॥ श्रीः ॥

श्रीरामचन्द्राचार्यप्रणीता

प्रक्रियाकौमुदी

पूर्वार्धम् ।

श्रीविट्ठलाचार्यकृतया प्रसादाख्यया टीकया समेतं

गुर्जरराजनगरस्थशिक्षकशिक्षणालयस्य मुख्याधिकारिणा सेवानिवृत्तेन
बी. ए. इत्युपाह्वेन मुम्बापुरीस्थविश्वविद्यालयस्याकार्यवाहक-
यशस्करपारिषद्यपदं प्राप्तेन मुम्बापुरीस्थएलफिन्स्टनाख्य-
विद्यामन्दिरस्य पुण्यपत्तनस्थडेक्कनाख्यविद्यामन्दिरस्य
च कादाचित्केन गीर्वाणभाषाध्यापकेन

त्रिवेद्युपपदधारिणा

प्राणशंकरसूनुना कमलाशंकरेण संशोधितं
स्वनिर्मिताङ्ग्लभाषाभूमिकया सनाथीकृतम् ।

तच्च

संस्कृतप्राकृतग्रन्थमालाधिकारिणा शाके १८४६ संवत्सरे
१९२५ ख्रिस्ताब्दे प्राकाश्यं नीतम् ।

प्रथमा आवृत्तिः ।

मूल्यं दश रूपकम्

PDF Creation and Uploading by:
Hari Parshad Das (HPD) on 18 January 2014.

THE PRAKRIYÂKAUMUDÎ

OF

RÂMACHANDRA

(IN TWO PARTS)

PART I

WITH THE COMMENTARY PRASÂDA OF VITṬHALA

AND

WITH A CRITICAL NOTICE OF MANUSCRIPTS AND AN EXHAUSTIVE AND CRITICAL INTRODUCTION

BY RAO BAHADUR

KAMALASHANKAR PRANASHANKAR TRIVEDI, B.A.,

Honorary Fellow of the University of Bombay,

Retired Principal, P. R. Training College, Ahmedabad,

(Formerly Professor of Sanskrit, Samaldas College, Bhavnagar, and Acting Professor of Oriental Languages, Elphinstone and Deccan Colleges)

FIRST EDITION

1000 COPIES

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No.......................................
Date...
Call No......................................

PRINTED BY B. MILLER, SUPERINTENDENT, B. I. PRESS, BOMBAY, AND
PUBLISHED BY DR. V. G. PARANJPE, M.A., LL.B., D.LITT.,
SECRETARY, BHANDARKAR ORIENTAL RESEARCH INSTITUTE, POONA.

CONTENTS

Critical Notice of Manuscripts of the Text and the Commentary pp. .... IX—XXI

Introduction ... ... XXIII—LVI

संध्युपयोगिसंज्ञाप्रकरणम् .... १—४३

संधिः .... ४४—११५

अच्संधिः .... ४४—८४

हल्संधिः .... ८५—१०३

विसर्गसंधिः .... १०४—१०५

स्वादिसंधिः .... १०६—११५

स्वादिप्रक्रिया .... ११६—२९८

अजन्ताः पुंलिङ्गाः .... ११६—१७६

अजन्ताः स्त्रीलिङ्गाः .... १७७—१९४

अजन्ता नपुंसकलिङ्गाः .... १९५—२०७

हलन्ताः पुलिङ्गाः .... २०८—२८६

हलन्ताः स्त्रीलिङ्गाः .... २८७—२९१

हलन्ता नपुंसकलिङ्गाः .... २९२—२९८

अव्ययानि .... २९९—३१७

स्त्रीप्रत्ययाः .... ३१८—३७८

विभक्त्यर्थाः .... ३७९—४६४

प्रथमा .... ३७९—३८२

द्वितीया .... ३८३—४०४

तृतीया	४०९—४१२
चतुर्थी	४१३—४२४
पञ्चमी	४२५—४३६
षष्ठी	४३६—४५४
सप्तमी	४५५—४६४
समासाः	४६५—६९४
अव्ययीभावः	४६५—४९०
तत्पुरुषः	४९१—५७४
बहुव्रीहिः	५७५—६२१
द्वन्द्वः	६२२—६४४
सर्वसाधारणसमासान्ताः....	६४५—६८४
अलुक्समासः	६८५—६९४
तद्धिताः	६९५—९६६
प्राग्दीव्यतीयेष्वपत्यार्थेषु साधारणाः प्रत्ययाः....	६९५—७३८
प्राग्दीव्यतीयाः	७३९—७५७
चातुरर्थिकाः प्रत्ययाः	७५८—७६६
शैषिकाः प्रत्ययाः	७६७—८०४
विकाराद्यर्थकाः प्रत्ययाः	८०५—८१२
प्राग्वहतीयाः प्रत्ययाः	८१३—८३१
प्राग्घितीयाः प्रत्ययाः	८३२—८३७
प्राक्क्रीतीयाः प्रत्ययाः....	८३८—८४१
प्राग्वतीयाः	८४२—८५५
प्राग्दिशीयाः	८५६—९०८
अन्ये तद्धिताः	९०९—९५६
द्विरुक्तप्रक्रिया	९५७—९६६

॥ श्रीः ॥

प्रक्रियाकौमुदीस्थशुद्धिपत्रम्

पूर्वार्धम्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१	१०	गीः पण्डि	गीःपण्डि
	१७	दियन्	दि यन्
२	१	वीर	वरि
३	११	तानि	तान्
	१९	गाधि	गाथि
	२०	पणिनस्या	पाणिनस्या
५	१५	पणिनस्या	पाणिनस्या
६	१७	वैदिका	वैदिकाः
७	९	लयो भा	लयोभा
	१८	प्रयुक्ते	प्रयुङ्क्ते
८	२३	वाक् तद	वाक्तद
९	१	पत्ये	यथा जाया पत्ये
	१०	वदन्तीति	वदन्ती
११	१४	ति।अइ-उण्।इ	ति-अइ-उण् इ
१२	११	लत्व	लत्व
१३	१०	रल	रल्
	११	मूध	मूर्ध
	१३	यर्यन्त	यय्यन्त
	२२	कार्यत्व	कार्यित्व

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१६	२	आगमः प्र	आगमप्र
	६	रिदित्वा	रिदित्त्वा
	७	चारे ग	चारेवग
१७	१५	त्संज्ञाया	त्संज्ञायां
	२४	योल्	यो ल्
१८	१८	दीना	दीनां
२०	१९	स्योशि	स्य योशि
२२	१०	प्रत्यक्षव्य	प्रत्यक्ष्य। व्य
२३	११	यास्त्	स्यात्
२४	२३	दितोपि	दितोपि च
	·	दित्यादेः	दिदित्यादेः
२५	५	श टित्-कित्मित	शटित्कित्-मित्
	११	सवणान्	सवर्णान्
	१३	उदितः।	उदितः
२६	१२	भ्रयण	भ्रयणं
	१३	शेषित्वाद्	शेषित-त्वाद्
	२२	प्रयत्स्नात्	प्रयत्न-त्वात्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२७	१३	चकार	चकारे
	१५	एत	एते
	१९	यत्नेप्र	यत्नप्रे
२८	३	संवृतं	संवृतत्वं
	५	प्रयत्नश्च	यदा
	११	स्पर्शाना	स्पर्शादीना
	२१	दघो षो	दूघोषो
२९	११	वर्गाणा	वर्गाणां
	१६	पलिक्न्क्रीः	पलिकक्रीः
	१७	गुंघुंङुं	गुंघुं
	१९	दशहा	दषहा
३०	१३	मनर्थ-कम् । सा	मनर्थकं सा
३१	४	नेपि नर्गुण	ने पुनर्गुण
	५	पत्यर्थ	पत्त्यर्थ
	६	आत् स	आत्स
	११	म् । अ	म् । तथा वृद्धिविधा-वपि । अ
३३	१३	भूवो	भुवो
३४	४	तत्त्व	तत्व
	५	तत्त्वम्	तत्वम्
	१२	दीर्घेशे भृ	दीर्घेशभृ
	२०	माभिमुखे भृशौ	मेभिमुखे भृशे

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३६	३	दर्थना	दर्थाना
३८	५	व्याध्यभि	व्याध्याभि
३९	१८	तरप्तमो	तरप्तमपो
४०	२१	पशु वै	पशुर्वै
४२	११	द्योस्त	द्र्योस्त
	१४	स्तान्तस्य	स्ताम् । तस्य
	१७	श्चालां	श्चाला
४६	११	पदभावं	पद्भावं
	२१	काय	कार्ये
४७	१६	पैते । ण्वु	पैतण्वु
४९	१२	ऐकारो	ऐकारौ
५१	१८	मते न	मतेन
५५	११	ते यादे	तेयादे
	१२	ते याद	तेयादे
५६	१०	त्रयाणा	त्रयाणां
५८	१३	ऐङ्-प्राप्ता	ऐङः-प्राप्ताः
५९	१२	रेफस्य गुणवृद्धि-संज्ञा	रेफशिरा गुणवृद्धि-संज्ञको
	१८	योवण	योवर्ण
६०	४	स्वैरम् । स्वै	स्वै
६१	७	दीरेरिणोः	दीरे
	१४	पैषः	प्रैषः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६३	२	ऋकारी	ॠकारी
	९	ऋत	ऋति
६४	१८	मनसं	मनस
६६	९	माङ्	माङ
६७	१५	तुलास्य	तुल्यास्य
	१७	घेङिति	घेर्ङिति
७०	१०	ते संनि	ते । स नि
७३	८	नुर्वत	नुवर्त
७४	६	प्रर्याये	पर्याये
	१६	गोत्कता	गोत्कता च
७५	६	उपरी	उपरि
७६	१२	दृरो	दृरा
	२२	संधि	संध्य
८०	१६	इत्यसे दृ	एत्यसे आदृ
	२४	त्रातादृग	त्र । तादृग
८१	१६	संज्ञा	संज्ञः
८२	१४	तस्माद्रच	तस्मादच्य
८३	२	को सत्र	कोऽसत्र
८४	९	अणो प्र	अणोऽप्र
९४	१४	त्रे 'न प	त्रेन 'प
९५	१६	परस्ये	पदस्ये
९८	७	स स्यात्	सः स्यात्
१००	१	नॄँ पाहि	नॄँः पाहि
	१४	कानिति	कानीति
१०३	५	दीर्घः	दीर्घस्य

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१०४	१८	चौरदे	चौरे दे
१०५	१६	स्तोन्यत्र	सोन्यत्र
१०६	१७	स्थानि- वत्त्वे	स्थानित्वे
१०९	१३	रेणासं व्राह्मणि	रेण । असं व्राह्मणी
	१८	न्ताद- ङ्गात्प- रस्ये	न्तात्पर- स्य यस्ये
११०	१७	अपूर्व	पूर्व
११३	३	इति लोपे प्राप्ते इति	इति
११८	१४	तेषा	तेषां
	१७	समर्थं · त्रि	समर्थवि
	२१	त्यपि वृ	त्यवृ
११९	१२	सकार	शकार
	१३	औङः शी	औङष्टा
	२१	वचनम्	वचनमम्
१२०	२५	सुओ	सु औ
१२१	१९	तो निर्दि	तोऽनिर्दि
१२२	१५	सूत्रकृतः	सूत्रे कृतः
१२३	१३	सूत्रकृते	तत्र कृते
१२५	५	दचि	दिचि
	१९	अचीति	इचीति

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२६	१५	त्रेट्संज्ञा	त्रेत्संज्ञा
१२७	१०	वचनं म	वचनम
१३०	१०	तस्यादेः	तदादेः
१३४	१८	त्तदोर्नि	त्तदो नि
	१९	तदन्ता	तदन्ताः
१३५	१६	अयात्	अयत्वात्
१३६	९	स्यादयः	स्याडादयः
१३७	१४	पूर्वापरा	पूर्वपरा
१३९	४	शाटका	शाटकाः
	८	वृत्तो	वृतो
	९	वृत्तस्य	वृतस्य
	१०	वीयत	वीयते
१४१	१७	भूत	बहुव्रीहि- ग्रहणं भूत
१४२	२२	कारस्या	कारस्य
१४४	१८	वादिहा	वात् । इहा
१४५	१४	जराश	जरश
१४७	६	दोषणी	दोषणी इ
१४८	७	भसज्ञं	भसंज्ञं
	१२	कुर्तात्	कुर्यात्
	१३	प्रथमे	प्रथमै
१५०	१४	हः सखि- भ्यश्च ट	हःसखि- भ्यष्ट
१५१	१२	क्रनिष्म	क्रनिष्व
१५२	३	ह्रस्वान्त- स्य	ह्रस्वान्ता- ह्रस्य

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१५३	६	हरिणाम्	हरीणाम्
१५४	९	देशः	देशार्थः
	१०	ङादेश	डादेश
१५५	१५	तेनैव	तेनैव
१५७	२	सख्युः ।	सख्युः
	११	धदिके	पदिके
१५९	१२	गोत्रे लु	गोत्रेऽलु
१६०	२	लुमन्ताः	लुमन्तः
१६५	८	मिव वर्ण	मिवर्ण
१६७	१३	तं मन्वा	तन्मन्वा
१७०	२२	क्रोष्टा	क्रोष्ट्रा
१७३	१	सबुद्धि	संबुद्धि
	२१	भाषाया	भाषायां
१७६	६	ऋकारा	ॠकारा
१७८	१९	सुतीत्य	सुतिस्य
१७९	२०	वृद्धिरे	वृद्धिरै
१८०	३	अपूरी	अपुरी
१८१	१७	मृजूष	मृजूष्
१८३	१०	घेङिति	घेर्ङिति
	१९	तस्मिन्ने	तस्मिन्ने
१८४	१२	षट् च	षट्त्रिच
	१७	ऋ उत्	ऋत उत्
१८७	१९	इदुती	ईदुदन्तौ
१८८	१४	हृणं नि	हृणनि
१९०	५	रथिनि	रनि
	१५	बाधि- त्वात्	बाधित- त्वात्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१९१	६	क्रौष्ट्र्यः	क्रोष्ट्र्यः
१९२	१७	ऊङ्प्र	ऊङ्प्र
१९८	१८	अजर स्	अजर शस्
१९९	१५	सु गृ	सुर्गृ
	१८	न्तेप्यनु	न्ते अप्यनु
	१७, १८	एतत्पङ्क्तिद्वयं पृ. २०२ पं. १३ झलचः इत्युत्तरं ज्ञेयम्	
२००	११	त्रिभक्तौ न	त्रिभक्तौ परतो नुमभावार्थमित्याशङ्क्याह-नञेति । अन्यत्रास्याहलादौविभक्तौ न
२०२	१३	झलचः। पीलुने फलाय इति।	झलचः 'इकोचि विभक्तौ' इत्यतः 'नपुंसकस्य' 'इकः' इति षष्ठ्यन्ते अप्यनुवर्तमाने अर्था-
२०२			त्प्रथमान्ते भवत इत्याह इगन्तं क्लीबमिति।
	१६	नुम्।	नुम् पीलुने फलाय इति।
२०३	१	समासवशात् पी	पी
	१२	च्यते	च्यते समासवशात्।
२०४	१९	न मता	न लुमता
२०५	१३	तन	तेन
२०६	१९	मणित्येव	मिणित्येव
२०९	५	न धातो	न। धातो
२११	८	ऊढ्	ऊठ्
	१४	ऊढु	ऊठु
२१२	१५	मान्ये वि	मान्यवि
	१६	भावो	भावाभावेन
२१३	६	पुरोडाशा	पुरोडाश
२१४	७	प्यत्वं तस्य	प्यत्वन्तस्य
२१५	१०	भूत्। मूर्धन्य इति। सहे	भून्मूर्धन्य इति सहे

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२१५	११	तु साह	तुरासाह
२१८	५	इत्यनु	इत्यत्रानु
२१९	९	त्यद्याद्य	त्यदाद्य
२२०	१२	विभक्तिक	विभक्ति
२२१	७	टौस्वे	टौःस्वे
२२३	१६	संज्ञा तुकां	संज्ञातुकां
२२७	५	तस्यान	तस्यानान
२२८	६	ने धातोः	नेऽधातोः
२२९	१	उपधाया दी	सर्वनाम-स्थाने चे-त्युपधादी
२३१	१२	वृटः	वृटः
२३२	२	युवस्यो	वस्यो
२३३	१४	नञीव यु	नञिवयु
२३४	१४	पर्थीनि	पर्थी
२३७	२	गाणत्वे	गौणत्वे
	२०	प्रियाष्टौ	प्रिया अष्टौ
२३८	११	व्रजे ऋत्यौ	यजे ऋतौ
	१२	त्याद्याः	त्याद्या
२४०	२१	वृत्त्यर्थस्य	वृत्त्यर्थम्
२४२	११	रङ्कस्य ल	रङ्कल
	१२	वर्वर्ति	अवर्वर्त्
	१४	मिति किम्	मिति
२४४	१	एव	एवं
	७	सा परे	सौ परे
२४४	९	तथादे	तद्व्यादे
२४५	११	योन्यद्वि-तीयायां चेत्यत्रवक्ष्यत	योऽन्यद्वि-तीयाया-मित्यत्र-क्ष्यत्
२४५	७	विक्ता	विभक्ता
	१९	अद	अद्
२४६	२१	लोपे	लोप
२४७	८	शसो नः	शसो न
२४८	२	देशेः	देशः
	११	नादेशः	नादेश
	१६	इत्यते	इत्येन
२५०	१७	यत्त्व	यत्व
२५१	४	युष्मा	आत्वम् युष्मा
	१०	न्तशेषे	न्तशेषः
२५३	११	र्थसान्य	र्थस्यान्य
	१५	द्वित्वै कत्व	द्वित्व
२५४	२	वयम्।	वयम्। अतित्वाम्।
	१४	ङेङसो	ङेङसो
२५५	३	युवाम् २	युवाम् ३
	४	त्वावाम् २	त्वावाम् ३
	११	युष्माम् २	युष्माम् ३
२५७	१५	मे अप	मे इत्यन-योरप

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२६०	११	इत्यत्रैव	इत्यत्रेव
२६५	११	नुभाव	मुभाव
	१५	प्रत्ययसि	प्रत्यसि
२६७	११	समिः	समि
२६८	३	भावत्वाद	भावाद
	१७	ङ्दायो	ङ्ङादयो
२६९	९	क्विन्	क्विप्
२७०	७	त्वाभात्	त्वाभावात्
	१३	ति । एत- दत्रे	ति एतदः तत्रे
२७४	१५	रित्यत्र	रन्यत्र
	१७	'कर्तरि' इति	कर्तरि
२७५	१२	क्विबन्तो	क्विन्नन्तो
२७६	२१	पिपठिष्	पिपठिष
२७७	१८	निस्से	निंस्से
	२०	ऋत	ऋत
२७८	१९	सु । तक्ष	तक्ष् सु
२७९	८	पक्तुमि- च्छतीत्य- र्थेपक्तेः	यष्टुमिच्छ- तीत्यर्थे यजेः
	१४	पिपक्ष्	यियक्ष्
२८०	२	सुपीस्सु । सुपीः सु	सुपीष्षु सुपीः षु
	१८	हणे प	हणप
२८१	१९	वन्निमि	वनिमि
२८२	१३	संप्रसार	असिद्धप- रिभाषा- या आभी- यत्वेन तां प्रत्युपधा- लोपस्यासि- द्धत्वात् । नन्वेवं सं- प्रसारण- स्याभीया- सिद्धत्वादु- पधालोपो- न स्यात् । मैवम् । संप्रसार
२८३	७	पुरुदंशा	पुरुदंसा
	१५	नितेन	नित्तेन
२८४	१५	व्ययः स	व्ययस
	१७	। सस्य	सस्य ।
२८५	२१	सतिति	सतीति
२८९	२	या ।	स्या ।
	३	व चः	वाचः
	४	अपतृन्	अप्तृन्
	११	अत्वन्तष्टा	अत्वं ततष्टा
२९४	२	प्रतिषेधो	प्रतिविधे
	३	पददन्	पद्दन्
	९	नासृगि	ना सृगि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२९४	११	विति।प्र	वित्याह-प्र
२९५	६	प्रत्यय	प्रत्ययलक्षण
	१६	नाम	नामस्थान
२९६	१	पददन्	पद्दन्
	१२	पददन्	पद्दन्
२९७	१६	अन्यार	अन्यथार
	२३	ताद्धितकृ	तद्धि कृ
३०५	३	अन्वा-चयो	अन्वाचये
	४	प्राधान्य	प्रधान
		संहतिः प्रा	संहतिप्रा
	६	संहत्य प्रा	संहत्यप्रा
३०६	५	शारवद्	शरवद्
३०७	४	सूत्रपाठः	तत्र पाठः
३०८	१६	आङ्क्ति	आङिति
३०९	२२	दवट्ट	दवट
३११	१४	नकर्थ	नर्थ
३१३	६	रूपके	रूपकाः
	१४	रीश्वराः	रीश्वरे
३१६	९	स्वादिषु वि	स्वादिवि
	२२	वचन—	वचनद्विव-चन
३१७	१०	चार्या	चार्य
३१९	१	र्थो यस्त	र्थः पः।त
	१९	क्वचिद् ब्रयाल्ले	क्वचिद्व्रयोल

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३२१	४	शूद्राथे	शूद्रा चे
	१३	'द्विगोः'	द्विगोरपि इति
३२२	१	सदच् का	सत्प्राक्का
	६	नैकाश	नैकश
३२३	१४	दिव्यन्ती	दीव्यन्ती
३२४	११	ङीप् रौ	ङीब्रौ
	१४	नलोपः	नलोपः।
		षणम्।ह	षणं ह
		ङीप्रौ	ङीब्रौ
३२५	४	पादान्ता	पादन्ता
	६	षडति	षडिति
		लोपः।सु	लोपः सु
	११	संग्रन्थेयः	तद्ग्रन्थे यः
३२६	६	डावुभा	डाबुभा
	९	नस्मिन्म	नस्मन्म
	१५	भ्यामुक्ते	भ्यां मुक्ते
३२७	१३	ङीपूरौ	ङीब्रौ
	१९	प्रत्यय	प्रत्ययस्थ
३२८	१६	दिति।इ	दिती
	२२	नामक	मामक
३३०	१६	तिट्ठ	ट्ठ
३३१	९	निवृत्तं	निर्वृत्तं
	१३	स्यैतच्चा	स्योक्तिर्ना
३३२	१२	स्येत्यत्वं	स्येत्त्वं
	१५	त्रामि	त्राणामि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३३५	५	भावात्।अ	भावाद
	१९	सुभगः	सुभग
	२४	इति।	इति
३३६	३	शक्त्री	शाक्त्री
	९	णम् इति	णमिति
	१०	ण इति	णः' इति
३३७	२	हल उत्तर	हलन्त
	५	प्राचा	प्राचां
	११	द्विपे	द्वीपे
	१८	उदीचा	उदीचां
३३९	२२	कतिकण्व	कत कण्व
३४०	९	क तन्त-स्या	कतस्या
३४१	१४	स्थविरे	स्थाविरे
३४२	१९	कालस्थौ	कालस्यौ
३४३	५	रश्मेः	रश्मेः
	७	द्विवर्षे	द्वे वर्षे
	१९	लुकिति	लुकीति
३४४	८	काण्डात्	काण्डा-न्तात्
	९	कः। सत्का	कः सन्का
		त्वात्।प्र	त्वात्प्र
	१३	वाचिति	वाचीति
३४५	६	त्वादे	त्वादादे
	१३	इयस्या	इत्यस्या
	१५	प्राप्तो ऊ	प्राप्ता ऊ

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३४५	१६	महौधाः	महोधाः
३४६	११	वेयसी	वेयसि
	१७	इति	इति।
३४८	१५	स्येति किम्	स्येति
३५१	१९	इति	ईति
३५२	२२	पुनेर्ग नित्यः।	पुनर्ग ऽनित्यः
३५३	३	त्यादीनि	त्यादीति
३५४	४	एषा	एषां
३५५	१३	तित्स्व	त्रित्स्व
३५८	८	स्तृणुस्तुही	शॄस्वृ-स्निही
	१०	ङीबु	ङीषु
३५९	१९	क्यार्थः। व	वदिति दिति वाक्यार्थः
३६१	९	आनुका वनुक	अनुका वानुक
३६२	१	याभ्या	याभ्यां
	१०	आनङ	आनुग
३६३	५	स्त्रीयां	स्त्रियां
	१२	पूर्वा	पूर्व
३६७	४	पुच्छी। इत्यादि	पुच्छी
३६८	६	स्वाङ्गा-च्चेति।	'स्वाङ्गा-च्च' इति

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३६८	११	ङीष्	ङीप्
३६९	१८	त्वात् । प्रा	त्वात्प्रा
	२०	नन्यत्र	नन्य
३७०	४	ङ्गाना	ङ्गानां
	१७	नर्पि	नः पि
३७१	३	वलाका	बलाका
	१६	वलाके	बलाके
३७२	१५	निवृत्ता	निर्वृत्ता
३७३	१०	अन्त	अन्ता
३७४	१२	खर्ज्वा	यथा ख-र्ज्वा
३७५	१	उरू	ऊरू
	१७	उरू	ऊरू
	१४	लक्ष्मणो	लक्षणो
		लक्ष्मण	लक्षण
३७६	३	वैदी	बैदी
	१६	वैदी	बैदी
		विदा	बिदा
३७७	२	चकारः	चः
	१२	दवट्	दवट
३८२	१३	आमन्त्रिप्र	आमन्त्रि-तप्र
३८४	८	पयसो	पयसौ
३८५	४	कृत्त	तिङ्कृत
	२०	कृत्वा ।	कृता
३८६	८	भत ।	भूत्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३८६	१०	स च कृतेनो	कृतो
	२०	क्रिया	क्रियया
३८७	६	द्वेष	द्वेष्य
	१५	त्यादि । अ	त्याद्य
३८८	२	वह	वह्
३८९	१२	दिप्सिता	दीप्सिता
	१३	देपि	देरपि
३९२	११	र्थाना	र्थानां
३९४	२०	स्मिन्नामते	स्य ण्य न्ते
३९५	२०	करोते	करोति
३९८	६	र्यधसः	र्यध्यधसः
३९९	७	मां च	मां
४००	१७	उप	उपो
		चाधिके	चानधिके
४०१	८	लक्षण	लक्षणे
	११	लक्षणं	लक्षणे
४०२	१६	सर्गा	सर्गाः
४०३	१७	कृञि ।	कृञि ॥१।४।९८॥
४०४	२१	था गु	थाऽगु
४०९	१५	प्रतीतितः	प्रतीतः
४१०	२	क्षणे	क्षणात्
४११	२	भाना	माना
	१४	केवल	। केवलं
४१५	६	आघृङ्	आघृ
४१७	१४	वर्तेत	वर्तेते

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४१८	१६	पूर्वस्य।	।पूर्वस्य
४१९	१८	कृपे	कूपे
४२३	२	वर्ज्ये	वर्ज्ये
	१०	मन्यत	मन्य
४२६	१८	यस्तस्य	यस्य
४२८	६	ब्राह्मणः	ब्रह्मणः
४३४	१२	लब्धेः।	लब्धेः
४३५	१९	व्यं क्रिया-याः।	व्यम्। क्रि-यायाः।
४३६	२	सत्त्व	ऽसत्त्वा
४४०	६	दाविल्या	दील्या
४४९	२	रकका	रकाका
	१३	र्हणो	र्हणो
४५२	७	शतृणा	शतृणा
	१४	व्रजं ग	व्रजं गा
	१७	णिनिः	णिनिः।
	१८	धिका	धिकार
४५६	५	कटे	कट
४५७	५	निमि	शूद्रेषु तरस्सु सन्तास्ति-ष्ठन्ति। निमि
४६१	९	न्नास्ति	न्नस्ति
४६२	१५	तत्रौ	तत्रो
४६३	१०	नोत्तरां ग	ग
४६४	५	दीना	दीनां
४६६	१४	ह्राक्य	ह्राक्यं
४६८	१	वृद्ध्य	व्यृद्ध्य
४६९	१७	मैकवि	मेकवि
४७०	१६	व्ययं	व्यये
	१७	इति क	इतिक
४७१	६	देवो	देरेवो
	१२	रीं पश्येत्य	रीश्रित इत्य
	२५	सो निय	सोऽनिय
४७२	२२	कुम्भ	कुम्भं
४७५	२	दुर्य	दुर्य
४७६	२	शब्दप्रका	शब्दःप्रका
४७९	३	प्रातना	प्रतिना
	६	सुप्रति	सुप्प्रति
४८०	७	आ मुक्ति	आमुक्ति
४८१	१०	प्रतीति	प्रती इति
४८६	१७	भिप्रति	भिप्रती
	२१	परः स	परस
४८८	१६	जाजला	जाजलाः
४९१	१२	येन	ये न
४९२	८	ना शंस	नाशंस
४९३	८	सामी	सामि
४९४	२०	वर्तिद्र	वति द्र
४९७	२	यण्य	यण्ण्य
	५	क्षीरो	क्षीरौ
	१६	क्षीरो	क्षीरौ

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५००	८	भरत	भारत
	१५	प्राप्ता	प्राप्ता ।
	१७	धस्या	धस्तस्या
	१८	भरत	भारत
५०२	२१	गुणि त्र	गुणित्र
५०५	३	षष्ठी स	षष्ठीस
५०६	८	हंणो	हंर्णो
५०७	१७	कं पुष्पे	कंपुष्पे
	१८	क्रीडाया	क्रीडायां
५०९	२१	वाचिन्य	वाचीन्य
५१०	१७	चेति	च इ इति
	१८	जतित्वं	जातेऽत्वं
५१४	१९	पात्रे स	पात्रेस
५१५	१०	मासे न	मासेऽन
५१६	२१	सकला	शकला
	२२	पेशला	शकला
५१७	२	सकलां कृत्यसंकल्पां ला	शकला- कृत्यसं- शकला
५२४	१९	दिकष्ट	दिः।कष्ट
	२१	पातानिषे	पातनिषे
	२३	पातेन	पाते न
५२५	४	श्रेयसि	श्रेयसिः
	१५	तन्त्री	तन्त्रि
५२६	१७	निवृत्ता	निर्वृत्ता
५२८	९	धारस्य	धारयस्य
५२९	१०	दिना	दिना ।
	१३	दि प्रति	दिप्रति
५३१	१३	द्धत्वादु	द्धत्वात् । उ
५३२	२	स्यते ॥	स्यते ॥ रक्तलता ।
५३५	१	युवतीः	युवतिः
५३६	११	नञिति	नञ इति
५३८	११	द्वे	यथाऽ
५४१	२०	वसती	च सती
५४२	१५	मानात्	मानेन
५४३	७	त्वात्	त्वात् ।
५४४	१४	रितीत्यत्र	रित्यत्र
५४५	१४	एचः	एच
५४६	१९	र्ताय	तार्थ
५४७	९	पवादे	पवादो
	१४	पदे तु	पदे च
५४८	१५	पञ्चम्याः	पञ्चम्या
५५१	१	राजाह	राजाहः
	६	राजेति	राज इति
	८	तृतीयो	द्वितीयो
	९	ट च श्वि	ट च ष्टि
५५२	४	हनीत्या	हनी इत्या
	१३	निवृत्तम्	निर्वृत्तम्
५५३	९	दुक्ताः ।	दुक्ताः
५५४	६	स्याणो	स्याणः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५५५	११	मोत्तम	पोत्तम
५५७	१९	इति।	इति
५५८	११	रिति। अत्र	रित्यत्र
५६३	१	प्रभृत्य	प्रभृतीन्य
५६४	५	छायाम्	छायम्
५६७	७	संज्ञायां	संज्ञाया
५६८	२१	शात्।	शात्
५६९	१०	३९	३१
५७०	११	शूल। व	शाल। व
५७६	६	मुदर्कं	मुदर्कं यं
	१७	नेति। अ	नेत्य
५७७	१०	भुक्तपञ्च	पञ्चभुक्त
५७८	२	श्रडा	श्रूडा
	१२	पूवप	पूर्वप
५८०	७	वत्	पुंवत्
५८२	१४	स्त्राप्र	स्त्रीप्र
		पुवाच्च	पुंवाच्च
	१५	लापो	लोपो
	१७	त्राथः	त्रार्थः
	२४	स्त्राश	स्त्रीश
५८५	९	त्यद्याद्य	त्यदाद्य
	१६	कारेण	प्रकारेण
५८६	२	तसिल	तासिलाद्या
	१०	तसिल	तसिलाद्या
	१५	पेर	परे
	१९	रोहणय	रौहिणेय
५८७	५	आग्नयैय	आग्नेयेय
	१५	वद्	पुंवद्
५८८	१८	ण्वुण्तृ	ण्वुल्तृ
५८९	१४	तिपादि	प्रतिपादि
	१६	तोतो न	तः। अतो
		केना	नाकेन
	२०	निवशि	निवेशि
५९०	६	माथुराय	माथुरीय
	१६	पंवत्त्व	पुंवत्त्व
५९१	११	अयमण	अयमण्
५९२	७	संख्याया	संख्यया
५९३	११	नार्थेपि	नार्थोपि
५९४	१२	'संख्यया-'	संख्यया
५९५	१६	संख्येयेति	संख्ययेति
	२०	पञ्चम्याः	पञ्चम्या
५९७	१	समस्यते	समस्येते
	१६	दृशिर्	दृशि
५९८	५	उरो	ओरो
	८	एषां	एषा
	१९	यस्मिन्	यस्मिंस्तथा
	२१	रोदित्	रोदिति
५९९	११	भावः	भावः।
	२०	कृत्व-	कृत्वा-
		प्रियः	प्रियः
६००	८	सत्त्वेन	सत्वेन
६०२	२	पुष्प	पुष्य
	२०	प्रभृति प्र	भृतिप्र

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६०३	१	हिभ्यां	हिभ्यां
६०४	७	भोगीण	भोगीणः
		अग्र	अग
६०६	४	शक्ते	शक्त्यो
	१६	शक्ते	शक्त्यो
६०७	८	दिति ।	दिति
६०८	१२	षष्ठात्व	षष्ठीत्वं
	१९	प्राप्ते	प्राप्तो
६०९	१९	णं त्वाक्यं	णं
६११	४	दिभिः	दिभ्यः
	१३	हस्तिन	हस्तिन्
६१२	११	ङीप्ये	ङीप्ये
६१६	१२	शेषे	शेष
६१७	१५	न्त्री स्त्री	न्त्रीर्या
६२२	९	मध्ये	मध्ये ।
६२४	१३	निपाते न	निपातेन
६२८	८	स एक	य एक
६३०	१४	नदीदेशा	नदी देशा
	२०	कैतवता	कैतवतं
६३१	१६	रादीति	रादिति
६३२	६	पुरिषम्	पुरीषम्
	८	भस्म	‘ भस्म
६३५	२	इध्मा	इध्मा
	१२	रणव	रणं व
६३६	१४	पुत्रो	पुत्रे
६३७	१७	तेषा	तेषां
६४०	११	स्रक्	स्रक्च
	१३	इति ।	इति
	२३	वृद्धात्	‘ वृद्धाड्ढ-ठक् । ‘ सौ कृसौ
६४२	१७	षस्यास	षस्य स
६४३	१३	इत्यस्य	इत्यस्य ।
६४६	२	पोस्मि	पोस्मि
	७	पथः	पथौ
	१२	पाप	प्राप
६४८	२१	निपति	निपाति
६४९	१४	संख्या	संख्यया
	१८	योर्द्व	योः कथं द्व
६५०	१५	ग्रहः । वि	ग्रहवि
६५२	२१	पूजार्था-मेवेति । पू	पू
६५३	११	किं समा	किंसमा
	१३	गस्य	गस्य ।
६५४	१०	नुम्	तुम्
	१६	मासस्य	मांसस्य
६५६	१३	स्नेहेन	स्नेहने
	१८	हलाविना	हला विना
६५८	२	गन्ध्याः	गन्ध्यायाः
६६१	१२	। तीर्थप-त्नीपक्षे नस्तस्यैव	। नत्वं त्र
	१३	दित्यय	दिति । अ
६६३	३	विश्व	विष्व

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६६३	१४	के सेहि	केऽसेहिं
६६४	८	अष	अन्यदीयः। अष
	१०	यतो त्र	यतोऽत्र
६६५	२	गर्हा	गहा
६६६	१२	ऋकपूर्	ऋकपूर्
६६९	२०	पट	पटु
६७०	९	कोटरा	कोटर।
६७१	१९	वहे पी	वहेऽपी
६७२	९	विश्रामि	विश्रमि
	२१	जेर्वि	जेर्वा
६७६	१८	आदेशा	अदेशा
६७९	११	मयुट्	मयट्
	२०	आदेश	अदेश
६८०	८	तिर्गी	ति गौ
६८३	८	त्रिस्करो	त्रिष्करो
६८६	१४	त्मना प	त्मनाप
६८९	१६	बन्ध	बन्धे
	१८	दप्राप्ते	दप्राप्ते।
६९३	१८	पूर्वेण नित्ये प्रा	मातुः पुर्वेण नित्येऽप्रा
६९४	१	मातुष्व	मातुःष्व
६९६	८	भानोपत्यं	भानोरपत्यं
६९७	८	यान्तस्य	ग्वन्तस्य
६९९	१६	शून्यः	शून्य-
७०२	१२	। तत्र भवे	तत्र भवे।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७०४	१५	न्त्य उका	न्त्य ऋका
७०६	११	ति। तद्राजा	ति।
७०७	२४	सिद्धे प्रा	सिद्धेऽप्रा
७०८	१२	पान्नागा	पन्नागा
	१६	तोल्वलि	तौल्वलि
७०९	१३	भ्यो ञः	भ्योऽञः
	२२	न्ता यनः	न्तायनः
७११	१४	फञ्	फिञ्
		यनि	यनिः
७१३	२०	डविडुः	डविडः
	२३	स्यात्	स्यात्।
	२४	इति।	इति
७१६	३	आनुशति	आनुशाति
	११	आनुशति	आनुशाति
	१३	आनुशति	आनुशाति
	१४	उक्	ढक्
	१६	हत्यः।	हात्यः।
	१८	अस्य हेति	अस्यहेतिः
	२१	कौर	कौरु
७१७	६	केरः	कैरः
७१८	५	णान्य	णादन्य
	१३	गोधार	गौधार
७१९	१	श्वसु	ष्वसु
	४	श्वसु	ष्वसु
	८	श्वसुर्यः	श्वशुर्यः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७१९	१४	ण्डल	ण्डलु
	१९	कृत्ये	कृते
७२०	६	राज्ञो वा	राज्ञो
	१७	स्य ईने	स्येन इ
७२१	४	बहुकौ	बाहुकु
	१३	छः । च	च
	१७	बहुकुलेयः	बाहुकुलेयकः
७२२	१५	ञमात्र	ठमात्र
	२०	कृत्सने	कुत्सने
७२३	५	सौख्ये	सौवीरे
	१०	ढक्	ठक्
७२४	१६	स्वरेन	स्वरेण
७२५	५	र्यायनिः	र्यायणिः
	१५	नायनिः	नकायनिः
७२६	१	र्यविदा	र्ये विदा
	६	वृद्धात्	अवृद्धात्
७२७	१६	आभ्याम	आभ्याम्
७२८	१	माङ्गिरो	माङ्गिरो
	४	रसाः	रसः
७३०	१	गोत्रे लु	गोत्रेऽलु
७३१	१९	वृद्धेत् को	वृद्धेत्को
७३३	१४	स्त्रीप्रत्यये	स्त्र्यपत्ये
७३४	५	ज्यादि	ञ्यादी
७३६	६	भोज्या	भोजा
	९	ईतो	इतो
७३७	६	गादित्य	आदित्य
	१८	ज्ञापि	इति ज्ञापि
७३८	१०	गौर्वष्क	गौवष्क
७४३	१६	दधिकम्	दाधिकम्
७४५	९	सास्या	सास्य
७४६	८	राङ्का	रीङ्का
	१३	शीर	सीर
७४७	२१	हवि	हविः
७४८	२	सोमे	सौमे
७४९	१५	रादु	रात् । उ
७५०	९	माण्ड-व्यम्	माणव्यम्
७५१	१९	स्वित्कः	श्वित्कः
	२१	दोषे	दोष
	२४	आश्वी	अश्वी
७५४	१५	वेति	अथवेति
७५५	५	एजाग	ऐजाग
७५६	८	यदधी	तदधी
	१८	सदृशी	सदृशो
७५८	२	थमा स	थमास
	१२	णम् । दे	णं दे
७६०	१	स्य च ।	स्य च
	२	सुवस्तो	सुवास्तो
	७	न ।	। न
७६१	१	डुह	डुह्
७६२	१५	चोदु	चौदु

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७६३	६	व्यक्त	व्यक्ति
७६४	१४	वना	खलतिकं वना
७६५	१२	तुर्थि	तुर्र्थि
	२०	तदस्या-स्तन्ना	तस्यास्तदना
७६७	८	पञ्चे-ति। 'प्रा	' प्रा
६६८	२२	अमा-वास्यः	आमा-वास्यः
७६९	१६	डित्त्वाद्वा	डिद्वा
७७५	१२	वित्रिति	विचिति
	२४	भारा	भार
७७६	१३	मीपम्। ग्रहा	मीयम्। गहा
	२६	कन्य	कान्य
७७७	४	कृतो	कृते
७७८	२	शाण्डिक	शण्डिक
	६	यत्र	येऽत्र
	२०	यान्तक	यान्तरक
७७९	२	पदत्वा	परत्वा
७८०	६	छन्दस्या	छन्दस्य
	१६	उत्तरवृ	उत्तरत्र वृ
७८१	६	हारिद्रु	हारिद्र
७८२	११	मधीते	मधीयते
७८३	१७	हेस्तु र	हेस्तुर
७८४	६	दर्था	द्रथा

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७८६	१३	इति लक्ष	इत्युपलक्ष
	१४	लक्ष	उपलक्ष
७८७	१७	नगरी	नगिरी
	१८	गौरेय	गैरेय
७८८	१७	द्युः	द्र्युः
७८९	११	रण्याः।	रण्याः
	१५	मत्रत्रौ	मत्र्त्रौ
	२३	दात्ता	दात्तो
७९०	१	ध्वजीति।	ध्वजीति
७९१	२०	त्रिठाभ्या	त्रिठाभ्यां
७९२	१०	प्रात्रा	प्राचां
	२२	त्वत्पुत्रौ	त्वत्पुत्रो
७९३	१०	तुमादि	नुमादि
७९४	५	निवृत्ता	निर्वृत्ता
७९५	१९	वृद्धा	वृृद्धा
७९६	४	वादे	वादो
	२२	योगंधरः। यो	यौगंधरः। यौ
७९७	४	जान	जन
	१५	साल्वप	साल्वः प
	१६	काच्छा	कच्छा
	१९	मध्य। मध्यं	मध्य मध्यमं
	२१	वासे ण	वासेऽण्
७९८	६	पार्श्व त	पार्श्वत
	१३	देशा	हेशा
	१७	देशा	हेशा

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७९९	१४	ननु	नतु
८००	८	उण्य	उञ्य
	१५	तिश	तिकश
		हृ | सम	हृ-समे
८०१	८	नुडा	तुडा
	१०	षिकम् |	षिकं
	१७	नुडा	तुडा
	१८	नुडा	तुडा
८०२	९	एष	ऐष
	१३	संधिवेलम्	सांधिवेलम्
८०६	१५	म्याः प्ल	म्याप्लु
८०९	९	ग्वहृते	ग्वते
८१२	१६	तयोच्छ	तयोऽच्छ
८१३	२	ढक्	ठक्
८१४	३	वा न्यग्रो	वा न्याग्रो
८१५	१३	श्रगणि	श्रागणि
८१६	२३	द्राणा	द्राणां
८१७	४	अनग	नग
	९	वाचिग्रा	वाचि | ग्रा
		वः पूर्वे	वः पूर्वे
	१३	ग्वहृती	ग्वती
८१८	१	ग्वहृते	ग्वते
	२	शोण	शाण
८१९	८	पूर्वपदयोः	पदयोः
	२४	कैकयः	कैकेयः
८२१	१७	यण्	अण्
८२१	२०	वादा	वाचा
८२२	२	ते नो	तेऽनो
	३	वार्त	वार्त्र
	४	ह्रस्या	ह्रस्य
	५	वार्त	वार्त्र
	१२	वासिना	वाशिना
	१४	अथर्वा	अथर्व
८२३	५	निवृत्त	निर्वृत्ति
	१४	नानाभि	नानभि
	१८	निवृत्त	निर्वृत्त
८२४	७	ष्टका	ष्टकौ
	१२	लीति	लिति
८२५	८	निवृत्ते	निर्वृत्ते
	९	निवृत्त	निर्वृत्त
	१३	याचति	याचित
	२१	ओ जसि	औ जसि
८२७	१	हरिणि	हारिणि
	३	आनिमिषिकः	विग्रह एव
	१४	अत्र	अयं
	१७	शब्दशा	शब्द | शा
८२८	९	पदविकः	पदिकः
८२९	८	तोत्र्	तोत्र्' ॥४।४।९॥
	२०	उन्	ष्ठन्
८३०	२०	काकिन्यः	कान्यिकः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८३१	२	च् पूर्व	च्पूर्व
	९	अग्रभो	आग्रभो
	१८	गारीकः	गारिकः
	२०	रक्रिया त	रः क्रियात
	२३	ड्डल्	ष्ठल्
८३२	२०	भुकुर	भकुर्
	२१	कुरुङ्कु	कुर्छु
८३३	१७	जन्या	जन्याः
८३४	२३	दिना ना	दिमूलेनानां
८३६	६	ण्यः ' ।	ण्यः ' ॥४।४।१०१॥
		पारिपद्यः	पारिषद्यः
	१३	पथ्यतथि	पथ्यतिथि
८३८	१३	दान्तं शू	दान्तम् । शू
८४१	१	प्रादेशे	प्रासादे
	१३	कसम	कं सम
८४२	११	वक्ष्यति ।	वक्ष्यति-
	१२	गौपुच्छी	गौपुच्छि
८४३	१०	द्रुहग	द्रुहणे
८४४	२	शातिकः	शतिकः
	१०	कारो स	कारोऽस
	२२	लुब्	लुग्
	२४	पतिश	प्रतिश
८४५	९	स्ताान्ना	स्तान्ता
		न्तान्	न्ताद्
८४६	२८	त्र ।	च ॥५।१।३६॥
८४७	२४	वंशभा	वांशभा
८४८	३	ड्याभ्या	ड्याभ्यां
	१८	खनौ	षनौ
८४९	३	ग्रह	र्ग्रह
	४	न ह्र	न ह्रे
	१४	दश	दशः
	१८	प्रत्यया:	प्रत्ययः
	२३	त्रिप्रत्य	तिप्रत्य
८६०	५	चत्वारिं	चात्वारिं
८६१	१५	नाहुत	नाहृत
	१६	”	”
	१८	”	”
	२१	निवृत्त	निर्वृत्त
		निवृत्ते	निर्वृत्ते
८६२	२	मासोन्ता	मासान्ता
		भूतौ	भूतो
		साच्च ।	साच्च ॥५।१।८३॥
	४	'षण्मासा-ण्यच्च' ॥५।२।८३॥षा	षण्मासा-ड्डण्यच्च । ष
	६	निवृत्तम्	निर्वृत्तम्
	८	न्निवृता	न्निर्वृता
		सुखः	सु खः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८५२	९	र्निवृत्ता	र्निर्वृत्ता
	१२	र्निवृत्ता	र्निर्वृत्ता
८५३	४	रिंशात्	रिंशतो
	७	र्मासिकः,	र्मासकः
८५४	४	था च ह	थात्रह्
	२०	प्राशातु	प्राशितु
८५५	१२	न्दः स	न्दःस
	१८	ले देशे	ल आदेश
८५७	५	अथात्र	अथात्र
८५८	३	तिङान्नि	तिङां नि
	९	तस्थ	तस्य
८५९	१४	दिणि	ढणि
८६०	१२	श्रेति।	श्रेति
८६१	३	त्य	त्यत्र्
	१६	द्यूत	दृत
८६२	८	रा जा स	राजासे
८६३	१	श्रोत्रम्	श्रौत्रम्
	१०	श्रोत्रम्	श्रौत्रम्
८६४	११	नर्ष्ट्रीयम्। पौ	नेर्ष्ट्रीयम्। पो
	१३	होत्रा	होतृ
	१६	इत्यच	इत्यात्र
८६८	१०	ने धृष्टा	नेऽधृष्टा
८६९	१८	कथं	कथंचित्
८७०	१३	चिगादेश भिको	त्रिगादेश भिक्तो

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८७१	३	स जातो	सं जातो
	५	ह्यसज्	ह्रयसज्
८७६	१४	स्विद्य	श्विद्य
	१५	स्विदिति	श्विदिति
	१६	स्वित	श्वित
	१८	स्वितः	श्वितः
८७७	२०	परत्वा	परा
	२१	इति। अ	इत्य
८८०	११	त्ययो न	त्ययो
	१४	छाभावस्य चे	छभावस्य। त्वे
८८१	२	अकर्षकः	आकर्षकः
	२२	तत्यत	तत्येत
८८२	११	एषा	एषां
८८३	२१	दित्यक	दित्येक
८८४	११	रीति	रीनिः
	२०	दिना	दीनाम्।
८८६	४	लुबि	लुगि
	११	दीना	दीना
८८८	८	कष्य	कष्या
	२०	बलला	बललक्ता
८९२	१८	तुवत्र	तुबत्र
८९३	१२	स्याम्र	स्यांम
	२०	आशीर्षां। आ	अशीर्षा। अ
८९४	५	इनि	इनिः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८९५	८	च्येलुः	च्यैलुः
	१७	च्येलु	च्यैलु
		हिमालुः	हिमेलुः
८९७	२१	तुप्वाध	तुब्बाध
८९९	५	त्वथ	त्वर्थे
९००	१२	पुत्रवलः	पितृवलः
	१३	उत्सङ्ग	उत्साह
९०१	७	स्वार्थ	स्वार्थि
	८	प्रथम	प्रथमं
	१४	ऊङिद	ऊडिद
९०२	७	पदाद्य	त्यदाद्य
	८	द्याभ्याम्	द्राभ्याम्
	११	ईश्	इश्
	१२	ईश्	इश्
९०३	१०	ते इत	त इत्
		एतावादै	एतावादे
	१२	यः।	यः।एतर्हि। इत्थम्।
	१३	ते एतर्हि। इत्थम्।	ते।
९०४	१०	त्रतशोः	त्रतसोः
	११	त्रतशा	त्रतसा
	१७	तत् कथमु	तत्कथम्। उ
९०५	८	मोर्हिल्	मो र्हिल्
	९	लेर्हिल्	ले र्हिल्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९०५	२१	ऊङिद	ऊडिद
९०६	२	इत	इत्
	१२	मोश	मोश्
९०७	१	मेर्हि	ने र्हि
	१७	न्यन्यत	न्यान्यत
	१९	तरेयुः।	तरेयुः। इतरस्मिन्नहनीतरेयुः।
९१२	१९	स्मर्यते	स्वर्यते
	२१	ति। ननु	ति। अ—
९१३	१२	विधा वि	विधा इ
	१७	एकधाप्र	एकाद्धो। प्र
	१८	तस्य धा	तस्य
९१४	११	प्रातस्या	प्रातःपा
	१२	वन्धिना	बन्धिनो
	१९	ष्विति। तम्।	ष्विति तं
	२०	तीति	तीति।
९१५	१२	त्वाद्द	त्वाद्दा
९१७	१०	ष्वकृत्व	ष्वाकृत्व
	१७	षेत्रता	षेवतां
९१९	७	दाम्	दामु
९२०	२	तृज	तृन्तृज
		यसू	यसुनौ

पृष्टम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९२०	९	इष्टा	इष्ठा
९२१	१२	सिध्यते	सिध्यति
९२३	५	रिष्टमे	रिमे
	११	न स्थानि-वत्त्व-	स्थानित्व-
९२४	१३	शब्दो-प्यनि	शब्दः । अथ नि
९२९	८	यस्त	यः । त
९३२	१५	शालिकः	त्रिशा-लिकः
९३३	३	शुण्डीरः	शुण्डारः
	७	त्तद्भ्यो	त्तदो
९३५	५	द्वितीर्या	द्वैतीर्या
९३७	९	इति ।	इति
९३८	१६	तादि	तात्ति
९३९	१०	त्र' इति	त्रे' ति
	११	त्रः । पाद-स्य पन्न ।	त्रे पादस्य पद्धवेत् ।
९४०	१५	गुर्वधीन इति उत्त	उत्त
९४१	२	र्थे णः	र्थेऽण्
	४	नस्थान अ	नं स्थानम-स्येति कृ-त्वा । त्रे
९४६	२२	पत्त्योर्थो	पत्त्यर्थो
९४७	२१	यत	यतः
८४७	२२	यते यः	यतेर्यः
९५३	१३	नित्यम् । 'अव्य-क्तानुक-रणस्या-त-' ।	नित्यमा । अव्यक्तानु-करणस्यातः
९५४	२	योग	योगे
	१३	निपत्र	निष्पत्रः
९५५	७	आम्यात्	अस्मात्
९५७	१४	द्विप्रयो	द्विःप्रयो
	१७	तं सर्वं कार्यं प्र	तत्सर्वकार्यप्र
९५८	७	तेषां	तैः
	१०	न्कसु	न्कसु
९६०	१०	भावः	भाव्यः
	१८	निषधो	निषेधो
९६१	७	वत् त्व	वत्त्वा
	१३	सुपृलु	सुप्लु
		त्तपरत्वा-दनेनाम्रे-डितानु-दात्तत्वं बाध्य	त्तानेनैव त्रि-धीयत इति परत्वादाम्रे-डितानुदा-त्तत्वं बाध
९६४	५	भावे	भावो
	७	स्युः	सुः

|| पूर्वार्धशुद्धिपत्रं समाप्तम् ||

उत्तरार्धशुद्धिपत्रम्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१	७	कोपि	केपि
	८	ख्यान	ख्यन्न
६	९	भाविनं	भाविनां
७	४	थसथ	थस्थ
	९	भज्या	भुज्या
८	१०	बन्ध	बन्धं
	२०	लादेशो लः	लादेशो- ऽतः
१२	४	तिथिः	तिथिभिः
१९	१५	मादात्रु	मानु
	१९	इतः। अतः	अतः।
२०	९	अतः। अ	अ
२१	५	सेर्लोपः	सलोपः
२२	९	भव	भवतु भव
	१०	गाधी	गामन्त्र- गाधी
	१६	त्यन्तता	त्यन्ता
	१७	तो ह्यादिदे	तोन्त्यादे
२३	१०	ते ह्य	नेऽन्त्य
२५	४	गः	नस्य गः
	१३	क्रियाया	क्रियया
२६	१२	देत्वं	दैत्वं
	२०	हषं	हषे
२८	१३	रोन्तादा	रोन्तोदा
२८	१६	तङो	चङङ्
२९	१०	दित्युक्त	दित्थमुक्त
	११	रोन्तादा	रोन्तोदा
३०	७	णम्। लु	णमलु
३१	१६	ताद्धातु	ता धातु
३२	७	आवा	अवा
	१२	रन्ताद	रान्ताद
	१७	तोदा	तः। अतोऽदा
३३	११	इटो	इतीटो
	१७	ति। मा- ङ्योगे न स्यात्।	ति।
३५	८	मन्त्रा	मन्त्र
	११	नित्यत्वा	नित्ये त्वा
	१३	त्वात्। वु	त्वाद्वु
३६	१५	निश	निनिश
३७	१२	स्थाना	स्थानाः
	१८	बोभावः	बोभाव
३८	१	प्राप्तो	प्राप्तौ
३९	१६	तेनाद्य	तेनानद्य
	२०	प्रत्ययानि	प्रत्यया
४०	२	रम्	रस्
	३	ङित्त्व	ङित्त्व

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४०	१७	वृत्य	वृत्तम् ।
४१	१४	च । यत्	च यत्
४२	३	सी युटि	सीयुटि
४३	१४	पदाद	पपदाद
४४	१०	पदां	पदानां
	१७	निवृत्तौ	निर्वृत्तौ
	१८	लटोः	लुटोः
	,,	सस्य	स्यस्य
४५	१६	प्रतित्र	प्रनित्र
४८	१४	इण्	इह
	१५	गृह्येते	गृह्यते
५०	४	रङ्का	रङा
५१	२	शाषः	शेषः
	१६	नयुक्त्या	नं युक्त्या
	१९	हलस्य	हैलः
५२	१४	डाच्युतिर्	द्रमिडाच्युतिर्
	२०	कथं	। कथम् ।
५३	४	लोपः	न्लोपः
५४	१४	षा करवा	षाऽकरवा
५५	२	स्वप्	स्वप
	१२	स्वद	ष्वद
५६	११	षीचती	षिचीती
	१७	य प्र	नप्र
५८	८	गङ्गा	गङ्गां

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५८	१०	स्वञ्जां	स्वञ्ज्
	११	च	सेव
६१	७	मास्था-स्यति	मास्यति
	१२	षा क	षाऽक
	१४	उपाधा	उपधा
६४	१	नृतः	नटः
	७	टुणदि	टुनदि
	१८	परकृते	परेऽकृते
६५	९	'अत आ-देः' इ	अत । आदेरि
	११	श्राच्छे	श्राञ्छे
६६	४	परस्मै	परमै
६७	१२	मो मि	मोऽमि
	१५	स्यार्थ	सार्थ
६८	१६	कृतः ।	कृत्
६९	१३	तत्वात् ।	तत्त्वात्
	,,	त्त्वात् ।	त्त्वात्
	१५	त्वाम	त्वाम्
७०	११	पादित	पायादि
	१३	न्यल्लो	न्याल्लो
	,,	वत्वोत्वा	वा
	१६	यति	यते
७२	१२	लिट्	लट्
	१६	इति	इति सलोपः ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७२	१९	देशः	देशे
	२०	ओख	ओख्
७३	८	चात्रो	चात्रौ
	१३	स्याढाम्	स्यादाम्
	२०	म्रुत्र	म्रुचु
७४	१२	म्रुचत् ।	म्रुत्रत् ।
		अम्रो	अम्रो
	१३	ञ्चत्	चत्
	,,	रूपं त्रयं	रूपत्रयं
	२३	हुर्च्छा	हुर्छा
७५	१४	च्छ	छ
	१५	,,	,,
७७	१३	से ।	से । भ्वादिः ।
७८	२	त्विष	त्विष्
	१५	श्यनादि	श्यना
७९	११	मादि	मादिक
८०	४	काचः ।	काच्
	९	वीं ।	तिप् ।
	१२	वा पदा-देशे	वापवादे
	१४	द्वित्वात् । द्वि	द्वि
	२०	स स्था	स न स्था
८१	१२	ड्रेर्वेति नि	वतिनि
	१६	त्यतेन	त्यनेन
	१७	वेट्	वेट

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८१	२०	थल्येव	थल्यपि
८२	२	निट्,	निट
	१३	वता	वेता
८३	२	रेचो	रे क्लित्यचो
	५	णिश्ये	णिश्व्ये
	१९	कृते या	कृतेऽया
८४	१७	दय अन्ते	दयोऽन्ते
८६	६	नञीव	नाञित्र
	११	तत्रास	तत्रास्
८८	८	शप	शप्
	१२	तीव्यय	तील्यय
	१७	स्र भ्लास्र	शृ भ्लाशृ
	१८	द्रेणे	द्रे गे
८९	१०	चमुक्ता	च उक्ता
	,,	कृता	कृते
	११	न लुमता	न । लुमता
९०	६	एषा	एषां
९१	५	इटीत्	इतीट्
	१०	प्रव्हत्वे	। प्रव्हत्वं
	१२	रमातां	रमनमातां
९२	८	सद्गत	स गत
	११	वीति	विति
	१२	क्षणया	क्षणाया
९३	१५	प्राप्रे	प्राप्ते
	१७	स्यासिद्ध	स्य सिद्ध
९४	५	उकारो	तकारो

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९४	७	निस	निंस
	,,	निदाम्	निन्दाम्
	१९	तिति	तीति
९७	१	ईड	इड
९८	७	तक्षूतनू	तक्षू । तनू
९९	२०	शलि	शल इगि
१००	३	ति। अत्रो-	त्यत्रोक्तम्।
		क्तं काशि	काशि
		कार्यां च	कार्यां च-
	७	चिलः सं	चिलसं
१०१	९	ते इष्णा	तेरिष्णा
	१६	ओर्षीत्	और्षीत्
१०२	१३	तुर्न शन्ते-	सुर्न शेति।
		ति । नैत	नैतदिति।
		दिति	•
१०३	५	त्वाद्गय-	त्वाद्गा
	१७	अमक्ष्यत्	अमेक्ष्यत्
१०५	७	चेनत्या	चेतेत्या
	१३	एश	एश्
	१८	पि ओत्व	प्योत्व
१०६	१८	पिबति	गापिबति
१०७	१२	गै शब्दे	गैशब्दे
	१५	ष्धातु । ष्ठ्यै	ष्धातुष्ठ्यै
	१७	स्यात्	स्यत्
१०८	५	द्धमेत्वं	द्धम् । एत्वं
१०८	७	धेङ्	धेट्
११०	४	दृष्ट्य	दृश्य
	१५	शितौ सं	शितोऽसं
१११	१२	वात् । तव	वात्तव
	१६	। झलि	झलि ।
	२०	चित्	क्विप्
११३	१०	दिरभ्या	दि । अभ्या
	१६	या	यि
११४	१६	' विप्र	विप्र
११५	५	कृत	कृत्
	१०	करणे	करणो
	१४	साकच्क	साच्क
११६	१२	आरु	अतु
	१६	वृद्धिर्न	वृद्धिः
११७	१५	स्योकार-	स्येत्युका-
		विशेषणा-	रविशेष-
		र्थम्	णम्
११८	१०	कात्र	कात्र्
		धातुकं	धातुके
१२०	१७	ईति	इटि
१२१	१०	पुषो	पुष्
	१५	दित्कार्या-	दित्त्वाद्य-
		भावे त	भावे त-
		योर	त्कार्या
१२३	९	षत्वंमि	ष त्वंमि
	१२	स्येति ।	स्येति

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२४	३	तु	तु विस्कन्नः ।
१२५	१	ऋत	ऋत
	,,	त्वाभ्या	त्वाभ्यां
	९	ऋत	ऋत
	,,	लृङ	लुङ्
	१३	थवा	थवास्य
	१४	नाम	नां चा
	१६	त्येत्वं	त्येवं
	१८	ऋत	ऋत
१२९	९	दष्टा	दंष्टा
१३०	८	सद्रूप	सन्रूप
	१२	सद्रूप	सन्रूप
	१३	सप्तमी	सत्सप्तमी
		विज्ञेय	विज्ञेये
१३१	११	गोपाय	गोपय
	१५	इत्यस्या	इत्यस
१३२	६	नात् । तत्रे	नात्तत्रे
१३३	६	ष्यञ्ज	ष्वञ्ज
	१७	तृगेपि इ	तृगामिन्यपी
	१८	उदुम्भां	उम्भां
१३४	६	कृञ्	कुञ
	९	कृत इति	कु त इति स्थिते

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१३४	१७	तथा	तथापि
	१९	क्ते ण	क्तेण
१३५	१०	जश्त्व	जश्त्वम्
	११	लृटः	लुटः
	१४	भयत्र	भयत्र ।
१३६	१०	त्मना	त्मनां
	१२	अटि	आटे
	१५	ष्यैको	ष्येको
	१९	करण	कारेण
१३७	३	मड	मङ्
	६	ष्वञ्जा	स्वञ्जा
	१२	स्वप स	स्वारपरस
	,,	न्यस्व	न्यष्व
१३८	३	सस्वञ्ज्ञे	षस्वजे
	१७	राध्यो	राध्योः
१४०	९	रा स्तु	रास्तु
१४१	६	इत्याय्	इत्यय्
	१५	दकार	दुकार
	१७	ते प्यावा	ते त्वावा
	,,	प्राप्तौ	प्राप्तेः ।
१४२	१७	चित् तत्रा-शङ्क्य प	चित् । तत्राशङ्क्यप
१४३	५	इयङ् ।	इयङ्—
	१०	च्यते ।	च्युतेः
	,,	त्र मा	त्र माभूत् ।
	११	भूर्दीर्घः	दीर्घो ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१४३	१५	यङा	यङ्गुणा
	१८	माय्	मय्
	१९	र्थंन उत्त-	र्थम् । न ।
		रार्थमा	उत्तरार्थम
१४५	१०	प्रत्यये	प्रत्यय
	११	दुमित्र	यदुमित्र
	१४	तौ य	तौऽय्
	१५	ज्ञाप	न ज्ञाप
१४६	३	आप्याया	ओप्यायी
	१७	तथा	तस्या
	१८	पदत्वा	पदित्वा
१४७	१०	तमयो	तमपो
१४७	१०		
	—१३	द्धत्वं वि-	द्धत्ववच-
		षयभेदा-	नादेकस्या-
		द्भियते ।	त्मन्यसि-
		व्यक्तौ प-	द्धत्वं न
		दार्थे प्रति-	स्यात् । स-
		व्यक्ति ल-	त्यम् । अ-
		क्षणम् ।	भेदेन श्रुत-
		वचनादे-	मपि लक्ष-
		कस्यात्म-	णं विषय-
		न्यसिद्धत्वं	भेदाद्भिद्य-
		न स्यात् । ते ।	व्यक्तौ
		सत्यम् ।	पदार्थे प्र-
		अभेदेन	तिव्यक्ति
१४७		श्रुतमपि	लक्षणं भि-
		लक्षणं भि-	द्यत इति
		द्यत इति	कृत्वा ।
		कृत्वा	
	१६	इडाभा-	इडभावे
		त्वेति ।	
	१८	लिङ्य	लिड्य
१४९	२	गातेः	गाते ।
	३	गाते 'आ	'आ
	११	वर्णे दी	वर्णदी
	१३	ईति	एती
१५०	१४	इत्वे	इच्चे
	२०	दन्तर	दनन्तर
१५२	१	डिङ्	डीङ्
	१६	मानबध	मानुबध
१५३	७	दीघो	दीर्घो
	१२	त्त्वविधेः ।	त्यविधेः
	१३	मासिषी	मांसिषी
	१६	यङ्गोः	यङोः
	,,	भत्सीष्ट	भत्सिष्ट
१५४	१३	कीयते ।	कीयतेः
१५५	९	वृन्सत्व	वृत्स त्व
	१४	न्दते	न्देत
		मत्स्य उ	मत्स्यो
	१६	दङ् प	दङ्प
१५६	३	कृपे	कृपो
	१३	कृपे	कृपो

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१५६	२०	दम्रहणस्य	दस्य
१५७	१३	त्र का	त्रः का
१५८	१७	त्रार्योयं	त्रार्यो यं
१६०	१६	त्वात् अका	त्वादाका
१६१	२	सोढ	सोढ्
	९	देशः। श	देशाश
	१४	सदेर	सादिर
	१९	दि शितः संबन्धीय	दिः शितः संबन्धी य
१६२	३	फणानां	फणां
	१२	फणानाम्	फणाम्
	१३	राज	राज्
	,,	भ्रास्	भ्रासृदु-भ्लास्
	१५	राज।	राज्।
	१६	फणानाम्	फणाम्
१६५	८	धाया गोहः	धायाः। गोह
	१९	त्र तस्यै	त्रान्त्यस्यै
	२०	लोपो न	लोपेन
१६६	१३	क्सो लोपे	क्सान्त लोपे
१६७	१५	क्लि	ग्लि
१६८	४	चङ	चङ्
	७	दिदांसीत्। अदि	दीदांसीत्। अदी

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१७१	८	टुवप	टुवप्
१७४	३	स्यल्लिटि	स्याल्लिटि
	१२	ओ वेति	ओऽन्त्येति
१७५	१५	भ्यस्तस्य	भ्यासस्य
	२०	सस्या	सः स्या
१७७	१७	चार्योयं	चार्यो यं
१७८	१५	हलि च	हलि
	१७	द्रुते	द्रुतौ
१७९	१७	घसेः। अ	घसेर
१८०	१४	घस्त्र	घसादेशा
१८२	८	तनुषणु-	तनु
१८३	७	हन्तेजा	हन्तेर्जा
१८४	९	मल्लोपे	माल्लोपे
	,,	अल्लोपा	आल्लोपा
	१९	तस्या	। तस्यां
१८५	१०	हन्	हनन
१८६	१०	द्योतिते	द्योते
१८७	४	स्त्रवने	स्त्रवणे
	१०	क्ष्णोति	क्ष्णौति
१८८	१६	लुङ्	लुङि
	१९	इति वृ	इति। वृ
१८९	१६	लिङ्	लिङि
	१७	सार्वधातुके। ननु त्राती	ननु सार्वधातुकेऽती

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१९१	११	एवामिति। या या	
	१९	करणे	करणे
१९२	१५	उस्	उ ति
१९३	१२	तप्	तिप्
१९४	१३	अस्तेर्भुवश्च इ	आहो भुव श्च ई
	१७	णसाम- र्थ्यात्	णं
१९५	१२	सकार	सकारं
	१४	दे	दकि
	१८	मृज	मृजूष्
१९७	२०	त्वप	त्वप्
१९८	११	वर्तते। धि	वृत्तेर्धि
१९९	१	निर्दुभ्यः	निर्दुर्भ्यः
	८	स्तिपो	श्तिपो
२०१	१०	दिभ्यः	दयः
२०२	१४	त्रि नलो- पप्र	त्रिणगल्लोः प्र
२०३	८	इत्	इस् इत्
२०४	१५	दसिद्धत्र- दित्यसि द्धत्वेने	दालोपस्य पूर्वं वृ त्तत्वेने
२०५	१७	इट्	ईट्
	२१	आदि	इत्यादि
२०६	१२	आङ्	आङः
२०७	९	दायादे	दा शादे
	१२	नस्तिः	नस्तेः
२०८	५	रणात्	रणात्।
	६	तेनान्तो	तेनान्ते
	१३	सिः '। इ	सि ' इ
२०९	९	ङकारा	ञकारा
	१०	'आतो लोपः--'	आतो लोपः।
२१०	९	म्। ईड स्तुतौ।	म्।
	१०	जनौ	ईड। ईड स्तुतौ जनौ
२११	७	असाटे	असोट
२१२	९	शीङ्।	शीङः।
	,,	शेशीश- यादेश	शेशीतः। शयाने
	११	शीङः।	शीङो।
	१४	इत्यत्	इत्यत
२१३	५	परे ञ्णितः	परेऽञ्णितः
	१९	गुध्र्	गुधु
२१४	५	ऐरने	एरने
	१५	त्वेन द्वि- त्वम्। गाङित्य- नुबन्धो गाङ् कुटे-	त्वं न द्वित्वे।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२१४		त्यत्र वि-शेषणार्थः।	
	१६	भ्यते।	भ्यते। गा-ङित्यनुबन्धो गाङ्-कुटेत्यत्र विशेषणा-र्थः।
२१५	१	याताम्।	याताम्। दीधीताम्।
	३	वेविङ्	वेवीङ्
	५	यते ण्वु	यतेर्ण्वु
	१०	ध्यमि	ध्य इ
	१२	ववाङ् चे	वेवीङ् वेती
२१६	५	दोदेर्घः	दादेर्घः
	१४	पूराणा	पूरणा
	१९	धोक्षिति	धोक्षीति
	२०	अः	क्षः
२१९	९	भाषा ऊ	भाषो
	१०	वङ् च	वङ्
	११	विदिति	वीदिति
	१६	श्रेदुप	श्रेडुप
२२०	९	नदरा।	नंदरा
	१२	वङ्गौ	वङौ
	१५	तुरिति	तु इति
	१८	मिति	मीति

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२२०	२०	हो पि	होऽपि
२२१	९	सिच्। इट्	सिच इट्
२२२	८	रौतिति	रौतीति
२२४	११	चार्योयं	चार्यो यं
२२५	१०	श्रु न।	श्रुना
२२७	८	ऋत	ॠत
	१२	ह्रस्वत्व	ह्रस्व
	१५	ऋ।	पॄ।
	१६	पृ	अर्ति। ऋगतौ पॄ
	१७	त्वात्। अर्ति। ऋगतौ।	त्वात्।
	१९	ऋत	ॠत
२२८	२	त्यताम्	त्यॄताम्
	३	णत्वान्नै	णित्वान्नो
	५	यङ्लि	यग्लि
	९	हल्च्या-ङिति	हल्ङ्या-ञिति
२२९	१०	इति। अ	इत्य
	१२	इत्वाप-वाद ई	ईत्वापवाद इ
	१३	ते ई न	तेर्न
२३०	२	स्याद्वा	वा स्यात्
२३१	४	ननिक्ते	नेनिक्ते
	८	आरुः	आरतुः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२३३	६	सनोतेर्वि- प्रतिषे- धात् ।	।सनोतेर्वि- प्रतिषेधात्
	९	। इति	इति ।
२३४	३	दर्धाति	र्दधाति
२३६	१५	चार्योयं	चार्यो यं
२३८	८	नृतः	नृत्तः
	९	धातु	धातुक
	१०	निषेधे	निषेध
	१६	स्यतासि	स्यतासी
२३९	१	ऋत	ऋत
२४०	१३	कावृद्धा	काद्वृद्धा
	१७	पास्य ।	पास्य
२४१	२२	रित	रिति
२४३	७	सित्रि वा	सिज्वा
२४५	५	स्नहन	स्नेहने
	१५	मिद्येत्	मेद्येत्
२४८	९	दाङ्	दीङ्
२५०	२०	चार्योयं	चार्यो यं
२५१	१	पुत्र	पुत्र्
	१२	पश्चा	पश्चास्या
२५३	८	योलि	योर्लि
२५४	१२	धूनोति	धुनोति
२५५	९	। हि गतौ ।	
	१०	वृ	हिनु । हि गतौ वृ
२५७	२	लोपे	ल्लोपे
	१९	चार्योयं	चार्यो यं
२५८	२०	।अभ्राक्षीत्	अभार्क्षीत्
२५९	२०	रमूरेफ	रम् । रेफ सकार
२६०	२	मुत्र	मुच्ल
	७	पत । आत्म	पत् । आत्म
२६१	११	कृतः	कृत्तः
२६२	३	श्रतु	श्रतुः
	५	नृछ	नृच्छ
	१९	आर्च्छेत्	आर्च्छत्
	„	आनर्च्छेति	आनर्च्छेति
२६३	२३	कात् पूर्व-ग्रहणात् सुटो	कात्पूर्वग्र-हणात्सुटोऽ
२६४	८	सुट्	सुटः
	११	धातुभ	धात्वभ
२६५	३	म्फदृफ-गुम्फतु	म्फतुम्फ-दृम्फगु-म्फउ
	१३	तुभ	उम्भ
२६८	५	अञ्जिति	अञ्जि-दिति
२७०	९	पदेन	पदेन न
२७१	१३	चार्योयं	चार्यो यं

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२७४	५	तृहन्ति	तृं हन्ति
	१७	सवर्णा	वर्णां
	१८	क्षणा प	क्षणप
२७६	१०	त्रीन्धी	त्रि इन्धी
	१६	चार्योयं	त्वार्यो यं
२७९	१६	भ र्च्छु	भकुर्च्छु
२८०	७	तेर्भू	तौ भू
	२०	याह । सुट	याह—
२८१	१८	युज्येत	युज्यते
	२२	सुटो न भ	सुटोऽभ
२८२	३	उपात्	समवाये च ॥६।१। १३८॥ संपर्चे सुट् स्यात् । उपात्
२८५	५	प्वादीना	ज्यादीनां
	२२	प्वादीना	ज्यादीना
	२४	इट	इट्
२८६	२	अकी	इडभावे अकी
	३	धञ	धूञ्
	१२	अन्यदित्व	अन्यत्रेत्व
	१९	विशेषः	शेषः
२८७	१२	भुत	भूत्
	१६	जग्राहे	जगृहतुरि

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२८८	११	शृणोति	शृणाति
२८९	१२	ज्यादीना	ज्यादीनां
२९०	२१	त्वार्योयं	चार्यो यं
२९४	१८	सद्भाव	सन्वद्भाव
२९५	३	ते दन्त	तेऽदन्त
३००	१८	भाष्यं न्या	भाष्यन्या
३०१	१५	'कर्तृ	कर्तृ
	,,	णिच	'णिच
३०२	१३	पुनर्ना	पुनर्णा
३०३	२२	शर्पूवाः	शर्पूर्वाः
३०६	७	भष	भष्
	१९	यीदिति	आर्दयीदिति
३०९	१३	ईर् । गु	इर्गु
३११	२०	अपपेय	अपेपय
३१२	६	अस्मात्	अस्माण्णिच् ।
३१४	२	ऐज्नि	एज्नि
३१६	१४	पुग्	पुक्
३१८	१८	पर्यु	न पर्यु
३२०	६	भ्यासावा	भ्यास आवा
	१४	वृद्धयाया	वृद्धयावा
३२४	१३	अचार्यै	आत्तार्यै '
३२५	१४	इत्युच्य	इति । उच्य

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३३२	६	स्कुड	स्कुव
३३९	१९	ष्वप	ष्वप्
	१८	ष्वप	ष्वप्
३४६	१२	ष्वप	ष्वप्
३५१	१०	तेन ज	तेऽनज
३६०	१७	मित्यनेन ।	मिति । अनेन
३६२	७	बोभूवि	बोभावि
	२०	वक्ष्यति	वक्ष्यते
३६६	१८	मूर्च्छा	मुर्छा
३७२	४	अकृतसा	अकृत्सा
३७९	८	चेदेक	चेदमेक
३८९	७	कृर्तकर-गार्थे इत्ये	कर्तृकर-गार्थे इति ।ए
३८७	८	बर्लीं	बलिं
३८८	२०	वणाद	वर्णाद
३९०	१४	पुत्रीयतु	पुत्रीयितु
३९७	१३	लिडः	लिङः
४०९	१९	यत्ने	यत्न
४१८	३	तङाना	तङानौ
४३८	३	पः कर्म	पःकर्म
	४	पः कर्म	पःकर्म
४४०	२	चिणू	चिण्
४४९	१२	मेते	मेति
४५०	११	स्तथवा	स्तथैवा
४५२	११	युक्तम्	युक्त
	१३	सप्तमी	पञ्चमी
४५५	१	लृङ	लृङ्
४५६	१९	कप्ति	कॢप्ति
४६२	५	त्रयं	चतुष्टयं
४६३	६	नायमा	नार्यं मा
४६५	१६	विशेषः	विशेष्यः
४६६	१८	द्विवचने	द्विर्वचने
४७०	१८	स्वेड् व	स्येड्व
४७४	१०	स्वार्थ	स्वार्थ
४७७	१४	व्यक्ताया	व्यक्तायां
४८३	११	भेतस्मा	एतस्मा
	१२	शालोपो	शात् न्लोपो
	२३	पूवा	पूर्वा
४८९	१८	षु प्रेर	षू प्रेर
४९७	४	निषेधात	निषेधात्
४९९	१२	त्युक्तम्	त्युल्वम्
	१९	चर गतौ	चल गतौ
५०१	११	नुवृत्ते	नुवृत्ति
५०४	१२	इयाव्यधे	इयाद्व्यधे
	,,	आस्र	आस्रु
		इति स्र	इतिस्रु
५०६	६	प्वादे	प्वादे
५०७	१९	आस्तेः	अस्तेः
५१०	२३	सामगाय	सामसं-गाय

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५१५	१२	त्य नेनावि	त्यनेन वि
५१६	८	पुराश	पूर्वश
५२१	८	मुद्रजः	मुद्रुजः
५३६	७	पीवा	पावा
५६०	१८	पवितः प	पोपूवितः पोपू
५६१	१२	शायितः	शोशियतः
५८६	२०	येष	येषां
५९०	१८	त्यपालाषी	त्यपलाषी
६००	४	उणू	उणू
	१३	प्रविृत्ति	प्रवृत्ति
६०२	५	मण्डो	मण्डि
६०४	१	निर्व्रच्चः	निर्वच्चः
६०५	११	प्राण	प्राणि
६०६	१७	पिशिः	पेशिः
६०८	६	वृत्ते	वृते
६०९	२३	स्कदेःस	स्कन्देः स
६१५	१०	मागमीः	मागमौ
६१६	३	करति कर्कः	कर्कः
	१४	मचर्कः	मर्कः
	२२	घ्राणकः	घाणकः
६२१	१२	वाय्वमी	वाय्वमी
६२२	१५	जीर्णः	जर्णः
६२४	९	जेर्मुद्	जेर्मूद्
६२५	५	कितव्	कितच्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६२६	८	वासः	वसः
६२७	६	एतकनि	एते कनि
६२९	१३	विशिपो	विशपो
	१५	विशिपं	विंशपं
६३०	१६	प्रथरेट् च	प्रथेरट् च
	१९	इषियु	ईषियु
६३१	७	प्रथरेम च्	प्रथेरमच्
६३२	१५	व्यथस्ते	व्यथते
६३३	५	तिष्टात	तिष्ठति
६३४	२२	व्रजति	वजति
	२४	सुरः	क्षुरः
६३५	७	यद्वराः	यद्वरोपह्वराः
६३८	१२	पिण्डभ्यः	पिण्डितुण्डिमुण्डिकोकिभ्यः
६३९	१५	शुक्लम्	शक्लम्
	१८	निपातितः	निपात्यः
६४४	१०	प्रहाण	प्रजहाति शोकं
६४६	१५	कटश्च	काटाश्च
६५४	१४	अवज्ञाया	अवज्ञाने
६५६	६	विश्रामो	विश्रामः
६५९	९	टिढाण	टिङ्ढाण
६६२	८	र थुच्	रथुच्
६६५	५	हानि	हानिः
	१७	दूडिति	दूडिति

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६६६	१८	सिंहेपि	सिंहोपि
६६८	१३	रिया	रदा
६६९	१	अः प्र	अ प्र
६७१	१८	अस्य धौं	अस्य र्वौं
६७९	१२	तेन ।	। तेन
६८२	१२	त्रितृष	त्रितृषा
६८३	१२	स्यतीत्वम्	स्यतीतीत्वम्
६८४	१२	मिव युक्तं	मिवयुक्तं
६८६	३	प्रपव्य	प्रपठ्य
६८७	१८	इयङा	इङा
६९२	३	निर्मूल	निमूल
६९५	९	वास्वरू	त्रासरू
७०१	१५	प्रथम	अवन्त्वि-न्ति प्रथम
७०५	३	स्वप्रने	स्वप्नेने
७१०	१०	वण	वर्ण
	१८	देत्वं	दैत्वं
७११	३	एतोन्यत्र	अन्यत्र
७१४	९	धातोरते	धातोरेते
७१५	२०	। स्वरप्र-क्रिया	।
७१७	६	वोत्र	वो त्रा
७१८	२२	बे विध्य-र्थम् । इषे	बेर्विध्यर्थ-म् । इच्छे
७१९	१०	यां पञ्चना गीः	पञ्चदा

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७२१	१	वा तुमी-यम् । छे	चातुमि-यम् । घे
७२५	२	रःयञ्च	रश्रयञ्च
	११	वदेसम्	वेदसम्
७३०	४	हस्तम	हस्तम्
७३१	६	इत्येते	एते
७३२	६	जायया:	जायथाः
	१६	निपूर्व ञ्जसा ।	ननिपूर्व ञ्जसा । निषत्तः ।
	१९	प्रतू	अनुत्तं प्रतू
	२४	अप्रारू	अप्रा ३
७३४	२१	गोसनि	गोसनिं
७३५	१४	चार्यायं	चार्यो यं
७३६	२१	दन्तो-दात्तः	दाद्युदात्तः
७४२	३	उदात्तस्ये-	नोदात्ते-
७४४	६	क्रेत्यनु	केत्यनु
७५०	५	उदात्तः ।	उदात्तो न ।
७५१	११	लघु पू	लघुपू
	१८	रषिः	रविः
७५२	१८	ख्यी चेत्	ख्या चेत्
७५८	९	॥	॥६।२।२॥
	२१	लवणयो	लवणयोः
	२३	पूवदं	पूर्वपदं
७६०	९	वाणिजाः	वाणिजः

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
७६५	१	सान्तः	सान्तो- दात्त :
	१९	प्रकृत्य	प्रकृत्या
७६६	२०	यावत	यावत्
७६९	१९	गोरिव	गौरिव
७७१	२१	ईति	इति
७७३	८	रुक्त	रुक्ता
	२४	अधिका- रः। आ	उत्तरपदा- धिकार आ
७७७	१९	प्रभदः	प्रभेदः
७८०	४	संपदा- द्यर्थाः	संपा- द्यार्थाः
७८५	७	णायाम	णायाम्
७८९	७	गदर्भ	गर्दभं
७९२	२१	ऋक	ऋक्
७९३	१२	बहुव्रीहिः	बहुव्रीहौ
	१४	बहुव्रीहिः	बहुव्रीहौ
	२३	चायर्सू	चार्यसू
७९४	२	साक्ष	संक्षि

॥ उत्तरार्धशुद्धिपत्रं समाप्तम् ॥

CRITICAL NOTICE OF MANUSCRIPTS

OF THE

TEXT AND THE COMMENTARIES

The text is based upon the following manuscripts:—

1. A manuscript from my friend, Mr. Hiralal P. Shroff, Principal, Śhri Sayaji Vijaya High School, Baroda. It belongs to a Petlad Library. It begins with ॐ विघ्नराजाय नमः । श्रीमद्विट्ठलमानम्य° and proceeds up to 'तसनतसनथनाश्च' ॥ ७ । १ । ४५ ॥ एते च तस्यादेशाः स्युः, a *Sûtra* of the *Vaidikî Prakriyâ*. It is thus almost complete. It contains 230 pages, having 10 lines on an average on each page, each line having on an average 30 letters. It is in *Nâgarî* characters and is generally correct. It is designated P.

2. A manuscript received from the Baroda Government Central Library, through the late Mr. J. S. Kudalkar, M.A., LL.B., the Librarian. It begins with ॐ नमः श्रीरामचन्द्राय । श्रीमद्विट्ठलमानम्य° and proceeds up to the Sûtra 'विभाषा लीयतेः' ॥ ६।१।५१ ॥ लीलिङोरात्वं वा स्यात् ल्यपि एज्निमित्ते अशिति च वि(षये) in the chapter of दिवादि's. It is an old manuscript in *Nâgarî* characters with पृष्ठमात्रा's. It is generally correct. It has 99 pages of the पूर्वार्ध and 36 of the उत्तरार्ध. The पूर्वार्ध ends thus:—
इति श्रीसकलसदागमचणश्रीरामचन्द्राचार्यविरचितायां प्रक्रियाकौमुद्यां सुबन्तप्रक्रिया ॥ समाप्तमिति । छ ।

याद्दशं पुस्तकं दृष्ट्वा(ष्टं) ताद्दशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ।

शुभं भवतु । कल्याणमस्तुलेखकपाठकयोः । It has 11 lines on each page and 40 letters on an average in each line. It is designated B_1.

3. A complete manuscript received from the Baroda Government Central Library. It is in beautiful *Nâgarî* characters and has copious marginal notes, particularly in the beginning. It contains 147 pages, with 13 lines on each page and 38 letters on an average in each line. It has पृष्ठमात्रा's and supplies a variety of readings. It begins with ॐ नमः । श्रीमद्विठ्ठलमानम्य° and concludes with इति श्रीरामचन्द्राचार्यविरचिता प्रक्रियाकौमुदी समाप्ता ॥

मीमांसायुगलाक्षपादकणभुक्प्रोक्तांशसद्वाक्यदा
दुर्ज्ञेयस्वनशास्त्रतप्तमनसां शब्दाधिकेच्छावताम् ।
शब्दाधारविसार्यसाधुवचनध्वान्तारिनाशक्षमा
तन्याच्छं पुरु रामचन्द्रजनिता सा प्रक्रियाकौमुदी ॥

संवत् १७४२ वर्षे आश्विन सुदि ११ भौमे लिखितम् ।
It is designated B_2.

4. A manuscript received from the Government Central College, Calcutta, through the kindness of the Principal, the late Mahâmahopâdhyâya Satishchandra. It begins with ॐ नमो गणेशभारतीभ्यां पाणिनिपतञ्जलिकात्यायनेभ्यः । श्रीमद्विठ्ठल° and ends with the कृदन्तप्रक्रिया. The concluding words are—इति कृदन्तप्रक्रिया । श्रीः ॥ वैदिकशब्देष्वप्येषैव प्रक्रिया । य एव लौकिकास्त एव वैदिका इति न्यायात् । क्वचित् प्रयोगवशादन्यथात्वम् । 'प्रकृत्यान्तःपादमव्यपरे' ॥ ६।१।११५॥ ऋक्पादमध्यस्थ एङ् प्र. It contains 239 pages. Each page has on an

average 10 lines and each line 25 letters. It is in *Nâgarî* characters and is in bold letters well written. It is generally correct. It is styled C.

5. A manuscript from the Deccan College Collection through my friend, Dr. S. K. Belvalkar, M.A. It is complete and comprises 178 pages with 10 lines on each page. Each line has on an average 40 letters. It is well written in bold *Nâgarî* letters and is correct. It has पृष्ठमात्रा's and a few marginal notes. It begins with ॐ नमो गणेशाय । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । श्रीमद्विठ्ठल°. It has at its end इति वैदिकी प्रक्रिया समाप्ता ।

आनन्त्यात् सर्वशब्दा हि न शक्यन्तेनुशासितुम् ।
बालव्युत्पत्तयेस्माभिस्संक्षिप्योक्ता यथामति ॥ १ ॥

प्रक्रियाकौमुदी सेयं रामचन्द्रप्रकाशिता ।
असद्वचस्तमो वध्यात् सच्चकोरप्रिया चिरम् ॥ २ ॥

जयति सुभगमूर्तिर्मुग्धहासावलोक-
प्रशमितजनतापो विठ्ठलस्स्वात्मदीपः ।
सचकितमिव लक्ष्मीः सेवते यत्पदाब्जं
ललिततरकराभ्यां साधु संवाहयन्ती ॥ ३ ॥

इति श्रीमद्रामचन्द्राचार्यविरचितायां प्रक्रियाकौमुद्यां कृदन्तः समाप्तः । श्रीः । समाप्ता चेयं प्रक्रियाकौमुदी। श्रीविश्वेश्वरः प्रीयताम् । श्रीरस्तु। कल्याणमस्तु श्रीः।... श्रीः । ... छ ॥ It is by appearance old. No date is given. It is named D_1.

6. Another manuscript from the Deccan College Collection. It comprises 168 pages with 11 lines on each page and 42 letters on an average in each line. It is in *Nâgarî* characters and is older in appearance

than D_1, by about 50 years. No date is given. It has more copious marginal notes than D_1. It is correct. It begins with—श्रीपार्श्वप्रभवे नमः। श्रीमद्विठ्ठल°. Its colophon is :—इति वैदिकी प्रक्रिया समाप्ता। आनन्त्यात्° । इति श्रीमद्रामचन्द्राचार्यविरचिता प्रक्रिया समाप्ता। It is designated D_2.

7. Another manuscript from the same collection. It has 73 pages of the पूर्वार्धं and 66 of the उत्तरार्धं, in all 139 pages. Each page has, on an average, 10 lines and each line, on an average, 35 letters. It begins with श्रीमहागणपतये नमः। श्रीमद्विठ्ठल°. The पूर्वार्धं ends as under:— इति श्रीरामचन्द्रविरचितायां प्रक्रियाकौमुद्यां सुबन्तं समाप्तम्। श्रीः। श्रीः—श्रीः। स्वस्तिश्री संवत् १५८३ वर्षे शके १४४८ प्रवर्तमाने भाद्रपदमासे शुक्लपक्षे त्रयोदश्यां तिथौ भौमदिने नन्दिगिरौ श्रीरामचन्द्राचार्यसुतसुतसुतेनालेखि। शुभं भवतु। कल्याणमस्तु।

The उत्तरार्धं begins with—ॐ नमो गणेशाय। सरस्वत्यै नमः। श्रीरामचन्द्राय नमः। प्रकृतिः सा° and ends with—इति लकारप्रक्रिया। श्री।...श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः। श्रीमद्विठ्ठलाय नमः। श्रीगुरुभ्यो नमः। श्रीरामः। It has पृष्ठमात्रा's. In the पूर्वार्धं pp. 73 (p. 69 wanting) it proceeds up to the *Sûtra* 'आनङ् ऋतो द्वन्द्वे' ॥६।३।२५॥ and its वृत्ति—पूर्वपदस्यानङ् स्यात्. Then on p. 101 it begins with तीयादीकक् स्वार्थे वाच्यः, a *Vârtika* on the *Sûtra* 'पूरणाद् भागे तीयादन्' ॥ ५ । ३ । ४८ and goes up to the end of the सुबन्तप्रक्रिया. It is designated D_3.

8. Another manuscript from the Deccan College Collection. It contains 137 pages with 13 lines on each page and 40 letters in each line on an average. The opening first page is wanting. It has marginal notes on a few pages and पृष्ठमात्रा's. It begins with—हल्झल्रल्वल्शालिति। हकारो द्विरुपात्तोयं° and ends with— इति वैदिकी प्रक्रिया समाप्ता। आनन्त्यात् सर्वशब्दा हि° ... संवाहयन्ती ॥२॥ इति श्रीरामचन्द्राचार्यविरचिता प्रक्रियाकौमुदी समाप्ता॥

मीमांसायुगलाक्षपादकणभुक्प्रोक्तज्ञसद्वाक्यदा
दुर्ज्ञेयस्वनशास्त्रतप्तमनसां शब्दाधिकेच्छावताम् ।
शब्दाधारविसार्यसाधुवचनध्वान्तारिनाशक्षमा
तन्याच्छं पुरु रामचन्द्रजनिता सा प्रक्रियाकौमुदी ॥ १ ॥
यस्याः प्रसादमासाद्य कुमुदन्ति कवीश्वराः ।
प्रक्रियाकौमुदी सेयं पात्रेत्र प्राप पूर्णताम् ॥ २ ॥

संवत् १६७७ वर्षे आसु सुदि ८ दिने श्रीजेशलमेरमध्ये लिखितम् । शिष्य श्री ५ लालावाचनार्थम् । लिखितं संपुजाजीवाणी । शुभं भवतु लेखकवाचकयोः । श्रीरस्तु ।

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥

It is a very correct and well written manuscript and agrees with B_2 or D_2 in most of its readings. It has पृष्ठमात्रा's and copious marginal notes. It is designated D_4.

9. Another manuscript from the Deccan College Library. It has 88 pages and is incomplete. Each page has on an average 9 lines and each line 46 letters. It begins with—श्रीवरदमूर्तये नमः । श्रीभवानीशंकराभ्यां नमः । श्रीमद्विठ्ठल° and ends with—इतरशब्दस्य नित्यसमासवदिति ज्ञेयम् । इतरेतरम् । स्त्रीनपुंसकयोः । उत्तरपदस्य वा, nearly the end of the द्विरुक्तप्रक्रिया and सुबन्तप्रक्रिया. It is correct and supplies good readings. It is designated D_5.

10. A manuscript received from the Dahilakshmi Library, Nadiad, through my friend, Mr. Tanasukharam Manassukharam Tripathi, B.A. It contains the उत्तरार्ध or the verbal portion only. It has 295 pages with 8 lines on each page and 32 letters on an average in each line. It is in *Nâgarî* characters

and is very neatly and legibly written. It begins with—ॐ नमो गणेशाय । श्रीमद्विट्ठलाय नमः । प्रकृतिः सा जयत्याद्या° and ends with—इत्याख्यातप्रक्रिया समाप्ता । स्वस्ति । श्रीः । संवत् १५८४.

खेटाब्धीन्द्रामिते शाके नभोमास्यसिते रवौ । सिंहाख्यो हि चतुर्दश्यामलिखत् प्रक्रियां शुचिः ॥ छ ॥ श्रीरस्तु ॥. It has पृष्ठमात्रा's. It is a very old manuscript, being one year later than D_3. It is very correct. It is designated N_1.

The text of the commentary of 'Prasâda' is based upon the following manuscripts :—

1. A manuscript received from the Deccan College Collection. It comprises 409—132—76 pages and has 10 lines on each page, each line having, on an average, 37 letters. It is clearly written and is generally correct. It begins with ॐ नमः श्रीगणेशाय । श्रीविट्ठलाय नमः । पाणिन्यादिभ्यो नमः । श्रीरामचन्द्राचार्यगुरुभ्यो नमः । श्रीमद्विट्ठलमेकमव्यय° and ends as follows :—At the end of सुबन्त's, p. 409 it has श्रीरस्तु । श्रीकल्याणमस्तु । स्वस्ति संवत् १६०६ वर्षे श्रावणवदि १० रवौ । अद्येह श्रीतापीतटे सूर्यपुरे लिखितोयं प्रसादः । समाप्तमिति । श्रीः ।

याद‍ृशं पुस्तकं वीक्ष्य शोधनीयं सदा बुधैः ।
हीनाधिक्यैः स्वरैर्वर्णैरस्माकं दूषणं न हि ॥ १ ॥

याद‍ृशं पुस्तके द‍ृष्टं ताद‍ृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ २ ॥

यावल्लवणसमुद्रो यावन्नक्षत्रमण्डितो मेरुः ।
यावद्भास्करचन्द्रौ तावदिदं पुस्तकं जयतु ॥ ३ ॥

श्रीरस्तु लेखकपाठकयोः । कल्याणमस्तु । श्रीः ॥ छ ॥

At the end of ऌकारार्थवर्ग, p. 132, it has—श्रीरस्तु । शुभं भवतु । कल्याणमस्तु । संवत् १६०६ वर्षे श्रावणमासे शुक्लपक्षे १ गुरौ लिखितमिदं पुस्तकम् । ति० प्र० प्रसाद । श्रीः ॥ छ ॥.

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

श्रीरस्तु । श्रीः ॥ छ ॥.

At the end of the last instalment, pp. 76-7, it has:—

श्रीः । छ ॥ यादृशं पुस्तके° ॥ छ । श्रीः ॥

श्रीः संवत् १६०५ वर्षे ज्येष्ठवदि ५ शुक्रे । अद्येह श्रीसूर्यपुरवास्तव्यआभ्यन्तरनागरज्ञातीयस्मार्तवासुदेवकेन लिखितमिदं पुस्तकम् । छ । श्रीरस्तु । कल्याणमस्तु । छ ।

तैलाद्रक्षेज्ज° ॥ छ छ छ.

The manuscript is thus copied at Surat, my native place, by a Nâgar Brâhmin Vâsudeva, a member of my caste. The उत्तरार्ध was copied in Saṁvat 1605 and the पूर्वार्ध in Saṁvat 1606. The whole chapter on स्त्रीप्रत्यय's is wanting. It is in *Nâgarî* characters and has पृष्ठमात्रा's. It is designated DC_1.

2. Another manuscript from the Government Collection in the Deccan College Library. It has 306 pages with 11 lines on each page and 47 letters on an average in each line. It is a much worn-out manuscript and had to be used with care. It supplies good readings, but vacant spaces are left in many places for words omitted. It is in *Nâgarî* characters. It begins with—ॐ नमो गणेशाय श्रीनृसिंहाय । श्रीमद्विठ्ठल°, proceeds up to the end of सुबन्त, and ends as under:—
श्रीरस्तु । मङ्गलमस्तु । लेखकविठ्ठलकासीवासीरजपुतः । संवत् १६४१ समए आषाढसुदि द्वादसी वासवीहफइ । श्रीविश्वनाथ । कलभैरवअयनमः । रामचन्द्र । राम ।.
This clearly shows how illiterate the copyist was. The whole chapter on स्त्रीप्रत्यय's is omitted in this. It is designated DC_2.

3. A manuscript from the Dahilakshmi Library, Nadiad. It has 127 pages with from 12 to 15 lines on each page and 44 letters on an average in each line. It is incomplete and breaks in the treatment of the *Kâraka's*. It is in *Nâgarî* characters. It begins with—श्रीगोकुलाधीशाय श्रीगुरुचरणकमलेभ्यो नमः। श्रीमद्विट्ठल° and ends with—केचित्त्वस्मादेव निर्वचनात् रुजा अर्थो विद्यते येषां ते. It is designated NC_1.

4. Another manuscript from the same Library at Nadiad. It is also incomplete. It contains 67 pages with 12 lines on each page and 45 letters on an average in each line. The beginning is worn out. It ends with—तिसृचतसृभावो हि विभक्तिपरतो विधीयते ताभ्यां परतो ङीप् चेत् स्यात् तर्हि तयोर्विभक्तिपरता विहन्येतेति ।. It thus breaks in the middle of declensions of words ending in a vowel. It is designated NC_2.

5. A manuscript from the Baroda Central Library. It is a good manuscript, but incomplete. It is fairly correct. It is in *Nâgarî* characters. It contains 281 pages with 9 lines on an average and 61 letters in each line. The opening page 1 and pages 114, 137, 277, and 278 are wanting. It begins with—कल्पत्वतो, रामाचार्यवरैरमूनि विशदं व्याख्यामि सूत्राण्यहम् , verse 8th. It comes up to the end of the Taddhitas, takes up द्विरुक्तिप्राक्रिया, and proceeds up to आभीक्ष्ण्यं पुनः पुनः कृतिः । वीप्सा नाम नानाभूतार्थ—It is designated BC_1.

6. Another manuscript from the Baroda Central Library. It begins with the तिङन्त as under :—ॐ श्रीगणेशाय नमः । श्रीविट्ठलं सुरवरं प्रणमामि देवम्° and comes up to the सन्नन्तप्राक्रिया—निरगमदमला प्रक्रियेयं सनन्ता ।. It contains 72

pages with 16 lines (a few pages have 11 lines) on each page and about 45 letters in each line. The writing is distinct and the manuscript generally correct. It is in *Nâgarî* characters and seems old, belonging to the Saṁvat era, 16th century. On the opening page is found—व्याससुखानन्दस्यैतत् ।. It is designated BC_2.

7. Another manuscript from the Baroda Central Library. It is incomplete. It begins with p. 116, goes up to p. 376, and has pp. 182-219, 253, 255-300, 304-311, 313-368 missing. It is a very old manuscript as the colophon shows. It has 11 to 12 lines on a page and about 40 letters in each line. It is in very clear and nice *Nâgarî* characters. It begins with—णान्ताद्धातोर्वनो ङीब् वा इत्येके इति । एके इति **न्यासकारादयः** । तथा च **न्यासकारेणोक्तम्** । and ends with

श्रीरामाचार्यसूनु . . . . .

× ... ... × ... ... ×

× ... ... × ... ... ×

व्याख्यानेस्मिन् प्रसादे सुविशदमगमत् सत्सुबन्तं समासम् ।

संवत् १५६० वर्षे पौषमासे शुक्लपक्षे ११ तिथौ लिखितमिदम् । शुभं भवतु ।

This manuscript, though of the commentary, is thus older by 23 years than a very old manuscript of the text, written by the great grandson of the author in Saṁvat 1583, designated D_3 here. It has पृष्ठमात्रा's and letters of old forms. It is very carefully written and is correct. It is designated BC_3.

8. A manuscript of the commentary from the Government Collection at Poona, now deposited

in the Bhandarkar Research Institute there. It has 251 pages with 19 lines on each page and 55 letters on an average in each l'ne. It is in beautiful *Nâgarî* characters, but is very incorrect. It begins with—श्रीसरस्वत्यै नमः । श्रीमद्विठ्ठल°. It has पृष्ठमात्रा's and ends as under :—

संवत् १७१७ वर्षे आसू सुदि १४। दिने बुधवासरे श्रीबृहत्खत्तरगच्छेशश्रीयुगप्रधानश्री १०८ श्रीमज्जिनचन्द्रसूरिशिष्यपं० भुवनमेरुगणितशिष्यवाचनाचार्यवर्यधुर्यश्रीपुण्यरत्नगणिशिष्यपं० दयाकुशलगणिलिखितेयं प्रसादप्रतिरियम् । शिष्यपं० धर्ममंदिरमुनिपठनार्थं । श्रीप्रल्हादनपुरे । वाच्यमानानां सुखं भूयात् । श्रीभट्टारकश्रीमज्जिनसागरसूरि । आचार्यश्रीजिनधर्मसूरिविजयराज्ये ।

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धिमदशुद्धि वा मम दोषो न दीयताम् ॥ १ ॥
भग्नपृष्ठिकटिग्रीवा वक्रदृष्टिरधोमुखम् ।
दुःखेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥ २ ॥
तिलाद्रक्षेज्जलाद्रक्षेद्रक्षेत् शिथिलबन्धनात् ।
परहस्तगतां रक्षेदेवं वदति पुस्तिका ॥ ३ ॥

ग्रन्थाग्रं १८०००। वाच्यमानो चिरं नन्दतु । लेखकपाठकयोः शुभं भवतु । श्री ।

The manuscript is designated DC_3.

9. A manuscript from the Government Collection in the Bhandarkar Research Institute. It contains 394 pages. Each page has from 9 to 11 lines and each line, 4 'etters or thereabouts. It begins with—ॐ नमः श्रीगणेशाय । श्रीविठ्ठलाय नमः । श्रीविठ्ठल° and ends with

श्रीरामाचार्यसु(सू)नु...
× ... × ...
... × ... × ...
... प्रसादे सुविशदमगमत् सत्सुवं—

It is designated DC_4.

10. A manuscript from the Shri Gattulal Library, Petlad. It contains the कृदन्तप्रक्रिया only. It has 80 pages with 15 lines on each page and about 50 letters in each line. It is a Jain manuscript. It begins with—श्रीवीतरागाय नमः । अथ कृदन्तप्रक्रिया and ends with—इति श्रीपाणिनिव्याकरणप्रसादं समाप्तम् । श्री । संवत् सोल ६४ वर्षे भाद्रपद्वादि २ गुरौ संपूर्ण लिखितं । पठनपाठनधो (धा)रकाणां कल्याणमस्तु । यादृशं पुस्तकं° । श्रीरस्तु । कल्याणमस्तु ।

... ...

तेनेयं पुस्तिके वाँद्रिवसुरसंशांशि (१६८७) व्यक्तवर्षे प्रदत्ता ।
... ... मुनये धर्मसिंहाय तस्मै
सम्यग्भावेन भक्त्या सुवितरणवता पाणिना स्वस्य लक्ष्मीः ॥

श्रीः ।

It thus bears date *Samvat* 1664 or A. D. 1608. It has पृष्ठमात्रा's. It is well written. It is very correct and has proved of great use to me in settling the correct text of the latter part of the commentary, *i.e.*, that on the स्वरप्रक्रिया. It is designated PC.

Krishṇa's commentary is also consulted. It is a very exhaustive and learned commentary and quoting and criticizing the *Prasâda* as it does in a number of places, it is useful for this edition. It provides different readings. I got three manuscripts of this work :—one from the Principal, Government Sanskrit College, Calcutta; another from the Dahilakshmi Library, Nadiad, and the third from the Government Collection in the Bhandarkar Research Institute, Poona. This Krishṇa is not the nephew of Râmachandra, author of our *Prakriyâ Kaumudî* as Dr. Bhandarkar seems to think. *Vide* Dr.

Bhandarkar's Report of Sanskrit manuscripts for 1883-84, where he says: 'I think he is the same Kṛishṇâchârya who has written another commentary on प्रक्रियाकौमुदी.' I shall discuss this question in the Introduction.

Kṛishṇa's commentary contains 46 introductory verses. In these, he gives an account of how he undertook to write his commentary on प्रक्रियाकौमुदी. It was undertaken to teach कल्याण, son of वीरवर (Birbal?), son of गङ्गादास, son of रूपधर, who was a petty king of पत्रपुञ्ज in the kingdom of उदुम्बरहार in आर्यावर्त. The opening verse is :—

अलिकुलमण्डितगण्डं प्रत्यूहव्यूहतिमिरमार्तण्डम् ।
सिन्दूरारुणशुण्डं देवं वेतण्डतुण्डमवलम्बे ॥

The following verse is given at the end of the book and also of different प्रकरण's in it :—

पृथ्वीमण्डलमौलिमण्डलमणिश्रीशेषवंशामलो-
त्तंसश्री**नरसिंहसूरि**रभवत् प्रत्यक्षवाचस्पतिः ।
तत्सूनोः कृतगूढभावविवृतौ सत्प्रक्रियाव्याकृतौ
श्रीकृष्णस्य कृतौ समाप्तिमगमत् सा वैदिकी प्रक्रिया ॥

समाप्तिमगमत् संज्ञा **प्रकाशोऽग्रिम**: &c., at the end of different प्रकरण's.

The commentary is called सत्प्रक्रियाव्याकृति by कृष्णाचार्य. Pandit जगन्नाथ, author of रसगङ्गाधर, calls it प्रकाश and so does चक्रपाणिदत्त in his प्रौढमनोरमाखण्डन. This will be dealt with fully in the Introduction. The manuscript of the commentary consulted is designated K. It belongs to the Government Collection, Poona.

The *Manoramâ* by Bhaṭṭoji Dîkshita is also consulted for the text of the commentary; since the Dîkshita has criticized the *Prakriyâ Kaumudî*, the *Prasâda,* and the *Prakâśa* in many places. The edition consulted is the lithographic edition of Benares of *Saṁvat* 1929. It is designated M.

INTRODUCTION

The Predecessors of Pâṇini—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः ॥—

This verse from Bopadeva's '*Kavikalpadruma*' mentions eight ancient schools of grammar. The names of grammarians met with in Pâṇini's '*Ashṭâdhyâyî*' are given in Index I. The *Aindra* and the *Chândra* schools were developed in Nepal; and the practical Bengalis, somehow feeling aversion to the Pâṇini's system which they found hard, adopted the easier systems of *Kâtantra, Mugdhabodha, Sârasvata, Saṁkshiptasâra,* and *Supadma.* Of these, the systems of *Kâtantra* and *Mugdhabodha* are frequently referred to in the *Prakriyâkaumudî* and the commentary *Prasâda.* It will not therefore be out of place if some information is given about these two systems.

The Kâtantra.—The system of *Kâtantra* is older than that of the *Mugdhabodha.* The word कातन्त्र means a small work. In his *Pañjikâ,* Trilochanadâsa explains the word as under :—

"तात्रि कुटुम्बधारणे चुरादाविनन्तः । तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति 'स्वरवृद्गमिग्रहामल्' [कात० ४।५।४१॥] इति करणेल् प्रत्ययः । स चानेकार्थत्वाद्धातूनां व्युत्पादनेपि वर्तते । तेन तन्त्रमिह सूत्रमुच्यते । ईषत् तन्त्रं कातन्त्रम् । कुशब्दस्य तन्त्रशब्दे परे 'का त्वीषदर्थेक्षः' [कात०२।५।२५॥] इतीषदर्थे कादेशः॥" Kât. p. 466. Thus कातन्त्र was so termed because of

its being a very short and simple work on grammar. It is also called कलाप or कौमार; because its author Śarvavarman* is said according to a tradition to have obtained the *Sûtras* constituting it from the tail (कलाप) of the peacock of कुमार, Śiva's son.† It is divided into four प्रकरण's :—१. संधिः ; २. नाम्नि चतुष्टयम्; ३. आख्यातम्, and ४. कृतः. The संधि is treated in 5 *Pâdas*—the first *Pâda* treats of संज्ञा's, the second, of स्वरसंधि, the third, of प्रकृतिभाव, the fourth, of व्यञ्जनसंधि, and the fifth, of विसर्गसंधि. The second प्रकरण, *i. e.*, नाम्नि चतुष्टयम् deals with nominal declensions. Words ending in vowels and consonants are taken together. The

* Also called Sarvavarman.

† The tradition is as under :—An *Ândhra* king, Śâlivâhana was sporting in water with his queen and sprinkling water over her. She said to him 'मोदकं देहि' (उदकं मा देहि)—Don't throw water over me. The king misunderstanding her as meaning 'मोदकं लड्डुकं देहि' ordered sweet balls to be brought for her. The queen consequently mocked him for his gross ignorance. He was thereupon much ashamed. He then made up his mind to learn Sanskrit and ordered the Pandit Sarvavarmâchârya to teach him grammar in an easy way. In this difficulty Sarvavarman is reported to have adored *Śiva* and got the *Sûtras* he wanted from the tail (कलाप) of the peacock of *Kumâra*. The grammar is consequently known as *Kalâpa* and also *Kaumâra*.

This legend is narrated in a work called कलापव्याकरणोत्पत्तिप्रस्ताव by वनमालिद्विज—'स च सर्ववर्माचिरेणैव कालेन राजानं व्याकरणसंस्कृतं कर्तुं प्रतिज्ञाय महादेवस्याराधनां कृतवान् । देवस्य च शंभोरनुज्ञया कार्तिकेयमाराध्य शिखिवाहनस्य शिखिनां कलापात् व्याकरणं संगृह्य राजानमल्पकालेनैव व्याकरणाभिज्ञं कृतवानित्यस्य कलाप इति नामासीदिति कथनम् ।'-Notice of Sanskrit Manuscripts, Calcutta, 1894, p. 29.

first word declined, for instance, is दृषद् of which the forms can be made up by adding terminations without any change except that of Saṁdhi. In place of *Pâṇini's* technical terms सर्वनामस्थान and घि we have घुट् and अग्नि ('पञ्चादौ घुट्' २।१।३॥ and 'जश्शसौ नपुंसके' २।१।४॥ and 'इदुदग्निः' २।१।८॥). नदी, संबुद्धि, and उपधा, the terms used by *Pâṇini* are adopted in the *Kâtantra* also. आकारान्त words are called श्रद्धा ('आ श्रद्धा' २।१।१०॥). The third *Pâda* of the second प्रकरण deals with pronominal declensions and also of nouns and numerals. The fourth *Pâda* treats of the declensional peculiarities of अव्ययीभाव compounds, अव्यय's, तद्धितान्त words designating names of countries and their kings ('रूढानां बहुत्वे स्त्रियामपत्यप्रत्ययस्य' २।४।५॥–The क्षत्रिय's having the same names as those of their countries are called रूढ–'जनपदसमानशब्दानां क्षत्रियाणां रूढसंज्ञा' दुर्ग° on २।४।५॥—as अङ्गाः। वङ्गाः। कलिङ्गाः। पञ्चालस्यापत्यानि पञ्चालाः), *Kârakas*, changes of म् and न् to अनुस्वार or the nasal corresponding to the following letter, and changes of न् and स् to ण् and ष्. This comprehensive *Pâda* is called कारकपाद. The fifth *Pâda* deals with compounds and the sixth, with तद्धित's. The third प्रकरण treats of verbs (आख्यात). The following are the words used for tenses and moods :—वर्तमाना (लट्), परोक्षा (लिट्), अद्यतनी (लुङ्), ह्यस्तनी (लङ्), क्रियातिपत्ति (लृङ्), श्वस्तनी (लुट्), भविष्यन्ती (लृट्), आशीः (आशीर्लिङ्) पञ्चमी (लोट्), and सप्तमी (लिङ्). The first *Pâda* treats of the senses of tenses and moods (लकारार्थ). The second deals with प्रत्यय's :—सन्, यिन् (as in पुत्रीयति), काम्य, आयि (as in श्येनायते), इन् of कारित (the Causal), य of चेक्रीयित (यङ्) आम् (as in उषांचकार), सिच्, सण् (क्स of the Aorist), चण्, अण् (अङ्), यण् (कर्मणि भावे वा यक्), the विकरण's or conju-

d [P. K.]

gational signs—अन् (of the 1st Conj.), यन् (of the 4th), नु (of the 5th), नशब्द (of the 7th), उ (of the 8th), ना (of the 9th), and the *Parasmaipada* and the *Âtmanepada* forms which roots assume when preceded by prepositions (पदव्यवस्था). The third *Pâda* deals with reduplication, the fourth, with *Samprasârana*, the Perfect and the Aorist, and the *Pâdas* from the fifth to the eighth finish the treatment of tenses. The last प्रकरण deals with कृत्प्रत्यय's. It is divided into six *Pâdas*, the last treating of Past Participles and Indeclinable Past Participles.

The Kâtantra follows the *Pâṇini* and tries to put it in a simpler form. It has no प्रत्याहार's. Most of the *Sûtras* are almost the same as in the *Pâṇini* in their wording as:—

'इन् हन् पूषार्यम्णां शौ च' २।२।२१॥
'उशनः पुरुदंशोनेहसां सावनन्तः' २।२।२२॥
'पन्थिमन्थ्यृभुक्षीणां सौ' २।२।३५॥

It is defective in arrangement, the treatment of the *Kârakas*, terminations of the feminine gender, the indeclinables, &c., and of all conjugations and tenses being mixed together without any classification and method. Some of the *Sûtras*, as those in the fourth *Pâda* of the second प्रकरण form verses in the अनुष्टुम् metre. The chief merit of the work is its simplification. A student of *Pâṇini* can go through it very easily.

The *Mugdhabodha*.—It was composed by Bopadeva in the middle of the 13th century in the Marâṭhâ country, then under the rule of the Yâdava kings

of Devagiri. Unlike the *Kâtantra* grammar, it accepts the प्रत्याहार's, but lessens their number to 10 in place of *Pâṇini's* 14. It invents new संज्ञा's, such as:

सु (ह्रस्व), अर्घ (दीर्घ), प्लु (प्लुत), नु (अं), वी (अः), र्ण (सवर्ण), णु (गुण), त्रि (वृद्धि), गि (उपसर्ग), क (sing.), द्व (dual), व्व (plu.), त्य (पर), झस् (हकार), गि and नि (चादि), घु (धातु), and त्कि (सुप् and तिङ्).

The treatment of the different subjects is as under:—

We have first संज्ञाप्रकरण. It is followed by the treatment of संधि's—अच्संधि, हस्संधि, (हल्संधि), and त्रि-संधि (विसर्गसंधि). This concludes the 1st or संध्यध्याय. Then comes the अजन्ताध्याय, dealing with declensions of words ending in a vowel. Here we have some संज्ञा's, such as प्री, द्वी, त्री, ची, पी, षी, ही for sing., dual, and plu. terminations of the seven cases in order. The प्रातिपदिक is called लि and सर्वनाम, स्चि. After अजन्ताध्याय we have हसन्ताध्याय and अव्यय's. This is followed by स्त्री-प्रत्यय, कारक, समास, and तद्धित, forming स्याद्यन्ताध्याय. Thus ends what corresponds to the 1st half (पूर्वार्ध) of the *Prakriyâkaumudî*. We have then the treatment of verbs and participles. The terminations of the Present, Par. and Âtm. are called की, those of the Potential, खी, those of the Imperative, गी, Imperf., घी, Aorist, टी, Perfect, ठी, 1st Fut., डी, Bene., ढी, 2nd Fut., ती, and Cond., थी. धातु is called घु. We have first the treatment of पवत् (भ्वादि परस्मै॰), then मवत् (भ्वादि आत्म॰), and मिश्र (भ्वादि उभय॰). This is followed by अदादि, ह्वादि, दिवादि, स्वादि, तुदादि, रुधादि, तनादि, क्र्यादि, and चुरादि—

ten conjugations in order. Next comes ण्यन्त (णिजन्त), सनन्त, यङन्त, and लिघु (Denominatives). Then follow chapters dealing with पदव्यवस्था, designated पम् (treating of roots assuming Par. with certain Prep.) and मम् (dealing with roots assuming Âtm. with Prep.), ढभाव (Passive), and क्ति (लकारार्थ). The last is the कृदन्ताध्याय dealing with त्य (कृत्य) प्रत्यय's, तृनादि, क्तादि, and इष्ण्वादि. *kṛit* terminations.

It will thus be seen that though the work does not afford as much facility to understand it as the *Kâtantra* to the student acquainted with the *Pâṇinian* system, the संज्ञा's are such as can be easily grasped and the treatment of the subjects is very methodical. It has afforded a basis for the arrangement of the *Sûtras* of *Pâṇini* according to the subjects treated therein. It being a small work, several works are composed as its परिशिष्ट's.

The way paved—It will thus be seen that the systems of the *Kâtantra* and the *Mugdhabodha* paved the way to students of *Pâṇini* who were not satisfied with the *Kâśikâ*, which, though an exhaustive वृत्ति on the *Sûtras*, explained them in the order of the *Ashṭâdhyâyî*, to recast the *Sûtras* of *Pâṇini* according to the subjects treated therein to facilitate the study of the learner. Several attempts were made in this direction before the composition of the *Siddhântakaumudî* by Bhaṭṭoji Dîkshita. The *Rûpâvatâra* of Dharmakîrti and the *Rûpamâlâ* of Vimalasarasvatî are the chief of them that have come down to us besides the *Prakriyâkaumudî* of our author.

The Rûpâvatâra—The *Rûpâvatâra* is composed by Dharmakîrti. The order of the subjects treated in it is the same as in the *Prakriyâkaumudî.* The chapters in it are called *Avatâras.* The first chapter is called संज्ञावतार. It is much smaller than that in the *Prakriyâkaumudî.* It is followed by संहितावतार, dealing with six kinds of संधि's—तुक्संधि, स्वरसंधि, प्रकृतिसंधि, व्यञ्जनसंधि, विसर्जनीयसंधि, and स्वादिसंधि. We have then विभक्त्यवतार dealing with declensions. In this we have the broad senses of cases given when they are first dealt with, as 'कर्मणि द्वितीया', 'कर्तृकरणयोस्तृतीया', 'चतुर्थी संप्रदाने', 'तादर्थ्ये चतुर्थी', &c., and also the etymology of some irregular words given, as 'लक्ष्मी—'लक्षेर्मुट् च', स्त्री—'स्त्यायतेड्ट्'. अजन्त words are taken up before हलन्त words. Next come अव्ययावतार, स्त्रीप्रत्ययावतार, कारकावतार, समासावतार, and तद्धितावतार. Thus ends the पूर्वभाग. The उत्तरभाग dealing with verbs is called धातुप्रत्ययपाञ्चिका in the introductory verse—

प्रणम्य शिरसा देवीं बालानां हितकारिणीम् ।
यथासारं प्रवक्ष्यामि धातुप्रत्ययपाञ्चिकाम् ॥

The colophon at the end of Mss. of the work—इति रूपावतारः समाप्तः—shows that it is the same work.*

The *Rûpâvatâra* is quoted in the *Prasâda.*† The following verses are found both in the *Rûpâvatâra* and the *Prakriyâkaumudî* :—

* *Vide* P. 3 *Rûpâvatâra* P. I. by Rao Bahadur M. Rangacharya.

† *Vide* Index III.

एकस्मात् ङञणवटा द्वाभ्यां षश्चिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ॥

(in both, we have the words वचनात् after it), and

सर्वादिः सर्वनामाख्यो न चेद् गौणोथवाभिधा ।
पूर्वादिश्च व्यवस्थायां समोतुल्येन्तरोपुरि ॥
* * * * *
परिधाने बहिर्योगे स्वोर्थज्ञात्यन्यवाच्यपि ॥

But the order in which the *Sûtras* are explained is not the same in both the works. So far as order goes, there is more agreement between the *Prakriyâkaumudî* and the *Siddhântakaumudî* than between the *Rûpâvatâra* and the *Prakriyâkaumudî*, thus showing that Bhaṭṭoji Dîkshita owes much to the *Prakriyâkaumudî* and has based his work upon it. Indeed, the above common verses seem to be traditional like the following found in many works :—

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥
स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥

The Rûpamâlâ—The *Rûpamâlâ* of Vimalasarasvatî seems to have been composed about the same time as the *Prakriyâkaumudî.* A Ms. of the work in the Deccan College Collection consulted by me bears date *Saṁvat* 1507, while the earliest Ms. of the *Prakriyâkaumudî,* deposited in the Government Sanskrit College, Calcutta, is dated *Saṁvat* 1493. The प्रकरण's in the *Rûpamâlâ* are called माला's and the order in which the subjects are taken up is as under :—

संज्ञामाला, स्वरसंधि, प्रकृतिभाव, व्यञ्जनसंधि, विसर्गसंधि, अजन्तमाला and हलन्तमाला, in which words of all the genders are treated together, सर्वनाममाला, संख्याभागः, नियतलिङ्गमाला, in which are included words like सखि and पति ('सखिपत्यादयश्चानियताभिधेया अपि षण्ढे प्रयोगरहिता इतीह लिख्यन्ते), छान्दसमाला (showing very few Vedic peculiarities—देवासः, द्वा सुपर्णा, कर्णेभिः, परमे व्योमन् &c.), अव्ययमाला (in which are treated तद्धितान्त words used as indeclinables—words ending in च्वि, तराम्, तमाम्), स्त्रीप्रत्ययमाला, कारकभाग, सार्वधातुकमाला (conjugational tenses, a few roots of all conjugations are treated in this section), a large number of roots have their meanings only given (something like धातुपाठ) भावकर्मप्रक्रिया, लुङ्भाग, लृङ्भाग, लुङ्माला, लिङ्भाग, पञ्चमभाग, सनादिभाग (dealing with सन्, क्यच्, क्यङ्, यङ्, णिच्), लकारार्थमाला, तङादिनियमभाग, कृतः, तद्धिताः, समासाः. The *Seṭ* and the *Aniṭ* *Kârikâs* are given in a way different from what is found in the *Prakriyâkaumudî* and the *Siddhânta-kaumudî*. They are as under :—

अनेकाचः श्विश्रिडीङ्शीङ्ऊर्णुस्नुक्ष्णुयुनुक्षुरून् ।
अदूदॄदन्तवृङ्न् हित्वा स्वरान्ता अनिटोखिलाः ॥
शक्ॢ शक्तौ सिचिमुची वचिर्विचिरिची पचिः ।
प्रछिः सञ्जिरुजीरञ्जिस्वञ्जीनिजिविजी सृजिः ॥
&c. &c. &c.

The following *Kârikâ* gives द्विकर्मक roots :—

दुहिप्रच्छचुक्तियाच्आर्थाश्रिआद्या अपि कुत्रचित् ।
द्विकर्मका धातवः स्युः कृषिनीव्हृव्वहस्तथा ॥

and the following *Kârikâ* shows the Passive construction of Primitive and Causal roots :—

कृषादिषु प्रधाने स्युरप्रधाने दुहादिषु ।
ण्यन्तेष्वण्यन्तकर्त्राख्ये कर्मण्यर्थे तङादयः ॥

The authors quoted in the work are माघ, भोज,* वृत्तिकार, वार्तिककार, भाट्ट,† चान्द्र,‡ शाकटायन,§ माध्यंदिनि, || and वररुचि¶ to whom is attributed the composition of उणादिसूत्र's.

आचार्य is quoted in the following verses :—

अदन्तो वृद्ध्यभावाय हनादेशो वधो मतः ।
अनेकाजित्ययं त्यक्तोप्याचार्यैर्दर्शितः पृथक् ॥
हनादेशतया ह्यस्मिन्नपि प्राप्नोत्यनिट्क्रमः ।
यडर्थमामश्चप्राप्त्यै....................

The आचार्य seems to be probably व्याघ्रभूति, for in the *Prakriyâkaumudî* also we find अदन्त roots excluded from the list of *Aniṭ* roots in the *Aniṭ Kârikâ* dealing with roots ending in a vowel and the *Tattvabodhinîkâra* criticizing it, says:—

"यत्तु तद्व्यावृत्तयेनिट्कारिकास्वदन्तपर्युदास उक्तो **व्याघ्रभूतिना** स एव **प्राचा**नुसृतः । 'अदूदृदन्तरुक्षुक्ष्णु°' । स चादन्तपर्युदास इहोपेक्षितः । सूत्राननुगुणत्वात् ॥" तत्त्वबो०, p. 333.

---

* On the *Sûtra* न लोकाव्यय°—

आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम् ।
कोशदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥

इत्यादेस्तु लोकपरिगृहीतत्वान्नास्ति दुष्टता । उक्तं हि **कण्ठाभरणे**—

इदं हि शास्त्रमाहात्म्यं दर्शनालसचेतसाम् ।
अपशब्दवदाभाति न च सौभाग्यमुज्झति ॥

† प्रवर्तनामात्रं विधिरिति **भाट्टाः** ।

‡ यङ्लुगन्तं छान्दसमित्येके । नैवमित्यपरे । भाषामात्रविषयोपि **चान्द्रे** प्रोक्तत्वात् ।

§ **शाकटायनास्तु** अभिधेयलिङ्गेभ्योपि ह्रस्वेदुदन्तेभ्यः परेषां ङितां वैकल्पिकमाटं साटश्च ङेरामादेशमिच्छन्ति ।

|| इकः षण्ढेपि (in Neu.) संबुद्धौ गुणे **माध्यंदिने**र्मते ।

¶ उणादिस्फुटीकरणाय **वररुचिना** पृथगेव सूत्राणि प्रणीतानि । तद्यथा । 'कृवापा°' ।

The Dîkshita has the same in his Manoramâ (*Vide* उत्तरार्धं, p. 8).

It will be seen from the above that the treatment of the different subjects is more systematic in the *Rûpâvatâra* than in the *Rûpamâlâ*.

The Prakriyâkaumudî—The *Prakriyâkaumudî* of Râmachandra is the first exhaustive attempt to classify the *Sûtras* of the *Ashṭâdhyâyî* and arrange them so as to suit a systematic and methodical treatment of the different subjects of grammar dealt with in them. The *Rûpâvatâra* and the *Rûpamâlâ* seem to have been composed about the same time; but Râmachandra does not seem to have utilized either. That Dharmakīrti preceded Viṭṭhalâchârya, his grandson, is clear; because the *Rûpâvatâra* is quoted in the *Prakriyâprasâda*. Neither the *Rûpâvatâra* nor the *Rûpamâlâ* seems to have been as popular as the *Prakriyâkaumudî** which has been used as a basis for his *Siddhânta-kaumdî* by Bhaṭṭoji Dîkshita. The order of the *Sûtras* and the very wording of the *Vṛittis* to them are almost the same in the *Kaumudî* as in the *Prakriyâ*.

The Prakriyâ and the Kaumudî—Though the order of the different subjects dealt with and of the *Sûtras* relating to them is almost identical in both, there are two broad points of difference between the works:—1. Râmachandra omits explaining a number of *Sûtras* which are not required in the formation of the forms given by him like the *Rûpâvatâra* and the *Rûpamâlâ*, the number of omitted *Sûtras*, however, is not so large in the *Prakriyâ* as in the two other works. On the other hand, the Dîkshita explains all the *Sûtras*. 2. Râmachandra takes a

---

* *Vide* the Colophon of D_4—यस्याः प्रसादमासाद्य कुर्वन्ति कवीश्वराः ।

e [P. K.]

more liberal view than the Dîkshita, accepting as correct forms recognised by systems of grammar other than that of *Pâṇini*, such as the *Kâtantra*, the *Mugdhabodha*, and *Vyâghrapâda*; while the Dîkshita invariably follows the system of *Pâṇini*—the three *Munis*, Pâṇini, Kâtyâyana, and Patañjali. The Dîkshita, particularly on this ground and also on other grounds finds much to criticize in the *Prakriyâ* and the *Prasâda*. Indeed, he criticizes them and also the *Prakâśa* of Krishṇa on almost every page in his *Manoramâ*. Râmachandra and his two commentators are attacked in many places as प्राञ्चः,*

---

* 1. 'यत्तु **प्राचा** (राम॰) गवे इति प्रत्युदाहृतं तन्न ॥' मनो॰ पूर्वा॰, p. 8.

2. 'अत्र **प्राचोक्तं** (राम॰) दृशिग्रहणात् कर्मव्यतिहारबहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वमात्वं चानचीति तत्रात्वं चेत्यपाणिनीयमत एव मुष्टामुष्टि बाहाबाहवीति उदाहरणमप्यप्रामाणिकमेव। भाष्यादिविसंवादात्। अत एव दृशिग्रहणस्येदृशेर्थे तात्पर्यं न कल्प्यमिति प्रामाणिकः पन्थाः। अर्वाचीनास्त्वात्त्वमाहुः। तथा च **पञ्चिकायां त्रिलोचनदासेनोक्तम्**। नाम्यन्तपूर्वपदस्यात्त्वं दृश्यत इति। एवं च **प्राचा** (राम॰) केचिदिति वक्तुमुचितं पाणिनीयसूत्राशयमध्ये निक्षेपस्त्वनुचित एवेति दिक् ॥' मनो॰ पूर्वा॰ pp. 71-2.

3. '**प्राचा** (राम॰) तु धिन्विकृण्वी स्वादिगणे पठितौ तदयुक्तम्। तथा हि पाणिनीयमते तावदिमौ भ्वादी एव न तु स्वादी। किं च स्वादित्वाभ्युपगमे तत्सामर्थ्यात् पक्षे श्नुः स्यात्। तथा च वस्य ऊठि अनिष्टं स्पष्टमेव। **बोपदेवेन** तु विकरणलोभात् तनादित्वं स्वीकृतं तथा च **प्राचो** (राम॰) ग्रन्थो निरालम्बन एवेत्यास्तां तावत् ॥' मनो॰ उत्त॰, p. 16.

4. "'ओतो गार्ग्यस्य'। ओकारादिति। यत्तु ओकारान्तादङ्गादिति **प्राचा** (विट्ठल) व्याख्यातं तन्न ॥" मनो॰ पूर्वा॰, p. 14.

5. 'एजृ दीप्तौ। कम्पनार्थस्तु परस्मैपदी। एजते कम्पते इति तु **प्राचां** (कृष्ण) व्याख्यानं प्रामादिकमेव ॥' मनो॰ पूर्वा॰, p. 8.

Vitthal as also प्रसादकार† and तत्पौत्र (रामचन्द्रपौत्र), and Krishna as तद्व्याख्यातारः, यत्तु वदन्ति, यद् व्याचख्युः, &c., without any name. The Dîkshita criticizes the form द्व्यह्नी used by Râmachandra in his *Kâlanirṇayadîpikâ* and also the commentary *Vivaraṇa* on it by his son

---

† १. "यत्तु **प्राचा** (रामचन्द्रेण) वेति केचिदित्युक्त्वा सख्यः सुख्य इत्याद्युक्तं यच्च **तद्व्याख्यातृभिः** (कृष्णाचार्यैः) उभयमप्येतद् भाष्ये स्थितमित्युक्तं यच्चात्रोपष्टम्भार्थं **प्रसादकृता**

'सख्युः पत्युः प्रसिद्ध्यै यत् ख्यत्यादित्याह पाणिनिः ।

* * * *

सुख्य इत्यादि साध्वेतदुभयं भाष्यगौरवात् । ' इति

विचारचिन्तामणिस्थश्लोकोपन्यसनं कृतं तदेतत् सर्वं भाष्यकैयटापर्यालोचनमूलकमिति कृतबुद्धय एव विदांकुर्वन्तु ।।' मनो० पूर्वा०, p. 26.

This criticism of the Dîkshita is rebutted by Chakrapâṇi Datta as under :—

'एवं चैतद् भाष्यकैयटापर्यालोचनमूलकमिति केषांचिदुक्तिराशयानवबोधनिबन्धनेति ध्येयम् ।।' प्रौढमनो० खण्ड०, p. 88.

2. 'इह **प्राचा** (रामचन्द्रेण) आखूत्थं वर्तत इति नपुंसकं पठितं **तत्पौत्रेण** (विठ्ठल) च तथैवाभिनिवेशेन व्याख्यातं तदुपेक्ष्यम् ।।' मनो० उत्त०, p. 59.

3. 'यत्तु **प्राचोक्तं** (राम०) प्रातिपदिकार्थः सत्तेति **यच्च व्याख्यातं** (*i. e* by कृष्ण) योऽर्थः सन्नित्येव केवलं भासते न जात्यादिरूपो न लिङ्गसंख्याकारकयोगी स विवक्षितो यथाव्ययार्थः...... ।तन्न ।' मनो० पूर्वा०, p. 47.

4. "अबोभूवीदिति । **यत्तु वदन्ति** (*i. e.* कृष्णाचार्याः) भाष्यमते 'ओः सुपि' इत्यत् ओरित्यनुवृत्तेरनित्यो वुक् पराभ्यां गुणवृद्धिभ्यां बाध्यते तेन अबोभवीदिति । तच्चिन्त्यम् ।। " मनो० उत्त०, p. 37.

5. "यच्च गण्डयन्त इति प्रतीकमुपादाय मेघनामेदमिति व्याख्याय गण्डिवदनैकदेशो इति **व्याख्यातृभि**(कृष्णाचार्यैः)र्विवृतं तदेतत् सर्वं प्रामादिकम् ।।' मनो० उत्त०, p. 96.

Nṛisiṁha.‡ The very large space, which is thus devoted in the *Manoramâ* to the criticism of Râmachandra's *Prakriyâ* and the commentaries, *Prasâda* of Viṭṭhala and *Prakâśâ* § of Kṛishṇa

---

‡ "यत्तु प्राचा (रामचन्द्रेण) कालनिर्णयदीपिकायां

पूर्वा स्यान्नवमी शुभाथ दशमी

कालास्पृगाद्याथ सा

वृथह्नी कालयुगादिमोत्तरयुता (मनो० गता for युता)

चाथोत्तरैकादशी

इति श्लोके वृचह्नीति प्रयुक्तं सा दशमी वृयोरह्नोर्भवा वृथह्नीत्यादि च तद्विवरणे व्याख्यातं तत् सर्वं प्रामादिकमिति भाव: ||" मनो० उत्त०, p. 67.

§ Kṛishṇa calls his commentary सत्प्रक्रियाव्याकृति; but it is designated प्रकाश by Jagannâtha:—

'इह केचित् (*i. e.* भट्टोजिदीक्षिता:)... शेषवंशावतंसानां श्रीकृष्णपण्डितानां चिरायार्चितयो: पादुकयो: प्रसादासादितशब्दानुशासनास्तेषु च पारमेश्वरं पदं प्रयातेषु तत्र भवद्भिरुल्लासितं प्रक्रियाप्रकाशं ...दूषणै: स्वयं निर्मितायां मनोरमायामाकुल्यकार्षु: ||' pp. 3-4 Intro. to रसगङ्गा०.

It is also called प्रकाश in the प्रौढमनोरमाखण्डनम् by श्रीचक्रपाणिदत्त. This work justifies प्रक्रिया and प्रकाश, rebutting the criticism of the Dîkshita there-on in the *Manoramâ*. चक्रपाणिदत्त uses प्राञ्च् for रामचन्द्र and प्रकाशकृत् for कृष्ण as in the following:—

'निर्जरसैरित्यादावैकारश्रवणमैस: फलमिति प्राचोक्तयस्तु वृत्तिकृदुक्त-मतान्तरानुसारिण इत्यवधेयम् ||' प्रौढमनो० खण्ड०, p. 65.

'तद् शिव इत्यत्र जश्त्वे कृते इति प्रक्रियाकौमुदी क्विबन्ततनोतिनिष्पन्न-ताच्छब्दपरत्वेन प्रकाशे व्याख्याता तेन न दान्तस्य जश्त्वोपन्यासवैयर्थ्यदोष: ||' प्रौढमनो० ख०, p. 37.

'अत्र प्रेजतीति मूलोदाहरणमभिप्रेत्य एजृ कम्पन इति प्रकाश: । कम्पनार्थस्य एजतेः परस्मैपदित्वादिति बोध्यम् । एवं च । अनियोगोवधारणभिन्ने संभावने । तथा च

अनवक्लृप्तौ यदा दृष्ट: पररूपस्य गोचर: ।

एवस्तु विषयो वृद्धेर्नियमेयं यदा भवेत् ||

makes it quite evident that these works were very popular in his time and the *Prakriyâ* was used as a model for the *Kaumudî.*

'इति श्लोकवार्तिकमिति **प्रकाशः** । तत्र वृत्तौ भवं वार्तिकम् । अध्यात्मादित्वाइञ् बोध्यम् । तेन वार्तिकोक्ती रभसादिति केषांचिदुक्तिः सैव राभसिकीति ध्येयम् ॥' प्रौढमनो० ख०, p. 27.

चक्रपाणिदत्त was the son of वीरेश्वर and grandson of कृष्ण:—
' सा (मनोरमा) च **प्रक्रियाप्रकाशकृतां** पौत्रैः...... अस्मद्गुरुपण्डितवीरेश्वराणां तनयैर्दूषितापि......' रस० Intro., p. 4.

We find वटेश्वर in place of वीरेश्वर in the introductory verse in प्रौढम० ख० as under:—

विरोधिनां तिरोभावभव्यो यद्भारतीभरः ।
वटेश्वरं गुरुं शेषवंशोत्तंसं भजामि तम् ॥

चक्रपाणिदत्त has composed another work, प्रक्रियाप्रदीप—' तस्मादुक्तरत्नानुवृत्त्यर्थं तदित्यस्मत्कृतप्रदीपोक्त एव निष्कर्षो बोध्यः ॥' प्रौढम० ख०, p. 47 ; and ' अन्यत्त **प्रक्रियाप्रदीपा**दवधेयम् ॥' प्रौढम० ख०, p. 120.

सत्प्रक्रियाव्याकृति is known as प्रकाश, probably from the word प्रकाश used by Krishṇa in the concluding verse in his commentary on the 1st chapter, dealing with technical terms (संज्ञाप्रकरण) as under :—

पृथ्वीमण्डलमौलिमण्डलमणिः श्रीशेषवंशामलो-
त्तंसश्रीनरसिंहसूरिरभवत् प्रत्यक्षवाचस्पतिः ।
तत्सूनोः कृतगूढभावविवृतौ **सत्प्रक्रियाव्याकृतौ**
श्रीकृष्णस्य कृतौ समाप्तिमगमत् **संज्ञाप्रकाशो**ऽमिमः ॥

Mahâmahopâdhyâya Haraprasâda Śâstri has erred when he says, '*Prakriyâprakâśa* was a recast of Pâṇini's *Sûtras* in practical shape by Krishṇa Paṇḍita of the *Sésha* family in the *Ândhra* country referred to in connection with the *Prakriyâkaumudî*. *Vide* Catalogue of Mss. 1905, Calcutta, p. VIII. It is a commentary and not an original work.

Râmachandra and Viṭṭhala.—The following information is gathered about the author and his grandson Viṭṭhala from the introductory and the concluding verses given in the *Prakriyâ* and the *Prasâda* :—

The family of Râmachandra belonged to the *Ândhra* country. His गोत्र was काण्डिन्य. Viṭṭhala praises him as an incarnation of *Śambhu*. He was as it were, शेष, पाणिनि, or वररुचि, or शिव himself descended on earth. He was a ऋग्वेदी, competent enough to expound all the branches of learning, son of Kṛishṇa and great-grandson of Anantâchârya. The family was accordingly known as *Śesha* family. Râmachandra was otherwise called Râghavendra. He was saluted by all ascetics. He conquered all controversialists in literary controversies. He taught fourteen branches of learning including the *Mahâbhâshya* of Patañjali to his pupils. He was the author of three works :—1. प्रक्रियाकौमुदी ; 2. कालनिर्णयदीपिका ; and 3. वैष्णवसिद्धान्तसद्दीपिका. His son Nṛisiṁha has composed a commentary called कालनिर्णयदीपिकाविवरण on his work कालनिर्णयदीपिका, in which he mentions the name of Râmachandra's teacher as Gopâlaprasâda. The verse composed by Râmachandra himself in praise of his preceptor is given in the *Vivaraṇa* and quoted by Viṭṭhala in his *Prasâda.** Besides the *Prakriyâprasâda*, Viṭṭhala has composed a commentary on Vaishṇavasiddhântadîpikâ, called *Nyâyasnehaprapûraṇi.*†

* *Vide* the verse सद्विद्यानिलयः°, p. 4.

† *Vide* the उत्तरभाग of प्रक्रियाकौमुदी.

Viṭṭhalâchârya praises the *Prakriyâkaumudî* as full of depth of sense, though measured in words. It is an ocean containing gems of good words, full of the correct maxims of Patañjali and embracing his own views and those of others. He states, 'Though unequal to the task of expounding such a deep work I should not be laughed at by the learned; for my attempt is to restore the correct text of Râmachandra's work; for the *Prakriyâkaumudî* is sullied by many who prided themselves upon their learning (पण्डितंमन्य), by introducing many interpolations (प्रक्षेप). My commentary *Prasâda* is intended to purify the work of those interpolations which sully it. Râmachandrâchârya has omitted to explain some of the *Sûtras* of *Pâṇini*, thinking them to be very clear and consequently requiring no elucidation. I shall explain these and also the *Uṇâdi Sûtras* and those dealing with accent (स्वर), and also give the *Gaṇas* and the maxims suggested by words. My commentary should not be branded as very profuse; for abridging it into a narrower compass would be of no use. It would, on the contrary, mar it; for I have looked over the works of many learned men and have given the substance of their views to satisfy the learned reader. My commentary will please those who are anxious to know the *Bhâshya*, the *Vṛitti*, and Bhartṛihari's works.' In explaining the introductory verse 'श्रीमद्विट्ठलमानम्य°' of Râmachandra, *Viṭṭhala* describes Gopâlaprasâda and Kṛishṇâchârya as teachers of Râmachandra. He observes at the end of the 1st half (सुबन्तप्रक्रिया), "I look

upon none as clever as Râmachandra in his mastery of पद (व्याकरणशास्त्र), वाक्य (मीमांसाशास्त्र), and प्रमाण (न्यायशास्त्र). His words, though clear, suggest different senses." Râmachandra's son was Nṛisiṁhâchârya, who was devoted to the worship of Harihara and whose son was Viṭṭhala by Mâṇikâmbâ.

In the commencement of his commentary on the verbs (तिङन्त) Viṭṭhala describes Râmachandra as a great Vedântist. He quotes a verse, probably from the *Vaishṇavasiddhântasaddîpikâ*, in proof of his statement.*

At the end of his commentary Viṭṭhalâchârya gives a long description of his ancestry. He commences by saluting God *Viṭṭhala*. He then salutes Pâṇini, Vararuchi, and Śesha (Patañjali) and others who have composed *Sûtras* and *Bhâshyas* which serve as boats to enable us to cross the ocean of the science of words (Grammar) which is measured even by God Indra (referring to *Aindra* grammar). The family is described as devoted excessively to the *Vaishṇava* doctrine and well versed in the knowledge of the *Ṛigveda* and as containing men capable of expounding the principles of the *Pâñcharâtra* philosophy. Anantâchârya was born in such a family. He was son of Avimukta. He was another God *Siva* and his fame pervaded the three worlds. He had a pupil named Râmasvâmî. His son was Nṛisiṁha, proficient in the *Vedas*, the *Śâstras*, the science of

* *Vide* the verse कुले यस्मिन् दैवं &c., उत्तरार्धं.

mathematics and astrology and the *Nyâya*, *Vaiśeshika*, and *Mîmâṁsâ* philosophies. He explained सौदर्शन भाष्य before the assembly of the learned. He had sons, Gopâlâchârya, Kṛishṇâchârya, &c. Though Kṛishṇâchârya was younger than Gopâlâchârya in years, he was older than he in wisdom. All the lores chose him for their residence; so the learned called him *Śrîkṛishṇa* himself. Kṛishṇâchârya had two sons, Nṛisiṁhâchârya and Râmachandrâchârya. This young son Râmachandra has composed several works for the development of the intellect of the learned, which, when properly studied, make even an ordinary person a *Paṇḍia*. His son was Nṛisiṁhâchârya, Viṭṭhala's father. He acquired knowledge in all branches of learning from the preceptor Kṛishṇa. He was an incarnation of *Hari* to revive all धर्म and विद्या that were destroyed in the *Kali* age. Viṭṭhala concludes as under:—

'I bow to the preceptor Râghava, the best of ascetics who made his devoted pupils well versed in all branches of learning, who conquered all opponents, established the excellence of the *Advaita* philosophy, and corrected the *Bhâshya* and other works. I bow to the preceptor Râmeśvara, the ocean of merits, son of Kṛishṇa, who subdued the whole world by his knowledge and worldly experience. I also bow to Ananta, son of the preceptor Viṭṭhalâchârya, of polished manners, who conquered all controversialists, who was well versed in the science of

grammar and the philosophies of *Nyâya* and *Mîmâṁsâ*. I bow to Nâganâtha, son of Kṛishṇa, who was lord of learning and who vanquished the best of controversialists. I worship the learned Râmachandra, the best of preceptors, son of the preceptor Gopâla. I salute Jagannâtha, an ascetic, proficient in the *Vedânta*, well versed in grammar, *Mîmâṁsâ*, and *Nyâya* and always devoted to religious duty.'

The following additional information is secured from the concluding verses of the *Kâlanirṇayadîpikâvivaraṇa* :—

Kṛishṇâchârya, grandson of Anantâchârya, was proficient in 18 branches of learning beginning with the *Vedas*. He explained the *Sûtravṛitti* in the court of king Râma. Râmachandra is described as devoted to fraternal affection and as having composed various works of learning in the assembly of the learned. His elder brother's son Kṛishṇa acquired his art of authorship from him. He (Kṛishṇa) was the ocean of mercy and knowledge and composed commentaries on poetical works. 'This Kṛishṇâchârya was my teacher,' says Nṛisiṁha, father of Viṭṭhala, 'and it is through his favour that I have composed the *Vivaraṇa*.'

The following genealogical table shows the genealogy of the family and all other information given in the above verses :—

- **अनन्ताचार्य** (शेष, son of अविमुक्त; pupil रामस्वामी; गोत्र कौण्डिन्य; वेद ऋग्वेद; वैष्णव, clever in expounding पाञ्चरात्र आगम).
  - **नृसिंह** (clever in निगम, आगम, न्याय, वैशेषिक, मीमांसा, and गणित; expounded सौदर्शन भाष्य)
    - **गोपालाचार्य**
    - **कृष्णाचार्य** (versed in 18 branches of learning, expounded सूत्रवृत्ति in the court of राम)
      - **नृसिंह**
        - **कृष्ण**
          - **रामेश्वर**
            - **विट्ठलाचार्य**
              - **अनन्त**
          - **नागनाथ**
            - **गोपालगुरु**
              - **रामचन्द्र**
      - **रामचन्द्र** (author of 1. प्रक्रिया-कौमुदी, 2. काल-निर्णयदीपिका, and 3. वैष्णव-सिद्धान्तदीपिका; his गुरु's गोपालप्रसाद and कृष्णाचार्य)
        - **नृसिंह** (author of काल० दी० विवरण; his गुरु, कृष्ण)
          - **विट्ठल** (1. प्रक्रि० प्रसाद and 2. न्यायस्नेहप्रपूरणी a com. on वैष्णव०, his गुरु, राघव or रामेश्वर)

यतिराज जगन्नाथाश्रम

Râmachandra's age.—There is a manuscript of the *Prakriyâkaumudî* which enables us to ascertain

the age of Râmachandra very easily. It is copied in the *Saṁvat* year 1583, Śaka 1448 by the author's great grandson ('श्रीरामचन्द्राचार्यसुतसुतसुतेनालेखि'). It is collated by me and designated D_3. On the ground of this manuscript Dr. Bhandarkar places the author in the 15th century, saying, 'If the great grandson of Râmachandra lived in A.D. 1527, Râmachandra must have lived about 1450 A.D.'* I have noticed a very old manuscript of the work. It is dated *Saṁvat* 1493, A.D. 1437. It contains the उत्तरार्ध only and is 'by appearance very old, worn out, torn, and the writing slightly injured in parts.'† From this it is clear that our author lived in the latter half of the 14th century.

The *Kâlanirṇayadîpikâ*, another work of Râmachandra, gives in a simpler form all that is discussed in the '*Kâlanirṇaya*,' and the fact that the name of the author of the work which is simplified by Râmachandra is not given by him points to only one conclusion, *viz.*, that the work was prevalent and popular in his time. The concluding verse of Râmachandra's work is :—

दुर्बोधग्रन्थसिद्धान्तध्वान्तसंघातभञ्जिका ।
सुश्लक्ष्णाकारि रामार्यैः कालनिर्णयदीपिका ॥

This *Kâlanirṇaya* must be, therefore, Mâdhava's *Kâlanirṇaya* and the authorities cited in the

* *Vide* Dr. Bhandarkar's Report on the Search of Sanskrit Mss. for 1883-84.

† *Vide* A Descriptive Catalogue of Sanskrit Mss. in the Library of the Calcutta Sanskrit College No. 20 of 1904.

Vivaraṇa by Nṛisiṁha are the same as those found in the *Kâlanirṇaya* of Mâdhava.* Mâdhava flourished in the reign of Bukka I (A.D. 1350—79), whose minister he was. This confirms our conclusion that our author flourished in the latter half of the fourteenth century.

Râmachandra, *Viṭṭhala* and *Hemâdri*—The *Prasâda* and the *Prakriyâ* are quoted by *Hemâdri* in his commentary on रघुवंश (*Vide* 15-69. 'प्रक्रियाप्रसादे वामिति युवामित्यर्थे' and p. 311 of the text and रघु० १२-१९—"प्रक्रियाकौमुद्यां च 'भजनाद्दार्ढ्यमात्रं विवक्षितं न स्त्रीत्वम्' इति" and p. 584 of the text). It is clear from this that *Râmachandra* lived before *Hemâdri*, a predecessor of the commentator *Mallinâtha* who is assigned to the fourteenth century. This confirms the conclusion that our author flourished in the fourteenth century.

Commentaries.—Dr. Aufrecht mentions the following commentaries on the work :—

1. By Kṛishṇa, son of Śesha Nṛisiṁha
2. *Tattvachandra* by Jayanta, son of Madhusûdana
3. By Râmabhaṭṭa
4. *Prakriyâkaumudîprasâda* by Viṭṭhala
5. *Amṛitaśruti* by Vâraṇavaneśa Śâstrî
6. *Satprakriyâvyâkṛiti* by Viśvakarman Śâstrî.

Of these I have consulted the *Prasâda* and Kṛishṇa's commentary and also the

---

* कूर्मपुराण, भविष्यत्पुराण, लिङ्गपुराण, स्कन्दपुराण, ब्रह्मपुराण, अग्निपुराण, वाराहपुराण, विष्णुपुराण, पद्मपुराण, आदित्यपुराण, देवीपुराण, नृसिंहपुराण, गोभिल, व्याघ्र, विष्णु, हारीत, लौगाक्षि, मरीचि, मनु, व्यास, सुमन्तु, शातातप, बृहस्पति, गर्ग, ऋष्यशृङ्ग, कात्यायन, देवल, भृगु, गौतम, शङ्ख, जाबालि, अत्रि, पैठीनसि, बौधायन, नारद, याज्ञवल्क्य, यम, बृहत्पराशर, शिवरहस्य, विष्णुरहस्य, विष्णुधर्मोत्तर, ब्रह्मसिद्धान्त, वासिष्ठसिद्धान्त, ज्योतिःसिद्धान्त, गृह्यपरिशिष्ट, काठकगृह्य, and षट्त्रिंशन्मत are the authorities cited in the *Vivaraṇa* of Nṛisiṁha.

'*Sâra*'† by Kâśinâtha, a manuscript of which was secured from the Deccan College Collection. Of these, the *Prasâda* by Viṭṭhalâchârya is the earliest and the best for the student. It seems to have been very popular. Its Mss. are more available than those of any other commentary, Kṛishṇa's inclusive. It is quoted and criticized along with the *Prakriyâ* by Bhaṭṭoji Dîkshita, and Tattvabodhinîkâra (Jñânendrasarasvatî).* It is an easy commentary, having a clear exposition. It has freely drawn upon the *Kâśikâ*, the *Mahâbhâshya*, the *Vâkyapadîya*, the *Nyâsa*, and the works of Kâtantra, Bopadeva, the *Pâṇinîyamatadarpaṇa*, the *Kshîrataraṅgiṇî*, &c.§

---

† This commentary is not mentioned in Dr. Aufrecht's list.

* १. "ये तु नियोगे त्वय्यैव गच्छेति प्राचो मन्ये स्थितस्य प्रत्युदाहरणस्यानुगुणतया नियोजनं नियोगो व्यापार इति व्याचक्षते तेषां 'यद्वैव पूर्वं ज्वलने शरीरं ममैव जन्मान्तरपातकानाम्' इति लौकिकप्रयोगाः...... न सिध्येयुः" तत्त्व०, p. 20 (रामचन्द्र and विठ्ठल criticized).

2. "तथा चेवमातिचम्वादय इति प्राचोक्तं नादर्तव्यमिति भावः ॥" तत्त्व०, p. 64. (राम०).

3. "प्राञ्चस्तु ह्रस्वदीर्घयोः समाहारद्वन्द्वमकृत्वैव 'विधीयमानोऽप्यण् क्वचित् सवर्णान् गृह्णाति' इति स्वीकृत्य आन्तरतम्यात् ह्रस्वव्यञ्जनयोर्ह्रस्वः दीर्घस्य दीर्घः" इति व्याचक्षते ॥ तत्त्व०, p. 93 (राम०).

4. "प्राचां मते आवव्यशब्दादपि ष्फ एव भवति ॥" तत्त्व०, p. 114 (राम०).

5. "अत्र प्राचोक्तम् । भवतेरिति कर्तृनिर्देशाद् भावकर्मणोर्नोत्त्वमिति । ...... एतच्च प्रक्रियाप्रसादग्रन्थदूषणं मनोरमायां स्थितम् ॥" तत्त्व०, p. 323 (राम० and विठ्ठ०).

§ *Vide* the Index III.

The commentary *Sâra* is mostly based upon it and though the *Prakâśa* of Kṛishṇa attacks it in many places, it borrows much from it.

In addition to the commentaries *Prasâda* and *Nyâyasnehaprapûraṇî*, Viṭṭhala is author of the *Avyayârthanirûpaṇa* according to Dr. Aufrecht.

Another important commentary is the *Prakâśa* of Kṛshṇâchârya. This Kṛishṇa is *not* the same Kṛishṇa that is, the nephew of Râmachandra, as Dr. Bhandarkar believes, when he says, "I think he is the same Kṛshṇâchârya who has written another commentary on the Prakriyâkaumudî."* My grounds for arriving at this conclusion are very cogent. They are as under :—

1. The commentator Viṭṭhalâchârya quotes in his *Prasâda* verses composed by Kṛishṇa, nephew of Râmachandra, to explain the senses of उपसर्ग's. —'कृष्णाचार्यैं रामचन्द्राचार्यभ्रातृसुतैः कृताः ।'. The commentator Kṛishṇa, however, not only does not allude to these verses, but states that it is not proper to give the sen es of उपसर्ग's for they are endless. He remarks as under :—

" अत्र

'निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्' ॥

इत्यभियुक्तस्मृतेरर्थेयत्तावधारणस्यासंभवात् प्रयोगत एवावगन्तुं शक्यत्वात् शब्दानुशासने चार्थानुशासनस्यानुपयोगादुपसर्गार्था न प्रदर्श्यन्ते विस्तरभयाच्चेति ॥"

* *Vide* Dr. Bhandarkar's Report ton he Search of Sanskrit Mss. for 1883-84.

If he is the same Kṛishṇa that has composed the *Kârikâs* given by Viṭṭhala, he would have said —उपसर्गाणामर्थाश्चास्माभिरन्यत्र (श्लोककारिकायाम्) उक्तास्ते च तत्रैव द्रष्टव्याः or some such words.

2. We have seen that Bhaṭṭoji attacks both Viṭṭhala and Kṛishṇa in his *Manoramâ* and that though he now and then uses तत्पौत्र (रामचन्द्रपौत्र) for विट्ठल, he never uses तद्भ्रात्रीय for कृष्ण. He always criticizes him by the words—'यत्तु वदन्ति,' 'यत्तु व्याचख्युः', 'यत्तु आहुः,' 'यदपि व्याख्यातार आहुः', 'प्राचो ग्रन्थं व्याचक्षाणाः' or some such words. He sometimes uses प्राच्—'इति प्राचो व्याख्यानम्' &c.

3. Kṛishṇa himself shows in the concluding verses of his commentary that he was son of Narasiṁha who was born in the pure family of Śesha. He gives no more information about his family. Moreover, he attacks Viṭṭhala in his commentary in many places by using the word प्राच् for him.*

---

* 1. "एवं स्यातां स्युरित्याद्यपि भवतो भवन्तीत्यर्थे एव निपातौ द्रष्टव्यौ इति प्राचोक्तं तदसत् । अस्ति भवति विद्यतीनामर्थविशेषाभावात् ॥" Ms. pp. 22-23.

2. "यत्तु प्राचा आगमः 'त्रपुजतुनोः षुक्' प्रत्ययः सन्नादिः । आदेशः च्क्षिङः ख्शाञ् इत्युदाहृतं तच्चिन्त्यम् । षुगाद्यन्तानां सूत्रत्वप्रयुक्तोपदेशान्तत्वादेवेत्त्वसिद्धेः । शत्रादिषु तु ऋकारादेरित्त्वार्थमुपदेशत्वं सूत्रत्वेनापि शक्यं वक्तुम् ॥" Ms. p. 24.

3. Com. on मयटि नित्यं वाच्यम्—"अत्र मयड्ग्रहणं प्रत्ययान्तरस्याप्युपलक्षणं तेन तन्मात्रं गुडलिण्मान् इति मात्रच्मतुबादिष्वपि नित्यमेव भवति । तथा च भाष्यम्—'यरोनुनासिकत्वे प्रत्यये भाषायां नित्यवचनम्' इति । अत एव मुग्धबोधे 'ञमे ञम् वा' इत्युक्त्वा 'त्ये' मिति नित्यमित्युक्तम् । त्य इति प्रत्यय उच्यते । 'परस्त्यः' इति लक्षणात् । कातन्त्रे च 'पञ्चमे पञ्चमांस्तृतीयान्न वा' इत्युक्त्वा 'प्रत्ययपञ्चमे पञ्चमान्नित्यम्' इत्युक्तम् । रूपमालायामपि 'प्रत्यये नित्यमिष्यते' इत्युक्तम् । एवं च यत् सोपसंख्यानसूत्रे पाठे भाषायां तद्धितप्रत्यये नित्यमित्युक्तं तत्र तद्धितग्रहणमनर्थम् । यत्तु रूपावतारे अञ्मात्रम् । अञ्मात्रमिति विकल्पोदाहरणं तदवधारणार्थमात्रशब्दस्येति द्रष्टव्यम् । एवं च हलन्तप्रकरणे षण्णाम् षड्णामिति यदुदाह्रियते यत्तु 'यरोनुनासिके°' इति वानुनासिक इति प्राचा व्याख्यातं तदुभयं चिन्त्यम् ॥"

If he was the nephew of Râmachandra, it would be absurd for him to use भ्रातृ for Viṭṭhala, who was his uncle's grandson.

4. In a concluding verse to the *Kâlanirṇaya-dîpikâvivaraṇa* Nṛisiṁha mentions three important facts; *viz.*, (1.) that Râmachandra was the teacher of his nephew Kṛishṇa: (2.) that Kṛishṇa was the teacher of himself, the *Vivaraṇakâra*; and (3.) that Kṛishṇa composed commentaries on poetical works.* Had the same Kṛishṇa composed a commentary on the *Prakriyâkaumudî*, there is no reason why Nṛisiṁha should have omitted to mention it.

5. The commentator Kṛishṇa (*Prakâśakṛit*) and the author of the drama '*Kaṁsavadha*' are the same person and not different persons as mentioned by Dr. Aufrecht in his 'Catalogus Catalogorum,'† because the words पृथ्वीमण्डलमौलिमण्डनमणिः are found in verse 19 of the *Kaṁsavadha* (*Vide* p. 6) and they occur at the end of every section of the commentary on the "*Prakriyâ*" (*Vide* p. 20); because the

* 'तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्
काव्यानां येन टीका व्यरचि स करुणाम्भोनिधिर्ज्ञानसिंधुः ।
श्रीकृष्णाचार्यसंज्ञो गुरुरयमवतान्मां कृपां प्राप्य यस्य
श्रीरामाचार्यसूनुर्विवरणमकरोद्दीपिकायां नृसिंहः ॥'
The Last verse of the *Vivaraṇa*'.

† To कृष्ण or शेषकृष्ण son of नृसिंह or नरसिंह (end of the 16th century) he attributes—कंसवधनाटक, पारिजातहरणचम्पू, and other works; and to कृष्णपण्डित, son of नरसिंह or शेषनृसिंह he attributes पदचन्द्रिका, and वृत्ति, प्राकृतचन्द्रिका, and प्रक्रियाकौमुदीटीका, written at the desire of कल्याण (It was however at the desire of वीरवर, कल्याण's father, for the education of कल्याण).

following words—आर्ये भूषणमेतन्न दूषणं कवीनां व्याकरणकोविदतेति' (*vide* the *Kaṁsavadha,* p. 7)—show that the author of the *Kaṁsavadha* was a great grammarian; and because the following verses occurring in the *Kaṁsavadha*, p. 7

मौलौ मन्दारदामभ्रमदलिपटलीकाकर्लीं श्रोणिबिम्बे*

and रसालंकारसारापि वाणी व्याकरणोज्झिता ।
श्वित्रोपहतगात्रेव न रञ्जयति सज्जनान् ॥

are found among the introductory verses of the *Prakriyâprakâśa* of Kṛishṇa. They are verses Nos. 26 and 34 among the 46 verses of the introduction to the commentary.

Thus there is no doubt that the author of the *Kaṁsavadha* and that of the *Prakriyâkaumudî—Prakâśa* are one and the same Kṛishṇa. This Kṛishṇa has composed the following works :—

1. कंसवधनाटक
2. पारिजातहरणचम्पू
3. प्रक्रियाकौमुदीटीका (प्रकाश)
4. शब्दालंकार
5. पदचन्द्रिका
6. कृष्णकौतूहल, *i.e.*, पदचन्द्रिकाविवरण.

Of these the *Kaṁsavadha* was represented before Giridhârin or Govardhanadhârin, son of Todarmalla, a predominant minister of Emperor Akbar.* It is

* *Vide* p. 4 कंस०–' तत्पादपद्म (तत्=इन्दुशेखर)परिचर्यापर्याप्तसाम्राज्यधुरंधरो गोवर्धनधारिराजश्च' and p. 5—' श्रीतोडरक्षितिपतेस्तनयो नयज्ञः' and 'एकोधितिष्ठति गुरुर्गिरिधारिनामा ।' p. 5.

clear therefore that Kṛishṇa flourished in the 16th century in the reign of Akbar and cannot, therefore, be the same Kṛishṇa, the nephew of Râmachandra, who flourished in the 14th century. Moreover, Kṛishṇa, the author of the *Kaṁsavadha* and the *Prakâśa* belonged to the *Mahârâshṭra*;† while Kṛishṇa, the nephew of Râmachandra, to the *Ândhradeśa*.

The *Pârijâtaharaṇachampû* was composed at the instance of Narottama, younger brother of king Taṇḍavapura on the precincts of *Kâśî*.*

The commentary Prakâśa.—It is a very learned commentary, in some respects superior to the *Prasâda.* It has borrowed much from it and has improved upon it and criticized it in a number of places. In the commentary on 'स्वरादिनिपातमव्ययम्,' Kṛishṇa gives senses of some indeclinables in the very same words as Viṭṭhala. Nay, the very instances given to illustrate the senses are almost the same, it being thus a clear instance of

---

† 'अयं महाराष्ट्राभिजनः शेषोपनामको नृसिंहसूनुः श्रीकृष्णकविः काश्यामकबरबादशाहसमये ख्रिस्ताब्दीयषोडशशतकसमयस्योत्तरभाग आसीत्॥' *Vide* foot-note to कंस० p. 1.

* *Vide* the foot-note कंस० p. 1.

borrowing without acknowledgment.* His criticism of Viṭṭhala is in some cases far-fetched.

---

* Examples of borrowing:—

1. "व्युत्पत्त्यादेः फलस्य बालगामित्वात् परोपकारजन्यादृष्टस्यापि (धर्माधर्मौ अदृष्टम्–Marginal explanation) 'यत्करोषि यदश्नासि......मदर्पणम्' इति भगवदुक्तेरीश्वरार्पितत्वात् परगामिक्रियाफलमित्यात्मनेपदभावः ॥" Ms. of प्रकाश, p. 7.

2. "ननु 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यत्र 'सुपि स्थः' इत्यतः सुपीत्यनुवर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थमित्युक्तं तत् कथमत्र णिनिः।...... अन्यथा अजाताविति किम्। ब्राह्मणानामन्त्रयितेति प्रत्युदाहरणं न संगच्छते। आङ उपसर्गत्वात्। तथा च 'सं कर्मठः कर्मसुतानुबन्धी' इति भट्टिः 'भ्रमरैः कुसुमानुसारिभिः' इति कालिदासोपीति ॥" Ms. of प्रका०, p. 8.

Examples of criticisms:—

1. "एवं स्यातां स्युरित्याद्यपि भवतो भवन्तीत्यर्थे एव निपातौ द्रष्टव्यौ इति प्राचोक्तं (i. e. by विट्ठल) तदसत्। अस्तिभवतिविद्यतीनामर्थविशेषाभावात्॥" Ms. of प्रका०, pp. 22—3.

2. प्रतिज्ञया समधिगम्यमानुनासिक्यं येषां ते तथोक्ता इति मध्यमपदलोपी समास इति केचित् (विट्ठल dissolves it thus) तदसत्। लक्षणाभावात्। तस्मात् प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दो लक्षणया वर्तते तेन समानाधिकरणो बहुव्रीहिरिति व्याख्येयम् ॥" Ms. of प्रका०, p. 23.

This criticism is far-fetched. If it be accepted, there would be no मध्यमपदलोपी समास. शाक may be taken in the sense of शाकप्रिय by लक्षणा in शाकपार्थिवः. Moreover, वैयधिकरण्येपि समासो भवत्येव यत्र गमकत्वम्।

Sometimes, the attack is made without the name of the author attacked, as in;—

"यत्तु अयन्त्येतामिति श्रीरिति तत् तात्पर्यार्थकथनं न विग्रहवाक्यम्। कर्मणि क्रिपो विधानात्। अयन्तीति कर्त्रर्थतिङन्तस्यासमानार्थत्वात्। वृत्तिसमानार्थेन हि वाक्येन भवितव्यमिति भाष्योक्तेः ॥" Ms., p. 3.

Other works by कृष्ण as gathered from his commentary:—

1. "अत्रापरः प्रयोजनसाधुत्वादिविचारः शब्दालंकारादस्मत्कृतादवधेयः ॥" Ms., p. 8.

2. "उपपादितं चैतन्निपुणतरं पदचन्द्रिकाविवरणे कृष्णकौतूहलेस्माभिः ॥" Ms. p. 11.

3. At the end of the अव्ययप्रकरण:—

"प्रयोगवशादित्यनेनापठिता अपि सुदि वदि रोदसी चिरायेत्यादयो लोके प्रयुज्यमाना निपातत्वेन ज्ञेयाः। ते चास्माभिः **पदचन्द्रिकायां** कारिकाभिः प्रायेण संगृहीताः व्याकृताश्च **कृष्णकौतूहले** तत एव ज्ञेयाः॥"

Two extracts showing the learning of the commentator, and his usefulness to the student:—

1. "तन्त्रं नाम सकृदनुष्ठितस्योभयार्थसमर्पकत्वम् यथोभयोः प्रधानअङ्गानयोर्मध्येवस्थापितः प्रदीपः सकृत्प्रयत्नकृत उभयोपकारको भवति॥" Ms.p. 8.

2, Explanation of पञ्चसंधि—

"एवं तावत् यथाकथंचिच्चत्वारः संधयो भवन्तु नाम (i. e. 1. अच्संधि; 2. हल्संधि; 3. विसर्गसंधि; 4. स्वादिसंधि) । पञ्चसंधिप्रवादस्तु संध्यर्थकत्वात् संज्ञाप्रकरणेपि संधित्वमुपचर्येति समाधेयम्॥"

3. Proving the सार्थकता of the word अव्ययीभाव—

"अनव्ययमव्ययं भवतीत्यव्ययीभाव इत्यन्वर्थसंज्ञा। प्रायेणाव्ययीभावे पूर्वपदमव्ययं समुदायो नाव्ययम्। स यदि पूर्वपदवशेन तस्य पूर्वपदस्य यो धर्मोऽव्ययत्वं तं प्रतिपद्यते ततोऽव्ययस्वभावो भवति। एवं च पूर्वपदवशेन तद्धर्मं प्रतिपद्यते। यदि पूर्वपदं प्रधानं भवति नान्यथा। प्रधानवशेन हि वस्तुनः स्वधर्मत्यागेन धर्मान्तरोत्पत्तिर्युक्ता। तथा हि प्रधाने राजनि हसति भृत्या अपि हसन्ति तस्मिन् रुदति तेपि रुदन्ति। न ह्यप्रधाने चेटिकापुत्रादौ। तदेवमन्वर्थसंज्ञा भवति॥"

This whole extract however seems to be a copy of *Nyâsa*. This shows to what extent commentators borrow from others without acknowledgment. *Vide-Nyâsa*, p. 340.

4. On the change of गन्ध to गन्धि:—

"गन्धशब्दोत्र गुणवाची गृह्यते 'गन्धस्य' इत्येकवचननिर्देशात्। यस्तु द्रव्यवाची स प्रायो बहुवचनान्तो दृश्यते। 'वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथते स्रजो विचित्राः' इति। तेन यदा गन्धशब्दो गुणवचनस्तदैवेत्त्वं भवति। यदा तु द्रव्यं वक्ति शोभनो गन्धश्चन्दन यस्मिन् स सुगन्धो मलय इत्यत्र न भवति। अत्र वार्तिकम् गन्धस्येत्त्वे तदेकान्तग्रहणमिति। तत्र केचिदाहुः। तस्यान्यपदार्थस्यैकान्तोवयवः स्वाभाविक इति यावत् तस्यैवेत्त्वं नागन्तुकस्येति। अपरे त्वाहुः। तान्निष्ठतयोपलभ्यमानत्वमात्रं तदेकान्तत्वं विवक्षितं न स्वाभाविकत्वमिति तेन स्वाभाविके गन्धे नित्यमित्त्वमागन्तुके तु व्याख्यातृमतभेदाद्विकल्पः पर्यवस्यतीत्येतत् सिद्धवत् कृत्याह। **आगन्तुकस्येति**। एकवचनान्तस्येत्येतत्तु द्रव्यवचन-

But the commentary is at once very exhaustive and learned. Is was composed by Kr̥shṇa at the desire of Vîravara for the education of his son Kalyâṇa, as mentioned in the introductory verses to the commentary.*

व्यावृत्त्यर्थं तच्च प्रागुपवर्णितम् । सुगन्ध आपण इति । न ह्यापणे उपलभ्यमानो गन्धविशेषः स्वाभाविकः किं तु संसर्गिपुष्पादिद्रव्यसंबन्धादागन्तुकः । अत एव सुगन्धो वायुः सुगन्धिर्वा इत्युभयं भवति । तथा च भारविः । 'महीभृतः पुष्पसुगन्धिरादृदे ।' भट्टिस्तु 'आघ्रातवान् गन्धवहः सुगन्धः' इति । एवं स्थिते "'लग्नवालसहकारसुगन्धीन्' इतीत्वं प्रमादपाठः । गन्धस्येत्त्वे तदेकान्तग्रहणमिति वार्तिकेन गन्धस्य स्वाभाविकत्वे इत्वविधानात् " इति वदन् दुर्घटः परास्तः । तदेकान्तापादने तत्र लक्ष्यमाणतामात्रस्य आकरे स्थितत्वात् ॥"

5. "'ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि ।' 'अधिश्रयन्तीर्जनताः परःशताः' (माघ)—' नाञ्झलौ' इत्यत्र कैयटः । 'कर्तृकरणे कृता बहुलम्' इति बहुलोक्तेः समास इति । अन्ये त्वाहुः ।—सहस्रात् शतात् परा इति विगृह्य 'पञ्चमी' इति योगविभागात् समासः । राजदन्तादित्वात् मयूरव्यंसकादित्वाद्वा परनिपातः । लोकाश्रयत्वाल्लिङ्गस्य न परवल्लिङ्गता । पारस्करादित्वात् सुट् । 'स्त्रियाः पुंवत्'—इति योगविभागात् पुंवद्भावः ॥"

* कल्याणस्य तनूद्भवस्य नृपतिः कल्याणमूर्तैस्ततः
कल्याणीमतिमाकलय्य विषमग्रन्थार्थसंवित्तये ।
कृष्णं शेषनृसिंहसूरितनयं श्रीप्रक्रियाकौमुदी-
टीकां कर्तुमसौ विशेषविदुषां प्रीत्यै समाजिज्ञपत् ॥ ३९ ॥

The genealogy given in these introductory verses is as under:—

रूपधर
|
गङ्गादास
|
वीरवर
|
कल्याण

There was a region called उदुम्बरहार between the Ganges and the Yamunâ and there was a village called पञ्चपुञ्ज in it. रूपधर was king of it.

Viṭṭhalâchârya and Kṛishṇa.—Viṭṭhalâchârya was very modest. He shows his modesty now and then in his commentary.* In the beginning of his commentary on चुरादि's he remarks :—

"नवगणा यथाकथंचिद् व्याख्याताः। धातुप्रक्रियाकथने धार्ष्ट्यमेव कारणम्। सम्यग्ज्ञानाभावात्॥"

He adduces authorities for whatever he says. He does not confine himself to the works of मुनित्रय only. He cites the authorities of *Kaumâra* works, the *Mugdhabodha* and works of the school. The Index III at the end will show how many works he has drawn upon in composing his commentary. In the very beginning of his work he declares his incompetence to do justice to the *Prakriyâ* and states that he has undertaken the work simply because it is much corrupted by interpolations and his object is to free it from these interpolations and to supply the correct text of the author. This shows that the *Prakriyâkaumudî* was very popular in India before the Dîkshita wrote his *Siddhânta-kaumudî*. The criticisms on the *Prakriyâ* and the *Prasâda* by the Dîkshita, *Tattvabodhinîkâra*, and Kṛishṇa indicate how widely it was read. The request of Vîravara to Kṛishṇa to prepare a good commentary for the education of his son Kalyâṇa is an additional ground to establish the popularity of the *Prakriyâ*. While Viṭṭhala is modest and unassuming in his writings, Kṛishṇa is often the reverse of him. The following from among his

---

* *Vide. P.* 2

introductory verses will bear out the truth of my remarks:—

अस्फुटभावा प्रस्फुटदोषाभिहितापसिद्धान्ता ।
असमर्थकपदबन्धा नैषा परं भावयत्यर्थम् ॥ ३६ ॥
संतोषाय विशेष्यभाष्यविदुषां बोधाय दुर्मेधसां ।
व्याख्याम्याकरसाक्षिकं सुविशदं तां प्रक्रियाकौमुदीम् ॥३७॥
केचित् पूर्वनिबद्धसिद्धवचनोपन्यासदक्षाः परे
पौर्वापर्यविरोधबोधविधुरा दृष्टाक्षरग्राहिणः ।
किं तैर्वक्तृभिरत्र यः स्वविभवैरुह्य पूर्वं परा–
नुक्तं वक्ति परिच्छिनत्ति विषमं व्याख्यात्यसौ दुर्लभः ॥३८॥

In the first of these verses Kṛishṇa seems to have Viṭṭhalâchârya in his mind; but as pointed out before, his criticism of the *Prasâda*, is in some places far-fetched and though he borrows much from it, he does not feel himself bound to acknowledge it. The last verse portrays an ideal commentator which Kṛishṇa believes himself to be. What a wide contrast thus between the boastful Kṛishṇa and the modest Viṭṭhalâchârya! But the works of both are good in their own ways and useful to those for whom they are intended.

K. P. TRIVEDI.

Havadia-Chakala,
Surat,
Sept. 1921.

ॐ श्रीगणेशाय नमः ।

अथ प्रसादसमेता प्रक्रियाकौमुदी ।

श्रीमद्विट्ठलमानम्य पाणिन्यादिमुनीन् गुरून् ।

ॐ नमः श्रीगणेशाय[1] । श्रीरामचन्द्राचार्यगुरुभ्यो नमः ।

श्रीमद्विट्ठलमेकमव्ययमजं शब्दात्मकं ब्रह्म यः
स्वेच्छातो जगदुद्भवस्थितिलये हेतुः स्वमायागुणैः ।
यच्छ्वासः श्रुतिसंततिव्यवहृतिस्तं पुण्डरीकाश्रमे
भक्तानुग्रहहेतुतः स्थितमहं वन्दे मुदे[2] संविदे ॥ १ ॥

श्रीशंभुं पाणिनिं श्रीवररुचिमथ वाक्संस्कृतौ दीक्षितं श्री-
शेषं तद्भाष्यहार्दप्रकटनपटुगीः पण्डितान् भर्तृमुख्यान् ।
वृत्तिन्यासादिकर्तॄन् स्वमतपरमतख्यापकान्[3] भोजदुर्ग-
क्षीरस्वामिप्रमुख्यान् प्रगुणमति[4] भजे तन्मतज्ञप्तिहेतोः ॥२॥

किं शेषः पाणिनिर्वा वररुचिरथवा सर्वविद्याप्रणेता
शंभुर्भूमावभूद्भूसुरकुलतिलको ह्यन्ध्रदेशे[5]ऽप्यवंशे[6] ।
ऋग्वेदी सर्वशास्त्रप्रकटनपटुधीः कृष्णजो रामचन्द्रो-
नन्ताचार्यप्रपौत्रो दिशतु कृतिमतिं मे स कौण्डिन्यगोत्रः ॥३॥

वन्दे तं यतिवृन्दवन्दितपदं श्रीरामचन्द्रादियन्[7]-
नामाभाति सरस्वतीपरंपदं[8] वादीन्द्रविद्रावकम् ।
यो विद्याः समदाच्चतुर्दश मुदा श्रीशेषभाष्यादिकाः
शिष्येभ्यो मयि यत्कृपास्ति सततं सच्छास्त्रसंवित्तये ॥ ४ ॥

---

१. After this श्रीविट्ठलाय नमः । पाणिन्यादिभ्यो नमः । Dc_1; श्रीनृसिंहाय Dc_2; श्रीगोकुलाधीशाय श्रीगुरुचरणकमलेभ्यो नमः । Nc_1. २. मुनिं Nc_2. ३. °स्थापकान् Dc_2, Dc_4, Nc_2. ४. °नति Dc_1, Dc_3. ५. नोन्ध्र° Nc_1; °न्ध्रप्रदेशे Dc_4. ६. °प्रवंशे Dc_3. ७. °राघवेन्द्रादि Nc_1, Nc_2, Dc_3. ८. °परपरं Dc_3, Dc_4.

लोकेस्मिन् यदुपक्रमं वीरवृतत्यौदार्यलोकज्ञता
विद्वत्तोपकृतिः क्षमा सुजनता वेदोक्तधर्मादरम् ।
आचार्यं कृतकालनिर्णयमहाग्रन्थार्थसद्दीपिका-
टीकं तं नरसिंहमात्मजनकं वन्दे विदां संमतम् ॥ ५ ॥

गम्भीरार्थां मितोक्त्या कलितसकलसच्छब्दरत्नाकरां श्री-
शेषोक्तन्यायगर्भां स्वपरमतयुतां प्रक्रियाकौमुदीं ताम् ।
व्याकुर्वन् बुद्धिहीनो यदपि तदपि तत्पुत्रजो रामचन्द्रा-
चार्योक्तेः पाठरक्षाकरणगुणतया सज्जनैर्नोपहास्यः ॥ ६ ॥

तथा च पण्डितंमन्यैः प्रक्षेपैर्मलिनीकृता ।
प्रक्रियाकौमुदी तस्याः प्रसादः क्रियते मया ॥ ७ ॥

स्पष्टत्वात् समुपेक्षितानि कतिचिद् व्याख्यातकल्पत्वतो
रामाचार्यवरैरमूनि विशदं व्याख्यामि सूत्राण्यहम् ।
ग्रन्थेस्मिन् स्वरसाधनं कतिपयानौणादिकांश्च ब्रुवे
स्थाने तांश्च गणान् यथामति तथा न्यायान् पदैः सूचितान् ॥८॥

टीकेयं विपुलेति येन विदुषा संक्षिप्यते तस्य नो
लाभः किं तु समीहिताः पुनरमी सर्वे विशेषा हताः ।
येनास्माभिरनेकसूरिरचितग्रन्थार्थमालोच्य[1] तत्
सारं मूलगतं विशेषविदुषां[2] प्रीत्यै प्रकाशीकृतम् ॥ ९ ॥

तत्र तावत् प्रक्रियाकौमुदीं चिकीर्षवः श्रीरामचन्द्राचार्यास्तत्-
समाप्ति[3]प्रचयगमनाभ्यां[4] शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतागुरु-[5]
प्रणामलक्षणं कृतं मङ्गलाचरणं शिष्यशिक्षार्थं मनस्युपनिबध्नन्तो[6] विषय-
प्रयोजनसंबन्धाधिकारिणश्च सूचयन्तः प्रतिजानते । श्रीमद्विठ्ठलमित्यादि ।
श्रयन्त्येतां सर्व इति श्रीर्लक्ष्मीः । ‘ क्विब्वचिप्रच्छ[7]यायतस्तुकटप्रुजुश्रीणां

१. °मालोक्य Dc4, Nc1 (in the Margin). २. समस्तविदुषां Bc1, Dc4.
३. °स्तत्प्राप्तिप्रचय° Dc3. ४. °परिगमनाभ्यां Nc2; °प्रचयगमनपरिपालनाभ्यां
Nc1. ५. विशिष्टदेवता° Dc3. ६. मनसि dropped Dc2, Nc1, Bc1.
७. °प्रच्छा° Dc1, Dc2, Nc1, Nc2.

दीर्घोसंप्रसारणं च' इति क्विप् दीर्घश्च। सा श्रीर्नित्यमस्मिन्नस्तीति श्रीमान्। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इति माङ्गलिके शब्दे प्रयोज्ये ग्रन्थादौ श्रीशब्दप्रयोगः। एतदध्येतॄणां लक्ष्मीसौभाग्यादि भूयादित्येतदर्थम्[1]। तथा च वार्तिककारेणादौ प्रयुक्तो यः सिद्धशब्दस्तद्व्याख्यासमये भाष्य उक्तम्। 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते[2]। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्म[3]त्पुरुषकाणि चाध्येतारश्च सिद्धार्था[4] यथा स्युः' इति। सूत्रकारेणादौ प्रयुक्तो यो वृद्धिशब्दस्तद्व्याख्यायामपि माङ्गलिक इत्याद्युक्त्वा वृद्धिः[5] प्रयुक्तेत्युक्तम्। वेदनं वित् ज्ञानम्। संपदादित्वाद्भावे क्विप्। तेन ठाः शून्याः। 'ठः शून्ये च बृहद्ध्वनौ' इत्यभिधानात्। तानि लाति आदत्ते आत्मीयतया गृह्णाति। ला आदाने। अस्मात् 'आतोनुपसर्गे कः' इति कप्रत्ययः। अज्ञानुग्राहक इत्यर्थः। तथा च श्रीरामचन्द्राचार्यै[6]र्निरुक्तम्।

'विदा ज्ञानेन ठान् शून्यान् लाति गृह्णाति यः स्वयम्।
अज्ञानुग्रहकृद् देवो विट्ठलः कथ्यते बुधैः॥' इति

अनेन भ्रान्तेः पुरुषधर्मत्वेप्यज्ञानुग्रहकृत्स्वभावं[7] श्रीमद्विट्ठलं नमतां[8] भ्रान्तिलेशानवकाशः सूचितः। तं श्रीमद्विट्ठलम्। पाणिन्यादिमुनीन्। पणनं पणः। भावे अच्[9][10]। पणोस्यास्तीति पणी। पणिनोपत्यं पाणिनः। 'तस्यापत्यम्' इत्यण्। 'गाथिविदथिकेशिगणिपणिनश्च' इति प्रकृतिभावाट्टिलोपाभावः। पणिनस्यापत्यं पाणिनो युवेति[11] विवक्षिते 'अत इञ्' इति इञ्। पाणिनिरादिर्येषां मुनीनां ते पाणिन्यादयः। ते च ते मुनयश्च। मननशीला मुनयः। 'मनेरुच्चोपधायाः' इति इन् उपधाया उकारः। तान् पाणिनिवररुचिपतञ्जलिप्रमुखान् मुनीन्। गुरून्।

१. °त्येतदर्थः Bc1. २. प्रायुङ्क्त Bc1, Dc4. ३. भवन्तीति। आयु° Bc1. ४. सिद्धा यथा Dc4. ५. वृद्धिशब्दः प्रयुक्त इत्युक्तम्। Dc2, Nc2. ६. °चन्द्रार्यै° Dc1. ७. Bc1 drops अज्ञानुग्रहकृत्स्वभावं. ८. नमतां पुरुषाणां Dc3. ९. Dc1 omits भावे अच्. १०. अप् Dc3. ११. युवापत्यमिति Nc1, Dc4.

प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम् ॥[1]

गृणन्त्युपदिशन्तीति गुरवः। 'कृग्रोरुच'[2] इति गृशब्दे अस्मात् कुरुका-रश्चान्तादेशः[3]। ते च गुरवो मातृपितृपत्याचार्यविद्यादातृज्येष्ठभ्रातर ऋत्विजो[4] भयत्रातान्नदाता चेति व्यासोक्ताः। श्रीमद्गोपालप्रसाद-श्रीकृष्णाचार्यादयस्तान् श्रीगुरूनानम्य भक्तिश्रद्धातिशयपूर्वकं नत्वा। ननु श्रीमद्विट्ठलं पाणिन्यादीन् मुनीन् गुरून् इत्येषां प्रत्येकमान-म्येत्येकया क्रियया संबन्धात् समुच्चयोस्ति। ततश्च तद्द्योतकेनाव्ययपदेन[5] भाव्यम्। उच्यते। गुरुदैवतैक्यप्रतिपत्त्यर्थं तन्न[6] प्रयुक्तम्। तथा च नृसिंहाचार्यवर्यैश्च कालनिर्णयदीपिका विवृता[7]। तत्रोक्तं रामचन्द्रा-चार्यसूनुभिः। 'अत्र समुच्चयद्योतकाव्ययपदाभावेन गुरुदैवतैक्यमा-चार्याणामभिप्रेतमिति[8] प्रतीयते। तथा च तेषामभिप्रायो गुरुस्तुतौ दृश्यते।

सद्विद्यानिलयः सदागमगुरुः सत्संप्रदायाग्रणीः
सद्धर्मस्थितिकृत् समस्वपरदृक् सभ्यः सतां संमतः।
सारासारविविक् समस्तगुणयुक् संसारसिन्धोस्तरिः
श्रीगोपालगुरुः सदावतु स नः श्रीविट्ठलो यः स्वयम् ॥

इति। गुरुदैवतैक्यं तु

'आचार्यं मां विजानीयान्नावमन्येत कर्हिचित्।'

इत्यादि[9] 'श्री भागवतादौ प्रसिद्धम्। एकवचनबहुवचनयोः सामा-नाधिकरण्यं तु वेदाः प्रमाणमित्यादौ सुप्रसिद्धम्[10]' इति। प्रक्रिया-

---

१. After this D_2 has:—

तन्नमामि जगद्वन्द्यं रामं सर्वार्थदेशकम्।
यद्दृष्टिपातसामर्थ्यान्मूको वाचस्पतिर्भवेत् ॥

२. कुप्रत्ययः Dc_2. ३. °रुकारान्तादेशश्च Nc_1. ४. °भ्रातृस्विजः Dc_2, Dc_3. ५. अव्यय dropped Dc_3, Dc_4. ६. चकारासूचनम्। तन्न प्रयुक्तमिति वा पाठः। Dc_2. ७. विवृतौ Dc_2; विवृता यत्र तत्रोक्तम् Nc_1, Nc_2; टीका विवृता यत्र तत्रोक्तम् Dc_3. ८. °मभीप्सित° Dc_2. ९. °मित्यादिवाक्ये Dc_3; °मितिवत् Dc_2, Bc_1. १०. प्रसिद्ध° Nc_2.

कौमुदीम् । प्रक्रियन्ते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यन्ते शब्दा आभिस्ताः प्रक्रियाः । 'कृञः श च' इति करणे शप्रत्ययः । 'रिङ् शयग्लिङ्क्षु' इति रिङ् । तासु कौमुदी । 'संज्ञायाम्' इति सप्तमीतत्पुरुषः । कौमुदीव कौमुदी सुखं जनयन्ती सर्वशब्दप्रकाशिका । अथवा प्रक्रिया कौमुदीव प्रक्रियाकौमुदी । 'उपमितं व्याघ्र—' इति समासः । कुर्मः । डुकृञ् करणे । अस्मात् 'अस्मदो द्वयोश्च' इत्यस्मद एकत्वे बहुवचनविधानात् अस्मदर्थकर्तृवाचिन उत्तमपुरुषस्य बहुवचनम् । परोपकारार्थं ग्रन्थकरणे प्रवृत्तत्वात् तज्जनितश्रेयसोपि[1]

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥'

इति भगवदुक्तेरीश्वरार्पितत्वात् परगामिक्रियाफलमिति[2] परस्मैपदं प्रयुक्तमाचार्यवर्यैः । पाणिनीयानुसारिणीम् । पाणिनिना प्रोक्तं पाणिनीयम् । अथवा पाणिनिनोपज्ञातं विनोपदेशं ज्ञातं पाणिनीयं । व्याकरणम् । प्रोक्तार्थे उपज्ञातार्थे वा 'वृद्धाच्छः' इति शैषिकश्छः[3] । ननु च पणिनस्यापत्यं पणिनो युवा[4] पाणिनिस्तेन प्रोक्तमुपज्ञातं वेत्यर्थविवक्षायां 'यूनि लुक्' इति इञो लुकि प्रत्ययलक्षणेन 'इञश्च' इत्यण् स्यात् । मैवम् । 'इञश्च' इत्यत्र 'कण्वादिभ्यो गोत्रे' इत्यतो गोत्र इत्यनुवर्तते अतो गोत्रे य इञ् विहितस्तदन्तादण् स्यादित्यर्थः । तत्र च पारिभाषिकं गोत्रं गृह्यते । अयं च यूनीञ् तेनाण् न । पाणिनीयमनुसर्तुं शीलं यस्याः सा पाणिनीयानुसारिणी । ताम् । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । 'सुपि स्थः' इत्यतः सुपीत्यनुवर्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थमिति केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यम् । अन्यथा अजाताविति किम् । ब्राह्मणानामन्त्रयितेति न युज्यते । आङित्यस्योपसर्गत्वात् । तथा च भट्टिकाव्ये प्रयोगः 'स कर्मठः कर्मसुतानुबन्धी' इति । तथा रघुवंशेपि

१. Dc2 drops from तज्जनित° to °रीश्वरार्पितत्वात्. २. इत्युक्तत्वादिति Bc1. ३. शैषिकछः Dc1. ४. युवापत्यं Dc3, Dc4.

'भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः' इति। अथवा 'सुपि स्थः' इत्यतोनुवर्तमानं सुब्ग्रहणं 'सत्सूद्विष—' इति सूत्रस्थोपसर्गग्रहणेनानुपसर्गार्थमिति ज्ञापितम्। 'सुप्यजातौ—' इति पुनः सुब्ग्रहणं सुम्मात्रविषयमिति णिनिः[1]। तथा च महाभाष्य उक्तम्। 'सुपीति वर्तमाने पुनः सुब्ग्रहणं किमर्थम्। अनुपसर्ग इत्येवं तदभूत्। इदं सुम्मात्रे यथा स्यात्। उदासारिण्यः[2] प्रत्यासारिण्यः' इति। इति श्लोकार्थः॥

ननु ग्रन्थादौ श्रोतृप्रवृत्तये प्रयोजनादि[3] वक्तव्यम्। तथोक्तम्।

'सिद्धार्थं ज्ञातसंबन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः[4]॥' इति।

सत्यम्। तत्तु प्रक्रियाकौमुदीमित्यनेन[5] सूचितम्। तथा हि। प्रकृतिप्रत्ययादिविभागेन शब्दव्युत्पादनं ब्रुवता[6] प्रक्रियाशब्देन महाभाष्यकारोक्तं साक्षात्प्रयोजनं शब्दानुशासनमेव[7] सूचितम्। शब्दानुशासनं च प्रकृत्यादिविभागेन शब्दव्युत्पादनम्। तथा चोक्तम्।

'विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः।
ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम्॥' इति।

अर्थाल्लौकिका वैदिका शब्दा अभिधेयः। प्रतिपाद्यप्रतिपादकभावः संबन्धः। शब्दव्युत्पित्सुरधिकारी। शब्दानुशासनप्रयोजनानि तु महाभाष्योक्तानि प्रक्रियेत्यनेनैव सूचितानि संक्षिप्योच्यन्ते। लोकेऽदृष्टं वर्णलोपादिकं वेदे पश्यन्नवैयाकरणो वेदं नाशयेदिति वेदरक्षार्थमध्येयं व्याकरणम्। वैदिकमन्त्राणां यज्ञे ऊहोप्यस्ति प्रकृत्यादिविभागेन तज्ज्ञानार्थं चाध्येयम्[8]। 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो[9] वेदोध्येयो ज्ञेयश्च' इति श्रुत्या चाङ्गत्वेन[10] व्याकरणाध्ययनं विहितम्। व्याकरणं हि श्रुतेर्मुखम्।

१. सुम्मात्रमिति णिनिः Nc_1. २. उदाहारिण्यः Dc_4. ३. प्रयोजनादिकं Nc_1. ४. सप्रयोजकः Dc_4. ५. °त्यनेनैव Dc_1. ६. वदता Nc_1. ७. एव dropped Bc_1, Dc_1. ८. वाध्येयम् Bc_1, Dc_3. ९. निष्कामः षडङ्गो Dc_2. १०. तदङ्गत्वेन Dc_2.

ब्राह्मणेन चावश्यं शब्दा ज्ञेयाः । ते[1] चानन्तत्वात् प्रतिपदपाठेन न[2] शक्यन्ते ज्ञातुम् । तथा[3] च[4] श्रूयते । 'दिव्यं वर्षसहस्रमिन्द्रो बृहस्पतेः सकाशात् प्रतिपदपाठेन शब्दान् पठन्नान्तं जगाम' इति । अतो लक्षणेनैव ज्ञातुं शक्यन्त इति लाघवार्थम[5]ध्येयं व्याकरणम् । स्थूलपृषतीमालभेतेत्यादाववैयाकरणस्य संदेहः स्यात् किं स्थूला चासौ पृषती च स्थूलपृषती उत स्थूलानि पृषन्ति यस्या इति । व्याकरणज्ञेन[6] तु पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहिरेव निश्चीयते । इत्यसंदेहार्थ[7]मध्येयं व्याकरणम् । अन्यानि चोक्तानि व्याकरणप्रयोजनानि ।

> 'रेफा[8]संधिप्लुताभावाद्धेलयो[9] भाषिणोसुराः ।
> म्लेच्छनेन पराभूता ज्ञेयं व्याकरणं ततः ॥
>
> दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
> स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्[10] ॥'

इन्द्रस्याभिचारस्त्वष्ट्रारब्धः । तत्र इन्द्रशत्रुर्वर्धस्वेति मन्त्र ऊहितः । तत्र शत्रुशब्दः शातयित्र[11]र्थमाश्रितो न रूढार्थः । तत्रेन्द्रस्य शातयिता भवेत्यस्यार्थस्य ज्ञानाय[12] तत्पुरुषद्योतकेन्तोदात्ते प्रयोज्ये[13] ऋत्विजा बहुव्रीहिद्योतक आद्युदात्तः प्रयुक्तः । तत्र इन्द्र एव वृत्रस्य शातयिता संपन्न इति वृत्रमिन्द्रशत्रुशब्दो हतवान् स्वरापराधात् ।

> 'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
> सोनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥
>
> अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
> कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥'

---

१. तेषामनन्त° Dc_3. २. न तु Dc_3. ३. तथा श्रूयते हि । Bc_2, Dc_4, Nc_2; तथा हि श्रूयते Nc_1. ४. च dropped Dc_3. ५. लाघवार्थमिदं व्याकरणमध्येयम् । Nc_1. ६. व्याकरणज्ञानेन Dc_2, Bc_1. ७. °हार्थं चाध्येयं Dc_1, Dc_3, Nc_1; व्याकरणं चाध्येयम् Nc_1. ८. रेफात् संधि° Dc_2. ९. हेलया Dc_2. १०. After it इति Bc_1. ११. शातयित्रर्थ आश्रितो Nc_1. १२. ज्ञापनाय Dc_2. १३. प्रयोज्येत्र Dc_1, Dc_2.

'यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधाति स आर्त्विजीनो भवति' इति श्रुतेरध्येयं व्याकरणम् । ऋचोपि

'चत्वारि शृङ्गा त्रयोस्य पादा द्वे शीर्षे सप्त हस्तासोस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यॉं आविवेश ॥'

एतद्व्याख्यानपरौ पाणिनीयमतदर्पणश्लोकौ

'नामाख्यातनिपातोपसर्गशृङ्गस्त्रिकालपात् ।
कार्यताव्यङ्ग्यतामूर्धा शब्दः सप्तविभक्तिदोः ॥
उरःकण्ठशिरोबद्धो वृषभः कामवर्षणात् ।
महान् देवो महत्वाय ज्ञातः स्यादिति च श्रुतिः ॥'

अन्यापि ।

'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥'

एतद्व्याख्यापद्यं तत्रत्यमेव ।

'नामाख्यातनिपातोपसर्गाञ् जानन्ति शाब्दिकाः ।
एकैकस्य चतुर्थांशमन्ये विद्वांस इत्यपि ॥'

अन्यापि ।

'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥'

उतशब्दोप्यर्थः । त्वशब्दोन्यार्थः । उत त्वः अप्येकः अज्ञातवाक् तदर्थं पश्यन्नपि प्रत्यक्षेण शब्दरूपमुपलभमानोपि ऋगादिरूपां वाचं न ददर्श न पश्यति । दर्शनफलाभावात् । उत त्वः अप्येकः अज्ञातवाक् तदर्थं शृण्वन्नपि स्वमुखेन परमुखेनोच्चार्यमाणां वाचं न शृणोति । श्रवणफलाभावात् । उतो त्वस्मै अप्येकस्मै विज्ञातवाक् तदर्थाय तन्वं

१. स्वरशो वाक्षरशो Dc_1. २. After it इति Bc_1. ३. व्यङ्गिता Dc_1. ४. महादेवो Dc_4. ५. अन्या अपि Dc_2. ६. व्याख्यानपद्यं Nc_1. ७. तदर्थं Dc_1, Nc_1. ८. तदर्थं एव स्वमुखेन &c. Dc_1, Nc_1. ९. एवं स्वमुखेन Nc_2.

स्वशरीरं सबाह्याभ्यन्तरं स्वशरीरं पत्ये विवृणुते । एवं वाक् वाग्विदे स्वमात्मानं विवृणुत इत्यध्येयं व्याकरणम् । अन्यच्च । याज्ञिकाः पठन्ति । 'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्' इति । प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम् । 'दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि सुप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा कृतं कुर्यान्न तद्धितम्' इति श्रूयते । न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुमिति ज्ञेयं व्याकरणम् । 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति च श्रुतिरभ्युदयार्थं शब्दप्रयोगं वदन्तीति तज्ज्ञानार्थं व्याकरणाध्येयतामाह ।

मनुरप्याह ।

'यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ॥
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥'

अन्यैरप्युक्तम् ।

'उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं विद्यानां सर्वासां तदवस्थितम् ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥
रूपान्तरेण देवास्ते विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ॥' इत्यादि ।

तत् स्थितं साधुशब्दप्रतिपादकं व्याकरणमध्येतव्यम् । साधुत्वं चोक्तम् ।

१. पिता नाम Dc_4. २. विदधाति Nc_1. ३. °मनन्तरिप्रतिष्ठितं Dc_3. ४. सुप्रतिष्ठितं Dc_1, Dc_2, Bc_1. ५. षडक्षरकृतं Dc_1. ६. °णाध्ययनमाह Dc_4. ७. यस्तु Dc_2. ८. यस्तु Dc_2, Nc_1. ९. After it इति Bc_1, Dc_4. १०. °मध्येयम् Dc_4.

'अनपभ्रष्टतानादिर्वाभ्युदययोग्यता ।
व्याक्रिया व्यञ्जनीया वा जातिः कापीह साधुता ॥
अनिदंप्रथमाः शब्दाः साधवः परिकीर्तिताः ।
त एव शक्तिवैकल्यप्रमादालसतादिभिः ॥
अन्यथोच्चारिताः पुम्भिरपशब्दा इतीरिताः ।
स्मारयन्तश्च ते साधूनर्थधीहेतवः स्मृताः ॥'

अन्यच्च ।

'यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः ।
कथं नु तासां साधुत्वं नैव ताः साधवो मताः ॥
अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता ।
हस्तचेष्टा यथा लोके तथा संकेतिता इमाः ॥'

ततश्च

'तासां प्रयोगेभ्युदयः प्रत्यवायोपि नो भवेत् ।
लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलम् ॥' इति ॥

इति प्रयोजनसंक्षेपः ॥

अत्र हि केचिद् ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दं वदन्ति । अपरे स्फोटम् । अपरे ध्वनिम् । तत्र ध्वनिरनित्यः । तत्र वर्णानामभिव्यक्तौ उत्पत्तौ च सर्वप्रकारेण सर्वेषामेकस्मिन् प्रदेशे काले वावस्थानं न संभवति । एकैकस्य च वर्णस्य वाचकत्वे शेषाक्षरोच्चारणमनर्थकम् । अथैकस्मृतिगोचरा वर्णा अर्थवाचकास्तदा सरो रस इत्यर्थभेदो न स्यात् । तस्मात् पदानि वाक्यानि वार्थवाचकानि । तानि येन स्वमर्थं स्फुटयन्ति स स्फोटः स च पदस्फोटो वाक्यस्फोटश्चेति स्फोटवादिनो हि

१. °दिषु K. २. हस्तसंज्ञा Dc_3. ३. वर्णयन्ति Dc_1. ४. देशे Nc_1, Nc_2, Dc_4. ५. Dropped Dc_1, Dc_3. ६. वा वाचकानि Bc_1, Nc_1, Nc_2. ७. Dropped Dc_3, Dc_4.

अइउण् ।१।

वैयाकरणाः । व्यक्तीनामानन्त्यात् तत्र संबन्धग्रहायोगाज्जातिः पदार्थ इत्येके । जात्युपलक्षिता व्यक्तिरित्यन्ये । पाणिनिस्तूभयं मन्यते । विचारविशेषस्तु महाभाष्याद् वाक्यपदीयादेश्चावगन्तव्यः ॥

ननु व्याकरणप्रयोजनमेव चेदस्य ग्रन्थस्य प्रयोजनं तत् किं सत्सु ग्रन्थान्तरेष्वनेनेत्याह । प्रक्रियाकौमुदीमिति । कौमुदीव कौमुदी । यथा कौमुदी सुखरूपा सती सकलार्थानभिव्यनक्त्येवमियं सुखं जनयन्ती स्वल्पैरेव शब्दैः सकलान् शब्दानाञ्जस्येन प्रकाशयति । अन्ये हि ग्रन्था महान्तोऽतिगहनास्तैः सहसा शब्दा न प्रकाश्यन्त इत्येतदवान्तरप्रयोजनमस्याः । व्याकरणे तावच्छब्दा अभिधेयास्ते चानन्तत्वात् प्रतिपदपाठेनाभिधातुं न शक्यन्त इति प्रक्रियाकौमुदीमित्यनेनासूचि । तत्र लक्षणेनाभिधाने प्राप्ते सति पाणिनीयानुसारिणीमित्युक्तत्वात् पाणिनीयलक्षणान्यनुसृत्य वर्णसमुदायरूपशब्दानामनुशासनं करिष्यन् वर्णान् प्रत्याहारार्थं ज्ञानार्थं चोपदेष्टुं पाणिनीयशास्त्रादिभूतानि वर्णसमाम्नायसूत्राणि पठति । अइउण् । इत्यादि । वर्णज्ञानेन हि महानभ्युदयः । तथा चोक्तं महाभाष्ये । 'सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते' इति । अइउण् एतानि चतुर्दशाक्षरसमाम्नायसूत्राणि महेश्वरेण शास्त्रस्य लक्ष्ये प्रवृत्तये पाणिनये उपदिष्टानि । तथा चोक्तम् ।

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥' इति ।

१. शब्दार्थ Dc3. २. जनयति Dc3. ३. व्याकरणेन Dc3. ४. च dropped Dc1. ५. °त्यनेनैवा° Nc1. ६. तत्र च Dc1. ७. प्रत्याहारशास्त्रार्थं Dc1, Dc2, Dc3. ८. तथोक्तम् Dc3. ९. फलितः पुष्पितश्च Dc4. १०. प्रतिमण्डलितो Dc4, Bc1. ११. समाम्नाय dropped Dc1. १२. तथोक्तम् Dc3.

ऋऌक् ।२। एओङ् ।३। ऐऔच् ।४।

तत्र [1]संध्यकरणमसंदेहार्थम् । अर्थस्याविवक्षितत्वाद्विभक्ते[2]रनुपपत्तिः। छान्दसो वा [3]सुब्लुक् । 'छन्दोवत् सूत्राणि भवन्ति' इति सूत्राणां छन्दस्त्वात् । 'वर्णात् कारः' इत्यत्र निर्देश इत्यनुवृत्तेर्यस्योच्चार्यमाणस्य प्रयोगस्थो वर्णो निर्देश्यः प्रतिपाद्यस्तस्माद्वर्णात् कारप्रत्यय इत्यर्थः । [4]अत्र चानुपूर्वीसंपादन एव तात्पर्यं न तु कविपुत्र इत्यादौ दृष्टानामकारादीनां प्रतिपादन इति [5]कारप्रत्ययो न । अथवा 'वर्णात् कारः' [6]इत्यत्र बहुलोक्तेः कारप्रत्ययो न । [7]चतुर्दशसु सूत्रेष्वन्त्यमन्त्यमितं विधायेतरान् वर्णानुपदिशति । ऋऌक् । नन्वकाराद्युपदेशे प्रयोजनं प्रयोगज्ञानं ऌकारस्तु क्लृपावेवास्ति क्लृपेश्च 'पूर्वत्रासिद्धम्' इति लत्वस्यासिद्धत्वादृकार एवाच्कार्याणि स्युः । [8]अत ऌकारोपदेशो[9]नर्थक इति चेन्न । पूर्वत्र परमसिद्धं न तु परस्मिन् पूर्वम् । एवं च 'कृपो रो लः' इत्यतः पराणि प्लुतस्वरितद्विर्वचनानि [10]ऌकारे भाव्यानीत्युपदेशः । [11]क्लृ३प्तशिखः । 'गुरोरनृतः' इति प्लुतः । प्रक्लृप्तः । 'उदात्तादनुदात्तस्य स्वरितः ।' क्लृप्प्तवान् । 'अनचि च' इत्यच उत्तरस्य द्वित्वम् । अन्यच्च । अशक्तिजशब्दानुकरणस्य साधुत्वमिष्यते । तत्र ऌकारस्याच्कार्याय चोपदेशः । यथा कुमारी ऋतक इति प्रयोक्तव्ये ऌतक इत्याह । तदन्योनुकरोति । कुमार्यॢतक [12]इत्याहेति । [13]तत्र ऌकारे इकारस्य यणादेशः साधुः ॥

एओङ् । ऐऔच् ॥

'प्रत्याहारेनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥'

---

१. असन्धिकरण° Dc_2. २. °रनुत्पत्तिः Dc_3, Dc_4. ३. लुक् Dc_4. ४. Nc_1 drops अत्र. ५. कार dropped Dc_3. ६. अत्र dropped Nc_1, Dc_2. ७. चतुर्दशसूत्रेषु Nc_1, Dc_3. ८. अतश्च Dc_3. ९. °नर्थ Dc_3. १०. ऋकारे न भाव्यानी° Dc_2. ११. क्लृप्त Nc_1, Dc_1, Dc_2. १२. इति dropped Dc_1, Dc_2, Nc_1, Nc_2, Bc_2. १३. अत्र Bc_1, Dc_3, Dc_4.

हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।८। घढधष् ।९।

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयः एकारैकारयोरकारेकारौ ओदौतोरकारोकारौ ऋकारे रेफः ऌकारे लस्तथाकारादिष्व-कारादयस्तेष्व[1]कारादिकार्यं न । अग्ने एति । अत्र 'एङः पदान्ता-दति' । अग्ने इन्द्रं वायो उदकम् । अत्र 'अकः सवर्णे दीर्घः' इत्यादि न[2] कार्यम् । कुतः । तच्छायानुकारिणो हि ते न तु त एव । पृथक्प्रयत्न[3]-निर्वर्त्यौ हि वर्णः । नुड्विधिलादेशणत्वेषु तु ऋकारैकदेशोपि रेफो वर्णः । अथवा तत्र प्रतिविधास्यते । आनृधतुः । कॢप्तः । नॄणाम्[4] ॥

हयवरट् ॥ अत्र रेफो यवाभ्यां पर उपादिष्टः 'व्योर्वलि' इति[5] लोपार्थं[6] रँल[7]ग्रहे वकारवर्जनार्थं च । ननु चैवं सति स्वर्नयती[8]त्यत्र 'यरोनुनासिके-' इति मूर्धस्थानत्वाद्रेफस्य णः स्यात् यरन्तर्भावात् । मद्र हृद इत्यत्र 'अचो रहाभ्याम्--' इति रेफस्य द्वित्वं स्यात् । कुण्डं रथेनेत्यत्र अनुस्वारस्य ययि परसवर्णः स्यात् । रेफस्य यर्यन्त[9]र्भावात् । अत्रोच्यते । जातिपदार्थाङ्गीकाराज्जातौ हि[10] प्रवर्तमानेनुनासिकपरसवर्णलक्षणे नान्त-रीकतया जातिमतीषु व्यक्तिषु प्रवर्तेते । यत्र तु वचनान्तरेण न्यायेन बाध्येते तत्र न प्रवर्तेते । तस्मात् 'स्थानेन्तरतमः' इति[11] परिभाषयान्तर-तमेष्वेव प्रवृत्तावनुनासिकपरसवर्णावत्र न स्तः । यतो णकारस्य 'ऋटु-रषाणां मूर्धा' इति रेफेण तुल्यस्थानत्वेपि भिन्नप्रयत्नत्वान्नान्तरतम्यम् । तथा हि रेफ ईषत्स्पृष्टो णः स्पृष्टः । नाप्यनुस्वारस्य रेफोन्तरतमः । भिन्नस्थानत्वात् । अनुस्वारस्य हि नासिका रँस्य[12] मूर्धा स्थानम् । नापि द्वित्वं स्यात् । रहाभ्यामिति प्रत्यक्षविहितेन निमित्तत्वेन[13] यरन्तर्भावानु-मितकार्यि[14]त्वबाधात् । यथा ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ

१. After तेषु तत्कार्यं न। Dc1, Dc2, Dc4. °ष्वकारादिषु कार्यं न Dc3. २. काय न Dc3, Dc4. ३. प्रयत्नेन नि° Dc1, Dc4. ४. नॄणाम् Dc4. ५. इति dropped Dc3, Dc4. ६. लोपार्थः Dc4, Dc2, Nc1. ७. रलू° Bc1. ८. स्वर्णय° Dc3; स्वर्णयति प्रातर्नयतीत्यत्र Dc4. ९. यरन्त° Dc3. १०. Dropped Bc1. ११. Dropped Dc3, Dc4. १२. रेफस्य Dc3. १३. निमित्तत्वेन dropped Dc1. १४. °कार्यित्व° Dc3.

जबगडदश् ।१०। खफछठथचटतव् ।११। कपय् ।१२। शषसर् ।१३। हल् ।१४। इति प्रत्याहारसूत्राणि । हकारादिष्वकार उच्चारणार्थः ।

परिवेविषातामित्यत्र साक्षाद्विहितेन परिवेषणं प्रति साधनत्वेन ब्राह्मणस्वानुमितभोजनं प्रति साधनत्वं बाध्यते । एवं तर्हि 'इको यणचि' इत्यत्रेकः साक्षाद्विहितेन कार्यित्वेनाजन्तर्भावप्राप्तं निमित्तत्वं बाध्येत । ततो दध्युदकमिति न स्यात् । नैष दोषः । व्यक्तिपदार्थाङ्गीकारात् । व्यक्तौ हि पदार्थे प्रतिलक्ष्यं लक्षणप्रवृत्तिः । तत्र यदीको यणादेशनिमित्तत्वं बाध्येत तदा दध्युदकादिविषयं लक्षणं व्यर्थं स्यात् । जातौ तु पदार्थे सकृदेव लक्षणप्रवृत्तिर्न पुनः पुनस्तेन सकृत्प्रवृत्तस्य द्विस्वस्यार्कं इत्यादौ चरितार्थत्वाद् मद्रह्रदादावकृतार्थत्वेऽपि नानर्थक्यमिति । अटां मध्ये विसर्ग ≍ क ≍ पा उपदेष्टव्याः । उर ≍ केण । उरः केण । उर ≍ पेण । उरः पेण । अत्राड्व्यवाये णत्वं स्यादिति ॥

हल् ॥

हकारो द्विरुपात्तोयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

अर्हेणेत्यत्र 'अट्कुप्वाङ्नुम्' इति णत्वम् । अधुक्षदित्यत्र 'शल इगुपधादनिटः क्सः' ॥

वर्णोपदेशस्य प्रयोजनमाह । इति प्रत्याहारसूत्राणीति । प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अस्मिन्निति प्रत्याहारोऽणादिः । अथवा प्रतिकार्यमाह्रियत इति अथवा प्रत्याह्रियन्ते संक्षिप्यन्ते संकोच्यन्त इति प्रत्याहारा अणादिसंज्ञाः । तदर्थान्येतानि सूत्राणि । प्रत्याहारश्च लाघवेन शास्त्रप्रवृत्त्यर्थः ।

हकारादिष्विति । उच्चारणार्थ इत्यनेनोच्चारणे प्रयोजने निवृत्ते

---

१. कार्यत्वेना° Dc$_4$. २. Dropped Nc$_1$. ३. °विषयलक्षणं Dc$_1$, Nc$_2$, Dc$_4$. ४. One पुनः dropped Dc$_4$. ५. °वकृतार्थत्वान्नानर्थक्य° Dc$_4$. ६. अपि dropped Dc$_1$, Nc$_2$. ७. अनेनेति Bc$_1$, Dc$_4$. ८. °णादि Nc$_2$; °णादिकः Dc$_2$. ९. After इति Dc$_1$, Nc$_1$ have प्रत्याहारः.

लण्मध्ये त्वित्संज्ञकः[२] ।

उपदेशेऽजनुनासिक इत् ॥१।३।२॥

उपदेशेऽनुनासिकोऽच् इत्संज्ञः[४] स्यात् ।

प्रतिज्ञानुनासिक्याः पाणिनीयाः ।

न्यायसिद्धत्वात् स नोपादीयत[५] इति सूचितम् । तथा हि । यथा लोक उदकाद्याहरणार्थो[६] घटस्तस्मिन् संनिवृत्ते[७] नोपादीयत एवमिहापि ।

प्रत्याहारान्[१] जिज्ञापयिषुरित्संज्ञासूत्रं पठति । उपदेशे । स्यादिति[८] भवत्यर्थे तिङन्तप्रतिरूपकमव्ययम् । एवं स्युरिति भवन्तीत्यर्थे[९]ऽव्ययमित्यग्रे वर्तमानप्रयोगेषु ज्ञेयम् । ननु चात्र सर्वत्र शुद्धोऽच् पठ्यते[१०] नानुनासिक इत्याशङ्क्याह । प्रतिज्ञेति । अनुनासिकस्य भाव आनुनासिक्यम् । प्रतिज्ञया प्रतिज्ञामात्रेण समधिगम्यमानुनासिक्यमेषां[११] ते प्रतिज्ञानुनासिक्याः । पाणिनिना प्रोक्तं शास्त्रं[१२] पाणिनीयम् । 'वृद्धाच्छः ।' तद्विदन्ति 'तदधीते तद्वेद' इत्यण् । तस्य 'प्रोक्ताल्लुक्' इति लुक् । ते पाणिनीया यत्रानुनासिक्यं प्रतिजानते तत्रैव तदपठ्यमानमपि भवति नान्यत्र । उपदेशशब्दार्थमाह ।

---

१. प्रत्याहारग्रहणार्थः D_2, D_5. २. After it C has—वर्णानां सकृदुपदेशाल्लुकारः किमर्थमसकृदुपदिश्यते; and B_2 has रः प्रत्याहारार्थं प्रतिज्ञायते. ३. Before this—

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्येतद् द्वयं सिद्धं भविष्यति ॥

P, B_1, B_2, C, D_4 (D_3 drops the first half and the second half is—अर्हेणाधुक्षतोः सिद्धिर्हमहावटि शल्यपि P, D_3; °दित्यत्र C, B_2), ४. इत्संज्ञकः B_2. ५. नोपादेय Bc_1, Dc_3. ६. °हरणार्थमुपात्तो Bc_1, Dc_3. ७. निवृत्ते Bc_2. ८. स्यातांस्युरिति Dc_3; K. ९. भवतो भवन्ती° Dc_3, K. १०. व्यज्यते Bc_1. ११. °सिक्यं येषां Dc_3, Dc_4. १२. Dropped Dc_1.

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमः प्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥

धात्विति । धातुर्धातुपाठः । तत्र एध वृद्धावित्यादावकारादेरित्संज्ञादि उपदेशत्वात् । सूत्रं सूत्रपाठः । तत्र 'लण्' इत्यादौ च तदेव । गणो गणपाठः । तत्र भवतु इत्यादावपि तदेव । उणादि उणादिपाठः । तत्रापि 'कजिमृजिभ्यां चित्' इत्यादौ सौत्रस्य कज्यादेरिदित्वादि । वाक्यं वार्तिकम् । तत्रापि 'आचारे गल्भक्लीबहोडेभ्यः क्विब् वाच्यः' इत्यत्र तदर्थानुषक्ताकारस्येत्संज्ञा । लिङ्गानुशासनं लिङ्गानुशासनप्रतिपादको ग्रन्थः । तत्रापि 'इदन्तो मृच' इत्यादौ तकारादेरित्संज्ञादि । उपदेशकार्यं यथासंभवं ज्ञेयम् । एतेषां द्वन्द्वः । समाहारे एकवचनम् । उपदिश्यन्ते यैस्ते इति साधनव्युत्पत्त्या एते उपदेशाः । आगमः 'त्रपुजतुनोः षुक्' इत्यादि । तत्र उकारादेरित्त्वम् । प्रत्ययः सनादिः । आदेशः 'चक्षिङः ख्याञ्' इत्यादि । उपदिश्यन्ते इति कर्मव्युत्पत्त्या एते उपदेशाः । उपदेशे किम् । अभ्र आं अपः । नायं स्वरूपेणादेश उच्चारितोऽनुनासिकः । किं तर्हि । 'आङोऽनुनासिकश्छन्दसि' इत्यनुनासिकशब्देन विहितः । इत्संज्ञाप्रदेशाः 'आदितश्च' इत्येवमादयः । इत्संज्ञकस्य श्रवणं मा भूदिति लोप आरभ्यते । तस्येति । तस्येत्यनेनेत्संज्ञकः परामृश्यते इत्याह । तस्येत इति । 'उपदेशेऽजनुनासिक–' इत्यत इदिति प्रथमान्तमप्यनुवर्तमानमर्थात् षष्ठीनिर्दिष्टं स्यात् । ततश्चेत इत्यनुवृत्त्यैवागतं किं तस्येति पदेन । उच्यते । 'आदिर्ञिटुडवः' इत्यत्र

१. आगमप्रत्यया° D_1, B_2. २. धातुसूत्रेति Bc_1, Dc_4. ३. °त्संज्ञेति Dc_3. ४. उणादिः Bc_1, Dc_3, Dc_4. ५. Dropped Bc_1. ६. कज्ज्यादे° Nc_2, Dc_1. ७. होडेभ्यः क्विब् वा । Bc_1, Dc_3, Dc_4. ८. लिङ्गप्रतिपादको Dc_3. ९. सन्नादिः Nc_2; K. १०. इत्यादिः Nc_2. ११. इत्संज्ञस्य Dc_4.

तस्य लोपः ॥१।३।९॥

तस्येतो लोपः स्यात् । णादयः प्रत्याहारार्थाः ।

हलन्त्यम् ॥१।३।३॥

उपदेशे अन्त्यं हल् इत् स्यात् ।

यावत इत्संज्ञा तावतस्सर्वस्य लोपार्थम् । अन्यथा 'अलोन्त्यस्य' इत्यन्त्यस्यैव स्यात् । एतच्च 'नानर्थके अलोन्त्यविधिः' इत्यस्यानाश्रयेणोक्तं सूत्रकृता । **णादय** इति । 'अइउण्' इत्यादिचतुर्दशसूत्रेष्वन्ते वर्तमाना हलः ।

हलन्त्यम् । 'उपदेशेऽजनुनासिक इत्' इत्यत उपदेशे इत् इत्येते पदे अनुवर्तेते स्वरितत्वादिति चेतसि कृत्वाह । **उपदेशे अन्त्यं हल् इत् स्यादिति** । तथा च सूत्रं 'स्वरितेनाधिकारः' । स्वरितो नाम स्वरविशेषो वर्णधर्मः । तेन लक्षणेनाधिकारो ज्ञेयः । अधिकारो विनियोगः । स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते । प्रतिज्ञास्वरिताः पाणिनीयाः । हल उभयलिङ्गत्वात् 'हलन्त्यम्' इति नपुंसकप्रयोगः । ननु लकारस्येत्संज्ञायां सत्याम् 'आदिरन्त्येन सहेता' इति प्रत्याहारग्रहणं स्यात् । सति च तस्मिन् 'हलन्त्यम्' इतीत्संज्ञा । तदितरेतराश्रयत्वं स्यात् । इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्त इति चेदुच्यते । हलिति द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम् । तथा चोक्तं भर्तृहरिणा

'आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते ।
लिङ्गाद्वा तन्त्रधर्माद्वा विभागो व्यवतिष्ठते ॥' इति ।

तन्त्रैकेन हल्ग्रहणेन हस्य समीपे योऽल् तस्येत्संज्ञा पश्चाद् द्वितीयेन प्रत्याहारग्रहणेनेत्संज्ञेति नेतरेतराश्रयदोषः । लघूपायेनानुवृत्तिज्ञानार्थ-

---

१. यदन्त्यं हल् तदित् B1. २. °स्सर्वस्यैव Nc1. ३. ननु च Nc2, Dc3. ४. तथा चेतरे° Dc3. ५. कार्याणि च Nc1; च dropped Nc2. ६. कल्पन्त Nc1, Dc4. ७. तन्त्रेणोच्चारितं Nc2, Dc3. ८. तथोक्तं Nc2. ९. सकृदिति Nc1. १०. Dropped Nc1. ११. अत्रै° Nc1. १२. यो हल् Nc2.

सूत्रेष्वदृष्टं पदं सूत्रान्तरा[1]दनुवर्तनीयं सर्वत्र ।

आदिरन्त्येन सहेता ॥१।१।७१॥

आदिरन्त्येनेता सह गृह्यमाणो म[2]ध्यगानां स्वस्य च ग्रा[3]हकः

माह । **सूत्रेष्विति** । [4]व्याख्यायमानसूत्रेष्वदृष्टमस्मद्वृत्तौ च[5] दृश्यमानं पदं सूत्रान्तरादन्यसूत्रादनुवर्तनीयमनुवर्तयेद[6]नुवृत्तं जानीयादिति भावः । तथा चास्मिन्नेव सू[7]त्रेस्माभिर्दर्शितम्

आदिः । 'स्वं रूपं शब्दस्य' इत्यनुवृत्तिसार्थक्याय आद्यन्तशब्दाभ्यां सामर्थ्यान्मध्यपतिता वर्णा एव संज्ञित्वेन गृह्यन्ते नाद्यन्तशब्दौ । अन्यथान्यस्य संज्ञिनोनिर्देशादादिरन्त्येन स[8]हितः स्वस्यैव संज्ञा स्यात् । ततश्च स्वं रूपमित्यस्यानुवृत्तिरपार्थिका स्यादित्यभिप्रेत्याह । **मध्यगानामिति** । प्रत्येकं संज्ञा न समुदायस्य । अन्यथा 'तस्मादित्युत्तरस्य' इत्यादौ 'इको यणचि' इत्यनेन यकारं यणादेशं न कुर्यात् । सहग्रहणमित्थंभूत[9]तृतीयानिरासार्थम् । अ[10]न्त्येन किम् । सुडिति तृतीयैकवचनेन टा इत्यनेन मा[11] भूत् । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इत्यस्यायमर्थः । इह शास्त्रे स्वमेव शब्दस्य रूपं ग्राह्यं ज्ञेयं नार्थः शब्दसंज्ञां वर्जयित्वा शब्दे व्याकरणे या संज्ञा तां वर्जयित्वेत्यर्थः । शब्देनार्थावगतेरर्थे कार्यस्यासंभवात् तद्वाचिनामयं प्रत्ययो मा भूदिति सूत्रारम्भः । 'अग्नेर्ढक्' । अत्राग्निशब्दोग्निशब्दस्यैव[12] ग्राहको न ज्व[13]लनशब्दादीना पर्यायाणां तेन आग्नेय इत्येव स्यात् । अशब्दसंज्ञा किम् । घुघकर्मादिसंज्ञाग्रहणे दाधातरप्तमप्कर्तुरीप्सिततमादय एव गृह्यन्ते न घुघकर्मादयः ।

---

१. पूर्वसूत्रा° B_1. २. मध्यगान ग्राहकः स्वस्य च B_2, D_3. ३. संज्ञा स्यात् D_5. ४. Dropped Nc_1. ५. °दनुवृत्ति Bc_1. ६. सूत्रेस्मद्वृत्तौ दृश्यतां निदर्शनम् Bc_1. ७. ये ते Bc_1. ८. सहितेति Dc_4. ९. °लक्षणतृतीया° Dc_3, Dc_4, Bc_4. १०. अन्त्येनेति Bc_1, Dc_2, K. ११. मा विज्ञायि K. १२. एव dropped Nc_2. १३. ज्वलनपावकादीनां Nc_2, Dc_3.

[1]स्यात् । [2]यथा अणिति अइउवर्णा गृह्यन्ते । एवमन्येपि ज्ञेयाः । ते च प्रत्याहारा एकचत्वारिंशत् ।

'एकस्मात् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः' । इति वचनात् ।

---

[4]क्वचिद्विशेषाणां पर्यायाणां वा ग्रहणमिष्यते । विभाषा वृक्षमृगतृणे[5]त्यादि । तथा च वक्ष्यति ।

'वृक्षादौ तद्विशेषाणां [6]स्वे पर्यायविशेषयोः ।
पर्यायस्यैव राजादौ मत्स्यादौ तद्विशेषयोः ॥' इति ।

[7]तत्तत्स्थानेषु प्रतिपादयिष्यामः । प्रत्याहारानुदाहरति । अणिति । अकारो णकारेण सह गृह्यमाणोण् प्रत्याहारः स्यात् । स च [8]मध्यगयो-रिवर्णोवर्णयोर्ग्राहकोकारस्यापि । एवमिति । [9]व्याख्यातप्रकारेणान्येपि प्रत्याहारा ज्ञातव्याः । तांश्च प्रत्याहारानानियमेन प्रसक्तान् नियमयति । ते चेति । [10]ते इति तच्छब्देनाणादिभिश्चतुर्दश[11]सूत्रान्त्यैः सह ये प्रत्या-हारास्ते [12]परामृश्यन्ते तेन रप्रत्याहारसुबादिषु सत्स्वपि नियमभङ्गो न । तांश्च [13]प्रत्याहारान्

'एकस्मात् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ॥' इति

---

१. D_1 drops it. २. यथा dropped D_2, D_4, B_1, C, N.; क्वचित् 'यथाणिति अइउवर्णा गृह्यन्ते इति यथाशब्दः पठ्यते K. ३. इति वचनात् dropped B_1, C_1, B_2, D_3, D_5. ४. यत्तु क्वचि° Nc_2. ५. °त्यादौ Bc_1. ६. स्वपर्याय° Dc_2. ७. तत्र तत्र स्थानेषु Nc_1, Dc_3. ८. तन्मध्ययो° Dc_1; मध्यगयोरिउवर्णयो° Dc_2. ९. एवमपि व्याख्यात° Nc_1; अनेन व्याख्यात° Dc_2. १०. ते चेति Dc_1; ते इति dropped Nc_1. ११. सूत्रान्तैः Dc_3. १२. परामृष्यन्ते Dc_1. १३. प्रत्याहारान् संग्रहश्लोकानुसारेण कथयति । एकस्मादिति । एङ् । Dc_4.

एङ् यञ् अण् पूर्वेण णकारेण । छव् अट्[1] झष् भष् अक् इक् उक् अण् इण् यण् परेण णकारेण । अम् यम्[2] ङम् अच् इच् एच् ऐच् यय् मय् झय् खय् यर् झर् खर् चर् शर् अश् हश् वश्[3] जश्[4] झश् बश् अल् हल् वल् रल् झल् शल् इति[5] । लकारस्थावर्णेन

संग्रहश्लोकानुसारेण कथयति । एङित्यादि । एङ् । 'एङः पदान्तात्—' इति । यञ् । 'अतो दीर्घो यञि । अण् पूर्वेणेति' । 'अइउण्' अत्रत्येन । 'केणः' । छव् । 'नश्छव्यप्रशान्' । अट् । 'शश्छोटि' । झष् भष् । 'एकाचो बशो भष् झषन्तस्यस्ध्वोः' । अक् । 'अकः सवर्णे दीर्घः ।' इक् । 'इको गुणवृद्धी ।' उक् । 'उगितश्च ।' अण् । 'अणुदित् सवर्णस्य चाप्रत्ययः ।' इण् । 'इण्कोः ।' यण् । 'इको यणचि ।' परेणेति । एतेणादयो 'लण्' इत्यनेन णकारेण प्रत्याहाराः । अम् । 'पुमः खय्यम्परे ।' यम् । 'हलो यमां यमि लोपः ।' ङम् । 'ङमो ह्रस्वादचि ङमुण् नित्यम् ।' अच् । 'अचः परस्मिन् पूर्वविधौ ।' इच् । 'इच एकाचोऽम्प्रत्ययवच्च ।' एच् । 'एचोयवायावः ।' ऐच् । 'वृद्धिरादैच् ।' यय् । 'अनुस्वारस्य ययि परसवर्णः ।' मय् । 'मय उञो वो वा ।' झय् । 'झयो होन्यतरस्याम् ।' खय् । 'पुमः खय्यम्परे ।' यर् । 'यरोनुनासिकेनुनासिको वा' ।झर् । 'झरो झरि सवर्णे ।' खर् । 'खरि च ।' चर् । 'अभ्यासे चर्च ।' शर् । 'शर्पूर्वाः खयः ।' अश् । 'भोभगोअघोअपूर्वस्योऽशि ।' हश् । 'हशि च । ' वश् । 'नेड्वशि कृति ।' जश् । झश् । 'झलां जश् झशि' । बश् । 'एकाचो बशो भष् झषन्तस्य स्ध्वोः ।' अल् । 'अलोन्त्यस्य ।' हल् । 'हलन्त्यम् ।' वल् । 'लोपो व्योर्वलि ।' रल् । 'रलो व्युपधाद्धलादेः संश्च ।' झल् । 'झलो झलि' । शल् । 'शल इगुपधादनिटःक्सः ।' इतिशब्दः समाप्तिं द्योतयति । लकारस्थेति ।

---

१. After अट् P has अटीति जिह्वामूलीयोपध्मानीययोर्ग्रहणम् । उरष्केण उरष्पेणेत्यादिसिद्धये: C agrees with P and has छव् अट् अटीति जिह्वा°...। सिद्धये before एङ् यञ्°. २. ङम् यम् C. ३. भश् झश् जश् बश् D_5. ४. बश् । जश् । झश् B_1, D_1, D_4, D_5, N. ५. इति प्रत्याहाराः D_2.

सहोच्चार्यमाणो रेफो रप्रत्याहारः ।

ऊकालोज्झ्रस्वदीर्घप्लुतः ॥ १।२।२७॥

उऊऊ३ इत्येवंकालोच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् ।

'लण्' इति सूत्रे लकारात् परोकारोनुनासिकः प्रतिज्ञायते । तेन 'उपदेशेज्—' इतीत्संज्ञकः सः । तेन सहोच्चार्यमाणो रेफः 'आदिरन्त्येन—' इति रप्रत्याहारः स्यादित्यर्थः । रप्रत्याहारफलम् 'उरण् रपरः' इत्यत्र वक्ष्यते ।

ऊकालः । एकमात्रत्वद्विमात्रत्वत्रिमात्रत्वानां कुक्कुटरुतावुकारे प्रसिद्धत्वादकारं परित्यज्योकारमाह सूत्रकारः । ऊकाल इति । ह्रस्वदीर्घप्लुत इति द्वन्द्वैकत्वं पुल्लिङ्गनिर्देशश्छान्दसः । संज्ञात्रयविधानात् संज्ञिनोपि त्रय इत्याह । उऊऊ३ । तत्र प्रथमो मात्रिको द्वितीयो द्विमात्रस्तृतीयस्त्रिमात्र इति । ननु च ऊ इति प्रश्लिष्टनिर्देशे कथं ज्ञायत एषैवानुपूर्वीति । ज्ञापकात् । तथा हि । 'विभाषा पृष्टप्रतिवचने हेः' इति मात्रिकस्य हेः प्लुतविधेर्ज्ञायते न मात्रिकोन्त्य इति । अन्त्यत्वे हि सति तस्य प्लुतसंज्ञा स्यात् । प्लुतस्य च प्लुतविधिरनर्थकः स्यात् । द्विमात्रोप्यन्त्यो न । 'ओमभ्यादाने' इति । द्विमात्रस्य प्लुतविधेः । तस्मादन्त्यस्त्रिमात्रः । मध्येपि मात्रिको न । 'अतो दीर्घो यञि' इति दीर्घविधेः । यदि मध्ये स्यात्तस्य दीर्घसंज्ञा स्यात् । दीर्घस्य च दीर्घविधानमनर्थकं स्यात् । तस्मादादौ मात्रिकः । अन्त्यस्त्रिमात्रः । परिशेषान्मध्ये द्विमात्रिकः एकमात्रादिकालज्ञानं तु चाषादिशब्दैः स्यात् । तथा चोक्तम् ।

---

१. After it D_1 has—हकारो द्विरुपात्तोयमटि शल्यापि वाञ्छता ।
अर्हणाधुक्षतोः सिद्धिर्हमहादटि शल्यतः ॥

D_4 gives this verse and has after it लृकारस्था°. २. उऊ ३ D_1. ३. °संज्ञकः C. ४. एकमात्रद्विमात्रत्रिमात्रत्वानां Dc_3. ५. Dropped Bc_1, Dc_3, Dc_4. ६. °निर्देशात् Dc_3. ७. स्यात् dropped D_1. ८ संज्ञानं चा° Nc_1.

अचश्च ॥ १।२।२८॥

ह्रस्वादिसंज्ञा[1] विधीयमाना एत अच एव स्थाने स्युः ।

[2]स प्रत्येकमुदात्तादिभेदेन त्रिधा[3] ।

उच्चैरुदात्तः ॥१।२।२९॥

'चाषस्तु वदते मात्रां द्वितीयां वायसोऽब्रवीत् ।
तृतीयां तु शिखी ब्रूयान्[4]नकुलो [5]ह्यर्धमात्रिकम् ॥' इति ।

ऊकालवत् कालो यस्येत्युपमानपूर्वो बहुव्रीहिरयमिति सूचयति । एवंकाल इति । द[6]धि । गौरी । देवदत्ता३ एहि । कालग्रहणं परिमाणावधारणार्थम् । अज्ग्रहणं संयोगस्याच्समुदायस्य च निवृत्त्यर्थम् । [7]प्रत्यक्षव्यञ्जनं त्वर्धमा[8]त्रिकमित्यर्धमा[9]त्रयोः कषयोर्हलोः समुदायस्य मात्रिकत्वात् । 'ह्रस्वस्य—' इति ह्रस्वाश्रयस्तुङ् मा भूत् । तितउ छत्रम् । अत्राकारोकारयोः समुदायस्य द्विमात्रत्वाद् दीर्घत्वं स्यात् । ततश्च 'दीर्घात् पदान्ताद्वा' इति तुक् वा स्यात् । स मा भूत् । ह्रस्वदीर्घप्लुतप्रदेशाः 'ह्रस्वो नपुंसके प्रातिपदिकस्य' 'अकृत्सार्वधातुकयोर्दीर्घः' 'वाक्यस्य टेः प्लुत उदात्तः' इत्येवमादयः । **स प्रत्येकमिति** । यस्याचो ह्रस्वदीर्घप्लुतसंज्ञा विहिताः स प्रत्येकमिति एकमेकं [10]प्रत्येकं ह्रस्वोऽपि दीर्घोऽपि प्लुतोऽपि उदात्तानुदात्तस्वरितभेदेन त्रिधेत्यर्थः । **उच्चैः** । 'अचश्च' इत्यनुवर्तते । तस्यायमर्थः । ह्रस्वादयः स्वसंज्ञया विधीयमाना अच [11]एव स्थाने स्युरिति । उदात्तादिशब्दाः स्वरे वर्णधर्मे

---

१. नाम्ना B_2 : संज्ञया D_4, ह्रस्वादिना नाम्ना C. २. Before this P and B_2 have—

निरन्तराः क्रमस्थाश्च ह्रस्वदीर्घप्लुतास्त्रयः ।
उवर्णे कुक्कुटरुतौ प्रसिद्धा इत्युकालगाः ॥ ;

D_2 follows P, B_2 and has an additional verse—

चाषस्तु वदते मात्रां द्विमात्रां वायसो वदेत् ।
त्रिमात्रां कुक्कुटो वक्ति मात्राणामेष निर्णयः ॥

It and the Com. drop the Sûtra अचश्च. ३. त्रेधा C. ४. नकुलो वदेत् Nc_1. ५. नकलो वदेत् Nc_1. ६. सुधि Bc_1. ७. प्रत्यक्ष्यं Dc_3, Dc_4. ८. °मात्रक° Dc_4. ९. मात्रकयोः Dc_3, १०. प्रति प्रत्येकं Dc_4, ११. Dropped Dc_3.

नीचैरनुदात्तः ॥१।२।३०॥

समाहारः स्वरितः १।२।३१॥

नैवविधोपि[1] प्रत्येकं सानुनासिकनिरनुनासिकत्वेन[2] द्विधा।

लोकवेदयोः प्रसिद्धास्त इह तद्गुणेचि परिभाष्यन्ते। उच्चैरिति श्रुतिप्रकर्षो न गृह्यते[3] उच्चैः पठतीति[4]। किं तर्हि। स्थानकृतमुच्चैस्त्वं संज्ञिनो विशेषणम्। ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा जायन्ते तत्र य ऊर्ध्वभागजोच् स उदात्तः स्यात्। यस्मिन्नुच्चार्यमाणे गात्राणां निग्रहः स्याद्रूक्षता स्वरस्य संवृतता[5] कण्ठविवरस्य। ये। ते। यत्तदोर्जसि त्यदाद्यत्वं 'जसः शी' 'आद्गुणः' 'एकादेश उदात्तेनोदात्तः' इति। उदात्तप्रदेशाः 'आद्युदात्तश्च' इत्येवमादयः। **नीचैः।** नीचभागे जातोच् अनुदात्तः यास्त्। यस्मिन्नुच्चार्यमाणे गात्राणां मार्दवं स्यात् स्वरस्य स्निग्धता कण्ठविवरस्य महत्ता। नमस्ते रुद्र मन्यव इत्यत्र 'अनुदात्तं सर्वमपादादौ' इत्यधिकारात् तेशब्दोनुदात्तः। रुद्रोपि 'आमन्त्रितस्य च' इत्यनुदात्तः। पदकालेनुदात्तश्रुतिः। संहितायां त्वेकश्रुतिः स्यात्। अनुदात्तप्रदेशाः 'अनुदात्तं सर्वमपादादौ' इत्येवमादयः। **समाहारः।** उदात्तानुदात्तौ समाह्रियेते यस्मिन्नचि[6] स स्वरितसंज्ञः स्यात्। अत्रोदात्तानुदात्तौ वर्णधर्माविव गृह्येते नाचौ। क्व। 'किमोत्।' 'क्वाति।' 'तित् स्वरितम्'। स्वरितप्रदेशाः[7] 'तित् स्वरितम्' इत्येवमादयः। **नवविधोपीति।** नवप्रकारोप्यच् प्रत्येकमेकमेकं प्रति **सानुनासिकनिरनुनासिकत्वेन**[8]। अनुगतो नासिकामनुनासिको वर्णधर्मः। अथवा अनु पश्चात् मुखस्य[9] नासिका व्याप्रियते यस्मिन्

---

१. स नव° C. २. °निरनुनासिकभेदेन P_1, D_1, B_2. ३. गृह्यतेत्र Nc_1. ४. प्रपठतीति Nc_1. ५. संहतता Dc_4. ६. यस्मिन् विषये स्वरितः स स्यात् Dc_2. ७. Before it-स्वरितः Dc_4. ८. °त्वेनेति Nc_1. ९. मुखं Dc_4.

मुखनासिकावचनोनुनासिकः ॥१।१।८॥

मुखयुतनासिकयोच्चार्यमाणोनुनासिकः स्यात् ॥

अणुदित्सवर्णस्य चाप्रत्ययः ॥१।१।६९॥

अत्राण् परेण णकारेण । अणुदिच्च सवर्णस्य ग्राहकः स्वस्य

नासिकाया वा पश्चान्मुखं व्याप्रियते यस्मिन् । सहानुनासिकेन वर्तत इति सानुनासिकः । निर्गतोनुनासिको यस्मात् स निरनुनासिकः । सानुनासिकश्च निरनुनासिकश्च सानुनासिकनिरनुनासिकौ तयोर्भावः सानुनासिकनिरनुनासिकत्वम् । तेन द्विधा । अयं भावः । अच् ह्रस्वो दीर्घः प्लुतश्च । तत्र ह्रस्वोप्युदात्तोनुदात्तः स्वरितश्चेति त्रिधा । एवं दीर्घप्लुतावपि त्रिधा । अनेन प्रकारेण नवविधोपि सानुनासिकनिरनुनासिकश्चेति प्रकाराभ्यां द्विधो स्यात् । तथा सत्यष्टादश भेदाः स्युरिति । अनुनासिकसंज्ञामाह । **मुख** । मुखनासिकेति न द्वन्द्वः किं तु मयूरव्यंसकादित्वादुत्तरपदलोपी तत्पुरुष एवं । द्वन्द्वे तु 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्येकवद्भावः स्यात् । ततश्च 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वं स्यात् । ततश्च मुखनासिकवचन इति स्यादिति मत्वाह । **मुखयुतनासिकयेति** । अभ्र आँ अपः । मुखग्रहणं किम् । अनुस्वारस्यैव हि स्यात् । नासिकाग्रहणं किम् । कचटतपानां मा भूत् । अनुनासिकप्रदेशाः 'आङोनुनासिकश्छन्दसि' इत्येवमादयः ॥

अणुदित् । अत्रत्यमेवाण्ग्रहणं परेण णकारेणेति चेतसि कृत्वाह । **अत्राणिति** । अचां यवलानां च सवर्णग्रहणाय 'लण्' इति सूत्रस्थेन णकारेण प्रत्याहारोयम् । अन्यान्यण्ग्रहणानि सर्वाणि पूर्वेणैव णकारेणेति भावः । संज्ञासूत्रमिदम् । तेनाण् उदिच्च सवर्णानां स्वस्य च संज्ञा स्यात् । ततश्चाणुदित्ग्रहणे सवर्णा अणुदितोपि गृह्यन्त इति भावोणुदित्यादेः ।

---

१. मुखयुतया ना° C; मुखनासिकयो° D_5. २. Dropped D_1. ३. D_1 drops च; अण् च उदिच्च D_2. ४. °विति Dc_1. ५. स्यात् द्विधा Dc_2. ६. एवेति मत्वाह । Dc_3. ७. ह्रस्वः Dc_4. ८. आंः Dc_3. ९. चटतकपानां Dc_1, Nc_1. १०. अणुदित् सवर्णस्य चाप्रत्ययः Dc_4. ११. निधायाह । Dc_4. १२. अणुदितोपि च Dc_2, Nc_2.

च[१] । [२]प्रत्ययस्तु न [३]सवर्णस्य ग्राहकः । यथा उप्रत्ययः । कुचुटुतुपु एते उदितः[४] । ततश्चावर्णः [५]स्वाष्टादशभेदान् गृह्णाति । तथा इउऋवर्णाः । लृवर्णो न दीर्घोस्ति । एच् ह्रस्वो नास्ति ।

तपरस्तत्कालस्य ॥ १।१।७०॥

'[६]अप्रत्यय इति । [७]अप्रत्ययादेश टित्कित्मित्[८] इति वक्तव्यम् । प्रत्ययः । 'सनाशंसभिक्ष उः ।' भिक्षुः । आदेशः । 'इदम इश् ।' इह । टित् । 'आर्धधातुकस्येड् वलादेः ।' लविता । कित् । 'भुवो वुक् लुङ्लिटोः ।' बभूव । मित् । 'अम् संबुद्धौ ।' हे अनड्वन् इत्यादिषु सवर्णानां ग्रहणं मा भूदित्येवमर्थम् । अथवा अप्रत्यय इति प्रत्ययग्रह[९]णेन न संज्ञाग्रहः किं त्वन्वर्थग्रहः । प्रतीयते विधीयत इति प्रत्ययः । तेनाप्रत्यय इत्यस्यायमर्थः । भाव्यमानोण् [१०]सवर्णान् न [११]गृह्णातीति । [१२]ईशादयोपि भाव्यन्त इति तेपि[१३] सवर्णग्राहका न । उदितः । कथयति । [१४]कुचु इति । सूत्रफलं दर्शयति । ततश्चेति । 'आद्गुणः' इत्यादाववर्णो गृह्यमाणः पूर्वोक्तान् [१५]ह्रस्वादीन् स्वाष्टादशभेदान् गृह्णाति । ततश्च उपेन्द्रः रमेशः इत्यादि सिद्धम् । तथेति । 'यस्येति च' 'ओर्गुणः' 'उरण् रपरः' इत्यादिषु इउऋवर्णास्तथा[१६]ष्टादश भेदान् गृह्णन्ति । लृवर्ण इति । दीर्घस्य प्रयोगाभावात् । एजिति । ह्रस्वानां प्रयोगाभावात् । ततश्चैते द्वादश द्वादश भेदान् स्वग्रहणेषु गृह्णन्ति । तपरः । तपर इति बहुव्रीहिस्तः परो यस्मादिति ।

---

१. च स्यात् D_2. २. Before this—प्रत्ययादन्य इत्युपलक्षणम् । विधीयमानोण् सवर्णस्य ग्राहको नेष्यते । D_5. ३. सवर्णग्राहकः B, D_5. ४. C has on the margin—उकारः पञ्चवर्णपरिग्रहणार्थः ।. ५. स्वादष्टादश° P, B_1. ६. प्रत्यय Dc_4. ७. प्रत्यया° Dc_4. ८. मित Bc_1. ९. °ग्रहणं Dc_1. १०. न सवर्णान् Dc_4. ११. इति dropped Dc_1. १२. इशादयोपि च Nc_1, Nc_2. १३. तेपि dropped Dc_1. १४. कुचुटु इति Nc_1; कुचुटुतुपु इति Dc_2, Dc_4. १५. ह्रस्वदीर्घप्लुतादीन् Dc_1. १६. °स्तथा चाष्टादशभेदान् स्वग्रहणेषु गृह्णन्ति Dc_4.

तपरस्तात्परो वा तावान् ग्राह्यः ॥

तुल्यास्यप्रयत्नं सवर्णम् । १।१।९॥

तुल्यौ स्थानप्रयत्नौ यस्य तदक्षरं मिथः सवर्णं स्यात् । ॠऌवर्णयोर्मिथः सावर्ण्यं वाच्यम् । वर्ग्यो वर्ग्येण सवर्णः ।

तात्पर इति पञ्चमीतत्पुरुषोऽप्यावृत्त्यात्र लभ्यत इत्यभिप्रेत्याह । तपरस्तात्परो वेति । तत्र बहुव्रीहेर्लिङ्गम् 'अतो भिस ऐस्' इति । अकारार्थं तपरकरणम् । पञ्चमीतत्पुरुषस्य लिङ्गं 'वृद्धिरादैच्' इत्यैजर्थं तपरकरणम् ।

तुल्यास्य । आस्ये भवमास्यं ताल्वादिस्थानम् । आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्यौ आस्यप्रयत्नौ यस्येति द्वन्द्वगर्भो बहुव्रीहिरित्यभिप्रेत्याह । तुल्यौ स्थानप्रयत्नौ यस्येति । स्थानस्यापि तुल्यत्वार्थं द्वन्द्वाश्रयण कृतम् । तुल्यः आस्ये प्रयत्नो यस्येति त्रिपदे बहुव्रीहावाश्रीयमाणे तुल्यत्वेन स्थानस्याविशेषितत्वाद् भिन्नस्थानानां कचटतपानां सवर्णसंज्ञा स्यात् । ननु द्वन्द्वगर्भाश्रयणे प्रयत्न आन्तरत्वेन न विशेषितः स्यात् । नैष दोषः । अत्र हि[10] स्थानसाहचर्यात् स्थाने यः प्रयत्नो वर्णोत्पत्तिकालभावी स विवक्षिष्यते । तेनान्तरो यः स्पृष्टतादिश्चतुर्विधः प्रयत्नः स एवेह गृह्यते न बाह्यो विवारादिः । अक्षरशब्दोत्र वर्णवाची । मिथः परस्परम् । ॠऌवर्णयोरिति । भिन्नस्थानत्वादप्राप्तं सावर्ण्यमुच्यते । तत्राचः[11] परस्परं सवर्णाः प्रदर्शिताः 'ततश्चावर्णः' इत्यादिना । हलः परस्परं सवर्णान् दर्शयति । वर्ग्यो वर्ग्येणेति । वर्गे भवो वर्ग्यः । दिगादित्वाद्यत् । वर्ग्यो यो वर्णः सोन्येन स्ववर्गान्तःपातिना सवर्णः स्यात् । तुल्यस्थानप्रयत्नात्[12] । सानुनासिकनिरनुनासिकत्वेन यवला

---

१. Before it—तुल्यशब्दः समपर्यायः । प्रयत्नं प्रयत्नः । D2. २. सवर्णसंज्ञं C, B2. ३. °प्यावृत्त्या dropped Dc1. ४. अत्र Dc3. ५. भिस् Dc1, Nc1, Dc3. ६. तुल्यार्थत्वार्थं Dc3. ७. स्थानस्यापि विशे° Dc3. ८. °श्रयणेन Dc3. ९. Dropped Dc3. १०. Dropped Dc3. ११. अत्राचः Dc3. १२. °प्रयत्नत्वात् Dc4.

रेफोष्मणां न स[1]वर्णः । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । उपूपध्मानीयानामोष्ठौ । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य द[2]न्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् ।

द्विधेति यवलानां सवर्णान् हल्सन्धौ वक्ष्यति । रेफोष्मणामिति । रेफस्य शषसहानां च भिन्नस्थानप्रयत्नत्वादन्ये भिन्नजातीया वर्णाः सवर्णा न स[3]न्ति । किं तु रेफस्य सजातीयो रेफ एव सवर्णः । तुल्यस्थानप्रयत्नत्वात् । तथा शस्य श एव । षस्य ष एव । सस्य स एव । हस्य ह एवेति भावः । आस्यग्रहणं किम् । कचटतपानां तुल्यप्रयत्नानां भिन्नस्थानानां मा भूत् । तत[4]स्तत्प्रेत्यत्र पकारस्य तकारे 'झरो झरि' इति लोपो न । प्रयत्नग्रहणं किम् । इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां मा भूत् । ततश्च अरुः [5]श्च्योततीत्यत्र शकारस्य चकार लोपो न [6]स्यात् । सवर्णप्रदेशाः 'अकः सवर्णे दीर्घः' इत्येवमादयः । इदानीं वर्णानां स्थानान्याह । अकुहेति । अत्र सर्वत्र अइउऋ एतेष्टादशभेदभिन्नाः लृएऐओऔ एत द्वादशभेदभिन्ना गृह्यन्ते । कुचुटुतुपु वर्गाः । एदैतोरि[7]त्यादि । तपरकरणं सुखोच्चारणार्थम् । इदानीं प्रयत्नानाह । स्पृष्टमित्यादि । स्पृष्टं स्पृष्टता गुणः तदनुगतं प्रयतनमुच्चारणं स्पर्शानाम् । एवं विवृतमूष्मणामित्यादौ व्याख्येयम् । त[8]त्र नाभिदेशात् प्रयत्नप्रेरितः प्राण ऊर्ध्वमाक्रामन् कण्ठप्रभृतीनाम[9]न्यतरस्मिन् स्थाने प्रयत्नेन विधार्यमाणः स्थानमभिहन्ति । तस्मात् स्था[10]नाभिघाताज्जातो ध्वनिः सा[11]काशो वर्णश्रुतिः । स वर्णस्यात्मलाभः । तत्र ध्वनावुत्पद्यमाने यदा कण्ठादिस्थानं जिह्वाग्रोपाग्रमध्यमूलानि

---

१. सावर्ण्यम् P, B1. २. दन्तौष्ठम् D1. ३. संभवन्ति Dc3. ४. ततश्च Dc3. ५. श्चोतती° Bc1, Dc3. ६. Dropped Bc1, Dc3, Dc4. ७. °रिति Dc4. ८. यत्र Dc1. ९. °मन्यतरस्य Dc1. १०. स्थानाभिघातजो Dc1. ११. आकाशे Dc2; सोवकाशे Dc3.

नासिकानुस्वारस्य[1] । स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तस्थानाम् । विवृतमूष्मणां स्वराणां च । [3]दीर्घप्लुतयोरवर्णयोर्विवृतत्वम् । संवृतं [4]ह्रस्वस्य । सोत्र सावर्ण्यार्थं विवृतः प्रतिज्ञायते । [5]कादयो मावसानाः स्पर्शाः ।

करणानि प्रयत्नश्च [6]परस्परं स्पृशन्ति सा स्पृष्टता । ईषद्यदा स्पृशन्ति सा ईषत्स्पृष्टता । सामीप्येन यदा स्पृशन्ति सा[7] संवृतता । दूरेण यदा स्पृशन्ति सा विवृतता । एते आभ्यन्तराः । आभ्यन्तरत्वं त्वेषां स्[8]थानकरणप्रयत्नव्यापारेणोत्पत्तिकाल एव भावात् । सोत्रेति । स[9] ह्रस्वोकारोत्र व्या[10]करणशास्त्रे दीर्घप्लुताभ्यां सावर्ण्यार्थं विवृत इ[11]ति प्रतिज्ञायते । तथा च शास्त्रान्ते सूत्रकारेण 'अ अ' इति सूत्रेण प्रत्यापत्तिः करिष्यते । इदानीं पूर्वोद्दिष्टानां स्पर्[12]शानाम[13]र्थानाह । काद्य इति । बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयोगिन इत्याचार्यवर्यैर्नोक्ताः । अस्माभिस्तु वर्णानामान्तरतम्यज्ञानायोच्यन्ते । ते चैकादश । विवारः । संवारः । श्वासः । नादः । घोषः । अघोषः । अल्पप्राणः । महाप्राणः । उदात्तः । अनुदात्तः । स्वरितश्च । तत्र पूर्वोक्त एव वायुर्यदा मूर्ध्नि प्रतिहतो निवृत्तः कोष्ठमभिहन्ति त[14]त्र यदा गलबिलस्य संवृतत्वं तदा संवारो नाम वर्णधर्मो जायते । यदा विवृतत्वं तदा विवारः । संवृते गलबिले अव्यक्तशब्दो नादः । विवृते श्वासः । श्वास उपरि[15]वर्ती वायुः । तौ श्वासनादाव[16]नुप्रदानमित्याहुः । अनु पश्चात् प्रदीयत इति । तत्र यदा स्थानाभिघातजे ध्वनौ नादोनुप्रदीयते तदा नादध्वनिसंसर्गादघोषो जायते । यदा श्वासोनुप्रदीयते तदा श्वासध्वनिसंसर्गादघोषः ।

१. After this—पञ्चमैश्च संयुक्तस्य ह्रस्य उरः D2. २. करणं P. ३. दीर्घप्लुतयोर्विवृ° B2. ४. ह्रस्वस्याकारस्य D2. ५. Before it—अचः स्वराः । हल् व्यञ्जनम् । D1. ६. यदा परस्परं Dc4. ७. तदा सा Dc3. ८. स्थानानां Bc1. ९. सः dropped Dc1. १०. व्याकरणे शास्त्रे Nc2; पाणिनीयव्याकरणशास्त्रे Bc1. ११. Dropped Dc3. १२. स्पर्शादीना° Bc1. १३. °मर्थमाह Dc4. १४. कोष्ठेभिहन्यमाने तत्र यदा Dc2. १५. °वर्ति Bc1, Dc3, Dc4. १६. कोचिदनुप्रदान° Dc2.

ञमङणना अनुनासिकाः । यरलवा अन्तस्थाः । शषसहा ऊष्माणः । ≍ क इति जिह्वामूलीयः । ≍ प इत्युपाध्मानीयः । अं इत्यनुस्वारः । अः इति विसर्जनीयः ।

वृद्धिरादैच् ॥१।१।१॥

महति वायौ महाप्राणः । अल्पे अल्पप्राणः । यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रः स्यात्तदा गात्रस्य निग्रहः कण्ठविवरस्य[२] चाणुत्वं स्वरस्य च[३] रौक्ष्यं स्यात्तमुदात्तमाहुः । यदा तु मन्दः प्रयत्नः स्यात्तदा गात्रस्य स्रंसनं कण्ठविवरस्य महत्त्वं स्वरस्य च[४] स्निग्धता स्यात् सोनुदात्तः । उदात्तानुदात्तसंबन्धात् स्वरितः । वर्णोत्पत्तिकालानन्तरमुत्पत्तेर्बाह्यत्वमेषाम्[५] । तत्र वर्गाणां[६] प्रथमद्वितीयाः शषसा विसर्जनीय ≍ क ≍ पा विवृतकण्ठाः श्वासानुप्रदाना अघोषाः । वर्गाणा[७] तृतीयचतुर्था अन्तस्था नासिक्या हानुस्वारौ च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च । वर्गाणां[८] प्रथमतृतीया अन्तस्थाश्चाल्पप्राणाः । इतरे सर्वे महाप्राणाः । यथा तृतीयास्तथा पञ्चमाः । आनुनासिक्यमेषामधिको गुणः । एते बाह्याः प्रयत्नाः । तत्र यमा नाम वर्गेष्वादितश्चतुर्णां पञ्चमेषु परतो ये त एव नासिक्या जायन्ते यथा पलिक्न्कीः चख्ख्नतुः आगग्मं नपाम् जघ्घ्नतुः अपप्न स्वतीत्यादौ कुंखुंगुंघुं इति । वृद्धिरादैच् । वृद्धिः आदैजिति द्विपदं सूत्रम् । आदैजिति समाहारद्वन्द्वैकवचनम् । समासान्तविधेरनित्यत्वात् 'द्वन्द्वाच्चुदशहान्तात् समाहारे' इति टच् न । 'अयस्मयादीनि छन्दसि' इति भत्वात् 'चोः कुः' इति कुत्वं न । छन्दस्त्वं तु 'छन्दोवत् सूत्राणि भवन्ति' इति वचनात् । लाघवार्थम इति वाच्ये दीर्घोच्चारणसामर्थ्याद् द्विमात्र एव ग्रहीष्यते न मात्रिकत्रिमात्रौ । अतो नाकारार्थं तपरत्वम् ।

१. अन्तस्था यरलवाः । D_2. २. तदा कण्ठ° Dc_1. ३. च वायोस्तीव्रगतित्वाद्रौक्ष्यं Dc_2; Dc_4 drops च. ४. वायोर्मन्दगतित्वात् स्निग्धता Dc_2. ५. °मुत्पत्तेर्हेतो° Nc_1. ६. वर्गयमानां Dc_2, Bc_1. ७. वर्गयमानां Dc_2, Bc_1. ८. वर्गयमानां Dc_2, Dc_3.

कृताकृतानामादैचां वृद्धिसंज्ञा स्यात् ।

अदेङ् गुणः ॥१।१।२॥

[१]अदेङां गुणसंज्ञा स्यात् ।

इको गुणवृद्धी ॥१।१।३॥

किं त्वैजर्थम् । कृताकृतानामिति । वृद्धिशब्दोच्चारणेन कृतानां तेनाकृतानां च आदैचां सामान्येन वृद्धिसंज्ञा स्या[२]दित्यर्थः । तेनौपगवीयः शालीय इत्यादि सिद्धम् । ननु कृतानां संज्ञायामितरेतराश्रयत्वं स्यात् । 'मृजेर्वृद्धिः' इत्यादौ संज्ञया हि क्रियन्ते । कृतानां च संज्ञेति । नैष दोषः । भाविनीयं संज्ञा विज्ञास्यते । ततश्चायमर्थः स्यात् । यस्य कृतस्य वृद्धिसंज्ञा स्यादिति । लोके च भाविन्यः संज्ञा दृश्यन्ते । तथा हि । कश्चित्तन्तुवायमाह । अस्य सूत्रस्य शाटकं वयेति । स पश्यति यदि वेयो न शाटकः । शाटकश्चेन्न वेयः । अतो मन्ये स वेयो यस्मिन्नुते शाटकसंज्ञा स्यादिति । इदं सूत्रमनर्थकम् । साध्वनुशासनार्थं प्रयोगनियमार्थमागमार्थमादेशार्थं विशेषणार्थं तद्गुणाध्यारोपणार्थं वेति सप्तानां विकल्पानां निराकरणं **महाभाष्यादेरवगन्तव्यम्** । वृद्धिप्रदेशाः 'वृद्धिरेचि' इत्येवमादयः ।

अदेङ् । पूर्वेण तुल्यं व्याख्यानमस्य । तपरत्वं त्वत्रत्यमकारार्थमेङर्थं च । गुणप्रदेशाः 'मिदेर्गुणः' इत्येवमादयः ।

इकः । इयं परिभाषा नाधिकारः । अस्वरितत्वात् । परिभाषा चैकदेशस्था सर्वं शास्त्रमभिज्वलयति । यदाहुः ।

'परितो व्याप्तृतां भाषां परिभाषां प्रचक्षते' इति ।

सा चानियमप्रसङ्गे नियमो विधीयत इति । यत्र साक्षात् स्थानी न निर्दिष्टः 'सार्वधातुकार्धधातुकयोः' 'सिचि वृद्धिः—' इत्यादौ

१. Dropped P. २. अदेङौ गुणसंज्ञौ स्याताम् । P, D_1; अदेङोर्गुणसंज्ञा स्यात् B_2. ३. स्यादिति Dc_4. ४. संज्ञायां Nc_1. ५. °मर्थः । स स्यात् Dc_1, Nc_1. ६. °संज्ञः Bc_1. ७. °मादेशार्थमागमार्थ° Bc_1, Dc_4. ८. यथाहुः Bc_1. ९. व्यावृतां Dc_4.

गुणवृद्धी स्वसंज्ञया विधीयमाने इक एव स्थाने स्तः ।

तत्रैव स्थानिनियमार्था प्रवर्तते । न 'अचोञ्णिति' इत्यादौ । स्थानि-निर्देशात् । 'वृद्धिरादैच्' इत्यतो 'वृद्धिः' 'अदेङ् गुणः' इत्यतो 'गुणः' इत्यनुवर्तमानेपि नगुणवृद्धिग्रहणं गुणवृद्धिसंज्ञया शिष्यमाणे इत्यस्यार्थस्य प्रतिपत्त्यर्थमित्यभिप्रेत्याह । **स्वसंज्ञयेति** । गुणवृद्धिसंज्ञयेत्यर्थः । इक इति किम् । आत् सन्ध्यक्षरव्यञ्जनानां मा भूत् । अन्यथा यानमित्यत्र यातेरने परे आकारस्य गुणे अकारे कृते 'अतो गुणे' इति पररूपे च यनमित्य-निष्टं रूपं प्रसज्येत । ग्लायतीत्यत्रैकारस्य गुणे एकारे कृते ग्लयतीति स्यात् । उभ्मितेत्यत्र भकारस्य ओकारे गुणे उमवितेत्यनिष्टं रूपं स्यात् । अतो गुणविधौ 'सार्वधातुकार्धधातुकयोः' इत्यादाविक इति भाव्यम् । अन्यथा चिरिजियोर्लुङि सिचि इटि अन्तरङ्गत्वाद्गुणाया-देशयोः कृतयोः 'ह्मयन्तक्षण–' इति यान्तत्वाद्वृद्धि निषेधः स्यात्ततश्च अचिरयीत् अजिरयीदित्यनिष्टं रूपं स्यात् । इकि तु सति सिचि वृद्ध्यान्तरङ्गस्य गुणस्य बाधः । अन्यथा न क्वापि सिचीगन्तं स्यात् । ततश्च अचिरायीत् अजिरायीत् इत्यादि सिद्धम् । स्वसंज्ञया विधीय-मान इति किम् । द्यौः । पन्थाः । इमम् । इत्यत्र 'दिव औत्' 'पथिमथ्यृभुक्षामात्' 'त्यदादीनामः' इत्येत इकः स्थाने मा भूव-न्निति । अस्मिन्सूत्रे अन्यदाक्षेपसमाधानादिकं महाभाष्यादेरवगन्तव्यम् । फलितमेवास्माभिरुक्तम् ।

---

१. Before it—अनिर्दिष्टस्थाने D_1; अनिर्दिष्टस्थानके B_1. B_2; गुणवृद्धी after विधीयमाने B_2. २. Dropped D_2. ३. °निर्दिशत्वात् Dc_3. ४. क्रियमाणे Dc_4. ५. Dropped Dc_1. ६. वृत्ते Dc_4. ७. स्यात् Dc_1. ८. Dropped Dc_3, Dc_4. ९. गुणे ओकारे Dc_4. १०. °गन्तमङ्ग Dc_2.

अदर्शनं लोपः ॥१।१।६०॥

वर्णानामदर्शनं लोपसंज्ञं स्यात् ।

भूवादयो धातवः ॥१।३।१॥

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥

अदर्शनम्। वर्णानामदर्शनमिति। 'षष्ठी स्थाने योगा' इत्यतः प्रसङ्गवाचिनः स्थानशब्दस्यानुवृत्तेः प्रसक्तानां वर्णानामश्रवणमित्यर्थः। लोपप्रदेशा 'लोपो व्योर्वलि' इत्येवमादयः।

भूवादयः। लध्वर्थमेकाक्षरायां संज्ञायां कार्यायां महत्याः पूर्वाचार्यसंज्ञाया यदाश्रयणं तत्तैर्यादृशां संज्ञा विहिता तादृशामेव यथा स्यादित्येवमर्थम्। तैस्तु क्रियावाचिनां विहितेत्यभिप्रेत्याह। **क्रियावाचिन** इति। क्रिया नाम साध्यमानस्वरूपा पूर्वापरीभूतावयवा। तथा चोक्तम्।

'यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥' इति।

तेन धातुसमानानामक्रियावाचिनां वादीनां न। ते च धातुपाठपठिता एव गृह्यन्ते तेनाणवयेत्यादीनां न। ननु च भू आदिर्येषामिति बहुव्रीहौ संहितया निर्देशे यणादेशे सति भ्वादय इति भाव्यं तत् कथं भूवादय इति। उच्यते।

'भूवादीनां वकारोयं मङ्गलार्थः प्रयुज्यते।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः॥'

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि च' इति मध्ये मङ्गलार्थं

---

१. भू इत्येवमादयः क्रियावाचिनो धात° D1.२. यादीनां Pc1, Dc3. ३. तेन भावयेत्यादीनां Bc1. ४. संहितानिर्देशे Nc1. ५. स्यात् Nc1, Dc4. ६. मङ्गलार्थं Bc1. ७. वीरपुरुषाणि Nc1, Nc2, Dc4. ८. °पुरुषाणि Nc1, Nc2. Dc2.

भूवादीनां वकारोयं मङ्गलार्थः प्रयुज्यते ।
भुवो वार्थे वदन्तीति भ्वर्था वा वादयः स्मृताः[१] ॥

वकारः प्रयुज्यते । द्वितीयं प्रकारमाह । भुवो वार्थे वदन्तीति । भुवो धातोरर्थं वदन्तीति वा भूवादयः । अर्थकथनमेतत् । व्युत्पत्तिस्तु भवनं भूः[२] क्रियासामान्यम् । भुवं वदन्तीति वदेरौणादिक इण् । यद्येवमस्ति-भवतिविद्यतीनामेव स्यान्न पचतीत्यादीनाम् । क्रियाविशेषवाचित्वात् । न । विशेषेपि[४] सामान्यस्य सत्त्वात् । भाव[५] इति पाकस्त्याग इत्यादौ घञ्विधिवद् भविष्यति । अस्मिन्पक्षे पाठसामर्थ्यात् पाठोप्यङ्गीक्रि-[६]यते । तृतीयं प्रकारमाह । भ्वर्था वा वादयः स्मृता इति । भवनं भूः सोर्थो येषां ते भ्वर्थाः । वादय इति । वा गतिगन्धनयोरिति आदिर्येषां ते वादयः वा गतीत्यारभ्य चुरादिसमाप्तेस्तथा[७] वा अस्य आदयो वादयः भूप्रभृतयः आ वा गतिगन्धनयोरस्मात्[८] । वादयश्च वादयश्च वादयः । एकशेषः । भूवो वादय इति वाच्यवाचकसंबन्धषष्ठ्याः[९] समासः । अत्र पक्षे पाठार्थौ सूत्राक्षरैरेवोपात्तौ विचारविशेषादर्थविशेषो महाभाष्यात् ज्ञेयः । तथा हि । भूवादय इति भू सत्तायां वा गतिगन्धनयोरनयोः प्रत्ये-कमादिशब्दः संबध्यते । तत्र यदा सपरिस्पन्दसाधनसाध्या[१०] क्रिया[११] धात्वर्थ इति पक्षस्तदा भूरादिर्व्यवस्थितिर्येषां वा आदिः प्रकारो येषां ते भूवादयो भूइत्यादयो वाप्रकारा वासदृशाः क्रियार्था इत्यर्थः । यदा त्वपरिस्पन्दसाधनसाध्यो भावो धात्वर्थस्तदा[१२] भूप्रकारा भाववचना वा इत्यादयो धातवः स्मृता इत्यादि[१३] ।

---

१. After this—अमृतात्मा प्रसिद्धोसावागमे तेन सिद्ध्यति ।
धातूनशेषशब्दानां बीजभूतान्महामुनिः ॥ २ ॥

K. remarks in regard to the verse भूवादीनां°—क्वचिदयं मूलेपि पठ्यते । कारकाणां प्रवृत्तिविशेषः क्रिया । C, D_1. २. After it सत्ता Dc_1, Dc_3, Dc_4. ३. विद्यतीत्यादीनां° Dc_3. ४. विशेषेष्वपि Bc_1. ५. यथा भाव इति Dc_3. ६. पाठोयमङ्गी° Nc_1. ७. आ चुरादि° Nc_1, Dc_2. ८. °रित्यस्मात् Dc_1. ९. °संबन्धः । षष्ठ्या Dc_4. १०. साध्यक्रिया Nc_1. ११. क्रियाभावो धात्वर्थ Dc_1. १२. धात्वर्थ इति पक्षः Dc_2. १३. Dropped Dc_2; इति Dc_1, Dc_3.

उपसर्गाः क्रियायोगे ॥१।४।५९॥

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र परा

उपसर्गाः । मरुच्छब्दस्य उपसर्गसंज्ञा वाच्या । मरुत्त इति मरुच्छब्दात् परस्य दाञः क्तप्रत्यये 'अच उपसर्गात्तः' इति तत्त्वविध्यर्थं विधिसामर्थ्यादनजन्तादपि तत्त्वम् । क्रियायोगे किम् । प्रगतो नायकोऽस्मात् प्रनायको देशः । अत्रोपसर्गाभावान्न णत्वम् । ननु चात्र गमिक्रियायोगोऽस्त्येव । प्रादीनां क्रियायोगाव्यभिचारात् । सत्यम् । तथापि क्रियाग्रहणसामर्थ्याद्यत्क्रियायुक्तास्तां प्रत्युपसर्गसंज्ञाः स्युः । नान्याम् । तेनेह नयतिं प्रत्युपसर्गता न ।

कृष्णाचार्यै रामचन्द्राचार्यभ्रातृसुतैः कृताः ।
सोदाहृत्युपसर्गार्थश्लोका ये ताँल्लिखाम्यहम् ॥ १ ॥

प्र आदिकर्मदीर्घेशे भृशसंभवतृप्तिषु ।
वियोगशुद्धिशक्तीच्छाशान्तिपूजाग्रदर्शने ॥ २ ॥

आदिकर्मणि क्तः । प्रयातः । दीर्घे । प्रबला मूषकाः । ईशे । प्रभुर्देशस्य । भृशार्थे । प्रवदन्ति दायादाः । संभवे । हिमवतो गङ्गा प्रभवति । तृप्तौ । प्रभुक्तमन्नम् । वियोगे प्रोषितः । शुद्धौ । प्रसन्नमुदकम् । शक्तौ । प्रशक्तो विप्राय । इच्छायाम् । प्रार्थयते कन्याम् । शान्तौ । प्रशान्तोर्मिः । पूजायाम् । प्राञ्जलिः स्थितः । अग्रे । प्रवालम् । दर्शने । प्रलोकयति ।

वधे गतौ दर्शने च विक्रमाभिमुखे भृशौ ।
अधीनमोक्षणप्रातिलोम्यकेषु परा मतः ॥ ३ ॥

वधे । पराहतः । गतौ । परागतः । दर्शने । परादृष्टः । विक्रमे । पराक्रान्तः । अभिमुखे । परावृत्तः । भृशे । पराजितः । अधीने । पराधीनः । मोक्षणे । पराकृतः । प्रातिलोम्ये । पराङ्मुखः ।

---

१. Dropped P. २. °सर्गत्वा° Dc4. ३. °क्रियया युक्ता° Nc1. ४. प्रवदन्तीति Dc3. ५. संभवेपि Dc4. ६. प्रसक्तो Dc3. ७. अधीने Dc4.

अप सम् अनु अव निर् दुर्

अपो वियोगे [1]विकृतौ विपरीते निदर्शने ।
आनन्दे वर्जने चौर्ये वारणे सम्यगीरितः ॥ ४ ॥

अपयाति । अपकृतवान् । अपशब्दः । अपदिशति । अपहसति । [2]अपत्रिगर्ताद्वृष्टो देवः । अपहरति । अपसरति ।

संयोग ऐक्यप्रभवसत्यप्रत्यक्षसिद्धिषु ।
भूषाश्लेषस्वीकरणक्रोधाभिमुखवाचि सम् ॥ ५ ॥

संगतः पुत्रेण । संवदन्ति सख्यः । संभवत्यभिः । कोष्ठे गां [3]संजानामि । संपश्यते । संसिद्धिः । संस्कृता कन्या । संधत्ते । संगृह्णाति । संक्रुद्धः । संयाति[4] ।

वेदाधिष्ठानसामीप्यपश्चाद्भावानुबन्धने ।
साम्याभिमुखहीनेषु विसर्गे लक्षणे त्वनु ॥ ६ ॥

अनुवाकमधीते । अनुष्ठानं देशे । अनुमेघं वर्षति । अनुरथम् । अनुशयः । अनुकृतिः । अनुवत्सो मातरं धावति । अन्वर्जुनं योद्धारः । [6]अनुज्ञातः । अनुधनमसतां गतिः ।

ज्ञानावलम्बशुद्धीषदर्थे व्याप्तिपराभवे ।
अवो ज्ञेयो वियोगे च लोकयोगानुसारतः ॥ ७ ॥

अवगतोर्थः । अवलम्ब्य यष्टिं गच्छति । अवदातम् । अवलम्बते । अवकीर्णम् । अवघ्नन्ति । अवयातः ।

निर्वियोगात्ययादेशातिक्रमे लाभनिश्चिते ।

निःसङ्गो ब्रवीति । निर्मेघम् । निर्दिष्टम् । निःक्रान्तः । निर्वेशः । निश्चितम् ।

दुरीषदर्थे कृच्छ्रेर्थे कृशासंपत्तिसंकटे ॥ ८ ॥

दुर्गतः । दुर्जीवनः । दुर्बलः । दुर्गतः । दुर्दिनम् ।

---

१. निकृतौ Bc_1. २. अपत्रिगर्तेभ्यो वृष्टो देवः Dc_3. ३. सजानाति Dc_4. ४. After it—इत्यादि Dc_2. ५. विसर्गलक्षणे Nc_1. ६. अनुज्ञाताः Dc_3. ७. °दर्थे° Dc_3. ८. दुःपावनः Dc_2.

वि आङ् नि

नानावियोगातिशय[1]भृशमोहेशवाङ्मृधे ।
पैशून्यास्मरणे भूषेषदर्थनाभिमुख्यके ॥ ९ ॥
अनवस्थामुख्यशौर्यदर्शने विरुदाहृतः ।

विचित्रा सूत्रस्य[2] कृतिः । वियुक्तः । विकीर्णः[3] । वितटा नद्यः । विमनस्कः । विभुः । विवदन्ति[4] । विगायति । विस्मृतः[5] । विभूषितः । विलोपितः[6] । विमुखः[7] । विभ्रान्तः[8] । विशिष्टः । विक्रान्तः । विलोकयति ।

आङिच्छाभयवाक्येषदर्थाश्लेषादिकर्मणि ॥ १० ॥
बन्धनेभिविधौ शाठ्यकृच्छ्रसामीप्यसंश्रये ।
अभिमन्त्रनिवृत्त्याशादानानुभवविस्मये ॥ ११ ॥
प्रतिष्ठादेशमर्यादास्पर्धामुख्योर्ध्वकर्मणि ।

आकाङ्क्षते । आविग्नः । आजानाति । आताम्रा नखाः । आलिङ्गति । आरभते । कवचमाबध्नन्ति । आकुमारं यशः । आचरति कपटेन । आहूकृतः । आसन्ना[10] वयम् । आवसथः[11] । आमन्त्रणम् । आधावति । आशास्ते । आदत्ते । आशितम्[12] । आ एवं किल तत् । आस्पदम् । आदिष्टः । आभक्तेर्दुःखम् । आह्वयन्ते रथिनो रथिनः । आगच्छति । आरोहति पर्वते[13] ।

राश्यै[14]धस्त्वभृशादेशनित्यकौशलबन्धने ॥ १२ ॥
अन्तर्भावे समीपे निर्दर्शने परमाश्रये ।

निकरो मणीनाम्[15] । निपतितम् । निगृहीतः[16] । निदेशितम् । निविशते । निपुणः । निबद्धः । निपीतमुदकं सिकताभिः । निकृष्टः । निदर्शनम्[17] । निवृत्तः पापात् । निलयः ।

१. °शये Dc_4. २. सत्रकृतिः Dc_2. ३. विप्रकीर्णः Dc_1. ४. विवदन्ते वादिनः Dc_2. ५. विस्मितः Dc_1. ६. विलोचनः Nc_1. ७. विमुखाः Dc_3. ८. विभ्रमः Nc_2. ९. °त्याशीर्वा° Bc_1, Dc_4. १०. आसन्नः Dc_1. ११. आवसथम् Dc_3; आवसथ्यम् Dc_4. १२. आशितम् Dc_3, Dc_4. १३. पर्वतम् Dc_3, Dc_4. १४. संघा° Dc_2, Dc_4. १५. मुनीनाम् Dc_4. १६. निगृहीतम् Bc_1, Dc_3, Dc_4. १७. निदर्शितम् Dc_3.

अधि अपि अति सु उत् अभि

अधिरध्ययनैश्वर्यवशित्वस्मरणाधिके[1] ॥ १३ ॥

उपाध्यायादधीते । अधिपतिः । अधीनः । मातुरध्येति । अधिकृतम् ।

अपि संभवगर्हाशीर्भूतिभूषासमुच्चये ।

अपि योजनमस्ति । अपि पापिन् । भद्रमपि । मरणमपि । अपिनह्यति हारम् । तदपि ।

विक्रमातिक्रमे बुद्धौ भृशार्थातिशये त्वतिः ॥ १४ ॥

अतिरथः । अतिक्रामति । अतिगहनम् । अतितप्तम् । अतिमनुते ज्ञानम् ।

प्रशंसानुमते पूजाभृशकृच्छ्रशुभेषु सुः ।

सुरूपः । सुकृतम् । सुसाधुः । सुतप्तः । सुदुष्करम् । सुगन्धः ।

उत् प्राबल्यवियोगोर्ध्वकर्मलाभप्रकाशने ॥ १५ ॥

आश्चर्यमोक्षणे भावे बलप्राधान्यशक्तिषु ।

उद्बलः । उद्गच्छति । उत्तिष्ठति शयनात् । उत्पन्नम् । उच्चरति । उत्सुकः । उद्गतोश्वः[2] । उत्पथः । उत्कः । उद्दिष्टः[3] । उत्साहः ।

अभिः पूजाभृशार्थेच्छाव्याधिसाम्या[4]भिमुख्यके ॥ १६ ॥

सौरूप्या[5]वचनाहारस्वाध्यायेषु निरूपितः ।

अभिवदति[6] गुरुम् । अभियुक्तः । अभिलिप्सते । अभिस्यन्दो व्याधिः । अभिजातः । अभिमुखम् । अभिरूपः[7] । अभिधानम् । अभ्यवहरति । अभ्यस्यति ।

---

१. °दिके Dc4. २. उद्गतोश्वम् Dc4; उद्गतमुखः Dc1. ३. उद्दिष्टम् Dc3. ४. °शाम्या° Dc3. ५. सारूप्य° Bc1. ६. अभिवदते Bc1. ७. अभिरूपम् Dc3.

प्रति परि उप एते प्रादयः ।

विरामोवसानम् ॥ १।४।११० ॥

वर्णानामभावोवसानसंज्ञः[1] स्यात् ॥

सादृश्यादानहिंसाङ्गीकृतौ प्रतिनिधौ[3] क्वचित् ॥ १७ ॥
व्याध्यभिमुख्ययोर्व्याप्तौ वारणे **प्रति**रुच्यते ।

प्रति देवदत्तस्य । प्रतिगृह्णाति । प्रतिहन्ति । प्रतिज्ञानम्[2] । अभिमन्युरर्जुनतः प्रति । प्रतिश्यायम्[4] । प्रतिसूर्यं गच्छति[5] । प्रतिकीर्णं पांशुभिः । प्रतिषिद्धः ।

परिः समन्ततो भावव्याप्तिदोषकथासु च ॥ १८ ॥
भूषाश्लेषे पूजने च वर्जने वसने शुभे ।

परिभ्रमति । परिगतोग्निर्ग्रामम् । परिवादः । परिकरोति[6] कन्याम् । परिष्वजते । परिचरति गुरुम् । परित्रिगर्तेभ्यो वृष्टो[7] देवः । परिधत्ते वासः । परिदेवनम् ।

उपः सामीप्यसामर्थ्यव्याप्त्याचार्यकृतौ मृतौ ॥ १९ ॥
दोषादानक्रियावीप्सारम्भाध्ययनपूजने ।
[8]कृष्णाचार्यैः कृताः श्लोका उपसर्गार्थसंग्रहे ॥ २० ॥

उपकुम्भं तिष्ठति । उपकरोति मित्रेभ्यः । उपकीर्णः पांशुभिः । उपदिशति शिष्येभ्यः । उपरतः । उपघातः । उपहरत्यर्थं देवदत्ताय । उपचारः । देवं देवमुपचरति[9] । उपक्रमते भोक्तुम् । उपाध्यायादधीते । उपचितः पिता पुत्रेण ।

समाप्ता[10] सोदाहरणोपसर्गवृत्तिः ।

विरामः । विरतिर्विरामः । स चात्र शब्दानुशासनप्रसङ्गाद्वर्णानामित्याह । **वर्णानामिति** ।

---

१. °संज्ञं B_2. २. प्रतिज्ञातम् Bc_1, Dc_4. ३. प्रतिनिधिः Dc_1. ४. प्रतिश्यायः Bc_1, Dc_3; प्रतिश्यामः Dc_4. ५. गतिः Dc_2; गच्छन्ति Dc_4. ६. परिष्करोति Bc_1, Dc_3. ७. देवो वृष्टः Dc_3. ८. This and the following line—अष्टादशोदाहृता हि सोदाहरणरूपतः are given after उपचितः पिता पुत्रेण Dc_2, Dc_4. ९. उपचरितः Dc_4. १०. Dc_2, Dc_4 drop this line.

परः संनिकर्षः संहिता ॥ १।४।१०९ ॥

[1]अतिशयितः संनिधिर्वर्णानां यः[2] स संहितासंज्ञः स्यात् ॥

सुप्तिङन्तं पदम् ॥ १।४।१४ ॥

सुबन्तं तिङन्तं च[3] पदसंज्ञं[4] स्यात् ॥

अतिशयित इति । अनेन परशब्दोतिशयेऽत्र[5] वर्तत इत्युक्तम्[6] । ततश्चान्यार्थो[7] न । **संनिधिरि**त्यनेन **संनिकर्ष**शब्दो न संश्लेषवचनस्तस्य वर्णेष्वसंभवात् किं तु प्रत्यासत्तिवचन इत्युक्तम् । स चातिशयितः संनिधिरीदृशः । यावता कालेन मात्राया अर्धमुच्चार्यते तावता[8] काल-व्यवधानेन वर्णानामुच्चारणम् । तस्य च कालस्यातिसूक्ष्मत्वाद् दध्यत्रे-त्यादौ वर्णाः संसृष्टा इव भान्ति ।

सुप्तिङ् । तिङा साहचर्यात् सुबित्यपि प्रत्याहारस्य ग्रहणं न सप्तमीबहुवचनस्य । 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति वचनाद्विनाप्यन्तग्रहणं[9] तदन्तस्यैव संज्ञासिद्धावप्यन्त ग्रहणमन्यत्र[10] संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधार्थम् । तेन तरप्तमोरेव[11] घसंज्ञा न[12] तदन्तस्य[13] ।

---

१. वर्णानां योतिशयितः संनिधिः स संहिता° D_1. २. यः सः dropped B_1. ३. Dropped B_2, D_3. ४. पदं D_1. ५. अत्र dropped Nc_1, Dc_1. ६. इत्युक्तं भवति Dc_3. ७. °श्चान्यार्थे न Dc_2, Bc_1. ८. तावत्काल° Dc_3, Dc_4. ९. °ग्रहं Nc_2. १०. °ग्रहणविधिरन्यत्र Dc_2. ११. तरप्तमपो° Bc_1, Dc_3, Dc_4. १२. स्यान्न Dc_2, Nc_1, Bc_1, Dc_4. १३. After this Bc_1, Dc_2, and Dc_4 have—अत्र केचिच्चोदयन्ति । युक्तं तिङिति प्रत्याहारग्रहणम् । अन्यस्य तिङ्शब्दस्याभावात् । सुबिति तु कथं प्रत्याहारग्रहणं यतः सप्तमी-बहुवचनं सुप् अतस्तस्य सुपो ग्रहणं कुतो न स्यात् । अत्रोच्यते । 'न ङिसंबुद्ध्योः' इति निषेधात् । तथा हि यद्येतत् सप्तमीबहुवचनस्य ग्रहणमिष्टं स्यात्तदा ङौ संबुद्धौ च परतः पदत्वाभावान्नलोपनिषेधोनर्थकः । तस्मान्नलोपनिषेधान्यथानु-पपत्त्या प्रत्याहारग्रहणमेवेदमिति व्यवस्थितम् ।; After न तदन्तस्य Dc_3 has—ब्राह्मणी कालितरेत्यत्र अतिशयेन काली कालितरेत्यत्र तरप्निमित्तो ह्रस्वो भवति । अन्तग्रहणे न भवति ।

हलोनन्तराः संयोगः ॥१।१।७॥

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः

चादयोसत्त्वे ॥१।४।५७॥

अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः ॥

प्रादयः ॥१।४।५८॥

प्रादयोपि[1] निपातसंज्ञाः स्युः ॥

हलः । समुदायः संज्ञी तेन निर्यायादित्यत्र 'वान्यस्य' इत्येत्वं न । प्रत्येकसंज्ञापक्षोपि[2] भाष्ये समर्थितः । अन्तरं व्यवधानं तच्च विजातीयैरेव स्यादित्याह । अज्भिरिति[3] । हल इति जातौ बहुवचनम् । तेन द्वयोर्बहूनां च संज्ञा स्यात् । हल[4] इति किम् । 'तनोतेर्डउः सन्वच्च' इति तितउ छत्रम् । हल इत्यनुक्तावुकारस्य[5] 'संयोगान्तस्य' इति लोपः स्यात् । अनन्तराः किम् । पनसम् । अत्र 'स्कोः—' इति सलोपः स्यात् ॥

चादयः । 'प्राग्रीश्वरान्निपाताः' इति सूत्रेण 'अधिरीश्वरे' एतत्पर्यन्तं निपाताधिकारः क्रियते । ततो निपात इत्यनुवर्तत इत्यभिप्रेत्याह । **निपातसंज्ञा** इति । इदं तदिति सर्वनामप्रत्यवमर्शयोग्योर्थो द्रव्यम् । तथोक्तं भर्तृहरिणा प्रकीर्णकाण्डे ।

'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन विवक्षितः ॥'

भेद्यत्वेन विशेष्यत्वेनेत्यर्थः । चादीनव्ययप्रकरणे वक्ष्यति । असत्त्वे किम् । पशु वै पुरुष इत्यत्र पशुशब्दस्य चादित्वेपि जातिव्यवच्छिन्नद्रव्यवाचित्वान्निपातत्वं न ।

प्रादयः । अद्रव्यार्था इत्येव[7] । पृथग्योगकरणं 'उपसर्गाः क्रियायोगे' इत्यत्र प्रादीनामेवानुवृत्तिः स्यान्न चादीनामित्येतमर्थम् ।

---

१. प्रादयो निपाताः P; D_2; प्रादयोपि निपाताः C_1, D_1, B_2, D_3. २. अपि dropped Dc_2. ३. °रित्यादि Dc_3. ४. हलः किम् Dc_3. ५. अनुस्वारस्य उकारस्य च Dc_2. ६. व्यवस्थितः Dc_1. ७. एव Dc_3.

आद्यन्तौ टकितौ ॥ १।१।४६ ॥

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तयोः स्तः ॥

मिदचोन्त्यात्परः ॥ १।१।४७ ॥

अन्त्यादचः परो मित्[1] स्यात् ॥

अनेकाल् शित् सर्वस्य ॥ १।१।५५ ॥

अनेकालादेशः शिच्च[2] सर्वस्य[3] स्यात्[4] ॥

ङिच्च ॥ १।१।५३ ॥

ङिदनेकालप्यन्त्य[5]स्यैव स्यात् ॥

आद्यन्तौ । टकारककाराविते यथोस्तौ टकितौ । इत् शब्दः प्रत्येकमभिसंबध्यते । टकारे अकारः सुखोच्चारणार्थः । सिंहावलोकित[6]-न्यायेन वक्ष्यमाणं 'षष्ठी स्थाने योगा' इत्यतः षष्ठीग्रहणमनुवर्तते । अथवा आद्यन्तावयवौ तौ चावयविनमपेक्ष्य वर्तेते । ततश्चावयवाव-यविसंबन्धेवयवी षष्ठ्या निर्देष्टव्य इति सामर्थ्यात् षष्ठी निर्दिष्टस्येति स्यादिति सर्वमभिप्रेत्याह । **टित्कितौ यस्योक्तौ तस्येति** । 'षष्ठी स्थाने योगा' इत्यस्याः परिभाषाया अयमपवादस्तेनेयमपि परिभाषा ॥

मिदचः । अन्त्यादित्यादि । सन्निविष्टानामचां मध्येन्त्यादचः परो मित् स्यादित्यभिप्रायः ॥

अनेकाल् । सर्वस्येति । षष्ठीनिर्दिष्टस्य सर्वस्येति भावः । शितः शकारेणानेकाल्त्वेपि पृथग्[7] ग्रहणं 'नानुबन्धकृतमनेकाल्त्वं स्यात्' इति ज्ञापनार्थम् । तेन 'दिव औत्' इत्यादौ सर्वादेशो न ॥

---

१. मित्संज्ञः D_5. २. च्च dropped B_2. ३. सर्वस्यैव D_1, D_4. ४. After it—नानुबन्धकृतमनेकाल्त्वमिति शिद्ग्रहणम् । P, C, B_1, D_3 (इति शिद्ग्रहणं dropped in D_3.) ५. °न्त्यन्तस्यैव D_1, D_2. ६. °वलोकन° Dc_2. ७. पृथक्स्थान्याश्रयणं ग्रहणं Nc_1.

स्थानिवदादेशोनल्विधौ ॥ १।१।५६ ॥

धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः स्थानिवत् स्युर्न त्वल्विधौ ॥

इति संज्ञ्युपयोगिसंज्ञाप्रकरणम् ॥

स्थानिवत्[1]। स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न स्यादिति कार्यातिदेशोयमारभ्यते[2]। स्थानिना तुल्यं वर्तते स्थानिवत्। स्थान्याश्रयाणि कार्याण्यादेशेपि स्युरित्यर्थः। अतिदेशस्य प्रयोजनान्याह। **धात्वङ्गेत्यादिना**। धात्वादेशो धातुवत्। 'अस्तेर्भूः'। भविता। धातुत्वात् तृच्। केन[3]। किमोङ्गस्यादेशः कस्तस्याङ्गवत्त्वादिनः। प्रकृत्य। कृतः क्त्वो ल्यप् तस्य कृत्त्वात् तुक्। अद्यतनम्[4]। द्योस्तद्धितस्यानस्तस्य तद्धितत्वात् प्रातिपदिकत्वम्। प्रस्तुत्य[5]। अव्ययस्य क्त्वो ल्यप् तस्याव्ययत्वात् सुपो लुक्। रामाय। सुपो ङेर्यः। तस्य सुबन्तत्वाद् दीर्घः। भवताम्। तसस्तिङस्तान्तस्य च तिङ्त्वात् पदत्वम्। ग्रामो वः स्वम्। युष्माकमिति पदस्य वः। तस्य पदत्वाद्रुत्वमित्यादीनि प्रयोज्यानि[6]। **न त्वल्विधाविति**। अलाश्रितो विधिरल्विधिरित्युत्तरपदलोपी समासः। ततश्च योलि विधिर्यश्चालो विधिर्यश्चालः परस्य विधिर्यश्चालां विधिः स सर्व एवालाश्रय इति सर्वत्र निषेधः। स्थानिनो योल् तदाश्रयाणि कार्याणि वर्जयित्वेत्यर्थः। कानि पुनरलाश्रयाणि कार्याणि यानि वर्णमात्राश्रयाणि यानि पुनः समुदायाश्रयाणि तान्यनलाश्रयाणि[7]। वत्करणं स्थान्यादेशस्य संज्ञा मा विज्ञायीत्येवमर्थम्। ततश्च स्थान्याश्रयं कार्यं स्थानिन्यपि स्यादादेशाश्रितमादेशेपि स्यात्। आहत आवधिष्टेत्युभयोरपि 'आङो यमहनः' इत्यात्मनेपदं भवति। अन्यथा स्थानिनो हनः संज्ञात्वात्

---

१. स्थानिवादिति Dc_3. २. °देशः समारभ्यते Dc_2. ३. 'किमः कः'। केन। Bc_1. ४. For अद्यतनम्...प्रातिपदिकत्वम् Dc_4 has दाधिकम्। ठादेशस्यैकस्य तद्धितत्वात् प्रातिपदिकत्वम्. ५. Before it प्रकृत्य K. ६. प्रयोजनानि Dc_3, Dc_4. ७. न तान्यलाश्रयाणि Bc_1, Dc_1.

तस्मादात्मनेपदं न स्यात् । किं तु तत्प्रत्यायितादेशात् संज्ञिनो वधशब्दादेव स्यात्[1] ।आदेशग्रहणमानुमानिकस्याप्यादेशस्य स्थानिवद्भावार्थम् । 'एरुः' । पचतुः । अत्र ते स्तुरित्यानुमानिक आदेशस्तस्य स्थानिवत्त्वात् पदसंज्ञा भवति । ननु च[2] उकारमात्रमादेशोस्तु किमनुमानेन । एवं हि 'एरुः' इति यथाश्रुतं व्याख्यातं स्यात् । आदेशग्रहणं च न कार्यम् । एकदेशविकृतस्यानन्यत्वात् पदसंज्ञा च[3] स्यात् । एवं तर्ह्येतदेवादेशग्रहणं लिङ्गमेकदेशविकारोत्र शास्त्रे नाश्रीयत इत्यस्यार्थस्य । ततश्चैतदुपपन्नम् ।

'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं[4] नोपपद्यते ॥' इति ।

'सेद्यपिच्च' इति ज्ञापकादनुबन्धकार्याणामल्विधित्वेप्यतिदेशः[5] स्यादेव । ततश्च प्रनुत्येत्यत्र[6] क्त्वाश्रयो गुणनिषेधः स्यात् । अनल्विधाविति किम् । द्यौः । 'हल्ङ्याब्—' इति सुलोपो न । प्रपठ्य । अत्र वलादिलक्षण इण्न ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलः **संधिसंज्ञाप्रसङ्गः** ॥

---

१. After it—तत्करणे च सत्यतिदेशोयं भवति । तत्र चान्यकार्यमन्यवत् संपाद्यते न तु स्वाश्रयं निवर्त्यते । आदेश° &c. Dc_2. २. च dropped Dc_1. ३. Dropped Dc_3. ४. अन्यत्वं Nc_1, Nc_2. ५. °मल्विधावपि Dc_4. ६. प्रस्तुत्ये° Dc_4.

अथ संधिः ॥

इको यणचि ॥ ६।१।७७ ॥

इकः स्थाने यण् स्यादचि[2] संहितायां विषये[3] ॥

अथ संधिप्रकरणमुच्यते । अथ संधिरिति । अथेति संध्युपयोगिनीनां संज्ञानां प्रकरणादनन्तरमचां हलां विसर्गस्य स्वादीनां च संधिरुच्यते । तत्र तावदच्[4]संधिः कथ्यत इत्यर्थः । इकः । इकः **स्थान** इति । एतच्च 'षष्ठी स्थाने योगा' इत्यनया परिभाषया लभ्यते । अस्यास्त्वयमर्थः । अत्र शास्त्रे या षष्ठ्यनियतसंबन्धा श्रूयते सा स्थानेयोगैव स्यात् । स्थाने योगो यस्याः सा स्थानेयोगा । सप्तम्या अलुक् । स्थानशब्दः प्रसङ्गवाची । योगशब्दः संबन्धवाची । प्रसङ्गे संबन्धस्य निमित्तभूते सति ज्ञेया । स च संबन्धः स्थान्यादेशभावलक्षणस्ततश्चायमर्थः । इकः प्रसङ्गे यण् स्यादचि परतः । अचीति सप्तमी । ततश्च 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति[5] परिभाषा प्रवर्तते[6] । तस्यास्त्वयमर्थः । सप्तमीनिर्देशे पूर्वस्यैव कार्यं स्यान्नोत्तरस्य । निर्दिष्टग्रहणमानन्तर्यार्थम् । निरन्तरं दिष्टेऽव्यवधानेनोच्चरित[7] इत्यर्थः । अग्निचित् अत्र इति व्यवहितस्य मा भूत् । संहितायां विषय इति । 'संहितायाम्' इत्यधिकारे या सप्तमी सा विषयसप्तमीति भावः । इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनाय यणादेशो वाच्यः* । हो३ ई[8] इदम् । हो३ यिदम् ॥

---

१. अच्संधिः D_2. २. °दचि परे D_4. ३. विषये dropped C. ४. °दचः संधिः Dc_2. ५. Dropped Dc_1. ६. वर्तते Dc_3. ७. °नोच्चारित Bc_1. ८. ई Dc_3.

यथासंख्यमनुदेशः समानाम् ॥१।३।१०॥

समेषूद्देशिषु[१] समानां[२] विधानं यथाक्रमं स्यात् ॥ सुध्य् उपास्य इति स्थिते[३]

अनचि च ॥८।४।४७॥

अचः परस्य यरो[४]नचि परे द्वे स्तः[५] ॥

अचः परस्मिन् पूर्वविधौ ॥१।१।५७॥

परनिमित्तो[६]जादेशः पूर्वविधौ कार्ये[७] स्थानिवत् स्यात् ॥

यथासं° । **समेष्वित्यादि** । समसंख्यकेषूद्देशिषु समसंख्यानां विधेयानां[८] यथाक्रमं क्रममनतिक्रम्य प्रथमस्य प्रथमो द्वितीयस्य द्वितीय इत्यादि स्यादित्यर्थः । **सुध्य् उपास्य इति** । स्थित इत्यर्थः । सुधी उपास्य इति स्थिते[९] 'इको यणचि' इति यणादेशे 'यथासंख्यम्—' इति ईकारस्य यकारे कृते सुध्य् उपास्य इति स्थित इत्यर्थः ॥

अनचि च । शर उत्तरस्य खयो द्वे स्त इति वाच्यम् * । स्थ्थाली । अथवा खय[१०] उत्तरस्य शरः । वत्स्सः । अवसाने च यरो द्वे स्त इत्येके । वाक्[११] । वाक् । एतच्च 'अनचि' इत्यस्माल्लभ्यते ।

अचः । सूत्रमिदमल्विधौ स्थानिवद्भावार्थम् । अजादेशः परनिमित्तः पूर्वविधौ स्थानिवदेव यथा स्यात् । मा भूत् स्वयंनिमित्तमिति नियमार्थ[१२]मयमारम्भः । तथा च पटयतीत्यत्र [१३]टिलोपे कृते प्राप्तोपधावृद्धिर्न । एवमत्र बहूनि स्वाश्रयनिवृत्तेरुदाहरणानि[१४] । अत एव द्विर्वचनविधौ स्थानिवत्त्वनिषेधः । **परस्मिन्निति** निमित्तसप्तमी । **पूर्वविधाविति** विषयसप्तमीत्यभिप्रेत्याह । **परनिमित्त इत्यादि** ।

---

१ समेषूद्देशिषु dropped B_1. २. समानानां B_2. ३. इति स्थिते dropped D_2, Com. ४. यरो द्वे स्तोनचि परे D_1, D_4. ५. इति द्वित्वे प्राप्ते after it in C, B_2. ६. °निमित्तो योजादेशः B, C, D_2, D_3. ७. कार्ये कर्तव्ये D_2. ८. Before it—विधानं Bc_1. ९. जाते Dc_2, Nc_2. १०. खञः Bc_1. ११. त्वक् । त्वक् । Dc_4. १२. नियमार्थोप्यारम्भः Bc_1, नियमार्थमप्यारम्भः Dc_3. १३. अणादिष्टं कार्यं प्रातिपदिकस्येति टिलोपे Dc_2. १४. °निमित्ते° Nc_1; °निमित्ते उदा° Dc_1.

इति द्वित्वाप्राप्तौ

पूर्वस्य विधिः पूर्वविधिः। विधीयत इति विधिरिति कर्मसाधनो विधिशब्दः। तदा पूर्वस्येति शेषे षष्ठी। भावसाधनो वा। विधानं विधिरिति। तदा पूर्वस्येति कर्मणि षष्ठी। उभयमपि यथासंभवमङ्गीक्रियते। तच्च यथास्थानं व्याख्यास्यामः। पूर्वत्वं त्वजपेक्षया आदेशापेक्षया निमित्तापेक्षया वा। तत्र त्रिष्वपि पक्षेषु दोषा उद्भाविता निराकृताश्च ते भाष्यन्यासादेरवगन्तव्याः। पदमञ्जरीकारमते विधिशब्दः कर्मसाधन एव। अजपेक्षयैव पूर्वत्वं ततोऽवगन्तव्यम्। अचः किम्। आगत्य। 'वा ल्यपि' इत्यनुनासिकलोपः। परनिमित्तस्तुकि कार्ये न स्थानिवत्। परस्मिन् किम्। वैयाघ्रपद्यः। अपरनिमित्तः पादान्तलोपः पदभावं न प्रतिषेधयति। पूर्वविधौ किम्। हे गौः। वृद्धिरजादेशः संबुद्धिलोपे कार्ये स्थानिवद् मा भूदिति। विधिग्रहणं किम्। न स्थानिवदादेश इत्यतोऽनुवर्तते। उच्यते। समासपरिग्रहार्थं पूर्वस्य विधिः पूर्वस्माद्विधिरिति। प्रथमसमासस्य प्रयोजनं वव्रश्च इत्यत्र 'उरत्' अत्त्वे 'न संप्रसारणे संप्रसारणम्' इति वस्य 'लिट्यभ्यासस्य' इति प्राप्तसंप्रसारणनिषेधः स्थान्यलाश्रयः[७]। द्वितीयप्रयोजनमपीपचन्नित्यत्र अपीपच् अ अन् इति स्थिते अन्त्याकारस्य चङश्च 'अतो गुणे' तस्य परं प्रत्यादिवत्त्वात् झिग्रहणेन ग्रहणे 'सिजभ्यस्त—' इति जुस्प्राप्तौ णिलोपस्यैकादेशस्य वा स्थानिवत्त्वान्नेति[११]। द्वित्वाप्राप्ताविति। सुध्य् उपास्य इत्यत्रेकारस्य यकारः सं[१२] परो योऽच् उकारस्तन्निमित्तकः पूर्वस्य धकारस्य द्वित्वे कार्ये स्थानिवत् स्यात्। ततश्च 'अनचि च' इति द्वित्वं नेति प्राप्ताविव्यर्थः[१३]॥

१. च Bc₁. २. च dropped Dc₄. ३. तत्त्वतो° Bc₁; तत्त्वतो Dc₃. ४. परस्मिन्निति Dc₃. ५. प्रतिषेधति Dc₂. ६. From पूर्वविधौ to मा भूदिति dropped Bc₁, Dc₃. ७. After it—अस्माद्वचनात् स्यात् Dc₃. ८. द्वितीयसमासस्य प्रयोजनम् Dc₂. ९. प्रत्यादिवद्भावात् Dc₁. १०. Dropped Bc₁. ११. After स्थानिवत्त्वान्नेति Bc₁, Dc₃ have—पूर्वविधौ किम्। हे गौः। वृद्धिरजादेशः संबुद्धिलोपे कार्ये स्थानिवन्मा भूदिति। इति द्वित्वाप्राप्ताविति। १२. तत्परो य उकार सोऽच् तन्निमित्तकः Dc₂. १३. द्वित्वाप्राप्ता° Bc₁, Dc₃, Dc₄.

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घ-

न पदान्त। पूर्वेणातिप्रसक्तः स्थानिवद्भाव एषु विधिषु निषिध्यते। अस्य सूत्रस्योदाहरणानि तत्तत्स्थाने व्याख्यास्यति स्वयमेव ग्रन्थकृत्। तथाप्यत्र स्पष्टीकरणार्थं लिख्यन्ते। पदान्ते। कौ स्तः। अत्रास्तेरल्लोपस्य स्थानिवत्त्वाभावादाव् न। द्विर्वचने तु स्थानिवत्त्वाभावः सुध्युपास्य इत्यत्रैव। वरे। यायावरः। यातेर्यङन्ताद्वरच्यतो लोपे च[1] कृते अतो लोपो न स्थानिवत् 'आतो लोप इटि च' इत्यालोपे कार्ये। ननु च वरे इति[2] सप्तम्या लुका भाव्यम्। न। निपातनादलुक्। अथवा [3]ईकारप्रश्लेषोयं तेनामलक्याः फलमामलकमित्यत्र मयटो लुकि कृते 'लुक् तद्धितलुकि' इति ङीषो[4] लुकि कृते तस्य स्थानिवत्त्वात्[5] 'यस्येति च' इत्यल्लोपः[6] स्यात्। तस्मात्[7] तस्य स्थानिवत्त्वं स्यादल्लोपे कार्ये। लुकस्तु पौर्वापर्यं स्थानिवद्द्वारकम्[8]। अलुक्पक्षे तु नेति योगविभागात् सिद्धम्। यलोपे। कण्डूयतेः क्तिन्। कण्डूतिः। 'लोपो व्योर्वलि' इति यलोपे कार्ये अतो लोपो न स्थानिवत्। स्वरे। चिकीर्षकः। चिकीर्षते। ण्वुलि ईकारस्य[10] 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वे कार्ये अतो लोपो न स्थानिवत्। सवर्णानुस्वारयोः। शिण्ढि। शिंषन्ति। अनुस्वारपरसवर्णौ प्रति अस्याल्लोपो न स्थानिवत्। दीर्घे। प्रतिदीव्नः[11]। अल्लोपो न स्थानिवत्

---

१. यलोपे च Bc1, Dc3. २. Dropped Dc3; अतो लोपे यलोपे च कृते Dc4. ३. इकार Dc3. ४. ङीपो Dc3. ५. स्थानिवद्भावात् Dc3. ६. इत्यल्लोपः Dc4. ७. Before it Bc1, Dc3, Dc4 have—तस्मादीकारपरतो यो विधिस्तं प्रति न स्थानिवत्। ईकारलुक् हि परं तद्धितलुकमाश्रित्य जातः (ईकारे परतो Dc3.). ८. स्थानिद्वारकम् Bc1. ९. Dropped Dc3, Dc4. १०. ईकारस्य Dc3. ११. प्रतिदीव्ना Bc1.

—जश्चर्विधिषु ।। १।१।५८ ।।

पदान्ते द्विर्वचनादौ च[1] कर्तव्ये परनिमि[2]त्तोजादेशो ने[3] स्थानिवत् स्यात् । इति ध[4]कारस्य द्वित्वम्[5] ।

[6]झलां जश् झशि ।। ८।४।५३ ।।

झलां ज[7]श् स्यात् झशि[8] ।।

स्थानेन्तरतमः ।। १।१।५० ।।

स्थाने प्राप्यमाणानां म[9]ध्ये सदृशतम आदेशः स्यात् ।।

'हलि च' इति दीर्घविधौ । जशि । सं[10]ग्धिः । समानाग्धिः । घसेः क्तिनि 'घसिभसोर्हलि च' इत्युपधालोपो 'झलां जशि' इति जश्त्वं प्रति न स्थानिवत् । चरि । जक्षतुः । घसेरतुसि 'गमहन—' इत्युपधालोपः 'खरि च' इति चर्त्वं प्रति न स्थानिवत् । स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत् । इति धकारस्येति । द्विर्वचनं प्रति स्थानिवद्भाव-निषेधात् सुध्य् इति वर्तमानस्य धकारस्य 'अनचि च' इति द्वित्वमित्यर्थः ।।

स्थाने । परिभाषेयमादेशनियमार्था न विधिरत एवाह । **स्थाने प्राप्यमाणानामि**ति । सदृशतमत्वं तु स्थानार्थगुणप्रमाणैः । स्थानेन । दण्डाग्रम् । कण्ठ्ययोरतोः कण्ठ्य एव दीर्घ आकारः । अर्थेन । वातण्ड्ययुवतिः । वतण्डशब्दादपत्ये यञ् । तस्य 'लुक् स्त्रियाम्' इति लुक् । 'शार्ङ्गरवाद्यञो ङीन्' वतण्डी चासौ युवतिश्चेति 'पोटा—' इत्यादिना समासः । 'पुंवत् कर्मधारय—' इति पुंवत्त्वे कार्ये सर्वः पुंशब्दः प्रसक्तः । अत्रानेन वतण्डापत्यार्थे वातण्ड्यशब्दो

---

१. Dropped B_2. २. °मित्तो योजादेशः B, C, D_2, D_3. ३. पूर्वविधौ कार्ये न स्थानिवत् D_3, D_4 (स्थानिवत् स्यात् D_4). ४. धकारद्वित्वम् B_1. ५. After it—पुनर्द्वित्वे प्राप्ते C. ६. C has 'झरो झरि सवर्णे' and its Vritti before it. ७. जशः स्युः B_2. ८. झशि परे D_1, D_4, B_1, B_2. ९. वर्णानां मध्ये B_1, B_2, C, D_5. १०. समानाङ्घिः । सङ्घिः । Dc_3.

इति पूर्वधकारस्य दकारः । [1]पुनर्द्वित्वे [2]प्राप्ते

झरो झरि सवर्णे ॥ ८।४।६५॥

हलः [3]परस्य झरो लोपः स्यात् सवर्णे झरि इति [4]मध्य[5]दकार-लोपः ॥

भवति । अर्थतः सादृश्यात् । गुणेन पाकः । 'चजोः कु घिण्यतोः' इति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारः स्यात् । गुणे-नान्तरतम्यात् । प्रमाणेन । अमुष्मै । अमूभ्याम् । 'अदसोसेः— ' इति ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारः । प्रमाणेनान्तरतम्यात् । 'षष्ठी स्थाने' इत्यतः 'स्थाने' इत्यनुवर्तमानेपि पुनः स्थानग्रहणं यत्रानेक-मान्तरतम्यं [6]संभवति तत्र स्थानत एवान्तरतम्यं बलीयो यथा स्यादिति । चेता । स्तोता । प्रमाणेनाकारो गुणः प्राप्तः । तत्र स्थानत एवान्तर्या-देकारोकारौ स्तः । तमग्रहणं किम् । वाग्घरिः । 'झयो होन्यतरस्याम्' इति हकारस्य पूर्वसवर्णे कार्ये सोष्मणो हकारस्य सोष्मत्वाद् द्वितीयाः प्राप्ताः । [7]नादत्वात् तृतीयाः । तमग्रहणाद्धे नादवन्तः [8]सोष्माणस्ते भवन्ति [9]चतुर्थाः । इति **पूर्वधकारस्येति** । 'झलां जश्' इति जश्त्वे कार्ये स्थानत आन्तरतम्याद् दन्त्यो दकारो [10]दन्त्यस्य धकारस्य स्यादित्यर्थः । **पुनर्द्वित्व इति** । 'अनचि च' इति दस्य [11]द्वित्वं इत्यर्थः । एतच्च व्यक्ति-पदार्था[12]श्रयेणोक्तम् । जातिपदार्थपक्षे तु सकृत्प्रवृत्त्यैव चरितार्थत्वान्न [13]पुनः प्रवृत्तिः ॥

झरो । 'झयो होन्यतरस्याम्' इत्यतः 'अन्यतरस्याम्' इत्यनु-वर्तते । तेन वा लोप इति **वृत्तिकारमतम्** । झर इति किम् । शार्ङ्गः । झरीति

---

१. पुनर्द्वित्वे प्राप्ते dropped C, D_5. २. Dropped K, D_1. ३. उत्तरस्य D_1. ४. मध्यमधकारस्य लोपः C ; मध्यमदकारलोपः D_2, D_3, D_5. ५. दकारस्य लोपः D_2. ६. संभवाति dropped Dc_3, Dc_4. ७. नादवत्त्वात् Dc_3. ८. सोष्माणो हकारस्य ते भवन्ति चतुर्थाः । Dc_3. ९. Dropped Nc_1. १०. दन्त्यधकारस्य Nc_1. ११. द्वित्वमित्यर्थः Dc_2, Nc_1. १२. °श्रयणेनोक्तम् Dc_3. १३. पुनः पुनः Dc_1.

संयोगान्तस्य लोपः ॥ ८।२।२३॥

संयोगान्तस्य पदान्तस्य लोपः स्यादिति लोपे[1] प्राप्ते यणः प्रतिषेधो वाच्यः[2][3] * । सुध्युपास्यः । मध्वरिः । धात्रंशः ।

किम् । प्रियपञ्च्ञाम् । अल्लोपस्य पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवद्भावनिषेधाच्चकारस्य ञकारे लोपः स्यात् । सवर्णे इति किम् । तर्प्ता । सवर्णग्रहणसामर्थ्यात् संख्यातानुदेशो न । सवर्णमात्रे लोपो भवति ॥

संयोगान्तस्येति[5] । संयोगान्तः सन्नेव यः पदान्तस्तस्येत्यर्थः । **यण** इति । यणादेशस्य संयोगान्तलोपप्रतिषेधो वाच्यो व्याख्येयः । तत्रेदं व्याख्यानम् । यणादेशो बहिरङ्गस्तेन 'असिद्धं बहिरङ्गमन्तरङ्गे' इति तस्यासिद्धत्वात् संयोगान्तलोपो न स्यादिति । **सुध्युपास्य** इति । सुधिया शोभनबुद्धिना पुंसा अथवा शोभनया बुद्ध्या उपास्यः । कथितायां प्रक्रियायां कृतायां श्लिष्टोच्चारणे सत्येवं भवति[7] सुध्युपास्य इति । **मध्वरिरिति** । मधोररिर्मध्वरिः । मधु अरि इति स्थिते 'इको यणचि' इति यणादेशे 'यथा संख्यम्—' इत्युकारस्य वकारे कृते 'अनचि च' इति धस्य द्वित्वे प्राप्ते 'अचः परस्मिन्—' इति स्थानिवत्त्वाद् द्वित्वाप्राप्तौ 'न पदान्त—' इति स्थानिवत्त्वनिषेधे[8] द्वित्वम् । 'झलां जश्' इति पूर्वधकारस्य जश् । 'स्थानेऽन्तरतमः' इति दकारः । पुनर्द्वित्वम् । 'झरो झरि' इति मध्यमदकारलोपः । संयोगान्तस्य लोपे यणो निषेधः संयोगान्तलोपस्य । ततः श्लिष्टोच्चारणम् । **धात्रंश** इति । धातुरंशो धात्रंशः । धातृ अंश इति स्थिते यण् । रेफः । द्वित्वम् । तकारस्य झशोभावाज् 'झलाम्—'

---

१. यण्लोपे B_2. २. वक्तव्य; C, D_2, D_3. D_5. ३. After it—अनच्च परेण संयोऽयम् B_2; पुनर्द्वित्वे प्राप्ते 'झरो झरि सवर्णे' and its वृत्ति (मध्यमदकारलोपः)। सुध्युपास्यः &c. D_5. ४. पूर्वत्रासिद्धीये Dc_1, Dc_3, Dc_4. ५. संयोगान्तस्येत्यादि Bc_1, Dc_3. ६. वक्तव्यः Dc_4. ७. संभवति Dc_3. ८. °निषेधः। द्वित्वम् Dc_4. ९. संयोगान्तस्य Dc_4.

१३१८३

लाकृतिः ॥

अचो रहाभ्यां द्वे ॥ ८।४।४६॥

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे स्तः[1]। पुनर्द्वित्वे प्राप्ते

इति न प्रवर्तते। **लाकृतिरिति**। ऌ इत्यस्याकृतिरिवाकृतिर्यस्य स लाकृतिः। अथवा ऌ इत्यस्याकृतिः। ऌकारस्य लकारो यण्। अचः परत्वाभावाद् द्वित्वादि न। **अचो रहाभ्याम्**। अचः किम्। ह्नुते। **पुनर्द्वित्व इति**। हरि अनुभव इति स्थिते 'इको यणचि' इति यणादेशे 'अचो रहाभ्याम्–' इति यकारस्य द्वित्वे हर्य्य् अनुभव इति स्थिते 'अचो रहाभ्याम्–' इति पुनर्द्वित्वे प्राप्त इत्यर्थः। एवं स्थिते त्रयो यकारा भवन्ति ॥

स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयं प्रसङ्गाद् व्याख्यायते। 'नादिन्याक्रोशे पुत्रस्य' ॥ ८।४।४८॥ अचः परस्य पुत्रयरोनचि न द्वे स्त आदिन्यां परत आक्रोशे। पुत्रादिनी भव। 'हतजग्धपरे वा'। पुत्रहती। पुत्रहती। पुत्रजग्धी। पुत्रजग्धी। शरि परे पौष्करसादेर्मते चयो द्वितीयाः स्युः। तस्य थः। वथ्सः। कस्य खः। ख्षीरम्। पस्य फः। अफ्सरसः। 'त्रिप्रभृतिषु शाकटायनस्य' ॥ ८।४।५०॥ त्र्यादिषु वर्णेषु न द्वे। इन्द्रः। उष्ट्रः। 'सर्वत्र शाकल्यस्य' ॥ ८।४।५१॥ अस्य

---

१. After it—रेफस्य यरन्तर्भावे सति यत्कार्यमुक्तं तत्साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः। P; C, D_1, D_5; B_1 has रवर्जितस्यैवेष्यते। २. पुनर्द्वित्वे प्राप्ते dropped D_1, D_3 which has हर्य्यनुभवः instead; प्राप्ते dropped B_1, D_1. ३. इति dropped Dc_4. ४. परत्वाद्यभावात् Ne_2. ५. पुत्रस्य यरो Dc_3. ६. Before it—चयो द्वितीयाः शरि पौष्करसादेः। Dc_3. ७. मयो Bc_1, Dc_4. ८. क्ख्षीरम् Dc_3, Dc_4.

8231

हलो यमां यमि लोपः ॥८।४।६४॥

हलः परस्य यमो लोपः स्याद्यमि[1]। इति पूर्वयलोपः[2]। द्वित्वविधानाद्[3] द्वावेव शिष्येते[4]। हर्य्यनुभवः[5]। न ह्यस्ति[6]।

[7] **दीर्घादाचार्याणाम् ॥८।४।५२॥**

सर्वेषां मते दीर्घात्[8] परस्य यरो न द्वे स्तः। दात्रम्। पात्रम्[9][10]॥

मते सर्वत्र द्वे न स्तः। अर्कः। 'दीर्घादाचार्याणाम्'॥ ८।४।५२॥ दीर्घात् परस्य न द्वे। दात्रम्। हलः। अत्रापि 'अन्यतरस्याम्' इत्यनुवर्तत इति वृत्तिकारमतम्। हलः किम्। अन्नम्। यमां किम्। अर्च्यम्[11]। यमि किम्। शार्ङ्गिन्। द्वित्वविधानादिति व्यक्तिपदार्थाश्रयणात्। तथा[12] हि व्यक्तौ पदार्थे प्रतिव्यक्ति लक्षणं प्रवर्तते। तत्र यदि द्वितीयस्यापि यस्य लोपः स्यात् हर्यनुभव इत्यत्र प्रवर्तमानं द्वित्वलक्षणं व्यर्थं स्यात्। ततो द्वित्वविधानसामर्थ्याद् द्वौ यकाराववशिष्येते। अथवा 'अन्यतरस्याम्' इत्यनुवृत्तेर्लोपाभावे द्वित्वविधानादुत्तरकालं द्वाववशिष्येते इत्यभिप्रायः[13]। हर्य्यनुभव इति। हरेरनुभवो हर्य्यनुभवः॥

---

१. Before this Sûtra D_3 has—'दीर्घादाचार्याणाम् ॥' ८।४।५२॥ दीर्घात् परस्य यरो द्वित्वं न स्यात् सर्वेषां मतेन। आचार्यग्रहणं पूजार्थम्। गौर्यत्र। रेफस्य यरन्तर्भावे यत्कार्यमुक्तं तत् साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः। पुनर्द्वित्वे प्राप्ते। २. यमि परे। द्वित्वविधौ द्वाववशिष्येते। हर्य्यनुभवः। न ह्यस्ति। D_1. ३. यकारस्य लोपः B_2, D_4; इति पूर्वयलोपः dropped D_2. ४. द्वित्वविधानसामर्थ्यात् D_2, D_3. ५. After it—अन्ये लुप्यन्ते D_5. ६. Before this—रेफस्य यरन्तर्भावे सति यत् कार्यमुक्तं तत् साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः। B_2; हर्य्य°... स्ति dropped D_3. ७. This Sûtra and the Vṛitti are dropped. Com. ८. दीर्घादुत्तरस्य यरः सर्वेषामाचार्याणां मते द्वित्वं न स्यात्। P; दीर्घादचः परस्य यरो द्वे न स्तः सर्वेषामाचार्याणां मतेन। दात्रम्। पात्रम्। D_1. ९. रेफहकाराभ्यां परस्य यरो द्वित्वं न स्यात्। B_2; दीर्घात् परस्य सर्वेषां मते द्वित्वं न स्यात्। गौर्यत्र। D_2. १०. After it—गौर्यत्र C, D_2. ११. अर्घ्यम् Bc_1, Dc_3. १२. यथा हि Dc_3. १३. इत्यर्थः। Dc_3.

एचोयवायावः ॥६।१।७८॥

एचः क्रमात् अय् अव् आय् आव् एते स्युरचि[1] । हरये । विष्णवे । नायकः । पावकः ॥

वान्तो यि प्रत्यये ॥ ६।१।७९॥

यकारादौ[2] प्रत्यये[3] अव् आव् आदेशौ[4] स्तः[5] । गव्यम् । नाव्यम् । अध्वपरिमाणे[6] च[7] गव्यूतिः ॥

एचोय् । क्रमादिति । 'यथासंख्यमनुदेशः समानाम्' इति परिभाषयेति भावः । **हरये विष्णवे** इति । हरिविष्णुशब्दाभ्यां चतुर्थ्येकवचनम् । 'घेङिति' 'इति गुणः । **नायकः पावक** इति । नयतेः पूञश्च ण्वुलि 'अचो ञ्णिति' वृद्धिः ॥

वान्तो यि । यीति वर्णग्रहणम् । वर्णग्रहणे च 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया यादौ प्रत्यये परे कार्यमित्यभिप्रेत्याह । **यकारादाविति** । यद्यप्यत्र स्थानी न निर्दिष्टस्तथाप्यवादेश ओकारस्य स्थाने स्यादावादेश औकारस्य स्थान इति ज्ञेयम् । कथम् । पूर्वयोगे हि तद्धर्मौ वान्तादेशौ दृष्टः[9] । इहापि तद्धर्म[10] एवानुवर्तते । **गव्यमिति** । गोर्विकारः । 'गोपयसोर्यत्' **नाव्यमिति** । नावा तार्यम् । 'नौवयोधर्म—' इत्यादिना यत् । **गव्यूतिरिति** । क्रोशयुगम्[11]इत्यर्थः । अध्वपरिमाणादन्यत्र गोयूतिरित्येव । वान्त इति किम् । रायमिच्छति रैयति । यीति किम् । गोभ्याम् । नौभ्याम्[12] । प्रत्यये किम् । गोयानम् । नौयानम् ॥

---

१. °रच्चि परे D_1, D_5; °रच्चि परतः B_2; परे D_3. २. यकारादौ प्रत्यये परे D_1, B_2; एचो यकारादौ प्रत्यये परे D_2. ३. After प्रत्यये—B_1, D_3, D_4, D_5 have ओदौतोः स्थाने. ४. आदेशः P, D. ५. स्यात् P; स्तः dropped D_1, D_2. ६. गौर्यूतावध्वपरिमाणे गव्यूतिर्निपात्यते । B_1, B_2, D_1. ७. Dropped P. ८. °व्यावादेश औकारस्य स्थाने स्यात् अवादेश ओकारस्य स्थाने । Dc_1, Dc_2, Nc_1, Nc_2. ९. द्रष्टव्यः Dc_3. १०. तद्धर्मा एवानुवर्तन्ते Dc_3. ११. °युगल° Dc_2. १२. नौभ्याम् dropped Dc_1, Dc_2, Nc_1, Nc_2.

धातोस्तन्निमित्तस्यैव ॥ ६।१।८० ॥

योदौ प्रत्यये परे तन्निमित्तयोर्धातोरोदौतोः स्थाने वान्तादेशः स्यात्[1] । लव्यम् । अवश्यलाव्यम् । तन्निमित्तयोरिति किम् । आ ऊयते ओयते । औयत[4] ।

धातोः । पूर्वेण सिद्धे नियमार्थं वचनम् । तन्निमित्तयोरिति । तच्छब्देन यकारादिः परामृश्यते । स निमित्तं ययोस्तौ तथोक्तौ । लव्यमिति । लूञ् छेदने । अस्माद् 'अचो यत्' । तमेव यतमाश्रित्य 'सार्वधातुकार्धधातुकयोः' इत्योकारो विधीयमानस्तन्निमित्तः स्यात् । अवश्यलाव्यमिति । 'ओरावश्यके' इति ण्यत् । मयूरव्यंसकादित्वात् समासः । 'लुम्पेदवश्यम्—' इति मलोपः । अत्रापि तमेव ण्यतमाश्रित्य 'अचो ञ्णिति' इति जात औकारस्तन्निमित्तः । धातोः किम् । प्रातिपदिकस्य नियमो मा भूत् । तत्र को दोषः स्यात् । बाभ्रव्य इत्यत्रैव स्यात् । अत्र न स्यात् । गव्यं नाव्यमिति । आ ऊयत इति । वेञ् तन्तुसंताने । 'आदेच—'इत्यात्वम् । आङ् पूर्वः । लट् । 'भावकर्मणोः' इति तङ् । 'सार्वधातुके यक् ।' यजादित्वात् संप्रसारणम् । 'अकृत्सार्वधातुकयोः' इति दीर्घः । 'आद्गुणः' इति गुणो जातः स यादिप्रत्ययनिमित्तो न भवति । औयतेति । तस्यैव धातोर्लङि रूपम् । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । एवकारकरणं धात्ववधारणं यथा स्यात् तन्निमित्तावधारणं मा भूत् । तन्निमित्तस्य हि धातोश्चाधातोश्च स्यात् । बाभ्रव्यः । लव्यम् ॥

---

१. यकारादौ B_2; एचो यकारादौ D_2. २. Dropped D_2. ३. P and B_1 drop तन्निमित्तयोरिति किम् । ४. Before औयत B_1 has आ औयतः D_2, B_2 drop औयत. ५. तन्निमित्तौ Dc_4. ६. धातोरिति किम् Dc_3.

क्षय्यजय्यौ शक्यार्थे ॥६।१।८१॥

अत्र यादौ यान्तादेशो निपात्यते । क्षय्यम् । जय्यम् । शक्यार्थे इति किम् । क्षेयं पापम् । जेयं मनः ॥

क्रय्यस्तदर्थे ॥ ६।१।८२॥

क्रयार्थे प्रसारितं क्रय्यम् । क्रेयमन्यत् ॥

लोपः शाकल्यस्य ॥ ८।३।१९॥

अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे ॥

क्षय्य । **अत्रेति** । अत्रेत्येतदावृत्त्या योज्यते । ततश्चात्र क्षय्यजय्यशब्दयोरत्र शक्यार्थे यादौ प्रत्यये परतो यान्तादेशो निपात्यत इत्यर्थः । अत्र क्षय्य इत्यत्र क्षि क्षये क्षि निवासगत्योः क्षीष हिंसायां वा ततो यति प्रत्यये परतो गुणे कृते यादेशो निपात्यते । जय्य इत्यत्र जि जये इत्यस्य तथैव यति गुणे कृते यादेशो निपात्यते । **क्षेयं जेयं मन** इति । क्षेतुमर्हं जेतुमर्हं न तु शक्यमित्यर्थः । अत्रार्हे कृत्यस्य जातत्वाच्छक्यार्थाभावः ॥

क्रय्यस्तदर्थे । डुक्रीञ् द्रव्यविनिमये । अस्माद्यति परे क्रयार्थे यान्तादेशो निपात्यते । क्रयार्थ इत्यनेन तदर्थ इति शब्दं व्याचष्टे । क्रयायेदं क्रयार्थम् । चतुर्थीसमासः । तस्मिन् क्रयार्थे प्रसारितं क्रयार्थमुपन्यस्तं द्रव्यमित्यर्थः । **क्रेयमन्यदिति** । क्रेतव्यं ग्रहीतव्यम् । स्वीकर्तव्यमित्यर्थः ।

लोपः । **अवर्णपूर्वयोरिति** । ननु च 'भोभगोअघोअपूर्वस्य' इत्यनुवृत्तेर्भोभगो अघो अवर्णपूर्वयोरिति वाच्यम् । मैवम् । 'ओतो

---

१. यादौ परे B₂; यादौ dropped D₁. २. Dropped P, D₁, D₂, B₂. ३. °र्यकारवकारयो° B₂. ४. लोपो वा स्यादशि परे C, B₂; लोपो वाशि परे D₄. ५. क्षय्यजय्ययोः Dc₃. ६. यान्तादेशनिपात इत्यर्थः Nc₂. ७. निपात्य इत्यर्थः Dc₂. ८. तत्र Nc₂, Bc₁. ९. अपूर्वयो° Nc₂.

पूर्वत्रासिद्धम् ॥ ८।२।१॥

सपादसप्ताध्याय्यां विहितं कार्यं प्रतीह त्रिपाद्यां विहितमसिद्धं ज्ञेयम्[1]। इतः[2] परमप्युत्तरोत्तरं[3] कार्यं पूर्वं पूर्वं[4] कार्यं प्रत्यसिद्धं ज्ञेयम्। अतः पुनर्न संधिः। हर एहि। हरयेहि।

गार्ग्यस्य' इति तेभ्यः परयोर्नित्यलोपं[5] विधास्यति। अतः साधूक्तम् 'अवर्णपूर्वयोः' इति। शाकल्यग्रहणं विकल्पार्थं न पूजार्थमित्यभिप्रेत्याह[6]। वा लोप इति॥

पूर्वत्र। सप्तानामध्यायानां समाहारः सप्ताध्यायी। पादेन सह वर्तमाना सपादा। सपादा[7] चासौ सप्ताध्यायी च सपादसप्ताध्यायी। 'वृद्धिरादैच्' इत्यारभ्य 'पूर्वत्रासिद्धम्' इति सूत्रावधिका। त्रयाणां पादानां समाहारस्त्रिपादी। 'पूर्वत्रासिद्धम्' इत्यारभ्याष्टमाध्यायपरिसमाप्त्यवधिका। ये त्वत्र त्रिपाद्यां षष्ठीनिर्देशाः सप्तमीनिर्देशाः पञ्चमीनिर्देशाश्च ते 'षष्ठी स्थानेयोगा' 'तस्मिन्निति निर्दिष्टे पूर्वस्य' 'तस्मादित्युत्तरस्य' इत्यादौ कर्तव्ये नासिद्धा भवन्ति। यतः पूर्वत्वमासां परिभाषाणां नास्ति। कार्यकालं हि संज्ञापरिभाषम्। यत्र कार्यं तत्र द्रष्टव्यमिति न्यायात्। 'विप्रतिषेधे परं कार्यम्' इत्येषा परिभाषा[8]त्र न प्रवर्तते। यतः परं लक्षणं येन पूर्वेण लक्षणेन सह स्पर्धते तत् प्रत्यसिद्धम्। ततश्चावगोर्यमित्यत्र[9] गुरेः 'पुगन्त–' इति गुणः परेण 'हलि च' इति दीर्घेण न बाध्यते। अपवादस्य तु परस्याप्युत्सर्गे पूर्वे कार्ये[10] वचनप्रामाण्यादसिद्धत्वं न। तेन दोग्धेत्यत्र घत्वस्यासिद्धत्वाद् 'हो ढः' इति ढत्वं स्यात् तन्न। अतः पुनर्न संधिरिति। हरे एहीत्यत्र 'एचोऽयवायावः' इत्ययादेशे संधौ कृते यस्य च लोपे

---

१. After it—स्यात् D_2, D_5, D_4; ज्ञेयम् dropped D_1, B_1. २. अतः D_2. ३. °प्युत्तरोत्तरकार्यं D_2. ४. पूर्वपूर्वकार्यं D_2. ५. °नित्यं लोपं Nc_2, Bc_1. ६. °मित्याह। Dc_4. ७. सा चासौ Nc_2, Dc_3. ८. परिभाषा त्वत्र Nc_2. ९. ततश्चावगूर्यमित्यत्र Bc_1. १०. कार्येऽपि Dc_3.

विष्ण इह । विष्णविह । श्रिया उद्यतः । श्रियायुद्यतः । गुरा उत्कः । गुरावुत्कः ।

कानि सन्ति । कौ स्तः । अत्रास्तेरल्लोपस्य 'न पदान्त–' इति सूत्रेण स्थानिवत्त्वाभावाद्यणावादेशौ न स्तः ।

'वृद्धिरेचि' इति वृद्धिलक्षणः पुनः संधिः प्राप्तस्तस्मिन् षष्ठाध्यायस्थे कार्ये प्राप्ते त्रि[3]पादीस्थं 'लोपः शाकल्यस्य' इति कार्यमसिद्धमिति कृत्वा यकारेण व्यवहितत्वात्[4] 'वृद्धिरेचि' इत्यादिकं न प्रवर्तत इत्यर्थः । विष्ण इह इत्यादिषु 'आद्गुणः' इति गुणः प्राप्तः स न भवत्यसिद्धत्वाल्लोपस्य । कानि सन्तीत्यादि । अस्तेर्लटि प्रथमपुरुषबहुवचनद्विवचनयोः 'श्नसोरल्लोपः' इत्यकारलोपः । परनिमित्तोजादेश इति कृत्वा कानि सन्तीत्यत्रेकारस्य यणादेशे कार्ये कौ स्त इत्यत्रौकारस्यावादेशे कार्ये तस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वं प्राप्तं तस्य च पदान्तविधिं प्रति 'न पदान्त–' इत्यादिना निषेधाद्यणादेश आवादेशश्च न भवतीति भावः । [6]ननु व्याकरणे पदानामेव संस्काराद् द्वितीयपदस्यानिमित्तत्वेनासंनिधानादनादिष्टादचः पूर्वत्वासंभवात् स्थानिवत्त्वाप्रसङ्गाद्यणादिप्राप्तिरेव नास्ति किं पन्दाते स्थानिवद्भावनिषेधेन । उच्यते । व्याकरणेन वाक्यमपि संस्क्रियते । पदमञ्जर्यां तूक्तम् । यद्यपि पदमेव संस्क्रियते न वाक्यं तथापि [7]वाक्यगते स्त इत्यादौ पदे व्युत्पाद्ये कावित्यादेरसत्यपि निमित्तत्वे संविधानमविरुद्धम् ॥

---

१. Before it—'श्नसोरल्लोपः ॥' ६ । ४ । १११ ॥ श्न इत्येतस्यास्तेश्चाकारस्य लोपः स्यात् ॥ B_1, D_2 (अस्यास्तेश्च and स्यात् सार्वे प्रत्यये परे D_2); C has the Sûtra 'श्नसोरल्लोपः' only. २. 'ओमाङोश्च' इति पररूपलक्षणः पुनः संधिः प्राप्तः । Dc_2. ३. त्रिपादीस्थं कार्ये Dc_1. ४. Dropped Dc_1. ५. After it—यस्य च लोपे Dc_3. ६. ननु च Dc_1, Nc_2, Dc_3. ७. वाक्यान्तर्गते Dc_3.

आद्गुणः ॥६।१।८७॥

अवर्णादचि पूर्वपरयोरेको गुण[1] आदेशोन्तरतमः स्यात् । [2]उपेन्द्रः । रमेशः । गङ्गोदकम् । कृष्ण ऋद्धिः । तव ऌकार इत्यत्र [3]ऋऌस्थाने गुणादेशे [4]कृते

आत् । अवर्णादित्यादि । 'अचि' इत्यनुवृत्तेः 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति पूर्वस्य गुणादेशः प्राप्तः । 'आत्' इति निर्देशात् 'तस्मादित्युत्तरस्य' इत्युत्तरस्य । [5]तथा ह्यस्यायमर्थः पञ्चम्यर्थनिर्देशेनन्तरस्य परस्यैव कार्यं स्यादित्येवं स्थिते 'एकः पूर्वपरयोः' इत्यधिकारादुभयोः स्थाने एको गुणादेशः स्यादिति चेतसि कृत्वाह । पूर्वपरयोरेको गुण इति । स च गुणा[6]देशः स्थानेन्तरतमपरिभाषया सदृशतमः स्यादित्याह । अन्तरतम इति । उपेन्द्र इति । इन्द्रमुपगत उपेन्द्रः । उप इन्द्र इति स्थिते पूर्वपरयोरकारेकारयोः स्थाने गुणसंज्ञा [7]अदेङ् प्राप्ता । तत्राकारस्य अकुहविसर्जनीयानां कण्ठ इति कण्ठस्थानम् । इचुयशानां तालु[8]इतीकारस्य तालुस्थानम् । तत्र स्थानत आन्तरतम्याददेतोः कण्ठतालु[9]इति कण्ठतालुस्थान एकारो भवति । रमेश इति । रमाया ईशो रमेशः । पूर्ववदाकारस्य [10]स्थान एकारः । गङ्गोदकमिति । गङ्गाया उदकम् । अत्राप्याकारस्य [11]कण्ठ्यस्योकारस्य चोपूपध्मानीयानामोष्ठाविति कण्ठोष्ठ्य ओकारः स्यात् । कृष्ण ऋद्धिः । तव ऌकार इत्यत्रेति । कृष्ण ऋद्धिः तव ऌकार इति स्थिते [12]अकारस्य ऋकारस्य च स्थाने अकारस्य ऌकारस्य च स्थाने 'आद्गुणः' इति गुणादेशो क्रियमाणे सत्युच्यत इत्यर्थः ॥

---

१. गुणादेशो C. २. उप इन्द्रः । उपेन्द्रः । रमा ईशः । रमेशः । गङ्गा उदकम् । गङ्गोदकम् । D_2. ३. ऋऌस्थाने dropped B_1, D_3. ४. च कृते D_4; कर्तव्ये D_1; कृते dropped B_1, D_5; after कृते—सर्वमुखस्थानमिच्छन्त्येके आचार्याः D_5. ५. तथाप्यस्या° Dc_4. ६. गुणादेश Bc_1, Dc_4. ७. अदेङः Bc_1. ८. स्थानं तालु Bc_1, Dc_4. ९. कण्ठतालुस्थ Dc_2. १०. °दाकारस्य ईकारस्य च स्थाने Bc_1, Dc_3. ११. कण्ठः Dc_2. १२. अकारऋकारयोः स्थाने Bc_1.

उरण् रपरः ॥ १।१।५१ ॥

ऋलृस्थानीयोण् रप्रत्याहारपरः स्यात् । द्वित्वम् । कृष्णर्द्धिः[1] । यणो मयो द्वे वाच्ये* । तवल्ल्कारः ।

वृद्धिरेचि[2] ॥ ६।१।८८॥

आदेचि परे वृद्धिरेकादेशः स्यात्[3] । कृष्णैकत्वम्[4] । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ॥

उरण् । ऋस्थाने लक्षणान्तरेण विधीयमानोण् विधानकाल एव तेन सह संहृत्य रप्रत्याहारपरत्वविशिष्टोनेन सूत्रेण भाव्यते । एवं च सति रश्रुतिमत ऋकारस्य रश्रुतिमानेव गुणो भवत्यर् । आन्तरतम्यात् । तथा[5] ऋ[7]वर्णग्रहणेन लृ[6]वर्णस्यापि सावर्ण्येन ग्रहणाद् लकारस्य लश्रुतिमतो लश्रुतिमानेव गुणो भवत्यल् । तथा च भाष्यकारः । 'वृद्धिर्भवति गुणो भवति रेफस्य[8] गुणवृद्धिसंज्ञा[9] भवति' इति । ननु च कृष्णर्द्धिस्तवल्कार इत्यत्राकारऋकारयोरुभयोः स्थाने भवन्नण् कथमृस्थानीयत्वेन रपरः स्यात्[10] । उच्यते । यो ह्युभयोः स्थाने भवति[11] लभतेसावन्यतरव्यपदेशम् । यथा देवदत्तस्य पुत्रो देवदत्तायाः[12] पुत्र इति । द्वित्वमिति । 'अचो रहाभ्याम्' इत्यनेन धकारस्य द्वित्वम् । जश्त्वम् । यण इति । 'यणः परस्य मयो द्वे स्तः' इति ककारस्य द्वित्वम् ॥

वृद्धिः । आदित्यादि । अवर्णात् परो य एच् एचि पूर्वो योवर्णस्त[13]योः पूर्वपरयोः स्थान आद्गुणापवादो वृद्धिरेकादेशः स्यादित्यर्थः ।

---

१. कृष्ण ऋद्धिः । कृष्णर्द्धिः । D_2. २. अवर्णादेचि D_5. ३. Dropped P. ४. कृष्ण एकत्वम् । कृष्णैकत्वम् । गङ्गा ओघः । गङ्गौघः । देव ऐश्वर्यम् । देवैश्वर्यम् । कृष्ण औत्कण्ठ्यम् । कृष्णौत्कण्ठ्यम् । D_2. ५. तथा च सवर्णग्रहणेन Bc_1. ६. लृवर्ण° Dc_1, Dc_2, Nc_1, Nc_2. ७. ऋवर्ण° Dc_1, Dc_2, Nc_1, Nc_2. ८. रेफस्य लकारशिरा गुणवृद्धिसंज्ञो भवतीति Nc_1; रेफलकारौ गुणवृद्धिसंज्ञो भवतीति Dc_2; रेफशिरा गुणवृद्धिसंज्ञको भवति Dc_4, Nc_2; रेफलपरगुणवृद्धिसंज्ञको भवतीति Dc_3. ९. °संज्ञको Dc_3, Dc_4, Nc_2. १०. Dropped Bc_1, Dc_4. ११. विधीयते Bc_1, विहितो Dc_3, Dc_4. १२. देवदत्तपुत्र Bc_1. १३. तयोः dropped Dc_1, Dc_2, Nc_1, Nc_2.

एत्येधत्यूठ्सु[1] ॥ ६।१।८९ ॥

एष्वाद्वृद्धिः[2] । पररूपगुणापवादः । उपैति । उपैधते । प्रष्ठौहः ॥

अक्षादुहिन्याम्* । अक्षौहिणी[3] ।

स्वादीरेरिणोः* । स्वैरम् । स्वैरी[4] । स्वैरिणी ।

एत्येधति । एष्वित्यादि । 'आत्' इति वर्तते 'वृद्धिरेचि' इति च । तत्र एजित्येतेरेव विशेषणं नैधतेः । व्यभिचाराभावात् । ऊठोपि न । असंभवात् । इण् गतावित्यस्मिन्नेजादौ धातावेध वृद्धावित्यस्मिन्नूठि च पूर्वो योवर्णस्ततश्च परो य एच् ऊठ् च तयोः पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यादित्यर्थः ॥

पररूपेत्यादि । एत्येधत्योरेङि पररूपत्वापवादः । 'ओमाङोश्च'। इति पररूपस्य न बाधः । 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषया । तेनेह न । उप आ इतः । उपेतः । ऊठ्याद्गुणापवादः । **प्रष्ठौह** इति । प्रष्ठं वहति । 'वहश्च' इति ण्विः । ततः षष्ठ्येकवचनम् । 'वाह ऊठ्' । 'संप्रसारणाच्च' । इति पूर्वरूपत्वम् । ततो वृद्धिः । एचीत्येव । उप इतः । उपेतः ।

अक्षादिति । अक्षशब्दस्योहिन्यां परतो वृद्धिर्वक्तव्येत्यर्थः । **अक्षौहिणीति** । अक्षाणामूहः समूहः सोस्यास्तीति मत्वर्थीय इनिः । 'ऋन्नेभ्यो ङीप्' इति ङीप् ।

स्वादिति । स्वशब्दस्य ईरशब्द ईरिन्शब्दे च परतो[5] वृद्धिः स्यादिति वाच्यमित्यर्थः । **स्वैरीति** । 'ईरणमीरः । भावे घञ् । स्वस्य ईरः स्वैरः । ईरशब्दे परतो[6] वृद्धिः[7] । ततः[8] स्वैरो विद्यते यस्यासौ स्वैरी । 'अत इनिठनौ' इतीनिः । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया ईरिन्ग्रहणे[9] ईरिणीशब्दस्यापि ग्रहणमित्यभिप्रेत्य स्त्रीलिङ्गोदाहरणमाह । **स्वैरिणीति** । स्वेन ईरितुं

---

१. °त्यूठ्सु C. २. एषु परे C. ३. After it—सेना B_2, D_2. ४. स्वैरिणी। स्वैरी C, P, B_1, B_2. ५. वर्तमाने Dc_4. ६. परे Bc_1, Dc_2. ७. वृद्धिः स्यात् Dc_1, Nc_1, Dc_3. ८. तत्र Bc_1. ९. °ग्रहणेन Bc_1.

प्रादूहोढोढ्येषैष्येषु[1]* । प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः । गुणोऽप्यत्रेति केचित् । प्रेषः । प्रेष्यः ।

ऋते च तृतीयासमासे* । आद्वृद्धिः । सुखेन ऋतः । सुखार्तः ।

शीलमस्याः । 'सुप्यजातौ–' इति णिनिः । अथवा मत्वर्थीय इनिः । 'ऋन्नेभ्यः–' इति ङीप् । णत्वम् । ननु चादन्तस्य ईरशब्दस्योदाहरणं किं न प्रदर्शितम् । नन्वेतत् प्रदर्शितं स्वैरीति । तथा हि कृतवृद्धेः स्वैरशब्दात् पश्चादिनिः । इन्नन्तोदाहरणं तु 'स्वादीरेरिणोः' इत्यस्मिन् वक्तव्ये ईरिणोरितीन्नन्तस्य पृथग् ग्रहणं न कर्तव्यमिति सूचनार्थम् । तथा च महाभाष्य उक्तम् । 'ईरिन्ग्रहणं शक्यमकर्तुम् । कथं स्वैरीति । इनिनैतन्मत्वर्थीयेन सिद्धम् । स्वैरोऽस्यास्तीति स्वैरी' इति ।

प्रादिति । अन्यमतोपसंग्रहार्थं वक्तव्यमध्य ऊहशब्दस्य प्रक्षेपः प्रौह इत्युदाहरणं च । प्रात् किम् । उपोहः । ननु कथं प्रोढवानित्यत्र न वृद्धिः । 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषया । कथं तर्ह्यूढशब्दात् णिचि कृते प्रौढयतीति । ऊढिशब्देन ण्यन्तस्यापि ग्रहणात् । प्रैषः । प्रैष्य इति । इषु गतिहिंसादानेषु इषुँ इच्छायामिति वा । आभ्यां प्रपूर्वाभ्यां यदा घञ् तदा प्रैषः यदा ण्यत् तदा प्रैष्यः । **गुणोऽप्यत्रेति** । अत्रेति । प्रेषः प्रेष्य इत्यनयोरुदाहरणयोः । तथा च **दौर्गसिंह्यां** वृत्तावुक्तम् । 'एषएष्ययोरैत्वं विभाषया' इति ।

सुखेन ऋत इति । सुखार्त इत्यस्य तृतीयासमासप्रदर्शनार्थं विग्रहवाक्यम् । स च समासः 'कर्तृकरणे कृता बहुलम्' इत्यनेन ।

---

१. After it—वृद्धिर्वक्तव्या P. २. प्रैषः । प्रैष्यः dropped D_1. ३. प्रेषः । प्रैषः । प्रेष्यः । प्रैष्यः । D_1. ४. °संग्रहणार्थं Dc_3. ५. वक्तव्यम् । मध्य Nc_1, Dc_4. ६. ऊढ° Bc_1. ७. इषु dropped Dc_1. ८. गुणोऽप्यत्रेति केचिदिति Dc_2, Nc_1. ९. तृतीयासमासत्वप्रदर्शनार्थं Dc_2, Bc_1.

तृतीयेति किम् । परमर्तः । समासेति किम् । सुखेनर्तः ।

प्रवत्सतरवत्सरकम्बलवसनार्णदशानामृणे * । प्रार्णम् । वत्सतरार्णमित्यादि ।

उपसर्गादृति धातौ ॥ ६।१।९१॥

ऋकारस्य रश्रुतिमतो रश्रुतिमानेवाकारो वृद्धिः । आन्तरतम्यात् । **परमर्त** इति । परम ऋत इति 'सन्महत—' इत्यादिना समासः । न तृतीयासमासः । अतोत्र 'आद्गुणः' इति गुण एव । ऋते किम् । सुखेन इतः सुखेतः ।

प्रवत्सतरेति । **कौमारा** वत्सतरस्य स्थाने वत्सरशब्दं पठितवन्तस्तन्मतोपसंग्रहार्थं वत्सरेत्युक्तम् । एषामृणशब्दे परतो वृद्धिरेकादेशः । **वत्सतरार्णमित्यादी**त्यादिशब्देन वत्सरार्णं कम्बलार्णं वसनार्णमृणार्णं दशार्णमिति ।

उपसर्गात् । उपसर्गादादिति ।'येन विधिस्तदन्तस्य' इत्यवर्णान्तादुपसर्गादित्यर्थः । अस्य सूत्रस्यायमर्थः । येन विशेषणेन विधीयते कार्यं तदन्तस्यात्मान्तस्य समुदायस्य स्वस्य च तत् संज्ञा स्यात् । 'एरच् ।' चयः । अयः । समासप्रत्ययविध्योर्न । कष्टं परमश्रितः । 'द्वितीया श्रित—' इति समासो न । परमनडस्यापत्यम् । 'नडादिभ्यः फक्' न । उगिद्वर्णग्रहणवर्जम् । 'उगितश्च ।' भवती । अतिभवती । 'अत इञ् ।' दाक्षिः । यस्मिन् विधिस्तदादावल्ग्रहण इति वाच्यम् । भुवः ।

---

१. इति dropped P, D_1. २. वत्सतरार्णम् । कम्बलार्णम् । ऋणार्णम् । B_2. ३. प्रवत्सतरेत्यादि Nc_2. ४. वत्सतरार्णं Nc_1, Nc_2. ५. परमाश्रितः Bc_1. ६. Dropped Bc_1. ७. After it—अस्यास्त्वयमर्थः । यस्मिन्निति सप्तमीनिर्दिष्टे पूर्वस्य विधिस्तत्र तदादौ वेदितव्यः । अलादावित्यर्थः । यदि तत्रापि तदन्तविधिः स्यादिहैव स्यात् । श्रियो भवति । इह न स्यात् । उपाच्छैतीति &c. Dc_2.

ऋकारादौ[1] धातावुपसर्गादात्[2] वृद्धिरेकादेशः स्यात्[3] । उपार्च्छति । प्राच्छति[4] । तपरत्वाद्दीर्घे न[5] । उप ऋकारीयति । उपर्कारीयति ।

वा सुप्यापिशलेः ॥ ६।१।९२॥

आदुपसर्गात् सुब्धातौ[6] ऋति प्रागुक्तं वा स्यात्[7] । उपर्षभीयति । उपार्षभीयति[8] । प्रर्षभीयति । प्रार्षभीयति । सावर्ण्याल्लृवर्णग्रहणम्[9] । प्रल्कारीयति प्राल्कारीयति ॥

प्रिय इति । उपार्च्छतीति । ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । उपसर्गात् किम् । खट्वर्च्छति । ऋत[10] इति किम् । उप इतः । उपेतः । उपसर्गग्रहणादेव धातुग्रहणे सिद्धेऽपि धातुग्रहणं 'ऋत्यकः' इति शाकल्यमतेन प्रकृतिभावः स्यात् तन्निवृत्त्यर्थम् । तन्निवृत्तिश्च धातुग्रहणे सति योगविभागाद्भवति । उपसर्गादृतीत्येको योगः । उपसर्गादृति वृद्धिः स्यात् । ततो धाताविति द्वितीयः । तत्रापि उपसर्गादृतीत्यनुवर्तते तत्र द्वितीयो योगो बाधकबाधनार्थम् । तेन[11] पक्षे शाकलं न भवति ॥

वा सुपि । आदित्यादि । अवर्णान्तादुपसर्गात् सुबन्तावयवे धातौ ऋकारादौ पूर्वपरयोर्वृद्धिरेकादेशो वा स्यादित्यर्थः । आपिशलिग्रहणं पूजार्थम्[12] । वेति ह्युच्यत इति । प्रार्षभीयति[13] । ऋषभमात्मन इच्छति[14] । 'सुप आत्मनः क्यच्' । 'क्यचि च' इतीत्वम् । सावर्ण्यादिति । 'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति ऋलृ अनयोः[15] सावर्ण्यादत्र ऋग्रहणेन लृकारस्यापि ग्रहणं स्यात् । ततश्च प्राल्कारीयतीति सिध्यतीति भावः ॥

---

१. ऋकारादिधातौ परे C_1; ऋकारादौ धातौ परे B_2. २. आदुपसर्गात् B_2. ३. Dropped D_1. ४. Dropped D_1. ५. After it—आद्गुणः B_1. ६. सुब्धातौ परे B_2. ७. Dropped B_1, D_1. ८. After it—उप ऋषभीयति D_1. ९. उपल्कारीयति । उपाल्कारीयति । C. १०. ऋतीति किम् Bc_1. ११. ततः Bc_1, Dc_4. १२. पूजनार्थम् । Dc_1, Nc_1, Bc_1. १३. After it—इति Dc_3. १४. इच्छतीति Dc_3. १५. उभयोः Dc_4.

एङि पररूपम् ॥ ६।१।९४॥

आदुपसर्गादेङादौ धातौ[1] पररूपमेका[2]देशः[3] स्यात्[4] । प्रेजते । उपोखति[5] । एङादौ सुब्धातौ वा । उपेडकीयति । उपैडकीयति । प्रोघीयति । प्रौघीयति ।

[6]शकन्ध्वादिषु पररूपं वाच्यम्* । शकन्धुः । कर्कन्धुः[7] । कुलटा । सीमन्तः[8] । मनीषा[9] । हलीषा । लाङ्गलीषा[10] । पतञ्जलिः । सारङ्गः ।

एङि । पररूपमेकादेशो वृद्धेरपवादश्च । **प्रेजत** इति । एजृ कम्पने । उपोखतीति[11] । ओखृ[12] शोषालमर्थयोः । **उपेडकीयतीति** । एडकमात्मन इच्छति । **प्रोघीयतीति** । ओघमात्मन इच्छति ।

शकन्धुरिति । शकानां जनपदानामन्धुः कूपः । **कुलटेति** । कुलान्यटतीति । पचाद्यच् । स्वैरिणी । **सीमन्त** इति । सीम्नोन्तः सीमन्तः । केशेष्वेव । अन्यत्र सीमान्तः । **मनीषा** । पतञ्जलिरित्यत्र पृषोदरादित्वादन्त्यलोपे पश्चात्पररूपम् । अथवा 'ओमाङोश्च' इत्युत्तरसूत्रे चकारोधिकविधानार्थः । [13]तेनैतेषां पररूपं स्यात् । तच्च मनःपतच्छब्दयोरिष्टेर्भवति । तस्य चकारस्याधिकविधानार्थत्वं **न्यासकारो**[14]**चैकथत्** । 'उत्तरसूत्रे चकारोधिकविधानार्थस्तेन शकन्ध्वादिष्वपि पररूपं भविष्यति' इति । **मनीषेति** । **मनस ईषेति** । **हलीषेति** । हलस्य ईषा । **लाङ्गलीषेति** । पूर्ववत्[15] । **पतञ्जलिरिति** । पतन्नञ्जलेः पतति स्माञ्जलेरित्यर्थः । **सारङ्ग** इति । साराण्यङ्गानि यस्य सः ।

---

१. धातौ परे B_2. २. पररूपं स्यात् B_2. ३. एकादेशः dropped C, D_3. ४. Dropped B_1, D_1. ५. प्रोषाति D_1; उपोषति noticed by K. ६. शकन्ध्वादौ D_2. ७. कर्कन्धुः dropped B_1, D_1. ८. After it केशेष्वेव । C, B_1, D_2, D_5. ९. हलीषा । लाङ्गलीषा । मनीषा । C. १०. लाङ्गलीषा dropped B_1, D_2. ११. उपोषतीति Nc_1, Nc_2, Dc_2, Dc_4. १२. ओख Dc_1. १३. तेनैकेषां Bc_1. १४. °चीकथत् Bc_1. १५. लाङ्गलस्येषा Bc_1.

एवे चानियोगे ।* अद्येव[1]। नियोगे तु अद्यैव गच्छ[2]। ओत्वोष्ठयोः समासे वा ।* स्थूलोतुः । स्थूलौतुः । बिम्बोष्ठः । बिम्बौष्ठः । [3]समासेति किम् । तवौष्ठः ।

ओमाङोश्च ॥६।१।९५॥

ओमि आङि च[3] आत् पररूपं स्यात्[4]। शिवायों नमः । शिव आ इहि । शिवेहि ।

एव इति । [5]नियोजनं नियोगो व्यापारः । न नियोगोनियोगस्तस्मिन् । एवशब्दो नियमे वर्तते । यदा व्यापारेणाविशिष्टं नियममाह तदा पररूपं भवति । यदा तु व्यापारविशिष्टं तदा न किं तु वृद्धिरेव स्यादिति । अद्येवेति । स्वरूपाख्यानं न तु नियोगः । **अद्यैव गच्छेति** नियोगः । अन्ये तु नियोगो नियमोवधारणमिति यावदिति नियोगं व्याख्यायानियोगमनवधारणं कथयन्ति । ततश्च 'यदेव पूर्वं ज्वलने शरीरम्' इत्यादयः प्रयोगा उपपन्ना भवन्तीत्याहुः । **स्थूलोतुरित्यादि** । स्थूलश्चासावोतुश्च । बिम्बमिव ओष्ठो यस्य स तथा । पक्षे 'वृद्धिरेचि' इति वृद्धिः । **तवौष्ठ** इति वाक्यमेव न समासः ।

ओमाङोः । 'एकःपूर्वपरयोः' इत्येव । ननु किमर्थमि[6]हाङो ग्रहणम् । यावता शिव आ इहि इत्यत्र अकः सवर्णे दीर्घत्वे आद्गुणे च[7] कृते शिवेहीति रूपं सिध्यत्येव । न सिध्यति । यतो धातूपसर्गयोः कार्यमन्तरङ्गमिति पूर्वमाद्गुणेन भाव्यम् । तथा च वृद्धिः । तत आङो ग्रहणं कार्यं वृद्धिबाधनार्थं [8]सवर्णदीर्घबाधनार्थं च । ननु च पूर्वं गुणे कृते एकारे जाते आङो निवर्तितत्वादिदं सूत्रं न प्रवर्तते । नैष

---

१. After it—इहैव तिष्ठ C, B_2, D_3, D_4. २. इति dropped B_1, D_1, D_3. ३. च परे D_1, B_2; च आत् dropped D_3. ४. Dropped C, D_1, D_2. ५. नियोजनं dropped Bc_1. ६. इह dropped Dc_3. ७. For च—इति गुणे Bc_1, Dc_4. ८. Before it—च Dc_3.

९ [प्र. कौ.]

[1]ब्रह्मोतम् । [2]राजर्षिः । [3]ओडेकादेशस्तु[4] आङ्ग्रहणेन [5]ग्राह्यः ॥

अव्यक्तानुकरणस्यात इतौ ॥६।१।९८॥

अव्यक्तानुकरणशब्दस्यात इतौ परे सह [6]पररूपमेकादेशः । पटत् इति । पटिति । [7]घटिति । एकाचो न ।* [8]श्रदिति । अतः किम् । दकारान्ते मा भूत् । [9]घडदिति । [10]सदिति[11]।

दोषः । द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यो भवति [12]लभतेसाऽत्रान्यतर-व्यपदेशमिति परिभाषया आङ्ग्रहणेन गृह्यते । ब्रह्मोतमिति । आ उतमोतम् । ब्रह्मण्योतं ब्रह्मोतम् । राजर्षिरिति । आ ईषदृषिरर्षिः । राजा चासावर्षिश्च राजर्षिः । अत्रान्तरङ्गत्वात् पूर्वमाङ् ऋकारस्य [13]च गुणे कृते सवर्णदीर्घ[14]बाधनार्थं पररूपम् ॥

अव्यक्त । **अव्यक्तेत्यादि** । अव्यक्तोपरिस्फुटवर्णो यः शब्दस्तस्य योऽनुकरणशब्दो ध्वनिसादृश्येन व्यक्तवर्ण एव तस्य योऽत्शब्दस्तस्य सर्वस्य इति शब्दे परतः पूर्वपरयोः स्थाने पररूप एकादेशः स्यादिति तात्पर्यार्थः । ननु च किमित्यत्रालोन्त्यपरिभाषा न प्रवर्तते । उच्यते । 'नानर्थकेऽलोन्त्यविधिः' इति । अथवोत्तरसूत्रेऽन्त्यस्येति वचनात् । **अतः किमिति** । तकारान्तग्रहणं किमित्यर्थः । **घटदिति** । दकारान्तमेवैतदनुकरणम् । अव्यक्तानुकरणस्येति किम् । जगदिति । अतः किम् । उतो मा भूत् । मरुदिति । इताविति किम् । पटदत्र ॥

---

१. Before it—ब्रह्म आ उतम् B_2. २. Before it—राज आ ऋषिः D_1, B_2. ३. This sentence is omitted–P, D_1, D_3, D_4; आङ एका° C. ४. Dropped D_2. ५. गृह्यते B_2. ६. पररूपादेशः स्यात् । C; पररूपं स्यात् D_3; पररूपादेशः D_1, D_2. ७. B_1 has घटत् इति before it; घटिति dropped D_3. ८. छादिति D_1; सादिति D_2. ९. घटदिति B_1, Com.; घटिति C. १०. Dropped B_1; For it—पटदिति C. ११. After it—अव्यक्तानुकरणस्येति किम् । जगदिति । अतः किम् । उतो मा भूत् । मरुदिति । इताविति किम् । पटदत्र । B_2. १२. लभते सोऽन्य° Bc_1. १३. Dropped Bc_1 १४. °दीर्घता° Dc_4.

नाम्रेडितस्यान्त्यस्य तु वा ॥६।१।९९॥

द्विस्त्रिरुक्तस्य नोक्तं[1] स्यादन्त्यस्य तु तकारमात्रस्य वा स्यात् । पटेत्पटेति[2] । पटत्पटदिति ॥

अकः सवर्णे दीर्घः ॥६।१।१०१॥

अकः सवर्णेचि दीर्घ एकादेशः स्यात्[3] । दैत्यारिः । श्रीशः । विष्णूद्यः ॥

ऋति सवर्णे ऋ वा ।* होतृ॑कारः[4] । होतॄकारः । ऋकारस्य

नाम्रेडितस्य । 'अव्यक्तानुकरणस्यात इतौ' इत्यनुवर्तते । **पटत्पटेति** । 'नित्यवीप्सयोः' इति द्वित्वम् । तकारस्य पररूपे अकारेण सहेकारस्य गुणः । **पटत्पटदिति** । तकारपररूपाभावे 'झलां जशोन्ते' इति जश्त्वम् । अनुकरणशब्दः पटदित्यादिर्यदा द्विस्त्रिरुच्यते तदा तस्याच्छब्दस्य पररूपं न स्यात् । यदा तु समुदायोनुकरणं तदा स्यादेव पूर्वरूपेण[5] पररूपत्वं पटत्पटिति ।

अकः । 'इको यणचि' इत्यतः 'अचि' इत्यनुवर्तत इत्यभिप्रेत्याह । **सवर्णेचीति** । दैत्यारिरित्यादि षष्ठीतत्पुरुषः । 'तुलास्यप्रयत्नं सवर्णम्' इति सर्वत्र सवर्णसंज्ञा । अकः किम् । अग्नये । परत्वात् 'घेर्ङिति' इति गुणे कृते उभयोरेकारयोः सवर्णत्वेपि अगभावादत्र सवर्णदीर्घो न । सवर्णे किम् । दध्यत्र । भिन्नस्थानत्वात् सावर्ण्याभावः ।

होतृकार इति । होतृ ऋकार इति स्थिते अकः सवर्णे दीर्घत्वे प्राप्ते ह्रस्व एव ऋकार एकादेशो जातः । पक्षे दीर्घ एव भवति होतॄकार इति ज्ञेयम् । **होतॄकार इति** । होतृ ऌकार इति स्थिते[6] ऌकार एकादेशः[7] । **पक्षे इति** । यदा ऌकारो न भवति तदा

---

१. उक्तं न । अन्त्यस्य C, B_2. २. पटत्पटादिति । पटत्पटेति B_1; पटत्पाटेति for पटत्पटेति D_1. ३. Dropped B_1. ४. होतृ ऋकारः । होतृकारः । पक्षे होतॄकारः सावर्ण्यात् स्यात् । होतॄकारः । B_2. ५. पूर्वेण पररूपम् । Dc_4. ६. स्थिते dropped Dc_1; संस्थिते Dc_4. ७. एकादेशो जातः । Dc_3.

ऌति ऌ वा ।* होतॢकारः । पक्षे [1]ऋकारः । सावर्ण्यात् । होतॄकारः । अचि किम् । कुमारी शेते ॥

नाज्झलौ ॥१।१।१०॥

तुल्यास्यप्रयत्नावप्यज्झलौ न सवर्णौ स्तः[2] । इति[3] सावर्ण्यनिषेधो न दीर्घशकारयोः ।

न निषिद्धं सवर्णत्वं नाज्झलाविति दीर्घशोः[4] ।
[5]ग्रहोदितानिषिद्धत्वादन्यत्र न निषिद्धता[6] ॥

ऋऌवर्णयोर्मिथः सावर्ण्याद्दीर्घस्य च ऌकारस्याभावात् सवर्णदीर्घे कार्ये ऋकार एव भवति । **अचि किमिति** । 'इको यणचि' इत्यतः 'अचि' इति किमर्थमनुवर्त्यत इति प्रश्नाभिप्रायः । उत्तरमाह । **कुमारी शेत** इति । 'इचुयशानां तालु' इतीकारशकारयोस्तुल्यं स्थानं 'विवृतमूष्मणां स्वराणां च' इति तुल्यः प्रयत्नः । एवं च सति यदि 'अचि' इति नोच्यते तदात्रापि सवर्णदीर्घः स्यादित्यभिप्रायः ।

ननु चात्र सवर्णसंज्ञैव नास्ति । अपवादादिति । अज्ग्रहणानुवृत्तिनिराकरणवाद्यपवादं पठति । **नाज्झलौ** । **तुल्यास्येति** । तुल्यस्थानप्रयत्नावपीत्यर्थः । अनेनापवादेनाज्झलोः सावर्ण्यनिषेधाद् 'अचि' इत्यनुवृत्तिं विनापि कुमारी शेत इत्यत्र सवर्णे दीर्घो न स्यादिति भावः । सिद्धान्ती परिहरति । **इति सावर्ण्येति** । 'नाज्झलौ' इति सावर्ण्यनिषेधो दीर्घशकारयोर्न भवति । अयं भावः । 'नाज्झलौ' इत्यत्र 'अच्' इति प्रत्याहारसंनिविष्टा एवाकारादयो गृह्यन्ते न तु तत्सवर्णा अपि । 'अणुदित् सवर्णस्य चाप्रत्ययः' इत्यत्र शास्त्रस्य सवर्णसंज्ञाविधायकशास्त्रं प्रत्यसिद्धेः । यतस्तस्य सवर्णसंज्ञा अङ्गम् । तस्या अङ्गभूताया

---

१. होतृकारः । ऋकारसवर्णत्वात् D_1. २. Dropped D_1. ३. Dropped B_1; from इति to °शकारयोः dropped D_3. ४. दीर्घ शोः P. ५. सहोदित° P. ६. After it—इति सावर्ण्यनिषेधो न दीर्घशकारयोः । D_3, D_5. ७. °वर्तेत Dc_4; °वर्तते Dc_3. ८. प्रयत्नं before विवृत° Dc_3. ९. सवर्णदीर्घो Dc_4.

एङः पदान्तादति ॥६।१।१०९॥

पदान्तादेङोति परे [1]पूर्वरूप एकादेशः स्यात् । हरेव । विष्णोव ॥

सर्वत्र विभाषा गोः ॥६।१।१२२॥

लोके वेदे च गोरति वा प्रकृतिभावः । गो अग्रम् । गोग्रम् ॥

असिद्धावङ्गिनोपि ग्रहणकशास्त्रस्यासिद्धिः । तस्मान् 'नाज्झलौ' इति [2]प्रति ग्रहणक[3]शास्त्रनिवृत्तेस्तत्र प्रत्याहारसूत्रसंनिविष्टा एवाकारादयो गृह्यन्ते । [4]तेन दीर्घशकारयोरयं सावर्ण्यनिषेधो न । दीर्घस्य प्रत्याहार-सूत्रसंनिवेशाभावादिति ॥

एङः । अयावादेशयोरपवादोयम् । हरे इति । 'ह्रस्वस्य गुणः' इति गुणः । अवेति । [5]अव रक्षणे । लोण्मध्यमपुरुषैकवचनम् । एङ इति किम् । दध्यत्र । पदान्तात् किम् । चयनम् । लवनम् । अति किम् । वायो इति । वायविति । तपरः किम् । वायवायाहि ॥

सर्वत्र । विभाषेति प्रतिषेधविकल्पयोः संज्ञा । तथा च सूत्रम्—'न वेति विभाषा' । नेति निषेधो वेति विकल्पस्तयोः प्रतिषेधविकल्पयो-र्विभाषेति संज्ञा स्यात् । विभाषेति [6]शब्दसंज्ञा । तस्यार्थो विकल्पोपि संज्ञा ततश्च विकल्पार्थेषु वान्यतरस्यामाचार्यग्रहणमित्येतेष्वपि प्रतिषेध-विकल्पावुपतिष्ठेते इति सिद्धम् । विभाषाप्रदेशेषु निषेधविकल्पावुप-तिष्ठेते । तत्र निषेधेन समीकृते विषये विकल्पः प्रवर्तते । उभयत्र विभाषा प्रयोजनमस्याः संज्ञायाः । यथा 'विभाषा श्वेः' । शुशाव । शिश्वाय । शुशुवतुः । शिश्वियतुः । णल्यप्राप्तेतुसि प्राप्ते संप्रसारण इयं [7]विभाषा । प्रकृतिभावात् सन्ध्यभावः ॥

---

१. पूर्वरूपमेका° B_2. २. प्रत्याहारग्रहणक° Nc_1; अजूग्रहणं प्रति Dc_3. ३. °शास्त्रीयनिवृत्तेः Dc_4. ४. ततः Dc_4. ५. अव रक्षणे dropped Dc_1. ६. शब्दोपि संज्ञा Dc_3, Dc_4. ७. परिभाषा Dc_3.

अवङ् स्फोटायनस्य ॥६।१।१२३॥

अतीति निवृत्तम् । आचि परे[1] गोरवङ् वा स्यात् पदान्ते[2] । गवाग्रम्[3] । गोग्रम् । गोअग्रम् । गवेशः । गवीशः । पदान्ते किम् । गवे ।

इन्द्रे च नित्यम् ॥६।१।१२४॥

गवेन्द्रः । चकाराद् गवाक्षः[4] ।

अचोन्त्यादि टि ॥१।१।६४॥

अन्त्याच्प्रभृतिशब्द[6]ष्टि[5]संज्ञः[7] स्यात् ॥

अवङ् । 'अचि' इत्येतत्तु मण्डूकप्लुतिन्यायेनानुवर्तत इत्यभिप्रेत्याह । अचीति । आद्युदात्तोयमादेशो निपात्यते संनिपातनस्वरो बहुव्रीहौ प्रकृतिस्वरविधौ भवति । गावोग्रमस्य गवाग्रमिति । अन्यस्मिंस्तु समासे समासान्तोदात्तत्वेन बाध्यते । स्फोटायनग्रहणं पूजार्थम् । विभाषेत्यनुवर्तत एव ।

इन्द्रे च । इन्द्रशब्दस्थेचि परतो गोर्नित्यमवङ् स्यात् । **गवेन्द्र** इति । गवामिन्द्रो यज्ञचरुः । पूर्वेण विकल्पे सिद्ध आरम्भसामर्थ्यादेवास्मिन् विधौ नित्ये सति पुनर्नित्यग्रहणं '[8]प्लुतप्रगृह्या अचि' इत्याद्युत्तरार्थम् । चकारादिति । अनुक्तसमुच्चयार्थादित्यभिप्रायः ॥

अचोन्त्यादि । संनिविष्टानामचां मध्ये योन्त्योच् तदादिको यः शब्दः स टिसंज्ञ इत्यभि[9]प्रायः ॥

---

१. पदान्ते गोरवङ् वादेशः स्यात् P. २. पदान्ते dropped D_1, D_4. ३. P; C have गवाग्रम् । गवीशः । गवेशः ।; B_2 has—गवाग्रम् । गवेशः । गवीशः; D_2 drops गोग्रम् । गोअग्रम् ।. ४. गवाक्षम् B_2, D_2, D_3; After it—अथ प्रकृतिभाव उच्यते D_2; इति स्वरसंधिः D_5. ५. °ष्टिः B_1. ६. अन्त्यादचः प्रभृति शब्दरूपं टिसंज्ञं स्यात् । D_1. ७. °संज्ञकः C. ८. °प्लुत° Dc_2, Nc_2. ९. एवत्येभि° Nc_2.

दूराद्धूते च ॥८।२।८४॥

दूरादाह्वाने टेः प्लुतः स्यात् ॥

दूरात् । दूरत्वं यद्यप्यनवस्थितं तथापि हूतग्रहणसामर्थ्याद्धूतापेक्षमिहाश्रीयते । यत्र प्राकृतात्[1] प्रयत्नात् प्रयत्नविशेष आश्रीयमाणे शब्दः श्रूयते तद् दूरम् । हूतग्रहणं संबोधनमात्रोपलक्षणं द्रष्टव्यम् । तेन यत्राह्वानं[2] नास्ति तत्रापि प्लुतिः स्यात् । अस्याश्च प्लुतेरेकश्रुतिः । 'दूरात्संबुद्धौ' इत्यनयैकश्रुत्या समावेश इष्यते । दूरात् किम् । आगच्छ भो माणवक देवदत्त३[3] ॥

एतत्सूत्रव्याख्यानेनैव व्याख्यातप्रायत्वात् स्पष्टत्वाद्वा त्यक्तानि षड्विंशतिसूत्राणि व्याख्यायन्ते । 'वाक्यस्य टेः प्लुत उदात्तः' ॥ ८।२।८२॥ इतः परमा पादसमाप्तेर्वाक्यस्य टेः प्लुत उदात्त इति सर्वमधिकृतं वेदितव्यम् । वाक्यसंज्ञा पारिभाषिकी महाभाष्य उक्ता । तथा हि । आख्यातं साव्ययकारकविशेषणं वाक्यम् । आख्यातं साव्ययं सकारकं सविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम् ।* साव्ययम् । उच्चैः पठति । नीचैः पठति । सकारकम् । ओदनं पचति । सकारकविशेषणम्[4] । मृदु विशदमोदनं पचति । सक्रियाविशेषणं चेति वक्तव्यम् ।* सुष्ठु[5] पचति । दुष्ठु पचति । अपर आह । आख्यातं सविशेषणमित्येव । सर्वाणि ह्येतानि क्रियाविशेषणानि । एकतिङ् ।* एकतिङ् वाक्यं भवतीति वक्तव्यम् । ब्रूहि ब्रूहीति । संबोधनस्य सतिङन्तस्यापि सविशेषणत्वं स्यादिति[6] वाक्यपदीय उक्तम् ।

'संबोधनपदं यच्च तत् क्रियाया विशेषणम्' । इति ।

तथा 'यथानेकमपि क्तान्तं तिङन्तस्य विशेषकम् ।

तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषकम्' ॥ इति ।

---

१. कृतात् Dc1, Nc1; प्राकृतप्रयत्नात् Dc4. २. यत्राप्याह्वानं Bc1, Dc4. ३. देवदत्त देवदत्तक३ Dc1. ४. सविशेषणं Bc1. ५. Before it—उच्चैः पठति Bc1. ६. स्यात् dropped Bc1, Dc4.

तथोदाहरिष्यामः । वाक्यग्रहणमनन्त्यस्य पदस्य निवृत्त्यर्थम् । टिग्रहणं व्यञ्जनान्तस्यापि[1] प्लुतो यथा स्यादिति । अग्निचि३त्[2] ।

'प्रत्यभिवादेऽशूद्रे' ॥८।२।८३॥ अभिवादयितृ आशीर्वादः प्रत्यभिवादः । तत्राशूद्रविषये यद्वाक्यं प्रवर्तते तस्य टेः प्लुत उदात्तः स्यात् । अभिवादये देवदत्तोऽहं भोः । आयुष्मानेधि देवदत्त३[3] । अभिवादवाक्ये संकीर्तिते[4] नाम गोत्रं वा यत्र प्रत्यभिवादान्ते प्रयुज्यते तत्रायं प्लुत इष्यते । इह[5] न । देवदत्त कुशल्यसि । आयुष्मानेधि । अशूद्रे किम् । शूद्रोऽभिवादयेऽहं भोः । आयुष्मानेध्यरे शूद्र । स्त्रियामपि निषेधः । अभिवादये गार्ग्यहं भोः । आयुष्मती भव गार्गि । भो राजन्यविशां वा ।* आयुष्मानेधि भोः३ । आयुष्मानेधीन्द्रवर्म३न् । आयुष्मानेधीन्द्रपालि३न् । पक्षे न ।

'हैहेप्रयोगे हैहयोः' ॥८।२।८५॥ हैहयोः प्रयोगे दूराद्धूते हैहयोरेव प्लुतः[6] । पुनर्[7]हैहेग्रहणमनन्त्ययोरपि यथा स्यात् । है३ देवदत्त । देवदत्त है३ । हे३ देवदत्त । देवदत्त हे३ ॥

'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' ॥८।२।८६॥ अन्त्यस्यानन्त्यस्य च ऋकारवर्जितस्य गुरोरेकैकस्य प्लुतः स्यात् प्राचां मतेन । दे३वदत्त । देवद३त्त । गुरोः किम् । वकारात्परस्य मा भूत् । अनृतः किम् । कृ३ष्णमित्र । कृष्णमित्र३ । एकैकग्रहणं पर्यायार्थम् । प्राचामिति विकल्पार्थम् । आयुष्मानेधि यज्ञदत्त । तेन यदुच्यते सर्व एव प्लुतः साहसमनिच्छता विभाषा वक्तव्य इति तदुपपद्यते ॥

'ओमभ्यादाने' ॥८।२।८७॥ आरम्भ ओंकारः प्लुतः स्यात् । ओ३म् अग्निमीळे पुरोहितम् । अभ्यादाने किम् । ओमित्येकाक्षरमुद्गीथमुपासीत ॥

१. °न्तस्य टेः प्लुतो Bc_1. २. अग्निची ३त् Dc_3, Bc_1. ३. देवदत्ता ३ Mss. ४. संकीर्तितं Bc_1, Dc_4. ५. तेनेह न Bc_1, Dc_4. ६. After it स्यात् Dc_4. ७. पुनरपि Bc_1. ८. After it—देवदत्त३ । Bc_1.

'ये यज्ञकर्मणि' ॥८।२।८८॥ ये इत्यस्य प्लुतः स्याद्यज्ञेऽध्ययने। ये३ यजामहे। यज्ञकर्मणि किम्। स्वाध्याये मा भूत्। [1]ये यजामह इत्यत्रैवायं प्लुत इष्यते। इह न भवति। ये देवासो दिव्येकादशस्थ इति॥

'प्रणवष्टेः' ॥८।२।८९॥ यज्ञकर्मणि वाक्यटेः स्थाने प्रणव आदेशः स्यात्। प्रणवो नाम पादस्य वार्धर्चस्य वान्त्याक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोकारमोंकारं वा विदधाति स इत्याचक्षते प्रातिशाख्यविदः। अपां रेतांसि जिन्वतो३म्। टेरित्यनुवर्तमाने पुनष्टिग्रहणमोकारादेशपक्षे सर्वादेशार्थम्। ओंकारादेशपक्षे त्वनेकाल्त्वादेव सर्वादेशः स्यात्॥

'याज्यान्तः' ॥८।२।९०॥ यज्ञकाण्डे ये मन्त्राः पठ्यन्ते ते याज्यास्तेषामन्तो यष्टिः स प्लवते यज्ञकर्मणि। स्तोमैर्विधेमाग्नये३। अन्तग्रहणं वाक्यसमुदायरूपाणां याज्याख्यानामृचां यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतो मा भूत् किं तु सर्वान्त्यस्येत्येवमर्थम्॥

'ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः' ॥८।२।९१॥ एषामादेः प्लुतो यज्ञकर्मणि। अग्नये अनुब्रू३हि। अग्नये गोमयान् प्रे३ष्य। अस्तु श्रौ३षट्। सोमस्याग्ने वीही वौ३षट्। अग्निमा३वह।

'अग्नीत्प्रेषणे परस्य च' ॥८।२।९२॥ अग्नीध ऋत्विजः प्रेषणमग्नीत्प्रेषणं तत्रादेः प्लुतस्तस्मादेव चादेः परस्य प्लुतः। आवय३। आ३वय। अत्रैवायं प्लुत इष्यते। तेनेह न। अग्नीदग्नीन् विहर बर्हिस्तृणीहि। इह तु उद्धर३ उद्धर। अभिहर३ अभिहर। छान्दसः प्लुतव्यत्ययः। यज्ञकर्मणीति निवृत्तम्।

'विभाषा पृष्टप्रतिवचने हेः' ॥८।२।९३॥ पृष्टप्रतिवचने हीत्यस्य प्लुतो वा। अकार्षीः कटं देवदत्त। अकार्षं हि३। अकार्षं हि। पृष्टप्रतिवचने किम्। कटं करिष्यसि हि। हेरिति किम्। करोमि ननु॥

१. ये३ Bc1.

'निगृह्यानुयोगे च' ॥८।२।९४॥ स्वमतात् प्रच्यावनं निग्रहः। अनुयोगो निग्रहाविष्करणम्। तत्र निगृह्य निगृहं कृत्वानुयोगे यद्वाक्यं वर्तते तस्य टेः प्लुतो वा स्यात्। अद्य श्राद्धमित्यात्थ३। नित्यः शब्द इत्यात्थ३। पक्षे आत्थ॥

'आम्रेडितं भर्त्सने॥' ८।२।९५॥ आम्रेडितसंज्ञं भर्त्सने प्लुतं स्यात्। चौर चौर ३ घातयिष्यामि त्वाम्। भर्त्सने पर्यायेणेति वाच्यम्।* चौर३ चौर। तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयन्ति॥

'अङ्गयुक्तं तिङाकाङ्क्षम्॥' ८।२।९६॥ अङ्गशब्देन युक्तं साकाङ्क्षं तिङन्तं भर्त्सने प्लवते। अङ्ग कुरु ३ ज्ञास्यसि फलम्। भर्त्सने किम्। अङ्गाधीष्व गुडं ते दास्यामि। आकाङ्क्षं किम्। अङ्ग पच। नैतदपरमाकाङ्क्षति॥

'विचार्यमाणानाम्॥' ८।२।९७॥ विचारवाक्यानां टेः प्लुतः स्यात्। होतव्यं दीक्षितस्य गृहा३ इ॥

'पूर्वं तु भाषायाम्॥' ८।२।९८॥ लोके तु विचार्यस्य पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु॥

'प्रतिश्रवणे च॥' ८।२।९९॥ अभ्युपगमप्रतिज्ञाश्रवणोक्तता प्रतिश्रवणं तत्र यद्वाक्यं तस्य टिः प्लवते। गां मे देहि भोः॥ अहं ते ददामि३। नित्यः शब्दो भवितुमर्हति। देवदत्त भोः किमात्थ३॥

'अनुदात्तं प्रश्नान्ताभिपूजितयोः॥' ८।२।१००॥ दूराद्धूतादिविहितः प्लुतः प्रश्नान्ताभिपूजितयोरनुदात्तः स्यात्। अगमः३ पूर्वा३न् ग्रामान् अग्निभूत३ इ। अग्निभूते इत्यस्य प्रश्नान्ते वर्तमानस्यानुदात्तः प्लुतो जातः। अगम इत्यादीनाम् 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इति स्वरितः प्लुतः। अभिपूजिते। शोभनः खल्वसि माणवक३॥

१. स्वमतप्रच्यावनं Nc_1. २. चौर चौर चौर ३ Bc_1. ३. दास्यामि ते गुडम्। Bc_1. ४. नैवेदं पर° Bc_1. ५. Dropped Bc_1, Dc_4. ६. °श्रवणोक्ता कृता Nc_1; श्रवणोक्तं ततः प्रतिश्रवणं Dc_2. ७. अपि for इति Dc_1, Dc_4. ८. Dropped Bc_1. ९. After it—स्यात् Dc_3.

'चिदिति चोपमार्थे प्रयुज्यमाने ' ॥८।२।१०१॥ चिदित्यस्मिन्नुपमार्थे [1]प्रयुक्ते वाक्यस्य टेरनुदात्तः प्लुतः स्यात् । अग्निचिद् भाया३ त् । अग्निरिव भायादित्यर्थः । उपमार्थे किम् । कथंचिदाहुः । प्रयुज्यमाने किम् । अग्निर्माणवको भायात् ॥

'उपरिस्विदासीदिति च ॥' ८।२।१०२॥ अस्यापि टेरनुदात्तः प्लुतः स्यात् । अधस्विदासी३ त् । उपरीस्विदासी३ त् । अधस्विदासीदित्यस्य 'विचार्यमाणानाम्' [2]इत्युदात्तः प्लुतः । उपरिस्विदासीदित्यस्यानेनानुदात्तः प्लुतः ॥

' स्वरितमाम्रेडितेसूयासंमतिकोपकुत्सनेषु ॥' ८।२।१०३॥

[3]एष्वर्थेष्वाम्रेडिते[4] स्वरितः प्लुतः स्यात् । असूयायाम् । अभिरूपक३ अभिरूपक व्यर्थं ते आभिरूप्यम् । संमतौ । अभिरूपक३ अभिरूपक शोभनोसि । कोपे । अविनीतक३ अविनीतक क इदानीं ज्ञास्यसि । कुत्सने । शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः । असूयादिषु वेति वाच्यम् ।* माणवक माणवक ॥

'क्षियाशीः प्रैषेषु तिङाकाङ्क्षम् ' ॥८।२।१०४॥ आचारभङ्गादिष्वर्थेषु साकाङ्क्षं स्वरितं तिङन्तं [5]प्लवते । क्षियायाम् । स्वयं हि रथेन याति३ उपाध्यायं पदातिं गमयति । आशिषि । पुत्रान् लभस्व३ धनं च । प्रैषे । यवान् लुनीहि३ सक्तूंश्च [6]पिब । [7]आकाङ्क्षं किम् । [8]अग्नीन् विहर ॥

'अनन्त्यस्यापि प्रश्नाख्यानयोः ' ॥८।२।१०५॥ एतयोरन्त्यस्यानन्त्यस्यापि टेः स्वरितः प्लुतः स्यात् । आगमः३ पूर्वा३न् ग्रामा३न् । अग्निभूत३इ । अग्निभूते । अत्र पक्षे अनुदात्तोप्युदाहृतः 'प्रश्नान्ताभिपूजितयोः' इत्यत्र ॥

---

१. प्रयुक्तस्य Dc_1, Dc_2, Nc_1, Nc_2. २. इत्याद्युदात्तः Bc_1, Dc_3. ३. एतेष्व° Dc_4. ४. °म्रेडिते परे Bc_1, Dc_3. ५. प्लवति Bc_1. ६. पिब३ Bc_1. ७. आकाङ्क्षायां Dc_2. ८. अग्निचिदग्नीन् Dc_2.

प्लुतप्रगृह्या अचि ॥६।१।१२५॥

प्लुताः प्रगृह्याश्चाचि[1] प्रकृत्या स्युः। न संधिं यान्तीत्यर्थः। कृष्णा३[2] एहि।

'प्लुतावैच इदुतौ' ॥८।२।१०६॥ दूराद्धूतादौ प्लुतो विहितस्तत्र एचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लुतौ स्तः। वर्धेत इत्यर्थः। ऐ३तिकायन। औ३पगव। यदा समः प्रविभागः अवर्णस्य मात्रा इवर्णोवर्णयोर्मात्रेति तदेदुतोर्द्विमात्रतायां कृतायामवर्णमात्रया सह त्रिमात्रावेचौ स्तः। भाष्यकारमते इदुतोस्त्रिमात्रतायामवर्णमात्रया सह चतुर्मात्रौ स्तः। यदा त्वर्धमात्रावर्णस्याध्यर्धमात्रेवर्णोवर्णयोस्तदाध्यर्धतृतयिमात्रावेचौ क्रियेते॥

'एचोप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' ॥ ८।२।१०७॥ एचोप्रगृह्यस्यादूराद्धूते पूर्वांशस्यादादेशः स्यात् स च प्लुत उत्तरस्येदुतौ तावुदात्तौ। प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति परिगणनं कार्यम्। आ गमः३ पूर्वा३इन् ग्रामा३इन् अग्निभूता३इ। पटा३उ। एवमभिपूजितादौ। पदान्त इति वाच्यम्।* तेनेह न। भद्रं करोषि गौरिति। अप्रगृह्यस्येति किम्। शोभने खट्वे इति॥

'तयोर्य्वावचि संहितायाम्' ॥८।२।१०८॥ तयोरिदुतोर्यवौ स्यातामचि परे संहितायां विषये। अग्ना३याशा। पटा३वाशा। इदुतोरसिद्धत्वाद्यण् न स्यात्। 'संहितायाम्' इत्यष्टमाध्यायपर्यन्तमधिकारः॥

प्लुत।[4] त्रिपादीविहितो[5]पि प्लुत ऐतं[6] प्रकृतिभावं प्रत्यासिद्धो न। तदाश्रयत्वात्। अचीत्यनुवर्तमानेपि पुनरज्ग्रहणं संधिनिमित्तं योच् तत्परिहारार्थम्। तेनेह न। जानु उ अस्य रुजति। जान्वस्य रुजति।

---

१. °चि परे P, C; °च्चि परतः D_2. २. कृष्ण३ एहि D_1. ३. Dropped Nc_1, Dc_1. ४. Before it—एतत्सूत्रसामर्थ्यादेवात्र न प्लुतस्यासिद्धत्वं निमित्तभूतेचि परत इत्युक्तेर्जानु उ अस्येत्यादौ पूर्वेणाचा संधिर्भवति ततो विकृतस्याप्यस्मिन्नचा संधिर्भवति रूपमालायाम्। Dc_3. ५. अपि dropped Nc_2, Dc_2. ६. एनं Nc_2, Dc_2.

ईदूदेद्द्विवचनं प्रगृह्यम् ॥१।१।११॥

ईदूदेदन्तं द्विवचनान्तं[1] प्रगृह्यसंज्ञं[2] स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू । द्विवचनं[3] किम् । कुमार्यत्र ।

अत्र जानु[4]शब्दात् परो य उकारः स प्रगृह्यः । तत्र उकारयोः सवर्णदीर्घे क्रियमाणे अस्येत्यकारस्यानिमित्तत्वात् तस्मिन् परत[5] उकारस्य प्रकृतिभावो न । तेन सवर्णदीर्घः स्यादेव । नित्यग्रहणमनुवर्तते । प्लुतप्रगृह्याणां नित्यमयमेव प्रकृतिभावो यथा स्याद् 'इकोसवर्णे–' इत्येतच्छाकलं मा भूत् । तेन हरी एतौ इत्यत्र पक्षे ह्रस्वो न । कृष्ण३ एहीति 'ओमाङोश्च[6]' इति प्राप्तं पररूपं न भवति ॥

ईदूदेत् । अत्र पक्षत्रयं संभाव्यते । ईदादयो यद् द्विवचनमित्येकः । 'येन विधिस्तदन्तस्य' इति तदन्तस्य ग्रहणम्[7] । ईदाद्यन्तं यद्द्विवचनमिति द्वितीयः । पूर्ववत् तदन्तग्रहे 'प्रत्ययग्रहणे यस्मात् स तदादेस्तदन्तस्य ग्रहणम्' इति द्विवचनान्तग्रहे च ईदाद्यन्तं यद् द्विवचनान्तमिति तृतीयः । तत्र प्रथमे[8] पक्षे पचेते अत्रेत्यत्र प्रगृह्यत्वं[9] न स्यादिति दोषः । न ह्यत्र[10] द्विवचनमेकारः किं तु तदन्तम् । द्वितीये तु पक्षे हरी एतावित्यादौ न स्यात् । न ह्यत्र ईदाद्यन्तं द्विवचनमपि तु त एव । तृतीये तु पक्षे कुमार्योरगारं कुमार्यगारमित्यत्र प्रगृह्यत्वं स्यात् । भवति ह्येतदीकारान्तं प्रत्ययलक्षणेन द्विवचनान्तं[11] च । तत्र द्वितीये पक्षे दोषः 'आद्यन्तवदेकस्मिन्' इत्यन्तवद्भावात् परिहर्तुं शक्यः । तृतीयपक्षे[12] दोषोपि 'ईदूतौ च सप्तम्यर्थे' इत्यर्थग्रहणात् प्रगृह्यप्रकरणे प्रत्ययलक्षणं[13] नेति ज्ञापितमिति प्रत्ययलक्षणेन द्विवचनान्तत्वाभावात् परिहर्तुं शक्यः । तत्रातिविशदत्वात् तृतीयं पक्षमाश्रित्याह । ईदूदेदन्तं द्विवचनान्तमिति । तपरकरणं न तावद्ध्रस्वप्लुतनिवृत्त्यर्थम् ।

---

१. प्रगृह्यं स्यात् द्विवचनान्तम् । B_2. २. प्रगृह्यं B_1. ३. द्विवचने B_2. ४. Before it—'प्रकृत्यान्तःपादमव्यपरे' इत्यस्मात् सूत्रात् Dc_2. ५. परस्य Dc_1. ६. 'वृद्धिरेचि' इति प्राप्ता वृद्धिर्न भवति Nc_2. ७. ग्रहः Nc_2. ८. प्रथमपक्षे Nc_1. ९. पूर्ववत् तदन्तग्रहे प्रगृह्यत्वं न स्यादिति दोषः । Bc_1. १०. ह्येतत् Bc_1. ११. द्विवचनं च Bc_1. १२. °पक्षदोषोपि Nc_2. १३. प्रत्ययलोपे प्रत्यय° Nc_2.

मणीवादेर्न ।* मणीव । रोदसीव[1] । दम्पतीव[2] ।।

अदसो मात् ।।१।१।१२।।

अदसो मात्परे ईदूदेतस्तथा[3] । अमी ईशाः । अमू आसाते[4] । अदसः किम् । शम्यत्र । मात् किम्[5] । अमुकेत्र ।

दीर्घोच्चारणसामर्थ्यादेव तन्निवृत्तेः[6] । अथ 'दूराद्धूते च' इत्यादि प्लुतनिवृत्त्यर्थमिति चेन्न । इष्टत्वात्तस्य प्लुतस्य । यथा चेष्टः स तथा[7] महाभाष्ये प्रतिपादितम् । तस्मादसंदेहार्थं तपरत्वम्[8] । हरीत्यादीनि प्रथमाद्विवचनान्तानि । आद्ययोर्यणादेशे प्राप्ते प्रगृह्यत्वात् प्रकृतिभावः । अन्त्यस्य तु 'एङः पदान्तादति' इति पूर्वरूपत्वे प्राप्ते । ईदूदेत् किम् । रामावत्र । द्विवचनमिति किम् । कुमार्यत्रेति । 'वयसि प्रथमे' इति कुमारशब्दाद् ङीप् यण् ।।

मणीवेति । मणिशब्दस्य प्रथमाद्विवचनान्तस्य इवशब्दे परतः सवर्णदीर्घः । रोदसीवेति । द्यावापृथिव्याविवेत्यर्थः । दम्पतीवेति । जाया च पतीश्च दम्पती । जायाया जंभावदंभावौ वा निपात्यौ पत्यौ[9] ।।

अदसः । अदसः[10] संबन्धी यो मकारस्तस्मात्परे ईदूदेतः प्रगृह्यसंज्ञाः स्युः । अमी ईशा इति । अदसशब्दात्परस्य जसः शी[11] । त्यदाद्यत्वम् । पररूपत्वम् । आद्गुणः । 'एत ईद्—'इतीकारः । दस्य च मः । प्रगृह्यत्वात् सवर्णदीर्घाभावः । ऊकारस्योदाहरणम् । अमू आसाते । एकारस्योदाहरणं न संभवति । ननु च अमी ईशा इत्यादौ सवर्ण-

---

१. दम्पतीव । रोदसीव । P, D_2. २. Before it—जंपतीव । C, D_1. जम्पतीव after it—B_2, D_3. ३. After it—स्युः B_2. ४. After it—इमे आसाते B_1. ५. मादिति किम् D_1. ६. °निवृत्तिः Dc_3. ७. तथा च Dc_3; ८. तपरकरणम् Dc_3. ९. Dropped Dc_1, Dc_3. १०. पत्यौ dropped Bc_1, Dc_3. ११. अदसः dropped Bc_1. १२. शीभावः Dc_3.

निपात एकाजनाङ् ॥१।१।१४॥

[1]एकाज् निपात आङ्वर्जः [2]प्रगृह्यः [3]स्यात् । अ अनन्तः । इ ईश्वरः । उ उमेशः ।[4] आ एवम्[5] । [6]अज्मात्रः किम् । प्रादात् । [7]अनाङ् किम् ।

दीर्घादिकं संधिं प्रति पूर्वत्रासिद्धन्यायेन ईत्वोत्वयोरसिद्धत्वात् सवर्णदीर्घादिर्न स्यात् । तत् किं प्रयोजनं प्रगृह्यसंज्ञया प्रकृतिभावार्थया । किं च ईत्वोत्वयोरसिद्धत्वात् प्रगृह्यसंज्ञा न प्रवर्तेतापि । अन्यच्च । अमी ईशाः । अमू आसाते । अमी अत्र । इत्यत्र ईत्वोत्वयोरसिद्धत्वाद् अय् आव् पूर्वरूपाणि क्रमेण प्राप्नुवन्ति । नैते दोषाः स्युः । 'अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये' इति वचनादीत्वोत्वयोः सिद्धत्वात् । अस्य वचनस्यायमर्थः । बहिष्पदलक्षणे द्वितीयपदव्यवस्थिते स्वरेचि परतोदस ईत्वोत्वे सिद्धे वाच्य इति । एकपदस्थे त्वच्यसिद्धे एव । तथा च यदग्रे वक्ष्यति ग्रन्थकारो 'मुभावस्यासिद्धत्वान्न संधिः' इति तदुपपन्नं भवति । एकपदत्वात् ॥

निपात । एकाजिति । यद्येकोच् यस्येति बहुव्रीहिः स्यात् प्रशब्दस्यापि प्रगृह्यत्वं स्यात् । ततश्च 'प्रोपाभ्यां समर्थाभ्याम्' इति निर्देशो नोपपद्येत । तस्मादेकश्चासावच्चेति कर्मधारयोयमिति मत्वाह । **एकाज् निपात** इति । **अ अनन्त** इत्यादि । चादिषु अइउऋऌएऐओऔ इति पठ्यन्ते । तस्मान्निपातत्वम् । निपातः किम् । चकारात्र । **अनाङ् किमिति** ङिदङितोराकारयोर्विभागप्रदर्शनार्थं प्रश्नः ।

---

१. एकोज् P, D_3, D_4, D_5, B_1. २. प्रगृह्यसंज्ञः C. ३. Dropped D_1, D_2. ४. After it—अ निषेधाधिक्षेपयोः । इ विस्मये । उ रोषोक्तौ संबोधने च । D_2. ५. After it—एकग्रहणं किम् । अइउ अपेहि इति निपातसमुदायस्य मा भूत् D_5. ६. एकाजिति किम् D_2; अज्मात्रः किम् dropped D_1. ७. अनाङिति किम् C, D_1. ८. क्रमेण पूर्वरूपाणि Bc_1. ९. Before it—एकपदस्थिते त्वसिद्धे वाच्ये इति Bc_1 and एकपदस्थिते for एकपदस्थे Bc_1.

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ १ ॥
ओत्तमैरक्ष्यसे न त्वमामृतादेन्द्रतोखिलैः ।
आ एवं सर्वं वेदोर्थः आ एवं सद्वचो हरेः ॥ २ ॥

ईषदर्थे इत्यादि । ईषच्छब्दस्यार्थ ईषदर्थः । तस्मिन् । क्रियाया योगः क्रियायोगस्तस्मिन् । मर्यादा सीमा । अभिविधिरभिव्याप्तिः । मर्यादा चाभिविधिश्च मर्यादाभिविधि तस्मिन् मर्यादाभिविधौ । सर्वो द्वन्द्वो-विभाषयैकवद् भवतीत्येकवद्भावे नपुंसकत्वम् । 'स नपुंसकम्' इति सप्तम्येकवचने ङौ परत 'इकोचि-'इति नुमागमो न भवति । अनित्य-मागमशास्त्रमित्यनित्यत्वात्तस्य । तस्माद् 'अच्च घेः' इत्यौकारोन्ता-देशश्चाकारः । एतेषु चतुर्षु विषयेषु वर्तमान आकारो यस्तं ङितं ङकारेतं विद्याज्जानीयात् । वाक्यस्मरणयोः । वाक्यशब्देन वाक्यार्थ उच्यते । अथवा वाक्यावयवः । स्मरणं स्मृतिः । तत्र वाक्ये स्मरणे च वर्तमानो य आकारः सोङित् । न ङिदङित् ।

ङिदङितोरुदाहरणानि श्लोकेनाह । ओत्तमैरिति । हे हरे त्वमखिलैरोत्तमैरा ईषदुत्तमा ओत्तमास्तैर्न ईक्ष्यसे दृश्यसे । किं मर्यादीकृत्य । आ अमृतादमृतं मोक्षं मर्यादीकृत्य । यावन्मोक्षो भवति तावन्नेक्ष्यस इत्यर्थः । किमभिव्याप्य । आ इन्द्रतः । इन्द्रमभिव्याप्य । इन्द्रेणापीषदुत्तमेन त्वं नेक्ष्यस इत्यभिप्रायः । ङिद्विशिष्टस्यानाङिति प्रगृह्यत्वप्रतिषेधादोत्तमैरित्यादिष्वाकारस्य संधिर्भवत्येव । [७]ईषदाद्यर्थ-त्वेन ङित्त्वात् । आ एवं सर्ववेदार्थः । अयं पूर्ववाक्यार्थ एव सर्व वेदार्थ इत्यर्थः । पूर्वप्रक्रान्तवाक्यार्थप्रदर्शनपरोयमाकारोतोङित् । ततः संधिर्न भवति । अथवा निरर्थकोयं वाक्यालंकारमात्रे प्रयुक्तः । आ एवं सद्वचः सतां वचो वाक्यम् । एवमेवार्तादृगर्थमेव सद्वचः स्मर्यत इत्यर्थः । अत्र स्मरण आकारो वर्ततेतो न संधिः ।

१. °वेदार्थाः B_2, D_6. २. क्रियया Nc_2. ३. परतो हि Dc_3. ४. भवतीति Dc_3. ५. °शासन° Nc_1, Dc_2, Dc_4. ६. य आकारः Nc_1. ७. ईषदर्थत्वेन Nc_1. ८. °तावदर्थमेव Dc_4.

ओत् ॥१।१।१५॥

ओदन्तोपि[1] निपातः प्रगृह्यः[2] । अहो ईशाः[3] ।

हैहयोः प्रगृह्यत्वमिति केचित् । है अम्ब[4] । हे ईश ।

संबुद्धौ शाकल्यस्येतावनार्षे ॥१।१।१६॥

संबुद्धावोदन्तोवैदिक[5] इतौ वा तथा । विष्णो इति । विष्ण[6] इति । विष्णविति । अनार्षे किम् । ब्रह्मबन्धवित्यब्रवीत् ॥

उञः[7] ॥१।१।१७॥

उञ[8] इतौ[9] वा प्रागुक्तम्[10] । उ इति । विति ॥

ओत् । अनदोदः समभवददोभवदिति च्व्यन्तस्य निपातत्वेपि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति प्रगृह्यत्वं न । लाक्षणिकत्वादोकारस्य । अगौर्गौः[11] संमपद्यत गोभवदित्यत्र तु 'गौण-मुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति न भवति प्रगृह्यसंज्ञा । एतच्च सुविशदं पदमञ्जर्यादेर्ज्ञेयम् ॥

संबुद्धौ । संबुद्धावित्यादि । संबुद्धाविति निमित्तसप्तमी । इता-विति परसप्तमी । संबुद्धिनिमित्तो य ओकारस्तदन्तः शब्दोप्युपचारात् संबुद्धावोदन्तः । सोवैदिक इतिशब्दे परतो वा प्रगृह्यसंज्ञा[12] स्यादित्यर्थः । विष्णो इतीति । 'ह्रस्वस्य गुणः' इति संबुद्धावुकारस्य गुणं[13] ओकारः । पक्षे अवादेशः । 'लोपः शाकल्यस्य' इति वा वलोपः । संबुद्धाविति किम् । गवित्ययमाह । अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादर्थ-वत्त्वाभावाद्विभक्तिर्नोत्पद्यते[14] । अत इदं प्रत्युदाहरणम् । अनुकरणस्य हि साधुत्वमिष्यते ॥

उञः । वितीति । प्रगृह्यत्वाभावे 'इको यणचि' इति यणादेशः ।

---

१. अपि dropped D_1. २. प्रगृह्यः स्यात् D_1, D_3. ३. ईशः D_2. ४. अज D_1. ५. °दन्त आवैदिक इतौ परे D_1. ६. विष्ण इति dropped P, B_1. ७. उञि D_2. ८. उञः dropped C, D_2. ९. इतौ परे D_1. १०. After it—स्यात् B_1. ११. संपद्ने गोभवति च्व्यन्तस्य निपातनादित्यत्र तु Bc_1. १२. °संज्ञः Dc_3. १३. गुणः dropped Bc_1. १४. °नोपपद्यते Bc_1, Dc_3, Dc_4.

ऊँ ॥ १।१।१८ ॥

अयमादेशश्च वा । ऊँ इति ॥

मय उञो वो वा ॥८।३।३३॥

मयः परादुञोचि परे वो वा स्यात् ।

ऊँ । अयमिति । दीर्घोनुनासिकः प्रगृह्यसंज्ञश्च । ऊँ इत्ययमुञ आदेशोपि वा स्यादित्यर्थः । ऊँ इति । पक्षे पूर्वोदाहृतरूपद्वयम् । एवं त्रीणि रूपाणि भवन्तीति योगविभागस्य फलम् । उञ ऊँ इत्येकयोगे हि सति ऊँ इति उ इति रूपद्वयमेव स्यात् ॥

मयः । मय गताविति धातुरस्ति । मयिति यकारेण प्रत्याहारोप्यस्ति तत् कस्येह ग्रहणमित्याशङ्क्याह । मयः परादिति । समानाधिकरणे एते पञ्चम्यौ । अयमर्थः । परं करोति परयति । णिच् । परयतीति परः । पचाद्यच् । णिलोपः । संनिधेरुञं स्वस्मात् परं करोति यो मय् तस्मात्परस्योञो वा स्यादिति । कश्च मय् उञं स्वस्मात्परं करोति । यः प्रत्याहारः । तस्माद्व्यवधानेन पर उञ् उपपद्यते न मयधातोः । तस्मादव्यवधानेन परस्योञः प्रयोगासंभवात् । अथवा मय्प्रत्याहारात्सकाशात्परः । अतति गच्छत्यत् । अत सातत्यगमने । क्विप् । परश्चासावच्च परात् । पराच्चासावुञ् च परादुञ् । तस्य परादुञः । मयः परस्योञ इत्यर्थः । अथवा मयः परादिति पदादित्यधिकारात् पदस्य परोवयवो यो मय् तस्मात् परस्योञः । मयन्तात्पदात्परस्योञ इत्युक्तं भवति । एतच्च 'येन विधिस्तदन्तस्य'

---

१. अयमादेशो वा C; Before it—अन्वर्थान्यर्थयोरुञ् D_2. २. °दुञो वो वा स्यादचि । C. ३. Dropped D_1, D_2. ४. °संज्ञकश्च Bc_1, Dc_3. ५. °रुञस्तस्मात्पर Dc_4. ६. हि dropped Bc_1. ७. मयेधातोः Nc_1. ८. तस्मात्पदादुत्तरस्येत्युक्तं भवति । Bc_1. ९. पदादुत्तरस्य Nc_1, Dc_3.

किमु[1] उक्तम् । किम्वुक्तम् । शमु अस्तु । शम्वस्तु[2] ॥

इको सवर्णे शाकल्यस्य ह्रस्वश्च ॥६।१।१२७॥

असवर्णेचि[4] इकः प्रकृत्या स्युर्ह्रस्वश्च[5] वा । चक्री अत्र । चक्रि अत्र । चक्रयत्र ॥

न समासे* । हर्यर्थः[6] ।

ऋत्यकः ॥६।१।१२८॥

ऋति पर अकः प्राग्वत् । ब्रह्मा ऋषिः । ब्रह्म ऋषिः । ब्रह्मर्षिः । होतृ ऋकारः । होतॄकारः[7] ॥

इत्यच्संधिः ॥

इति परिभाषया लभ्यते । किम्वुक्तमिति । प्रगृह्यत्वादुञः प्रकृतिभावे प्राप्ते वकारोनेन विधीयते । अस्य[8] च वकारस्यासिद्धत्वाद् 'हलि' इत्यनुवर्तमाने 'मोनुस्वारः' इति विधीयमानोनुस्वारः किम्वुक्तमित्यादौ न भवति । किमु उक्तमिति पक्षे प्रगृह्यत्वात् प्रकृतिभावः ॥

इकः । हर्यर्थमिति । हरय इदम् । 'अर्थेन नित्यसमासः सर्वलिङ्गता च' इति समासः । नित्यसमासोदाहरणप्रदर्शनेन समास इति नित्यसमास एव प्रतिषेध इति ज्ञेयम्[9] । इकः किम् । उपेन्द्रः । असवर्ण इति किम् । श्रीशः ॥

ऋति । ऋकारे परतः शाकल्यस्याचार्यस्य मतेनाकः प्रकृतिभावः स्याद्ध्रस्वश्च वा । होतृ ऋकार इति । पक्षेस्य 'अकः सवर्णे दीर्घः' इति सूत्र उक्तमुदाहरणद्वयं भवति[10] ॥

---

१. किम्वुक्तम् । किम् उक्तम् । किमुक्तम् C, B_2. २. शम्वस्तु । शमु अस्तु । C, B_2. ३. After it—वत्वस्यासिद्धत्वादनुस्वाराभावः । D_2. ४. पदान्ता अस° B_2. ५. Dropped B_1. ६. हर्यर्थम् C, B_2, D_4, D_5, K. ७. C drops this; होतृकारः । पक्षे होतृकारः B_2; After it होत्लृकारः D_5. ८. तस्य Bc_1, Dc_3, Dc_4. ९. Bc_1 drops from नित्य° to ज्ञेयम् । १०. संभवति Dc_1, Dc_4.

स्पष्टत्वात् त्यक्तं सूत्रत्रयं व्याख्यायते । 'अप्लुतवदुपस्थिते' ॥ ६।१।१२९ ॥ उपस्थितो नामानार्ष इतिकरणस्तास्मिन् परे प्लुतोप्लुतवत् स्यात् । प्लुतकार्यं न करोति । सुश्लोक३ इति । सुश्लोकेति ॥

'ई३चाक्रवर्मणस्य' ॥ ६।१।१३० ॥ ई३चाप्लुतः स्यादचि चाक्रवर्मणस्य मतेन । अभुहि३ इत्यब्रवीत् । अभुहीत्यब्रवीत् । आचार्यग्रहणमुपस्थितनिवृत्त्यर्थमनुपस्थितप्राप्त्यर्थमित्युभयत्र विभाषार्थम् । इकारादन्यत्रापीष्यते । वशा३ इयम् । वशेयम् ॥

'अणो प्रगृह्यस्यानुनासिकः ॥' ८।४।५७॥ अणन्तस्याप्रगृह्यस्यावसाने वर्तमानस्यानुनासिको वा स्यात् । दधिँ । मधुँ । दधि । मधु । अप्रगृह्यस्य किम् । अग्नी३ इति ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदतुलोच्चसंधिराद्योनवद्यः ॥

---

१. °मुपास्थिते No1, Dc3. २. °मनुपस्थिते No1, Dc3. ३. इव Dc3.

अथ हल्संधिः ॥

स्तोश्चुना श्चुः ॥ ८।४।४० ॥

[1]स्तोः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । [2]रामश्शेते । रामश्चिनोति । [3]सच्चित् । शार्ङ्गिञ्जय ॥

अथ [4]हल्संधिरुच्यते । स्तोः । सकारतवर्गयोरित्यादि । अत्र च सकारतवर्गौ द्वौ कार्यिणौ । निमित्ते [5]अपि द्वे [6]एव शकारचवर्गौ[7] । एवं च साम्यात् संख्यातानुदेशः प्राप्नोति । नैष दोषः । यदयं शात्परस्य तवर्गस्य चुत्वाभावं शास्ति तज् ज्ञापयति निमित्तनिमित्तिनोः स्तोश्चुनानयोः संख्यातानुदेशो न भवतीति । [8]आदेशादेशिनोस्तु[9] स्तोश्चुरनयोः संख्यातानुदेश इष्यत एव । ततश्चायमर्थः । सकारस्य शकारेण चवर्गेण च योगे शकारो भवति तवर्गस्यापि शकारेण चवर्गेण च योगे चवर्गो भवतीति । इममेवार्थं चेतसि कृत्वोदाहरति । रामश्शेते । रामश्चिनोतीति । तवर्गस्यापि चवर्गो भवन् यथासंख्येनैव भवतीति प्रदर्शनायोदाहरति । सच्चित् । शार्ङ्गिञ्जयेति । पूर्वत्र तस्य चः । उत्तरस्य नस्य ञः । [10]लाघवार्थं श्चाविति सप्तमीनिर्देशे कार्ये श्चुनेति तृतीयानिर्देशः पूर्वेणापि योगे यथा स्यात् । यज् नः यज्ञः । याच् ना याच्ञा ॥

---

१. स्तोः dropped D_2, D_3; स्तोः सकारतवर्गीयाः शकार° D_1. २. रामस् शेते रामश्शेते &c. D_2; D_1 has तत् शास्त्रम् । तच् शास्त्रम् । शार्ङ्गिञ्जय । रामश्चिनोति । रामश्शेते. ३. सच्चित्रम् D_5. ४. हलन्ते सं° Dc_3. ५. अपि dropped Dc_1. ६. Dropped Bc_1. ७. After it च Dc_1, Nc_1. ८. आदेशानां संख्यातानुदेश इष्यत एव । Bc_1. ९. तु dropped Dc_3. १०. Before it—अकृत्वा सप्तमीमेतां तृतीयामकरोन्मुनिः । श्चुनेति तस्मात्पूर्वेण संनिपातः परेण वा ॥ Dc_3.

ष्टुना ष्टुः ॥ ८।४।४१ ॥

स्तोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः। रामष्षष्ठः[1]। रामष्टीकते। तट्टीका[2]। चक्रिण्ढौकसे॥

न पदान्ताट्टोरनाम् ॥ ८।४।४२॥

पदान्ताट्टवर्गात्परस्य स्तोः ष्टुर्न स्यात्[3]। षट् सन्तः। षट् ते[4][5]। अनाम्नवतिनगरीणामिति वाच्यम्*। षण्णाम्[6]। षण्णवतिः। षण्णगर्यः।

ष्टुना। अत्रापि निमित्तनिमित्तिनोः संख्यातानुदेशाभावस्य 'तोःषि' इति प्रतिषेधो ज्ञापकः। अत्राप्ययमर्थः। सकारस्य षकारेण टवर्गेण च योगे षकारो भवति। तवर्गस्य षकारेण टवर्गेण च योगे टवर्गो भवतीति[7]। रामष्षष्ठः। रामष्टीकते। टीकृ गत्याम्। उभयत्र सस्य षः। तट्टीका। तस्य टः। चक्रिण्ढौकस इति। ढौकृ गत्याम्। चक्रिन् इति नस्य णः[8]॥

न पदान्तात्। षट् सन्त इति। अत्र 'ङः सि धुट्' इति यदा धुट् नास्ति तदेदमुदाहरणम्। पदान्तात् किम्। ईट् ते। ईट्टे। टोः किम्। सर्पिष् तमम्। 'ह्रस्वात्तादौ तद्धिते' इति षः। सर्पिष्टमम्॥

अनामित्यादि। सूत्रे अनामित्यल्पमुच्यते। नाम्नवतिनगरीणां निषेधो नेति वाच्यम्* इत्यभिप्रायः[9]। नामित्यागतनुट्कस्य[10] षष्ठीबहुवचनस्य निर्देशः। षण्णामिति। 'षट् चतुर्भ्यश्च' इति नुट्। 'झलां जशोन्ते' इति षस्य डः। 'यरोनुनासिकेनुनासिको वा' इति डस्य णः। षण्णवतिरिति। षडधिका नवतिः। शाकपार्थिवादित्वादुत्तरपदलोपी समासः॥

---

१. रामस्षष्ठः। रामष्षष्ठः। &c. D_2, D_3; D_1 has before it—यथासंख्यमत्र नेष्यते. २. तट्टीकते D_1, D_3, B_2. ३. भवाति D_1. ४. षड्न D_1. ५. After it—पदान्तात् किम्। ईट्टे। टोः किम्। सर्पिष्टमम्। P, B_1, C. ६. षट् नाम्। षण्णाम्। &c. D_2. ७. इति dropped Dc_3. Dc_4. ८ इत्यस्य नस्य णकारः Nc_1. ९. Before it—किं तर्हि। Dc_3. १०. °नुट्कषष्ठी° Nc_1.

तोः षि ॥८।४।४३॥

तवर्गस्य षकारे परे[1] न ष्टुत्वम् । सन् षष्ठः ॥

शात् ॥८।४।४४॥

शात्परस्योक्तं न । विश्नः । प्रश्नः[2] ॥

झलां जशोन्ते ॥८।२।३९॥

पदान्ते झलां जशः स्युः । वागीशः । चिद्रूपः[3] ।

तोः षि । षीति सप्तमीनिर्देशात् पूर्वभूतेन संनिपातेन स्यादेव[4] । रोष्टा[5] । पेष्टेति । **सन्निति** । अस् भुवीत्यस्य शत्रन्तस्य रूपं असोरल्लोपे नुमि संयोगान्तलोपे च कृते ॥

शात् । शादिति । शात्परस्य तवर्गस्य चुत्वं न स्यादित्यर्थः । **विश्नः प्रश्न** इति । विच्छ गतौ । प्रच्छ ज्ञीप्सायाम् । 'यजयाच—' इति नङ् । 'च्छ्वोः शूड—' इति शः ॥

झलाम् । ननु च 'स्कोः संयोगाद्योरन्ते च' इत्यतः 'अन्ते' इत्यनुवर्तत एव । किमर्थं पुनर् 'अन्ते' इत्युच्यते । तद्ध्यन्तग्रहणं 'झलो झलि' इत्यतोनुवर्तमानेन 'झलि' इत्यनेन संबद्धम् । अतो 'झलि' इत्यस्य निवृत्त्यर्थं पुनरन्तग्रहणं कृतम् । तेन वस्ता वस्तुमित्यादौ जश्त्वं न । **वागीश** इति । वाचामीशो वागीशः । तत्रान्तर्वर्तिनीं[6] विभक्तिमाश्रित्य पदान्तत्वम् । 'स्थानेन्तरतमः' इति स्थानप्रयत्नान्तरतम्याद्[7] गकारो[8] जश् । **चिद्रूप** इति । चित् ज्ञानं रूपमस्य । अत्रापि तथा ॥

---

१. परे dropped P. २. Dropped D1. ३. चिद्रूपम् B2, D5. ४. संनिपाते स्यादेव । Bc1. ५. लोष्टा । Bc1. ६. अत्रा° Nc2, Dc3, Dc4. ७. °प्रयत्नत आन्त° Nc1; °प्रयत्नेनान्त° Dc2. ८. कस्य गकारो Dc2.

यरोनुनासिकेनुनासिको वा ॥८।४।४५॥

यरः पदान्तस्यानुनासिके परेनुनासिको वा स्यात् । एतन्मुरारिः । एतद्मुरारिः[2] ।

मयटि नित्यं वाच्यम्* । चिन्मयम्[4] ।

तोर्लि ॥८।४।६०॥

तवर्गस्य[5] लकारे परे परसवर्णः[6] । तल्लयः । विद्वाँल्लिखति । सानुनासिकनिरनुनासिकत्वेन यवला द्विधा । तेन नकारस्य सानुनासिको लकारः ॥

उदः स्थास्तम्भोः पूर्वस्य ॥८।४।६१॥

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ॥

यरः । अनुनासिका ञमङणनाः[7] । पदान्तस्य किम् । यत्नः ॥ मयटीति । एतच्च व्यवस्थितविभाषाविज्ञानात् सिद्धम् । चिन्मयमिति । मयट् तद्रूप इति केचित् । पाणिनिमते तु 'मयड् वैतयोः—' इति मयट् ।

तोर्लि । तल्लय इति । तत् लय इति स्थिते । विद्वाँल्लिखतीति । विद्वान् लिखति इति स्थिते । नकारस्य परसवर्णे लकारे प्राप्ते विशेषमाह । सानुनासिकेति । यतो द्विप्रकारा यवलास्तेन कारणेन नकारस्य सानुनासिकस्य लसवर्णे[8] कार्ये स्थानेन्तरतमपरिभाषया सानुनासिक एव लकारः स्यादित्यभिप्रायः ॥

उदः स्थास्तम्भोरिति । ष्ठा गतिनिवृत्तौ । स्तम्भु रोधने[9] ॥

---

१. Dropped D_1. २. Before it—एतन् मुरारिः D_2. ३. After it—स्पर्शस्यैवेष्यते । तेन चतुर्मुखः। D_2 (तेन dropped), B_1, C. ४. P has after it स्पर्शस्यैवेष्यते । तेन चतुर्मुखः ।. ५. तोर्लि° D_1; तोस्तवर्गस्य B_2; तोर्लकारे परसवर्णः D_2. ६. After it—स्यात् D_1. ७. ङञणनमाः । Bc_1. ८. ले सवर्णे Bc_1, Dc_4. ९. After it—इत्येतयोर्ग्रहणम् । Dc_3.

आदेः परस्य ॥१।१।५४॥

पञ्चमीनिर्देशेन क्रियमाणं कार्यं परस्यादेर्ज्ञेयम्[1] । उत्थानम् । उत्तम्भनम्[2] ।

झयो होऽन्यतरस्याम् ॥८।४।६२॥

झयः परस्य हस्य पूर्वसवर्णो वा[3] । वाग्घरिः । वाग्हरिः । घोषवत्त्वादिगुणतो[4] वर्गचतुर्थो हस्य सवर्णः[5] ।

आदेः । 'अलोऽन्त्यस्य' इत्यस्यापवादोऽयम् । इह शास्त्रे न क्वचित् परस्येत्युच्चार्य कार्यं विधीयत इत्येतन्निर्विषयमित्याशङ्क्याह । पञ्चमीनिर्देशेनेति । 'तस्मादित्युत्तरस्य' इति परिभाषयेत्यभिप्रायः । उत्थानमिति । ल्युट् । उदः परस्य सकारस्य पूर्वसवर्णस्तकारः । केचिदघोषस्य महाप्राणस्य तादृश एव पूर्वसवर्णस्थकारः । तस्य 'खरि च' इति चर्त्वे[6] तकारे क्रियमाणेऽसिद्धत्वात् तन्मते थकारद्वय-श्रवणम् । पूर्वस्य चर्त्वे तकारः । तस्य[7] 'अनचि च' इति द्वित्वम् । 'झरो झरि सवर्णे' इति लोपः । उत्तम्भनमिति । स्तम्भेर्ल्युट्[8] । पूर्ववत्साधनम् । स्थास्तम्भोः किम् । उत्स्नातः । उदः परस्य स्कन्दे रोगे वाच्ये पूर्वसवर्णो वाच्यः । उत्कन्दनो नाम रोगः ॥

झयः । वाग्घरिरिति । ननु चात्र पूर्वस्य सवर्णत्वेन कवर्गेषु पञ्चसु प्राप्तेषु कथं घकार एव जात इत्याशङ्कायामाह । घोषवत्त्वादिति । हस्य यः पूर्वसवर्णो भवति[9] स वर्गचतुर्थ[10] एव । कुतः । घोषवत्त्वादिगुणतः[11] । घोषवत्त्वं महाप्राणत्वं नादवत्त्वं सोष्मत्वं चेति चतुर्गुणत्वेनान्तरतम्यादित्यर्थः । तत्र घोषवत्त्वादयस्त्रयो गुणाः

---

१. विधीयमानं D_1. २. P has after this—उदः परस्य स्कन्दे रोगे वाच्ये पूर्वं सवर्णः । ३. After it—स्यात् D_2, D_5. ४. गुणवतो P, D_4, D_5. ५. After it—वाग्घरिः । वाग्हरिः । तद्धविः । D_5. ६. चर्त्वम् Nc_2. ७. तथा Bc_1. ८. °र्ल्युडादि Dc_4. ९. हस्य पूर्वसवर्णौ य एव भवति Dc_2. १०. चतुर्थः सवर्ण एव Dc_4. ११. °गुणवतः Dc_3, Dc_4.

तत् शिव इत्यत्र जश्त्वे कृते[१]

खरि च ॥८।४।५५॥

खरि झलां चरः स्युः ॥

शश्छोऽटि ॥८।४।६३॥

झयः परस्य शस्य छो वा स्यादटि । तच्छिवः । तच्शिवः । छत्वममीति वाच्यम्* । तच्छ्लोकेन[२] । अमीति किम् । वाक् श्च्योतति ॥

'तुल्यास्यप्रयत्नं सवर्णम्' इत्यस्मिन् सूत्रे कथिता ज्ञातव्याः । सोष्मत्वं तु शषसहानां वर्गद्वितीयचतुर्थानां च ॥

तत् शिव इत्यादि । तदो 'वावसाने' इति चर्त्वे कृते पश्चात् 'शिव' इत्यनेन संबन्धे जश्त्वं 'झलां जशोऽन्ते' इति । ततश्च तद् शिव इति स्थिते ।

खरि चेति । अनेन चर्त्वे आन्तरतम्यात्तकारे कृते 'स्तोः श्चुना—' इति चकारे तच् शिव इति स्थिते ।

'शश्छोऽटि' इत्यनेन पक्षे शस्य छत्वे कृते तच्छिव इति स्यात् । छत्वाभावे तच् शिव इति । छत्वममीति । 'शश्छोऽटि' इत्यत्र 'शश्छोऽमि' इति वक्तव्यमित्यर्थः[३] । 'अमि' इत्युक्ते यत् सिध्यति तद्दर्शयति । तच्छ्लोकेनेति । अत्र[४] लस्याट्त्वाभावादप्राप्तं छत्वम् । प्रक्रिया पूर्ववत्[५] । वाक् श्च्योततीति । अत्र शकारात्परो यश्चकारः सोऽम् न भवतीति न छत्वम् ॥

---

१. Dropped P, D_1. २. Before it—तच्च् श्लोकेन D_1; After it—तच्च् श्लोकेन B_2, D_4. ३. °मिति शेषः Bc_1, Dc_4. ४. अटि लस्याभावादप्राप्तं Dc_2. ५. पूर्ववत् प्रक्रिया Nc_1.

मोनुस्वारः ॥८।३।२३॥

हलि[1] मस्यानुस्वारः स्यात्[2] पदान्ते । हरिं वन्दे । अपदान्ते तु गम्यते ।

नश्चापदान्तस्य झलि ॥८।३।२४॥

नस्य मस्य चापदान्तस्य[3] झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि[4] किम् । आक्रम्यते ।

अनुस्वारस्य ययि परसवर्णः ॥८।४।५८॥

[5]अनुस्वारस्य ययि परे परसवर्णः स्यात्[6] । शान्तः । अङ्कितः ।

मोनु । अपदान्ते तु गम्यत इति । अयं भावः । 'पदस्य' इत्यनुवर्तते । तेन पदान्तस्यैव मस्यानुस्वारः स्यात् । अपदान्तस्य तु न स्यात्[7] । तेन गम्यत इति सिध्यतीति । हलि किम् । किमत्र ।

नश्च । यशांसीति । 'जश्शसोः शिः' । 'नपुंसकस्य झलचः' । इति नुम् । 'सान्तमहतः—' इति दीर्घः । नस्यानुस्वारः । **आक्रंस्यत** इति । क्रमेर्लृट् । 'आङ उद्गमने' इत्यात्मनेपदम् । अपदान्तस्य मस्यानुस्वारः । अपदान्तस्य किम् । राजन् भुङ्क्ष्व । झलि किम् । मन्यते । गम्यते ॥

अनुस्वारस्य । अनुस्वारस्य यथि परतः परसवर्णः स्यात् । **शान्त** इति । शमु उपशमे । निष्ठा । 'अनुनासिकस्य क्विझलोः' इति दीर्घः[8] । 'वा दान्त—' इतीडभावो वा निपात्यते । मकारस्य 'नश्चापदान्तस्य' इत्यनुस्वारः । तस्य परसवर्णो[9] नकार एव स्यादान्तरतम्यात् । एवं सर्वत्रानुस्वारस्य परसवर्णो ययि परतः सानुनासिक एव स्यादान्तरतम्यादिति ज्ञेयम् । **अङ्कित** इति ।

---

१. हलि पदान्ते च मस्या° B_1. २. Dropped B_2, D_2. ३. चापदान्ते वर्तमानस्यानुस्वारः स्यात् झलि परे । D_4. ४. झलीति किम् । जंघन्यते । P; झलि to आक्रम्यते dropped D_1, D_4, D_5. ५. D_1, D_2, B_2 drop the Vritti. ६. Dropped P. ७. Dropped Dc_4. ८. Dropped Dc_1, Nc_1. ९. Before it—नकार एव Dc_3.

वा पदान्तस्य ॥८।४।५९॥

पदान्तस्यानुस्वारस्य ययि परसवर्णो वा। त्वं करोषि। त्वङ्करोषि। संयन्ता। सँय्यन्ता। संवत्सरः। सँव्वत्सरः। यं लोकम्। यँल्लोकम्॥

मो राजि समः क्वौ ॥८।३।२५॥

क्विबन्ते राजतौ समो मस्य म एव स्यात्। सम्राट्॥

हे मपरे वा ॥८।३।२६॥

मपरे हकारे मस्य मः स्याद्वा। किम् ह्मलयति। किं ह्मलयति॥

अङ्क पदे लक्षणे च। निष्ठा। अत्रानुस्वारस्य नकारस्थाने जातस्य परसवर्णो ङकारः। कुर्वन्तीत्यत्र णत्वस्यासिद्धत्वात् पूर्वं नस्यानुस्वारः। तस्य परसवर्णो नः। तस्याप्यसिद्धत्वात् पुनर्णत्वं न। ययीति किम्। सर्पींषि॥

वा पदान्तस्य। 'वावसाने' इत्यतो वाग्रहणेनुवर्तमानेपि पुनर्वाग्रहणं द्वयोर्विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति मध्ये वर्तमानस्य 'अनुस्वारस्य ययि परसवर्णः' इत्यस्य विधेर्नित्यत्वार्थम्। त्वङ्करोषीति। मकारस्यानुस्वारे सति तस्य पक्षे परसवर्णो ङकारः स्यादान्तरतम्यात्। संयन्तेत्यादि। पक्षे क्रमेणानुस्वारस्य सानुनासिका यकारवकारलकाराः॥

मो राजि। **सम्राडिति।** संपूर्वस्य राजः 'सत्सूद्विष—' इति क्विप्। मस्य मवचनमनुस्वारनिवृत्त्यर्थम्। राजि किम्। संयत्। समः किम्। किं राट्। क्वौ किम्। संराजिता॥

हे म। मः परो यस्मादिति मपरः॥

---

१. ययि परे B_2. २. राजतौ परे B_2. ३. Before it D_1 has—सिद्धे सत्यारम्भो नियमार्थः। ४. हकारे परे B_2. ५. म एव स्याद्वा। C, B_1; मो वा स्यात् D_3; मः। D_5. ६. °स्थानजातस्य Nc_2. ७. पूर्वं dropped Dc_1. ८. ययि किम् Dc_1, Dc_3, Nc_1.

यवलपरे यवला वा*। यवलपरे हकारे मस्य यवला वा स्युः। किँय्ह्यः। किं ह्यः। किँव्ह्वलयति। किं ह्वलयति। किँल्ह्लादयति। किं ह्लादयति॥

नपरे नः ॥८।३।२७॥

नपरे हकारे मस्य नो वा स्यात्। किन्ह्नुते। किं ह्नुते॥

ङ्णोः कुक्टुक् शरि ॥८।३।२८॥

ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि। प्राङ्क्षष्ठः। प्राङ् षष्ठः। सुगण्ट्षष्ठः। सुगण् षष्ठः[४]॥

डः सि धुट् ॥८।३।२९॥

यवलपर इति। यवलाः परे यस्य सः। यवलाश्चान्तरतम्या-न्मकारस्य सानुनासिका एव भवन्ति॥

नपरे।

ङ्णोः कुक्। कुक्टुकोः पूर्वान्तत्वकरणं छत्वार्थं षत्वनिषेधार्थं ष्टुत्वनिषेधार्थं च। तथा हि। प्राङ्क् छेते। सुगण्ट् छेते। परादित्वे हि सति 'शश्छोऽटि' इति छत्वं न स्यात्। तत्र हि 'पदान्तात्' इत्यनुवर्तते। अन्यथा पुराक्रूरस्य विसृपो विरप्शिन् इत्यत्रापि स्यात्। प्राङ्क् साय इत्यत्र 'सात्पदाद्योः' इति षत्वनिषेधो न स्यात्। परादित्वे सुगण्ट् साय इत्यत्र 'न पदान्ताट्टोः' इति ष्टुत्वनिषेधो न स्यात्। तस्मात् पूर्वान्तौ कुक्टुकौ क्रियेते॥

डः सि। नन्वत्र सूत्रे 'सि' इति सप्तम्यस्ति। ततश्च 'तस्मिन्निति निर्दिष्टे पूर्वस्य' प्राप्नोति। नैवम्। 'डः' इति पञ्चमी। ततः

---

१. Dropped D5. २. स्तो वा B1, B2, D3; स्यातां वा D1; वा शरि dropped D6. ३. शरि परे D4. ४. drops सुगण्षष्ठः and प्राङ्षष्ठः. ५. च dropped Dc1, Nc1. ६. सुगण्ट् छेते dropped Dc1, Dc2, Bc1. ७. परादित्वे हि सति Dc2, Bc1.

डात्परस्य सस्य वा[१] धुडागमः स्यात् । षट्त्सन्तः । षट् सन्तः ॥

नश्च ॥८।३।३० ॥

नकारान्तात् परस्य सस्य धुड् वा स्यात्[२] । सन्त्सः । सन् सः ।

शि तुक् ॥८।३।३१॥

नैस्य[३] पदान्तस्य शि[४] परे तुग्वा[५] । सञ्च् छंभुरिति[६] स्थिते 'झरो झरि सवर्णे'[७] । सञ्छंभुः । सञ्च् शंभुः । सञ् शंभुः ।

'तस्मादित्युत्तरस्य' इत्युत्तरस्यैव स्यात्परत्वादिति चेतसि कृत्वाह । **डात्परस्य सस्येति** । धुटः परादित्वकरणं 'न पदान्ताट्टोरनाम्' इति ष्टुत्वनिषेधार्थम् । श्चुत्वं धुटि सिद्धं वाच्यम्* । अटतीत्यट् श्चोततीति धुट् न भवति । श्चुतिरयं सादिः ॥

नश्च ।

शि तुक् । अस्यापि पूर्वान्तत्वकरणं छत्वार्थम् । यद्येवं कुर्वन् च्छेते अत्र नकारस्य णत्वं प्राप्नोति । तुगन्तत्वेन पदान्तत्वाभावे 'न पदान्तस्य' इति निषेधाभावात् । उच्यते । 'स्तोश्चुना श्चुः' इत्यत्र 'स्तोश्चुना' इति योगविभागः क्रियते । तत्र च णत्वनिषेधोनुवर्तते । ततश्चायमर्थः । स्तोश्चुना णकारो न भवति । ततः 'श्चुः' इति सूत्रम् । ततः 'स्तोश्चुना' इति वर्तते । **सञ्च् च् छंभुरिति स्थिते** इति । सन् शंभुरिति स्थिते तुकि कृते शस्य छत्वे चुत्वे च नतयोः कृत इत्यर्थः । **'झरो झरि सवर्णे'** इति । चकारस्य लोप इत्यर्थः । **सञ्च् च् शंभुरिति** । तुकि चुत्वे छत्वाभावे रूपम् । सञ् शंभुरिति । तुगभावे रूपम् ॥

---

१. धुडागमः स्याद्वा P; धुडागमो वा । D5; धुड् वा C, B_1, D_3. २. Dropped D_4, D_5. ३. नकारस्य P; नान्तस्य D_2. ४ शे for शि परे B_2, D_2. ५. तुग्वा स्यात् P, B_2, D_2. ६. सम् च् शंभुरिति स्थिते D_2; सम् च् छंभुरिति स्थिते dropped D_1. ७. After this हलः परस्य झरो लोपः स्यात्, र्णे झरि परे D_2. ८. छंभु° Dc_1.

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥८।३।३२॥

ह्रस्वोत्तरात्[1] ङमः[2] पदान्तात् ङमः परस्याचो नित्यं ङमुडागमः स्यात्[3] । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ॥

पुमः खय्यम्परे ॥८।३।६॥

पुम्शब्दस्य रुः स्यादम्परे खयि ॥

ङमो ह्रस्वात् । ह्रस्वोत्तरादिति । ह्रस्वात् परो[4] यो ङम् पदान्तस्तस्मात्परस्याचो नित्यं ङमुडागमो यथासंख्यं[5] स्यादित्यर्थः । अत्र सूत्रे 'ह्रस्वात्[6] ङमः' इति पञ्चम्यस्ति 'अचि' इति च सप्तमी । तत्र परत्वात् 'तस्मादित्युत्तरस्य' इतीयमेव परिभाषा प्रवर्तते । अत एवोक्तं '**परस्याचः**' इति । **प्रत्यङ्ङात्मे**ति । अत्र ङुँट्[7] जातः । **सुगण्णीश** इत्यत्र णुँट्[8] । **सन्नच्युत** इत्यत्र नुँट्[9] यथासंख्येन । ङमुटः परादित्वकरणं कुर्वन्नास्त अत्र णत्वं मा भूदिति । पूर्वान्तत्वे हि पूर्वस्य नस्य पदान्तत्वाभावात् 'पदान्तस्य' [10]निषेधो न स्यात् । ननु च परमदण्डिनेत्यत्र प्रत्ययलक्षणेन समासान्तवर्तिविभक्त्याश्रयेणास्य नस्य पदान्तत्वात् तस्मात्परस्याचो ङमुट् प्राप्नोति । मैवम् । 'उञि च पदे' इत्यतः 'पदे' इत्यनुवर्तते । ततश्चाचि पदेजादेः परस्येत्यर्थः स्यात् । अतोत्र ङमुट् न भवति[11] । ङमः किम् । त्वमास्से[12] । ह्रस्वात् किम् । प्राङ् आस्ते । अचि किम् । प्रत्यङ् करोति ॥

पुमः । पुंसः सकारन्यूनस्यायं[13] निर्देशः । सकारस्य[14] संयोगान्तलोपे कृते तस्यैव कार्यित्वात्[15] । **अम्** इति । अम् परो यस्मात् सोम्परः । अमिति प्रत्याहारो गृह्यते न द्वितीयैकवचनम् । खया प्रत्याहारेण साहचर्यात् ॥

१. ह्रस्वादुत्तरात् D_2. २. पदान्तात् ङमः P, C, D_3. ३. Dropped B_1. ४. उत्तरात् परो Bc_1. ५. यथासंख्येन Dc_2. ६. ह्रस्वोत्तरात् Bc_1. ७–८–९. ङट्, णट्, नट् All Mss. except Dc_2. १०. णत्वनिषेधो Bc_1, Dc_3, Dc_4. ११. प्राप्नोति Nc_1. १२. त्वमसौ Bc_1. १३. सकारपूर्वस्या° Dc_2. १४. अतः सकारस्य Dc_3. १५. कार्यत्वात् Nc_2, Dc_2.

अलोन्त्यस्य ॥१।१।५२॥

षष्ठीनिर्दिष्टोन्त्यस्यादेशः स्यात् ॥[1]

अत्रानुनासिकः पूर्वस्य तु वा ॥८।३।२॥

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्[2]। इत्युकारः सानुनासिकः ॥

अनुनासिकात्परोनुस्वारः ॥८।३।४॥

अनुनासिकाभावपक्षे रोः पूर्वस्यानुस्वारागमः ॥

संपुंकानां सो वक्तव्यः*। [4]≍ कँ ≍ पनिवृत्त्यर्थम्। पुँस्कोकिलः।[5] पुंस्कोकिलः। पुँस्पुत्रः। पुंस्पुत्रः। खयि[6] किम्। पुंदासः। अम्परे किम्। पुंक्षीरम्। ख्याधातौ नेति केचित्। पुंख्यानम् ॥

अलः। षष्ठीनिर्दिष्टान्त्यस्येति[7]। षष्ठ्या निर्दिष्टस्य योन्त्यस्त-स्यादेशः स्यादित्यर्थः[8]। अयं भावः। स्थानषष्ठ्या निर्दिष्टस्य य आदेश उच्यते स तस्य स्थानषष्ठीनिर्दिष्टस्यान्त्यस्यालः स्थाने स्यादिति। तथा च 'पुमः खय्यम्परे' इति 'पुमः' इति स्थानषष्ठ्या निर्दिष्टस्य पुमो मकारस्य रुर्भवति ॥

अत्रानुनासिकः। इत्युकार इति। अनेन सूत्रेण पुम इत्यत्र वर्तमान उकारः सानुनासिको जात इत्यर्थः[9] ॥

अनुना ॥

संपुंकानामिति। ≍क≍पनिवृत्त्यर्थमित्युपलक्षणमेतत् षत्व-विसर्गयोरपि निवृत्त्यर्थम्। 'समः सुटि'। 'पुमः खय्यम्परे'।

---

१. षष्ठीनिर्दिष्टस्यान्त्यस्या° D4, D5, K notices षष्ठीनिर्दिष्टः also. २. Dropped B1. ३. After it स्यात् B2. ४. Before it—विसर्जनीयस्य D1. ५. पुँस्कोकिलः। पुँस्पुत्रः। पुंस्कोकिलः। पुंस्पुत्रः। B1. ६. P omits खयि किम्। पुंदासः। After it B2 has पुंक्षीरम्. ७. षष्ठीनिर्दिष्टस्यान्त्यस्येति। Dc1, Dc2, Dc3. ८. षष्ठ्या निर्दिष्टः षष्ठीनिर्दिष्टस्तस्य योन्त्य° Dc2. ९. उकार इत्यर्थः Dc4.

समः सुटि ॥८।३।५॥

समो मस्य रुः स्यात् सुटि परे ।

'कानाम्रेडिते' इत्येतेषु सूत्रेषु रुर्विधीयते सकारो वेति पक्षद्वयमस्ति। तत्र रुविधिपक्षे 'संपुंकानां विसर्गस्य सो वक्तव्यः*'। अन्यथा संस्कर्तेत्यत्र 'वा शरि' इति स्यात्। पुंस्कोकिल इत्यत्र 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वम्। कांस्कानित्यत्र 'कुप्वोः—' इति ×कः। अयं च पक्षो 'मतुवसो रु–' इत्यस्यानुवृत्तेर्लभ्यते। सकारविधिपक्षेयमर्थः। संपुंकानां सो वक्तव्यो व्याख्येयः। एभिः सूत्रैः सो विधीयत इति व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्।

समः सुटीति। द्विसकारको निर्देशः। तेन सो विधीयते। एषु सूत्रेषु रुस्त्वनुवर्तमानोपि[४] न संबध्यते। संबन्धानुवृत्तः 'मतुवसो रु संबुद्धौ छन्दसि' इति। ननु च 'कानाम्रेडिते' इत्यत्र सकारानुवृत्तौ 'नश्छव्यप्रशान्' इत्यत्रापि स्यात् सकारः। मैवम्। संबन्धानुवृत्तः 'समः सुटि' इति। तेन तत्र रुरेव संबध्यते न सः। 'कानाम्रेडिते' इत्यत्र तु सकारमात्रं संबध्यते। 'समः सुटि' इति तु निवर्तते। ननु सकारविधिपक्षे संस्कर्तेत्यादावनुनासिकानुस्वारौ न स्तः। [११]तौ हि रुविधावुक्तौ[१२] नान्यत्रेति। मैवम्। तस्योपलक्षणत्वात्। तत्र सकारविधिपक्ष एवाचार्याणामभिप्रेतः। कुतः। यतो रेफविसर्गविधायकं सूत्रं पठित्वैवं वदति संपुंकानामिति। रुविधौ हि विसर्गं कृत्वा[१३] एतदवक्ष्यत्[१४]। अयं च पक्षो भाष्यकाराभिप्रेतोतः साधीयान्। पुंस्कोकिल इति। पुमांश्चासौ कोकिलश्च। अनुनासिकपक्षेर्धो[१५] बिन्दुः। अनुस्वारपक्षे

---

१. Dropped P, D5. २. इत्यतोनु° Dc1; इत्यतो रु इत्यस्यानु° Nc1, Dc3, Dc4. ३. °सकारो Nc1. ४. अपि dropped Dc2. ५. सकारस्यानुवृत्तौ Dc4. ६. सकारः स्यात् Dc2. ७. Dropped Nc1. ८. Dropped Nc1, Dc2. ९. इत्यनुवर्तते Nc1. १०. Dropped Dc1, Dc2, Dc4. ११. यत स्तौ Bc1. १२. °वुक्तावत्रेति Dc1, Dc3, Nc1, Nc2. १३. उक्त्वा Dc4. १४. एतदेव वक्ष्यते Dc2. १५. पक्षेर्धबिन्दुः Nc1.

सँस्कर्ता । संस्कर्ता ॥

नश्छव्यप्रशान् ॥८।३।७॥

अम्परे छवि नकारस्य रुः स्यान्न तु प्रशान्शब्दस्य ॥

खरवसानयोर्विसर्जनीयः ॥८।३।१५॥

खरि अवसाने च पदान्ते रेफस्य विसर्जनीयः ॥

विसर्जनीयस्य सः ॥८।३।३४॥

खरि विसर्जनीयस्य स स्यात् । श्चुत्वम् । शार्ङ्गिँश्छिन्द्धि । शार्ङ्गिंश्छिन्द्धि । चक्रिँस्त्राहि चक्रिंस्त्राहि । अम्परे किम् । सन्त्सरुः ।

समग्रः । खयीति किम् । पुंदासः । पर इति किम् । यतोमीति सप्तम्यैव परत्वं स्यात् । मैवम् । अमि खय्पर इति विपरीतमपि ज्ञायेत ॥

समः । मोनुस्वारे प्राप्ते वचनम् । **संस्कर्तेति** । 'संपर्युपेभ्यः—' इति सुट् । समः किम् । उपस्कर्ता । सुटि किम् । संकरः ।

नश्छवि । छवि किम् । सन् करोति ॥

खर । खरवसानयोः किम् । अग्निर्नयति । इह नृपतेरपत्यं नार्पत्य इति वृद्धेर्बहिरङ्गत्वात्तदाश्रयस्य रस्य 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यसिद्धत्वाद्विसर्गो न ॥

विसर्जनीयस्य । 'खरवसानयोर्विसर्जनीयः' इत्यतः 'खरि' इति मण्डूकप्लुतिन्यायेनानुवर्तत इत्यभिप्रेत्याह । खरीति । श्चुत्वमिति । 'स्तोश्चुना—' इति । शार्ङ्गिँश्छिन्द्धीति । शार्ङ्गिन् छिन्द्धि इति स्थिते

---

१. Before it सम् स्कर्ता इति स्थिते D_1, B_1, C. २. रुर्वा स्यान्न B_2. ३. पदान्तस्य B_2. ४. After it स्यात् C, D_3, D_4, B_1. ५. खरि पदान्ते P. ६. विसर्गस्य D_2. ७. पुनश्चुत्वम् । B_1. ८. खयि परतः Dc_2. ९. ज्ञायते Dc_1, Dc_2, Bc_1. १०. Before it—व्याघाताविति । तथोक्तं महाभाष्ये । रुविधिः पुंख्याने । पुंख्यानमित्यत्र रुविधिर्न भवति । Dc_3, Dc_4.

अप्रशान् किम् । प्रशान् तनोति ॥

नॄन्पे ॥८।३।१०॥

पेपरे नॄन्नकारस्य रुर्वा ॥

कुप्वोः ≍क ≍पौ च ॥८।३।३७॥

कुप्वोः संबन्धिनि खरि परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः ।

'नश्छवि:—' इति रुः । अनुनासिकोनुस्वारो वा । विसर्गः । तस्य सः । श्चुत्वेन शः । चक्रिंस्त्राँहीति । त्रायत इति त्राः । 'क्विप् च' इति क्विप् । त्रावदाचरति । 'सर्वप्रातिपदिकेभ्यः क्विबाचारे' इति क्विप् । 'सनाद्यन्ताः' इति धातुत्वम् । लोण्मध्यमैकवचनस्य सेर्हिः । शप् । सवर्णदीर्घः । प्रशान् तनोति । प्रपूर्वात् शमेः क्विप् । 'अनुनासिकस्य क्वि–' इति दीर्घः । 'मो नो धातोः' इति नः । तस्यासिद्धत्वान्नलोपाभावः ॥

नॄन् । पे परे नॄन्नकारस्य रुर्वैति । 'वा' इत्येतद् 'उभयथर्क्षु' इत्यत 'उभयथा' इत्यस्यानुवृत्तेर्लभ्यते । तथा चोक्तं काशिकायाम् । "'उभयथा' इत्येतदपि केचिदनुवर्तयन्ति । नॄन् पाहीत्यपि यथा स्यात्" । इति । पे किम् । नॄन् भोजयति ।

कुप्वोः । 'खरि' इत्यनुवृत्तिसामर्थ्यात् कुप्वोरिति षष्ठ्यन्तं संपद्यत इत्याह । कुप्वोः संबन्धिनीति । ≍क ≍पावित्यत्र वर्तमानौ कपावुच्चारणार्थौ । जिह्वामूलीयोपध्मानीयावेव त्वादेशावित्यभिप्रेत्याह । जिह्वामूलीयोपध्मानीयाविति । 'विसर्जनीयस्य सः' इति प्राप्त इदमारभ्यत इति तस्यैवापवादः । अतो वासः क्षौमम् । अद्भिः प्सातम्–इत्यत्र पूर्वत्रासिद्धीये परविप्रतिषेधाभावात् 'शर्परे विसर्जनीयः'

---

१. रुर्वा स्यात् C. २. त्राणं त्राः Bc_1. ३. °दनुवर्णयन्ति Nc_1. ४. तु dropped Dc_1, Dc_3.

चोद्विकल्पः । नॄँ ×पाहि । नॄं ×पाहि । नॄँ पाहि । नॄः पाहि । नॄन् पाहि ॥

कानाम्रेडिते ॥८।३।१२॥

कान्नकारस्य रुः स्यादाम्रेडिते परे[2] ॥

कस्कादिषु च ॥८।३।४८॥

एषु विसर्जनीयस्य ×क ×पौ न । अविहितलक्षणः कस्कादौ

इत्येतदेव भवति । केचित्त्वेतदर्थं योगविभागं कुर्वन्ति । 'कुप्वोः' इत्येको योगः । कुप्वोः शर्परयोर्विसर्गस्य विसर्गः । एतच्च '×क ×पौ च' इति प्राप्तयोः ×क ×पयोर्बाधनार्थम् । ततः '×क ×पौ च' इति सूत्रम् । तत्र 'कुप्वोः' इति वर्तते । **चाद्विकल्प** इति । अयं भावः । चकारो हि विसर्जनीय इत्यस्यानुकर्षणार्थः । तेन पक्षे विसर्गस्य विसर्ग एवं स्यादिति । चाद्विकल्पः । तेन ×क ×पयोरभावपक्षे 'विसर्जनीयस्य सः' इति न प्रवर्तते । विसर्गेण बाधितत्वात् ॥

कान् । कान् कानिति वक्तव्य आम्रेडितग्रहणं यत्र द्वित्वं स्यात्तत्रैव यथा स्यात् । तेनेह न । कान् कान् पश्यतीति । एकोत्र किम् प्रश्ने । द्वितीयः क्षेपे । कान् कुत्सितान् पश्यतीत्यर्थः ॥

कस्कादिषु चेति । ननु चात्र 'न' इति नानुवर्तते नापि '×क-×पौ' । तयोरस्वरितत्वात् । तत् किमित्येतदाह । **एषु विसर्जनीयस्य ×क ×पौ** नेति । उच्यते । अत्र 'सोपदादौ' इतः 'सः' अनुवर्तते । 'इणः षः' इत्यतः 'षः' । तौ सषावनेन विधीयेते ×क ×पयोर्नाप्राप्तयोः । अतः 'येन नाप्राप्ते से तस्य बाधको भवति' इति न्यायेन सषाभ्यां

---

१. चाद्विसर्गः C, D3, D4, B1, B2; K. notices चाद्विकल्पः also. २. आम्रेडिते परे in the beginning of the Vritti B1. ३. °विसर्जनीयस्य Nc1, Nc2, Bo1. ४. इत्यम् Nc2. ५. ततः Dc1. ६. विसर्ग Dc1. ७. एव dropped Nc2. ८. °द्विकल्पार्थः Dc1; °द्विकल्प इति । अयं भावः । Nc1. ९. यो विधिरारभ्यते स Bc1, Dc3.

ज्ञेयः । तत्र कौतस्कुत इत्यादौ सः । सर्पिष्कुण्डिकेत्यादाविणः परस्य सस्य ष इति ज्ञेयम् । काँस्कान् । कांस्कान् । रुत्वं वेति केचित् । कान् कान् ॥

छे च ॥६।१।७३॥

×क ×पौ बाध्येते इति । तौ[1] कस्कादिषु विसर्गस्य नेत्युच्यते । अत एवाह । **तत्र कौतस्कुत इत्यादौ सः सर्पिष्कुण्डिकेत्यादाविणः परस्य सस्य ष इति ज्ञेयम्** । **अविहितलक्षण** इति । न विहितं लक्षणं यस्य षस्य सस्य वा[3] सोविहितलक्षणः । अनेन कस्कादिष्वाकृतिगणतां चकारसूचितां दर्शयति । **कौतस्कुत** इति । कुतः कुत आगतः । वीप्सायां द्वित्वम् । 'तत आगतः' इत्यण् । टिलोपः । **सर्पिष्कुण्डिके**ति षष्ठीसमासः । कस्कः । कौतस्कुतः । भ्रातुष्पुत्रः । शुनस्कर्णः । सद्यस्कालः । साद्यस्क्रः । क्रीणातेः क्विपि तत्र भवोण् । सर्पिष्कुण्डिका । धनुष्कपालः । बहिष्पूलः । यजुष्पात्रम् । अयस्कान्तः । तमस्काण्डम् । अदस्पिण्डः । **कांस्कानि**ति । 'कानाम्रेडिते' इति सूत्रेण यदा रुत्वं विधीयते तदा कस्कादित्वात् सः । यदा तु सत्वं तदा तेनैव सिद्धम् । **रुत्वं वेति केचि**दिति । तथा च बोपदेवपण्डितैरुक्तम् । 'कांस्काँन् नॄंः पि वा' इति ॥

छे च । अत्र 'ह्रस्वस्य' इत्यनुवृत्तेः 'येन विधिस्तदन्तस्य' इति यदि ह्रस्वान्तस्य तुक् स्यात्तदा चिच्छिदुरित्यत्र तुगभ्यासग्रहणेन गृह्यत इति हलादिशेषेण निर्वर्त्येत । तदन्तविध्यभावे तु नावयवावयवः समुदायावयवो भवतीति न निवर्त्स्यैतेति चेतसि कृत्वाह ।

---

१. विसर्गस्य C. २. Dropped Nc1. ३. वासौ Dc3. ४. इति वीप्सायां Nc1. ५. °भवाण् Nc2; °भवेण् Bc1. ६. °ष्कपालम् Bc1, Nc2. ७. 'कान् कान् नॄन् पि वा' Dc1, Dc2, Dc3, Dc4, Nc1. ८. निवर्तते Dc4. ९. निवर्तत Dc4.

ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम्। चुत्वम्। शिवच्छायां[1]। चुत्वस्यासिद्धत्वात्[2] 'चोः कुः' इति कुत्वं न॥

आङ्माङोश्च ॥६।१।७४॥

एतयोश्छे[3] तुक् स्यात्[4]। 'पदान्ताद्वा' इति विकल्पापवादः आ[5] च्छादयति। मा च्छिदत्॥

दीर्घात् ॥६।१।७५॥

[6]दीर्घाच्छे तुगागमः[7]। ह्रीच्छति[8]।

ह्रस्वस्येति। अयमर्थश्चकारात् ज्ञायते। तथा हि। अत्र स्वरितत्वादेव 'ह्रस्वस्य' इत्यनुवर्तमानेपि यत् 'छे च' इति चकारस्तदनुकर्षणार्थः क्रियते तत्र ह्रस्व एवागमी यथा स्यात् न तदन्त इत्येवमर्थमिति। चुत्वस्येति। 'स्तोश्चुना श्चुः' इत्यनेन विहितस्य चुत्वस्य 'पूर्वत्रासिद्धम्' इत्यनेनासिद्धत्वादित्यर्थः। प्लुतविकारस्तुग्विधौ छे[9] सिद्धो व[10]क्तव्यः*। अग्ना३ इ छत्रम्। पटा३ उ छत्रम्॥

आङ्। ङित्त्विशिष्टस्य किम्। आ छाया। आच्छाया। अयं स्मरण आकारः। ततो विकल्पः। प्र मा छर्दः[11]। प्र मा च्छर्दः[12]। नायं माङव्ययं किं तु माङ् माने इति धातुः। ननु 'दीर्घात्' इत्येव सिद्धे किमर्थमिदमित्याशङ्क्याह। 'पदान्ताद्वा' इति॥

दीर्घात्। दीर्घात् परो यश्छकारस्तस्मिन् परे पूर्वस्य तस्यैव दीर्घस्य तुगागमः स्यादित्यर्थः। वि[13] चाच्छायत इत्याद्यप्युदाहरणम्। ननु चात्र 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति छस्य तुक्

---

१. After it—अत् छ अच्छ। D_2. २. अत्र चुत्व° D_5. ३. °श्छे परे D_4, B_1, C. ४. Dropped D_1, D_3, B_2. ५. आच्छादय D_1. ६. The Vṛitti is dropped D_1, B_2; दीर्घात् परस्य छे परे नित्यं तुगागमः स्यात्। D_4; दीर्घाच्छे परे नित्यं तुगागमः स्यात्। दीर्घस्येति विभक्तिविपरिणामः। D_5. ७. तुक् C. ८. After it म्लेच्छः C. ९. Dropped Dc_1, Nc_1. १०. वाच्यः Nc_2. ११. छन्दः Dc_3, Dc_4. १२. च्छन्दः Dc_3, Dc_4. १३. Before it—छो छेदने। यङ्। दीर्घोक्तिः। वि उपसर्गः। Nc_2.

पदान्ताद्वा ॥६।१।७६॥

दीर्घात् पदान्ता च्छे[1] तुग्वा[2] । लक्ष्मी च्छाया । लक्ष्मी छाया ॥[3]

इति हल्संधिः ॥

स्यात् । न दीर्घस्य । नैष दोषः । 'तस्मादित्युत्तरस्य' इत्यत्र 'तस्मात्' इति योगविभागः क्रियते तेन दीर्घः स्यादिति ॥

पदान्तात् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलः संधिरीदृग्घलां च ॥

---

१. च्छे परे P, C. २. तुग्वा स्यात् C. ३. D_1 drops लक्ष्मी च्छाया; D_3 drops लक्ष्मी छाया.

अथ[1] विसर्गसंधिः ।

विसर्जनीयस्य सः ॥८।३।३४॥[2]

शर्परे विसर्जनीयः ॥८।३।३५॥

शर्परे खरि वि[3]सर्जनीयो न त्वन्यत् । कः त्सरुः ॥

वा शरि ॥८।३।३६॥

शरि परे पूर्[4]वं वा । हरिः शेते । हरिश्शेते ।

खर्परे शरि वा[5] विसर्गलोपः*। हरि स्फुरति । हरिः स्फुरति । तद्बृहतोः करपत्योश्चौरदेवतयोः सुट् तलोपश्च* । तस्करः । बृहस्पतिः ।

अथ विस[6]र्गसंधिरुच्यते । विसर्जनीय[7]स्य । कृष्णश्चिन्त्यः । हरिष्टीकते । विष्णुस्त्राता–इत्यत्रानेन सूत्रेण सकारो भवतीत्यर्थः । पूर्वयोर्यथाक्रमं श्चुत्वष्टुत्वे ॥

शर्परे । विसर्जनीयस्य विसर्जनीयवचनं तद्विकारनिवृत्त्यर्थ-मित्या[8]ह । न त्वन्यदिति ॥

वा शरि । पूर्वं वेति । विसर्जनीयस्य विसर्जनीयो वा स्यादित्यर्थः ॥ तद्बृहतोरिति । एतच्च पारस्करगणस्थं सूत्रम् । अस्य चायमर्थः । तत् बृहत् इत्येतयोर्यथाक्रमं करपतिशब्दयोः परतो यथाक्रमं चौरदेवतायां चाभिधेयायां सुट् स्यात् तलोपश्च । तत्र करपतिशब्दयोः सुट् स्यात् तयोरेव परयोस्तत्बृहतोस्तलोपः ‘ अलोन्त्यस्य ’ इत्यन्त्यस्य

१, Heading dropped D_2. २. After this the Vṛitti—खरि पदान्ते विसर्जनीयस्य सः स्यात् । कृष्णश्चिन्त्यः । हरिष्टीकते । विष्णुस्त्राता । P, B_1, C. ३. विसर्जनीयस्य पदान्तस्य विसर्जनीयः स्यात् । सस्यापवादः । न त्वन्यत् D_2, D_5, B_1. ४. पूर्वोक्तं D_4, D_5, P, B_1. ५. विसर्गलोपो वा B_1. ६. विसर्गस्य संधि° Nc_2. ७. °नीयस्येति Dc_4. ८. °मित्यत आह Dc_4.

कुप्वोः ×क ×पौ च ॥८।३।३७॥

कः करोति । क ×करोति । कः पचति[1] । क ×पचति । कस्कादित्वात्सः । कुप्वोः खरि[2] सो वा समास इति केचित् । भास्करः । भा×करः ॥

नमस्पुरसोर्गत्योः ॥८।३।४०॥

गतिसंज्ञयोरनयोर्विसर्गस्य[3] सः स्यात्[4] कुप्वोः परयोः[5] । नमस्करोति । पुरस्करोति ॥

इति[6] विसर्गसंधिः ॥

स्यादिति निपातनस्यैवायं[7] प्रपञ्चः । एतच्चाग्रे वक्ष्यते[8] । तत्करोतीति तस्करश्चौरः । 'कियत्तद्बहुष्वज्वा' इति कृञोच् । अन्यस्तत्करः । बृहतां पतिर्बृहस्पतिर्देवता । बृहत्पतिरन्यः । 'कुप्वो ×क ×पौ च' इति विसर्जनीयस्य ×क ×पौ विसर्जनीयश्च ॥

कस्कादित्वादिति । भास्करशब्दे सकारो लक्षणान्तरेणाविहित इति कृत्वा कस्कादित्वात् ज्ञेय इत्यर्थः । अथवा भास्करेति निपातनादिति कृदन्ते वक्ष्यति । **कुप्वोरिति** । अर्वाचीनमतमेतत् । वाशब्दो व्यवस्थायां तेन संज्ञायां स्तोन्यत्र नेति तेषामभिप्रायः ॥

नमस् । **नमस्करोतीति** । 'साक्षात्प्रभृतीनि च' इति कृञो योगे नमःशब्दस्य विभाषा गतिसंज्ञा । **पुरस्करोतीति** । 'पुरोव्ययम्' इति पुरःशब्दस्याव्ययस्य नित्यं गतिसंज्ञा । गत्योः किम् । नमः पीत्वा गतः । पूः पुरौ पुरः कृत्वा गतः ॥

इति विसर्गसंधिः ॥

---

१. कः पठति । क ×पठति । P, B_1. २. सबन्धिनि खरि परे D_4, B_1. ३. °विसर्जनीयस्य C, D_1. ४. Dropped P, D_1, D_4, D_5. ५. Dropped D_5; परतः C. ६. इति विसर्गसंधिः dropped D_1, D_2, D_4, D_5; B_2 has इति विसर्गः. ७. निपातस्यैवा° Nc_1, Dc_2. ८. वक्ष्यति Nc_1.

अथ स्वादिसंधिः[1] ॥

स्वौजसमौडिति सुप्रत्यये[2] शिव सु[3] अर्च्य इति स्थिते ॥

ससजुषो रुः ॥८।२।६६॥

पदान्तस्य सकारस्य सजुष्शब्दस्य च रुः स्यात् ॥

अतो रोरप्लुतादप्लुते ॥६।१।११३॥

अप्लुतादतः परस्य रोरुः स्यादप्लुतेति[4] । 'भोभगोअघो–' इति प्राप्तस्य[5] यस्यापवादः । रुत्वैकाश्रयमुत्वं प्रति रुत्वं[6]

अथ स्वादिसंधिः[7] । स्वौजसमौडिति । शिव अर्च्य इत्यत्र 'अर्थवदधातुरप्रत्ययः—' इति प्रातिपदिकत्वात् 'स्वौजसमौट्—' इत्यादिना सूत्रेण प्रथमैकवचने सुप्रत्यये कृते सति शिवस् अर्च्य इति स्थिते उच्यत इत्यर्थः । ससजुषोः । जुषी प्रीतिसेवनयोरस्मात्[8] क्विपि सहपूर्वस्य रूपमेतत् सजुष् इति । 'अतो रोः' इति विशेषणार्थं उकारानुबन्धः ॥

अतो रोः । 'भोभगो—' इतीति । नाप्राप्ते तस्मिन्नेतस्य विधीयमानत्वात् । ननु चोत्वे कार्ये पूर्वत्रासिद्धन्यायेन रुत्वमसिद्धम्[9] । तत् कथमसतः शक्यमुत्वं विधातुमित्याशङ्क्याह । रुत्वैकाश्रयमिति । यदि रुत्वमसिद्धं स्यात्तर्हि रुत्वस्योत्वं प्रति स्थानिवत्त्वेनाश्रयणमनर्थकं

१. अथ स्वादिसंधिः dropped D_2. २. सुप्रत्ययः D_3. ३. सु P, D_1. ४. After this—अत इत्येव। प्लुतादौ वर्जिते पुनस्तद्द्वारेण मुत्वे कर्तव्ये सत्यसिद्धस्य पुनर्भाविनः प्लुतस्य विसर्जनार्थमिदं वचनम्। सुपया अत्रागच्छ । 'दूराद्धूते च' इति प्लुतः । 'भोभगो–' इति प्राप्तस्यापवादः । रुत्वैकाश्रयमुत्वं प्रति रुत्वं नासिद्धम् &c. D_2. ५. प्राप्तस्यापवादः P, B_2; आप्तस्य D_1. ६. रुत्वं dropped P, B_1, D_2, D_3, D_5. ७. स्वादिप्रक्रिया Dc_1. ८. इति for अस्मात् Dc_1. ९. After it—स्यात् Dc_3.

नासिद्धम् । शिवोर्च्यः । अप्लुतात् किम् । कृतेपि प्लुते तस्योत्वं प्रत्यसिद्धत्वादुत्वं स्यात् । तन्मा भूत् । [1]सुस्रोत३ । अत्र 'दूराद्धूते च' इति प्लुतः । [2]अप्लुते किम् । तिष्ठतु पय अ३ग्निदत्त । 'गुरोरनृतोन[3]न्त्यस्य' इति प्लुतः ॥

हशि च ॥६।१।११४॥

[4]हशि च तथा । शिवो वन्द्यः । रोरित्येव ।

स्यात् । त[5]तः स्थानित्वेनाश्रयणादुत्वं नासिद्धमित्यभिप्रायः । **शिवोर्च्य** इति । उत्वे 'आद्गुणः ।' 'एङः पदान्तात्' इति पूर्व[6]रूपत्वम् । ननु 'अतः' इति तपरत्वादेव सिद्धायां प्लुतनिवृत्तौ किमर्थम् 'अप्लुतात्' इत्युच्यत इत्याक्षिपति । **अप्लुतात् किमिति** । परिहरति । **कृतेपीति** । अयमर्थः । यदि 'अतः' इत्येवोच्येत तदा [7]सुस्रोत३ अत्रेत्यत्र 'दूराद्धूते च' इति प्लुते कृतेपि तस्य प्लुतस्य 'अतो रोः' इत्युत्वं प्रति पूर्वत्रासिद्धन्यायेनासिद्धत्वाद्रोरुत्वं स्यादेव । तन्मा भूदित्येवमर्थम् 'अप्लुतात्' इत्युक्तम् । 'अप्लुतात्' इति ह्युच्यमाने यत्र प्लुतसंभावनाप्यस्ति तत्र न भवति । [8]**सुस्रोत३ अत्रेति** । [9]सुस्रोतस् अत्रेति स्थिते रुत्वम् । प्लुतः । उत्वाभावात् 'भोभगो–' इति यत्वम् । 'लोपः शाकल्यस्य' इति यलोपः । **अप्लुतेति [10]किमि**-त्यादि । पूर्ववदाक्षेपपरिहारौ ॥

हशि च । **तथेति** । अप्लुतादतः परस्य रोरुः स्यादित्यर्थः । **रोरित्येवेति** । उकारानुबन्धस्यैव रेफस्योत्वं नान्यस्येत्यभिप्रायः ।

---

१. सुश्रोत३ D_1, B_2, D_4. २. भप्लुतेति C, B_2, Com. ३. °नन्त्यस्यार्थै-कैकस्य प्राचामिति D_1. ४. हशि च dropped D_2; हशि चोत्वं तथा P. ५. तस्मात् Bc_1, ६. °रूपम् Dc_1, Dc_2, Dc_4. ७. सुश्रोत३ Dc_1, Dc_2, Dc_3, Dc_4. ८. सुश्रोत३ Dc_1, Dc_2, Dc_3, Dc_4. ९. सुश्रोतस् Dc_1, Dc_2, Dc_3, Dc_4. १०. किमिति Dc_1.

मातरत्र[1] । धातगच्छ[2] । देवा स्[3] इहेति स्थिते रुत्वम्[4] ।

भोभगोअघोअपूर्वस्य योऽशि ॥८।३।१७॥

एतत्पूर्वस्य रोर्यादेशोऽशि परे[5] ॥

लोपः शाकल्यस्य ॥८।३।१९॥

देवा इह । देवायिह[6] ।

मातरत्र[7] । धातर्गच्छेति । अत्र । मातृधातृशब्दयोः[8] संबुद्धौ ऋकारस्य गुणो[9] रपरः । देवास् इहेति । देवशब्दाज्जसि पूर्वसवर्णदीर्घे कृते देवास् इह इति स्थिते इत्यर्थः । रुत्वमिति । 'ससजुषोरुः' इति ॥

भोभगो । अथ 'अशि' इति किम् । खरि मा भूत् । न । तत्र 'खरवसानयोः—' इति विसर्गः[10] स्यात् । नैष दोषः । तत्र कृतेऽपि स्थानिवत्त्वाद्यः स्यात् । न । ज्ञापकात् । यदयम् 'अत्रानुनासिकः पूर्वस्य तु वा' इति विसर्गस्य यकारमकृत्वा निर्दिशति तज् ज्ञापयति विसर्गस्य खरि यकारो[11] न भवतीति । अवसाने तर्हि स्यादिति चेन्न । 'संहितायाम्' इत्यधिकारात् । एवं तर्ह्युत्तरार्थमश्ग्रहणम् । 'व्योर्लघु-प्रयत्नतरः शाकटायनस्य' । 'लोपः शाकल्यस्य' इत्येतदशि यथा स्याद्[12] 'हलि सर्वेषाम्' इति च हशि यथा स्यात् । ततश्च वृक्षं वृश्चतीति वृक्षवृट् । तमाचष्टे । णिच्[13] । टिलोपः । वृक्षवयति । ततो[14] विच्[15] । वृक्षवूकरोतीत्यत्रैतानि कार्याणि न संभवन्ति[16] । अत्र णिलोपस्य स्थानिवत्त्वात् 'लोपो व्योर्वलि' लोपो न । पूर्वत्रासिद्धीये न स्थानिवत्[17] इति । 'हलि सर्वेषाम्' इति स्यादेव । अथ 'हलि सर्वेषाम्' इत्यत्र

---

१. भ्रातरत्र B₁, B₂; भ्रातरत्र Com. २. मातर्गच्छ B₁; भ्रातर्गच्छ D₃, D₄, P, C. ३. सु P. ४. रुत्वे B₂. ५. परे dropped P, B₁, D₁, D₃. ६. After it—भाशि किम् । देवाः सन्ति । C, B₁. ७. भ्रातरत्र Dc₂, Dc₄, Bc₁. ८. भ्रातृ Dc₂, Dc₄, Bc₁. ९. ऋकारगुणो Dc₃. १०. विसर्जनीयः Dc₃. ११. यकारः खरि Dc₂. १२. इत्येतदर्थं यथा स्यात् Dc₂. १३. णिचि Dc₁. १४. ततः dropped Dc₂. १५. क्विप् Bc₁, Dc₄. १६. भवन्ति Dc₂, Dc₄. १७. पूर्वत्रासिद्धन्याये Dc₂.

विभाषा भवद्भगवदघवतामोच्चावस्य । एषां रुः स्योद्वस्यौकारो वा संबुद्धौ । यत्वम् ॥

व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥८।३।१८॥

वकारयकारयोर्लघूच्चारणौ वयौ वोशि ॥

ओतो गार्ग्यस्य ॥८।३।२०॥

ओकारात्परस्यालघुप्रयत्नस्य नित्यं लोपः[4] ।

हल्ग्रहणं किमर्थं 'हशि' इत्येव किं नोक्तम् । 'मोनुस्वारः' इत्येवमादि हल्मात्रे यथा स्यादिति ॥

विभाषा । एषां रुरिति । अलोन्त्यपरिभाषया एषामन्त्यस्य स्यात् । यत्वमिति । 'भोभगो—' इत्यनेन वृत्तिकारमते 'विभाषा भवद्—' इत्यादिकं वक्तव्यं न कर्तव्यम् । भो इत्येवमादयो 'भोभगोअघोअपूर्वस्य' इति सौत्राः सान्ता निपाता द्रष्टव्याः । अथवा विभक्तिस्वरप्रतिरूपकाश्चेति चकारेणासंबुद्धावपि हि दृश्यन्ते । भो ब्राह्मणि ॥

व्योर्लघु । प्रयतनं प्रयत्नः । लघुः प्रयत्नो यस्य स लघुप्रयत्नः । अतिशयेन लघुप्रयत्नः लघुप्रयत्नतरः । लघुप्रयत्नतरत्वं नामोच्चारणे स्थाने करणे च शैथिल्यम् । आन्तरतम्याद्यस्य य एव वस्य व एव भवति ॥

ओतः । ओकारात्परस्येति । ओकारान्तादङ्गात्परस्येत्यर्थः । ओकारान्तात्परस्य वकारस्यासंभवात् । 'परस्य' इत्येकवचननिर्देशः । यद्यविशेषेणालघुप्रयत्नस्य लघुप्रयत्नस्य च लोपः स्यात् । 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' इति विधिरनर्थकः स्यात् । तस्मादलघुप्रयत्नस्यैव लोप इत्याह । अलघुप्रयत्नस्येति । केषांचिन्मते सर्वस्यैव लोपः । 'लोपः शाकल्यस्य' इत्यनेनैव लोपे सिद्धे नित्यत्वार्थं वचनमित्याह । नित्यमिति ।

---

१. स्यात् dropped B_2 which has रुर्वस्यौ°. २. Dropped D_3. ३. वाशि परे D_1. ४. लोपोशि परे D_1, B_2, C; लोपः स्यात् D_3; लोपोशि B_1. ५. निपातात् Nc_1. ६. ब्रह्माणि Dc_1, Nc_2. ७. ओकारात् Nc_2, Dc_2. ८. °वचनेन निर्देशः Nc_2. ९. केषांचित्पक्षे Nc_2.

गार्ग्यग्रहणं पूजार्थम् । भो अच्युत । लघुप्रयत्नपक्षे । भो यच्युत । रुत्वाभावे । भवन्नच्युत ।

हलि सर्वेषाम् ॥८।३।२२॥

ओतः परस्यावर्णात्परस्य च लघ्वलघूच्चारणस्य यकारस्य नित्यं लोपो हलि सर्वेषां मतेन । देवा नम्याः । भो हरे ।

ननु यदि नित्यार्थं वचनं गार्ग्यग्रहणं किमर्थमित्याशङ्क्याह । **गार्ग्यग्रहणमिति** । **भो अच्युतेति** । भवन् अच्युतेति स्थिते 'नानर्थकेलोन्त्यविधिः' इति सर्वस्य अवस्य ओत्वम् । यत्वम् । यलोपः । **लघुप्रयत्नेति** । यदा लघुप्रयत्नस्तदा लोपो न । **भवन्नत्रेति** । 'उगिदचाम्—' इति नुम् । संयोगान्तलोपः । 'ङमो ह्रस्वादचि ङमुट्' ॥

स्पष्टत्वात्त्यक्तं व्याख्यायते । 'ञि च पदे ॥' ८।३।२१॥ अपूर्वयोः पदान्तयोर्य्वोर्लोपः स्यादुञि पदे परे । क उ कृष्णं समाश्रयेत् । पदे किम् । तन्त्रे उतम् । तन्त्रयुतम् ॥

हलि । **ओतः परस्येति** । भोभगोअघोअपूर्वस्येत्यर्थः । एतेषामनुवृत्तेः । ननु च व्योरित्यनुवर्तते । तत् कथं **यकारस्य** इत्येवोच्यते । वकारस्य चेत्यपि किं नोच्येतेति चेदुच्यते । अत्र हि भोभगोअघोअपूर्वस्तु वकारो न संभवत्येव । अवर्णपूर्वस्तु यद्यपि संभवति वृक्षव् करोति तथापि तस्येह ग्रहणं न भवतीति 'भोभगोअघोअपूर्वस्य' इति सूत्रे प्रतिपादितम् । **भो हरे** इत्यादि । 'विभाषा भवत्—' इत्यादिना

---

१. °वचनं P. २. भवन्नत्र D_5, Com. ३. Dropped D_1. ४. °चारणयकारस्य D_1. ५. वकारस्य यकारस्य च लोपो नित्यं B_1; नित्यं dropped B_2, D_2, D_4, D_5. ६. मते C. ७. भगवत् No_2. ८. Before it—रुत्वं No_2, Do_2. ९. औ No_1, Do_1. १०. Dropped No_2. ११. यलोपो No_2, Do_2. १२. भगवन्नत्रेति No_2. १३. संयोगान्तस्य लोपः No_1, Do_3. १४. एषा° No_2. १५. वृक्षव् करोति dropped No_1, Do_1. १६. संभवतीति Do_3.

भगो रक्ष। अघो याहि। सोरुत्वम्। हरिरयम्। विष्णुर्याति॥

रोऽसुपि ॥८।२।६९॥

अह्नो रेफादेशः स्यादसुपि[2]। रोरपवादः। अहरहः। अहर्गणः। असुपि किम्। अहोभ्याम्। अत्र 'अहन्' इति रुत्वम्।

रूपरात्रिरथन्तरेषु[4] रुत्वं वाच्यम्*। अहो रूपम्। अहो[5] रात्रम्। अहो रथन्तरम्।

रुः। अवस्य ओ। यत्वम्। सोरुत्वमिति। हरिविष्णुशब्दाभ्यां प्रथमैकवचनम्[6]। सौ जाते हरिस् अयम्। विष्णु स् याति। इति स्थिते 'ससजुषो रुः।' इति रुत्वमित्यर्थः॥

रोऽसुपि। रोरपवाद इति। 'अहन्' इत्यनेन प्राप्तस्य तेन अहरह इत्यत्र 'अतो रोरप्लुतादप्लुते' इत्युत्वं न भवति। अहर्ददातीत्यादौ तु सुपो[7] लुक् जात इति सुप्परत्वं नास्तीति रो भवति[8]। अह्नो रविधौ तु[9] लुमता लुप्ते[10][11] प्रत्ययलक्षणं न भवतीति वक्तव्येन प्रत्ययलक्षणनिषेधात्। यत्र तु लोप इति लुप्यते तत्र प्रत्ययलक्षणं स्यादेव। तेन[12] हेतुना दीर्घाहो निदाघ इत्यादौ रो न। 'हल्ङ्याब्भ्यः—' इति सोर्लोपात्॥

रूपरात्रीति। रेफापवादो रुत्वमुत्वार्थं विधीयते॥

---

१. भगो नमस्ते D_4, D_5. २. After it—परे B_1. ३. असुपीति C. .°रेष्वह्नो B_1. ५. अहोरात्रः K. (नपुंसकपाठस्तु प्रामादिकः 'रात्राह्नाहाः पुंसि' इति वचनात् K). ६. °वचने Nc_2, Dc_2; प्रथमैकवचनम् dropped Nc_1. ७. Before it—'स्वमोर्नपुंसकात्' इति स्वमोर्लुक् जात इति Dc_2, Dc_4. . भवतीति Dc_1, Dc_2, Dc_3, Dc_4. ९. रुविधौ Bc_1, Dc_2. १०. Dropped Nc_1, Nc_2, ११. प्राप्ते Dc_1, Nc_1, Nc_2. १२. तेनेह Nc_2, Dc_2.

अहरादीनां पत्यादिषु वा रेफः* । विसर्गोपवादः[1] ।
अहर्पतिः । अहऽपतिः । अहः[2] पतिः । गीर्पतिः । गीऽपतिः ।
गीः[3] पतिः । धूर्पतिः । धूऽपतिः । धूः[4] पतिः[5] ।

रो रि ॥८।३।१४॥

रेफस्य रेफे परे[6] लोपः[7] ॥

ढ्रलोपे पूर्वस्य दीर्घोणः ॥६।३।१११॥

ढरेफयोर्[8]लोपनिमित्तयोः परतः पूर्वस्याणो दीर्घः स्यात्[9] ।

अहरादीनामिति । अत्र विसर्गबाधनार्थं रेफस्यैव पक्षे रेफो विधीयते ॥

रो रि । यद्यपि 'पदस्य' इत्यनुवर्तते तथापि तस्याविशेषणषष्ठीत्वात् पदान्तस्या[10]पदान्तस्य चाविशेषेण लोपो भवतीत्यभिप्रेत्याह । **रेफस्य रेफे लोप इति** ॥

ढ्रलोपे । ढ्रलोपे इत्ययं न तत्पुरुषः किं तु बहुव्रीहिः । ढ्रयोर्लोपो यस्मिन्निति यन्निमित्तो ढ्रयोर्लोपः स्यादित्यर्थः । स च ढ्रलोपो विचार्यमाणो ढकाररेफावेवेति सर्वं चेतसि कृत्वाह । **ढरेफयोर्लोपनिमित्तयोः परत इति** । ढ्रलोप इति सप्तमीनिर्देशादेव पूर्वस्य दीर्घे सिद्धे पूर्वग्रहणमुत्तरपदाधिकारेप्यनुत्तरपदेपि पूर्वमात्रस्य दीर्घार्थम् ।

---

१. P drops विसर्गापवादः. २. अहः पतिः dropped P, D_1; After it—एवं स्वर्पतिः । स्वऽपतिः । गीर्पतिः &c. B_2. ३. Dropped P, D_1; गीष्पतिः D_3. ४. Dropped P, D_1; धूष्पतिः D_3. ५. After this—B_1, D_2 have—उषसो नित्यं बुधेरः । उषर्बुधः and D_5 has—उषसो बुधेर्नित्यं च । उषर्बुधः ।. ६. Dropped Com. ७. After it—स्यात् D_3, D_5. ८. ढकाररेफयो° C, D_2. ९. Dropped B_1. १०. तस्यापदान्तस्य चाविशेषणलोपो Nc_1.

पुना रमते। हरी रम्यः। शंभू राजते। अणः किम्। दृढः।

मनस् रथ इत्यत्र रुत्वे कृते 'हशि च' इत्युत्वे 'रो रि' इति लोपे प्राप्ते।

इति लोपे प्राप्ते 'पूर्वत्रासिद्धम्' इत्युत्वमेव। मनोरथः।

दृढ इति। नात्र 'दृढः स्थूलबलयोः' इति निपातो गृह्यते। तस्य निपातनादेव दीर्घाभावसिद्धेः प्रत्युदाहरणत्वानुपपत्तेः। किं तु दृह वृद्धावित्यस्य निष्ठायामागमशासनस्यानित्यत्वेनेडभावे 'वा द्रुहमुह—' इति 'वा' इति योगविभागात् पक्षे घत्वाभावे ढत्वे ष्टुत्वे ढलोपे च रूपम्। तथा च न्यास उक्तम्। 'केचित्त्वनित्यत्वादागमशासनस्याभावमिटो वर्णयन्ति। 'वा द्रुह—' इत्यत्र 'वा' इति योगविभागात् पक्षे घत्वस्य' इति। अथवा तृढ इति प्रत्युदाहरणम्। तृहू हिंसार्थः। निष्ठा॥

मनस् इत्यादि। सिद्धं रुत्वं 'ससजुषो रुः' इति। तस्मिन् कृते उत्वलोपयोः प्राप्तयोर्विषयव्यवस्थार्थमुच्यते—

लोपे प्राप्ते इति। 'हशि च' इत्युत्वं शिवो वन्द्य इत्यादौ सावकाशम्। 'रो रि' इति लोपो हरी रम्य इत्यादौ सावकाशः। तयोरत्र प्रसङ्गे लोपे प्राप्ते 'रो रि' इत्यस्य परत्वादित्यर्थः। '**पूर्वत्रासिद्धम्**' **इत्युत्वमेवेति**। अत्र 'रो रि' इत्यस्य त्रिपादीस्थत्वात् पूर्वत्रासिद्ध-

---

१. Before it—विसर्जनीयस्य सः। ससजुषो रुः। D_2. २. ढ्रलोपे किम्। सुश्रोतर् अत्र B_2. ३. वृढः D_2. ४. हशीन्युत्वे P. ५. After this C and D_2 have—पूर्वत्रासिद्धमित्युक्तेर्हशि चेति त्रिधा प्राप्ते। रोरीत्यस्य सिद्धं स्यात्तेन सिध्येन्मनोरथः॥. ६. सिद्धं dropped Nc_2, Dc_2. ७. त्रिपादी-पूर्वत्रासिद्धन्यायेन Nc_1, Dc_1.

विप्रतिषेधे परं कार्यम् ॥१।४।२॥

तुल्यबलविरोधे परं कार्यं स्यात् ।

एतत्तदोः सुलोपोकोरनञ्समासे हलि ॥६।१।१३२॥

एतत्तदोरककारयोरनञ्समासे लोपः[1] स्याद्धलि[2] । एष विष्णुः । स शंभुः । अकोः[3] किम् । एषको रुद्रः । अनञ्समासे किम् । असः शिवः[4] । हलि[5] किम् । एषोत्र ॥

न्यायेन षाष्ठिकमुत्वं प्रत्यसिद्धत्वात् तुल्यबलत्वाभावात् विप्रतिषेधपरिभाषा न प्रवर्तते । अत उत्वमेव स्यादिति भावः । अपवादादीनां तु परस्परं[6] संप्रधारणायां नित्यादन्तरङ्गो[7] बलीयांस्तस्मादप्यपवादः । तथोक्तम् ।

'परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव ।
नित्यान्तरङ्गोपगमेन्तरङ्गस्तस्माद्विधिः प्रातिपदो बलीयान् ॥' इति ॥

विप्रति । द्वौ प्रसङ्गावन्यत्र सावकाशौ यत्र युगपत् प्राप्नुतः स तुल्यबलविरोधः[8] । उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता[9] नास्तीति नायमस्य सूत्रस्य विषयः । जातिपदार्थपक्षेप्रवृत्तौ[10] विध्यर्थं वचनम् । व्यक्तिपदार्थपक्षे पर्यायेण प्राप्तौ नियमार्थमिति ।

एतत्तदोः । एष इति । 'तदोः सः सौ' इति सः । षत्वम् । एषको रुद्र इति । 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच् । ननु चाकच्सहितं शब्दान्तरमेतन्नैतत्[11] । मैवम् । 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति रूपभेदेप्येतदेव । **असः शिव** इति । ननु चात्र समेतस्य[12] सुशब्दो न तदः । मैवम् । उत्तरपदार्थप्रधानत्वान्नञ्समासस्य तद एवायं सुः । सोः किम् । एतौ गावौ ॥

---

१. सोर्लोपः D_1, D_2, B_2; सुलोपः D_5. २. °द्धलि परे C, B_2. ३. अकोरिति D_2. ४. After this—अनेषो रामः B_1. ५. हलीति किम् B_2. ६. परस्परसंप्र° Nc_1, Nc_2. ७. °दन्तरङ्गो विधिर्ब° Dc_2. ८. विप्रतिषेधः for तुल्यविरोधः Dc_3. ९. तुल्यबलं Nc_1. १०. अप्राप्तौ for अप्रवृत्तौ Dc_3. ११. नैतदिति Dc_2. १२. समस्तस्य Dc_2, Bc_1.

सोचि लोपे चेत् पादपूरणम् ॥६।१।१३४॥

स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे पूर्येत[1] । सेमामविड्ढि । सैष दाशरथी रामः ॥[2]

इति विसर्गसंधिः ॥[3]

सोचि । स[4] इति प्रथमैकवचनान्तस्य तदो रूपं तस्य ग्रहणमेतत् । पादग्रहणेन ऋक्पादः श्लोकपादोपि गृह्यते । अत एवोदाहरणद्वयमाह । **सेमामविड्ढि** । **सैष दाशरथी राम** इति । तथा चोक्तं **काशिकायां** वृत्तौ । 'पादग्रहणेनात्र श्लोकपादस्य ग्रहणं केचिदिच्छन्ति । तेनैतदपि सिद्धं भवति ॥

सैष दाशरथी रामः सैष राजा युधिष्ठिरः[5] ।' इति

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेगात् प्रसादे **युगलमिति विसर्गाभिधस्वादिसंध्योः** ॥

इति संधिप्रकरणम् ॥[6]

---

१. पूर्येत P, C. २. After it—पादपूरणमिति किम् । स एषः । P, B1; लोपे चेत् पादपूरणमिति किम् । स एषः । B2. ३. इति विसर्गसंधिः dropped D1, D2. ४. स इति dropped Bc1, Nc1, Dc1. ५. After it—सैष कर्णो महात्यागी सैष भीमो महाबलः ॥ Bc2. ६. इति संधिप्रकरणम् dropped D1, D2.

अथ स्वादिप्रक्रिया ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥१।२।४५॥

धातुप्रत्ययवर्जमर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् ॥

अथ स्वादिप्रक्रिया। तत्र तावदजन्तान् पुंलिङ्गानकारान्तादिक्रमेण व्युत्पादयितुकामः प्रातिपदिकसंज्ञामाह। **अर्थवत्**। **धातुप्रत्ययवर्जमिति**। धातुवर्जं प्रत्ययान्तवर्जं चेत्यर्थः। ननु चान्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नेति ज्ञापितं 'सुप्तिङन्तं पदम्' इत्यन्तग्रहणेन तत् किमेवं व्याख्यायते। नैष दोषः। संज्ञाविधौ हि निषेधः। न चायं संज्ञाविधिः। किं तर्हि। निषेधविधिः। **अर्थवदिति**। अत्रार्थशब्दोऽभिधेयवाची।

'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु'। इत्यभिधानात्।

तेनाभाववचनानां शशविषाणादिशब्दानामपि प्रातिपदिकसंज्ञा स्यात्। अभावो ह्यभिधेयो भवति। तच्चाभिधेयं चतुर्विधं। जातिगुणक्रियाद्रव्यभेदेन। अत एव चतुष्टयी शब्दानां प्रवृत्तिः। अर्थवदिति किम्। यदि त्वर्थवदिति नोच्येत तदा वनमित्यस्मिन्नव्युत्पन्ने शब्दे नान्तस्यावधेर्निरर्थकस्य संज्ञा स्यात् ततश्च सुप् स्यात्। ततश्च पदत्वान्नलोपः प्रसज्येत। ननु च 'अधातुरप्रत्ययः' इति पर्युदासावेतौ ततश्च नञिव युक्तमन्यसदृशार्थे तथा ह्यर्थगतिरिति न्यायेनार्थवतस्तत्सदृशस्यैव संज्ञा स्यात्। अतो नार्थोऽर्थवद्ग्रहणेन। न्यायस्यायमर्थः। नञ्युक्तमिवयुक्तं चान्यास्मिन् सदृशेऽर्थे प्रतीतिं जनयति। तथा ह्ययमर्थो लोके दृश्यते। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं क्षत्रियमानयति। न विसदृशलोष्टमानीय

---

१. The heading dropped P, B₁. २. प्रत्ययातिरिक्त° P, C, D₁. ३. शब्दानां चतुष्टयी Dc3. ४. ह्यर्थवदिति Dc3. ५. नोच्यते No2, Dc3. ६. °अनर्थकस्य Dc3. ७. Dropped Bc1. ८. Dropped Bc1. ९. °वग्रहणे No1. १०. मणिसदृशं लोष्ट° No1.

कृती भवतीति । नैष दोषः । अनर्थकोपि धातुरस्ति । तद्यथा । इङ् अध्ययन इति धातुः । अधिपूर्वस्यैवास्यार्थवत्त्वात् । यस्तु धातुपाठेर्थनिर्देशः स समुदायार्थमवयव आरोप्य कृतः । आरोपितार्थस्यापि गणपाठबलादेव धातुसंज्ञा । प्रत्ययोप्यनर्थकोस्ति । 'यावादिभ्यः कन्' । याव एव यावक इति । न ह्यत्र कनोन्वयव्यतिरेकाभ्यामर्थो ज्ञायते । विनापि कना यावशब्दादेवार्थप्रतीतेः । तस्मात् 'अर्थवत्' इति वक्तव्यम् । अधातुरिति किम् । हन्तेर्लङि शपूलुकि 'हल्ङ्याब्–' इति लोपे अटि चाहन् । अत्र हन्तिग्रहणेनैव गृह्यत इति कृतेप्यटि हन्तिर्धातुरेवेति धातुनिषेधं विना संज्ञा स्यात् ततश्च नलोपः प्रसज्येत । ननु च प्रत्ययग्रहणेनाप्रत्यय इति निषेधः स्यात् । मैवम् । प्रातिपदिकसंज्ञायां हि नलोपकार्यम् । नलोपे प्रत्ययलक्षणेनाप्रत्यय इति निषेधो न प्रवर्तत इत्यत्र 'न ङिसंबुद्ध्योः' इति निषेधो ज्ञापकः । यदि हि प्रत्ययलक्षणेनाप्रत्यय इति संज्ञानिषेधः स्यात्तर्हि राजन्नित्येवमादावपि तत एव संज्ञानिषेधे 'न ङिसंबुद्ध्योः' इति व्यर्थं स्यात् । अप्रत्यय इति किम् । काण्डे इत्यत्र प्रथमाद्विवचनान्ते शब्दे प्रत्ययान्तनिषेधं विना 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः प्रसज्येत । ननु च काण्डशब्दस्य प्रातिपदिकत्वाद्विभक्त्या चैकादेशे कृते 'अन्तादिवच्च' इत्यन्तवत्त्वादस्त्येव प्रातिपदिकत्वमिति कृतेप्यप्रत्ययग्रहणे ह्रस्वः स्यादेव । न स्यात् । अप्रत्ययग्रहणसामर्थ्यात् । अन्यथा ह्यप्रत्ययग्रहणमनर्थकं स्यात् ॥

१. धातोरधि° Dc1, Bc1. २. अस्य dropped Nc1, Dc1, Bc1. ३. अत्र dropped Dc1. ४. कनोप्यन्वय° Nc2, Bc1, Dc3, Dc4; कनान्वय° Dc1, Nc1. ५. तिङि लुकि Dc1. ६. °लक्षणेना° Nc1, Dc2. ७. न लोपः कार्यः Bc1, Dc3. ८. °प्रत्ययलक्षणो निषेधो Dc3. ९. Dropped Nc1.

प्रत्ययः ॥३।१।१॥ परश्च ॥३।१।२॥ ङ्याप् प्रातिपदिकात् ॥४।१।१॥

इत्यधिकृत्य

प्रत्ययः । परश्च । ङ्याप् प्रातिपदिकात् । इत्यधिकृत्येति । एतानि त्रीणि सूत्राण्यधिकृत्योच्यन्त इत्यर्थः । तानि च क्रमेण व्याख्यामः[१] । प्रत्ययः । प्रतियन्त्यनेनार्थमिति प्रत्यय इत्यन्वर्थसंज्ञा । इत ऊर्ध्वमा पञ्चमाध्यायपरिसमाप्तेर्याननुक्रमिष्यामः प्रत्ययसंज्ञास्ते ज्ञेयाः प्रकृत्युपपदोपाधिविकारान् वर्जयित्वा । परश्च । प्रत्ययः प्रकृतेः परः स्यादित्यधिकारो योगे योग उपतिष्ठते । परिभाषा वा । चकारो बहुलाधिकारविहितानामप्युणादीनां परत्वविकल्पो मा भूदिति । ङ्याप् प्रातिपदिकात् । इत ऊर्ध्वमा पञ्चमाध्यायपरिसमाप्तेः स्वादिषु कप्पर्यन्तेषु प्रकृतित्वेनाधिक्रियते ङ्याप् प्रातिपदिकादिति । ङीप्ङीष्ङीनां सामान्यग्रहणं 'ङी' इति । टाप् डाप् चापाम् 'आप्' इति । प्रातिपदिकमुक्तम् । तेषां समाहारद्वन्द्वो ङ्याप्प्रातिपदिकादिति । यद्यपि प्रत्ययपरत्वेन पारिशेष्यात् ङ्याप्प्रातिपदिकमेव प्रकृतिर्लभ्यते तथापि वृद्धावृद्धावर्णस्वरद्व्यच्लक्षणप्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कार्यम् । अन्यथा समर्थ विशेषणमेतत्[२] स्यात् 'समर्थानां प्रथमाद्वा' इति समर्थात् प्रत्ययविधानात् । ततश्च ज्ञानामपत्यमित्यत्र 'उदीचां वृद्धात्' इति प्रातिपदिकावस्थायामवृद्धस्यापि ज्ञशब्दस्य समर्थावस्थायां[३] षष्ठीबहुवचने वृद्धत्वमस्तीति फिञ् स्यात् । तथा च 'प्राचामवृद्धात् फिन् बहुलम्' इत्यपि वृद्धविशेषणं प्रातिपदिकत्वेऽस्ति[४] । समर्थत्वे[५] नास्तीति न स्यादित्यादि प्रयोजनं महाभाष्यादवगन्तव्यम् । विस्तरभयान्न लिख्यते । अथ ङ्याब्ग्रहणं किमर्थम् । न प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापिग्रहणं भवतीत्येव सिद्धम् । न सिध्यति । प्रातिपदिकस्य स्वरूपग्रहणे सा परिभाषा । किं च ङ्याबन्तात्

१. व्याख्यास्यामः Dc_3, Dc_4. २. समर्थविशेषण° Nc_2, Dc_2. ३. सामर्थ्यावस्था° Nc_1. ४. °त्वेऽप्यस्ति Dc_4. ५. समर्थत्वेन Dc_1.

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥४।१।२॥

ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः । सुङस्योरुकारेकारौ जशटङपाश्चेत्संज्ञार्थाः ॥

तद्धितविधानार्थं च तद्ग्रहणं कार्यम् । अन्यथा विप्रतिषेधात् तद्धित एव स्यान्न ङ्यापौ । कालितरा । खट्वातरा ॥

स्वौजसमौट् । **सुङस्योरित्यादि** । **संज्ञार्था** इति । सु इत्यादि संज्ञा प्रयोजनं येषां ते तथोक्ताः । अयं भावः । सु इत्यत्रोकार उच्चारणार्थः सन् सुसंज्ञार्थः । ङसेरिकारः षष्ठ्येकवचनाद्विशेषणार्थः सन् ङसिसंज्ञार्थः । जसो जकार औकारेण सहासंदिग्धोच्चारणार्थः सन्नितरथा ह्यौकारस्यावादेशे कृते संदेहः स्यात् कीदृक् प्रत्यय इति । शसः सकार औटष्टकारश्चत्वेनासंदिग्धोच्चारणार्थः सन् । इतरथा 'औङः शी' इत्युक्ते टस्येदं ग्रहणं डस्य वेति संदेहः स्यात् । औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः सन् । टाइत्यत्र[1] टकारः 'टाङसिङसामिनात्स्याः' इत्यत्र विशेषणार्थः सन् । चतुर्थ्येकवचनादिषु ङकारो 'घेर्ङिति' इति विशेषणार्थः सन्[2] । सुपः पकारः सुबिति प्रत्याहारार्थः । इत्वं चैषां यथायोगम् 'उपदेशेऽजनुनासिक इत्' 'हलन्त्यम्' 'चुटू' 'लशक्वतद्धिते' इति सूत्रैः । संख्याकर्मादयश्च स्वादीनामर्थाः सूत्रान्तरैर्विहिताः 'बहुषु बहुवचनम्' इत्यादिभिः 'कर्मणि द्वितीया' इत्येवमादिभिश्च । तैः सहास्यैकवाक्यता भवति । कर्मणो बहुत्वे बहुवचनं शस् स्यात् । कर्मण एकत्व एकवचनम् । कर्मणो द्वित्वे द्विवचनमौ भवतीत्येकवाक्यता ज्ञेया । तत्रेदं वैयाकरणसिद्धान्तरहस्यम् । इदं तावत् केषांचिन्मतम्[3] । स्वार्थद्रव्यलिङ्गसंख्याकर्माद्यात्मकः पञ्चकः प्रातिपदिकार्थ इति । अन्येषां तु स्वार्थद्रव्यलिङ्गात्मकस्त्रिक इति । तत्र स्वार्थो नाम विशेषणम् । तच्च कदाचित् स्वरूपं जातिर्गुणो

---

१. अत्रत्यः for इत्यत्र Nc2. २. सन् dropped Bc1. ३. °न्मते Dc1, Nc1.

विभक्तिश्च ॥१।४।१०४॥

सुप्तिङौ विभक्तिसंज्ञौ स्तः। सु औ जस् इति प्रथमा। अम्

द्रव्यं वा स्यात्। द्रव्यं नाम विशेष्यम्। तदपि कदाचित् जातिर्गुणो द्रव्यं वा स्यात्। तत्र यदा शब्दरूपेण विशिष्टा जातिरुच्यते गौरिति तदा गोशब्दस्य स्वरूपं विशेषणत्वात् स्वार्थो भवति। जातिस्तु विशेष्यत्वाद् द्रव्यम्। यदा तु जातिविशिष्टो गुण उच्यते पटस्य शुक्लो गुण इति तदा जातिर्विशेषणत्वात् स्वार्थः शुक्लगुणो विशेष्यत्वाद् द्रव्यम्। यदा तु गुणविशिष्टं पटादि द्रव्यमुच्यते शुक्लः पट इति तदा विशेषणत्वाद् गुणः स्वार्थः विशेष्यत्वात् पटो द्रव्यम्। यदा[1] पुनर्द्रव्यं द्रव्यान्तरस्य विशेषणं स्यात् 'यष्टीः प्रवेशय' इत्यादौ तदा यष्ट्यादिकं विशेषणत्वात् स्वार्थः द्रव्यान्तरं पुरुषादि विशेष्यत्वाद् द्रव्यमेव। क्वचित् संबन्धोपि स्वार्थः स्याद्यत्र संबन्धनिमित्तः प्रत्ययः स्यात्। यथा दण्डीति। अत्र दण्डपुरुषसंबन्धो विशेषणम्। दण्डीति द्रव्यम्। क्वचित् क्रियापि स्वार्थः। यत्र क्रियानिमित्तः प्रत्ययो यथा पाचक इति। क्रियाकारकसंबन्ध एव स्वार्थ इत्यन्ये। लिङ्गं स्त्रीत्वादि। संख्या एकत्वादि। कर्मादयो वक्ष्यमाणाः कारकविशेषाः। धातोस्तु क्रियैव वाच्येत्याचार्याणामविवाद एव। तत्र पञ्चकप्रातिपदिकार्थपक्षे संख्याकर्मादयः प्रातिपदिकेनैवोच्यन्ते विभक्तयस्तु तद्द्योतिकाः[2]। त्रिकपक्षे विभक्तयो वाचिकाः। तत्र त्रिकप्रातिपदिकार्थपक्षमेव युक्तत्वादङ्गीकृत्य 'बहुषु बहुवचनम्' विध्यर्थताश्रिताचार्यवर्यैः[3]। ततस्तैः सहास्यैकवाक्यता स्यात्॥

विभक्तिश्च। चकारः पुरुषादिसंज्ञासमावेशार्थः। अन्यथैकसंज्ञाधिकारे वचनप्रामाण्यात् पर्यायेण स्युः। तिङो विभक्तित्वे प्रयोजनं 'न विभक्तौ तुस्माः' इति। सुपस्त्वेतच्चान्यच्च त्यदाद्यत्वादि। पूर्वाचार्यैः स्वादीनां त्रिकाणां कृताः प्रथमादिसंज्ञाः कथयति। **सुऔजस्** इत्यादिना॥

---

१. यदा तु पुन° Nc2, Dc2, Dc3. २. °द्योतकाः Dc3. ३. सिद्धयर्थताश्रिता° Nc1, Dc1.

औट् शस् इति[1] द्वितीया । टा भ्याम् भिस् इति तृतीया । ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी । ङस् ओस् आम् इति षष्ठी । ङि ओस् सुप् इति[2] सप्तमी ॥

सुपः ॥१।४।१०३॥

सुबिति प्रत्याहारः । सुपस्त्रीणि त्रीणि[3] पदान्येकैकश[4] एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ॥

द्व्येकयोर्द्विवचनैकवचने[5] ॥१।४।२२॥

द्वित्वैकत्वयोरेते[6] स्तः ॥

सुपः । प्रत्याहार इति । प्रथमैकवचनमारभ्या सुपः पकारात् । अथ कपः पकारेण ग्रहणं कस्मान्न स्यात् । सप्तमीपकारस्य वैयर्थ्य-प्रसङ्गात् । तस्य हि प्रत्याहार एव प्रयोजनं नानुदात्तत्वं[7] तस्य सुप्त्वादेव सिद्धत्वात् । कपः पकारस्य त्वनुदात्तत्वमस्ति प्रयोजनम् ॥

द्व्येकयोः । द्व्येकयोरिति भावप्रधानो निर्देशः । अन्यथा बहुत्वाद्बहुवचनं स्यादित्यभिप्रेत्याह । द्वित्वैकत्वयोरिति । कर्मादयोपरे विभक्तीनां वाच्यास्तदीये एकत्वादावेकवचनादि भवति । अत्र येषां मतं त्रिकः प्रातिपदिकार्थ इति तत्पक्षे एतत् सूत्रं विध्यर्थम् । तथा हि । ङ्याप् प्रातिपदिकात् स्वादयो लस्य तिबादय इत्येकवचनद्विवचने सामान्येन विहिते तयोरनेन द्वित्वैकत्वे वाच्यत्वेन विधीयेते । अन्यथा यदीदं सूत्रं नोच्येत ततो निर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति प्राति-पदिकात् स्वादयो विधीयमानास्त्रिक एवार्थे स्युः । धातोरपि तिबादयः क्रियायामेव स्युर्नैकत्वादौ । येषां तु मते पञ्चकः प्रातिपदिकार्थस्तत्पक्षे

---

१. इति dropped P, B2. २. इति dropped B1, B2, D3, D5. ३. त्रीणि dropped B1. ४. वचनान्ये° P, C, D2, B1. ५. °द्विवचनैकवचने P. ६. भवतीति Dc3. ७. °दात्तत्वादि Dc4.

बहुषु बहुवचनम् ॥१।४।२१॥

बहुत्व एतत् स्यात् ॥

पञ्चाप्यर्थाः प्रातिपदिकवाच्या इति विनाप्येतेन वचनेन प्रातिपदिकाद्वि- धीयमानाः स्वादयो निर्दिष्टार्थत्वेनैकत्वादौ स्युः । ततस्त्वनियमेन प्राप्ता अनेन नियम्यन्ते । एकत्व एकवचनमेव द्वित्वे द्विवचनमेवेति । 'अव्ययादाप्सुपः' इत्यव्ययादुत्पन्नानां सुपां सुंलुग्वचनं ज्ञापकं निःसंख्येभ्योप्यव्ययेभ्यः स्वादय उत्पद्यन्त इति ॥

बहुषु । अयमपि भावपरो निर्देशः । एवं तर्हि भावस्यैकत्वाद् 'बहुषु—' इति बहुवचनं न घटते । नैष दोषः । यस्मात् संख्याधारस्य द्रव्यस्य यो भेदस्तं बहुत्वे गुणेध्यारोप्य 'बहुषु—' इति बहुवचन- निर्देशः कृतः संख्यावाची बहुशब्दो न वैपुल्यवाचीति ज्ञापनार्थम् । तेनावैपुल्यं बहुवचनस्य वाच्यम् । तेन बहुरोदन इति वैपुल्यवाचिनो बहुशब्दादेकवचनमेव स्यात् । एतदपि सूत्रं त्रिकप्रातिपदिकार्थपक्षे विधायकं पञ्चप्रातिपदिकार्थपक्षे नियामकम् । प्रातिपदिकार्थविचारस्तु 'स्वौजसमौट्—' इति सूत्रकृतः ॥

एतद्व्याख्यानेनैव व्याख्यातप्रायत्वेन त्यक्तं सूत्रत्रयं व्याख्यायते । 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' ॥१।२।५८॥ जाते- रेकत्वात्तदाख्यायामेकवचने प्राप्ते विकल्पेन बहुवचनार्थं विधिः । जात्यर्थो बहुवत् स्यादिति यावत् । ततश्च तद्विशेषणानामपि बहुवचनम् । संपन्ना यवाः । संपन्नो यवः । जातीति किम् । देवदत्तः । आख्यायां किम् । काश्यपप्रतिकृतिः काश्यपः । जातिशब्दोपि प्रतिकृतिमाचष्टे । एकस्मिन् किम् । व्रीहियवौ । संख्याप्रयोगे निषेधः । एको व्रीहिः ॥

---

१. अत° Dc$_3$. २. लुग्वचनं Nc$_2$. ३. गुणाधारे Dc$_2$. ४. तेन वैपुल्यं बहुवचनस्य वाच्यं नेति बहु' Nc$_2$, Dc$_2$; न वैपुल्यं बहुवचनस्य वाच्यं तेन बहु° Nc$_1$. ५. तेन dropped Bc$_1$. ६. सूत्रे कृतः Dc$_3$, Dc$_4$. ७. बहुवचनाय Dc$_1$. Nc$_1$; बहुवचनविधिः Dc$_2$, Bc$_1$. ८. विशेषणानामपि Nc$_1$, Bc$_1$.

राम[1] सु[2] इति स्थिते रुत्वविसर्गौ। रामः। राम[3] राम औ इति स्थिते।

'अस्मदो द्वयोश्च' ॥१।२।५९॥ एकत्वे द्वित्वे चास्मदो बहुवचनं वा। अहं करोमि। आवां कुर्वः। वयं कुर्मः। सविशेषणस्य निषेधः। अहं देवदत्तो ब्रवीमि। युष्मदि गुरावेकेषाम्*। त्वं मे गुरुः। यूयं मे गुरवः॥

'फल्गुनीप्रोष्ठपदानां च नक्षत्रे'॥ १।२।६०॥ फल्गुन्योः प्रोष्ठपदयोश्च नक्षत्रयोर्द्वित्वे बहुवचनं वा। कदा पूर्वाः फल्गुन्यः। कदा पूर्वे फल्गुन्यौ। कदा पूर्वाः प्रोष्ठपदाः। कदा पूर्वे प्रोष्ठपदे। नक्षत्रे किम्। फल्गुन्यौ माणवकौ॥

राम सु[4] इति स्थिते रामशब्दस्याव्युत्पन्नस्य 'अर्थवत्—' इति प्रातिपदिकसंज्ञायां प्रातिपदिकार्थैकत्वविवक्षायां प्रथमैकवचनं सु। सूत्रकृते[5] उकारस्येत्संज्ञायां लोपे च कृते राम स् इति स्थित इत्यर्थः। **रुत्वविसर्गाविति**। 'ससजुषो रुः' इति रुत्वम्। 'खरवसानयोः—' इति विसर्गः। रामत्वं पुंस्त्वमेकत्वं तदधिष्ठानमित्यमी रामपदेर्था-[6]श्चत्वारः। एवमूह्यं पदान्तरे। **राम राम औ इति स्थिते** इति। रामद्वयवाचके रामशब्दद्वये[7] स्थिते सति द्वित्ववाचके औ इत्यस्मिन् विवक्षिते सत्युच्यत इत्यर्थः॥

---

१. Before this P, D_1, C have—'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' [जातिर्नामायमेकोर्थस्तदभिधाने एकवचनमेव प्राप्तं तत इदमुच्यते। जातेराख्या जात्याख्या तस्यां C] एकस्मिन्नर्थे बहुवचनं वा स्यात्। जात्यर्थो बहुवद्भवतीत्यर्थः। तेन वि (तद्वि D_1) शेषणानामजातिशब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते। संपन्नो यवः। संपन्ना यवाः। जातिग्रहणं किम्। देवदत्तो यज्ञदत्तः (यज्ञदत्त इति D_1) आख्यायामिति किम्। काश्यपप्रतिकृतिः काश्यपः। भवत्ययं जातिशब्दः। न च तेन (नत्वनेन D_1) जातिराख्यायते। किं तर्हि। प्रतिकृतिः। एकस्मिन्निति किम्। व्रीहियवौ। संख्याप्रयोगे प्रतिषेधो वक्तव्यः*। एको यवः संपन्नः। सुभिक्षं करोति। 'अस्मदो द्वयोश्च'॥ अस्मदेकत्वे द्वित्वे च बहुवचनं वा स्यात्। अहं ब्रवीमि। आवां ब्रूवः। वयं ब्रूमः। सविशेषणस्य प्रतिषेधो वक्तव्यः*। अहं देवदत्तो ब्रवीमि। युष्मदि गुरावेकेषाम्*। त्वं मे गुरुः। यूयं मे गुरवः। २. स् P, D_2, B_1, B_2. ३. राम औ D_1. ४. सू Nc$_2$, Dc$_3$. ५. तत्र कृते Dc$_3$. ६. °पदार्था° Nc$_2$. ७. °शब्दस्य द्वये Dc$_1$.

सरूपाणामेकशेष एकविभक्तौ ॥१।२।६४॥

सरूपाणां मध्ये एक एव शिष्यते नेतरे एकविभक्तौ परतः ॥

सरूपाणाम् । रूपशब्दः स्वभाववाची । समानं रूपं येषां ते सरूपाः । 'ज्योतिर्जनपदरा—' इति समानस्य सः । सरूपाणामिति निर्धारणे षष्ठीत्याह । **सरूपाणां मध्य** इति । समानजातीयस्यैव निर्धारणं भवति न विजातीयस्य । तेन सरूप एव शिष्यते । एकस्यां विभक्तौ परतो यानि सरूपाणि प्रातिपदिकानि दृष्टानि तेषां मध्ये एक एव सरूपः नेतरे सरूपा इत्यर्थः । अनुत्पन्नायामेव विभक्तौ एकशेषः । कृते एकशेषे विभक्त्युत्पत्तिः । अथवा सविभक्तिकानामेकशेषः । कथम् । विभज्यत अनेन प्रातिपदिकार्थ इति विभक्तिः कारकम् । परशब्द इष्टवाची । **एकविभक्तौ** । एकस्मिन् कारके परत इष्टे विवक्षिते यानि सरूपाणि तेषां मध्ये एक एव शिष्यते नेतर इति । कारकं हि विवक्षितत्वात्[१] स्वनिमित्तां विभक्तिं जनयतीति सविभक्तिकानामेकशेषः[२] । सह विवक्षायां चायमेकशेषो नान्यथा । ननु च जातिः पदार्थः । जातिश्चैकैव । तत्रैकत्वादर्थस्य बहूनां शब्दानां प्रसङ्ग एव नास्ति । तत् किमेकशेषारम्भेण । व्यक्तिपक्षेप्यनेकार्थाभिधानसामर्थ्यं द्व्यादिवदभ्युपेयम् । उच्यते । जातिपक्षेप्यक्षा इत्यादावनेकशब्दत्वं स्यात् । न हि विभीतकदेवनशकटाक्षेष्वनुस्यूतं किंचित् सामान्यमस्ति । व्यक्तिपक्षेपि वृक्षश्च वृक्षश्चेति वाक्येनेकशब्ददर्शनाद् विरूपेषु द्वन्द्वदर्शनादनेकेषामर्थानामेकेन शब्देनाभिधानमशक्यमिति यावन्तस्तेर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति । इष्यते चैकशब्दत्वं तस्मादेकशेष आरभ्यते । समानामित्येव वक्तव्ये रूपग्रहणं भिन्नेप्यर्थे[३]

१. निमित्तत्वात् Nc1. २. °नामेवैकशेषः Nc2, Dc1, Dc2. ३. भिन्नेष्वर्थेषु Nc1.

प्रथमयोः पूर्वसवर्णः ॥६।१।१०२॥

अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते

नादिचि ॥६।१।१०४॥

अवर्णादचि न पूर्वसवर्णदीर्घः । वृद्धिरेचि । रामौ ॥

यथा स्यात् । अक्षाः । अन्यथा अक्षशब्दस्य विभीतकशकटाक्षादिवाचकत्वेन सरूपत्वेऽप्यर्थभेदादेकशेषो न स्यात् । स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यते । यथा भूवादय इत्यत्र वादयश्च वादयश्च वादयः । बहुव्रीहिः शेषः । एकग्रहणं किम् । द्विबह्वोः शेषो मा भूत् । एकविभक्ताविति किम् । पयः पयो जरयतीत्यत्र प्रथमाद्वितीययोः सरूपयोरेकशेषो मा भूत् ॥

प्रथमयोः । प्रथमाशब्दो विभक्तिविशेषरूढस्तत्साहचर्याद् द्वितीयापि प्रथमाशब्देनोच्यत इत्यभिप्रेत्याह । **प्रथमाद्वितीययो**रिति । 'अतो गुणे' इति यदकारे पररूपत्वं तदकः सवर्णदीर्घत्वमेव बाधते न पूर्वसवर्णदीर्घत्वम् । 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति । पूर्वग्रहणम् अग्नीत्यत्र पक्षे परसवर्णो मा भूत् । दीर्घग्रहणं त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम् । इति **प्राप्ते** इति । इति सूत्रेण राम औ इत्यत्र पूर्वसवर्णदीर्घे प्राप्ते इत्यर्थः ॥

नादिचि । आदिति किम् । अग्नी । अचीति किम् । रामान् । 'वृद्धिरेचि' इति वृद्धिरेव स्यादित्यर्थः ॥

---

१. B_2 has अकः after अचि. २. दीर्घत्वे प्राप्ते D_3. ३. °दीर्घ एकादेशः B_2; न पूर्वसवर्णः D_3. ४. °विशेषे Dc_2. ५. सवर्णे Dc_2. ६. After it—अनेन न पूर्वसवर्णनिषेधः Dc_3.

चुटू ॥१।३।७॥

प्रत्ययाद्यौ चुटू इतौ स्तः[१] । इति जलोपः[२] ।

न विभक्तौ तु स्माः ॥१।३।४॥

विभक्तिस्थास्तवर्गसकारमकारा इतो न । इति[३] न सकारलोपः । एकशेषः । पूर्वसवर्णदीर्घः । रामाः ॥

चुटू । 'चुटू' 'षः प्रत्ययस्य' इत्येकस्मिन्नेव योगे कार्ये पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम् । तथा चाग्रे वक्ष्यति । 'चुटू' इत्यस्यानित्यत्वात् न चस्येत्संज्ञेति । तेन[४] 'तेन वित्तश्चुञ्चुप्चणपौ' । केशचञ्चुः । अवटीट[५] इत्यादि सिद्धम् । **इति जलोप** इति । बहुत्वविवक्षायां बहुवचनम् । राम जस् इति स्थिते जकारस्येत्संज्ञायां लोप इत्यर्थः ।

न विभक्तौ । 'हलन्त्यम्' इतीत्संज्ञायां प्राप्तायां निषेधारम्भः[६] । विभक्ताविति किम् । 'अचो यत्' 'ऊर्णाया युस्' 'रुधादिभ्यः श्नम्' । अनित्योयं निषेध इति 'इदमस्थमुः' इति मकारस्येत्संज्ञापरित्राणार्थादुकारानुबन्धाज् ज्ञायते । तेन 'किमोत्' 'इटोत्' इत्यत्रेट्संज्ञानिषेधो न । **इति न सकारलोप** इति । जस इति शेषः । **एकशेष** इति । 'सरूपाणाम्–' इति विभक्त्युत्पत्तेः पूर्वं सविभक्तिकस्य वा । **पूर्वसवर्णदीर्घ** इति । 'अतो गुणे' इति[७] पररूपस्य बाधकः । **रामा** इति । रुत्वविसर्गौ ॥

---

१. प्रत्ययाद्यौ चुटू dropped B_2. २. जाहादिवर्जं कर्णजाहमिति जलोपः B_2. ३. इति dropped Dc_1, Dc_2, Dc_4. ४. Dropped Nc_1, Dc_2. ५. अवटीटं Dc_1. ६. निषेधार्थोयमारम्भः Dc_1, Nc_1. Dc_3. ७. 'अतो गुणे' इति dropped Nc_2.

एकवचनं संबुद्धिः ॥२।३।४९॥

संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् ॥

एङ् ह्रस्वात् संबुद्धेः ॥६।१।६९॥

एङन्तात् ह्रस्वान्ताच्च[1] हल् लुप्यते संबुद्धेश्चेत्[2][3] । [4]हे राम । हे रामौ । हे रामाः ॥

अमि पूर्वः ॥६।१।१०७॥

अकोमि परतः पूर्वरूपमेकादेशः[5] स्यात्[6] । रामम् । रामौ ॥

एकवचनम् । ननु सुग्रहणमेव कस्मान्न कृतम् । न च सप्तमी-बहुवचनेतिव्याप्तिः । संबोधनप्रथमाधिकारादिति चेदुच्यते । प्रत्यय-मात्रस्य संज्ञार्थमेकवचनं ग्रहणम् । अन्यथा पूर्वसूत्रेण तदन्तस्यैव संज्ञा विहितेति तदन्तस्यैव स्यात् ॥

एङ् ह्रस्वात् । ननु च एङ्ग्रहणं किमर्थम् । यतो हे अग्ने हे वायो इत्यादावपि प्रागेव संबुद्धि[10]गुणात् ह्रस्वादित्येव लोपः स्यादिति[11] चेदुच्यते । नित्यत्वात् परत्वाच्च संबुद्धिगुण एव बलीयानिति[12] प्रथमं स एव स्यात् । तत्र कृते ह्रस्वात्परः संबुद्धेर्हल् नेति लोपो न स्यात् । अत एङ्ग्रहणं कर्तव्यम् । हे **राम** । हे **रामौ** । **हे रामा** इति । अत्र संबोधनाभिव्यक्त्यै हे शब्दः प्रयुक्तः ॥

अमि । 'प्रथमयोः पूर्वसवर्णः' इत्यतः पूर्वसवर्णग्रहणेनुवर्तमानेपि पूर्वग्रहणं पूर्व एव यथा स्यात् पूर्वसवर्णान्तरतमो मा भूत् । तेन कुमारीमित्यत्र त्रिमात्रो न ॥

---

१. ह्रस्वाच्च P, D_5. २. After it–परः D_4. ३. After it–स्यात् B_2, D_2. ४. Before it—संबोधनाभिव्यक्त्यर्थं क्वचिद्धेशब्दः प्राक् प्रयुज्यते. B_1; B_2 has हे शब्दः प्राक् प्रयुज्यते. ५. पूर्वरूप एकादेशः D_1. ६. स्यात् dropped P, D_1. ७. संबोधने Dc_2. ८. °वचनग्रहणम् Bc_1, Dc_3, Dc_4. ९. °सूत्रे Dc_1. १०. °ग्रहणात् Nc_2. ११. इति चेत् dropped Nc_2. १२. बलवानि° Dc_3.

लशक्वतद्धिते ॥१।३।८॥

तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः । इति शलोपः । पूर्वसवर्णदीर्घः ॥

तस्माच्छसो नः पुंसि ॥६।१।१०३॥

तस्मात् पूर्वसवर्णदीर्घात् परस्य शसः सस्य नः स्यात् पुंसि ॥

रषाभ्यां नो णः समानपदे ॥८।४।१॥

रेफषकाराभ्यां परस्य नस्य णः स्यात् समानपदे ॥

अट्कुप्वाङ्नुम्व्यवायेपि ॥८।४।२॥

लश इति । शलोप इति । राम शस् इति स्थिते शसः शस्य लोप इत्यर्थः ॥

तस्मात् । तस्मादिति किम् । एतान् गाः पश्य । शस इति किम् । रामाः । पुंसीति किम् । बह्वीर्धेनूः । इह तु चञ्चाप्रतिकृति-श्चञ्चा । 'लुम्मनुष्ये' इति कनो लुपि कृते 'लुपि युक्तवद् व्यक्तिवचने' इति पुंसोपि स्त्रीलिङ्गता । तेन नत्वं न । चञ्चाः पश्य ॥

अट्कु । आङ्ग्रहणं 'पदव्यवाये' इत्यस्य प्रतिषेधस्य बाधनार्थम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । तेन बृंहणमित्यत्रानुस्वार-व्यवाये नुमभावेपि णत्वं स्यात् । प्रेन्वनमित्यत्र तु सत्यपि नुमि अनुस्वाराभावे णत्वं न । किं पुनरिह सूत्रे समुदाये वाक्यपरिसमाप्ति-राहोस्वित् प्रत्येकम् । तत्र समुदाये इति पक्षो न घटते । सर्वैरडादिभि-र्व्यवायाभावात् । यदि द्वितीयस्तदा अर्केणेत्येवमादावनेकेन व्यवाये न

---

१. °वर्जितप्रत्यया° C, D_1, D_5; °वर्जं प्रत्यया° B_2; वर्जाः प्रत्यया° B_1, P. २. शकारलोपः B_1, D_3, D_5. ३. सकारस्य नकारः C, B_1, D_1. ४. After it—रामान् B_1. ५. The Sûtra with the Vṛitti dropped D_5. ६. D_4 has इति वर्तमाने in place of the Vṛitti; Before it—एकपदस्थाभ्यां D_3. ७. नस्य णत्वं स्यादिति वर्तमाने D_2. ८. हाहाः पश्य Dc_3. ९. प्रतिषेधस्य dropped Nc_1, Dc_1, Dc_2. १०. °नुस्वारस्य Dc_3. ११. व्यवायनुम° Nc_2. १२. वाक्ये Nc_1, Dc_1. १३. व्यवायेन न Nc_1, Dc_1.

अट्कवर्गपवर्गआङ्नुम् एतैर्व्यस्तैः समस्तैश्च व्यवधानेपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे ॥ इति णत्वे प्राप्ते

पदान्तस्य ॥८।४।३७॥

पदान्तस्य नस्य णत्वं न स्यात् । रामान् ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥१।४।१३॥

प्रत्ययो यस्मात् क्रियते तदादिशब्दः प्रत्यये परेऽङ्गसंज्ञः स्यात् ॥

स्यात् । तस्माद् व्यवाये णत्वं स्यादित्युपलक्षयितुमडादीनां ग्रहणम् । कतरस्मिन् व्यवाये । अडादिभिर्व्यवाये । ते चाडादयो व्यस्ताः समस्ता वा व्यवायमुपलक्षयितुं शक्नुवन्तीत्यभिप्रेत्याह । **एतैर्व्यस्तैः समस्तैश्च व्यवधाने** इति । **इति णत्वे प्राप्ते** इति । रामानित्यत्रेति शेषः ॥

यस्मात् । यस्माद्धातोः प्रातिपदिकाद्वा । तदादीति । स आदिर्यस्य स तदादिः । यस्मादिति किम् । तदादीत्यनेन संबन्धात् संज्ञिनिर्देशार्थम् । प्रत्ययग्रहणं किम् । न्यविशत अत्र 'नेर्विशः' इति नेरुपसर्गाद्विधिरस्तीति तदादेरङ्गसंज्ञा स्यात् । ततश्चोपसर्गात् प्रागडागमः स्यात् । विधिग्रहणं किम् । प्रत्ययपरत्वमात्रे मा भूत् । स्त्री इयती । इदं परिमाणमस्या इति वतुप् । 'किमिदम्भ्याम्—' इति वस्य घः । तस्येय् । 'इदंकिमोः—' इति इदम ईश् । 'यस्येति च' इतीकारलोपः । 'उगितश्च' इति ङीप् । स्त्रीशब्दात् सोर्हल्ङ्यादिलोपः । स्त्री इयती इति स्थिते यदि विधिग्रहणं न क्रियते इयतीशब्दे प्रत्यये परतः स्त्रीशब्दस्याङ्गसंज्ञा स्यात् । ततश्च 'यस्येति च' इति लोपः प्रसज्येत । ननु च 'असिद्धवदत्राभात्' इत्यसिद्ध ईलोपस्तत् कुतोयं प्रसङ्गः । उच्यते । विधिग्रहणात् प्राक् भाचासिद्धमित्यभिप्रायो

---

१. अट्कवर्गाः पवर्गाः B_2. २. समस्तैर्व्यव° C, D_3. ३. स्यात् dropped P, D_1, D_4. ४. °स्तदादिः B_1. ५. विधीयते C, B_2. ६. तदादिशब्दरूपं प्रत्यये परेऽङ्गसंज्ञं B_2. ७. B_1 drops परे. ८. समस्ता व्यस्ता वा Dc_1. ९. अप्रत्यय इति किम् Dc_1. १०. After it—इति Dc_3. ११. यलोपः Nc_2.

टाङसिङसामिनात्स्याः ॥७।१।१२॥

अकारान्तादङ्गाट्टादीनां क्रमादिनादयः स्युः[१] । णत्वम्[२] । रामेण ॥

सुपि च ॥७।३।१०२॥

यञादौ सुपि परेकारान्ताङ्गस्य[३] दीर्घः स्यात् । रामाभ्याम् ॥

अतो भिसँ[४] ऐस् ॥७।१।९॥

अकारान्ताद्[५] भिसँ[६] ऐस् स्यात् ॥

लक्ष्यते । अथवा भाधिकारीयमँसिद्धमनित्यमिति[७] । तदादिवचनं स्यादिप्रत्ययसहितस्य नुमाद्यागमसहितस्य चाङ्गसंज्ञा यथा स्यात् । करिष्यामि । कुण्डानि । असति हि तदादिग्रहणे यस्मात् प्रत्ययविधिस्तस्य संज्ञा स्यात् न तस्यादेः समुदायस्य । ततः प्रत्ययस्याविहितत्वात् । पुनः प्रत्ययग्रहणं किम् । श्रिये इदं श्र्यर्थम् । अस्त्यत्र चतुर्थ्येकवचनस्य विधिरित्यसति पुनः प्रत्ययग्रहणे श्रीशब्दस्यार्थशब्दे परतोऽङ्गसंज्ञा स्यात् । ततश्चेयङ् स्यात् । सति तु [८]विहिते प्रत्यये परत इत्येवं विज्ञायते । यश्चातो विहितः स लुप्त इति न भवति ॥

टाङसि । **णत्व**मिति । राम टा इति स्थिते 'चुटू' इति टस्येत्त्वाल्लोपे इनादेशे आद्गुणे च कृते पश्चात् 'अट्कुप्वाङ्—' इति णत्वमित्यर्थः ॥

सुपि च । **अतो भिस** ।

एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति ।
कृतेप्येत्वे भौतंपौर्व्यादैस्तु[१०] नित्यस्तथा सति ॥

---

१. आदेशाः स्युः B_2, D_3. २. णत्वम् dropped B_1, D_4. ३. परेकाराङ्गस्य D_2; परेतोऽङ्गस्य C, B_1, D_1, D_3. ४. भिस् P, B_1, B_2, C. ५. अकारान्तादङ्गात् B_2. ६. भिस् P, B_1, B_2, C. ७. °मसिद्धत्वम° Bc_1. ८. विहिते Dc_1, Nc_1. ९. Before it—यञादौ परेकारान्तस्याङ्गस्य दीर्घः स्यादिति भाव: Dc_2. १०. भौतपूर्व्यादैस्तु Dc_1, Dc_2.

अनेकाल् शित् सर्वस्य ॥१।१।५५॥

रामैः ॥

ङेर्यः ॥७।१।१३॥

अतोऽङ्गात् परस्य ङे इत्येतस्य यादेशः स्यात्। स्थानिवत्त्वात् सुप्कार्यम्। 'सुपि च' इति दीर्घः। रामाय। रामाभ्याम्॥

अनेकाल् शित् सर्वस्य। इत्यनेकाल्त्वात् सर्वादेशोऽयमैस्॥

ङेर्यः। स्थानिवत्त्वादित्यादि। चतुर्थ्येकवचने राम ङे इति स्थिते 'लशक्वतद्धिते' इतीत्त्वात् ङकारलोपे यादेशे च कृते 'स्थानिवदादेशोऽनल्विधौ' इति सुबादेशस्य यस्य स्थानिवत्त्वात् 'सुपि च' इति दीर्घः सुप्कार्यं भवति। ननु यञादौ दीर्घो विधीयत इत्यल्विधिरयं तत् कथं स्थानिवत्त्वम्। नैष दोषः। अनल्विधाविति स्थानिनो योऽल् तमाश्रितो विधिर्निषिध्यते। यथा प्रपठ्येत्यत्र क्त्वो वलादित्वमाश्रित इट् निषिध्यते। न चात्र यञादित्वं स्थान्यतिदेशेन किं तु स्वयमेवादेशस्येति। ननु चात्र स्थानिन एकारस्याल्त्वात्तदाश्रयं सुप्त्वमलाश्रयमेव। न। यस्मिन् कार्ये अल् एवासाधारणं रूपं निमित्तादित्वेनाश्रीयते अशि हलीत्यादि स एवाल्विधिः। 'सुपि च' इत्यत्र नैवंविधं किंचिदस्ति। केवलमुदाहरणे अलात्मकस्थानी। ननु च 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्यदन्तत्वसंनिपातेन जातो यादेशः कथमदन्तत्वं विहन्यात्। मैवम्। 'कष्टाय क्रमणे' इति निर्देशादनित्यत्वमस्याः परिभाषायाः। तेन दीर्घो भवत्येव। रामाभ्यामिति। 'सुपि च' इति दीर्घः॥

---

१. C drops the Sûtra. The Vṛitti—अनेकालादेशः शिच्च सर्वस्य स्यात् D3. २. इत्यस्य D6. ३. Dropped B1, D1, D4, D6. ४. सुप्कार्यं dropped D1. ५. 'सुपि च' इति दीर्घः dropped B1, B2. ६. Dropped Dc1, Nc1. ७. अल् Dc3. ८. इत्यत्र तु Nc1, Nc2.

बहुवचने झल्येत् ॥७।३।१०३॥

झलादौ[1] बहुवचने[2] परेतोऽङ्गस्यैकारः[3] स्यात्[4] । रामेभ्यः । रामात् । रामाभ्याम् । रामेभ्यः । रामस्य ॥

ओसि च ॥७।३।१०४॥

ओसि[5] परेतोऽङ्गस्यैकारः[6] स्यात्[7] । रामयोः[8] ॥

ह्रस्वनद्यापो नुट् ॥७।१।५४॥

ह्रस्वान्तान्नद्यन्तादाबन्तात्परस्यामो नुडागमः स्यात् ॥

बहुवचने । बहुवचने किम् । रामाभ्याम् । झलि किम् । रामाणाम् । 'सुपि' इत्यनुवर्तत एव । यजध्वम् । **रामादिति** । पञ्चम्येकवचने राम ङसीति स्थिते । इत्त्वात् ङकारेकारयोर्लोपे 'टाङसिङसामिनात्स्याः' इत्यादादेशो ङसः । अकः सवर्णे दीर्घः । **रामाभ्याम्** । **रामेभ्य** इति । पञ्चमीद्विवचनबहुवचनयोः क्रमाद् दीर्घस्त्वैत्वे[9] । **रामस्येति** । षष्ठ्येकवचने राम ङस् इति स्थिते इत्त्वात् ङलोपे 'टाङसिङसामिनात्स्याः' इति स्यादेशः ॥

ओसि । **रामयोरिति** । षष्ठीद्विवचने राम ओस् इति स्थिते एत्वायादेशरुत्वविसर्गाः ॥

ह्रस्व[10] । आमत्र षष्ठीबहुवचनं गृह्यते । एतत्[11] 'आमि सर्वनाम्नः सुट्' इत्यत्र प्रतिपादयिष्यते । तदेव ह्यामग्रहणमत्रानुवर्तते ॥

---

१. झलादिबहु° D_1. २. सुपि बहु° P, B_1, B_2, D_3. ३. °स्यैत् C. ४. Dropped P, B_2, D_2, D_4. ५. अतोऽङ्गस्य ओसि परे D_3. ६. °स्यैत् C. ७. Dropped D_1, D_2, B_2. ८. Before it—'एचोऽयवायावः' D_2. ९. After it—इति दीर्घः Dc_2. १०. ह्रस्वनद्यापः Dc_2. ११. तत् Nc_1.

नामि ॥६।४।३॥

नामि परतोजन्तस्य[1] दीर्घः[2] । रामाणाम् । रामे । रामयोः । एत्वे[3] कृते ।

आदेशप्रत्यययोः[4] ॥८।३।५९॥

इण्कवर्गाभ्यां परस्यादेशप्रत्यययोरपदान्तस्य सस्य मूर्धन्यादेशः स्यात्[5] । रामेषु । पदान्ते तु हरिस्तत्र[6] । एवं कृष्णमुकुन्दादयः[7] ॥

नामि । ननु च रामाणामित्यत्र 'सुपि च' इति दीर्घेण सिद्धम् । किमर्थं 'नामि' इत्यारभ्यते । उच्यते । अवश्यं हरीणामित्यादि-सिद्ध्यर्थमेतदारभ्यं[9] तदन्यार्थं कृतमेतदर्थमपि स्यादिति भावः । **रामाणा**मिति । षष्ठीबहुवचने आमि नुटि 'नामि' इति दीर्घत्वे[10] 'अट्कुप्वाङ्—' इति णत्वम् । **रामे** इति । सप्तम्येकवचने ङि ङकारलोपः । 'आद्गुणः' इति गुणः । **रामयो**रिति । 'ओसि च' इत्येकारः । अयादेशः । **एत्वे कृते** इति । सप्तमीबहुवचने राम सु इति स्थिते 'बहुवचने झल्येत्' इत्येत्वे कृते इत्यर्थः ॥

आदेश । आदेशप्रत्यययोरिति षष्ठी भेदेन संबध्यते । आदेशो यः सकारः प्रत्ययावयवो यः सकार इति । **रामेष्विति** । सकारस्य[11] सोष्मणो घोषस्यान्तरतम्यात् तादृश एव षकारो भवति मूर्धन्यः ॥

---

१. °जन्तस्याङ्गस्य B_1, C. २. After it—स्यात् C, D_3, D_5. ३. एत्वे कृते dropped P. ४. इण्कोरादेशप्रत्यययोः B_2. ५. Dropped P, D_1. ६. हरिस्त्राता B_1. ७. °मुकुन्दगोविन्दकेशवादयः शब्दाः D_1. ८. तद् No_1. ९. °दारम्भणीयम् Dc_2; °दारम्भः Bc_1. १०. दीर्घत्वं Dc_4. ११. Before it—विवृतस्य Dc_2, Dc_4.

सर्वादीनि सर्वनामानि ॥१।१।२७॥

सर्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः ॥

सर्व । विश्व । उभ । उभय । डतर । डतम । इतर[1] । अन्य । अन्यतर । त्वत् । त्व । नेम । सम । सिम । पूर्व[2] । पर । अवर । दक्षिण । अपर[3] । अधर । स्व । अन्तर । त्यद् । तद् । यद् । एतद् । इदम् । अदस् । एक । द्वि ।[4] युष्मद् । अस्मद् । भवत् । किम् । डतरडतमौ प्रत्ययौ । ततश्च[5] तदन्ताः शब्दा ग्राह्याः । एते सर्वादयस्त्रिलिङ्गाः[6] ॥

सर्वादीनि । सर्व आदिर्येषां तानि सर्वादीनि । तद्गुणसंविज्ञानो बहुव्रीहिः । सर्वेषां नामानि सर्वनामानीत्यन्वर्थसंज्ञा । तेन संज्ञोपसर्जनयोः सर्वनामत्वं न । एतच्च[7]ाग्रे स्वयमेव वक्ष्यति । ननु च 'सर्वनामानि' इत्यत्र 'पूर्वपदात् संज्ञायामगः' इति णत्वेन भाव्यम् । अस्मादेव निपातनान्न भवति । सर्वादिगणं पठति । **सर्वेत्यादि** । त्वशब्दोयमन्यवाची द्विः पठितः स्वरभेदात् । एक उदात्तोन्योनुदात्त इति **काशिकाकारमतम्** । ग्रन्थकारमतं तु एकोकारान्तोन्यस्तकारान्तो द्वावप्यनुदात्ताविति । भवतोकच् एकशेषः * । 'आ सर्वनाम्नः' । इत्यात्वम् । 'सर्वनाम्नस्तृतीया च' इत्यादीनि[8] प्रयोजनानि । **डतरडतमौ प्रत्ययाविति** । किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् । वा बहूनां जाति[9]परिप्रश्ने डतमच् इति । **ततश्च तदन्ता शब्दा** इति 'प्रत्ययग्रहणे यस्मात् स तदादेस्तदन्तस्य ग्रहणम्[10]' इति परिभाषया । ननु च

---

१. अन्य । अन्यतर । इतर C, D_3. २. B_1 has एक before पूर्व. ३. अपर dropped P, B_1, D_3, D_4, D_5. ४. After it—किम् B_1. ५. च dropped D_1, D_5, B_2. ६. After it—तत्र पुंलिङ्गत्वे रूपं नेयम् D_5. ७. तच्च Nc_2. ८. इत्येतानि Nc_2, Dc_4. ९. जाति dropped Nc_2. १०. ग्रहणम् dropped Dc_1, Dc_4.

जसः शी ॥७।१।१७॥

अकारान्तात् सर्वनाम्नः परस्य जसः शी स्यात् । शे इत् । सर्वे ॥

सर्वनाम्नः स्मै ॥७।१।१४॥

अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात् । सर्वस्मै ॥

ङसिङ्योः स्मात्स्मिनौ ॥७।१।१५॥

अतः सर्वनाम्नो ङसिङ्योः क्रमात् स्मात्स्मिनौ स्तः । सर्वस्मात् ।

'सुप्तिङन्तं पदम्' इत्यन्तग्रहणेन ज्ञापितं न संज्ञाविधौ तदन्तविधिरिति । सत्यम् । तथापि केवलयोः सर्वनामकार्याभावात् तदन्तग्रहणमित्यदोषः ॥

जसः शी । श इति । 'लशक्वतद्धिते' इति । स च सर्वादेशार्थः । अन्यथा 'आदेः परस्य' इत्यकारमात्रस्य स्यात् । दीर्घोच्चारणं 'नपुंसकाच्च' इत्येवमर्थम् । मधुनी । **सर्वे** इति । 'अर्थवत्—' इति प्रातिपदिकसंज्ञायां सर्वशब्दात् प्रथमाबहुवचनं जस् ॥

सर्वनाम्नः । अतः किम् । भवते । अथोत्रास्मै इत्यन्वादेशे अशि कृते सवर्णदीर्घे एकादेशः प्राप्नोति । तत्रैकपदाश्रयत्वादन्तरङ्गत्वात्पूर्वं स्मैभाव एव स्यात् पश्चादेकादेशः । पदद्वयाश्रयात् । **सर्वस्मै** इति । चतुर्थ्येकवचनस्य ङे इत्यस्य स्मै ॥

ङसिङ्योः । ङेरल्पाच्तरस्य पूर्वनिपाते प्राप्ते परनिपातो वैचित्र्यार्थः । **सर्वस्मादिति** । पञ्चम्येकवचनं ङसिः ॥

---

१. श इत् dropped B_2. २. आह्नुणः । सर्वे D_2. ३. परस्य ङेः D_4.
४. क्रमात् dropped D_1. ५. न । तत्रै° Nc_2. ६. °श्रयत्वात् Nc_2, Dc_3.

आमि सर्वनाम्नः सुट् ॥७।१।५२॥

अवर्णात् सर्वनाम्नः परस्यामः सुट्[1] स्यात्। ऐत्वषत्वे[2]। सर्वेषाम्। सर्वस्मिन्[3]। शेषं रामवत्। एवं विश्वादयोप्यकारान्ताः। उभशब्दो [4]द्विवचनान्तः। उभौ। उभौ। उभाभ्याम्। उभाभ्याम्। उभाभ्याम्। उभयोः। उभयोः।

आमि सर्वनाम्नः। 'आमि' इति सप्तमीनिर्देश उत्तरार्थः। इह तु 'सर्वनाम्नः' इति पञ्चमीनिर्देशात् षष्ठी[5]प्रकृतिर्भवति। आमीति षष्ठीबहुवचनं गृह्यते न ङेराम्। तस्य हि परत्वात् आट् याट् स्यादयः स्युः। तेषु[6] कृतेषु सुट्प्राप्तिरेव नास्ति। न हि द्वयोरादिलिङ्गयोः समुच्चयो घटते। यश्च घ.दाम् यश्च कास्प्रत्ययेत्याम् तावपि न गृह्येते। 'अननुबन्धकग्रहणे न सानुबन्धस्य[7]' इति परिभाषया। तौ हि सानुबन्धौ। **एत्वषत्वे** इति। सर्व आम् इति स्थिते सुट्। 'बहुवचने झल्येत्' इत्येत्वम्। 'आदेशप्रत्यययोः' इति षत्वम्। **सर्वस्मिन्निति**। सर्व ङि इति स्थिते 'ङसिङ्योः—' इति स्मिन्। **शेषं रामवदिति**[8]। जस्ङेङसिआम्ङि इति वचनपञ्चकव्यतिरिक्तं वचनषोडशकं रामशब्दवत् साधनीयम्। तानि रूपाणि चैवम्[9]। सर्वः। सर्वौ। सर्वम्। सर्वौ। सर्वान्। सर्वेण। सर्वाभ्याम्। सर्वैः। सर्वाभ्याम् ३। सर्वेभ्यः २। सर्वस्य। सर्वयोः २। सर्वेषु॥

उभशब्दो द्विवचनान्त इति। तस्य द्वित्ववाचकत्वात्। **उभौ उभौ** इति। प्रथमाद्वितीययोर्द्विवचनमौकारौ। **उभाभ्याम् ३** इति। तृतीयाचतुर्थीपञ्चमीद्विवचनानि। भ्यामः 'सुपि च' इति दीर्घः। **उभयोः। उभयोरिति**। षष्ठीसप्तमीद्विवचने। ओसौ 'ओसि च'

---

१. For सुट् C has सुडागमः. २. एत्वसत्वे P, B_1, D_3, D_4, D_5. ३. After it—सर्वयोः। सर्वेषु। D_5. B_1, P, C. ४. नित्यं द्विव° D_1. ५. °प्रकृति° Dc_2, Bc_1. ६. तेषु च Dc_4. ७. सानुबन्धकस्य Bc_1, Dc_3, Dc_4. ८. रामवत् Dc_3. ९. च dropped Nc_1, Nc_2, Bc_1.

तेस्य सर्वादिषु पाठः ‘ सर्वनाम्नस्तृतीया च ’ इत्यर्थः ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥१।१।३४॥

ऐतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्राप्ता सा जसि वा स्यात् । स्वाभिधेयापेक्षावधिनियमो व्यवस्था ।

इत्येकारः । यदि द्विवचनान्त एव तत् किमर्थोऽस्य सर्वादिषु पाठः । यतः ‘ सर्वनाम्नः स्मै ’ इत्यादीनां सर्वनामकार्याणामेकवचनबहुवचनविषयत्वम् । अकजपि सर्वनामसंज्ञां न प्रयोजयति । विशेषाभावात् । न हि तस्मादकचि के वा कृते रूपभेदः स्वरभेदो वास्ति । अथवाकच् तस्मान्न प्राप्नोत्येव द्विवचनटाब्विषयत्वादस्येत्याशङ्क्याह । तस्येत्यादि । अनेन तृतीया षष्ठी च यथा स्यादित्येवमर्थ इत्यभिप्रायः ॥

पूर्व । **व्यवस्थाया**मिति । गम्यमानायामित्यर्थः । **असंज्ञाया**मिति । संज्ञायामसत्याम् । यदि पूर्वादयः संज्ञारूपा न भवन्तीति यावत् । **गणपाठात् सर्वत्र या प्राप्ते**ति । गणे हि ‘ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ’ इति सूत्रं पठ्यते तेनास्मिन् विषये सर्वत्रैषां सर्वनामसंज्ञा प्राप्तानेन जसि विभाष्यते । **स्वाभिधेये**ति । अवधिर्मर्यादा तस्य नियमोवश्यंभावः । अवधिभावादभ्रंशः किंविशिष्टः । स्वाभिधेयापेक्षः । पूर्वादीनां स्वाभिधेयो यो दिग्देशकालस्वभावोर्थस्तमपेक्षते तेन वापेक्ष्यत इति स्वाभिधेयापेक्षः । अयमर्थः । पूर्वाद्यभि-

---

१. Before it—अन्यतरग्रहणे अन्यतमस्य सर्वनामसंज्ञा प्रतिषेधः (निषेधः D_1) शब्दान्तरं वा । उभशब्दस्य C, D_1, D_2. २. इत्येवमर्थः C; इत्येतदर्थम् D_5. ३. एषां D_3. ४. या सा dropped B_1, C, D_1, D_2, D_3. ५. °धेयापेक्षो° P. ६. विषयत्वात् Bc_1 ७. °पेक्ष्यः Nc_1, Bc_1. ८. °पेक्ष्यः Nc_1, Bc_1.

पूर्वे । पूर्वाः । व्यवस्थायां किम् । दक्षिणा गाथकाः । प्रवीणा इत्यर्थः । सत्यामपि व्यवस्थायां न नाम्नि । उत्तराः कुरवः ।

स्वमज्ञातिधनाख्यायाम् ॥१।१।३५॥

ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता सर्वनामसंज्ञा जसि वा स्यात् । स्वे । स्वाः । ज्ञातिधनाख्यायां तु । स्वाः । ज्ञातयोर्था वा ॥

धेयानां दिगादीनामर्थानां यत् पूर्वादित्वं तन्नियोगतः कमप्यवधिमपेक्ष्य स्यात् । तथा हि पूर्वदेशस्य यत् पूर्वत्वं तदवश्यं परं देशमवधिमपेक्षते । तथा परस्यापि यत् परत्वं तत् पूर्वम् । तस्मात् पूर्वादिशब्दवाच्यापेक्षेण केनचिदवधिनावश्यं भाव्यम् । तेन तस्यैवावधेर्यः पूर्वादिशब्दाभिधेयापेक्षोवधिभाव ऐकान्तिकः स व्यवस्थेति । **पूर्वे** । **पूर्वाः** इति । परस्मादवधेरिति गम्यते । **दक्षिणा** इति । सर्वनामसंज्ञाभावात् जसः शीभावो न । **प्रवीणा इत्यर्थ** इति । प्रावीण्यमात्रं निमित्तमुपादायावधिभावनिरपेक्ष एव दक्षिणशब्दो गाथकेषु वर्तत इति व्यवस्थात्र न गम्यत इति भावः । **सत्यामपी**त्यादि । अयं भावः। जम्बुद्वीपं सुमेरुं वावधिमपेक्ष्योत्तरशब्दः कुरुषु वर्तत इति व्यवस्था गम्यत एव किं तु इयं तेषां संज्ञेति न भवति सर्वनामसंज्ञेति ॥

स्वम् । **प्राप्तेति** । 'स्वमज्ञातिधनाख्यायाम्' इत्यस्मात् गणसूत्रात् । **स्वे** । **स्वा** इति । आत्मीया इत्यर्थः ।

---

१. Before it—परे । पराः । इत्यादि C. २. या प्राप्ता सर्वनामसंज्ञा सा जसि C, D5. ३. किम् C. ४. ज्ञातयः स्वा अर्था वा । D3. ५. °क्ष्यते Dc3. ६. °पेक्ष्य Dc3. ७. प्रवर्तत Dc3, Dc4. ८. जम्बू° Dc4.

अन्तरं बहिर्योगोपसंव्यानयोः ॥१।१।३६॥

बहिर्योगोपसंव्यानयोः[1] सर्वनामसंज्ञोन्तरशब्दो जसि तत्संज्ञो वा स्यात् । अन्तरे अन्तरा वा गृहाः । बाह्या इत्यर्थः[2] । अन्तरे अन्तरा वा शाटका परिधानीया इत्यर्थः ॥

पूर्वादिभ्यो नवभ्यो वा ॥७।१।१६॥

एभ्यः परयोर्ङसिङ्योः स्मात्स्मिनौ वा[3] । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । एवं परादीनामपि । शेषं सर्ववत् ।

अन्तरम् । बहिरित्यनावृत्तो देशस्तेन योगः संबन्धो बहिर्योगः । स चानावृत्तस्य बाह्यस्य वस्तुनो भवति । उपरि संवीयते विधीयते तदुपसंव्यानम् । 'कृत्यल्युट–' इति कर्मणि ल्युट् । अथवा संवीयत अनेनेति संव्यानम् । करणे ल्युट् । पश्चादुपशब्देन समासः । संव्यानस्य समीपमुपसंव्यानं परिधानीयमुच्यते । **सर्वनामसंज्ञे**ति । 'अन्तरं बहिर्योगोपसंव्यानयोः' इत्यनेन सूत्रेण । **तत्संज्ञ**[4] इति । सर्वनामसंज्ञ[5] इत्यर्थः । **बाह्या इत्यर्थ** इति । ग्रामबाह्याश्चाण्डालादिगृहा[6] इत्यर्थः । **परिधानीया इत्यर्थ** इति । न प्रावरणीया इति भावः ।

पूर्वादिभ्यः । **एवं परादीनामपी**ति । पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर इत्येतेषामपि रूपाण्येवमेव ज्ञातव्यानीत्यर्थः । **शेषं सर्ववदि**ति । जस् ङसि ङि इत्येतानि वचनानि वर्जयित्वान्येषु वचनेषु पूर्वादीनां नवानां रूपाणि सर्वशब्दस्येव ज्ञातव्यानीत्यर्थः । सर्वादीनां शब्दानां येषां यस्मिन्नर्थे यस्मिन्नुपाधौ च सर्वनामसंज्ञा भवति

---

१. बहिर्योगोपसंव्यानयोः dropped P, D_2, B_1 ; बहिर्योगोपसंव्यानयोरन्तरशब्दस्य सर्वनामसंज्ञा वा स्यात् B_2. २. इत्यर्थः dropped B_3. ३. वा स्तः B_2, D_3. ४. तत्संज्ञक Dc_3. ५. °संज्ञक Dc_3. ६. °श्चण्डालगृहा Nc_1.

सर्वादिः सर्वनामाख्यो न चेद्गौणोथवाभिधा।
पूर्वादिश्च व्यवस्थायां समोतुल्येन्तरोपुरि॥
परिधाने बहिर्योगे स्वोर्थज्ञात्यन्यवाच्यपि॥

प्रत्युदाहरणं तु। अतिक्रान्तः सर्वमतिसर्वः। तस्मै अतिसर्वाय

तानर्थानुपाधींश्च सार्धश्लोकेन सुखप्रतिपत्त्यर्थं संगृह्णाति। **सर्वादिरिति**। सर्वादिर्गणस्तर्हि सर्वनामसंज्ञो भवति। चेद् गौणो न। अप्रधानं न। अभिधा वा न। चेत् संज्ञारूपो न भवतीति। एतच्च सर्वेषां नामानि सर्वनामानीत्यन्वर्थसंज्ञाविज्ञानाल्लभ्यते। गौणत्वे संज्ञायां वा सर्ववाचकत्वं सर्वादीनां नास्तीति कृत्वा। **पूर्वादिश्च व्यवस्थायामिति**। न चेद् गौणोथवाभिधेत्येतदुत्तरत्र सर्वत्रानुवर्तते। एतच्चान्ते समुच्चयार्थादपिशब्दात् ज्ञायते। **स्वोर्थज्ञात्यन्यवाच्यपीति**। पूर्वादिगणः सप्तसंख्यो व्यवस्थायां गम्यमानायां सर्वनामसंज्ञो भवति। एतत्तु 'पूर्वपर–' इत्यादेर्गणसूत्राल्लभ्यते। **समोतुल्येति**। समशब्दो सदृशवाची सर्वनामसंज्ञः। एतदन्वर्थसंज्ञाविज्ञानाल्लभ्यते। **अन्तरोपुरि परिधाने बहिर्योगे** इति। अन्तरशब्दः सर्वनामसंज्ञो भवति यदि नगर्यां न वर्तते परिधाने बहिर्योगे च वर्तते। एतदपि 'अन्तरम्–' इत्यादेर्गणसूत्रादन्वर्थसंज्ञायाश्च लभ्यते। **स्वोर्थज्ञात्यन्यवाच्यपीति**। स्वशब्दः सर्वनामसंज्ञः स्याद्यदि धनज्ञातिवाची न भवति। एतेषामुदाहरणान्युक्तानि। **प्रत्युदाहरणं त्विति**। प्रत्युदाहरणमिति जात्यभिप्रायेणैकवचनम्। न चेद् गौण इत्यस्य प्रत्युदाहरणं वक्तुं सर्वशब्दस्य गौणतां दर्शयति। **अतिक्रान्तः सर्वमतिसर्व** इति। 'न बहुव्रीहौ' इत्यादेर्निषेधात् सर्वनामविधौ तदन्तविधेरभ्युपगमात्। **अतिसर्वाय देहीति**। एतत् प्रत्युदाहरणम्।

---

१. तुल्येन्तरापुरि P, B1. २. Dropped P, D1. ३. इति dropped Dc3.

देहि । सर्वो नाम कश्चित् तस्मै सर्वाय । पूर्वाय । समाय सदृशायेत्यर्थः । अन्तरायां पुरि । ग्रामयोरन्तरे तापसः । मध्य इत्यर्थः । स्वाय धनाय ज्ञातये वा ।

न बहुव्रीहौ ॥१।१।२९॥

बहुव्रीहौ सर्वादेः सर्वनामता न स्यात् । प्रियसर्वाय ।

सर्वनामत्वाभावात् स्वभावो न । अथत्राभिधेत्यस्य प्रत्युदाहरणमाह । **सर्वो नामे**त्यादि । पूर्वादिश्चेत्यस्य प्रत्युदाहरणं **पूर्वाये**ति । अत्र व्यवस्था न गम्यते । समोतुल्येत्यस्य प्रत्युदाहरणं **समाये**ति । सदृशायेत्यनेन समशब्दस्य तुल्यवाचितां दर्शयति । अपुरीत्यस्य प्रत्युदाहरणम् **अन्तरायां पुरी**ति । प्राकाराद्बहिर्वर्तिन्यामित्यर्थः । परिधाने बहिर्योगे इत्यस्य प्रत्युदाहरणं **ग्रामयोरन्तरे तापस** इति । **स्वाये**ति । स्वोर्थज्ञात्यन्यवाच्यपीत्यस्य प्रत्युदाहरणम् ॥

न बहु । अत्र वृत्तौ द्विधा सूत्रार्थो लभ्यते । बहुव्रीहाविति निषेधाधिकरणम् । बहुव्रीहौ संज्ञा न । बहुव्रीहेः संज्ञा नेति यावद् । बहुव्रीहाविति सत्राधिकरणं वा । बहुव्रीहौ यानि सर्वादीनि वर्तन्ते तानि सर्वनामसंज्ञानि नेति । 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतो 'बहुव्रीहौ' इत्यनुवर्तमानेपि भूतपूर्वेपि बहुव्रीहौ प्रतिषेधो यथा स्यात् । वस्यतेनेनेति वस्त्रम् । वस्त्रमन्तरं येषां ते वस्त्रान्तराः । वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः । अन्यथा 'विभाषा जसि' इति विभाषा स्यात् । प्रथमसूत्रस्योदाहरणमाह । **प्रियसर्वाय** इति । प्रियः सर्वो यस्य प्रियसर्वस्तस्मै प्रियसर्वाय । 'वा प्रियस्य पूर्वत्वम्' इति प्रियशब्दस्य पूर्वनिपातः । एतदुपन्यासस्तदन्तविधिज्ञापनाय । ननु चान्वर्थसंज्ञाविज्ञानादेवात्र सर्वनामसंज्ञा न स्यात् तत्

---

१. After it—आद्यायेत्यर्थः । P, B_1, B_2; D_5 has पराय after it. २. तापसाः D_3, D_5. ३. After it—चिर्कीर्षिते B_1. ४. अन्तरापुरीत्यस्य Dc_1. ५. अत्रावृत्तौ Dc_1. ६. Before it—बहुव्रीहिग्रहणं Bc_1, Dc_3, Dc_4. ७. अपि dropped Nc_2. ८. अयमुप° Nc_1; एतदुपन्यस्तं Dc_2. ९. °ज्ञापनार्थम् Dc_2.

सूत्रकारमते बहुव्रीहौ न सर्वनामता। भाष्यकारमते तु गौणत्वमात्रे। त्वत्कपितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनङ्गकार्यत्वेनाकच् स्यात्। स मा भूत् किं तु कप्रत्यय एव स्यादित्येतदर्थमिदं सूत्रमिति **न्यासकृन्मतम्** ॥

किमेतत्सूत्रारम्भेणेत्याशङ्क्याह। **सूत्रकारमत** इति। 'न बहुव्रीहौ' इति सूत्रश्रवणात् सूत्रकारमतमेवं प्रतिभाति। बहुव्रीहौ सर्वनामसंज्ञानिषेधो नोपसर्जनमात्रे इति भावः। **भाष्यकारमत** इति। भाष्यकारमतेऽन्वर्थसंज्ञाविज्ञानाद् गौणत्वमात्रे सर्वनामसंज्ञानिषेधात् 'न बहुव्रीहौ' इति सूत्रं व्यर्थमिति शेषः। तथा च महाभाष्यम्। "**गोनर्दीय** आह।

'अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ'।

त्वकत्पितृकः मकत्पितृक इत्येव भवितव्यमिति'। एतस्य तात्पर्यमुक्तं **कैयटेन**। '**गोनर्दीय** आहेति। सूत्रप्रत्याख्यानमेतत्। यथोत्तरं हि मुनित्रयस्य प्रामाण्यमिति'। **त्वत्कपितृक** इति। त्वं पिता यस्य अहं पिता यस्येति विगृह्य बहुव्रीहिसमासे कृते समासावयवयोः समासान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामसंज्ञकत्वात्। अज्ञाताद्यर्थविवक्षायाम् 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच् प्रसज्येत। तस्य हि स्मैप्रभृतीनामिवाङ्गाधिकारविहितत्वाभावात् स्वाद्युत्पत्त्यनपेक्षत्वात्। ततश्च त्वकत्पितृको मकत्पितृक इत्यनिष्टं रूपं स्यात्। तस्मात् सोकच् मा भूत्। 'प्रागिवात् कः' इति कप्रत्यय एव स्यादित्येतदर्थं 'न बहुव्रीहौ' इति सूत्रमिति **न्यासकृतः काशिकाविवरणपञ्जिकाकारस्य जिनेन्द्रबुद्धेर्मतमित्यर्थः**। तथा च **काशिकाविवरणपञ्जिकायामुक्तम्**। 'त्वं पिता अस्य अहं पिता अस्येति

---

१. Dropped D_1, D_2, B_2. २. सर्वाविद्वा° C. ३. नोपसर्जनत्वमात्रे Bc_1, Nc_2. ४. महाभाष्ये Bc_1, Dc_2. ५. Before it—इत्येतस्य तात्पर्यार्थं Dc_4. ६. मकत्पितृकः त्वकत्पितृकः Dc_2, Dc_4, Nc_1, Nc_2, Bc_1. ७. इत्येवं Dc_1, Dc_2, Dc_3. ८. भवितव्य इत्येकमिति Bc_1. ९. After it—शेषः Dc_3. १०. प्रतिप्रसज्येत Dc_3. ११, १२. यस्य Nc.

तृतीयासमासे ॥१।१।३०॥

तृतीयासमासे सर्वनामता न । मासपूर्वाय । तृतीयासमासार्थवाक्येऽपि न । मासेन पूर्वाय ॥

विगृह्य बहुव्रीहौ कृते अज्ञाताद्यर्थविवक्षायामसति प्रतिषेधे 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच् प्रसज्येत । ततश्च त्वकत्पितृको मकत्पितृक इत्यनिष्टं स्यात् । तस्मादकच् मा भूदिति प्रतिषेध आरभ्यते । तेन 'प्रागिवात् कः' इति क एव भवति । तत्र परतः प्रत्ययोत्तरपदयोश्चेति मपर्यन्तयोर्युष्मदस्मदोस्त्वमादेशयोः 'नद्यृतश्च' इति समासान्ते कपि च त्वत्कपितृको मत्कपितृक इति सिध्यति । ननु चान्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृते अकच् न भविष्यति । न ह्यत्र सर्वार्थता संभवति । विशेषविषयत्वात् । नैतदस्ति । स समुदायो हि विशेषे वर्तते । पूर्वपदं तु सर्वार्थताया अनपेतमेव' । इति ॥

तृतीया । तृतीयासमासार्थवाक्येऽपि नेति । अयमाशयः । 'विभाषा दिक्समासे बहुव्रीहौ' इत्यतः समासग्रहणेनुवर्तमानेऽपि पुनः समासग्रहणं गौणेऽपि तृतीयासमासे संज्ञानिषेधार्थं तृतीयासमासार्थं च वाक्यं तादर्थ्येन गौणस्तृतीयासमास इति कृत्वा तत्रापि निषेध इति । अत्र च लक्षणप्रतिपदोक्तपरिभाषया 'पूर्वसदृश–' इत्यादिनायं तृतीयासमासं वक्ष्यति । तस्येदं ग्रहणं न 'कर्तृकरण–' इत्यादेः । तेन त्वयका कृतं मयका कृतमिति सिद्धम् ॥

---

१. न तृती° B₂. २. तृतीयासमासे dropped D1, D2, D3. ३. सर्वादेः सर्व° B2. ४. रूपं स्यात् Dc3. ५. For अकच् न भविष्यति Dc1, Bc1, No1 have अकच्निरासो भविष्यति. ६. भवति Dc4. ७. After it—इति Dc3. ८. प्रवर्तते Dc4. ९. Dropped Dc2. १०. अत्रापि Dc1.

द्वन्द्वे च ॥१।१।३१॥

[1]उक्ता संज्ञा न । पूर्व[2]परावराणाम् ॥

विभाषा जसि ॥१।१।३२॥

द्वन्द्वे जसि वा सर्वनामता । वर्णाश्रमेतरे । वर्णाश्रमेतराः ॥

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥१।१।३३॥

एते जसि वा [3]सर्वनामसंज्ञाः[4] । तयः प्रत्ययः । प्रथमे । प्रथमाः । द्वितये । द्वितयाः । [5]इत्यादि । शेषं रामवत् । नेमे । नेमाः । शेषं सर्ववत् । [6]सर्वादिमध्ये पाठात् ॥

द्वन्द्वे च । उक्तेत्यादि । द्वन्द्वे समासे सर्वादीनां सर्वनामसंज्ञा नेत्यर्थः ॥

विभाषा । पूर्वेण नित्ये निषेधे प्राप्ते विभाषारभ्यते । व्यवस्थितविभाषाविज्ञानाज्जसः कार्यं प्रति विभाषा । तेनाकच् न भवति । क एव भवति । वर्णाश्रमेतरकाः । अकचि हि[7] सति तस्य सर्वनामान्तःपातित्वात् पाक्षिकः शीभावः स्यात् । कप्रत्यये तु सति तेन व्यवधानादेष प्रसङ्गो न ॥

प्रथम । **द्वितय** इति । 'संख्याया अवयवे तयप्' । आदिना । चरमे । चरमाः । अल्पे । अल्पाः । अर्धे । अर्धाः । **शेषं रामवदिति** । एतेषां सर्वादिमध्ये पाठाभावादिहापि जसः कार्यं प्रति विभाषा । तेन एतेभ्यः क एव स्यान्नाकच् । नेमशब्दात्त्वकच् । सर्वादिमध्ये पाठात् । उभयशब्दस्य [8]तयप्रत्ययान्तस्यापि जस्यन्तरङ्गत्वाद्गणपाठान्नित्या सर्वनामसंज्ञा उभये इति ॥

---

१. Before it—द्वन्द्वसमासे B_1; द्वन्द्वे चोक्ता D_4. २. पूर्वापराणाम् D_3; पूर्वापराधराणाम् D_5; पूर्वापरावराधराणाम् P, D_1, D_2. ३. सर्वनामसंज्ञकाः C. ४. After it—स्युः D_2, P, C. ५. Dropped B_2, D_2. ६. अस्य सर्वादि° C. ७. विहिते Nc_1. ८. तयप्प्रत्यया° Dc_1.

तीयस्य ङित्सु वा सर्वनामता वाच्या* । द्वितीयस्मै । द्वितीयाय । द्वितीयस्मात् । द्वितीयात् । द्वितीयस्मिन् । द्वितीये[२] । शेषं रामवत् । एवं तृतीयः । निर्जरः[३] ।

जराया जरसन्यतरस्याम् ॥७।२।१०१॥

जराशब्दस्य जरस् वा स्यादचि[४] । तदन्तविधिरत्रेष्यते । निर्जरसौ । निर्जरसः । निर्जरसम् । निर्जरसौ । निर्जरसः । निर्जरसा । केचिदादौ इनातौ आदेशाविच्छन्ति पूर्वविप्रतिषेधेन[५] । [६]निर्जरसिन । निर्जरेण । निर्जरसे । निर्जराय । निर्जरसैः ।

तीयस्येति । अत्र सजातीयशब्दस्य सर्वनामसंज्ञा न भवति । 'अर्थवद्ग्रहणे नानर्थकस्य' इति ॥

जराया । अष्टन आ 'विभक्तौ' इत्यतो 'विभक्तौ' इत्यनुवर्तते । तेन जरान्तिकमित्यादौ जरस्भावो न । **निर्जरसाविति** । निर्गतो जरायाः । प्रादिसमासे ह्रस्वे च कृते 'एकदेशविकृतमनन्यवद्भवति' इति जराशब्दस्य जरसादेशः । **निर्जरसेति** । परत्वाज्जरसादेशः । पश्चाददन्तत्वाभावादिनादेशो न । एतत्तु **भाष्यकारमतम्** । **केचिदादावित्यादि** । केचिदिति भाष्यकारादन्ये[७] । निर्जर टा इत्यादौ स्थिते 'टाङसिङसामिनात्स्याः' इतीनादौ प्राप्ते जरसादेशे च 'विप्रतिषेधे परं कार्यम्' इत्यत्र परशब्दस्येष्टवाचित्वात् पूर्वविप्रतिषेधेन पूर्वबलीयस्त्वेन प्रथममिनातावादेशौ भवतः पश्चाज्जरसादेश इतीच्छन्तीत्यर्थः । **निर्जरसैरिति** ।

---

१. वा ङित्सु D_1, D_5. २. After it—इत्यादि D_1. ३. After it—'एकदेशविकृतमनन्यवद्भवति'।. D_5 ४. After it—विभक्तौ परतः B_1; विभक्तौ B_2, D_3. ५. After it—भिस ऐस् इच्छन्ति P. ६. After it—निर्जरसैः। निर्जरसे। निर्जरसात्। निर्जरसाम्। पक्षे हलादौ च रामवत् for निर्जरेण...रामवत् D_1, D_5: ऐस्करणात् पूर्वविप्रतिषेधाद्वा। निर्जरसैः। निर्जरसे। निर्जरसः। निर्जरसात्। इत्यादि। पक्ष हलादौ च रामवत्। B_2; ऐसि कृते पश्चाज्जरसादेशः पूर्वविप्रतिषे° then follows B_2—D_4. ७. महाभाष्यकारा° Dc_3, Dc_4.

ऐस्करणात् पूर्वविप्रतिषेधेन निर्जरैः । निर्जरसः । निर्जरसात् । इत्यादि । पक्षे हलादौ रामवत् ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥६।१।६३॥

पाददन्तनासिका मास हृदय निशा असृज् यूष दोष यकृत् शकृत् उदक आसन इत्येतेषां पदादय आदेशाः क्रमात् स्युः

'अतो भिस ऐस्' इत्यैस्भावे कृतेजादित्वाज्जरसादेशः । 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्यस्याः परिभाषाया अनित्यत्वात् निर्जरसे इति चतुर्थ्येकवचनं निर्जरसः निर्जरसात् इति पञ्चम्येकवचने क्रमेण **भाष्यकारतदन्येषां** मतेन रूपे । आदिना । निर्जरसः । निर्जरसोः । निर्जरसाम् । निर्जरसि । निर्जरसोः । **पक्षे** इति । जरसभावपक्षे हलादौ विभक्तौ च रामशब्दवद्रूपाणि निर्जरशब्दस्य ज्ञेयानीत्यर्थः ॥

पद्दन्नः । इह शस्प्रभृतयो निमित्तत्वेनोपात्तास्ते च विना प्रकृत्या न घटन्त इति तेषु प्रकृत्यन्तराद्विहितेषु विधीयमानाः पदादय आदेशा विज्ञायन्ते तेष्वादिश्यमानेषु शस्प्रभृतयोनुरूपामेव पादादिकां प्रकृतिमाक्षिपन्तीत्याह । **पाददन्ते**त्यादि । केचिदत्र 'छन्दसि' इत्यनुवर्तयन्त्यपरे पुनरविशेषेणेच्छन्ति । तथा हि भाषायामपि पदादयः प्रयुज्यन्ते ।

'व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥' इत्येवमादयः ।

---

१. P, D_2 drop ऐस्करणात्......षेधेन. २. हलादौ च P, D_3. ३. भाष्यकारतदन्येषां मतेन dropped Dc_1; भाष्यकारमतादन्येषां मतेन Dc_4. ४. च विभक्तौ Nc_2, Bc_1, Dc_3.

शसादौ वा । प्रभृतिग्रहणात् क्वचित् तद्धितेपि । पदः । पदा । पद्भ्याम् । इत्यादि । दतः । दता । दद्भ्याम् । इत्यादि । मासः । मासा । माभ्याम् । इत्यादि ॥

सुडनपुंसकस्य ॥१।१।४३॥

प्रभृतिग्रहणादिति । प्रकारार्थोयं प्रभृतिशब्द इत्यभिप्रायः । तद्धितग्रहणमुपलक्षणार्थं तेन दोषणीत्यादौ औङः श्यामपि दोषन् । नासिकाया यत् तस् क्षुद्रेषु नसादेशः* । नस्यः । नस्तः । नः क्षुद्रः । नासिक्यो वर्णः । नासिक्यं नगरम् । अत्र न । पदः । पदेत्यादि । पादशब्दस्य दन्तशब्दस्य मासशब्दस्य च क्रमेण शसादौ पदादेशे ददादेशे मासादेशे च कृते रूपाणि । पक्षे स्वादिषु पञ्चसु रामवत् । **माभ्यामिति** । मास्भ्यामिति स्थिते 'ससजुषो रुः' इति रुत्वम् । 'भोभगोअघोअपूर्वस्य' इति यत्वम् । 'हलि सर्वेषाम्' इति यलोपः ॥

सुडनपुं° । सुडिति प्रत्याहारग्रहणम् । आ औटष्टकारात् । तत्र पञ्चैव वचनान्यन्तर्भवन्तीत्याह । **स्वादिपञ्चवचनानीति** ।

'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोयं[२] क्रियया सह यत्र नञ् ॥
प्राधान्यं तु विधेर्यत्र प्रतिषेधेप्रधानता[३] ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥

इति प्रसज्यप्रतिषेधपर्युदासयोर्लक्षणे[४] । तत्र यद्यनपुंसकस्येति प्रसज्यप्रतिषेधः[५] स्यात् तदायमर्थः स्यान्नपुंसके न भवतीति । ततश्च जसः शेः[६] सर्वनामसंज्ञा न स्यात् । पर्युदासपक्षे अनपुंसकस्य नपुंसकव्यतिरिक्तस्येत्यर्थः[७] स्यात् । तेन न विधिर्न प्रतिषेधः ।

---

१. पञ्चसु च Dc4. २. प्रसह्य° Dc3. ३. प्रतिषेधोप्रधानता Dc3. ४. प्रसह्य° Dc3. ५. प्रसह्य° Dc3. ६. शिः Dc4. ७. °त्ययमर्थः Dc3.

सुट्[1] प्रत्याहारः । स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥

स्वादिष्वसर्वनामस्थाने ॥१।४।१७॥

कप्[2]प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः[5] पूर्वं[3] पदसंज्ञं स्यात् ॥

यचि भम् ॥१।४।१८॥

यकारादिष्वजादिषु[4] स्वादिष्वसर्वनामस्थानेषु पूर्वं[5] भसंज्ञं स्यात् न पदसंज्ञम् ॥

तेन जसः[6] शेः 'शि सर्वनामस्थानम्' इत्यनेन संज्ञा सिद्धा भवतीति चेतसि कृत्वा पर्युदासपक्षमाश्रित्याह । **अक्लीबस्येति** ॥

स्वादिषु । अत्र यदि सप्तमीबहुवचनादारभ्य आ कपः प्रत्यया गृह्येरन् असर्वनामस्थान इति प्रतिषेधं न कुर्यात् । कृतश्चासौ । ततो ज्ञायते प्रथमेकवचनादारभ्येति । ननु च राजेत्यत्र पदसंज्ञा न स्यात् प्रत्ययलक्षणेनासर्वनामस्थान इति निषेधात् । ततश्च नलोपो न स्यात् । नैष दोषः । यतो यदयं 'न ङिसंबुद्ध्योः' इति निषेधं शास्ति तज् ज्ञापयति सौ पदत्वं स्यादिति । अन्यथा संबुद्धिग्रहो व्यर्थः स्यात् ॥

यचि भम् । यचीति वर्णग्रहणं सप्तमीनिर्दिष्टम् । अतो 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति तदादिविधिनात्र भाव्यमित्यभिप्रेत्याह । **यकाराजादिष्विति** । नभोङ्गिरोमनुषां वति भत्वं वाच्यम् * । नभसा तुल्यं नभस्वत् । अङ्गिरस्वत् । मनुष्वत् । वृषण्वस्वश्वयोर्भत्वम् * । वृषण्वसुः । वृषण्[7]श्वः ॥

---

१. सूडिति C. २. कप्रत्यया° D_3, D_4, D_5. ३. Dropped D_1. ४. यकाराजादिषु D_1, Com. ५. Before it—परतः C, B_2, D_2. ६. जसः शसः शिः Dc_3. ७. वृषण्वश्वः Dc_3.

अल्लोपो नः ॥६।४।१३४॥

अन्नन्तस्य भस्याङ्गस्याकारस्य[1] लोपः स्यात् ॥

रेषाभ्यां[2] नो णः समानपदे ॥८।४।१॥

एकपदस्थाभ्यां[3] रेफषकाराभ्यां परस्य नस्य णः स्यात् । यूष्णः । यूष्णा ॥

नलोपः प्रातिपदिकान्तस्य ॥८।२।७॥

प्रातिपदिकान्तस्य[4] पदान्तस्य नस्य लोपः स्यात् । नलोपस्यासिद्धत्वान्न दीर्घत्वम् । यूषभ्याम् । इत्यादि[6] ॥

अल्लोपः । तपरकरणं नञ्समासोयमिति शङ्कानिरासार्थम् ।

रषाभ्याम् । यूष्ण इत्यादि । यूषशब्दस्य शसि वा यूषन्नादेशः । भसंज्ञा । अल्लोपः । णत्वम् ।

नलोपः । अत्र च[5] 'पदस्य' इत्यनुवर्तते । सूत्रस्थं च प्रातिपदिकग्रहणम् । असमस्तमेव 'सुपां सुलुक्' इति षष्ठ्या लुकं कृत्वा निर्दिष्टम् । ततश्च 'अन्तस्य' इत्युभाभ्यां संबध्यते प्रातिपदिकान्तस्य पदान्तस्येति चेतसि कृत्वाह । **प्रातिपदिकान्तस्य पदान्तस्य नस्य लोपः स्यादिति** । **नलोपस्येति** । यूषन् भ्यामिति स्थिते । नलोपे कृते 'सुपि च' इत्यदन्तत्वाद् दीर्घत्वं प्राप्नोति तन्न भवति । 'नलोपः सुप्स्वर—' इति सुब्विधिं प्रति नलोपस्यासिद्धत्वात् ॥

---

१. °स्याकारलोपः C, D_1, D_4. २. रषाभ्यामिति णत्वम् । यूष्णः D_3. ३. D_1 drops the Vṛitti. ४. पदान्तस्य प्रातिपदिकान्तस्य D_5. ५. Dropped D_2. ६. Dropped Dc_3.

विभाषा ङिश्योः ॥६।४।१३६॥

अन्नन्तस्य भस्याङ्गस्याकारलोपो[1] वा स्यात् ङिश्योः परतः। यूष्णि। यूषणि। पक्षे सर्वनामस्थाने च रामवत्॥

पदादयः पृथक्शब्दा इत्येके[2]। द्वयोरह्नोर्भवो द्व्यह्नः[3]।

संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ॥६।३।११०॥

संख्याविसाय[4]एतत्पूर्वस्याह्नस्याहन्नादेशो वा स्यात्[5] ङौ[6]। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। व्यह्नि। व्यहनि। व्यह्ने। सायाह्नि। सायाहनि। सायाह्ने।

विभाषा ङिश्योरिति। ङिरिति सप्तम्येकवचनम्। शीति 'नपुंसकाच्च' इति यः शी विहितस्तस्येदं ग्रहणम्। न 'जस्शसोः शिः' इति। तस्मिन् भसंज्ञाया अभावात्॥

द्वयोरह्नोर्भवः द्व्यह्न इति। तद्धितार्थविवक्षायां 'तद्धितार्थ–' इति समासः। 'कालाट्ठञ्' इति ठञ्। तस्य 'द्विगोर्लुगनपत्ये' इति लुक्। 'राजाहः सखिभ्यश्च टच्' इति टच् समासान्तः। 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः॥

संख्या। 'संख्याविसायेभ्यः' इत्येवं वाच्ये पूर्वशब्दस्याधिकस्य ग्रहणमधिककार्यसूचनार्थम्। तेन सायाह्न इत्यत्र मलोपः सिद्धः स्यात्। **द्व्यहनि**। द्व्यह्नि। इति। 'विभाषा ङिश्योः' इति वाल्लोपः। द्व्यह्ने इति। आदेशाभावपक्षे व्यह्नीत्यादि। व्यह्न इति प्रादिसमासः। शेषं द्व्यह्नशब्दवत्। सायमह्नः सायाह्नः। सायंशब्दोऽह्नरेकदेशवाची। 'संख्याविसाय–' इति ज्ञापकादेकदेशिसमासः। शेषाण्येतेषां रूपाणि रामशब्दवत्॥

इत्यदन्ताः[7]॥

---

१. भस्याकार° P, C, D4. २. Dropped B1. ३. इति केचित् D6. ४. एतत् dropped C. ५. Dropped B1. ६. ङौ परे B1. ७. इत्यदन्ताः dropped No2.

विश्वपाः । विश्वपौ ।

दीर्घाज्जसि च ॥६।१।१०५॥

दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न [1]स्यात् । [2]सवर्णदीर्घः । विश्वपाः । विश्वपाम् । विश्वपौ ।

आतो धातोः ॥६।४।१४०॥

आकारान्तस्य [3]भस्य धातोरालोपः [4]स्यात् । विश्वपः । विश्वपा । [5]विश्वपाभ्याम् । इत्यादि । एवं [6]शङ्खध्मादयः । धातोः किम् । [7]हाहान् । आदन्तत्वाच्छसो नत्वाभाव इत्येके । हाहाः । [8]हाहा । हाहाभ्याम् । इत्यादि । हलि विश्वपावत् । आत इति योगविभागादधातोरप्यालोपः क्वचित् । क्त्वः । श्नः ।

विश्वपाः । विश्वं पातीति विश्वपाः । 'विजुपे छन्दसि' इत्यनुवर्तमाने 'आतो मनिन्क्वनिब्वनिपश्च' इति विच् । पा रक्षणे अस्माद्धातोः 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् स्वादयः ॥

दीर्घात् । ननु च विश्वपा इत्यत्र पूर्वसवर्णदीर्घे सवर्णदीर्घे वा विशेषो नास्ति तत् [9]किमर्थं निषेधः क्रियते । उच्यते । वातप्रम्य इत्यादौ पूर्वसवर्णदीर्घो मा भूदित्येतदर्थमवश्यमेतत् सूत्रं कार्यम् । तदन्यार्थं [10]कृतमिहार्थमपि स्यात् । **हाहा** । अस्य ङे वृद्धिरेचि ङसिङसोः सवर्णदीर्घः । ओसि वृद्धिः । ङौ गुणः ॥

इत्यादन्ताः ॥

---

१. Dropped B_1. २. सवर्णे दीर्घः B_2. ३. भस्य dropped P. ४. Dropped B_1. ५. Dropped D_2. ६. कलालपाशङ्खध्मादयः P. ७. C has हाहाः। हाहौ । हाहाः । हाहाम् । हाहौ । हाहान् । ८. After it—हाहा । हाहाभ्याम् । dropped P, B_1, C. ९. किम् Dc_1. १०. °मिहापि Dc_3.

हरिः । 'प्रथमयोः पूर्वसवर्णः' । हरी ।

जसि च ॥७।३।१०९॥

जसि च[1] परे[2] ह्रस्वाङ्गस्य गुणः स्यात् । हरयः ।

ह्रस्वस्य गुणः ॥७।३।१०८॥

ह्रस्वस्य गुणः स्यात् संबुद्धौ । 'एङ् ह्रस्वात्–' इति संबुद्धिलोपः[3] । हे हरे[4] । हरिम् । हरी । हरीन् ।

शेषो घ्यसखि ॥१।४।७॥

अनदीसंज्ञं ह्रस्वमिउवर्णान्तं सखिवर्जं घिसंज्ञं स्यात् ॥

आङो नास्त्रियाम् ॥७।३।१२०॥

आङिति टासंज्ञा[5] । घेः परस्याङो ना स्यादस्त्रियाम् । हरिणा । हरिभ्याम् । हरिभिः ।

प्रथमयोरिति । हरि औ इति स्थिते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घ ईकार इत्यभिप्रायः ।

जसि च । ह्रस्वग्रहणमङ्गविशेषणं विशेषणेन च तदन्तविधिर्भवति ततश्च ह्रस्वान्ताङ्गस्येत्यर्थः ।

हरिमिति । 'अमि पूर्वः' । **हरी** इति । 'प्रथमयोः–' इति पूर्वसवर्णदीर्घः **हरीनिति** । शसि पूर्वसवर्णदीर्घे 'तस्माच्छसो नः–' इति नत्वम् ॥

शेषः । शेषशब्दार्थमाह । **अनदीसंज्ञमिति** ।

आङः । आङिति तृतीयैकवचनस्य पूर्वाचार्याणां संज्ञेत्याह । **आङितीति** । आङिति स्थान्यन्तरस्य निर्देशादिहार्थाद्विभक्तिविपरिणामो भवतीति घेरिति षष्ठ्यन्तं प्रकृतं पञ्चम्यन्तं भवतीत्याह । **घेः परस्येति** ।

---

१. Dropped D_2, D_4. २. परतः P. ३. संबुद्धेर्लोपः D_3. ४. After it—हे हरी । हे हरयः D_1, B_2. ५. आङिति टासंज्ञा given at the end of the Vṛitti B_2.

घेर्ङिति ॥७।३।१११॥

घिसंज्ञस्य ङिति सुपि परे[2] गुणः स्यात्[3] । हरये । हरिभ्याम् । हरिभ्यः । गुणे कृते

ङसिङसोश्च ॥६।१।११०॥

एङो ङसिङसोरति परे[4] पूर्वरूप एकादेशः स्यात्[5] ॥ हरेः । हरिभ्याम् । हरिभ्यः । हरेः । हर्योः । हरीणाम् ॥

अच्च घेः ॥७।३।११९॥

घेरुत्तरस्य ङेरौत् स्यात् घेरन्तादेशश्चाकारः ॥ वृद्धिः[6] । हरौ । हर्योः । हरिषु । एवं श्रीपत्यग्निरव्यादयः[7] ॥

पुंसीति वाच्ये अस्त्रियामित्युक्तममुना ब्राह्मणकुलेनेत्यत्रोत्वमत्वयोरसिद्धत्वात् 'इकोचि विभक्तौ' इति नुम् न प्राप्नोति ततश्च अमुनेति सिद्ध्यर्थम् । अस्त्रियां किम् । धेन्वा । कृत्या । घेः किम् । सख्या ॥

घेः । घेः किम् । सख्ये । ङितीति किम् । हरिभ्याम् । सुपीति किम् । पट्वी । कुरुतः ।

ङसि । अथ कस्मादत्र यथासंख्यं न द्वौ एङौ द्वौ च ङसिङसौ इति । उच्यते । अल्पाच्तरस्य ङसः परनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावोवसीयते ॥

अच्च । अदिति तपरकरणं स्त्रियां बुद्धावित्यादौ कृते अत्वे टापो निवृत्त्यर्थम् । वृद्धिरिति । 'वृद्धिरेचि' इति ॥

---

१. Dropped D_1, D_2, D_4; C has च in its place. २. Dropped B_1. ३. Dropped B_1. ४. पूर्वरूपमेकादेशः । B_2, D_2. ५. Dropped B_1. ६. स्याद्वृद्धिरेचीति वृद्धिः D_2; वृद्धिः dropped D_3, B_1, C, P. ७. अग्न्यादयः D_2.

अनङ् सौ ॥७।१।९३॥

सख्युरसंबुद्धौ सौ परे अनङादेशः स्यात् ॥

अलोन्त्यात् पूर्व उपधा ॥१।१।६५॥

अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात् ॥

सर्वनामस्थाने चासंबुद्धौ ॥६।४।८॥

नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे ॥

अपृक्त एकाल् प्रत्ययः ॥१।२।४१॥

एकाल् प्रत्ययो यः सोपृक्तसंज्ञः स्यात् ॥

अनङ् । ङकारोन्त्यादेशः । अकार उच्चारणार्थः । आकारे विधेये अनङ्विधानं सोर्लोपार्थम् । ङादेशस्तर्हि सोर्विधेयः । एवं सिद्धे यदनङ्विधानं तदनङ एव क्वचिच्छ्रुत्यर्थम् । तेन यद्वक्ष्यति उशनसः संबुद्धौ वानङ्वाच्यः इत्यारभ्य हे उशनन् इत्येतदुपपन्नम् ॥

अलोन्त्यात् । समुदायादपि पूर्वस्य संज्ञा स्यात् तन्निवृत्त्यर्थमलः इति विशेषणम् । अन्त्यादित्यस्य पूर्व इत्यस्याप्यविशेषितत्वे समुदायस्य संज्ञा स्यात् तन्निवृत्त्यर्थं विशेषणं वर्ण इति भाव्यम् । तच्च लोकतः सिद्धम् । लोके ह्यमीषां ब्राह्मणानामन्त्यात् पूर्व आनीयतामित्युक्ते एक एवान्त्यात् पूर्व आनीयत इत्येतत् सर्वं चेतसि कृत्वाह । अन्त्यादलः पूर्वो वर्ण इति ।

सर्वनाम । सर्वनामस्थाने किम् । राजनि । असंबुद्धाविति किम् । हे राजन् ।

अपृक्त । असहायवचन एकशब्दः । एकाल् किम् । जागृविः । 'वेरपृक्तस्य' इति न भवति । प्रत्यय इति किम् । सुरां सुनोतीति सुरासुत् । तमाचष्टे । सुरासयतीति सुराः । सकारस्य लोपो न ॥

---

१. B_1 has सख्युः after परे. २. परतः D_2. ३. Dropped B_2.
४. तन्निवृत्त्यर्थमल इति Do_4.

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ॥६।१।६८॥

हलन्तात् ङ्यन्तादाबन्ताद्दीर्घात्[1] परं सुतिसि इत्येतदपृक्तं हल् लुप्यते । इति सुलोपः । ततो नलोपः । सखा । हे सखे ॥

सख्युरसंबुद्धौ ॥७।१।९२॥

सख्युः परं सम्बुद्धिवर्जं[4] सर्वनामस्थानं णित्[5] स्यात् ॥

हल् । लोप इति वर्तते । तादिह लौकिकेनार्थेनार्थवत् कर्मसाधनं लुप्यत इति लोप इति । ततश्चापृक्तं हलिति प्रथमान्तेन संबध्यते इति चेतसि कृत्वाह । हल् लुप्यत इति । हलन्तादेव तिस्योर्लोपः । तिपा सहचरितस्य ग्रहणात् सीति सिच् न गृह्यते । अभैत्सीत् । ननु हलन्तात् 'संयोगान्तस्य लोपः' इत्यनेनैव सिद्धत्वाल्लोपविधानं व्यर्थम् । मैवम् । सखेत्यत्र संयोगान्तलोपे तस्यासिद्धत्वान्नलोपो न स्यात् । अभिनोत्रेत्यत्र 'अतो रोरप्लुतादप्लुते' इत्युत्वं न स्यात् । अजागर्भवानित्यत्र 'रात्सस्य' इति नियमाल्लोप एव न स्यात् । तथा चोक्तम् ।

'संयोगान्तस्य लोपे हि नलोपादिर्न सिध्यति ।
रात्तु तेनैव लोपः स्यात् हलस्तस्माद्विधीयते' ॥ इति ।

हल्ङ्याब्भ्य इति किम् । ग्रामणीः । सुतिसीति किम् । अभैत्सीत् । अपृक्तस्येति किम् । बिभर्ति । हलिति[6] किम् । बिभेद । **ततो नलोप** इति । 'नलोपः प्रातिपदिकान्त—' इति । हे **सखे** इति । ह्रस्वस्य गुणः ॥

सख्युः । संबुद्धेरन्या असंबुद्धिरिति पर्युदासोयम् । तत्र 'णित्' इत्यनेन सामानाधिकरण्यात् सर्वनामस्थानं प्रथमान्तं तत्रोत्तरार्थं सप्तम्यन्तमप्यसंबुद्धावित्येतदर्थात् प्रथमान्ततयान्वेतीत्यभिप्रेत्याह । **संबुद्धिवर्जमिति** ॥

---

१. ङ्याबन्ताद्दीर्घाच्च P. २. दीर्घाच्च P, D_1, D_5, B_1. ३. Dropped D_1. ४. सर्वनामस्थानं संबुद्धिवर्जं णित्कार्यकृत् स्यात् B_2. ५. णित्कार्यकृत् D_3. ६. हलि किम् Bc_1.

अचो ञ्णिति ॥७।२।११५॥

ञिति णिति च परेऽचो वृद्धिः स्यात् । सखायौ । सखायः । सखायम् । सखायौ[1] । शोभनः सखा सुसखा । अतिसखा । अतिसखायौ । घिसंज्ञाभावान्न तत् कार्यम् । सख्या । सख्ये ।

ख्यत्यात् परस्य ॥६।१।११२॥

खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरकारस्य उः स्यात् । सख्युः[2] ।

औत् ॥७।३।११८॥

अचः । शोभनः सखा सुसखेत्यादिना 'अनङ् सौ' 'सख्युरसंबुद्धौ' इत्यत्र तदन्तविधिरिष्यते इति दर्शयति । **सुसखेति ।** 'राजाहः सखिभ्यष्टच्' इति प्राप्तस्य टचो 'न पूजनात्' इति निषेधः । अतिशयितः सखा अतिसखा । अत्रापि टचो निषेधः । **घिसंज्ञेत्यादि ।** तत् कार्यम् 'आङो नाऽस्त्रियाम्' । 'घेर्ङिति' इत्यादि ।

ख्यत्यात् । ख्यत्यादिति कृतयणादेशयोर्निर्देश इत्याह ।

कृतयणादेशाभ्यामित्यादि । कृतयणादेशनिर्देशस्तु यत्रैषां यणादेशः प्राप्नोति तत्रैवोकारो यथा स्यात् । यत्र गुणस्तत्र मा भूत् अतिसखेरागच्छतीत्यादौ । अत्र हि सख्युः समासे घिसंज्ञास्त्येवेति घित्वात् 'घेर्ङिति' इति गुणः । 'परस्य' इति ग्रहणं 'एकः पूर्वपरयोः' इत्यधिकारनिवृत्त्यर्थम् ॥

औत् । 'इदुद्भ्याम्—' इति सूत्रेण नदीसंज्ञकात् परस्य ङेराम् विहितः । 'अच्च घेः' इति घिसंज्ञकात् परस्याकारसहित औकारो विहितः ।

---

१ Dropped D_2. २. After this—तदन्तविधिरत्रेष्यते । अतिसखायौ । घिसंज्ञाभावात् &c. D_2; तदन्तस्याप्यनङिष्यते D_4. ३. After it—सखीन् C, D_3.

घिनदीसज्ञावर्जिताभ्यामिदुद्भ्या ङेरौत् स्यात् । सख्यौ । शेषं हरिवत् । सख्युः । समासे घिसंज्ञास्त्येव । अतिसखेरागच्छति ॥

पतिः समास एव ॥१।४।८॥

पतिः समास एव[1] घिसंज्ञः[2] । पत्या । पत्ये । पत्युः । पत्युः । पत्यौ । शेषं हरिवत् । समासे तु[3] भूपतये ।

कतिशब्दो[4] बहुवचनान्तः ।

बहुगणवतुडतिसंख्या ॥१।१।२३॥

एते [5]संख्यासंज्ञाः स्युः[6] ॥

तस्मात् पारिशेष्यात् ताभ्यां यदन्यत् तदिह[7]ोदाहरणमित्यभिप्रेत्याह । **घिनदीसंज्ञावर्जिताभ्यामिति** । **सख्युरित्यादि** । ग्रहणवता प्रातिपदिकेन तदन्तविधेः[8] प्रतिषेधात् ॥

पतिः । सिद्धे सत्यारम्भो नियमार्थ इति विनाप्येवकारमवधारणे सिद्धेप्येवकारकरणं विपरीतावधारणनिरासार्थम् । ततश्च समासशब्दानन्तरमेवकारे श्रूयमाणे यत एवकारस्ततोन्यत्रावधारणमिति पतिशब्द एव नियम्यते न तु समासः । ततश्च शोभनाग्निनेत्यादि सिद्धम् । [9]समासे पतिशब्दस्य घित्वं विधीयत इति पतिगृहे 'द्वन्द्वे घि' इति पूर्व[10]निपातः सिद्धः ॥

बहु । अत्र बहुगणशब्दौ प्रातिपदिके[11] । वतुडती प्रत्ययौ । बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति । संख्यावाचिनोरेव । भूयादिनिवृत्त्यर्थं संख्यासंज्ञा विधीयते । संख्यायतेनयेति

---

१ Dropped C. २. घिसंज्ञकः D_1, B_2; After it—स्यात् C, D_2. ३. After it—भूपतिना D_3. ४. After it—नित्यं B_1, B_2. ५. संख्या ज्ञेयाः B_1. ६. Dropped B_2. ७. इह dropped Nc_2. ८. °विधिप्रति° Dc_3. ९. पतिशब्दस्य समासे Dc_3. १० °निपातनियमः Nc_2. ११. After it—वर्तेते Nc_1, Dc_1.

डति च ॥१।१।२५॥

डत्यन्ता संख्या षट्संज्ञा स्यात् ॥

प्रत्ययस्य लुक्श्लुलुपः ॥१।१।६१॥

लुक्श्लुलुप् एतैः शब्दैः कृतं प्रत्ययादर्शनं क्रमात् लुक्श्लुलुप्संज्ञं स्यात् ॥

संख्येत्यन्वर्थसंज्ञाविज्ञानात् । अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वाच्यम्* । समासकन्विध्यर्थम् । अर्धपञ्चमशूर्पम् । अर्धपञ्चमकः ॥

डति च ॥ संख्येत्यनुवर्तत इत्यभिप्रेत्याह । डत्यन्ता संख्येति । किमर्थं सेहानुवर्तते । पातेर्डतिः । पतय इत्यत्र मा भूत् । ननु च पतिशब्दस्यापि डत्यन्तत्वात् पूर्वसूत्रेण संख्यासंज्ञास्त्येवेति संख्यानुवर्तनादपि षट्संज्ञा प्राप्नोत्येव । नैष दोषः । पूर्वसूत्रे वतुना साहचर्यात् तद्धित एव डतिर्गृह्यते न कृत् । कृच्चायम् ॥

प्रत्ययस्य । अनेकसंज्ञाविधानात् तद्भावितग्रहणमिह विज्ञायत इत्यभिप्रेत्याह । लुक्श्लुलुप्शब्दैरिति । तद्भावितग्रहणात् संज्ञासंकरो न । प्रत्ययस्येति किम् । अगस्तयः । कुण्डिनाः । यदि प्रत्ययग्रहणं न क्रियते तदागस्त्यस्यापत्यानि ऋष्यण् कुण्डिन्या अपत्यानि गर्गादिभ्यो यञ् । तयोरागस्त्यकौण्डिन्यशब्दयोर्जसि परतो यदागस्त्यकौण्डिन्ययोः अगस्तिकुण्डिनच् इति लुक् अगस्तिकुण्डिनचौ चादेशास्तदा वैषम्यादेकैकस्य स्थानिनस्त्रय आदेशाः पर्यायेण स्युः । तत्र यदा लुगादेशः स्यात्तदा विभक्तिमात्रस्य श्रवणं प्रसज्येत । अथाप्यलोन्त्यस्य स्यादेवमप्यागस्त्यः कौण्डिन्य इति स्यात् । अगस्तयः कुण्डिना इति चेष्यते ।

---

१. Dropped P, C, D_4. २. लुक्श्लुलुप् dropped B_2. ३. पति इत्यत्र Bc_1. ४. संख्यानुवृत्तावपि Nc_2, Dc_4. ५. चादेशौ Dc_3. ६. प्राप्नुवन्ति Dc_3.

षड्भ्यो लुक् ॥७।१।२२॥

षट्संज्ञकेभ्यः परयोर्जश्शसोर्लुक् स्यात् ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥१।१।६२॥

प्रत्ययलुप्तेऽपि[२] तदाश्रितं[३] कार्यं स्यात् ॥ इति 'जसि च' इति गुणे प्राप्ते ।

यदाप्यागस्त्यशब्दस्य कुण्डिनजादेशः कौण्डिन्यशब्दस्यागस्त्यादेशस्त-दाप्यनिष्टमेव । विपर्ययस्यानङ्गीकारात् । अथान्तरतम्यादगस्त्यस्याग-स्तिरेव कौण्डिन्यस्य कुण्डिनच् तथापि प्राग्दीव्यतीयेजादौ विवक्षिते 'वृद्धाच्छः' इति छो न स्यात् । अवृद्धत्वात् प्रकृतेः । प्रत्ययग्रहणे तु तददर्शनस्यैवेयं संज्ञेति तस्यैव लुक् स्यात् । परिशिष्टस्य प्रकृतिद्वयस्य यथासंख्यमादेशद्वयम् । तेन अगस्तयः कुण्डिना इति स्यात् । प्राग्दीव्यतीयेजादौ विवक्षिते 'गोत्रे लुगचि' इति लुकि निषिद्धे तत्संनियोगशिष्टत्वादगस्त्यादेशेऽपि निवृत्ते वृद्धाच्छे आगस्तीया इति स्यात् ॥

षड्भ्यः । षट्संज्ञकं यत्र प्रधानं तत्र तदन्तादपि लुक् । परमषट् । यत्र तूपसर्जनं तत्र न । प्रियषषः ॥

प्रत्ययलोपे । प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये भाव्यमितीद-मारभ्यते । प्रत्ययग्रहणेनुवर्तमानेऽपि पुनः प्रत्ययग्रहणं कृत्स्नप्रत्ययलोपे यथा स्यात् । एकदेशलोपे मा भूत् । तेन संग्मीतेत्यत्र सीयुटः सलोपेऽपि प्रत्ययग्रहणेन झलादित्वं नेत्यनुनासिकलोपो न । प्रत्ययलक्षणं किम् । रायः कुलं रैकुलम् । गवे हितं गोहितम् । आयवादेशौ न स्तः । वर्णाश्रयत्वात् ॥

---

१. Before it—कृत्स्नप्रत्ययलोपे यथा स्यादिह मा भूत् । जोघ्नीत् । संग्मीत । गवेहितम् । गोहितम् । रायःपदम् । रैपदम् । अयआयौ न स्तः । D_5. २. अपि dropped P; प्रत्यये लुप्ते D_2, D_4. ३. तदाश्रितमङ्गकार्यं B_2; प्रत्ययाश्रितं D_3. ४. यथा स्यादितीद° Dc_3. ५. कृत्स्नस्य प्रत्य° Dc_1. ६. °देशे लोपे Bo_1. ७. प्रत्ययग्रहणे Nc_2.

न लुमताङ्गस्य ॥१।१।६३॥

लुक्श्लुलुप एते लुमन्ताः । लुमता शब्देन लुप्ते[1] तन्निमित्तमङ्गकार्यं न स्यात् ॥ कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु ।

अव्ययास्मद्युष्मत्षट्[2]संज्ञास्त्रिषु सरूपाः । त्रिशब्दो बहु-[3] वचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः ।

न लु° । पूर्वेणातिप्रसक्तं प्रत्ययलक्षणं विशेषे निषिध्यते । लुशब्दो विद्यते यस्मिन्नसौ लुमानिति व्युत्पत्तिरत्रेत्यभिप्रेत्याह । लुगित्यादि । लुमता किम् । कार्यते । कृञो णिचि यकि णिलोपे कृतेपि प्रत्ययलक्षणेन[4] वृद्धिः । अङ्गस्येति किम् । पञ्च । पदत्वान्नलोपः स्यात् । **कति । कति इति[5]** । का संख्या येषां ते कति । 'किमः संख्यापरिमाणे डति च' इति डतिः । तदन्तस्य च संख्या संज्ञा ततः षट्संज्ञा । ततः कतिशब्दस्य बह्वर्थवाचकत्वेन तस्मात् प्रथमाबहुवचनं जस् उत्पद्यते । तस्य लुक् । प्रत्ययलक्षणेन प्राप्तो गुणो 'न लुमता–' इति निषिध्यते । एवमेव द्वितीयाबहुवचनेपि रूपम्[6] । शसो लुप्तत्वात् ॥

अव्ययेत्यादि । त्रिषु सरूपाः । त्रिषु लिङ्गेषु समानरूपाः । लिङ्गरहितार्थप्रातिपदिकत्वेन तद्विशेषद्योतकाः प्रत्ययास्तेभ्यो नोत्पद्यन्त इत्यर्थः । **त्रय इति** । 'जसि च' इति गुणः । **त्रीनिति** । पूर्वसवर्णदीर्घः । नत्वम् ॥

---

१. लुप्ते सति B_2. २. P drops षट्. ३. बहुवचनः P; नित्यं बहुवचनान्तः C, D_3. ४. °लक्षणे Dc_4. ५. इति स्थले Dc_3. ६. After it—ज्ञेयम् Nc_1.

त्रेस्त्रयः ॥७।१।५३॥

त्रि इत्येतस्य त्रयादेशः स्यादामि ॥ त्रयाणाम् । त्रिषु । द्विशब्दो द्विवचनान्तः ।

त्यदादीनामः ॥७।२।१०२॥

त्यदादीनां द्विपर्यन्तानामकारोन्तादेशः स्याद्विभक्तौ ॥ द्वौ । द्वौ । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥

संज्ञायामुपसर्जनत्वेपि च नाकारादेशः । द्विः । अतिद्विः । प्राधान्ये स्यादेव । परमद्वौ ॥

त्रेस्त्रयः । ननु च 'निजां त्रयाणाम्' इति निपातनादेवैतत् सिद्धं तत् किमर्थमेतत् सूत्रम् । एवं तर्हि सिद्धे सतीदमारभ्यमाणमेतज् ज्ञापयति 'अबाधकान्यपि निपातनानि स्युः' इति । तेन पुरातनेति सिद्धं स्यात् । अन्यथा हि 'पुराणप्रोक्तेषु' इति निपातनेन बाधितत्वादेतन्न सिध्येत् ॥

त्यदादीनाम् । **द्विपर्यन्तानामिति** । तथा चोक्तं **महाभाष्ये** । 'तस्माद् द्विपर्यन्तानामिति वक्तव्यम्' इति । **द्विरिति** । कस्यचिदियं संज्ञा । **अतिद्विरिति** । द्वावतिक्रान्तोतिद्विः । अत्र द्विशब्दस्योपसर्जनत्वादप्राधान्यान्नात्वम् । **परमद्वाविति** । परमौ च तौ द्वौ च परमद्वौ । अत्र द्विशब्दस्य प्राधान्याद्त्वम् ॥

इतीदन्ताः ॥

---

१. द्विशब्दपर्यन्ताना° D_1. २. विभक्तौ परतः C, D_3. ३. नाकारः B_2. ४. तथोक्तं Bc_1, Dc_4, Dc_3.

वातप्रमीः । 'दीर्घाज्जसि च' इति पूर्वसवर्ण[1]निषेधाद्यणादेशः । वातप्रम्यौ । [2]वातप्रम्यः । वातप्रमीम् । वातप्रम्यौ । वातप्रमीन् । वातप्रम्या । वातप्रमीभ्याम् । वातप्रमीभिः । वातप्रम्ये । [3]वातप्रमीभ्याम् । [4]वातप्रमीभ्यः । वातप्रम्यः । वातप्रम्यः । वातप्रम्योः । [5]दीर्घान्नुडभावः । वातप्रम्याम् । ङौ तु सवर्णदीर्घः । वातप्रमी । वातप्रम्योः । [6]वातप्रमीषु । एवं देवयज्यतिलक्ष्म्यादयः ।

वातप्रमीः । वातं प्रमिणोतीति वातप्रमीः निःशृङ्गो मृगाकृतिः । 'वातप्रमीः' इत्युणादिसूत्रेण ईप्रत्ययान्तो निपातः[7] । **दीर्घादित्यादि** । वातप्रमी औ इति स्थिते 'प्रथमयोः—' इति पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इति तस्य प्रतिषेधात्[8] 'इको यणचि' इति यणादेश इत्यर्थः । **वातप्रमीमिति** । परत्वात् 'अमि पूर्वः' इति पूर्वत्वम् । **वातप्रमीनिति** । शसि पूर्वसवर्णदीर्घः । नत्वम् । **दीर्घत्वान्नुडभाव इति** । वातप्रमी आम् इति स्थिते दीर्घत्वात् 'ह्रस्वनद्यापो नुट्' इति नुट् नेत्यर्थः । **ङौ त्विति** । सप्तम्येकवचने वातप्रमी ङि इति स्थिते ङस्येत्संज्ञायां लोपे 'अकः सवर्णे दीर्घः' इति दीर्घः[9] । **एवं देवयज्यतिलक्ष्म्यादय इति** । देवान् यजतीति देवयजीः । यजेरीप्रत्ययः । 'प्रत्ययतः प्रकृतेश्च तदूह्यम्' इति वचनात् । लक्ष्मीमतिक्रान्तोतिलक्ष्मीः । इत्यादयः शब्दा ईकारान्ता अधातवो वातप्रमीसदृशा ज्ञेया इत्यर्थः। अतिलक्ष्मीशब्दस्य वातप्रमीशब्दवद्रूपमर्वाचीनमते[10] ज्ञेयम् । **भाष्यकारमते** तु नदीसंज्ञत्वान्नदीकार्यं स्यात् । हे अतिलक्ष्मि । अतिलक्ष्म्यै ।

---

१. °निषेधः । यणादेशः । D3. २. From this to वातप्रम्योः dropped D3. ३. Dropped D1, D2, D4. ४. Dropped D1, D2, D4. ५. D1 has वातप्रम्याम् before it. ६. Dropped D1, B2. ७. निपातितः Bc1, Dc3, Dc4. ८. निषेधात् Dc3. ९. सवर्णदीर्घः Bc1, Dc2, Dc3. १०. °मतेन Nc1, Dc3, Dc4.

सुधीः । 'इको यणचि' इति यणि प्राप्ते

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥६।४।७७॥

श्नुप्रत्ययान्तस्य भ्रूइत्येतस्य धातोश्चेवर्णोवर्णयोः क्रमादियङुवङौ स्तोचि परे ॥ इति इयङादेशः । एतदपवादे 'एरनेकाचः—' इत्यनेन यणि प्राप्ते

अतिलक्ष्म्याः । अतिलक्ष्मीणाम् । अतिलक्ष्म्याम् । इति स्यात् । तथा च भाष्ये । 'प्रथमलिङ्गग्रहणं च कर्तव्यम्' इत्याद्युक्त्वा 'अतितन्त्र्यै ब्राह्मणाय । अतिलक्ष्म्यै ब्राह्मणाय' इत्युक्तम् । **सुधीरिति** । सुष्ठु ध्यायतीति सुधीः । ध्यायतेः 'संप्रसारणं च' इति क्विप् संप्रसारणं च । सुष्ठु धीरस्येति वा । इक इत्यादि । सुधी औ इति स्थिते दीर्घत्वात्पूर्वसवर्णनिषेधे 'इको यणचि' इति यणि प्राप्ते उच्यत इत्यर्थः ॥

अचि श्नु । अङ्गस्येत्यनुवर्तते । तत् श्नुप्रत्ययान्तस्य भ्रू इत्येतस्याङ्गस्य धातोरङ्गस्येत्येवं संबध्यते । अचीति वर्णग्रहणम् । तेन 'यस्मिन् विधिस्तदादावल्ग्रहणे' इत्यजादौ कार्यं ज्ञेयम् । यत्र त्वजेव प्रत्ययो नाजादिस्तत्र व्यपदेशिवद्भावेनाजादित्वं ज्ञेयम् । ङकारो विस्पष्टार्थः । 'निर्दिश्यमानस्यादेशा भवन्ति' इति य्वोरेवादेशयोः सिद्धत्वात् । अचीति किम् । सुधीभ्याम् । श्नुधातुभ्रुवामिति किम् । वातप्रम्यौ । य्वोरिति किम् । चक्रतुः । अङ्गानुवृत्तिः किमर्थम् । सुध्युपास्यः । इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन । चयनम् । चायकः । लवनम् । लावकः । एतदित्यादि । एतस्येयङादेशस्यापवादे 'एरनेकाचोसंयोगपूर्वस्य' इत्यनेन यणादेशो प्राप्त इत्यर्थः ।

---

१ इको यणिति D_2. २. यण् C. ३. इत्यस्य C. ४. क्रमात् dropped B_2; Before it—एतयोः D_2. ५. इयङादेशे प्राप्ते D_1, B_2. ६. तदपवादः D_1. ७. अनेन dropped B_1, B_2. ८. प्रथमं लिङ्ग° Nc_2, Dc_1, Dc_3, Dc_4. ९. क्विप् च कर्तरि पुंसि तद्योगात् । सुष्ठु &c. Dc_3. १०. After it—अङ्गस्य Nc_1, Dc_3. ११. सवर्णग्रहणम् Nc_2. १२. स्यादिति ज्ञेयम् Dc_2. १३. अचिश्नु° Dc_2. १४. °पवादः Dc_1, Nc_1, Nc_2.

न भूसुधियोः ॥६।४।८५॥

एतयोरचि[1] यण् न स्यात् ॥ सुधियौ । सुधियः । अमि शसि च[2] परत्वादियङ्[3] । सुधियम् । सुधियौ । सुधियः । इत्यादि[4] । एवं सुश्रीयवक्र्यादयः । प्रधीः ।

एरनेकाचोऽसंयोगपूर्वस्य ॥६।४।८२॥

अनेकाचोऽङ्गस्य धातोरिवर्णस्य यण् स्यादचि धात्ववयव-संयोगः पूर्वो यस्मात् तस्य तु न स्यात् । गतिकारकपूर्वस्य

न भू । भूग्रहणेन तदन्तग्रहणम् । केवलस्य यणादेशप्राप्त्यभावाद् व्यर्थं वचनं स्यात् । उवङादेशनिषेधार्थत्वान्न व्यर्थमिति चेदेवं तर्हि 'वर्षाभ्वश्च' इति यण्विधिर्व्यर्थः स्यात् । तस्माद्यण्निषेधार्थमेतत् । ततो भूग्रहे तदन्तग्रहणं कार्यम् । अमि शसीति । अमि 'अमि पूर्वः' इति पूर्वरूपे प्राप्ते परत्वादियङेव । शसि 'प्रथमयोः—' इति पूर्वसवर्णदीर्घे प्राप्ते परत्वादियङेवेत्यर्थः । एवं सुश्रीयवक्र्यादय इति । सुष्ठु श्रीर्यस्य स सुश्रीः । यवान् क्रीणातीति यवक्रीः । प्रधीरिति । प्रध्यायति प्रकृष्टा धीरस्य वा ॥

एरने । धातोरिति[10] वर्तते । तेन संयोगो विशेष्यते धातोरवयवः संयोगपूर्वो यस्मादिवर्णान्नास्ति तस्येवर्णस्य यण् स्यात् । यस्मात्तु[11] धात्ववयवः संयोगः पूर्वस्तस्य तु न स्यादित्याह । धात्ववयव इति । गतिकारकेति । क्विबन्तस्य धातोर्गतिकारकपूर्वस्य यण् इष्यते* ॥

---

१. °शच परे D_3. २. च परे B_2. ३. After it—विप्रतिषेधे परं कार्यम् । B_2. ४. Dropped B_2; Before it—सुधिया D_5. ५. °शसि सुपि D_2. ६. Dropped C. ७. °पूर्वकस्य B_2. ८. °मेव तत् Dc_2. ९. °ग्रहणे Dc_2; °ग्रहणेन Dc_3. १०. °रित्यनुवर्तते Dc_2. ११. तु dropped Dc_4.

क्विबन्तस्यैवेष्यते[1]* । प्रध्यौ । प्रध्यः । प्रध्यम्[3] । प्रध्यौ । प्रध्यः । इत्यादि । एवं दीधीवेवीसुत्यादयः[4] । असंयोगपूर्वस्य[5] किम् । सुश्रियौ । यवक्रियौ । गतिकारकोपपदात् किम् । परमधियौ । शुद्धधियौ । अनेकाचः किम् । नीः । नियौ[6] ।

'सर्वं[7] वाक्यं सावधारणं भवति' इति गतिकारकपूर्वस्यैव[8] नान्यपूर्वस्येत्यर्थः । अयं भावः । यदि क्विबन्तस्य धातोः संपूर्वपदस्य यण् क्रियते तर्हि गतिकारकपूर्वस्यैवेष्यते नान्यपूर्वस्येति । एरिति किम् । असंयोगग्रहणमिव वर्णविशेषणं[9] यथा स्यात् । अङ्गविशेषणं मा भूदिति । ननु चासत्येरित्येतस्मिन् य्वोरित्यनुवृत्तेर्लुलुवतुरित्यत्रापि यण् स्यात् । नैतदस्ति । 'ओः सुपि' इति ओः सुप्येवेति नियमादत्र यण्निषेधः । धातुना संयोगविशेषणं किम् । इहापि यथा स्यात् उन्न्यौ उन्न्य इति । प्रध्यम् । प्रध्य इति । अमि शसि च परत्वाद्यणादेश[10] एव । एवमिति । सुष्ठु नयतीति सुनीः । 'सत्सूद्विष—' इति क्विप् । परमधियौ । शुद्धधियाविति । अत्र परमशुद्धशब्दौ न गती नापि कारके इति तत्पूर्वस्य न भवति । अङ्गस्येति किम् । ब्राह्मणस्य नियौ । अत्र मा भूत् ।।

---

१. एव dropped D_1, D_2. २. After it—नान्यपूर्वस्य C. ३. Before it P has परत्वाद्यणादेशः; C has अमि शसि च प्रध्यम् । प्रध्यः । इति विशेषः । परत्वाद्यणादेशः; D_1 has इत्यादि after it; After प्रध्यौ । प्रध्यः, D_2 has—यणोन्तरङ्गत्वान्नामिपूर्वः । इत्यादि । एवं सुन्यादयः । एवं दीधीसुत्यादयः । असंयोगपूर्वस्य किम्, &c. ४. वेवी dropped D_6, B_2; दीधीवेवी dropped D_4. ५. असंयोगस्य किम् D_1. ६. After it—नियः D_2, D_4. ७. वाक्यं च Dc_1, Nc_1. ८. गतिकारकपूर्वस्य Dc_1. ९. °विशेषग्रहणं Nc_1. १०. यणावादेशः Dc_2.

ङेराम्नद्याम्नीभ्यः ॥७।३।११६॥

नद्यन्तादाबन्तान्नीशब्दात् परस्य ङेराम् स्यात् । नियाम । शेषं सुधीवत् । ग्रामणीः । ग्रामण्यौ । ग्रामण्यः । शेषं प्रधीवत् । सह खेन वर्तते सखः । तमिच्छतीति सखीः । सख्यौ । 'ख्यत्यात्—' इति दीर्घस्यापि ग्रहणादुकारः । सख्युः । सख्युः । सुखमिच्छतीति सुखीः । सुख्युः २ । सुतमिच्छतीति सुतीः ।

ङेराम् । ङेरिति सप्तम्येकवचनं गृह्यते । एतच्च 'स्त्रियाम्' 'इच्छायाम्' इत्यादेर्निर्देशात् ज्ञायते । **ग्रामणीरिति** । ग्रामं नयतीति ग्रामणीः । अग्रग्रामाभ्यां नयतेर्णो वाच्यः* । **सह खेन वर्तत इति** । **सख इति** । 'तेन सह तुल्ययोगे' इति बहुव्रीहिः । 'वोपसर्जनस्य' इति सहस्य सः । **तमिच्छतीति सखीरिति** । सखमात्मन इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यच् । 'क्यचि च' इतीत्वम् । सखीयतेः क्विपि कृते 'अतो लोपः' इत्यल्लोपः । 'लोपो व्योर्वलि' इति यलोपः । क्विपः सर्वस्य लोपः । कृत्त्वात् सुः । **सख्याविति** । 'एरनेकाचः—' इति यण् । **ख्यत्यात्—**' इत्यादि । सखी ङसि सखी ङस् इति स्थिते यणादेशे च कृते 'ख्यत्यात् परस्य' इत्यत्र सूत्रे दीर्घस्यापि सखीशब्दस्य ग्रहणात् ङसिङसोर्ङकारस्योकारः । **सुखमिच्छतीति सुखीरिति** । क्यच् । ईत्वम् । क्विप् । अल्लोपयल्लोपौ । **सुख्युरिति** । अत्रापि पूर्ववत् । **सुतमित्यादि** । पूर्ववत् प्रक्रिया ।

---

१. °शब्दाच्च D_1, D_2, D_4. २. उत्तरस्य P; चोत्तरस्य B_2, D_3; परस्य dropped D_4. ३. °रामादेशः D_1. ४. ग्रामण्याम् D_2. ५. Before it—ङौ तु ग्रामण्याम् B_2; शेषं dropped D_3. ६. इति सखः P. ७. After तमिच्छतीति—सखीयति । सखीयतीति सखीः &c. D_3, P, B_1, B_2, C. ८. Dropped Dc_3. ९. ङसिङसोरकारस्य Dc_3, Dc_4, Nc_2.

सुत्युः २। त[1]कारस्था[2]नजाद्वर्णादपीष्यते। लूनमिच्छतीति लूनीः। लून्युः २। वेति केचित्। सख्यः। स[3]ख्यः। सुत्यः। सु[4]त्यः। लून्यः। लू[5]न्यः। शेषरूपमेषां[6] प्रधीवत्।

तकारस्थानजादिति। तकारस्थाने यो जातो वर्णस्तस्मात् परस्य ङसिङसोरस्योत्वमिष्यते। अयं भावः। लूञ् छेदने। क्तः। 'ल्वादिभ्यः' इति निष्ठानत्वम्। लूनस्तमात्मन इच्छति। क्यजादि पूर्ववत्। लूनी ङस् इति स्थिते पूर्वत्रासिद्धन्यायेन तकारस्य स्थाने जातस्य नस्यासिद्धत्वात् 'ख्यत्यात्परस्य' इति तीशब्दात् परस्य ङसिङसो[7]रस्य उः स्यादिति। **वेति केचि**दिति। दीर्घाभ्यां खीतीशब्दाभ्यां परयोर्ङसिङसोरस्य उत्वमिति शेषः। उत्वाभावपक्षे रूपाणि सख्य इत्यादीनि। तथा चायमर्थो **विचारचिन्तामणा**वुक्तः।

> 'सख्युः पत्युः प्रसिद्ध्यै यत् ख्यत्यादित्याह पाणिनिः।
> साधारणं तं मन्वानाः सुख्युः सुत्युः सुखीः सुतीः॥
>
> सुखीयतीसुतीयत्योर्यौ क्विबन्तौ तयोर्विदुः।
> निष्ठादेशस्य पूर्वत्रासिद्धत्वात् लून्युरादिकम्॥
>
> सुख्य इत्यादि साध्वेतदुभयं **भाष्य**गौरवात्॥' इति।

शेषमिति। **एषा**मिति। सखीसुतीलूनीशब्दानामित्यर्थः॥

इति ईदन्ताः॥

---

१. Before it—उत्वं प्रति निष्ठानत्वं 'पूर्वत्रासिद्धम्' इत्यासिद्धम्। B_2, D_3 (तेन तकार° D_3). २. °स्थावर्णादपि D_5. ३. सख्युः D_1, D_2, B_2; सुख्युः D_4, D_5. ४. सुत्युः D_1, D_2, D_5, B_2. ५. लून्युः D_1, B_2. ६. प्रधीवदेषाम् C; शेषं प्रधीवत् B_2. ७. °रकारस्य Dc_3.

शंभुर्हरिवत् साध्यः[1]। शंभुः। शंभू। शंभवः। हे[2] शंभो। शंभुम्। शंभू। शंभून्। शंभुना। शंभुभ्याम्। शंभुभिः। शंभवे। शंभुभ्याम्। शंभुभ्यः। शंभोः। शंभुभ्याम्। शंभुभ्यः। शंभोः। शंभ्वोः। शंभूनाम्। शंभौ। शंभ्वोः। शंभुषु। एवं विष्णुवायुभान्वादयः॥

तृज्वत् क्रोष्टुः॥७।१।९५॥

क्रोष्टुशब्दस्य तृजन्तवद्रूपं[3] स्यादसंबुद्धौ सर्वनामस्थाने[4]॥

ऋदुशनस्पुरुदंसोऽनेहसां च॥७।१।९४॥

ऋदन्तानामुशनसादीनामनङ्[5] स्यादसंबुद्धौ सौ परे॥ क्रोष्टा। हे क्रोष्टो।

शंभुरिति। शंभुशब्दो हरिशब्दवत् साध्यः। हरिशब्दे यादृशी प्रक्रिया तादृश्येवात्रेति भावः॥

तृज्वत्। क्रोष्टुशब्दः[6] क्रुश आह्वाने अस्मात् 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' इति तुन्प्रत्ययान्तो जम्बूकवाची। तस्यानेन प्रत्यासत्तेस्तृजन्तस्य क्रुशे रूपमतिदिश्यत इत्यभिप्रेत्याह। क्रोष्टुरित्यादि।

ऋदु। ऋकारान्तस्य 'ऋतो ङि—' इति गुणे प्राप्ते इतरेषां तु हल्ङ्याादिलोपरुत्वविसर्जनीयासन्तदीर्घत्वेषु[7] प्राप्तेष्वनङ् विधीयते। तपरकरणमसंदेहार्थम्। **क्रोष्टेति**। अनङि अन्तादेशे जाते सुलोपः। 'सर्वनामस्थाने च' इत्युपधादीर्घः। नलोपः। हे **क्रोष्टो** इति। 'ह्रस्वस्य गुणः'॥

---

१. Before it—इति ईदन्ताः। C. २. हे शंभो dropped D_5, B_1, P, C; After it—इत्यादि B_2. ३. तृजन्तं रूपं P, तृज्वद्रूपं D_1, B_2. ४. After it—परे D_1, D_5, B_2. ५. °नां चानङ् D_1, D_2, B_2. ६. °शब्दस्य Dc_3. ७. °ङ्यादिर्लोप° Nc_1; °ङ्यादिर्लोपः Dc_2; °ङ्यादिलोपे Dc_3.

ऋतो ङिसर्वनामस्थानयोः ॥७।३।११०॥

ङौ सर्वनामस्थाने च[1] परे ऋदन्तस्य गुणः स्यात् ॥ रपरत्वम् ।

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥६।४।११॥

अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने[2] ॥ क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारौ । क्रोष्टून् ॥

ऋतः । तपरकरणं मुखसुखार्थम् । ङिसर्वनामस्थानयोर्दीर्घस्यासंभवात् । ऋकारस्य स्थाने गुणो भवन्नान्तरतम्यात् रश्रुतिमानकार एव भवतीत्यभिप्रेत्याह । रपरत्वमिति । तच्च 'उरण् रपरः' इत्यनेन ॥

अप्तृन् । ननु च यथा 'तुरिष्ठेमेयस्सु' इत्यत्र तृन्तृचोर्यः समानोंशस्तस्यैव ग्रहणं कृतं तथेहापि किं न कृतम् । 'अर्वणस्त्रसावनञः' इत्यस्य ग्रहणं मा भूदिति । मैवम् । अर्थवद्ग्रहणपरिभाषयैव तस्य ग्रहो न स्यात् । एवं तर्हि तस्या अनित्यत्वज्ञापनार्थम् । तेन 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इत्येतदुपपन्नं स्यात् । अथवा 'सामान्योक्तावपि विशेष एव गृह्यते' इति ज्ञापनार्थम् । तेन 'न कोपधायाः' इत्यत्र सामान्योक्तावपि अकतद्धितयोरेव कौ गृह्यते । न कमात्रम् । तेन यदग्रे वक्ष्यति 'अकतद्धिताभ्यां कोपधायाः पुंवत्त्वनिषेधोत्र' इति तदुपपन्नं भवति । अथ नप्त्रादयः किमर्थं गृह्यन्ते । यतस्तेपि केचित् तृजन्ताः केचित् तृन्नन्ताः । अत्रोच्यते[3] । केचिदाचार्या उणादीन्यव्युत्पन्नानि प्रातिपदिकानीत्याहुः । तत्पक्षे विध्यर्थम् । केचिद् व्युत्पन्नानीत्याहुः । तत्पक्षे नियमार्थम् । एवंभूतानामन्येषां संज्ञाशब्दानां दीर्घो मा भूदिति । पितरौ । पितरः ॥

---

१. Dropped D_2, B_2. २. After it—परे C, B_2, D_3, D_4. ३. तत्रो Bc_1, Dc_3, Dc_4.

विभाषा तृतीयादिष्वचि ॥७।१।९७॥

तृतीयादिष्वचि[1] क्रोष्टुर्वा तृज्वत् स्यात् ॥ क्रोष्ट्रा[2] । क्रोष्ट्रे[3] ।

ऋत उत् ॥६।१।१११॥

ऋदन्तात् ङसिङसोरति परे उकार एकादेशः स्यात् । रंपरः[4] ।

रात्सस्य ॥८।२।२४॥

रेफात् संयोगान्तस्य सकारस्यैव लोपो नान्यस्य ॥ रेफस्य विसर्गः[5] । क्रोष्टुः । क्रोष्टुः । क्रोष्ट्रोः । आमि परत्वात् तृज्वद्भावे प्राप्ते ।

विभाषा । अप्राप्तविभाषेयम् ॥

ऋत उत् । ऋत इति तपरत्वम् । तेन दीर्घनिवृत्त्यर्थम् । तेन उन्र्योर्ग[6] इत्येवमादि सिद्धम् । उदित्येतदपि दीर्घनिवृत्तये । अन्यथा हि द्विमात्रस्य स्थानिनो द्विमात्र एवादेशः स्यात् । ननु च 'भाव्यमानेनाणा सवर्णानां ग्रहणं न' इति द्विमात्रो न स्यात् । एवं तर्ह्येतत् ज्ञापयति 'भवत्युकारेण भाव्यमानेनापि सवर्णानां ग्रहणम्' इति । तेन यदग्रे-वक्ष्यति 'स्थानेन्तरतमः' इति ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकार इत्येतदुपपन्नं भवति ॥

रात्सस्य । 'संयोगान्तस्य लोपः' इति सिद्धे नियमार्थं वचनम् । 'सिद्धे सत्यारम्भो नियमार्थः' इति न्यायादिति चेतसि कृत्वाह । **सकारस्यैव लोपो नान्यस्येति** । **रेफस्य विसर्ग** इति । क्रोष्टु अस् इति स्थिते सलोपे च कृते 'खरवसानयोः—' इति रेफस्य विसर्ग इति भावः । **आमीत्यादि** । क्रोष्टु आम् इति स्थिते रामाणामित्यादौ सावकाशो 'ह्रस्वनद्यापः—' इति नुट् प्राप्नोति[7] । क्रोष्टा[8] इत्यादौ

---

१. तृतीयादावचि D_1, B_2. २. After it—क्रोष्टुना B_2, D_3, D_4, D_5. ३. After it—क्रोष्टवे B_2, D_3, D_5. ४. पररत्वम् B_1. ५. विसर्जनीयः D_2. ६. उन्र्योर्ग Bc_1. ७. प्राप्ति Nc_1. ८. क्रोष्टु Bc_1, Dc_4.

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन* । इति नुडेव स्यात् । क्रोष्टूनाम् । क्रोष्टरि । क्रोष्टोः । पक्षे हलादौ च शंभुवत् । ओमि शसि च तृज्वद्भावो वेति केचित् । क्रोष्टून् । क्रोष्टृणाम् ॥

हूहूः । हूह्वौ । हूह्वः । इत्यादि । वातप्रमीवत् । एवमतिचम्वादयः । खलपूः ।

सावकाशस्तृज्वद्भावश्च प्राप्नोति । 'तत्र विप्रतिषेधे परं कार्यम्' इति परत्वात् तृज्वद्भाव एव प्राप्नोति तस्मिन् प्राप्ते इत्यर्थः । नुमित्यादि । नुम् 'इकोचि विभक्तौ' इति विहितः । अचिरेति । 'अचिर् ऋतः' इति विहितो रः । तृज्वद्भावोयमेव । एभ्यो नुट् भवति पूर्वविप्रतिषेधेनेत्यर्थः । पूर्वविप्रतिषेधश्च परशब्दस्येष्टवाचित्वाल्लभ्यते । क्रोष्टूनामिति । नुटि कृते अजादित्वाभावात् तृज्वद्भावो न । पक्षे इत्यादि । तृज्वद्भावाभावे हलादौ च विभक्तौ परतः शंभुशब्दस्येव रूपाणि ज्ञातव्यानीत्यर्थः । केचिदिति । दुर्गादयः । तथा चाह दुर्गः । 'शसादौ तु तृनन्तस्य तुनन्तस्य च प्रयोगः । क्रोष्टॄन् । क्रोष्टून् ।' इति ॥

इत्युदन्ताः ।

हूहूः । इति गन्धर्वविशेषस्य संज्ञा । इत्यादि वातप्रमीवदित्यादि । ङिवर्जमिति शेषः । ङौ सवर्णदीर्घो न भवति किं तु यणेव । हूह्वि । एवमिति । चमूं सेनामतिक्रान्तोतिचमूः । आदिना अलाब्वादयः । अतिचमूशब्दो हूहूशब्दवदित्यर्वाचीनमतम् । भाष्यकारमते तु नदीकार्यं स्यादिति । हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचमूनाम् । अतिचम्वाम् । इति । खलपूरिति । खलं पुनातीति खलपूः । पूञः क्विप् ॥

---

१. नुमचिर ऋतः B_2. २. नामि D_1. ३. वा dropped D_1. ४. क्रोष्टृणाम् । क्रोष्टूनाम् D_1, क्रोष्टून् । क्रोष्टृणाम् dropped P, D_5, B_1, B_2. ५. Before it—इति ऋदन्ताः C. ६. इत्यादि dropped D_2, P, B_1, B_2. ७. Before it—हूहूम् । हूह्वौ । हूहून् C. ८. Dropped Dc_3. ९. वातप्रमीवदिति Dc_3, Dc_4.

ओः सुपि ॥६।४।८३॥

अनेकाचोऽङ्गस्य धातोरुवर्णस्य यण् स्यादचि सुपि धात्ववयवपूर्वस्य[1] तु न स्यात्[2] । गतिकारकपूर्वस्यैवेति वाच्यम्* । खलप्वौ । खलप्वः । इत्यादि । प्रधीवत् । एवं सुल्वादयः । स्वभूः । स्वभुवौ । स्वभुवः । इत्यादि । सुधीवत् । एवं कटप्रू-स्वयंभ्वादयः । दृग्भूः[3] । दृक्कारापुनर्भ्वश्चेति वक्तव्यम्* । इति वचनाद्यण् । दृग्भ्वौ[4] । दृग्भ्वः । इत्यादि[5] । एवं[6] काराभूः । पुनर्भूः[7] ।

वर्षाभ्वश्च ॥६।४।८४॥

वर्षाभ्वो[8] यण् स्यादचि[9] । वर्षाभूः । वर्षाभ्वौ । वर्षाभ्वः । शेषं खलपूवत् ॥

ओः सुपि । सुपि किम् । ललुवतुः । अनेकाचः किम् । लुवौ । धात्ववयवसंयोगपूर्वस्य तु नेति किम् । कटप्रुवौ । गतिकारकपूर्वस्यैवेति किम् । परमलुवौ[10] । **स्वभुवौ** । स्वस्माद्भवतीति 'न भूसुधियोः' इति यणो निषेधः । **कटप्रू** इति । कटं प्रवते । 'क्विब्वचि—' इति क्विप् । दीर्घश्च । 'अत्यल्पमिदमुच्यते । वर्षाभ्वश्चेति । वर्षादृक्कार-पुनःपूर्वस्य भुव इति वक्तव्यम्' इति **महाभाष्यकारवचनमर्थतोऽनूद्य** तद्वचनबलादत्र यण् भवतीत्याह । **दृक्कारेत्यादि** । **इति वचनादिति** वचनं दृग्भूशब्दस्य यण् न स्यात् **काशिकादावदृष्टत्वादिति** शङ्का न कार्या साक्षाद् भाष्ये उक्तत्वादिति प्रामाणिकत्वदर्शनार्थम्[11] ॥

इत्यूदन्ताः ॥

---

१. पूर्वस्य न B_2. २. Dropped C, D_1, D_3, D_4. ३. दृन्भूः । दृन्कारा° B_1, D_1, P. ४. दृन्भ्वौ । दृन्भ्वः B_1, D_1, P_1. ५. इत्यादि dropped B_1, D_1. ६. एवं काराभूः । पुनर्भूः dropped B_3. After वर्षाभ्वश्च and its वृत्ति D_5 has एवं काराभूः. ७. Dropped C, D_3. After it—C has इत्युदन्ताः; From पुनर्भूः to खलपूवत्, dropped D_1. ८. Before it—वर्षाभू-शब्दस्य B_2. ९. °दचि सुपि B_2, D_4, D_5. १०. °भुवौ D_4. ११. °प्रदर्शनार्थम् Bc_1, Dc_4.

धाता[१]। सबुद्धिलोपे प्राप्ते परत्वात् 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः। [२]सस्य लोपः। [३]रस्य विसर्गः। हे धातः। [४]धातारौ। धातारः। धातारम्। धातारौ। पूर्वसवर्णदीर्घः। नत्वम्। धातॄन्। ऋवर्णान्नस्य णत्वं वाच्यम्*। धातॄणाम्। शेषं [५]तृजन्तक्रोष्टुवत्। एवं नप्तृहोतृपोत्रा[६]दयः। पिता। हे पितः। अतृजन्तत्वात् 'अप्तृन्–' इत्युपधादीर्घो न। पितरौ। पितरः। पितरम्। पितरौ। शेषं धातृवत्। एवं जा[७]मातृमातृभ्रात्रादयः॥

नृ च ॥६।४।६॥

नॄ[८] इत्यस्य ना[९]मि वा दीर्घः। नृणाम्। नॄणाम्। शेषं पितृवत्[१०]।

धात्रेति। 'ण्वुल्तृचौ' इति तृच्। अनङादि। धाताराविति। तृजन्तत्वाद् दीर्घः। एवमिति। अनेन प्रकारेण। नप्त्रादयस्तृन्तृजन्ताश्च ज्ञातव्या इत्यर्थः। अतृजन्तत्वादिति। पितृशब्दस्येति शेषः। ननु पितृशब्दोऽप्युणादौ तृजन्तो 'नप्तृनेष्टृ–' इत्यादिना निपात्यते सत्यम्। तथापि 'अप्तृन्–' इति सूत्रेण उणादितृजन्तव्यतिरिक्ततृजन्तग्रहणादतृजन्तः स्यात्। यथा चैतत्तथा तत्रैव प्रत्यपादि॥

नृ च। केचिदत्र 'छन्दस्युभयथा' इत्यतः 'छन्दसि' इत्यनुवर्तयन्ति। तेन भाषायां न भवति। आचार्याणां मते तु भाषायामपि भवतीति 'छन्दसि' इति नोक्तम्। तथा च।

'नृणामेको गम्यस्त्वमसि पयसामर्णव इव' इत्यादि प्रयोगो भाषायां दृश्यते॥

इति ऋदन्ताः।

---

१. After it—दृग्भ : दृग्कारा° । काराभू : D4. २. सस्य लोपः। रस्य विसर्गः dropped B1. ३. रेफस्य B2, D4. ४. Before it—ऋतौ ङौ सर्वनामस्थाने गुणः। 'अप्तृन्—' इति दीर्घः B2. ५. तृज्वत् क्रोष्टुवत् D1. ६. भ्रात्रादयः B1. ७. जामात्रादयः B1, C, B2. ८. नृ इत्येतस्य P. ९. नामि परे D3. १०. ऋदन्ताः after it C.

गोतो णित् ॥७।१।९०॥

गोशब्दात् परं सर्वनामस्थानं णित्कार्यकृत् स्यात् ॥ गौः । गावौ । गावः ।

औतोम्शसोः ॥६।१।९३॥

ओतोम्शसोः परतः[१] आकार एकादेशः स्यात् ॥ गाम् । गावौ । गाः । गवा । गोभ्याम् । इत्यादि । 'ङसिङसोश्च' इति पूर्वरूप[२] एकादेशः[३] । गोः । गोः । इत्यादि[४] । गोत इति

गोतः । ननु च हे चित्रगो । चित्रगव इत्यत्र किमिति णित्कार्यं न । उच्यते । 'अङ्गान्त्यकार्ये वृत्ते पुनर्नाङ्गान्त्यकार्यम्' इति गुणे कृते णित्कार्यं न भविष्यति । अथवा गोत इति सम्बन्धे षष्ठी । ततश्च गोतो यत् सर्वनामस्थानमिति यच्च तदर्थस्यैकत्वादौ सर्वनामस्थानं तद् गोः सर्वनामस्थानमुच्यते । चित्रगुशब्दात् परं यत् सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादौ ।

ओतः । ओकारान्तात् परं सर्वनामस्थानं णिन्निर्दिश्यते । तेन वृद्धौ नाप्राप्तायामयमाकारो विधीयमानस्तां बाधते । 'अम्' अत्र द्वितीयैकवचनं गृह्यते । शसा साहचर्यात् । 'सुपि' इत्यधिकाराच्च । तेन 'अचिनवम्' इत्यत्र न । गोत इत्यादि । 'गोतो णित्' इत्यस्मिन् सूत्रे 'गोतः' इति तपरकरणमोकारान्तानां शब्दानामुपलक्षणार्थम् । तेन सुद्योरित्यादि सिध्यति । ननु च तपरकरणं तत्कालावधारणार्थं

---

१. परे B_1, अतः D_1. २. रूपादेशः D_1. ३. After it—स्यात् B_2. ४. इत्यादि dropped B_1, B_2. ५. कृते Dc_2. ६. Dropped Bc_1.

तपरत्वमोकारा[1]न्तोपलक्षणार्थम् । यस्माद्व[2]र्णनिर्देशे तपरत्वं प्रसिद्धम्[3] । तेन सुद्यौः । सुद्यावौ । सुद्यावः । हे सुद्यौः । इ[4]त्यादि ।

रायो हलि ॥७।२।८५॥

रैशब्दस्या[5]कारः स्याद्धलि विभक्तौ । अचि आयादेशः । रा[6]ः । रायौ । रायः । रा[7]यम् । रायौ । रायः । राया । राभ्याम् । इत्यादि ॥

तत् किमुच्यत ओकारान्तोपलक्षणार्थमित्याशङ्क्याह । **यस्मादि-**त्यादि । यस्माद्धेतोस्तत्कालावधारणार्थं तपरत्वं वर्णनिर्देशे प्रसिद्धं 'वृद्धिरादैच्' इत्यादौ । न चायं वर्णनिर्देशः किं तु शब्दनिर्देशस्तस्मादेतत् तपरत्वमोकारान्तोपलक्षणार्थमेव तेन सुद्यौरित्यादि सिध्यतीति । केचित् 'ओतो णित्' इति सूत्रं पठन्ति तदपि प्रमाणम् । उभयथा ह्याचार्येण शिष्याः प्रतिपादिताः ॥

इत्योदन्ताः ॥

रायः । 'हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि' इत्यभिधाने पुलिङ्गसाहचर्यात् पुंसि ॥

इत्यैदन्ताः ॥

---

१. °रान्तस्योप° B_2. २. °द्वर्णे निर्देशे B_1. ३. After this—हे चित्रगो । परमगव इत्यत्र 'एकदेशविकृतमनन्यवद् भवति' इत्यनया परिभाषया वृद्धौ सत्याम् 'अङ्गान्त्यकार्ये कृते पुनर्नाङ्गान्त्यकार्यम्' अनया वृद्धिर्न । तेन सुद्यौः &c., D_2. ४. इत्योदन्ताः after it—C; D_1 drops इत्यादि. ५. °स्याकारान्तादेशः B_2; °स्याकारादेशः D_1, D_2. ६. सुराः । सुरायौ । सुरायः । इत्यादि ॥ इत्यैदन्ताः । C. ७. हे राः before it—D_2; हे राः for रायम् । रायौ रायः । D_1.

ग्लौशब्दस्य हलादावविशेषः । अजादावावादेशः । ग्लौः । ग्लावौ । ग्लावः । इत्यादि[1] ॥[2]

इत्यजन्ताः पुंलिङ्गाः ॥

ग्लौरिति । 'ग्लौर्मृगाङ्कः कलानिधिः' ।

इत्यौदन्ताः ॥[3]

अत्र ऋकारान्ता ऌकारान्ता एकारान्ताश्चाप्रसिद्धत्वान्नोदाहृताः। इति

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहाचार्यो-

यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।

तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीयव्याख्याने-[4]

गुः प्रसादे सुविशदमिह पुल्लिङ्गशब्दा अजन्ताः ॥

---

१. B_1, C, D_4, D_5 drop ग्लौशब्दस्य....वादेशः। २. हे ग्लौः । ग्लावम् ग्लावौ । ग्लावः । ग्लावा । ग्लौभ्याम् । इत्यादि । D_1; After it—हे ग्लौः D_2, D_5; हे ग्लौः । इत्यादि । D_3. ३. इत्यौदन्ताः after it C. ४. व्याख्यानेऽस्मिन् प्रसादे Dc_1, Dc_2.

आबन्तत्वात् स्वाद्युत्पत्तिः। हल्ङ्याबिति सुलोपः[1]। रमा। दीर्घात् किम्। अतिखट्वः। निष्कौशाम्बिः।

औङ आपः ॥७।१।१८॥

आबन्तादङ्गात्[2] परस्यौङः शी स्यात्॥ औङित्यौकारविभक्तेः संज्ञा। रमे। रमाः।

अथ स्त्रीलिङ्गाः शब्दा अजन्ता[3] उच्यन्ते ॥

आबन्तत्वादिति[4]। रमाशब्दस्य 'अजाद्यतष्टाप्' इति टाबन्तत्वेनाबन्तत्वात् 'स्वौजसमौट्' इत्यादिना स्वाद्युत्पत्तिरित्यर्थः। तत्र प्रथमैकवचने[5] रमा सु इति स्थिते 'हल्ङ्याब्--' इति सोर्लोपो भवतीत्याह। हल्ङ्याब् इति। 'हल्ङ्याब्भ्यः--' इति सूत्रे यद् दीर्घग्रहणं तत्प्रत्युदाहरणव्याजेन। ङ्याबन्तयोर्ह्रस्वत्वे जाते यादृशं रूपं भवति तद् दर्शयति। दीर्घादित्यादि। खट्वामतिक्रान्तोतिखट्वः। निर्गतः कौशाम्ब्या निष्कौशाम्बिः। 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वम्[6]।

औङः। प्रथमाद्वितीययोरौकारयोर्ग्रहणार्थमौङिति ङित् पठितः। न च ङित्त्वे श्यां परतो याडादीनि कार्याणि स्युरित्याशङ्कनीयम्। ङिदिति हि वर्णनिर्देश इति तानि ङिदादौ विधीयन्ते। अथवा पूर्वाचार्याणां संज्ञेयम् औङिति औकारविभक्तेरित्येतच्चेतसि कृत्वाह[7]। औङित्यादि। तथा चोक्तम्।

'औकारोयं शीविधौ ङिद् गृहीतो
ङिच्चास्माकं नास्ति कोयं प्रकारः।
सामान्यार्थस्तस्य चासञ्जनेस्मिन्
ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥१॥

---

१. सोर्लोपः D_5, D_4, D_3, D_2. २. B_1 drops अङ्गात्. ३. अजन्ताः शब्दा Dc_4. ४. आबन्तत्वात् स्वाद्युत्पत्तिरिति। Dc_2. ५. °वचनं Nc_2, Bc_1. ६. ह्रस्वः। Dc_4. ७. च औकार° Dc_1.

सम्बुद्धौ च ॥७।३।१०६॥

आप एकारः स्यात् संबुद्धौ ॥ एङ्ह्रस्वादिति संबुद्धि[1]-लोपः । हे रमे । हे[2] रमे । हे रमाः । रमाम् । रमे । रमाः । स्त्रीत्वान्नत्वाभावः ।

आङि चापः ॥७।३।१०५॥

आङि ओसि च[3] आबन्तस्य एकारः[4] स्यात्[5] ॥ रमया । ङ्याब्ग्रहणे दीर्घग्रहणादेत्वमत्र न । अतिखट्वेन । रमाभ्याम् । रमाभिः ।

याडापः ॥७।३।११३॥

आपः परस्य ङिद्वचनस्य याडागमः स्यात् ॥

'ङिन्त्वे विद्याद् वर्णनिर्देशमात्रं
वर्णे यत् स्यात्तच्च विद्यात् तदादौ ।
वर्णश्चायं तेन ङिन्त्वेप्यदोषो
निर्देशोयं पूर्वसूत्रेण वा स्यात् ॥ २ ॥' इति ।

आबिति टाप् डाप् चापां सामान्यग्रहणम् ।

आङीति । **ङ्याबिति** । ङ्यापोर्ग्रहणे दीर्घग्रहणात् दीर्घविशेषग्रहणात् अतिखट्वेनेत्यत्रैत्वं न । अयं भावः । 'हलङ्याब्भ्यो दीर्घात्' इति योगविभागः कर्तव्यः । इह शास्त्रे यावत् ङ्यापोः कार्यं तावत् सर्वं दीर्घयोः स्यात् ह्रस्वयोर्मा भूदिति । ततः 'सुतीत्यपृक्तं हल्' इति द्वितीयो योगः । अत्र च हल्ङ्याब्भ्यो दीर्घा[6]दिति वर्तते ।

याट् । अतिखट्वायेत्यत्राकृते दीर्घे ङ्याब्ग्रहणे दीर्घग्रहणात् यां[7]डागमो न भवति कृते तु लाक्षणिकत्वान्न भवति ।

---

१. संबुद्धेर्लोपः D_3. २. D_1, D_2, drop हे रमे । हे रमाः ।. ३. परे P; च परे D_2. ४. एकारादेशः P. ५. Dropped B_2. ६. °दित्यनुवर्तते । Dc_2. ७. याडापो न Nc_2.

आटश्च ॥६।१।९०॥

आटोचि परे वृद्धिरेकादेशः ॥ रमायै । रमाभ्याम् । रमाभ्यः । रमायाः २ । रमयोः २ । रमाणाम् । ङेरामित्यामादेशः । रमायाम् । रमासु । एवं दुर्गाम्बिकादयः ।

सर्वनाम्नः स्याड्ह्रस्वश्च ॥७।३।११४॥

आपः सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः ॥ सर्वस्यै । सर्वस्याः २ । आमि सुट् । सर्वासाम् । सर्वस्याम् । शेषं रमावत् । एवं विश्वादय आबन्ताः ।

आटः । चकारोधिकविधानार्थः । तेन उस्रामात्मन ऐच्छत् औस्रीयत् औंकारीयत् आ ऊढा ओढा तामैच्छत् औढीयत् इत्यत्र 'उस्यपदान्तात्' 'ओमाङोश्च' इति पररूपं न भवति । ननु च रमाया ए इति 'वृद्धिरेचि' इति वृद्धया रमायै इति सिध्यति रमायाः इत्यादि तु सवर्णदीर्घेण तत् किमेतत् सूत्रारम्भेण । नैष दोषः । यद्यप्येतत् सिध्यति तथापि ऐषिष्टेत्यादि न सिध्यति तदर्थमेतत् सूत्रमवश्यमारब्धव्यम् । तत् तदर्थं कृतमेतदर्थमपि भवति । याटोप्यन्ते आट् अस्तीति एतच्चेतसि कृत्वात्रेदं सूत्रं पठितमाचार्यवर्यैः । तथा च धर्मकीर्तिना रूपावतारे जायाशब्दरूपवर्णने 'याडापः' इत्येतदुक्त्वा 'आटश्च' इत्येतत् पठितं जायायै जायाया इत्येतद्रूपसिद्ध्यर्थम् । तथा विचारचिन्तामणौ बोपदेवपण्डितैरपि पठितम् ।

'शिवाभ्यां च शिवाभिर्या डाप आटश्च वृद्धिरे ।
शिवायै च शिवाभ्यां च शिवाभ्यः पुनरप्ययम् ॥' इति ।

सर्वनाम्नः । याटोप्येपवादः । आपः किम् । भवत्यै । भवत्याः ।

---

१. After it—स्यात् B_2, D_2, D_3. २. B_1 drops this sentence. ३. B_1 drops शेषं रमावत्. ४. °दयोप्याबन्ताः D_5. ५. ऐक्षिष्ट° Nc_2, Dc_4, Dc_3; ऐधिष्ट° Nc_1. ६. Before this—च Dc_2. ७. After it—शिवायै इति सिद्धये Dc_3. ८. चि शिवायै Nc_1, Dc_1, Dc_2. ९. अपि dropped Bc_1, Dc_4.

विभाषा दिक्समासे बहुव्रीहौ ॥१।१।२८॥

अत्र सर्वनामता वा[1] ॥ उत्तरपूर्वस्यै । उत्तरपूर्वायै । अपूरीत्युक्तेः अन्तरायै नगर्यै ॥

विभाषा द्वितीयातृतीयाभ्याम् ॥७।३।११५॥

आभ्यां परस्य ङितः स्याड् वा[2] स्यात् [3]ह्रस्वश्च वा[4] ॥ द्वितीयस्यै । द्वितीयायै । द्वितीयस्याः । द्वितीयायाः । पुनस्तौ । द्वितीयस्याम् । द्वितीयायाम् । शेषं रमावत् ॥

अम्बार्थनद्योर्ह्रस्वः ॥७।३।१०७॥

अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् संबुद्धौ । हे अम्ब । [5]शेषं रमावत् । एवमक्काल्लादयः । डलकवतीनां न ह्रस्वः[6] ।

विभाषा । 'न बहुव्रीहौ' इति प्रतिषेधे प्राप्ते विकल्प आरभ्यते । दिशां समासो दिक्समासः । उत्तरपूर्वस्यै इति । उत्तरस्याः पूर्वस्याश्चान्तरालमुत्तरपूर्वा । 'दिङ्नामान्यन्तराले' इति समासः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव इति पुंवत् । समासग्रहणं समास एव यो बहुव्रीहिस्तत्रैव यथा स्यात् बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत् । दक्षिणदक्षिणस्यै देहीति । 'आबाधे च' इति द्विर्वचनं बहुव्रीहिवद्भावश्च । **अपुरीति** । अन्तरोपुरीत्यत्रापुरीत्युक्ते अन्तरशब्दस्य नगरीवाचकस्य सर्वनामसंज्ञा नेति अन्तरायै इति याट् स्यात् न स्याडित्यर्थः ।

विभाषा । **पुनस्ताविति** । पुनरतौ प्रयोगौ द्वितीयस्या द्वितीयाया इति ।

अम्बार्थ । अम्बार्था मात्रर्थाः । मातुर्मातजादेशो वाच्यः संबुद्धौ अर्हन्तं पुत्रमभिधातुम् । चोन्तोदात्तार्थः । गार्गीमात । **डलकवतीति** ।

---

१. वा स्यात् B_2. २. C D_4, D_5 drop वा. ३. आपश्च ह्रस्वः D_3. ४. P, B_2 drop वा; D_1 drops च वा. ५. शेषं रमावत् dropped B_2. ६. D_1 drops it.

जरा। हलि रमावत्। अचि वा जरसादेशः। जरसौ। केचित् पूर्वविप्रतिषेधेनादौ शीभावमिच्छन्ति। जरसी। जरे। जरसः। जराः। इत्यादि। 'पद्दन्—' इति नासिकाया नस् निशाया निश्। नसः। नसा। 'ह्रशि च।' नोभ्याम्। निशः। निशा।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥८।२।३६॥

व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्याज्झलि पदान्ते च। 'झलां जशोऽन्ते' इति जश्त्वम्। डकारः।

डलका यासामक्षरश्रुतीनां सन्ति ता डलकवत्यः। अथवार्थगतेन स्त्रीत्वेन अम्बार्था निर्दिष्टाः। अत्रासंयुक्ता डलका गृह्यन्ते। अतः अक्क अक्ष इत्यत्र ह्रस्वः स्यादेव। 'जराया जरसन्यतरस्याम्' इत्यचि वा जरसादेशः स्यादित्याह। अचीत्यादि। जरसाविति। जरा औ इति स्थिते 'औङ आपः' इति शीभावः प्राप्नोति जरस्भावश्च। तत्र परत्वाज्जरस्भाव एव भवति। केचिदिति। तथा च दुर्गसिंहवृत्तौ 'औरीम्' इति सूत्रव्याख्याने उक्तम्। 'दीर्घात् किम्। जरसीति केचित्' इति। नसः। नसा। इति। नासिकाशब्दस्य नसादेशे शसि टाप्रत्यये च परे पक्षे सर्वनामस्थाने च रमावत्।

व्रश्च। ओ व्रश्चू छेदने। भ्रस्जो पाके। सृज विसर्गे। मृजूष शुद्धौ। यज देवपूजासंगतिकरणदानेषु। राजृ दीप्तौ। टु भ्राजृ

---

१. Before it—अत्रासंयुक्ता डलका गृह्यन्ते। हे अम्बाडे। हे अम्बाले। हे अम्बिके। डि संबुद्धौ ह्रस्वो वेति वक्तव्यम्*। हे देवत। हे देवते। हे देवते। हे देवताः। P; B_2 and D_3 have अत्रासंयुक्ता डलका गृह्यन्ते after the form हे अम्बिके and drop from डि to हे देवताः. २. जरसौ dropped D_1, B, P, C. ३. इत्यादि dropped B_1. ४. निशाया निश् after नोभ्यामित्यादि D_3. ५. Dropped P, B_1, D_2, D_3. ६. After it—इत्यादि D_1, D_2, D_3, D_4. ७. षकारान्तादेशः D_1. ८. झलि परे D_1; झलि परतः D_2. ९ जश्त्वेन D_4, P, C; जश्त्वम् dropped D_3. १०. डत्वम् D_3. ११. इच्छन्तीति Dc_4. १२. व्रश्चू Dc_1.

निड्भ्याम् । निड्भिः । इत्यादि ॥ मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा* ॥ पृतनायाः पृत् । पृतः । पृता । पृद्भ्याम् । इत्यादि । पक्षे सुटि च रमावत् । गोपा विश्वपावत् । मतिर्हरिवत् । स्त्रीत्वाच्छसो नत्वाभावः । मतीः । टा इत्यस्य न नात्वम् । मत्या ।

ङिति ह्रस्वश्च ॥१।४।६॥

इयङुवङ्स्थानौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इउवर्णौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति परे न तु स्त्री ॥

दीप्तौ । **निड्भ्यामित्यादि** । निश् समाधौ क्विबन्तः । ततः 'आपं चैव हलन्तानाम्' इति भागुरिमतेनाप् । ततो निश् आदेशः । पश्चात् षः । यदि च 'व्रश्चभ्रस्ज–' इति सूत्रे 'दादेर्धातोः–' इत्यतः 'धातोः' इत्यनुवर्तते तर्हि आबभावपक्षे रूपं निड्भ्यामिति । **गोपा विश्वपावदिति** । गाः पातीति गोपाः । अयं विश्वपाशब्दवत् । आबन्तत्वाभावादाब्विधिर्न स्यादिति भावः ॥

इत्यादन्ताः ॥

टा इत्यस्य न नात्वमिति । स्त्रीत्वादेव । ङिति । 'यू स्त्र्याख्यौ नदी' इति दीर्घयोरेव नदीसंज्ञा विहितेति ह्रस्वयोर्न प्राप्नोति । 'नेयङुवङ्स्थानावस्त्री' इतीयङुवङ्स्थानयोश्च निषिद्धा तस्मात् ह्रस्वयोरियङुवङ्स्थानयोश्च ङिति वा विधीयते । **इयङुवङ्स्थानावित्यादि** । इयङुवङ्स्थानौ नित्यस्त्रीलिङ्गावीकारोकारौ ह्रस्वौ नित्यस्त्रीलिङ्गाविकारोकारौ स्त्रीलिङ्ग एव वा नदीसंज्ञौ स्तः न तु लिङ्गान्तरे स्त्रीशब्दं विनेत्यर्थः । तथा चोक्तं **महाभाष्ये** । 'ह्रस्वौ च इयङुवङ्स्थानौ च प्रवृत्तौ प्राक् च प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यम् । किं प्रयोजनम् । श्रियै । अतिश्रियै ब्राह्मण्यै । क्व मा भूत् । श्रिये अतिश्रिये ब्राह्मणाय । भ्रुवै । अतिभ्रुवै ब्राह्मण्यै । क्व मा भूत् ।

---

१. इति D_1. २. शसादौ परे D_2. ३. टापं Dc_1. ४. च प्राक् D_3. ५. °वचनादेव Dc_2.

आण् नद्याः ॥७।३।११२॥

नद्यन्तात् परेषां ङितामाडागमः स्यात्। 'आटश्च' इति वृद्धिः। मत्यै। मतये। मत्याः। मतेः २। मत्याम्। मतौ। एवं श्रुतिस्मृतिबुद्ध्यादयः॥

भ्रुवे अतिभ्रुवे ब्राह्मणाय। शकट्यै। अतिशकट्यै ब्राह्मण्यै। क्व मा भूत्। शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्व मा भूत्। धेनवे अतिधेनवे ब्राह्मणाय' इति। तथाग्रे उक्तम्। 'प्रथमलिङ्गग्रहणं चोदितं तद् द्रेष्यं विजानीयात्। सर्वमेवं विकल्प्यते इति तदाचार्यः सुहृद् भूत्वाचष्टे' इति॥

आण्नद्याः। मतये इति। नदीसंज्ञाभावे घिसंज्ञा ततो 'घेर्ङिति' इति गुणः। मत्यामिति। अत्र स्पष्टत्वादव्याख्यातं यत् सूत्रम् 'इदुद्भ्याम्*' ७।३।११७॥ इति तेन ङेराम्। अस्यायमर्थः। इकारोकाराभ्यां नदीसंज्ञाभ्यामुत्तरस्य ङेराम् स्यादिति। ननु च यद्यत्रापि नद्या इति वर्तते तर्हि 'ङेराम्नद्याम्नीभ्यः' इत्यनेनैवाम् सिद्धः किम् 'इदुद्भ्याम्' इत्यनेन। मैवं वोचः। 'औत्' इत्यौत्वं परत्वादामं बाधित्वा स्यात् तन्मा भूदित्येवमर्थमिदं पृथक् सूत्रम्। ननु च 'औत्' इति सूत्रे घिनदीसंज्ञावर्जिताभ्यामिति व्याख्यातम्। अयं च नदीसंज्ञः। तत् कुत औत्वप्रसङ्गः। नैष दोषः। 'इदुद्भ्याम्' इत्यस्मिन् पृथग्योगे सति तद् व्याख्यानं नान्यथेति तस्मिन्नेव सूत्रे सूचितम्। मतौ इति। नदीसंज्ञाभावे 'अच्च घेः' इत्यौत्वमन्तादेशश्चाकारः॥

---

१. 'आटश्च' इति वृद्धिः dropped D2. २. Before it—मत्योः २। D2. ३. After it—इत्यादि P. ४. भूतिस्मृतिश्रुति° D1. ५. After it the verse—

अवीतन्त्रीतरीलक्ष्मीह्रीधीश्रीणामुणादितः।
शब्दानां तु भवत्येषां सिलोपो न कदाचन॥ B1.

६. कर्तव्यमिति Dc3. ७. सर्व एवं Nc1. ८. °मित्येतस्मिन् Dc3, Nc1; अस्मिन् dropped Dc1. ९. Dropped Dc1.

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥७।२।९९॥

एतयोरेतावादेशौ स्तः स्त्रियां विभक्तौ परतः ॥

अचि र ऋतः ॥७।२।१००॥

तिसृचतसृशब्दयोः ऋकारस्य रेफादेशः स्यात् अचि । गुणदीर्घोत्वानामपवादः ॥ तिस्रः २ । तिसृभिः । तिसृभ्यः २ । आमि 'नुमचिर' इति नुडेव ॥

न तिसृचतसृ ॥६।४।४॥

एतयोर्नामि दीर्घो न स्यात् ॥ तिसृणाम् । तिसृषु ।

त्रिचतुरोः । स्त्रियामिति किम् । त्रयः । चत्वारः । विभक्तौ किम् । त्रिभार्यः । चतुर्भार्यः । संज्ञायां कनि तिसृभावो वाच्यः । तिसृकः । चतसृशब्दस्याद्युदात्तत्वं निपात्यम् । चतस्रः पश्येत्यत्र 'चतुरः शसि' इत्येष स्वरो मा भूदिति । चतसृणामित्यत्र तु 'षट् चतुर्भ्यो हलादिः' इत्येष स्वरो भवति । हलादिग्रहणसामर्थ्यात् निपातनस्वर-बाधात् ।

अचि । गुणदीर्घोत्वानामपवाद इति । गुणस्य 'ऋतो ङिसर्व-नामस्थानयोः' इति प्राप्तस्य । दीर्घस्य 'प्रथमयोः पूर्वसवर्ण—' इति पूर्वसवर्णदीर्घस्य । उत्वस्य 'ऋ उत्' इति प्राप्तस्यापवादः बाधको रेफ इत्यर्थः । तत्र गुणस्य पूर्वविप्रतिषेधेन इतरयोः परविप्रतिषेधेन ।

न तिसृ । अयमेव प्रतिषेधो ज्ञापकः अचि रात् पूर्वविप्रति-षेधेन नुट् स्यादित्यस्यार्थस्य । 'त्रिचतुरोः स्त्रियाम्' इत्यत्र सूत्रे वर्तमानं 'स्त्रियाम्' इति पदमङ्गस्य प्रकृतत्वात् तस्यैव विशेषणं

---

१. भवतः P. २. B_1 drops परतः. ३. एतयोः for शब्दयोः P, D_1, B_2. ४. अचि dropped Dc_2; अचि परे Dc_3. ५. आमि नुडेव B_2. ६. एतयोरङ्गयो° D_3. ७. चतुर्भार्यः dropped Dc_1.

स्त्रियामिति त्रिचतुरोर्विशेषणं नाङ्गस्य तेन स्त्रियां गौणयोर्नैतावादेशौ[1] । प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः । प्रियत्री । प्रियत्रयः[2] । प्रियचत्वाः[3] । 'चतुरनडुहोः—' इत्याम् । इत्यादि । यदा स्त्रियां मुख्यौ लिङ्गान्तरे गौणौ तदादेशौ[4] स्त एव । प्रियास्तिस्रो

न त्रिचतुरोरिति कस्यचिदाशङ्का स्यात्तामपनुदन्नाह । स्त्रियामितीत्यादि । यतः स्त्रियामित्येतत्पदं प्रत्यासत्त्या त्रिचतुरोरेव विशेषणं नाङ्गस्य तेन कारणेन अङ्गस्य स्त्रियां प्राधान्येन वृत्तावपि स्त्रियामप्रधानयोस्त्रिचतुर्शब्दयोस्तिसृ चतसृ इत्येतावादेशौ न भवत इत्यर्थः । तादृशं स्थलं दर्शयति । प्रिया इत्यादि । अत्र प्रियत्रिरित्येतदङ्गं मुख्यवृत्त्या स्त्रियां वर्तते । त्रिशब्दस्तु मुख्यया वृत्त्या पुंसि नपुंसके वा वर्तते स्त्रियां तु गौण्या वृत्त्येति न भवति तिसृभावः । तेन मतिशब्दवदस्य रूपं नेयम् । प्रियचत्वा इति । प्रियाश्चत्वारश्चत्वारि वा यस्याः सा प्रियचत्वाः । अत्रापि चतुःशब्दोऽप्राधान्येन[5] स्त्रियां वर्तते प्राधान्येन पुंनपुंसकयोस्तेन चतसृभावो न । प्रिय चतुर् स् इति स्थिते 'चतुरनडुहोरामुदात्तः' इत्याम् । सुलोपः । रेफविसर्गः[6] । आदिना । प्रियचत्वारौ । प्रियचत्वारः । हे प्रियचत्वः । प्रियचत्वारम् । प्रियचत्वारौ । प्रियचतुरः । प्रियचतुरा । प्रियचतुर्भ्याम् । प्रियचतुराम् । प्रियचतुर्षु । इत्यादि । यदेत्यादि । यदा त्रिचतुर्शब्दौ स्त्रियां मुख्यया वृत्त्या वर्तेते लिङ्गान्तरे पुंनपुंसकयोर्गौण्या वृत्त्या वर्तेते तदा त्रिचतुर्शब्दयोस्तिसृचतसृशब्दावादेशौ भवत एव यद्यप्यङ्ग

---

१. After it—स्तः B1, C, D3. २. After it—शेषं हरिवत् D3. ३. प्रियचत्वारि for it C; After it—मतिवत् D2; after it—प्रियचत्वारौ । प्रियचत्वारः । D5. ४. तदा त्वादेशौ B2. ५. प्रवृत्ता° Dc3. ६. रेफस्य विसर्गः । Nc2, Dc1, Dc2.

यस्य[1] स प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रम्। प्रियतिस्रौ। शसि प्रियातिस्रः[2]। ङसि प्रियतिस्रः। ङौ प्रियतिस्रि। क्लीबे प्रियतिसृ। प्रियातिसृणी[3]। इत्यादि। एवं प्रियचतसा। प्रियचतसृ[4]। द्वेरत्वे सत्याप्। द्वे २। द्वाभ्याम् ३। द्वयोः २। गौरी। गौर्यौ। गौर्यः।

स्त्रियां न वर्तते तदापीत्यर्थः। तादृशं स्थलं दर्शयति। **प्रियास्तिस्रोस्य प्रियतिसेति**। अत्र त्रिशब्दो मुख्यया वृत्त्या स्त्रीमाह पुमांसं तु गौण्या वृत्त्या। **प्रियतिसेति**। तिसृभावोनङ् उपधादीर्घः सुलोपः नलोपः। **प्रियतिस्रावित्यादि**। गुणअमिपूर्वत्वपूर्वसवर्णदीर्घऋत्वउत्वानि बाधित्वा 'अचिर ऋतः' इति रेफः। **क्लीबे** इति। प्रियास्तिस्रो यस्य तत् **प्रियतिसृ**। **एवं प्रियचतसेति**। प्रियाश्चतस्रोस्य प्रियचतसा प्रियतिसवत् प्रक्रिया। **प्रियचतसृ**। एतत् क्लीबे। **द्वेरत्वे** इति। द्विशब्दो द्विवचनान्तस्तस्य द्वि औ इति स्थिते 'त्यदादीनामः' इत्यत्वम्। तस्मिन् कृतेदन्तत्वाद् 'अजाद्यतष्टाप्' इति टाप्। ननु च विभक्तौ परतस्त्यदाद्यत्वं विधीयते तत्र यदि त्यदाद्यत्वे कृते टाप् स्यात् विभक्तिपरत्वं व्याहन्येत तन्नायुक्तम्। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषया निषिद्धत्वात्। नैष दोषः। अनित्यैषा परिभाषेति। तत 'औङ आपः' इति शीभावः। ततो गुणः॥

इतीदन्ताः॥

---

१. यस्यासौ B_1, यस्य यस्या वा सा D_2, D_3.: अस्य Com. २. After it—प्रियातिस्रा। प्रियतिस्रे। प्रियतिस्रः २। प्रियतिस्रि। क्लीबे, &c., D_3, D_4. ३. After it—प्रियतिसृणि D_1, D_3. ४. प्रियचतस्रौ for प्रियचतसृ B_2, D_2 follows B_2, and has one more form प्रियश्चतस्रः. ५. Before it—'दीर्घाज्जसि च' इति पूर्वसवर्णनिषेधः D_1. ६. तथापि Bc_1. ७. °भावे Nc_2. ८. अनित्येयं Dc_4, Dc_3.

यू स्त्र्याख्यौ नदी ॥ १।४।३॥

ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः ॥ अम्बार्थेति[1] ह्रस्वः । ह्रस्वविधिसामर्थ्यान्न गुणः । हे गौरि । गौरीम् । गौर्यौ । गौरीः । गौर्या । गौरीभ्याम् ३ । गौरीभिः । 'आण् नद्याः' । गौर्यै[2] । गौरीभ्यः २ । गौर्याः २ । गौर्योः २ । गौरीणाम्[3] । गौर्याम् । गौरीषु । एवं वाणीनद्यादयः[6] । लक्ष्मीः । अङ्ग्यन्तत्वान्न[7] सुलोपः । शेषं[8] गौरीवत् । एवं तरीतन्त्र्यादयः[9] । स्त्री । ङ्यन्तत्वात् सुलोपः । हे स्त्रि ।

गौरीति । 'षिद्गौरादिभ्यश्च' इति ङीष् । ततो ङ्यन्तत्वात् सुलोपः । गौर्याविति । 'दीर्घाज्जसि च' इति पूर्वसवर्णनिषेधाद्यणादेशः । यू । ई च ऊ च यू । अविभक्तिको निर्देशः । स्त्रियमाचक्ष्याते स्त्र्याख्यौ । मूलविभुजादित्वात् कः । अत्र च यदि ईदूतोरेव संज्ञा स्यात् तदा हे लक्ष्मि हे यवाग्वित्यादि न स्यात् । समुदायो ह्यत्र स्त्र्याख्यो न त्वीदूतौ तस्मादीदूदन्तस्यैवेयं संज्ञा । एवं तर्हि ङ्या नदीसंज्ञा न स्यात् । नैवम् । व्यपदेशिवद्भावात् स्यात् । ननु च संज्ञाविधौ तदन्तविधिर्नेति 'सुप्तिङन्तम्—'इत्यन्तग्रहणेन ज्ञापितम् । नैष दोषः । यदयं 'नेयङुवङ्स्थानावस्त्री' इति प्रतिषेधयति तज्ज्ञापयति स्यादत्र तदन्तविधिरिति । न हि यूमात्रं स्त्र्याख्यमियङुवङ्स्थानं संभवतीत्येतत् सर्वं मनसि[10] कृत्वाह । ईदूतौ नित्यस्त्रीलिङ्गाविति ।

१. अम्बार्थनद्योर्ह्रस्वः B1. २. गौर्यै इत्यादि D3. ३. Dropped D2. ४. Dropped D2. ५. Dropped D2. ६. वाण्यादयः D3. ७. Before it—लक्ष्मेर्मुट् ईच । D5. ८. शेषं गौरीवत् dropped D2. ९. P drops तरी. १०. चेतसि कृत्वा Dc1, Nc1, Nc2.

स्त्रियाः ॥६।४।७९॥

स्त्रीशब्दस्येयङ् स्यादजादौ[1] ॥ स्त्रियौ । स्त्रियः ।

वाम्शसोः ॥६।४।८०॥

अमि शसि च[2] स्त्रिया इयङ् वा स्यात् ॥ स्त्रियम् । स्त्रीम् । स्त्रियः । स्त्रीः । स्त्रिया । स्त्रीभ्याम्[3] । स्त्रीभिः । स्त्रियै । स्त्रीभ्यः २ । स्त्रियाः २ । स्त्रियोः २ । परत्वान्नुट् । स्त्रीणाम् । स्त्रियाम् । स्त्रीषु । श्रीः । श्रियौ । श्रियः । ई[4]त्यादि ।

यू इति किम् । मात्रे । दुहित्रे । स्त्र्याख्यौ किम् । ग्रामण्ये । खलप्वे । आख्याग्रहः शब्दार्थे स्त्रीत्वे यथा स्यात् पदान्तरद्योत्ये मा भूत् । ग्रामण्ये स्त्रियै । खलप्वे स्त्रियै । एतयोः क्रियाशब्दयोः स्त्रियां वृत्तिः पदान्तरेण क्रियते । इष्वशन्यादीनां त्रिलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति स्यादेव नदीत्वम् । इष्वै । अशन्यै । सामान्यशब्दस्य पट्वादेः स्त्रीपुंनपुंसकवृत्तेः पदा[5]न्तरेण केवलं विशेषान्तरव्यवच्छेदः क्रियते इति तस्य शब्दार्थ एव स्त्रीत्वमित्याख्याग्रहणं निवर्त्यं न । पट्वै स्त्रियै । प्रथमं यः स्त्रियां वर्तते तस्य नदीत्वं स्यादित्यपि वाच्यम् । प्रयोजनम् क्विप्लुप्समासाः । कुमारीमिच्छति कुमारीयति । ततः क्विप् । कुमारी । कुमार्यै ब्राह्मणाय । 'लुम्मनुष्ये' । खरकुट्यै पुंसे । बहुश्रेयस्यै पुंसे । ननु च गौरीशब्दस्य ह्रस्वत्वे कृते 'ह्रस्वस्य गुणः' इति गुणः स्यादित्याशङ्क्याह ।

---

१. After it–ह्रपि C, D_3, B_1. २. After it–परे D_2, D_3, C, B_1. ३. After this B_1 has नदीत्वेऽपि ङिति विकल्पः. ४. Dropped B_2. ५. शब्दान्तर° Nc_2, Dc_1, Bc_1.

नेयङुवङ्स्थानावस्त्री ॥१।४।४॥

ईयङुवङौ स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री ॥ हे श्रीः । 'ङिति ह्रस्वश्च' इति वा नदीत्वम् । श्रियै । श्रिये । श्रियाः । श्रियः ।

वामि ॥१।४।५॥

इयङुवङ्स्थानौ यूँ स्त्र्याख्यौ वामि नदीसंज्ञौ न तु स्त्री ॥

ह्रस्वविधिसामर्थ्यादिति । यदि ह्यत्र गुण इष्टः स्यात् 'अम्बार्थानां ह्रस्वः' इत्युक्त्वा नदीह्रस्वयोर्गुण इत्येवं वदेत् । तथा च नोक्तं 'अम्बार्थनद्योर्ह्रस्वः' इत्युक्तम् । तस्मात् ह्रस्वविधिसामर्थ्याद् गुणो न भवतीत्यर्थः । **एवं वाणीनद्यादय इति** । वण्यते शब्द्यते इति वाणी । वण शब्दे । 'इणजादिभ्यः' इतीण् । 'कृदिकारादक्तिनः' । सर्वतोऽक्तिन्नर्थात् इति ङीष् । **नदीति** । नदट् इति पचादिगणे पठ्यते ततष्टित्वात् ।'टिड्ढाणञ्–' इति ङीप् । **लक्ष्मीरिति** । 'लक्षेर्मुट् च' इति ईमुडागमश्च । **एवं तरीतन्त्र्यादय इति** । 'अवितृस्तृतन्त्रिभ्य ईः' इति ईप्रत्ययः । **स्त्री** । ङ्यन्तत्वात् **सुलोप इति** । संस्त्याने 'स्त्यायतेर्ड्रट्' । टिलोपः । टित्वात् ङीप् । ततो 'हल्ङ्याब्–' इति सुलोपः । **हे स्त्रीति** । 'यू स्त्र्याख्यौ–' इति नदीसंज्ञा । 'अम्बार्थ–' इति ह्रस्वः । **स्त्रियाः** । 'जातेरस्त्रीविषयादयोपधात्' इति निर्देशान्नेदं स्त्रीप्रत्ययानां ग्रहणं नापि स्त्र्यर्थवृत्तेः शब्दस्येति स्त्रीशब्द इति स्वरूपेण गृह्यत इत्याह । **स्त्रीशब्दस्येति** । **श्रीरिति** । श्रयन्त्येताम् 'क्विब् वचि'

---

१. इयङुवङ्स्थिति° D₁. २. न नदीसंज्ञौ D₃. ३. After it–श्रीभ्याम् । श्रीभ्यः D₃. ४. ईदूतौ स्त्र्याख्यौ वा आमि नदीसंज्ञौ स्तः न तु स्त्री C. ५. आमि वा C, D₃, D₆, B₁, B₂. ६. After it—स्तः D₁, D₂, B₂; वा स्तः D₃. ७. तर्हि Dc₄. ८. Before it–इति ड्रट् Dc₃, Dc₄. ९. एव for इति Dc₄. १०. इत्याशयेनाह Dc₃.

श्रीणाम् । श्रियाम् । श्रियि[1] । श्रियोः । श्रीषु ॥ सुध्यादयः पुंवत् । सुष्ठु धीः । प्रकृष्टा धीरिति नित्यस्त्रीत्वे तु सुधीप्रध्यौ लक्ष्मीवत् । अमि शसि । प्रध्यम् । प्रध्यः । इति विशेषः ।

इति श्रियः क्विप् दीर्घश्च । अङ्यन्तत्वान्न सुलोपः । नेयङ् । स्थानग्रहणं यत्र इयङुवङोः स्थितिरभिनिवृत्तिस्तत्र प्रतिषेधो यथा स्यात् । यत्र त्वपवादेन तयोर्बाधा तत्र मा भूत् । प्रध्यै । वर्षाभ्वै । इति । वामि । संहितासाम्येपि षष्ठीबहुवचनस्यैव आमो ग्रहणं न द्वितीयैकवचनस्य । तत्र नदीकार्याभावात् । नापि सप्तम्यादेशस्य । तस्य नदीसंज्ञोत्तरकालीनत्वात् विभक्तिसंबन्धेन चेयं नदीसंज्ञा विधीयते इति विभक्तिसंबन्धिन एव ङ्याख्यस्य नदीसंज्ञा युक्ता । तेन यत्रावयवः ङ्याख्यस्तत्र न । अतिश्रियां ब्राह्मणानामिति । सुध्यादय इति । सुष्ठु ध्यायति प्रध्यायतीति विग्रहादस्त्रीलिङ्गानां पदान्तरेण स्त्रीलिङ्गतेति नदीत्वाभावात् सुध्यादयः पुंवत् ज्ञेया इत्यर्थः । सुष्ठु धीः । प्रकृष्टा धीरित्यादि । तत्र सुधीशब्दस्येयङ्स्थानत्वान्नदीसंज्ञाया विकल्पनिषेधाभ्यां श्रीशब्दवत् । प्रधीशब्दस्य यणादेशेनेयङो बाधित्वात् नदीसंज्ञास्त्येवेति । तेन लक्ष्मीशब्दवत् प्रक्रियेत्यर्थः । अमीत्यादि । परत्वात् अमिपूर्वत्वं पूर्वसवर्णदीर्घत्वं च बाधित्वा यणादेश एव स्यादिति भावः ॥

इतीदन्ताः ।

---

१. After it—इत्यादि B_1. २. Dropped D_1. ३. शसि च P, D_1, B_2. ४. °रनिवृत्ति° Dc_2. ५. °बाधः Bo_1. ६. अत्र Dc_1. ७. निषेधविकल्पाभ्यां Bc_1, Dc_3, Dc_4. ८. स्त्रीशब्दवत् Nc_1. ९. इति dropped No_1, Dc_3. १०. °दीर्घं च Bo_1.

धेनुर्मतिवत् । धेनुः । धेनू । धेनवः । इत्यादि[1] । एवं तन्वादयः ॥

स्त्रियां च ॥७।१।९६॥

[2]क्रोष्टुश[3]ब्दस्तृजन्तवद्रूपं स्यात् स्त्रियाम् ॥

ऋन्नेभ्यो ङीप् ॥४।१।५॥

ऋदन्तेभ्यो न[4]न्तेभ्यश्च [5]स्त्रियां ङीप् स्यात् ॥ ङपावितौ । यण् । क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्र्यः । इत्यादि । [6]गौरीवत् ॥

धेनुरिति । धेनुशब्दो मतिशब्दवत् साध्यः । **स्त्रियां च** । स्त्रियां वर्तमानः क्रोष्टुशब्दः तृज्वत् स्यादित्यर्थः[7] । केचित्तु क्रोष्टुशब्दं गौरादिषु पठन्ति ते[8]न स्त्रियामिति स्त्रीप्रत्यये ङीषि[9] परतस्तृज्वद्भावो भ[10]वतीति व्याचक्षते क्रोष्ट्रीशब्दस्यान्तोदात्तत्वार्थम् । तन्मते पञ्चभिः क्रोष्ट्रीभिः क्रीता रथास्तैः पञ्चक्रोष्टुभिरिति 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययस्य लुकि कृते तृज्वद्भावो न प्राप्नोति । अत्र प्रतिविधेयमिति तन्मतं परित्यज्य स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य तृज्वद्भावे कृते 'ऋन्नेभ्यः—' इति ङीप् पश्चात् 'उदात्तयणो हल्पूर्वात्' इति क्रोष्ट्रीशब्दोन्तोदात्तो भवतीत्येतच्चेतसि कृत्वा पठति सूत्रम्—'**ऋन्नेभ्य**—' इति । **ङपाविताविति** । ङकारः सामान्यग्रहणार्थः । पकारः स्वरार्थः सामान्यग्रहणाविघातार्थश्च ॥

इत्युदन्ताः ॥

---

१. P, B_2 drop इत्यादि. २. क्रोष्टुस्त॰ B_2, D_2. ३. P, D_1, D_4; D_5 drops शब्द. ४. नकारान्तेभ्यश्च C; च dropped P, B_1, B_2. ५. After स्यात् in D_1, D_2. ६. शेषं गौरीवत् D_3. ७. ॰दिति भावः Dc_3. ८. ते for तेन Bc_1. ९. ङिपि Dc_1. १०. न भवतीति Nc_1.

वधूः । वध्वौ । वध्वः । गौरीवत्[1] । एवं[2] चमूतन्वादयः । भ्रूः श्रीवत् । भ्रूः । भ्रुवौ । भ्रुवः । इत्यादि । सुभ्रूः । अस्य संबुद्धौ ह्रस्वतेति[3] केचित् । हे सुभ्रु । पुनर्भूः । खलपूवत् । [4]नित्यस्त्रीत्वे हे[5] पुनर्भु ।

वधूरित्यादि । उह्यते इति वधूः स्त्री । चमूशब्दः सेनावाची । तनूशब्दः शरीरवाची । तनुशब्दो ह्रस्वः स्त्रीलिङ्गस्ततो मतान्तरेण ऊङ् । यस्त्वल्पवाची स तु वाच्यलिङ्गः । भ्रूः श्रीवदिति । भ्रमु अनवस्थाने । अस्मात् 'भ्रमेश्च डूः' इति डूप्रत्यये टिलोपे च भ्रूरिति भवति । सुभ्रूरित्यादि । तेषां त्वयमभिप्रायः । 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यूङ् । तदन्तत्वान्नदीसंज्ञायाम् 'अम्बार्थ—' इति ह्रस्वता । तथा च **कुमारसंभवे कालिदासेन** प्रयुक्तम् । 'विमानना सुभ्रु कुतः पितुर्गृहे' इति तथा च **भट्टिकाव्ये** प्रयोगः । 'हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः' इति । तथा च **वामनेनोक्तम्** । 'ऊकारान्तादप्यूङ्प्रवृत्तेः । उत ऊङ् विहितः । ऊकारान्तादपि क्वचिद् भवति । आचार्यप्रवृत्तेः । कासौ प्रवृत्तिः । अप्राणिजातेश्चारज्ज्वादीनामिति । अलाबूः कर्कन्धूः इत्युदाहरणम् । तेन 'सुभ्रु किं संभ्रमेण' । अत्र सुभ्रूशब्दात् ऊङ्प्रत्ययः सिद्धो भवति । 'ऊङि त्वसति सुभ्रूरिति स्यात्' इति । **पुनर्भूः खलपूवदिति** । दृन्करपुनःपूर्वस्य* इति वक्तव्येन यणादेशात् पुनर्भवतीति पुनर्भूरिति व्युत्पत्त्या नित्यस्त्रीत्वाभावान्नदीसंज्ञाभावः । **नित्यस्त्रीत्वे** त्विति । यदा तु पुनर्भूर्दिधिषूरुच्यते तदा नित्यस्त्रीत्वान्नदी-

---

१. P, D_1, D_2 have इत्यादि after it; इत्यादि । शेषं गौरीवत् D_3. २. D_1, D_3 drop गौरीवत्. ३. ह्रस्व इति B_1; ह्रस्वेति D_1; ह्रस्वो वेति केचित् । हे सुभ्रु । हे सुभ्रू D_2. ४. नित्यं P; नित्यस्त्रीत्वे तु D_1, D_2. ५. तु D_3. ६. च कृते Dc_3, Dc_4. ७. तथा च तेषामभि° Dc_3. ८. ह्रस्वतेति Bc_1, Dc_4. ९. उकारान्ता° Bc_1. १०. भ्रमेण Nc_1. ११. वक्तव्ये Bc_1.

एकाजुत्तरपदे णः ॥८।४।१२॥

एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य[1] प्रातिपदिकान्तनुम्विभक्तिस्थस्य[2] नस्य णः स्यात् ॥[3] पुनर्भूणाम् । शेषं वधूवत् । वर्षाभूः[4] ।

वर्षाभ्वश्च ॥६।४।८४॥

वर्षाभ्वो[5] यण् स्यादचि[6] ॥ वर्षाभ्वौ । वर्षाभ्वः । इत्यादि ॥[7] सुलूवत् । स्वयंभूः पुंवत् ।

न षट् स्वस्रादिभ्यः ॥४।१।१०॥

षट्संज्ञकेभ्यः स्वस्रादिभ्यो ङीप्टापौ न स्तः ॥

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥

संज्ञायां ह्रस्वत्वादि नदीकार्यं स्यादित्यर्थः । एकाच्च । 'रषाभ्यां नो णः—' इत्यतः 'णः' इत्यनुवर्तमाने पुनर्णग्रहणं 'वा भावकरणयोः' इति विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणार्थम् । **पुनर्भूणामिति** । परत्वाद्यणं बाधित्वा नुट् । विभक्तिस्थत्वान्नस्य णत्वम् । **सुलूवदिति** । वर्षासु भवतीति वर्षाभूरिति यदा वाच्यलिङ्गत्वेन स्त्री विवक्ष्यते तदा सुलूवद् रूपं ज्ञेयम् । यदा तु भेकजातीया स्त्रीव्यक्तिः वर्षाभूरित्युच्यते तदा नित्यस्त्रीत्वात् वधूशब्दवत् वर्षाभूशब्दो ज्ञेयः ।

इत्यूदन्ताः ॥

न षट् । अत्र स्त्रियामित्यनुवृत्तेरस्मिन्नर्थे यदुक्तं तन्न भवति इति यो यतः प्राप्नोति स सर्वः स्त्रीप्रत्ययः प्रतिषिध्यत इत्यभिप्रेत्याह । **ङीप्टापौ न स्त इति** । ननु च तिसृचतसृभावो हि विभक्तौ

---

१. °दुत्तरस्य C. २. प्रातिपदिकान्तस्य नुम्° B1. ३. C has before it—णग्रहणं नित्यत्वार्थम् । परत्वाद्यणं बाधित्वा नुट् ।. ४. Dropped D3. ५. अस्य उवर्णस्य यण् &c. D2. ६. °दचि सुपि D4. ७. Dropped D2.

'अप्तृन्—' इत्युपधाया दीर्घः[1]। स्वसा। स्वसारौ। धातृवत्[2]। शसि स्वसॄः। इति भेदः[3]। माता पितृवत्। शसि[4] मातॄः। द्यौर्गौवत्। राः पुंवत्[5]। नौर्ग्लौवत्॥

इत्यजन्ताः स्त्रीलिङ्गाः

परतो विधीयते ताभ्यां परतो ङीप् चेत् स्यात् तर्हि तयोर्विभक्तिपरता व्याहन्येतेति 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्यनयैव परिभाषया ङीबभावः सिद्धः। तत् किमेतयोरत्र पाठेन। एवं तर्हि संनिपातलक्षणपरिभाषाया अनित्यत्वं ज्ञाप्यते। ततश्च ङेरत्वे सत्याबित्यादि सिद्धं स्यात्॥

इति ऋदन्ताः॥

राः[6] इति। ननु चायं पुंल्लिङ्ग एवेत्युक्तम्। सत्यम्। केचित्तु स्त्रीलिङ्गमप्येनमिच्छन्ति। तथा च क्षीरस्वामिनोक्तम्[7]। रात्येनं[8] राः स्त्रीत्येके।

इत्यैदन्ताः॥

ग्लौः[9]। औदन्तः। अन्ये त्वप्रसिद्धाः। इति

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम्।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्याने गुः प्रसादे सुविशदमबला लिङ्गशब्दा अजन्ताः॥

---

१. इत्युपधादीर्घः C, D3, D5; इति दीर्घः B1, D1. २. शेषं धातृवत् P, D4. ३. इति भेदः dropped B. ४. शसि मातॄः dropped P, C, B1, B2. ५. सुराः D3. ६. Before it—द्यौः। औदन्तः। Bc1, Dc3, Dc4. ७. °मिना प्रोक्तम्। Dc3. ८. रान्त्येनां Dc3. ९. नौः Dc3, Dc4.

अतोम् ॥७।१।२४॥

अ[1]तोऽङ्गात् नपुंसकात् स्वमोरम् स्यात् ॥ 'अमि पूर्वः' । ज्ञानम् । 'एङ् ह्रस्वात्' इति ह[2]ल्मात्रलोपः । अमिपूर्वत्वम् । हे ज्ञान ।

नपुंसकाच्च ॥७।१।१९॥

न[3]पुंसकात् परस्यौङः शी स्यात् ॥ भसंज्ञायाम् ।

यस्येति च ॥६।४।१४८॥

अथ न[4]पुंसकलिङ्गाः प्रदर्श्यन्ते ।

अतोम् । 'स्वमोर्नपुंसकात्' इति प्राप्तस्य लुकोऽपवादः । तपरकरणं मुखसुखार्थम् । न च दीर्घनिवृत्त्यर्थम् । दीर्घस्य 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वविधानात् । ननु च किमर्थममादेशः क्रियते । मकार एवादेशः किं नोच्यते । न चैवम् 'आदेः परस्य' इति द्वितीयैकवचनो[5]कारमकारे कृते द्वयोर्मकारयोः श्रवणं स्यादिति वाच्यम् । एकस्य संयोगान्तलो[6]पेनापहानादिति चेदु[7]च्यते । यदि मकारमा[8]त्रमादेशः स्यात् 'सुपि च' इति दीर्घः स्यात् संनिपातलक्षणपरिभाषाया अनित्यत्वात् । **ज्ञानमिति** । ल्युडन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् सुः । **एङिति** । हे ज्ञान स् इति स्थिते अमि 'एङ् ह्रस्वात् संबुद्धेः' इति संबुद्धेर्हल्मा[9]त्रमस्य लोप इत्यर्थः ।

नपुं । **भसंज्ञायामिति** । 'यचि भम्' इति सूत्रेण ।

यस्येति च । यदीदं यस्येति यकारस्य ग्रहणं स्यात् 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः' इत्युत्तरसूत्रे पुनर्यकारग्रहणं न कुर्यात् । एतदेवानुव[10]र्तिष्यते । तस्मादिवर्णावर्णयोरिदं ग्रहणमित्यभिप्रेत्याह ।

---

१. अकारान्तात् P. २. हल्मात्रं सुलोपः । हे ज्ञान B_2. ३. क्लीबात् D_2. ४. नपुंसकाः Dc_2. ५. °नाकारस्य Bc_1, Dc_3, Dc_4. ६. °लोपो नापहन्यादि° Nc_1. ७. उच्यते dropped Nc_1. ८. °मात्र आदेशः Bc_1, Dc_3. ९. °मात्रस्य लोप इत्यर्थः Dc_1, Nc_1, Nc_2. १०. वर्तयिष्यते Nc_1.

भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे ॥

इत्यकारलोपे प्राप्ते । औङः श्यां प्रतिषेधो वाच्यः[1]* । ज्ञाने ।

जश्शसोः शिः ॥७।१।२०॥

[2]क्लीबादनयोः शिः स्यात् ॥

शि सर्वनामस्थानम् ॥१।१।४२॥

शि इत्येतत् सर्वनामस्थानसंज्ञं स्यात् ॥

नपुंसकस्य झलचः ॥७।१।७२॥

झलन्तस्याजन्तस्य च[3] क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने[4] ॥ उपधाया दीर्घः[5] । ज्ञानानि । पुनस्तद्वत्[6] । शेषं रामवत् । एवं धनवनफलादयः[7] ॥

भस्येवर्णावर्णयोरिति । इयङुवङ्भ्यां लोपो विप्रतिषेधेन । वत्सं प्रीणातीति वत्सप्रीः । तदपत्यं वात्सप्रेयः । 'चतुष्पाद्भ्यो ढञ्' इति ढञ् । लेखाभ्रूः शुभ्रादिः[8] । तदपत्यं लेखाभ्रेयः । 'ढे लोपोकद्र्वाः' इत्यूलोपः ।

जश्शसोः । जसा सहचरितस्य शसो ग्रहणादिह न । कुण्डशो ददातीति ।

शि सर्वनामस्थानमिति । महती संज्ञा प्रयोजनमन्तरेण पूर्वाचार्यैः कृता तस्या यदिहाश्रयणं तत् कृतस्य शास्त्रस्य[9] दोषत्वदर्शनार्थम्[10] । तत् पुनः स्वशास्त्रस्य पुनरुक्ततादोषपरिहारार्थम्[11] ।

नपुं । नपुंसकस्य किम् । अग्निचिद्ब्राह्मणः । झलच इति किम् । वारि । उगितो नपुंसकस्य झलन्तस्य परत्वात् अनेनैव नुम् स्यात् । श्रेयांसि कुर्वन्ति ।

---

१. P, D_1, D_4 drop वाच्यः; वक्तव्यः B_2, D_2, D_5. २. अनयोः क्लीबात् P; जश्शसोः for अनयोः B_2; क्लीबात्परयोर्जश्शसोः D_3; क्लीबादनयोर्जश्शसोः D_5. ३. P, B_2 drop च. ४. After it—परे D_3, B_3. ५. उपधादीर्घः B_1, D_2, D_4. ६. P, D_1 have instead of this धनम् । धने । धनानि । ज्ञानम् । ज्ञाने । ज्ञानानि ।; B_2, D_3, C, D_2 drop it. ७. D_1 drops वन. ८. शुभ्रादि Nc_1. ९. तत्तस्य शास्त्रस्य Dc_2. १०. दोषत्वमिह दर्शं° Dc_1. ११. सूचनार्थम् Dc_3.

अद्ड्डतरादिभ्यः पञ्चभ्यः ॥७।१।२५॥

एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्

टेः ॥६।४।१४३॥

डिति परे भस्य टेर्लोपः स्यात् ॥

वावसाने ॥८।४।५६॥

अवसाने झलां चरो वा स्युः ॥ कतरत् । कतरद् । कतमत् । कतमद् । कतमे । कतमानि । टेर्लुप्तत्वादेङ्ह्रस्वादिति न संबुद्धिहल्लोपः[1] । हे कतमत्–द् । पुनस्तद्वत् । शेषं पुंवत् ।

अद् । डतर । डतम । इतर । अन्य । अन्यतर इति सर्वाद्यन्तःपातिनः पञ्च गृह्यन्ते । तत्राद्यौ प्रत्ययौ ततस्तदन्ताः शब्दा गृह्यन्ते । पञ्चभ्यः किम् । नेमम् । डित्करणं कतरदित्यत्र प्रथमैकवचने 'प्रथमयोः—'[2] इति पूर्वसवर्णदीर्घाभावार्थम्[3] । द्वितीयैक-वचने तु स्थानिवद्भावात् अमि पूर्वत्वेनापि सिध्यति । एवं तर्हि तकार एवादेशः कुतो न कृतः । हे । कतरदिति संबुद्धिलोपो मा भूदिति । 'एङ्ह्रस्वात्—' इत्यत्रापृक्तग्रहणानुवृत्तौ हे कुण्डे-त्यत्रामो हलो लोपो न स्यादिति दोषः । तन्निवृत्तौ च डतरादिषु अदो हलो लोपः स्यादिति दोषः । तस्मात् डित्करणादकारलोपे ह्रस्वाभावान्न लोपो न च पूर्वसवर्णदीर्घः । तथा चोक्तम् ।

'अपृक्तश्चेदमो दोषो निवृत्ते डतरादिषु ।
अद्डित्त्वात् डतरादीनां नलोपो न च दीर्घता ॥' इति ।

टेरित्यादि । हे कतरं सु इति स्थिते सोरद्डादेशः । तत्र कृते टिलोपस्य जातत्वात् ह्रस्वादुत्तरा संबुद्धिर्न भवतीति संबुद्धेर्हलो लोपो न ।

---

१. हल् dropped D_3, B_1, P. २. ङेप्रथमयोः Nc_1. ३. नेमं तिष्ठति । नेमं पश्य । Dc_3. ४. Before it—इह तु कतरत् पश्येति Dc_3. ५. °ग्रहणानु° Dc_2, Dc_3. ६. अड्डित्त्वात् Bc_1. ७. सु Dc_3 ८ °हल्लोपो न न च दीर्घतेति Dc_2.

एवमन्यत्[1] अन्यतरत्[2] इतरत्[3]। एकतरात्[4] प्रतिषेधः[5]॥ एकतरम्। स्वमोरमादेशं वा जरस्। अजरसम्। अजरम्। अजरसी। अजरे। परत्वाज्जरस्। पश्चाज्झलन्तत्वान्नुम्।

सान्तमहतः संयोगस्य ॥६।४।१०॥

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने[6]। अजरांसि। अजराणि। पुनस्तद्वत्। शेषं पुंवत्[7]। 'पद्दन्—' इति हृदयोदकासनानां हृद् उदन् आसन्[8]। हृदि। हृदा[9]। हृद्भ्याम्। इत्यादि। उदानि। उद्नां[10]। उदभ्याम्। इत्यादि। आसानि[11]। आस्ना। आसभ्याम्। इत्यादि। शिर्षस्य शीर्षन् वा शसादाविति केचित्। [12]शीर्षाणि। शीर्ष्णः[13]। शीर्ष्णा। शीर्षभ्याम्। इत्यादि। पक्षे शेषं[14] च ज्ञानवत्।

स्वमोरमादेश इति। न विद्यते जरा यस्य तदजरम्। अजर सु अजर अम् इति स्थिते 'अतोम्—' इति सोः पूर्वविप्रतिषेधेनामोप्यमादेशे कृते संनिपातलक्षणपरिभाषाया अनित्यत्वात् जरस् वादेश इत्यर्थः। **गोनर्दीयमते** तु संनिपातलक्षणपरिभाषाया नित्यत्वात् जरसादेशो नेति प्रथमैकवचने अजरमित्येव भाव्यम्। द्वितीयैकवचने तु परत्वादमादेशं बाधित्वा जरस् स्यात् तेन अजरसमिति। **परत्वा-दिति**। अजर सु इति स्थिते परत्वाज्जरस्। पश्चात् 'नपुंसकस्य झलचः' इति नुम् स्यादिति॥

इत्यदन्ताः॥

---

१. P drops एवमन्यत्. २. D_1 drops it. ३. Dropped D_3. ४. एकतरस्य B_1. ५. प्रतिषेधो वाच्यः D_3. ६. After it—परे D_3. ७. पुंलिङ्गवत्। अजरसेन। अजरेण। अजरसा। अजरसात्। अजरात्। अजरसः। B_1. ८. After this—इत्येते आदेशाः स्युः C. ९. D_1 drops हृदा. १०. After it—उदकेन B_2. ११. After it—आसनानि B_2. १२. Before it—शीर्षिण B_2. १३. D_1, D_2, D_4, D_5 drop it; D_3 drops this and the next form. १४. शेषे च D_4, D_5. १५. Dropped No_1.

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥१।२।४७॥

क्लीबे प्रातिपदिकस्य ह्रस्वः स्यात् ॥ श्रीपम् । ज्ञानवत् ॥

स्वमोर्नपुंसकात् ॥७।१।२३॥

क्लीबात् स्वमोर्लुक् स्यात् ॥ वारि ।

इकोऽचि विभक्तौ ॥७।१।७३॥

इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ ॥

ह्रस्वः । नपुंसके किम् । ग्रामणीर्ब्राह्मणः । प्रातिपदिकस्येति किम् । काण्डे तिष्ठतः । काण्डे इत्यत्र 'अप्रत्ययः' इति प्रतिषेधात् प्रातिपदिकत्वाभावात् न ह्रस्वः । ननु च प्रातिपदिकाप्रातिपदिकयोरेकादेशोऽन्तादिवद्भावात् प्रातिपदिकग्रहणेन गृह्यते इति स्यादेव ह्रस्वः । नैष दोषः । प्रातिपदिकग्रहणसामर्थ्यान्न भवत्यत्रान्तवद्भावः । एतदुपपादनं पदमञ्जर्यादिज्ञेयम् । श्रीपमिति । श्रियं पातीति श्रीपं कुलम् ।

इत्यादन्ताः ।

स्वमोः । सु इति यद्यपि सप्तमीबहुवचनमस्ति तथाप्यमैकवचनेन साहचर्यादेकवचनमेवं सुं गृह्यते । तद् ब्राह्मणकुलमित्यत्र लुका त्यदाद्यत्वं बाध्यते पूर्वविप्रतिषेधेन ।

इकोऽचि विभक्तौ इत्यतः 'नपुंसकस्य' 'इकः' इति षष्ठ्यन्तेऽप्यनुवर्तमाने अर्थात् प्रथमान्ते भवत इत्याह । इगन्तं क्लीबमिति ।

इकोऽचि । ननु च 'अचि' इति किमर्थमुच्यते । संबुद्धौ परतो नुम् मा भूदिति चेत् । नैवम् । बलवत्त्वादादौ संबुद्धिलुकैव भाव्यम् । तथापि प्रत्ययलक्षणेन नुम् स्यात् स मा भूदिति 'इकोऽचि—' इत्यच्ग्रहणं क्रियते इत्याशङ्क्याह ।

---

१. After it—परतोः B1, D3. २. नुम् स्यात् C, D1. ३. तदुप° Dc1, Dc3; उपपादनं Dc4. ४. एव dropped Dc2. ५. सुर्गृह्यते Bc1, Dc4.

वारिणी । वारीणि । न लुमतेति निषेधस्य नित्यत्वे[1] संबुद्धेर्लुकि[2] तन्निमित्तनुमोप्राप्तेरिकोचीत्यज्ग्रहणं व्यर्थं स्यात् । नै[3] चान्यत्र हलादौ नुमभावार्थमिदम् । कृतेपि नुमि त[4]ल्लोपस्य संभवात् । अतोचीत्युक्तेरेवं ज्ञायते । न लुमतेत्यस्यानित्यत्वात् संबुद्धेर्लुक्यपि [5]प्रत्ययल[6]क्षणत्वेन नुम् स्यात् ।

न लुमतेत्यादि । 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनि[7]षेधो [8]नित्यः । तथा च सति संबुद्धेर्लुकि जाते प्रत्ययलक्षणनिषेधात् संबुद्धिनिमित्तो नुम् न प्राप्नोत्येव । अतस्तदप्राप्तेस्तत्प्राप्तिनिवारण-प्रयोजनम् 'इकोचि विभक्तौ' इति सूत्रे वर्तमानमज्ग्रहणं व्यर्थं स्यात् । व्यर्थमिति संभावयाम इत्यर्थः । ननु च न व्यर्थ-मज्ग्रहणं संबुद्धेरन्यस्यां हलादौ विभक्तौ[9] । न[10] नुमभावार्थ-मज्ग्रहणम् । कुत इत्याशङ्क्य [11]हेतुमाह । कृतेपीति । तत्र हलादौ विभक्तौ परतो नुमि कृते नल्लोपस्य तस्य[12] नुमो 'न लोपः प्रातिपदिकान्तस्य' इति न[13]लोपसंभवात् हेतोर्नेदमज्ग्रहणप्रयोजनमिति भावः । एवं प्रयोजनाभावादनर्थकमज्ग्रहणं प्राप्तमनिष्टं सत् किंचि-दिष्टं[14] ज्ञापयतीति न्यायेन कमप्यभिप्रेतमर्थमेतत् ज्ञापयतीत्याह । अतोचीति । अतोस्मादचीत्युक्तेर्हेतोरयमर्थो ज्ञायते । कोर्थो ज्ञायत इत्याशङ्क्याह । न लुमतेतीति । 'न लुमताङ्गस्य' इत्ययं प्रत्यय-लक्षणनिषेधोनित्यः कादाचित्कः । तस्मात् संबुद्धेर्लुकि जाते[15] सति 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति नुम् भवेदेव । स मा भूदित्येव-मर्थमज्ग्रहणं कृतमिति भावः । ननु च तत्र जातेपि नुमि तस्य 'न लोपः प्रातिपदिकान्तस्य' इति लोपः स्यादित्याशङ्कामपनुदन्नाह ।

१. नित्यत्वेन B_2; नित्यत्वात् D_2. २. °र्लुक्यपि D_3. ३. नान्यत्र D_1. ४. तल्लोपसंभवात् P; C, D_4. ५. Before it—प्रत्ययलोपे P, C. ६. लक्षणेन C; लक्षणत्वे D_2. ७. °प्रतिषेधो Dc_2. ८. ततः Dc_2. ९. After it—परतो नुमभावार्थमित्याशङ्क्याह । न चेति । अन्यत्रास्यां हलादौ विभक्तौ Dc_3, Dc_4. १०. नुमभावार्थमज्ग्रहणं न Dc_3. ११. तत्र हेतु° Dc_3. १२. Dropped Dc_2. १३. लोपसंभ° Bc_1. १४. किंचित् dropped Nc_1, Nc_2, Dc_1. १५. जातेपि Dc_3.

न च तल्लोपः शक्यः। 'न ङिसंबुद्ध्योः' इति [1]निषेधात्। अतस्तत्र नुमभावार्थमज्ग्रहणं कृतम्। तेन न लुमतेति निषेधस्यानित्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः। हे वारे। हे वारि। हे वारिणी। हे वारीणि। वारिणा। घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्वगुणेभ्यो नुम् पूर्वविप्रतिषेधेन* ॥ [3]इति नुम्। वारिणे। वारिणः २। वारिणोः। नुमचिरेति नुट्। [4]नुटः प्रत्ययावयवत्वात्

न चेति। तत्र हेतुमाह। न ङीति। प्रकृतमुपसंहरति। अत इति। 'न लुमताङ्गस्य' इति निषेधस्यानित्यत्वमज्ग्रहणेन ज्ञापितमित्येतदुपपादितं तज्ज्ञापने प्रयोजनमाह। तेनेति। यदा प्रत्ययलक्षणनिषेधो नास्ति तदा 'ह्रस्वस्य गुणः' इति गुणो भवति। [5]अन्यदा न भवति। तेन हे वारे हे वारि इत्युभयमपि सिध्यति। घेर्ङितीति। वारि ङे इति स्थिते। नुमं बाधित्वा परत्वाद् गुणे प्राप्ते इत्यर्थः।

वृद्ध्यौत्वेति। एतच्च परशब्दस्येष्टवाचित्वाल्लभ्यते। वृद्धेरवकाशः। सखायौ। गावौ। नुमोऽवकाशः। वारिणी। इहोभयं प्राप्नोति अतिसखीनि कुलानीति। तत्र पूर्वविप्रतिषेधेन नुमेव स्यात्। औत्वस्यावकाशः। सख्यौ। हरौ। नुमः स एव। इहोभयं प्राप्नोति। वारिणि। अतिसखिनीति। नुमेव स्यात् पूर्वविप्रतिषेधेन। गुणः सावकाशः। हरेः। नुमः स एव। इहोभयं प्राप्नोति। वारिणे इति। नुमेव स्यात् पूर्वविप्रतिषेधेन। '**नुमचिर–**' इति। नुमोऽवकाशः स एव। नुटोऽवकाशः। रामाणामिति। इहोभयं प्राप्नोति। वारीणामिति। नुडेव स्यात् पूर्वविप्रतिषेधेन। ननु च नुटि नुमि वा को विशेष इत्याशङ्क्याह। नुट इति।

---

१. प्रतिषेधात् D_4. २. After C has:—इकः षण्डेऽपि संबुद्धौ गुणो माध्यंदिनेर्मते। त्रिधा चोशनसो रूपं सान्तं नान्तमदन्तकम् ॥. ३. C drops इति नुम्. ४. नुट्। D_2. ५. अन्यथा Dc_2.

'नामि' इति दीर्घत्वम् । वारीणाम् । वारिणि । वारिणोः । हलादौ हरिवत् ॥

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥७।१।७४॥

अर्थवशादुक्तपुंस्कमिगन्तं क्लीबं पुंवद्वा स्यात् टादावचि[1] ॥ अनादये । अनादिने । इत्यादि । शेषं वारिवत् । अर्थवशादुक्तपुंस्कं किम् । पीलुने फलाय ।

तृतीया । अर्थवशादिति । अर्थ्यते याच्यते व्यावर्तयितुमित्यर्थो विशेष्यम् । [3]विशेष्यवशेन यदुक्तपुंस्कमित्यर्थः । स्वत एव केचिच्छब्दा विशेष्यलिङ्गाः । यथा गुणशब्दाः गुणप्रवृत्तिनिमित्ताः सन्तो गुणिनि वर्तन्ते । अतो विशेष्यलिङ्गाः । यथा शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रमिति । तदुक्तम् । गुणवचनानामाश्रयतो लिङ्गवचनानीति । केचिच्च । यथा जात्यादिशब्दा ब्राह्मणी कलत्रमित्यादयः । 'नपुंसकस्य झलचः' । पीलुने फलाय इति ।

अनादये अनादिने इति । न विद्यते आदिर्यस्य तदनादि । अनादिशब्दोनादित्वं प्रवृत्तिनिमित्तीकृत्य तद्विवर्तमानोनादिर्नारायण इति विशेष्यवशादुक्तपुंस्कः । पुंवत्पक्षे गुणः । अन्यत्र पक्षे नुम् ।

---

१. After it—वारिषु । D_1. २. After it—अनादिना । अनादये । अनादिने । इत्यादि । शेषं वारिवत् । अर्थवशादुक्तपुंस्कं किम् । पीलुने फलाय ।

पीलुर्वृक्षः फलं पीलु पीलुने न तु पीलवे ।
वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः ॥ १ ॥
यन्निमित्तमुपादाय पुंसि लिङ्गं प्रवर्तते ।
नपुंसकेपि तच्चेत् स्यादुक्तपुंस्कं तदुच्यते ॥ २ ॥ P, D_3.

C has यन्निमित्त' as the first verse, एक एव हि यः शब्दस्त्रिषु लिङ्गेषु विश्रुतः । एकमेवार्थमाख्याति भाषितपुंस्कं तदुच्यते ॥ as the second verse and पीलुर्वृक्षः as the third verse; D_4 follows C, but it has 2 verses only, पीलुर्वृक्षः &c., being the second. ३. विशेष्येन वशेन No_2.

[1]समासवशात् पीलवे वृक्षाय ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥७।१।७५॥

एषामनङ् स्यात् टादावचि स च उदात्तः ॥ अल्लोपोनः । दध्ना । दध्ने । दध्नः २ । दध्नोः २ । दध्नाम् । [2]विभाषा ङिश्योः ।

ननु च पीलुशब्दोपि भाषितपुंस्कः । पीलुर्वृक्षस्तस्य विकारः फलमपि–पीलु । नैवम् । तुल्ये प्रवृत्तिनिमित्ते यद् भाषितपुंस्कं तस्य पुंवद्भावः । इह तु पुंसि पीलुशब्दस्य प्रवृत्तौ निमित्तं वृक्षाकृतिः । नपुंसके तु फलाकृतिरिति भिन्नप्रवृत्तिनिमित्तत्वान्न पुंवद्भावः । ननु च कुत एतल्लभ्यते तुल्ये प्रवृत्तिनिमित्ते भाषित[3]पुंस्क इति । उच्यते । भाषित[4]पुंस्क इत्यस्यायमर्थः । भाषितः पुमान् यस्मिन्नर्थे तुल्यप्रवृत्तिनिमित्ते तत् भाषितपुंस्कशब्देनोच्यते । तद्योगादभिधेयमपि यन्नपुंसकं तदपि भाषितपुंस्कं तस्य प्रातिपदिकं यच्छब्दरूपं तदपि भाषितपुंस्कमिति । इगन्तं किम् । सोमपेन कुलेन । अचि किम् । ग्रामणीभ्यां कुलाभ्याम् । तृतीयादौ किम् । अनादि । अनादिनी । अनादीनि ।

[5]अस्थि । 'इकोचि—' इति नुमि प्राप्ते विधिरयं ङोन्तादेशार्थः । अकार उच्चारणार्थः । अस्थ्यादयः [6]एते 'नब्विषयस्यानिसन्तस्य' इति फिट्स्वरेणाद्युदात्ताः । शेषमनुदात्तम् । तत्रान्तस्यानुदात्तस्यानङ् विधीयमानः स्थानिवद्भावादनुदात्तः स्यादित्युदात्त उच्यते । तत्र दध्नेत्यादौ भसंज्ञायाम् 'अन्त्याभावेन्त्यसदेशस्य' इति परिभाषयान्त्यसमीपस्थाकारस्य लोपे कृते 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्युदात्तनिवृत्तिस्वरेण विभक्तिरुदात्ता स्यात् । टादौ किम् ।

---

१. D_2 drops from समास° to वृक्षाय ; B_2 has the verse पीलुर्वृक्षः &c., in place of 'समास°' to वृक्षाय. २. P, C, D_2, D_3 drop विभाषा ङिश्योः. ३. °पुंस्कमिति Dc_2. ४. °पुस्कमि° Dc_2. ५. अस्थिदधि Dc_2. ६. एते नपुंसकस्य Dc_4.

दध्नि । दधानि[1] । शेषं वारिवत् । एवमस्थिसक्थिअक्षि[2] । तदन्तस्याप्यनङिष्यते* ॥ प्रियदध्ना ब्राह्मणेन । [3]प्रियसक्थ्ना । [4]प्रियाक्ष्णा । प्रियास्थ्ना शुनेत्यादि ।

सुधि । सुधिनी । सुधीनि । सुधिया । सुधिना । इत्यादि[5] । एवं प्रध्यादयः ।

मधु । मधुनी । मधूनि । हे मधो[6] । हे मधु । पुनस्तद्वत् । मधुना । मधुभ्याम् । इत्यादि । एवमम्बुसान्वादयः । सानुशब्दस्य

दधिनी । अचि किम् । दधिभ्याम् । प्रियदध्नेत्यादि । प्रियं दधि यस्य ब्राह्मणस्य स प्रियदधिस्तेन । प्रियं सक्थि यस्य प्रियमक्षि यस्य तेन प्रियसक्थ्ना प्रियाक्ष्णा । अत्र 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच् न भवति । समासान्तविधेरनित्यत्वात् । अनित्यत्वं च ज्ञापयिष्यते ॥

इतीदन्ताः ।

सुधि । सुष्ठु धीरस्य तत् सुधि । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः । पश्चाद्वारिवत् । **सुधियेति** । तृतीयादिष्विति । पक्षे पुंवत्त्वात् 'अचि श्नु–' इति इयङ् । **सुधिना** इति । पुंवत्त्वाभावपक्षे नुम् स्यात् । एवमनेन प्रकारेण प्रध्यादयोपीकारान्ता ज्ञेयाः । आदिना । प्रध्या । प्रधिने । इत्यादि ॥

इतीदन्ताः ॥

मधु । हे **मधो** । हे **मधु** । इति । 'न मता–' इत्यस्यानित्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः । **पुनस्तद्वदिति** । द्वितीया प्रथमावदिति भावः ॥

इत्युदन्ताः ।

१. After it—औक्षि भाग्वत् । वधिषु D_3. २. शब्दाः after it—P, C, B_1, B_2. ३. B_1 omits from प्रियसक्थ्ना to शुनेत्यादि. ४. Omitted in C; After शुना D_3. ५. For his—सुधिये । सुधिने D_2. ६. B_1 drops from हे मधो to इत्यादि. ७. हे मधु । हे मधो । No_1, Dc_3.

स्नु वा[१] । सानूनि । स्नूनि [२] । इत्यादि । सुलु । सुलुनी । सुलूनि । सुल्वा । सुलुनेत्यादि[३] । प्रियक्रोष्टु । प्रियक्रोष्टुनी । [४]तृज्वद्भावः । प्रियक्रोष्टृणि । हे[५] प्रियक्रोष्टु । हे प्रियक्रोष्टो । टादौ पुंवत्पक्षे[६] प्रियक्रोष्ट्रा । प्रियक्रोष्टुना । अ[७]न्यत्र तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् । प्रियक्रोष्ट्रे । प्रियक्रोष्टवे । प्रियक्रोष्टुने । [८]प्रियक्रोष्टूनाम् ।

सुलु इति । सुष्ठु लुनातीति सुलू इति स्थिते ह्रस्वः । **सुल्वेति** । पुंवत्पक्षे 'ओः सुपि' इति यणादेशः ॥

इत्यूदन्ताः ॥

प्रियक्रोष्टु इति । प्रियः क्रोष्टा यस्य तत् प्रियक्रोष्टु कु[९]लम् । अयमुदन्तोपि तृज्वद्भावपक्षे ऋ[१०]दन्तेन तुल्यरूप इति तत्संनिधौ पठित इति ज्ञेयम् । **तृज्वद्भाव** इति । 'जश्शसोः शिः' इति शौ कृते तस्य सर्वनामस्थानत्वात् 'तृज्वत् क्रोष्टुः' इति तृज्वद्भाव इत्यर्थः । तन प्रियक्रोष्टृणीत्येतद्रूपं स्यात् । **टादावित्यादि** । तृतीयादिष्वित्यादिना पुंवत्त्वं यदा स्यात् तदा 'विभाषा तृतीयादिष्वचि' इति पक्षे तृज्वद्भावः । पक्षे नाभावस्तेन प्रियक्रोष्ट्रा प्रियक्रोष्टुना इत्येतद्रूपद्वयं स्यादित्यर्थः । **अन्यत्रेति** । पुंवत्त्वाभावपक्षे । **प्रियक्रोष्ट्रे** । **प्रियक्रोष्टवे** इति । पुंवत्पक्षे एते रूपे क्र[११]मात् तृज्वद्भावे घेर्गुणे च कृते । **प्रियक्रोष्टूनामिति** । पुंवत्पक्षे आमि नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेनेति

---

१. After it—वाच्यम् B_2. २. इत्यादिभेदः D_3, D_1, D_2. ३. सुलुनेत्यादि B_1. ४. शीपरे तृज्वद्भावः C ; तृज्वद्भावः dropped D_2 : After it—प्रियक्रोष्टूनि D_3. ५. B_1 drops the Voc. forms ; हे प्रियक्रोष्टु dropped D_2, D_3. ६. C drops पक्षे. ७. From अन्यत्र to नुम् dropped B_1, P ; B_2 has अन्यत्र to नुम् before प्रियक्रोष्टुना । ८. B_1 drops प्रियक्रोष्टूनाम् । इत्यादि ।; D_3 has प्रियक्रोष्टुः । प्रियक्रोष्टोः । प्रियक्रोष्टुनः । प्रियक्रोष्ट्रोः । प्रियक्रोष्ट्रोः । प्रियक्रोष्टुनोः । प्रियक्रोष्टूनाम् । प्रियक्रोष्टृणाम् । प्रियक्रोष्टरि । प्रियक्रोष्टौ । प्रियक्रोष्टुनि । इत्यादि ।. ९. जलम Bc_1. १०. ऋदन्तस्य Dc_2. ११. Dropped Dc_2.

इत्यादि । धातृ । धातृणी । धातॄणि । हे धातः । हे धातृ । [1]द्वितीया प्रथमावत् । धात्रा । धातृणा । इत्यादि । एवं ज्ञातृकर्त्रादयः ॥

एच इग्घ्रस्वादेशे ॥१।१।४८॥

[2]ह्रस्वे कार्ये एच इगेव स्यात् ॥ प्रद्यु । [3]प्रद्युनी । प्रद्यूनि ।

तृज्वद्भावं बाधित्वा नुट् । क्लीबत्वपक्षेऽपि नुमं बाधित्वा तस्मादुभयत्राप्येकमेव रूपम् । धातृ । दधातीति धातृ । धातृणी इति । ऋतो ङि गुणं बाधित्वा नुम् पूर्वविप्रतिषेधेन । धात्रेत्यादि । पक्षे पुंवत्त्वम् ।

इति ऋदन्ताः ॥

[4]एचः । परिभाषेयमादेशनियमार्था । एचोऽ[5]वयवसमाहारवर्णाः । तत्रैचां पूर्वो भागोऽवर्णसमानाकृतिः कण्ठ्यो मात्रात्मा । एऐ अनयोरुत्तरो भाग इवर्णाकृतिस्तालव्यो मात्रात्मैव । ओऔ अनयोरुत्तर उवर्णाकृतिरोष्ठ्यो मात्रात्मैव । तत्र समुदायात्मनामेवमा[6]न्तरतमो ह्रस्वो नास्तीति तदवयवयोर्योऽन्तरतमस्तेनैव युक्तं भवितुम् । स भवन् एऐ अनयोः कदाचिदकारः कदाचिदिका[7]रः स्यात् । ओऔ अनयोः कदाचिदकार उकारो वा स्यात् । स मा भूत् । इकारोकारावेव स्यातामिति परिभाष्यते । अत्रैचामिकां साम्येऽपि संख्यातानुदेशो न । यतो नेदं विधायकं किं तु नियामकम् । नियमश्च प्राप्तिपूर्वक इति[8] येऽन्तरतमा इकः प्राप्तास्ते नियम्यन्त इति कुतो यथासंख्यम् । यद्येवमणित्येव वाच्यं न त्विगिति । सत्यम् । किं त्वेवमुच्यमाने संदेहः स्यात् । [9]किं परेण णकारेणोत पूर्वेणेति । प्रद्यु इति । प्रकृष्टा द्यौरस्य तत् प्रद्यु ।

---

१. B_1 drops from द्वितीया to इत्यादि; D_2 drops द्वितीया प्रथमावत्. २. ह्रस्वादेशे B_2; ह्रस्वे कार्ये कर्तव्ये D_3. ३. प्रद्युनीत्यादि B_1. ४. एच इक Dc_2. ५. °वयवेति समा° Nc_1. ६. °मन्तर° Dc_2. ७. °रो वा । Dc_3. ८. एव for इति Dc_3. ९. Dropped Dc_3.

पुनस्तद्वत् । प्र[1]द्यवा । प्रद्युना । इत्यादि । प्ररि । प्रे[2]रिणी । प्ररीणि[3] २ । प्रराया । प्ररिणा । प्र[4]राभ्याम् । प्र[5]राभिः । इत्यादि । सुनु । सु[6]नुनी । सुनूनि २ । सु[7]नावा । सुनुना । इत्यादि ॥

इत्यजन्ता नपुंसकलिङ्गाः ॥

प्रद्यो इति स्थिते 'ह्रस्वो नपुंसके–' इति ह्रस्वे का[8]र्ये ओकारस्यान्तरतम्यादुकारो जातः । **प्रद्यवा** इत्यादि । तृतीयादौ वा पुंवत्वम् ॥

इत्योदन्ताः ॥

प्ररीति । प्रकृष्टा रा यस्य तत् प्ररि । ह्रस्वे प्राप्ते ऐकारस्यान्तरतम्यादिकारः । सोर्लुक् जात इत्यात्वं न भवति । **प्ररायेति** । पुंवत्पक्षे । ह्रस्वाभावादायादेशः । **प्रराभ्यामिति** । 'एकदेशविकृतमनन्यवद्भवति' इति न्यायेन 'रायो हलि' इत्यात्वम् ॥

इत्यैदन्ताः ॥

सुनु इति । सुष्ठु नौर्यस्य तत् सुनु ॥

इत्यौदन्ताः ॥

अन्ये अप्रसिद्धाः । इति

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेगुः प्रसादे सुविशदममलाः क्लीबशब्दा अजन्ताः ॥

---

१. प्रद्यवे । प्रद्युने । D_2. २. प्ररिणीत्यादि B_1. ३. After it—पुनस्तद्वत् D_3. ४. प्ररिभ्याम् । प्ररिभिः D_1. ५. Dropped D_3. ६. सुनुनीत्यादि B_1. ७. सुन्वा B_2; सुनुना । सुनावा । इत्यादि D_3; सुनवा । D_5. ८. कार्ये Dc_3, Dc_4.

हो ढः ॥८।२।३१॥

झलि पदान्ते च हस्य ढः स्यात् ॥ 'हल्ङ्याब्—' इति सुलोपः। जश्त्वचर्त्वे। लिट्। लिड्। लिहौ। लिहः। [1]लिहम्। लिहौ। लिहः। लिहा। लिड्भ्याम्। इत्यादि। 'खरि च' इति चर्त्वम्[2]। लिट्सु ॥

दादेर्धातोर्घः ॥८।२।३२॥

द[3]कारादेर्धातोर्हस्य घः स्यात् झलि पर[4]तः। पदान्ते च।

एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥८।२।३७॥

एकाचो धातोर्झषन्तस्य बशः स्थाने भष् स्यात् सकारे

अथ हलन्ताः पुंलिङ्गाः प्रदर्श्यन्ते।

हो ढः। लिडिति। लेढीति लिट्। लिह आस्वादने। क्विबन्तत्वात् प्रातिपदिकत्वम्। ततः स्वाद्युत्पत्तिः ॥

दादेः। धातूपदेशावस्थायां यो दादिस्तस्य हस्य घत्वं स्यादिति ज्ञेयम्। ततश्च अधोक् इत्येतत् सिद्धं स्यात्। अन्यथा अटि जाते अटो धातुभक्तत्वात् दादित्वाभावाद् घत्वं न स्यात्। अन्यच्च दामलिहमिच्छति दामलिह्यति। ततः क्विप्। दामलिट् इत्यत्र घत्वाभावः सिद्धः स्यात् ॥

एकाचो। प्रातिपदिकसंज्ञस्य तु झलीति। झलि तु परे प्रातिपदिकसंज्ञकस्यैव पदान्ते तु धातोः प्रातिपदिकस्यापीत्यर्थः। एकाचो धातोरिति व्यधिकरणे षष्ठ्यौ। धातोरवयवो य एकाच् तस्य झषन्तस्येति।

---

१. लिहम्। लिहौ। लिहः dropped D_2, B_1, P, C. २. After it—'झलां जशोऽन्ते' इति जश्त्वम्। 'डः सि धुट्' इति धुट्त्वम्। तकारः। लिड्त्सु। धुडभावे लिट्सु D_5. ३. दादे° B_2. ४. परतः dropped C, B_2. ५. 'हो ढः' इत्यस्यापवादः P, B_1; ढत्वापवादः D_5.

ध्वेशब्दे[1] च परे[2] । प्रातिपदिकसंज्ञस्य[3] तु झलि पदान्ते च ॥ धुक् । धुग् । दुहौ । दुहः । दुहम् । दुहौ ।

आ कडारादेका संज्ञा ॥१।४।१॥

इत ऊर्ध्वं 'कडाराः कर्मधारये' इत्यतः प्रागेकस्यैकैव[4] संज्ञा

धातोरवयवस्येति किम् । न धातोरेकाच इति समानाधिकरण्येन सिद्धम् । उच्यते । गर्दभं करोत्याचष्टे च गर्दभयति । गर्दभयतेः[5] क्विप् । णिलोपः । क्विपो लोपः । स्वाद्युत्पत्तिः । गर्धप् इत्यत्रापि भष्भावो यथा स्यादित्येवमर्थं धातोरित्यवयवषष्ठी व्याख्यायते । एकाचः किम् । दामलिट् । असति ह्येकाच्ग्रहणे धातोरित्येतदेव बशो विशेषणार्थं[6] स्यात् । बशः किम् । क्रुधेः क्रोत्स्यति । झषन्तस्य[7] किम् । दास्यति । स्ध्वोः किम् । बोद्धा । वकारोपसृष्टस्य धकारस्य ग्रहणं किम् । दध धारण इत्येतस्य यङ्लुकि लोटि सिपि 'हुझल्भ्यो हेर्धिः' इति धिभावे सति दादद्धि इति भवति । तत्र भष्भावो मा भूत् । धुगिति । दोग्धीति धुक् । दुह प्रपुरणे । क्विप् ।

आ कडारात् । अन्यत्र लोके शास्त्रे च संज्ञानां समावेशात् नियमार्थमेकसंज्ञाधिकारः । तथा हि लोके इन्द्रः शक्रः पुरुहूत इत्यादयः । शास्त्रे प्रत्ययकृत्कृत्यसंज्ञाः । एकैव संज्ञा भवति ।

---

१. ध्वशब्दे B_2, D_3. २. After it—धातोर्भवति B_1. ३. प्रातिपदिकस्य तु C, D_4; प्रातिपदिकान्तस्य झलि &c. B_2; प्रातिपदिकस्य झलि D_3; तु dropped—झलि परतः M. ४. प्रागेकैकस्य C. ५. गर्दभयतीति Dc_2. ६. विशेषणं Dc_3. ७. °स्येति Dc_3. ८. Dropped Dc_3.

ज्ञेया । तेन शसादावचि भसंज्ञैव न पदत्वम्[1] । अतो घत्वजश्त्वभष्भावा न ॥ द्रुहः । द्रुहा । ध्रुग्भ्याम् । इत्यादि[2] । चेत्वं[3] [4]षत्वम् । ध्रुक्षु ।

वा द्रुहमुहष्णुहष्णिहाम्[5] ॥८।२।३३॥

एषां[6] हस्य वा[7] घः स्याज्झलि पदान्ते च ॥ ध्रुक् । ध्रुग् । ध्रुट् । ध्रुड् । द्रुहौ । द्रुहः । [8]द्रुहा । ध्रुग्भ्याम् । ध्रुड्भ्याम् । ध्रुग्भिः । ध्रुड्भिः । इत्यादि[9] । ध्रुक्षु । ध्रुट्सु[10] । एवं मुहष्णुहष्णिहः[11] ॥

का स्यादिति चेत् या परानवकाशा च । तेनेत्यादि । यत एवमेकसंज्ञाधिकारस्तेन कारणेन द्रुहशब्दस्य शसादावचि भसंज्ञैव स्यात् । परत्वादनवकाशत्वाच्च । न पदसंज्ञा । ततः किं फलितं स्यादित्याशङ्क्याह । अत इत्यादि । अतः पदत्वाभावात् घत्वादयो न भवन्ति । तेन द्रुह इत्यादि सिद्धम्[12] ।

वा द्रुह । द्रुह द्रोहे । मुह वैचित्त्ये । ष्णुह उद्गारे । ष्णिह प्रीतौ । द्रुहेर्दादित्वान्नित्यं प्राप्ते इतरेषामप्राप्ते विकल्प्यते । द्रुहादयो दिवादिगणे अनेनैव क्रमेण पठ्यन्ते । तत्र वा द्रुहादीनामिति वाच्ये प्रतिपदपाठो यङ्लुक्यपि यथा स्यात् । दोध्रुक् । दोध्रुट् । अन्यथा 'निर्दिष्टं यद् गणे न च' इति न स्यात् ।

---

१. पदसंज्ञा C, B_2, D_4, D_5. २. B_1 drops from इत्यादि to षत्वम्. ३. चत्वंषत्वौ C. ४. Dropped D_3. ५. After the Vṛitti of the Sûtra, D_2 has—वा द्रुहादीनामिति वाच्ये प्रतिपदपाठो यङ्लुक्यपि यथा स्यात् । दोध्रुक्-ग् । अन्यथा निर्दिष्टं यद्ग्रहणेन चेति न स्यात्. ६. वा हस्य B_2. ७. घो वा D_4. ८. Before it—द्रुहम् । द्रुहौ । द्रुहः D_1. ९. P, D_1, B_2 drop इत्यादि. B_1 has on the margin भारोहः । भारोहा ।; D_3 drops ध्रुग्भिः ध्रुड्भिः and has इत्यादि after ध्रुक्षु । ध्रुट्सु. १०. After it—इत्यादि D_4, D_5. ११. °ष्णिहाम् B_2. १२. After it–भवति Dc_3.

वाह ऊठ् ॥६।४।१३२॥

भस्य वाहो वाशब्दस्य ऊठ् स्यात् ॥ ठ इत् । 'एत्येधत्यूठ्सु' इति वृद्धिः । विश्वौहः । विश्वौहा । इत्यादि । शेषं लिड्वत् ।

ऊठि कृते सवर्णे दीर्घः । भूहः । भूहेत्यादि । शेषं लिड्वत् ।

वाहः । 'वहश्च' इति ण्विप्रत्ययान्तो वहिर्वाहन्तः । अस्य । अत्र च 'वसोः संप्रसारणम्' इत्यतः 'संप्रसारणम्' इत्यनुवर्तते । तेन स ऊठ् संप्रसारणसंज्ञो भवति । संप्रसारणत्वात् 'इग्यणः संप्रसारणम्' इति वकारस्य स्थाने भवति । ततः 'संप्रसारणाच्च' इति आकारस्य पूर्वरूपमित्येतच्चेतसि कृत्वाह । वाशब्दस्येति । ननु च यदि 'संप्रसारणम्' इत्यनुवर्तते किमर्थं तर्हि ऊठुच्यते । संप्रसारणे हि कृते प्रत्ययलक्षणेन ण्विप्रत्ययमाश्रित्य 'पुगन्तलघूपधस्य च' इति गुणः स्यात् । ततश्च 'वृद्धिरेचि' इति वृद्धौ कृतायां विश्वौह इत्येवमादि सिद्धं स्यात् । न चानकारान्त उपपदे छन्दसि वहेर्ण्विप्रत्ययो दृश्यते । एवं तर्हि ज्ञापनार्थमूठ्ग्रहणम् । तत् ज्ञापयति । 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्येषा परिभाषास्तीति । तस्यां च सत्यां बहिरङ्गस्य संप्रसारणस्यासिद्धत्वात् अन्तरङ्गो गुणो न स्यात् । ठ इत् इति । 'हलन्त्यम्' इत्यनेन । स च एत्येधत्यूठ्विति विशेषणार्थः । ऊठि कृते इति केषांचिन्मते लोकेऽपि ण्विः स्यात् इति तन्मते छन्दस्यदृष्टेऽपि ण्विरिति भूवाह शस् इति स्थिते ऊठ् । 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घ इत्यर्थः ।

---

१. After it—शसादावचि B_2. २. B_1, D_5 drop इत्यादि. ३. P drops from ऊठि to लिड्वत्. ४. Dropped in C. ५. सवर्णदीर्घः D_1, D_4, M. ६. इत्यादि । शेषं dropped B_2. ७. °वाहन्तस्य Bc_1; °वहिस्तस्य ण्विः । Dc_3. ८. Dropped Dc_2. ९. एतत् Dc_2, Dc_3. १०. Dropped Dc_3. ११. इत्यर्थः dropped Dc_4.

चतुरनडुहोरामुदात्तः ॥७।१।९८॥

अनयोः सर्वनामस्थाने आम् स्यात् स चोदात्तः ।

सावनडुहः ॥७।१।८२॥

अस्य नुम् स्यात् सौ परे ॥ सोर्लोपः[1] । संयोगान्तस्य लोपः । नुम्विधिसामर्थ्याद् 'वसुस्रंसु—' इति दत्वं न । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । अनड्वान् ॥

अम् संबुद्धौ ॥७।१।९९॥

चतुरनडुहोः संबुद्धावम् स्यात् । आमोपवादः । हे अनड्वन् ॥ अनड्वाहौ । अनड्वाहः । अनड्वाहम् । अनड्वाहौ । अनडुहः । अनडुहा ।

चतुर् । आगमा अनुदात्ता इत्यनुदात्ते प्राप्ते उदात्तो विधीयते[2] इत्यभिप्रेत्याह । स च उदात्त इति । सौ । 'आच्छीनद्योर्नुम्' इत्यतः 'आत्' इत्यनुवृत्तेराममोः कृतयोर्नुम् स्यात् । तेन नुमा आममौ[4] न बाध्येते । आममुभ्यां च न नुम् बाध्यते । अपरे तु सत्यपि सामान्ये विशेषविषयत्वे[5] आममोर्नुमश्च समावेशमिच्छन्ति । बाध्यबाधकभावो यथा चिचीषतीत्यादिषु दीर्घद्विवचनयोरिति ।

अनड्वानिति । अनो[6] वहतीत्यनड्वान् बलीवर्दः । अनसि वहेः क्विप् । अनसो डश्चेति क्विप् । अनसो डोन्तादेशश्च । ततः संप्रसारणम् ।

---

१. सुलोपः D_4. २. °विधान° B_2. ३. The Sûtra and its वृत्ति are given after अनडुही C, B_1, D_3. ४. अमामौ No_1. ५. सामान्यविशेष° Do_4. ६. अनः शकटं Do_3.

वसुस्रंसुध्वंस्वनडुहां दः ॥८।२।७२॥

*सान्तस्य वस्वन्तस्य स्रंसादेश्च दः स्याज्झलि पदान्ते च। अनडुद्भ्याम्। इत्यादि। सान्तेति किम्। विद्वान्। तदन्तविधि-रत्रेष्यते। प्रियानड्वान्। प्रियानड्वाहौ। प्रियानड्वाहः।

अनडुहः स्त्रियामाम् वा वाच्यः[2]*। अनड्वाही। अनडुही।

श्वेतवाहुक्थशास्पुरोडाशावयाजां डस् पदान्त इति वाच्यम्*। ड इत्। डित्वसामर्थ्यादभस्यापि टेर्लोपः।

अत्वसन्तस्य चाधातोः ॥६।४।१४॥

अत्वन्तस्यान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सौ। न तु धातोः। श्वेतवाः। अवयाः[4]।

वसुस्रंसु। 'हो ढः' इत्यस्यापवादोयम्। अत्र 'ससजुषोरुः' इत्यतः 'सः' इत्यनुवर्तते तेन च संभवव्यभिचाराच्च वसुरेव विशेष्यते न स्रंसुध्वंसु। व्यभिचाराभावात्। नाप्यनडुह्। असंभवात्। इत्येतत् सर्वं चेतसि कृत्वाह। सान्तवस्वन्तस्येति। विद्वानिति। उगित्वान्नुम्। 'सान्तमहतः—' इति दीर्घः। संयोगान्तस्य लोपः। तदन्तविधिरिति। 'अङ्गाधिकारे तस्य तदुत्तरपदस्य' इति वचनात्। अनड्वाहीति। गौरादित्वात् ङीष्। श्वेतवाह इति। एतेषां यत्र पदत्वं भावि तत्र ण्विनोपवादो डस् वाच्य इत्यर्थः। ड इदिति। 'चुटू' इत्यनेन।

अत्वसन्तस्य च। अत्वन्तस्योदाहरणं धीमानित्यग्रे वक्ष्यति। तत्र यद्यप्यकृत एव दीर्घत्वे परत्वात् कृताकृतप्रसङ्गित्वेन नित्यत्वाच्च नुम् प्राप्नोति तथापि वचनसामर्थ्यादादौ दीर्घ एव भवति। अन्यथा

---

*सान्तवस्वन्तस्य Com. १. After it—परतः D3, D5. २. वक्तव्यः C. ३. After it—परे B1, B2. ४. After it—'वा शरि' इति विसर्गपक्षे श्वेतवःसु। D5. ५. Dropped Bc1, Dc3. ६. संयोगान्तलोपः Dc2. ७. एषां Dc2.

[1]श्वेतवाः पुरोडाश्च । एते कृतदीर्घाः संबुद्धौ निपात्यन्ते । चकाराद्[2]उक्थशाः । हे श्वेतवाः । वेति केचित् । हे श्वेतवः । श्वेतवाहौ । श्वेतवाहः । श्वेतवाहम् । श्वेतवाहौ । ऊड्[3] वास्येति केचित् । श्वेतौहः । श्वेतवाहः । श्वेतौहा । श्वेतवाहा । श्वेत[4]वोभ्याम् । श्वेतवोभिः । श्वेतवस्सु । [5]श्वेतवः सु । इत्यादि । हस्य ढत्वे [6]कृते

दीर्घस्य निमित्तमजुपधा विहन्येत । अन्तग्रहणमुपदेशे यत् [7]प्रसज्यते शब्दरूपं तदेकदेशस्याप्यल्त्वं[8] तस्य परि[9]ग्रहार्थम् । अन्यथा ह्युपदेशे ये अल्वन्ता भवतुक्तवत्वादयस्तेषामेव ग्रहणं स्यात् । [10]प्रयोगे उपदेशे वा नायमल्वन्तः श्रूयते इति । अन्त[11]ग्रहणे [12]तु अन्तग्रहणसामर्थ्यादल्वन्तमात्रस्य ग्रहणं विज्ञास्यते । तेन योऽप्युपदेशाप्रयोगैकदेशभूतस्तस्यापि [13]ग्रहः स्यादित्युपपद्यते मतुपो ग्रहणम् । ननु च गोमन्तमात्मन इच्छति गोमत्यति । गोमत्यतेः क्विप् । गोमानित्यत्र कथं दीर्घत्वं यतः 'अधातोः' इति निषिध्यते । अयं च 'सनाद्यन्ता धातवः' इति धातुः । नैष दोषः 'अधातो' इति निषेध आनन्तर्यादसन्तस्यैव नाल्वन्तस्य । अथवा चकारोऽनुक्तसमुच्चयार्थः । तेनेह धातोरपि स्यात् श्वेत[14]वा इति । श्वेता एनं वहन्ति श्वेतवा इन्द्रः । 'मन्त्रे श्वेतवह–' इति ण्विन् । **अवयाः** । **चकारा**दिति । अनुक्तसमुच्चयार्थाच्चकारात् उक्थशा इत्येतदपि **संबुद्धौ** [15]दीर्घं सिध्यतीत्यर्थः । **केचि**दिति । अर्वाचीनाः । तथा च **मुग्धबोध** उक्तम् । 'डसड्गो धौ[16] वा' इति । **ऊड् वे**ति । एतदपि तत्रैवोक्तम् । 'वाहो वौ पौ श्वेतात्तु वा' इति ।

---

१. अवयाः before it—D_2. २. °दुक्थशाश्च B_2. ३. ऊड्वा स्यादिति B_2. ४. Before it—'हशि च' इत्युत्वम् । 'आद्गुणः' D_5. ५. Before it—'वा शरि' इति विसर्गपक्षे D_5; श्वेतवःसु । इत्यादि dropped D_4. ६. P drops कृते. ७. प्रयुज्यते Dc_2, Dc_3. ८. °प्यत्वे Dc_2. ९. °ग्रहणार्थम् Dc_2, Dc_4. १०. शब्दरूपनिश्चयात्मके उपदेशे लौकिके प्रयोगे हि नायमल्वन्तो मतुप् श्रूयते इति न गृह्येत । अन्तग्रहणे तु, &c. Dc_3. ११. °ग्रहे Dc_1, Nc_1, Nc_2. १२. Dropped Nc_1. १३. ग्रहणं Dc_2. १४. श्वेतवाह Dc_3. १५. दीर्घः Dc_3. १६. 'धौ वा' इति केचित् Dc_3.

सहेः साडः सः ॥८।३।५६॥

साड्रूपस्य सहेः सस्य मूर्धन्यः स्यात् ॥ तुराषाट् । तुराषाड् । तुरासाहौ । तुरासाहः । तुरासाहं । तुरासाहौ । तुरासाहः । तुरासाहा । तुराषाड्भ्यामित्यादि ।

दिव औत् ॥७।१।८४॥

दिविति प्रातिपदिकस्य औत् स्यात् सौ परे ॥ तौ इत् ।

सहेः । सहेरिति । षह मर्षणे । अस्य धातोः । सहेरिति किम् । 'अन्येष्वपि दृश्यते ।' इति डीङो डः । सह डेन वर्तत इति सडः । सडस्यापत्यं साडिरित्यत्र 'यस्य-' इत्यलोपे कृते साड्रूपं संपद्यते तत्र मा भूत् । मूर्धन्य इति । सहेरित्युक्तम् । साड्ग्रहणं यत्रास्यैतद्रूपं तत्र यथा स्यादन्यत्र तु साहमित्यादौ मा भूत् । स इति किम् । अलोन्त्यपरिभाषया डस्य मा भूत् । तस्य च विधिर्व्यर्थ इति 'अन्त्याभावेन्त्यसदेशस्य' इत्याकारस्य मा भूत् । 'आदेशप्रत्यययोः' इत्यादावनुवृत्त्यर्थं च सग्रहणम् । तुराषाडिति । तुरं सहते तुराषाट् । इन्द्रः । 'छन्दसि सहः' इति ण्विः । उपधावृद्धिः । हो ढः । जश्त्वम् । 'अन्येषामपि दृश्यते' इति दीर्घः । सस्योष्मणोघोषस्य तादृश एव षः ॥

इति हान्ताः ॥

दिवः । दिव्शब्दोयमस्त्यव्युत्पन्नं प्रातिपदिकं स्वर्गवाचि । अस्ति च धातुः दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्विति । तयोर्मध्येत्र प्रातिपदिकमेव गृह्यते न धातुरननुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषया धातुर्हि उदनुबन्ध इत्यभिप्रेत्याह । दिविति प्रातिपदिकस्येति । ततश्चाक्षैर्दीव्यतीत्यक्षद्यूरित्यत्र क्विपि

---

१. मूर्धन्यादेशः D3, C, B1, B2. २. इत्यादि dropped B2. ३. B2, D5 drop त इत् । अलोन्त्यस्य ।. ४. डीङ् विहायसा गतौ Dc3. ५. अन्त्यस्य for डस्य Dc1, Nc1, Nc2; डस्य स्यात् । तस्य च Dc3. ६. °बन्धग्रहणे Dc3.

अलोन्त्यस्य । अनल्विधावित्युक्तेरलाश्रितत्वेन[1] स्थानिवत्त्वाभावाद् हल्ङ्याबिति सुलोपो न । सुद्यौः । सुदिवौ । सुदिवः । दिवो वा आत्वममीति केचित् । सुद्याम् । सुदिवम् । इत्यादि[2] ।

दिव उत् ॥६।१।१३१॥

[3]दिवोन्तादेश उकारः स्यात्[4] पदान्ते ॥ सुद्युभ्याम् । सुद्युभिः । इत्यादि[5] ॥ चत्वारः[6] । चतुर्भिः । चतुर्भ्यः २ ।

'च्छ्वोः शूडनुनासिके च' इत्यूठि कृते[7] एकदेशविकृतस्यानन्यत्वात् दिव्‌शब्द एवायमित्यूकारस्यौत्वं प्राप्नोति तन्न भवति । ननु च सुद्यौरित्यत्रौत्वे कृतेपि स्थानिवदादेशोनल्विधाविति स्थानिवत्त्वेन हलन्तत्वात् हल्ङ्याब्भ्यः—' इति सोर्लोपः स्यादित्याशङ्क्याह । **अनल्विधाविति** । **दिवो वेति** । **केचिदिति** । **दुर्गादयः** । तथोक्तं दुर्गेण । 'दिव उद्व्यञ्जने' 'औ सौ' 'वाम्या' इति ।

दिव उत् । अत्रापि दिविति प्रातिपदिकं गृह्यते न धातुः सानुबन्धकत्वात् । तपरकरणं किम् । सुद्युभ्यामित्यत्र परत्वात् 'च्छ्वोः शूडनुनासिके च' इत्यूट् प्राप्नोति । च्छ्वोरिति सूत्रे क्ङितीत्यस्याननुवृत्तिरिति केषांचिन्मतम्[8] । येषां तु मते क्ङितीत्येतदनुवर्तते तन्मतेपि द्युभ्यामित्यत्रोकारस्य वकारस्थाने जातत्वात् संप्रसारणसंज्ञास्तीति हल[9] इति दीर्घनिवृत्त्यर्थः[10] ।

इति वान्ताः ॥

चत्वार इति । चतुर्‌शब्दो बह्वर्थवाचकत्वाद्बहुवचनान्तः । जसि 'चतुरनडुहोः' इत्याम् ॥

---

१. °श्रितत्वे B_2. २. इत्यादि dropped B_2, D_3. ३. दिव उकारान्तादेशः स्यात् पदान्ते B_2. ४. B_1, D_1, D_5, drop स्यात्. ५. Dropped B_2. ६. चतुर्‌शब्दो नित्यं बहुवचनान्तः C. ७. च कृते Dc_3. ८. हि केषां Dc_2. ९. हल् Dc_2. १०. निवृत्त्यर्थम् Dc_2, Dc_3, Dc_4.

षट्चतुर्भ्यश्च ॥७।१।५५॥

षट्[1]संज्ञकेभ्यश्चतुरश्च परस्यामो नुट्[2] स्यात् ॥ णत्वं द्वित्वम्[3] । चतुर्ण्णाम् ।

रोः सुपि ॥८।३।१६॥

सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य[4] ॥ षत्वम्[5] । षस्य द्वित्वे प्राप्ते ।

शरोऽचि ॥८।४।४९॥

अचि परे शरो द्वे[6] न स्तः ॥ चतुर्षु । प्रियचत्वाः । हे प्रियचत्वः । [7]प्रियचत्वारौ । प्रियचत्वारः । इत्यादि । गौणत्वे नुट् नेष्यते[8]* ॥ प्रियचतुराम् । प्राधान्ये तु[9] स्यादेव । परमचतुर्णाम् ।

षट् । णत्वमिति । 'रषाभ्यां नो णः समानपदे' इति । द्वित्वमिति । 'अचो रहाभ्यां द्वे' इत्यनेन । रोः सुपि । रोरिति । उकारानुबन्धस्य रस्येत्यर्थः[10] । 'खरवसानयोर्विसर्जनीयः' इति सिद्धे नियमार्थम् । सिद्धे सत्यारम्भो नियमायेत्यभिप्रेत्याह । रोरेवेति । प्रियचत्वा इति । प्रियाश्चत्वारो यस्य प्रियचत्वाः । 'चतुरनडुहो-' इत्याम् । हे प्रियचत्व इति । अम् संबुद्धौ । गौणत्व इति । 'षट्चतुर्भ्यः' इति बहुवचननिर्देशात् अत्र संख्याप्रधानस्य ग्रहणम् । तेन गौणत्वे नुट् न । संख्याया अप्राधान्यात्[11] ।

इति रेफान्ताः ॥

---

१. षट्संज्ञिकेभ्य° B_2. २. नुडागमः स्यात् B_1, B_2. ३. द्वित्वं च P; D_1, D_2 drop द्वित्वम्. ४. नान्यस्य रेफस्य D_2, D_5. ५. सस्य षत्वम् C. ६. न द्वे B_2. ७. हे प्रियचत्वारौ । प्रियचत्वारः । प्रियचत्वारम् । प्रियचत्वारौ । प्रियचतुरः । प्रियचतुरा । प्रियचतुर्भ्याम् । प्रियचतुर्भिः । प्रियचतुरे । प्रियचतुर्भ्याम् । प्रियचतुर्भ्यः । प्रियचतुरः । प्रियचतुर्भ्याम् । प्रियचतुर्भ्यः । प्रियचतुरः । प्रियचतुरोः । प्रियचतुराम् । प्रियचतुरि । प्रियचतुरोः । प्रियचतुर्षु । गौणत्वे &c. B_2. ८. Dropped D_2, D_3. ९. B_1 drops तु. १०. रोरित्यर्थः Dc_3. ११. अप्रधानत्वात् Dc_1.

मो नो धातोः ॥८।२।६४॥

धातोर्मस्य नः स्यात् झलि पदान्ते च ॥ नत्वस्यासिद्धत्वान्नलोपो न । प्रशान् । प्रशामौ । प्रशामः । प्रशामम् । प्रशामौ । प्रशामः । प्रशामा । प्रशान्भ्याम् । इत्यादि ॥

मो नः । 'नशेर्वा' इत्यनुवर्तमानेपि मण्डूकप्लुत्या संबन्धानुवृत्त्या वा 'झलो झलि' इत्यस्मिन्नत्रानुवर्तमाने न कश्चिद्दोष इत्यभिप्रेत्याह । झलीति । ननु चायमस्ति दोषः । आक्रंस्यते । अत्रापि नः स्यात् । नायं दोषः । जातेपि तस्मिन् 'नश्चापदान्तस्य झलि' इत्यनुस्वारः स्यात् । एवं चेत् प्रशान्भ्यामित्यत्रापि प्राप्नोत्यनुस्वारः । न प्राप्नोति । 'स्वादिष्वसर्वनामस्थाने' इति पदत्वेन नस्य पदान्तत्वात् 'पदस्य' इत्यत्रानुवर्तते । तत्र मकारेण पदं विशेष्यमाणं येन विधिस्तदन्तस्येति न्यायेन विशेष्यते । नान्तस्य पदस्येति । निर्दिश्यमानस्यादेशा भवन्तीति न्यायेन मस्यैव नः ततश्चायं तात्पर्यार्थः संपद्यते । धातोर्मस्य नः स्यात् पदान्ते इत्येतच्चेतसि कृत्वाह । **पदान्ते चेति** । अथवा पदस्यान्ते चेत्यनुवृत्तेः इत्युच्यते । तथा च **धर्मकीर्तिना रूपावतारे** उक्तम् । 'धातोर्मकारस्य नकारादेशो भवति झलि परतः पदान्ते च' इति । म इति किम् । भित् । धातोः किम् । इदम् । झलि पदान्ते चेति किम् । प्रशामौ । **प्रशानिति** । शमु उपशमे । क्विप् । 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घः ।

---

१. झलि परतः B1, C. २. From 'नशेर्वा' to झलि परतः पदान्ते चेति dropped Dc2, Bc1. ३. प्रोक्तम् Dc3.

किमः कः ॥७।२।१०३॥

किमः कः स्याद्विभक्तौ[1] ॥ अकच्सहितस्याप्ययमादेशः। कः। कौ। के।[2] कादेशस्य स्थानिवत्त्वादङ्गकार्यम्[3]। केन। काभ्याम्। इत्यादि[4]। सर्ववत्।

इदमो मः ॥७।२।१०८॥

इदमो मस्य मः स्यात् सौ परे[5] ॥ त्यदाद्यत्वापवादः ॥

इदोय् पुंसि ॥७।२।१११॥

इदम[6] इदस्थाने अय् स्यात् सौ[7] पुंसि ॥ सोर्लोपः[8]। अयम्। त्यद्याद्यत्वे कृते।

अतो गुणे ॥६।१।९७॥

अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात् ॥

किमः । **अकच्सहितस्येति** । 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इति कृतेकचि साकच्स्यापि किमः कादेशः स्यादित्यर्थः।

इदमः । मस्य मविधानमनर्थकमित्याशङ्क्याह । **त्यद्याद्यत्वापवाद** इति ।

इदोय् । पुंसि किम्। इयं ब्राह्मणी ।

अतः । अकः सवर्णदीर्घस्य 'वृद्धिरेचि' इति वृद्धेश्चापवादः। अतः किम्। यान्ति। गुणे किम्। अपचे। अपदान्तात् किम्। दैत्यारिः।

---

१. विभक्तौ परतः P, B1. २. Before it—कम्। कौ। कान् D3, D4. ३. स्थानिवत्त्वभावात्° B2. ४. इत्यादि । सर्ववत् dropped B2; शेषं सर्ववत् D4. ५. Dropped D1, D3. ६. इदम dropped B2. ७. After it—परे B1. ८. सुलोपः B2.

अनाप्यकः ॥७।२।११२॥

आबिति टा[1] इत्यारभ्य सुपः पकारेण प्रत्याहारः[2]। अककारस्य इदम इदोऽन्[3] स्यादापि विभक्तौ[4]। अनेन।

हलि लोपः ॥७।२।११३॥

अककारस्य इदम इदो लोपः स्यादापि हलादौ[5]। नात्रालोन्त्यविधिः[6]।

आद्यन्तवदेकस्मिन् ॥१।१।२१॥

एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्। 'सुपि च' इति दीर्घः। आभ्याम्॥

अनाप्यकः। आबिति तृतीयैकवचनादारभ्य सप्तमीबहुवचन-पर्यन्तं[7] प्रत्याहारोऽत्राप् गृह्यते। न टाबादि स्त्रीप्रत्ययः। विभक्ता-वित्यस्यानुवृत्तेः टाबादेश्चाविभक्तिकत्वादिति भावः।

हलि। **नात्रेति**। नानर्थकेलोऽन्त्यविधिरिति परिभाषयेति भावः।

आद्यन्तवत्। द्वितीयादिकं सहायमपेक्ष्य आद्यन्तशब्दौ प्रवर्तेते[8]। तथापि लोके परस्मिन् सहाये सति पूर्वस्मिन्नसति चादिरित्युच्यते पूर्वस्मिंश्च सति परस्मिन्नसति चान्त इत्युच्यते। अतस्तदुभयमेकस्मिन्न संभवतीति तत्राद्यन्तप्रतिबद्धानि कार्याणि न स्युरतोऽयमतिदेश आरभ्यते। **आद्यन्तवदिति**। 'तत्र तस्येव' इति सप्तम्यर्थे वतिरित्यभिप्रेत्याह। **आदाविव अन्त इवेति**। **सुपि च** इत्यादि। अन्तापदिष्टमेतत् कार्यम्।

---

१. टाकारादारभ्य B_1. २. आप्प्रत्याहारः B_2. ३. इदः स्थानेऽन् C. ४. विभक्तौ परतः B_2. ५. हलि। 'सुपि च' इति दीर्घः। आभ्याम्। आद्यन्त° B_2. ६. After it—इदोऽनर्थकत्वात् C, D_2; and C has also नानर्थकेलोन्त्यविधिः after °नर्थकत्वात्. ७. °पर्यन्तः Dc_2. ८. वर्तेते for प्रवर्तेते Dc_2, Nc_1, Nc_2.

नेदमदसोरकोः ॥७।१।११॥

अककारयोरिदमदसोर्भिसे[1] ऐस् न स्यात् ॥ एत्वम् । एभिः । अंत्वम्[2] । ङेः स्मै । पश्चाल्लोपः[3] । अस्मै । आभ्याम् । एभ्यः । अस्मात् । आभ्याम् । एभ्यः । अस्य । अनयोः । एषाम् । अस्मिन् । अनयोः । एषु ।

ककारयोगे[4] तु[5] इमकेन । इमकाभ्याम् । इमकैः । इत्यादि[6] ।

द्वितीयाटौस्स्वेनः ॥२।४।३४॥

द्वितीयायां टौसोश्च परत[7] इदमेतदोरेनादेशः स्यादन्वादेशे ॥

नेद । अकोरित्येतदेव प्रतिषेधवचनं ज्ञापकं 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इत्यस्याः परिभाषायाः । ननु च 'इदमदसोः कात्' इत्येव सूत्रं किं नोक्तं तद्धि सिद्धे सत्यारभ्यमाणत्वान्नियमार्थं स्यात् । उच्यते । विपरीतोपि नियमः संभाव्यते[8] । इदमदसोरेव कादिति । ततश्चैतन्न स्यात् सर्वकैरिति । इमकेनेत्यादि । 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच् । 'दश्च' इति मत्वम् । त्यदाद्यत्वम् ।

द्वितीया । 'इदमोन्वादेशेशनुदात्तस्तृतीयादौ' इत्यतो मण्डूकप्लुतिन्यायेन 'इदमः' इत्यनुवर्तते । 'एतदस्त्रतसोस्त्रतसौ चानुदात्तौ' इत्यतोनन्तरसूत्रात् 'एतदः' इत्यनुवर्तत इति चेतसि कृत्वाह । इदमेतदोरिति । अन्वादेशशब्दार्थमाह ।

---

१. °भिस् D_2. २. Dropped B_2, D_2, D_5. ३. After it—नित्यत्वात् प्रथमं स्मैप्रभृतयः B_1. ४. अककारयोः किस् for ककारयोगे तु B_2; ककारयोगेन तु D_2. ५. तु is dropped in B_1. ६. इत्यादि is dropped in B_1, B_2. ७. Dropped B_2; परयोः D_3. ८. संभाव्येत Dc_2, Bc_1.

उक्तस्य पुनरुक्तिरन्वादेशः[1] । एनम् । एनौ । एनान् । एनेन । एनयोः २। [2]उपधादीर्घः । सोर्लोपः । नस्य लोपः[3] । राजा ।

उक्तस्येति । उक्तस्य किंचित् क्रियादिकं विधातुं कथितस्य पुनस्तेनान्येन वा शब्देनान्यद्विधातुमुक्तिः कथनमन्वादेशः[4] । एवमन्वादेशस्यार्थे[6] जाते यत्र वस्तुमात्रनिर्देशं कृत्वा विधानं तत्र पुनरुक्तावप्यन्वादेशता न । तेन[5] 'एतमातं ङितं विद्यात्' इत्येवमादि सिद्धम् । अत्र ईषदर्थे इत्यादिना वस्तुमात्रमाकारं निर्दिश्य एतमातं ङितं विद्यादिति विधीयते । अत एकमेव विधानं तेन एनादेशो न । एनमित्यादि । अत्रैवं वाक्यं प्रयोक्तव्यम् । इमं छात्रं छन्दोऽध्यापय । अथो[7] एनं व्याकरणमध्यापय । एवमेव द्विवचनबहुवचनयोः प्रयोगः । अनेन छात्रेण रात्रिरधीता । अथो एनेनाप्यहरप्यधीतम्[8] । अनयोश्छात्रयोः शोभनं शीलम् । अथो एनयोः प्रभूतं स्वमिति । एतद् व्याख्यानेनैव व्याख्यातप्रायत्वात् त्यक्तं सूत्रं व्याख्यायते ।'इदमोन्वादेशेशनुदात्तस्तृतीयादौ' । २।४।३२।। इदमोन्वादेशविषयस्याशादेशः स्यात् स चानुदात्तस्तृतीयादौ विभक्तौ परतः । एतस्यापवादः एनादेशः । अतस्तद्विषयं परित्यज्योदाह्रियते । आभ्यां छात्राभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतम् । [9]अस्मै कम्बलं देहि । [10]अस्मै शाकं देहीत्यादि । अशादेशवचनं साकच्कार्थम्[11] । इमकाभ्यां छात्राभ्यां रात्रिरधीता । अथो आभ्यामहरप्यधीतम् ।।

इति मान्ताः ।।

उपधेति । राजन् सुँ इति स्थिते 'सर्वनामस्थाने चासंबुद्धौ' इत्युपधादीर्घ इत्यर्थः । सोर्लोप इति । 'हल्ङ्याब्भ्यः—' इति । नस्येति । 'नलोपः प्रातिपदिकान्तस्य' इति ।

---

१. पुनर्भाषणम° B_2. २. उपधाया दीर्घः P, B_3. ३. लोपः स्यात् C. ४. °मन्वादेश इत्यर्थः Dc_2, Bc_1. ५. तेन एव° Dc_1. ६. °मन्वादेशशब्दस्य Dc_2. ७. अथो dropped Nc_1. ८. अपि dropped Nc_1. ९. From अस्मै to अधीतम् dropped Dc_1, Dc_2, Dc_3. १०. अथोस्मै Dc_4. ११. सु Dc_1.

न ङिसंबुद्ध्योः ॥८।२।८॥

नस्य लोपो न स्याद् ङौ[1] सम्बुद्धौ च ॥ हे राजन् । राजानौ । राजानः । राजानम् । राजानौ । 'अल्लोपोनः' । श्चुत्वम्[2] । राज्ञः । राज्ञा ।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ॥८।२।२॥

सुब्विधौ स्वरविधौ संज्ञाविधौ

न ङि । न[3]नु राजन् इत्यत्र लु[4]प्ते सौ प्रत्ययलक्षणेनाप्रत्यय इति निषेधा[5]त् प्रातिपदिकत्वं नास्तीति अप्रातिपदिकान्तत्वान्नलोप एव न प्राप्नोति । ङौ तु परमे व्योमन्नित्यत्र प्रत्ययल[6]क्षणेन भत्वात् प[7]दत्वबाधात् । तत् किं निषेधारम्भेणेति चेदुच्यते । एतदेव नलोप-निषेधवचनं ज्ञापयति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यते भसंज्ञा च न भवतीति । तेन राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपः स्यात् अल्लोपश्च न स्यादिति सिद्धम् । ङावुत्तरपदे प्रतिषेधो वाच्यः । चर्मणि तिलाः अस्य चर्मतिलः ॥

नलोपः । विधिशब्दोयं प्रत्येकमभिसंबध्यते इत्याह । **सुब्विधा-विल्यादि** । स्वरसंज्ञा तु[8]कां विधेयत्वात् तैः क[9]र्मषष्ठीयुक्तैः भाव-साधनो विधिशब्दोभिसंबध्यते । सुपा तु संबन्धसामान्यवाचिषष्ठ्यन्तेन कर्मसाधनः । तेन सुपां स्थाने यो विधिः सुपि च परतो यो विधिः स सर्वः संगृहीतः स्यात् । 'पूर्वत्रासिद्धम्' इति सिद्धे

---

१. ङिसम्बुद्ध्योः B2 २. C, D2, D5 have जश्शोर्जः after it; dropped D3; चुत्वम् D4, D5. ३. ननु च Dc3, Dc4. ४. लुप्तेपि Dc3, Dc4. ५. निषेधत्वात् Dc1, Dc2. ६. °लक्षणत्वेन Dc3, Dc4. ७. पदत्वाभावात् Dc4. ८. °तुकोः Dc3. ९. कर्मणि षष्ठी° Dc3.

कृति तुग्विधौ च[1] न लोपोसिद्धो नान्यत्र राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं न स्यात्[2]। राजभ्याम्। राजभिः। राज्ञि। राजनि। इत्यादि। प्रतिदिवन् अस्य भविषये अल्लोपस्य

नियमार्थमेतद्वचनमित्यभिप्रेत्याह। नान्यत्रेति। राज्ञोऽश्वो राजाश्व इत्यत्र सवर्णदीर्घं प्रति नलोपोसिद्धो नेति भावः। सुब्विधावुदाहरति। इत्यसिद्धत्वादित्यादि। आत्वं राजभ्यामित्यत्र एत्वं राजभ्य इत्यत्र ऐस्[3] राजभिरित्यत्र एतानि सुब्विधय इति कृत्वा नलोपो सिद्धो जातः। स्वरविधौ राजवती। 'अन्तोवत्याः' इत्यन्तोदात्तत्वं नलोपस्यासिद्धत्वान्न। पञ्चार्मा। 'अर्मे चावर्णं द्व्यच् त्र्यच्' इति पूर्वपदाद्युदात्तत्वं न। संज्ञाविधौ पञ्च ब्राह्मण्यः। 'ष्णान्ता षट्' इति षट्संज्ञा स्यात्। नलोपस्यासिद्धत्वात्। ततो 'न षट्स्वस्रादिभ्यः' इति टाप् न। कृति तुग्विधौ वृत्रहभ्याम्। न लोपस्यासिद्धत्वात् 'ह्रस्वस्य' इति तुक् न। अत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया असिद्धत्वात् तुग्विधिग्रहणमनर्थकम्। तत् क्रियते परिभाषाया अस्या अनित्यत्वज्ञापनार्थम्। तेन सा या इत्यादौ विभक्त्याश्रयं त्यदाद्यत्वं बहिरङ्गमपि[4] प्रातिपदिकमात्राश्रये टापि अन्तरङ्गेपि नासिद्धम्। कृति किम्। वृत्रहच्छत्रम्। 'छे च' इति तुक् स्यादेव। राज्ञि राजनीति। 'विभाषा ङिश्योः' इति वाल्लोपः। प्रतिदिवन्निति। प्रतिपूर्वात् दिवः 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन्प्रत्ययान्तस्य प्रतिदिवन्नित्यस्य शसादौ प्रत्यये परे 'भस्य' इत्यधिकृत्य 'अल्लोपोनः' इति जातस्य अल्लोपस्य

---

१. C, B₂ drop च. २ °मैस् न स्यात् C, °मैस्त्वं च D₅. ३. ऐस्तु Bc₁. ४. अपि dropped Dc₄.

'उपधायां च' इति दीर्घविधौ स्थानिवत्त्वाभावात् प्रतिदीव्नः[1]। इत्यादि[2] स्यात्[3]।

न संयोगाद्वमन्तात् ॥६।४।१३७॥

वकारमकारान्तसंयोगात्परस्यानोकारस्य लोपो न स्यात् ॥ यज्वनः। यज्वना। यज्वभ्याम्[4]। ब्रह्मणः। ब्रह्मणा। इत्यादि। शेषं[5] राजन्वत्[6]।

'उपधायां च' इति दीर्घविधौ इति। 'उपधायां च' इत्युपलक्षणं 'हलि च' इति दीर्घे क्रियमाणे। स्थानिवत्त्वाभावादिति। 'अचः परस्मिन् पूर्वविधौ' इति प्राप्तस्य स्थानिवत्त्वस्य 'न पदान्त–' इति सूत्रेण दीर्घविधौ निषेधात्। प्रतिदीव्न इत्यादि स्यादिति। 'हलि च' इति दीर्घेण प्रतिदीव्नः। प्रतिदीव्ना इत्यादि रूपं स्यादित्यर्थः। ननु च 'हलि च' इत्यस्य लक्षकम् 'उपधायां च' इति किमर्थमुक्तम्। उच्यते। अत्र 'उपधायां च' इत्यस्याप्राप्तेः। धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परतः इको दीर्घः स्यादिति स्वयं व्याख्यातत्वात्। अतोवगम्यते काशिकायां यदुपधायां चेत्युक्तं तदनुरोधादुपधायां चेत्युक्तमिति।

न संयोगात्। संयोगादिति किम्। प्रतिदीव्ना। वमन्तात् किम्। तक्ष्णा। यज्वन इत्यादि। इष्टवान् यज्वा। 'सुयजोर्ङ्वनिप्'।

---

१. B1, C omit प्रतिदीव्नः; 'हलि च' इति दीर्घः before it B2; After it–प्रतिदीव्ना D3, D4, P, C, B1, B2. २. इत्यादि is omitted in B1. ३. After it—उपधायां च रेफवकारान्तस्य उपधादीर्घः स्यात्। D6. ४. Dropped D2. ५. Dropped B3. ६. राजवत् B2.

सौ च ॥६।४।१३॥

इन्हन्पूषार्यम्णामसंबुद्धौ सावेवोपधाया दीर्घः स्यान्नान्यत्र ॥ वृत्रहा । 'एकाजुत्तर—'इति प्रातिपदिकान्तस्य नस्य णत्वम् । वृत्रहणौ । वृत्रहणः । वृत्रहणम् । वृत्रहणौ ।

हो हन्तेर्ञ्णिन्नेषु ॥७।३।५४॥

ञिति णिति प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं स्यात् ॥

सौ च । 'इन्हन्पूषार्यम्णां शौ' इति क्लीबे वक्ष्यमाणसूत्रेण कृतं नियमं सौकर्यार्थमत्रैवाह । **सावेवोपधाया दीर्घः स्यान्नान्यत्रेति** । तत्र हि 'दीर्घविधिर्य इहेन्प्रभृतीनाम्' इत्यादिना वार्तिकत्रयेण इन्प्रभृतीनामुपधाया दीर्घः शावेव प्रत्ययेन नियम्यत इत्युक्तम् । तच्च **महाभाष्याद् वृत्तिन्यासादेश्चावगन्तव्यम्** । विस्तरभयादत्र नोक्तम् । शावेव प्रत्यये उपधादीर्घस्य नियतत्वात् वृत्रहणीत्यत्र 'अनुनासिकस्य क्विझलोः क्ङिति' इति यद् दीर्घत्वं तदपि न भवति । वृत्रहेवाचरति वृत्रहायते इत्यत्र 'अकृत्सार्वधातुकयोर्दीर्घः' इति तु दीर्घो भवत्येव । उपधादीर्घस्यैव नियतत्वादस्य चाजन्तदीर्घविधित्वात् । **वृत्रहेति** । वृत्रं हतवान् । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' इति क्विप् ।

हो हन्तेः । अत्र 'ञ्णिति' इत्येतत् 'हन्तेः' विशेषणं 'न' इत्येतत् हकारस्य विशेषणम् । तेनायमर्थः स्यात् । ञिति णिति प्रत्यये परतो योनन्तरो हन्तिस्तस्यावयवस्य हस्य कुत्वं नकारे च परतो यो हन्तेरवयवोनन्तरो हस्तस्य कुत्वं स्यादिति ।

---

१. °मुपधाया दीर्घः स्यादसम्बुद्धौ सावेव B2. २. °पधादीर्घः D6. ३. C, D1, D3, D5, D4 have हे वृत्रहन् after it. ४. प्रातिपदिकान्तनकारस्य P; प्रातिपदिकान्तनस्य D1, D4. ५. प्रत्ययपरे B1. ६. चाव्यवहिते परे B1. ७. °ह्कारस्य C. ८. एव dropped No1.

हन्तेरत्पूर्वस्य ॥८।४।२२॥

हन्तेर[1]पूर्वस्यैव नस्य णत्वं[2] नान्यस्य। द्वित्वम्। जश्त्वम्। वृत्रघ्नः[3]।

वृत्रघ्न इत्यादावल्लोपे कृते 'अचः परस्मिन्—' इति स्थानिवद्भावाद्यद-नानन्तर्यं प्राप्नोति तत् कुत्वं न विहन्ति। वचनसामर्थ्यात् श्रुतिकृतस्यै-वात्रानन्तर्यस्याङ्गीकारात् शास्त्रकृतस्यानन्तर्यस्याप्रयोजकत्वात्। यदपि सर्वैरेव ञ्णिर्हन्त्यवयवो हकार एव विशेष्यते तदपि 'येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्' इति न्यायेन घातक इत्यादौ ञ्णितो धात्ववयवेन व्यवधानेपि कुत्वं स्यादेव। अत्र तु न स्यात्। हननमिच्छति हननीयति। हननीयतेर्ण्वुल्। हननीयकः। ल्युडादिना व्यवधानात्। ह इति किम्। अलोन्त्यस्य मा भूत्। हन्तेः किम्। प्रहारकः।

हन्तेः। एतत्तु सूत्रमुपसर्गस्थान्निमित्तात् परस्य हन्तेरकारपूर्वस्य नस्य णत्वविधायकम्। तथा चादादिगणे हन हिंसागत्योरस्य प्रक्रियायां स्वयमेव वक्ष्यते[6]। 'हन्तेरत्पूर्व-' इति णत्वं प्रहण्यादिति। **काशिकाकारो-**प्युक्तवान्। 'हन्तेरकारपूर्वस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति' इति। अत्पूर्वस्येत्ययं सूत्रावयवस्तु वृत्रघ्न इत्यादौ णत्वं मा भूदिति नियमं करोति। स एव नियमः प्रस्तुतोपयोगि-त्वादाचार्यैर्व्याख्यातः। **हन्तेरकारपूर्वस्यैव नस्य णत्वमिति।** तथा चेममेवार्थं प्रकटयन् **महाभाष्यकार** आह। 'कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। वृत्रघ्नः। स्रुघ्नः। प्राघानीति' इति।

---

१. अत्पूर्वस्य as the Sûtra P, D_1, B_1, B_2. २. °रकारपूर्वस्यैव P, D_4, D_5, Com.; अत्पूर्वस्य हन्तेरेव B_2. ३. After it—स्यात् D_4. ४. Before it—तच्चानन्तर्यश्रुतिकृतमाश्रीयते। Dc_3. ५. वृत्रघ्नः। वृत्रघ्ना। Most of Mss. ६. वक्ष्यति Dc_4.

वृत्रघ्ना । वृत्रहभ्याम् । इत्यादि । एवं शार्ङ्गिन्यशस्विन्नर्यमन्पूषन्प्रभृतयः । पूष्णि । पूषणि । पूष्णो ङौ टिलोपो वेति केचित् । पूषि[1] ॥

मघवा बहुलम् ॥६।४।१२८॥

[2]मघवन्नित्यस्य वा तृ इत्यन्तादेशः स्यात् । ऋ इत् ।

उगिदचां सर्वनामस्थाने धातोः ॥७।१।७०॥

अधातोरुगितो नलोपिनो[3]ऽञ्चतेश्च नुमागमः स्यात्

'हन्तेरत्पूर्वस्य' इत्यत्रात्पूर्वग्रहणं न कर्तव्यं भवति इति । तथा च विचारचिन्तामणौ बोपदेवपण्डितैः साक्षादुक्तम् ।

'यथा वृत्रहणावेकाजुत्तरेति ण इष्यते ।
वृत्रघ्नो न तथा हन्तेरत्पूर्वस्य नियन्त्रणात् ॥' इति ।

पूष्ण इति । तथा च 'मासनिशापूष्णां ङौ वा[4]न्तस्वराद्विलोपः' इति दुर्गवचनम् । 'पूष्णो ङिर्डिर्वा[5]' इति बोपदेवपण्डितवचनं[6]म्[7] ।

मघवा । मघवेति सुब्व्यत्ययेन षष्ठ्याः स्थाने प्रथमेत्यभिप्रेत्याह । **मघवन्नित्यस्येति** ।

उगिदचाम् । अजिति यदि प्रत्याहारग्रहणं स्यात् तर्हि उत्तरसूत्रे पुनर् 'नपुंसकस्य झलचः' इत्यज्ग्रहणं न कुर्यात् । कृतं च । ततो ज्ञायते अत्राजिति धातुरञ्चतिर्गृह्यते इत्यभिप्रेत्याह । **नलोपिनोऽञ्चतेरिति** । उगिदचां किम् । वृषद् । वृषदौ ।

---

१. After it—पक्षे पोषमासूत्रम् । अर्थवद्ग्रहणेनानर्थकस्य । इति न्यायात् । प्लीहा । प्लीहानौ । प्लीहानः । प्लीहानम् । प्लीहानौ । प्लीह्नः । प्लीह्ना । इत्यादि ।
२. मघवन्नित्यादेः B_1. ३. न्लोपिनो D_1, D_2. ४. वान्त्य° Dc_3. ५. °ङिन्वा Dc_3. ६. पाण्डितैरुक्तम् Dc_3. ७. °वचनं च Dc_2, Dc_4.

सर्वनामस्थाने[१] । उपधाया दीर्घः । मघवान् । मघवन्तौ । मघवन्तः । हे[३] मघवन् । मघवन्तम् । मघवन्तौ । मघवतः ॥ मघवता । मघवद्भ्याम्[४] । इत्यादि[५] । तृत्वाभावे[६] मघवा । मघवानौ । मघवानः[७] । इत्यादि[८] । सुटि राजन्वत्[९] ॥

सर्वनामस्थाने किम् । भवतः पश्य । उगित्त्वादेवाञ्चतेरपि नुमि सिद्धे अञ्चतिग्रहणं नियमार्थं धातोश्चेदुगितः स्यात् तर्ह्यञ्चतेरेवेति । तेन उषास्रदित्यादौ न । ननु चैवमधातोरिति व्यर्थम् । न व्यर्थम् । अधातुभूतपूर्वस्यापि[१०] नुम् स्यादित्यधातुग्रहणम् । गोमन्तमात्मन इच्छति गोमत्यति गोमत्यतेः क्विप् । गोमान् । अन्यथा ह्यत्र क्विबन्तत्वेन धातुत्वान्नुम् न स्यात् । **सर्वनामस्थाने चेत्युपधादीर्घ** इति । मघवन् सँ[११] इति स्थिते तृ अन्तादेशस्ततो नुम् । सुलोपः । संयोगान्तलोपः[१२] । ततः 'सर्वनामस्थाने चासंबुद्धौ' इति दीर्घः । ननु च[१३] 'पूर्वत्रासिद्धम्' इति संयोगान्त[१४]लोपस्यासिद्धत्वान्नान्तत्वाभावाद् दीर्घो न स्यात् । उच्यते । 'मघवा बहुलम्' इति बहुलग्रहणात् सर्वविधिव्यभिचारार्थात् 'संयोगान्तस्य[१५] लोपस्य सिद्धत्वाद्दीर्घो लभ्यते' । तथा च **महाभाष्यकारः** ।

'अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ।
मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात् ॥' इति

व्याख्यानान्मतुपा[१६] सिद्धत्वेन 'मघवा बहुलम्' इति सूत्रं निराकृतवान् । तत्र यदि प्रथमैकवचने त्रन्तस्य[१७] मघवन् शब्दस्य दीर्घो न

१. चेत्युपधादीर्घः D1; After it—परे D3, D4, D5. २. 'सर्वनामस्थाने चासंबुद्धौ' इत्युपधाया दीर्घः C; सर्वनामस्थाने चेत्युपधादीर्घः D3, D4, Com. ३. हे मघवन् to मघवतः dropped D3. ४. P has मघवद्भिः । मघवते । मघवद्भ्याम् । मघवद्भ्यः । before इत्यादि. ५. इत्यादि dropped B2. ६. त्रभावे B2. ७. B1 drops मघवानः । इत्यादि ।; D1, D3 drop मघवानः. ८. C, B2 drop इत्यादि; before it—मघवानम् । मघवानौ । D4. ९. राजवत् B2, D2. १०. अधातुपूर्वस्यापि Dc3. ११. सु Dc3. १२. संयोगान्तस्य Dc2. १३. Dropped Dc2. १४. संयोगान्तस्य लो° Dc2. १५. संयोगान्तलोपस्य Dc4. १६. वार्तिकव्याख्यानात् Dc3, Dc4. Bc1. १७. त्वन्तस्य Dc3.

इग्यणः संप्रसारणम् ॥१।१।४५॥

यणः स्थाने भूतो भावी वा इक् संप्रसारणसंज्ञः स्यात् ॥

स्यान्मतुपा व्याख्यानं न कुर्यात् । मतुबन्तस्य हि प्रथमैकवचने दीर्घो भवत्येवेति विशेषस्य सत्त्वात् मतुपा च सूत्रं निराकरोति । अतो ज्ञायते मघवानिति दीर्घो भवत्येवेति । तथा बोपदेवपण्डितैरपि विचारचिन्तामणावुक्तम् ।

'मघवानेव मघवा बहुलं सुपि सुप्यभो ।
धीमद्वद्राजवद् भस्य श्वयुवेति संप्रसारणम् ॥' इति ।

तथा च दुर्गसिंहवृत्तावप्युक्तम् । 'सौ च मघवान् मघवा वा । मघवन् शब्दो मघवन्तुर्भवति विभक्तौ सौ च परे मघवान्' इति । तट्टीकायामपि । मघवन्तुरित्यनुबन्धो व्याख्यानाद्गम्यते । छन्दस्येतौ प्रयोगाविति भाष्यकारो भाषते । शर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते । तथा हि 'मघवद्व्यलज्ज्ञानिदाने' इति दृश्यते वतुना प्रयोग इति । तथा च भट्टिकाव्ये प्रयोगः । 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति ।

इग्यणः । भूत इति यत्र शास्त्रान्तरेण विहितो भूतविभक्त्या कार्यान्तरार्थमनूद्यते यथा संप्रसारणस्य 'संप्रसारणाच्च' इति तत्र भूतः । भावी वेति । यत्र भाव्यमानविभक्त्या विध्यर्थं निर्दिश्यते यथा 'ष्यङः संप्रसारणम्' 'वसोः संप्रसारणम्' इति तत्र भावी । ततश्चायमर्थः । सं इग्यणः स्थाने स्याद्यस्य भूतस्य संप्रसारणं स्यादिति । इहं 'यथासंख्यम्—' इति परिभाषा प्रवर्तते । इकां

१. संप्रसारणं P; संप्रसारणसंज्ञं B₂. २. प्रत्याख्यानं Dc3, Dc4. ३. तथा च Dc4. ४. मघवते तुर्भवति Bc1. ५. Dropped Nc1. ६. संप्रसारणसंज्ञा Nc1; संप्रसारणं संज्ञा Bc1. ७. Dropped Dc3.

श्वयुवमघोनामतद्धिते ॥६।४।१३३॥

भसंज्ञानामेषामतद्धिते पंरे[१] संप्रसारणं स्यात् ॥

संप्रसारणाच्च ॥६।१।१०८॥

संप्रसारणादेचि[२] पूर्वरूपमेकादेशः स्यात्[३] ॥ आद्गुणः । मघोनः । मघोना । मघवभ्याम्[४] । इत्यादि । अतद्धिते किम् ।

यणां च समसंख्यत्वात्[५] । ततश्च दुहेर्लङन्तस्य कर्मकर्तर्यात्मनेपदमिट् । 'न दुह—' इति यक्प्रतिषेधः । अदादित्वाच्छपो लुक् । अट् । 'तिङश्च' इति तमप् । 'किमे—' इत्यादिनाम् । अदुहितमामित्यत्र यद्यपि लस्य स्थाने इर्जातस्तथापि संप्रसारणसंज्ञो[६] न । यस्य स्थानेजातत्वात् ततश्च 'हलः' इति दीर्घो न । द्युभ्यामित्यत्र 'दिव उत्' इत्युक्ते तस्य संप्रसारणत्वेपि 'हलः' इति प्राप्तं[७] दीर्घत्वं तपरत्वान्न स्यात् । अक्षद्युवावित्यादावूटः संप्रसारणत्वेपि 'संप्रसारणाच्च' इति पूर्वरूपत्वं प्राप्तं वार्णादाङ्गं बलीय इत्युवङा बाध्यते ।

श्वयुव । 'अल्लोपोनः' इति सूत्रे योगविभागः क्रियते 'अल्लोपः' 'अनः' इति । तत्र 'अनः' इति 'श्वयुवमघोनामतद्धिते' 'अल्लोपः' इत्युभयोर्योगयोः शेषस्ततश्चानन्तस्यैव संप्रसारणं विधीयत इति युवतीः मघवतः इत्यादौ संप्रसारणं न भवति ।

संप्रसा । संप्रसारणविधिसामर्थ्याद्विगृहीतस्य श्रवणे प्राप्ते वचनम् । शकं ह्वयतीति शकहूः । शकह्वौ इत्यत्रान्तरङ्गे अचि कृतार्थं वचनमिति पश्चादागते बाह्य अचि औ इत्यस्मिन् परतः पूर्वरूपत्वं न भवति ।

---

१. P has अतद्धिते at the end of the sentence; परे dropped P, C. २. °दचि परे B_1. ३. D_1, D_5 drop it. ४. B_1 drops मघवभ्याम्. ५. °संख्यात्वात् Dc, Bc_1. ६. °संज्ञा Bc_1. ७. Dropped Dc_3.

माघवनम् । शुनः । शुना । श्वभ्याम् । इत्यादि ।[1] युवन्शब्दे[2] युवस्योत्वे कृते

न संप्रसारणे संप्रसारणम् ॥६।१।३७॥

संप्रसारणे परतः[3] पूर्वयणः[4] संप्रसारणं न स्यात् ॥ इति यकारस्येत्वं[5] न । अत एव ज्ञापकादन्त्यस्य[6] यणः संप्रसारणम्[7] । यूनः । यूना । युवभ्याम् । इत्यादि । अर्वा । हे अर्वन् ।

माघवनमिति । मघवा देवतास्य । 'सास्य देवता' इत्यण् । 'अन्' इति प्रकृतिभावाट्टिलोपो न । **युवन्शब्द** इत्यादि । शसादौ परतः संप्रसारणे कृते इत्यर्थः ।

न संप्र । 'ष्यङः संप्रसारणम्' इत्यतः 'संप्रसारणम्' इत्यनुवर्तमानेपि पुनः संप्रसारणग्रहणं श्वयुवमघोनामित्यस्यान्यदेशस्यस्यापि निषेधार्थम् । **यून इति** । अत्र संप्रसारणग्रहणसामर्थ्यादेव पूर्वस्य संप्रसारणनिषेधे कार्ये सवर्णे[8] दीर्घत्वं न स्थानिवत् स्यात् । अस्तु वा स्थानिवत्त्वम् । तथाप्येतावद्व्यवधानमाश्रयिष्यते । ननु चास्मिन् निषेधे आरब्धेपि यून इत्यत्र यकारस्य संप्रसारणनिषेधो न । यतस्तस्य पूर्वं[9] संप्रसारणं करिष्यते पश्चाद्वकारस्य कृतं च[10] वचनशतैरप्यशक्य[11]निवृत्तीत्याशङ्क्याह । अत एवेत्यादि ।

---

१. Dropped B_2. २. युवन्शब्दे तु वकारस्योत्वे कृते B_3; युवन्शब्दे तु उत्वे कृते D_4; युवन्शब्दे तु वस्य उत्वे कृते D_6. ३. परे B_1, D_1. ४. पूर्वस्य यणः C, D_3, D_4. ५. °स्य नेत्वम् D_2, D_4, D_5; °स्य इत्वं न C, B_3. ६. °दन्त्यस्यैव B_1. ७. B_1 has स्यात् after it. ८. सवर्णदीर्घत्वं Dc_3, Dc_4; नस्यात्वे कृते अल्विधित्वात् । उपधादीर्घः D_2. ९. Dropped Dc_1, Dc_2. १०. Dropped Dc_2. ११. °व्यशक्यं निवर्तयितुमित्या° Dc_3.

अर्वणस्त्रसावनञः ॥६।४।१२७॥

नञ्[1]वर्जस्यार्वणस्तृ इत्यन्तादेशः स्यादसौ [2]प्रत्यये परतः। अर्वन्तौ। अर्वन्तः। अर्वन्तम्। अर्वन्तौ। अर्वतः। अर्वता। अर्वद्भ्याम्। इत्यादि। अनञः किम्। अनर्वा। अनर्वाणौ। अनर्वाणः। [3]इत्यादि। यज्ववत्।

पथिमथ्यृभुक्षामात् ॥७।१।८५॥

एषां सौ परे आकारोन्तादेशः स्यात्॥

अर्वणः। उकारस्यात्रानुनासिकत्वप्रतिज्ञानात् प्रथमैकवचनं सुर्गृह्यते न सप्तमीबहुवचनम्। 'नानुबन्धकृतमनेकालत्वम्' इत्ययमन्तादेशः स्यादित्यभिप्रेत्याह। **तृ इत्यन्तादेश** इति। '**असौ**' इति [4]प्रसज्यप्रतिषेधः पर्युदासो वा। तत्र [4]प्रसज्यप्रतिषेधपक्षे निर्निमित्त एष त्रन्तादेशः सौ निषिध्यते। पर्युदासे तु सुव्यतिरिक्तप्रत्ययनिमित्तकस्तत्र पक्षद्वयमपि प्रमाणम्। तत्र पर्युदासपक्षमाश्रित्याह। **असौ प्रत्यय** इति। ननु च 'नञिव युक्तमन्यसदृशार्थे' इति न्यायेन सुसदृशेन्यस्मिन् प्रत्यये विभक्तावेव स्यात् त्रादेशस्तत् किमिति विभक्ताविति परित्यज्य प्रत्यय इत्याह। नैष दोषः। अनित्यत्वान्नञिवयुक्तपरिभाषायाः। अनित्यत्वं तु 'औषधेश्च विभक्तावप्रथमायाम्' इत्यत्र विभक्तिग्रहात् ज्ञायते। यदि हि सा नित्या स्यात् प्रथमानिषेधादेवान्यस्यां विभक्तावेव स्यादिति विभक्तिग्रहणं न कुर्यात्। **यज्ववदिति**। तेन 'न संयोगान्तात्—' इति शसादावल्लोपो नेत्यभिप्रायः।

पथि। हल्ङ्यादिलोपे प्राप्ते वचनं 'भाव्यमानोण् सवर्णान्न गृह्णाति' इति [6]नकारस्थाने '[7]अलोन्त्यस्य' इति न्यायेन भवन्नकारोनुनासिको [8]न भवति। शुद्धो ह्ययमुच्चार्यते।

---

1. नञ्वर्जितस्या° C. 2. विभक्तौ B_1, C; प्रत्यये परे D_3. 3. Dropped B_2, D_3. 4. प्रसह्य° Dc_3, Dc_4. 5. एव dropped Dc_1, Dc_3. 6. नकारस्य स्थाने Bc_1. 7. न 'अलोन्त्यस्य' Dc_2; अलोन्त्येति Dc_3. 8. Dropped Dc_2.

इतोत् सर्वनामस्थाने ॥७।१।८६॥

पथ्यादेरिकारस्योकारः स्यात् सुटि ॥

थोन्थः ॥७।१।८७॥

पथिमथोस्थस्य न्थादेशः स्यात् सुटि । स्थानिवत्त्वाभावः । पन्थाः । उपधादीर्घः । पन्थानौ । पन्थानः । पन्थानम् । पन्थानौ ।

भस्य टेर्लोपः ॥७।१।८८॥

भसंज्ञस्य पथ्यादेष्टेर्लोपः स्यात् ॥ पथः । पथा । पथिभ्याम् । इत्यादि । एवं मन्थाः । ऋभुक्षाः ॥

इतः । अथ 'आत्' इति वर्तमाने अद्वचनं किमर्थम् । ह्रस्वश्रवणार्थमिति चेन्न । कृतेपि ह्रस्वे सौ परतः सवर्णदीर्घेण भाव्यम् । अन्यत्र तूपधादीर्घत्वेनेति । उच्यते । ऋभुक्षणमित्यत्र 'वा षपूर्वस्य निगमे' इति विकल्पेन दीर्घविधेर्ह्रस्वस्य पक्षे श्रवणार्थमद्वचनम् । स्थानिन्यादेशे च तपरत्वं मुखसुखार्थमित्येके । पथीनि इति दीर्घनिवृत्त्यर्थमित्यन्ये । पन्थानमात्मन इच्छतीति पथीयति । ततः क्विप् । अकारयकारलोपौ । पथी ।

थोन्थः । द्वावपि स्थान्यादेशावनच्कौ । यस्तु न्थ इत्यत्राकारः श्रूयते स उच्चारणार्थः । सत्यप्यनेकाल्त्वे न्थादेशस्य 'निर्दिश्यमानस्यादेशा भवन्ति' इति थमात्रस्यैवायं विज्ञायते । **स्थानिवत्त्वाभाव** इति । नस्यात्वे कृते अल्विधित्वात् स्थानिवदादेशोनल्विधाविति स्थानिवत्त्वाभावस्ततश्च हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् इत्यादिलोपो नेति भावः । एवमित्यादि । मन्थानौ । ऋभुक्षाणौ । मथः । ऋभुक्षः । मथिभ्याम् । ऋभुक्षिभ्याम् । इत्यादि पथिवत् ज्ञेयम् ।

---

१. B_2 gives this Sûtra after 'थोन्थः' and has उपधाया दीर्घः after सुटि of the Vṛitti. २. °स्याकारादेशः C. ३. Dropped D_5. ४. स्थानिवत्त्वाभावान्न सुलोपः C, D_3, B_2; D_2 has स्थानिवत्त्वाभावः after पन्थाः. ५. उपधाया दीर्घः C, D_3, P, B_2. ६. Before it—पथिभिः D_2. ७. न dropped Nc_1.

ष्णान्ता षट् ॥१।१।२४॥

[1]उपदेशकाले षान्ता न[2]न्ता च[3] संख्या षट्संज्ञा स्यात् ॥
[4]उपदेशकाले[5] किम् । शतानि ।

[6]षड्भ्यो लुक् । [7]पञ्च । पञ्च । तदन्तग्रहणमत्रेष्यते । परमपञ्च । गौणत्वे तु[8] प्रियपञ्चानः । पञ्चभिः । पञ्चभ्यः । 'षट्चतुर्भ्यश्च' इति नुट् ॥

ष्णान्ता षट् । ष्णान्तेति स्त्रीलिङ्गनिर्देशेन संख्यानुवृत्तिः स्पष्टीकृता । न च षकारमात्रं नकारमात्रं वा संख्यास्तीति सामर्थ्यादेव तदन्तत्वे ज्ञातेऽप्यन्तग्रहणमुपदेशावस्थायां या ष्णान्ता सा षट्संज्ञा यथा स्यादित्येवमर्थमित्यभिप्रेत्याह । **उपदेशकाले षान्ता नान्ता च संख्या षट्संज्ञा स्यादिति** । **शतानीति** । यद्यत्रोपदेशकालद्योतनार्थमन्तग्रहणं न स्यात्तदा शतानीत्यत्र नुमि कृते षट्संज्ञा स्यात् ततश्च लुक् स्यात् स मा भूदित्येवमर्थमन्तग्रहणमिति भावः । **तदन्तेति** । **अत्रेति** । 'षड्भ्यो लुक्' इत्येतस्मिन् सूत्रे । **परमपञ्चेति** । परमाश्च ते पञ्च चेति विग्रहः । **गौणत्वे त्विति** । षड्भ्य इति बहुवचननिर्देशात् अर्थस्येदं ग्रहणम् । स चार्थो द्विधा प्रधानं चाप्रधानं च तत्र प्रधाने कार्यसंप्रत्ययाद् गौणत्वे जश्शसोर्लुक् न तत्रार्थस्याप्राधान्यादिति भावः । **प्रियपञ्चान इति** । प्रियाः पञ्च येषामिति बहुव्रीहिः ।

---

१. Before it—स्त्रीलिङ्गनिर्देशात् संख्येति संबध्यते B_2. २. नान्ता षट्संज्ञा स्यात् C. ३. च dropped D_3, D_5. ४. D_1 and D_3 have उपदेशकाले किम् । शतानि after पञ्च । पञ्च ।. ५. °काले इति किम् P, D_2. ६. षड्भ्यो लुक् । पञ्च ॥ पञ्च । dropped D_2. ७. Before it—षट्संज्ञिकेभ्यः (°संज्ञकेभ्यः D_4) परयोर्जश्शसोर्लुक् स्यात् । B_2, D_4. ८. तु न C, D_3, D_4, D_6; न for तु D_1; पुनः for तु B_2. ९. Dropped Dc_3. १०. Dropped Nc_2.

नोपधायाः ॥ ६।४।७॥

नान्तस्योपधाया[1] दीर्घः स्यान्नामि । पञ्चानाम् । परमपञ्चानाम् । न गौणत्वे[2] नुडिष्यते । प्रियपञ्चाम्[3] । पञ्चसु । एवं सप्तन्नवन्दशन्[4] ।

अष्टन आ विभक्तौ ॥७।२।८४॥

अष्टन आत्वं स्याद्विभक्तौ परतः[5] ।

अष्टाभ्य औश् ॥७।१।२१॥

कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात् । अष्टाभ्य इति

नोप । नान्तस्य किम् । चतुर्णाम् । नामीति किम् । चर्मणाम् । **पञ्चानामिति** । पञ्चन् आम् इति स्थिते नुट् । 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः । **न गौणत्वे** इति । अत्रापि 'षड्भ्यो लुक्' इत्यत्रोक्त एव हेतुः । **प्रियपञ्ञामिति** । आमि अल्लोपः । चुत्वेन ञः ।

अष्टनः । आ इति व्यक्तिनिर्देशोयम् । जातिनिर्देशे तु अन्तरतमपरिभाषया नकारस्य स्थानेनुनासिकः स्यात् ।

अष्टाभ्यः । 'षड्भ्यो लुक्' इति लुकि प्राप्तेयमारम्भोतो 'येन नाप्राप्ते स तस्य बाधकः' इति परिभाषयास्यैव बाधको न सुपो धातुप्रातिपदिकयोरस्य । एतस्मिन् हि प्राप्ते चाप्राप्ते चारम्भात् । अतोष्टपुत्रेत्येवमादि सिद्धं स्यात् । **अष्टाभ्य** इति । कृताकारस्याष्टनो निर्देशो यत्रास्यात्वं तत्रैवौश्त्वं[7] यथा स्यादित्येतदर्थः । अन्यथा लाघवात् अष्टन इत्येव ब्रूयादित्यभिप्रेत्याह । **कृताकारादिति** । ननु च 'अष्टन आ विभक्तौ' इत्यनेनाष्टनो नित्यमात्वं विधीयते । तत्राकृताकारस्याष्टनो असत्त्वेन व्यभिचाराभावात् कृताकारस्याष्टनो निर्देशो व्यर्थ इत्याशङ्क्याह । **अष्टाभ्य इति** ।[6]

---

१. नान्तोपधा° Dc_5. २. गौणत्वे नुट् न C; गौणत्वे तु नुट् नेष्यते B_1, B_2. ३. °पञ्चाम् D_1; °पञ्चाम् । 'अल्लोपो नः' D_2. ४. °दशन्प्रभृतयः C, D_2. ५. परतः dropped B_1. ६. Dropped Dc_1. ७. तत्रैवौत्वं Dc_3.

दीर्घोच्चारणं ज्ञापकमात्वविकल्पस्य ॥ अष्टौ[1] २। परमाष्टौ। गौणत्वे तु नात्वम्। प्रियाष्टा। आत्वस्याभावादौश्त्वं न। प्रियाष्टानः। अष्टाभिः। अष्टाभ्यः २। अष्टानाम्। अष्टासु। आत्वाभावे। अष्ट २। अष्टाभिः। अष्टाभ्यः २। अष्टानाम्। परमाष्टानाम्। गौणत्वे तु। प्रियाष्णाम्। अष्टसु। गौणत्वेप्यात्वं जश्शसोरौश्त्वं वेत्येके[4]। प्रियाष्टाः। प्रियाष्टौ। जसि शसि च[6]। प्रियाष्टौ २। आमि न नुट्। प्रियाष्टाम्। शेषं हाहावत्। 'एकाचो बश्—' इति भष्भावः[7]। जश्त्वचर्त्वे।

दीर्घोच्चारणमिति। दीर्घस्योच्चारणं दीर्घस्याकारस्योच्चारणं कृतात्वस्योच्चारणमिति यावत्। अत्र च कृतात्वोच्चारणमिति वक्तव्ये दीर्घोच्चारणमिति वचनम् 'अष्टनो दीर्घात्' इति सूत्रे दीर्घवचनमपि ज्ञापकमिति दर्शयितुम्। परमाष्टाविति। तदन्तविधीष्टिं दर्शयति। प्रियाष्टान इति। प्रिया अष्टौ येषामिति बहुव्रीहिः। अष्ट अष्ट इति। औश्त्वाभावात् 'षड्भ्यो लुक्' इति जश्शसोर्लुक्। प्रियाष्णामिति। गौणत्वान्न नुट्। अल्लोपः। गौणत्व इति। एके दुर्गसिंहादयः। तथा च दुर्गसिंहवृत्तावुक्तम्। 'अष्टनः सर्वासु' इति सूत्रे 'प्रियाष्टाः। प्रियाष्टौ' इति। तट्टीकायामुक्तम्। 'प्रिया अष्टौ यस्य ययोर्वेति विग्रहः। एवं प्रियाष्टाम्। प्रियाष्टा पुरुषेणेत्यादि यथालक्षणं योज्यम्' इति। तथा 'औ तस्माज्जश्शसोः' इति सूत्रेप्युक्तम्। 'तदन्तविधिरत्र प्रकरणेस्तीति परमाष्टौ उत्तमाष्टौ प्रियाष्टौ येषाम्। अष्टावतिक्रान्ता वा प्रियाष्टौ अत्यष्टौ इति भवितव्यमेव' इति।

इति नान्ताः ॥

---

१. After this—अष्टाभिः। अष्टाभ्यः २। अष्टानाम्। अष्टासु। परमाष्टौ। परमाष्टानाम्। गौणत्वे तु नात्वम्। प्रियाष्टानः। 'नोपधायाः' 'षट्चतुर्भ्यश्च' इति नुट्। आत्वस्याभावादौश्त्वं न। प्रियाष्टानः। आत्वाभावे। अष्ट २. &c. B_2. २. Dropped D_4. ३. C has after it—प्रियाष्णः। प्रियाष्णा।. ४. वेति केचित् D_5. ५. Dropped P. ६. आमि च C. ७. °भावे D_4.

भुत् । भुद् । बुधौ । बुधः । बुधम् । बुधौ । बुधः । बुधा । भुद्भ्याम् । इत्यादि ।

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥३।२।५९॥

आद्याः पञ्च क्विन्नन्ता निपात्यन्ते त्रिभ्यः क्विन् विधीयते । अञ्चेः सुप्युपपदे क्विन् युजि क्रुञ्चोः केवलयोः क्रुञ्चेर्नलोपाभावश्च निपात्यते । क इ न एते इतः ।

भुदिति । बुध्यते जानातीति भुत् । बुध अवगमने । अस्मात् क्विप् ॥

इति धान्ताः ॥

ऋत्विक् । **आद्याः पञ्चेति** । ऋत्विगादयः पञ्च शब्दाः क्विन्नन्ता निपात्यन्ते । अलाक्षणिककार्यार्थं निपातनम् । तथाहि ऋतावुपपदे यजेर्धातोः क्विन् निपात्यते । ऋतौ यजति ऋतुं वा यजति ऋतुप्रयुक्तो वा यजतीति ऋत्विक् । रूढिरेषा कथंचिद् व्युत्पाद्याः । धृषेः क्विन् । द्विर्वचनमन्तोदात्तत्वं च निपात्यते । धृष्णातीति दधृक् । सृजेः कर्मणि क्विन् अमागमश्च । सृजन्ति तां स्रक् । दिशेः कर्मणि क्विन् । दिशन्ति तां दिक् । उत्पूर्वात् ष्णिहेः क्विन् । उपसर्गान्तलोपः । षत्वं च । उष्णिक् । **त्रिभ्य इति** । अञ्चुयुजिक्रुञ्च एतेभ्यस्त्रिभ्यः क्विन् विधीयते । निपातनैः सह निर्देशादत्रापि किंचिदलाक्षणिकमस्तीत्यभिप्रेत्याह । **अञ्चेरित्यादि क इ न एते इत इति** । 'लशक्वतद्धिते' इति क इत् । 'उपदेशेऽजनुनासिक इत्' इतीकारः । 'हलन्त्यम्' इति नकारः ।

---

१. C has before this हे भुत—द्. २. न्लोपाभाव' D_1. ३. क्विप् Dc_1 Dc_2. ४. ऋतुना प्र' Nc_2. ५. व्युत्पाद्यम् Bc_1.

कृदतिङ् ॥३।१।९३॥

अत्र [1]तिङ्वर्जः प्रत्ययः [2]कृत्संज्ञः स्यात् ॥

वेरपृक्तस्य ॥६।१।६७॥

अपृक्तस्य वेर्लोपः स्यात् ॥

कृत्तद्धितसमासाश्च ॥१।२।४६॥

[3]कृतस्तद्धिताः समासाश्च प्रातिपदिक[4]संज्ञाः स्युः ॥ स्वाद्युत्पत्तिः ।

युजेरसमासे ॥७।१।७१॥

युजेः सुटि नुम् स्यादसमासे ॥ सुलोपः । संयोगान्तस्य लोपः ।

कृद । अत्रेति । तृतीये धात्वधिकारे ।

वेर । वेरिति विशेषकराननुबन्धानुत्सृज्य सामान्येन क्विबादयो गृह्यन्ते । अपृक्तस्येति किम् । पद्भ्यां विन् । पर्विः । दर्विः ।

कृत्तद्धित । 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रे 'अप्रत्ययः' इति पर्युदासात् कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदिकसंज्ञा विधीयते । समासग्रहणं नियमार्थम् । अर्थवत्समुदायानां मध्ये समासस्यैव प्रातिपदिकसंज्ञेति । तेन वाक्यस्य प्रातिपदिकसंज्ञा न । ननु चैवं बहुपटवः उच्चकैरित्यादौ प्रकृतिप्रत्ययसमुदायानां प्रातिपदिकसंज्ञा न स्यात् । नैष दोषः । 'अप्रत्ययः' इति निषेधात् ज्ञापकाद्भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकत्वम् । अन्यथा 'अप्रत्ययः' इति पर्युदासो व्यर्थः स्यात् ।

युजेः । युजिर् योगे । क्विन् । 'झलो झलि' इत्यतः 'झलि' इत्येतस्मिन् [5]मण्डूकप्लुत्यानुवर्तमानेपि न कश्चिद्दोष इत्यभिप्रेत्याह । झलीति । 'पदस्य' इत्यनुवृत्तेः पदान्ते चेत्याह । तथा च धर्मकीर्तिना रूपावतार [6]उक्तम् ।

---

१. तिङ्वर्जितः B1. २. कृतसंज्ञकः B1. ३. एते for कृ...श्च D5. ४. °संज्ञिकाः P. ५. मण्डूकप्लुत्या 'झलि' इत्यस्मिन्न° M, K. ६. प्रोक्तम् Dc3.

क्विन्प्रत्ययस्य कुः ॥८।१।६२॥

क्विन्नन्तस्य धातोः कवर्गोन्तादेशः स्यात् झलि पदान्ते च ॥ युङ् । अनुस्वारपरसवर्णौ । युञ्जौ । युञ्जः । युञ्जम् । युञ्जौ । युजः । युजा । युग्भ्याम् । इत्यादि । असमासे किम् ।

चोः कुः ॥८।२।३०॥

चवर्गस्य कवर्गः स्यात् झलि पदान्ते च ॥ सुयुक्—ग् । सुयुजौ । इत्यादि । समाध्यर्थस्य युजेर्न नुम् । युक् । समाधिमानित्यर्थः । संयोगान्तस्य लोपः ।

'क्विन्प्रत्ययान्तस्य कवर्गादेशो भवति झलि परतः पदान्ते च' इति प्रत्ययग्रहणं बहुव्रीहिप्रतिपत्त्यर्थम् । क्विन् प्रत्ययो यस्मात् सोयं क्विन्प्रत्ययो धातुस्तस्येति । ततश्च यदग्रे वक्ष्यति क्विन्प्रत्ययो यस्माद्विहितस्तस्यान्यत्रापि प्रत्यये पदान्तस्य कुत्वमिति तदुपपन्नं भवति । युङ् इति । युनक्तीत्यर्थे युजेः क्विन् । क इ न एते इतः । वेर्लोपः । कृत्त्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः । 'युजेरसमासे' इति नुम् । हल्ङ्याब्भ्यादिलोपः । संयोगान्तस्य लोपः । कुत्वेनानुनासिकस्य नस्यानुनासिको ङः । अनुस्वारपरसवर्णाविति युँनूज् इति स्थिते 'नश्चापदान्त—' इत्यनुस्वारः । 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णः ।

तस्यासिद्धत्वात् 'चोः कुः' इति कुत्वं न । सुयुक् इति । 'सत्सूद्विष—' इत्यादिना क्विप् । समाध्यर्थस्येति । 'युजेरसमासे' इत्यत्र युजेरिकारानुबन्धस्य ग्रहणं युज समाधौ इत्यस्य निवृत्त्यर्थस्य । तेन समाध्यर्थस्य न नुम् इति भावः । युक् । युज्यते समादधातीति युक् ।

---

१. °रस्य ययि परसवर्णः D_3. २. कवर्गोन्तादेशः B_1, D_3. ३. Dropped D_5. ४. After it—स्यात् B_2. ५. संयो—लोपः dropped D_3. ६. लोपेन B_2. ७. Before it—पदस्य Dc_3, Dc_4. ८. कुत्वं स्यादित्येतदु° Dc_3. ९. °सुलोपः Dc_4. १०. °न्तलोपः Dc_3. ११. युन्ज् औ इति Dc_1.

खन् । खञ्जौ[1]। इत्यादि । 'व्रश्चभ्रस्ज—' इति षत्वम् । जश्त्व[2]-चर्त्वे । राट्-ड् । राजौ । राजः । राजम् । राजौ । राजः । राजा । राड्भ्याम् । इत्यादि । एवं विभ्राट् देवेट् विश्वसृट् परिमृट् ।

परौ व्रजेः षः पदान्ते इति षत्वम्[3]* । परिव्राट् ।

विश्वस्य वसुराटोः ॥६।३।१२८॥

विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ[4] राट्शब्दे च[5] परे[6] ॥ विश्वावसुः । विश्वाराट्-ड् । विश्वराजौ । विश्वराजः[7] । विश्वराजा[8] । विश्वाराड्भ्याम् । इत्यादि ॥

खन्निति । खजि गतिवैकल्ये । इदित्वान्नुम् । क्विप् । **राडिति** । राजृ दीप्तौ 'सत्सूद्विष—' इति क्विप् । **एवमित्यादि** । विभ्राजते इति विभ्राट् । देवान् यजते देवेट् । विश्वं सृजति विश्वसृट् । परिमार्ष्टीति परिमृट् । सर्वत्र क्विप् । **परौ व्रजेः षः । पदान्त इति षत्वमिति** । एतत् सूत्रमुणादौ पठ्यते । तेन च विण्[9]प्रत्ययः परिपूर्वात् व्रजेः क्रियते पदान्ते व्रजस्य षः । तेन ष इत्यर्थः । **परिव्राडिति** । परिवर्ज्य[10] सर्वं संन्यस्य व्रजतीति परिव्राट् कर्मन्दी[11] ।

विश्वस्येति । राडिति । विकृति[12]निर्देशो यत्रास्यैतद्रूपं तत्र यथा स्यात् । कुत्रास्यैतद्रूपम् । पदान्ते । पदान्ताधिकारे हि षत्वादय उक्ताः । **विश्वावसुरिति** । विश्वं वसु अस्य विश्वावसुः । **विश्वाराडिति** । विश्वस्मिन् राजते विश्वाराट् ।

---

१. After it—खञ्जः C, D_2, D_3; खन्त्सु B_2 ; खञ्जम् । खञ्जौ । खञ्जः । खञ्जा । खन्भ्याम् D_5. २. जश्त्वं चर्त्वम् D_2. ३. षत्वं ण्विप्रत्ययश्च B_1; वाच्यम् for षत्वम् P, C, D_1; षत्वं दीर्घश्च D_5. ४. वसुराट्शब्दयोः परतः C. ५. Dropped D_5. ६. परतः B_1, P, C. ७. After it—विश्वराजम् । विश्वराजौ । विश्वराजः । P, C, D_2, D_3. ८. From विश्वराजा to इत्यादि dropped D_2, D_3. ९. क्विप् Dc_4. १०. परित्यज्य Bc_1, Dc_3. ११. कपर्दी Nc_2. १२. विकृत° Nc_2, Bc_1.

स्कोः संयोगाद्योरन्ते च ॥८।२।२९॥

पदान्ते यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात् झलि परे[1]। भृट्-ड्। 'झलां जश् झशि' इति सस्य दत्वे[2] चुत्वम्। भृज्जौ। भृज्जः। इत्यादि। क्विन्नन्तत्वात् कुत्वम्। ऋत्विक्-ग्[3]। ऋत्विजौ। ऋत्विजः। इत्यादि[4]। 'रात्सस्य' इति नियमान्न संयोगान्तस्य लोपः। चोः कुः।

स्कोः। झलि परत इति। झलि परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यादित्यर्थः। ननु काष्ठशक्स्थातेति[5] थकारे झलि संयोगादेः कस्य लोपः स्यात्। न। कान्तानां[6] क्विबन्ताना प्रयोग एव नास्ति। तथोक्तं[7] भाष्ये। काष्ठशगेव नास्तीति। वास्यर्थं वाक्यर्थमित्यत्र बहिरङ्गस्य लक्षणस्य यणादेशस्यासिद्धत्वात् संयोगादिलोपो न। स्कोः किम्। वर्वर्ति। संयोगाद्योः किम्। पयः। अन्ते च किम्। रक्षिता। भृडिति। भ्रस्जो पाके। भृज्जतीति भृट्। क्विप्। सलोपः। व्रश्चादिना षः। जश्त्वचर्त्वे। झलामिति किम्। भृस्ज् औ इति स्थिते झलामिति जशि कार्ये 'स्थानेन्तरतमः' इति स्थानत आन्तर्यात्[8] सस्य दत्वे कृते पश्चात् 'स्तोश्चुना श्चुः' इति चुत्वं जकार[9] इत्यर्थः। असिद्धत्वं[10] जश्त्वस्य न स्यात्। 'न मु ने' इत्यत्र 'न' इति योगविभागात्। तथा च भृज्जतीनां डिति च इति निर्देश उपपद्यते। क्विन्नन्तत्वादिति। 'ऋत्विक्—' इत्यादिना क्विन्नन्तनिपातनात् 'क्विन्प्रत्ययस्य कुः' इति कुत्वम्।

---

१. झलि च परतः B_1; झलि परे पदान्ते च B_2; झलि च परे D_2, D_4; झलि (परे dropped) D_3; झलि परे चकारात् पदान्ते D_5. २. दत्वम् C. दत्वे चुत्वे D_1, B_2; दत्वं चुत्वम् D_2. ३. ऋतौ यजत इति ऋत्विक् C. ४. C has ऋत्विजम्। ऋत्विजौ। ऋत्विजः। ऋत्विजा। ऋत्विग्भ्याम् before t. ५. °स्थानेति Bc_1, Dc_3. ६. ककारान्तानां Dc_3. ७. तथा चोक्तं Dc_3. ८. सावर्ण्यात् आन्तरतम्यात् Dc_3, Bc_1. ९. दकारे Bc_1, Dc_3, Dc_4. १०. असिद्धत्वं तु Nc_2, Dc_2.

ऊर्क्-र्ग् । ऊर्जौ । ऊर्जः । इत्यादि[1] । अवयाः[2] । अवयाजौ । अवयाजः । हे अवयाः । हे अवयः । अवयाजम् । अवयाजौ । अवयाजः । अवयाजा । अवयोभ्याम् । इत्यादि । त्यदाद्यत्वं पररूपत्वम्[3] ।

तदोः सः सावनन्त्ययोः ॥७।२।१०६॥

त्यदादीनां[4] तकारदकारयोरनन्त्ययोः सः स्यात् सौ परे ॥ स्यः । त्यौ । त्ये । सः । तौ । ते । इत्यादि । सर्ववत्[5] । परमसः । परमतौ । परमते । संज्ञायां गौणत्वे नात्वसत्वे[6] । त्यद् । त्यदौ । त्यदः । अतित्यद् । अतित्यदौ । अतित्यदः[7] ।

ऊर्क् इति । ऊर्ज बलप्राणनयोः । 'भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' इति क्विप् । **अवया** इति । अवयजते । 'अवे यजः' इति ण्विन् 'श्वेतवह—' इत्यादिना डस् । हे **अवया** इति । 'अवयाः श्वेतवाः—' इत्यादिना संबुद्धौ दीर्घः । केषांचिन्मतेन वा ॥

इति जान्ताः ॥

तदोः । अनन्त्ययोरिति किम् । अन्त्ययोर्मा भूत् । ननु च त्यदाद्यत्वं बाधकं स्यात् । न । अनवकाशं हि बाधकम् । अत्वं तु द्वावित्यादौ सावकाशम् । सत्वमप्यनन्त्ययोः सावकाशम् । ततश्च परत्वादत्वं बाधित्वान्त्ययोः सत्वमेव स्यात् । ततश्च सा इत्यत्रादन्तत्वाभावात् 'अजाद्यतष्टाप्' इति टाप् न स्यात् । तस्मादनन्त्ययोरित्युच्यते । **परमस** इति । तदन्तविधेरिष्टत्वादत्वसत्वे । **संज्ञायामिति** । अत्वमित्युपलक्षणं सत्वमपि संज्ञायां गौणत्वे च[8] नेष्यते ॥

---

१. ऊर्जम् । इत्यादि P; B1. drops इत्यादि. २. अवया B1. ३. पररूपत्व च D2. ४. After it—द्विपर्यन्तानां B2. ५. Dropped D2. ६. नात्वसत्वम् B1; आत्वं न P; च आत्वं न D1, D2. चात्वं सत्वं न B2; तु नात्वम् D3; नात्वम् D5. ७. D1, B2, D4 drop it. ८. न चेष्यते Dc1, Dc2.

एव यद् । एषः । एतौ । एते । इत्यादि । अन्वादेशे तु 'द्वितीयाटौस्स्वेनः' । एनम् । एनौ । एनान् । एनेन । एनयोः[2] २ ।

ङे प्रथमयोरम् ।।७।१।२८।।

युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमाद्वितीययोश्चामादेशः स्यात् ।।

त्वाहौ सौ ।।७।२।९४।।

युष्मदस्मदोर्मपर्यन्तस्य [3]क्रमात् त्वाहावादेशौ स्तः सौ परे ।।

अथ युष्मदस्मदौ । **ङे प्रथमयोः** । प्रथमयोरिति विभक्त्योर्ग्रहणं न प्रत्यययोः 'द्वितीयायां च' इति वचनाज् ज्ञापकात् । तथादेशार्थमुच्यते । अनादेशे तु 'युष्मदस्मदोरनादेशे' इति सिद्धत्वात् यत्वं चेदनेन बाधिष्यते तर्हि योन्यद्वितीयायां चेत्यवक्ष्यत इत्यभिप्रेत्याह । **प्रथमाद्वितीययोरि**ति ।

त्वाहौ । **मपर्यन्तस्ये**ति । मपर्यन्तस्येत्यधिकारसूत्राल्लभ्यते । तस्य चाधिकारस्य प्रयोजनं स्वयमेवाग्रे वक्ष्यति । मपर्यन्तस्य किम् । साकच्कस्य मा भूदिति । [4]अन्यथा सर्वस्य वक्ष्यमाणा आदेशा मा भूवन्निति मपर्यन्तस्येत्युच्यते । अन्यथा हि त्वमयोरकारस्य 'योचि' इति यकारे कृते तृतीयैकवचने त्व्या म्या इत्यनिष्टं रूपं स्यात् । त्वया मया इति चेष्यते । मान्तस्येत्येव सिद्धे परिग्रहणमवधिद्योतनार्थम् । अन्यथा यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशः स्यात् । युष्मानाचष्टे अस्मानाचष्टे इत्यस्मिन्नर्थे णिचि टिलोपे च कृते युष्मयतेरस्मयतेश्च क्विपि णिलोपे क्विपो लोपे च कृते मान्ते युष्मदस्मदी संपद्येते इत्यत्रैवादेशाः स्युरन्यत्र न स्युः ।

---

१. तद् D_4. २. C has इत्यादि after it. C has on the margin:—पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि । यदि द्विवचनान्यत्र शेषे लोपो विधीयते ।। १ ।। आत्वयत्वं च यत्रोक्तं ततोन्यः शेष उच्यते । लोपस्तत्र विभक्तौ तु दस्य स्याद्युष्मदस्मदोः ।।२।।. ३. C drops क्रमात. ४. आत्वं Dc_1. ५. अन्यच्च Dc_3.

शेषे लोपः ॥७।२।९०॥

आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात् ॥ ‘अतो गुणे’ । ‘[1]अमि पूर्वः’ । त्वम् । अहम् । [2]शेषे लोपेलिङ्गत्वाट्टिलोपाद्वा टाप् न । [3]त्वं स्त्री । अहं स्त्री । परमत्वम् । [4]परमाहम् । अतित्वम् । [5]अत्यहम् ॥

शेषे । उक्तादन्यः शेषः । तच्चोक्तमात्वं यत्वं चेत्यभिप्रेत्याह । **आत्वयत्वनिमित्तेतरविक्ताविति** ।

‘पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि ।
यान्यद्विवचनान्यत्र तेषु लोपो विधीयते ॥’

शेषे लोप इत्यादि । स्त्रियां विवक्षितायामस्मदः सोरमि तस्मिन्परे अहादेशे अतो गुणे च सति शेषे लोप इति अन्त्यलोपे कृते अह अम् इति स्थिते ‘अजाद्यतष्टाप्’ इत्यकारान्तत्वात् टाप् प्राप्नोति स न भवति । तत्र हेतुरलिङ्गत्वादिति । [6]अलिङ्गे हि युष्मदस्मदी । अतो लिङ्गविशेषवाचकत्वाभावात् ‘स्त्रियाम्’ इत्यधिकारेण स्त्रियां वर्तमानात् प्रातिपदिकाद्विधीयमानष्टाप् न स्यादिति भावः । मतान्तरेण हेत्वन्तरमाह । **टिलोपाद्वेति** । केचिदाहुः । शेषे लोपष्टिलोप इति । तथा हि ते व्याकुर्वन्ति । शेषोत्र वक्ष्यमाणयुवावाद्यादेशापेक्षः । ते चादेशा मपर्यन्तस्य विधीयन्ते । तेन मपर्यन्ताद्योन्यः स शेष इति । अद इत्यस्याष्टेर्लोपो भवति । ततश्चादन्तत्वाभावात् टाप् न भवतीत्यभिप्रायः । अङ्गाधिकारे तस्य [7]तदुत्तरस्य चेति न्यायेन तदन्तयोर्गौणयोरपि एते आदेशाः स्युरित्यभिप्रेत्याह । **परमत्वमिति** । परमश्चासौ त्वं च परमत्वम् । **अतित्वमिति** । त्वामतिक्रान्तः अतित्वम् । एवं परमाहमादौ विग्रहीतव्यम् ।

---

१. अमि पूर्वत्वम् B_1, D_3. २. Before it—मपर्यन्तस्य किम्। सर्वस्य मा भूत् D_4, D_5. ३. त्वं स्त्री dropped P, C, D_1, D_4; D_5; त्वमहं स्त्री B_2. ४. परमाहं dropped D_3; after अतित्वम् D_4. ५. Dropped D_3. ६. अलिङ्गाति हि Dc_4. ७. तदुत्तरपदस्य चेति तदन्तयोरप्येते Bc_1.

युवावौ द्विवचने ॥७।२।९२॥

[1]द्विवचन इत्यर्थग्रहणम् । [2]द्व्यर्थवाचिनोर्युष्मदस्मदोर्म-पर्यन्तस्य [4]युवावौ स्तः ॥

प्रथमायाश्च द्विवचने भाषायाम् ॥७।२।८८॥

प्रथमाद्विवचने परे युष्मदस्मदोराकारोन्तादेशः[5] स्याद्भाषायाम् ॥ युवाम् । आवाम् । मपर्यन्तस्य किम् । साकच्कस्य मा भूत् । [6]युवकाम् । [7]आवकाम् ।

यूयवयौ जसि ॥७।२।९३॥

युष्मदस्मदोर्मपर्यन्तस्य यूयवयौ स्तो [8]जसि ॥ शेषे लोपः ।

युवावौ । **द्विवचन इत्यर्थग्रहणमिति** । द्वयोर्वचनं द्विवचन-मित्यर्थपरत्वान्निर्देशस्येति भावः ।

प्रथमायाः । आदेशार्थं वचनम् । प्रथमायाः किम् । युवयोः । आवयोः । द्विवचने किम् । त्वम् । अहम् । भाषायां किम् । युवं वस्त्राणि पीवसा वसाथे । मपर्यन्तस्य किमिति । युवावौ द्विवचन इत्यादौ मपर्यन्तस्याधिकारः [9]किमर्थं [10]इत्याशङ्का । उत्तरमाह । **साकच्कस्येति** । अकच्सहितस्य युष्मकद् अस्मकद् इत्येतावतः समुदायस्य युवावा-दिरादेशो मा भूदित्येवमर्थं मपर्यन्तस्येत्याधिकार इत्यर्थः । **युवकामिति** । 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इत्यकच् ।

यूयवयौ । **यूयम्** । **वयमिति** । युष्मद् जस् अस्मद् जस् इति स्थिते 'ङे प्रथमयोः' इति जसः अमादेशः । मपर्यन्तस्य यूयवयौ । अतो गुणे पररूपम् । शेषे लोपे इत्यन्तदकारलोपे अमिपूर्वत्वम् ।

---

१. B_1 drops द्विव°...ग्रहणम्. २. °र्थनिर्देशः D_2. ३. B_1 drops द्व्यर्थ-वाचिनोः ।. ४. क्रमाद्युवावौ D_4, B_1, D_3. ५. °राकारान्तादेशः B_1, B_2. ६. Dropped D_2. ७. P drops आवकाम्. ८. C has जसि परे. ९. किमर्थमि° Nc_2, Dc_4. १०. Before it—क्रियते Dc_3.

यूयम् । वयम् । परमयूयम्[1] । परमवयम् । अतियूयम् । अतिवयम् ।

त्वमावेकवचने ॥७।२।९७॥

एकवचन इत्यर्थनिर्देशः । एकार्थवाचिनोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तः ॥

द्वितीयायां च ॥७।२।८७॥

द्वितीयायां[2] परतो युष्मदस्मदोराकारोन्तादेशः स्यात् ॥ त्वाम् । माम् । युवाम् । आवाम् ।

शसो नः ॥७।१।२९॥

युष्मदस्मद्भ्यां परस्य शसो नकारः[3] स्यात् । अमोपवादः ॥

आदेः परस्य ॥१।१।५४॥

संयोगान्तस्य[4] लोपः । युष्मान् । अस्मान् ।

परमयूयमिति । तदन्तस्य । **अतियूयमिति** । गौणत्वेपि ।

त्वमा । **एकवचन इत्यर्थनिर्देशः** इति । एकस्य[5] वचनमेकवचनमित्यर्थपरत्वान्निर्देशस्य ।

द्वितीयायाम् । आदेशार्थं वचनम् ।

शसः । ङे प्रथमयोरित्यमादेशे प्राप्ते वचनमित्यभिप्रेत्याह । **अमोपवाद** इति । ननु चामादेशेपि कृते 'प्रथमयोः—' इति पूर्वसवर्णदीर्घे च 'तस्माच्छसो नः पुंसि' इति नत्वेन युष्मानस्मानिति सिद्धमिति व्यर्थं वचनमिति चेन्मैवम् । स्त्रीनपुंसकार्थं वचनम् । युष्मान् ब्राह्मणीः अस्मान् ब्राह्मणीः युष्मान् ब्राह्मणकुलानि अस्मान् ब्राह्मणकुलानि । अलिङ्गे युष्मदस्मदी इति वा पुंस्यप्यप्राप्तेः 'आदेः परस्य' इति शसोकारस्य नः । 'संयोगान्तस्य लोपः' इति सकारस्य[6] लोपः ।

---

१. परमयूयम् । अतियूयम् । परमवयम् । अतिवयम् P ; B_2 has परमयूयम् for it ; परमयूयं dropped D_2, C, B_1. २. द्वितीयायां च C; द्वितीयायां विभक्तौ परतः D_5. ३. नः स्यात् C, D_5. ४. Before it—पञ्चमीनिर्देशेन क्रियमाणं कार्यं परस्यादेर्ज्ञेयम् । C. ५. एकस्यार्थस्य Dc_3. ६. सकारलोपः Dc_3.

योचि ॥७।२।८९॥

युष्मदस्मदोर्यकारोन्तादेशः स्यादनादेशे अजादौ परे ॥ त्वया । मया[1] ।

युष्मदस्मदोरनादेशे ॥७।२।८६॥

युष्मदस्मदोरा[2]कारः स्यादनादेशे हलादौ परे ॥ युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ।

तुभ्यमह्यौ ङयि ॥७।२।९५॥

युष्मदस्मदोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो[3] ङयि ॥ अमादेशः । शेषे लोपः[4] । तुभ्यम् । मह्यम् । परमतुभ्यम् । परममह्यम् । [5]अतितुभ्यम् । अतिमह्यम् । युवाभ्याम् । [6]आवाभ्याम् ।

योचि । 'युष्मदस्मदोरनादेशः' इत्यत्र 'रायो हलि' इत्यतो यदि हल्ग्रहणमनुवर्तते तदात्र 'अचि' इत्येतन्न वक्त[7]व्यम् । आत्वमपवादो भविष्यति । अनादेशे इति किम् । त्वद् गच्छति । मद् गच्छति । त्वया मयेति । 'त्वमावेकवचने' इति त्वमावादेशौ ।

युष्मदस्मदोः । अनादेशे इति किम् । युष्मत् । अस्मत् । यदात्र[8] 'हलि' इत्यतेदनुवर्तते तदा तेनैवात्रात्वं नेत्यनादेशग्रहणं 'यो[9]चि' इत्यत्रानुवृत्त्यर्थम् । **युवाभ्यामित्यादि** । 'युवावौ द्विवचने' इति युवावौ । [10]आत्वम् ।

तुभ्य । **अमादेश इति** । 'ङे प्रथमयोः—' इति । 'शेषे लोपः' इति । तुभ्यद् अम् इति स्थिते दलोपः । अमि पूर्वत्वम् । **परमतुभ्यमित्यादि** । तदन्तगौणप्रतिपत्त्यर्थम् ।

---

१. After this—अनादेशे किम् । त्वद्गच्छति D_2. २. °राकारान्तादेशः B_2, D_3; °राकारान्तादेशः D_2. ३. Dropped D_5. ४. शेषे लोपः dropped B_1. ५. अतितुभ्यम् । अतिमह्यम् dropped D_3. ६. Dropped B_2. ७. कर्तव्यम् Dc_1, Dc_2. ८. अत्र dropped Nc_2. ९. Dropped Dc_1. १०. Before it—युष्माभिरित्यादौ Dc_3.

भ्यसोऽभ्यम् ॥७।१।३०॥

युष्मदस्मद्भ्यां परस्य भ्यसो भ्यम् स्यात् । शेषे लोपः । अङ्गकार्ये[1] वृत्ते पुनर्नाङ्गकार्यम्[2] । तेन एत्वं न स्यात् । अभ्यमित्यादेशो वा । युष्मभ्यम् । अस्मभ्यम् ।

भ्यसः । अत्र पक्षद्वयमस्ति । भ्यमित्यादेशः । अभ्यमिति च[3] । तत्र पूर्वस्मिन् पक्षे युष्मदोस्मदश्च[4] परस्य भ्यसो भ्यमिति[5] कृते शेषे लोपे च कृते 'बहुवचने झल्येत्' इत्येत्वं प्राप्नोति । ततश्चानिष्टं रूपं स्यादित्याशङ्क्याङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येत्येतां परिभाषामर्थतः पठन्नुत्तरमाह । **अङ्गकार्ये[6] वृत्ते पुनर्नाङ्गकार्यं तेन एत्वं न स्यादिति** । अङ्गकार्ये जाते सति पुनरुत्तरकालमन्यदङ्गकार्यं न भवति प्रयोगार्हे[7] स्थले तेनात्र शेषे लोपे अङ्गकार्ये पुनर्[8] 'बहुवचने झल्येत्' इत्येत्वलक्षणमङ्गकार्यं न भवतीत्यर्थः । क्वचित्तु अङ्गान्त्यलोपे पुनर्नाङ्गान्त्यकार्यमिति पाठः । तदा परिभाषार्थं प्रकृते प्रयोजयन् परिहरतीति भावः । ततश्चायमर्थः । अङ्गान्त्यस्य दस्य लोप इति लोपे जाते पुनरङ्गान्त्यस्याकारस्य कार्यं न । प्रयोगार्हत्वात् । तेनैत्वं न भवतीति । परिभाषायास्त्वयमर्थः । अङ्गे वृत्तं वर्तनं यस्य तदङ्गवृत्तं कार्यं तस्मिन्नङ्गकार्ये वृत्ते[9][10] सति पुनरुत्तरकालमपरस्य कार्यस्य वृत्तौ[11] प्राप्तायां तस्य कार्यस्याविधिरविधानं निष्ठितस्येत्यनेन यत्संबधिनः कार्यस्याविधिः स्यात्तदङ्गं विशेष्यते निष्ठितं यत् परिसमाप्तं प्रयोगार्हं तत्संबन्धिनः कार्यस्याविधिः स्यान्नान्यसंबन्धिन इति । द्वितीयपक्षेणोत्तरमाह । **अभ्यमित्यादेशो वेति** । अयं[12] पक्षो यन्मते शेषे लोपष्टिलोपस्तैरवश्याभ्युपेयो युष्मभ्यमित्यादिरूपसिद्धये ।

---

१. अङ्गान्त्यकार्ये C; अङ्गान्त्यलोपे वृत्ते (कृते B_2) पुनर्नाङ्गान्त्यकार्यम् D_1, B_2, D_5. २. °र्नाङ्गान्त्यकार्यम् C, D_3, D_4. ३. वा Dc_3. ४. युष्मदस्मदोश्च Dc_4. ५. भ्यमि कृते Dc_3. ६. अङ्गान्त्यकार्ये for अङ्गकार्ये Dc_1, Dc_2. ७. प्रयोगार्हस्थले Nc_2. ८. जाते पुनर् Dc_4. ९. वृत्ते पुन° Dc_3, Dc_4, १०. कृते Nc_2, Bc_1, Dc_3. ११. वृत्तौ प्रवृत्तौ Dc_3. १२. अयं च Nc_2, Dc_4.

एकवचनस्य च ॥७।१।३२॥

आभ्यां परस्य पञ्चम्येकवचनस्य अत् इत्यादेशः स्यात् ॥ त्वत् । मत् । युवाभ्याम् । आवाभ्याम् ।

पञ्चम्या अत् ॥७।१।३१॥

आभ्यां परस्य[1] पञ्चम्या भ्यसोत् स्यात् ॥ युष्मत् । अस्मत् ।

तवममौ ङसि ॥७।२।९६॥

युष्मदस्मदोर्मपर्यन्तस्य तवममौ स्तो ङसि ॥

युष्मदस्मद्भ्यां ङसोश् ॥७।१।२७॥

आभ्यां ङसः[4] स्थाने[5] अश्[6] स्यात् । श इत् । तव । मम । परमतव । परममम । अतितव । अतिमम ।

एक । चकार आदेशानुकर्षणार्थो भ्यसपेक्षया समुच्चयार्थो वा । ङसेश्चेति वाच्ये एकवचनस्येति वचनं वैचित्र्यार्थम् ।

पञ्चम्याः । भ्यसोपवादः[7] । युष्मदस्मद् । यदा शेषे लोपोन्त्य लोपस्तदास्यादेशे[8] प्राप्ते इदं वचनम् । यदा टिलोपस्तदा विभक्तेः श्रवणे प्राप्ते आदेशार्थं वचनम् । शित्करणं सर्वादेशार्थम् । अन्यथा हि 'आदेः परस्य' इत्यादेरेव स्यात् । ननु चाकारस्याकारवचने प्रयोजनाभावात् सर्वादेश एव स्यात् । मैवम् । यत्त्वनिवृत्त्यर्थ आदेशव्यपदेश एव प्रयोजनं स्यात् ।

तव ममेति । ङसि युष्मदस्मदोस्तवममादेशयोः कृतयोः ङसोशादेशे शेषे लोपे 'अतो गुणे' इति पररूपम् । **परमतवेत्यादि** । तदन्तगौणविध्यर्थम् ।

---

१. परस्य dropped B_1, D_1, D_3, D_4. २. पञ्चम्याः dropped D_2. ३. ङसि परे C. ४. ङसूस्थाने B_1. ५. Dropped D_2. ६. अश् आदेशः P, D_1, D_4, B_2, D_3; असादेशः D_5. ७. After it—पञ्चम्या अत् । पूर्वसूत्रम् । एकवचनस्येति परसूत्रम् । तस्मादादेशानुकर्षणार्थम् । युष्मदस्मद् &c. Dc_3. ८. °स्तदा ङसः स्या° Dc_3.

'योचि'। युवयोः। आवयोः। आमि सुटि कृते[1]

साम आकम् ॥७।१।३३॥

आभ्यां सुट्सहितस्याम आकं स्यात्[2] ॥ युष्माकम्। अस्माकम्। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु।

युवयोरावयोरिति युवावादेशयोः कृतयोः 'योचि' इति दस्य यः। **आमीति**। आमि परतः। **सुटि कृते**। कर्तुमारब्धे सति आशंसिते वा भाविनीति तात्पर्यार्थः। कृत इति। आदिकर्मणि क्तः। 'आशंसायां भूतवच्च' इत्याशंसायां वा।

सामः। [3]ननु[4] 'आमि सर्वनाम्नः सुट्' इत्यत्र 'आज्जसेरसुक्' इत्यतः 'आत्' इत्यनुवर्तते। युष्मदोस्मदश्च शेषे लोपे अकारान्तशेषे लोपश्च विभक्तेरादेशे प्राप्नोति। ततश्चाकमादेशात् प्राक् सुटोऽप्राप्तेः सुट्सहितस्येति न घटत इति चेत् उच्यते। आकस्यादेशे कृते पश्चात् शेषे लोपे च[5] यः सुट् भविष्यति तस्य भाविनः निवृत्त्यर्थम्[6]। साम इत्युक्तम्। तथोक्तं **काशिकायां** वृत्तौ। 'अथ[7] किमर्थमागतसुट्को गृह्यते। न ह्यादेशविधानकाले सुट् विद्यते। तस्यैव तु भाविनः सुटो निवृत्त्यर्थम्। आदेशे कृते हि शेषे लोपे युष्मदस्मदोरकारान्तयोः सुट् प्राप्नोति। 'स स्थानिन्यन्तर्भूतत्वान्निवर्तते' इति। आकमो दीर्घाकारोच्चारणम् 'अकः सवर्णे दीर्घः' इति दीर्घो यथा स्यादिति। ह्रस्वे तु सति 'अतो गुणे' इति पररूपं स्यात्। ननु चाकारोच्चारणादेव पररूपं न स्यात्। अन्यथाकमित्येवावक्ष्यदिति चेत् 'बहुवचने झल्येत्' इत्येत्वनिषेधार्थमकारोच्चारणम्। **त्वयि मयीति**। सप्तम्येकवचने त्वमादेशयोः कृतयोः 'योचि' इति यकारः। **आत्वमिति**। 'युष्मदस्मदोरनादेशे' इत्यनेन। अङ्गाधिकारे तस्य तदुत्तरस्य[8]

---

१. After it—भाविसुट्निवृत्त्यर्थम् D_3. २. आभ्यां परस्य सामाकं स्यात् B_1, सुटि सहितस्याम C. ३. Before it—आत्वम् D_5, D_4, Com. ४. ननु च Nc_2, Dc_3. ५. च कृते Dc_3. Dc_4. ६. सुटो निवृत्त्यर्थम् Nc_2, Dc_3. ७. अथवा° Dc_1, Dc_2. ८. तदुत्तरपदस्य Dc_3.

समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसंख्यश्चेत् स्तो युवावौ त्वमावपि ॥१॥

सुजसूङेङस्सु परत आदेशाः स्युः सदैव[1] ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममाविति ॥२॥

चेति परिभाषया समस्तयोरपि युष्मदस्मदोर्युवावाद्यादेशप्राप्तौ सत्यां विषयविशेषे तद्व्यवस्थां सुखप्रतिपत्त्यर्थं श्लोकचतुष्टयेन संगृह्णाति । **समस्यमान** इत्यादिना । समस्यमाने युष्मदस्मदी[2] चेत् द्व्येकत्ववाचिनी द्वित्वैकत्ववाचिनी[3] भवतः समासार्थोऽन्यसंख्यस्तत्संख्यो वा भवतु तर्हि युवावौ स्तः । त्वमावपि यथासंख्यं स्तः । अयं भावः । यदा समासे युष्मदस्मदी द्व्यर्थे भवतः समासार्थस्य त्वन्यसंख्यत्वादेकवचनं बहुवचनं वा भवति तदापि युवावौ भवतः । 'युवावौ द्विवचने' इत्यत्र द्विवचनग्रहणस्य[4] द्वित्वार्थपरत्वात् । तथा यदा समासे युष्मदस्मदी एकार्थे स्तः समासार्थस्य त्वन्यसंख्यत्वात् द्विवचनं बहुवचनं वा स्यात् तदापि त्वमौ स्तः । 'त्वमावेकवचने' इत्येकवचनस्यै[5]कत्वार्थपरत्वादिति । एवमनेन न्यायेन प्रथमैकवचनबहुवचनचतुर्थ्येकवचनषष्ठ्येकवचनयोरपि[6] परतो युष्मदस्मदोर्द्वित्ववाचित्वे प्राप्तौ युवावौ एकत्ववाचित्वे प्राप्तौ त्वमौ अपवदति । **सुजस्ङे** इति । सुजस्ङेङस्सु परतो ये आदेशा विहितास्ते सदैव युष्मदस्मदोर्द्व्येकत्ववाचित्वेपि स्युः । ते चादेशाः के इत्याशङ्क्याह । त्वाहावित्यादि । सदैव ते स्युरित्यत्र हेतुमाह ।

---

१. °वपि C, B_1, D_3, D_5. २. Before it—प्रातिपदिके यदि Bc_1. ३. द्वित्वैकत्ववाचिनी dropped Dc_1, Dc_2. ४. °ग्रहस्य Nc_2. ५. °वचनग्रहणस्यै° Nc_2, Dc_3, Dc_4. ६. °वचनेष्वपि Dc_3.

एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः ॥३॥
द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च ॥४॥

एते परत्वादित्यादि । एते त्वाहादयः स्वके विषये सुजस्ङेङस्सु परतः परत्वाद् युवावौ बाधन्ते 'विप्रतिषेधे परं कार्यम्' इति न्यायेन । **त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः** । 'विप्रतिषेधे परं कार्यम्' इत्यत्र परशब्दस्येष्टवाचित्वात् पूर्वा अप्येते परावपि त्वमौ बाधन्त इत्यर्थः । तथा च **काशिकायां वृत्तावुक्तम्** । 'आदेशान्तराणां त्वाहौ सावित्यादीनां विषये पूर्वविप्रतिषेधेन त एवेष्यन्ते' इति । युष्मदस्मदोर्बह्वर्थत्वे समासार्थसान्यसंख्यत्वे कथमित्याशङ्क्याह । **द्व्येकसंख्य** इत्यादि । यदा युष्मदस्मदी बह्वर्थे बहुत्ववाचिनी स्तः समासार्थो द्व्येकसंख्यो द्वित्वैकत्ववाची बहुत्ववाची वा तदा युवावौ न स्तः । त्वमावपि न स्तः[1] । अत्र हेतुः । **तयोरद्व्येकतार्थत्वादिति** । तयोर्युष्मदस्मदोर्द्वित्वैकत्ववाचित्वाभावात् युवावौ[2] न स्तः । एकत्ववाचित्वाभावात् त्वमौ न स्त इत्यर्थः । तथा चैतत् सर्वं **महाभाष्ये** उक्तम् । "यद्यपि समास एकार्थो वा भवति बह्वर्थो वा भवति द्व्यर्थे च युष्मदस्मदी भवत एव युवावौ । किमविशेषेण । नेत्याह । 'यूयवयौ जसि' । 'त्वाहौ सौ' । 'तुभ्यमह्यौ ङयि' । 'तवममौ ङसि' इत्येतान् विधीन् वर्जयित्वा । तथा च यद्यपि समासो द्व्यर्थो भवति बह्वर्थो वा एकार्थे युष्मदस्मदी भवत एव त्वमौ तानेव विधीन् वर्जयित्वा" इति ।

---

१. After it—इत्यर्थः Dc4. २. Before it—द्वित्ववाचित्वाभावात् Dc3, Dc4, Bc1.

त्वां मां वा[1]तिक्रान्त इति विग्रहे अतित्वम् । अत्यहम् । अतित्वाम् । अतिमाम् । अतियूयम् । अतिवयम् । अतित्वाम् । अतित्वाम् २ । अतिमाम् २ । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः । अतितुभ्यम् । अतिमह्यम् । भ्यामि[2] प्राग्वत् । अतित्वभ्यम् । अतिमभ्यम् । अतित्वत् । अतिमत् । भ्यामि[3] प्राग्वत् । भ्यसि[4] ङसिवत् । अतित्वत् । अतिमत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । गौणतायामसर्वनामत्वेन सुडभावात्[5] 'साम आकम्' इत्यस्याप्रवृत्तेः 'योचि' इति यकार इति केचित् ।

त्वां मा वातिक्रान्त इति विग्रहे इति । अतित्वमत्यहमित्यादेः समासस्यार्थबोधके एवंविधे वाक्ये सत्येवं वक्ष्यमाणानि रूपाणि भवन्तीति शेषः । अतित्वमित्यत्र 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासस्तत्पुरुषः । अत्र सुजसङेर्ङसो वर्जयित्वान्यत्र त्वमौ युष्मदस्मदोरेकार्थवाचित्वात् स्वादौ त्वाहादयआदेशाः स्युः । अन्या प्रक्रिया पूर्ववत् । **अतित्वाकमतिमाकमिति** । 'साम आकम्' इत्याकम् । ननु च गौणत्वेनात्र सर्वनामत्वाभावात् सुट् नास्ति तत् कथमाकम् । उच्यते । 'साम आकम्' इत्यत्र केवलस्यैव आम आकम् विधीयते । सुट्सहितग्रहणं भाविनः सुटो निवृत्त्यर्थमित्युपपादितं तस्मिन् सूत्रे । **दुर्गसिंहा**दिमतमाह । **गौणतायामिति** । अत्र युष्मदस्मदोरतिपूर्वयोर्गौणतायां सत्यां सर्वनामसंज्ञाया अभावेन 'आमि सर्वनाम्नः सुट्' इति सुट् न प्राप्नोति इति 'साम आकम्' इति न प्रवर्तते इति कृत्वा 'योचि' इति यकारः ।

---

१. C, D_2 drop वा. २. For भ्यामि प्राग्वत्—अतित्वाभ्याम् । अतिमाभ्याम् C, B_1, D_4, D_5. ३. For भ्यामि प्राग्वत्—अतित्वाभ्याम् । अतिमाभ्याम् C, B_1, D_4, D_5. ४. भ्यस् ङस्वत् P, D_1; भ्यस् ङसिवत् D_3; भ्यासि च D_5. ५. सुडागमा° D_4.

अतित्वयाम् । अतिमयाम् । अतित्वयि । अतिमयि । ओसि[1] प्राग्वत् । अतित्वासु । अतिमासु । युवामावां वातिक्रान्त इत्यत्र[2] सुजसूङेङस्सु प्राग्वत् । औ अम् औट्सु[3] आतियुवाम् २ । अत्यावाम् २ । अतियुवान् । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः । भ्यसि । अतियुवभ्यम् । अत्यावभ्यम् । ङसिभ्यसोः । अतियुवत् २ । अत्यावत् २ । ओसि[4] । अतियुवयोः २ । अत्यावयोः २ । अतियुवाकम् । अत्यावाकम् । अतियुवयाम् । अत्यावयाम् । इति केचित् । अतियुवयि । अत्यावयि । अतियुवासु । अत्यावासु । युष्मानस्मान् वातिक्रान्त इत्यत्र[5] सुजसूङेङस्सु[6] प्राग्वत् । औ अम् औट्सु अतियुष्मामूँ[7] । अत्यस्माम् ३ । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्माभ्याम् ३ । अत्यस्माभ्याम् ३ ।

तथा च **दुर्गसिंहवृत्तावुक्तम्** । 'सामिति किम् । प्रिययुष्मयामतित्वयाम्' इति । **युवामावां वातिक्रान्त इत्यत्रेति**[8] । अत्र विग्रहे वक्ष्यमाणानि रूपाणि स्युरित्यर्थः । अत्र युष्मदस्मदोर्द्व्यर्थवाचित्वात् सर्वत्र युवावौ सुजसूङेङस्सु परत्वात् त्वाहादयः । **युष्मानस्मान् वातिक्रान्त** इत्यत्रेति । अत्र विग्रहे वक्ष्यमाणानि रूपाणि स्युरित्यर्थः । अत्र युष्मदस्मदोर्बह्वर्थवाचिनोरद्व्येकतार्थत्वात् युवावौ त्वमावपि न भवतः सुजसूङेङस्सु त्वाहादयो भवन्ति ।

---

१. For ओसि प्राग्वत्—अतित्वयोः । अतिमयोः C, B_1. २. इति विग्रहे B_1, D_4, D_5. ३. B_1 has अतित्वम् । अत्यहम् । अतियूयम् । अतिवयम् before it. ४. B_1 has अतितव । अतिमम before it. ५. इति विग्रहे P. ६. From सु...प्राग्वत् dropped in D_1, D_3. ७. Before it—भ्यामि D_1, B_2. ८. After it—एवंविध इत्यादिके Dc_3; इत्यत्र विग्रहे वक्ष्यमाणा° Dc_4. ९. युवावौ त्वमावपि न भवतः । Dc_4.

अतियुष्माभिः। अत्यस्माभिः। भ्यसि। अतियुष्मभ्यम्। अत्यस्मभ्यम्। ङसिभ्यसोः। अतियुष्मत् २। अत्यस्मत् २। ओसि। अतियुष्मयोः २। अत्यस्मयोः २। अतियुष्माकम्। अत्यस्माकम्। अतियुष्मयाम्। अत्यस्मयाम्। इति केचित्। अतियुष्मायि। अत्यस्मायि। अतियुष्मासु। अत्यस्मासु। शेषं प्राग्वत्।

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥ ८।१।२०॥

पदात् परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिद्विवचनान्तयोः क्रमात् वां नौ इत्यादेशौ स्तः ॥

युष्मदस्मदोः। 'पदस्य'। 'पदात्'। 'अनुदात्तं सर्वमपादादौ' इत्येतत् त्रयमनुवर्तते इत्यभिप्रेत्याह। पदादित्यादि। अनयोर्युष्मदस्मदोः। पादो नाम ऋचः श्लोकस्य वा चतुर्थो विभागः। षष्ठ्यादिद्विवचनान्तयोरिति। षष्ठीचतुर्थीद्वितीयाद्विवचनसहितयोरित्यर्थः। एतत्तु 'पदस्य' इत्यनुवृत्तेर्लभ्यते। स्थग्रहणं तु श्रूयमाणविभक्तिकयोर्यथा स्यादित्येवमर्थमिति स्वयमेवाग्रे वक्ष्यति। वामिति। मान्तो युष्मद आदेशः। नाविति। औकारान्तोऽस्मदः। तौ च सर्वानुदात्तौ भवतः। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। तेन अयं दण्डो हरानेन। अत्र हरेत्यत्र 'तिङ्ङतिङः' इति सर्वानुदात्तत्वं न। भिन्नवाक्यस्थपदात् पर इति कृत्वा। ओदनं पच तव भविष्यति मम भविष्यति। अत्रापि भिन्नवाक्यस्थपदात् परौ युष्मदस्मदाविति कृत्वा ते मे आदेशौ न।

---

१. पदादौ D_2. २. षष्ठीचतुर्थीद्वितीयाद्विवचनान्तयोः B_1. ३. Dropped C.

बहुवचनस्य वस्नसौ ॥८।१।२१॥

उक्तविधयोरेवा[1]नयोः षष्ठ्यादिबहुवचनान्तयोः[2] वस्नस् इ[3]त्येतावादेशौ स्तः ॥

ते मयावेकवचनस्य ॥८।१।२२॥

तादृशयोरनयोः षष्ठीचतुर्थ्येकवचनान्त[4]योस्ते मे इ[5]त्येतौ स्तः ॥

त्वामौ द्वितीयायाः ॥८।१।२३॥

तादृग्विधयो[6]रनयोर्द्वितीयैकवचनान्तयोस्त्वा मा इत्येतौ स्तः ॥[7]

बहुवचनस्य । उक्तविधयोरेवेति । उक्ता विधा प्रकारो ययोस्तौ उक्तविधौ पदात्परौ अपादादिस्थितौ तयोरेव षष्ठीचतुर्थी-द्वितीयाबहुवचनान्तयोर्युष्मदस्मदोर्यथासंख्यं वस् नस् आदेशौ भवतः । तावपि सर्वानुदात्तौ ।

ते मया । **तादृशयोरनयोरिति** । पदात् परयोरपादादौ स्थित-योर्युष्मदस्मदोरित्यर्थः । **षष्ठीचतुर्थ्येकवचनान्तयोरिति** । ननु चात्र द्वितीया कथं निवृत्तेति चेत्[8] द्वितीयैकवचनान्तयोस्त्वामौ द्वितीयाया इति ते मे [8]अपवादत्वेन त्वामादेशयोर्विधानात् । तावपि[9] सर्वानुदात्तौ ॥

त्वामौ । तादृग्विधयोरिति । प[10]दात् परयोरपादादौ स्थित-योरित्यर्थः । एतावपि सर्वानुदात्तौ । चतुःसूत्र्या विहितानादेशान् द्वितीयादिविभक्तिष्वेकवचनादिक्रमेणोदाहरति श्लोकद्वयेन ।

---

१. एवानयोः dropped B_2. २. After it—क्रमात् P, B_1, D_4, D_5. ३. इत्यादेशौ D_1; इत्येतौ B_2, D_3, D_4, D_5. ४. After it—क्रमात् P, C, D_1, D_4. ५. इत्येतावादेशौ P, C; इत्यादेशौ D_1. ६. °रेवानयो° B_1; अनयोः dropped D_2, D_5. ७. After it—उच्यते Bc_1, Dc_3, Dc_4. ८. मे इत्यनयोरपवादत्वेन Bc_1, Dc_3. ९. एतावपि Bc_1, Dc_3. १०. Before it—तादृक् विधा प्रकारो ययोस्तादृग्विधौ तयोः । Dc_3, Dc_4.

श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः ।
स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः ॥१॥

सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।
सोव्याद्वो नः शिवं वो नो दद्यात् सेव्योत्र वः स नः ॥२॥

पदात् परयो[1]रिति किम् । वाक्यादौ मा भूत् । त्वां पातु । मां पातु । अपा[3]दादौ किम् ।

श्रीशस्त्वेत्यादिना । श्रीशः लक्ष्मीशः । त्वावतु मापि । त्वां मां च रक्षत्वित्यर्थः । कर्मणि द्वितीया । श्रीश इति पदात् परस्य पादादावस्थितस्य त्वामित्यस्य द्वितीयैकवचनान्तस्य त्वादेशः । एवं सर्वेष्वप्यादेशेषु ज्ञेयम् । दत्तात्ते मेपि शर्म सः । स श्रीशस्तुभ्यं मह्यं च शर्म सुखं [4]ददातु । संप्रदाने चतुर्थी । स्वामी ते मेपि स हरिः । तव ममापीत्यर्थः । 'स्वामीश्वराधिपति—' इत्यादिना षष्ठी । सेव्योत्र वः स नः इत्यत्र 'कृत्यानां कर्तरि वा' इति कर्तरि षष्ठी । पदात् परयोः किमिति । अत्र किमित्याक्षेपे । अपादादौ स्थितयोरित्यनेनैव पदात्परयोरिति सिद्धे व्यर्थं पदात्परयोरिति । उत्तरमाह । वाक्यादौ मा भूदिति । वाक्यं तु सविशेषणमाख्यातमित्यो[5]युक्तलक्षणम् । तस्य वाक्यस्यादौ वर्तमानयोर्युष्मदस्मदोरेतदादेशजातं मा भूदिति 'पदात्परयोः' इत्युच्यते । अयं भावः । [6]यदि 'पदात् परयोः' इति नो[7]च्येत तदा वृ[8]त्तनियमं विना वाक्यप्रयोगे वाक्यादौ स्थितयोरपदादौ स्थितत्वादादेशाः स्युरिति । अपादादौ किमिति । 'पदात् परयोः' इत्येव पादादिस्थितयोर्निषेधे सिद्धे व्यर्थमपादादिग्रहणमित्यर्थः ।

---

१. P, B_2 drop इति. २. त्वां मां पातु । D_3. ३. °पदादौ D_2. ४. Before it—दत्तात् Dc_3. ५. °मित्युक्त° Dc_3. ६. यदा Nc_2, Dc_2, Bc_1. ७. नो for नोच्येत Nc_2; नोच्यते Dc_4. ८. वृत्ति° for वृत्त° Nc_2.

युष्मान् रक्षतु गोविन्दोस्मान् कृष्णः सर्वदावतु ।

स्थग्रहणाद्विभक्तिलोपे नैते[1] स्युः । युवयोः पुत्रो युष्मत्पुत्रः । आवयोः[2] पुत्रोस्मत्पुत्रः । एते वां नावाद्य आदेशा अनन्वादेशे वा वक्तव्याः ॥ *अन्वादेशे तु नित्यं स्युः[3] । धाता ते तव वापत्यम् । तस्मै ते हरये नमः ।

न चवाहाहैवयुक्ते ॥८।१।२४॥

चादिपञ्चयोगे[4] नैते आदेशाः[5] स्युः ॥

आवयोर्युवयोश्चेशो हरिर्मामेव रक्षतु ।

युष्मानित्यादि । पथ्यावक्त्रवृत्तस्यार्धम् । अत्र गोविन्दो युष्मानस्मान् रक्षतु कृष्णः सर्वदावत्वित्यन्वयः । गोविन्दपदात् परोप्यस्मच्छब्दः पादादौ वर्तत इति नसादेशो न भवति । **स्थग्रहणादिति** । षष्ठीचतुर्थीद्वितीय-योरिति वाच्ये स्थग्रहणं श्रूयमाणविभक्तिकयोरादेशा यथा स्युरिति । तेन विभक्तिलोपे एते आदेशा न भवन्ति । युष्मत्पुत्रः अस्मत्पुत्र इति षष्ठीसमासे 'सुपो धातुप्रातिपदिकयोः' इति विभक्तेर्लुक् । **एते** इत्यादि । **अन्वादेशे**[6] **तु** । उक्तस्य पुनरुक्तिरित्युक्तः । **धातेत्यादि** । धाता तेपत्यमित्यत्र प्रयोगेनन्वादेशत्वात् वा ते आदेशः स्यादित्याह । ते तव वेति । यस्य तव धाता ब्रह्मापत्यं तस्मै ते हरये नमोस्तु । अत्र तवापत्यमिति युष्मच्छब्देनोक्तस्य पुनर्युष्मदा वचनादन्वादेशोयं तेन ते इत्यादेशो नित्यं जातः ।

न च । **आवयोरित्यादि** । **आवयोर्युवयोश्चेति** । चशब्दो युष्मदस्मदर्थयोः साक्षात् समुच्चयमाहेति वां नौ न भवतः । **मामेवेति** । अत्रास्मदर्थावधारणमेवकार आहेति मामित्यत्र मादेशो न । अत्र प्रत्याहारन्यायेन चशब्देवकारयोगे निषेधोदाहरणे दर्शिते तेन चादिभिरपि योगे ज्ञेयम् । आवयोर्युवयोर्वेशो हरिः । आवयोर्युवयोर्ह ईशो हरिः । आवयोर्युवयोरहेशो हरिः । इत्यादि

---

१. नैते आदेशाः B1, B2. २. P, D1, D3, D5, B2 drop आवयोः पुत्रः and B1 drops आवयोः पुत्रोस्मत्पुत्रः. ३. ते स्युः D3. ४. °पञ्चक° B1. ५. C drops आदेशाः. ६. अन्वादेशः Nc2, Dc3, Dc4.

साक्षाद्योगेयं निषेधः । युक्तयुक्ते तु[1] न निषेधः । शिवो हरिश्च मे स्वामी ।

पश्यार्थैश्चानालोचने ॥८।१।२५॥

अचाक्षुषज्ञानार्थैर्धातुभिर्योगे नैते स्युः ॥ चेतसा त्वां समीक्षते । युक्तयुक्तेपि निषेधः । भक्तस्तव रूपं ध्यायति । आलोचने तु भक्तस्त्वा पश्यति चक्षुषा ॥

ज्ञेयम् । **साक्षाद्योगेयं निषेध** इति । साक्षादव्यवधाने चाद्यर्थे युष्मदस्मदर्थयोर्यत्र योगस्तत्रैवायं निषेध इत्यर्थः । **युक्तयुक्ते तु न निषेध** इति । चाद्यर्थयुक्तेनान्येन युक्तयोर्युष्मदस्मदोर्नादेशानिषेधः । अयं चार्थो युक्तग्रहणाल्लभ्यते । अन्यथा[2] सहार्थपरिभाषयैव युक्तत्वं लभ्यते । अथवा 'तुल्यार्थैरतुलोपमाभ्याम्' इत्यत्रैव युक्तग्रहणमध्याह्रियते । **हरिश्च मे स्वामी**ति । हर इति शेषः । अत्र हरिहरशब्दौ चशब्देन युक्तौ । तदर्थगतस्य समुच्चयस्य चशब्देन द्योतितत्वात् । अस्मच्छब्दश्च हरिहरशब्दाभ्यां युक्त इति निषेधाभावात् मे आदेशः ।

पश्यार्थैः । पश्यतीति पश्य इति 'पाघ्राध्माधेट्दृशः शः' इति यदि कर्तरि शः स्यात् तदा द्रष्टृर्थैरिति स्यात् । तथा च 'अनालोचने' इति प्रतिषेधो दुर्घटः स्यात् । तस्मादत एव निपातनाद् भावे शः । तथा च पश्यार्थैरिति दर्शनार्थैरित्यर्थः । दर्शनशब्दोयं चक्षुःपर्यायोप्यस्ति । 'अक्ष्णोदर्शनात्' इति । ज्ञानसामान्यवाच्यप्यस्ति । 'अदर्शनं लोपः' इति । तत्र 'अनालोचने' इति निषेधात् ज्ञानार्थोयमित्याभिप्रेत्याह[3] । **अचाक्षुषज्ञानार्थै**रिति ।

---

१. B_2 drops युक्तयुक्ते तु न निषेधः । D_1, D_2; °युक्तेपि न निषेधः D_3; तु dropped D_2, D_3, P, C, B_1. २. अन्यथा Nc_2, Bc_1. ३. ज्ञानार्थोय° Nc_2.

सपूर्वायाः प्रथमाया विभाषा ॥८।१।२६॥

विद्यमानपूर्वात् प्रथमान्तात् परयोरन्वादेशेप्येत आदेशा वा स्युः ॥

भक्तस्त्वमप्यहं तेन हरिस्त्वा त्रायते स मा ।

विशेष्यपूर्वं संबोधनेतरपूर्वं संबोधनं हित्वान्यस्मात् संबोधनान्तात् परयोर्नैत आदेशा इति केचित् । देवास्मान् पाहि । नृहरे विष्णोस्मान् रक्ष सर्वदा । विशेष्यपूर्वात्तु हरे कृपालो नः पाहि । असंबोधनपूर्वात्तु सर्वदा रक्ष देव नः ।

सपूर्वायाः । सपूर्वाया इत्यत्र सहशब्दो विद्यमानवचनो यथा सहैव दशभिः पुत्रैर्भारं वहति गर्दभी इत्यत्रेत्यभिप्रेत्याह । विद्यमानपूर्वादिति । प्रथमाशब्दोयं प्रत्ययवचनः । तेन प्रत्ययग्रहणपरिभाषया तदन्तस्य ग्रहणमित्यभिप्रेत्याह । **प्रथमान्तादिति** । पदादिति शेषः । परयोर्युष्मदस्मदोरिति शेषः । ननु एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्या इति वक्तव्येनैव विभाषासिद्धेर्व्यर्थमेतद्वचनमित्याशङ्क्याह । **अन्वादेशेपीति** । एते **आदेशा** इति । एते वांनावादय इत्यर्थः । **विशेष्यपूर्वमित्यादि** । विशेष्यं व्यवच्छेद्यं तत् पूर्वं यस्य तत् विशेष्यपूर्वं संबोधनम् । संबुध्यते आमन्त्र्यते अभिमुखीक्रियते येन तत् संबोधनं हित्वा त्यक्त्वा तथा संबोधनेतरपूर्वमिति संबोधनादितरदसंबोधनं तत् पूर्वं यस्य संबोधनस्य तत् संबोधनं हित्वान्यस्मादविशेष्यपूर्वसंबोधनान्तात् तथा संबोधनपूर्वसंबोधनान्तात् परयोर्युष्मदस्मदोर्नैवैते वांनावादय आदेशा न भवन्तीति केचिदित्यर्थः ॥

इति युष्मदस्मदौ[७] ॥

---

१. Dropped D2. २. परतो नैते D1, D2, D5. ३. हे हरे D2, D3. ४. तु dropped D3. ५. सहशब्दो dropped Dc1, Dc2. ६. संबोधनान्तात् Dc1, Dc2. ७. After it—परिसमाप्तौ Dc3.

सुपात्-द् । सुपादौ । सुपादः । सुपादम् । सुपादौ ।

पादः पत् ॥६।४।१३०॥

पाच्छब्दस्य भस्य पदादेशः स्यात् ॥ सुपदः । सुपदा । सुपाद्भ्याम् । इत्यादि ।

अग्निमत्-द् । अग्निमथौ । अग्निमथः । हे अग्निमत्-द् । अग्निमथम् । अग्निमथौ । अग्निमथः । अग्निमथा । अग्निमद्भ्याम् । इत्यादि ।

प्राञ्च् इति स्थिते क्विनि कृते

सुपादिति । शोभनौ पादावस्येति[3] बहुव्रीहिः । 'संख्यासुपूर्वस्य' इति पादस्यान्तलोपः ।

पादः । अत्र पादिति पादशब्दो लुप्ताकारो गृह्यते । 'अङ्गस्य' इत्यनुवृत्तेः पाच्छब्दान्तस्याङ्गस्य प्राप्नुवन्नपि पदादेशो 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया पाच्छब्दस्यैव भवति न तदन्तस्य सर्वस्येति सर्वं चेतसि कृत्वाह । **पाच्छब्दस्येत्यादि** ॥

इति दान्ताः ॥

अग्निमदिति । अग्निं मथ्नातीत्यग्निमद् । मथेः क्विन् । नलोपः ॥

इति थान्ताः ॥

प्राञ्च् इति स्थित इति । **प्रकर्षेण अञ्चतीति** । अञ्चु गतिपूजनयोरित्यस्य प्रोपसर्गपूर्वस्य अकः सवर्णे दीर्घे कृते सति प्राञ्च् इति स्थिते । **क्विनि कृते** इति । 'ऋत्विक्—' इत्यादिना ।

---

१. After it—'संख्यासुपूर्वस्य' संख्यासुपूर्वस्य पादशब्दस्यान्त्यलोपः स्यात् । B_1. २. B_1, P, D_5 drop हे अग्निमत्-द् ; D_1, D_2, D_4 drop from हे अग्निमत्-द् to अग्निमथा ; D_3 drops from हे अग्निमत्-द् to अग्निमथः. ३. Before it—सुपाद् Dc_3. ४. पादशब्दस्या° Dc_3. ५. नस्य लोपः । 'झलां जशोऽन्ते' इति जश्त्वे 'वावसाने' इति वा तकारः । विकल्पभावे जश्त्वम् Dc_3.

अनिदितां हल उपधायाः क्ङिति ॥६।४।२४॥

हलन्तानामनिदितामुपधाया नस्य लोपः स्यात् किति ङिति परे[4] ॥ उगिद्चामिति नुम् । संयोगान्तस्य लोपः । नकारस्य कुत्वेन ङकारः । प्राङ् । अनुस्वारपरसवर्णौ । प्राञ्चौ । प्राञ्चः । प्राञ्चम् । प्राञ्चौ ।

अनिदिताम् । इत् इत् येषां ते इदितः । न इदितः अनिदितः । 'हलः' इति सुब्व्यत्ययेन षष्ठीबहुवचनस्य स्थाने षष्ठ्येकवचनम् । एतच्च 'अनिदिताम्' विशेषणं विशेषणेन च तदन्तविधिर्भवतीत्यभिप्रेत्याह । **हलन्तानामित्यादि** । अङ्गानामिति शेषः । अनिदितामिति किम् । नन्द्यते । हल इति किम् । नीयते । उपधाया इति किम् । नह्यते । क्ङितीति किम् । स्रंसिता । गलिकम्प्योरुपतापशरीरविकारयोरिति वाच्यम् । गलितः । कंपितः । **उगिद्चामिति** । **नुमिति** । प्राच् अस्मात् क्विन्नन्तात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् सौ सति नुम् । सुलोपः । संयोगान्तलोप इति चलोपः । **नकारस्य कुत्वेन ङकार** इति 'क्विन्प्रत्ययस्य कुः' इत्यनुनासिकस्य नकारस्यानुनासिको ङकार इत्यर्थः । **अनुस्वारपरसवर्णाविति** । प्राच् औ इति स्थिते 'उगिद्चाम्–' इति नुमि 'नश्चापदान्तस्य' इत्यनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णो ञकार इत्यर्थः ।

---

१. हलि C, B_1, B_2. २. °मुपधानस्य B_2. ३. नकारस्य D_3; नलोपः D_5. ४. D_1, D_2, D_3, D_4 drop it. ५. संयोगान्तलोपः D_1. ६. Dropped Dc_1. ७. लगि° Bc_1, Dc_4, Dc_3. ८. लगितः Bc_1, Dc_4, Dc_3. ९. विकम्पितः Dc_3, Dc_4.

अचः ॥६।४।१३८॥

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात् ॥

चौ ॥६।३।१३८॥

लुप्ताकारेऽञ्चतौ परे पूर्वस्याणः स्थाने दीर्घः स्यात् ॥ प्राचः। प्राचा। प्राग्भ्याम्। इत्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चम्। प्रत्यञ्चौ। प्रतीचः। प्रतीचा। प्रत्यग्भ्याम्। इत्यादि[४]।

अचः। अत्र 'अच्' इति प्रत्याहारग्रहणं वा पचाद्यच्ग्रहणं वा। लुप्तनकाराञ्चतिर्ग्रहणं वा। तत्राद्यद्वितीयपक्षौ न। 'द्युप्रागपागुदक्प्रतीचो यत्' इत्यस्मान्निर्देशात्। यदि हि प्रत्याहारग्रहणं पचाद्यच्ग्रहणं वा स्यात् प्रतीच इत्यञ्चतेर्लोपो नोपपद्येत। न ह्येतदजन्तमङ्गं पचाद्यजन्तं वा तस्मादन्त्य एव पक्षोऽभिप्रेत इत्यभिप्रेत्याह। **लुप्तनकारस्याञ्चतेरिति**।

चौ। चौ इति लुप्ताकारोऽञ्चतिर्गृह्यत इत्याह। **लुप्ताकारे इति**। **प्रत्यङ् इति**। प्रतीपमञ्चतीति प्रतिपूर्वादञ्चतेः क्विनि तस्य सर्वस्य लोपे नलोपे च कृते प्रातिपदिकत्वात् सौ नुमि सुलोपे संयोगान्तलोपे कृते कुत्वेन नस्य ङः। **प्रत्यञ्चा**वित्यादौ अनुस्वारपरसवर्णौ। **प्रतीच इति**। शसि 'अचः' इत्यल्लोपः। 'चौ' इति दीर्घत्वम्। अत्रान्तरङ्गोऽपि यणादेशो दीर्घविधानसामर्थ्यान्न प्रवर्तते।

---

१. °र्भस्याकारलोपः C. २. Dropped B1. ३. Dropped D3. ४. After this—'उगिदचाम्—' इति नुम्। संयोगान्तस्य लोपः। 'अदसोसेर्दादु दो मः।' अदसोसकारसंबन्धिनो दस्य मः स्यात्। तस्मात् परस्य वर्णमात्रस्योवर्णादेशः। अकारस्येति बहुव्रीहिणा कृतत्यदाद्यत्वस्य विवक्षितत्वादुत्वमत्वयोरभावः। परतः केचिदिच्छन्ति &c. D2. ५. ग्रहणं dropped Dc1, Dc2. ६. नोपपद्यते Dc1, Dc3. ७. इत्यभिप्रेत्याह Nc2. ८. Dropped Dc4.

अमुमुइअच् । अदमुइअच् । इति स्थिते यणादेशः । अमुमुयङ् । अमुमुयञ्चौ । अमुमुयञ्चः । शसादौ मुभावस्यासिद्धत्वान्न संधिः । अमुमुईचः । अमुमुईचा । अमुमुयग्भ्याम् । इत्यादि । एवमदमुयङ् । अदम्यङ् । उदङ् । उदञ्चौ । उदञ्चः । शसादावचि

अमुमुइअच् अदमुइअच् इति स्थिते इति । अमुमञ्चतीति विग्रहे अदःशब्दपूर्वादञ्चतेः क्विनि तल्लोपे नलोपे च सति अदस् अच् इति स्थिते 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' इत्यदसष्टेरद्र्यादेशे अदद्रि अच् इति स्थिते 'अदसोसेर्दादु दो मः' इत्यविशेषादुभयत्रापीत्यपर इति वक्ष्यमाणवचनेनादसो दकारात् परस्याकारस्योत्वे दस्य च मत्वे । तथाद्र्यादेशदकारात् परस्य रेफस्योत्वे दस्य च मत्वे अमुमुइ अच् इति स्थिते अदसोद्र्यादेशस्य मुभाव इत्येके इति वचनादद्र्यादेशस्यैव मुभावे अदमु इ अच् इति स्थिते सतीत्यर्थः । यणादेश इति । 'इको यणचि' इति इकारस्य यकारः । ननु प्रथमं मु इत्यत्र वर्तमानस्योकारस्य वत्वं कस्मान्न स्यात् । उच्यते । 'पूर्वत्रासिद्धम्' इति यणादेशं प्रत्ययसिद्धत्वात् अमुमुयङ् इत्यादौ शेषा प्रक्रिया पूर्ववत् । शसादावित्यादि । अमुमुइअच् शस् इत्यादौ स्थिते शसादौ परे 'अचः' इत्यल्लोपे पूर्वस्येकारस्य 'चौ' इति दीर्घत्वे 'पूर्वत्रासिद्धम्' इति मुभावस्यासिद्धत्वान्न संधिर्यणादेश इत्यर्थः । अदद्र्यङ् इति । उभयत्र मुभावाभावपक्षे रूपम् । उदङ् इति । उत्कृष्टमञ्चतीति उत्पूर्वस्याञ्चतेः पूर्ववद्रूपसाधनम् ।

---

१. For अमुमुइअच् to अदद्र्यङ्—अमुमञ्चतीति विग्रहे अदस् अच् इति स्थिते

परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥६।३।९२॥

अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्याद्वप्रत्ययेऽञ्चतौ परे । इति टेरद्र्यादेशे अदद्रि अच् इति स्थिते

अदसोसेर्दादु दो मः ॥८।२।८०॥

अदसोऽसान्तस्य दात्परस्योवर्णो दस्य च मः स्यात् । स्थानेन्तरतम इति ह्रस्वस्य

उद ईत् ॥६।४।१३९॥

उच्छब्दात्परस्य भस्याञ्चतेरस्य ईत् स्यात् ॥ उदीचः । उदीचा । उदग्भ्याम् । इत्यादि ।

उदः । अत्रापि लुप्तनकार एवाञ्चतिर्गृह्यते 'अचः' इत्यनुवृत्तेः ।

ह्रस्वः दीर्घस्य दीर्घ ऊकारः । अदमु इ अच् इति यणादेशः । अदमुयङ् । अदमुयञ्चौ । अदमुयञ्चः °शसादौ मुभावस्यासिद्धत्वान्न संधिः । अदमुईचः । अदमुईचा । अदमुयग्भ्याम् । इत्यादि । एवमदमुयङ् । अमुमुयङ् । अदद्र्यङ् । P, C, B_1 (B_1 drops the वृत्ति of विष्वग्देवयोश्च°); (After the Sûtra विष्वग्दे° D_2 drops the वृत्ति and has इति टेरद्र्यादेशः । अदमुयङ् । अमुद्र्यङ् । अदद्र्यङ् । अमुमुयङ् । अमुमुइच् इति स्थिते यणादेशः स्यात् । अमुमुयञ्चौ । अमुमुयञ्चः । शसादौ मुभावस्यासिद्धत्वान्न संधिः । अमुमुईचः । अमुमुईचा । अमुमुयग्भ्याम् । एवमदमुयङ् । अमुद्र्यङ् । अदद्रमुङ् । उदङ् &c. D_2). (C and P have अमुमुइअच् । अमुमुयङ् । अमुमुयञ्चौ &c./ अमुमुईचः । for अदमुइअच् &c.) (C drops स्थाने° to ऊकारः and has परतः केचिदिच्छन्ति.......... चोभयोः here) (C has एवमदमुयङ् । अमुद्र्यङ् । अदद्र्यङ्).

B_2 has विष्वग्देवयोरित्यद्र्यादेशः । अदसोसेर्दादु दो मः । अदमु इ अच् इति स्थिते यणादेशः । then follows the text and after इत्यादि has एवमदमुयङ् । उदङ् Dc.

अमुमञ्चतीति विग्रहे क्विन् । क्विनि कृते 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' इति टेरद्र्यादेशः । अदद्र्यङ् । अदसोद्र्यादेशस्य 'अदसोसेर्दादु दो मः' इति मुभाव इत्येके । अदमुयङ् । अविशेषादुभयत्रापीत्यपरे । अमुमुयङ् । आद्यावेवेत्येन्ये । अमुद्र्यङः । तथा चाहुः ।

परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥

अमुमुइअच् इति स्थिते मुभावस्यासिद्धत्वान्न पूर्वेण संधिः । अदमुइअच् इति स्थिते यणादेशः । अमुमुयङ् । अमुमुयञ्चौ । अमुमुयञ्चः । शसादौ मुभावस्यासिद्धत्वान्न संधिः । अमुमुईचः । अमुमुईचा । अमुमुयग्भ्याम् । एवमदमुयङ् । एवममुमुयङ् । अदद्र्यङ् । उदङ् । उदञ्चौ । उदञ्चः । &c. D_4. १. P drops it.

समः समि ॥६।३।९३॥

समः समिरादेशः[3] स्यादञ्चतौ[4] परे । सम्यङ् । सम्यञ्चौ । सम्यञ्चः । सम्यञ्चम् । सम्यञ्चौ । समीचः । समीचा । सम्यग्भ्याम् । इत्यादि[5] ।

[6]तिरस् अच् इति स्थिते

तिरसस्तिर्यलोपे ॥६।३।९४॥

अलुप्ताकारेऽञ्चतौ परे तिरसास्तिर्यादेशः स्यात् ॥ तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । [7]तिर्यञ्चम् । तिर्यञ्चौ । अकारलोपः । श्चुत्वम् । तिरश्चः । तिरश्चा । तिर्यग्भ्याम् । इत्यादि ।

प्राञ्च् इति स्थिते

सम्यङ् इति । सम्यक् अञ्चतीति सम्यङ् । 'समः समिः' इति समः समिरादेशः ।

तिरसः । **अलोप** इति । न विद्यते लोपो यस्य सोऽलोपः । स च प्रकृतत्वादञ्चतिरित्यभिप्रेत्याह । **अलुप्ताकारेऽञ्चताविति** । तस्मिन् वप्रत्ययान्ते इति ज्ञेयम् । तस्याप्यनुवृत्तेः । **अकारलोप** इति । तिरस् अच् शस् इति स्थिते 'अचः' इत्यकारलोपे इत्यर्थः । अल्लोपस्य जातत्वात् तिर्यादेशो न । **श्चुत्वमिति** । 'स्तोश्चुना श्चुः' इति सकारस्य शकार इत्यर्थः । **प्राञ्च इति स्थिते** इति । प्रकर्षेणाञ्चति पूजयतीत्यर्थे अञ्चेः क्विनि तल्लोपे च कृते प्राञ्च् इति स्थिते इत्यर्थः ।

---

१. D$_1$ drops the Sûtra and its Vritti and also सहस्य सध्रिः and has—सम्यङ् । सम्यञ्चौ । समीचः । समीचा । सम्यग्भ्याम् । तिरस् अच् इति स्थिते ।. २. अञ्चतावप्रत्ययान्ते उत्तरपदे परतः समः समीत्यादेशः स्यात् । D$_2$. ३. आदेशः dropped C. ४. °दञ्चतावप्रत्यये परे : B$_1$; °दप्रत्ययान्तेऽञ्चतौ परे D$_3$; °दञ्चतौ प्रत्यये परे B$_2$. ५. Dropped D$_2$. ६. Before it—सहस्य सध्रिः ॥६।३।९५॥—सहस्य सध्रिरादेशः । सध्र्यङ् । D$_1$, B$_1$. ७. तिर्यञ्चम् । तिर्यञ्चौ dropped D$_1$, D$_3$, D$_4$.

नाञ्चेः पूजायाम् ॥६।४।३०॥

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात् ॥ अलुप्तनकारत्वान्न नुम्। प्राङ्। प्राञ्चौ। प्राञ्चः। नलोपाभावत्वादकारस्य लोपो न। प्राञ्चः। प्राञ्चा। संयोगान्तस्य लोपः। कुत्वेन ङकारः। प्राङ्भ्याम्। प्राङ्भिः। 'ङ्णोः कुक्टुक् शरि' इति कुक्। प्राङ्क्षु। प्राङ्षु। एवं प्रत्यङादयः। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुञ्चा। क्रुङ्भ्याम्। इत्यादि। 'चोः कुः'।

नाञ्चेः। 'अनिदिताम्—' इति प्राप्तो नलोपो निषिध्यते। अलुप्तनकारत्वादिति। 'उगिदचां सर्वनामस्थाने धातोः' इत्यत्र नलोपिनोऽञ्चतेर्ग्रहणादिति भावः। नलोपाभावादिति। प्राञ्च् शस् इति स्थिते अस्य पूजार्थत्वेन नलोपाभावात् 'अचः' इति लुप्तनकारस्याञ्चतेर्विधीयमानोऽल्लोपो नेत्यर्थः। संयोगान्तलोप इति। प्राञ्च्भ्याम् इति स्थिते चस्य लोप इत्यर्थः। कुत्वेनेति। क्विन्प्रत्ययस्येति पञ्चमस्यानुनासिकस्य नकारस्य पञ्चमोऽनुनासिको ङकार इत्यर्थः। ङ्णोरित्यादि। प्राञ्च् सु इति स्थिते संयोगान्तस्य लोपे कुत्वेन नस्य ङे कृते 'ङ्णोः—' इति कुगागम इत्यर्थः। 'आदेशप्रत्यययोः' इति सस्य षः। कषयोगे क्षः। एवं प्रत्यङादय इति। एवमनेन प्रकारेण पूजार्थाः प्रत्यङादयो ज्ञेया इत्यर्थः। क्रुङ् इति। क्रुञ्चति गच्छतीति क्रुङ्। क्रुञ्च गतौ। अस्मात् केवलात् 'ऋत्विक्—' इत्यादिना क्विन्। न लोपाभावो निपात्यते।

---

१. नलोपाभावात् P, C, Com. २. °ष्ठाकारलोपः C; °कारस्यालोपः B_2, D_3, D_5; °इकारस्य न लोपः P, D_4. ३. संयोगान्तलोपः Com. ४. इत्यादि for it D_5. ५. °टुगिति D_1. ६. प्राङ्षु dropped P, B_1, D_1, D_3, D_5. ७. प्राप्ते निषिध्यते। Dc_1, Dc_2, Nc_1. ८. नलोपिनो Dc_2, Nc_2, Bc_1. ९. °लोपो ने° Bc_1. १०. °गान्तलोपे Dc_3.

पयोमुक्–ग् । पयोमुचौ । पयोमुचः । पयोमुचम् । पयोमुचौ । पयोमुचः । [1]पयोमुचा । पयोमुग्भ्याम् । इत्यादि । 'व्रश्चभ्रस्ज–' इति चस्य षत्वम्[2] । 'स्कोः संयोग—' इति सलोपः । जश्त्व-चर्त्वे[3] । सुवृट्–ड् । सुवृश्चौ । सुवृश्चः । इत्यादि । उगित्त्वान्नुम् । 'सान्तमहतः [4]संयोगस्य' । [5]महान् । महान्तौ । महान्तः । [6]महान्तम् । महान्तौ । महतः । महद्भ्याम् । इत्यादि ।

पयोमुक् इति । पयोमुञ्चतीति पयोमुक् । मुच्लृ मोक्षणे । अस्मात् क्विप् । सुवृडिति । सुष्ठु [7]वृश्चतीति सुवृट् । ओव्रश्चू छेदने । अस्मात् क्वि[8]न् । 'ग्रहिज्या—' इत्यादिना संप्रसारणम् ॥

इति चान्ताः ॥

उगित्त्वादिति । 'वर्तमाने पृषत्बृहत्महत्जगत्शतृवच्च' इत्युणादिसूत्रेण मह पूजायामित्यस्य धातोर्महदिति रूपं निपात्यते । तच्च शतृवदित्यतिदेशादुगिद् भवति । तत उगित्त्वान्महच्छब्दस्य 'उगिदचाम्—' इत्यादिना नुमित्यर्थः । 'सान्तमहतः संयोगस्य' इत्यनेन सूत्रेण दीर्घ इत्यर्थः ।

---

१. From पयोमुचा to इत्यादि dropped D_1, D_4, D_5, B_2; From पयोमुचः (Nom. Plu.) to इत्यादि dropped D_2, D_3. २. निमित्ताभावे 'स्कोः—' D_5. ३. After it—सुवृश्चा । सुवृड्भ्याम् । इत्यादि । तत्त्वप्राट्-ड् । तत्त्वप्राशौ । तत्त्वप्राशः । तत्त्वप्राशम् । तत्त्वप्राशौ । तत्त्वप्राशः । तत्त्वप्राशा । तत्त्वप्राड्भ्याम् । इत्यादि । B_2. ४. संयोगस्येति दीर्घः B_2. ५. After it—हे महन् B_2, D_1, D_2, D_3. ६. महान्तम् । महान्तौ and महद्भ्याम् dropped D_1. ७. वृश्चति छिनत्तीति Dc_3. ८. क्विप् Dc_3, Dc_4.

अत्वन्तत्वाभावान्न दीर्घः । भवन् । भवन्तौ । [1]भवन्तः । [2]भवन्तम् । भवन्तौ । [3]भवतः । भवता । भवद्भ्याम् । इत्यादि । अत्वन्तत्वाद्दीर्घः । धीमान्[4] । हे धीमन् । शेषं [5]भवद्वत् । अत्रभवत्-तत्रभवच्छब्दौ पूज्यार्थौ[6] । धीमद्वत्[7] । अत्रभवान्[8] । [9]अत्रभवन्तौ । अत्रभवन्तो भट्टाचार्याः । तत्रभवन्तः ।

अत्वन्तत्वाभावादिति । भवच्छब्दस्य भू अस्मात् 'लटः शतृ' इति शत्रन्तस्य सिद्धत्वादत्वन्तत्वाभात् 'अत्वसन्तस्य चाधातोः' इति न दीर्घ इत्यर्थः । **भवन्निति** । 'उगिदचाम्—' इति नुम् । अत्वन्तत्वाद् दीर्घ इति । धीमत्शब्दस्य धीर्विद्यते यस्यासावित्यर्थे 'तदस्यास्त्यस्मिन्' इति मतुप् इति मतुप्-प्रत्ययान्तत्वेनात्वन्तत्वात् 'अत्वसन्तस्य—' इति दीर्घ इत्यर्थः[10] **अत्रभवदित्यादि** । अत्रभवत्तत्रभवच्छब्दौ[11] पूज्यार्थौ पूज्यवाचिनौ । तौ च धीमच्छब्दवत् साधनीयौ । **अत्रभवानिति** । **अत्रेति** । एतदत्रेति तदः 'इतराभ्योपि[12] दृश्यन्ते' इति त्रल् । अत्र तत्रशब्द-विशिष्टो भवच्छब्दः पूजार्थतां[13] द्योतयति । अथवा पूज्यार्थावेवात्रभवत्-तत्रभवच्छब्दौ उदनुबन्धौ प्रकृतिप्रत्ययविभागेन कल्प्यौ । अत्वन्तत्वाद् दीर्घत्वम् । अत्रभवन्तो भट्टाचार्या इत्यनेन पूजार्थता[14] दर्शिता ।

---

१. P and B_1 have शेषं महद्वत् for भवन्तः.........भवद्भ्याम्. २. In place of भवन्तम्...शेषं महद्वत् D_3 has शेषं महद्वत्. ३. For भवतः...... इत्यादि D_1, D_2, B_2 have शेषं महद्वत्; after it—शेषं महद्वत् D_4, D_5. ४. After it—धीमन्तौ । धीमन्तः । D_3, B_1, B_2. ५. महद्वत् D_5. ६. पूजार्थे P; After it—निपात्येते D_3. ७. C omits धीमद्वत्. ८. D_1 drops अत्रभवान् । अत्रभवन्तौ. ९. हे अत्रभवन् D_5. १०. इत्यर्थः dropped Dc_1, Dc_2, Nc_1. ११. शब्दौ dropped Nc_2. १२. इतरेभ्योपि Dc_3. १३. पूज्यार्थतां Dc_4. १४. पूज्यार्थता Dc_4.

एवं यशस्वदादयः । भवान् । भवन्तौ । भवन्तः । विभाषा भवदिति[1] रुत्वम् । अवस्य ओकारो[2] वा । हे भोः । हे भवन् । हे भगोः । हे भगवन् । हे अघोः । हे अघवन् । शेषं धीमद्वत् ॥

उभे अभ्यस्तम् ॥६।१।५॥

अत्र प्रकरणे ये द्वे विहिते ते[3] उभे समुदिते अभ्यस्तसंज्ञे स्तः ॥

नाभ्यस्ताच्छतुः ॥७।१।७८॥

अभ्यस्तात् परस्य शतुर्नुम् न स्यात् ॥ ददत् । ददतौ । ददतः । इत्यादि[4] ॥

एवं यशस्वदादय इति । धीमद्वदेव यशस्वदादयो ज्ञेया इत्यर्थः । **भवानिति** । अयं सर्वदोकारानुबन्धः पठ्यत इति दीर्घः ।

उभे । अत्र प्रकरणे 'एकाचो द्वे प्रथमस्य' इत्यारभ्यैतत्सूत्रपर्यन्तमित्यर्थः । अत्र च 'द्वे' इत्यनुवर्तमाने उभेग्रहणं समुदायस्य संज्ञा यथा स्यात् प्रत्येकं मा भूदित्येवमर्थमाह । **उभे समुदिते** इति । समुदितसंज्ञाप्रतिपत्तिर्नेनिजतीत्यत्र 'अभ्यस्तानामादिः' इति विधीयमानमाद्युदात्तत्वं समुदाये[5] यथा स्यात् प्रत्येकं पर्यायेण वा[6] मा भूदित्येवमर्थम् ।

नाभ्य° । अत्र यद्यपि 'अनन्तरस्य विधिर्भवति प्रतिषेधो वा'[7] इति परिभाषया 'ई च द्विवचने' इत्यनन्तरविहितस्य ईकारस्यैव निषेधेन भाव्यं तथापि तस्य शतुरविहितत्वात् व्यवहितोऽपि नुमत्र निषिध्यत इत्यभिप्रेत्याह । **शतुर्नुम् न स्यादिति** । ददिति । डुदाञ् दाने । वर्तमाने लट् । 'लटः शतृ' इति शतृ । शप् । 'जुहोत्यादिभ्यः श्लुः' । 'श्लौ' इति द्वित्वम् । अभ्यस्तसंज्ञायां 'श्नाभ्यस्तयोः' इत्यालोपः । स्वाद्युत्पत्तिः । उगित्त्वात् प्राप्तो नुमभ्यस्तत्वान्न ।

---

१. C has भवद्भगवदिति. २. अकारो D1. ३. B1 drops ते. ४. B1 drops इत्यादि. ५. समुदायसंज्ञा Nc1. ६. Dropped Dc1. ७. वा विधि° Dc2, विधिर्वा Nc2.

जक्षित्यादयः षट् ॥६।१।६॥

षड् धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः[1] ॥ जक्षत्। जक्षतौ। जक्षतः[2]। एवं जाग्रत्दरिद्रत्शासच्चकासत् दीध्यत्वेव्यत्[3]।

धर्मगुप्-ब्। धर्मगुपौ। धर्मगुपः। इत्यादि[4]।

जक्षि। जक्षिरित्ययं धातुरभ्यस्तसंज्ञः। इत्यादयो जागृप्रभृतयः षट् चाभ्यस्तसंज्ञा इति सूत्रार्थः। तथा हि। इतिरादिर्येषां त इत्यादयः। इतिशब्दोऽतिक्रान्तप्रत्यवमर्शकः। तत्र जक्ष इत्ययं धातुरनन्तरमतिक्रान्त इति स एव तेन प्रत्यवमृश्यते। जक्षित्येतदुपलक्षितानां जागृप्रभृतीनां वेवीङ्पर्यन्तानां षण्णां जक्षित्येतस्य च तेभ्यः पृथङ्निर्दिष्टस्य सप्तमस्याभ्यस्तसंज्ञा तेत्[5] सर्वं चेतसि कृत्वाह। **षड् धातवोऽन्ये जक्षितिश्च सप्तम** इति। **जक्षदिति**। जक्षभक्ष हसनयोः। शता। अभ्यस्तत्वान्नुमूनिषेधः। एवं जाग्रदित्यादि। जागृ निद्राक्षये। दरिद्रा दुर्गतौ। शासु अनुशिष्टौ। चकासृ दीप्तौ। दीधीङ् दीप्तिदेवनयोः। वेवीङ् वेतिना तुल्यः। सर्वेभ्यो लटः शता[6] दीधीङ्वेवीङः 'व्यत्ययो बहुलम्' इति व्यत्ययेन शता ॥

तान्ताः ॥

धर्मगुबिति। धर्मं गोपायतीति धर्मगुप्। गुपू रक्षणे क्विप् 'आयादय आर्धधातुके वा' इति आयाभावपक्षे रूपम् ॥

पान्ताः ॥

---

१. B_1 drops स्युः. २. C has after it—इत्यादि। जक्षिजागृदरिद्राशास् दीधीवेवीङ् चकास्तथा। अभ्यस्तसंज्ञाः सप्तैते धातवो मुनिभाषिताः ॥

३. After this—जक्षजागृदरिद्राशास् दधीङ् वेवीङ् चकास्तथा। अभ्यस्तसंज्ञाः सप्तैते साभ्यासा ये च धातवः ॥१॥ B_1, C.

४. B_1, D_1 drop इत्यादि; C has धर्मगुपम्। धर्मगुपौ। धर्मगुपः। धर्मगुब्भ्याम् before it. ५. एतत् Dc_3, Dc_4. ६. शतृ Bc_1.

त्यदादिषु दृशोऽनालोचने कञ्च ॥३।२।६०॥

त्यदादिषूपपदेष्वनालोचनार्थाद्[1] दृशेर्धातोः कञ् स्यात् चात् किन्। किन्नन्तत्वात् कुत्वम्। तादृक्-ग्। तादृशौ। तादृशः[2]। एवं यादृगादयः। समानान्ययोश्च वक्तव्यम्[*]॥ इति किन्[3]। सदृक्-ग्[4]। सदृशौ। सदृशः[5]। अन्यादृक्-ग्[6]। अन्यादृशौ। अन्यादृशः[7]। व्रश्चेति षत्वम्। जश्त्वचर्त्वे। विट्-ड्। विशौ। विशः। विशम्[8]। विशौ। विशः। विशा। विड्भ्याम्। इत्यादि।

त्यदादिषु। आलोचनमिह ज्ञानमात्रं विवक्षितम्। यदि ज्ञाने दृशिर्न वर्तेत[9] तर्हि प्रत्ययो नान्यथा। तादृगिति[10]। 'आ सर्वनाम्नः' इत्यात्वम्। ननु चात्रापि दर्शनक्रियास्त्येव तथाहि तादृगादिशब्दानां[11] व्युत्पत्तौ आचार्याः। तमिव पश्यति अथवा स इव दृश्यते इत्येवं-प्रकारं[12] वाक्यमुपन्यस्यार्थप्रत्ययं कुर्वन्ति। नैष दोषः। रूढशब्दा[13] एते तेनात्र[14] नास्ति दर्शनक्रिया यतो रूढशब्देषु[15] नावश्यमवयवार्थेन भाव्यम्। बालव्युत्पत्त्यर्थमविद्यमानोप्यवयवार्थ उपादीयते। यथा[16] व्याजिघ्रतीति व्याघ्र इत्यादौ। अथवोपमानोपमेयभावमात्रमत्रास्ति न दर्शनक्रिया। तथा च **धर्मकीर्तिनोक्तं रूपावतारे**। 'उपमानोपमेय-भावो गम्यते चेत्तौ भवतः' इति। **सदृगिति**। 'दृग्दृशवतुषु' इति समानस्य सभावः। **विडिति**। विशतीति विट्। विश प्रवेशने। क्विप्[17]।

---

१ °लोचनार्थदृशे° B_1. २. P has before it—आसर्वनाम्न इत्यात्वम्। कञ्पक्षे तादृशः।. ३. B_1 has before it—क्विन्प्रत्ययः। कुः।. ४. Before it—समानस्य सः। D_2. ५. P drops it. ६. एवमन्यादृक्। व्रश्चेति &c. D_2. ७. P and B_1, D_1 drop it. ८. From this to विशा dropped D_2; From this to इत्यादि dropped D_4. ९. वर्तते Nc_2, Dc_4. १०. °गित्यादिना Nc_2. ११. तादृगित्यादि° Nc_2. १२. प्रत्येकं प्रकारं Dc_1, Dc_2. १३. रूढि° Nc_2, Dc_4. १४. एतेनात्र Dc_3. १५. रूढि° Nc_2, Dc_2, Dc_4. १६. तथा Dc_1, Dc_2. १७. After it—'व्रश्चभ्रस्ज-' इति षत्वम्। 'झलां जशोऽन्ते' इति जश्त्वम्। 'वावसाने' इति चर्त्वम्। विट्। विड्। Dc_3.

नशेर्वा ॥८।२।६३॥

नशेः कवर्गान्तादेशो वा स्यात् पदान्ते।[1] झल्यपि[2] केचित्। नक्–ग्। नट्–ड्। नशौ। नशः। नग्भ्याम्। नड्भ्याम्[3][4]। श्वेतवहादित्वात् डस्। पुरोडाः। पुरोडाशौ। पुरोडाशः। हे पुरोडाः। हे [5]पुरोडः। [6]पुरोडाशम्। पुरोडाशौ। पुरोडाशः। पुरोडाशा। पुरोडोभ्याम्[7]। पुरोडस्सु। पुरोडःसु।

स्पृशोऽनुदके क्विन् ॥३।२।५८॥

अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्।

नशेर्वा। 'पदस्य' इत्यनुवर्तते इत्यभिप्रेत्याह। **पदान्त** इति। **नगिति**। नशनं नक्। संपदादित्वात् भावे क्विप्। नश्यतीति नगिति कर्तरि वा। **पुरोडा** इति। पुरो दाशन्ते[8] एनं पुरोडाः। 'मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्'। हे **पुरोडाः**। हे **पुरोड**[9] इति। 'अवयाः श्वेतवाः पुरोडाश्च' इति संबुद्धौ कृतदीर्घौ निपात्यते। वेति केचित्।

स्पृशः। ननु च 'सुपि स्थः' इत्यत्रोक्तं सकर्मकेषु कर्मानुवृत्तिरित्यत्र सुप इति स्पृश संस्पर्शने इति च[10] धातुः सकर्मक इति कर्मानुवृत्त्या भाव्यम्। तत्कथमुच्यते सुपीति चेत्। उच्यते। 'कर्तरि कृत्' इति 'कर्तरि' इति सिद्धेपि 'कर्तरि भुवः' इत्यतः 'कर्तरि' इत्येतदनुवर्तते तत् कर्तृप्रचयार्थम्। कर्तृप्रचयश्च सुबन्तमात्रे उपपदे स्यात्। कर्मण्युपपदे एकः प्रत्ययार्थः कर्ता अपरः करणादावुपपद इति। नकारः क्विन्प्रत्ययस्येति विशेषणार्थः। ककारो गुणप्रतिषेधार्थः। इकारः 'वेरपृक्तस्य' इति विशेषणार्थः।

---

१. झलि पदान्ते च C. २. झल्यपीति D_1. ३. नशम्। नशौ। नशः। नशा। नग्भ्याम्। नड्भ्याम्। नग्भिः। नड्भिः। इत्यादि C; नग्भ्याम्। नक्षु। नट्सु P. ४. After it—इत्यादि D_3. ५. हे पुरोडः dropped P, C, D_2. D_5, B_1, B_2. ६. D_1, D_2, D_4, D_5 drop all these forms except पुरोडोभ्याम्. ७. C has इत्यादि after it; P drops पुरोडस्सु। पुरोडःसु।. ८. डाशन्ते Bc_1, Dc_4. ९. पुरोडा इति Dc_1, Dc_2. १०. Dropped Dc_2.

घृतस्पृक्-ग् । घृतस्पृशौ[१] । [२]क्विन् प्रत्ययो यस्माद्विहितस्त[३]स्मादन्यत्रापि [४]प्रत्यये पदान्तस्य कुत्वं स्या[५]त् ॥ स्पृक्-ग् । स्पृ[६]शौ । स्पृ[७]ग्भ्याम् । इ[८]त्यादि ।

द[९]धृक्-ग् । दधृषौ । द[१०]धृग्भ्याम् । इत्यादि । रत्नमुट्-ड् । रत्नमुषौ । रत्नमुषौ । र[११]त्नमुड्भ्याम् । इ[१२]त्यादि ।

षड्भ्यो लुक् ॥ षट् । षड् । २ । षड्भिः । षड्भ्यः २ । षण्णाम् । ष[१३]ट्सु ।

घृतस्पृक् इति । घृतेन स्पृशतीति क्विन्[१४]प्रत्ययादि । एतच्च 'क्विन्-प्रत्ययस्य कुः' इत्यत्रोपपादितम् । स्पृक् इति । स्पृशतीति स्पृक् । 'क्विप् च' इति क्विप् ॥

इति शान्ताः ॥

दधृगिति । धृष्णोतीति दधृक् । 'ऋत्विक्—' इत्यादि क्विबन्तो निपात्यते । रत्नमुडिति । रत्नं मुष्णातीति रत्नमुड् । मुष स्तेये । अस्मात् क्विप् । षडिति । षष्शब्दो बहुवचनान्तः । [१५]अत्र जश्शसोः सतोः 'ष्णान्ता षट्' इति षट्संज्ञायां 'षड्भ्यो लुक्' इति जश्शसोर्लुक् । षण्णाम् । ष[१६]ड् णामिति 'षट् चतुर्भ्यश्च' इति नुट् । ष्टुत्वम् । 'यरोऽनुनासिके—' इति वानुनासिकः ।

---

१. After this C has घृतस्पृशः । घृतस्पृशम् । घृतस्पृशौ । घृतस्पृशः । घृतस्पृशा । घृतस्पृग्भ्याम् । इत्यादि । अनुदके किम् । उदकस्पृट्-ड् ।; P has उदकस्पृट्-ड्; B_2 has अनुदके किम् । उदकस्पृट्-ड् ।. २. Before this Sûtra क्विन्प्रत्ययस्य कुः B_2. ३. °स्तस्यान्यत्रापि D_1. ४. प्रत्यये परे B_2, D_5. ५. Dropped D_2, D_4. ६. After this—स्पृशः D_1, D_3. ७. Before it—स्पृशम् । स्पृशौ । स्पृशः । स्पृशा । C. ८. Dropped D_1. ९. Before it—द्वेष्टीति । द्विष प्रीतौ । द्विट् । द्विड्भ्याम् । इत्यादि B_1. १०. Before it—दधृषम् । दधृषौ । दधृषः । दधृषा C; दधृषः D_2. ११. रत्नमुषः । रत्नमुषम् । रत्नमुषौ । रत्नमुषः । रत्नमुषा before it in C; B_1 has रत्नमुषः for रत्नमुड्भ्याम् । इत्यादि; D_3 has रत्नमुषः before it. १२. D_2, D_5, D_4, D_1 drop it. १३. P has in place of this जश्त्वे परे डस्य णत्वे पश्चात्तस्य णः ।. १४. °प्रत्यय इत्यादि Dc_3. १५. तत्र Bc_1, Dc_4. १६. षड्णामिति dropped Bc_1.

[१]तदन्तग्रहणात् परमषट् । परमषण्णाम् । गौणत्वे तु [२]प्रियषषः । प्रियषषाम् । [३]रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषोरिति रुत्वम् ।

वोरुपधाया दीर्घ इकः ॥८।२।७६॥

रेफवकारा[४]न्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते[५] ॥ पिपठीः । पिपठीषौ । [६]पिपठीर्भ्याम् । वा शरीति वा विसर्जनीयः । सत्वपक्षे सस्य [७]षत्वम् ।

तदन्तग्रहणादिति । 'षड्भ्यो लुक्' इत्यत्र 'षट्चतुर्भ्यश्च' इत्यत्र च तदन्तग्रहणात् परमषट् इत्यत्र जश्शसोर्लुक् । परमषण्णामित्यत्र नुट् स्यादित्यर्थः । परमाश्च षट् च इति । गौणत्वे त्वित्यादि । प्रियाः षट् येषां ते प्रियषष इत्यत्र [९]गौणत्वे जश्शसोर्लुक् न । प्रियषषामित्यत्र नुट् न भवति । गौणत्वे अनयोरनिष्टत्वात् । रुत्वं प्रतीति । पिपठिष् सु इति स्थिते हल्ङ्यादिलोपे सति 'ससजुषोरुः' इति प्राप्तं रुत्वं प्रति 'आदेशप्रत्यययोः' इति जातस्य षत्वस्य पूर्वत्रासिद्धन्यायेनासिद्धत्वात् 'ससजुषोः—' इति सूत्रेण रुत्वमिति भावः ।

वोरुपधायाः । उपधायाः किम् । अबिभर्भवान् । अभ्यासेकारस्य मा भूत् । इकः किम् । अत्रैव भशब्दस्याकारस्य मा भूत् । धातोः किम् । अग्निः । वायुः । पदस्येत्येव । गिरौ । गिरः । पिपठीरिति । पठितुमिच्छति । 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति पठ व्यक्तायां वाचि अस्मात् सन् । इट् । 'सन्यङोः' इति द्वित्वम् । 'सन्यतः' इतीत्वम् । षत्वम् । पिपठिष् इति स्थिते क्विप् । अतो लोपः । क्विपः सर्वस्य लोपः ।

---

१. तदन्तग्रहणमत्रेष्यते P. २. Before it—प्रियषट् । प्रियषषौ C, B_1. ३. Before it—षट्चतुर्भ्यश्च D_6. ४. °वकारान्तधातो° P, B_2. ५. After it—झलि B_2. ६. C has पिपठिषः । पिपठिषम् । पिपठिषौ । पिपठिषः । पिपठिषा before it. ७. षः स्यात् B_1. ८. ते षट् Dc_3, Dc_4. ९. गौणत्वे dropped Nc_2.

नुम्विसर्जनीयशर्व्यवायेपि ॥८।३।५८॥

एभिर्व्यवधानेपि इणकुभ्यां[1] परस्य सस्य षः[2] स्यात् ॥ पिपठीष्षु । विसर्जनीयपक्षे पिपठीःषु । रात्सस्येति[3] सलोपः । चिकीः । चिकीर्षौ[4] । चिकीर्भ्याम् । चिकीर्षु । दोः । दोषौ । दो[6]र्षः । दोषम् । दोषौ । पद्दन्निति वा

नुम् । 'इण्कोः—' इति पञ्चमीनिर्देशात् निर्दिष्टग्रहणस्य चानन्तर्यार्थत्वात् व्यवधाने 'इण्कोः—' इति न प्राप्नोतीत्यारम्भः । एभिरित्यादि । अत्र नुमा विसर्जनीयेन शरा च व्यवधाने इण्कवर्गाभ्यां परस्य सस्य षः स्यादित्यर्थः । अत्र नुम्ग्रहणमनुस्वारोपलक्षणार्थम् । स चानुस्वारो नुम्स्थानिकः एव भाव्य इति नुम्ग्रहणम् । तेन पुंस्वित्यत्र षो न । पिपठीष्षु इति । पिपठीष् सु इति स्थिते रुत्वं प्रति षत्वस्यासिद्धत्वात् रुत्वम् । 'खरवसानयोः—' इति विसर्गः । तत्र 'वा शरि' इति यदा विसर्जनीयो न भवति तदा विसर्जनीयस्य सः । शरा सकारेण व्यवधाने परस्य सस्य षत्वम् । पूर्वस्य ष्टुत्वम् । विसर्जनीयपक्षेपि पिपठीःषु इति विसर्गस्य श्रवणं स्यादित्यर्थः । अत्र च प्रत्येकं वाक्यपरिसमाप्तिर्भवति । कथम् । नुमैव व्यवाये विसर्जनीयेनैव व्यवाये शरैव व्यवाये मूर्धन्य इति । ततश्च द्वाभ्यां [7]त्रिभिर्व्यवाये न भवति । तेन निस्से इत्यत्र न भवति मूर्धन्यः । 'रात्सस्य' इति सलोप इत्यादि । कर्तुमिच्छतीत्यर्थे कृञः सनि 'इको झल्' इति कित्वे 'अज्झनगमां सनि' इति दीर्घत्वे 'ऋत इत्' इतीत्वे द्वित्वे चुत्वे क्विपि अल्लोपे स्वादौ सुलोपे च चिकीर्ष् इति स्थिते 'रात्सस्य' इति सलोपं प्रति षत्वस्यासिद्धत्वात् 'रात्सस्य' इति सलोप इत्यर्थः । दोरिति । दाम्यतीति दोर्भुजः । 'दमेर्डोस्' इत्युणादिसूत्रेण

१. °कवर्गाभ्यां D_1, D_2. २. मूर्धन्यादेशः C; मूर्धन्यः D_1, B_2, D_4, D_5, D_3, D_2. ३. रात्सस्येति सूत्रं प्रति षत्वस्यासिद्धत्वात् सलोपः C, B_2. ४. चिकीर्षः । चिकीर्षम् । चिकीर्षौ । चिकीर्षः । चिकीर्षा before it in C; after it चिकीर्षः D_3. ५. This and the two next forms dropped D_3. ६. Dropped Nc_2. ७. त्रिभिर्वा व्यवधाने न भवति । Dc_3; त्रिभिर्वा Dc_4.

दोषन्नादेशः । दोष्णः । दोषः । दोष्णा । दोषा । दोषभ्याम् । दोर्भ्याम्[1] । इत्यादि । क्षा[2]न्तस्य न रुत्वमिति केचित् । '[3]स्कोः संयोग—' इति कलोपं प्रति कत्वस्यासिद्धत्वात् [4]संयोगान्तलोपः । 'व्रश्च—' इति ष[5]ः । जश्त्वचर्त्वे[6] । विविट्–ड् । विविक्षौ । [7]विविड्भ्याम् । विविट्सु । 'स्कोः—' इति कलोपः । तट्–ड् । तक्षौ[8] । तड्भ्याम् । त[9]ट्सु ।

डोस् । डित्त्वात् टिलोपः । षत्वम् । रुत्वं प्रति षत्वस्यासिद्धत्वात् रुत्वम् । दोष्ण इति । 'अल्लोपो न' इत्य[10]ल्लोपः । 'रषाभ्याम्—' इति णत्वम् । दोषभ्यामिति 'न लोपः प्रातिपदिकान्तस्य' इति नलोपः । 'स्कोः—' इत्यादि । व्रेष्टुमिच्छतीत्यर्थे विश प्रवेशने अस्मात् सनि 'हलन्ताच्च' इति कित्त्वे द्वित्वे 'व्रश्च—' इति षत्वे 'षढोः कः सि' इति कत्वे 'आदेशप्रत्यययोः' इति सस्य षत्वे क्विपि अल्लोपे प्रातिपदिकत्वात् सौ तल्लोपे च सति 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण प्राप्तं कलोपं प्रति 'षढोः—' इति प्राप्तस्य कत्वस्य पूर्वत्रासिद्धन्यायेनासिद्धत्वात् 'संयोगान्तस्य लोपः' इति सकारस्य लोप इत्यर्थः । ततश्च निमित्ताभावे नैमित्तिकस्याप्यभाव इति षत्वकत्वाभा[11]वे विविश् इति स्थिते 'व्रश्च—' आदिना तस्य शस्य ष इत्यभिप्रेत्याह । 'व्रश्च—' इति ष इति । 'स्कोः—' इति कलोप इति । तक्षतीति तक्षू तनूकरणे क्विप् । सु । त[12]क्ष् इति स्थिते संयोगादिभूतस्य तस्य 'स्कोः—' इति कलोप इत्यर्थः । ततः षस्य जश्त्वम् । डः । 'वावसाने' इति चर्त्वम् ।

---

१. दोर्भ्याम् दोषभ्याम् । दोषसु । दोष्षु । दोःषु P, C, D_5. २. क्षान्तस्य... ...केचित् dropped D_1, D_2, D_3. ३. 'स्कोः—' इति D_1, D_2. ४. संयोगान्तस्य D_2. ५. षत्वम् C. ६. After it—'षढोः कः सि' इति कत्वम् D_5. ७. C has विविक्षः । विविक्षम् । विविक्षौ । विविक्षः । विविक्षा before it; D_1, D_2 have विविक्षः before it. ८. After it—तक्षः D_1, D_2. ९. तट्सु dropped D_4, D_5. १०. °त्यल्लोप Nc_2, Dc_4. ११. °भावेपि Dc_3. १२. तक्ष् सु Dc_3.

[1]गोरट्-ड् । गोरक्षौ । गोरक्षः[2] । रक्षतेः संयोगान्तलोप इति के[3]चित् । 'संयोगान्तस्य लोपः' । गोरक्-ग्[4] । 'स्कोः—' इति कलोपं प्रति कुत्वस्यासिद्धत्वात् [5]संयोगान्तलोपः । यि[6]यक्-ग् । यियक्षौ । यियक्षः । यियग्भ्याम् । यियक्षु । एवं विवक्दि[7]धक्षादयः ।

गोरडिति । गां रक्षतीति गोरट् । पूर्ववत् । रक्षतेरिति । तथा च मुग्धबोधे । 'रक्षतेः संयोगादिलोपो निषिद्धः स्यादेः[8] सोलोपः षेढन्यूरक्षः[9]' इति । 'स्कोः—' इत्यादि । पक्तुमिच्छतीत्यर्थे पचः सनि द्वित्वे अभ्यासस्येत्वे 'चोः कुः' इति कुत्वे षत्वे क्विपि सौ तल्लोपे च[10] 'स्कोः संयोगाद्योरन्ते च' इति संयोगादिककारस्य प्राप्तं लोपं प्रति 'चोः कुः' इति कुत्वस्य पूर्वत्रासिद्धन्यायेनासिद्धत्वात् संयोगादिकस्याभावेन तल्लोपाप्राप्तेः 'संयोगान्तस्य लोपः' इति सस्य लोप इत्यर्थः । 'चोः कुः' इति चस्य कुत्वम् । एवमित्यादि । वक्तुमिच्छतीति विवक् । दग्धुमिच्छतीति दिधक् इत्यादयोन्येपि पिपक् इतिवत् ज्ञेया इत्यर्थः ।

इति षान्ताः ॥

---

१. Before it—षढाभ्यामन्यस्थाने जातस्य रक्षतेश्च ककारस्य संयोगादेर्लोपो नेति केचित् । संयोगान्तस्य लोपः । यियक्-ग् । यियक्षौ । यियक्षः । यियग्भ्याम् । यियक्षु । गोरक्-ग् । गोरक्षौ । गोरक्षः । गोरट्-ड् । गोरड्भ्याम् । गोरग्भ्याम् । इत्यादि । एवं विवक्ष्दिधक्षादयः । C. २. Dropped D_1, D_3. ३. एके D_1, D_2, D_3. ४. After it—गोरक्षौ । गोरक्षः । गोरक्षा । गोरग्भ्याम् D_2. ५. संयोगान्तस्य लोपः D_2, D_4, D_5. ६. पिपक्-ग् । पिपक्षौ । पिपक्षः । पिपग्भ्याम् । पिपक्षु D_3. ७. दिदृक्षा° B_2. ८. स्यादेशोलोपः । को षढ &c. Dc_3. ९. को षढन्यरक्ष इति Dc_4. १०. च सति Dc_4.

रुत्वम् । उपधादीर्घः[1] । सुपीः । सुपिसौ । सुपीभ्र्याम् । सुपीस्सु । सुपीःसु । एवं सुतूः[2] । विद्वान्[3] । हे विद्वन् । विद्वांसौ । विद्वांसः । विद्वांसम् । विद्वांसौ ।

वसोः संप्रसारणम् ॥६।४।१३१॥

वस्वन्तस्य भस्य संप्रसारणं स्यात् ॥ पूर्वरूपत्वम् । षत्वम्[4] । विदुषः । विदुषा । वसुस्रंस्विति दत्वम् । विद्वद्भ्याम् । इत्यादि[5] ।

रुत्वमिति । सुष्ठु पेसतीति विग्रहे पिस गत्याम[6]स्मात् सुपूर्वात् क्विपि सौ तल्लोपे च सुपिस् इति स्थिते 'झलां जशोऽन्ते' इति जश्त्वं प्रत्यसिद्धमपि नाप्राप्ते जश्त्वे आरभ्यमाणत्वात् तस्य बाधकमिति 'ससजुषो रुः' इति रुत्वमिति भावः । उपधादीर्घ इति । 'र्वोरुपधाया दीर्घ इकः' इत्युपधादीर्घत्वमित्यर्थः । सुपीःषु सुपीष्षु इति 'वा शरि' इति वा विसर्गे[7] 'नुम्विसर्जनीयशर्व्यवायेपि' इति षत्वम् । सुतूरिति । सुष्ठु तोसतीति विग्रहे तुस् शब्दे अस्मात् क्विबादि पूर्ववत् । विद्वानिति । वेत्तीति विग्रहे विदेर्लट् । तस्य शता । तस्य 'विदेः शतुर्वसुः' इति वसुः । ततः प्रातिपदिकत्वात् सुः । उगित्त्वान्नुम् । 'सान्तमहतः—' इति दीर्घः । परमपि रुत्वमसिद्धमिति तद्बाधित्वा संयोगान्तलोपः । तस्यासिद्धत्वात् नलोपाभावः । 'हे विद्वन्निति । 'असंबुद्धौ' इत्यनुवृत्तेर्न दीर्घः ।

वसोः । प्रत्ययग्रहणे परिभाषया तदन्तस्य कार्यं स्यादित्यभिप्रेत्याह । वस्वन्तस्येति । पूर्वरूपत्वमिति । 'संप्रसारणाच्च—' इति । षत्वमिति । 'आदेशप्रत्यययोः' इति ।

---

१. उपधाया दीर्घः B_2. २. P has सुतुसौ and D_2 सुतुसौ । सुतुसः after it. ३. B_1, D_1 drop हे विद्वन्. ४. Dropped in B_1. ५. B_1 drops it. ६. गत्याम् । तस्मात् Dc_4. ७. विसर्गः Bc_1.

पेचिवान् । पेचिवांसौ[1] । वस्य उत्वादिडभावः । पेचुषः । पेचुषा । पेचिवद्भ्याम् । इत्यादि ।

जगन्वान्[4] । जगन्वांसौ[5] । वस्य उत्वे तन्निमित्तस्य नस्य मत्वम् ॥

पेचिवानिति । डुपचष् पाके इत्यस्माल्लिट् । 'क्वसुश्च' इति तस्य क्वसुरादेशः । 'लिटि धातोः' इति द्वित्वम् । 'अत एकहल्मध्ये—' इत्यादिनैत्वाभ्यासलोपौ 'वस्वेकाजाद्घसाम्' इति इडागमः । नुमादि-पूर्ववत् । **वस्य उत्वादिडभाव** इति । पेच्वस् शस् इति स्थिते 'वसोः—' इति संप्रसारणेन वस्य उत्वाद्वलादित्वविघातात् निमित्ताभावे नैमित्तिक-स्याप्यभाव इति न्यायेन इडभाव इत्यर्थः । ननु चैकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ग्रहणमिति परिभाषया 'विदेः शतुर्वसुः' इत्यस्यैव वसोः संप्रसारणं स्यात् न द्व्यनुबन्धकस्य क्वसोः तत् कथं पेचुष इति क्वसुरुदाहृत इति चेदुच्यते । शत्रादेशस्य वसोरुकारानुबन्धकरण-सामर्थ्यात् क्वसोरपि ग्रहणम् । तद्धि क्वसुना सामान्यग्रहणार्थं क्रियते । ननु चोगित्कार्यार्थं तत् स्यात् । मैवम् । उगित्कार्यस्य स्थानिवद्-भावेनापि सिद्धत्वात् ।

जगन्वानिति । गमेर्लिट् । क्वसुः । द्वित्वम् । चर्त्वम् । 'म्वोश्च' इति मस्य नत्वम् । वस्येत्यादि । जगम् वस् शस् इति स्थिते वस्य संप्रसारणे उत्वे कृते तन्निमित्तस्य वन्निमित्तस्य[7] 'म्वोश्च' इत्यनेन प्राप्तस्य नस्य मत्वमिति निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायेन नस्याभावेन पूर्वस्थितो म एव स्थित इत्यर्थः ॥

---

१. C has after it पेचिवांसः। पेचिवांसम् । पेचिवांसौ. २. वस्य उत्वे वसो वलादित्वनिवृत्तौ तन्निमित्तस्येटोऽप्यभावः B_1. ३. Dropped B_1, D_1. ४. Before it—म्वोश्च ॥८।२।६५॥ मकारवकारयोः परतो मान्तस्य धातोर्मस्य नः स्यात् ॥ P, C, D_2, B_1, B_2. ५. After it—जगन्वांसः । जगन्वांसम् । जगन्वांसौ । C. ६. °भावेन Bc_1. ७. वस्य Dc_1, Dc_2.

गमहनजनखनघसां लोपः क्ङित्यनङि ॥६।४।९८॥

एषामुपधाया लोपः[1] स्यादजादौ क्ङिति न त्वङि ॥ जग्मुषः । जग्मुषा । जगन्वद्भ्याम् । इत्यादि[2] । एवं[3] जघन्वान् । सान्तमहत इति महच्छब्दसाहचर्यात् सान्तधातोर्न दीर्घः । सुहिन् । सुहिंसौ । सुहिन्भ्याम्[4] । इत्यादि[5][6] । ध्वत्-द्[7] ।

ध्वसौ[8] । ध्वद्भ्याम् । इत्यादि[9] । एवं स्रत्-द्[10] । उक्थशाः । उक्थशासौ । उक्थशोभ्याम्[11] । इत्यादि ।

गम । **अनङीति** । अङि अजादौ प्रतिषेधः । तेन तत्तुल्यजातावजादावेव कार्यं विज्ञायते । नञिव युक्तन्यायेनेत्येतच्चेतसि कृत्वाह[12] । **अजादौ क्ङितीति** । **जग्मुष इति** । ननु च संप्रसारणस्य भाश्रयस्य बहिरङ्गत्वेनान्तरङ्गे उपधालोपे कार्ये असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषयासिद्धत्वात् अजादित्वाभावेनोपधालोपो न स्यात् । मैवम् । संप्रसारणस्य भिन्नाश्रयत्वेनादोषः । समानाश्रयत्वे ह्यसिद्धत्वं स्यात् । **जघन्वानिति** । हन्तेर्लिट् । क्वसुः । द्वित्वम् । 'अभ्यासाच्च' इति कुत्वम् । **सुहिन् इति** । हिसि हिंसायाम् । इदित्वान्नुम् । संयोगान्तलोपः । **ध्वदिति** । स्रंसु ध्वंसु अवस्रंसने । क्विप् । 'अनिदिताम्—' इति न्लोपः[13] । 'वसुस्रंसुध्वंसु—' इति दत्वम् । **उक्थशा इति** । उक्थानि उक्थैर्वा शंसति । 'मन्त्रे श्वेतवहोक्थशस्—' इति निपातः । श्वेतवाहादित्वाद् डस् ।

---

१. अकारलोपः D_2. २. B_1, D_1 drop it. ३. Dropped D_3. ४. C. has सुहिंसः । सुहिंसम् । सुहिंसौ । सुहिंसः । सुहिंसा before it; D_2 has सुहिंसः । सुहिंसा before it. ५. B_1, D_1 drop it. ६. After it—अधातोरित्युक्तेर्नुम् न P; C,. B_1 (र्न नुम् B_1). ७. ध्वन् D_1, B_2. ८ ध्वसः । ध्वसा before it in C. ९. B_1, D_1 drop it. १०. स्रन् D, C has उक्थशासः । हे उक्थशाः । हे उक्थशः before it B_2; D_2 have उक्थशासः before it. ११. B_1, D_1 drop it. १२. युक्तमन्यसदृशार्थे तथा ह्यर्थे गतिः । अब्राह्मणमानयेति ब्राह्मणसदृशः क्षत्रियादिरानीयते । न लोष्टादिरिति न्यायेनेत्येतच्चेतसिकृत्वाह ॥ Dc_4. १३. नलोपः Dc_3.

पुंसोसुङ् ॥७।१।८९॥

पुंसोन्तस्यासुङ् स्यात् सुटि ॥ उङावितौ । पुमान् । हे पुमन् । पुमांसौ । पुमांसः । पुमांसम् । पुमांसौ । पुंसः । पुम्भ्याम्[2] । इत्यादि । ऋदुशनसित्यनङ् । उशना । उशनसौ । उशनसः । संबुद्धौ वानङ् वाच्यो[4] न लोपश्च वा* । हे उशन[5] । हे उशनन् । हे उशनः । उशनसौ । उशनोभ्याम् । इत्यादि । अनेहा । हे अनेहः । अनेहसौ[6] । एवं पुरुदंशा[7] । वेधाः । हे वेधः । वेधसौ । इत्यादि । अधातोरित्युक्तेर्न दीर्घः । सुवः । सुवसौ । सुवोभ्याम्[9] । सुवःसु । सुवस्सु ।

पुंसः । उङावितावितिं । उकार उगित्कार्यार्थः । ङकारोन्तादेशार्थः । असुङ्युपदेशिवद्वचनं कार्यम् । तेन परमपुमानित्यत्राकृत एव समासान्तोदात्तत्वे उपदेशावस्थायामेव विभक्त्युत्पत्तेः प्रागसुङ् स्यात्तदनन्तरं समासान्तोदात्तत्वं ततश्च परमपुमानिति नित्यमन्तोदात्त एव स्यात् । पुमानित्ययं पुनः पुनातेर्मुम्सकौ निर्ह्रस्वश्चेत्येवं[10] व्युत्पाद्यते । नितेन[11] नित्स्वरेणाद्युदात्त एव स्यात् नान्तोदात्तः । पुम्भ्यामिति । संयोगान्तस्य लोपः । उशनस इत्यादि । एतच्च 'अनङ् सौ' इत्यत्रोपपादितम् । तथा चोक्तम् ।

'संबोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
माध्यंदिनिर्वष्टि गुणं त्विगन्ते नपुंसके व्याघ्रपदां वरिष्ठः' ॥ इति ।

अनेहेति । 'ऋदुशनस्—' इत्यनङ् । वेधा इति । 'अत्वसन्तस्य—' इति दीर्घः । अधातोरित्युक्तेरिति । 'अत्वसन्तस्य चाधातोः' इति । सुव इति । सुवस्ते इति विग्रहे वस आच्छादने । अस्मात् क्विप् ।

---

१ °स्यासुङादेशः C. २. C has पुंसा before it; P has संयोगान्तस्य लोपे मोनुस्वारे वा पदान्तस्येति परसवर्णे before it. ३. B_1 drops it. ४. B_1 drops वाच्यः; अनङस्य नलोप° D_2. ५. Dropped D_1, B_2, D_4. ६. अनेहसः । अनेहसम् । अनेहसौ । अनेहसः । अनेहसा । अनेहोभ्याम् । इत्यादि after it in C. ७. Before it—अत्वसन्तस्य चाधातोः । D_5. ८. B_1 drops it; C has वेधसः before it. ९. C has हे सुवः and B_2 सुवसः before it. १०. नित् ह्रस्वश्चे° Dc_3. ११. निति वाते निल्स्वरेण Dc_3, Dc_4.

अदस औ सुलोपश्च ॥७।२।१०७॥

अदस [1]औकारोन्तादेशः स्यात् सौ परे सुलोपश्च । तदोः ससाविति दस्य सः । असौ । [2]औत्वप्रतिषेधः साकच्काद्वा [3]वक्तव्यः। सादुत्वं च[4] । यदौत्वाभावस्तदा सात्परस्योत्वम् । [5]असकौ । असुकः । त्यदाद्यत्वम् । [6]पररूपत्वम् । वृद्धिः ।

अदसोसेर्दादु दो मः ॥८।२।८०॥

अदसोसान्तस्य दात्परस्य उवर्णो दस्य च मः स्यात् ॥ स्थानेन्तरतम इति ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घ ऊकारः । अमू । जसः शीभावः । आद्गुणः ।

अदसः । ननु चादःशब्दात् परस्य सोरौत्वं विधीयतां ततश्च सुलोपो न विधेयः स्यात् । न च वाच्यं सोरौत्वे हे असौ ब्राह्मणीत्यत्र 'संबुद्धौ च' इत्येत्वं प्रसज्येतेति । 'बहुवचने झल्येत्' इत्यतः 'झलि' इति हि तत्रानुवर्तते इति चेदुच्यते । असकौ ब्राह्मणीत्यत्र 'प्रत्ययस्थात् कात्पूर्वस्य' इतीत्वं प्रसज्येत । असौ ब्राह्मणीत्यत्र 'औङ आपः' इति शीभावोपि प्रसज्येत । असकौ । असुक इति । 'अव्ययः सर्वनाम्नाम्—' इत्यकच् । त्यदाद्यत्वमित्यादि । अदस् औ इति स्थिते 'त्यदादीनामः' इत्यत्वम् । सस्य 'अतो गुणे' इति पररूपम् । 'वृद्धिरेचि' इति वृद्धिः । अदौ इति स्थिते । **अदसः** । अदसोनोस्त्र इति वक्तव्यम् । तथा चानोकारस्यासकारस्यारेफस्येत्यर्थः । तथा चादोत्रेत्यत्रौकारान्तत्वान्मुत्वं न । अदस्यतीत्यत्र सकारान्तत्वान्न । अद इत्यत्र रेफान्तत्वान्नेति सिद्धं स्यात् । 'स्थानेन्तरतमः' इत्यादि प्रमाणतोन्तरतमत्वादित्यर्थः । एतच्च 'ऋत उत्' इत्यत्र प्रतिपादितम् । **जसः शीभाव इत्यादि** । अदस् जस् इति स्थिते त्यदाद्यत्वे पररूपत्वे च सति 'जसः शी' इति शीआदेशः । 'आद्गुणः' इति गुणः ।

---

१. औकारान्तादेशः D_2. २. अत्व° D_5. ३. वाच्यः B_1, D_3. ४. C drops it. ५. असुकौ D_5. ६. पररूपत्वं dropped D_2. ७. Dropped Dc_3. ८ पररूपे सति Dc_1, पररूपत्वे कृते सति Dc_2, Dc_3.

एत ईद् बहुवचने ॥८।२।८१॥

अदसो दात्परस्यैत ईत्[1] स्यात्[2] दस्य च[3] मः[4] बह्वर्थोक्तौ[5] । अमी । पूर्वत्रासिद्धमिति[6] न्यायेन विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । उत्वमत्वे कृते[7] घिसंज्ञायां नाभावः ।

न मु ने ॥८।२।३॥

नाभावे[8] कर्तव्ये कृते च सति[9] मुभावो नासिद्धः स्यात्[10] ॥ अमुना ।

एत ईत् । अत्र बहुवचनमिति । यदि पारिभाषिकं बहुवचनं गृह्येत तदा बहुवचने पर इत्यर्थः स्यात् तथाचामीभिरित्यत्रैवेत्वं स्यादमी आसत इत्यत्र न स्यात् । अतोन्वर्थं बहुवचनं गृह्यते बहूनामर्थानां वचनं बहुवचनमित्यभिप्रेत्याह । बह्वर्थोक्ताविति । पूर्वत्रेत्यादि । विभक्तिकार्यस्य सपादसप्ताध्यायीस्थितत्वात् 'अदसोसेर्दादु दो मः' इत्यस्य[11] त्रिपादीस्थितत्वादिति भावः । उत्वे मत्वे च कृत इत्यादि । अदस् टा इति स्थिते त्यदाद्यत्वे प्रथमम् 'अदसोसेः—' इत्युत्वे मत्वे च कृते उकारान्तत्वेन 'शेषो घ्यसखि' इति घिसंज्ञायां सत्याम् 'आङो नास्त्रियाम्' इति नाभावः । टा इत्यस्येत्यर्थः । ननु च पूर्वत्रासिद्धन्यायेन विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे इत्युक्तत्वात् कथमुच्यते उत्वे मत्वे च कृते इत्यादि । नैष दोषः । यदयं सूत्रकारो 'नमुने' इति सूत्रेण नाभावे कार्ये मुभावस्यासिद्धत्वं निषेधयति तत् ज्ञापयति टाप्रत्यये प्रथमं मुभावः पश्चाद्विभक्तिकार्यमिति ।

न मु ने[12] । ननु च 'अमुना इत्यत्र 'सुपि च' इति दीर्घत्वं प्रति मुभावस्यासिद्धत्वात् दीर्घः स्यादेवेत्याशङ्क्याह । कृते च सतीति ।

---

१. ईः B_2. २. B_1 drops it. ३. D_1 drops it. ४. B_1, D_3 have स्यात् after it. ५. बह्वर्थोक्ते D_1. ६. D_1, B_2, D_4 drop इति. ७. च कृते D_1; उत्वे मत्वे च कृते Com. ८. नभावे D_2. ९. C drops सति. १०. After it—नाभावे कृते 'सुपि च' इति दीर्घे कर्तव्ये मुभावस्यासिद्धत्वं नेष्यते । P; C, B_1, D_4. ११. इत्यस्य च Bc_1. १२. नमु नेति Dc_3.

अमूभ्याम् । 'नेदमदसोरकोः' । अमीभिः । अमुष्मै । अमूभ्याम् । अमीभ्यः । अमुष्मात् । अमूभ्याम् । अमीभ्यः । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ।

इति हलन्ताः पुंलिङ्गाः ॥

नेति योगविभागः कार्यस्तेन द्विवचने परसवर्णः सिद्धः सत्यन्ता पदाधिकारे द्वित्वे लत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि स्युः । गरोगरः । गलोगलः । द्रोग्धा २ । द्रोढा २ । नुन्नः २ । नुत्तः २ । अभिनः २ । अभिनत् २ । मातुः स्वसा २ । मातुः ष्वसा २ । क्षीरपाणम् २ । क्षीरपानम् २ । वाङ्नयनम् २ । वाग्नयनम् २ । वाक् छयनम् २ । वाक् शयनम् २ । अन्यथा लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने पश्चादनिष्टोऽपि तद्विकल्पः स्यात् । गरो गलः[1] । गलो गर[2] इति । इत्यादीनि सिद्धवद्वक्तव्यानि सिद्धानि[3] । अमूभ्यामित्यादि । अदस्भ्याम् अदस् भिस् अदस् ङे इत्यादौ विभक्तिकार्ये प्रथमं कृते अदाभ्याम् । अदेभिः । अदस्मै इत्यादौ स्थिते पश्चादुत्वमत्वे स्यातामिति ज्ञेयम् ॥

इति सान्ताः ॥

यान्तलान्तादयोऽप्रसिद्धत्वान्नोदाहृताः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेर्गुःप्रसादे सुविशदमिह पुल्लिङ्गशब्दा हलन्ताः[4] ॥

---

१. गरः Dc3. २. गलः Dc3. ३. सिद्धानि वक्तव्यानि । Dc4.
४. सुविशदमिह पुल्लिङ्गशब्दा हलन्ताः । Dc4.

नहो धः ॥८।२।३४॥

नहो हस्य धः स्यात् झलि पदान्ते च ॥ उपानत्–द् । उपानहौ । [1]उपानहः । उपानहा । उपानद्भ्याम् । [2]इत्यादि । क्विबन्तत्वात् कुत्वम् । उष्णिक्–ग् । उष्णिहौ । [3]उष्णिग्भ्याम् । [4]इत्यादि ।

'दिव औत्' ॥ द्यौः । दिवौ । दिवः । [5]दिवो वात्वममीति केचित् । द्याम् । दिवम् । 'दिव उत्' । द्युभ्याम् । उवर्ण एव स्वरे दिव उदिति केचित् । द्यूर्णुत् । अन्यत्र [6]दिवीशः । गीः । गिरौ । [7]गिरः । एवं [8]पूः ।

नहो धः । नह इति । णह बन्धने । अस्य । **उपानदिति** । उपनह्यते बध्यते इत्युपानत् । संपदादित्वात् क्विप् । 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इति पूर्वस्य दीर्घः । **क्विबन्तत्वादिति** । उष्णिक्शब्दस्य 'ऋत्विक्—' इत्यादिना क्विन्नन्तस्य निपातनादिति भावः ।

इति हान्ताः ॥

उवर्ण एव स्वर इति । तथा च **मुग्धबोधे** उक्तम् । 'उहस्युङ्' इति । **द्यूर्णुदिति** । दिवमूर्णोति द्यूर्णुत् ॥

वान्ताः ॥

गीरिति । गृणातीति गॄ शब्दे । क्विप् । ऋत इत् । 'उरण् रपरः' । 'र्वोरुपधाया' दीर्घ [9]इकः[10] । **एवं पूरिति** । पूर्यत इति पूः ।

---

१. D_1, D_3, D_4 drop उपानहः । उपानहा; D_2 drops उपानहा; After it—उपानहम् । उपानहौ । उपानहः । D_5. २. B_1, D_1, B_2, D_4 drop it. ३. उष्णिहः for उष्णिग्भ्याम् । इत्यादि B_2. ४. D_1, D_2, D_3 drop it. ५. B_1, D_3 have द्याम् only for दिवो........ दिवम् ।; B_2 drops from दिवो......द्युभ्याम्; D_2, D_5 drop from दिवो to केचित् . ६. After this—द्याम् । दिवम् । दिव उत् । द्युभ्याम् B_2. ७. C has गिरम् । गिरौ । गिरः । गिरा । हलि चेति दीर्घः । गीर्भ्याम् । इत्यादि । गिरः dropped D_3. ८. धूः D_2. ९. इति दीर्घः Nc_2. १०. After it—इति दीर्घः Dc_4, Dc_3.

चतुरश्चतस्रादेशः । स्वस्रादित्वान्न ङीप्[1] । चतस्रः २ । चतसृभिः । चतसृभ्यः २ । चतसृणाम् । चतसृषु ।

किमः कादेशे टाप् । का । के । काः । इत्यादि । सर्वावत् ।

यः सौ ॥७।२।११०॥

इदमो दस्य यः स्यात् सौ परे[2] ॥ इदमो मः । इयम् । त्यद्याद्यत्वम्[3] । टाप् । दश्चेति मः । इमे । इमाः । इमाम् । इमे । इमाः । अनादेशः[4] । अनया । हलि लोपः । आभ्याम् । आभिः । अस्यै । आभ्याम् । आभ्यः । अस्याः[5] । अनयोः । आसाम् । अस्याम् । अनयोः । आसु । अन्वादेशे[6] तु । एनाम् । एने । एनाः । एनया । एनयोः २ ।

पृ अस्मात् संपदादित्वात् क्विप् । अथवा पिपर्तीति 'भ्राजभास—' इति क्विप् । 'उदोष्ठ्यपूर्वस्य' इत्युत् । रपरः । दीर्घः । **चतस्र** इति । 'अचि र ऋतः' इति रः । **चतसृणामिति** । 'न तिसृचतसृ' इति दीर्घनिषेधः ॥

रान्ताः ॥

किम इति । 'किमः कः' इति कादेशे 'अजाद्यतष्टाप्' इति टाप् । **सर्वावदिति** । आबन्तसर्वशब्दवत् ।

यः सौ । 'इदोय् पुंसि' इत्युत्तरसूत्रे 'पुंसि' इति वचनात् क्लीबे तु सोर्लुकि सोरभावात् स्त्रियामयं यकारः । **इदम** इति । 'इदमो मः' इति सूत्रेण त्यदाद्यत्वापवादो म इत्यर्थः । **अनादेश** इति । 'अनाप्यकः' इत्येतेन[7] । **अन्वादेशे**[8] **त्विति** । 'द्वितीयाटौस्स्वेनः' इति एनादेशे तु एनामित्यादि स्यादित्यर्थः ॥

मान्ताः ॥

---

१. ङीप्टापौ D_4. २. D_1, D_2, D_3, B_2 drop it. ३. त्यद्याद्यत्वे D_2, B_1, P, C. ४. अनादेशः dropped D_2. ५. C, D_1 have अस्याः। आभ्याम्। आभ्यः before it. ६. अन्वादेश Dc_3, ७. इत्यनेन Dc_3. ८. अनादेशे Dc_3.

स्रक्-ग् । स्रजौ[1] । स्रजः[2] । स्रग्भ्यामित्यादि[3] । त्यदाद्यत्वम् । टाप् । या । त्ये । त्याः । इत्यादि[4] । सर्वावत् । एवं तद् यद् एतद्[5] । वाक्-ग् । वाचौ । वाचः[6] । [7]हे वाक्-ग् । [8]वाग्भ्याम् । वाक्षु । अप्शब्दो [9]बहुवचनान्तः । 'अप्तृन्–' इति दीर्घः । आपः । अपः ।

अपो भि ॥७।४।४८॥

अपस्तकारः स्याद् भादौ [10]प्रत्यये [11]परे । अद्भिः । अद्भ्यः । अपाम् । अप्सु ।

स्रगिति । 'ऋत्विक्—' इति क्विन्नन्तो निपात्यते ॥

जान्ताः ॥

त्यदाद्यत्वमिति । त्यद् स् इति स्थिते [12]अत्वन्तष्टाबित्यर्थः । स्येति । 'तदोः स सौ' इति तस्य सः ॥

दान्ताः ॥

वागिति । वक्त्यनया । 'क्विब् वचि—' इत्यादिना क्विप् दीर्घश्च । 'चोः कुः' इति कुत्वम् ॥

चान्ताः ॥

अपो भि । भीति किम् । अप्सु ॥

पान्ताः ॥

---

१. D_1 drops स्रजः. २. C has स्रजम् । स्रजौ । स्रजः । स्रजा before it स्रग्भ्याम् । इत्यादि—dropped D_4; इत्यादि dropped D_5. ३. B_1 has स्रक्षु after इत्यादि. ४. Before it—त्याम् । त्ये । त्याः । D_3. ५. After it—प्रभृतयः C; तद् एतद् यद् शब्दाः B_2; एतद् dropped D_3; एतद् । यद् । D_4, D_5. ६. D_1 drops it. ७. D_1 drops it; D_2 drops this and the next two forms. ८. Before it—वाचम् । वाचौ । वाचः । वाचा । C; D_4 and D_5 drop this and वाक्षु ।. ९. नित्यं बहुवचनान्तः C, D_1, D_2, B_2. १०. Dropped B_1. ११. Dropped B_2, D_4, D_5. १२. अत्वन्ततष्टा° Nc_1, Bc_1.

दिक्-ग् । दिशौ । दिशः[1] । दिग्भ्याम्[2] । एवं दृक्-ग् । दृशौ[3] । दृशः[4] ।

त्विट्-ड् । त्विषौ । त्विषः । त्विड्भ्याम्[5][6] । सजूः । सजुषौ[7] । सजुषः[8] । सजूर्भ्याम्[9] । आशीः[10] । आशिषौ । आशिषः[11] । आशीभ्याम्[12] । इत्यादि ।

दिगिति । 'ऋत्विक्—' इति क्विन्नन्तो निपात्यते । दृगिति । दृश्यते अनया दृगिति क्विन्नन्तः[13] । क्विन्प्रत्ययो यस्माद्विहितस्तस्यान्यत्रापि प्रत्यये पदान्तस्य कुत्वम् ॥

शान्ताः ॥

त्विडिति । त्विष् दीप्तौ । क्विप् । जश्त्वचर्त्वे । सजूरिति । जुषेर्भावे क्विप् । बहुव्रीहौ सहस्य सभावः । सप्रीतिरित्यर्थः । 'ससजुषोरुः' इति रुत्वम् । 'र्वोरुपधायाः—' इति दीर्घः । आशीरिति । आङः शास इच्छार्थत्वात् क्विप् । शास आशासश्च क्वावुपधाया इत्वं वाच्यमितीत्वम् । 'शासिवसि—' इति षः । रुत्वं प्रति षत्वस्यासिद्धत्वात् रुत्वम् । 'र्वो—' इति दीर्घः ।

षान्ताः ॥

---

१. Dropped P; After it C has—दिशम् । दिशौ । दिशः । दिशा । दिग्भ्याम् । इत्यादि. २. दिग्भ्याम् dropped D_4, B_1, P. ३. दृशौ । दृशः dropped D_1, D_4, D_5, B_2. ४. After it—दृशेश्च वक्तव्यमिति क्विन् C, P. ५. Before it—त्विषम् । त्विषौ । त्विषः । त्विषा and after it इत्यादि । C. ६. After it—त्विट्सु B_1, P. ७. सजुषा । सजूर्भ्याम् D_1; सजुषौ । सजूर्भ्याम् B_2. ८. Dropped D_2, D_3, D_4. ९. Before it—सजुषा C. १०. एवमाशीः for आशीः to इत्यादि C, B_2, D_3; एवमाशीः D_1, D_2, D_4. ११. आशिषः to इत्यादि dropped D_2. १२. आशीर्भ्याम् । इत्यादि । dropped D_5. १३. क्विबन्तः Bc_1, Dc_3.

असौ[1] । त्यदाद्यत्वम् । टाप् । शीभावादि । उत्वमत्वे । अमू । अमूः । अमूम् । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमूष्यै । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमूभ्याम् । अमूभ्यः । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् । अमुयोः । अमूषु ॥

इति हलन्ताः स्त्रीलिङ्गाः ॥

असाविति । 'अदस औ सुलोपश्च' इत्यौकारादेशः सुलोपश्च । 'तदोः—' इति सः । त्यदाद्यत्वे टापि च कृते सर्वावत् विभक्तिकार्ये कृते उत्वे मत्वे चाग्रिमाणि रूपाणि स्युः ॥

इति सान्ताः ॥

याँन्तादयोऽप्रसिद्धाः[3] ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेगुः प्रसादे सुविशदमबलालिङ्गशब्दा हलन्ताः ॥

---

१. C has before it—अदस औः सुलोपश्चेति औकार अन्तादेशः स्यात् । तदोः स साविति सः । २. B1 omits टाप्. ३. वान्ता Dc3.

स्वेमोर्लुक्[१] । दत्वम् । स्वनडुत्–द् । स्वनडुही । 'चतुरनडुहोः—' इत्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । वाः । वारी । अझलन्तत्वान्न नुम् । वारि । चत्वारि[४][५] । 'न लुमता–' इति कादेशो न । किम् । के । कानि । २ । इदम् । इमे । इमानि । २ । अन्वादेशे नपुंसकैकवचने[६] एनदिति वाच्यम् । एनत्–द् । एने । एनानि । शेषं[७] पुंवत् ॥

स्वमोर्लुगिति । स्वनडुह्शब्दात्परयोः 'स्वमोर्नपुंसकात्' इति लुक् । दत्वमिति । 'वसुस्रंसुध्वंसु–' इत्यादिना । तत्र तदन्तविधेरिष्टत्वात् । स्वनडुही इति । 'नपुंसकाच्च' इत्यौङः शीभावः । चतुरनडुहोरित्यामिति । तदन्तविधेरिष्टत्वात् । स्वनड्वांहीति । 'जश्शसोः शिः'। 'नपुंसकस्य झलचः' इति नुम् । पुनस्तद्वदिति । द्वितीयारूपाणि प्रथमावदिति भावः ॥

हान्ताः ॥

वारिति । रेफान्तो जलवाची[८] । चत्वारीति । 'चतुरनडुहोः–' इत्याम् ॥

रान्ताः ॥

न लुमतेति । कादेशो न[९] । किम् स् इति स्थिते सोर्लुकि कृते 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधात् 'किमः कः' इति विभक्तौ परतो विधीयमानः कादेशो न भवतीत्यर्थः । के । कानीति । कादेशे कृते ज्ञानवत् प्रक्रिया ॥ अन्वादेश इति । 'द्वितीया टौ स्वेनः' इत्येनः[१०]। एनदिति । नपुंसकैकवचने एनदिति वाच्यमिति वक्तव्यात् ॥

मान्ताः ॥

---

१. Before it—अथ नपुंसकलिङ्गा हलन्ताः । B_2. २. Dropped D_1. ३. Dropped D_1, B_2. ४. Before it—दण्डि । दण्डिनी । 'इन्हन्पूषार्यम्णां शौ' एषामङ्गानामुपधाया दीर्घः स्यात् शौ परे। दण्डीनि । बहुवृत्रहाणि २। बहुपूषाणि २। बह्वर्यमाणि ।. ५. After it B_2 has—गौणत्वे प्रियचतुः । प्रियचतुरी । प्रियचत्वारि ।. ६. अमो लुकि for नपुंसकैकवचने B_1; एनदिति नपुंसकैकवचने वक्तव्यम् P, B_2; इदमेतदोर्नपुंसके द्वितीयैकवचने एनदिति वाच्यम् C; From नपुंसकैक° to वाच्यम् dropped D_2, D_4. ७. शेषं पुंवत् dropped D_2. ८. °वाचीति Dc_3. ९. नेति Bc_1, Dc_3. १०. इत्यनेन Nc_2.

ब्रह्म। संबुद्धौ वा नपुंसकानां नलोपो [1]वाच्यः॥ *हे ब्रह्म। हे ब्रह्मन्। [2]ब्रह्मणी। [3]ब्रह्माणि।

अह्नन् ॥८।२।६८॥

अहन्नित्यस्य [4]रुः स्यात् पदान्ते॥ रुत्वस्यासिद्धत्वेन नलोपे प्राप्ते अह्नो नलोपप्रतिषेधो [5]वक्तव्यः। [6]अहः। विभाषा ङिश्योः। अह्नी। अहनी। अहानि। हे अहः। [7]अहोभ्याम्। [8]अहोभिः। दण्डि। दण्डिनी।

इन्हन्पूषार्यम्णां शौ ॥६।४।१२॥

[9]एषामङ्गानामु[10]पधाया दीर्घः स्यात् शौ [11]परे॥ दण्डीनि २। बहुवृत्रहाणि २। [12]बहुपूषाणि २। बह्वर्यमाणि २।

ब्रह्मेति। 'न लोपः प्रातिपदिकान्तस्य' इति नलोपः। ब्रह्माणीति। 'सर्वनामस्थाने चासंबुद्धौ' इति दीर्घः। अहन्निति। अहरित्यत्र रुत्वस्यासिद्धत्वादिति रुत्वस्येत्युपलक्षणं रेफस्यापि। **अहोभ्याम्।** 'नलोपः प्रातिपदिकान्तस्य' इति नलोपं प्रति पूर्वत्रासिद्धन्यायेन रुत्वस्य रेफस्य [13]चासिद्धत्वेन नलोपे प्राप्ते सतीत्यर्थः। एतत् सूत्रमहोभ्यामित्यादौ रुत्वविध्यर्थं पठितम्। अहरित्यत्र [14]तु स्यमोर्लुको जातत्वेन 'रोः सुपि' इति रोरपवादो रेफो भवति।

इन्हन्। एत[15]च्च सूत्रं नियमार्थमिति 'सौ च' इति सूत्रे प्रतिपादितम्। बहुवृत्रहादिशब्दनां बहुवृत्रघ्नेत्यादि रूपाणि पुंवत् ज्ञेयानि।

---

१. वक्तव्यः D_5. २. B_1 drops the forms. ३. C has इत्यादि after it. ४. रुत्वम् C. ५. वाच्यः B_1, D_3. ६. B_1 drops अहः। विभाषा ङीश्योः।. ७. अहोभ्याम्। इत्यादि। असृजः पदान्ते &c. B_2. ८. अहः सु in C; D_1, D_2, D_3, D_5, D_4 drop it. ९. एतेषा° C. १०. °मुपधादीर्घः B_1. ११. D_1 drops it. १२. बहुपूष। बहुपूष्णी। बहुपूषणी। बहुपूषाणि। बहुपूष्णा। बहुपूषभ्याम्। बह्वर्यम &c. similarly D_4. १३. रेफस्या° Dc_3. १४. तु Dropped Nc_2. १५. च dropped Nc_2.

असृजः पदान्ते कुत्वम् । सृजेः क्विनो विधानात् । विश्वसृजादौ प्रतिषेधोयम्[1] । असृक्–ग् । असृजी । असृञ्जि । 'पददन्—' इति वा असन् । असानि । असृजा । अस्ना । असृग्भ्याम् । असभ्याम्[2] । ऊर्क्–र्ग् । ऊर्जौ । ऊर्जः[3] शौ नुम् वेति केचित् । ऊर्जि । ऊंर्जि । बहूर्जि[4] नुम्प्रतिषेधः[5] । बहूर्जि कुलानि । अन्त्यात् पूर्वं नुममिच्छन्त्येके । बहूर्ञ्जि ।

असृज इति । ताम्बूलरसादिवन्मध्ये न सृज्यते सहजत्वादित्यसृक् रक्तम् । संपदादित्वात् क्विप् । तस्यासृजः पदान्ते कुत्वं स्यात् । सृजेः 'ऋत्विक्—' इत्यादिनासृगित्यत्र क्विनो विधानात् । क्विन् प्रत्ययो यस्माद्विहितस्तस्यान्यत्रापि प्रत्यये पदान्तस्य कुत्वमिति वचनादिति भावः । **न[6] त्वेवं विश्वसृडादाविति** । **प्रतिविधेयमिति** । विश्वसृडादौ कुत्वं नेति वचनमेव कर्तव्यमित्यर्थः । **ऊर्क्** । **ऊर्ग्** । इति । 'रात्सस्य' इति नियमान्न संयोगान्तलोपः । **ऊर्ज** इत्यादि । अर्वाचीनमतमेतत् । **बहूर्जि नुम्प्रतिषेध** इति । बहूर्जि इत्येतस्मिन्नुदाहरणे शौ परे नुमः प्रतिषेधो वाच्य[7] इत्यर्थः । **बहूर्जि कुलानीति** । बहव[8] ऊर्जो येषां तानि बहूर्जि । **अन्त्यादिति** । अन्त्यो जकारस्तस्मात्पूर्वं केचिदिच्छन्तीत्यर्थः । **बहूर्ञ्जि** इति । श्चुत्वं ञः । तथा च **महाभाष्ये** उक्तम् । 'तत्र बहूर्जि प्रतिषेधः । तत्र बहूर्जि प्रतिषेधो वक्तव्यः । बहूर्जि ब्राह्मणकुलानि । अन्त्यात् पूर्वं नुममेके इच्छन्ति ॥'

इति जान्ताः ॥

---

१. प्रतिषेधो विधेयः B_1. २. Dropped D_1. ३. ऊर्जः dropped B_2, D_2. ४. बहूर्जा P, D_4. ५. After it—वक्तव्यः D_3. ६. The reading of the Com. seems different; न त्वेवं विश्वसृडादावपि कुत्वं स्यादित्याशङ्क्याह । विश्वसृडादाविति Bc_1, Dc_4, Dc_3. ७. वक्तव्य Dc_3. ८. बहवो हि Dc_3.

त्यत् । त्ये । त्यानि । २ । तत् । ते । तानि । २ । यत् । ये[1] । यानि । २ । एतत् । अन्वादेशे[2] नपुंसके[3] [4]द्वितीयैकवचने एनदिति वाच्यम्[5] । एनत् ।

[6]गवाक्—ग् । [7]भसंज्ञायामकारलोपः । गोची । गवाञ्चि । तिर्यक्—ग् । तिरश्ची । तिर्यञ्चि । एवं [8]परे ।

त्यदित्यादि सोर्लुकि 'न लुमता—' इति [9]प्रत्ययनिषेधात् त्यदाद्यत्वं न ॥

दान्ताः ॥

गवागिति । गामञ्चतीति गवाक् । गोशब्दे उपपदे अञ्चतेः 'ऋत्विक्—' इत्यादिना क्विन् । तस्य लोपः । 'अनिदिताम्—' इति नलोपः । 'अवङ् स्फोटायनस्य' इति गोशब्दस्यावङादेशः । सवर्णदीर्घः । कुत्वम् । **भसंज्ञेति** । गवाच् औ इति स्थिते 'नपुंसकाच्च' इति औङः शी आदेशे 'यचि भम्' इति भसंज्ञा । **अकारलोप** इति । 'अचः' इति सूत्रेण । ततश्चावङभावे गोच् ई इति स्थिते गोची इति स्यात् । **गवाञ्चि** इति । गवाच् जस् इति स्थिते 'जसः[10] शी' । तस्य सर्वनामसंज्ञकत्वात् 'उगिदचाम्—' इति नुम् । गोचा । गवाग्भ्याम् । इति । **तिर्यगिति** । 'तिरसस्तिर्यलोपे' इति तिर्यादेशः । **तिरश्चीति** । 'अचः' इत्यकारलोपः । **तिर्यञ्चीति** । सर्वनामस्थानत्वान्नुम् । एवं परे । अन्ये प्राक् प्रत्यगित्यादयोऽप्येवमेव ज्ञेया इत्यर्थः ॥

चान्ताः ॥

---

१. D_1 B_2, D_2 drop ये । यानि. २. अन्वादेशे तु P; C, D_1; अन्वादेशे तु एनदिति D_3. ३. नपुंसकैकवचने D_1, D_5. ४. Before it—इदमेतदोः B D_4. ५. वक्तव्यम् B_1, B_2, D_3. ६. गवाक् । गोअक् । गोक् । गवाची । गोअची । गोची । गवाञ्चि । गोअञ्चि । गोञ्चि D_6. ७. भसंज्ञा । अकारलोपः । D_2. ८. एवं प्राक्प्रत्यगादयः B_1, D_2. ९. प्रत्ययलक्षण° Dc_4. १०. तस्य for जसः Dc_1.

यकृत् । यकृती । यकृन्ति । 'पद्दन्–' इति वा[1] यकन् । यकानि । यकृता[2] । यक्ना । यकृद्भ्याम् । यकभ्याम् । शकृत्–द् । शकृती । शकृन्ति । शकानि । शकृता । शक्ना । शकृद्भ्याम् । शकभ्याम्[3] । ददत् । ददती ।

वा नपुंसकस्य ॥७।१।७९॥

अभ्यस्तात् क्लीबात्परस्य शतुर्वा[4] नुम् स्यात् सर्वनामस्थाने ॥ ददन्ति । ददति । एवं जक्षज्जाग्रदादयः । तुदत् ।

आच्छीनद्योर्नुम् ॥७।१।८०॥

अवर्णान्तात्परस्य शतुर्नुम् वा स्यात् शीनद्योः परयोः ॥ तुदन्ती । तुदती । तुदन्ति ।

यकृन्तीति । झलन्तत्वान्नुम् । यक्नेति । 'अल्लोपो नः' इत्यल्लोपः[5] । शकृन्ति । शकानीति । 'पद्दन्—' इति वा शकृतः शकन्नादेशः । वा नपुं । अभ्यस्तादित्यादि । अभ्यस्तात् परस्य शतुर्नुम् वा स्यात् । क्लीबात् नपुंसकाद्विहिते[6] सर्वनामस्थाने परे इत्यर्थः ।

आच्छी । तुदन्तीति । तुद व्यथने । लटः शता[7] । शः[8] प्रत्ययः । अन्तरङ्गत्वादतो गुणे पररूपम् । ततो नुम् ।

---

१. Dropped D_1. २. यकृता to यकभ्याम् dropped D_2. ३. After it—इत्यादि C. ४. °र्नुम् वा स्यात् D_1, D_3, D_4, D_5. ५. इत्यलोपः Dc_1, Dc_2, Dc_3. ६. °द्विहितः Bc_1. ७. शतृप्रत्ययः। Dc_4. ८. शप्रत्ययः Bc_1.

भात् । भान्ती । भाती । भान्ति । पचत् ।

शप्श्यनोर्नित्यम् ॥७।१।८१॥

शप्श्यनोरात्परस्य शतुर्नुम्[1] नित्यं स्यात् शीनद्योः परयोः[2]। पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती[3] ।

स्वप् । स्वपी । 'अप्तृन्–' इति दीर्घः ।

भात् इत्यादि । भा दीप्तौ । अदादित्वाच्छपो लुक् । अत्र किंचिदाक्षेपसमाधानं **काशिकायां** वृत्तावुक्तम् । तथा हि । अत्रान्तरङ्गत्वादेकादेशे कृते अवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुम् । उभयत आश्रये नान्तादिवदित्यन्तादिवद्भावो नास्ति । भूतपूर्वगत्याश्रयणे तु अदती घ्नतीत्येवमादिष्वतिप्रसङ्ग इति । अत्र समाधिं केचिदाहुः । शत्रवयवे शतृशब्दो वर्तते । अवर्णान्तादङ्गादुत्तरो यः शत्रवयव इति । अपरे पुनराहुः । आदित्यनेन शीनद्यावेव विशेष्येते । अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ तयोः शीनद्योः शत्रन्तस्य नुम् भवति तत्र येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादिति तकारेण व्यवधानमाश्रितं भवतीति ।

शप् । नित्यग्रहणं वेत्यस्य निवृत्त्यर्थम् । अन्यारम्भसामर्थ्यादिहैव नित्यमुत्तरत्र विकल्प्य इत्याशङ्क्येत । **पचन्तीति** । कर्तरि शप् । दीव्यन्तीति । दिवादिभ्यः श्यन् ॥

तान्ताः ॥

स्वप् इति । शोभना आपो अस्मिन्निति स्वप् । समासान्तविधेरनित्यत्वात् 'ऋक्पुर्–' इत्यप्रत्ययो न । 'अप्तृन्–' इति दीर्घ इति । स्वप् शि इति स्थिते अप्तृन्नित्यत्र 'वा षपूर्वस्य निगमे' इत्यतः पूर्वग्रहणमनुवर्तते । तद्धितकृताकृतप्रसङ्गित्वेन नित्यमपि परमपि नुमं

---

१. शतुर्नित्यं नुम् P, C, B_2. २. Dropped B_2, D_4. ३. P has दीव्यन्ति after it.

स्वाम्पि । २ । स्वपा । अपो[1] भि । स्वद्भ्याम् । रुत्वम् । धनुः । धनुषी । ‘सान्तमहत–’ इति दीर्घः । ‘नुम्विसर्जनीये[2]–’ इति षत्वम् । धनूंषि । धनुषा । धनुर्भ्याम्[3] । एवं[4] हविः ।

पयः । पयसी । पयांसि । २ । पयसा । पयोभ्याम्[5] । अदः । विभक्तिकार्यम्[6] । उत्वमत्वे । अमू । अमूनि । शेषं[7] पुंवत् ॥

इति हलन्ता नपुंसकलिङ्गाः ॥

बाधित्वा पूर्वं दीर्घ एव यथा स्यादित्येवमर्थमिति दीर्घ इति भावः । ततो नुम् । अनुस्वारपरसवर्णौ । अन्ये तु स्वम्पीति दीर्घो न भाव्य एवेत्याहुः ॥

पान्ताः ॥

धनुरिति । ‘धनि[8]—’ इति धनेरुस् ।

षान्ताः ॥

पय इत्यादि । शेषं पुंवदित्यन्तं सुगमम् । पुंलिङ्गे विशेषो ज्ञेयः ॥

सान्ताः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्री पाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेगुः प्रसादे सुविशदममला क्लीबशब्दा हलन्ताः ॥

---

१. स्वपोभि D_5. २. °नीयश्च । षत्वम् D_1. ३. After it—इत्यादि C, B_2. ४. हविः । हविषी । हवींषि । D_2, B_2. ५. After it—इत्यादि । पेचिवत्-इ । ‘वसोः संप्रसारणम् ।’ वस्वन्तस्य संप्रसारणं स्यात् । वस्वन्तत्वादिडभावः । पेचुषी । पेचिवांसि । २। जगन्वत् । ‘वसोः संप्रसारणम् ।’ वस्य उत्वेन निमित्तस्य नस्य मुत्वम् । ‘गमहन–’ एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । जग्मुषी । जगन्वांसि । जघन्वत् । २। जघ्नुषी । जघन्वांसि । २। विद्वत् । २। विदुषी । विद्वांसि । शेषं पुंवत् । C; पेचिवत् । पेचुषी । पेचिवांसि । जगन्वत् । जग्मुषी । जगन्वांसि । जघन्वत् । जघ्नुषी । जघन्वांसि । विद्वत् । विदुषी । विद्वांसि D_4. ६. विभक्तिकार्यम् । उत्वमत्वे dropped B_2. ७. शेषं पुंवत् dropped P, C. ८. धन्वन्तीति Dc_4; धनन्तीति Dc_3.

स्वरादिनिपातमव्ययम् ॥१।१।३७॥

स्व[1]रादयो निपाताश्चाव्ययसंज्ञाः स्युः ॥

स्वर् । अन्तर् । प्रातर् । पुनर् । स[2]नुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते ।

अथाऽव्ययानि निरूप्यन्ते । **स्व[3]रादिनिपात** इति । 'प्राग्रीश्वरान्निपाताः' इत्यारभ्य 'अधिरीश्वरे' इति सूत्रपर्यन्तं ये[4] उक्तास्त उच्यन्ते । तांश्चाग्रे वक्ष्यति । अत्र पठितानामव्ययानामर्थाः कतिचित्प्रयोगाश्चास्माभिः सुखप्रतिपत्त्यर्थं कथ्यन्ते । **स्वर् अन्तर्** एतावन्तोदात्तौ निपा[5]त्येते । स्वरिति स्वर्गपरलोकयोः । स्वर्गे । 'छायेव या स्वर्जलधेर्जलेषु' । परलोके । 'स्वर्यातस्य ह्यपुत्रस्य' इति । अन्तरिति मध्ये । 'अन्तर्बाष्पश्चिरमनु[6]चरो राजराजस्य दध्यौ' । **प्रातर् पुनर्** आद्युदात्तौ । प्रातरिति प्रत्यूषे । 'प्रातः संध्यामुपासीत' । श्वस्तनेऽपि । पुनरित्यप्रथमविशेषयोः । अप्रथमे । पुनरुक्तम् । विशेषे । 'किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा' । **सनुतर्प्रभृतयो** नवान्तोदात्ताः । सनुतरित्यन्तर्धाने । 'सनुतश्चौरो गच्छति' । **उच्चै**रिति महति । 'उच्चैरुच्चैर्ऋतुश्चिरम्' । **नीचै**रित्यल्पे । 'नीचैर्मरुद्वाति' । **शनै**रिति क्रियामान्द्ये । 'शनैः शनैर्ददात्येष पादौ भूतानुकम्पया' । **ऋधगि**ति सत्ये । 'ऋधग्वदन्ति विद्वांसः' । वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये । **ऋते** इति वर्जने । 'ऋते कृशानोर्न हि मन्त्रपूतम्' ।

---

१. स्वरादिनि॰ P, D_3, D_4. २. सत् । सत्कारिका । अङ्गीकार । B_2; सत् । तस् D_5; C has before it—सत् आदरे । असत् अनादरे । कारिका अङ्गीकारे । अलं भूषायै । अन्तर् परिग्रहे । कणेमनसी श्रद्धाप्रतीघाने । पुरः पुरस्कारे । अस्तमदर्शने । अदोऽनुपदेशे । तिरोऽन्तर्धौ । उपाजेऽन्वाजे बलाधाने । उरसिमनसा निश्चितार्थे । मध्ये पदे अनित्याधाने । प्राध्वं बन्धने । हस्ते पाणौ उद्वाहार्थे । जाविकौपनिषदावौपम्ये । ३. स्वरादिनिपातमव्ययमिति Nc_2. ४. ये dropped Nc_2. ५. निपात्यौ Dc_3. ६. ॰नुचर इति Dc_3.

युगपत् । आरात् । पृथक्[1] । ह्यस् । श्वस् । दिवा[2] । रात्रौ[3] । सायम् । चिरम्[4] । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । अधस्[5] । समया । निकषा । स्वयम् । वृथा[6] । नक्तम् ।

युगपदित्येककालम् । 'युगपत् प्राप्ताः' । आराद् दूरसमीपयोः दूरे । 'आरात् शत्रोः सदा वसेत्' । समीपे । 'प्रतीतान् स्थापयेदारात्' । पृथगिति वर्जने । 'त्वत्तः पृथक् नास्ति बन्धुः' । ह्यस्प्रभृतयोपि साम्यन्ता द्वाविंशतिरन्तोदात्ता इति । अतीतेह्नि ह्यः । 'ह्योकरोत्' । श्वोनागतेह्नि 'श्वो गन्ता' । दिवेति अह्नि । 'दिवातनम्' । रात्राविति निशायाम् । 'रात्रौ वृत्तं तु वक्ष्यसि' । रात्रौचरः । सायमिति निशामुखे । 'सायमासीनः संध्यां वन्दते'[7] । चिरमिति चिरकाले । चिरंजीवी । मनागिति ईषदर्थे । 'मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी' ॥ ईषदित्यल्पे । 'ईषद्गौरः' । जोषमिति सुखमौनयोः । 'जोषमास्ते[8] जितेन्द्रियः' । जोषमास्स्व । तूष्णीमिति मौने । 'मुनिस्तूष्णीमुपास्ते[9] । बहिस् बाह्ये । बहिर्भूतः । अधस् इति बहिर्भूते[10] । अधो गच्छति । समयेत्यन्तिकमध्ययोः । त्वां समयास्ते । समीप इत्यर्थः । ग्रामं समयास्ते । मध्ये इत्यर्थः । निकषेत्यन्तिके । 'विलङ्घ्य लङ्कां निकषा हनिष्यति' । स्वयमित्यात्मनेत्यर्थे[11] । स्वयंकृतम् । वृथेति वृथार्थे । 'वृथा दुग्धोनड्वान्' । नक्तमिति रात्रौ । 'इदं नक्तंतनं दाम' ।

---

१. For it दूरात् D_5. २. P has सनत् before it. ३. रात्रम् C, B_2, D_2, D_3, D_5. ४. After it—वरम् D_5. ५. अवस् Com. ६. मृषा B_2, D_2; मृषा । वृथा D_4. ७. संध्यावन्दने Nc_2. ८. °मास्त Dc_2. ९. °मास्ते Nc_2, Dc_4, Bc_1. १०. बहिरर्थे Nc_2, Dc_3, Bc_1. ११. °त्यात्मनेर्थे Dc_2.

नञ् । हेतौ । इद्धा । अं[1]द्धा । सामि । वत्प्रत्ययान्तं चं[2]—ब्राह्मणवत् । क्षत्रियवत् । सनौ[3] । उपधा । सं[4]नात् । स[5]नदिति केचित्[6] । तिरस् । अन्तरा । अन्तरेण ।

नञिति निषेधेषदर्थावि[7]क्षेपेषु । ‘अब्राह्मणः’ ‘अनुदरा कन्या’ । ‘अपचसि त्वं जाल्म’ । तदन्यतद्विरुद्धतदभावेष्वपि नञो वृत्तिमिच्छन्ति । अश्वादन्योनश्वः । धर्मविरुद्धोधर्मः । पापाभावोपापम् । अकारो नलोपो नञ इति विशेषणार्थः । **हेतौ** इति निमित्तार्थे । हेतौ हृष्यति । **इद्धेति** प्राकाश्ये । ‘समिद्धमिद्धेशमहो द[8]दासि’ । **अद्धेति** स्फुटावधा[9]रणे । ‘आराधितोद्धा मनुरप्सरोभिः’ । तत्त्वातिशययोरित्येके । **सामीत्येतदर्धजुगुप्सितयोः** । अर्धे । ‘सामिसंमीलिताक्षी’ । जुगुप्सिते । ‘सामिकृतमकृतं स्यात्’ । **वत्प्रत्ययान्तमिति** । ‘तेन तुल्यं क्रिया चेद्वतिः’ इत्यादिना विहितो यो वतिस्तदन्तं च स्वरादौ ज्ञेयम् । **सनेत्यादयश्चत्वारस्तिरसन्ता आद्युदात्ताः** । सनेति नित्ये । ‘सनातनः पितरमुपागमत् स्वयम्’ । **उपधेति** भेदे । सनदिति केचित् पठन्ति । तन्नित्ये । सनत्कुमारः । **सनादिति** नित्ये । सनात्कुमारः । **तिरस्** इत्यन्तर्धौ तिर्यगर्थे च । तिरोहितः । तिरः काष्ठं कुरु । परिभूतेन्तर्ध्युपचारात् । तिरस्कृतोरिः । **अन्तरेत्यन्तोदात्तो** मध्यविनार्थयोः । ‘त्वां[10] मां चान्तरा कमण्डलुः’ । ‘त्वामन्तरा तामरसायताक्षी’ । **अन्तरेणेति** वर्जने । ‘अन्तरेण पुरुषकारं न किंचित् सिध्यति’ ।

---

१. Before it—अन्तर् B_2; समिद्धम् । अद्धा । तत्त्वात् D_4. २. च dropped D_3, B_1. ३. सनात् D_3. ४. P, C, D_2, D_3 have सनत् and B_2 सनत् । सनात् for सनात्......केचित्; सनदिति केचित् पठन्ति । सनात् । D_4; for सनात् ......केचित्; D_5 has मनाक्. ५. D_1 drops सनदिति केचित्. ६. B_1 has after it उपधा. ७. °विक्षेपेषु Dc_1, Dc_2. ८. ददाति Dc_3. ९. °धारणयोः Bc_1, Dc_4, Dc_3. १०. Before it—त्वां च मां चान्तरा हरिः Dc_3.

ज्योक्[१] । कम् । शम् । सहसा । विना । नाना[२] । स्वस्ति[३] । स्वधा । अलम् । वषट् । अन्यत् । अस्ति । उपांशु । क्षमा ।

'ज्योगिति कालभूयस्त्वप्रश्नयोः' । 'ज्योग् जीवामः' । 'ज्योक्कृत्य नृपतिं गतः' । शीघ्रार्थे संप्रत्यर्थेपि । कमिति वारिमूर्धनिन्दासुखेषु । वारिणि । कंजं पद्मम् । मूर्ध्नि[४] कंजाः कचाः । निन्दायाम् । कंदर्पः । सुखे । कम्बुः । शमिति दुःखोपशमे । शंकरः । सहसेत्याकस्मिकाविमर्शयोः । 'दिवः प्रसूनं सहसा पपात' । 'सहसा विदधीत न क्रियाम्' । विनेति पृथगर्थे । 'विना वातं विना वर्षम्' । नानेत्यनेकविनार्थयोः । 'नानाविधं देहभृतां समाजम्' । 'नाना नारीं[५] निष्फला लोकयात्रा' । स्वस्तीति पुण्याशीःक्षेममङ्गलप्रत्यभिवादेषु । 'स्वस्त्यस्तु ते धार्मिक मत्प्रसादात्' । 'स्वस्ति तेस्तु लतया सह वृक्ष' । 'स्वस्त्यस्तु ते सौम्य चिराय जीव' । 'स्वस्ति श्रीकुसुमपुरात्' । 'राज्ञा नमस्कृता विप्राः स्वस्तीत्येतत् प्रयुञ्जते' । स्वधेति पितृदाने । 'स्वधा पितृभ्यः' । अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु । भूषणे । 'अलंकारः' । 'अलमस्य धनम्' । बह्वित्यर्थः । 'अलं मल्लो मल्लाय' शक्त इत्यर्थः । वारणे । 'अलमतिप्रसङ्गेन' । निषेधे । 'आलप्यालमिदं बभ्रोर्यत् स दारानपाहरत्' । न वक्तव्यमेतदित्यर्थः । 'वषडिति हविर्दाने' । 'वषडिन्द्राय' । अन्यदित्यन्यार्थे । 'देवदत्त आयातोन्यच्च यज्ञदत्तः' इति । अस्तीति सत्तायाम् । 'अस्तिक्षीरा गौः' । अस्ति परलोके मतिरस्य आस्तिकः । उपांशु इति । अप्रकाशोच्चारणरहस्ययोः । 'जपतः सदा जपमुपांशु' । 'कथमुपांशु वधः' । क्षमेति क्षान्तौ ।

---

१. C drops it. २. After it—स्वाहा D_5, B_1. ३. रहस् । क्षमा B_2, D_2. ४. मूर्धनि Bc_1. ५. नारीर्निः Bc_1, Dc_3, Dc_4.

विहायसा । दोषा । मृषा । मिथ्या[१] । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रबाहुकम्[३] । आर्यहलम्[४] । अभीक्ष्णम् । साकम्[५] । सार्धम्[६] । नमस् । हिरुक् । धिक् । तसिलादिस्तद्धिते

'भवान् क्षमा करोतु' । विहायसेति वियदर्थे । 'विहायसा रम्यमितो विभाति' । दोषेति रात्रौ । 'दोषामन्यमहः' । मृषेति वितथे । मृषोद्यम् । मिथ्येति वितथे । मिथ्यावादी । मुधेति व्यर्थार्थे[७] । 'मुधा बुधा विमुह्यन्ति' । पुरेति अविरतचिरातीतभविष्यदासत्तिषु । 'उपाध्यायेन स पुराधीयते' । अविरतमपाठीत्यर्थः । चिरातीते । 'पुरापि न नवं पुराणम्' । भविष्यदासत्तौ । 'गच्छ पुरा देवो वर्षति' । समनन्तरं वर्षिष्यतीत्यर्थः । मिथो इति रहःसहार्थयोः । 'मन्त्रयते मिथो' । विरहान्योन्यार्थयोरपि । मिथस् इति रहोन्योन्यार्थयोः । 'मन्त्रयते मिथः' । 'मिथः प्रहरतः' । प्रायस् इति बाहुल्ये । 'सन्तः प्रायो विवेक्तारः' । मुहुस् इति पुनरर्थे । 'इह मुहुर्मुदितैः कलभैरवः' । प्रबाहुकमिति । समकालार्थे[८] । 'प्रबाहुकं गृह्णीयात्' । ऊर्ध्वार्थेपि । प्रवाहिकेति केचित् । आर्यहलमिति बलात्कारे । 'आर्यहलं गृह्णाति' । आर्येति प्रीतिवचे । हलमिति[९] निषेधविषादयोरिति **शाकटायनः** । अभीक्ष्णमिति[१०] । अनारते पुनरर्थे च । 'अभीक्ष्णं वक्ति'[११] । पुनरर्थे । 'अभीक्ष्णमास्फालयतीभकुम्भम्'[१२] । साकं सार्धमित्येते सहार्थे । 'पुत्रेण साकं याति' । 'पुत्रेण सार्धं याति' । नमस् इति नतौ । 'नमो देवेभ्यः' । हिरुगिति वर्जने । 'हिरुक् कर्मणां मोक्षः' । कर्माणि वर्जयित्वेत्यर्थः । धिगिति निन्दाभर्त्सनयोः । 'धिगिमां देहभृतामसारताम्' । 'धिक् तार्किकान्' । तसिलादीत्यादि । 'पञ्चम्यास्तसिल्' इत्यतः प्रभृतिभिः

---

१. B_1, D_1, D_2, D_5 drop it; अकंहिकं B_2. २. Dropped D_2. ३. After this—प्रवाहिकम् B_2, D_1, D_4. D_5, C. ४. After it—अनार्य-हलम् D_4. ५. Dropped D_2. ६. After it—सह D_3, B_1. ७. मिथ्यार्थे Dc_3, ८. समानकालेर्थे Dc_2, Dc_4. ९. निषिद्ध° Bc_1. १०. आभीक्ष्ण° Dc_3.

एधाच्पर्यन्तः । कृत्वसुच् । सुच्[१] । शस्तसी[२] । आस्थालौ[३] च्व्यर्थाश्च । एते प्रत्ययाः । अथ । आम्[४] । प्रताम् । प्रशान्[५] । प्रतान् । मा[६] । माङ् । इति स्वरादिः[७] ।

'एधाच्च' इत्येतत्पर्यन्तैः सूत्रैरुक्तस्तद्धितः स्वरादिगणान्तःपाती ज्ञेयः । **कृत्वसुजिति** । 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति । **सुच्** इति । 'द्वित्रिचतुर्भ्यः सुच्' । **शस्तसी** इति 'बह्वल्पार्थात्[८] शस्-कारकादन्यतरस्याम्' इति शस् । 'प्रतियोगे पञ्चम्यास्तसिः' । **आस्थालौ** इति । 'इण आसिः' इत्युणादिविहित आस् । 'प्रत्नपूर्व-विश्वेमात्थाल् छन्दसि' । इति थाल् । **च्व्यर्थाश्चेति** । 'अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः' । 'विभाषा साति कार्त्स्न्ये' । 'देये त्रा च' । **एते प्रत्यया** इति । ततश्च तदन्ताः शब्दा अव्ययसंज्ञा इति भावः । **अथेति** मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु । मङ्गले । 'अथ परस्मैपदानि' । अनन्तरे । 'स्नातोथ भुङ्क्ते' । आरम्भे । 'अथ शब्दानुशासनम्' । प्रश्ने । 'अथ शक्तोसि भोक्तुम्' । कार्त्स्न्ये । 'अथ क्रतून् ब्रूमः' । अधिकारे । 'अथ स्नानविधिः' । प्रतिज्ञायाम् । 'गौडो भवान् । अथेति ब्रूमः' । समुच्चये । 'भीमोथार्जुनः' । अथेत्यस्य स्थाने अम् इति केचित्पठन्ति । स च 'अमु च च्छन्दसि' इत्युक्तः अम्प्रत्ययः । **आमित्यङ्गीकारे** । 'आम् कुर्मः' । 'किमेत्तिङ-व्ययघादाम्वद्रव्यप्रकर्षे' इति प्रत्ययोपि । 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यपीति केचित् । **प्रतामिति** ग्लानौ । **प्रशानिति** समानार्थे । 'प्रशान् देवदत्तो यज्ञदत्तेन' । **प्रतानिति** विस्तारे[९] । **मा** इति निषेधे । 'मा भवतु' । 'मा भविष्यति' । **माङिति** निषेधाशङ्कयोः । 'मा कार्षीत्' । 'अस्य पापं मा भूत्' ।

इति स्वरादिर्गणः समाप्तः ॥

---

१. Dropped B_2. २. शत् । प्रसी । D_1. ३. आवर्थलौ B_1; आच्थालौ B_2, D_3, D_4, D_5. ४. अम् । आम् D_4. ५. प्रतान् । प्रशान् D_1, D_3. ६. म D_2; मा । मङ् D_5. ७. स्वरादि B_1, B_2; स्वरादिर्गणः D_3. ८. बाहुल्या° Bc_1. ९. विस्तरे Bc_1.

चं[१]। वा[२]। ह[३]। अह[४]। एवम्[५]। नूनम्।

अथ निपातान् ब्रुवन् चादिगणं पठति। चेति अन्वाचयसमाहारेतरेतरसमुच्चयविनियोगतुल्ययोगितावधारणहेतुषु[६]। अन्वाचयो मुख्या सिद्धा च प्राधान्यनिष्पत्तिः[७]। यथा 'भिक्षामट गां चानय'। संहतिः प्राधान्ये समाहारे। पाणी च पादौ च पाणिपादम्। इतरेतरयोगे च संहत्य प्राधान्ये। 'प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ'। एकत्रानेकप्रत्यये समुच्चये। 'गार्ग्यो वात्स्यश्च'। 'पचति च पठति च चैत्रः'। विनियोगे। 'अहं च त्वं च वृत्रहन् संयुज्याव[८]'। तुल्ययोगितायाम्। 'ध्यातश्चोपस्थितश्च'। अवधारणे। 'अतीतः पन्थानं तव च महिमा वाङ्मनसयोः'। हेतौ। 'ग्रामश्च गन्तव्यः[१०] शीतं च'। शीतात् कथं गम्यत इत्यर्थः। पादपूरणेपि[११]। 'भीमः पार्थस्तथैव च'। वेति विकल्पानवक्लृप्त्युपमानद्वन्द्वसमुच्चयेषु। विकल्पे। 'यवैर्व्रीहिभिर्वा यजेत[१२]'। अनवक्लृप्तौ। 'कस्य वेह भुजवीर्यशालिनः'। उपमाने। 'जातां मन्ये तुहिनमथितां पद्मिनीं वान्यरूपाम्'। द्वन्द्वे। 'सा वा शंभोस्तदीया वा मूर्तिर्जलमयी मम'। न तृतीयेत्यर्थः। समुच्चये। वायुर्वा दहनो वा। अहेति विनियोगे। 'त्वमह ग्रामं गच्छाह महारण्यम्'। आचारातिक्रमेपि। 'स्वयमह रथेन याति। उपाध्यायमह पदातिं गमयति'। पूजायामपि। 'अह माणवकमध्यापय'। एवमिति प्रकृतपरामर्शप्रकारेवार्थोपदेशनिर्देशनिश्चयाङ्गीकारेषु। प्रकृतपरामर्शे। 'एवंवादिनि देवर्षौ'। प्रकारे। 'एवं कुरु'। इवार्थे। 'अग्निरेवं विप्रः'। उपदेशे। 'एवं पठ'। निर्देशे। 'एवं तावत्'। निश्चये। 'एवमेतत् कः संदेहः'। अङ्गीकारे। 'एवं कुर्मः'। नूनमिति। तर्के[१३] अर्थनिश्चये च[१४] तर्के। 'नूनं शरत्फुल्ला हि[१५] काशाः'। अर्थनिश्चये। 'नूनं हन्तास्मि रावणम्'।

---

१. च to अह dropped B_1. २. व D_1. ३. D_1, D_2, Com. drop it. ४. C has आह। एक।. ५. एव C. ६. हेतुपादपूरणेषु Dc_3. ७. प्रधान° Bc_1; Dc_4. ८. °युञ्ज्याव: Dc_4, Bc_1. ९. Dropped Nc_2, Bc_1, Dc_4. १०. गन्तव्यं Dc_3. ११. अपि dropped Dc_3. १२. यजेत याज्ञिको मुनिः। Dc_3. १३. वितर्कै Nc_2, Dc_4. १४. वा Nc_2. १५. Dropped Nc_2, Dc_4.

शश्वत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । न ह । हन्त । माकिम् । नकिम् । माङ् । नञ् ।

शश्वदिति । सार्वकाल्ये । 'शश्वच्चकार' इत्यादि । पौनःपुन्येपि । 'शश्वद्भक्ति कुशिक्षितः' । नित्यसहार्थयोरपि । 'शाश्वतं वैरम्' । 'शाश्वद् भुञ्जते' । **कूपदिति** प्रश्नवितर्कप्रशंसासु । 'कूपदयं गायति' । **कुविदिति** भूर्यर्थे । 'कुविदङ्ग यवमन्तः' । प्रशंसादावपि । **नेदिति** शङ्कायाम् । नेज्जिह्मायन्तो नरकं पतामेति । प्रतिषेधविचारसमुच्चये-ष्विति **शाकटायनः** । **चेदिति** यद्यर्थे । 'सन्तश्चेदमृतेन किम्' । **चणिति** चेदर्थे । णकारो 'निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्र-युक्तम्' इति विशेषणार्थः । 'अयं च करिष्यति' अयं चेत् करि-ष्यतीत्यर्थः । **कच्चिदिति** इष्टप्रश्ने । 'कच्चिज्जीवति ते माता कच्चिज्जी-वति ते पिता' । **यत्रेत्य**नवक्लृप्त्यमर्षगर्हाश्चर्येषु । 'नावकल्पयामि न मर्षये गर्हे आश्चर्यं यत्र भवान् वृषलं याजयेत्' । अस्य 'तद्धितश्चासर्व-विभक्तिः' इत्यव्ययत्वे सिद्धेपि 'निपातैर्यद्यदिहन्त—' इत्यादौ विशेषणार्थं निपातसंज्ञा । **न हेति** प्रत्यारम्भे । 'न ह भोक्ष्यसे' । 'न हाध्येष्यसे' । **हन्तेति** हर्षानुकम्पावाक्यारम्भविषादेषु । हर्षे । 'हन्त जीविताः स्मः' । अनुकम्पायाम् । 'पुत्र हन्त ते घातकाः' । वाक्यारम्भे । 'हन्त ते कथयिष्यामि' । विषादे । 'हन्त हताः पथिक-गेहिन्यः' । दाने निश्चये च । 'हन्तकारः' । 'हन्त गच्छामः' । **माकिमिति** निषेधवर्जनयोः । 'रक्षां मे माकिं कुरु' । **नकिमित्यौपम्ये** च । 'मेघो नकिं वर्षति सिद्धराजः' । माकिर्नकिरिति रेफान्तावित्येके । **माङ् नञ्** इत्येते व्याख्याते स्वरादौ । ननु च स्वरादित्वेनैवाव्ययत्वे सिद्धे किमर्थमत्र पाठ इति चेदुच्यते । निपाताद्युदात्तत्वादिकार्यार्थं

---

१. Dropped B_1. २. Dropped B_2. ३. कच्चित् D_3, D_5; कच्चित् । काश्चित् । कश्चन । कचन । कच्चित् । क्व । कुह । D_4. ४. नेकिम् C; नकि B_1, D_1, D_2, D_4; D_3 drops this and माङ्. ५. पताम इति । K. ६. अभीष्टप्रश्ने Dc_2. ७. तत्रभवान् Dc_3.

यावत् । तावत् । त्वै[1] । द्वै । रै । श्रौषट् । वौषट् ।
स्वाहा[2] । स्वधा । तुम् । तथा हि । खलु । किल[3] ।

निपातेषु पाठः । एवं चेत् स्वरादिपाठोनर्थकः । मैवम् । सत्त्ववचनानामपि अव्ययसंज्ञार्थं[4] सूत्रपाठः । एवं सर्वेषामप्युभयत्र पाठवतां प्रयोजनं ज्ञेयम् । **यावत्तावदित्येते** साकल्यावधिमानावधारणेषु । साकल्ये । 'यावत्कार्यं तावत् कुरु' । अवधौ । 'यावद्गङ्गा तावत्तिष्ठ' । माने । 'यावद्दत्तं तावद् भुंक्तम्[5]' । अवधारणे । 'यावदमत्रं ब्राह्मणानामन्त्रयस्व' । त्वै इति विशेषवितर्कयोः । 'अयं त्वै[6] प्रकृष्यते' । 'कस्मै त्वै[7] एषोभिगच्छति' । द्वै इति वितर्के । 'कस्माद् द्वै[8] एषोभिगच्छति' । रै इति दानानादरयोः[9] । 'रै करोनि' । दानं ददातीत्यर्थः । 'त्वं रै किं करिष्यसि[10]' । श्रौषट् वौषडिति वषट्शब्दार्थौ । **स्वाहेति स्वधेति** च व्याख्यातम् । तुमिति तुङ्कारे । 'गुरुं हुंकृत्य तुंकृत्य—' इति । **तथा हीति** निदर्शने । 'तथा हि ते शीलमुदारदर्शने' । **खल्विति** निषेधवाक्यालंकारजिज्ञासानुनयेषु । निषेधे । 'खलूक्त्वा खलु वाचिकम्' । वाक्यालंकारे । 'अथो खल्वाहुः' । जिज्ञासायाम् । 'स खल्वधीते वेदम्' । अनुनये । 'न खलु न खलु मुग्धे साहसं कार्यमेतत्' । नियमनिश्चयहेतुविषादेषु च । नियमे । 'प्रवृत्तिसाराः खलु मादृशां धियः' । निश्चये 'खलु दानम्' । हेतौ । 'त्वदधीनं खलु देहिनां सुखम्' । विषादे । 'न विदीर्ये कठिनाः खलु स्त्रियः' । **किलेति** वार्तारुचिन्यक्करणसंभाव्यहेत्वलीकेषु । वार्तायाम् । 'जघान कंसं किल वासुदेवः' । रुचौ । 'एवं किल केचिद्वदन्ति' । न्यक्करणे । 'त्वं किल योत्स्यसे' । संभाव्ये । 'पार्थः किल विजेष्यते कुरून् प्रवीरान्[11]' । हेतौ । 'स किल कविरेवमुक्तवान्' । अलीके । 'गोत्रस्खलितं किलाशुभं कृत्वा' ।

---

१. त्वैः । द्वैः । रैः । P. २. स्वधा । स्वाहा C; स्वाहा dropped D_4. ३. Dropped D_3. ४. संज्ञार्थस्तत्र पाठः । Dc_4. ५. भुङ्क्ते Dc_2. ६. वै° Bc_1. ७. वै Bc_1. ८. वै Bc_1. ९. °दरणयोः Bc_1. १०. दानं दास्ये Bc_1, Dc_3. ११. Dropped प्रवीरान् Dc_2, Dc_4, Bc_1; कुरुप्रवीरान् Dc_3.

तथा। अथ। स्म। अस्मि। अं। इ। उ। ऋ। ऌ। ए। ऐ। ओ। औ। आङ्। अ। मा। नो। ना— प्रतिषेधे। उत्। ओकस्।

तथेति सादृश्ये 'यथा हरिस्तथा हरः'। अयं च 'प्राग्दिशो विभक्तिः' इति विभक्तिसंज्ञकथाल्प्रत्ययान्तो न गृह्यते। तस्य 'तद्धितश्च—' इत्यादिनाऽव्ययत्वसिद्धेः। आद्युदात्तत्वं च लित्स्वरेणैव। कस्य तर्हि ग्रहणम्। तत्सदृशस्याऽव्युत्पन्नस्य। ननु च तस्यापि 'विभक्तिप्रतिरूपकाश्च' इत्यनेनैव सिद्धम्। सत्यम्। तस्यैवायं प्रपञ्चः। एवमन्यत्रापि विभक्त्यादिप्रतिरूपकेषु ज्ञेयम्। समुच्चयाभ्युपगमयोरपि। 'देवदत्तो गच्छतु तथा यज्ञदत्तः'। तथेति प्रतिज्ञायाम्। अथेति व्याख्यातम्। स्मेत्यतीते पादपूरणे च। 'वक्ति स्म व्यासः'। 'इति ह स्माहुराचार्याः'। **अस्मीति** अहमित्यर्थे। 'अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः'। अकारादयो यथासंभवं संबोधनभर्त्सनानुकम्पापादपूरणप्रतिषेधेषु वर्तन्ते। 'अं अनन्त'। 'इ इन्द्रं पश्य'। 'उ उत्तिष्ठ'। ऋ ऌ एतौ मन्त्रस्तोभवचनौ। 'ए इतो भव'। 'ऐ वाचं देहि धैर्यं नस्तव हेतोरसुस्रुवत्'। 'ओ श्रावय'। औ अयमपि मन्त्रस्तोभवचनः। **आङिति** ईषदर्थाभिविधिमर्यादाक्रियायोगेषु। ईषत् पिङ्गलः आपिङ्गलः। अभिविधौ। 'आ कुमारं यशः पाणिनेः'। मर्यादायाम्। 'ओदकान्तात् प्रियं पान्थमनुव्रजेत्'। अमानोना प्रतिषेधे। एते प्रतिषेधे वर्तमानाश्चादयः। 'अविप्र इव भाषसे'। विप्रवन्न ब्रूषे इत्यर्थः। 'मा भवतु'। 'नो जानीमः'। 'नैकः सुप्तेषु जागृयात्'। उदिति अप्यर्थे 'उदरमन्तरं कुरुते'। अरमप्यल्पमप्यन्तरं कुरुत इत्यर्थः। उञिति ञितमपि पठन्ति। संतर्कसंबोधनपूरणेषु। 'तद्वायुस्तदु चन्द्रमाः'। **ओकस्** इति आश्रये।

---

१. अट्। ओम्। अल्। ए। ऐ &c. D_2. २. After it—उञ् इति केचित् D_3, B_1, (इति केचित् dropped D_4, D_5.) ३. उकस् B_2; Before it—अरम् D_3; उकञ् D_2, D_4, D_5, B_1. ४. संज्ञकः Bc_1. ५. °व्ययत्वे सिद्धे Dc_3. ६. Before it—संबोधने। Bc_1, Dc_3. ७. इन्द्र Bc_1. ८. प्रपठन्ति Nc_2.

आदह[1] । आतङ्क[2] । वेलायाम् । मात्रायाम्[3] । यथा[4] । किम्[5] ।
यत् । यम् । हा[6] । ह । हे । है । पाट्[7] । प्याट् । आहो[8] ।

आदहेति हिंसोपक्रमकुत्सनेषु । 'आदहारीन् पुरंदरः' । 'आदह भक्तस्य भोजनाय' । 'कुर्वादह यदि करिष्यसि'[9] । आतङ्केति कुत्सनाविनाशयोः । आतङ्क क्षीरं दधिभावनाय । प्रतिग्रहेपीति शाकटायनः । वेलायामिति कालपरिमाणे । मात्रायामिति अल्पपरिमाणे । मात्रायां[10] भोजकः । यथेति योग्यतावीप्सापदार्थानतिवृत्तिसादृश्येषु । योग्यतायाम् । 'यथारूपमूढा कन्या' । वीप्सायाम् । 'यथादेवं नमति' । अनतिक्रमे । 'यथाशक्ति करोति' । सादृश्ये । 'यथा हरिस्तथा हरः' । किमिति इच्छा[11]जुगुप्सयोः । 'किं गतोसि' । 'किंराजा यो न रक्षति' । ईषदर्थातिशययोरपि । 'न किमप्यस्यास्ति' । 'किमप्येष प्रगल्भते' । यदिति हेतौ । 'यत् सभासु प्रथसे तत् पूज्योसि' । यमिति यदित्यर्थे । हा इति विस्मयविषादशोकजुगुप्सार्तिषु । 'हा पाटलिपुत्रं लब्धम्' । 'कन्यान्तःपुरमेव हा प्रविशति' । 'हा क्रुद्धो मुनिर्भार्गवः' । 'हा प्रिये जानकि' । 'हा देवदत्त' । 'हा हतोस्मि मन्दभाग्यः' । ह इति विनियोगातिक्रमपादपूरणेषु । 'त्वं ह ग्रामं गच्छ' । 'अयं हारण्यं गच्छतु' । 'स्वयं ह ओदनं भुङ्क्ते । उपाध्यायं सक्तून् पाययति' । 'इति ह स्माहुराचार्याः' । हे है पाट् प्याट् एते चत्वारोपि संबोधनार्थाः । 'हे देवदत्त' । 'है देवदत्त' । 'पाट् पाठकाः' । 'प्याट् पान्थाः' । आहो इति विकल्पे । 'अयं स्थाणुराहो पुरुषः' । चेदर्थेपि । 'आहो रिक्तः कथमपि भवेदेष दैवात् तदानीं को नाम स्यादवटुकुहरालोकनेप्यस्य कल्पः' ।

१. अदह B_2. २. आतङ्क्के लोपात् B_1. ३. नम् मात्रायाम् B_2. ४. अथ D_1. ५. कियत् B_2. ६. हाम् । ह । है । हो C; हा dropped D_1; हं । हंहो । है D_2. ७. षाट् D_5, B_1, P, C. ८. अहो D_3, D_4, D_5, B_1. ९. कुर्यादह K. १०. मात्रायामपि Bc_1. ११. पृच्छा Dc_2, Dc_4, Dc_3.

अथो । ननु । मन्ये । न हि । उताहो । असि । ब्रूहि । न तु । इति । इव । [1][2][3]

अथो इत्यथार्थवत् । अन्वादेशेपि । 'इमं वेदमध्यापय । अथो एनं छन्दोध्यापय' । नन्विति प्रश्नावधारणानुज्ञेच्छानुनयामन्त्रणेषु । 'नन्वधीषे' । 'नन्वद्य गच्छामः' । 'नन्वादिश' 'ननु भुञ्जे' । 'ननु चण्डि प्रसीद मे' । वाक्यारम्भादौ च । 'नन्वयोहः(?) प्रसूयते' । आक्षेपे । ननु किमर्थमागतोसि । प्रत्युक्तौ । 'अकार्षीः कटं चैत्र । ननु करोमि भोः' । मन्ये इति वितर्के । 'मन्ये मार्तण्डगृह्याणि पद्मान्युद्धर्तुमुत्सुकः' । नहीत्यभावे । 'न हि प्रयोजनापेक्षं प्रेम' । उताहो इति विकल्पे । 'गौरयमुताहो गवय इति' । असीति त्वमित्यर्थवाक्यालंकारयोः । 'वेत्स्यसि' । 'शाधि वस्त्वमसि सभ्यमभ्यधाः' । ब्रूहीति प्रैषानुज्ञावसरेषु । 'ब्रूहि ब्राह्मणाः' । न तु इति निषेधे । 'न तु करोति' । इतीति हेतुप्रकारप्रकर्षएवमर्थव्यवस्थास्वरूपविवक्षानियमसमाप्तिप्रकृतिवक्ष्यमाणपरामर्शिमतेषु । 'हन्तीति पलायते' । 'गौरश्वो हस्तीति जातिः' । 'इति पाणिनिः' । पाणिनिशब्दः प्रकर्षेण प्रकाशते इत्यर्थः । 'क्रमादमुं नारद इत्यबोधि सः' । 'ज्वलिति कसन्तेभ्यो णः' । 'वृद्धिरित्येव या वृद्धिः' । 'तदस्यास्त्यस्मिन्निति मतुप्' । 'पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि' । 'इत्युक्तवन्तं परिरभ्य दोर्भ्याम्' । 'विनिश्चयार्थामिति वाचमाददे' । 'इत्यापिशलिः' । इवेति ईषदर्थोपमोत्प्रेक्षावाक्यालंकारेषु । 'कडार इवायम्' । 'चन्द्र इव मुखम्' । 'लिम्पतीव तमोङ्गानि' । 'कथमिवैतद्भविष्यति' ।

---

१. तर्हि D_1, D_3, B_1, D_4. २. ननु Com; नु B_2. ३. After it—श्री D_4.

ओम् । फट् । वषट् । यदि[1] । हो[2] । इहि[3] । इह । तत् । आहोस्वित्[4] । उपरि । सीम्[5] । कम् । आम् । हिम् । वाम् । सुकम् । शुकम् । अनुकम् । नहिकम् । सत्यम् ।

ओमित्याभ्यादानाभ्युपगमसमाप्त्यर्थेषु । मङ्गलप्रयोजनश्च । 'ओं अग्निमीळे पुरोहितम्' । 'ओमित्युक्तवतोथ शार्ङ्गिण इति व्याहृत्य वाचं नभः' । 'ब्रह्मभूर्भुवः स्वरोम्' । फडिति विघ्ननिराकृतौ । 'अस्त्राय फट्' । वषडिति व्याख्यातम् । यदीति पक्षान्तरे । 'यदि शमः किं तपसा' । हो इति संबोधने । 'दुःसहो हो वियोगः' । इहीति तिङन्तप्रतिरूपकं । गच्छेत्यर्थे[6] । एहि इति पाठे प्रहासे । 'एहि मन्ये ओदनं भोक्ष्यसे । भुक्तः सोतिथिभिः' । इहेति अत्रेत्यर्थे । 'इह मुहुर्मुदितैः कलभैरवः' । तदिति हेतौ । 'यत् सभासु प्रथसे तत् पूज्योसि' । आहोस्विदिति अहोवत्[7] । उपरि इत्युपरिष्टादर्थे । 'जगतामुपरि हरिः' । सीमिति सर्वतो भावे । कमित्यनकर्थके पादपूरणे च । आमिति प्रतिवचनावधारणयोः । 'आं किं ब्रवीति' । 'आं चिरस्य प्रतिबुद्धोस्मि' । हिमिति स्तोभवचनः । वामिति युवामित्यर्थे । 'गेये केन विनीतौ वाम्' । सुकमित्यतिशये । 'सुकं शोभते' । शुकमिति शैघ्र्ये । 'शुकं गच्छति' । अनुकमिति वितर्के । नुकमिति केचित् । नहिकमिति निषेधे । 'अस्ति ते किंचित् । नहिकम्' । सत्यमिति प्रश्नप्रतिषेधसत्येषु । 'सत्यं करोषि' । 'ननु किमेवं सत्यम्' । 'सत्यं मनोज्ञाः श्रियः' ।

---

१. सदि D_1, B_1, P; C. २. Dropped B_2. ३. Dropped D_3. ४. आहोश्वित् P. ५. Before it—नहिकम् D_1; नहिकिम् D_3, D_4; after it—सुक्तम् D_2, D_4, P; C. ६. °त्यर्थः । Dc_3. ७. अहो Bc_1.

ऋतम् । नो चेत्[१] । जातु । कथम् । कुतः । कुत्र । अनु । अव । हाहौ । हैहौ[२] । ईहौ[३] । शंबट्[४] । द्यं[५] । दिष्ट्या । पशु । सह[६] । आनुषक्[७] । भाजक् । अङ्ग । स्राक्[८] । अरे । चटु[९] । चाटु । हुम् ।

ऋतमिति सत्यार्थे । 'ऋतं ब्रवीषि' । **नो चेन्न चेदिति** निषेधे । 'नो चेत् कार्यम्' । **जातु** इति कदाचिदर्थे । 'न जातु कामः कामानामुपभोगेन शाम्यति' । **कथमिति** प्रकारप्रश्ने । 'कथं कृतम् । इत्थं कृतम्' । **कुत** इति प्रश्ननिह्नवयोः । 'कुत आगच्छति' । 'कुतो मे हिरण्यम्' । **कुत्रेति** । देशप्रश्ने[१०] । 'कुत्र तिष्ठति देवदत्तः' । **अनु अव** इति उपसर्गप्रतिरूपकौ[११] । अनु अव इत्येतयोरर्थे वर्तेते । उपसर्गप्रतिरूपकयोरपि पाठः प्रपञ्चार्थः । **हाहौ हैहौ ईहौ**[१२] एते त्रयोपि स्तोभार्थाः । **शंबाडिति** अन्तःकरणे आभिमुख्येपि । 'शंबट्[१३] शुद्धया सर्वं[१४] जयति' । 'शंबट्[१५] सुखो धावति' । **द्यं**[१६] इति पादपूरणहिंसाप्रातिलोम्येषु । 'द्यं[१७] हिनस्ति मृगं व्याधः' । **दिष्ट्येत्यानन्दे** । 'दिष्ट्या वर्धामहे' । सभाजनदर्शनप्रातिलोम्येष्वित्येके । **पशु** इति सम्यगर्थे । 'पशु मन्यमानाः' । दर्शनीयमात्मानं सम्यक् प्रतिपद्यमाना इत्यर्थः । **सहेति** सार्धमित्यर्थे । **आनुषगित्यानुपूर्व्ये** । 'आनुषग्ब्रवीतीह बान्धुता'[१८] । **भाजक्** इति शैघ्र्ये । 'भाजक् गच्छति' । **अङ्गेति** संबोधने । 'अङ्ग कुरु' । **स्राग्गिति**[१९] झटित्यर्थे । **अरे** इति नीचसंबोधने । 'अरे शूद्र' । **चटु चाटु** इत्येतौ प्रियवाक्ये । 'चटु वदति चाटुकारः' । हुमित्यनिच्छाभयभर्त्सनकोपेषु । 'हुं मुञ्च' । 'हुं राक्षसोयम्' । 'हुं निर्लज्जाप्रसर' । 'हुं मार्तर्दैवतानि धिक्' ।

१. After it—न चेत् D₁, D₃, D₄, D₅, B₂. २. हे हा dropped B₂. ३. इह B₂; इहा P; C, D₂, D₃, D₄, D₅, B₁. ४. Dropped D₁. ५. Dropped D₁, D₃; अद्य D₄; द्या D₅. ६. मह C. ७. आमुक् C. ८. श्राक् B₂, स्रक् D₃. ९. बटु D₂, D₃, D₅, B₁, B₂, P, C. १०. Before it—कथं कृतम् । इत्थं कृतम् । Dc₄. ११ °रूपके Bc₁. १२. हे हा हं हौ K. १३. संवट् संबुद्धया Bc₁ or विशुद्धया. १४. सर्वे जयन्ति Dc₃. १५. संवट्सुखो K. १६. य Bc₁; ब K. १७. य Bc₁; ब K. १८. अ° Bc₁. १९ द्राग्द्रुते । स्रागित्यन्ये K.

कुम्[१] । लुम् । खुम्[२] । वै । उपसर्गविभक्तिस्वरप्रति-
रूपकाश्च । भूयस् । अलम् । सुष्ठु । कामम् । पुरस् । आशु[३] ।
तर्हि[४] । रहस्[५] । सपदि । इत्यादयो निपाताः । प्रादयश्च ।
ऊरी[६] । उँरी । उररी[७] ।

कुं लुं खुम् इति मन्त्रस्तोभवचनाः । वै पादपूरणे । 'बृहस्पतिर्वै देवानां पुरोहितः' । विशेषेपि । उपसर्गेति । उपसर्गप्रतिरूपके उपसर्गसदृशाश्च निपाता ज्ञेयाः । ते च केचित् दर्शिताः । अन्ये प्रयोगानुसारेण ज्ञेयाः । भूय इति पुनरर्थे । अलमिति व्याख्यातम् । सुष्ठु इति प्रशंसायाम् । 'सुष्ठूक्तम्' । पुर इत्यग्रे पूर्वदेशपूर्वकालयोश्च । पुरोगाः[१०] । पुरस्तिष्ठति । पुरःकृतम्[११] । आश्विति । क्षिप्रे । आशु करोति । तर्हीति विशेषे । बलवानर्जुनः कृष्णस्तर्हि बलवत्तरः । रह इत्येकान्ते । रहः करोति । सपदीति क्षिप्रार्थे । इत्यादयः । इतिशब्देन चादीनां प्रत्यवमर्शः[१२] । आदिशब्देन 'प्रादयः' इत्यादिभिः 'अधिरीश्वराः' इत्येतत्पर्यन्तैः सूत्रैरुक्ता उच्यन्ते इति सर्वे निपाता ज्ञेया इत्यर्थः । अनेन 'प्राग्रीश्वरान्निपाताः' इति सूत्रं व्याख्यातम् । तांश्च 'प्रादयः' इत्यादिभिः सूत्रैः कथितान् निपातान् दर्शयति । प्रादयश्च ऊरी उररी उरी इत्यादयः पठिताः कथितार्थाश्च । ऊर्यादयस्त्रयोप्यङ्गीकारे विस्तारे च । 'ऊरीकृत्याज्ञां याति' । अङ्गीकृत्येत्यर्थः । 'ऊरीकृत्य पटं गतः' । विस्तार्येत्यर्थः । आदिशब्देन पांपी ताली इत्यादिः ऊर्यादिगणः च्व्यन्ता डाजन्ता अनुकरणं सत् असत् इत्यादयो गतिसंज्ञाः कर्मप्रवचनीयाश्चाधिपर्यन्ता उच्यन्ते ।

१. Dropped D_3; क्रिम् D_1. २. Dropped D_1; शुम् C. ३. आञ D_1; आस् D_5. ४. Dropped D_3, B_1, P, C. ५. For रहस् B_2 has तर्हि. ६. Dropped D_2, D_3. ७. उररी । ऊररी D_1; उरी dropped D_4, Com.; ऊररी D_4; ऊरी उररी इत्यादयः समासे एव । अन्येपि प्रयोगवशात् ज्ञेयाः । B_2. ८. °रूपका उपसर्गसदृशा विभक्तिप्रतिमरिशाः स्वरप्रतिरूपका अच्सदृशाश्च Bc_1; °रूपका उपसर्गसदृशा विभक्तिप्रतिरूपका विभक्तिसदृशाः स्वरप्रतिरूपका अच्सदृशाश्च निपाता ज्ञेयाः Dc_3, Dc_4. ९. Before it—काममिति निश्चये Bc_1. १०. पुरोगः Dc_4. ११. पुरस्कृतम् Dc_4. १२. परामर्शः Dc_3, Dc_4.

इत्यादयोन्येपि प्रयोगवशाज्ज्ञेयाः ।

तद्धितश्चासर्वविभक्तिः ॥१।१।३८॥

यस्मान्न सर्वविभक्तेरुत्पत्तिः स त[1]द्धितान्तोप्य[2]व्ययं स्यात् । त[3]तः । यतः । तत्र । यत्र ।

अन्येपि प्रयोगवशात् ज्ञेया इति । कथितेभ्योन्येपि प्रयोगवशान्निपाता ज्ञेया इत्यर्थः । एतच्च चादिगणस्याकृतिगणत्वाल्लभ्यते । ते च हये सुदि वदि प्रत्युतेत्यादयः । अ[4]र्थकथनं चैषामुपलक्षणं वेदितव्यम् । तथा चोक्तम् ।

'निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥' इति

त[5]द्धितः । **यस्मान्न सर्वविभक्तेरुत्पत्तेरिति** । सर्वस्या निरवशेषाया विभक्तेर्यस्मान्नोत्पत्तिर्येषां त्रयाणां वचनानां विभक्तिसंज्ञा कृता तानि सर्वाणि यतो नोत्पद्यन्ते इत्यर्थः । केवलस्य ताद्धितस्याव्ययत्वप्रयोजनाभावात् तद्धितान्तस्य संज्ञा विज्ञायत इत्यभिप्रेत्याह । **स तद्धितान्त** इति । ततः यतः इति । तदो यदश्च पञ्चमीसमर्थात् 'पञ्चम्यास्तसिल्' इति तसिल् सुप् लुक् । प्राग्दिश इति । विभक्तित्वात् त्यदाद्यत्वम् । पररूपत्वम् । **तत्र यत्रेति** । 'सप्तम्यास्त्रल्' । एते सर्वे ततः प्रभृतयो विभक्त्यर्थप्रधानाः । स च विभक्त्यर्थः प्रातिपदिकार्थः संपन्न इति प्रातिपदिकार्थे प्रथमैव स्यात् । सापि संख्याविशेषाभावात् न सर्वा किं तर्हि सुरेव तस्योत्सर्गत्वात् । तथा चोक्तं **महाभाष्ये** । 'एकवचनमुत्सर्गः करिष्यते' इति । तस्यापि 'अव्ययादाप्सुपः' इति लुक् । तद्धित इति किम् । एकः । द्वौ । बहवः । असर्वविभक्तिः किम् । औपगवः । औपगवौ । औपगवाः । स चासर्वविभक्तिस्ताद्धिते नि[6]यत एवाश्रयणीयः । तथाहि । तसिलादयः प्राक् पाशपः शसादयः आसमासान्तात् मान्तः कृत्वोर्थः तसिवती नानाञाविति । अन्यथा संख्यायाः सं[7]ज्ञा संघेति संज्ञायां कनि स्वार्थे कृते पञ्चकाः शकुनय इत्यत्र पञ्चकशब्दस्यासर्वविभक्तिकत्वादतिप्रसङ्गः स्यात् ।

---

१. ताद्धितो° D_2. २. °प्यव्ययसंज्ञः C. ३. ततः । तत्र । C. ४. अर्थे Dc_2. ५. तद्धितश्च Bc_1. ६. Dropped Dc_2. ७. संज्ञेति संज्ञायां Bc_1.

कृन्मेजन्तः ॥१।१।३९॥

कृद्यो मान्त एजन्तश्च सोऽप्यव्ययं स्यात्[1] ॥ स्मारं स्मारम् । जीवसे । पिबध्यै ।

क्त्वातोसुन्कसुनः ॥१।१।४०॥

एते अव्ययसंज्ञाः स्युः ॥ कृत्वा । उदेतोः । [2]विसृपः ।

कृन्मेजन्तः । **स्मारं स्मारमिति** । स्मृ आध्याने अस्मात् 'आभीक्ष्ण्ये णमुल् च' इति णमुल् । **जीवसे** इति । जीव प्राणधारणे अस्मात् 'तुमर्थे—' इत्यादिनासेप्रत्ययः । **पिबध्यै** इति । पा पाने अस्मात् शध्यैप्रत्ययः । पः पिबादेशः । येन विधिस्तदन्तस्येत्यनेनैव मेजन्त इति सिद्धे अन्तग्रहणमौपदेशिक[3]स्य मेजन्तत्वस्य प्रतिपत्तये तेन आधये चिकीर्षवे कुम्भकारेभ्य इत्यत्राव्ययसंज्ञा न । ननु चात्र लक्षणप्रतिपदोक्तपरिभाषया असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया वा न भविष्यति । सत्यमेतत् । एवमर्थप्रतिपत्तौ साध्यायां प्रतिपत्तिगौरवं स्यादित्यन्तग्रहणमेव कृतम् । **क्त्वातोसुन्** । **कृत्वेति** । कृञः 'समानकर्तृकयोः पूर्वकाले' इति क्त्वा । **उदेतोरिति** । उत्पूर्वादिणो 'भावलक्षणे स्थेण्—' इति तोसुन् । **विसृप** इति । 'सृपितृदोः—' इति कसुन् । ननु च 'तद्धितश्चासर्वविभक्तिः' इत्यादिकं सर्वं[4] न पठितव्यम् । यतस्तस्याव्ययत्वं स्वरादित्वेनैव सिद्धम् । तथा हि स्वरादौ पठ्यते । तसिलादिस्तद्धित एधाच्पर्यन्त इत्यादि । तथा क्त्वातोसुन्कसुनः कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्चेति । उच्यते । तस्य पुनर्वचनमव्ययसंज्ञाया अनित्यत्वज्ञापनार्थम् । तेन 'पुरा क्रूरस्य विसृपो विरप्शिम्' इत्यादौ 'न लोकाव्यय—' इति षष्ठीनिषेधो न । उपाग्निकामित्यादावकच् न । क एव स्यात् ।

---

१. सोऽव्ययसंज्ञः B_1. २. विश्वसृपः D_3. ३. °कमेजन्त° Bc_1. ४. सर्वं काण्डं Dc_2, Dc_3, Dc_4.

अव्ययादाप्सुपः ॥२।४।८२॥

अव्ययात् परस्यापः सुपश्च लुक् स्यात् ॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥१॥

अव्ययात् । ननु चाव्ययस्यालिङ्गत्वात् टाप्प्राप्तिरेव नास्ति स हि स्त्रियां विधीयते । अतो व्यर्थमेतत् । लुक्वचनं चानर्थकम् । स्त्रियामिति गुणिप्रधानो निर्देशः । स्त्रीत्ववति टाबादय इति स्त्रीत्ववत्त्वाच्च शालादौ तत्रेत्याद्यव्ययं वर्तत इत्यापो लुग्वाच्यः । ननु च स्वादिषु विधायकं सूत्रं 'बहुषु बहुवचनम्' इत्यादिना एकवाक्यत्वं प्राप्य प्रवर्तते । तथा च सत्यव्ययस्यासंख्यत्वात् स्वादयो नोत्पद्यन्ते एवेति सुपो लुग्वचनं व्यर्थम् । एवं तर्ह्येतदेव ज्ञापयति निःसंख्येभ्योऽव्ययेभ्यः स्वादयो भवन्तीति । तथा चोक्तं **महाभाष्ये** । 'अथवाचार्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्तेऽव्ययात् स्वादयः' इति । यदयम् 'अव्ययादाप्सुपः' इति 'सुपो लुकं शास्ति इति' । अत्युच्चैसौ इत्यादौ उपसर्जनस्याव्ययत्वप्रतिषेधार्थं परमश्च इत्यादौ तदन्तस्याव्ययत्वप्रतिपत्त्यर्थमव्ययसंज्ञाया अन्वर्थत्वं दर्शयितुम् । आथर्वणीं प्रणवविद्यास्थां श्रुतिमाह । **सदृशमित्यादि** । यन्न व्येति विविधं नाना न गच्छति तदव्ययम् । क्व पुनर्न व्येतीत्याशङ्क्याह । **सदृशमित्यादि** । त्रिषु लिङ्गेषु स्त्रीपुंनपुंसकेषु सदृशं तुल्यम् । लिङ्गविशेषापरिग्रहात् लिङ्गसामान्योपादानाच्च । **सर्वासु च विभक्तिषु** इति । विभक्तिनिमित्तत्वात् विभज्यते वा प्रातिपदिकार्थ एभिरिति कर्मादीनि कारकाणि शक्तिरूपाणि विभक्तिशब्देनोच्यन्ते । **वचनेषु चेति** । वचनान्येकवचनबहुवचनानि । इह त्वभिधेयेऽभिधानोपचारादेकादिका संख्या गृह्यते तदेव कारकसंख्याविशेषानुपादानात् तत्सामान्यरूपोपादानाच्च विभक्तिषु वचनेषु च सदृशं भवति । एवं यस्माल्लिङ्गकारकविशेषानुपादानान्न व्येत्यतोऽव्ययमित्यन्वर्थसंज्ञा ।

---

१. °वत्त्वां च Dc2 ; °वत्त्वां वा Dc4.

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं[1] चैव हलन्तानां यथा वाचा निशा दिशा ॥२॥
वगाहः । अवगाहः । पिधानम् । अपिधानम् ।

इत्यव्ययानि ॥

वष्टीति । भागुरिर्ऋषिरत्रावाप्योरुपसर्गयोरकारस्य लोपं वष्टि इच्छति तथा हलन्तानामापं चैवं[2] वष्टि । **वाचेत्यादि** । यथा हि दृश्यत इत्यर्थः । **वगाह** इति । गाहू विलोडने । घञ् । **पिधानमिति** । डुधाञ् धारणपोषणयोः । ल्युट् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादेऽव्ययगणकथनं सार्थकं सातिमागात् ॥

---

१. टापं B_1, B_2. २. चैवं Dc_3.

अथ स्त्रीप्रत्ययाः[1] ।

अजाद्यतष्टाप् ॥४।१।४॥

अजादिभ्योकारान्ताच्च टाप्[2] स्यात् स्त्रियाम् ।

अथ स्त्रीप्रत्ययाः कथ्यन्ते । **अजाद्यतः** । अत्र[3] 'ङ्याप्प्रातिपदिकात्' इति वर्तते । तत्रात्र प्रकरणे प्रातिपदिकमात्रं संबध्यते । ङ्यापोरनेनैव विधानात् । **स्त्रियामिति** । 'स्त्रियाम्' इत्यधिकारसूत्रानुवृत्तेः । तस्य चायमर्थः । स्त्रियां वाच्यायामथवा स्त्रियां यत् प्रातिपदिकं वर्तते तस्मात् टाबादयः प्रत्ययाः स्युरिति । केयं स्त्री । उच्यते । स्त्रीलिङ्गं[4] तच्च सविशेषं[5] **भर्तृहरिणा** प्रकीर्णककाण्डे[6] व्याख्यातम् । तथापि कियद्विशेषं कथ्यते । अग्रे 'प्रातिपदिकार्थ—'[7] इति सूत्रे कश्चित् प्रकारः कथयिष्यते । यद्दर्शेन इयं स्त्रीति लोके संप्रत्ययः स धर्मः स्त्रीत्वम् । स च गोत्वादिवत् सामान्यविशेषः । तथा च **पाणिनीयमतदर्पणे** उक्तम् ।

'इयमयमिदमिति येषु व्यपदेशो दृश्यते लोके ।
स्त्रीपुंनपुंसकानि प्रोच्यन्ते तानि लोकेन ॥१॥

गोत्वादि[8] स्वाश्रयैर्यद्वत्[9] सामान्यमुपलक्ष्यते ।
व्यञ्जकैरनुवृत्तत्वात् स्त्रीत्वपुंस्त्वादिकं तथा ॥२॥

भावानां शक्तीनां लोके प्रतिनियतविषयत्वात् ।
किंचित् केनचिदेवाश्रयेण सामान्यमुन्मिषति ॥३॥

ततो व्यञ्जकवैचित्र्याद्येनात्र स्त्रीत्वमेव हि ।
व्यज्यते न तु पुंस्त्वादिः सोर्थः स्त्रीत्यभिधीयते ॥४॥

---

१. Heading dropped P, B_1, B_2, D_2, D_5. २. स्त्रियां टाप् स्यात् D_3; प्रातिपदिकाट्टाप् D_4. ३. अत्र dropped Bc_1. ४. स्त्रीलिङ्गं च Bc_1. ५. विशेषं Nc_1. ६. प्रकीर्णकाण्डे Nc_1. ७. प्रातिपदिकार्थे सूत्रे Bc_1. ८. Before it—तथा Bc_1, Dc_4. ९. स्वाश्रयं य° Dc_4.

आबिति सामान्योक्त्यर्थो यस्तदविघातार्थष्टः। अन्यथैकेद्ग्रहणे अनेकेतौ डाप्चापौ न गृह्येयाताम्। अजाद्युक्तिर्ङीप्निषेधार्था।

पुमान् नपुंसकं चैवं द्वित्रिलिङ्गं तथैव च।
यथा गौरी गिरिर्गेहमर्धर्चस्तटमत्र दिक् ॥५॥
अत्यन्तमाश्रयाणां सादृश्याद् व्यञ्जकाभावात्।
उपदेशैकव्यङ्ग्यं क्वचिद्यथा ब्राह्मणत्वादि ॥६॥
आश्रयस्यातीन्द्रियत्वात्तथा स्त्रीत्वादिकं क्वचित्।
उपदेशव्यङ्ग्यमेव स्यात् दिगात्मा गगनं यथा ॥७॥' इति।

आबिति। **सामान्योक्त्यर्थ** इति। 'ङ्याप्प्रातिपदिकात्' इत्यादौ डाप्चापोरिवास्यापि ग्रहणं यथा स्यादिति सामान्यग्रहणार्थं पकारोनुबध्यते। असति हि पकारे अस्य ग्रहणं न स्यादिति भावः। **तदविघातार्थष्ट** इति। तस्य सामान्यस्य विघातो मा भूदिति टकारोनुबध्यते। एतदेव व्यतिरेकेणोपपादयति। **अन्यथे**त्यादि। यदि टकारो नानुबध्येत तदा 'ङ्याप्प्रातिपदिकात्—' इत्यादौ एकेतोस्य ग्रहणे सति अनेकेतौ डाप् चापौ न गृह्येयातामेकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति परिभाषयेति भावः। अजादीनां प्रायशोदन्तत्वादेत इत्येव सिद्धे अजादिग्रहणं व्यर्थमित्याशङ्क्याह। **अजाद्युक्ति**रिति। ङीबित्युपलक्षणं ङीषोपि ङीप्निषेधार्थेत्येतदुपलक्षणमप्राप्तटाब्विधेरपि। तथाहि क्वचिज्जातिलक्षणे ङीषि प्राप्ते तन्निषेधार्थं टाब्विधिः। क्वचिद् द्वयालेक्षणे ङीपि क्वचित् पुंयोगलक्षणे ङीषि क्वचित् पुष्पफलमूलोत्तरपदे ङीषि क्वचित् टिल्लक्षणे ङीपि हलन्तानां त्वप्राप्त एव। एतच्च

---

१. °दविघानार्थ° P; C, B1; °दभिधानार्थ° D5. २. Before it—, ानुबन्धग्रहणे न द्व्यनुबन्धकस्य ग्रहणम् D5. ३. सामान्यग्रहणस्य Dc3, Dc4, Bc1. ४. °दत एव Nc2, Dc3. ५. ङीषि Dc3.

अजा । एडका । अश्वा[1] । चटका । मूषिका[2] । बाला । होडा[3] । पाका । वत्सा[4] । मन्दा । विलाता । मेधा[5] । सर्वा ॥

हलन्ताद्वा* । वाचा । वाक् । दिशा । दिक्[6] । तपरः किम् । सोमपाः । शूद्रा[7] चामहत्पूर्वा जातिः ।

यथास्थानमनन्तरमेव वक्ष्यामः । अजादिगणं पठति । अजेत्यादि । मूषिकेत्यन्ता जातिवचना इति 'जातेः—' इति ङीषि प्राप्ते । बालादयो विलातान्ता वयोवचनाः । तत्र 'वयसि प्रथमे' इति ङीपि पूर्वापहाणा अपरापहाणेति च गणे पठ्यते तदपि ज्ञेयम् । अत्र 'टिड्ढाणञ्—' इति टिल्लक्षणे ङीपि । तथा क्रुञ्चा देवविशा उष्णिहेति च गणे पठ्यते तदपि ज्ञेयम् । अत्र हलन्तत्वादप्राप्तष्टाब् विधीयते । अदन्तत्वादुदाहरति[8] । **मेधा सर्वेति हलन्ताद्वेति** । एतच्च **भागुरिमतम्** । आपं चैव हलन्तानामित्युक्तत्वात् । **तपरः किमिति** । अत इत्यकारस्तपरः किमर्थमुच्यत इत्याशङ्क्का[9] । उत्तरमाह । **सोमपा** इति । अयं भावः । अत इति तपरकरणं कालावधारणार्थं[10] ततश्च द्विमात्रात् सोमपाशब्दात् टाप् न । यदि हि टाबत्राभविष्यत् 'हल्ङ्याब्भ्यः' इति सुलोपोऽभविष्यदिति । **शूद्राच्चामहत्पूर्वाज्जातिरिति** । गणसूत्रमर्थतः पठति ।

---

१. अश्वा । चटका । dropped C. २. मूषिका before अश्वा D_1. ३. होढा D_5. ४. Dropped D_3. ५. Before it—त्रिफला C; अतः मेधा । त्रिफला । सर्वा । B_2; अतः मेधा । सर्वा । D_5. ६. After it—निशा । निट् । D_2. ७. Before it—महणवता प्रातिपदिकेन तदन्तविधिर्न । यथा विशिष्टवाक् B_2. ८. अत्राद° Nc_2. ९. °शङ्क्य Dc_4, Dc_3. १०. कालावधानार्थं Nc_2.

शूद्रा। जातिः[1] किम्। शूद्रस्य स्त्री शूद्री। अमहत्पूर्वेति[2] किम्। महाशूद्री। अत्र[3] प्रकरणे तदन्तग्रहणमिष्यते[4]। संभस्त्राजिनशणपिण्डेभ्यः फलात्*॥ संफलेत्यादि[5]।

शूद्रा चेति। शूद्रशब्दादपि अमहत्पूर्वात् टाप् स्यात् जातिश्चेत् समुदायेन वाच्या स्यादित्यर्थः। शूद्रस्य स्त्री शूद्रीति। 'पुंयोगादाख्यायाम्' इति ङीष्[6]। महाशूद्रीति। जातित्वाद् ङीष्[7]। आभीरजातिस्त्री महाशूद्री। यदा तु महती चासौ शूद्रा चेति विग्रहस्तदा महाशूद्रेत्येव स्यात् महत्पूर्वनिषेधे जातिरित्यनेन संबन्धात्। ननु च ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् महत्पूर्वात् टापोप्राप्तिरेव तद् व्यर्थो महत्पूर्वनिषेध इत्याशङ्क्याह। अत्र प्रकरण इति। अयमेव महत्पूर्वनिषेधो ज्ञापयति यदत्र प्रकरणे तदन्तग्रहणमिष्यत इति भावः। ननु च यद्यत्र प्रकरणे तदन्तग्रहणमिष्टं तर्हि पञ्चानामजानां समाहारः पञ्चाजीति 'द्विगोः[8]' इति तदन्तविधिना टाप् स्यात्। मैवम्। 'अजाद्यतः—' इति षष्ठी। तत्राजादिभिः स्त्रियं विशेषयिष्यामः। अजादीनां या स्त्रीति अजादिशब्दानां वाच्येऽर्थे यत् स्त्रीत्वं समवेतं तत्र टाबिति। न च पञ्चाजीत्यत्राजशब्दवाच्येऽर्थे[9] स्त्रीत्वं समवेतं किं तर्हि समाहारस्य[10] वाच्ये। संभस्त्रेत्यादि। संभस्त्रादिभ्यः परो यः फलशब्दस्तस्माट्टाप् स्यादित्यर्थः। इत्यादीति। आदिशब्दात् भस्त्रफला अजिनफला शणफला पिण्डफला।

---

१. जातेः किम् P, C, B_1, B_2. २. अमहत्पूर्वादिति B_1; अमहत्पूर्वस्येति किम् D_3. ३. Before अत्र C has आभीरजातिः. ४ C has after it—इहापि तर्हि द्विगोरिति ङीपं बाधित्वा टाप् प्राप्नोति। पञ्चाजा। दशाजी। नैवम्। अजादिसूत्रे अजादिभ्यः स्त्रीवृत्तिभ्य इति विशेषणात्। न चात्र अजाशब्दः स्त्रियाम्। किं तर्हि। समास इति।. ५. संफला। भस्त्रफला। इत्यादि। D_3. ६. ङीप् Dc_3. ७. ङीप् Bc_1. ८. द्विगोरपि Bc_1, Dc_4. ९. °त्यत्र शब्द° Nc_1; पञ्चाजी अत्रा° Dc_4. १०. समाहारवाच्ये Bc_1.

एकफलेति केचित्[१]। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्[२]*॥ सत्पुष्पेत्यादि[३]। ज्येष्ठाकनिष्ठामध्यमेति पुंयोगेपि[४]। कोकिला जातावपि। मूलान्नञः*॥ अमूला। ऋन्नेभ्यो ङीप्[५]। कर्त्री। दण्डिनी। अर्वती। राज्ञी। शुनी। मघोनी। मघवती।

एकफलेति केचिदिति। तथा चोक्तं बोपदेवपण्डितैः। 'जातेरस्त्रीयुङ्सत्प्राक्काण्डप्रान्तशतैकादिपुष्पसंभस्त्राजिनैकाशणपिण्डादि—फलनादिमूलात्' इति। सत्प्रागिति। एतेभ्यः परात् पुष्पशब्दात् टाप् स्यादित्यर्थः। प्राक्पुष्पा। काण्डपुष्पा। शतपुष्पा। एकपुष्पा। 'पाककर्णपर्णपुष्पफल—' इति प्राप्तस्य ङीषोपवादः। ज्येष्ठेत्यादि। एते पुंयोगेपि टाबन्ताः साधव इत्यर्थः। 'पुंयोगादाख्यायाम्' इति प्राप्तङीषोपवादः। कोकिलेति जातावपि टाबन्तः साधुः। मूलादिति। नञ्पूर्वात् मूलात् टाप् स्यात्। 'ऋन्नेभ्यो ङीप्' इति। इदं सूत्रमजन्तस्त्रीलिङ्गे व्याख्यातम्। अर्वतीति। अर्वन्शब्दात् ङीपि कृते 'अर्वणस्त्रसावनञः' इति तृ अन्तादेशः। एतच्चासावित्यस्य पर्युदासत्वे। प्रसज्यप्रतिषेधे त्वस्मिन् प्रथमं त्रादेशस्तत उगित्त्वात् ङीप्। तथा च कैयटादिभिरुदाहृतम्। उगितश्चेत्यत्रार्वतीति। राज्ञीति। 'अल्लोपोनः' इत्यल्लोपः। शुनी। मघोनीति। 'श्वयुवमघोनामतद्धिते' इति संप्रसारणम्। मघवतीति। ङीपि कृते 'मघवा बहुलम्' इति त्रन्तादेशः।

---

१. After it—वदन्ति B₂. २. पुष्यात् D₁. ३. सत्पुष्ये° D₁. ४. After it—टाप् D₅. ५. P has after it ऋदन्तेभ्यो नान्तेभ्यश्च ङीप् स्यात्।. ६. Before it—आदिना Bc₁. ७. काण्डपुष्पा। शतपुष्पा dropped Dc₄. ८. °स्त्रीलिङ्गेषु Bc₁. ९. कैय्यटा° Nc₁.

उगितश्च ॥४।१।६॥

यथाकथंचिदुगितः शब्दात् स्त्रियां ङीप् स्यात्[1] ॥ विदुषी ॥ [2]श्रीमती । [3]भवती । [4]अतिभवती । अत्रभवती । शप्श्यनोर्नित्यम् । पचन्ती । दीव्यन्ती । 'आच्छीनद्योर्नुम्[5]' । तुदन्ती । तुदती । भान्ती । भाती । धातोरुगितो न । उखास्रत् । पर्णध्वत् । अञ्चतेस्त्विष्टः । [6]प्रतीची । प्रत्यञ्ची । [7]तिरश्ची । तिर्यञ्ची । अमुमुईची । उदीची ।

उगितः । **यथाकथंचिदिति** । येन केनचित् प्रकारेण य उगित् तस्माद्यद्यादेशवर्ण उगित् संभवति यदि वा प्रत्ययः [8]अथापि प्रातिपदिकं [9]सर्वथा यत्रैषामन्यतम उगित् स्यात् तच्छब्दरूपमुगित्तेनोगित इति शब्दस्य विशेषणं न प्रातिपदिकस्येति भावः । **विदुषीति** । 'विदेः [10]शतुर्वसुः' इति लटो वसुरादेशः । वसोः संप्रसारणम् । **श्रीमतीति** मतुप् । **भवतीति** । सर्वादिगणे भवतु [11]इत्युदिदुच्यते । **अतिभवतीति** । तदन्तविधेरिष्टत्वात् । **पचन्तीं दिव्यन्तीति** । लटः शता । **उखास्रदित्यादि** । स्रंसुध्वंसु अधःपतने । क्विप् । वसुस्रंसु—' इति दत्वम् । **प्रतीची इति** । 'अचः' इत्यलोपः । 'चौ' इति दीर्घः । **प्रत्यञ्चीति** । 'नाञ्चेः पूजायाम्' इति [12]नलोपो न ।

---

१. D_1 omits it. २. गोमती D_4. ३. Dropped D_3. ४. Before it—भवन्तमतिक्रान्ता P, B_1, B_2. ५. °र्नुम् वा B_2. ६. प्राची for प्रतीची B_1, C, P. ७. तिर्यञ्ची । उदञ्ची । प्राची । प्रतीची । तिरश्ची । अदमुईची । उदीची B, C, P (C has अमुमुईची). ८. Corrected into तथापि Bc_1, Dc_3. ९. सर्वथाप्यत्रैषा° Dc_3. १०. शतुर्वसु° Dc_3. ११. इत्युदित पठ्यते Dc_4. १२. लोपो न Bc_1.

वनो र च ॥४।१।७॥

वन्नन्तात् स्त्रियां ङीप् स्यात् रश्चान्तादेशः ॥ धीवरी । हरिदृश्वरी ।

वनो न हशः* । राजयुध्वा । सहयुध्वा स्त्री । शतयुध्वा स्त्री । णान्ताद्धातोर्वनो ङीब्रावित्येके । अवावरी[४] । बहुव्रीहौ वा* ॥ बहुधीवा । बहुधीवरी ।

वनः । अत्र वन इति क्वनिब्वनिपोः प्रत्यययोर्ग्रहणं नान्यस्य वनः । **धीवरीति** । धाञ् । आतो मनिन् क्वनिब्वनिपश्च । 'अन्येभ्योपि दृश्यन्ते' इति निरुपपदादपि क्वनिप् । 'घुमास्था—' इतीत्वम् । **हरिदृश्वरीति** । हरिं दृष्टवती । दृशेः क्वनिप् । **वन इति** । हशान्ताद्धातोर्विहितो यो वन् तदन्तात् प्रातिपदिकात् ङीप्रौ न भवतः । **राजयुध्वेति** । राजानं योधितवती । 'राजनि युधि—' इति क्वनिप् । **सहयुध्वेति** । 'सहे च' इति क्वनिप् । 'सर्वनामस्थाने च' इति दीर्घः । नलोपः विहितविशेषणम् । हश्ग्रहणं किम् । शर्वरीत्यत्र ङीप्रौ यथा स्याताम् । अत्र यद्यपि रेफात् हशः परो वन् तथापि हशन्तान्न विहितः किं तु शॄ अस्मात् 'अन्येभ्योपि दृश्यन्ते' इति वनिपि गुणे रपरे च पश्चाद्धशः परो वनिबिति निषेधो न । **णान्तादिति** । **एक इति** । **न्यासकारादयः** । तथा च **न्यासकारेणोक्तम्** । **अवावरीति** । हशान्ताद्धातोः परो वनिब् विहितः तथापि प्रतिषेधो न भवति । ओणृ अपनयने । 'अन्येभ्योपि दृश्यन्ते' इति वनिप् । 'विड्वनोरनुनासिकस्यात्' इति णस्यात्वम् इति । **बहुव्रीहौ वेति** । एतच्च 'डाबुभाभ्यामन्यतरस्याम्' इत्यन्यतरस्यांग्रहणात् सिद्धं तथा च **वृत्तिकृतोक्तम्** । अन्यतरस्यांग्रहणं किमर्थम् । 'बहुव्रीहौ वनोरच' इत्यस्यापि विकल्पो यथा स्यादिति । **बहुधीवेति** बहवो धीवानो यस्यां सा ।

---

१. Before it—पीवरी । ण्यन्ताद्धातोर्वनोर्ङीब्राबिति केचित् । अवावरी । B_1, C, P. २. हश्प्रत्याहारात् परस्य वनो ङीप्रौ न स्तः । राजयुध्वा । सहयुध्वा । P; B_1, C; (After स्तः C has विहितविशेषं हश्ग्रहणं तेन शर्वरीत्यत्र ङीप्रौ यथा स्याताम्); B_2 has हश्प्रत्याहारात् विहितो यो वन् तदन्तस्य ङीप्रौ न स्याताम्. ३. राजयुध्वा B_2. ४. After it—धीवरी D_3. ५. युधि कृञः Bc_1, Dc_4. ६. वनिप् Dc_3. ७. दृश्यते Bc_3.

पादोन्यतरस्याम् ॥४।१।८॥

पाच्छब्दान्तात्[1] स्त्रियां ङीप् स्याद्वा ॥ द्विपाद् । द्विपदी ।

टाबृचि ॥४।१।९॥

ऋचि वाच्यायां पादान्तात् टाप् स्यात् न ङीप् । द्विपदा ऋक्[2] । न षट्स्वस्रादिभ्यः । पञ्च । चतस्रः । पञ्चेत्यत्र नलोपे कृतेपि ष्णान्ता षडति षट्संज्ञां प्रति नलोपः । सुप्स्वरेति नलोपस्यासिद्धत्वान्न षट्स्वस्रादीति न[3] टाप्[4] ।

पादः । पादिति कृतसमासान्तः पादशब्दो गृह्यते । **द्विपदीति** । द्वौ पादौ अस्या[5] इति बहुव्रीहिः । 'संख्यासुपूर्वस्य' इति पादस्यान्तलोपः । 'पादः पद्' इति पद्भावः ।

टाबृचि । यदि ऋचि इति विषयनिर्देशः स्यात् तदा संग्रन्थेयः[6] पाच्छब्दनिर्देशः स्यादित्याशङ्क्य ऋगित्यभिधेयनिर्देश[7] इत्यभिप्रेत्याह । **ऋचि वाच्यायामिति**[8] । **पञ्चेत्यत्रेत्यादि** । अयमर्थः । पञ्च ब्राह्मण्य इत्यत्र 'ऋन्नेभ्यः—' इति प्राप्तस्य ङीपो 'न षट्स्वस्रादिभ्यः' इति निषेधे कृते 'षड्भ्यो लुक्' इति जसो लुकि नलोपे[9] च कृते अकारान्ततायामुपजातायां टाप् प्राप्तः स 'न षट्स्वस्रादि—' इति निषिध्यते । ननु च 'ष्णान्ता षट्' इति नान्तस्यैव षट्संज्ञा विधीयते । तथा चात्र नान्तत्वाभावात् षट्संज्ञा नास्तीति न टापो निषेध इत्याशङ्क्याह । **न लोपे कृतेपि ष्णान्ता षडित्यादि** ।

---

१. After it—बहुव्रीहिः B_1. २. After it—द्विपदा गायत्री B_1. ३. न ङीप्टापौ D_4. ४. After it—न ङीप् B_1. ५. यस्याः Bc_1. ६. ऋक्ग्रन्थेयः पाच्छब्द इत्यर्थः स्यादित्याशङ्क्य Bc_3, Dc_3. ७. ऋचीत्य° Bc_3, Dc_4, Dc_3. ८. व्याख्यायां Nc_1. ९. कृते न लोपे च Nc_1, Bc_3.

मनः ॥४।१।११॥

मन्नन्तात् स्त्रियां न ङीप्[१] ॥ सीमा[२] । सीमानौ । अतिमहिमानौ[३]

अनो बहुव्रीहेः ॥४।१।१२॥

अन्नन्ताद्बहुव्रीहेर्न[४] ङीप्[५] ॥ बहुयज्वानौ[६] ।

डाबुभाभ्यामन्यतरस्याम् ॥४।१।१३॥

मन्नन्तादन्नन्ताद्बहुव्रीहेश्च[७] डाब् वा स्यात् । टिलोपः[८] । बहुसीमे[९] । बहुसीमानौ । बहुयज्वानौ ।

मनः । अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति परिभाषयात्रार्थवद्ग्रहणपरिभाषा नोपतिष्ठत इत्यभिप्रेत्यानर्थकं मनमुदाहरति । **सीमा । सीमानावि**त्यादि । 'ऋन्नेभ्यः—' इति प्राप्तस्य ङीपो निषेधः ।

अनः । उपधालोपिनो विकल्पं वक्ष्यतीत्यनुपधालोपी बहुव्रीहिरिहोदाहरणमित्यभिप्रेत्याह । **बहुयज्वानावि**ति । 'न संयोगाद्वमन्तात्' इत्ययमनुपधालोपी ।

डाबुभाभ्याम् । इहा[१०]न्यतरस्यांग्रहणं डापामुक्ते ङीपुनिषेधार्थं[११] वा टाप्निषेधाभ्यामुक्ते ङीबर्थं वा । न प्रथमः । डाबपि ह्युच्यते निषेधोपि तौ वचनसामर्थ्यात् स्याताम् । द्वितीयं विकल्पयामः । स ङीप्पक्षे भवन् अनुपधालोपिनो वा स्यादुपधालोपिनो वा । नाद्यः । निषेधवचनानर्थक्यप्रसङ्गात् । न द्वितीयः ।

---

१. ङीप् स्यात् D₂. २. C has दामा । दामानौ before it. ३. Dropped Bc₃; अतिमहिमा । अतिमहिमानौ । D₄, D₅. ४. C has स्त्रियाम् before न. ५. ङीप् स्यात् D₂. ६. Before it—बहुयज्वा D₃. ७. °न्तबहु° D₁; °न्ताच्च बहुव्रीहेर्वा डाप् D₂. ८. P drops डित्त्वात् टिलोपः; डित्त्वात् before टिलोपः D₄, B₁. ९. सीमे । सीमाः । पामे । पामाः । सीमानौ । पामानौ । बहुयज्वे । बहुयज्वानौ C; सीमे । सीमानौ । बहुयज्वा । बहुयज्वे । बहुयज्वानौ P; सीमा । सीमे । सीमानौ । बहुयज्वे । बहुयज्वानौ D₁, Bc₃; सीमे । सीमानौ बहुयज्वे D₅, D₄, D₃, B₂. १०. इह dropped Nc₁, Bc₃. ११. ङीप् Bc₁, Dc₃.

अन उपधालोपिनोन्यतरस्याम् ॥४।१।२८॥

अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वा[१] ङीप् स्यात् ॥ पक्षे डाप्ङीप्निषेधौ[२] ॥ बहुराज्ञ्यौ[३] । बहुराजे । बहुराजानौ ।

प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः ॥७।३।४४॥

प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य ईकारः[४] स्यादापि परे स आप् सुपः[५] परो न चेत् ॥ सर्विका । कारिका । अतः किम् । नौका[६] । असुपः किम् ।

'अन उपधालोपिनोन्यतरस्याम्' इति प्रतिपदं ङीपो विधास्यमानत्वात् । न ह्यन्यतरस्यांग्रहणमवश्यं कर्तव्यम् । उपधालोपिनो[७] ङीपामुक्ते डाब्निषेधौ स्यातामिति । बहुराज्ञ्यौ बहुराजानौ बहुराजे इति । तस्मादत्रान्यतरस्यांग्रहणं व्यर्थम् । अन्यतरस्यामिति योगविभागः क्रियते । बहुव्रीहिरनुवर्तते । 'वनो र च' इति मण्डूकप्लुत्याधिक्रियते[८] । तथा च वन्नन्ताद्बहुव्रीहेर्ङीप्रौ[९] वा भवतः । तथा च 'वनो र च' इत्यत्रोक्तं 'बहुव्रीहौ वा' बहुधीवा[१०] बहुधीवरीति । अनः । उपधालोपिनः किम् । बहुयज्वा । बहुयज्वे । बहुयज्वानौ ।

प्रत्ययस्थात् । सुपः पर इति । सुबन्तात् पर इत्यर्थः । **सर्विकेति** । 'अव्ययसर्वनाम्नाम्—' इत्यकच् । अज्ञाताद्यर्थे । **कारिकेति** । कृञो ण्वुल् । प्रत्ययग्रहणं किम् । शक्नोतेः पचाद्यचि शका । ककारमात्रं प्रत्ययो[११] नास्तीति सामर्थ्यादेव प्रत्ययग्रहणे[१२] सिद्धे स्थग्रहणं विस्पष्टार्थम् । कादिति किम् । नन्दना । पूर्वस्य किम् । परस्य मा भूत् । मृदुका । पटुका । अत्र ककारात्परस्याकारस्य मा भूत् । **नौकेति** । 'प्रागिवात् कः' इत्यज्ञाताद्यर्थे कः । तपरकरणं किम् । धाका । दधातेरौणादिकः[१३]

---

१. ङीब् वा C. २. डाब्निषेधौ D_1. ३. बहुराज्ञ्यौ dropped Bc_3. ४. इत् B_1. ५. सुप्परो B_1. ६. After it—तपरः किम् । राका B_1; प्रत्ययग्रहणं किम् । राका B_2; तपरः किम् । कन्थाका । प्रत्ययग्रहणं किम् । शक्रा । Bc_3. ७. °लोपिनोन्यतरस्यामिति ङीपा° Bc_3. ८. °धिकमनुवर्तते Dc_3. ९. °द्बहुव्रीहौ ङी° Dc_4. १०. Nc_1, Bc_3 drop बहुधीवा. ११. °योस्तीति Bc_3. १२. प्रत्ययस्थग्रहणे Bc_3. १३. °रौणादिकप्रत्ययः Nc_1.

बहवः परिव्राजका यस्यां सा बहुपरिव्राजका।

मामकनरकयोरुपसंख्यानम्* ॥ मामिका । नरिका ।

त्यक्त्यपोश्च* ॥

कप्रत्ययः। आपीति किम्। कारको हारकः। ननु चापीत्यनेन किं विशेष्यते। यद्युच्येत ककार इति तदा सर्विका कारिकेत्यत्रापि न स्यात्। अकारेण व्यवधानात्। न च वाच्यमेकादेशे कृते नास्ति व्यवधानमिति तस्य 'अचः परस्मिन्—' इति स्थानिवद्भावादिति चेदुच्यते। येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधानमाश्रीयते। रथकट्या पुत्रकाम्येत्यादौ तु श्रुतिकृतमनेकेन वर्णेन व्यवधानमितीत्वं न स्यात्। बहव इत्यादि। परिव्राजकशब्दो ण्वुलन्तः तस्मात् सुबन्तादयमाबिति निषिध्यतेत्रेत्वम्। असुबिति च प्रसज्यप्रतिषेधोयं न पर्युदासः। तथा चोक्तम्। **स आप् सुपः परो न चेदिति**। पर्युदासत्वे हि असुबन्तात् समुदायात् पर आबिति बहुपरिव्राजकेत्यत्रेत्वं स्यादेव। अविद्यमानः सुबत्र सोयमसुबिति बहुव्रीहिरपि नाश्रीयते। यतो बहूनि चर्माण्यस्यां सन्तीति बहुचर्मिका। 'शेषाद्विभाषा' इति कप्। तत्र प्रत्ययलक्षणेन सुपो विद्यमानत्वादिति। इत्वं न स्यादिति। **मामकनरकयोरिति**। **उपसंख्यानमिति**। संख्यायते संक्षिप्यते प्रतिपाद्यतेनेनार्थ इति संख्यानं सूत्रं तस्योपोच्चारि संख्यानमुपसंख्यानम्। सूत्रसमीपे इदमपि सूत्रं पठितव्यमित्यर्थः। **मामिकेति**। ममेयम्। 'तस्येदम्' इत्यण्। 'तवकममकावेकवचने' इति ममकादेशः। वृद्धिः। ननु चात्र 'टिड्ढाणञ्—' इति ङीपा भाव्यम्। तत्कथं टाप्। नैष दोषः। 'केवलमामक' इति सूत्रेण संज्ञाछन्दसोरेव ङीपो नियमितत्वात्। **नरिकेति**। नरान् कायतीति नरिका। कै शब्दे। 'आदेच उपदेशेशिति' इत्यात्वम्। 'आतोनुपसर्गे कः' इति कः।

---

१. यस्यां शालायां B_1. २. यद्युच्यते Dc_4. ३. Before it—**असुपः** किम् Dc_3. ४. °च्चारितमुपसंख्यानम् Dc_3. ५. °नामकभाग—' Nc_1; °मामिक—' Bc_3; °मामक—' Dc_3. ६. °सर्ग—' इति Nc_1.

दाक्षिणात्यिका ॥ इहत्यिका । क्वत्यिका ।

न यासयोः ॥७।३।४५॥

कात् पूर्वस्य यत्तदोरस्य इन्न[1] स्यात् ॥ यका । सका । यकाम् । तकाम्[2] ।

त्यकनश्च निषेधः* ॥ अधित्यका । उपत्यका[3] ।

आशिषि वुनश्च न* ॥ जीवका । भवका[4] ।

उत्तरपदलोपे न* ॥ देवदत्तिका । देवका । यज्ञदत्तिका । यज्ञका । क्षिपकादीनां न* ॥ क्षिपका । ध्रुवका[5] । चटका ।

दाक्षिणात्यिकेति । दाक्षिणायां दिशि भवा । 'दक्षिणापश्चात्पुरसस्त्यक्' 'किति च' इति वृद्धिः । अज्ञाताद्यर्थे कः । **इहत्यिका** । **क्वत्यिकेति** । अव्ययात् त्यप् । कः । उभयत 'उदीचामातः स्थाने यकपूर्वायाः' इति प्राप्तस्य विकल्पस्यापवाद इत्वम् ।

न या । पूर्वेण नित्यमित्त्वे प्राप्ते निषेधः । **यका** । **सकेति** । यत्तदोरकच् । त्यदाद्यत्वम् । टाप् । सत्वम् । या सा इति निर्देशोऽतन्त्रं[6] केवलं यत्तदोरुपलक्षणमेतदित्यभिप्रेत्याह । **यकां तकामिति** । ननु च यत्तदोरित्येव किं नोक्तम् । सूत्रवैचित्र्यार्थम्[7] । **अधित्यका । उपत्यकेति** । 'उपाधिकाभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन् । **जीवका भवकेति** । 'आशिषि च' इति वुन् । **देवदत्तिका । देवकेत्यादि** । देवदत्तयज्ञदत्तशब्दात् 'अनुकम्पायाम्' इति कनि कृते । अत्र प्रकरणे हलादौ प्रत्यये द्वितीयादचः परस्य लोपो वा वाच्यः इति द्वितीयादचः परस्य वा लोपः । **क्षिपकादीनामिति** । इत्वं नेत्यनुवर्तते । **क्षिपका ध्रुवकेति** । क्षिप् प्रेरणे । ध्रुव स्थैर्ये । आभ्याम् 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः । ततोऽज्ञाताद्यर्थे कः[8] । **चटकेति** ।

---

१. इर्न D₁, B₂, D₂, Bc₃. २. तकाम् dropped D₂, D₅, C, B₁; D₅ drops यकाम् also. ३. C drops it. ४. B₁ drops it. ५. धृवका D₁. ६. °तन्त्रः Nc₁. ७. सूत्रे । वैचि° Bc₃. ८. कः । Dc₄, Dc₃; कः प्रत्ययः । Bc₃.

तारका ज्योतिषि* ॥ अन्यत्र तारिका। वर्णका तान्तवे* ॥ अन्यत्र वर्णिका। वर्तका शकुनौ प्राचाम्* ॥ उदीचां तु वर्तिका। अष्टका पितृदेवत्ये* ॥ अष्टिकान्या। सूतकादीनां वा* ॥ सूतका। सूतिका। पुत्रका। पुत्रिका। वृन्दारका। वृन्दारिका।

उदीचामातः स्थाने यकपूर्वायाः ॥७।३।४६॥

यकपूर्वस्य स्त्रीप्रत्ययस्याकारस्य स्थाने योकारस्तस्य कात्पूर्वस्येत् स्याद्वापि ॥ आर्यका। आर्यिका। चटकका।

चटति भिनत्ति गृहीतधान्यादिकं मुखेनेति चटका। चट स्फुटभेदे। दण्डका। इष्टका। हलका। ध्रुवका। चरका। पिप्पका। एडका। अलका। करका। मेनका। कन्यका। एरका। इत्यादयोऽन्ये प्रयोगात् ज्ञेयाः। **तारकेति**। तरतेर्ण्वुल्। **वर्णका तान्तव** इति। तन्तूनां विकारः। ओरञ्। तान्तवः प्रावरणविशेषः। तत्र वर्णकेति इत्वाभावेन साधुः। वर्ण क्रियाविस्तारगुणवचनेष्विति चौरादिः। ततो ण्वुल्। **अन्यत्र वर्णिकेति**। व्याख्यायिकेत्यर्थः। **वर्तकेति**। वृतु वर्तने। ण्वुल्। **अष्टका** पैतृदेवत्ये कर्मविशेषे। अशू व्याप्तौ। अस्मात् 'इष्याशिभ्यां तकन्' इति तकन्। व्रश्चादिना षत्वम्। तिष्टुत्वम्। **अष्टिकान्येति**। अष्टौ परिमाणमस्याः। 'संख्याया अतिशदन्तायाः कन्'। **सूतकेत्यादयः** पृषोदराद्यन्तःपातिनस्ततः साधवः।

उदीचाम्। नित्यमित्त्वे प्राप्ते विकल्पार्थं वचनम्। **यकपूर्वस्येति**। यकौ पूर्वौ यस्येति। यकपूर्वाया इति स्त्रीलिङ्गनिर्देशः स्त्रीविषयस्याकारस्य प्रतिपत्त्यर्थमित्यभिप्रेत्याह। **स्त्रीप्रत्ययस्येति**। स्त्रीवाचकस्य प्रत्ययस्येत्यर्थः। **आर्यकेत्यादि**। सर्वत्राज्ञाताद्यर्थे कः।

---

१. °स्य इः D1, D5, B2, D2, इद्वा स्याद्वापि D3; After it—'क्षेणः' इति ह्रस्वः D1, B2, P; C. २. Dropped D2. ३. चटका। चाटिका D2. ४. चौरादिकः Dc3. ५. कर्मणि Nc1. ६. अशूङ् Nc1, Bc3. ७. आर्यिकेति Bc1, Bc3, Dc3.

चटकिका। आतः किम्। साङ्काश्ये भवा साङ्काश्यिका। यकेति किम्। अश्विका। स्त्रीप्रत्ययः किम्। शुभंयिका।

धात्वन्तयकोस्तु नित्यम्* ॥ सुनयिका। सुपाकिका।

'केणः' इति ह्रस्वः। साङ्काश्ये भवा साङ्काश्यिकेति। संकाशेन निवृत्तं साङ्काश्यम्। 'वुञ्छण्—' इति संकाशादित्वात् ण्यः। ततो भवार्थे 'धन्वयोपधाद्वुञ्' इति वुञ्। स च साङ्काश्ये भवां स्त्रियमाहेति भवति स्त्रीप्रत्ययो यपूर्वश्च न तु स आकार इति कृत्वा तस्य स्थाने 'युवोरनाकौ' इति अकादेशे कृते अकारो जातस्तस्येत्त्वं विकल्पेन न किं तु नित्यमेव जातम्। ननु च यद्यपि वुञ् दैवगत्या स्त्रियमाह तथापि नायं स्त्रीप्रत्ययः स्त्र्यधिकारविहितत्वाभावात्। स्त्र्यधिकारविहित एव हि स्त्रीप्रत्ययः। अतो द्व्यङ्गविकलमिति चेत् कश्चिदाशङ्केत तदा तं प्रत्येवं ब्रूयात् साक्षात् सूत्रे स्त्रीप्रत्ययस्यैतन्नास्तीति कृत्वा प्रत्युदाहृतमिति[3] न द्व्यङ्गविकलता। तथा चानन्तरमेव उक्तार्थलभ्यता स्त्रीप्रत्ययस्येत्येतस्यास्माभिः कार्यकालं संज्ञापरिभाषमिति षष्ठी स्थाने योगेति परिभाषाविधावेवोपतिष्ठत इति अत इत्यस्य विशेषणे आत इत्यत्रानुवादे परिभाषानुपस्थानादथवा आत इत्यस्य विशेषणत्वेनाप्रधानत्वात् परिभाषाया अनुपस्थानात् स्थानषष्ठीत्वं न ज्ञायेतेति स्थानग्रहणम्। शुभंयिकेति। शुभं याति। 'आतो मनिन्—' इत्यादिना यातेर्विच्। ततः शुभंया इति स्थिते कप्रत्ययः। 'केणः' इति ह्रस्वः। अयमाकारः स्त्रीप्रत्ययो न भवतीति विकल्पो न। नित्यमेवेत्त्वं स्यात्। सुनयिकेति। णीञ् एरच्। शोभनो नयो यस्याः सा सुनया। ततः कः। 'केणः' इति ह्रस्वः। सुपाकिकेति। पचो भावे घञ्। 'चजोः—' इति कुत्वम्। शोभनः पाको[4] यस्याः। पूर्ववत् कः। ह्रस्वः।

१. सुनायिका D5. २. यदि No1. ३. °मिति कृत्वा Bc3. ४. पाकोऽस्याः। टाबादि पूर्ववत्° । Bc3, Dc4, पाको यस्याः। टाबादि पूर्ववत् Dc3;

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥७।३।४७॥

एषामत[1] इद्वा स्यात् नञ्पूर्वाणामपि॥ भस्त्रका। भस्त्रिका। अभस्त्रका। अभस्त्रिका। एषका[2]। एषिका। अजका। अजिका। [3]ज्ञिका। ज्ञका[4]। स्विका। स्वका। द्वके[5]। द्विके।

एषाद्वा* ॥ एतयोर्नञ्पूर्वयोर्नेत्वम् ॥ अनेषका। अद्वका[6] ॥ भस्त्रादेरुपसर्जनत्वेपि वा इत्वम्। निर्भस्त्रिका। निर्भस्त्रका।

अभस्त्रकेति। बहुव्रीहिस्तत्पुरुषो वा। **द्वके द्विके** इति। अकच्। **एषाद्वा**। **एतयोरिति**। अयं भावः। एतयोरकचि कृते पश्चान्नञ्समासः। अथवा पूर्वमुभयथापि समासादुत्पन्नायां विभक्तौ त्यदाद्यत्वे सति टाप् स्यात् सोन्तवर्तिन्या विभक्त्या सुबन्तात् पर इति इत्वस्याप्राप्तेरेव विकल्पाभावः। प्राप्तिपूर्वकत्वाद्विकल्पस्येति। एवं चेत् स्वशब्दस्यापि नञ्पूर्वस्येत्यत्वं न स्यात् पूर्ववत्। मैवम्। स्वशब्दस्य ज्ञातिधनाख्यायामसर्वनामत्वादकच् नास्त्येवेति कप्रत्यये कृते सुपः परष्टाप् न भवति केन व्यवधानादितीत्वं स्यादेवेति नञ्पूर्वस्यापि विकल्पः। **भस्त्रादेरिति**। एतच्च नञ्पूर्वाणामपीत्यस्मादपिशब्दाल्लभ्यते। स हि अन्यपूर्वाणां केवलानां च विकल्पो यथा स्यादित्येवमर्थः। यदि ह्यन्यपूर्वाणां केवलानामपि[9] वायं विधिरिष्यते तर्हि नञ्पूर्वाणामिति वचनं व्यर्थम्। यतो नञादिपूर्वाणां तदन्तविधिना स्यात् केवलानां व्यपदेशिवद्भावेन। अयमेवार्थो मन्दबुद्धिप्रत्ययार्थं नञ्पूर्वाणामपीत्यनेनानूद्यते।

---

१. °मतः स्थाने C. २. C and P drop these instances; C, D_2 have द्विके; D_1 drops from एषका to स्वका; Bc_3, D_3, D_4 drop from एषका to स्वका. ३. Before it—अनजिका। अनजका। अज्ञका। अज्ञिका B_2. ४. After it—अज्ञका। अज्ञिका D_2. ५. द्वके। द्विके dropped D_2. ६. B_1, B_2, D_5 have अद्वके।. ७. द्विके। द्वके इति Bc_3. ८. Dropped Dc_3. ९. केवलानामपि Nc_1, Bc_3. १०. अपि dropped Bc_1, Dc_3.

अभाषितपुंस्काच्च ॥७।३।४८॥

एतस्मादत इत् स्याद्वा ॥ गङ्गका । गङ्गिका । अगङ्गका । अगङ्गिका । परमगङ्गका । परमगङ्गिका ॥ बहुव्रीहौ तु नित्यम् ॥ अखट्विका ।

अभाषित । एतस्मादिति । अभाषितपुंस्काद्विहितस्यातः स्थाने योकारस्तस्य इद्वा स्यादित्यर्थः । गङ्गकेति । कप्रत्ययः । ह्रस्वः । गङ्गाशब्दोयमाविष्टलिङ्गो नित्यस्त्रीलिङ्गः । अगङ्गिकेति । 'नञ्' । इति तत्पुरुषः । परमगङ्गिकेति । 'सन्महत्—' इति तत्पुरुषः । ततः 'प्रागिवात् कः' । ततः 'केणः' इति ह्रस्वः । बहुव्रीहौ त्विति । तुर्विशेषे । बहुव्रीहौ समासे तु विशेषः । तमेव विशेषं दर्शयति । नित्यमिति । अखट्विकेति । अखट्विका । अत्र नित्यमित्त्वमित्यर्थः । अयं भावः । न विद्यते खट्वा यस्याः सा अखट्वा । अल्पा अखट्वा 'अल्पे' इति कः । 'केणः' इति ह्रस्वः । तस्य नित्यमेवेत्वं न विकल्पः । भाषितपुंस्काद्बहुव्रीहेर्विहितस्यातः स्थाने अकारस्य विहितत्वादिति । यदा तु बहुव्रीहौ 'शेषाद्विभाषा' इति कपि 'आपोन्यतरस्याम्' इति ह्रस्वः क्रियते तदा त्वभाषित-पुंस्काद्विहितस्यातः स्थाने जातोकार इति कृत्वा भवति विकल्पः । अविद्यमाना खट्वा यस्याः सा अखट्विका । यद्वा खट्वामतिक्रान्ता अतिखट्वा । अल्पा अतिखट्वा अतिखट्विकेत्यत्र प्रादिसमासे कृते उपसर्जनह्रस्वत्वेन ततष्टापि ततः कप्रत्यये पुनः 'केणः' इति ह्रस्वत्वम् । भाषितपुंस्कात् तत्पुरुषात् विहितस्यातः स्थाने विहितमिति विकल्पो न । 'आत्' । 'नञ्पूर्वाणामपि' इति निवृत्तम् । पूर्वसूत्रे चानुकृष्टत्वात् । इत्वापवादः । 'केणः' इति ह्रस्वत्वापवादश्च योगः

---

१. अभाषितपुंस्कात्त इद्वा स्यात् D3. २. इद्वा स्यात् C, Bc3, D4.
३. न विद्यमाना खट्वा यस्याः सा before it in B1. ४. नित्यं Dc3.
५. भवति dropped Nc1. ६. °ह्रस्वत्वे Dc3, Dc4.

आदाचार्याणाम् ॥७।३।४९॥

अभाषितपुंस्कादतः स्थाने आद्वा स्यात् । गङ्गाका[1] । अगङ्गाका । पक्षे प्रागुक्तम् । उक्तपुंस्कस्य तु[2] शुभ्रिका ।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ॥४।१।१५॥

टिदादिभ्योनुपसर्जनेभ्यः स्त्रियां ङीप् स्यात् ॥ यस्येति च । कुरुचरी । नैदट् । नदी । सौपर्णेयी ।

आचार्याणामिति । उदीचामित्युक्तम् । ततोन्येषामाचार्याणामित्यर्थः । अथवा पाणिनेराचार्यस्येति । गुरुत्वाद्बहुवचनम् । सर्वथा त्रैरूप्यं[3] स्यादित्यभिप्रेत्याह । **पक्षे प्रागुक्तमिति** ।

टिड्ढाणञ् । 'अतः' इत्यनुवर्तते सर्वत्र तत्संभवे सति विशेषकं[5] स्यात् । **अनुपसर्जनेभ्य इति** । 'अनुपसर्जनात्' इत्यस्मादधिकारसूत्रादेतल्लभ्यते । **कुरुचरीति** । टित उदाहरणम् । 'चरेष्टः' इति टः । **नदट् इति** । पचादौ नदडिति टिदयं पठ्यते । तेन नदीत्यत्र ङीप् । पचमानेत्यादौ स्थानिवद्भावेन शानचष्टित्त्वेपि ङीप् न । एकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति लटो ग्रहणं नास्तीति हेतोः । ल्युडादेस्तु द्व्यनुबन्धकत्वेपि टित्करणस्य प्रयोजनान्तराभावात् तत्सामर्थ्यादेवास्तीह ग्रहणम् । लटस्तु टित आत्मनेपदानां टेरेत्वं प्रयोजनम् । ननु पठिता विद्येत्यत्रापि ङीप् स्यात् । प्रत्ययभक्तस्येडागमस्य टित्त्वेन प्रत्ययस्यापि टित्त्वात् । मैवम् । सायं चिरमित्यत्र[6] तुटष्टित्त्वेपि पुनष्ट्युट्युल् प्रत्यययोष्टित्करणात् ज्ञायते नात्रागमटित्त्वं ङीप्निमित्तमिति[7] । **सौपर्णेयीति** । ढस्य । सुपर्णशब्दाज्जातिलक्षणङीषन्तादपत्यार्थे

---

१. गङ्गका । गङ्गाका । पक्षे प्रागुक्तम् । गङ्गिका B$_2$; after it—गङ्गका D$_2$. २. तु न शुचिका D$_2$. ३. Dropped D$_3$. ४. त्रिरूपं Dc$_4$. ५. विशेषणकं Nc$_1$, Bc$_3$, Dc$_4$. ६. अत्र dropped Nc$_1$. ७. °निवृत्तमिति Nc$_1$.

ऐन्द्री । [1]औत्सी । उरुद्वयसी । उरुदघ्नी । [2]ऊरुमात्री । पञ्चतयी । [3]आक्षिकी । [4]लावणिकी । [5]यादृशी । इत्वरी । आढ्यंकरणी ॥ अनुपसर्जनात् किम् । बहुकुरुचरा ॥

'स्त्रीभ्यो ढक्' इति ढक् । 'शिलाया ढः' । 'ढश्छन्दसि' । इत्येतयोर्ढयोः स्त्रियां प्रयोगाभावात् । अननुबन्धग्रहणे न सानुबन्धकस्येति परिभाषात्र न प्रवर्तत इत्यभिप्रेत्य ढगुदाहृतः । ऐन्द्रीति । अणः । इन्द्रस्येयम् । 'तस्येदम्' इत्यण् । औत्सीति । अञः । उत्सस्येयम् । 'उत्सादिभ्योऽञ्' । 'शार्ङ्गरवाद्यञो ङीन्' इति सिद्धे पुनरञो ग्रहणं जातिलक्षणं ङीषं बाधितुम् । यदि तत्र 'जातेः' इति वर्तते तर्हि स्पष्टार्थम् । उरुद्वयसीति । द्वयसचः । उरुदघ्नीति । दघ्नचः । ऊरुमात्रीति । मात्रचः । 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' । पञ्चतयीति । तयपः । 'संख्याया अवयवे तयप्' । आक्षिकीति । ठकः । 'तेन दीव्यति' इति ठक् । लावणिकीति । [6]ठञः । लवणं पण्यमस्याः । 'लवणाट्ठञ्' । ठक्ठञोर्भेदेनोपादानं ठनादिनिवृत्त्यर्थम् । तेन दण्डोऽस्त्यस्या दण्डिका काशिकेत्यादौ न ङीप् । यादृशीति । कञः । 'त्यदादिषु दृशोऽनालोचने कञ्च' । इति कञ् । सानुबन्धकग्रहणम् 'आतोऽनुपसर्गे कः' इत्यादिनिवृत्त्यर्थम् । इत्वरीति । क्वरपः । 'इण्नशजिसर्तिभ्यः क्वरप्' । [7]सानुबन्धकग्रहणं वरचो निवृत्त्यर्थम् । ईश्वरेति । आढ्यंकरणीति । ख्युनः । अनाढ्यः आढ्यः क्रियते अनया । 'आढ्यसुभगः—' इत्यादिना ख्युन् । ख्युनः सानुबन्धग्रहो [8]लाघवार्थः । [9]अन्यथा आमि नुटि [10]दीर्घत्वे च गुरूच्चारणं स्यात् ख्यूनामिति । अनुपसर्जनात् किमिति । अनुपसर्जनादित्युपसर्जननिषेधः [11]किमर्थमित्यर्थः । उत्तरमाह । बहुकुरुचरेति । बहवः कुरुचरा अस्यामिति बहुव्रीहिः । तस्यान्यपदार्थप्रधानत्वात् । चर इति । टिदत्रोपसर्जनमिति ङीप् न ।

१. Before it—अण् B_2. २. D_1 drops ऊरुमात्री. ३. ठक्ठञोराक्षिकीति B_2, D_2; ठक्ठञोराक्षिकी । Bc_3. ४. लावणकी D_3. ५, C has आध्यात्मिकी before it. ६. ठञ् Nc_1. ७. सानुबन्धकग्रहो Dc_3, Dc_4. ८. लाघवार्थम् । Nc_1, Bc_3. ९. अथवा Nc_1. १०. दीर्घत्वेपि Nc_1, Bc_3. ११. किमर्थ इत्यर्थः Bc_3.

णेऽपि क्वचित्* ॥ चौरी ॥ क्वचिन्न । दाण्डा ।

नञ्स्नञीकक्ख्युंस्तरुणतलुनानां च* ॥ स्त्रैणी । पौंस्नी । शाक्तीकी[2]। तरुणी[3]। तलुनी[4]।

यञश्च ॥४।१।१६॥

यञन्तात् स्त्रियां ङीप् स्यात् ॥ अकारलोपे कृते

णेऽपि क्वचिदिति । ङीबिति शेषः । एतच्च 'कार्मस्ताच्छील्ये' इति सूत्राद् गम्यते । तच्च तद्धिते तत्रैव प्रतिपादयिष्यामः । चौरीति । चुरा शीलमस्या इति । 'छत्रादिभ्यो णः' इति णः । णित्त्वाद्वृद्धिः । दाण्डेति । दण्डः प्रहरणमस्यां क्रीडायाम् । 'तदस्यां प्रहरणम्' इति क्रीडायां ण इति णः । स्त्रैणी । पौंस्नीति । स्त्रिया इयं पुंस इयम् । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञ्स्नञौ । शाक्तीकीति । शक्तिः प्रहरणमस्याः । 'शक्तियष्ट्योरीकक्' । तरुणी । तलुनीति । वयो यदा न विवक्ष्यते तदेदं[5] वयोविवक्षायां तु गौरादिपाठाद् ङीषा भाव्यम् । तत्र स्वरे विशेषः । 'त्रोरश्च लो वा'[6] इति उनन्प्रत्ययान्तावेतौ तित्स्वरेणाद्युदात्तौ । तत्र ङीपि सति आद्युदात्तत्वमेव स्यात् । ङीषि तु प्रत्ययस्वरेणान्तोदात्तत्वम् ।

यञः । पृथग्योगकरणमुत्तरार्थम् । अकारलोपे कृते इति । गर्गस्य गोत्रापत्यम् । 'गर्गादिभ्यो यञ्' । गार्ग्यशब्दात् ङीप् । गार्ग्य इति स्थिते 'यस्येति च' इत्यकारलोपे कृते सतीत्यर्थः ।

---

१. स्त्रीषु भवा स्त्रैणी । पुंसि भवा पौंस्नी । C. २. शाक्तिकी B_1; After it—'शक्तियष्ट्योरीकक्' । आश्विकी D_5. ३. Before this—याष्टकी B_2, याष्टीकी D_2. ४. After this—B_1, D_4 have साधारणात् स्वार्थेञो विकल्पोक्तेर्ङीपोऽपि विकल्पोक्तिः । साधारणा । साधारणी । तलुनी dropped Bc_3. ५. तदेवं Nc_1, Bc_3. ६. लः' इति Dc_3, Dc_4.

हलस्तद्धितस्य ॥६।४।१५०॥

हल[1] उत्तरस्य तद्धितयकारस्य ईति[2] लोपः स्यात् ॥ गार्गी[3] । अनपत्यान्न ङीप् । द्वीपे भवा द्वैप्या[4] ।

प्राचां ष्फ तद्धितः ॥४।१।१७॥

यञन्तात् प्राचां[5] मते स्त्रियां ष्फः स्यात् । स च तद्धितसंज्ञः[6] ।

षः प्रत्ययस्य ॥१।३।६॥

प्रत्ययस्यादिः[7] षः इत् स्यात् ॥

हलः । हलन्तस्येति । अन्तशब्दोयं समीपवाची । हलन्तः[8] हलः समीपवर्ती यो[9] यकारस्तस्य हल उत्तरस्येति यावत् । **अनपत्यादिति** । न विद्यतेपत्यमर्थो यस्य सोयमनपत्यस्तस्मादनपत्यात् । यञो ङीप् न स्यादित्यर्थः । **द्विपे भवा द्वैप्येति** । 'द्वीपादनुसमुद्रं यञ्' इति यञ् । द्वीपे भवेति तु विग्रहवाक्यमनपत्यार्थत्वद्योतनार्थम् ।

प्राचाम् । षकारो ङीषर्थः । ननु च स्त्रीत्वस्य ष्फप्रत्ययेनैवोक्तत्वात् कथं ङीष् स्यात् । उच्यते । प्रत्ययद्वयेनेह स्त्रीत्वं व्यज्यते ष्फेन ङीषा च । न त्वेकेन ष्फेनैव । तद्धितग्रहणं प्रातिपदिकसंज्ञार्थम् । उत्तरसूत्रात् सर्वत्रग्रहणमिहानुकृष्यते । बाधकबाधनार्थम् । तेन 'आवट्याच्च' इति परमपि चापं बाधित्वा प्राचां मते ष्फ एव स्यात् । आवट्यायनीति । उदीचां तु आवट्या ।

षः । प्रत्ययस्येति किम् । षट् दन्ताः अस्य षोडन् । तमाचष्टे । णिचि पचाद्यच् । षोडः । अनुकम्पिता षडङ्गुलिः षडिकः । 'बह्वचो मनुष्यनाम्नष्ठज्वा' । 'ठाजादावूर्ध्वं द्वितीयादचः'

---

१. हलः परस्य D_3, D_4; हलन्तस्य Com. २. ईपि B_2, Bc_3; ईति परे D_4. ३. वात्सी Bc_3. ४. B_1 has after it—द्वीपादनुसमुद्रं यञ् ।; 'द्विगोर्लुगनपत्ये'। द्विगोर्निमित्तं यस्तद्धितोनपत्यार्थः प्राग्दितीयस्तस्य लुक् स्यात् । द्वीपे भवा द्वैप्या । D_5. ५. B_1 has प्राचां मते after स्यात्. ६. °संज्ञकः C. ७. प्रत्ययादिः B_1. ८. हलोन्तः Nc_1. ९. यस्य Dc_3.

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥७।१।२॥

प्रत्ययादिभूतानां फादीनामायनादयः क्रमादादेशाः स्युः ॥ कृत्तद्धितेति प्रातिपदिकसंज्ञायां

इति द्वितीयादचः परस्य लोपः । 'यस्य—' इति लोपः । अन्तर्वर्तिनीं विभक्तिमाश्रित्य षान्तस्यावधेः पदत्वात् जश्त्वम् । अत्रोभयत्र षस्येत्संज्ञायां स्त्रीविवक्षायां ङीषु प्रसज्येत । आदिः किम् । 'अविमह्योष्टिषच्' । अविषः । महिषः ।

आयन । शास्त्रलाघवार्थमुपदिष्टानां फादीनामनेनायनादयो विधीयन्ते । ते च फादेर्व्यञ्जनमात्रस्यैव स्युः । अन्ते 'घाम्' इत्यनच्क-निर्देशात् । अन्यथा 'घानाम्' इत्यवक्ष्यत् । तत्र फस्य आयन् । ढस्य एय् । खस्य ईन् । छस्य ईय् । घस्य इय् इत्यर्थः । प्रत्ययग्रहणं किम् । ढौकते खनति । छिनत्ति । घूर्णते । आदिग्रहणं किम् । उरुदघ्नम् । एते आयन्नादय उपदेशकाल एव स्युः । पश्चात् प्रत्ययाद्युदात्तत्वम् । लाघवार्थम् 'ऋतेः छङ्' इत्येवं वाच्ये 'ऋतेरीयङ्' इत्याह तत् ज्ञापयति धातुप्रत्ययानामादेशा न भवन्तीति । तेन घञादीनां न । 'प्राचामवृद्धात् फिन् बहुलम्' इति फिनो 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तार्थं नित्वं ज्ञापयत्यायनादिनां नकारस्येत्संज्ञा नेति । अन्यथायनो नित्त्वात् फिनो नित्त्वं व्यर्थं स्यात् । कृत्तद्धितेतीति । गार्ग्यायणशब्दस्य प्रातिपदिकसंज्ञायाम् ।

---

१. °मायनादेशाः C; क्रमादायनादयः D3, D1, B2. २. क्रमात् स्युः C; P, drops क्रमात्. ३. ङीप् Bc1. ४. प्रसज्यते Dc3. Dc4. ५. Before it—फक्कति Dc3, Dc4. ६. घूर्णुते Bc3.

षिद्गौरादिभ्यश्च ॥४।१।४१॥

षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात् ॥ गार्ग्यायणी ।

एतच्च 'ङ्याप्प्रातिपदिकात्' इत्यधिकारेणोच्यमानस्य 'षिद्गौरादिभ्यश्च' इत्यस्य पीठिकारचनापरम् ।

षित् । 'अन्यतो ङीष्' इति व्याख्याय 'षिद्गौर—' इति ङीष् इति वक्ष्यते । तत्र 'सूर्यतिष्य—' इत्यादि सूत्रं व्याख्याय कांश्चिद् गौरादीन् पठिष्यति तत्र समग्रं गणं पठिष्यामः । अत्र ह्येतत्सूत्रव्याख्यानं प्रासङ्गिकम् । 'प्राचां ष्फ तद्धितः' इति सूत्रव्याख्यानेनैव व्याख्यातप्रायत्वादुपेक्षितं सूत्रद्वयं व्याख्यायते । 'सर्वत्र लोहितादिकतन्तेभ्यः' । ४ । १ । १८ ॥ पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् । यञन्तेभ्यो लोहितादिभ्यः कतपर्यन्तेभ्यः स्त्रियां ष्फः स्यात् । कतन्तेभ्य इति निपातनात् पररूपम् । लौहितादिगणो गर्गाद्यन्तर्गणः । तत्र कपिशब्दात् परो यः कतशब्दः स्वतन्त्रं प्रातिपदिकं तदिहावधित्वेन गृह्यते न कुरुकतेति प्रातिपदिकावयवः । लौहित्यायनी । शांसित्यायनी । बाभ्रव्यायणी । गर्गादिगणे कपि । कत । कुरुकत । अनडुह् । कण्व । शकल इत्यनयानुपूर्व्या प्रातिपदिकानि पठ्यन्ते । तत्र वार्तिककारोऽन्यथा पठितव्यमित्याह ।

'कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते ।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम्' ॥ इति ।

शकलशब्दः कण्वात् पूर्वः कतशब्दादुत्तर इष्यते । एतदुक्तं भवति । कुरुकत अनडुह इत्येतौ शब्दौ एतत्स्थानादपकृष्य लोहितादिषु कुत्रचित् स्थाने पठितव्यौ । शकलशब्दस्तु कतिकण्वशब्दयोर्मध्ये पठितव्यः कत शकल कण्वेति । किमेवं सति स्यादित्यत आह । पूर्वोत्तरावित्यादि । तच्छब्देन शकलशब्दस्य परामर्शः ।

---

१. ङीष् स्यात् । स्वरे विशेषः । D_5. २. इति तस्य Nc_1. ३. लोहितादिर्गणो Nc_1, Bc_3. ४. शांसित्यायनी Bc_3, Dc_3, Dc_4; Kás'ikâ has शाशित्यायनी. ५. °मित्याशङ्कयाह Dc_3. ६. पूर्वं Dc_3. ७. फाणौ Bc_1; स्फाणौ Bc_3. ८. अतःस्थाना° Bc_3, Dc_3, Dc_4.

वयसि प्रथमे ॥४।१।२०॥

प्रथमवयोवाचिनोदन्तात् स्त्रियां ङीप् स्यात् ॥ कुमारी[1] ।

शकलशब्दोन्त आदिश्च यथाक्रमं ययोस्तौ तदन्तादी पूर्वोत्तरौ गणौ स्तः । पूर्वो गणो लोहितादिः शकलान्तः स्यात् । उत्तरो गणः कण्वादिः शकलादिः स्यात् । तथा च किं प्रयोजनमत आह । ष्फाणावित्यादि[2] । ततश्चायं सूत्रार्थः स्यात् । कतशब्दोन्तो येषां ते कतन्ता लोहितादयः । कतस्यान्तः कतन्तः शकल[3]शब्दः । कतन्ताश्च कतन्तश्च कतन्ताः । स्वरभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यत इति । बहुव्रीहेः शेषः । ततो लोहितादिसूत्रे कतन्तस्यान्त इति तत्पुरुषसंगृहीतस्य यञन्तस्य शकलशब्दस्य शाकल्यायनीति ष्फः स्यात्। 'कण्वादिभ्यो गोत्रे' इत्यत्र पूर्ववदेकशेषात् कण्वस्यादिरिति संगृहीतस्य यञन्तस्य शकलशब्दस्य शाकल्यस्य इमे छात्राः शाकला इत्यण् स्यात् इति ष्फाणौ प्रयोजनम्। 'कौरव्यमाण्डूकाभ्यां च' ॥४।१।१९॥ कौरव्यमाण्डूकाभ्यां स्त्रियां ष्फः स्यात् । कुरुशब्दात् कुर्वादिण्ये कृते मण्डूकशब्दात् ढक् च मण्डूकात् इत्यणि च यथाक्रमं टाप्ङीपोरपवादः ष्फः । कौरव्यायणी । माण्डूकायनी । कौरव्येति ण्यान्तस्य ग्रहणात् 'तस्येदम्' इत्यणन्तात् कौरवीति स्यात् । आसुरेरुपसंख्यानम् । आसुरायणी ।

वयसि । कालकृता शरीरावस्था[4] यौवनादिर्वयः । कुमारीति कुमारीशब्दः प्रथमवयसि रूढः । यस्तु वृद्धायामपि वृद्धकुमारीति प्रयोगः स कुमारीसाधर्म्यात् पुंयोगाभावात् । भवति हि साधर्म्यात् ताच्छब्द्यम् । यथा गौर्वाहीक इति । ननु च उत्तानशया लोहितपादिकेत्यत्रापि ङीषा भाव्यम् । यतो बाल्यमत्र गम्यते । बाल्ये हि उत्तानशया लोहितपादिका स्यात् । मैवम् । नैतौ वयोवचनौ किं तु उत्तानशयनलोहितपादवचनौ[5] । वयस्तु प्रकरणादिना गम्यते ।

---

१. C has after it—किशोरी । कलभी ।. २. फाणा° Bc1; स्फाणा° Bc3. ३. सकल° Nc1, Dc1. ४. शरीराविन्यवस्था Dc3. ५. °पादतावचनौ Dc4, Bc3, Dc3.

वयस्यचरमे इति वाच्यम्* ॥ चिरण्टी । चरमे तु । वृद्धा ।
अदन्तात् किम् । शिशुः ॥ कन्याया नेष्टः* ॥

वयस्यचरम इति । अनन्ते वयसीति वाच्यमित्यर्थः । एतच्च येषां चत्वारि त्रीणि वा वयांसीति पक्षस्तन्मते वक्तव्यम् । यावता चिरण्टीवधूटीशब्दयोः प्राज्ययौवनस्त्रीवाचिनोर्द्वितीयवयोवाचित्वात् प्रथमवयोवाचित्वं न । येषां च द्वे एव वयसी तन्मते तु न वक्तव्यम् । तन्मते यौवनस्यापि प्रथमवयोरूपत्वात् । तथा च मतभेदाः । केचित् कौमारयौवनमध्यत्ववृद्धत्वानि चत्वारि वयांसीच्छन्ति । तथा चाहुः ।

'आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम् ।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यसि' ॥

अन्येपि कौमारयौवनस्थविरत्वानि त्रीणीच्छन्ति । तथा चाहुः ।

'पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति' ॥ इति ।

केचित्तु बाल्यमध्यत्ववृद्धत्वानि त्रीणीच्छन्ति । तथाहुः ।

'आषोडशाद् भवेद्बालो यावत् क्षीरनिवर्तकः ।
मध्यमः सप्ततिर्यावत् परतो वृद्ध उच्यते' ॥ इति ।

केचित्तु द्वे वयसीच्छन्ति । यावत्यो वृद्धिमत्योवस्थास्ताः सर्वा राशीकृत्य प्रथमं वयः । यास्त्वपचयवत्यस्ता राशीकृत्य द्वितीयम् । तथा चोक्तम् । 'वर्द्धतां यावदनेन वर्धितव्यं पश्चादपायेन युज्यताम्' इति । **कन्याया नेष्ट** इति । 'कन्यायाः कनीन च' इति निर्देशात् ज्ञापकादिति भावः ।

---

१. चिरिण्टी D1. २. B1 has स्थविरा after it. ३. तु Bc3, Dc3, Dc4. ४. प्रथमे Dc3, Dc4. ५. करिष्यति Dc3. ६. अन्ये तु Bc3, Dc3. ७. स्थविरीभावे Bc3, Dc3, Dc4.

द्विगोः ॥४।१।२१॥

द्विगुसमासादतो ङीप्[1] स्यात् स्त्रियाम् ॥ पञ्चपूली । अजादित्वात् त्रिफला[2] ।

अपरिमाणबिस्ताचितकम्बल्येभ्यो

द्विगोः। पञ्चपूलीति[3] । पञ्चानां पूलानां[4] समाहारः। 'तद्धितार्थ—' इति समाहारे द्विगुः । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट इति स्त्रीलिङ्गता । अजादित्वादिति । त्रिफलेति । अजादिषु द्रष्टव्य इति भावः । त्रयाणां फलानां समाहारः ।

अपरि । पूर्वेण प्राप्तो ङीप्[5] प्रतिषिध्यते[6] । बिस्तादीनां परिमाणार्थं ग्रहणम् । परितः सर्वतः आरोहपरिणाहाभ्यां मानं परिमाणं प्रस्थाद्यं न संख्या[7] कालश्च । तथोक्तम् ।

'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः' ॥ इति ।

कालसंख्ययोरपरिमाणत्वं ज्ञापकात् । तथा हि । यदयं 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्येव द्विसांवत्सरिकः द्विषाष्टिकः इत्यादावुत्तरपदवृद्धौ सिद्धायां 'संख्यायाः संवत्सरसंख्यस्य च' इति संख्यासंवत्सरग्रहणं करोति तज् ज्ञापयति कालः संख्या परिमाणं नेति । अत एवात्रात्रैर्द्विवर्षैत्युदाहृतम्[8] । 'कालाः परिमाणिना' इत्यत्र तु कालस्यौपचारिकं परिमाणत्वमित्यविरोधः ।

---

१. स्त्रियां ङीप् स्यात् C, D_3; ङीष् D_1, D_5. २. After this—संज्ञा छन्दसि । एभ्यो ङीप् स्यात् । केवली । मामकी । भागधेयी च । लोके तु केवलेत्यादि D_2. ३. पञ्चमुलीति Nc_1. ४. मूलानां Nc_1. ५. ङीष् निषिध्यते । Bc_3, Dc_3. ६. निषिध्यते Nc_1, Dc_4. ७. संख्या च Bc_3, Dc_3. ८. °द्विवर्षि (वार्षि?) के° Nc_1; द्विवार्षिके° Bc_3.

न तद्धितलुकि ॥४।१।२२॥

अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोस्तद्धितलुकि न ङीप्[1]। पञ्चाश्वा। द्विवर्षा[2]। द्विबिस्ता[3]। द्व्याचिता[4]। द्विकम्बल्या। परिमाणात्तु[5] द्व्याढकी*। 'अध्यर्ध—'[6] इति ठको लुक्॥

पञ्चाश्वा। द्विवर्षेति। अपरिमाणान्तस्योदाहृतिः। पञ्चभिरश्वैः क्रीता। 'तेन क्रीतम्' इति ठक्। 'तद्धितार्थ—' इति द्विगुः। 'अध्यर्धपूर्व—' इति ठको लुक्। द्विवर्षेति। द्विवर्षे[7] भूता। 'तमधीष्टो भृतो भूतो भावी' इत्यनेन विहितस्य ठको 'वर्षाल्लुक्—' इति पाक्षिको लुक्। चित्तवत्त्वे तु प्रत्ययार्थस्य विवक्षिते 'चित्तवति नित्यम्' इति नित्यमेव लुक्। द्विबिस्तेति। द्वौ बिस्तौ पचति। 'संभवत्यवहरति पचति' इति ठक्। 'अध्यर्ध—' इति ठको लुक्। केचिद् बिसशब्द[8] उन्मानं मन्यन्ते। 'सुवर्णबिस्तौ हेम्नोक्षे' इति। बिस्तग्रहणादुन्मानमपि परिमाणग्रहणेन गृह्यत इति। तन्मते ठञो[9] लुक्। एवं द्वावाचितौ पचति। 'आचितो दशभाराः'[10]। द्व्याचिता। द्विकम्बल्या। द्वाभ्यां कम्बलाभ्यां क्रीता। कम्बल्यमूर्णाशतम्। 'कम्बलाच्च संज्ञायाम्' इति यत्। द्व्याढकीति। द्वौ आढकौ पचति। 'आढकाचितपात्रात् खोऽन्यतरस्याम्'। इति वर्तमाने 'द्विगोः ष्ठंश्च'[11] इति ठंखञोरभावपक्षेऽभ्यनुज्ञातष्ठक्[12]। तस्य च 'अध्यर्ध—' इति लुक् स्यादित्याह। अध्यर्धेति ठको लुगिति। तद्धितलुकिति[13] किम्। पञ्चानामश्वानां समाहारः पञ्चाश्वी।

---

१. C and Bc_3 have after it 'अध्यर्ध—' इति ठको लुक्।; D_5 has 'अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्'। अध्यर्धपूर्वात् द्विगोश्च परस्यार्हीयप्रत्ययस्य लुक् स्यात्. २. कालसंख्यावचनपरिमाणे द्विवर्षा B_2. ३. Before it—द्विशता C. ४. B_1 drops द्व्याचिता। द्विकम्बल्या and has 'तेन क्रीतम्' इति ठक्।; D_1, B_2, D_3, Bc_3 drop द्व्याचिता। द्विकम्बल्या. ५. परिमाणे तु C, B_2. ६ C drops 'अध्य......लुक्; Bc_3 drops this and has instead प्रमाणे लुक् द्विगोर्नित्यमिति द्वयसो लुक्।. ७. द्वे वर्षे Bc_3, Dc_3, Dc_4. ८. °शब्दस्तु Nc_1. ९. ठको Bc_1. १०. After it—स्युः Dc_1. ११. ठञ् Dc_3, Dc_4. १२. °भावे पक्षे Bc_3. १३. Before it—द्विवर्षादौ तुक्तौ विशेषो ज्ञेयः। Dc_3; द्विवर्षादौ तूक्ते विशेषो ज्ञेयः। Dc_4.

काण्डान्तात् क्षेत्रे ॥४।१।२३॥

परिमाणवाचिकाण्डान्ताद् द्विगोस्तद्धितलुकि न ङीप्[१] क्षेत्रे वाच्ये ॥ द्विकाण्डा भूमिः[२]। प्रमाणे[३] लो[४] द्विगोर्नित्यम्* ॥ इति द्वयसो[५] लुक्। [६]क्षेत्रे किम्। द्विकाण्डी रज्जुः।

पुरुषात् प्रमाणेन्यतरस्याम् ॥४।१।२४॥

प्रमाणवाचिपुरुषान्तात् द्विगोस्तद्धितलुकि वा ङीप्[७] ॥ द्विपुरुषी। द्विपुरुषा[८]।

काण्डात्। परिमाणवाचीति। अत्र परिमाणशब्दो मानसामान्यलक्षकः। सत्काण्डविशेषणत्वात्। प्रमाणे पर्यवस्यति। काण्डशब्दो हि मानदण्डवाची प्रमाणविशेषमाह। तथा च काशिकायां वृत्तावुक्तम्। 'काण्डशब्दस्यापरिमाणवाचित्वात्' पूर्वेणैव प्रतिषेधे सिद्धे क्षेत्रे नियमार्थं वचनम्। इह मा भूत्। द्विकाण्डी त्रिकाण्डी[९] रज्जुः प्रमाणविशेषः काण्ड इति। अथवा प्रमाणवाचीति पाठः। द्विकाण्डेति[१०]। द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिः। 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः[११]'।

पुरुषात्। अपरिमाणान्तत्वात् निषेधे प्राप्ते विकल्पार्थं वचनम्। द्विपुरुषीति। द्वौ पुरुषौ प्रमाणमस्याः। पूर्ववत् द्वयसच्। तस्य लुक्। प्रमाणे किम्। द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा। तद्धितलुकीत्येव। पञ्चानां पुरुषाणा समाहारः पञ्चपुरुषी।

---

१. After it—स्यात् D3. २. Dropped D3. ३. C has after it—द्विकाण्डा रज्जुः। ४. लोपो B2, लुक् D2, D4. ५. द्वयसचो B1, B2, D4. ६. C drops क्षेत्रे......रज्जुः. ७. After it—स्यात् D3. ८. After it—एकपुरुषी। त्रिपुरुषी B2. ९. Dropped Nc1. १०. द्विकाण्डीति Bc3. ११. After it—इति द्वयसच् Bc3, Dc3, Dc4.

[1]ऊधसोनङ् ॥५।४।१३१॥

ऊधसन्तस्य बहुव्रीहेरनङादेशः स्यात्[2] स्त्रियाम् ॥

[3]बहुव्रीहेरूधसो ङीष् ॥४।१।२५॥

ऊधसन्ताद्बहुव्रीहेः स्त्रियां ङीष् स्यात् ॥ पीनोध्नी[4] ।
[5]बहुव्रीहेः किम् । प्राप्तोधाः । स्त्रियां[6] किम् । महोधा गोगणः[7] ।

ऊध । ङित्त्वादेशोयं न प्रत्ययः प्रत्ययत्वे हि ङित्त्वं व्यर्थं स्यादित्यभिप्रेत्याह । **अनङादेशः स्यादिति** । अनङोकारादित्वं 'धनुषश्च' इत्येतदर्थम् । इह तु तेन विनापि सिद्धेः । अत्र च स्त्रियामिति वक्तव्यमित्यभिप्रेत्याह । **स्त्रियामिति** । ततश्च 'गवां गणाः प्रस्नुतपीवरोधसः' इत्यादि सिद्धम् ।

बहु । 'ऊधसोनङ्' इति । समासान्ते कृते 'अनो बहुव्रीहेः' । डाबुभाभ्याम्—' इति डाप्निषेधयोः प्राप्तयोरिदमुच्यते । 'अन उपधालोपिनः—' इयस्यापि ङीपोयं बाधक इष्यते । **पीनोध्नीति** । पीनमूधो यस्याः सा । 'अल्लोपोनः' इत्यकारलोपः[8] । बहुव्रीहेः किम् । प्राप्तो ऊधः प्राप्तोधाः स्त्री । 'प्राप्तापन्ने च द्वितीयया' इति समासः । स्त्रियां किम् । महोधाः पर्जन्यः । ङीषः षकारो ङीपा सामान्यग्रहणार्थः । 'आद्युदात्तश्च' इत्युदात्तो ङीष् ङीप् तु 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तः । इति स्वरभेदोनयोः । 'बहुव्रीहेरूधसो ङीष्' इत्यस्य व्याख्यानेनैव व्याख्यातप्रायत्वात् अनतिविशेषोदाहरणत्वाच्चोपेक्षितं सूत्रं व्याख्यायते । 'संख्याव्ययादेर्ङीप्' ।४।१।२६। पूर्वेण ङीषि प्राप्ते ङीप् विधीयते । संख्यादेरव्ययादेरूधःशब्दान्तात् बहुव्रीहेर्ङीप् स्यात् । द्व्यूध्नी । अत्यूध्नी । आदिग्रहणाद् व्यवधानेपि स्यात् । द्विविधोध्नी ।

१. The Sûtra and the Vṛitti dropped B_2. २. आदेशः dropped B_1. ३. Dropped Bc_3. ४. After it—कुण्डोध्नी D_4. ५. B_1 has स्त्रियां किम्......गोगणः before it. ६. C has instead of this—समासान्तः स्त्रियामेव । इह न भवति । महदूधा यस्यासौ महोधाः पर्जन्यः; समासान्तस्य स्त्रियामेव । इह न भवति । महोधा गोगणः B_2. ७. पर्जन्यः D_1; पर्यन्यः D_2, D_3. ८. इत्यलोपः । Dc_3.

दामहायनान्ताच्च ॥४।१।२७॥

संख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च स्त्रियां ङीप्[1] स्यात् । द्विदाम्नी ।

हायनान्ताद्वयसि ङीप्[2] णत्वं च[3]*॥ त्रिचतुर्भ्यां हायनस्य इति । त्रिहायणी । चतुर्हायणी । वयसोऽन्यत्र त्रिहायना शाला ।

अन्तर्वत्पतिवतोर्नुक् ॥४।१।३२॥

एतयोः स्त्रियां नुक् स्यात् ॥ नान्तत्वात् ङीप् ।

दाम । संख्याग्रहणमेवेह स्वरितत्वादनुवर्तते नाव्ययग्रहणमस्वरितत्वादित्यभिप्रेत्याह । **संख्यादे**रित्यादि । दामान्तात् डाप्निषेधविकल्पेषु प्राप्तेषु नित्यार्थं वचनम् । हायनान्तात् टापि । **हायनान्ता**दित्यादि । हायनशब्दान्ताद् बहुव्रीहेर्वयसी गम्यमाने ङीप् स्मृतः । त्रिचतुर्भ्यां परस्य हायनशब्दस्य णत्वं च वयसि गम्यमाने स्मृतमित्यर्थः ।

अन्तर्वत् । अन्तर्वदित्यत्रान्तःशब्दस्याधिकरणप्रधानत्वेन प्रथमासमर्थत्वाभावादस्तिना सामानाधिकरण्यासंभवादप्राप्तो मतुब् निपात्यते । वत्वं तु 'मादुपधायाश्च' इति सिद्धम् । पतिवच्छब्दे वत्वमेव निपात्यते मतुपः सिद्धत्वात् तयोर्नुगागमोऽनेन विधीयत इत्याभिप्रेत्याह ।

एतयोरित्यादि । **नान्तत्वादिति** । 'ऋन्नेभ्यो ङीप्' इति निपातनसामर्थ्यात् कार्यान्तरवदर्थविशेषवृत्तिश्च स्यादित्याह ।

---

१. दामन्नन्ता° B_1. २. ङीष् D_1, D_4. ३. ङीष् B_2, D_3, D_4. ४. णत्वं च dropped D_3, D_4. ५. C has णत्वम् and D_3 णत्वं च after it ६. चतुर्हायणा P; त्रिहायना शाला B_2. ७. Dropped Nc_1.

अन्तर्वत्नी । पतिवत्नी । गर्भभर्तृयोगे एताविष्येते । अन्यत्र । अन्तर्वती । पतिमती ।

गर्भभर्तृयोग इति । गर्भयोगे अन्तर्वत्नीशब्द इष्यते । गर्भयोगश्च तस्याः स्यात् यस्याः कुक्षौ गर्भः स्यात् । भर्तृयोगे पतिवत्नीशब्दः । इह च भर्ताग्निविप्रसाक्षिकेण पाणिग्रहणेन[2] संबन्धी यः स एव गृह्यते । तस्याश्च भर्तृयोगः स्यात् यस्याः पतिर्जीवति । तथा चान्तर्वत्नी गर्भिणी पतिवत्नी जीवद्भर्तृकेत्यर्थः । तथा चोक्तं **वार्तिककारेण** । 'अन्तर्वत्पतिवतोर्नुक् । मतुब्वत्वे निपातनात् । गर्भिण्यां जीवत्पत्यां च वा च च्छन्दसि नुग्विधिः' इति । **अन्यत्रेति** । गर्भभर्तृयोगाभावे इत्यर्थः । अन्तर्वती । शालेति शेषः । ननु च अन्तर्वतीति मतुब् नोपपद्यते अधिकरणप्रधानत्वादन्तःशब्दस्य । तथा चान्तर्विद्यते यस्यां शालायामिति वाक्यमेव प्रत्युदाहार्यम् । तथा चोक्तं **महाभाष्ये** । 'अथान्तःशब्दस्य गर्भयोगे किं प्रत्युदाह्रियते । अन्तरस्यां शालायामस्तीति । किं पुनः कारणं वाक्यं प्रत्युदाह्रियते । न पुनर्मतुप् । मतुबस्तिसामानाधिकरण्ये । अस्तिना सामानाधिकरण्ये मतुब् विधीयते । न चात्रास्तिना सामानाधिकरण्यम्' इति । किं पुनरित्यादि भाष्यं **कैयटेन** व्याख्यातम् । 'किं पुनरिति । अन्तर्वतीति नुगभाव एव प्रत्युदाहार्य इति मन्यते । न चात्रेति । अन्तःशब्दस्याधिकरणप्रधानत्वादिति भावः' इति । अतोन्तर्वतीति प्रत्युदाहरणं नोपपद्यत इति चेदुच्यते । सत्यं मध्यवाचिनोन्तःशब्दादधिकरणप्रधानत्वान्मतुब् नेति वाक्यमेव प्रत्युदाहार्यम् । यस्तु परिग्रहवाच्यन्तःशब्दः स आधेयप्रधानोप्यस्तीति चेतसि कृत्वाचार्यैः प्रत्युदाहृतम्[3] । बहुतरप्रयोगदर्शनात् । तथा चानेनैवाभिप्रायेण **बोपदेवपण्डितैर्विचारचिन्तामणावुक्तम्** । 'अन्तर्वत्नी च गर्भिणी । सधवा पतिवत्यन्यान्तर्वती पतिमत्यपि' इति । तथा च **पाणिनीयमतदर्पणेप्युक्तम्** । 'अन्यथान्तर्वती शाला पतिमती पृथिवी[1]' इति । पतिः स्वामी विद्यते यस्याः सा पतिमती ।

---

१. पतिमती भूमिः B2. २. °ग्रहणसंबन्धी Bc3. ३. तत्र प्रत्यु° Dc3.

पत्युर्नो यज्ञसंयोगे ॥४।१।३३॥

पत्युर्नोन्तादेशः स्यात् स्त्रियां यज्ञसंयोगे ॥ नान्तत्वात् ङीप् । पत्नी । अन्यत्र गवां पतिः स्त्री । वृषलपत्नीत्युपमानात्[1] ।

विभाषा सपूर्वस्य ॥४।१।३४॥

सपूर्वस्य पत्युः प्रागुक्तं वा[2] ॥ दृढपत्नी । दृढपतिः[3] ।

नित्यं सपत्न्यादिषु ॥४।१।३५॥

एषु पूर्वोक्तं नित्यं स्यात् ॥ [4]सपत्नी । एकपत्नी[5] ।

पत्यु । **यज्ञसंयोगे** इति । यज्ञेन संयोगो यज्ञसंयोगः । पतिशब्दवाच्यस्यार्थस्य[6] भार्याया यज्ञसंबन्धे गम्यमाने इत्यर्थः । यजमानस्य हि भार्याया यागं प्रति साधनत्वमस्ति । न हि भार्यारहितस्त्रैवर्णिको यज्ञेधिक्रियते । अतो यज्ञसाधनत्वात् पत्न्या यज्ञसंयोगः । यज्ञफलभाक्त्वाच्च पत्न्या यज्ञसंयोगः स्वस्वामिलक्षणः । ननु च[7] शूद्रस्यैव तावद् यज्ञेन संबन्धो नास्त्यनधिकृतत्वात् किं पुनस्तद्भार्याया इत्याशङ्क्याह । **वृषलपत्नीत्युपमानादिति** । पत्नीसाधर्म्यात् पत्नीव पत्नी ।

विभाषा । सपूर्वस्येति किम् । विद्यमानः पूर्वो यस्य स सपूर्वः । **प्रागुक्तं** वेति । नान्तादेशो वा । नान्तत्वाच्च ङीप् । अयज्ञसंयोगादप्राप्तविभाषेयम् । **दृढपतिरिति** । **दृढपत्नीति** दृढः पतिः यस्याः सा । सपूर्वस्य किम् । पतिरियम् ।

नित्यम् । पूर्वेण विकल्पे[9] नित्यार्थं वचनम् । आरम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणं विस्पष्टार्थम् । लाघवार्थं समानादेरिति वाच्ये सभावार्थं सपत्न्यादिष्वित्युक्तम्[8] । **सपत्नीति** । समानः पतिरस्याः । **एकपत्नी** । एकः पतिरस्याः । वीरपत्नी पिण्डपत्नी भ्रातृपत्नी पुत्रपत्नी ।

---

१. °त्युपचारात् B_1, B_2. २. वा स्यात् D_1, D_3. ३. दृढपत्नी । दृढपतिः D_2, B_2, D_3, D_4, D_5, P, C. ४. समानः पतिर्यस्याः सा before it in C. ५. After this B_1 has—वीरपत्नी । पिण्डपत्नी । पुत्रपत्नी । भ्रातृपत्नी । दासपत्नी । पूर्वजपत्नी ।; C has वीरपत्नी । पिण्डपत्नी । भ्रातृपत्नी । पुत्रपत्नी ।. ६. अर्थस्य dropped Nc_1. ७. Dropped Nc_1. ८. Dropped Dc_1, Bc_1. ९. विकल्पे प्राप्ते Bc_3, Dc_3, Dc_4.

पूतक्रतोरै च ॥४।१।३६॥

अस्य स्त्रियामै आदेशो ङीप् च ॥ पूतक्रतायी । पुंयोग-इत्येव । पूतक्रतुः स्त्री ।

वृषाकप्यग्निकुसितकुसिदानामुदात्तः ॥४।१।३७॥

एषां पुंयोगे उदात्त ऐआदेशः स्यात् ङीप् च ॥ वृषाकपायीत्यादि ।

पूत । उत्तरसूत्रे उदात्तवचनादैकार आदेशः । प्रत्ययत्वे हि प्रत्ययस्वरेणोदात्तत्वे उदात्तवचनं व्यर्थं स्यादित्यभिप्रेत्याह । **ऐ आदेश** इति । **पुंयोगे** इत्येवेति । इत आरभ्य त्रयो योगा ङीप्सहिताः पुंयोगादाख्यायामिति प्रकरणे अनुवर्तन्ते । ततश्च पुंयोग इत्यत्रैवार्थे एतत् कार्यं नान्यत्रेति भावः । तथा चोक्तं **महाभाष्ये** । 'पूतक्रत्वादीनां पुंयोगप्रकरणे वचनम् । पूतक्रत्वादयः पुंयोगप्रकरणे वक्तव्याः । पूतक्रतोः स्त्री पूतक्रतायी यया हि पूताः क्रतवः पूतक्रतुः सा भवति' इति । एतच्च भाष्यं कैयटेन व्याख्यातम् । 'पूतक्रत्वादीनामिति । त्रय एते योगा ङीप्सहिताः 'पुंयोगादाख्यायाम्' इत्यत्रानुवर्तयितव्या इत्युक्तं भवति । तेन यदा पुंयोगात् स्त्रियां पूतक्रत्वादयो वर्तन्ते तदायं विधिर्नान्यथा' इति ।

वृषा । वृषाकपिशब्दो 'लघावन्ते द्वयोश्च बह्वषो गुरुः' । इति फिट्सूत्रेण मध्योदात्तः । उदात्तवचनं प्रयोजयति । अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धम् । वृषाकपायीति । वृषाकपेः स्त्री । आदिना अग्नायी कुसितायी कुसिदायी । पुंयोगे किम् । वृषाकपिः स्त्री ।

---

१. इति dropped D4. २. ऐकारादेशः B1. ३. Dropped D3. ४. तथा हि Dc3. ५. इति किम् Bc3.

मनोरौ वा ॥४।१।३८॥

मनोर्वा औ स्यादै च वा ङीप्[1] ॥ मनोः स्त्री मनावी मनायी मनुः ।

वर्णादनुदात्तात् तोपधात्तो नः ॥४।१।३९॥

अनुदात्तान्ताद्वर्णवाचिनस्तोपधात्[2] ङीष्[3] वा स्यात् तकारस्य नकारश्च[4] । एता । एनी । अनुदात्तात्[5] किम् । श्वेता । अत इत्येव । शितिः[6] स्त्री ।

पिशङ्गाच्च* । पिशङ्गी ।

असितपलितयोर्न* । असिता । पलिता । क्नमेके[7] । असिक्नी । पलिक्नी ।

मनोः । मनुशब्द आद्युदात्तः । तस्यादेशौवौकारैकारावुदात्तौ[9] स्तः । उदात्त इत्यनुवृत्तेः[10] ।

वर्णात् । एता । एनीति । 'वर्णानां तणतिनितान्तानाम्' इति फिट्सूत्रेणाद्युदात्तः । ततश्च 'अनुदात्तं पदमेकवर्जम्' इत्यनुदात्तान्तः । श्वेतेति । 'घृतादीनां च' इति फिट्सूत्रेणान्तोदात्तः । पिशङ्गाच्चेति । पिशङ्गशब्दो 'लघावन्ते—' 'इत्यादिना मध्योदात्तस्ततः 'अन्यतो ङीष्' इति ङीषि प्राप्ते ङीप उपसंख्यानम् । **असितेत्यादि** । 'वर्णानां तणतिनितान्तानाम्' इत्याद्युदात्तौ । **क्नमेक** इति । एके आचार्या असितपलितशब्दयोस्तस्य स्थाने क्नमिच्छन्ति[8] । तथा चोक्तं **महाभाष्ये** । 'छन्दसि क्नमेके' इति । आचार्यास्तु[11] छन्दसीति नोक्तवन्तः । भाषायामपि दर्शनात् । तथा चोक्तं **काशिकायां वृत्तौ** । भाषायामपीष्यते । 'गतो[12] गणस्तूर्णमसिक्निकानाम्' इति । वर्णादिति किम् । प्रकृता । 'गतिरनन्तरः' इत्याद्युदात्तः । तोपधात् किम् । अन्यतो ङीषं वक्ष्यति ।

---

१. ङीप् च Bc3, D3. २. °त्तोपधाद्वर्णवाचिनः D2. ३. ङीप् D4, D1 Bc3. ४. नश्च D1, D4, B2; नकारः D2, D3, Bc3. ५. अनुदात्तान्तात् D1. ६. शतिः D2, D5, B1, P, C. ७. After it—इच्छन्ति D2, D3, D4; क्नमिच्छन्त्येके Bc3. ८. Dropped D3. ९. वैकारौकारा° Dc3. १०. °दात्तत्वम् । Dc3. ११. तु dropped Bc1. १२. °तौ Bc1, Nc1, Dc3, Dc4.

अन्यतो ङीष् ॥४।१।४०॥

तोपधादन्यतो वर्णादनुदात्तात् ङीष् स्यात् । स्वरे विशेषः । शबली[3] । अनुदात्तात् किम् । कपिला ।

षिद्गौरेति ङीष् । नर्तकी । गौरी ।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥६।४।१४९॥

एषामीति[4] ताद्धिते च उपधाया यस्य लोपः[5] स्यात् ॥

अन्यतः । तोपधापेक्षयान्यत्वमित्याह । तोपधादन्यत इति । स्वरे विशेष इति । ङीप्ङीषोरिति शेषः । ङीपः 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वम् । ङीषस्तु 'आद्युदात्तश्च' इति प्रत्ययाद्युदात्तत्वेनो-दात्तत्वमिति स्वरे विशेष इत्यर्थः । शवलीति । 'शपेर्बश्च' इति कलप्रत्ययः । पकारस्य च बकारः प्रत्ययाद्युदात्तत्वेन मध्योदात्तः । शबलशब्दोनुदात्तान्तः । कपिलेति । कमु कान्तौ । 'कमेः पश्च' इति इलच् मकारस्य च[6] पकारः । चित्स्वरेणान्तोदात्तः । षिद्गौरेति । ङीष् इति । नर्तकीति । 'शिल्पिनि ष्वुन्' । गौरीति । गौरशब्दस्य वर्णवाचित्वे[7] प्रातिपदिकस्वरेणान्तोदात्तत्वात् पूर्वेण ङीष् न प्राप्नोतीति गौरादिषु पाठः ।

सूर्य । अत्र च 'भस्य' इत्यनुवर्तते । तत्र यदि भसंज्ञत्वेन सूर्यादयो विशेष्येरन् तदा सूर्येणैकदिक् सौरी वलाकेत्यत्र लोपो न स्यात् । न ह्यत्र सूर्यशब्द इति भसंज्ञकः । किं तर्हि । अन्यदेवाणन्तं शब्दान्तरम् । ततश्चैवं योजना । भस्य भसंज्ञकस्य उपधाया[8] यलोपः स्यात् । सा चेद् भसंज्ञा सूर्यादीनामिति । तेन यदापि सूर्यादीनां भत्वं नास्ति तदापि तस्योपधाया यकारलोपः[9] स्यादेव । आचार्यत्र्यैस्तु[10] 'भस्य' इत्येदनुवर्तमानमप्युपेक्षितम् । विषयपरिगणनादत्र तस्यानुवृत्ते-रनुपयोगात् । विषयपरिगणनं चात्र कर्तव्यमित्याह ।

---

१. °दात्तान्तात् D3. २. भेदः D3. ३. शबली D1. ४. इति P, C; ईपि B2. ५. यलोपः C, P, D1, Bc3, D4. ६. Dropped Dc3. ७. °वाचिक-त्वेपि Nc1; °वाचित्वेपि Dc3, Dc4. ८. उपधायलोपः Bc1, Dc4, Dc3. ९. °पधायकारस्य Dc3, Dc4. १०. यलोपः Bc3.

मत्स्यस्य ङ्याम्* ॥ सूर्यागस्त्ययोश्छे च ङ्यां च* ॥ तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्* ॥ मत्सी । अनडुही । अनड्वाही । मातामही । पितामही । इत्यादि । अनित्यः

मत्स्यस्येत्यादि । सौकर्यायोदाहरणप्रत्युदाहरणानि कथ्यन्ते । मत्सी । इह मा भूत् । मत्स्यस्येदं मात्स्यम् । **सूर्यागस्त्ययोरिति** । सौरी । सौरीयम् । आगस्ती । आगस्तीयः । इह न । सौर्यं चरुम् । आगस्त्यम् । **तिष्यपुष्ययोरिति** । नक्षत्राणि नक्षत्रसंबन्धी योण् तस्मिन्नित्यर्थः । तिष्येण नक्षत्रेण युक्तः कालस्तैषः । पौषः । उपधाया इति किम् । मत्स्यचरी । यग्रहणं 'हलस्तद्धितस्य' इत्याद्यर्थम् । अत्र सूत्रे अन्यदपि वाच्यम् । अन्तिकशब्दस्य तासि प्रत्यये परे कादेरवयवस्य लोप आद्युदात्तत्वं च वाच्यम् । अन्तित आगतो न दूरात् । तमप्रत्यये परेन्तिकशब्दस्य तादेः कादेश्चावयवस्य लोपो वाच्यः । तादिलोपः । अन्तमः । कादिलोपः । अन्तितमः । कादिलोपो बहुलम् । अन्यत्रापि दृश्यते । अन्तिके सीदतीति अन्तिषत् । 'पूर्वपदात्—' इति षः । ये च । अन्तियः । मत्सी । गौरादित्वात् ङीष् । मत्स्यशब्दस्य योपधत्वात् 'जातेरस्त्री—' इति ङीष् प्राप्त इति गौरादिषु पाठः । **अनडुही । अनड्वाहीति** । गौरादिगणे ङीषन्तयोः पाठोस्ति स आम्भावार्थः पुंवद्भावप्रतिषेधार्थश्चेति दर्शयितुं गणमध्यस्थावेतौ शब्दौ पठति । अनडुहीत्यादि । तथा चानडुही भार्येत्यत्र पुंवद्भावो न । पितृव्यमातुलमातामहपितामहा इत्यत्र पितृमातृभ्यां पितरि वाच्ये डामहच् निपात्यते । मातरि षिच्चेति मातरि वाच्यायां डामहजेव तस्य च षित्वम् । अतः षित्त्वादेव ङीषि सिद्धे पुनर्गणेनयोः पाठोनित्यः ।

---

१. नक्षत्रे अणि C. २. B_1 has before it—उपधाया इति किम् । मत्स्यचरी । भूतपूर्वे चरट् । टित्वात् ङीप् । भवत्यमत्स्यचरशब्दो भसंज्ञकः । मत्स्यसंबन्धी च यकारः । न त्वसौ भसंज्ञकस्योपधेति लोपो न प्रवर्तते । हलस्तद्धितस्येत्यत्रानुवृत्त्यै यग्रहणम् ।. ३. °स्तैष्यः Bc_3. ४. Dropped Bc_3.

षितां ङीषु[1] ।

षितां ङीषित्यस्यार्थस्य ज्ञापनार्थमिति दर्शयितुं पठितवान् । मातामहीत्यादि । इत्यादीनि । गौरादिगणो ज्ञेय इत्यर्थः । स च पठ्यते । मनुष्य । शृङ्ग । गवय । हय । मुकय । ऋष्य । शृङ्गशब्दवर्जितानामेषां योपधत्वात् जातिलक्षणस्य ङीषो निषेधे प्राप्ते पाठः । शृङ्गशब्दस्य तु अस्त्रीविषयत्वान्निषेधे । पुट । द्रुण । द्रोण । हरिण । कण । पंटर[2] । उकण । आमलक । कुवल । बदर । बिम्ब । तर्कारि[3] । पुष्कर । शष्कण्ड । सुषव । सनन्द । गडुंल[4] । षाण्डस[5] । आढक । आछक । आनन्द । सृपाट । शष्कुल । सूर्य । शूर । शूर्प । शूर्ष[6] । वातक्र । सलूक । हांलक[7] । मालत । शाल्वक । वेतस । पृस[8] । अतस । उभय । भृङ्ग । मह । मंठ[9] । छेद । पेश । मेद । एतेषामानन्दवर्जितानां स्त्रीविषयत्वादस्त्रीविषयादिति निषेधे प्राप्ते आनन्दशब्दस्य त्वजातित्वात् ङीष्यप्राप्ते । श्वन् तक्षन् अनयोः ऋन्नेभ्यो ङीपि प्राप्ते । एषण करणे । इष्यतेनयेत्येषणी । करणे किम् । इष्यते तस्यामित्यधिकरणे ङीबेव स्यात् । एषणी । स्वरे विशेषः । देह । टापि प्राप्ते । देहन । काकादन । गवादन । टेपन[10] । रंभन[11] । भोजन । लवण । पान । एतेषां टिल्लक्षणे ङीपि प्राप्ते । मेध । अस्याजातित्वात् ङीष्यप्राप्ते । गौतम । शार्ङ्गरवादित्वात् ङीनि प्राप्ते पक्षे वचनात् सोपि स्यात् । आर्प[12] । स्थूण । भौरिकि । भौलिकि । भौलिङ्गि । औद्गाहमानि । आलम्बि ।

१. ङीष् स्यात् D_2 ; ङीप् D_5. २. पिठर Bc_1 ; पेटर Dc_3. ३. तर्कर Dc_3. ४. गण्डुल । Bc_3. ५. सण्डस् Bc_3 ; खण्डश Dc_3 ; खण्डस Dc_4. ६. सूर्ष Bc_1. ७. हांत्लक Bc_3. ८. पृश Dc_3, Bc_3; मृश Dc_4. ९. मेठ Bc. १०. टेभन Dc_3, Bc_1 ; टोभन Dc_4. ११. रभन Bc_1. १२. आय । स्थौण Bc_3.

दंष्ट्रा ।

एतेभ्यो 'णिञोः' इति ष्यङि प्राप्ते । आपिञ्ज्ञक । अस्माज्जनपद-शब्दात् क्षत्रियाद्ञन्तात् ङीपि । आलिचि । कोरट । नट । नाट । मूलाट । एषा स्त्रीविषयत्वात् ङीष्यप्राप्ते । शातन । पातन । पावन । आस्तरण । अधिकरण । एषां टिल्लक्षणे ङीपि । अधिकार । अस्मात् टापि । आग्रहायणी । अण्णन्तत्वात् ङीपि । ईकारान्तस्य पाठः पुंवद्-भावनिषेधार्थः । आग्रहायणी भार्या इति । सेवन । प्रत्यवरोहिणी । टिल्लक्षणे ङीपि । ईकारान्तस्य पाठः पुंवत्त्वनिषेधार्थः । प्रत्यवरोहिणी-भार्यः । सुमङ्गलात् संज्ञायाम् । 'केवल—' इत्यादिना ङीपि प्राप्ते वचनात् पक्षे सोपि । सुन्दर । मन्दर । मण्डल । मङ्गल । पट । पिण्ड । ऊर्द । गूर्द । सूर्द । पाण्ड । लोहाण्ड । दर्दूर । कन्दर । कटल । कलन्द । स्त्रीविषयत्वात् ङीष्यप्राप्ते । तरुण । तलुन । वयोलक्षणे ङीपि । सौधर्म । 'अणिञो—' इति ष्यङि । रोहिणी नक्षत्रे । रेवती नक्षत्रे । विकल । निष्कल । पुष्कल । टापि प्राप्ते । कटाच्छ्रोणिवचने । पिप्पलादयश्च । पिप्पली । हरीतकी । कोशातकी । शमी । शेरी । पृथिवी । ईकारान्तनिपातनं पुंवद्भावनिषेधार्थम् । पृथिवीभार्यः । अवृत्-करणादाकृतिगणोयम् । दंष्ट्रेति । दंश दशने । 'दाम्नीशसयुयुज—' इति ष्ट्रन् ।

---

१. पुंवद्भाव° Bc3. २. °रोहणी Nc1, Dc3, Dc4. ३. मन्दन Bc1. ४. Dropped Nc1, Bc3. ५. Dropped Nc1, Dc3, Bc3, Dc4. ६. कदर Bc3. ७. कण्टल Bc1, Bc3, कण्डल Dc3. ८. Before it— बृहत् । महत् । उगित्त्वात् ङीपि Bc3, Dc3, Dc4. ९. शरारी Dc4.

जानपदकुण्डगोणस्थलभाजनागकालनीलकुश-कामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णा-नाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥४।१।४२॥

एभ्यो यथाक्रमं वृत्त्यादिष्वर्थेषु ङीष् स्यात् ॥ जानपदी । वृत्तिश्चेत् । अन्यत्र अञन्तत्वात्[1] ङीप् । जानपदी । स्वरे भेदः । कुण्डी । अमत्रं चेत् । कुण्डान्या[2] । इत्यादि । [4]औषधौ प्राणिनि च* । नीली । [6]संज्ञायां वा* । नीला । नीली ।

जानपद । जानपदीति । जनपदे भवा जानपदी । 'उत्सा-दिभ्योऽञ्' । वृत्तिरिति । वर्तते यया सा वृत्तिः । जीवनोपाय इति यावत् । **अन्यत्रेत्यादि** । वृत्तिव्यतिरिक्तेऽर्थे अञन्तत्वात् 'टिड्ढाणञ्—' इति ङीप् । ननु चोभयत्रापि जानपदीत्येवं रूपं भवति को विशेष इत्याह । **स्वरे भेद इति** । ङीषि सति प्रत्ययस्वरेणान्तोदात्तः स्यात् ङीपि तु सत्याद्युदात्तः स्यात् । जानपदशब्दस्य तित्स्वरेणाद्युदात्तत्वात् । **अमत्रं चेदिति** । पात्रं चेद्वाच्यमित्यर्थः । **कुण्डान्येति** । क्रियाशब्दः । कुडि दाहे । 'गुरोश्च हलः—' इत्यकारः । टाप् । यस्तु द्रव्यवाची कुण्डशब्दः स नित्यं क्लीब एवेति न प्रत्युदाहार्यः । **इत्यादीति** । आदिना गोणी भवति आवपनं चेत् । आवपनमिति यत्र प्रक्षिप्य धान्यादि नीयते तत् पात्रम् । गोणान्या । स्थली स्यादकृत्रिमा चेत् । स्थलान्या । भाजी । श्राणा पक्का चेत् । भाजान्या । नागी स्थूला चेत् । नागशब्दस्य गुणवचनस्यैवेदं ग्रहणम् । जातिवाचिनस्तु ङीष् सिद्ध एव । काली वर्णश्चेत् । कालान्या । नीली अनाच्छादनं चेत् । अनाच्छा-दनेपि औषधौ प्राणिनि वा प्रयोग इत्याह । **औषधौ प्राणिनि चेति** । **संज्ञायां चेति** । अनाच्छादने एवायं विकल्पः । कुशी अयोविकारश्चेत् । कुशान्या । कामुकी मैथुनेच्छावती चेत् । कामुकान्या । कबरी केशवेशश्चेत् । कबरान्या ।

---

१. After it स्यात् D_2, B_2, P, C. २. विशेषः D_3, D_5, Bc_3.

(For Notes see Next Page)

शोणात् प्राचाम् ॥४।१।४३॥

शोणा । शोणी[1] ।

वोतो गुणवचनात् ॥४।१।४४॥

उदन्ताद् गुणवचनात्[2] स्त्रियां वा[3] ङीप्[4] ॥

शोणात् 'वर्णानां तणतिनितान्तानाम्' इत्याद्युदात्तत्वात् अन्यतो ङीषि प्राप्ते विकल्पार्थं वचनम् ।

वोतः । गुणमुक्तवान् गुणवचनः । स पुनर्यः प्राग् गुणमभिधाय पश्चाद् मतुब्लोपादभेदोपचाराद्वा द्रव्यमभिधत्ते स ज्ञेयः । ननु च गुणो नाम कः । उच्यते ।

'सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः' ॥

सत्त्वं द्रव्यम् । वाक्यं हि व्यवच्छेदफलं स्यादिति सत्त्व एव निविशत इति व्याख्येयम् । अनेन सत्ता व्यावर्त्यते । सा हि न केवलं द्रव्ये वर्तते अपि तु द्रव्यगुणकर्मसु । तर्हि द्रव्यत्वं द्रव्य एव वर्तते तत्रातिव्याप्ति-

---

(Continued From Page 355)

३. After it—गौणी आवपनं चेत् । गौणा अन्या । स्थली अकृत्रिमा चेत् । स्थला अन्या । लाजी आणा चेत् पक्केत्यर्थः । लाजा अन्या । नागी स्थौल्यं चेत् । नागा अन्या । काली वर्णश्चेत् । काला अन्या । नीली अनाच्छादनं चेत् । नीला अन्या । कुशी अयोविकारश्चेत् । कुशा अन्या । कामुकी मैथुनेच्छा चेत् । कामुका अन्या । कबरी केशवेशश्चेत् । कबरा अन्या । इत्यादि । B_2., D_2. (भाजी... भाजा D_2–अन्या गुणवचना इत्यादि D_2.); From नीली to कबरा अन्या इत्यादि D_5. ४. Before it—नीलात् B_1. ५. नीली औषधिः । नीली च गौः B_1; नीलशब्दात् ङीप् । नीली गौः । प्राणिनि च नीली B_2. ६. नीला । नीली सज्ञायां वा B_1; नीला संज्ञायां वा D_1. ७. शब्दस्य Bc_3, Nc_1. ८. °वचनस्तु Nc_1, Bc_3. ९. केशश्चेत् Nc_1.

---

१. शोणी । शोणा D_1. २. गुणवाचिनः P. ३. ङीप् स्याद्वा P. ४. C. D_5 have स्यात् after it; ङीष् D_1; ङीष् स्यात् D_3.

मृद्वी। मृदुः[१]। उतः किम्। शुचिः स्त्री। गुणेति किम्।

रत आह। अपैति। अपगच्छति। अर्थात् सत्त्वादेव। यथा पीततायां जातायामाम्रादेर्नीलता। नैवं द्रव्यत्वं द्रव्यादपैति। एवं चेद् गोत्वं स्वस्तिमत्यादौ वर्तते अश्वादेश्चापैति तत्रातिव्याप्तिरत आह। पृथग्जातिषु दृश्यते इति। गोत्वं हि द्रव्यत्वावान्तरनानाजातिषु न दृश्यते स गुणस्तु दृश्यते। यथाम्रे दृष्टा नीलता तृणादिष्वपि दृश्यते। एतेन समुदितेन सकलजातेर्व्यवच्छेदः। एवं तर्हि[२] कर्म द्रव्ये वर्तते ततोपैति पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिरत आह। आधेयश्चाक्रियाजश्चेति। आधेय उत्पाद्यः। यथा पुष्पयोगाद् गन्धो वस्त्रे। अक्रियाजो नित्यः। यथाकाशादौ महत्त्वादिः। कर्म तु न तथा उत्पाद्यमनुत्पाद्यं किं तूत्पाद्यमेव। एवं तर्हि द्रव्येतिव्याप्तिः। तद्धि द्रव्य एवारम्भके वर्तते तद्विनाशेपैति च पृथग्जातिषु अवयवेषु दृश्यते। निवर्त्यानिवर्त्यस्वरूपं च अवयविनो निवर्त्यत्वात् आकाशादेश्चानिवर्त्यत्वादिति। अत आह। सोसत्त्वप्रकृतिरिति। गुणो न द्रव्यस्वभावः द्रव्यं तु द्रव्यस्वभावमिति। ननु पूर्वार्धं व्यर्थमुत्तरार्धेनैव जाति[३]व्यावृत्तेः। निवर्त्यत्वेन तासामुत्पाद्यस्वभावात्। न। असति पूर्वार्धे यथा तैजसं परमाणुरूपं कार्यद्रव्यरूपं च मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति द्वयोरपि गुणत्वं तथा पाक्य[४]द्रव्यरूपं जातिश्चेति मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति जातिरपि गुणः स्यात्। अतः पूर्वार्धेन जातिव्यावृत्तिरिति वार्तिकार्थः। विचारविशेषः प्रकीर्णकाण्डादवगन्तव्यः।

मृद्वीत्यादि। मृदुशब्दो मृदुत्वं गुणमुक्त्वा द्रव्यमभिधत्त इति गुणवचनः। 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' इति कुप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तो मृदुशब्दः। शुचिशब्दो गुणवचनो न तूकारान्तः।

---

१. After it—तन्वी। तनुः D_5. २. तर्हीति Bc_1. ३. सर्वाजाति° Bc_1; सर्वजाति° Bc_3. ४. पाक्य° Dc_4.

आखुः । खरुसंयोगोपधान्न* ।। खरुः[1] । पौण्डुः[2] ।

बह्वादिभ्यश्च ।।४।१।४५।।

बह्वी । बहुः । पद्धतिः[3] । पद्धती । इत्यादि ।

आखुरिति । जातिवचनोयं न गुणवचनः । अत्र च ङीबिति वक्तव्यम् । तथा चोक्तं **भाष्ये** । 'गुणवचनात् ङीबाद्युदात्तार्थः । गुणवचनात् ङीब् वक्तव्यः । किं प्रयोजनम् । आद्युदात्तार्थः । आद्युदात्ताः प्रयोजयन्ति । वस्विति' । एतच्च **कैयटेन** भाष्यप्रदीपे व्याख्यातम् । वस्वीति । 'धान्ये नित्' इत्यतः 'नित्' इति वर्तमाने स्तृणु स्तुहीति वसुशब्द आद्युदात्तो व्युत्पादितः । तस्मात् ङीपि सति ईकारोनुदात्तो भवति । ङीबुदात्तः स्यात् । अन्तोदात्तात्तु ङीप्ङीषोर्विशेषाभावः । 'उदात्तयणो हल्पूर्वात्' इति ङीप उदात्तत्वविधानादिति । **खरुसंयोगोपधान्नेति** । खरुशब्दात् संयोगोपधाच्च ङीप् नेत्यर्थः । खरुः पतिंवरा कन्या ।

बह्वादिभ्यः । बह्वीति । बहुशब्दस्य गुणवाचिन इह पाठो 'नित्यं छन्दसि' इत्येतदर्थः । आदिना अञ्चति । अंहति । वहति । शकटि । शक्तिः शस्त्रे । शक्तिः । शक्ती । शस्त्रे इति किम् । शक्तिः सामर्थ्यम् । अन्ये तु शक्ति शस्त्रीति द्वयं पठन्ति । शक्ती । शस्त्री । शारि । वारि । राति । अहि । कपि । मुनि । यष्टि । चण्ड । अराल । कमल । कृपाण । विकट । विशाल । विशङ्कट । भरुज । चन्द्रभागान्नद्याम् । चन्द्रभागी । चन्द्रभागा नदी । नद्यां किम् । चन्द्रभागा नाम देवता । कल्याण । उदार । पुराण । अहन् । अयं केवलः स्त्रियां नास्तीति तदन्त उदाहार्यः । दीर्घाह्नी शरत् । पक्षे डाप्निषेधौ । दीर्घाहा । दीर्घाहे ।

---

१. After it–पतिंवरा कन्येत्यभिधानात् । युवतिः । युवती D_2. २. B_1 has बभ्रुः before it. ३. पद्धती । पद्धतिः D_1, B_2, Bc_3. ४. भाष्ये Bc_3. ५. वसुहृ Bc_3. ६. ङीषु° °Dc_4. ७. बह्वादिभ्यश्च Bc_3. ८. इति Bc_1. ९. From शस्त्रे to शस्त्री omitted Nc_1. १०. शक्तिः । शक्ती । शस्त्रिः । शस्त्री Bc_3. ११. शति Nc_1; शनि Bc_3. १२. मराल Nc_1, Bc_3. १३. तरुज Bc_3. १४. Dropped Nc_1.

इतः प्राण्यङ्गात् ॥ अङ्गुली । अङ्गुलिः[1] । कृदिकारादक्तिनः[2] । सर्वतोक्तिन्नर्थादित्येके[3] । राजिः । राजी । आजिः[4] । आजी । अक्तिनः किम् । बुद्धिः[5] । मतिः[6] ।

पुंयोगादाख्यायाम् ॥४।१।४८॥

या[7] पुमाख्या पुंयोगात् स्त्रियां वर्तते ततः[8] स्त्रियां ङीष् स्यात् ॥

इतः प्राण्यङ्गादिति गणसूत्रम् । कृदिकारादक्तिन इत्यपि गणसूत्रम् । तस्यायमर्थः । कृते[9] इकारः कृदिकारः । तदन्तात् ङीप् स्यात् । सर्वतोक्तिन्नर्थादित्येके इति च । एके आचार्याः सर्वतः सर्वस्मादिकारात् कृतोकृतोपि अक्तिन्नर्थात् न विद्यते क्तिन्नर्थो यस्य सोयमक्तिन्नर्थस्तस्मात् ङीप् स्यादित्याहुरित्यर्थः । अक्तिन्नर्थादिति किम् । अकरणिः । अहरणिः । सर्वतोक्तिन्नर्थादित्येव सिद्धे शकट्यादीनां पाठः प्रपञ्चार्थः । बह्वादिराकृतिगणः ।

पुंयोगात् । पुंयोगादिति हेतौ पञ्चमी । आख्यायामिति पञ्चम्यर्थे सप्तमी इत्यभिप्रेत्याह । **या पुमाख्येत्यादि** । पुंस आख्या पुमाख्या पुंसो वाचकः शब्द इत्यर्थः । पुंयोगात् स्त्रियां वर्तत इति पुंसो योगः संबन्धः तस्येयमिति तस्माद्धेतोः स्त्रियां वर्तते । अयं यः शब्दः पुंसो वाचकोभूत् पश्चात्पुरुषसंबन्धाद्धेतोः स्त्रियां वर्तते तस्मात् शब्दात्[10] ङीष् स्यादिति[11] वाक्यार्थः ।

---

१. बह्वादिराकृतिगणः after it in B_1. २. After it—वा ङीष् B_1. ३. Before it—युवतिः। युवती। D_5, B_1, B_2; तेन युवतिः। युवती Bc_3; राज्ञी। राज्ञिः। आज्ञी। आज्ञिः D_1, Bc_3; From राज्ञिः to आज्ञी dropped D_3. ४. P drops आज्ञिः। आज्ञी; D_4 has after it—दाक्षिः। दाक्षी।. ५. मतिः। बुद्धिः C. ६. After it—अक्तिन्नर्थात् किम्। ग्लानिः। म्लानिः। अहरणिः B_1, B_2, D_2. (B_2 drops अहरणिः, D_2 drops it and also म्लानिः); D_5 (D_5 drops ग्लानिः and म्लानिः and has अकरणिः। अहरणिः). ७. Before it—C has मतिबुद्धिपूजार्थेभ्यश्च' इति क्तिन्नाख्यायां. ८. ततो ङीप् स्त्रियाम् P. ९. कृत इति इकारः Bc_1. १०. Dropped Nc_1; स्त्रियां ङीष् स्यादिति Bc_3. ११. Dropped Bc_1.

गोपी[1] ॥ गोपालिकादीनां न* ॥ गोपालिका ॥ सूर्याद्देवतायां चाप्* ॥ सूर्यस्य स्त्री देवता सूर्या । अन्या सूरी ।

गोपीति । गाः पातीति गोपः । 'आतोनुपसर्गे कः' । गोपस्य स्त्री गोपी । अत्र गोपशब्दस्य गोरक्षणं यत् प्रवृत्तिनिमित्तं तस्य पुंसि संभवो न स्त्रियाम् । तस्मात् पुंवाचको गोपशब्दः पुंसंबन्धात् स्त्रियमाहेति । अतो ङीष् जातः । पुंयोगात् किम् । देवदत्ता । अत्र देवदत्ता शब्दो न पुंयोगात् स्त्रियमाह । यतः स्त्रिय इयं संज्ञा । आख्यायामिति किम् । प्रसूता । अयं जातप्रसवामात्रष्टे । तस्य हि प्रसवस्य पुंयोगो निमित्तम् । तस्मात् पुंयोगात् प्रसूताशब्दः स्त्रियां वर्तते न तु पुंवाचकः । **गोपालिकादीनां ने**ति । पालकशब्दान्तात् प्रतिषेध इत्यर्थः । तथा चोक्तं **पाणिनीयमतदर्पणे** । 'अपालकान्तादित्यत्र वाच्यं गोपालिकेति दिक्' इति । तथा **रामकौतुके**पि । 'पालकान्तान्निषेधो गोपालिका पशुपालिका[2]' इति । **सूर्यादि**ति । चकारोन्तादात्तार्थः पकारः सामान्यग्रहणार्थे । हल्ङ्याबिति । **सूर्ये**ति । 'राजसूयसूर्य—' इति क्यबन्तोयमाद्युदात्तः । तस्माच्चापि 'चितः' इत्यनेनान्तोदात्तो भवति । **अन्या सूरी**ति । अदेवता सूरी । ङीष् । 'सूर्यतिष्य—' इति यलोपः ।

---

१. B₁ has after it—गोपाली । पुंयोगादिति किम् । देवदत्ता ।; पालशब्दात् प्रतिषेध इत्यर्थः । पुंयोगादिति किम् । देवदत्ता । आख्यायां किम् । प्रसूता । प्रजाता । B₂. २. पशुपालिका B₂. ३. तस्य Dc₃, Dc₄, Bc₃. ४. शब्दः dropped Bc₁.

इन्द्रवरुणभवशर्व[1]रुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥४।१।४९॥

इन्द्रादेः स्त्रियां ङीष् आनुक्[2] चागमः स्यात् ॥ इन्द्राणीत्यादि । ब्रह्माणीति केचित् । हिमारण्ययोर्महत्त्वे* ॥ महद्धिमं हिमानी । अरण्यानी[3] ॥ यवाद्दोषे*॥ दुष्टो[4] यवो यवानी ॥ यवनाल्लिप्याम्* ॥ यवनानी[5] ॥ मातुलोपाध्याया[6]भ्यां वा* ॥ मातुलानी[7] मातुली वा । उपाध्यायानी[8] । उपाध्यायी वा[9] ॥

इन्द्र । येषामत्र पुंयोग इष्यते तेषामागममात्रं[10]विधिः । ङीष् तु पूर्वेणैव सिद्धः । अन्येषां तूभयं विधीयते । आनुका सिद्धावनुकरणमिन्द्रमाचष्टे इन्द्रयति ततः क्विपि इन्द्रः स्त्रीत्यत्र इन्द्राणीति दीर्घश्रवणार्थम् । **इत्यादीति** । आदिना वरुणानी भवानी शर्वाणी रुद्राणी मृडानी । **ब्रह्माणीति केचिदिति** । तथा च **मुग्धबोधे** उक्तम् । ब्रह्मरुद्रभवशर्वमृडेन्द्रवरुणादी[11]नङ्ङीति । **हिमारण्ययोरिति** । महत्त्वे गम्यमाने हिमशब्दात् अरण्यशब्दाच्च स्त्रियामानुक्ङीषौ । **अरण्यानीति** । महदरण्यम् । **यवाद्दोषे इति** । यवाद् दोषे गम्यमाने स्त्रियां पूर्ववत् । **यवानीति** । दुष्टो यवो यवानी । **यवनानीति**। यवनानां लिपिः । तस्येदमित्य[12]ण्प्रसङ्गे ङीष् आनुक् चागमः । अण् तु तदर्थस्य ङीषैवोक्तत्वात् न । **मातुलानीत्यादि** । मातुलस्य स्त्री । उपाध्यायस्य स्त्री ।

---

१. सर्व B_1. २. स्याद्वानुगागमश्च C; आनुगागमश्च D_5. ३. महदरण्यमरण्यानी B_2. ४. D_1, D_4, D_5 drop दुष्टो यवो. ५. B_1 has got लिपि : after it. ६. °ध्याययोर्वा B_1. ७. C, B_1, D_1, D_4 drop मातुली वा; D_3 drops वा. ८. C drops उपाध्यायानी । उपाध्यायी वा; B_1 drops वा D_5. ९. D_1, D_3, D_5 drop it. १०. मात्रं Nc_1. ११. °दानङ्ङीति Bc_3, Dc_4. १२. °त्यणि Bc_1.

आचार्यादणत्वं च* ॥ आचार्यानी । अर्यक्षत्रियाभ्यां वा स्वार्थे* ॥ अर्याणी । अर्या । क्षत्रियाणी । क्षत्रिया । पुंयोगे तु ङीषेव । अर्यी । क्षत्रियी । सूर्याणी वेति केचित् ।

क्रीतात् करणपूर्वात् ॥४।१।५०॥

क्रीतान्तात् करणादेः स्त्रियां ङीष् स्यात् ॥ वस्त्रक्रीती । क्वचिन्न । धनक्रीता ।

आचार्यादणत्वं चेति । क्षुभ्नादिषु द्रष्टव्योयमिति भावः । **आचार्यानीति** । आचार्यस्य स्त्री । **सूर्याणी वेति केचिदिति** । तथा चोक्तं **मुग्धबोधे** । 'मातुलोपाध्यायक्षत्रियाचार्यसूर्याद्वा—' इति । आनङनुवर्तते ।

क्रीतात् । **क्रीतान्तात् करणादेरिति** । अदन्तात् प्रातिपदिकादिति शेषः । प्रातिपदिकादत इति सर्वत्रानुवृत्तेः । **वस्त्रक्रीतीति** । वस्त्रशब्दस्य करणस्य क्रीतशब्देन 'कर्तृकरणे कृता बहुलम्' इति गतिकारकोपपदानां कृद्भिः सह समासः प्राक् सुबुत्पत्तेरिति परिभाषया सुबुत्पत्तेः प्राक् समासः । **क्वचिन्न** । **धनक्रीतेति** । अयं भावः । धनेन क्रीता धनक्रीता । टाबन्तेन समासः । अत्र च 'अतः' इत्यनुवर्तते । ततो न ङीषिति । ननु चात्रापि सुबुत्पत्तेः प्राक् समासेन भाव्यम् । उच्यते । कर्तृकरणे कृता बहुलमिति बहुलवचनात् 'गतिकारकोपपदानां कृद्भिः समासः प्राक् सुबुत्पत्तेः' इत्येतदपि बहुलम् । करणपूर्वात् किम् । सुक्रीता ।

---

१. C drops this Vârtika and the instance. २. आचार्योनी । आचार्यी B_2; आचार्यी । आचार्यानी । Bc_3. ३. आर्य C, B_1, D_1. ४. आर्याणी । आर्या C, B_1, D_1, D_5. ५. Dropped Bc_3. ६. ङीष् D_3. ७. आर्या C, B_1, D_1. ८. सूर्याणीति केचित् D_2, B_1, D_4, D_5, P, C. ९. करणपूर्वादेः B_1. १०. ङीप् D_5. ११. Dropped Bc_1. १२. भवितव्यम् Dc_3.

क्तादल्पाख्यायाम् ॥४।१।५१॥

करणादेः क्तान्तादल्पाख्यायां ङीष् स्यात् ॥ अभ्रलिप्ती द्यौः।[1,2]

बहुव्रीहेश्चान्तोदात्तात् ॥४।१।५२॥

बहुव्रीहेः क्तान्तादन्तोदात्तात् स्त्रीयां ङीष्[3] स्यात् ॥ ऊरुभिन्नी । जातान्तान्न[4]* ॥ दन्तजाता ॥ बहुनञ्सुकालसुखादिपूर्वाच्च न* ॥ बहुकृता । इत्यादि ।

क्तात् । अल्पाख्या समुदायोपाधिः । अभ्रलिप्तीति । लिप उपदेहे । क्तः । अल्पैरभ्रैर्लिप्ता इत्यस्मिन्नर्थे विवक्षिते सुबुत्पत्तेः प्राक् समासः । अल्पशब्दो गतार्थत्वान्न प्रयुज्यते । अल्पाख्यायां किम् । चन्दनानुलिप्ता । बहुचन्दनानुलिप्तेत्यर्थः । बहु । अस्वाङ्गपूर्वपदाद्विकल्पं वक्ष्यतीति स्वाङ्गपूर्वामुदाहरति । ऊरुभिन्नीति । भिन्नौ ऊरू यस्याः सा । 'जातिकालसुखादिभ्यः परा निष्ठा' इति क्तान्तस्य परनिपातः । 'जातिकालसुखादिभ्योनाच्छादनात् क्तोकृतमितप्रतिपन्नाः' इत्यन्तोदात्तत्वम् । जातिवाची हि ऊरुशब्दः । बहुव्रीहेः किम् । पादपतिता । अन्तोदात्तात् किम् । वस्त्रच्छन्ना । दन्तजातेति । जाता दन्ता यस्याः । पूर्ववत् क्तान्तस्य परत्वमन्तोदात्तत्वं च । बहुकृतेति । बहु कृतं यया । पूर्ववत् परत्वान्तोदात्तत्वे । आदिना अकृता सुकृता मांसकृता सुखकृता दुःखकृता ।

---

१. Dropped द्यौः D_1, Bc_3, D_4, D_5. २. C has after it—अक्षरलिप्ती जिह्वा । अल्पाख्यायां किम् । चन्दनानुलिप्ता ।; अल्पाख्यायां किम् । चन्दनानुलिप्ता B_2, D_3, D_5. ३. ङीप् D_3, D_5. ४. Before it—अल्पाख्यायां किम् । शंखभिन्नी । ऊरुभिन्नी । गलकोत्कृत्ती केशलूनी । बहुव्रीहेरिति किम् । पादपतिता । अन्तोदात्तादिति किम् । वस्त्रच्छन्ना । B_2. ५. Dropped Bc_3. ६. परनिपातत्वम्° Dc_3. ७. Dropped Bc_3.

पाणिगृहीती भार्यायाम् * ॥ पाणिगृहीता अन्या ।

अस्वाङ्गपूर्वपदाद्वा ॥४।१।५३॥

अस्वाङ्गादेः क्तान्ताद्बहुव्रीहेर्वा ङीष् ॥ सुरापीती । सुरापीता । अन्तोदात्तात् किम् । वस्त्रच्छन्ना ।

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥४।१।५४॥

असंयोगोपधात् स्वाङ्गादुपसर्जनात् स्त्रियां ङीष् वा स्यात् ॥ सुमुखी । सुमुखा ।

पाणिगृहीतीति । यस्यास्त्वग्निसाक्षिकं पाणिर्गृहीतः सा भार्या तस्यां वाच्यायामित्यर्थः । **पाणिगृहीतान्येति** । यस्या यथा कथंचित् पाणिर्गृहीतः सा ।

अस्वाङ्ग । **अस्वाङ्गादेरिति** । स्वाङ्गलक्षणमनन्तरमेव पठिष्यति । न स्वाङ्गमस्वाङ्गं तदादिर्यस्य बहुव्रीहेः । **सुरापीतीति** । पीता सुरा यया । 'जातिकाल—' इति परनिपातः । 'जातिकालसुखादि—' इत्यन्तोदात्तत्वम् । अत्र 'अन्तोदात्तात्' इत्यनुवर्तते इत्यभिप्रेत्याह । **अन्तोदात्तात् किमिति** । **वस्त्रच्छन्नेति** । अनाच्छादनेति अन्तोदात्तत्वनिषेधात् 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वम् । 'अनुदात्तं पदमेकवर्जम्' इति शेषमनुदात्तम् । बहुलं संज्ञाछन्दसोरिति वाच्यम् । प्रवृद्धविलूनी । प्रवृद्धविलूना । प्रबद्धा चासौ विलूना चेति । नायं बहुव्रीहिः ।

स्वाङ्गात् । **सुमुखीति** । सुष्ठु मुखं यस्या इति बहुव्रीहिः । अत्र च 'प्रथमानिर्दिष्टम्—' इति मुखशब्दस्योपसर्जनत्वम् ।

---

१. क्तान्तादन्तोदात्ताद्बहुव्रीहे B_2. २. B_1, D_1 have स्यात् after it. ३. P has वा after it; C and Bc_3 have after it—स्वाङ्गपूर्वपदात् किम् । ऊरुभिन्ना । शङ्खभिन्ना । (Bc_3 has ऊरुभिन्नी । शङ्खभिन्नी). ४. वा ङीष् स्यात् C, B_2, ङीष् स्याद्वा P; ङीप् D_1, वा ङीप् D_5. ५. तु dropped Dc_3. ६. इत्यभिप्रायः । Dc_4. ७. Dropped Nc_1, Dc_3.

अतिकेशी। अतिकेशा[1]। संयोगोपधात्[2] तु। सुगुल्फा। अङ्गगात्रकण्ठेभ्यास्त्विष्यते[3]। स्वङ्गी। स्वङ्गा। इत्यादि।

अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम्।

अतिकेशीति। 'कुगतिप्रादयः' इति तत्पुरुषः। 'एकविभक्ति च—' इति केशशब्दस्योपसर्जनत्वम्। स्वाङ्गात् किम्। बहुयवा। उपसर्जनात् किम्। अशिखा। नञ्तत्पुरुषः। स्वाङ्गलक्षणमाह।

अद्रवमित्यादि। मुखनासिकासंचारी वायुः प्राणः सोऽस्यास्तीति प्राणी। तत्र यत् तिष्ठति तत् प्राणिस्थं मुखादि स्वाङ्गमुच्यते। यद्येवं स्वेदोऽपि स्वाङ्गं स्यात् प्राणिस्थत्वादत आह[4]। **अद्रवमिति**। स्वेदस्तु द्रवरूपोऽतो न तत्र प्रसङ्गः। एवमपि ज्ञानं स्वाङ्गं स्यात् प्राणिस्थत्वादद्रवत्वाच्चेत्यत आह। **मूर्तिमदिति**। असर्वगतस्य द्रव्यस्य परिमाणं मूर्तिः सा यस्यास्ति तन्मूर्तिमत्। न च सा ज्ञानस्यास्ति निर्गुणत्वाद्गुणानां ज्ञानस्यात्मगुणत्वात्। यन्मते-काठिन्यादि स्पर्शविशेषो मूर्तिस्तन्मतेनापि नैव मूर्तिमत् ज्ञानम्। न हि ज्ञानस्य स्पर्शोऽस्ति। एवमपि शोफस्य श्वयथुसंज्ञस्य स्वाङ्गत्वं स्यात्। यथोक्तविशेषणविशिष्टत्वादत आह। **अविकारजमिति**। विकारो वातादिवैषम्यम्[5]। तज्जं विकारजम्। न विकारजम-विकारजम्। शोफस्तु विकारजः। एवं चेत् रथ्यापरिगतानां केशादीनां स्वाङ्गता न स्यादप्राणिस्थत्वादत आह।

---

१. B_1 has after it—बहुलं संज्ञाछन्दसोरिति वक्तव्यम्। प्रवृद्धविलूनी। प्रवृद्धविलूना।. २. असंयोगोपधात् किम् B_1; Before it—स्वाङ्गात् किम्। बहुयवा। उपसर्जनात् किम्। आशिषा B_2. ३. °कण्ठेभ्यो वेष्यते B_2. ४. आह: Dc_3. ५. धातुवैषम्यम्। Dc_4.

अतत्स्थं तत्र दृष्टं चेत् तेन चेत् तत् तथायुतम् ॥ १ ॥

बहुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्तत्वात्[1]। सुमुखा शाला। अप्राणिस्थत्वात्[2]। सुशोफा। विकारजत्वात्। सुकेशी। सुकेशा। रथ्या। अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। सुस्तनी। सुस्तना। प्रतिमा। प्राणिवत् प्राणिसदृशे स्थितत्वात्।

अतत्स्थं तत्र दृष्टं चेदिति। तस्मिन् प्राणिनि तिष्ठतीति तत्स्थम्। अतत्स्थमप्राणिस्थमपि[3] केशादि स्वाङ्गं स्यात् यदि तत्र प्राणिनि दृष्टं स्यात्। एवमपि प्रतिमावयवानां मुखादीनां स्वाङ्गता न स्यात्। अप्राणिस्थत्वादत आह। तेन चेत् तत् तथायुतमिति। तेन प्राणिना येन प्रकारेण संस्थानविशेषेण संबद्धं तथा यद्यप्राणिना संबद्धं स्यात् एवमपि स्वाङ्गं स्यात्। अथवा तेन चेत् मुखादिना तत् अप्राणिद्रव्यं तथा युक्तं स्याद्यथा प्राणिद्रव्यमेवमपि स्वाङ्गं स्यादिति। सर्वथायमर्थः[4]। यादृशं प्राणिनो मुखादि स्वाङ्गं तादृशमेव[5] यद्यप्राणिनः स्यात् एवमपि स्वाङ्गं भवतीति। स्वाङ्गलक्षणपद्ये पूर्वस्थपदानां प्रयोजनं दर्शयन् प्रत्युदाहरणान्याह। बहुस्वेदेत्यादिना विकारजत्वादित्यन्तेन। अत्र सर्वत्र स्वाङ्गत्वाभावाद् ङीषोभावः। सुकेशी। सुकेशा रथ्येति। तृतीयचरणार्थस्योदाहरणम्। अप्राणिस्थस्येत्यादि। तत्र लक्षणप्रदर्शनम्। सुस्तनीत्यादि। चतुर्थचरणार्थस्योदाहरणम्। प्राणिवदित्यादि लक्षणप्रदर्शनपरम्। सर्वमेतच्छ्लोकव्याख्यान एव व्याख्यातप्रायम्।

---

१. अमूर्तित्वात् B_2. २. °स्थित° Bc_3; अप्राणित्वात् D_3. ३. अप्राणिस्थमपि D_2, P; C, B_1, B_2. ४. °मर्थ इत्यर्थः। Bc_3. ५. एव dropped Bc_3.

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥४।१।५५॥

एतदन्तात्[1] स्त्रियां वा ङीष्[2] ॥ सुनासिकी। सुनासिका। इत्यादि ॥ पुच्छाच्च* ॥ सुपुच्छी ॥ सुपुच्छा ॥ कबरमणिविषशरेभ्यो नित्यम्* ॥ कबरपुच्छी[3]। इत्यादि। मणिपुच्छी। इत्यादि। उपमानात् पक्षपुच्छाभ्याम्* ॥ श्येनपक्षी। श्येनपुच्छी। सेना।

न क्रोडादिबह्वचः ॥४।१।५६॥

क्रोडादेर्बह्वचश्च स्वाङ्गात् स्त्रियां[4] न ङीष्। सुक्रोडा[5]। आकृतिगणोयम्। सुजघना[6]।

नासिका। 'स्वाङ्गाच्चोपसर्जनात्' इत्येव। बह्वच्लक्षणे संयोगोपधलक्षणे निषेधे प्राप्ते वचनम्। सहनञ्विद्यमानपूर्वलक्षणस्तु[7] निषेधः स्यादेव। आदिना शातोदरी शातोदरा बिम्बोष्ठी बिम्बोष्ठा दीर्घजङ्घी दीर्घजङ्घा समदन्ती समदन्ता चारुकर्णी चारुकर्णा तीक्ष्णशृङ्गी तीक्ष्णशृङ्गा। पुच्छाच्चेति वक्तव्यम्। **कबरेत्यादि**। एभ्यः परात् पुच्छान्नित्यं ङीषित्यर्थः। आदिना मणिपुच्छी विषपुच्छी शरपुच्छी श्येनपक्षी इत्यादि। श्येनवत् पक्षौ यस्याः श्येनवत् पुच्छं यस्याः।

न क्रोडादि। स्वाङ्गादिप्राप्तो ङीष् निषिध्यते। **सुक्रोडेति**। सुष्ठु क्रोडा यस्याः सा सुक्रोडा। अश्वानामुरः क्रोडा। स्त्रीलिङ्गोयम्। उत्तरपदस्य 'गोस्त्रियोः—' इति ह्रस्वः। ततो ङीषो निषेधे टाप्। खुर। शाखा। बाल। शफ। गुल्फ। आकृतिगणोयमिति। अक्रोडादिराकृतिगणः। ततः स्वसुभगा सुमङ्गलेत्यादि सिद्धम्। **सुजघनेति**। बह्वच उदाहरणम्।

---

१. After it—बहुव्रीहिः D2, D3, B1, B2. २. After it—स्यात् P, D2, ङीप् स्यात् D5. ३. कबरवत् पुच्छो यस्याः सा कबरपुच्छी B1, D5. ४. स्त्रियां dropped P, Bc3, D3, D4, D5. ५. After it—शातोदरी—रा। बिम्बोष्ठी—ष्ठा। दीर्घजङ्घी—ङ्घा। समदन्ती—न्ता। चारुकर्णी—र्णा। तीक्ष्णशृङ्गी—ङ्गा। B2. ६. C has पद्मवदना after it. ७. °पूर्वस्तु Bc3; °विद्यमानलक्षणस्तु Dc3.

सहनञ्विद्यमानपूर्वाच्च ॥४।१।५७॥

एतत्पूर्वात् स्वाङ्गात् स्त्रियां न ङीष् ॥ सकेशा । अनासिका । विद्यमानोदरा ।

नखमुखात् संज्ञायाम् ॥४।१।५८॥

सूर्पणखा[2] । गौरमुखा । असंज्ञायां तु ताम्रनखी[4] ।

सह । स्वाङ्गाच्चेति । 'नासिकोदर—' इति प्राप्तो ङीष् निषिध्यते । सकेशेति । सह केशैर्वर्तते । 'तेन सहेति तुल्ययोगे' इति समासः । 'वोपसर्जनस्य' इति सहस्य सः । अनासिकेति । अविद्यमाना नासिका यस्याः । 'नञोऽस्त्यर्थानाम्' इति समासः ।

नख । सूर्पणखेति । 'पूर्वपदात् संज्ञायामगः' इति णत्वम् । स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते । 'दिक्पूर्वपदात् ङीष्' ॥ ४।१।६०॥ स्वाङ्गाच्चोपसर्जनादित्यादि विधिशास्त्रमिहानुवर्तते । न क्रोडादीति निषेधशास्त्रं च । ततो यत्र तेन विहितस्तत्र विधेयः । यत्र निषिद्धस्तत्र निषेध्यः । दिक्पूर्वपदात् प्रातिपदिकात् ङीप् स्यात् । स्वरे विशेषः । प्राङ्मुखी । प्राङ्मुखा । इह न । प्राक्क्रोडा । प्राक्जघना ।

---

१. C, D$_1$, Bc$_3$, D$_5$, D$_4$ omit it. २. शूर्प° D$_1$. ३. गौरमुखी D$_5$. ४. After this C, D$_4$ have दिक्पूर्वपदात् ङीष् । वा डाप् स्यात् ॥ प्राङ्मुखा । इह न । प्राग्गुल्फा । प्राक्क्रोडा । प्राग्जघना । न क्रोडादिबह्वच इति प्रतिषेधात् ॥; B$_2$ has—दीर्घजिह्वी च छन्दसि । दिक्पूर्वपदात् ङीष् । प्राङ्मुखी । प्राङ्मुखा । इह न । प्राग्गुल्फा । प्राक्क्रोडा । प्राग्जघनेति न क्रोडेत्यादि निषेधात् ।; D$_2$, D$_3$ follow B$_2$, dropping दीर्घजिह्वी च छन्दसि ।. ५. इति च Bc$_3$, Dc$_3$. ६. शूर्प° Dc$_4$. ७. ङीप् Dc$_3$.

वाहः ॥४।१।६१॥

वाहन्तात् स्त्रियां ङीष् स्यात् ॥ भारौही ।

सख्यशिश्वी भाषायाम् ॥४।१।६२॥

एतौ निपात्येते भाषायाम् ॥

जातेरस्त्रीविषयादयोपधात् ॥४।१।६३॥

जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् ॥

वाहः । वाह इति वहेर्ण्विप्रत्ययान्तस्य निर्देशः । कर्मणि चोपपदे वहेर्ण्विविधानात् केवलस्य वाहः संभवो नास्तीति सामर्थ्यात् तदन्तविधिर्विज्ञायते इत्यभिप्रेत्याह । **वाहन्तादिति** । अत्र स्वरितत्वात् ङीषनुवर्तते । न ङीप् । अस्वरितत्वादित्यभिप्रेत्याह । **ङीष् स्यादिति** । **भारौहीति** । भारं वहतीति 'वहश्च' इति ण्विः । ण्वेः सर्वापहारी लोपः । प्रत्ययलक्षणेनोपधावृद्धिः । ङीष् । 'वाह ऊठ्' इति संप्रसारणम् । 'एत्येधत्यूठ्सु' इति वृद्धिः ।

सखी । एताविति । सखीशब्दात् ङीष् । सखी । नास्याः शिशुरस्ति । अशिशुशब्दादपि ङीष् । अशिश्वीति निपात्यत इत्यर्थः । भाषायां किम् । सखा सप्तपदी भव । अशिशुरिव ।

जातेः । जातिवाचकत्वात् । प्रातिपदिकं जातिशब्देनोक्तम् । अभिधेयेभिधानोपचारात् । अत एवाह । **जातिवाचीति** । **अस्त्रीविषयादिति** । विषयशब्दोनन्यत्रभावे वर्तते । अत एवाह । **यन्न च स्त्रियां नियतमिति** । जातिलक्षणं चोक्तम् । 'आकृतिग्रहणा जातिर्लिङ्गानां न च सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह' ॥ इति । गृह्यते अनेनेति ग्रहणम् । करणे ल्युट् ।

---

१. Dropped D_4. २. एते निपात्ये B_1. ३. B_1 drops it. ४. 'वहेश्च' Bc_3, Dc_3. ५. °पदा Dc_3, Dc_4. ६. °नोच्यते Dc_3.

आकृतिः संस्थानं ग्रहणं यस्याः सा आकृतिग्रहणा । उपसर्जनत्वान्न ङीष् । अवयवविशेषव्यङ्ग्येत्यर्थः । एतेन गोत्वमृगत्वतटत्वादिजातिर्लक्षिता। ब्राह्मणक्षत्रियाद्याकारेऽसौ[1] सादृश्याद् ब्राह्मणत्वजातिरनेन न[2] संगृहीतेति तामाह । लिङ्गाना न च सर्वभागिति । या सर्वाणि लिङ्गानि न भजते साकारव्यङ्ग्यापि जातिः । एतच्चाप्राप्तप्रापणाय विधिर्नाकृतिग्रहणेत्यस्य[3] संकोचकमिति तटादेः सर्वलिङ्गत्वेपि आकृतिव्यङ्ग्यत्वाज्जातित्वं सिद्धम् । ब्राह्मणादिर्हि ब्राह्मणो ब्राह्मणीति द्वे लिङ्गे भजति न तु क्लीबमिति लिङ्गानां न सर्वभाक् । सर्वशब्दस्योपपदस्य लिङ्गापेक्षत्वेपि गमकत्वाद् भजो ण्विप्रत्यय उपपदसमासश्च । लिङ्गानामिति कर्मणि षष्ठी । सकृदाख्यातनिर्ग्राह्येति । सकृदुपदिष्टा सती निश्चेतुं शक्येत्यर्थः । अनेन ब्राह्मणजातिवद्देवदत्तादेरसर्वलिङ्गत्वेपि सकृदाख्यातनिर्ग्राह्यत्वाभावान्न जातित्वम् । एकत्वं नित्यत्वं प्रत्येकपरिसमाप्तत्वमित्येते जातिधर्माश्च सकृदाख्यातनिर्ग्राह्येत्यनेनोक्ताः। तथा हि यद्येका न स्यात् एकस्मिन् पिण्डे[4] गौरिति सकृदुपदिष्टा पिण्डान्तरे न गृह्येत । नित्या चेन्न स्यात् यत्रोपदिष्टा तस्मिन् पिण्डे नष्टे न[5] स्यात् । यदि प्रत्येकं परिसमाप्ता न स्यात् यत्राख्याता तस्मिन्नपि पिण्डे सर्वात्मना न गृह्येत किं पुनर्पिण्डान्तरे । अनुक्तं संगृह्णाति । गोत्रं च चरणैः सहेति। गोत्रमिति पूर्वाचार्याणामपत्यस्य संज्ञा । अपत्यप्रत्ययान्ता च जातिरित्यर्थः । सा हि नाकारव्यङ्ग्या नाडायनो नाडायनी नाडायनमिति सर्वलिङ्गभाक् च । अतः पृथक् ग्रहणम् । चरणशब्दा वेदशाखाध्ययनक्रियासंबन्धात् क्रियाशब्दा न जातिशब्दाः । तेषां जातित्वप्रतिपादनाय चरणैः सहेत्युक्तम् । विचारविशेषः प्रकीर्णकाण्डादवगन्तव्यः ।

---

१. असौ ब्राह्मणत्वं जाति &c. correct. कैयट is followed, see it. २. Dropped Bc3, Dc4. ३. वचनं No1, विधानं Dc4. ४. गोपिण्डे सकृदुपदिष्टापि Bc1; गोपिण्डे Dc3. ५. For न स्यात्–नश्येत् Dc4, Dc3.

मृगी । हंसी । ब्राह्मणी । घटी ।

गोत्रचरणावपि जातिरिष्यते। नाडायनी। कठी । बह्वृची । जातेः किम् । मुण्डा । स्त्रीविषयात्तु वलाका । योपधात्तु क्षत्रिया । गवयहयमुकयमत्स्यमनुष्याणां न निषेधः* ॥ गवयी । इत्यादि ॥

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च—॥४।१।६४॥

पाकाद्युत्तरपदात् जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात् ॥ ओदनपाकी । शङ्कुकर्णी । शालपर्णी । शङ्खपुष्पी । दासीफली । दर्भमूली । गोवाली ।

मृगी । हंसीति । आकृतिग्रहणाया जातेरुदाहरणम् । **ब्राह्मणी**ति असर्वलिङ्गभाजः । **घटी**ति तु पूर्वाया एव ।

गोत्रचरणावपीति । एतच्च व्याख्यातम् । **नाडायनी**ति गोत्रलक्षणा जातिः । **कठी बह्वृची**ति चरणलक्षणा । **मुण्डे**ति । मुण्डगुणयोगान्मुण्डा । गुणशब्दोऽयम् । **वलाके**ति । जातिवाच्यप्ययं सर्वदा स्त्रियामेव नियतः । **क्षत्रिये**ति । गोत्रमिह जातिः । 'क्षत्राद् घः' इत्यपत्ये घविधानात् । असर्वलिङ्गभाक्त्वे सति सकृदाख्यातनिर्ग्राह्यत्वाद्वा जातित्वम् । **गवयहये**त्यादि । गौरादिषु गवयादीनां पाठ इदानीन्तनः । तथा चोक्तं **भाष्यदीपे कैयटेन** । गौरादिष्विदानीन्तनैर्गवयादयः प्रक्षिप्ता इति वार्तिकारम्भाद्विज्ञायत इतीति ।

पाक । स्त्रीविषयत्वात् पूर्वेणाप्राप्तो ङीष् विधीयते ।

पाककर्णादयः समुदाया जातिविशेषवाचिनः ।

---

१. मन्दा D_3. २. Dropped D_5. ३. लम्बकर्णी B_1. ४. शालिपर्णी C. ५. सस्यफली C, B_2; गन्धफली D_2, C, B_1, B_2. ६. After it—इत्यादि D_5.

इतो मनुष्यजातेः ॥४।१।६५॥

इदन्तान्मनुष्यजातेः स्त्रियां ङीष् [1]स्यात् ॥ अवन्ती । [2]दाक्षी । [3]इतः किम् । विट् । मनुष्यजातेः किम् । तित्तिरिः । इञ-उपसंख्यानमजात्यर्थम् । सौतङ्गमी । [4]सुतङ्गमादिभ्यश्चातुरर्थिक इञ् ॥

ऊङुतः ॥४।१।६६॥

[5]मनुष्यजातेरुदन्तात् स्त्रियामूङ् [6]स्यात ॥

इतः । अवन्तीति । अवन्तेरपत्यं स्त्री । 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति तस्य लुक् । दाक्षीति । 'अत इञ्' । उभयत्र गोत्रं जातिः । इतः किम् । विशोपत्यं विट् । 'जनपदशब्दात् क्षत्रियादञ्' । 'अतश्च' इति तस्य स्त्रियां लुक् । मनुष्यग्रहणं किम् । तित्तिरिः । आकृतिग्रहणा जातिः । जातेरित्यनुवर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात् । उदमेयस्यापत्यम् । 'अत इञ्' । औदमेयी । इञ उपसंख्यानमजात्यर्थम् । सुतङ्गमेन [7]निर्वृत्ता सौतङ्गमी । 'वुञ्छण्—' आदिसूत्रेण चातुरर्थिक इञ् । न चेयं जातिः । तपरकरणात् क्यजन्तादवन्तीयतेः क्विपि न [8]ङीप् । अवन्तीरिति ।

ऊङुतः । ङकारो 'नोङ्धात्वोः' इति विशेषणार्थः । सवर्णदीर्घत्वेनैव दीर्घत्वे सिद्धे यद्दीर्घोच्चारणं तत् 'शेषाद्विभाषा' इति प्राप्तस्य कपो बाधनार्थम् । तेन ब्रह्मबन्धूरिति नित्यमूकारान्त एव स्यात् । वृत्तस्वाधायहीनायां ब्राह्मणजातावयं बहुव्रीहिर्वर्तते । तथा जीवबन्धूः ।

---

१. Dropped D_1, B_2. २. Before it—कुन्ती Bc_1. ३. From इतः to इञ् dropped C, P, D_1, D_3, D_5; Bc_3; from इञ उप' to इञ् dropped D_4; B_2 has from इतः to विट् after सौतङ्गमी. ४. B_2 drops from सुत° to इञ्. ५. उदन्तान्मनुष्यजातेः C, D_2, D_3, D_4; उदन्तादयोपधान्मनुष्यजातेः B_2. ६. Dropped B_1. ७. निर्वृत्ता Bc_1, Bc_3. ८. ङीष् Dc_3.

सवर्णदीर्घः ।

अन्तादिवच्च ॥६।१।८५॥

योयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यात् ॥ इत्यादिवद्भावात् स्वाद्युत्पत्तिः । कुरूः । अयोपधादित्येव । अध्वर्युः । अप्राणिजातेश्चारज्ज्वादीनामिति वाच्यम्*।

सवर्णदीर्घ इति । कुरोरपत्यं स्त्री । 'कुरुनादिभ्यो ण्यः' । 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति लुक् । गोत्रत्वाज्जातिः । ततः कुरुशब्दादूङ् । 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घ इत्यर्थः । ततः कुरू इति स्थिते ।

अन्त । योयमिति । 'एकः पूर्वपरयोः' इत्यधिकारेण य एकादेशो विधीयते स पूर्वस्येत्यादि । यथा तस्यान्त आदिर्वा तदन्ततस्तद्ग्रहणेन गृह्यते तद्वदेकादेशोपि तद्ग्रहणेन गृह्यते इत्यतिदेशार्थः । पूर्वपरयोरिति स्थानषष्ठ्यन्तत्वेन श्रवणात् पूर्वपरसमुदाय एकादेशस्य साक्षात् स्थानी । न पूर्वपरौ समुदायिनौ । समुदायो हि एकदेशेन निवर्त्यते तत्रावयवनिवृत्तिं विना समुदायनिवृत्तिर्नेति अवयवौ नान्तरीयकतया निवर्त्यैते इति अवयवयोरानुमानिकं स्थानित्वं ततश्च श्रुतानुमानिकयोः श्रुतेनैव संबन्धो बलीयानिति अवयवाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते । एवं स्थिते कुरु इत्यत्र प्रातिपदिकान्तो य उकारो यश्चोङ उकारस्तयोर्य एकादेशस्तस्य पूर्वस्यान्तवदित्यन्तवद्भावे सति यदिष्टं सिध्यति तदाह । इत्यादिवद्भावादित्यादि । आदिवद्भावः पूर्ववद्भावः प्रस्तुते प्रातिपदिकवद्भाव इति यावत् । ततो 'ङ्याप्प्रातिपदिकात्' इत्यधिकारेण विधीयमानानां स्वादीनामुत्पत्तिः स्यादित्यर्थः ।

---

१. सवर्णे Dc3. २. Before it— 'अकः सवर्णे दीर्घः' इत्यर्थः Dc3. ३. °रिति Nc1, Dc3, Dc4.

कर्कन्धूः[१] । प्राणिजातेस्तु धेनुः । रज्ज्वादेस्तु रज्जुः । हनुः ।[२]

पङ्गोश्च ॥४।१।६८॥

पङ्गूः ॥ श्वशुरस्योकाराकारयोर्लोपश्च[३]* ॥ श्वश्रूः ।

वर्णाश्रयविधावन्तर्भावो नेष्यते । तेन खट्वाभिरित्यत्रान्तवद्भावात् 'अतो भिस ऐस्' इति न । उभयत आश्रये नान्तादिवदिति च ज्ञेयम् ।

कर्कन्धूरिति । ननु चात्र ऊङि सति को विशेषः । यत ऊङ्यसत्यपि तदेव रूपं स एव स्वरः । तथा हि जम्बूपेलूकर्कन्धू[४] इत्यूप्रत्ययान्त एव व्युत्पादित इति चेदुच्यते । कर्कन्ध्वा कर्कन्ध्वै इत्यत्र 'नोङ् धात्वोः' इति विभक्त्याद्युदात्तत्वनिषेधार्थम् । अन्यथा खर्ज्वा खर्ज्वै इत्यत्र स न तथेहापि न स्यात् । स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते । 'बाह्वन्तात् संज्ञायाम्' ॥४।१।६७॥ बाह्वन्तात् ऊङ् स्यात् संज्ञायाम् । भद्रबाहूः । संज्ञायां किम् । वृत्तौ बाहू यस्याः वृत्तबाहुः ।

पङ्गोः । **श्वशुरस्येति** । अस्मादूङ्प्रत्ययः । अस्योकाराकारयोर्लोपश्च वक्तव्यः । श्वश्रूरिति । 'श्वशुरः श्वश्र्वा'[५] इति तृतीयान्त[६]निर्देशात् ज्ञापकात् स्वाद्युत्पत्तिः ।

---

१. After it—अलाबूः Bc₂. २. After it the Sûtra—बाह्वन्तात् संज्ञायाम् ॥ ४।१।६७॥ बहुशब्दान्तात् प्रातिपदिकात् स्त्रियामङ् स्यात् संज्ञायाम् । भद्रबाहूः । संज्ञायां किम् । वृत्तौ बाहू यस्याः सा वृत्तबाहुः । D_4, D_5, B_1 ; B_2 drops the वृत्ति up to भद्रबाहूः । ; वृत्तौ बाहू यस्याः सा dropped B_2, D_4 ; for all up to वृत्ता...बाहुः, D_5 has चित्रबाहुः (D_5 drops प्रातिपदिकात्). ३. °कारालोपश्च D_3, D_1, D_2, Bc_3. ४. कफेलू for पेलू, Dc_3; फेलू Dc_4. ५. Before it—यथा Dc_4. ६. प्रत्ययान्त for तृतीयान्त Bc_1, Dc_1.

उरूत्तरपदादौपम्ये ॥४।१।६९॥

ऊर्वन्तात् स्त्रियामूङ् स्यात् औपम्ये ॥ करभोरूः[1]।

संहितशफलक्षणवामादेश्च ॥४।१।७०॥

संहितादेरूर्वन्तात् स्त्रियामूङ् स्यादनौपम्येपि[3] ॥ संहितोरूः। इत्यादि ॥ सहितसहाभ्यां च* ॥ सहितोरूः। सहोरूः[4]। तन्वादेर्वेति केचित्* ॥ तनुः[5]। तनूः। चञ्चुः। चञ्चूः।

उरू। करभोरूरिति। करभवदूरू यस्याः सा। लाघवार्थमूर्वन्तादिति वाच्ये उत्तरपदादित्युक्तम्। यत्र केवल ऊरुशब्द उत्तरपदं तत्र यथा स्यादिह मा भूत्। स्वामिन ऊरुः स्वाम्यूरुः हस्तिन इव स्वाम्यूरुरस्या हस्तिस्वाम्यूरुरिति। भवति ह्येतदूर्वन्तं प्रातिपदिकं न तूरूत्तरपदं किं तु स्वाम्यूरूत्तरपदम्। औपम्ये किम्। वृत्तोरुः।

संहित। आदिना शफोरूः। शफशब्दः संश्लिष्टवाची। लक्ष्मणोरूः। लक्ष्मीवद्वाची लक्ष्मणशब्दः। वामोरूः। तन्वादेरिति। तथोक्तं मुग्धबोधे। 'तन्वादेर्वा' इति। स्पष्टत्वात्त्यक्तं सूत्रं व्याख्यायते। 'संज्ञायाम्' ॥४।१।७२॥ कद्रुकमण्डलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् स्यात्। अच्छन्दोर्थं[6] वचनम्। कद्रूः। कमण्डलूः। संज्ञायां किम्। कद्रुः। कमण्डलुः।

---

१. After this औपम्ये किम्। वृत्तोरुः स्त्री। D2, B1, B2 (D2 and B2 drop स्त्री). २. संहितायारे° B2. ३. अपि dropped B2, D5, D3, D2, Bc3. ४. D1 drops it. ५. तनूः। तनुः। चञ्चूः। चञ्चुः D1, B2. ६. °च्छन्दार्थं Bc1.

शार्ङ्गरवाद्यञो ङीन् ॥४।१।७३॥

शार्ङ्गरवादेरञन्ताच्च जातिवाचिनः स्त्रियां ङीन् स्यात् ॥ स्वरे भेदः ॥ शार्ङ्गरवी । इत्यादि । वैदी ॥

नृनरयोर्वृद्धिश्च* ॥ नारी ।

शार्ङ्ग । आदिना कापटव । बाहव । गौतम । गौडुल । एते अणन्ताः । ततो ङीपि प्राप्ते वचनम् । गौतमशब्दात् गौरादित्वात् ङीषपि । कामण्डलेयः । ब्राह्मणकृतेयः । आनिधेयः । आशोकेयः एते ढगन्ताः । अत्रापि ङीपि । वात्स्यायन । मौञ्जायन । जातित्वात् ङीषि । कैकेय । ढगन्तः । काव्यशैव्यो यञन्तौ । ततश्चापि प्राप्ते । एहि । पर्येहि । कृदिकारान्तौ । ततो ङीषि । आश्मरथ्या यञन्तः । ततो ङीपि । औदपानम् । शुण्डिका । घणन्तः । अराल । चण्डाल । वतण्ड । जातित्वात् ङीषि । भोगवद्गौरिमतोः संज्ञायाम् । उगिल्लक्षणे ङीपि प्राप्ते । ननु चेमावाद्युदात्तौ । ततश्च ङीपि ङीनि वा विशेषाभावात आह । घादिषु नित्यं ह्रस्वार्थम् । भोगवतितरा । गौमतितरेति । अन्यथा 'उगितश्च' इति वा ह्रस्वत्वं स्यात् । इति शार्ङ्गरवादिः । वैदीति । 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' । गोत्रत्वात् जातिलक्षणे ङीषि प्राप्ते ङीन्विधिः । स्वरे विशेषः ।

नृनरयोर्वृद्धिश्चेति । शार्ङ्गरवादिगणस्थं सूत्रम् । नृशब्दादृदन्तत्वाज्जातित्वात् ङीपि नरशब्दादपि प्राप्ते वचनम् । जातित्वात् ङीषि वा ।

---

१. Before it— 'संज्ञायाम्' ॥४।१।७२॥ कद्रुकमण्डलुशब्दाभ्यां स्त्रियामूङ् स्यात् संज्ञायाम् । अच्छन्दोर्थवचनम् । कमण्डलूः । संज्ञायां किम् । कद्रुः । कमण्डलुः ॥ P; C, B₁, B₂ (B₂ has अच्छन्दोर्थं वचनम् । कद्रूः । कमण्डलूः ।). २. विशेषः D₃. ३. ङीपि Dc₃, Dc₄. ४. °शैल्यौ Bc₃. ५. यञन्तः Dc₃. ६. ङीपि Bc₃. ७. भोभगवद् Bc₃.

यङश्चाप् ॥४।१।७४॥

यङन्तात् स्त्रियां चाप् स्यात् ॥ चेकारः स्वरार्थः । कौमुद्गन्ध्या । कारीषगन्ध्या । वाराह्या ।

षात्पराद्यञश्चाप् वाच्यः*। पौतिमाष्या।[1]

यङ । चः स्वरार्थ इति । 'चितः' इत्यन्तोदात्तार्थः । पकारः सामान्यग्रहणार्थः । **कौमुद्गन्ध्येत्यादि** । कुमुदस्येव गन्धोस्याः कुमुदगन्धिः । करीषगन्धिः । तस्य गोत्रापत्यं स्त्री । अण् । वाराहस्य गोत्रापत्यं स्त्री । 'अत इञ्' । ततः 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' इति अणिञोः ष्यङा-देशस्ततश्चाप् । **पौतिमाष्येति** । पूतिमाषस्य गोत्रापत्यम् । गर्गादित्वाद्यञ् । ततश्चाप् । व्याख्यातप्रायत्वात् त्यक्तम् ।

'आवट्याच्च' । ॥४।१।७५॥ गर्गादियञन्तादवट्शब्दात् चाप् स्यात् । आवट्या । 'यञश्च' इति ङीपि प्राप्ते वचनम् ।

---

१. चः P, D_5. २. शार्कराक्ष्या । पौतिमाष्या । गौकक्ष्या B_2. ३. After this the Sûtra—आवट्याच्च ॥४।१।७५॥ अवटो गर्तादिस्तस्माद्यञन्तात् ङीपोपवादश्चाप् स्यात् । आवट्या P, C, B_1, B_2 तदपवाद° P ; °चाप् स्यात् । तदपवादे ङीष् । आवट्या । आवट्यायनी । पिप्पलादियश्च । पिप्पली । हरीतकी । कौशातकी । शमी । शरी । पृथिवी । इ(ई?)कारनिपातश्च पुंवद्भावनिषेधार्थः । पृथिवीभार्यः । यूनस्तिः । &c. B_2.

यूनस्तिः ॥४।१।७७॥

युवन्शब्दात् स्त्रियां तिः स्यात् ङीपोपवादः। तद्धितत्वात् स्वाद्युत्पत्तिः। युवतिः।

इति स्त्रीप्रत्ययाः ॥

इति श्रीरामचन्द्रविरचितायां प्रक्रियाकौमुद्यां स्त्रीप्रत्यय-प्रकरणं पूर्णम् ॥

यूनस्तिः। ङीपोपवाद इति। ऋन्नेभ्यः प्राप्तस्य। तद्धितत्वादिति। 'तद्धिताः' इत्यनुवृत्तेरिति भावः। कथं युवतीति। यौतेरौणादिके कतिप्रत्यये 'कृदिकारात्—' इति ङीष् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम्।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेगुः प्रसादे सुविशदमबलाप्रत्ययाः संप्रदिष्टाः ॥

इति स्त्रीप्रत्ययाः।

---

१. Before it—स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां नलोपः B_2.
२. P and B_1 have इति श्रीरामचन्द्रविरचितायां प्रक्रियाकौमुदीव्याकरणे (प्रक्रिया कौमुद्यां B_1) स्त्रीप्रत्ययप्रक्रिया समाप्ता (स्त्रीप्रत्ययप्रकरणं पूर्णम् B_1).
३. °भगमन् प्रत्ययाः स्त्रीवदन्तः। Dc_4.

अथ विभक्त्यर्था उच्यन्ते ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥२।३।४६॥

प्रातिपदिकार्थः सत्ता ।

अथ विभक्त्यर्था उच्यन्ते[1] । **प्रातिपदिकार्थलिङ्ग** । **प्रातिपदिकार्थः सत्तेति** । सत्तेत्युपलक्षणम् । यत्रार्थान्तरानपेक्षया शब्दस्य प्रवृत्तिः स सर्वः प्रातिपदिकार्थः । शब्दप्रवृत्तिनिमित्तमिति यावत् । लिङ्गं पुंस्त्रीनपुंसकशब्दवाच्यः क्रमादुपचयापचयस्थितिरूपो वस्तुधर्मः । तथा चोक्तं **महाभाष्ये** । संस्त्यानप्रसवौ लिङ्गमिति । संस्त्यानं संहतिरपचयः । प्रसवः प्रसूतिरुपचय इत्यर्थः । तथा संस्त्यानविवक्षायां स्त्री । प्रसवविवक्षायां पुमान् । उभयोरविवक्षायां नपुंसकमिति । तत्र क्वचिदुपचयो यथा वृक्षः । क्वचिदपचयो यथा गङ्गा । क्वचिदुपचयापचयाभावो यथा ज्ञानम् । क्वचिदुपचयापचयौ । यथा मृगः मृगी । क्वचित् त्रयं यथा तटस्तटी तटमिति । अयं च लिङ्गस्यैकः प्रकारो वर्णितः[2] । लिङ्गप्रकारविशेषास्तु भर्तृहरिणा प्रकीर्णकाण्डे उक्ता ज्ञेयाः । तेन च

'स्तनकेशादिसंबन्धो विशिष्टा वा स्तनादयः ।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा ॥१॥
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि ।
लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सप्त दर्शिताः ॥२॥'

इत्यारभ्य

'इदमयमियं चेति शब्दसंस्कारमात्रकम् ।
निमित्तदर्शनादर्थः कैश्चित् सर्वत्र वर्ण्यते ॥३॥
नावश्यं विषयत्वेन निमित्तं व्यवतिष्ठते ॥'

---

१. Before it—ओं नमः सरस्वत्यै Dc4. २. लिङ्गैकदेशो वर्णितः Dc1.

मात्रशब्दस्य[1] प्रत्येकं योगः। सत्तामात्रादिष्वर्थेषु[2] प्रथमा स्यात्॥ उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्।

इत्यन्तेन ग्रन्थसंदर्भेण सर्वप्रकारविशिष्टं लिङ्गं सम्यग् विचारितम्। परिमाणं खारी द्रोणः प्रस्थ इत्यादिकं सर्वतो मानम्। तच्चोन्मानादेरप्युपलक्षणम्। वचनमेकत्वद्वित्वबहुत्वानि। **मात्रशब्दस्येति।** मात्रशब्दस्य प्रातिपदिकार्थादिभिः प्रत्येकं संबन्धः। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते' इति न्यायात्। ततश्च प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमेत्यर्थः। उच्चैः नीचैरिति प्रातिपदिकार्थस्योदाहरणम्[3]। अलिङ्गसंख्यावेतौ केवलजात्यादिनिरपेक्षं[4] स्वार्थमाहतुः। यदि प्रातिपदिकार्थमात्रे प्रथमा नोच्यते[5] तत[6] उच्चैरित्यादौ 'षष्ठी शेषे' इति षष्ठी स्यात्। ततश्च ग्राम उच्चैस्तव स्वमित्यत्र 'सपूर्वायाः प्रथमाया विभाषा' इति विकल्पेन तेमयादिविधिर्न स्यात्। कृष्णः। श्रीः। ज्ञानमिति लिङ्गस्योदाहरणम्। ननु त्वात्रापि प्रातिपदिकार्थ इत्येव प्रथमा सिद्धा। लिङ्गस्यापि प्रातिपदिकार्थत्वात्। न सिद्धा। तथा हि विभक्तिं विना कृष्णादयः शब्दाः किं पुंस्त्वमाचक्षते उत स्त्रीत्वं क्लीबत्वं वेति संदेहो भवति। तत्र यथा राज्ञः पुरुष इति प्रातिपदिकेनानुपात्ते स्वस्वामिसंबन्धे तस्याभिधानार्थं षष्ठ्यपेक्ष्यते[7] तथात्रापि पुंस्त्वादीनामभिधानार्थं षष्ठी स्यात्। अन्यच्च यदा स्त्रियामभिधेयायां टाबादय इत्यर्थस्तदा स्त्रीत्वस्याप्रातिपदिकार्थत्वात् शालाकुमारीत्यादौ प्रथमा न स्यात्। तस्माल्लिङ्गग्रहणं कार्यम्।

---

१. मात्रशब्दः प्रत्येकमाभिसंबध्यते C. २. सन्मात्रा° P, C, D, Bc₃. ३. प्रातिपदिकस्यो° Nc₁, Dc₁. ४. केवलं Bc₃, Dc₄, Dc₃. ५. नोच्येत Dc₂, Dc₄, Dc₃. ६. तर्हि Dc₂. ७. °मपेक्षते Bc₃, Dc₃, Dc₄.

खारी । द्रोणः । आढकम् । एकः । द्वौ । बहवः ।

खारी द्रोण इति परिमाणस्योदाहरणम् । ननु चा[2]त्र प्रातिपदिकार्थ इत्येव सिद्धा प्रथमा । तथा हि द्रोणादयः शब्दा लौहे दारुमये वा परिमाणेर्थान्तरनिरपेक्षा एव वर्तन्ते । सत्यं सिद्धा यदा परिमाणे वर्तन्ते । यदा तु त[1]त्परिमिते धान्यादौ सोयमित्यभिसंबन्धात् वर्तन्ते द्रोणपरिमितो व्रीहिर्द्रोण इति तत्र प्रथमा न स्यात् । अतः परिमाणग्रहणम् । यद्येवं निमित्तरूपेण निमित्तिनोभिधानादव्यतिरिक्त एव प्रातिपदिकार्थ इति प्रातिपदिकार्थ इत्येव प्रथमा स्यात् । न स्यात् । मुख्ये सति गौणस्य ग्रहणायोगात् । नन्वेवमपि लिङ्गग्रहणादेव प्रथमा स्यात् । नैवम् । यत्र हि परिमाणं नास्ति सोवकाशो लिङ्गग्रहणस्य स्यात् । तत्र तु परिमाणस्याधिक्यात् षष्ठ्येव स्यात् । तस्मात् परिमाणग्रहणम् । तच्चोन्मानादेरप्युपलक्षणम् । तेन [illegible]तं पलं हस्तः प[3]टः दीर्घं काष्ठमित्यत्रापि प्रथमा स्यात् । एकः द्वौ बहव इति व[4]चनग्रहणस्योदाहरणम् । उक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति वचनग्रहणम् । अन्यथानभिहिताधिकारादुक्तेष्वेकत्वादिषु न स्यात् । ननु प्रातिपदिकात् प्रथमा विधीयते । तत्रासत्यपि प्रातिपदिकग्रहणे अर्थग्रहणमात्रे सति प्रातिपदिकार्थ एवेति विज्ञास्यते । तत् किं प्रातिपदिकग्रहणेन । उच्यते । निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तम् । ततोपि यथा स्यात् । प्रलम्बते । अध्यागच्छतीति । 'कृत्तद्धितसमासाश्च' इति कृदन्तस्य तद्धितान्तस्य समा[5]सस्य च प्रातिपदिकत्वात् तदर्थस्य च प्रातिपदिकार्थत्वात् कृदर्थादौ प्रातिपदिकार्थेत्यनेनैव प्रथमा स्यादित्याह ।

---

१. तत्परिमाणपरिमिते Nc1, Dc2, Dc3. २. अत्र Dc2, Dc4, Dc3. ३. पटः Dc1, Dc2. ४. वचनस्यो° Dc1, Bc3. ५. समासान्तस्य Bc1; dropped Bc3.

कृदर्थे युङ् । ताद्धितार्थे औपगवः । समासार्थे चित्रगुः ।

संबोधने च ॥२।३।४७॥

संबोधने प्रथमा स्यात् ॥ हे राम ।

कृदर्थ इत्यादि । युङ् । युजिर् योगे अस्मात् कर्तरि 'ऋत्विक्—' इति क्विन् च । औपगव इति । उपगोरपत्यम् । तस्यापत्यमित्यर्थेण् तद्धितः । चित्रगुरिति । चित्रा गावो यस्येति 'अनेकमन्यपदार्थे' इत्यन्यपदार्थे बहुव्रीहिः समासः ।

संबोधने । अभिमुखीकरणं हि संबोधनम् । तस्य प्रातिपदिकार्थादधिकत्वात् पूर्वेण न प्राप्नोति इत्यारम्भः । हे पचन् हे पचमानेत्यत्र संबोधनस्य शतृशानच्भ्यामुक्तत्वात् प्रातिपदिकार्थान्तर्भूतत्वात् पूर्वेणैव प्रथमा । स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते । 'सामन्त्रितम्' । २।३।४८।। संबोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं स्यात् । आमन्त्रिप्रदेशाः 'आमन्त्रितस्य' । इत्येवमादयः । सेति वचनं प्रातिपदिकार्थेति या संबोधने प्रथमा विहिता तस्या अपि यथा स्यादित्येवमर्थम् । हे पचन्निति । अन्यथा अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेत्यनन्तरसूत्रेण या विहिता तत्रैव स्यान्नात्र ॥

इति निरूपिता प्रथमा ॥

---

१. D1 drops संबोधने; संबोधने च B2. २. च dropped Dc2. ३. संबोधने च Dc2;, संबोधने च । संबोधने च प्रथमा स्यात्; हे राम । मू० । Dc1. ४. वा विधि° Dc1, Bc3.

कर्तुरीप्सिततमं कर्म ॥१।४।४९॥

कर्तुः क्रिय[1]या आ[2]प्तुमिष्टतमं क[3]र्मसंज्ञं स्यात् ॥

क[4]र्तुः— अत्र यद्यपि क्रिययेति नोक्तं तथापि कर्तुः शब्दस्य संबन्धिशब्दत्वात् क्रियोपस्थानमित्यभिप्रेत्याह । **कर्तुः क्रिययेति** । ईप्सितशब्दोयमस्ति रूढोभिप्रेते अस्ति च क्रियाशब्दः प्रा[5]प्तुमिष्ट इति । तत्र रूढिशब्दस्य कर्तृसाध्यया क्रियया संबन्धाभावात् क्रियाशब्दोत्र गृह्यत इत्यभिप्रेत्याह । **आप्तुमिष्टतममिति** । तच्च कर्म त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं चेति । तत्र निर्वर्त्यं यदसदेव जायते यथा कटं करोतीति । विकार्यं लब्धसत्ताकमेवावस्थान्तरमापद्यते । तदपि द्विविधम् । एकं प्रकृत्युच्छेदसंभूतम् । यथा काष्ठं भस्म करोतीति । अपरं गुणान्तराधानेन व्यपदेशान्तरनिमित्तम् । यथा सुवर्णं कुण्डलं करोतीति । प्राप्यं तु यत्र निर्वर्त्यविकार्यसंबन्धिनो विशेषाः प्रत्यक्षेणानुमानेन वा न प्रतीयन्ते केवलं प्राप्तिमात्रं प्रतीयते । यथा आदित्यं पश्यतीति । यथा चायमर्थो **भर्तृहरिणोक्तः** ।

'यदसज्जायते पूर्वं जन्मना यत् प्रकाशते ।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ॥ १ ॥
प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत् ।
किंचित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ २ ॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ॥ ३ ॥'

इति । एवमीप्सिततमं त्रिविधम् । तथा युक्तं द्वेधा । द्वेष्यमितरच्च । अकथितं चापरम् । संज्ञान्तर[6]प्रसङ्गे चान्यत् । 'दिवः कर्म च' इत्यादि । तदेवं कर्म सप्तधा । तथोक्तम् ।

---

१. त्रियार्थमिष्टतमं कारकं D_2 ; क्रियया यदा° D_3, D_5. २. प्राप्तु° D_4. ३. C has कारकम् before it. ४. कर्तुरीप्सिततमं कर्म । कर्तुः क्रियया आप्तुमिष्टतमं कर्मसंज्ञं स्यात् । मू. Dc_1. ५. आप्तु° Dc_4. Dc_3. ६. °प्रसङ्गेन Dc_4.

कर्मणि द्वितीया ॥२।३।२॥

'निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ॥१॥
औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥२॥' इति ॥

कर्तुरिति किम् । माषेष्वश्वं बध्नाति । कर्मण ईप्सिता माषा न कर्तुः । ईप्सित इति किम् । अग्नेर्माणवकं वारयति । तमग्रहणं किम् । पयसोदनं भुङ्क्ते । 'अधिशीङ्स्थासां कर्म' इत्यतः कर्मेत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् । तद्धि आधारेण संबद्धं तदनुवृत्तावाधारस्याप्यनुवृत्तिः स्यात् । ततश्च गेहं प्रविशतीत्यादावेव स्यात् । पुनः कर्मग्रहणात्तु सर्वत्र सिध्यति ।

कर्मणि । अनभिहित इत्यनुवर्तते । तत्राभिपूर्वो दधातिर्हस्वाभिधानमाधत्त इति बन्धने वर्तते श्लोकोभिहित इत्युच्चारणे अर्थोभिहित इति प्रतिपादने हिनोतेरपि गतिवृद्ध्यर्थस्याभिपूर्वस्याभिहितमिति स्यात् । तत्र कर्मादीनां बन्धनाद्यर्थासंभवात् प्रतिपादनार्थोत्राभिहितशब्दः । तथा च यद्यनभिहिते कर्मणि द्वितीयेति सामान्येनोच्येत ततो यथा कृतः कट इत्यत्र क्तेन कर्मण उक्तत्वात् द्वितीया न तथा कटं करोति भीष्ममुदारं दर्शनीयमित्यमित्यत्रापि कटशब्दादुत्पद्यमानया द्वितीयया भीष्मादिगतस्य

१. कल्पिकम् Bc_3. २. After it—ओदनं पचतीत्यत्र न स्यात् Dc_4, Dc_3. ३. कर्मणि द्वितीया । तिङ्कृत्तद्धितसमासैरनुक्ते कर्मणि द्वितीया स्यात् । हरिं भजति । तिङाद्यभिहिते तु कर्मादिकारके प्रातिपदिकार्थे प्रथमा । सेव्यते सेवितो लक्ष्म्या प्राप्तानन्दः सदा हरिः ॥ तद्धितोक्तौ । शतेन क्रीतः । शत्यः । मूल. Dc_1.

तिङ्कृत्तद्धितसमासैरनुक्ते[1] कर्मणि[2] द्वितीया स्यात् ॥ हरिं भजति । तिङाद्यभिहिते तु कर्मादिकारके प्रातिपदिकार्थेति[3] प्रथमा ।

कर्मण उक्तत्वात् भीष्मादिभ्यो द्वितीया न स्यादतः परिगणनं कर्तव्यमित्येतत् सर्वं चेतसि कृत्वाह । **कृत्तद्धितसमासैरनुक्ते कर्मणीति** । एतैरनुक्तकर्माश्रितायां संख्यायां द्वितीया स्यादित्यर्थः। संख्याया विभक्त्यर्थत्वात् । तथा चोक्तं **भर्तृहरिणा**

'निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्गतं तु यदेकत्वं विभक्तिस्तत्र वर्तते' ॥ इति ।

तथा च सति अनभिहिते कर्मणि द्वितीया बहुषु बहुवचनमित्यादेरेकवाक्यता सिध्यति । तथा चोक्तं **काशिकायां वृत्तौ** । बहुषु बहुवचनमित्येवमादिना संख्या वाच्यत्वेन विभक्तीनामुपदिष्टा । तत्र विशेषणार्थमिदमारभ्यते । अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति । हरिं भजतीति । देवदत्त इति शेषः । अत्र देवदत्तस्य कर्तुर्भजनक्रियया हरिराप्तुमिष्टतम इति कर्म । तच्च प्राप्यम् । एवं निर्वर्त्यादावुदाहार्यम् । **तिङाद्यभिहिते त्विति** । तिङ्कृत्तद्धितसमासैरुक्ते कर्मादौ कारके 'प्रातिपदिकार्थ—' इति सूत्रेण प्रथमेत्यर्थः । तथा चोक्तं **कारकपरीक्षायाम्** । 'तत्कर्मादिषु कारकेष्वनभिहितेषु द्वितीयादयः कर्तव्याः अभिहितेषु प्रथमेत्येवं विभक्तीनां विषयविभागः' इति । अत एवोक्तं **भाष्यकृता** । 'अभिहितो योर्थः संपन्नः प्रातिपदिकार्थः' इति । तत्र तिङाद्यभिहितस्य कर्मण उदाहरणान्याह ।

---

१. तिङाद्यनुक्ते D_3. २. After it—कारके P, C, B_1. ३. प्रातिपदिकार्थेपि D_1.

सेव्यते सेवितो लक्ष्म्या प्राप्तानन्दः सदा हरिः ।
तद्धितोक्तौ शतेन क्रीतः शत्यः ।

तथायुक्तं चानीप्सितम् ॥१।४।५०॥

ईप्सिततमवत् क्रियया युक्तमनीप्सितं च कर्मसंज्ञं स्यात् ॥[1]

सेव्यत इत्यादि । सदा प्राप्तानन्दो लक्ष्म्या सेवितो हरिः मया सेव्यत इत्यन्वयः । सेव्यते इति षेवृ सेवने अस्मात् 'लः कर्मणि—' इति कर्मणि लट् । 'भावकर्मणोः' इत्यात्मनेपदम् । 'सार्वधातुके यक्' । अत्र हरिः कर्म । स तु तिङोक्त इति प्रथमाभूत । सेवित इति । तस्मादेव धातोः 'तयोरेव—' इति कर्मणि क्तः । स च कृतेनोक्तं कर्मेति सेवित इति प्रथमा । प्राप्तानन्द इति । प्राप्त आनन्दो यमिति कर्मण्यन्यपदार्थे 'अनेकमन्यपदार्थे' इति बहुव्रीहिः समासः । तत्र समासेनोक्तं कर्मेति प्राप्तानन्द इति प्रथमा । शत्य इति । 'शताच्च ठन्यतावशते' इति क्रीतार्थे ताद्धितो यत् । तेन क्रयस्य कर्मोक्तमिति शत्य इति प्रथमा । तिङ्कृत्तद्धितसमासैरिति परिगणनं न कर्तव्यं वा । तथोक्तं न्यासे । 'कटशब्दस्तु विशिष्टद्रव्यवचन इति तत उत्पद्यमाना द्वितीया तद्गतमेव कर्म शक्नोत्यभिधातुं नान्यत् । तत् कथं तया भीष्मादिकर्माभिधीयते । तथा च निरर्थकं परिगणनम् । तस्मात् कृत्तद्धितसमासैरेवाभिधानं संभवतीति संभवदुदाहरणप्रदर्शनपरमेतत् परिसंख्यानं वेदितव्यम्' इति ।

तथायुक्तं चानीप्सितम् । ईप्सिततमवत् क्रियायुक्तमिति । येन प्रकारेणेप्सिततमं कर्तुः क्रियया युज्यते तेनैव चेत् प्रकारेणानीप्सितमपि युज्यते तर्हि अनीप्सितमपि कर्मसंज्ञं स्यादित्यर्थः ।

---

१. क्रियायुक्तं B_2, D_2, D_5, D_4, Bc_3. २. अपि C. ३. B_1, D_4 have ओदनं भक्षन् तत्संसृष्टं and B_2, Bc_3 द्वेष्यमितरच्च; and D_5 has अन्नं भक्षन् before it. ४. तथा चोक्तं Dc_4.

विषं भुङ्क्ते । ग्रामं गच्छन् तृणं स्पृशति ॥

अकथितं च ॥१।४।५१॥

अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यात् ॥

ईप्सितादन्यदनीप्सितमिति पर्युदासोयम् । तेन यद् द्वेष्यं यच्चोपेक्षणीयं तद् द्वयमप्यनीप्सितम् । एतदेवाभिप्रेत्योदाहरणद्वयमाह । **विषं भुङ्क्ते** इति द्वेषस्योदाहरणम् । **ग्रामं गच्छन् तृणं स्पृशतीत्युपेक्षणीयस्य** ।

अकथितं च । **अपादानादीति** । अपादानसंप्रदानकरणाधिकरणकर्मकर्तृभिः कारकविशेषैरनुक्तमित्यर्थः । **कारकमिति** । अत्र च 'कारके' इत्यधिकारोस्ति । तस्य चायमर्थः । कारकं निमित्तं तच्चापादानादिसंज्ञाविषयं विशेषणत्वेनाधिक्रियते । कारके इति निर्धारणे सप्तमी । जात्यभिप्रायं चैकवचनमिति । ततश्चात्रायमर्थः । कारकेषु मध्ये अपादानादिविशेषैरकथितं यत् क्रियाया निमित्तं तत् कर्मसंज्ञं स्यादिति । कारकं किम् । माणवकस्य पितरं पन्थानं पृच्छति । माणवकस्येत्यत्राकारकत्वादकथितेपि कर्मसंज्ञा न । नटस्य गाथां शृणोतीत्यादि । अन्यधातुव्यवच्छेदार्थं परिगणनं करोति दुह्याच्पचेत्यादिना श्लोकेन । तेन दुहादीनामेव प्रयोगे अकथितस्य कर्मसंज्ञा नान्येषाम् । श्लोकस्यायमर्थः । अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यादित्युक्तम् ।

---

१. Before it—गङ्गां द्रष्टुं प्रसारितनेत्रो जनानपश्यत् D_1. २. After it—उदाहरणम् Dc_3. ३. कारक इति Bc_3. ४. यदपा° Bc_1.

दुह्याच्यर्थरुधिप्रच्छिचिब्रूशासुजिकर्मयुक् ।
नीहृकृष्मन्थवहदण्डिग्रहमुष्पचकर्मभाक् ॥१॥

तच्च कारकं विशिनष्टि दुह्याच्यर्थेत्यादिना । दुह प्रपूरणे । याच्यर्था याञ्चार्थाः । रुधिर् आवरणे । प्रछ ज्ञीप्सायाम् । चिञ् चयने । ब्रूञ् व्यक्तायां वाचि । शासु अनुशिष्टौ । जि जये । एतेषां धातूनां द्वन्द्वः । तेषां कर्म कर्तुरीप्सिततममत्वादि तेन सह युनक्तीति कर्मयुक् । एतद्धातुकर्मसंबद्धमित्यर्थः । तथा णीञ् प्रापणे । हृञ् हरणे । कृष विलेखने । मन्थ विलोडने । वह प्रापणे । दण्ड दण्डने । ग्रह उपादाने । मुष स्तेये । डुपचष् पाके—एतेषामपि यत् कर्म तद् भजतीति कर्मभाक् । एवंविधं यदकथितं कारकं तत् कर्मसंज्ञमित्यर्थः । तथा चोक्तं वार्तिककारेण ।

'दुहियाचिरुधिप्रछिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना' ॥

इति । दुहादीनां प्रयोगे अपूर्वविधौ सति यदुपयोगनिमित्तं तदकीर्तितमाचरितं कविना सूत्रकारेणेत्यन्वयः । उपयुज्यत इत्युपयोगे मुख्यं दुग्धादि कर्म तस्य निमित्तं संपादकम् । अपूर्वविधिरपादानादीनामविवक्षा । गुणेन कर्मणा सचते संबन्धं प्राप्नोतीति । तथा

'नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।
द्विकर्मकेषु ग्रहणम्—' इति ।

अत्रापि चकारेण जयत्यादीनां समुच्चयः । तथा चोक्तं न्यासकारेण । 'अत्रापि श्लोके चकारो जयतिप्रभृतीनामनुक्तसमुच्चयार्थः' इति ।

१. बूञ् for ब्रू B_1. २. °शासि B_1. ३. °ष्मथ D_3. ४. °मुष्पाचि B_2: °मुष्पच्य् द्विकर्मभाक् D_2. ५. जयप्रभृतीनां Nc_2, Bc_1. ६. प्रभृतीनां प्रयोगेऽकथितस्य समुच्चयार्थः । Nyâsa, p. 298.

यो दुदोह धरामन्नं ययाचे वसुधां बलिम् ।

दुहादीनां प्रयोगे[1] क्रमेणोदाहरणान्याह सार्धश्लोकचतुष्टयेन **यो दुदोह** इत्यादिना । तं हरिं **भजे** इत्यग्रिमेणान्वयः । तं कम् । यः पृथुरूपधरः सन् धरामन्नमदनीयं वस्तु दुदोह क्षारयामास । दुहेर्लिट् । अत्रान्नं मुख्यं कर्म । तत्र 'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञा । कर्तुः क्रियया ईप्सिततमत्वात् । धरा त्वप्रधानम् । तत्र 'अकथितं च' इति कर्मसंज्ञा । अपादानादिविशेषैरकथितत्वात् । ननु चात्रोक्तापादानसंज्ञा । तथा हि धरान्नं क्षरति । तद् दोग्धा हरिः क्षारयति । एवं तत् क्षार्यमाणं[2] ततोपक्रामतीति स्पष्ट एवापायस्ततो नेदमुदाहरणमिति चेन्नैवम् । यद्यप्यत्रापायोस्ति तथापि नात्र धराया अवधित्वं विवक्षितं किं त्वन्नं प्रति निमित्तत्वमात्रमतः स्यादेवोदाहरणम् । ननु धरामित्यादौ 'तथायुक्तं चानीप्सितम्' इति कर्म स्यादीप्सिता-दन्यत्वात् । नैवम् । धरादेपि प्रकर्षरहितस्येप्सितत्वस्य[3] विवक्षितत्वात् । अतः 'अकथितं च' इत्यनेनैव कर्मत्वम् । 'कर्मणि द्वितीया' इति द्वितीया । तथा यो वामनरूपधरः सन् बलिं दैत्यं वसुधां पृथिवीं ययाचे याचितवान् । अत्र वसुधामित्येतदीप्सिततमं कर्म । बलि-मित्येतदकथितम् । पूर्वत्र 'कर्तुरीप्सिततमम्' इति कर्मत्वम् । उत्तरत्र 'अकथितं च' इति । एवमत्र सर्वत्र ज्ञेयम् । ननु चात्रापि बलेः सकाशात् वसुधां याचत इत्यस्त्यपायः[4] । ततोपादानत्वं स्यात् । नैवम् । न हि याचनादेवापायः स्यात् । किं तर्हि । याचितोसौ यदा दास्यति तदा । यतो याचनसमये नापायः । अथवापायो न विवक्षितः ।

१. प्रयोगक्रमेण Dc2, Dc3. २. क्षरमाणं Nc2. ३. °प्सितत्वाविवक्षित° Nc2, Dc4, ४. इत्यपायोस्ति । Dc3.

रुरोध दैत्यान् पातालं पप्रच्छेन्द्रं च वाञ्छितम् ॥२॥
धर्मानवाचिनोद्वेदमब्रवीत् तान् स्वसेविनः ।

तथा यो दैत्यान् दितेरपत्यानि पातालमधोभुवनं रुरोध प्रवेशयामास स्थापयामास वा पातालेन हेतुना दैत्यान् स्थापयामासेति यावत् । अत्र दैत्यानिति ईप्सिततमं मुख्यं कर्म पातालमित्यप्रधानमकथितम् । ननु चात्र प्रवेशयामासेत्यत्रार्थे 'कर्तुः—' इति कर्मसंज्ञा स्यात् । स्थापयामासेत्यत्रार्थे 'आधारोधिकरणम्' इत्यधिकरणसंज्ञा । सत्यम् । यदा पातालस्येप्सिततमत्वमाधारत्वं वा विवक्ष्यते तदैते स्याताम् । न चेह ते विवक्षिते । किं तर्हि । अवरोधनक्रियां प्रति निमित्तत्वमात्रं विवक्षितमतोकथितत्वम् । तथा य उपेन्द्रः सन्निन्द्रममराधीश्वरत्वं वाञ्छितमभिलषितं पप्रच्छ च पृष्टवांश्च । अत्र चशब्दः सर्वत्र संबध्यते । वाञ्छितमित्येतत् मुख्यं कर्म । इन्द्रमित्येतदकथितम् । ननु चात्राप्यपायोस्ति । स हि तस्मादुपदेशमादित्सत । मैवम् । नैवात्रापायो विवक्षित । किं तु प्रश्नक्रियानिमित्तमात्रम् । तथा यो वेदं धर्मानवाचिनोच्च । वेदेन कारणेन धर्मावचयं चकारेति यावत् । अत्र च धर्मानिति मुख्यं कर्म । वेदमित्यकथितम् । ननु चात्राप्यपायोस्ति । वेदाद्धि धर्मानादत्ते । मैवम् । तस्याविवक्षितत्वात् । धर्मावचयं प्रति हेतुत्वमात्रस्य विवक्षितत्वात् । तथा यस्तान् धर्मान् स्वसेविनः स्वसेवकानब्रवीत् प्रत्यपादयत् । स्वसेविभिर्निमित्तभूतैर्धर्मानदादिति यावत् । अत्र धर्मानिति मुख्यं कर्म । स्वसेविन इत्यकथितम् । ननु चात्र संप्रदानत्वं स्यात् । धर्मेण हि संप्रदेयेन स्वसेविनामभिप्रेयमाणत्वात् । मैवम् । अविवक्षितत्वात् संप्रदानत्वस्य । धर्मदानक्रियानिमित्तत्वमात्रस्य विवक्षितत्वात् ।

---

१. तथा च Bc1. २. °माविशते Dc4. ३. नात्रा° Dc. ४. °मात्रत्वम् Dc3.

पार्थिवानन्वशाद्भक्तिं त्रिलोकीमजयद्रिपून् ॥२॥
द्वारकामनयद्बन्धून् रुक्मिणीमहरत् पुरम्¹ ।
चकर्ष कंसं विपिनं ममन्थ क्षीरधिं सुधाम् ॥३॥
अवहन्मन्दरं सिन्धुमदण्डयदरीनसून् ।
जग्राह द्युतरुं शक्रममुष्णाद्दितिजान् सुधाम् ॥४॥

तथा यः पार्थिवान् पृथिवीश्वरान् भक्तिमन्वशात् प्रत्यपादयत् । अत्र भक्तिमिति मुख्यं कर्म । पार्थिवानित्यकथितम् । अत्र संप्रदानत्वप्रसङ्गपरिहारावनन्तरवत् । एवमुत्तरत्रापि अपादानादित्वाशङ्कायामविवक्षैवोत्तरं ज्ञेयम् । तथा यस्त्रिलोकीं त्रयाणां लोकानां समाहारस्त्रिलोकी तां रिपूनजयत् जिगाय । अत्र रिपूनिति मुख्यं कर्म त्रिलोकीमित्यकथितम्² । यो बन्धून्³ स्वसुहृदो द्वारकां पुरीमनयत् नीतवान् । अत्र बन्धवो मुख्यं कर्म द्वारका त्वकथितम् । तथा यो रुक्मिणीं भीष्मककन्यां पुरं द्वारकामहरत्⁴ जहार नीतवानिति यावत् । अत्र रुक्मिणीमिति मुख्यं कर्म पुरमित्यकथितम् । तथा यः कंसं स्वमातुलं विपिनं गहनं चकर्ष आकृष्टवान् । अत्र कंसो मुख्यं कर्म विपिनमकथितम् । तथा यः क्षीरनिधिं क्षीरसमुद्रं सुधाममृतं ममन्थ मथितवान् । अत्र सुधा मुख्यं कर्म क्षीरनिधिरकथितम् । तथा यः सिन्धुं समुद्रं मन्दरं मन्दरनामानं पर्वतमवहत्⁵ समुद्रेण निमित्तेन मन्दरं दधारेति यावत् । मन्दरो मुख्यं कर्म सिन्धुरकथितम् । तथा योरीन् वैरिणोसून् प्राणानदण्डयत् दण्डितवान् । वैरिभिर्निमित्तभूतैः प्राणान् जग्राहेति यावत् । अत्रासवो मुख्यं कर्म वैरिणोकथितम् । तथा यो द्युतरुं पारिजातवृक्षं शक्रं जग्राह गृहीतवान् । शक्रेण ⁶निमित्तेन द्युतरुं जहारेति यावत् । अत्र द्युतरुर्मुख्यं कर्म शक्रोकथितम् । तथा यो दितिजान् दैत्यान् सुधाममृतममुष्णादपजहार । अत्र सुधा मुख्यं कर्म दितिजास्त्व-

---

१. पुरीम् Dc1, Bc3. २. °तं कर्म। Dc3. ३. बन्धून् Dc3. ४. द्वारकापुर° Dc3. ५. After it—उवाह Dc3, Dc4. ६. निमित्तभूतेन Dc2.

पचति प्राणिनां कर्म यः फलं तं हरिं भजे ॥ इत्यादि ।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥१।४।५२॥

गत्यर्थादीनामणौ यः कर्ता स ण्यन्तानां कर्मसंज्ञः स्यात् ॥

कथितम् । तथा यः प्राणिनां कर्म धर्माधर्मलक्षणं फलं स्वर्गनिरयादिलक्षणं पचति । कर्मणा निमित्तेन फलं निष्पादयतीत्यर्थः । अत्र फलं मुख्यं[2] कर्म कर्मत्वकथितम् । तं हरिं भजे सेवे इत्यर्थः । एवं द्विकर्मका उदाहृताः । इत्यादीत्यादिनाकर्मकधातुभिः प्रयोगे देशकालाध्वभावा अपि अकथितं कर्म भवन्ति । तेऽप्युदाहार्या उच्यन्ते । तथा चोक्तं **महाभाष्ये** ।

'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् ।
देशश्चाकर्मकाणां च कर्मसंज्ञा भवन्त्विति ॥१॥'

देश उदाह्रियते । कुरूनास्ते । कुरून् स्वपिति । कालः । मासमास्ते । अध्वा । क्रोशमास्ते । भावः । गोदोहमास्ते । इति । देशादयोऽकथिताः । तथोक्तं **न्यासकारेण** । 'सर्वे चैते कालादयोऽकथिताः पूर्वविधेः कस्यचिदविषयत्वात्[3]' इति ।

गति । अर्थशब्दो गतिबुद्धिप्रत्यवसानैः प्रत्येकमभिसंबध्यते इत्याह **गत्यर्थादीनामिति** । प्रत्यवसानमभ्यवहारः । गत्यर्थानां ज्ञानार्थानामभ्यवहारार्थाना धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अणौ यः कर्तेति 'हेतुमति च' इति प्रयोजकव्यापारे विधीयमानो यो णिच् तस्मिन्नसति य एषां धातूनां कर्ता स ण्यन्तानामेषां कर्मसंज्ञः स्यादित्यर्थः । गत्यर्थादीन् क्रमेण सार्धपद्येनोदाहरति ।

---

१. इत्यादयो द्विकर्मका इति केचित् C, B_2, D_2; न्यादयो द्विकर्मका इति केचित् Dc_1, Bc_3, इत्यादयो द्विकर्मकाः D_3. २. कर्म dropped Dc_2. ३. °दप्रवृत्तत्वात् । Nyâsa p. 299.

शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत्[1] ।

आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ॥१॥

आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥

शत्रूनित्यादि । स श्रीहरिर्मे मम गतिः । स कः । यः शत्रून् स्वर्गमगमयत् प्रापयत् । अत्राण्यन्तस्य गत्यर्थस्य[2] गमेर्धातोः स्वर्गं गच्छन्तः शत्रवः कर्तारस्ते ण्यन्तस्य तस्यैव कर्मसंज्ञा जाताः । ततः शत्रूनिति द्वितीया । यः स्वान् स्वकीयान् वेदार्थमवेदयत् ज्ञापयामास । अत्राण्यन्तस्य ज्ञानार्थस्य विदेः कर्तारो वेदार्थं विदन्तः स्वे ते ण्यन्तस्य तस्यैव कर्मसंज्ञा[3] जाताः । यो देवानमृतमाशयच्च भोजयामास । अत्राप्यमृतमश्नन्तो देवाः प्रत्यवसानार्थस्याश्नोतेरण्यन्तस्य कर्तारो ण्यन्तस्य तस्यैव[4] कर्माभूवन् । तथा यो विधिं ब्रह्माणं वेदमध्यापयत् पाठयामास । अत्रापीङो धातोर्वेदलक्षणशब्दकर्मणोऽण्यन्तस्याधीयानो विधिः कर्ता स ण्यन्तस्य कर्म । तथा यः सलिले उदके पृथ्वीमासयत् स्थापयामास । अत्राकर्मकस्यासेरण्यन्तस्य कर्त्री पृथिवी सा ण्यन्तस्य कर्माभूत् । एवंसामर्थ्यः स श्रीहरिर्मे गतिः । ननु चैतत् सूत्रं व्यर्थं यतो ण्यन्ते धातौ प्रयोजकव्यापारेण प्रेषणादिना प्रयोज्यस्य कर्तुर्व्याप्तुमिष्टतमत्वात् 'कर्तुरीप्सिततमं कर्म' इत्येव कर्मसंज्ञा सिद्धा । सत्यम् । नियमार्थमेतद्वचनम् । प्रयोजकव्यापारेण[5] व्याप्यमानस्य यदि कर्मसंज्ञा स्यात् तर्हि गत्यर्थादीनामेव स्युर्नान्येषामिति[6] ।

१. °नबोधयत् Dc_1, Bc_3. २. °न्तगत्य° Dc_2. ३. कर्म Bc_2, Dc_2, Dc_3.
४. तस्यैव dropped Bc_1, Dc_2, Dc_3; तस्य कर्म जाताः Dc_4.
५. °व्यापारैः Dc_1, व्यापारे Bc_3. ६. हि स्या° Dc_3.

नीवह्योर्न* ॥ नाययति वाहयति वा भारं भृत्येन । नियन्तृकर्तृकस्य वहेरनिषेधः । वाहयति रथिनं वाहान् सूतः । आदिखाद्योर्न* ॥ आदयति खादयति वान्नं बटुना । भक्षेरहिंसार्थस्य न* ॥ भक्षयत्यन्नं बटुना । हिंसार्थस्य तु भक्षयत्यमात्यमरीन् राजा ॥ श्रुग्रहदृशामिति केचित् । श्रावयति गीतं श्रोतन् ।

नीवह्योरिति । णीञ् प्रापणे । वह प्रापणे । गत्यर्थत्वादण्यन्तयोः कर्ता ण्यन्तयोः कर्मसंज्ञः प्राप्तः स निषिध्यते । **भृत्येने**ति । अण्यन्तस्य कर्तरि भृत्ये णौ सत्यपि 'कर्तृकरणयोस्तृतीया' इति तृतीया जाता । **नियन्तृ** इति । नियच्छति विशिष्टे विषये स्थापयतीति नियन्ता सारथिः । नियन्ता कर्ता यस्य स नियन्तृकर्तृकः । तस्य 'वहेरनिषेधः' इति अण्यन्तस्य कर्ता णौ कर्मसंज्ञो भवत्येवेत्यर्थः । **वाहयती**ति । वाहा रथिनं वहन्ति तान् सूतः सारथिर्वाहयतीत्यर्थः । अत्र वाहानित्यत्राण्यन्तकर्तरि णौ सति कर्मत्वाद् द्वितीया । **आदी**ति । अद भक्षणे । खाद भक्षणे । प्रत्यवसानार्थत्वात् प्राप्ता कर्मसंज्ञा निषिध्यते । **भक्षयतीत्यादि** । बटुरन्नं भक्षयति । तमन्यो भक्षणे प्रेरयतीत्यर्थः । ननु चात्राणौ कर्ता नास्ति पूर्वमपि स्वार्थिकणिजन्तत्वाद्भक्षयतेः । ततः प्राप्तिरेव नास्तीति व्यर्थो निषेधः । नैवम् । गतिबुद्ध्यादिसूत्रे हेतुमण्णिच एव ग्रहणं तस्य पूर्वकर्तुः संभवात् । न स्वार्थिकस्य । तस्य पूर्वकर्तुरसंभवात् । ततश्च हेतुमण्णिचः पूर्वं कर्ता बटुस्तस्मिन्नागते कर्मत्वं प्राप्नोतीति निषेधः । **भक्षयत्यमात्यमि**ति । हिंसयतीत्यर्थः । **श्रुग्रहे**ति । **केचिदि**ति । **भाष्यकारादयः** । तथोक्तं **महाभाष्ये** । 'शृणोत्यादीनां चोपसंख्यानमशब्दक्रियत्वात् । के पुनः शृणोत्यादयः । शृणोति विजानाति उपलभत इति ।

---

१. ग्रन्थं P. २. पूर्वकर्ता Dc_2, Dc_3.

ग्राहयति बटुं वेदम् । दर्शयति भक्तान् देवम् । अयक्रन्दशब्दायह्वेञां नेति केचित् । आययति[2] सैनिकैररीन् । क्रन्दयति सैनिकैररीन् । शब्दाययति ह्वाययति वा शूरै[3] रिपून्[4] ।

हृक्रोरन्यतरस्याम् ॥१।४।५३॥

हृक्रोरणि कर्ता स णौ वा कर्मसंज्ञः[5] स्यात् ॥

तथा दृशेः सर्वत्रोपसंख्यानं कर्तव्यम् । पश्यति रूपतर्कः कार्षापणम् । दर्शयते रूपतर्कं[6] कार्षापणम्' इति । **कालिदासस्तु** ग्रहिं ण्यन्तं द्विकर्मकं प्रयुक्तवान् । 'अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक' इति । तथा **भट्टिकाव्येपि**[7] प्रयोगः । 'अजिग्रहत्तं जनको धनुस्तत्' इति । अयेति । केचिदिति । **भाष्यकारादयः** । तथोक्तं **महाभाष्ये** । 'शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेत् ह्वयतीत्यादीनां प्रतिषेधो वक्तव्यः । के पुनर्ह्वयत्यादयः । ह्वयति क्रन्दयति[8] शब्दायते' इति । तथा **बोपदेवपण्डितैरपि मुग्धबोधे** उक्तम् । 'खादादेस्तु

रक्षांस्यखादयदनाययदूर्ध्वलोक-
माक्रन्दयत् कपिभिराययदाशु रामः ।
शब्दाययन्निपुमजूहवदादयच्च
शैलानवाहयदभक्षयदिष्टभक्ष्येम्[9] ॥' इति

हृक्रोः । गत्यर्थादयो निवृत्तास्तेनोभयत्र विभाषेयम् । यदा हरतिर्गत्यर्थोऽभ्यवहारार्थो वा । हरति भारं देवदत्तः । अभ्यवहरत्योदनमिति करोतेश्चाकर्मकः स्यात् ओदनस्य पूर्णाश्छात्रा विकुर्वत

---

१. आत्मानम् D_2, B_1, B_2; C has a marginal note—वेणुमश्रावयद्धेनूर्गैयमग्राहयत् सखीन् । योदर्शयत् परं रूपं पार्थे कृष्णः स मे गतिः ॥. २. आययति सैनिकैः शब्दाययति वा शूरो रिपून् B_1. ३. शौरै D_1. ४. रिपुम् C, D_2, D_4, D_5. ५. कर्म P, C, D_1, B_2, D_2, D_3, D_4, D_5. ६. तर्कं रूपकार्षा° Dc_3. ७. अपि dropped Dc_1, Bc_3. ८. क्रन्दति Dc_2, Dc_4, Bc_1. ९. °भक्षम् Dc_1, Dc_2, Bc_3, Dc_3, Dc_4.

हारयति कारयति वा भृत्यं भृत्येन वा कटम् ।

अभिवादिदृशोरात्मनेपदे वेति वाच्यम्* ॥ अभिवादयते दर्शयते वा देवं भक्तेन भक्तं वा ।

अधिशीङ्स्थासां कर्म ॥१।४।४६॥

अधिपूर्वाणामेषामाधारः कर्म स्यात् । अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः ॥

अभिनिविशश्च ॥१।४।४७॥

अभिनिपूर्वस्य विशतेराधारः कर्म स्यात् ॥ अभिनिविशते सन्मार्गम् । क्वचिन्न । पापेभिनिवेशः ।

इति तदा प्राप्ते । यदा हरतिः स्तेयाद्यर्थः हरति सुवर्णं चोरयति करोतिश्च सकर्मकः स्यात् करोति कटं देवदत्त इति तदा त्वप्राप्ते । **अभिवादयते दर्शयत इति** । 'णिचश्च' इत्यात्मनेपदम् ।

अधिशीङ् । 'आधारोधिकरणम्' इति अधिकरणसंज्ञायां प्राप्तायां तदपवादः कर्मसंज्ञानेन विधीयते । **एषामिति** । शीङ् स्वप्ने । ष्ठा गतिनिवृत्तौ । आस उपवेशने ।

अभिनि । अधिकरणत्वापवादः । **विशतेरिति** । विश प्रवेशने अस्य । **अभिनिविशते सन्मार्गमिति** । सदाचारे तत्परो भवतीत्यर्थः । **क्वचिन्नेति** । 'परिक्रयणे संप्रदानमन्यतरस्याम्' इत्यतः 'अन्यतरस्याम्' इत्यनुवर्तते सा च व्यवस्थितविभाषा तेन क्वचिन्नेत्यर्थः ।

---

१. Dropped B_2. २. भक्तं भक्तेन वा C. ३. कर्मसंज्ञः C, D_5, B_1. ४. विशेरा° D_2. ५. कर्मसंज्ञः C, D_2, B_1, B_2. ६. पापेभिनिविशते B_2. ७. °त्यनुवृत्ते : No_1.

उपान्वध्याङ्वसः ॥१।४।४८॥

उपादिपूर्वस्य वसतेराधारः [1]कर्म स्यात् ॥ उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः ।

अभुक्त्यर्थस्य न* । वने उपवसति । अ[3]भुक्त्यर्थस्य काले* । हरिदिनमुपवसति ।

[4]उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाम्रेडितान्तेषु ततोन्यत्रापि दृश्यते ॥१॥

[5]उभयतो गोपाः कृष्णम् । सर्वतः कृष्णम् । धिक् कृष्णाभक्तम् ।

उपान्व । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति परिभाषया वस निवास इति [6]भौवादिर्गृह्यते न वस आच्छादन इत्यदादिरित्यभिप्रेत्याह । **उपादिपूर्वस्य वसतेरिति** । **अभुक्त्यर्थस्येति** । अभोजनार्थस्येत्यर्थः । **उभसर्वतसोरिति** । उभसर्वशब्दयोस्तसिप्रत्ययान्तयोर्योगे द्वितीया कार्या । षष्ठ्यपवादोयम् । अत्र [7]यद्यप्युभशब्दः पठितस्तथापि सामर्थ्यादुभयशब्दो गृह्यते नोभशब्दः । तस्य नित्यं द्विवचनटाब्विषयत्वात्तसोभावात् । तथा चैवोदाहरिष्यति । उभयतो गोपाः कृष्णमिति । तथा धिक्शब्देनापि योगे द्वितीया कार्या । तथोपर्यादिषु त्रिषु उपरि अधि अधस्तु आम्रेडितान्तेषु कृतद्विर्वचनेषु सत्सु तद्योगे द्वितीया कार्या । ततो यथोक्तादन्यत्रापि द्वितीया दृश्यत इति वार्तिकार्थः । क्रमेणोदाहरति ।

उभयत इत्यादि । पञ्चम्यास्तसिल् । **धिगित्यादि** । धिक्शब्दः कुत्साद्योती । धिग्जाल्मेत्यादौ जाल्मादयः कुत्स्यत्वेन न विवक्षिताः किं तु संबोध्यत्वेन । तस्मान्न द्वितीया ।

---

१. कर्मसंज्ञः C, B_2, D_2, D_5. २. अभुक्त्य ...वसति dropped D_1, D_2, Bc_3. ३. P, D_5 have न निषेधः after it.; C has स्यादेव after it ; B_2 has अधिकरणे after it. ४. अभि for उभ B_1. ५. अभितो B_1. ६. भौवादिको गृह्यते Dc_3. ७. यद्प्यु° Bc_1.

उपर्युपरि लोकं हरिः[1] । अध्यध्यधि लोकम् । अधोधो लोकम् । अभितःपरितःसमयानिकषाहाप्रतियोगेष्वपि[2][3] । अभितः[4] कृष्णम् । परितः कृष्णम्[5] । इत्यादि[6] ।

अन्तरान्तरेण युक्ते ॥२।३।४॥

आभ्यां योगे द्वितीया स्यात् ॥

उपर्युपरीत्यादि । 'उपर्यधसः सामीप्ये' इति द्विर्वचनम् । ततोन्यत्रापि दृश्यत इत्युक्तम् । क्वान्यत्र दृश्यत इत्याशङ्क्याह । अभित इत्यादि । अभितः परितः इति शब्दौ सर्वत इत्यर्थौ । समयानिकषाशब्दौ सामीप्यलक्षणसंबन्धद्योतकौ स चोभयाश्रित इति यद्यप्युभयोरपि ताभ्यां योगस्तथापि यत्र षष्ठी प्राप्ता तत्रैव द्वितीया स्यात् षष्ठ्यपवादत्वात् । अपवादो ह्युत्सर्गनिवर्तक इति तद्विषयमेवावलम्बते । प्रतिशब्दः क्रियाविशेषणं न कर्मप्रवचनीयः । कृष्णं प्रतीति । भाति भक्तिरिति शेषः । अपिशब्दो विकल्पार्थः । तेन हा मातः हा पितरित्यादि[7] सिद्धं स्यात् ।

अन्तरा । एतौ द्वावपि निपातावत्र गृह्येते । तेन त्वान्तरायां[8] पुरि वसतीति टाबन्तस्यान्तराशब्दस्य योगे न द्वितीया । तथा[10] किं तव तयोरन्तरेण ज्ञातेनेति विशेषवाचिना तृतीयान्तेनान्तरेणेति शब्देन योगे न द्वितीया[9] ।

---

१. लोकं हरिः D3. २. उभयतः B. ३. प्रतियोगेपि C, D4. ४. उभयतः B1. ५. C drops परितः कृष्णम्. ६. After this—प्रति कृष्णं भाति भक्तिरिति शेषः । इत्यादि D2; प्रति कृष्णम् । इत्यादि D4 ; कृष्णं प्रति Com. ७. हा मातरो हा पितर इत्यादि Dc2. ८. चान्तरायां Bc3. ९. द्वितीया न Dc3, Dc4. १०. From तथा to न द्वितीया dropped Bc3.

अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

अनुर्लक्षणे ॥१।४।८४॥

लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात् ॥ गत्युपसर्गसंज्ञापवादः।

कर्मप्रवचनीययुक्ते द्वितीया ॥२।३।८॥

कर्मप्रवचनीयैर्योगे[1] द्वितीया स्यात् ॥ जपमनु[2] प्रावर्षत्[3]।

अन्तरा त्वां मां च हरिरिति तव मम च मध्ये हरिरित्यर्थः। अत्र हरिशब्दस्य स्वार्थे प्रवृत्तिः युष्मदस्मदोस्तु परार्थे हरिविशेषणार्थं प्रवृत्तत्वात्। [4]तत्र हरिशब्दात् स्वार्थे वर्तमानात् प्राधान्ये स्थितात् प्रातिपदिकार्थादप्रच्युतात् प्रथमैव स्यात्। युष्मदस्मद्भ्यां त्वप्रधानाभ्यां प्रथमान्तेन हरिणोपजनिते व्यतिरेके षष्ठ्यां प्राप्तायां तदपवादो द्वितीया विधीयते। **अन्तरेण हरिमिति**। हरिं विनेत्यर्थः। युक्त इति किम्। अन्तरा त्वां मां च बटोः पटः। अत्र न बटुशब्दस्यान्तराशब्देन योगः।

अनु। कर्मप्रवचनीया इत्यधिकारसूत्रादनुवर्तते कर्मप्रवचनीय-ग्रहणम्। कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनीया इत्यन्वर्थसंज्ञाविज्ञानार्थं महती संज्ञा क्रियते। ततश्च ये क्रियां द्योतितवन्तो न तु संप्रति क्रियां द्योतयन्ति केवलं संबन्धविशेषं द्योतयन्ति ते कर्मप्रवचनीया इत्युक्तं स्यात्। लक्षणमिह हेतुर्विवक्षितः। ननु च 'लक्षणेत्थम्—' इत्यादिनैव सिद्धावेतत्सूत्रारम्भस्य किं प्रयोजनम्। तच्च 'लक्षणेत्थम्—' इत्यत्र सूत्रे ग्रन्थकार एव वक्ष्यति।

कर्म। **जपमनु प्रावर्षीदिति**। जपेन हेतुना प्रावर्षत्। जपमनुनिशम्य प्रावर्षदित्यर्थः।

---

१. कर्मप्रवचनीयः Bc3. २. पर्जन्यो जप° D5. ३. After it B, D2 have घनमनु प्रावृड् मेघः। प्रावृट्कालस्य लक्षणमित्यर्थः।. ४. अत्र Dc1.

तृतीयार्थे ॥१।४।८५॥

अनुस्तृतीयार्थे उक्तसंज्ञः[1]। नदीमन्ववसिता[2] सेना। नद्या सह संबद्धेत्यर्थः[3]।

हीने ॥१।४।८६॥

हीने द्योत्ये अनुरुक्तसंज्ञः[4] ॥ अनु हरिं सुराः[5]।

उपोधिके च ॥१।४।८७॥

उपशब्दोधिके हीने च कर्मप्रवचनीयः[6]। अधिके सप्तमी वक्ष्यते। उप हरिं सुराः[6]।

तृतीया। उक्तसंज्ञः कर्मप्रवचनीयसंज्ञ इत्यर्थः। अवसितेति षिञ् बन्धने इत्यस्य निष्ठायां रूपम्। सहार्थोत्र तृतीयार्थः। 'सहयुक्तेप्रधाने' इति सहार्थे तृतीयाविधानादित्यभिप्रेत्याह। **नद्या सह संबद्धेत्यर्थ** इति।

हीने। अनु हरिं सुरा इति। हरिमपेक्ष्यान्ये देवा हीना इत्यपेक्षयात्र जनितः संबन्धः। तत्र षष्ठ्यां प्राप्तायां तदपवादो द्वितीया। अभिधानशक्तिस्वाभाव्यादुत्कृष्टादेव स्यात्। तत्रैकयैव विभक्त्या संबन्धस्य द्योतितत्वात् सुरा इत्यत्रापरसंबन्धविभक्तिर्न[7]।

उप। अधिकमित्यारूढमुच्यते न चाधिकेन विनाधिकं संभवति। ततश्चाधिकानधिकसंबन्धेध्यारूढक्रियाजनिते[8] संज्ञेयम्। चकाराद्धीने च। **अधिके सप्तमी** वक्ष्यत इति। 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इति सूत्रेण। **उप हरिमिति।** हरेर्हीना देवा इत्यर्थः।

---

१. After this—स्यात् C; कर्मप्रवचनीयसंज्ञः D_3. २. मनुवसिता B_1, D_2. ३. After it—हरेर्हीना इत्यर्थः C, B_1, D_2, D_3, D_5. ४. कर्मप्रवचनीय इत्यर्थः Dc_1, Bc_3. ५. After it—हरेर्हीना इत्यर्थः D_2, B_1, C has हीना इत्यर्थः and D_5 has in its place उपार्जुनं योद्धारः।. ६. कर्मप्रवचनीयसंज्ञः स्यात् C, B_2., कर्मप्रवचनीयसंज्ञकः D_1; कर्मप्रवचनीयसंज्ञः D_3, D_4, Bc_3. ७. इत्यत्र नापरसंबन्धविभक्तिः Dc_2. ८. °श्चाना-धिकाधिक° Dc_3.

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥१।४।९०॥

एष्वर्थेष्वेते उक्तसंज्ञाः स्युः । लक्षणे हरिं प्रति हरिं परि हरिमनु वा ते[1] भक्तिः । हेतौ[2] तृतीयां बाधितुमनुर्लक्षणे इति सूत्रम् । इत्थंभूताख्याने । भक्तो विष्णुं प्रति परि अनु वा । भागे । लक्ष्मीर्हरिं प्रति पर्यनु वा । वीप्सायाम् । भूतं भूतं प्रति परि अनु वा प्रभुः ।

लक्षण । लक्षणं चिह्नमिहाभिप्रेतम् । इत्थंभूत इति । अयं प्रकार इत्थम् । तमभविष्ट प्राप्तवान् । किंचित्प्रकारं प्राप्त इत्यर्थः । तस्याख्यानमित्थंभूताख्यानम् । भज्यत इति भागः स्वीक्रियमाणोंशः[3] । पदार्थानां व्याप्तुमिच्छा वीप्सा । लक्षणं हरिं प्रतीति । प्रकाशते भक्तिरिति शेषः । हरिर्लक्षणं प्रकाशमाना भक्तिर्लक्ष्यम् । हरिं प्राप्य भक्तिः प्रकाशते इति प्राप्तिक्रियाजनितो लक्ष्यलक्षणभावः संबन्धः प्रतिना द्योत्यते । एवं हरिं परीत्यादावपि पर्यादिभिः स एव संबन्धो द्योत्यते इति ज्ञेयम् । ननु अनुशब्दोपि लक्षणे वर्तमानोत्र कर्मप्रवचनीयश्चेत् स्यात् तर्हि 'अनुर्लक्षणे' इति सूत्रं व्यर्थमित्याशङ्क्याह । हेताविति । इत्थंभूताख्याने भक्तो विष्णुं प्रतीत्यादि । भक्तरूपं प्रकारं प्राप्तस्य देवदत्तस्य विष्णोश्च विषयविषयिभावं प्रत्यादयः प्रकाशयन्ति । विष्णोर्भक्त इति तात्पर्यार्थः । भागे लक्ष्मीर्हरिं प्रतीत्यादि । लक्ष्मीरूपभागस्य हरिणा स्वीकारजनितस्वस्वामिभावः प्रत्यादिभिर्द्योत्यते । हरेर्भागो लक्ष्मीरिति तात्पर्यार्थः । वीप्सायां भूतं भूतं प्रतीत्यादि । व्याप्तुमिष्टस्य भूतसमुदायस्य प्रभोः सद्भावेन संबन्धः प्रत्यादिभिर्द्योत्यते । एकैकस्मिन् भूते प्रभुरस्तीत्यर्थः ।

---

१. P and C, B_2, D_5 drop ते भक्तिः, D_1, Bc_3, D_3 drop वा ते भक्तिः; जगत् for ते भक्तिः D_4. २. हेतोस्तृतीयां D_1. ३. स्वीक्रियमाणांशः Nc_1.

एषु किम् । परिषिञ्चति । अत्रोपसर्गत्वेन[1] षत्वम् ।

अभिरभागे ॥१।४।९१॥

भागवर्जिते[2] लक्षणादौ अभिरुक्तसंज्ञः[3] ॥ हरिमभिवर्तते । भक्तो हरिमभि[4] । देवं देवमभिसिञ्चति । अभागे किम् । यदत्र मामभिष्यात् तद्दीयताम्[5] ।

अतिरतिक्रमणे च ॥१।४।९५॥

अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयः[6] ॥

परिषिञ्चतीत्यादि । परितः सर्वतः सिञ्चतीत्यर्थः । कर्मप्रवचनीयसंज्ञाभावस्य फलमाह । **अत्रे**त्यादि । अत्र कर्मप्रवचनीयत्वाभावादुपसर्गत्वम् । ततश्च 'उपसर्गात् सुनोति—' इत्यादिना षत्वमित्यर्थः ।

अभि । **हरिमभिवर्तते** इति लक्षणे । **भक्तो हरिमभी**तीत्थंभूताख्याने । **देवं देवमभिसिञ्चती**ति वीप्सायाम् । अत्र कर्मप्रवचनसंज्ञयोपसर्गसंज्ञाया बाधितत्वान्न षत्वम् । **यदत्र मामभिष्या**दिति । 'श्नसोरल्लोपः' इत्यकारलोपः । कर्मप्रवचनीयत्वाभावादुपसर्गत्वमस्त्येव तेन 'उपसर्गप्रादुर्भ्याम्—' इत्यादिना षत्वम् । **मामि**ति । यद्यप्यस्तिरकर्मकस्तथाप्यकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति कर्मणि द्वितीया ।

अतिः । निष्पन्ने फले क्रियाप्रवृत्तिरतिक्रमणम् ।

---

१. अत्रोपसर्जनत्वेन षत्वम् C, D_3, D_4, D_5; अत्र 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौति—' इत्यनेन षत्वम् B_1. २. भागवर्जे D_1, B_2. D_4, D_5. ३. C has स्यात् after it. ४. विष्णुमभि Bc_3. ५. After it—यदत्र मम भवति D_2; अस्तेरकर्मकस्य सोपसर्गत्वेन सकर्मकत्वात् मामिति कर्मणि द्वितीया । Bc_3. ६. कर्मप्रवचनीयसंज्ञः स्यात् C, B_2; after it—स्यात् D_4.

अति देवान् कृष्णः ।

कालाध्वनोरत्यन्तसंयोगे ॥२।३।५॥

गुणक्रियाद्रव्यैः कालाध्वनोरत्यन्तसंयोगे द्वितीया स्यात् ॥ मासं कल्याणी । मासमधीते । मासं गुडधानाः ।

अति देवान् कृष्ण इति । दीव्यन्तीति देवास्तान् देवनेनातिक्रम्य वर्तते कृष्ण इत्यर्थः । पूजायामुदाहार्यम् । अति सिक्तं भवता साधु कृतम् । प्रकृतानुपयोगित्वात् त्यक्तानि चत्वारि सूत्राणि प्रसङ्गाद् व्याख्यायन्ते । 'अधिपरी अनर्थकौ' ॥ १।४।९३॥ एतावनर्थकौ कर्मप्रवचनीयसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति । गत्युपसर्गसंज्ञे मा भूतामिति वचनम् । 'सुः पूजायाम्' । १।४।९४॥ कर्मप्रवचनीयः । सुसिक्तम् । सुस्तुतं भवता । उपसर्गसंज्ञाश्रयः षो न । पूजायां किम् । सुषिक्तम् । 'अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु' । १।४।९६॥ एष्वपिः कर्मप्रवचनीयः । अप्रयुक्तपदस्यार्थः पदार्थः । सर्पिषोऽपि स्यात् । मात्राद्यर्थोऽपिः । संभावने । अपि सिञ्चेद्धनम् । अन्ववसर्गः स्वरानुज्ञा । अपि सिञ्च । अपि स्तुहि । गर्हायाम् । अपि सिञ्चेत् पलाण्डुम् । समुच्चये । अपि सिञ्च । अपि स्तुहि । 'विभाषा कृञि' । अधिः कर्मप्रवचनीयो वा । यदत्र मामधिकरिष्यति । कर्मप्रवचनीयपक्षे 'तिङि चोदात्तवति' इति निघातो न ।

काल । अन्तमवसानमतिक्रान्तोऽत्यन्तः स चासौ संयोगश्च अत्यन्तसंयोगः । साकल्येन संबन्ध इत्यर्थः । **मासं कल्याणीति** । कल्याणगुणेन कालस्य मासस्यात्यन्तसंबन्धः । **मासमधीते** इति । अध्ययनक्रियया मासस्यात्यन्तसंबन्धः । **मासं गुडधाना** इति । गुडेन मिश्रा धाना गुडधानाः । गुडधानाभिर्द्रव्येणात्यन्तसंयोगो मासस्य ।

---

१. B₁ has after it—निष्पन्नेऽपि फले क्रियाप्रवृत्तिरतिक्रमणम्; C has अतिकृष्णम् after it; देवान् अति कृष्णः B₂.

क्रोशं कुटिला नदी । क्रोशमधीते । क्रोशं गिरिः । अत्यन्तसंयोगे[2] किम् । मासस्य द्विरधीते । क्रोशे द्वारका । क्रोशैकदेशे इत्यर्थः[4] ।

स्वतन्त्रः कर्ता ॥१।४।५४॥

क्रियायां स्वातन्त्र्येण[6] विवक्षितोऽर्थः

क्रोशं कुटिला नदीत्यत्र कुटिलगुणेनात्यन्तसंयोगोऽध्वनः क्रोशस्य । **क्रोशमधीते** अध्ययनक्रिययात्यन्तसंयोगोऽध्वनः क्रोशस्य । **क्रोशं गिरिरिति** गिरिणा द्रव्येणात्यन्तसंयोगोऽध्वनः क्रोशस्य । अत्यन्तसंयोगे इति किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥

इति निरूपिता द्वितीया ॥

स्वतन्त्रः कर्ता । **क्रियायामिति** । क्रियासिद्धौ स्वातन्त्र्येण प्राधान्येनागुणीभावेन विवक्षितो योऽर्थः स कर्तृसंज्ञः । यद्यपि क्रियासिद्धौ सर्वेषां व्यापारस्तथापि यस्य स्वातन्त्र्यं विवक्ष्यते स एव स्वतन्त्रः कर्ता नान्य इति भावः । स्वातन्त्र्यं नाम इतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वम् । ननु चैवमिहैव स्यात् । देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीति । इह न स्यात् । देवदत्त आस्ते शेते इत्यादौ । तत्प्रयोज्यानां करणादीनामसंभवात् । एवं तर्हि धातूक्तक्रियत्वं स्वातन्त्र्यं यदीयो व्यापारो धातुनोच्यते स कर्ता । तथा चोक्तम् ।

'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते' । इति ।

सर्वथा गुणीभावः स्वातन्त्र्यमिति तात्पर्यम् ।

---

१. P and D_1 drop from अत्यन्त° to इत्यर्थः. २. °संयोगाति D_5. ३. क्रोशस्यैकदेशे पर्वतः D_5, B_1, D_2. ४. After it—C, B_2 have अति ऋते येन तेन योगं द्वितीयेति केचित् । देवानति क्रुष्णः । ऋते कृष्णमित्यादि; Dc_1 and Bc_3 have also अति ऋते येन तेन योगे द्वितीयेति केचित् । देवा अति क्रुष्णम् । येन क्रुष्णम् । तेन कृष्णम् ।. It drops क्रोशे द्वारका...इत्यर्थः । D_4 follows Dc_1, Bc_3, but has देवानाति कृष्णः । ऋते कृष्णम् ।. ५. स्वातन्त्र्ये B_1. ६. Dropped Dc_3. ७. After it—स्यादित्यर्थः Dc_3; इत्यर्थः Dc_4. ८. Dropped Dc_2. ९. तात्पर्यार्थः Dc_3.

कर्ता स्यात् ॥

साधकतमं करणम् ॥१।४।४२॥

क्रियासिद्धौ प्रकृष्टोपकारकं करणं स्यात् ॥

कर्तृप्रदेशाः 'कर्तृकरणयोस्तृतीया' इत्येवमादयः । स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते । 'तत्प्रयोजको हेतुश्च' ।१।४।५५॥ तस्य कर्तुः प्रयोजकस्तत्प्रयोजकः । निपातनात् समासः । अन्यथा 'कर्तरि च' इति निषेधः स्यात् । अथवा निर्देशोयं ज्ञापयति 'कर्तरि च' इति निषेधोनित्य इति । ततश्च दम्भेर्हल्ग्रहणस्य जातिवाचकत्वादित्यादयः प्रयोगा उपपन्नाः स्युः । स्वतन्त्रप्रयोजको योर्थस्तत्कारकं हेतुसंज्ञं स्यात् चकारात् कर्तृसंज्ञं च । कुर्वाणं प्रयुङ्क्ते कारयति । हेतुत्वाण्णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते । हेतुप्रदेशाः 'हेतुमति च' इत्येवमादयः ।

साधक । क्रियासिद्धावित्यादि । यत् क्रियासिद्धौ विषये प्रकृष्टमत्यर्थमुपकारकम् । अथवा प्रकर्षः प्रकृष्टम् । नपुंसके भावे क्तः । प्रकर्षेणोपकारकं विवक्ष्यते तत्करणसंज्ञं स्यादित्यर्थः । तथा चोक्तं हरिणा प्रकीर्णकाण्डे

'क्रियायाः परिनिष्पत्तिर्यद् व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम्' ॥ इति ।

ननु चात्र साधकतमामित्यत्र तमग्रहणं न कार्यम् । विनापि हि तेनात्र प्रकर्षो गम्यते । तथा हि कारकाधिकारादसाधके संज्ञायाः प्रवृत्तिर्नास्तीति साधकं करणमित्युक्ते अन्तरेणापि तमग्रहणं साधकतममिति गम्यते यथानभिरूपाय कन्यादानप्रतीतिर्नास्तीत्यभिरूपाय कन्या देयेत्युक्ते विनापि प्रकर्षप्रत्ययमभिरूपतमायेति गम्यते तत् किं तमग्रहणेनेति चेदुच्यते । ज्ञापकार्थं तमग्रहणम् । एतदनेन ज्ञाप्यते अन्यत्र तमग्रहणं विनापि प्रकर्षो नाश्रीयत इति ।

१. कर्तृसंज्ञः B_2. २. भर्तृहरिणा No_1. ३. तत्र Dc_2. ४. Dc_3, Dc_2 drop अपि.

कर्तृकरणयोस्तृतीया ॥२।३।१८॥

तिङाद्यनुक्ते कर्तरि करणे च तृतीया स्यात् ॥ रामेण बाणेन हतो वाली[1] । तिङाद्युक्तौ[2] तु हरिः करोति । जीवनः । शाब्दिकः । कृतविश्वः ॥

प्रकृत्यादिभ्यस्तृतीया* ॥ प्रकृत्या चारुः । प्रायेणालसः[3] । गोत्रेण गार्ग्यः । समेनैति[4] ।

ततश्च 'आधारोऽधिकरणम्' इत्यनेन गङ्गायां घोष इत्यादावमुख्यस्याप्याधारस्य गङ्गादेरधिकरणसंज्ञा स्यात् ।

कर्तृ । **तिङाद्यनुक्त** इति । तिङ्कृत्तद्धितसमासैरनुक्त इत्यर्थः । **रामेणे**त्यादि । अत्र हननक्रियां प्रति स्वातन्त्र्येण रामो विवक्षित इति कर्तृत्वं तस्य । बाणस्तु तत्र प्रकृष्टोपकारकमिति करणम् । तत्रोभयत्र तृतीया । **तिङाद्युक्तौ** त्विति । तत्र तु विशेषः । प्रथमा स्यादिति भावः । **हरिः करोती**ति । अयं तिङ् कर्तरि जात इति हरिरिति प्रथमा । **जीवन** इति । जीवन्ति येन स जीवनः । 'करणाधिकरणयोश्च' इति करणे ल्युट् । तेन कृता करणमुक्तमिति प्रथमा । **शाब्दिकः** । शब्दं करोतीत्यर्थे 'शब्ददर्दुरं करोति' इति कर्तरि ठक् तद्धितः । तेनोक्तः कर्तेति शाब्दिक इति प्रथमा । **कृतविश्व** इति । कृतं विश्वं येनेति समासेनोक्तः कर्तेति प्रथमा ।

प्रकृत्यादिभ्य इति । वक्तव्येति शेषः । **प्रकृत्या चारु**रिति । अत्र क्रियाया अभावात् कर्तृकरणयोरभावः । केवलः संबन्धः प्रतीयते । अतोऽत्र षष्ठी प्राप्तेति तृतीयाविधिः । एवं **प्रायेणालसः गोत्रेण गार्ग्य** इत्यत्रापि ज्ञेयम् । **समेनैति** ।

---

१. वालिः । Bc_3. २. °द्युक्ते D_2, D_4, P, C, B_1, B_2. ३. प्रायेण शक्त C, D_2, D_3, D_4. प्रायेण समः B_2. ४. समेन धावति P.

विषमेणैति[1] । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् गृह्णाति । सुखेन दुःखेन यातीत्यादि[2] ।

दिवः कर्म च ॥१।४।४३॥

दिवः साधकतमं कर्मसंज्ञं[3] वा स्यात्[4] ॥ अक्षैरक्षान्[5] वा[6] दीव्यति ।

विषमेण । एतीति शेषः । यद्यप्यत्र क्रियास्ति तथापि नात्र समविषमशब्दौ करणत्वेन विवक्षितौ किं तु कर्मत्वेन । अतो द्वितीया स्यात् । **द्विद्रोणेन धान्यं क्रीणातीत्यादावपि** कर्मत्वेन विवक्षा । तथा हि द्वौ द्वौ द्रोणौ क्रीणात्येषोर्थो विवक्षितः । **पञ्चकेन पशून् गृह्णातीत्यत्र** पञ्च परिमाणमस्य पञ्चकः सङ्घः । पञ्चकं वर्गं कृत्वा पशून् गृह्णातीत्यर्थः । **सुखेन दुःखेन यातीति** । सुखयुक्तो दुःखयुक्तो यातीत्यर्थः । आदिना नाम्ना मैत्रो द्विजो जात्या स्वभावेन मनोहर इत्यादि ।

दिवः । दिवुः क्रीडाद्यर्थः । तस्येत्यर्थः । **अक्षैरित्यादि** । पाशैः क्रीडयतीत्यर्थः[7] ।

---

१. विषमेण धावति P; C has एवं नामजातिजन्मादिषु । सुखदुःखादिभ्यो वा । सुखेन सुखं वा करोति दुःखेन दुःखं वा इत्यादि । समविषमादिभ्यो वा । समेन याति विषमेण वा । द्विद्रोणपञ्चकादिभ्यः कर्मणि वीप्सायाम् । द्विद्रोणेन धान्यं विक्रीणाति । द्वौ द्वौ द्रोणौ क्रीणातीत्यर्थः । पञ्चकेन पशून् गृह्णाति । for समेनैति इत्यादि; विषमेण । D_1, Bc_3, Com. २. वा याति D_1, D_2, D_5, P, C, B_1, B_2. ३. P, D_1, B_2, Bc_3 drop वा; वा कर्मसंज्ञं D_2. ४. D_2 drops it ; स्याद्वा D_3, D_4. ५. वा याति D_1, D_2, D_5, P, C, B_1, B_2. ६. दिव् Dc_2. ७. क्रीडतीत्यर्थः Dc_2.

अपवर्गे तृतीया ॥२।३।६॥

अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् ॥ अह्ना क्रोशेन वानुवाकोधीतः । अपवर्गे किम् । मासमधीतो नायातः ।

सहयुक्तेऽप्रधाने ॥२।३।१९॥

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । पुत्रेण सहागतः ।

अपवर्गे । **मासमधीतो नायात** इति । अत्र केवला कर्तृव्यापृतिः न तु फलप्राप्तिः ।

सह । अत्र च युक्तग्रहणात् सहार्थोऽभिप्रेत इत्याह । **सहार्थेन युक्ते** इति । सहार्थो नाम क्रियागुणद्रव्यैस्तुल्ययोगो विद्यमानता च । यस्य शब्देन क्रियादिसंबन्धः प्रत्याय्यते तत् प्रधानमितरदप्रधानम् । पुत्रेण सहागत इत्यत्रागमनक्रियासंबन्धः पितुरेव शब्देनोच्यते । शब्दशक्तिस्वाभाव्यात् । अतः पिता प्रधानम् । अत एवागत इत्येकवचनम् । अन्यथा द्विवचनं स्यात् । यथा पितापुत्रावागतावित्यादौ । पुत्रस्य तु तुल्ययोगादर्थात् प्रतीयते इति सोऽप्रधानम् । ततस्तृतीया । गुणद्रव्याभ्यां तुल्ययोगस्योदाहरणं तु । पुत्रेण सह स्थूलः । पुत्रेण सह गोमान् । विद्यमानतायां तु । सहैव दशभिः पुत्रैर्भारं वहति गर्दभीति विद्यमानैरित्यर्थः । सहार्थेन योगे विधानात् पर्याययोगेऽपि स्यादित्याह ।

---

१. After it—गुणक्रियाद्रव्यैस्तुल्ययोगो विवक्षितो विद्यमानता वा । पुत्रेण सह स्थूलः । पुत्रेण सह गोमान् । पुत्रेण सह धनी । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । धावति । पुत्रेण सहागतः । D_5. २. सहागतः पिता C ; सहायातः D_1, D_5, B_1. ३. अत्र च dropped Dc_2. ४. °द्रव्यगुणै° Bc_3. ५. प्रत्याख्यातः Nc_1. ६. आगमनक्रियासंबन्धस्तुल्ययोगाद° Dc_2.

एवं साकं[1]सार्धसमंयोगेपि । विनापि तद्योगं[2] तृतीया । 'वृद्धो यूना' इति निर्दर्शनात्[3] ॥

येनाङ्गविकारः ॥२।३।२०॥

येनाङ्गेन विकृतेनाङ्गिनोऽङ्ग[4]विकारस्ततस्[5]तृतीया स्यात् ॥ अक्ष्णा काणः[6] ।

एवं **साकं[7]सार्धसमंयोगेपीति** । **विनापीति** । सहशब्दार्थे गम्यमाने सहशब्दयोगं विनापि तृतीया स्यादित्यर्थः । तत्र[8] हेतुमाह । **वृद्धो यूनेति दर्शनादिति**[9] । यूनेति तृतीयानिर्देशदर्शनादित्यर्थः ।

येन । अङ्गानि सन्त्यस्याङ्गं शरीरम् । अर्शआदित्वादच् । येनेति तदवयवो हेतुत्वेन निर्दिश्यत इत्यभिप्रेत्याह । **येनाङ्गेनेत्यादि** । तत इति । विकृतादङ्गात् । **अक्ष्णा काण** इति । अत्रावयवधर्मेणावयवी व्यपदिश्यते । ननु चात्र कस्मादक्षिशब्दः प्रयुज्यते । यतो विनापि तं काणत्वविशिष्टो देहः प्रतीयत एव । सत्यम् । लोकस्य शब्दप्रयोगे गुरुलाघवं प्रत्यनादरात् । तथा चोक्तं **पाणिनीयमतदर्पणे** । 'अक्ष्यादिशब्देन विनापि देहः स्यादेव काणादिगुणप्रतीति[10]तः । अथापि लोको गुरुलाघवं प्रत्यनादराच्छब्दमपि प्रयुङ्क्ते' ॥ इति । अङ्गेत्यङ्गि[11]ग्रहणं किम् । अक्षि काणमस्येति । असति शरीरवाचिन्यङ्गग्रहणे काणशब्दात् तृतीया स्यात् । लक्ष्यते हि काणशब्देन समुदायावयवस्याक्ष्णो विकारः । कृतादिक्रियाध्याहारेण 'कर्तृकरणयोः—' इत्येव तृतीयासिद्धौ संबन्धषष्ठीबाधनार्थं वचनम् ।

---

१. सार्धसाकं D_1. २. तद्योगेन B_1. ३. दर्शनात् Com. ४. अङ्ग dropped C, D_2, Dc_1. ५. °स्तस्मात्तृ° B_1, D_2 ; after it—लक्ष्यते D_5. ६. After it—पादेन खञ्जः। अङ्गविकार इति किम्। अक्षि काणमस्य D_4 C ; B_1 has पादेन खञ्जः। हस्तेन कुब्जः। शिरसा खल्वाटः। कर्णेन बधिरः। D_2 and D_3 have पादेन खञ्जः। only. C has आङ्गविकार for अङ्गविकार. ७. सार्धसाकं...Dc_1, Dc_3, Dc_4. ८. अत्र Dc_1, Dc_2, Bc_3 ९. निदर्शनादिति Nc_1. १०. प्रतीतेः Dc_1, Dc_3. ११. °स्यङ्ग° Nc_1, Dc_4

इत्थंभूतलक्षणे ॥२।३।२१॥

कंचित् प्रकारं प्राप्त इत्थंभूतः । तल्लक्षणे तृतीया स्यात् ॥ छात्रेणोपाध्यायमद्राक्षीत् ॥

संज्ञोन्यतरस्यां कर्मणि ॥२।३।२२॥

संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् ॥ पित्रा पितरं वा संजानीते[3] ।

इत्थम्— । कंचित् प्रकारमित्यनेनेत्थंशब्दस्यार्थमाचष्टे । तथा हि । प्रकारवचने इदमस्थमुप्रत्यये कृते इत्थमिति स्यात् । सामान्यस्य च भेदको विशेषः प्रकारः । **प्राप्त** इत्यनेन भूत इत्यस्यार्थमाचष्टे । तथा हि प्राप्त्यर्थस्य भूधातोः क्तान्तस्य भूत इति स्यात् । **तल्लक्षणादिति** । तस्य कञ्चित् प्रकारं प्राप्तस्य लक्षणं लक्ष्यतेनेनेति लक्षणं चिह्नं तस्मादित्यर्थः । **छात्रेणेत्यादि** । अत्र मनुष्यत्वस्य सामान्यस्योपाध्यायत्वमध्यापकत्वं प्रकारस्तमुपाध्यायः प्राप्तस्तस्य चिह्नं छात्रः । इह न । कमण्डलुपाणिश्छात्र इति । लक्षणस्य समासेन्तर्भूतत्वात् । इत्थंभूतलक्षणे किम् । वृक्षं प्रति विद्योतते विद्युत् । नात्र विद्योतनप्रकारं प्राप्तस्य कस्यचिद्वृक्षो लक्षणम् । किं तर्हि । विद्योतनस्यैव ।

संज्ञः । **पित्रा पितरं वा संजानीते** इति । अवेक्षत इत्यर्थः । 'संप्रतिभ्यामनाध्याने' इति तङ् । स्मरणे तु 'अधीगर्थ—' इति परत्वात् षष्ठी । मातुः संजानातीति । कृत्प्रत्यययोगे तु अनाध्यानेपि 'कर्तृकर्मणोः कृति' इति परत्वात् षष्ठी । मातुः संज्ञेति ।

---

१. तल्लक्षणा B_1; तल्लक्षणात् Com. २. D_1, D_3, D_4 drop it. ३. After it—अस्मरणार्थ एव । स्मरणे तु पितरं संजानाति । स्मरतीत्यर्थः D_2, D_3, B_1, C (स्मरतीत्यर्थः dropped C).

हेतौ ॥२।३।२३॥

हेतुवाचिनस्तृतीया स्यात् ॥ पुण्येन दृष्टो हरिः । मानाद्वीप्सायां कर्मणि तृतीया वेति केचित् । शतं शतं वत्सान् पाययति पयः । शतेन शतेन वा ।

वारणार्थयोगे तृतीया ॥ अलं विलम्बेन । 'तृतीया तत्कृतार्थेन—' इति तृतीयासमासोक्तेरर्थशब्दयोगे तृतीया । सतामर्थो हरिभक्त्या । पूर्वावरोनार्थादियोगेपि । मासेन पूर्वः । मासेनावरः । पुण्येन हीनः । शास्त्रेण कलहः । गुडेन मिश्रः ।

हेतौ । 'तत्प्रयोजको हेतुश्च' इति शास्त्रीये हेतौ कर्तरीत्येव तृतीया सिद्धा । अतः फलमनिष्पादयन्नपि फलसाधनयोग्यो लोके हेतुरित्युच्यमान इह गृह्यते । तथोक्तं भर्तृहरिणा—

'अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते' इति ।

पुण्येन दृष्टो हरिरिति । अत्र पुण्यव्यापारादनन्तरं दर्शनक्रियानिष्पत्तिरविवक्षिता केवल क्रियासाधनयोग्यता विवक्षिता । अतः पुण्यं हेतुः । तथा धनेन कुलं विद्यया यश इत्यादौ । अत एव करणत्वाभावादसिद्धा तृतीया । मानादित्यादि । मीयतेनेनेति मानम् । तथोक्तं मुग्धबोधे । 'मानाद्वीप्सायां ढे' इति । वारणार्थेति । एतच्च 'प्रकृत्यादिभ्य उपसंख्यानम्' इति सिद्धम् । अथवा करणविवक्षया । विलम्बेन न किंचित् साध्यमित्यर्थावगमात् । 'तृतीया तत्कृत—' इति । अर्थशब्दयोगे तृतीयासमासविधानं तृतीयाविधिज्ञापकमिति भावः । पूर्वावरोनार्थादियोगेपीति । अत्रापि 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' इत्येभिर्योगे तृतीयासमासविधानं ज्ञापकं तृतीयाविधेः ।

---

१. Before it—फलसाधनयोग्यः पदार्थो हेतुरुच्यते । C, B_2, D_4, D_5. २. Dropped P, D_1, D_4. ३. मानाद्वीप्सायां तृतीयेति । वेति केचित् । Dc_1, Bc_3. ४. द्वितीया D_2. ५. P, C, B_2, D_2, D_3, Dc_1, Bc_3 have after it—इति केचित्. ६. After it—भवति D_3. ७. मासेन पूर्वः अवरः B_2. ८. अत्र च Nc_1.

अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीया । दास्या संयच्छते कामुकः । धर्म्ये तु । भार्यायै संयच्छति ।

कर्मणा यमभिप्रैति स संप्रदानम् ॥१।४।३२॥

दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात् ॥

अशिष्टव्यवहार इति । अत्रापि 'दाणश्च सा चेच्चतुर्थ्यर्थे' इति संपूर्वाद्दाणश्चतुर्थ्यर्थे तृतीयायोगे आत्मनेपदविधानं ज्ञापकम् । सा चाशिष्टव्यवहारे स्यादित्यत्र लौकिकः प्रयोगो नियामकः । अथवा वक्तव्यमेवैतत् । तथोक्तं **काशिकावृत्तौ** । 'वक्तव्यमेतदशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवति' इति । **दास्या संयच्छते कामुक** इति । यो धर्मशास्त्रविरुद्धं दासीं कामयितुं तस्यै ददाति तस्यासावशिष्टव्यवहारो भवतीत्यत्राशिष्टव्यवहारः ॥

इति निरूपिता तृतीया ॥

कर्मणा । संप्रदानमिति महत्याः संज्ञायाः करणात् सम्यक् प्रकर्षेण दीयते यस्मै तत् संप्रदानं इत्यन्वर्थता विज्ञायते । तथा चोक्तम्—

'संप्रदानं तदेव स्यात् पूजानुग्रहकाम्यया ।
दीयमानेन संयोगात् स्वामित्वं लभते यदि' ॥ इति ।

ततश्च ददातिकर्मणैव यमभिप्रैतीति विज्ञायत इत्यभिप्रेत्याह । **दानस्य कर्मणा यमभिप्रैतीति** । दानं हि मानपूजानुग्रहकाम्ययात्मीयद्रव्यस्य परित्यागेन परस्वत्वापादनम् । ततश्च रजकस्य वस्त्रं दत्तमित्यादौ न । **अभिप्रैतीति** । अभिसंबध्नाति । सुसंबध्नातीति यावत् । अथवाभिप्रैतीप्सतीत्यर्थः । कर्मणेति किम् । यमभिप्रैति स संप्रदानमित्येतावत्युक्ते कर्मण एव संप्रदानसंज्ञा स्यात् ।

---

१. संप्रयच्छते B₁. २. संप्रयच्छति B₁. ३. वक्तव्यमेव तत् No₁, Bo₁. ४ अस्मै No₁, ५. इत्यन्वर्थता Do₁, No₁. ६. परसत्तापादनम् । Do₁, Bo₂. ७. °ध्नातीति यावत् Do₃.

चतुर्थी संप्रदाने ॥२।३।१३॥

संप्रदानेर्थे चतुर्थी स्यात् ॥ विप्राय गां ददाति। अनभिहिते इत्येव। दानीयो विप्रः। क्रियया यमभिप्रैति सोपि संप्रदानम्* ॥

कर्मसंज्ञायास्तु ददातिकर्मणोन्यत्कर्मावकाशः स्यात्। यमिति किम्। कर्मणाभिप्रैति स संप्रदानमित्युच्यमाने योभिप्रैति तस्य संप्रदानसंज्ञा स्यात्। कर्तृसंज्ञायास्तु यत्र कर्मसंबन्धो नास्ति सोवकाशः स्यात्। आस्ते देवदत्त इत्यादि। अभिप्रग्रहणं किम्। कर्मणा यमेति स संप्रदानमित्युक्ते कालविवक्षा स्यात्। ततश्च विप्राय गामदात् दास्यतीत्यत्र न स्यात्। अभिप्रग्रहे तु सर्वत्र स्यात्। अभिराभिमुख्ये वर्तते। तच्चातीते भाविन्यप्यस्ति। प्रशब्दः प्रारम्भे। स चातीतायां भाविन्यामपि स्यात्। ततश्चोपसर्गद्वयोपादानसामर्थ्यात् कालानवच्छिन्ना क्रियाश्रीयेत। यदा त्वीप्सतीत्यर्थस्तदाभिप्रग्रहणं कार्यम्। संप्रदानं त्रिविधम्। अनिराकर्तृ प्रेरकमनुमन्तृ चेति। तत्रानिराकर्तृ यथा। आदित्याय पुष्पं ददाति। नात्रादित्यः प्रार्थयते नानुमन्यते न च निराकरोति। प्रेरकं यथा। विप्राय गां ददाति। विप्रेण गां मह्यं देहीति प्रेरितो ददाति। अनुमन्तृ यथा। उपाध्यायाय गां ददाति। उपाध्यायो हि पूर्वं न प्रार्थितवान्। अथ च दीयमानामनुमन्यते भद्रं कृतमिति। तथोक्तं भर्तृहरिणा

> 'अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
> प्रेरणानुमतिभ्यां च लभते संप्रदानताम्' ॥ इति।

चतुर्थी। **दानीयो विप्र** इति। दीयतेस्मै दानीयः। 'कृत्यल्युटो बहुलम्' इति संप्रदानेनीयर् कृत्। **क्रिययेति**। एतच्च वक्तव्यं प्रयोगदर्शनविषयम्।

---

१. तु सति Nc_1, Bc_3, Dc_3. २. ददातीति Dc_2. ३. दीयमानमेवानुमन्यते Nc_1; दीयमानमनुमन्यते Bc_3.

पत्ये शेते । यजेः कर्मसंप्रदानयोः करणकर्मत्वे वाच्ये* ॥ पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ।

रुच्यर्थानां प्रीयमाणः ॥१।४।३३॥

रुच्यर्थानां धातूनां योगे प्रीयमाणोर्थः संप्रदानसंज्ञः ॥ हरये रोचते भक्तिः ।

पत्ये शेते इति । शयनेन पतिमभिप्रैति पतिमाभिमुख्येनारभ्य शेते इत्यर्थः । कर्मसंप्रदानयोरिति । एतत् पशुना रुद्रं यजते इत्यत्रैव ज्ञेयम् ।

रुच्य । रुचिरर्थो येषां ते रुच्यर्थाः । रुचिना समानार्था इति यावत् । यद्यपि रुचिर्दीप्तौ पठ्यते तथापीहान्यकर्तृकोभिलाषे वर्तते । तत्रैव प्रीयमाणार्थस्य संभवात् । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणस्तर्प्यमाणो योर्थस्तत् कारकं संप्रदानसंज्ञं स्यादित्यर्थः । हरये रोचते भक्तिरिति । भक्तिर्हरेरात्मविषयमभिलाषमुत्पादयतीत्यर्थः । हरिस्थस्याभिलाषस्य भक्तिः कर्त्रीत्यन्यकर्तृकताभिलाषस्य । ततश्च देवदत्तो मोदकमभिलषतीत्यत्र देवदत्तस्य संप्रदानसंज्ञा न । अभिलाषस्यान्यकर्तृकताभावात् । प्रीयमाणः किम् । देवदत्ताय रोचते मोदकः पथि । इहाधिकरणस्य पथोप्रीयमाणस्य संप्रदानत्वं मा भूदिति ।

---

१. D_1, D_4 drop यजेः. २. रुच्यर्थानां...प्रीयमाणोर्थः dropped D_1. ३. प्रयोगे B_1; रुच्यर्थानां प्रयोगे B_2, Bc_3. ४. प्रीयमाणः B_1; प्रीयमाणो योर्थः स B_2, Bc_3; यः प्रीयमाणः स संप्र D_3; प्रीत्यर्थानां धातूनां यः प्रीयमाणः स संप्रदानसंज्ञः स्यात् D_4. ५. संप्रदानं स्यात् C, D_2. ६. °कर्तृकेच्यभि° Dc_2. ७. °त्वाभावात् Dc_4, Dc_2, Dc_3.

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥१।४।३४॥

श्लाघादेर्ज्ञापयितुमिष्टः संप्रदानं[1] स्यात्[2] ॥ गोपी स्मरात् कृष्णाय श्लाघते[3] ह्नुते तिष्ठते शपते[4] ।

धारेरुत्तमर्णः ॥१।४।३५॥

उत्तसंज्ञः[5] स्यात्[6] ॥ भक्ताय धारयति मोक्षं हरिः ।

श्लाघ । श्लाघृँङ्[7] कत्थने । ह्नुङ् अपनयने । ष्ठा गतिनिवृत्तौ । शप उपालम्भने । **एतेषां प्रयोगे ज्ञापयितुमिष्ट** इति । बोधयितुमभिप्रेत इत्यर्थः । **गोपी स्मरात् कृष्णाय श्लाघत** इति । गोपी मदनावस्थया[8] कृष्णं श्लाघमाना स्तुवती तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः । अथवात्मानमेव श्लाघमाना तां श्लाघां कृष्णं बोधयितुमिच्छति । आत्मानं सगुणां बोधयतीति यावत् । ह्नुते । संनिहितमेव कृष्णं सपत्नीभ्यो निह्नुवाना तामेव निह्नुतिं तमेव ज्ञापयतीत्यर्थः । अथवा ह्नोतव्यवस्तुषु इदमहं ह्नुवे इति कृष्णं ज्ञापयतीत्यर्थः । तिष्ठते । स्वाभिप्रायं कृष्णं प्रति प्रकाशयतीत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् । शपते । सत्यमेतदिति प्रकटयतीत्यर्थः । ज्ञीप्स्यमान इति किम् । देवदत्तं श्लाघते ।

धारे । धृङ् अवस्थाने । अस्य हेतुमण्णिजन्तस्य प्रयोगे उत्तमर्णो धनस्वामी धनप्रयोक्ता उक्तसंज्ञः संप्रदानसंज्ञः स्यात् । **भक्ताय धारयति मोक्षं हरिरिति** । अत्र भक्त उत्तमर्णो हरिरधमर्णः । उत्तमर्ण इति किम् । देवदत्ताय शतं धारयति[9] ग्रामे । अत्र ग्रामस्यानुत्तमर्णस्य न ।

---

१. संप्रदानसंज्ञः B_2. २. Dropped B_2. ३. एवं before it in B_1. ४. वा after it in C, D_4, D_5. ५. धनस्य स्वामी उत्तमर्णः । धारयतेः प्रयोगे उत्तमर्णो योर्थः स उक्तसंज्ञः । D_5. धारेरुत्तमर्णः संप्रदानं स्यात् C; धारयतेः प्रयोगे उत्तमर्णो योर्थः स संप्रदानसंज्ञः स्यात् B_2, D_3. ६. Dropped in D_1, Bc_3, Dc_1, P, D_2. ७. श्लाघृ Dc_1, Bc_3. ८. मदनावस्थायां Nc_1. ९. धारयति शतं Dc_3.

स्पृहेरीप्सितः ॥१।४।३६॥

स्पृहयतेरिष्टः संप्रदानं[1] स्यात् ॥ हरये स्पृहयति[2] ।

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥१।४।३७॥

[3]क्रुधाद्यर्थानां योगे[4] यं प्रति कोपः स उक्तसंज्ञः[5] ॥ हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति[6] गोपी स्मरात् । यं प्रति कोप इति किम् । भार्यामीर्ष्यति मैनामन्योद्राक्षीदिति[8] ।

स्पृहे । स्पृह ईप्सायां चुरादावदन्तः । इष्टोभिप्रेतः । **हरये स्पृहयतीति** । हरिमभिलेषतीत्यर्थः । ईप्सित इति किम् । पुष्पेभ्यो वने स्पृहयति ।

क्रुध । **क्रुधाद्यर्थानामिति** । क्रुधद्रुहेर्ष्यासूयार्थानां धातूनामित्यर्थः । क्रोधोमर्षः । द्रोहोपकारः । ईर्ष्या परसंपत्त्यसहनम् । असूया गुणेषु दोषारोपः । यं प्रति कोप इति सर्वेषां सामान्येन विशेषणम् । यतः क्रोधः कोप एव द्रोहादयोपि कोपप्रभवा एव गृह्यन्ते । **हरये क्रुध्यतीत्यादि** । गोपी स्मराद्धेतोः हरिं प्रति क्रोधादिकं करोतीत्यर्थः । **भार्यामीर्ष्यतीति** । अस्ति भार्यायामीर्ष्या न तु तां प्रति कोपः । केवलं परैर्दृश्यमानां तां न क्षमते । ननु च योस्मान् द्वेष्टीत्यत्र कुतः संप्रदानत्वं न । उच्यते । द्विषेरक्रोधाद्यर्थत्वात् । अप्रीतौ ह्येनं स्मरन्ति । तथाचेतनेष्वपि प्रयुज्यते । औषधं द्वेष्टि । नाभिनन्दतीति गम्यते । क्रुधद्रुहोरकर्मकत्वात् षष्ठ्यां प्राप्तायामारम्भः । इतरयोः सकर्मकत्वाद् द्वितीयायाम् ।

---

१. संप्रदानसंज्ञः B_2, D_2. २. B_1 has after it—वेति केचित् । हरिं स्पृहयति. ३. Before it Dc_1, Bc_3 have अमर्षः क्रोधः । अपकारो द्रोहः । अक्षमा असहिष्णुत्वम् । दोषारोपो गुणेष्वसूया ।. ४. प्रयोगे C. ५. स्यात् after it in C, D_3, D_4, B_2. ६. वा after it in C. ७. Dropped in B_1, D_3, P, D_1, Dc_1. ८. इति is dropped in B_1, Dc_1. Bc_3, D_4, D_5. ९. °लष्यती° Nc_1. १०. °द्रोहे° Bc_1, Dc_2. ११. कोपः क्रोधः Dc_3. १२. द्रुहा° Dc.

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥१।४।३८॥

उपसृष्टयोरेतयोः प्रागुक्तः[1] कर्म स्यात् ॥ क्रूरमभिक्रुध्यति अभिद्रुह्यति ।

राधीक्ष्योर्यस्य विप्रश्नः ॥१।४।३९॥

एतयोः कारकं[2] संप्रदानं स्यात् यस्य विविधः प्रश्नः क्रियते ॥ कृष्णाय राध्यति ईक्षते वा । पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः ।

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥१।४।४०॥

आभ्यां परस्य शृणोतेर्योगे पूर्वस्याः प्रवर्तनक्रियायाः कर्ता संप्रदानं[3] स्यात् ॥

क्रुध । **उपसृष्टयोः** । उपसर्गसंबद्धयोः । **प्रागुक्त** इति । यं प्रति कोपः स इत्यर्थः ।

राधीक्ष्योः । राध संसिद्धौ । ईक्ष दर्शनाङ्कनयोः । एतावत्रोदाहरणे शुभाशुभपर्यालोचने वर्तेत इत्यभिप्रेत्याह । **पृष्ट** इत्यादि । यस्येति ग्रहणं विस्पष्टार्थम् । 'यं प्रति' इति हि वर्तते । तत्र यं प्रति विप्रश्न इत्येतावतैव यस्येत्यस्यार्थो[4] गम्यत एव ।

प्रत्याङ् । प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमरूपे प्रतिज्ञाने वर्तते । स चाभ्युपगमः परेण प्रयुक्तस्य सतः स्यात् । तथा ह्यन्येन केनचिदिदं क्रियतामिति प्रयुक्तो हि प्रतिजानीते करिष्यामीत्यभिप्रेत्याह । **पूर्वस्या** इत्यादि । सूत्रेषु लिङ्गनिर्देशोऽर्थापेक्षया । स चार्थो विचार्यमाणः क्रियैव स्यात् । यतः क्रियाया एव कर्ता नान्यस्येत्यभिप्रेत्याह । **प्रवर्तनक्रियायाः कर्तेति** ।

---

१. प्रागुक्तं कर्मसंज्ञं स्यात् C, B_1. २. कर्मकारकं B_2, D_4, D_5. ३. संप्रदानसंज्ञं C. ४. °र्थोऽवगम्यत No_1.

विप्राय गां प्रतिशृणोति आशृणोति । प्रतिजानीत इत्यर्थः ।

अनुप्रतिगृणश्च ॥१।४।४१॥

अस्य धातोः कारकं पूर्वस्य कर्तृभूतं संप्रदानं स्यात्[1] ॥ होत्रे अनुगृणाति[2] । होतारं शंसन्तं प्रोत्साहयतीत्यर्थः ।

विप्राय गां प्रतिशृणोतीति । अत्र विप्रः पूर्वस्या याचनक्रियायाः कर्ता । विप्रेण हि पूर्वं गां मह्यं देहीति याचितो ददामीति प्रतिजानीते । अत्र हेतुसंज्ञायां प्राप्तायामयमारम्भः । पूर्वस्याः प्रवर्तनक्रियायाः कर्ता हि प्रतिज्ञातुः प्रयोजकः । **पूर्वस्य कर्तेति** । एतस्मिन्नसति गवादेरभ्युपेयमानस्य कर्मण एव स्यात् । पुरस्तादपवादत्वेनानन्तरकर्मत्वस्यैव बाधात् । सति तु तस्मिन् हेतुसंज्ञामेव बाधते ।

अनुप्रतिगृण इति । श्नाप्रत्ययान्तेन निर्देशात् गॄ शब्द इति क्र्यादिपठितस्य ग्रहणं न तौदादिकस्य गॄ निगरण इत्यस्य । **अस्य धातोरित्यादि** । अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं स्यादित्यर्थः । **होतारं शंसन्तमित्यनेन** पूर्वस्याः स्तुतिक्रियाया होता कर्तेति दर्शयति । **प्रोत्साहयतीत्यर्थः** । इत्यनेनानुगृणातिप्रतिगृणातिशब्दयोरर्थमाचष्टे **पूर्वस्य** । **कर्तेति** किम् । होत्रे अनुगृणाति सदसीत्यत्राधिकरणस्य मा भूत् ।

---

१. तथा for संप्रदानं स्यात् B_1, D_1, D_2, D_5. २. After it—प्रतिगृणाति D_1, D_3.

परिक्रयणे संप्रदानमन्यतरस्याम् ॥१।४।४४॥

नियतकालं भृत्यास्वीकरणं परिक्रयस्तत्करणं संप्रदानं वा[1] स्यात् ॥ शताय शतेन[2] वा परिक्रीतः ।

तादर्थ्ये चतुर्थी वाच्या* ॥ मुक्तये हरिं भजति । क्लृप्त्यर्थे संपद्यमाने च* ॥

परि । क्रयः क्रयणं वेतनादिनात्यन्तिकं स्वीकरणम् । परिपूर्वेण क्रयणशब्देन नियतकालं स्वीकरणमुच्यते क्रयणस्य समीपमिति व्युत्पत्त्येत्यभिप्रेत्याह । नियतकालमित्यादि । भृत्या वेतनेन । तादर्थ्ये इति । तच्छब्देन कार्यं[3] निर्दिश्यते । तस्मै इदं तदर्थम् । चतुर्थीसमासः । तदर्थशब्दः कार्यप्रयोजनं कारणमाह । तदर्थस्य भावस्तादर्थ्यम् । ष्यञ् । तादर्थ्यशब्दः कार्यप्रयोजनस्य कारणस्य कार्यस्य च यः संबन्धस्तमाह । तत्र षष्ठ्यां प्राप्तायां चतुर्थी विधीयते । यत्तु दुर्गसिंहेन 'यस्मै दित्सा रोचते धारयते वा तत् संप्रदानम्' इत्याद्युक्त्वोक्तं 'तादर्थ्यचतुर्थ्या सिद्धम्' इति तदसत् । विप्राय गां ददातीत्यादौ न विप्रादयो दानादीनां प्रयोजनानि किं तु साधनानि । अतस्तादर्थ्याभावान्न तादर्थ्यचतुर्थ्या सिद्धम् । मुक्तये हरिं भजतीति । मुक्तिलक्षणकार्यप्रयोजनाय हरिं सेवते इत्यर्थः । क्लृप्त्यर्थ इति । कृपेत्यस्य धातोरर्थ एवार्थो यस्य धातोस्तस्य प्रयोगे संपद्यमाने संपत्ति-रिहाभूतप्रादुर्भावस्तत्र[4] यद्रूपं संपद्यते ततो विकाराच्चतुर्थी वाच्येत्यर्थः ।

---

१. Dropped in B_1; वा संप्रदानं D_1; स्याद्वा D_3. २. शतेन शताय D_1. ३. वार्यं B_1. ४. °रिहाभूतस्तद्भावस्तत्र Bc_1; Dc_3, Dc_4. °रिहाभूतस्तत्र यद्रूपं Bc_3.

भक्तिर्ज्ञानाय कल्पते संपद्यते जायते[1] इत्यादि । उत्पातेन ज्ञापिते च* ॥ वाताय कपिला विद्युत्[2][3] ॥

हित[4]योगे च* ॥ ब्राह्मणाय[5] हितम् ।

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥२।३।१४॥

क्रिया[6] क्रियार्था उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य

भक्तिर्ज्ञानाय कल्पत इति । भक्तिर्ज्ञानलक्षणविकाररूपेण भवति । भक्तिर्ज्ञानं भवतीति यावत् । विकाररूपापत्तौ चतुर्थीविधानादिह न भवति देवदत्तस्य संपद्यन्ते शालय इति । यदा च प्रकृतिविकारयोरभेदविवक्षा तदा परत्वात् प्रथमैव स्यात् । ज्ञानमियं संपद्यते भक्तिरिति । यदा तु 'जनिकर्तुः प्रकृतिः' इत्येतत्कृतमपादानत्वं विवक्ष्यते तदा भक्तेः पञ्चम्येव स्यात् । ज्ञानं संपद्यते भक्तेरिति । **उत्पातेनेति** । प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः । **वाताय कपिला विद्युदिति** । अत्र कपिला विद्युदुत्पातस्तेन ज्ञापिते वाते चतुर्थी ।

क्रिया । उपपदमिह 'तत्रोपपदं सप्तमीस्थम्' इति पारिभाषिकं गृह्यते । तच्चोपपदं क्रियार्थं क्रियाप्रयोजनं विचार्यमाणं 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्येतस्मिन् सूत्रे या सप्तमी निर्दिष्टा क्रिया सैव भवति[7] । नान्यदिति । क्रियार्थोपपदग्रहणेन अर्थविषयो लक्ष्यते इत्यभिप्रेत्याह । **क्रियार्थेत्यादि** । क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था । एवंविधा क्रिया उपपदं यस्य तस्य । स्थानिन इति पदं व्याचष्टे । **अप्रयुज्यमानस्येति** । अयं भावः । तिष्ठत्यस्मिन् शब्दार्थ इत्यर्थः स्थानम् । तदस्यास्तीति स्थानी । यस्यार्थो ज्ञायते न च स प्रयुज्यते स स्थानीत्युच्यत इति ।

---

१. Dropped in C. २. इति Bc_3. ३. C, B_2, D_4. complete the verse—आतपायातिलोहिता (लोहिती B_2.) । पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥. ४. बलिरक्षितहितयोगे च । कुबेराय बलिः । गोभ्यो रक्षितम् । ब्राह्मणाय हितम् । D_4, D_6. ५. ब्राह्मणेभ्यः B_1, D_2. ६. क्रियार्था क्रिया B_1, D_1, Dc_1, Bc_3. ७. भवतीति Bc_3.

तुमुनः कर्मणि चतुर्थी स्यात्[1] ॥ फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः ।

तुमर्थाच्च भाववचनात् ॥२।३।१५॥

तुमर्था ये भाववाचिनो[2] घञादयस्तदन्ताच्चतुर्थी स्यात् ॥ यागाय[3] याति । यष्टुं यातीत्यर्थः[4] ।

तुमुन इति । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणमिति न्यायात् तुमुन्प्रत्ययान्तस्य धातोः कर्मणि चतुर्थी स्यादित्यर्थः । **फलेभ्यो यातीति** । आङ्पूर्वो हरतिस्तुमुन्प्रत्ययान्तोत्र स्थानी । फलानि कर्म । ननु चात्र तादर्थ्य इत्येव चतुर्थी सिद्धा । सत्यम् । नियमार्थं वचनम् । अप्रयुज्यमानस्यैव कर्मणि यथा स्यात् प्रयुज्यमानस्य मा भूत् । **फलान्याहर्तुं यातीति** । क्रियार्थोपपदस्य किम् । प्रविश पिण्डीम् । अत्र गृहं प्रविश पिण्डीं भक्षयेति गम्यमानत्वात् भक्षिरत्र स्थानी न तु क्रियार्थोपपदस्तुमुन्प्रत्ययान्तत्वाभावात् ।

तुमर्थात् । तुमुना समानार्थास्तुमर्थाः 'भाववचनाश्च' इति यान् घञादीन् वक्ष्यति तेषामिदं ग्रहणम् । त एव तुमर्था भाववचनाः संभवन्ति नान्ये इत्यभिप्रेत्याह । **तुमर्था ये भाववचना घञादय** इति । **यागाय यातीति** । यजेः 'भाववचनाश्च' इति तुमर्थे भावे घञ् । यद्यप्यत्र तादर्थ्यं गम्यते तथापि चतुर्थी न स्यात् । तादर्थ्यस्य भाववचनेनैव द्योतितत्वात् । यथा पाचको व्रजतीत्यत्र । तेन चतुर्थीविध्यर्थमिदम् । अथवा भाववचनादेव यथा स्यादिह मा भूत् पाचको व्रजतीति नियमार्थम् । नायं भाववचनः किं तु कर्तृवचनः ।

---

१. Dropped in D_1, B_2, Dc_1, D_3, Bc_3. २. भाववचना P, C. ३. B_1 has त्यागाय याति । त्यक्तुं यातीत्यर्थः । एवं यागाय यातीत्यादि योज्यम् । ; D_2 has पाकाय व्रजति । त्यागाय व्रजति । पाचनाय व्रजति । यागाय व्रजति । यष्टुं यातीत्यर्थः । before it—पाकाय याति । D_6. ४. After it—तुमर्थादिति किम् । यागः । त्यागः । भाववचनादिति किम् । कारको व्रजति । D_4, D_6 (त्यागः dropped D_5.).

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥२।३।१६॥

एभिर्योगे चतुर्थी स्यात् ॥ हरये नमः[1] । इत्यादि[2] । अलमिति पर्याप्त्यर्थग्रहणम्[3] । तेन दैत्येभ्यो हरिरलं प्रभुः समर्थ[4] इत्यादि । आशिषि षष्ठीं बाधितुं चकारः । स्वस्ति गोभ्यो भूयात्[5] । उपपदविभक्तेः कारकविभक्तिर्बलीयसी । तेन[6] नमस्करोति देवान् ।

नमः । संबन्धषष्ठ्या बाधार्थं[7] वचनम् । **हरये नम** इत्यादीति । आदिना स्वस्ति प्रजाभ्यः । स्वाहाग्नये । स्वधा पितृभ्यः । वषडिन्द्राय । **अलमिति पर्याप्त्यर्थग्रहणमिति** । सामर्थ्यार्थस्य ग्रहणमित्यर्थः । 'तस्मै प्रभवति संतापादिभ्यः' इत्यलमा समानार्थेन[8] प्रभवतिना योगे चतुर्थीनिर्देशाल्लिङ्गात् । तेन सामर्थ्यपर्यायाणां प्रयोगे स्यादित्याह । **तेन दैत्येभ्यो हरिरलं प्रभुः समर्थ इत्यादि** । अलमित्यस्य तु पर्याप्त्यर्थस्यैव योगे चतुर्थी स्यात् । तेन कन्यामलंकुरुते इत्यादौ भूषणाद्यर्थयोगे न । **आशिषीत्यादि** । 'चतुर्थी चाशिषि–' इत्यादिनाशीर्विवक्षायां पक्षे या षष्ठी विधीयते तामपि बाधित्वा चतुर्थ्येव भाव्येति चकार इत्यर्थः । **नमस्करोति देवानिति** । देवानित्यत्र नमो योगेन प्राप्ता चतुर्थी उपपदविभक्तिः । 'कर्मणि द्वितीया' इति प्राप्ता द्वितीया कारकविभक्तिः । सैव बलीयसीति सैव जाता ।

---

१. After it—राज्ञे स्वस्ति । सोमाय स्वाहा । पितृभ्यः स्वधा । अलं मल्लो मल्लाय । D_6. २. B_1, D_2 drop it. ३. पर्याप्त्यर्थस्य ग्रहणम् B_1. ४. समर्थः शक्तः D_1, P, D_4, B_2, D_5; शक्तः समर्थः D_3, C, Dc_1. ५. B_1 has इत्यादि after it. ६. P, D_1 drop तेन; तेन नमसायोगेपि द्वितीयैव । नमस्करोति देवान् । C, B_2; तेन नमस्योगे द्वितीयैव । D_2, D_6, (एव dropped D_5); तेन नमसा योगे द्वितीयैव Dc_1, D_3, D_4. (नमसो D_3, D_4). ७. बाधनार्थं Dc_1, Dc_3, Bc_3. ८. समार्थेन Nc_1.

मन्यकर्मण्यनादरे विभाषाप्राणिषु ॥२।३।१७॥

प्राणिवर्ज्ये[1] मन्यतेः कर्मणि चतुर्थी वा स्यात् अनादरे । न[2] त्वां तृणाय मन्ये । न त्वां तृणं मन्ये । अनादरे किम् । देवं[3] त्वां मन्ये । अप्राणिष्विति नौकाकान्नशुकशृगाल[4]वर्जेष्विति[5] वाच्यम्* । नेह[6] । न त्वां नावं मन्ये इत्यादि[7] ।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥२।३।१२॥

गत्यर्थानां[8] धातूनां कर्मण्यध्ववर्जे[9][10] द्वितीयाचतुर्थ्यौ[11] स्तश्चेष्टायाम् ।

मन्य । अनादरस्तिरस्कारः । परिभवोवज्ञानमिति यावत् । न त्वां तृणाय मन्यत[12] इति । तृणादपि निकृष्टतरं त्वां मन्यत[13] इत्यर्थः । ननु च युष्मदः कस्मान्न चतुर्थी तदपि हि मन्यतेः कर्म । व्यवस्थितविभाषाविज्ञानात् । मन्यतेः किम् । न त्वां तृणं चिन्तयामि । मन्यतेरिति श्यन्विकरणनिर्देशात् तनादिकस्य मनु अवबोधे इत्यस्य कर्मणि न । न त्वां तृणं मन्वे । अप्राणिष्वितीति । व्यवस्थितविभाषाविज्ञानादिति भावः । इह तु स्यादेव चतुर्थी । न त्वां श्वानं मन्ये । न त्वां शुने मन्ये ।

गत्यर्थे । यदि हि क्रियामात्रमत्राभिप्रेतं स्याच्चेष्टाग्रहणमनर्थकं स्यात् ।

---

१. °वर्जे C, D1, Bc3, D4, D5 ; °वर्जिते P, D3. २. न त्वां तृणं मन्ये तृणाय मन्ये । P. ३. त्वां देवं मन्ये C. ४. °सृगाल° B1, D1 ; °शृगालमिति वाच्यम् Bc3. ५. °वर्जमिति D3. ६. तेन D4; तेनेह न । B1, Bc3. ७. काकं मन्ये इत्यादि D4, B1. ८. Dropped B1, D1, D5. ९. अध्ववर्जे कर्मणि B1. १०. °वर्जिते P, D2, D4, Dc1, Bc1. ११. चतुर्थीद्वितीये D2. १२. मन्ये Dc3, Dc4. १३. मन्ये Dc3, Dc4.

[१]व्रजं व्रजाय वा व्रजति कृष्णः । चेष्टायां किम् । [२]मनसा[३]काशं [४]याति । अनध्वनि किम् । मार्गं याति । उत्पथगतौ तु[५] स्यादेव । उत्पथेन पथे गच्छति । द्वितीयाग्रहणं [६]कृद्योगे षष्ठीं बाधितुम् । [७]ग्रामाय गता । ग्रामं गता ॥

सर्वो हि धातुः क्रियार्थ एव । तस्माच्चेष्टाग्रहणात् शरीरव्यापार-वाच्यत्र चेष्टाशब्दः । अध्वनीत्यर्थग्रहणमर्थप्रधानत्वान्निर्देशस्येत्यभि-प्रेत्याह । **अनध्वनि किम्** । **मार्गं याती**ति । मार्गमाक्रम्य याति मार्गेण यातीति यावत् । **उत्पथगतावि**ति । उत्पथेनामार्गेण चेदध्वानं प्रति गतिः स्यात्तदा चतुर्थी स्यादेवेत्यर्थः । **द्वितीयाग्रहणमि**त्यादि । कर्मणि चतुर्थ्यां विकल्पितायां पक्षे न्यायप्राप्तायां द्वितीयायां द्वितीयाग्रहणं 'कर्तृकर्मणोः कृति' इति कृद्योगे या षष्ठी स्यात् तस्या बाधनार्थ-मित्यर्थः । ननु च 'गत्यर्थ–' इत्यत्रार्थग्रहणं किमर्थं यतो गतिरर्थ एव । उच्यते । या गतिर्गमिनैव शब्दान्तरसंनिधानाद्यनपेक्षेणोच्यते पादग्रहणात्मिका प्रधानभूता तस्या ग्रहणं यथा विज्ञायेतेत्येवमर्थम् । तेनेह न । स्त्रियं गच्छति । अजां ग्रामं नयतीति । अत्र हि गमेर्मैथुनमर्थः स्त्रीशब्दसंनिधानाद् गम्यते न तु गमेरेव केवलात् । नयतौ च प्रापणमेव प्रधानं तद्विशेषणं तु पादविहरणमप्रधानम् ॥

इति निरूपिता चतुर्थी ॥

---

१. व्रजं व्रजति व्रजाय व्रजति वा P, D_4, Dc_1, Bc_3; व्रजं व्रजति व्रजाय व्रजति C; व्रजं व्रजति व्रजाय व्रजति कृष्णः D_1; व्रजाय व्रजति व्रजं व्रजति वा कृष्णः D_2. २. मनसा वनं याति P, D_1, D_5; मनसा ईशं याति Dc_1, Bc_3. ३. काशीं B_2; व्रजं D_2. ४. व्रजति D_3. ५. Dropped P, C. ६. कृद्योगेपि B_1, D_1, Bc_3. ७. ग्रामाय ग्रामं वा गता। B_1. ८. ग्रामं dropped Dc_1, Bc_1, Bc_3.

ध्रुवमपायेऽपादानम् ॥१।४।२४॥

अपायो विश्लेषस्तस्मिन् साध्ये यद् ध्रुवमवधिभूतं तदपादानं स्यात् ॥

अपादाने पञ्चमी ॥२।३।२८॥

अपादाने कारके पञ्चमी स्यात् ॥ ग्रामादायाति । धावतोऽश्वात् पतति ।

ध्रुवम् । **अपाय** इति । विश्लेषो विभागस्तद्धेतुभूतो गतिविशेष इति यावत् । तस्मिन् साध्य इति विषयसप्तमी । अपाये साध्यत्वेन विषयभूत[2] इत्यर्थः । यद्यपि ध्रुवशब्दो लोके एकरूपतामाचष्टे ध्रुवमस्य रूपमिति तथाप्यपायं गतिविशेषं प्रति या ध्रुवतोपयुज्यते[3] सैवेहोपादीयते । सा चापायेनानाविष्टता तदुपयोगिता चौदासीन्येन सा चार्थादवधिभाव एव । तस्मादपायसंनिधौ प्रयुक्तो ध्रुवशब्दोऽवधिभावमाचष्ट इत्याह । **यद् ध्रुवमवधिभूतमिति** । तेन चलेऽप्यपादानसंज्ञा सिद्धा स्यादित्यभिप्रेत्य[4] **धावतोऽश्वात्पततीति** द्वितीयमुदाहरणमाह । तथोक्तम्[5] ।

> 'अपाये यदुदासीनं चलं वा यदि वाचलम् ।
> ध्रुवमेवातदावेशात् तदपादानमुच्यते' ॥ इति ।

तथा पततः पतित इत्यत्रापि ध्रुवत्वं युक्तम् ।

> 'पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ ।
> तस्य त्वश्वस्य पतने कुड्यादि ध्रुवं[6] इष्यते' ॥ इति ।

तथा परस्परस्मान्मेषावपसर्पत इत्यत्राप्युक्तम् ।

> 'मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
> मेषयोः स्वक्रियापेक्षं[7] कर्तृत्वं च पृथक् पृथक्' ॥ इति ।

---

१. D₁ drops ध्रुवम्. २. विषयीभूते Nc₁. ३. ध्रुवेनोप° Bc₃. ४. °प्रेत्याह Dc₁, Nc₁, Bc₁, Dc₃, Dc₄. ५. तथा चोक्तम् Dc₃, Dc₄. ६. °ध्रुव Bc₃, Dc₃. ७. °पेक्षे Dc₃.

जुगुप्साविरामप्रमादार्था यतस्तद[1]प्यपादानम्[2]* ॥ पापाज्जुगुप्सते । पापाद्विरमति । धर्मात् प्रमाद्यति ।

भीत्रार्थानां भयहेतुः ॥१।४।२५॥

भयार्थानां त्राणार्थानां च योगे भयहेतुरपादानं स्यात् ॥ चौराद्बिभेति । चौरात् त्रायते ।

जुगुप्सेति । जुगुप्सा निन्दा । विरामो विरतिः । प्रमादोनवधानता । एतेर्था यतः स्युस्तदप्यपादानसंज्ञं स्यादित्यर्थः ।

भीत्रा । भयं भीः । त्राणं त्राः । संपदादित्वाद् भावे क्विप् । भीत्रावर्थौ येषां ते भीत्रार्थास्तेषां भीत्रार्थानां प्रयोगापेक्षया षष्ठीत्येतत् सर्वं चेतसि कृत्वाह । **भयार्थे**त्यादि । भयहेतुरिति किम् । अरण्ये बिभेति । नात्रारण्याद्भयं किं तु तत्स्थेभ्यश्चौरादिभ्यः । ननु चात्र परत्वादधिकरणसंज्ञा बाधिका स्यात् [3]किमेतन्निवृत्त्यर्थेन भयहेतुग्रहणेन । उच्यते । पूर्वस्यायं योगः प्रपञ्चः । न हि देहसंबन्धपूर्वक एवापायः । किं तर्हि । ज्ञानसंबन्धपूर्वकोपि । तथा हि । यो हि पण्डितः स तु यदि मां चौराः पश्येयुर्ध्रुवो मे मृत्युरिति विचारयंस्तान् ज्ञानेन प्राप्य ततो निवर्तेत[4] इत्यस्त्यपायः । एवं सर्वत्र । उत्तरेपि योगाः पूर्वस्यैव प्रपञ्चा ज्ञेयाः । तत्राप्यपायस्तस्य[5] संभवात् । यथा चापायोस्ति तथा **भाष्य** उपपादितम् । प्रपञ्चे च[6] गुरुलाघवं न चिन्त्य[7]मित्यदोषः ।

---

१. अपि dropped D_3, D_2. २. After it—स्यात् D_1. ३. तत् किमे° Bc_3, Dc_3, Dc_4. ४. निवर्तेत Dc_2; निवर्त्स्यत Dc_1. ५. °प्यपायस्य संभ° Nc_1, Dc_2, Dc_3, Dc_4. ६. Dropped Nc_1. ७. विचिन्त्य° Nc_1.

पराजेरसोढः ॥१।४।२६॥

पराजेः प्रयोगेसह्योऽर्थोपादानं स्यात् ॥ पापात् पराजयते[१] ।

वारणार्थानामीप्सितः ॥१।४।२७॥

वारणार्थानां प्रयोगे ईप्सितोऽर्थोपादानं स्यात् ॥ यवेभ्यो गां वारयति ।

अन्तर्धौ येनादर्शनमिच्छति ॥१।४।२८॥

अन्तर्द्धिर्व्यवधानं तन्निमित्तमात्मनो येनादर्शनमिच्छति तदपादानं स्यात् ॥

पराजेः । सोढुं शक्यः सह्यः । न सह्यः असह्यः । **पापात् पराजयत** इति । पापमभिभवितुं न पारयति । पापं कर्तुं न शक्नोतीति यावत् । असोढ इति किम् । शत्रून् पराजयते ।

वार । प्रवृत्तिविघातो वारणम् । ईप्सितशब्दोयं क्रिययाप्तुमिष्टमाह नाभिप्रेतम् । स चेप्सितः कर्तुः कर्मणो वा । विशेषाभावात् । ततश्चाग्नेर्माणवकं वारयति कूपादन्धमित्याद्यपि सिद्धम् । **यवेभ्यो गां वारयतीति** । गां इत्यत्र परत्वादीप्सिततमे कर्मसंज्ञा । ईप्सित इति किम् । यवेभ्यो गां वारयति क्षेत्रे ।

अन्तः । अन्तर्द्धाविति निमित्तसप्तमी विषयसप्तमी सत्सप्तमी वा । येनेत्यदर्शनस्य कर्ता । ननु चात्र 'कर्तृकर्मणोः कृति' इति षष्ठ्या भाव्यम् । न । 'उभयप्राप्तौ कर्मणि' इति नियमात् कर्मण्येव स्यात् कर्म त्वत्रादर्शनस्यात्मा । यद्यप्यत्र सूत्रे तच्छब्दो नोपात्तस्तथापि यत्तदोर्नित्यसंबन्धाल्लभ्यत इत्येतत् सर्वं चेतसि कृत्वाह । **अन्तर्धिरित्यादि** ।

---

१. After it—असोढ इति किम्। शत्रून् पराजयते। B_2, D_5. २. योगे P. ३. गा B_1, D_2, D_4, D_5. ४. जेतुं Dc_2; पराकर्तुं Dc_3. ५. गां Dc, Bc_3 Dc_3. ६. गामित्यत्र Dc_3. ७. गां Bc_3, Dc_3, Dc_4.

मातुर्निलीयते कृष्णः[१] ।

आख्यातोपयोगे ॥१।४।२९॥

उपयोगो विधिपूर्वकं विद्याग्रहणम्[२] । उपयोगे विद्यास्वीकारे[४] आख्याता अपादानं स्यात् ॥ उपाध्यायादधीते[५] ।

जनिकर्तुः प्रकृतिः ॥१।४।३०॥

जायमानस्य[६] प्रकृतिर्हेतुरपादानं स्यात्[७] ॥ ब्राह्मणः प्रजाः प्रजायन्ते[८] ।

मातुर्निलीयते कृष्ण इति । मां माता मा द्राक्षीदिति निलीयते । अत्र कृष्णो मात्रा कर्त्र्या आत्मनः कर्मभूतस्यादर्शनं व्यवधाननिमित्तमिच्छति । अन्तर्धाविति किम् । चौराच्च दिदृक्षते । इच्छतिग्रहणं सत्यपि दर्शने अदर्शनेच्छायां यथा स्यात् ।

आख्याता । विद्यास्वीकारो[९] नियमपूर्वकं विद्याग्रहणं तस्मिन्[३] सति । आख्याता प्रतिपादयिता । उपयोगे इति किम् । नटस्य गाथां शृणोति ।

जनि । जनेः कर्ता जनिकर्ता । अयमेव निर्देशो ज्ञापयति 'कर्तरि च' इति समासनिषेधोऽनित्य इति । जन्यर्थस्य जन्मनः कर्ता स च जायमान एवेत्यभिप्रेत्याह । **जायमानस्येति** । प्रकृतिशब्दोऽत्र कारणसामान्यवाची । नोपादानमात्रवाची । अन्यथा पुत्रात् प्रमोदो जायते अत्र न स्यादित्यभिप्रेत्याह । **प्रकृतिर्हेतुरिति** ।

---

१. After it—माता मां मा द्राक्षीदिति D_3. २. विधिपूर्वकं विद्याग्रहणमुपयोगः C, B_2; उपयोगो विद्यास्वीकारः B_1; D_1, D_2, Dc_1, Bc_3, D_3, D_4 drop from उपयोगो to °ग्रहणम्; नियमपूर्वको विद्यास्वीकार उपयोगः । विद्यास्वीकारे तस्मिन्नुपयोगे आख्याता &c. D_5. ३. तस्मिन् साध्ये B_1. ४. °स्वीकरणे C. ५. C, B_2 have after it—उपयोगे किम् । गायनस्य शृणोति । नटस्य गाथां शृणोति D_5. ६. जायमानप्रकृति° Bc_3. ७. D_1, D_2 drop it. ८. जायन्ते B_2, Dc_1. ९. °स्वीकारोत्र Nc_1.

भुवः प्रभवः ॥१।४।३१॥

भवनं भूः । भूकर्तुः प्रभवस्तथा ॥ हिमवतो गङ्गा प्रभवति । प्रथमं दृश्यत इत्यर्थः ।

ल्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वाच्या* ॥ प्रासादात्[1] प्रेक्षते[2] । आसनात् प्रेक्षते । प्रासादमारुह्य[3] आसने उपविश्य[4][5] प्रेक्षत[6] इत्यर्थः ।

प्रश्नाख्यानयोश्च* ॥ कस्मात्त्वम् । नद्याः ।

भुवः । भवनं भूरिति । संपदादित्वात् क्विप् । ननु हिमवत इत्यत्र पूर्वेणैव सिद्धम् । यतोऽत्रायमर्थो हिमवतो गङ्गा जायत इति तद् व्यर्थमेतदित्याशङ्क्याह । प्रथमं दृश्यत इत्यर्थ इति । एष चार्थो धातूनामनेकार्थत्वात् । तेनात्र जन्यर्थो न । न हि हिमवान् गङ्गायाः कारणं किं तु कारणान्तरोत्पन्ना केवलं तत्र प्रथमं दृश्यते ।

ल्यब्लोपे इति । प्रासादात् प्रेक्षते । आसनात् प्रेक्षते इत्यत्र प्रासादमारुह्य आसने उपविश्य प्रेक्षत इति गम्यमानार्थत्वाद्-प्रयुज्यमानस्यापि ल्यबन्तस्य शब्दस्य[7][8] संबन्धे कर्मणि द्वितीया अधिकरणे सप्तमी च प्राप्नोतीति इह पञ्चमी विधीयते ।

प्रश्नाख्यानयोरिति । कस्मात्त्वमित्यादौ आगच्छसीत्याद्यविवक्षायामेतद्वक्तव्यम् । आगच्छसीत्याद्यनुमाने तु 'अपादाने' इत्येव सिद्धा[9] ।

---

१. Dropped D_2, Dc_1, Bc_3. २. आसनात् प्रेक्षते । प्रासादात् प्रेक्षते । Dc_1, Bc_3, D_4. ३. After it—प्रासादमारुह्येत्यर्थः B_1. ४. प्रासादमारुह्य dropped B_1. ५. उपविश्येत्यर्थः B_1. ६. वीक्षते D_3. ७. Dropped Dc_1, Bc_3. ८. शब्द° Dc_1. ९. सिद्धम् Dc_2.

यतश्चाध्वकालनिर्माणं तत्र पञ्चमी* ॥ तद्युक्तादध्वनः प्रथमासप्तम्यौ* ॥ कालात् सप्तमी* ॥ वनाद् ग्रामो योजनं योजने वा । कार्तिक्या आग्रहायणी मासे ।

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहि-युक्ते ॥२।३।२९॥

एतैर्युक्ते[1] पञ्चमी स्यात्[2] ॥ अन्य[3] इत्यर्थग्रहणम् । अन्यः कृष्णात् । भिन्नो रामात् । आराद्वनात्[4] । इतरो रामात् । ऋते कृष्णात् ।

यतश्चेति । यस्मादवधेरध्वनः कालस्य वा निर्माणं परिच्छेदस्तत्र पञ्चमी । तद्युक्तस्तेन युक्तो योस्त्यध्वा तस्मात् प्रथमासप्तम्यौ स्तः तद्युक्तात् कालात् सप्तमी भवतीति वक्तव्यार्थः । पञ्चमी अपादानत्वादेव सिद्धा ।

अन्या । **अन्य इत्यर्थग्रहणमिति** । तेन पर्याययोगेपि स्यादिति भावः । तथा चोदाहृतम् । **अन्यः कृष्णात्** । **भिन्नो रामादिति** । अथान्यो देवदत्ताद्यज्ञदत्त इत्यत्र यज्ञदत्तादपि पञ्चमी कस्मान्न । उच्यते । तद्विशिष्टमन्यत्वमेकत एवोत्पन्नया शक्यं प्रतिपादयितुमिति द्वितीयात् संबन्धिनः पञ्चमी न । **आराद्वनादिति** । आराच्छब्दो दूरान्तिकयोर्वर्तते । तत्र 'दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्' इति प्राप्ते पञ्चम्युच्यते । **इतरो रामादिति** । इतरशब्दोयं निर्दिश्यमानस्य प्रतियोगिनमाह । यथा क्वचिद् द्वौ प्रकृतौ रामश्चान्यश्च तत्रैकस्तावन्निर्दिश्यते । रामः शूर इति । तस्य निर्दिश्यमानस्य यो द्वितीयः प्रतियोगी स इतरशब्देनोच्यते । इतरो रामात् कातर इति । अतोन्यार्थादन्यः । **ऋते कृष्णादिति** । ऋते इत्यव्ययं वर्जने ।

---

१. एतैर्युक्तैः C. २. P, D_1, B_2, Dc_1, Bc_3 drop it. ३. B_1 drops अन्य इत्यर्थग्रहणम्. ४. B_1 drops आराद्वनात्; आराद्ग्रामात् D_2, Dc_1; आराद्ग्रामात् Bc_3, D_4.

दिक्[1]शब्दाः । पूर्वो ग्रामात् । [2]अयमस्मात् पूर्वः । अञ्[3]चूत्तरपदात् । प्राक् ग्रामात् । आच् । दक्षिणा ग्रामात् । [4]आहि । दक्षिणाहि ग्रामात् । आरभ्यार्थयोगेपीति केचित् । भ[5]वादारभ्य भवात् प्रभृति सेव्यो हरिः ॥ बहिर्योगे च ॥ [6]ग्रामाद्बहिः ।

दिक्शब्दा इति । शब्दग्रहणात् दिशि दृष्टाः शब्दा दिक्शब्दाः । तेन यद्यपि संप्रति दिक्शब्दो देशे काले च वर्तते सोपि दिशि दृष्टः शब्द इति तद्योगे पञ्चमी स्यादिति चेतसि कृत्वा देशवर्तिना योगे उदाहृतं **पूर्वो ग्रामादिति** । कालवर्तिना च **अयमस्मात्पूर्व** इत्युदाहृतम् । दिग्वर्तिना तु योगे इयमस्याः पूर्वेत्युदाहरणं ज्ञेयम् । **प्राग् ग्रामादिति** । प्रपूर्वादञ्चतेः क्विनि तदन्तात् 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इत्यस्तातिः । तस्य 'अ[7]ञ्चेर्लुक्' इति लुकि कृते प्रागिति उदाहरणम् । एवं चेत् दिक्शब्देत्येव सिद्धे किमर्थं पृथग्ग्रहणम् । अतसर्थषष्ठीबाधनार्थमिति ब्रूमः । **आच्** इति । 'दक्षिणादाच्' इति विहित आच्प्रत्ययः । आहीति 'आहि च दूरे' 'उत्तराच्च' इति विहित आहिः । **आरभ्येति** । आङ्पूर्वस्य रभेर्ल्यपि रूपम् । प्रभृत्यर्थयोग इति यावत् । तथा हि **कालिदासेन** प्रयुक्तम् ।

'असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि' । इति । तथा **मुग्धबोधे**प्युक्तम् । 'अन्यारभ्यार्थारात्—' इत्यादि । **बहिर्योगे चेति** । तथा च **महाभाष्ये** । 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यत्रोक्तम् । 'इदं तर्हि प्रयोजनं बहिःशब्देन योगे पञ्चमी न विधीयते तत्रापि यथा स्यात्' इति । तथा 'कथमिवैतत् सिध्यति । पञ्चमीग्रहणसामर्थ्यात्' इति चोक्तम् ।

---

१. दिग्वाचकशब्दात् B_1; दिक्शब्दात् C, D_4, D_5, B_2. २. अयमस्मात् पूर्वः dropped B_1. ३. °पदः P, D_1; °पदाः Dc_1, Bc_3; °पदे D_2, D_3. ४. From आहि to ग्रामात् dropped B_1. ५. भवादारभ्य शुचिः । अर्थग्रहणात् भवात् । B_1. ६. बहिर्ग्रामात् B_1, D_2. ७. अञ्चतेर्लुक् Dc_1, Dc_2, Bc_3. ८. उक्तम् Dc_1, Bc_3.

अपपरी वर्जने ॥१।४।८८॥

एतौ वर्जने कर्मप्रवचनीयौ[1] स्तः ॥

आङ् मर्यादावचने ॥१।४।८९॥

आङ् मर्यादायामुक्तसंज्ञः[2] स्यात्। वचनग्रहणादभिविधावपि[3]॥

अप । प्रकृतेन संबन्धिना कस्यचिदसंबन्धो वर्जनम् । वर्जने किम् । ओदनं परिषिञ्चति । कर्मप्रवचनीयत्वाभावात् उपसर्गत्वेन 'उपसर्गात् सुनोति--' इति षत्वम् ।

आङ् । मर्यादा अवधिः । अत्राभिविधिग्रहणाभावादभिविधौ वर्तमानस्य आङः कर्मप्रवचनीयता नेति भ्रमं निराचिकीर्षुराह । **वचनग्रहणादिति** । वचनग्रहणे हि सति मर्यादेत्येतद्वचनं यस्मिन् सूत्रे तन्मर्यादावचनम् । 'आङ् मर्यादाभिविध्योः' इति सूत्रम् । तत्र सूत्रे उपात्त आङ् कर्मप्रवचनीयः स्यात् । तत्र च आङ् मर्यादाभिविध्योर्वर्तमान उपात्त इत्युभयत्रापि सिध्यति । अथवाभिविधिर्मर्यादाविशेष एव । तथा हि या मर्यादा कार्यसंबन्धा[4] साभिविधिरुच्यते । या तु कार्यासंबद्धा सा मर्यादेति । एवं स्थिते वचनग्रहणाद्विशेषो नाश्रीयते । तेन मर्यादोक्तिमात्रे स्यात् । अन्यथा वचनग्रहणं व्यर्थं स्यात् । यदि मर्यादाविशेष एवाभिविधिस्तर्हि 'आङ् मर्यादाभिविध्योः' इत्यादावभिविधिग्रहणं व्यर्थम् । न व्यर्थम् । मर्यादासामान्यस्य प्रपञ्चार्थम् ।

---

१. °प्रवचनीयसंज्ञौ C. २. Dropped in B_1, D_2, Dc_1, D_3, Bc_3. ३. °ग्रहण° Dc_1. ४. °संबद्धा Dc_2, Dc_3.

पञ्चम्यपाङ्परिभिः ॥२।३।१०॥

एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्॥ अप हरेः परि हरेः[1] संसारः। परिरत्र वर्जने। लक्षणादौ तु। हरिं परि। आ मुक्तेः संसारः। आ सकलाद्ब्रह्म।

प्रतिः प्रतिनिधिप्रतिदानयोः ॥१।४।९२॥

एतयोरर्थयोः[2] प्रतिः कर्मप्रवचनीयः स्यात् ॥

प्रतिनिधिप्रतिदाने च यस्मात् ॥२।३।११॥

यस्मात् प्रतिनिधिप्रतिदाने स्तस्तत्र[3] कर्मप्रवचनीययुक्ते पञ्चमी स्यात् ॥ प्रद्युम्नः कृष्णात् प्रति[4] ॥ तिलेभ्यः प्रतियच्छति माषान्।

पञ्चमी । अप हरेरित्यादि । हरिं वर्जयित्वा संसार इत्यर्थः । **परिरत्र वर्जने** इति । अत्र 'पञ्चम्यपाङ्परिभिः' इति सूत्रे परिर्वर्जनार्थः एव गृह्यते । न लक्षणाद्यर्थः । अपेन साहचर्यादित्यर्थः । परेर्वर्जने इत्यत्र परेर्वर्जने वावचनमिति वक्तव्याद्[5] द्विर्वचनाभावः । **आ मुक्तेरिति** । मुक्तिं मर्यादीकृत्येत्यर्थः । **आ सकलादिति** । सकलमभिव्याप्य ब्रह्म वर्तत इत्यर्थः ।

प्रतिः । मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् ।

प्रतिनिधिः । **प्रद्युम्नः कृष्णात् प्रतीति** । कृष्णो मुख्यस्तत्सदृशः प्रद्युम्नः स कृष्णमनुकरोति । अत्रानुकार्यानुकरणभावः संबन्धः प्रतिना द्योत्यते । **तिलेभ्य** इत्यादि । अत्रोत्तमर्णाधमर्णभावलक्षणसंबन्धः प्रतिना द्योत्यते । तिलान् गृहीत्वा माषान् ददातीति यावत् ।

---

१. D_1 drops परि हरेः. २. एतयोरर्थे D_1; अनयोरर्थे Dc_1, D_4. ३. स्तः dropped D_2. ४. प्रतिनिधिः B_2. ५. Dropped Bc_3. ६. वक्तव्यं Nc_1.

अकर्तर्यृणे पञ्चमी ॥२।३।२४॥

ऋणाद्धेतोरकर्तृत्वेन विवक्षितात् पञ्चमी स्यात्[1] ॥ शताद्बद्धः[2] । अकर्तरि किम् । शतेन बन्धितः[3] ।

विभाषा गुणेऽस्त्रियाम् ॥२।३।२५॥

गुणे[4] हेतावस्त्रीलिङ्गे वा पञ्चमीतृतीये स्तः । जाड्येन जाड्याद्वा बद्धः[5] । गुणे[6] किम् । धनेन कुलम् । अस्त्री[7] किम् । बुद्ध्या मुक्तः[8] ।

अकर्तरि । तृतीयापवादो योगः । **ऋणादित्यादि** । ऋणे यो हेतुरकर्तृत्वेन विवक्षितस्तस्मादित्यर्थः । अकर्तरि किम् । शतेन बन्धितः । शतमत्र ऋणं भवति किं तु प्रयोजककर्ता ।

विभाषा । **धनेन कुलमिति** । धनं द्रव्यं न गुणः । द्रव्याश्रितो हि गुणो न तु द्रव्यमेव । धूमाद्वह्निः । उपलब्धेः । पट इत्यादौ तु विभाषेति योगविभागात् पञ्चमी । योगविभागादिष्ट-सिद्धिरिति धनेन कुलमित्यादौ न । अथवा धूमादिकमुपलभ्याग्न्यादिकं जानातीति ल्यब्लोपे पञ्चमी[9] ।

---

१. अकर्तरीति C, D_2; D_1, D_3, Com. drop from अकर्तरि to बन्धितः. २. बद्धः D_4, D_5, Bc_3. ३. After it—अत्र प्रयोजकत्वात् कर्तृसंज्ञा B_2, D_4. ४. गुणहेता° C. ५. जाड्याद्बद्धो जाड्येन वा C; जाड्याज्जाड्येन वा D_1, D_2, D_4, B_2. ६. गुण इति किम् C. ७. अस्त्रीति किम् C; अस्त्रियां किम् D_5. ८. युक्तः D_2; after it—योगविभागात् धूमादग्निः C, B_2. ९. Dropped Dc_3.

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ॥२।३।३२॥

एभिर्योगे तृतीया वा[1] स्यात् पक्षे पञ्चमीद्वितीये ॥ पृथग्[2] रामेण रामाद्रामं वा इत्यादि ।

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥२।३।३३॥

एभ्योद्रव्यवचनेभ्यः[3] करणे[4] तृतीयापञ्चम्यौ स्तः ॥ [5]स्तोकेन [6]मुक्तः । स्तोकान्मुक्तः[7] ।

[8]असत्त्वे किम् । स्तोकेन विषेण हतः ।

पृथक् । सर्व इमे पृथगादयो सहार्थे वर्तन्ते । भेदेन तूपादानं पर्यायान्तरनिवृत्त्यर्थम् । तेन हिरुक् देवदत्तस्येत्यादौ न । मण्डूकप्लुत्या पञ्चम्यनुवर्तते । 'पृथग्विनानानाभिः' इति योगविभागात् पक्षे द्वितीया चेत्यभिप्रेत्याह । पक्षे पञ्चमीद्वितीये इति ।

करणे । अत्र करणे तृतीयासिद्धौ पक्षे पञ्चमी विधीयते । यद्योगाद् द्रव्यं स्तोकादिव्यपदेशं प्राप्नोति स गुणो यदा स्तोकादिशब्दैरभिधीयते तदैषामद्रव्यवचनता । यदा तु[9] सोयमित्यभिसंबन्धादभेदेन द्रव्यमाहुस्तदैषां द्रव्यवाचित्वम् । [10]करणे किम् । क्रियाविशेषणे कर्मणि मा भूत् । स्तोकं पचति । सर्वत्र हि क्रिया साध्यत्वात् कर्मेति तद्विशेषणमपि कर्म भवति । तच्चाद्रव्यं क्रियायाः । अद्रव्यत्वेन [11]तद्विशेषणस्याप्यद्रव्यत्वात् । स्तोकादीनामेकार्थत्वेपि भेदेनोपादानं पर्यायान्तरनिवृत्त्यर्थम् । तेनेह न । मात्रया मुक्त इति ।

---

१. Dropped D_2, Dc_1, Bc_3. २. पृथग् ग्रामाद्ग्रामेण ग्रामं वा C. ३. °वाचिभ्यः C. ४. करणेर्थे B_1. ५. Before it C has—यदा तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यं तदा स्तोकादीनामसत्त्ववचनता |. ६. स्तोकाद्वा मुक्तः B_1. ७. After it—इत्यादि D_2, D_3, D_4, D_5. ८. Before it—स्तोकादीनामेकार्थत्वेपि भेदेनोपादानं पर्यायान्तरनिवृत्त्यर्थम् । तेनेह न । मात्रया मुक्तः । करणे इति किम् । स्तोकं पचति । B_2; इति किम् C, D_1, Dc_1. ९. तु dropped Dc_2, Dc_4. १०. द्रव्ये Bc_3. ११. तद्विशेषस्यापि Bc_3.

दूरान्तिकार्थेभ्यो द्वितीया च ॥२।३।३५॥

एभ्योसत्त्वर्थेभ्यः प्रातिपदिकार्थे द्वितीयापञ्चमीतृत्तीयाः स्युः[1]। ग्रामस्य[2] दूरं दूरात् दूरेण वा वसति।

षष्ठी शेषे ॥२।३।५०॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबन्धादिः शेषः।

दूरा। द्वितीया साक्षादुच्यते। पञ्चम्यनुवर्तते। तृतीया चकारेण समुच्चीयत इति चेतसि कृत्वाह। **द्वितीयापञ्चमीतृतीयाः स्युरिति**। सत्त्ववाचिभ्यस्तु यथायथं विभक्तयः स्युः। दूरः पन्थाः। दूराय पथे देहि। दूरस्य पथः स्वम्।

इति निरूपिता पञ्चमी ॥

शेषः। प्रकृतादन्यं शेषशब्दो वदन् प्रकृतेभ्यः कारकप्रातिपदिकार्थेभ्योन्यं तस्येदं भावरूपं संबन्धमाहेत्याह। **कारकेत्यादि**। **स्वस्वामिसंबन्धादिरिति**। संबन्ध इति शेषः। आदिनावयवावयविभावादेर्ग्रहणम्। तथोक्तं **भर्तृहरिणा** प्रकीर्णकाण्डे।

'संबन्धः कारकेभ्योन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां च क्रियायां सोभिधीयते' ॥ इति।

---

१. वा स्युः Bc_3. २. ग्रामस्य दूरं ग्रामस्यान्तिकं दूरात् दूरेण वा। P, D_1, D_5, Bc_3; ग्रामस्यान्तिकमन्तिकेनान्तिकाद्वा दूरं दूरात् दूरेण वा B_2, D_4; ग्रामस्यान्तिकं दूरं दूरात् दूरेण वा। D_2, D_3; ग्रामस्य दूरम्। ग्रामस्यान्तिकम्। दूरात् दूरेण वा। Dc_1.

तत्र[1] षष्ठी स्यात्। यद्वाप्रधानं शेषस्तेन द्वयोः[2] पर्यायेण वा न स्यात्॥

तत्र श्रुतायां क्रियायां माषाणामश्नीयादित्यादि। अश्रुतायां तु राज्ञः पुरुष इत्यादि। तत्र संबन्धस्य द्विष्ठत्वादुभयोरपि अपर्यायेण पर्यायेण वा षष्ठी स्यादित्याशङ्क्याह। **यद्वाप्रधानं शेष** इति। अथवा अप्रधानं शेषशब्देनोच्यत इत्यर्थः। अप्रधानस्य शेषत्वं परार्थत्वात्। एवं ह्यभियुक्ता वदन्ति। परार्थः शेष इति। फलमाह। **तेने**त्यादि। तेन कारणेन द्वयोरप्यपर्यायेण पर्यायेण वा षष्ठी न भवति[3]। अप्रधानस्यैव शेषत्वेन तत एव षष्ठ्या उत्पत्स्यमानत्वा[4]दिति भावः। तथा च **काशिकायां वृत्ता**वुक्तम्। 'शेषे संबन्धे यदप्रधानं तच्छेषशब्देनोच्यते। तेनोभयत्र पर्यायेण वा न भवति षष्ठी[5]'। तथा **न्यासकारेणो**क्तम्। 'एकस्मादप्युत्पद्यमाना षष्ठी विशेषणादेव भवति। विशेष्यात्तु प्रथमैव। यस्माच्छेषशब्दो यथा प्रकृतादन्यमाचष्टे तथा परार्थमपि' इति। तथा **भर्तृहरिणा**[6] **प्रकीर्णकाण्डे** उक्तम्।

'द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते' ॥ इति।

तथा **कैय्यटेना**पि[7] **भाष्यदीपे** उक्तम्। 'संबन्धो गुणपदं तस्य द्विष्ठत्वात् प्रधानमपि संस्पृशति' इति।

---

१. अत्र D_2. २. पर्यायेण द्वयोः D_1. ३. भवतीति Dc_4. ४. उत्पद्यमानत्वा° Nc_1. ५. षष्ठीति Bc_1, Dc_4. ६. भर्तृहरिणापि Bc_1, Dc_4, Bc_3, Nc_1. ७. अपि dropped Bc_1, Nc_1, Bc_3, Dc_3, Dc_4.

राज्ञः[1] पुरुषः। कर्मण्यपीति केचित्। भजे[2] शंभोश्चरणयोः।

राज्ञः पुरुष इति। अत्र राजा विशेषणत्वादप्रधानं ततः षष्ठी जाता। पुरुषस्तु विशेष्यत्वात् प्रधानमिति। ततः 'प्रातिपदिकार्थ--' इति प्रथमा। तथोक्तं[3]।

'परार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम्।
विशेष्यं तु प्रधानं स्यात् स्वार्थस्यैव प्रकाशनात्॥
भेद्यभेदकयोः श्लिष्टिः संबन्धोन्योन्यमुच्यते।
द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिस्तु भेदकात्'॥ इति।

यदा तु पुरुषो विशेषणं स्यात् तदा पुरुषस्य राजेति स्यात्। यदा तु द्वावप्यप्रधानत्वेन विवक्ष्येते तदा द्वयोरपि षष्ठी। राज्ञः पुरुषस्य वस्त्रमिति। शेषग्रहणं किम्। 'कर्मणि द्वितीया' इत्यादौ प्रत्ययनियमोर्थनियमश्चेति द्वौ पक्षौ। तत्र प्रत्ययनियमपक्षे यदि शेषे इति नोच्येत[4] कर्मण्येव द्वितीयेति कर्मादिरनियत इति तत्रापि षष्ठी स्यात्। अतः शेषग्रहणं शेष एव यथा स्यादन्यत्र मा भूदिति। अर्थनियमे तु शेषग्रहणं न कार्यम्। **कर्मण्यपीति। केचिदिति। कालिदासबोपदेवपण्डितादयः।** तथा च **कुमारसंभवे कालिदासेन** प्रयुक्तम्[5]।

'न केवलं यो महतां विभाषते शृणोति तस्मादपि यः स पापभाक्।' इति।

तथा **बोपदेवपण्डितैर्मुग्धबोधे** उक्तम्[6]। 'समर्थैर्नार्यस्तस्ताद्धितसुखैर्निर्धारे[7] संबन्धे ढे च षी'। इति। तथोदाहृतं च तैः। 'वर्यस्य[8] पदयोर्भजे' इति। पाणिनीयानां तु मते कर्माविवक्षया[9]

---

१. नराणामधिपः। राज्ञः पुरुषः B_2. २. हरेर्भजति। कटस्य करोति B_2; अनुकरोति भगवतो नारायणस्य D_3; ग्रामस्य गच्छति। भजे शंभोश्चरणयोः। माषाणामश्नीयात्। D_4. ३. तथा चोक्तम् Dc_4. ४. नोच्यते Dc_1, Bc_3. ५. तथा कुमारसंभवेपि Dc_1, Bc_3. ६. उक्तम् Dc_4. ७. समानार्थै° Bc_3. ८. सर्वस्य Dc_3. ९. °क्षायां Bc_3, Dc_3, Dc_4.

षष्ठी हेतुप्रयोगे ॥२।३।२६॥

हेतुश[1]ब्दप्र[2]योगे हेतौ द्योत्ये[3] षष्ठी स्यात् ॥ अन्नस्य हेतोर्वसति ।

सर्वनाम्नस्तृतीया च ॥२।३।२७॥

सर्वनाम्नो हेतुप्रयोगे [4]तृतीया स्यात् षष्ठी च ॥ कस्य हेतोः । केन हेतुना इत्यादि ।

सर्वनामप्र[5]योगे निमित्तकारणहेत्वर्थेषु सर्वासामिष्टिः । किं निमित्तं केन निमित्तेनेत्यादि । एवं किं कारणं

संबन्धविवक्षयैतत् सिध्यति । एतदेवाभिप्रेत्य हरिणोक्तं 'श्रुतायाम्' इति । तथा **पाणिनीयमतदर्पणे कविदर्पणेनोक्तम्** । श्रुतायां यथा । माषाणामश्नीयात् । सुभाषितस्य शिक्षते । न ते सुखस्य जानन्ति । अन्नस्य नो देहि । अक्ष्णोर्दीव्यति । ग्नतः पृष्ठं ददाति । नटस्य शृणोति । वृक्षस्य पत्रं पतति । महतां विभाषते इति । अनुदरा कन्येति वत्सतामपि कर्मादीनामविवक्षयात्र शेषत्वमिति ।

षष्ठी । हेतुरिति हेतुशब्दो गृह्यते प्रयोगस्य शब्दधर्मत्वादित्यभिप्रेत्याह । **हेतुशब्दप्रयोग** इति । ननु चान्नस्येत्यत्र शेषविवक्षयैव षष्ठी स्यात् तत्सामानाधिकरण्याच्च हेतुशब्दात् । सत्यम् । सैव शेषविवक्षानेन द्योत्यते मन्दधियोनुग्रहीतुम् । हेतुतृतीयापवादो वा योगः ।

सर्व । **सर्वनामेत्यादि** । **निमित्तकारणेत्यादि** । पर्यायग्रहणम् । अथ निमित्तवाचिनां शब्दान्तराणामुपलक्षणार्थमित्यभिप्रेत्योदाहृतम् ।

---

१. शब्द dropped D_2. २. योगे Bc_3. ३. After it—च B_1, B_2. ४. तृतीया वा स्यात् B_1; तृतीया षष्ठी च स्यात् B_2. ५. °योग Bc_3, D_4.

राज्ञः[1] पुरुषः। कर्मण्यपीति केचित्। भजे[2] शंभोश्चरणयोः।

राज्ञः पुरुष इति। अत्र राजा विशेषणत्वादप्रधानं ततः षष्ठी जाता। पुरुषस्तु विशेष्यत्वात् प्रधानमिति। ततः 'प्रातिपदिकार्थ--' इति प्रथमा। तथोक्तं[3]।

'परार्थे स्वार्थनिक्षेपादप्रधानं विशेषणम्।
विशेष्यं तु प्रधानं स्यात् स्वार्थस्यैव प्रकाशनात्॥
भेद्यभेदकयोः श्लिष्टिः संबन्धोन्योन्यमुच्यते।
द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिस्तु भेदकात्'॥ इति।

यदा तु पुरुषो विशेषणं स्यात् तदा पुरुषस्य राजेति स्यात्। यदा तु द्वावप्यप्रधानत्वेन विवक्ष्येते तदा द्वयोरपि षष्ठी। राज्ञः पुरुषस्य वस्त्रमिति। शेषग्रहणं किम्। 'कर्मणि द्वितीया' इत्यादौ प्रत्ययनियमोर्थनियमश्चेति द्वौ पक्षौ। तत्र प्रत्ययनियमपक्षे यदि शेषे इति नोच्येत[4] कर्मण्येव द्वितीयेति कर्मादिरनियत इति तत्रापि षष्ठी स्यात्। अतः शेषग्रहणं शेष एव यथा स्यादन्यत्र मा भूदिति। अर्थनियमे तु शेषग्रहणं न कार्यम्। **कर्मण्यपीति। केचिदिति। कालिदासबोपदेवपण्डितादयः।** तथा[5] च **कुमारसंभवे कालिदासेन** प्रयुक्तम्[6]।

'न केवलं यो महतां विभाषते शृणोति तस्मादपि यः स पापभाक्।' इति।

तथा **बोपदेवपण्डितैर्मुग्धबोधे** उक्तम्। 'समार्थैनार्यस्तस्ताद्धित-[7]सुखैर्निर्धारे संबन्धे ढे च षी'। इति। तथोदाहृतं च तैः। 'वर्यस्य[8] पदयोर्भजे' इति। पाणिनीयानां तु मते कर्माविवक्षया[9]

१. नराणामधिपः। राज्ञः पुरुषः B_2. २. हरेर्भजति। कटस्य करोति B_2; अनुकरोति भगवतो नारायणस्य D_3; ग्रामस्य गच्छति। भजे शंभोश्चरणयोः। माषाणामश्नीयात्। D_4. ३. तथा चोक्तम् Dc_4. ४. नोच्यते Dc_1, Bc_3. ५. तथा कुमारसंभवेपि Dc_1, Bc_3. ६. उक्तम् Dc_4. ७. समानार्थै° Bc_3. ८. सर्वस्य Dc_3. ९. °क्षायां Bc_3, Dc_3, Dc_4.

षष्ठी हेतुप्रयोगे ॥२।३।२६॥

हेतुशब्द[1]प्रयोगे[2] हेतौ द्योत्ये[3] षष्ठी स्यात् ॥ अन्नस्य हेतोर्वसति ।

सर्वनाम्नस्तृतीया च ॥२।३।२७॥

सर्वनाम्नो हेतुप्रयोगे तृतीया[4] स्यात् षष्ठी च ॥ कस्य हेतोः । केन हेतुना इत्यादि ।

सर्वनामप्रयोगे[5] निमित्तकारणहेत्वर्थेषु सर्वासामिष्टिः । किं निमित्तं केन निमित्तेनेत्यादि । एवं कि कारणं

संबन्धविवक्षयैतत् सिध्यति । एतदेवाभिप्रेत्य हरिणोक्तं 'श्रुतायाम्' इति । तथा **पाणिनीयमतदर्पणे कविदर्पणेनोक्तम्** । श्रुतायां यथा । माषाणामश्नीयात् । सुभाषितस्य शिक्षते । न ते सुखस्य जानन्ति । अन्नस्य नो देहि । अक्ष्णोर्दीव्यति । घ्नतः पृष्ठं ददाति । नटस्य शृणोति । वृक्षस्य पत्रं पतति । महतां विभाषते इति । अनुदरा कन्येति वत्सतामपि कर्मादीनामविवक्षयात्र शेषत्वमिति ।

षष्ठी । हेतुरिति हेतुशब्दो गृह्यते प्रयोगस्य शब्दधर्मत्वादित्यभिप्रेत्याह । **हेतुशब्दप्रयोग** इति । ननु चान्नस्येत्यत्र शेषविवक्षयैव षष्ठी स्यात् तत्सामानाधिकरण्याच्च हेतुशब्दात् । सत्यम् । सैव शेषविवक्षानेन द्योत्यते मन्दधियोनुग्रहीतुम् । हेतुतृतीयापवादो वा योगः ।

सर्व । **सर्वनामेत्यादि** । **निमत्तकारणेत्यादि** । पर्यायग्रहणम् । अथ निमित्तवाचिनां शब्दान्तराणामुपलक्षणार्थमित्यभिप्रेत्योदाहृतम् ।

---

१. शब्द dropped D_2. २. योगे Bc_3. ३. After it—च B_1, B_2.
४. तृतीया वा स्यात् B_1; तृतीया षष्ठी च स्यात् B_2. ५. °योग Bc_3, D_4.

किं प्रयोजनं किमर्थमित्यादि[1] । निमित्तादिप्रयोगे[2] सर्वनामाप्रयोगेपि[3] प्रातिपदिकमात्रात्[4] तृतीयादय इति केचित् । ज्ञानेन निमित्तेन हरिः सेव्यः ।

षष्ठ्यतसर्थप्रत्ययेन ॥२।३।३०॥

एतद्योगे षष्ठी स्यात् ॥ दक्षिणतो ग्रामस्य । पुरस्ताद्ग्रामस्य ।

किं **प्रयोजनमिति** । **निमित्तादावित्यादि** । **केचिदिति** । काविदर्पणादयः । तथा चोक्तं **पाणिनीयमतदर्पणे** । प्रायग्रहणादसर्वनाम्नस्तृतीयाद्याः । धनेन हेतुना वसति । श्रुताय[5] हेतवे इत्यादि । बन्धनेन निमित्तेनेत्यादि । तथा **पदमञ्जर्यामप्युक्तम्** । भाष्यकारेण तु हेतावित्यत्र पठितत्वादसर्वनाम्नोप्येतद्विधानं मन्यन्ते । तत्र प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न भवतः । अन्येभ्यस्तु यथादर्शनं भवतः । अन्नेन कारणेन वसतीत्यादि ।

षष्ठ्यत । 'दक्षिणोत्तराभ्यामतसुच्' इति । अतसर्थप्रत्यया दिक्शब्देभ्यः स्वार्थे विहितास्तदन्तानां योगे 'अन्यारादितरर्ते—' इति पञ्चम्यां प्राप्तायामिदं वचनम् । **दक्षिणतो ग्रामस्येति** । 'दक्षिणोत्तराभ्यामतसुच्' । **पुरस्ताद्ग्रामस्येति** । 'दिक्शब्देभ्यः—' इत्यादिनास्तातिः । 'अस्ताति च' इति पुरादेशः । एवमुत्तरतो ग्रामस्य । पुरो ग्रामस्य । उपरि ग्रामस्य । उपरिष्टाद्ग्रामस्य । ततः पश्चाद् व्रजतीति **भाष्यकारप्रयोगात्** पञ्चमी ।

---

१. C has before it—किं कार्यम्. २. निमित्तादियोगे D_1. ३. असर्वनामयोगेपि Dc_1, Bc_3. ४. °मात्रे D_1, D_6. ५. धनाय Dc_3.

एनपा द्वितीया ॥२।३।३१॥

एनपायोगे द्वितीया स्यात् षष्ठी[१] च ॥ दक्षिणेन[२] ग्रामं ग्रामस्य वा[३] ।

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥२।३।३४॥

एतैर्योगे षष्ठी स्यात्[४] पक्षे पञ्चमी[५] ॥ दूरं निकटं वा[६] ग्रामस्य ग्रामाद्वा ।

ज्ञोविदर्थस्य करणे ॥२।३।५१॥

जानातेरज्ञानार्थस्य करणे षष्ठी स्यात्[७] ॥ सर्पिषो जानीते ।

एनपा । 'एनबन्यतरस्यामदूरे पञ्चम्याः' इति एनपं वक्ष्यति । तेन योगेन[८] पूर्वेण[९] षष्ठ्यां प्राप्तायामिदं वचनम् । एनपोप्यतसर्थत्वात् । एनपेति योगविभागः षष्ठ्यर्थं कार्यः । अन्यथा हि द्वितीययासौ बाध्येतेत्यभिप्रेत्याह । **षष्ठी चेति** ।

दूरा । 'पृथग्विना—' इत्यतोन्यतरस्यांग्रहणेनुवर्तमानेपि पुनरन्यतरस्यांग्रहणं पक्षे पञ्चम्यर्थम् । अन्यथा पूर्वेणान्यतरस्यांग्रहणेन पक्षे पूर्वसूत्र[१०]श्रुता तृतीया स्यादित्यभिप्रेत्याह । **पक्षे पञ्चमीति** ।

ज्ञोवि । यद्यपि बहवो विदस्तथापि यस्यार्थे ज्ञो वृत्तिः संभवति तदर्थस्यैव निषेधे ग्रहो युक्तः । विद ज्ञाने अस्य चार्थे ज्ञो वृत्तिः संभवति ततोविदर्थस्येति ज्ञानार्थनिषेध इत्यभिप्रेत्याह । **जानातेरज्ञानार्थस्येति** । **सर्पिषो जानीत इति** ।

---

१. षष्ठी च स्यात् B_2. २. दक्षिणेन ग्रामस्य दक्षिणेन ग्रामं वा Bc_3. ३. Dropped D_2. ४. वा स्यात् D_1, D_2, Bc_3, D_4. ५. पञ्चमी च Bc_3. ६. B_1, B_2 drop it. ७. वा स्यात् D_3. ८. योगे Dc_3, Dc_4. ९. Dropped Dc_1. १०. °सूत्रे श्रुता Dc_3.

सर्पिषो प्रवर्तत इत्यर्थः[२] । अविदर्थस्य किम् । स्वरेण पुत्रं जानाति ।

अधीगर्थदयेशां कर्मणि ॥२।३।५२॥

एषां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यात् ॥ अधीगर्थाः स्मृत्यर्थाः । मातुरध्येति[४] । पितुः स्मरति । सर्पिषो दयते ।

'अकर्मकाच्च' इति ज्ञस्तङ् । सर्पिषेत्यादि । अनेकार्थत्वाद् धातूनां प्रवृत्तिरिह ज्ञोर्थः । अथवा भ्रान्त्या सर्वमुदकादिकं सर्पीरूपेण प्रतिपद्यत इति मिथ्याज्ञानं वा ज्ञोर्थः । तदपि ह्यज्ञानमेव ।

अधीगर्थ । अधीगर्था इति । अधिपूर्व इक् स्मरणे अधीक् । तदर्थो येषां ते तथा । दय दानगतिरक्षणेषु । ईश ऐश्वर्ये । कर्मणि शेषत्वेन विवक्षित इति । कर्माद्यविवक्षा शेषः । कर्मत्वेनाविवक्षिते कर्मणि केवलं संबन्धित्वेन विवक्षिते इत्यर्थः । सतोपि ह्यविवक्षा स्याद्यथानुदरा कन्येति । ननु शेषत्वविवक्षाया तु 'षष्ठी शेषे' इत्यनेनैव सिद्धा । सत्यम् । नियमार्थं प्रकरणम् । अत्र विषये षष्ठी स्यादेव । श्रूयत एव न तु लुप्यते ततश्च समासो नेत्युक्तं स्यात् । तेन प्रतिपदविधाना षष्ठी न समस्यत इति सिद्धम् । तेनेदं प्रकरणं शेषषष्ठीसमासनिषेधार्थम् । मातुः स्मरणम् । कारकषष्ठीसमासस्तु स्यादेव । मातृस्मरणम् । कः पुनर्विशेषः शेषषष्ठिसमासे कारकषष्ठीसमासे वा । अयमस्ति विशेषः । कारकषष्ठ्याः समासे सति कृत्स्वरः स्यात् ।

---

१. After it—करणभूतेन हवने B_1, B_2; D_3 has उपायेन; C has करणभूतेन. २. C has after it—अथवा भ्रान्त्या सर्पिर्मिथ्या जानातीत्यर्थः. ३. विवक्षितात् Dc_1. ४. मातुः P, B_2, Dc_1, Bc_3. ५. Dropped Dc_1, Bc_3, Dc_3, Dc_4. ६. स्वज्ञान° Dc_1, Bc_3. ७. Dropped Dc_1, Bc_3, Dc_3, Dc_4. ८. °षष्ठ्यां Dc_3.

जगतामीष्टे । शेषे[1] इत्येव । मातरं स्मरति ।

कृञः प्रतियत्ने ॥२।३।५३॥

गुणाधानेर्थे[2] कृञः कर्मणि षष्ठी स्यात् ॥ एधोदकस्योपकुरुते ।

रुजार्थानां भाववचनानामज्वरेः ॥२।३।५४॥

भावकर्तृकाणां[3] रुजार्थानां ज्वरिवर्जितानां[4] कर्मणि षष्ठी स्यात् ॥

शेषषष्ठ्याः[5] समासे समासान्तोदात्तत्वमिति । **मातरं स्मरतीति** । अत्र कर्मणः कर्मत्वेन विवक्षितत्वात् संबन्धस्याविवक्षितत्वान्न षष्ठी । कर्मणीति किम् । मातुर्गुणैः स्मरति । कर्मग्रहणाद् गुणानां करणभूतानां शेषविवक्षायामपि तेभ्यः षष्ठी न ।

कृञः । सतो गुणान्तराधानं प्रतियत्नः । अत एवाह । **गुणाधानेर्थे** इति । **एधोदकस्योपस्कुरुत** इति । 'जातिरप्राणिनाम्' इत्येकवद्भावः । 'गन्धना—'[6] इति सूत्रेण तङ् । 'उपात् प्रतियत्ने' इति सुट् । कृञः किम् । एधोदकमीक्षते । प्रतियत्ने किम् । कटं करोति । शेषत्वेन विवक्षिते इत्येव । एधोदकमुपस्कुरुते । कर्मणीत्येव । एधोदकस्योपस्कुरुते । प्रज्ञया ।

रुजा । सर्वे रुजार्था धातवो भाववचना एवेति भाववचनग्रहणसामर्थ्यान्नात्र धातुवाच्यो भावो विवक्षितः किं तु घञादिप्रत्ययवाच्यः । वक्तीति वचनः । कर्तरि ल्युट् । 'भावो वचनो येषां ते तथा । रुजर्थानां भावस्य वचनक्रियाकर्तृत्वं न संभवतीति सामर्थ्यात् वचनशब्देन प्रकृत्यर्थं परित्यज्य प्रत्ययार्थमात्रं कर्तृत्वं विवक्षितमिति ज्ञायते[7] ततश्च भावकर्तृका इत्यर्थः सिद्ध इत्यभिप्रेत्याह । **भावकर्तृकाणामिति** । सूत्रे भावकर्तृकाणामिति वाच्ये भाववचनानामिति वैचित्र्यार्थमुक्तम् । **रुजार्थानामिति** ।

---

१. शेषमित्येव D_2. २. Before it—सतो गुणान्तराधानं प्रतियत्नः । Bc_3. ३. भावकर्तृणां B_1. ४. ज्वर° D_2. ५. शेषषष्ठ्यास्तु समासान्तो° Dc_3; शेषषष्ठ्यास्तु समासे Dc_4. ६. गन्धनादिसूत्रेण Dc_4, Bc_1, Nc_1, Bc_3. ७. विज्ञायते Dc_3.

चौरस्य रुजाति रोगः । भावेति[1] किम् । नदी कूलं रुजाति । अज्वरिसंताप्योर्वाच्यम्[2]* ।। चौरं ज्वरयति संतापयति[3] । शेषे[4] एव । चौरं रुजति[5] ।

आशिषि नाथः ॥२।३।५५॥

नाथतेः कर्मणि षष्ठी स्यादाशिषि[6] ।। सर्पिषो नाथते[7] । आशिषि किम् । बटुं नाथति[8] । याचते इत्यर्थः ।

रुजाशब्दस्य भिदादिपाठात् केचित् साधुत्वं वदन्ति । केचित्त्वस्मादेव निपातनात्[9] । रुजा अर्थो येषां[10] ते रुजार्थाः । तेषाम् । चौरस्येत्यादि । अत्र रोगो भावः कर्ता । नदी कूलं रुजतीति । अत्र नदी द्रव्यं कर्त्रीति न भावकर्तृको रुजिः । ननु त्र रूढ्या रुजाशब्दो व्याधिमेवाह । भङ्गवाची चात्र रुजिः । एवं तर्हि प्रत्युदाहरणदिगियं प्रदर्शिता[11] । इदं त्वत्र प्रत्युदाहरणम् । श्लेष्मा पुरुषं रुजतीति । चौरं ज्वरयति संतापयति वेति[12] । रोग इति शेषः । ज्वर रोगे । घटादिः[13] । रुजार्थानां किम् । एति जीवन्तमानन्दो नरं वर्षशतादपि । शेष इत्येवेति । शेषे इत्यस्यानुवृत्तिं प्रति शङ्का न कार्येत्यर्थः । चौरं रुजतीत्यत्र कर्मणो विवक्षितत्वान्न षष्ठी ।

आशिषि । नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु । **सर्पिषो नाथत** इति । सर्पिर्मे भूयादित्याशास्ते[14] इत्यर्थः । 'आशिषि नाथः' इत्युपसंख्यानात्तङ् ।

---

१. भावे B₁. २. B₁ has इति before वाच्यम्; From भावे to चौरं रुजति dropped D₂. ३. C, D₁, B₂, Dc₁ have वा after it. ४. शेषे इत्येव B₁, D₄, Com. ५. After it—रोगः D₅. ६. °दाशिषि गम्यायाम् B₂. ७. After it—सर्पिर्मे भूयादित्यर्थः B₁. ८. नाथयति D₂, D₅. ९. निर्वचनात् Nc₁. १०. विद्यते येषां ते Nc₁. ११. दर्शिता Dc₄, Dc₃, Dc₂, Bc₁. १२. वेति dropped Dc₁, Bc₃. १३. इति घटादिः Dc₁, Bc₃. १४. Dropped Dc₁, Bc₁, Bc₃.

जासिनिप्रहृणनाटक्राथपिषां हिंसायाम् ॥२।३।५६॥

एषां[1] हिंसार्थानां कर्मणि षष्ठी[2] ॥ चौरस्योज्जासयति[3] । निप्रौ संहतौ व्यस्तौ[4] वा । चौरस्य निप्रहन्ति प्रणिहन्ति[5] निहन्ति[6] वा । चौरस्योन्नाटयति क्राथयति[7] पिनष्टि । हिंसायां किम् । धानाः पिनष्टि । शेषे एव । चौरं निहन्ति ।

व्यवहृपणोः समर्थयोः ॥२।३।५७॥

एतयोर्द्यूतव्यवहारे समर्थयोः[9] कर्मणि षष्ठी स्यात्[10] ॥ शतस्य व्यवहरते[11] पणते वा । समर्थयोः[12] किम् ।

जासि । जसु हिंसायां ताडने चेति चुरादिः[13] । न जसु मोक्षणे इति दिवादिः । निप्रपूर्वो हन्तिः । नटक्राथौ चुरादी हिंसार्थौ । जासीति विकृतनिर्देशो यत्रास्यैतद्रूपं तत्र यथा स्यादिह मा भूत् । दस्युमजीजसत् । नटेरपि विकृतनिर्देशात् दस्युमनीनटत् इत्यत्र न षष्ठी । क्रथेस्तु विकृतनिर्देशो दस्युमचिक्रथदित्यत्र षष्ठ्यभावार्थे । घटादित्वेपि क्राथयतीत्यादौ निपाताद् वृद्ध्यर्थश्च । धानाः पिनष्टीति । अत्र हिंसा नास्तीति । तस्याः प्राणिधर्मत्वात् । एषां किम् । चौरं हन्ति । अभावकर्तृकार्थं वचनम् ।

व्यवहृपणोः । व्यवपूर्वो हृञ् हरणे । पण व्यवहारे स्तुतौ च । शतस्य व्यवहरते पणते वेति । शतं क्रयविक्रयेण विनियुङ्क्ते । दीव्यतीत्यर्थः । पणते इत्यत्रास्तुत्यर्थत्वान्नायः ।

---

१. हिंसार्थानामेषां B_1. २. After it—स्यात् D_1, D_2, B_1, C. ३. °ज्जासयते C. ४. विपर्यस्तौ वाच्यौ D_1, D_3; विपर्यस्तौ B_2; व्यस्तौ विपर्यस्तौ वा । Bc_3, D_5 ; विपर्यस्तौ च D_4. ५. निहन्ति प्रहन्ति प्रणिहन्ति वा । D_1, D_5, Dc_4. ६. प्रहन्ति प्रणिहन्ति वा । P, D_2; प्रणिहन्ति निहन्ति प्रहन्ति वा C, Dc_1, Bc_3. ७. चौरस्योत्क्राथयति चौरस्य पिनष्टि । C. ८. Dropped D_2. ९. समानार्थयोः P, D_1. १०. Dropped P, D_1, D_4, D_5, Dc_1, Bc_3. ११. व्यवहरति P. १२. C has before it—द्यूते क्रयविक्रये च समानार्थत्वमनयोः ।. १३. चौरादिः Bc_3.

शलाकां[1] व्यवहरति । विक्षपतीत्यर्थः[2] । ब्राह्मणं[3] पणायति । स्तौतीत्यर्थः । शेषे एव । शतं [4]व्यवहरति[5] ।

दिवस्तदर्थस्य ॥२।३।५८॥

द्यूतार्थस्य दिवः कर्मणि षष्ठी स्यात्[6] ॥ शतस्य दीव्यति ॥

विभाषोपसर्गे ॥२।३।५९॥

[7]शतस्य शतं वा प्रतिदी[8]व्यति ॥

कृत्वोर्थप्रयोगे कालेधिकरणे ॥२।३।६४॥

कृत्वोर्थानां प्रयोगे कालवाचिनि अधिकरणे षष्ठी स्यात्[9] ॥

स्तुत्यर्थस्यैवायस्येष्टत्वात् । शलाकां व्यवहरतीति । गणयतीत्यर्थः । अत्र चार्थे पणिर्निवर्तत इत्यसमानार्थत्वम् । **स्तौतीत्यर्थ** इति । पणायतीत्यस्य । अत्र चार्थे व्यवहरतिर्निवर्तत इत्यसमर्थत्वम् ।

दिवः । **तदर्थस्येति** । व्यवहृपणसमानार्थतोच्यत इत्यभिप्रेत्याह । **द्यूतार्थस्येति** । द्यूतव्यवहारार्थस्येत्यर्थः । तदर्थस्य किम् । ब्राह्मणं दीव्यति । स्तौतीत्यर्थः । योगविभाग उत्तरार्थः ।

विभाषा । तदर्थस्येत्येव । [10]शलाकाः प्रतिदीव्यति । क्रीडादिरत्रार्थः ।

कृत्वोर्थ । 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति वक्ष्यति कृत्वसुचम् । तदर्थानां प्रत्ययानामित्यर्थः ।

---

१. शिलाकां D_1. २. प्रतिक्षिपतीत्यर्थः B_1; Bc_3 drops विक्षिपतीत्यर्थः; D_3 has द्यूतव्यवहारे किम् for विक्षिपतीत्यर्थः. ३. Before it—द्यूतव्यवहारे किम् D_4. ४. व्यवहरते B_1, D_2. ५. After it—द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः B_2. ६. Dropped P, D_2, D_4, D_5, Dc_1, Bc_3. ७. शतं शतस्य वा D_1; Before it C has the Vṛitti—उपसर्गे सति दिवः कर्मणि षष्ठी वा स्यात् ।; D_1 has उपसर्गप्रयोगे दिवः कर्मणि वा षष्ठी ।. ८. प्रदीव्यति C, D_2, D_3, D_4, D_5. ९. Dropped Bc_3. १०. शलाकाः is dropped in Dc_1, Bc_1, Bc_3.

पञ्चकृत्वोह्नो भुङ्क्ते । द्विरह्नो[1] भुङ्क्ते । शेषे[2] एव द्विरहन्यधीते[2] ।

कर्तृकर्मणोः कृति ॥२।३।६५॥

कृत्प्रयोगे कर्तरि कर्मणि च[3] षष्ठी स्यात्[4]। कृष्णस्य कृतिः।

पञ्चकृत्वोह्न भुङ्क्त इति । पञ्चवारं दिवसे भुङ्क्ते इत्यर्थः । **द्विरह्नो** भुङ्क्ते । 'द्वित्रिचतुर्भ्यः सुच्' इति सुच् । **शेष एवेति** । अधिकरणत्वेनाविवक्षित एवाधिकरण इत्यर्थः । कृत्वोर्थग्रहणं किम् । अहनि शेते । प्रयोगग्रहणं किम् । अहनि भुङ्क्ते । अत्र प्रकरणादेर्गम्यते द्विस्त्रिर्वेति न तु प्रयुक्तम् । काले किम् । द्विः कांस्यपात्र्यां भुङ्क्ते । अधिकरणे किम् । द्विरह्ना भुङ्क्ते ।

कर्तृकर्मणोः । **कृष्णस्य कृतिरिति** । भावे कर्मणि वा 'स्त्रियां क्तिन्' इति क्तिन् । **जगतः कर्तेति** । कर्तरि तृच् । **कृतपूर्वी कटमिति** । पूर्वं कृतमनेन । 'सपूर्वाच्च' इतीनिः । अत्र कर्ता तद्धितेनैवोक्त इति तत्र षष्ठीप्राप्तिरेव न । कर्म तु नोक्तमित्यसति कृद्ग्रहणे[5] कटात् षष्ठी स्यात् । ननु वाक्यमेवैतन्न घटते । तथा हि कर्म निष्ठयोक्तमिति द्वितीया न स्यात् । नापि तद्धितोसामर्थ्यात् । तच्च सापेक्षत्वात् । तथा हि कृतशब्दः कटमपेक्षते । नैते दोषाः । धातोर्ह्युत्पन्ना निष्ठा कर्मसामान्यमेवाभिधातुं समर्था न कर्मविशेषं कटगतम् । वाक्ये

---

१. द्विरह्नो भुङ्क्ते dropped D_1, D_4, C. २. After it—शेष इति निवृत्तम् । P, D_4. ३. Dropped D_2. ४. Dropped D_3, D_4, B_1, P. ५. °ग्रहे Dc_2.

जगतः कर्ता[१] कृष्णः। कृति[२] किम्। तद्धिते मा भूत्। कृतपूर्वी कटम्। शेष इति निवृत्तम्।

उभयप्राप्तौ कर्मणि ॥२।३।६६॥

उभयोः[३] प्राप्तिर्यस्मिन् कृति[४] तत्र कर्मण्येव षष्ठी[५] ॥

तु कृत इत्यनेन सामानाधिकरण्यात् कटस्यापि[६] कर्मत्वमुच्यते। तद्धिते तूत्पन्ने[७] एकार्थीभावात् सामानाधिकरण्यं[८] निवृत्तमिति केन कटादेः कर्मत्वमुच्येत। क्रिया तु प्रकृत्यर्थत्वाद्यथा वाक्ये गुणभूता साधन-संबन्धमनुभवति तथा वृत्तावपीति करोत्यर्थापेक्षं कटस्य कर्मत्वं घटते। तस्मात् स्यादेव द्वितीया वृत्तिसमानार्थं च वाक्यं स्यात्। न च वृत्तौ बाह्यं कटादि कर्म गम्यते तेन प्रत्यये क्रियमाणे वाक्ये कटादिकर्मापेक्षा व्यर्थेति न क्रियते। अत एवैवं विगृह्यते कृतं पूर्वमनेनेति। अतो न सापेक्षतेति स्यादेव तद्धितः। शेष इति निवृत्तमिति। कर्मणीत्यनुवर्तमानेपि पुनः कर्मग्रहणं पूर्वस्य कर्मग्रहणस्य निवृत्तिमाख्याति। तन्निवृत्तौ तत्संबद्धं शेषग्रहणमपि निवृत्तमिति भावः।

उभय। पूर्वेण प्राप्ता षष्ठी नियम्यते। उभयप्राप्ताविति न तत्पुरुषः किं तु बहुव्रीहिरित्यभिप्रेत्याह। **उभयोः प्राप्ति-र्यस्मिन् कृतीति**। एकस्मिन्नेव कृति यदि कर्तरि कर्मणि च षष्ठी प्राप्नोति तर्हि कर्मण्येव षष्ठी स्यादित्यर्थः।

---

१. Dropped D_4. २. कृतीति C, Dc_1. ३. उभयप्राप्ति° D_1. ४. B_1 drops कृति. ५. C, D_1 have स्यात् after it. ६. अपि dropped Dc_2. ७. ह्युत्पन्ने Dc_2. ८. °करण्यनिवृत्तिरिति Dc_3.

चित्रं गवां दोहो गोपेन ।

स्त्रीप्रत्यययोरककारयोः प्रयोगे नेति वाच्यम्* ॥ भेदिका बिभित्सा वा रुद्रस्य जगतः ॥ शेषे स्त्रीप्रत्यये वा* ॥ विचित्रा जगतः कृतिर्हरेर्हरिणा वा ॥ केचिदविशेषेण विभाषामिच्छन्ति । शब्दानामनुशासनमाचार्येण आचार्यस्य वा ।

क्तस्य च वर्तमाने ॥२।३।६७॥

वर्तमानार्थक्तस्य योगे षष्ठी स्यात् ॥ सतां ज्ञातः ।

चित्रमित्यादि । दोह इति घञ् कृत् तत्प्रयोगे गवामित्यत्र कर्मण्येव षष्ठी जाता नागोपे कर्तरि । बहुव्रीहिः किम् । आश्चर्यमिदमोदनस्य पाको विप्राणां च प्रादुर्भावः । अत्रौदनः पाकस्य कर्म विप्राः प्रादुर्भावस्य कर्तार इत्येकस्मिन् कृति नोभयोः प्राप्तिः । **स्त्रीप्रत्यययोरिति** । स्त्रियामित्यधिकारेण विहितयोरकाकारयोः प्रयोगे नियमो नेति वाच्यम् । अकः पर्यायार्हर्णोत्पत्तिषु ण्वुजित्यादिः । अकारोऽप्रत्ययादिति । **भेदिकेत्यादि** । रुद्रेण जगतो भेदनं भेत्तुमिच्छा वेत्यर्थः । यथाक्रमं ण्वुजकारौ । **शेष इति** । अकाकारव्यतिरिक्ते । **केचिदिति** । तथा **काशिकाकारेणैतदेव** पठितम् । **केचिदविशेषेणेत्यादि** ।

क्तस्य । 'न लोक—' इति षष्ठीनिषेधापवादः । **सतां ज्ञात इति** । 'मतिबुद्धि—' इति वर्तमाने क्तः । सतामिति कर्तरि षष्ठी । शीलितो देवदत्तेनेत्यादौ यद्यपि वर्तमाने क्तो विहितस्तथाप्यत्र 'चतुर्थ्यर्थे बहुलं छन्दसि' इत्यतो बहुलग्रहणानुवृत्तेर्न षष्ठी । कान्तो हरिश्चन्द्र इव प्रजानामित्यादौ तु स्यात् । क्तस्य किम् । अन्नं पचमानः । वर्तमाने किम् ।

---

१. विचित्रं D_2. २. P, D_4 have °गोपालकेन. ३. जगतां D_2. ४. वर्तमानार्थस्य क्तस्य C, B_2, D_2, D_4, Bc_3. ५. B_1 drops it. ६. मतः P, D_4. ७. °लकारौ Dc_3. ८. यथा Dc_1, Bc_3.

नपुंसके भावे क्तस्य योगे शेषविवक्षायां वा ॥ सतां [1]गतम् । [2]कर्तृत्वे तु सद्भिर्गतम् ॥

अधिकरणवाचिनश्च[3] ॥२।३।६८॥

क्तस्य योगे षष्ठी[4] ॥ इदमेषामासितम्[5] ॥

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥२।३।६९॥

[6]एषां प्रयोगे न[7] षष्ठी[8] ॥ [9]लादेशाः । कुर्वन् कुर्वाणः चकृवान्

ग्रामं गतः । नपुंसके भाव उपसंख्यानमित्युपसंख्यानम् । शेषविज्ञानात् सिद्धमित्युपसंख्यानप्रत्याख्यानं चार्थतः पठति । **नपुंसक** इत्यादि । नपुंसके भावे यो क्तो विहितस्तस्य योगे च षष्ठी स्यात् । सा च शेषविवक्षायां कर्माद्यविवक्षायां तथा चोपसंख्यानं विना 'षष्ठी शेषे' इत्यनेनैव सिद्धेत्यर्थः । **कर्तृत्वे त्विति** । यदा कर्तृत्वं विवक्ष्यते तदा शेषाभावात् तृतीयैव स्यात् । तथा च सद्भिर्गतमिति स्यादित्यर्थः ।

अधिकर । **इदमेषामासितमिति** । 'क्तोऽधिकरणे च' इत्यधिकरणे क्तः । इदमेषां भुक्तमोदनस्येत्यत्र उभयप्राप्तौ कर्मणीति नियमो न । मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरानिति परिभाषया ।

न लोक । 'कर्तृकर्मणोः कृति' इति प्राप्ता षष्ठी निषिध्यते । **कुर्वन् कुर्वाण** इति । 'लटः शतृशानचौ' इति शतृशानचौ । **चकृवानिति** । 'क्वसुश्च' इति लिटः क्वसुः । द्वित्वादि ।

---

१. ज्ञातम् D_2. २. साद्भिर्वा गतम् B_1; कर्तृत्वेन तु D_3; कर्तृत्वे साद्भिर्गतम् Bc_3, कर्तृत्वे तु dropped D_3. ३. C has अधिकरणवाचिनः before it; B_1 has एतदर्थस्य on the margin. ४. After it—स्यात् D_1, D_5. ५. B_1 has गतं भुक्तं वा after it. ६. एतेषां प्रयोगे षष्ठी न D_2. ७. कर्तृकर्मणोः षष्ठी न स्यात् C. ८. After it—स्यात् D_5. ९. लादेशाःशतृशानच्क्वसुकानच्कीकिनः B_2. १०. Dropped Bc_3, Dc_4; प्रयोगे षष्ठी Dc_3.

चक्राणः चेक्रिर्वा सृष्टिं हरिः । उ—हरिं दिदृक्षुरलंकरिष्णुर्वा ॥ उक—दैत्यान् घातुको हरिः । कमेरनिषेधः । लक्ष्म्याः कामुकः[2] । अव्ययम् । जगत् सृष्ट्वा । सुखं कर्तुम् । निष्ठा । दैत्यान् हतवान्[3] । विष्णुना[4] हता दैत्याः । खलर्थः[5] । ईषत्करः प्रपञ्चो हरिणा[6] । तृन्निति शतृतृकारेण[7] तृनो नकारेण प्रत्याहारः ।

चक्राण इति । 'लिटः कानज्वा' इति कानच्[8] । चक्रिरिति । 'आदृगमहनजनः किकिनौ लिट् च' इति किकिनौ । यद्यपि किकिनोरलादेशत्वेन ल इति ग्रहो नास्ति तथापि लिड्वत्त्यातिदेशेन स्यात् । विशेषातिदेशे हि नान्तरीयकः सामान्यातिदेशः । विशेषस्य सामान्येन्तर्भावात् । ल इति सामान्याश्रितो निषेधः किकिनोरपि स्यादिति युक्तं चक्रिरित्युदाहरणम् । सृष्टिमित्यत्र षष्ठी न जाता । दिदृक्षुरिति । 'सना शंसभिक्ष उः' इत्युः । अलंकरिष्णुरिति[9] । 'अलं कृञ्—' इत्यादिना इष्णुच् । घातुक इति । 'लषपत—' इत्यादिनोकञ् । कमेरिति । कमु कान्तौ अस्मात् परस्योकञः प्रयोगे षष्ठ्या अनिषेधः । सृष्ट्वेति । 'समानकर्तृकयोः' इति क्त्वा । कर्तुमिति । 'तुमुन्ण्वुलौ' इति तुमुन् । अव्ययनिषेधे तोसुन्कसुनोरनिषेधः । सूर्यस्योदेतोः । पुराक्रूरस्य विसृपः । हतवान् । हता इति । निष्ठेति । क्तक्तवतू । ईषत्कर इति । 'ईषद्दुःसुषु—' इत्यादिना खल् । तृन्नितीति । ततः 'लटः शतृशानचौ' इत्यारभ्य 'तृन्' इति

---

१. चाक्रिवान् D_1. २. कामुको हरिः C, B_2. ३. P, D_2, D_4, B_2 have विष्णुः after it. ४. हरिणा B_1. ५. खलर्थाः D_3, D_5. ६. ईषत्पानः सोमो भवता after it in C. ७. शतृतृकारस्य तृनो नकारेण C, B_1, B_2. ८. शानच् Bc_3. ९. अलंकरिष्णुर्वेति Bc_3, Dc, Dc_4.

शानन् । सोमं पवमानः[2] । चानश् । आत्मानं मण्डयमानः । शतृ । वेदमधीयन् । तृन् । कर्ता लोकान्[4] ।

द्विषः शतुर्वा* ॥ मुरस्य मुरं वा द्विषन् ।

अकेनोर्भविष्यदाधमर्ण्ययोः ॥२।३।७०॥

भविष्यत्यकस्य[5] भविष्यदाधमर्ण्यार्थेनश्च योगे कर्मणि न[6] षष्ठी । सतः[7] पालकोवतराति । व्रजं गामी । सुखमृणं दायी ।

सूत्रपर्यन्ताः प्रत्यया गृह्यन्ते तेन शानन्[8]चानश्शतॄणामपि निषेधः । **पवमान** इति 'पूङ्यजोः शानन्' । **मण्डयमान** इति । 'ताच्छील्यवयोवचनशक्तिषु चानश्' । **अधीयन्निति** । 'इङ्धार्योः' इति शतृ ।

अकेनोर्भविष्य । **भविष्यत्यकस्येति** । आधमर्ण्ये तस्यासंभवात् । **भविष्यदाधमर्ण्यार्थेन** इति । इन उभयत्रापि संभवात् । **सतः पालक** इति । 'तुमुन्ण्वुलौ' इति ण्वुल् । सतः पालयितुमवतरतीत्यर्थः । **व्रजं गमीति** । 'गमेः' इत्यौणादिक इनिः । स च 'भविष्यति गम्यादयः' इति भविष्यति । **सुखमृणं दायीति** । 'आवश्यकाधमर्ण्ययोर्णिनिः । भविष्यदाधमर्ण्ययोः किम् । यवानां लावकः । वर्तमाने ण्वुल् । अवश्यंकारी कटस्य । आवश्यके णिनि कथं वर्षशतस्य पूरकः । पुत्रपौत्राणां दर्शक इति नायं भविष्यदधिकारविहितोकः[10] । किं तु 'ण्वुलतृचौ' इति सामान्यविहितः[11] ।

---

१. शानच् Bc_3, Dc_3. २. देवं यजमानः after it in C. ३. शत्रुं निघ्नानः after it in C. ४. P has विष्णुः and C हरिः after it. ५. भविष्यवकस्य C. ६. षष्ठी न स्यात् C; षष्ठी न D_2. ७. Before it—ओदनं भोजको व्रजति । सतः पालको व्रजति P; जगत्पालको D_3; D_4 follows P but has सतः पालकोवतराति ।. ८. शानच् Dc_3. ९. After it—कर्तेति । 'तृन्' इति तृन् । द्विष इति । द्विषः परो यः शता तस्य प्रयोगे वा निषेध इति वाच्यम् । द्विषन्निति । द्विषोमित्र इति शद्ब । Dc_3, Dc_4. १०. °विहितः । किं तु Bc_3. ११. सामान्यं विहितः Bc_1.

कृत्यानां कर्तरि वा ॥२।३।७१॥

कृत्यानां प्रयोगे कर्तरि वा[1] षष्ठी स्यात् ॥ मया मम वा सेव्यो हरिः। उभयप्राप्तौ कृत्ये षष्ठी न ॥ नेतव्या व्रजं गावः कृष्णेन।

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ॥ २।३।७२॥

[3]तुल्यार्थैर्योगे तृतीयाषष्ठ्यौ[2] स्तः[4]॥ कृष्णस्य कृष्णेन वा [5]तुल्यः सदृशः समो वा प्रद्युम्नः। अतुलोपमाभ्यामिति[6] किम्। शेषे षष्ठ्येव। तुला उपमा वा[7] कृष्णस्य नास्ति[8]।

कृत्यानाम्। कर्तरि किम्। गेयो माणवकः साम्नाम्। 'भव्यगेय—' इति कर्तरि गेयो निपातितः। साम्नामिति [9]कर्मणि षष्ठी। नेतव्या इति। कर्मणि तव्यः। वक्तव्यादुभयत्र न षष्ठी।

तुल्य। शेषविषयत्वात् पक्षे षष्ठीत्यभिप्रेत्याह। तृतीयाषष्ठ्यौ स्त इति। तुल्यार्थैरित्यत्र बहुवचननिर्देशादेव स्वरूपविधेर्निरस्तत्वेऽप्यर्थ-ग्रहणं ये पदान्तरनिरपेक्षतया तुल्यतामाहुस्तत्परिग्रहार्थम्। तेन द्योतका इवादयो निवर्तिताः। गौरिव गवयः। यथा गौस्तथा गवय इति। वेत्यनुवर्तमानेऽन्यतरस्यांग्रहणमुत्तरसूत्रे चकारेण तस्यानुकर्षणार्थम्। इतरथा हि तृतीयानुकृष्येत। 'तुलां यदारोहति दन्तवाससा' इति सहार्थतृतीयेति न दोषः।

---

१. षष्ठी वा B_1. २. Before it—तुलोपमाव्यतिरिक्तैः B_2. ३. After it—वा B_1, D_2, P, C. ४. After it—तुलोपमाभ्यां न D_1. ५. सदृशः तुल्यः &c, D_2. ६. P, D_1, D_2 drop इति. ७. Dropped Bc_3. ८. B_1 has शेषे षष्ठ्येव after this; नास्त्येव B_2. ९. कर्मणि नित्यं षष्ठी Dc_3.

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ २।३।७३॥

[१]आयुष्यार्थादियोगे चतुर्थीषष्ठ्यौ स्त आशिषि ॥ कृष्णाय कृष्णस्य वा[२] चिरं जीवितं भूयात् । एवमायुष्यादिभिः[३] ।

तृप्त्यर्थानां करणे षष्ठी वा । फलैः फलानां वा[४] तृप्तः[५] ।

चतुर्थी । तृतीयान्तनिर्देशेपरिसमाप्तत्वादस्य वाक्यस्य योग इत्यध्याह्रियते स च योगोर्थैरेव स्यान्न शब्दैरिति सामर्थ्यादर्थग्रहणं सिद्धमतोर्थशब्दः पृथगेव निमित्तमिति ज्ञायते । **कृष्णाय** इत्यादि । चिरंजीवितमायुष्यपर्यायः । **एवमायुष्यादिभिरिति** । कृष्णाय कृष्णस्य वा चिरमायुष्यं भूयात् । मद्रं भद्रं कुशलं सुखमर्थो हितं वा कृष्णाय कृष्णस्य वा भूयात् । एवं तत्पर्याया [६]अप्युदाहार्याः । आशिषि किम् । आयुष्यं देवदत्तस्य तपः ॥

इति निरूपिता षष्ठी ॥

---

१. आयुष्यादियोगे P; आयुष्यादिभियोगे C. २. B_1, D_3 drop it. ३. C has after it—आशिषीति किम्-आयुष्यं देवदत्तस्य भूयात्; D_5 has the same after it as C, and has एवमायुष्यादिभिः after it. ४. तृप्तो वा B_2. ५. B_1 has हरिः after it. ६. अपि dropped Dc_2.

आधारोधिकरणम् ॥१।४।४५॥

क्रियाश्रययोः कर्तृकर्मणोराधारोधिकरणसंज्ञः स्यात् ॥

सप्तम्यधिकरणे च ॥२।३।३६॥

अधिकरणे सप्तमी स्यात् । चात् दूरान्तिकार्थेभ्यः[2] । औपश्लेषिकः सामीपिको विषयो[3] व्याप्त इत्याधारश्चतुर्धा ।

आधारः । आध्रियन्ते[4] क्रिया अस्मिन्नित्याधारः । 'अध्यायन्याय—' इत्यादिना घञन्तोधिकरणे निपातितः । अत्र यद्यपि 'कारके' इत्यधिकारात् तस्य च क्रियासापेक्षत्वात् क्रियाया आधारः सोधिकरणमिति स्थिते कर्तृकर्मणोरेवाधिकरणसंज्ञा स्यात् तयोरेव साक्षात्क्रियाधारत्वात् तदाधारस्य व्यवधानात् तथापि परत्वादनवकाशत्वाच्च कर्तृकर्मसंज्ञाभ्यां बाधितत्वात् कर्तृकर्मणोर्न किं तु व्यवहितस्यापि तदाधारस्य भवतीति चेतसि कृत्वाह । **क्रियाश्रययोरिति** । तथोक्तं[5] **भर्तृहरिणा** ।

'कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेधिकरणं स्मृतम्' ॥ इति ।

गौणस्याप्याधारस्याधिकरणत्वं स्यादिति 'साधकतमं करणम्' इति तमग्रहणेन ज्ञापितं तत् तत्रैव प्रतिपादितम् ।

सप्तमी । **औपश्लेषिक** इत्यादि । आधाराधेययोरन्यत्र सिद्धयोः प्रादेशिकः संबन्ध उपश्लेषः । तत्र भव औपश्लेषिकः । सामीप्यं सांनिध्यं तत्र भवः सामीपिकः । विषयस्त्वनन्यत्र भावः । तत्र भवोप्युपचारेण विषयः । अपृथग्देशयोराधाराधेययोर्यः सकलावयवसंबन्धस्तत्र भवो व्याप्तः[6] । एवमाधारश्चतुर्धा स्यादित्यर्थः ।

---

१. °र्थे आधारः सोधिकरणसंज्ञः P. २. °र्थेभ्योपि B_1. ३. वैषयिकः D_2, B_1. ४. आध्रियते Dc_3, Dc_4. ५. तथा चोक्तं Dc_3, Dc_4. ६. °भिव्याप्तः Dc_3.

कटे आस्ते। स्थाल्यां पचति । नद्यामास्ते। तर्के कुशलः। सर्वस्मिन् स्थितः। वनस्य दूरे अन्तिके वा।

कटे आस्ते। स्थाल्यां पचत्यौपश्लेषिकस्योदाहरणे। तत्र कटे आस्ते इति क्रियाश्रयकर्त्राधार आसनक्रियाश्रयस्य देवदत्तस्य कर्तुः कटे आधार इति। स्थाल्यां पचतीति क्रियाश्रयकर्माधारो विक्लित्त्याश्रयस्यौदनस्य कर्मणः स्थाल्याधार इति। नद्यामास्ते इति सामीपिक आधारः। नदीसमीपे घोष आस्ते इत्यर्थः। नद्या सह घोषस्य संयोगाभावान्नौपश्लेषिकोयम्। नापि वैषयिको[1] व्याप्तो वा। विषयाद्यभावात्। अतोयं पृथक्। तर्के कुशल इति विषयस्योदाहरणम्। तर्कविषयं[2] कौशलमस्यास्तीत्यर्थः। देवदत्तस्य कौशलं तर्कादन्यत्र नास्तीति तर्कस्य विषयत्वम्। ननु चास्तिक्रियाश्रयस्य कर्तृभूतस्य कौशलस्य न तर्केण सह संयोगः समवायो वा तत् कथमयमाधारः। आधारो ह्याश्रयः स च संयोगेन समवायेन वा स्यात्। नैष दोषः। यतो यदधीना यस्य स्थितिः स विनापि संयोगसमवायाभ्यां तस्याश्रयो भवति। यथा पुरुषस्य राजा। अत्र यद्यपि राज्ञा पुरुषस्य संयोगसमवायौ न तथापि तदायत्तस्थितित्वाद्राजाश्रयः पुरुष इत्युच्यते लोके। तथात्रापि कौशलस्य तर्काधीनस्थितित्वाद्यु-क्तस्तर्कस्य कौशलं प्रत्याधारभावः। गुरौ वसतीत्याद्यपि विषयस्योदाहरणं ज्ञेयम्। सर्वस्मिन् स्थित इति व्याप्तस्योदाहरणम्। सर्वमभिव्याप्य स्थितो विष्णुरित्यर्थः। अत्र यद्यपि विष्णोः सर्वेण सह संबन्धोस्ति तथापि देशविभागाभावात् संश्लेषव्यवहारो नास्तीत्यौप-श्लेषिकात् पृथगुच्यते। तिलेषु तैलमित्याद्यपि व्याप्तस्योदाहरणं ज्ञेयम्।[3]

---

१. Before it—अनन्यत्र भावो विषयः। D_5. २. विषयको Bc_3. ३. Dropped Bc_1.

क्तस्येन्विषयस्य कर्मण्यपि* ॥ अधीती व्याकरणे।

साध्वसाधुप्रयोगे च* ॥ साधुः कृष्णो मातरि असाधुर्मातुले। अर्हाणां कर्तृत्वे अनर्हाणामकर्तृत्वे तद्वैपरीत्ये च* ॥ सत्सु तरत्स्वसन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु शूद्रास्तरन्ति[४]। निमित्तात् कर्मयोगेपि* ॥ चर्मणि द्वीपिनं हन्ति[६]।

क्तस्येति। इन्विषयो यः क्तस्तदीये कर्मण्यपि सप्तमी वाच्या। कश्चेन्विषयः क्तो यस्तेनैव सह प्रयुज्यते। **अधीती व्याकरण** इति। अधीतमनेनाधीती। 'इष्टादिभ्यश्च' इतीनिः।

साध्वसाधुप्रयोग इति। अनर्चार्थं साधुग्रहणम्। अर्चायां साधुनिपुणाभ्यामित्येव सिद्धत्वात्। **अर्हाणामित्यादि**। क्रियां प्रति येषां कर्तृत्वं न्याय्यं तेषामेव कर्तृत्वे सति सप्तमी वाच्या। क्रियां प्रति येषां कर्तृत्वमन्याय्यं तेषामकर्तृत्वे च सप्तमी वाच्येत्यर्थः। **सत्स्वित्यादि**। तरणक्रियां प्रति ये साधनभावमनुभवन्ति सन्तस्तेषामेव चेह कर्तृत्वमिति सप्तमी जाता। **असत्स्वित्यादि**। अत्र तरणक्रियां प्रति येषामकर्तृत्वं न्याय्यं तेषामसतामकर्तृत्वम्। **सत्सु तिष्ठत्स्विति**। अत्र तरणक्रियां प्रति येषां कर्तृत्वं न न्याय्यं तेषामेव कर्तृत्वम्। एतत् सर्वं 'यस्य च भावेन' इति सिद्धम्। **निमित्तादिति**। कर्मणा योगे सति निमित्तादपि सप्तमी वाच्येत्यर्थः। **चर्मणि द्वीपिनं हन्तीति**। अत्र हननस्य निमित्तं चर्म तस्य द्वीपिना कर्मणा सह संयोगः।

---

१. Before it—इन्विषयस्य योगे कर्मणि सप्तमी स्यात् B_2. २. Before it—लक्षणभावाविवक्षायामपि यथा स्यादिति वचनम्। B_2. ३. °श्चरन्ति D_1. ४. After it—असत्सु तरत्सु सन्तास्तिष्ठन्ति B_2, D_5, D_2; असत्सु तरत्सु सन्त आसते D_3; शूद्रेषु तरत्सु सन्तास्तिष्ठन्ति। D_4. ५. °योगे च D_4. ६. C, D_5 have got the whole verse—दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥;—दन्तयोर्हन्ति कुञ्जरम् B_2, (वालेषु चमरीं D_5.) ७. °कर्तृत्वेपि Dc_3.

यस्य च भावेन भावलक्षणम् ॥२।३।३७॥

भावः क्रिया। यस्य क्रियया क्रियान्तरं लक्ष्यते तत:[1] सप्तमी स्यात्॥ गोषु दुह्यमानासु गतः।

सप्तमीपञ्चम्यौ कारकमध्ये ॥२।३।७॥

कारकद्वयमध्यस्थयोः कालाध्वनोरेते स्तः॥ अद्य भुक्त्वायं द्व्यहे[2] द्व्यहाद्वान्नं भोक्ता। इहस्थोयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्[3]। अधिकेन योगेपीति केचित्। लोके लोकाद्वाधिको हरिः।

यस्य। यस्य क्रिययेति। प्रसिद्धयैव क्रियया क्रियान्तरं लक्ष्यते। न हि स्वयमप्रसिद्धा परस्य लक्षणं घटते।

सप्तमीपञ्चम्यौ। कारकं नाम क्रियानिमित्तभूता शक्तिः। **अद्य[4] भुक्त्वेति**। अत्र भुजिक्रियायाः कर्तरि द्वे शक्ती व्यवस्थिते एकाद्यभुजेः साधनभूता अपरा द्व्यहेतीते इति भिन्नयोर्द्वयोः कर्तृशक्त्योर्मध्ये वर्तते तद्‌द्व्यहलक्षणः काल इति। तत्र सप्तमीपञ्चम्यौ जाते। **इहस्थ** इति। इहस्थोयं कर्ता लक्ष्यं कर्म तयोः कारकयोर्मध्ये वर्तते क्रोश इति तत्र सप्तमीपञ्चम्यौ[6] जाते[5]। अथवा यतः शरो निर्याति तदपादानं यच्च लक्ष्यं तत् कर्म तयोर्मध्ये क्रोशः। अथवेहेत्यनेन निर्दिश्यते यदधिकरणं यच्च लक्ष्यं कर्म तयोर्मध्ये क्रोशः। अथ कालात् सप्तम्यध्वनः पञ्चमीति संख्यातानुदेशः कस्मान्न। अस्वरितत्वात्। स्वरितेनाधिकार इत्यत्र स्वरितेनेति योगविभागात् यत्र स्वरितत्वं तत्र यथासंख्यमिति व्याख्येयम्। **अधिकेनेति**। तथोक्तं बोपदेवपण्डितैः।

'निर्धारेधिकेन क्रियान्तः कालाध्वनोश्च पी च' इति।

---

१. ततः सप्तमी P; तत्र for ततः B_1. २. द्व्यहि द्व्यह्राद्वा C. ३. विध्यति C. ४. अद्य dropped Bc_3. ५. जायेते Bc_3. ६. पञ्चमीसप्तम्यौ Dc_3.

अधिरीश्वरे ॥१।४।९७॥

स्वस्वामिसंबन्धेऽधिः कर्मप्रवचनीयसंज्ञः[१] ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ २।३।९॥

अधिकार्थेनेश्वरार्थेन च कर्मप्रवचनीयेन युक्ते सप्तमी स्यात् ॥ उप परार्धे हरेर्गुणाः ॥ स्वात् स्वामिनो वा विभक्तिः । अधि भुवि रामः । अधि रामे भूः ।

षष्ठी चानादरे ॥२।३।३८॥

अनादराधिके भावलक्षणे भाववतः षष्ठीसप्तम्यौ स्तः ॥ रुदति रुदतो वा प्राव्राजीत् ।

अधि । ईश्वरः स्वामी स च स्वमपेक्षते ततश्च स्वस्वामिसंबन्धे इत्यर्थो लभ्यत इत्यभिप्रेत्याह । स्वस्वामिसंबन्धे इति ।

यस्मात् । उप परार्धे इति । 'उपोऽधिके च' इत्युपशब्दस्य कर्मप्रवचनीयता । स्वात् स्वामिन इति कथम् । स्वस्वामिसंबन्धेऽधिः कर्मप्रवचनीय इत्युक्तम् । तत्र यदा स्वमप्रसिद्धत्वाद्विधीयते तदा तत् प्रधानं स्वाम्यप्रधानमिति ततः षष्ठ्यां प्राप्तायां तदपवादः सप्तमी स्यात् । यदा तु स्वाम्यप्रसिद्धो विधीयते तदा विपर्ययो ज्ञेयः । कथं पुनर्यस्य चेश्वरवचनमित्युच्यमाने स्वादपि विभक्तिः स्यात् । न हि स्वस्येश्वरव्यपदेशोऽस्ति । नैष दोषः । अनुक्तसमुच्चयार्थश्चकारः क्रियते । तेन यस्य च स्ववचनमित्यस्याप्यर्थस्य विज्ञानात् ।

षष्ठी । रुदतीत्यादि । रुदन्तमनादृत्य प्रव्रज्यां कृतवानित्यर्थः ।

---

१. °संबोधे P. २. कर्मप्रवचनीयः स्यात् P, B_2, Bc_3, D_4, D_5. ३. After it—स्यात् D_2; D_3. ४. कर्मप्रवचनीययुक्ते C; कर्मप्रवचनीययोगे D_3. ५. °परार्ध्ये D_1, D_4, Bc_3, Dc_1. ६. वा भः B_2. ७. °र्ध्ये Bc_3.

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ २।३।३९॥

एभिर्योगे षष्ठीसप्तम्यौ स्तः। [1]गवां स्वामी । गोषु स्वामी । [2]इत्यादि ।

आयुक्तकुशलाभ्यां चासेवायाम् ॥२।३।४०॥

आभ्यां योगे षष्ठीसप्तम्यौ [3]स्तैस्[4]तात्पर्ये[5]ऽर्थे ॥ आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। [5]आसेवायां किम् । आयुक्तः [6]शकटे गौः । ईषद्युक्त इत्यर्थः ।

यतश्च निर्धारणम् ॥२।३।४१॥

जातिगुणक्रियाभि[7]रेकदेशविवेचनं यतः स्यात् [8]ततः षष्ठीसप्तम्यौ [9]स्तः ॥

स्वामी । स्वामीश्वराधिपतीनां ग्रहणं पर्यायान्तरनिवृत्त्यर्थम् । शेषलक्षणायां षष्ठ्यामेव प्राप्तायां वचनम् ।

आयुक्त । आयुक्तो व्यापृतः । कुशलो निपुणः । आभ्यां योगे षष्ठीसप्तम्यौ स्तः । तात्पर्ये गम्ये । आयुक्तता निपुणता च हरिपूजनविषयेति सप्तम्यामेव प्राप्तायां पक्षे षष्ठीविध्यर्थो योगः । आसेवायां किम् । आयुक्तः शकटे गौः। ईषद्युक्त इत्यर्थः ।

यतश्च । निर्धार्यमाणोवयवः समुदायाभ्यन्तर इति स यदा तदाधारत्वेन विवक्ष्यते तदा सप्तमी सिद्धैव । यथा वृक्षे शाखा इति । यदा त्ववयवसंबन्धस्तदा षष्ठी । यथा वृक्षस्य शाखेति ।

---

१. गोषु स्वामी । गवां स्वामी । D_1. २. Dropped C. ३. P drops स्तः ४. °स्तात्पर्ये Bc_3, Dc_1; °स्तात्पर्यार्थे D_4. ५. तात्पर्यार्थे किम् C; P, Dc_1, Bc_3, D_3, Com. drop from आसेवायां to इत्यर्थः; तात्पर्ये किम् D_1; तात्पर्येऽर्थे किम् D_2, D_4. ६. गौः शकटे D_1, B_2, D_3, D_4. ७. °रेकदेशास्यस्य P. ८. तत्र B_1. ९. P and D_1, D_4, B_2, Bc_3 drop it.

नृणां नृषु वा द्विजः श्रेष्ठः। गवां गोषु वा कृष्णा गौर्बहु-क्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः।

पञ्चमी विभक्ते ॥२।३।४२॥

विभक्तवति निर्धारणाश्रये[2] पञ्चमी स्यात्[3] ॥ उदीच्या दाक्षिणात्येभ्यः श्रोत्रियाः।

किमर्थं वचनम्। तस्यैव प्रपञ्चार्थमित्यदोषः। जातिगुणक्रिया-भिरित्येतत्प्रदर्शनममीषां छात्राणां देवदत्तः पटुरिति संज्ञयापि निर्धारणप्रदर्शनात्।

पञ्चमी। विभागो विभक्तं तद्यस्मिन्नास्ति स विभक्तो निर्धारणाश्रय इत्यभिप्रेत्याह। **विभक्तवति निर्धारणाश्रय** इति। सर्वस्मिन्नेव निर्धारणाश्रये विभागोस्तीति विशेषणसामर्थ्याद्विभाग एव सर्वदा यत्र न कदाचिदात्मन्यन्तर्भावः स इह निर्धारणाश्रयो विज्ञायते। तेन कृष्णा गवां बहुक्षीरेत्यत्र न भवति। यतोत्र यद्यपि कृष्णा गौर्गोमण्डलात् पृथक् क्रियते तथापि गवात्मनान्तर्भवतीति न विभाग एव। उदीच्या दाक्षिणात्येभ्यः श्रोत्रिया इत्यत्र यद्यपि प्राणित्वेनान्तर्भावोस्ति तथापि शब्दोपात्ताकारापेक्षया नान्तर्भाव इति विभाग एवेत्ययमस्य योगस्य विषयः। अन्ये त्वेवमाहुः। यत्र राशीकृतस्य पृथक् क्रिया स पूर्वसूत्रस्य विषयः। यत्र पुनः पृथक्कृतस्यैव गुणाविष्करणं सोस्येति। अयमपि योगः प्रपञ्चार्थ एव। अपादानत्वादेवात्र सिद्धा पञ्चमी।

---

१. कृष्णगौः B_2, Bc_3. २. निर्धारणेर्थे C. ३. After it—न षष्ठी सप्तम्यौ D_1, B_2. ४. पूर्वस्य Bc_3.

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥२।३।४३॥

आभ्यां योगे सप्तमी स्यात्[१] ॥ मातरि साधु[३]र्निपुणो वा[२] । अर्चायां किम् । साधुर्भृत्यो राज्ञस्तत्त्वकथनेन । अप्रतेः किम् । साधुर्मातरं प्रति ।

अप्रत्यादौ वाच्यम्* ॥ साधुर्मातरं प्रतिपर्य[४]नु वा[५] ।

प्रसितोत्सुकाभ्यां तृतीया च ॥२।३।४४॥

[६]चात् सप्तमी । प्रसितः प्रसक्त उत्सुको वा हरिणा हरौ वा ।

साधु । पदमञ्जरीकारमते 'साधुर्भृत्यो राज्ञस्तत्त्वकथनेन' इति प्रत्युदाहरणमन्याय्यं तत्र 'साध्वसाधुप्रयोगे च' इति सप्तमी भाव्यैव । [७]अर्चाग्रहणं निपुणार्थं निपुणो भृत्यो राज्ञ इति तत्त्वकथने प्रत्युदाहरणं न्याय्यम् । **अप्रत्यादाविति** । ये 'लक्षणेत्थंभूत—' इत्यादिसूत्रे कर्मप्रवचनीयसंज्ञा उक्ता प्रतिपर्यनवस्ते गृह्यन्ते ।

प्रसित । प्रकृष्टः सितः शुक्ल इति गुणवाच्यप्यस्ति । प्रसितशब्दः क्रियावाच्यप्यस्ति । षिञ् बन्धन इत्यस्य क्तान्तस्य प्रपूर्वस्य । तत्रौत्सुकशब्देन क्रियावाचिना साहचर्यात् क्रियावाच्यत्र गृह्यत इत्याह । **प्रसितः प्रसक्त इति** । अधिकरणे सप्तमी सिद्धौ पक्षे तृ[८]तीयार्थं वचनम् ।

---

१. B_1 drops it. २. साधुर्मातरि निपुणो वा हरिः B_1. ३. After it—कृष्णः D_3. ४. P, D_1, Dc_1, drop प्रति. ५. Dropped B_2, Bc_3, D_3, D_5. ६. C has before it—आभ्यां योगे तृतीया स्यात् D_5. ७. अर्चाया ग्रह° Bc_3. ८. तृतीयार्थवचनम् Bc_1.

नक्षत्रे च लुपि ॥२।३।४५॥

लुबन्तान्नक्षत्रात्[1] तृतीया स्यात्[2] । अधिकरणत्वात् पक्षे सप्तमी । पुष्ये पुष्येण वा गच्छेत् । पुष्ययुक्ते काले इत्यर्थः । लुपि किम् । पुष्ये शनिः ।

अकर्मकधातुभिर्योगे देशकालाध्वभावेभ्यो[4] वा द्वितीयेति केचित् ॥

नक्षत्रे । नक्षत्रे च लुपीति सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमी । अत एवाह । **लुबन्तान्नक्षत्रादिति** । **पुष्ये पुष्येण वेति** । 'नक्षत्रेण युक्तः कालः' इति विहितस्याणो 'लुबविशेषे' इति लुप् । उत्तराभ्यां फल्गुनीभ्यां नोत्तरां गच्छेदित्यत्र तु लुबन्तविशेषणत्वादुत्तराभ्यामित्यत्र तृतीया स्यात् । अथवा नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्तस्तस्य प्रत्ययस्यार्थस्तत्र वर्तमानादिति लुबन्तादित्यादेरर्थस्तेन स्यात् । **पुष्ये शनिरिति** । सामीप्येधिकरणे सप्तमी । अत्र नक्षत्रेण युक्त इत्यस्याविवक्षितत्वादण् न ।

अकर्मकेति । देशो जनपदादिर्नद्यादिरपीति केचित् । कालो निमेषादिव्यपदेश्यो निमेषादिक्रियापरिच्छिन्न आदित्यादीनां क्रियासन्तानः । अध्वा क्रोशादिशब्दव्यपदेश्यः क्षितिविशेषः । भावो नाम संसर्गिभिः परिच्छिन्नो यागादिशब्दव्यपदेश्यो धात्वर्थः । **केचिदिति** ।

---

१. नक्षत्रवाचिनः B_1. २. स्याद्वा B_1; वा स्यात् D_5. ३. Dropped D_5. ४. °भाववचनेभ्यो Dc_1, Bc_3.

नदीं नद्यां वा वसति । रात्रिं[1] रात्रौ वा शेते । क्रोशं क्रोशे वा वसति । यागं यागे वा तिष्ठति ॥

इति विभक्त्यर्थाः[2][3] ॥

भर्तृहरिप्रमुखाः । तथा हि भर्तृहरिरन्तर्भूतक्रियान्तरैरेव सर्वैरकर्मकैर्धातुभिर्योगे देशादीना कर्मतेत्याह । तथा च यदान्तर्भूतक्रियान्तरताकर्मकाणां विवक्ष्यते तदा देशादिभ्यो द्वितीया । यदा न विवक्ष्यते तदाधिकरणत्वात् सप्तमी देशादिभ्यो भवति । तथोक्तम्[4] ।

'कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते' ॥ इति ।

ततश्च नदीमित्यादेरयमर्थः द्वितीयापक्षे । वसन्नदीमतिक्रामतीति । सप्तमीपक्षे तु नदीसमीपे वसतीति तथा शयानो रात्रिमतिक्रामतीत्यादि ज्ञेयम् । स्वमते तु क्रियान्तर्भावं विनाप्यकर्मकयोगे देशादीनां कर्मतैवेति । तच्चोपपादितम् ॥

इति निरूपिता सप्तमी ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे सुविशदमधुनोक्तो विभक्त्यर्थ ईदृक् ॥

---

१. रात्रौ रात्रिं वा Dc_1, Bc_3. २. इति कारकप्रक्रिया C. ३. After it—समाप्ताः D_1, D_2. ४. तथा चोक्तम् Dc_4.

अथ समासा निरूप्यन्ते ।

समर्थः पदविधिः ॥२।१।१॥

पदयोः पदानां वा[1] विधिः समर्थान्वित एव स्यात्[2] ॥

[3]समासश्चतुर्धा[4] । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः ।

अथ समासा निरूप्यन्ते । **समासश्चतुर्धेति** । समसनं समासः संक्षेपः । स चानेकपदैक्यम् । स चतुर्धा चतुःप्रकारः स्यात् । प्रधानार्थस्य चातुर्विध्यात् । तथा चोक्तं **महाभाष्ये** । इह कश्चित् समासः पूर्वपदार्थप्रधानः । कश्चिदुत्तरपदार्थप्रधानः । कश्चिदन्यपदार्थप्रधानः । कश्चिदुभयपदार्थप्रधान इति । तदेव चातुर्विध्यं दर्शयति । **पूर्वपदार्थेत्यादिना** । समासवर्तिपदयोर्मध्ये पूर्वपदस्य योर्थः स प्रधानं यस्मिन् समासे प्रायेण स समासोऽव्ययीभाव इत्युच्यते । तथोक्तं **काशिकायां वृत्तौ**[5] । अन्वर्थसंज्ञा चेयं महती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयतीति । **उत्तरपदार्थेति** । उत्तरपदस्य योर्थः स प्रधानं यस्मिन् समासे प्रायेण स तत्पुरुषो नाम समासः । तथोक्तं **काशिकायाम्** । पूर्वाचार्यसंज्ञा चेयं महती तदङ्गीकरणमुपाधेरपि तदीयस्य परिग्रहार्थम् । उत्तरपदार्थप्रधानस्तत्पुरुष इति । ननु द्विगुकर्मधारयावपि पृथक् समासौ स्तस्तत् कथं चातुर्विध्यमेवेत्यत आह ।

---

१. च D_2. २. C has after it—तेन अग्नेः शैत्यम् । जलस्यौष्ण्यम् । उपगोः वस्त्रम् । अपत्यं चैत्रस्य पुरुषोयं राज्ञः फलिताश्चामी द्रुमाः । अत्र न भवति । D_1 has after it—अधिकृतो ज्ञातव्यः । परस्परान्वययोग्यत्वे सति इतरसंबन्धनैरपेक्ष्यं सामर्थ्यम् ।; The Sûtra and the Vṛitti dropped in D_3. ३. Before it—समसनं समासः । D_4. ४. B_1 has a marginal note—द्वन्द्वोहं द्विगुरपि मद्गेहे नित्यमव्ययीभावः । तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः ॥; अव्ययीभावस्तत्पुरुषो बहुव्रीहिर्द्वन्द्वश्चेति after चतुर्धा P, B_1, C
५. वृत्ति° Bo_3.

द्विगुकर्मधारयौ तत्प्रभेदौ । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । समासार्थबोधकं वाक्यं विग्रहः ।

द्विगुकर्मधारयाविति । तस्य तत्पुरुषस्य भेदौ उत्तरपदार्थप्राधान्यादिति भावः । **अन्यपदार्थप्रधान** इति । वृत्तिपदव्यतिरिक्तं यत् पदं तस्यार्थः प्रधानं यत्र प्रायेण स बहुव्रीहिसंज्ञः स्यात् । **उभयेति** । उभयोर्वृत्तिपदयोर्यावर्थौ तौ प्रधानं यस्मिन् समासे प्रायेण स द्वन्द्वसंज्ञः स्यात् । एतदेव चोक्तं **महाभाष्ये** । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्व इति । अत्र हि द्वौ पक्षौ । वाक्यमेव समासीस्यादित्येकः । समासोन्यो वाक्यमन्यदेव रूढमिति द्वितीयः । कृत्तद्धितसमासानामभिधानलक्षणत्वात् । तत्र द्वितीयं पक्षं सूचयन् विग्रहलक्षणमाह । **समासेति** प्रथमं त्वग्रे सूचयिष्यति । तस्य चतुर्विधस्यापि समासस्यार्थं बोधयति यद्वाक्यं तद्विग्रह इत्युच्यते । समासेत्युपलक्षणं वृत्तेः । वृत्त्यर्थबोधकं यद्वाक्यं तद्विग्रह इत्यर्थः । तेन तद्धितार्थादिबोधकमपि विग्रहः । विशेषेण गृह्यते ज्ञायते अनेनेति विग्रह इति व्युत्पत्त्येति भावः । समासार्थो वाक्यार्थ एव । वाक्यं पुनर्मतभेदेनैकप्रयोजनसाकाङ्क्षपदसमूहाद्यनेकलक्षणम् । तच्च मतभेदानुपन्यस्य **वाक्यपदीये** सम्यगुपपादितं ज्ञेयम् । तत्र

'साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते' ॥

---

१. अन्यपदार्थे बहुव्रीहिः B_1. २. समासार्थविबोधकं C. ३. After it—अविग्रहो नित्यसमासः । D_5. ४. वार्ति Dc_2, Dc_3, Dc_4. ५. °वर्ति° Dc_2, Dc_3. ६. °संज्ञकः Dc_2, Bc_1; °संज्ञकः समासः Bc_3; °संज्ञः समासः Dc_4. ७. एतदेवोक्तं Dc_3. ८. इति dropped Bc_3. ९. Dropped Dc_1, Bc_3, Dc_4. १०. तत्र लोके Dc_2; तथात्र Dc_4.

इतिलक्षणं प्रायशोभिप्रेतम् । वाक्यार्थः पुनः संसर्गो भेदो भेदसंसर्गो वा । संसर्गः संबन्धः । भेदो व्यावृत्तिः । तत्र राज्ञः पुरुष इत्यनेन स्वविशेषस्य स्वामिविशेषेण स्वामिविशेषस्य स्वविशेषेण यः संबन्धः स उच्यते । स्वान्तरेभ्यः स्वाम्यन्तरेभ्यश्च या व्यावृत्तिः सार्थसिद्धा । न ह्यव्यावर्तमानयोः संबन्ध्यन्तरेभ्यः संसर्गो घटत इति संसर्गं वाक्यार्थं मन्वानस्य मतम् । भेदं वाक्यार्थं मन्वानस्य तु मते व्यावृत्तिरुच्यते । संसर्गोर्थगृहीतो न ह्यन्यस्माद्व्यावृत्तस्य संबन्ध्यन्तरेणासंबन्धस्यावस्थानं संभवति । उभयं वाक्यार्थं मन्यमानस्य तु मते भेदसंसर्गौ गृह्येते इति विवेकः । अयं पुनर्वाक्यार्थात् समासार्थस्य भेदो यदेकार्थीभावः । समासे हि भिन्नार्थानां पदानां साधारणार्थतावस्थाविशेषः स्यात् । वाक्ये तु भिन्नार्थत्वात् साधारणार्थता नास्ति । अत एव भेदनिबन्धनात्र षष्ठ्युपजायते राज्ञः पुरुष इति । अयं भावः । समासे हि विशेषणं विशेष्यमनुप्रविशति एकीभवति विशेष्येण । वाक्ये तु विशेष्यतः पृथग् जायते । तथा हि वाक्ये एकार्थीभावाभावाद् राज्ञो गौश्चाश्वश्च पुरुषश्चेति भिन्नार्थनिबन्धनसमुच्चयप्रतिपादनाय चशब्दः प्रयुज्यते । समासे त्वेकार्थीभावसद्भावान्न प्रयुज्यते । राजगवाश्वपुरुषा इति । एतच्चान्यच्च महाभाष्ये । इह द्वौ पक्षौ वृत्तिपक्षोवृत्तिपक्षश्चेत्याद्युक्त्वा अथ ये वृत्तिं वर्तयन्ति किं त आहुः । परार्थाभिधानं वृत्तिमाहुः । अथ तेषामेवं ब्रुवतां जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्था वृत्तिर्भवतीत्यादिना ग्रन्थसंदर्भेणोभयविधामपि वृत्तिं प्रतिपाद्य सम्यगुपपादितं तत्ततोवगन्तव्यम् । तत्राव्ययीभावं समासमाह । स च द्विधा । अव्ययपूर्वपदो नामपूर्वपदश्चेति तत्र तावदव्ययपूर्वपदमाह ।

१. संसर्गाभेदो Bc3. २. विशेषणं वाक्ये Dc1, Dc4, Bc3. ३. वाक्ये हि Bc3. ४. इह Bc3. ५. तत्ततोवगन्तव्यम् dropped Bc3.

अव्ययं विभक्तिसमीपसमृद्धिवृद्धयर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य—सादृश्यसंपत्तिसाकल्यान्तवचनेषु ॥२।१।६॥

एष्वर्थेषु वर्तमानं सुबन्तं समर्थमव्ययं सुबन्तेन समर्थेन

अव्ययमित्यादि । एष्वर्थेष्विति । विभक्त्यादिषु षोडशस्वर्थेष्वित्यर्थः । वचनग्रहणं प्रत्येकमभिसंबध्यते । **सुबन्तं समर्थमिति**। अन्वययोग्यमित्यर्थः । एतच्च 'समर्थः पदविधिः' इत्यस्याः परिभाषाया लभ्यते । अस्याश्चायमर्थः । विधीयत इति विधिः । पदानां विधिः पदविधिः समासादिः । यः कश्चनेह शास्त्रे पदविधिः स समर्थो ज्ञेयः । समर्थः शक्तः स्वार्थप्रतिपादने यो विग्रहवाक्यार्थस्याभिधाने शक्तः स समर्थो ज्ञेयः । अथवा समर्थपदाश्रयत्वात् समर्थः । ततश्च समर्थानां संबद्धानां पदानां विधिस्तथा समर्थानां संसृष्टार्थानां च पदानां विधिर्ज्ञेय इत्यर्थः । तथा च समर्थपदेन व्यपेक्षा एकार्थीभावश्चोक्तो भवति । तत्र वाक्ये व्यपेक्षालक्षणं सामर्थ्यम् । तथा हि राज्ञः पुरुष इत्यत्र वाक्ये राजा पुरुषमपेक्षते ममायमिति पुरुषोऽपि राजानमपेक्षते अहमस्येति । समासे त्वेकार्थीभावः सामर्थ्यं तच्चानन्तरमेवोपपादितम् । **सुबन्तेनेति** । एतच्च 'सह सुपा' इत्यस्मादधिकाराल्लभ्यते । अस्य चायमर्थः । 'सुबामन्त्रित—' इत्यतः सुबित्यनुवर्तते सहेति सुपेति च सुबिति च त्रयमधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रेति । सहग्रहणं योगविभागार्थम् । ततश्च यस्य समासस्यान्यल्लक्षणं नास्ति तस्येदं

---

१. समर्थेन सुबन्तेन समस्यते नित्यं सोऽव्ययी° D3. २. पदार्थानां Bc3. ३. 'सुप् सुपा' Bc3. ४. सुबिति वर्तते Bc1, Dc2, Dc3.

नित्यं समस्यते स समासोऽव्ययीभावसंज्ञः [1]स्यात् ।[2] [3]ऐकपद्यं समासप्रयोजनम्[4] ।

विधायकं स्यात् । **सह सुप् समस्यत** इति । ततश्चानुप्रावर्षदिति तिङन्तेनाप्यनुः समस्यते । ततः समासान्तोदात्तत्वं स्यात् । **नित्यं समस्यत** इति । संक्षिप्यते समाससंज्ञयैकार्थीभावं प्राप्यत इत्यर्थः । अनेन वृत्तिपक्षोऽभिप्रेत इत्याख्यायते । समस्यत इत्येतत् 'प्राक् कडारात् समासः' इत्यस्मात् सूत्राल्लभ्यते । अस्य त्वायमर्थः । 'कडाराः कर्मधारयः' इति कडारसंशब्दनात् प्राक् यानत ऊर्ध्वमनुक्रमिष्यामः समाससंज्ञास्ते वेदितव्याः । प्राक्वचनं संज्ञासमावेशार्थमिति । **समासोऽप्यव्ययीभावसंज्ञः स्यादिति** । एतच्च 'अव्ययीभावः' इत्यस्मादधिकारसूत्राल्लभ्यते । ननु समास-संज्ञयाव्ययीभावादिसंज्ञया च किं प्रयोजनम् । न च वाच्य-मेकार्थीभूतार्थवाचित्वं पूर्वपदार्थादिवाचित्वं च पदानां क्रियत इति । यतः शब्दानां पदार्थाभिधानं स्वाभाविकं न वाचनिकमित्यर्थाना-देशनादित्यादिना ग्रन्थसंदर्भेण **भाष्यकृतो**पपादितमिति शङ्का-मपनुदन्नाह । **ऐकपद्यमिति** । समाससंज्ञायाः प्रयोजनमैकपद्य-मित्यर्थः । ऐकपद्यमित्युपलक्षणमैकस्वर्यमैकाविभक्तिकत्वं च । अत एवोक्तं **धर्मकीर्तिना** । ऐकपद्यमैकस्वर्यमैकविभक्तिकत्वं च समास-प्रयोजनमिति । अव्ययीभावादिसंज्ञानां स्वरसमासान्तादि प्रयोजनं ज्ञेयम् ।

---

१. B_1 drops स्यात्. २. C has after it—वचनग्रहणं प्रत्येकमभि-संबध्यते. ३. ऐकपद्यमैकस्वर्यमैकाविभक्तिकत्वं समासप्रयोजनम् D_3, D_4, D_5, Dc_1, B_1, B_2; (ऐकाविभक्तिकत्वं dropped D_4). ४. After it—उन्मत्तगङ्गमित्यत्र अन्यपदार्थसंज्ञायामित्यव्ययीभावसमासः । D_5.

विभक्तौ तावत् । हरौ अधिकृत्येति विग्रहे हरौ अधि इति स्थिते ।

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥१।२।४३॥

विभक्तौ तावदिति । विभक्त्यर्थे वर्तमानस्याव्ययस्यादौ समासप्रकारः कथ्यत इत्यर्थः । **हरौ अधिकृत्येति विग्रह** इति । अधिहरीत्यस्य समासस्यार्थबोधके वाक्ये एतादृशे स्थिते सतीत्यर्थः । ननु चाव्ययं नित्यं समस्यत इत्युक्तत्वान्नित्यसमासोयं नित्यसमासश्चाविग्रह इति वदन्ति वृद्धास्तत् कथमयं विग्रहः क्रियते । नैष दोषः । अस्वपदविग्रहस्यापि नित्यसमासस्याङ्गीकारात् । तथा चोक्तं **धर्मकीर्तिना** । अविग्रहो नित्यसमासोस्वपदविग्रहो वेति । अत्र च वृत्तिपदव्यतिरिक्तेनाधिकृत्येति पदेन विग्रहः क्रियते । **हरौ अधि इति स्थित** इति । तिङ्कृत्तद्धितसमासैरित्यनभिहितसूत्रे परिगणितत्वात् अधिना अधिकरणे सप्तम्यर्थे द्योतितेपि हरिशब्दात् सप्तमी भवतीति सप्तम्यन्तो हरिशब्दः समस्यते । अधिशब्दस्तु प्रथमान्तः । ततश्चायमर्थः । अधीत्येतस्मिन् प्रथमान्ते विभक्त्यर्थेव्ययं सप्तम्यन्तेन हरिशब्देन समस्यमाने हरौ अधि इति स्थिते इति कर्तव्यतोच्यत इति ।

प्रथमा । समासा हि कष्टश्रितादयो न तेषु किमपि प्रथमानिर्दिष्टं समस्ति । समासे तु कृते या प्रथमोत्पद्यते सा समासादेव न तु[3] तदवयवात् । अन्तर्वर्तिनी च या प्रथमा सा श्रितशब्दात् सा च समासात् प्रागेवोत्पन्ना । अतो मुख्यस्य समासस्यासंभवात् तद्विधायि शास्त्रं तादर्थ्यात् समासशब्देनोच्यत इत्यभिप्रेत्याह ।

---

१. After it—अविग्रहो नित्यसमासोस्वपदविग्रहो वा । D_6. २. वर्ति° Dc_3, Dc_4. ३. Dropped Dc_3.

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥

उपसर्जनं पूर्वम् ॥२।२।३०॥

समासे उपसर्जनं प्राक् प्रयोज्यम् ॥

समासशास्त्रे इति । प्रथमान्तं यदुच्चारितं समासशास्त्रे इत्यर्थः । अत्र चाव्ययं प्रथमान्तमुच्चारितमिति तस्योपसर्जनत्वम् । यद्येवमव्ययशब्दादेवोपसर्जनता स्यात् नाधिशब्दादीनाम् । न हि ते शास्त्रे प्रथमानिर्दिष्टाः । नैष दोषः । यतो य एवाव्ययस्य प्रथमानिर्देशः स एवाधिशब्दादीनां तत्परत्वात्तस्य । अत्र चोपसर्जनमिति महासंज्ञाश्रयणेनान्वर्थता विज्ञायते । यथा हि लोके अप्रधानमुपसर्जनमुच्यते एवमत्राप्यप्रधानमेवोपसर्जनम् । प्रधानाप्रधानशब्दौ त्र संबन्धिशब्दावेतौ । तेन यत् प्रति यदप्रधानं तदेव प्रति तदुपसर्जनं स्यात् । तेन राजकुमारीं पश्येत्यत्र 'द्वितीया श्रित—' इत्यत्र प्रथमानिर्दिष्टस्यापि कुमारीशब्दस्य संज्ञा न । यदि स्यात् पूर्वनिपातानियम उपसर्जनह्रस्वत्वं च स्यात् । अन्वर्थत्वे तु श्रितादीनेवापेक्ष्य द्वितीयान्तमुपसर्जनमिति नेह प्रसङ्गः । यद्यन्वर्थसंज्ञा तर्हि याचकवृन्दारकः पुरुषव्याघ्रः अर्धपिप्पली पूर्वकाय इत्यादौ प्रधानेपि कथमुपसर्जनत्वम् । उच्यते । 'विशेषणं विशेष्येण बहुलम्' इत्यादिनैव समासे सिद्धे 'वृन्दारकनागकुञ्जरैः पूज्यमानम्' इत्यादीनां प्रथमानिर्देशानामुपसर्जनतैव प्रयोजनम् । अथवा 'एकविभक्ति चापूर्वनिपाते' इति अत्र वर्तमानस्य चशब्दस्यानुक्तसमुच्चयार्थत्वादुपसर्जनत्वं स्यात् ।

उपसर्जनम् । पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् । यद्यपि प्रयोगविपर्ययो न दृष्टस्तथापि पुरुषापराधाद्विपरीतप्रयोगोपि संभाव्येत । यन्मते वाक्यमेव समासीभवति तन्मते वाक्यस्यानियतक्रमत्वात् तद्विकारोपि समासो नियतक्रमः स्यादिति ।

---

१. प्रथमान्तं B1, D2, Bc3. २. °मुपसर्जनं स्यात् D5. ३. स्यात् D3.
४. अन्वर्थे तु Bc3. ५. पाचक° Bc3, Dc3, Dc4. ६. °भाव्यते Dc1, Bc3.

इत्यधेः प्राक् प्रयोगः । कृत्तद्धितेति प्रातिपदिकत्वम् ।

सुपो धातुप्रातिपदिकयोः ॥२।४।७१॥

एतयोरवयवस्य सुपो लुक् स्यात् ॥ स्वाद्युत्पत्तिः ।

अव्ययीभावश्च ॥१।१।४१॥

अव्ययीभावोप्यव्ययं स्यात् । सुपो लुक् । अधिहरि प्रवृत्ता कथा ।

इत्यधेरिति । प्रथमानिर्दिष्टमित्युपसर्जनत्वादनेनाधिशब्दस्य प्राक् प्रयोगः स्यादित्यर्थः । **कृत्तद्धिते**त्यादि । समासत्वादधिहरावित्यस्य प्रातिपदिकसंज्ञेत्यर्थः ।

सुपः । धातुप्रातिपदिकयोः किम् । वृक्षः । अनेन सूत्रेणाधिहरावित्यत्र वर्तमानाया विभक्तेः सप्तम्या लोपः । **स्वाद्युत्पत्ति**रिति । अधिहरि इति स्थिते 'स्वौजसमौट्' इति स्वाद्युत्पत्तिः ।

अव्ययीभावः । अव्ययीभावस्याव्ययत्वे किं प्रयोजनमित्याशङ्क्याह । **सुपो लुगि**ति । 'अव्ययादाप्सुपः' इत्यनेन मुखस्वरोपचारनिवृत्तिश्च प्रयोजनम् । उपाग्निमुखम् । 'मुखं स्वाङ्गम्' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'नाव्ययदिक्शब्द–' इति तस्मिन्निषिद्धे पूर्वपदप्रकृतिस्वर एव स्यात् । उपपयःकाम इति विसर्गस्थानिकस्य सकारस्योपचार इति संज्ञा । तत्राव्ययत्वात् 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' इति पर्युदासः सिद्धः स्यात् । नन्वन्यान्यप्यव्ययत्वप्रयोजनानि सन्ति । उपाग्निकमित्यत्राकच् । उपकुम्भमन्य इति मुमः प्रतिषेध इत्यादीनि । तत् कथमेतान्येवेति नियमः । उच्यते । एतद्धि सूत्रं स्वरादावपि पठ्यते । पुनर्वचनमनित्यत्वज्ञापनार्थम् । तेनैतद्व्यतिरिक्तं कार्यमनित्यं स्यादिति ।

---

१. प्रातिपदिकत्वात् B_1. २. B_1 drops it. ३. D_1, Bc_3, D_4 drop अपि.

[1]सन्ति गुणा हरौ । अधिगच्छ तान् । अत्रा[2]नन्वयान्न समासः । समीपे । कृष्णस्य उप[3] । अत्र प्राग्वत् [4]समासादि ।

नाव्ययीभावादतोऽम् त्वपञ्चम्याः ।२।४।८३॥

अदन्तादव्ययीभावात् [5]सुपो न [6]लुक् [7]तस्य पञ्चमीं

सन्तीत्यादि । अत्र हरौ गुणाः सन्ति तानधिगच्छेत्यन्वयः । तत्र हरौ अधि अनयोरन्वयाभावात् समासो न जात इत्यर्थः । **समीपे** इति । समीपे वर्तमानमव्ययं समस्यते । **कृष्णस्य उपेति** । समीपार्थेनोपशब्देनोपजनिते व्यतिरेके कृष्णशब्दात् षष्ठी स्यादिति षष्ठ्यन्त एव समस्यते । **अत्र प्राग्वदिति** । समासः । प्रथमानिर्दिष्टमित्युपसर्जनत्वमुपशब्दस्य पूर्वनिपातः प्रातिपदिकत्वम् । सुपो लुक् । स्वाद्युत्पत्तिः । अव्ययत्वम् । ततः सुपो लुकि प्राप्ते उच्यते ।

नाव्ययी । अत्र द्वे वाक्ये नाव्ययीभावादत इत्येकं लुङ्निषेधकम् । अम्त्वपञ्चम्या इति द्वितीयमम्विधायकम् । तत्र अपञ्चम्या इत्यनन्तरत्वात् अम एव निषेधो न तु लुकः । यदि ह्येकमेव वाक्यं स्यात् तदा कार्यद्वयस्यैकत्रावृत्त्याविधीयमानत्वात् कार्यद्वयस्यापि पञ्चम्याः प्रतिषेधः स्यात् । तच्चानिष्टमित्येतच्चेतसि कृत्वाह । **अदन्तादित्यादि** । उक्तोऽर्थस्तुशब्देनैव द्योतितः । ननु चाव्ययीभावस्य पूर्वपदार्थप्रधानत्वं पूर्वपदस्य चाव्ययत्वेन तदर्थस्यासत्त्वभूतत्वं ततस्तस्य क्रियान्तरेण संबन्धो नास्तीत्यपादानादित्वाभावादव्ययीभावात् पञ्चम्यादिसंभव एव नास्ति तत् कथमपञ्चम्या इति निषेधः । नैष दोषः । पूर्वपदार्थप्रधानभूतेऽपि

---

१. Before it—समर्थं किम् D_1, Bc_3, D_3, D_4, D_5; समर्थः किम् B_2. २. अत्रानन्वयत्वात् P. ३. After it—समीपम् D_1. ४. समासादिः P; प्राग्वत् only for अत्र प्रा° समासादि Bc_3. ५. न सुपो C. ६. After it—स्यात् D_3. ७. तस्य च B_1. ८. न समास इत्यर्थः । Dc_3. ९. Dropped Dc_4.

विनामादेशः । कृष्णस्य समीपमुपकृष्णम् । उपकृष्णं वृतः ।

तृतीयासप्तम्योर्बहुलम् ॥२।४।८४॥

अदन्तादव्ययीभावात् तृतीयासप्तम्योर्बहुलमम्भावः स्यात् ॥ उपकृष्णमुपकृष्णेन कार्यम् । उपकृष्णमुपकृष्णे स्थितः । बहुलमिति क्वचित् स्यात् । क्वचिन्न स्यात् । क्वचिन्निषिद्धमपि स्यात् । क्वचिद्वा स्यात् । क्वचिदन्यदेव स्यादित्यर्थः ।

गुणभूतोत्तरपदार्थापेक्षः क्रियायोग उपपद्यते । उन्मत्तगङ्गादित्यादिरन्यपदार्थप्रधानत्वात् सत्त्ववाच्यव्ययीभावः क्रियासंबन्धसद्भावादपादानत्वात् पञ्चम्या मुख्यमुदाहरणम् ।

तृतीया । बहुलशब्दार्थमाह । बहुलमितीत्यादि । बहूनर्थान् लात्यादत्त इति बहुलम् । ते च बहवोऽर्थाः क्वचित् प्रवृत्त्यादयः । तथा चोक्तम् ।

'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति' ॥

इति । क्वचित् प्रवृत्तिरित्यनेनैव क्वचिन्निषिद्धमपि स्यादिति संगृहीतम् ।

---

१. C, D_1, D_3 have after it—स्यात् ।. २. In place of कृष्णस्य···वृत: B_1 has—उपकृष्णम् । अपञ्चम्या इत्युक्तेः उपकृष्णात् गतः ।. ३. In place of उपकृष्णं वृतः—D_1, B_2, D_2, D_5 have उपकृष्णाद् गतः उपकृष्णादागतः Dc_1, Bc_3; अपञ्चम्याः किम् । उपकृष्णाद् गतः । D_3. ४. B_1 has only अम्भावः in place of the whole Vritti. ५. उपकृष्णं कृतमुपकृष्णेन वा B_1; उपकृष्णेन कार्यमुपकृष्णम् । D_4. ६. वा स्थितः B_1, B_2. ७. °दन्यथा स्यात् Dc_1, Bc_3. ८. इत्यर्थः dropped D_3. ९. उन्मत्तगङ्गादिश्च Dc_2.

तेन सुमद्रमुन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमम्भावः। समृद्धौ। मद्राणां समृद्धिः सुमद्रम्। व्यृद्धौ। यवनानां व्यृद्धिर्दुर्यवनम्। अर्थाभावे।

अव्ययीभावश्च ॥२।४।१८॥

अव्ययीभावो नपुंसकं स्यात् ॥ क्लीबत्वाद्ध्रस्वता। मक्षिकाणामभावो निर्मक्षिकम्। अत्यये। अतीतानि हिमानि

उन्मत्तगङ्गमिति। 'अन्यपदार्थे च संज्ञायाम्' इति समासः। **सुमद्रमिति।** मद्राणामाधिक्येन ऋद्धिर्वर्तत इत्यर्थः। यदा समृद्धेः प्राधान्यं तदाव्ययीभावः। यदा तु तस्या अप्राधान्यं तदा तत्पुरुषः सुमद्रा इति। ऋद्धिमन्तो मद्रा इत्यर्थः। व्यृद्धाविति। ऋद्धेर्विगमो व्यृद्धिः। **दुर्यवनमिति।** यवनानामृद्धिविगमो वर्तत इत्यर्थः। ननु च ऋद्धिविगमोर्थाभाव एव तत् किं पृथगुच्यते व्यृद्धिरिति। उच्यते। अर्थाभावो ह्युत्तरपदार्थाभावः। तथा हि निर्मक्षिकमिति मक्षिकाणामभाव उच्यते। न तथा दुर्यवनमिति यवनानामभावः किं तु तदीयऋद्धेरभावः। **अर्थाभाव इति।** अर्थाभावे वर्तमानमव्ययं समस्यते। ननु चाभाव इत्येव सिद्धे अर्थग्रहणं किमर्थम्। धर्माभावे इतरेतराभावे च समासाभावार्थम्। धर्माभावे। न भवति ब्राह्मणः। अत्र ब्राह्मणत्वं धर्मो निषिध्यते इति नार्थाभावोयम्। इतरेतराभावे। गौरश्वो न भवतीति। अत्राप्यर्थान्तरत्वं निषिध्यते। नार्थः।

अव्ययी। पूर्वपदार्थप्रधानस्यालिङ्गत्वे प्राप्ते अन्यपदार्थप्रधानस्योन्मत्तगङ्गमित्यादावभिधेयवल्लिङ्गे प्राप्ते वचनम्। **क्लीबत्वात् ह्रस्वतेति।** 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति। **अत्यय इति।**

---

१. उपसुमद्रं C. २. After it—उन्मत्तगङ्गमित्यत्र 'अन्यपदार्थे च संज्ञायाम्' इत्यव्ययीभावसमासः। D5. ३. वृद्धौ Dc1 ; वृद्धौ B1, B2. ४. दुर्यवनम् P, D1, D2 drop यवनानां व्यृद्धिः। वृद्धौ दुर्यवनम् D4, D5. ५. व्यृद्धिर्वैरागः दुर्यवनम् C. ६. अव्ययीभावेपि B1.

निर्हिमम् । असम्प्रति । नायं निद्राकालोऽतिनिद्रम् । शब्दप्रादुर्भावे । इतिहरि हरिशब्दप्रकाशित इत्यर्थः । पश्चात् । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यमनुरूपम् । विष्णुं विष्णुं प्रति प्रतिविष्णु । आनुपूर्व्ये । ज्येष्ठमनुक्रम्य अनुज्येष्ठम् । यौगपद्ये ।

अत्ययोऽतिक्रमः प्रध्वंसाभावस्तत्र वर्तमानमव्ययं समस्यते । ननु चात्ययोऽर्थाभाव एव पृथग्वचनं व्यर्थम् । नैवम् । अर्थाभावः क्वचिद्देशविशेषे वस्तुनः कालत्रयेऽप्यभावः । अत्ययः पुनरुत्पन्नस्य प्रध्वंस इत्यर्थाभावाद्भिन्नत्वात् पृथगुच्यते । **असंप्रतीति** । संप्रत्यभाव इत्यर्थः । अनेनोपभोग्यस्य वस्तुनो यो वर्तमानः कालस्तस्य निषेधः क्रियत इत्यर्थाभावादत्ययाच्च पृथगुच्यते । **शब्दप्रादुर्भाव इति** । शब्दप्रादुर्भावः शब्दप्रकाशः । **पश्चादिति** । पश्चादर्थे यदव्ययं तत् समस्यते । **अनुरूपमिति** । योग्यतार्थे वर्तमानोऽत्रानुः समस्यते । **विष्णुं विष्णुं प्रतीति** प्रतिविष्णु इत्यस्य विग्रहः । ननु च नित्यसमासत्वाद् वाक्याभावात् स्वपदविग्रहः कथं क्रियत इति चेदुच्यते । अर्थमर्थं प्रतीत्यादि भाष्यप्रयोगात् वाक्यमपि स्यात् । यद्वा प्रतिशब्दस्य वीप्सार्थे कर्मप्रवचनीयसंज्ञा विहिता तद्योगे द्वितीयाप्राप्त्यर्थं तस्याश्च वाक्य एव प्रयोग इति वाक्यमपि स्यादिति स्वपदविग्रहः कृतः । **पदमञ्जरीकारमते** तु नात्राव्ययं वीप्सावृत्ति किं तर्हि कर्मप्रवचनीयत्वात् संबन्धावच्छेदकं वीप्सा तु द्विर्वचनद्योत्येत्यस्वपदविग्रहः । पदार्थानतिक्रमवाच्यव्ययसमासोदाहरणं 'यथासादृश्ये' इत्यत्र वक्ष्यति । सादृश्योदाहरणं चानन्तरमेव वक्ष्यति । **यौगपद्य इति** । यौगपद्यमेककालता ।

---

१. C has before it हरौ इति. २. हरिः D_3. ३. प्रकाशक D_1; प्रकाशत B_2; शब्दः प्रकाशते D_4, D_5. ४. Dropped in B_1. ५. प्रतीति C. ६. °देशो विशेषवस्तुनः Dc_3. ७. वर्तमानकाल° Dc_1. ८. °स्तस्यैव Dc_2, Dc_3, Dc_4.

अव्ययीभावे चाकाले ॥६।३।८१॥

सहस्य सः स्यादव्ययीभावे न तु काले । चक्रेण युगपद्धेहि धेनुः[1] सचक्रम् । काले तु सहपूर्वाह्णम् । सादृश्ये । हरेः सादृश्यं सहरि । यथार्थत्वेन सिद्धे[2] गुणभूतेपि[3] सादृश्ये स्यादिति[4] पुनर्वचनम् । सदृशः सख्या ससखि । संपत्तौ[5] । क्षत्राणां संपत्तिः सक्षत्रम् । ऋद्धेराधिक्यं समृद्धिः । अनुरूप आत्मभावः[6] संपत्तिरिति भेदः ।

अव्ययी । न तु काल इति । कालवाचिन्युत्तरपदे न भवतीत्यर्थः । चक्रेणेत्यादि । चक्रं शार्ङ्गं च युगपद् धारयतीत्यर्थः । सादृश्ये इति । सादृश्यं तुल्यता । गुणभूतेपि सादृश्ये स्यादिति । यदि सादृश्ये इति नोच्येत तदा पूर्वपदार्थप्रधानोऽव्ययीभाव इति यदा सादृश्यं विशेष्यत्वात् प्रधानं स्यात् तदैव स्यात् समासः । यदा तु सादृश्यं विशेषणत्वादप्रधानं स्यात् तदा न स्यात् । अस्मात्तु[7] वचनात्तदापि स्यात् । सदृशः सख्येति । सादृश्यवतः प्राधान्यदर्शनेन सादृश्यस्य गुणभावं दर्शयितुं सदृश इत्युक्तम् । ननु च संपत्तिः समृद्धिरेव तत् कस्मात् पुनरुच्यते संपत्तिरित्याशङ्क्याह । ऋद्धेरित्यादि । ऋद्धेर्हस्त्यश्वादिकाया आधिक्यं समृद्धिरित्यर्थः । अनुरूप आत्मभाव इति । अनुरूपः सदृशो य आत्मभावः संपत्तिरित्यर्थः[8] । सक्षत्रमिति । शालङ्कायनानामिति शेषः । क्षत्रभावोनुरूपः शालङ्कायनानामित्यर्थः । तथा सब्रह्म बाभ्रवाणामित्यादि संपत्त्युदाहरणं ज्ञेयम् । तत्रापि बाभ्रवाणामनुरूपो ब्रह्मभाव इत्यर्थः ।

---

१. D1, Dc1, D3 drop धनुः. २. सिद्धेपि गुणभूते D3. ३. गुणभूते गौणत्वेपि D5. ४. यथा स्यादिति C; D4. ५. After it—विशेषणत्वाद् गौणम् D4; Before it—गौणत्वाद्विशेषणम् । D5. ६. आत्मलाभः C. ७. तु dropped Dc2. ८. स संपत्ति° Bc1, Dc1, Dc4. ९. Dropped Dc3.

साकल्ये । तृणेन सकलमत्ति सतृणम् । अन्तवचने । अग्निग्रन्थपर्यन्तमधीते साग्नि ।

यथासादृश्ये ॥२।१।७॥

[1]असादृश्यार्थो यथाशब्दः सुपा नित्यं समस्यते[2] । सादृश्यनिरासायैतत् । शक्तिमनतिक्रम्य[4] यथाशक्ति । सादृश्ये तु[5] । यथा हरिस्तथा हरः[6] ।

यावदवधारणे ॥२।१।८॥

यावदित्येतदवधारणेर्थे[7] सुपा नित्यं समस्यते सोऽव्ययीभावः । यावन्तः श्लोकास्तावन्तोऽच्युतप्रणामाः यावच्छ्लोकम्[8] ।

साकल्य इति । साकल्यमशेषता । **तृणेनेत्यादि** । न किंचिदभ्यवहार्यं परित्यजतीत्यर्थः । अधिकार्थवचनेन साकल्यं प्रतिपाद्यते । **अन्तवचने** इति । अन्त इति परिग्रहापेक्षया समाप्तिरुच्यते । **अग्निग्रन्थेत्यादि** । इयं समाप्तिरसकलेप्यध्ययने स्यादिति साकल्यात् पृथगुच्यते ।

यथा । ननु च यथार्थे यदव्ययमिति पूर्वेणैव सिद्धे समासे किमर्थं वचनमित्याशङ्क्याह । **सादृश्यनिरासायैतदिति** ।

यावत् । अवधारणं परिमाणनिश्चयः । **यावन्त** इत्यादि । निर्ज्ञातपरिमाणैः श्लोकैः प्रणामपरिमाणमिहावधार्यते । अवधारणे किम् । यावद्दत्तं तावद् भुक्तं नावधारयामि कियन्मया भुक्तमिति । स्पष्टत्वात् त्यक्तं नामपूर्वपदाव्ययीभावप्रतिपादनपरं सूत्रत्रयं व्याख्यायते ।

---

१. सतृणमत्ति P. २. असादृश्येर्थे D_2. ३. After it—सोऽव्ययीभावः B_1. ४. करोतीति after it in C. ५. Dropped D_3. ६. हरस्तथा हरिः C. ७. °धारणार्थे B_1, D_1. ८. इति before it in B_1.

सुप्[1] प्रतिना मात्रार्थे ॥२।१।९॥

मात्रा बिन्दुस्तोकमिति[2] पर्यायाः[3] । मात्रार्थे वर्तमानेन प्रतिना सह सुबन्तं समस्यते सोऽव्ययीभावः । अस्त्यत्र किंचित् सूपः[4] । सूपप्रति । शाकप्रति । मात्रार्थे[5] इति किम् । वृक्षं[6] प्रति विद्योतते विद्युत् ।

'सुप्रतिना मात्रार्थे' ॥२।१।९॥ अल्पार्थे वर्तमानेन प्रतिना सह सुबन्तं समस्यते सोऽव्ययीभावः । सूपोल्पोस्मिन् भोजने सूपप्रति । शाकप्रति । मात्रार्थे किम् । वृक्षं प्रति विद्योतते विद्युत् । सुबिति वर्तमाने पुनः सुप्ग्रहणमव्ययनिवृत्त्यर्थम् । 'अक्षशलाकासंख्याः परिणा' ॥२।१।१०॥ अक्षादयः परिणा समस्यन्ते सोऽव्ययीभावः । कितवव्यवहारे चायमिष्यते । पञ्चिका नाम द्यूतं तच्च पञ्चभिरक्षैः शलाकाभिर्वा स्यात् । तत्र यदा सर्वे उत्ताना अवाञ्चो वा पतन्ति तदा पातयिता जयति । अन्यथा पाते तु पराजयते । अक्षेणेदं न तथा वृत्तं यथा पूर्वजये । अक्षपरि । शलकापरि । संख्या । एकपरि । द्विपरि । त्रिपरि । चतुःपरि । पञ्चसु त्वेकरूपासु जय एव । तथा चोक्तं[7] वार्तिके ।

'अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् ।
कितवव्यवहारे च एकत्वेक्षशलाकयोः' ॥ इति

'विभाषा' ॥२।१।११॥ यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र विभाषेत्यधिकृतं ज्ञेयम् ।

---

१. Before it— 'विभाषा' —विभाषेत्ययमधिकारादित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा विकल्पेन भवति । D_4. This Sûtra and Vṛitti dropped D_5, Com. २. °स्तोकमल्पमिति P. ३. पर्यायः D_1. ४. सूपमात्रं D_1 ; सूपम् B_2, D_3, D_4. ५. मात्रार्थं किम् P; D_3, मात्रार्थेति किम् B_1. ६. वृक्षं वृक्षं D_3. ७. च dropped Dc_1, Bc_1, Dc_4.

अपपरिबहिरञ्चवः पञ्चम्या ॥२।१।१२॥

एते पञ्चम्या वा समस्यन्ते स प्राक्संज्ञः ॥ अपविष्णु संसारः । अपविष्णोः । परिविष्णु । परिविष्णोः । बहिर्वनम् । बहिर्वनात् । प्राग्वनम् । प्राग्वनात् ।

आङ् मर्यादाभिविध्योः ॥२।१।१३॥

आङ् सीमाद्यर्थः पञ्चम्या वा समस्यते स प्राक्संज्ञः । आ मुक्ति संसारः । आ मुक्तेर्वा । अभिविधौ । आबालं हरिभक्तिः । आ बालेभ्यः ।

लक्षणेनाभिप्रती आभिमुख्ये ॥२।१।१४॥

अप । **अपविष्णोरित्यादि** । 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञा । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । **बहिर्वनादिति** । अत एव ज्ञापकाद्बहिर्योगे पञ्चमी । **प्राग्वनादिति** । 'अन्यारात्—' इति पञ्चमी ।

आङ् । **आमुक्तेरित्यादि** । 'आङ् मर्यादावचने' इत्याङ् कर्मप्रवचनीयः । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी ।

लक्षणेन । **अभ्यग्नि शलभा इत्यादि** । अग्निमभि अग्निं प्रति शलभाः पतन्तीति विग्रहः । अभेः 'अभिरभागे' इति कर्मप्रवचनीयता । प्रतेस्तु 'लक्षणेत्थम्—' इति । 'कर्मप्रवचनीययुक्ते द्वितीया' इति अग्निशब्दाद् द्वितीया । अत्राग्निर्लक्षणं तेन शलभपातो लक्ष्यते ।

---

१. B has the Sūtra विभाषा ॥ २।१।११॥ अधिकारोऽयम् । विभाषेत्ययमधिकारः । before it; B_2, D_2 have—विभाषेत्ययमधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा स्यात्. २. मर्यादाद्यर्थः D_3. ३. समस्यते वा D_3. ४ आ मुक्तेः संसारः C; P. ५. वा dropped D_1, D_3, D_4, D_5. ६. C has a marginal note तेन विना मर्यादा । तेन सहेत्यभिविधिः. ७. अत्र चाग्नि' Bc_1, Dc_3.

चिह्नवाचिना सह अभिप्रती आभिमुख्यार्थे वा समस्येते स[1] प्राक्संज्ञः[2] । अभ्याग्नि[3] शलभाः पतन्ति[4] अग्निमभि । प्रत्यग्नि आग्निं प्रति ।[5]

[6]अनुर्यत्समया ॥२।१।१५॥

समया[7] सामीप्यम्[8] । यत्[9]सामीप्य[10]वाच्यनुश[11]ब्दस्तेन[12] सह

अभिप्रती आभिमुख्ये वर्तेते । तथा हि अभ्यग्नि प्रत्यग्नि इत्यग्ने[13]रभिमुखमेव शलभाः पतन्ति न पार्श्वतो न पृष्ठत इति प्रतीयते । लक्षणेनेति किम् । स्रुघ्नान्मथुरां प्रस्थितो दिङ्मोहात् स्रुघ्नमेव प्रतिनिवृत्तः । यदुद्दिश्याभिगच्छन्ति तदेव लक्षणं स्यादिति नात्र स्रुघ्नो लक्षणम् । अभिप्रतीति किम् । येनाग्निस्तेन गतः । भवत्यत्राग्निर्लक्षणम् । आभिमुख्यमप्यस्ति । किं तु अभिप्रती न स्तः । आभिमुख्ये किम् । अभिनवोऽङ्को यासां ता अभ्यङ्काः । प्रतिनवोऽङ्को यासां ताः प्रत्यङ्काः । अङ्कोऽत्र लक्षणं भवति । आभिमुख्यं तु नास्ति । ननु चात्र परत्वाद्बहुव्रीहिर्बाधकः स्यात् । किमाभिमुख्यग्र[14]हणेन । मैवम् । अशेषत्वाद्बहुव्रीहिर्न स्यात् । अथवैतत् ज्ञापयति यद्बहुव्रीहिरव्ययीभावेन बाध्यते । ततश्च द्वौ मुनी वंश्यौ यस्य द्विमुनि[15] व्याकरणमिति सिद्धम् । अन्यथा स्वपदार्थे कृतार्थोऽव्ययीभावो द्विमुनि व्याकरणमित्यत्र बहुव्रीहिणा बाध्येत । स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते ।

'अनुर्यत्समया' । २।१।१५ । यस्य सा[16]मीप्यमाहानुस्तेन सह

---

१. Dropped D_3. २. स प्राक्संज्ञः dropped P, D_1, D_3. ३. अभ्याग्नि अग्निमभि शलभाः पतन्ति B_1, C, P. ४. पतन्ति dropped D_2, D_3. ५. After it—लक्षणेनेति किम् । द्वारकां प्रति । लक्षणे किम् । द्वारकां प्रति गतः । D_5. ६. This and the next (२।१।१६) Sûtra with the Vṛitti dropped D_5, Com. ७. B_1 drops समया सामीप्यम् ८. समीपम् P, D_3. ९. अनुर्यस्य समीपवाची तेन लक्षणभूतेन सुबन्तेन सह । D_3 ; अनुर्यस्य सामीप्यवाची तेन लक्षणभूतेन सुबन्तेन सह वा समस्यते सोऽव्ययीभावः । D_4. १०. °समीप° P, D_2. ११. शब्दः dropped D_2. १२. तेन लक्षणभूतेन सुबन्तेन सह B_2. १३. °राभिमुख्य° Dc_1. १४. °ग्रहेण Dc_1, Dc_4, Bc_1. १५. After it—त्रिमुनि Dc_2. १६. समीप° Dc_1.

समस्यते[1] स[2] प्राक्संज्ञः। अनुवनमशनिर्गतः[3]। वनसमीपे[4] गत इत्यर्थः। 'अव्ययं[5] विभक्तिसमीप—' इति सिद्धे पुनर्वचनं विभाषार्थं[6]।

यस्य[7] चायामः ॥२।१।१६॥

यस्य[8] दैर्घ्यवाची अनुस्तेन लक्षणेन[9] समस्यते[10] सोऽव्ययी[11]-भावः। अनुगङ्गं काशी। गङ्गादैर्घ्येणात्र काशीदैर्घ्यं[12] लक्ष्यते।

समस्यते सोऽव्ययीभावः। अनुवनमशनिर्गतः। वनस्य समीपं गत इत्यर्थः। अनुः किम्। वनं समया। समया किम्। वृक्षमनु विद्योतते विद्युत्। 'अव्ययं विभक्तिसमीप—' इत्येव सिद्धे पुनर्वचनं विभाषार्थम्।

यस्य। अत्रोपचारेणायामवाचित्वादनुरेवायामशब्देनोच्यते इत्यभिप्रेत्याह। **यस्य दैर्घ्यवाच्यनुरिति**। **अनुगङ्गमिति**। यथा गङ्गा प्रागायता तथा काशी प्रागायतेत्यर्थः। यद्यप्यत्र गङ्गा-काश्यावायामवत्यौ तथापि दीर्घवत्तया प्रसिद्धत्वात् गङ्गैवात्र लक्षणं न काशी। प्रसिद्धं हि लक्षणं स्यात्। **गङ्गादैर्घ्येणेत्यादि**। हेतोरेषा तृतीया। गङ्गादैर्घ्येण हेतुना तद्वत्या गङ्गया लक्षणभूतया करणत्वमापन्नया काश्यायामो लक्ष्यत इत्ययमर्थो ज्ञेयः।

---

१. After it–वा B_1. २. सोऽव्ययीभावः D_1, B_2. ३. B_1 has अग्नेः समीपमन्वग्नि for अनुवन...विभाषार्थं।. ४. वन...विभाषार्थं dropped P. ५. समीपं D_1, B_2. D_4. ६. अव्ययं...विभाषार्थं dropped D_1, D_4. ७. B_1, D_2 have 'अनुर्यत्समया' ॥२।१।१५॥ before it. ८, Before it–आयामो दैर्घ्यम् C. ९. Before it—सह B_1, Dc_1, D_4, D_5; लक्षणार्थेन सह B_2, १०. After it—वा B_1. ११. सोऽव्ययीभावः dropped B_1, D_1, D_3, D_4. १२. काशीत्यर्थः। Dc_1.

तिष्ठद्गुप्रभृतीनि च ॥२।१।१७॥[1]

कालविशेषे निपात्यन्ते[2] सोऽव्ययीभावः[3] ॥ तिष्ठन्ति गावो यस्मिन् काले स[4] तिष्ठद्गु । एवं[5] वहद्गु[6] । आयतीगवम्[7] । खलेयवम् । लूनयवम् । पूतयवम् । संहृतयवमित्यादि ।

'तिष्ठद्गुप्रभृतीनि च' इत्यव्ययीभावत्वादव्ययत्वमित्यग्रे वक्ष्यति । तेन व्याख्यातप्रायत्वात् त्यक्तं सूत्रं व्याख्यायते । 'तिष्ठद्गुप्रभृतीनि च' ।२।१।१७। एते समुदाया एव निपात्यन्तेऽव्ययीभावसंज्ञाः । तिष्ठन्ति गावो यस्मिन् कालविशेषे दोहनाय स तिष्ठद्गु कालः । खलेयवादीनि प्रथमान्तानि विभक्त्यन्तरेणैव संबध्यन्ते अन्यपदार्थे च वर्तन्ते । चकारोऽवधारणार्थः । तेनान्यः समासो न । परमातिष्ठद्गु इति । तिष्ठद्गु । वहद्गु । आयतीगवम् । खलेयवम् । खलेबुसम् । लूनयवम् । लूयमानयवम् । पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणयवम् । संहृतबुसम् । संह्रियमाणबुसम्– एते कालवाचिनः । समभूमि । समपदाति । सुषमम् । विषमम् । दुःसमम् । अपरसमम् । आयतीसमम् । प्ररथम् । प्रमृगम् । प्रदक्षिणम् । अपरदक्षिणम् । संप्रति । असंप्रति । पापसमम् । पुण्यसमम् । आयतीसमम् । प्राह्णम् । 'इच् कर्मव्यतिहारे' । केशाकेशि ।

---

१. The Com. drops the Sûtra. २. Before it—एते D4. ३. C drops सोऽव्ययीभावः; स प्राक्संज्ञः D1; तिष्ठद्गुप्रभृतीनि शब्दरूपाणि उक्तसंज्ञानि स्युः । D4. ४. तिष्ठद्गुकालविशेषे B2. ५. खलेयवम् । लूनयवम् in C; for एवं to °मित्यादि; D1 drops एवम्. ६. After it—आसद्गु D1; इत्यादि D4. ७. D1 drops it; D4 drops from आयती° to °त्यादि. ८. कालविशेषः । Dc3.

पारेमध्ये षष्ठ्या वा ॥२।१।१८॥

पारे मध्ये शब्दौ षष्ठ्या[1] वा समस्येते सोऽव्ययीभावः । षष्ठीसमासापवादः । एदन्तत्वं चानयोर्निपात्यते[2] ॥ पारे गङ्गायाः पारे गङ्गम् । मध्ये गङ्गम् । पक्षे तत्पुरुषः । गङ्गापारम् । गङ्गामध्यम् । महाविकल्पेन[3] वाक्यमपि । गङ्गायाः पारम् ।

संख्या वंश्येन ॥२।१।१९॥

वंशो द्विधा विद्यया जन्मना च । तत्र भवो वंश्यस्तद्वाचिना[4] संख्या वा समस्यते स[5] प्राक्संज्ञः[6] ॥ द्वौ मुनी वंश्यौ द्विमुनि त्रिमुनि व्याकरणस्य । विद्यातद्वतामभेदविवक्षायां त्रिमुनि व्याकरणम् ।

पारे । विभाषेत्यनुवर्तमानेपि पुनर्वाग्रहणं पक्षे षष्ठीसमासाभ्यनुज्ञानार्थमित्याह । **पक्षे तत्पुरुष** इति । यदि पक्षे तत्पुरुषो वावचनात् स्यात्तदा महाविभाषया किं क्रियत इत्यत आह । **महाविकल्पेनेति** ।

संख्या । वंशः प्राणिनामेकस्वभावः संतानः । विद्यया वैयाकरणवंशः उपाध्यायवंशः । जन्मना ब्राह्मणवंशः क्षात्रियवंशः । तत्र भवो वंश्य इति । दिगादित्वाद्यत् । **द्वौ मुनी** इति । पाणिनिकात्यायनौ । **त्रिमुनी**ति । पूर्वोक्तौ द्वौ भाष्यकारश्चेति । त्रयो मुनयो व्याकरणस्येति संबन्धे षष्ठी । विद्यावतां पाणिनिप्रभृतीनामतिशयेन विद्यायोगमाख्यातुं यदा व्याकरणाख्यया विद्ययाभेदो विवक्ष्यते तदा सामानाधिकरण्यं स्यादित्याह । **विद्यातद्वतामिति** ।

---

१. वा षष्ठ्या D_6. २. B_1 has a marginal note—सम्यक्साधितसिद्धरूपपठनं निपातः. ३. B_1, B_2 have नेहैस्वम् before it. ४. तद्वाचिनो P. ५. D_1 drops स. ६. प्राक्संज्ञकः P.

नदीभिश्च ॥२।१।२०॥

नदीभिः संख्या समस्यते सोऽव्ययीभावः ॥ समाहारे चायमिष्यते । सप्तगङ्गम् । द्वियमुनम् ।

अन्यपदार्थे च संज्ञायाम् ॥२।१।२१॥

नदीभिः सह सुबन्तं समस्यतेऽन्यपदार्थे नाम्नि सोऽव्ययीभावः ॥ उन्मत्तगङ्गं देशः । वाधिकारेप्ययं नित्यसमासः । न हि वाक्येन संज्ञा गम्यते । नाम्नि किम् । शीघ्रगङ्गो देशः ।

नदी । चकारेण संख्यानुकृष्यत इत्यभिप्रेत्याह । **संख्येति** । नदीभिरिति बहुवचननिर्देशादर्थस्येदं ग्रहणम् । तेन सर्वैस्तद्वाचिभिः समासः स्यात् । **समाहारेति** । चशब्दोवधारणे । समाहार एव नान्यत्रेति । **सप्तगङ्गमिति** । सप्त गङ्गाः समाहृताः । **द्वियमुनमिति** । द्वे यमुने समाहृते । 'तृतीयासप्तम्योर्बहुलम्' इत्यत्रोन्मत्तगङ्गमित्युदाहरणोक्त्यैव व्याख्यातप्रायत्वात् त्यक्तं व्याख्यायते ।

'अन्यपदार्थे च संज्ञायाम्' ॥२।१।२१॥ संख्येति निवृत्तम् । नदीग्रहणमनुवर्तते । नदीभिः सह सुबन्तमन्यपदार्थे समस्यते संज्ञायां सोऽव्ययीभावः । विभाषाधिकारेपि नित्यसमास एवायम् । न हि वाक्येन संज्ञा गम्यते । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् । तूष्णींगङ्गम् । शनैर्गङ्गम् । अन्यपदार्थे किम् । कृष्णा चासौ वेणा च कृष्णवेणा । संज्ञायां किम् । शीघ्रगङ्गो देशः । इतः प्रभृति अव्ययीभावसंज्ञाशब्देन ये समासान्ता उच्यन्ते तान् दर्शयति तथा तत्पुरुषादौ वक्ष्यति । साधारणांस्तु समासान्तानग्रे स्वतन्त्रे समासान्तप्रकरणे वक्ष्यति ।

---

१. स प्राक्संज्ञः । Dc1. २. °न्यार्थे D1, D4. ३. स प्राक्संज्ञः B1. . महाविभाषेति वाधि° D4.

अव्ययीभावे शरत्प्रभृतिभ्यः ॥५।४।१०७॥

शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे ॥ उपशरदम् । प्रतिविपाशम् ।

शरद् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । विश् । चेतस् । चतुर् । त्यद् । तद् । यद् । कियत् । जराया जरस् च । उपजरसम् । प्रतिपरसमनुभ्योऽक्ष्णः । एभ्योऽक्ष्णष्टच् स्यात् । अक्षिशब्दात् टचि कृते भसंज्ञायाम् ।

अव्ययी । **समासान्त** इति । समासान्त इत्यधिकारसूत्राल्लभ्यते । अस्यायमर्थः । इत आरभ्यापादसमाप्तेर्ये प्रत्यया विधास्यन्ते ते समासस्यान्ता अवयवाः स्युस्तद्ग्रहणेन गृह्यन्त इति ज्ञेयम् । प्रयोजनमव्ययीभावादिसंज्ञाः । तेन उपशरदमित्यादौ 'नाव्ययीभावाद्—' इति विधिः स्यात् । द्विपुरीत्यत्र 'द्विगोः' इति ङीप् स्यात् । कोशनिषादिनी 'द्वन्द्वोपतापगर्ह्यात्—' इतीनिः स्यात् । विधुरः । 'तत्पुरुषे तुल्यार्थ—' इति पूर्वपदप्रकृतिभावः स्यात् । उच्चैर्धुरः । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्येतत् स्यात् । **उपशरदमिति ।** सामीप्येऽव्ययीभावः । **प्रतिविपाशमिति ।** 'लक्षणेनाभिप्रती—' इति समासः । गणं पठति । **शरदित्यादि ।** येऽत्र झयन्तास्तेषां नित्यार्थं वचनम् । **जराया जरस् चेति ।** गणसूत्रम् । अस्यायमर्थः । जराशब्दाट्टच् स्यात् जरसादेशश्च । **प्रतिपर** इत्यादि । अस्यापि गणसूत्रस्यायमर्थः । प्रतिपरःसमनुभ्यः परस्मादक्षिशब्दाट्टच् स्यादिति । **अक्षिशब्दादिति ।** प्रत्यक्षि । अस्मात् टचि कृते 'यचि भम्' इति भसंज्ञायाम् ।

---

१. B_1 drops it. २. Before it—अयस् D_4. ३. दिव् । उपानह् B_1. ४. D_1 drops it. ५. B_1 drops it. ६. P drops from एभ्यो to स्यात्. ७. C has after it—समासान्तोऽव्ययीभावे ; After it—अव्ययीभावे D_3.

तद्धिताः ॥४।१।७६॥

अंतः[1] परमापञ्चमोध्यायान्ताद्ये[2] प्रत्ययास्ते तद्धितसंज्ञाः स्युः[3]। 'यस्येति च'। प्रत्यक्षम्। परोक्षम्। परोक्षमित्यत्र पारस्करादित्वात् सुट्। श्रीभोजस्तु परःशब्दं निपातं मन्यते। स[4]मक्षम्। अन्वक्षम्।[5]

अनश्च ॥५।४।१०८॥

अन्नन्ताद्व्ययीभावात् टच् स्या[6]त्।

तद्धिताः। बहुवचनमनुक्ततद्धितपरिग्रहार्थम्। तेन[7] पृथिव्या ञाञौ इत्यादयो लब्धाः स्युः। महासंज्ञाकरणमन्वर्थताज्ञापनार्थम्। तेभ्यो हितास्तद्धिता इति। तदित्यनेन वैदिका लौकिकाश्च शब्दाः प्रत्यवमृश्यन्ते। तेषां व्युत्पाद्यत्वेन प्रकृतत्वात्। तेन तत्रैवाणादयः स्युः यत्र भवन्तस्तेषामुपकारिणः स्युर्नान्यत्रेत्यभिधानलक्षणं तद्धितानामुपपन्नं स्यात्। **प्रत्यक्षमिति**। अक्ष्णोराभिमुख्यम्। 'लक्षणेनाभिप्रती-' इति समासः। अथवाक्ष्यक्षि प्रतीति वीप्सायां समासः। **परोक्षमिति**। अक्षिभ्यां परं परोक्षम्। अत एव समासान्तविधानादव्ययीभावः समासः परार्थे। श्रीभोजस्त्वन्यथा व्याख्यदित्याह। **श्रीभोज** इति। **समक्षमन्वक्षमिति**। अक्ष्णोः समीपम्। पूर्वत्र 'अव्ययम्' इति समासः। उत्तरत्र 'अनुर्यत्-समया' इति।

अनश्च। समासान्तः।

---

१. अत ऊर्ध्वं P, Dc_1. २. °माध्यायान्तं ये P, D_1; °माध्यायन्ता ये C. ३. ज्ञेयाः P, dropped D_5. ४. अन्वक्षम्। समक्षम् C, B_2. ५. D_1, D_3, D_4, D_5 drop it. ६. ततः Dc_1, Dc_4. ७. After it—परः शब्दः Dc_2, Bc_3.

नस्तद्धिते ॥६।४।१४४॥

नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते ॥ उपराजम्[1] । अध्यात्मम् ।

नपुंसकादन्यतरस्याम् ॥५।४।१०९॥

अन्नन्तं यत्[2] क्लीबं तदन्तादव्ययीभावाट्टच् वा[3] स्यात् ॥ उपचर्मम् । उपचर्म ।

नस्तद्धिते । उपराजमिति । सामीप्येऽव्ययीभावः । **अध्यात्ममिति** । आत्मन्यधीति विभक्त्यर्थे । नः किम् । सात्वतः । तद्धितेति किम् । शर्मणा । नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणां टिलोपस्योपसंख्यानम् । अत्र ये इन्नन्तास्तेषाम् 'इनण्यनपत्ये' इति प्रकृतिभावः प्राप्तो ये त्वन्नन्तास्तेषामन्निति । सब्रह्मचारिण इमे साब्रह्मचाराः पीठसर्पिण इमे पैठसर्पाः । कलापिना प्रोक्तमधीयन्ते कालापाः । कुथुमिन इमे कौथुमाः । तैतिलिजाजलिनावाचार्यौ तत्कृतो ग्रन्थ उपचारात् तैतिलिजाजलिशब्दाभ्यामुच्यते तमधीयते तैतिला जाजला । एवं लाङ्गलाः । शिलालिन इमे शैलालाः । शिखण्डिन इमे शैखण्डाः । सूकरसद्मन इमे सूकरसद्माः । सुपर्वण इमे सौपर्वाः । चर्मणः कोश उपसंख्यानम् । चार्मः कोशः । चार्मणोऽन्यः । शुनः संकोच उपसंख्यानम् । शौवः संकोचः । शौवनोऽन्यः ।

नपुंसकात् । नपुंसकग्रहणमुत्तरपदविशेषणमित्यभिप्रेत्याह । **अन्नन्तं यदित्यादि** । पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ।

---

१. राज्ञः समीपमुपराजम् B_3. २. यन्नपुंसकं P; Dc_1. ३. Dropped D_3.

नदीपौर्णमास्याग्रहायणीभ्यः ॥५।४।११०॥

एभ्यो[1] वा[2] टच् स्यात्[3] ॥ उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि[4] । इत्यादि[5] ।

झयः ॥५।४।१११॥

झयन्तादव्ययीभावाट्टच्[6] वा[7] स्यात् ॥ उपसमिधम् । उपसमित् ।

गिरेश्च सेनकस्य ॥५।४।११२॥

गिर्यन्तादव्ययीभावाट्टच्[8] वा स्यात् ॥

नदी । एभ्य इति । नद्याद्यन्तादव्ययीभावाद्वा टच् स्यादित्यर्थः । नदीग्रहणेन स्वरूपं गृह्यते न संज्ञा । यदि संज्ञाग्रहः स्यात् पौर्णमास्यादिग्रहं न कुर्यात् । इत्यादीत्यादिना उपाग्रहायणम् । उपाग्रहायणि ।

झयः । झय इति प्रत्याहारग्रहणम् ।

गिरेः । ननु च 'नपुंसकादन्यतरस्याम्' इत्यतोन्यतरस्यां-

---

१. एतदन्ताद्वच् वा B_1. २. टच् स्याद्वा D_1. ३. Dropped D_5. ४. B_1 drops उपपौर्णमासि. ५. In place of इत्यादि D_1 has—उप आग्राहयणम् । उप आग्राहायणि ; B_2 drops it. ६. वा टच् स्यात् D_1. ७. स्याद्वा B_1; वा dropped D_3; स्यात् dropped D_4. ८. वा टच् स्यात् D_1; स्याद्वा D_3. ९. वा स्या° Dc_3. १०. गिरेश्च Dc_3.

सेनकग्रहणं पूजार्थम् । उपागिरम् । उपगिरि ॥

इत्यव्ययीभावः ।

ग्रहणेनुवर्तमानेपि सेनकग्रहणं किमर्थमित्याशङ्क्याह । **सेनकग्रहणमिति** ।

इत्यव्ययीभावः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेगात् प्रसादे सुविशदममलो **ह्यव्ययीभावसंज्ञः** ।

---

१. उपगिरि । उपगिरम् । D4.

अथ तत्पुरुषः[१]।

द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥२।१।२४॥

द्वितीयान्तं सुबन्तं समर्थं[२] श्रितादिभिर्वा समस्यते स समास[३]स्तत्पुरुषः[४]। कृष्णं श्रितः कृष्णश्रित इत्यादि[५]। गम्यादेरिष्टिः। ग्रामं गमी ग्रामगमी। [६]ग्रामं गामी ग्रामगामी।

अथ तत्पुरुषः। स तु[७] त्रेधा। व्यधिकरणपदः समानाधिकरणपदः संख्यापूर्वपदश्चेति। तत्र तावद् व्यधिकरणपदमाह।

द्वितीया[८]। **स समासस्तत्पुरुष** इति। तत्पुरुष इत्यधिकारसूत्राल्लभ्यम्[९]। द्वितीयान्तस्य श्रितादिभिः समासविधिर्ज्ञायते। श्रितादिषु कर्तरि क्त इति। स च 'गत्यर्थ—' इत्यादिना। तत्र येन गत्यर्थादयस्तेभ्योऽनुक्तसमुच्चयार्थाच्चकारात्। कृष्णं श्रित इति। समासे कृते 'प्रथमानिर्दिष्टम्—' इत्युपसर्जनत्वाद् द्वितीयान्तस्य पूर्वनिपातः। प्रातिपदिकत्वम्। सुपो लुक्। स्वाद्युत्पत्तिः। एवमुत्तरत्र प्रक्रिया ज्ञेया। इत्यादीति। आदिना भवमतीतो भवातीतः कूपं पतितः कूपपतितो ग्रामं गतो ग्रामगतस्तरङ्गानत्यस्तस्तरङ्गात्यस्तः सुखं प्राप्तः सुखप्राप्तः सुखमापन्नः सुखापन्न इति। **गम्यादेरिति**। गम्यादेः समासस्येष्टिः। द्वितीयान्तं गम्यादिभिः समस्यते इत्यर्थः। गम्यादयश्च प्रयोगतो ज्ञेयाः। **ग्रामगमीति**। ग्रामं गमीति विग्रहः। 'गमेरिनिः' इत्यौणादिको भविष्यतीनिः। **ग्रामगामीति**। आवश्यकाधमर्ण्ययोर्णिनिः। उभयत्र 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीनिषेधः।

---

१. Before it—अथ तत्पुरुषः C. २. समर्थं सुबन्तं P, Dc_1. ३. समासः dropped C, D_1, D_3, D_4, Dc_1. ४. °स्तत्पुरुषसंज्ञकः P. ५. भवमतीतः कूपं पतितः ग्रामं गतः तरङ्गानत्यस्तः सुखमापन्नः D_4. ६. ग्रामं गामी ग्रामगामी dropped D_1, D_3, D_4, D_5, B_2. ७. Dropped Dc_4. ८. द्वितीयेति Dc_4. ९. °लभ्यते Dc_3.

अन्नं बुभुक्षुरन्नबुभुक्षुः । सुखेप्सुः[1] । तत्त्वबुभुत्सुः[2] । समर्थं किम् । पश्य कृष्णं श्रितस्त्वं साधून् ।

स्वयं क्तेन ॥२।१।२५॥

स्वयं क्तेन समस्यते स प्रोक्संज्ञः[3] ॥ स्वयंकृतम्[4] ।

खट्वा क्षेपे ॥२।१।२६॥

खट्वा द्वितीयान्ता क्तेन समस्यते निन्दायाम्[5][6] ॥ खट्वारूढो जाल्मः । निन्दायां किम् । खट्वामारूढो व्याचष्टे[7] ।

अन्नं बुभुक्षुरिति । भुजेः सन्नन्तात् 'सना शंसभिक्ष उः' । पश्य कृष्णमित्यादि । अत्र कृष्णशब्दस्य पश्येत्यनेन संबन्धः श्रितशब्दस्य साधूनित्यनेन । अतः कृष्णश्रितशब्दयोरन्वयाभावात् समासो न ।

स्वयम् । स्वयमित्यस्याव्ययत्वाद् द्वितीयासंबन्धो नास्तीति द्वितीयाग्रहणमुत्तरार्थमनुवर्तते । स्वयंकृतमिति । आत्मना कृतमित्यर्थः । ऐकपद्यमैकस्वर्यं च समासात् स्यात् ।

खट्वा । खट्वारूढ इति । आङ्पूर्वाद्रुहेः क्तप्रत्यये आरूढ इति स्यात् । अत्र विमार्गप्रस्थानेन निन्दा क्रियते जाल्मस्य । यतोधीत्य गुरुभिरनुज्ञातेन खट्वारोहणं न्याय्यं यत्त्वन्यथा खट्वारोहणं तद्विमार्गप्रस्थानम् । खट्वारोहणमिदं विमार्गप्रस्थानस्योपलक्षणं ज्ञेयम् । सर्व एवाविनीतः खट्वारूढ उच्यते । निन्दात्र समासार्थ एव तेन विभाषाधिकारेपि नित्यसमास एवायम् । न हि वाक्येन निन्दा गम्यते ।

---

१. P, B_2, D_3 drop सुखेप्सुः । तत्त्वबुभुत्सुः; C has सुखमीप्सुः सुखेप्सुः । तत्त्वं बुभुत्सुः तत्त्वबुभुत्सुः. २. D_1 drops तत्त्वबुभुत्सुः; D_5, Dc_1 drop it and also सुखेप्सुः. ३. तत्पुरुषः B_2; C, D_1, D_4. ४. C has स्वयं भुक्तम् after it. ५. स तत्पुरुषो निन्दायाम् D_1. ६. C has स तत्पुरुषः after it. ७. B_1 has a marginal note:—क्षेपस्य समासार्थत्वान्नित्यसमासोयं वाक्ये तस्याप्रतीतेः ।; D_4 follows B_1's marginal note, D_1 gives क्षेपस्य &c. for निन्दायां...to व्याचष्टे ; dropped from निन्दायाम् to व्याचष्टे D_3, D_6.

सामि ॥२।१।२७॥

[1]सामि क्तेन समस्यते ॥ सामिकृतम्[2] ।

[3]**ईषदकृता ॥२।२।७॥**

ईषदित्यव्ययम[4]कृता समस्यते स तत्पुरुषः । ईषत्[5] पिङ्गलः ।

कालाः ॥२।१।२८॥

कालवाचिनो द्वितीयान्ताः क्तेन समस्यन्ते[6] । अनत्यन्तसंयोगेपि । मासप्रमितश्च[7]न्द्रः ।

सामि । सामीत्येतदप्यव्ययमर्धपर्यायं तस्यासत्त्ववाचित्वाद् द्वितीयासंबन्धो नास्ति तत् सुबन्तेन क्तान्तेन समस्यते स तत्पुरुषः ।

कालाः । 'अत्यन्तसंयोगे च' इत्येव सिद्धेनत्यन्तसंयोगार्थं वचनमित्याह ।

अनत्यन्तसंयोगेपीति । **मासप्रमित** इति । माङ् मान इत्यस्मादादिकर्मणि क्तः । 'द्यतिस्यति—' इतीत्वम् । मासं प्रमातुमारब्ध इत्यर्थः । चन्द्र इति प्रतिपत्संबन्धी चन्द्रोत्र[8] विवक्षितः । ततश्च प्रतिपच्चन्द्रमसा न मासस्य व्याप्तिरिति नास्तीहात्यन्तसंयोगः ।

---

१. Vṛitti dropped P, B_2, D_4, Dc_1; सामि इत्यव्ययं कृदन्तेन समस्यते C; सामीत्येतदर्धपर्यायः स क्तान्तेन समस्यते स च तत्पुरुषः D_3. २. After it—अधिकृतमित्यर्थः । क्षेपस्य समासार्थत्वान्नित्यसमासोयम् D_5. ३. The Sûtra and the Vṛitti dropped P, D_3. ४. °मकृदन्तेन C, B_2, D_4; °मकृतेन D_1. ५. ईषत् कृत्यम् D_1. ६. After it—स तत्पुरुषः P. ७. °श्चन्द्रमाः B_2. ८. अत्र dropped Dc_3.

अत्यन्तसंयोगे च ॥२।१।२९॥

मुहूर्तं सुखं मुहूर्तसुखम् ।

तृतीया तत्कृतार्थेन गुणवचनेन ॥२।१।३०॥

तृतीयान्तं समर्थं तृतीयान्तार्थकृतगुणेनार्थेन च समस्यते स तत्पुरुषः । शङ्कुलया खण्डः शङ्कुलाखण्डः ।

अत्यन्त । काला इति वर्तते । क्तेनेति निवृत्तम् । अत्यन्तसंयोगः कृत्स्नसंयोगः । कालस्य स्वेन संबन्धिनानवयवेन व्याप्तिः । कालवाचिनो द्वितीयान्ताः सुबन्तेन समस्यन्तेऽत्यन्तसंयोगे गम्ये । मुहूर्तं सुखमिति । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया ।

तृतीया । तत्कृतेत्येतदसमस्तमेव 'सुपां सुलुक्' इति लुप्तविभक्तिकं गुणवचनेनेत्येतस्य विशेषणम् । तृतीयान्तेन गुणस्य करणं न संभवत्यतः सामर्थ्यादर्थकृतेनेति ज्ञायत इत्येतत् सर्वं चेतसि कृत्वाह । तृतीयान्तार्थकृतगुणेनेति । तृतीयान्तार्थेन कृतस्तृतीयान्तार्थकृतः । तृतीयान्तार्थकृतो गुणो यस्य गुणिनः स तृतीयान्तार्थकृतगुणो गुणी तद्वाचिनेत्यर्थः । ननु गुणवचनेनेत्येतावतैव कथं गुणी लभ्यते । उच्यते । गुणमुक्तवान् गुणवचनः । अथवा गुण उक्तो येन स गुणवचनः । कर्तरि करणे वा 'कृत्यल्युटो बहुलम्' इति ल्युट् । यश्च पूर्वं गुणे वर्तित्वा पश्चाद् गुणवर्तिद्रव्ये वर्तते स गुणवचनः । एतच्च वचनग्रहणसामर्थ्याल्लभ्यते । अन्यथा गुणेनेत्येवावक्ष्यत् । ततश्च घृतेन पाटवं शङ्कुलया खण्डनमित्येवमादौ गुणेन समासो न । शङ्कुलया खण्ड इति ।

---

१. C, D_5 have before it—क्तेनेति निवृत्तम् । कालवाचिनो द्वितीयान्ताः अत्यन्तसंयोगे च समस्यन्ते. २. सुबन्तं before it in C, D_1. ३. तृतीयार्थकृत° B_1; तृतीयान्तकृत D_1; तत्कृतेन गुणेनार्थेन च B_2. ४. स समासस्तत्पु° Dc_1. ५. °त्यस्य Dc_4. ६. ननु च Dc_2. ७. शङ्कुलाखण्ड इति Bc_1.

धान्येनार्थः धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः । समर्थं किम् । नार्थः शङ्कुलया खण्डोसौ ग्राऽणा । समर्थानुवृत्तिः सर्वत्र समासे तद्धिते च ज्ञेया ।

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥२।१।३१॥

एभिस्तृतीया समस्यते[4] । मासेन पूर्वो मासपूर्वः । एवं सदृशादौ । अवरस्येष्टिः । मासावरः ।

खण्डशब्दो गुणे खण्डने वर्तित्वा पश्चान्मतुब्लोपादभेदोपचाराद्वा वहति द्रव्ये वर्तेत इति गुणवचनः । अक्ष्णा काण इति । 'येनाङ्गविकारः' इति तृतीया । नात्र तृतीयान्तार्थेनाक्ष्णा देवदत्तस्य काणत्वम् । किं तर्हि । अन्येनैव केनचित् । अक्ष्णा तु केवलं काणगुणयुक्तो लक्ष्यते । गुणवचनेनेति किम् । गोभिर्वपावान् । गोभिः स वपावान् कृतो न तु वपावानित्ययं शब्दो गुणमुक्तवान् । [5]गुणवचनत्वात् । नार्थः शङ्कुलयेति । अत्र शङ्कुलयेत्यस्यार्थशब्देन संबन्धः । खण्डशब्दस्य ग्राऽणेत्यनेन संबन्धः । ततः शङ्कुलया खण्ड इत्यनयोः संबन्धाभाविनासामर्थ्याच्च समासः । समर्थानुवृत्तिरिति । समर्थानुसरणं सर्वत्र ज्ञेयं विशेषतः समासे तद्धिते च । समर्थः पदविधिरिति परिभाषयेत्यभिप्रायः ।

पूर्व । मासेन पूर्व इति । अस्मादेव समासविधिसामर्थ्यात् तृतीया । एवं सदृशादाविति । पित्रा सदृशः पितृसदृशः । मात्रा समः मातृसमः । पापेनोनः पापोनः । पापेन हीनः पापहीनः । शास्त्रेण[6] कलहः शास्त्रकलहः[7] । आचारेण निपुणः आचारनिपुणः । तिलैर्मिश्रः तिलमिश्रः । वाचा श्लक्ष्णः वाक्श्लक्ष्णः ।

---

१. तत्कृतेन किम् D_1; तत्कृते किम् D_3; तत्कृतार्थेनेति किम् D_4. २. समर्थः B_1; समर्थेति C. ३, Before it—एवं D_4. ४. After it—स तत्पुरुषः D_1. ५. न गुण° Bc_1. ६. शस्त्रेण Dc_4, Dc_3. ७. शस्त्र° Dc_4. Dc_3.

कर्तृकरणे कृता बहुलम् ॥२।१।३२॥

कर्तरि[1] करणे च[2] तृतीया कृदन्तेन समस्यते बहुलम् ॥ हरिणा त्रातो हरित्रातः । नखैर्भिन्नो[3] नखभिन्नः ।

कृत्यै[4]रधिकार्थवचने ॥२।१।३३॥

कर्तृकरणवाचि[5] तृतीयान्तं कृत्यैः समस्यते स्तुति-निन्दाधिक्यारोपे ॥

कर्तृ । हरिणा त्रात इति कर्तरि तृतीया । नखैर्भिन्न इति करणे । कर्तृकरण इति किम् । भिक्षाभिरुषितः । हेतावेषा तृतीया । बहुलग्रहणं सर्वोपाधिव्यभिचारार्थं तेन दात्रेण लूनवानित्यादौ न । पादहारको गले चोपक इत्यादौ[6] स्यात् । पूर्वस्यैव सूत्रस्य प्रपञ्च इति तद्व्याख्यानेनैव व्याख्यातप्रायत्वात् त्यक्तं सूत्रं व्याख्यायते ।

'कृत्यैरधिकार्थवचने' ॥२।१।३३॥ स्तुत्यर्थं निन्दार्थं वा असतः समारोपितार्थस्य[7] वचनमधिकार्थवचनं तस्मिन् द्योत्ये कर्तरि करणे च या तृतीया सा कृत्यैः सह समस्यते । कर्तरि

---

१. कर्तरि कारके Dc_1. २. च या तृतीया सा C. ३. After it—C has बहुलोक्तेर्वृक्षारूढ इत्यादावपि स्यात् । दात्रेण लूनवानेवमादौ च न स्यात् । ; B_2 has—बहुलग्रहणात् भिक्षाभिरुषितः । दात्रेण लूनवान् । खड्गेश्छिन्नवान् । कर्तृकरणे किम् । भिक्षाभिरुषितः । बहुलग्रहणं किम् । दात्रेण लूनवान् । खड्गेन छिन्नवान् D_4; D_5 follows B_2 and has इत्यादौ न after छिन्नवान्. ४. The Sûtra and the Vṛitti dropped D_3, D_5, Com. ५. तृतीयान्तं समर्थमधिकोक्तौ कृत्यैः सह समस्यते । तत्स्तुतिर्निन्दा वाधिकार्थता । काकपेया नदी । बाष्पैश्छेद्यानि तृणानि बाष्पच्छेद्यानि तृणानि । B_2; तृतीयान्तं कर्तृकरणं सुबन्तं कृत्यैः सह समस्यते अधिकार्थे स्तुति-निन्दाधिक्यारोपे । D_4. ६. इत्यादि Dc_3 ७. समारोपितस्या° Bc_1.

काकपेया नदी । बाष्पच्छेद्यानि तृणानि । कृत्यग्रहणे[1] यण्यतोर्ग्रहणम् । नेह[2] । काकैः पातव्या ।

अन्नेन व्यञ्जनम् २।१।३४॥

व्यञ्जनवाचि तृतीयान्तमन्नवाचिना[3] समस्यते ॥ क्षीरेण सिक्त ओदनः क्षीरोदनः ।

भक्ष्येण[4] मिश्रीकरणम् ॥२।१।३५॥

मिश्रीकरणवाचि तृतीयान्तं भक्ष्येण[5] समस्यते ॥ गुडेन मिश्रा धाना गुडधानाः ।

काकपेया नदी । करणे । बाष्पच्छेद्यानि तृणानि । एवं नाम पूर्णतोया नदी यत् तटस्थैः काकैरपि शक्या पातुम् । एवं नाम कोमलानि तृणानि यद् बाष्पेणापि छिद्यन्ते । एवं स्तुतिप्रयुक्ते अधिकार्थवचने उदाहरणे एते । एते एव निन्दार्थ-[6] प्रयुक्तेप्यधिकार्थवचने । एवं[7] नामाल्पतोया नदी यत् काकैरपि शक्या पातुम् । एवं नाम क्वथितानि तृणानि यद् बाष्पेणापि छिद्यन्ते ।

अन्नेन । संस्कार्यमभ्यवहार्यमन्नमोदनादि । संस्कारकं व्यञ्जनं क्षीरादि । **क्षीरोदन** इति । उपसेचनादिक्रियां विना संस्कार्यं संस्कारकं च न संभवतीति वृत्तावुपसेचनादिक्रियान्तर्भावादन्न-व्यञ्जनयोः सामर्थ्यम् । अत एवेदृशं वाक्यं दर्शितं क्षीरेण सिक्त ओदन इति ।

भक्ष्येण । खरविशदमभ्यवहार्यं भक्ष्यं तस्य संस्कारकं मिश्रीकरणम् । अमिश्रं मिश्रं क्रियतेऽनेनेति मिश्रीकरणम् । **गुडधाना** इति । वृत्तौ मिश्रक्रियाया अन्तर्भावात् पूर्वोत्तरपदयोः सामर्थ्यम् ।

---

१. कृत्यानां ग्रहणे D_4. २. काकैः पातव्या नदी । C. ३. तृतीयान्त-मन्नेन सह समस्यते । B_1. ४. भक्षेण D_3, D_5. ५. भक्षेण D_1, D_3, D_5; भक्ष्येण सह B_1. ६. निन्दार्थं D_2. ७. तथाहि । एवं° Bc_1. ८. प्रयुक्त Dc_1.

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥२।१।३६॥

चतुर्थ्यन्तार्थाय[१] यत् तद्वाचिनार्थादिभिश्च[२] चतुर्थी वा समस्यते[३]॥ तदर्थेन[४] प्रकृतिविकारभाव एवेष्टिः। यूपाय दारु[५] यूपदारु। अन्यत्र न। रन्धनाय स्थाली॥ अर्थेन नित्यसमासः सर्वलिङ्गता च*॥ द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः[६]। गोहितम्[७]। गोसुखम्। गोरक्षितम्।

चतुर्थी। तदर्थशब्दे तच्छब्देन सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते तस्मै इदं तदर्थमिति। एतदभिप्रेत्याह। **चतुर्थ्यन्तार्थाय यदिति**। **अर्थादिभिश्चेति**। अर्थबलिहितसुखरक्षितैः। **तदर्थेनेति**। तदर्थेन सह समासः प्रकृतिविकारभाव एव स्यादितीष्टिः। **यूपाय दारु** इति। तादर्थ्ये चतुर्थी। अत्र दारु प्रकृतिर्यूपो विकृतिः। **रन्धनाय स्थालीति**। तादर्थ्ये एव चतुर्थी। अत्र स्थाली न रन्धनस्य प्रकृतिः किं त्वाधारमात्रम्। **अर्थेनेति**। अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमासः स्यात् सर्वलिङ्गता च समासे सति स्यादिति वक्तव्यम्। अन्यथा विभाषाधिकारादनित्य एव समासः स्यात्। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति परपदलिङ्गतैव च स्यात्। **भूतबलिरिति**। भूतेभ्यो बलिः। तादर्थ्ये चतुर्थी। पूर्वत्रापि सर्वत्र तादर्थ्ये एव चतुर्थी। **गोहितमिति**। गोभ्यो हितम्। 'हितयोगे च' इति चतुर्थी। **गोसुखमिति**। गोभ्यः सुखम्। 'चतुर्थी चाशिष्या—' इति चतुर्थी। **गोरक्षितमिति**। तादर्थ्ये चतुर्थी।

---

१. चतुर्थ्यन्तं यत् B_1, D_2. २. तदर्थवाचिना B_1; तदर्थादिभिः B_2. ३. B_1 drops it; चतुर्थी वा dropped D_3. ४. तदर्थेति C. ५. दारुः D_3. ६. भूतेभ्यो बलिः B_1. ७. गोभ्यो रक्षितं गोरक्षितम् before this in B_1. ८. Dropped Dc_2. ९. Dropped Dc_2.

पञ्चमी भयेन ॥२।१।३७॥

वा[१] समस्यते । चौराद्[२] भयं चौरभयम् ।

भयभीतभीतिभीभिरिति वाच्यम्* ॥ वृकभीतः[३] । वृकभीतिः । वृकभीः ।

बहुलोक्ते[४]र्ग्रामनिर्गतः[५] । अधर्मजुगुप्सुरित्यादि[६] ।

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः॥ २।१।३८॥

एभिः पञ्चमी क्वचित् समस्यते ॥ सुखादपेतः[७] सुखापेतः । इत्यादि । अल्पशः[८] किम् । प्रासादात् पतितः[९] इत्यादौ क्वचिन्न ।

पञ्चमी । **वा समस्यत** इति । पञ्चम्यन्तं भयशब्देन वा समस्यत इत्यर्थः । **चौराद् भयमिति** । 'भीत्रार्थानाम्—' इत्यपादानत्वात् पञ्चमी । **बहुलोक्ते**रिति । 'कर्तृकरणे कृता बहुलम्' इति बहुलोक्तेर्ग्रामनिर्गतोधर्मजुगुप्सुरित्यादौ समास इत्यर्थः । तस्यैव बहुलग्रहणस्यायं योगः प्रपञ्चः ।

अपेत । अल्पश इत्यनेन समासस्याल्पताख्यायते अल्पेभ्य उत्पन्ना पञ्चमी समस्यत इति । तदिदमाह । **क्वचिदिति** । आदिना कल्पनापोढः चक्रमुक्तः स्वर्गपतितः तरङ्गापत्रस्तः ।

---

१. पञ्चम्यन्तं सुबन्तं भयवाचिना before it in C, B2, D5; पञ्चमी भयेन before it D2, D4; पञ्चमी भयेन समस्यते D3. २. Before it—वृकभयम् D4; dropped D5. ३. वृकभीः । वृकभीतिः । D3. ४. बहुलमिति D3, D5. ५. °ग्रामान्निर्गतो ग्रामनिर्गतः । D4. ६. Before it—अधर्माज्जुगुप्सुः D4. ७. दुःखादपेतो दुःखापेतः B1. ८. अल्पश इति B1. ९. After it—भोजनादपत्रस्तः D4.

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥२।१।३९॥

एतानि पञ्चम्यन्तानि क्तेन समस्यन्ते ॥ स्तोकान्मुक्तः । अल्पान्मुक्तः । एवमन्तिकार्थदूरार्थयोः । कृच्छ्रान्मुक्तः । 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् ।

षष्ठी ॥२।२।८॥

षष्ठ्यन्तं समर्थं[2] सुबन्तेन समस्यते वा[3] ॥ राज्ञः पुरुषो राजपुरुषः । कृद्योगलक्षणा षष्ठी समस्यते इति वाच्यम्* ॥ षष्ठीसमासनिषेधापवादः । व्यासकृतिः । भरतश्रवणम्[4] ।

स्तोक । **स्तोकान्मुक्त** इति । 'करणे च स्तोकाल्प–' इति पञ्चमी । ननु च 'सुपो धातुप्रातिपदिकयोः' इति पञ्चमीलोपेन भाव्यम् । समासस्य प्रातिपदिकत्वादित्याशङ्क्याह । '**पञ्चम्याः स्तोकादिभ्यः**' इत्यलुगिति ।

षष्ठी । **राजपुरुष** इति । सुपो लुक्यन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्न लोपः । **कृद्योगलक्षणेति** । 'कर्तृकर्मणोः कृति' इति प्राप्ता षष्ठीत्यनेनैव समासे सिद्धे पुनर्वचनं व्यर्थमित्याशङ्क्याह । **षष्ठीसमासेत्यादि** । प्रतिपदविधानषष्ठ्या न समास इत्यग्रे भविष्यता वक्तव्येन यः षष्ठीसमासनिषेधस्यापवाद इत्यर्थः । **व्यासकृतिरित्यादि** । व्यासस्य कृतिः । कर्तरि षष्ठी । भरतस्य श्रवणम् । कर्मणि ।

---

१. Dropped D_3. २. सुबन्तं B_1, D_1. ३. सह वा C; वा समस्यते D_5, B, P, C. ४. भारतश्रवणम् D_2, D_3, D_5.

याजकादिभिश्च ॥२।२।९॥

एतैः षष्ठी समस्यते । वक्ष्यमाण[1]निषेधापवादः ॥ द्विजयाजकः । याजक । पूजक । परिचारक । परिवेषक । स्नातक । अध्यापक । उत्सादक[2] । उन्मादक[3] । उद्वर्तक[4] । होतृ । पोतृ । भर्तृ । रथगणक[5] । पत्तिगणक ।

न निर्धारणे ॥२।२।१०॥

निर्धारणे या षष्ठी सा न समस्यते ॥ नृणां द्विजः श्रेष्ठः ।

याजका । **वक्ष्यमाणे**ति । 'तृजकाभ्यां कर्तरि' 'कर्तरि च' इति वक्ष्यमाणस्य निषेधस्यापवाद इत्यर्थः । रथगणकपत्तिगणकेति समस्तपाठो गणकशब्दस्य रथपत्तिशब्दाभ्यामेव समास इति दर्शयितुम् ।

न । निर्धारणं जातिगुणक्रियाभिरेकदेशविवेचनम् । **नृणामिति** । 'यतश्च निर्धारणम्' इत्यनेन षष्ठी । ननु च प्रतिपदविधानषष्ठ्या न समास इत्यनेनैव निषेधे सिद्धे व्यर्थं वचनम् । मैवम् । यतः 'यतश्च निर्धारणम्' इत्यनेन सप्तम्येव विधीयते षष्ठी तु 'षष्ठी शेषे' इत्यनेनैव प्राप्ता सप्तम्या मा बाधीति चकारेणानुकृष्यते । अत एव गृहस्वामीत्यादौ 'स्वामीश्वर—' इत्यादिना सामान्यविहिताया एव षष्ठ्याश्चकारेणानुकृष्टिरेवेति समासः ।

---

१. Before it—कर्तरि चेति D_4. २. C has आच्छादक for उत्सादक। उन्मादक. ३. P, Dc_1. D_1, D_3, D_4, D_5 omit उन्मादक. ४. After it—उत्पादक D_2. ५. B_1 has—महरथपत्तयो गणकेन समस्यन्त इति वाच्यम् । महगणकः । रथगणकः । पत्तिगणकः । B_2 follows B_1, dropping रथगणकः । पत्तिगणकः; D_2 has भर्तृ । कर्तृ and then महरथपत्तयो &c. as in B_2. ६. इति षष्ठी । Dc_4, Bc_1.

प्रतिपदविधानषष्ठ्या न समास इति वाच्यम्* ॥ सर्पिषो ज्ञानम् ।

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥२।२।११॥

एतदर्थैः षष्ठी न समस्यते ॥ पूरणे । सतां षष्ठः । गुणे । पटस्य शौक्ल्यम् । भावप्रत्ययान्तो गुणवाच्यत्र निषिध्यते ।

प्रतिपदविधानेति । 'षष्ठी शेषे' इति सामान्यविहितां षष्ठीं मुक्त्वान्या विशेषविहिता षष्ठी प्रतिपदविधाना । **सर्पिषो ज्ञानमिति** । 'ज्ञोविदर्थस्य करणे' इति षष्ठी ।

पूरण । अर्थशब्दः प्रत्येकमभिसंबध्यते तेन स्वरूपविधानं नेत्यभिप्रेत्याह । एतदर्थैरिति । **सतां षष्ठ** इति । षण्णां पूरणः । 'तस्य पूरणे डट्' । 'षट्कतिकतिपयचतुरां थुक्' इति थुक् । **सतामिति** । समुदायसमुदायिसंबन्धे शेषलक्षणैव षष्ठी । एवं पटस्य शौक्ल्यमित्यादिषु गुणगुणिभावादिसंबन्धे शेषलक्षणैव षष्ठी ज्ञेया । **भावप्रत्ययान्त** इत्यादि । गुणवाची गुणशब्दो भावप्रत्ययान्तोत्र सूत्रे निषिध्यते । तथोदाहृतं **पटस्य शौक्ल्यमिति** । **काशिकावृत्तावप्युदाहारि** बलाकायाः शौक्ल्यं काकस्य कार्ष्ण्यमिति । **भाष्यकारेणापि** बलाकायाः शौक्ल्यमित्याद्युक्त्वोक्तम् । 'एतदेव तस्मिन् योग उदाहरणम्' इति । अथवा पुनःपुनर्गुणमेव वक्तीति गुणवाची । आभीक्ष्ण्ये णिनिः । न कदाचिद् द्रव्यवाचीति यावत् । भावप्रत्ययान्त एव सन् यः केवलगुणवाची भावप्रत्ययान्तताभावे तु गुणवाची गुणि द्रव्यवाची च सोत्र निषिध्यत इत्यर्थः । तेन पटस्य शौक्ल्यं पटस्य शुक्लो गुणः

---

१. C has a marginal note—प्रतिपदे विधानेति षष्ठी । शेषेति सामान्यविहितां षष्ठीं मुक्त्वान्या विशेषविहिता षष्ठी प्रतिपदविधाना ।. २. एतैः सह षष्ठी समस्यते C. ३. सामान्यलक्षणविहितां Bc_1. ४. स्वरूपविधिर्नै° Dc_3, Dc_4. Dc_1, Bc_1. ५. केवलं Dc_3.

सदा गुणवाचिनो न निषेधः । चन्दनगन्धः । सुहितं तृप्तिः । फलानां तृप्तः । सत् । द्विजस्य कुर्वन् ।

ब्राह्मणस्य शुक्ला दन्ता इति सर्वत्र समासो न । तथोक्तम् । कदाचित्कः प्रयोगोस्ति गोः शुक्लो गुण इत्ययम् । तेनैवमादिषु बुधैः समासोपि निषिध्यत इति । **सदा गुणवाचिन** इति । यः सदा गुणमेव वक्ति न कदाचिद् द्रव्यं तस्य समासनिषेधो न । तथा चोक्तं **महाभाष्ये** । 'तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम् । ब्राह्मणवर्णः । चन्दनगन्धः । पटहशब्दः । नदीघोषः । न तु तद्विशेषणैरिति वक्तव्यम् । घृतस्य तीव्रो गन्धः चन्दनस्य मृदुः' इति । तस्मिन् गुण एव तिष्ठन्तीति तत्स्थाः सदा गुणवाचिन इत्यर्थः । उदाहरति चन्दनगन्ध इति । गन्धो हि केवलं गुण एव वर्तते न कदाचिद् गुणिनि । तथोक्तम् ।

'न कदाचित् प्रयोगोस्ति चन्दनं गन्ध इत्ययम् ।
चन्दनस्यैव गन्धो हि स्वप्रधानः प्रतीयते' ॥ इति ।

कथं गोविंशतिः । यतः संख्याया गुणत्वान्निषेधः स्यात् । नैष दोषः । यदयम् 'शतसहस्रान्ताच्च निष्कात्' इत्याह तज् ज्ञापयति संख्यायाः समासः स्यादिति । न हि तं विना शतसहस्रान्तता प्रातिपदिकस्य स्यात् । 'संज्ञाप्रमाणत्वात्' 'उत्तरपदार्थप्राधान्यम् ।' इत्यादिमुनित्रयप्रयोगादनित्यो गुणेन निषेध इति करणपाटवं बुद्धिमान्द्यं यत्नगौरवमित्यादि सिद्धम् । **फलानां तृप्त** इति । 'तृप्त्यर्थानां करणे षष्ठी वा' इति शेषविवक्षायां षष्ठी । सदिति शतृशानचोः संज्ञा । द्विजस्येत्यादौ शेषे षष्ठी । कुर्वन् । किङ्कर इत्यर्थः ।

---

१. °वाचिनां D3. २. सुहितार्थाः तृप्त्यर्थाः C. ३. केवले Dc3. ४. तदेव Dc3.

सतां कुर्वाणः । अव्ययम् । सतां कृत्वा । तव्य । सतां कर्तव्यम् । तव्यता भवत्येव । द्विजकर्तव्यम् । समानाधिकरणे । राज्ञो नलस्य । सति समासे पूर्वनिपातानियमः स्यात् । कर्मधारयः स्यादेव ।

क्तेन च पूजायाम् ॥२।१।१२॥

पूजायां विहितक्तेन षष्ठी न समस्यते ॥

सतां कर्तव्यमित्यत्र 'कृत्यानां कर्तरि वा' इति षष्ठी । तव्यतेत्यादि । निरनुबन्धग्रहणे न सानुबन्धकस्येति परिभाषया तव्यतोऽत्राग्रहणात् तेन समासो भवत्येवेत्यर्थः । **द्विजकर्तव्यमिति** । 'गतिकारकोपपदात् कृत्' इति प्रकृतिस्वरकृत्स्वरेणान्तस्वरितमुत्तरपदं स्यात् । तव्यतस्तित्त्वात् । यदि तु निरनुबन्धकेनापि समासः स्यात्तदा द्विज-कर्तव्यमित्यत्र प्रकृतिस्वरे कृते तव्यस्य प्रत्ययस्वरेणाद्युदात्तत्वे सति मध्योदात्तत्वं स्यात् । तच्च नेष्टम् । अतो निरनुबन्धेन समास-निषेधो न सानुबन्धेन । ननु च समानाधिकरणस्य षष्ठीसमास-निषेधेपि 'विशेषणं विशेष्येण बहुलम्' इति समासः स्यादेव । एवं त्वावश्यंभाविनि समासे यदि षष्ठीसमासः स्यात् को बाधः स्यादित्याशङ्क्याह । **सति समासे** इत्यादि । यदि षष्ठीसमासः स्यात् तदा द्वयोरपि षष्ठ्यन्तयोः प्रथमानिर्दिष्टत्वात् पूर्वनिपातोऽनियमेन स्यात् कर्मधारये तु विशेषणस्यैव प्रथमानिर्दिष्टत्वात् पूर्वनिपातो नियम्यत इति कर्मधारयः स्यादेवेत्यर्थः ।

क्तेन । पूजायामित्यनेन 'मतिबुद्धिपूजार्थेभ्यश्च' इत्यनेन सूत्रेण यः क्तो मत्यादौ विहितः स सर्वो लक्ष्यते इत्याह ।

---

१. तव्यता सानुबन्धेन समासो भवत्येव B_1, अत्र तु अनुबन्धोः भवत्येव B_2. २. कर्मधारये D_1, D_5. ३. षष्ठीसमासो न । B_2. ४. निरनुबन्धकग्रह° Dc_2, Dc_4. ५. लक्षित Bc_1,

पूजोक्तिरुपलक्षणम् । राज्ञां मतो बुद्धः पूजितो वा[1] ।

अधिकरणवाचिना च ॥२।२।१३॥

क्तेन षष्ठी समासो न ॥ इदमेषामासितं गतं भुक्तं वा[2] ।

कर्मणि[3] च ॥२।२।१४॥

उभयप्राप्तौ कर्मणि[4] षष्ठ्या समासो[5] न ॥ आश्चर्यो[6] गवां दोहोगोपेन[7] ।

पूजोक्तिरित्यादि । **राज्ञामिति** । 'क्तस्य च वर्तमाने' इति षष्ठी[8] । पूजायां किम् । छात्रहसितम् । नपुंसके भावे क्तः । शेषे षष्ठी ।

अधि । 'क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इत्यधिकरणे विहितस्य क्तस्येदं ग्रहणम् । **इदमेषामासितमित्यादि** । आस्यतेस्मिन्नित्यासितम् । गम्यतेस्मिन्निति गतम् । भुज्यतेस्मिन्निति भुक्तम् । एषामिति 'अधिकरणवाचिनश्च' इति षष्ठी । अधिकरणवाचिना किम् । छात्रहसितम् ।

कर्मणि । यदि या काचन कर्मणि षष्ठी[9] सा सर्वेह गृह्येत तर्हि 'कर्तरि च' इति निषेधं न कुर्यात् । अनेनैव सिद्धत्वात् । यत्र हि कर्तरि तृजकौ नियोगतस्तत्र कर्मण्येव[10] षष्ठी स्यात् तस्मात् 'कर्तरि च' इति पुनर्निषेधवचनात् 'उभयप्राप्तौ कर्मणि' इति या षष्ठी तस्या इदं ग्रहणमिति ज्ञायत इत्यभिप्रेत्याह । **उभयप्राप्तौ कर्मषष्ठ्याः समासो नेति** ।

---

१. B₁ has after it—पूजायां किम् । छात्रहसितम् । नपुंसके भावे क्तः । शेषे षष्ठी ।. २. After it—क्तेनेति निवृत्तम् । D₄. ३. Before it—क्तेनेति निवृत्तम् । D₅. ४. कर्मषष्ठ्या P D₃, Com.; कर्मणि षष्ठी सा न समस्यते । D₄. ५. न समासः । C. ६. चित्रं D₄. ७. °गोपालकेन P; °गोपकेन D₅. ८. 'क्तस्य च' इति षष्ठी Dc₁, Bc₁. ९. कर्मषष्ठी Dc₂. १०. एव dropped Dc₃.

तृजकाभ्यां कर्तरि ॥२।२।१५॥

कर्तरि[1] षष्ठ्यास्तृजकाभ्यां न समासः ॥ भवतः शायिका[2]। कर्तर्येव तृज्विधानात् तद्योगे कर्तृषष्ठी नेति तृजुत्तरार्थः। कर्तरि किम्। इक्षुभक्षिका।

कर्तरि च ॥२।२।१६॥

कर्त्रर्थ[3]तृजकाभ्यां षष्ठ्या[4] न समासः[5] ॥ अपां स्रष्टा[6]। वज्रस्य भर्ता।

तृज। भवतः शायिकेति। 'पर्यायार्हणोत्पत्तिषु ण्वुच्'। 'कर्तृकर्मणोः' इति कर्तरि षष्ठी। ननु तृचः किमित्युदाहरणं न प्रदर्शितमित्याशङ्क्याह। कर्तर्येवेति। तद्योगे कर्तृषष्ठी नेतीति। तृचैव कर्तुरभिहितत्वात्। तर्हि तृचो ग्रहणं किमर्थमित्यत आह। तृजुत्तरार्थ इति। इक्षुभक्षिकेति। पूर्ववत् ण्वुच्। अत्रेक्षुशब्दात् कृद्योगे कर्मणि षष्ठी।

कर्तरि। कर्तरीत्येतदकस्य विशेषणम्। तस्य कर्मणि भावे च विधानाद्व्यभिचारसंभवात्। न तृचः। तस्य कर्तर्येव विधानाद्व्यभिचाराभावात्। अपां स्रष्टेति। 'ण्वुल्तृचौ' इति तृच्। 'सृजिदृशोः—' इत्यम्। ननु च भर्तृशब्दो याजकादिषु पठ्यते तत् कथं वज्रस्य भर्तेति प्रत्युदाहृतमित्याशङ्क्याह।

---

१. कर्तृषष्ठ्यां P, D_2, D_4; कर्तृविहिततृजकाभ्यां D_6. २. शायिकाः D_1. ३. कर्तरि यौ तृजकौ ताभ्यां C D_4, B_2; कर्त्रर्थे D_5. ४. कर्मणि षष्ठी न समस्यते B_2; षष्ठी न समस्यते D_4. ५. C, Dc_1, D_4 have after it—सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणम्। इतरत्राव्यभिचारात्।; B_2 follows C but has विशेषग्रहणार्थं for विशेषणार्थं; कर्तरि तृजकाभ्यां D_2, D_3. ६. B_1 has after it—पुरां भेत्ता।. ७. वृत्त° Dc_1. ८. °त्याशङ्क्याह Dc_2, Dc_4. ९. कर्मषष्ठी Dc_2. १०. °चारासंभवात् Dc_2.

पत्यर्थभर्तृशब्दस्य याजकादित्वात् समासः । भूभर्ता । सतामर्चकः ।

नित्यं क्रीडाजीविकयोः ॥२।२।१७॥

षष्ठीसमासः ॥ उद्दालकपुष्पभञ्जिका । जीविकायाम् । दन्तलेखकः । तृजत्र नास्ति ।

पत्यर्थभर्तृशब्दस्येति । होतृशब्देन संबन्धिशब्देन साहचर्यात् भर्तृशब्दोपि संबन्धिशब्द एव याजकादौ गृह्यते न क्रियाशब्दः । वज्रस्य भर्तेत्ययं तु क्रियाशब्द इति भावः । अकमुदाहरति । सतामर्चक इति । कर्तरि ण्वुल् । कर्मणि षष्ठी । ननु[2] च तृचः सानुबन्धस्य[3] ग्रहणं किम् । न च तृनो निवृत्त्यर्थमिति वाच्यम् । तद्योगे 'न लोक—' इति षष्ठीनिषेधात् । एवं तर्ह्येतज् ज्ञापयति तद्योगेपि क्वचित् षष्ठी स्यादिति । ततश्च भीष्मः कुरूणां भयशोकहन्तेत्यादि सिद्धम् । अपि चायं निषेधोनित्य इति 'जनिकर्तुः प्रकृतिः' 'तत्प्रयोजको हेतुश्च' इत्यादिनिर्देशा[4] ज्ञापयन्ति । ततश्च 'निजत्रिनेत्रावतरत्वबोधिकाम्' इत्याद्युपपन्नम् ।

नित्यम् । उद्दालकपुष्पभञ्जिकेति । क्रीडाविशेषः । 'संज्ञायाम्' इति ण्वुल् । उद्दालकं पुष्पेषु । कर्मणि षष्ठी । दन्तलेखक इति । 'ण्वुल्तृचौ' इति ण्वुल् । क्रीडायां विकल्पेन षष्ठीसमासे प्राप्ते 'जीविकायां कर्तरि च' इति षष्ठीनिषेधे प्राप्ते वचनम् । तत्र नित्यग्रहणं जीविकार्थमुत्तरार्थं च । तृजत्रेति । क्रीडाजीविकयोस्तृच् नास्तीति नोदाहृत[5] इति भावः । वामनमते तु तृच् जीविकायामस्ति रमणीयकर्तेति ।

---

१. पतिपर्यायस्य भर्तृ° C, Dc1. २. ननु Dc2. ३. सानुबन्धकस्य Dc2, Dc3. ४. निर्देशो ज्ञापयति Dc3. ५. नोदाहृतमिति Dc2.

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥२।२।१॥

पूर्वादयोवयवा अवयविना समस्यन्ते एकं चेद् द्रव्यम् । षष्ठीसमासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । एकदेशिना किम् । पूर्वं नाभेः कायस्य । एकाधिकरणे किम् । पूर्वं छात्राणाम्[1] ।

पूर्वापर । एकदेशोस्यास्तीत्येकदेश्यत्रयवी तद्वाचिना पूर्वादयः समस्यमानाः सामर्थ्यादवयववाचिन एव स्युरित्यभिप्रेत्याह । **पूर्वादयोवयवा** इति । छन्दोवत् सूत्राणि भवन्तीति व्यत्ययेन तृतीयार्थे एकाधिकरण इति सप्तमी । ततश्चैकदेशिन एतद्विशेषणम् । अधिकरण-शब्दश्चात्र द्रव्यवाचीत्येतच्चेतसि कृत्वाह । **एकं चेद् द्रव्यमिति** । एकत्वसंख्याविशिष्टं चेद् द्रव्यमवयवी स्यादित्यर्थः । **पूर्वं कायस्येति** । अवयवावयविसंबन्धे षष्ठी । काय एकदेशी । एकं च द्रव्यम् । **पूर्वं नाभेः कायस्येति** । नाभेरिति दिग्योगलक्षणा पञ्चमी । नाभेर्यत् पूर्वत्वं तत् कायस्येत्येषोत्रार्थो विवक्षितः । तेन नाभिर्नात्रावयवी किं त्ववधिभूता तद्वाची नाभिशब्दः पञ्चम्यन्तो न समस्यते । **पूर्वं छात्राणामिति** । अत्र बहुत्वसंख्या युक्ता अवयविनश्छात्रा इति न समासः । ननु चात्र छात्राणां पूर्वमामन्त्रयस्वेति[2] यां काञ्चन क्रियामध्याहृत्य निर्धारणं परिकल्प्यते ततश्च 'न निर्धारणे' इत्येव परत्वात् षष्ठीसमासनिषेधः स्यात् किमेकाधिकरणग्रहणेन । उच्यते । एवं सति पूर्वं कायस्येत्यत्रापि निर्धारणं स्यात् । अस्त्यत्रावयवस्यापकृष्टिक्रिया निर्धारणहेतुः । तथा[3] च तस्यैव योगस्य विषय आरभ्यमाणो योगस्तदपवादः स्यात् ।

---

१. B_1 drops it. २. After it—आमन्त्रयस्व । D_4. ३. तथापि Dc_1.

सर्वेणैकदेशेनाह्नः समासः । संख्याविसायेति ज्ञापकात् । मध्याह्नः । सायाह्नः ।

अर्धं नपुंसकम् ॥२।२।२॥

समांशवाच्यर्धशब्दः क्लीबे । स[1] च तथा समस्यते ॥ अर्धं पिप्पल्या[2] अर्धपिप्पली । क्लीबे[3] किम् । ग्रामार्धः । द्रव्यैक्ये एव । अर्धं पिप्पलीनाम् ।

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ॥२।२।३॥

एतानि वा तद्वत् । पूरण[4]गुणेति [5]निषेधं बाधित्वा पक्षे षष्ठीसमासः ।

सर्वेणेति । यदयं 'संख्याविसायपूर्वस्य' इत्याह ततो ज्ञायते सर्वेणावयवेनाह्नः समास इति । अन्यथा हि सायंपूर्वत्वमह्नस्य न घटत इत्ययुक्तं तद्वचनं स्यात् । केचित्तु सर्वेणैकदेशवाचिना एकदेशिवाचिनः समासः स्यात् न त्वहःशब्दस्यैवेति ज्ञापनमाहुः । तेन मध्यरात्र इत्यपि सिध्यति ।

अर्धम् । **समांशेत्यादि** । समांशः [6]समप्रविभागः तं वदति योऽर्धशब्दः स नपुंसके वर्तते स चावयववाच्यवयविवाचिना समस्यते एकं चेद् द्रव्यमवयवी स्यादित्यर्थः । **अर्धपिप्पलीति** । 'परवल्लिङ्गम्'– इति स्त्रीलिङ्गता । विभाषानुवृत्तेरर्धपिप्पलीत्यादौ नोपसर्जनत्वमिति 'गोस्त्रियोः—' इति ह्रस्वो न । एकदेशिना किम् । अर्धं पशोर्देवदत्तस्य । देवदत्तशब्देन समासो न ।

द्वितीय । **एतानि वा तद्वदिति** । एतान्यवयववाचिन्यवयविवाचिना समस्यन्ते एकं चेद् द्रव्यम् । यद्यत्र 'पूरणगुण—' इति षष्ठीसमासनिषेधः [7]स्यादन्यतरस्यां ग्रहणमनर्थकं स्यात् वाक्यस्य महाविभाषयैव सिद्धत्वादित्यभिप्रेत्याह । **पूरणगुणेतीत्यादि** ।

---

१. C drops स. २. B_1 drops अर्धं पिप्पल्याः. ३. क्लीबं D_4, D_8. ४. पूरणेति C. ५. निषेधविधिं P. ६. समविभागः Dc_4. ७. स्यात्तर्हि° Dc_2

द्वितीयं भिक्षाया द्वितीयाभिक्षा । भिक्षाद्वितीयम् । एवं तृतीयादि । तुरीयस्येष्टिः । [2]तुरीयाभिक्षा । भिक्षातुरीयम् ।[3]

प्राप्तापन्ने च द्वितीयया ॥२।२।४॥

[4]एते वा तद्वत् ॥ पक्षे द्वितीयासमासः । प्राप्तो जीविकां प्राप्तजीविकः । जीविकाप्राप्तः । आपन्नजीविकः । जीविकापन्नः ।

कालाः परिमाणिना ॥२।२।५॥

[5]परिमाणवद्वाचिना कालाः समस्यन्ते ॥

द्वितीयभिक्षेति । भिक्षाया द्वितीयो भाग इत्यर्थः । एकदेशिनेत्येव । द्वितीयं भिक्षाया भिक्षुकस्य । एकाधिकरण इत्येव । द्वितीयं भिक्षाणाम् ।

प्राप्ता । **पक्षे द्वितीयासमास** इति । 'द्वितीया श्रित—' इत्यादिना द्वितीयासमासविधिसामर्थ्यादिति भावः । **प्राप्तजीविक** इति । उपसर्जनत्वात् 'गोस्त्रियोः—' इति ह्रस्वः । अत्र 'परवल्लिङ्गम्—' इति न भवति । 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न' इति निषेधात् । यदा तु प्राप्ता जीविकामिति विगृह्य समासः क्रियते तदा प्राप्तजीविकेति स्यात् । 'स्त्रियाः पुंवत्' इति योगविभागेन पुंवद्भावात् । अथवा 'प्राप्तापन्ने च' इत्यत्र चेति विच्छिद्य प्राप्तापन्नयोः समासे जातेत्वं च विधीयते ।

कालाः । सामर्थ्यात् कालाः परिमाणवाचिनो गृह्यन्ते ।

---

१. Dropped B_1, P, C. २. तुरीयं भिक्षायाः before it in C, B_2. ३. After it—तलपादाग्रहस्तयोर्वेति वाच्यम्. पादस्य तलं तलपादं, पादतलं वा । एवं हस्ताग्रम् । अग्रहस्तम् । B_2, D_4. ४. एतौ P, C. ५. परिमाणं यस्यास्ति तद्वाचिना B_1; परिमाणवाचिना D_1.

मासो जातस्य मासजातः ।

सप्तमी शौण्डैः ॥२।१।४०॥

सप्तम्यर्थं समर्थं शौण्डादिभिर्विभाषा समस्यते स तत्पुरुषः ॥ अक्षेषु शौण्डः अक्षशौण्डः ॥ शौण्ड । धूर्त । कितव । व्याड । संवीत । अन्तर । आधि । पटु । पण्डित । कुशल । चपल । निपुण ।

मासादयो हि जातादेः संबन्धिनीरादित्यगतीर्गमयन्तीति भवन्ति परिच्छेद्यहेतुत्वात् परिमाणं गौणम् ।

सप्तमी । शौण्डैरिति बहुवचननिर्देशादाद्यर्थो गम्यत इत्याह । **शौण्डादिभिरिति** । **अक्षेषु शौण्ड** इति । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिष्वधिकरणे सप्तमी । अन्तःशब्दोत्राधिकरणप्रधान एव पठ्यते । अतस्तत्प्रयोगे तत्सामानाधिकरण्यमेव सप्तम्याः कारणम् । वनेन्तः वनान्तर्वसतीति । पूर्वपदार्थप्राधान्ये विभक्त्यर्थेव्ययीभावः । अन्तर्वणमिति । अधिशब्दोत्र पठ्यते तस्याप्यधिकरणप्राधान्येव्ययीभावः । अधिस्त्रीति । आधेयप्राधान्ये तु तत्पुरुषः । ब्राह्मणेष्वधि ब्राह्मणाधीन इति । ब्राह्मणाधिशब्दः केवलो न प्रयुज्यते । 'अषडक्षाशितं—' इत्यादिना अध्युत्तर-पदान्नित्यस्य स्वार्थिकस्य खस्य विधानात् ।

---

१. वा P, C, B1, B2. २. Before it—प्रवीण D4. ३. पवीण । अधिक । पटु । &c. D2; अन्तर् Com. ४. Before it—प्रवीण B1, D5. ५. °करणसप्तमी Dc3, Dc2.

'कर्तृकरणे कृता बहुलम्' इति बहुलोक्तेरन्यत्रापि द्वितीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः ॥

'सिद्धशुष्कपक्वबन्धैश्च' इत्येवमादीनि तत्पुरुषविधायीनि सूत्राणि 'कर्तृकरणे कृता बहुलम्' इति बहुलग्रहणस्य सर्वविधिव्यभिचारार्थस्यैवोदाहरणप्रपञ्चभूतानीत्याभिप्रेत्याह । कर्तृकरण इत्यादि । अत एव व्याख्यातप्रायत्वात् त्यक्तान्यष्टौ सूत्राणि वैशद्यार्थं व्याख्यायन्ते । 'सिद्धशुष्कपक्वबन्धैश्च' ॥२।१।४१॥ एभिः सह सप्तम्यन्तं समस्यते वा स तत्पुरुषः । काम्पिल्ये सिद्धः काम्पिल्यसिद्धः । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः । 'ध्वाङ्क्षेण क्षेपे' ॥२।१।४२॥ ध्वाङ्क्षवाचिना सुबन्तेन सह सप्तम्यन्तं समस्यते निन्दायां गम्यमानायाम् । तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः । अनवस्थित इत्यर्थः । तीर्थकाकः । तीर्थवायसः ।

१. अपि dropped D_1. २. After it the Sûtras २।१।४१-४२-४३-४४-४६ ४७-४८ are given with their Vrittis and instances in B_1, D_1, D_4; C gives only २।१।४१-४२-४३.

सिद्धशुष्कपक्वबन्धैश्च ॥ २।१।४१॥

एतैः सप्तमी समस्यते स तत्पुरुषः ॥ काम्पिल्यसिद्धः* । आतपशुष्कः । स्थालीपक्वः । चक्रबन्धः ।

ध्वाङ्क्षेण क्षेपे ॥ २।१।४२॥

†ध्वाङ्क्षवाचिना ‡सप्तम्यन्तं समस्यते §क्षेपे वाच्ये स तत्पुरुषः । ¶तीर्थे ध्वाङ्क्ष $इव तीर्थध्वाङ्क्षः । अनवस्थित इत्यर्थः ।

* After it—साम्तपासिद्धः D_1. † ध्वाङ्क्षेण C. After it—सह D_1. ‡ सुबन्तं D_1; सह सुबन्तं D_4. § क्षेपे वाच्ये omitted in B_1, D_1, D_4. ¶ After it—क्षेपे निन्दायाम् D_1. $ D_1 drops it.

क्षेपे किम् । तीर्थे ध्वाङ्क्षस्तिष्ठति । 'कृत्यैर्ऋणे' ॥२।१।४३॥ ऋणे गम्ये सप्तम्यन्तं कृत्यान्तैः सह समस्यते । यत्प्रत्ययेनैवेष्यते । मासे देयमृणं मासदेयम् । ऋणग्रहणं नियोगोपलक्षणार्थम् । इहापि स्यात् । पूर्वाह्णे गेयं साम पूर्वाह्णेगेयम् । ऋणे किम् । मासे देया भिक्षा । 'संज्ञायाम्' ॥ २।१।४४॥ संज्ञायां विषये सप्तम्यन्तं समस्यते । संज्ञा समुदायोपाधिस्तेन नित्यसमासोयम् । न हि वाक्येन संज्ञा गम्यते । अरण्येतिलकाः । 'हलदन्तात्' इति सप्तम्या अलुक् । 'क्तेनाहोरात्रावयवाः' ॥ २।१।४५॥ अहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते । पूर्वाह्णकृतम् । पूर्वरात्रकृतम् । अवयवाः किम् । दिवा वृत्तम् । रात्रौ वृत्तम् । 'तत्र' ॥२।१।४६॥ तत्रेत्येतत् क्तान्तेन सह समस्यते । तत्रकृतम् । तत्रपीतम् । ऐकपद्यमैकस्वर्यं च समासप्रयोजनं समासत्वात् स्याद् । 'क्षेपे' ॥२।१।४७॥

१. Dropped Dc3.

कृत्यैर्ऋणे ॥ २।१।४३ ॥

*ऋणे वाच्ये सप्तम्यन्तं समस्यते स तत्पुरुषः ॥ मासे देयं मासदेयमृणम् । ऋणग्रहणं नियोगोपलक्षणार्थम् । पूर्वाह्णेगेयं साम । सप्तम्या अलुक् ।

संज्ञायाम् ॥ २।१।४४॥

संज्ञायां विषये सप्तम्यन्तं सुपा समस्यते स तत्पुरुषः । अरण्येतिलकः । नित्यसमास एवायम् । न हि वाक्येन संज्ञा गम्यते ।

तत्र ॥ २।१।४६ ॥

तत्रेत्येतत् क्तान्तेन समस्यते स तत्पुरुषः । तत्रकृतम् ।

क्षेपे ॥ २।१।४७ ॥

* सप्तम्यन्तात् समस्यते स तत्पुरुषः । ऋणे वाच्ये B1; D1 drops the Vṛitti; D4 follows B1 but has कृत्यैः for सप्तम्यन्तात् ।.

निन्दायां गम्यमानायां सप्तम्यन्तं क्तान्तेन समस्यते । अवतप्तेनकुलस्थितम् । चापलमेतदनवस्थितत्वं तवैतदित्यर्थः । उदकेविशीर्णम् । प्रवाहेमूत्रितम् । भस्मनिहुतम् । निष्फलं यत् क्रियते तदेवमुच्यते । 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । 'पात्रेसमितादयश्च' । २।१।४८॥ समुदाया एव तत्पुरुषसंज्ञा निपात्यन्ते निन्दायां गम्यमानायाम् । ये त्वत्र क्तान्तास्तेषां पूर्वेणैव सिद्धे पुनःपाठो युक्तारोह्यादित्वेन पूर्वपदाद्युदात्तत्वं यथा स्यादिति । तत्र हि पात्रेसमितादयश्चेति पठ्यते । पात्रेसमिताः । पात्रेबहुलाः । अवधारणेनात्राक्षेपो गम्यते । पात्रे एव समिताः न पुनः क्वचित् कार्ये । उदुम्बरमशकादिषूपमयाक्षेपः । मातरिपुरुष इति निषिद्धसेवया । पिण्डीशूरादिषु निरीहतया । वृत्करणाभावादाकृतिगणोयम् । पात्रेसमिताः । पात्रेबहुलाः । उदुम्बरमशकः । उदुम्बरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डूकः । उदपानमण्डूकः । नगरकाकः । नगरवायसः । मातरिपुरुषः । पिण्डीशूरः । गेहेशूरः । गेहेनर्दी । गेहेक्ष्वेडी । गेहेविजिती । गेहेव्याडः । गेहेतृप्तः । आखनिकबकः । गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गेहेमेही । गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेटिरिटिरा[1] । कर्णेचुरुचुरा[2] । चकारोवधारणार्थः । तेन समासान्तरं न भवति परमपात्रे समिता इति ।

---

१. °टिरटिरा Dc3. २. °चुरचुरा Dc3.

निन्दायां सप्तम्यन्तं क्तान्तेन समस्यते स तत्पुरुषः ॥ उदकेविशीर्णः । तत्पुरुषे कृति बहुलमित्यलुक् ।

पात्रेसमितादयः ॥ २।१।४८ ॥

पात्रेसमिताः ।

कुगतिप्रादयः ॥२।२।१८॥

कुशब्दो गतिसंज्ञाः प्रादयश्च समर्थेन नित्यं समस्यन्ते। स तत्पुरुषः[1]। कुपुरुषः[2]। गतिः[3]। ऊरीकृत्य[4]। समासत्वादत्र क्त्वो[5] ल्यप्। अत्र 'सुप् सुपा' इत्यननुवृत्तेस्तिङापि

कुगति। कुशब्दोऽत्राव्ययं पापाद्यर्थं गृह्यते गत्यादिसाहचर्यात्। न पृथिव्यादिद्रव्यवाची[6]। गतिग्रहणेनैव प्रादिग्रहणे सिद्धे क्रियायोगाभावेपि समासो यथा स्यादित्येवमर्थं प्रादिग्रहणम्। **कुपुरुष** इति। कुत्सितः पापः पुरुषः। **ऊरीकृत्येति**। 'ऊर्यादिच्विडाचश्च'। इत्यूरीशब्दो गतिसंज्ञः। 'समानकर्तृकयोः पूर्वकाले' इति क्त्वा। **समासत्वादिति**। समासे नञ्पूर्वे क्त्वो ल्यबिति। **अत्र 'सुप् सुपा' इत्यननुवृत्तेरिति**। अयं भावः। 'उपपदमतिङ्' इत्युत्तरसूत्रस्थमतिङ्ग्रहणमुभयोर्योगयोः शेषः। गतिः समस्यते अतिङन्तश्च समासः स्यात्। ततः प्रपचतीत्यत्र न समासः। उपपदं समस्यते अतिङन्तश्च समासः स्यादिति। ततो माङि लुङ्। मा कार्षीदिति न समासः। ततश्चातिङ्ग्रहणात् 'सुप् सुपा' इति नानुवर्तत इति ज्ञायते। ततस्तिङापि समास इति। असुपो सुपा समासात् केनचित् तिङा गतिमता उदात्तवतापि समास इत्यर्थः। तथोक्तं[7] भाष्ये[8]। उदात्तवता तिङा गतिमता चाव्ययस्य समासो वक्तव्यः। अनुव्यचलत्। अनुप्राविशत्।

---

१. C has after it—उदात्तवता तिङा गतिमता वाव्ययस्य समासो वक्तव्यः। कुपापीषदर्थयोः. २. Before it—कुत्सितो विप्रः कुविप्रः। ईषदुष्णं कोष्णम् C, B_1, B_2 (B_1 has कवोष्णम् for कोष्णम्); C and D_2 drop कुपुरुषः. ३. उर्यादयो गतिसंज्ञा C; P drops गति. ४. After it—उररीकृत्य P, C, B_1, B_2. ५. Dropped D_1, D_2, D_3. ६. °शब्दवाची Bc_3, Bc_1, Dc_1, Dc_2. ७. तथा चोक्तं Dc_3. ८. महाभाष्ये Dc_2.

समासः । ऊरीकरोति । प्रोदि । प्रकृत्य । प्रकरोति ।

ऊर्यादिच्विडाचश्च ॥१।४।६१॥

ऊर्यादयश्च्व्यन्ता डाजन्ताश्च गतिसंज्ञाः ॥

व्याकरोति । तत्परियन्तीति । ऊरीकरोतीति । अत्र यदिति शेषः । तत्र 'निपातैर्यद्यदि—' इति तिङन्तनिघातनिषेधात् उदात्तवता तिङा समासः । एवं प्रकरोतीत्यादावपि यदित्यध्याहारः । अन्येन तिङा गतीनां न समासः । विभक्तिस्तु सत्यपि समासत्वे न प्रातिपदिकत्वेन भवति । तिङैवैकत्वादेरुक्तत्वात् । गतिसंज्ञकान् दर्शयितुमाह ।

ऊर्यादय इत्यादि । **एषामव्ययानामिति** । ऊर्यादिकानां तिरसन्तानामव्ययानां प्रादीनां विंशतेश्च 'गतिश्च' इत्यादिभिः सूत्रैरर्थविशेषेषु क्रियायोगे गतिसंज्ञा विधीयत इति ज्ञेयम् । स्पष्टत्वात् त्यक्तान्येकादशसूत्राणि क्रमेण व्याख्यायन्ते । 'गतिश्च' ॥१।४।६०॥ प्रादयो गतिसंज्ञकाश्च स्युः क्रियायोगे । चकारो गत्युपसर्गसंज्ञयोः समावेशार्थः । तेन प्रणीतमभिषिक्तमत्र 'गतिरनन्तरः' इति स्वरः 'उपसर्गात्—' इति णत्वषत्वे च स्तः । 'ऊर्यादिच्विडाचश्च' । १।४।६१॥ ऊर्यादयः शब्दाश्च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः । च्विडाचोः कृभ्वस्तियोगे विधिस्तत्साहचर्यात् ऊर्यादीनामपि तैरेव योगे गतिसंज्ञा ज्ञेया । ऊरीकृत्य । शुक्लीकृत्य । पटपटाकृत्य । ऊरी । उररी । ऊररी । एतेङ्गीकारे । पापी । ताली । आताली । वेताली । धूसी । एते विस्तृतौ । सकला । संशकला । ध्रंसकला । ध्वंसकला । पेशलादयो हिंसायाम् ।

---

१. Dropped P. २. The Com. omits the Sûtra. ३. C, B₁, D₄ have स्युः after it. ४. °परिपचन्तीति Dc3. ५. समासत्वेपि Dc1. ६. व्याख्यामः । Dc4; व्याख्यास्यामः Dc3.

अनुकरणम् । सत्[1] । असत् । कारिका[2] । अलम्[3] । अन्तर्[4] ।

सकलां कृत्यसंकल्पां लाकृत्येत्यादि । हिंसित्वेत्यर्थः । गुलुगुधा पीडार्थे । गुलुगुधाकृत्य । सजूः सहार्थे । सजूःकृत्य । फलूकृत्य । फलीकृत्य । विक्लीकृत्य । आक्लीकृत्य । एते वैकृत्ये । आलाष्टी केवासी सेवाली वर्षाली पश्पसा मस्मसा[5] एते हिंसायाम् । श्रौषट् वौषट् स्वाहा स्वधा एते दाने । प्रादुस् आविस् प्रकाशने । 'अनुकरणं चानितिपरम्' । १।४।६२।। इतिः परो यस्मादिति बहुव्रीहिः । अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं स्यात् । खाट्कृत्य । अनितिपरं किम् । खाडिति कृत्वा निरष्ठीवत् । 'आदरानादरयोः सदसती' । १।४।६३।। प्रीतिसंभ्रम आदरः । परिभवौदासीन्यमनादरः । आदरानादरयोर्यथासंख्यं सदसच्छब्दौ गतिसंज्ञौ स्तः । सत्कृत्य । असत्कृत्य । आदरानादरयोः किम् । सत्कृत्वाकाण्डं गतः । असत्कृत्वाकाण्डं गतः । कारिकाशब्दस्योपसंख्यानम् । कारिकाकृत्य । 'भूषणेलम्' । १।४।६४।। अलंशब्दो भूषणे गतिसंज्ञः । अलंकृत्य । भूषणे किम् । अलं भुक्त्वौदनं गतः । 'अन्तरपरिग्रहे' । १।४।६५।। अपरिग्रहेर्थे अन्तःशब्दो गतिसंज्ञः । अन्तर्हत्य । मध्ये हत्वेत्यर्थः । अपरिग्रहे किम् । अन्तर्हत्वा मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः ।

---

१. भूषणे अलम् before it—B_2. २. P, D_3 drop it. ३. Dropped B_2. ४. Dropped D_3. ५. मष्मसा Dc_1; मष्मषा Dc_4, Dc_3. ६. Dropped Dc_1, Dc_2.

कणे। मनस्। पुरस्। अस्तम्। अदस्। तिरस्। एषामव्ययानां प्रादीनां च 'गतिश्च' इत्यादिभिः सूत्रैरर्थविशेषेषु क्रियायोगे गतिसंज्ञा ज्ञेया।

'कणेमनसी श्रद्धाप्रतिघाते'। १।४।६६॥ कणेमनःशब्दौ अभिलाषातिशयार्थौ श्रद्धाप्रतिघाते गतिसंज्ञौ स्तः। कणेहत्य पयः पिबति। मनोहत्य पयः पिबति। तावत् पिबति यावदस्याभिलाषो निवृत्तः। श्रद्धा प्रतिहतेत्यर्थः। श्रद्धाप्रतिघाते किम्। कणे हत्वा गतः। मनो हत्वा गतः। अत्र कणेशब्दोऽधिकरणभूते तण्डुलावयवे वर्तते मनःशब्दश्चेतसि। 'पुरोऽव्ययम्'। १।४।६७॥ असिप्रत्ययान्तः पुरःशब्दोऽव्ययं स गतिसंज्ञः स्यात्। समासस्वरोपचाराः प्रयोजनम्। पुरस्कृत्य। 'नमस्पुरसोर्गत्योः' इति विसर्गस्य सः। अव्ययं किम्। पुरः कृत्वा गतः। नगरीः कृत्वा गत इत्यर्थः। 'अस्तं च'। १।४।६८॥ अव्ययमिति वर्तते। अनुपलब्धौ वर्तमानो मान्तोऽस्तंशब्दोऽव्ययं स गतिसंज्ञः। अस्तं गत्य सविता पुनरुदेति। अव्ययं किम्। अस्तं काण्डम्। निक्षिप्तमित्यर्थः। 'अदोऽनुपदेशे'। १।४।७०॥ उपदेशः परस्यार्थकथनम्। स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेशः। तस्मिन् विषयेऽदःशब्दो गतिसंज्ञः। अदः कृत्य। अनुपदेशे किम्। अदः कृत्वा काण्डं गत इति परस्य कथयति। 'तिरोऽन्तर्धौ'। १।४।७१॥ व्यवधाने तिरःशब्दो गतिसंज्ञः। तिरोभूय। अन्तर्धौ किम्। तिरोभूत्वा स्थितः। अनृजुर्भूत्वा पार्श्वतो वा भूत्वेत्यर्थः

---

१. B_1 drops it; B_2 has श्रद्धाप्रतिघाते before it. २. गतिसंज्ञाः स्तुः B_2. ३. °प्रतीघाते Dc3, Dc4. ४. Dropped Dc2, Dc3. ५. विसर्जनीयस्य Dc3. ६. °संज्ञकः Dc3. ७. नोपदेशः Dc4.

अच्छ गत्यर्थवदेषु ॥१।४।६९॥

अच्छगत्य[1] । अच्छगच्छति । अच्छोद्य । अच्छवदति ।[2]

तिरस्[3] ।

उपाजेन्वाजे ॥१।४।७३॥

साक्षात्प्रभृतयः[5] ॥१।४।७४॥

अच्छ । अव्ययमिति[6] वर्तते । अभिशब्दार्थोच्छशब्दोव्ययं स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञः । तिरस् इत्यादि । एते तिरस्प्रभृतयः करोतौ धातौ परे 'विभाषा कृञि' इत्यादिभिः सूत्रैर्वा गतिसंज्ञा विधीयन्त इत्यर्थः । तानि पञ्च सूत्राणि व्याख्यायन्ते । 'विभाषा कृञि' । १।४।७२॥ अन्तर्धाविति वर्तते । प्राप्तविभाषेयम् । तिरःशब्दः करोतौ परे वा गतिसंज्ञः । तिरःकृत्य[7] । तिरःकृत्वा । अन्तर्धौ किम् । तिरः[8] कृत्वा काष्ठं गतः । 'उपाजेन्वाजे' ।१।४।७३॥ एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते । तौ कृञि वा गतिसंज्ञौ स्तः । उपाजेकृत्य । उपाजेकृत्वा । अन्वाजेकृत्य । अन्वाजेकृत्वा । 'साक्षात्प्रभृतीनि च' ।१।४।७४॥ साक्षात्प्रभृतीनि कृञि परे वा गतिसंज्ञानि स्युः । साक्षात्प्रभृतिषु च्व्यर्थवचनम् । साक्षात्कृत्य । साक्षात्कृत्वा । साक्षात् । मिथ्या । चिन्ता । भद्रा । लोचना । अमा । आस्था । अद्धा । प्राजर्या । प्राजरुहा ।

---

१. अच्छगति D_1; गत्यर्थोच्छशब्दोव्ययम् । गत्यर्थे वदे च गतिसंज्ञः स्यात् B_2. २. Dropped D_3. ३. After this—विभाषा कृञि ॥ १।४।७२॥ तिरस् D_1, B_1, P; C. ४. Dropped B_2, D_3. ५. °प्रभृतीनि च B_2, Com. ६. °मित्यनुवर्तते Dc_2. ७. तिरस्कृत्य । तिरःकृत्य । Dc_3. ८. तिरस्कृत्वा Dc_3.

उरसिमनसी ॥१।४।७५॥

मध्ये पदे निवचने च ॥१।४।७६॥

एते कृञि परे 'विभाषा कृञि' ॥१।४।७२॥ इत्यादिभिर्वा गतिसंज्ञाः ॥

वीजर्या । वीजरुहा । संजर्या । अर्थे । लवणम् । उष्णम् । शीतलम् । उदकम् । आर्द्रम् । गतिसंज्ञासंनियोगेन लवणादीनां मान्तता निपात्यते । अग्नौ । वशे । विकसने । प्रतपने । विकम्पने । विहसने । प्रादुस् । नमस् । आविस् । 'अनत्याधान उरसिमनसी' ।१।४।७५॥ अत्याध्यानमुपश्लेषणम् । तदभावे उरसिमनसीशब्दौ विभक्तिप्रतिरूपकौ निपातौ वा गतिसंज्ञौ स्तः । उरसिकृत्य । उरसिकृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य । मनसि-कृत्वा । निश्चित्येत्यर्थः । अनत्याधाने किम् । उरसि कृत्वा पाणिं शेते । 'मध्येपदेनिवचने च' ।१।४।७६॥ मध्ये पदे इति सप्तम्यन्तप्रतिरूपकौ निपातौ । निवचन इत्यर्थाभावेव्ययीभावः । एते शब्दा अनत्याध्याने कृञि परे वा गतिसंज्ञाः । मध्येकृत्य । मध्ये कृत्वा । पदेकृत्य । पदे कृत्वा । निवचनेकृत्य । निवचने कृत्वा । वाचं नियम्येत्यर्थः । अनत्याधान इत्येव । हस्तिनः पदे कृत्वा शिरः शेते ।

---

१. अनत्याधाने उरसि मनसी B₂, D₄, Com. २. Dropped D₂. ३. After it—स्तुः C, B₁. ४. °णार्थम् । Bc₁. ५. After it—आश्चर्यं वा । Dc₃.

तिरसोऽन्यतरस्याम् ।।८।३।४२।।

गतिसंज्ञस्य तिरसो विसर्जनीयस्य सो[1] वा स्यात् कुप्वोः [2]परयोः ।। [3]तिरः कृत्य । तिरस्कृत्य । [4]तिरस्कृत्वेत्यादि ।

[5]हस्ते पाणौ[6]

प्राध्वम्[7]

जीविकोपनिषद्—एते कृञि 'नित्यं हस्ते पाणावुपयमने' ।।१।४।७७।। इत्यादिभिर्नित्यं गतिसंज्ञाः[8] ।। हस्ते कृत्येत्यादि ।।

तिरसः । 'कुप्वोःᳲकᳲपौ च' इति प्राप्ते वचनमिदम् । गतिग्रहणं चेह स्मर्यत इत्यभिप्रेत्याह । गतिसंज्ञस्येति । हस्त इत्यादि । हस्ते इत्यादयो 'नित्यं हस्तेपाणावुपयमने' इत्यादिभिः सूत्रैर्नित्यं गतिसंज्ञाः स्युः[9] । तानि च [10]सूत्राणि व्याख्यायन्ते । 'नित्यं हस्तेपाणावुपयमने' ।१।४।७७।। हस्तेपाणावित्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ स्त उपयमने विवाहकर्मणि । हस्तेकृत्य । पाणौकृत्य । दारकर्म कृत्वेत्यर्थः । उपयमने किम् । हस्ते कृत्वा कार्षापणं गतः । 'प्राध्वं बन्धने' । १।४।७८।। प्राध्वमिति मान्तमव्ययम् । आनुकूल्ये वर्तते । तदानुकूल्यं बन्धननिमित्तं यदा स्यात्तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञः स्यात् । प्राध्वंकृत्य । [11]बन्धनेन निमित्तेनानुकूल्यं कृत्वेत्यर्थः । बन्धने किम् । प्रगतमध्वानं प्राध्वं कृत्वा शकटं गतः । 'जीविकोपनिषदावौपम्ये' ।।१।४।७९।। जीविकाशब्दो जीवनोपायवाची उपनिषच्छब्दो रहस्यवाची तौ कृञि परे औपम्यविषये नित्यं गतिसंज्ञौ स्तः । जीविकाकृत्य । जीविकामिव कृत्वेत्यर्थः । उपनिषत्कृत्य । उपनिषदमिव कृत्वेत्यर्थः । औपम्ये किम् । जीविकां कृत्वा गतः ।

---

१. वा सः B_1. २. परतः B_1; dropped D_2, D_3, D_4. ३. C, D_4 have कुप्वोःᳲकᳲपौ च before it. ४. तिरᳲकृत्येत्यादि C ; तिरः कृत्वेत्यादि P. ५. नित्यं हस्ते पाणौ B_2. ६. After it—उपयमने D_4. ७. After it—बन्धने D_4. ८. D_1 drops it. ९. After it—ज्ञेयाः B_2. १०. त्रीणि सूत्राणि D_2, Dc_3. ११. बन्धननिमित्तेन.

प्रादयो गताद्यर्थे प्रथमया* ॥ प्रगत आचार्यः प्राचार्यः[१] । प्रान्तेवासी[२] ।

[४]दुर्निन्दाकृच्छ्रयोः ॥ दुष्टो नरो दुर्नरः । निन्दित इत्यर्थः[५] । दुःकृतम् ।

स्वती पूजायाम् ॥ सुश्रीः[६] । अतिराजा ।

अतिशयातिक्रमयोश्च[७] ॥ सूक्तः । अतिज्ञः ।

आङ् ईषदर्थाभिव्याप्तौ ॥ आबद्धम्[८] । आनगरम् ॥

प्रासङ्गिकीं गतिसंज्ञां परिसमाप्य प्रकृतं 'कुगतिप्रादयः' इत्यस्मिन् सूत्रे उपाधिवचनवक्तव्यैर्विधीयमानं समासमाह । प्रादय इत्यादि । तत्र दुर्निन्दायाम्[९] । कुः पापार्थे । स्वती पूजायाम् । आङीषदर्थे इत्यादीन्युपाधिवचनानि[१०] वक्तव्यानि प्रायिकत्वात् त्यक्तानि । तथा चोक्तं काशिकायां वृत्तौ । 'प्रायिकं चैतदुपाधिवचनमन्यत्रापि हि समासो दृश्यते । कोष्णम् । दुःकृतम् । सुकृतम् । अतिस्तुतम् । आबद्धम्' इति । प्रादय इति । प्रादयो गताद्यर्थे वर्तमानाः प्रथमया प्रथमाविभक्त्यन्तैः समस्यन्त इति वक्तव्यम्[११] । नित्यसमासत्वात् पदान्तरेण विग्रहं करोति । प्रगत आचार्य इति । प्रान्तेवासीति । प्रगतोन्तेवासी[१२] । आदिशब्दादपरेपि वृद्धप्रयोगानुसारेण ज्ञेयाः । यथा प्रगतः पितामहः प्रपितामहः ।

---

१. After it–उक्तार्थानामप्रयोगः D_4. २. प्रकृष्टोन्तेवासी before it–D_2, B_1, B_2. ३. After it—वेला उद्गतः उद्वेलः । मुखमभिप्रपन्नः अभिमुखः । अक्षि प्रति गतः प्रत्यक्षः । प्रत्यर्थी पक्षः प्रतिपक्षः । प्रतिकूलो नायकः प्रतिनायकः । B_2; D_2 has प्रवासी । प्रतिनायकः । प्रतिपक्षः । D_4. ४. दुर्निन्दा to आनगरम् dropped P, D_1, D_3, D_5. ५. निन्दित इत्यर्थः dropped C, D_2, D_4. ६. सुधीः D_4. ७. °क्रमणयोश्च C. ८. आनगरम् । आबद्धम् । D_1; ईषद्बद्धमाबद्धम् । आनगरम् । B_2. ९. कुःपापार्थे । दुर्निन्दायाम् । Dc_3, Dc_4. १०. वचनवक्तव्यानि Bc_1, Dc_1. ११. वाच्यम् D_3. १२. After it—प्रान्तेवासी D_3.

अत्यादयः क्रान्ताद्यर्थे द्वितीयया* ॥ अतिक्रान्तो मालामिति विग्रहे ।

एकविभक्ति चापूर्वनिपाते ॥१।२।४४॥

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं[1] स्यात् न तु तस्य पूर्वनिपातः ।

प्रमातामहः । दुष्टः पुरुषो दुष्पुरुषः[2] । शोभनोऽश्वो स्वश्व इत्यादयः । **अत्यादय** इति । क्रान्ताद्यर्थवृत्तयोत्यादयो द्वितीयाविभक्त्यन्तैः समस्यन्त इति वक्तव्यमित्यर्थः । आदिशब्दादन्येपि उद्गतो वेलामुद्वेल इत्यादयः प्रयोगानुसारात् ज्ञेयाः । **अतिक्रान्तो मालामिति विग्रह** इति । समासस्यार्थप्रतिपादके[3] वाक्य इत्यर्थः ।

एक । 'प्रथमानिर्दिष्टं समासे' इत्यतः समास इत्यनुवर्तते । तच्च समासार्थं यद्वाक्यं तदाहेत्यभिप्रेत्याह । **विग्रह** इति । एकविभक्तिशब्दार्थमाह । **नियतविभक्तिकमिति** । नियता विभक्तिर्यस्य तन्नियतविभाक्तिकम् । विभक्तिर्वचनः[4] सुब्वचनः कारकशक्तिवचनो वा विभज्यते प्रातिपदिकार्थोनयेति । द्वितीये संबन्धिनि बह्वीभिर्विभक्तिभिर्युज्यमानेपि यदेकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं स्यादित्यर्थः । **न तु तस्य पूर्वनिपात** इति । अनेन यस्योपसर्जनत्वं कृतं तस्य पूर्वनिपातो नेत्यर्थः । एतच्चाग्रे अतिमाल इत्युदाहरणे स्पष्टीकरिष्यामः ।

---

१. °दुपसर्जनम् D2. २. दुःपुरुषः Dc4. ३. Before it–अतिमाल इति Dc3. ४. °शब्दः Dc4.

गोस्त्रियोरुपसर्जनस्य ॥१।२।४८॥

गोन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोर्ह्रस्वः स्यात् ॥ अतिमालः ।

गोस्त्रियोः । गो इति स्वरूपग्रहणं स्त्रीति प्रत्ययग्रहणं स्वरितत्वादुपसर्जनग्रहणं तयोर्विशेषणमित्यभिप्रेत्याह । **गोन्तस्त्रीप्रत्ययान्तयोर्ह्रस्वः स्यादिति** । गोशब्दोन्तो गोन्तः स्त्रीप्रत्ययोन्तो यस्य तत् स्त्रीप्रत्ययान्तं तयोर्गोन्तस्त्रीप्रत्ययान्तयोरुपसर्जनयोरित्यर्थः। अत्र च प्रातिपदिकस्येति वर्तते । तस्योपसर्जनगोशब्देन उपसर्जनस्त्रीप्रत्ययान्तेन च तदन्तविधिर्ज्ञेयः । ततश्चायमर्थः स्यात् । उपसर्जनगोशब्दान्तस्य प्रातिपदिकस्य उपसर्जनस्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्वः स्यादिति । तेन गोकुलं राजकुमारीपुत्र इत्यत्र ह्रस्वो न । **अतिमाल इति** । मालामतिक्रान्तोतिमालः । मालाशब्दोतिक्रमणक्रियापेक्षया कर्मशक्तियोगाद् द्वितीयान्त एव । न तस्य क्रियान्तरमपेक्ष्य शक्त्यन्तरावेशः संभवति । अतिशब्दस्तु अतिक्रान्तप्रधानो नानाशक्तिभिर्युज्यत इति तस्मिन्ननेकाभिर्विभक्तिभिर्युज्यमानेपि मालाशब्दो द्वितीयान्त एवेत्युपसर्जनसंज्ञः । तस्य च 'गोस्त्रियोः—' इति ह्रस्वः । अतिशब्दस्य तु प्रधानस्यापि 'अत्यादयः' इति प्रथमानिर्देशसामर्थ्यादुपसर्जनत्वम् । अथवा 'एकविभक्ति च—' इति चस्यानुक्तसमुच्चयार्थत्वाद्वा । नेनु[1] 'एकविभक्ति च—' इत्यस्यावकाशोतिमालः 'प्रथमानिर्दिष्टम्—' इत्यस्यावकाशो नीलोत्पलादिकष्टश्रित इत्यादौ[2] । उभयप्रसङ्गे परत्वात् 'एकविभक्ति—' इत्युपसर्जनता स्यात् ततश्चापूर्वनिपात इति पूर्वनिपातानिषेधप्रसङ्गः[3] । मैवम् । नायं प्रसज्यप्रतिषेधः पूर्वनिपाते नेति किं तु पर्युदासोयम् । पूर्वनिपातेन विधिर्न निषेधः । अथवा प्रसज्यप्रतिषेधोपि[4] भवतु ।

---

१. ननु च Dc3. २. °त्पल इत्यादि । Dc3. ३. After this च Bc1. ४. प्रतिषेधः Dc3.

अतिगङ्गः । विभाषानुवृत्तेरर्ध[1]पिप्पलीत्यादौ नोपसर्जनत्वम् । स्त्रीप्रत्ययान्तत्वाभावात् अतितन्त्रीः । अतिलक्ष्मीः । अतिश्रीः । इत्यादौ ह्रस्वो न । ईयसो बहुव्रीहेर्न । बहुश्रेयसी राजा[2] । बहुव्रीहेः किम् । अतिश्रेयसि ।

तथाप्यदोषः । यतः 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति अनन्तरा प्राप्तिर्निषिद्धा पूर्वा त्वनिषिद्धैवेति तथा स्यात् । न चानन्तरा प्राप्तिः पूर्वां प्राप्तिं बाधत इति वाच्यम् । तस्या निषिद्धत्वाद्बाधकत्वाभावात् । **अतिगङ्ग** इति । गङ्गामतिक्रान्तोऽतिगङ्गः । **विभाषानुवृत्तेरि**ति । अत्र 'विभाषा छन्दसि' इत्यतो मण्डूकप्लुतिन्यायेन विभाषाग्रहणमनुवर्तते । व्यवस्थितविभाषा च सा । तेनार्धं पिपल्या अर्धपिप्पलीत्यादौ पिप्पल्यादीनामेकविभक्तियुक्तानामप्युपसर्जनसंज्ञा न स्यात् । यदि हि स्यात् ह्रस्वत्वं स्यादित्यर्थः । **स्त्रीप्रत्ययान्तत्वाभावा**दिति । 'स्त्रियाम्' इत्यधिकारेण विहिताः प्रत्ययाः स्त्रीप्रत्ययाः । अतितन्त्रीरतिलक्ष्मीरतिश्रीरित्यादौ तु 'अवितॄस्तॄतन्त्रीभ्य ईः' । 'लक्षेर्मुट् च' 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' । इति विहिताः प्रत्ययाः न ह्यधिकारविहिता इति कृत्वात्र ह्रस्वो नेत्यर्थः । **ईयस** इति । ईयसन्ताद्यः स्त्रीप्रत्ययो विहितस्तदन्तस्य बहुव्रीहेर्ह्रस्वो न स्यादिति वक्तव्यमित्यर्थः । **बहुश्रेयसी**ति । 'प्रशस्यस्य श्रः' इति प्रशस्यशब्दस्येयसुनि श्रादेशः । 'उगितश्च' इति ङीप् । बह्व्यः श्रेयस्योऽस्येति बहुव्रीहिः । 'नद्यृतश्च' इति प्राप्तस्य कपः 'ईयसश्च' इति निषेधः । पुंस्यपि सोर्हल्ङ्यादिलोपः । बहुव्रीहेः किम् । अतिश्रेयासिः ।

---

१. B₁ has एकविभक्ति चेत्यादौ षष्ठीवर्जमुपसर्जनसंज्ञेति वाच्यम् । तेनार्धपिप्पलीत्यादौ &c; एकविभक्ति चेत्यादौ षष्ठीवर्जमुपसर्जनसंज्ञं भवति । तेन विभाषा° B₂. २. पुरुषः C; राजा । बहुव्रीहेः किम् । अतिश्रेयसि B₁, P.

अवादयः क्रुष्टाद्यर्थे तृतीयया* ॥ अवक्रुष्टः कोकिलया अवकोकिलः।

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या* ॥ परिग्लानोऽध्ययनाय पर्यध्ययनः[1]। अलं कुमार्यै अलंकुमारिः[2][3]।

निरादयः क्रान्ताद्यर्थे पञ्चम्या*[4] ॥ निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः[5]।

अवादय इति । क्रुष्टाद्यर्थे वर्तमाना अवादयस्तृतीयान्तेन समस्यन्त इत्यर्थः । **अवकोकिल** इति । अतिमालवदुपसर्जनत्व-ह्रस्वत्वे । आदिशब्दादन्येपि वृद्धप्रयोगस्थाः परिणद्धो वीरुधा परिवीरुत् संनद्धो वर्मणा संवर्मेत्यादयो ज्ञेयाः ।

पर्यादय इति । ग्लानाद्यर्थे वर्तमानाः पर्यादयश्चतुर्थ्यन्तेन समस्यन्त इति वक्तव्यमित्यर्थः । **अलंकुमारि**रिति । अलं कुमार्यै । आदिशब्दाद्वृद्धप्रयोगस्था अन्येपि उद्युक्तः संग्रामाय उत्संग्राम इत्यादयो ज्ञेयाः ।

निरादय इति । क्रान्ताद्यर्थवृत्तयो निरादयः पञ्चम्यन्तेन सह समस्यन्त इति वक्तव्यमित्यर्थः । **निष्कौशाम्बि**रिति । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी । उपसर्जनत्वह्रस्वत्वे पूर्ववत् । आदिशब्दे-नापगतः शाखाभ्य अपशाख इत्यादयोऽन्येपि वृद्धप्रयोगस्था ज्ञेयाः ।

---

१. After it—वर्मणा संनद्धः संवर्मा । अर्थेनानुगतः अन्वर्थः । अर्थेन वियुक्तो व्यर्थः B_1, B_2, C (C dropping वर्मणा संनद्धः संवर्मा). २. D_1, D_2, D_3, D_5 drop अलं कुमार्यै. ३. अलंकुमारी P. ४. निः क्रान्ताद्यर्थे B_1. ५. After it—निर्गतमङ्गुलिभ्यः निरङ्गुलम् । 'तत्पुरुषस्याङ्गुलेः' इत्यनेनाच् । D_2.

[१]इवेन समासो विभक्त्यलोपश्च[२]* ॥ ताविव । [३]वाससीव । [४]कर्मप्रवचनीयानां न समासः । वृक्षं प्रति ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥२।१।४९॥

एते समानाधिकरणेन समस्यन्ते स तत्पुरुषः ॥ पूर्व[५]कालार्थस्त्वपरकालार्थेन । [६]स्नातानुलिप्तः ।

इवेनेति । इवेन समासः स्याद्विभक्त्यलोपश्चेति वक्तव्यमित्यर्थः । **कर्मप्रवचनीयानामिति** । कर्मप्रवचनसंज्ञानां प्रादीनां समासो न स्यादिति वक्तव्यमित्यर्थः । समानाधिकरणपदं तत्पुरुषमाह ।

पूर्वकाल । पूर्वकाल इत्यर्थग्रहणमर्थपरत्वान्निर्देशस्य । स च पूर्वकालार्थः संबन्धिशब्दत्वादपरकालार्थमपेक्ष्यैव स्यादिति तेनैव [७]समस्यत इति चेतसि कृत्वाह । **पूर्वकालार्थस्त्वपरकालार्थेनेति** । एकादीनां स्वरूपग्रहणं शब्दप्रधानत्वान्निर्देशस्य भिन्नप्रवृत्तिनिमित्तप्रयुक्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् । भिन्नप्रवृत्तिनिमित्तप्रयुक्तानामिति पर्यायनिवृत्त्यर्थम् । एकस्मिन्निति गौरश्वइत्यादिनिवृत्त्यर्थम् । **स्नातानुलिप्त** इति । पूर्वं स्नातः पश्चादनुलिप्तः । अत्र स्नातशब्दः स्नानेन निमित्तेन प्रयुक्तः । अनुलिप्तशब्दस्त्वनुलेपनेन निमित्तेन प्रयुक्तस्तयो[८]रेकार्थे देवदत्ते वृत्तिरस्तीति अस्ति सामानाधिकरण्यम् । पूर्वनिपातनियमाद्यर्थ आरम्भः ।

---

१. इवेन विभक्त्यलोपः समासनित्यता च । D_2. २. D_1 drops च; C, B_2 have after it—पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् ।. ३ असाविव for वाससीव । D_3. ४. C, B_2 have प्राद्विप्रसङ्गे before it. ५. C has समस्यन्ते after it. ६. Before it पूर्वं स्नातः पश्चादनुलिप्तः P, B_1 ७. समस्यते Dc_2. ८. °रेकत्रार्थे Dc_3.

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥१।२।४२॥

समानाभिधेयो यस्तत्पुरुषः स कर्मधारयाख्यः ॥

पुंवत् कर्मधारयजातीयदेशीयेषु ॥६।३।४२॥

कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कमनूङन्तं पूर्वं पुंवत् स्यात् ।

तत्पुरुषः । अत्र समानाभिधेय इत्यनेन समानाभिधेयपदस्तत्पुरुष उपचारात् समानाभिधेय इत्युच्यते । यद्युपचारो न व्याख्यायते मुख्य एव तत्पुरुषः समानाभिधेय इत्युच्येत तदा राजपुरुषः शोभन इत्यत्र कर्मधारयसंज्ञा स्यात् । बाह्येन शोभनपदेन कर्मधारस्य सामानाधिकरण्यात् । परमराज्यमित्यत्र न स्यात् । शब्दान्तरस्याप्रयोगात् । तत्पुरुषः किम् । पाचिकाभार्यः । समानाधिकरण इति किम् । ब्राह्मणराज्यम् । कर्मधारयप्रदेशाः 'कर्मधारयेनिष्ठा' इत्येवमादयः ।

पुंवत् कर्मधारय इत्यादि । अत्र भाषितपुंस्कादनूङिति वर्तते इत्यभिप्रेत्याह । **कर्मधारय** इत्यादि । कर्मधारये समासे जातीयदेशीययोः प्रत्यययोः परतोपि भाषितपुंस्कं भाषितः पुमान् यस्मिन्नर्थे सोर्थो भाषितपुंस्कस्तद्वाचकं शब्दरूपमप्युपचाराद् भाषितपुंस्कमनूङन्तमूङोभावोनूङ् सोन्ते यस्य तदनूङन्तं पूर्वं स्त्रीवाचकं शब्दरूपं पुंवत् स्यादित्यर्थः । अत्र स्त्रीशब्दस्य पुंशब्दोतिदिश्यते न तु स्त्र्यर्थस्य पुमर्थः । न वा स्त्रीप्रत्ययस्य पुंवदित्यनेन निवृत्तिः । उभयोरपि पक्षयोर्दोषवत्त्वात् पूर्वत्रैव दोषाभावात् । एतच्च **महाभाष्ये वृत्तिन्यासयोश्च** प्रतिपादितम् । तच्च 'स्त्रियाः पुंवद् भाषितपुंस्कात्—' इत्यत्र सूत्रे विशदं वक्ष्यामः ।

---

१. C, D_4 have स्यात् after it. २. देशीययोः परतश्च D_6, D_4, D_1; देशीययोः परयोश्च D_2. ३. C. D_3 have स्त्रीप्रत्ययान्तं and B_2 स्त्रीलिङ्गं before it. ४. °इत्युच्यते Dc_2, Dc_3.

पुंवत्त्वात् स्त्रीप्रत्ययलोपः ॥ एका चासौ शाटी च एकशाटी[2]। कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। पञ्चमभार्या। [4]दत्तभार्या। स्रौघ्नभार्या। सुकेशभार्या।

पुंवत्त्वात् स्त्रीप्रत्ययलोप इति। पुंवाचकशब्दातिदेशात् स्त्रीवाचकः प्रत्ययो यस्मात् स स्त्रीप्रत्ययः स्त्रीवाचकः शब्दस्तस्य निवृत्तिरित्यर्थः। अथवा स्त्री प्रतीयते यस्मात् सोयं स्त्रीप्रत्ययः स्त्रीवाचकः शब्दस्तस्य निवृत्तिरित्यर्थः। **एकशाटीति**। 'पूर्वकालैक—' इति समासः। पुंवद्भावः। ननु च कर्मधारयसमासे 'स्त्रियाः पुंवत्—' इत्यादिनैव पुंवत्त्वं सिद्धं जातीयदेशीयपरतोपि 'तसिलादिषु—' इत्यादिना तद् व्यर्थमिदं सूत्रमित्याशङ्क्याह। **कोपधादेरित्यादि**। 'न कोपधायाः' इत्यादिना सूत्रसन्दर्भेण कोपधादेः पुंवद्भावो निषिद्धः। स कर्मधारयादावनेन सूत्रेण पुनः प्रसूयते। 'न कोपधायाः' इत्यादि प्रतिषेधविषयेपि कर्मधारयसमासे जातीयदेशीययोः परतश्च पुंवद्भावो यथा स्यादित्येवमर्थमिदं सूत्रमित्यर्थः। क्रमेण प्रतिषेधविषयमुदाहरति। **पाचकस्त्रीत्यादि**। पाचिका चासौ स्त्री च पाचकस्त्री। 'न कोपधायाः' इति निषेधः प्राप्तः स बाधितः। **पञ्चमभार्येति**। पञ्चमी चासौ भार्या च पञ्चमभार्या। दत्तभार्या। दत्ता चासौ भार्या चेति। अत्रोभयत्र 'संज्ञापूरण्योश्च' इति निषेधः प्राप्तः। **स्रौघ्नभार्येति**। स्रुघ्ने भवा स्रौघ्नी। सा चासौ भार्या च स्रौघ्नभार्या। 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' इति। **सुकेशभार्येति**। सुकेशी चासौ भार्या च सुकेशभार्या। 'स्वाङ्गाच्चेतः' अमानिनीति*।

---

१. पुंवद्भावात् D3. २ After it—समानाधिकरणे किम्। एकस्याः शाटी B2. ३. B1 has पाचिका चासौ स्त्री च before it; पाचकभार्या after it D3. ४. ब्राह्मणभार्या। स्रौघ्नभार्या। एवं पाचकजातीया C.

ब्राह्मणभार्या । एवं पाचकजातीया पाचकदेशीयेत्यादि । सर्वदेवाः[1] । जरत्पतिरित्यादि ।

ब्राह्मणभार्येति । ब्राह्मणी चासौ भार्या चेति । 'जातेश्च' इति । एवं पाचकजातीया पाचकदेशीयेति । पाचिकाप्रकारा पाचकजातीया । 'प्रकारवचने जातीयर्' । ईषदूना पाचिका पाचकदेशीया । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति देशीयर् । इत्यादीति । आदिना पञ्चमजातीया पञ्चमदेशीया दत्तजातीया दत्तदेशीया स्रौघ्नजातीया स्रौघ्नदेशीया सुकेशजातीया सुकेशदेशीया ब्राह्मणजातीया ब्राह्मणदेशीयेति । सर्वदेवा इत्यादि । 'पूर्वकाल—' इत्यास्योदाहरणशेषः । इत्यादीति । आदिना पुराणान्नम् । नवान्नम् । केवलान्नमिति । समानाधिकरणेनेति किम् । एकस्याः शाटी । स्पष्टत्वात् त्यक्तं सूत्रत्रयम्[2] । 'दिक्संख्ये संज्ञायाम्' । २।१।५०।। दिग्वाचिनः शब्दाः संख्या च समानाधिकरणेन सुबन्तेन सह समस्यन्ते स तत्पुरुषः । संज्ञायां विषये पूर्वेषुकामशमी । पञ्चाम्राः । सप्तर्षयः । संज्ञायां किम् । उत्तरा वृक्षाः । पञ्च ब्राह्मणाः । 'कुत्सितानि कुत्सनैः' ।।२।१।५३।। कुत्सितवाचीनि सुबन्तानि कुत्सनवाचिभिः सुबन्तैः सह समस्यन्ते स तत्पुरुषः । शब्दप्रवृत्तिनिमित्तकुत्सायामयमिष्यते । 'विशेषणं विशेष्येण' इति विशेष्यस्य परनिपाते प्राप्ते पूर्वनिपातार्थ आरम्भः । वैयाकरणखसूचिः । निष्प्रतिभ[3] इत्यर्थः । याज्ञिककितवः[4] । अयाज्ययाजनातृष्णापर इत्यर्थः । मीमांसकदुर्दुरूढः । नास्तिक इत्यर्थः । कुत्सितानीति किम् । वैयाकरणश्चोरः । न ह्यत्र वैयाकरणत्वं कुत्स्यते । कुत्सनैरिति किम् । कुत्सितो ब्राह्मणः । 'पापाणके कुत्सितैः' । २।१।५४।। पापाणकशब्दौ कुत्सिताभिधायिनौ तयोः पूर्वेण समासे परनिपातः स्यात् । पूर्वनिपातार्थोयमारम्भः । पापनापितः । अणकनापितः ।

---

१. सर्वे च ते देवाश्च before it and जरच्चासौ पतिश्च before जरत्पतिः in B_1. २. After it—व्याख्यायते Dc_3. ३. निःप्रतिभ Bc_1, Dc_1, Dc_4. ४. °याजक° Dc_2.

उपमानानि सामान्यवचनैः ॥२।१।५५॥

उपमानोपमेयैकधर्मवचनैरुपमानानि समस्यन्ते ॥ घन[1] इव श्यामो घनश्यामः ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥२।१।५६॥

उपमेयमुपमानैर्व्याघ्रादिभिः समस्यते[2] ॥ पुरुषो[3] व्याघ्र इव पुरुषव्याघ्रः । सामान्याप्रयोगे किम् । पुरुषो व्याघ्र इव शूरः[4] ॥

उपमानानि । इह सूत्रे उपमानस्य श्रुतत्वात् तस्य चोपमेयापेक्षत्वात् उपमानोपमेययोरेव यः साधारणो धर्मः स सामान्यशब्देनोच्यते इत्याह । **उपमानोपमेयैकधर्मवचनैरिति** । उपमीयते येन तदुपमानम् । उपमीयते यत्तदुपमेयम् । तयोरेकः साधारणो यो धर्मस्तमुक्तवन्तो ये उपमेयवचनाः शब्दास्तैः सहोपमानवाचिनः शब्दाः समस्यन्त इत्यर्थः । **घन इव श्यामो घनश्याम** इति । उपमानं घनः प्रसिद्धत्वादुपमेयं कृष्णोऽप्रसिद्धत्वात् तयोः सामान्यवचनमेको धर्मः श्यामत्वं तत् श्यामत्वमुक्त्वा श्यामशब्दः श्रीकृष्णे मतुब्लोपादभेदोपचाराद्वा वर्तत इति सामान्यवचनः । सामान्यवचनैरिति किम् । पर्वता इव वलाहकाः ।

उपमितम् । उपमितमुपमेयं तच्च सामर्थ्यादुपमानवचनैः शब्दैः सह समस्यते न चेत् सामान्यवाची शब्दः प्रयुज्यत इतीमं सूत्रार्थमभिप्रेत्याह । **उपमेयमित्यादि** । व्याघ्र । सिंह । ऋक्ष । ऋषभ । वृषल[5] । वृक । वृष । वराह । हस्तिन् । कुञ्जर । रुरु । पृषत् । पुण्डरीक । पलाश । कितव । आकृतिगणश्चायम् । तेनेदमपि स्यात् । मुखपद्मम् । मुखकमलम् । करकिसलयम् । पार्थिवचन्द्र इत्यादि ।

---

१. घन इव श्यामः dropped D_3. २ After it—सामान्याप्रयोगे B_1. ३. P and C have अयम् before it. ४. After this—व्याघ्र । सिंह । ऋषभ । वृषभ । पुण्डरीक । पद्म । पल्लव । किसलय । इन्दु । चन्द्रादयः D_2, D_4, C, B_1, B_2 (पर्यङ्क । पल्लव । किशलय D_2) चन्द्र । वराह । हस्तिन् । कुञ्जर । इत्यादि D_4; शार्दूल । सिंह for सिंह । वृषभ D_2, B_2 (वृषभ dropped B_2). ५. वृषभ Dc_1.

विशेषणं विशेष्येण बहुलम् ॥२।१।५७॥

भेदकं[1] भेद्येन[2] समानाधिकरणेन बहुलं समस्यते[3] ॥

बहुलोक्तेः कृष्णसर्प इत्यादौ नित्यम् । रामो[4] जामदग्न्य इत्यादौ न[5] । क्वचिद्वा[6] । नीलमुत्पलं नीलोत्पलम्[7] ।

विशेषणम् । विशेषणस्य लक्षणमाह । **भेदकमिति** । यत् सामान्याकारेण प्रवृत्तमनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र[8] प्रकारे व्यवस्थापयति तद् भेदकम् । **भेद्यमिति** । विशेष्यस्य लक्षणम् । यदनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र प्रकारे व्यवस्थाप्यं तद् भेद्यम् । **रक्तलतेति** । रक्ता चासौ लता च रक्तलता । शुक्लतादिभ्यो लतार्थं व्यावर्तयतीति रक्तशब्दो विशेषणम् । लतार्थस्तु व्यावर्त्यत्वाद्विशेष्यम् । बहुलग्रहणस्यार्थमाह । **बहुलोक्तेरि-त्यादि** । अत्र विशेष्येणेत्येतावतैव संबन्धिशब्दाद्विशेषणमिति लब्धे पुनर्विशेषणोपादानमुत्तरपदस्य विशेषणत्वप्रतिपत्त्यर्थम् । ततश्चायमर्थः । तच्चेद्विशेष्यं विशेषणमर्थाद्विशेषणमपि विशेष्यमिति । अतस्तक्षकः सर्प इत्यत्र न । सर्पस्याविशेषणत्वात् । लोहितस्तक्षक इत्यत्रापि न । तक्षकस्याविशेष्यत्वात् ।

---

१. After it—सुबन्तं C, D_2, B_1, B_2. २. After it—सुबन्तेन C, D_2, B_1, B_2 (समानाधिकरणेन सुबन्तेन C). ३. After it—स तत्पुरुषः B_1; After it the Sûtra—तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ १।२।४२॥ रक्ता चासौ लता च रक्तलता । D_3, B_1, B_2 (B_2 drops the Sûtra only). ४. Before it—लोहिताहिः C ; अर्जुनकार्तवीर्यः B_2. ५. न भवति D_4. ६. °द्वा स्यात् D_4. ७. After it—कुत्सितानि कुत्सनैः ॥ २।१।५३॥ कुत्सितवचनानि कुत्सितवचनैः सह समस्यन्ते स तत्पुरुषः । शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । वैयाकरणखसूचिः । निःप्रभ इत्यर्थः । याज्ञिककितवः ॥ पापाणके कुत्सितैः॥ २।१।५४॥ पापाणकशब्दौ कुत्सिताभिधायिनौ कुत्सितैः सह समस्येते । पापकुलालः । अणकनापितः ॥ C, D_2, D_3, D_4, B_1, B_2 (निमित्तकुत्सित° B_1; कुत्सितवचनानि सुबन्तानि B_2, D_4) स तत्पुरुषः स्यात् C ; शब्दप्रवृत्ति-कुत्सायां B_1; यथावैयाकरणखसूचिः B_1; निःप्रतिभ B_2, D_3, D_4 ; याजक-कितवः D_4 ; कुत्सितवचनैः सह B_2, D_3 : समं for सह B_1. ८. चैकप्रकारे Dc_3, Dc_4.

शाकपार्थिवादीनामुत्तरपदलोपश्च[1]* ॥ शाकप्रियः[2] पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणो देवब्राह्मणः ।

शाकपार्थिवादीनामिति । शाकपार्थिवादीनां समास उत्तरपदलोपश्च स्यादिति वक्तव्यमित्यर्थः । **शाकप्रिय** इत्यादि । अत्र प्रियशब्दस्योत्तरपदस्य लोपः । 'विशेषणं विशेष्येण बहुलम्' इत्यस्य प्रपञ्चत्वात्त्यक्तानि पञ्चदश सूत्राणि व्याख्यायन्ते । 'पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च' ।२।१।५८॥ एते समानाधिकरणेन समस्यन्ते[3] स तत्पुरुषः । पूर्वपुरुषः । अपरपुरुषः । इत्यादि । 'श्रेण्यादयः कृतादिभिः ।२।१।५९॥ श्रेण्यादयः समानाधिकरणैः समस्यन्ते । श्रेण्यादिषु च्व्यर्थवचनम् । अश्रेणयः श्रेणयः कृताः श्रेणीकृताः । च्व्यन्तानां तु 'कुगतिप्रादयः' इति नित्यसमासः । श्रेणीकृताः । श्रेणि । एक । पूग । कुण्ड । राशि । विशिख । निधान । देव । मुण्ड । भूत । श्रवण । वदान्य । अध्यापक । अभिरूपक[4] । क्षत्रिय । पटु । पण्डित । कुशल । चपल । निपुण । कृपण । श्रेण्यादिः । कृत । मत । मित । भूत । उक्त । समाम्नात । समाख्यात । संभावित । अवधीरित । निराकृत । अवकल्पित । उपकृत । उपाकृत । कृतादिराकृतिगणः । 'क्तेन नञ्विशिष्टेनानञ्' ।।२।१।६०।। नञेव विशेषोऽस्य सर्वमन्यत् प्रकृत्यादिकं तुल्यं तन्नञ्विशिष्टं तेन नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सहानञ् क्तान्तं समस्यते स तत्पुरुषः । कृतं च तदकृतं च कृताकृतम् । भुक्ताभुक्तम् । नुडिटौ तद्भक्तत्वान्नैव भेदकौ । अशितानशितेन जीवति । क्लिष्टाक्लिशितेन जीवति । कृतापकृतादीनामुपसंख्यानम् । कृतापकृतम् ।

---

१. C has वाच्यः after it. २. शाकप्रियश्चासौ पार्थिवश्च B_1. ३. समानाधिकरणेन समस्यन्ते स तत्पुरुषः । Dc_1. ४. अभिरूप Dc_1.

भुक्तविभुक्तम् । पीतविपीतम् । गतप्रत्यागतम् । यातानुयातम् क्रयाक्रयिका । फलाफलिका । मानोन्मानिका । 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' । २।१।६१॥ सदादयः पूजावचनाः पूज्यमानैः समानाधिकरणैः समस्यन्ते स तत्पुरुषः । महापुरुषः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः । पूज्यमानैः किम् । उत्कृष्टा गौः कर्दमात् । 'वृन्दारकनागकुञ्जरैः पूज्यमानम्' । २।१।६२॥ एतैः पूजावचनैः पूज्यमानं समस्यते । गोवृन्दारकः । गोनागः । गोकुञ्जरः । पूज्यमानं किम् । सुभीमो नागः । 'कतरकतमौ जातिपरिप्रश्ने' ।२।१।६३॥ समानाधिकरणेनेत्यापादसमाप्तेर्वर्तते । जातिपरिप्रश्ने वर्तमानौ कतरकतमौ सुपा समस्येते । कतरकठः । कतमकठः । 'किं क्षेपे' ।२।१।६४॥ किमित्येतत् क्षेप गम्ये सुपा समस्यते । किंराजा यो न रक्षति । 'किमः क्षेपे' इति समासान्तनिषेधः । क्षेपे किम् । को राजा पाटलिपुत्रे ।'पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः' ।२।१।६५॥ एतैर्जातिः समस्यते । स्त्री पुंसलक्षणा पोटा । गृष्टिरेकवारप्रसूता । धेनुर्नवप्रसवा । वशा वन्ध्या । वेहद्गर्भघातिनी । बष्कयणी तरुणवत्सा । इभपोटा । इभयुवतिः । अग्निस्तोकम् । उदश्वित्कतिपयम् । गोगृष्टिः । गोधेनुः । गोवशा । गोवेहत् । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः । जातिः किम् । देवदत्तः प्रवक्ता । धूर्तग्रहणमकुत्सार्थम् । 'प्रशंसावचनैश्च' ।२।१।६६॥ जातिवाचि सुबन्तं प्रशंसावचनैः समस्यते । रूढा मतल्लिकादयः प्रशंसावाचिनो गृह्यन्ते । गोप्रकाण्डम् । गोमतल्लिका । 'युवाखलतिपलितवलिनजरतीभिः' ।२।१।६७॥ खलत्यादिभिः समानाधिकरणैः युवशब्दः समस्यते । जरतीभिरिति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति ज्ञापनार्थः । युवा खलतिः

१. पूज्यमानैः Bc₁.

युवखलतिः । युवतीः खलती युवखलती । इत्यादि । 'कृत्यतुल्याख्या अजात्या' ॥२।१।६८॥ कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्चाजातिवचनेन समस्यन्ते । भोज्योष्णम् । भोज्यलवणम् । तुल्यश्वेतः । सदृशश्वेतः । अजात्या किम् । भोज्य ओदनः । 'वर्णो वर्णेन' ॥२।१।६९॥ कृष्णसारङ्गः । अवयवद्वारेण कृष्णशब्दः समुदाये वर्तमानः समानाधिकरणो भवति । 'कुमारः श्रमणादिभिः' ।२।१।७०॥ श्रमणादिषु ये स्त्रीलिङ्गाः पठ्यन्ते तैः स्त्रीलिङ्ग एव कुमार-शब्दः समस्यते । अन्यैस्तु पुंलिङ्गः स्त्रीलिङ्गश्च । कुमारी श्रमणा कुमारश्रमणा । कुमारोध्यापकः कुमाराध्यापकः । कुमारी अध्यापिका कुमाराध्यापिका । श्रमणा । प्रव्रजिता । कुलटा । गर्भिणी । तापसी । दासी । बन्धकी । अध्यापक । अभिरूपक । पण्डित । पटु । मृदु । कुशल । चपल । निपुण । 'चतुष्पादो गर्भिण्या' ॥२।१।७१॥ चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन समस्यन्ते । गोगर्भिणी । अजागर्भिणी । जातिः किम् । कालाक्षी गर्भिणी । चतुष्पादः किम् । ब्राह्मणी गर्भिणी । 'मयूरव्यंसकादयश्च' ॥२।१।७२॥ समुदाया एव निपात्यन्ते । चकारोवधारणार्थः । तेन परममयूरव्यंसक इति समासान्तरं न । मयूरव्यंसकः । छात्रव्यंसकः । कम्बोजमुण्डः । यवनमुण्डः । छन्दसि । हस्तेगृह्य । पादेगृह्य । लाङ्गूलेगृह्य । पुनर्दाय । भाषायां तु हस्ते गृहीत्वेत्यादि । एहीडादयोन्यपदार्थे । एहीडेति यत्र कर्मणि तदेहीडं वर्तते । एहियवम् । एहिवाणिजा । अपेहिवाणिजा । प्रेहिवाणिजा । एहिस्वागता । प्रेहिस्वागता । एहिद्वितीया । अपेहिद्वितीया । प्रेहिद्वितीया । एहिकटा । प्रेहिकटा । अपेहिकटा । एहिकर्दमा । प्रेहिकर्दमा । उद्धमचूडा । आहरचेला । आहरवसना । आहरवितता । कृन्धिविचक्षणा । उद्धरोत्सृजा । उद्धमविधमा । उत्पतनिपता । उच्चावचम् । आचोपचम् । उच्चनीचम् । आचपराचम् । निश्चप्रचम् । अकिञ्चनम् । सकिञ्चनम् । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वासुहितकः । प्रोष्यपापीयान् । उत्पत्यपाकला । निपत्यरोहिणी । निषण्णश्यामा ।

नञ् ॥२।२।६॥

नञ् समर्थेन[1] सुपा[2] समस्यते[3] ।

नलोपो नञः ॥६।३।७३॥

नञो[4] नलोपः स्यादुत्तरपदे[5] ॥

अपेहिप्रघसा । इहपञ्चमी । इहद्वितीया । जहिकर्मणा बहुलमाभीक्ष्ण्ये समस्यते समासेन कर्ताभिधीयते चेत् । जहिजोडः । उज्जहिजोडः । उज्जहिस्तम्बः[6] । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता । पचतभृज्जता । खादतमोदता । खादतवमता । आहरनिवपा । आवपनिष्किरा । उत्पचनिपचा । भिन्धिलवणा । पचलवणा । पचप्रकूटा । अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ।

नञ् । अकारो नलोपो नञिति विशेषणार्थः ।

नलोपः । नञः सानुबन्धस्य ग्रहणं पामनपुत्रो नैकधेत्यत्र मा भूदिति । ननु च क्रियमाणेपि सानुबन्धग्रहणे स्त्रैणार्थं इत्यत्र 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति जातस्य नञः कस्मान्नलोपो न । उच्यते । विभाषानुवर्तते । तस्याश्च व्यवस्थितविभाषात्व-विज्ञानादत्र न स्यात् । यद्येवं पामनपुत्रो नैकधेत्यत्राप्यत एव न स्यात् । एवं तर्हि विस्पष्टार्थं सानुबन्धग्रहणम्[7] ।

---

१. सुबन्तेन D_3. २. C has नित्यं समस्यते. ३. After it—तदन्यतद्विरुद्ध-तदभावेषु नञ् प्रवर्तते । B_2. ४. नस्य लोपः B_1, B_2, D_1. ५. °दुत्तरे पदे P. ६. Dc_1 has हस्तिबन्धः before it, Dc_2 जहिस्तम्बः after it. ७. °बन्धक° D_3.

तस्मान्नुडचि ॥६।३।७४॥

लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात् ॥

तस्मात् । सप्तमीपञ्चमीनिर्देशयोः परत्वात् पञ्चमीनिर्देश एव बलीयानित्यभिप्रेत्याह । **लुप्तनकारा**दित्यादि । तस्मादिति किम् । नञ एव हि स्यात् पूर्वान्ते हि क्रियमाणे 'ङमो ह्रस्वादचि—' इति ङमुट् स्यात् । अतः किन्न कृतस्तस्मादित्येवोक्तम् । अचि किम् । अब्राह्मणः । ननु चायं नञ्समासः किंप्रधानः । उत्तरपदार्थ-प्रधानः । तत्पुरुषत्वात् । यदि पूर्वपदार्थप्रधानः स्यात्तर्ह्यव्ययीभावः स्यात् अमक्षिकमिति । अन्यपदार्थप्राधान्ये पुनर्बहुव्रीहिः स्यात् अब्राह्मणको देश इति । अत उत्तरपदार्थप्रधानस्तत्पुरुषोयम् । ननु च नञ् निषेधवाची स किं सतो निषेधं ब्रूते अथासतः । न तावत् सतः । तस्याशक्यसाधनत्वात् । यदि सतोपि निषेधे नञः सामर्थ्यं स्यात् तर्हि राजानो हस्त्यश्वादीन् न बिभृयुः । न सन्ति शत्रव इत्येवं ब्रूयुः । नाप्यसतः । तस्य स्वत एव निषिद्धत्वात् । न च प्रकारान्तरं संभवति । उच्यते । सर्वो हि शब्दः प्रयुज्यमानः स्वार्थज्ञानमपेक्षते । स्वयं हि ज्ञातमर्थं परं प्रतिपादयितुकामेन शब्दः प्रयुज्यते । तच्चार्थज्ञानं द्विविधं सत्यं मिथ्या चेति । द्वयमप्येतत् ब्राह्मणशब्दं प्रवर्तयति । तत्र सम्यग्ज्ञानपूर्वके ब्राह्मणशब्दप्रयोगे नास्ति नञो व्यापारः । न हि तेन तत्र किंचित् क्रियते । ब्राह्मणशब्दस्य सत्यत्वेन तदर्थस्य निषेद्धुमशक्यत्वात् । मिथ्याज्ञानपूर्वके त्वस्ति व्यापारः । तत्र हि तेन ब्राह्मणशब्दस्य मिथ्याज्ञानप्रभवत्वमाख्यायते । स च निषेधो द्विविधः पर्युदासवृत्तिः प्रसज्यवृत्तिश्च । तत्राद्यपक्षे ब्राह्मणसदृश एव क्षत्रियादिरब्राह्मण इत्युक्ते प्रतीयते । मिथ्याज्ञानमिन्द्रियहेतुकं सादृश्यमन्तरेण न भवतीति सादृश्यस्य

---

१. °स्तवा Dc2. २. प्राधान्येन बहु° Dc1. ३. इत्येव Dc2, Dc4. ४. तथार्थ° Dc4. ५. तत्राद्ये पक्षे Dc3.

अश्वादन्योनश्वः । धर्मविरुद्धोधर्मः । पापाभावोपापम् ।

नञ्विशिष्टेनोत्तरपदेन लक्षणात् । तथोक्तम् । नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति । द्वितीये तु मिथ्याज्ञाननिवृत्तिः क्रियते । अश्वो न भवत्यनश्व इत्यादि । तत्र मिथ्याज्ञाननिवृत्त्या नञ्विशिष्टेन परपदेनान्यत्वविरुद्धत्वाभावविशेषा लक्ष्यन्ते । तत्र सादृश्यस्योदाहरणमब्राह्मण इत्येतत् प्रसिद्धत्वान्नोक्तम् । तदन्यतद्विरुद्धतदभावविशेषाणामुदाहरणान्याह । अश्वादन्योनश्व इत्यादि । तत्र नञ्विशिष्टेनाश्वपदेनान्यत्वं लक्ष्यते । नञ्विशिष्टेन तु धर्मशब्देन विरुद्धत्वम् । नञ्विशिष्टेन च पापशब्देनाभावविशेष इत्येते त्रयोपि तत्पुरुषाः । उत्तरपदार्थप्राधान्यात् । तथोक्तं विचारचिन्तामणौ ।

नञ्नलोपो द्विप्रोयशोनभिरभाषणम् ।
सदृग्विरुद्धान्याभावा नञर्था एष्वनुक्रमात् ॥
समासे तूत्तरपदप्राधान्यं मासजातवत् ।
नञर्थमिलितं तद्धि सदृशादीनि लक्षयेत्' ॥ इति ।

ननु चापापमित्यत्राव्ययीभावो युक्तः । पूर्वपदार्थस्यैवाभावस्य प्राधान्यात् । सत्यम् । यदाभावमात्रमुच्यते तदापापमित्यव्ययीभाव एवार्थाभावे । यदा त्वभावविशेष उच्यते न तदाव्ययीभावः । अभावविशेषस्य नञर्थत्वाभावेन पूर्वपदार्थप्राधान्याभावात् । तथोक्तं **नरेन्द्राचार्यैः** । 'अग्रहणमिति ग्रहणाभावमात्रविवक्षायामव्ययीभावोदाहरणम् । अभावविशेषस्य विवक्षायां तत्पुरुषस्योदाहरणं ग्रहणस्याभावविशेषो ग्रहणाभाव इति तस्मिन्नेवार्थे वैकल्पिकः प्रयोगो विशेषस्य मुख्यवृत्त्या नञर्थत्वाभावात्' इति ।

१. धर्मविरोधोधर्मः C, D3. २. प्रविशिष्ट° Dc1,

नञो नलोपस्तिङि क्षेपे* ॥ अपचसि त्वं जाल्म ।[१]

[२]नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या ॥६।३।७५॥

[३]नग्ननाग[४]नाभागनाराचनाचिकेतनापितनमेरु[५]ननान्दनभस-[६]नान्तरीयकादिषु वाच्यम्* ॥ निषेधार्थनकारस्य समासत्वान्न-लोपाभावो नैकधेत्यादौ ज्ञेयः ।

आन्महतः समानाधिकरणजातीययोः ॥६।३।४६॥

महत आकारोन्तादेशः स्यात् समानाधिकरणे जातीये च परे ॥ महादेवः ।

नञो नलोप इति । तिङन्ते परे नञो नकारस्य लोपो भवतीति वाच्यं निन्दायां गम्यमानायामित्यर्थः । ननु च नैकधेत्यादौ नलोपो नुट् च कस्मान्न स्यादित्याशङ्क्याह ।

निषेधार्थेत्यादि । अमानो नाः प्रतिषेधे इति निषेधार्थो योस्ति नकारस्तेन सह समासोयं न तु नञेति कृत्वा नलोपाभावो नैकधेत्यादौ वेदितव्य इत्यर्थः ।

आत् । **महादेव** इति । महांश्चासौ देवश्च महादेवः । 'सन्महत्—' इति समासः । समानाधिकरणजातीययोरिति किम् ।

---

१. After this—निषेधार्थेन नञा समासत्वान्नलोपाभावो नैकधेत्यादौ ज्ञेयः D_5, Dc_1. २. The Sûtra and the Vârtika following it up to वाच्यम् dropped P, D_1, D_3. ३. For नग्न...ज्ञेयः D_5 has—एतेषु नञ् प्रकृत्या तिष्ठति. ४. नभाग B_1. ५. ननान्द्र B_1. ६. नोन्तरीयकादिषु C.

महान् प्रकारोऽस्य महाजातीयः।

घासकरविशिष्टेष्वपि वाच्यम्* ॥ जातीयघासादौ तीशब्दस्याप्यात्वम्। महत्या घासो महाघासः। महाकरः। महाविशिष्टः।

महतः पुत्रो महत्पुत्र इत्यत्र मा भूत्। ननु च लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न्याय्यमिति परिभाषया 'सन्महत्—' इत्यादिना प्रतिपदोक्ते समासे यः पूर्वपदो महच्छब्दः स एव ग्रहीष्यते न महत्पुत्र इत्यत्र लाक्षणिके। एवं च समानाधिकरणपदं व्यर्थम्। न व्यर्थम्। बहुव्रीहावपि यथा स्यादित्येवमर्थम्। तेन महाबाहुरिति सिध्यति। अत्र समानाधिकरणग्रहणसामर्थ्यात् लक्षणप्रतिपदोक्तपरिभाषा नायाति। तेन बहुव्रीहावपि स्यादन्यथा लाक्षणिकत्वात् तत्र न स्यात्। अमहान् महान् संपन्नो महद्भूतश्चन्द्रमा इत्यत्र गौणत्वं महदर्थस्येति न भवत्यात्वम्।

घासेति। घासकरविशिष्टइत्येतेष्वपि परपदेषु महत आत्वं स्यादिति वाच्यमित्यर्थः। जातीयघासादाविति। तीशब्दस्याप्यात्वमित्यस्यायं भावः। जातीयघासादौ महतीशब्दस्य पुंवद्भाव आत्वं च वक्तव्यमिति तथा वाच्ये लाघवार्थमेवमुक्तम्। तथा चोक्तं कात्यायनेन। महदात्वे घासकरविशिष्टेषूपसंख्यानम्। पुंवद्भावश्चासमानाधिकरणार्थ इति। स्पष्टत्वात् त्यक्तं सूत्रम्। 'ईषदकृता'। २।२।७॥ ईषदित्यव्ययं शब्दो गुणवाचिनाकृदन्तेन समस्यते। ईषत्पिङ्गलः। अकृता किम्। ईषत्कारकः। अनेकपद्यमेकस्वर्यमेकविभक्तिकत्वं च न। गुणवाचिना किम्। ईषद्गार्ग्यः।

---

१. D_1, Dc_1, D_3, D_5 drop from महान् to महाजातीयः. २. प्रकारो यस्य C. ३. महत्याः करः before it in B_1. ४. ज्ञेय° Dc_2.

तद्धितार्थोत्तरपदसमाहारे च ॥२।१।५१॥

तद्धितार्थविषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये एकार्थेन समस्येते स तत्पुरुषः॥ पूर्वस्यां शालायां भव इति विग्रहे।

तद्धित। यदि तद्धितार्थे वाच्ये इति स्यात् तर्हि पाञ्चनापितिरित्यादौ तद्धितो न स्यात्। तदर्थस्य समासेनैवोक्तत्वात्। अत एकापि सप्तमी विषयभेदेन भिद्यमाना तद्धितार्थापेक्षया विषयसप्तमी उत्तरपदापेक्षया परसप्तमी समाहारापेक्षयाभिधेयपरे-त्येतच्चेतसि कृत्वाह। **तद्धितार्थे विषये** इत्यादि। तद्धिता अणादयस्तेषामर्थोपत्यादिस्तस्मिन् विषये। अनन्यत्रभावो विषयार्थः। **एकार्थेनेति**। समानाधिकरणेनेत्यर्थः। ननु च समाहारः समूहः स तद्धितार्थ एवेति समाहारग्रहणं पृथक् न कार्यम्। मैवम्। पञ्चकुमारीत्यत्र समूहप्रत्ययस्य 'द्विगोर्लुगनपत्ये' इति लुकि कृते 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययस्यापि लुक् स्यात्। समा-हारस्य पृथग्ग्रहणे तु तद्धितानुत्पत्तिरेवात्र विषये व्याख्यायत इति न स्यादेष दोषः। तथा ह्याह। **समाहारे वाच्ये** इति। समाहरणं समाहारः विप्रकीर्णानामेकराशीकरणम्। भिन्नदेशा-नामपि बुद्ध्या राशीकरणं स्यात्। **पूर्वस्यामित्यादि**। पौर्वशाल इत्यस्यार्थबोधके वाक्ये सति तद्धितार्थे विषयभूते समासे सुब्लुकि वसतीत्यर्थः।

---

१. Before this—

दिक्संख्ये संज्ञायाम् ॥ २।१।५०॥

दिग्वाचिनः शब्दाः संख्या चोत्तरपदेन समानाधिकरणेन समस्यन्ते संज्ञायां विषये स तत्पुरुषः स्यात्॥ पूर्वा चासौ दिक् च पूर्वदिक्। सप्तर्षयः। B_1.

२. तद्धितार्थे विषये D_1, D_3, D_5. ३. °भिधेये Dc_3. ४. सुपि लुकि Dc_1.

दिक्पूर्वपदादसंज्ञायां ञः ॥४।२।१०७॥

अस्माद्[1] भवाद्यर्थे ञः[2] स्यादसंज्ञायाम्। कर्मधारये पुंवद्भावे च कृते ञनिमित्ता आदिवृद्धिः। पौर्वशालः।[3] उत्तरपदे। पूर्वशालाप्रियः। दिक्षु समाहारो नास्ति।

दिक्पूर्व। असंज्ञायामिति प्रकृतिविशेषणम्। ततश्च असंज्ञाविषयाद्। दिक्पूर्वपदात् प्रातिपदिकात् ञः स्यादित्यर्थः। असंज्ञायां किम्। पूर्वेषुकामशमी। 'दिक्संख्ये संज्ञायाम्' इति समासः। 'प्राचां ग्रामनगराणाम्' इत्युत्तरपदवृद्धिः। पदग्रहणं स्वरूपविधिनिरासार्थम्। अन्यथा दिग्दाह इत्यादिः प्रकृतिः स्यात्। पदग्रहे तु दिग्विशेषो गृह्यते। कथम्। पदग्रहणसामर्थ्यात्। दिशः पूर्वं पदं यस्येति त्रिपदो व्यधिकरणो बहुव्रीहिः। दिश इति वाचकापेक्षया षष्ठी। तेनेह तदभिधायी दिक्शब्दो गृह्यते। कर्मधारय इत्यादि। समानाधिकरणस्तत्पुरुषोयमिति कर्मधारयसंज्ञा। तस्यां च सत्यां 'पुंवद्—' इत्यादिना पूर्वपदस्य पुंवद्भावस्तस्मिंश्च कृते 'ञ्णिति—' इत्यनुवर्त्य विधीयमानात् 'तद्धितेष्वचामादेः' इत्यनेनादेरचो वृद्धिः स्यादित्यर्थः। **उत्तरपदे** इति। उत्तरपदे परतः समासः कथ्यत इत्यर्थः। **पूर्वशालाप्रिय** इति। पूर्वा शाला प्रिया यस्येति विग्रहे प्रियशब्दे उत्तरपदे परतो भाविनि विवक्षिते पूर्वा शालानयोस्तत्पुरुषः। पुंवद्भावः समासान्तोदात्तत्वेन शालान्तोदात्ता। ततः प्रियशब्देन बहुव्रीहिः। **दिक्षु समाहारो नास्ती**ति। समाहारः समूहः स च भिन्नानामेककालानां स्यात्। न त्वभिन्नस्य वस्तुनः।

---

१. एतस्माद् C. २. अप्रत्ययः C; D3. ३. After it—यस्येत्याकारलोपः D2.

संख्यापूर्वो द्विगुः ॥२।१।५२॥

तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्वि[1]गुसंज्ञः [2]स्यात् । पञ्चसु कपालेषु संस्कृत इति विग्रहे ।

संस्कृतं भक्षाः ॥४।२।१६॥

सप्तमीसमर्थात् [3]संस्कृतार्थे यथावि[4]हितं [5]प्रत्ययः [6]भक्षाश्चे-द्वाच्याः [7]स्युः । इत्यण् । द्विगौ वि[8]भक्तिलोपे [9]च कृते

संख्यैव हि भेदमाचष्टे न दिक्शब्दास्तेषां प्रतिनियतार्थविषयत्वाद् विभक्तिरपि समासे नास्ति । तस्मात् समाहारे दिक्शब्दा न संभवन्त्येवेति न तत्र समस्यन्ते । [10]ननु यथा काकसमूह इत्यत्र विभक्त्यभावेपि भेदावगतिस्तथात्रापि स्यात् । एवं तर्हि दिक्षु समाहाराभावे प्रयोगाभाव एव हेतुर्वाच्य इति न दिक्शब्दानां समाहारोदाहरणमिति भावः । इदानीं संख्यापूर्वपदं तत्पुरुषमाह ।

[11]संख्या । **पञ्चस्वि**त्यादि । पञ्चकपाल इत्यस्यार्थबोधके वाक्ये एवंविधे सतीत्यर्थः ।

संस्कृतम् । संस्कृतमिति सामान्यशब्दत्वात् संस्कृतशब्दस्य क्लीबतैकवचने । [12]भक्षा इति विशेषवाचित्वाद् भक्षशब्दस्य पुंस्त्व-बहुवचने । **भक्षाश्चेद्वाच्या स्युरि**ति । संस्कृतं वाच्यं तद्भक्षाश्चेत् स्युरित्यर्थः । इत्यण् । **द्विगौ विभक्तिलोपे च कृते** इति । प्रथमं द्विगुस्ततो विभक्तिलोपस्ततः 'प्राग्दीव्यतोण्' इत्यधिकारादण् इति भावः । खरविशदमभ्यवहार्यं भक्ष्यम् । सत उत्कर्षाधानं संस्कारः । भक्षाः किम् । पुष्पपुटे संस्कृतो मालागुणः ।

---

१. द्विगुः D_3. २. B_1 drops it. ३. संस्कृताद्यर्थे B_1; संस्कृतेर्थे D_3; संस्कृतमित्यर्थे D_4. ४. °विहितः D_3. ५. प्रत्ययाः स्युः C; प्रत्ययः स्यात् D_5, D_4, D_3, D_1, Dc_1. ६. भक्ष्या° P, D_2, D_3, D_5, C, B_1, B_2. ७. C drops it. ८. विभक्तेर्लोपे कृते C. ९. D_1 drops it. १० ननु च Dc_1. ११. संख्येति Dc_3. १२. भक्षार्थे Dc_4.

द्विगोर्लुगनपत्ये ॥४।१।८८॥

द्विगोर्निमित्तं यस्तद्धितोनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक् स्यात् । पञ्चकपालः पुरोडाशः । अनपत्ये किम् । द्वयोर्मित्रयोरपत्यं द्वैमित्रिः । पञ्चभिर्गोभिः क्रीत इत्यत्र द्विगौ कृते

तेन क्रीतम् ॥५।१।३७॥

तेनेति तृतीयासमर्थात् क्रीतार्थे[1] यथाविहितं प्रत्ययः[2] स्यात् । इति ठक् ।

द्विगोः । द्विगोरिति षष्ठी संबन्धे[3] तच्च संबन्धित्वं निमित्तेनेत्याह । द्विगोर्निमित्तमिति । प्राग्दीव्यतीयस्तस्येति । 'प्राग्दीव्यतोण्' इत्यधिकारे यो विहितस्तस्येत्यर्थः । ननु च पञ्चकपालस्येदं पाञ्चकपालमत्र कथं लुक् न । उच्यते । प्रथमं तद्धितो योभूत् स एव हि द्विगोर्निमित्तमित्येष द्वितीयो नात्र लुप्यते । द्वैमित्रिरिति । 'अत इञ्' । पञ्चभिर्गोभिः क्रीत इत्यत्र द्विगौ कृते । इति । तद्धितार्थे विषये पञ्चभिर्गोभिरितीत्यत्र द्विगुसमासे कृते इत्यर्थः ।

तेन । 'प्राग्वतेष्ठञ्'[4] इत्यारभ्य आदयस्त्रयोदश प्रत्ययाः पूर्वमुक्तास्तेषामनेन समर्थविभक्तिः[5] प्रत्ययाश्च निर्दिश्यते । तेनेति मूल्यात् करणे या तृतीया विभक्तिः सा समर्थविभक्तिस्तेनान्यत्र[6] न भवति । देवदत्तेन क्रीतं पाणिना क्रीतमिति । द्विवचनबहुवचनान्ताच्च न भवति प्रत्ययोनभिधानात् । प्रस्थाभ्यां क्रीतं प्रस्थैः क्रीतमिति । यत्र तु प्रकृत्यर्थस्य संख्याभेदावगतौ प्रमाणमस्ति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययः स्यात् । द्वाभ्यां क्रीतं द्विकम् । त्रिकम् । पञ्चकम् । तथा मुद्रैः क्रीतं मौद्रिकम्[7] । न ह्येकेन द्वाभ्यां वा मुद्राभ्यां क्रयः संभवति । इति ठगिति । 'आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' इति पञ्चगोशब्दात् ठगित्यर्थः ।

---

१. क्रीताद्यर्थे B_1. २. प्रत्ययाः स्युः C. ३. संबन्धे षष्ठी Dc_3. ४. प्राग्वहते° Dc_4. ५. समर्था Dc_2 ; न समर्थ° Dc_3. ६. समर्था Dc_2. ७. मौद्रकम् Dc_2.

अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥५।१।२८॥

अध्यर्धपूर्वाद् द्विगोश्च परस्यार्हीयप्रत्ययस्य लुक् स्याद-संज्ञायाम्॥ पञ्चगुः। उत्तरपदे पञ्च गावो धनं यस्येत्यत्र द्विगौ कृते

गोरतद्धितलुकि ॥५।४।९२॥

गोन्तात् तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि। अवादेशः। ततो बहुव्रीहिः।

अध्यर्धपूर्वादित्यादि। अध्यर्धशब्दः पूर्वो यस्य सोऽध्यर्धपूर्वस्तस्मात्। **आर्हीयप्रत्ययस्येति**। 'आर्हादगोपुच्छ—' इत्यधिकारे विहितस्य। अध्यर्धेन कंसेन क्रीतम्। 'कंसाट्टिठन्'। तस्य लुक्। अध्यर्धकंसम्। ननु चाध्यर्धशब्दः संख्यैवेति 'द्विगोः' इत्येव सिद्धे भेदेनोपादानं क्वचिदस्य संख्याकार्यं नेति ज्ञापनार्थम्। तेन 'संख्यायाः क्रियाभ्या-वृत्तिगणने कृत्वसुच्' इति कृत्वसुच् न। **पञ्चगुरिति**। तद्धितलुको जातत्वान्न टच्। 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वम्। 'एच इग्घ्रस्वादेशे' इतीक्। एवं तद्धितार्थे विषये संख्योदाहरणमुक्त्वा उत्तरपदे परतो वक्तुमाह। **उत्तरपदे** इत्यादि। **पञ्च गावो धनं यस्येत्यादि**। अत्र त्रिपदे बहुव्रीहौ धनशब्दे उत्तरपदे पूर्वयोः पदयोः 'तद्धितार्थ—' इति समासे कृते तस्य च 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञायामेकसंज्ञाधिकारेऽपि 'द्विगुश्च' इत्यत्र सूत्रे चकारेण तत्पुरुषसंज्ञासमावेशादत्र तत्पुरुषकार्यमुच्यत इत्यर्थः।

गोरतद्धित। **न तु तद्धितलुकीति**। तद्धितलुग्विषये न भवतीत्यर्थः। अतद्धितलुकीति किम्। पञ्चभिः गोभिः क्रीतः पञ्चगुः। तद्धितग्रहणं किम्। सुब्लुकि निषेधो मा भूत्। राज्ञो गौः। राजगवः। लुग्ग्रहणं किम्। तद्धित एव निषेधो मा भूत्। पञ्चभ्यो गोभ्य आगतं पञ्चगवरूप्यम्। **अवादेश इति**। 'एचोऽयवायावः' इति। ततो बहुव्रीहिः।

---

१. °पूर्वाद् C, B1. २. लुगसंज्ञायाम् P, C, B1. ३. B1 has अश्वः after it. ४. C drops तु. ५. टच् न Dc1.

पञ्चगवधनः । समाहारे । पञ्च गावः समाहृता इत्यत्र समासान्ते कृते

द्विगुरेकवचनम् ॥२।४।१॥

द्विगोरर्थः समाहारे एकवत् स्यात् ॥

पञ्चगवधन इति । ततो द्विगुगर्भः पञ्चगवधन इत्येव बहुव्रीहिः स्यान्न तु विभाषाधिकारात् पञ्चगोधन इत्यपि स्यादिति वाच्यमिति भावः । तथा चोक्तम् । द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् । समाहारोदाहरणं वक्तुमाह । **समाहार** इत्यादि । **पञ्च गावः समाहृता** इति । पञ्चानां गवां समाहार इति यावत् । समुदायात् समुदायिनामभेदविवक्षयैवं विगृहीतम् । तत्र समाहारेऽर्थे द्विगौ विभक्तिलोपे 'गोरतद्धितलुकि' इति समासान्ते टचि कृते इत्यर्थः ।

द्विगुरेक । ब्रवीतीति वचनम् । एकस्यार्थस्य वचनमेकवचन-मित्यन्वर्थमेकवचनं गृह्यते न पारिभाषिकं तद्ग्रहेनुप्रयोगे एकवचनं न स्यात् पञ्चपूलीयं स्थूलेति तस्याद्विगुत्वादतो द्विगोरर्थस्यैकवद्भावो विधीयत इत्यभिप्रेत्याह । **द्विगोरर्थ** इत्यादि । ननु च द्विगोः पुल्लिङ्गत्वात्तद्विशेषणस्यैकवचनशब्दस्यापि पुल्लिङ्गता स्यात् । नैष दोषः। यतो लिङ्गसामान्यविवक्षयोपक्रमात् क्लीबत्वं पश्चात् द्विगुरित्यस्य पुँल्लिङ्गस्य संबन्धः । यदि द्विगुमात्रस्यार्थ एकवत् स्यात् तर्हि तद्धितार्थद्विगोरप्येकत्वं स्यात् ततश्च पञ्चकपालौ पञ्चकपाला इत्येतन्न स्यादतः समाहारद्विगोरिति वक्तव्यमित्यभिप्रेत्याह । **समाहार** इति । ननु च समाहारद्विगोश्चेद् ग्रहणं तर्हि व्यर्थं वचनं समाहारस्यैकत्वादेवैकत्वस्य सिद्धत्वात् । नैष दोषः । समुदायिभ्यो नान्यः समुदाय इत्यस्मिन् मतेनेकद्रव्यात्मकत्वात् समुदायस्यैकत्वं न स्यादित्यतोयमारम्भः । समुदायिभ्योन्यः समुदाय इति मते

---

१. Dropped D_3. २. स्यात् dropped Dc_1, Bc_1, Dc_4. ३. °वचनमिति Dc_2, Dc_3. ४. °क्रमत्वात् Dc_1. ५. पुल्लिङ्गसंबन्धः Dc_3. ६, एवत् dropped Dc_4, Dc_2, Dc_3. ७. स्यादित्यस्यारम्भः Bc_1, Dc_1, Dc_4. ८. अन्यः समुदायिभ्यः Dc_3, Dc_1, Dc_4, Bc_1.

स नपुंसकम् ॥२।४।१७॥

यस्यैकवद्भावः स नपुंसकं स्यात् ॥ पञ्चगवम् । द्विगोरन्यत्र । परमगवः[1] । देवगवः[2] । देवगवी ।

अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः ॥ 'द्विगोः' इति ङीप् । त्रिलोकी । आबन्तो वा । त्रिखट्वम् । त्रिखट्वी । अनो न-

---

प्रत्याख्यातमेव सूत्रं भाष्यकृता । एताः पञ्च पूल्य इत्यत्र तु पूर्वं द्विग्वर्थस्य पञ्चसंख्यायुक्तस्यैकवद्भावः कृतः । ततो बहूनां द्विगूनां द्विग्वर्थत्वाभावान्नैकवद्भावः ।

स नपुंसकम् । परवल्लिङ्गतापवादे[3] योगः । नपुंसकमित्येतावत्युच्यमाने 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इत्यनन्तरस्य द्वन्द्वस्यैव स्यान्न द्विगोस्तस्मात् सग्रहणं कृतम् । यस्यैकवद्भावो विहितो द्विगोर्द्वन्द्वस्य वा तस्यैकवत्त्वं[4] यथा स्यादित्यभिप्रेत्याह । **यस्यैकवद्भाव** इति । **द्विगोरन्यत्रे**ति । द्विगुव्यतिरिक्ते तु समानाधिकरणपदे व्यधिकरणपदे तु तत्पुरुषे एवं स्यादित्यर्थः । **परमगव** इत्यादि । परमश्चासौ गौश्च । 'सन्महत्परम—' इति समासः । देवगवः देवानां गौः । 'षष्ठी—' इति समासः । **देवगवीति** । 'टिड्ढाणञ्—' इति ङीप् ।

अकारान्त इति । अकारान्तमुत्तरपदं यस्य द्विगोः स स्त्रीलिङ्गे वर्तते इतीष्यते । **त्रिलोकीति** । त्रयाणां लोकानां समाहारः । **आबन्तो** वेति । आबन्तोत्तरपदो द्विगुः स्त्रियां वेष्यत इत्यर्थः । **त्रिखट्वमित्यादि** । पूर्ववत् । **अनो** न-

---

१. परमगावः C. २. P drops देवगवः. ३. °पवादो Dc1, Dc2, Dc4. ४. तस्य सर्वस्य नपुंसकत्वं यथा Dc2.

लोपश्च वा स्त्रियाम् । पञ्चकर्मी । पञ्चकर्मम ॥ पात्रादौ न ॥ पञ्चपात्रम । चतुर्युगम । त्रिभुवनम ।

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥५।४।८६॥

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्याच् प्रत्ययः स्यात् । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम । निर्गतमङ्गुलिभ्यः निरङ्गुलम् ।

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥५।४।८७॥

एभ्यो रात्रेरच् स्यात् चकारात् संख्याव्ययादेः ॥ अहश्च रात्रिश्च अहोरात्रम ।

लोपश्चेति । अन्नन्तोत्तरपदस्य द्विगोर्नलोपः स्यात् स चान्नन्तो द्विगुर्वा स्त्रियां वर्तते । **पञ्चकर्मम**मित्यादि । पञ्चानां कर्मणां समाहारः । **पात्रादौ नेति** । पात्राद्युत्तरपदे द्विगौ अकारान्तेपि स्त्रीत्वं नेत्यर्थः । पात्रादिराकृतिगणः ।

तत्पुरुषस्य । **द्वे अङ्गुलीत्यादि** । 'तद्धितार्थ—' इति समासः 'प्रमाणे द्वयसच्' इत्यादिना विहितस्य मात्रचः 'प्रमाणे लोद्विगोर्नित्यम्' इति लुक् । **निरङ्गुलमिति** । 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इति समासः ।

अहः । ननु चात्र तत्पुरुषस्येत्यनुवर्तते । तत् कथमहश्च रात्रिश्च अहोरात्रमिति द्वन्द्व उदाहियते इत्याशङ्क्योष्टिमाह ।

---

१. After it—अन्नन्तोत्तरपदस्य द्विगोरन्तस्य नलोपः स्यात् । २. पञ्चकर्म । पञ्चकर्मी D_1, B_2, D_4. ३. Dropped D_3. ४. After this—अत्यङ्गुलम् । तत्पुरुषस्येति किम् । पञ्चाङ्गुलिर्हस्तः B_2, D_3, D_4. ५. Dropped D_5. ६. Bc_1 drops पात्राद्युत्तरपदे द्विगौ.

इहैव द्वन्द्वः । एकवद्भावात् क्लीबता । इतरत्र तत्पुरुषः ।

इहैव द्वन्द्व इति । इह अहोरात्रमित्यत्रैव द्वन्द्वोदाहृतिरपीष्यते । ज्ञापकादित्यर्थः । तच्च ज्ञापकं 'हेमन्तशिशिरावहोरात्रे च छन्दसि' इति समासान्तस्याहःशब्दात् परस्य रात्रिशब्दस्य निपातनम् । ननु चाहःशब्दादे रात्रिशब्दस्य तत्पुरुषो न संभवतीति द्वन्द्व उदाह्रियते । न त्वियं द्वन्द्वस्यापीष्टिः । मैवं वोचः । तत्पुरुषस्यापि संभवात् । तथा हि अहर्गुणा रात्रिरहःशब्देनोच्यते रात्रिगुणं वाहो रात्रिशब्देनोच्यते तदा अहश्च तद्रात्रिश्चेत्यहोरात्र इति समानाधिकरणस्तत्पुरुषः संभवति । अथवा अह्ना सहिता रात्रिरहोरात्रमिति मध्यमपदलोपी तत्पुरुषः संभवति ।[1] ततो द्वन्द्वेपि अहःशब्दात् पराद्रात्रिशब्दादजिष्यते । तथा चोक्तं न्यासकारेण । अहर्ग्रहणं द्वन्द्वार्थमितीष्टिरियं न तु तत्पुरुषस्यासंभवाद् द्वन्द्वार्थमित्येषोर्थः प्रतिपत्तव्य इति । अथवा इहैव द्वन्द्व इत्यस्यायमर्थः । इह अहोरात्रमित्यत्र द्वन्द्व एव तत्पुरुषस्यासंभवात् । यस्तु तत्पुरुषसंभवो दर्शितः स तु मुख्यया वृत्त्या न संभवतीत्यसंभव एव । तथोक्तं महाभाष्ये । 'अहर्ग्रहणं द्वन्द्वार्थं द्रष्टव्यम् । किमुच्यते द्वन्द्वार्थमिति । नं[2] पुनस्तत्पुरुषार्थमपि स्यात् । तत्पुरुषाभावात् । न हि रात्र्यन्तोहरादिस्तत्पुरुषोस्ति' इति । ननु चाहोरात्रमिति चेद् द्वन्द्वस्तर्ह्यहोरात्रयोर्द्वित्वादहोरात्राविति द्विवचनेन 'रात्राह्नाहाः पुंसि' इति पुंस्त्वेन च भाव्यमित्याशङ्क्याह । एकवद्भावात् क्लीबतेति । सर्वो द्वन्द्वो विभाषयैकवद्भवतीत्येकवद्भावपक्षे 'स नपुंसकम्' इति नपुंसकत्वमित्यर्थः । यदा त्वेकवद्भावो नास्ति न तदा नपुंसकत्वमहोरात्रौ पुण्याविति । ननु चाहर्ग्रहणं चेद् द्वन्द्वार्थं तर्हि तत्साहचर्यात् सर्वादयोपि द्वन्द्वार्थाः स्युरित्यत आह । इतरत्र तत्पुरुष इति । तत्रासंभवात् तत्पुरुषस्य द्वन्द्वार्थतोक्ता । सर्वैकदेशाद्यादेस्तु रात्र्यन्तस्य तत्पुरुषस्य संभवान्न द्वन्द्वार्थता किं तु तत्पुरुषार्थतैवेति तत्पुरुष इति भावः ।

१. After it—इति Dc3. २. ननु Dc2.

रात्राह्नाहाः पुंसि ॥२।४।२९॥

एते पुंस्येव॥ सर्वा रात्रिः सर्वरात्रः ॥ एकदेशः। पूर्वं रात्रेः पूर्वरात्रः। अपररात्रः। संख्यातरात्रः। पुण्यरात्रः।

संख्यादेः रात्रिशब्दस्य क्लीवता वाच्या* ॥ द्विरात्रम्। अतिरात्रः।

रात्राह्नाहाः। परवल्लिङ्गतापवादः। कृतसमासान्तानां निर्देशो रात्र अह्न अह इति। एते पुंस्येवेति। एतदन्ताः पुंस्येवेत्यर्थः। ततश्च समाहारेपि पुंस्त्वमेव। अन्यथैषामेव पुंस्त्वे परवल्लिङ्गतया च तदन्तानामपि पुंस्त्वे सिद्धेपि समाहारे 'स नपुंसकम्' इत्येव स्यात्। परवल्लिङ्गतापवादत्वात्। वाकान्ताश्चेति वाच्यम्। अनुवाकः। शंयुवाकः। सूक्तवाकः। केचिदाहुः। अनुवाकादिर्बहुव्रीहिः। अनुक्रान्तो वाकोनयानेन वेति। तेन पक्षे क्लीबे स्त्रीलिङ्गे च प्राप्ते वचनमिति। अन्ये त्वाहुः। अनूच्यते अनुवाकः। 'अकर्तरि च कारके' इति घञ्। प्रादिसमासः। तत्र यो भावे घञ् स सामर्थ्यात् पुल्लिङ्ग एव नपुंसके तस्य क्तोपवादः स्त्रियां क्तिन्निति। यस्त्वकर्तरि कारके स पुंसि क्लीबे चापवादाभावादिति पक्षे क्लीबे प्राप्ते उक्तिः। **सर्वा रात्रिः सर्वरात्र** इति। 'पूर्वकालैकसर्व—' इति तत्पुरुषः। **पूर्वं रात्रेरित्यादि**। 'पूर्वापराधरोत्तरम्—' इति समासः। **संख्यातरात्र** इत्यादि। संख्याता रात्रिः। पुण्या रात्रिः। 'विशेषणं विशेष्येण बहुलम्' इति समासः। **द्विरात्रमिति**। द्वे रात्री समाहृते। 'तद्धितार्थ—' इति द्विगुः। अच्प्रत्ययः। **अतिरात्र** इति। रात्रिमतिक्रान्तः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः।

---

१. सर्वा चासौ रात्रिश्च सर्वरात्रः P, Dc_1; हेमन्तशिशिरावहोरात्रे च छन्दसि। सर्वरात्रः। D_4. २. C drops from एकदेशः to संख्यातरात्रः. ३. Dropped D_3. ४. After it—अतिरात्रः। D_3. ५. संख्यापूर्वरात्रिशब्दस्य D_1; संख्यापूर्वस्य रात्रि° D_3. ६. C, D_4 have त्रिरात्रम् after it; B_2 has त्रिरात्रम् for द्विरात्रम्. ७. यस्तु भावे घञ् Dc_4.

राजाहःसखिभ्यष्टच् ॥५।४।९१॥

एतदन्तात्तत्पुरुषाट्टच् स्यात् ॥ महाराजः । अतिराजः । अतिराजी । कृष्णसखः । महासखः । त्रिसखम् ।

अह्नष्टखोरेव ॥६।४।१४५॥

अह्नष्टखयोरेव[1] टिलोपः स्यान्नान्यत्र[2] । उत्तमाहः । त्र्यहः[3] ।

राजाहः । महाराजेति । 'सन्महत्—' इति समासः । टचश्चित्करणमव्ययपूर्वपदप्रकृतिस्वरत्वं बाधित्वा चित्स्वर एव यथा स्यादित्येवमर्थमिति दर्शयितुं तृतीयोदाहरणमतिराज इति । राजानमतिक्रान्तः । 'अत्यादय—' इति समासः । टचश्चित्करणं ङीबर्थमिति दर्शयितुं तृतीयोदाहरणमतिराजीति । कृष्णसख इति । षष्ठीसमासः । कर्मधारयेपि तत्पुरुषसंज्ञाश्रयं कार्यं स्यात् संज्ञानां समावेशात् तस्याः कर्मधारयसंज्ञयाबाधितत्वादिति दर्शयितुमुदाहृतं महासख इति । एकसंज्ञाधिकारेपि 'द्विगुश्च' इति चकारेण तत्पुरुषसंज्ञाया अपि समावेशस्योक्तत्वाद् द्विगावपि टच् स्यादिति दर्शयितुं त्रिसखमित्युदाहृतम् । त्रयाणां सखानां समाहारस्त्रिसखम् ।

अह्नः । 'नस्तद्धिते' इत्येव सिद्धे सत्यारम्भो नियमार्थः । एवकारकरणं विस्पष्टार्थम्[4] । अह्न एव टखयोरित्येवं विपरीतनियमो न भविष्यति । 'आत्माध्वानौ खे' इति प्रकृतिभावविधानसामर्थ्यात् । उत्तमाह इति । 'सन्महत्—' इति समासः । त्र्यह इति । त्रयाणामह्नां समाहारः । 'रात्राह्नाहाः पुंसि' इत्युभयत्र पुंस्त्वम् ।

---

१. °ष्टखोरेव P. २. स्यात् dropped D_3. ३. Dropped D_3. ४. Dc_1 drops एव.

द्वे अहनी संभृते द्व्यहीनः क्रतुः । अह्नः खः क्रतुसमूहे । अहीनः क्रतुः । नियमः किम् । आह्निकम् । पुंनिर्देशान्नेह । मद्राणां राज्ञी मद्रराज्ञी ।

द्वे अहनीत्यादि । 'तद्धितार्थ—' इति द्विगुसमासे कृते 'तमधीष्टो भृतो भूतो भावी' इत्यधिकारे 'समायाः खः' इत्यतः ख इत्यनुवर्तमाने 'द्विगोर्वा' इत्यतो द्विगोरिति च 'रात्र्यहःसंवत्सराच्च' इति खः । अहीन इत्यत्र तु केन ख इत्याशङ्क्य वक्तव्यमाह । अह्न इत्यादि । क्रतुश्च समूहश्च क्रतुसमूहम् । द्वन्द्वैकवद्भावः । एकापि सप्तमी विषयभेदेन व्यवस्थाप्यते । समूहे वाच्ये क्रतुविषये अहन्शब्दात् खः स्यादित्यर्थः । अहीनः क्रतुरिति । अह्नां समूहोऽहीनः । अह्नां समूहेन साध्य इति क्रतुरहीनः । अह्नष्टखोरेवेति नियमः किमिति पृच्छति । उत्तरमाह । आह्निकमिति । अह्ना निवृत्तम् । 'आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' इति ठक् । नियमादत्र टिलोपाभावः । ननु मद्राणां राज्ञी मद्रराज्ञीत्यत्र प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया टच् स्यादित्याशङ्क्याह । पुंनिर्देशान्नेहेति । इह लघ्वक्षरं पूर्वं निपततीति सख्युरह्नो वा पूर्वनिपाते प्राप्ते योऽयमहःशब्दे परे राजशब्दस्यादौ प्रयोगः स सवर्णदीर्घार्थस्तं कुर्वन्नेतज् ज्ञापयति यस्याकारादौ परे सवर्णदीर्घः स्यात् तस्येदं ग्रहणमिति । अकारादौ च राजशब्दस्य सवर्णदीर्घः पुल्लिङ्गस्यैव प्रथमान्तस्य स्यात् इति राजाहरित्ययं पुंनिर्देशः । तस्मादिह मद्राणां राज्ञी मद्रराज्ञीति टच् न भवतीत्यर्थः ।

---

१. भृते P; संभृतो D_1, B_2. २. नियमात् D_2, D_5, C, B_1. ३. क्रतौ विषये Dc_2. ४. खं Dc_2. ५. किमर्थमिति Dc_1, Bc_1, Dc_4, Dc_3. ६. After it—नियमः किमिति Dc_3. ७. For आर्हा° to ठक् Dc_2 has 'तेन निवृत्तम्' इति ठञ् । ८. ननु च Dc_2, Dc_3.

अह्नोऽह्न एतेभ्यः ॥५।४।८८॥

एतेभ्यः सर्वादिभ्यः परस्याहन्शब्दस्य अह्नादेशः स्याट्टचि परे ॥

अह्नोऽदन्तात् ॥८।४।७॥

अदन्तात् पूर्वपदस्थान्निमित्तात् परस्याह्नो नस्य णः स्यात् ॥ सर्वाह्णः । पूर्वाह्णः । मध्याह्नः । संख्याताह्नः । द्वयोरह्नोर्भवः ।

अह्नोऽह्नः । एतेभ्य इत्यनेन सर्वनाम्ना प्रकृताः 'अहःसर्वैकदेश—' इति सूत्रे प्रकृतित्वेन निर्दिष्टाः सर्व एकदेश संख्यात पुण्य एते साक्षादुक्ताः । चेन आकृष्टाः संख्या अव्यय एते शब्दाः परामृश्यन्त इत्यभिप्रेत्याह । **'एतेभ्यः सर्वादिभ्यः'** इति । अहः— शब्दात् परोऽहःशब्दष्टचि परे न संभवतीति अहःशब्दो न गृह्यते । अहःशब्दान्तात् तत्पुरुषाट् टजेव विहितो नाच्प्रत्यय इति सामर्थ्याट्टच्येवादेशः स्यात् । अथ 'अच्' इति योगविभागेनाज् विधीयते तथापि वचनवैयर्थ्यम् । अच्यह्नोपेनैव तद्रूपसिद्धेः । न च वाच्यं टिलोपः स्यादिति । अह्नष्टखोरेवेति नियमात् । अतोऽपि टच्येवाह्नादेश इत्येतच्चेतसि कृत्वाह । **टचि परत इति ।**

अह्नः । अह्न इति षष्ठ्याः स्थाने व्यत्ययेन प्रथमा । **सर्वाह्ण इति** । सर्वमहः । 'पूर्वकाल—' इति समासः । टच् । अह्नादेशः । **पूर्वाह्ण इति** । अह्नः पूर्वम् । एकदेशिसमासः । **संख्याताह्नः** । संख्यातमहः । विशेषणसमासः । संख्यापूर्वस्योदाहरणं वदन्नाह । **द्वयोरित्यादि** । 'तद्धितार्थ—' इति द्विगुः ।

---

१. °स्याहःशब्दस्य C. २. परतः D4, Com. ३. अदन्तपूर्व° P, D1.
४. पूर्वाह्णः । सर्वाह्णः । D2, D5, B1; पूर्वाह्णः dropped P; D4.
५. Dropped C, B2. ६. Dropped P, D1, D4. ७. संगृह्यते Dc1.

अणो लुक् । द्व्यह्नः । द्व्यह्नप्रियः । अत्यह्नः । अदन्तादित्युक्तेर्नेह णत्वम् । निरह्नः । अह्न इत्यदन्तग्रहणान्नेह । दीर्घाह्नी प्रावृट् ॥

न संख्यादेः समाहारे ॥८।४।८९॥

इह नाह्नादेशः । द्वे अहनी समाहृते द्व्यहः । त्र्यहः ।

अणो लुगिति । 'तत्र भवः' इति जातस्याणो 'अध्यर्धपूर्वाद् द्विगोः' इति लुगित्यर्थः । द्व्यह्नप्रिय इति । द्वे अहनी प्रिये यस्य । उत्तरपदे द्विगुः । शेषं पूर्ववत् । अत्यह्न इति । अहरतिक्रान्तः । निरह्न इति । निर्गतमह्नः । अह्न इत्यदन्तग्रहणान्नेहेति । अदन्तग्रहणं व्याख्यानाद्गम्यते । दीर्घाह्नीति । दीर्घाणि अहानि यस्यामिति बहुव्रीहिः । 'अन उपधालोपिनोऽन्यतरस्याम्' इति ङीप् । 'अल्लोपोऽनः' इत्यल्लोपः । अत्रादन्तत्वाभावाण्णत्वं न । अदन्तादिति तपरकरणात् पराजितमहः पराह्नमित्यत्र न । अन्तग्रहणं विस्पष्टार्थम् ।

न संख्या । इहेत्यादि । समाहारे वर्तमानस्य संख्यादेरह्नोऽह्नादेशो नेत्यर्थः । द्व्यहत्र्यह इति । 'अह्नष्टखोरेव' इति टिलोपः । समाहारे किम् । द्वयोरह्नोर्भवः द्व्यह्नः ।

---

१. अह्नादेशो न B_2. २. C has इति before it. ३. इत्यागतस्याणो 'द्विगोर्लुगनपत्ये' इति लुगित्यर्थः । Dc_2; इत्यागतस्याणो Dc_3. ४. ॰न्नेति Dc_4.

उत्तमैकाभ्यां च ॥५।४।९०॥

आभ्यां परस्याह्लादेशो[1] न ॥ उत्तमशब्दोन्त्यार्थः पुण्यशब्दमाह । पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा[2] ॥ पुण्याहम् । सुदिनाहम् । एकाहः । संख्याताह इत्यपीष्यते ।

अग्राख्यायामुरसः ॥५।४।९३॥

उरोन्तात्तत्पुरुषाट्टच् स्यात् अग्राख्यायाम् ॥ अश्वोरसम् । मुख्योश्व[3] इत्यर्थः ।[4]

उत्तम । उत्तमशब्द इत्यादि । अन्त्यपर्याय उत्तमशब्दः 'अहःसर्वैकदेशसंख्यातपुण्याच्च' इत्यत्रान्ते वर्तमानं पुण्यशब्दं ब्रूते इत्यर्थः । पुण्यग्रहणमेव कस्मान्न कृतम् । वैचित्र्यार्थम् । केचित्तूमोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति । तेन संख्यातशब्दात् परस्यापि न । अत एवानन्तरमेवाह । **संख्याताह इत्यपीष्यत** इति । पुण्याहं सुदिनाहमिति कर्मधारयः । **एकाह** इति । 'पूर्वकालैक—' इति समासः । 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम् ।

अग्रा । अग्रं प्रधानं तस्याख्या अग्राख्या । **अश्वोरसमिति** । अश्वानामुरः । यथा शरीरावयवानामुरः प्रधानमेवमश्वोपि प्रधानभूत उरःशब्देनोच्यते । अग्राख्यायां किम् । देवदत्तस्योरो देवदत्तोरः ।

१, परस्याह्नोह्नादेशो न टच् B_2. २. क्लीबतेष्यते C. ३. मुख्याश्व D_5.
४. After it—अग्राख्यायामिति किम् । अश्वोरसि आवर्तः B_2, D_2, D_4.

अनोऽश्मायःसारसां जातिसंज्ञयोः ॥५।४।९४॥

एतदन्तात्तत्पुरुषाट्टच् स्यात् जातौ संज्ञायां च[1] ॥ उपानसम् ।[2] अमृताश्मः । कालायसम् । मण्डूकसरसमिति जातिः । महानसम् । पिण्डाश्मः । लोहितायसम् । जलसरसमिति संज्ञा ।

ग्रामकौटाभ्यां च तक्ष्णः ॥५।४।९५॥

आभ्यां तक्ष्णष्टच् स्यात्तत्पुरुषे ॥ ग्रामतक्षः । कौटतक्षः ।

अतेः शुनः ॥५।४।९६॥

अतेः परात् शुनष्टच् स्यात् ॥ अतिश्वो वराहः । अतिश्वी सेवा[4] ।

अनः । तत्र जातौ तावदुदाहरति । **उपानसमि**त्यादि । उपगतमन इति प्रादिसमासः । अमृताश्मः कालायसमिति कर्मधारयौ । मण्डूकसरसमिति षष्ठीतत्पुरुषः । संज्ञायामुदाहरति । **महानसमि**त्यादि । पूर्वे त्रयोपि कर्मधारयाः । जलसरसमिति षष्ठीतत्पुरुषः । जातिसंज्ञयोः किम् । सदनः । सदश्मा ।

ग्राम । **ग्रामतक्ष** इति । ग्रामस्य तक्षा । बहूनां साधारण इत्यर्थः । **कौटतक्ष** इति । कुट्यां भवः कौटः । स चासौ तक्षा च । स्वतन्त्रः कर्मजीवी । न कस्यचित् प्रतिबद्ध इत्यर्थः । ग्रामकौटाभ्यां किम् । राज्ञस्तक्षा ।[6]

अतेः । **अतिश्व** इति । श्वानमतिक्रान्तः । प्रादिसमासः । **अतिश्वी सेवे**ति । शुनोपि सेवामतिक्रान्ता । निकृष्टा सेवेति यावत् । 'टिड्ढाणञ् ' इति ङीप् ।

---

१. Dropped D6. २. After it—अनो मातरिशकटे च । D6. ३. संज्ञायाम् D3. ४. सेना D2. ५. Before it—एवं Dc4. ६. After it—राजतक्षा Dc2. Dc3, Dc4.

उपमानादप्राणिषु ॥५।४।९७॥

उपमानवाचिनः शुनष्टच् स्यादप्राणिषु । आकर्षः श्वेव आकर्षश्वः । 'उपमितं [1]व्याघ्रादिभिः—' इति समासः । [2]अप्राणिषु किम् । वानरः श्वेव वानरश्वा ॥[3]

उत्तरमृगपूर्वाच्च सक्थ्नः ॥५।४।९८॥

[4]एभ्यः सक्थ्नष्टच् स्यात् ।[5] [6]चादुपमानाच्च । उत्तरसक्थम् । मृगसक्थम् । [7]पूर्वसक्थम् । उपमानात् । फलकसक्थम् ।

नावो द्विगोः ॥५।४।९९॥

नौशब्दान्ताद् द्विगोष्टच् स्यात् ॥ द्वौ नावौ समाहृतौ द्विनावम् । [8]त्रिनावम् । पञ्चनावप्रियः । तद्धितार्थे । द्वाभ्यां नौभ्यामा[9]गतो द्विनावरूप्यः । 'हेतुमनुष्येभ्यः—' इति रूप्यः ।

उपमानात् । **आकर्षश्व** इति । अत्र श्वशब्द उपमानमप्राणिन्याकर्षे वर्तते । **वानरश्वेति** । अत्र प्राणिनि वानरे वर्तते । उपमानात् किम् । न श्वा अश्वा लोष्टः ।

उत्तर । **उत्तरसक्थमिति** । उत्तरं सक्थ्नः । 'पूर्वापर—' इति समासः । अथवा उत्तरं सक्थीति विशेषणसमासः । **मृगसक्थमिति** । षष्ठीतत्पुरुषः । **पूर्वसक्थमिति** । उत्तरसक्थतुल्यम् । **फलकसक्थमिति** । फलकमिव स[10]क्थि ।

नावः । **द्विनावमित्यादौ** सर्वत्र 'तद्धितार्थोत्तरपद—' इति समासः ।

---

१. व्याघ्रेति P, B_2, D_3. २. अप्राणिष्विति D_2. ३. After it—उपमानादिति किम् । न श्वा अश्वा लोष्टः B_2, D_4. ४. एभ्यः परात् P, D_1, Dc_1. ५. C has तत्पुरुषे after it. ६. चकारा° D_4. ७. C, D_1 drop it. ८. P, Dc_1 drop it. ९. After °मागतः C, Dc_1 have द्विगोर्लुगनपत्ये .. न लुक्; D_1, Dc_1, D_3 follow C and have द्विनावरूप्यः after न लुक्. १०. 'उपमितं व्याघ्र—' इति समासः । Dc_4, Dc_3.

'द्विगोर्लुगनपत्ये' इत्यत्र वेत्यनुवृत्तेरत्र ताद्धितस्य न लुक्। अताद्धितलुकीत्येव । पञ्चभिर्नौभिः क्रीतः पञ्चनौः ॥

अर्धाच्च ॥५।४।१००॥

अर्धात् परतो नावष्टच् स्यात् ॥ नावोर्धमर्धनावम् । क्लीबत्वं लोकात् ।

खार्याः प्राचाम् ॥५।४।१०१॥

द्विगोरर्धाच्च खार्याष्टच्[2] वा स्यात् ॥ द्विखारम् । द्विखारि । द्विखारधनः[3] । द्विखारीधनः[4] । अर्धखारम् । अर्धखारी[5] ।

द्विगोर्लुगित्यादि । अत्र 'समर्थानां प्रथमाद्वा' इत्यतो वेत्यनुवर्तते । सा च व्यवस्थितविभाषेति अजादेरेव प्रत्ययस्य लुक् न हलादेरिति । अत्र न लुगिति भावः । पञ्चनौरिति । आर्हीयस्य ठकः 'अध्यर्धपूर्व---' इति लुक् ।

अर्धाच्च । अर्धनावमिति । 'अर्धं नपुंसकम्' इति समासः। ननु परवल्लिङ्गतात्र किमिति नेत्याशङ्क्याह । क्लीबत्वं लोकादिति । लोकाश्रयत्वाल्लिङ्गस्येति भावः ।

खार्याः । द्विखारमिति । द्वे खार्यौ समाहृते । अर्धखारमिति । खार्या अर्धम् ।

---

१. Before it—हेतुमनुष्येभ्य इति रूप्यः D_1, Dc_1. २. C, D_1 drop वा. ३. P, D_1, D_2, D_3 have द्विखारीधनः । द्विखारधनः ४. द्विखारधनः B_2, D_6. ५. अर्धखारि B_2.

द्वित्रिभ्यामञ्जलेः ॥५।४।१०२॥

आभ्यामञ्जलेष्टच् वा स्यात् द्विगौ ॥ द्व्यञ्जलम् । द्व्यञ्जलि । अताद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिः ।

ब्रह्मणो जानपदाख्यायाम् ॥५।४।१०४॥

ब्रह्मान्तात् तत्पुरुषाट्टच् स्यात् जनपदसंबन्धद्योतकं चेदुपपदम् । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः । सप्तमीति योगविभागात् समासः ।

द्वित्रिभ्याम् । **द्व्यञ्जलमिति** । द्वावञ्जली समाहृतौ । द्विगौ किम् । द्वयोरञ्जलिर्द्व्यञ्जलिः । **द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिरिति** । 'अध्यर्ध—' इत्यार्हीयस्य ठको लुक् ।

ब्रह्मणः । जनपदे भवो जानपदः । तस्याख्या तस्याम् । भावप्रधानोऽत्र जानपदशब्दः । जानपदत्वाख्यायामित्यर्थः । तदिदमुक्तम् । **जनपदसंबन्धद्योतकं चेदुपपदमिति** । ब्रह्मणो जनपदसंबन्धस्य द्योतकमित्यर्थः । ननु चैकमेव ब्रह्मग्रहणं तेन तत्पुरुषो विशेषितो ब्रह्मान्तादिति । तत्कथं जानपदत्वं ब्रह्मणा विशेष्यते । नैष दोषः । तन्त्रेण ह्यत्र द्वौ ब्रह्मशब्दावुच्चारितौ तत्रैकेन समासो विशेष्यते अपरेण जानपदत्वम् । **सप्तमीति योगविभागादिति** । 'सप्तमी शौण्डैः' इत्यत्र योगे सप्तमीति विभागात् समास इत्यर्थः । जानपदाख्यायां किम् । देवब्रह्मा नारदः ।

---

१. स्याद्वा C. २. Dropped D_2. ३. °बोधकं D_2, B_1, P; C.

कुमहद्भ्यामन्यतरस्याम् ॥५।४।१०५॥

आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे ॥ कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा ।

तत्रोपपदं सप्तमीस्थम् ॥३।१।९२॥

अस्मिन् धात्वधिकारे कर्मण्यणित्यादौ सप्तमीनिर्दिष्टमुपपदसंज्ञं स्यात् ।

उपपदमतिङ् ॥२।२।१९॥

उपपदमतिङन्तं समर्थेन नित्यं समस्यते स तत्पुरुषः ॥ कुम्भकारः । अतिङ् किम् ।

कुमहत् । अप्राप्तविभाषेयम् । न ह्यत्र जानपदत्वं प्रतीयते । **कुब्रह्मेति** । 'कुगति—' इति समासः । ब्राह्मणपर्यायो ब्रह्मशब्दः ।

तत्र । तत्रेति तृतीयो धात्वधिकार उच्यते इत्यभिप्रेत्याह । **अस्मिन् धात्वधिकारे** इति । **सप्तमीस्थमिति** । स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम् । अन्यथा यत्र सप्तमीश्रुतिस्तत्रैव स्यात् स्तम्बेरम इत्यादौ । यत्र सप्तमीश्रुतिर्नास्ति 'सप्तम्यां जनेर्डः' सरोजमित्यादौ तत्र न स्यात् । महत्याः संज्ञायाः करणमन्वर्थताविज्ञानार्थमुपोच्चारितं पदमुपपदमिति । एवं च विज्ञायमाने समर्थपरिभाषा व्याप्रियते । ततश्चात्र न भवति । पश्य कुम्भं करोति कटमिति । न ह्यत्र कुम्भस्य करोतिना सामर्थ्यं किं तु पश्येत्यनेन । ततो नाण् ।

उपपदम् । 'नित्यं क्रीडाजीविकयोः' इत्यतः नित्यमित्यनुवर्तत इत्यभिप्रेत्याह । **नित्यमिति** । **कुम्भकार** इति । कर्मण्यण् ।

---

१. टच्च वा D_1. २. कुब्रह्मम् । महाब्रह्मम् C. ३. तत्रास्मिन् P. ४. तृतीये before it in P; D_4. ५. सुबन्तेन before it in C. ६. अतिङिति C.

एधानाहारको व्रजति । 'तुमुन्ण्वुलौ क्रियायाम्—' इति सप्तम्या[1] निर्देशात् तिङन्तस्योपपदत्वम् । अतिङ्वचनं[2] ज्ञापयति नात्र सुबनुवृत्तिरिति । तेन गतिकारकोपपदानां कृद्भिः समासः[3] प्राक् सुबाद्युत्पत्तेरिति[4] सिध्येत्

एधानाहारको व्रजतीति । 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल् । ननु सुप् सुपेत्यनुवृत्तेरेव तिङन्तस्योपपदस्यापि समासो न स्यात् तत् किमर्थं तिङ्वर्जनमित्याशङ्क्य ज्ञापनार्थं तदित्याह । तिङ्वचनमिति । ज्ञापनस्य फलमाह । तेनेत्यादि । तेन कारणेन गतिकारकोपपदानामित्यादि पूर्वाचार्यकृता परिभाषा सिध्यतीत्यर्थः । ततश्चाश्वक्रीतीत्यत्र प्राक् सुबुत्पत्तेः समास इति लिङ्गयोगानपेक्षणात् समासात् प्राग् टाबपि न क्रियते इति प्रथमं 'कर्तृकरणे कृता बहुलम्' इति समास एव स्यादित्य-दन्तत्वादत इत्यधिकारेण 'क्रीतात् करणपूर्वात्' इति विधीयमानो ङीष् स्यात् । यदि हि सुबुत्पत्तौ सत्यां समासः स्यात् तदान्त-रङ्गत्वात् प्राक् सुपष्टाप् स्यात् ततः समासः ततोदन्तत्वा-भावान्ङीष् न स्यात् । ननु चाश्वस्य धात्वधिकारे सप्तमीनिर्देशा-भावात् नोपपदत्वं कथमत्र सुबुत्पत्तेः प्राक् समास इति चेन्नैष दोषः । न हि धात्वधिकारे यदुपपदं तदेवोपपदमपि तु उपोच्चारितं पदमुपपदमित्यप्यत्र क्वचिदाश्रीयते यथा इतरेतरान्यो-न्योपपदाच्चेति । तस्मादश्वोऽप्युपोच्चारितपदत्वादुपपदम् । पद्यतेनेनार्थ इति पदं न सुबन्तत्वात् । ननु उपोच्चारितं पदमप्युपपदं चेत् तर्ह्यतिप्रसङ्गः । राजाश्रित इत्यत्रापि प्राक् सुबुत्पत्तेः समासः स्यात् ।

---

१. सप्तमीनिर्देशात् C, D_2, D_3. २. तिङ्वचनं D_1, Com. ३. C has सह before it. ४. सुबुत्पत्तिरिति P, C; सुबुत्पत्तेरिति D_1, D_3; सुबुत्प-त्तेस्तेन अश्वक्रीतीति सिध्येत् B_2; Dc_1 follows B_2, dropping सिध्येत्. ५. °दित्यन्तरङ्गत्वादत Bc_1. ६. ङीप् Dc_4, Dc_3. ७. ङीप् Dc_4, Dc_3. ८. तत्कथ° Bc_1.

अमैवाव्ययेन ॥२।२।२०॥

उपपदसमासोऽव्ययेष्वमैव स्यात् ॥ स्वादुंकारम् । अमा किम् । कालो भोक्तुम् ।

ततश्च पदत्वाभावान्नलोपो न स्यात् । असर्वविषयत्वादस्य ज्ञापकस्येत्यदोषः । अथवा 'गतिकारकोपपदानाम्—' इत्यस्यायमर्थः । गतीनां कारकाणामुपपदानां चेति । गतीनां व्याघ्री । व्याजिघ्रतीति । 'आतश्चोपसर्गे' इति कः । व्याङा गतिशब्देन समासो यदि सुबन्तस्योत्तरपदस्य स्यात् ततः सुबुत्पत्तये संख्याकर्मादियोगोपेक्ष्यस्ततः प्राक् लिङ्गयोगः । ततश्च घ्रशब्दस्याजातित्वात् स्त्रीनिमित्तष्टाप् स्यात् । ततो घ्राशब्देन समासेनकारान्तत्वात् ङीप् न स्यात् । प्राक् सुबुत्पत्तेः समासो भवन् लिङ्गयोगं नापेक्षत इति स एव स्यात् । पश्चाज्जातित्वात् स्त्रीप्रत्ययो भवन् ङीषेव स्यात् । कारकाणामश्वक्रीती । उपपदानां माषवापिणी । ङीपः प्राक् समासे समासप्रातिपदिकस्यान्तो नकार इति णत्वं स्यात् ।

अमा । पूर्वेण सिद्धे नियमार्थं वचनम् । ननु च सिद्धे सत्यारम्भो नियमायेत्येवकारमन्तरेणापि नियमार्थतायां सिद्धाया-मेवकारकरणं किमर्थम् । उच्यते । उपपदविशेषणार्थम् । अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात् । येन त्व वाक्येनामेव विधीयते न प्रत्ययान्तरमपि तेन यदुपपदं निर्दिश्यते तदमैव तुल्यविधानम् । यथा स्वादुंकारमिति 'स्वादुमि णमुल्' इति स्वादुशब्दः । यत्तु अमा वान्येन च तुल्यविधानं यथा अग्रे भोजमग्रे भुक्त्वा । अत्राग्रेशब्द उपपदम् । 'विभाषाग्रे-प्रथमपूर्वेषु' इत्यमा क्त्वाप्रत्ययेन च तुल्यविधानमिति न समस्यते । अयं नियमः किमर्थमित्याक्षिपति । **अमा किमिति** । उत्तरमाह । **कालो भोक्तुमिति** । 'कालसमयवेलासु तुमुन्' ।

---

१. उपपदस्य समासो° B_2. २. व्याघ्र Bc_1, Dc_4, Dc_3.

तृतीयाप्रभृत्यन्यतरस्याम् ॥२।२।२१॥

उपदंशस्तृतीयायामित्यतः प्रभृतीन्युपपदान्यमा वा समस्यन्ते ॥ मूलकोपदंशं मूलकेनोपदंशं भुङ्क्ते ।[1]

क्त्वा च ॥२।२।२२॥

उपपदानि तृतीयाप्रभृतीनि क्त्वाप्रत्ययेन वा समस्यन्ते ॥[2] उच्चैः कृत्वा । उच्चैः कृत्य ।[3][4]

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥२।४।२१॥

उपज्ञोपक्रमयोरादेराख्यानेच्छायां तदन्तस्तत्पुरुषो नपुंसकं स्यात् ॥

तृतीया । उभयत्र विभाषेयम् । यदमैव तुल्यविधानं तस्य प्राप्ते यथोपदंशस्तृतीयायां **मूलकोपदंशं मूलकेनोपदंशमिति** । यत्पुनरमा चान्येन च तस्याप्राप्ते यथा 'अव्ययेयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ' उच्चैः कारमाचष्टे उच्चैः कारं पठतीति[5] । अमेत्येव । पर्याप्तिवचनेष्वलमर्थेषु । पर्याप्तो भोक्तुं प्रभुर्भोक्तुम् ।

क्त्वा च । तृतीयाप्रभृतीनीति किम् । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' । अलं कृत्वा । खलु कृत्वा । अयं च तृतीयाप्रभृतिभ्यः पूर्वः ।

उपज्ञा । उपज्ञायत इत्युपज्ञा[6] । उपज्ञेयः परिच्छेद्य इति यावत् । 'आतश्चोपसर्गे' इति कर्मण्यण् । उपक्रम्यत इत्युपक्रमः । कर्तव्यः । 'अकर्तरि च कारके—' इति कर्मणि घञ् । तयोर्ज्ञेयकर्तव्ययोरादेः प्राथम्यस्य कथनेच्छायां तदन्त उपज्ञोपक्रमान्तस्तत्पुरुषो नपुंसकः स्यादित्यर्थः ।

१, वा भुङ्क्ते । D3. २. तृतीयाप्रभृतीन्युपपदानि D3. ३. उच्चैः कृत्य । उच्चैः कृत्वा D1, D4, D5. ४. After it P has—तृतीयाप्रभृतीत्येव । तेन अलं कृत्वा खलु कृत्वा इत्यादौ न. ५. इति dropped Dc3. ६. After this Dc2 has:—उपपूर्वको जानातिर्विनोपदेशने वर्तते ।

पाणिन्येरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । तेनादौ कृत इत्यर्थः । नन्दस्योपक्रमं[1] नन्दोपक्रमं द्रोणः । तेनादौ उपक्रान्त इत्यर्थः ॥

छाया बाहुल्ये ॥२।४।२२॥

छायान्तस्तत्पुरुषः पूर्वपदार्थबाहुल्ये क्लीबं स्यात् ॥ शलभानां छाया शलभछायाम् ।[2] बाहुल्ये किम् । कुडयस्य छाया कुडयछाया ।

सभा राजामनुष्यपूर्वा ॥२।४।२३॥

राजामनुष्यपूर्वः सभान्तस्तत्पुरुषः क्लीबं[3] स्यात् ॥ इनसभम् । ईश्वरसभम् । [4]पर्यायस्यैवेष्यते तेनेह न ।

उपज्ञोपक्रमं किम् । वाल्मीकिश्लोकाः । अस्त्यत्र तदादेराख्यानेच्छा । वाल्मीकिः प्रथमतः श्लोकसंबन्धं ददर्शेति प्रसिद्धेः । तदाख्याचिख्यासायां किम् । देवदत्तोपज्ञो[5] ग्रन्थः । यज्ञदत्तोपक्रमो रथः । देवदत्तेनोपज्ञायते यज्ञदत्तेनोपक्रम्यत इति क्रियासंबन्धमात्रमत्र विवक्षितम् ।

छाया । 'विभाषा सेनासुराछाया—' इति वक्ष्यति । नित्यार्थमिदं वचनम् । शलभच्छायमित्यादौ शलभादीनां बहुत्वं गम्यते । न हि तेन विना छाया संभवति । अतः पूर्वपदार्थस्य शलभादेर्बाहुल्यं धर्म इत्यभिप्रेत्याह । **पूर्वपदार्थबाहुल्ये** इति । बाहुल्ये किम् । कुडयस्य छाया कुडयछाया ।

सभा । **इनसभमित्यादि** । षष्ठीतत्पुरुषः । ननु च 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति राजशब्द एवोदाहार्यो न पर्यायास्तत्कथं पर्यायाविनेश्वरशब्दावुदाहृतावित्याशङ्क्याह । **पर्यायस्यैवेष्यत** इति ।

---

१. °क्रमः D_2, D_3. २. D_1, D_3, D_4 drop from बाहुल्ये किम्... कुड्यच्छाया ।. ३. क्लीबे D_1. ४. राज्ञः पर्यायस्यै° B_1, D_5. ५. °पज्ञो रथः Dc_3, Dc_4.

राजसभा । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह । रक्षःसभम् ।[1] राजामनुष्यपूर्वा किम् । चंद्रगुप्तसभा ।

अशाला च ॥२।४।२४॥

[2]संघातार्था सभा तत्पुरुषे क्लीबं स्यात् ॥ स्त्रीसभम् । स्त्रीसंघात इत्यर्थः । अशाला किम् । धर्मसभा । धर्मशालेत्यर्थः ॥[3]

राजादिपर्यायस्यैवेष्यते[4] । तथा च महाभाष्ये उक्तम् । जित्पर्यायवचनस्यैव । राजाद्यर्थः जिन्निर्देशः कर्तव्यस्ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भविष्यतीति । किं प्रयोजनं राजाद्यर्थमिति । अमनुष्यशब्दोयमस्त्यव्युत्पन्नो रूढो रक्षःपिशाचादौ । अस्ति[6] व्युत्पन्नो[7] नञ्समासान्तः । अत्र च रूढ एव गृह्यत इत्याह । **अमनुष्येति** । **चन्द्रगुप्तसभेति** । चंद्रगुप्तशब्दो न राजपर्यायो नाप्यमनुष्यवचनः ।

अशाला । सभाशब्दोयमस्ति कुटीवचनः दीर्घसभेति । अस्ति च संघातवाची स्त्रीसभमिति । इह च शालेति कुटीवाचिनिषेधात् संघातवाची गृह्यत इत्याह । **संघातार्थेति** ।

१, After it—पिशाचसभम् । गन्धर्वसभम् B_2; यक्षसभम् । पिशाचसभम् । गन्धर्वसभम् । D_4. २. संघातार्थसभा P ; संघातार्थसभान्तस्तत्पुरुषः C. ३. After it—स्थूणोर्णे गृहशशयोरिति वाच्यम्* । गृहस्थूणम् । शशोर्णम् । ऊर्णा मेषादिलोम्नि स्यान्मध्यमावर्तके भ्रुवः B_1, D_4; D_2 gives the Vârtika without the Vṛitti and the instances; D_6 follows B_2 up to शशोर्णम्. ४. After it Dc_2 has—इत्यर्थः । ५. °द्यर्थे Dc_3, Dc_4. ६. अस्ति च Dc_2. ७. व्युत्पत्तौ Dc_3.

विभाषा सेनासुराच्छायाशालानिशानाम् ॥२।४।२५॥

एतदन्तस्तत्पुरुषो वा क्लीबं[1] स्यात् ॥ द्विजसेनम् । यवसुरम् । कुड्यस्य छाया कुड्यच्छायम् । गोशालम् । श्वनिशम्[2] । पक्षे द्विजसेनेत्यादि । तत्पुरुषोनञ् कर्मधारय इत्यनुवृत्तेनेह[3] । दृढसेनो[4] राजा । असेना[5] । परमसेना[6] ।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥२।४।२६॥

इतरेतरयोगद्वन्द्वस्य तत्पुरुषस्य च परवल्लिङ्गं[7] स्यात् ॥

विभाषा । **द्विजसेनेत्यादि** । द्विजानां सेना । यवानां सुरा । गवां शाला । शुनां निशेति विग्रहाः । यस्यां निशायां श्वानो मत्ताश्चरन्ति सा निशा श्वनिशमित्युच्यते । **तत्पुरुष इत्यादि** । 'तत्पुरुषोनञ् कर्मधारयः' इत्यधिकारसूत्रात् । अस्यार्थः । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र नञ्समासं कर्मधारयं च वर्जयित्वान्यस्तत्पुरुषो नपुंसकलिङ्गः स्यादित्यधिकृतं वेदितव्यमिति । **दृढसेन** इति बहुव्रीहिः । **असेनेति** नञ्समासः । **परमसेनेति** कर्मधारयः ।

परवत् । समाहारद्वन्द्वस्य क्लीबत्वस्योक्तत्वादितरेतरयोगद्वन्द्वोत्र गृह्यते । अन्यच्च द्वन्द्वतत्पुरुषयोरिति षष्ठीयं समासार्थस्य लिङ्गातिदेशार्था न सप्तमीत्येतत्सर्वं चेतसि कृत्वाह[8] । **इतरेतरयोगद्वन्द्वस्य तत्पुरुषस्य चेति** । यदि हि सप्तमी स्यात् तर्हि द्वन्द्वे तत्पुरुषे च परपदं तद्वल्लिङ्गं पूर्वपदस्यापद्येत । द्वन्द्वस्य[9] सर्वपदप्राधान्यात् क्रमेण सर्वपदलिङ्गे प्राप्ते नियमार्थं[10] वचनम् । तत्पुरुषे तूत्तरपदार्थप्रधानेनर्थकत्वात् पूर्वपदार्थप्रधानार्थं[11] वचनम् ।

१, B1, D1, D3 drop it. २. द्विनिशम् B2. ३. Before it—नञ्समासं कर्मधारयं च हित्वान्यस्तत्पुरुषः क्लीबं स्यात् B2, D. ४. Before it—तत्पुरुषः किम् D3. ५. Before it—अनञ् किम् D3. ६. Before it—अकर्मधारये इति किम् D3. ७. परवदेव लिङ्गं D2. ८. इति Dc3. ९. Before it—परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः । Dc3. १०. नियमार्थमिदं Dc3. ११. °प्रधानार्थव° Dc3.

कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । तत्पुरुषे । अर्धपिप्पली ।[१]

द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न* ॥ पञ्चकपालः । प्राप्तजीविकः ।[२] अलंजीविकः । निष्कौशाम्बिः ।

पूर्ववदश्ववडवौ ॥२।४।२७॥

एतयोर्द्वन्द्वः पूर्ववल्लिङ्गः[३] ॥ अश्ववडवौ । पक्षे एकवद्भावो वक्ष्यते ।

कुक्कुटमयूर्याविति । अत्र द्वन्द्वस्य सर्वपदार्थप्रधानत्वादुपसर्जनसंज्ञायां अभावात् ह्रस्वत्वं न । अर्धपिप्पलीत्यत्र तु विभाषानुवृत्तेः[४] ।

द्विगु इत्यादि[५] । द्विगुसमासे प्राप्तशब्दपूर्वे समासे आपन्नशब्दपूर्वे समासे अलंशब्दपूर्वे समासे गतिसमासे च परपदवल्लिङ्गता न भवतीति वक्तव्यमित्यर्थः । **पञ्चकपाल** इति । पञ्चसु कपालेषु संस्कृतः । ताद्धितार्थे[६] द्विगुः । **प्राप्तजीविक आपन्नजीविक** इति । 'प्राप्तापन्ने च द्वितीयया' इति समासः । **अलंजीविक** इति । 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति । **निष्कौशाम्बिरिति** 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति ।

पूर्ववत् । 'विभाषा वृक्षमृग—' इति अश्ववडवयोर्विभाषैकवद्भावविधेरन्यत्र पक्षे परवल्लिङ्गतायां प्राप्तायामारम्भः । अर्थातिदेशश्चायं न[७] निपातनम् । निपातने हि[८] पूर्ववदिति वचनमनर्थकमित्यश्ववडवावित्येव ब्रूयादित्यभिप्रेत्याह । एतयोरित्यादि ।

---

१. After this D_4 has—' अर्धर्चाः पुंसि च'. अर्धर्चादयः शब्दाः पुंसि भाष्यन्ते चात् क्लीब...दिनवासरादयः. २. After it—आपन्नजीविकः D_1. ३. C, B_2 have स्यात् after it; पूर्वलिङ्गः D_3. ४. वृत्तिः Bc_1, Dc_3. ५. इत्यादि Bc_3. ६. °तार्थेति Bc_3. ७. न निपातनम् dropped Dc_3. ८. न Bc_3.

द्वित्वमतन्त्रम् । अश्ववडवान् । क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनान्तत्वं च[1] वाच्यम्* ॥ सानन्दं नमति हरिम्[2] । प्रातः कमनीयम्[3] ।

पथः संख्याव्ययादेः क्लीबता ॥ त्रिपथम् । विपथम् ।

अपथं नपुंसकम् ॥२।४।३०॥

अपथानि ।[4] तत्पुरुषे एव । अपथा नगरी ।

द्वित्वमतन्त्रमित्यादिनार्थातिदेशस्य फलं दर्शयति । निपातने तु वचनान्तरे पूर्ववल्लिङ्गं न स्यात् । **क्रियाव्यये**ति । क्रियाविशेषणानामव्ययविशेषणानां च क्लीबत्वमेकवचनान्तत्वं च वक्तव्यमित्यर्थः । अत्र क्लीबत्वमव्ययीभावश्चेति चकारेणानुक्तसमुच्चयार्थेन लभ्यते । एकवचनं तूत्सर्गसिद्धम् । क्रियाया अव्ययस्य चासंख्यत्वात् । तथा क्रियाविशेषणस्य कर्मत्वमपि भवति । क्रिया हि सर्वधातूनामान्तरं कर्मेति ।

पथ इत्यादि । संख्यादेरव्ययादेश्च पथिशब्दस्य क्लीबता वाच्येत्यर्थः । **त्रिपथमि**ति । त्रयाणां पन्थाः । षष्ठीसमासः । समाहारद्विगोस्तु 'द्विगुरेकवचनम्' 'स नपुंसकम्' इत्येव सिद्धम् । 'ऋक्पूरब्धूः—' इत्यकारः । **विपथमि**ति । प्रादिसमासः । पूर्ववदकारः ।

अपथम् । अपथशब्दः क्लीबः स्यात् । **अपथानी**ति । न पन्थानः । 'नञ्' इति समासः । अपथमिदमिति च । अपथमिति समासान्तनिर्देशात् । 'पथो विभाषा' इति यदा समासान्तो नास्ति तदा पुल्लिङ्गतैव स्यात् अपन्था इति । **तत्पुरुषे** एवेत्यादि 'तत्पुरुषोनञ् कर्मधारयः' इति अतस्तत्पुरुष इत्यनुवर्तत एवेति । न विद्यते पन्था यस्याः सा अपथा नगरीत्यत्र बहुव्रीहौ क्लीबता न ।

---

१. Dropped D_3, D_6. २. हरिं नमति C. ३. After it—गाहते मूढः B_1; ईहते मूढः B_2. ४. तत्र Bc_1, Dc_3. Dc_4.

[1]‘आन्महतः—’ इत्यत्र आदिति योगविभागादात्वं [2]प्रागेकादशेति निर्देशाद्वा । [3]एकाधिका दश एकादश ।

[4]अर्धर्चाः पुंसि च ॥२।४।३१॥

चात् क्लीबे ॥ ऋचः अर्धमर्धर्चः अर्धर्चम् । एवमष्टापद-

स्पष्टत्वात् त्यक्तं सूत्रद्वयम् । ‘संज्ञायां कन्थोशीनरेषु’ ॥२।४।२०॥ संज्ञायां विषये कन्थान्तस्तत्पुरुषः क्लीबं स्यात् सा चेत् कन्था उशीनरेषु स्यात् । सौशमिकन्थम् । आह्वरकन्थम् । संज्ञायां किम् । वीरणकन्था । उशीनरेषु किम् । दाक्षिकन्था । परवल्लिङ्गतापवादो योगः ।

‘अर्धर्चाः पुंसि च ।’ २।४।३१॥ अर्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते । शब्दाश्रया चेयं द्विलिङ्गता । क्वचिदर्थभेदेनापि । यथा पद्मशङ्खौ निधौ पुल्लिङ्गौ जलजे उभयलिङ्गौ । भूतः पिशाच उभयलिङ्गः । क्रियावाची त्वभिधेयलिङ्गः । सैन्धवो लवणे उभयलिङ्गः । यौगिको वाच्यलिङ्गः । सार उत्कर्षे पुल्लिङ्गः । न्यायादनपेते क्लीबे । धर्म इत्यपूर्वे पुंसि । तत्साधने क्लीबे । अर्धर्च । गोमय । कषाय । कार्षापण । कुतप । [5]कपाट । शङ्ख । गूथ । यूथ । [6]ध्वज[7] । कबन्ध । पद्म । गृह । [8]सरक । कंस । दिवस । यूष । अन्धकार । दण्ड । कमण्डलु । मण्ड । भूत । द्वीप । द्यूत । चक्र । धर्म । कर्म । वासस् । मोदक । शतमान । [9]यान । नख ।

---

१. D_2 and Com. give from आन्महत to एकादश after the Sûtra अर्धर्चाः° and its Vṛitti. २. प्रागेकादशभ्योच्छंदसीति B_1. ३. एकेनाधिका Bc_3. ४. P and C and D_1, D_3, D_5 drop from अर्धर्चाः to वासरादयः; B_2, D_4 have it after अर्धपिप्पली and before द्विगुप्राप्तापन्न° (५५८ p.) ५. कवाट Dc_3, Dc_4. ६. Dropped Bc_3. ७. After it—गुह्य । कवच । Dc_3. ८. सूरक Dc_4; स्वरक Bc_3. ९. पात Dc_4, Bc_3.

सुवर्णशतमानकार्षापणवारबाणगन्धमादनअन्धकारअपराह्णपूर्वोप-वासनिर्यासविमानप्रग्रीवप्रवालवाजपेयराजसूयप्रतिसरतोरणवल्मीकदिवसदिनवासरादयः ॥

चरण । पुच्छ । दाडिम । हिम । रजत । सक्तु । पिधान ।
सार । पात्र । घृत । सैन्धव । औषध । आढक । चषक । द्रोण ।
पात्रीव । वारबाण । प्रोथ । कपित्थ । शुक्र । शील । सीधु ।
कवच । कपट । शीकर । सुपर्ण । पूर्व । वयस । चमस । पर्ण ।
क्षीर । कक्ष । आकाश । अष्टापद । मङ्गल । निधान । निर्यास ।
जृम्भ । वृत्त । पुस्त । बुस्त । क्ष्वेडित । शृङ्ग । शृङ्खल ।
मधु । मूल । स्थूलक । शराव । नाल । वप्र । विमान ।
मुख । ग्रीव । शूल । प्रग्रीव । शूल । वज्र । कर्कट ।
शिखर । कल्क । नीव । मस्त । वलय । कुसुम । तृण ।
पङ्क । कुण्डल । किरीट । अर्बुद । अङ्कुश । तिमिर ।
आश्रम । भूषण । इल्कस । कुसूल । मुसल । वसन्त ।
तडाग । पिटक । पिण्डक । पिटाक । माष । कोश ।
पालक । दैव । दैवत । पिनाक । समर । स्थाणु । अनीक ।
उपवास । शाक । कार्पास । चषाल । खण्ड । दर । विटप ।

---

१. विमान and प्रग्रीव dropped D_4. २. राजपेय before it B_2. ३. Before it—गुच्छ Dc_3. ४. After it—प्रणाल । खलीन । Dc_3. ५. खलीन । पात्रव । Dc_4, Bc_3. ६. कातिप Dc_3; कपित्थ Dc_4. ७. शुक्ति । शुक्त । मुक्ता । मुक्त । मुक्ति Dc_3. ८. Before it कृपण Dc_2, Dc_4. ९. सुवर्ण Dc_2. १०. After it—पर्वत Dc_3. ११. सूल । नाग । मूलक । स्थूलक । Dc_3, स्थूल Dc_2. १२. Before it—ग्राम । नगर । दुर्ग । कोट्ट । विहङ्गम । Dc_3. १३. Before it—प्रावृत् Dc_3; मूल for शूल Bc_3. १४. Before it—नाच Dc_3. १५. Before it—पुष्कर Dc_3. १६. Before it—ऐन्द्र । ऐरावत । द्वप । Dc_3. १७. कुशूल Dc_1, Bc_3. १८. मूशल Dc_1, Dc_4. Bc_3. १९. After it—ईश्वर । गिरि । Dc_3.

रण[1] । बल । मृणाल[2] । हस्त । सूत्र[3] । पूर्त[4] । ताण्डव । गाण्डीव । मण्डप । पटह । योध । पार्श्व । करवीर[5] । फल । पुर । राष्ट्र । अम्बर । विश्व । कुङ्कुम । मण्डल । कुण्डल । ककुद । तोमर । तोरण । पञ्चक । मध्यम । बाल । वल्मीक[6] । वर्ष । वर्ण[7] । वसु । देह । उद्यान[8] । उद्योग । स्तन । संगम । निष्क । क्षेम । शूक । छत्र । पवित्र । पौतक । फलक । मूषिक[9] । वल्कल । कुञ्ज । विहार । लोहित[10] । विषाण । भवन । अरण्य । पुलिन । हल । दृढ । आसन । ऐरावत । शूर्प । तीर्थ । लोमश । तमाल । लोह । तण्डक[11] । शयन । प्रतिसर[12] । दारु । धनुस्[13] । मान[14] । तन्त्र । विटङ्क[15] । मठ[16] । मह । मर्ष । सहस्र । ओदन । प्रवाल । शकट । श्वपच । नीड[17] । शकल[18] ॥ एकाधिका दश एकादशेति । शाकपार्थिवादीनामुत्तरपदलोपश्चेत्युत्तरपदलोपी तत्पुरुषः । द्वन्द्वो वा एकश्च दश चेति । एवं द्वादश द्वाविंशतिरित्यादावपि ज्ञेयम् ।

१. After it—पणव । वीथी Dc_3. २, Before it—मृग Dc_3. ३. Before it—कल्क Dc_2. ४. Before it—गर्तापूर्त Dc_3. ५. कणवीर Bc_1, Dc_3. ६. Before it—व्याल Dc_3; After it—शालूर । फल । पुर Dc_3. ७. वर्णक Dc_1, Bc_3. ८. उद्याति Dc_3, Dc_4. Bc_3. ९. Before it—शार्दूल Dc_2; वसट् Dc_1: सढक Bc_1, Dc_4. १०. After it—रक्त । अश्रु । भानु । किरण । परिवेष Dc_3. ११. दण्डक Dc_1, Bc_3. १२. प्रतीकार Dc_1, Dc_3, Dc_4, Bc_1, Bc_3. १३. Before it—कूर्च Dc_2; आर्धन् Dc_1; कृतवन् Bc_1; कुर्वन् Dc_4, Bc_3. १४. पीन Dc_3, Bc_3. १५. After this—मट । मठ । मह । अहः । मर्य । मय । Dc_3. १६. मई Dc_4, Bc_3. १७. Before it—हु Dc_2, Bc_1, Bc_3. १८. सकल Bc_1; After शकल—एतेषां नाम्नां पर्यायाश्च विशेषाश्च गृह्यन्ते Dc_3.

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः॥६।३।४७॥

संख्यायामुत्तरपदे द्व्यष्टनोरात्[1] स्यात्॥ द्व्यधिकाः[2] दश द्वादश। द्वाविंशतिः। द्वात्रिंशत्। अष्टाविंशतिः[3]। अष्टात्रिंशत्[4]। अबहुव्रीह्यशीत्योः किम्। द्वित्राः। द्व्यशीतिः। प्राक् शतात् प्रयोगः। नेह। द्विशतम्। अष्टशतम्।[5]

अष्टनः कपाले हविषि* ॥ अष्टाकपालः पुरोडाशः। गवि च[6] युक्ते[7]* ॥ अष्टागवेन शकटेन।

द्व्यष्टनः। द्व्यष्टन इति किम्। पञ्चदश। संख्यायामिति किम्। द्वैमातुरः। द्वित्रा इति। द्वौ वा त्रयो वा मानं येषाम्। द्वौ वा त्रयो वेति विग्रहः। 'संख्ययाव्ययासन्न—' इति बहुव्रीहिः। 'बहुव्रीहौ संख्येये डजबहुगणात्' इति डच्। द्व्यशीतिरिति। द्व्यधिकाशीतिर्द्व्यशीतिः।

अष्टनः। **कपाले** इति। अष्टनः कपाले परे हविषि वाच्ये आत्वं वक्तव्यमित्यर्थः। **अष्टाकपाल** इति। अष्टसु कपालेषु संस्कृतः। **गवि च युक्ते** इति। गोशब्दे चोत्तरपदे युक्तार्थे गम्यमाने अष्टन आत्वं स्यादिति वाच्यम्[8]। **अष्टागवेनेति**। अष्टानां गवां समाहारः अष्टागवम्। अष्टागवेन युक्तमष्टागवम्। न चैवं युक्तशब्दस्य श्रवणं स्यादिति वाच्यम्। पदैकदेशस्य प्रयोगात्। यथा सत्या सत्यभामा[9] भीमसेनो भीम इति। अथवाष्टौ गावो युक्ता अस्मिन्निति त्रिपदो बहुव्रीहिः। युक्तशब्दस्तु[10] गम्यमानार्थत्वान्न प्रयुज्यते। 'अच् प्रत्यन्ववपूर्वात्—' इत्यत्राजिति योगविभागादच्।

---

१. °रात्वं P; D₅ °रा C. २. द्वाभ्यामधिका दश Dc₁. ३. Before it—अष्टादश Bc₃, D₃. ४. B₁ drops it. ५. B₁ has अष्टशतम् after it. ६. Before it—अष्टनः पदे च। अष्टापदम्। D₄. ७. प्रयुक्ते for च युक्ते D₄. ८. आत्वं स्यादिति वाच्यम् Bc₁. ९. सत्यभामा भामा Dc₂, Dc₃. १०. प्रयुक्त° Dc₃.

त्रेस्त्रयः ॥६।३।४८॥

[1]त्रेस्त्रय इत्यादेशः स्यात् पूर्वविषये ॥ त्रयोदश । त्रयोविंशतिः । त्रयस्त्रिंशत् । बहुव्रीहौ तु । त्रिदशाः । अशीतौ तु । त्र्यशीतिः । प्राक् शतादित्येव । त्रिशतम् । त्रिसहस्रम् ।

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥६।३।४९॥

द्वि अष्टन् त्रि इत्येतेषां[4] प्रागुक्तं वा स्यात् चत्वारिंशदादौ परे ॥ द्विचत्वारिंशत् । द्वाचत्वारिंशत् । अष्टचत्वारिंशत् । अष्टाचत्वारिंशत् । त्रिचत्वारिंशत् । त्रयश्चत्वारिंशत् । एवं पञ्चाशत्षष्टिसप्ततिनवतिषु ।

त्रेस्त्रयः । सकारान्तोयमादेशः । संधिवेलादिषु त्रयोदशीति पाठात् । **त्रयोदशेति** । 'ससजुषो रुः' इति रुत्वम् । 'हशि च' इत्युत्वम् । 'आद्गुणः' । **त्रिदशा** इति । त्रिर्दशेति विगृह्य सुजर्थे बहुव्रीहिः ।

विभाषा । **प्रागुक्तमिति** । द्व्यष्टनोरात्वम् । 'त्रेस्त्रयः' इति त्रयादेशः ।

---

१. त्रिशब्दस्य B_1. २. B_1 drops it. ३. पूर्ववत् before it D_2. ४. इत्येषां C ; D_1, Dc_1, D_3 drop इति ; Bc_3, D_4, D_5 drop इति and have एषाम् ।. ५. सुजर्थो Bc_1; सुजर्थे च Dc_3. ६. इत्यादेशः Bc_1, Dc_2.

एकादिश्चैकस्य चादुक् ॥६।३।७६॥

एकादिर्नञ् प्रकृत्या स्यादेकस्य आदुगागमश्च । एकेन न विंशतिः एकान्नविंशतिः । अनुनासिकविकल्पपक्षे । एकाद्न-विंशतिः । एकोनविंशतिरित्यर्थः । एवमेकान्नत्रिंशदादि ।

षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं च धासु वा भवतीति वक्तव्यम्* ॥ षोडन् । षोडश । षडधिका दश षोडश ॥

इति तत्पुरुषः ॥

एकादिश्च । एकेन न विंशतिरिति । पूर्वं नञो विंशति-शब्देन समासस्ततस्तृतीयेति योगविभागात् तृतीयासमासः । पदान्तलक्षणोनुनासिकाविकल्पो यथा स्यादिति पूर्वान्तोयमादुक् क्रियत इति चेतसि कृत्वाह। अनुनासिकेत्यादि ।

षष उत्वमित्यादि । षट्शब्दस्योत्वं स्याद् दतृदशइत्येतयो-रुत्तरपदयोः उत्तरपदादेः ष्टुत्वं च स्यात् । धासु वा भवतीति । उत्वस्यायं विकल्पः । धास्विति बहुवचननिर्देशो नानाधिकरणवाचिनः 'संख्याया विधार्थे धा' 'अधिकरणविचाले च' इति विहितस्य धाप्रत्ययस्य प्रतिपत्त्यर्थः । इह मा भूत् । षट् दधाति धयति वा षड्धा ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन्नयं तत्पुरुष इति गतोद्य प्रसादे समासः ॥

---

१. B₁ drops it. २. °दागमः स्यात् D₄. ३. °विकल्पेन । पक्षे D₁, D₅; °विकल्पेन Dc₁. ४. षोडन् षोडश for षडधिका दश षोडश । D₂, B₁, B₂. ५. दशदतृ Dc₁, Bc₃.

अथ बहुव्रीहिसमासः ।

अनेकमन्यपदार्थे ॥२।२।२४॥

अनेकं सुबन्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः ।

सप्तमीविशेषणे बहुव्रीहौ॥२।२।३५॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् ॥

अथ बहुव्रीहिः । स च सप्तधा । द्विपदो बहुपदः संख्योत्तरपदः संख्योभयपदो दिगन्तलक्षणो व्यतिहारलक्षणः सहपूर्वपदश्चेति । तत्र तावत् द्विपदं दर्शयितुमाह ।

अनेकम् । 'सुप् सुपा' इति वर्तते । तत्रानेकग्रहणेन सुबित्येतदेव संबध्यते प्रथमान्तत्वात् न सुपेत्यतदित्यभिप्रेत्याह । **अनेकं सुबन्तमिति** । बहुव्रीहिरिति । एतच्च 'शेषो बहुव्रीहिः' इत्यधिकारसूत्राल्लभ्यते । तस्य चायमर्थः । यत्रान्यः समासो नोक्तः स शेषस्तत्र बहुव्रीहिसंज्ञकः समासः स्यादिति । शेष इति किम् । उन्मत्तगङ्गम् ।

सप्तमी । सप्तम्युदाहरणं कण्ठेकालः । यदा कण्ठे किंचिदस्तीति ज्ञाते कालो विशेषणं प्रयुज्यते तदा सप्तम्यन्तस्य पूर्वनिपातार्थः सप्तमीग्रहः । अन्यथा तु विशेषणत्वादेव सिध्यति ।

---

१. °मन्यपदस्या° C, D2, B1, B2. २. दिगन्तराललक्षणो Bc3, Dc4, Dc3. ३. अत्र before it Dc4, Dc3. ४. स बहु° Dc2. ५.°निपातः Bc3. ६. अन्यदा Dc4, Dc3.

अप्रथमाविभक्त्यर्थेष्वयम् । प्राप्तमुदकं यं ग्रामं[1] स[2] प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । [3]उपहृतपशू रुद्रः[4] । [5]उद्धृतौदना स्थाली[6] । पीताम्बरो हरिः । वीरपुरुषको ग्रामः । प्रथमार्थे तु न[7] । वृष्टे देवे गतः । अनेकोक्तेर्बहूनामपि । नीलमुज्ज्वलं वपुर्यस्य स[8] नीलोज्ज्वलवपुः[9] ।

अप्रथमाविभक्त्यर्थेष्वयमिति । अयं बहुव्रीहिसमासः प्रथमाव्यतिरिक्ताविभक्त्यर्थेषु भवतीति वाच्यम् । **प्राप्तमुदकं ग्राममिति** । **प्राप्तोदक** इति द्वितीयाविभक्त्यर्थे वर्तमानस्य बहुव्रीहेर्विग्रहः । ऊढरथ इत्यादीनि तृतीयादिविभक्त्यर्थेषु यथाक्रमं बहुव्रीहेरुदाहरणानि । तेषां विग्रहस्त्वेवम् । ऊढो रथो येनानडुहा सः । उपहृतः पशुर्यस्मै रुद्राय । उद्धृत ओदनो यस्याः स्थाल्याः । पीतमम्बरं यस्य हरेः । वीराः पुरुषा यस्मिन् ग्रामे । **प्रथमार्थे तु नेति** । अनभिधानात् । न हि वृष्टे देवे गत इति वाक्याद्योऽर्थः प्रतीयते स वृष्टदेवशब्दात् प्रतीयते । अनेकपदं बहुव्रीहिं[10] दर्शयितुमाह । **अनेकोक्तेरिति** । अयं भावः । यथा 'सुप् सुपा' इत्यधिकारात् समर्थपरिभाषोपस्थानाच्च तत्पुरुष एकस्य न भवति तथा बहुव्रीहिरप्येकस्य न स्यादित्येकस्य मा भूदित्येवमर्थमनेकग्रहणं नेति । अनेकोक्तेर्बहूनामपि पदानां समासः स्यादिति ।

---

१. ग्रामं dropped D_1, D_3, B_1, B_2. २. Dropped D_1, D_3. ३. Before it—ऊढो रथो येन स B_1, B_2. ४. Before it—उपहृतः पशुर्यस्मै स B_1, B_2. ५. After it—बहुव्रीहौ वाच्यलिङ्गता Dc_3. ६. Before it—उद्धृत ओदनो यस्याः सा B_1, B_2. ७. B_1 drops न. ८. D_1, B_3, D_5 drop it. ९. After it—पुरुषः D_5. १०. बहुव्रीहिसमास Dc_4.

समानाधिकरणानां बहुव्रीहिरिष्यते *॥ नेह। पञ्चभिर्भुक्तमस्य। अव्ययानां वाच्यः* ॥ उच्चैर्मुखः।

सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च* ॥ करे स्थितं धनं यस्यासौ[1] करधनः।

समानाधिकरणानामिति । किं प्रयोजनम् । व्यधिकरणानां मा भूदिति । ततश्च पञ्चभिर्भुक्तमस्येत्यत्र वैयधिकरण्यात् नेत्याह । **नेहेति** । इष्यमाणोपि कथं लभ्यते । उच्यते । अभिधानलक्षणाः कृत्तद्धितसमासा भवन्ति । न हि व्यधिकरणानां बहुव्रीहौ कृते विवक्षितार्थाभिधानमस्ति । तथा हि पञ्चभिर्भुक्तमस्येति वाक्याद्योर्थः प्रतीयते स भुक्तपञ्चशब्दान्न प्रतीयते । तस्मादनभिधानाद् व्यधिकरणानां बहुव्रीहिर्न । यत्र त्वभिधानमस्ति तत्र वैयधिकरण्येपि बहुव्रीहिः स्यात् यथा कण्ठेकाल इति । कथं पुनस्तुल्ये वैयधिकरणत्वे क्वचिद् गमकत्वं क्वचिन्नेति । शब्दशक्तिस्वाभाव्यादिति ब्रूमः । **अव्ययानामिति** । असमानाधिकरणार्थमिदम् । **उच्चैर्मुख** इति । उच्चैःशब्दस्यासत्त्ववाचित्वात् सत्त्ववाचिमुखेन[2] नास्ति सामानाधिकरण्यम् । तथापि गमकत्वात् समासः ।

सप्तम्युपमानेति । सप्तम्यन्तमुपमानं च पूर्वपदं यस्य तस्य सप्तम्यन्तपूर्वपदस्योपमानपूर्वपदस्य च पदान्तरेण समास उत्तर-पदलोपश्च[3] भवति । **करे स्थितमित्यादि** । सप्तमीपूर्वपदस्योदाहरणं करे स्थितमिति विगृह्य 'सप्तमी' इति योगविभागात् समासः । सप्तम्या लुक् । ततः करस्थितं धनं यस्येति विग्रहः । तत्र स्थितशब्दस्योत्तरपदस्य लोपः । अत्र सामानाधिकरण्यात् सिद्ध एव समास उत्तरपदलोपस्तु विधीयते[4] । एवं सर्वत्र ।

---

१. Before it—आस्तिधनः । D4. २. यस्य स Dc1. ३. °वाचिना Dc3. ४. पदस्य लोपश्च Dc4. ५. अभिधीयते Dc3.

खरस्य मुखमिव [1]मुखं यस्य [2]स खरमुखः ।

संघातविकारषष्ठ्याश्चोत्तरपदलोपश्च । केशानां संघातश्चूडा यस्य [4]केशचूडः । सुवर्णस्य विकारोलंकारो [5]यस्य सुवर्णालंकारः ।

प्रादिभ्यो धातुजस्य वाच्यो वोत्तरपदलोपश्च ।

खरस्येत्यादि । उपमानपूर्वस्योदाहरणम् । खरस्य मुखमिति विगृह्य षष्ठीसमासः । ततः खरमुखमिव मुखमस्येति विग्रहः । अत्र खर उपमानं [7]पूर्वपदम् । ननु च खरमुखमुपमानं देवदत्तमुखस्य न तु खरः । उपमानावयवत्वात् खरोप्युपमानमित्युच्यत इत्यदोषः । तत्र मुखशब्दस्योत्तरपदस्य लोपः अत्र वृत्त्यैव मुखसाम्यप्रतीतेर्वृत्ताविवशब्दाप्रयोगः ।

[8]संघातेति । संघाते विकारे च या षष्ठी तदन्तात् [9]पूर्वपदात् परं यदुत्तरपदं तदन्तं पदान्तरेण समस्यते तस्य च संघातविकारषष्ठ्यन्तपूर्वपदस्योत्तरपदलोपः स्यात् । केशानामित्यादि । [10]समुदायसमुदायिसंबन्धे षष्ठी । षष्ठीसमासः । ततो बहुव्रीहिः । संघातशब्दस्योत्तरपदस्य लोपः । सुवर्णस्य विकार इत्यत्र [11]विकारविकारिसंबन्धे षष्ठी । शेषं पूर्ववत् ।

प्रादिभ्य इति । धातोर्जातं निष्पन्नं धातुजं प्रादिभ्यः पूर्वपदेभ्यः परं यद् धातुजमुत्तरपदं पतितशब्दादि तदन्तस्य बहुव्रीहिः स्यात् तस्य चोत्तरपदस्य वा लोपो वाच्यः ।

---

१. मुखमस्य खरमुखः D_1. २. असौ D_2, D_5; स dropped D_3. ३. अस्य D_1, D_5, Dc_1, Bc_3. ४. स केश° D_2, C, B_1, B_2. ५. अस्य D_1, D_5, Dc_1, Bc_3. ६. स सुवर्णा° D_2, C, B_1, B_2. ७. पूर्वपदम् dropped Dc_3. ८. षष्ठ्या संघातेति Dc_4. ९. षष्ठ्यन्तात् Dc_3. १०. समुदायिसमुदाय° Dc_1, Bc_3. ११. विकारिविकार° Dc_1, Bc_3.

प्रपतितपर्णः।[३] विगताभ्रं व्यभ्रं नभः।

नञोऽस्त्यर्थानां वाच्यो वोत्तरपदलोपश्च* ॥ [४]अविद्यमानभार्यः। अभार्यः।

अस्तिक्षीरादयश्च। अस्तिक्षीरा गौः।

स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥६।३।३४॥

उक्तपुंस्कात्परस्यानूङः स्त्रीप्रत्ययस्य पुंवत् स्यात् एकार्थे स्त्रीलिङ्गे [५]पदे परे न तु पूरण्यां प्रियादौ [६]च परतः ॥

प्रपतितपर्ण इत्यादि। प्रपतितानि पर्णानि यस्य विगतमभ्रं यस्मादिति विग्रहौ।

नञ इति। नञः परेषामस्त्यर्थानां पदान्तरेण समासो वाच्य उत्तरपदलोपश्च वा वाच्यः। अस्तिक्षीरादयश्चेति सुबधिकारात् तिङन्तेन समासो नास्तीत्यारम्भः।

स्त्रियाः। अत्र स्त्रिया इति स्त्रीशब्देन स्त्रीप्रत्ययो वा गृह्यते स्त्र्यर्थो वा स्त्रीवाचकः शब्दो वा। तत्र तावदाद्ये पक्षे एवं सूत्रार्थः स्यात्। उक्तपुंस्कात् परः स्त्रीप्रत्ययोऽनूङ् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे पुंवत् स्यादिति। यथा पुंसः स्त्रीप्रत्ययो न तथास्यापि नेत्यर्थः। [८]अत्र पक्षे पट्वी भार्या यस्य स पटुभार्य इत्यत्रोत्तरपदनिमित्तायाः स्त्रीप्रत्ययनिवृत्तेः पूर्वस्मिन् यणादेशे विधेये 'अचः परस्मिन्—' इति स्थानिवद्भावे सति यणादेशः स्यात्।

---

१. प्रपतितं पर्णं यस्मात स प्रपर्णः। विगतमभ्रं यस्मात् तत् व्यभ्रम् Dc_1, Bc_3. २. After it—वृक्षः B_1. ३. Dropped C, D_1, D_3, D_4. ४. अविद्यमाना भार्या यस्य सोऽभार्यः Dc_1, Bc_3. ५. उत्तरपदे D_4. ६. P, D_3 drop it. ७. Dropped Bc_3. ८. Before it—इति Bc_1, Dc_2.

इह गार्ग्यो वृन्दारिका गर्गवृन्दारिका इत्यत्र 'यञञोश्च' इति बहुष्वस्त्रियामुच्यमानो यञो लुक् न स्यात् । पुंवद्भावेन हि स्त्रीप्रत्ययस्य निवृत्तिः कृता न त्वर्थस्य स्त्रीत्वस्य । ततश्चार्थस्यानिवृत्तत्वात् केन यञो निवृत्तिः स्यादित्येवमादयः प्रत्ययपक्षे बहवो दोषा विस्तरेण भाष्ये प्रतिपादिताः । अतः प्रथमपक्षोनुपपन्नः । द्वितीये तु पक्षे उत्तरपदे उक्तपुंस्कस्यानूङः स्त्रीशब्दस्य योर्थस्तस्य वत् स्यात् पुमर्थः स्यादिति सूत्रार्थः । अत्र पक्षे कालिंमन्या स्त्रीत्यत्र 'खित्यनव्ययस्य' इति ह्रस्वत्वस्यास्य च पुंवत्त्वस्य विप्रतिषेधो न स्यात् । भिन्नविषयत्वात् । अचो हि ह्रस्वो विधीयते अर्थस्य पुंवत्त्वम् । ततश्च विप्रतिषेधाभावात् विप्रतिषेधे परं कार्यमिति ह्रस्वो न स्यात् । इष्यते च स इत्येवमादयो दोषा द्वितीयपक्षे उद्भाविता भाष्ये । तृतीय एव पक्षः साधीयस्तया स्थापितः । दोषाभावात् । अतः स्त्रियाः पुंवदिति सूत्रावयवस्यायमर्थः । स्त्रीवाचकस्य शब्दस्य पुंवाचकः शब्दः स्यादिति । भाषितपुंस्कादनूङ इत्यस्य त्वयमर्थः । भाषितः पुमान् यस्मिन्नर्थे शब्दप्रवृत्तिनिमित्ते तद् भाषितपुंस्कं तस्य प्रतिपादको यः शब्दः स भाषितपुंस्कः । एवं [3]व्याख्यायमाने समानायामाकृतौ यो भाषितपुंस्क इत्युक्तं स्यात् । ततश्च द्रोणीभार्य इत्यत्र पुंवद्भावो न । अत्र द्रोणीशब्दो गवादिन्यां स्त्रीलिङ्गः परिमाणविशेषे पुल्लिङ्ग इत्येकस्मिन्नेव प्रवृत्तिनिमित्ते भाषितपुंस्कत्वाभावात् । यदा तु भाषितः पुमान् येनेति व्याख्यायेत तदा द्रोणीभार्य इत्यत्र पुंवत्त्वं स्यात् । यत्र क्वचिदर्थे भाषितपुंस्कत्वात् । अतः पूर्वैव व्याख्या ज्यायसी । कथं तर्हि गर्भिभार्यः प्रसूतभार्यः प्रजातभार्य इति पुंवद्भावः । यतो गर्भ्यादीनां भिन्ने प्रवृत्तिनिमित्ते भाषितपुंस्कत्वम् । तथा ह्यनवयवभूतान्तर्वर्तिवस्तु-

१. अत्र dropped Bc_1, Dc_2, Dc_4. २. °प्रत्ययस्य Bc_3. ३. व्याख्याने Dc_3, Dc_4.

विशेषसंबन्धे हि स्त्री गर्भिण्युच्यते । व्रीहिस्त्वैवयवविशेषसंबन्धे गर्भीत्युच्यते इति प्रवृत्तिनिमित्तभेदः स्त्रीपुंसयोः । तथा प्रसूतप्रजात-शब्दौ गर्भनिर्मोक्षं प्रवृत्तिनिमित्तमुपादाय स्त्रियां वर्तेते पुंसि तु गर्भाधानम् । कर्तव्योऽत्र यत्नः । तत्र केचिदुपसंख्यानं कार्यमित्याहुः । केचित्तु पुंवदिति योगविभागः कार्य इति । अनूङिति यद्ययमूङोन्योऽनूङिति पर्युदासः स्यात् ततो नञिव-युक्तन्यायेन तत्सदृशानां टाबादीनां ग्रहणे सति तदन्तस्यैव पुंवत्त्वं स्यात् । ततश्चैडविडवृन्दारिकादारदवृन्दारिकेत्यत्र न स्यात् । कथम् । इडविडोपत्यं स्त्री 'जनपदशब्दात्—' इत्यञ् । दरदोपत्यं स्त्री 'द्व्यचञ्मगध—' इत्यण् । ततः 'अतश्च' इति लुक् । ततः इडविट् चासौ वृन्दारिका चेति समासः । तत्र 'पुंवत् कर्मधारय—' इति पुंवत्त्वं न स्यात् । ऊङ्सदृशप्रत्ययान्तत्वाभावात् । ततश्चैडविट्शब्दस्य एडविडशब्दो दरच्छब्दस्य दारदशब्दो न स्यात् । ऊङोभावोऽनूङिति प्रसज्यप्रतिषेधे तु सति भवति अत्राप्युङ्भावस्याभावात् । भाषितपुंस्कादनूङ इति यद्येतदसमस्तं स्यात् तदायमर्थः स्यात् । उक्तपुंस्कात्परस्यानूङः स्त्र्यर्थवृत्तेः शब्दस्योत्तरपदे पुंवत् स्यादिति । ततश्चातिप्रसङ्गः । हंसा नाम पक्षिणस्तेषां वरटाः स्त्रियः । तत एता वरटाश्च ता वृन्दारिकाश्चेति समासे कृते एतच्छब्द उक्तपुंस्क इति तस्मात् परस्य वरटाशब्दस्यार्थतोऽन्तरतमो हंसशब्दः पुंशब्द आदेशः स्यात् । अन्यस्यान्तरतमस्याभावात् । ततश्च एता हंसवृन्दारिका इति स्यात् । वरटावृन्दारिका इति चेष्यते । भाषितपुंस्कादनूङ इत्यस्मिन् समस्ते तु बहुव्रीहिः स्यात् । ततश्चानिष्टप्रसङ्गो न । तथा हि भाषितपुंस्कादनूङ् यस्मिन् स्त्रीवाचके

१. गर्भिणीत्युच्यते Dc2, Dc3. २. °स्त्ववयवभूतान्तर्वर्तिवस्तुविशेष° Dc4; °स्त्ववयवभूतान्तर्वस्तुविशेष° Dc3. ३. यद्येव° Dc3. ४. °दारवृन्दा° Bc3, Dc4.

पुंवद्भावात् स्त्रीप्रत्ययलोपः। गोस्त्रियोरिति[1] परपदस्य ह्रस्वः[2]।

शब्दे स भाषितपुंस्कादनूङ् । निपातनात् पञ्चम्या अलुक् । एवं बहुव्रीहौ कृते उक्तपुंस्कस्य पुंवत्त्वेन भाव्यम् । न च वराटाशब्द उक्तपुंस्क इत्यत्र पुंवत्त्वं न भवति । एवं सूत्रार्थे निश्चिते एतमेव सूत्रार्थं व्याख्यातुं प्रवृत्तापीयं वृत्तिः प्रत्ययपक्षमसमस्ततां पर्युदासं वाङ्गीकृत्य[4] प्रवृत्तेति मन्दमतीनां भ्रमो भवति तन्निरासार्थमुच्यते । उक्तपुंस्कादित्यादि । उक्तः पुमान् यस्मिन् शब्दप्रवृत्तिनिमित्ते तत्प्रतिपादकः शब्द उक्तपुंस्कः । तस्मात्परस्यानूङः ऊङोभावोनूङ् तस्य । ननु चाभावस्य पौर्वापर्याभावादुक्तपुंस्कात् परत्वं नोपपद्यत इति चेन्नैष दोषः । प्रतियोगिनोप्यूङः परत्वेनाभावस्य परत्वमुपचर्यते । तस्योङभावस्य य आश्रयत्वेन संबन्धी स्त्रीप्रत्ययः स्त्री प्रतीयते अस्मादिति[5] स्त्रीप्रत्ययः स्त्रीवाचकशब्दः तस्य पंवत् स्यात् पुंवाचकः शब्दः स्यादित्यर्थः[6] । पुंवद्भावात् स्त्राप्रत्ययलोप इति । पुवाचकशब्दातिदेशात् स्त्रीप्रत्ययस्य स्त्रीवाचकशब्दस्य लापो निवृत्तिरित्यर्थः । स्त्रीशब्दस्य शब्दोतिदिश्यत इत्येष एवार्थ आचार्याणामभिप्रेत इति 'न कोपधायाः' इत्यादिसूत्रवृत्तिषु प्रकटं दृश्यते । अयमेव च सूत्राथः काशिकायां वृत्तावुक्तः । भाषितः पुमान् येन समानायामाकृतौ एकस्मिन् प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दः । तदेतदेव कथं भवति । भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते तस्य प्रतिपादको यः शब्दः स भाषितपुंस्कः । ऊङोभावोनूङ् । भाषितपुंस्कादनूङ् यस्मिन् शब्दे स भाषितपंस्कादनूङ् । बहुव्रीहिरयम् । अलुक्निपातनात् पञ्चम्याः । तस्य भाषितपुंस्कादनूङः स्त्राशब्दस्य पुंशब्दस्येव रूपं भवतीति ।

---

१. गोस्त्रियोरुपसर्जनस्येति P. २. For ह्रस्व D_2 and B_1 have ह्रस्वत्वम्. ३. निपातात् Dc_3. ४. चाङ्गी° Dc_4, Dc_3. ५. यस्मा° Dc_2. ६. °वाचकः शब्दः Dc_4, Dc_3.

चित्रगुः। रूपवद्भार्यः। उक्तपुंस्कात् किम्। गङ्गाभार्यः। अनूङः किम्। वामोरूभार्यः। पूरण्यां तु।

अप् पूरणीप्रमाण्योः ॥५।४।११६॥

पूरणीप्रत्ययान्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात्॥ कल्याणी पञ्चमी[2] यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। स्त्रीप्रमाणः। पुंवद्भावनिषेधोप्प्रत्ययश्च प्रधानपूरण्यामेव। रात्रिः पूरणी वाच्या चेत्यत्र मुख्यत्वमन्यत्र

चित्रगुः रूपवद्भार्य इति। चित्रा गावो यस्य रूपवती भार्या यस्य। अत्र चित्रत्वं नाम गुणश्चित्रशब्दस्य प्रवृत्तिनिमित्तं तमेकमुपादायासौ पुंसि स्त्रियां च वर्तते। तथा रूपवतीशब्दस्य रूपवत्त्वं नाम सामान्यविशेषः प्रवृत्तिनिमित्तं तमेकमुपादायासौ पुंसि स्त्रियां च वर्तते। अत एतौ भाषितपुंस्कौ। **वामोरूभार्य** इति। 'संहितशफलक्षणवामादेश्च' इत्यूङ्।

अप्पूरणी। समासान्तोयम्। **पूरणीप्रत्ययान्तादित्यादि**। 'तस्य पूरणे डट्' इत्यादिना प्रकरणेन पूरणेर्थे ये प्रत्यया विहितास्ते स्त्रीविषया पूरणीप्रत्यया इत्युच्यन्ते। प्रमाणीति स्वरूपग्रहणम्। **पञ्चमीति**। अत्र 'नान्तादसंख्यादेर्मट्' इति पञ्चशब्दात्परस्य डटो मट्। ङीप्। **स्त्रीप्रमाण** इति। स्त्री प्रमाणी यस्य कुटुम्बिनः स स्त्रीप्रमाणः। **पुंवद्भाव** इत्यादि। यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवले वर्तिपदार्थे एव तत्र पूरण्याः प्राधान्यम्। एतदेव कथितोदाहरणे योजयति। **रात्रिरिति**। अत्रोदाहरणे रात्रिरेवावयवभूता पूरणी तत्सहिता रात्रय एव समुदिता अन्यपदार्थः न तु ताभिरारब्धमर्थान्तरमिति पूरण्याः प्रधानत्वम्। **अन्यत्रेति**। पूरण्या अप्राधान्ये।

---

१. Before it—चित्रा गावो यस्येति D_2, D_1. २. पञ्चमी रात्री B_2. ३. स्त्री प्रमाणी यस्य स्त्रीप्रमाणः B_2. ४. यस्य सः Dc_3. ५. यस्य सः Dc_3.

नद्यृतश्च ॥६।४।१५३॥

नद्यन्तादृदन्ताच्च बहुव्रीहेः कप् स्यात् पुंवद्भावः । कल्याणपञ्चमीकः पक्षः । बहुकर्तृकः[1] । अप्रियादिषु किम् । कल्याणीप्रियः[2] ॥

प्रिया । मनोज्ञा[3] । कल्याणी । सुभगा । दुर्भगा । भक्तिः । सचिवा । स्वसा । कान्ता । क्षान्ता । समा[4] । चपला । दुहिता । वामना । वामा[5] । बाला[6] । तनया ॥ दृढभक्तिरित्यादौ भजनादेर्दाढर्यमात्रं विवक्षितं न तु[7] स्त्रीत्वम् ।

नद्यृतः । ऋत इति तपरकरणं मुखसुखार्थं न ऋकारान्तनिवृत्त्यर्थम् । ऋकारान्तस्य प्रातिपदिकस्याभावात् । अयमपि समासान्तः । कल्याणपञ्चमीकः पक्ष इति । अत्र हि नावयवः पञ्चमी रात्रिः समासार्थः किं तर्हि तदारब्धः पक्षाख्यः । पूरणी तु समासावयवभूतैवेत्यप्राधान्यमस्याः । बहुकर्तृक इति । ऋदन्तत्वात् कप् । अप्रियादिषु किमिति । स्त्रियाः पुंवदिति सूत्रावयवस्याक्षेपः । प्रियादिगणं पठति प्रियेत्यादिना । अथ दृढभक्तिरित्यादौ कथं पुंवत्त्वम् । यतो भक्तिशब्दः प्रियादिरिति निषेधो भाव्य इत्याशङ्क्याह । दृढभक्तिरित्यादि । दृढशब्दो ह्यत्रादाढर्यनिवृत्तिमात्रपरः प्रयुक्तस्तत्रादाढर्यनिवृत्तिपरायां चोदनायां लिङ्गविशेषोपादानमनुपयोग्येवेति स्त्रीत्वमिह न विवक्षितम् । तस्मादस्त्रीलिङ्गदृढशब्दस्यायं प्रयोग इत्यभिप्रायः ।

---

१. After it—प्रासादः C, D_2, B_1, B_2. २. Before it—कल्याणी प्रिया यस्यासौ B_1. ३. Dropped C. ४. Before it—क्षमा P. ५. Dropped P. ६. Dropped D_2. ७. D_1, B_2, D_3, D_4 drop it.

तसिलादिष्वाकृत्वसुचः ॥६।३।३५॥

तसिलादिषु कृत्वसुजन्तेषु परेषु[1] स्त्रियाः पुंवत् स्यात् ॥ ततः[2] । तत्र । पटुतरा[3] । पटुतमा[4] । एवं चरट्[5]जातीयकल्पदेश्यदेशीयरूप्यपाशादौ ।[6]

तसिल् । अनुत्तरपदार्थो योगः । तसिलादिषु कृत्वसुजन्तेष्विति । 'पञ्चम्यास्तसिल्' इत्यारभ्य 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति सूत्रात् प्राक् ये विहितास्तेषु । तत इति । तस्या इति विग्रहः । 'पञ्चम्यास्तसिल्' । विभक्तिलोपः । 'प्राग् दिशो विभक्तिः' इति विभक्तित्वात् त्यदाद्यत्वम् । तत्रेति । तस्याम् । 'सप्तम्यास्त्रल्' । शेषं पुंवत् । तसिलादिषु कृत्वसुजन्तेष्वन्तर्भूतेष्वपि केषुचिन्नेष्यते । अनन्तर्भूतेष्वपि केषुचिदिष्यते इति परिगणनं कर्तव्यमिति भाष्यकारमतं चेतसि कृत्वा परिगणयन् त्रल्तसिलावुदाहृत्य तरप्तमपावुदाहरति । पटुतरा । पटुतमेति । इयमनयोरतिशयेन पट्वी 'द्विवचनविभज्योपपदे' इति तरप् । इयमासामतिशयेन पट्वी 'अतिशायने तमबिष्ठनौ' इति तमप् । एवमिति । अनेन कारिण चरडादावुदाहार्यं नान्येष्वित्यर्थः । 'भूतपूर्वे चरट् ।' 'प्रकारवचने जातीयर्' । 'ईषदसमाप्तौ कल्पप्देश्यदेशीयरः' । 'प्रशंसायां रूपप्' । 'याप्ये पाशप्' । पाशादावित्यादिशब्देन थमुथाल्दार्हिल् तिल् तातिलो गृह्यन्ते ।

---

१. परतः B_1; dropped D_5. २. B_1 has before it—तस्या इति.
३. B_1 has इयमनयोरतिशयेन पट्वी पटुतरा ; P, C, drop from इय° to पट्वी.
४. B_1 has इयमासामतिशयेन पट्वी पटुतमा. ५. C has पटुचरा after चरट्.
६. After it—रूप्ये तु न पुंवदिति केचित् B_2, Dc_1 ; Bc_3 drops तु.

त्वतलोर्गुणवचनस्येति वाच्यम्*॥ पट्व्या भावः पटुत्वम्[1]। पटुता। नेह। कटीत्वम्। उत्तरसूत्रे चकारात् तसिलकृत्वसुजनन्तर्भूतेष्वपि पुंवत्। अल्पां [2]देहि अल्पशः। [3]बहुशः। भस्याढे तद्धिते*॥ पुंवद्भावः। हस्तिनीनां समूहो हास्तिकम्। अढे किम्। रौहिणेयः।

त्वतलोरिति। त्वतलोः प्रत्यययोः परयोर्गुणवचनस्य पुंवद्भावः स्यादिति वाच्यमित्यर्थः। नेहेति। कटीत्वमित्यत्र जातिवाचित्वेनागुणवाचित्वात् पुंवत्त्वं नेत्यर्थः। यद्यपि भाष्यकाराभिमतं परिगणनं न क्रियते तथापि 'क्यङ्मानिनोश्च' इत्युत्तरसूत्रे वर्तमानादनुक्तसमुच्चयार्थाच्चकारात् तसिलकृत्वसुजनन्तर्भूतेष्वपि प्रत्ययेषु परेषु पुंवत्त्वं स्यादित्याह। उत्तरसूत्रेति। ननु चान्तर्भूतेष्वपि केषुचिन्नेष्यत इति परिगणनं कार्यमेवेति चेन्न कार्यम्। 'न कोपधायाः' इत्यत्र नेति योगविभागेन निषेधस्य सिद्धत्वात्। अल्पश इति। 'बह्वल्पार्थात्' इति शस्। 'भस्याढे' इति भसंज्ञस्य ढव्यतिरिक्ते तद्धिते परे पुंवद्भावो वक्तव्यः। हास्तिकमिति। 'अचित्तहस्तिधेनोष्ठक्' इति ठक्। ननु चात्र 'ठक्छसोश्च' इत्येव पुंवत्त्वं सिद्धम्। न सिध्यति। तत्र हि छसा साहचर्यात् 'भवतष्ठक्छसौ' इति सूत्रेण विहितस्यैव ठको ग्रहणं न सर्वस्य। रौहिणेय इति। रोहितवर्णाया अपत्यम्। रोहितशब्दात् 'वर्णादनुदात्तात्तोपधात्तो नः' इति ङीप्। नकारश्चान्तादेशः। ततः 'स्त्रीभ्यो ढक्' इति ढक्। तस्यैयादेशः। 'यस्येति च' इतीकारलोपः। ननु चाग्नेः स्त्री वृषाकपीति ङीपि[4] ऐकारे चान्तादेशे कृते अग्नायीति स्यात्। 'सा देवतास्य' इति

---

१. पट्वीभावः D3, D1; पटुभावः D2. २. देहीति B1, B2. ३. बह्वीं देहि बहुशः B1, B2. ४. ङीषि Dc4.

ठक्छसोश्च* ॥ भवत्याश्छात्रा भावत्काः । भवदीयाः । कुक्कुट्यादीनामण्डादिषु[1] । कुक्कुटाण्डम् । मृगपदम् । मृगक्षीरम् । काकशावः ।[2]

विवक्षायामाग्नेयः स्थालीपाक इतीष्यते । अढ इति तु[3] निषेधे आग्नयैय इति स्यादिति चेन्नैष दोषः । अढ इत्यपत्यार्थविहितं ढप्रत्ययं वर्जयित्वेति विशेषणस्य विवक्षितत्वात् । ढक्छसो-श्चेति । अभसंज्ञार्थ[4] आरम्भः । ननु[5] ठग्रहणं व्यर्थम् । यतष्ठस्यैकादेशे कृते भत्वादेव सिद्धः[6] पुंवद्भाव इति । न व्यर्थम् । ठावस्थायामेव पुंवत्त्वं स्यादित्येवमर्थम् । ततश्च 'इसुसुक्तान्तात् कः' इति कः सिध्येत् । अन्यथा यथा मथितं पण्यमस्य माथितिक इत्यत्र ठस्यैकादेशे[7] 'यस्येति च' इत्यकारलोपे कृतेपि तान्तादिति कादेशो न भवति । तथा भावत्क इत्यत्रापि इकादेशे कृते जाते पुंवत्त्वे कादेशो न स्यात् । भावत्का भवदीया इति । 'भवतष्ठक्छसौ' इति ठक्छसौ 'सिति च' इति पदत्वाज्जश्त्वम् । प्रसङ्गेन वद्भावविधिनिषेधप्रकरणं पठति । तत्र कुक्कुटाण्डमित्यादौ उत्तरपदस्याण्डादेरस्त्रीत्वादसामानाधिकरण्याच्च पुंवत्त्वं न प्राप्नोतीत्यारभ्यते वक्तव्यम् । कक्कुट्यादिष्विति । अण्डादौ परपदे कुक्कुट्यादिषु पूर्वपदेषु पुंवत्त्वं वाच्यमित्यर्थः । कुक्कुटाण्डमित्यादि[8] । कुक्कुट्या अण्डं मृग्याः पदं मृग्याः क्षीरं काक्याः शाव इति विग्रहाः ।

---

१. कुक्कुट्यादिषु C; D_1, D_4, Com. कुक्कुट्यादेर्वाण्डादिषु B_1. २. B_1 has पक्षे कुक्कुट्यण्डमित्यादि. ३. Dropped Dc_2. ४. संज्ञार्थमारम्भः Dc_1, Bc_3. ५. ननु च Dc_2. ६. अस्य सिद्धः Bc_1. ७. After it—कृते Dc_2, Bc_3. ८. कक्कुटाण्डमिति Bc_3.

क्यङ्मानिनोश्च ॥६।३।३६॥

एतयोः[1] परतः पुंवत्[2] ॥ एनी[3] वाचरति[4] एतायते[5] । श्येनी[6] वाचरतीति[7] श्येनायते । दर्शनीयां[8] मन्यते दर्शनीयमानिनी ॥

न कोपधायाः ॥६।३।३७॥

कोपधाया उक्तपुंस्कः[9] स्त्रियां न पुंवत् ॥ पाचिकाभार्यः ।

क्यङ् । एनीवाचरति एतायत इत्यादि । एतश्येनशब्दाभ्यां 'वर्णादनुदात्तात्—' इति ङीप् । तकारस्य नकारः[10] । 'कर्तुः क्यङ् सलोपश्च' इति क्यङ् । पुंवत्त्वम् । ततः 'अकृत्-सार्वधातुकयोः' इति दीर्घः । मानिन्ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च । इह तु दर्शनीयामात्मानं मन्यते स्त्री दर्शनीयमानिनीति 'स्त्रियाः पुंवत्' इत्येव सिद्धम् । अत एवासमानाधिकरणोदाहरणमे-तदिति ज्ञापयितु दर्शनीयां मन्यत इति विग्रहे आत्मशब्दो न प्रयुक्त आचार्यवर्यैः । ततश्च दर्शनीयमानिनीत्यस्यायमर्थः । काचन स्त्री काञ्चन स्वव्यतिरिक्तां दर्शनीयां मन्यते इति । दर्शनीयां देवदत्तां यज्ञदत्तो मन्यते दर्शनीयमान्ययमस्या इति अस्त्रीसमानाधिकरणोदाहरणम् ।

न कोप । पूर्वेण प्रकरणेन प्राप्तस्य पुंवद्भावस्यायं निषेधः । पाचिकेति । पचेः 'ण्वुण्तृचौ' इति ण्वुल् । टाप् । 'प्रत्ययस्थात्—' इतीत्वम् । 'स्त्रियाः पुंवत्' इति पुंवत्त्वस्य प्राप्तिः ।

---

१. Dropped D_3. २. After it—स्यात् C. ३. Before it—एनी मृगी D_5; एनायते D_2, D_5. ४. °चरतीति C. ५. एतायते । एनायते Bc_3. ६. श्येनीति B_1; श्येनीवाचरतीति dropped D_3. ७. इति dropped D_4. ८. Before it—आत्मानम् D_5. ९. उक्तपुंस्कं D_1, D_5. १०. च नकारः । Dc_3.

पाचिकाता । पाचिकात्वम् । रसिकाभार्यः । मद्रिकायते । मद्रिकामानिनी ॥

अकताद्धिताभ्यां कोपधायाः पुंवत्त्वनिषेधोत्र । इह मा भूत् । पाका भार्या यस्यासौ पाकभार्यः ।

संज्ञापूरण्योश्च ॥६।३।३८॥

अनयोर्न पुंवत् ॥

पाचिकातेत्यादि । 'तस्य भावस्त्वतलौ' त्वतलोरिति प्राप्तिः । **रसिकेति** । रसोस्त्यस्याः । 'अत इनिठनौ' इति ठन् । अत्रापि 'स्त्रियाः—' इति प्राप्तिः । **मद्रिकायत** इत्यादि । मद्रेषु भवा । 'मद्रवृज्योः कन्' । 'क्यङ्मानिनोश्च' इति प्राप्तिः ।

अकताद्धिताभ्यामिति । अकश्च तद्धितश्चाकतद्धितौ ताभ्यां हेतुभ्याम् । या कोपधा स्त्री कोपधः स्त्रीवाची शब्दः । तस्य पुंवद्भावोत्र सूत्रे निषिध्यत इत्यर्थः । एतच्च 'अप्तृन्—' इत्यत्र तिपादितम् । फलमाह । **इह मा भूदिति** । **पाकेति** । पाकशब्दोयमुणादिषु 'अर्भकपृथुकपाका वयसि' इति कप्रत्ययान्तो निपातितोतोनेकेनातद्धितेन वा कोपध इति पुंवत्त्वनिषेधो न ।

संज्ञा । **अनयोरिति** । संज्ञायाः पूरण्याश्च स्त्रियाः प्राप्तः पुंवद्भावो नेत्यर्थः । ननु च संज्ञाशब्दस्यैकद्रव्यविनिवेशितत्वादुक्तपुंस्कत्वाभावात् कथं पुंवत्त्वप्राप्तिः । नैतत् । न ह्ययं नियमोस्ति एकद्रव्यविनिवेशिनः संज्ञाशब्दा इति । तथा हि देवदत्तादिशब्दः संज्ञाभूतोनेकत्र प्रयुज्यमानो लोके दृश्यते । शास्त्रे च ह्रस्वादिशब्दाः ये त्वेकद्रव्यविनिवेशिनस्तान् प्रति नैष निषेधः । नन्वनेकार्थवृत्तित्वेपि

---

१. पाचिकता D_5. २. पुंवद्भावनिषेधोत्र C; पुंवद्भावनिषेधः । तेन B_2. ३. For यस्यासौ D_1, D_4 have अस्य. ४. P, D_2, D_5 drop असौ. ५. °नोकना° Bc_3.

दत्ताभार्यः। दत्तायते। दत्तामानिनी। पञ्चमीभार्यः। पेञ्चमायते। पञ्चमीपाशेत्यादि।

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥६।३।३९॥

वृद्धिहेतोस्ताद्धितस्यारक्तविकारार्थस्य न पुंवत् ॥ स्रौघ्नीभार्यः। माथुरीभार्यः। माँथुरायते। माथुरीमानिनी।

संज्ञाशब्दानां कथमुक्तपुंस्कत्वमेकत्र प्रवृत्तिनिमित्ते। न हि तेषां किंचित् प्रवृत्तिनिमित्तमस्ति यदृच्छाशब्दत्वात्। एषोप्यदोषः। यतस्तेषामपि किंचिन्निमित्तमस्त्येव सप्तपर्णादिवत्। यत्राप्यन्यनिमित्तं नास्ति तत्रापि स्वरूपमेव निमित्तमादाय वाच्ये प्रवर्तन्ते तत्रैकस्मिन् निमित्ते य उक्तः पुमान् ते उक्तपुंस्का इति किमत्रानुपपन्नम्।

दत्ताभार्य इति। अत्र यासौ दानक्रियाकृतिस्तस्यां दत्तशब्दो भाषितपुंस्कः अथवा स्वरूपे प्रवृत्तिनिमित्ते। **दत्तायत** इति। ननु चात्र कृतेपि पुंवत्त्वे 'अकृत्सार्वधातुकयोः—' इति दीर्घेणाप्येतत् सिद्धम्। तत् कथमेतन्निषेधस्योदाहरणम्। एवं मन्यते। यद्यत्र पंवत्त्वनिषेधो न स्यात् तदा 'संज्ञापूर्वको विधिरनित्यः' इति यदा दीर्घो न स्यात् तदा दत्तयत इत्यनिष्टं स्यादिति।

वृद्धि। वृद्धेर्हेतुर्वृद्धिहेतुस्तस्य वृद्धिहेतोः। **स्रौघ्नीभार्य** इति। स्रुघ्ने भवा। 'तत्र भवः' इत्यण्। 'टिड्ढाणञ्—' इति ङीप्। **माथुरीयत** इति। मथुरायां भवा माथुरी।

---

१. Dropped C, D_1, Bc_3. २. स्त्रियां विहितस्य न D_3. ३. C, D_1, Dc_1, Bc_3, D_6 drop it. ४. माथुरीयति Bc_3. ५. °त्यनिष्टं रूपं Dc_2, Dc_3.

अरक्ते किम् । काषायी कन्था[1] यस्य स[2] काषायकन्थः । अविकारे किम् । हैममुद्रिकः । वृद्धिनिमित्तत्वाभावादिह पुंवत् । वैयाकरणभार्यः । सौवश्वभार्यः ।

स्वाङ्गात् चेतो[3]मानिनि ॥ ६।३।४०॥

स्वाङ्गादीकारस्य स्त्रियां विहितस्य न पुंवत्[4] ॥ सुकेशीभार्यः । स्वाङ्गात् किम् ।

पूर्ववत् । माथुरीवाचरति । क्यङ् । माथुरीं मन्यते । **काषायीति** । काषायेण रक्ता । 'तेन रक्तम्' इत्यण् । **हैममुद्रिक इति** । हेम्नो विकारः । 'अनुदात्तादेश्च' इत्यञ् । **वैयाकरणभार्य** इति । व्याकरणमधीते । 'तदधीते तद्वेद' इत्यण् । 'न य्वाभ्याम्—' इति वृद्धिनिषेधः । ऐजागमश्च । अयमणनिषिद्धत्वात् वृद्धेर्निमित्तं न भवतीति पुंवद्भावनिषेधो न । **सौवश्वभार्य** इति । स्वश्वस्यापत्यं सौवश्वी । अण् । पूर्ववत् वृद्धिनिषेधः ऐजागमश्च । ननु च तावती भार्या यस्य स तावद्भार्यः[5] । इहापि निषेधः स्यात् । 'आ सर्वनाम्नः' इति आत्वलक्षणां वृद्धिं प्रति वतोस्तद्धितस्य निमित्तत्वात् । नैष दोषः । वृद्धनिमित्तत्वं नाम वृद्धिसंशब्दनेन विहिताया वृद्धेर्यन्निमित्तत्वं तद्विवक्षितमिति[6] हेतोः । तद्विवक्षा च वृद्धिशब्दस्यावृत्तेरित्याचार्याणामभिप्रायः । **काशिकाकारस्य** तु मते वृद्धिनिमित्तस्येति वृद्धेर्निमित्तं अणका यस्मिंस्तस्येति बहुव्रीहिः । तथा च अणकानामभावादप्राप्तिः । स च बहुव्रीहिपक्षोऽत्रापि योजयितुं शक्यः । किं तु तन्मते वैयाकरणभार्य इत्यादौ वृद्धिनिषेधात् वृद्धिनिमित्तता नास्तीति पुंवत्त्वनिषेधो न भवतीति ज्ञेयम् ।

स्वाङ्गात् । **सुकेशीभार्य** इति । 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङीषॅ[7] ।

---

१. कन्थास्य काषाय॰ B_1, D_1. २. असौ D_3; स dropped D_4, D_5. ३. °मानिनी C. ४. After it—अमानिनिपरतः । D_5. ५. After it—इति Dc_2. ६. °मिह Dc_1. ७. ङीप् Dc_4, Dc_3.

पटुभार्यः । अमानिनि[1] किम् । सुकेशमानिनी ।

जातेश्च ॥६।३।४१॥

जातेर्विहितो ङीप् न[2] पुंवत्[3] ॥ ब्राह्मणीभार्यः । अमानिनीत्येव । ब्राह्मणमानिनी ।

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ॥२।२।२५॥

संख्येयार्थया[4] संख्याया अव्ययादि[5] समस्यते स बहुव्रीहिः ।

पटुभार्य इति । पट्वी भार्या यस्येति विग्रहः । ईत इति किम् । अकेशा भार्या यस्य सोकेशभार्यः ।

जाते । अयं च निषेध औपसंख्यानिकस्य नेष्यते । हस्तिनीनां समूहो हास्तिकम् । तथोक्तं **महाभाष्ये** । एवं तर्हि 'न कोपधायाः' इत्येष योगः पुंवद्भावमात्रस्य विषये उत्तरमेवमाद्यनुक्रमणमाद्यस्य योगस्य विषय इति । संख्योत्तरपदं संख्योभयपदं च बहुव्रीहिमाह ।

संख्यया । 'अनेकमन्यपदार्थे' इति सूत्रं मत्वर्थे बहुव्रीहिविधायकमिति भाष्यकारेण स्थापितम् । अतो मत्वर्थं[6] विनापि बहुव्रीहिर्यथा स्यादित्ययं योग आरभ्यते । तथा प्रथमार्थं वर्जयित्वान्यत्र विभक्तौ बहुव्रीहिरुक्तः प्रथमार्थमिदं वचनम् ।

---

१. अमानिनीति किम् C ; Before it—ईत इति किम्—अकेशभार्यः D_4. २. ङीष् पुंवन्न B_1, D_1, D_3. ३. पुंवन्न D_2. ४. °यार्थसंख्यया D_3. ५. अव्ययादिः P, D_5. अव्ययादयः समस्यन्ते D_4. ६. मत्वर्थत्वं Dc_3.

बहुव्रीहौ संख्येये डजबहुगणात् ॥५।४।७३॥

संख्येये यो बहुव्रीहिस्तस्मात् डच् स्यात् न तु बहुगणात्। टिलोपः। [1]उपगता दश येषां ते उपदशाः॥

तथा हि उपदशा इति दशानां समीपे ये त उच्यन्ते ते च नवैकादश चेत्यन्यपदार्थोत्रास्त्येव न तु मत्वर्थः। प्रथमाविभक्त्यर्थोप्यत्रास्ति। [2]द्वित्रा इत्यत्र द्वौ वा त्रयो वेति विगृह्य वार्थेयं समासः। वार्थश्चान्यपदार्थः। न तु मत्वर्थोस्ति। तथा प्रथमार्थोप्यत्रास्ति। [3]तथा द्विदशा त्रिदशा[4] इति। द्विर्दश त्रिर्दशेति[5] विगृह्य सुजर्थेयं समासः। दशसंबन्धिनी चावृत्तिर्दशशब्देन लक्ष्यमाणा द्विशब्देन त्रिशब्देन वा संख्यायते। सुजर्थश्चायमन्यपदार्थो न तु मत्वर्थः। प्रथमार्थोप्यत्रास्ति सुच्प्रत्ययश्च वृत्तौ गतार्थत्वान्न प्रयुज्यते। प्रतिपदविधानार्थेपि[6] 'बहुव्रीहौ संख्येये डजबहुगणात्' इत्यत्रास्यैव ग्रहणं यथा स्यात्। बहु। संख्येये इति। 'संख्ययाव्ययासन्न—' इति यो बहुव्रीहिस्तस्येदं ग्रहणम्। बहुव्रीहाविति सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमीत्यभिप्रेत्याह। तस्मादिति। उपगता दश येषां ते उपदशा इति। ननु चात्र दशानां समीपे ये ते उपदशा इति विग्रहः कार्यः। तथोक्तं महाभाष्ये। 'कोस्य विग्रहो दशानां समीपे ये त उपदशाः' इति। सत्यं विग्रहस्तु तथैव किं त्वस्य समासस्य समीपिप्राधान्यमव्ययीभावस्य तु सामीप्यप्राधान्यमिति विषयविभागप्रदर्शनार्थं समीपिप्राधान्यं स्फुटीकर्तुमुपगता दश येषामित्युक्तम्। समीपगता दश येषां तेत्र समीपिनः समासार्था[7] इति भावः। ये हि दशानां समीपे तेषामुपगता दश भवन्त्येवेति विग्रहेण तुल्यार्थत्वमस्य वाक्यस्येति

---

१. उपगता दश येषां ते dropped D3. २. तथा हि द्वित्रा Bc1, Dc4. ३. तथा हि Bc1, Dc4. ४. After it—चतुर्दशा Dc3. ५. त्रिर्दश चतुर्दशेति Dc3. ६. विधानार्थोपि Dc2, Bc1, Dc. ७. समासार्थ Dc2.

ति विंशतेर्डिति[1] ॥ ६।४।१४२॥

[2]विंशतेर्भस्य तिशब्दस्य लोपः स्यात् डिति ॥ [3]आसन्नविंशाः । अदूरत्रिंशाः । अधिकचत्वारिंशाः । द्वौ त्रयो वा मानं येषां ते द्वित्राः[4] । अबहुगणात् किम् ।

न विरुद्धं किंचित् । तथोक्तं त्रिलोचनदासेन पञ्जिकायाम्[5] । 'ये हि दशानां समीपे तेषामुपगताः समीपगता दश इत्यर्थोऽपि न भिद्यते' इति । तथा च समीपिप्राधान्यमस्येति जिनेन्द्रबुद्धिना न्यासे उक्तम् । 'यदा समीपिप्राधान्यं[6] तदा बहुव्रीहिः । यदा तु सामीप्यप्राधान्यं[7] तदाव्ययीभाव इत्येष विषयविभागः' इति ।

ति विं । तिग्रहणमन्त्यस्य लोपो मा भूदिति । आसन्नविंशा इत्यादि । आसन्ना विंशतेः । अदूरे त्रिंशतः । अधिकाश्चत्वारिंशत इति विग्रहाः । सर्वत्र 'संख्यया—' आसन्नादेः समासे जाते डच् । द्वौ वा त्रयो वा मानं येषामिति । यद्यप्यादशभ्यः संख्या संख्येये वर्तते ततः परं संख्याने संख्येये च तथाप्यत्र मानशब्दसंनिधानात् द्वित्रिशब्दौ संख्याने द्वित्वे त्रित्वे च वर्तेते । यथा पञ्च परिमाणमेषां पञ्चकाः शकुनय इत्यत्र पञ्चशब्दः पञ्चत्वे । ततश्च द्वित्वं त्रित्वं वा मानं संख्यानमेषां द्वित्वेन त्रित्वेन वा संख्याता इति यावत् । ततश्चानेन वाक्येन द्वौ वा त्रयो वेति महाभाष्योक्तविग्रहस्यार्थ उक्तः ।

---

१. डिति dropped B_1. २. विंशतेः dropped B_1. ३. तिलोपः स्यात् D_1, D_3. ४. Before it—आसन्ना विंशतिर्येषां ते C. ५. After it—त्रिदशाः D_1. ६. त्रिलोचनपञ्जिकायां Dc_3. ७. समीपिनः प्राधान्यं Nyâsa. ८. समीपस्य प्राधान्यं Nyâsa. ९. Dropped Bc_1.

उपबहवः । उपगणाः । अत्र स्वरविशेषः । संख्येये किम् । अधिका विंशतिर्गवाम् ।

संख्यायास्तत्पुरुषस्य डच् * ॥ निर्गतानि त्रिंशतः निस्त्रिंशानि वर्षाणि मैत्रस्य । निश्चत्वारिंशानि । निर्गतस्त्रिंशतोङ्गुलिभ्यः निस्त्रिंशः खङ्गः ।

तथा प्रपञ्चप्रदीपे पञ्च षड् वा मानमेषामित्यस्यार्थ उक्तः । पञ्च वा षड् वेत्यर्थ इति । अयं च समासो वार्थे वार्थश्चात्र संशयः । संशये हि बहुवचनं स्यात् । संशयस्योभयपक्षपरामर्शित्वेन बह्वर्थविषयत्वात् । तद्यथा कति वा भवतः पुत्रा इति । तथोक्तं भाष्ये । 'अविज्ञातार्थे बहुवचनं प्रयोक्तव्यम्' इति ।

उपबहव इति । बहूनां समीपे ये ते उपबहवः । उपगणा इति । गणानां समीपे ये । अत्रेत्यादि । उपगणा इत्यत्र डचि सत्यसति वा यद्यपि रूपभेदो नास्ति तथापि स्वरे विशेषोस्ति । तथा हि डचि सत्यन्तोदात्तत्वं स्याच्चित्स्वरेण । तस्मिन्नसति पूर्वपदप्रकृतिभावेनाद्युदात्तत्वं स्यात् । संख्येये किमिति । 'संख्ययाव्यय—' इति सूत्रे संख्येये वर्तमानया संख्येयेति किमर्थमुक्तमित्यर्थः । अधिका विंशतिर्गवामिति । अत्र विंशतिशब्दः संख्यायामेव वर्तते न संख्येये इति ।

संख्याया इति । तत्पुरुषस्य संख्यावाचि यदुत्तरपदं ततो डच् वाच्य इत्यर्थः । निस्त्रिंशानीति । 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इति समासः । दिगन्तरालक्षणं बहुव्रीहिमाह ।

---

१. स्वरे D_1, D_2, D_5. २, Before it—शदन्तायाः B_1, D_2; डच्प्रकरणे अव्ययादेः C, B_2. ३. °स्तत्पुरुषे B_1. ४. After it—वाच्यः D_4. ५. तथा च प्रदीपे Bc_1, Dc_3, Dc_4, ६. महाभाष्ये Dc_2.

दिङ्नामान्यन्तराले ॥२।२।२६॥

दिशां नामानि समस्यन्ते अन्तराले वाच्ये स बहुव्रीहिः । सर्वनाम्नः समासे पूर्वं पुंवत् । दक्षिणपूर्वा । तयोरन्तरालमित्यर्थः । नामोक्तेरैन्द्र्यादौ न ॥

तत्र तेनेदमिति सरूपे ॥२।२।२७॥

सप्तम्यन्ते ग्रहणविषये सरूपे पदे तथा तृतीयान्ते सरूपे

दिङ्नामानि । प्रथमार्थेमत्वर्थेपि समासार्थमस्यारम्भः । प्रतिपदविधानार्थं च 'विभाषा दिक्समासे बहुव्रीहौ' इत्यत्रास्यैव ग्रहणं यथा स्यादिति । तेन या पूर्वा सोत्तरा अस्योन्मुग्धस्य तस्मै पूर्वोत्तराय देहि इत्यत्र सर्वनामत्वं न । कबभावार्थं च । 'शेषाद्विभाषा' इत्यत्र शेषाधिकारोक्तस्यैव बहुव्रीहेर्ग्रहः । शेषाधिकारश्च 'अनेकमन्यपदार्थे' इत्यत्रैव । तेनात्र न कप् । वैयधिकरण्येपि स्यादित्यप्यारम्भः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव इत्युपसंख्यानमर्थतः पठति । **सर्वनाम्नः समासे** इति । सर्वनामसंबन्धिनि समासे पूर्वं यत् सर्वनामपदं तत् पुंवत् स्यादिति वाच्यमित्यर्थः । **दक्षिणपूर्वेति** । दक्षिणस्याः पूर्वस्याश्चान्तरालम् । **नामोक्तेरिति** । नामग्रहणं लोकरूढिपरिग्रहार्थम् । तेन ऐन्द्र्याश्च कौबेर्याश्च यदन्तरालमित्यादौ न समासः । नेमौ रूढिशब्दौ किं तु इन्द्रस्येयं कुबेरस्येयमिति यौगिकौ । व्यतिहारलक्षणं बहुव्रीहिमाह ।

तत्र । अमत्वर्थार्थोयमारम्भः । प्रतिपदविधानार्थोपि । 'इच् कर्मव्यतिहारे' इत्यत्रास्यैव ग्रहः । **सप्तम्यन्तेत्यादि** । गृह्यतेस्मिन्निति ग्रहणं केशादि तद्विषयो वाच्यं ययोस्ते ग्रहणविषये सरूपे

---

१. सुबन्तानि समस्यन्ते Dc1. २. नाम्नोक्ते° D1. ३. °रैन्द्राग्नेय्यादौ B2. ४. तथा च Bc3. ५. संग्रहः Dc3.

[1]प्रहरणे [2]इदं युद्धमित्यर्थे मिथः समस्यते[3] कर्मव्यतिहारे द्योत्ये । इतिशब्दादे[4]तावल्लभ्यते ॥

अन्येषामपि दृश्यते ॥६।३।१३७॥

अन्येषामपि भाषायां दीर्घत्वं[5] दृश्यते । [6]दृशिग्रहणात् कर्म[7]व्यतिहारे बहुव्रीहौ पूर्वपदस्य दीर्घत्वमात्वं [8]वानचीति [9]ज्ञेयम् ॥

इच् कर्मव्यतिहारे ॥५।४।१२७॥

कर्मव्यतिहारे बहुव्रीहेरिच् स्यात् समासान्तः ॥ 'तिष्ठद्गुप्रभृतीनि च' इत्यव्ययीभावादव्ययत्वम् । तत्र[10] इच् प्रत्ययस्य पाठात् ।

समानरूपे पदे इदं युद्धमित्यस्मिन्नर्थे मिथः परस्परं समस्येते तथा तृतीयान्ते सरूपे पदे प्रहरत्यनेनेति प्रहरणं मुसलादि तद्विषये इदं युद्धमित्यर्थे मिथः समस्येते कर्मव्यतिहारे द्योत्ये इति । कर्मव्यतिहारः परस्परग्रहणं परस्परप्रहरणं च । इतिशब्दादेतावदिति । ग्रहणं प्रहरणं कर्मव्यतिहारो युद्धं चेति ।

अन्ये । दृशिग्रहणादिति । प्रयोगानुसरणार्थादिति भावः । आत्वं वेति । अर्वाचीनमतेनात्वम् । तथा च **पञ्जिकायां त्रिलोचनदासेनोक्तम्** । तथा मुष्टामुष्टीति इचिनाम्यन्तपूर्वपदस्यात्वं दृश्यत इति ।

इच् । इच्करणं तिष्ठद्गुप्रभृतिषु इच् कर्मव्यतिहारे इत्यस्य विशेषणार्थम् । 'तिष्ठद्गुप्रभृतीनि च' इतीदमव्ययीभावे व्याख्यातम् ।

---

१. प्रहरणार्थे D_4, D_5, C, B_1. २. इदं युद्धं प्रवृत्तमित्यस्मिन्नर्थे C, B_1, B_2. ३. After it—स बहुव्रीहिः D_4. ४. °देतल्लभ्यते D_5. ५. दृश्यते दीर्घत्वम् D_4. ६. दृशेर्म° D_2, D_3, P, C, B_1, B_2. ७. व्यतिहारबहुव्रीहौ D_1. ८. नाचि इति P; D_2. ९. संज्ञेयम् D_1. १०. इच्प्रत्ययस्य तत्र C, D_1, Bc_3, D_4.

केशेषु केशेषु गृहीत्वेदं युद्धं[1] प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च [2]प्रहृत्येदं युद्धं[3] प्रवृत्तं दण्डादण्डि। [4]मुष्टामुष्टि।

ओर्गुणः ॥६।४।१४६॥

उवर्णान्तस्य भस्य गुणः स्यात्[5]। [6]अवादेशः। बाहू-[7]बाहवि। बाहाबाहवि। [8]उरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्यो[9] यथा स्यात्।

स्पष्टत्वात् त्यक्तं सूत्रं व्याख्यायते। 'द्विदण्डयादिभ्यश्च'। ५।४।१२८॥ एषां तादर्थ्ये चतुर्थी। न पञ्चमी। द्विदण्डयादि-सिद्ध्यर्थं चेच् कार्यः। समुदायनिपातनादर्थविशेषेवरुध्यन्ते। द्वौ दण्डौ प्रहरणमस्यां क्रियायां द्विदण्डि प्रहरति। तथा द्विमुसलि प्रहरति। इह न द्विदण्डा[10] शालेति। बहुव्रीह्यधिकारेपि तत्पुरुषात् क्वचिद्विधिः। निकुच्य कर्णौ धावति निकुच्यकर्णि धावति। प्रोह्य पादौ हस्तिनं वाहयति। प्रोह्यपादि हस्तिनं वाहयति। मयूरव्यंसकादित्वात् समासः। उभाभ्यामञ्जलिभ्यां पिबति। उभाञ्जलि। उभयाञ्जलि[11]। उभयादन्ति। [12]उभादन्ति। उभाकर्णि। उभयाकर्णि। उभौ कर्णौ यस्मिन् श्रवणे। उभाहस्ति। उभयाहस्ति। उभापाणि। उभयापाणि। उभाबाहु। उभयाबाहु। निपातनादिचो लोपः। प्रत्ययलक्षणेनाव्ययीभावत्वम्। एकपदि। आढ्यपदि। संहितानि पुच्छानि यस्मिन् धावति संहितपुच्छि धावति।

ओर्। अत्र 'नस्तद्धिते' इत्यतः तद्धित इत्यनुवर्तते। तेन शंभ्वोरित्यादौ न। ओदिति वक्तव्ये इति। लाघवार्थमोरोदित् सूत्रे कार्ये गुणोक्तिः संज्ञापूर्वस्य विधेरनित्यत्वज्ञापनार्थम्।

---

१. प्रवृत्तं युद्धं D_2. २. प्रवृत्तं युद्धं दण्डादण्डि C. ३. Dropped D_2, D_5. ४. मुष्टीमुष्टि। मुष्टामुष्टि D_1, B_2; मुष्टामुष्टि। मुष्टीमुष्टि। D_3, D_4, D_5. ५. After it—तद्धिते C, B_1. ६. Dropped D_3. ७. Dropped D_3. ८. ओदिति D_3; ओरोदिति D_5. ९. °रानिमित्तो D_3. १०. द्विदण्डशालेति Dc_2. ११. Dropped Bc_3. १२. Dropped Bc_3.

तेन स्वायंभुवमिति सिध्येत् । अचि तु अस्यसि । [1]सरूपेति किम् । [2]हलेन मुसलेन ॥

तेन सहेति तुल्ययोगे ॥२।२।२८॥

सहेत्येतत् तृतीयान्तेन समस्यते तुल्ययोगे स बहुव्रीहिः ।

वोपसर्जनस्य ॥६।३।८२॥

उपसर्जनस्य सहस्य सः स्याद्वा ॥ पुत्रेण [3]सह [4]सहपुत्रः सपुत्रो वा आगतः ।

तेन स्वायंभुवमित्यत्र गुणाभावः सिद्ध इत्यर्थः । **अस्यसीति** । असिभिश्चासिभिश्च प्रहृत्येदं युद्धं प्रवृत्तम् । सहपूर्वपदं बहुव्रीहिमाह ।

तेन । व्यधिकरणयोः प्रथमार्थेपि यथा स्यादित्ययमारम्भः कबभावार्थश्च । उक्तः कबभावः तुल्ययोगः समानसंबन्धस्तं यदा सहशब्दो द्योतयति तदेत्यर्थः ।

वोप । **उपसर्जनस्य सहस्येति** । व्यधिकरणे षष्ठ्यौ । उपसर्जनसर्वावयवो बहुव्रीहिसमास उपसर्जनमिह विवक्षितम् । तदवयवस्य सहशब्दस्य स इत्ययमादेशो वा स्यादित्यर्थः । **सपुत्र** इति । सह पुत्रेण वर्तमान इति विग्रहः । अत्र देवदत्तस्य पुत्रस्य चागमने तुल्यः संबन्धः सहशब्देन द्योत्यते । उपसर्जनस्येत्यनेन बहुव्रीह्याश्रयणं किम् । सहयुध्वेति । 'सहे च' इति क्वनिप् । 'उपपदमतिङ्' इति तत्पुरुषः । अथेह कस्मान्न सह कृत्वा प्रियो यस्य सहकृत्वप्रियः प्रियसहकृत्व इति वा प्रियस्य पूर्वत्वम् । भवति ह्यत्रापि सहशब्दो बहुव्रीहेरवयवः ।

---

१. सरूपे किम् P, D_1, B_2, D_3. २. हलमुसलेन D_1, D_2, हलमुशलेन । हस्तमुशलेन । हलेन मुशलेन B_2; हलमुशलेन Dc_1, Bc_3; हलकमुसलेन D_5. ३. सह आगतः सहपुत्रो वा सपुत्रो वा Dc_1, Bc_3. ४. सपुत्रः सहपुत्रो वा D_1, B_2, D_2, D_3, D_4.

तुल्ययोगवचनं प्रायिकम् । सकर्मकः । सलोमकः ।[2]

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ ५।४।११३॥

स्वाङ्गार्थयोरनयोः षच् स्यात् बहुव्रीहौ ॥ दीर्घसक्थः । पुण्डरीकवदक्षिणी यस्यासौ पुण्डरीकाक्षः । जलजाक्षी । स्वाङ्गात् किम् । दीर्घसक्थि शकटम् । स्थूलाक्षिरिक्षुः ।

उच्यते । उत्तरपदाधिकारादिह बहुव्रीह्याश्रयणाच्च बहुव्रीहौ यदुत्तरपदं तत्परं यस्मात् सहशब्दात् तस्य सत्त्वेन भाव्यम् । न चेह बहुव्रीहौ यदुत्तरपदं तत् सहशब्दात् परं शब्दान्तरेण व्यवधानादिति न भवति सत्वम् । **तुल्ययोगवचनं प्रायिकमिति** । असर्वविषयमित्यर्थः । **सकर्मकः** । **सलोमक** इति । सह कर्मणा सह लोम्ना । न ह्यत्र तुल्ययोगो गम्यते किं तु विद्यमानता ।

बहुव्रीहौ । इह स्वाङ्गम् 'अद्रवम्—' इत्यादि परिभाषोक्तम् । सूत्रस्थितं सक्थ्यक्ष्णोरिति पञ्चम्यर्थे षष्ठीं वैचित्र्यप्रदर्शनार्थमनुवदन्नाह । **स्वाङ्गार्थयोरनयोरिति** । टचि प्रकृते षज्ग्रहणं स्वरार्थम् । दीर्घसक्थी स्त्रीत्यत्र 'सक्थं चाक्रान्तात्' इति विभाषोत्तरपदस्यान्तोदात्तत्वं विधीयते । तत्र यस्मिन् पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वरस्याभावात् अनुदात्तः श्रूयेत । ङीषि तु सति सर्वत्रोदात्तः सिद्धः स्यात् । बहुव्रीहौ किम् । परमसक्थि । कल्याणाक्षि । सक्थ्यक्ष्णोः किम् । सुबाहुः ।

---

१. Before this—तुल्ययोगे किम् । एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । अत्र सत्तामात्रं विवक्षितं न भारवहनम् B_2. २. सपक्षः after it in C, B_2 ; सलोमकः dropped and has तुल्ययोगे किम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । विद्यमानैरेवेत्यर्थः । D_4.

अङ्गुलेर्दारुणि ॥५।४।११४॥

अङ्गुल्यन्ताद्बहुव्रीहेः षच् स्यात् दारुण्यर्थे ॥ पञ्च अङ्गुलयो यस्य[1] तत् पञ्चाङ्गुलं दारु । अङ्गुलिसदृशावयवं धान्यादिविक्षेप[2]णकाष्ठमुच्यते । दारुणि किम् । पञ्चाङ्गुलिर्हस्तः ।

द्वित्रिभ्यां ष मूर्ध्नः ॥५।४।११५॥

आभ्यां प[4]रस्य मूर्ध्नः ष[5]ः स्याद्बहुव्रीहौ ॥

अङ्गुलेः । दारुणि समासार्थे मुख्याभिरङ्गुलिभिः संबन्धो न घटते । तस्मात् सामर्थ्यादङ्गुलिसदृशेषु अङ्गुलिशब्दो वर्तमान इहाश्रीयत इत्यभिप्रेत्याह । **अङ्गुलिसदृशावयवमिति** । ननु च द्वे अङ्गुली प्रमाणमस्य दारुण इत्यत्र मुख्याभिरेवाङ्गुलिभिः संबन्धः । तत्र मुख्ये अङ्गुलिशब्दे संभवति गौणग्रहणमयुक्तमिति चेन्न । बहुव्रीहावित्यनुवृत्तेः । अयं च तद्धितार्थे तत्पुरुष इति 'तत्पुरुषस्याङ्गुलेः—' इत्यच् स्यात् ।

द्वित्रिभ्याम् । षचि प्रकृते षविधिर्विकल्पेनोदात्तत्वं यथा स्यादिति । तथा हि 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' इत्यत्र विभाषानुवृत्तेरसमासान्तमूर्धशब्दनिर्देशाच्च यस्य असमासान्तो मूर्धशब्दो द्वित्रिभ्यां परस्तस्य बहुव्रीहेरन्तोदात्तत्वं पाक्षिकं विधीयते ।

---

१. यस्येति पञ्चा॰ D1. २. Dropped D5. ३. °पर्ण D3, D4. ४. Dropped C, Bc3. ५. षच् D3.

द्विमूर्धः[1] । त्रिमूर्धः[2] । [3]नेतुर्नक्षत्रेब्वक्तव्यः* ।। मृगो नेता यासां[4] रात्रीणां[5] मृगनेत्रा रात्रयः । पुष्पनेत्राः ।

अन्यथा कृतसमासान्तमेव मूर्धशब्दं निर्दिशेत् । तत्र यदि षच् स्यात् तर्हि पाक्षिकमन्तोदात्तत्वं बाधित्वा चित्त्वसामर्थ्यान्नित्यमन्तोदात्तत्वं स्यात् । विभाषान्तोदात्तवचनस्य यत्र समासान्तो नास्ति सोवकाशः । षे तु सति वान्तोदात्तत्वं स्यात् । नन्वसमासान्तनिर्देशादसमासान्त एव मूर्धशब्द उत्तरपदे वान्तोदात्तत्वेन भाव्यं तत् कथं समासान्ते कृते तत् स्यात् । नैष दोषः । यतो हि काशिकायामुक्तम् । 'यदापि च समासान्तः क्रियते तदापि बहुव्रीहिः कार्यित्वात्तदेकदेशित्वाच्च[6] समासान्तोदात्तत्वं पक्षे भवत्येव' इति । एतन्न्यासे[7] व्याख्यातम् । 'इह बहुव्रीहिः कार्यी तदेकदेशित्वं च समासान्तस्य । एकदेशोऽस्यास्तीत्येकदेशी । स बहुव्रीहिरेकदेशी यस्य समासान्तस्य स तदेकदेशी । तस्य भावस्तदेकदेशित्वम् । एतेन समासान्तस्य बहुव्रीह्यवयवत्वं दर्शयन्नकृतसमासान्तस्य शब्दान्तरत्वं निरस्यति । तदेवं यस्मादिह बहुव्रीहिः कार्यी तदेकदेशित्वं च समासान्तस्य तस्माद्यदापि समासान्तः क्रियते तदापि पक्षेन्तोदात्तत्वं भवत्येव' इति । समासान्तस्य च वैकल्पिकत्वमसमासान्तनिर्देश एव ज्ञापयति ।

नेतुरिति । नक्षत्रे यो नेतृशब्दो वर्तते तदन्ताद्बहुव्रीहेरप् वक्तव्य इत्यर्थः । मासात् प्रभृति प्रत्ययपूर्वपदात् ठच् विधेयः । पञ्चको मासोऽस्य पञ्चकमासिकः । कर्मकरः । दशकमासिकः । 'सोऽस्यांशवस्नभृतयः' इति भृत्यर्थे संख्यायाः कन् ।

---

१. द्वौ मूर्धानौ यस्यासौ द्विमूर्धः D_5. २. Dropped C. ३. नेतुर्नक्षत्रे । नक्षत्रे यो नेतृशब्दो वर्तते तदन्ताद्बहुव्रीहेरच् वक्तव्यः । B_2. ४. आसां D_4, B_2, D_2. ५. Dropped D_1, B_2, D_2. ६. कार्यत्वा° Bc_3, Dc_3, Dc_4. ७. एतदेव न्यासे Dc_4.

अन्तर्बहिर्भ्यां च लोम्नः ॥५।४।११७॥

आभ्यां लोम्नोप् स्यात् । अन्तर्लोमः । बहिर्लोमः ।

अच् नासिकायाः संज्ञायां नसं चास्थूलात् ॥५।४।११८॥

नासिकान्ताद्बहुव्रीहेरच् स्यात् नासिकाशब्दश्च नसं प्राप्नोति संज्ञायां विषये न तु स्थूलपूर्वात् ॥

पूर्वपदात् संज्ञायामगः ॥८।४।३॥

पूर्वपदस्थान्निमित्तात् परस्य नस्य णः स्यात् संज्ञायां न

अन्तः । अन्तर्लोम इति । अन्तर्गतानि लोमान्यस्य ।

अच् । संज्ञायामिति समुदायोपाधिस्तेन यदि प्रकृतिप्रत्यय-समुदायः कस्यचित् संज्ञा स्यात् एवं प्रत्ययः स्यात् । अचश्चित्करणं बहुव्रीहिस्वरबाधनार्थम् ।

पूर्वपदात् । 'रषाभ्याम्' इति वर्तते । न च तयोः पूर्वपदत्वं समस्ति । रषान्तात् पूर्वपदादिति त्वर्थो व्याख्यानान्नेति । सामर्थ्यात् पूर्वपदस्थान्निमित्तादित्येषोऽर्थः स्यादित्याह । पूर्वपदस्थान्निमित्तात्परस्येति । केचिदेतन्नियमार्थमाहुः । पूर्वपदात् संज्ञायामेव णत्वं नान्यत्रेति । समासे हि समुदायादुत्पन्नया विभक्त्या समुदायस्य पदत्वात् समानपदे निमित्तनिमित्तिनोर्भावादस्ति 'रषाभ्याम्—' इति प्राप्तिः । समानपदत्वं हि तत्राश्रितं न भिन्नपदत्वं प्रतिषिद्धम् । स च नियमः पूर्वपदसंबन्धादुत्तरपदस्यैव णत्वं निवर्तयति । चर्मनासिक इति । न

---

१. This Sûtra with the Vritti omitted D_5, P, C, B_1, २. After this B_2 has नाभेः संज्ञायाम् । नाभेरप् स्यात् । पद्मं नाभावस्य पद्मं नाभिरस्येति वा पद्मनाभः । ऊर्णनाभः । ३. Dropped D_5. ४. Dropped B_2, D_4, D_5, Dc_1. ५. संख्यायामिति Dc_4.

तु गकारव्यवधाने ॥ द्रुरिव नासिका यस्य[1] द्रुणसः। खरणसः[2]। अगः[3] किम्। ऋगयनम्। अस्थूलात् किम्। स्थूलनासिकः।

खुरखराभ्यां नस्[4] * ॥ खुरणाः[5]। खरणाः। पक्षे अच्। खुरणसः। खरणसः[6] ॥

उपसर्गाच्च ॥५।४।११९॥

उपसर्गान्नासिकाया अच् स्यान्नसादेशश्च ॥ असंज्ञायामपि ॥

तद्धितस्थस्य पूर्वपदस्थस्य च मातृभोगीण करणप्रिय इति। अग्र इति योगविभागेन णत्वनिषेधो न नियमनिषेध इति। अन्ये तु पूर्वसूत्रे समानमेव यन्नित्यं पदं तत् समानपदमिति समानग्रहणादाश्रयन्ति। तेषामप्राप्तमेव णत्वमनेन विधीयते। समासे पूर्वपदमुत्तरपदमिति विभागादसमानपदत्वमप्यस्ति। **द्रुरिवेति**। 'सप्तम्युपमानपूर्वस्योत्तर-पदलोपश्च' इति समासः। **खरणस इति**। खर इव नासिकास्य। **अगः किमिति**। 'पूर्वपदात् संज्ञायामगः' इत्यस्यावयव आक्षिप्यते। **ऋगयनमिति**। ऋचोऽयनम्। **अस्थूलात् किमिति**। 'अञ्नासिकायाः संज्ञायाम्—' इत्यादिसूत्रावयवाक्षेपः।

खुरेत्यादि। खुरखराभ्यां परस्य नासिकाशब्दस्य नसादेशो वक्तव्य इत्यर्थः। **पक्षेऽजिति**। खुरखराभ्यां परात् नासिकाशब्दात् पक्षे अजपीष्यत इत्यर्थः। **खुरणस इति**। खुर इव नासिकास्य।

उपसर्गात्। उपसर्गग्रहणमिह प्राद्युपलक्षणम्। नासिकाशब्दे परतः क्रियायोगाभावादुपसर्गत्वाभावात्। असंज्ञार्थं वचनम्।

---

१. यस्य स D_1, B_1, P, C. २. Dropped C. ३. Before it—संज्ञायां किम्। चर्मनासिकः B_2. ४. After it—वा वक्तव्यः। D_4. ५. खुराकारा नासिका यस्य स खुरणाः B_2; From this to अच् dropped D_3; खुरस्येव नासिका यस्यासौ D_5. ६. Dropped P, C.

उपसर्गाद्बहुलम् ॥८।४।२८॥

उपसर्गस्थान्निमित्तात्[1] परस्य नसो नकारस्य[2] णः[3] स्याद्बहुलम् ॥ प्रणसः[4] । उन्नसः ॥

वेर्ग्रो वक्तव्यः[5] ।* विगता नासिका यस्य[6] स[7] विग्रः ।[8]

उपसर्गात् । **प्रणस** इति । प्रगता नासिकास्य । उन्नता नासिकास्य । **वेर्ग्र** इति । विशब्दात्परस्य नासिकाशब्दस्य ग्रादेशः स्यादिति वक्तव्यम् । प्रत्ययस्त्वजेव । स्पष्टत्वात्त्यक्तं[9][10] 'सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः'[11] ॥५।४।१२०॥ एते बहुव्रीहयोजन्ता निपात्यन्ते । शोभनं प्रातरस्य सुप्रातः । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवास्य सुदिवः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयोऽस्य[12] चतुरश्रः[13] । एण्या इव पादावस्य एणीपदः । अजस्येव पादावस्य अजपदः । प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः ।

---

१. उपसर्गान्नि° C. २. नस्य C, Dc_1, Bc_3. ३. णकारः D_5. ४. After it—प्रनसः B_2. ५. After it—वेः परस्य नासिकाशब्दस्य ग्र इत्यादेशो वक्तव्यः B_2. ६. अस्यासौ D_1; अस्य D_3, Bc_3. ७. असौ D_5, dropped D_3, D_4. ८. After it—वियः खुखौ च* । वियः परस्य नासिकाशब्दस्य खुखौ स्तः । विखुः । विखः B_2; खुखौ च । विखुः । विखः D_4. ९. After it—इति विग्रह इति Dc_1, Bc_3. १०. त्यक्तं सूत्रं व्याख्यायते Dc_3, ११ चतुरश्रै° Dc_2. १२. °श्रयो° Dc_2. १३. चतुरश्रः Dc_2.

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ ६।४।१२१॥

एभ्यो हलिसक्थ्योरच् स्याद्वा[१] । अहलः[२] । अहलिः । असक्थः । असक्थिः । एवं दुःसुभ्याम् । शक्तेरिति[३] पाठे[४] । अशक्तः । अशक्तिरित्यादि[५] ॥

नित्यमसिच् प्रजामेधयोः ॥६।४।१२२॥

[६]नञ्दुःसुभ्यः प्रजामेधयोर्नित्यमसिच् स्याद्बहुव्रीहौ ॥ अप्रजाः[७] । दुःप्रजाः[८] । सुप्रजाः[९] । अमेधाः । दुर्मेधाः[१०] । सुमेधाः । नित्यग्रहणात् । मन्दमेधाः । अल्पमेधाः ।

नञ्दुःसु । ननु चादन्तोपि हलशब्दोस्ति । इदन्तोपि । तत्र यदादन्तेन समासस्तदा अहल इति स्यात् । यदा त्विदन्तेन तदा अहलिरित्यतो व्यर्थं हलिग्रहणम् । न व्यर्थम् । भिन्नार्थत्वादनयोः । महद्धलं हलिः । अत्र विषयेहल इति न स्यात् । अन्यच्च यद्यहल इत्यदन्तेन समासस्तर्हि पूर्वपदप्रकृतिभावेनाद्युदात्तत्वं स्यात् । अन्तोदात्तत्वं चेष्यते । 'शेषात्—' इति विभाषा कप् च प्रसज्येत । तस्माद्युक्तं हलिग्रहणम् । **शक्तेरिति पाठ इति** । उभयथा ह्याचार्येण शिष्याः प्रतिपादिता इत्युभयमपि प्रमाणम् ।

नित्य । ननु च पूर्वसूत्रादिहान्यतरस्यांग्रहणं न स्वर्यते इति व्यर्थं नित्यग्रहणमित्याशङ्क्य ग्रन्थाधिक्यादर्थाधिक्यं भवतीति कृत्वा नित्यग्रहणादन्यदपि सिध्यतीत्याह । **नित्यग्रहणादित्यादि** ।

---

१. वा स्यात् B_2, D_3. २. अविद्यमानो हलो यस्यासौ अविद्यमानं सक्थि यस्यासौ । अहलः &c. D_5. ३, शक्त्योरिति D_1, D_2, B_1, B_2. ४. पाठात् D_4 ।. ५. इत्यादि dropped D_3. ६. नञ्दुःसुभ्यः परयोः Dc_1, Bc_3. ७ Before it—अल्पमेधाः D_1. ८. D_1 drops it. ९. B_1, B_2 drop it. १०. B_1, P, drop it.

धर्मादनिच् केवलात् ॥५।४।१२४॥

केवलात् पेदाद्यो धर्मशब्दः केवलस्तदन्ताद्बहुव्रीहेरनिच् स्यात् ॥ कल्याणधर्मा । केवलात् किम् । परमस्वो धर्मो यस्य परमः स्वधर्मो यस्य वेति परमस्वधर्मः ।

दक्षिणेर्मा लुब्धयोगे ॥५।४।१२६॥

अयं निपात्यते । दक्षिणे ईर्ममस्य दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः । दक्षिणेर्ममन्यत् ।[४]

धर्मात् । केवलादिति । धर्मशब्दस्य पूर्वपदस्य च विशेषणमित्याभिप्रेत्याह । केवलादित्यादि । तथोक्तं पाणिनीयमतदर्पणे । 'केवलादिति कैवल्यं धर्मप्राक्पदयोर्मतम्' इति । चित्त्वं पूर्वपदप्रकृतिस्वरं बाधित्वान्तोदात्तो यथा स्यादिति । स्पष्टत्वात्त्यक्तं 'जम्भा सुहरिततृणसोमेभ्यः' ॥५।४।१२५॥ बहुव्रीहौ स्वादिभ्यः परं जम्भेति कृतसमासान्तमुत्तरपदं निपात्यते । जम्भशब्दोभ्यवहार्यवाची दन्तवाची वा । शोभनो जम्भोस्य सुजम्भा देवदत्तः । शोभनाहारः शोभनदन्तो वेत्यर्थः । एवं हरितजम्भा । तृणजम्भा सोमजम्भा । दन्तवचने तृणामिव जम्भोस्य सोम इव जम्भोस्येति विग्रहीतव्यम् । एभ्यः किम् । पतितजम्भः ।

दक्षिणेर्मा । लुब्धो व्याधः । ईर्मशब्दो व्रणवाची ।

---

१. पदात् परो यो B_2. २. D_1 drops it. ३. परमः स्वधर्मो यस्य परमस्वो धर्मो यस्य वेति C. D_1, D_3, D_4, D_5 (अस्य for यस्य in two places D_3; अस्य for the second यस्य D_4). ४. After it—ईर्मं व्रणः D_5. ५. After it—सूत्रं व्याख्यायते Dc_3.

प्रसंभ्यां जानुनोर्ज्ञुः ॥५।४।१२९॥

आभ्यां परस्य जानुशब्दस्य ज्ञुरादेशः स्याद्बहुव्रीहौ ॥ प्रगते जानुनी अस्य[1] प्रज्ञुः । संज्ञुः[2] ।

ऊर्ध्वाद्विभाषा ॥५।४।१३०॥

ऊर्ध्वज्ञुः । ऊर्ध्वजानुः ।

ऊधसोनङ् ॥ कुण्डोध्नी । पुंसि तु । महौधाः गोगणः ।

धनुषश्च ॥५।४।१३२॥

धनुरन्ताद्बहुव्रीहेरनङादेशः स्यात् ॥ शार्ङ्गं धनुरस्य[3] शार्ङ्गधन्वा ।

वा संज्ञायाम् ॥५।४।१३३॥

शतधन्वा[4] । शतधनुः ।

प्रसंभ्याम् । जानुनोरिति । षष्ठीद्विवचननिर्देशः स्थानषष्ठात्वं निश्चेतुमन्यथा जानुन इत्येकवचनेन निर्देशे प्रत्ययाधिकारात् पञ्चमीयमिति भ्रमः स्यात् । अतो ज्ञुरादेश इत्यभिप्रेत्याह । ज्ञुरादेशः स्यादिति ।

ऊर्ध्वात् ।

ऊधसः । एतच्च स्त्रीप्रत्ययेषु व्याख्यातम् ।

धनुषः । शार्ङ्गधन्वेति । अनङि कृते यणादेशः ।

वा संज्ञा । पूर्वेण नित्यप्राप्ते[5] विकल्प्यते ।

---

१. यस्य D_3, D_4, D_5. २. P, D_5 drop it; संगते जानुनी अस्य संज्ञुः D_2. ३. धनुयस्यै स C; धनुर्यस्य B_2, D_4. ४. D_1 drops शतधन्वा; धनुःशब्दान्ताद्बहुव्रीहेरनङादेशो वा स्यात् । शतधन्वा । शतधनुः । B_2; शतधनुः । शतधन्वा D_2. ५. °प्राप्तौ Bc_3, Dc_4, Dc_3.

जायाया निङ् ॥५।४।१३४॥

जायान्तस्य बहुव्रीहेर्निङादेशः स्यात् ॥

लोपो व्योर्वलि ॥६।१।६६॥

धातोरधातोश्च वकारयकारयोर्लोपः स्याद्वलि परे । पुंवद्भावः ।

युवतिर्जाया यस्य[1] युवजानिः[2] । लक्ष्मीजानिः ॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥५।४।१३५॥

एभ्यो गन्धस्येकारोन्तादेशः स्याद्बहुव्रीहौ ॥

जाया । ङित्त्वादादेशोयम् ।

लोपः । 'लिटि धातोः—' इत्यतो यद्धातोरिति प्रकृतं तद् 'धात्वादेः षः सः' इति पुनर्धातुग्रहणान्निवृत्तमित्यभिप्रेत्याह । **अधातो-श्चेति** । पूर्वं लोपनिर्देशो वेरपृक्तात् पूर्वो वलि लोप एव यथा स्यादिति । कण्डूयतेः क्विप् । कण्डूः । व्रश्चादीनामुपदेशसामर्थ्याद्वलि लोपो न । **पुंवद्भाव** इति । 'स्त्रियाः पुंवत्—' इति ।

गन्धस्य । षष्ठ्या निर्देशादिकार आदेशः । उद्गन्धिरित्यादि । उत्कृष्टो गन्धोस्य । पूतिर्गन्धोस्य । शोभनो गन्धोस्य । सुरभिर्गन्धोस्येति विग्रहाः । गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यम् । गन्धस्येत्वे विधेये तदेकान्तग्रहणं तस्य बहुव्रीह्यर्थस्यैकान्त एकदेशोवयवः स गृह्यते तेन तदेकान्तग्रहणं वाक्यं कार्यमित्यर्थः । अयं भावः ।

---

१. यस्य स B_2; यस्यासौ D_3, B_1. २. युवतिजानिः B_2, D_5.

उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः । आगन्तुकस्यैक-[1] वचनान्तस्य तु[2] वा । शोभनो गन्धो यस्य[3] सुगन्ध आपणः सुगन्धिर्वा ॥

अल्पाख्यायाम् ॥५।४।१३६॥

अल्पत्वकथने गन्धस्य प्राग्वत् ॥ सूपोल्पोस्मिन्[4] सूप-गन्धिभोजनम्[5] । घृतगन्धि[6] । वेति ग्रन्थान्तरे । सूपगन्धम् । घृतगन्धम् । अल्पपर्यायो[7] गन्धशब्दः ।

गन्धो द्विविधः । गुणो द्रव्यं च । तत्र यो गुणः सोन्यपदार्थ-स्यैकान्तः स्यात् । यथा सुगन्धिश्चन्दन इत्यत्र चन्दनद्रव्यस्य गुणात्मकत्वाद् गन्धो गुणोवयवः । यस्तु द्रव्यं गन्धः पुष्पादिः सोन्यपदार्थस्यैकान्तो न । यथा शोभना गन्धाः पुष्पादयो यस्य स सुगन्ध आपणिकः । तत्र गुणे गन्धे इत्वं यथा स्यात् द्रव्ये मा भूदिति । गन्धस्येत्व इत्यादि वार्तिकमारब्धं तच्च गन्धस्येत्येकवचनान्तनिर्देशादेव सिद्धम् । द्रव्यवचनस्य बहुवचनान्तनियमादित्याचार्यैरुपेक्षितम् । अथवा स्नातानुलिप्ते कथं भवितव्यमित्यादिना भाष्यग्रन्थेन योर्थ उक्तस्तं[10] तात्पर्यतो निष्पन्नमाह । **आगन्तुकस्येति** । आगन्तुकस्या-स्वाभाविकस्यैकवचनान्तस्य गुणवाचिन इत्वं वेत्यर्थः । तथोक्त-**मिन्दुमत्याम्** । 'आगन्तोरेकवचनाद्वा' इति ।

अल्प । **वेति ग्रन्थान्तरे** इति । तथेन्दुमत्यां विकल्प उदाहृतः । सूपोल्पो यस्मिन् सूपगन्धि भोजनम् । सूपगन्धं वेति ।

---

१. आगन्तुकगन्धस्यैक° B_1. २. Dropped D_1, D_3, B_2. ३. अस्य for यस्य B_1, D_2, D_6; यस्य स D_4 ; गन्धो यस्य स सुगन्धः सुगन्धिर्वा आपणः C. ४. °ल्पो यस्मिन् D_3. ५. After it—भोजने D_4. ६. भोजनम् after it in C. ७. अत्र before it in C ८. कुष्ठादिः Dc_4, Bc_3. ९. कुष्ठादयो Dc_4, Bc_3. १०. उक्तस्तात्प° Bc_1, Dc_1.

उपमानाच्च ॥५।४।१३७॥

उपमानात् परस्य [1]गन्धशब्दस्य प्राग्वत् ॥ [2]पद्मस्येव [3]गन्धो यस्य [4]स पद्मगन्धिः । [5]मतान्तरे विकल्पः ।[6]

पादस्य लोपोऽहस्त्यादिभ्यः ॥५।४।१३८॥

[7]हस्त्यादिवर्जादुपमानात् परस्य पादस्यान्तलोपः स्याद्बहुव्रीहौ । [8]व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादेः किम् । [9]हस्तिपादः । [10]कुशूलपादः ।

उप । मतान्तरे विकल्प इति । तथोक्तं मुग्धबोधे वोपमानादिति ।

पादस्य । अयं च लोपः समासान्तः स्थानिद्वारेण च लोपस्य समासान्तता । ननु लोपस्य समासान्तत्वे किं प्रयोजनम् । उच्यते । यदि समासान्तो न स्यात्तदा 'आदेः परस्य' इति परस्यादेः स्यात् । समासान्तत्वे तु अन्तशब्दो नियतदेशावयववाचीत्य[11]न्तस्यैव स्यात् । हस्तिन । [12]कटोल । कडोलक । गण्डोल । गण्डोलक । महिला । दासी । गणिका । जाले । [13]कुशूल ॥

---

१. गन्धस्य B_2, D_3 C, D_1; P drops it. २. D_1 drops पद्मस्येव गन्धो यस्य स. ३. गन्धोऽस्य पद्म° B_1, B_2, Bc_3, D_3. ४. Dropped D_4, D_2. ५. पक्षान्तरे D_5. ६. B_1 has पद्मगन्धम् after it ; B_2 पद्मगन्धः after it. ७. अहस्त्यादिभिः परस्य C. ८. C drops the Vigraha ; व्याघ्रस्येव पादाविव पादावस्य B_2. ९. हस्तिनः पादाविव पादौ यस्य हास्तिपादः । D_5. १०. कुसुलपादः P, D_5 ; कुशूल° D_3. ११. °त्यन्त्यस्यैव Bc_1, Dc_4. १२. कडोल Bc_3, Dc_3, Dc_4. १३. कुसूला Bc_1, Dc_3: कुसूल Dc_4 कुशूली। जालम् Bc_3.

कुम्भपदीषु[1] च ॥५।४।१३९॥

कुम्भपद्यादिषु पादस्या[2]न्तलोपो ङीप् च निपात्यते स्त्रियाम् । पादःपत् । [3]कुम्भपदी । शतपदी । स्त्रियां किम् । कुम्भपादः ।

संख्यासुपूर्वस्य ॥५।४।१४०॥

[4]संख्यापूर्वस्य सुपूर्वस्य च पादस्यान्तलोपः स्यात् ॥ द्विपात् । सुपात् ॥

कुम्भ । कुम्भपदीप्रभृतयः कृतपादलोपाः समुदायाः पठ्यन्ते । तत्रैवं सूत्रं योज्यम् । पादस्य लोपः स्यात् कुम्भपद्यादिविषये । यथा कुम्भपद्यादयः सिध्यन्तीति[5] । समुदायपाठस्य च प्रयोजनं विषयनियमः । स्त्रियामेव ङीष्येवेत्ये[6]तच्चेतसि कृत्वाह । कुम्भपद्यादिष्विति । कुम्भपदी । एकपदी । शतपदी । सू[7]त्रपदी । शुचिपदी । शितिपदी । गोधापदी । द्विपदी । दासीपदी । सुपदी । निष्पदी । आर्द्रपदी । कुणिपदी । [8]द्रोणपदी । द्रुपदी । तृणपदी । सूकरपदी । अष्टापदी । स्तेनपदी[9] । य[10]दिहोपमानपूर्वं संख्यापूर्वं च पठ्यते तस्य लोपे सिद्धे ङीबर्थं वचनम् । 'पादोन्यतरस्याम्' इति विकल्पो न ।

संख्या । अनुपमानार्थं वचनम् ।

---

१. कुम्भपदीषु B_1. २. D_1, Bc_3 drop अन्त. ३. कुम्भपदीत्यादि B_1. ४. एतत्पूर्वस्य B_2. ५. इति dropped Dc_2. ६. एतत् dropped Bc_1. ७. सूतपदी Dc_2; सुतीपदी Bc_1, Dc_1, Dc_4, Bc_3. ८. Before it—सप्तपदी Dc_1; कूपपदी Bc_1, Dc_4. ९. Dropped Dc_2. १०. यद्येहो° Dc_4, Bc_1; यत्त्विह Bc_3.

वयसि दन्तस्य दतृ ॥५।४।१०१॥

संख्यासुपूर्वस्य दन्तस्य दतृआदेशः स्याद्वयसि द्योत्ये बहुव्रीहौ। ऋः इत्[1]। द्विदन्[2]। द्विदन्तौ[3]। चतुर्दन्[4]। षष उत्वम्। इति उत्वम्[5]। ष्टुत्वम्। षोडन्[6]। सुदन्। सुदती। वयसि किम्। द्विदन्तः करी। सुदन्तो लाटः।

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥५।४।१४५॥

एभ्यो दन्तस्य दतृ वा[7]॥ कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। शुद्धदन्[8]। शुद्धदन्तः। चकारात्। मूषकदन्। मूषकदन्तः। अहिदन्। अहिदन्तः। इत्यादि।

वयसि सुदन्निति। 'उगिदचाम्—' इति नुम्। ऋकारस्योगित्कार्यार्थत्वात्। **षोडन्निति।** षट् दन्ता अस्य। **सुदतीति।** उगित्त्वात् ङीप्। स्पष्टत्वात्त्यक्तं सूत्रद्वयम्।[9] 'स्त्रियां संज्ञायाम्' ॥५।४।१४३॥ दन्तस्य दतृ स्यात् स्त्रियां संज्ञायां विषये। अयोदती। फालदती[10]। संज्ञायां किम्। समदन्ती। 'विभाषा श्यावारोकाभ्याम्' ॥५।४।१४४॥ आभ्यां दन्तस्य दतृ वा बहुव्रीहौ। श्यावदन्। श्यावदन्तः। अरोकदन्। अरोकदन्तः। रोचनं रोको दीप्तिः। नास्ति रोकोऽस्यारोकः। संज्ञायामित्येव। श्यावदन्तः। अरोकदन्तः।

अग्रान्त। कुड्मलाग्रदन्निति। कुड्मलाग्रमिव दन्तौ यस्य। **चकारादिति।** अनुक्तसमुच्चयार्थादिति भावः। आदिना खरदन्। गर्दभदन्।

---

१. ऋत इत् D_1, D_5, B_1, B_2. २. Before it—एकदन् B_1, D_4. ३. Dropped Bc_3. ४. After it—चतुर्दन्तौ Bc_3. ५. Before it—दस्य डः B_2. ६. षड् दन्ता यस्य षोडन् P, C, B_1. ७. B, D_4 have स्यात् after it. ८. शुद्धदन्। शुद्धदन्तः dropped D_3. ९. After it—व्याख्यायते Dc_3. १०. Dropped Bc_3.

ककुदस्यावस्थायां लोपः ॥५।४।१४६॥

ककुदस्यान्तलोपः स्यादवस्थायां द्योत्यायाम् ॥ अजातककुत् ।[1] [2]पूर्णककुत् ॥[3]

उद्विभ्यां काकुदस्य ॥५।४।१४८॥

आभ्यां परस्य काकुदस्यान्[4]तलोपः स्यात् ॥ उत्काकुत् । विकाकुत् । काकुदं तालु ॥

ककुदस्य । कालाहारादिकृता वयःप्रभृतयो वस्तुधर्मा अवस्थेत्युच्यन्ते । अजातककुदिति । बालो वत्स उच्यते । पूर्णककुदिति । मध्यमवयाः । अवस्थायां किम् । श्वेतककुदः । स्पष्टत्वात् त्यक्तं व्याख्यायते । 'त्रिककुत् पर्वते' ॥५।४।१४७॥ निपातोयं गिरौ । त्रीणि ककुदाकाराणि शिखराणि यस्य स पर्वतविशेष उच्यते त्रिककुदिति ।

उद्विभ्याम् । समासान्तत्वात् 'आदेः परस्य' इति न[5] संचरति । स्पष्टत्वात् त्यक्तं[6] 'पूर्णाद्विभाषा' ॥५।४।१४९॥ पूर्णकाकुद् । पूर्णकाकुदः ।

---

१. After it—बाल इत्यर्थः । उत्पन्नककुत् । मध्य इत्यर्थः । पूर्णककुत् । वृद्ध इत्यर्थः । D_4; अजातं ककुद यस्य सोजात° D_6. २. पूर्णककुत् dropped D_3. ३. After it—अवस्थायां किम् । श्वेतककुदः । D_6. ४. अन्त dropped B_1, D_1, D_3. ५. नेह संभवति । Dc_2. ६. After it—सूत्रं व्याख्यायते Dc_3.

सुहृद्दुर्हृदौ मित्रामित्रयोः ।५।४।१५०॥

सुदुर्भ्यां[६] हृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रम् । दुर्हृदमित्रः । अन्यत्र । सुहृदयः । दुर्हृदयः ।

उरःप्रभृतिभ्यः कप् ॥५।४।१५१॥

एभ्यः कप् स्याद्बहुव्रीहौ ॥ प इत् । तद्धितत्वान्न ककारे[२] इत् । व्यूढोरस्कः । प्रियसर्पिष्कः ॥[३]

इनः स्त्रियाम् ॥५।४।१५२॥

इन्नन्तात्[४] कप् स्यात् [५]स्त्रियाम् ॥ बहुदण्डिका । बहुवाग्मिका[६] । 'नद्यृतश्च' इति कप् । 'केणः' इति ह्रस्वे प्राप्ते ।

सुहृत् । सुहृदित्यादि । शोभनं हृदयमस्य सुहृत् । दुष्टं हृदयमस्य दुर्हृत् । हृच्छब्देनैवैतत् सिद्धं तथापि सुहृदयो दुर्हृदय इति मित्रामित्रयोर्मा भूदिति वचनम् ।

उरः । व्यूढोरस्क इति । व्यूढमुरो यस्य । प्रियसर्पिष्क इति । 'इणः षः—' इति षः । उरस् । सर्पिस् । उपानह् । पुमान् । अनड्वान् । पयः । नौः । लक्ष्मीः । पुमान्प्रभृतीनामेकवचनान्तानां पाठो द्विवचनबहुवचनान्तेभ्यो मा भूदिति । तत्र 'शेषाद्विभाषा' इति वा कप् । दधि । मधु । शालि । अर्थान्नञः । नास्त्यर्थोऽस्यानर्थकः ।

इनः । स्त्रियां किम् । बहुदण्डी राजा । अत्र 'शेषाद्विभाषा' इति भवति ।

---

१. Before it—पूर्णाद्विभाषा ॥५।४।१४९॥ अस्मात् काकुदस्यान्तलोपो वा स्याद्बहुव्रीहौ । पूर्णं काकुदमस्य पूर्णकाकुदः । पूर्णकाकुत् । B_2, D_4; P, & C and B_1 follow B_2, D_4, but drop the Vṛitti. २. ककारलोपः D_3. ३. After this—उरः सर्पिर्दधिमधूपानद्भ्यः । Dc_1, Bc_3. ४. After it—बहुव्रीहेः D_3. ५. Before it—बहुव्रीहौ C. ६ After it—सभा D_4.

न कपि ॥७।४।१४॥

केपि[1] अणो ह्रस्वो न स्यात्[2] ॥ बहुलक्ष्मीकः ॥

शेषाद्विभाषा ॥५।४।१५४॥

प्रागनुक्तसमासान्ताद्बहुव्रीहेः[3] कब्वा[4] स्यात्[5] । बहुदण्डी[6] । बहुदण्डिकः ।

आपोन्यतरस्याम् ॥७।४।१५॥

कप्याबन्तस्य ह्रस्वो वा स्यात् ॥ बहुमालाकः । बहुमालकः। बहुमालः । अनाबन्तस्यापि ह्रस्वो वेति केचित् । सुसोमपाकः[7] । सुसोमपकः ॥

शेषात् । अत्र यदि कबपेक्षः शेषः स्यात् अनृचो व्याघ्रपात् सुगन्धिरित्यत्रापि स्यात् । न ह्यतः कप् विहित इति कबपेक्षया शेषे दोषं दृष्ट्वा समासान्तापेक्षया शेषे इति चेतसि कुर्वन्नाह । **प्रागनुक्तसमासान्तादिति** । समासान्तापेक्षया शेषे अनृक्कं साम बह्वृक्कं सूक्तमिति कथमिति चेदुच्यते । अध्येतर्येवा- प्रत्ययस्य विधानात् तत् सिध्यति । तथोक्तम् । अनृचबह्वृचा- वध्येतर्येवेति । शेषादिति किम् । यतो[8] ये प्रतिपदं समासान्ता बहुव्रीहेर्विधीयन्ते ते बाधकाः स्युः । एवं तर्हि शेषाधिकार- विहिते बहुव्रीहौ कप् स्यादिति शेषग्रहः । तेनोत्तरपूर्वेत्यादौ न । स्पष्टत्वात् त्यक्तं[9] 'न संज्ञायाम्' ॥५।४।१५५॥ पूर्वेण प्राप्तः कप् संज्ञायां निषिध्यते । विश्वे देवा अस्य विश्वदेवः[10] ।

आपः । **अनाबन्तस्यापीति** । तथा[11] च **मुग्धबोधे** उक्तम् । के वस्वो हेतु वेति ।

---

१. कापि परे C, B_2. २. Dropped C. ३. प्रागलुस° D_5. ४. कप् स्याद्वा P. ५. स्यात् dropped D_5, B_1. ६. बहुदण्डिकः । बहुदण्डी P, D_3. ७. सुसोमपकः । सुसोमपाकः । Bc_3. ८. प्रियपश्वातो ये Bc_1, Dc_4, Dc_3. ९. After it—सूत्रं व्याख्यायते । Dc_3. १०. विश्वेदेवः Bc_3. ११. तथोक्तं मुग्धबोधे Dc_2.

ईयसश्च[1] ॥५।४।१५६॥

ईयसन्ताद्बहुव्रीहेः कप्[2] न स्यात् ॥ बहवः श्रेयांसोस्य[3] बहुश्रेयान् । बह्व्यः श्रेयस्योस्य[4] बहुश्रेयसी पुरुषः ॥

वन्दिते भ्रातुः ॥५।४।१५७॥

भ्रातन्तान्न कप्[5] पूजायाम् ॥ शोभनो भ्रातास्य[6] सुभ्राता । अन्यत्र । मूर्खभ्रातृकः ।

ईयसः । कबत्रानुवर्तते । न 'शेषात्' इति । तेन सर्वा कपः प्राप्तिरनेन निषिध्यते । **बहुश्रेयानिति** । 'शेषाद्विभाषा' इति कप् प्राप्तः । **बहुश्रेयसी पुरुष** इति । 'नद्यृतश्च' इति कप् प्राप्तः । 'ईयसो बहुव्रीहेर्न' इति ह्रस्वनिषेधः[7] ।

वन्दि । इह वन्दितः स्तुतः पूजित उच्यते इत्यभिप्रेत्याह । **पूजायामिति** । 'नद्यृतश्च' इति प्राप्तः कप् निषिध्यते । स्पष्टत्वात् त्यक्तं सूत्रद्वयम्[8] । 'नाडीतन्त्र्योः स्वाङ्गे' ॥५।४।१५९॥ स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्ताद्बहुव्रीहेः कप् न । बह्व्यो नाड्यो यस्मिन् बहुनाडिर्देहः[9] । बहुतन्त्री ग्रीवा । धमनीवचनस्तन्त्रीशब्दः । स्वाङ्गे किम् । बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा । 'निष्प्रवाणिश्च' ॥५।४।१६०॥ नदीलक्षणस्य कपो निषेधः । प्रकर्षेण ऊयते अस्यां प्रवाणी तन्तुवायशलाका । निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः । तुर्यादिभ्योचिरोपहृत इत्यर्थः । एवं बहुव्रीह्यधिकारेण विहितान् समासान्तान् परिसमाप्य 'बहुव्रीहौ' इति विधीयमानं प्राङ् निपातमाह ।

---

१. Before this Sûtra—न संज्ञायाम् ॥५।४।१५५॥ संज्ञायां बहुव्रीहेर्न कप् । विश्वेदेवा अस्य स विश्वदेवः D_3, D_4, D_5, B_1, B_2 (यस्य D_5; After विश्वदेवः B_2 has विश्वेदेवास्त्रयादेश). २. न कप् D_5. ३. श्रेयांसोस्येति C, Bc_3; श्रेयांसो यस्य B_1, D_1, D_3, D_4, D_5. ४. °स्येति C; यस्य for अस्य D_1. ५. P, B_2 have स्यात् after it. ६. भ्राता यस्य C. ७. °स्वनिषेधः । Dc_3. ८. °द्वयमाह । Dc_3. ९. °नाडी देहः । Dc_4, Dc_3.

सर्वनामसंख्ययोः प्राङ्निपातो बहुव्रीहौ वाच्यः[1]* ॥ सर्वश्वेतः । [2]द्वि[3]शुक्लः ॥ मिथोनयोः समासे संख्या पूर्वं निपतेत् । द्व्य[4]न्यः ।

अल्पीयसी पूर्वम् ॥ द्वित्राः ।[5]

वा प्रियस्य पूर्वत्वम् ।* गु[6]डप्रियः । प्रियगुडः ॥

ग[7]ड्वादेः परा सप्तमी इ[8]ष्टा* ॥ गड्डुः[9] कण्ठेस्य गड्डुकण्ठः । प्रायिकं चैतत् । [10]वहेगड्डुः । अत्र सप्तम्या अलुक् ।[11]

सर्वनामसंख्ययोरित्यादि । यत्र गुणवचनेन समासः सोऽस्य विषयः । यत्र तु[12] द्रव्यवाचितौ[13] तत्र सर्वनामसंख्ययोर्विशेषणत्वादेव प्राङ् निपातः सिद्धः । **मिथोनयोरिति** । सर्वनामसंख्ययोः परस्परं समासे इत्यर्थः ।

अल्पीयसी पूर्वमिति । संख्यायाः संख्यया समासे अल्पीयसी पूर्वं निपतेदिति वाच्यमित्यर्थः । **द्वित्रा इति** । द्वौ वा त्रयो वा ।

वा प्रियस्येति । प्रियशब्दस्येत्यर्थः । **प्रायिकमिति** ।

गड्वादेः परा सप्तमीष्टेति प्रायिकम् ।

---

१. वक्तव्यः P. २. त्रिशुक्लः B_1. ३, °शुष्कः Bc_3. ४. द्व्यन्यकः C. ५. After it—पञ्चषाः Bc_3, D_4. ६. प्रियगुडः । गुडप्रियः D_3. ७. गड्डुकादेः D_5. ८. वाच्या D_2, D_3, P, C. ९. गड्डुः कण्ठेस्य dropped D_1, B_1, P, C. १०. वक्रेगड्डुः P; स्कन्धेगड्डुः C; कण्ठेगड्डुः before it D_4; कण्ठेगड्डुः for it D_5. ११. After it—नेन्द्वादिभ्यः । इन्दुमौलिः । इन्दुशेखरः । एवं शङ्खदर्भपवित्रेभ्यः पाणिः । शङ्खपाणिः । इत्यादि P; B_1, B_2. (B_2 has after नेन्द्वादिभ्यः—इन्द्वादिभ्यः परस्याः सप्तम्याः पूर्वनिपातो न स्यात् ।). १२. Dropped Dc_2, Dc_3. १३. °वाचिना Dc_4.

निष्ठा ॥२।२।३६॥

निष्ठान्तं प्राक् प्रयोज्यं बहुव्रीहौ ॥ विशेषणस्य[1] विवक्षापूर्वत्वादेतद्वचनम्[2] ।[3] कृतकटः[4] ।

जातिकालसुखादिभ्यः परा निष्ठा वाच्या* ॥ सारङ्गजग्धी[5] । मांसजाता[6] । सुखजाता[7] ।

प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ[8] * ॥ अस्युद्यतः । दण्डपाणिः[9] । उद्यतासिरित्यादि प्रयोगवशात् ज्ञेयम्[10] ॥

निष्ठा । ननु च निष्ठान्तस्य विशेषणत्वादेव 'सप्तमी विशेषणे—' इति पूर्वनिपाते सिद्धे व्यर्थमेतद्वचनमित्याशङ्क्याह । विशेषणस्येति । कृतकट इति । कृतः कटो येन ।

अत्र 'जातिकाल—' इति क्तान्तस्य परत्वं न । यत उक्तं कथं कृतकट इति प्राप्तस्य बाधा व्याख्येयेति । सारङ्गजग्धीति । जग्धः सारङ्गो यया । सारङ्गशब्दो जातिवाची । 'अस्वाङ्गपूर्वपदाद्वा' इति ङीष् । सुखादिस्तद्धिते वक्ष्यते ।

प्रहरणार्थेभ्य इति । प्रहरणमर्थो येषां ते तथोक्ताः । अस्युद्यत इति । उद्यतोऽसिर्येन । उद्यतासिरित्यादीति । प्राप्तस्य बाधाव्याख्यानात्[11] ।

---

१. विशेषणत्वस्य D_1, Dc_1. २. पूर्वकत्वा° D_4, Dc_1. ३. B_1 has कृतम् after it. ४. कृतपटः । D_5. ५. जग्धः सारङ्गो यया सा D_5. ६. C has सहजाता before it. B_2 has शुक्रजग्धी before it; Dc_1 has सक्तुजग्धा before it, सक्तुजग्धा । सारङ्गजग्धा । Bc_3. ७. Dropped D_3. ८. After it—भवत इति केचित् B_2. ९. खड्गपाणिः B_2. १०. विज्ञेयम् D_3. ११. बाधार्थः Bc_1.

वाहिताग्न्यादिषु ॥२।२।३७॥

एषु निष्ठा वा पूर्वं स्यात् ॥ आहिताग्निः । अग्न्याहितः । [2]जातपुत्रः । पुत्रजातः । इत्यादि । आकृतिगणोयम् ॥

समस्यमानपदार्थौ यत्रान्यपदार्थस्यैकदेशः स्यात्[4] स तद्गुणसंविज्ञानो बहुव्रीहिः ।

वाहिता । 'निष्ठा' इति पूर्वनिपाते विकल्प उच्यते । जातदन्तः । जातश्मश्रुः । तैलपीतः । घृतपीतः । मद्यपीतः । ऊढभार्यः । गतार्थः । **आकृतिगणोयमिति** । आकृत्या गणः आकृतिगणः । तेन । गड्डुकण्ठप्रभृतय इहैव द्रष्टव्याः । मत्वर्थे बहुव्रीहिः । स च द्वेधा । मत्वर्थस्य संबन्धस्योभयविधत्वात् । तथा हि कश्चित् संयोगसमवायनिमित्तः । कश्चित् स्वस्वामिसंबन्धादिनिमित्तः । तत्र पूर्वो बहुव्रीहिस्तद्गुणसंविज्ञान उच्यते । उत्तरस्त्वतद्गुणसंविज्ञानः । तस्यान्यपदार्थस्य गुणो वर्तिपदार्थः सोपि कार्ये संविज्ञायते यस्मिन् बहुव्रीहौ स तद्गुणसंविज्ञान इत्यभिप्रेत्याह ।

समस्यमानेति । समस्यमानानि यानि पदानि तेषामर्थौ यत्र बहुव्रीहावन्यपदार्थस्यैकदेशोवयवः सन् कार्यी स्यात् स तद्गुणसंविज्ञानसंज्ञको बहुव्रीहिः स्यादित्यर्थः ।

---

१. Before it—आहिताग्निर्येन B_2. २. जातपुत्रः । इत्यादि P. ३. Dropped D_6. ४. Dropped D_1, D_2, D_4, B_2, ५. स्वस्वामिनिमित्तः Bc_3. ६. वृत्तिपदार्थः Dc_2, Dc_1, Bc_3. ७. कार्यी विज्ञा° Bc_3.

लम्बकर्णः[1] ।

इति बहुव्रीहिः[2] ॥

लम्बकर्ण इति । लम्बौ कर्णौ यस्येति । यत्र तु समस्यमानपदार्थोऽन्यपदार्थानवयवभूतः कार्यी न सोऽतद्गुणसंविज्ञानो बहुव्रीहिः । यथा चित्रा गावो यस्य स चित्रगुरित्यादि ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य[3] श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्याने[4]ऽस्मिन् प्रसादे विशद[5] इह बहुव्रीहिसंज्ञः समासः ।

१. लम्बौ कर्णौ यस्य लम्बकर्णः D_4. २. इति बहुव्रीहिसमासः D_4. ३. Dropped Bc_1, Dc_3. ४. व्याख्यानेगात् प्रसादे Bc_1, Dc_4, Dc_3. ५. विशदमिह Dc_4.

अथ द्वन्द्वसमासः

चार्थे द्वन्द्वः ॥२।२।२९॥

अनेकं सुबन्तं[1] चार्थे[2] समस्यते स द्वन्द्वसंज्ञः[3] ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्रेश्वरं गुरुं च भजस्वेति [4]प्रत्येकमेकक्रिया[5]संबन्धः समुच्चयः । बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबन्धोन्वाचयः । अन्योन्यापेक्षयैकक्रियासंबन्ध

अथ द्वन्द्वसमास उच्यते । स च द्वेधा । इतरेतरयोगार्थः समाहारार्थश्च । तमुभयं वक्तुमाह ।

चार्थे । तत्रेति । तत्र तेषु चार्थेषु मध्ये ईश्वरं गुरुं च भजस्वेति प्रकाराणां द्विप्रभृतीनामनेकेषां साधनानामनियतक्रमयौगपद्यानां तुल्यबलानां प्रत्येकमेकया भजस्वेत्यादिकया क्रियया संबन्धो यः स समुच्चयः । आत्मरूपभेदेन चीयमानता हि समुच्चयः । स च संबन्धेनैव भवतीति संबन्धः समुच्चय इत्युक्तम् । अनेकेषामनियतक्रमयौगपद्यानां तुल्यबलानामेकक्रियां द्रव्यं गुणं वा प्रति आत्मरूपभेदेनानेकत्वं समुच्चय इति यावत् । यदा त्वेकस्य प्राधान्यात् तदनुरोधेनेतरदन्वाचीयते तदान्वाचय इत्यभिप्रेत्याह । बटो इत्यादि । अत्र भिक्षाटनं मुख्यं गवानयनं तु तदनुरोधेन पश्चादन्वाचीयते अत एवोक्तं क्रमेणेति । इतरेतरयोगमाह । अन्योन्येत्यादि । परस्परापेक्षाणां साधनानामवयवभेदानुगत एकक्रियासंबन्ध इतरेतरयोग इति यावत् । यथा हरिहरौ कुरुत इत्यत्रैककार्ये उभावपि परस्पर-

---

१. सुबन्तं समर्थं B_2. २. वर्तमानम् after it in B_1, Dc_1, Bc_3. ३. स्यात् after it in P. ४. प्रत्येकक्रियाभिसंबन्धः P. ५. क्रियाभिसंबन्धः D_5, D_1, B_2. ६. °श्चेति Dc_4, Dc_3. ७. °रोधनं Bc_3. ८. एक dropped Dc_1, Bc_1.

इतरेतरयोगः । संहतिः समाहारः । तत्र समुच्चयान्वाचययोर्न समासोऽस्त्यसामर्थ्यात् ।

द्वन्द्वे घि ॥२।२।३२॥

द्वन्द्वे घिसंज्ञं पूर्वं स्यात् ॥ हरिश्च हरश्च हरिहरौ[2] ।

सापेक्षौ तथा हि तदेकस्याप्यभावे[3] न क्रियते । अवयवप्रधानश्चायमिति द्वित्वात् द्विवचनम् । इतरेतरयोग एव तिरोहितावयवभेदः संहतिप्रधानः समाहार इत्यभिप्रेत्याह । **संहतिरिति** । यथा छत्त्रोपानहमिति । अत्रापि कस्यांचित् क्रियायां छत्त्रादेः परस्परसापेक्षत्वं संभवति । संहतिप्रधानत्वाच्चैकवचनम् । यदि समुच्चयान्वाचयावपि चार्थौ तयोरपि समासः स्यादत आह । **तत्रेत्यादि** । तत्र हेतु**रसामर्थ्यादिति** । समुच्चये तावत् परस्परानभिसंबन्धा एवेश्वरादयो भजनादिभिः संबध्यमानाः समुच्चीयन्ते इत्यसामर्थ्यमतो न समासः । अन्वाचयेऽप्येकं सापेक्षं नेतरत् । यथा पूर्वोक्तोदाहरणे । तत्र हि गवानयनस्य भिक्षाटनेपेक्षा न भिक्षाटनस्य गवानयने । विनापि तेन तदनुष्ठानात् । स हि यदि गां पश्यति तामानयति[4] । न चेद् भिक्षामेवाटतीति एकं व्यपेक्षारहितमित्यसामर्थ्यात् न स्यात् समासः ।

द्वन्द्वे । उपसर्जनमित्यन्वर्थत्वादप्रधानस्य[5] संज्ञेत्युक्तम् । द्वन्द्वे च सर्वपदानां प्राधान्यादुपसर्जनाभावादनियते प्राङ्निपाते प्राप्तेस्यारम्भः । हरिश्चेत्यादिविग्रहः । हरिहराविति समासः । यावतां पदानां द्वन्द्वस्तावतां यदि युगपदन्योन्यार्थाभिधानं स्यात् तर्हि द्वन्द्वः स्यात् । अत्र द्विवचनबहुवचनान्यथानुपपत्तिः प्रमाणमित्यादि **महाभाष्यादेर्ज्ञेयम्** । इतरेतरयोगस्य चार्थस्य समासेनैवोक्तत्वात् चो वृत्तौ न प्रयुज्यते ।

---

१. ध्यन्तं D_4. २. इतरेतरयोगप्रधानत्वाद् द्विवचनम् । D_4 ; After it—उक्तार्थानामप्रयोगः D_5. ३. °भावो Dc_3. ४. तदा तामा° Dc_1. ५. °स्प्राधान्यस्य Bc_1, Dc_3.

अनेकप्राप्तावेकस्य नियमोनियमः शेषे । हरिगुरुहराः । हरिहरगुरवः ।

अजाद्यदन्तम् २।२।३३॥

अजादि यददन्तं तद् द्वन्द्वे पूर्वं स्यात् ॥ ईशकृष्णौ । बहुष्वनियमः । अश्वरथेन्द्राः । इन्द्राश्वरथाः ।

घ्यन्ताजाद्यदन्तयोर्मिथः समासे घ्यन्तं परम् । इन्द्राग्नी । इन्द्रवायू । तपरः किम् । [1]अश्वावृषौ । वृषाश्वे वा ।

अल्पाच्तरम् ॥२।२।३४॥

[2]अल्पाच्कं द्वन्द्वे पूर्वं स्यात् ॥ शिवकेशवौ । बहुष्वनियमः । शङ्खदुन्दुभिवीणाः । वीणाशङ्खदुन्दुभयः ।

यत्र द्वयोर्बहूनां वा घ्यन्तता स्यात् तदा कथं स्यादित्याशङ्क्याह । **अनेकप्राप्ताविति** । एष चार्थो जातिपदार्थाश्रयणाल्लब्धः । जातौ हि पदार्थे एकं लक्षणं सकृत् प्रवर्तते तेनैकस्यैव प्राङ् निपाते न जातिः संस्कृतेति शेषाणामानियमः । यथोदाहृतम् । एवमुत्तरत्राप्येकस्य नियमः शेषाणामनियमो ज्ञेयः । द्वन्द्वे किम् । देवदत्तगुरुः ।

अजाद्य । घ्यन्ताजाद्यन्तयोरिति । घ्यन्तस्याजाद्यन्तस्य च परस्परं समासविप्रतिषेधात् अजाद्यदन्तं पूर्वं स्यात् घ्यन्तं तु परं स्यादित्यर्थः । 'द्वन्द्वे घि' इत्यस्यावकाशः हरिहरौ । 'अजाद्यदन्तम्' इत्यस्यावकाशः ईशकृष्णौ । इन्द्राग्नीत्यत्रोभयं प्राप्नोति । 'अजाद्यदन्तम्' इत्येतत् स्याद्विप्रतिषेधेन ।

अल्पाच् । अत एव निपातनात् स्वार्थे तरप् । कुत्वाभावश्चुत्वाभावश्च । यदि प्रकर्षे तरप् स्यात्तदा द्वयोरेवाल्पाच्कस्य स्यात् । प्लक्षन्यग्रोधाविति । बहुषु न स्यात् । धवखदिरपलाशा इति । एतच्चेतसि कृत्वाह । **अल्पाच्कमिति** ।

---

१. अश्वावृक्षौ । वृक्षाश्वे वा : D_5. २. अत्यल्पाच्कं B_1, D_1; अल्पाच्तरं B_2, अत्यल्पाच् D_5.

ऋतुभानां समाक्षराणा[1]मानुपूर्व्येण पूर्वं[2] निपातः*। हेमन्तशिशिरवसन्ताः। अश्विनीभरणीकृत्तिकारोहिण्यः[3]। समाक्षराणा[4] किम्। ग्रीष्मवसन्तौ।

लघ्वक्षरं पूर्वम्*॥ कुशकाशम्।

अभ्यर्हितं च*॥ तापस[5]पर्वतौ।

वर्णानामानुपूर्व्येण*॥ ब्राह्मणक्षत्रियविट्शूद्राः।

भ्रातुर्ज्यायसः*॥ युधिष्ठिरार्जुनौ।

संख्याया अल्पीयस्याः*॥[6] द्वौ च दश च द्वादश।

ऋतुभानामिति। ऋतवो वसन्तादयः भान्यश्विन्यादीनि। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं नक्षत्राणामुदयकृतम्।

लघ्वक्षरमिति। लघून्यक्षराणि यस्मिन् पदे तत् पूर्वं स्यादित्यर्थः।

वर्णानामिति। एषामानुपूर्व्यं जन्मकृतं श्रुतौ पठ्यते। मुखतो ब्राह्मणमसृजत् बाहुभ्यां राजन्यमूरुभ्यां वैश्यं पद्भ्यां शूद्रमिति।

---

१. समानाक्षराणा° B_1, D_4. २. पूर्वनिपातः D_1, Bc_3, D_4. ३. कृत्तिकारोहिण्यौ P, D_5, C; कृत्तिकारोहिण्यः D_1, Dc_1, Bc_3; भरणीकृत्तिकारोहिण्यः B_2, D_2, D_4. ४. समानाक्षराणां D_1, D_4. ५. नारदपर्वतौ D_2, Dc_1, Bc_3. ६. पूर्वनिपातः। द्वौ च B_2.

राजदन्तादिषु परम् ॥२।२।३१॥

एषु पूर्वप्रयोगार्हं परं स्यात् ॥ दन्तानां राजा राजदन्तः । वनस्याग्रे अग्रेवणम् । नि[1]पातादलुक् । शब्दार्थौ । धर्मार्थौ । कामार्थौ ॥

धर्मादिष्वनियम इष्यते* । अर्थशब्दौ[2] । अर्थधर्मौ[3] । अर्थकामौ । इत्यादि[4] । जायाया जंभावदंभावौ वा निपात्यौ[5] [6]पत्यौ । जम्पती । दम्पती । जायापती ।[7]

राज । राजदन्तः । अग्रेवणम् । लिप्तवासितम् । नग्नमुषितम् । सिक्तसंमृष्टम् । मृष्टलुञ्चितम् । अवक्लिन्नपक्वम् । अर्पितोप्तम् । उप्तगाढम् । उलूखलमुसलम् तण्डुलकिण्वम् । दृषदुपलम् । आरड्वायनिबान्धकम् । चित्ररथबाह्लीकम् । अवन्त्यश्मकम् । शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अक्षिभ्रुवम् । दारगवम् । शब्दार्थौ । धर्मार्थौ । कामार्थौ । वैकारिमतम् । गाजव्याजम् । गोपालिधानपूलासम् । पूलासकुरण्टकम् । स्थूलपूलासम् । उशीरबीजम् । शिञ्जास्थम् । चित्रास्वाती । जम्पती । दम्पती ।

---

१. निपातना° C, D_4. २. P drops अर्थशब्दौ. ३. अर्थकामौ । अर्थधर्मौ C. ४. C, B_2 have after it—गुणवृद्धी । वृद्धिगुणौ ।. ५. निपात्यौ वा C; च for वा D_2. ६. D_1, D_2 drop it; पतिशब्दे परे B_2. ७. After this D_4 has—

'अनुवादे चरणानाम्' ॥ २।४।३॥ चरणः शाखा । चरणानां द्वन्द्व एकवदनुवादे गम्यमाने । कठकालापम् ॥

'अध्वर्युक्रतुरनपुंसकम् ॥' २।४।४ ॥ अध्वर्युवेदे यस्य विधानं सोऽध्वर्युक्रतुः । तद् द्वन्द्व एकवत् स्यात् । अर्काश्वमेधम् । अध्वर्युक्रतुरिति किम् । इषुवज्रौ । अनपुंसकमिति किम् । राजसूयवाजपेये ॥

'अध्ययनतो विप्रकृष्टाख्यानाम् ॥' २।४।५॥ अध्ययनेनासन्नसंज्ञानां द्वन्द्व एकवत् । पदक्रमकम् । अध्ययनत इति किम् । पितापुत्रौ । आसन्नाख्यानामिति किम् । याज्ञिकवैयाकरणौ ॥

८. सृष्टलवितम् Bc_1, Dc_4; सृष्टवलितम् Dc_1, Bc_3. ९. °मुशलम् Dc_4, Dc_3. १०. °मूलासम् Bc_1, Bc_3, Dc_1.

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥२।४।२॥

एषां द्वन्द्व एकवत् स्यात् ॥ प्राण्यङ्गे । दन्तोष्ठम् । तूर्याङ्गे । मार्दङ्गिकपाणविकम् । सेनाङ्गे । रथिकाश्वारोहम् ।

भार्यापती । पुत्रपती । केशश्मश्रु । शिरोबिजु । सर्पिर्मधुनी । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ । स्पष्टत्वात् त्यक्तं प्रसङ्गाद् व्याख्यायते । 'कडाराः कर्मधारये' ॥२।१।३८॥ गुणशब्दानां विशेषणत्वात् प्राङ्निपाते प्राप्ते विकल्पार्थ आरम्भः । कडारजैमिनिः । जैमिनिकडारः । कडार । गडुल । काण । खञ्ज । कुण्ठ । खोड । खलति । गौर । वृद्ध । भिक्षुक । पिङ्गल । तनु । बधिर । मठर । कुब्ज । बर्बर । कर्मधारये किम् । कडारपुरुषको ग्रामः ।

द्वन्द्वः । अत्राङ्गशब्दस्य प्रत्येकं परिसमाप्त्या त्रीणि वाक्यानि संपद्यन्त इत्यभिप्रेत्याह । **प्राण्यङ्ग** इत्यादि । ततश्च व्यतिकरे न । मार्दङ्गिकाश्वारोहौ । दन्तोष्ठमिति । अत्र यदि प्राण्यङ्गानि प्राणिग्रहणेन गृह्यन्ते ततो 'जातिरप्राणिनाम्' इति निषेधे प्राप्ते वचनम् । अथ न गृह्यन्ते व्यतिकरनिरासार्थम् । **मार्दङ्गिकपाणविकमित्यादि** । अत्राप्राणित्वान्निषेधे प्राप्ते । हस्त्यश्वादिषु परत्वात् पशुद्वन्द्वविभाषैव । द्वन्द्वप्रकरणस्य प्रयोजनमाह ।

---

१. दन्तौष्ठम् B1. २. केशश्मश्रू Bc1, Dc3, Dc4. ३. °विज्ञम् Bc1, Bc3. Dc1, Dc3. ४. गडल Bc1, Dc1. ५. After it Dc3 has—तनू । चञ्चु । चञ्चू । विग्रह । देह । वृक्ष । नाक । देव । भूत । पृथिवी । मनुष्य । स्त्री ।.

समाहारस्यैकत्वात्[1] समाहारे[2] सिद्धेपि इदं[3] तु[4] प्रकरणं विषयविभागार्थम् । [5]प्राण्यङ्गादीनां [6]समाहार एव द्वन्द्वः ॥ [7]दधिपयआदीनामितरेतर[8]योग [9]एव । वृक्षमृगादीनामु[10]भयथेत्ये-तदर्थमिदं[11] प्रकरणम् ॥

समाहारस्येत्यादिना । विषयविभागार्थमिदं प्रकरणमिति भावः । को विषयविभाग इत्यत आह । **प्राण्यङ्गादीनामित्यादि** । प्राण्यङ्गादीनां द्वन्द्व एकवचनः स्यादित्यस्यार्थः । **प्राण्यङ्गादीनां समाहार एव द्वन्द्व इति** । वचनव्यक्तिभेदात् । एवं ह्यत्र वचनं व्यज्यते । स एकवचनो द्वन्द्वः स प्राण्यङ्गादीनां स्यात् । एकवचनश्च द्वन्द्वः समाहारद्वन्द्वः । **दधिपयआदीनामितरेतरयोग एवेति** । दधिपयआदीनामेकवचनो द्वन्द्वः समाहारद्वन्द्वो नेति वचनव्यक्तेः । **वृक्षमृगादीनामिति** । वृक्षादीनामेकवचनो द्वन्द्वो वेति वचनव्यक्तेः । स्पष्टत्वात्त्यक्तं सूत्रत्रयम्[12] । 'अनुवादे चरणानाम्' ॥२।४।३॥ चरणशब्दः शाखानिमित्तः पुरुषे वर्तते । चरणानां द्वन्द्व एकवत् स्यादनुवादे । प्रमाणान्तरावगतस्यार्थस्य शब्देनोक्तिरनुवादः । तिष्ठतेरिणश्च लुङन्तस्य प्रयोगे एतदेकत्वं ज्ञेयम् । प्रत्यष्ठात् कठकौथुमम् । उदगात् कठकलापम् । उदयप्रतिष्ठे प्रमाणान्तरावगते अनूद्येते । अनुवादे किम् । प्रथमत उपदेशे मा भूत् । उदगुः कठकलापाः । स्थेणोः किम् । अनन्दिषुः कठकलापाः । लुङि किम् । उद्यन्ति कठकलापाः । 'अध्वर्युक्रतुरनपुंसकम्' ॥२।४।४॥

---

१. °स्यैकवत्त्वादेकत्वे सिद्धेपि प्राण्यङ्गादीनां &c. D_1. २. एकत्वे सिद्धे इदं प्रकरणम् D_4 ; Bc_3 ; एकत्वे सिद्धेपि प्राण्य° D_5. ३. प्राण्यङ्गादीनां समाहार एव for इदं तु...द्वन्द्वः । P. ४. Dropped D_4, Bc_3. ५. प्राण्यङ्गानां C. ६. समाहारद्वन्द्व एव Dc_1. ७. P drops from दधि to एव. ८. °द्वन्द्वयोग एव Dc_1. ९. After it—द्वन्द्वः C. १०. °मुभयं नियम्यत एतदर्थ° B_1; °मुभयथैव तदर्थमिदं B_2. ११. समाहारो द्वन्द्वो Bc_2. १२. After it–प्रसङ्गाद्व्याख्यायते । Dc_3.

जातिरप्राणिनाम् ॥२।४।६॥

प्राणिवर्जजातिवाचिनां द्वन्द्व एकवत्। धानाशष्कुलि। प्राणिनां तु। विट्शूद्राः।

अत्राध्वर्युशब्देन यजुर्वेद उच्यते नाध्वर्युः। तथोक्तं पाणिनीयमतदर्पणे।

'क्रतौ कर्तृत्वमध्वर्योर्ऋत्विग्भिरपरैः समम्।
तेनासाधारणं केन स स्यात् क्रतुविशेषणम् ॥१॥
अनध्वर्योरथर्वोक्तक्रतोरथ निवृत्तये।
अथर्वप्रतिषेधः स्यादध्वर्युग्रहणाल्लघुः ॥२॥
तस्मादध्वर्युशब्देनाध्वर्युवेदोत्र लक्ष्यते।
यजुःसंज्ञस्तद्विहितस्ततोध्वर्युक्रतुः स्मृतः' ॥३॥ इति।

यजुर्वेदोक्तक्रतुवाचिनामनपुंसकानां द्वन्द्व एकवत् स्यात्। अर्काश्वमेधम्। साह्नातिरात्रम्। अध्वर्युक्रतुः किम्। इषुवज्रौ। अनपुंसकं किम्। राजसूयवाजपेये। कथं दर्शपूर्णमासौ। क्रतुशब्दस्य सोमयागेषु रूढेः। 'अध्ययनतोविप्रकृष्टाख्यानाम्' ॥२।४।५॥ अध्ययनेन निमित्तेन येषां प्रत्यासन्ना संज्ञा तेषां द्वन्द्व एकवत् स्यात्। पदक्रमकम्। यस्मात् पदानां क्रमस्य च यः पाठः स नातिभिन्नः। ग्रन्थोपि सदृश एवेति प्रत्यासन्नः। अथवा पदान्यधीत्य क्रमोध्येतव्य इति प्रत्यासत्तिः। अध्ययनत इति किम्। पितापुत्रौ। अविप्रकृष्टाख्यानामिति किम्। याज्ञिकवैयाकरणौ। न हि यज्ञाध्ययनेन व्याकरणाध्ययनेन वा द्वयोः क्रियाप्रत्यासत्तिः। नापि ग्रन्थप्रत्यासत्तिः।

जातिः। अत्र गौणवृत्त्या जातिर्द्वन्द्व इति समानाधिकरणनिर्देशः। जातिवाच्यवयवो हि द्वन्द्वो जातिरिति चेतसि कृत्वाह। **प्राणिवर्जजातिवाचिनामिति।**

१. एकवत् स्यात् B_2, D_5. २. धान्य° D_1. ३. विट्शूद्रौ। नाप्रिव व्यक्त न्यान्येन B_2. ४. °पेयौ Dc_1, Dc_3.

द्रव्यजातीनामेव[1]ैकवद्भावः । नेह । रूपरसौ । गमेना[2]कुञ्चने । द्रव्य[3]विवक्षायां न । बदरामलके स्तः[4] ।

विशिष्टलिङ्गो नदीदेशोऽग्रामाः ।।२।४।७।।[5]

ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां द्वन्द्व एकवत् ।। गङ्गाशोणम् । कुरुकुरुक्षेत्रम्[6] । भिन्नलिङ्गः किम् । गङ्गायमुने । ग्रामे तु । जाँम्बव[7]शालूकिन्यौ ।।

द्रव्यजातीनामिति । अप्राणिनामिति पर्युदासान्नञिवयुक्तन्यायेन द्रव्यप्राणिसदृशानां द्रव्यजातीनामेव[8]ैकवद्भाव इति भावः । जातिरिति किम् । नन्दकपाञ्चजन्यौ । द्रव्यविवक्षायां नेति । यदा क्वचिद् देशादौ नियतानां द्रव्यविशेषाणां विवक्षा तदा जाति[9]शब्दत्वेऽप्येकवद्भावो न भवति । जातिशब्दानां प्राधान्यात् । जातिपरत्वे एवैकवत्त्वविधेरिति भावः ।

विशिष्ट । अत्र विशिष्टशब्दो भिन्नवचनः । नद्यर्थावयवो द्वन्द्वो नदीदेशार्थावयवो द्वन्द्वो देश इत्युक्त इत्येतत् सर्वं चेतसि कृत्वाह । **ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानामिति** । नदीदेशः किम् । कुक्कुटमयूर्यौ । नदीग्रहणात् देशोऽत्र जनपदो गृह्यते । तेन पर्वता न गृह्यन्ते । विन्ध्यगन्धमादने । यदि ग्रामनिषेधः कथं मथुरापाटलिपुत्रमिति । नगरत्वात् । यदयमाचार्यः 'प्राचां ग्रामनगराणामिति' ग्रामनगरे भेदेनोपादत्ते तज् ज्ञापयति ग्रामग्रहणे नगरं न गृह्यत इति । तर्हीह कस्मान्न । सौर्यं नाम नगरं केतवता नाम ग्रामः सौर्यकेतवते । अग्रामा इति प्रसज्यप्रतिषेधात् यत्र ग्रामगन्धोऽप्यस्ति तत्र नैकत्वमिति ।

---

१. B_1, Dc_1, Bc_3 drop एव. २. गमनकुञ्चने P. After it—स्तः । D_3. ३. द्रव्यमात्रविवक्षायां C. नियतद्रव्याविवक्षायां न B_2; द्रव्यत्वविव° D_4. ४. B_1 drops स्तः. ५. C, D_5 have स्यात् after it. ६. B_1 has after नदीदेश इति किम् । कुक्कुटमयूर्यौ. ७. जाम्बविकशालूकिन्यौ P; जाम्बवशालकिन्यौ D_1; जाम्बुवशालूकिन्यौ D_4. ८. एव dropped Bc_3. ९. जाति dropped Bc_3.

क्षुद्रजन्तवः ॥२।४।८॥

क्षुद्रजन्तूनां द्वन्द्व एकवत् स्यात्[1]* ॥ यूकालिक्षम्[2][3] । आनकुलात्[4] क्षुद्रजन्तवः ।

येषां च विरोधः शाश्वतिकः ॥२।४।९॥

नित्यविरोधिनां[5] द्वन्द्व एकवत्[6] ॥ अहिनकुलम् । अश्वमहिषम् । काकोलूकम् ॥ चकारात् पशुशकुनिद्वन्द्व एकवत्[7] ॥

क्षुद्र ।

क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः ।
शतं वा प्रसृतौ येषां केचिदानकुलादपि ॥

इत्येतेषु स्मृत्युक्तेषु पक्षेषु सर्वानुग्रहकारकत्वादन्त्य एव पक्षः श्रेयानिति मन्यमानेन **भाष्यकारेण** सर्वेषां पक्षाणामन्ते उक्तत्वाद्वृत्तिकृता च साक्षादानकुलादितीयमेव स्मृतिः प्रमाणमितरासां तद्विरोधादित्युक्तत्वादानकुलाद्ये प्राणिनस्त एव क्षुद्रजन्तव इत्युच्यन्त इति चेतसि कृत्वाह । **आनकुलादिति** ।

येषाम् । जन्तूनां प्रकृतत्वात्तद्विरोध एवात्र गृह्यते । तेन अग्निजले इत्यत्र न । **चकारादीति** । एकवद्भाव इति शेषः । ततश्चायमर्थः । चकारादवधारणार्थत्वात् पशुशकुनिद्वन्द्वे एकवद्भावो न विभाषेति । तथोक्तं **महाभाष्ये** । किमर्थश्चकारः । एवकारार्थः । येषां[8] विरोधः शाश्वतिकस्तेषां द्वन्द्व एकवचनमेव यथा स्यात् । यदन्यत्प्राप्नोति तन्मा भूदिति । किं चान्यत् प्राप्नोति । पशुशकुनिद्वन्द्वे विरोधिनां पूर्व[9]विप्रतिषिद्धमिति वक्ष्यति । स पूर्वविप्रतिषेधो न पठितव्यो भवतीति ।

---

१. B_1 D_1, B_2 drop स्यात्. २. After it—दंशमशकम् D_2, B_1, B_2. ३. °लिख्यम् । Bc_3. ४. आनकुलान्तं D_1, D_2, P, C, B_1, B_2. ५. °विरोधवाच्चिनां D_1, D_3, B_2, Bc_3. ६. After it—स्यात् D_5, ७. After it—स्यात् D_5; नेह । रामरावणौ B_1, D_4; एव D_1; एकवद्भाव एव । नेह । रामरावणौ । B_2. ८. येषां च Dc_1. ९. पूर्वं Bc_3.

शूद्राणामनिरवसितानाम् ॥२।४।१०॥

[1]अबहिष्कृतानां शूद्राणां द्वन्द्व एकवत्[2] ॥ रजकतन्तुवायम् ॥ [3]बहिष्कृतानां तु । [4]चाण्डालमृतपाः ॥

गवाश्वप्रभृतीनि च ॥२।४।११॥

यथोच्चारितान्येतानि कृतैकत्वानि साधूनि ॥ [5]गवाश्वम् ॥ [6]दासीदासम् । पुत्रपौत्रम् । मूत्रपूरिषम् । स्त्रीकुमारम् । [7]इत्यादि ।

शूद्राणाम् । शूद्रशब्दोत्र त्रैवर्णिकव्यतिरिक्तजातिमात्रवचनो न वृषलपर्यायः । यैर्भुक्ते पात्रं भस्मना शुध्यते पात्रमि' त्यादि-स्मृत्युक्तेन संस्कारेण न शुध्यति ते निरवसिता बहिः-कृताः । यैर्भुक्ते पात्रं संस्कारेण शुध्यति ते अनिरवसिता अबहिःकृता इत्यर्थः ।

गवाश्व । गवाश्वम् । गवाविकम् । गवैडकम् । अजाविकम् । अजैडकम् । कुब्जवामनम् । कुब्जकिरातम् । पुत्रपौत्रम् । श्वचण्डालम् । स्त्रीकुमारम् । दासीमाणवकम् । [8]शाटीप्रच्छिकम् । उष्ट्रखरम् । [9]उष्ट्रशशम् । मूत्रशकृत् । मूत्रपुरीषम् । शकृन्मेदम् । मांस-शोणितम् । दर्भशरम् । [10]दर्भपूतीकम् । अर्जुनपुरुषम् । [11]तृणोलपम् । दासीदासम् । कुटीकुटम् । भागवतीभागवतम् । गवाश्वादिषु यथोच्चरितत्वे साधुत्वात् रूपान्तरे नायं विधिः । गोश्वौ । गोश्वम् । पशुद्वन्द्वविभाषैव ।

---

१. अबाहिःकृतानां P, C, B_1, Bc_3; अबाहिःप्रतिष्ठितानां D_4. २. After it—स्यात् D_5. ३. बाहिःकृतानां P, B_2, D_4, Bc_3. ४. चण्डाल° B_1, D_3. ५. दासीदासम् । गवाश्वम् । इत्यादि C ; गवाश्वम् । दासीदासमित्यादि । Dc_1 ; गवाश्वमित्यादि D_5. ६. दासीदासम् । इत्यादि D_4, D_3, D_1, Bc_3. ७. इत्या-दयः B_1. ८, प्रच्छदम् Dc_2. ९. After it—मूत्रशशम् Bc_3. १०. °पूतिकम् Dc_2. ११. तृणोलुपम् Dc_1.

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ॥२।४।१२॥

एषां द्वन्द्व एकवत् स्याद्वा[1] ॥ वृक्षादौ विशेषाणामेव ग्रहणम्। चूताशोकम्[2]। चूताशोकाः[3]। रुरुपृषतम्[4]। कुशकाशम्। व्रीहियवम्। दधिघृतम्। गोमहिषम्। शुकबकम्[5]। अश्ववडवम्। पूर्वापरम्। अधरोत्तरम्। पक्षे। दधिघृते। गोमहिषौ। इत्यादि[6]।

विभाषा। ये त्वत्राप्राणिनस्तेषां जातित्वान्नित्ये प्राप्ते अन्येषामप्राप्ते वचनम्। वृक्षादाविति। अत्र[7] वृक्षादिभिः प्रत्येकं द्वन्द्वो विशेष्यते। तेनैषा विभाषा तुल्यजातीयेष्वेवावतिष्ठते। तत्रापि न सरूपेषु। तेषामेकशेषात् द्वन्द्वाभावात्। विरूपेष्वपि न पर्यायेषु तेषां द्वन्द्वाभावात्। तदभावस्तु प्रयोगाभावात्। प्रयोगाभावस्तु चार्थाभावात्। चार्थाभावस्त्वर्थभेदाभावात्। भिन्नाधिष्ठानो हि चार्थस्तस्माद्विरूपेष्वेव वृक्षादिविशेषवाचिषु अस्या विभाषाया अवस्थानमिति विशेषा एव गृह्यन्ते न स्वरूपं पर्याया[8] वेति भावः। पशुग्रहणेनैव मृगशकुनिग्रहणे सिद्धेपि पुनर्मृगशकुनिग्रहणं परस्परमेषां पश्वन्तरेण च द्वन्द्वैकत्वं मा भूदिति। पशुग्रहणेनैव सिद्धे अश्ववडवग्रहणं योन्यस्तयोः पर्यायस्तत्र मा भूदिति। हयवेडव इति[9]।

---

१. एकवद्वा B, Dc₁, Bc₃; एकवद्वा स्यात् B₂. २. B₁ drops it. ३. चूताशोकौ B₂. ४. After it—रुरुपृषताः D₄, D₅. ५. B₁ has शुकबकाः after it. ६. Dropped Bc₃, D₅. ७. अत्र dropped Bc₃. ८. पर्याया एवे Bc₃. ९. वेडवे इति Bc₁; वडवेति Dc₂.

फलसेनाङ्गवनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवत्[3] ॥ बदराणि च आमलकानि च बदरामलकम् । द्विप्रकृतौ तु । बदरामलके । रथिकाश्वारोहौ ।[4] इत्यादि ।

विप्रतिषिद्धं चानधिकरणवाचि ॥२।४।१३॥

अद्रव्यवाचिनां[5] विप्रतिषिद्धार्थानां द्वन्द्व एकवत् स्याद्वा[6] । शीतोष्णम् । शीतोष्णे[7] । विरुद्धं किम् । कामक्रोधौ । द्रव्ये तु । शीतोष्णे उदके ।

फलेत्यादि । वक्तव्यमिति शेषः । बहुप्रकृतिरिति । बह्वर्था बहुवचनान्ता वा प्रकृतिर्यस्य स बहुप्रकृतिः । बहुवचनान्तानामेव फलादीनां द्वन्द्व एकवत् स्यादित्यर्थः ।

विप्रति । इहाधिकरणं द्रव्यं विवक्षितं तथा चकारो विभाषानुकर्षणार्थ इत्यभिप्रेत्याह । **अद्रव्यवाचिनामित्यादि । कामक्रोधाविति** । क्रुद्धोपि काममाचरतीति नानयोर्विरोधः ।

---

१. D_1, Dc_1, Bc_3, D_3 drop अङ्ग. २. शकुन्त D_1. ३ एकवत् स्यात् B_2, D_3, D_5. ४. After it—प्लक्षन्यग्रोधौ । रुरुपृषतौ । हंसचक्रवाकौ । युकालिक्षे । व्रीहियवौ । कुशकाशावित्यादि B_2. ५. विप्रतिषेधार्थानां D_1. ६. B_1 drops it—वा B_2; स्यात् dropped Bc_3, D_3, D_4. ७. After it—सुखदुःखम् । सुखदुःखे । जीवितमरणे । विभाषानूकर्षणार्थश्चकारः । B_2. ८. विप्रतिषिद्धं D_1. ९. यथा Dc_1; Dc_2 drops it. १०. चकारोपि Dc_4. ११. °मिति । Bc_3.

न दधिपयआदीनि ॥२।४।१४॥

एतानि नैकवत् स्युः । दधिपयसी । इध्माबर्हिषी । निपाताद्दीर्घः[1] । ऋक्सामे । वाङ्मनसे[3] । इत्यादि[4] ।

अधिकरणैतावत्त्वे च ॥२।४।१५॥

द्रव्यपरिमाणावगमे नैकवद्भावः ॥ दश दन्तोष्ठाः ।

न दधि । यथायथमेकवद्भावे प्राप्ते निषेध आरभ्यते । दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राजककौशिकौ । शुक्लकृष्णौ[5] प्रवर्ग्योपसदौ । याज्यानुवाक्ये । इध्माबर्हिषी । दीक्षातपसी । श्रद्धातपसी । अध्ययनतपसी । उलूखलमुसले[6] । आद्यवसाने । श्रद्धामेधे । ऋक्सामे । वाङ्मनसे । अन्येपि प्रयोगवशात्[7] ज्ञेयाः ।

अधि । अधिकरणवर्तिपदार्थः स हि समासार्थस्याधार इति तस्यैतावत्त्वे गम्ये इत्युक्ते द्रव्यमेवाधिकरणमित्युक्तं स्यात् तस्यैव परिमाणवत्त्वात् इत्यभिप्रेत्याह । द्रव्येत्यादि । दशेत्यादि । 'द्वन्द्वश्च—' इत्येकवत्त्वं प्राप्तम् । स्पष्टत्वात् त्यक्तम् । 'विभाषा समीपे' ॥२।४।१६॥ अधिकरणैतावत्त्वस्य समीपे एकत्वं वा स्यात् । उपदशं दन्तोष्ठम् । इहैकार्थस्य द्वन्द्वस्यैकार्थ एवाव्ययीभावोनुप्रयुज्यते । उपदशा दन्तोष्ठाः । इह बह्वर्थस्य द्वन्द्वस्य बह्वर्थो बहुव्रीहिरनुप्रयुज्यते । अत्राधिकरणैतावत्त्वं दशसंख्या तत्समीपं

---

१. निपातनाद्दीर्घः । D₃. २. °द्दीर्घत्वम् C. ३. After it—मधुसर्पिषी । सर्पिर्मधुनी । श्रद्धामेधे । शुक्लकृष्णे । दीक्षावेदसी । अध्ययनतपसी । आद्यवसाने । श्रद्धातपसी । याज्यानुवाक्ये । अपवर्गोपसादौ । उलूखलमूशले । हरिवासवौ । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । प्रव्रज्याकौशिकौ । पीतकृष्णे । पीतनीले । सोमरुद्रौ । वानरपर्वतौ । सूर्याचन्द्रमसौ । मित्रावरुणौ । रामलक्ष्मणौ । नरनारायणौ । भीमार्जुनौ । पितापुत्रौ । मातापितरौ । कम्बलाश्वतरौ । अग्नीषोमौ । इत्यादि B_2, D_2, (D_2 has दीक्षातपसी). ४. Dropped D_4. ५. °कृष्णे Bc_1, Dc_4 ; पीतकृष्णे । पीतनीले । Dc_3. ६. °मुशले Dc_4. ७. प्रयोगात् Dc_3, Dc_2, Bc_1.

आनङ् ऋतो द्वन्द्वे ॥ ६।३।२५॥

विद्यायोनिसंबन्धवाचिनामृदन्तानां द्वन्द्वे पूर्वपदस्यानङ् स्यात् ॥ होतापोतारौ । मातापितरौ । पुत्र इत्यनुवृत्तेः पितापुत्रौ ॥ मोतापुत्रौ ।

नवैकादश वा । प्रसङ्गादन्यत् त्यक्तं व्याख्यायते । 'तिष्य-पुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ।' १।२।६३॥ एषां नक्षत्रद्वन्द्वे बह्वर्थे नित्यं द्वित्वं स्यात् । तिष्यपुनर्वसू । एषां किम् । राधानुराधाः । नक्षत्रे किम् । तिष्यपुनर्वसवो माणवकाः । नक्षत्रमहात् पर्यायाणामपि । पुष्यपुनर्वसू । द्वन्द्वे किम् । यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसवः । बहुवचनस्य किम् । तिष्यपुनर्वस्विदम् । अत एव ज्ञापकात् सर्वद्वन्द्वैकवद्भावो वा ।

आनङ् । होतापोताराविति । विद्यासंबन्धवाचिनामृदन्तानां द्वन्द्वस्योदाहृतिः । मातापितराविति योनिसंबन्धवाचिनाम् । पुत्र इत्यनुवृत्तेरिति । 'पुत्रोन्यतरस्याम्' इत्यतो मण्डूकप्लुतिन्यायेन पुत्र इत्यनुवृत्तेरित्यर्थः । तथा 'ऋतो विद्या—' इत्यत 'ऋतः' इत्यस्याप्यनुवृत्तेरित्यपि ज्ञेयम् । ततश्चायमर्थः । पुत्रशब्दे परे ऋत आनङ् स्यात् ततः पितापुत्राविति सिध्यतीति । आनङो नकारोच्चारणम् 'उरण् रपरः' इति रपरत्वनिवृत्त्यर्थम् । ऋतो द्वन्द्वे इति किम् । पितृपितामही ।

---

१. P, C drop it. २. Dropped Dc₃. ३. Dropped Dc₄, Dc₃.
४. प्रासरपरत्व° Bc₁, Dc₃.

देवताद्वन्द्वे च ॥६।३।२६॥

इह पूर्वपदस्यानङ् ॥ मित्रावरुणौ । उभयत्र वायोः प्रतिषेधः । अग्निवायू । वाय्वग्नी । एकहविर्भागित्वे द्वन्द्वस्य ब्रह्मप्रजापती इत्यादावप्रसिद्धेर्नानङ् ।

देवता । अविद्यायोनिसंबन्धार्थोनुकारार्थश्चारम्भः । **उभयत्रेति** । वायोः पूर्वपदत्वे उत्तरपदत्वे च सति आनङादेशस्य प्रतिषेधो वाच्य इत्यर्थः । **एकहविर्भागित्वे** इति । ब्रह्मप्रजापतीत्यादावानङ् न । तत्र हेतुरेकहविर्भागित्वे द्वन्द्वस्याप्रसिद्धेरिति । एकं हूयमानं हविः प्रतिसंप्रदानत्वेन संबन्धित्वे वेदे अप्रसिद्धेः । प्रसिद्ध्यभावात् । लोके च द्वन्द्वस्याप्रसिद्धेः । सहचरिततयाप्रसिद्ध्यभावादित्यर्थः । अयं भावः । 'आनङ् ऋतो द्वन्द्वे' इत्यतः समासविशेषप्रतिपत्त्यर्थं 'द्वन्द्वे' इत्यनुवर्तमानेपि पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यपरिग्रहार्थम् । द्वन्द्वशब्दस्य चात्यन्तसहचरिते लोकविख्यातेर्थे निपातनं 'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' इति सूत्रे कृतम् । ततश्च ये लोके प्रसिद्धसाहचर्या वेदे च एकहविःप्रतिसंप्रदानत्वेन संबन्धितया निर्दिष्टा एकत्र मन्त्रे इन्द्रावरुणाभ्यां छागं निर्वपेदित्यादौ तेषामिह सूत्रे ग्रहणं भवति न तु ब्रह्मप्रजापती शिववैश्रवणावित्यादीनाम् । तेषां लोके साहचर्यप्रसिद्ध्यभावात् । वेदे चैकहविर्भागित्वेनानिर्देशादिति ।

---

१. स्यात् after it in C. २. एकहविर्भागित्वेन प्रसिद्धानामेव द्वन्द्वस्य परिग्रहार्थं पुनर्द्वन्द्वग्रहणम् । तेन शिवविष्णू ब्रह्मप्रजापती इत्यादावप्रसिद्धेर्नानङ् B_1; B_2 follows B_1 but has एकहविर्भागित्वेन द्वन्द्वस्याप्रसिद्धेस्तेन &c. B_2; एकहविर्भागित्वेन द्वन्द्वस्य शिवविष्णू । ब्रह्म° D_4. ३. °र्भागत्वे Bc_3. ४. °र्भागत्वे Bc_3. ५. °र्भागत्वे Bc_3. ६. °चरितलोक° Dc_4. ७. °ख्यातार्थे Dc_2.

ईदग्नेः सोमवरुणयोः ॥६।३।२७॥

अनयोर्द्वन्द्वेऽग्नेरीकारादेशः[1] स्यात्

अग्नेः स्तुत्स्तोमसोमाः ॥८।३।८२॥

अग्नेः[2] परेषामेषां सस्य षः स्यात् समासे ॥ आग्निष्टुत् । अग्निष्टोमः । अग्नीषोमौ । अग्नेर्दीर्घात्[3] सोमस्येष्यते[4][5] । नेह । अग्निसोमौ माणवकौ । अग्नीवरुणौ ।[6]

इद्वृद्धौ ॥६।३।२८॥

[7]वृद्धौ परपदेऽग्नेरिदादेशः[8] स्यात्[9] ॥ आग्निमारुतं कर्म । आग्निवारुणीमनड्वाहीम् ।[10]

ईदग्नेः । आनङोपवाद ईकारः । तकार उच्चारणार्थः । देवताद्वन्द्व इत्येव । अग्निसोमौ माणवकौ ।

अग्नेः स्तुत् । 'सात् पदाद्योः' इति षत्वनिषेधे प्राप्ते वचनम् । **अग्निष्टुदित्यादि** । अग्निः स्तूयते यत्र सोऽग्निष्टुत् क्रतुविशेषः । अग्नीनां स्तोमः अग्निष्टोम इति सोमयागे आद्या संस्था । अग्नीषोमाविति देवताद्वन्द्वः । **अग्निसोमौ माणवकाविति** । अदेवताद्वन्द्वत्वान्नेत्वम् ।

इत् । 'देवताद्वन्द्वे' इत्यनुवर्तते । 'सोमवरुणयोः' इति निवृत्तम् । वृद्धिशब्देनात्र साहचर्यात् कृतवृद्ध्युत्तरपदमुच्यते । अत्रापि तकार उच्चारणार्थः । **आग्निमारुतमित्यादि** । 'सास्य देवता' इत्यण् । 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिः । **आग्निवारुणीमिति** । पूर्ववदण् । ङीप् ।

---

१. °रीकारोन्तादेशः B_2. २. अत्राग्ने° B_2. ३. दीर्घात् परस्य D_4. ४. °स्यैवेष्यते Bc_3. ५. °ष्यते षत्वम् B_2. ६. After it—इत्युभयपदवृद्धौ कृतायामानङमीत्वं च बाधितुमिकारः क्रियते D_4. ७. कृता वृद्धिर्यस्य तत् कृतवृद्धि । कृतवृद्ध्युत्तरपदे अग्नेरिकारादेशः स्यात् । B_2. ८. इकारादेशः P, D_5. ९. Dropped Bc_3. १०. After it—आलभेत P.

विष्णौ न* ॥ 'देवताद्वन्द्वे च' इत्यानङ् । आग्नावैष्णवं चरुम् ॥[१]

दिवो द्यावा ॥६।३।२९॥

[२]द्यावाभूमी जनयन् ।

[३]मातरपितरावुदीचाम् ॥६।३।३२॥

[४]मातरपितरौ । उदीचां किम् । मातापितरौ ।

विष्णौ नेति । कृतवृद्धौ विष्णुशब्दे परपदे इकारादेशो नेति वक्तव्यमित्यर्थः ।

दिवः । दिवे इत्यस्य द्यावेत्ययमादेशो देवताद्वन्द्व उत्तरपदे ।[६] स्पष्टत्वात्त्यक्ते द्वे । 'दिवसश्च पृथिव्याम्' ॥ ६।३।३०। पृथिव्यामुत्तरपदे देवताद्वन्द्वे दिवो[५] दिवसादेशः स्याद् द्यावा च । दिवस्पृथिव्यौ । द्यावापृथिव्यौ । अकारोच्चारणं सकारस्याविकारप्रतिपत्त्यर्थं तेन रुत्वादि न। कथं द्यावाचिदस्मै पृथिवी नमेते इति । कार्योत्र यत्नः । 'उषासोषसः' ॥६।३।३१॥ उषस उषासादेशः स्याद् देवताद्वन्द्व उत्तरपदे परे । उषश्च नक्तं च उषासानक्तम् ।

मातर । उदीचां मतेन मातृशब्दस्यारङादेशो निपात्यते ।

---

१. After it—आनय B_1,. २. After this—'दिवसश्च पृथिव्याम्' ॥ ६।३।३० ॥ पृथिव्यामुत्तरपदे दिवो दिवसादेशः स्याद् देवताद्वन्द्वे चात् द्यावा । After this-द्यावाभूमी जनयन् । D_3, B_2, D_5, C; (B_2 has—दिव्शब्दस्य द्यावादेशः स्यात् ॥). ३. Before it—'उषासोषसः' । ६।३।३१॥ उषसः उषासादेश, स्यात् । उषासानक्तम् B_2, D_4. ४. Before it—उदीचामाचार्याणां मते अरङादेशो निपात्यते । B_2. ५. दिवशब्दस्य Bc_3. ६. After it—परे Dc_2.

द्वन्द्वाच्चुदषहान्तात् समाहारे ॥५।४।१०६॥

चवर्गान्ताद् दषहान्ताच्च द्वन्द्वाट्टच् स्यात् समासान्तः समाहारे ॥ वाक् च त्वक् च तयोः समाहारो वाक्त्वचम् । श्रीस्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारे किम् । प्रावृट्शरदौ ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥१।२।६५॥

यूना सह वचने गोत्रं शिष्यते गोत्रयुवप्रत्ययकृतमेव वैरूप्यं चेत्तयोः ॥ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धः किम् । गर्गगार्ग्यायणौ । यूना किम् । गार्ग्यगर्गौ । तल्लक्षणः किम् । गार्ग्यवात्स्यायनौ ।

द्वन्द्वात् । श्रीस्रजमित्यादौ श्रीश्च स्रक् तयोः समाहार इत्यादयो विग्रहा ज्ञेयाः ।

वृद्धः । अत्र वृद्धशब्देन 'अपत्यमन्तर्हितं वृद्धम्' इति पूर्वाचार्यपरिभाषितं पौत्राद्यपत्यमुच्यते । तथा युवशब्देन 'जीवति तु वंश्ये युवा' इति परिभाषितं चतुर्थाद्यपत्यमुच्यते । सहयोगे तृतीया । यूनेति । तदिति वृद्धो यूनेति निर्देशः । लक्षणशब्दो निमित्तवाची । चेदिति यद्यर्थे । एवकारोवधारणे । विशेषो वैरूप्यम् । एतत् सर्वं चेतसि कृत्वाह । **यूना सहवचन** इत्यादि । **गार्ग्यश्चे**त्यादि । गर्गशब्दात् 'गर्गादिभ्यो यञ्' इति गोत्रे यञ् । युवापत्ये[3] 'यञिञोश्च' इति फक् । प्रकरणादिनात्र युवार्थो गम्यते । एवकारः किम् । भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ । अत्र कुत्सा सौवीरत्वं च भागवित्तिकस्यान्यो विशेषः । गोत्रापत्ये भगवित्तशब्दात् 'अत इञ्' । यूनि तु वृद्धात् ठक् । 'सौवीरेषु बहुलम्' इति कुत्सायां ठक् ।

---

१. °गार्ग्यौ Bc3. २. पौत्रा° Dc1. ३. After it—तु Dc1. ४. चतुर्थो Dc1, Bc3.

स्त्री पुंवच्च ॥१।२।६६॥

यूना सह वचने स्त्री वृद्धा शिष्यते। सा च पुंवत्[1] स्यात्। तल्लक्षणमेव वैरूप्यं चेत्[2]॥ गार्गी च गार्ग्यायणश्च गार्ग्यौ।

पुमान् स्त्रिया ॥१।२।६७॥

स्त्रिया सहोक्तौ पुमान् शिष्यते। स्त्रीपुंसलक्षणश्चेदेव विशेषः। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। तल्लक्षणः[3] किम्। कुक्कुटमयूर्यौ।

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥१।२।६८॥

स्वस्रा सहोक्तौ भ्राता दुहित्रा सहोक्तौ पुत्रः शिष्यते। [4]अन्ये लुप्यन्ते। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ।

स्त्री पुंवत्। 'वृद्धो यूना—' इति सर्वमनुवर्तते इत्यभिप्रेत्याह। यूनेत्यादि[5]। सा चेति स्त्री परामृश्यत इत्यर्थः। स्त्र्यर्थः पुमर्थवत्[6] स्यादित्यर्थः।

पुमान्। अत्र 'वृद्धो यूना' इति निवृत्तम्। 'तल्लक्षणश्चेदेव विशेषः' इत्यनुवर्तते इत्यभिप्रेत्याह। स्त्रियेत्यादि। पुमानिति किम्। प्राक् च प्राची च प्राक्प्राच्यौ। प्रागित्ययमलिङ्गोऽव्ययत्वात्।[7]

---

१. Dropped D_4, Bc_3. २. चेत्तयोः P, D_2, D_4, D_5. ३. तल्लक्षणे D_5. ४. C, D_1, D_4 drop अन्ये लुप्यन्ते. ५. यूनेति Dc_1. ६. पुंवत् Dc_2. ७. After this Dc_1 has—भ्रातृपुत्रौ—प्रकटार्थत्वान्न व्याख्यातम्।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥१।२।६९॥

अक्लीबेन सहोक्तौ क्लीबं शिष्यते । एकत्वम[1]स्य वा स्यात् । लि[2]ङ्गविशेष एव[3] । शुक्लः कम्बलः । शुक्ला प[4]टी । शुक्लं वस्त्रम् । त[5]दिदं शुक्लम् । तानीमानि शुक्लानि ।

पिता मात्रा ॥१।२।७०॥

मात्रा सहोक्तौ पिता वा[6] शिष्यते । पिता च माता च पितरौ । मातापितरौ वा ।

नपुंसकम् । अनपुंसकेनेति किम् । शुक्लं च शुक्लं च शुक्लं च शुक्लानि । ननु चात्र 'सरूपाणाम्—' इत्येकशेषः स्यादेव । तत् कोऽत्र विशेषोऽनेनैकशेषे तेन वा । उच्यते । यद्यनेनैकशेषः स्यात् एकवत्त्वं स्यात् तेन त्वेकशेषे एकवत्त्वं न स्यादिति विशेषः । अस्येति वचनमस्यैवैकशेषस्यैकत्वं यथा स्यादुत्तरत्र मा भूदिति । अन्यथोत्तरत्र एकवदित्यस्यानुवृत्तिः स्यात् । ननु च स्वरितत्वादेव सा न स्यात् । सत्यम् । तदेवानेन विस्पष्टीक्रियते । एवकारो[7]ऽत्रानुवर्तते । तेन हिमं च हिमानी च हिमहिमान्यौ इत्यत्र न । महत्त्वस्य विशेषस्यासत्त्वात् ।

पिता । **मातापितराविति** । 'तेभ्यो माता गरीयसी' इति 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' । इति मातुरभ्यर्हितत्वात् पूर्वनिपातः । आनङ् ।

---

१. °मस्य तु D_4. २. लिङ्गकृत एव विशेषश्चेत् P ; लिङ्गकृतविशेष एव चेत् B_2. ३. B_1, D_1, Bc_3, D_4 have चेत् after it. ४. द्विपटी D_1, D_5, D_2. ५. तदिदं सर्वं शुक्लम् P. ६. शिष्यते वा P, D_1, D_5. ७. अत्र omitted Dc_1.

श्वशुरः श्वश्र्वा ॥१।२।७१॥

श्वशुरश्च श्वश्रूश्च श्वशुरौ । श्वश्रूश्वशुरौ ।[1]

त्यदादीनि सर्वैर्नित्यम् ॥१।२।७२॥

सर्वैः सहोक्तौ त्यदादीनि शिष्यन्ते नित्यम् । स च देवदत्तश्च तौ ।

त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते इति वाच्यम्* ॥ स च यश्च यौ ।

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ॥१।२।७३॥

[2]ग्राम्यपशूनां सङ्घेषु सहोक्तौ स्त्री शिष्यते न तु तरुणेषु ।

श्वशुरः । श्वश्रूश्वशुराविति । 'श्वश्रूः पूर्वजपत्नी च मातृतुल्या प्रकीर्तिता' इति श्वश्र्वा अभ्यर्हितत्वात् प्राक् निपातः ।

त्यदा । सर्वग्रहणं साकल्यार्थम् । अन्यथानपुंसकेनेत्यस्यानुवृत्तिराशङ्क्येत । अथवा तल्लक्षणश्चेदेव विशेष इत्यस्य नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । त्यदादीनामिति । परत्वं गणपाठापेक्षं ज्ञेयम् ।

ग्राम्य । ग्रामे भवा ग्राम्याः । अतरुणग्रहणं सामर्थ्यात् पशुविशेषणम् ।

---

१. After it—वा D_1, D_2. २. ग्राम्यपशुसङ्घेषु C.

[1]गाव इमाः । [2]अजा इमाः । ग्राम्येति किम् । रुरव इमे । [3]पशुषु किम् । ब्राह्मणा इमे । सङ्घेषु किम् । एतौ गावौ । [4]अतरुणेषु किम् । वत्सा इमे[5] । अनेकशफेष्विति वाच्यम्* ॥ नेह । अश्वा इमे ॥

इति द्वन्द्वः ॥

इमा इत्यनुप्रयोगः स्त्रीत्वाभिव्यक्तये । अनेकशफेष्विति । अनेकखुरेष्वित्यर्थः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेस्मिन् प्रसादे सुविशदमगमत् द्वन्द्वसंज्ञः समासः[6] ॥

---

१. Before it—गावश्च गावश्च एवं सति B_2. २. P, Dc_1, Bc_3 drop it. ३. पशु किम् P ; पशूनामिति किम् B_2. ४. अतरुणे Bc_3. ५. After it—बर्करा इमे B_2. ६. °ममली द्वन्द्व° Dc_3.

अथ सर्वसाधारणसमासान्ताः ।

ऋक्पूरब्धूः पथामानक्षे ॥५।४।७४॥

एषामप्रत्ययः स्यात् समासान्तः । धुरस्त्वनक्षे । अर्धर्चः । अनृचबह्वृचावध्येतर्येव । नेह । अनृक् साम । बह्वृक् सूक्तम् । विष्णुपुरम् । विमलापं सरः ॥

अथ सर्वसाधारणान् समासान्तान् सर्वसमाससाधारणीमसाधारणीं प्रक्रियां चाह ।

ऋक्पू । धुर एवाक्षेण संबन्धोस्ति नेतरेषामतः सामर्थ्यात् 'अनक्षे' इत्येतस्या एव विशेषणं न ऋगादीनामित्यभिप्रेत्याह । **धुरस्त्वनक्ष** इति । अनक्ष इति षष्ठ्यर्थे सप्तमी सुब्व्यत्ययेन । ततश्चायमर्थः । अक्षसंबन्धिनी या धूस्तदन्तस्य नेति । एवं च यदग्रे उदाहरिष्यति । अक्षे तु अक्षधूः दृढधूरक्ष इत्येतदुभयमप्युपपन्नं स्यात् । अक्षस्य वाच्यत्वेपि धुरस्तत्संबन्धित्वात् । **अर्धर्च** इति । ऋचोर्धम् । 'अर्धं नपुंसकम्' इति समासः । 'अर्धर्चाः पुंसि च' इति पुंस्त्वम् । **अनृचेत्यादि** । अविद्यमाना ऋचोस्येति विग्रहः । तथोक्तम् ।

'अनृचो माणवो ज्ञेयो बह्वृचश्चरणाख्यया' ॥ इति ।

विष्णुपुरमिति । षष्ठीतत्पुरुषः । **विमलापमिति** । बहुव्रीहिः ।

---

१. अर्धर्चाः पुंसि च । Dc1 ; After it—अर्धर्चाः पुंसि च D4, Bc3 ; 'अर्ध-र्चाः पुंसि च' इति पुंस्त्वम् D5. २. प्रक्रियामाह Dc3. ३. इत्येतत्तस्या Dc4. ४. तु Dc1, Bc3. ५. अग्रे dropped Bc1, Dc3. ६. वाच्यत्वे पूर्वपदत्वेपि D2, Dc3 ; वाच्यत्वे पूर्वपदत्वेपि च Dc4.

रम्यपथो देशः । महापथः । दक्षिणापथः । चतुष्पथम् । उपपथम्[2] ।

अच् प्रत्यन्ववपूर्वात् सामलोम्नः ॥५।४।७५॥

एभ्यः पराभ्यां सामलोमभ्यामच्[3] स्यात् समासे[4] ॥ प्रतिसामम् । अनुसामम् । अवसामम्[5] । एवं प्रतिलोमादि ॥ कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते ॥ कृष्णभूमः । उदग्भूमः । पाण्डुभूमः । द्विभूमः[6] । त्रिभूमः[7] । प्रासादः । संख्याया नदीगोदावरीभ्यां च* ॥ पञ्चनदम् । सप्तगोदावरम् । अन्यत्रापीष्यते ।

रम्यपथ इति बहुव्रीहिः । **महापथ** इति कर्मधारयः । **दक्षिणापथ** इति । दक्षिणस्यां पन्थाः । आकारान्तोपि दक्षिणाशब्दोस्ति । आबन्तस्य तु सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंवत्त्वेन भाव्यम् । तथोक्तं **प्रदीपे** । 'आकारान्तेन दक्षिणाशब्देन समासोयम्' इति । **चतुष्पथमिति** । चतुर्णां पथां समाहारः । पात्रादित्वात् स्त्रीत्वनिषेधः । **उपपथमित्यव्ययी**भावः ।

अच् । **प्रतिसाममित्यादि** । प्रतिगतं साम प्रतिगतं सामात्रेति वा विग्रहः । एवमनुसामादिषु प्रादिसमासस्तत्पुरुषो बहुव्रीहिर्वा ज्ञेयः । **कृष्ण** इत्यादि । तथोक्तम् ।

'कृष्णोदक्पाण्डुपूर्वाया भूमेरच् प्रत्ययः स्मृतः ।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि' ॥

इति । संख्योत्तरत्वं भूमेरपीष्यते । तथोदाहृतं **वृत्तिकृता** । **द्विभूम** इत्यादि । **कृष्णभूम** इत्यादयो बहुव्रीहयः । **पञ्चनदमित्यादि** । समाहारे 'नदीभिश्च' इत्यव्ययीभावः । **अन्यत्रापीष्यत** इति ।

---

१. Before it—महापथः C. २. After it—कृतसमासान्तस्य ग्रहणान्नेष्यते । अपन्थाः । सुपन्थाः । B_2. ३. °मच्प्रत्ययः D_2, B_2. ४. समासान्तः D_1. ५. P drops it. ६. C drops द्विभूमः । त्रिभूमः. ७. Dropped D_4. ८. Before it—चत्वारः पन्थानः समाहृता इति Dc_3.

[1]पद्मनाभः । [2]ऊर्णनाभः । दीर्घरात्रः । वर्षारात्रः ।

अक्ष्णोदर्शनात् ॥५।४।७६॥

अचक्षुःपर्यायादक्ष्णोच् स्यात् [3]समासे ॥ गवामक्षीव [4]गवाक्षः । चक्षुषि तु । विप्राक्षि ।

[5]**अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥५।४।७७॥**

अचतुरेति [6]सूत्रेणाजन्ताः पञ्चविंशतिर्निपात्यन्ते ।

अजिति योगविभागादिति भावः । **पद्मनाभ** इत्यादि । पद्मं नाभौ यस्य । ऊर्णा नाभौ यस्य । दीर्घा रात्रिः । वर्षासु रात्रिरिति विग्रहाः । 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम् ।

अक्ष्णः । चक्षुःपर्यायो दर्शनशब्दः प्राण्यङ्गवाचीहाश्रीयते इत्यभिप्रेत्याह । **अचक्षुःपर्यायादिति** । **गवामक्षीवेति** । अक्षिशब्दोत्र रन्ध्रवाची ।

अचतुरेत्यादि । ग्रन्थविस्तरभयात् सूत्रमपठित्वैव [7]तदर्थमुक्त्वोदाहरति । तत्तु सूत्रम् 'अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' । अत्र सूत्रे निपतितानां क्वचिद् बहुव्रीहिरेव क्वचिद् द्वन्द्व एवेत्यादि समासनियमष्टिलोपादिकं च निपातनादेव ज्ञेयमित्यभिप्रेत्याह ।

---

१. Before it—नाभेः संज्ञायाम् B_2. २. C drops it. ३. समासान्तः D_1. ४. गवाक्षम् D_1, D, D_5. ५. P, D_1, D_2, Com. omit the Sûtra and gives the अनुवृत्ति only; D_2 gives the Sûtra on the margin. ६. सूत्रेजन्ताः C. ७. एतदर्थ° Bc_3.

आद्यास्त्रयो बहुव्रीहयः । अपगतानि चत्वार्यस्य अचतुरः । विचतुरः । सुचतुरः । त्र्युपाभ्यां चतुरोऽजिष्यते ॥ त्रिचतुराः । उपचतुराः । तत एकादश द्वन्द्वाः । स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिभ्रुवम् । दारगवम् । ऊर्वष्ठीवम् । निपातात्टिलोपः । पदष्ठीवम् । निपातात् पद्भावः । नक्तन्दिवम् । रात्रिन्दिवम् । अहर्दिवम् । अहन्यहनीत्यर्थः । रजसा सकलमत्ति सरजसम् । साकल्येऽव्ययीभावः । निश्चितं श्रेयो निःश्रेयसमिति कर्मधारयः । पुरुषस्यायुः पुरुषायुषमिति तत्पुरुषः । ततो द्विगुः ।

आद्यास्त्रय इत्यादि । तानेवोदाहरति । **अपगतानीत्यादि** । विगतानि चत्वारि यस्य विचतुरः । शोभनानि चत्वारि यस्य सुचतुरः । सर्वस्य वाक्यस्य सावधारणत्वात् बहुव्रीहय एवेति बहुव्रीहिनियमात् तत्पुरुषादौ न स्यात् । न चत्वारोऽचत्वार इत्यादौ । **त्रिचतुरा** इत्यादि । त्रयो वा चत्वारो वा त्रिचतुराः । चतुर्णां समीपे उपचतुराः । 'संख्याव्यय—' इति बहुव्रीहिः । 'बहुव्रीहौ संख्येय—' इति डचि प्राप्तेऽचो विधिः । **तत** इति । तेभ्यस्त्रिभ्यः परे एकादश द्वन्द्वा एव । नियमादिह तत्पुरुषो न । स्त्रियाः पुमान् स्त्रीपुमान् । **निपातनाट्टिलोप** इति । अष्ठीवत्-शब्दस्येति शेषः । ननु चाहर्दिवमित्यत्र पर्याययोर्द्वन्द्व इत्याशङ्क्य वीप्सायां द्वन्द्वो निपात्यत इत्यभिप्रेत्याह । **अहन्यहनीत्यर्थ** इति । **रजसेत्यादि** । तेन बहुव्रीहौ न । सह रजसा सरजः पङ्कजमिति । **निश्चितमित्यादि** । कर्म-धारयनियमान्निश्चितं श्रेयोऽस्येति निःश्रेयस्कः पुमानित्यत्र बहुव्रीहौ न **पुरुषस्यायुरित्यादि** । तत्पुरुषनियमात् पुरुषश्चायुश्च पुरुषायुषी इति द्वन्द्वे न । तत इति । ततः परौ द्वौ द्विगू एवेत्यर्थः ।

---

१. वाङ्मनसी D_5. २. उर्वष्ठीवम् D_1, D_2 ; ऊरूश्चाष्ठीवच्च ऊर्वष्ठीवम् D_5. ३. सकलं सरजसमत्तीति साकल्ये° C. ४. द्विगू D_1. ५. चत्वार्यस्य Dc_4. ६. सरजसं Dc_4.

द्व्यायुषम् । त्र्यायुषम् । ततो द्वन्द्वः । [1]ऋग्यजुषः । ततस्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः । शुनः समीपमुपशुनम् । गोष्ठे श्वा गोष्ठश्वः ।

ब्रह्महस्तिभ्यां वर्चसः ॥५।४।७८॥

ब्रह्मवर्चसम् । हस्तिवर्चसम् ।

पल्यराजभ्यां च* ॥ पल्यवर्चसम् । राजवर्चसम् ।

अवसमन्धेभ्यस्तमसः ॥५।४।७९॥

[2]एभ्यस्तमसोच् स्यात् ॥ अवतमसम् । संतमसम् । अन्धतमसम् ।

द्व्यायुषमित्यादि । द्वे आयुषी समाहृते । इह न द्वयोरायुर्द्व्यायुः । त्र्यायुरिति । **ऋग्यजुषमिति** । ऋक् च यजुश्च । द्वन्द्वनियमादिह न । ऋगेव यजुरस्य ऋग्यजुरुन्मुग्धः । तत इत्यादि । कर्मधारयनियमात् बहुव्रीहौ न । जातोक्षो ब्राह्मणः । शुनः समीपमिति विग्रहेणाव्ययीभाव एवेति दर्शयति । इह न । उपगतः श्वास्य उपश्वा । गोष्ठे श्वेति विग्रहः । विशेषेण सप्तमीतत्पुरुष एवेति दर्शयति । इह न । गोष्ठस्य श्वा गोष्ठश्वा ।

ब्रह्म । आभ्यां परात् वर्चस्शब्दादच् । **ब्रह्मवर्चसम्** । **हस्तिवर्चसमिति** । षष्ठीतत्पुरुषौ ।

पल्येति । आभ्यां परादपि वर्चस्शब्दादच् स्यादिति वाच्यमित्यर्थः ।

अवसम् । **अवतमसमित्यादि** अवहीनं तमसा अवहीनं वा तमः इति प्रादिसमासः । एवं संगतं तमसा संगतं वा तमः । अन्धं करोतीत्यन्धम् । तच्च तमः अन्धतमसम् ।

---

१. ऋग्यजुषम् Bc_3, D_4, D_5. २. C drops the अनुवृत्ति. ३. Dropped D_1, B_2, Bc_3. ४. After it—द्वयोरायुषोः समाहार इति वा । Dc_3. ५. After it—महोक्षा वृद्धोक्षा Dc_3. ६. Before it—पल्यवर्चसम् । राजवर्चसम् । इति षष्ठीतत्पुरुषौ । Dc_3. ७. तत्तमः Dc_2.

श्वसोवसीयश्श्रेयसः ॥५।४।८०॥

श्वोवसीयसम् । मयूरव्यंसकादित्वात् समासः । श्वः-श्रेयसम् । शुभार्थावेतौ ।

अन्ववतप्ताद्रहसः ॥५।४।८१॥

अनुरहसम् । अवरहसम् । तप्तरहसम् ।

प्रतेरुरसः सप्तमीस्थात् ॥५।४।८२॥

प्रतेः परात् सप्तमीस्थादुरसोच् स्यात् ॥ उरसि प्रतिवर्तते प्रत्युरसम् । विभक्त्यर्थेऽव्ययीभावः । सप्तमीस्थात् किम् । प्रत्युरः ।

श्वसः । श्वसः पराभ्यामाभ्यामच् । **श्वोवसीयसमित्यादि** । श्वोवसीयः श्वश्रेयः इति विगृह्य मयूरव्यंसकादित्वात् समासः । **शुभार्थाविति** । एतौ समासान्तौ शब्दौ शुभार्थौ शुभवाचकौ शब्दशक्तिस्वाभाव्यादिति भावः । तथोक्तं **पाणिनीयमतदर्पणे** ।

'अर्थे परपदस्यात्र श्वःशब्दः कालवाच्यपि ।
अभिधत्ते स्वभावेन तेनेमौ मङ्गलार्थकौ' ॥ इति ।

अन्व । एभ्यः पराद्रहसोच् । **अनुरहसमित्यादि** । अनुगतं रहः । अवगतं रहः इति तत्पुरुषः । अनुगतं रहोत्र अवगतं रहोत्रेति बहुव्रीहिर्वा । **तप्तरहसमिति** । तप्तं च तद्रहश्च । तथोक्तं **पाणिनीयमतदर्पणे** ।

'परेणानधिगम्यं हि यद्रहो वह्नितप्तवत् ।
तप्तं च तद्रहश्चेति तत् तप्तरहसं विदुः' ॥ इति ।

प्रतेः । सप्तमीस्थात् किम् । प्रतिगतमुरः प्रत्युरः ।

---

१. P, D_1, Dc_1, Bc_3 drop मयूर°...समासः. २. C, D_1, D_2, D_4, D_5 drop from सप्तमी to प्रत्युरः ।

अनुगवमायामे ॥५।४।८३॥

एतन्निपात्यते दीर्घत्वे । अनुगवं यानम् । दीर्घमित्यर्थः । 'यस्य चायामः' इति समासः ।

उपसर्गादध्वनः ॥५।४।८५॥

प्रगतोध्वानं प्राध्वो रथः ।

न पूजनात् ॥५।४।६९॥

पूजार्थात् परेभ्यः समासान्तप्रत्यया न स्युः ॥ सुराजा । अतिराजा । स्वतिभ्यामेव । नेह । परमराजः । पूजनात् किम् । गामतिक्रान्तोतिगवः । बहुव्रीहौ सक्थ्यक्ष्णोर-निषेधः । सुसक्थः । स्वक्षः ।

अनुगव । **अनुगवमिति** । गामन्वायतं गोदैर्घ्येणान्वितं शाकटमेवमुच्यते । अन्यत्र गवां पश्चात् समीपं वा अनुगु इत्येव । स्पष्टत्वात् त्यक्तं 'द्विस्तावा त्रिस्तावा वेदिः' ॥५।४।८४॥ वेद्यां वाच्यामेतौ निपात्येते । यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा कस्यांचिद्विकृतौ या वेदिस्तस्यामेतन्निपातनम् । अच्टिलोपसमासा निपात्यन्ते । द्विस्तावती द्विस्तावा । त्रिस्तावती त्रिस्तावा । वेदिः किम् । द्विस्तावती त्रिस्तावती रज्जुः ।

उपसर्गात् । अस्मादध्वनोच् । **प्रगत** इत्यादि । प्रादिसमासः । उपसर्गग्रहणं प्राद्युपलक्षणार्थम् । क्रियायोगाभावात् । उपसर्गात् किम् । परमाध्वा ।

न पू° । **स्वतिभ्यामेवेति** । पूजार्थामेवेति । पूजार्थाभ्यां स्वतिभ्यामेव परस्य समासान्तो निषिध्यत इति वाच्यमित्यर्थः । **बहुव्रीहाविति** । एतच्च प्राग्बहुव्रीहिग्रहणं कर्तव्यमिति वार्तिकाल्लभ्यते ।

---

१. After it—सूत्रं व्याख्यायते Dc3.

किमः क्षेपे ॥५।४।७०॥

क्षेपार्थात् किमः परस्य समासान्तो न स्यात् ॥ किंराजा ।[२]

नञस्तत्पुरुषात् ॥५।४।७१॥

नञ्पूर्वात् तत्पुरुषात् समासान्तो न ॥ अराजा । असखा । तत्पुरुषात् किम् । अनृचो माणवकः । अधुरम् ।

पथो विभाषा ॥५।४।७२॥

नञ्पूर्वात् पथो वा समासान्तः ॥ अपथम् । अपन्थाः । तत्पुरुषादित्येव । अपथो देशः । अपथं वर्तते ।

किमः । किंराजेति । निन्दितो राजेति विगृह्य 'किं क्षेपे' इति समासः । क्षेपे किम् । कस्य गौः किंगवः । ननु लक्षणप्रतिपदोक्तपरिभाषया किं क्षेपे इति प्रतिपदोक्तः किं समासो ग्रहीष्यत इति क्षेपग्रहणं व्यर्थमिति चेत् नैष दोषः । अत्रैषा परिभाषा नोपतिष्ठत इति ज्ञापनार्थत्वात् क्षेपग्रहणस्य तेन बहुव्रीहावपि निषेधः स्यात् । कुत्सिता धूरस्य किंधूः शाकटमिति ।

नञः । अराजेत्यादि तत्पुरुषः । अनृच इत्यादि बहुव्रीहिः ।

पथः । अपथमिति । अपथं नपुंसकम् । अपथं वर्तते इत्यर्थाभावेऽव्ययीभावः ।

---

१. Before it—'किं क्षेपे' इति समासः । D_5. २. B_1 has after it—क्षेप इति किम् । कस्य राजा किंराजः ।; क्षेपे किम् । कस्य गौः । किंगवः B_2, ३. After it—स्यात् C, B_1, B_2, D_3. ४. तत्पुरुषे Bc_1. ५. बहुव्रीहौ Bc_1.

लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि ।

समो वा हिततयोर्मांसस्य पचि युंट्घञोः ॥[१]

अवश्यसेव्यः[२] । गन्तुकामः । गन्तुमनाः । सहितः । संहितः[३] । सततम्[४] । संततम् । मांस्पचनम्[५] । मांसपचनम् । मांसपाकः । मांस्पाकः । काममनसोः समोन्तलोप इति केचित् । सकामः । समनाः ।

उदकस्योदः संज्ञायाम् ॥६।३।५७॥

उदकस्योदादेशः स्यादुत्तरपदे संज्ञायाम् ॥ उदमेघः ॥

लुम्पेदित्यादि । अन्त्यमिति शेषः । तेनावश्यंशब्दस्य कृत्ये कृत्यप्रत्ययान्ते परे मलोपः काममनसोः परयोः तुमुप्रत्ययस्याप्यन्त्यं लुम्पेत् । हिततशब्दयोः परतः संशब्दस्यान्त्यं वा लुम्पेत् मांसशब्दस्य चान्त्यं लुम्पेत् डुपचष् पाके इत्यस्मिन् धातौ परे । किंविशिष्टे । युट्घञोः परतो यः पच् तस्मिन्नित्यर्थः । **अवश्यसेव्य** इति । अवश्यं सेव्यः । गन्तुं कामोस्य । गन्तुं मनोस्य । सम्यक् हितः । सम्यक् ततः । मासस्य पचनम् । मांसस्य पाक इति विग्रहा ज्ञेयाः ।

उदकस्य । उदमेघो नाम यस्य औदमेघिः पुत्रः । उदवाहो नाम यस्य औदवाहिः पुत्रः । **उदमेघ** इति । उदकस्य मेघः । अथवा उदकपूर्णो मेघः[६] । शाकपार्थिवादित्वादुत्तरपदलोपी तत्पुरुषः[७] ।

---

१. स्फुट् Dc_1. २. C has मयूरव्यंसकादित्वात् समासः after it. ३. संहितम् । सहितम् D_4. ४. सततः D_1 D_5 ; संततः D_2, D_5, संततम् । सततम् । D_4. ५. B_1 drops मांस्पचनम् ; C, D_1; D_4 have मांसपचनम् । मांस्पचनम् । ६. After it—उदमेघः । अथवा उदकेनोपलक्षितो मेघः Dc_3. ७. समासः Dc_3.

उदवाहः । उत्तरपदस्यापि* ॥ लोहितोदः । क्षीरोदः ।

पेषंवासवाहनधिषु च ॥६।३।५८॥

एषु [1]उदकस्योदादेशः [2]स्यात् ॥ उदपेषं पिनष्टि [3]। णमुलन्तः । उदवासः । उदवाहनः । उदधिः । [4]किप्रत्ययान्तः ।

एकहलादौ पूरयितव्येन्यतरस्याम् ॥६।३।५९॥

[5]असंयुक्त हलादौ परपदे [6]उदादेशो वा ॥ [7]उदकुम्भः । उदपात्रम् । [8]पक्षे । उदककुम्भः [9]। [10]एकेति किम् । उदकस्थाली । [11]पूरणीयेति किम् । उदकपर्वतः ।

उदवाह इति । उदकं वहतीति कर्मण्यण् । उत्तरपदस्यापीति । उत्तरपदभूतस्यापि उदकशब्दस्योदादेशः स्यादिति वक्तव्यमित्यर्थः । लोहितोदः । क्षीरोद इति बहुव्रीहिः ।

पेषं । असंज्ञार्थं वचनम् । उदपेषं पिनष्टीति । उदकेन पिष्ट्वा । णमुलन्त इति । उदपेषमित्ययं 'स्नेहेन पिषः' इति विहितणमुलन्तः इत्यर्थः । उदवास इत्यादि । उदके वासः । उदकस्य वाहनः । उदधिरिति । उदकं धीयतेस्मिन्नित्युदधिः । किप्रत्ययान्त इति । 'कर्मण्यधिकरणे च' इति विहितकिप्रत्ययान्त इत्यर्थः ।

एक । अत्रैकशब्दोसहायवाची । एकोसहायस्तुल्यजातीयेनानन्तरेण हलाविनाभूतोसंयुक्त इति यावदित्यभिप्रेत्याह । असंयुक्तहलादाविति । उदकादिना द्रव्येणान्तर्व्याप्तव्यः पूरयितव्य उच्यते ।

---

१. उदकस्योदः । उदपेषं &c. D_1, D_4, D_5. २. °स्योदः स्यात् B_2. ३. P. Bc_3 drop it. ४. क्विप्रत्ययान्तः C ; विप्रत्ययान्तः D_1 क्वचप्प्रत्ययान्तः D_2. ५. असंयुक्तैकहलादौ C. ६. Before it—उदकस्य D_5. ७. उदकुम्भः । उदककुम्भः । उदपात्रम् । उदकपात्रम् । B_2. ८. C. B_2, D_4 drop पक्षे. ९. After it—उदकपात्रम् D_4. १०. एकहलादाविति किम् । D_4. ११. पूरणीये किम् D_1.

मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ॥६।३।६०॥

एषु परपदेषूदकस्योदादेशो वा स्यात् ॥ उदमन्थः । उदकमन्थः । इत्यादि ॥

इको ह्रस्वोऽङ्यो गालवस्य ॥६।३।६१॥

अङ्यन्तस्येको ह्रस्वो वा । ग्रामणिपुत्रः । ग्रामणीपुत्रः ।

मन्थौदन । द्रव्यसंस्कृताः सक्तवो मन्थाः । तत्र मन्थशब्दो यदाव्युत्पन्नस्तदा उदकेन मन्थ इति 'तृतीया' इति योगविभागात् समासः । अथ व्युत्पन्नो मथ्यते मन्थ इति तदा 'कर्तृकरणे—' इति । आदिना उदौदनः । उदकौदनः । उदसक्तुः । उदकसक्तुः । 'अन्नेन व्यञ्जनम्' इति तृतीयासमासः । उदबिन्दुः । उदकबिन्दुः । उदवज्रः । उदकवज्रः । षष्ठीतत्पुरुषौ । उदभारः । उदकभारः । उदहारः । उदकहारः । 'कर्मण्यण् ।' उपपदसमासः । उदवीवधः । उदकवीवधः । षष्ठीसमासः ।

इकः । ग्रामं नयवीति ग्रामणीस्तस्य पुत्रो ग्रामणिपुत्रः ।

---

१. P, Bc_3 drop it. २. Dropped D_5. ३. Dropped D_5. ४. After it—स्यात् B_1, D_4, Dc_1. ५. After this D_1 has—इयङुवङ्भाविनामव्ययानां च न ह्रस्वः ॥* श्रीकुलम् । भ्रूकुलम् । काण्डीभूतम् । अभ्रूकुंसादीनाम् । भ्रूकुंसादीनां तु स्यादेव । भ्रूकुंसः । भ्रुकुंसः । भ्रूकुटिः । भ्रुकुटिः । अपर आह । भ्रुकुंसादीनामकारः स्यादिति । भ्रकुंसः । भ्रकुटिः । ङ्यन्तस्य तु गार्गीपुत्रः । ष्यङः संप्रसारण &c, ; B_2 has—इयङुवङ्भाविनामव्ययानां च प्रतिषेधः । श्रीमदः । भ्रूमदः । भ्रूभङ्गः । शुक्लीभावः । ङ्यन्तस्य तु गार्गीपुत्रः । त्यक्तमूत्रम् । 'ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥' ङ्यन्तस्याबन्तस्य च संज्ञाछन्दसोर्बहुलं ह्रस्वः स्यात् ॥ रेवतिपुत्रः । रोहिणिपुत्रः । भरणिपुत्रः । प्रस्य च हौ छन्दसि ।* आबन्तस्य संज्ञायाम् । शिलवहम् । शिलप्रस्थम् । अजक्षीरेण न च भवति । ऊर्णासूत्रेण कवयो वयन्ति । बहुलग्रहणादिति काशिकायाम् ॥. ६. द्रवद्रव्य° Bc_3, Dc_3. ७. व्युत्पन्नं मथ्यते मन्थमिति Bc_1, Dc_1, Bc_3. ८. Before it:—उदगाहः । उदकगाहः । Dc_2. ९. °समासौ Dc_2, °तत्पुरुषः Bc_3.

ङ्यन्तस्य तु । गार्गीपुत्रः । इयङुवङ्भाविनामव्ययानां च प्रतिषेधः* । श्रीमदः । श्रीपुत्रः । स्वयंभूपुत्रः । भ्रूभङ्गः । शुक्लीभावः ॥[3]

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥६।१।१३॥

ष्यङन्तस्य संप्रसारणं स्यात् पुत्रपत्योः परतस्तत्पुरुषे ॥ पूर्वरूपत्वम् ।

गालवग्रहणं पूजार्थम् । अन्यतरस्यामिति हि वर्तते । **गार्गीपुत्र** इति । 'यञश्च' इति गार्ग्यशब्दात् ङीप्[4] । 'हलस्तद्धितस्य' इति यलोपः । इयङुवङ्भाविनामव्ययानां च न ह्रस्वः । श्रीकुलम्[5] । भ्रूकुलम् । काण्डीभूतम् । वृषलीभूतम् । अभ्रूकुंसादीनाम् । भ्रूकुंसादीनां तु स्यादेव । भ्रुकुंसः । भ्रूकुंसः । भ्रुकुटिः । भ्रूकुटिः । अपर आह । अभ्रूकुंसादीनामित्यस्यायमर्थः । भ्रूकुंसादीनामकारः स्यादिति । भ्रकुंसः । भ्रकुटिः ।

ष्यङः । ष्यङन्ते यद्यपि बहवो यणः संभवन्ति तथापि निर्दिश्यमानस्यादेशा भवन्तीति ष्यङ एव संप्रसारणम् । ष्यङः किम् । इभ्यापुत्रः । पुत्रपत्योः किम् । कौमुदगन्ध्याकुलम् । तत्पुरुषे किम् । कौमुदगन्ध्या पतिरस्य कौमुदगन्ध्यापतिर्ग्रामः । उपसर्जने ष्यङि न संप्रसारणम् । अतिक्रान्तः कौमुदगन्ध्यामतिकौमुदगन्ध्यः । तस्य पुत्रोतिकौमुदगन्ध्यपुत्रः । अनुपसर्जनष्यङन्तस्य तु स्यादेव । परमकौमुदगन्ध्यायाः पुत्रः परमकौमुदगन्धीपुत्रः । पुत्रपत्योः केवलयोरिदं संप्रसारणम् । तदादौ तदन्ते च न । कौमुदगन्ध्यापुत्रकुलम् । कौमुदगन्ध्यापरमपुत्रः । पूर्वरूपत्वमिति । 'संप्रसारणाच्च' इति ।

---

१. भाविनां and च dropped B_1, D_2, D_4, D_5; D_4 has वाच्यः after प्रतिषेधः. २. P has श्रीकुलम् । भ्रूकुलम् । भ्रूभङ्गः । वृषलीभूतम् ।; D_2 has—ङ्यन्तस्य तु गार्गीपुत्र. । श्रीकुलम् । भ्रूकुलम् । वृषलीभूतम्. ३. After this—ङ्यन्तस्य तु गार्गीपुत्रः । D_5. ४. ङीष् Dc_3. ५. श्रीस्रजम् Bc_3.

संप्रसारणस्य ॥६।३।१३९॥

संप्रसारणान्तस्य दीर्घः स्यात् ॥[1] कौमुदगन्ध्याः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । व्यवस्थितविभाषया[2] ह्रस्वो न ।

संप्र । कौमुदगन्धीपुत्र इति । कुमुदस्येव गन्धोस्येति बहुव्रीहिः । तत्र 'उपमानाच्च' इति गन्धशब्दस्येदन्तादेशः । कुमुदगन्धेरपत्यमित्यण् । तदन्तस्य स्त्रियाम् 'अणिञोः—' इति ष्यङ् । ततः 'यङश्चाप्' । ततः षष्ठीसमासः । ततः संप्रसारणम् । पूर्वरूपत्वम् । दीर्घः । ननु चात्र 'इको ह्रस्व—' इति विकल्पेन ह्रस्वो भाव्य इत्याशङ्क्याह । व्यवस्थितविभाषयेति । तत्रान्यतरस्यामित्यनुवर्तते । सा च व्यवस्थितविभाषेत्यत्र ह्रस्वो नेत्यर्थः । 'ष्यङः संप्रसारणम्—' इत्यस्य व्याख्यानेनैव व्याख्यातप्रायत्वात् त्यक्त्वा[6] व्याख्यायते । 'बन्धुनि बहुव्रीहौ' ॥६।१।१४॥ ष्यङन्तस्य संप्रसारणं स्यात् बन्धुशब्दे उत्तरपदे बहुव्रीहौ । कौमुदगन्ध्या बन्धुरस्य कौमुदगन्धीबन्धुः । बहुव्रीहौ किम् । कौमुदगन्ध्याया बन्धुः कौमुदगन्ध्याबन्धुः । अत्रापि पूर्ववदेव । अतिकौमुदगन्ध्याबन्धुरिति अत्र न स्यात् । परमकौमुदगन्धीबन्धुरत्र स्यात् । तथा कौमुदगन्ध्यापरमबन्धुः कौमुदगन्ध्याबन्धुकुलमित्यत्र न स्यात् । बन्धुनीति नपुंसकनिर्देशः शब्दरूपापेक्षया । पुल्लिङ्गाभिधेयस्त्वयं बन्धुशब्दः । 'मातच्मातृकमातृषु' । ष्यङ् प्रसार्यो विभाषया बहुव्रीहावेव । कौमुदगन्ध्या मातास्येति बहुव्रीहौ कृते स्यादेवोपसंख्यानात् पक्षे मातृशब्दस्य मातजादेशः । तत्र चित्त्वसामर्थ्यात्

---

१. उत्तरपदे after it B_1, B_2, D_4. २. °विभाषयात्र D_1, B_2, D_2, D_4. ३. गन्धो यस्य° Dc_2. ४. करीषगन्धे° Dc_1, Bc_1, Dc_4. ५. After it—च Bc_1. ६. Before it—सूत्रं Dc_3. ७. Before it—कारीषगन्ध्या बन्धुरस्येति कारीषगन्धीबन्धुः । Dc_3.

ऐकतद्धिते च ॥६।३।६२॥

एकस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च ॥ एकस्या भावः एकता । एकक्षीरम् ।

इष्टकेषीकामालानां चिततूलभारिषु ॥६।३।६५॥

इष्टकादीनां चितादौ पेरे[1] यथाक्रमं ह्रस्वः स्यात् ॥ इष्टकचितम् ।

बहुव्रीहिस्वरमन्तोदात्तो बाधते । मातृमातृकशब्दयोश्च भेदेन ग्रहणात् 'नद्यृतश्च' इति कबपि विकल्प्यते[2] । कौमुदगन्धीमातः । कौमुदगन्ध्यामातः । कौमुदगन्धीमातृकः । कौमुदगन्ध्यामातृकः । कौमुदगन्धीमाता । कौमुदगन्ध्यामाता ।

एक । अत्रानिर्दिष्टस्थानिकह्रस्वविधेरचश्चेति परिभाषोपतिष्ठते । तत्र विशेषणविशेष्यभावे कामचारादत्राचा गृह्यमाण एकशब्दो विशेष्यते अजन्तस्यैकशब्दस्य ह्रस्वः स्यादिति । न पुनर्गृह्यमाणेनैक-शब्देनाच् । एकशब्दस्याच इति अनिष्टप्रसङ्गात् । तत्राजन्तस्यैक-शब्दस्य ह्रस्वो विधीयमानो व्यर्थस्तस्य ह्रस्वान्तत्वादेवेति कृत्वा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषोपतिष्ठते । तत[3] आबन्तस्यैकशब्दस्य ह्रस्वोत्र[4] विधीयत इत्येतच्चेतसि कृत्वा विगृह्णाति । **एकस्या भाव** इति । यदैकशब्दो न संख्यावाची तदेदमुदाहरणम् । संख्यावाचित्वे तु 'त्वतलोर्गुणवचनस्य' इति पुंवत्त्वेनैव सिद्धम् ।

इष्ट । इष्टकचितमिति इष्टकाभिश्चितम् । 'कर्तृकरणे कृता—' इति समासः ।

---

१. एकस्य तद्धिते च B_2. २. परे पदे D_4. ३. विकल्पते Dc_3. ४. अत Dc_2; तत्र Dc_3. ५. अत्र dropped Dc_2.

ईषीकतूलम्[1]। मालभारी। तदन्तस्यापीष्टिः। पङ्क्तिष्टकाचितम्[2]।

ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु ॥६।३।८५॥

एषु परेषु[3] समानस्य सः स्यात् ॥ समानं ज्योतिर्यस्यासौ[4] सज्योतिः। इत्यादि।

पिण्डगन्धलोहितकुक्षिवेणि[5]पत्नीपक्षेष्वपीति केचित्। सपिण्डः। इत्यादि[6]।

ईषीकतूलमिति[7]। षष्ठीसमासः। मालां[8] भर्तुं शीलमस्य[9] मालभारी। ताच्छील्ये णिनिः[10]।

ज्योतिः। आदिना सजनपदः। सरात्रिः। सनाभिः। सनामा। सगोत्रः। सरूपः। सस्थानः। सवर्णः। सवयाः। सवचनः। सबन्धुः।

[11]पिण्डेत्यादि। तथोक्तं मुग्धबोधे। ज्योतिर्जनपदरात्रिनाभिबन्धुगन्धपिण्डलोहितकुक्षिवेणीब्रह्मचारितीर्थ्यपत्नीपक्षे समानः सः इति।

---

१. ईषीकरूपम् D_2. २. पङ्क्तिष्टिक° D_4. ३. B_1 drops परेषु. ४. °र्यस्य स D_2, D_4. ५. वेणी C, D_1, B_2, Dc_1, D_4. ६. Dropped D_5. ७. °मित्यादि। Dc_3. ८. Before it—इषीकायास्तूलमिति Dc_3. ९. यस्य for अस्य Dc_2. १०. After it—उपपदसमासः Dc_3. ११. सपिण्डे° Dc_3.

चरणे ब्रह्मचारिणि ॥६।३।८६॥

ब्रह्मचारिणि परपदे समानस्य सः स्यात् व्रताचरणे[1] गम्ये॥ सब्रह्मचारी ।

तीर्थे ये ॥६।३।८७॥

यप्रत्ययान्ते तीर्थे परे प्राग्वत्॥ सतीर्थ्यः॥

विभाषोदरे ॥६।३।८८॥

यान्ते उदरे परे प्राग्वद्वा ॥ सोदर्यः[2] । समानोदर्यः । रूपनामगोत्रस्थानवर्णवयोवचनधर्मजातीयेषु वेति केचित् ॥ सरूपः । समानरूपः । इत्यादि ।

चरणे । **सब्रह्मचारीति** । समानो ब्रह्मचारी सब्रह्मचारी । ब्रह्म वेदः । तदध्ययनाय यद् व्रतं तदपि ब्रह्म । तच्चरतीति ब्रह्मचारी । [3]तीर्थपत्नीपक्षे 'व्रते' इति णिनिः । समानस्तस्यैव ब्रह्मणः समानत्वादित्ययमप्यस्यार्थो भवति । समाने ब्रह्मणि व्रतचारी सब्रह्मचारी ।

तीर्थे । **प्राग्वदिति** । समानस्य सः । य इति वर्णः सप्तम्या निर्दिष्टस्तेन ययतोर्द्वयोरपि ग्रहणम् । **सतीर्थ्य** इति । समाने तीर्थे गुरौ वासी । 'समानतीर्थे वासी' इति यत्प्रत्ययः ।

विभा । **सोदर्य** इत्यादि । 'सोदराद्यः' इति यः । समानोदरे शयितः । 'समानोदरे शयित ओ चोदात्तः' इति यत् । **रूपेति** । तथोक्तं मुग्धबोधे । 'रूपनामगोत्रस्थानवर्णवयोवचनधर्मजातीयोदर्ये वा' इति ।

---

१. ब्रह्माचरणे D_1. २. समानोदर्यः । सोदर्यः । D_5. ३. Dc_2 Dc_4 drop तीर्थपत्नीपक्षे.

दृग्दृशवतुषु ॥६।३।८९॥

एषु समानस्य सः स्यात् ॥ सदृक् । सदृशः ॥ दृक्षे चेष्यते । सदृक्षः । वतुरुत्तरार्थः ।

इदंकिमोरीश्की ॥६।३।९०॥

इदम ईश् किमः की स्यात् दृक्दृशवतुषु ॥ ईदृक् । ईदृशः । कीदृक् कीदृशः ॥ दृक्षे च ॥ ईदृक्षः । कीदृक्षः । वतूदाहरणं वक्ष्यते ।

आ सर्वनाम्नः ॥६।३।९१॥

एषु सर्वनाम्न आकारोन्तादेशः स्यात् ॥ तादृक् । तादृशः । तादृक्षः ।[4] दीर्घः । मत्वोत्वे । अमूदृक् । अमूदृशः ।[5]

दृग्दृश । सदृगित्यादि । समानमात्मना पश्यति समान इव दृश्यत इति वा विग्रहः । रूढिशब्दोऽयं नात्रावयवार्थो ग्राह्यः । 'समानान्ययोश्च वक्तव्यम्' इति कञ्क्विनौ । ननु वतुग्रहणं व्यर्थं यतः समानशब्दात् परो वतुप् न संभवत्येवेत्याशङ्क्याह । वतुरुत्तरार्थ इति ।

इदं । शः सर्वादेशार्थः । ईदृगित्यादि । अयमिव दृश्यते । इदमिव पश्यतीति वा । वतूदाहरणं वक्ष्यत इति । तद्धित इति ज्ञेयम् ।

आ सर्व । दीर्घविधिः 'अतो गुणे' इति पररूपबाधनार्थः । दीर्घ इत्यादि । अदस् दृश् इति स्थिते दीर्घ आकारान्तादेशः । 'अदसोसेः—' इति दस्य मत्वम् । दीर्घस्याकारस्य दीर्घ ऊकारः । असाविव दृश्यते अमुमिव पश्यतीति वा अमूदृक् ।

---

१. D_1 drops it. २. °हरणं वक्ष्यते । D_4. ३. D_1 drops it. ४. दीर्घमत्वोत्वे कृते D_1. ५. After it—अमूदृक्षः D_1, D_4, D_8. ६. दृक्र Dc_4, Dc_3.

विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये ॥६।३।९२॥

अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यात् वप्रत्ययान्तेऽञ्चतौ परे ॥ विश्वद्र्यङ् । देवद्र्यङ् । तद्र्यङ् । यद्र्यङ् । अमुमञ्चति अदद्र्यङ् ॥ अदसोऽद्र्यादेशस्य 'अदसोसेः—'इति मुभाव इत्येके । अदमुयङ् । अविशेषादुभयत्रापीत्यपरे । अमुमुयङ् । आदावेवेत्यन्ये । अमुद्र्यङ् । वप्रत्यये किम् । विष्वगञ्चः ॥

विष्वक् । **विष्वद्र्याङिति** । विष्वगञ्चतीति 'ऋत्विक्—' आदिसूत्रेण क्विन् । 'उगिदचाम्—' इति नुम् । 'संयोगान्तलोपः' । 'क्विन्प्रत्ययस्य कुः' । एवं देवानञ्चतीति देवद्र्यङ् । तमञ्चतीति तद्र्यङ् । यमञ्चतीति यद्र्यङ् । अद्रिसध्र्योरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम् । तत्र यणादेशे कृते 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितो भवति । **अदस** इत्यादि । तथोक्तं **वार्तिककारेण** ।

'अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येके सेऽर्हि दृश्यते' ॥ इति ।

येऽसेः इति निषेधः क्रियते अन्त्यविकारे अन्त्यसदेशस्येति च परिभाषा नाश्रीयते तेषामुभयोरपि मुत्वं स्यात् । **अमुमुयङिति** । यथा चलीकॢप्यत इति लत्वम् । ये तु परिभाषामाश्रयन्ति तेषामन्त्यसदेशस्यैव मुत्वम् । **अदमुयङिति** । येषां तु त्यदाद्यत्वविषय एव मुत्वं तन्मते उभयत्रापि न मुत्वम् । **अदद्र्याङिति** । एतदाचार्यैः स्वमतेनादावुक्तम् । **विष्वगञ्च** इति । पचाद्यच् । कर्तरि भावे घञ् वा । विष्वग्देवयोः किम् । अश्वाङ् । अञ्चतौ किम् । विष्वग्युक् । ननु

---

१. अप्रत्ययान्ते D_2, B_2. २. B_1 drops इत्यपरे; इत्येके D_1. ३ °त्येके D_1. ४. After it—परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः । उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥ D_4. ५. अप्रत्यये D_2. ६. C has पचाद्यच् after it. ७. एत° Dc_3. ८. एत° Dc_3.

समः समि ॥६।३।९३॥

[1]वप्रत्ययान्तेऽञ्चतौ परे समः समिरादेशः स्यात् ॥ सम्यङ् ।[2]

सहस्य सध्रिः ॥६।३।९५॥[3]

अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु ॥६।३।९९॥

अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु ॥ अन्यदाशीः । अन्यदाशा । अन्यदास्था । अन्यदास्थितः । अन्यदुत्सुकः । अन्यदूतिः । अन्यत्कारकः । अन्यद्रागः ।[4] अषष्ठ्यतृतीयास्थस्येति किम् । अन्यस्यान्येन वा आशीः अन्याशीः ॥[5]

वप्रत्ययग्रहणं [6]व्यर्थं यतो वताविल्युक्ते केवले एवाञ्चतौ उत्तरपदे कार्येण भाव्यम् । [7]वप्रत्यय [8]एव केवलोऽञ्चतिरुत्तरपदं स्यात् । उच्यते । वप्रत्ययग्रहणमन्यत्र धातुग्रहणे तदादिविधिप्रतिपत्त्यर्थम् । तेन 'अतः कृकमि—' इत्यत्र कृ इति प्रकृतिप्रत्ययसमुदायो गृह्यते । ततश्चायस्कृत् अयस्कृतमयस्कार इत्यादि सिध्यति ।

समः । सम्यङिति । सम्यगञ्चतीति सम्यङ् ।

सह । सध्र्यङिति सह अञ्चतीति ।

अषष्ठ्य । अन्यदाशीरादयः सर्वे कर्मधारयाः ।[9]

---

१. अप्रत्ययान्ते B_2, D_2. २. After it—सध्र्यङ् D_4. D_5. ३. अन्यस्य B_2, Dc_1. ४. B_1 has after it—अन्यस्मिन् भवः अन्यदीयः |; B_2, Dc_1, D_5 have अन्यदीयम् after it. ५. अन्याशीः dropped D_4. ६. न कार्यं Dc_3. ७. वप्रत्ययान्त एव Dc_2. ८. एव हि Dc_4. ९. अन्यदाशीत्यादय Bc_1, Dc_1, Dc_4.

कारकस्थयोरिष्यते एव ।[1] अन्यस्य कारकः अन्यत्कारकः । अन्यस्येदमन्यदीयम् । गहादित्वात् छः ।

अर्थे विभाषा ॥६।३।१००॥

अन्यदर्थम् । अन्यार्थम् ।

कोः कत्तत्पुरुषेचि ॥६।३।१०१॥

कु इत्यस्य कदादेशः स्यादचि ॥ कदन्नम् । तत्पुरुषे किम् । कूष्ट्रो राजा ।[2] त्रौ च[3] ॥* कुत्सितास्त्रयः कत्त्रयः ।

रथवदयोश्च ॥६।३।१०२॥

कद्रथः । कद्वदः ।

कारकस्थयोरिति । अनयोः षष्ठीतृतीयास्थयोरपि इष्यत एव । तथोक्तं भाष्ये ।

‘ दुगागमोविशेषेण वक्तव्यः कारकस्थयोः ।
षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु ’ ॥ इति ।

अर्थे । **अन्यदर्थ**मिति । अन्यस्मै इदम् । ‘चतुर्थी तदर्थार्थ—’ इति समासः ।

कोः । **कदन्न**मिति । कुत्सितमन्नम् । ‘कुगति—’ इति समासः । **कूष्ट्र** इति । कुत्सिता उष्ट्रा अस्येति बहुव्रीहिः । **त्रौ चे**ति । त्रिशब्दे परेऽपि[4] कोः कदादेशो वक्तव्य इत्यर्थः । अनजादित्वादप्राप्ते वचनम् ।

रथ । कोः कदादेशः स्याद्रथवदयोरुत्तरपदयोः । अनजाद्यर्थो योगः । एवमुत्तरत्रापि ।

---

१. After it—दुगागमो विशेषवक्तव्यः । कारकस्थयोः षष्ठीतृतीययोर्नेष्टः । आशीरादिषु सप्तसु B_2. २. After it—अचीति किम् । कुपुरुषः । B_2. ३. त्रौ च । त्रौ परे कु इत्येतस्य कदादेशः स्यात् । कुत्सितास्त्रयः &c. B_2. ४. अपि dropped Dc_2.

तृणे च जातौ ॥६।३।१०३॥

कत्तृणम् ।

का पथ्यक्षयोः ॥६।३।१०४॥

कोः कादेशः स्यात् पथ्यक्षयोः ॥ कापथः । काक्षः । कुपथोपीति केचित् ।

ईषदर्थे च ॥६।३।१०५॥

ईषज्जलं काजलम् ।[1]

विभाषा पुरुषे ॥६।३।१०६॥

कापुरुषः । कुपुरुषः ।

तृणे । कत्तृणं नाम तृणजातिविशेषः । जातौ किम् । कुत्सितानि तृणानि कुतृणानि ।

का । अनीषदर्थ आरम्भः । **कापथ** इति । 'ऋक्पुर्—' इत्यः । **काक्ष** इति । कुत्सितोक्षः काक्षः । कुत्सितोक्षोस्येति वा । **कुपथ** इत्यादि । तथोक्तं **मुग्धबोधे** । 'पथि पुरुषे वा' इति ।

ईष । ईषदर्थे वर्तमानस्य कोः का इत्ययमादेशः स्यात् ।

विभाषा । 'ईषदर्थे' इत्यस्य निवृत्तत्वात् अप्राप्तविभाषेयम् । ईषदर्थे तु पूर्वविप्रतिषेधेन नित्यः का भवति । ईषत्पुरुषः कापुरुषः ।

---

१. After it—कालवणम् । काम्लम् B_2.

कवं चोष्णे ॥६।३।१०७॥

कवोष्णम्[1] । चकारात् कदुष्णम् । कोष्णम् । अग्नावपीति केचित् । कदग्निः[2] । काग्निः ।

पृषोदरादीनि यथोपदिष्टम् ॥६।३।१०९॥

एतानि यथोपदिष्टान्येव[3] साधूनि । पृषदुदरं[4] पृषोदरम् ।

कवं च । उष्णशब्दे परे कोः कव इत्ययमादेशः स्यात् । अग्नावपीति । तथोक्तं मुग्धबोधे । 'कौ[5] कवौ चाग्न्युष्णे' इति ।

पृषोदरादीनि । एतानीति । पृषोदरादीनि पृषोदरप्रकाराणि । येषां लोपागमवर्णविकाराः शास्त्रेण न विहिता लोके च दृश्यन्ते[6] तानि यथास्थितानि यथोपदिष्टानि साधूनि स्युरित्यर्थः । यथास्थितानीति । कुत्र यथास्थितानि । शिष्टप्रयोगेषु[7] । के ते शिष्टाः । ये अविसंवादिनः तैरुपदिष्टानि तथैवोपगन्तव्यानि । यदि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या । शिष्टवचनादेव शब्दानां साधुत्वं विज्ञास्यते । शिष्टज्ञानार्था अष्टाध्यायी । तथा हि अष्टाध्यायीमधीतवान् पुरुषोयमनधीताष्टाध्यायीकमप्यष्टाध्याय्यां विहितान् शब्दान् प्रयुञ्जानं पश्यन्नेवमध्यवस्यति । नूनमस्य दैवानुग्रहः[8] । स्वभावो वा योयं न चाष्टाध्यायीमधीतवान् अस्यां च विहितान् शब्दान् प्रयुङ्क्ते । नूनमयमन्यानपि जानातीत्येवमेषा शिष्टज्ञानायाष्टाध्यायी । पृषोदरमित्यत्र तस्य लोपः । निरुक्तशास्त्रे ये शब्दा व्युत्पाद्यन्ते तेषां पृषोदरादित्वादेव साधुत्वमिष्यते । तथोक्तम्[9] ।

---

१. चकारात् कवोष्णम् । कदुष्णम् C; ईषदुष्णं जलं कवोष्णम् P; कवोष्णम् । कोष्णम् । चकारात् कदुष्णम् D_4. २. P, D_1 and B_2 have कवाग्निः । before it; C has कवाग्निः । काग्निः । D_2 has कवाग्निः । कदग्निः । and drops काग्निः ।; कवाग्निः । कदग्निः । काग्निः । D_4, D_5. ३. यथास्थितान्येव D_1, D_5. ४. पृषत उदरं पृषोदरम् B_2, D_4, D_5. ५. कत्कवौ in मुग्ध°. ६. Dropped Bc_1. ७. प्रयोगे Dc_2, Dc_4. ८. देवता° Dc_2. ९. यथोक्तम् Dc_1, Dc_4.

[1]भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ।
गूढो[2]त्मा वर्णविकृते[4]र्वर्णनाशात् पृषोदरम् ॥
म[3]ह्यामतिशयेन रौतीति मयूरः । आकृतिगणोऽयम् ॥

'[5]वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥' इति

निश्चयेनोक्तोऽर्थोऽनेनेति निरुक्तम् । तदेतत् पञ्चविधं निरुक्तमुदाहर्तुं पद्यं कृतं भवेदित्यादि । अपूर्वस्य वर्णस्यागमनं वर्णागमस्तस्मात् हंस इति शब्दो भवेत् । तथा हि हन्तेर्गत्यर्थात् पचाद्यचि कृते तस्य सकार आगमः । ततश्च हन्ति गच्छतीति हंस इति भवति । वर्णविपर्ययो वर्णस्थानव्यत्यासस्तस्मात् सिंहशब्दो भवेत् । तथा हि । हिंसि हिंसायामस्मात् पचाद्यचि कृते हकारसकारयोः स्थानव्यत्यासः । ततश्च हिनस्तीति सिंह इति भवति । वर्णस्य विकृतिर्वर्णस्य रूपान्तरापत्तिस्तस्यां गूढोत्मेति शब्दो भवेत् । तथा हि । गूढ आत्मा गूढोत्मेत्याकारस्योकाररूपापत्तिः । वर्णनाशो वर्णलोपः । तस्मात् पृषोदरशब्दो भवेत् । तथा हि । पृषोदरमित्यत्र तकारस्य लोपः । धातोस्तदर्थातिशयेन योगः । अर्थातिशयोऽर्थविशेषः । प्रसिद्धादर्थादर्थान्तरेण धातोः संबन्धः । तल्लक्षणं निरुक्तमुदाहरति । **मह्यामतिशयेन रौतीति मयूर** इति । अत्र रौतेः शब्दक्रियस्यातिशयलक्षणेनार्थान्तरेण योगो जातः । रौतेः पचाद्यचि टिलोपो महीशब्दस्य मयू आदेशः । आकृतिगणोऽयमिति ।

---

१. The verse is dropped P. २. गूढात्मा D_1. ३. मह्यामतिशयेन रौतीति मयूरः given before the verse—D_3, B_1. ४. वर्णविकृति° Dc_2. ५. Before it—भ्रमन् सन् रौतीति भ्रमरः । अत्र तकारलोपः । वाणारसीति । वाणाः असीत्यत्र विसर्गस्य रत्वापत्तिः । शुनश्चिच्छेफमित्यत्र शुनः शेफं चित् अत्र चित्शेफयोर्विकारः । चित्स्थाने शेफः । शेफस्थाने चित् । Dc_3.

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥६।३।११६॥

क्विबन्तेष्वेषु परेषु पूर्वस्य दीर्घः स्यात् ॥ उपानत् । इत्यादि ॥

तेन वारिवाहको वलाहकः जीवनस्य मूतो जीमूतः । शवानां शयनं श्मशानम् । ऊर्ध्वं खमस्य उलूखलम् । पिशिताशः पिशाचः । ब्रुवन्तोस्यां सीदन्तीति वृषी । अश्व इव तिष्ठति अश्वत्थः । महीव तिष्ठति महित्थः । कपिरिव तिष्ठति कपित्थः । इत्यादयोन्ये प्रयोगवशात् ज्ञेयाः । दिक्शब्देभ्यः परस्य तीरस्य तारादेशो वा । दक्षिणतीरम् । दक्षिणतारम् । वाचो वादे डत्वं वल्भावश्चोत्तरपदस्य ञिप्रत्यये । वाचं वदतीति वाग्वादः । तस्यापत्यं वाड्वलिः । दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च । कृच्छ्रेण दाश्यते नाश्यते दभ्यते दूडाशः दूणाशः दूडभः । दभेरनुनासिकलोपो निपातनात् । दुष्टं ध्यायतीति दूढ्यः ।

नहि । नह बन्धने । वृतु वर्तने । वृषु सेचने । व्यध ताडने । रुच दीप्तौ । षह मर्षणे । तनु विस्तारे । **उपानदिति** । उपनह्यत इति उपानत् । संपदादित्वात् क्विप् । आदिना निवर्तते नीवृत् । 'अन्येभ्योपि-' इति क्विप् । एवं सर्वत्र । प्रावृट् । मर्माविंत् । नीरुक् । ऋतीषट् । 'सहेः पृतनर्ताभ्यां च' इत्यत्र योगविभागात् षः । परीतत् । 'गमः क्वौ' इत्यत्र गमादीनामिष्यत इति तनोतेर्नलोपः । क्वौ किम् । परिणहनम् । गतिकारकयोरेव दीर्घो नेह । पटरुक् ।

---

१. Dropped B_1. २. उपानत् । नीवृत् । प्रावृट् । मर्माविंत् । नीरुक् । ऋतीषट् । परीतत् । इत्यादि । क्विबन्तेष्विति किम् । परिनह्यतं B_2, D_5 (परिनहनम् D_5). ३. After it—बन्धः Dc_3. ४. पिशितं मांसमश्नातीति पिशाचः पिशिताशः । अथवा पिशितमत्तीति पिशिताशः पिशाचः । Dc_3.

वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ॥६।३।११७॥

कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात्[1] ॥ किंशुलुकागिरिः[2] ॥

वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः ॥८।४।४॥

एभ्यो वनस्य णत्वं स्यान्नाम्नि[3] ॥ पुरगावणम् । कोटरावणम्[4] । अग्रेवणम्[5] । इत्यादि । एभ्यः किम् । कुबेरवनम् ॥[6]

वनगि । कोटरामिश्रक । सिध्रक । सारिक । पुरग । कोटरादिः । किंशुलुक[7] । साल्व । नभ्र । अञ्जन । भञ्जन । लोहित । कर्कट । किंशुलुकादिः[8] ।

वनं पु । **वनमिति** । सुब्व्यत्ययेन षष्ठ्याः स्थाने प्रथमेत्यभिप्रेत्याह । **एभ्यो वनस्येति** । 'पूर्वपदात्–' इत्येव सिद्धे वनस्य एभ्य एव परस्य णत्वमिति नियमार्थं वचनम् । कृतदीर्घाणां निर्देशो यत्रैव दीर्घत्वं तत्रैव नियमो यथा स्यात् । ततो नास्ति विपरीतनियमाशङ्का । न हि वनादन्यत्रैषां पूर्वपदभूतानां दीर्घोऽस्ति । **पुरगावणमिति** षष्ठीसमासः । **अग्रेवणमिति** । वनस्याग्रे । राजदन्तादित्वात् परनिपातः । आदिना मिश्रकावणम् । सिध्रकावणम् । सारिकावणम् ।

---

१. किंशुल्कादी° C. २. Dropped D_1. ३. After it—नाम्नि B_1, B_2, D_5. ४. किंशुल्का° C. Before it—कोटरावणम् । B_2. ५. Dropped D_1; Before it—पुरगावणम् B_2. ६. After this the Sûtras :—

'**मतौ बह्वचोनजिरादीनाम्**' ॥६।३।११९॥

बह्वचो दीर्घः स्यात् मतौ परे संज्ञायाम् । अमरावती । पुष्करावती । अनजिरादीनामिति किम् । अजिरवती । खदिरवती (From अनजि° to खदिरवती dropped B_2 ; खदिरवती dropped D_4).

शरादीनां च ॥६।३।१२०॥

एषां दीर्घः स्यात् पूर्वविषये । शरावती । वंशावती । are dropped D_3, D_4, C, B_2. ७. किंशुलक Bc_1, Dc_1. ८. किंशुलकादिः Bc_1, Dc_1, Dc_3.

उपसर्गस्य घञ्यमनुष्ये बहुलम् ॥६।३।१२२॥

प्रादेर्बहुलं दीर्घः स्याद् घञन्ते परे ॥ परीहासः । परिहासः । अमनुष्ये किम् । निषादः ॥[1]

शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः ॥* श्वादन्तः । श्वापदम् । इत्यादि ।

उपसर्गस्य । उपसर्गात् केवलात् घञ् न संभवति इति घञन्त उत्तरपदे कार्यं विज्ञायत इत्याह । **घञन्ते परे** इति । **परीहास** इति । हसे हसने । घञ् । निषाद इति । निषीदत्यस्मिन् पापमिति ' हलश्च ' इति घञ् ।

शुन इत्यादि । श्वादन्त इति । शुनो दन्तः । आदिना श्वादंष्ट्रः[2] । श्वाकर्णः । श्वाकुन्दः । श्वावराहः । श्वापुच्छः । एतद्व्याख्यानेनैव व्याख्यातप्रायत्वात् कानिचित् प्रपञ्चत्वात् कानिचित् स्पष्टत्वाच्च त्यक्तानि ' अलुगुत्तरपदे ' इत्युत्तरपदाधिकारसूत्राणि अष्टादश व्याख्यायन्ते । ' कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ' । ६।३।११५॥ कर्णशब्दे उत्तरपदे लक्षणवाचिनां दीर्घः स्यात् विष्टादीन् विना । पशूनां स्वामिविशेषज्ञापनार्थं यद्दात्राकारादि क्रियते चिह्नं तदिह लक्षणं गृह्यते । दात्राकर्णः । द्व्यङ्गुलाकर्णः । लक्षणस्य किम् । शोभनकर्णः । अविष्टादीनां किम् । विष्टकर्ण इत्यादि । अत्र ' संहितायाम् ' इति वर्तते । तेन पदकाले न । ' इको वहे पीलोः ' । ६।३।१२१॥ इगन्तस्य पीलुवर्जितस्य वहे उत्तरपदे दीर्घः स्यात् । ऋषीवहम् । कपीवहम् । इकः **किम्** । पिण्डवहम् । अपील्वादीनां वाच्यम् ।

---

१. After it—**अष्टनः संज्ञायाम्** ॥६।३।१२५॥

अस्य दीर्घः स्यात् संज्ञायामुत्तरपदे ॥ अष्टावक्रः । संज्ञायां किम् । अष्टपुत्रः ॥ D_3, C; B_2 has instead—सादकारयोः । कृत्रिमे दीर्घो वक्तव्यः । प्राकारः । प्रासादः । २. श्वादंष्ट्रा P.

पीलुवहम् । दारुवहम् । 'अष्टनः संज्ञायाम्' । ६।३।१२५॥ अष्टन उत्तरपदे दीर्घः स्यात् । अष्टावक्रः । अष्टापदम् । संज्ञायां किम् । अष्टपुत्रः । 'चितेः कपि' । ६।३।१२७॥ चितिशब्दस्य कप्प्रत्यये परे दीर्घः स्यात् । एकचितीकः । द्विचितीकः । 'शेषाद्विभाषा' इति कप् । 'नरे संज्ञायाम्' । ६।३।१२९॥ नरशब्दे उत्तरपदे विश्वशब्दस्य दीर्घः स्यात् संज्ञायाम् । विश्वानरो नाम यस्य वैश्वानरिः पुत्रः । संज्ञायां किम् । विश्वे नरा अस्य विश्वनरः । 'मित्रे चर्षौ' । ६।३।१३०॥ मित्रे उत्तरपदे विश्वस्य दीर्घः स्यात् ऋषौ वाच्ये । विश्वामित्रो नाम ऋषिः । ऋषौ किम् । विश्वमित्रो माणवकः । हृदयशब्देन समानार्थो हृत्शब्दः प्रकृत्यन्तरमस्ति इति तत एव सिद्धे प्रपञ्चार्थत्वात् त्यक्तं सूत्रद्वयं व्याख्यायते । 'हृदयस्य हृल्लेखयदण्लासेषु' ।६।३।५०॥ हृदयस्य हृदादेशः स्यात् लेखयत्अण्लासेषु परतः। हृदयं लिखति हृल्लेखः । हृदयस्य प्रियं हृद्यम् । हृदयस्येदं हार्दम् । हृल्लासः । लेख इत्यणन्तग्रहणम् । घञि तु हृदयस्य लेखो हृदयलेख इत्येव । एतदेव लेखग्रहणं ज्ञापकमुत्तर-पदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नास्तीति । 'वा शोकष्यञ्रोगेषु' ।६।३।५१॥ एतेषु परेषु हृदयस्य वा हृत् । हृच्छोकः । हृदयशोकः । सौहार्द्यम् । सौहृदय्यम् । हृद्रोगः। हृदयरोगः । स्पष्टत्वात् त्यक्तानि । 'पादस्य पदाज्यातिगोपहतेषु' ।६।३।५२॥ पदादेशोदन्तो विभक्तिलुकं कृत्वा निर्दिष्टः । पादस्य पदादेशः स्यादाज्यादिषु परतः। पादाभ्या-मजतीति पदाजिः । पादाभ्यामततीति पदातिः । औणादिक इण् । अत एव निपातनादजेर्विभावो न । पादाभ्यां गच्छति पदगः । एते कृत्स्वरेण समासान्तोदात्ताः । पादेनोपहतः पदोपहतः । अन्तोदात्तोयम् । 'हिमकाषिहतिषु च' ।६।३।५४॥ 'पद्यत्यतदर्थे' इत्यतः 'पद्' इति वर्तते । एषु पादस्य पद् । पद्धिमम् । पत्काषिणः । पद्धतिः । 'वा घोषमिश्रशब्देषु' ।६।३।५६॥ एषु परेषु पादस्य पद्वा । पद्घोषः । पादघोषः । पद्मिश्रः । पादमिश्रः । पच्छब्दः । पादशब्दः ।

निष्के चेति वाच्यम् । पञ्चनिष्कः । पादनिष्कः । 'कारे सत्यागदस्य' । ६।३।७०।। कारे उत्तरपदे सत्यागदयोर्मुम् स्यात् । सत्यं करोति सत्यस्य वा कारः सत्यंकारः । अगदंकारः । 'अस्तुंकार इत्यपि वाच्यम्' । 'धेनोर्भव्यायां मुम्' । धेनुंभव्या । 'लोकस्य पृणे' । लोकंपृणः । 'इत्येनभ्याशस्य' । अनभ्याशमित्यः । 'भ्राष्ट्राग्न्योरिन्धे' । भ्राष्ट्रमिन्धः । अग्निमिन्धः । 'उष्ट्रभद्रयोः करणे' । उष्ट्रंकरणम् । भद्रंकरणम् । 'सूतोमराजभोजमेरुभ्यो दुहितुः पुत्रड्वादेशः' । सूतपुत्री । सूतदुहितेत्यादि । केचित्तु शार्ङ्गरवादिषु पुत्रशब्दं पठन्ति तेषां पुत्रीति स्यात् । तेन शैलपुत्रीत्यादि सिद्धम् । 'नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या' । ६।३।७५।। एषु नञ् प्रकृत्या स्यात् । न भ्राजते नभ्राट् । न पातीति नपात् । शत्रन्तः । न वेत्तीति नवेदाः । असुन्नन्तः । सत्सु साधवः सत्याः । न सत्याः असत्याः । न असत्या नासत्याः । न मुञ्चतीति नमुचिः । औणादिकः किः । नास्य कुलमस्तीति नकुलः । नास्य खमस्तीति नखः । न स्त्री न पुमान् नपुंसकम् । स्त्रीपुंसयोः पुंसकभावो निपातनात् । न क्षरति न क्षीयते वा नक्षत्रम् । क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते । न क्रामतीति नक्रम् । क्रमेर्डप्रत्ययो निपातनात् । नात्राकमस्तीति नाकः । 'नगोऽप्राणिष्वन्यतरस्याम्' । ६।३।७७।। नग इत्यत्र नञ् वा प्रकृत्याऽप्राणिषु । नगाः । अगाः । पर्वताः । गमेर्डः । अप्राणिषु किम् । अगो वृषलः शीतेन । 'सहस्य सः संज्ञायाम्' ।६।३।७८।। सह इत्यस्य सादेशः स्यात् उत्तरपदे संज्ञायाम् । साश्वत्थः । संज्ञायां किम् । सहयुध्वा । सादेश उदात्तो निपात्यते । स निपातस्वरः पूर्वपदप्रकृतिस्वरत्वं यत्र तत्र भवति । अन्यत्र समासान्तोदात्तत्वेन बाध्यते । सेष्टि । सपशुबन्धमिति अन्तवचनेऽव्ययीभावः । 'ग्रन्थान्ताधिके च' । ६।३।७९।।

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ॥८।४।५॥

एभ्यो वनस्य णत्वं स्यात् ॥ प्रवणम् । एवं निर्वणादि[2] ॥

अनयोर्वर्तमानस्य सहस्य सः स्यात् ग्रन्थान्ते । सकलं समुहूर्तं ज्योतिषमधीते कलान्तं मुहूर्तान्तमित्यन्तवचनेऽव्ययीभावः । तत्र कालवाचिन्युत्तरपदे ‘अव्ययीभावे चाकाले’ इति न प्राप्नोतीत्यारम्भः । अधिके । सद्रोणा खारी । द्रोणाधिकेत्यर्थः । ‘द्वितीये चानुपाख्ये’ । ६।३।८०॥ द्वयोः सहप्रयुक्तयोरप्रधानं द्वितीयः । उपाख्यायते प्रत्यक्षत उपलभ्यत इत्युपाख्यः । तस्मादन्योऽनुपाख्योऽनुमेयस्तस्मिन् द्वितीयेऽनुपाख्ये सहस्य सः स्यात् । साग्निः कपोतः । सपिशाचा वात्या । सराक्षसिका निशा । अग्न्यादयः साक्षादनुपलभ्यमानाः कपोतादिभिरनुमीयमाना अनुपाख्या भवन्ति । ‘प्रकृत्याशिष्यगोवत्सहलेषु’ । ६।३।८३॥ सहशब्दः प्रकृत्या स्यादाशिषि गोवत्सहल इत्येतान्युत्तरपदानि विना । स्वस्ति देवदत्ताय सहपुत्राय सहछात्राय । अगोवत्सहले किम् । स्वस्ति सगवे सवत्साय सहलाय । ‘वोपसर्जनस्य’ इति वा सः ।

प्रनिरन्तः[3] । **प्रवणमित्यादि** । प्रगतं वनम् । निर्गतं वनम् । प्रादिसमासः । आदिना अन्तर्वणम् । विभक्त्यर्थेऽव्ययीभावः । शरवणम् । इक्षुवणम् । प्लक्षवणम् । आम्रवणम् । कार्ष्यवणम् । खदिरवणम् । पीयूक्षवणम् । षष्ठीतत्पुरुषः ।

---

१. असंज्ञायामपि after it in B_1, D_5; संज्ञायामसंज्ञायामपि B_2. २. निर्वणादिषु B_2; निर्वणमित्यादि D_5. ३. प्रनि° Dc_3.

विभाषौषधिवनस्पतिभ्यः ॥८।४।६॥

एतद्वाचिभ्यो[1] वनस्य णत्वं वा स्यात् ॥ दूर्वावणम्[3] । बदरीवणम् । पक्षे दूर्वावनम् । इत्यादि । द्वित्र्यक्षरेभ्य एव । नेह । देवदारुवनम् ।

इरिकादिभ्यो न ॥* इरिकावनम्[4] । मिरिकावनम् ।

वाहनमाहितात् ॥८।४।८॥

यदारोपितमुह्यते तद्वाचिस्थान्निमित्तात्[5] परस्य वाहननकारस्य णत्वं स्यात् ॥ इक्षुवाहणम् । शरवाहणम् ।[6]

विभाषा । बहुवचनादर्थपरो निर्देश इत्याह ।

एतद्वाचिभ्य इति । औषधिवनस्पतिवाचकेभ्यः परस्य वनस्येत्यर्थः ।

फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ।
औषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ॥ इति सत्यपि वृक्षवनस्पत्योर्भेदे इहाभेदो ज्ञेयः ।

वाहन । उह्यतेनेनेति वाहनम् । करणे ल्युट् । अत एव निपातनात् उपधादीर्घः । तत्रानेकार्थत्वाद् धातूनां दधातिरारोपणे वर्तत इत्यत 'आहिताद्' इत्यस्य 'आरोपिताद्' इत्यर्थः स्यादित्येतत् सर्वं चेतसि कृत्वाह । **यदारोपितमुह्यत** इति । आहितमिति भूतकालो न विवक्षितस्तेन यदापि वाहनार्थमिक्ष्वाद्युपकल्पितं नारोपितं तदापि इक्षुवाहणमिति स्यात् । **इक्षुवाहणमित्यादि** । इक्षूणां वाहनं शराणां वाहनम् । कृद्योगलक्षणायाः कर्मषष्ठ्याः समासः । आहितात् किम् । दाक्षिवाहनम् । दाक्षिस्वामिकं वाहनमित्यर्थः ।

---

१. B_1 has परस्य after it. २. B_1, D_5 drop it. ३. C and D_1, D_5 have दूर्वावणम् । शिरीषवणम् । बदरीवणम् । for दूर्वा° to बदरीवणम् ; P, D_4 have दूर्वावणम् । पूर्वावणम् । शिरीषवणम् । बदरीवणम् । पक्षे दूर्वावनमित्यादि. ४. D_1, D_2 drop it ; गिरिकावनम् B_2, D_5. ५. तद्वाचिनि स्था° D_1 ; तद्वाचिनि स्थिता° D_4, D_5. ६. दर्भवाहणम् after it D_4. ७. °वाहन° Dc_3.

पानं देशे ॥८।४।९॥

पूर्वपदस्थान्निमित्तात् परस्य पानस्य णत्वं स्याद्देशे गम्ये[1] ॥ क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सुरापाणाः प्राच्याः ।

वा भावकरणयोः ॥८।४।१०॥

प्रागुक्तनिमित्तात्परस्य भावे करणे च निष्पन्नस्य पानस्य वा णत्वं स्यात् ॥ क्षीरपाणम् । क्षीरपानम् ।[2] करणे । क्षीरपाणं[3] क्षीरपानं वा पात्रम् ।

गिरिनद्यादीनां वा ॥* [4] गिरिणदी । चक्रणदी । चक्रणितम्बा । पक्षे । गिरिनदी । इत्यादि ।

पानम् । **क्षीरपाणा उशीनरा** इत्यादि । अतिशयोत्र प्रतीयते न तु क्षीरपानादिमात्रम् । तस्यान्यत्रापि सद्भावात् । ननु क्षीरपाणादिशब्दा उशीनरादिशब्दाश्च मनुष्ये वर्तन्ते न देशे तत् कथमेतद्देशाभिधानम् । नैष दोषः । उशीनरादिदेशसंबन्धद्वारा मनुष्येषु[5] वर्तन्ते तेन मनुष्याभिधानेपि देशाभिधानं गम्यत एव ।

वा भाव । आदेशार्थ आरम्भः । **क्षीरपाणमिति** । पीतिः पानम् । नपुंसके भावे ल्युट् । **क्षीरपाणं वा पात्रमिति** क्षीरं पीयतेनेनेति 'करणाधिकरणयोश्च' इति करणे ल्युट् । **गिरिनद्यादीनां वेति** । णत्वं वक्तव्यमिति शेषः ।

---

१. गम्यमाने B_2. २. क्षीरपानम् । क्षीरपाणम् । D_4. ३. C has वर्तते after it. ४. गिरिणदी ॥ गिरिनदी । चक्रनितम्बा C; गिरिनदी । चक्रणदी । चक्रणितम्बा । पक्षे । गिरिनदी । इत्यादि B_1. ५. मनुष्येषु Dc_3.

प्रातिपदिकान्तनुम्विभक्तिषु च ॥८।४।११॥

पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णत्वं वा स्यात् ॥ प्रातिपदिकान्ते । माषवापिणौ । नुमि । व्रीहिवापाणि । विभक्तौ । माषवापेण[1] । पक्षे । [2]माषवापेनेत्यादि । समासे[3] सति प्रातिपदिकान्तस्यैवेष्यते । नेह । माषाणां वापिनी ।[4]

प्राति । **माषवापिणाविति** । 'बहुलमाभीक्ष्ण्ये' इति णिनिः ॥ **व्रीहिवापाणीति** । व्रीहीन् वपन्तीति कर्मण्यण् । 'जस्शसोः शिः' । 'नपुंसकस्य झलचः' । इति नुम् । 'सर्वनामस्थाने च' इत्युपधादीर्घः । **माषवापेणेति** । अणन्तात् तृतीयैकवचनम् । 'टाङसिङसाम्' इतीनादेशः । **समासे सतीति** । समासे जाते पश्चाद्यः प्रातिपदिकान्ते नकारस्तस्यैव णत्वमिष्यते । अयं भावः । 'पूर्वपदात्' इत्यनुवर्तते । पूर्वपदशब्दश्च संबन्धिशब्दत्वादुत्तरपदं संनिधापयति । तेन पूर्वपदात् परमुत्तरपदं यत् प्रातिपदिकं तदन्तस्यैव नस्य णः । समासे जाते एव हि कश्चिच्छब्दः पूर्वपदं कश्चिच्चोत्तरपदमिति रूढिः । तेन समासे सति यः प्रातिपदिकान्तस्तस्यैव णत्वमिति सिध्यति । **माषाणां वापिनीति** । वापोऽस्त्यस्या वापिनी । [6]मत्वर्थीय इनिः । ततो[5] नान्तत्वाद् ङीप् । ततः षष्ठीसमासः । न ह्यत्र नान्त उत्तरपदं किं तु ईबन्तः । स च प्रातिपदिकं न । अप्रत्यय इति निषेधात् । न च तस्यान्तो नकारः ।

---

१. After it—इत्यादि and drops पक्षे...इत्यादि D_5. २. माषवापिनावित्यादि B_1. ३. उपपदसमासे B_2. ४. After it—माषवापिनी D_1, D_2, D_4, D_5. ५. कान्तो Dc_3. ६. मत्वर्थ इनिः । Dc_3.

समासे स्यादेव । माषान् वपतीति माषवापिणी माषवापिनी ।

युवादेर्न ॥* रम्ययूना । रम्यपक्वेन । रम्याह्वा ।

एकाजुत्तरपदे णः ॥८।४।१२॥

णग्रहणं नित्यार्थम् । वृत्रहणौ । हरिं मानयतीति हरिमाणी । नुमि । क्षीरपाणि । विभक्तौ । क्षीरपेण । रम्यविणा ।

कुमति च ॥८।४।१३॥

कवर्गवत्युत्तरपदे प्राग्वत् ॥ हरिकामिणौ । हरिकामिणः । श्रीकामाणि । श्रीकामेण ।

समासे स्यादेवेति । समासे जाते यः प्रातिपदिकान्तो नस्तस्य णः स्यादेवेत्यर्थः । **माषान् वपतीत्यादि** । अत्र 'गतिकारकोपपदानां कृद्भिः समासः प्राक् सुबुत्पत्तेः' इति ङीबागमनात् प्रागेव समासो जातः इति समासे जाते प्रातिपदिकान्तो नकारो भवत्येवेति णत्वं जातम्।

युवादेर्नेति । वक्तव्यमिति शेषः ।

एकाच् । एतच्छब्दप्रकरणे व्याख्यातम् । **वृत्रहणाविति** । 'ब्रह्मभ्रूण—' इति क्विप् । **हरिं मानयतीत्यादि** । 'क्विप्' इति क्विप् । प्राक् सुबुत्पत्तेः समासः । नान्तत्वात् ङीप् । **क्षीरपाणीति** । पातेः पिबतेर्वा 'आतोनुपसर्गे कः' । **रम्यविणेति** । रम्यश्चासौ विश्च रम्यविस्तेन । 'आङो नास्त्रियाम्' इति तृतीयैकवचनस्य नादेशः ।

कुमति । अनेकाजुत्तरपदार्थ आरम्भः । **हरिकामिणाविति** । हरिं कामयेते । पूर्ववत् णिनिः । **श्रीकामाणीति** । कर्मण्यण् ।

---

१. उपपदसमासे B$_2$. २. After it—पक्वाह्वा । D$_4$. ३. पुनर्णत्वग्रहणं नित्यत्वार्थम् B$_2$. ४. नित्यत्वार्थम् B$_2$. ५. हरिं मानयतीति dropped D$_5$. ६. च प्राग्वत् D$_1$, D$_4$. ७. ङीबागमात् Dc$_3$.

असमासे तु गर्गाणां भगिनी[1] । समासे तु गर्गभगिनी ।

पदव्यवायेपि ॥८।४।३८॥

पदेन [3]व्यवधानेपि णत्वं न स्यात् ॥ माषकुम्भवापेन । चतुरङ्गयोगेन ।

अतद्धित इति वाच्यम् ॥* आर्द्रगोमयेण । शुष्कगोमयेण[4] ।

असमासे त्विति । यतः समासे जाते प्रातिपदिकान्तस्यैवेष्यते अतोसमासे प्रातिपदिकान्तस्य न भवतीत्यर्थः । भगो विद्यतेस्याः सा भगिनी । मत्वर्थीय इनिः । काविति वाच्ये कुमतीति वचनम-कवर्गादावपि यथा स्यात् । तेन वस्त्रयुगिणावित्यादि सिध्यति । अन्यथा यस्मिन् विधिस्तदादावल्ग्रहणे इति कवर्गादावेव स्यात् न कुमति सर्वत्र ।

पद । **माषकुम्भवापेने**त्यादि । माषाणा कुम्भः । तं वपतीति कर्मण्यण् । माषकुम्भवापः । तेन । चत्वार्यङ्गान्यस्य चतुरङ्गस्तेन योगस्तेन । **आर्द्रगोमयेणे**ति । 'गोश्च पुरीषे' इति मयुट् । गोमयं ततः कर्मधारयः । 'स्वादिष्वसर्वनामस्थाने' इति गोशब्दस्य पदसंज्ञा । एतद्व्याख्यानेनैव व्याख्यातप्रायत्वात् स्पष्टत्वाच्च त्यक्तानि त्रीणि सूत्राणि व्याख्यायन्ते । 'षात् पदान्तात्' ॥८।४।३५॥ पदे परतो योन्तः षस्तस्मात् परस्य नस्य णत्वं न । निष्पादनम् । दुष्पादनम् । पदे परतोन्तः किम् । यजुष्केण । 'अन्तरदेशे' ॥८।४।२४॥ अन्तःशब्दस्याङ्कि-विधिणत्वेषूपसंख्यानमित्युपसर्गसंज्ञाया णत्वविधौ विद्यमानत्वात् 'हन्तेरत्पूर्वस्य' इति सिद्धे णत्वे आदेशविषये यथा स्यादित्यस्यारम्भः । अन्तःशब्दात् परस्य हन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । 'अन्तर-परिग्रहे' इति गतिसंज्ञकत्वात् समासः । अदेशे किम् । अन्तर्हननो देशः । अधिकरणे ल्युट् । 'अयनं च' ॥८।४।२५॥ अयतेरिणो वा ल्युटि रूपमयनमिति । तस्यान्तःशब्दात् परस्यादेशे णत्वं स्यात् । अन्तरयणम् । देशे तु अन्तरयनो देशः ।

---

१. After it—गर्गभगिनी D_4, D_5. २. P and C, Dc_1, D_4 drop समासे तु. ३. व्यवायेपि C, D_3, D_1, B_1. ४. C drops it.

पारस्करप्रभृतीनि च संज्ञायाम् ॥६।१।१५७॥

एतानि ससुट्कानि निपात्यन्ते नाम्नि ॥ पारस्करः । किष्किन्धा । प्रायश्चित्तम् । वनस्पतिः । इत्यादि । आकृतिगणोयम् ।

पारस्कर । पारस्करादयो रूढिशब्दा यथाकथंचिन्निष्पाद्याः । पारं करोतीति पारस्करो वृक्षः ।[२] किं किं दधातीति किष्किन्धा गुहा । प्रायः चित्तं प्रायश्चित्तम् । वनस्य पतिर्वनस्पतिः । आकृतिगणत्वादविहितलक्षणः सुट् पारस्करादिषु द्रष्टव्यः । ततश्च किष्कुईस्तः । रथस्या नदी प्रस्तुम्पतिर्गौरित्यादयो ज्ञेयाः । एतस्यैव सूत्रस्य प्रपञ्चः 'कुस्तुम्बुरूणि जातिः' इत्यादीनि त्रयोदश सूत्राणि अत एवात्र न व्याख्यातानि तानि व्याख्यामः । 'कुस्तुम्बुरूणि जातिः' ॥६।१।१४३॥ कुस्तुम्बुरूणीति सुट् निपात्यते जातिश्चेत् स्यात् । कुस्तुम्बुरुरोषधिजातिः । तत्फलान्यपि कुस्तुम्बुरूणि । सूत्रे क्लीबनिर्देशोविवक्षितः । जातिः किम् । कुत्सितानि तुम्बुरूणि कुतुम्बुरूणि । तुम्बुरुशब्देनात्र तिन्दुकफलान्युच्यन्ते । समासेन तेषां कुत्सा । 'अपरस्पराः क्रियासातत्ये' ॥६।१।१४४॥ अपरस्परा इति क्रियासातत्ये सुट् निपात्यते । अपरस्पराः सार्था गच्छन्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । क्रियासातत्ये किम् । अपरे च परे च सकृदेव गच्छन्ति अपरपरा गच्छन्ति । नात्र गमनस्य प्रबन्धो विवक्षितः । 'गोष्पदं सेवितासेवितप्रमाणेषु' ॥६।१।१४५॥ गोष्पदमिति सुट् षत्वं च सेवितासेवितप्रमाणेषु निपात्यते । गावः पद्यन्तेत्र देशे स गोभिः सेवितो गोष्पदः । असेविते अगोष्पदान्यरण्यानि । ननु नार्थ एतेन गोष्पदनिषेधादगोष्पदं स्यात् । सत्यमेतत् । किं तु यत्र तु सेवितप्रसङ्गोस्ति तत्रैव स्यादगोष्पदमिति । यत्र त्वत्यन्तमसंभव एव तत्र न स्यात् । असेवितग्रहणात् तत्रापि स्यात् । यानि महान्त्यरण्यानि येषु गवामसंभवस्तान्यगोष्पदान्युच्यन्ते । प्रमाणे । गोष्पदपूरं वृष्टो देवः ।

---

१. Dropped D_5. २. After it—कारं करोतीति कारस्करो वृक्षः । Dc_3.

नात्र गोष्पदपदं स्वार्थं ग्रहीतुमुपादीयते किं तु क्षेत्रस्य वृष्टेश्चेयत्तां परिच्छेत्तुम् । सेवितादौ किम् गोः पदं गोपदम् । 'आस्पदं प्रतिष्ठायाम्' ॥६।१।१४६॥ प्राणधारणार्थं स्थानं प्रतिष्ठा तस्यामास्पदं निपात्यते । आस्पदमनेन लब्धम् । प्रतिष्ठायां किम् । आपदात् आपदम् । 'आश्चर्यमनित्ये' ॥६।१।१४७॥ अनित्यतया विषयभूतया अद्भुतमिह लक्ष्यते तत्राश्चर्यं निपात्यते । आश्चर्यं सोधीयीत । अनित्ये किम् । आचर्यं कर्म शोभनम् । 'वर्चस्केवस्करः' ॥६।१।१४८॥ कुत्सितं वर्चो वर्चस्कमन्नमलं तत्रावस्करो निपात्यते । अवकीर्यत इत्यवस्करो-न्नमलम् । तत्संबन्धाद्देशोपि तथोच्यते । वर्चस्के किम् । अवकरः ब्रह्मचारिणः स्त्रियां रेतःसेकोवकरः । 'अपस्करो रथाङ्गम्' ॥६।१।१४९॥ रथाङ्गेपस्करो निपात्यते । अपस्करो रथावयवः । रथाङ्गे किम् । अपकरः । 'विष्किरः शकुनिर्विकिरो वा' ॥६।१।१५०॥ शकुनौ वाच्ये एतौ निपात्यौ ।

'सर्वे शकुनयो भक्ष्या[1] विष्किराः कुक्कुटादृते' । विकिरो वा । वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा भूदिति । 'प्रतिष्कशश्च कशेः' ।६।१।१५२॥ कश गतिसाधनयोरित्यस्य धातोः प्रतिपूर्वस्य पचाद्यजन्तस्य सुट् । तस्य षत्वं च निपात्यते ।

'ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः' ।

वार्तासहायः पुरोयायी वा प्रतिष्कश इत्यभिधीयते । कशेः किम् । प्रतिगतः कशां प्रतिकशोश्वः । अत्र यद्यपि कशेरेव कशा तथापि कशेरिति धातूपादानं कशिं प्रत्युपसर्गस्यैव प्रतेःप्रतिपत्त्यर्थम् । तेन धात्वन्तरं प्रत्युपसर्गत्वादत्र नेति भावः । 'प्रस्कण्वहरिश्चन्द्रावृषी' ॥६।१।१५३॥ एतौ निपात्यौ ऋषी चेत् । प्रस्कण्व ऋषिः । हरिश्चन्द्र ऋषिः । ऋषी किम् । प्रकण्वो देशः । हरिचन्द्रो माणवकः । 'मस्करमस्करिणौ

१. अभक्ष्या (ऽभक्ष्या) in Dc₂.

अधःशिरसी पदे ॥८।३।४७॥

अनुत्तरपदयोरनयोर्विसर्जनीयस्य सः स्यात् पदशब्दे परे समासे ॥ अधस्पदम् । शिरस्पदम् । अन्यत्र । शिरसः पदम् । परमाशिरःपदम् ।

वेणुपरिव्राजकयोः' ॥६।१।१५४॥ मकरशब्दोयमव्युत्पन्नं प्रातिपदिकं तस्य वेणौ वाच्ये सुट् निपात्यते परिव्राजके त्विनिरपि । मस्करो वेणुः । मस्करी परिव्राजकः । एतयोः किम् । मकरो ग्राहः । मकरी समुद्रः । केचित्तु मा क्रियते निषिध्यतेनेनेति मस्करो वेणुः । माङ्युपपदे कृञोच्प्रत्ययं माङो ह्रस्वत्वं सुटं च निपातयन्ति । माकरणशीलो मस्करी । ताच्छील्ये इनिः । माङो ह्रस्वत्वं सुटं च निपातयन्ति । स ह्येवमाह । मा कृषत कर्माणि शान्तिर्वः श्रेयसीति । 'कास्तीराजस्तुन्दे नगरे' ॥६।१।१५५॥ एतौ नगरे निपात्येते । ईषत्तीरमस्य कास्तीरं नगरम् । अजस्येव तुन्दमस्य अजस्तुन्दं नगरम् । नगरे किम् । कातीरम् । अजतुन्दम् । 'कारस्करो वृक्षः' ॥६।१।१५६॥ कारं करोतीति कारस्करो वृक्षः। वृक्षे किम् । कारकरः ।

अधः । 'नित्यं समासेनुत्तरपदस्थस्य' इत्यतः 'समासे' इत्यनुवृत्तेः पदशब्देन स्वरूपमेव गृह्यते न सुप्तिङन्तमित्यभिप्रेत्याह । **पदशब्दे परे समासे** इति । एतत्सूत्रव्याख्यानेनैव व्याख्यातप्रायत्वात् स्पष्टत्वाच्च त्यक्तानि समासे सत्वषत्वविसर्जनीयमूर्धन्यविधायकानि पञ्चदशसूत्राणि व्याख्यामः ।

---

१. Before it—अनुत्तरपदे किम् B_2; dropped D_5. २. सुटं माङो ह्रस्वत्वं च Dc_2.

'इदुदुपधस्य चाप्रत्ययस्य' ॥८।३।४१॥ इकारोपधस्योकारोपधस्य चाप्रत्ययविसर्गस्य षः स्यात् कुप्वोः। निष्कृतम्। दुष्कृतम्। बहिष्कृतम्। आविष्कृतम्। चतुष्कृतम्। प्रादुष्कृतम्।[1] अप्रत्ययविसर्गस्य किम्। अग्निः करोति। 'पुंमुहुसोर्निषेधः'। पुंस्कामा। मुहुःकामा। नैष्कुल्यं निष्कुलमित्यत्र बहिरङ्गलक्षणयोर्वृद्धिप्लुतयोरसिद्धत्वात् षत्वम्। 'द्विस्त्रिश्चतुरिति कृत्वोर्थे' ॥८।३।४३॥ एषां विसर्गस्य कुप्वोः परयोः षो वा। द्विःकरोति। द्विष्करोति। त्रिःकरोति। त्रिस्करोति। चतुःकरोति। चतुष्करोति। कृत्वसुजर्थे किम्। चतुःकपालम्। 'इसुसोः सामर्थ्ये' ॥८।३।४४॥ इस उसश्च विसर्गस्य कुप्वोः षो वा। सर्पिः करोति। सर्पिष्करोति। सर्पिः पचति। सर्पिष्पचति। यजुः करोति। यजुष्करोति। यजुःपठति। यजुष्पठति। सामर्थ्ये किम्। तिष्ठतु सर्पिः पिबत्वमुदकम्। 'नित्यं समासेनुत्तरपदस्थस्य' ॥८।३।४५॥ इसुसोर्विसर्गस्य अनुत्तरपदस्थस्य कुप्वोः नित्यं षः समासे। सर्पिष्फलम्। धनुष्फलम्। अनुत्तरपदस्थस्य किम्। परमसर्पिः फलम्। परमसर्पिः करोति। 'समासेङ्गुलेः सङ्गः' ॥८।३।८०॥ अङ्गुलिशब्दात् परस्य सस्य मूर्धन्यः समासे। अङ्गुलिषङ्गः। समासे किम्। अङ्गुलेः सङ्गः।'पारिस्कन्दः प्राच्यभरतेषु' ॥८।३।७५॥ 'परेश्च' ॥८।३।७४॥ इति स्कन्देः प्राप्तस्य मूर्धन्यस्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु। पारिस्कन्दः। प्राच्यभरतेषु किम्। पारिस्कन्दः। पारिष्कन्दः। 'परेश्च' इति वा मूर्धन्यः। 'भीरोः स्थानम्' ॥८।३।८१॥ भीरोरुत्तरस्य स्थानस्य सस्य मूर्धन्यः समासे। भीरुष्ठानम्। असमासे तु भीरोः स्थानम्। 'ज्योतिरायुषः स्तोमः' ॥८।३।८३॥ आभ्यां स्तोमसकारस्य मूर्धन्यः। ज्योतिष्टोमः। आयुष्टोमः। 'अभिनिसः स्तनः शब्दसंज्ञायाम्' ॥८।३।८६॥ अभिनिस्पूर्वात् स्तनतेर्मूर्धन्यो वा शब्दसंज्ञायाम्। अभिनिष्टानो वर्णः। शब्दसंज्ञायां

१. After it—यजुष्कृतम् Dc3. २. After it—'तस्य परमाम्रेडितम्' तस्य पूर्वशब्दसदृशतममेव परशब्दमाम्रेडितसंज्ञं स्यात्। आम्रेडिते परे विसर्गस्य सो वा स्यात्। यथा कांस्कान्। काँःकान्। पक्षे कान् कान्। Dc3.

किम्। अभिनिः स्तनति मृदङ्गः। 'सूत्रं प्रतिष्णातम्' ॥८।३।९०॥ सूत्रे निपात्यते। प्रतिष्णातं सूत्रम्। प्रतिस्नातमन्यत्। 'कपिष्ठलो गोत्रे' ॥८।३।९१॥ गोत्रमत्र स्वसंतानव्यपदेशहेतुराद्यः पुरुषो गृह्यते। स कपिष्ठलो नाम यस्य पुत्रः कापिष्ठलिः। गोत्रे किम्। कपीनां स्थलं कपिस्थलम्। 'प्रष्ठोऽग्रगामिनि' ॥८।३।९२॥ प्रतिष्ठत इति प्रष्ठः। अग्रगामी चेत्। अन्यस्तु प्रस्थः। 'वृक्षासनयोर्विष्टरः' ॥८।३।९३॥ विष्टरो वृक्षः। विष्टरमासनम्। 'छन्दोनाम्नि च' ॥८।३।९४॥ इह मूर्धन्यः। विष्टारपङ्क्तिश्छन्दः। अन्यो विस्तारः। 'विकुशमिपरिभ्यः स्थलम्' ॥८।३।९६॥ एभ्यः स्थलस्य मूर्धन्यः। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्। 'सुषामादिषु च' ॥८।३।९८॥ एषु मूर्धन्यः। शोभनं साम अस्य सुषामा। दुःषामा। सुषेधः। दुःषेधः। सुषन्धिः। दुष्षन्धिः। सुष्ठु। दुःष्ठु। तिष्ठतेरौणादिके कुप्रत्यये सत्येतौ व्युत्पादितौ। गौरिषक्थः। प्रतिष्णिका। जलाषाहम्। निषेवणम्[2]। सुषेविता। दुन्दुभिषेवणम्। 'एतिसंज्ञायामगात्' ॥८।३।९९॥ इण्कोरगात् परस्यैकारपरस्य सस्य मूर्धन्यः। हरिषेणः। एति किम्। हरिसन्धिः। संज्ञायां किम्। पृथुसेनः। अगकारात् किम्। विष्वक्सेनः। 'नक्षत्राद्वा' ॥८।३।१००॥ रोहिणीषेणः। रोहिणीसेनः। अगादित्येव। शतभिषक्सेनः। अविहितलक्षणो मूर्धन्यः सुषामादिषु द्रष्टव्यः। 'निसस्तपतावनासेवने' ॥८।३।१०२॥ अनासेवनमपौनःपुन्यं तस्मिन्नर्थे तपतौ परे निसः सस्य मूर्धन्यः। निष्टपति सकृदग्निं स्पर्शयतीत्यर्थः। निष्टप्ता अरातय इत्यत्रासेवनेऽपि छान्दसो वर्णव्यत्ययः।

इति समासान्तादिप्रक्रिया ॥

१. उच्यते Bc_1, Dc_5. २. नैषिवणम् Dc_2.

अलुक्समासः

पञ्चम्याः स्तोकादिभ्यः ॥६।३।२॥

स्तोकादिभ्यः परस्याः पञ्चम्या अलुक् स्यादुत्तरपदे परे ॥ समासे प्राप्तो लुक् निषिध्यते । स्तोकान्मुक्तः । एवं अन्तिकार्थदूरार्थकृच्छ्रेभ्यः । उत्तरपदे किम् । निष्क्रान्तः स्तोकान्निःस्तोकः ।

ओजःसहोम्भस्तमसस्तृतीयायाः ॥६।३।३॥

अलुक् । ओजसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तमसाकृतम् ।

इदानीमलुक्समासमाह । **पञ्चम्याः** । अत्र 'अलुगुत्तरपदे' इत्यधिक्रियते इत्यभिप्रेत्याह । **अलुक् स्यादुत्तरपदे** इति । **स्तोकान्मुक्त** इति । 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति समासः । स्तोकादयः प्रातिपदिकपाठे न पठ्यन्ते । तस्मात् 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति सूत्रपठिता एव गृह्यन्ते इत्यभिप्रेत्याह । **एवमन्तिकार्थ**— इत्यादि । द्विवचनबहुवचनान्तानां स्तोकादीनामनभिधानात् समास एव नास्तीति स्तोकाभ्यां मुक्तः स्तोकेभ्यो मुक्त इति न कदाचिदस्यैक-पद्यमैकस्वर्यं च स्यात् । 'ब्राह्मणाच्छंसिन उपसंख्यानम्' । ब्राह्मणाच्छंसतीति ब्राह्मणाच्छंसी ऋत्विग्विशेषस्य रूढिः ।

ओजः । **ओजसा कृतमित्यादौ** 'कर्तृकरणे कृता बहुलम्' इति समासः । 'अञ्जस उपसंख्यानम्' । अञ्जसाकृतम् । 'पुंसानुजः जनुषान्ध इत्युपसंख्यातव्यम्' । स्पष्टत्वात् त्यक्तमेकं व्याख्यायते । 'मनसः संज्ञायाम्' ॥६।३।४॥ मनसः परस्यास्तृतीयाया अलुक् स्यात् संज्ञायाम् । मनसागुप्ता । मनसासंगता । संज्ञायां किम् । मनोदत्ता कन्या ।

---

१. न लुक् B_1. २. D_1, D_4, D_5 drop it. ३. प्राप्त D_1; प्राप्ते स्तोकादिभ्यो लुक् B_2. ४. P has तमसाकृतम् । अम्भसाकृतम्. ५. After this—मनसः संज्ञायाम् । मनसाकृतम् । संज्ञायां किम् । मनोदत्ता कन्या B_2.

आज्ञायिनि च ॥६।३।५॥

मनसस्तृतीयाया अलुक् स्यात् आज्ञायिन्युत्तरपदे ॥ मनसा आज्ञातुं शीलमस्य मनसाज्ञायी[1]।

आत्मनश्च पूरणे ॥६।३।६॥

पूरणार्थे परपदे आत्मनस्तृतीयाया अलुक् ॥ आत्मनापञ्चमः । आत्मनाषष्ठः ।

प्रकृत्यादिभ्यश्च ॥ प्रकृत्याभिरूपः ।[2]

वैयाकरणाख्यायां चतुर्थ्याः ॥६।३।७॥

आत्मनश्चतुर्थ्या अलुक् स्यात् वैयाकरणाख्यायाम् ॥

आज्ञायिनि । **मनसाज्ञायीति** । ताच्छीलिको णिनिः ।

आत्मनः । **प्रकृत्यादिभ्यश्चेति** । प्रकृत्यादिभ्यः परस्यास्तृतीयाया अभिरूपादावुत्तरपदे अलुक् स्यादिति वक्तव्यमिति केचिदित्यर्थः । तथोक्तमिन्दुमत्यां वृत्तौ । प्रकृत्यादिभ्यश्चेति । प्रकृत्याभिरूप इति । अथवा नन्वात्मना पञ्चम इत्यादौ कथं तृतीया कथं च समास इत्याशङ्क्याह । प्रकृत्यादिभ्यश्चेत्यादि । प्रकृत्यादिभ्यश्चेत्युपसंख्यानेन प्रकृत्याभिरूप इतिवत् तृतीया । ततश्च तृतीयेति योगविभागात् समास इति भावः । कथं 'जनार्दनस्त्वात्मचतुर्थ एवे'ति । उच्यते । बहुव्रीहिरयम् । आत्मा चतुर्थोऽस्येति ।

वैयाकरण । **वैयाकरणाख्यायामिति** । व्याकरणमधीयते विदन्ति वा वैयाकरणाः । तेषामाख्या संज्ञा । यया संज्ञया वैयाकरणा एव व्यवहरन्ति तस्यां गम्यमानायामित्यर्थः ।

---

१. आज्ञापयितुम् B_2. २. C has after it—प्रकृत्याचारुः । सदृशः । तृतीयेति योगविभागात् समासः कथं तर्हि जनार्दनस्त्वात्मचतुर्थ एवेति । बहुव्रीहिरयम् । आत्मा चतुर्थोऽस्येत्यात्मचतुर्थः । ; B_2 has प्रकृत्याचारुः after it.

आत्मनेपदम् । आत्मनेभाषा । अलुग्विधिसामर्थ्याच्चतुर्थीसमासः ।

परस्य च ॥६।३।८॥

परस्मैपदम् । परस्मैभाषा ।

हलदन्तात् सप्तम्याः संज्ञायाम् ॥६।३।९॥

हलन्तादन्ताच्च[1] सप्तम्या अलुक् स्यात् संज्ञायाम् ॥

गविंयुधिभ्यां स्थिरः ॥८।३।९५॥

आभ्यां स्थिरसकारस्य षः स्यात् ॥ गविष्ठिरः । युधिष्ठिरः । त्वचिसारः । अदन्तात् । अरण्येतिलकः । अत्र संज्ञायामिति[2][3] सप्तमीसमासः ।

आत्मनेपदमिति । आत्मार्थं पदम् । **आत्मनेभाषा** । आत्मार्था भाषा । तादर्थ्ये चतुर्थी । ननु केनात्र समास इत्याशङ्क्याह । **अलुग्विधिसामर्थ्यादिति** ।

परस्य । परस्य च चतुर्थ्या वैयाकरणाख्यायामलुक् स्यात् । परस्मैपदम् । पूर्ववच्चतुर्थीसमासौ । **हलदन्तात्** । **गवि** । स्थिरशब्दोयं यदा 'अजिरशिशिरशिथिलस्थिर—' इत्यादिकेन सूत्रेण[4][5] तिष्ठतेः किरच्प्रत्ययान्तो निपात्यते तदा 'सात् पदाद्योः' इति निषेधे[6] प्राप्ते वचनम् । यदा त्वव्युत्पन्नं प्रातिपदिकं तदा त्वप्राप्ते एव वचनम् ।

गविष्ठिर इति । अत्र[7] 'गवियुधिभ्याम् —' इति निपातनादलुक् । अत्रेत्यादि । अत्रेति गविष्ठिर इत्यादावित्यर्थः । हलदन्तात् किम् । नद्यां कुक्कुटिका नदीकुक्कुटिका । संज्ञाया किम् । अक्षशौण्डः ।

---

१. B₁, P, D₁, and D₅ drop च. २. संख्याया D₁. ३. संज्ञायां विषये सप्तमी सुपा नित्यं समस्यते इति सप्तमीसमासः । D₄, इति dropped D₅. ४. शिखर Dc₁, Bc₁ for शिथिल. ५. इत्यादिना औणादिकेन सूत्रेण Dc₁, Dc₄, Dc₃. ६. Dropped Dc₂, Dc₄. ७. Dropped Dc₁.

हृद्द्युभ्यां च ॥* हृदिस्पृक् । दिविस्पृक् ।

मध्याद्गुरौ ॥६।३।११॥

अत्रापि प्राग्वत् । मध्येगुरुः ।

अन्ताच्च ॥* अन्तेगुरुः ।

हृद्युभ्यां चेति । असंज्ञार्थं वक्तव्यम् । हृदिस्पृगित्यादि । हृदयं स्पृशति[1] दिवं स्पृशति । 'स्पृशोनुदके क्विन्' । द्वितीयार्थे सप्तमी । तथोक्तं भाष्ये । अन्यार्थे नैषा[2] सप्तमी द्रष्टव्या हृदयं स्पृशतीति हृदिस्पृगिति । स्पष्टत्वात् त्यक्तम् । 'कारनाम्नि च प्राचां हलादौ' ॥ ६।३।१०॥ वणिगादिभी राज्ञे देयोंशः कारः । प्राचां देशे यत् कारनाम तत्र हलादावुत्तरपदे हलदन्तात् सप्तम्या अलुक् स्यात् । सूपेशाणः । हलेद्विपदिका । पूर्वेण सिद्धे नियमार्थम् । त्रिविधोत्र नियमः । कारनाम्न्येव प्राचामेव हलादावेवेति । कारनाम्नि किम् । अभ्यागतपशुः । कारादन्यस्य देयस्यैतन्नाम । प्राचां किम् । यूथपशुः । हलादौ किम् । अविकटे उरणः अविकटोरणः । हलदन्तात् किम् । नदीदोहनी ।

मध्यात् । **प्राग्वदिति** । सप्तम्या अलुगित्यर्थः । मध्येगुरुः । **अन्तेगुरुरिति** । सप्तमीति योगविभागात् समासः ।

---

१. Dropped D_5. २. वचनम् Dc_1. ३. After it in both places इति Dc_1. ४. चैव Dc_1.

अमूर्धमस्तकात् स्वाङ्गादकामे ॥६।३।१२॥

स्वाङ्गात् सप्तम्या अलुक् ॥[1] कण्ठेकालः । उरसिलोमा । उदरेमणिः । अमूर्धमस्तकात् किम् । मूर्धशिखः[3] । मस्तकशिखः । अकामे किम् । मुखे[4] कामोस्य मुखकामः ।

बन्धे च विभाषा ॥६।३।१३॥

बन्धे परपदे[5] सप्तम्या अलुग्वा[6] ॥ हस्तेबन्धः । हस्तबन्धः । चक्रेबन्धः ।[7] चक्रबन्धः । '[8]सिद्धशुष्क—' इति समासः ।

तत्पुरुषे कृति बहुलम् ॥६।३।१४॥

कृति परपदे सप्तम्या बहुलमलुक् तत्पुरुषे[9] ॥ स्तम्बेरमः[10] । कर्णेजपः ।[11] अत्र[12] च[13] न स्यात् । कुरुचरः । 'उपपदम्—' इति समासः ।

अमूर्ध । स्वाङ्गमद्रवादिलक्षणं पारिभाषिकं गृह्यते । कण्ठेकाल इत्यादि । कण्ठेकालोस्येति व्यधिकरणानामपि बहुव्रीहिः । समानाधिकरणानां बहुव्रीहिरिष्यत इत्यस्य प्रायिकत्वात् । स्वाङ्गात् किम् । अक्षशौण्डः ।

बन्ध । बन्ध इति घञन्तो गृह्यते । उभयत्र विभाषेयम् । स्वाङ्गात् बहुव्रीहौ पूर्वेण नित्यं प्राप्ते स्वाङ्गादस्वाङ्गाच्च तत्पुरुषे 'नेन्सिद्धबध्नातिषु च' इति निषेधादप्राप्ते हलन्तादित्येव । गुप्तिबन्धः । ननु हस्तबन्धादिषु केन समास इत्याशङ्क्याह । सिद्धशुष्केतीति ।

तत्पुरुषे । स्तम्बेरमः । कर्णेजपः । 'स्तम्बकर्णयो रमिजपोः' इत्यच् । कुरुचर इति । 'चरेष्टः' ।

---

१. B_1 has उत्तरपदे after it. २. C has कण्ठे कालोस्येति before it. ३. मूर्धमणिः । मस्तकमणिः । D_4. ४. मुखे कामोस्य मुखकामः । D_4. ५. पदे परे B_1. ६. स्यात् after it in B_1, D_2. ७. पक्षे चक्रबन्धः B_2; चक्रबन्धः dropped D_5. ८. सिद्धशुष्कपक्वबन्धश्चेति सप्तमीसमासः B_1, D_4 (श्चेति समासः D_4). ९. स्यात्तत्पुरुषे B_1, B_2. १०. B_1 has कुञ्जरः after it. ११. B_1 has पिशुनः after it. १२. न च स्यात् P, D_1, D_2; बहुलमित्युक्तेः क्वचिन्न स्यात् । कुरुचरः B_2; क्वचिन्न स्यात् Dc_1; इह for अत्र D_5. १३. च dropped D_4, D_5.

प्रावृट्शरत्कालदिवां जे ॥६।३।१५॥

जे परपदे एभ्यः सप्तम्या अलुक् ॥ प्रावृषिजः । शरदिजः । कालेजः[2] । दिविजः ।

विभाषा वर्षक्षरशरवरात् ॥६।३।१६॥

एभ्यो जेपरे अलुग्वा ॥ वर्षेजः । वर्षजः । इत्यादि ।[3]

शयवासवासिष्वकालात् ॥६।३।१८॥

एषु परेष्वकालवाचिनः सप्तम्या अलुग्वा[4] ॥

प्रावृट् । पूर्वस्य प्रपञ्चः । **प्रावृषिज** इति । 'सप्तम्यां जनेर्डः' । टिलोपः । उपपदसमासः ।

विभाषा । आदिना क्षरेजः । क्षरजः । शरेजः । शरजः । वरेजः । वरजः । स्पष्टत्वात् त्यक्तमेकम् । 'घकालतनेषु कालनाम्नः' ॥६।३।१७॥ घसंज्ञकप्रत्यये परे कालशब्दे तनप्रत्यये च कालनाम्नः परस्याः सप्तम्या अलुग्वा स्यात् । पूर्वाह्णेतरे । पूर्वाह्णतरे । पूर्वाह्णेतमे । पूर्वाह्णतमे । पूर्वाह्णेकाले । पूर्वाह्णकाले । पूर्वाह्णेतने । पूर्वाह्णतने । कालनाम्नः किम् । शुक्लतरे । हलदन्तादित्येव । रात्रितमायाम् । उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते । लेखग्रहणाल्लिङ्गात् । तेनेह घतनग्रहणे तदन्तविधिर्न भवति ।

शय ।[5]

---

१. After it—तत्पुरुषः B_2. २. Dropped D_2. ३. After it—P, D_4 have—घकालतनेषु कालनाम्नः ॥६।३।१७॥ घे काले च तने च परे कालनाम्नः सप्तम्या वा अलुक् । पूर्वाह्णेतरा । पूर्वाह्णेकाले । पूर्वाह्णेतने ; (कालशब्दे for काले ; पूर्वाह्णेतराम् । पूर्वाह्णेतमाम् । पूर्वाह्णेकाले । पूर्वाह्णेतने । पक्षे पूर्वाह्णतरामित्यादि । हलदन्तादित्येव । रात्रितरायाम् । D_4); B_2 follows P and has after पूर्वाह्णेतने । हलदन्तादित्येव । रात्रितराम्. ४. वा अलुक् B_2. ५. After it—सूत्रं व्याख्यायते Dc_3.

खेशयः । ग्रामेवासः । ग्रामेवासी । पक्षे । खशयः । इत्यादि । हलदन्तादित्येव । नेह । भूमिशयः । अकालात् किम् । [1]पूर्वाह्णेशयः ।

अपो योनिजमतिषु ॥* अप्सुयोनिः । अप्सुजः । अप्सुमतिः ।

षष्ठ्या आक्रोशे ॥६।३।२१॥

आक्रोशे गम्ये षष्ठ्या अलुक् ॥ चोरस्यकुलम् । निन्दायां किम् । [2]ब्राह्मणकुलम् ।

वाक्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ॥* वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः ।

---

[3]अपोयोनीति । अप् शब्दात् परस्याः सप्तम्याः योन्यादिषूत्तरपदेषु अलुग्वाच्य इत्यर्थः । काशिकाव[4]ृत्तिकारस्तु जस्थाने यत् इति पठति स्म । अप्सव्य इति चो[5]ज्जहार । सर्वत्र सप्तमीति योगविभागात् समासः । स्पष्टत्वात् त्यक्ते द्वे[6] । 'नेन्सिद्धबध्नातिषु च' ॥६।३।१९॥ इन्नन्ते परे सिद्धशब्दे बध्नातौ च सप्तम्या अलुक् न[7] । स्थण्डिलशायी । साङ्काश्यसिद्धः । चक्रबन्धः । 'स्थे च भाषायाम्' ॥६।३।२०॥ स्थे चोत्तरपदे भाषायां सप्तम्या अलुक् न स्यात् । समस्थः । भाषायां किम् । कृष्णोस्याखरेष्ठः । 'पूर्वपदात्' इति षत्वम् ।

षष्ठ्याः । पूर्वत्र चानुकृष्टत्वात् नेतीह नानुवर्तते 'चानुकृष्टमुत्तरत्र नानुवर्तते' इति परिभाषायाः । वागित्यादि वक्तव्यम् । पश्यतोहर इति । 'षष्ठी चानादरे' इति षष्ठी । हर इति पचाद्यच् ।

---

१. पूर्वाह्णशयः B1. २. ब्रह्मकुलम् D4. ३. अप्सु योनिरिति Dc2. ४. वृत्ति dropped Dc2. ५. चोदाजहार Dc4, Dc3. ६. After it—सूत्रे व्याख्यायेते । Dc3. ७. न स्यात् Dc3.

[1]आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेत्यत्र षष्ठ्या अलुग्वाच्यः ॥* देवानांप्रिय इति च मूर्खे ।

[3]शेफ[2]पुच्छलाङ्गूलेषु शुनः ॥* शुनःशेफ[4]ः । शुनःपुच्छः । शुनोलाङ्गूल[5]ः ।

पुत्रेन्यतरस्याम् ॥६।३।२२॥

षष्ठ्याः पुत्रे परेलुग्वा स्यात् निन्दायाम् ॥ दास्याःपुत्रः । दासीपुत्रः । निन्दायां किम् । ब्राह्मणीपुत्रः ।

आमुष्यायण इति । अत्राप्यलुग्वाच्यः । अमुष्य अपत्यम् । अदःशब्दात् षष्ठ्यन्तात् ‘नडादिभ्यः फक्’ इति फक् । आमुष्यायण इति अमुष्यपुत्रिका अमुष्यकुलिका इत्यनयोरुपलक्षणम् । **देवानांप्रिय** इति स्या[6]दलुक् मूर्खेभिधेये इति वाच्यम् । **शेफे[7]त्यादि** । शुनः परस्याः षष्ठ्या अलुग्वाच्यः शेफादिषु[8] परेषु । दिवश्च दासे । षष्ठ्या अलुग् वाच्यः । दिवोदासाय गायति ।

पुत्रे ।

---

१. आमुष्यायणः । देवानांप्रिय इति मूर्खे C, D_1 ; D_4 (इति च मूर्खे D_4) आमुष्यायणः । देवानांप्रिय इति वाच्यम् P. २. शेप D_4. ३. Before it— एषु शुनः षष्ठ्या अलुग्वाच्यः B_2. ४. °शेपः D_4. ५. °लाङ्गूलम् D_4. ६. च स्यात् Dc_4, Dc_2 ; यस्मादलुक् Bc_2. ७. शेपेत्यादि Dc_1. ८. शेपादिषु Dc_1 ; शेफादिपरेषु Dc_4.

ऋतो विद्यायोनिसम्बन्धेभ्यः ॥६।३।२३॥

[1]विद्यायोनिसम्बन्धवाचिन[2] ऋदन्तात् षष्ठ्या अलुक् स्यात्॥ होतुरन्तेवासी । होतुःपुत्रः ।[4]

विभाषा स्वसृपत्योः ॥६।३।२४॥

स्वसृपत्योः परयोः ऋदन्तात् षष्ठ्या अलुग्वा[3] स्यात् ॥ ननान्दृपतिः । ननान्दुःपतिः । लुक्पक्षे ।

मातृपितृभ्यां स्वसा ॥८।३।८४॥

आभ्यां परस्य स्वसुः सस्य षः स्यात् ॥ मातृष्वसा । पितृष्वसा[6] । अलुक्पक्षे ।

मातुः पितुर्भ्यामन्यतरस्याम् ॥८।३।८५॥

षष्ठ्यन्ताभ्यां परस्य[7] स्वसुः सस्य[8] षः स्याद्वा[5] समासे ॥

ऋतो विद्यायोनिसंबन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणं कर्तव्यम् ॥ विद्यासंबन्धवाचिन्येवोत्तरपदे यथा स्यादन्यत्र मा भूत् । होतृधनम् । पितृगृहम् ।

विभाषा । लुक्पक्षे इति । स्वसृशब्दे परे यदा ऋकारान्तात् षष्ठ्या लुक् स्यात् तस्मिन् पक्षे इत्यर्थः ।

मातृ । अभ्यर्हितत्वात् मातृशब्दस्य पूर्वत्वम् । पूर्वेण नित्ये प्राप्ते विभाषेयमारभ्यते । प्रकृतिप्रत्ययसमुदायस्य

---

१. विद्यासंबन्धयोनिसंबन्ध° C. २. °वाचिऋदन्तानां षष्ठ्या अलुक् स्यात् B_1. ३. अलुग्वा P, B_1, D_3. ४. After it—विद्यायोनिसंबन्धवाचिन्येवोत्तरपदे स्यात् । होतृधनम् । पितृधनम् B_2. ५. स्याद्वा D_4. ६. पितृष्वसा dropped D_5. ७. परस्य dropped P. ८. सकारस्य B_2.

मातुष्वसा । मातुः स्वसा । पितुः ष्वसा । पितुः स्वसा । असमासे तु मातुः स्वसेत्येवं ॥[1][2]

इति समासप्रक्रिया ॥[3]

मातुः पितुरित्यस्य मातृपितृशब्दाभ्यामन्यत्वात् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे सुविशदमगमत् तत् **समासस्य कार्यम्** ॥[4]

---

१. पितुःष्वसा। मातुःष्वसा। पितुःस्वसा। मातुः स्वसा। D_4. २. After it—पितुः स्वसेत्येव नित्यम् D_5; नित्यम् D_1, B_2, D_4, B_1; 'नित्यं वीप्सयोः' इति द्वित्वे कृते 'एकं बहुव्रीहिवत्' द्विरुक्त एकशब्दो बहुव्रीहिवत् स्यात् तेन सुब्लोपपुंवद्भावौ । एकैकमक्षरम् । एकैकयाहुत्या । अनिर्दिष्ट-बहुव्रीहौ सर्वनामतानिषेधादयो न । एकैकस्यै देहि । कर्मव्यतिहारे सर्वनाम्नो द्वे समासवच्च वा । ते एते जयति । पारस्करादित्वात् सुट् । अन्योन्यम् । परस्परम् । स्त्रीक्लीबयोरुत्तरपरस्य विभक्तेर्वाम्भावः । अन्योन्यम् अन्योन्ये । अन्योन्यत् । D_2. ३. After it—समाप्ता C; इति समासान्तप्रक्रिया D_4. ४. सकलमभिहितो वेदसंख्यः समासः । Dc_3.

अथ तद्धिताः

अथ तद्धिता निरूप्यन्ते[1]।

उपगोरपत्यमिति विग्रहे ।

प्राग्दीव्यतोण् ॥४।१।८३॥

तेन दीव्यतीत्यतः प्राग्यदितः[2] परं वक्ष्यते तत्राण् प्रत्ययः स्यादिति ज्ञेयम् ।

तस्यापत्यम् ॥४।१।९२॥

तस्येति षष्ठी । समर्थादपत्येऽर्थे यथायथमणादयः[3] स्युः ।

अथ तद्धिता निरूप्यन्ते[4] । ते च द्विविधाः प्रकृत्यर्थभिन्नार्थाः स्वार्थिकाश्च । तत्र प्रथमं प्रकृत्यर्थभिन्नार्था उच्यन्ते । तेष्वपि प्रथमं प्राग्दीव्यतीयाः । तेष्वप्यपत्यार्थे प्रत्ययाः[5] प्रथममुच्यन्ते ।

उपगोरिति । औपगव इत्यस्यार्थबोधके ईदृशे वाक्ये[6] सतीत्यर्थः ।

प्राग्दी । इयं परिभाषा विधिर्वा नाधिकारस्तेनापवादविषयं परिहृत्य प्रवर्तते ।

तस्य । तस्येति षष्ठी । **समर्था**दिति । तस्येति सामान्यं षष्ठ्यन्तं विशेषोपलक्षणार्थम् । समर्थानामिति च निर्धारणषष्ठी । तत्र तुल्यजातीय-निर्धारणादयमर्थः स्यात् षष्ठ्यन्तात् समर्थादिति । **अपत्येऽर्थे** इति । प्रथमान्तस्यापत्यशब्दस्यान्यथासंबन्धायोगादित्यर्थ इत्यध्याहारलब्धम्[7] । अणादयः पूर्वे उत्तरे च । ननु च 'तस्येदम्' इत्येव सिद्धम् । यतः 'तस्येदम्' विशेषा एवापत्यसमूहविकारादयः । तस्मात् सूत्रं

---

१. अथ...निरूप्यन्ते is dropped in P, D_4, D_5, C, B_2, D_2. २. प्रागितः परं C. ३. याथायथ°; D_1 यथायथविहितम° D_4; यथास्व° D_5. ४. तद्धितो निरूप्यते Dc_1. ५. °पत्यार्थप्रत्ययाः Dc_2. ६. वाक्ये ईदृशे Dc_2. ७. °लब्धः Dc_1.

समर्थानां प्रथमाद्वा ॥४।१।८२॥

यदितः परं वक्ष्यते प्राग् दिश इति यावत् तत् समर्थानां मध्ये प्रथमनिर्दिष्टाद्वा स्यादिति ज्ञेयम् ॥ इति षष्ठ्यन्तादण् ।

तद्धितेष्वचामादेः ॥७।२।११७॥

ञिति णिति च तद्धिते परे अचामादेरचो वृद्धिः स्यात् ॥ विभक्तिलोपः। ओर्गुणः। अवादेशः। तद्धितत्वात् प्रातिपदिकसंज्ञा।

व्यर्थम् । नैवम् । बाधकबाधनार्थम् । 'तस्येदम्' इति कृतस्याणो बाधको यः सोपत्ये मा भूदितीदं सूत्रम् । एवं च सति भानोपत्यं भानव इत्यादौ छो न । अपत्यमात्रं चेह गृह्यते । लिङ्गवचनादिकमन्यत् सर्वमविवक्षितम् ।

सम । अत्र त्रयमप्यधिक्रियते । समर्थानां प्रथमाद्वेति च । **प्राग्दिश इति यावदिति** । ततः परेषां सर्वप्रत्ययानां स्वार्थिकत्वात् तत्रास्योपयोगो नास्ति । विकल्पोपि तत्रानवस्थितः । तत्र हि केचिन्नित्यमेव स्युः । लक्षणवाक्येषु यत् प्रथमानिर्दिष्टं तस्मात् स्यादित्यर्थः । इति षष्ठ्यन्तादणिति ।

ननु च तस्येति तच्छब्दः प्रथमनिर्दिष्टस्तस्मात् प्रत्ययेन भाव्यम् । सत्यम् । तस्येति सामान्यं विशेषोपलक्षणार्थम् । तेन तदीयं प्राथम्यं विशेषाणां विज्ञायते । **विभक्तिलोप** इति । 'कृत्तद्धितसमासाश्च' इति तद्धितान्तस्य प्रातिपदिकत्वात् 'सुपो धातुप्रातिपदिकयोः' इति उपगोरित्यस्याः षष्ठ्या लोप इति भावः। **ओर्गुण** इति। उकारस्य ओर्गुणः। **अवादेश** इति। 'एचोयवायावः' इति।

---

१. प्राग्दिशो विभक्तिरिति B_1, D_1, D_3. २. Before it—सुपो धातुप्रातिपदिकयोरिति B_1, B_2. ३. B_1 drops प्रातिपदिकसंज्ञा; प्रातिपदिकत्वात D_4. ४. अपि dropped Bc_1, Dc_3.

स्वाद्युत्पत्तिः आदिवृद्धिरन्त्योपधावृद्धिं बाधते । औपगवः । वाग्रहणाद्वाक्यमपि स्यादुपगोरपत्यमिति । अन्यतरस्यामित्यनुवृत्तेः समासोपि उपग्वपत्यमिति । समर्थग्रहणान्नेह । वस्त्रमुपगोरपत्यं चैत्रस्य । अणन्तत्वात् ङीप् । औपगवी स्त्री ।

अपत्यं पौत्रप्रभृति गोत्रम् ॥४।१।१६२॥

पौत्राद्यपत्यं गोत्रसंज्ञं[1] स्यात् ॥

स्वाद्युत्पत्तिरिति । 'स्वौजसमौट्—' इत्यादिना । **आदिवृद्धिरिति** । उपगु अ इति स्थिते 'अचोञ्णिति' । इति यान्तस्य वृद्धिः प्राप्नोति तामादिवृद्धिर्बाधते । तथोपगव् अ इति स्थिते 'अत उपधायाः' इत्युपधाकारस्य वृद्धिः प्राप्नोति तां च बाधते परत्वादिति भावः । **वाग्रहणादिति** । 'समर्थानां प्रथमाद्वा' इति । **अन्यतरस्यामित्यनुवृत्तेरिति** । 'दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्' इत्यतः । **वस्त्रमुपगोरिति** । उपगोरित्यस्य वस्त्रमित्यनेन संबन्धः । अपत्यमित्यस्य चैत्रस्येत्यनेन संबन्धः । अतः उपगोरपत्यमनयोः सामर्थ्याभावादुपगुशब्दादण् न ।

अपत्यम् । संबन्धिशब्दत्वादपत्यशब्दस्य यस्य तदपत्यं तदपेक्षया पौत्रप्रभृतेः गोत्रसंज्ञा । तदयमत्र सूत्रार्थः । वस्तुतः पौत्रप्रभृतिरपत्यरूपेण प्रतिभासमानोऽर्थो यं प्रत्यपत्यरूपेण प्रतिभासते यं च प्रति वस्तुतः पौत्रप्रभृतिस्तं प्रति गोत्रसंज्ञः[3] स्यादिति पौत्रप्रभृतिग्रहणमनन्तरस्य मा भूदित्येवमर्थम् ।

---

१. B1, D4 drop स्यात्. २. सामर्थ्यग्रहणा° P, D1, D2. ३. °संज्ञा D5. ४. °मानार्थो DC2.

एको गोत्रे ॥४।१।९३॥

गोत्रे एक एव प्रत्ययः स्यात् न[1] प्रत्ययबाहुल्यम् । यद्वा मूलप्रकृतेरेव[2] प्रत्ययोत्पत्तिः । उपगोः पौत्रादिरौपगवः ।

जीवति तु वंश्ये युवा ॥४।१।१६३॥

वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञं स्यान्न[3] गोत्रसंज्ञम् ।

गोत्राद्यून्यस्त्रियाम् ॥४।१।९४॥

यून्यपत्ये विवक्षिते गोत्रप्रत्ययान्तादेव प्रत्ययः स्यान्न तु[4] मूलप्रकृत्यनन्तरयुवभ्यः न तु स्त्रियां युवसंज्ञादि[5] ॥

एको । गोत्रापत्येषु विवक्षितेषु भेदेन प्रत्ययोत्पत्तिप्रसङ्गेन नियमः क्रियते । संख्याप्रथमसमानासहायमुख्यान्यवाच्येकशब्दः । अत्र तु संख्यावाची विज्ञेयः प्रथमवाची वा । तत्र संख्यावाचिपक्षे प्रत्ययनियम इत्याह । **एक एव प्रत्ययः स्यान्न प्रत्ययबाहुल्यमिति** । प्रथमवाचित्वे प्रकृतिनियमस्तदा गोत्रे विवक्षिते एक एव शब्दः प्रथमाप्रकृतिः प्रत्ययमुत्पादयतीति सूत्रार्थमभिप्रेत्याह । **यद्वेति** ।

जीव । पित्रादिसंतानो वंशः । तत्र भवो वंश्यः पित्रादिः । पौत्रप्रभृतीत्येतत् प्रथमान्तमप्यनुवर्तमानमर्थादिह षष्ठ्यन्तं जायत इत्यभिप्रेत्याह । **पौत्रादेरिति** । **गोत्रसंज्ञमिति** । तुशब्दादेतत् । स खलु अवधारणार्थः सन् गोत्रसंज्ञां वारयति ।

गोत्रात् । नियमोयम्[6] । **न तु स्त्रियामित्यादि** । अयं भावः । यदि अस्त्रियामिति नियमः प्रतिषिध्यते तर्हि स्त्रियां नियमो न स्यात् । अथ युवप्रत्ययस्तर्हि स्त्रियां गोत्रप्रत्ययेनाभिधानं न स्यात् । गोत्रसंज्ञाया युवसंज्ञया बाधितत्वात् । तस्माद्योगविभागः कार्यः । गोत्राद्यूनीत्येको नियमः । अस्त्रियामिति द्वितीयः । तत्र यूनीति वर्तते । तत्र यूनि यदुक्तं तत् स्त्रियां न इति युवसंज्ञैव प्रतिषिध्यते ।

---

१. न तु B_2. २. °प्रकृतिरेव D_1. ३. B_1 drops स्यात्. ४. P, C, Dc_1 drop तु. ५. युवसंज्ञा D_1. ६. योगः for नियमः Dc_3.

औपगवस्यापत्यं युवेति विग्रहे ।

अत इञ् ॥४।१।९५॥

अकारान्तात्[1] षष्ठीसमर्थादिञ्[2] स्यादपत्येऽर्थे। अणोऽपवादः ।
औपगविर्युवा । अस्त्रियामित्युक्तेर्गोत्रप्रत्यये एव चतुर्थादौ औपगवी स्त्री । दक्षस्यानन्तरापत्यं गोत्रापत्यं वा दाक्षिः । युवापत्ये तु

यञिञोश्च ॥४।१।१०१॥

गोत्रे यौ यञिञौ तदन्ताद्यूनि फक् स्यात् ॥

गोत्रसंज्ञा तु प्रवर्तत इति । **औपगवस्येति** । उपगोर्गोत्रापत्यस्य अपत्यं तच्च युवा[3] इति विग्रहे कृते सतीत्यर्थः ।

अत इञ् । अत इत्यनेन प्रकृतं प्रातिपदिकं विशेष्यते । विशेषणेन च तदन्तविधिः स्यादित्यभिप्रेत्याह । **अकारान्तादिति** । तपरकरणं किम् । शुभंयाः । अस्मान्मा भूत् । ननु 'प्रदीयतां दाशरथाय मैथिली' इत्यत्र कथमण् । शेषविवक्षायां स्यात् । दशरथस्यायं दाशरथ इति । **दक्षस्येति** । अनन्तरापत्यं साक्षादपत्यम् । **युवापत्ये त्विति** । दाक्षेरपत्यं युवेति विग्रहे विवक्षिते इति भावः ।

यञिञोः । गोत्रग्रहणेन यञिञौ विशेष्येते । तदन्ताद् गोत्राद्यून्यः[4] स्त्रियामिति वचनाद्यून्येव स्यादित्यभिप्रेत्याह । **गोत्र** इत्यादि ।

---

१. अदन्तात् C, D_1, D_2, D_3, D_5, B_1, B_2. २. इञपत्येऽर्थे D_3, B_1; अपत्येऽर्थे इञ् स्यात् C; इञ् स्यादपत्ये Dc_1. ३. युवापत्यमिति Dc_1. ४. Dropped Dc_2.

किति च ॥७।२।११८॥

किति च तद्धिते परेऽङ्गस्यादेरचो वृद्धिः स्यात् ॥ फस्यायनादेशः । दाक्षायणः । दाक्षायणौ[1] । दाक्षायणाः । गर्गस्यानन्तरापत्यं गार्गिः । गार्गी[2] । गार्ग्यः । गोत्रापत्ये तु इञि प्राप्ते ।

गर्गादिभ्यो यञ् ॥४।१।१०५॥

गर्गादिभ्यो गोत्रापत्ये यञ् स्यात् ॥ गार्गेरपत्यं गार्ग्यः । वात्स्यः ।

किति । आदेरच इति । अचामादेरच इत्यर्थः । **फस्येति** । 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति । दाक्षायण इति । 'यस्येति च' इतीकारलोपः । **दाक्षायणौ दाक्षायणा** इति । बहुत्वे तत्र[3] लुक्प्राप्तिर्नास्तीति दर्शनार्थम् ।[4] **गार्गिरिति** । 'अत इञ्' । ननु चात्र ऋष्यणा भाव्यम् । मैवम् । बाह्वादेराकृतिगणत्वादिञ् । एतच्चाग्रे स्वयमेव वक्ष्यति । **गोत्रापत्य** इति । 'एको गोत्रे' इति नियमात् ।

गर्गादि । गर्ग । वत्स । वाजासे । असमासे इत्यर्थः । वाज्यः । समासे तु सौवाजिः । संकृति । अज । व्याघ्रपात् । विदभृत् । प्राचीनयोग । पुलस्ति । ऐत[5] । अग्निवेश । शङ्ख । खट[6] । धूम । अवट । मनस् । धनंजय । वृक्ष । विश्वावसु । जरमाण । लोहित । शंसित । बभ्रु । वल्गु । मण्डु । मङ्क्षु । शङ्कु । अलिगु । गुहलु[7] । जिगीषु । मनु । ननु कथं मानवी प्रजेति । अपत्यसामान्येण् । मन्तु । तन्तु । मनायी । सूनु । कथक । ऋक्ष[8] । तरुक्ष[9] । तलुक्ष[10] । तण्ड । वतण्ड[11] । कपि ।

---

१. दाक्षायणौ । दाक्षायणाः dropped D_2, D_3, B_1, P, C. २. गार्गी । गार्ग्यः dropped D_3, B_1, P, C. ३. अत्र Dc_3. ४. After it—'यस्येति च' इतीकारलोपः । Dc_3. ५. Before it—वलस्ति Bc_1, Dc_3, Dc_4. ६. खटेवट Dc_3. ७. हलगु Dc_1. ८. रुक्षक Dc_1, Dc_3. ९. तरक्ष Dc_1. १०. Before it—कच्छप Dc_3. ११. After it—कण्ड । मण्ड । अण्ड । Dc_3.

यञञोश्च ॥२।४।६४॥

एतयोर्लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः । तत्कृते किम् । प्रियगार्ग्याः । स्त्रियां तु । गार्ग्यः स्त्रियः । युवापत्ये तु फक् ।

कत । कुरुकत । अनडुह । कण्व । शकल । गोकक्ष । अगस्त्य । कुण्डिनी । यज्ञवल्क । पर्णवल्क । अभयजात । विरोहित । वृषगण । रहूगण । शाण्डिल । मुद्गल । मुशल । पराशर । रामो जामदग्न्यः व्यासः पाराशर्य इति । अनन्तरेपि गोत्ररूपाध्यारोपः । अनन्तरविवक्षायामृष्यणेव । जामदग्नः पाराशरः । जतूकर्ण । मन्त्रित । अश्मरथ । शर्कराक्ष[2] । पूतिमाष । स्थूर । अरराक । पिङ्गल । कृष्ण । गोलन्द । उलूक । तितिक्ष । भिषज । भण्डित[3] । दण्ड । चिकित । देवहू । इन्द्रहू । एकलू । पिप्पलू । बृहदग्नि । जमदग्नि । सुलाभिन् । उत्थ । कुटीगु ।

यञ् । **तत्कृत** इति । यञ्प्रत्ययान्तेन अञ्प्रत्ययान्तेनैव कृते बहुत्वे । **प्रियगार्ग्या** इति । प्रियो गार्ग्यो येषां ते तथा । न चात्र यञ्प्रत्ययान्तकृतं बहुत्वं किं तु समासकृतम् । यञादीनामेकस्य द्वयोर्वा षष्ठीतत्पुरुषे लुग् वाच्यो वा । गार्ग्यस्य गार्ग्ययोर्वा कुलं गार्ग्यकुलं गर्गकुलं वा । वैदस्य वैदयोर्वा कुलं विदकुलं वैदकुलं वा । यञादीनां किम् । आङ्गकुलम् । तद्राजोयम् । न यञादिः । एकद्वयोः किम् । गर्गाणां धनं गर्गधनम् । तत्पुरुषे किम् । गार्ग्यस्य समीपमुपगार्ग्यम् । षष्ठी किम् । परमगार्ग्यः[4] ।

---

१. यञिञोश्चेति युवापत्ये फक् C. २. शर्कराक्ष Dc_1. ३. भडित Bc_1, Dc_1; भिडित Dc_4. ४. Before it—परमश्चासौ गार्ग्यश्च Dc_3.

आपत्यस्य च तद्धितेनाति ॥६।४।१५१॥

आपत्ययकारस्य तद्धिते परे लोपः स्यान्न त्वाकारे ॥[1] गार्ग्यस्यापत्यं युवा गार्ग्यायणः। गार्गेगार्ग्यस्य गार्ग्यायणस्य[2] गोत्रापत्ये[3] विवक्षिते 'एको गोत्रे' इति नियमात् गर्गशब्दादेव यञ्। गार्ग्यः। गर्गस्य गार्गेगार्ग्यायणस्य वा युवापत्यमिति विवक्षायां[4] 'गोत्राद्यूनि' इति नियमात् गार्ग्यशब्दादेव युवापत्यप्रत्ययः।[5] गार्ग्यायणः॥

भ्रातरि च ज्यायसि ॥४।१।१६४॥

ज्येष्ठे भ्रातरि जीवति कनीयान् युवसंज्ञः[6]। पित्रादौ मृते

आपत्यस्य। गर्गगोत्रापत्यानां समूहो गार्गकम्। वात्सकम्।[7] 'गोत्रोक्षोष्ट्र—' इति वुञ्। आपत्यस्य किम्। साङ्काश्यकः। सङ्काशाचातुरर्थिको ण्यः। 'धन्वयोपध—' इति वुञ्। तत्र भवे तद्धिते किम्। गार्ग्ययोः। वात्स्ययोः। हल इत्यनुवर्तते। तेन कारिकेयस्यापत्यं कारिकेयिः। अत्र न। **गार्ग्यायण** इति। 'यञिञोश्च' इति फक्। अत्र यकारलोपो न। आकारत्वात्। **गार्गेरिति**। गर्गस्यानन्तरापत्यस्य। **गार्ग्यस्येति**। गर्गगोत्रापत्यस्य। **गार्ग्यायणस्येति**। गर्गयुवापत्यस्य। अपत्ये विवक्षिते इत्यर्थः। **गर्गस्येत्यादि**। गर्गस्य मूलप्रकृतेरपत्ये **गार्गेरित्यनन्तरापत्यस्य गार्ग्यायणस्येति** युवापत्यस्य।

भ्रातरि। अवंश्यार्थमेतत्। **पित्रादौ मृते** इत्यादि। गर्गपौत्रप्रभृतेर्गार्ग्यस्य द्वौ पुत्रौ तयोः पित्रादौ वंश्ये मृतेपि

---

१. लोपः स्यात्तद्धिते परे D_5. २. After it—च D_4. ३. अपत्ये for गोत्रापत्ये D_1, D_6 ; वा गोत्रापत्ये B_2 ; वा अपत्ये Dc_1. ४. युवापत्याविवक्षायां P, D_3, B_1, B_2. ५. After it—स्यात् C. ६. C has स्यात् after it. ७. Before it—वत्सगोत्रापत्यानां समूहो Dc_2.

जीवत्यग्रजेनुजो गार्ग्यायणः ।

बाह्वादिभ्यश्च ॥४।१।९६॥

एभ्य इञ् स्यादपत्येर्थे ॥ बाहविः । औपबाहविः । नस्तद्धिते । औडुलोमिः ।[4]

अग्रजे जीवति सत्यनुजो गार्ग्यायणो भवति । युवसंज्ञया युवप्रत्ययान्तः स्यादिति भावः । एतत्सूत्रव्याख्यानमग्रिमसूत्रत्रयव्याख्यानमुपलक्षयति । तानि व्याख्यायन्ते । 'वान्यस्मिन् सपिण्डे स्थविरतरे जीवति' । ४।१।१६५ ॥ सप्तपुरुषान्तर्भूतः सपिण्डः । तथोक्तम् ।

'सपिण्डता तु पुरुषे सप्तमे विनिवर्तते' । इति ।

सप्तमेतीते इत्यर्थः । तथा 'साापिण्ड्यं साप्तपौरुषम्' इति च । भ्रातुरन्यस्मिन् सापिण्डे स्थविरतरे स्थानेन वयसा चोत्कृष्टे जीवति पौत्रप्रभृति जीवदपत्यं वा युवसंज्ञं स्यात् । पितृव्यादौ जीवति गार्ग्यस्यापत्यं गार्ग्यायणो गार्ग्यो वा । स्थविरतरे किम् । स्थानवयोन्यूने गार्ग्य एव । जीवतीति किम् । मृते मृतो वा गार्ग्य एव । 'वृद्धस्य च पूजायाम्' । ४।१।१६६ ॥ अपत्यमन्तर्हितं वृद्धम् । गोत्रस्य पूजायां युवसंज्ञा वा । गर्गस्य पौत्रादिरार्चितो गार्ग्यायणो गार्ग्यो वा । पूजायां किम् । गार्ग्यः । 'यूनश्च कुत्सायाम्' । ४।१।१६७॥ यूनः कुत्सायां वा युवसंज्ञा । पक्षे गोत्रसंज्ञैव । गार्ग्यो जाल्मः । गार्ग्यायणो वा । गुर्वायत्तो भूत्वा यः स्वच्छन्दः स एवमुच्यते । कुत्सायां किम् । गार्ग्यायणः ।

बाह्वा । क्वचिदनकारार्थं क्वचिद्बाधकबाधनार्थम् । बाहु । उपबाहु । उपवाकु । निवाकु । शिवाकु । विपकु । अवाकु । उपबिन्दु ।

---

१. जीवति चाग्रजे B_2 ; जीवति वाग्रजे Dc_1 २. °रपत्ये B_1, D_1, B_2. ३. औपबिन्दविः B_1 ; P, D_1, Dc_1. ४. After it—भाद्रशर्मिः । आग्निशर्मिः D_2 ; आग्निशर्मिः Dc_1 ; आग्निशर्मिः । भाद्रशर्मिः । D_5. ५. After it—स्यात् Dc_3.

सुधातुरकङ् च ॥४।१।९७॥

सुधातुरिञ् स्यादकङादेशश्च । सौधातकिः ।

व्यासवरूडनिषादचण्डालबिम्बानां चेष्टः ॥

कृकला । वृकला । चूडा । वलाका । मूषिका । भगला । छगला । ध्रुवका । गेहला । सुमित्रा । दुर्मित्रा । पुष्करसत् । अनुहरत् । देवशर्मन् । अग्निशर्मन् । कुनामन् । सुनामन् । पञ्चन् । सप्तन् । अष्टन् । संभूयोम्भोमितौजसां सलोपश्च । उदञ्चु । माषशराविन् । क्षेमवृद्धिशृङ्खलातोदित् । खरनादिन् । नरमर्दिन् । प्राकारमर्दिन् । लोमन् । आजीगर्त । कृष्ण । युधिष्ठिर । अर्जुन । साम्ब । गद । प्रद्युम्न । राम । उदक । संजय । येषां लोकविदितो गोत्रभाव आदिपुरुषत्वं तेभ्य एव बाह्वादिभ्य इञ् । अन्येभ्यो नेष्टः । बहुनाम्नोपत्यं बाहवः । संबन्धिशब्दानां राजश्वशुरादीनां 'राजश्वशुराद्यत्' इत्यादि कार्यमुच्यते तत् संबन्धिशब्दसदृशान्न । श्वशुरनाम्नोपत्यं श्वाशुरिः । आकृतिगणोयम् । जाम्बिः । ऐन्द्रशर्मिः । आजधेनविः ।

सुधा । ङित्त्वादन्त्य उकारस्याकङ् । **व्यासेति** । एभ्य इञ् अकङ् चादेश इष्ट इत्यर्थः ।

---

१. °दकङ् च C; अकङ् चादेशः B_2, D_4, D_5. २. P, D_1, D_2 drop च. ३. After it—हगला Dc_4; before it—अर्गला Dc_3. ४. Dropped Dc_4. ५. Before it—अरुन्तुद । Dc_3. ६. उदञ्च Dc_4. ७. यत्कार्य° Dc_3. ८. °दन्त्यस्य Dc_3, Bc_1.

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥७।३।३॥

पदान्ताभ्यां यकारवकाराभ्यां परस्य[1] न वृद्धिः किं तु ताभ्यां पूर्वावैचावागमौ क्रमात्[2] स्तः । वैयासकिः । वारुडकिः । इत्यादि ।

गोत्रे कुञ्जादिभ्यश्च्फञ्[3] ॥४।१।९८॥

एभ्यो गोत्रापत्ये[4] च्फञ्[5] स्यात् ॥

न य्वा । क्रमादिति । यकारात् पूर्व ऐकारः वकारात् पूर्व औकारः । वैयासकिरिति । वेदं व्यस्यतीति वेदव्यासः । तस्यैकदेश-प्रयोगो व्यास इति । तत्र वीत्ययमुपसर्गः । स च पदान्तस्यान्तो यकारः । पदान्ताभ्यां किम् । यष्टिः प्रहरणमस्य याष्टीकः । प्रतिषेधवचनं वृद्धिविषये ऐच् यथा स्यादिह मा भूत् । दाध्यश्विः । न ह्यत्र य्वाभ्यामुत्तरस्य वृद्धिप्रसङ्गोऽस्ति । उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्टः । पूर्वत्रैयलिन्दः । यत्रोत्तरपदसंबन्धी यण् नास्ति तत्र नेष्यते । द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिकः । वारुडकिरित्यादिशब्देन नैषादकिः चाण्डालकिः । बैम्बकिः ।

गोत्रे । चो व्रातच्फञोरिति विशेषणार्थः । ञो वृद्ध्यर्थः । कुञ्ज । ब्रध्न । शङ्ख । भस्मन् । लोमन् । शठ । शाक । शुण्ड । शुंभ । विपाश । स्कन्द । स्कम्भ । 'शिवादिभ्योण्' इति यावद्गोत्रमनुवर्तते ।

---

१. परस्याचो Dc_1.   २. B_1 drops क्रमात्.   ३. च्फञ् D_1.   ४. गोत्रे C; गोत्रेपत्ये D_8.   ५. फञ् D_1.   ६. Dropped Dc_4.   ७. शुभ्र । उभ । Dc_3.

व्रातच्फञोरस्त्रियाम् ॥५।३।११३॥

व्रातवाचिभ्यश्चफञन्तेभ्यश्च स्वार्थे ञ्यः स्यान्न तु स्त्रियाम् । कौञ्जायन्यः । ब्राध्नायन्यः । स्त्रियां तु । कौञ्जायनी ।

अत्र गोत्रत्वेन जातित्वात् ङीष् ।

ञ्यादयस्तद्राजाः ॥५।३।११९॥

ञ्यादयः प्रत्ययास्तद्राजसंज्ञाः स्युः ॥

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥२।४।६२॥

तद्राजस्य लुक्[1] तत्कृते बहुत्वे[2] सति न तु स्त्रियाम् ॥ कौञ्जायनाः ।

व्रात । नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः । उत्सेधः शरीरं तदायस्य ये जीवन्ति उत्सेधजीविनः । व्रातेभ्यः कापोतपाक्यः कापोतपाक्यौ कपोतपाकाः । कौञ्जायन्य इति । कुञ्जस्य गोत्रापत्यम् । पूर्वेण च्फञि ञ्यः । एकवचनद्विवचनयोः सति शिष्टत्वात् ञित्स्वरेणैवाद्युदात्तत्वेन भाव्यम् । बहुवचने तु कौञ्जायना इत्यत्र परमपि ञित्स्वरं त्यक्त्वा चित्स्वर एवान्तोदात्तत्वमिष्यते । गोत्रत्वेनेति । 'गोत्रं च चरणैः सह' इति वचनाज्जातित्वं 'तस्माज्जातेरस्त्रीविषयादयोपधात्' इति ङीष् ।

ञ्यादयः । 'पूगाञ् ञ्यो ग्रामणीपूर्वात्' इत्यतः प्रभृत्येतत्सूत्रपर्यन्तं ये प्रत्ययाः सन्ति तेषामियं संज्ञा । तत्कृत इति । तद्राजा तेनैव कृते बहुत्वे इत्यर्थः । तद्राजस्य किम् । औपगवाः । बहुषु किम् । कौञ्जायन्यः । तेनैव किम् । प्रियः कौञ्जायन्यो येषां ते प्रियकौञ्जायन्याः । अस्त्रियां किम् । आङ्ग्यः स्त्रियः । 'गोत्रे कुञ्जादिभ्यश्च्फञ्' इत्यत्रस्थगोत्रपदस्य प्रत्युदाहरणमाह[4] ।

---

१. लुक् स्यात् P, C, D_5, Dc_1. २. बहुत्वे B_1, D_1, D_3, D_5. ३. तद्राजस्य तत्कृत इति । Dc_3. ४. °स्थस्य गोत्रपदस्य व्यावर्त्यमाह । Dc_2.

अनन्तरापत्ये तु कौञ्जिः ।

अनन्तरेति । अत इञ् स्यान्न च्फञ् । स्पष्टत्वात् त्यक्तं सूत्र-चतुष्टयं प्रसङ्गाद् व्याख्यायते । 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' । २।४।५८।। ण्यन्तात् क्षत्रियगोत्रादार्षात् ञितश्च परयोरणिञोर्यूनि लुक् स्यात् । कौरव्यः पिता । कौरव्यः पुत्रः । 'कुर्वादिभ्यो ण्यः' । गोत्रे तस्माद्यूनि इञ् तस्य लुक् । ननु चात्र तिकादिपाठात् फिञा भाव्यम् । कौरव्यायणिरिति । उच्यते । क्षत्रियगोत्रस्य तत्र ग्रहणं 'कुरुनादिभ्यो ण्यः' इति विहितस्य । इदं तु ब्राह्मणगोत्रं 'कुर्वादिभ्यो ण्यः' इति । क्षत्रियात् । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । अन्धकत्वाद् गोत्रेण् । तस्माद् यूनीञ् । तस्य लुक् । आर्षात् । वासिष्ठः पिता । वासिष्ठः पुत्रः । ऋषित्वाद् गोत्रेण् । ततो यूनीञ् । तस्य लुक् । ञितः । वैदः पिता । वैदः पुत्रः । विदाद्यञ् गोत्रे । ततो यूनीञ् । तस्य लुक् । अणः खल्वपि । तैकायनिः पिता । तैकायनिः पुत्रः । तिकादिभ्यः फिञ् । ततो यून्यण् । तस्य लुक् । एभ्यः किम् । कौहलः पिता । कौहालिः पुत्रः । शिवाद्यण् । तस्माद्यूनीञ् । तस्य लुक् न । यूनि किम् । वामरथ्यस्य छात्रा वामरथाः । 'कुर्वादिभ्यो ण्यः' तस्मात् 'कण्वादिभ्यो गोत्रे' इति शैषिकोण् । तस्य लुक् न । अणिञोः किम् । दाक्षेरपत्यं युवा दाक्षायणः । अब्राह्मणमात्राद्युवप्रत्यय-स्योपसंख्यानम् । बौधिः पिता । बौधिः पुत्रः । साल्वावयवलक्षण इञ् गोत्रे । तस्मात् फक् यूनि । तस्य लुक् ।। 'पैलादिभ्यश्च' ।। २।४।५९।। पैल इत्येवमादिभ्यश्च युवप्रत्ययस्य लुक् स्यात् । पैलः पिता । पैलः पुत्रः । 'पीलाया वा' इत्यण् गोत्रे । तस्मात् 'अणो द्व्यचः' इति यूनि फिञ् । तस्य लुक् । अन्ये इञन्तास्तेभ्यः 'इञः प्राचाम्' इति सिद्धे प्रागर्थः पाठः । पैल । शालङ्कि ।

१. P, D_1, Dc_1 drop तु. २. गोत्रादण् Dc_2. ३. तस्य च Dc_3. ४. पैल इत्येवमादिभ्यश्च dropped Bc_1, Dc_1, Dc_4. ५. Dropped Bc_1, Dc_1, Dc_4. ६. Dropped Bc_1, Dc_1, Dc_4. ७. तस्य च Dc_3.

नडादिभ्यः फक् ॥४।१।९९॥

एभ्यो गोत्रापत्ये फक् स्यात्। नाडायनः। चारायणः।[२] आमुष्यायणः। अनन्तरे तु[४]। नाडिः।

सात्यकि। सात्यकामि। औदञ्चि। औदमज्जि। औदव्रजि। औदमेघि। औदशुद्धि। दैवस्थानि। पैङ्गलायनि। राणायनि। रौहाक्षि[५]। भौलिङ्गि। औद्राहमानि। औज्जिहायनि। तद्राजाच्चाणः। तद्राजसंज्ञादणः परस्य युवप्रत्ययस्य लुक्। आङ्गः पिता। आङ्गः पुत्रः। 'द्व्यञ्मगध—' इति तद्राजोऽण्। ततः 'अणो द्व्यचः' इति यूनि फिञ्। तस्य[६] लुक्। आकृतिगणोऽयम्। 'इञः प्राचाम्'॥ २।४।६०॥ गोत्रे य इञ् तदन्तात् युवप्रत्ययस्य लुक्। प्राचामिति गोत्रविशेषणं न विकल्पार्थम्। पान्नागारिः पिता। पान्नागारिः पुत्रः। पान्नागारस्य गोत्रापत्यमिञ्। तस्माद्यूनि 'यञिञोश्च' इति फक्। तस्य लुक्। प्राचां किम्। दाक्षिः पिता। दाक्षायणः पुत्रः। 'न तौल्वलिभ्यः' ॥ २।४।६१॥ तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुक्। तौल्वलिः पिता। तौल्वलायन पुत्रः। तौल्वलि। धारणि। पारणि। रावणि[७]। दैलीपि। दैवापि। दैवमति। दैवयज्ञि। प्राणहावि। चाफट्टकि। आनुराहति। श्वाफल्कि। आनुमति। आहिंसि। आसुरि। आयुधि। नैमिषि। आसिबन्धकि। वैहति[८]। पौष्कि। पौष्करसादि। धैरकि। धैलोकि[९]। वैहाकि। वैकर्णि। कारेणुपालि। कामलि।

नड। फस्यायनादेशः। आमुष्यायण इति। अमुष्यापत्यम्। अमुष्येति निपातनात् षष्ठ्या अलुक्। नड। चर। बक। मुञ्ज। इतिक। इतिश। उपक। लमक। शलङ्कु। शलङ्कुं चेति।

---

१. गोत्रे फक्। B_1, D_1, D_2. २. After it—आमुष्यायणः। D_8. ३. आनन्तरो नाडिः C, अनन्तरो नाडिः। D_1, अनन्तरापत्ये नाडिः D_2. ४. P drops तु. ५. रौहाक्षि Bc_1, Bc_3. ६. तस्य च Dc_2. ७. वाराणि Bc_1, Dc_1. ८. वैहक्ति Bc_1, Dc_1. ९. धैलुकि Bc_1.

शालङ्कायनः । पैलादिषु शालङ्किरस्ति । तत्र तदेव ज्ञापकमिञ्[1]-भावस्य । सप्तल । वाजप्य । तिक । अग्निशर्मन् वृषगणे । अग्निशर्मायणो वार्षगण्यः । अग्निशर्मोन्यः । प्राण । नर । सायक । दास । मित्र । द्वीप । [2]पिङ्गर । पिङ्गल । किङ्कर । किन्नर । कात्यल । काश्य । काव्य । अज । अमुष्य । कृष्णरणौ ब्राह्मणवासिष्ठे । कार्ष्णायनो ब्राह्मणः । अन्यः कार्ष्णिः । राणायनो वासिष्ठः । अन्यो राणिः । [3]अमित्र । लिगु । चित्र । कुमार । क्रोष्टु क्रोष्टं च । क्रोष्टायनः । लोह । दुर्ग । स्तम्भ । शिंशपा । अग्र । तृण । शकट । सुमत । वि[4]मत । केकुजत् । इत्वर । जवन । युगंधर । हंसक । दण्डिन् । हस्तिन् । पञ्चाल । चमसिन् । सुकृत्य । स्थिरक । ब्राह्मण । चटक । बदर । अश्वल । [5]खरप । कामुक । ब्रह्मदत्त । उदुम्बर । शोण । अलोह । दण्ड । स्पष्टत्वात् त्यक्तं सूत्रनवकम्[7] । 'हरितादिभ्यो ञः' ।४।१।१००।। हरितादिर्बिदाद्यन्तर्गणः । तस्माद्योञ् तदन्तात् प्रातिपदिकात् फक् स्यात् । गोत्रप्रत्ययादपरो गोत्रप्रत्ययो न संभवतीति सामर्थ्यात् यूनि फक् । हरितस्यापत्यं युवा हारितायनः । 'शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु' ।४।१।१०२।। शरद्वदादिभ्यो यथासंख्यं भृग्वादिष्वपत्येषु फक् स्यात् गोत्रे । शारद्वतायनो भार्गवश्चेत् । अन्यः शारद्वतः । शौनकायनो वात्स्यश्चेत् । शौनकोन्यः । बिदाद्यञ् । दार्भायणः । आग्रायणश्चेत् । दार्भिरन्यः । 'द्रोणपर्वतजीवन्तादन्यतरस्याम्' ।४।१।१०३।। एभ्यो गोत्रे वा फक् । द्रौणायनः । द्रौणिः । पार्वतायनः पार्वतिः । जैवन्तायनः । जैवन्तिः । 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' ।४।१।१०६।। अनयोर्ब्राह्मणकौशिकयोर्यञ् । बभ्रोर्गर्गादिपाठादेव सिद्धे कौशिके नियमार्थम् । माधव्यो ब्राह्मणश्चेत् । माधवोन्यः । बाभ्रव्यः

१. °मित्रोभावस्य Dc2. २. Dropped Dc1, Dc2. ३. अजामित्र D4, Dc3. ४. मिमत Dc2. ५. ककु । जतु । Dc4, Dc3. ६. खचर Dc1; Bc3, Bc1 अश्वखचर Dc4. ७. After it—व्याख्यायते । Dc3.

कौशिकश्चेत् । बाभ्रवोन्यः । गर्गादिषु पाठः सर्वत्र लोहितादिकतन्तेभ्य इत्यन्तर्गणकार्यार्थः । बाभ्रव्यायणी । 'कपिबोधादाङ्गिरसे' । ४।१।१०७।। गोत्रे यञ् । काप्यः । लोहितादित्वात् काप्यायनी । बौध्यः । आङ्गिरसे किम् । कापेयः । बौधिः । 'वतण्डाच्च' । ४।१।१०८।। आङ्गिरसे गोत्रे यञ् । वातण्ड्यः । वतण्डशब्दो गर्गादिः शिवादिश्च । तत्रानाङ्गिरसे द्वयमपि स्यात् । वातण्ड्यः । वातण्डः । 'लुक् स्त्रियाम्' ।४।१।१०९।। वतण्डादाङ्गिरस्यां स्त्रियां यञो लुक् । ततः शार्ङ्गरवादित्वात् ङीन् । वतण्डी । अनाङ्गिरसे वातण्ड्यायनी । वातण्डी । 'अश्वादिभ्यः फञ्' ।४।१।११०।। आङ्गिरसे इति निवृत्तम् । एभ्यो गोत्रे फञ् । ये त्वत्र गोत्रप्रत्ययान्तास्तेभ्यः सामर्थ्याद्युनि । आश्वायनः ।। अश्व । अश्मन् । शङ्ख । विद । पुट । रोहिण । खर्जूर । नलिन । चटुल । भण्डिल । भडिल । भण्डित । भडित । प्रकृत । रामोद । क्षत्री । ग्रीवा । शाक । काण । गोलाङ्क । अर्क । स्वन । वन । पद । चक्र । कुल । श्रविष्ठ । पदविन्द । पवित्र । गोमिन् । श्याम । धूम । वाग्मिन् । विश्वानर । शव । शपात्रेये । शापायनः आत्रेयः । शापिरन्यः । शापो वा । जनवत । ग्रीष्म । अरह । बीज । विशम्य । विशाल । गिरि । चपल । यूप । दारुक । वैल्य । लाप्य । आनडुह्य । पुंसिजात । पुंसि वर्तमानाज्जातात् फञ् । जातस्यापत्यं जातायनः । स्त्रियां तु जातेयः । अर्जुन । शूद्रक । सुमनस् । दुर्मनस् । आत्रेयो भरद्वाजे । आत्रेयायणो भरद्वाजः । अन्य आत्रेयः[1] । यूनि 'इञोण्यक्षत्रिय—' इति लुक् । भारद्वाज आत्रेये । भारद्वाजायन आत्रेयः । अन्यो भारद्वाजः । उत्स । आतप । कितव । शिव । खदिर । भर्गात् त्रैगर्ते । गोत्रे फञ् । भार्गायणः । त्रैगर्तश्चेत् । भार्गिरन्यः ।

१. आत्रेयोऽन्यः । Dc3.

शिवादिभ्योण् ॥४।१।११२॥

ईञोपवादः । शैवः ।

'शिवादि' । 'गोत्रे' इति निवृत्तम् । शिव । प्रोष्ठ । चण्ड । जम्भ । भूरि । कुठार । अनभिम्लान । संधि । मुनि । ककुत्स्थ । कहोड । कहूय । रोध । पल । वतण्ड । तृणकर्ण । क्षीरपूर्ण । जलहृद । परिषेक[2] । गोहिलक । जटिरक । बधिरक । मञ्जिरक । वृष्णिक । खंजनक[3] । खञ्जल । रेफ । आलेखन । विश्रवण । रवण । एतौ विश्रवःशब्दस्यादेशौ प्रकृत्यन्तरे[4] वा । वृत्तिविषये तत्समानार्थे । विश्रवसोपत्यं वैश्रवणो रावणश्च । वर्तनाक्ष । पिटक । पिटाक । तृक्षाक । नभाक । जननाम । जरत्कारु । उत्कम्प । पौरोहितक[5] । आर्यश्वेता । सुपिष्ट । पिष्ट । मयूरकर्ण । वेन्दूरकर्ण[6] । तक्षन् । अस्मात् कारिलक्षणो ण्योपीष्यते । न तु 'उदीचामिञ्' । ताक्षणः । ताक्षण्यः । ऋष्टिषेण । गङ्गा । गाङ्गः । तिकादिभ्यः फञ् । गाङ्गायनि । शुभ्रादित्वात् ढक् । गाङ्गेयः । एवं त्रैरूप्यमस्य स्यात् । विपाश् । वैपाशः । कुञ्जादिभ्यश्च्फञ् । वैपाशायन्यः । यस्क । लह्य । द्रुह्य । अयःस्थूण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्नी । द्व्यचो नद्याः । कुल्याया अपत्यं कौलः । त्रिवेणी त्रिवणं च । त्रिवेण्याः अपत्यं त्रैवणः । त्यक्तं सूत्रम् । 'अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः' ।४।१।११३॥ अवृद्धसंज्ञानि नदीनां मानुषीणां च यानि नामानि तेभ्योण् स्यात् न ढक् । नार्मदः । यामुनः । मानुषीभ्यः । चिन्तितताया अपत्यं चैन्तितः । वृद्धाभ्यो न । चान्द्रभागाया अपत्यं चान्द्रभागेयः । वासवदत्तेयः । अत्र 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धसंज्ञा ।

---

१. Before it—एभ्योण् स्यात् । D_4, D_1. २. After it—परिषिका Dc_1, Dc_4, Dc_3. ३. खञ्जिनक Dc_1. ४. तत्प्र° Dc_1. ५. पौराहितिका Dc_4. ६. वदूर° Dc_1, Dc_4; चदूर° Dc_3.

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥४।१।११४॥

एभ्योऽण् स्यान्नेञ्[1] ॥ ऋषिभ्यः । वासिष्ठः[2] । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । राधसः[3] । वृष्णिभ्यः । वासुदेवः[4] । आनिरुद्धः । कुरुभ्यः । नाकुलः । साहदेवः । बाह्वादित्वात् कार्ष्णिः । आर्जुनिः । प्राद्युम्निः । इत्यादयः इञन्ताः । बाह्वादेराकृतिगणत्वात्[5] । गार्गिः । वैदिः ।

मातुरुत् संख्यासंभद्रपूर्वायाः ॥४।१।११५॥

संख्यादिपूर्वाया मातुरपत्येण् स्यादुकारोन्तादेशश्च[6][7][8] ॥ द्वयोर्मात्रोरपत्यं द्वैमातुरः । षाण्मातुरः[9] । सांमातुरः[10] । भाद्रमातुरः ।

ऋषि । ऋषयो मन्त्रदर्शिनः । ननु नित्यानां शब्दानामन्धकादिवंशसमाश्रयणेनान्वाख्यानं न घटते । उच्यते । कथमपि काकतालीयन्यायेन कुर्वादिवंशेष्वसंकरेणैव नकुलादिशब्दाः संकलितास्तानादाय पाणिनिना स्मृतिरुपनिबद्धा । अथवा अन्धकादिवंशा अपि नित्यास्तत्र प्रयुक्तेभ्य इदं प्रत्ययविधानम् ।

मातुः । **द्वैमातुर** इति । प्राक् तद्धितार्थविषये द्विगुः । पश्चात् तद्धितः । **सांमातुर** इति । पूर्वं प्रादिसमासस्ततस्तद्धितः । स्त्रीलिङ्गनिर्देशात् संमिमीते संमाता तस्यापत्यं सांमात्र इत्यत्र न । संख्यादिपूर्वायाः किम् । सौमात्रः ।

---

१. B₁ drops स्यात्. २. वाशिष्ठः B₁, D₅. ३. C, D₄ have रांधसः; B₁ drops it. ४. B₁ drops it; आन्धकः । वासुदेवः । D₅. ५. बाह्वादित्वात् गार्गिः । वैदिः C; Before this B₂ has—वङ्गवाकुक्ष्याकौकिलाभ्योऽण् वाच्यः । वङ्गवाया अपत्यं वाङ्गवः. ६. B₁ drops स्यात्. ७. उकारान्तादेशश्च B₁, B₂. ८. B₁ has स्यात् after it. ९. D₁, D₄ drop it; D₅ drops this and भाद्रमातुरः । १०. भाद्रमातुरः । सांमातुरः C; D₂.

कन्यायाः कनीन च ॥४।१।११६॥

कन्याया अण् स्यात्[1] कनीनादेशश्च ॥ कानीनः ।

स्त्रीभ्यो ढक् ॥४।१।१२०॥

स्त्रीप्रत्ययान्तेभ्यो[2] ढक् स्यात् ॥ ढस्यैयादेशः । वैनतेयः । माहेयः । यौवतेयः[3] ॥

कन्यायाः । ननु यदि कन्या नापत्यं तस्याः । अथापत्यं न कन्या । नैष दोषः । यतो विवाहपूर्वं यः पुंयोगस्तदभाववती[4] कन्या नाक्षतयोनिः । या पुनर्विवाहं विना पुंसा संयुज्यते सा कन्यात्वं न जहाति । अपर आह । मुनिदेवतामाहात्म्यात् या पुंयोगे क्षतयोनिर्न भवति सेहोदाहरणम् । कुन्ती । सत्यवती । कानीनः कर्णः । कानीनो व्यासः । स्पष्टत्वात्[5] त्यक्तं सूत्रत्रयम् । 'विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु' ।४।१।११७॥ विकर्णादिभ्यो वत्सादिष्वपत्येष्वण् स्यात् । वैकर्णो वात्स्यः । शौङ्गो भारद्वाजः । छागल आत्रेयः । अन्यत्रेञ् । शुङ्गां केचित् स्त्रीलिङ्गां पठन्ति ते ढकं प्रत्युदाहरन्ति । शौङ्गेय इति । 'पीलाया वा' ।४।१।११८॥ अण् । पैलः । पैलेयः । 'ढक् च मण्डूकात्' ।४।१।११९॥ मण्डूकादपत्ये ढक् । अण् वा स्यात् । माण्डूकेयः । माण्डूकः । माण्डूकिः ।

स्त्रीभ्यः । स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते इत्याभिप्रेत्याह । **स्त्रीप्रत्ययान्तेभ्य** इति । स्त्रीप्रत्ययान्तेभ्यः किम् । इडविडोपत्यमैडविडुः । वडवाया वृषे वाच्ये ढग्वाच्यः । वाडवेयो वृषः । वृषो बीजाश्वः । अपत्ये तु वाडव इत्यणेव स्यात् । अण् क्रुञ्चाकोकिलाभ्यां वाच्यः । क्रौञ्चः । कौकिलः । स्पष्टत्वात्त्यक्तं सूत्रम् । 'द्व्यचः' । ४।१।१२१॥ द्व्यचः स्त्रीप्रत्ययान्ताद् ढक् स्यात् अवृद्धाभ्य इति । प्राप्तस्याणोपवादः । दत्ताया अपत्यं दात्तेयः ।

---

१. B_1 drops it. २. °भ्योपत्ये ढक् B_1, D_1, D_4. ३. Before it—माहेयः D_2; after it—कौन्तेयः D_5. ४. संयोगः Dc_1. ५. स्पष्टत्वात् dropped D_4.

शुभ्रादिभ्यश्च ॥४।१।१२३॥

अपत्ये ढक् स्यात् । अवृद्धाभ्य इति प्राप्तस्याणोपवादः । शौभ्रेयः । गाङ्गेयः ॥

ढे लोपोऽकद्र्वाः ॥६।४।१४७॥

ढे परे उवर्णलोपः स्यात् कद्रूं विना ॥ कामण्डलेयाः । कद्र्वास्तु काद्रवेयः । पाण्डोश्च न । पाण्डवेयः ।

शुभ्र । **अवृद्धाभ्य** इत्यादि । एतच्च यथायोगं प्राप्तानामिञौत्सर्गिकाण्ढक्चतुष्पाल्लक्षणढञामुपलक्षणम् । शुभ्र । विष्टपुर । ब्रह्मकृत । शतद्वार । शलाका । शालास्थल । शलाकाभ्रू । विधवा । विकसा । रोहिणी । रुक्मिणी । दिशा । शालूक । अजवस्ति । शकुनि । लक्षणश्यामयोर्वासिष्ठे । लाक्षणेयः । श्यामेयः । वासिष्ठः । अन्यो लाक्षणिः श्यामायनः । अश्वादित्वात् फञ् । गोधा । कृकलासा । आलिवी । प्रवाहण । भर्वत । भारत । मकष्टु । यकष्टु । सृकण्डु । मृकण्डु । कर्पूर । इतर । अन्यतर । आलीढ । सुदन्त । सुदक्ष । सुदामन् । कद्रु । तुद । अकशाप । कुमारिका । कुवेरिका । किशोरिका । जिह्माशिन । परिधि । वायुदत्त । शकल । शवल । खर्दुर । अम्बिका । अशोका । गन्धपिङ्गला । खडोन्मत्ता । अनुदृष्टिन् । जरतिन् । बलीवर्दिन् । विश्र । विम्ब । श्वन् । अश्मन् । अश्व । अजिर । आकृतिगणः । गाङ्गेयः । पाण्डवेयः ।

ढे लोपः । **कामण्डलेय** इति । 'चतुष्पादभ्यो ढञ्' इति ढञ् । **काद्रवेय** इति । 'संज्ञायाम्' इत्यूङ् । स्त्रीभ्यो ढक् ।

---

१. Dropped B_1, B_2, D_1. २. C drops from अवृद्धाभ्यः to °पवादः । ३. अन्तलोपः D_2. ४. कद्रूवर्जम् B_3, D_2. ५. ढञादीना Dc_4. ६. विश् Dc_3, Dc_4. ७. भारत । भारम Dc_2. ८. सुतन्द Bc_1, Dc_1, Dc_4. ९. जिह्मालिन् Dc_4. १०. खवूर Bc_1, Dc_4. ११. विज्य Dc_1, Dc_4; वीज्य Dc_3.

इतश्चानिञः ॥४।१।१२२॥

इकारान्ताद् द्व्यचोपत्ये ढक् स्यात् न त्विञन्तात् ॥ आत्रेयः । नैधेयः । इतः किम् । दाक्षिः । अनिञः किम् । दाक्षायणः ।

कल्याणादीनामिनङ् ॥४।१।१२६॥

एषामपत्ये ढक् स्यादिनङादेशः ॥ काल्याणिनेयः । ज्यैष्ठिनेयः ।

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥७।३।१९॥

हृदाद्यन्ते शब्दे पूर्वोत्तरपदयोर्वृद्धिः स्यात् ॥

इत । **दाक्षायण** इति । दाक्षेरपत्यं युवा । 'यञिञोश्च' इति फक् । द्व्यचः किम् । मरीचेरपत्यं मारीचः । स्पष्टत्वात् त्यक्ते सूत्रे 'विकर्णकुषीतकात् काश्यपे' ।४।१।१२४॥ आभ्यां काश्यपेपत्ये ढक् स्यात् । वैकर्णेयः । कौषीतकेयः । काश्यपे किम् । वैकर्णिः । कौषीतकिः । 'भ्रुवो वुक् च' । ४।१।१२५॥ भ्रूशब्दस्यापत्ये ढक् वुक् च । भ्रौवेयः ।

कल्या । कल्याणी । सुभगा । दुर्भगा । अनुसृष्टि । जरती । बलीवर्दे । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री ।

हृद्भग । ञिति णिति किति तद्धिते परत इति शेषः ।

---

१. Dropped B_1. २. Dropped P. ३. इतश्चेति किम् C. ४. After it—द्व्यचः किम् । मारीचः । मरीचेरपत्यम् B_2; द्व्यचः किम् । मारीचः । D_4, D_5. ५. ढक् इनङादेशश्च । D_3; B_1; इनङ् चादेशः B_2. ६. शब्दे परे B_1. ७. पदयोराद्यचः D_5. ८. Dropped B_1. ९. च तद्धिते परे Dc_2.

सौहार्दम् । सौभागिनेयः । साक्तुसैन्धवः ॥

अनुशतिकादीनां च ॥७।३।२०॥

उभयपदवृद्धिः । आनुशतिकम् ।[2] पारस्त्रैणेयः ॥

सौहार्दमिति । सुहृदयस्येदं सुहृदयस्य भावो वा । पूर्वत्र 'तस्येदम्' इत्यण् । उत्तरत्र 'हायनान्तयुवादिभ्योण्' । 'हृदयस्य हृल्लेख—' इति हृद्भावः । अथवा हृद्शब्दादेवाण् । 'सौभागिनेय' इति । सुभगाया अपत्यम् । कल्याण्यादीनामिनङ् । सुभगशब्द उद्गात्रादिषु पठ्यते । तत्र महते सौभगायेत्युत्तरपदवृद्धिर्न । छन्दसि सर्वविधीनां विकल्पितत्वात् । 'साक्तुसैन्धव' इति । सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः । तत्र भवः साक्तुसैन्धवः । 'कच्छादिभ्यश्च' इत्यण् ।

अनु । आनुशतिकमिति । शतेन क्रीतः शतिकः । 'शताच्च ठन्यतावशते' । अनुगतः शतिकेन अनुशतिकः । 'तस्येदम्' इत्यर्थेण् । आनुशतिकम् । पारस्त्रैणेय इति । 'कल्याणादीनामिनङ्' इति ढक्[3] इनङ् वा । अनुहोडेन चरति आनुहौडिकम् । अनुसंवत्सरं दीयते आनुसंवत्सरिकः । 'बह्वचोन्तोदात्ताट्ठञ्' । अगारवेणोरपत्यमागारवैणवः । असिहत्ये भवः आसिहत्यः । अस्यहत्यशब्दोऽस्मिन्नध्यायेस्ति । आस्यहात्यः । 'विमुक्तादिभ्यश्च' । इत्यण् । अस्य हेति प्रयोजनमस्य आस्यहैतिकः । अत एव वचनादस्य प्रातिपदिकत्वम् । विभक्तेश्चालुक् । वध्योगस्यापत्यं वाध्यौगः । विदाद्यञ् । पुष्करसदोपत्यं पौष्करसादिः । अनुरहतोपत्यमानुराहतिः । बाह्वादित्वादिञ् । कुरुकतस्यापत्यं कौरकात्यः । गर्गादियञ् । कुरुपञ्चाले भवः कौरुपाञ्चालः । उदकशुद्धस्यापत्यमौदकशौद्धिः । इह लोके भवमैहलौकिकम् । पारलौकिकम् । 'लोकोत्तरपदस्य'

---

१. शाक्तसैन्धवः D_3, D_1, P, C. २. After it—इनाङि कृते वृद्धिः B_1. ३. ठकञ् Do_1. ४. 'तत्र च दीयते कार्यं भववत्' इत्यतिदेशेन कालाट्ठञ् । Do_2. ५. वियुक्ता° Do_4.

कुलटाया वा ॥४।१।१२७॥

अस्या इनङादेशो वा स्यात्[1] ढकि ॥ कौलटेयः । कौलटिनेयः । सती भिक्षुक्यत्र कुलटा ॥

चटकाया ऐरक् ॥४।१।१२८॥

चटकाया ऐरक् प्रत्ययः स्यादपत्येऽर्थे[2] ॥ चटकादपीष्यते[3] । चटकायाश्चटकस्य वापत्यं चाटकेरः । स्त्र्यपत्ये[4] तु[6] लुग्वाच्यः । स्त्र्यपत्यं चटका ।[5]

इति ठञ् । सर्वलोके विदितं सार्वलौकिकम् । 'लोकसर्वलोकाट्ठञ्' । सर्वपुरुषस्येदं सार्वपौरुषम् । सर्वभूमिनिमित्तं सार्वभौमः । प्रयोगे भवं प्रायौगिकम् । पारस्त्रैणेयः । 'राजपुरुषात् ष्यञ्' । राजपौरुष्यम् । सूत्रनडस्यापत्यं सौत्रनाडिः । आकृतिगणश्चायमिष्यते । तेनाभिगममर्हति आभिगामिकः । आधिदैविकम् । आधिभौतिकम् । चातुर्वैद्यमिति सिद्धं स्यात् ।

कुलटा । आदेशार्थं वचनम् । ढक् तु 'स्त्रीभ्यो ढक्' इत्येव सिद्ध इत्याह । **अस्या** इति । **सतीति** । सती साध्वी अशीलभेदिनी भिक्षुकीति । अकिंचनत्वाद् भिक्षार्थं कुलान्यटन्तीत्येवंविधाः कुलटा अत्राभिप्रेता इत्यर्थः । या तु कुलान्यटन्ती शीलभेदिनी तस्याः 'क्षुद्राभ्यो वा' इति ढ्रक् । कौलटेरः ।

चटका । **स्त्र्यपत्यं चटकेति** । चटकाया अपत्यं स्त्रीति विवक्षायां चटकेति स्यात् । लुक् 'तद्धितलुकि' इति कृते पुनष्टाप् कर्तव्यः ।

---

१. Dropped B1. २. Dropped D2. ३. B1 drops स्यात्. ४. °त्यपत्ये B1, B2, D4, D8. ५. स्त्र्यपत्ये चटका C. ६. B1, D1, D2 drop तु.

गोधाया ढ्रक् ॥४।१।१२९॥

अस्यापत्ये ढ्रक्[1] । ढस्य एयः । लोपोव्योर्वलि[2] । गौधेरः । शुभ्रादित्वाद् ढक् । गौधेयः ।

आरगुदीचाम् ॥४।१।१३०॥

गौधारः । आकारोच्चारणान्यत्रापि । नाटेरः । नाटेयः । नाटारः ।

क्षुद्राभ्यो वा ॥४।१।१३१॥

शीलहीना अङ्गहीनाश्च क्षुद्रास्ततो वा ढ्रक् ॥ कौलटेरः । दासेरः । काणेरः । पक्षे ढक्[7] ।

गोधा । ढस्येति । 'आयनेयीनी—' इति सूत्रेण ढमात्रस्यैयः । लोपो व्योरिति यलोपः ।

आरक् । गोधाया अपत्ये आरक् । उदीचां मतेन । ननु गोधाशब्दस्यावन्तत्वाद् रगेव वाच्यस्तेन गोधार इति सिध्येदित्याशङ्क्याह । आकारोच्चारणादिति । यद्यन्यत्र न स्यादाकारोच्चारणं व्यर्थं स्यादिति भावः । नाटेर इति । नटस्यापत्यम् ।

क्षुद्रा । ढ्रगनुवर्तते नारक् । पक्षे ढगिति । कौलटेयः । दासेयः । काणेयः ।

---

१. अस्या अपत्ये B_1. २. स्यात् after it P, D_1, B_2, D_4. ३. एयू D_4. ४. After it—धातोरधातोश्च वकारयकारयोर्लोपः स्याद्वलि परे । D_6. ५. अत्र before it in B_1. ६. नाटारः । नाटेरः । नाटेयः P, D_1; नाटारः । नाटेयः । D_4. ७. After it—कौलटेयः । दासेयः । काणेयः । D_2.

पितृष्वसुश्छण् ॥ ४।१।१३२॥

अस्यापत्ये[1] छण् स्यात् ॥ छस्येयादेशः[2] । पैतृष्वस्रीयः ।

ढकि लोपः ॥४।१।१३३॥

पितृष्वसुरन्तलोपः[3] स्यात्[4] ढकि । अत एव ढक् पैतृष्वसेयः ॥

मातृष्वसुश्च ॥४।१।१३४॥

मातृष्वस्रीयः[5] । मातृष्वसेयः ।

राजश्वशुराद्यत् ॥४।१।१३७॥

अस्माद्यत्[6] स्यादपत्ये[7] ॥ श्वशुर्यः ।

पितृ । अणोपवादः ।

ढकि । ननु पितृष्वसृशब्दात् कथं ढक् इत्याशङ्क्याह । अत एवेति । 'ढकि' इत्येतस्मादेव ज्ञापकादित्यर्थः ।

मातृ । छण्प्रत्ययो ढकि लोपश्च । स्पष्टत्वात् त्यक्तं सूत्रद्वयम् । 'चतुष्पाद्भ्यो ढञ्' । ४।१।१३५॥ चतुष्पाद्वाचिभ्योपत्ये ढञ् स्यात् । अणादीनामपवादः । कामण्डलेयः । कमण्डलश्चतुष्पाद्विशेषः । जाम्बेयः । जम्बुः शृगालः । 'गृष्ट्यादिभ्यश्च' । ४।१।१३६॥ एभ्योपत्ये ढञ् । गार्ष्टेयः । गृष्टि । हृष्टि । बलि । हलि । विश्रि[8] । क्षुद्रि[9] अजवस्ति । मित्रयु ।

राजश्व । राज्ञो जाताविति प्रत्ययान्तेन क्षत्रियजातिर्यदि गम्यते इत्यर्थः । राजन इति । 'तस्यापत्यम्' इत्यणि कृत्ये 'नस्तद्धिते' इति टिलोपे प्राप्ते 'अन्' इति सूत्रम् । 'राजन्नसमासे' इति पुरोहितादौ पठ्यते । ततोयमसमासे यक्प्रत्ययः ।

---

१. अस्याश्छण् स्यादपत्ये B_2, D_2, D_4; अस्य छण् स्यादपत्ये Dc_1; अस्मात् छण् अपत्ये B_1; अस्याश्छण् स्यादपत्ये P. २. छस्य ईयः P: D_1, D_2, D_4. ३. पितृष्वसृशब्दस्य D_4. ४. B_1 drops it. ५. मातृष्वसेयः । मातृस्वस्रीयः । D_4. ६. अतो यदपत्ये B_1. ७. अर्थे after it—P, D_2, D_3, B_1. ८. विष्टि Dc_4, Dc_3. ९. कुद्रि Dc_1; Bc_3.

ये चाभावकर्मणोः ॥६।४।१६८॥

यादौ तद्धिते[1] अन् प्रकृत्या स्यात् न तु भावकर्मणोः। राज्ञो जातौ यत्[2]। राजन्यः। क्षत्रियः। राजनोन्यः।

अन् ॥६।४।१६७॥

अणि अन् प्रकृत्या स्यात्। इति टिलोपो न। अभावकर्मणोः किम्। राज्ञो वा[4] भावः कर्म वा राज्यम्।

क्षत्रात् घः ॥४।१।१३८॥

घस्येयः। क्षत्रियः। जाताविष्टिः। क्षात्रिरन्यः।

कुलात् खः ॥४।१।१३९॥

केवलात् कुलात् तदन्ताच्च खः स्यात्[5]। खस्येनः। कुलीनः। आढ्यकुलीनः।

क्षत्रात्। घशब्द एवायं गृह्यते न तरप्तमपौ। कुतः। ज्ञापकात्। यदयं प्रत्ययादेर्घकारस्येयादेशं शास्ति तज् ज्ञापयति यत्र प्रत्ययविधौ घः श्रूयते तत्र स्वरूपमेव गृह्यत इति। **क्षात्रिरन्य** इति। 'अत इञ्'। केवलं क्षत्रस्यापत्यं न क्षत्रियजातिः।

कुलात्। उत्तरसूत्रे पूर्वपदनिषेधादिह केवलस्तदन्तश्च गृह्यत इत्याह। **केवलादित्यादि। खस्य ईनेति।** 'आयनेयीनीयि—' इति।

---

१. After it—परे P, D_1, D_3, C. २. यत्प्रत्ययः C. ३. अन्नाणि C, D_2.
४. D_1, B_2, D_2, D_3 drop it. ५. B_1 drops it.

अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥४।१।१४०॥

[1]केवलात् कुलादेतौ [2]वा स्तः ॥ [3]पक्षे खः । कुल्यः । कौलेयकः । कुलीनः । [4]पदग्रहणात् [5]बहुपूर्वाद्भवत्ये[6]व । बहुकुल्यः । बहुकौलेयकः । बहुकुलीनः ।

महाकुलादञ्खञौ ॥४।१।१४१॥

अस्मादेतौ वा स्तः ॥[7] माहाकुलः । माहाकुलीनः । पक्षे खः । महाकुलीनः ।

दुष्कुलाड्ढक् ॥४।१।१४२॥

दौष्कुलेयः ।[8] पक्षे खः । [9]दुष्कुलीनः ॥

स्वसुश्छः ॥४।१।१४३॥

स्वस्रीयः ।

भ्रातुर्व्यच्च ॥४।१।१४४॥

भ्रातुरपत्ये व्यत् स्यात् ॥ भ्रातृव्यः । छः । चकारात् छः । भ्रात्रीयः ।

अपूर्व । अपूर्वादित्युक्ते बहुच्पूर्वादपि निषेधः स्यात् । अतः 'अपूर्वपदात्' इत्युक्तम् । ईषदसमाप्तं कुलं बहुकुलम् । बहुकुल्यः । बहु[10]कुलेयः । बहुकुलीनः ।

---

१. केवलात् क्रलान् यक्ढकञ् एतौ स्तो वा B_1. २. Dropped D_5. ३. कुल्यः । कौलेयकः । पक्षे खः । कुलीनः B_1, D_5. ४. P drops from पद° to दुष्कुलीनः; C, D_1, D_2, D_4 drop from पद° to बहुकुलीनः. ५. बहुच्पूर्वादपि भव ति B_2. ६. एव dropped D_5. ७. After this—पक्षे खः, dropping it after महाकुलीनः—D_1, D_4, D_5, B_2. ८. After this—अन्यतरस्यांग्रहणात् खञ् च । वौष्कुलीनः । P, B_1, D_3. ९. दुःकुलीन D_1. १०. °कौलेयकः Dc_4; बाहुकुलेयकः Dc_3.

व्यन् सपत्ने ॥४।१।१४५॥

भ्रातृव्यः शत्रुः । स्वरे भेदः ।

रेवत्यादिभ्यष्ठक् ॥४।१।१४६॥

एभ्योपत्ये ठक् स्यात् ।

ठस्येकः ॥७।३।५०॥

प्रत्ययादेष्ठस्येकादेशः स्यात् ॥ रैवतिकः । आश्वपालिकः ।

व्यन् । स्वरे भेद इति । तिति तु 'तित् स्वरितम्' इति स्वरितत्वम् । निति 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वमित्यर्थः ।

रेवत्या । यथायोगमणादीनामपवादः । रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवती । वृकग्राह । दण्डग्राह । कुक्कुटाक्ष ।

ठस्येकः । कुष्ठः कण्ठ इत्यादीनाम् 'उणादयो बहुलम्' इति ठस्य न स्यादिकः । मथितं पण्यमस्य माथितिकः । अत्र यस्येति लोपे कृते 'तान्तात्कः' इति स्थानिवद्भावेनेकः कः स्यादिति चेन्नैवम् । 'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न भवति । अथवा ठमात्रस्यादेशः । अकार उभयत्रोच्चारणार्थः । तेनालविधित्वात् स्थानिवद्भावो नेति कादेशो न । स्पष्टत्वात् त्यक्तानि पञ्चदश । 'गोत्रस्त्रियाः कुत्सने ण च' ॥४।१।१४७॥ पितुरज्ञाने मात्रा व्यपदेशः कुत्सनम् । तस्मिन् गम्यमाने गोत्रस्त्रीवाचिनो यून्यपत्ये णः स्यात् ठक् च । गार्ग्या अपत्यं गार्गो जाल्मः । गार्गिकः । गोत्र इति किम् । कारिकेयो जाल्मः । स्त्रियाः किम् । औपगविर्जाल्मः । कुत्सने किम् । गार्गेयः ।

---

१. रेवत्यादिभ्यः C, D_1, B_2, Dc_1. २, B_1 drops it. ३, आदेशः dropped D_5. ४. B_1 drops it. ५. वृकवञ्चिन् Dc_4. ६. Before it—कर्णग्राह Dc_4. ७. गार्ग्यौ Dc_1, Dc_2.

'वृद्धात् ठक् सौवीरेषु बहुलम्' ॥४।१।१४८॥ वृद्धात् सौवीरगोत्राद्बहुलं ठक् स्यात् कुत्सने। भागवित्तेर्गोत्रापत्यं भागवित्तिकः। पक्षे 'यञिञोश्च' इति फक्। भागवित्तायनः। तार्णविन्दवस्य तार्णविन्दविकः। तार्णविन्दविः। आकशापेयिकः। आकशापेयिः। एभ्य एवेष्यते। वृद्धादिति स्त्रीनिवृत्तये। सौवीरेष्विति किम्। औपगविर्जाल्मः। कुत्सन एव। भागवित्तायनः। बहुलोक्तिर्वैचित्र्यार्था। तेन 'गोत्रस्त्रियाः—' इत्यादिषु चतुर्षु सूत्रेषु आद्यसूत्रे कुत्सने एव। अन्त्यसूत्रे सौवीरेष्वेव। मध्यमसूत्रयोः कुत्सने सौवीरेषु च।

'फेश्छ च' ॥४।१।१४९॥ कुत्सने वृद्धात् फिञन्तात् सौवीरगोत्रादपत्ये छः ठक् च। वृषयमुन्दसुयामास्तिकादिषु पठ्यन्ते। एभ्य एवेष्यते। वार्ष्यायणीयः। वार्ष्यायणिकः। यामुन्दायनीयः। यामुन्दायनिकः। सौयामायनीयः। सौयामायनिकः। कुत्सन एव। वार्ष्यायणिः। फिञन्तादणो 'ण्यक्षत्रिय—' इति लुक्।

'फाण्टाहृतिमिमताभ्यां णफिञौ' ॥४।१।१५०॥ आभ्यां सौवीरगोत्राभ्यामपत्ये णफिञौ स्तः। अल्पाचः परनिपाताद्यथासंख्यं न। फाण्टाहृतः। फाण्टाहृतायनिः। मैमतः। मैमतायनिः। सौवीरेषु किम्। फाण्टाहृतायनः। 'यञिञोश्च' ॥ इति फक्। मैमतायनः। 'नडादिभ्यः फक्' ॥

'कुर्वादिभ्यो ण्यः' ॥४।१।१५१॥ 'सौवीरेषु बहुलम्' इति निवृत्तम्। एभ्योऽपत्ये ण्यः स्यात्। कौरव्यः। यस्तु 'कुरुनादिभ्यः' इति कुरुशब्दात् ण्यः स तु क्षत्रियात् तद्राजसंज्ञको बहुषु लोपी। अयं तु श्रूयते कौरव्याः। विकादिपाठात् फिञपि। कौरव्यायणिः। कुरु। गर्ग। मङ्गुष। अजमारक। वावदूक। सम्राजः क्षत्रिये। साम्राज्यः

१. From तार्ण॰ to भागवित्तायनः dropped Dc_1, Bc_1, Bc_3. २. अन्त्ये सूत्रे Dc_3, Dc_4. ३. Dropped Dc_4. ४. गर्ग। गर्गर। Dc_3. ५. मज्जुर Dc_4. ६. अज्जमार Dc_2, Dc_3. ७. वाफडक Bc_1, Dc_1, Dc_4.

क्षत्रियः । साम्राजोन्यः । कवि । मति । वाक् । पितृमत् । इन्द्रजाली । एजि । दामोष्णीषि । गणकारि । कैशोरि । कपिञ्जलादि । कुट । शलाका । पुर । एरक । शुंक्रा । दर्भ । केशिनी । स्त्रीनिर्देशात् पुंवत्त्वं नेति 'नस्तद्धिते' इति टिलोपो न । कैशिन्यः । वेना-च्छन्दसि । वैन्यो राजेति च्छान्दस एव कविभिः प्रमादात् प्रयुक्तः । शूर्पणाय । श्यावनाय । श्यावरथ । श्यावपुत्र । सत्यंकार । वल-भिंकार । पथिकारिन् । मूढ । शकन्धु । हर्तृ । शालीन । रथकार । जातिशब्दोयम् । करिणस्तूत्तरेण सिद्धः । ईन । पिण्डी । वामरथस्य कण्वादिवत् स्वरवर्जम् । ण्यप्रत्ययान्तस्य वामरथ्यस्य यञन्तेषु कण्वादिषु दृष्टमात्रस्य कार्यस्य लुगादिकस्यातिदेशः न तु कण्वादि-त्वप्रयुक्तस्यैव 'कण्वादिभ्यो गोत्रे' इत्यस्य । अत एव स्वरवर्ज-मित्याह । 'यञञोश्च' इति बहुषु लुक् । वामरथाः । स्त्री वामरथी । वामरथ्यायनी । 'प्राचां ष्फतद्धितः' । युवा वामरथ्यायनः । 'यञिञोश्च' इति फक् । वामरथाश्छात्राः । 'कण्वादिभ्यो गोत्रे' इत्यण् । वामरथानि संघाङ्कलक्षणानि । 'संघाङ्कलक्षण—' इत्यादि-नाण् । स्वरस्त्वन्तोदात्त एव ण्यस्वरेन न त्वतिदेशेनाद्युदात्तः । 'सेनान्तलक्षणकारिभ्यश्च' ॥४।१।१५२॥ सेनान्ताल्लक्षणात् कारिवा-चिभ्यश्चापत्ये ण्यः । हारिषेण्यः । लाक्षण्यः । कारिभ्यः । तान्तुवाय्यः । नापित्यः । 'उदीचामिञ्' ॥४।१।१५३॥ सेनान्तादिभ्य इञ्स्यादुदीचां मतेन । हारिषेणिः । लाक्षणिः । तान्तुवायिः । 'तिकादिभ्यः फिञ्' ॥ ४।१।१५४॥ एभ्योपत्ये फिञ् स्यात् । तैकायनिः । तिक । कितव । संज्ञा । बाल । शिखा । उरस् । शाठ्य । सैन्धव । यमुन्द । रूप्य । वृष । अस्य प्रत्ययसंनियोगेन यकारान्तत्वमिष्यते । वार्ष्यायणिः । ग्राम्य । नीड । अमित्र । कुरु । देवरथ । तैतिल । औरस । लाङ्कट । गोकक्ष । कौरव्य । क्षत्रियशब्दोयम् । अन्यतस्त्विञेव । तस्य

१. दामालिपि Bc1; दामालिषि Dc3, Dc4. २. शुभ्र Dc2. ३. इनपिण्डी Bc1. ४. After it—शब्दस्य Dc2. ५. °वाय्य: Dc3. ६. संयोगेन Bc1.

'ण्यक्षत्रिय—' इति लुक् । मौरिकि । मौलिकि[1] । चौपयत । चैटयत[2] ।[3] शैकयत । क्षैतयत । ध्वजयत[4] । चन्द्रमस् । शुभ । गङ्गा । वरेण्य । वस्व[5] । आराट । वाह्यका । खल्यका । लोमका । सुयाम । उदन्य । यज्ञ । 'कौशल्यकार्मार्याभ्यां च' ॥४।१।१५५॥ आभ्यामपत्ये फिञ् स्यात् । कौशल्यायनिः[6] । कार्मार्यायनिः । कौशलकर्माराभ्यामेवात्रेऽपवादः फिञ्[7] । तत्संनियोगेन प्रकृतिरूपं निपात्यते । तथोक्तम् ।

'दगुकौशलकर्मारच्छागवृषाणां युड्वादिष्टस्य' इति ।

दाँगव्यायनिः । छाग्यायनिः । वार्ष्यायणिः[8] । 'अणो द्व्यचः' ॥४।१।१५६॥ अणन्ताद् द्व्यचः फिञ् स्यात् । कर्तुरपत्यं । कार्त्रः । कार्त्रस्यापत्यं कार्त्रायणिः । अण इति किम् । दाक्षायणः । द्व्यचः किम् । औपगविः । 'उदीचां वृद्धादगोत्रात्' ॥४।१।१५७॥ वृद्धादगोत्रादपत्ये फिञ् उदीचाम् । आम्रगुप्तायनिः । कारिशब्दादपि परत्वादयमेव । नापितायनिः । उदीचां किम् । आम्रगुप्तिः । वृद्धात् किम् । याज्ञदत्तिः । अगोत्रात् किम् । औपगविः । 'वाकिनादीनां कुक् च' ॥४।१।१५८॥ एभ्योऽपत्ये फिञ् । कुगागम उदीचाम् । वाकिनायनिः । वाकिनिः । वाकिन । गारेध । काक । कार्कस्य । लङ्का । चर्मवर्मणोर्नलोपश्च । 'पुत्रान्तादन्यतरस्याम्' ॥४।१।१५९॥ पुत्रान्ताद्वृद्धात् पूर्वेण पक्षे फिञ् सिद्धस्तस्मिन्ननेन वा कुगागमो विधीयते । ततस्त्रैरूप्यम् ॥ गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः । गार्गीपुत्रिः । 'प्राचामवृद्धात् फिन् बहुलम्' ॥४।१।१६०॥ अवृद्धात् फिन् स्यात् प्राचाम् ।

१. भौलिक Dc_4. २. वैपयत । वैढयत Dc_4. ३. After it—वैकयत Dc_3. ४. ध्वजवत Dc_3 ५. स्वर Dc_1. ६. कौसल्य° Dc_2, Bc_3. ७. कौसल्या° Dc_3, Bc_3. ८. कौसल° Dc_2, Bc_3. ९. कौसल° Dc_2, Bc_3. १०. दाग्यायनि: Bc_1, Dc_1, Dc_4.

अनृष्यानन्तर्ये विदादिभ्योञ् ॥४।१।१०४॥

विदादिभ्यो गोत्रापत्येञ् स्यात् येत्वत्रानृषयस्तेभ्य आनन्तर्ये[1]। वैदः। और्वः। अञन्तत्वाद्बहुत्वे लुक्। विदाः। उर्वाः। गोत्र इत्येव। वैदिः।[2] और्विः। अनृषिभ्यः। पौत्रः। दौहित्रः।

ग्लुचुकायनिः। ग्लौचुकिः। वृद्धात् किम्। राजदन्तिः। बहुलोक्तेः क्वचिन्न। दाक्षिः। 'मनोर्जातावञ्यतौ षुक् च' ॥४।१।१६१॥ मनुशब्दाज्जातौ अञ्यतौ स्तः षुक् चागमः। मानुषः। मनुष्यः। जातिशब्दावेतौ। ततोपत्यार्थाभावाद् बहुष्वलुक्। मानुषाः। अपत्ये विवक्षिते त्वणेव। मानवी प्रजा।

'अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः' ॥

अनृष्या। **अञन्तत्वादिति**। 'यञञोश्च' इति। **वैदिरिति**। ब्राह्मादित्वादिञ्। विद। उर्व[4]। कश्यप। कथमिद्रभूः सप्तमः काश्यपानामिति। अपत्यसामान्यरूपविवक्षया ऋष्यणा भविष्यति[5]। कुशिक। भरद्वाज। उपमन्यु। किलात। किन्दर्भ। विश्वानर। ऋष्टिषेण[6]। ऋतभाग। प्रियक। सप्तस्तम्ब। कुशवार। शरद्वत्। शुनक। धेनु। गोपवन। शिग्रु। बिन्दु। भाजन। अश्वावतान। श्यामाक। श्यापर्ण। हरित। किंदास। वस्यस्क। अर्कलुग। वध्योग। विष्णुवृद्ध। प्रतिबोध। रथन्तर। गाविष्ठिर। निषाद। मठर। मृदाक। पुनर्भू। पुत्र। दुहितृ। ननान्दृ। परस्त्री परशुं च। परस्त्रिया अपत्यं पारशवः। ब्राह्मणाच्छूद्रायामूढायामुत्पन्नः। सा च जातितः परस्त्री। यस्तु परभार्यायामुत्पन्नः पारस्त्रैणेयः सः।

---

१. D1 drops it. २. Before it—आनन्तरः C. ३. Dropped P, C, D1, D5. ४. ऊर्व Bc4, Dc1, Dc3. ५. भवति Dc3. ६. ऋषिषेण Dc1, Dc2.

यस्कादिभ्यो गोत्रे ॥२।४।६३॥

एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् ॥ यस्काः । लेह्याः । अस्त्रियां किम् । यास्क्यः स्त्रियः ॥[४]

यस्कादि । प्रत्ययाविधेश्चान्यत्र लौकिकं गोत्रं गृह्यते इत्यनन्तरापत्येऽपि लुक् । बहुत्वे किम् । यास्कः । तत्कृते किम् । प्रिययास्काः । अस्त्रियामित्येव । यास्क्यः स्त्रियः । गोत्रे किम् । यास्काश्छात्राः । यस्क । लह्य । द्रुह्य । अयस्थूण । तृणकर्ण । एते शिवादिषु पठ्यन्ते । तेभ्योऽण् । ततः परेभ्यः षड्भ्य इञ् । सदामत्त । कम्बलहार । औहिर्योग । कर्णाढक । पिण्डीजङ्घ । बकसँक्थ । ततः परेभ्यश्चतुर्भ्यः 'गृष्ट्यादिभ्यश्च' इति ढञ् । वंसि । कुडि । अजबस्ति । मित्रयु । ततः परभ्यो द्वादशभ्य इञ् । रज्जुमुख । जङ्घारथ । उत्कास । कटुक । मन्थर । पुष्करसद् । द्विषयुट् । उपरिमेखल । क्रोष्टुमाय । क्रोष्टुमान । क्रोष्टुपाद । शीर्षमाय । पुष्करसद् शब्दाद् बाह्वादिपाठादिञ् । केचिद् गोपवनादिषु तौल्वलादयश्चेति पठन्ति तौल्वलादिषु च पौष्करादिशब्दपाठाच्च गोपवनादिभ्य इति निषेधे प्राप्तेऽत्रास्य पाठः । खलयवशब्दो नडादिस्ततः फक् । पदक । वर्षुक । आभ्याम 'अत इञ्' । भ[१०]लन्दनशब्दात् शिवाद्यण् । भ[११]ण्डिल । भण्डित । भाण्डिक । एभ्योऽश्वादिफञ् ।

---

१. बहुषु लुक् D_1, D_2, D_4, B_2. २. Before it—शिवादिभ्यः D_5. ३. स्त्रियां तु B_1, D_5 ; from अस्त्रियां to स्त्रियः dropped D_1. ४. After it—लाह्यः P. ५. बहिर्योग Bc_1, Dc_1, Dc_3. ६. कार्णाटक Bc_1, Dc_1, Dc_3. ७. बकभक्त Bc_1, Dc_1, Dc_4, Dc_3. ८. विभ्रि Dc_2 ; विासि Dc_3, Dc_4. ९. खलयवय Bc_1 ; खलयवन Dc_1. १०. हलदेक Dc_1, Bc_1; हलदेश Dc_4 ; हलबलदक Dc_3. ११. भडिल Dc_4.

अत्रिभृगुकुत्सवसिष्ठगौतमाङ्गिरोभ्यश्च ॥२।४।६५॥

एभ्यस्तद्वत् ।[1] अत्रयः । भृगवः । कुत्साः । वसिष्ठाः[2] । गौतमाः । अङ्गिरसाः । तेनैवेत्येव । प्रियात्रेयाः । स्त्रियां तु । आत्रेय्यः स्त्रियः ।

अत्रि । अत्रेः 'इतश्चानिञः' इति ढक् । अन्येभ्य ऋष्यण् । **प्रियात्रेया** इति । प्रिय आत्रेयो येषां ते प्रियात्रेयाः । न ह्यत्र प्रत्ययान्तकृतं बहुत्वम् । किं तर्हि । समासार्थकृतम् । **आत्रेय्य** इति । 'टिड्ढाणञ्—' इति ङीप् । स्पष्टत्वात् त्यक्तं सूत्रपञ्चकम् । 'बह्वच इञः प्राच्यभरतेषु' ॥२।४।६६॥ बह्वचः पदात् प्राच्यगोत्रे भरतगोत्रे च य इञ् तस्य बहुषु लुक् । प्राच्ये पन्नागाराः । भरते[3] अर्जुनाः । बह्वचः किम् । वैकयः । प्राच्यभरतेषु किम् । वालाकयः[4] । भरताः प्राच्या एव तद्ग्रहणमन्यत्र प्राग्ग्रहणे भरतग्रहणं नेति ज्ञापनार्थम् । तेन 'इञः प्राचाम्' इत्यत्र भरतानां युवप्रत्ययस्य लुङ्न । आर्जुनिः पुत्रः अर्जुनायनः । 'न गोपवनादिभ्यः' ॥२।४।६७॥ एभ्यो गोत्रप्रत्ययस्य न लुक् । गौपवनाः । विदाद्यन्तर्गणोऽयं । गोपवन । शिग्रु । बिन्दु । भाजन । अश्वावतान । श्यामाक । श्यापर्ण । 'तिककितवादिभ्यो द्वन्द्वे' ॥२।४।६८॥ तिकादिभ्यः कितवादिभ्यश्च गोत्रप्रत्ययस्य द्वन्द्वे बहुषु लुक् । तैकायनयश्च कैतवायनयश्च तिककितवाः । 'तिकादिभ्यः फिञ्' । तस्य लुक् । वाङ्खरयश्च भाण्डीरथयश्च वङ्खरभण्डीरथाः । इञो लुक् । औपकायनाश्च लामकायनाश्च उपकलमकाः । नडादिफक् । वाहकयश्च नारकयश्च वहकनरकाः । इञः । वाकनखयश्च गौदपरिणद्धयश्च वकनखगुदपरिणद्धाः । इञः । औब्जयश्च काकुभाश्च उब्जककुभाः । उब्जादिञः । ककुभाच्छिवाद्यणः । लौङ्कटयश्च शान्त-

---

१. After it—स्यात् B_1. २. वशिष्ठाः B_1, D_8. ३. भरते Dc_3. ४. लाकट° Dc_4.

मुखयश्च लङ्कट[1]शान्तमुखाः । इञः । औरसायनयश्च लाङ्कटयश्च उरसलङ्कटाः । उरसात् तिकादिफिञः । लङ्कटादिञः । कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च कृष्णाजिनकृष्णसुन्दराः । इञः । भ्राष्ट्रकयश्च कापिष्ठलयश्च भ्रष्ट्रककपिष्ठलाः । इञः । आग्निवेश्याश्च दाशेरकयश्च अग्निवेशदशेरकाः । अग्निवेशाद् गर्गादियञः । दशेरकादिञः । 'उपकादिभ्योन्यतरस्यामद्वन्द्वे' ॥२।४।६९॥ उपकादिभ्यो गोत्रप्रत्ययस्य वा लुक् द्वन्द्वे चाद्वन्द्वे च । उपकाः । उपकायनाः । लमकाः । लामकायनाः । भ्रष्ट्रकाः । भ्राष्ट्रकायनाः । कपिष्ठलाः । कापिष्ठलयः । कृष्णाजिनाः । कार्ष्णाजिनयः । कृष्णसुन्दराः । कार्ष्णसुन्दरयः । एषामद्वन्द्वे विकल्पः । द्वन्द्वे तु पूर्वेण नित्यम् । परिशिष्टानां द्वन्द्वे चाद्वन्द्वे च वा । चूडारक । आडारक । उदङ्क । सुधायक । सुपिष्ट । पिष्ट । मयूरकर्ण[2] । खरीजङ्घ । शलाथल । पतञ्जल । पदञ्जल । कठेरणि । कुषीतक[3] । कशकृत्स्न । निदाघ । कलशीकण्ठ[4] । दामकण्ठ । कृष्णाजिन । कृष्णपिङ्गल । कृष्णक । कर्णक । पर्णक । जटिलक । बधिरक । जातुक । अनुलोम । अनुपद । पिङ्गलक । प्रतिलोम । प्रतान । अनभिहित । 'आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्' ॥२।४।७०॥ आगस्त्यकौण्डिन्ययोरवयवयोर्गोत्रप्रत्यययोर्लुक् । एतयोश्चागस्तिकुण्डिनचावादेशौ । अगस्तयः । ऋष्यणः । कुण्डिनाः गर्गादियञः । चोन्तोदात्तार्थः । सर्वादेशं परित्यज्य गोत्रप्रत्ययस्य लुग्विधिरागस्तीया इत्यत्र 'गोत्रेलुगचि' इति लुकि निषिद्धे संनियोगशिष्टे आदेशेसति वृद्धलक्षणश्छो यथा स्यादित्येवमर्थम् । अन्यथागस्त्यादेशे अवृद्धत्वात् छो न स्यात् । कौण्डिन्ये त्वणैव भाव्यम् । 'कण्ड्वादिभ्यो गोत्रे' इति । तत्र विशेषो नास्ति लुगलुकोः । कौण्डिना-

१. लकट° Dc4. २. मयूरकर्णक Dc2, Dc4. ३. कुषीतर Bc1, Dc1, Dc4, Dc3. ४. कलसीकण्ठ Bc1, Dc3.

छात्रा इति। स्वकं सूत्रत्रयं प्रसङ्गाद्व्याख्यायते। 'गोत्रे लुगचि'॥४।१।८९॥ यस्कादिभ्य इत्यादौ येषां लुगुक्तस्तेषामजादौ प्राग्दीव्यतीये विवक्षिते न। यास्कीयाः। गार्गीयाः। आत्रेयीयाः। गोत्रे किम्। बदर्याः फलं बदरम्। तस्येदं बादरम्। अचि किम्। गर्गरूप्यम्। प्राग्दीव्यतः किम्। गर्गेभ्यो हितं गर्गीयम्। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग् वाच्यः। गोत्रप्रत्ययस्य बहुत्वे विधीयमानलोपस्य गोत्रप्रत्ययान्तं यद्बहुवचनान्तं तस्यार्थान्तरसंक्रमे द्वित्वैकत्वयोर्वृत्तौ लुगभावो वक्तव्यः। वैदः। वैदौ। अत्र विदस्य गोत्रापत्यानि विदाः। अत्र बहुषु लोपी। एतदन्ताद्यूनीञ्। तस्य 'ण्यक्षत्रिय—' इति लुकि गोत्रप्रत्ययान्तस्य बहुवचनान्तस्य विदानामपत्यं युवा युवानौ वेति युवरूपार्थान्तरवृत्तौ द्वित्वैकत्वयोर्वृत्तिरिति गोत्रप्रत्ययस्यालुक्। एकवचनद्विवचनान्तस्य गोत्रप्रत्ययस्य वृत्तौ बहुषु लुक् यूनि। वैदस्य वैदयोर्वापत्यानि विदाः॥ 'यूनि लुक्' ॥४।१।९०॥ प्राग्दीव्यतीयेजादौ विवक्षिते युवप्रत्ययस्य लुक्। तस्मिन् लुप्ते यो यतः प्राप्नोति स स्यात्। फाण्टाहृतस्य गोत्रापत्यं फाण्टाहृतिः। ततो यूनि 'फाण्टाहृति—' इति णः। तस्य छात्रा इति विवक्षिते णस्य लुकि इञन्तात् 'इञश्च' इत्यणि फाण्टाहृताः। अचि किम्। फाण्टाहृतरूप्यम्। प्राग्दीव्यतः किम्। हिते तैकायनीयम्। 'फक्फिञोरन्यतरस्याम्' ॥४।१।९१॥ फक्फिञोर्युवार्थयोः प्राग्दीव्यतीयेजादौ विवक्षिते वा लुक् स्यात्। गार्ग्यात् 'यञिञोश्च' इति यूनि फक्। तस्य छात्राः गार्गीयाः। गार्ग्यायणीयाः। यस्कस्यापत्यं शिवाद्यण्। यास्कस्य गोत्रस्यापत्यं युवा 'अणो द्व्यचः' इति फिञ्। यास्कायनिः। तस्य छात्रा यास्कीयाः यास्कायनीयाः।

१. वृत्तौ Dc3. २. संक्रमेण Bc1, Dc3, Dc4. ३. °स्य न लुक् Dc2, Bc3. ४. गोत्रं Bc1, Dc1, Dc4.

जनपदशब्दात् क्षत्रियादञ् ॥४।१।१६८॥

जनपदशब्दादपत्यवाचिनोपत्येञ् स्यात्॥ पाञ्चालः। वैदेहः। देशशब्दात् किम्। पौरवः। क्षत्रियसमानशब्दात् जनपदस्य राजन्य- पत्यवत्। पञ्चालानां राजा पाञ्चालः। वैदेहः। आङ्गः। वाङ्गः।

जन। पाञ्चालः। वैदेह इति। पञ्चालविदेहशब्दौ जनपदक्षत्रिय- वचनौ। पौरव इति। पुरुर्नाम क्षत्रियो न जनपदः। क्षत्रियात् किम्। पञ्चालस्य विप्रस्यापत्यं पाञ्चालिः। **क्षत्रियसमानेति**। समानः शब्दो यस्य स तथोक्तः। क्षत्रियेण समानशब्दः क्षत्रियसमान- शब्दः तस्माज्जनपदशब्दात् षष्ठीसमर्थात् जनपदस्य राजेत्यस्मिन्नर्थे अपत्यवत् प्रत्ययाः स्युः। अपत्ये यथा प्रत्यया भवन्ति तथास्मिन्न- प्यर्थे। **पाञ्चाल** इत्यादि। 'अवृद्धादपि बहुवचनविषयात्' इति प्राप्तो वुञ् निषिध्यते। **आङ्ग** इत्यत्र 'द्व्यञ्मगध—' इत्यण्। स्पष्टत्वात् त्यक्तं सूत्रपञ्चकम्। 'साल्वेयगान्धारिभ्यां च' ॥४।१।१६९॥ 'जनपदशब्दात् क्षत्रियात्' इति वर्तते। आभ्यामपत्येञ् स्यात्। 'वृद्धेत् कोसलाजादाञ् ञ्यङ्' इत्यस्यापवादः। साल्वेयः। गान्धारः। तस्य राजन्यपि। साल्वेयो राजा। गान्धारो राजा। 'द्व्यञ्मगध- कालिङ्गसूरमसादण्' ॥४।१।१७०॥ द्व्यजादिभ्योपत्येण्। अञो- पवादः। आङ्गः। मागधः। कालिङ्गः। सौरमसः। एवं तस्य राजन्यपि। 'वृद्धेत् कोसलाजादाञ्ञ्यङ्' ॥४।१।१७१॥ वृद्धादि- दन्ताच्च कोसलाजादाभ्यां च ञ्यङ् स्यादञोपवादः। वृद्धात्। आम्बष्ठ्यः। सौवीर्यः। इतः। आवन्त्यः। कौन्त्यः। कोसलात्। कौसल्यः। अजादात्। आजाद्यः। इतीति तपरः किम्। कुमारी नाम क्षत्रियस्तस्यापत्यं कौमारः। अञेव। पाण्डोर्जनपदशब्दात् क्षत्रियात् ड्यण् वाच्यः। पाण्ड्यः। पाण्डवोन्यः। तस्य राजन्यपि। 'कुरुनादिभ्यो ण्यः' ॥४।१।१७२॥ जनपदशब्दात् क्षत्रियादित्येव।

---

१. °शब्दात् क्षत्रियवाचिनो D_1, D_2, D_4. २. जनपदशब्दात् किम् P. ३. C drops it. ४. बाध्यते Dc_4.

ते तद्राजाः ॥४।१।१७४॥

ते अञादयस्तद्राजसंज्ञाः स्युः। बहुत्वे तु तद्राजस्येति लुक्। पञ्चालाः। विदेहाः। अङ्गाः। वङ्गाः।

कुरुशब्दान्नकारादिभ्यश्च ण्यः। अणञोरपवादः। कौरव्यः। नैचिक्यः। नैषध्यः। तस्य राजन्यपि। कथं 'स नैषधस्यार्थपतेः सुतायाम्' इति। शेषविवक्षायामण्। 'साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्' ॥४।१।१७३॥ 'जनपदशब्दात् क्षत्रियात्' इति वर्तते। एभ्योपत्ये तस्य राजनि च इञ्।

'उदुम्बरास्तिलखला मद्रकारा युगंधराः।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः' ॥

औदुम्बरिः। तैलखलिरित्यादि। प्रात्यग्रथिः। कालकूटिः। आश्मकिः।

ते। जनपदशब्दात् क्षत्रियादञ् इत्येवमादयः। त्यक्तं सूत्रचतुष्टयं प्रसङ्गाद् व्याख्यायते। 'कम्बोजाल्लुक्' ॥४।१।१७५॥ कम्बोजात् क्षत्रियात् परस्य तद्राजस्याञो लुक्। कम्बोजः। चोलादिभ्योपीष्यते। चोलः। केरलः। शकः। एवं तस्य राजनि। 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' ॥४।१।१७६॥ अवन्त्यादिभ्यः परस्य तद्राजस्य स्त्रियां लुक्। अवन्ती। कुन्ती। वृद्धेत्कोसलाजादात् ञ्यङो लुक्। कुरूः। कुरुनादिण्यस्य। स्त्रियां किम्। आवन्त्यः। 'अतश्च' ॥४।१।१७७॥ अकारस्य प्रत्ययस्य तद्राजस्य स्त्रियां लुक् स्यात्। शूरसेनी। मागधी। 'न प्राच्यभर्गादियौधेयादिभ्यः' ॥४।१।१७८॥ एभ्योकारस्य प्रत्ययस्य तद्राजस्य स्त्रियां न लुक्। प्राच्येभ्यः क्षत्रियेभ्यस्तावत्। पाञ्चाली। वैदेही। आङ्गी। वाङ्गी।

---

१. B_1 drops it. २. C drops तु and इति; बहुत्वेति D_1, D_6. ३. Before it—स्पष्टत्वात् Dc_2, Bc_3. ४. प्रसङ्गादत्र Bc_1. ५. सलकः। Bc_1, Dc_1. ६. °कारप्रत्य° Bc_1, Dc_3, Dc_1. ७. Omitted Bc_1, Dc_1. ८. After it—स्यात् Dc_3.

कुमुदगन्धेरपत्यं कौमुदगन्धः । वाराहिः । स्त्र्यपत्ये तु ।

[2]ह्रस्वं लघु ॥१।४।१०॥

ह्रस्वमक्षरं लघुसंज्ञं स्यात् ॥

[2]संयोगे गुरु ॥१।४।११॥

संयोगे[3] ह्रस्वं[4] गुरुसंज्ञं स्यात्[5] ॥

भर्गादेः । भार्गी । योधेयादेः । यौधेयी । यौधेयादिभ्योऽत्र[6] तद्राजप्रत्ययाकारस्यासंभवात् पाञ्चमिकस्य प्रकरणान्तरस्थस्यापि पर्श्वादिसूत्रोक्तस्याञो लुक् निषिध्यते ज्ञापनार्थं तेन पर्श्वाद्यणः स्त्रियां लुक् सिद्धः । पर्शुः । रक्षाः । असुरी । भर्ग । करूष । कश्मीर । केकय । साल्व । सुस्थाल । उरश । कौरव्य । भर्गादि । यौधेय । शौक्रेय[7] । शौभ्रेय । धार्तेय ।[8] त्रिगर्त । भरत । उशीनर । यौधेयादि । कुमुदगन्धेरिति । कुमुदस्य गन्ध इव गन्धोऽस्य[9] स कुमुदगन्धिः । 'उपमानाच्च' इति गन्धस्येकारः । कौमुदगन्ध इति । 'तस्यापत्यम्' इत्यण् । वाराहिरिति । 'अत इञ्' । स्त्रीप्रत्यये त्विति । यदा तयोरपत्यं स्त्री विवक्ष्यते तदेति भावः ।

ह्रस्वम् । भेत्ता । छेत्ता । लघुसंज्ञायां 'पुगन्तलघूपधस्य च' इति गुणः । अचीकरत् । 'दीर्घो लघोः' इत्य[10]भ्यासस्य दीर्घः ।

संयोगे । गुरुप्रदेशाः 'गुरोश्च हलः' इत्येवमादयः । कुण्डा । शिक्षा । भिक्षा ।

---

१. Before it—वराहस्यापत्यम् । अत इञ् । D_5. २. C has the Sûtra and the Vritti after दीर्घं च. ३. संयोगे परे D_1, D_4. ४. ह्रस्वमक्षरं D_4. ५. B_1, D_1 drop it. ६. °त्रस्थ Bc_1, Dc_4, Dc_3. ७. शौक्रय Dc_2; Dc_3, Bc_1. ८. After it—धार्तेय । ज्यावानेय । Dc_2 ; Bc_1 has—वर्तेय । मौर्वेय । यौवनेय ।; Dc_3 and Dc_4 have—वार्तेय । धार्तेय । मार्वेय । यावनेय । त्रिगर्त &c. (ज्यावनेय Dc_3). ९. गन्धो यस्य कुमुद° Dc_4. १०. इत्यभ्यासदीर्घः Dc_1, Bc_1.

दीर्घं च ॥१।४।१२॥

दीर्घं[1] च गुरुसंज्ञं स्यात्[2] ॥

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥४।१।७८॥

त्र्यादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमं गुरूपोत्तमयोरनार्षयोर्गोत्रे स्त्रियां[3] यावणिञौ विहितौ तयोः ष्यङादेशः स्यात् ।

दीर्घम् । ईहांचक्रे । 'इजादेश्च गुरुमतोनृच्छः' इत्याम् ।

अणिञोः । उत्तमशब्दोयं व्युत्पन्नस्तमबन्तोस्ति । अव्युत्पन्नोपि । तत्र यदि व्युत्पन्नो गृह्यते तदा वाराह्येति न सिध्येत् । यतः स[3] चतुष्प्रभृतीनेवाह । तथा हि उच्छब्द उद्गतार्थवाची[4] । उद्गतश्चानुद्गतमपेक्ष्य त्रिषु द्वावुद्गतौ एकोनुद्गतः । तत्रातिशये तरबेव स्यात् । त्रिषूद्गतेषु एकस्मिंश्चानुद्गते बहूनां मध्ये एकस्यातिशये तमप् स्यात् तस्माच्चतुर्ष्वेव स्यात् । इत्येतदालोच्य अव्युत्पन्नोत्र उत्तमशब्दो गृह्यते इत्याह । त्र्यादीनामिति । अव्युत्पन्न उत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमाह । इह अणिञोरिति यदि प्रत्ययमात्रं स्यात् गुरूपोत्तमयोरिति विशेषणं न घटेत । न ह्यणिञोर्गुरूपोत्तमत्वमस्ति तस्मात् तदन्तः समुदायो गृह्यते इत्यभिप्रेत्याह । गुरूपोत्तमयोरिति । गुरूपोत्तमयोरणन्तेञन्तयोः समुदाययोरवयवभूतौ यावणिञावित्यर्थः । ननु च समुदाययोरनार्षयोरिति विशेषणं न घटते समुदायस्य ऋषावविधानात् । नैष दोषः । समुदायस्य विशेषणं न संभवतीति सामर्थ्यात् तदेकदेशयोरणिञोर्विज्ञास्यते । गोत्रे इत्यपि अणिञोरेव विशेषणं समुदायस्यासंभवादित्याह । गोत्रे स्त्रियां यावणिञौ विहिताविति । वृत्तावन्वयस्त्वेवम् । गुरूपोत्तमयोरणिञन्तयोः प्रातिपदिकयोरवयवभूतौ गोत्रे स्त्रियां यावणिञौ विहितौ तयोरनार्षयोः ष्यङादेशः स्यादिति ।

---

१. दीर्घमक्षरं गुरु° C; D_1 drops दीर्घं च ; D_2 drops the Vritti. २. B_1 drops it. ३. Omitted Bc_1, Dc_1. ४. Dc_2 has after it—प्रक्रिया.

षङावितौ ।

यङश्चाप् ॥४।१।७४॥

कौमुदगन्ध्या । वाराह्या । अनार्षयोः किम् । वासिष्ठी । वैश्वामित्री ।[४]

षङावितावििति । ङो 'यङश्चाप्' इति सामान्यग्रहणार्थः । षस्तद्विघातार्थः । तेन षस्य 'षः प्रत्ययस्य' इतीत्संज्ञा ङस्य 'हलन्त्यम्' इति । वासिष्ठी इति । 'ऋष्यन्धकवृष्णि—' इत्यण् । अणिञोः किम् । ऋतभागस्यापत्यं स्त्री आर्तभागी । विदाद्यञ् । 'शार्ङ्गरवाद्यञो ङीन्' गुरूपोत्तमयोः किम् । औपगवी । गोत्रे किम् । अहिच्छत्रे जाता आहिच्छत्री । कान्यकुब्जी । स्पष्टत्वात् त्यक्तं सूत्रत्रयम् । 'गोत्रावयवात्' । ४।१।७९॥ गूयन्ते शब्द्यन्तेनेन स्वसंतानप्रभवा इति प्रधानभूत आदिपुरुषः स्वसंतानसंज्ञाकारी गोत्रमित्युच्यते । गोत्रमिति श्रूयते गोत्राध्याये तु नेक्ष्यते यः स गोत्रावयवः कुलाख्यः पुणिक भुणिक मुखरादिः । तस्मादगुरूपोत्तमादपि कृतयोरणिञोः स्त्रियां ष्यङादेशः । पौणिक्या । भौणिक्या । मौखर्या । 'क्रौड्यादिभ्यश्च' ॥४।१।८०॥ अगुरूपोत्तमार्थमनणिञर्थं च । एभ्यः ष्यङ् प्रत्ययः स्यात् । क्रौड्या । लाड्या । क्रौडि । लाडि । व्याडि । आपिशलि । आपिङ्गलि । आपक्षिति । चौपयत । चैटयत । सैकयत । पैल्वयत । सौधातकि । सूत युवत्याम् । सूत्या युवतिः । अन्या सूता । भोज क्षत्रिये । भोज्या ।

---

१. यौ विहितावणिञौ B_1. २. B_1 drops it. ३. वाशिष्ठी B_1, D_4, D_6. ४. After it—गुरूपोत्तमयोः किम् । औपगवी । त्र्यादीनामिति किम् । वात्सी B_2. ५. ग्रहार्थः Dc_2, Bc_3. ६. इतीत्संज्ञा । Dc_4. ७. वाशिष्ठी° Dc_1, Dc_4, Dc_3. ८. श्रूयते वा Bc_1. ९. चैटयत Dc_4.

अश्वपत्यादिभ्यश्च ॥४।१।८४॥

एभ्यः प्राग्दीव्यतीयेष्वपत्याद्यर्थेष्वण् स्यात् । ण्यस्यापवादः । आश्वपतम् । गाणपतम् ।

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥४।१।८५॥

दित्यादिभ्यः पत्यन्ताच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् ॥

अन्या भोज्या । भौरिकि । भौलिकि । शालास्थलि । कपिष्ठलि । आकृतिगणोयम् । दैवल्यादौ गौकक्ष्या । 'दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योन्यतरस्याम्' ॥४।१।८१॥ दैवयज्ञादेरिञो गोत्रेपि ष्यङ् वा स्यात् । तेन मुक्ते 'ईतो मनुष्यजातेः' इति ङीप् । दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । काण्ठेविद्ध्या । काण्ठेविद्धी ।

इत्यपत्यार्थे प्रत्यया उक्ताः ।

इदानीं प्राग्दीव्यतीयेषु सर्वेष्वपत्यार्थेषु साधारणान् प्रत्ययानाह ।

अश्व । ननु 'प्राग्दीव्यतोण्' इत्येव सिद्धोणिति व्यर्थमिदं सूत्रमित्याशङ्क्याह । ण्यस्यापवाद इति । 'दित्यदित्य—' इति प्राप्तस्येत्यर्थः । अश्वपति । शतपति । धनपति । गणपति । राष्ट्रपति । कुलपति । गृहपति । पशुपति । धान्यपति । धर्मपति । सभापति । प्राणपति । क्षेत्रपति ।

दित्यदित्या । प्राग्दीव्यतीयाणोपवादः । तदपवादानां चार्थविशेष-

---

१. B₁ drops it. २. प्राग्दीव्यतीयार्थेषु B₁; प्राग्दीव्यतीयाद्यर्थेषु D₄. ३. Before this Dc₂ has गौकक्ष्य and after it—दैवदत्यापत्या । याज्ञवल्क्या ।. ४. दैवत्या । गौकक्ष्या । Dc₁, Dc₃, Dc₄. ५. धन्वपति Bc₁.

दैत्यः । आदित्यः । 'हलो यमां यमि लोपः' इति पूर्व-यलोपः । आदित्यं हविः । प्राजापत्यम् । सैनापत्यम् । यमाच्चेष्यते ॥ याम्यम् । देवस्य यञञौ ॥* दैव्यम् । दैवम् ॥ बहिषष्टिलोपो यञ्च ॥* बाह्यः । ईकक् च ॥* बाहीकः ।[४] दितेर्ङीषि कृते 'स्त्रीभ्यो ढक्' । तेन दैतेय इति सिध्येत्

विहितानाम् । दैत्य इति । दितेरपत्यम् । आदित्य इति । अदितेरपत्यम् । हलो यमामित्यादि । आदित्यं हविरित्यत्र । आदित्यो देवतास्येति विग्रहे आदित्यशब्दात् ण्यः । तत्र 'यस्येति च' इत्यकार-लोपे पश्चाद्यलोपः । पृथिव्या ञाञौ वाच्यौ । पार्थिवा । पार्थिवी । स्थाम्नोकारः । अश्वत्थामः । लोम्नोपत्येषु बहुषु । उडुलोमाः । बहुषु किम् । औडुलोमिः । सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत् । गव्यम् । अजादिप्रसङ्गे किम् । गोभ्यो हेतुभ्य आगतं गोरूप्यम् । गोमयम् । दितेरित्यादि । कृदिकारादक्तिनः सर्वतोऽक्तिन्नर्थादित्येके इति ङीषि कृते इत्यर्थः । ननु प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया ङीषि कृते ण्यः प्राप्नुयादेव । नैष दोषः । कृत्प्रकरणे 'शक्तिलाङ्गलाङ्कुशतोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम्' इत्यत्र घटशब्दमुच्चार्य घटीशब्दोच्चारणादनित्यत्वमस्याः परिभाषाया ज्ञापितत्वात् ।

१. °यकारस्य लोपः D_1; यकारलोपः D_4; हलः परस्य यमो लोपः स्याद्यमि इति पूर्वयकारस्य लोपः B_2, D_2; D_5 drops—इति पूर्वयलोपः ।. २. साभापत्यम् C; P drops it. After it—पौरोहित्यम् D_5. ३. यण्च D_1, B_3, D_2. ४. Before it—कृदिकारेति B_2; कृदिकारादक्तिनः सर्वतोक्तिन्नर्थादिति D_4. ५. इति is dropped in C; इति सिध्येत् dropped B_2. ६. देवता यस्ये° Dc_2. ७. पृथिवी Dc_4.

उत्सादिभ्योऽञ् ॥४।१।८६॥

औत्सः ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥४।१।८७॥

धान्यानां भवनमित्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमात् नञ्स्नञौ स्तः ॥ स्त्रीषु भवः स्त्रैणः । पौंस्नः । एवं समूहहितागतादिषु । 'स्त्री पुंवच्च' इति ज्ञापकात् वत्यर्थे न । स्त्रीवत् । पुंवत् ।

उत्सा । अगस्तदपवादानां च बाधकः । उत्स । उदपान । विकर । विनेद । महानद । महानस । महाप्राण । तरुण । तलुन । वष्कयासे । वाष्कयः । असे किम् । गौर्वष्कयिः । धेनु । पृथिवी । पङ्क्ति । जगती । त्रिष्टुप् । अनुष्टुप् । जनपद । भरत । उशीनर । ग्रीष्म । पीलु । कुण । उदस्थान देशे । औदस्थानो देशः । औदस्थानिरन्यः । पृषदंशे । पार्षतोंशः । अन्यत्राण् । भल्लकीय । रथन्तर । मध्यन्दिन । बृहत् । महिमन् । सत्त्वन् । सत्त्वच्छब्दो मत्वन्त आगतनुड्कः परिगृह्यते सत्त्वानिति । कुरु । पञ्चाल । इन्द्रावसान । उष्णिक् । ककुप् । सुवर्ण । देव । ग्रीष्मादच्छन्दसीति वक्तव्यम् । इह मा भूत् । ग्रैष्मी पङ्क्तिः । छन्दश्चेह वृत्तं गृह्यते न वेदः ।

स्त्रीपुं । पौंस्न इति । 'संयोगान्तस्य लोपः' इति सलोपः । योगापेक्षत्वात् ज्ञापकस्य स्त्रीवदित्यत्रापि नेत्यभिप्रेत्याह । स्त्रीवदिति ।

इति प्राग्दीव्यतीयेष्वपत्यार्थेषु साधारणाः प्रत्ययाः ॥

---

१. औत्सम् D_1. २. क्रमेण Dc_1. ३. पुंसु भवः पौंस्नः B_2. ५. विरद Dc_1, Dc_3, Dc_4, Bc_1. ६. पाञ्चाल Dc_2.

तेन रक्तं रागात् ॥४।२।१॥

[1]तृतीयासमर्थाद्रागवाचिनो रक्तमित्यर्थे यथाविहितं [2]प्रत्ययः स्यादित्यण् । कषायेण रक्तः काषायः पटः ।[3]

लाक्षारोचनाशकलकर्दमाट्ठक् ॥४।२।२॥

अस्माद्रक्तार्थे ठक् [4]स्यात् । अणोपवादः । [5]लाक्षिकः । [6]इत्यादि ।

इदानीमपत्यव्यतिरिक्ताः प्राग्दीव्यतीया अर्थाः प्रातिस्विकाश्च प्रत्ययाः प्रकृतयश्चोच्यन्ते ।

तेन रक्तम् । शुक्लस्य वर्णान्तरापादनमिह रज्यर्थः । रज्यतेनेनेति रागः । ननु कथं काषायौ खरस्य कर्णौ । हारिद्रौ पक्षिणोऽङ्घ्री । सादृश्यादुपचारोयम् । रागात् किम् । देवदत्तेन रक्तम् । 'तेन' इत्येतत् 'द्वैपवैयाघ्रादञ्' इति यावदनुवर्तते ।

लाक्षा । शकलकर्दमाभ्यामणपी[7]ष्टः । शाकलम् । कार्दमम् । नील्या अन् वाच्यः । नीलं वस्त्रम् । पीतात् कन् । पीतकम् । हरिद्रामहारजनाभ्यामञ् वाच्यः । हारिद्रम् । माहारजनम् ।

---

१. तेनेति तृतीया° B_2. २. स्वप्रत्ययः D_5. ३. After it—रागात् किम् । देवदत्तेन रक्तं वस्त्रमित्यत्र न B_2. ४. Dropped B_1. ५. लाक्षिकम् D_5. ६. In place of इत्यादि Dc_1 has रोचनिकः । कार्दमिकः. ७. °मणोपीष्टिः । Do_2.

नक्षत्रेण युक्तः कालः ॥४।२।३॥

तृतीयान्तान्नक्षत्रवाचिनो युक्त इत्यर्थे यथास्वं प्रत्ययः स्यात् यो युक्तः स कालश्चेत् । पुष्येण युक्ता पौषी रात्रीः ।

नक्षत्रेण । ननु कालं क्रियात्मकमाहुः केचित् द्रव्यात्मानं चापरे । तथोक्तं भर्तृहरिणा ।

'आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ।
व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभुं द्रव्यं परिमाणं क्रियावताम्' ॥ इति ।

एवं स्थिते पक्षद्वयेपि कालस्य नक्षत्रेग युक्तत्वं न घटते । तथा हि प्रथमे पक्षे नक्षत्रस्यैव चेत् क्रिया कालः अयुक्तं युक्तविशेषणम् । नित्ययुक्तत्वाद् व्यवच्छेद्याभावात् । अथ सूर्यादिद्रव्यान्तरस्था तथाप्ययुक्तम् । अन्यसमवेता क्रिया कथमन्येन युज्यते । अथ द्रव्यात्मकः कालस्तथापि नक्षत्रकालयोर्योगायोगौ न स्तः । कालस्य विभुत्वात् । इति युक्तविशेषणं न घटते । अत्रोच्यते । नक्षत्रसमीपस्थश्चन्द्रमा नक्षत्रशब्देन लक्षणयोच्यते । तथा च सति नक्षत्रसमीपस्थेन चन्द्रमसा कालस्य योगायोगौ संभवत इति युक्तविशेषणं घटते । पुष्येण युक्तेति । पुष्यसमीपस्थेन चन्द्रमसा युक्तेत्यर्थः । पौषीति । 'सूर्यतिष्य—' इति सूत्रे तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वक्तव्याद्यलोपः । 'टिड्ढाणञ्—' इति ङीप् ।

---

१. Before it—शकलकर्दमाभ्यामणपीष्यते । शाकलम् । कार्दमम् । B_1; शकलकर्दमाभ्यामणपीष्टः । शाकलम् । कार्दमम् । नील्याञ् वाच्यः । नीलं वस्त्रम् । पीतात् कन् । पीतकम् । हरिद्रामहारजनाभ्यामञ् वाच्यः । हारिद्रम । माहारजनम् । इत्यादि । B_2. २. युक्तमि° D_1. ३. Dropped B_1. ४. रात्रिः पौषी D_4. ५. परिस्पन्द ° Bo_1. ६. तस्य कालस्य Do_3.

लुबविशेषे ॥४।२।४॥

कालस्याविशेषे प्रत्ययस्य लुप्[1] ॥ अद्य[2] पुष्यः ।

दृष्टं साम ॥४।२।७॥

तृतीयान्ताद् दृष्टमित्यर्थे यथास्वं प्रत्ययः[3] स्यात्[4] साम चेत्[5] स्यात् । वसिष्ठेन[6] दृष्टं वासिष्ठं[7] साम ॥

लुब । कालस्याविशेष इति । यदि नक्षत्रयुक्तस्य कालस्य रात्र्यादिविशेषो नोच्यत[8] इत्यर्थः । यतो यावान् कालो नक्षत्रेण युज्यते तस्य सर्वस्य अहोरात्रस्य प्रत्ययान्तेनाभिधानमविशेषः । तदेकदेशस्य रात्र्यादेरभिधानं विशेषः । स्पष्टत्वात् त्यक्तं सूत्रद्वयम् । 'संज्ञायां श्रवणाश्वत्थाभ्याम्' ॥४।२।५॥ आभ्यां विहितस्य प्रत्ययस्य लुप् स्याद्विशेषेपि संज्ञायाम् । श्रवणा रात्रिः । अश्वत्थो मुहूर्तः । अत्र 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' इति निपाताल्लुकि युक्तवद्भावो न । संज्ञायां किम् । श्रावणी रात्रिः । 'द्वन्द्वाच्छः' । ४।२।६।। नक्षत्रद्वन्द्वात् युक्ते काले विशेषे चाविशेषे च छः स्यात् । राधानुराधीया रात्रिः । अद्य राधानुराधीयम् । परत्वाल्लुपं बाधते ।

दृष्टम् । स्पष्टत्वात् त्यक्तं सूत्रद्वयम् । 'कलेर्ढक्' ॥४।२।८॥ तृतीयान्तात् कलेर्दृष्टं सामेत्यर्थे ढक् नाण् । कलिना दृष्टं साम कालेयम् । सर्वत्राग्निकलिभ्यां प्राग्दीव्यतीयेषु । अग्निना दृष्टमाग्नेयं साम । एवं तत्रभवजातादौ । तथा कालेयमपि । दृष्टे सामनि जाते वा अण् वा डिच्च विधीयते । तीयादीकक् । न विद्यायाः । गोत्रादङ्कवदिष्यते । दृष्टं साम अस्मिन्नर्थे जातेर्थे च वाण् डिद्वाच्यः । तीयात्

---

१. After it—स्यात् D_5, D_1, B_2; लुक् स्यात् D_2. २. अद्य युक्तः पुष्यः D_5. ३. प्रत्ययः स्यात् dropped D_1. ४. यद् दृष्टं तत् साम चेत् स्यात् B_2, C, D_5 (स्यात् dropped C, D_5). ५. Dropped B_1, C, D_4. ६. वशिष्ठेन D_5, B_2. ७. वाशिष्ठं B_2, D_5. ८. नोच्येते° Dc_1.

परिवृतो रथः ॥४।२।१०॥

वस्त्रेण परिवृतो वास्त्रो रथः ॥

स्वार्थे ईकक् वा वाच्यः । विद्यायां न । गोत्रान्तस्याङ्क इत्यत्रार्थे यथा तथा दृष्टमित्यर्थे प्रत्ययः स्यादित्यर्थः । उशनसा दृष्टमुशनमुशनसम् । शतभिषजि जातः शातभिषः शातभिषजः । द्वैतीयीकम् । द्वितीयम् । द्वितीया विद्या । औपगवेन दृष्टमौपगवकं साम । 'गोत्रचरणाद्वुञ्' । 'वामदेवाड् ड्यड्ड्यौ' ॥४।२।९॥ वामदेवेन दृष्टं वामदेव्यं साम । तकारः स्वरितार्थः । आद्योन्तःस्वरितः । द्वितीयोन्तोदात्तः ।

'सिद्धे यस्येति लोपेन किमर्थं ययतौ ड्डितौ ।
ग्रहणं मातदर्थे भूद्वामदेव्यस्य नञ् स्वरे' ॥

अवामदेव्यम् । ययतोश्चातदर्थे इति विधीयमानोन्तोदात्तो न ।

परि । तृतीयान्तात् परिवृतार्थे यथास्वं प्रत्ययः स्यात् ।

परिणा सर्वतो भावो वृणोत्यर्थस्य गृह्यते ।
तेन भृत्यैः परिवृतो रथ इत्यत्र नेष्यते ॥

स्पष्टत्वात्त्यक्तं सूत्रत्रयम् ॥ 'पाण्डुकम्बलादिनिः' ॥४।२।११॥ पाण्डुकम्बलेन परिवृतो रथः पाण्डुकम्बली । मत्वर्थीयेन सिद्धेणोपवादः । 'द्वैपवैयाघ्रादञ्' ॥४।२।१२॥ अणोपवादः । द्वैपेन चर्मणा परिवृतो रथो द्वैपः । वैयाघ्रः । 'कौमारापूर्ववचने' ॥ ४।२।१३॥ कौमारेत्येतत् पाणिग्रहस्यापूर्ववचने निपात्यते । स्त्रिया अपूर्वत्वे स्त्रीपुंसयोरुभयोर्निपात इष्यते । अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः । अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या ॥

'कौमारापूर्ववचने कुमार्या अण् विधीयते ।
अपूर्वत्वं यदा तस्याः कुमार्या भवतीति वा' ॥

---

१. Before it—तृतीयान्तात् परिवृतेर्थे यथास्वं प्रत्ययः स्यच्चेत् ॥ B_2, D_3, D_4.

तत्रोद्धृतममत्रेभ्यः ॥४।२।१४॥

सप्तम्यन्तेभ्योमत्रेभ्य उद्धृतेर्थे यथास्वं प्रत्ययः।[1] शरावे उद्धृत ओदनः शारावः।[2] भुक्तोच्छिष्ट इत्यर्थः ॥

संस्कृतं भक्षाः ॥४।२।१६॥

भ्राष्ट्रेषु संस्कृता भ्राष्ट्रा भक्षाः[3] ॥[4]

तत्रोद्धृतम् । अत्रोद्धरतिरुद्धरणपूर्वनिधाने[5] वर्तते । तेन सप्तमीसमर्थविभक्तिर्घटते । 'तत्र' इत्येतत् 'क्षीराड्ढञ्' इति यावदनुवर्तते । **भुक्तोच्छिष्ट** इति । शिष्ट एवोच्छिष्टो न सर्वः । भुक्तशिष्ट इति यावत् । अमत्रेभ्यः किम् । पाणावुद्धृतः । स्पष्टत्वात् त्यक्तम् । 'स्थण्डिलाच्छयितरि व्रते' ॥४।२।१५॥ शयितर्यभिधेये व्रते शास्त्रविहिते नियमे गम्यमाने स्थण्डिलाद्यथास्वं प्रत्ययः ।[6] स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलः ।

संस्कृतम् । एतत् सूत्रं तत्पुरुषप्रकरणे व्याख्यातम् । स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयम् । 'शूलोखाद्यत्' ॥४।२।१७॥ शूले संस्कृतं शूल्यं मांसम् । उखायां संस्कृतमुख्यम् । 'दध्नष्ठक्' ॥४।२।१८॥ दध्नि संस्कृतं दाधिकम् । ननु 'संस्कृतम्' इत्यनेनैव[7] सिद्धम् । यद्धि दध्नि संस्कृतं तदपि दध्ना संस्कृतमेव । न सिद्धम् । तद्धि दध्ना संस्कृतं यस्य दध्नैव संस्कारः ।[8] इह तु दधि क्षिप्तस्य[9] लवणादिना संस्कार उच्यते इति विशेषात् । 'उदश्वितोन्यतरस्याम्'[10] ॥४।२।१९॥ ठक् । पक्षेण् । औदश्वित्कम्[11] । तान्तत्वात् कः । औदश्वितम्[12] । 'क्षीराड्ढञ्' ॥४।२।२०॥ क्षीरे संस्कृतं क्षैरेयम् ।

---

१. After it—स्यात् D_1, D_4, D_5, B_2. २. शाराव ओदनः P, D_2. ३. लाजाः संस्कृता लाजाः P; संस्कृता लाजाः । भ्राष्ट्राः D_4 (भक्षाः dropped D_4.) ४. भक्ष्याः D_3, D_4, B_1, P, C. ५. °विधाने for °निधाने Dc_2; °निपाते Dc_3. ६. After it—स्यात् Dc_3. ७. इत्यैवैतत् सिद्धम् । Bc_1, Dc_3. ८. Dropped Bc_1. ९. दधिक्षिप्तलवणा° Dc_3. १०. उदस्वितो Bc_1, Dc_1. ११. औदस्वित्कम् Bc_1, Dc_1. १२. औदस्वितम् Bc_1, Dc_1.

सास्मिन् पौर्णमासीति संज्ञायाम् ॥४।२।२१॥

प्रथमा समर्थादस्मिन्नित्यर्थे यथास्वं प्रत्ययः स्यात् प्रथमा समर्थं सा पौर्णमासी चेत् प्रत्ययान्तं चेत् संज्ञा स्यात् ॥ पौषी पौर्णमास्यस्मिन् पौषो मासः ॥

सास्मिन् । अस्मादेव ज्ञापकात् पूर्णो मासोस्यामिति पूर्णमासादण् । पौर्णमासी । पूर्णो माश्चन्द्रस्तस्येयं वा । प्रथमासमर्थादस्मिन्नर्थे यथास्वं प्रत्ययः यत् प्रथमासमर्थं सा पौर्णमासी चेत् स्यात् । प्रत्ययान्तं चेत् मासार्धमाससंवत्सराणामेव संज्ञा । तेन पौषी पौर्णमासी अस्मिन् । दशरात्रे मृतकमासे चेत्यादौ न । संज्ञानवगमात् । इतिशब्दस्य संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणम् । तत्र द्वयोरिह ग्रहणं संज्ञाशब्देन इतिशब्दस्य तुल्यतां ज्ञापयितुम् । संज्ञार्थत्वेनेति प्रतिज्ञायते । ततश्च यदुच्यते प्रयोगानुसरणार्थमिति तदुपपन्नं स्यात् । स्पष्टत्वात् त्यक्तं सूत्रद्वयम् । 'आग्रहायण्यश्वत्थाट्ठक्' ॥ ४।२।२२॥ 'सास्मिन् पौर्णमासीति संज्ञायाम्' इत्यनुवर्तते । अग्रं हायनमस्या आग्रहायणी । प्रज्ञादेराकृतिगणत्वादण् । 'पूर्वपदात्—' इति णः । अश्वत्थेन युक्ता पौर्णमासी अश्वत्था । निपातनात् पौर्णमास्यां लुप् । टाप् । आग्रहायणिको मासोर्धमासः संवत्सरो मासो वा । आश्वत्थिकः । 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' ॥४।२।२३॥ ठक् वा । फाल्गुनी पौर्णमासी अस्मिन् फाल्गुनिकः । फाल्गुनः । श्रावणिकः । श्रावणः । कार्तिकिकः । कार्तिकः । चैत्रिकः । चैत्रः ।

---

१. From प्रथमा to संज्ञा स्यात् dropped C, D_2, D_4, D_5; B_1 has प्रथमान्तात् पौर्णमास्यर्थादस्मिन्नित्यर्थेणादयः स्युः प्रत्ययान्ते चेत् संज्ञा । पूर्णो मासोस्यामिति पूर्णमासादण् पौर्णमासी । अस्मात् सूत्रनिर्देशादेवाण् । यद्वा पूर्णो माश्चन्द्रस्तस्येयं वेति संज्ञायाम् for प्रथमा to संज्ञा स्यात्; प्रथमासमर्थात् पौर्णमास्युपाधिकात् सप्तम्यर्थे यथास्वं प्रत्ययः स्यात् संज्ञायां वाच्यायाम् । पौषी &c, B_2. २. प्रथमान्तं पौर्णमासी चेत् स्यात् प्रत्ययान्तं संज्ञा चेत् स्यात् D_1. ३. °स्मिन्नस्तीति B_1, D_5. ४. Before it—स्यात् । Dc_3. ५. चेत्या° Dc_1, Bc_1, Dc_4. ६. संज्ञात्वेनेति Dc_4. ७. एवमाश्व° Dc_4.

सास्य देवता ॥४।२।२४॥

देवतावाचिनः प्रथमान्तात् षष्ठ्यर्थे यथास्वं प्रत्ययः स्यात्[१] ॥ इन्द्रो देवतास्य[२] ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् ।[३]

कस्येत् ॥४।२।२५॥

कशब्दाद्यथास्वं प्रत्ययः[४] । इकारोन्तादेशश्च[५] ॥ वृद्ध्यायादेशौ । को देवतास्य[६] कायं हविः ॥

शुक्राद् घन् ॥४।२।२६॥

शुक्रियम्[७] ।

सास्या । सेति प्रकृतेः पुनर्ग्रहणात् संज्ञा निवृत्ता । **पाशुपतमिति** । 'अश्वपत्यादिभ्यश्च' इत्यण् । **बार्हस्पत्यमिति** । 'दित्ये—' इति ण्यः । 'महाराजप्रोष्ठपदाट्ठञ्' इति यावदधिकारः 'सास्य देवता' इति । ननु यागसंप्रदानं देवता देयस्य स्वामिनी तत् कथमैन्द्रो मन्त्रः । स्तुत्यमपि देवतेत्युपचरन्ति । आग्नेयो ब्राह्मणः । अत्राप्युपमानात् ।

कस्येत् । **वृद्ध्यायादेशा**विति विधानसामर्थ्याद्यस्येति लोपाभावाद् वृद्ध्यायादेशाविति भावः । कः प्रजापतिः ।

शुक्रात् । अणोपवादः । स्पष्टत्वात् त्यक्तं सूत्रत्रयम् । 'अपोनप्त्रपान्नप्तृभ्यां घः' ॥४।२।२७॥ अपोनपात् देवतास्य । तृप्रत्ययान्तता निपातनात् । अपोनप्त्रियम् । 'छ च' ॥४।२।२८॥ अपोनप्त्रीयम्[८] । पैङ्गाक्षीपुत्रादिभ्योपि । पैङ्गाक्षीपुत्रीयम् । तार्णबिन्दवीयम् । शतरुद्राच्छ च । शतरुद्रियम् । शतरुद्रीयम् । 'महेन्द्राद् घाणौ च' ॥४।२।२९॥ छ च । महेन्द्रियम् । माहेन्द्रम् । महेन्द्रीयम् ।

---

१. इत्यण् B_1; स्यात् dropped D_1, D_2. २. देवता यस्य D_4. ३. After it—दित्यादित्यादित्यपत्युत्तरपदाण्ण्यः C. ४. After it—स्यात् C, D_5. ५. इकारान्ता° D_4. ६. यस्य for अस्य C. ७. B_1 has घस्येयः before it. ८. उत्सादिभ्योञ् । Bc_1, Dc_2, Dc_4. ९. 'दित्यदित्य—' Bc_1, Dc_1, Dc_4. १०. After this—अपांनप्त्रीयम् । Bc_1, Dc_3 and एवमपांनप्त्रीयम् । Dc_4, Dc_1.

सोमात् ट्यण् ॥४।२।३०॥

सौम्यम् । टित्वात् सौमी ऋक् ।[१]

वाय्वृतुपित्रुषसो यत् ॥४।२।३१॥

एभ्यो यत् स्यादुक्तेऽर्थे ॥ 'ओर्गुणः' । 'वान्तो यि प्रत्यये' । वायव्यम् । ऋतव्यम् ।

रीङृतः ॥७।४।२७॥

अकृद्यकारेसार्वधातुके च यकारे च्वौ च परे ऋदन्तस्य रीङादेशः स्यात् ॥ 'यस्येति च' । पित्र्यम् । उषस्यम् ।

सोमात् । टित्त्वादिति । टित्त्वात् 'टिड्ढाणञ्—' इति ङीपि 'हलस्तद्धितस्य' इति यलोपे च कृते सौमीति रूपं स्यादित्यर्थः ।

वाय्वृतु । उक्तेऽर्थे इति । सास्य देवतेत्यस्मिन् । अणोपवादः ।

रीङ् ऋत इति । तपरः किम् । चेकीर्यते । निजेगिल्यते । स्पष्टत्वात् त्यक्तम् । 'द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च' ॥४।२।३२॥ यच्च । वास्तोष्पतिशब्दात् ण्यस्यान्येभ्योऽणोपवादः । द्यावापृथिव्यौ देवते अस्य द्यावापृथिवीयम् । द्यावापृथिव्यम् । इत्यादि ।

---

१. After it—अग्नेर्ढक् ।४।२।३३॥ आग्नेयम् B_2. २. D_1 drops it. ३. Dropped D_2.

[1]अग्नेर्ढक् ॥४।२।३३॥

आग्नेयम् ।

देवताद्वन्द्वे च ॥७।३।२१॥

[2]अत्र पूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् [3]ञिदादौ परे ॥ अग्निमरुतौ [4]देवते [5]अस्य आग्निमारुतं [6]हविः । [7]सूक्तहविः-[8]स्वामिन्येतत् । नेह । स्कान्दविशाखः ॥

अग्नेः । अणोपवादः । स्पष्टत्वात् त्यक्तानि त्रीणि । 'कालेभ्यो भववत्' ॥४।२।३४॥ कालवाचिभ्यः सास्य देवतेत्यस्मिन्नर्थे भववत् प्रत्ययाः स्युः । यथा मासे भवं मासिकम् । 'कालाट्ठञ्' । तथा मासो देवतास्य मासिकम् । 'महाराजप्रोष्ठपदाट्ठञ्' ।।४।२।३५॥ महाराजो देवतास्य माहाराजिकम् । प्रौष्ठपदिकम् । तदस्मिन् वर्तत इति नवयज्ञादिभ्यष्ठञ् वाच्यः । नवयज्ञोस्मिन् काले वर्तते नावयज्ञिकः । पूर्णमासादण् । पौर्णमासी तिथिः । 'पितृव्यमातुलमातामहपितामहाः' ॥४।२।३६॥ एते निपात्यन्ते । पितृमातृभ्यां भ्रातरि वाच्ये व्यड्डुलचौ प्रत्ययौ पितरि वाच्ये डामहच् । स्त्रियां षिच्च । पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः । पितुः पिता पितामहः । मातुः पिता मातामहः । पितामही । मातामही । अवेर्दुग्धे सोढदूसमरीसचः प्रत्यया वाच्याः । अवेर्दुग्धमविसोढम् । अविदूसम् । अविमरीसम् । तिलान्निष्फलात् पिञ्जपेजौ वाच्यौ । निष्फलस्तिलस्तिलपिञ्जः तिलपेजः ।

देवता । सूक्तेति । सूक्तस्वामिनि हविस्वामिनि चैतत् । यदि सूक्तस्वामिनी हविःस्वामिनी च देवता स्यादित्यर्थः ।

---

१. B₃ drops the Sûtra and आग्नेयम्. २. Dropped B₁. ३. ञादौ परे B₃. ४. दैवते D₁. ५, यस्येति C. ६. Dropped D₄. ७. सूक्तं हविः C; सूक्तम् D₁; सूक्तं हविर्वा सूक्तहविः B₂, D₄. ८. स्वामिन्येवायं विधिः B₂; स्वामिन्येव D₄.

नेन्द्रस्य परस्य ॥७।३।२२॥

परस्येन्द्रस्य वृद्धिर्न[3] ॥ सोमेन्द्रः[1] । परस्य किम् । ऐन्द्राग्नः[2] ॥

दीर्घाच्च वरुणस्य ॥७।३।२३॥

दीर्घात् परस्य वरुणस्य नै वृद्धिः ॥ ऐन्द्रावरुणम् । मैत्रावरुणम् ।[4] दीर्घात् किम् । आग्निवारुणीमनड्वाहीम्[5] ॥

तस्य समूहः ॥४।२।३७॥

षष्ठ्यन्तात् समूहेर्थे यथास्वमणादि[6] स्यात्[7] ॥ काकानां समूहः काकम्[8] ॥

भिक्षादिभ्योण् ॥४।२।३८॥

एभ्योण् स्यादुक्तेर्थे[9] । ठगाद्यपवादः ॥

दीर्घात् । ऐन्द्रावरुणमिति । 'देवताद्वन्द्वे च' इत्यानङि कृते दीर्घात् परो वरुणशब्दः । आग्निवारुणीमिति । अत्र 'इद्वृद्धौ' इद्विधीयते तेन दीर्घात्परो न ।

तस्य समूहः । अचित्ताट्ठकं वक्ष्यति । अनुदात्तादेरञं गोत्राद्वुञं । प्रतिपदं च केदाराद्यञ् चेत्यादि । तत्परिहारेणोदाहर्तव्यमित्यभिप्रायेणोदाहरति । काकानां समूहः काकमिति । 'प्राणिनां कुपूर्वाणाम्' इति फिट्सूत्रेण काकशब्द आद्युदात्तः ।

भिक्षा । अण्ग्रहणं बाधकबाधनार्थमित्याह । ठगाद्यपवाद इति ।

---

१. सौमेन्द्रम् P. २. ऐन्द्रामश्वरुः P; ऐन्द्राग्नेयम् B_3. ३. वृद्धिर्न D_1. ४. After it—इह देवताद्वन्द्वेति पूर्वस्यानङ् B_1. ५. After it—आलभेत D_5; आग्निवारुणी अनड्वाही D_2, D_3, B_1, P; C. ६. °मणादयः स्युः D_2, D_5, B_2. ७. Dropped P. ८. After it–क्लीबत्वं लोकात् B_1, B_2. ९. Dropped B_1.

भैक्षम् । यौवनम् । 'भस्याढे' तद्धित इति । नेह पुंवद्भावो युवतिशब्दपाठसामर्थ्यात् ॥[१]

केदाराद्यञ् च ॥४।२।४०॥

उक्तेऽर्थे । चकाराद्वुञ् ॥[२] कैदार्यम्[३] ।

युवोरनाकौ ॥७।१।१॥

युवु इत्येतयोः प्रत्यययोः क्रमात् अन अक एतौ[४] स्तः ॥ कैदारकम् । अनुनासिकयोरिष्टिः[५] ॥ नेह । ऊर्णायुः ।

गणिकाया यञ् वाच्यः ॥ गाणिक्यम् ॥

भिक्षा । गर्भिणी । क्षेत्र । करीष । चर्मन् । कर्मन् । सहस्र । युवति । पदाति । पद्धति । अर्थवत् । दक्षिणा । स्पष्टत्वात् त्यक्तम् । 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्' । अपत्यमात्रं गोत्रम् । गोत्रादिभ्यो वुञ् स्यात् समूहे । औपगवकम् । औक्षकम् । औष्ट्रकम् । औरभ्रकम् । राजकम् । राजन्यकम् । राजपुत्रकम् । वात्सकम् । मानुष्यकम् । आजकम् । वृद्धाच्चेष्टः । वार्धकम् ।

केदाराद्वुक्तेऽर्थे । समूहेऽर्थे । इत्यर्थः । अचित्तठकोपवादः ।

युवोः । अनुनासिकयोरिति । प्रतिज्ञानुनासिक्याः पाणिनीया इति यत्र पाणिनीया अनुनासिकत्वं प्रतिजानते तत्रैवानाकौ स्तः । युवोरिति निर्देशे द्वन्द्वैकवद्भावपक्षे अनित्यमागमशासनमिति कृत्वा नुम् न । इतरेतरयोगे छान्दस उवर्णलोपो ज्ञेयः ।

---

१. After this—

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥४।२।३९॥

एभ्यो वुञुक्तेऽर्थे ॥ औपगवकम् । औक्षकम् । इत्यादि ॥

वृद्धाच्च ।* वार्धकम् ॥ D_3, B_1, B_2 (B_2 has वुञ् स्यादुक्तेऽर्थे । औक्षकमित्यादि । अत्रापत्यमात्रं गोत्रं न तु पौत्रप्रभृत्येव । औपगवकम्).

२. अतो यञ् उक्तेऽर्थे B_1. ३. कैदारम् D_5. ४. इत्येतौ B_2, D_5. ५. °रिष्टः D_1; °रिष्टं B_2. ६. Dropped Dc_2.

ठञ् कवचिनश्च ॥४।२।४१॥

कवचिनः केदाराच्च ठञ् स्यादुक्तेर्थे ॥ कावचिकम् । कैदारिकम् ॥[2][3]

ग्रामजनबन्धुसहायेभ्यस्तल् ॥४।२।४३॥

एभ्यस्तल् स्यात् समूहे[4] । तलन्तं स्त्रीलिङ्गम् । ग्रामतेत्यादि । गजाच्चेष्टः[5] ॥ गजता ।[6]

ठञ् । कवचिशब्दात् प्रत्ययस्वरेणान्तोदात्तत्वात् अनुदात्तादिलक्षणेऽञि प्राप्ते । स्पष्टत्वात् त्यक्तम् । 'ब्राह्मणमाणववाडवाद्यन्' । ४।२।४२॥ नः स्वरितार्थः । ब्राह्मणानां समूहो ब्राह्मण्यम् । माण्डव्यम् । वाडव्यम् । पृष्ठाच्चेष्टः । पृष्ठ्यः । पर्शोर्णस् । पर्शूनां समूहः पार्श्वम् । पदत्वादोर्गुणो न ।

ग्राम । ग्रामादचित्तत्वाट्ठकि जनबन्धुभ्यामाद्युदात्तत्वादणि सहायात् 'लघावन्ते—' इति मध्योदात्तत्वादनुदात्तादेरञि प्राप्ते वचनम् । स्पष्टत्वात् त्यक्तानि । 'अनुदात्तादेरञ्' ॥४।२।४४॥ अनुदात्तादेरञ् स्यात् समूहे । कापोतम् । मायूरम् । एतौ 'लघावन्ते द्वयोश्च बह्वचो गुरुः' इति मध्योदात्तत्वाच्छेषानुदात्तत्वेनानुदात्तादी । 'खण्डिकादिभ्यश्च' ॥४।२।४५॥ अञ् । खण्डिकानां समूहः खाण्डिकम् । खण्डिका । वडवा । क्षुद्रकमालवात् सेनासंज्ञायाम् । क्षुद्रकमालवादनुदात्तादेर्गोत्रद्वन्द्वात् गोत्रसमुदायत्वेनागोत्रत्वात् तदन्त-

---

१. स्यात् dropped B_1. २. Dropped D_2. ३. After this the Sûtra—ब्राह्मणमाणववाडवाद्यत् ॥४।२।४२॥ एभ्यो यत् स्यात् समूहेर्थे ॥ ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ॥ D_3, B_1; D_4 gives the Sûtra 'गोत्रोक्ष°' ॥४।२।३९॥ here and follows B_2 in the Vritti, dropping न तु पौत्रप्रभृत्येव. It goes up to वार्धकम्. ४. समूहेर्थे C. ५. °च्चेष्टः B_2. ६. After it—सूत्राणि Dc_3.

अचित्तहस्तिधेनोष्ठक् ॥४।२।४७॥

अचित्तार्थेभ्यो हस्तिधेनुभ्यां च ठक् स्यात् समूहे ॥ आपूपिकम् । हास्तिकम् ।

इसुसुक्तान्तात् कः ॥७।३।५१॥

इस् उस् उक् तकारान्ताच्च परस्य ठस्य कः स्यात् ॥ धैनुकम् ।

विध्यभावेन परत्वाच्च वुञं बाधित्वाञि सिद्धे तदन्तविधेः पूर्वविप्रतिषेधस्य च ज्ञापनार्थः पाठः । तेन औनकायनकमित्यत्रानुदात्तादित्वेपि पूर्वविप्रतिषेधेन वुञेव स्यात् । वानहस्तिकं गौधेनुकमित्यत्र तदन्तविधेष्ठक् स्यात् । क्षुद्रकमालवादिति योगविभागस्तेनार्थद्वयं ज्ञाप्यते । सेना संज्ञायामिति द्वितीयेन नियमः । क्षौद्रकमालवी सेना । क्षौद्रकमालवकमन्यत् । अत्र गोत्रत्वाद्वुञ् । तिन्दुक । ग्लुक । भल्लूक । श्वन् । युग । वरत्र । हलबन्ध । 'चरणेभ्यो धर्मवत्' ॥४।२।४६॥ 'गोत्रचरणाद्वुञ्' इत्यारभ्य चरणेभ्यः कठकलापादिभ्यो विधास्यन्ते प्रत्ययास्तद्वदेव समूहे स्युः । यथा कठानां धर्मः काठकम् । तथा कठानां समूहः काठकम् । छान्दोग्यम् । आथर्वणमित्यादि ।

अचित्त । नञ्पूर्वाद्धेनुशब्दान्नेष्यते । आधेनवम् । उत्सादिभ्योञ् ।

इसु । सार्पिष्कः । धानुष्कः । पैतृकम् । औदश्वित्कः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणादत्र न । आशिषा चरति आशिषिकः । दोषं उपसंख्यानम् । दोर्भ्यां तरति दौष्कः । स्पष्टत्वात् त्यक्तम् । 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' ॥४।२।४८॥ केशाद्यञ् अश्वाच्छो वा स्यात् तस्य समूहे । कैश्यम् । कैशिकम् । आश्वीयम् । आश्वम् ।

---

१. B_1 drops it. २. उक्तेर्थे D_5. ३. D_1, D_2 drop च. ४. B_1 drops it. ५. After it—पैतृकम् । तान्तकम् । अदस्वित्कः । D_5. ६. औवकायनक° Bo_1; औवकायनक° Do_1; औपगवकम् । कायकमित्यत्र Dc_3.

पाशादिभ्यो यः ॥४।२।४९॥

पाश्या । वात्या ।[२] ऊलोपि । वातूलः ।

खलगोरथात् ॥४।२।५०॥

यप्रत्ययः । खल्या । गव्या । रथ्या

इनित्रकट्यचश्च ॥४।२।५१॥

खलगोरथेभ्य एते क्रमात् स्युः ॥ खलिनी । गोत्रा । रथकट्या ।

पाशा । अचित्तलक्षणे ठकि प्राप्ते वचनम् । यान्तं स्वभावात् स्त्रियाम् । पाश । तृण । धूम । वात । अङ्गार । पाटलक । पिटक । शकट । फैल । हल । धन । नड ।

खल । योगभेदादुत्तर इनित्रकट्यच एभ्य एव स्युः ।

इनि । योगविभागो यथासंख्यार्थ इत्यभिप्रेत्याह । **क्रमा**दिति । खलादिभ्य इनिर्वाच्यः । डाकिनी । कुटुम्बिनी । खलादयः प्रयोगतो ज्ञेयाः । इन्याद्यन्तमपि स्वभावतः स्त्रियाम् । स्पष्टत्वात् त्यक्तानि पञ्च । 'विषयो देशे' ॥४।२।५२॥ 'समूहे' इति निवृत्तम् । 'तस्य' इति वर्तते । षष्ठीसमर्थाद्विषय इत्यर्थे यथास्वं प्रत्ययाः । योसौ विषयः स देशश्चेत् । शिवीनां विषयो देशः शैवः । देशे किम् । देवदत्तस्य विषयोनुवाकः । 'राजन्यादिभ्यो वुञ्' ॥४।२।५३॥ राजन्यानां विषयो देशो राजन्यकः । राजन्य । अनृत । बाभ्रव्य । शालङ्कायन । देवयातव । जालंधरायण ।

---

१. B_1 has उक्तेर्थे before it. २. B_1 has after it—स्त्रीत्वं लोकात्. ३. अतो य उक्तेर्थे B_1. ४. B_1 has स्त्रीत्वं लोकात् after it. ५. पटोलक Dc_4. ६. Before it—पिटका Bc_1; पिटक । पिरटक । Dc_4. ७. कल Bc_1. ८. ऊकिनी Bc_1, Dc_1, Dc_4, Dc_3. ९. शैवो देशः Dc_4.

आत्मकामेय । अम्बरीषपुत्र । वसाति । बैल्ववन । शैलूष । उदुम्बर[1] । वैलस । आर्जुनायन । संप्रिय । दाक्षि ।[2] आकृतिगणोऽयम् । मालव । त्रैगर्त । वैराट । 'भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ' । ४।२।५४॥ भौरिक्यादिभ्यो विधल् ऐषुकार्यादिभ्यो भक्तल् स्याद् विषये देशे । भौरिकिविधम् । ऐषुकारिभक्तम् । भौरिकि । भौलिकि । चैकयत[3] । चैटयत । शैकयत । काणेय[4] । कालञ्जिक । भौरिक्यादिः । ऐषुकारि । सारस्यायन । चान्द्रायण । द्व्याक्षायण । त्र्याक्षायण । औलायन । औडायन । सौवीर । दासमित्र । दासमित्रायण । शायण्ड । शायाण्ड । वैश्वमाणव । वैश्वधेनव । तुण्डदेव । शायण्डि । ऐषुकार्यादिः । 'सोऽस्यादिरिति च्छन्दसः प्रगाथेषु' । ४।२।५५॥ प्रथमासमर्थात् वृत्तवाचिन आदित्वोपाधिकात् षष्ठ्यर्थे प्रगाथेषु वाच्येषु यथास्वमणादिः स्यात् । इतिः प्रसिद्धयर्थः । प्रगाथशब्दः क्रियानिमित्तको मन्त्रविशेषे वर्तते । यत्र द्वे ऋचौ प्रग्रन्थात् तिस्रः क्रियन्ते स प्रग्रन्थनात् प्रकर्षगानाद्वा प्रगाथः । पङ्क्तिरादिरस्य प्रगाथस्य पाङ्क्तः । आदिः किम् । पङ्क्तिर्मध्यमस्य प्रगाथस्य । छन्दसः किम् । अग्निशब्द आदिरस्य । प्रगाथेषु किम्[5] । पङ्क्तिरादिरस्यानुवाकस्य । क्लीबे छन्दसोऽण् स्वार्थे वाच्यः* । त्रिष्टुबेव त्रैष्टुभम् । जागतम् । 'संग्रामे प्रयोजनयोद्धृभ्यः' । ४।२।५६॥ सोऽस्येति वर्तते । प्रथमासमर्थविशेषणं प्रयोजनं योद्धारः । प्रत्ययार्थविशेषणं संग्रामः । प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च प्रथमान्तेभ्यः षष्ठ्यर्थे संग्रामे वाच्ये यथास्वमणादिः[6] । सुभद्रा प्रयोजनमस्य संग्रामस्य सौभद्रः संग्रामः । भरता योद्धारोऽस्य भारतः संग्रामः । संग्रामे किम् । सुभद्रा प्रयोजनमस्य दानस्य । प्रयोजनयोद्धृभ्यः किम् । सुभद्रा प्रेक्षिकास्य संग्रामस्य ।

---

१. उडुम्बर Dc2. २. After it—ऊर्णनाभ Dc4, Dc3. ३. चैपयत Bc1, Dc1, Dc4. ४. कालेय Bc1, Dc1. ५. प्रगाथे किम् । Dc3. ६. °मणादयः स्युः Dc3.

तदस्यां प्रहरणमिति क्रीडायां णः ॥४।२।५७॥

प्रहरणार्थात् प्रथमान्तात् सप्तम्यर्थे[1] क्रीडायां णः स्यात् ॥ दण्डः प्रहरणमस्यां क्रीडायां दाण्डा । मौष्टा ।

घञः सास्यां क्रियेति ञः ॥४।२।५८॥

घञन्तात् गतिकारकपूर्वात् क्रियार्थात् प्रथमान्तादस्यामित्यर्थे ञः स्यात् ॥

श्येनतिलस्य पाते ञे ॥६।३।७१॥

ञप्रत्ययान्ते पातशब्दे परे श्येनतिलयोर्मुमागमः स्यात् ॥ श्येनपातोस्यां वर्तते श्यैनम्पाता मृगया । तैलम्पाता स्वधा । [4]दाण्डपाता तिथिः ।

तदस्यां । प्रहरणं किम् । माला भूषणमस्यां क्रीडायाम् । क्रीडायां किम् । खड्गः प्रहरणमस्यां सेनायाम् ।

घञः । तदस्यामित्यनुवृत्तौ पुनः सास्यामिति ग्रहात्[5] क्रीडायामिति न वर्तते । घञ इति कृद्ग्रहणं तत्र गतिकारकपूर्वमपि गृह्यत इत्यभिप्रेत्याह । **गतिकारकपूर्वादिति** । [6]वेतिकरणाद्विवक्षार्थाल्लभ्यते । क्रियार्थादिति । एतेन भावे यो घञ् तदन्तात् प्रत्यय इत्युक्तं स्यात् । ननु भावे यो घञ् तदन्तं नैव क्रियावाचि । यस्माद्धात्वर्थस्य सिद्धता नाम यो धर्मस्तत्र घञादयः स्युरित्युक्तम् । नैष दोषः । धर्मधर्मिणोर्भेदाविवक्षया[7] क्रियाधर्मोपि क्रियाशब्देनोक्तः । घञः किम् । श्येनपतनमस्यां वर्तते । क्रिया किम् । प्राकारोस्यां वर्तते ।

---

१. णः क्रीडायाम् B_1. २. क्रीडायामिति B_1. ३. वर्तनं B_1. ४. Before it—श्यैनतिलयोः किम् B_2. ५. महणात् Bo_1. ६. अथवेति Dc_2, Dc_4. ७. °विवक्षायां Dc_1.

तदधीते तद्वेद ॥४।२।५९॥

द्वितीयासमर्थादधीते वेद[1]इत्यर्थयोर्यथास्वमणादयः स्युः । ऐ[2]जागमः । व्याकरणमधीते [3]वेत्ति वा वैयाकरणः । सौ[4]वश्वः ।

तदधीते । द्विवारं तद्ग्रहणादधीयानविदुषोः पृथग्विधानमिति चेतसि कृत्वा द्विवचनं प्रयुङ्क्ते **अधीते वेदेत्यर्थयोरि**ति । **एजागम** इति । 'न य्वाभ्याम्—' इति । **वैयाकरण** इति । विशेषेण क्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति करणे ल्युट् । प्रादिसमासः । प्रसङ्गात् 'न य्वाभ्याम्—' इत्येतदीयं वकारात् परस्योदाहरणमाह । **सौवश्व** इति । शोभनोऽश्वः स्वश्वः । तस्यापत्यम् । 'शिवादिभ्योण्' । अथवा स्वश्वं वेद वकारात् पूर्वमौकारो जातः । स्पष्टत्वात् त्यक्तम् । 'क्रतूक्थादिसूत्रान्ताट्ठक्' । ४।२।६०॥ क्रतुविशेषवाचिभ्य उक्थादिभ्यश्च सूत्रान्ताच्च ठक् स्यात् तदधीते वेदेत्यर्थयोः । अग्निष्टोमार्थो ग्रन्थोऽग्निष्टोमस्तमधीते आग्निष्टोमिकः । यज्ञायज्ञीयात् परेण यानि सामानि गीयन्ते तान्युक्थानि न तत्र प्रत्ययः । किं तर्हि । तेषां लक्षणग्रन्थवाचको यस्तत्र प्रत्यय इष्यते । औक्थिकः । सूत्रान्तादकल्पादेः । वार्तिकसूत्रिकः । कल्पादेस्तु काल्पसूत्रः । उक्थ । न्याय । लोकायत । न्यास । पुनरुक्त । यज्ञ । चर्चा । पृतना । श्लक्ष्ण । संहिता । पद । क्रम । संघट्ट । वृत्ति[5] । संग्रह । गण । गुण । आयुर्वेद ।

---

१. वेदेत्यर्थे D_3, D_4, B_1, P, C ; वेद सौवश्व इत्यर्थयो॰ D_5. २. ऐजागमश्च B_1. ३. वेद B_1, D_2, D_5. ४. शोभनोऽश्वः स्वश्वः । तं वेदेति सौवश्वः B_1; after it—क्रतूक्थादिसूत्रान्तात् ठक् । क्रतुवाचिभ्य उक्त्थादेर्गणात् सूत्रान्ताच्च ठक् स्यात् । आग्निष्टोमिकः । औक्त्थिकः । B_2, D_4 (D_4 adds वार्तिकसूत्रिकः after औक्त्थिकः) ; सौवश्वः dropped D_5. ५. संघट्टवृत्ति । Bc_1.

इतिहासपुराणाभ्यां ठक् वाच्यः* । ऐतिहासिकः । पौराणिकः ॥[1]

क्रमादिभ्यो वुन् ॥४।२।६१॥

क्रमकः । पदकः ।

विद्यालक्षणकल्पान्ताट्ठक् वाच्यः । सार्पविद्यिकः । गौलक्षणिकः । मातृकल्पिकः । विद्यायाश्चाङ्गक्षत्रधर्मसंसर्गत्रिपूर्वाया न । आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । सांसर्गविद्यः । त्रैविद्यः । आख्यानाख्यायिकाभ्याम् । यवक्रीतमधिकृत्य कृतमाख्यानं यवक्रीतम् । यदधीते तद्वेद वा यावक्रीतिकः । वासवदत्तिकः । वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता । 'लुबाख्यायिकाभ्यो बहुलम्' इति छस्य लुप् । द्विपदा ज्योतिषानुपदानुकल्पेभ्योपि । द्वैपदिकः । ज्योतिषिकः । आनुपदिकः । आनुकल्पिकः । सर्वसादेर्द्विगोश्च ठको लुक् । सर्वादेः । सर्ववेदः । सादेः । सवार्तिकः । द्विगोः । पञ्चव्याकरणः । अनुसूर्लक्ष्यलक्षणेभ्योपि ठक् । आनुसुकः[2] । लाक्षिकः । लाक्षणिकः । इकन्पदोत्तरपदात्[3] । उत्तरपदिकः[4] । शतषष्टेः पथः षिकन् । शतपथिकः । शतपथिकी । शतपथोपि । षष्टिपथिकः ।

क्रमादिभ्यः । क्रम । पद । शिक्षा । मीमांसा । सामन् । स्पष्टत्वात् त्यक्तानि पञ्च । 'अनुब्राह्मणादिनिः' ॥४।२।६२॥ अणोपवादः । ब्राह्मणसदृशी ग्रन्थोनुब्राह्मणम् । तस्मादिनिः स्यात् । अनुब्राह्मणमधीते वेद वा अनुब्राह्मणी । 'वसन्तादिभ्यष्टक्' । ४।२।६३॥ वसन्तसहचरितो ग्रन्थो वसन्तः । तमधीते वेद वा

---

१. After it--विद्यालक्षणकल्पसूत्रान्तादिति वाच्यम् । धानुर्विद्यिकः । गोलक्षणिकः । मातृकल्पिकः । धार्मसूत्रिकः । विद्यायाश्चाङ्गक्षत्रधर्मसंसर्गत्रिपूर्वायां न ॥ अङ्गविद्यामधीते वेद वा आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । सांसर्गविद्यः । त्रैविद्यः । D_3, C, B_1, B_2 (For धानुर्विद्यिकः B_1 has सार्पविद्यिकः, B_2 सार्पवैद्यिकः, गोलाक्षणिकः B_2 ; °क्षत्रसंसर्गत्रिपूर्वाया अण् C ; आङ्गविद्यिकः, dropping from क्षात्रविद्यः to त्रैविद्यः C, B_2). २. B_1 has उक्तेर्थे before it. ३. °सूकः । Dc_4, Dc_3. ४. पदोत्तरपदिकः । Dc_1, Bc_1.

वासन्तिकः। वसन्त। वर्षा। शरद्। हेमन्त। शिशिर। प्रथम। गुण। चरम। अनुगुण। अथर्वन्।[1] 'प्रोक्ताल्लुक्'। ४।२।६४॥ प्रोक्तप्रत्ययान्तादध्येतृवेदितॄरुत्पन्नस्य लुक्। पाणिनीयमधीते पाणिनीयः। आपिशलः। स्त्री पाणिनीया। 'सूत्राच्च कोपधात्'। ४।२।६५॥ सूत्रवाचिनः कोपधात् उत्पन्नस्य प्रत्ययस्य लुक् स्यात्। अप्रोक्तार्थमारम्भः। पाणिनीयमष्टकं सूत्रं तदधीयते अष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः। त्रिकाः काशकृत्स्नाः। संख्याप्रकृतेर्वाच्यम्। इह न। महावार्तिकं सूत्रमधीयते माहावार्तिकाः। कोपधात् किम्। चतुष्टयमधीते चातुष्टयः। 'छन्दोब्राह्मणानि च तद्विषयाणि'॥४।२।६६॥ छन्दांसि च ब्राह्मणानि च प्रोक्तान्तान्यध्येतृवेदितृविषयाण्येव स्युः न स्वतन्त्राणि। अनन्यभावो विषयार्थः। ततश्च पाणिनिना प्रोक्तं पाणिनीयमितिवत् स्वातन्त्र्यं पाणिनीयं महदिति वन्महत्त्वाद्युपाधियोगः पाणिनीयमधीयत इति वद्वाक्यं च न स्यात्। छन्दसि। कठेन प्रोक्तमधीयते कठाः। 'कलापिवैशंपायनान्तेवासिभ्यश्च' इति णिनिः। तस्य कठचरकाल्लुक्। ततस्तदधीते इत्यण्। तस्यापि प्रोक्ताल्लुक्। ब्राह्मणानि। ताण्ड्येन प्रोक्तमधीयते ताण्डिनः। ताण्ड्यात् प्रोक्ताणिन्यन्तादणो लुक्। ब्राह्मणस्यापि छन्दस्त्वे ब्राह्मणग्रहणं पुराणप्रोक्तताऽरूपविशेषार्थम्। इह तद्विषयता न। याज्ञवल्क्यानि ब्राह्मणानि। चोनुक्तार्थः। कल्पे। काश्यपिनः। सूत्रे पाराशरिणो भिक्षवः। शैलालिनो नटाः। णिन्यन्तादणो लुक्। कर्मन्दिनः कृशाश्विनः। इन्यन्तात्। छन्दोब्राह्मणानि किम्। पाणिनीयं व्याकरणम्। पैङ्गी कल्पः॥

१. After it-आथर्वण Dc1, Dc4, Dc3.

तदस्मिन्नस्तीति देशे तन्नाम्नि ॥४।२।६७॥

तदिति[1] प्रथमा समर्थादस्त्युपाधिकात् सप्तम्यर्थे प्रत्ययान्तनाम्नि देशे वाच्ये यथास्वमणादयः स्युः[2] । उदुम्बराणि सन्त्यस्मिन् देशे औदुम्बरो देशः[3] ।

तेन निर्वृत्तः[4] ॥४।२।६८॥

कुशाम्बेन[5] निर्वृत्ता कौशाम्बी नगरी ।

तस्य निवासः ॥४।२।६९॥

षष्ठ्यन्तान्निवासे देशे तन्नाम्नि वाच्येणादयः[6] स्युः[7] ॥ शिबीनां[8] निवासः शैबो देशः[9] ।

इतश्चातुरर्थिकाः प्रत्ययाः ।

तद । तदिति प्रथमासमर्थविभक्तिः । अस्तीति प्रकृत्यर्थविशेषणम् । अस्मिन्नित्यस्य प्रत्ययार्थस्य विशेषणम् । देशे तन्नाम्नीत्याह । **प्रथमासमर्था**दिति । **प्रत्ययान्तनाम्नी**ति । एतद्विहितं प्रत्ययान्तं नाम तस्य तस्मिन्नित्यर्थः । मत्वर्थीयापवादो योगः ।

तेन । तृतीयासमर्थात् निर्वृत्त इत्यस्मिन् विषये देशतन्नाम्नि गम्ये यथास्वमणादिः स्यात् । **कुशाम्बेने**ति । अत्र कर्तरि तृतीया । निर्वृत्तेत्यन्तर्भावितण्यर्थाद्वृत्तेः कर्मणि निष्ठा । सहस्रेण निर्वृत्ता साहस्री परिखा । अत्र हेतौ तृतीया । कर्तरि निष्ठा ।

तस्य । निवसत्यस्मिन्निति निवासः ।

---

१. D_1, D_2, D_4, D_5 drop तदिति. २. B_1 drops it. ३. B_1 has असौ before it; देशः dropped D_1, B_2, D_2, D_4. ४. निर्वृत्तम् D_5. ५. B_1 has before it—तेनेति तृतीयासमर्थान्निर्वृत्तामित्यर्थे यथास्वमणादय-स्तन्नाम्नि वाच्ये ।. ६. यथास्वम° D_5. ७. B_1, D_1, D_4 drop it. ८. शिबस्य निवासो देशः शैबः ।. ९. Dropped D_5.

अदूरभवश्च ॥४।२।७०॥

षष्ठ्यन्तादूरभवे देशे तन्नाम्नि वाच्येऽणादयः स्युः ॥ विदिशाया अदूरभवं नगरं वैदिशम् ॥

अदूर । चकारः पूर्वेषां त्रयाणामर्थानामिह संनिधानार्थस्तेनोत्तरेषु योगेषु चत्वारोऽप्यर्थाः संबध्यन्ते 'शेषे' इति सूत्रं यावत् । स्पष्टत्वात् त्यक्तानि दश । 'ओरञ्' ॥४।२।७१॥ उवर्णान्तात् तदस्मिन्नित्यादिषु चतुर्ष्वर्थेषु अञ् स्यात् । आरण्डवः । कार्कन्धवः । नद्यां परत्वान्मतुप् । 'नद्यां मतुप्' इति । इक्षुमती । 'मतोश्च बह्वजङ्गात्' । ४।२।७२॥ बह्वजङ्गं यस्य मतुपस्तदन्तादञ् चातुरर्थिकः । वारणावतम् । बह्वच् किम् । आहिमतम् । अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा स्यात् मत्वन्तविशेषणं मा भूदिति । मालावतां निवासो मालावती । 'बह्वचः कूपेषु' । ४।२।७३॥ बह्वचोऽञ् स्यात् कूपेषु चातुरर्थिकः । दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः । 'उदक् च विपाशः' । ४।२।७४॥ विपाश उत्तरे कूले ये कूपास्तेषु वाच्येष्वबह्वचोऽप्यञ् स्यात् । दत्तेन निर्वृत्तो दात्तः कूपः । दक्षिणतः कूपेष्वणेव । दात्तः । स्वरे विशेषः । 'संकलादिभ्यश्च' । ४।२।७५॥ एभ्यश्चातुरर्थिकोऽञ् । संकलेन निर्वृत्तं साङ्कलम् । संकल । पुष्कल । उद्वप । उत्पुट । निधान । कुम्भ । सुदक्ष । सुदत्त । सूत । सुनेत्र । सुमङ्गल । सिकता । पूतिका । पूलाश । पलाश । निवेश । गम्भीर । आन् । अहन् । लोमन् । वेमन् । चरण । बहुल । सद्योज । अभिषिक्त । गोभृत् । राजभृत् । मल्ल । माल । 'स्त्रीषु सौवीरसाल्वप्राक्षु' ॥४।२।७६॥ ङ्याप्प्रातिपदिकादञ् चातुरर्थिकः । स्त्रीलिङ्गे सौवीरादिदेशे वाच्ये । सौवीरे । दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे । वैधूमाग्नी । प्राचि । काकन्दी । 'सुवास्त्वादिभ्योऽण्'

---

१. B1 drops it. २, B1 has नगरम् after it. ३. Dropped Dc3.
४. इति dropped Dc3, Dc4.

॥४।२।७७॥ चातुरर्थिकः । उवर्णान्तलक्षणस्य कूपलक्षणस्य च । अत्रोपवादः । सुवस्तोरदूरभवं पुरं सौवास्तवम् । अणुग्रहणं नद्यां मतुबो बाधनार्थम् । सौवास्तवी नदी । सुवास्तु । वर्णु । भण्डु । खण्डु । सेवालिन् । कर्पूरिन् । शिखण्डिन् । गर्त । कर्कश । शकटीकर्ण । विकर्ण । कृष्णकर्ण । कर्कन्धुमती । गोह । अहिसक्थ । 'रोणी' ॥४।२।७८॥ रोणीति प्रथमानिर्देशात् केवलात् तदन्ताच्चाण् चातुरर्थिकः न । कूपलक्षणोञ् । रौणः कूपः । आजकरोणः । 'कोपधाच्च' ॥४।२।७९॥ कोपधाच्चाण् । चातुरर्थिकः । कार्णच्छिद्रकः कूपः । त्रैशङ्कवः । 'वुञ्छण्कठजिलसेनिरढञ्ण्यय-फक्फिञिञ्ञ्यककठकोरीहणकृशाश्वर्ष्यकुमुदकाशतृणप्रेक्षाश्मसखि--संकाशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः' ॥४।२।८०॥ अरीहणादिभ्यः सप्तदशभ्यो वुञादयः सप्तदश प्रत्ययाः स्युश्चतुष्वर्थेषु । अरीहणादिभ्यो वुञ् । आरीहणकम् । अरीहण । द्रुघण[1] । खदिर । भगल । उलन्द[2] । सांपरायण[3] । क्रौष्ट्रायण । भास्त्रायण[4] । त्रैगर्तायण । चैत्रायण । गौत्रायण । रायस्पोष । विपथ । विपाश । उद्दण्ड । उदञ्चन । खाण्डायन । खण्ड । वीरण । काशकृत्स्न । जाम्बवत् । शिंशपा । किरण । रैवत । बिल्व । वैमतायन । सौसायन । शाण्डिल्यायन । सुयज्ञ । शिरीष[5] । बधिर । कृशाश्वादिभ्यश्छण् । कार्शाश्वीयः । कृशाश्व । अरिष्ट । वेश्म । विशाल । रोमक । शवल । कूट । रोमश । वठर । सुकर । प्रभर[6] । सदृश । पुगर । सुख । धूप[7] । अजित । विनत[8] । अवनत । विकुड्यास । अरुस् । अयस् । असायस । मौद्गल्य । पराशर । ऋश्यादिभ्यः कः । ऋश्यकः । ऋश्य । न्यग्रोध । परिवृत्त । सूव । निलीन । निधान । वितान । विधान । निवद्ध । विवद्ध । परिगूढ । उपगूढ । अश्मन् ।

१. Before it—द्रुहण Bc_1, Dc_4. २. उलुन्द Bc_1, Dc_1, Dc_4. ३. सांवत्सरायण Bc_1, Dc_1, Dc_3, Dc_4. ४. भस्त्रायण Bc_1, Dc_1, Dc_3, Dc_4. ५. सिरीष Dc_3. ६. प्रकर । प्रसर Dc_3. ७. धूम Dc_2. ८. वनिता Dc_2.

उत्तराश्मन् । स्थूल । बाहु । खदिर । शर्करा । अनडुह । परिवेष । वेणु । वीरण । कुमुदादिभ्यष्ठच् । कुमुदिकम् । कुमुद । शर्करा । न्यग्रोध । इक्कर । संकट । गर्त[1] । बीज । अश्वत्थ । बल्वज । परिवाप । शिरीष[2] । यवास[3] । कूप । विकङ्कत । काशादिभ्य इलः । काशिलः । काश । पाश । अश्वत्थ । पलाश । पीयूक्षा[4] । बिस । तृण । नड । वन । कर्दम । कर्पूर । कण्टक । गुहा । तृणादिभ्यः सः । तृणसः । तृण । नड । फल । पर्ण । वराण[5] । अर्ण । अर्जुन[6] । वल । प्रेक्षादिभ्य इनिः । प्रेक्षी । प्रेक्षा । फलका । बन्धुका । ध्रुवका । क्षिपका । न्यग्रोध । इक्कटा । इकटा । संकट । पुक । अश्मादिभ्यो रः । अश्मरम् । अश्मन् । यूथ[7] । ऊष । मीन । दंश । वृन्द । गुड[8] । दण्ड । नग[9] । शिखा । सख्यादिभ्यो ढञ् । साखेयम् । सखि । अग्निदत्त । वायुदत्त । सखिदत्त । गोभिल[10] । भल्ल[11] । पाल । चक्र । चक्रवाक[12] । छगल । अशोक । करवीर । सीकर । सरस । समल । सुरस । संकाशादिभ्यो ण्यः । सांकाश्यम् । संकाश । कम्पील । कश्मीर । शूरसेन । मन्थन । यूप । अङ्ग । नाग । अश्मन् । कूट । मलिन । तीर्थ । अगस्ति । विरत । विकर । नासिका । बलादिभ्यो यः । बल्यम् । बल । पूल[13] । मूल । उल । दुल । वन[14] । कुल । पक्षादिभ्यः फक् । पाक्षायणः । पक्ष । तुक्ष[15] । अण्ड । कम्बलिका । कुत्स । सकल । चित्र । अभिश्वन् । पथिन्[16] पन्थ च । कुम्भ[17] । सिंहक । मकर । शमल । रोमन् । लोमन् । मकर । हंसक । सुवर्णक[18] । हस्तिन् । खिल[19] । कर्णादिभ्यः फिञ् । कार्णायनिः ।

१. गर्धभ Bc_1; गर्भ Dc_3, Dc_4. २. सिरीष Dc_3. ३. यवाष Bc_1. ४. पीयुक्ष Bc_1, Dc_1, Dc_4. ५. वर्ण Bc_1, Dc_4. ६. जन Bc_1. ७. यूष Bc_1, Dc_1, Dc_4. ८. गुडा Dc_1. ९. नर Bc_1, Dc_1, Dc_4. १०. गोहिल Bc_1, Dc_1, Dc_4. ११. कल Bc_1, Dc_1. १२. चक्रवाल Dc_4. १३. धूल Bc_1, Dc_1, Dc_3, १४. धन Bc_1, Dc_1, Dc_4. १५. त्रुक्ष Dc_2. १६. पथ Bc_1, Dc_1; पथः पन्था च Dc_4. १७. कुम्भसीर । शीरमूक च Bc_1, Dc_4. १८. सकर्णक Bc_1, Dc_3, Dc_4. १९. विचिल Dc_4.

जनपदे लुप् ॥४।२।८१॥

जनपदे[1] विशेषे चातुरर्थिकप्रत्ययस्य लुप् स्यात् ॥

कर्ण । वसिष्ठ । अर्कलूष[2] । द्रुपद । आणनद्धु[3] । मकर । हिंसक । सुह्म । पाञ्चजन्य । अर्क । स्फिज्[4] । कुलिश । कुम्भी । जीवन्त । जित्वन् । औण्डीवत्[5] । सुतङ्गमादिभ्य इञ् । सौतङ्गमिः । सुतङ्गम । मुनिचित्त । विप्रचित्त । महाचित्त । महापुत्र । श्वेत । अडिक[6] । शुक्र । विग्र । बीजवापिन् । श्वन् । अर्जुन । अजिर । प्रगद्यादिभ्यो ञ्यः । प्रागद्यः । प्रगदिन् । मगदिन् । कलिव । खण्डिव[7] । गडिव । चूडार । पञ्जर[8] । कोविदार । वराहादिभ्यः कक् । वाराहकः । वराह । पलाश । शिरीष[9] । निबद्ध । स्थूल । विवृद्ध[10] । विदग्ध । विजग्ध । विभग्न । विमग्न । बाहु । खदिर । शर्करा । कुमुदादिभ्यष्ठक् । कौमुदिकम् । कुमुद । मागध । रथकार । दशग्राम । अश्वत्थ । शाल्मलि । स्थूल[11] । कूट । मुण्ड । कर्ण ।

जनपदे । ग्रामसमुदायो जनपदः । तन्नाम्नीति वर्तते । लुबन्तं चेन्नामधेयं स्यादित्यर्थः । तथा चोदुम्बरे जनपदे इत्यादौ न ।

---

१. जनपदविषये Dc_1. २. अर्क । सम । Dc_1, Dc_4. ३. अनडुह्य for this up to सुह्य ; आनडुह्य Dc_4, Bc_1. ४. स्फग । स्फिग । Bc_1, Dc_1, Dc_3, Dc_4. ५. अण्डीवर्त Bc_1, Dc_1, Dc_3, Dc_4. ६. गडिक Dc_2, Bc_3. ७. खडिव Bc_1, Dc_1, Dc_4. ८. पिञ्जर Dc_4. ९. सिरीष Dc_3. १०. विविद्ध Bc_1. ११. For स्थूल to कण—स्थल । कुण्डल । मधुकर्ण Dc_3, Bc_3.

लुपि युक्तवद्व्यक्तिवचने ॥१।२।५१॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः ॥ पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः ।

लुपि । लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते । युक्तवदिति क्तवतुना प्रकृत्यर्थ उच्यते स हि प्रत्ययार्थं युनक्ति । अथवा युक्तप्रत्ययार्थेन संबद्धः प्रकृत्यर्थः । व्यक्तवचने इति लिङ्गसंख्ययोः पूर्वाचार्यसंज्ञेति सर्वमभिप्रेत्याह । लुपीत्यादि । पूर्वाचार्याणामिदं सूत्रम् । तथा चास्य प्रत्याख्यानं सूत्रकारेण कृतम् । 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति । अस्यार्थः । युक्तवद्भावलक्षणमवाच्यम् । कस्मात् । संज्ञाप्रमाणत्वात् । संज्ञाशब्दा हि नानालिङ्गसंख्याः प्रमाणम् । यथा आपो दाराः । प्रसङ्गादन्यान्यपि त्यक्तानि चत्वारि व्याख्यायन्ते । 'लुब्योगाप्रख्यानात्' ॥१।२।५४॥ लुबपि न वाच्यः । योगादर्शनात् । न हि वृक्षयोगान्नगरे वरणाशब्दाः । किं तर्हि । संज्ञा एताः । 'योगप्रमाणे च तदभावेऽदर्शनं स्यात्' ॥१।२।५५॥ योगप्रमाणे हि योगाभावे प्रयोगो न स्यात् । दृश्यते च विनैव क्षत्रिययोगं देशे पञ्चालशब्दः । 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' । १।२।५६॥ पूर्वाचार्यैः प्रधानाप्रधाने[3] प्रधानार्थं सह ब्रूतः प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इत्युक्तम् । तदप्यवाच्यम् । अर्थस्य लोकत एवावगतेः । 'कालोपसर्जने च तुल्यम्' । १।२।५७॥ आन्याय्यादुत्थानादान्याय्याच्च संवेशनादेषोऽद्यतनः । अन्ये तु अहरुभयतोऽर्धरात्रमेषोऽद्यतनः । तथा अप्रधानमुपसर्जनमिति कालोपसर्जने उक्ते । ते अपि न वाच्ये । लोकत

---

१. °संज्ञायां Bc1, Dc1. २. वरणादयः Dc4 ; वरणा इति Dc3. ३. After it—च Bc1.

वरणादिभ्यश्च ॥४।२।८२॥

एभ्यश्चा[1]तुरर्थिकप्र[2]त्ययस्याजनपदेपि लुप् स्यात् ॥ वरणानामदूरभवं नगरं [3]वरणाः । गोदयोरदूरभवो ग्रामो गोदौ[4] ।

विशेषणानां चाजातेः ॥१।२।५२॥

लुबन्तस्य विशेषणानामपि लिङ्गवचने तद्वत् जातिं विना । पञ्चाला रम्याः । गोदौ रम्यौ । अजातेः किम् । पञ्चाला जनपदो रम्यः । गोदौ ग्रामो रम्यः ॥

एवावगतेः । प्रासङ्गिकं परिसमाप्य प्रकृतमुच्यते । लुपि किम् । लुकि मा भूत् । लवणेन संसृष्टो लवणः सूपः । लवणा यवागूः । प्राग्वहतेष्ठको 'लवणाल्लुक्' इति लुक् । व्यक्तिवचने किम् । शि[5]रीषाणामदूरभवो ग्रामः शि[6]रीषास्तस्य वनं शि[6]रीषवनमिति शि[6]रीषेषु यद्वनस्पतित्वं तस्यापि ग्रामेतिदेशः स्यात् । तथा च 'विभाषौषधिवनस्पतिभ्यः' इति णत्वं स्यात् खलतिकादिषु वचनमेव प्रकृतिवत् । खलतिकस्य पर्वतस्यादूरभवानि वनानि ।

वरणा । वरण । शृङ्गिन् । शाल्मली । पूर्वौ गोदौ । अपरौ गोदौ । आलिङ्ग्यायन । पर्णी । श[7]फाण्डि । जनपद । मथुरा । उज्जयिनी । गया । तक्षशिला । उरसा । आकृतिगणोयम् । कटुकबदरी । शि[8]रीष । काञ्ची ।

विशेषणानाम् । पूर्वेणैव सिद्धे जातिप्रतिषेधार्थं वचनम् । पाञ्चाला जनपदो रम्य इत्यादि । जनपदग्रामशब्दौ जातिवचनौ ।

---

१. °श्चातुरर्थिकस्य C, D_1, D_5, B_2. २. °प्रत्ययस्य लुप् स्यात् । अजनपदार्थ आरम्भः B_1, B_2. ३. वरणाः नगरम् B_1, B_2, D_2. ४. B_1, B_2, D_5 have ग्रामः after it. ५. सिरि° Bc_1, Dc_4. ६. सिरि° Bc_1. Dc_4 (in all places). ७. सफाण्डि Bc_1; सिफाण्डि Dc_3. ८. सिरीष Bc_1, Dc_4, Dc_3.

ताभ्यां स एव लुबर्थो जातिरूपेणोच्यते इति प्रकृतिवल्लिङ्गसंख्ये स्याताम् । अतो निषेधः । अजातेरित्यर्थनिषेधः । तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न । पञ्चालो जनपदो रमणीयो बह्वन्न इति । मनुष्यलुपि निषेधो वाच्यः । चञ्चेव चञ्चा अभिरूपः । वध्रिका दर्शनीयः । 'इवे प्रतिकृतौ' इति कः । 'लुम्मनुष्ये' इति लुप् । स्पष्टत्वात् त्यक्तान्येकादश । 'शर्कराया वा' ॥४।२।८३॥ अस्माच्चातुरर्थिकस्य वा लुप् । यद्ययं नित्यो लुप् स्यात् कुमुदादौ वराहादौ च पाठो व्यर्थः स्यात् । तस्मात् पाठसामर्थ्यादेव पाक्षिके प्रत्ययश्रवणे लब्धे औत्सर्गिकोप्यण् स्यात् तस्यायं वा लुबिति ज्ञापयति वाग्रहः । तेनास्य षाड्रूप्यं स्यात् । शर्करा । शार्करम् । शर्करिकम् । शार्करकम् । उत्तरे च द्वे । 'ठक् छौ च' ॥४।२।८४॥ शर्करायाश्चातुर्थिकौ । शार्करिकम् । शर्करीयम् । 'नद्यां मतुप्' ॥४।२।८५॥ देशे तन्नाम्नि नद्यां वाच्यायां मतुप् स्याच्चतुर्ष्वर्थेषु[1] । 'मतौ बह्वचोनजिरादीनाम्' ॥६।३।११९॥ मतौ[2] बह्वचो दीर्घः स्यादजिरादीन् विना संज्ञायाम् । उदुम्बरावती । वीरणावती । अनजिरादीनां किम् । अजिरवती । खदिरवती । पुलिनवती । हंसकारण्डवती । चक्रवातवती[3] । संज्ञायामेव । वलयवती । 'शरादीनां च' ॥६।३।१२०॥ एषां मतौ परे दीर्घः संज्ञायाम् । शरावती । संज्ञायामिति मतोर्वा यवादित्वेपि । शर । वंश । धूम । अहि । कपि । मुणि । मनि । शुचि । भागीरथी । भैमरथीत्यादौ न मतुप् तदस्यास्तन्नामत्वात् । किं त्वणेव । 'मध्वादिभ्यश्च' ॥४।२।८६॥ मतुप् चातुरर्थिकः अनद्यामपि । मधुमान् । मधु । बिस । स्थाणु । मुष्टि । इक्षु । वेणु । ऋष्य । कर्कन्धु ।

---

१. चातुरर्थिकेषु Bc1, Dc4; चातुरर्थेषु Dc3. २. मतौ परे Bc1, Dc4.
३. °वाकवती Dc3, Dc4.

शमी । करीर । हिम । किशरा । शर्याण । रुमत । मरुत् । वार्दाली । शर । इष्टका । वंक्ष । तक्षशिला । शक्ति । आसन्दी । आसुती । शलाका । आमिषी । शकला । खड । वेट । पार्द । 'कुमुद-नडवेतसेभ्यो ड्मतुप्' ॥४।२।८७॥ चातुरर्थिकः । कुमुद्वान् । नड्वान् । वेतस्वान् । 'महिषाच्च' । महिष्मान् देशः । 'नडशादाड्ड्वलच्' ॥४।२।८८॥ चातुरर्थिकः । नड्वलम् । शाड्वलम् । 'शिखाया वलच्' ॥४।२।८९॥ चतुर्षु । शिखावलं पुरम् । 'उत्करादिभ्यश्छः' ॥४।२।९०॥ चातुरर्थिकः । उत्करीयम् । उत्कर । संफल । शफर । पिप्पल । पिप्पलीमूल । अर्क । अश्मन् । पर्ण । सुपर्ण । खलाजिन । अग्नि । तिक । कितव । आतप । अनेक । पलाश । त्रैवण । पिचुक । क्षार । अश्वत्थ । काश । क्षुद्र । भस्त्रा । विशाल । जन्या । वेत्र । अजिन । चर्मन् । उत्क्रोश । क्षान्त । खदिर । शूर्पणाय । श्यावनाय । नितान्तवृक्ष । निशान्तवृक्ष । इन्द्रवृक्ष । आर्द्रवृक्ष । 'नडादीनां कुक् च' ॥४।२।९१॥ प्रत्ययः स्यात् कुक् चागमः । नडकीयम् । नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । इक्षु । काष्ठ । कपोत । तृण । क्रुञ्चात् ह्रस्वत्वं च । तक्ष्णो नलोपश्च । प्रासङ्गिकं सूत्रं व्याख्यायते । 'बिल्वकादिभ्यश्छस्य लुक्' ॥६।४।१५३॥ एभ्य उत्तरस्य छस्य भस्य तद्धिते परतो लुक् स्यात् । बिल्वा अस्यां सन्ति बिल्वकीया । तस्यां भवः । अण् । बैल्वकः । बिल्वकादिर्नडाद्यन्तर्गणः । छग्रहणं छमात्रस्य निवृत्त्यर्थं न कुकः ॥

इति चातुरर्थिकाः ॥

१. स्यायण । तुमुन् । मतुप् । दार्वाली for शर्याण to वार्दाली Bc_1, Dc_3, Dc_4. २. तक्ष Dc_3, Dc_4. ३. संकर for संफल । शफर Bc_1; संफर Dc_4. ४. बालाजिन Bc_1, Dc_3, Dc_4. ५. आवेक Dc_3. Dc_4. ६. पेटक । प्लक्ष । for पिचुक । क्षार । Bc_1, Dc_1, Dc_3, Dc_4. ७. अत्र छग्र° Bc_1.

शेषे ॥४।२।९२॥

अपत्यादि चतुरर्थान्तादन्यः शेषस्तत्र यथास्वमणादयः स्युः ॥ चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः ।[1][2]

इतः शेषाधिकारः । 'शेषे' । इदं विधायकं चाधिकारश्च । तत्र विधायकतां प्रकटयन् व्याकरोति । अधिकारत्वं तूत्तरत्र 'ग्रामाद्यखञौ' इत्यादौ शेषेर्थे इत्यादि वदन् स्फुटयिष्यति[3] । शेषो नामोक्तादन्य इत्याभिप्रेत्याह । **अपत्यादीति** । **अणादयः पञ्चेति** । 'प्राग्दीव्यतोण्' 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' । 'उत्सादिभ्योञ्' । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति साधारण्येनोक्ता महोत्सर्गा अणादयः पञ्च गृह्यन्ते । **चाक्षुषं रूपमिति** । ग्रहणार्थेत्रानेनाण् विहितः । **श्रावण इति** । श्रवणेन गृह्यते । तथान्येष्वप्यनुक्तेष्वर्थेषूदाहार्यम् । तथा हि दृषदि पिष्टा दार्षदाः सक्तवः । उलूखले क्षुण्णा उलूखला यवाः । अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । अयमधिकारोपीति कृत्वा वक्ष्यमाण 'राष्ट्रावारपाराद् घखौ' इत्यादयोपत्यादिचतुरर्थान्तेभ्योन्यस्मिन् जातादावर्थे वेदितव्याः । शेषाधिकारप्रयोजनं **पाणिनीयमतदर्पणे** स्पष्टीकृतम् । तथा हि

"'तस्येदम्' इत्यसावर्थो जातादिष्वत्र पठ्यते ।
स चापत्यादिसामान्यमतस्तत्र कृतो विधिः ॥
तद्विशेषेष्वपत्यादिष्वप्यवश्यं भविष्यति ।
शेषाधिकारस्तेनायं क्रियते तन्निवृत्तये ॥"

किं च असति शेषग्रहणे घादीनां प्रथमेनैवार्थेन सह संबन्धो विज्ञायेत ततश्च द्वितीयादिष्वर्थेषु प्राग्दीव्यतीया अणादयः पञ्च स्युर्न घादयः । शेषशब्दस्तु प्रयुक्तादन्यतया जातादीनर्थान् वर्गीकृत्य शक्नोत्यभिधातुमिति सर्वत्र घादयः सिध्यन्ति ततः सर्वेषु जातादिषु घादयो यथा स्युरिति शेषग्रहणं कृतमिति । अथ सौकर्यार्थं

१. चतुरर्थादन्यः B₁. २. After it—भिक्षया संपन्नं भैक्षम् । औपलिकम् B₁, B₂. ३. स्फुटं पठिष्यति । Dc₄.

तत्र जातः ॥४।३।२५॥

सप्तम्यन्ताज्जातेऽर्थे यथास्वमणादयः स्युः ॥ मथुरायां जातो माथुरः ।

प्रावृषष्ठप् ॥४।३।२६॥

जातार्थेऽस्माट्ठप् स्यात् ॥ अणोऽपवादः । प्रावृषिकः ।

प्रकृतानामणादीनां वक्ष्यमाणानां घादीनां च प्रत्ययानामर्थान् समर्थविभक्तीश्च प्रथमं निर्देष्टुं व्यवहितान्यपि तत्र जात इत्यादीनि व्याख्याति ।

तत्र । **माथुर** इति । प्राग्दीव्यतोऽण् ।

प्रावृषः । **अणोऽपवाद** इति । उपलक्षणमेतत् । 'प्रावृष एण्यः' इत्यस्याप्यपवादः । पकारोऽनुदात्तत्वार्थः । **प्रावृषिक** इति । प्रावृषि जातः । स्पष्टत्वात् त्यक्तानि षड्विंशतिः । 'संज्ञायां शरदो वुञ्' ॥४।३।२७॥ अस्माज्जातार्थे वुञ् स्यात् संज्ञायाम् । ऋत्वणोऽपवादः । शारदका दर्भाः । संज्ञायां किम् । शारदं सस्यम् । केचित् 'कृत-लब्धक्रीतकुशलाः' इत्येतदन्तं संज्ञाधिकारमाहुः । 'पूर्वाह्णापराह्णार्द्रा-मूलप्रदोषावस्कराद्वुन्' ॥४।३।२८॥ एभ्यो वुन् तत्र जात इत्यर्थे । पूर्वाह्णकः । अपराह्णकः । 'विभाषा पूर्वाह्णापराह्ण—' इति ठञोऽपवादः । आर्द्रकः । मूलकः । नक्षत्राणोऽपवादः । प्रदोषकः । 'निशाप्रदोषाभ्यां च' इति ठञोऽपवादः । अवस्करकः । औत्सर्गिकस्याणः । असंज्ञायां तु यथाप्राप्तठञादयः । 'पथः पन्थ च' ॥४।३।२९॥ पथो वुन् स्यात् पन्थादेशश्च । पथि जातः पन्थकः । 'अमावास्याया वा' ॥४।३।३०॥ वुन् । पक्षे संधिवेलाद्यण् । अमावास्यकः । अमावास्यः । एकदेशविकृतस्यानन्यत्वादमावस्यकः । आमावस्यः । 'अ च' ॥४।३।३१॥ अमावास्याया अः स्याज्जातार्थे चाद्वुन्नणौ । अमावास्यः ।

---

१. °ज्जातार्थे P; D₁. २. This Sûtra and the next (४।३।५३) dropped D₄. ३. अस्माट्ठप्स्याज्जातार्थे C; जातेऽर्थे only before अणोऽपवादः in B₁. ४. शस्यम् Bc₁, Dc₄, Dc₃.

अमावस्यः । 'सिन्ध्वपकराभ्यां कन्' ॥४।३।३२॥ सिंधौ जातः सिन्धुकः । कच्छाद्यणो मनुष्यवुञश्चापवादः । अपकरकः । औत्सर्गिकस्याणः । 'अणञौ च' ॥४।३।३३॥ सिन्ध्वपकराभ्यां यथासंख्यम् । सैन्धवः । आपकरः । चात् कन् । 'श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्' ॥४।३।३४॥ एभ्यः परस्य नक्षत्राणो जातार्थे लुक् । तत्र कृते 'लुक्तद्धितलुकि' । इति स्त्रीप्रत्ययस्यापि लुक् । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः । अनुराधः । स्वातिः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । अषाढः । बहुलः । 'नक्षत्रेभ्यो बहुलम्' इत्यस्यायं प्रपञ्चः । उत्तरौ च योगौ । 'स्थानान्तगोशालखरशालाच्च' ॥४।३।३५॥ एभ्यः प्रत्ययस्य जातार्थे लुक् । गोस्थाने जातो गोस्थानः । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् गोशाले गोशालायां वा जातो गोशालः । खरशालः । 'वत्सशालाभिजिदश्वयुक्छतभिषजो वा' ॥४।३।३६॥ लुक् । वत्सशाले वत्सशालायां वा जातो वत्सशालः । वात्सशालः । अभिजित् । आभिजितः । अश्वयुक् । आश्वयुजः । शतभिषक् । शातभिषजः । ङित्त्वाद्वा शतभिषक्शब्दादण् । शातभिषः । 'नक्षत्रेभ्यो बहुलम्' ॥४।३।३७॥ लुक् । रोहिणः । रौहिणः । मृगशिराः । मार्गशीर्षः । 'कृतलब्धक्रीतकुशलाः' ॥४।३।३८॥ सप्तमीसमर्थात् कृतादिष्वर्थेषु यथासंख्यं प्रत्ययाः । स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलो वा स्रौघ्नः । ननु यद्यत्र कृतं जातमपि तत्तत्र यच्च यत्र क्रीतं लब्धमपि तत्तत्र । किमर्थं भेदेनोपादानम् । शब्दार्थस्य भिन्नत्वाद् भेदेनोपादानम् । 'प्रायभवः' ॥४।३।३९॥ सप्तमीसमर्थात् प्रायभव इत्यर्थे यथास्वं प्रत्ययाः । प्रायशब्दः साकल्यस्य किंचिन्न्यूनतामाह । स्रुघ्ने प्रायेण भवः स्रौघ्नः । प्रायभवग्रहणं वैचित्र्यार्थम् । तत्र भवेन चरितार्थत्वात् । 'उपजानूपकर्णोपनीवेष्ठक्' ॥४।३।४०॥ एभ्यः प्रायभवे ठक् । अणोपवादः । औपजानुकः । औपकर्णिकः । औपनीविकः ।

'संभूते' ॥४।३।४१॥ संभावनाप्रमाणानतिरेकश्च संभूतशब्दार्थः। सप्तमीसमर्थात् संभूतार्थे यथास्वं प्रत्ययाः। स्रुघ्ने संभवति स्रौघ्नः। यस्तु स्रुघ्ने संभाव्यते स्रुघ्नप्रमाणाच्च नातिरिच्यते स एवमुच्यते। 'कोशाड्ढञ्' ॥४।३।४२॥ कोशे संभवति कौशेयं वस्त्रम्। वस्त्रे रूढोयं तेन क्रिमिखड्गकोशादौ न। 'कालात् साधुपुष्प्यत्पच्यमानेषु' ॥४।३।४३॥ सप्तमीसमर्थात् कालविशेषवाचिनः साध्वादिष्वर्थेषु यथास्वं प्रत्ययाः। हेमन्ते साधु हैमनं वस्त्रम्। वसन्ते पुष्प्यति वासन्ती लता। शरदि पच्यन्ते शारदाः शालयः। 'उप्ते च' ॥४।३।४४॥ सप्तमीसमर्थात् कालादुप्तेर्थे यथास्वं प्रत्ययः। हेमन्ते उप्यन्ते हैमना यवाः। योगविभाग उत्तरार्थः। 'आश्वयुज्या वुञ्' ॥४।३।४५॥ उप्तेर्थे। कालठञोपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः। अश्विनीपर्यायोश्वयुक्शब्दः। 'ग्रीष्मवसन्तादन्यतरस्याम्' ॥४।३।४६॥ उप्तेर्थे वुञ्। ऋत्वणोपवादः। ग्रैष्मम्। ग्रैष्मकम्। वासन्तम्। वासन्तकम्। 'देयमृणे' ॥४।३।४७॥ सप्तमीसमर्थात् कालाद्देयमित्यर्थे यथास्वमृणविषये। मासे देयमृणं मासिकम्। ऋणे किम्। मासे देया भिक्षा। 'कलाप्यश्वत्थयवबुसाद्वुन्' ॥४।३।४८॥ देयमृणमित्यर्थे। यदा मयूराः कलापिनः स्युः स कालः कलापी। तदा देयमृणं कलापकम्। यदाश्वत्थाः फलन्ति स कालोश्वत्थः। तत्र देयमृणमश्वत्थकम्। यदा यवबुसोत्पत्तिः स कालो यवबुसः। तत्र देयमृणं यवबुसकम्। 'ग्रीष्मावरसमाद्वुञ्' ॥४।३।४९॥ ग्रीष्मे देयमृणं ग्रैष्मकम्। ऋत्वणोपवादः। अवरसमायां देयमृणमावरसमकम्। कालठञोपवादः। 'संवत्सराग्रहायणीभ्यां ठञ् च' ॥४।३।५०॥ चाद्वुञ्। संवत्सरे देयमृणं सांवत्सरिकम्। सांवत्सरकम्। आग्रहायणिकम्। आग्रहायणकम्। वेति वक्तव्ये ठञ्ग्रहणं संधिवेलादिषु संवत्सरात् फलपर्वणोरिति पठ्यते तत्र फले ऋणत्वेन विवक्षिते अणं बाधित्वा ठञेव यथा

१. क्रिमि° Bc₁, Do₁, Do₃, Do₄. २. पुष्पति Do₃, Do₄. ३. प्रत्ययाः। Do₄. ४. °पर्याय आश्वयुजीशब्दः Bo₁, Do₁, Do₃, Do₄.

तत्र भवः ॥४।३।५३॥

अत्रापि यथास्वमणादयः ॥ मथुरायां भवो माथुरः ।

दिगादिभ्यो यत् ॥४।३।५४॥

एभ्यो भवार्थे यत् ॥ दिश्यम् । वर्ग्यम् ॥

शरीरावयवाच्च ॥४।३।५५॥

अस्माद्भवार्थे यत् ॥ दन्त्यम् । कण्ठ्यम् ॥[4]

स्यादिति । 'व्याहरति मृगः' ॥४।३।५१॥ सप्तमीसमर्थात् कालात् व्याहरति मृग इत्यस्मिन्नर्थे यथास्वं प्रत्ययाः । निशायां व्याहरति नैशिकः । नैशः । मृगः किम् । निशायां व्याहरत्युलूकः । 'तदस्य सोढम्' ॥४।३।५२॥ प्रथमासमर्थात् कलात् षष्ठ्यर्थे यथास्वं प्रत्ययाः । यत् तत् प्रथमासमर्थं सोढं चेत्तद्भवति । निशा सहचरितमध्ययनं निशा । तत्सोढमस्य नैशिकश्छात्रः । नैशः ।

तत्र । अत्रेति । भवो नाम सत्ता न जन्म । सप्तमीसमर्थात् प्रातिपदिकादिति ज्ञेयम् । 'तत आगतः' इति यावत् 'तत्र भवः' इत्यधिकारः ।

दिगादि । अणश्छस्य चापवादः । दिश् । वर्ग । पूग । गण । पक्ष । वायु । मित्र । मेधा । अन्तर । पथिन् । रहस् । अलीक । उषा । साक्षिन् । आदि । अन्त । मुख । जघन । मेष । यूथ । उदकात् संज्ञायाम् । उदक्या । न्याय । वंश । अनुवंश । वेश । काल । आकाश । मुखजघनयोः सेनामुखाद्यशरीरावयवार्थः पाठः ।

शरीरा । दन्त्यम् । कण्ठ्यमिति । दन्ते कण्ठे च भवम् । प्रसङ्गात् स्पष्टत्वात् त्यक्तं सूत्रद्वयं व्याख्यायते । 'ये च तद्धिते'

---

१. सप्तम्यन्तात् भवार्थे यथास्वम् C, B_2. २. यत्स्याद्भवार्थे C. ३. यत् स्यात् B_2. ४. After this P has जिह्वामूलाङ्गुलेश्छः ॥४।३।६२॥ आभ्यां छः स्याद्भवार्थे । जिह्वामूलीयम् । अङ्गुलीयम् ।. ५. Dc_2 has धाच्या before it.

अध्यात्मादेष्ठञिष्यते ॥ अध्यात्मे भवमाध्यात्मिकम् । अनुशतिकादित्वादुभयपदवृद्धिः । आधिदैविकम् । आधिभौतिकम् । ऐहलौकिकम् । पौरलौकिकम् । इत्यादि ।

॥६।१।६१॥ यादौ तद्धिते परे शिरसः शीर्षन्नादेशः । शीर्षण्यः स्वरः । 'ये चाभाव—' इति प्रकृत्या वा । केशेषु । शीर्षण्याः केशाः शिरस्या वा । 'अचि शीर्षः' ॥६।१।६२॥ अजादौ तद्धिते शिरसः शीर्षादेशः । हस्तिशिरसोपत्यं हास्तिशीर्षिः । स्थूलशिरस इदं स्थौलशीर्षम् । अध्यात्मादेरिति । अध्यात्मे भवमिति । आत्मन्यधि अध्यात्मम् । विभक्त्यर्थेऽव्ययीभावः । 'अनश्च' इति टच् । आधिदैविकम् । आधिभौतिकमिति । अधिदेवे भवमधिभूते भवम् । पूर्ववदव्ययीभावः । ततष्ठञ् । ऐहलौकिकमिति । इह लोके भवम् । अध्यात्मादिराकृतिगणः । इत्यादीत्यादिना वार्तिकोक्ताः संगृह्यन्ते । तथोक्तम् ।

'समानस्य तदादेश्च अध्यात्मादिषु चेष्यते ।
ऊर्ध्वं दमाच्च देहाच्च लोकोत्तरपदस्य च ॥
मुखपार्श्वतसोरीयः कुग् जनस्य परस्य च ।
ईयः कार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा ।
मध्यो मध्यं दिनण् चास्माल्लुक् स्थाम्नो अजिनात्तथा' ।

इति । उदाहरणानि । समाने भवं सामानिकम् । सामानग्रामिकम् । और्ध्वदमिकम् । और्ध्वदेहिकम् । पारलौकिकम् । मुखतीयम् । पार्श्वतीयम् । जनकीयम् । परकीयम् । मध्यीयम् । माध्यमः । मध्यमीयम् । मध्ये भवं मध्यन्दिनम् । अश्वत्थामा । वृकाजिनम् । 'स्थाम्नोकारः'

---

१. C, D_1, D_2 drop पारलौकिकम्; D_5 has पारलौकिकम् । ऐहलौकिकमित्यादि ।. २. तद्धिते परे Bo_1. ३. For स्थाम्नो…लुक्—उभयत्राणो लुक् Bo_1, Do_3, Do_4.

इत्यप्रत्ययः । उत्तरत्र चाणो लुक् । स्पष्टत्वात् त्यक्तान्यष्टादश । 'दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' ॥४।३।५६॥ दृतौ भवं दार्तेयम् । कौक्षेयम् । कालशेयम् । वास्तेयम् । आस्तेयम् । आहेयम् । कुक्षेः शरीरावयवत्वाद्यति प्राप्ते धूमादित्वाद्वुञि च शेषेभ्योणि । अस्तीति निपातो न तिङन्तः । 'ग्रीवाभ्योण् च' ॥४।३।५७॥ चात् ढञ् । यतोपवादः । ग्रीवायां भवं ग्रैवं ग्रैवेयम् । 'गम्भीराञ् ञ्यः' ॥४।३।५८॥ अणोपवादः । गाम्भीर्यम् । बहिर्देवपञ्चजनाच्चेति वक्तव्यम् । बाह्यम् । दैव्यम् । पाञ्चजन्यम् । चातुर्मास्य ऋतौ । अन्यत्र चातुर्मासः[1] । 'द्विगोर्लुक् —' इति ठञो लुक् । 'अव्ययीभावाच्च' ॥४।३।५९॥ अणोपवादः । परिमुखादेरेवाव्ययीभावात् । पारिमुख्यम् । अन्यत्र न । औपकुलम् । परिमुख । परिहनू[2] । पर्योष्ठ । पर्युलूखल । परिसीर[3] । उपसीर । उपस्थूल । उपकलाप । अनुपथ । अनुगङ्ग । अनुतिल । अनुसीर[4] । अनुमाष । अनुयव । अनुयूप[5] । अनुवंश ॥ 'अन्तःपूर्वपदाट्ठञ्' ॥४।३।६०॥ अव्ययीभावात् । आन्तर्गेहिकम् । अव्ययीभावात् किम् । अन्तःकरणे भव आन्तःकरणः ॥ 'ग्रामात् पर्यनुपूर्वात्' ॥४।३।६१॥ ठञ् । अव्ययीभावादित्येव । पारिग्रामिकः । आनुग्रामिकः ॥ 'जिह्वामूलाङ्गुलेश्छः' ॥४।३।६२॥ यतोपवादः । जिह्वामूलीयम् । अङ्गुलीयम् ॥ 'वर्गान्ताच्च' ॥४।३।६३॥ कवर्गीयम् ॥ 'अशब्दे यत्खावन्यतरस्याम्' ॥४।३।६४॥ वर्गान्तात् शब्दादन्यस्मिन् प्रत्ययार्थे पक्षे छः । वासुदेववर्ग्यः । वासुदेववर्गीणः । वासुदेववर्गीयः । शब्दे तु कवर्गीयो वर्णः । 'कर्णललाटात् कनलंकारे' ॥४।३।६५॥ तत्र भवेलंकारे वाच्ये । यतोपवादः । कर्णिका । ललाटिका । अलंकारे किम् । कर्ण्यम् । ललाट्यम् । 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' ॥४।३।६६॥ व्याख्यातव्यस्य नाम व्याख्यातव्य-

---

१. चतुर्मासः । Bc1, Dc2, Dc3. २. परिहनु Dc3. ३. परिसार । उपसार । Bc1, Dc1, Dc3, Dc4. ४. अनुसित Bc1, Dc3, Dc4. ५. अनुसूय Bc1, Dc3, Dc4.

नाम तस्मात् तस्य व्याख्यानमित्यर्थे यथास्वं प्रत्ययाः । चात् तत्र भवेपि । सुपां व्याख्यानो ग्रन्थः सौपः । तैङः । सुप्सु भवं सौपम् । व्याख्यातव्यनाम्नः किम् । पाटलिपुत्रस्य व्याख्यानी सुकोशला । पाटलिपुत्रं सुकोशलया व्याख्यायते एवंसंनिवेशमिति । न तु पाटलिपुत्रशब्दो व्याख्यातव्यनाम । भवव्याख्यानयोरयं युगपदधिकारोपवादविधानार्थः । 'बह्वचोन्तोदात्ताट्ठञ्' ॥४।३।६७॥ बह्वचो व्याख्यातव्यनाम्नोन्तोदात्तात् ठञ् स्यात् भवव्याख्यानयोरर्थयोः । षात्वणात्विकम् । समासस्वरेणान्तोदात्तः । बह्वचः किम् । द्व्यचष्ठकं वक्ष्यति । एकाच् प्रत्युदाह्रियते । सौपम् । अन्तोदात्तात् किम् । संहितायां भवं तस्या व्याख्यानं वा सांहितम् । संहिता गतिस्वरेणाद्युदात्ता । 'क्रतुयज्ञेभ्यश्च' ॥४।३।६८॥ भवव्याख्यानयोष्ठञ् । अनन्तोदात्तार्थ आरम्भः । क्रतुभ्यः । आग्निष्टोमिकः । यज्ञेभ्यः । पाकयज्ञिकः । क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योपि यथा स्यात् । पाञ्चौदनिकः । बहुवचनं स्वरूपविधिनिरासार्थम् । 'अध्यायेष्वेवर्षेः' ॥४।३।६९॥ ऋषिसहचरितेषु ग्रन्थेषु साहचर्यादृषिशब्दा वर्तन्ते । तेभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोष्ठञ् स्यात् । अध्यायेष्वेव प्रत्ययार्थविशेषणेषु । वासिष्ठस्य व्याख्यानम् । तत्र भवो वासिष्ठिकोध्यायः । अध्यायेषु किम् । वासिष्ठी ऋक् । 'पौरोडाशपुरोडाशात् ष्ठन्' ॥४।३।७०॥ भवव्याख्यानयोः । पुरोडाशाः पिष्टपिण्डास्तेषां संस्कारको मन्त्रः पौरोडाशः । तस्या व्याख्यानस्तत्र भवो वा पौरोडाशिकः । पौरोडाशिकी । षित्त्वात् ङीष् । अस्मात् बह्वचोन्तोदात्ताट्ठञि प्राप्ते । पुरोडाशसहचरितो मन्त्रः पुरोडाशः[1] । अस्मान्मध्योदात्तादणि पुरोडाशिकः । पुरोडाशिकी[2] । 'छन्दसो यदणौ' ॥४।३।७१॥ भवव्याख्यानयोः । द्व्यचष्ठकि प्राप्ते । छन्दस्यः । छान्दसः । 'द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्' ॥४।३।७२॥ भवव्याख्यानयोः । ठञणोरपवादः । द्व्यचः । ऐष्टिकः । पाशुकः[3] । ऋकारान्तात् । चातुर्होतृकः । ब्राह्मणः । ब्राह्मणिकः । एषु

1. पुरोडाशः Bc1, Do4. 2. After it—षित्वात् ङीष् । Do3. 3. पाचकः । Do4.

तत आगतः ॥४।३।७४॥

पञ्चम्यन्तादागतेर्थे यथास्वमणादयः स्युः ॥ मथुराया आगतो माथुरः ।

ठगायस्थानेभ्यः ॥४।३।७५॥

स्वामिभागोत्पत्तिस्थानार्थेभ्यष्ठक् स्यादागतेर्थे ॥ [2]आपणिकः॥

ठञः । ऋक् । आर्चिकः । अत्राणः । प्रथम । प्राथमिकः । अध्वर । आध्वरिकः । पुरश्चरण । पौरश्चरणिकः । नामाख्यातग्रहणं संघातविगृहीतार्थम् । नामाख्यातिकः । नामिकः । आख्यातिकः । 'अणृगयनादिभ्यः' ॥४।३।७३॥ भवव्याख्यानयोः । ठञादेरपवादः । [3]आर्गयनः । अण्ग्रहणं वृद्धादन्तोदात्तादण्बाधकस्य छस्य बाधके ठञि पुनर्वचनेन बाधिते छः स्यात् तद्बाधार्थम् । पादव्याख्यानः । ऋगयन । पादव्याख्यान । [4]छन्दोमान । छन्दोभाषा । छन्दोविचिति । [5]छन्दोविजिति न्याय । पुनरुक्त । निरुक्त । व्याकरण । निगम । वास्तुविद्या । अङ्गविद्या । क्षत्रविद्या । उत्पात । उत्पाद । संवत्सर । मुहूर्त । निमित्त । उपनिषद् । शिक्षा ।

ततः । स्रुघ्नादागच्छन् वृक्षमूलादागत इत्यत्रामुख्यान्न स्यात् प्रत्ययः । 'ततः' इति 'तद्गच्छति—' इति यावदनुवर्तते । 'आगतः' इति 'प्रभवति' इति यावत् ।

ठगाय । अणोपवादः । छं तु परत्वाद्बाधते । बहुवचनं स्वरूपविधिनिरासार्थम् । स्पष्टत्वात् त्यक्तानि त्रयोदश । 'शुण्डिकादिभ्योण्' ॥४।३।७६॥ तत आगत इत्यर्थे । अण्ग्रहणमुदपानादण्बाधकस्योत्साद्यञो बाधनार्थम् । शुण्डिकात् शुण्डिकाया वा आगतः शौण्डिकः । शुण्डिक । कृकण । पर्ण । स्थण्डिल । उदपान । उपल । [6]तीर्थभूमि । तृण । 'कृकणपर्णाद् भारद्वाजे' इति

---

१. Dropped D_4. २. Before it—आपणादागतः P. ३. आर्गयणः । Bc_3, Dc_4, Dc_3. ४. छन्दोगान Bc_1, Bc_3, Dc_4, Dc_3. ५. छन्दोविजित Bc_1, Dc_3, Dc_1 have छन्दोविचित. ६. तीर्थ । भूमि Bc_1, Bc_3, Dc_4, Dc_1.

छस्य तीर्थाद्धुमादिवुञोन्येभ्यः आयस्थानठकोपवादः । 'विद्यायोनिसंबन्धेभ्यो वुञ्' । ४।३।७७॥ तत आगत इत्यर्थे । अणोपवादः । छं तु परत्वाद्बाधते । औपाध्यायकः । पैतामहकः । 'ऋतष्ठञ्' ॥४।३।७८॥ विद्यायोनिसंबन्धेभ्य ऋदन्तेभ्यस्तत आगतेर्थे ठञ् । वुञोपवादः । हौतृकम् । मातृकम् । 'पितुर्यच्च' ॥४।३।७९॥ चात् ठञ् । तत आगते । पित्र्यम् । पैतृकम् । 'गोत्रादङ्कवत्' ॥४।३।८०॥ अपत्यमात्रं गोत्रम् । अङ्कग्रहणेन तस्येदमर्थसामान्यं लक्ष्यते । ततश्च गोत्रात्तस्येदंवत्प्रत्ययः स्यादिति सूत्रार्थः । तथा च 'गोत्रचरणाद्वुञ्' 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' । इति तस्येदमधिकारे गोत्राद्विधीयमानयोर्वुञणोरयमतिदेशः । यथा औपगवानामङ्क औपगवकः । एवमौपगवेभ्य आगतोपि । एवं नाडायनकः । बैदः । दाक्षः । 'हेतुमनुष्येभ्योन्यतरस्यां रूप्यः' ॥४।३।८१॥ हेतुभ्यः । समादागतं समरूप्यम् । समीयम् । गहादित्वाच्छः । मनुष्यग्रहणमहेत्वर्थम् । देवदत्तरूप्यम् । दैवदत्तम् । 'मयट् च' ॥४।३।८२॥ हेतुमनुष्येभ्यस्तत आगतेर्थे । सममयम् । देवदत्तमयम् । टो ङीबर्थः । सममयी । योगविभागो यथासंख्यनिरासार्थः । 'प्रभवति' ॥४।३।८३॥ पञ्चम्यन्तादत्रार्थे यथास्वम् । हिमवतः प्रभवति प्रकाशते प्रथमत उपलभ्यते हैमवती गङ्गा । 'विदूराञ्ञ्यः' ॥४।३।८४॥ विदूरात् प्रभवति वैदूर्यो मणिः । ननु[1] असौ बालवायात् प्रभवति विदूरे तु संस्क्रियते इति चेत् सत्यम् । बालवायस्यापि विदूरमिति संज्ञा । अथवा बालवायस्य विदूर आदेशः । 'तद्गच्छति पथिदूतयोः' ॥४।३।८५॥ द्वितीयासमर्थाद् गच्छतीत्यर्थे यथास्वं प्रत्ययाः यो गच्छति स पन्था दूतो वा स्यात् । स्रुघ्नं गच्छति स्रौघ्नः । पन्था दूतो वा । अनयोः किम् । स्रुघ्नं गच्छति सार्थः । 'अभिनिष्क्रामति द्वारम्' ॥४।३।८६॥ स्रुघ्नमभिनिष्क्रामति स्रौघ्नम् । कान्यकुब्जद्वारम् । निष्क्रमणसाधनमपि द्वारं कर्तृत्वेन विवक्ष्यते । द्वारं किम् । स्रुघ्नमभिनिष्क्रामति जनः । 'अधिकृत्य कृते ग्रन्थे'

१. ननु dropped Dc_2, Dc_3, Dc_4.

सोऽस्य निवासः ॥४।३।८९॥

प्रथमान्तान्निवासोपाधिकात् षष्ठ्यर्थे यथास्वं प्रत्ययः ॥ मथुरा निवासोस्य माथुरः ।

॥४।३।८७॥ द्वितीयान्ताद्यथाविहितमधिकृत्य कृतो ग्रन्थ इत्यर्थे । सुभद्रामधिकृत्य कृतो ग्रन्थ सौभद्रः । आख्यायिकाभ्यः परस्य प्रत्ययस्य बहुलं लुप् । वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता । उर्वशी । न च स्यात् । भैमरथी । अनाख्यायिकाभ्योपि । जानकीहरणम् । रुक्मिणीहरणम् । 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' ॥४।३।८८॥ अधिकृत्य कृते ग्रन्थे । अणोपवादः । शिशुक्रन्दीयः । यमसभीयः । द्वन्द्वात् । वाक्यपदीयम् । दैवासुरम् । गौणमुख्यम् । राक्षोसुरम् । अत्राण् इष्यते । इन्द्रजननादिभ्यः । इन्द्रजननीयम् । सीतान्वेषणीयम् । आकृतिगणोयम् ।

सोस्य । यत्र संप्रत्युष्यते स निवसन्त्यस्मिन्निति निवासो देशः । स्पष्टत्वात् त्यक्तान्येकादश । 'अभिजनश्च' ॥४।३।९०॥ प्रथमासमर्थादभिजनोपाधिकात् षष्ठ्यर्थे यथास्वं प्रत्ययाः । अभिजनः पूर्वबान्धवाः । तत्संबन्धाद्देशोप्यभिजन इत्यर्थः । यत्र पूर्वैरुषितं स देशोभिजन इत्यर्थः । स्रुघ्नोभिजनोस्य स्रौघ्नः । योगविभाग उत्तरत्राभिजनस्यैव संबन्धार्थः । 'आयुधजीविभ्यश्छः पर्वते' ॥४।३।९१॥ पर्वतवाचिनः प्रथमासमर्थादभिजनात् षष्ठ्यर्थे छः स्यादायुधजीविनोभिधातुम् । हृद्रोलः पर्वतोभिजनो येषामायुधजीविनां ते हृद्रोलीयाः । लोहितगिरीयाः । आयुधजीविभ्यः किम् । ऋक्षोदः पर्वतोभिजन एषां ब्राह्मणानां त आर्क्षोदाः । पर्वतात् किम् । सांङ्काश्यका आयुधजीविनः ।

---

१. अणादयः स्युः C, D_5; प्रत्ययाः D_4, D_1; प्रत्ययः स्यात् B_8. २. लक् Dc_4, Dc_3. ३. स च Bc_1. ४. अभिजनाः Bc_1. ५. उच्यते Dc_3, Dc_4. ६. From यत्र…इत्यर्थः dropped Dc_2. ७. सङ्काश्यका Bc_3.

'शण्डिकादिभ्यो ञ्यः' ॥४।३।९२॥ सोस्याभिजन इत्यत्र विषये। अणोपवादः। शाण्डिक्यः। शाण्डिक। सर्वसेन। सर्वकेश। शक। शङ्कु। शट। रंक। बोध। 'सिन्धुतक्षशिलादिभ्योणञौ' ॥४।३।९३॥ सिन्ध्वादिभ्योण् तक्षशिलादिभ्योञ् स्यात् सोस्याभिजन इत्यर्थे। सैन्धवः। सिन्धु। वर्णु। गधार। मधुमत्। कम्बोज। साल्व। कश्मीर। किष्किन्धा। गब्दिका। उरस्। यत्र कच्छादिषु पठ्यन्ते तेभ्यस्तत एवाणि सिद्धे मनुष्यवुञो बाधनार्थं वचनम्। गन्धार-किष्किन्धादीनामवृद्धादपि इति जनपदवुञि प्राप्ते वचनम्। तक्षशिला-दिभ्यः। ताक्षशिलः। तक्षशिला। वत्सोद्धरणा। कौमेदुर। काण्डधारण। ग्रामणी। सुमङ्गल। कंस। किन्नर। संकुचित। सिंहकर्ण। सिंह। क्रोष्टुकर्ण। बर्बर। अवसान। वृद्धाच्छे प्राग्दीव्यतेणि। 'तुदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' ॥४।३।९४॥ तूद्यादिभ्यो यथासंख्यं ढगादयः सोस्याभिजन इत्यर्थे। तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। 'भक्तिः' ॥४।३।९५॥ भज्यते सेव्यत इति भक्तिः। कर्मणि क्तिन्। प्रथमासमर्थात् भक्त्युपाधिकात् षष्ठ्यर्थे यथास्वम्। स्रुघ्नो भक्तिरस्य स्रौघ्नः। 'अचित्ताददेशकालाट्ठक्' ॥४।३।९६॥ सोस्य भक्तिरित्यनुवर्तते। अणोपवादः। वृद्धाच्छं परत्वाद्बाधते। अपूपो भक्तिरस्य आपूपिकः। अचित्तात् किम्। देवदत्तः। अदेश-कालात् किम्। स्रौघ्नः। ग्रैष्मः। 'महाराजाट्ठञ्' ॥४।३।९७॥ महाराजो भक्तिरस्य माहाराजिकः। प्रत्ययान्तकरणं ञित्स्वरेणाद्युदात्तार्थम्। 'वासुदेवार्जुनाभ्यां वुन्' ॥४।३।९८॥ वासुदेवो भक्तिरस्य वासुदेवकः। अर्जुनकः। वासुदेवोत्र देवता। क्षत्रियात्तु 'गोत्रक्षत्रियाख्येभ्यः—'

१. Before it—सर्वशर्कर Bc_1, Bc_3, Dc_3, Dc_4. २. शत Dc_4. ३. शभ Bc_3. ४. कर Bc_3, Dc_3, Dc_4. ५. शाङ्किक Dc_3, Dc_4. ६. सुसकल Bc_1; सुशकल Bc_3, Dc_3, Dc_4. ७. सिंहकोष्ठ। कर्णकोष्ठ Bc_1, Dc_3.

इति वुञ् । 'गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्' ॥४।३।९९॥ अणोपवादः । वृद्धाच्छं पदत्वाद्बाधते । ग्लौचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । क्षत्रियाख्येभ्यः । नाकुलकः । आख्याग्रहणं प्रसिद्धक्षत्रियपरिग्रहार्थम् । तेन विद्वान् क्षत्रियो भक्तिरस्येत्यादौ न । न हि विद्वच्छब्दः क्षत्रिये प्रसिद्धः । बहुलग्रहणात् क्वचिन्न । पाणिनो भक्तिरस्य पाणिनीयः । पौरवीयः । 'जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने' ॥४।३।१००॥ ये जनपदिनो जनपदस्वामिनः क्षत्रिया बहुवचने जनपदेन एकशब्दाः स्युस्तेषां सर्वं प्रत्ययः[१] प्रकृतिश्च जनपदवत् स्यात् सोस्य भक्तिरित्यस्मिन् विषये 'जनपदतदवध्योश्च' इत्यत्र प्रकरणे ये प्रत्यया उक्तास्ते जनपदिभ्योऽस्मिन्नर्थेऽतिदिश्यन्ते । यथा अङ्गा जनपदो भक्तिरस्य आङ्गकः ।[२] 'जनपदतदवध्योश्च' इति वुञ् । सर्वग्रहणं प्रकृत्यतिदेशार्थम् । स च द्व्येकयोरतिदेशं प्रयोजयति । वृद्धिनिमित्तेषु वुञादिषु विशेषो नास्तीति मद्रवृज्योः क्वनि विशेषः । मद्रस्यापत्यम् । 'द्व्यञ्मगधकलिङ्गसूरमसादण्' । माद्रः । वृजिशब्दादपि 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' । वार्ज्यः । माद्रो वार्ज्यो वा भक्तिरस्य मद्रकः वृजिकः । प्रकृतेरल्पतादिश्यते । जनपदिनां किम् । पाञ्चाला[३] ब्राह्मणा भक्तिरस्य पाञ्चालः[४] । बहुवचने किम् । एकत्वद्वित्वयोरसरूपादपि यथा स्यात् । आङ्गः आङ्गौ वा भक्तिरस्य आङ्गकः[५] । समानशब्दानां किम् । अनुखण्डो जनपदस्तस्य पौरवो राजा स भक्तिरस्य पौरवीयः ।

१. सर्वं प्रत्ययाः Dc3. २. After it—तद्वदङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः । Dc3, Dc4. ३. पञ्चाला Dc3. ४. पञ्चालः Dc3. ५. आङ्गिकः Dc4.

तेन प्रोक्तम् ॥४।३।१०१॥

तृतीयान्तात् प्रोक्तेऽर्थे यथास्वमणादयः स्युः ॥ मनुना प्रोक्तो मानवो धर्मः ।

तेन । प्रकर्षेणोक्तं प्रोक्तं न तु कृतम् । स्पष्टत्वात् त्यक्तानि चतुर्दश । 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' ॥४।३।१०२॥ अणोपवादः । अयं च छण् छन्दस्याभिधेय इष्यत इति 'शौनकादिभ्यश्छन्दसि' इत्यत्रानुवर्तयितव्यमाहुः । तित्तिरिणा प्रोक्तमधीयत तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः । छन्दो ब्राह्मणानीत्यध्येतृवेदितृविषयता । छन्दसि वाच्ये किम् । तित्तिरिणा प्रोक्तः श्लोक इत्यत्र न । 'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' ॥४।३।१०३॥ छस्यापवादः । प्रोक्तार्थे । काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः । कौशिकिनः । छन्दोधिकारविहिताना च तद्विषयतेष्यत इति कल्पस्यापि तद्विषयता । 'शौनकादिभ्यश्छन्दसि' इत्यत्रानुवर्त्यम् । छन्दस्यभिधेय एव । काश्यपीयं शास्त्रम् । ऋषिभ्यां किम् । अनृषिणा काश्यपेन प्रोक्तः कल्पः काश्यपीयः । ण उत्तरवृद्ध्यर्थः । 'कलापिवैशम्पायनान्तेवासिभ्यश्च' ॥४।३।१०४॥ णिनिः । तेन प्रोक्ते । अणोपवादः । छं तु परत्वाद्बाधते । कलाप्यन्तेवासिनश्चत्वारः हरिद्रुः छगली तुम्बुरुः उलप इति । वैशम्पायनान्तेवासिनो नव ते च चरक इति वैशम्पायनस्य संज्ञा तत्संज्ञया चरका इत्युच्यन्ते । आलम्बिः । पलिङ्गः । कमलः । एते त्रयः प्राच्याः । ऋचाभः । आरुणिः । ताण्ड्यः । एते त्रयो मध्यमाः । श्यामायनः । कठः । कलापीति एते त्रय उदीच्याः । अत्र

---

१. तेनेति before it in B1. २. प्रोक्तार्थे C, D1. ३. D1 drops यथास्वम्. ४. स्युः dropped B1, B2, D1, D4. ५. °यतेत्युच्यत Dc3. ६. °त्रानुवृत्तः Dc2. ७. च शास्त्रम् Bc1. ८. हरिद्रु Bc1. ९. तुम्बुरु Bc1, १०. आरुणः Bc1, Dc1, Dc3, Dc4. ११. श्यामानवः Dc2, Dc4.

साक्षाच्छिष्या गृह्यन्ते न शिष्यशिष्याः । कलापिखाण्डायनग्रहणात् । तथा हि वैशम्पायनशिष्यः कलापीति तच्छिष्या वैशम्पायनशिष्या एवेति किं कलापिग्रहणेन । तथा वैशम्पायनशिष्यः कठः । तच्छिष्यः खाण्डायनः । तस्य किं शौनकादिपाठेन । तदेतत्साक्षाच्छिष्यग्रहणे लिङ्गम् । कलापिशिष्यास्तावत् । हरिद्रुणा प्रोक्तमधीयते हरिद्रविणः । तौम्बुरविणः । औलपिनः । छगलिनो ढिनुकं वक्ष्यति । वैशम्पायनशिष्याः । आलम्बिनः । पालिङ्गिनः । कामलिनः । आर्चाभिनः । आरुणिनः । ताण्डिनः । कठाल्लुकं वक्ष्यति । कलापिनश्चाणम् । 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' ॥४।३।१०५॥ तृतीयान्ताद् णिनिः स्यात् पुराणेन चिरन्तनेन ऋषिणा प्रोक्तानि चेद्ब्राह्मणानि कल्पाश्च भवन्ति । ब्राह्मणेषु तावत् । भाल्लवेन प्रोक्तं ब्राह्मणमधीयते[1] भाल्लविनः । ऐतरेयिणः । कल्पेषु । पैङ्गी कल्पः । न चायं योगश्छन्दोधिकारेनुवर्तते इति कल्पेषु तद्विषयता न । पुराणप्रोक्तेषु किम् । याज्ञवल्क्यानि ब्राह्मणानि । आश्मरथः[3] कल्पः । याज्ञवल्क्यादयोर्वाचीना इत्याख्यानेषु वार्ता । प्रतिपदं ब्राह्मणेषु यः प्रत्ययस्तस्य[2] तद्विषयता विधीयते इति कृत्वा याज्ञवल्क्यानीत्यत्र[4] तद्विषयता न । न हि याज्ञवल्क्यशब्दात् कण्वादिपाठेन विधीयमानोण् प्रतिपदं ब्राह्मणे विधीयते । 'शौनकादिभ्यश्छन्दसि' ॥४।३।१०६॥ णिनिस्तेन प्रोक्तमित्यर्थे छन्दसि वाच्ये । छाणोरपवादः । शौनकिनः । काठशाठिनः । छन्दसि वाच्ये किम् । शौनकीया शिक्षा । शौनक । वाजसनेय । शार्ङ्गरव । शापेय । शाष्पेय । खाण्डायन । स्तम्भ । स्कन्ध । देवदर्शन । रज्जुभार । रज्जुकण्ठ । कठशाठ । कषाय । तल । साङ्गरव । पुरुषाशक ।[5] 'कठचरकाल्लुक्' ॥४।३।१०७॥ प्रोक्तप्रत्ययस्य लुक् । कठेन

---

१. °मयमधी° Dc3. २. यः प्रत्ययस्तस्य before it Bc1, Dc3. ३. अश्मरथ्यः Bc1, Dc1, Dc4. ४. याज्ञवल्क्यानि ब्राह्मणानीत्यत्र Dc4. ५. Before it—तलवकार and after it–अश्वपेय Dc3, Bc1; before it–तलवकार Dc4.

प्रोक्तमधीयते कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्य लुक्। ततः 'तदधीते—' इत्यण्। तस्य प्रोक्ताल्लुक्। चरकेण प्रोक्तमधीयते। प्रोक्तप्रत्ययस्य लुक्[1]। प्रोक्तेण्। पूर्ववल्लुगादि। छन्दस्यभिधेये एव। काठाः श्लोकाः। 'कलापिनोण्' ॥४।३।१०८॥ वैशम्पायनान्तेवासित्वात् प्राप्तस्य णिनेरपवादः। कलापिना प्रोक्तमधीयते कालापाः। 'इनण्यनपत्ये' इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापि-कुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डि[2]सूकरसद्मसुपर्वणामुप—संख्यानमिति टिलोपः। यथाप्राप्तमिति सिद्धेण्ग्रहणमधिकविधानार्थम्। तेन माथुरादेर्वृद्धाच्छ्यण् स्यात्। माथुरेण प्रोक्ता माथुरी वृत्तिरित्यादि सिध्यति। 'छगलिनो ढिनुक्' ॥४।३।१०९॥ कलापिशिष्यत्वात् प्राप्तस्य णिनेरपवादः। छगलिना प्रोक्तमधीते छागलेयिनः। 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' ॥४।३।११०॥ णिनिरनुवर्तते। न ढिनुक्। भिक्षुसूत्रे प्रत्ययार्थौपाधौ पाराशर्यात्। नटसूत्रे शिलालि-शब्दात्। अनयोश्छन्दस्त्वमुपचारात् ततस्तद्विषयता। पाराशर्येण प्रोक्तं सूत्रमधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः। अन्यत्र पाराशरम्। शैलालम्। 'कर्मन्दकृशाश्वादिनिः' ॥४।३।१११॥ आभ्यामिनिः स्याद् भिक्षुनटसूत्रयोः। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः। अन्यत्र कार्मन्दम्। कार्शाश्वम्। 'तेनैकदिक्' ॥४।३।११२॥ तृतीयान्तात् एकदिगित्यर्थे यथास्वम्। सुदाम्ना समानदिक् सौदामिनी। तेनेति प्रकृतेर्ग्रहणं छन्दोधिकार-निवृत्त्यर्थम्। 'तसिश्च' ॥४।३।११३॥ तेनैकदिगिति विषये तसिश्च प्रत्ययः स्यात्। सुदामतः। स्वरादित्वादव्ययत्वम्। 'उरसो यच्च' ॥४।३।११४॥ चात् तसिः। उरसा एकदिक् उरस्यः। उरस्तः। 'उपज्ञाते' ॥४।३।११५॥ सदेव विनोपदेशं ज्ञातमुपज्ञातम्। अस्मिन्नर्थे तृतीयान्ताद्यथास्वम्। पाणिनिनोपज्ञातं पाणिनीयम्।

१. From प्रोक्त to लुक् omitted Dc2. २. खण्ड for शिखण्डि Bo1.

कृते ग्रन्थे ॥४।३।८७॥

तृतीयान्तात् कृतेर्थेणादयः स्युर्ग्रन्थे वाच्ये । वररुचिना कृतो वाररुचो ग्रन्थः ।

तस्येदम् ॥४।३।१२०॥

षष्ठ्यन्तादिदमर्थेणादयः स्युः ॥ उपगोरिदमौपगवम् । दैवम् ।

कृते । कृतमित्युत्पादितमुच्यते । स्पष्टत्वात् त्यक्तं सूत्रत्रयम् । 'संज्ञायाम्' । ४।३।११७॥ तृतीयान्तात् कृतेर्थे यथास्वम् । माक्षिकम् । सारघम् । मधुसंज्ञा । 'कुलालादिभ्यो वुञ्' ॥४।३।११८॥ तेन कृतमित्यर्थे संज्ञायाम् । कुलालेन कृतं कौलालकम् । कुलाल । वरूढ । चण्डाल । निषाद । कर्मार । सेना । देवराज । परिषद् । वधू । कुरु । अनडुह । ब्रह्मन् । कुम्भकार । श्वपाक । 'क्षुद्राभ्रमरवटरपादपादञ्' ॥४।३।११९॥ तेन कृतं संज्ञायाम् । अणोपवादः । स्वरे विशेषः । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ।

तस्येदम् । यथाविहितमणादयो घादयश्च स्युरित्यर्थः । तस्येत्यत्र षष्ठ्यर्थमात्रं तत्संबन्धिमात्रं च विवक्षितम् । लिङ्गसंख्याप्रत्यक्षपरोक्षाद्यविवक्षितम् । उपगोः समीपमित्यादौ त्वनभिधानान्न । संवहेस्तु रणिट् च । संवोढुः स्वं सांवहित्रम् । सिद्ध एवात्राण् इडर्थमुपसंख्यानम् । अग्नीधः शरणे रण् भसंज्ञा च । आग्नीध्रम् । समिधामाधाने षेण्यण् । सामिधेन्यो मन्त्रः । सामिधेनी ऋक् ।

---

१. B_1 drops it. २. ग्रन्थो वाररुचः । D_5. ३. तस्येति before it in B_1, D_5, D_1; षष्ठीसमर्थात् D_5. ४. कृतार्थे Dc_4, Dc_3. ५. ब्रह्महन् Bc_1.

रथाद्यत् ॥४।३।१२१॥

रथस्येदं रथ्यम् ।

रथात् । अणोपवादः । रथ्यमिति चक्रं युगं वा । रथाङ्ग एवेष्यते । नान्यत्र । अनभिधानात् । रथसीताहलेभ्यो यद्विधौ तदन्तविधिरुपसंख्यायते । परमरथ्यम् । उत्तमरथ्यम् । स्पष्टत्वात् त्यक्तानि द्वादश । 'पत्रपूर्वादञ्' ॥४।३।१२२॥ पतन्त्यनेनेति पत्रं वाहनम् । तत्पूर्वादर्थादञ् स्यात् तस्येदमित्यर्थे । यतोपवादः । आश्वरथं चक्रम् । औष्ट्ररथम् । 'पत्राध्वर्युपरिषदश्च' ॥४।३।१२३॥ पत्रं वाहनं तद्वाचिनः प्रातिपदिकादध्वर्युपरिषद्भ्यां चाञ् स्यात् । अणोपवादः । पत्राद्वहनीये । अश्वस्येदं वहनीयमाश्वम् । आध्वर्यवम् । पारिषदम् । 'हलसीराट्ठक्' ॥४।४।८१॥ अणोपवादः । हलस्येदं हालिकम् । सैरिकम् । 'द्वन्द्वाद्वुन् वैरमैथुनिकयोः' ॥४।३।१२५॥ द्वन्द्वाद्वुन् स्याद्वैरे विवहने च प्रत्ययार्थविशेषणे । छं तु परत्वाद्बाधते । वैरे तावत् काकोलूकिका । मैथुनिकायाम् । अत्रिभारद्वाजिका । वैरे देवासुरादिभ्यो निषेधो वाच्यः । दैवासुरम् । राक्षोसुरम् । 'गोत्रचरणाद्वुञ्' ॥४।३।१२६॥ अणोपवादः । छं तु परत्वाद्बाधते । गोत्रात् ग्लौचुकायनकम् । औपगवकम् । चरणाद्धर्माम्नाययोरिष्यते । काठको धर्म आम्नायो वा । 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' ॥४।३।१२७॥ अञन्तायञन्तादिञन्तात् प्रातिपदिकादण् स्यात् सङ्घादिषु । प्रत्ययार्थविशेषणेषु । तस्येदंविषये । वुञोपवादः । घोषग्रहणमप्यत्र कार्यम् । तेन वैषम्याद्यथासंख्यं न । अञन्तात् । वैदः सङ्घोङ्को लक्षणं घोषो वा । यञन्तात् गार्गः सङ्घोङ्को लक्षणं घोषो वा । इञन्तात् । दाक्षः सङ्घोङ्को लक्षणं घोषो वा । लक्षणं लक्ष्यस्यैव चिह्नभूतं स्वम् । यथा विदानां विद्या । अङ्कस्तु गवादिस्थोपि गवादीनां स्वं न स्यात् । णित्करणं ङीबर्थम् । वृद्धिनिमित्तस्येति पुंवन्निषेधार्थं च ।

---

१. राक्षसपुरम् । Dc4 ; रक्षोसुरम् Dc3. २. विदानां Bo1, Dc4, Dc3, Dc1.

वैदी विद्यास्य वैदीविद्यः । 'शाकलाद्वा' ॥४।३।१२८॥ सङ्घादिषु प्रत्ययार्थविशेषणेष्वस्मादण् । चरणलक्षणवुञोपवादः । शाकल्येन प्रोक्तं वेदं विदन्त्यधीयते वा शाकलाः । तेषां[1] सङ्घादिः शाकलः । पक्षे चरणत्वाद्वुञ्[2] । शाकलकः । 'छन्दोगौक्थिकयाज्ञिकबह्वृच-नटाञ्ञ्यः' ॥४।३।१२९॥ सङ्घादयो निवृत्ताः । सामान्येन विधिः । एभ्यो ञ्यः । छन्दोगादेश्चरणत्वाद्धर्माम्नाययोः प्रत्ययार्थविशेषणयोः । तत्साहचर्यान्नटशब्दादपि[3] तयोरेव । छन्दोगानां धर्म आम्नायो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् । 'न दण्डमाणवान्तेवासिषु' ॥४।३।१३०॥ दण्डप्रधाना माणवा दण्डमाणवाः अन्तेवासिनः शिष्यास्तेष्वभिधेयेषु गोत्राद्वुञ् न स्यात् । दाक्षा दण्डमाणवा अन्तेवासिनो वा । 'रैवतिकादिभ्यश्छः' ॥४।३।१३१॥ एभ्यश्छः स्यात् तस्येदमित्यर्थे । गोत्रप्रत्ययान्ता एते । ततः पूर्वेण वुञि प्राप्ते विधिः । रैवतिकीयः । रैवतिक । स्वापिशि[4] । क्षैमधन्वि । गौरग्रीवि । औदमेघि । औदवापि । बैजवापि । 'कौपिञ्जल-हास्तिपदादण्' ॥४।३।१३२॥ आभ्यामण् । गोत्रवुञोरपवादः । कौपिञ्जलः । हास्तिपदः । 'आथर्वणिकस्येकलोपश्च' ॥४।३।१३३॥ आथर्वणिकशब्दादण् । इक इत्येतस्य च लोपः । तस्येदमर्थे । चरणवुञोरपवादः । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा ।

इति शैषिकाणां घादीनामर्थाः समर्थविभक्तयश्चोक्ताः[5] ।

---

१. Omitted Bc_1, Dc_3. २. °वुञ् Dc_4, Dc_3. ३. शब्दादिभ्योपि Dc_4. ४. स्वापिशिक Bc_1, Dc_1, Dc_4. ५. °नामि Dc_4, Dc_3.

ग्रामाद्यखञौ ॥४।२।९४॥

ग्रामाद्यखञौ स्तः[1] शेषेर्थे[2]। अणोपवादः। खस्येनादेशः[3]। ग्रामे जातो ग्रामे भवो ग्रामादागतादिर्वा[5] ग्राम्यः। ग्रामीणः।

अथ प्रकृतिविशेषोपादानेन शैषिकाः प्रत्यया उच्यन्ते।

तत्र तावत् स्पष्टत्वात् त्यक्तमेकं सूत्रं व्याख्यायते। 'राष्ट्रावारपाराद्घखौ'। ४।२।९३॥ राष्ट्राच्छे अवारपारादणि प्राप्ते यथासंख्यं घखयोर्विधिः। जातादौ शेषेर्थे। राष्ट्रे जातो भवः क्रीतादिर्वा राष्ट्रियः। अवारपारीणः। विगृहीताद्विपरीताच्च अवारपारात् ख इष्यते। अवारीणः। पारीणः। पारावारीणः।

ग्रामात्। **शेषेर्थे** इति। जातादौ शेषाधिकारविहितेर्थे इत्यर्थः। **अणोपवाद** इति। महोत्सर्गस्य प्राग्दीव्यतीयस्याणोपवाद इत्यर्थः। ननु चाणोपवादश्छो ग्रामशब्दात् प्राप्नोति तस्यापवाद इति वाच्यम्। सत्यम्। अणोपवाद इति लक्षणं[6] तदपवादस्यापवाद इत्यस्यार्थस्य। एवं चेच्छस्यापवाद इत्येव वाच्यं किं लक्षणेन। सत्यम्। तथाप्यत्र प्रकरणे विधीयमाना ढकञ्ठगादयः सर्वेणोपवादा इति दर्शयितुं तथोक्तम्। **खस्येनादेश** इति। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'। इत्यनेन। खञो ञकारो 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तार्थः। ग्रामणीभार्य इत्यत्र 'वृद्धिनिमित्तस्य च—' इति पुंवद्भावनिषेधार्थश्च। स्पष्टत्वात् त्यक्तं सूत्रद्वयम्। 'कत्र्यादिभ्यो ढकञ्'॥४।२।९५॥ शेषेर्थे[7]। कात्रेयकः।

---

१. B_1 drops ग्रामाद्यखञौ स्तः. २ Dropped D_2. ३. शेषे C, D_3, B_1. ४. खस्येनः C. ५. °दागतो वा B_2, D_6. ६. उपलक्षणं Dc_3. ७. शेषार्थे Dc_3.

नद्यादिभ्यो ढक् ॥४।२।९७॥

एभ्यो[1] ढक् स्यात् शैषिकः ॥ नद्यां जातादिर्नादेयः। माहेयः।

दक्षिणापश्चात्पुरसस्त्यक् ॥४।२।९८॥

एभ्यस्त्यक्[2] स्यात् शेषेर्थे ॥ दक्षिणस्यां जातादि-दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः।

कन्त्रि। उम्भि। पुष्कर। पुष्कल। पौदन[3]। मोदन। कुण्डिन। नगरी[4]। माहिष्मती। वर्मती। ग्राम[5]। कुड्याया यलोपश्च। कौडेयकः। 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' ॥४।२।९६॥ कुलादिभ्यो यथासंख्यं श्वादिषु प्रत्ययार्थोपाधिषु ढकञ् स्याज्जातेर्थे[6]। कौलेयकः श्वा। कौलोन्यः। कौक्षेयकोसिः। कौक्षोन्यः। ग्रैवेयकोलंकारः। ग्रैवोन्यः।

नद्यादि। अवृद्धेभ्योणि वृद्धेभ्यश्छे प्राप्ते वचनम्। नदीत्येतत् स्वरूपग्रहणं न संज्ञाग्रहणम्। संज्ञाग्रहणे हि मह्यादीनां पाठो व्यर्थः स्यात्। नदी। मही। वाराणसी। अमरावती। श्रावस्ती। कौशाम्बी। वनकौशाम्बी। खादिरी[7]। पूर्वनगरी। पौर्वनगरेयम्। केचित्तु पूर्वनगरीति पठन्ति विच्छिद्य च प्रत्ययं कुर्वन्ति। पुरि भवं पौरेयम्। वानेयं[8] गौरेयमिति। तदुभयं प्रमाणम्। पोठा[9]। माया। सौल्वा[10]। दार्वा। सेनकी। वडवाया वृषे।

दक्षिणा। अणोपवादः। पश्चात्पुरोभ्यामव्ययाभ्यां साहचर्यात् दक्षिणाशब्दः 'दक्षिणादाच्' इत्याजन्ताव्ययं गृह्यते। स्पष्टत्वात्

---

१. एभ्यो ढक् शेषे B_1, नद्यादिभ्यः D_5. २. B_1 and C drop एभ्यस्तक् स्यात्. ३. यौवन Bc_1, Dc_1, Dc_3, Dc_4. ४. नगर Dc_3, Dc_4. ५. Dropped Bc_1, Dc_1, Dc_3, Dc_4. ६. °ञ्जाताद्यर्थे Dc_3. ७. Before it—काशिकरी Bc_1. ८. वालेयं Dc_2. ९. पावा Bc_1. १०. शाल्वा Bc_1, Dc_3.

द्युप्रागपागुदक्प्रतीचो[1] यत् ॥४।२।१०१॥

एभ्यो यत् स्यात् [2]शेषेर्थे ॥ दिवि जातादिर्दिव्यः। प्राच्यः। [3]अपाच्यः। [4]उदीच्यः। प्रतीच्यः।

त्यक्तं सूत्रद्वयम्। 'कापिश्याः ष्फक्'। ४।२।९९॥ कापिशीशब्दात् छापवादः ष्फक्। शैषिकः। षो ङीषर्थः। कापिशायनं मधु। कापिशायनी द्राक्षा। बाह्ल्युर्दिपर्दिभ्यश्चेति वाच्यम्। बाह्लायनी। और्दायनी। पार्दायनी। 'रङ्कोरमनुष्येऽण् च'। ४।२।१००॥ शेषे। चात् फक्। राङ्कवो गौः। राङ्कवायणो गौः। 'औदेशे ठञ्' इति ठञि 'जनपदतदवध्योश्च' इति जनपदलक्षणे वुञि 'कोपधादण्' इत्यणि च प्राप्ते वचनम्। 'मनुष्यतत्स्थयोर्वुञ्' इति परत्वात् मनुष्येऽर्थे रङ्कोर्वुञेव स्यात्। राङ्कवको मनुष्य इति। अमनुष्ये इति न मनुष्यनिषेधः किं तु नञिव युक्तन्यायेन मनुष्यसदृशे प्राणिनि प्रतिपत्तिकारि। राङ्कवो गौः राङ्कवायणो गौः। प्राणिनि किम्। राङ्कवः कम्बलः। कच्छादित्वादणेव स्यात्।

द्युप्रागप्राक्। अणोपवादः। द्यु इति दिव उत्वेन निर्देशः न तु द्युशब्दः व्याख्यानादित्यभिप्रेत्याह। दिवीति। प्राक्तनमिति तु परत्वात् 'सायंचिरम्—' इति कालवाचिनोव्ययाद् ट्युः। स्पष्टत्वात् त्यक्तं सूत्रद्वयम्। 'कन्थायाष्ठक्'। ४।२।१०२॥ शेषे। अणोपवादः। कन्था नाम ग्रामस्तत्र जातादिः कान्थिकः। 'वर्णौ वुक्'। ४।२।१०३॥ वर्णुनाम नदः। तस्य समीपो देशो वर्णुस्तद्विषयार्थवाचिनी या कन्था तस्या वुक् स्यात्। ठकोपवादः। कान्थकम्।

---

१. °गपागु° B_1. २. शेषे B_1, D_5, D_1; D_2 drops शेषेर्थे. ३. अवाच्यः B_1, D_2; उदीच्यः। अवाच्यः। D_5. ४. Dropped D_2.

अव्ययात्त्यप् ॥४।२।१०४॥

शेषेर्थे[1] ॥ अमेहक्वतसित्रेभ्य एव ॥* अमात्यः[2] । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । त्यब्नेर्ध्रुवेनियतम् ॥* ध्रुवं नित्यम् ।

ऐषमो ह्यः श्वसोन्यतरस्याम् ॥४।२।१०५॥

एभ्यो वा त्यप् शैषिकः ॥ ऐषमस्त्यम् । ह्यस्त्यम् । श्वस्त्यम् । पक्षे वक्ष्यमाणष्ट्युः[3] । ऐषमस्तनम् । इत्यादि ।

अव्ययात् । पोनुदात्तार्थः । अमेहेति । तथोक्तम् ।

'अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात् स्मृतः' । इति । परिगणनं किम् । उपरिष्टाद्भव औपरिष्टः । त्यब्नेरिति । निशब्दाद् ध्रुवेर्थे त्यब् वाच्य इत्यर्थः । निसो गते त्यब् वाच्यः । निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः । अरण्याण्णो वाच्यः । आरण्याः । सुमनसः । दूरादेत्यः । दूरेत्यः पथिकः । उत्तरादाहञ् । औत्तराहः ।

ऐषमः । आदिना ह्यस्तनं श्वस्तनम् । 'श्वसुट् च' इति ठञपि । शौवस्तिकः । स्पष्टत्वात् त्यक्तं सूत्रषट्कम् । 'तीररूप्योत्तरपदादञ्ञौ' ॥४।२।१०६॥ तीरोत्तरपदाद् रूप्योत्तरपदाच्च यथासंख्यमञञौ स्तः शेषे । अणोपवादौ । पाल्वलतीरम् । शैवरूप्यम् । बहुचूप्रत्ययपूर्वान्मा भूदिति तीररूप्यान्तादिति नोक्तम् । तेन बहुतीरादेर्न । 'मद्रेभ्योञ्' ॥४।२।१०८॥ दिक्पूर्वपदान्मद्रशब्दादञ् शेषे । पौर्वमद्रः । दिशोमद्राणामिति पर्युदासादादिवृद्धिः । 'उदीच्यग्रामाच्च बह्वचोन्तोदात्तात्' ॥४।२।१०९॥ दिग्ग्रहणं निवृत्तम् । उदीच्यग्रामवाचिनो बह्वचोन्तोदात्तादञ् स्यात् शेषे । अणोपवादः । शैवपुरम् । शिवपुरशब्दः समासस्वरेणान्तोदात्तः । उदीच्यग्रामात् किम् । मथुरेति प्रातिपदिकस्वरेणान्तोदात्ता मध्यदेशग्रामस्ततोणेव । माथुरः । बह्वचः किम् ।

---

१. शेषे B₁. २. अमा समीपे भव अमात्यः B₁. ३. वक्ष्यमाणाः स्युः C.

ध्वजीति । गौरादित्वात् ङीषः स्वरेणान्तोदात्तः उदीच्यग्रामः ततोणेव । ध्वाजः । अन्तोदात्तात् किम् । शर्करीधानशब्दे धानशब्दो ल्युडन्तो लित्स्वरेणाद्युदात्तः । गतिकारकोपपदात् कृदिति प्रकृतिभावात् शार्करीधानः । 'प्रस्थोत्तरपदपलद्यादिकोपधादण्' ।४।२।११०॥ प्रस्थोत्तरपदात् पलद्यादिभ्यः ककारोपधाच्च प्रातिपदिकादण् स्यात् शेषे । उदीच्यग्रामलक्षणस्याञोपवादः । मागधीप्रस्थः । पलद्यादिभ्यः । पालदः । पारिषदः । ककारोपधात् । नैलीनकः । पलद्यादिषु यो वाहीकग्रामस्ततष्ठञ्ञिठयोरपवादः । यथा गौष्ठी नैकतीति । गोमतीति पठ्यते । ततः 'रोपधेतोः—' इति वुञोपवादः । कोपधोपि वाहीकशब्दः पठ्यते । परं छं बाधितुम् । औत्सर्गिकेणि स्थिते अण्ग्रहणं बाधकबाधनार्थम् । पलदी । परिषत् । यकृल्लोमन् । पटच्चर । वाहीक । कलकीट । बहुकीट । कमलभिदा । गोष्ठी । नैकती । परिखा । शूरसेन । गोमती । उदपान । 'कण्वादिभ्यो गोत्रे' ।४।२।१११॥ गोत्रप्रत्ययान्तेभ्यः कण्वादिभ्योण् शेषे । छस्यापवादः । काण्वाः । गौकक्षाः । कण्वगोकक्षाभ्यां गोत्रे गर्गादित्वाद्यञ् तदन्तादण् । 'आपत्यस्य—' इति यलोपः । गोत्रे किम् । कण्वो देवतास्येति काण्वः । तस्येदं काण्वीयम् । कण्वादिर्गर्गाद्यन्तर्गणः । 'न द्व्यचः प्राच्यभरतेषु' ॥४।२।११३॥ 'इञश्च' इति प्राप्तोण् वार्यते । द्व्यचः प्रातिपदिकात् प्राच्यभरतगोत्रादिञन्तादण् न । पैङ्गीयाः । पौष्कीयाः । काशीयाः । द्व्यचः किम् । पान्नागारः । प्राच्यभरतेषु किम् । दाक्षाः । ननु काशीया इति कथमुदाहृतम् । यतः 'काश्यादिभ्यष्ठञ्ञिठौ' इति भाष्यम् । न । देशवाचिनः 'काशिशब्दस्य' तत्र ग्रहो वेदिशब्देन साहचर्यात् । गोत्रात्तु वृद्धाच्छ एव स्यात् । प्राच्यग्रहणेन भरतग्रहणं न भवतीति ज्ञापितत्वात् । स्वशब्देन भरतानामुपादानं कृतम् ।

---

१. शर्करी Dc4. २. शार्करी° Dc4. ३. °सेना Dc4, Dc3. ४. स्यात् शेषे Dc3.

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥१।१।७३॥

यस्याच्समुदायस्यादिर्वृद्धिस्तद् वृद्धसंज्ञं स्यात् ॥

वृद्धाच्छः ॥४।२।११४॥

वृद्धाच्छः स्यात् शेषेऽर्थे[2] ॥ 'आपत्यस्य च—' इति यलोपः[3] । गार्गीयः[4] । 'सूर्यतिष्य—' इति यलोपः । आगस्तीयः । शालीयः[5] । वा नामधेयस्य वृद्धसंज्ञा ॥ देवदत्तीयः । दैवदत्तः[6] ।

वृद्धिः । यस्येति समुदाय उच्यते । अचामिति निर्धारणे षष्ठी । जातौ बहुवचनम् । अचामिति निर्देशादजपेक्षयैवादित्वमत्र विवक्षित-मित्येतच्चेतसि[7] कृत्वाह । **यस्याच्समुदायस्ये**त्यादि । आदिरिति किम् । सभासंनयने भवः साभासंनयनः । गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वाच्यम् । घृतप्रधानो रौढिर्घृतरौढिस्तस्य छात्रा घृतरौढीयाः । ओदनपाणिनीयाः । वृद्धाम्भीयाः । वृद्धकाश्यपीयाः । जिह्वाकात्य-हरितकात्यवर्जम् । जैह्वाकाताः । हारितकाताः ।

वृद्धात् । अणोपवादः । अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपध-विधींस्तु परत्वाद्बाधते । आराद् भवः आरातीयः । अव्ययत्वात् प्राप्तष्ट्युर्न । वायसतीरीयः । अञ् न । वाडवकर्ष नामोदीच्यग्रामस्तत्र जातो वाडवकर्षीयः । अञ् न । औलूकीयः । अण् न । एषां तु विधीनामवृद्धोवकाशः । **वा नामधेयस्ये**ति । नामधेयं पुरुषैर्व्यवहाराय संकेत्यमानः शब्दः । **देवदत्तीय** इति । ननु काश्यादिपाठादस्माट्ठञ्-ञिठाभ्यां भाव्यम् । अतश्छोदाहृतिरयुक्ता । नैष दोषः । यो हि देवैर्दत्तो देवदत्त इति क्रियानिमित्तकस्तस्यैव तत्र पाठो न संज्ञाशब्दस्य । अतश्छोदाहृतिर्युक्ता ।

---

१. °र्वृद्धि° D4. २. अर्थे dropped D4. ३. आपत्यस्येति P, D1, D4; आपत्यस्योभयलोपः C. ४. B1 drops from गार्गीयः to यलोपः. ५. B1, D4 have मालीयः after it. ६. After this—'एङ् प्राचां देशे' । एङ् वृद्धसंज्ञः । एनिपचनीयः । गोनर्दीयः । भोजकटीयः । B2, D4 (एङ् वा वृद्ध° D4). ७. °त्येतत् सर्वं चेतसि Dc4, Bc1.

त्यदादीनि च ॥१।१।७४॥

एतानि वृद्धसंज्ञानि स्युः ॥ तदीयम् । विभक्तावित्यधि-कारादत्र त्वमयोरप्राप्तौ ।

प्रत्ययोत्तरपदयोश्च ॥७।२।९८॥

मपर्यन्तयोर्युष्मदस्मदोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तर-पदे च ॥* त्वदीयम् । मदीयम् । त्वत्पुत्रः । मत्पुत्रः ।

त्यदा । यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते । इह तु असंभवात् तन्न संबध्यत इत्यभिप्रेत्याह । एतानीत्यादि । स्पष्टत्वात् त्यक्तमेकम् । 'एङ् प्राचां देशे' ॥ १।१।७५॥ एङ् यस्याचामादिस्तच्छब्दरूपं वृद्धसंज्ञं भवति प्राचां देशाभिधाने । एणीपचनीयः ।[1] एङ् किम् । आहिच्छत्रः । प्राचां किम् । देवदत्तो नाम वाहीकेषु ग्रामस्तत्र भवो दैवदत्तः । देशे किम् । गोमत्यां भवा गौमता मत्स्याः । शरावती नाम नदी उत्तरपूर्वाभिमुखी । तस्या दक्षिणपूर्वस्यां दिशि व्यवस्थितो देशः प्राग्देशः । उत्तरापरस्यां दिशि व्यवस्थित उदग्देशः । तथोक्तम् ।

'प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती' ॥ इति ।

'प्रत्ययोत्तरपदयोश्च' इत्येतस्य सूत्रस्य प्रयोजनमाह । विभक्तावित्यादि । 'त्वमावेकवचने' इत्यत्र 'विभक्तौ' इत्यधिकारादत्र प्रत्ययोत्तरपदयोः परतस्त्वमयोरप्राप्ताविदमुच्यत इत्यर्थः ।

प्रत्यय । त्वदीयं **मदीयमिति** । तवेदं ममेदम् । त्वत्पुत्रो **मत्पुत्र** इति । तव पुत्रो मम पुत्रः । ननु चात्राप्यन्त-र्वर्तिनी विभक्तिरस्ति तस्यामेव त्वमौ भाविष्यतः । किमनेन

---

१. विभक्त्यधिकारा° B_1. २. After it—भर्तो गुणे D_5. ३. स्यात् Bc_1, Dc_1, Dc_4. ४. After it—गोनर्दीयः भोजकटीयः । Dc_4. ५. सरावती Dc_3. ६. Dropped Dc_3; after it—यथाशब्द इवार्थे Dc_2.

भवतष्ठक्छसौ ॥४।२।११५॥

वृद्धाद्भवत एतौ स्तः। छस्यापवादः। तान्तत्वात्कादेशः। भावत्कः।

सिति च ॥१।४।१६॥

सिति प्रत्यये यादावजादावपि[1] पूर्वं पदसंज्ञं स्यात्[2] ॥ जशादेशः[3]। भवदीयः। वृद्धात् किम्। शत्रन्तादणेव। भावतः।[4]

सूत्रेण। मैवम्। विभक्तेर्हि लुक् स्यात्। ननु बहिरङ्गो लुक्। अन्तरङ्गावादेशौ प्रथममेव स्यातामिति चेदुच्यते। एतदेवादेश-वचनं ज्ञापयत्यन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति। तेन गोमान् प्रियो यस्य गोमत्प्रिय इत्यादौ तुमादि लुका बाध्यते। एवं च त्वाहादयोऽप्यादेशाः प्रत्ययोत्तरपदयोर्न स्युः।

भवतः। छस्यापवाद इति। छस्य छविधायकस्य योगस्यायं योगोऽपवाद इत्यर्थः। **तान्तत्वादिति।** 'इसुसुक्तान्तात्कः' इति सूत्रेण।

सिति च। 'यचि भम्' इत्यस्यापवादः। **जशादेश इति।** 'झलां जशोऽन्ते' इति।

---

१. After it—परे D_1, D_2, D_4. २. पदत्वाज्जश्त्वम् B_1; पदत्वाज्जशादेशः B_2; ईयादेशः D_2. ३. भवतीति भवन्। भवतोयं भावतः। B_2. ४. After it—'उगितश्च' इति ङीप्प्रत्ययस्य वृद्धसंज्ञा वाच्या। विदुषीयाः। गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वक्तव्यम्। घृतप्रधानो रौढिः घृतरौढिः। घृतरौढेरमे घृतरौढीयाः॥ P; उगितश्चेति ङीप्प्रत्ययस्य वृद्धसंज्ञा वाच्या। विदुषीयाः। 'इञश्च' &c. D_5.

इञश्च ॥४।२।११२॥

गोत्रे य इञ् तदन्तादण् स्यात्[2] शेषे[3] ॥ छस्यापवादः ।
दाक्षः[4] । छात्रः[5] ।

इञः । दाक्षा इति । दक्षस्य गोत्रापत्यं दाक्षिः । तस्येमे । गोत्रे किम् । सुतङ्गमेन निवृत्ता सौतङ्गमी । तस्यां भवं सौतङ्गमीयम् । नात्र गोत्रलक्षण इञ् किं तु 'वुञ्छण्—' इत्यादिना सुतङ्गमलक्षण इञ् । स्पष्टत्वात् त्यक्तानि द्वाविंशतिः । 'काश्यादिभ्यष्ठञ्ञिठौ' ॥४।२।११६॥ इकार उच्चारणार्थः । अकार उभयत्र ङीबर्थो विपर्यस्तदेशोऽनुबन्धः । काशिकी । काशिका । 'वृद्धात्' इत्यनुवर्तते । येत्रावृद्धाः पठ्यन्ते वचनप्रामाण्यात्तेभ्यः प्रत्ययः । काशि । चेदि । संयाति । संवाह । अच्युत । मोदमान । शकुलाद । हस्तिकर्षू । कुनामन् । हिरण्य । गोवासन । भारङ्गी । अरिन्दम । दासमित्र । देवदत्त । अस्य 'एङ् प्राचां देशे' इति वृद्धत्वम् । वाहीकग्रामस्य नास्ति वृद्धत्वम् । यदा वृद्धत्वं तदा ठञ्ञिठौ । दाशग्राम । गोधावतार । युवराज । उपराज । सिन्धुमित्र । देवराज । आपदादिपूर्वपदात् कालान्तात् । आपत्कालिकी । आपत्कालिका । और्ध्वकालिकी । और्ध्वकालिका । 'वाहीकग्रामेभ्यश्च' ॥४।२।११७॥ वाहीकेषु ग्रामा ये वृद्धास्तेभ्यष्ठञ्ञिठौ छस्यापवादौ । शाकलिकी । शाकलिका । 'विभाषोशीनरेषु' ॥ ४।२।११८॥ वृद्धेभ्य उशीनरग्रामेभ्यष्ठञ्ञिठौ । आह्वजालिकी ।

---

१. Before it the Sūtra—काश्यादिभ्यष्ठञ्ञिकौ ॥४।२।११६॥ काशीत्येवमादिभ्यष्ठञ्ञिक एतौ स्तः । इकार उच्चारणार्थः । स्त्रीप्रत्यये विशेषत्वात् काशिकी । काशिका । वैदिकी । वैदिका ॥ D_3, B_1, P. २. B_1 drops स्यात्. ३. शेषेर्थे B_2. ४. B_1, P, B_2, Dc_1 have दाक्षाः । छात्राः. ५. छात्राः D_5, D_4, D_1. ६. Dropped Dc_1, Dc_3.

आह्वजालिका । पक्षे छः । आह्वजालीया । 'ओर्देशे ठञ्' ॥४।२।११९॥ वृद्धादिति निवृत्तम् । उत्तरत्र पुनर्ग्रहणात् । उवर्णान्ताद्देशवाचिनः ठञ् शेषे । नैषादकर्षुकः । ओर्देशे किम् । पटोश्छात्राः पाटवाः । 'वृद्धात् प्राचाम्' । ओर्देशे इत्येव । पूर्वेण सिद्धे वृद्धादेव प्राग्देशवाचिनष्ठञ् नियम्यते । नापितवास्तुकः । वृद्धात् किम् । माल्लवास्तवः । 'धन्वयोपधाद्वुञ्' ॥४।२।१२१॥ धन्ववाचिनो योपधाच्च देशवाचिनो वृद्धाद्वुञ् शेषे । धन्वशब्दो मरुदेशवाची । पारेधन्वकः । ऐरावतकः । योपधात् । साङ्काश्यकः । 'प्रस्थपुरवहान्ताच्च' ॥४।२।१२२॥ प्रस्थान्तात् पुरान्ताद्वहान्ताच्च वृद्धादेशाद्वुञ् । शालाप्रस्थकः । नान्दीपुरकः । पैलुवहकः । 'रोपधेतोः प्राचाम्' ॥४।२।१२३॥ रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् । पाटलिपुत्रकः । ऐकचक्रकः । काकन्द्यां भवः काकन्दकः । प्राचां किम् । दात्तमित्रीयः । 'जनपदतदवध्योश्च' ॥४।२।१२४॥ वृद्धाज्जनपदवाचिनस्तदवधिवाचिनश्च वुञ् शेषे । आदर्शकः । जनपदावधेः । श्यामायनकः । तदवधिरपि जनपद एव गृह्यते । न ग्रामः किमर्थं तर्हि तदवधिग्रहणम् । बाधकबाधनार्थम् । गर्तोत्तरपदात् छं बाधित्वा वुञेव जनपदावधेः स्यात् । त्रैगर्तकः । 'अवृद्धादपि बहुवचनविषयात्' ॥४।२।१२५॥ अवृद्धावृद्धाज्जनपदवाचिनस्तदवधिवाचिनश्च बहुवचनविषयाद्वुञ् शेषे । अणछयोरपवादः । अङ्गेषु भव आङ्गकाः । तदवधेः । अजमीढेषु भव आजमीढकः । वृद्धाज्जनपदात् । दार्वेषु भवः दार्वकः । तदवधेः । वैकुलिशे भवः वैकुलशिकः । विषयग्रहणमनन्यत्र भावार्थम् । तेन वर्तनी च वर्तनी च वर्तन्य इति जनपदैकशेषेण बहुत्वे मा भूत् । अपिशब्देन वृद्धोत्राधिकृतोपि समुच्चितः । बाधास्य तक्रकौण्डिन्यन्यायेन मास्म भूदिति । 'कच्छाग्निवक्त्रवर्तोत्तरपदात्' ॥४।२।१२६॥ कच्छाद्युत्तरपदाद्वृद्धाद्वावृद्धाद् देशाद्वुञ् । छाणोरपवादः ।

१. न्यायतो Dc_1, Dc_4. २. गर्तो° Bc_1.

भरुकच्छे भवः भारुकच्छकः । पैप्पलीकच्छकः । काण्डाग्नकः । वैभुजाग्नकः । ऐन्द्रवक्त्रकः । सैन्धुवक्त्रकः । बाहुवर्तकः । चारुवर्तकः । बहुच्पूर्वान्मा भूदित्युत्तरपदग्रहः । 'धूमादिभ्यश्च' ॥४।२।१२७॥ देशवाचिभ्योणादेरपवादे वुञ् । धौमकः । खाण्डकः । धूम । खण्ड । शशादन । अर्जुनाद । दाण्डायनस्थली । विदेह । राजगृह । सात्रासह । भक्षाली । मद्रकूल । आञ्जिकूल । द्व्याहव । संस्थाय । बह्वय । भागवत्त । विदेह । आनर्त । माठर । पाथेय । घोष । शिष्य । फलि । आराज्ञी । आवय । तीर्थ । कूलात् सौवीरेषु समुद्राच्चास्मान्नावि मनुष्ये च वुञ् इष्यते । सामुद्रिका नौः । सामुद्रको मनुष्यः । अन्यत्र न । सामुद्रं लवणम् । कुक्षि । अन्तरिक्ष । अनसौ । उज्जयनी । दक्षिणापथ । साकेत । 'नगरात् कुत्सनप्रावीण्ययोः' ॥४।२।१२८॥ प्रत्ययार्थविशेषणयोर्वुञ् । नागरकश्चौरः । नागरकश्चित्रकारः । अनयोः किम् । नागरो जनः । अण् । कत्र्यादौ[1] नगरविशेषवाचिनो ग्रहणात् नगरविशेषे तु ढकञ् प्रत्युदाहार्यः । नागरेयकः । 'अरण्यान्मनुष्ये' ॥४।२।१२९॥ औपसंख्यानिकस्य णस्यापवादो वुञ् । आरण्यको मनुष्यः । पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यम् । आरण्यकः पन्था अध्यायो विहारो मनुष्यो हस्ती वा । गोमयेषु वा । आरण्यका गोमया आरण्या वा । एषु किम् । आरण्याः पशवः । 'विभाषा कुरुयुगन्धराभ्याम्' ॥४।२।१३०॥ वुञ् । कौरवः । कौरवकः । यौगन्धरः । यौगन्धरकः । कुरोः कच्छादित्वाद्वाण्सिद्धौ युगन्धरार्था विभाषा । मनुष्यतत्स्थयोस्तु कुरोर्नित्यो वुञ् । कौरवको मनुष्यः । कौरवकमस्य हसितम् । 'मन्द्रवृज्योः कन्' ॥४।२।१३१॥ जनपदवुञोपवादः । मद्रकः । वृजिकः । 'कोपधादण्' ॥४।२।१३२॥

1. कर्त्र्यादौ Dc3.

गहादिभ्यश्च ॥४।२।१३८॥

ऐभ्यश्छः स्यात् ॥ गहीयः । जनपरयोः कुक् च ॥* जनकीयम् । परकीयम् ।[२]

जानपदवुञोपवादः । ऋषिकेषु जात आर्षिकः । अण्ग्रहणमुवर्णान्तादपि यथा स्यादिति । इक्ष्वाकुषु जात ऐक्ष्वाकवः । 'कच्छादिभ्यश्च' ॥४।२।१३३॥ देशे इत्येव । अण् शेषे । वुञादेरपवादः । काच्छः । कच्छ । सिन्धु । वेडु[३] । गन्धार । मधुमत् । कम्बोज । काश्मीर । साल्व[४] । कुरु । अरुखण्ड । द्वीप । अनूप । अजवाह । विजापक[५] । कुलूत । रङ्कु । 'मनुष्यतत्स्थयोर्वुञ्' ॥४।२।१३४॥ एतयोः प्रत्ययार्थविशेषणयोः कच्छादिभ्यो वुञ् । अणोपवादः । काच्छको मनुष्यः । काच्छकमस्य हसितम् । काच्छिका चूडा । एतयोः किम् । काच्छो गौः । 'अपदातौ साल्वात्' ॥४।२।१३५॥ अपदातावेव मनुष्ये मनुष्यस्थे वा सल्वशब्दाद्वुञ् । साल्वको मनुष्यः । साल्वकमस्य हसितम् । अपदातौ किम् । साल्वपदातिर्व्रजति । 'गोयवाग्वोश्च' ॥४।२।१३६॥ साल्वाद्वुञ् । काच्छाद्यणोपवादः । साल्वको गौः । साल्विका यवागूः । साल्वमन्यत् । 'गर्तोत्तरपदाच्छः' ॥४।२।१३७॥ देश इत्येव । अणोपवादः । वाहीकग्रामलक्षणं प्रत्ययं परत्वाद्बाधते । वृकगर्तीयम् ।

गहादि । गह । अन्तस्थ[६] । विषम । मध्य । मध्यं चाण् चरणे । पृथिवीमध्यवाचिनो मध्यशब्दाच्छः । मध्यशब्दस्य मध्यमादेशः । मध्यमीयः । चरणे तु प्रत्ययार्थे निवासे णमध्यमादेशश्च । माध्यमाः । उत्तम । अङ्ग । वङ्ग । मगध । पूर्वपक्ष । अपरपक्ष । अधमशाख ।

---

१. एभ्यश्छः शेषे B₁. २. After this—देवस्य वा ॥* देवकीयम् । देवीयम् । स्वस्य वा । स्वकीयम् । स्वीयम् । D₃, B₁, B₅ D₅ (D₅ has देवस्य to देवीयम् after स्वीयम्). ३. वर्णु Dc₄. ४. शाल्व Dc₃. ५. विजावक Dc₄, Dc₃. ६. After it—सङ्ग Dc₁, Dc₄ ; अङ्ग Dc₃.

समानशाख । एकग्राम । एकवृक्ष । एकपलाश । इष्वग्र । इष्वनीक । अवस्यन्दन । कामप्रस्थ । खाण्डायनि । काठेरणि । लावेरणि । सौमित्री । भौञ्जि[1] । सौङ्गि । आसुरि । आहिंसि । आमित्रि । व्याडि । वैजि । भौजि । आढ्यश्वि । आनृशंसि । सौर्थतपावथि[2] । अग्निशर्मन् । देवशर्मन् । सौत्रि । वाराटकि । वाल्मीकि । क्षेमधन्वन्[3] । उत्तर । अन्तर । मुखपार्श्व । तसोर्लोपः । मुषतीयम् । पार्श्वतीयम् । देवात् कुक् चेति वाच्यम् । देवकीयम् । वेणुकादिभ्यश्छण् । वैणुकीयम् । आकृतिगणोयं वेणुकादिः । स्पष्टत्वात् त्यक्तं सूत्रसप्तकम् । 'प्राचां कटादेः' ॥४।२।१३९॥ प्राग्देशवाचिनः कटादेश्छः स्यात् शेषे । कटनगरीयम् । कटघोषीयम् । प्राचां किम् । काटनागरः । 'राज्ञः क च' ॥४।२।१४०॥ छः स्यात् कोन्तादेशश्च । असंभवान्न देशविशेषणम् । राजकीयम् । 'वृद्धादकेकान्तखोपधात्' ॥४।२।१४१॥ वृद्धादेशादकान्तादिकान्तात् खोपधाच्च छः स्यात् शेषे । अकान्तात् । आरीहणकीयम् । द्रौघणकीयम् । इकान्तात् । शाल्मलिकीयम् । खोपधात् । कौटकशिखीयम् । कोपधग्रहणं शोशुकाद्यर्थं कार्यम् । शोशुकीयम् । 'कन्थापलदनगरग्रामह्रदोत्तरपदात्' ॥४।२।१४२॥ वृद्धादेशात् कन्थाद्युत्तरपदाच्छः । वाहीकग्रामत्वात् ठञ्ञिठओपवादः । दाक्षिकन्थीयम् । दाक्षिपलदीयम् । दाक्षिनगरीयम् । माहकिग्रामीयम् । दाक्षिह्रदीयम् । 'पर्वताच्च' ॥४।२।१४३॥ छः । पर्वतीयो राजा । 'विभाषामनुष्ये' ॥४।२।१४४॥ पर्वताच्छो वा शेषे । पर्वतीयानि फलानि । पार्वतानि वा । अमनुष्ये किम् । पर्वतीयो मनुष्यः । 'कृकणपर्णाद्भारद्वाजे'[4] । ४।२।१४५॥ भारद्वाजदेशवाचिभ्यां कृकणपर्णाभ्यां छः शेषे । अणोपवादः । कृकणीयम् । पर्णीयम् । भारद्वाजे किम् । कार्कणः । पार्णः ।

१. भौञ्जिसौङ्गि Dc4. २. सौतिपावथि Dc1; सौतिपाथावधि Dc3. ३. क्षेम° Dc3. ४. Dropped Bc3, Dc4.

युष्मदस्मदोरन्यतरस्यां खञ् च ॥४।३।१॥

एतयोः खञ् स्यात्[1] शेषे । चकारात्[2] छः । वाग्रहणादण्[3] ।

तस्मिन्नणि च युष्माकास्माकौ ॥४।३।२॥

एतयोः क्रमादेतौ स्तः खञि[4] अणि च ॥ युवयोर्युष्माकं वायं यौष्माकीणः । आस्माकीनः[5] । यौष्माकः । आस्माकः । तस्मिन्नणि किम् । युष्मदीयः । अस्मदीयः[6] ।

तवकममकावेकवचने ॥४।३।३॥

एकार्थयोर्युष्मदस्मदोः क्रमादेतौ स्तः खञि अणि च ॥[7] तावकीनः[8] । मामकीनः[9] । तावकः । मामकः । छे तु । त्वदीयः । मदीयः ।

युष्मदस्मदोः । त्यदादित्वाद्वृद्धसंज्ञयोर्युष्मदस्मदोश्छे प्राप्ते प्रत्ययत्रयविधिः ।

तस्मिन्नणि च । तस्मिन्निति साक्षाद्विहितः खञ् निर्दिश्यते । ननु चानुकृष्टः छ इत्यभिप्रेत्याह । **खञि अणि चेति** । स्पष्टत्वात्त्यक्तं सूत्रचतुष्टयम् । 'अर्धाद्यत्' ।४।३।४॥ अर्ध्यः । 'परावराधमोत्तमपूर्वाच्च'। ४।३।५॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात् पूर्वेणाप्राप्ते एतत्पूर्वादर्धाद्यद्विधीयते शेषे । पराध्यर्म् । अवराध्यर्म् । अधमाध्यर्म् । उत्तमाध्यर्म् । परावरशब्दावदिक्शब्दावपि स्तः । परं सुखमवरं दुःखमिति । तत्र कृतार्थत्वाद् दिक्शब्दत्वेनानयोः परेण ठञ्यतौ

---

१. B_1 drops स्यात् ; वा स्यात् D_4. २. चात् B_1. ३. °दण् वा P; °दण् च D_1, B_2. ४. खञि परे D_1. ५. यौष्माकः । आस्माकीनः D_2; यौष्माकः । आस्माकः । आस्माकीनः । D_4; यौष्माकः । आस्माकीनः । आस्माकः । D_5. ६. P and C drop it. ७. After it—परे D_6. ८. तावकीनः । तावकः । मामकीनः । मामकः C; P; D_4. ९. तावकः । मामकीनः । D_2.

मध्यान्मः ॥४।३।८॥

शेषे । मध्यमः । आदेश्च ॥* आदिमः अधमो लोपश्च ॥* अधमः ।

अ साम्प्रतिके ॥४।३।९॥

मध्यशब्दादकारप्रत्ययः शैषिकः समर्थे[1] । उत्कर्षापकर्षहीनो मध्यो वैयाकरणः ।

स्यातां तौ मा भूतां यदेव स्यादिति पूर्वग्रहणं कृतम् । 'दिक्पूर्वपदात् ठञ्च' । ४।३।६॥ अर्थात् ञण्यतौ । पौर्वार्द्धिकम् । पूर्वार्ध्यम् । पदग्रहणं स्वरूपविधिनिरासार्थम् । 'ग्रामजनपदैकदेशादञ्ठञौ' ।४।३।७॥ दिक्पूर्वपदादर्धादित्येव । यतोपत्यादौ । इमे खल्वस्माकं ग्रामस्य जनपदस्य पौर्वार्द्धाः पौर्वार्धिकाः ।

मध्यात् । आदेश्चेति वक्तव्यम् । **अधस** इति । अधसोमप्रत्ययोन्तलोपश्च । वाच्य इत्यर्थः । अवसोपि मोन्तलोपश्च वाच्यः । अवमः ।

अ साम्प्रतिके । साम्प्रतिशब्दार्थमाह । **समर्थे** इति । स्पष्टत्वात् त्यक्तमेकं व्याख्यायते । 'द्वीपादनुसमुद्रं यञ्' ॥४।३।१०॥ समुद्रसमीपे यो द्वीपस्तद्विषयाद्द्वीपाद्यञ् शेषे । कच्छाद्यणो मनुष्यवुञश्चापवादः । द्वैप्यः । समुद्रसमीपात् किम् । द्वैपः ।

---

१. P drops it. २. छश्च Bo₁.

कालाट्ठञ् ॥४।३।११॥

कालविशेषवाचिनः शेषेर्थे ठञ् स्यात्[1] ॥ अणोपवादः । वृद्धाच्छं परत्वाद्बाधते । मासिकः[2] । आर्धमासिकः । सांवत्सरिकः ।

निशाप्रदोषाभ्यां च ॥४।३।१४॥

आभ्यां वा ठञ्[3] स्यात्[4] शेषे[5] ॥ नैशिकम्[6] । नैशम् । प्रादोषिकम्[7] । प्रादोषम् ।

श्वसस्तुट् च ॥४।३।१५॥

श्वसो वा ठञ् स्यात्[8] तस्य नुडागमश्च ।

कालात् । वाच्यः कदम्बपुष्पादेः कालार्थात् साहचर्यतः । कादम्बपुष्पिकम् । व्रीहिपलालिकम् । इतो यावत् शैषिकम् । कालाधिकारः । स्पष्टत्वात् त्यक्ते सूत्रे । 'श्राद्धे शरदः' ॥४।३।१२॥ अस्मात् ठञ् श्राद्धे कर्मणि वाच्ये शैषिकः । ऋत्वणोपवादः । शारदिकं श्राद्धम् । शारदमन्यत् । 'विभाषा रोगातपयोः' ।४।३।१३॥ शरदात् ठञ् । शारदिकः शारदो रोग आतपो वा । अन्यत्र शारदं दधि ।

निशा । कालादिति नित्ये ठञि प्राप्ते विकल्पार्थं वचनम् ।

श्वसः । **तस्य नुडागमश्चेति** । तस्येति ठञि इकादेशस्य उपदेशावस्थायां विधेस्तत्र कृते नुडागमः स्यादिति ज्ञेयम् ।

---

१. B_1 drops it. २. पौर्णमासिकः क्रतुः B_2. ३. ठक् B_1, C. ४. B_1, B_2, D_1, D_4 drop it. ५. शेषेर्थे D_3, P; C ६. नैशम् । नैशिकम् C, D_1, D_4, D_5. ७. प्रादोषम् । प्रादोषिकम् D_1, D_2, D_4, D_5. ८. शेषे for स्यात् B_1; स्यात् शेषे D_1, D_4, D_5.

द्वारादीनां च ॥७।३।४॥

द्वार । स्वर । व्यल्कश । स्वस्ति । स्वर्[2] । स्वादु । मृदु्[3] । श्वस् । श्वन् । स्फ्यकृत्[4] । स्व—एतेषां न वृद्धिः[5] ऐजागमश्च । शौवास्तिकः[6] । पक्षे । श्वस्त्यम् । श्वस्तनम् ।[7]

सर्वत्राण् च तलोपश्च ॥४।३।२२॥

हेमन्तादण् स्यात् तलोपश्च ।

द्वारादीनाम् । अपदान्तार्थोयमारम्भः । अत्र तदादिविधेर-पीष्टत्वात् द्वारपालशब्दो न पठित इति ज्ञेयम् । पक्षे श्वस्त्यमित्यादि । 'एषमोह्यस्श्वसोरन्यतरस्याम्' इति त्यप् 'सायंचिरम्—' इति ट्युश्च । 'संधिवेला—' इति सूत्रेणाणि कृते तलोपो नेति अग्रे वक्ष्यमाणग्रन्थेन व्याख्यातप्रायत्वात् त्यक्तं सूत्रत्रयं व्याख्यायते । 'संधिवेलादृतुनक्षत्रेभ्योण्' ॥४।३।१६॥ संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्चाण् स्यात् शेषेपि । संधिवेलम् । संधिवेला । संध्या । अमावास्या । त्रयोदशी । चतुर्दशी । पञ्चदशी । पौर्णमासी । प्रतिपद् । संवत्सरात् फलपर्वणोः । सांवत्सरं फलम् । सांवत्सरं पर्व । 'प्रावृष एण्यः' ॥४।३।१७॥ ऋत्वणि प्राप्ते । प्रावृषेण्यो बलाहकः । 'वर्षाभ्यष्ठक्' ॥४।३।१८॥ शेषे । ऋत्वणोपवादः । वार्षिकम् । सर्वत्र सर्वग्रहणं 'छन्दसि ठञ्' इति छन्दोधिकारनिवृत्त्यर्थमित्यभिप्रेत्याह ।

---

१. P has द्वार after स्वस्ति. २. स्वस्र C ; स्वर् D1, D4. ३. मृदु D4, D5. ४. स्फ्यकृत D1, D4. ५. किं तु ऐजा° D4. ६. शौवस्तिकम् D4. ७. After it—इत्यादि D4.

वेदे भाषाया च ॥ हैमनो वायुः । ठञपीष्यते । हैमन्तिकः । संधिवेलेति सूत्रेणाणिकृते तलोपो न । हैमन्तः ।

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ ४।३।२३॥

एभ्यः कालवाचिभ्यष्ट्युट्युलौ स्तः तयोस्तुडागमश्च ॥ सायन्तनम् । स्वरे भेदः[1] । चिरन्तनम् । प्राह्णेतनम् । प्रगेतनम् । अनव्ययानामेषां मान्तत्वमेदन्तत्वं च निपातनात् । अव्ययेभ्यः[2] । दोषातनम् । टित्त्वात् दोषातनी । चिरपरुत्परारिभ्यस्त्नो[3] वक्तव्यः ॥* चिरत्नम् । परुत्नम् । परारित्नम् ॥ प्रगस्य गलोपश्च । प्रत्नम् ॥

वेदे **भाषायां चेति** । ननु अण् चेति चकारः किमर्थः । ऋत्वणर्थः । कः पुनरनयोर्विशेषः । उच्यते । ऋत्वणि हि तलोपो नास्ति अत्र तु तलोप इत्येतत् सर्वं चेतसि कृत्वाह । **संधिवेलेत्यादि** ।

सायम् । कालादित्येव । **स्वरे भेद इति** । ट्यौ सति 'आद्युदात्तश्च' इति सायंतनमित्यत्र त उदात्तः स्यात् । ट्युलि तु 'लिति' इति यं शब्द उदात्त इति ट्युट्युलोर्भेद इत्यर्थः । ननु सायमादयोऽप्यव्ययानि कुतस्तेषां पृथग्-ग्रहणम् । अथानव्ययानि कथं मान्तत्वमेदन्तत्वं चेत्याशङ्क्याह । **अनव्ययानामिति** । **प्रगस्येति** । एतच्छन्दसीति ज्ञेयम् ।

---

१. स्वरभेदः P. २. अव्ययाना° D_1, D_5. ३. चिरत् P, B_1.

अग्रपश्चादिमन्[१] ॥* अन्ताच्च ॥* अग्रिमम् । अन्तिमम् । अव्ययानां भमात्रे टिलोपः । पश्चिमम् । सायंप्रातर्भवः सायंप्रातिकः । पौनःपुनिकः । अध्यात्मादित्वात् ठञ्[२] । बहिषष्टिलोपविधानादनित्योऽव्ययानां टिलोपः ।[३] आरातीयः । शाश्वतिकः ।[४]

अग्रपश्चादिति । केचित् डिमजिति डितं पठन्ति । **अध्यात्मादित्वात् ठञिति** । सायंप्रातिकः । पौनःपुनिकः इत्यत्र । **आरातीय इति** । 'वृद्धात् छः' इति छः । **शाश्वतिक इति** । शश्वदिति त्रैकाल्यमुच्यते । तत्र भवं शाश्वतिकम् । 'कालाट्ठञ्' इति ठञ् । 'येषां च विरोधः' 'शाश्वतिकः' इति निपातनात् तान्तादपि कादेशो न । स्पष्टत्वात्त्यक्तमेकम् । 'विभाषा पूर्वाह्णापराह्णाभ्याम्' ॥४।३।२४॥ ट्युट्युलौ तुट् च वा । पक्षे 'कालाट्ठञ्' इति ठञ् । पूर्वाह्णेतनम् । पौर्वाह्णिकम् । अपराह्णेतनम् । आपराह्णिकम् । 'घकालतनेषु कालनाम्नः' इति सप्तम्या अलुक् । यदा तु पूर्वाह्णः सोढोऽस्येति विग्रहस्तदा पूर्वाह्णतन इति भवति ।

इति शैषिकाः प्रत्ययाः ।[५]

१. C has अग्रिमम् after this. २. ठञ् च C. ३. After this—नित्यानामिसादिभ्यः स्थानीयेभ्यश्च ठस्य को नेष्यते इक एव B_2. ४. तस्य विकारः । येषां च विरोधः शाश्वतिक इति ज्ञापकात् । इसुसुक्तान्तादिति कादेशो न । D_6. ५. प्राक्रियाः Bc_1, Dc_4.

तस्य विकारः ॥४।३।१३४॥

षष्ठ्यन्ताद्विकारेर्थेणादयः स्युः ॥ सुवर्णस्य विकारः सौवर्णः ।

अवयवे च प्राण्योषधिवृक्षेभ्यः ॥४।३।१३५॥

प्राण्यादिभ्योवयवे विकारे चाणादयः स्युः ॥ कापोतम् । मौर्वम् । काण्डं भस्म वा । कारीरम् ।[४]

तस्य विकारः । 'तस्येदम्' इत्यतस्तस्येत्यनुवृत्तौ पुनस्तस्य ग्रहणात् शैषिकनिवृत्तिः न त्वणः प्राग्दीव्यतीयस्य निवृत्तिः । व्याख्यानतो विशेषप्रतिपत्तेः । तेन विकारावयवयोर्घादयो न भवन्ति । विकारो नाम प्रकृतेरवस्थान्तरम् । यस्यान्यत् प्रतिपदं विधानं नास्ति अप्राण्याद्युदात्तमवृद्धं च तदिहोदाहरणमित्यभिप्रेत्याह । **सुवर्णस्य विकारः सौवर्ण** इति । सुवर्णशब्दः शोभनो वर्णोस्येति व्युत्पत्त्या बहुव्रीहिस्वरेण 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति पूर्वपदप्रकृतिभावेनाद्युदात्तः । सुशब्दस्य 'निपाता आद्युदात्ताः' इति आद्युदात्तत्वात् ।

अवयवे च । अणादयो यथायथं स्युरित्यर्थः । **कापोतमिति** प्राणिन उदाहरणम् । कपोतानामवयवो विकारो वा । 'प्राणिरजतादिभ्योञ्' इत्यञ् । **मौर्वमिति** । औषधेरण् । मूर्वाया अवयवो मौर्वं काण्डं विकारस्तु भस्म । **कारीरमिति** । वृक्षादण् । करीरस्यावयवो विकारो वा कारीरं काण्डं भस्म वा । उत्तरे प्रत्ययाः प्राण्यौषधिवृक्षेभ्यो विकारावयवयोः स्युरन्येभ्यस्तु विकारमात्रे । उभयानुवृत्तेः । स्पष्टत्वात् त्यक्तानि षट् । 'बिल्वादिभ्योण्' । ४।३।१३६॥ यथायोगं विकारावयवयोः । अनुदात्तादेरञो वृद्धान्मयटोपवादः । बिल्वस्य विकारोवयवो वा बैल्वः । बिल्व । व्रीहि । काण्ड । मुद्ग । मसूर ।

---

१. B_1 drops it. २. Dropped D_4. ३. कारीरम् । काण्डं नालं भस्म वा B_1, काण्डं भस्मनि च । कारीषम् । D_4. ४. After it—कारीषम् B_2.

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ ४।३।१४३॥

विकारावयवयोर्वा मयट् स्याद्भाषायाम् ॥ दूर्वामयम् । दौर्वम् । भक्ष्याच्छादनयोस्तु । मौद्गः सूपः । कार्पासं वासः ॥

गोधूम । वेणु । इक्षु । गवेधुका । पाटली । कर्पासी । कर्कन्धू । कुटीर । 'कोपधाच्च' ॥४।३।१३७॥ अण् । यथायोगं विकारावयवयोः । 'ओरञ्' अनुदात्तादेश्चेत्येताभ्यां प्राप्तस्याञोपवादः । तर्कोरवयवो विकारो वा तार्कवम् । तैत्तिडीकः । मध्योदात्तत्वादनुदात्तादिः । 'त्रपुजतुनोः षुक्' ॥४।३।१३८॥ ओरञोपवादोण् तत्संनियोगेनानयोः षुक् । त्रपुणो विकारः त्रापुषम् । जातुषम् । अप्राण्यादित्वान्नावयवे । 'अनुदात्तादेश्च' ॥४।३।१४०॥ विकारावयवयोरञ् । दाधित्थम् । कापित्थम् । एतौ समासस्वरेणान्तोदात्तावित्यनुदात्तादी । 'पलाशादिभ्यो वा' ॥४।३।१४१॥ विकारावयवयोरञ् । पक्षेण् । पालाशम् । पलाश । खदिर । शिंशपा । स्यन्दन । पूलास । शिरीष । यवास । विकङ्कत । 'शम्याः ष्लञ्' ॥४।३।१४२॥ अनुदात्ताद्यञोपवादः । प्राचुर्यविकारप्राधान्यादिषु इति । शामीलं भस्म । टो ङीबर्थः । शामीली स्रुक् ।

मयड्वैतयोः ॥ भाषायां किम् । छन्दसि बैल्वः खादिरो वा यूपः । विकारावयवयोरनुवृत्तावपि पुनरेतयोरिति ग्रहणात् 'प्राणिरजतादिभ्योञ्' इत्येवमादिविशेषप्रत्ययविषयेपि स्यात् । कपोतमयं कापोतं लोहमयं लौहमिति ।

---

१. °भक्षा° D1, D4. २. भाषायां भक्षादनयोर्वा मयट् स्यात् । D5. ३. स्यात् dropped B1. ४. भक्षा° D1, D2, D4, D5, B2. ५. तु dropped D2. ६. After it—इत्यत्र 'बिल्वादिभ्योण्' इत्यण् । B2. ७. कार्पासी Bc1, Dc3, Dc4. ८. °श्चेत्याभ्यां Bc1, Dc4. ९. पूलासास । पुलाश Bc1, Dc3, Dc4. १०. सिरीष Bc1, Dc3, Dc4. ११. प्राचुर्यविकारप्राधान्यादिषु इति–dropped Bc1, Dc3, Dc4. १२. शामी त्वक् Dc3.

नित्यं वृद्धशरादिभ्यः ॥४।३।१४४॥

वृद्धाच्छरादेश्च नित्यं मयट् [1]एतयोः ॥ आम्रमयम् । शरमयम् । दर्भमयम् । एकाचोपि मयट् । वाङ्मयम् । चिन्मयम् । मयट् तद्रूप इति केचित् । विष्णुमयम् ।

तत्प्रकृतवचने मयट् ॥५।४।२१॥

तदिति प्रथमा समर्थात् प्राचुर्येण प्रस्तु[2]तमत्रेत्यर्थे मयट् स्यात् ॥ [4]अन्नमयो यज्ञः । प्राधान्येपीत्येके । धर्ममयो देशः ।

नित्यम् । भाषायामभक्ष्याच्छादनयोरित्येव । शर । दर्भ । मृत् । कुटी । तृण । सोम । बल्वज । मयट् तद्रूप इति केचिदिति । तथोक्तं बोपदेवपाण्डितैः । मयट् तद्रूप इति ।

तत्प्रकृत । प्राग्दीव्यतीयाधिकारबहिर्भूतमपि सूत्रं मयट्प्रसङ्गादत्रोक्तम् । [3]प्रकृतं प्राचुर्येण प्रस्तुतमुच्यते यत्र तत् प्रकृतवचनमिति सूत्रार्थं चित्ते कृत्वाह । तदित्यादि । केचित्तु प्राचुर्येण प्रस्तुतं यत् तद्वाचिनः प्रातिपदिकात् स्वार्थे मयडिति व्याख्यान्ति तदुभयं प्रमाणम् । प्राधान्येपीत्येक इति । तथोक्तं नरेन्द्राचार्यैः । प्राचुर्यविकारप्राधान्यादिषु मयडिति ।

---

१. स्यादेतयोः B_2, C. २. अत्र is dropped in C. ३. B_1 drops it. ४. B_1 has अन्नं प्राचुर्येण प्रस्तुतमत्र अन्नमयो यज्ञः.

गोश्च पुरीषे ॥४।३।१४५॥
गोर्मयट् स्यात्[1] पुरीषेऽर्थे[2] ॥ गोः पुरीषं गोमयम् ।

गोश्च । पुरीषं गोर्न विकारो नाप्यवयवोऽतस्तस्येदंविषयो मयटो विधिः । विकारावयवयोस्तु यतं वक्ष्यति । स्पष्टत्वा-त्त्यक्तानि द्वादश । 'पिष्टाच्च' ॥४।३।१४६॥ विकारे मयट् । पिष्टमयं पैष्टी सुरेति तु सामान्यविवक्षायां तस्येदमित्यण् । 'संज्ञायां कन्' ॥४।३।१४७॥ पिष्टात् विकारे संज्ञायां कन् स्यात् । पिष्टकः । 'व्रीहेः पुरोडाशे' ॥४।३।१४८॥ विकारा-वयवयोर्मयट् । बिल्वाद्यणोपवादः । व्रीहिमयः पुरोडाशः । त्रैहमन्यत् । 'असंज्ञाभ्यां तिलयवाभ्याम्' ॥४।३।१४९॥ विकारा-वयवयोर्मयट् । तिलमयम् । यवमयम् । असंज्ञायां किम् । तैलम् । यावकः । 'तालादिभ्योऽण्' ॥४।३।१५२॥ विकारा-वयवयोः । मयडाद्यपवादः । तालाद्धनुष्येव । तालं धनुः । अन्यत्र तालमयम् । ताल । बर्हिण[3] । इन्द्रालिश । इन्द्रादृश । इन्द्रायुध । चाप । श्यामाक । पीयूक्षा । 'जातरूपेभ्यः परिमाणे' ॥४।३।१५३॥ सुवर्णवाचिभ्योऽण् परिमाणे विकारे । हाटको निष्कः । जातरूपः । तापनीयः । परिमाणे किम् । हाटकमयी यष्टिः । 'प्राणिरजतादिभ्योऽञ्' ॥४।३।१५४॥ प्राणिवाचिभ्यो रजतादिभ्यश्चाञ् स्यात् विकारावयवयोः । अणादीनामपवादः । अनुदात्तादेरञ् विहितः । परिशिष्टमुदाहरणम् । कापोतम् । मायूरम् । रजतादिभ्यः । राजतम् । रजतादिषु येऽनुदात्ताः पठ्यन्ते तेभ्योऽञि सिद्धे मयड्बाधार्थं[4] वचनम् । रजत । सीस ।

१. B₁ drops स्यात्. २. B₁ drops अर्थे. ३. बर्हि । Bc₁, Dc₃.
४. °ड्बाधनार्थं Dc₄.

गोपयसोर्यत् ॥४।३।१६०॥

एतयोर्यत् [1]स्यात् विकारावयवयोः। मयडादेरपवादः। गव्यम्। पयस्यम्।

लोह। उदुम्बर। नीप। दारु। [2]लोहितक। विभीतक। पीतदारु। त्रिकण्टक। [3]कण्टकार। 'ञितश्च तत्प्रत्ययात्' ॥४।३।१५५॥ विकारावयवयोर्विहितात् ञितः प्रत्ययादञ् स्यात्। वृद्धमयटोपवादः। 'औरञ्'। देवदारवस्य विकारोवयवो वा दैवदारवः। अनुदात्ताद्यञ्। दाधित्थस्य दाधित्थः। शम्याट्ट्लञ्। शामीलः इत्यादि। 'क्रीतवत् परिमाणात्' ॥४।३।१५६॥ 'प्राग्वहतेष्ठञ्' इत्यारभ्य क्रीतार्थे ये प्रत्यया विधास्यन्ते परिमाणात् ते विकारेतिदिश्यन्ते। निष्केण क्रीतः। 'असमासे निष्कादिभ्यः'। नैष्किको यथा तथा निष्कस्य विकारो नैष्किकः। संख्याप्यत्र परिमाणग्रहणेन [4]गृह्यते ततश्च शत्यः शतिकः। साहस्र इत्यादयः। वतिः सर्वसादृश्यार्थः। ततः अध्यर्धपूर्वाद् द्विगोर्लुगित्याद्यप्यतिदिश्यते। द्विसहस्रः। द्विनिष्कः। द्विनैष्किकः। 'उष्ट्राद्वुञ्' ॥४।३।१५७॥ एतयोः प्राण्यञोपवादः। उष्ट्रस्य विकारोवयवो वा [5]औष्ट्रकः। 'उमोर्णयोर्वा' ॥४।३।१५८॥ विकारावयवयोर्वा वुञ्। औमम्। औमकम्। और्णकम्। और्णम्। 'एण्या ढञ्' ॥४।३।१५९॥ प्राण्यञोपवादः। ऐणेयं मांसम्। पुंसस्त्वञेव स्यात्। एणस्य मांसमैणम्।

गोपयसोः। सर्वत्र गोरजादिप्रसङ्गे यदस्त्येव मयड्विषये तु विधीयते इत्यभिप्रेत्याह। **मयडादेरिति**। स्पष्टत्वात् त्यक्तं सूत्रद्वयम्। 'द्रोश्च' ॥४।३।१६१॥ अञोपवादो यद्विकारावयवयोः। द्रव्यम्। 'माने वयः' ॥४।३।१६२॥ द्रुशब्दाद्यतोपवादो वयः स्यात्। द्रुवयं मानम्।

---

१. B_1 drops it. २. लोहित Dc_3. ३. कर्णिकार Bc_1, Dc_1, Dc_3, Dc_4 ४. दृश्यते Bc_1. ५. औष्ट्रकम् Bc_1, Dc_3, Dc_4.

फले लुक् ॥४।३।१६३॥

विकारावयव[1]प्रत्ययस्य फले वाच्ये लुक् स्यात् ॥

लुक् तद्धितलुकि ॥४।२।४९॥

[3]उपसर्जनस्त्रीप्रत्ययस्य लुक् [4]स्यात् [5]तद्धितलुकि ॥ बदर्याः फलं बदरम् । आमलकम् ।

फले । फलितस्य वृक्षस्य फलं विकारोऽवयवश्च भवति ।

लुक् । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वे प्राप्ते लुक् विधीयते । तद्धितलुकीति सत्सप्तमीयं स्त्रीग्रहणमुपसर्जनग्रहणं चानुवर्तत इत्यभिप्रेत्याह । उपसर्जनस्त्रीप्रत्ययस्येति । बदर्याः फलं बदरमिति । 'अनुदात्तादेश्च' इत्य[6]ञ् । आमलकमिति । आमलक्याः फलम् । 'नित्यं वृद्धशरादिभ्यः' इति मयट् । तद्धितग्रहणं किम् । गार्गी[7]कुलम् । लुकि किम् । गार्गीत्वम् । उपसर्जनस्येति किम् । अवन्ती । कुन्ती । त्यक्तमेकं प्रसङ्गाद्व्याख्यायते । 'इद्गोण्याः' ॥१।२।५०॥ गोण्यास्तद्धितलुकि सति इकारादेशः स्यात् । लुकोपवादः । पञ्चभिर्गोणीभिः क्रीतः । पञ्चगोणिः । इदिति योगविभागः । पञ्चभिः सूचिभिः क्रीतः । '[8]वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति ञ्यङ् । तस्य 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' इति लुक् । ततः 'इतो मनुष्यजातेः' इति ङीष् । पञ्चसूचिः ।

---

१. °रावयवार्थप्रत्ययस्य B_1. २. B_1 drops it. ३. उपसर्जनस्य विकारावयवप्रत्ययस्य स्त्रीप्रत्ययस्य C. ४. B_1 drops it. ५. P, B_2, D_2 drop it; D_1, D_4, D_5 have it in the beginning of the Vritti. ६. °त्यण् Dc_4. ७. गार्गीकुलम् Dc_4. ८. From 'वृद्धे°...to ङीष्' dropped Bc_1, Dc_2, Dc_3, Dc_4.

प्लक्षादिभ्योऽण् ॥४।३।१६४॥

एभ्यः[1] फलेऽण् स्यात्[2] ॥ विधानसामर्थ्यान्न लुक् । प्लाक्षम् । आश्वत्थम् ।

ओरञ् ॥४।२।७१॥

उवर्णान्तादञ् स्याद्विकारादौ[3] ॥ तस्य फले लुक् । जम्ब्वाः फलं जम्बु ।

जम्ब्वा वा ॥४।३।१६५॥

जम्ब्वाः फले वाच्येऽण् स्याद्वा[4] । विधानान्न लुक्[5] । जाम्बवम् ।

लुप् च ॥४।३।१६६॥

जम्ब्वाः फलप्रत्ययस्य वा[6] लुप् स्यात् ॥ जम्बूः । पक्षे प्राग्वत् । फलपाकशुषां लुबिष्टः ॥* व्रीहयः । माषाः । पुष्पफलमूलेषु बहुलम्[7] ॥*

प्लक्षादिभ्यः । अणोऽपवादः । प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । शिग्रु । कर्कन्धू । बृहती ।

ओः । अनुदात्तादेरन्यदिहोदाहरणम् । दैवदारवं काष्ठम् ।

जम्ब्वा ।

लुप् च । लुपि युक्तवद्भावः स्त्रीप्रत्ययश्रवणं च लुको विशेषः । फलपाकशुषामिति । फलस्य पाकस्तेन शुष्यन्तीति फलपाकशुषस्तेषां संबन्धिनः फलप्रत्ययस्य लुबिष्ट इत्यर्थः । व्रीहयः । माषा इति । व्रीहीणां फलानि । बिल्वाद्यणो लुप् । माषाणां फलानि । औत्सर्गिकाणो लुप् । पुष्पेषु मूलेषु चाभिधेयेषु बहुलं लुप् स्यात् ।

---

१. अण् स्यात् फले वाच्ये C. २. B_1 drops it. ३. B_1 drops it. ४. B_1 drops it. ५. विधानसामर्थ्यान्न D_1. ६. लुब्वा B_1. ७. After it—लुप् D_5. ८. गृहपतिः Bc_1, Dc_1, Dc_3, Dc_4.

मल्लिकायाः पुष्पं मल्लिका । जातिः । विदार्या मूलं विदारी । बृहती । क्वचिन्न । पाटलं पुष्पम् ।[१]

हरीतक्यादिभ्यश्च ॥४।३।१६७॥

एभ्यः फलप्रत्ययस्य लुप् स्यान्न[२] लुक् ॥ हरीतक्याः फलं हरीतकी । द्राक्षा । हरीतक्यादेः प्रकृतेर्लिङ्गमेवेष्यते ॥* हरीतक्याः फलानि हरीतक्यः ।[३]

मल्लिकेत्यादि । अत्रानुदात्तत्वलक्षणस्याञो लुप् । मल्लिकाशब्दो लघावन्त इति मध्योदात्तः । जातिशब्दः क्तिच् क्ताविति क्तिजन्तोन्तोदात्तः । विदारी बृहतीति । गौरादिङीषन्तावन्तोदात्तावित्यनुदात्ताद्यञो लुप् । पाटलमिति । बिल्वादित्वादण् ।

हरीत । हरीतकी । कौशातकी[४] । नखरञ्जनी[५] । शष्कण्डी । दांडी[६] । दोडी[७] । श्वेतपाकी । अर्जुनपाकी । काला । द्राक्षा । गर्भारिका[८] । कटकारिका । शेफालिका । स्पष्टत्वात् व्यक्तमेकम् । 'कंसीयपरशव्ययोर्यञञौ लुक् च' ॥४।३।१६८॥ प्राक् क्रीताच् छेन कंसीयः । उगवादियता परशव्यः । ताभ्यां यथासंख्यं विकारे यञञौ स्तः तत्संनियोगेन च तयोच्छयतोर्लुक् स्यात् । कंसीयस्य विकारः कांस्यम् । परशव्यस्य विकारः पारशवम्[९] । ननु कंसशब्दः उणादौ सप्रत्ययान्तो व्युत्पादितः परशुशब्दः कुप्रत्ययान्तस्तयोः किं लुक् न । उच्यते । प्रातिपदिकाधिकारात् धातुप्रत्ययस्य न लुक् । परशव्यादनुदात्तादित्वादञि सिद्धे लुगर्थं वचनम् ॥

इति प्राग्दीव्यतीयाः समाप्ताः । अणोवधिः पूर्णः ।

---

१. After it—बिल्वादिभ्योण् D_5. २. B_1 drops स्यात्. ३. After it—खलिताचिकादिषु वचनमेव प्रकृतेः खलितकस्य अदूरभवानि खलितकं वनानि । D_5. ४. कौशोतकी Dc_3. ५. जनरञ्जनी Bc_1, Dc_1, Dc_3, Dc_4. ६. डाण्डी । डौडी Bc_1. ७. डौडी Dc_4. ८. गाभोरिका । कण्टकारिका Bc_1. ९. पारशवः Bc_1, Dc_3, Dc_4.

तत्र नियुक्तः ॥४।४।६९॥

सप्तम्यन्तान्नियुक्तेऽर्थे[1] ठक् स्यात्[2] । द्वारादित्वादैच् । द्वारे[3] नियुक्तो दौवारिकः । स्वरस्यायं सौवरः । वैयल्कशः ॥ [4]तदाहेति माशब्दादिभ्यष्ठग्वाच्यः ॥* स्वस्तीत्याह सौवस्तिकः । माशब्दिकः । स्वभवः सौवः[5] । [6]सौवादुमृदवम् । शुन इदं शौवनम् । अन् इति प्रकृत्या[7] । स्फैयकृतम्[8] । स्वस्येदं[9] सौवम् । तदादिविधिरप्यत्र । सौवग्रामिकः । सौवाध्यायिकः ।

अथ प्राग्वहतीयाः प्रत्यया उच्यन्ते । तत्र प्रक्रियाविशेष-निरूपणाय 'प्राग्वहतेष्ठक्' इति सूत्रं प्रथममपठित्वा क्रमोल्लङ्घनेनापि सूत्रं पठति ।

तत्र नियुक्तः । नियुक्तोऽधिकृतो व्यापारित इत्यर्थः । प्रसङ्गाद् द्वारादिगणोदाहरणानि कथयति । **सौवर** इति । 'तस्येदम्' इत्यण् । **वैयल्कश**[10] इति । व्यल्कशे[11] भवः । **तदाहेति** । तत्कथयतीत्यत्रार्थे वाक्यादेतत्प्रत्ययविधानं नित्यः शब्द इत्यादयो माशब्दादयः प्रयोगात् ज्ञेयाः । **सौव** इति । अव्ययानां भमात्रे टिलोप इति टिलोपः । **सौवादुमृदवमिति** । स्वादुमृदुन इदम् । **स्फैयकृतमिति** । स्फ्यकृतस्येदम् । **सौवग्रामिक** इति । स्वग्रामे भवः । अध्यात्मादित्वात् ठञ् । **सौवाध्यायिक** इति । स्वाध्याये भवः । पूर्ववत् ठञ् ।

---

१. अर्थे dropped P. २. Dropped B_1. ३. Before it—शुल्कशालायां नियुक्तः शौल्कशालिकः B_2. ४. Before it—ऐच् प्रसङ्गाद् दर्शितावेतौ । B_2. ५. सौवरः D_4. ६. स्वादुमृदुन इदं सौवादुमृदवम् B_1, B_2, D_5; सौवादवम् मृदवम् C, D_3. ७. प्रकृतिभावः B_1 अन् प्रकृत्या D_1. ८. स्फ्यकृतस्येदं before it in B_1, D_5. ९. B_1 drops स्वस्येदं सावम् ।. १०. वैयल्कस Bc_1, Dc_4. ११. व्यल्कसे Bc_1, Dc_4.

न्यग्रोधस्य च केवलस्य ॥७।३।५॥

अस्य ऐजागमः स्यान्न वृद्धिः ॥ नैयग्रोधं फलम् । केवलस्य किम् । न्यग्रोधमूले भवा न्यग्रोधमूला[1]: शालयः ।

स्वागतादीनां च ॥७।३।७॥

एषामैजागमो[2] न स्यात् । आदिवृद्धिः । स्वागतमित्याह स्वागतिकः । स्वाध्वरिकः । स्वाङ्गिः । व्याङ्गिः ।[3] व्यावहारिकः ।

पथ्यतिथिवसतिस्वपतेर्ढञ् ॥४।४।१०४॥

स्वापतेयम् ।

न्यग्रोधस्य । न्यक् रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थं वचनम् । केवलस्यैवेति अव्युत्पत्तिपक्षे विध्यर्थमेव ।

स्वागत । शोभनमागतं स्वागतम् । तदाहेति माशब्दादिभ्यष्ठक् । **स्वाध्वरिक** इति । शोभनोऽध्वरः स्वध्वरः । 'तेन चरति' इति सूत्रेण ठक् । **स्वाङ्गिरिति** । शोभनान्यङ्गान्यस्य स्वङ्गः । तस्यापत्यम् । 'अत इञ्' । **व्याडिरिति** । विशेषेणाडत्युद्यमं करोतीति व्यडः । तस्यापत्यम् । **व्यावहारिक** इति । व्यवहरणं व्यवहारः । भावे घञ् । व्यवहारेण चरति । व्यवहारशब्दो लोकप्रवृत्तौ वर्तते न कर्मव्यतिहारे । अतः 'न कर्मव्यतिहारे' इति निषेधो न प्राप्नोतीत्यत्र पाठः । **स्वापतेयमिति** । स्वपतौ साधु । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' । द्वारादिषु स्वशब्दस्य पाठात् तदादिविधेश्च तत्राङ्गीकारात् प्राप्तिः ।

---

१. मुलीयाः D_2. २. °मैच् P, C, D_1, D_2, D_4, D_5. ३. B_1 and C D_4 have व्याडिः before it; P has व्याञ्जिः before it.

श्वादेरिञि ॥७।३।८॥

श्वादेर्नैच्[८] इञि परे ॥ श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । इकारादाविति वाच्यम् ।

श्वगणाट्ठञ् च ॥४।४।११॥

अस्मात् तेन चरतीत्यर्थे[१] ठञ् स्यात्[२] ठन् च ॥ श्वगणेन चरतीति श्वागणिकः । श्वगणिकः[४] ।

पदान्तस्यान्यतरस्याम् ॥७।३।९॥

पदशब्दान्तस्य श्वादेरैच् स्याद्वा[५] । श्वापदस्येदं श्वापदं[६] शौवापदम् । न्यङ्कोर्वेति केचित् । न्याङ्कवम्[७] । नैयङ्कवम् ।

श्वादेः । श्वन्शब्द आदिर्यस्य स श्वादिस्तस्येत्यर्थः । **इकारादाविति** । इञीत्यस्य स्थाने इकारादाविति वाच्यमित्यर्थः । वक्तव्यप्रयोजनं दर्शयितुं सूत्रं पठति ।

श्वगणात् । ष्ठनो ङीषर्थः षकारः । **श्वगणिक इति** । इकारादित्वादैच्निषेधः ।

पदान्तस्य । श्वादेरिञीति नित्यनिषेधे प्राप्ते विकल्पः । स्पष्टत्वात् त्यक्तं सूत्रद्वयं व्याख्यायते । 'उत्तरपदस्य' ॥७।३।१०॥ अयमधिकारः । यदितः परमुच्यते 'हनस्तोचिण्णलोः' इति यावत् तदुत्तरपदस्येत्येवं वेदितव्यम् । 'अवयवादृतोः' ॥७।३।११॥

---

१. चरत्यर्थे B_1, D_1. २. B_1 drops it. ३. B_1, P drop इति. ४. ठन् श्वगणिकः B_2. ५. B_1 drops स्यात्. ६. शौवापदम् । श्वापदम् B_1. ७. न्याङ्कवम् dropped D_3, D_5, B_1, B_2. ८. नित्ये Dc_2.

सुसर्वार्धाज्जनपदस्य ॥७।३।१२॥

एभ्यो जनपदवाचिन उत्तरपदस्यैव वृद्धिः स्यात् ॥ सुपाञ्चालः । सर्वपाञ्चालः । अर्धपाञ्चालः ।

अवयववाचिन उत्तरस्य ऋतुवाचिनः पदस्याचामादेरचः स्थाने वृद्धिः स्यात् तद्धिते ञिति णिति किति परे । पूर्वं वर्षाणामित्येकदेशिसमासः । तत्र भवः । 'वर्षाभ्यष्ठक्' । तत्रावयवपूर्वस्य तदन्तविधेरिष्टत्वात् पूर्ववार्षिकः । अवयवात् किम् । पूर्वासु वर्षासु भवः पौर्ववार्षिकः । 'कालाट्ठञ्' ।

सुसर्वा । सुपाञ्चाल इत्यादि । शोभनाः पञ्चालाः सुपञ्चालाः । सर्वे पञ्चालाः सर्वपञ्चालाः । पञ्चालानामर्धमर्धपञ्चाला इति विगृह्यते । तेषां राजेत्यर्थे क्षत्रियसमानशब्दात् जनपदस्य राजन्यपत्यवदिति वक्तव्येन 'अवृद्धादपि बहुवचनविषयात्' इति प्राप्तस्य वुञोपवादोञ् जातः । तत उत्तरपदवृद्धिः । सुपञ्चालेषु भव इत्याद्यर्थेषु तु 'अवृद्धादपि बहुवचनविषयात्' इति वुञुदाहार्यः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः । इति । ननु जनपदान्तात् कथमञ्वुञौ स्तः । उच्यते । 'सुसर्वार्धादिक्शब्देभ्यो जनपदस्य' इति तदन्तविधेरिष्टेः । स्पष्टत्वात् त्यक्तानि वृद्धितदपवादविधायकानि षोडश सूत्राणि प्रसङ्गाद् व्याख्यायन्ते । 'दिशोमद्राणाम्' ॥७।३।१३॥ दिग्वाचिन उत्तरस्य मद्रवर्जितस्य जनपदवाचिनोचामादेरचो वृद्धिः स्यात् ञिति णिति किति तद्धिते परे । पूर्ववदेव तदन्तविधिः प्रत्ययश्च । दिशः किम् । पञ्चालानां पूर्वः पूर्वपञ्चालः । तत्र भवः पौर्वपञ्चालः । अत्र च दिशि वर्तमानो दिक्शब्दोभिप्रेतो न चायं दिशि किं तु अवयवेतो न । अमद्राणा किम् ।

---

१. Dropped B_1. २. उत्तरपदस्य Dc_4. ३. पाञ्चालाः throughout Dc_3. ४. Before it—पूर्वपाञ्चालकः । Dc_3. ५. पाञ्चालानां, पाञ्चालः Dc_3.

पौर्वमद्रः । 'मद्रेभ्योऽञ्' । 'प्राचां ग्रामनगराणाम्' ॥७।३।१४॥ ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे यद् द्वयोर्ग्रहणं तत् संबन्धभेद-ज्ञापनार्थम् । अङ्गस्येति प्रकृतमुत्तरपदस्येति च । तत्र ग्रामाणामित्ये-तदङ्गस्येत्यनेन संबध्यते । अनगराणामित्येतदुत्तरपदस्येत्यनेन । ततश्चायमर्थः । दिक्शब्दादुत्तरस्य प्राग्देशग्रामवाचिनामङ्गानामवयवस्य पदस्य वृद्धिः स्यात् तथा[१] दिश उत्तरस्य[२] प्राग्देशनगरवाचिनः[३] पदस्य वृद्धिः स्यात् इति । दिक्पूर्वपदो हि समुदायः । पूर्वेषुकामशम्यादिर्ग्रामनाम । पाटलिपुत्रिकादिः[४] पुनरुत्तरपदमेव नगरवाचिग्रामाणां तावत् । पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः । 'दिक्पूर्वपदादसंज्ञायां ञः' । नगराणाम् । पूर्वस्मिन् पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः । 'रोपधेतोः प्राचाम्' इति वुञ् । 'संख्यायाः संवत्सर-संख्यस्य च' ॥७।३।१५॥ संख्याया* उत्तरयोः संवत्सरसंख्ययोर्वृद्धिः स्यात् । द्वौ संवत्सरावधीष्टादिर्द्विसांवत्सरिकः । प्राग्वहतीयष्ठञ्[५] । द्वे षष्टी अधीष्टादिर्द्विषाष्टिकः । द्विषष्टिशब्दो वर्षेषु संख्येयेषु वर्तमानं कालाधिकारोक्तं ठञमुत्पादयति । परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थम् । तेन द्वैसमिक इत्यादावुत्तरपदवृद्धिर्न । 'वर्षस्याभविष्यति' । ७।३।१६॥ संख्याया उत्तरस्य वर्षस्य वृद्धिस्तद्धिते स चेत् तद्धितो भविष्यति न । द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः । अभविष्यतीति किम् । त्रीणि वर्षाणि भावीति त्रिवार्षिकं धान्यम् । अधीष्टभृतयोरभविष्यतीति निषेधो न । गम्यते हि तत्र भविष्यत्ता न तु तद्धितार्थः । द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः । 'परिमाणान्तस्या-संज्ञाशाणयोः' । ७।३।१७॥ परिमाणान्तस्याङ्गस्य संख्याया यदुत्तरपदं तस्य वृद्धिः संज्ञायां शाणे चोत्तरपदे न । द्वौ कुडवौ प्रयोजनमस्य

१. न च for तथा Bc1. २. उत्तरपदस्य Dc3. ३. °ग्रामवाचिनः Dc3. ४. पुत्रकादिः Dc1, Dc4; पुत्रादिः Dc2. ५. आर्हीयष्ठका Bc1, Dc1, Dc3, Dc4.

द्विकौडविकः । 'प्राग्वहतेष्ठञ्' । अनार्हीयत्वात् 'अध्यर्ध—' इति लुङ् न । असंज्ञाशोणयोः किम् । पञ्च लोहित्यः परिमाणमस्य पाञ्चलोहितिकम् । तद्धितान्तः समुदायः संज्ञा । 'तदस्य परिमाणम्' इति ठञ् । द्वाभ्यां शाणाभ्या क्रीतं द्वैशाणम् । 'द्वित्रिपूर्वादण् च' इत्यण् । असंज्ञाशाणकुलिजानामिति केचित् पठन्ति । द्वे कुलिजे प्रमाणमस्य द्वैकुलिजः । 'जे प्रोष्ठपदानाम्' ।७।३।१८।। जातार्थविहिते ञिति णिति किति तद्धिते परे प्रोष्ठपदानामुत्तरपदस्य वृद्धिः । प्रोष्ठपदासु जातः प्रोष्ठपादः । 'संधिवेला—' इत्यण् । बहुवचनात् पर्यायग्रहणम् । भद्रपदासु जातो भद्रपादः । जे इति किम् । प्रोष्ठपदासु भवः प्रौष्ठपदो मेघः । 'प्राचां नगरान्ते' ।७।३।२४।। प्राग्देशे नगरान्तेऽङ्गे पूर्वोत्तरपदयोरचामादेरचो वृद्धिः स्यात् ञिति णिति किति तद्धिते परे । सुह्मनगरे भवः सौह्मनागरः । प्राचां किम् । उदक्षु मद्रनगरं तत्र भवो माद्रनगरः । 'जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्' ।७।३।२५।। जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्य वृद्धिः स्यादुत्तरपदस्य वा । कुरुजङ्गलेषु भवं कौरुजाङ्गलं कौरुजङ्गलम् । वैश्वधैनवं वैश्वधेनवम् । सौवर्णवालजः । सौवर्णवलजः । 'अर्धात् परिमाणस्य पूर्वस्य तु वा' ।७।३।२६।। अर्धात् परस्य परिमाणवाचिनो वृद्धिः पूर्वपदस्य वा । अर्धद्रोणेन क्रीतमार्धद्रौणिकमर्धद्रौणिकम् । 'नातः परस्य' ।७।३।२७।। अर्धात् परस्य परिमाणाकारस्य न वृद्धिः पूर्वपदस्य तु वा । अर्धप्रस्थिकः । आर्धप्रस्थिकः । तपरत्वादिह न । अर्धखार्यां भवा अर्धखारीति । किं च स्यात् । अर्धखारीभार्य इत्यत्र 'वृद्धिनिमित्तस्य' इति पुंवत्त्वनिषेधो न स्यात् । 'प्रवाहणस्य ढे' ।७।३।२८।। प्रवाहणशब्दस्य ढे परत उत्तरपदस्य वृद्धिः स्यात् पूर्वपदस्य तु वा । प्रवाहणस्यापत्यं प्रावाहणेयः । प्रवाहणेयः । शुभ्रादित्वात् ढक् । 'तत्प्रत्ययस्य च' ।७।३।२९।। ढप्रत्ययान्तस्य प्रवाहणस्य

१. °परवृद्धिः Dc3.

ञिति णिति किति तद्धिते परे उत्तरपदस्य वृद्धिः स्यात् पूर्वपदस्य तु वा। प्रवाहणेयस्यापत्यं प्रावाहणेयिः। प्रवाहणेयिः। बाह्यतद्धितनिमित्ता वृद्धिर्द्वाश्रयेण विकल्पेन बाधितुमशक्येति सूत्रारम्भः 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' ।७।३।३०।। नञ उत्तरेषामेषां वृद्धिः स्यात् पूर्वपदस्य तु वा। आशौचम्। अशौचम्। आनैश्वर्यम्। अनैश्वर्यम्। आक्षैत्रज्ञम्। अक्षैत्रज्ञम्। आकौशलम्। अकौशलम्। आनैपुणम्। अनैपुणम्। 'यथातथयथापुरयोः पर्यायेण'। ७।३।३१।। नञ उत्तरयोरेतयोः पूर्वपदयोः क्रमेणाचामादेरचो वृद्धिः स्यात् ञिति णिति किति तद्धिते परे। आयथातथ्यम्। अयाथातथ्यम्। आयथापुर्यम्। अयाथापुर्यम्। ब्राह्मणादिदर्शनात् ष्यञ्। यथातथयथापुरशब्दौ 'यथासादृश्ये' इत्यव्ययीभावौ। तथा हि नपुंसकाश्रयं ह्रस्वत्वं कृतम्। भाष्ये तु यथा विगृहीतमयथातथा भाव[1] इति तथा विचार्यमाणे 'सुप् सुपा' इति समासो लक्ष्यते। 'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' ।।७।३।१।। एषामङ्गानामचामादेरचः स्थाने वृद्धिप्रसङ्गे आकारादेशः स्यात्। देविकायां भवं दाविकमुदकम्। पूर्वदेविका नाम प्राचां ग्रामस्तत्र भवः पूर्वदाविकः। शिंशपानां विकारः शांशपः। पलाशादित्वात्पक्षेण्। अनुदात्तादिलक्षणो वाञ्। पूर्वशिंशपा नाम प्राचां ग्रामस्तत्र भवः पूर्वशांशपः। दित्यौह इदं दात्यौहम्। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयसि भवः श्रायसः। वहीनरस्याचामादेरचः स्थाने वृद्धिप्रसङ्गे इकारादेशः स्यादिति वाच्यम्। वहीनरस्यापत्यं वैहीनरः। केचिद्विहीनरस्यैव वैहीनरिमिच्छन्ति। 'केकयमित्रयुप्रलयानां यादेरियः' ।।७।३।२।। एषां यादेः शब्दस्येयादेशः स्यात् ञिति णिति किति तद्धिते परे। केकयस्यापत्यं कैकयः। 'जनपदशब्दात् क्षत्रियादञ्' ।। मित्रयुभावेन श्लाघते मैत्रेयिकया श्लाघते। गोत्रचरणलक्षणो वुञ्। प्रलयादागतं प्रालेयमुदकम्।

१. After it—अयथापुराभाव Dc₂. २. यथा Bc₁. ३. तद्धिते ञिति णिति किति च परे। Dc₄.

संयोगादिश्च ॥६।४।१६६॥

संयोगात् पर इन् [1]प्रकृत्या स्यादणि परे ॥ चाक्रिणः ॥

अन् ॥६।४।१६७॥

[3]अणि [2]परे अन् प्रकृत्या [4]स्यात् ॥ याज्वनः । सामनः ।

न मपूर्वोपत्येवर्मणः ॥६।४।१७०॥

मात् परोन् प्रकृत्या न[5] स्यादपत्येणि न तु वर्मणः ॥ सुसाम्नोपत्यं सौसामः । भाद्रशर्मः । अपत्ये किम् । साम्नोयं सामनः । अवर्मणः किम् । भाद्रवर्मणः । अश्मनो विकारे टिलोपः[6] । [7]अश्मनो विकार आश्मः । आश्मनोन्यः । [8]अनुदात्तादेश्चेत्यञन्तत्वान्न प्रकृतिभावः । हेम्नो विकारो हैमः ॥

संयोगादिश्च । ‘ इनण्यनपत्ये ’ इति सिद्धे अपत्यार्थोयमारम्भः । **चाक्रिण** इति । चक्रमस्यास्तीति चक्री । इन् । तस्यापत्यम् । अण् ।

अन् । एतत्सूत्रं पूर्वमेव व्याख्यातम् । तेनाणि प्रकृतिभावाद् याज्वन इत्यादौ न टिलोपः । **याज्वन** इति । इष्टवान् यज्वा तस्यापत्यम् । **सामन** इति । साम्नोयम् । ‘ तस्येदम् ’ इत्यण् ।

न म । हितनाम्नो वेति वाच्यम् । हैतनामः । हैतनामनः । **अश्मनो विकार** इति । वक्तव्यम् । अनुदात्तादेरिति हेमन् शब्दोन्तोदात्तत्वादनुदात्तादिः ।

---

१. अणि परे प्रकृत्या स्यात् B_1. २. D_1, D_4 drop the Vṛitti. ३. B_1, B_2 drop it. ४. B_1, B_2 drop it. ५. नापत्येणि D_1, D_3, B_1, B_2. ६. After it—अणि निपात्यते B_1. ७. B_1 has आश्मः प्रासादः for अश्मनो विकार आश्मः; आश्मो विकारः । आश्मनोन्यः । D_1. ८. विकारार्थेणि अन् प्रकृत्या नेति केचित् C, D_3, B_1 (न प्रकृत्येति केचित् B_1).

ब्राह्मोजातौ ॥६।४।१७१॥

अयं निपात्यते ॥[१] ब्राह्मम[२]हः । जातावपत्ये तु ब्रह्मणोपत्यं ब्राह्मणः ।

कार्मस्ताच्छील्ये[३] ॥६।४।१७२॥

कर्मशीलः कार्मः । कार्मणमन्यत् ॥

औक्षमनपत्ये ॥६।४।१७३॥

अणि निपात्यते ॥ औक्षम् । अपत्ये तु

ब्राह्मः । योगविभागोत्र क्रियते । ब्राह्म इत्येकः । ततोजाताविति । तत्र ब्राह्म इत्येतदपत्याधिकारेपि सामर्थ्यादपत्यादन्यत्राणि टिलोपार्थं निपात्यत इत्यभिप्रेत्याह । **अयं निपात्यते** इति । **ब्राह्मम** इति । ब्रह्मण इदम् । अजाताविति द्वितीयो योगोपत्य इत्यनुवर्तते । ततश्च जातावपत्येणि ब्रह्मन् इत्येतस्य टिलोपो न भवतीति नञो भवतिना संबन्ध इतीममर्थमभिप्रेत्याह । जातावपत्ये त्वित्यादि । अपत्ये किम् । ब्राह्मी औषधिः ।

कार्मः । **कर्मशीलः कार्म** इति । 'छत्रादिभ्यो णः' इति णः । यद्येवं व्यर्थमिदं 'नस्तद्धिते' इति नलोपः सिद्ध एवेति चेत् । उच्येत । न व्यर्थम् । ज्ञापनार्थं ताच्छीलिकेणे यण्कृतानि कार्याणि स्युरिति । तेन चौरी तापसीत्यादौ ङीप् सिद्धः । ततश्च णेपि क्वचिदित्यादि यत् स्त्रीप्रत्ययेषूक्तं तदुपपन्नम् । **कार्मणमिति** । यथा संदेशवा[४]दा प्रतिपादितमेवमेतत् कर्तव्यमिति तच्छ्रुत्वा तथैव यत् क्रियते तत् कार्मणमुच्यते । 'तद्युक्तात्कर्मणोण्' इत्यण् ।

औक्षम् । **औक्षमिति** । 'तस्येदम्'[५] इत्यण् ।

---

१. After it—अजातौ D_2, D_3, D_5, B_1. २. Dropped in B_1. ३. कर्मणस्ताच्छील्ये B_2. ४. वाचा Dc_1, Dc_3, Dc_4. ५. इति न्याये Dc_2.

षपूर्वहन्धृतराज्ञामणि ॥६।४।१३५॥

एषामेवाणि तद्धिते नोल्लोपः[1] स्यात् ॥ उक्ष्णोपत्यमौक्ष्णः । वार्तघ्नः । धार्तराज्ञः । एषामेव[2] किम् । सामनम् ।

षपूर्व । एषामिति । षकारपूर्वो योन्‌शब्दस्तदन्तस्याङ्गस्या- हन्‌शब्दस्य धृतराजन्‌शब्दस्य चेत्यर्थः । वार्तघ्न इत्यादि । वृत्रघ्नोपत्यम् । धृतराज्ञोपत्यम् । सामनमिति । अत्रानिति प्रकृतिभावाट्टिलोपो न । अणि किम् । तक्ष्णोपत्यं ताक्षण्यः । 'सेनान्तलक्षणकारिभ्यश्च' इति ण्यः । त्यक्तं सूत्रद्वयम् । 'गाथिविदथिकेशिगणिपणिनश्च' ॥ ६।४।१६५॥ अपत्यार्थोयमारम्भः । एते चाणि प्रकृत्या स्युः । गाथिनोपत्यं गाथिनः । वैदथिनः । कैशिनः । गाणिनः । पाणिनः । 'दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनि- भ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि' ॥६।४।१७४॥ एते निपात्यन्ते । दण्डिनोपत्यं दाण्डिनायनः । हस्तिनोपत्यं हास्तिनायनः । उभयत्र 'नडादिभ्यः फक्' । अथर्वाणां ग्रन्थमधीते आथर्वणिकः । 'वसन्तादिभ्यष्ठक्' । जिह्माशिनोपत्यं जैह्माशिनेयः । शुभ्रादित्वाड्ढक् । वाशिनोपत्यं[3] वाशिनायनिः[4] । 'उदीचां वृद्धादगोत्रात्' इति फिञ् । एतेषु पञ्चसु प्रकृतिभावनिपातनात् टिलोपो न । भ्रूणघ्नो भावो भ्रौणहत्यम् । धीव्नो भावो धैवत्यम् । उभयत्र ष्यञ् तोन्तादेशश्च निपात्यते । सरय्वां भवं सारवमुदकम् । अत्राणि अयुशब्दलोपो निपात्यते । इक्ष्वाकुदेशे भव ऐक्ष्वाकः । उकारलोपो निपात्यते । मित्रयोरपत्यं मैत्रेयः । गृष्ट्यादित्वाड्ढञ् । अत्र यादेरियादेशापवादो लोपो निपात्यते । हिरण्यविकारो हिरण्यमयम् । मयटि यादिलोपो निपात्यते ।

---

१. °नोकार लोपः B_1; °नो लोपः D_2, D_5. २. °मेवेति किम् D_5. ३. वासिनो° Dc_3. ४. वसिनायनिः Dc_3.

प्राग्वहतेष्ठक् ॥४।४।१॥

तद्वहतीत्यतः प्रागित ऊर्ध्वं ठगधिक्रियते ॥

तेन दीव्यति खनति जयति जितम् ॥४।४।२॥

तृतीयान्तात् दीव्यत्याद्यर्थेषु[1] ठक् स्यात् ॥ अक्षैर्दीव्यती[2]-त्याक्षिकः । आक्षिकी ।[3] सैनिकः । भावप्रत्ययान्तान्निर्वृत्तेर्थे[4] इमन् वाच्यः । पाकेन निर्वृत्तः पाकिमः । [5]त्यागिमः ।

प्राग्वहतेः । आहेत्यर्थे प्रभूतादिभ्य उपसंख्यानं ठकः । प्रभूतमाह प्राभूतिकः । पार्याप्तिकः । क्रियाविशेषणात् प्रत्ययः । पृच्छतौ सुस्नातादिभ्यः ।* सुस्नातं पृच्छति सौस्नातिकः । सौखरात्रिकः । सौखशायनिकः । गच्छतौ परदारादिभ्यः ।* परदारान् गच्छति पारदारिकः । गौरुतल्पिकः ।

तेन । **तृतीयान्तादिति** । करणतृतीयान्तादिति ज्ञेयम् । तथोक्तं **पाणिनीयमतदर्पणे** ।

'साधनात् तद्धितो ज्ञेयः कर्तुर्नाभिधानतः ।
देवदत्तेन जितमित्यादौ तेन न जायते' ॥ इति ।

आक्षिकीति । 'टिड्ढाणञ्—' इति ङीप् । अभ्र्या खनति आभ्रिकः । अक्षैर्जयति आक्षिकः । अक्षै[6]र्जितमाक्षिकम् । **भाव-प्रत्ययान्तादिति** । तृतीयान्ताद्भावप्रत्ययान्तान्निर्वृत्त इत्यर्थे इमन् वाच्य इत्यर्थः । पाकत्यागौ भावघञन्तौ । स्पष्टत्वात्त्यक्तान्यष्टाविंशतिः । 'कुलत्थकोपधादण्' ॥४।४।४॥ कुलत्थात् कोपधात् तृतीयान्तात् संस्कृतेर्थेण् । ठकोपवादः । कुलत्थैः संस्कृतं कौलत्थम् । तैत्तिडीकम् । 'तरति' ॥४।४।५॥ तृतीयान्तात्तरतीत्यर्थेठक् । उडुपेन तरति

---

१. दीव्यत्स्यर्थेषु C. २. P, D_1 drop इति. ३. After it—कौद्दालिकः । D_1, D_3, B_1, B_2, सैनिकः. ४. अर्थे is dropped in P and C. ५. P has त्यागिकः before it; त्यागेन निर्वृत्तस्त्यागिमः । D_5. ६. °जित आक्षिकः Dc_3.

औडुपिकः । धार्मिकः । 'गोपुच्छाट्ठञ्' ॥४।४।६॥ ठकोपवादः । गोपुच्छेन तरति गौपुच्छिकः । ञित्स्वरेणाद्युदात्तः । ठकि तु कित इत्यन्तोदात्तः स्यात् । 'नौद्व्यचष्ठन्' ॥४।४।७॥ तेन तरतीत्यर्थे । नावा तरति नाविकः । द्व्यचः । घटेन तरति घटिकः । घटिका । नित्त्वादाद्युदात्तत्वम् । षः सांहितिकोतो न षित् ।

आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च ।

आवसथात् किसरादेष्ठकाधिकारे षितः सप्त ॥

'चरति' ॥४।४।८॥ तृतीयान्ताट्ठक् चरतीत्यर्थे । चरतिर्भक्षणे गतौ च वर्तते । दध्ना चरति भक्षयति दाधिकः । हस्तिना चरति गच्छतीति हास्तिकः । 'आकर्षात् ष्ठल्' ॥४।४।९॥ आकर्षः सुवर्णपरीक्षोपलः । तेन चरति आकर्षिकः । षो ङीषर्थः । लो लीति इति प्रत्ययात् पूर्वस्योदात्तत्वार्थः । 'पर्पादिभ्यष्ठन्' ॥४।४।१०॥ पर्पेण चरति पर्पिकः । पर्पिकी । पर्प । अश्व । अश्वत्थ । रथ । जाल । न्यास । व्याल । पादः पञ्च । 'वेतनादिभ्यो जीवति' ॥४।४।१२॥ तेनेति ठक् । वेतनेन जीवति वैतनिकः । वेतन । वाह । अर्धवाह । धनुर्दण्ड । संघातविगृहीतार्थम् । धानुर्दण्डिकः । धानुष्कः । दाण्डिकः । जाल । वेश । उपवेश । प्रेषण । उपहस्ति । सुख । शय्या । शक्ति । उपनिषद् । उपवेष । स्फिज । पाद । उपस्थान । 'वस्नक्रयविक्रयाट्ठन्' ॥४।४।१३॥ वस्नेन जीवति वस्निकः । क्रयविक्रयग्रहणं संघातविगृहीतार्थम् । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः । 'आयुधाच्छ च' ॥४।४।१४॥ ठन् च । आयुधेन जीवति आयुधिकः । आयुधीयः । 'हरत्युत्सङ्गादिभ्यः' ॥४।४।१५॥ ठक् । उत्सङ्गेन हरति औत्सङ्गिकः । उत्सङ्ग ।

---

१. पर्पादिभ्यो Dc_3. २. ष्ठकोधिकारे Dc_3, Dc_4. ३. उपवस्ति Dc_2. ४. स्फिग Bc_1, Dc_1, Dc_4. ५. आयुधीयः । आयुधिकः । Dc_3.

उडुप । उ[1]त्पुत । उत्पुट । पिटाक । पिटक । ‘भस्त्रादिभ्यष्ठन्’ ॥४।४।१६॥ भस्त्रेन हरतीति भस्त्रिकः । भस्त्रिकी । भस्त्र । भरट । भरण । शीर्षभार । शी[2]र्षेभार । अं[3]सभार । अं[3]सेभार । अं[4]सहार ॥ ‘विभाषाविवधवीवधात्’ ॥४।४।१७॥ तेन ह[5]रति । वा ष्ठन् । विवधिकः । वीवधिकः । वैवधिकः । विव[6]धिकी । वीवधिकी । ‘अण् कुटिलिकायाः’ ॥४।४।१८॥ कुटिलिका वक्रगतिः । वक्रं[7]गा लोहयष्टिश्च । तया हरति मृगं कौटिलिको व्याधः । कौटिलिकः कर्मकरः । स हि तयाङ्गारान् हरति । ‘निवृत्तेक्षद्यूतादिभ्यः’ ॥४।४।१९॥ ठक् । अक्षद्यूतेन निवृत्तमाक्षद्यूतिकम् । अक्षद्यूत । जं[8]घूत । जङ्घाप्रहत । जङ्घाप्र[9]हत । पादस्वे[10]दन । कण्टकमर्दन । गतागत । गतानुगत । ‘अपमित्ययाचिताभ्यां कक्कनौ’ ॥४।४।२१॥ अपमित्ये[11]निर्वृत्तम् । आपमित्यकम् । अपमयेन निर्वृ[12]त्तमित्यर्थः । याचितेन निर्वृ[13]त्तं याचतिकम् । ‘संसृष्टे’ ॥४।४।२२॥ तेनेति ठक् । दध्ना संसृष्टं दाधिकम् । ‘चूर्णादिनिः’ ॥४।४।२३॥ संसृष्टे । ठकोपवादः । चूर्णैः संसृष्टाश्चूर्णिनोपूपाः । ‘लवणाल्लुक्’ ॥४।४।२४॥ सैन्धवादिद्रव्यवाचिनो लवणशब्दात् परस्य ठको लुक् । न च रसवाचिनः । लवणेन संसृष्टं लवणं शाकम् । ‘मुद्गादण्’ ॥४।४।२५॥ मुद्गैः संसृष्टं मौद्गमन्नम् । ‘व्यञ्जनैरुपसिक्ते’ ॥४।४।२६॥ ठक् । दध्नोपसिक्तं दाधिकम् । व्यञ्जनैः किम् । अम्भसोपसिक्तम् । ‘संसृष्टे’ इति वर्तमाने उपसिक्तग्रहादोदनादावेव स्यादिह न । सूपेनोपसिक्ता स्थालीति । ‘ओजः सहोम्भसा वर्तते’ ॥४।४।२७॥ ओजसा वर्तते ओजसिकः ।

१. उद्गृहीत Bc1, Dc1, Dc3, Dc4. २. शीर्षेभार and अंसेभार dropped Bc1, Dc1. ३. असंभार । असंहर Dc3. ४. Dropped Dc2. ५. हरतीति Bc1. ६. Dropped Bc1. ७. वक्रीग्राहलोह° Bc1, Dc1. ८. Dropped Bc1, Dc1, Dc3, Dc4. ९. °प्रहार Bc1. १०. °घाटन Bc1. ११. °निवृत्तम् Bc1. १२. निवृत्त° Bc1. १३. निवृत्तः याचितकः Bc1, Dc1, Dc3, Dc4.

पक्षिमत्स्यमृगान् हन्ति ॥४।४।३५॥

एभ्यो द्वितीयान्तेभ्यो हन्त्यर्थे ठक् [1]स्यात् ॥ स्वरूपस्य पर्यायाणां विशेषाणां च [2]ग्रहणम् । पक्षिणो हन्तीति[3] पाक्षिकः ॥[4]

सहसा वर्तते साहसिकः । अम्भसा वर्तते आम्भासिकः । 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' ॥४।४।२८॥ तदिति द्वितीयासमर्थात् प्रत्यनुपूर्वादीपादेर्वर्तत इत्यर्थे ठक् । प्रतीपं वर्तते प्रातीपिकः । अन्वीपिकः । प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः । 'परिमुखं च' ॥४।४।२९॥ वर्तत इति ठक् । परिमुखं वर्तते पारिमुखिकः सेवकः । चकारोनुक्तसमुच्चयार्थः । पारिपार्श्विकः । 'प्रयच्छति गर्ह्यम्' ॥४।४।३०॥ ठक् । द्विगुणं प्रयच्छति द्वैगुणिकः । द्विगुणमिति तादर्थ्यात्ताच्छब्द्यम् । द्विगुणं [5]ग्रहीतुमेकगुणं ददातीत्यर्थः । अन्यथा गर्ह्यत्वाभावात् । वृद्धेश्च वृधुष्यादेशः । वार्धुषिकः । प्रकृत्यन्तरं वा वृधुषिशब्दः । 'कुसीददशैकादशात् ष्ठन्ष्ठचौ' ॥४।४।३१॥ यथासंख्यं प्रयच्छति गर्ह्यमित्यर्थे । कुसीदं प्रयच्छति कुसीदिकः । कुसीदिकी । अत्रापि तादर्थ्यात्ताच्छब्द्यम् । ये दश दत्ता एकादश भविष्यन्ति ते दशैकादश तान् प्रयच्छति दशैकादशिकः । दशैकादशिकी । 'उञ्छति' ॥४।४।३२॥ उच्चिनोतीत्यर्थे ठक् । बदराण्युञ्छति बादरिकः । 'रक्षति' ॥४।४।३३॥ अत्रार्थे द्वितीयान्तात् ठक् । समाजं रक्षति सामाजिकः ।

पक्षिमत्स्य । स्वरूपस्येत्यादि । अर्थप्रधानत्वान्निर्देशस्येत्यर्थः ।

---

१. Dropped B_1. २. ग्रहणात् B_2. ३. इति dropped D_4. ४. After पाक्षिकः D_6 has–श्वादेरैच् स्याद्वा ॥ श्वपदस्येदं श्वापदम् । शौवापदम् । न्यकोर्वेति केचित् । न्याकवम् । नैयकवम् । 'सुसर्वार्धाज्जनपदस्य ॥' एभ्यो जनपदवाचिन उत्तरपदस्यैव वृद्धिः स्यात् । सुपाञ्चालः । सर्वपाञ्चालः । अर्धपाञ्चालः । 'संयोगादिश्च ॥' संयोगात् परस्येन् प्रकृत्या स्यात् अणि अनपत्ये । चाक्रिणः । याज्वनः । सामनः । 'न मपूर्वोपत्ये वर्मणः ॥' मपूर्वोन् प्रकृत्या न स्यात् अपत्येणि न तु वर्मणः । सुसाम्नोपत्यं सौसामिनः । भाद्रशर्मः । अपत्ये किम् । साम्नोयं सामनः । अवर्मणः किम् । भाद्रवर्मणः । शाकुनिकः । तैत्तिरिकः । &c. ५. गृहीतमे° Bc_1.

शाकुनिकः । तैत्तिरिकः । मार्गिकः । हरिणिकः । सारङ्गिकः ।[3] मात्स्यकः । अत्र पर्याया न गृह्यन्ते । अनिमिषान् हन्तीति[4] आनिमिषिकः । मीनस्येष्टिः । मैनिकः । विशेषाणाम् ।[5] शाकुलिकः । मार्गिकः[6] । हारिणिकः । शार्ङ्गिकः ॥

संस्कृतम् ॥४।४।३॥

तृतीयान्तात् संस्कृतेर्थे[7] ठक् स्यात्[8] ॥ दध्ना संस्कृतो दाधिकः ॥

शब्ददर्दुरं करोति ॥४।४।३४॥

आभ्यां[9] द्वितीयान्ताभ्यां करोत्यर्थे ठक्[10] ॥ शब्दं[11] करोतीति[12] शाब्दिकः । दार्दुरिकः ॥

शाकुनिक इति । पक्षिपर्यायः शाकुनिशब्दः । **तैत्तिरिक**[13] इति । पक्षिविशेषस्तित्तिरिः । मृगपर्यायो हरिणः । सारङ्गो मृगविशेषः । **अत्र पर्याया न गृह्यन्त** इति । अत्र मत्स्ये अनिमिषादयः पर्याया न गृह्यन्ते । अनभिधानात् । **मीनस्येष्टिरिति** । अत्र मत्स्यपर्यायो गृह्यते । अभिधानात् ।

संस्कृतम् । सत उत्कर्षाधानं संस्कारः ।

शब्द[14]**शाब्दिको** वैयाकरणः । **दार्दुरिकः** । कुम्भकारः । स्पष्टत्वात् त्यक्तं सूत्रपञ्चकम् । 'परिपन्थं च तिष्ठति' ॥४।४।३६॥

---

१. Dropped D_2, D_3, B_1, C. २. हारिणिकः । सारङ्गिकः dropped B_1. ३. शार्ङ्गिकः । मात्सिकः D_6. ४. हन्तीति विग्रह एवावतिष्ठते B_1; P, D_1 have अनिमिषान् हन्ति for अनिमिषान्...आनिमिषिकः ; D_4 drops इति. ५. After it-ग्रहणमिष्यते C. ६. मार्गिकः···शार्ङ्गिकः dropped P, C. ७. संस्कृतार्थे C. ८. Dropped B_1. ९. आभ्यां dropped B_1. १०. After it—स्यात् C, B_2. ११. शब्दं करोतीति dropped B_1, B_2. D_2, D_5. १२. इति dropped P, D_1. १३. तैत्तिरीयक Bc_1, Dc_3. १४. शब्दः Dc_3.

धर्मं चरति ॥४।४।४१॥

अस्माच्चरत्यर्थे ठक् ॥ धर्मं चरतीति धार्मिकः ॥ अधर्माच्च ॥* आधर्मिकः ।

ठक् । परिपन्थं तिष्ठति पारिपन्थिकश्चौरः । चकारो भिन्नक्रमः । परिपन्थं तिष्ठति चेति द्रष्टव्यम् । स च समानजातीयस्य प्रत्ययार्थस्य समुच्चयार्थः । तेन परिपन्थं हन्ति पारिपन्थिकः । 'माथोत्तरपदपदव्यनुपदं धावति' ॥४।४।३७॥ माथोत्तरपदात् । दण्डमाथं धावति दाण्डमाथिकः । माथशब्दः पथिवाची । पदव्याः । पदवीं धावति पादविकः । अनुपदात् । अनुपदं धावति आनुपदिकः । 'आक्रन्दात् ठञ् च' ॥४।४।३८॥ आक्रन्दं धावति आक्रन्दिकः । आक्रन्दिकी । स्वरे विशेषः । 'पदोत्तरपदं गृह्णाति' ॥४।४।३९॥ पदोत्तरपदात् गृह्णातीत्यर्थे ठक् । पूर्वपदं गृह्णाति पौर्वपदिकः । 'प्रतिकण्ठार्थललामं च' ॥४।४।४०॥ एभ्यो गृह्णातीत्यर्थे ठक् । प्रातिकण्ठिकः । आर्थिकः । लालामिकः ।

धर्मं । चरतिरत्रासेवायां नानुष्ठानमात्रे । धार्मिको यः पौनःपुन्येन तात्पर्येण धर्ममनुतिष्ठति स उच्यते । अधर्माच्चेति वक्तव्यम् । ग्रहणवता प्रातिपदिकेन प्रतिषेधादस्यारम्भः । स्पष्टत्वात्त्यक्तान्यष्टादश । 'प्रतिपथमेति ठंश्च' ॥४।४।४२॥ ठक् च । प्रतिपथमेति प्रतिपथिकः । प्रातिपथिकः । 'समवायान् समवैति' ॥४।४।४३॥ समवायवाचिभ्यो द्वितीयान्तेभ्यः समवैतीत्यागत्य तदेकदेशी भवतीत्यर्थे ठक् स्यात् । सामवायिकः । सामाजिकः । सामूहिकः । सान्निवेशिकः । 'परिषदो ण्यः' ॥४।४।४४॥ ठकोपवादः । परिषदं समवैति पारिषद्यः । 'सेनाया वा' ॥४।४।४५॥ ण्यष्ठक् च । सेनां समवैति सैन्यः सैनिकः ।

---

१. अस्माद् द्वितीयान्तात् D_4. २. After it—स्यात् B_2. ३. इति dropped B_1, D_1, D_4. ४. Before it—ठक् Dc_3. ५. Before it—ठक् च Dc_3.

'संज्ञायां ललाटकुक्कुट्यौ पश्यति' ॥४।४।४६॥ ठक् । ललाटं कोपप्रसादचिह्नं पश्यति लालाटिकः कार्याक्षमः सेवकः। कुक्कुटीं पश्यति कौक्कुटिकः कुक्कुटीपातमात्रं पश्यन् संकुचितदृष्टिर्भिक्षुरुच्यते । 'तस्य धर्म्यम्' ॥४।४।४७॥ धर्म्यं धर्मादनपेतमित्यर्थे षष्ठ्यन्ताट्ठक् । आपणस्य धर्म्यमापणिकम् । 'अण् महिष्यादिभ्यः' ॥४।४।४८॥ महिष्या धर्म्यं माहिषम्। महिषी। प्रजापति। विलेपिका। प्रलेपिका। अनुलेपिका। पुरोहित। मणिपाली। अनुचारक। होतृ। यजमान। 'ऋतोञ्' तस्य धर्म्यमित्यर्थे। पोतुर्धर्म्यं पौत्रम्। नारम्। विशसितुरिड्लोपश्च। विशसितुर्धर्म्यं वैशस्त्रम्। विभाजयितुर्णिलोपश्च। विभाजयितुर्धर्म्यं वैभाजित्रम् । 'अवक्रयः' ॥४।४।५०॥ वणिग्भिः शुल्कस्थाने प्रतिभाण्डमधिपतये देयमवक्रयः। षष्ठ्यन्तादवक्रयार्थे ठक्। शुल्कशालाया अवक्रयः शौल्कशालिकः। आकरिकः। लोकपीडयाधर्मातिक्रमेणाप्यवक्रयः स्यादिति धर्म्यात्पृथग्ग्रहणम् । 'तदस्य पण्यम्' ॥४।४।५१॥ प्रथमान्तादस्य पण्यमित्यर्थे ठक्। अपूपाः पण्यमस्य आपूपिकः । 'लवणाट्ठञ्' ॥४।४।५२॥ लवणं पण्यमस्य लावणिकः। ठकोपवादः। ञः स्वरार्थः। 'किशरादिभ्यष्ठन्' ॥४।४।५३॥ किशरः पण्यमस्येति किशरिकः। षित्त्वात् किशरिकी। किशरादयो गन्धविशेषवाचिनः। किशर[1]। नदर[2]। ङगल[3]। तगर। गुग्गुल। उशीर। हरिद्रा। हरिद्रु। पर्णी। 'शलालुनोऽन्यतरस्याम्' ॥४।४।५४॥ ठन्। पक्षे ठक्[4]। शलालु पण्यमस्य शलालुकः। शालालुकः। शलालुकी । 'शिल्पम्' ॥४।४।५५॥ कौशलं क्रियाभ्यासपूर्वको ज्ञानविशेषः। 'तदस्य–' इति ठक्। मृदङ्गवादनं मृदङ्ग उपचारात्। मृदङ्गः शिल्पमस्य मार्दङ्गिकः। 'मड्डुकझर्झरादणन्यतरस्याम्' ॥४।४।५६॥ मड्डुकं शिल्पमस्य माड्डुकः। माड्डुकिकः। झर्झरः शिल्पमस्य झार्झरः झार्झरिकः। 'प्रहरणम्'

१. किसर all through Bc1, Dc3, Dc4. २. नरद Dc2. ३. स्थगल Dc2. ४. Before it—पक्षे ठक् Dc3, Dc4.

अस्तिनास्तिदिष्टं मतिः ॥४।४।६०॥

एभ्यो मत्युपाधिकेभ्यः प्रथमान्तेभ्यः षष्ठ्यर्थे ठक्[1] । परलोकमतिरत्रेष्यते । अस्ति परलोके मतिरस्य[2] आस्तिकः ।[3] प्रमाणानुगा[4] मतिर्दिष्टा । सास्यास्तीति दैष्टिकः ॥[5]

॥४।४।५७॥ तदस्येति ठक् । असिः प्रहरणमस्य आसिकः । धानुष्कः । 'परश्वधाट्ठञ् च' ॥४।४।५८॥ चात् ठक् । परश्वधः प्रहरणमस्य पारश्वधिकः । 'शक्तियष्ट्योरीकक्' ॥४।४।५९॥ शक्तिः प्रहरणमस्य शाक्तीकः । याष्टीकः ।

अस्ति । परलोकमतिरत्रेष्यते इति । तदेतदास्तिकादिशब्दानामभिधानशक्तिस्वाभाव्याल्लभ्यते । अस्तिनास्तिशब्दौ निपातौ । अथवा वचनसामर्थ्यादाख्यातात्[7] वाक्याच्च प्रत्ययः । स्पष्टत्वात् त्यक्तानि त्रयोदश । 'शीलम्' ॥४।४।६१॥ तदस्येति ठक् । अपूपभक्षणं शीलमस्य आपूपिकः । भक्षणक्रिया तद्विषयं च शीलं तद्धितवृत्तावन्तर्भवति । 'छत्रादिभ्योणः' ॥४।४।६२॥ तदस्य शीलमित्यर्थे । छादनादावरणाच्छत्रम् । गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः । छत्र । शिक्षा । भिक्षा । प्ररोह[8] । स्था । अयमुपसर्गपूर्वो गृह्यते । चुरा । उपस्थान । ऋषि । कर्मन् । विश्वधा । तपस् । सत्य । अनृत । विशिखा । 'कर्माध्ययने वृत्तम्' ॥४।४।६३॥ प्रथमान्तादध्ययने कर्म वृत्तमित्येतस्मिन् षष्ठ्यर्थे ठक् स्यात् । एकमन्यदपपाठरूपमध्ययने कर्मवृत्तमस्य ऐकान्यिकः । एकमन्यदिति विगृह्य तद्धितार्थ इति समासस्ततष्ठक् । अध्ययने कर्मवृत्तमित्येतत् सर्वं तद्धितवृत्तावन्तर्भवति । यस्याध्ययने प्रवृत्तस्य[9] परीक्षाकाले पठतः स्खलितमपपाठ-

---

१. ठक् स्यात् B_2, D_5. २. मतिर्यस्य C. ३. After it—नास्ति परलोके मतिरस्य नास्तिकः । D_3, D_5, B_1, B_2. ४. प्रमाणानुगमति° D_1. ५. After it—इति प्राग्वहतीयाः D_4. ६. Then comes the Sūtra प्राग्घिताद्यत् ॥ ४।४।७५॥ 'तस्मै हितम्' इत्यतः प्राक् यदधिक्रियते–D_3, D_4, B_1. P (P drops the Vṛitti). ७. °दाख्याताच्च Dc_3. ८. पुरोहित Bc_1, Dc_1, Dc_3, Dc_4. ९. प्रयुक्तस्य Bc_1, Dc_3, Dc_4.

रूपमेकं जायते स ऐकान्यिक उच्यते । एवं द्वैयन्यिकः । त्रैयन्यिकः । 'बह्वच् पूर्वपदाट्ठच्' ॥४।४।६४॥ कर्माध्ययने वृत्तमित्यर्थे । द्वादशान्यानि कर्माण्यपपाठरूपाण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः । त्रयोदशान्यिकः । त्रयोदशापपाठा अस्य जाता इत्यर्थः । चित्वादन्तोदात्तत्वम् । 'हितं भक्षाः' ॥४।४।६५॥ हितयोगसामर्थ्याच्चतुर्थ्यर्थः प्रत्ययार्थः । प्रथमान्ताच्चतुर्थ्यर्थे ठक् । तच्चेत् प्रथमान्तं हितं भक्ष्यं स्यात् । अपूपभक्षणं हितमस्मै आपूपिकः । हितार्थः क्रिया च तद्धितवृत्तावन्तर्भवति । 'तदस्मै दीयते नियुक्तम्' ॥४।४।६६॥ ठक् । अग्रे भोजनमस्मै नियतं दीयते आग्रभोजनिकः । 'श्राणामांसौदनाट्टिठन्' ॥४।४।६७॥ टो ङीबर्थः[1] । इरुच्चारणार्थः । न आद्युदात्तार्थः । श्राणा नित्यमस्मै दीयते श्राणिकः । मांसौदनं समस्तव्यस्तम् मांसौदनिकः । मांसिकः । औदनिकः । औदनिकी । 'भक्तादणन्यतरस्याम्' ॥४।४।६८॥ पक्षे ठक् । भक्तमस्मै नित्यं दीयते भाक्तिकः[2] । 'अगारान्ताट्ठन्' ॥४।४।७०॥ तत्र नियुक्त इत्यर्थे । देवागारे नियुक्तः देवागारिकः । 'अध्यायिन्यदेशकालात्' ॥४।४।७१॥ सप्तम्यन्तादेशकालादध्यायिन्यर्थे ठक् । अध्ययने यौ देशकालौ शास्त्रेण निषिद्धौ तावदेशकालशब्देनोच्येते । श्मशानेधीते श्माशानिकः । चतुर्दश्यामधीते चातुर्दशिकः । अदेशकालात् किम् । स्रुघ्नेधीते । पूर्वाह्णेधीते । 'कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति' ॥ ४।४।७२॥ ठक् । व्यवहारक्रिया तत्त्वम् । कठिनान्तात् । वंशकठिने व्यवहरति वांशकठिनिकः । प्रस्तारे व्यवहरति प्रास्तारिकः । संस्थाने व्यवहरति संस्थानिकः । 'निकटे वसति' ॥४।४।७३॥ ठक् । निकटे वसति नैकटिकः । भिक्षुः । 'आवसथाट्ठल्' ॥४।४।७४॥ लः स्वरार्थः । आवसथे वसति आवसथिकः । आवसथिकी ।

इति प्राग्वहतीयाः प्रत्ययाः । ठकः पूर्णोवधिः ।

---

१. ङीषर्थः Dc4. २. भाक्तः । भाक्तिकः Dc3.

तद्वहति रथयुगप्रासङ्गम् ॥४।४।७६॥

एभ्यो द्वितीयान्तेभ्यो वहत्यर्थे[1] यत् ॥ रथ्यः । युग्यः । प्रासंग्यः ।

धुरो यड्ढकौ ॥४।४।७७॥

धुरं वहति धौरेयः ।

हलि च ॥८।२।७७॥

रेफवान्तस्योपधाया[2] दीर्घः[3] स्याद्धलि परे ॥ इति दीर्घे[4] प्राप्ते

न भकुर्छुराम् ॥८।२।७९॥

भस्य[5] कुर्छुरोरुपधाया न दीर्घः ॥ धुर्यः ।

अथ प्राग्घितीया उच्यन्ते ।

तद्वहति । यदिति । 'प्राग्घिताद्यत्' ॥४।४।७५॥ इत्यधिकारसूत्राल्लभ्यते तस्य चायमर्थः । 'तस्मै हितम्' इत्यतः प्राक् यदितः परं वक्ष्यते तत्र यत् प्रत्ययः स्यादिति ज्ञेयम् । रथसीताहलेभ्यो यद्विधौ तदन्तविध्युपसंख्यानात् परमरथ्य उत्तमरथ्य इत्यपि स्यात् ।

धुरः । द्वितीयान्तात् धुरो यत्ढकौ प्रत्ययौ स्तः ।

हलि च । 'वोरुपधायाः—' इति सिद्धे अपदान्तार्थोयमारम्भः । तीर्णम् । गूर्णम् । दीव्यति । धातोरित्यनुवर्तते । तेनेह न । चतुर इच्छति चतुर्यति । इकः किं स्मर्यते । इति दीर्घत्वे प्राप्त इति । धुर्य इत्यत्र ।

न भकुर् । वोरित्यनुवर्तते । ततश्चायमर्थः । रेफवान्तस्य भस्य कुरछुरोश्चोपधाया दीर्घो न स्यादिति । रेफवकाराभ्यां भस्य विशेषणं किम् । प्रतिदीव्ना । प्रतिदीव्ने ।

---

१. वहतीति D_2, D_5. २. वकारान्तस्यो° B_1, D_2, D_4, D_5. ३. इको दीर्घः D_1, D_4, D_5, B_2. ४. दीर्घत्वे D_3, P, C, Com. दीर्घे dropped D_5. ५. Before it—रेफवान्तस्य D_4.

खः सर्वधुरात् ॥४।४।७८॥

वहत्यर्थे ॥ सर्वधुरीणः ।

एकधुराल्लुक् च ॥४।४।७९॥

अस्मात् खः[1] स्यात्[2] तस्य[3] लुग्वा ॥ एकधुरीणः[4] । एकधुरः ।

शाकटादण् ॥४।४।८०॥

शाकटः ।

हलसीराट्ठक् ॥४।४।८१॥

हालिकः । सैरिकः ।

खः । स्त्रीलिङ्गे न्याय्ये सर्वधुरादिति प्रातिपदिकमात्रापेक्षो निर्देशः । ख इति योगविभागः इष्टसंग्रहाय । दक्षिणधुरीणः । उत्तरधुरीणः ।

एकधुरात् । वचनसामर्थ्यात् पक्षे लुग्विधीयत इत्यभिप्रेत्याह । **तस्य च लुग्वेति** । **एकधुरीण** इत्यादि । एकधुरां वहति ।

शकटात् । द्वितीयासमर्थादस्माद्वहतीत्यर्थेऽण् स्यात् । **शाकट** इति । शकटं वहति ।

हल । **हालिक** इत्यादि । हलं वहति । सीरं वहति । स्पष्टत्वात् त्यक्तानि षोडश । 'संज्ञायां जन्या' ॥४।४।८२॥ तद्वहत्यर्थे यत् । जनीं वहतीति जन्या वरस्य स्निग्धा । जनी वधूः । 'विध्यत्यधनुषा' ॥४।४।८३॥ विध्यत्यर्थे द्वितीयान्ताद्यत् धनुष्करणिकायां [5]व्यधनक्रियायां न । पादौ विध्यन्तीति पद्याः । शर्कराः । 'पद्यत्यतदर्थे' इति

---

१. Before it C has–अस्मात् खः स्यात्. २. वहत्यर्थे for स्यात् B_1, ३. तस्य च B, D_1, Com. ४. एकधुरः । एकधुरीणः । D_5. ५. तु व्यधन° Dc_3.

पादशब्दस्य पदादेशः । अस्य सूत्रस्य चायमर्थः । अतदर्थे यत्प्रत्यये परे पादशब्दस्य पदादेशः स्यात् । शरीरावयवस्य पादस्येह ग्रहस्तेन 'पणपादमाषशतात्—' इत्यत्र न । द्विपाद्यमिति । अतदर्थे किम् । पादार्थमुदकं पाद्यम् । चरताविकेपि यद्भावो वाच्यः । पादाभ्यां चरति पदिकः । अधनुषेति किम् । चोरं विध्यति देवदत्तः । 'धनगणं लब्धा' ॥४।४।८४॥ यत् । धनं लब्धा धन्यः । गणं लब्धा गण्यः । 'अन्नाण्णः' ॥४।४।८५॥ अन्नं लब्धा आन्नः । 'वशं गतः' ॥४।४।८६॥ यत् । वशं गतो वश्यः । 'पदमस्मिन् दृश्यम्' ॥४।४।८७॥ यत् । पदं द्रष्टुं शक्यं यत्र प्रतिमुद्रोत्पादनेन स पद्यः कर्दमः । कर्दमस्य समावस्थोच्यते । नातिद्रवो नातिशुष्क इति । 'मूलमस्याबर्हि' ॥४।४।८८॥ बृहू उद्यमे । आङ् पूर्वाद् भावे घञ् । आबर्हणमाबर्हः उत्पाटनं सोस्यास्तीति आबर्हि । मूलादाबर्ह्युपाधिकादस्येत्यर्थे यत् । मूलमेषामाबर्हि मूल्या मुद्गाः । सुष्ठु[1] निष्पन्नाः । मूलोत्पाटनेन विना ग्रहीतुं न शक्यन्त इत्यर्थः । 'संज्ञायां धेनुष्या' ॥४।४।८९॥ यत् । धेनुरुत्तमर्णाय आऋणप्रदानाद्दोहार्थं दीयते तस्यामभिधेयायां धेनुष्येत्यन्तोदात्तो निपात्यते । 'गृहपतिना संयुक्ते ञ्यः' ॥४।४।९०॥ संज्ञायाम् । गृहपतिना संयुक्तो गार्हपत्योग्निः । 'नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु' ॥४।४।९१॥ नावादिभ्यस्तृतीयान्तेभ्यो यथाक्रमं तार्यादिष्वर्थेषु यत् । नावा तार्यं नाव्यम् । वयसा तुल्यो वयस्यः । संज्ञाधिकाराच्छत्रौ न । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । मूलेन पटादिना नाम्यं मूल्यम् । येन पटादिकं गृह्यते तद्धिरण्यादि मूल्यमित्युच्यते । यदपहाय यद्गृह्यते तत्तेनानामितं स्यात् । मूलेन समो मूल्यः पटः । उपादानेन[2] समानफल इत्यर्थः ।

---

१. न सुष्ठु Bc1, Dc1, Dc4. २. उपादानसमान° Bc1, Dc1, Dc3, Dc4.

तत्र साधुः ॥४।४।९८॥

सप्तम्यन्तात् साध्वर्थे यत् स्यात् ॥ 'ये चाभाव—' इति प्रकृत्या। सामसु साधुः सामन्यः। कर्मण्यः।

सीतया संमितं संगतं सीत्यं क्षेत्रम्। रथसीताहलेभ्यो यद्विधौ तदन्तविधेरपीष्टत्वात्। परमसीत्यम्। तुलया संमितं समानं तुल्यं सदृशमुच्यते। 'धर्मपथ्यर्थन्यायादनपेते' ॥४।४।९२॥ यत्। धर्मादिनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम्। 'छन्दसो निर्मिते' ॥४।४।९३॥ तृतीयान्ताच्छन्दसो निर्मितेर्थे यत्। छन्दसा निर्मितं छन्दस्यम्। इच्छया कृतमित्यर्थः। 'उरसोण् च' ॥४।४।९४॥ यच्च। उरसा निर्मित औरस उरस्यः पुत्र एव संज्ञाधिकारात्। 'हृदयस्य प्रियः' ॥४।४।९५॥ यत्। हृदयस्य प्रियो हृद्यः। 'बन्धने चर्षौ' ॥४।४।९६॥ हृदयाद्यत्। ऋषिर्मन्त्रः। हृदयस्य बन्धनो हृद्यो वशीकरणमन्त्र उच्यते। 'मतजनहलात् करण-जल्पकर्षेषु' ॥४।४।९७॥ मतादिभ्यस्त्रिभ्यः षष्ठ्यन्तेभ्यस्त्रिष्वेव करणादिषु यथासंख्यमर्थेषु यत् स्यात्। मतं ज्ञानं तस्य करणं मत्यम्। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। तदन्तविधेरपीष्टत्वात् द्विहल्यः त्रिहल्यः।

तत्र। साधुरिति प्रवीणो योग्यो वा गृह्यते नोपकारकः। तत्र हि परत्वात् 'तस्मै हितम्' इति विधिना भाव्यम्। स्पष्टत्वात् त्यक्तं सूत्रषट्कम्। 'प्रतिजनादिभ्यः खञ्' ॥४।४।९९॥ प्रतिजने साधुः प्रातिजनीनः। जने जने साधुरित्यर्थः। प्रतिजन। इदंयुग। संयुग। समयुग। परयुग। परकुल। परस्यकुल।

---

१. Before it—धर्मपथ्यर्थन्यायादनपेते ॥४।४।९२॥ अनपेते पञ्चम्यन्तात् ज्यः स्यात्। धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम् ॥ २. Dropped B_1. ३. इति dropped P, B_3; °भाव—' इत्यन् प्रकृत्या D_4. ४. °रभीष्टत्वात् Dc_3. ५. °रभीष्ट° Dc_3.

संभाया यः ॥४।४।१०५॥

अस्माद्यः स्यात् साध्वर्थे ॥ सभ्यः ।

अमुष्यकुल । सर्वजन । विश्वजन । महाजन । पञ्चजन । यत्र हितार्थ एव साध्वर्थस्तत्र वचनात् प्राक्क्रीतीयो बाध्यते । 'भक्ताण्णः' ॥४।४।१००॥ भक्ते साधुर्भाक्तः शालिः । 'परिषदो ण्यः' । परिषदि साधुः परिषद्यः । णोपीष्यते । तदर्थं योगविभागः क्रियते परिषद इति । परिषदि साधुः पारिषदः । 'कथादिभ्यष्ठक्' ॥४।४।१०२॥ कथायां साधुः काथिकः । कथा । विकथा । विश्वकथा । वितण्डा । कुष्ठविद् । जनवाद । जनेवाद । वृत्ति । संग्रह । गुण । गण । आयुर्वेद । 'गुडादिभ्यष्ठञ्' । गुडे साधुर्गौडिकः । इक्षुः । गुड । कुल्माष । सक्तु । अपूप । मांसौदन । इक्षुवेणु । सङ्ग्राम । संघात । प्रवास । निर्वास । उपवास । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' ॥४।४।१०४॥ पथि साधु पाथेयम् । अतिथिषु साधुरातिथेयः । वसतौ साधु वासतेयम् । स्वपतौ साधु स्वापतेयम् ।

सभाया यः । स्वरे विशेषः । यति ह्यन्तस्वरितं स्यात् । अन्तोदात्तत्वं चेष्यते ।

---

१. Before it—प्रतिजनादिभ्यः खञ् ॥४।४।९९॥ एभ्यः प्रतिजनादिभ्यः खञ् स्यात् साध्वर्थे । प्रतिजने साधुः प्रातिजनीनः । प्रतिजन । इदंयुग । सयुग । परयुग । परकुल । परस्यकुल । मनुष्यकुल । सर्वजन । विश्वजन । महाजन । इति । D_4. २. B_1 has स्वार्थे यः as the वृत्ति. ३. पारि° Dc_3. ४. विवास Dc_1, Dc_3. ५. अतिथौ Bc_1, Dc_3, Dc_4. ६. साधुर्वासतेयः Dc_3.

समानतीर्थे वासी ॥४।४।१०७॥

अस्मात् सप्तम्यन्ताद्वासीत्यर्थे यत् स्यात्[1] ॥ समानतीर्थे गुरौ वासी सतीर्थ्यः ।

समानोदरे शयित ओ चोदात्तः ॥४।४।१०८॥

सप्तम्यन्तादस्मात्[2] शयितार्थे यत् स्यात्[3] ओकारश्चोदात्तः ॥ समानोदर्यो भ्राता ।

सोदराद्यः ॥४।४।१०९॥

यत्प्रत्यये विवक्षिते प्रागेव सादेशः[4] ॥ सोदर्यः ।

अग्राद्यत् ॥४।४।११६॥

अस्माद्भवार्थे[5] यत् स्यात् ॥ अग्रेभवः अग्र्यः ।

घच्छौ च ॥४।४।११७॥

अग्रियः[6] । अग्रीयः ।

समान । वासीति निपातनाण्णिनिः[7] । ग्रहादेराकृतिगणत्वाच्च ।

समानोदरे । **ओकारश्चोदात्त** इति । यतः स्वरे प्राप्ते ओकारस्योदात्तत्वं विधीयते ।

सोदरात् । **सोदर्य** इति । अन्तोदात्तोयम् । 'विभाषोदरे' इति ये विवक्षिते सादेशः ।

अग्रात् । **घच्छौ च** । एतत्सूत्रद्वयं छन्दोधिकारे पठितमपि लोकेपि अग्र्यादीनां प्रयोगाणां दर्शनादत्र पठितमिति वेदितव्यम् ।

इति प्राग्घितीयाः । यतः पूर्णोविधिः ।

---

१. Dropped B_1, B_2, D_1, D_2. २. अस्मात् dropped B_1. ३. Dropped B_1. ४. Before it—'विभाषोदर'–इति समानस्य B_1, D_5. ५. अस्मात् dropped B_1. ६. अस्मात् घच्छौ प्रत्ययौ स्तः । D_5. ७. निपातनादिनिः Dc_3, Bc_1.

तस्मै हितम् ॥५।१।५॥

चतुर्थ्यन्ताद्धितार्थे छः स्यात् ॥ सूर्याय हितः सूरीयः ।

अथ प्राक्क्रीतीया उच्यन्ते । स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयम् । 'प्राक् क्रीताच्छः' ॥५।१।१॥ 'तेन क्रीतम्' अस्मात् प्रागित ऊर्ध्वं छस्याधिकारः । 'उगवादिभ्यो यत्' ॥५।१।२॥ उवर्णान्ताद्गवादेश्च प्राक्क्रीतीयेष्वर्थेषु यत् । छस्यापवादः । शङ्कवे हितं शङ्कव्यम् । दारु । सनङ्गोः । 'चर्मणोञ्' ॥ इति प्राप्नोति । चरोः सक्तोश्च 'विभाषा हविरपूपादिभ्यः' इति प्राप्नोति । तत्र पूर्वविप्रतिषेधेन यदेवेष्यते । सनङ्गव्यं चर्म । चरव्यास्तण्डुलाः । सक्तव्या धाना इति । गवादिभ्यः । गवे हितं गव्यम् । गो । हविस् । अष्टका । बर्हिस् । युग । मेधा । स्रुक् । नाभि नभं च । नभ्यम् । कथं नाभ्यम् । 'शरीरावयवाद्यत्' ॥ शुनः संप्रसारणं दीर्घो वा तत्संनियोगेनान्तोदात्तत्वं च । शुन्यम् । आद्युदात्तं शून्यम् । अन्तोदात्तम् । 'ऊधसोनङ् च' ॥ ऊधन्यम् ॥ अक्षर । दर । स्वर । खेद । विष ॥ 'कम्बलाच्च संज्ञायाम्' ॥५।१।३॥ यत् । कम्बल्यमूर्णाशतम् । संज्ञायां किम् । कम्बलीया ऊर्णा । 'विभाषा हविरपूपादिभ्यः' ॥५।१।४॥ यत् । हविःशब्दाद् गवादित्वान्नित्यं यत् । ततो हविर्विशेषा इह गृह्यन्ते । आमिक्ष्यं दधि । आमिक्षीयम् । अपूपादिभ्यः । अपूप्यम् । अपूपीयम् । अपूप । तण्डुल । पृथुक । अभ्यूष । अभ्योष । अवोष । किण्व । मुसल । शकट । कर्णवेष्टक । अर्गल । स्थूणा । यूप । दीप । सूप । अश्व । पत्र । अन्नविकारेभ्यश्च । **तस्मै** । **सूरीय** इति । 'सूर्यतिष्य-' इति यलोपः ।

---

१. Before it—इति प्राग्घितीयाः । प्राक् क्रीतात् छः ॥५।१।११॥ 'तेन क्रीतम्' अस्मात्प्रागित ऊर्ध्वं छस्याधिकारः । D4. २. °द्धितेर्थे D4. ३. स्नुच्र Bc1, Dc3. ४. स्वेद Dc3. ५. Before it—पुष्कल । आयुष् Dc3. ६. यूष Dc3.

शरीरावयवाद्यत् ॥५।१।६॥

अस्माद्धितार्थे[1] यत् स्यात्[2] ॥ दन्त्यम् । ओष्ठ्यम् ।[3]

आत्मन्विश्वजनभोगोत्तरपदात् खः ॥५।१।९॥

एभ्यः खः स्याद्धितार्थे ॥

आत्माध्वानौ खे ॥६।४।१६९॥

एतौ ख एव[4] प्रकृत्या स्तः ॥ आत्मनीनम् । विश्वजनीनम् । मातृभोगीणः ।[5]

शरीर । शीर्यत इति शरीरम् । प्राणिकायः । स्पष्टत्वात्त्यक्तं सूत्रद्वयम् । 'खलयवमाषतिलवृषब्रह्मणश्च' ॥५।१।७॥ एभ्यो हिते यत् । खल्यम् । यव्यम् । माष्यम् । तिल्यम् । वृष्यम् । ब्रह्मण्यम् । वृषोत्रादन्तो गृह्यते । ब्रह्मन्नान्तः । तेन वृष्णे हितं ब्राह्मणेभ्यो हितमिति वाक्यमेव । छप्रत्ययोऽपि[6] न स्यादनभिधानात्[7] । चात् रथाय हिता रथ्या । 'अजाविभ्यां थ्यन्' ॥५।१।८॥ हितार्थे । अजथ्या भूः । अविथ्या ।

आत्मन् । नलोपाकरणं प्रकृतिपरिमाणज्ञापनार्थं तेनोत्तरपदग्रहणं भोगशब्देनैव संबध्यते न तु प्रत्येकम् ।

आत्माध्वानौ । एतावित्यादि । एवकारो भिन्नक्रमः । प्रकृत्या इत्येतस्यानन्तरं द्रष्टव्यः । एतौ खे प्रकृत्यैव स्तः न कदाचित् खे अनयोष्टिलोपः स्यादित्यर्थः । **विश्वजनीनमिति** । विश्वजनेभ्यो हितम् । कर्मधारयादिष्यते । षष्ठीसमासाद्बहुव्रीहेश्च छ एव । विश्वजनीयम् । पञ्चजनाच्च खः । पञ्चजनीनम् । अत्रापि कर्मधारयादेव । पञ्चजनीयमन्यत् । सर्वजनात् ठञ्खौ । सार्वजनिकः । सर्वजनीनः । कर्मधारयादन्यत्र सर्वजनीयम् । महाजनान्नित्यं ठञ् । माहाजनिकम् । तत्पुरुषादेव । महाजनीयमन्यत्र । **मातृभोगीण** इति । मातृभोगाय हितः ।

---

१. तस्मात् C. २. P, D_1, B_2 and C drop it. ३. After it—कण्ठ्यम् । D_4. ४. Dropped D_4. ५. B_1 has after it—पूर्वपदस्थान्निमित्तात् परस्य तद्धितस्थस्य नस्य णत्वमिष्यते ।. ६. अपि Dropped Bc_1. ७. °दनभिधानत्वात् Dc_3.

भोगशब्दः शरीरवाची । केवलात्तु छ एव । मात्रीयः । राजाचार्याभ्यां नित्यं भोगोत्तरपदाभ्यामेव प्राक्क्रीतीयः प्रत्यय इष्यते । राजभोगीणः । आचार्यादणत्वं च । आचार्यभोगीनः । केवलाभ्यां तु वाक्यमेव स्यात् । राज्ञे हितम् । आचार्याय हितम् । स्पष्टत्वात् त्यक्तान्यष्ट । 'सर्वपुरुषाभ्यां णढञौ' ॥५।१।१०॥ आभ्यामेतौ यथासंख्यं हितार्थे । सर्वशब्दात् णो वा वाच्यः । सार्वम् । सर्वीयम् । पुरुषात्तु हिते वधे वृन्दे विकारे तत्कृते च ढञ् । पुरुषाय हितं तस्य वधः समूहो विकारो वा तेन कृतो वा पौरुषेयः । 'माणवचरकाभ्यां खञ्' ॥५।१।११॥ हिते । माणवीनम् । चारकीणम् । 'तदर्थं विकृतेः प्रकृतौ' ॥५।१।१२॥ प्रकृतिरुपादानकरणम् । तस्यैवोत्तरमवस्थान्तरं विकृतिः । तदर्थमिति प्रत्ययार्थविशेषणं क्रियाविशेषणं वा । तत्र प्रत्ययार्थविशेषणपक्षे क्लीबत्वप्रथमान्तत्वे सूत्राणां छान्दसत्वाद् व्यत्ययेन बोध्ये । तस्मै इत्यनुवर्तते । ततश्चायमर्थः । विकृतिवाचिनश्चतुर्थ्यन्ताद्धिकृत्यर्थायां प्रकृतौ प्रत्ययार्थे यथाविधि छयतौ स्तः । प्राकारायेष्टकाः प्राकारीयाः । तदर्थे किम् । यवानां धानानां सक्तवः । अत्र प्रकृत्यन्तरनिवृत्तिर्विवक्षिता धानानां सक्तवो न लाजानामिति न तादर्थ्यम् । विकृतेः किम् । अक्रियमाणे विकृतिग्रहे या काचित् प्रकृतिः स्यात् । न तूपादानमेव । तथा चात्र स्यात् । उदकाय कूपः । अत्र यथा प्रयाजादीनां धर्माणामुत्पत्त्याधारभूतत्वाद्दर्शपौर्णमासौ प्रकृती तथा कूप उदकस्य प्रकृतिर्न तूदकं कूपस्य विकृतिः । अत्यन्तभेदात् । भिन्नस्वभावत्वात् । भिन्नसंतानवर्तित्वाच्च । समानस्वभावयोः समान-

१. After it–इति Bc1, Dc3, Dc4. २. After it—अणोपवादः । Dc3, Dc4. ३. °विशेषणत्वपक्षे Dc3, Dc4. ४. न तु Dc3, Dc4.

संतानवर्तिनोरेव हि[1] प्रकृतिविकृतिभावो यथा प्रादेशेष्टकादीनाम्[2]। प्रकृतौ किम्। खड्गाय कोशः। खड्गो लोहस्य विकृतिः। नास्य कोशः[4] प्रकृतिः। विवक्षितप्रकृतिविकारलाभाय[5] प्रकृतिविकृत्योरुभयोर्ग्रहणम्। 'छदिरुपधिबलेर्ढञ्' ॥५।१।१३॥ उपधिशब्दात् स्वार्थे ढञ्। छदिर्बलिभ्यां तु प्रकृतिविकारभावे। छादिषेयं तृणम्। बालेया स्तण्डुलाः। उपधिरेवौपधेयं रथाङ्गं दारु। 'ऋषभोपानहोर्ञ्यः' ॥५।१।१४॥ प्रकृतिविकारभावे। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यपि पूर्वविप्रतिषेधादयमेवेष्यते। औपानह्यं चर्म। 'चर्मणोञ्' ॥ ५।१।१५॥ चर्मणो या विकृतिस्तद्वाचिनः प्रकृतौ अञ्। वार्ध्रं चर्म। वार्त्रं[6] चर्म। 'तदस्य तदस्मिन् स्यादिति' ॥ ५।१।१६॥ स्यादिति संभावने लिङ्। तदिति प्रथमान्तादस्य संभाव्यते अस्मिन् संभाव्यते इति षष्ठ्यर्थे सप्तम्यर्थे च यथाविधि छयतौ स्तः। द्विस्तच्छब्दग्रहणमनेकस्मिन् प्रत्ययार्थे प्रत्येकसमर्थविभक्तिः संबन्धनीयेति न्यायं प्रदर्शयितुम्। प्रासादोस्य स्यात् प्रासादीयं दारु। प्राकारोस्मिन् देशे स्यात् प्राकारीयो देशः। प्रासादोस्य नगरस्य स्यादित्यादौ न भवति। इतिकरणस्य विवक्षार्थत्वात् पूर्वत्र प्रकृतिविकारभावस्तादर्थ्यं च विवक्षितमिह तु योग्यतामात्रमिति विषयभेदः। 'परिखाया ढञ्' ॥५।१।१७॥ तदस्य तदस्मिन् स्यादिति विषये। परिखात्र स्यात् पारिखेयी भूः।

इति प्राक्क्रीतीयाः। छयतोः पूर्णोवधिः।

---

१. Dropped Bc1, Dc1. २. °विहारभावः Bc1. ३. प्रसादेष्ट° Dc3. ४. हेतुः for कोशः Bc1. ५. °भावलाभाय Bc1, Dc3. ६. वारत्रं Bc1, Dc2, Dc3.

तेन क्रीतम् ॥५।१।३७॥

तृतीयान्तात् क्रीतेर्थे[1] ठञ् स्यात्[2] ॥ सप्तत्या क्रीतः साप्ततिकः ।

अथ प्राग्वतीया उच्यन्ते । तेष्वध्यार्हीयाः । तत्र स्पष्टत्वात् त्यक्तं सूत्रत्रयम् । 'प्राग्वतेष्ठञ्' ॥५।१।१८॥ 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिसंशब्दनात् प्राक् यदितः परं वक्ष्यते तत्र ठञ् प्रत्ययः स्यादिति ज्ञेयम् । तथोदाहरिष्यामः । 'आर्हादगोपुच्छसंख्या-परिमाणाट्ठक्' ॥५।१।१९॥ 'तदर्हति' इत्येतदर्हसंशब्दनमभिव्याप्य यदितः परं वक्ष्यते तेषु ठञोपवादष्ठक्प्रत्ययोधिकृतो ज्ञेयः गोपुच्छा-दीन् वर्जयित्वा । अभिविधावाङ् । तेनार्हत्यर्थेपि ठक् स्यात् । वक्ष्यति । तेन क्रीतम् । निष्केण क्रीतं नैष्किकम् । अगोपुच्छादौ किम् । गोपुच्छेन क्रीतं गौपुच्छीकम् । साप्ततिकम् । प्रास्थिकम् । ठञेवात्र स्यात् । 'असमासे निष्कादिभ्यः' ॥५।१।२०॥ आर्हीयेष्वर्थेषु ठक् । नैष्किकम् । असमासे किम् । द्विनैष्किकम् । ठञेव स्यात् । ननु ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधादसमासग्रहणं व्यर्थमिति चेन्मैवम् । पूर्वत्र 'उगवादिभ्यो यत्' इत्यादौ तदन्तविधिज्ञापनार्थम् । गव्यम् । सुगव्यम् । दन्त्यम् । राजदन्त्यम् । इतःपरमपि प्राग्वतेः संख्यापूर्वपदानामलुगन्तानां तदन्तविधिः । द्वैपारायणिक इति । अलुक् किम् । द्वाभ्यां शूर्पाभ्यां[4] क्रीतं द्विशूर्पम् । द्विशूर्पेण क्रीतम् । अत्राञो लुकि पुनः शूर्पादन्यतरस्यामित्यञ् न स्यात् । सामान्यविहितष्ठञेव स्यात्[3] । द्विशौर्पिकम् । निष्क । पण । पाद । माषवाह । वाह । द्रोण । षष्टि ।

तेन । एतदादिभिष्ठञादीनां समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते इति व्युत्क्रमेणेदं सूत्रं पठितम् । एतच्च तत्पुरुष एव व्याख्यातम्[5] ।

---

१. क्रीतार्थे C, D_1. २. ठक् स्यात् P; D_1, D_5; ठक् B_1. ३. Dropped Dc_2, Dc_4. ४. सूर्पाभ्याम् । सूर्प throughout Dc_4. ५. Dropped Bc_1, Dc_3.

संख्याया अतिशदन्तायाः कन् ॥५।१।२२॥

[1]संख्यायाः कन् [2]स्यात् क्रीताद्यर्थे न [3]तु त्यन्तशदन्तायाः । पञ्चकः पटः । तिशदन्तायास्तु । आशीतिकः । चात्वारिंशत्कः ।

बहुगणवतुडति संख्या ॥१।१।२३॥

वतोरिड्वा ॥५।१।२३॥

वतोः परस्य कनो वा इडागमः [4]स्यात् ॥ तावतिकः । तावत्कः ।

विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ॥५।१।२४॥

आभ्यां ड्वुन् स्यान्न नाम्नि ॥ [5]विंशकः । त्रिंशकः ।

संख्यायाः । अर्थवद्ग्रहण नानर्थकस्येत्यर्थवतस्तेर्ग्रहणा[6]ड्डतेः पर्युदासो न । कतिकः । प्रत्ययग्रहणपरिभाषयैव [7]तदन्तग्रहणे लब्धेऽप्येक-सप्तादिभ्यस्तिप्रत्ययस्याविधानादेकसप्तत्या क्रीतमित्यादौ निषेधो न स्यात् । अन्तग्रहणे तु कृते समुदायस्यान्ते तिशब्दोस्तीति तत्र निषेधः स्यादित्यन्तग्रहणम् ।

वतोः । **वतोः परस्य कन** इति । 'तस्मादित्युत्तरस्य' इति परिभाषयेति भावः ।

विंशति । असंज्ञायां किम् । विंशतिकः । त्रिंशत्कः । विंशतित्रिंशद्भ्यामिति योगविभागादाभ्यां कन् । पूर्वेण ह्यतिशदन्ताया इति निषेधान्न स्यात् ।

---

१. संख्यावाचिनः B_1. २. B_1 drops it. ३. B_1 drops it. ४. B_1 drops it. ५. B_1 has before it:—युवोरनाकौ इति विंशतेर्डितीति तिलोपः; तिर्विंशतेर्डितीति तिलोपः D_1. ६. °ड्डुत्यादेः Bc_1, Dc_4. ७. तदन्ते गृहीतेऽप्ये° Bc_1, Dc_4.

शताच्च ठन्यतावशते ॥५।१।२१॥

शतेन क्रीतः शत्यः । शातिकः । अशते किम् । शतं परिमाणमस्य शतकः । सङ्घः ।

शतात् । आर्हीयेष्वर्थेषु । कनोपवादः । **शतं परिमाणमस्ये-** त्यादि । 'संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' इति कन् । अत्र प्रकृत्यर्थ एव शतं कनन्तेनोच्यते सङ्घस्य प्रत्ययार्थस्य प्रकृत्यर्थादभेदात् । शतेन क्रीतं[1] शत्यं पटशतमित्यत्र निषेधो न । पटशतमिति पदान्तरं प्रयुज्य प्रत्ययार्थस्य शतत्वं गम्यत इति वाक्यार्थोयं न प्रत्ययार्थः । तथोक्तम् । शतप्रतिषेधेन्यशतेप्रतिषेध इति । प्रकृत्यर्थादन्यस्येत्यर्थः । चकारो समास इत्यस्यानुकर्षणार्थः । तेन द्विशतेन क्रीतं द्विशतकामित्यत्र[2] न । स्पष्टत्वात् त्यक्तानि पञ्चदश । 'कंसाट्टिठन्' ॥५।१।२५॥ आर्हीयेषु । परिमाणत्वात् ठगप्राप्ते ठञोपवादः । टो ङीबर्थः । इकार उच्चारणार्थः । नकार आद्युदात्तार्थः । कंसिकः । कंसिकी । अर्धाचेति वा[3]च्यम् । अर्धिकः । अर्धिकी । कार्षापणाच्च वाच्यः । कार्षापणशब्दस्य प्रतिशब्दादेशो वा वाच्यः । कार्षापणिकः । कार्षापणिकी । प्रतिकः । प्रतिकी । 'शूर्पादञन्यतरस्याम्' ॥५।१।२६॥ आर्हीयेष्वर्थेषु । परिमाणत्वात् ठगप्राप्ते पक्षे ठञ् । शूर्पेण क्रीतं शौर्पं शौर्पिकम् ॥ 'शतमानविंशतिकसहस्रवसनादण्' ॥५।१।२७॥ आर्हीयेषु[4] । यथायथं ठक्ठञोरपवादः ॥ शतमानेन क्रीतं शातमानम्[5] । विंशत्या क्रीतं विंशतिकं तेन क्रीतं वैंशतिकम् । साहस्रम् । वासनम् । 'विभाषा कार्षापणसहस्राभ्याम्' ॥५।१।२९॥ 'अध्यर्धपूर्वद्विगोः—' इति नित्यं प्राप्ते लुब्[6] विकल्प्यते । अध्यर्धकार्षापणम् । द्विकार्षापणम् । कार्षापणाट्टिठन् वक्तव्यः । पतिशब्दश्चादेशो वा वाच्य इत्यस्य टिठनो लुक् । पक्षे सोपि ।

---

१. B_1 drops शतेन क्रीतः. २. द्विशतमि° Dc4. ३. वक्तव्यम् Dc3. ४. After it-अर्थेषु Dc3. ५. शत° Dc4. ६. लुक् Bc1, Dc3, Dc4.

अध्यर्धकार्षापणिकम् । द्विकार्षापणिकम् । अध्यर्धप्रतिकः । द्विप्रतिकः । सहस्रान्तात् । अध्यर्धसहस्रम् । अध्यर्धसाहस्रम् । अध्यर्धशतमानम् । अध्यर्धशातमानम् । द्विसहस्रम् । द्विसाहस्रम् । 'शतमान—' इत्यण् । 'संख्यायाः संवत्सर—' इत्युत्तरपदवृद्धिः । सुवर्णशतमानयोरुपसंख्यानम् । अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकम् । अध्यर्धशतमानम् । अध्यर्धशातमानम् । 'द्वित्रिपूर्वान्निष्कात्' ॥५।१।३०॥ द्वित्रिपूर्वान्निष्कान्ताद् द्विगोरार्हीयस्य लुग्वा । द्विनिष्कम् । द्विनैष्किकम् । ठञ् । 'परिमाणान्तस्य' इत्युत्तरपदवृद्धिः । 'बिस्ताच्च' ॥५।१।३१॥ द्वित्रिपूर्वाद्बिस्ताच्चात् चकाराद्बहुपूर्वबिस्तान्तान् द्विगोरार्हीयस्य वा लुक् । द्विबिस्तम् । त्रिबिस्तम् । बहुबिस्तम् । पक्षे [1]द्विबैस्तिकमित्यादि । 'विंशतिकात् खः' ॥५।१।३२॥ अध्यर्धपूर्वाद् द्विगोश्च । [2]विंशतिकशब्दान्तादार्हीयेषु खः स्यात् । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् । विधिसामर्थ्याच्च लुक् । 'खार्या ईकन्' ॥५।१।३३॥ अध्यर्धपूर्वाद् द्विगोश्च खारीशब्दादीकन् स्यात् आर्हीयेषु । ठग्लुकोरपवादः । अध्यर्धखारीकम् । द्विखारीकम् । केवलादपीति वाच्यम् । खारीकम् । काकिण्याश्चोपसंख्यानम् । अध्यर्धकाकिणीकम् । द्विकाकिणीकम् । केवलायाश्च । काकिणीकम् । 'पणपादमाषशताद्यत्' ॥५।१।३४॥ उक्तविशेषणादुक्तेऽर्थे । ठक्लुकनामपवादः । अध्यर्धपण्यम् । द्विपण्यम् । अध्यर्धपाद्यम् । अयं पादशब्दः परिमाणवाचीति पद्भावो न । प्राण्यङ्गस्य हि स इष्यते । अध्यर्धमाष्यम् । द्विमाष्यम् । अध्यर्धशत्यम् । द्विशत्यम् । 'शाणाद्वा' ॥५।१।३५॥ अध्यर्धपूर्वाद् द्विगोरित्येव । आर्हीयेषु वा यत् । पक्षे ठञ् । तस्य च लुक् । अध्यर्धशाण्यम् । अध्यर्धशाणम् । द्विशाण्यम् । द्विशाणम् । शताच्च वाच्यः । अध्यर्धशत्यम् । अध्यर्धशतम् । द्विशत्यम् । द्विशतम् । द्वित्रिपूर्वादण् च । शाणादुक्ते । चात् यद्वा । द्विशाण्यम् । द्विशाणम् । द्वैशाणम् । 'परिमाणान्तस्यासंज्ञाशाणयोः' इति पर्युदासादादिवृद्धिरेव । 'तस्य निमित्तं संयोगोत्पातौ' ॥५।१।३८॥

---

१. द्विबैस्तमि° Dc4. २. विंशतिशब्दा° Dc4.

तस्येश्वरः[1] ॥५।१।४२॥

सर्वभूमिपृथिवीभ्यामणञौ ॥५।१।४१॥

षष्ठ्यन्ताभ्यामीश्वरेर्थे अणञौ स्तः ॥

तस्येति षष्ठ्यन्तान्निमित्तेर्थे यथास्वं पूर्वोक्ताष्ठञादयस्त्रयोदश[2] प्रत्ययाः[3]। तच्चेन्निमित्तं संयोग उत्पातो वा[4]। संयोगः संबन्धः। शुभाशुभसूचको महाभूतविपरिणाम उत्पातः। शतस्य निमित्तं धनपतिना संयोगः शत्यः शतिकः। साहस्रः। उत्पातः खल्वपि। शतस्य निमित्तं दक्षिणाक्षिस्फुरणं शत्यम्। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्। वातस्य शमनं कोपनं वातिकं पैत्तिकं श्लैष्मिकम्। संनिपाताच्चेति वक्तव्यम्। सांनिपातिकम्। 'गोद्व्यचोरसंख्यापरिमाणाश्वादेर्यत्' ॥५।१।३९॥ तस्य निमित्तं संयोगोत्पातावित्यर्थे। ठञादीनामपवादः। गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः। धन्यः। यशस्यः। असंख्यापरिमाणाश्वादेः किम्। पञ्चानां निमित्तं पञ्चकः। प्रास्थिकः। अश्वादेः। आश्विकः। अश्व। अश्मन्। ऊर्णा। उमा। भङ्ग। वर्षा। वसु। ब्रह्मवर्चसादुपसंख्यानम्। ब्रह्मवर्चस्यो गुरुसंयोगः। 'पुत्राच्छ च' ॥५।१।४०॥ यच्चोक्तेर्थे। पुत्रीयः। पुत्र्यः।

'सर्वभूमिपृथिवीभ्यामणञौ' ॥५।१।४१॥ उक्तेर्थे। ठकोपवादौ। सर्वभूमेर्निमित्तं संयोग उत्पातो वा। सार्वभौमः। अनुशतिकादित्वादुभयपदवृद्धिः। पृथिव्या निमित्तं संयोग उत्पातो वा पार्थिवः। तस्य। षष्ठीप्रकरणे पुनस्तस्येति समर्थनिर्देशस्तस्य निमित्तं संयोगोत्पातावित्यस्य निवृत्तये। अन्यथेश्वरोपि प्रत्ययार्थस्य निमित्तस्य विशेषणं संभाव्येत। स्पष्टत्वात् त्यक्तानि षट्षष्टिसूत्राणि व्याख्यायन्ते। 'तत्र विदित इति च' ॥५।१।४३॥

---

१. The Vritti:—तस्येति षष्ठी समर्थादीश्वरेर्थे यथास्वं प्रत्ययाः स्युः B_2.
२. त्रयोदश dropped Bc_1. ३. After it—स्युः Dc_4. ४. वा dropped Bc_1, Dc_3, Dc_4.

सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।

अत्रार्थे सर्वभूमिपृथिवीशब्दाभ्यामणञौ स्तः । सर्वभूमौ विदितः सार्वभौमः । पार्थिवः । 'लोकसर्वलोकाट्ठञ्' ॥५।१।४४॥ तत्र विदिते । लौकिकः । सार्वलौकिकः । 'तस्य वापः' ॥५।१।४५॥ उप्यतेस्मिन्निति वापः क्षेत्रम् । षष्ठ्यन्ताद्वापेर्थे यथाविहितं प्रत्ययः । प्रस्थस्य वापः प्रास्थिकं क्षेत्रम् । 'पात्रात् ष्ठन्' ॥५।१।४६॥ तस्य वापेर्थे । ठञोपवादः । नः स्वरार्थः । षो ङीषर्थः । पात्रिकं क्षेत्रम् । पात्रिकी क्षेत्रभक्तिः । 'तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते' ॥५।१।४७॥ प्रथमासमर्थात् सप्तम्यर्थे यथास्वं प्रत्ययाः । यत् तत् प्रथमासमर्थं वृद्ध्यादि चेत् दीयते । तत्राधमर्णेनोत्तमर्णाय धनातिरिक्तं दीयमानं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भागः आयः । पटादीनामुपादानमूल्यादतिरिक्तं द्रव्यं लाभः । रक्षाकारितो राजभागः शुल्कम् । उत्कोच उपदा । पञ्चास्मिन् वृद्धिरायः शुल्कमुपदा वा दीयते पञ्चकः । शत्यः । शतिकः । साहस्रः । 'पूरणार्धाट्ठन्' ॥५।१।४८॥ तदस्मिन् वृद्ध्यादि दीयत इत्यर्थे । पूरणादार्हीयस्य ठकोपवादः । अर्धादैपसंख्यानिकस्य ठनः । द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः । अर्धशब्दो रूपकार्धे रूढः । अर्धिकः । 'भागाद्यच्च' ॥५।१।४९॥ चात् ठन् । उक्तेर्थे । भागो वृद्ध्यादिरस्मिन् दीयते भाग्यं शतम् । भागिकम् । भागशब्दो रूपकार्धस्य वाचकः । 'तद्धरति वहत्यावहति भाराद्वंशादिभ्यः' ॥५।१।५०॥ द्वितीयान्ताद्वंशादिभ्यः परात् भाराद् भारभूतेभ्यो वा वंशादिभ्यो हरत्यादिषु यथास्वं प्रत्ययाः । हरति देशान्तरं प्रापयति चोरयति वा वहत्युत्क्षिप्य धारयति आवहत्युत्पाटयतीत्यर्थः । वंशभारं वहति हरत्यावहति वा वंशभारिकः । भारभूतान् वंशान् हरति वांशिकः ।

१. After it—आनुशतिकत्वादुभयपदवृद्धिः २. पृथिव्या ईश्वरः पार्थिव D_6. ३. प्रत्ययाः Bc_1, Dc_3. ४. क्षेत्र drodped Bc_1, Dc_1, Dc_3.

सूत्रार्थद्वयमप्याचार्येण[1] शिष्याः प्रतिपादिताः । वंश । कुटज । बल्वज । श्लक्ष्ण[2] । मूल । स्थूणा । अश्मन् । अश्व । इक्षु । खट्वा । 'वस्नद्रव्याभ्यां ठन्कनौ' ॥५।१।५१॥ द्वितीयान्ताभ्यामाभ्यामेतौ च[3] यथासंख्यं हरत्यादिष्वर्थेषु । वस्नं हरत्यादि वास्निकः । द्रव्यकः । 'संभवत्यवहरतिपचति' ॥५।१।५२॥ द्वितीयान्तादेष्वर्थेषु यथास्वं प्रत्ययाः । आधेयस्य प्रमाणानतिरेकेण धारणं संभवः । धारणार्थत्वाद्भवतेः सकर्मकता । अवहरणमुपसंहरणम् । प्रस्थं संभवत्यवहरति पचति वा प्रास्थिकः कटाहः पाचकश्च । द्रोणादण् च पचत्यर्थे । द्रौणः । द्रौणिकः । 'आढकाचितपात्रात् खोऽन्यतरस्याम्' ॥५।१।५३॥ उक्तेषु । पक्षे ठञ् । आढकं संभवत्यवहरति पचति वा आढकीना । आढकिकी । आचितीना । आचितिकी । पात्रिकी । पात्रीणा । 'द्विगोःष्ठंश्च' ॥५।१।५४॥ आढकाचितपात्रान्तात् संभवत्यादिषु । चात् खः । अन्यतरस्यामित्यनुवृत्तेष्ठञपि[4] । तत्र विधिसामर्थ्यात् ठन्खयोर्लुक्[5] न । ठञस्तु स्यादेव । खनौ ङीषाद्युदात्तार्थौ । द्व्याढकिकी । द्व्याढकीना । द्व्याढकी । 'कुलिजाल्लुक्खौ च' ॥५।१।५५॥ एतदन्ताद् द्विगोरुक्तेषु । चात् ष्ठन्[6] । अन्यतरस्यामित्यनुवृत्त्या लुगपि विकल्प्यते[7] । तेन ठञोपि श्रवणं पक्षे । द्वे कुलिजे संभवत्यवहरति पचति वा द्विकुलिजीना द्विकुलिजिकी द्विकुलिजी द्वैकुलिजिकी । 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्यत्र कुलिजग्रहोपीष्टस्तेन नोत्तरपदवृद्धिः । 'सोऽस्यांशवस्नभृतयः' ॥५।१।५६॥ प्रथमान्तात् षष्ठ्यर्थे यथाविधि स चेत् प्रथमान्तोंशो वस्नो भृतिर्वा स्यात् । अंशो भागः । वस्नो मूल्यम् । भृतिर्वेतनम् । पञ्चांशो

---

१. द्वयेप्याचा° Dc3. २. सूक्ष्म Bc1, Dc1. ३. Dropped Bc1, Dc3. ४. °त्यनुवर्तते Bc1, Dc3. ५. ठखयो° Bc1, Dc3. ६. खन् Bc1. ७. निषिध्यते । Dc3.

वस्नो भृतिर्वेतनं वास्य पञ्चकः । 'तदस्य परिमाणम्' ॥५।१।५७॥ प्रथमान्तात् षष्ठ्यर्थे यथास्वम् । प्रस्थः परिमाणमस्य प्रास्थिको राशिः । समर्थविभक्तिप्रत्ययार्थयोः पूर्वसूत्रादेवानुवृत्तौ पुनर्ग्रहण-मध्यर्धपूर्वद्विगोर्लुगभावार्थम् । तेन द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिक इत्यादि सिद्धम् । 'संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु' ॥५।१।५८॥ संख्यावाचिनः परिमाणोपाधिकात् षष्ठ्यर्थे यथास्वं प्रत्ययाः प्रत्ययान्तं चेत् संज्ञादि स्यात् । पञ्च संख्या परिमाणमेषां पञ्चकाः शकुनयः । त्रिकाः शालङ्कायनाः । सप्तको ब्रह्मवृक्षः । अष्टको राजर्षिः । भावे स्वार्थेपि संज्ञायाम् । यथा पञ्चैव पञ्चकाः । त्रयः परिमाणमस्य त्रिकः सङ्घः । अष्टावध्यायाः परिमाणमस्याष्टकं पाणिनीयं सूत्रम् । त्रिकं काशकृत्स्नम् । दशकं वैयाघ्रपदीयम् । पञ्चावृत्तयः परिमाणमस्य पञ्चकमध्ययनम् । स्तोमे डविधिः पञ्चदशाद्यर्थम्[1] । पञ्चदश मन्त्राः परिमाणमस्य पञ्चदश स्तोमः । एकविंशः । 'पङ्क्तिविंशतित्रिंशत्-चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्' ॥५।१।५९॥ एते तदस्य परिमाणमित्यधिकारात् परिमाणिनि निपात्यन्ते । पञ्च पदानि परिमाणमस्य पङ्क्तिश्छन्दः । पञ्चन् शब्दात् तिप्रत्यय-ष्टिलोपश्च निपात्यते । द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययाः । विंशतिर्गावः । स्वाभाविकमेकवचनं स्त्रीत्वं च । त्रयाणां दशतां त्रिन्भावः शत्प्रत्ययः । त्रिंशत् । चतुर्णां चत्वारिन्-भावः शत्प्रत्ययः । चत्वारिंशत् । पञ्चानामाकारः शच्च प्रत्ययः । पञ्चाशत् । षण्णां तिप्रत्ययः अपदत्वं च । षष्टिः । सप्तानां तिप्रत्ययः । सप्ततिः । अष्टानामशीभावस्तिश्च प्रत्ययः । अशीतिः । नवानां तिप्रत्ययः । नवतिः । दशानां दशतां शभावः तश्च प्रत्ययः । शतम् । सहस्रादयोप्येवंजातीयका[2] एतद्वदेव द्रष्टव्याः । उदाहरणमात्रमेतत् । एते सर्वे यथाकथंचिद् व्युत्पाद्याः ।

१. °द्यर्थः Bc1. २. °प्येवंविधजाती° Dc3.

नात्रावयवार्थेभिनिवेष्टव्यम् । 'पञ्चद्दशतौ वर्गे वा' ॥५।१।६०॥ निपात्येते । पञ्च परिमाणमस्य पञ्चद्वर्गः । पक्षे 'संख्याया अति—' इति कन् । पञ्चकः । दशत् । दशकः । 'त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्' ॥५।१।६२॥ वर्गे । त्रिंशदध्यायाः परिमाणमेषां त्रैंशानि ब्राह्मणानि । चत्वारिंशानि । त्रिंशतो योगविभागजे कनि प्राप्ते चत्वारिंशतः प्राग्वतीये ठञि । 'तदर्हति' ॥५।१।६३॥ अर्हतीत्यर्थे द्वितीयान्ताद्यथास्वम् । श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः । शत्यः । शतिकः । 'छेदादिभ्यो नित्यम्' ॥५।१।६४॥ नित्यग्रहणं प्रत्ययार्थविशेषणम् । नित्यं सदा छेदमर्हति छैदिकः । छेद । भेद । द्रोह । दोह । नर्त । प्रकर्ष । कर्ष । संप्रयोग । विप्रयोग । विप्रकर्ष । प्रेषण । संप्रश्न । विरागस्य विरङ्गादेशश्च । वैरङ्गिकः । 'शीर्षच्छेदाद्यच्च' ॥५।१।६५॥ नित्यमर्हतीत्यर्थे । चात् ठक् । शीर्षच्छेद्यः । शैर्षच्छेदिकः । 'दण्डादिभ्यो यः' ॥५।१।६६॥ नित्यमिति निवृत्तम् । ठकोपवादः । दण्डमर्हति दण्ड्यः[2] । दण्ड । मुसल । मधुपर्क । कशा । अर्घ । मेधा । मेघ । उदक । वध । युग । वृत् । 'पात्राद् घंश्च' ॥५।१।६८॥ यश्च । पात्रमर्हति पात्रियः पात्र्यः । परिमाणार्थत्वात्[3] ठञ्[1]ठकोरपवादः । 'कडङ्करदक्षिणाच्छ च' ॥५।१।६९॥ यच्च । अर्हत्यर्थे । ठकोपवादः । कडङ्करीयो[4] गौः । कडङ्कर्यः[5] । दक्षिणीयः । दाक्षिण्यः । अल्पाच्तरस्य परनिपातेन[6] लक्षणव्यभिचारचिह्नेन यथासंख्याभावं सूचयति । 'स्थालीबिलात्' ॥५।१।७०॥ छयतौ स्तोर्हत्यर्थे । स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः । पाकयोग्या इत्यर्थः । 'यज्ञर्त्विग्भ्यां घखञौ' ॥५।१।७१॥ यथासंख्यमर्हत्यर्थे तत्कर्मार्हतीत्यर्थे चेष्यते । यज्ञियो ब्राह्मणो देशो वा । आर्त्विजीनः ।

इत्यार्हीयाः । ठगादीनां पूर्णोवधिः ।

---

१. ठञ Dc3, Dc4. २. दण्ड्यम् Bc1, Dc3. ३. परिमाणापरिमाणार्थत्वात् Bc1, Dc4; परिमाणमपरिमाणार्थत्वात् Dc1. ४. °गरीयो Bc1, Dc3, Dc4. ५. °गर्यः Bc1, Dc3, Dc4. ६. °निपातन° Bc1; °निपात° Dc3.

इतःपरं प्राग्वतीयष्ठञेव । 'पारायणतुरायणचान्द्रायणं वर्तयति' ॥५।१।७२॥ एभ्यो द्वितीयान्तेभ्यो वर्तयतीत्यर्थे ठञ् । द्वितीयाप्रकरणे द्वितीयोच्चारणामिष्टविषये प्रत्ययो यथा स्यात् । पारायणं वर्तयति पारायणिकः । शिष्यो न गुरुः । तुरायणो यज्ञस्तं वर्तयति तौरायणिको यजमानो न याजकः । चान्द्रायणिकस्तपस्वी । 'संशयमापन्नः' ॥५।१।७३॥ ठञ् । अत्रापि पुनर्द्वितीयोच्चारणमिष्टविषयार्थं तेन संशयस्य विषये कर्मण्येव प्रत्ययो न कर्तरि । संशयमापन्नः सांशयिकः स्थाणुः । 'योजनं गच्छति' ॥५।१।७४॥ ठञ् । योजनं गच्छति यौजनिकः । क्रोशशतयोजनशतयोरुपसंख्यानम् । क्रौशशतिकः । यौजनशतिकः । ततोभिगमनमर्हतीत्यप्यर्थे । 'पथः ष्कन्' ॥५।१।७५॥ तं गच्छतीत्यर्थे । षनौ ङीषाद्युदात्तार्थौ । पन्थानं गच्छति पथिकः । पथिकी । 'पन्थो ण नित्यम्' ॥५।१।७६॥ पथः पन्थ इत्ययमादेशो ण च प्रत्ययः सदा गच्छत्यर्थे । पन्थानं गच्छति पान्थः । 'उत्तरपथेनाहृतं च' ॥५।१।७७॥ तृतीयान्तादुत्तरपथादाहृतमिति तेन गच्छतीति चार्थे ठञ् । उत्तरपथेनाहृतस्तेन गच्छति वा औत्तरपथिकः । वारिजङ्गलस्थलकान्ताराजशङ्कुपूर्वपदात् पथष्ठञ् वाच्यः । वारिपथेनाहृतस्तेन गच्छति वारिपथिकः इत्यादि । अण् स्थलपथाद्वाच्यो मधुकमरीचयोरर्थयोः । स्थालपथं मधुकं मरीचं वा । 'कालात्' ॥५।१।७८॥ 'व्युष्टादिभ्योण्' । इति यावत् कालाधिकारः । 'तेन निर्वृत्तम्' ॥५।१।७९॥ तृतीयान्तात् कालात् ठञ् निर्वृत्तेर्थे । अह्ना निर्वृत्तमाह्निकम् । 'तमधीष्टो भृतो भूतो भावी' ॥५।१।८०॥ द्वितीयान्तात् कालादिष्वर्थेषु ठञ् । मासमधीष्टः सत्कृत्य व्यापारितो मासिकः । भृतो वेतनेन क्रीतः । स्वसत्तया व्याप्तो भूतः । भावी तादृश एवानागतकालः । 'मासाद्वयसि यत्खञौ' ॥५।१।८१॥ वयसीत्युक्तिसामर्थ्यात् भूत एवात्र युज्यते । मासं भूतो मास्यो

मासीनः । वयसि किम् । मासिकम् । 'द्विगोर्यप्'[1] ॥५।१।८२॥ मासान्ताद्वयसि । द्वौ मासौ भूतौ द्विमास्यः । षण्मासाच्च । यप् च । औत्सर्गिकः ठञपि समुच्चीयते । वयसि । षाण्मास्यः । षण्मास्यः । षाण्मासिकः । 'अवयसि ठंश्च' ॥५।१।८४॥ 'षण्मासाण्ण्यच्च'[2] ॥५।१।८३॥ षाण्मासिको रोगः । षाण्मास्यः । 'समायाः खः' ॥५।१।८५॥ अधीष्टादिचतुष्टयं 'तेन निवृत्तम्' इति चानुवर्तते । समामधीष्टादिस्तया निर्वृत्तो वा समीनः । 'द्विगोर्वा' ॥५।१।८६॥ समान्तान्निवृत्तादिषु पञ्चसु खः । पक्षे ठञ् । द्विसमीनः । द्वैसमिकः । 'रात्र्यहःसंवत्सराच्च' ॥५।१।८७॥ द्विगोर्निवृत्तादिषु वा खः । पक्षे ठञ् । द्विरात्रीणः । द्वैरात्रिकः । द्व्यहीनः । अत्र विभाषा वर्तते । सा च व्यवस्थिता[3] । द्वैयह्निकः । द्विसंवत्सरीणः । द्विसांवत्सरिकः । 'वर्षाल्लुक् च' ॥५।१।८८॥ वर्षान्ताद् द्विगोर्निवृत्तादिषु खठञौ तयोर्लुक् वा । द्विवर्षीणो भोगः । द्विवार्षिकः । द्विवर्षः । 'वर्षस्याभविष्यति' इत्युत्तरपदवृद्धिः । 'चित्तवति नित्यम्' ॥५।१।८९॥ वर्षान्ताद् द्विगोः परस्य प्रत्ययस्य नित्यं[4] लुक् । द्विवर्षो दारकः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' ॥५।१।९०॥ षष्टिरात्र[5]शब्दात् कन् प्रत्ययो रात्र[6]शब्दस्य लोपश्च निपात्यते । बहुवचनमतन्त्रम् । धान्यविशेषसंज्ञा षष्टिका इति । तेन न मुद्गादिष्वतिप्रसंगः । 'तेन परिजय्यलभ्यकार्यसुकरम्' ॥५।१।९३॥ तृतीयान्तात् कालवाचिनः परिजय्यादिष्वर्थेषु ठञ् । मासेन परिजय्यादिर्मासिकः । 'तदस्य ब्रह्मचर्यम्' ॥५।१।९४॥ तदिति प्रथमान्ताद् द्वितीयान्ताद्वा[7] कालात् षष्ठ्यर्थे ठञ् । मासोऽस्य ब्रह्मचर्यस्य मासिकम् । मासं ब्रह्मचर्यमस्य मासिकः । पूर्वत्र ब्रह्मचर्यं प्रत्ययार्थ उत्तरत्र ब्रह्मचारी । आदित्यव्रतगोदानमहानाम्नीभ्यस्तस्य ब्रह्मचर्यं तच्चरतीत्यर्थयोष्ठञ् । आदित्यव्रतस्य ब्रह्मचर्यं तच्चरति वा

---

१. °र्यत् Dc3. २. °सात् ण्यत् च यच्च । Dc3. ३. °स्थितेति ठक् Dc4, Dc3 (ठञ् Dc3). ४. नित्यं dropped Dc3, Dc4. ५. रात्रि° Bc1, Dc4. ६. रात्रि° Bc1, Dc4. ७. द्वितीयान्ताच्च Dc2.

आदित्यव्रतिकमादित्यव्रतिकः। गौदानिकं गौदानिकः। महानाम्न्यो नाम ऋचस्तत्सहचरितं व्रतं तच्छब्देनोच्यते । माहानामिकं माहानामिकः। अवान्तरदीक्षादेस्तच्चरतीत्यर्थे डिनिर्वाच्यः । अवान्तरदीक्षी तिलव्रती देवव्रती । अष्टाचत्वारिंशात् ड्वुन्डिनी वाच्यौ व्रतं चरतीत्यर्थे । अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति अष्टाचत्वारिंशकः अष्टाचत्वारिंशी । चातुर्मास्यानां ड्वुन्डिनौ यलोपश्च । चातुर्मास्यानि चरति चातुर्मासिकः । चातुर्मासी । चातुर्मासात् ण्यो यज्ञे । तत्र भवे । चतुर्मासेषु भवानि चातुर्मास्यानि । यज्ञविशेषाः । तत्सहचरितानि चातुर्मास्यानि । संज्ञायामण् वाच्यः । चतुर्मासेषु भवा पौर्णमासी चातुर्मासी । आषाढी कार्तिकी फाल्गुनी । 'तस्य च दक्षिणा यज्ञाख्येभ्यः' ॥५।१।९५॥ षष्ठ्यन्तेभ्य एभ्यो दक्षिणेत्येतस्मिन्नर्थे ठञ् ।[1] आग्निष्टोमे दीयते आग्निष्टोमिकं भक्तम् ॥

कालाधिकारस्य पूर्णोवधिः ॥

१. Bc_1, Dc_4 have after it— अग्निष्टोमस्य दक्षिणा *अग्निष्टोमिकी। †कालाधिकारेऽप्याख्यामहायज्ञवाचिनोरपि स्यात् । अन्यथैकादशाहप्रभृतय एव संज्ञा गृह्येरन् । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति एकादशाहादिष्वस्ति प्रसंगः । 'तत्र च दीयते कार्यं भववत्' ॥५।१।९६॥ सप्तम्यन्तात् कालवाचिनो दीयते कार्यमित्यनयोरर्थयोर्भववत्§ प्रत्ययाः स्युः । यथा । मासे भवं मासिकम् । एवं मासं दीयते कार्यं वा मासिकम् । वतिः सर्वसादृश्यार्थः । हेमन्ते दीयते कार्यं वा हैमनम् । योगविभागश्चात्र कार्यः । तत्र च दीयते इति तेन यज्ञाख्येभ्योऽपि ।

* आग्नि° D_4. † °वाचिनः कालादपि Dc_3. § After it–सप्तम्यन्तात् कालवाचिनो दीयते कार्यमित्यनयोरर्थयोर्भववत् Dc_4.

अतः परं सामान्येन प्रत्ययाः । 'व्युष्टादिभ्योण्' ॥५।१।९७॥ सप्तम्यन्तेभ्य एतेभ्यो[1] दीयते कार्यं वा इत्यर्थयोरण् । व्युष्टे दीयते कार्यं वा वैयुष्टम् । व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । तीर्थ । संग्राम । संघात । अग्निपद । पीलुमूल । 'तेन यथाकथा च हस्ताभ्यां णयतौ' ॥५।१।९८॥ तृतीयान्ताभ्यामाभ्यां क्रमादेतौ दीयते कार्यं वा इत्येतदर्थयोः[2] । यथाकथंचिच्छब्दोव्ययसमुदायोनादरवाची । यथाकथंचिद्दीयते कार्यं वा याथाकथाचम् । हस्तेन दीयते कार्यं वा हस्त्यम् । 'संपादिनि' ॥५।१।९९॥ गुणोत्कर्षः संपत्तिः । आवश्यके णिनिः । अत्रार्थे तृतीयान्तात् ठञ् । कर्णवेष्टकाभ्यां संपादि विशेषतः शोभमानं मुखं कार्णवेष्टकिकम् । 'कर्मवेषाद्यत्' । तेन संपादिन्यर्थे । कर्मणा संपादि कर्मण्यम् । वेषेण संपादी वेष्यः । 'तस्मै प्रभवति संतापादिभ्यः' ॥५।१।१०१॥ चतुर्थ्यन्तेभ्यः संतापादिभ्यः प्रभवतीत्यर्थे ठञ् । संतापाय प्रभवति सांतापिकः । अलमर्थे चतुर्थी । संताप । संनाह । संग्राम । संयोग । संपराय[3] । संवेष । निष्पेष । निसर्ग । उपसर्ग । प्रवास । उपवास । संघात । संमोदन । सक्तु । मांसौदनाद्विगृहीतादपि । 'योगाद्यच्च' ॥५।१।१०२॥ चात् ठञ् । प्रभवत्यर्थे । योग्यः । यौगिकः । 'कर्मण उकञ्' ॥५।१।१०४॥ कर्मणे प्रभवति कार्मुकम् । 'समयस्तदस्य प्राप्तम्' ॥५।१।१०४॥ प्रथमान्तात् समयादस्य प्राप्तमित्यर्थे ठञ् । समयः प्राप्तोस्य सामयिकम् । 'ऋतोरण्' ॥५।१।१०५॥ ऋतुः प्राप्तोस्य आर्तवम् । उपवस्तुः प्राशितुश्च वाच्यः । उपवस्ता प्राप्तोस्य औपवस्त्रम् । प्राशित्रम् । 'कालाद्यत्' ॥५।१।१०७॥ कालः प्राप्तोस्य काल्यम् । 'प्रकृष्टे ठञ्' ॥५।१।१०८॥ प्रकर्षे वर्तमानात् प्रथमान्तात् कालात् षष्ठ्यर्थे ठञ् । प्रकृष्टो दीर्घः कालोस्य कालिकमृणम् । ठञ्ग्रहणं विस्पष्टार्थम् । 'प्रयोजनम्' ॥५।१।१०९॥ तदस्य प्रयोजनमित्यर्थे प्रथमान्तात् ठञ् । इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम् । 'विशाखाषाढादण्मन्थदण्डयोः' ॥५।१।११०॥ तदस्य

---

१. एभ्यो Dc4. २. इत्येतयोः Dc3, Dc4. ३. संपराजय Bc1.

प्रयोजनमित्यर्थे यथासंख्यमेताभ्यां मन्थे दण्डे च वाच्येण् । विशाखा प्रयोजनमस्य वैशाखो मन्थः । आषाढो दण्डः । अन्यत्र वैशाखिकः । चूडादेरुपसंख्यानम् । चूडा प्रयोजनमस्य चौडम् । श्रद्धा प्रयोजनमस्य श्राद्धम् । 'अनुप्रवचनादिभ्यश्छः' ॥५।१।१११॥ अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयः । विशिपूरिपदिरुहिभ्यो ल्युडन्तेभ्यः सपूर्वपदेभ्यश्छो वाच्यः । गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम् । प्रपापूरणीयम् । अश्वप्रपदनीयम् । प्रासादारोहणीयम् । स्वर्गादिभ्यो यद्वाच्यः । स्वर्ग्यम् । धन्यम् । यशस्यम् । आयुष्यम् । काम्यम् । पुण्याहवाचनादिभ्यो लुग्वाच्यः । पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम् । शान्तिवाचनम् । स्वस्तिवाचनम् । अनुप्रवचन । उत्थापन । संवेशन । अनुप्रवेशन । अनुवाचन । आरम्भण । अन्वारोहण । 'समापनात् सपूर्वपदात्' ॥५।१।११२॥ प्रयोजने छः । छन्दः समापनं प्रयोजनमस्य छन्दः-समापनीयम् । पदग्रहणं बहुच्पूर्वनिरासार्थम् । 'ऐकागारिकट् चौरे' ॥५।१।११३॥ निपात्यते । एकमसहायमगारं गृहं प्रयोजनमस्य ऐकागारिकः । ङीबन्तोस्तु स्त्रियामेष मा च ञित्स्वरवान् स्म भूत् । अचोरेस्माच्च ठञ् मा भूदिति ह्येवं निपात्यते । केचित्तु इकट्प्रत्ययं वृद्धिं च निपातयन्ति । 'आकालिकडाद्यन्तवचने' ॥५।१।११४॥ समानकालशब्दस्याकाले देशे इकट् च प्रत्ययो निपात्यते । आद्यन्तवचने समानकालावाद्यन्तावस्य आकालिकः स्तनयित्नुः । जन्मसमानकालविनाश इत्यर्थः । आकालाट्ठञ् च । आकालिकोन-ध्यायः ।

इति प्राग्वतीयाः प्रत्ययाः । ठञः पूर्णोविधिः ।

१. अनुरोहण Bc_1, Dc_3. २. आरोहण Bc_1, Dc_3, Dc_4.

तेन तुल्यं क्रिया चेद्वतिः ॥५।१।११५॥

तृतीयान्तात् तुल्येऽर्थे वतिः स्यात् यत्तुल्यं सा क्रिया चेत् । ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत् । क्रिया किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।

तत्र तस्येव ॥५।१।११६॥

सप्तम्यन्तात् षष्ठ्यन्ताच्च इवार्थे वतिः स्यात् ॥ मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवत् मैत्रस्य गावः ।

तेन तुल्यम् । ब्राह्मणेन तुल्यमित्यादि । ननु ब्राह्मणादयः शब्दा जातिं द्रव्यं च ब्रुवते न क्रियामतो ब्राह्मणवदित्यत्र क्रियायाः केन तुल्यतेति चेदुच्यते । अत्र ब्राह्मणादिशब्दैः ब्राह्मणादिस्था क्रियोच्यते तेन ब्राह्मणक्रियातुल्यक्रियो ब्राह्मणवदित्युच्यते ।

तत्र तस्य । अक्रियार्थोयमारम्भः । इवार्थ इति । सादृश्ये इत्यर्थः । स्पष्टत्वात् त्यक्तम् । 'तदर्हम्' ॥५।१।११७॥ द्वितीयान्तादर्हार्थे वतिः स्यात् । देवमर्हति देववद्वृत्तम् ।

क्रियायां कर्तृभूतायां प्रत्ययोत्र विवक्षितः ।
पूजामर्हति विप्रोयमित्यादौ न भवेदतः ॥

---

१. Dropped D6. २. त्यक्तमेकम् Dc3.

तस्य भावस्त्वतलौ ॥५।१।११९॥

षष्ठ्यन्ताद्भावेऽर्थे त्वतलौ स्तः ॥ शब्दस्य प्रवृत्तिनिमित्तं भावः । त्वान्तं क्लीबम् । तलन्तं स्त्रियाम् । साधोर्भावः साधुत्वम् । साधुता ।

अथावत्वीयाः । इतस्त्वतलोरधिकारः ।

तस्य भावः । भवतेरनेकार्थत्वाद् भावशब्दस्याभिप्रायादयोऽनेकार्थाः । तत्र न ज्ञायते कोऽत्रार्थोऽभिप्रेत इति तज्ज्ञानार्थमाह । शब्दस्येत्यादि । भवतोऽस्माच्छब्दप्रत्ययाविति व्युत्पत्त्या इत्यभिप्रायः । विशेषणाद्धि गोत्वादेर्विशेष्ये गवादौ गौरित्यादिः शब्दः प्रवर्तते । गोत्वाद्याकारानुगतश्च प्रत्ययो भवति । स च भावोऽनेकविधः । जातिशब्दानां जातिर्यथा गोशब्दस्य गोत्वं गुणशब्दानां गुणः यथा शुक्लस्य शुक्लत्वं क्रियाशब्दानां क्रिया यथा पाचकस्य पचिक्रिया । केचित्तु क्रियाकारकसंबन्धं क्रियाशब्दानामिच्छन्ति यदृच्छाशब्दानां स्वरूपं यथा डित्थशब्दस्य डित्थत्वमित्यादौ द्रष्टव्यम् । आकाशत्वमभावत्वमित्याद्युपचरितं सामान्यमेतच्च **महाभाष्यादौ** विस्तरेण प्रतिपादितं ततो ज्ञेयम् । ननु नानेत्यादीनामव्ययादीनामसत्त्ववाचित्वेन षष्ठ्यर्थेनायोगात् षष्ठ्यन्तत्वाभावात् कथं स्वाद्युत्पत्तिर्नानात्वमित्यादौ । उच्यते । असत्त्वभूतमप्यव्ययं शब्दान्तरेण प्रत्यवमृष्टं षष्ठ्यर्थत्वेन युज्यते । नानेत्यस्य भाव इति । प्रत्यवमर्शार्थे च वृत्तिरेव गमयति । त्वान्तं क्लीबमित्यादि । शब्दशक्तिस्वभावादिति भावः ।

---

१. °ज्ञावार्थे P, D₂. २. गोत्वादि विशिष्यते Dc₃. ३. °गमश्च Bc₁. ४. षष्ठ्यर्थेन प्रयुज्यते Dc₄ ; षष्ठ्यर्थेन युज्यते Dc₃. ५. स्वाभाव्यादि° Dc₃.

ह्रस्वात्तादौ तद्धिते ॥८।३।१०१॥

ह्रस्वात्परस्य सस्य षः स्यात्तादौ तद्धिते ॥ यजुष्ट्वम् । यजुष्टा ।[1] ह्रस्वात् किम् । गीस्त्वम् । तिङ्गान्निषेधः[2] । भिन्द्युस्तराम्[3] ।

आ च त्वात् ॥५।१।१२०॥

ब्रह्मणस्त्व इत्यतः प्राक् त्वतलौ च[4]काराद्नञ्स्नञ्भ्यां[5] समावेशः । स्त्रिया भावः स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पौंस्नम् । पुंस्त्वम् । पुंस्ता ।

ह्रस्वात् । अपदान्तस्येत्यधिकारात् पदान्तस्याप्राप्ते मूर्धन्ये सत्ययमारम्भः । यजुष्ट्वमिति । यजुषो भावः । सस्य रुत्वम् । तस्य विसर्जनीयः । 'विसर्जनीयस्य सः' इति सः । तस्यानेन षः । **गीस्त्वमिति** । 'र्वोरुपधाया दीर्घ—' इति दीर्घः । **भिन्द्युस्तरामिति** । भिदेर्लिङ् । यासुट्सलोपः[6] । झेर्जुस् । 'उस्यपदान्तात्' इति पररूपम् । श्नम् । 'श्नसोरल्लोपः' इत्यल्लोपः । 'तिङश्च' इति तरप् । 'किमेत्तिङ—' इत्याम् ।

आ च त्वात् । त्वतलोरपवादैः सह समावेशार्थं कर्मणि विधानार्थं वचनम् । ननु चात्रत्यश्चकारः किमर्थमित्याशङ्क्याह । **चकारादिति** । स्पष्टत्वात् त्यक्तमेकम् । 'न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः' ॥५।१।१२१॥ वक्ष्यमाणभावप्रत्यया नञ्पूर्वात्तत्पुरुषान्न स्युः । चतुरादीन् वर्जयित्वा । अपतित्वम् । अपटुता । अरमणीयत्वम् । नञ्पूर्वात् किम् । बार्हस्पत्यम् । तत्पुरुषादिति किम् । नास्य पटवः सन्त्यपटुः । तस्य भावः आपटवम् ।

---

१. After it—ज्योतिष्ट्वम् D_3, D_5, B_1, B_2. २. तिङा निषेधः P; तिङो निषेधः B_1. ३. बिभ्युस्तराम् C. ४. चात् B_1. ५. नञ्स्नञोः C, D_2, D_3, B_2. ६. सलोपः Bo_1, Do_4.

पृथ्वादिभ्य इमनिज्वा ॥५।१।१२२॥

एभ्य इमनिज् वा स्याद्भावे ॥

टेः ॥६।४।१५५॥

भस्य टेर्लोपः स्यादिष्ठेमेयस्सु परतः ॥

र ऋतो हलादेर्लघोः ॥६।४।१६१॥

हलादेर्लघोर्ऋकारस्य रः स्यादिष्ठेमेयस्सु ॥ पृथोर्भावः प्रथिमा । म्रदिमा । हलादेः किम् । ऋजिमा । लघोः किम् । कृष्णिमा ॥ पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम् ॥* पक्षे त्वतलौ ।

अचतुरादिभ्यः किम् । आचतुर्यम् । आलवण्यम् । आवट्यम् । आबुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् । ष्यञ् एभ्यो ब्राह्मणादेराकृतिगणत्वात् ।

पृथ्वादिभ्यः । वाक्यस्य महाविभाषयैव सिद्धेर्वावचनमिगन्तलघुपूर्वादिणि चण्डादेर्गुणशब्दात् ष्यञि बालादेर्वयोवचनादञि प्राप्ते तत्समावेशार्थम् । पृथु । मृदु । स्वादु । महत् । तनु । लघु । पाण्डु । पटु । बहु । साधु । आशु । उरु । अणु । चण्ड । खण्ड । बहुल । अक्ष । धन । बाल । होड । पाक । वत्स । मन्द । ऋजु । ह्रस्व । दीर्घ । क्षिप्र । क्षुद्र । प्रिय । रऋतः । परिगणनं चात्र कर्तव्यमन्येषां मा भूदित्यभिप्रेत्याह । मृदु इत्यादि । यद्येवं हलादेर्लघोरिति किमर्थम् । विस्पष्टार्थम् ।

---

१ भावार्थे B1. २. त् इष्ठ इमन् ईयस्सु B2, त् इष्ठ इम ईयस्सु D4. ३. Dropped D4. ४. रत्वमिष्यते B1. ५. P has पक्षे पृथुता ; C, D1, B2 have पृथुत्वम् । पृथुता ; before पक्षे—वावचनमणादिसमावेशार्थम् । D4; पक्षे । पृथुत्वम् । पृथुता । D5. ६. पृथुत्वम् । पृथुता D2, D4. ७. Before it—आसंगत्यम् Dc3. ८. माहि । पद Bc1, Dc1, Dc3, Dc4. ९. लञ्जु Bc1, Dc1, Dc3, Dc4. १०. Before it–समु Bc1, Dc3; शमु Dc1, Dc4. ११. गुरु Bc1, Dc1, Dc3, Dc4.

वर्णदृढादिभ्यः ष्यञ्च ॥५।१।१२३॥

वर्णविशेषार्थेभ्यो[1] दृढादिभ्यश्च ष्यञ् स्यात् इमनिज्वा[2] भावे[3]र्थे ॥ शौक्ल्यम् । शुक्लिमा । दार्ढ्यम् । द्रढिमा । लावण्यम् । लवणिमा । षित्त्वात् ङीष् । औचिती । मैत्री[4] । हलस्तद्धितस्येति यलोपः । पक्षे त्वतलौ ।

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥५।१।१२४॥

गुणवचनाद् ब्राह्मणादे[5]श्च ष्यञ् स्यात् कर्मणि भावे[6] च ॥ जडस्य कर्म[7] भावो वा जाड्यम् । ब्राह्मण्यम् । चौर्यम् । पक्षे [8]कर्मभावयोस्त्वतलौ । चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यः ।* [9]चत्वार एव वर्णाश्चातुर्वर्ण्यम् । त्रैलोक्यम् । चातुराश्रम्यम् । चतुर्वेदस्योभयपदवृद्धिः ।[10] चातुर्वैद्यम् ॥

वर्ण । वर्णेभ्यो वृढादिभ्यश्चेति । बहुवचनं प्रत्येकमभिसंबध्यते । तेन वर्णवाचिनां ग्रहणं न स्वरूपस्येत्यभिप्रेत्याह । वर्णविशेषार्थेभ्य इति । गुणवचनात् सिद्धौ ष्यञ्ग्रहणमुत्तरार्थं वचनं त्विमनिजर्थम् । वृढ । परिवृढ । कृश । भृश । चक्र । आम्र । लवण । अम्ल । वेर्यातलाभमतिर्मनःशारदानाम् । वैयात्यम् । वैलाभ्यम् । वैमत्यम् । वैमनस्यम् । वैशारद्यम् । पक्षे इमनिजादयः । समो मतिमनसोः । सांमत्यम् । सांमनस्यम् । शीत । उष्ण । जड । बधिर । मूक । मूर्ख । पण्डित । मधुर ।

गुणवचन । गुणमुक्त्वा गुणिनि वर्तन्ते ये ते गुणवचनाः । ब्राह्मण । माणव । वाडव । अर्हतो नुम् च । आर्हन्त्यम् । चोर । धूर्त । सांराधय । विराधय । अपराधय । एकभाव । द्विभाव ।

---

१. वर्णविशेषवाचिभ्यो B_1. २. इमनिच्च for इमनिज्वा C. ३. भावे D_3. ४. P, D_1, D_4, D_5, B_2 drop from मैत्री to यलोपः. ५. ब्राह्मणादिभ्यश्च D_1. ६. भावेर्थे C. ७. भावः कर्म वा B_2. ८. भावकर्मणो° D_2, D_3, B_1, C. ९. After it–वाच्या D_4. १० आकृष्ट Bc_1, Dc_3, Dc_4.

स्तेनाद्यन्नलोपश्च ॥५।१।१२५॥

अस्माद्यत् स्यान्नलोपश्च । कर्मभावयोः ॥ स्तेयम् । योगविभागात् पक्षे ष्य । स्तैन्यम् ॥

सख्युर्यः ॥५।१।१२६॥

सख्यम् ॥ दूतवणिग्भ्यां च ॥* दूत्यम् । वणिज्यम् ।

कपिज्ञात्योर्ढक् ॥५।१।१२७॥

कापेयम् । ज्ञातेयम् ।

त्रिभाव । अपत्यभाव । अक्षेत्रज्ञ । संवादिन् । संवेशिन् । संवेदिन् । बहुभाषिन् । शीर्षघातिन् । समस्थ । परमस्थ । विषमस्थ । अनीश्वर । गडुल । दायाद । कुशल । निपुण । पिशुन । बालिश । अलस । दुःपुरुष । कापुरुष । राजन् । गणपति । अधिपति । विशस्ति । विषम । विपात । निपात । आकृतिगणोयम् । गणनं तु बाधकबाधनार्थम् । प्रपञ्चार्थं च । यथा ब्राह्मणात् प्राणिजातित्वात् प्राप्तस्याञो बाधनम् ।

स्तेनात् । स्तेयमिति । स्तेनस्य कर्म भावो वा ।

सख्युः । सखिशब्दाद्यः भावकर्मणोः । द्यूतवणिग्भ्यां चेति वक्तव्यम् ।

कपि । भावकर्मणोः । यथासंख्यामर्थयोः सर्वत्रैवात्र प्रकरणे नेष्यते । कपेरिगन्तादिति प्राप्तोण् बाध्यते ।

---

१. °न्नस्य च लोपः D_1. २. भावकर्मणोः D_3, B_1. ३. Before it—स्तेनादिति B_1. ४. चेति वक्तव्यम् । D_4. ५. द्यौत्यम् after it D_5. ६. अतिस्वर Dc_3. ७. Bc_1, Dc_3 have वलय in place of गडुल । दायाद. ८. Bc_1, Dc_3 have शिंशपा for विषम.

पत्यन्तपुरोहितादिभ्यो यक् ॥५।१।१२८॥

सैनापत्यम् । पौरोहित्यम् । राज्यम् ।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्
॥५।१।१२९॥

एभ्योऽञ् स्यादुक्तेऽर्थे ॥ आश्वम् । कौमारम् । औद्गात्रम् । हौत्रम् ।

हायनान्तयुवादिभ्योऽण् ॥५।१।१३०॥

द्वैहायनम् । यौवनम् ।

पत्यन्त । भावकर्मणोः । पत्यन्तादणि प्राप्ते । पुरोहित । राजास । असमास इत्यर्थः । समासे त्वाधिराज्यमिति ब्राह्मणादित्वात् ष्यञ् । स्वरे विशेषः । अस इति वचनं ज्ञापकमिह प्रकरणे राजन्शब्दस्य तदन्तविधिः स्यादिति । ग्रामिक । दण्डिक । वर्मिक । शीलिक । खण्डिक । अञ्जलिक । पारिषदिक । अविक । आञ्जनिक । सूचक ।

प्राणभृत् । प्राणभृतः प्राणिनस्तेषां जातिः प्राणिजातिरित्यर्थः । उक्तेऽर्थे । भावकर्मणोरित्यर्थः । आश्वमिति प्राणिजातिवाचिन उदाहरणम् । कौमारमिति वयोवाचिनः । औद्गात्रादि उद्गात्रादेः । उद्गातृ । होतृ । उन्नेतृ । प्रतिहर्तृ । प्रशास्तृ । भर्तृ । रथगणक । पत्तिगणक । सुष्ठु । दुष्ठु । अध्वर्यु । वधू । सुभगं मन्त्रे । महते सौभगाय । अन्यत्र ब्राह्मणादित्वात् ष्यञ् । सौभाग्यम् ।

हायनान्त । भावकर्मणोः । द्वैहायनमित्यादि । द्विहायनस्य कर्म भावो वा । यूनः कर्म । 'अन्' इति प्रकृत्या ।

---

१. B_1 has उक्तेऽर्थे before it; हृद्भगसिन्ध्वन्ते पूर्वपदस्य च before it D_5. २. संग्रामिक Bc_1, Dc_4. ३. चण्डिक Bc_1, Dc_3, Dc_4. ४. शिलङ्क । रितिक । Bc_1, Dc_3; शिलङ्क । चितिक Dc_4. ५. त्रिक । परिषिक । प्रतिक । सारथिक । साञ्जलिक । सूचक Bc_1, Dc_3, Dc_4. ६. कर्म भावो वा Bc_1, Dc_3; भावः कर्म वा Dc_4.

सौहार्दम् ॥[१] श्रोत्रम् ।

इगन्ताच्च लघुपूर्वात् ॥५।१।१३१॥

[३]लघुपूर्वादिगन्तादण् स्यादुक्तेऽर्थे ॥ मौनम् । गौरवम् । लघुपूर्वात् किम् । कण्डूत्वम् ।

योपधाद्गुरूपोत्तमाद्वुञ् ॥५।१।१३२॥

[४]रामणीयकम् ।[५] सहायाद्वा ॥* साहायकम् । [६]पक्षे ष्यञ् । साहाय्यम् ।

सुहृदयस्य कर्म भावो वा । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' । 'हृद्भग—' इत्युभयपदवृद्धिः । श्रोत्रियस्य यलोपश्चाण् च वाच्यः ॥* श्रोत्रियस्य कर्म भावो वा श्रोत्रम् । युवन् । स्थविर । होतृ । यजमान । पुरुषासे । असे किम् । राजपुरुषत्वम् । भ्रातृ । [७]कुतुक । कन्दुक । [८]श्रमण । कमण्डलु । [९]कुस्त्री । सुहृद् । दुर्हृद् । [१०]सुहृदय । दुर्हृदय । हृदयासे । असे किम् । अहृदयता । सुभ्रातृ । दुर्भ्रातृ । वृष । परिव्राजक । सब्रह्मचारिन् । अनृशंस । [११]चपल । कुशल । निपुण । [१२]कुतूहल । क्षेत्रज्ञ ।

इगन्तात् । कथं काव्यम् । ब्राह्मणादिषु द्रष्टव्यः ।

योपधात् । त्रिप्रभृतीनामन्त्यमुत्तमम् । तस्य समीपमुपोत्तमम् । गुरूपोत्तमाद्योपधात् प्रातिपदिकाद्वुञ् । योपधात् किम् । विमानत्वम् । गुरूपोत्तमात् किम् । क्षत्रियत्वम् । सहायाद्वेति वक्तव्यम् ।* स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयम् । 'द्वन्द्वमनोज्ञादिभ्यश्च' ॥५।१।१३३॥

---

१. After it—श्रोत्रियस्य यलोपश्चाण् वाच्यः । D3, D5. २. Before it—श्रोत्रियस्य भावः कर्म वा before it D5. ३. लघुपूर्वो य इक् तदन्ता° P, D1. ४. B1 has before it—उक्तेऽर्थे । रमणीयस्य भावः. ५. B1 and C have युवोरनाकौ after it. ६. C, D1, D4, D5 and P omit पक्षे ष्यञ्. ७. नाश । कुरूप । Bc1, Dc1, Dc3, Dc4. ८. श्रवण Bc1, Dc1, Dc4. ९. भस्त्री Bc1, Dc1, Dc4. १०. Before it—कुहृदय Bc1, Dc1, Dc4. ११. Before it—हृदयाश्व D4; हृदयाश्च Dc3. १२. Before it—पीयूष Bc1, Dc1, Dc3.

भावकर्मणोर्वुञ् । गौपालपशुपालिका । शैष्योपाध्यायिका । मानोज्ञकम् । मनोज्ञ । प्रियरूप । अभिरूप । कल्याण । मेधाविन् । आढ्य । कुलपुत्र । छान्दस । छात्र । श्रोत्रिय । चौर । धूर्त । विश्वेदेव । युवन् । ग्रामपुत्र । ग्रामखण्ड । ग्रामकुमार । अमुष्यपुत्र । सारपुत्र । 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' ॥५।१।१३४॥ गोत्रवाचिनश्चरणवाचिनश्च वुञ् भावकर्मणोः श्लाघादिषु विषयभूतेषु । श्लाघा विकत्थनम् । अत्याकारोधिक्षेपः । तदवेतस्तत्प्राप्तस्तज्ज्ञो वा । गार्गिकया श्लाघतेत्याकुरुते गार्गिकामवेतः । एवं काठिकया श्लाघत इत्यादि । श्लाघादिषु किम् । गार्ग्यत्वम् । कठत्वम् । 'होत्राभ्यश्छः' ॥५।१।१३५॥ होत्राभ्यः ऋत्विग्विशेषवाचिभ्यो भावकर्मणोश्छः । अच्छावाकस्य भावः कर्म अच्छावाकीयम् । नष्ट्रीयम् । पौत्रीयम् । बहुवचनं स्वरूपविधिनिरासाय । 'ब्रह्मणस्त्वः' ॥५।१।१३६॥ ब्रह्मशब्दात् होत्रावाचिनः त्वः स्यात् भावकर्मणोः । छापवादः । ब्रह्मणो भावः कर्म वा ब्रह्मत्वम् । नेति वाच्ये त्वग्रहणं तलो बाधनार्थम् । जात्यर्थात्तु ब्रह्मशब्दात् त्वतलौ स्तः एव ।

इत्यवत्वीयाः । त्वतलोः पूर्णोवधिः । नञ्स्नञोरपि पूर्णोवधिः ।

१. अहोरूप Bc1, Dc1, Dc3, Dc4. २. Before it—वृद्ध Bc1, Dc1, Dc3, Dc4. ३. शतपुत्र । Bc1, Dc1, Dc3, Dc4. ४. गार्गिकयात्याकुरुते Dc3, Dc4. ५. Before it—ब्राह्मणत्वं वा Dc4. ६. °निरासार्थम् Dc3. ७. होतृवाचिनः Dc4.

धान्यानां भवने क्षेत्रे खञ् ॥५।२।१॥

धान्यविशेषार्थेभ्यः षष्ठ्यन्तेभ्यो भवने क्षेत्रे[1] खञ्[2] स्यात् ॥ भवत्यस्मिन्निति[3] भवनम् । मुद्गानां भवनं[4] क्षेत्रं मौद्गीनम् ।

व्रीहिशाल्योर्ढक् ॥५।२।२॥

उक्तेर्थे[5] । व्रैहेयम् । शालेयम् ।

यवयवकषष्टिकाद्यत् ॥५।२।३॥

यव्यम् । इत्यादि[6] ।

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥५।२।४॥

तिलादिभ्यो वा यदुक्तेर्थे[7] ॥ पक्षे खञ् ॥ तिल्यम् । तैलीनम् । इत्यादि[8] ।

धान्यानाम् । बहुवचनं स्वरूपविधिनिरासार्थमित्यभिप्रेत्याह । **धान्यविशेषार्थेभ्य** इति । निर्देशादेव षष्ठीसमर्थविभक्तिरित्यभिप्रेत्याह । **षष्ठ्यन्तेभ्य** इति । क्षेत्रसंनिधानाद्भवतिरिहोत्पत्त्यर्थो गृह्यते । न सत्तावाची । धान्यानां किम् । तृणानां भवनं क्षेत्रम् । क्षेत्रे किम् । मुद्गानां भवनं कुसूलः ।

व्रीहि । उक्तेर्थे । भवनं क्षेत्रम् । आभ्यां खञोपवादो ढक् ।

यव । एभ्यो भवने क्षेत्रे यत् । **यव्यमिति** । यवानां भवनं क्षेत्रम् । आदिना यवक्यं षष्टिक्यम् ।

विभाषा । आदिना माष्यं माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् । स्पष्टत्वात्

---

१. क्षेत्रेर्थे B_1, D_1, D_4. २. B_1 drops it. ३. भवन्त्य° D_5. . भवनक्षेत्रं B_1. ५. B_1 has आभ्यां ढक् before it; आभ्यां ढक् स्यादुक्तेर्थे D_4. ६. यवक्यम् । षाष्टिक्यम् B_2; इत्यादि dropped D_5. ७. यद्वा उक्तेर्थे P, D_4; यत् स्यादुक्तेर्थे C. ८. माष्यम् । माषीणम् । उम्यम् । औमीनम् । अणव्यम् । आणवीनम् B_2.

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥५।२।७॥

सर्वपूर्वकात्[1] पथ्याद्यन्तात् [2]द्वितीयान्ताद्व्याप्नोत्यर्थे खः स्यात् ॥ सर्वपथान् व्याप्नोति सर्वपथीनः । पूर्वपदस्थान्निमित्तात्[3] परस्य[4] तद्धितस्थस्य[5] नस्य[6] णत्वमिष्यते । सर्वाङ्गीणः ।[7]

त्यक्तं सूत्रद्वयम् । 'सर्वचर्मणः कृतः खखञौ' ॥५।२।५॥ सर्वचर्मशब्दात् तृतीयासमर्थात् कृत इत्यर्थे खखञौ स्तः । सर्वशब्दश्चात्र कृतेन प्रत्ययार्थेन संबध्यते न चर्मणा । तत्रायमसमर्थसमासो द्रष्टव्यः । सर्वैः चर्मणा कृत इत्यस्मिन् वाक्ये वृत्तिः । सर्वचर्मीणः । सार्वचर्मीणः । 'यथामुखसंमुखस्य दर्शनः खः' ॥५।२।६॥ दृश्यतेस्मिन् दर्शनः आदर्शादिः । तस्मिन् दर्शनेर्थे आभ्यां खः स्यात् । यथामुखमिति निपातनात् सादृश्येव्ययीभावः । यथामुखं दर्शनं यथामुखीनम् । संमुखम् । समस्यान्तलोपो निपात्यते । संमुखस्य दर्शनः संमुखीनः । तत्सर्वादेः । आदिना सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः । शरावाच्चेति वाच्यम् । सर्वशरावीणः । स्पष्टत्वात् त्यक्तान्यष्टौ । 'आप्रपदं प्राप्नोति' ॥५।२।८॥ खः । आप्रपदीनं वस्त्रम् । 'अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु' ॥५।२।९॥ अनुपदादिभ्यो द्वितीयान्तेभ्यः क्रमाद्बद्धादिष्वर्थेषु खः । अनुपदं बद्धा अनुपदीना उपानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः । अयः प्रदक्षिणं गमनम् । अनयोप्रदक्षिणगमनम् । अयसहितोनयः अयानयः । तं नेयः अयानयीनः शारः । फलकशिरस्थ इत्यर्थः । 'परोवरपरंपरपुत्रपौत्रमनुभवति' ॥५।२।१०॥ एभ्योनुभवत्यर्थे खः ।

---

१. सर्वपूर्वात् P, D_5. २. C has भाषायाम् before it. ३. B_1 has सर्वाङ्गीणः before it. ४. उत्तरपदतद्धितस्थनकारस्य D_4, C; उत्तरपदतद्धितस्थस्य नकारस्य B_2, P, D_1. ५. °स्थनकारस्य D_2. ६. नकारस्य D_5. ७. After it—इत्यादि B_2, D_1, D_4, D_5. ८. क्रमेण बद्धा° Dc_3.

अध्वनो यत्खौ ॥५।२।१६॥

अस्माद् द्वितीयान्तादलंगामीत्यर्थे यत्खौ स्तः ॥ अध्वानमलं गच्छत्यध्वन्यः । अध्वनीनः ।

तत्र परावरशब्दस्य परोवरादेशः । परपरतराणां च परंपरादेशो निपात्यते । परांश्चावरांश्चानुभवति परोवरीणः । परान् परतरांश्चानुभवति परंपरीणः । पुत्रपौत्राननुभवति पुत्रपौत्रीणः । शब्दान्तरं चास्ति मन्त्रिपरंपरेति । 'अवारपारात्यन्तानुकामं गामी' ॥५।२।११॥ गमिष्यतीति गामी । अत्रार्थे एभ्यः खः । अवारपारं गामी अवारपारीणः । व्यस्ताद् विपरीताच्च । अवारीणः । पारीणः । पारावारीणः । अन्तस्याभावोत्ययो वा अत्यन्तम् । अन्तमतिक्रान्तं वा । कामसदृशमनुकामम् । क्रियाविशेषणे चैते । अत्यन्तीनः । अनुकामीनः । 'समांसमां विजायते' ॥५।२।१२॥ विजायत इति गर्भं धारयतीत्यर्थः । समांसमां विजायते समांसमीना गौः । वीप्सा द्विर्वचनं पूर्वपदे सुपो लुगभावो निपातनात् । केचित्तु समायां समायामित्यस्य निपातः समांसमेति वर्णयन्ति विजनिं च गर्भमोचनार्थम् । 'अद्यश्वीनावष्टब्धे' ॥५।२।१३॥ अविदूरे प्रसवे अद्यश्वीना निपात्यते । अद्य श्वो वा विजायते अद्यश्वीना गौः । केचिद्विजायते इति नानुवर्तयन्ति । अद्यश्वीनं मरणम् । 'आगवीनः' ॥५।२।१४॥ वेतनभूतेन गवा भृतः सन्ना गोः प्रदानात् कर्म करोतीत्यर्थे खो निपात्यते । आगवीनः । 'अनुग्वलं गामी' ॥५।२।१५॥ अनुगुशब्दादलंगामीत्यर्थे खः । अनुगवीनः गोपः ।

अध्वनः । अध्वन्य इति । 'ये चाभाव–' इति प्रकृत्या । **अध्वनीन** इति । 'आत्माध्वानौ खे' इति । स्पष्टत्वात् त्यक्तानि सप्त । 'अभ्यमित्राच्छ च' ॥५।२।१७॥ चाद्यत्खौ । अभ्यमित्रमलं

---

१. इति is dropped in P, D_1, and C. २. Before it C has—'ये चाभावकर्मणोः' इति प्रकृतिभावः. ३. पारावारीणम् Dc_2. ४. °नार्थः Bc_1, Dc_3, Dc_4.

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥५।२।२४॥

षष्ठ्यन्तात् पील्वादेः कर्णादेश्च क्रमात् पाकमूलयोरर्थयोः[1] कुणब्जाहचौ क्रमात्[2] स्तः ॥ पीलूनां पाकः पीलुकुणः । कर्कन्धुकुणः[3] । कर्णस्य मूलं कर्णजाहम् । अक्षिजाहम् ।

गच्छति अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । 'गोष्ठात् खञ् भूतपूर्वे' ॥५।२।१८॥ स्वार्थे भूतपूर्वं गोष्ठं गौष्ठीनम् । भूतपूर्वे किम् । गोष्ठम् । 'अश्वस्यैकाहगमः' ॥५।२।१९॥ एकाहेन गम्यते एकाहगमः । घञ् । निपातनान्न वृद्धिः । अश्वस्यैकाहगमः आश्वीनोऽध्वा । 'शालीनकौपीने धृष्टाकार्ययोः' ॥५।२।२०॥ एतयोरर्थयोरेते खञन्ते निपात्येते । शालीनो जडः । स हि जाड्याज्जनेषु लज्जया स्थातुमशक्तः । अधृष्टः शालाप्रवेशमर्हति । कौपीनं पापं तद्धि लोकनिन्द्यत्वादकार्यं कूपप्रवेशमर्हति । तत्साहचर्यादवयवश्च कश्चित्तदाच्छादनं च कौपीनशब्देनोच्यते । 'व्रातेन जीवति' ॥५।२।२१॥ खञ् । नानाजातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घा व्रातास्तेषां कर्म व्रातम् । व्रातेन जीवति व्रातीनः । व्रातानामन्यतमे एव अन्यत्र न । 'साप्तपदीनं सख्यम्' ॥५।२।२२॥ सख्ये निपात्यते । सप्तभिः पदैरवाप्यं साप्तपदीनं सख्यम् । साप्तपदीनः सखेति धर्मिणि धर्मोपचारात् । 'हैयङ्गवीनं संज्ञायाम्' ॥५।२।२३॥ निपात्यते । ह्यो गोदोहस्य विकारो हैयङ्गवीनम् । घृतस्येयं संज्ञा ।

तस्य । 'चुटू' अस्यानित्यत्वाज्जाहचो जस्येत्संज्ञा न । पीलु । कर्कन्धु । शमी । करीर । कुवल । बदर । अश्वत्थ । खदिर । पील्वादिः । कर्ण । अक्षि । नख । केश[4] । पाद । गुल्फ । भ्रू । दन्त[5] । ओष्ठ । स्पष्टत्वात् त्यक्तमेकम् । 'पक्षात्तिः' ॥५।२।२५॥ मूलग्रहणमनुवर्तते न पाकग्रहणम् । पक्षस्य मूलं पक्षतिः ।

---

१. After it–क्रमात् D_3, D_5, B_1. २. C and B_2 drop it. ३. कर्कन्धू° D_4. ४. मुख before it Bc_1, Dc_3, Dc_4. ५. Before it–शृङ्ग Bc_1, Dc_1, Dc_4; शृङ्ग for दन्त Dc_3.

तेन वित्तश्चुञ्चुप्चणपौ ॥५।२।२६॥

तृतीयान्ताद्वित्तेऽर्थे एतौ स्तः । 'चुटू' इत्यस्यानित्यत्वान्न चस्येत्संज्ञा । विद्यया वित्तो विद्याचञ्चुः । विद्याचणः ।

संप्रोदश्च कटच् ॥५।२।२९॥

एभ्यः कटच् स्यात् ॥ संकटम् । प्रकटम् । उत्कटम् । चात् । विकटम् ॥ अलाबूतिलोमाभङ्गाणुभ्यो रजसि कटच्

तेन । वित्तः प्रतीतो विज्ञात इत्यर्थः । **अलाबू** इति । एभ्यो रजसि वाच्ये कटच् प्रत्ययो वाच्य इत्यर्थः । **गोष्ठजादय** इति । आदिशब्दः प्रकारे । पशुनामानि गोशब्दादीनि । **संघात** इत्यादि । अनन्तरोक्तस्य प्रपञ्चः । **अविकट** इति विप्रकीर्णानामवीनां विस्तार उच्यते । **उष्ट्रगोयुगमिति** । द्वावुष्ट्रौ । **अश्वषड्गवमिति** । षडश्वाः । **तिलतैलमिति** । तिलानां स्नेहः । **इक्षुशाकटमिति** । इक्षूणां भवनं क्षेत्रम् । स्पष्टत्वात् त्यक्तानि नव । 'विनञ्भ्यां नानाञौ नसह' ॥५।२।२७॥ असहार्थे वर्तमानाभ्यामाभ्यामेतौ स्तः स्वार्थे । विना । नाना । ञ आद्युदात्तार्थः । 'वेः शालच्छङ्कटचौ' ॥५।२।२८॥ ससाधनक्रियावचनाद्वेरेतौ स्तः स्वार्थे । विगते शृङ्गे विशाले विशङ्कटे । तद्योगाद् गौरपि विशालो विशङ्कट इत्युच्यते । परमार्थतस्तु गुणशब्दा एते यथाकथं व्युत्पाद्यन्ते । नात्र प्रकृतिप्रत्ययार्थयोरभिनिवेष्टव्यम् ।

'संप्रोदश्च कटच्' ॥५।२।२८॥ चकाराद्वेश्च । संकटम् । प्रकटम् । उत्कटम् । विकटम् । 'अवात् कुटारच्च' ॥५।२।३०॥ चकारात् कटच् । अवकुटारः । अवकटः । 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' ॥५।२।३१॥ नासिकाया नमने अवात् टीटजादयः

---

१. °श्चुञ्चुप् D1. २. तेनेति तृती° D4. ३. ज्ञातो C, D2, D4, D5. ४. विद्याचुञ्चुः D1. ५. D1 and D4 drop the Vritti; D2, D5, B2 have स्वार्थे only. ६. भङ्गाभ्यो D1; भाङ्गाणुभ्यो D4. ७. यथाकथंचिद् Bc1, Dc3. ८. कुटच् Dc3. ९. अवकुटः Dc3.

वाच्यः ॥* अलाबूनां रजः अलाबूकटम् ॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः ॥* गवां स्थानं गोगोष्ठम् । महिषीगोष्ठम् । संघाते कटच् ॥* अवीनां संघातः[1] अविकटः ॥ विस्तारे पटच् ॥* [2]अविपटः । द्वित्वे गोयुगच् ॥* उष्ट्रगोयुगम् । षट्त्वे षड्गवच् ॥* अश्वषड्गवम् ।[3] [4]स्नेहे तैलच् ॥* तिलतैलम् । भवने क्षेत्रे [5]शाकटशाकिनौ ॥* [6]इक्षुशाकटम् । इक्षुशाकिनम् ।

स्युः । अवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगात् नासिकायां पुरुषे च भवन्त्यमी । अवटीटा नासिका । अवटीटः पुमान् । 'नेर्बिड-ज्बिरीसचौ' ॥५।२।३२॥ निबिडम् । निबिरीसम् । 'इनच् पिटच्चिक चि च' ॥५।२।३३॥ नेरिनच्पिटचौ स्तः तत्संनियोगे यथासंख्यं चिक चि इत्येतावादेशौ स्तः । चिकिनम् । चिपिटम् । कप्रत्यय-चिगादेशनिपाताच्चिकोपि वाच्यः । क्लिन्ने चक्षुषि चुल्लचिल्लपिल्ला निपात्याः । चुल्लं चक्षुः । तद्योगात् पुरुषोपि चुल्लादिः । 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' ॥५।२।३४॥ पर्वतस्यासन्नमुपत्यका । [7]पर्वतस्याधि-रूढमधित्यका । 'कर्मणि घटोठच्' ॥५।२।३५॥ घटत इति घटः । पचाद्यच् । सप्तम्यन्तात् कर्मशब्दात् [8]घट इत्यर्थेठच् स्यात् । कर्मणि घटते कर्मठः । अकर्मकत्वाद् घटतेः कर्मशब्दो न कारकम् । अकारकरणाच्चात्र ठस्येको न प्रवर्तते ।

---

१. संघः C. २. Before it—अवीनां विस्तारः D_5. ३. After it P has—षडश्वा इत्यर्थः. ४. Before this B_1 has—तिलादिभ्यः. ५. Before it—इक्ष्वादिभ्यः D_4. ६. इक्षुशाकिनम् । इक्षुशाकटम्. D_5. ७. पर्वतस्यारूढ° Dc_2. ८. घटत इत्यर्थे Bc_1, Dc_3.

तदस्य संजातं तारकादिभ्य इतच् ॥५।२।३६॥

एभ्यः प्रथमान्तेभ्यः संजातोपाधिकेभ्यः[1] षष्ठ्यर्थे इतच् स्यात्[2]। तारकाः संजाता अस्येति[3][4] तारकितं नभः। पुष्पितो वृक्षः[5]।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥५।२।३७॥

प्रमाणोपाधिकात्[6] प्रथमान्तात् षष्ठ्यर्थे एते स्युः। ऊरू[7] प्रमाणमस्य ऊरुद्वयसम्। जानुदघ्नम्। नाभिमात्रम्॥ प्रमाणे लुक्[8]॥* प्रमाणशब्देभ्यः प्रत्ययस्य लुक् स्यात्[9]॥[10] वितस्तिः प्रमाणमस्य वितस्तिः॥ द्विगोर्नित्यम्॥* द्विवितस्तिः। द्व्याढकी।

तदस्य। तारक। पुष्प। कंटक[11]। सूत्र। निष्क्रमण। पुरीष। रुचि। कुड्मल। मुकुल। स्तवक[12]। किसलय। वेग। निद्रा। तन्द्रा। बुभुक्षा। पिपासा। श्रद्धा। अभ्र। रोग। अङ्गार। पर्णक। द्रोह। मुख[13]। दुःख। उत्कण्ठ। भार। व्याधि। कर्ण[14]। गर्भादप्राणिनि। गर्भिताः शालयः। प्राणिनि तु गर्भिणी गौः।

प्रमाणे। 'प्रथमश्च द्वितीयश्च उर्ध्वमाने मतौ मम'॥ ऊरुद्वयसमुदकम्। ऊरुदघ्नमुदकम्। मात्रच् पुनरविशेषेण। प्रस्थमात्रमित्यपि स्यात्। प्रमाणे ल इति वक्तव्यम्। ल इति पूर्वाचार्याणां लुकः संज्ञेति चेतसि कृत्वा व्याचष्टे। **प्रमाणशब्देभ्य इति**। **वितस्तिरिति**। वितस्तिः प्रमाणं यस्यः सः। द्विगोर्नित्यमित्यपि वक्तव्यम्। ल इति वर्तते। **द्विवितस्तिरित्यादि**। द्वे वितस्ती प्रमाणं यस्य सः। द्वावाढकौ प्रमाणमस्य।

---

१. संजातोपाधिभ्यः B_1; संज्ञातोपाधिकेभ्यः D_1. २. स्यात् dropped D_5. ३. यस्य तत् C. ४. इति dropped P, D_1. ५. पुष्पिता वृक्षाः D_2. ६. प्रमाणोपाधिकेभ्यः प्रथमान्तेभ्यः B_1. ७. ऊरुः B_1; ऊरूः D_4. ८. लः C. ९. Dropped B_1. १०. After it—प्रथमश्च द्वितियश्च ऊर्ध्वमाने मतौ मम। मात्रच् पुनरविशेषेण प्रस्थमत्रमपीष्यते॥ D_4. ११. कण्टक Bc_1, Dc_4. १२. After it—क्षारक Dc_4. १३. सुख Bc_1, Dc_3, Dc_4. १४. Dropped Bc_1, Dc_3, Dc_4.

पुरुषहस्तिभ्यामण् च ॥५।२।३८॥

आभ्यामुक्तेर्थेण् स्यात् द्वयसजादयश्च ॥ पौरुषम् ॥

इनण्यनपत्ये ॥६।४।१६४॥

अनपत्यार्थेणि इन् प्रकृत्या स्यात् ॥ हास्तिनम् । अपत्ये तु मेधाविनोपत्यं मैधावः । पक्षे । पुरुषद्वयसमित्यादि ।

यत्तदेतेभ्यः परिमाणे वतुप् ॥५।२।३९॥

एभ्यः परिमाणोपाधिकेभ्यः षष्ठ्यर्थे वतुप् स्यात् ॥ 'आ सर्वनाम्नः' इत्यात्वम् । यत् परिमाणमस्य यावान् । तावान् । एतावान् ।

नित्यग्रहणं संशये विधास्यमानस्य मात्रचोपि लुगर्थम् । प्रमाण-परिमाणाभ्यां संख्यायाश्चापि संशये मात्रच् वाच्यः । सममात्रम् । प्रस्थमात्रम् । पञ्चमात्रम् । वत्वन्तात् स्वार्थे द्वयसच्मात्रचौ बहुलम् । तावदेव तावद्वयसं तावन्मात्रम् । यावद्वयसं यावन्मात्रम् ।

पुरुष । उक्तोर्थः प्रमाणम् ।

इनणि । अणीति किम् । दण्डिनां समूहो दाण्डम् । अनुदात्तादेर-ञ् । इन्निति किम् । सौश्रुतम् ।

यत्तदेतेभ्यः ।

'एकादिमानं संख्या स्यादुन्मानं तु तुलादिकम् ।
कुडवादि परीमाणं प्रमाणं त्वङ्गुलादिकम्' ॥
इति भेदात् प्रमाणानुवृत्तावपि परिमाणग्रहणमिदम् ।

---

१. उक्तेर्थे for आभ्यां . स्यात् in B_1. २. °णि परे B_1, D_1, D_2, D_5. ३. After it—हस्ती प्रमाणमस्य हास्तिनम् । एकादिमानं संख्या स्यादुन्मानं तु तुलादिकम् । कुडवादि परिमाणं प्रमाणं त्वङ्गुलादिकम् ॥ D_5. ४. मैधावम् D_1, B_2; after it-दण्डिनोपत्यं दाण्डः D_2. ५. °ग्रहः Bc_1, Dc_3. ६. इदम् dropped Dc_3, Dc_4, Bc_1.

किमिदंभ्यां वो घः ॥५।२।४०॥

आभ्यामुक्तेर्थे वतुप् स्यात् तस्य च[1] वकारस्य[2] घः स्यात् ।

इदंकिमोरीश्की ॥६।३।९०॥

घस्य ईयादेशः[3] । 'यस्येति च' इतीकारलोपः । किं परिमाणमस्य कियान् । इयान् ।

किमः संख्यापरिमाणे डति च ॥५।२।४१॥

संख्यापरिच्छेदेऽर्थे[4] वर्तमानात्[5] किमः षष्ठ्यर्थे डतिः स्यात् वतुप् च । तस्य च वो[6] घः । टिलोपः[7] । का संख्या एषां[8]

किमि । अत्र किमिदंभ्यामिति योगविभागेन वतुपं विधाय वो घ इति द्वितीयेन तस्य घो विधीयत इत्यभिप्रेत्याह । **आभ्यामित्यादि** ।

किमः । संख्यायाः परिमाणं संख्यापरिमाणं संख्यापरिच्छेद इत्यर्थः । अथवा संख्यैव परिमाणं परिच्छेद इत्यर्थः । द्वयमप्यभिप्रेत्याह । **संख्यापरिच्छेदे वर्तमानादिति** । यदा संख्या पृच्छ्यमाना स्यात्तदा किंशब्दस्तस्यां परिच्छेदविशिष्टायां वर्तते । का संख्या एषामिति । संख्यायाः परिमाणमिति पक्षे विग्रहः । संख्यैव परिमाणमिति पक्षे तु का संख्या परिमाणं परिच्छेदिका एषामिति ।

---

१. P, D_4 drop च. २. वतुपो वस्य for वकारस्य B_1. ३. इयः B_1. ४. अर्थे dropped P, D_4, Com. ५. Before it—बह्वर्थे D_4. ६. वस्य घः B_1. ७. टेर्लोपः D_1, D_3, B_1, P, C. ८. येषां C ; एतेषां D_4.

ते[1] कति विप्राः । कियन्तः । क्षेपे न । केयं संख्या ऐषां[2] देशानाम् । यत्तद्भ्यामपि डतिरिति केचित् । यति । तति ।

संख्याया अवयवे तयप् ॥५।२।४२॥

अवयववृत्तेः संख्यायाः षष्ठ्यर्थे अवयविनि तयप् स्यात् । पञ्च अवयवा यस्य तत्[3] पञ्चतयम् । चतुष्टयी रज्जुः ।

द्वित्रिभ्यां तयस्यायज्वा ॥५।२।४३॥

आभ्यां तयपोयजादेशो वा स्यात्[4] ॥ द्वयम् ॥ त्रयम् । द्वितयम् । त्रितयम् ।

अत्र पक्षे संख्यायाः परिमाणेन विशेषणं [5]यत्र परिच्छेदकत्वेन न विवक्ष्यते तत्र मा भूदिति । तेन क्षेपे न त[6]त्र परिच्छेदो नास्तीत्यभिप्रेत्याह । **क्षेपे नेति** । **केचिदिति** । अर्वाचीनाः । तथोक्तं **मुग्धबोधे** । कतियतिततियावत्तावत्एतावत्कियत्इयत इति ।

संख्यायाः । अवयवग्रहणादवयवी प्रत्ययार्थो गम्यत इत्यभिप्रेत्याह । **अवयविनीति** । **चतुष्टयीति** । चतुरो रेफस्य विसर्गे विसर्जनीयस्य सः । तस्यापि ' ह्रस्वात्तादौ तद्धिते ' इति मूर्धन्यः ।

द्वित्रि । तयपोनुवृत्तावपि तयग्रहणं स्थानिनिर्देशार्थमन्यथा हि प्रत्ययान्तरमयच् विज्ञायेत त[7]तश्च त्रयी गतिरित्यत्र ङीप् तयब्निबन्धनः त्रयो देवा इत्यत्र तयन्निबन्धनो जसः शी आदेशश्च न स्यात् । चः स्वरार्थः ।

---

१. ते dropped D_1, D_2, D_4, D_5. २. येषां P, C, D_4. ३. B_1, D_4. drop तत्; अस्य for यस्य तत् D_1. ४. B_1 drops it. ५. च यत्र Bc_1. ६. तत्र हि Bc_1, Dc_3, Dc_4. ७. अतश्च Dc_4.

उभादुदात्तो नित्यम् ॥५।२।४४॥

उभात्परस्य तयपो नित्यमयजादेशः स्यात्[1] । स चोदात्तः । उभौ अवयवौ यस्य[2] उभयम् ।

तदस्मिन्नधिकमिति दशान्ताड्डः ॥५।२।४५॥

प्रथमान्तादधिकोपाधिकाद् दशान्तात् शब्दात् सप्तम्यर्थे डः स्यात् ॥ एकादश[3] अधिका अस्मिन् शते सहस्रे वा एकादशम्[4] । द्वादशम्[5] । शतसहस्रयोरेवेष्यते । नेह[6] । द्वादश अधिका अस्यां त्रिंशतीति । प्रकृतिप्रत्ययार्थयोर्वैजात्ये न ॥* एकादश माषा अधिका अस्मिन् निष्कशते । दशान्तात् किम् । पञ्च अधिका अस्मिन् । अन्तग्रहणं किम् । दश अधिका अस्मिन् ।

उभात् । उभशब्दो लौकिकी संख्येति पूर्वेण विहितस्य तयपोयजादेशो विधीयत इत्यभिप्रेत्याह । **उभात्परस्येत्यादि** । अथ न संख्या ततो योगविभागेन तयपं विधायायजादेशः क्रियते । **स चोदात्त** इति चित्त्वादन्तोदात्तत्वे प्राप्ते वचनसामर्थ्यादाद्युदात्त इत्यर्थः । कथमुभये देवमनुष्याः । यतो बहूनामुभावयवौ न घटेते । नैष दोषः । अत्र हि द्वौ राशी समुदायस्यावयवौ एको देवानामपरो मनुष्याणामिति ।

तदस्मिन् । **शतसहस्रयोरेवेत्यादि** । एतच्च विवक्षार्थादिति-करणाल्लभ्यते । तथोक्तं **काशिकायाम्** । इतिकरणो[7] विवक्षार्थस्तत इदं सर्वं लभ्यते इति । कथमेकादशं शतसहस्रमिति । शतानां सहस्रं सहस्राणां वा शतं शतसहस्रम् । तत्र शतसहस्रयोरित्येव सिद्धम् ।

---

१. B_1 drops it. २. अस्य उभयः D_1, B_2; यस्य स उभयः D_4. ३. एकादधिका दश D_1; एकादश द्वादश वा अधिका &c. D_5, B_2. ४. एकादश शतं सहस्रं वा B_1 for एकादशम् । द्वादशम् B_1. ५. C drops it; B_2 has शतम् after it. ६. तेनेह । D_2. ७. इतिकरणोपि Dc_3.

शदन्तविंशतेश्च ॥५।२।४६॥

शदन्ताद्विंशतेश्च डः स्यादुक्तेर्थे ॥ त्रिंशम् । विंशम् । शतम् । संख्यापूर्वादपीष्यते । एकत्रिंशम् । एकविंशम् । शैतम् ।

तस्य पूरणे डट् ॥५।२।४८॥

षष्ठ्यन्तात् संख्यावाचिनः पूरणेर्थे डट् स्यात् । पूर्यते संपद्यते संख्यानेनेति पूरणः । एकादशानां पूरणः एकादशः । द्वादशः ।[३]

शदन्त । **संख्यापूर्वादिति** । असंख्यादेस्तु न । गोत्रिंशदधिका अस्मिन् गोविंशतिरधिकास्मिन्निति वाक्यमेव । त्यक्तमेकम् । 'संख्याया गुणस्य निमाने मयट्' ॥५।२।४७॥ गुणो भावः । निमानं मूल्यम् । तदपीह भाग एव । संख्यावाचिनः प्रथमान्ताद्गुणस्य निमाने वर्तमानात् षष्ठ्यर्थे मयट् । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम् । भागे विहितः प्रत्ययः प्राधान्येन भागवन्तमाहेति द्विमयमुदश्विदिति सामानाधिकरण्यम् । गुणस्यैकत्वं विवक्षितं तेनेह न । द्वौ भागौ यवानां त्रय उदश्वित इति । निमेयवाचिनोपि निमाने वाच्ये इष्यते । तक्रस्य द्वौ भागौ निमेयावस्य भागस्य द्विमया यवाः तक्रस्य । गुणस्येति किम् । द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमान इति किम् । क्षीरस्य द्वौ भागौ पचनावस्य तैलस्य ।

तस्य । इह द्वे संख्याग्रहणे अनुवर्तेते । तत्रैकेन संख्येयवाचिना प्रकृतिर्विशेष्यत इत्यभिप्रेत्याह । **षष्ठ्यन्तात् संख्यावाचिन इति** । टित्त्वात् ङीप् । संख्यापूरणे किम् । पञ्चानामुष्ट्रिकाणां पूरणो घटः । न हि घटेन उष्ट्रिकाणां पञ्च संख्या संपद्यते । किं तर्हि । लब्धसंख्यानां जलादिना रिक्तता ।

---

१. एकशतम् । D_6. २. संख्यापूरणः B_1. ३. After it—टित्त्वात् । द्वादशीनाम् B_2; द्वादशी D_4.

नान्तादसंख्यादेर्मट् ॥५।२।४९॥

नान्तात् संख्यार्थात् परस्य डटो मडागमः स्यात् न तु संख्यापूर्वात् ॥ पञ्चमः[1] । नान्तात् किम् । विंशः । संख्यादेस्तु । द्वादशः[2] ।

षट्कतिकतिपयचतुरां थुक् ॥५।२।५१॥

एषा डटि परे थुगागमः स्यात् ॥ षष्ठः[3] । चतुर्थः । इत्यादि । चतुरश्छयतौ वलोपश्च ॥* तुर्यः[4] । तुरीयः ।

नान्तात् । 'तस्मादित्युत्तरस्य' इति परिभाषया डडित्यस्यानुवर्तमानस्य प्रथमान्तस्यापि षष्ठ्यन्तता स्यादित्यभिप्रेत्याह । **परस्य डट इति** । डटः स्वरितत्वेनेहानुवृत्त्या मट आगमत्वं न प्रत्यय इति ज्ञायते । अन्यथा तस्य पूर्वमेव विहितत्वादिहानुवृत्तिर्वृथा स्यादित्यभिप्रेत्याह । **मडागमः स्यादिति** । यद्यपीहागमत्वे प्रयोजनं नास्ति तथापि तमडादौ स्वरविशेषोस्ति । तथा हि तमट आगमत्वे आगमानुदात्तत्वे च डटः प्रत्ययाद्युदात्तत्वे च विंशतितम इत्यन्तोदात्तं स्यात् । यदि प्रत्ययस्तमट् स्यात् मध्योदात्तः स्यात् । तच्च नेष्टम् । **पञ्चम** इति । टेरित्यस्य परत्वेपि अन्तरङ्गत्वात् पूर्वं मयट् ततो भत्वाभावान्न टिलोपः ।

षट् । डडितीहानुवृत्तं सामर्थ्यात् सप्तम्यन्तं स्यादित्यभिप्रेत्याह । **डटि परे थुगागम इति** । थुकः पूर्वान्तत्वकरणं षष्ठ इत्यादौ जश्त्वादि मा भूदिति । परत्वादित्वे हि स्वादिष्विति पदत्वं स्यात् । ततश्च 'झलां जशोन्ते' इति जश्त्वं प्रसज्येत[5] । **चतुर्थ** इति । अत्र च रेफस्य विसर्गः । आदिना कतिथः कतिपयथः । अस्यासंख्यात्वेपि अस्मादेव डट् ।

---

१. Before it—पञ्चानां पूरणः D_2, D_3, B_1. २. एकादशः B_1. ३. B_1 has before it—षण्णां पूरणः. ४. तुरीयः । तुर्यः । D_6. ५. प्रसह्येत Dc_4.

बहुपूगगणसङ्घस्य तिथुक् ॥५।२।५२॥

एषां तिथुगागमः स्यात् डेटि । बहुतिथः ।[2] इत्यादि । पूगसङ्घाभ्यामत एव डट् ।

वतोरिथुक् ॥५।२।५३॥

वतोरिथुगागमः स्यात् डटि ॥ यावतिथः ।

द्वेस्तीयः ॥५।२।५४॥

द्वेः पूरणे तीयः स्यात् । द्वितीयः ।

त्रेः संप्रसारणं च ॥५।२।५५॥

त्रेः पूरणे तीयः स्यात् संप्रसारणं च ॥ तृतीयः ।

विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥५।२।५६॥

एभ्यः परस्य डटो वा तमडागमः स्यात् ॥

बहु । ननु पूगसङ्घाभ्यामसंख्यावाचिभ्यां कथं डडित्याशङ्क्याह । **पूगसङ्घाभ्यामिति** ।

वतोः । **यावतिथ** इति । 'यत्तदेतेभ्यः—' इति वतुप् । 'आ सर्वनाम्नः' इत्यात्वम् ।

द्वे । अयं तु डटोपवादः प्रत्ययो नादेशः । 'कर्मणि द्वितीया' इति टापा निर्देशाज् ज्ञापकात् । आदेशत्वे हि ङीप् स्यात् ।

त्रेः । **तृतीय** इति । अत्र 'हलः' इति दीर्घो न । अण इति हि तत्र वर्तते । पूर्वेण च णकारेणाण्ग्रहणम् ।

विंशति । पूरणार्थस्य डटोधिकारात् स आगमी विज्ञायत इत्यभिप्रेत्याह । **डट** इत्यादि ।

---

१. डटि परे P. २. After it—पूगतिथः । गणतिथः । सङ्घतिथः B_2. ३. पूरणेर्थे C. ४. C drops it.

विंशतितमः । [1]द्वाविंशतितमः । [2]त्रिंशत्तमः । पक्षे । विंशः । त्रिंशः । द्वाविंशः ।

नित्यं शतादिमासार्धमाससंवत्सराच्च ॥५।२।५७॥

एभ्यो [3]नित्यं डटस्तमडागमः[4] ॥ [5]शततमः । एकशततमः । सहस्रतमः । [6]मासतमः । अर्धमासतमः । संवत्सरतमः । मासादेरत एव डट् ।

षष्ट्यादेश्चासंख्यादेः ॥५।२।५८॥

षष्ट्यादेर्डटो नित्यं [7]तमट् स्यात् न तु संख्यापूर्वात् । विकल्पापवादः । षष्टितमः । सप्ततितमः । संख्यादेस्तु [8]वा । एकषष्टः । [9]एकषष्टितमः ।

विंशत्यादयो लौकिकाः संख्याशब्दा गृह्यन्ते न पङ्क्त्यादिसूत्र-संनिविष्टाः । तद्ग्रहणे एकविंशतिप्रभृतिभ्यो न स्यात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात् । एवं च सति षष्ट्यादेश्चासंख्या-देरिति पर्युदासोत्र युज्यत एव ।

नित्यम् । षष्ट्यादेरिति वक्ष्यमाणेन सिद्धे शतादिग्रहणं संख्याद्यर्थम् ।

षष्ट्यादेः । प्राक् शतात् षष्ट्यादयो ज्ञेयाः । शतादीनां स्वशब्देन तमटो विधेः ।

---

१. द्वात्रिंशत्तमः C, D_1, D_2. २. P and C, D_2, D_4 have विंशः त्रिंशः in place of त्रिंशत्तमः…द्वाविंशः; D_5 has—after विंशतितमः—मासतमः । अर्धमासतमः । त्रिंशतितमः । द्वाविंशतितितमः । विंशः । द्वाविंशः ।. ३. डटो नित्यं D_2, D_5. ४. After it—स्यात् C. ५. Before it–शतस्य पूरणः । D_5. ६. Before it–उत्तरसूत्रेसंख्यादेरिति ज्ञापकात् D_4. ७. तमडागमः B_1. ८. न B_1. ९. B_1 drops it.

मतौ छः सूक्तसाम्नोः ॥५।२।५९॥

मतुबर्थे[1] छः स्यात् सूक्ते सामनि वार्थे ॥ अच्छावाकशब्दोस्मिन्नस्ति[2] अच्छावाकीयं सूक्तम् । वारवन्तीयं[3] साम । अनुकरणत्वाद्भिन्नपदादपि[4] । अस्यवामीयम् । कयाशुभीयम् ।

मतौ । मताविति मतुबर्थ उच्यते साहचर्यादित्याह । **मतुबर्थे इति** । मतुबर्थग्रहणेन समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थ इति सर्वमाक्षिप्यत इत्यभिप्रेत्याह । **अच्छावाकशब्दोस्मिन्नस्तीति** । **अनुकरणत्वादिति** । अयं भावः । अस्य वामादयोनुकरणशब्दाः अनुकार्यस्वरूपमात्रवाचिनश्चेति तेषामवयवभूतानि पदानि[5] न सन्ति वाक्यत्वाभावादर्थवत्त्वाच्च प्रातिपदिकाद्भिन्नपदत्वावभासेपि प्रत्ययो न[6] भवति । स्पष्टत्वात् त्यक्तानि षड्विंशतिः । 'अध्यायानुवाकयोर्लुक्' ॥५।२।६०॥ एतयोरर्थयोरुत्पन्नस्य छस्य लुक् । इदमेव ज्ञापकं छोभावस्य चेति च वाच्यम् । गर्दभाण्डशब्दोस्मिन्नस्ति गर्दभाण्डो गर्दभाण्डीयोध्यायोनुवाको वा । 'विमुक्तादिभ्योण्' ॥५।२।६१॥ एभ्यो मत्वर्थेण् स्यात् अध्यायानुवाकयोरर्थयोः । विमुक्तशब्दोस्मिन्निति वैमुक्तोध्यायोनुवाको वा । विमुक्त । देवासुर । रक्षोसुर । उपसत् । परिसारक । वसुमत् । पत्नीवत् । सत्त्वन् । दशार्ह । वयस् । हविर्धान । पतत्रिन् । सोम । पूषन् । इडा । अग्नाविष्णू । वृत्रहन् । 'गोषदादिभ्यो वुन्' ॥५।२।६२॥ मत्वर्थे अध्यायानुवाकयोः । गोषदकोध्यायोनुवाको वा । गोषद । इषेत्वा । मातरिश्वन् । देवस्यत्वा । देवीरापः । कृष्णोस्याखरेष्ठः । दैवीं धियम् । अञ्जन । रक्षोहण । प्रतूर्तक । कृशानु । 'तत्र कुशलः पथः' ॥५।२।६३॥ सप्तम्यन्तात् पथः कुशल इत्यर्थे वुन् । पथि कुशलः पथकः ।

---

१. मत्वर्थे D_1, D_5. २. अच्छावाक् D_1. ३. °वतीयं D_4. ४. °कारण° D_4, D_5. ५. पदानि सन्तीति वाक्य° Bc_1. ६. Dropped Bc_1.

'आकर्षादिभ्यः कन्' ॥५।२।६४॥ तत्र कुशले । आकर्षे कुशलः अकर्षकः । आकर्ष । त्सरु । पिशाच । पिचण्ड । अशनि । अश्मन् । निचय । जय । पाद । ह्लाद । शकुनि । 'धनहिरण्यात् कामे' ॥५।२।६५॥ सप्तम्यन्ताभ्यामाभ्यां कामे कन् । धने कामो धनकामः । धनकः । हिरण्यकः । 'स्वाङ्गेभ्यः प्रसिते' ॥५।२।६६॥ स्वाङ्गवाचिभ्यः सप्तम्यन्तेभ्यः प्रसक्तेर्थे[2] कन् । केशेषु प्रसितः केशकः । बहुवचनात् स्वाङ्गसमुदायादपि । दन्तोष्ठकः । 'उदराट्ठगाद्यूने' ॥५।२।६७॥ तत्र प्रसिते । यः प्रसितः सोविजिगीषुरलसो वा चेत् । औदरिकः । आद्यूने किम् । उदरकः । कन्नेव । 'सस्येन परिजातः' ॥५।२।६८॥ अत्रार्थे सस्यशब्दात् कन् । सस्यशब्दोत्र गुणवाची । सहार्थे इत्थंभावे[3] वा तृतीया । सस्येन परिजातः सस्यको मणिः । सस्यको वत्सः । परितो गुणैः पूर्णः आकारशुद्ध इत्यर्थः । 'अंशं हारी' ॥५।२।६९॥ हारीत्यावश्यके णिनिः । तत्र 'अकेनोः' इति षष्ठीनिषेधात् द्वितीया । अंशशब्दात् द्वितीयान्तात् हारीत्यर्थे कन् । अंशको दायादः । 'तन्त्रादचिरापहृते' ॥५।२।७०॥ कन् । तन्त्रादचिरापहृतस्तन्त्रकः पटः । नव इत्यर्थः । 'ब्राह्मणकोष्णिके संज्ञायाम्' ॥५।२।७१॥ यत्र आयुधजीविनो ब्राह्मणाः स देशो ब्राह्मणकः । उष्णिकाल्पान्ना यवागूः । 'शीतोष्णाभ्यां कारिणि' ॥५।२।७२॥ कन् । इह शीतोष्णे मान्द्यशैघ्र्यार्थे न स्पर्शवचने । शीतं करोति शीतकोलसः । उष्णकः । दक्षः । 'अधिकम्' ॥५।२।७३॥ अध्यारूढस्यारूढलोपे कन्नन्तमधिकमिति निपात्यते । अधिको द्रोणः खार्याः । 'अनुकाभिकाभीकः कमिता' ॥५।२।७४॥ कमितेत्यतस्मिन्नर्थे अन्वभिभ्यां कनि त्रयोप्येते निपात्याः[4] । अनुकामयते अनुकः । अभिकः । अभीकः । 'पार्श्वेनान्विच्छति' ॥५।२।७५॥ पार्श्वशब्दात् तृतीयान्तादत्रार्थे कन् । पार्श्वेनानृजूपायेनार्थमन्विच्छति

१. Dropped Dc_2. २. प्रसितेर्थे Dc_4. ३. °भूते वा Bc_1, Dc_3, Dc_4.
४. निपातिताः Bc_1.

पार्श्वकः । कौसृतिकः । 'अयःशूलदण्डाजिनाभ्यां ठक्ठञौ' ॥५।२।७६॥ यथासंख्यम् । तीक्ष्णोपायोयःशूलम् । तेनान्विच्छति आयःशूलिकः । राभसिकः । यो मृदुनोपायेनान्वेष्टव्यानर्थान् रभसेनान्विच्छति स एवमुच्यते । दण्डाजिनं दम्भस्तेनान्विच्छति दाण्डाजिनिको दाम्भिकः । 'तावतिथं ग्रहणमिति लुग्वा' ॥५।२।७७॥ तावतिथमिति पूरणान्तानां सामान्यनिर्देशोयम् । न स्वरूपग्रहणम् । अर्थप्राधान्यान्निर्देशस्य । गृह्यतेनेनेति ग्रहणं ग्रहणसाधनम् । ग्रहणो-पाधिकात् पूरणान्तात् कन् स्वार्थे । पूरणस्य च वा लुक् । द्वितीयेन रूपेण ग्रहणं द्विकं ग्रहणं ग्रन्थस्य द्वितीयकम् । ग्रहणकर्तरि तु नित्यं लुक् । षष्ठेन रूपेण गृह्णाति षट्कश्चैत्रः । ग्रन्थ एव प्रयोगः । 'स एषा ग्रामणीः' ॥५।२।७८॥ प्रथमान्तादत्रार्थे कन् । मैत्रो ग्रामणीः प्रधानमेषां ते मैत्रकाः । 'शृङ्खलमस्य बन्धनं करभे' ॥५।२।७९॥ कन् । शृङ्खलं बन्धनमस्य शृङ्खलकः । करभः । करभस्य दारवः पादपाशः शृङ्खलम् । 'उत्क उन्मनाः' ॥५।२।८०॥ उत्क इति निपात्यते उन्मनाश्चेदर्थः[1] । उत्कः प्रवासी । 'काल-प्रयोजनाद्रोगे' ॥५।२।८१॥ रोगे वाच्ये कालवाचिनः प्रयोजन-वाचिनश्च कन् । अर्थलभ्या समर्थविभक्तिर्यथायोगम् । कालो दिवसादिः । द्वितीयेह्नि भवो द्वितीयको ज्वरः । तृतीयकः । प्रयोजनं कारणं फलं वा । विषपुष्पैर्जनितो विषपुष्पको ज्वरः । उष्णं प्रयोजनमस्य उष्णको ज्वरः । शीतको ज्वरः । उत्तरसूत्रस्थं संज्ञाग्रहणमिहानुकृष्यते तेनायं प्रकारनियमो लभ्यते । 'तदस्मिन्नन्नं प्राये संज्ञायाम्' ॥५।२।८२॥ प्रथमान्तादस्मिन्नर्थे कन् । संज्ञायाम् । यत्तत् प्रथमान्तं प्रायविषयं चेदन्नम् । गुडापूपं प्रायेणान्नमस्यां पौर्णमास्यां गुडापूपिका । वटकेभ्य इनिर्वाच्यः । वटकिनी । 'कुल्माषादञ्' ॥५।२।८३॥ पूर्वेर्थे । कौल्माषी । पौर्णमासी । 'श्रोत्रियंश्छन्दोधीते' ॥५।२।८४॥ छन्दसः श्रोत्रभावो घन् प्रत्ययश्च

१. उन्मादश्चेदर्थः Bc1.

पूर्वादिनिः ॥५।२।८६॥

अस्मादिनिः स्यादनेनेत्यर्थे ॥ पूर्वमनेन भुक्तं पीतं वा पूर्वी ॥

सपूर्वाच्च ॥५।२।८७॥

सोपपदात् पूर्वादिनिः स्यात् ॥ पूर्वं कृतमनेन कृतपूर्वी कटम् । सुप्सुपेति समासे सति तद्धितः ।

निपात्यते छन्दोधीते इति वाक्यार्थे । न स्वरार्थः । श्रोत्रियो विप्रः । तावतिथमित्यतो वानुवृत्ते छान्दस इत्यपि स्यात् । 'श्राद्धमनेन भुक्तमिनिठनौ' ॥५।२।८५॥ अनेन भुक्तमित्यर्थे श्राद्ध-शब्दादिनिठनौ । श्राद्धी । श्राद्धिकः । समानेहनि प्रयोगः । नेह । ह्यः श्राद्धं भुक्तमनेन ।

पूर्वात् । **पूर्वमित्यादि** । पूर्वशब्दः क्रियाविशेषणम् । क्रियाविशेषणं च कर्म स्यादिति द्वितीयान्तात् प्रत्ययः । 'सौ च' इति दीर्घः ।

सपूर्वात् । **सोपपदादिति** । सहशब्दोत्र विद्यमानवचनः 'वोपसर्जनस्य' इति सहस्य सः । **कृतपूर्वी कटमिति** । भावे निष्ठा न कर्मणीति कटाद् द्वितीया । अथवा कर्मण्येव तथापि द्वितीयात्र स्यादित्युपपादितमधस्तात् । नैनु पूर्वं कृतमनेनेत्यनेकपदावयवत्वा-द्वाक्यं वाक्यस्य चाप्रातिपदिकत्वात् कथं प्रत्यय इत्याशङ्क्याह । **सुप् सुपेत्यादि** । 'पूर्वादिनिः' इत्येव सपूर्वादपि सिद्धौ 'सपूर्वाच्च' इति वदन् ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति परिभाषां ज्ञापयति । सपूर्वात्पूर्वादित्यकयोगेन च व्यपदेशिवद्भावात्पूर्वादपि सिद्धौ 'पूर्वादिनिः' इति पृथग्योगं कुर्वन् व्यपदेशिवद्भावोप्रातिपदिकेनेति परिभाषां ज्ञापयति ।

---

१. भुक्तं वा C, २. ननु च Bc1, Dc3, Dc4.

इष्टादिभ्यश्च ॥५।२।८८॥

इष्टमनेनेति इष्टी यज्ञे । अधीती व्याकरणे ।

इष्टादिभ्यः । इष्टी यज्ञे इति । 'क्तस्येन्विषयस्य कर्मण्यपि' इति सप्तमी । इष्ट । पूर्त । उपसादित । निगदित । परिगदित । निकथित । निषेवित[1] । संकलित[2] । परिकलित । संरक्षित । परिरक्षित । अर्चित । गणित । उपाकृत[3] । अनुगणित । अनुपठित । अवकीर्ण । आयुक्त । गृहीत[4] । आम्नात । श्रुत । आसेवित । अवधारित । अवकल्पित । निराकृत । अनुयुक्त । उपकृत । व्याकुलित[5] । स्पष्टत्वात् त्यक्तानि चत्वारि[6] । 'अनुपद्यन्वेष्टा' ॥५।२।९०॥ अन्वेष्टर्यनुपदीति निपात्यते । अनुपदी गवाम् । 'साक्षाद् द्रष्टरि संज्ञायाम्' ॥५।२।९१॥ साक्षादित्यस्मादव्ययाद् द्रष्टरीति स्यात् संज्ञायाम् । साक्षी उपद्रष्टा । 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः' ॥५।२।९२॥ क्षेत्रियजिति निपात्यते परक्षेत्रे चिकित्स्य इत्यर्थे । चोन्तोदात्तार्थः । परक्षेत्रे जन्मान्तरभाविनि देहे चिकित्स्यो य आमृत्योर्न निवर्तते व्याधिः स क्षेत्रियः । अथवा परक्षेत्रे संक्रमय्य चिकित्स्यं विषं क्षेत्रियम् । अथवा परक्षेत्रे चिकित्स्यः परकलत्रे निग्राह्यः[7] पारदारिकः क्षेत्रियः । अथवा परक्षेत्रे सस्यार्थे विनाश्यं तृणं क्षेत्रियम् । सर्वं चैतदाचार्यस्याभिप्रेतमिति प्रमाणम् । 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' ॥५।२।९३॥ इन्द्रियमिति घच्प्रत्ययान्तमन्तोदात्तं निपात्यते । रूढिरेषा चक्षुरादिनां तत्र निमित्तानि । इन्द्रलिङ्गादीनि पञ्च । वा शब्दः प्रत्येकं संबध्यते । इन्द्रलिङ्गमिति वा । इन्द्रस्यात्मनो लिङ्गम् । यत इन्द्र आत्मा करणैरनुमीयते नाकर्तृकं करणमस्तीति । इन्द्रदृष्टमिति । आत्मना दृष्टमिति । इन्द्रसृष्टमिति वा । आत्मना

---

१. निपठित Bc1, Dc3, Dc4. २. संकल्पित Bc1. ३. Before it—परिविदित Bc1, Dc3, Dc4. ४. विगृहीत Bc1; निगृहीत Dc3, Dc4. ५. आकुलित Bc1, Dc3, Dc4. ६. सूत्राणि चत्वारि Dc4. ७. विग्राह्यः Bc1.

तदस्यास्त्यस्मिन्निति मतुप् ॥५।२।९४॥

प्रथमान्तादस्त्युपाधिकादस्यास्मिन् वेत्यर्थे मतुप् स्यात् ॥ श्रीरस्यास्मिन् वास्तीति श्रीमान् । श्रीमती ।

सृष्टं तत्कृतेन शुभाशुभेनोत्पन्नमिति कृत्वा । इन्द्रजुष्टमिति वा । आत्मना सेवितं तेन द्वारेण विज्ञानोत्पादनात् । इन्द्रदत्तमिति । आत्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय । इतिकरणः प्रकारार्थः । सति संभवे व्युत्पत्तिरन्यथापि कार्या इन्द्रोनेन विषयानुपलभत इत्यादि ।

तदस्यास्ति । अस्यास्मिन् वेत्यर्थद्वयस्यैकत्र समावेशो नियमाभावात् पृथगुक्तिः । ततश्चैतत् सिद्धम् । गावोस्य सन्ति गोमान् देवदत्तः । वृक्षा अस्मिन् सन्ति वृक्षवान् पर्वत इति । इतिकरणो विवक्षार्थ इति ।

> 'भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने ।
> संसर्गेस्तिविवक्षायां भवन्ति मतुबादयः' ॥ इति ।

भूम्नि । बहवो गावोस्य सन्ति गोमान् । निन्दायाम् । ककुदावर्ती । ककुदावर्तो निष्फलत्वान्निन्दितः । प्रशंसायाम् । प्रशस्तं रूपमस्यास्ति स रूपवान् । नित्ययोगे । क्षीरिणो वृक्षाः । नित्यं क्षीरसंबद्धा एत उच्यन्ते । अतिशायने । उदरिणी कन्या । यस्या आतिशयेन उदरमस्ति सेयमुच्यते । संसर्गे । दण्डी । संसक्तदण्ड उच्यते । एवं भूमादिविशिष्टेस्त्यर्थे मतुपि सति व्रीहिरस्य यवोस्येत्यादौ सन्मात्रे नातिप्रसङ्गो भवति । एतच्च **भाष्यकारे**णानादृतम् । तथा चोक्तम् । 'तत् तर्हि भूमादिग्रहणं न कर्तव्यम् । कस्मान्न भवति व्रीहिरस्य यवोस्येति । उक्तं वा । किमुक्तम् । अनभिधानादिति' इति । तथा 'सन्मात्रे चर्षिदर्शनात् । सन्मात्रे च ऋषिर्मतुपं दर्शयति ।

---

१. °स्मिन्नित्यर्थे D_1, D_5. २. °रस्यास्त्यस्मिन् वा C; °रस्त्यस्यास्मिन्वा D_1, D_5. ३. P, D_2 drop अस्ति; B_2, D_4 drop अस्तीति.

तसौ मत्वर्थे ॥१।४।१९॥

तान्तसान्तौ भसंज्ञौ स्तः मत्वर्थे प्रत्यये परे। संप्रसारणम्। अपदत्वान्न[1] रुत्वम्। विदुष्मान्[2]। दोष्मान्।

गुणवचनेभ्यो मतुबो लुबिष्टः[3]। शुक्लो गुणोस्यास्मिन्[4] वास्तीति शुक्लः पटः। कृष्णः।

यवमतीभिरद्भिर्यूपं प्रोक्षति' इति चोक्तम्। अतो भूमादिवचनमाचार्यैरुपेक्षितमिति ज्ञेयम्। स्पष्टत्वात् त्यक्तमेकम्। 'रसादिभ्यश्च' ॥५।२।९५॥ एभ्यो मतुप् स्यादुक्तेर्थे। रसवान्। रस। रूप। गन्ध। स्पर्श। शब्द। भाव। स्नेह। गुणात्। एकाचः। पूर्वेणैव सिद्धे पुनर्वचनं लुब्निषेधार्थम्। मत्वर्थीयान्तरं च मा भूदिति। कथं रूपिणी कन्या रसिको नटः। उच्यते। गुणादिति गणे पठ्यते। तच्च रसादीनां विशेषणम्। तेन ये रसनादीन्द्रियग्राह्या रसादयस्तेषामेवायं पाठः। तेन रूपिणीत्यत्र शोभायोगो गम्यते न चक्षुर्ग्राह्यं रूपम्। रसिक इत्यत्रापि शृङ्गारादिभावयोगो गम्यते न तु रसनेन्द्रिय ग्राह्यो रसः। एकाच इति गणे पठ्यते ततोपि मतुबेव स्यान्नान्यः। स्ववान्।

तसौ। तसाविति वर्णग्रहणं न च वर्णान्मत्वर्थीयः संभवतीति सामर्थ्यात्तदन्तविधिर्विज्ञायत इत्यभिप्रेत्याह। **तान्तसान्ताविति**। **संप्रसारणमिति**। 'वसोः संप्रसारणम्' इति। **अपदत्वान्न रुत्वमिति**। भसंज्ञया पदसंज्ञाया बाधितत्वादपदत्वम्। ततः 'ससजुषो रुः' इति रुत्वं न स्यादित्यर्थः। **विदुष्मानिति**। विद्वांसो विद्यन्तेस्यास्मिन् वा।

---

१. अपदान्तत्वान्न D_2, D_5, B_1. २. विद्वांसो वर्तन्ते यस्य यस्मिन् वा। दोष्मान्। दोषो विद्यते अस्य अस्मिन् वा।. ३. लुगिष्टः C, D_1, B_2. ४. °स्यास्तीति C; °स्यास्ति P; °स्ति शुक्लः पटः D_1.

मादुपधायाश्च मतोर्वोयवादिभ्यः ॥८।२।९॥

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जात्[1] परस्य मतोर्मस्य[3] वः स्यात् ॥ किंवान् । ज्ञानवान् । विद्यावान्[2] । लक्ष्मीवान् । यशस्वान् । भास्वान् । यवादेस्तु । यवमान् । भूमिमान् ।

झयः ॥८।२।१०॥

झयन्तान्मतुपो मस्य वः स्यात् ॥ विद्युत्वान् । [4]अपदत्वान्न जश्त्वम् ।

मादुपधायाः । यव । दल्मि । कृमि । भूमि । ऊर्मि । क्रुञ्चा । वशा । द्राक्षा । ध्रजि । ध्वजि । सिञ्जि । हरित् । ककुत् । गरुत् । इक्षु । द्रुम । मधु । यवादिराकृतिगणः ।

झयः । विद्युत्वानिति । विद्युत् विद्यते यस्य स विद्युत्वान् मेघः । स्पष्टत्वात् त्यक्तं सूत्रत्रयं प्रसङ्गाद्व्याख्यायते । 'संज्ञायाम्' ॥८।२।११॥ नाम्नि मतोर्मस्य वभावः[6] स्यात् । अहीवती । कपिवती । मुनिवती । 'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती' ॥८।२।१२॥ संज्ञायामेते निपात्यन्ते । आसनस्य आसन्दीभावः आसन्दी वा प्रकृत्यन्तरमस्ति । औदुम्बरी राज्ञ आसन्दीभवतीति प्रयोगदर्शनात् । आसन्दीवान् ग्रामः । अस्थिशब्दस्य अष्ठीभावोष्ठीवान् देहैकदेशः । चक्रीवान् नाम राजा । चक्रस्य चक्रीभावोत्र[7] निपात्यते । कक्ष्यायाः संप्रसारणम् । कक्षीवान् नाम ऋषिः । लवणस्य रुमण्भावः । रुमण्वान् नाम गिरिः । चर्मण्वती [8]नदी । नलोपाभावो णत्वं च निपात्यते । संज्ञाया अन्यत्र आसनवान्

---

१. °वर्जाच्च D_2. २. C drops विद्यावान् । लक्ष्मीवान्. ३. मतोर्मस्य P, C, D_1, D_2. ४. अपदान्तत्वा° D_3, D_5, B_1, B_2. ५. Before it—शरादीनां वेतसि दीर्घः Dc_3. ६. वः Dc_4. ७. अत्र dropped Bc_1, Dc_4. ८. नगरी Bc_1, Dc_3, Dc_4.

प्राणिस्थादातो लजन्यतरस्याम् ॥५।२।९६॥

आकारान्ताल्लज्वा स्यान्मत्वर्थे । चूडालः । चूडावान् । प्राणिस्थादिति किम् । शिखावान् दीपः । प्राण्यङ्गादेव । नेह । मेधावान् ।

सिध्मादिभ्यश्च ॥५।२।९७॥

एभ्यो लज् वा[6] ॥ सिध्मलः । मांसलः ॥ पक्षे सिध्मवान् ॥

अस्थिमान् चक्रवान् कक्ष्यवान् लवणवान् चर्मवतीति । 'उदन्वानुदधौ च' ॥८।२।१३॥ उदकस्योदभावो निपातितः । उदन्वान्नाम ऋषिः । उदन्वानुदधिः । 'राजन्वान् सौराज्ये' ॥८।२।१४॥ शोभनो राजास्मिन्नित्यत्रार्थे निपातः । राजन्वान् देशः । राजन्वती भूमिः । राजवानन्यः ।

प्राणिस्थात् । प्रत्ययस्वरेणैवोदात्तत्वे[2] सिद्धे चित्करणं चूडालो-सीत्यादौ 'स्वरितो वानुदात्ते पदादौ' इति स्वरितबाधनार्थम् ।

सिध्मा । अत्र महाविभाषयैव लचो विकल्पे सिद्धे अन्यतरस्यां-ग्रहणानुवृत्तिर्मतुप्समुच्चयार्थम् । ततोकारान्तेभ्यः सिध्मादिभ्य इनिठनौ न स्तः किं तु मतुबेव पक्षे स्यादित्यभिप्रेत्याह । **पक्षे सिध्मवानिति** । सिध्म । गडु । मणि । नाभि । बीज । कृष्ण । पांसु[4] । हनु । सक्तु । मांस । परशु[5] । पार्ष्णिधमन्योर्दीर्घश्च । पार्ष्णीलः । धमनीलः । वातदन्तबलललाटानामूङ् च । वातूल इत्यादि । जटाघाटाकालाः क्षेपे । क्षेपो निन्दा । जटाल इत्यादि । क्षेपे किम् । जटावांस्तापसः ।

---

१. After it—स्यात् D_4, D_6. २. °वान्तोदात्तत्वे ले च सिद्धे Dc_1, Dc_3. ३. Dropped Bc_1, Dc_1, Dc_3, Dc_4. ४. पांशु Dc_3, Dc_4. ५. पर्शु Dc_2, Bc_3. ६. वा Dc_3.

[१] फेनादिलच ॥५।२।९९॥

फेनिलः ।[२] फेनलः । [३]फेनवान् ।

लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ ५।२।१००॥

त्रिभ्यो गणेभ्यः क्रमात् श न इलच् एते वा[४] स्युः ॥ लोमशः । रोमशः । पामनः ।

उदकप्रज्ञारोगेभ्यः । क्षुद्रजन्तुभ्यश्चादन्तेभ्यः[५] । विचर्चिकालः । विपादिकालः । यूकालः । मक्षिकालः । आदन्तेभ्यः किम् । कासवान् । दंसवान्[६] । स्पष्टत्वात् त्यक्तम्[७] । 'वत्सांसाभ्यां कामबले' ॥५।२।९८॥ वत्सांसाभ्यां यथासंख्यं कामवद्बलवतोरर्थयोर्लच् । वत्सलः स्वामी । स्नेहवानित्यर्थः । अंसल उपचितांसो[८] बलवानित्यर्थः । न चायमर्थो मतुपि संभवतीति नित्यं लजेव ।

फेनात् । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रानुवर्तत इत्यभिप्रेत्याह । फेनवानिति ।

लोमादि । लोमन् । रोमन् । बभ्रु[९] । वल्गु । हरि । कपि । तरु । मुनि । लोमादिः । पामन् । वामन् । धामन् । हेमन्[१०] । श्लेष्मन् । कद्रु ।

---

१. Before it the Sûtra—

वत्सांसाभ्यां कामबले ॥ ५।२।९८॥

आभ्यां क्रमात् कामे बले चार्थे लच् स्याद्वा ॥ वत्सलः । अंसलः । D_3, B_1.

२. After it—चकाराल्लच् । B_1, D_4, D_5. ३. Before it—अन्तरस्यामित्यनुवृत्तेः D_3, D_4, B_1. ४. स्युर्वा B_1. ५. After it—इष्यते Dc_3, Dc_4. ६. दंसवान् dropped Dc_1. ७. त्यक्तमेकम् Dc_3, Dc_4. ८. उपचितमांसो Dc_3, Dc_4. ९. बभ्रु Dc_4; १०. हिमन् । हिमवतः Dc_3.

अङ्गना । पिच्छिलः । उरसिलः । पक्षे मतुप् ।

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥५।२।१०१॥

एभ्यो णः स्यान्मतुप् च ॥ प्राज्ञः । श्राद्धः ।[२] [४]पक्षे । प्रज्ञावान् । इत्यादि ।

कद्रु । वलि । सामन् । ऊष्मन् । कृमि । अङ्गात् कल्याणे । कल्याणान्यङ्गान्यस्य । अङ्गना । शाकी । पलाली । दद्रूणां ह्रस्वत्वं च । दद्रुणः । विष्वगित्युत्तरपदलोपश्चाकृतसंधेः । विष्वञ्चोस्य सन्ति विषुणः । विषुशब्दोयं निपात्यते नानार्थे वर्तते । लक्ष्म्या अच्च । लक्ष्मणः । पामादिः । पिच्छ । उरस् । ध्रुव । जटाघोटाकालात् क्षेपे । जटिलः । घोटिलः । कालिलः । क्षेपे किम् । जटावानित्यादि । पर्ण । उदक । प्रज्ञा । पिच्छादिः ।

प्रज्ञाश्रद्धा । आदिना श्रद्धावान् । आर्चः । अर्चावान् । वार्तः । वृत्तिमान् । स्पष्टत्वात् त्यक्तानि चत्वारि । 'तपःसहस्राभ्यां विनीनी' ॥५।२।१०२॥ तपःशब्दात् मत्वर्थे विनिः[७] सहस्रादिनिः[८] । तपस्वी । सहस्री । 'अण् च' ॥५।२।१०३॥ तपःसहस्राभ्यामणपि स्यात् । तापसः । साहस्रः । ज्योत्स्नादिभ्य उपसंख्यानम् । ज्यौत्स्नः । तामिस्रः । कौतपः । वैसर्पः । वैपादिकः । 'सिकताशर्कराभ्यां च' ॥५।२।१०४॥ आभ्यां मत्वर्थे अण् स्यात् । सैकतः सेतुः । शार्करं मधु । अदेशविषयमिदम् । 'देशे लुबिलचौ च' ॥५।२।१०५॥ सिकता-

---

१. Before this—वत्सांसाभ्यां कामबले । आभ्यां क्रमात् कामबलवतोरर्थयोर्लच् स्याद्वा । वत्सलः । अंसलः । B_2. २. Dropped C. ३. आर्चं । वार्तं after it B_2, D_5. ४. Dropped P, C. ५. घाटा Dc_3. ६. घाटिलः Dc_3. ७. विन् Bc_1; Dc_3, Dc_4. ८. °विन् Bc_1, Dc_4. ९. Before it—कौडलः Bc_1, Dc_3, Dc_4.

दन्त उन्नत उरच् ॥५।२।१०६॥

[1]उन्नतत्वोपाधिकाद्दन्तशब्दादुरच् स्यात् ॥ [2]उन्नता दन्ता [3]अस्य दन्तुरः ।

ऊषसुषिमुष्कमधो रः ॥५।२।१०७॥

एभ्यो मत्वर्थे रः । ऊषरः । [4]सुषिरः । [5]मुष्करः । [6]मधुरः ॥ [7]खमुखकुञ्जेभ्यश्च ॥* खरः । मुखरः । कुञ्जरः । कुञ्जो हस्तिहनुः ॥ कच्छ्वा ह्रस्वत्वं च ॥* कच्छुरः ।[8]

शर्कराभ्यां मत्वर्थीयस्य देशे लुप् स्यादिलजण्मतुपश्च । शर्करा देशः । शर्करिलः । शार्करः । शर्करावान् । सिकता । सिकतिलः । सैकतः । सिकतावान् । देशः ।

दन्त उन्नत । दन्तादुन्नतोपाधिकादुरच् स्यात् । मत्वर्थे इनूठन् [9]सिध्मादिलचामपवादः ।

ऊष । यथासंभवं मतुबादिषु प्राप्तेषु । रसवाचिनो मधुशब्दस्येह ग्रहणं न द्रव्यवाचिनः । तत्र मधुमान् घट इति । नगपाण्डुपांसुभ्यश्च रो वाच्यः । नगरम् । पाण्डुरम् । पांसुरम् ।

---

१. P, D1, D2, D4 drop the Vṛitti; C has—उन्नताद्दन्तादुरच् स्यात्; B2 has—उन्नतोपाधिकात् प्रथमान्ताद् दन्तान्मतुबर्थे उरच् स्यात् । २. C drops उन्नता दन्ता अस्य; उन्नता दन्ता यस्य स B2. ३. यस्य D4. ४. Dropped P, C, D1, D4, D5. ५. Dropped P. ६. मधुरम् P; after it—इत्यादि D1, D2, D4, D5. ७. खनख° B1. ८. After it—नगपांशुपाण्डुभ्यश्च* ॥ नगरम् । पांशुरः । पाण्डुरः । B2, D2; नगपांस्वादिभ्यश्चोपसंख्यानम्* ॥ नगरम् । पाण्डुरम् । इत्यादि । B1, D3; ९. तुन्दादिलचामपवादः Bc1, Dc3, Dc4.

केशाद्वोन्यतरस्याम् ॥५।२।१०९॥

केशवः ॥ अन्येभ्योपि ॥* मणिवः । सेर्पः । अर्णसो लोपेश्च । अर्णवः । पक्षे मतुप् ॥ मेधारथाभ्यामिरन्निरचौ च ॥* मेधिरः । रथिरः ॥

काण्डाण्डादीरन्नीरचौ ॥५।२।१११॥

आभ्यामेतौ क्रमात् स्तः ॥ काण्डीरः । अण्डीरः ।

द्युद्रुभ्यां मः ॥५।२।१०८॥

द्युमः । द्रुमः ।

केशात् । मतुप्समुच्चयार्थं पूर्वमन्यतरस्यांग्रहणमनुवर्तते । इदं तु इनृठन्प्राप्त्यर्थम् । ततश्चातूरूप्यं भवति । केशवः । केशी । केशवान् । केशिक इति । स्पष्टत्वात् त्यक्तमेकम् । 'गाण्ड्यजगात् संज्ञायाम्' ॥५।२।११०॥ आभ्यां मत्वर्थे वः । संहितया निर्देशात् गाण्डिगाण्डीशब्दौ गृह्येते । उभयथा हि सूत्रं प्रणीतम् । गाण्डिवं गाण्डीवं धनुः । अजगवं धनुः ।

काण्डा । इनृठनोरपवादः ।

द्युद्रुभ्यां म इति । द्यौरस्यास्तीति । 'दिव उत्' । केचित्तु द्यु इति उकारान्तं प्रकृत्यन्तरमह्नो वाचकं वर्णयन्ति । रूढिशब्दावेतौ इति पक्षे मतुवत्र न विकल्प्यते । स्पष्टत्वात् त्यक्तमेकम् । 'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विनूर्जस्वलगोमिन्मलिनमलीमसाः' ॥५।२।११४॥

---

१. अन्येभ्योपि माणि हरिभ्यामुपसंख्यानमिति वः । पक्षे मतुप् । अर्णसो &c. D_5 ; अन्येभ्योप्युपसंख्यानम् B_1 ; Before it—पक्षे इन् ठन् मतुप् च B_2, D_2 (also केशी । केशिकः । केशवान् D_2). २. Dropped P, C, D_1, D_2, D_4. ३. सलोपश्च B_1, B_2 ; अर्णसोन्तलोपश्च D_4. ४. आभ्यां क्रमादेतौ B_1. ५. Dropped B_2. ६. केशिकः । केशवानिति Bc_1, Dc_3, Dc_4.

अत इनिठनौ ॥५।२।११५॥

अकारान्तादिनिठनौ स्तः मत्वर्थे । दण्डी । दाण्डिकः । पक्षे । दण्डवान् ।

व्रीह्यादिभ्यश्च ॥५।२।११६॥

एभ्य इनिठनौ स्तः मत्वर्थे[1] मतुप् च ॥ व्रीही । शिखी । व्रीहिकः । शिखादेर्न ठन् ।

ज्योत्स्नादयो निपात्यन्ते मत्वर्थे । ज्योतिष इलोपो नश्च प्रत्ययो निपात्यते । ज्योत्स्ना । तमस उपधाया इत्वं रप्रत्ययः । तमिस्रा । शृङ्गादिनच् । शृङ्गिणः । ऊर्जोसुगागमो विनिवलचौ प्रत्ययौ । ऊर्जस्वी । ऊर्जस्वलः । गोर्मिनिः । गोमी । मलादिनज्मीमसचौ प्रत्ययौ । मलिनः । मलीमसः ।

अतः । पक्षे दण्डवानिति । मतुप्समुच्चयार्थस्यान्यतरस्याग्रहण-स्यानुवृत्तेरित्यर्थः । तपरकरणं किम् । खट्वावान् ।

व्रीहि । शिखादेर्न ठन्निति । शिखादिभ्य इनिर्वाच्य इकन् यवखदादिषु परिशिष्टेभ्य उभयमित्यस्माद्[2]वक्तव्याल्लभ्यते । शिखा । माला । मेखला । वीणा । संज्ञा । वडवा । अष्टका । वलाका । पताका । कर्मन् । [3]चर्मन् । एभ्य इनिरेव । शिखीत्यादि । यवखद । नौ । कुमारी [4]एभ्यष्ठन्नेव । यवखदिकः । नाविकः । कुमारिकः । शेषेभ्यो व्रीहि माया शीर्षान्नञ् एभ्यः इनुठनौ स्तः । व्रीही । व्रीहिकः । मायी । मायिकः । आशीर्षी । आशीर्षिकः ।

---

१. मत्वर्थे dropped D4. २. °द्वक्तव्यादेतल्ल° Bc1, Dc4. ३. Before it-वर्मन् Bc1, Dc4. ४. एतेभ्य° Dc3, Dc4.

एकाक्षरात् कृतो जातेः सप्तम्या च न तौ स्मृतौ ॥

स्ववान् । कारकवान् । सिंहवान् । दण्डा अस्यां सन्ति दण्डवती । शाला । क्वचिद्भवतोपि । कार्यी । कार्यिकः[1] ।

तुन्दादिभ्य इलच्च ॥५।२।११७॥

तुन्दिलः । पक्षे इनि ठन् मतुप् च[2] ।

एकाक्षरादित्यादि । ताविति इनिठनौ । स्ववानित्येकाक्षरस्योदाहृतिः । कारकवानिति कृदन्तस्य । सिंहवानिति जातेः । दण्डवती शालेति सप्तम्यर्थस्य[3] । क्वचिद् भवतोपीति । इनिठनाविति शेषः । एतच्च सर्वं 'तदस्यास्त्यस्मिन्' इत्येतस्माद् विवक्षार्थादितिकरणाल्लभ्यते ।

तुन्द । पक्षे इत्यादि । इलजभावपक्षे । चकारादिनिठनौ । अन्यतरस्यांग्रहणानुवृत्तेर्मतुप् । एवं चत्वारः प्रत्ययाः स्युः । तुन्दी । तुन्दिकः । तुन्दिलः तुन्दवान् । तुन्द । उदर । पिचण्ड । यव । व्रीहि । व्रीहिशब्देन व्रीह्यर्थः शाल्यादिर्गृह्यते । शालिलः । शाली । शालिकः । शालिमान् । स्वाङ्गाद्विवृद्धौ । महान्तौ कर्णावस्य स्तः कर्णिलः । कर्णी । कर्णिकः । कर्णवान् । स्पष्टत्वात् व्यक्तानि त्रीणि । 'एकगोपूर्वाट्ठञ् नित्यम्' ॥५।२।११८॥ नित्यमिति मतुपो बाधार्थम् । एकशतमस्यास्ति[4] ऐकशतिकः । गौसहस्रिकः । अत इत्येव । एकविंशतिमान् । ऐकगविक इति समासान्तेनादन्तः । कथमेकद्रव्यवत्त्वादिति । पूर्वं द्रव्यवत्त्वादिति मतुपं कृत्वा पश्चादेकेन द्रव्यवत्त्वादेकद्रव्यवत्त्वादिति समासः । 'शतसहस्रान्ताच्च निष्कात्' ॥५।२।११९॥ निष्कोत्तराभ्यां शतसहस्राभ्यां नित्यं ठञ् । नैष्कशतिकः । नैष्कसहस्रिकः[5] । 'रूपादाहतप्रशंसयोर्यप्' ॥५।२।१२०॥ आहतं रूपमस्येति रूप्यो गौः । प्रशस्तं रूपमस्यास्ति रूप्यो गौः । आहतप्रशंसयोः किम् । रूपवान् घटः । अन्येभ्योपि दृश्यते । हिमवान् हिम्यः । गुणवान् । गुण्यः ।

---

१. कार्यमस्मिन्नस्ति कार्यिकः। D_5. २. इन् ठन् मतुपश्च इनिठनौ मतुप् च B_2, D_1, D_2. ३. सप्तम्यन्तस्य Bc_1, Dc_4. ४. °मस्यास्ति Bc_1, Dc_4. ५. निष्कः Dc_3

अस्मायामेधास्रजो विनिः ॥५।२।१२१॥

असन्तान्मायादेश्च विनिः स्यान्मतुप् च[1] । तेजस्वी । मायावी[2] । मेधावी[3] । 'चोः कुः' । स्रग्वी । पक्षे स्रग्वान् । इत्यादि । व्रीह्यादित्वान्मायी । मायिकः । शृङ्गवृन्दाभ्यामारकन्[4] ॥* शृङ्गारकः । वृन्दारकः । फलबर्हाभ्यामिनच्[5] ॥* फलिनः । बर्हिणः । रथाच्च ॥* रथिनः । शीतोष्णतृप्राभ्य[6] आलुच् ॥ तदसहने[7] । शीतं न सहते शीतालुः ।[8] हिमा[9]च्चेलुः ।* हिमेलुः । बलादूलः ॥* बलूलः । वाताच्च ॥* वातूलः । तप्पर्वमरुद्भ्याम् ॥ पर्वतः । मरुत्तः ।

ऊर्णाया युस् ॥५।२।१२३॥

पदत्वान्नावर्णलोपः ॥ ऊर्णायुः ।

अस्माया । मतुप् सर्वत्र समुच्चीयत इत्यभिप्रेत्याह । **मतुप् चेति** । **तेजस्वीति** । 'तसौ मत्वर्थे' इति भसंज्ञा ततः पदकार्यं न । शृङ्गवृन्देत्यादीनि वक्तव्यानि । आमयस्योपसंख्यानम् । आमयावी । हृदयाच्चालुरन्यतरस्याम्[10] ।* हृदयालुः । हृदयी । हृदयिकः । हृदयवान् । हिमाच्चेलुरिति वक्तव्यम् । हिमं न सहते हिमालुः ।

ऊर्णायाः । ऊर्णायुस् इति स्थिते 'यस्येति च' इत्यकारलोपः प्राप्नोतीत्याशङ्क्याह । **पदत्वादिति** । 'सिति च' इति सूत्रेण पदत्वादिति भावः । केचिच्छन्दोग्रहणमिहानुवर्तयन्ति[12] ।

---

१. वा B_1. २. Dropped D_1. ३. B_1, B_2 drop it. ४. °मारकच् B_1, D_2. ५. °मिनच् B_2, D_2. ६. तृषाभ्यश्चा° D_4. ७. After it—इति वाच्यम् D_3, P, C, B_1. ८. After it—उष्णालुः । तृष्णालुः । बलाद्गुलः ॥* D_5. ९. P, C, D_1 drop हिमा°...हिमेलुः; हिमाच्च । हिमालुः । D_4. १०. °मिति वाच्यम् Bc_3, Dc_3, Dc_4. ११. Dropped Dc_2. १२. इह dropped Dc_4.

वाचो ग्मिनिः ॥५।२।१२४॥

वाग्मी ।

आलजाटचौ बहुभाषिणि ॥५।२।१२५॥

[1]बहुगर्ह्या वागस्यास्तीति वाचालः । वाचाटः ।

स्वामिन्नैश्वर्ये ॥५।२।१२६॥

[2]स्वामी । स्ववानन्यः ।

अर्शआदिभ्योच् ॥५।२।१२७॥

[3]आर्शसः । वैजयन्तः ।

वाचः । वाक्शब्दात् मत्वर्थे ग्मिनिः स्यात् ।

आल च् । कुत्सायामिति वाच्यमित्यभिप्रेत्याह । बहु **गर्ह्या वागस्यास्तीति** । यो हि सम्यक् बहु भाषते स वाग्मीत्येव स न वाचालः ।

स्वामिन् । ऐश्वर्ये गम्ये धनवाचिनः स्वशब्दादामिन् प्रत्ययो निपात्यते । स्वं धनमस्यास्तीति स्वामी । **स्ववानन्य** इति । अत्रात्मादावर्थान्तरे स्वशब्दो वर्तते अतोत्रैश्वर्यं न प्रतीयते ।

अर्श । मत्वर्थे । **अर्शस** इति । अर्शांसि विद्यन्ते यस्य स तथा । आकृतिगणोयमित्यभिप्रेत्याह । **वैजयन्त** इति । वैजयन्ती विद्यते यस्य । अर्शस् । उरस् । तुन्द । चतुर । पलित । जटा । घाटा । अभ्र । अम्ल । लवण । स्वाङ्गाद्धीनात् । खञ्जः पादोस्यास्तीति खञ्जः । काणं चक्षुरस्यास्तीति काणः । वर्णात् । शुक्लाः प्रासादा अस्मिन्

---

१. B₁ has कुत्सित इति वाच्यम् before it. २. Before it—ऐश्वर्ये गम्यमाने धनवाचिनः स्वशब्दादामिन् प्रत्ययः स्यात् पूर्वस्य च दीर्घः । B₁. ३. Before it—मतुबर्थे B₁.

वातातिसाराभ्यां कुक् च ॥५।२।१२९॥

आभ्यामिनिः स्यात् कुक् चागमः ॥ वातकी । अतिसारकी ।[१]

सन्ति शुक्लं नगरम् । प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चित्त्वमर्शसोसीत्यत्र 'स्वरितो वानुदात्ते पदादौ' इति स्वरितबाधनार्थम् । यत्राभिन्नरूपेण शब्देन तद्वतोभिधानं तत् सर्वमिह द्रष्टव्यमस्याकृतिगणत्वात् । स्पष्टत्वात्त्यक्तमेकम् । 'द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः' ॥५।२।१२८॥ द्वन्द्वः समासः । उपतापो रोगः । गर्ह्यं निन्द्यम् । एतद्विषयेभ्यः प्राणिस्थवाचिभ्य इनिरेव स्यात् मत्वर्थे । कटकवलयिनी । कुष्ठी । ककुदावर्ती । प्राणिस्थात् किम् । पुष्पफलवान् वृक्षः । प्राण्यङ्गान्नेष्यते । पाणिपादवान् । अत ईत्युक्तेर्मणिमुक्तावतीत्यादौ न ।

वात । कुक् चागम इति । इनिसंनियोगेन च वातातिसारयोः कुगागमः । वातातिसारयोरुपतापत्वात् पूर्वेणैव सिद्धे इनौ कुगर्थमेतद्वचनम् । रोगादन्यत्र वातवान् देशः । पिशाचाच्चेति वक्तव्यम् । पिशाचकी वैश्रवणः । स्पष्टत्वात् त्यक्तानि त्रीणि । 'वयसि पूरणात्' ॥५।२।१३०॥ पूरणप्रत्ययान्ताद्वयसि इनिरेव स्यात् । पञ्चमो मासः संवत्सरो वास्यास्तीति पञ्चमी उष्ट्रः । दशमी । 'सुखादिभ्यश्च' ॥५।२।१३१॥ एभ्य इनिरेव मत्वर्थे । सुखी । सुख । दुःख । अँसु । आम्रँ । अलीक । करुणा । कृपण । सोढ । प्रतीप । शील । दॅल । माला क्षेपे । व्रीह्यादिपाठेपि पुनः पाठपक्षे मतुब् वा धनार्थः । 'धर्मशीलवर्णान्ताच्च' ॥५।२।१३२॥ धर्माद्यन्तादिनिरेव । ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी ।

---

१. Dropped B_1. २. कुगागमः C. ३. After this—पिशाचाच्चेति वक्तव्यम् । पिशाचकी B_1; रोगे चायमिष्यते । नेह । वातवती गुहा । पिशाचाच्च । पिशाचा विद्यन्तेस्य पिशाचकी वैश्रवणः B_2; D_4 follows B_2 and has it up to गुहा. ४. इत्युक्ते कर्मणि मुक्ता° Bc_1. ५. बालकः Dc_3. ६. After it—कलभः Dc_3. ७. अर्थ for असु । आम्र Bc_1, Dc_3; स्वार्थ for them Dc_4. ८. फल Bc_1, Dc_4.

हस्ताज्जातौ ॥५।२।१३३॥

हस्ती । हस्तवानन्यः ।

हस्तात् । इनिरेव स्यात् । समुदायेन चेत् ज्ञातिरुच्यते । त्यक्तानि चत्वारि । 'वर्णाद् ब्रह्मचारिणि' ॥५।२।१३४॥ वर्णादिनिः स्याद्ब्रह्मचारिणि वाच्ये । वर्णी ब्रह्मचारी । अन्यत्र वर्णवान् । 'पुष्करादिभ्यो देशे' ॥५।२।१३५॥ एभ्यो देशेर्थे इनिरेव । पुष्करिणी । देशे किम् । पुष्करवान् गजः । बलाद्बाहूरुपूर्वपदादुपसंख्यानम् । बाहुबली । ऊरुबली । सर्वादेश्चेति वाच्यम् । सर्वधनी । सर्वबीजी[1] । अर्थाच्चासंनिहिते । असंनिहितोर्थोस्य अर्थी । असंनिहिते किम् । अर्थवान् । तदन्ताच्चेति वाच्यम् । धान्यार्थी । हिरण्यार्थी । विद्यार्थी । पुष्कर । पद्म । उत्पल । तमाल । कुमुद । नड । कपित्थ । बिस । मृणाल । कर्दम । शालूक । विगर्ह[2] । करीष । शिरीष[3] । प्रयवस[4] । हिरण्य । 'बलादिभ्यो मतुबन्यतरस्याम्' ॥५।२।१३६॥ अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते । बलवान् । बली । बल । उत्साह । उद्भास[5] । उद्वास । शिला । कूल[6] । चूडा । सुल । कुल । आयाम । व्यायाम । उपयाम । अवरोह । आरोह । परिणाह । 'संज्ञायां मन्माभ्याम्' ॥५।२।१३७॥ मन्नन्तान्मान्ताच्चेनिः स्यात् समुदायेन चेत् संज्ञा गम्यते । दामिनी । मान्तात् । सौमिनी । संज्ञायां किम् । दामवान् । सोमवान् ।

---

१. सर्वजीवी Bc1. Dc3. २. विदर्भ Bc1, Dc3, Dc4. ३. सिरीष Dc4. ४. प्रचय । प्रवास Bc1, Dc4; प्रचय । पङ्कज । प्रवास Dc3. ५. उद्वास Bc1, Dc3, Dc4. ६. मूल । दल । कुल । आयाम &c. Bc1, Dc3, Dc4.

कंशंभ्यां बभयुस्तितुतयसः ॥५।२।१३८॥

आभ्यामेते स्युः ॥[1] कंबः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । एवं शंबादि[2] ।

तुन्दिवलिवटेर्भः[3] ॥५।२।१३९॥

एभ्यो भः स्यान्मत्वथ ॥ तुन्दिभः । इत्यादि ।

अहंशुभमोर्युस् ॥५।२।१४०॥

[4]आभ्यां म[5]तुबर्थे युस् स्यात् । पदत्वान्न टिलोपः । [6]अहंयुः । शुभंयुः ।

कंशंभ्याम् । कंशमिति मकारान्तावुदकसुखयोर्वाचकौ । य[7]सः सकारः पदसंज्ञार्थः । तेनानुस्वारपरसवर्णौ सिद्धौ स्तः । भसंज्ञायां हि सत्यां कम्युः शम्युः कम्यः शम्य इति स्यात् ।

तुन्दि । तुन्दिरिति वृद्धा नाभिरुच्यते । वलिशब्दः पामादिषु पठ्यते । तेन वलिन इत्यपि स्यात् ।

अहम् । अहमित्यव्ययमहंकारे वर्तते । शुभमित्यव्ययं शुभपर्यायः । पदत्वादिति । अहंयुः शुभंयुरित्यत्र युसः सित्त्वात् 'सिति च' इति पदत्वात् अव्ययानां भमात्रे टिलोप इति टिलोपो न भवतीत्यर्थः ।

---

१. After it—मत्वर्थे B_1; 'अव्ययानां भमात्रे टिलोप इति टिलोपः ।' कंशमिति मकारान्तावुदकसुखयोर्वाचकौ D_5. २. शंबादिः B_2, D_4. ३. B_1 drops it. ४. B_1 drops the Vritti. ५. मत्वर्थे C. ६. Before it—अनुनासिकस्येष्टिः । D_4. ७. युसो यसश्च Dc_2.

रजःकृष्यासुतिपरिषदो वलच् ॥५।२।११२॥

एभ्यो मत्वर्थे वलच् स्यात् । रजस्वला ।

वले ॥६।३।११८॥

वले परे पूर्वस्याणो दीर्घः [१]स्यात् ॥ कृषीवलः[२] ॥ [३]वलच् अन्येभ्योपि दृश्यते ॥* इति वलच् । भ्रातृवलः । पुत्रावलः । उत्सङ्गावलः ॥

दन्तशिखात् संज्ञायाम् ॥५।२।११३॥

आभ्यां वलच् [४]स्यात् संज्ञायाम् ॥ दन्तावलः[५] । शिखावलः ॥

रजः । रजःशब्दादिभ्य इनावितरेभ्यो मतुपि प्राप्ते वलच् विधीयते । इतिकरणो विषयनियमार्थोत्रानुवर्तते तेनेह न । रजोस्मिन् ग्रामे विद्यत इति । अन्येभ्योपि दृश्यते इति वाच्यम् । भ्रातृवलः । पुत्रवलः । [६]उत्सङ्गवलः ।

वले । वल इति 'रजःकृष्यासुति परिषदो वलच्' इत्यस्य ग्रहणं [८]न प्रातिपदिकस्य वलस्य । 'वनगिर्योः संज्ञायाम्' इत्यतः संज्ञाग्रहणानुवृत्तेर्भ्रातृवल इत्यादौ न दीर्घः ।

दन्त । दन्तशब्दादिनिठनोः प्राप्तयोर्वलच् विधीयते । शिखाशब्दादिनौ । दन्तावलो [७]धौम्यः । शिखावलो मयूरः ।

इति प्रकृत्यर्थपृथगर्थास्तद्धिताः समाप्ताः ।

समर्थाधिकारस्य प्रथमग्रहणस्य च पूर्णोविधिः ।

---

१. Dropped D_1. २. After it—आसुतीवलः । मद्यसंधानमास्तुति । परिषद् विद्यते यस्य स परिषद्वल; वलच् प्रकरणे अन्येभ्योपि &c. B_2. ३. This Vārtika up to उत्सङ्गावलः is omitted in P, D_1, D_2, D_4, D_5 and C; D_4 has after कृषीवलः आसुतीवलः । पर्षद्वलः । परिषद्वलः ।; D_5 has आसुतीवलः । परिषद्वलः ।. ४. B_1, D_1 drop it. ५. After it—धौम्यः । कुञ्जरः । मयूरः । D_5. ६. उत्तुङ्गवलः Bc_1, Dc_3, Dc_4. ७. हस्ती Dc_3. ८. Dropped Dc_2.

प्राग्दिशो विभक्तिः ॥५।३।१॥

दिक्शब्देभ्य इत्यतः प्राक् इत ऊर्ध्वं प्रत्यया विभक्तिसंज्ञाः स्युः । विभक्तित्वात्त्यदाद्यत्वादि ॥

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥५।३।२॥

वक्ष्यमाणा प्राग्दिशीयाः प्रत्यया एभ्य एव स्युः । न तु द्व्यादिभ्यः ।

अथ स्वार्थिका उच्यन्ते ।

तत्रापि प्रथमं प्राग्दिशीयाः । तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यनपेक्षत्वान्नात्रोपयुज्यते इति निवृत्तम् । वावचनं तु क्वचिदनुवर्तते तेन विकल्पेन तसिलादयः स्युः ।

प्राग्दिशः । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' । इति वक्ष्यति । अतः तत्प्रागित्यर्थः । विभक्तिसंज्ञाप्रयोजनमाह । **विभक्तित्वादिति** । 'त्यदादीनामः' इत्यादि । इदमो विभक्तिस्वरोपि इत इत्यत्र 'ऊडिदम्पदा—' इत्यनेन लित्स्वरं बाधित्वा तसेरुदात्तत्वं 'लिति' इत्यत्र तस्य सूत्रस्यानुवर्तनात् ।

किम् । सर्वनामत्वात् प्राप्ते ग्रहणे द्व्यादिपर्युदासः क्रियते । संख्यार्थोत्र बहुशब्दो ज्ञेयः । तेन बहोः सूपादित्यत्र न । प्राग्दिश इत्येव । वैयाकरणपाशः ।

---

१. विभक्तिसंज्ञाः प्रत्ययाः C, D_1, D_2, D_5; ये प्रत्ययास्ते D_4.
२. स्वार्थिका Dc_3, Dc_4. ३. अत्र dropped Bc_2, Dc_4.

पञ्चम्यास्तसिल् ॥५।३।७॥

पञ्चम्यन्तात् किमादेर्वा तसिल् स्यात् स्वार्थे[1]। लः स्वरार्थः । सुपो लुक् ।

कु तिहोः ॥७।२।१०४॥

तकारहकारादौ प्रत्यये परे किमः कुः स्यात् । तद्धितत्वात् स्वाद्युत्पत्तिः[2] । अव्ययत्वात् सुपो लुक् । कुतः[3] । कस्मात् । सर्वतः । विभक्तित्वात् पदाद्यत्वम्[4] । ततः । यतः । बहुतः । द्व्यादेस्तु । द्व्याभ्याम् । किमादेः किम् । वृक्षात् । सर्वप्रातिपदिकात् तसिलिति केचित् । कृष्णतः ।

इदम इश् ॥५।३।३॥

प्राग्दिशीये परे इदम इश् स्यात्[5] । इतः[6] ।

पञ्चम्याः । **लः स्वरार्थ** इति । 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वार्थ इति । **सुपो लुगिति** । कस्मात् तस् इति स्थिते 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुक् ।

कु ति । **तद्धितत्वात् स्वाद्युत्पत्तिरिति** । तद्धितत्वेन प्रातिपदिकत्वम् । ततः स्वाद्युत्पत्तिरित्यर्थः । **अव्ययत्वादिति** । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययत्वात् 'अव्ययादाप्सुपः' इति सुपो लुक् इत्यर्थः । **सर्वप्रातिपदिकादिति** । तथोक्तं **मुग्धबोधे** । 'तंसुक्तेः[7]' इति ।

इदमः । शकारः सर्वादेशार्थः ।

---

१. स्वार्थे न तु परार्थे । सुपो लुक् B_2. २. Before it–तद्धितश्चासर्वविभक्तिः । D_6. ३. कस्मादिति कुतः । सर्वस्मात् । सर्वतः ।. ४. सर्वात्पदाद्यत्वम् B_1; त्यदाद्यत्वम् । D_4. ५. B_1, D_2 drop it. ६. After it–अस्मात् D_3, D_6, B_1. ७. तसुक्ते Dc_1.

एतदोऽश् ॥५।३।५॥

एतदः अश् स्यात् प्राग्दिशीये[1]। अतः विभक्तिकार्यम् । अमुतः ।

पर्यभिभ्यां च ॥५।३।९॥

आभ्यां तसिल् स्यात् ॥ परितः । अभितः ।

सप्तम्यास्त्रल् ॥५।३।१०॥

द्व्यादिवर्जात् किमादेः सप्तम्यन्ताद्वा त्रल् स्यात् स्वार्थे ॥ कुत्र । तत्र । एतस्मिन्निति अत्र । अमुत्र ।[4] बहुत्र ।

एतदः । 'एतदः' इति योगविभागः कार्यः । 'एतेतौ रथोः' इत्यनुवर्तते । एतदो रथोः परयोरेते इत एतावादेशौ स्तः । रेफादिः 'अनद्यतने र्हिलन्यतरस्याम्' थादिः पुनरेतदस्थमुप्रत्यय उपसंख्येयः । ततः 'अश्' इति द्वितीयो योगः । तत्र 'एतदः' इत्यनुवर्तते । एतर्हि । इत्थम् । **विभक्तिकार्यमिति** । अदसस्तसिलि त्यदाद्यत्वम् । 'अदसोसेः—' इति मुभावः । त्यक्तमेकम् । 'तसेश्च' ॥५।३।८॥ प्रतियोगे पञ्चम्यास्तसिः 'अपादाने चाहीयरुहोः' इति वक्ष्यति । तस्य तसेः किंसर्वनामभ्यो बहुभ्यः परस्य तसिलादेशः स्यात् । कुत आगतः । यत आगतः । तत आगतः । तसेस्तसिल्वचनं लित्स्वरार्थं विभक्तिसंज्ञार्थं विभक्तिस्वरार्थं च ।

पर्यभि । सर्वोभयार्थे वर्तमानाभ्यामिष्यते । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः । इह न । परिषिञ्चति अभियातीति ।

सप्तम्याः । **कुत्रेति** 'कु तिहोः' । **तत्रेति** । 'त्यदाद्यत्वम्' । **एतस्मिन्निति अत्रेति** । 'एतदोऽश्' इत्यश् । यदा त्वन्वादेशस्तदा 'एतदस्त्रतसोस्त्रतसौ चानुदात्तौ' इत्यश् अनुदात्तः । अस्य

---

१. Dropped D4. २. After it—परे D5. ३. B1 drops it. ४. सर्वोभयार्थे वर्तमानाभ्यामिष्यते । D5. ५. अत Dc4,

इदमो हः ॥५।३।११॥

अस्मात् सप्तम्यन्ताद्धः स्यात्[1] । त्रलोपवादः । इह ।

किमोत् ॥५।३।१२॥

किमः सप्तम्यन्तादत् प्रत्ययः स्यात्[2] ॥

क्वाति ॥७।२।१०५॥

किमः क्वः स्यादति विभक्तौ ॥ क्व । त्रलपीत्येके । कुत्र ।

वा ह च च्छन्दसि ॥५।३।१३॥

कु[3] तिहोः ॥७।२।१०४॥

कुह ।

सूत्रस्यायमर्थः । एतदोन्वादेशविषयस्याशादेशोनुदात्तः स्यात् त्रतशोः परयोः । तौ त्रतशावनुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः । अथो अत्राधीमहे । अत्रेति पदमनुदात्तम् ।

इद । इहेति । 'इदम इश्' ।

'किमोत्' । तकारस्येत्संज्ञा 'न विभक्तौ तुस्माः' इति निषेधस्यानित्यत्वात् ।

क्वाति । त्रलपीत्येके इति । तच्चोक्तं **काशिकायां** वृत्तौ । त्रलमपि केचिदिच्छन्ति । कुत्रेति । तत् कथमुत्तरसूत्राद्धावचनं पुरस्तादपकृष्यत इति ।

वा ह च । किमः सप्तम्यन्तात् ह प्रत्ययो वा स्याच्छन्दसि । चकाराद्यथाप्राप्तम् । एतत् सूत्रं वैदिकप्रक्रियायां पठनीयमपि 'कु तिहोः' इति कुआदेशप्रदर्शनार्थं पठितम् । स्पष्टत्वात् त्यक्तमेकम् । 'इतराभ्योपि दृश्यन्ते' ॥५।३।१४॥ सप्तमीपञ्चम्यपेक्षमितरत्वम्[4] ।

---

१. B_1 drops it. २. B_1, D_1, D_2 drop it. ३. Before this—किमो हः स्यात् छन्दसि वा । B_2. ४. पञ्चमीसप्तम्य° Bc_1.

सर्वैकान्यकिंयत्तदः काले दा ॥५।३।१५॥

एभ्यः सप्तम्यन्तेभ्यो दाप्रत्ययः स्यात् कालेऽर्थे । त्रलादेरपवादः ।

सर्वस्य सोन्यतरस्यां दि ॥५।३।६॥

दाप्रत्यये परे सर्वस्य सो वा स्यात् ॥ सर्वस्मिन्[2] काले । सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् । सर्वत्र[3] देशे ।

इदमोर्हिल् ॥५।३।१६॥

[3]अस्मात् सप्तम्यन्तात् कालेर्हिल् स्यात् । हस्यापवादः ।[4]

इतराभ्यो विभक्तिभ्यस्तसिलादयः प्रत्यया दृश्यन्ते । दृशिग्रहणं प्रायिकविध्यर्थम् । तेन भवान् दीर्घायुः देवानां प्रिय आयुष्मानित्येतेषामेव योगे एतद्विधानम् । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । ततो भवन्तम् । तत्र भवन्तम् । तेन भवता । ततो भवता । तत्र भवता । तस्मै भवते । ततो भवते । तत्र भवते । तस्माद्भवतः । ततो भवतः । तत्र भवतः । तस्य भवतः । ततो भवतः । तत्र भवतः । तस्मिन् भवति । ततो भवति । तत्र भवति । एवं दीर्घायुप्रभृतिषूदाहार्यम् ।

सर्वैक ।

सर्वस्य । प्राग्दिशीये उभस्योभयादेशो वक्तव्यः । उभाभ्याम् । उभयतः । उभयत्र । उभाभ्यां प्रकाराभ्याम् । उभयथा ।

इदमः । लः प्रत्ययात् पूर्वस्योदात्तत्वार्थः । ननु च यथा इत इत्यत्र 'ऊडिदम्—' इति विभक्तिस्वरो भवति तथेहापि स्यात् । नैष दोषः । यतस्तसिलो लित्त्वस्य परितोभित इत्यत्र चरितार्थत्वादित इत्यादौ विभक्तिस्वरो भवति । र्हिलस्तु लित्करणमचरितार्थमिति विभक्तिस्वरेण न बाध्यते ।

---

१. B_1 drops it. २. सर्वस्मिन् देशे B_1. ३. B_1 drops अस्मात्. ४. After it B_1 has–लः स्वरार्थः.

एतेतौ रथोः ॥५।३।४॥

इदमो रेफे[1] थकारे च[2] क्रमात् एत इत आदेशौ स्तः ॥ एतर्हि । काले किम् । इह देशे ।

अधुना ॥५।३।१७॥

इदमो रूपं निपात्यते ।

दानीं च ॥५।३।१८॥

इदमो दानीं प्रत्ययः स्यात्[3] काले ॥ इदानीम् ।

तदो दा च ॥५।३।१९॥

तदः सप्तम्यन्तात् दा स्याद्दानीं च काले ॥ तदा । तदानीम् ।[4] पुनर्दाविधेः फलं चिन्त्यम् ।

एत । रेफे अकार उच्चारणार्थः ।

अधुना । इदमोऽशभावो धुनेति च प्रत्ययो निपातनात् ।

दानीम् । इदानीमिति । इदम इश् ।

तदः । ननु 'सर्वैकान्यकिंयत्तदः काले दा' इत्यनेनैव दाविधेः सिद्धत्वात् पुनर्दाविधिर्व्यर्थ इत्याशङ्क्याह । पुनर्दाविधेरिति । फलं चिन्त्यमित्यनेन वैचित्र्यार्थव्यतिरिक्तं फलं नास्तीति सूचितम् । यदि सर्वथा फलाभाव एवाभिप्रेतः स्यात्तर्हि चिन्त्यमिति नावक्ष्यत् ।

---

१. रेफथकारावौ प्राग्दिशीये इदम एत इत एतौ स्तः B_1. २. च परे D_1.
३. B_1 drops it. ४. After it—च D_4.

अनद्यतने र्हिलन्यतरस्याम् ॥५।३।२१॥

किमादेः सप्तम्यन्तादनद्यतने र्हिल् स्याद्वा ॥ कर्हि[1] । यर्हि । तर्हि । पक्षे दादिः ।

सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥५।३।२२॥

एते सप्तम्यन्ताः कालविशेषे निपात्यन्ते ॥ समानेऽह्नि सद्यः । इत्यादिः । उभयद्युश्च[2] ।

प्रकारवचने थाल् ॥५।३।२३॥

सामान्यस्य भेदको विशेषः प्रकारः । तद्वृत्तेः किमादेस्थाल् स्यात् ॥ सर्वेण[3] प्रकारेण सर्वथा । यथा । तथा ।

अनद्यतने । **कर्हीति** । 'किमः कः' ।

सद्यः । **समानेऽह्नि सद्यः इति** । समानस्य सभावो द्यश्च प्रत्ययोऽहन्यभिधेये निपात्यते । आदिना पूर्वपूर्वतरयोः परभाव उदारी च प्रत्ययौ वर्षे वाच्ये । पूर्वस्मिन् वर्षे परुत् । पूर्वतरस्मिन् वर्षे परारि । इदमः समसण् प्रत्ययो वर्षे । अस्मिन् वर्षे ऐषमः । परस्मादेद्यविप्रत्ययोऽहनि वाच्ये । परस्मिन्नहनि परेद्यवि । इदमोऽश्भावो द्यश्चाहनि । अस्मिन्नहनि अद्य । पूर्वान्यन्यतरेतरापराधरोभयोत्तरेभ्योऽहनि वाच्ये एद्युस् प्रत्ययः । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः । अन्यतरस्मिन्नहनि अन्यतरेद्युः । अपरस्मिन्नहनि अपरेद्युः । अधरस्मिन्नहनि अधरेद्युः । उभयोरह्नोरुभयेद्युः । उत्तरस्मिन्नहनि उत्तरेद्युः ।

प्रकार । 'किंसर्वनामबहुभ्यः' इति वर्तते । सप्तम्याः । काल इति च निवृत्तम् । **सामान्यस्येति** । यथा ब्राह्मण इति

---

१. B_1 drops कर्हि. २. D_2 drops च. ३. सर्वप्रकारेण D_4; Before it–पूर्वस्मिन् वर्षे परुत्, पूर्वतरस्मिन् वर्षे परारि । अस्मिन् वर्षे ऐषमः । पूर्वस्मिन्नहन्युभयोरह्नोः । तद्वृत्तेः किमादेस्थाल् स्यात् । D_5.

इदमस्थमुः ॥५।३।२४॥

थालोपवादः । इत्थम् ॥

किमश्च ॥५।३।२५॥

अस्मात् थमुर्न[1] थाल् ॥ कथम् ।

सामान्यस्य विशेषा माठरादयः प्रकारास्तथेति भावः । ईदृशमेव लक्षणं जातीयरोपि । तथापि स स्वभावात् प्रकारवति वर्तते अयं तु प्रकारमात्रे । अतो विषयभेदात् सामान्यविहितोपि जातीयर् विशेषविहितेन थाला न बाध्यते । तेन किंजातीयस्तज्जातीय इत्यादि सिद्धम् ।

इदम । **इत्थमिति** । 'एतेतौ रथोः' इति इदादेशः ।

किमः । **कथमिति** । 'किमः कः' ।

इति प्राग्दिशीयाः प्रत्ययाः । विभक्तिसंज्ञायाः पूर्णोवधिः ।

---

१. थमुः स्यान्न D_1, D_2, D_4, D_5.

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥५।३।२७॥

सप्तम्याद्यन्तेभ्यो दिक्शब्देभ्यो दिगाद्यर्थेभ्यः स्वार्थे-स्तातिप्रत्ययः स्यात् ।

पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥५।३।३९॥

एभ्योस्तात्यर्थे असिप्रत्ययः स्यात् तद्योगे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः ॥

अस्ताति च ॥५।३।४०॥

अस्तातौ परे पूर्वादीनां पुरादयः स्युः ॥ पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः । पुरस्तात् । अधः । अधस्तात् । अवः ।[3]

दिक्शब्देभ्य इत्यादि । दिशां वाचकाः शब्दा दिक्शब्दाः । ते यदा स्वभावाद् दिशि देशे काले च वर्तन्ते तदा दिगाद्यर्थाः ते च सप्तमीपञ्चमीप्रथमान्तास्तेभ्य इत्यर्थः । अत्र यथासंख्यं नेष्यते । दिक्शब्देभ्यः किम् । ऐन्द्र्यां दिशि वसति । सप्तमीपञ्चमीप्रथमाभ्य इति किम् । पूर्वं ग्रामं गतः । दिग्देशकालेभ्यः किम् । पूर्वस्मिन् गुरौ वसति ।

पूर्वाधर । एभ्य इति । पूर्वाधरावरेभ्यः । नन्वेषामिति व्यर्थं यतः पूर्वाधरावराणामिति येयं षष्ठी सैव प्रत्ययं विधाय स्थानषष्ठी विज्ञास्यते । संबन्धिभेदाच्च षष्ठ्यर्थे भेदः । सत्यम् । तथापि सुखप्रतिपत्त्यर्थमेषामित्युक्तम् ।

अस्ताति । ननु चासिना बाधितत्वात् पूर्वादिभ्योस्तातिना न भाव्यमेवेति कथमुच्यते अस्तातौ परे पूर्वादीनां पुरादय इति । नैष दोषः । इदमेव हि विधानं ज्ञापकमस्तातिरेभ्यो भवतीति । पुरः पुरस्तादित्यादि । वसत्यागतो रमणीयं वेति शेषः ।

---

१. दिगाद्यर्थैस्तातिप्रत्ययः स्यात् स्वार्थे । P. २. च परे P, C, D_1, D_4.
[3] After it—अवस्तात् । B_2, D_1, D_2.

विभाषावरस्य ॥५।३।४१॥

अवरस्यास्तातौ परे अवः स्याद्वा ॥ अवस्तात् । अवरस्तात् । परस्तात् । अपरस्तात् । एवं देशे काले च ।

दक्षिणोत्तराभ्यामतसुच् ॥५।३।२८॥

आभ्यामतसुच् स्यादुक्तेर्थे[1] । अस्तातेरपवादः ॥ दक्षिणतः । उत्तरतः ।

विभाषा परावराभ्याम् ॥५।३।२९॥

आभ्यामतसुच् स्याद्वा[2] ॥ परतः । अवरतः । पक्षे अस्तातिः ।

अञ्चेर्लुक् ॥५।३।३०॥

अञ्चत्यन्ताद् दिक्शब्दात् परस्यास्तातेर्लुक् स्यात् ॥

विभाषा । पूर्वेण नित्यः प्राप्तो विकल्प्यते । **एवं देशे काले चेति** । उदाहार्यमिति शेषः । पूर्वस्मिन् । पूर्वस्मात् । पूर्वो वा देशः । पुरः पुरस्ताद्वसति आगतो रम्यं वा । तथा पूर्वस्मिन् पूर्वस्मात् पूर्वो वा कालः । पुरः पुरस्ताद्वसत्यागतो रम्यं वा ।

दक्षिण । अकारो विशेषणार्थः षष्ठ्यतसर्थप्रत्ययेनेति । दक्षिणशब्दः काले नास्तीति दिग्देशवृत्तिरेव गृह्यते ।

अञ्चेः । दिक्शब्दाधिकारे केवलस्याञ्चेरदिक्शब्दत्वादञ्चेरित्ययमञ्चूत्तरपदस्य दिक्शब्दस्य निर्देशो विज्ञायत इत्यभिप्रेत्याह । **अञ्चत्यन्तादिति** । **प्रागिति** । प्रपूर्वादञ्चेः 'ऋत्विक्—' इत्यादिना क्विन् । अञ्चतेस्त्विष्ट इति ङीप् । 'अचः' इत्यल्लोपः । 'चौ' इति

---

१. B_1 drops स्यात्. २. स्यादुक्तेर्थे वा । D_5.

लुक् तद्धितलुकि । प्राच्यां प्राच्याः प्राची वा दिक् प्राक् । उदक् । एवं देशे काले च ।

उपर्युपरिष्टात् ॥५।३।३१॥

ऊर्ध्वशब्दस्यास्तात्यर्थे निपातावेतौ ।[१]

पश्चात् ॥५।३।३२॥

अवरस्यास्तात्यर्थे निपातः ।[२]

उत्तराधरदक्षिणादातिः ॥५।३।३४॥

एभ्योस्तात्यर्थे आतिः[३] । उत्तराद्वसति इत्यादि ।

दीर्घः । प्राचीति स्थिते अस्तातिस्तस्य लुक् । 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययलुक् । कुत्वम् । उदगिति । उदीच्यामुदीच्या उदीची वा दिक् । उत्पूर्वादञ्चतेः पूर्ववत् ङीपि क्विनि[४] च कृते उद ईत् इति कृते शेषं पूर्ववत् ।

उपरि । ऊर्ध्वस्योपभावः । रिल्रिष्टातिलौ च प्रत्ययौ निपात्येते । उपरि उपरिष्टाद्वा वसति आगतो रमणीयं वा ।

पश्चात् । अवरस्येति । पश्चभाव आतिश्च प्रत्ययो निपात्यते । पश्चाद्वसतीत्यादि । दिक्पूर्वपदस्य चावरस्य पश्चभावः आतिश्च प्रत्ययो वाच्यः । दक्षिणावरायां दिशि वसतीति दक्षिणपश्चादुत्तरपश्चात् । अर्धोत्तरपदस्य दिक्पूर्वपदस्याप्यवरस्य पश्चभावो वाच्यः । दक्षिणपश्चार्धः । अर्धे च परे विना पूर्वपदेनावरस्य पश्चभावो वाच्यः । पश्चार्धः ।

उत्तरा । आदिना । उत्तरादागतः उत्तराद्रमणीयम् । अधराद्वसत्यागतो रमणीयं वा । दक्षिणाद्वसत्यागतो रमणीयं वा ।

---

१. After this B_1 has—उपरि । उपरिष्टात् ।. २. After it—ऊर्ध्वे वसति । उपरि वसति आगतो रमणीयं वा । D_5. ३. B_1, D_4 have स्यात् after it. ४. क्विनि ङीपि Bc_1, Dc_3, Dc_4.

एनबन्यतरस्यामदूरेपञ्चम्याः ॥५।३।३५॥

सप्तमीप्रथमान्तादुत्तराधरदक्षिणादेनब् वा स्याददूरे[1]ऽस्तात्यर्थे ॥ उत्तरेण । अधरेण । दक्षिणेन । पक्षे यथास्वं प्रत्ययाः । अपञ्चम्याः किम् । उत्तरादागतः । दिक्शब्दमात्रादेनबिति केचित् । पूर्वेण[2] ।

दक्षिणादाच् ॥५।३।३६॥

[3]उक्तेऽर्थे न तु पञ्चम्याः ॥ दक्षिणा ॥

आहि च दूरे ॥५।३।३७॥

दक्षिणाद्दूरेऽर्थे आहिः स्यात् चकारादाच् न[4] तु पञ्चम्याः । [5]दक्षिणाहि कैलासाद्वसति ।

उत्तराच्च ॥५।३।३८॥

[6]आजाही स्तः ॥ उत्तरा । उत्तराहि ॥

एनप् । विभक्तित्रये प्रकृते पञ्चमी पर्युदस्यते । तेनायं सप्तमीप्रथमान्तात् प्रत्ययो विज्ञायत इत्यभिप्रेत्याह । **सप्तमीप्रथमान्तादिति** । अदूरे चेदवधिमान् अवधेर्भवति । **दिक्शब्दमात्रादिति** । तथोक्तं **काशिकायां वृत्तौ** । केचिदिहोत्तरादिग्रहणं नानुवर्तयन्ति दिक्शब्दमात्रात् प्रत्ययं मन्यन्त इति । अपञ्चम्या इति निषेधः प्रागसेरनुवर्तते । असिप्रत्ययस्तु पञ्चम्यन्तादपि भवति ।

दक्षिणात् । अदूर इति न स्मर्यते । चकारोऽनूत्तरपदाजाहियुक्त इति विशेषणार्थः ।[7]

आहि च । दूर इति किम् । दक्षिणतो वसति । ननु पञ्चम्या इति किम् । दक्षिणत आगतः ।

उत्तरात् । अस्तात्यर्थे । अपञ्चम्या इत्येव । उत्तरत आगतः ।

---

१. स्यान्न तु पञ्चम्या अदूरेऽस्तात्यर्थे B_1. २. पूर्वेण । परेण B_2. ३. अस्मादाच् स्यादुक्ते &c. B_2. ४. न तु पञ्चम्याः dropped D_2, D_5. ५. दक्षिणाहि वसन्ति चाण्डालाः । दक्षिणा दक्षिणाहि वा कैलासाद्वसन्ति चाण्डालाः । B_2; दक्षिणा दक्षिणाहि वा D_4 ; दक्षिणाहि वसन्ति चाण्डालाः । D_5. ६. अस्मादाजाही B_2. ७. After it—तस्य प्रत्ययस्वरेणैव सिद्धः Bc_1, Dc_3.

संख्याया विधार्थे धा ॥५।३।४२॥

क्रियाप्रकारवृत्तेः संख्यायाः स्वार्थे धा स्यात् ॥ चतुःप्रकारं चतुर्धा ।

ऐकाद्धो ध्यमुञन्यतरस्याम् ॥५।३।४४॥

एकशब्दात् धा इत्यस्य ध्यमुञादेशो वा स्यात् ॥ ऐकध्यम् । [2]एकधा ।

द्वित्र्योश्च धमुञ् ॥५।३।४५॥

द्वित्र्योर्धा इत्यस्य वा धमुञ् स्यात् ।[4] द्वैधम् । द्विधा । त्रैधम् । त्रिधा ।

संख्यायाः । अत्र विधा इति प्रकार उच्यते । स च द्रव्यगुणविषयोऽप्यस्तीति । तस्य व्यावृत्तये आह । **क्रियाप्रकारवृत्तेरिति** । एतच्चार्थग्रहणाल्लभ्यते । त[5]द्धि प्रकारविशेषग्रहणार्थमेवान्यथा विधावित्येव ब्रूयात् । एवं चेत् नवधा द्रव्यमित्यादयः प्रयोगा न स्युः । नैष दोषः । अत्रापि क्रियाध्याहार्या नवधा द्रव्यमुपदिश्यत इति । स्पष्टत्वात् त्यक्तमेकम् । ‘अधिकरणविचाले च’ ॥५।३।४३॥ द्रव्यसंख्यान्तरापादने च संख्याया धाप्रत्ययः स्यात् । एकं राशिं पञ्चधा कुरुते । अनेकमेकधा कुरुते । एकधाप्रकरणादेव लब्धे[6]ऽपि पुनर्धाग्रहणं विधार्थेऽपि विहितस्य धा यथा स्यात् । अन्यथानन्तरस्यैव स्यात् ।

द्वित्र्योः । चकारो विक[7]ल्पानुकर्षणार्थ इत्यभिप्रेत्याह । **वा धमुञ् स्यादिति** । धमुञन्तात् स्वार्थे डदर्शनम् । द्वैधानि संश्रयन्ते । त्रैधानि संश्रयन्ते ।

---

१. C has the Sūtra and the Vṛitti after एधाच्च. २. Before it—एकप्रकारः । D_5. ३. स्यात् dropped D_3, P, B_1. ४. After it—चकाराद्विकल्पानुकर्षः D_3, B_1, B_2. ५. तद्धितप्रकार° Bc_1; तद्धितत्वप्रकार° Dc_3, Dc_4. ६. अपि dropped Dc_3, Dc_4. ७. विकल्पत इत्यस्या° Dc_3.

एधाच्च ॥५।३।४६॥

द्वित्र्योर्धा इत्यस्य एधाच्[1] वा स्यात् ॥ द्वेधा । त्रेधा । षष उत्वमिति उत्वष्टुत्वे वा । षोढा । षड्धा ।

याप्ये पाशप् ॥५।३।४७॥

कुत्सितेऽर्थे[2] प्रातिपदिकात् पाशप् स्यात् ॥ कुत्सितो भिषक् भिषक्पाशः ।

सोपदादौ ॥८।३।३८॥

अपदाद्योः कुप्वोः परतो विसर्गस्य[3] सः स्यात् । पाशकल्पकाम्येषु वाच्यः ॥* पयस्पाशम् । पयस्कल्पम्[4] । पदादौ[5] तु पयः पिबति । अनव्ययस्य वाच्यः ॥* नेह । प्रातस्पाशम् ।

एधाच् । द्वित्र्योः संबन्धिना धाप्रत्ययस्यैधाजादेशो वा स्यादित्यर्थः ।

याप्ये । कुत्सितेऽर्थे इति । वर्तमानादिति शेषः । यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तत्कुत्सायां प्रत्ययः । तेन दुःशीलो वैयाकरण इत्यत्र वैयाकरणत्वस्य कुत्साभावान्न भवति ।

सोप । 'कुप्वोः ≍क ≍पौ च' इत्यस्यापवादः । अपदादाविति व्यत्ययेन द्विवचनस्थाने[6] एकवचनमित्यभिप्रेत्याह । **अपदाद्योरिति** । **पाशकल्पकाम्येष्विति**[7] । संभवप्रदर्शनं न परिगणनमित्यभिप्रेत्योदाहृतम् । पयः पिबतीति काम्ये रोरेव विसर्गस्य स इति वाच्यम् । तेनेह न ।

---

१. वा एधाच् D_4. २. कुत्सितार्थे C. ३. विसर्जनीयस्य D_5. ४. P, C and D_1, D_2, D_4 drop पयस्कल्पम्. ५. Before it—सुपयस्कः । पयस्काम्येति यथासंभवम् B_2. ६. द्विवचनस्य स्थाने Dc_4, Dc_3. ७. °कल्पक° Dc_3, Bc_1.

इणः षः ॥८।३।३९॥

इणः परस्य विसर्गस्य[1] षः स्यात् कुप्वोः[2] ॥ सर्पिष्पाशम् ।

पूरणाद्भागे तीयादन् ॥५।३।४८॥

पूरणात् तीयादन् स्याद्भागे ॥ स्वरे भेदः । द्वितीयो[3] भागो द्वितीयः । तृतीयः[4] ।

गीः काम्यति ।[5] उपध्मानीयस्य च कवर्गे परे सकार आदेशो भवतीति वक्तव्यम्[6] । किं प्रयोजनम् । उब्जिरुँपध्मानीयोपधः पठ्यत इत्यत्र दर्शने अभ्युद्रः समुद्र इति यथा स्यात् ।

इणः । पूर्वेण संप्राप्ते वचनम् । अपदादावित्येव । अग्निः करोति । वायुः पिबति । कुप्वोरित्येव । सर्पिस्तत्र ।

पूरणात् । पूरणाधिकारे विहितत्वात् पूरणार्थाभिधायित्वाद्व[8] पूरणस्तीयः । पूरणग्रहणमुत्तरार्थम् । न ह्यपूरणस्तीयोस्ति । ननु मुखपार्श्वतसोरीयः । मुखतीयः । पार्श्वतीय इत्यपूरणोपि तीयोस्ति । मैवं वोचः । अर्थवद्ग्रहणपरिभाषया अर्थवानिह तीयो गृह्यते । न च मुखतीयादिरर्थवान् । अतः पूरणाग्रहणेपि तस्य ग्रहणं न । ननु व्यर्थमिदं सूत्रम् । यतोकृतेप्यनि तदेव रूपं कृतेपि तदेवेत्याशङ्क्याह[9] । स्वरे भेद इति । भागेर्थे अनि सति 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं स्यात् । ततोत्र स्वरकृतो भेद इत्यर्थः ।

---

१. विसर्जनीयस्य D_5. २. After it—परयोः D_5. ३. D_1 drops it. ४. D_2, D_5 drop it. ५. इति after it Dc_2, Dc_3. ६. इति वक्तव्यम् dropped Bc_1, Dc_4. ७. °रयमु° Dc_2. ८. परणार्थय° Dc_3. ९. रूपमित्याशङ्क्याह । Dc_2.

प्रागेकादशभ्योऽच्छन्दसि ।।५।३।४९।।

पूरणाद्भागेन् स्यात् प्रागेकादशभ्यो न तु छन्दसि ।। [1]चतुर्थः । [2]दशमः ।।[3]

षष्ठाष्टमाभ्यां ञ च ।।५।३।५०।।

[4]चकारादन् । [5]षाष्ठः । [6]षष्ठः । आष्टमः । [7]अष्टमो [8]वा भागः ।।[9]

भूतपूर्वे चरट् ।।५।३।५३।।

भूतपूर्व आढ्यः आढ्यचरः ।

प्राक् । प्राक् किम् । एकादशः । अच्छन्दसि किम् । पञ्चममिन्द्रियमस्यापाक्रामत् ।

षष्ठ । अत्रोभाभ्यामुभौ स्तो न तु यथासंख्येन । यथासंख्ये हि षष्ठादन् स्यात् स च पूर्वेणैव सिद्ध इति षष्ठग्रहो व्यर्थः स्यात् । स्पष्टत्वात् त्यक्ते द्वे । 'मानपश्वङ्गयोः कन्लुकौ च' ।।५।३।५१।। षष्ठाष्टमाभ्यां भागे यथासंख्यं कन्लुकौ स्तो मानपश्वङ्गयोर्वाच्ययोः । षष्ठको भागो मानं चेत् अष्टमो भागः पश्वङ्गं चेत् । अस्यानो वा लुक् । चकाराद्यथाप्राप्तिम्[10] । षाष्ठः । षष्ठः । आष्टमः । अष्टमः । 'एकादाकिनिच्चासहाये' ।। ५।३।५२।। एकशब्दादसहायवाचिनः स्वार्थे आकिनिच् । चकारात् कन्-लुकौ च । एकाकी । एककः । एकः । असहायग्रहणं संख्याशब्द-निरासार्थम् । तदुपादाने हि द्विबह्वोर्न स्यात् । एकाकिनौ । एकाकिनः ।

भूतपूर्वे । भूतः पूर्वमिति विगृह्य सुप् सुपेति समासः । भूतपूर्व-शब्दोऽतिक्रान्तवाची । भूतपूर्वे विशिष्टेऽर्थे वर्तमानात् स्वार्थे चरट् प्रत्ययः स्यादित्यर्थः । टो ङीबर्थः । आढ्यचरी ।

---

१. चतुर्थो भागश्चतुर्थः B_1. २. पञ्चमः C; नवमः B_1, D_2; नवमः । दशमः B_2, D_5. ३. After it—अत्रापि स्वरे भेदः P. ४. चादन् भागे B_1. ५. षष्ठो भागः षाष्ठः B_1. ६. Dropped D_1. ७. अष्टमो भागोऽष्ट आष्टमः B_1. ८. Dropped C. ९. After it—स्वरे विशेषः C. १०. °प्राप्तं च Bc_1.

षष्ठ्या रूप्य च ॥५।३।५४॥

षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूप्यः स्याच्चरट् च ॥ कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः । रूप्ये न पुंवदिति केचित् । शुभ्रारूप्यः । [1]कृष्णचरः ।

अतिशायने तमबिष्ठनौ ॥५।३।५५॥

[2]प्रकर्षेऽर्थे एतौ स्तः । [3]टिलोपः । अयमेषामतिशयेन लघुर्लघुतमः लघिष्ठः ।

षठ्याः । पूर्वसूत्रे भूतपूर्वग्रहणं प्रकृत्यर्थविशेषणम् । इह तु षठ्या ग्रहणात् प्रत्ययार्थविशेषणमित्यभिप्रेत्याह । **षठ्यन्तात् भूतपूर्वेऽर्थे** इति । **रूप्ये न पुंवदिति केचिदिति** । 'तसिलादिष्वकृत्वसुचः' इत्यत्र परिग्रहणं कार्यमिति [4]मन्वाना **भाष्यकारादयः** । ते हि परिगणितेषु रूप्यं न पठितवन्तः ।

अतिशायने । अतिशयनमतिशायनम् । निपाताद्दीर्घः । अतिशायनशब्दः प्रकर्षवाचीत्यभिप्रेत्याह । **प्रकर्षेऽर्थे** इति । एतच्च प्रकृत्यर्थविशेषणम् । [5]प्रकर्षे वर्तमानात् प्रातिपदिकादित्यर्थः । प्रकृत्यर्थविशेषणस्य च स्वार्थिकाः प्रत्ययाः सर्वत्र द्योतका भवन्ति । **टिलोप** इति । 'टेः' इति सूत्रेण । यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपर आतिशायिकः प्रत्ययो भवत्येव । देवो वः सविता प्रार्थयतु श्रेष्ठतमाय कर्मणे । युधिष्ठिरः श्रेष्ठतमः कुरूणाम् ।

---

१. Before it—कृष्णारूप्यः B_2. २. For प्रकर्षेऽर्थे B_1 has बहूनामेकस्य प्रकर्षे. ३. टेर्लोपः C. ४. मन्वाना dropped Dc_2. ५. प्रकर्षेऽर्थे Dc_4, Dc_3.

तिङश्च ॥५।३।५६॥

तिङन्तात् प्रकर्षेऽर्थे तमप् स्यात् ॥[1]

द्विवचनविभज्योपपदे तरबीयसुनौ ॥५।३।५७॥

द्वयोरेकस्यातिशये विभज्ये चोपपदे सुप्तिङन्तादेतौ स्तः प्रकर्षे । पूर्वयोरपवादः ॥ अयमनयोरतिशयेन लघुः लघुतरः । लघीयान् । विभज्योपपदे[2] । उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः ।

तिङः । 'ङ्याप्प्रातिपदिकात्' इत्यधिकारात् तिङो न प्राप्नोतीति वचनम् । ननु तमबिष्ठनाविति उभयोरपि प्रकृतत्वात् कथं तमप् स्यादिति[3] तमबेवोच्यते न इष्ठन्नपीति[4] चेदुच्यते । अजादी गुणवचनादेवेति इष्ठनो गुणवचने नियमितत्वात् तिङन्तात्तस्याप्राप्तेः । उदाहरणं तु 'किमेत्तिङव्यय—' इत्यत्र सूत्रे कथयिष्यति ।

द्विवचन । द्वयोरर्थयोर्वचनं द्विवचनं द्व्यर्थ इति यावत् । अत एवाह । **द्वयोरेकस्यातिशये** इति । विभक्तव्यो विभज्यः पृथक्कर्तव्य इत्यर्थः । निपातनाद्यत् । अत्राप्यतिशये द्योत्ये इत्येव । यथासंख्यं नेष्यते । उदीच्याः प्राच्येभ्यः पटुतरा इति । 'पञ्चमी विभक्ते' इति पञ्चमी । प्राच्येभ्य इत्येतद्विभज्यमुपपदम् । प्राच्या हि उदीच्येभ्योतिशय्यमाना विभज्यन्ते उदीच्यास्त्वतिशायितारस्तेभ्यः प्रत्ययविधिः ।

---

१. B_1, B_2, D_6 have after it—पचतितमाम् and C has पचतितमः । जल्पतितमः; D_2 has पिबतितमाम्. २. B_1 has किम् after it; B_2 has तु after it. ३. इति for स्यादिति Dc_2. ४. अपि dropped Dc_2.

अजादी गुणवचनादेव ॥५।३।५८॥

इष्ठन्नीयसुनौ गुणवचनादेव स्तः ॥ प्रथिष्ठः । प्रथीयान् । नेह । पाचकतमः । पाचकतरः ॥[1]

तरप्तमपौ घः ॥१।१।२२॥

एतौ घसंज्ञौ स्तः ॥

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥५।४।११॥

किम एदन्तात् तिङोऽव्ययाच्च यो घस्तदन्तादाम् स्यान्न तु द्रव्यप्रकर्षे ॥ किंतराम् । प्राह्णेतराम् । पचतितराम् ।[2] उच्चैस्तराम् ।[3] एवं किंतमाम् । इत्यादि । स्वरादित्वादव्ययत्वम्[4] । द्रव्यप्रकर्षे तु । उच्चैस्तरः तरुः ।

अजादी । एवकार इष्टतोऽवधारणार्थः । प्रत्ययनियमो न प्रकृतिनियम इति तेन गुणवचनादनजादयोऽपि भवन्ति ।

तरप् । यद्यपि तरतेः 'ऋदोरप्' इत्यपि गुणे च कृते भूतपूर्वेण पकारेण तरबिति रूपं स्यात्तथापि तमपा साहचर्यात् तरबिति प्रत्ययस्यैव ग्रहणम् ।

किमेत् । उदित्करणं सामान्यग्रहणविघातार्थम् । अन्यथा आम्ग्रहणेनास्यापि ग्रहणात् किंतरामित्यादौ यस्येति लोपं बाधित्वा 'ह्रस्वनद्यापो नुट्' इति नुट् प्रसज्येत । **न तु द्रव्यप्रकर्षे** इति । यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति तथापि क्रियागुणस्थः प्रकर्षो यदा द्रव्ये उपचर्यते तदायं निषेधः ।

---

१. Before it—पाठकतरः । पाठकतमः D_4. २. After it—पचतितमाम् । पूर्वाह्णेतराम् । पूर्वाह्णेतमाम् । अतितराम् । अतितमाम् । उच्चैस्तराम् । उच्चैस्तमाम् । स्वरादित्वादव्ययत्वम् । B_2, D_5 ; D_2 has एतितराम् । एतितमाम् for पचतितराम्. ३. एवं किंतमाम् । इत्यादि dropped D_2. ४. °दव्ययम् D_1. ५. After it—परत्वात् Dc_3.

तुश्छन्दसि ॥५।३।५९॥

तृजन्तात्[1] प्रकर्षेऽर्थे इष्ठेयसू[2] स्तः छन्दसि । भाषायामपीति केचित् ।

तुरिष्ठेमेयस्सु ॥६।४।१५४॥

तृशब्दस्य लोपः स्यादिष्ठेमेयस्सु[3] ॥ करिष्ठः ।[4] दोहीयसी धेनुः ।

प्रशस्यस्य श्रः ॥५।३।६०॥

अस्य श्रादेशः स्यादजाद्योः[5] ॥

प्रकृत्यैकाच् ॥६।४।१६३॥

इष्ठादावेकाच्[6] प्रकृत्या स्यात् ॥ श्रेष्ठः । श्रेयान् ।

तुः । तुरिति तृन्तृचोः सामान्यग्रहणमित्यभिप्रेत्याह । तृन्तृजन्तादिति ।

तुरिष्ठ । अन्त्यस्य हि 'टेः' इत्येव लोपे सिद्धे[7] सर्वस्य तृशब्दस्य लोपार्थं वचनम् ।

प्रशस्य । अजादी इति प्रथमान्तमप्यनुवर्तमानमर्थात् सप्तम्यन्तं विपरिणम्यते इत्यभिप्रेत्याह । अजाद्योरिति । अगुणवचनादपि प्रशस्यशब्दादस्मादेवादेशविधेर्ज्ञापकादजाद्योर्विधिः । एवमुत्तरत्रापि ।

प्रकृत्या । एकाच्[8] किम् । पटिष्ठः । प्रकृत्याके राजन्यमनुष्य-युवानः । अके प्रत्यये राजन्यमनुष्ययुवानः प्रकृत्या स्युः । राजन्यकम् । मानुष्यकम् । प्रकृतिभावात् 'आपत्यस्य—' इति यलोपो न । यौवनकम् । मनोज्ञादित्वाद्वुञि 'नस्तद्धिते' इति टिलोपो न ।

---

१. तृन् तृजन्तात् P, C, Com. २. इष्ठेयसौ B_2 ; इष्ठेयसुनौ D_4, D_5. ३. After it—परतः B_2, D_5. ४. B_1 has before it—अतिशयेन दोग्धा दोहीयान्. ५. After it—परतः B_2. ६. B_1 has before it—तेन 'यस्येति च' इति नावर्णलोपः । अतिशयेन प्रशस्यः. ७. सिद्धे लोपे Bc_1, Dc_4. ८. एकाचः Dc_4 ; एकाजिति Dc_3.

ज्य च ॥८।३।६१॥

प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः ॥ ज्येष्ठः ।

ज्यादादीयसः ॥६।४।१६०॥

ज्यात्परस्येयस आकारादेशः स्यात् ॥ 'आदेः परस्य' । ज्यायान् ।

वृद्धस्य च ॥८।३।६२॥

वृद्धस्यापि ज्यादेशः स्यादिष्ठेयसोः ॥ अतिशयेन वृद्धो ज्येष्ठः । ज्यायान् ॥

ज्य च । योगविभाग उत्तरत्र ज्य इत्यस्यैवानुवृत्त्यर्थः ।

ज्यात् । ननु च 'बहोर्लोपो भू च बहोः' इत्यतो लोपोनुवर्तते ततश्च 'आदेः परस्य' इति इकारस्य लोपे कृते अकृत्सार्वधातुकयोर्दीर्घत्वे सति ज्यायानित्येतत् सिध्यते तत् किमर्थमादित्युच्यत इति चेदुच्यते । लोपस्येष्ठस्य यिट् चेति यिटा व्यवहितत्वादादित्युच्यते । ननु तत्र लोपोप्यनुवर्तत इत्यपि पक्षोस्ति तत् कथं तस्य यिटा व्यवधानम् । एवं तर्हि अङ्गवृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्य इत्येतस्याः परिभाषाया ज्ञापनार्थमात्वं विधीयते ।

वृद्धस्य । वृद्धस्येति स्वरूपग्रहणम् ।

---

१. B1 drops स्यात्. २. स्यात् dropped B2, D2. ३. Dropped Dc3. ४. उच्यते dropped Dc2.

अन्तिकबाढयोर्नेदसाधौ ॥५।३।६३॥

एतयोः क्रमादेतावादेशौ[1] स्त इष्ठेयसोः ॥ [2]नेदिष्ठः । नेदीयान् । [3]साधिष्ठः । साधीयान् ॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ॥६।४।१५६॥

एषां यणादिपरं लुप्यते पूर्वस्य च गुण इष्ठेमेयस्सु । [4]स्थविष्ठः । [5]दविष्ठः । [6]यविष्ठः । [7]ह्रसिष्ठः । [8]क्षेपिष्ठः । [9]क्षोदिष्ठः । [10]एवमीयस् ॥[11] ह्रस्वक्षिप्रक्षुद्राणां [12]पृथ्वादित्वात् ह्रसिमा । क्षेपिमा । क्षोदिमा ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगवर्षित्रप्द्राघिवृन्दाः ॥६।४।१५७॥

प्रियादीनां क्रमात् प्रादय आदेशाः स्युरिष्ठेमेयस्सु ।

अन्तिक । स्थान्यादेशयोर्यथासंख्यमिष्यते । प्रत्यययोस्तु नेष्यते इति चेतसि कृत्वाह । **एतयोः क्रमादित्यादि** ।

स्थूल । परग्रहणं पूर्वस्य यणादेर्लोपो मा भूदिति । यविष्ठः । ह्रसिष्ठः । परस्मिन् लुप्ते सामर्थ्यात् पूर्वस्यैव गुणे सिद्धे पूर्वग्रहणं विस्पष्टार्थम् ।

प्रिय । **प्रियोरुबहुलेति** । तेनान्येषामिमनिच् नास्तीति नोदाहार्य इति भावः ।

---

१. आदेशौ dropped D_5. २. Before it—अतिशयेन अन्तिकः D_3, B_1. ३. Before it—अतिशयेन बाढः D_3, B_1. ४. Before it—अतिशयेन स्थूलः । D_3, D_5, B_1. ५. Before it—अतिशयेन दूरः D_3, B_1. ६. Before it—अतिशयेन युवा D_3, B_1. ७. Before it—अतिशयेन ह्रस्वः D_3, B_1, B_2. ८. Before it—अतिशयेन क्षिप्रः D_3, B_1. ९. अतिशयेन क्षुद्रः क्षोदिष्ठः D_1, D_2, D_4. १०. °मीयसि B_1. ११. After it—स्थवीयान् D_5. १२. पृथ्वादिमनिच् B_1, D_2.

[1]प्रेष्ठः । [2]स्थेष्ठः । स्फेष्ठः । [3]वरिष्ठः । [4]बंहिष्ठः । [5]गरिष्ठः । [6]वर्षिष्ठः । [7]त्रपिष्ठः । [8]द्राघिष्ठः । [9]वृन्दिष्ठः । एवमीयसं[10] । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वात्[11][12] प्रेमा इत्यादि ज्ञेयम् ।

बहोर्लोपो भू च बहोः ॥६।४।१५८॥

बहोः परयोरिष्ठमेयसोरादेर्लोपः स्याद्बहोश्च भूरादेशः । भूमा । भूयान् ॥

इष्ठस्य यिट् च ॥६।४।१५९॥

[13]बहोर्भूरादेशः ।[14] इष्ठस्यादेर्लोपस्तस्य यिडागमश्च [15]स्यात् ॥ भूयिष्ठः ।

बहोः । पूर्वं बहोरिति पदं पञ्चम्यन्तमुत्तरत्र[16] षष्ठ्यन्तमित्यभिप्रेत्याह । बहोः परयोरिति[17] । पुनर्बहुग्रहणं न स्थानिवत्त्वप्रतिपत्त्यर्थम् । अन्यथा प्रत्ययानामेव भूभावः स्यात् । भूमेति । पृथ्वादित्वादिमनिच् ।

इष्ठस्य । चकारो भू च बहोरित्यस्यानुकर्षणार्थ इत्यभिप्रेत्याह । बहोर्भूरादेश इति । अत्र लोप इत्यनुवर्तत इत्यभिप्रेत्याह । इष्ठस्यादेर्लोप इति । तस्य यिडागमश्चेति । इष्ठस्येत्यर्थः ।

---

१. B_1 has before it–अतिशयेन प्रियः २. Before it—अतिशयेन स्थिरः B_1. ३. Before it—अतिशयेन उरुः B_1. ४. Before it—अतिशयेन बहुलः B_1. ५. Before it—अतिशयेन गुरुः B_1. ६. Before it—अतिशयेन वृद्धः B_1. ७. Before it—अतिशयेन तृप्रः B_1. ८. Before it—अतिशयेन दीर्घः B_1. ९. Before it—अतिशयेन वृन्दारकः B_1. १०. °मीयसि B_1, D_4. ११. पृथ्वादि for पृथ्वा°···ज्ञेयम् B_1. १२. °त्वादिमन् B_2. १३. बहोर्भूरादेशः dropped P, D_2, D_3, D_5, B_1, C. १४. After it—स्यात् D_4. १५. Dropped B_1. १६. °मुत्तरं Bc_1, Dc_3, Dc_4. १७. °रित्यादि Bc_1, Dc_3, Dc_4.

युवाल्पयोः कनन्यतरस्याम् ॥५।३।६४॥

एतयोः कनादेशो वा [1]स्यादिष्ठेयसोः ॥ [2]कनिष्ठः । कनीयान् । पक्षे यविष्ठः । अल्पिष्ठः । इत्यादि ।

विन्मतोर्लुक् ॥५।३।६५॥

विनो मतुपश्च लुक् स्यादिष्ठेयसोः । अतिशयेन स्रग्वी स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् त्वचिष्ठः । त्वचीयान् ।

ननु **काशिकावृत्तिकृता** यिडागमो लोपापवाद इकारश्चोच्चारणार्थ इति व्याख्यातम् । तथा हि लोपापवादो यिडागमस्तस्मिन्निकार उच्चारणार्थ इति । ततस्तेन विरुद्धमिदं व्याख्यानमिति चेन्नैष दोषः । यत उभयस्यापि व्याख्यानस्य **महाभाष्यकारेणा**-ङ्गीकारात् । तथोक्तम् । किं पुनरयं यिशब्द आहोस्वित् [3]यकारः । किं चातः । यदि तावल्लोपोप्यनुवर्तते ततो यिशब्दोप्यनिवृत्तस्ततो यकार इति ।

युवा । युवेति स्वरूपग्रहणमिष्यते न जीवद्वंशयस्य ।

विन्मतोः । मतुपा साहचर्यात् मत्वर्थ एव विन् गृह्यते 'तपःसहस्राभ्यां विनीनी' 'अस्मायामेधास्रजो विनिः' इति च । न त्वौणादिकः 'वृदृभ्यां विन्' इति । अस्मादेव लुग्वचनाज् ज्ञायते विन्मतुबन्तादजादी स्त इति ।

१, B_1 drops स्यात्. २. अतिशयेन युवाल्पो वा before it D_3, C, B_1.
३. यदीकारः Dc_4.

प्रशंसायां रूपप् ॥५।३।६६॥

[1]प्रशस्तः पटुः पटुरूपः । तिङोनुवृत्तेस्तिङन्तादपि । पचतिरूपम् । क्लीबत्वं लोकात् ।

प्रशंसायाम् । प्रशंसा स्तुतिः । प्रकृत्यर्थविशेषणं चैतत् । प्रशंसाविशिष्टेर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् स्यादित्यर्थः । प्रकृत्यर्थस्य परिपूर्णत्वे प्रशंसा स्यात् । ततो वृषलरूपः चोररूप इत्याद्यपि सिध्यति । वृषलशब्दस्य शूद्रो वाच्यः । स यदा पलाण्ड्वादिकमपि साधुजनगर्हितं भक्षयति तदा तस्य परिपूर्णं शूद्रत्वं स्यात् । शूद्रः सर्वाशी सर्वविक्रयीति कृत्वा । चौरस्यापि सुगुप्तवस्त्वपहरणेन परिपूर्णता स्यात् । **पचतिरूपमिति** । पचतोरूपं पचन्तिरूपमित्याद्यपि ज्ञेयम् । ननु च स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्त इति पचतोरूपं पचन्तिरूपमित्यत्र द्विवचनबहुवचनाभ्यां भाव्यम् । नैष दोषः । आख्यातस्य हि क्रिया प्राधान्येन वाच्या साधनं त्वप्रधानं[2] यच्च प्रधानं प्रकृत्यर्थस्तस्यैव लिङ्गवचने स्वार्थिकैरनुवर्त्येते[3] । क्रिया चैकैवेति रूपप्प्रत्ययान्तादाख्याताद्[4] द्विवचनबहुवचने न स्तः । एवं तर्हि क्लीबत्वमपि न स्यात् । क्रियाया अलिङ्गत्वादित्याशङ्क्याह । **क्लीबत्वमिति** । अत्रैव हेतुमाह । **लोकादिति** । यदि हि एका क्रिया आख्याताद् द्विवचनबहुवचने न सिध्यते एव । नैष दोषः । साधनमनेकं तदपि वाच्यं तदाश्रये द्विवचनबहुवचने भवतः । रूपप्प्रत्ययादपि तर्हि स्याताम् । न[5] स्याताम् । तिङन्तेनोक्तत्वात् । एकवचनं तु स्यात् तस्यौत्सर्गिकत्वात् । एकवचनमुत्सर्गः करिष्यत इति वचनात् ।

---

१. Before it—प्रकृत्यर्थविशेषणं चैतत् । प्रशंसाविशिष्टेर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे रूपप् स्यादित्यर्थः । प्रशस्तो वैयाकरणः वैयाकरणरूपः । D_6.
२. प्रधानं वाच्यं Dc_3, Dc_4. ३. भविष्यतः Dc_3. ४. प्रत्ययान्तादपि Bc_1.
५. तिङन्तेनोक्तत्वान्न । Bc_1.

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥५।३।६७॥

सुप्तिङन्तादीषदूनतायामेते स्युः ॥ ईषदूनो विद्वान् विद्वत्कल्पः । यशस्कल्पम् । यजुष्कल्पम्[1] । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ।[2]

विभाषा सुपो बहुच् पुरस्तात्तु[3] ॥५।३।६८॥

सुबन्तादुक्तेऽर्थे बहुच् वा स्यात्[4] स च प्रागेव[5] ॥ ईषदूनः पटुः बहुपटुः । पटुकल्पः । सुपः किम् । यजतिकल्पम् ।

ईषत् । संपूर्णता पदार्थानां समाप्तिः स्तोकेनासंपूर्णता ईषदसमाप्तिरित्यभिप्रेत्याह । **ईषदूनतायामिति** । प्रकृत्यर्थविशेषणं चैतत् । ईषन्न्यूनतायां वर्तमानात् सुप्तिङन्तात् स्वार्थे एते कल्पवादयः प्रत्ययाः स्युरित्यर्थः । **विद्वत्कल्पमिति** । पदत्वात् ' वसुस्रंसुध्वंसु–' इति दत्वम् । **यशस्कल्पमिति** । ' सोपदादौ ' इति विसर्गस्य सः । **यजुष्कल्पमिति** । ' इणः षः ' इति षः । कल्पपः पकारोऽनुदात्तार्थः । देशीयरो रेफः ' उपोत्तमं रिति ' इति उपोत्तमस्योदात्तार्थः ।

विभाषा । विभाषाशब्देन बहुच् संबध्यते न पुरस्ताच्छब्दः । तुशब्देन योगात् । तेन पूर्वत्वं नित्यमेव बहुजेव विभाषा स्यादिति सर्वं चेतसि कृत्वाह । **बहुच् वा स्यात् स च प्रागेवेति** । चोऽन्तोदात्तार्थः । तच्चान्तोदात्तत्वं सप्रकृतेः प्रत्ययस्य चित्तः[6] सप्रकृतेर्बहुजकजर्थमिति वचनात् ।

---

१. B_1 drops यजुष्कल्पम्; D_5 drops it and has in its place—सोपदावाविति विसर्गस्य सः । D_5. २. After it—यजुष्कल्पम् । D_5. ३. तु dropped D_1, D_2, D_4, D_5, B_2. ४. स्याद्वा B_2, D_5. ५. प्रकृतेः प्रागेव B_1. ६. चित्तः dropped Bc_1, Dc_2, Dc_3.

प्रकारवचने जातीयर् ॥५।३।६९॥

पटुप्रकारः पटुजातीयः । प्रकारवति चायम्[3] । थाल् तु[4] प्रकारमात्रे ।

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ॥६।३।४३॥

ङ्यन्तस्यानेकाचो ह्रस्वः[5] स्याद्[6] घादौ परे[7] ॥ ब्राह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा[8] ।[9] इत्यादि । उक्तपुंस्कादेव । नेह । आमलकीतरा ।

प्रकार । रेफः उपोत्तमस्योदात्तार्थः । सामान्यस्य भेदको विशेषः प्रकारः । थाल्जातीयरोर्विषयभेदमाह । **प्रकारवतीत्यादि** । विषयभेदे सति विशेषविहितेनापि थाला जातीयरो बाधो न तेन थाल्प्रत्ययान्ताच्च जातीयर् सिध्येत् तथा जातीय इति ।

घरूप । घ रूप कल्पाः प्रत्ययाः । चेलडादीनि उत्तरपदानि । चेलडिति पचादौ पठ्यते । ब्रुव इति पचाद्यजन्ते वच्यादेशो गुणश्च निपातनात् । ब्राह्मणितरेत्यादि । घादिषु पुंवद्भावाद् ह्रस्वत्वं भवति विप्रतिषेधेनेति ह्रस्व एव । इत्यादीत्यादिना ब्राह्मणिकल्पा । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा । चेलडादीनां कुत्सितत्वात् ' कुत्सितानि कुत्सनैः ' इति समासः । ब्राह्मणिमता । ब्राह्मणिहता । अत्रोभयत्र ' विशेषणं विशेष्येण ' इति समासः । ङ्य इति किम् । दत्तातरा । अनेकाचः किम् । नद्याः शेषस्यान्यतरस्यामिति वक्ष्यति । **आमलकीतरेति** । आमलकीशब्दो वृक्षे नित्यस्त्रीलिङ्गः फले[10] नपुंसकलिङ्ग इत्यभाषितपुंस्कः । गौरादित्वात् ङीष् ।

---

१. जातीयच् D_1. २. B_1 has बहुप्रकारो बहुजातीयः before it. ३. चायम् C, D_2, D_4. ४. Dropped D_1 ; न तु प्रकारमात्रे D_5. ५. ह्रस्वो वा D_5. ६. B_1 drops it. ७. Dropped D_5. ८. B_1 drops it. ९. After it—गार्गिरूपा । गार्गिकल्पा । कुत्सिता ब्राह्मणी च ब्राह्मणिचेला । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रा । ब्राह्मणिमता । ब्राह्मणिहता । इत्यादि B_2. १०. फले तु Bc_1, Dc_3, Dc_4.

नद्याः शेषस्यान्यतरस्याम् ॥६।३।४४॥

अङ्यन्तनद्या ङ्यन्तस्यैकाचो ह्रस्वो वा स्याद्[1] घादौ[2] परे[3] ॥ वामोरुतरा । वामोरूतरा[4] । वामोरुतमा[5] । वामोरूतमा[6] । स्त्रितरा । स्त्रीतरा । एवं तमरूपादि[7] । कृन्नद्याः प्रतिषेधः ॥* लक्ष्मीतरा । तन्त्रीतरा[8] ।

उगितश्च ॥६।३।४५॥

उगितो नद्या ह्रस्वो वा स्याद्[9] घादौ[10] । तसिलादिष्विति पक्षे पुंवद्भावो वक्तव्यः[11] । विदुषितरा । विदुषीतरा । विद्वत्तरा । सतितरा । सतीतरा[12] । सत्तरा ।

प्राग्विवात् कः ॥५।३।७०॥

'इवे[13] प्रतिकृतौ' इत्यतः प्राक् काधिकारः ।

नद्याः । शेषं व्याख्याति । अङ्यन्तनद्या इत्यादिना ।

उगितः । उगितः[14] प्रातिपदिकाद्विहिता या नदी तस्या ह्रस्वो वा स्यादित्यर्थः ।

अथ प्रागिवीयाः ।

प्राक् । तिङन्तादयं कप्रत्ययो नेष्यते अकजिष्यते । तिङश्चेत्यनुवृत्तिरुत्तरत्रैव[15] हि संबध्यते ।

---

१. B_1 drops it. २. घादौ परे droped D_2. ३. Dropped D_1, D_4, B_2. ४. Dropped D_4. ५. Dropped D_1, D_4, D_5. ६. पक्षे वामोरूतरा । स्त्रीतरा । D_4. ७. तमरूपादिषु C, D_3, B_1. ८. P drops तन्त्रीतरा. ९. B_1 drops it. १०. घादौ परे । D_4. ११. Dropped D_1. १२. Dropped D_1. १३. इवेति D_1. १४. Dropped Dc_2. १५. Dropped Dc_2.

अज्ञाते ॥५।३।७३॥

संबन्धादिनाज्ञातेर्थेधिकृतः कप्रत्ययः स्यात् ॥ कस्यायमश्वः अश्वकः । पयस्कम् । यजुष्कम् ।

कुत्सिते ॥५।३।७४॥

अत्र कः स्यात् ॥ कुत्सितोश्वः अश्वकः । अत्र प्रकरणे हलादौ प्रत्यये परे द्वितीयादचः परस्य लोपो वा वाच्यः ॥* देवदत्तकः । देवकः ।

अज्ञाते । प्रयोगोस्य कथं नु स्यादज्ञातः सर्वथैव यस्तस्माद्धर्मान्तराज्ञानमज्ञानं न स्वरूपत इतीममर्थं चेतसि कृत्वाह । **संबन्धादिने**त्यादि । स्वरूपेण ज्ञाते विशेषरूपेण संबन्धित्वादिना त्वज्ञातेर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे प्रागिवात् क इत्यधिकृतः कः स्यादित्यर्थः । **कस्यायमश्वः अश्वक** इति । स्वेन रूपेण ज्ञातोश्वः स्वामिसंबन्धेन तु विशेषरूपेणाज्ञात इति कप्रत्ययो जातः । **पयस्कम्** । **यजुष्कमि**ति । 'सोपदादौ' 'इणः षः' इति क्रमात् सषौ ।

कुत्सिते । **अत्रे**ति । कुत्सितत्वोपाधिके वर्तमानात् प्रातिपदिकात् स्वार्थे कः स्यादित्यर्थः । **अत्र प्रकरणे** इति । प्रागिवीये प्रकरणे हलादौ प्रत्यये परे प्रकृतेर्द्वितीयादचः परस्य सर्वस्य लोपो विकल्पेन वक्तव्य इत्यर्थः । अजादौ तु 'ठाजादावूर्ध्वं द्वितीयादचः' इति नित्यं वक्ष्यामः । **देवक** इति । अज्ञाताद्यर्थे के दत्तशब्दस्य लोपः ।

---

१. B_1, B_2 have पयस्कम् । यजुष्कम् before it. २. Dropped D_4 ; वक्तव्यः for वा वाच्यः D_6.

अव्ययसर्वनाम्नामकच् प्राक् टेः ॥५।३।७१॥

अव्ययानां सर्वनाम्नां च टेः प्रागकच् स्यात् अज्ञाताद्यर्थे। कापवादः। उच्चकैः। नीचकैः। सर्वके। उभयके। प्रातिपदिकात् सुप इत्यनुवृत्तेः केवलस्य सुबन्तस्य वा सर्वनाम्नष्टेः प्रागकच्। प्रयोगाद् व्यवस्था। युष्मकाभिः। अस्मकाभिः। युवकयोः। आवकयोः। युष्मकासु। अस्मकासु। इति केवलस्य। त्वयका। मयका। त्वयकि। मयकि। अत्र सुबन्तस्य तिङोनुवृत्तेः पचतकि। भवतकि।

कस्य च दः ॥५।३।७२॥

कान्ताव्ययस्य दकारोन्तादेशः स्यात् अकच्संबन्धे। धकित्। हिरकुत्। पृथकत्।

अव्यय। 'काकचोर्भिन्नदेशत्वाद्विरोधो नास्ति यद्यपि। अस्ति त्वर्थकृतस्तेन बाध्यबाधकतानयोः'॥ इतीममर्थमभिप्रेत्याह। **कापवाद** इति। अकचः सप्रकृतेरन्तोदात्तः। चितः सप्रकृतेर्बहुजकजर्थमिति वचनात्। अकच्प्रकरणे तूष्णीमः काम् प्रत्ययो वक्तव्यः। तूष्णीकामास्ते। शीले को मलोपश्च वक्तव्यः। तूष्णीं शीलः तूष्णीकः।

कस्य च। कान्तस्य सर्वनाम्नोभावादव्ययमेवात्र सामर्थ्यादनुवर्तेत इत्यभिप्रेत्याह। **कान्ताव्ययस्येति**। चकारोकच् संनियोगार्थ इत्यभिप्रेत्याह। **अकच्संबन्ध** इति। स्पष्टत्वात् त्यक्तानि त्रयोदश। 'संज्ञायां कन्' ॥५।३।७५॥ कुत्सितत्वोपाधिके वर्तमानात् प्रातिपदिकात् कन् स्यात् तदन्तेन चेत् संज्ञा गम्यते। शूद्रकः। नित्त्वादाद्युदात्तत्वं भेदः। 'अनुकम्पायाम्' ॥५।३।७६॥ कारुण्ये गम्ये सुबन्तात्

---

१. °गकच् प्रत्ययः B_2, D_4, D_5. २. Dropped B_1. ३. च वा B_2. ४. B drops स्यात्. ५. चितः dropped Bc_1, Dc_3, Dc_4. ६. संयोगार्थ Bc_1.

तिङन्ताच्च यथाविहितं प्रत्ययः। अनुकम्पितः पुत्रः पुत्रकः। स्वपितकि। श्वसितकि। 'नीतौ च तद्युक्तात्' ॥५।३।७७॥ सामदानादिरूपा या नीतिस्तस्यां गम्यमानायामनुकम्पायुक्ताद्यथास्वं काकजादिः। हन्त ते धानकाः। हन्त ते गुडकाः। एहकि। अद्धकि। अनुकम्पमानो दानेनाराधयति। पूर्वत्रानुकम्प्यमानादेव प्रत्ययः इह तु व्यवहितादपि। 'बह्वचो मनुष्यनाम्नष्ठज्वा' ॥५।३।७८॥ अनुकम्पायां नीतौ च गम्यायां बह्वचो मनुष्यनामधेयात् ठच् यथाप्राप्तं च। देविकः। देवदत्तकः। बह्वचः किम्। मैत्रकः। मनुष्यनाम्नः किम्। मद्रबाहुकः। 'घनिलचौ च' ॥५।३।७९॥ बह्वचो मनुष्यनाम्नोनुकम्पायां नीतौ च घन् इलच् ठच् क एते प्रत्ययाः। देवियः। देविलः। देविकः। देवदत्तकः। 'प्राचामुपादेरडज्वुचौ च' ॥५।३।८०॥ उपपूर्वाद्बह्वचो मनुष्यनाम्नो नीतावनुकम्पायां च अडच् वुच् घन् इलच् ठच् क एते प्रत्ययाः। उपडः। उपकः। उपियः। उपिलः। उपिकः। उपेन्द्रदत्तकः। प्राचां ग्रहणं पूजार्थम्। वेति ह्यनुवर्तते। 'जातिनाम्नः कन्' ॥५।३।८१॥ बह्वच इति नानुवर्तते। जातिशब्दो यो व्याघ्रादिर्मनुष्यनाम तस्मादनुकम्पायां नीतौ च कन्। व्याघ्रकः। सिंहकः। वानुवृत्तेर्यथादर्शनमन्येपि। व्याघ्रिलः। 'अजिनान्तस्योत्तरपदलोपश्च' ॥५।३।८२॥ मनुष्यनाम्नोजिनान्तात् कन् उत्तरपदलोपश्च पूर्वार्थे। व्याघ्राजिनो नामानुकम्पादिविशिष्टः व्याघ्रकः। सिंहकः। 'ठाजादावूर्ध्वं द्वितीयादचः' ॥५।३।८३॥ अत्र प्रकरणे यष्ठोजादिश्च तत्र परे प्रकृतेर्द्वितीयादच ऊर्ध्वं शब्दरूपं लुप्यते। ऊर्ध्वग्रहणं सर्वलोपार्थम्। तथैवोदाहृतम्। देविकः। देवियः। देविलः। ठग्रहणमुको द्वितीयत्वे सति द्वितीयादूर्ध्वस्य लोपे कृते 'इसुसुक्तान्तात् कः' इति कविध्यर्थम्। अनुकम्पितो वायुदत्तो वायुकः। पितृकः। क्वचिच्चतुर्थादच ऊर्ध्वस्य लोपो वा वाच्यः। अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः बृहस्पतियः। लोपः पूर्वपदस्याजादावनजादौ च वा

वक्तव्यः । देत्तियः । दत्तिलः । दत्तकः । विना प्रत्ययेन पूर्वोत्तरपदयोर्वा लोपो वाच्यः । देवदत्तः । दत्तः । देवः । उवर्णात्परस्येलस्यादेर्लोपो वाच्यः । अनुकम्पितो भानुदत्तो भानुलः । वसुलः । वायुलः । सन्ध्यक्षरस्य द्वितीयत्वे तदादेर्लोपो वाच्यः । कहोडः । कहिकः । एकाक्षरपूर्वपदानामुत्तरपदलोपो वाच्यः । अनुकम्पितो वागाशीर्वाचिकः । अत्रेक आशीःशब्दस्य उत्तरपदस्य लोपे कृते तस्यानजादेशत्वात् 'अचः परस्मिन्—' इति स्थानिवद्भावो नास्तीति भसंज्ञा ततः पदनिबन्धनं कुत्वं न । कथमनुकम्पितः षडङ्गुलिः षडिकः । उच्यते । अत्र 'ठाजादावूर्ध्वम्—' इति द्वितीयादच ऊर्ध्वस्य लोपो वाच्यः । तत्र कृते 'यस्येति च' इत्यलोपः । ठस्य पूर्वविधौ स्थानिवत्त्वाद् भत्वं नास्तीत्यन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाज्जश्त्वम् । 'शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्' ॥५।३।८४॥ शेवलादीनां मनुष्यनाम्नां ठाजादौ परे तृतीयादच ऊर्ध्वं लुप्यते । पूर्वस्यापवादः । अनुकम्पितः शेवलदत्तः शेवलिकः । शेवलियः । शेवलिलः । सुपरिकः । शालिकः । वरुणिकः । अर्यमिकः । एषामकृतसंधीनामयं लोप इष्यते । शेवलेन्द्रदत्तः शेवलिकः । सुपर्याशीर्दत्तः । सुपरिकः । शेवलयिकः । सुपर्यिक इति मा भूत् । 'अल्पे' ॥५।३।८५॥ अल्पविवक्षायां यथाविहितं काकजादिः । अल्पं तैलं तैलकम् । सर्वकम् । उच्चकैः । पचतकि । 'ह्रस्वे' ॥५।३।८६॥ यथाविहितम् । ह्रस्वो वृक्षो वृक्षकः । 'संज्ञायां कन्' ॥५।३।८७॥ ह्रस्वत्वहेतुकायां संज्ञायां कन् । वंशकः । वेणुकः । नदकः ।

१. Before it—दत्तिकः Dc3, Dc4. २. Dropped Dc2. ३. Dropped Dc2.

कुटीशमीशुण्डाभ्यो रः ॥५।३।८८॥

एभ्यो रः स्यात् ह्रस्वेऽर्थे[1] ॥ ह्रस्वा कुटी कुटीरः । शमीरः । शुण्डीरः । पुंस्त्वं लोकात् ।

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥३।५।९१॥

एभ्यस्तनुत्वे[2] ष्टरच् स्यात् ॥ वत्सतरः । वत्सतरी । उक्षतरी[3] । इत्यादि ।

किंयत्तद्भ्यो[4] निर्धारणे द्वयोरेकस्य डतरच् ॥५।३।९२॥

द्वयोर्मध्ये एकस्य पृथक्करणे किंयत्तद्भ्यो डतरच्

कुटी । कस्यापवादः । स्पष्टत्वात् त्यक्ते द्वे । 'कुत्वा डुपच्' ॥५।३।८९॥ कुतूशब्दाद्ध्रस्वत्वे डुपच् । ह्रस्वा कुतूः कुतुपः । चर्ममयं स्नेहपात्रम् । 'कासूगोणीभ्यां ष्टरच्' ॥५।३।९०॥ ह्रस्वत्वे । कस्यापवादः । षो ङीषर्थः । ह्रस्वा कासूः कासूतरी । ह्रस्वा गोणी गोणीतरी । कासूरिति शक्तिरायुधविशेषः । गोण्यावपनम् ।

वत्स । **एभ्य इति** । यस्य हि गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तत्तनुत्वौपाधिकेऽर्थे वर्तमानेभ्यो वत्सादिभ्यः स्वार्थे ष्टरच् स्यादित्यर्थः । प्रथमवया वत्सस्तस्य तनुत्वं द्वितीयवयःप्राप्तिः[5] । तत्र वत्सतर इति स्यात् । तरुण उक्षा । तस्य तनुत्वं तृतीयवयःप्राप्तिः । तत्र उक्षतरः । अश्वेनाश्वायामुत्पन्नोऽश्वस्तस्य तनुत्वमन्यपितृकता । तत्र अश्वतरः । अनड्वान् ऋषभः । तस्य तनुत्वं भारोद्वहने मन्दशक्तिता । तत्र ऋषभतरः ।

किंयत् । **निर्धारणे** इति विषयनिर्देशः । **द्वयोरिति** समुदायान्निर्धारणविभक्तिः । **एकस्येति** निर्धार्यमाणनिर्देशः । तत्र निर्धारणं नामैकदेशस्य[6] समुदायाज्जात्या क्रियया गुणेन संज्ञया वा पृथक्-

---

१. ह्रस्वार्थे D_2. २. Dropped D_1. ३. उक्षतरः D_1, D_3, D_4; B_2, उक्षतरः । अश्वतरः । ऋषभतरः । D_5. ४. कियत्तदो नि° P, C, D_1. ५. °वयोवाप्तिः Dc_3. ६. नामैकस्य Dc_3.

स्यात् स्वार्थे ॥ अनयोः कतरो वैष्णवः । यतरः । ततरः महाविभाषया विकल्पः । अनयोः कः पटुः ।

वा बहूनां जातिपरिप्रश्ने डतमच् ॥५।३।९३॥

बहूनामेकस्य[2] निर्धारणे जातिपरिप्रश्नार्थेभ्यः[3] किंयत्तद्भ्यो वा डतमच् स्यात्[4] । पक्षे अकजपि । परिप्रश्न इति[5] किमो विशेषणम् । एषां कतमः को वा विप्रः । यतमः[6] । यकः । ततमः । सकः । महाविकल्पात् को भवतां विप्रः यः सः ।

किमोऽस्मिन्नर्थे डतरजपि ॥[*] भवतां कतरो विप्रः ।

एकाच्च प्राचाम् ॥५।३।९४॥

एकशब्दाच्चोक्तेऽर्थे डतरडतमौ[7] स्तः । एतयोरेकतरो विप्रः । एषामेकतमः । पक्षे । एककः । एकः ॥ अन्यशब्दात् डतमच्[8] इति

करणम् । तत्र निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्यय इत्येतत् सर्वं चेतसि कृत्वाह । **द्वयोर्मध्ये** इत्यादि । **महाविभाषयेति** । 'समर्थानां प्रथमाद्वा' इत्यत्र वेत्यनया ।

वा बहूनां । **पक्षेकजपीति** वावचनादित्यर्थः । **परिप्रश्न** इत्यादि । न यत्तदोरसंभवात् । जातिग्रहणं तु सर्वैरेव संबध्यत इति भावः ।

एकात् । **उक्तेर्थे** इति । द्वयोरेकस्य निर्धारणे डतरच् । बहूनामेकस्य निर्धारणे डतमच् । प्राग्ग्रहणं पूजार्थम् । विकल्पोनुवर्तत एव । जातिपरिप्रश्ने इति नानुवर्तते । सामान्येन विधानम् । **अन्यशब्दादिति** । एकाच्चेति चकारादन्यशब्दात् डतमच् इति

---

१. Dropped D_1. २. °मेकनिर्धारणे B_1. ३. जातिप्रश्नार्थेभ्यः. ४. Dropped D_4. ५. P, D_1, D_5, B_2 and C drop इति. ६. यतमः । ततमः । यकः । सकः B_1. ७ डतरच् डतमच् इत्येतौ B_1. ८. तम C; डतम D_1; डतरडतमौ D_2.

केचित् । अन्यतमः[1] । सर्वशब्देभ्यः स्वार्थे केन्[2] इति केचित् । बहुतरकम् ।

केणः ॥७।४।१३॥

के परेणो ह्रस्वः स्यात् ॥ कन्यका[3] । नदिका[4] । अणः किम् । नौका ॥ तीयादीकक् स्वार्थे वाच्यः ॥* द्वितीयीकः । तार्तीयीकः[5] ।

केचिद् वोपदेवपण्डितादयो वदन्ति । डतमजिति डतरचोऽप्युपलक्षणम् । तथा च **वोपदेवपण्डितैर्विचारचिन्तामणावुक्तम्** । 'एवमेकतरोऽप्येकतमोऽप्यन्यतरोऽपि च । चकारादन्यतमवत् पक्षेकजपि बाधनात्' ॥ इति । **सर्वशब्देभ्य** इति । **केचिदिति** । **काशिकाकारादयः** । तथा च **काशिकाकारेण** 'न सामिवचने' इत्यत्रोक्तम् । 'एतदेव ज्ञापकं भवति स्वार्थे कन्निति । तत्र यदेतदुच्यते । एवं हि[6] सूत्रमभिन्नतरकं भवति । एवं तर्हि बहुतरकं व्याप्यत इत्येवमादि[7] तदुपपन्नं भवति' इति ।

केणः । **केणः** इति । ह्रस्वे तद्धितग्रहणं कर्तव्यं कृति मा भूदिति राकेति । अथवा उणादयोऽव्युत्पन्नानि प्रातिपदिकानीत्येव सिद्धम् । स्पष्टत्वात् त्यक्तमेकम् । 'अवक्षेपणे कन्' ॥५।३।९५॥ यन्निमित्तोऽवक्षेपस्तस्मादवक्षेपणोपाधिकेऽर्थे वर्तमानात् कन् स्यात् । परस्य कुत्सार्थं यदुपादीयते तदिहोदाहरणम् । व्याकरणकेन गर्वितोऽसि । यः स्वयं कुत्सितस्तत्र 'कुत्सिते' इति कः । चैत्रक इति ।

इति प्रागिवीयाः । कस्य पूर्णोऽवधिः ।

---

१. Before it—अन्यतरः D_2, D_5. २. क C. ३. Before it—कन्यैव D_3, D_5, B_1. ४. Dropped D_1, D_4, D_5, B_2. ५. Dropped D_1, D_3, D_5, B_2. ६. Dropped Bc_1, Dc_3. ७. °मादिषु Dc_3.

स्पष्टत्वात्त्यक्तानि चतुस्त्रिंशत् सूत्राणि व्याख्यायन्ते । 'इवे प्रतिकृतौ' ॥५।३।९६॥ प्रतिकृतिविषये सादृश्येऽर्थे वर्तमानात् प्रातिपदिकात् कन् । अश्व इवायमश्वस्य प्रतिकृतिरश्वकः । प्रतिकृताविति किम् । गौरिवायं गवयः । 'संज्ञायां च' ॥५।३।९७॥ इवार्थे कन् । अश्वकः । अश्वसदृशस्य नाम । 'लुम्मनुष्ये' ॥५।३।९८॥ मनुष्येऽर्थे संज्ञायां कनो लुप् । चञ्चेव चञ्चा मनुष्यः । वर्धिका । दासी । खरकुटी । मनुष्ये किम् । उष्ट्रकः । 'जीविकार्थे चापण्ये' ॥५।३।९९॥ जीविकार्थं यदपण्यं तस्मिन् वाच्ये कनो लुप् । वासुदेवः । शिवः । स्कन्दः । विष्णुः । देवलकादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते । अपण्ये किम् । हस्तिकान् विक्रीणीते । देवपथादेरेवायं प्रपञ्चः । 'देवपथादिभ्यश्च' ॥५।३।१००॥ इवे प्रतिकृतौ कनो लुप् संज्ञायां विहितस्य च । देवपथः । वारिपथः ।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च ।'
इवे प्रतिकृतौ लोपः कनो देवपथादिषु ॥'

अर्चासु । शिवः । विष्णुः । चित्रकर्मणि । अर्जुनः । दुर्योधनः । ध्वजेषु । कपिः । गरुडः । देवपथ । वारिपथ । अजपथ । राजपथ । शतपथ । शङ्कुपथ । उष्ट्रग्रीव । वामरज्जु । हस्त । इन्द्र । पुष्प । मत्स्य । देवपथादिराकृतिगणः । 'वस्तेर्ढञ्' ॥५।३।१०१॥ इवे प्रतिकृतौ च । वस्तिरिव वास्तेयः । वास्तेयी । 'शिलाया ढः' ॥५।३।१०२॥ शिलेव शिलेयं दधि । योगविभागतो ढञ् च । शैलेयम् । 'शाखादिभ्यो यत्' ॥५।३।१०३॥ शाखेव शाख्यः । शाखा । मुख । जघन । शृङ्ग । मेघ । चरण । स्कन्ध । उरस् । अग्र । शरण । 'द्रव्यं च भव्ये' ॥५।३।१०४॥ भव्योऽभिप्रेतार्थानां पात्रभूतस्तत्रार्थे वर्तमानात्

---

१. °सदृशनामकः । Dc3. २. खुर° Dc4. ३. After it—देवलः । Dc3. ४. एव उच्यन्ते Dc3. ५. देवपथः । वारिपथः &c. in the Nom. Sing. Dc3, Dc4. ६. वाम । रज्जु Bc1. ७. Before it–शिरस् Bc1, Dc3, Dc4.

द्रुशब्दात् यदन्तो निपातः। द्रुरिवायं द्रव्यम्। राजपुत्रः। द्रव्यं मैत्रः। 'कुशाग्राच्छः' ॥५।३।१०५॥ कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः। 'समासाच्च तद्विषयात्' ॥५।३।१०६॥ इवार्थविषयात् समासपदादन्यस्मिन्निवार्थे छः। काकतालीयम्। अतर्कितोपनतं चित्रीकरणमुच्यते। तथा हि। काकस्यागमनं यादृच्छिकं तालस्य पतनं च। तेन च तालेन पतता काकस्य वधः कृतः। एवमेव देवदत्तस्य गमनं दस्यूनां चोपनिपातस्तैस्तस्य वधः। तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृश इत्युपमार्थः समासार्थः। पश्चाद्देवदत्तस्य वधः काकवधसदृश इति। द्वितीय उपमार्थः।

'इवार्थे काकतालाद्याः समासाः स्युरमी इति।
ज्ञायते तेन योगेन प्रत्ययश्च विधीयते'॥

'शर्करादिभ्योण्' ॥५।३।१०७॥ इवार्थे। शार्करम्। शर्करा। कपालिका। पुण्डरीक। शतपत्र। गोलोमन्। गोपुच्छ। नराची। नकुल। सिकता। 'अङ्गुल्यादिभ्यष्ठक्' ॥५।३।१०८॥ अङ्गुलीव आङ्गुलीकः। अङ्गुली। भरुज। बभ्रु। मण्डल। मण्डर। शष्कुल। हरि। कपि। रुह। खल। उदश्वित्। गोणी। तरस्। कुलिश। 'एकशालायाष्ठजन्यतरस्याम्' ॥५।३।१०९॥ एकशालेव एकशालिकः। पक्षे ठक्। ऐकशालिकः। 'कर्कलोहितादीकक्' ॥५।३।११०॥ कर्कः शुक्लोश्वः स इव कार्कीकः। उपाधिना लोहित इव लौहितीकः। स्फाटिकः। 'पूगाञ्ञ्योग्रामणीपूर्वात्' ॥५।३।११२॥ इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयोर्थकामप्रधानाः सङ्घाः पूगाः। अग्रामणीपूर्वादिति पूर्वशब्दोत्रावयववाची। ग्रामणीः पूर्वोवयवो यस्य स ग्रामणीपूर्वः। न ग्रामणी पूर्वोग्रामणीपूर्वः। अग्रामण्यवयवात् पूगवाचिनो ञ्यः स्वार्थे। लौहध्वज्यः। लौहध्वज्यौ। लौहध्वजाः।

१. यजन्तो Bc1, Dc3, Dc4. २. मैत्रम् Bc1, Dc3. ३. Before it—स प्रत्ययार्थः Bc1, Dc4. ४. ज्ञाप्यते Dc3. ५. नाराच। Bc1, Dc3, Dc4. ६. तरु। Bc1, Dc4. ७. Dropped Dc2; स्फुटिकः Bc1. ८. ग्रामणी° Bc1, Dc4.

शैब्यः। शैब्यौ। शिबयः। 'ञ्यादयस्तद्राजाः' इति तद्राजत्वात् बहुषु लुक्। अग्रामणीपूर्वात् किम्। देवदत्तो ग्रामणीरेषां ते देवदत्तकाः। देवदत्तो ग्रामणीरवयव इति ञ्यो न। 'स एषां ग्रामणीः' इति कन्। 'आयुधजीविसङ्घाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्' ॥५।३।११४॥ वाहीकेषु ये आयुधजीविसङ्घास्तद्वाचिनः प्रातिपदिकात् ब्राह्मणराजन्यवर्जितात् स्वार्थे ञ्यट् स्यात्। ब्राह्मणे[1] तद्विशेषग्रहः। राजन्ये तु स्वरूपमेव। कौण्डीबृस्यः। कौण्डीबृस्यौ। कुण्डीबृसाः। टो ङीबर्थः। तेन 'अस्त्रियाम्' इति नानुवर्तते। कौण्डीबृसी। आयुधजीवीति किम्। मल्लाः। शयण्डाः[2]। सङ्घात् किम्। सम्राट्। वाहीकेषु किम्। शबराः। अब्राह्मण्यराजन्यात् किम्। सालङ्कायना[3] राजन्याः। 'वृकाट्टेण्यण्' ॥५।३।११५॥ आयुधजीविसङ्घवाचिनो वृकात् स्वार्थे टेण्यण्। टणौ ङीब्वृद्ध्यर्थौ। वार्केण्यः। वृकाः। आयुधजीविसङ्घविशेषणाज्जातिशब्दान्न।

कामक्रोधौ मनुष्याणां खादितारौ वृकाविव।

'दामन्यादित्रिगर्तषष्ठाच्छः' ॥५।३।११६॥ दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्य आयुधजीविसङ्घतादिभ्यः स्वार्थे छः। दामनीयः। दामनीयौ। दामनयः। दामनि। औलपि। वैजवापि। औदकि। अच्युतन्ति[4]। काकदन्तकि[5]। शात्रुन्तपि[6]। सार्वसेनि। बिन्दु। तुलभ[7] मौञ्जायन। सावित्रीपुत्र। त्रिगर्तषष्ठेभ्यः खल्वपि। कौण्डोपरथीयः। कौण्डोपरथीयौ। कौण्डोपरथाः।

'आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
कौष्टकिर्जालमानिश्च ब्राह्मगुप्तोथ[8] जानकिः॥' इति।

'पर्श्वादियौधेयादिभ्यामणञौ' ॥५।३।११७॥ आयुधजीविसङ्घवाचिभ्यः पर्श्वादिभ्योऽण्। पार्शवः। पार्शवौ। पर्शवः। पर्शु। असुर। रक्षस्[9]।

१. ब्राह्मणेनि त° Dc2. २. सयण्डाः Bc1, Dc4. ३. शाल° Bc1, Dc4. ४. अच्युतकि Bc1, Dc3, Dc4. ५. कासदकि Bc1, Dc3, Dc4. ६. शात्रुन्तपि। सर्वसेनि। Bc1, Dc3, Dc4. ७. सुलभ। कौञ्जायन Dc3, Dc4. ८. ब्रह्म° Dc4. ९. राक्षस Bc1, Dc3, Dc4.

बाह्लीक । वयस्[1] । वसु[2] । मरुत् । सात्वत्[3] । दशार्ह[4] । पिशाच । अशनि । कार्षापण । यौधेयादिभ्योञ् । यौधेयः । यौधेयादिः कथितः । 'अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्' ॥५।३।११८॥ आयुधजीविसङ्घादिति निवृत्तम् । अभिजिदादिभ्योणन्तेभ्यो यञ् स्यात् । अभिजितोपत्यमण् । ततो यञ् । आभिजित्यः । वैदभृत्यः । शालावत्यः । शैखावत्यः । शामीवत्यः । और्णावत्यः । श्रौमत्यः । गोत्रप्रत्ययस्याणो ग्रहणमिष्यते । तेन अभिजितो मुहूर्तः इत्यत्र न । 'पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' ॥५।४।१॥ पादशब्दान्तस्य शतशब्दान्तस्य च संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् स्यात् लोपश्चान्त्यस्य[5] । 'यस्येति च' इति सिद्धे यल्लोपस्य वचनं पुनः । तेनास्य स्थानिवद्भावाभावः । पादस्य पन्न । द्वौ द्वौ पादौ ददाति द्विपादिकां ददाति । द्विशतिकाम् । 'प्रत्ययस्थात्'—इतीत्वे 'तद्धितार्थ' इति समासः । स्त्रीत्वं स्वभावात् । संख्यादेः किम् । पादं पादं ददाति । वीप्सायां किम् । द्वौ पादौ ददाति । पादशतग्रहणमुपलक्षणार्थम् । अन्यत्रापि दर्शनात् । द्विमोदकिकां[6] ददाति । 'दण्डव्यवसर्गयोश्च' ॥५।४।२॥ दण्डदानयोर्गम्यमानयोः पादशतान्तस्य संख्यादेर्वुन् स्यात् अन्तलोपश्च । अवीप्सार्थ आरम्भः । द्वौ पादौ द्विपदिकां दण्डितः । त्रिशतिकाम् । द्विपदिकां व्यवसृजति । द्विशतिकां ददातीत्यर्थः । 'स्थूलादिभ्यः प्रकारवचने कन्' ॥५।४।३॥ स्थूलप्रकारः स्थूलकः । स्थूल । अणु । माष । इषु । कृष्ण तिलेषु । कृष्णकास्तिलाः । यव व्रीहिषु । यवको व्रीहिः । पाद्यकालावदातसुरायाम् । पाद्यिका सुरा । कालिका सुरा । अवदातिका सुरा । गोमूत्र आच्छादने । गोमूत्र-प्रकारमाच्छादनं गोमूत्रकम् । सुराहौ । सुरावर्णोहिः सुरकः ।

१. सवन Bc1, Dc3 ; वसन Dc4. २. Dropped Dc3, Dc4. ३. सत्वत् Bc1, Dc3, Dc4. ४. दाशार्ह Dc3. ५. °श्चान्तस्य Dc1. ६. द्विमोदिकां Dc3.

जीर्णशालिषु । जीर्णप्रकारा जीर्णकाः शालयः । पत्रमूल । समस्तो व्यस्तश्च । पत्रमूलकम् । पत्रकम् । मूलकम् । कुमारीपुत्र । कुमारीश्वशुर । मणि । चञ्चद्बृहतोरुपसंख्यानम् । चञ्चत्कः । बृहत्कः । 'अनत्यन्तगतौ क्तात्' ॥५।४।४॥ क्तान्तात् कन् । नात्यन्तं भिन्नं भिन्नकम् । अनत्यन्तगतौ किम् । अत्यन्तं भिन्नम् । 'न सामिवचने' ॥५।४।५॥ इह क्तान्तान्न कन् । सामिकृतम् । अर्धभुक्तम् । स्वार्थिकस्य कनो निषेधः । अत एव ज्ञापकात् कन् । 'बृहत्या आच्छादने' ॥५।४।६॥ स्वार्थे कन् । 'केणः' इति ह्रस्वः । बृहतिका पटी । अन्यत्र बृहती छन्दः । 'अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः' ॥५।४।७॥ एभ्यः स्वार्थे खः । नास्मिन् षडक्षीणि सन्ति द्वाभ्यामेवालोचितोषडक्षीणो मन्त्रः । आशिता गावोस्मिन् आशितंगवीनमरण्यम् । एतौ बहुव्रीही । निपातनान्मुम् । अलंकर्मणे अलंकर्मीणः । अलं पुरुषायालंपुरुषीणः । पर्यादय इति तत्पुरुषः । गुर्वधीनः । अधिशब्दः शौण्डादिषु पठ्यते । नित्यश्चायं प्रत्ययः । गुर्वधीन इति उत्तरत्र विभाषाग्रहात् अन्येपि स्वार्थिका नित्याः स्मर्यन्ते । तरबादयः प्राक् कनः । ञ्यादयः प्राग्वुनः । आमादयः प्राङ् मयटः । बृहतीजात्यन्ताः समासान्ताश्चेति । 'विभाषाञ्चेरदिक्स्त्रियाम्' ॥५।४।८॥ अञ्चत्यन्ताच्छब्दाददिक्स्त्रियां वर्तमानात् स्वार्थे खो वा । प्राचीनम् । प्राक् । प्रतीचीनम् । प्रत्यक् । अदिक्स्त्रियां किम् । प्राची दिक् । दिग्ग्रहः किम् । प्राचीनाः इति । स्त्री किम् । प्राक् । प्राक्शब्दोत्र दिशि वर्तते न तु स्त्रियामव्ययत्वात् । खान्तस्य तु क्लीबत्वं लोकात् । 'जात्यन्ताच्छ बन्धुनि' ॥५।४।९॥ बध्यतेस्मिन् जातिरिति बन्धुशब्देन द्रव्यमुच्यते । जात्यन्ताद्बन्धुनि वर्तमानात् स्वार्थे छः । ब्राह्मणजातीयः । शूद्रजातीयः । बन्धुनि किम् । वन्द्या ब्राह्मणजातिः । 'स्थानान्ताद्विभाषा सस्थानेनेति चेत्' ॥५।४।१०॥ स्थानान्ताद्वा छः स्यात् । सस्थानेन चेत् स्थानान्तमर्थवत्

प्रज्ञादिभ्यश्च ॥५।४।३८॥

एभ्यः स्वार्थे[1] णः स्यात् ॥ प्रज्ञ एव प्राज्ञः । प्राज्ञी । प्रज्ञावती तु प्राज्ञा । [2]चौरः ॥[3]

स्यात् । सस्थान इति तुल्य उच्यते । [4]समानस्थानअच्छब्दः संबन्धे । समानं स्थानं प्राप्तिर्यस्येति स्थानशब्दः प्राप्तिपर्यायः । करणे तृतीया । सस्थानेन कृत्वा जाड्यमस्येति कृत्वा । पित्रा तुल्यः । पितृस्थानीयः । पितृस्थानः । मातृस्थानीयः । मातृस्थानः । सस्थानेनेति किम् । गोस्थानम् । 'अनुगादिनष्ठक्' ॥५।४।१३॥ अनुगदतीति अनुगादी । अनुगादिशब्दात् स्वार्थे ठक् स्यात् । आनुगादिकः । 'विसारिणो मत्स्ये' ॥५।४।१६॥ विसरतीति विसारी । विसारिणः स्वार्थेण् मत्स्ये वाच्ये । वैसारिणो मत्स्यः । मत्स्ये किम् । विसारी देवदत्तः ।

प्रज्ञा । प्रज्ञ । वणिज् । उष्णिज् । प्रत्यक्ष । विद्वन् । षोडन् । विद्यमान । श्रोत्र शरीरे । श्रौत्रं शरीरम् । [5]अन्यत् श्रोत्रम् । जुह्वत् । कृष्णमृगे । जौह्वतः कृष्णमृग इत्येके । अन्ये कार्ष्णो मृग इत्येव जौह्वते इत्यविशेषेणाहुः । चिकीर्षत् । शत्रु । चोर । चक्षुस् । वसु । मरुत् । क्रुञ्च । सत्वत् । दशार्ह । वयस् । असुर । पिशाच । रक्षस् । अशनि । कार्षापण । [6]देवता । बन्धु । आकृतिगणोयम् ।

---

१. स्वार्थेण् D3, D4. २. Before it—चोर एव B1, B2. ३. After it—चौरी B2, C. ४. समानं स्थानमस्येति कृत्वा । पित्रा तुल्यः । &c. Dc3. ५. अन्यत्र Bc3. ६. देवदत्त Dc4.

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥५।४।१७॥

क्रियापौनःपुन्यगणनार्थायाः संख्यायाः कृत्वसुच् स्यात् ॥ पञ्चकृत्वः । [1]कतिकृत्वो भुङ्क्ते । [2]कतिवारानित्यर्थः ॥

द्वित्रिचतुर्भ्यः सुच् ॥५।४।१८॥

एभ्यः सुच् स्यादुक्तेऽर्थे ॥ कृत्वसुचोपवादः । द्विः । त्रिः । चतुः [3]पठति ।

संख्यायाः । **क्रियापौनःपुन्यगणनार्थाया** इति । पौनः-पुन्येनात्र साहचर्यादेककर्तृकाणां तुल्यजातीयानां क्रियाणां क्रिययोर्वा जन्मोपलक्ष्यते । तत्संख्यानार्थायाः संख्याया इत्यर्थः । संख्यायाः किम् । भूरीन् वारान् भुङ्क्ते । अभ्यावृत्तिग्रहात् क्रियामात्र[4]ग्रहणे न । दश पाकाः । अस्त्यत्र क्रियागणनं नत्वभ्यावृत्तिगणनम् । अभ्यावृत्तिर्हि भिन्नकालानां क्रियाणां स्यात् । गणनग्रहः किम् । यावता संख्या गणनात्मिकैव । अक्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः संख्येयवचनेभ्यः एव स्यात् प्रत्ययो न संख्यानमात्रवृत्तिभ्यः । गणनग्रहणात् सर्वत्र सिध्यति । शतं वारान् वाराणां वा शतं भुङ्क्ते शतकृत्व इति । क्रियाग्रहणं किम् । यतोभ्यावृत्तिः क्रियाया एव स्यान्न गुणद्रव्ययोः । सत्यम् । एकस्य सकृच्चेत्येतदर्थम् । तत्र हि क्रियैव गण्यते नाभ्यावृत्तिः ।

द्वित्रि । चकारः प्रकृतेरन्तोदात्तत्वार्थः । प्रत्ययस्य त्वनच्कत्वान्न तस्य ।

---

१. Before it—दशकृत्वः D_2. २. पञ्चवारानित्यर्थः B_1, P, C. ३. पठति dropped D_2, B_1, P, C. ४. °गणने Dc_3, Dc_4.

एकस्य सकृच्च ॥५।४।१९॥

[1]एकशब्दस्य सकृदादेशः [2]स्यात् सुच्प्रत्ययश्च[3] ॥ 'हल्ङ्याब्भ्यः'—इति सुलोपः । सकृद् भुङ्क्ते ।[4]

एकस्य । अभ्यावृत्तिस्त्विह न संभवतीति क्रियागणन एव प्रत्ययः । अत्रापि प्रकृतेरन्तोदात्तार्थश्[5]चकारः । एकपाक इत्यत्र न भवत्यनभिधानात् । [6]स्पष्टत्वात् त्यक्तान्येकोनविंशतिः । 'विभाषा बहोर्धाविप्रकृष्टकाले' ॥५।४।२०॥ बहुशब्दाद् धाकृत्वसुच्च क्रियाभ्यावृत्तिगणने । दिवसस्य बहुधा भुङ्क्ते बहुकृत्वो वा । अविप्रकृष्टकाले किम् । मासस्य बहुकृत्वो भुङ्क्ते । 'समूहवच्च बहुषु' ॥५।४।२२॥ तत्प्रकृतमित्यर्थे समूहविहिता अपि प्रत्ययाः स्युः [7]मयड्वा । मोदकाः प्रकृताः । [8]मौदकिको यज्ञः । मोदकमयो वा । 'अनन्तावसथेतिहभेषजाञ्ञ्यः ॥५।४।२३॥ स्वार्थे । आनन्त्यम् । आवसथ्यम् । ऐतिह्यम् । भैषज्यम् । स्वार्थिकत्वं विभाषा च सर्वत्रानुवर्तते । अनन्तम् । आवसथः । इतिह । भेषजम् । 'देवतान्तात्तादर्थ्ये यत्' ॥५।४।२४॥ अग्निदेवतायै इदमग्निदेवत्यम् । वायुदेवत्यम् । 'पादार्घाभ्यां च' ॥५।४।२५॥ आभ्यां तादर्थ्ये यत् । पाद्यम् । अर्घ्यम् । समादावतुः । समावद्वसति । नवस्य नूआदेशः त्नप्तनखाश्च प्रत्ययाः । नूत्नम् । नूतनम् । नवीनम् । [9]नश्च पुराणे प्रात् । [10]प्रत्नम् । प्रणम् । प्रतनम् । प्रीणम् । भागरूपनामभ्यो धेयश्च । भागधेयम् । रूपधेयम् । नामधेयम् । अग्नीध्रसाधारणादञ् । आग्नीध्रम् । साधारणम् । वानुवृत्तेः सर्वं वा । 'अतिथेर्ञ्यः' ॥५।४।२६॥ तादर्थ्ये । अतिथये इदमातिथ्यम् ।

---

१. अस्य C, D_1, D_4, B_2. २. Dropped B_1, D_1, D_4, D_5. ३. च dropped D_4. ४. After it—एकवारमित्यर्थः D_2, B_1. ५. श्वः । Dc_3, Dc_4. ६. Omitted Dc_2. ७. मयट् च । Dc_3, Dc_4. ८. Before it—मौदकिकम् । मौदकमयम् Bc_3 ; मौदकिकं मोदकमयमस्मिन् प्रकृतमित्यर्थे Dc_3, Dc_4 (°मित्यत्राप्यर्थे Dc_3). ९. प्रात् नश्च पुराणे Bc_1, Dc_3. १०. Dropped Dc_2.

'देवात्तल्' ॥५।४।२७॥ स्वार्थे । देव एव देवता । 'अवेः कः' ॥५।४।२८॥ अविरेवाविकः । 'यावादिभ्यः कन्' ॥५।४।२९॥ स्वार्थे । याव एव यावकः । याव । मणि । अस्थि । इन्द्र । पीत । स्तम्ब । ऋतावुष्णशीते । उष्णकः ऋतुः । शीतकः ऋतुः । पशौ लूनवियाते । लूनकः पशुः । वियातकः पशुः । अणु निपुणे । अणुको निपुणः । पुत्रकृत्रिमे । पुत्रकः कृत्रिमः । स्नातवेदसमाप्तौ । यस्य वेदः समाप्तः स स्नातकः । शून्य रिक्ते । शून्यकः तुच्छः । दान कुत्सिते । दानकं कुत्सितं दानम् । तनु सूत्रे । तनुकं सूत्रम् । ईयसश्च । श्रेयस्कः । ज्ञात । अज्ञात । कुमारी । क्रीडनानि च । कन्दुकः । 'लोहितान्मणौ' ॥५।४।३०॥ स्वार्थे कन् । लोहितको मणिः । 'वर्णे चानित्ये' ॥५।४।३१॥ लोहितान् कन् आगन्तुकत्वे । लोहितकः कोपेन । अनित्ये किम् । लोहितो गौः । लोहितात् लिङ्गाधिकारोक्तस्य 'वर्णादनुदात्तात्तोपधात्तो नः' इत्यस्य बाधनं वा वक्तव्यम् । लोहितिका लोहिनिका कोपेन । 'रक्ते' ॥५।४।३२॥ लाक्षादिना रक्ते यो लोहितशब्दस्ततः कन् । लोहितकः पटः । लोहितिका लोहिनिका शाटी । 'कालाच्च' ॥५।४।३३॥ अनित्ये वर्णे रक्ते च कन् । कालकं मुखम् । कालकः पटः । कालिका शाटी । 'विनयादिभ्यष्ठक्' ॥५।४।३४॥ स्वार्थे । वैनयिकः । विनय । समय । उपायाद्ध्रस्वत्वं च । औपयिकः । कथंचित् । अकस्मात् । उपचार । समाचार । व्यवहार । संप्रदान । समुत्कर्ष । समूह । विशेष । अत्यय । 'वाचो व्याहृतार्थायाम्' ॥५।४।३५॥ संदेशवाचि वर्तमानात् वाक्शब्दात् ठक् स्वार्थे । वाचिकं कथयति । 'तद्युक्तात्कर्मणोण्' ॥५।४।३६॥ वाचिकयुक्तात् कर्मशब्दादण् । वाचिकं श्रुत्वा तथैव यत् कर्म क्रियते तत् कार्मणमुच्यते । सान्नायानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाः ।

१. °द्ध्रस्वश्च । Bc_1, Dc_3.

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥५।४।४२॥

बह्वल्पपर्यायात् कारकवाचिनः शस् स्याद्वा । बहूनि बहुभिर्बहुभ्य इत्याद्यर्थे बहुशो ददाति । भूरिशः । अल्पशः । स्तोकशः । कारकात् किम् । बहूनां स्वामी ।

संख्यैकवचनाच्च वीप्सायाम् ॥५।४।४३॥

संख्याया एकवचनाच्च कारकात् वीप्सायां शस् स्याद्वा ॥ द्वौ द्वौ इत्याद्यर्थे द्विशो ददाति । त्रिशः । कतिशः । बहुशः । गणशः । तावच्छः । माषं माषं ददाति माषशः । प्रस्थशः ।

एतेणन्ताश्छन्दसि भाषायां चेष्यन्ते । 'ओषधेरजातौ' ॥५।४।३७॥ अण् स्वार्थे । औषधं पिबन्ति । अजातौ किम् । ओषधयः क्षेत्रे रूढाः । 'मृदस्तिकन्' ॥५।४।३९॥ स्वार्थे । मृदेव मृत्तिका । 'सस्नौ प्रशंसायाम्' ॥५।४।४०॥ प्रशंसोपाधिके स्वार्थे मृदः सस्नौ स्तः । मृत्सा । मृत्स्ना । प्रशस्ता मृत् ।

बह्वल्पार्थेति । विशेषानभिधानात् सर्वं कर्मादि कारकं गृह्यत इत्यभिप्रेत्याह । **बहूनि बहुभिर्बहुभ्य इत्याद्यर्थ** इति । अर्थग्रहात् पर्यायेभ्योपि स्यादित्यभिप्रेत्याह । **भूरिश इत्यादि** । बह्वल्पार्थात् किम् । गां ददाति । यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते । बहुशो ददात्याभ्युदयिके । अल्पशो ददात्यनिष्टे ।

संख्यैक । 'नित्यवीप्सयोः' । इति द्विर्वचने प्राप्ते शस् विधीयते । एकोर्थ उच्यते येन तदेकवचनम् । वृत्तौ यदेकार्थं तदेकवचनमिह गृह्यते । माषं माषं ददातीत्येकवचनस्योदाहरणम् । माषादयः शब्दा वृत्तावेकार्था भवन्ति ते परिमाणशब्दा इत्युक्तपरिमाणस्यैवार्थस्य

---

१. वा स्यात् B_1; स्यात् dropped D_3. २. भूरिशो ददाति D_3. ३. B_1 drops स्तोकशः. ४. संख्यावाचिनः B_1. ५. Dropped D_5. ६. B_1 drops स्यात् ; D_5 drops वा ; वा स्यात् D_3. ७. C omits it.

प्रतियोगे पञ्चम्यास्तसिः ॥५।४।४४॥

प्रतिना योगे पञ्चम्यन्तात् तसिर्वा ॥ प्रद्युम्नः कृष्णतः प्रति कृष्णाद्वा ॥ आदिमध्यान्तपृष्ठपार्श्वादेश्च ॥* आदित इत्यादि[1] ।

अपादाने चाहीयरुहोः ॥५।४।४५॥

अपादान[2]पञ्चम्यन्तात् तासिर्वा ॥[3] ग्रामत आयाति ग्रामाद्वा[4] । चौरतो बिभेति चौराद्वा[5] । अहीयरुहोः किम् । सार्थाद्धीयते[6] । पर्वतादवरोहति ॥

वाचकाः । अतोर्थाधिक्ये तेषां वृत्तिर्न संभवति । या तु वाक्ये तेषां प्रयोगेनेकप्रतीतिर्माषी माषा इति सा सविभक्तिकेभ्यो वृत्तौ च सा[7] विभक्तिर्नास्तीत्येकार्था एव स्युः । वृत्तिस्था[8] चैकार्थता प्रत्ययविधावाश्रीयते न वाक्यस्था । घटं घटं ददातीति घटादयः शब्दा वृत्तावेकार्था न भवन्ति किं तु वाक्ये एकवचनान्तत्वादेकार्थाः । वृत्तौ तु विभक्तिनिवृत्तौ सत्यां घटादय एकार्था न जातिशब्दत्वात् । जातिशब्दो हि जात्याधारभूतायामनेकस्यां व्यक्तौ वर्ततेतो नात्र शस् । यदा त्वर्थप्रकरणादिसहिता घटादयो जातिशब्दा वृत्तावप्येकार्थाः स्युस्तदा भवत्येव शस् घटशो ददातीति ।

प्रतियोगे । **प्रद्युम्नः कृष्णतः प्रतीति** । 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति कर्मप्रवचनीयत्वम् । 'प्रतिनिधिप्रतिदाने च' इति पञ्चमी । तसेरिकारो मुखसुखार्थः । **आदीत्यादि** । आकृतिगणोयम् ।

अपादाने । **ग्रामत आयातीति** । 'ध्रुवमपायेपादानम्' इत्यपादानत्वम् । **चौराद् बिभेतीति** । 'भीत्रार्थानां भयहेतुः' इति । हीयेति विकृतनिर्देशो जहातेः प्रतिपत्त्योर्थो न जिहीतेः । भूमेरुज्जिहीते

---

१. मध्यतः । अन्ततः । पृष्ठतः । पार्श्वतः । B₂ ; इत्यादि dropped D₄.
२. अपादाने D₂, D₄. ३. After it—न तु हीयरुहोः B₁, B₂, D₃, D₅.
४. ग्रामाद्वा dropped D₅. ५. चौराद्वा dropped D₅. ६. स्वार्थाद्धीयते P, C, B₁. ७. सार्वविभक्ति° Dc₁, Dc₂. ८. वृत्तितस्था° Bc₁.

अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः ॥५।४।५०॥

संपद्यतेर्यः कर्ता तद्वाचिनः कृभ्वस्तियोगे च्विः स्याद-तथाभूतस्य तथा भावे गम्ये ॥

भूमितः। कथं मन्त्रो हीनः स्वरतो वर्णतो वेति। नैषा पञ्चमी। किं तर्हि। तृतीया। स्वरेण वर्णेन वा हीन इति। 'हीयमानपापयोगाच्च' इति तसिः। स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयम्। 'अतिग्रहाव्यथन-क्षेपेष्वकर्तरि तृतीयायाः' ॥५।४।४६॥ अतिक्रम्य ग्रहोतिग्रहः। अव्यथनमचलनम्। क्षेपो निन्दा। एतद्विषये या तृतीया तदन्तात्तसिर्वा सा चेत् तृतीया कर्तरि न। वृत्तेनातिगृह्यते वृत्तितोतिगृह्यते। वृत्तेनान्यानतिक्रम्य गृह्यत इत्यर्थः। वृत्ततो न व्यथते। वृत्तेन न व्यथते। वृत्ततः क्षिप्तः। वृत्तेन क्षिप्तः। अकर्तरि किम्। देवदत्तेन क्षिप्तः। 'हीयमानपापयोगाच्च' ॥५।४।४७॥ आभ्यां योगादकर्तरि तृतीयायास्तसिर्वा। वृत्ततो वृत्तेन वा हीयते। वृत्ततो वृत्तेन वा पापः। 'क्षेपे पूर्वेण सिद्धत्वात् तत्त्वाख्यान इदं विदुः'। 'षष्ठ्या व्याश्रये' ॥५।४।४८॥ नानापक्षाश्रयो व्याश्रयः। देवा अर्जुनतोभवन्। आदित्याः कर्णतोभवन्। व्याश्रये किम्। वृक्षस्य शाखा। 'रोगाच्चापनयने' ॥५।४।४९॥ रोगवाचिनः षष्ठ्यन्तात् तसिः अपनयने गम्ये। प्रवाहिकातः कुरु। ज्वरतः कुरु। प्रतीकारमित्यर्थः। अपनयने किम्। प्रवाहिकायाः कोपं करोति।

अभूत। संपद्यते कर्ता संपद्यकर्ता। निर्देशस्य सौत्रत्वात् तिङा समासस्तिङ्लोपश्चेत्यभिप्रेत्याह। **संपद्यते यः कर्तेति**। यद्वस्तु येन रूपेणाभूतं तस्य तदाकारेण भवनमभूततद्भाव इत्यभिप्रेत्याह। **अतथाभूतस्य तथाभावे गम्ये** इति। प्रागप्रतिपन्नविकारस्योत्तरकालं विकारोपपत्तिरित्युक्तं भवति। तेन यत्र प्रकृतिर्न विवक्ष्यते

अस्य च्वौ ॥७।४।३२॥

अवर्णस्य ई स्याच्च्वौ । वेर्लोपः[1] । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति । ब्रह्मीभवति[2] । गङ्गीस्यात् ।

क्यच्व्योश्च ॥६।४।१५२॥

हलः परस्यापत्ययकारस्य लोपः स्यात् क्ये च्वौ च परे ॥ गार्गीभवति ।

च्वौ च ॥७।४।२६॥

च्वौ परेणो दीर्घः स्यात् ॥ शुचीभवति । पटूस्यात् । अव्ययस्य ईत्वदीर्घौ नेति केचित् । दिवास्यात्[3] । स्वस्तिस्यात् ।

तत्र प्रत्ययो न । यथा शुक्लं करोतीति विकारमात्रमत्र विवक्ष्यते न प्रकृतिरित्थभूततद्भावो न । कृभ्वस्तियोगे किम् । अशुक्लः शुक्लो जायते । च्वेरिकार उच्चारणार्थः । चः प्रकृतेरन्तोदात्तार्थः ।

अस्य । 'च्वौ च' इति दीर्घस्यायमपवादः ।

क्यच्व्योः । 'आपत्यस्य च' इति सिद्धे अतद्धितार्थोयमारम्भः । **गार्गीभवतीति** । अगार्ग्यो गार्ग्यो भवति । आपत्यस्येति किम् । साङ्काश्यीभूतः । हल इति किम् । कारिकेयस्यापत्यं कारिकेयिः । कारिकेयीभूतः ।

च्वौ च । **अव्ययस्येति** । **केचिदिति** । **वार्तिककारादयः** । तथोक्तं **भाष्ये** । अस्य च्वौ । अव्ययप्रतिषेधश्चोद्यते दोषाभूतमहः दिवाभूता रात्रिरित्येवमादिसिद्ध्यर्थमिति । तथा[4] **मुग्धबोधेऽप्युक्तम्** । 'च्विः कृभ्वस्त्स्वभूततद्भावेस्वावीर्घाविव्यस्य[5]' ।

---

१. च्वेर्लोपः B_1. २. ब्राह्मणीभवति B_2. ३. दिवा स्यात् dropped D_1. ४. तथा च Dc_4. ५. दीर्घो न व्ययस्येति । Dc_4 ; °स्वा दीर्घाव्व्यस्येति । Dc_3.

रीङ् ऋतः ॥७।४।२७॥

मात्रीकरोति । संपद्य कर्तरि किम् । अगृहे गृहे संपद्यते ।

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च॥५।४।५१॥

एषामन्तलोपः स्यात् च्विश्च ॥ अरूकरोति । मनी स्यात् ।

विभाषा साति कार्त्स्न्ये ॥५।४।५२॥

च्विविषये सातिप्रत्ययो वा स्यात् साकल्ये ॥

सात् पदाद्योः ॥८।३।१११॥

सातेः पदादेश्च सस्य षो न स्यात् ॥ दधि सिञ्चति । कृत्स्नं शस्त्रमग्निः संपद्यते अग्निसाद्भवति । अग्नीभवति । कार्त्स्न्ये किम् । एकत्र शुक्लीभवति पटः ।

मात्रीकरोतीति । अमाता माता संपद्यते तां करोति । **अगृहे गृहे इति** । अधिकरणमेतत् न संपद्य कर्ता ।

अरुः । सर्वविशेषणसंबन्धात् पूर्वेणैव च्विः सिद्धः । लोपार्थं वचनम् । **अरूकरोतीति** । अनरुः अरुः संपद्यते तं करोतीति । **मनीस्यादिति** । अमनो मनः संपद्यते । चक्षूकरोति । विचेतीकरोति । विरहीकरोति । निरजीकरोति ।

विभाषा । साकल्ये गम्यमाने इति शेषः । यदि प्रकृतिः कृत्स्ना विकारभावमापद्यते इत्यर्थः । विभाषाग्रहणं च्विप्रापकम् । विकल्पस्तु महाविभाषयैव सिद्धः ।

सात् । 'आदेशप्रत्यययोः' इति षत्वे प्राप्तेयं निषेधः ।

अभिविधौ संपदा च ॥५।४।५३॥

संपदा कृभ्वस्तिभिश्च योगे सातिः स्याद्व्याप्तौ । पक्षे च्विश्च स तु न संपदायोगे । [१]अग्निसात् संपद्यते । [२]जलसाद्भवति लवणं जलीभवति । एकद्रव्यस्य सर्वात्मनान्यथात्वं कार्त्स्न्यम् । सर्वस्यानेकद्रव्यस्यान्यथात्वमभिविधिः ।

[३]तदधीनवचने ॥५।४।५४॥

तदधीनत्वार्थे सातिः स्या[४]त् संपदा कृभ्वस्तिभिर्योगे ॥ राजसात् संपद्यते राजसात् करोति राजाधीनमित्यर्थः ।

अभिविधौ । अभिविधेः कार्त्स्न्यस्य चावश्यं विशेषेण भाव्यम् । अन्यथा सूत्रद्वयारम्भो निष्फलः स्यादित्याशङ्क्याह । एकद्रव्यस्ये-त्यादि । एकस्यापि द्रव्यस्य [५]सर्वात्मता विकाररूपापत्तिर्नैकदेशेन तत् कार्त्स्न्यमित्यर्थः । **सर्वस्येति** । एकदेशेन सर्वद्रव्यस्यान्यथात्वमभि-विधिरित्यर्थः । अयं च विशेषो विवक्षावशाल्लभ्यते । तत्राग्निसाद्भवती-त्यत्र शस्त्रस्य सर्वात्मनाग्निभावो विवक्षितः । जलसाद्भवति लवण-मित्यत्र तु लवणस्यैकदेशेन जलभावो विवक्षितः ।

तदधीन । अभूततद्भाव इति निवृत्तम् । अर्थान्तरोपादानात् । कृभ्वास्तियोगे संपदा चेति वर्तते । तदधीनं तदायत्तं तत्स्वामिकमित्यर्थः । स्वामिसामान्यं स्वसामान्यं च तदधीनशब्देन निर्दिश्यते । स्वामिविशेष-वाचिनः स्वे वाच्ये सातिः स्यादित्यर्थः ।

---

१. Before it—अग्नीसंपद्यते D_1. २. जलीभवति लवणम् for जलसाद्... जलीभवति B_1. ३. C has before it—अभूततद्भाव इति निवृत्तम्. ४. B_1 drops it. ५. सर्वात्मताकावि° Bc_1.

देये त्रा च ॥५।४।५५॥

तदधीने देये त्रा स्यात् कृादियोगे सातिश्च। विप्राधीनं देयं[1] करोति विप्रत्राकरोति। विप्रत्रा संपद्यते। पक्षे। विप्रसात् करोति।[2]

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥५।४।५६॥

एभ्यो द्वितीयार्थे सप्तम्यर्थे च बहुलं त्रा स्यात्॥ देवत्रा वन्दे रमे वा। इत्यादि[3]।

बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः।

देये। देयग्रहणं तदधीनविशेषणम्। विप्राधीनमित्यादि। विप्राय देयमिति विज्ञातं तद्यदा तत्समर्पणेन तदधीनं क्रियते तदा प्रत्ययः। देये किम्। राजसाद्भवति राष्ट्रम्।

देव। सातिरिति निवृत्तम्। त्राप्रत्ययोनुवर्तते। कृभ्वस्तियोग इति नात्र संबध्यते। सामान्येन विधानमित्यभिप्रेत्याह। एभ्य इत्यादि। इत्यादीत्यादिना मनुष्यत्रा वन्दे रमे वा। पुरुषत्रा। पुरुत्रा। मर्त्यत्रा। विभाषानुवृत्तेर्व्यर्थं बहुलग्रहणमित्याशङ्क्याह। बहुलोक्तेरिति।

---

१. करोति देयम् D4. २. After this—कृभ्वस्तिभिर्योगे इति नात्र संबध्यते। सामान्येन विधानात्। तेन। देवान् गच्छति। देवत्रा गच्छति। देवेषु वसति। देवत्रा वसति॥ B2, D5. ३. After it—कृभ्वस्तिभिर्योगे इति नात्र संबध्यते (संपद्यते D2)। सामान्येन (सामान्ये D4) विधानात्। तेन देवान् गच्छति। (After it देवेषु गच्छति D4) देवत्रा गच्छति। P, D2, D4, B1; (After देवत्रा गच्छति B1 has—देवान् वन्दते। देवेषु वसति। देवत्रा वन्दे देवत्रा वसति).

अभिविधौ संपदा च ॥५।४।५३॥

संपदा कृभ्वस्तिभिश्च योगे सातिः स्याद्व्याप्तौ । पक्षे च्विश्च स तु न संपदायोगे । अ[1]ग्निसात् संपद्यते । [2]जलसाद्भवति लवणं जलीभवति । एकद्रव्यस्य सर्वात्मनान्यथात्वं कार्त्स्न्यम् । सर्वस्यानेकद्रव्यस्यान्यथात्वमभिविधिः ।

[3]तदधीनवचने ॥५।४।५४॥

तदधीनत्वार्थे सातिः स्या[4]त् संपदा कृभ्वस्तिभिर्योगे ॥ राजसात् संपद्यते राजसात् करोति राजाधीनमित्यर्थः ।

अभिविधौ । अभिविधेः कार्त्स्न्यस्य चावश्यं विशेषेण भाव्यम् । अन्यथा सूत्रद्वयारम्भो निष्फलः स्यादित्याशङ्क्याह । एकद्रव्यस्येत्यादि । एकस्यापि द्रव्यस्य [5]सर्वात्मता विकाररूपापत्तिर्नैकदेशेन तत् कार्त्स्न्यमित्यर्थः । **सर्वस्येति** । एकदेशेन सर्वद्रव्यस्यान्यथात्वमभिविधिरित्यर्थः । अयं च विशेषो विवक्षावशाल्लभ्यते । तत्राग्निसाद्भवतीत्यत्र शस्त्रस्य सर्वात्मनाग्निभावो विवक्षितः । जलसाद्भवति लवणमित्यत्र तु लवणस्यैकदेशेन जलभावो विवक्षितः ।

तदधीन । अभूततद्भाव इति निवृत्तम् । अर्थान्तरोपादानात् । कृभ्वस्तियोगे संपदा चेति वर्तते । तदधीनं तदायत्तं तत्स्वामिकमित्यर्थः । स्वामिसामान्यं स्वसामान्यं च तदधीनशब्देन निर्दिश्यते । स्वामिविशेषवाचिनः स्वे वाच्ये सातिः स्यादित्यर्थः ।

---

१. Before it—अग्नीसंपद्यते D_1. २. जलीभवति लवणम् for जलसाद्... जलीभवति B_1. ३. C has before it—अभूततद्भाव इति निवृत्तम्. ४. B_1 drops it. ५. सर्वात्मताकवि° Bc_1.

देये त्रा च ॥५।४।५५॥

तदधीने देये त्रा स्यात् कादियोगे सातिश्च । विप्राधीनं देयं[1] करोति विप्रत्राकरोति । विप्रत्रा संपद्यते । पक्षे । विप्रसात् करोति ।[2]

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥५।४।५६॥

एभ्यो द्वितीयार्थे सप्तम्यर्थे च बहुलं त्रा स्यात् ॥ देवत्रा वन्दे रमे वा । इत्यादि[3] ।

बहुलोक्तेरन्यत्रापि । बहुत्रा जीवतो मनः ।

देये । देयग्रहणं तदधीनविशेषणम् । विप्राधीनमित्यादि । विप्राय देयमिति विज्ञातं तद्यदा तत्समर्पणेन तदधीनं क्रियते तदा प्रत्ययः । देये किम् । राजसाद्भवति राष्ट्रम् ।

देव । सातिरिति निवृत्तम् । त्राप्रत्ययोनुवर्तते । कृभ्वस्तियोग इति नात्र संबध्यते । सामान्येन विधानमित्यभिप्रेत्याह । एभ्य इत्यादि । इत्यादीत्यादिना मनुष्यत्रा वन्दे रमे वा । पुरुषत्रा । पुरुत्रा । मर्त्यत्रा । विभाषानुवृत्तेर्व्यर्थं बहुलग्रहणमित्याशङ्क्याह । बहुलोक्तेरिति ।

---

१. करोति देयम् D_4. २. After this—कृभ्वस्तिभिर्योगे इति नात्र संबध्यते । सामान्येन विधानात् । तेन । देवान् गच्छाति । देवत्रा गच्छाति । देवेषु वसाति । देवत्रा वसति ॥ B_2, D_5. ३. After it—कृभ्वस्तिभिर्योगे इति नात्र संबध्यते (संपद्यते D_2) । सामान्येन (सामान्ये D_4) विधानात् । तेन देवान् गच्छति । (After it देवेषु गच्छति D_4) देवत्रा गच्छाति । P, D_2, D_4, B_1; (After देवत्रा गच्छाति B_1 has—देवान् वन्दते । देवेषु वसति । देवत्रा वन्दे देवत्रा वसाति).

समयाच्च यापनायाम् ॥५।४।६०॥

अस्मात् कृञो योगे डाच्[1] यापनेर्थे ॥ समयाकरोति । कालक्षेपं करोतीत्यर्थः ।[2]

सपत्रनिष्पत्रादतिव्यथने ॥५।४।६१॥

आभ्यां कृञो योगे डाजति[4]व्यथनेर्थे । सपत्राकरोति मृगम् । सपत्रं शरं मृगकाये प्र[5]वेशयतीत्यर्थः । निष्पत्राकरोति । [6]शरमपरपार्श्वस्य निर्गमयतीत्यर्थः ।[7]

निष्कुलान्निष्कोषणे ॥५।४।६२॥

अस्माड्डाच् निष्कोषणेर्थे । निष्कुलाकरोति दाडिमम् ।

समयात् । कर्तव्यावसरप्राप्तिः समयः । तस्यातिक्रमणं यापना । यापनायां किम् । समयं करोति ।

सपत्र । अतिव्यथनमतिपीडनम् । सह पत्रेण वर्तते सपत्रः । निर्गतं पत्रमस्मान्निर्पत्रः । अतिव्यथने किम् । सपत्रं वृक्षं करोति जलसेचकः । निष्पत्रं वृक्षतलं करोति शोधकः ।

निष्कुलान् । निष्कोषणमन्तरवयवानां बहिर्निष्काशनम् । निष्कोषणे किम् । निष्कुलान् करोति शत्रून् ।

---

१. डाच् स्यात् D_1, D_4, B_2. २. After it—यापनायां किम् । समयं करोति । शपथमित्यर्थः B_2, D_2, C. ३. डाच् स्याद° D_1, D_4, D_5. ४. °व्यथने C. ५. निवेशयती° D_1. ६. शरस्यापरपार्श्वं निष्क्रामयतीत्यर्थः C. ७. After this C has—अतिव्यथने किम् । निष्पत्रं करोति । वृक्षतलं भूमिशोधकः. ८. °न्निष्पत्रः । Bc_3, Dc_4. ९. °सनम् । Dc_1.

सुखप्रियादानुलोम्ये ॥५।४।६३॥

आभ्यां डाच्[1] आनुकूल्येर्थे[2] ॥ सुखाकरोति प्रियाकरोति स्वामिनम्[3] । तच्चित्तमनुवर्तत इत्यर्थः ।

दुःखात् प्रातिलोम्ये ॥५।४।६४॥

दुःखाकरोति स्वामिनम् । तच्चित्तं पीडयतीत्यर्थः ।[4]

शूलात् पाके ॥५।४।६५॥

आभ्यात्[5] पाकेर्थे[6] डाच् ॥ शूलाकरोति[7] । शूलेन पचतीत्यर्थे ।[8]

सत्यादशपथे ॥५।४।६६॥

अनृतप्रातिपक्षात् सत्यात् डाच् स्यात्[9] ॥ सत्याकरोति भाण्डं वणिक् । सत्येन क्रेतव्यामिति तथ्यं करोतीत्यर्थः । शपथे[10] तु[11] सत्यं करोति विप्रः[12] ।

सुख । आनुलोम्यमनुकूलता । आराध्यचित्तानुवर्तनमिति यावत् । तच्च प्राणिधर्मः । आनुलोम्ये किम् । सुखं करोति तिक्तौषधपानम् ।

दुःखात् । प्रातिलोम्यं प्रतिकूलता । स्वाम्यादेश्चित्तपीडनम् । प्रातिलोम्ये किम् । दुःखं करोत्यशनम् ।

शूलात् । पाके किम् । शूलं करोति कदन्नम् ।

सत्यात् । सत्यशब्दोनृतप्रतिपक्षवचनः । क्वचित्तु शपथे वर्तते । सत्येन शापयेद्विप्रमिति । तस्यायं निषेध इत्यभिप्रेत्याह । अनृतप्रतिपक्षादिति ।

---

१. डाच् स्यात् D1, D4, D5, B2. २. आनुलोम्येर्थे C. ३. रिपुम् P, D4, B1. ४. After this C has—प्रातिलोम्ये किम् । दुःखं करोति रोगः. ५. पाके डाच् स्यात् P. ६. After it—स्यात् D1, D2, D3, D4, D5. ७. शूलाकरोति मांसम् C, B2. ८. C has after it—पाके किम् । शूलं करोति कदन्नम्. ९. C drops it. १०. Before it—सत्यात् किम् । मन्युं करोति B2. ११. Dropped D5. १२. प्रियः D1.

मद्रात् परिवापणे ॥५।४।६७॥

अस्मात् डाच् स्यात् कृञो योगे परिवापणेर्थे[1] ॥[2] मद्राकरोति कुमारम् ॥ भद्राच्च ॥* भद्राकरोति मङ्गल्यम्[3] । मुण्डनं करोतीत्यर्थः ।[4]

इति तद्धितप्रक्रिया ॥

मद्रात् । परिवापणं मुण्डनम् । मद्रशब्दोमङ्गलार्थः **भद्राच्चेति** । वक्तव्यमेतत् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे सुविशदमगमंस्तद्धितास्ते समाप्तिम् ॥

---

१. वपनेर्थे D_1, D_3, B_2. २. B_1 has before it—अस्माड्डाच् स्यात् कृञो योगे. ३. मङ्गलम् B_2. ४. After this C has—परिवापणे किम् भद्रं करोति साधुः.

नित्यवीप्सयोः ॥८।१।४॥

आभीक्ष्ण्ये वीप्सायां च पदस्य द्विरुक्तिः स्यात् ॥

अथ[1] द्विरुक्तप्रक्रियोच्यते ।

नित्य । अयं नित्यशब्दः कूटस्थेष्वविचालिषु भावेषु वर्तते । यथा नित्यमाकाशम् । नित्य आत्मेति[2] । आभीक्ष्ण्येऽपि । नित्यं प्रजल्पतेति । तत्राभीक्ष्ण्यवाचिनो नित्यशब्दस्येह ग्रहणमित्यभिप्रेत्याह । **आभीक्ष्ण्य** इति । आभीक्ष्ण्यं पुनः पुनः कृतिः । वीप्सा नाम नानाभूतार्थवाचिनां शब्दानां यानि वाच्यानि तेषां क्रियागुणद्रव्यैरेककालं प्रयोक्तुर्व्याप्तुमिच्छा । पदस्य द्विरुक्तिरित्येतत् 'सर्वस्य द्वे' इत्यस्माद-धिकरणसूत्राल्लभ्यते । तस्य चायमर्थः । इत उत्तरं यद्वक्ष्यामः प्राक् 'पदस्य' इति यावत् तत् 'सर्वस्य द्वे' इत्येतदधिकृतं ज्ञेयम् । तत्र सर्वस्य स्थाने द्वे रूपे स्त इत्येकः पक्षः। सर्वस्यैव द्विः प्रयोग इत्यन्यः । तत्र यदा सर्वस्य स्थाने द्वे स्त इति पक्षस्तदा ये शब्दतोऽर्थतश्चान्तरतमे द्वे रूपे एकस्य स्थाने स्तः । यदा द्विप्रयोगस्तदा स एव शब्दो द्विरावर्तते । ननु सर्वस्येति किमर्थमुक्तम् । पदस्येत्येव किं नोक्तम् । नैवं शक्यम् । इह न स्यात् । प्रपचति प्रपचतीति । अन्यस्य सर्वस्येत्येतदकृतं सर्वं कार्यं प्रतिपत्त्यर्थं[3] द्रष्टव्यम् । तेन पूर्वत्रा-सिद्धीयमद्विर्वचन इत्येवमादि सिध्येत् । ननु च सर्वस्येत्यनुवृत्तेः सर्वस्येति वाच्ये ग्रन्थकारेण पदस्येत्यनुचितमुक्तम् । नानुचितम् । पद्यतेऽर्थोऽनेनेति पदमिति व्युत्पत्त्या वाचकस्य सर्वस्येत्येवोक्तम् ।

---

१. From here to the end of सुबन्त p. 93 in this Ms. is omitted in Dc3. २. आत्मा चेति Dc4. ३. प्रतिपत्त्यर्थे Dc4.

आभीक्ष्ण्यं तिङव्ययकृत्सु ॥ पचति पचति । भुक्त्वा भुक्त्वा । वीप्सायां वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रम्यः ।

आभीक्ष्ण्यं तिङव्ययकृत्सु इति । अव्ययानि च ते कृतश्चाव्ययकृत इति कर्मधारयः । तिङश्चाव्ययकृतश्चेति तिङव्ययकृत इति द्वन्द्वः । तेषु तिङव्ययकृत्सु । यां क्रियां कर्ताप्राधान्येनानुपरमन् करोति तस्याः क्रियाया धर्म आभीक्ष्ण्यम् । सा च क्रिया साध्यरूपा तिङन्तादिभिरेवोच्यते इति तेषु आभीक्ष्ण्यं न सुबन्तेषु तेषां सिद्धरूपस्य द्रव्यस्यैवाभिधानात् । **पचति पचतीति** । तिङन्तस्योदाहरणम् । **भुक्त्वा भुक्त्वा** इत्यव्ययकृतः । 'आभीक्ष्ण्ये णमुल् च' इति क्त्वान्तस्य 'कृदतिङ्' इति कृत्त्वम् । 'क्त्वातोसुन्कसुनः' इत्यव्ययत्वम् । यद्यपि क्त्वा आभीक्ष्ण्ये विधीयते तथापि तस्य द्विर्वचनसापेक्षस्यैवाभीक्ष्ण्यप्रकाशनशक्तिः[2] । यङ्[3] निरपेक्ष एव प्रकाशयति । पुनः पुनः पचति पापच्यते इति । **वीप्सायामित्यादि** । **वृक्षं वृक्षं सिञ्चतीति** । तत्र प्रयोक्तुः सेचनक्रियया दिगादिभिर्भिन्नानां वृक्षाणां युगपत् प्राप्तुमिच्छा । **ग्रामो ग्रामो रम्य इति**[1] । अत्र रमणीयत्वेन गुणेन युगपत् प्रयोक्तुर्व्याप्तुमिच्छा तत्र ग्रामे ग्रामे पानीयमित्येतदुदाहरणीयम्[4] । यत् तिङन्तं नित्यतया प्रकर्षेण च प्रयुक्तं ततः कृतद्विर्वचनात् प्रकर्षप्रत्यय इष्यते । पचतिपचतितरामिति । इह तु आढ्यतरमाढ्यतरमानयेति प्रकर्षयुक्तस्य वीप्सेष्यते ।

---

१. रमणीयः C, D3. २. After it—तथोक्तं **वृत्तिकृता** । क्त्वाणमुलोर्लोटश्च द्विर्वचनसापेक्षाणामेव पौनःपुन्यप्रकाशनशक्तिः Dc4. ३. यङ् तु Dc4. ४. °मित्यत्रेति । एतदु° Dc4.

परेर्वर्जने ॥८।१।५॥

अस्य द्वे स्तो वर्जने ॥ परि परि वङ्गेभ्यो वृष्टो देवः ।

उपर्यध्यधसः सामीप्ये ॥८।१।७॥

एषां द्वे स्तः देशतः कालतः सामीप्ये[1]र्थे ॥ उपर्युपरि-ग्रामम् । अध्यधि सुखम्[2] । अधोधो ग्रामम्[3] ।[4]

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सन-भर्त्सनेषु ॥८।१।८॥

वाक्यादेः संबोधनस्य द्वे स्तः एष्वर्थेषु ॥ असूयायाम्[5] । सुन्दर सुन्दर वृथा ते सौन्दर्यम् । संमतौ[6] । देव देव वन्द्योसि । कोपे ।

परेः । परि परि वङ्गेभ्य इति । 'अपपरी वर्जने' इति कर्मप्रवचनीयत्वम् । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । समासे तु वर्जनार्थस्य समासेनैव प्रत्यायितत्वात् न भाव्यं द्विर्वचनेन परिवङ्गं वृष्टो देव इति । असमासे तु वेति वाच्यम् । 'विभाषा वेष्टि—' इत्यतो मण्डूकप्लुत्या विभाषानुवृत्तेः परिवङ्गेभ्यो वृष्टः ।

उपरि । उपर्युपरि **ग्राममिति** देशकृतसामीप्यस्योदाहरणम् । ग्रामस्य सामीप्येनोपरिष्टाद् देशः इत्यर्थः । 'उभसर्वतसोः—' इत्यादिना द्वितीया । कालकृतसामीप्यस्योदाहरणम**ध्यधि सुखमिति** । उपरि शिरसो घटं धारयतीत्यादौ औत्तराधर्यमात्रं विवक्षितमिति द्विर्वचनं न ।

वाक्यादेः । आख्यातं साव्ययकारकविशेषणं वाक्यम् । परगुणानामसहनमसूया । संमतिः पूजनम् । कोपः क्रोधः ।

१, C, D_3, D_5 drop अर्थे. २. सुषम् D_2. ३. नगरम् C; D_1, D_4 drop it; लोकम् B_2, D_2. ४. After this C has—सामीप्ये किम् । उपरि चन्द्रमाः. ५. Before it—गुणेषु दोषाविष्करणमसूया B_2, D_3. ६. संमतौ तु C, B_2.

दुर्विनीत दुर्विनीत इदानीं ज्ञास्यति । कुत्सने । धानुष्क धानुष्क व्यर्थं[1] ते धनुः । भर्त्सने । चौर चौर घातयिष्यामि त्वाम् ॥

एकं बहुव्रीहिवत् ॥८।१।९॥

द्विरुक्त एकशब्दो बहुव्रीहिवत् स्यात्[2] ॥ तेन सुब्लोप-पुंवद्भावौ । एकैकमक्षरम् । एकैकयाहुत्या[3] । अतिदिष्टबहुव्रीहौ[4] सर्वनामत्वानिषेधो[5] न । एकैकस्मै देहि ।

कुत्सनं निन्दनम् । अपकारशब्दैर्भयोत्पादनं भर्त्सनम् । एते च प्रयोक्तृधर्मा नाभिधेयधर्माः । ननु चासूयादिषु 'स्वरितमाम्रेडितेसूया-संमतिकोपकुत्सनेषु' इति पूर्वपदस्य प्लुतो भाव्यः । भर्त्सने तु 'आम्रेडितं भर्त्सने' इत्याम्रेडितस्यैव प्लुतो भावः[6] । सत्यम् । भवत्येवम्[7] । किं तु सर्वस्यापि प्लुतस्य विभाषितत्वादत्राचार्यवर्यैर्न प्रयुक्तः । वाक्यादेः किम् । अन्त्यस्य च मध्यस्य च मा भूत् । शोभनः खल्वसि माणवक । आमन्त्रितस्य किम् । उदरो देवदत्तः । असूयादिषु किम् । देवदत्त गामभ्याज[8] शुक्लां दण्डेनेति ।

एकम् । एकैकमक्षरमिति । सुब्लोपः । एकैकयेति । अत्र सुब्लोपपुंवद्भावौ । ननु चासत्यपि पुंवद्भावे एतत् सिध्यति । सत्यम् । तथाप्युत्तरार्थमेतत् । ननु च बहुव्रीहिवद्भावे सति तत्स्वरसमासान्त-सर्वनामत्वनिषधो भाव्य इत्याशङ्क्याह । अतिदिष्टेत्यादि । सर्वनामत्व-निषेधः स्वरसमासान्तयोरुपलक्षणार्थः । तत्र[9] सर्वनामत्वनिषेधस्तु न बहुव्रीहावित्यत्र बहुव्रीहिरेव यो बहुव्रीहिरिति विज्ञानान्न स्वरसमासान्तौ समासाधिकारे बहुव्रीहौ विज्ञायेते इति न स्तः ।

---

१. वृथा B_2. २. Dropped D_6. ३, After it—जुहोति B_2. ४. आनिर्दिष्ट° D_3, D_4. ५. °निषेधाभावात् for °निषेधो न C. ६. भाव्यः Bc_3, Dc_4. ७. भवत्येव Dc_4. ८. गामानय Dc_4. ९. Dropped Dc_4.

आबाधे च ॥८।१।१०॥

पीडायामर्थे द्विरुक्तं[1] बहुव्रीहिवत् स्यात्[2] ॥ गतगतः ।[3][4]

प्रकारे गुणवचनस्य ॥८।१।१२॥

सादृश्येऽर्थे गुणवचनस्य द्वे स्तः तच्च कर्मधारयवत् स्यात् ॥ पटुपट्वी । पटुपटुः । न्यूनगुण इत्यर्थः[5] ।

आबाधे । गतगत इति । सुप्लुक् । प्रियस्य चिरगमनात् पीड्यमानः प्रयोक्तैवं प्रयुङ्क्ते । पुंवत्त्वार्थं गतगतेत्यप्युदाहार्यम् ।

प्रकारे । तच्च कर्मधारयवत् स्यादिति । एतच्च कर्मधारयवदुत्तरेष्वस्मादधिकारसूत्राल्लभ्यते । तस्य चायमर्थः । एतदुत्तरेषु द्विर्वचनेषु कर्मधारयवत् कार्यं स्यात् । कर्मधारयवत्त्वे प्रयोजनं सुब्लुक्पुंवद्भावान्तोदात्तत्वानि । पटुपट्वीत्यत्र 'पुंवत् कर्मधारय—' इति पुंवद्भावः । पटुपटुरित्यत्र 'सुपो धातुप्रातिपदिकयोः' इति सुप्लुक् । 'समासस्य' इत्यन्तोदात्तत्वं च परत्वादनेनाम्रेडितानुदात्तत्वं बाध्यते । अधिकारेणैव सिद्धे यदुत्तरेष्विति वचनं तत् स्पष्टार्थम् । न्यूनगुण इत्यर्थ इत्यनेन सादृश्यवृत्तिता दर्शिता । प्रकारे किम् । पटुर्देवदत्तः । गुणवचनस्येति किम् । अग्निर्माणवकः ।

---

१. द्वे स्तः for द्विरुक्तं D3. २. C drops it. ३. गतगतम् for गतगतः । गतगता C ; B1 has गतगता only. ४. After it—गतगता P, C, B1, B2. ५. °गुणमित्यर्थः C, अन्यूनगुण D3.

आनुपूर्व्ये द्वे स्त इति वाच्यम् ॥* मूले मूले स्थूला[1] । वृद्धं वृद्धं प्रवेशय । संभ्रमेण प्रवृत्तौ द्वे[2] वाच्ये ॥* सर्प सर्प बुध्यस्व बुध्यस्व । नेह द्वित्वनियमः ।[3] सर्प सर्प सर्प बुध्यस्व बुध्यस्व बुध्यस्व । क्रियासमभिहारे च ॥* लुनीहि लुनीहि इत्येवायं

आनुपूर्व्य इति । अवीप्सार्थं वचनम् । स्वार्थेवधार्यमाणेनेकस्मिन् द्वे भवतः इति वक्तव्यम् । अस्मात् कार्षापणादिह भवद्भ्यां माषं माषं देहि । स्वार्थे एतद् द्वित्वं न वीप्सायाम् । अत्र हि द्वावेव माषौ दीयेते न कार्षापणसंबन्धिनः सर्वे तेन वीप्सा न । अवधार्यमाणे किम् । अस्मात् कार्षापणादिह भवद्भ्यां माषं देहि द्वौ वा त्रीन् वा । अनेकस्मिन् किम् । अस्मात् कार्षापणादिह भवद्भ्यां माषमेकमेव देहि । नेह द्वित्वनियम इति । किं तर्हि । यावद्भिः शब्दैः संभ्रमोर्थोवगम्यते तावन्तः प्रयोक्तव्या इति भावः । **क्रियासमभिहारे चेति** । एतच्च 'नित्यवीप्सयोः' । इत्येव सिद्धम् । तत् तत्रैव प्रतिपादितम् । पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे स्त इति वाच्यम् । पूर्वं पूर्वं पुष्यन्ति । प्रथमं प्रथमं पच्यन्ते । अतिशायिकोपि दृश्यते । पूर्वतरं पुष्यन्ति । प्रथमतरं पच्यन्त इति । डतरडतमान्तयोस्त्रिलिङ्गशब्दवाच्ये भावे वर्तमानयोः समेनाढ्यत्वादिना धर्मेण या संप्रधारणा तस्यां विषयभूतायां द्विर्वचनं स्यादिति वाच्यम् । उभाविमावाढ्यौ कतरा कतरा अनयोराढ्यता । सर्वे इमे आढ्याः । कतमा कतमा एषामाढ्यता । डतरडतमाभ्यामन्यत्रापि दृश्यते । उभाविमावाढ्यौ । कीदृशी कीदृशी अनयोराढ्यता । तथा स्त्रीनिगदाद्भावादन्यत्रापि दृश्यते । उभाविमावाढ्यौ । कतरः कतरोनयोर्विभव इति ।

---

१. स्थूलाः D₁; स्थूला वृक्षाः D₂. २. द्वे स्त इति वाच्यम् C. ३. C has before it—किं तर्हि । यावद्भिः सोर्थोवगम्यते तावन्तः शब्दाः प्रयोक्तव्याः.

लुनाति । कर्मव्यतिहारे सर्वनाम्नो द्वे स्तः समासवच्च बहुलम् ॥* यदा न समासवत्तदा प्रथमैकवचनं पूर्वपदस्य[1] द्वितीयाद्येकवचनान्तत्वं[1] परपदस्य । अन्योन्यं विप्रा नमन्ति । अन्योन्येन कृतम्[3] । अन्योन्यस्मै ।[4] अन्योन्यस्मात् । अन्योन्यस्य[5] । अन्योन्यस्मिन् साधवः । एवं परस्परम् । अत्र विसर्जनीयस्य सः कस्कादित्वाज्ज्ञेयः[6] । बहुलोक्तेरेतयोर्नित्यमसमासवत् । इतरशब्दस्य[7] नित्यं समासवदिति ज्ञेयम् ।

कर्मव्यतिहार इत्यादि । कर्मव्यतिहारः क्रियाविनिमयः । एकस्यान्यतरभोजनाद्यपरस्यापीतरभोजनादि । समासवच्च बहुलमिति समासवद्भावो बहुलं विधीयते । प्रथमैकवचनं पूर्वपदस्येति । पूर्वपदस्य द्वितीयाद्येकवचनानां स्थाने सुः कर्तव्य इत्यर्थः । द्वितीयादीति । परपदस्य द्वितीयाद्येकवचनान्तस्य द्वितीयाद्येकवचनान्ततैव स्यादित्यर्थः । अत्रेति । परस्परमित्यत्र । इतरेतरमिति द्वितीयान्तस्य द्विर्वचने कृते समासवद्भावेन सुप्लुक् । समासस्य स्वरोन्तोदात्तत्वमाम्रेडितस्वरापवादः । समासत्वादेव प्रातिपदिकत्वात् द्वितीयैकवचनादि ।

---

१. °वचनान्तत्वं B_2. २ पूर्वस्य D_5. ३. कृतमित्यादि सव्रुचः and drops अन्योन्यस्मै···साधवः C. ४. After it—देहि D_3. ५. अन्योन्यस्य dropped B_1. ६. कस्कादित्वेन ज्ञेयः D_3, D_4, D_5. ७. तु नित्यं P, D_3, B_1, B_2.

इतरेतरम् । स्त्रीनपुंसकयोरुत्तरपदस्य वा आम्भावो वाच्यः । अन्योन्यां परस्परामितरेतरां वा इमाः स्त्रियो भोजयन्ति कुलानि वा । पक्षे अन्योन्यमित्यादि । तृतीयादिषु पुंवत् ॥

स्त्रीनपुंसकयोरिति । स्त्रीनपुंसकयोर्यत् सर्वनाम कर्मव्यतिहारे वर्तते तस्योत्तरपदस्य या विभक्तिस्तस्याः स्थाने आम्भावे वा वक्तव्य इत्यर्थः । अन्योन्यां परस्परामिति । द्विर्वचनं विभक्तेराम्भावः पूर्वपदस्य स्युः । पक्षे अन्योन्यमित्यादीति । स्त्रियां समासवद्भावात् सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति टापो निवृत्तिः । स्पष्टत्वात् त्यक्तं सूत्रत्रयं व्याख्यायते । 'अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्' ॥८।१।१३॥ अप्रयासे प्राणिधर्मेऽर्थे वर्तमानयोः प्रियसुखयोर्द्वे वा । प्रियप्रियेण ददाति । सुखसुखेन ददाति । अकृच्छ्रे किम् । प्रियः पुत्रः । सुखो रथः । 'यथास्वे यथायथम्' ॥८।१।१४॥ यथास्वभावे यथावर्त्म यथायथं निपात्यते । यथायथं पदार्था ज्ञाताः । यथास्वभावमित्यर्थः । यथायथं यान्ति । यथात्मीयमित्यर्थः । 'द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु' ॥८।१।१५॥ एषु पञ्चस्वर्थेषु द्विशब्दस्य द्वन्द्वमिति निपात्यते । रहस्ये । द्वन्द्वं मन्त्रयते । स्थित्यनतिक्रमे । आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण पौत्रेण प्रपौत्रेणापीति । व्युत्क्रमणे । द्वन्द्वं व्युत्क्रान्ताः । द्विवर्गसंबन्धेन भिन्ना इत्यर्थः । यज्ञपात्रप्रयोगे । द्वन्द्वं यज्ञपात्राणि

---

१. °रुत्तरस्य च C. २. आम्भावो वा वाच्यः C. ३. अम्भावो D_2. ४. अन्योन्यम् । परस्परम् । अत्र विसर्जनीयस्य सः D_1; अन्योन्यं परस्परमितरेतरं वा D_2, D_3. ५. वा dropped C. ६. पदार्थो ज्ञातः Bc_3, Dc_4. ७. व्युत्क्रान्तः Bc_3, Dc_4. ८. भिन्न Bc_3, Dc_4.

इति[1] द्विरुक्तप्रक्रिया ॥[2]

प्रयुनक्ति धीरः । अभिव्यक्तौ । द्वन्द्वं नारदपर्वतौ । द्वन्द्वं संकर्षण-वासुदेवौ । साहचर्येणाभिव्यक्तावित्यर्थः । अन्यत्रापि द्वन्द्वमित्येतदिष्यते । तदर्थं योगविभागः क्रियते । तेन द्वन्द्वं युद्धम् । द्वयोर्युद्धमित्यर्थः । द्वन्द्वानि सहते । चार्थे द्वन्द्वः ।

इति द्विरुक्तप्रक्रिया ॥

भाष्यवृत्तिहरिग्रन्थतद्व्याख्याममर्मवेदिनः ।
कौतुकाक्रान्तमनसः प्रमोदयतु मत्कृतिः ॥ १ ॥

श्रीरामचन्द्राचार्योक्तेः स्पष्टार्थत्वेपि चित्रता ।
न मर्मज्ञैः प्रयोज्योर्थः स्फटिकाकारगो यथा ॥ २ ॥

पदे वाक्ये प्रमाणे च तत्त्वज्ञं ज्ञातृसंमतम् ।
रामचन्द्राचार्यसूरेरन्यं नोपलभामहे ॥ ३ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी ।
वेदान्तानुमता च वैष्णवमहासिद्धान्तसद्दीपिका ॥
कालज्ञानविधौ व्यधायि विबुधानन्दि प्रबन्धत्रयं ।
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥ ४ ॥

१. इति ̤̤ प्रक्रिया dropped C; इति द्विरुक्तिप्र° D_4. २. After it— समाप्ता D_3. ३. स्पष्टार्थत्वं विचित्रता Dc_1; स्पष्टार्थत्वे विचित्रता Dc_2, Bc_1, Dc_3. ४. तेने वेदमता च वैष्णव° Dc_1, Dc_2, Dc_3. Bc_1.

इति[1] श्रीरामचन्द्राचार्यविरचितायां
प्रक्रियाकौमुद्यां सुबन्तप्रक्रिया ॥[4]

इति ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे सुविशदमगमत् तत् सुबन्तं समाप्तिम् ॥[5]

---

१. इति श्रीसकलसदागमचणश्रीराम° D_3, D_5, B_1. २. श्री dropped P; श्रीमद्रामचन्द्राचार्य° D_1. ३. सुबन्तं समाप्तमिति । D_2; सुबन्तं समाप्तम् । श्रीरस्तु। D_4. ४. After it–समाप्तेयम् C; सुबन्तं समाप्तम् ।श्रीरस्तु । शुभं भवतु ।कल्याणमस्तु । श्रीः'' श्रीः D_1; सुबन्तं समाप्तम् । श्रीरस्तु । श्रीः। ओं नमः । B_2; P has सुबन्तं समाप्तम्।; After सुबन्तप्रक्रिया B_1 has—समाप्तमिति । छ । यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ शुभं भवतु । कल्याणमस्तु ।लेखकपाठकयोः।; at the end—इति श्रीरामचन्द्रविरचितायां प्रक्रियाकौमुद्यां सुबन्तं समाप्तम् D_3. ५. समाप्तम् । Bc_3. ६. After this Dc_1 has the following:—

श्रीरस्तु । कल्याणमस्तु । इति श्रीप्रक्रियाकौमुदीये प्रसादः समाप्तः ॥ श्रीरस्तु। श्रीकल्याणमस्तु ॥ श्रीरस्तु ।

स्वस्ति संवत् १६०६ वर्षे श्रावणवदि १० रवौ अद्येह श्रीतापीतटे सूर्यपुरे लिखितोयं प्रसादः । समाप्तमिति । श्रीः ।

यादृशं पुस्तकं वीक्ष्य शोधनीयं सदा बुधैः ।
हीनाधिक्यैः स्वरैर्वर्णैरस्माकं दूषणं न हि ॥ १ ॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ २ ॥
यावल्लवणसमुद्रो यावन्नक्षत्रमण्डितो मेरुः ।
यावद् भास्करचन्द्रौ तावदिदं पुस्तकं जयतु ॥ ३ ॥
श्रीरस्तु । लेखकपाठकयोः कल्याणमस्तु ॥ श्रीः ॥ श्री ॥

Dc_2 has:—

श्रीरस्तु । मङ्गलमस्तु । लेखक विठलकासीवासी रजपुतः ॥ संवत १६४१ समए अषाढ सुदि द्वादसी वासवीहफइ । श्रीविश्वनाथ । कलभैरव अय नमः ॥ रामचन्द्र राम ॥

Bc_3 has—संवत् १५६० वर्षे पौष मासे शुक्लपक्षे ११ तिथौ । लिखितमिदम् । शुभं भवतु ।

॥ श्रीः ॥

श्रीरामचन्द्राचार्यप्रणीता

प्रक्रियाकौमुदी

उत्तरार्धम् ।

श्रीविट्ठलाचार्यकृतया प्रसादाख्यया टीकया समेतं

गुर्जरराजनगरस्थशिक्षकशिक्षणालयस्य मुख्याधिकारिणा सेवानिवृत्तेन
बी. ए. इत्युपाह्वेन मुम्बापुरीस्थविश्वविद्यालयस्याकार्यवाहक-
यशस्करपारिषद्यपदं प्राप्तेन मुम्बापुरीस्थएलफिन्स्टनाख्य-
विद्यामन्दिरस्य पुण्यपत्तनस्थडेक्कनाख्यविद्यामन्दिरस्य
च कादाचित्केन गीर्वाणभाषाध्यापकेन

त्रिवेद्युपपदधारिणा

प्राणशंकरसूनुना कमलाशंकरेण संशोधितं
स्वनिर्मिताङ्ग्लभाषाभूमिकया सनाथीकृतम् ।

तच्च

संस्कृतप्राकृतग्रन्थमालाधिकारिणा शाके १८५३ संवत्सरे
१९३१ खिस्ताब्दे प्राकाश्यं नीतम् ।

प्रथमा आवृत्तिः ।

मूल्यं दश रूपकाः

PDF Creation and Uploading by:
Hari Parshad Das (HPD) on
18 January 2014.

THE PRAKRIYÂKAUMUDÎ

OF

RÂMACHANDRA

(IN TWO PARTS)

PART II

WITH THE COMMENTARY PRASÂDA OF VIṬṬHALA

AND

WITH A CRITICAL NOTICE OF MANUSCRIPTS AND AN EXHAUSTIVE AND CRITICAL INTRODUCTION

BY RAO BAHADUR

KAMALASHANKAR PRANASHANKAR TRIVEDI, B.A.,

Honorary Fellow of the University of Bombay,
Retired Principal, P. R. Training College, Ahmedabad,
(Formerly Professor of Sanskrit, Samaldas College, Bhavnagar, and Acting Professor of Oriental Languages, Elphinstone and Deccan Colleges)

FIRST EDITION

1000 COPIES

1931

Bombay Sanskrit and Prakrit Series No. LXXXII

LIBRARY CHINSURA

Bombay Sanskrit and Prakrit Series

No. LXXXII

THE

PRAKRIYÂKAUMUDÎ

OF

RÂMACHANDRA

(PART II)

Price Rs. Ten

PRINTED BY DOMINIC MARION PIRRIE, SUPERINTENDENT, B. I. PRESS,
BOMBAY, AND PUBLISHED BY DR. S. K. BELVALKAR, M.A., PH.D., I. E. S.,
SECRETARY, BHANDARKAR ORIENTAL RESEARCH INSTITUTE, POONA.

CONTENTS

भ्वादिगणः	....	१—१७७
भूधातुः	....	१— ४५
परस्मैपदिनो धातवः	....	४५—१३२
आत्मनेपदिनो धातवः	....	१३३—१५८
मिश्रप्रक्रिया	....	१५९—१७७
अदादिगणः	....	१७८—२२४
ह्वादिगणः	....	२२५—२३६
दिवादिगणः	....	२३७—२५०
स्वादिगणः	....	२५१—२५७
तुदादिगणः	....	२५८—२७१
रुधादिगणः	....	२७२—२७६
तनादिगणः	....	२७७—२८२
क्र्यादिगणः	....	२८३—२९०
चुरादिगणः	....	२९१—२९९
ण्यन्तप्रक्रिया	....	३००—३२५
सन्नन्तप्रक्रिया	....	३२६—३४७
यङन्तप्रक्रिया	....	३४८—३५८
यङ्लुगन्तप्रक्रिया	....	३५९—३६९
नामधातुप्रक्रिया	....	३७०—३९१
पदव्यवस्था	....	३९२—४२५

भावकर्मप्रक्रिया	४२६—४३५
कर्मकर्तृप्रक्रिया	४३६—४४३
लकारार्थप्रक्रिया	४४४—४६७
कृदन्तम्	४६८—६९९
कृत्यप्रक्रिया	४६८—४९४
ण्वुलादयः प्रत्ययाः....	४९५—५९९
उणादयः (दशपादी)	५९९—६४७
तुमुन्नादयः प्रत्ययाः	६४७—६९९
वैदिकीप्रक्रिया	७००—७३५
स्वरप्रकरणम्	७३६—७९३
उपसंहारः	७९४—७९९
Corrigenda to Part I	८०१—८२२
Corrigenda to Part II	८२३—८३७
Index I	८३९
Index II	८३९
Index III	८३९—८४०

POSTSCRIPT

Rao Bahadur K. P. Trivedi unfortunately died after seeing about 300 pages of this part through the press. The remainder of Part II was seen through the press by his son, Prof. A. K. Trivedi of Baroda, with the assistance, at first, of Prof. M. P. Dave of Surat College, and later of Mahāmahopādhyāya Vasudeo Shastri Abhyankar, the latter having kindly compiled the rather extensive corrigenda to both the Parts.

ॐ श्रीगणेशाय नमः ।

अथ प्रक्रियाकौमुदी ।

उत्तरार्धम् ।

ॐ नमः । श्रीगणेशप्रसादात् । श्रीविठ्ठलाय नमः ।

श्रीविठ्ठलं सुरवरं प्रणमामि देवं कारुण्यसिन्धुमखिलानतदत्तबुद्धिम् ।
ईषत्सहासमुखपङ्कजमात्मभासमुत्फुल्ललोचनविलोकननाशिताघम् ॥१॥

तिङन्तकाण्डस्य हि कोपि पारं नाज्ञासिषुः शुद्धधियोपि सन्तः ।
तं प्रक्रियाकौमुदमंशमज्ञो व्याख्यानहं स्यामुपहास्य एव ॥२॥

प्रक्षेपकालुष्यनिरासहेतोः
प्रसादमस्या विदधे यथावत् ।
इति प्रतिज्ञातमतः करिष्ये
व्याख्यां स्वतः सज्जनतोषदात्रीम् ॥३॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इत्यभिप्रेत्य तिङन्तमभिधातुमिच्छन् ग्रन्थकृत् ग्रन्थमध्ये मङ्गलाचरणं करोति ।

---

१. च शास्त्राणि Bo2, De3. २. मङ्गलमाचरति Bo2.

प्रकृतिः[1] सा जयत्याद्या यया धात्वादिरूपया ।
व्यज्यन्ते शब्दरूपाणि परप्रत्ययसंनिधेः ॥

प्रकृतिरिति । सा वैयाकरणाभिमता[2] आद्या प्रकृतिः प्रत्ययमवधिं कृत्वा यः पूर्वमुपादीयते शब्दः[3] सा प्रकृतिः प्रकर्षेण नियमेनास्मात् प्रत्ययः क्रियत इति वा प्रकृतिर्भूइत्यादिर्जयति उत्कर्षेण वर्तते । सा का । यया धात्वादिरूपया धातव आदिर्येषां तानि धात्वादीनि धातुप्रातिपदिकङ्यन्ताबन्तसुबन्ततिङन्तानि तानि[4] रूपं यस्याः सा तया भूइत्यादिकया शब्दरूपाणि भवतीत्यादीनि व्यज्यन्ते । कस्मात् परप्रत्ययसंनिधेः । परश्चासौ प्रत्ययश्च परप्रत्ययः प्रतीयतेर्थोस्मादिति प्रत्ययस्तिबादिस्तस्य संनिधिस्तस्मात् । यद्यपि[5] श्लेषेण सांख्याभिमत-प्रधानाख्या[6] मूलप्रकृतिर्वक्तुं शक्यते तथापि सेह नोच्यते[7] तस्याः शारीरकमीमांसायाम् 'ईक्षतेर्नाशब्दम्' 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्न अन्यस्मृत्यनवकाशदोषप्रसङ्गात्' इत्यादिभिर्महता प्रबन्धेन निराकृतत्वात् । तस्मात् श्लेषेणात्र परमेश्वरशक्तिस्तेनाधिष्ठिता सर्व-जगत्कारणमविद्योच्यते । तस्यां बहुतरप्रमाणानां तत्रैव प्रदर्शनात्[8] । वेदान्तशास्त्रार्थस्यैवाचार्याणामभीप्सितत्वात्[9][10] । तथोक्तं स्वयमेव ।

---

१. Before this P has ॐ नमः श्रीगणेशाय and C has ॐ नमः श्रीगणेशभारतीभ्यां पाणिनिपतञ्जलिकात्यायनेभ्यः ।; D_1 has— ॐ नमः । श्रीरामचन्द्राचार्याय नमः ।; N has ॐ नमो गणेशाय । श्रीमद्विठ्ठलाय नमः ।; D_3 has—ॐ नमो गणेशाय । सरस्वत्यै नमः । श्रीरामचन्द्राय नमः ।; D_4 has श्रीरस्तु । श्रीः । ॐ नमो गणेशाय ।. २. °भिप्रेता Bc_2. ३. शब्दः dropped Bc_2, Dc_3. ४. तानि dropped Bc_2. ५. श्लेषेण यद्यपि Bc_2, Dc_3. ६. °मता प्रधा° Bc_2, Dc_3. ७. प्रसिद्धत्वान्नोच्यते Bc_2. ८. दर्शनात् Bc_2. ९. °शास्त्रस्यैवा° Bc_2. १०. °मभिप्रेतत्वात् Dc_3.

कुले यस्मिन् देवं सकलफलदं विट्ठलविभुः

स्मृता यस्मिन् दीक्षा हरिहरमनुष्यागमयुता ।

रतिर्ब्रह्माद्वैते तदमलमनन्तागमपथं

बुधाः संसेवन्तां कथितमसकृद्रामगुरुभिः ॥

सदा यत्र वेदाविरुद्धागमोक्त—

प्रकारेण विष्णोः सपर्याविधानम् ।

मतिर्यत्र वेदान्तसिद्धान्तवर्ये

बुधः संप्रदायं कथं नाश्रयेत् तम् ॥ इति ।

साद्या प्रकृतिर्जयति यया धात्वादिरूपया धातवः पञ्च महाभूतानि तेषामादिकारणभूतं रूपं यस्याः । अथवा पञ्च महाभूतादिकं रूपं यस्याः सा । विकृतिर्हि प्रकृते रूपमेव । तथा च धातुशब्देन पञ्च महाभूतान्याह याज्ञवल्क्यः ।

पञ्च धातून् स्वयं षष्ठ आदत्ते युगपत् प्रभुः ।

तथा

ब्रह्म खानिलतेजांसि जलं भूश्चेति धातवः । इति ।

तथा चामरसिंहोपि

श्लेष्मादिरसरक्तादिमहाभूतानि तद्गुणाः ।

इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥ इति ।

एवंविधया यया प्रकृत्या परप्रत्ययसंनिधेः परः प्रत्ययो ज्ञानं यस्याः । अथवा परश्चासौ प्रत्ययश्च परप्रत्ययः परज्ञानरूपः । 'प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु' । इत्यमरसिंहः । एवंविधस्य सर्वज्ञस्य

१. °फलदो Dc3. २. °गमोक्ति—Dc3. ३. °वर्गे: Bc2; °वर्यैः Dc3. ४. °मारिः Dc3. ५. हि Dc3. ६. यथा Dc3.

धातोः ॥३।१।९१॥

आ तृतीयाध्येयायान्तं[1] वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः ॥

संनिधेः । शब्दरूपाणि शब्दाश्च रूपाणि च शब्दरूपाणि नामरूपाणि घटादिसंज्ञा घटादिरूपाणि च व्यज्यन्ते । अयमर्थो वैष्णवसिद्धान्तदीपिकायामाचार्यैः प्रत्यपादि । अस्माभिरपि तट्टीकायां सर्वशास्त्रसाररूपायां न्यायस्नेहप्रपूरण्यां[2] प्रत्यपादि ततो ज्ञेयः[3] । अथवा[4] वेदान्त्यभिमतेश्वरमायोच्यते । तत्राप्यनन्तवद्योजना । 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति सूत्रे वर्तमानं धातोरिति पदं स्वरितमुत्तरत्राधिकारार्थं व्याख्याति । सममसूत्रं[5] यङ्प्रकरणे व्याख्यास्यति ।

आ तृतीयाध्यायान्तमिति । 'धातोः' इत्यारभ्य आ तृतीयाध्यायपरिसमाप्ति[6] इत्यर्थः । धातवो नाम क्रियावाचिनो भ्वादयः । ते च द्विविधाः सकर्मका अकर्मकाश्चेति । तत्र कर्मसापेक्षां क्रियामाहुस्ते सकर्मकाः । यथा कटं करोतीत्यादयः । अकर्मकाः पुनर्ये कर्मनिरपेक्षां क्रियामाहुस्ते आस्ते शेते तिष्ठतीत्यादयः । अथवा ये कर्मकर्तृगतं[7] व्यापारद्वयमाचक्षते ते सकर्मकाः । यथा पचत्यादयः । यथा[8] ओदनादिगतं विक्लेदादि कर्तृगतमधिश्रयणादि । ये तु कर्तृगतमेव ते[9] अकर्मकाः । यथास्ते शेते इत्यादयः । अथवा क्रियार्थो धातुः सकमर्कः । भावार्थो धातुरकर्मकः । तत्र सपरिस्पन्दसाधनसाध्या[10] क्रिया । अपरिस्पन्दसाधनसाध्यो[11] भावः । सर्वथापि[12] प्रमेये विसंवादो नास्ति ।

---

१. °ध्यायान्तात् D_1, B_2. २. न्यायशास्त्रे स्नेह° Dc_3. ३. ज्ञेयम् Dc_3. ४. अथवा to °जना dropped Bc_2. ५. समम तु सूत्रं Bc_2, Dc_3. ६. °समाप्तेरित्यर्थः Dc_3. ७. °गतव्या° Dc_3. ८. यथा dropped Bc_2, Dc_3. ९. ते तु Dc_3. १०. °परिस्पन्दनसाधन° Bc_2, सपरिस्पन्दनसाधन° Dc_3. ११. अपरिस्पन्दनसाधन° Dc_3. १२. सर्वथा प्रमेयेऽपि Dc_3.

[१]तेष्वादौ दश लकाराः [२]प्रदर्श्यन्ते । [३]लट् । लिट् । लुट् । लृट् ।
लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् ॥

तत्रापि कदाचिदर्थान्तरवृत्त्यादिभिः सकर्मकाणामप्यकर्मकत्वमकर्मकाणामपि सकर्मकत्वम् । यथाहुः ।

'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।

प्रसिद्धेरविवक्षातः कर्मिणोकर्मिका क्रिया' ॥ इति ।

अर्थान्तरे [५]प्रवर्तमानत्वात् सकर्मकोप्यकर्मकः । यथा भारं वहति । उद्यच्छतीत्यर्थः । नदी [६]वहति । स्रवतीत्यर्थः । कर्मणो धात्वर्थान्तःप्रवेशात् अकर्मको यथा [७]जीव प्राणधारणे जीवति । नृती गात्रविक्षेपे । नृत्यती[८]ति । अत्र प्राणगात्राख्ये कर्मणी धात्वर्थेनैव क्रोडीकृते । कर्मणः प्रसिद्धत्वात् । यथा देवो वर्षति । पार्थो वर्षति । नियतं मेघोम्बु वर्षति पार्थः शरान् वर्षतीति प्रसिद्धम् । [९]प्रयुक्तेरविवक्षितत्वात् कर्मणः सकर्मकादपि भावे लकारः । यथा नेह पच्यते । नेह भुज्यते । अविवक्षा च लोकानुसारिण्येव । सतोप्यविवक्षा दृश्यते । यथानुदरा कन्येति । अकर्मकस्याप्यर्थान्तरवृत्त्या सकर्मकत्वम् । यथा सुखमनुभवति । उत्साहाद्भवते लक्ष्मीम् । प्राप्नोतीत्यर्थः । [१०]तेष्विति । तेषु प्रत्ययेषु मध्ये प्रथमं दश लकाराः कथ्यन्ते । ते षट् टितः । चत्वारो ङितः । तांश्चाक्षरसमाम्नाया[११]नुपूर्व्या पठति । लडित्यादि । तत्र सकर्मकेभ्यः कस्मिन्नर्थे लकारा भवन्ति [१२]कस्मिन्नर्थे अकर्मकेभ्य इत्य[१३]तं आह ।

---

१. Before it—इत्यधिकारः C. २. उच्यन्ते D3. ३. लट् । लिङ् । लोट् । लङ् । लुङ् । लिट् । लुट् । लिङ् । लट् । लङ् । लेट् । P, B1, C. ४. Dropped D3, D4. ५. वर्तमानः Bc2; वर्तमानत्वात् Dc3. ६. प्रवहति Bc2. ७. जीव प्राणधारणे and नृती गात्रविक्षेपे dropped Bc2. ८. °तीत्यादि । Dc3. ९. प्रयोक्तु° Bc2, Dc3. १०. Dropped Bc2. ११. °यानुपूर्वान् Dc3. १२. अकर्मकेभ्यः कस्मिन्नर्थे Bc2. १३. अतः dropped Dc3.

लः कर्मणि च भावे चाकर्मकेभ्यः ॥३।४।६९॥

लकाराः सकर्मकाद् धातोः कर्मणि कर्तरि चाकर्मकाद्भावे कर्तरि च स्युः ॥ 'प्रत्ययः' 'परश्च' इत्यनुवर्तते

वर्तमाने लट् ॥३।२।१२३॥

आरब्धापरिसमाप्तक्रियोपलक्षिते काले वाच्ये धातोर्लट् प्रत्ययः[1] स्यात् ॥

लः **कर्मणि** । लकारा द्विविधाः तिङ्भाविनोऽतिङ्भाविनश्च । तत्र तिङ्भाविनां कृत्संज्ञानिषेधात् 'कर्तरि कृत्' इत्यस्यानुपस्थानात् स्वार्थे विधिः स्यात् । अतिङ्भाविनं तु 'कर्तरि कृत्' इति कर्तर्येव स्यादिति वचनमारभ्यते । **लकाराः** । लडादयो दश कर्मणि[2] कर्तुरीप्सिततमे कर्तरि क्रियायां स्वतन्त्रे भावे धात्वर्थे ।

वर्तमाने । आरब्धेति । कर्तुं प्रस्तुता आरब्धा अपरिसमाप्ता च या क्रिया तया उपलक्षित इत्यर्थः । अथेह कुमाराः क्रीडन्तीति प्रवृत्तस्य विरामे तिष्ठन्ति पर्वता इति नित्यप्रवृत्ते च कथं लट् वर्तमानत्वाभावात् । तथा हि पूर्वत्रान्तराले क्रियान्तरसद्भावादुत्तरत्र पर्वतादिस्थितेस्तु[3] सर्वदाभावात् भूतत्वाद्ययोगात् वर्तमानत्वाभावः[4] । नैवम् । क्रीडनस्यानुपरतत्वात् । अन्तरालक्रियास्तु नान्तरीयकत्वाद-व्यवधायिकास्तदवयवभूता वा यथा भुङ्क्ते इत्यादौ भुक्तसंशयं[5]

१. प्रत्ययः dropped D_1, D_3. २. कर्मणीति Bc_2. ३. °स्थितेः सदाभावात् Bc_2. ४. °भावात् Bc_2. ५. भुक्त° Bc_2, Dc_3.

अटावितौ । आदेशविधानसामर्थ्यान्न लस्येत्संज्ञा ।

लस्य ॥३।४।७७॥

इत्यधिकृत्य

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ॥३।४।७८॥

एतेष्टादश लस्यादेशाः स्युः ॥ पटञा इतः ।

पानीयपानादि । तदुक्तं हरिणा ।

'व्यवधानमिवोपैति विच्छिन्न इव दृश्यते ।
क्रियासमूहो भज्यादिरन्तरालप्रवृत्तिभिः ॥
न च विच्छिन्नरूपोपि सोविरामान्निवर्तते ।
सर्वैव हि क्रियान्येन संकीर्णेवोपलभ्यते ॥
तदन्तराले दृष्टा वा सर्वैवावयवक्रिया' ॥ इति ।

पर्वतादिस्थितेस्तु यद्यपि स्वरूपेण भूतत्वादि न स्यात्तथाप्यन्यतो भविष्यति । भेदस्य तथाभूतत्वात् । उक्तं हरिणा ।

'परतो भिद्यते सर्वमात्मा तु न विकल्पते ।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते' ॥ इति ।

भूतभविष्यद्वर्तमानानां पदार्थानां क्रियाप्राप्तिसाहचर्यात् पर्वतादिस्थितेरपि भूतत्वादीति सिद्धं समीहितम् । लटष्टकारः 'टित आत्मनेपदानाम्—' इति विशेषणार्थः । अकारो 'विदो लटो वा' इति विशेषणार्थ इत्यभिप्रेत्याह । अटाविताविति ।

तिप्तस् । पटञा इत इति । तिप् सिप् मिप् इत्यत्र

---

१. D_1, D_4 drop आदेश° to इत्यधिकृत्य; D_3 drops from आदेश...to संज्ञा. २. लस्येत्संज्ञा न C; लस्य नेत्संज्ञा P, B_2, D_2, N_1. ३. इत्यधिकृत्य dropped D_3. ४. भुज्यादि Bc_2, Dc_3. ५. तदन्तरालदृष्टा वा Bc_2, Dc_3. ६. भूतत्वं नास्ति तथापि Bc_2. ७. उक्तं हि Bc_2. ८. अकारोपि Bc_2;

ल इति दश लकारा उच्यन्ते ।

लः परस्मैपदम् ॥१।४।९९॥

लादेशाः परस्मैपदसंज्ञाः स्युः ॥

तङानावात्मनेपदम् ॥१।४।१००॥

तङिति प्रत्याहारः । तादिर्नवकः शानच्कानचौ चैतेत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ।

पकारोनुदात्तार्थः पित्कार्यार्थश्च । इट् इति टकारः 'इटोत्' इति विशेषणार्थः । तिबादिभिरादेशविशेषैस्तुल्यत्वान्न देशविध्यर्थः । महिङो ङकारस्तिङिति प्रत्याहारार्थः । एषां 'हलन्त्यम्' इतीत्संज्ञेत्यर्थः । लस्येत्यस्मिन्नधिकारे उत्सृष्टानुबन्ध ल इति सामान्यं गृह्यत इत्याह ।

ल इति ।

लः परस्मै । अत्र ल इति प्रथमा स्यात् षष्ठी वा । यदि प्रथमा लकारस्यैव पदसंज्ञा स्योन्नादेशानाम् । स्थानिवद्भावेन तेषामपि स्यादिति चेत्तर्हि 'तङानावात्मनेपदम्' इत्यत्र ल इत्यनेन तङानयोः संबन्धो न स्यात् । न हि तौ लौ भवतः । मैवम् । तत्र तङानभावी लकार एव तङानावुक्तः । एवं व्याख्यानद्वारेणार्थप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात् प्रथमापक्षे । षष्ठीपक्षे त्वेष दोषो नास्तीति षष्ठीपक्षमाश्रित्याह । लादेशा इति ।

तङानौ । लादेशा इत्येव । कतीह निघ्नानाः । निपूर्वाद्धन्तेः 'ताच्छील्यवयोवचनशक्तिषु' इति चानश् प्रत्ययः । न चायं लादेशो लः परस्मैपदिनोपि स्यात् ।

---

१. एते आत्मनेपदसंज्ञाः स्युः C; B_2, D_1, D_3. २. °रादेशैस्तुल्य° Bc_2, Dc_3. ३. परस्मैपदम् Bc_2. ४. स्याद्वा Bc_2. ५. स्यात dropped Dc_3. ६. तर्हि Dc_3.

शेषात् कर्तरि परस्मैपदम् ॥१।३।७८॥

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ॥

अनुदात्तङित आत्मनेपदम् ॥१।३।१२॥

अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात् ॥

शेषात् । आत्मनेपदनिमित्तमनुदात्तेत्त्वङित्त्वादि । 'अनुदात्त-ङित—' इत्यादिनात्मनेपदं नियतं परस्मैपदमनियतं तत् सर्वतो[1]पि स्यादित्यारम्भः । अथ पच्यते ओदनः स्वयमित्यत्र कर्मकर्तरि परस्मैपदं किं न स्यात् । उच्यते । 'कर्तरि कर्म–' इत्यतः कर्तृग्रहणं [2]द्वितीयमनुवर्तते । तेन कर्तैव यः कर्ता न कदाचित् कर्म ततः परस्मैपदं न कर्मकर्तरीत्यग्रे स्वयमेव वक्ष्यति ।

अनुदात्त । 'धातोः' इति कुतोनुवर्तते । 'भूवादयो धातवः' इत्यतः । तच्च अनुदात्तेत इत्यनेन सामानाधिकरण्यात् पञ्चम्यन्तं स्यात् । अत एव चङङ्भ्यां तङ् न । एवं तर्हि यङन्तादपि न स्यात् । वेविद्यते इति । यङेव [3]ह्यत्र ङित् न समुदायः । यतः अवयवे चरितार्थं लिङ्गं समुदायस्य विशेषकं न भवति । एवं [4]तर्हि प्रायोविवक्षया धातोरित्युक्तं चङङोस्तु परस्मैपदप्रवृत्त्यनन्तर-[5]प्रवृत्तित्वेन ङित्त्वेपि तङ् न ।

---

१. भवति N1. २. अपि dropped Bc2, Dc3. ३. तत्र Dc3. ४. हि dropped Bc2. ५. प्रकृत्य° Bc2.

स्वरितञितः कर्त्रभिप्राये क्रियाफले॥१।३।७२॥

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि [1]क्रियाफले॥

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥१।४।१०१॥

[2]तिङ् प्रत्याहारः तिङ उभयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः **स्युः** ॥

स्वरित । कर्तृगामिनीति । क्रियायाः फलं प्रधानभूतम् । यदर्थमसौ क्रियारभ्यते तच्चेत् कर्तुर्लकारवाच्यस्य स्यादित्यर्थः । तदुक्तं हरिणा ।

‘ यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत्प्रधानं फलं तेषां न लोभादि प्रयोजनम् ’ ॥ इति ।

अतो यजति याजक इत्यत्र यद्यपि दक्षिणाद्यप्रधानं फलं कर्तुर्भवति तथापि प्रधानं स्वर्गादिकं लकारवाच्यस्य न भवति । अतोत्र नात्मनेपदम् ।

तिङः । ननु च तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमसंज्ञानि भवन्ति इति सूत्रार्थः । एवं च षट् त्रिकाः संज्ञिनः तिस्रः संज्ञा इति वैषम्यम् । ततो न संख्यातानुदेश इत्याशङ्क्याह । **तिङ उभयोरिति** । अयमभिसंधिः । अत्रात्मनेपदं परस्मैपदं चानुवर्तते । तदनुवृत्तौ द्वौ राशी भवतः । तत्रात्मनेपदराशौ ये त्रयस्त्रिका ये परस्मैपदराशौ त्रयस्त्रिकास्तैरिदं सूत्रं प्रत्येकमभिसंबध्यते ।

---

१. फले N. २. तिङिति C; D3. ३. उभयोः परयोस्त्रय° B1. ४. इति dropped Bc2. ५. दक्षिणाद्यं फलं प्रधानं Dc3. ६. ततो नात्रात्मने° Dc3. ७. Dropped Bc2. ८. चेति Bc2. ९. Dropped Bc2.

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥१।४।१०२॥

तिङस्त्रीणि त्रीणि वचनान्येकैकश एतत्संज्ञानि स्युः ॥

शेषे प्रथमः ॥१।४।१०८॥

युष्मदस्मद्विषयादन्यत्र प्रथमपुरुषः स्यात् ॥

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥१।४।१०५॥

तिङ्वाच्यकारकवाचिनि युष्मदि स्थिते स्थानिन्यपि मध्यमपुरुषः स्यात् ॥

तानि । तानिवचनं संज्ञासमावेशार्थम् । अन्यथैकसंज्ञाधिकारत्वात् पुरुषवचनसंज्ञाः पर्यायेण प्रवर्तेरन् । एवं च 'आडुत्तमस्य–' इत्याडादिकार्यं पाक्षिकं स्यात् । तानीति तु सति संज्ञासमावेशः स्यात् । तच्छब्देन हि लब्धपुरुषसंज्ञानि परामृश्यन्ते । येषां पुरुषसंज्ञाः कृतास्तानि वचनसंज्ञानि स्युः ।

शेषे । **युष्मदस्मद्विषयादन्यत्रेति** । यत्र युष्मदस्मदी समानाधिकरणे न स्तस्तत्रेत्यर्थः । ततश्च देवदत्तश्च त्वं च पचथः । देवदत्तश्चाहं च पचावः । इत्यत्र प्रथमो न मध्यमोत्तमावेव स्तो[1] युष्मदस्मत्सद्भावात्[2] ।

युष्मदि । **तिङ्वाच्यकारकवाचिनीति** । तिङा[3] वाच्यं यत् कारकं कर्मादि यस्मिन्नर्थे तिङ् विहित इति यावत् । तद्वाचिनि युष्मदि स्थिते प्रयुज्यमाने स्थानिनि अप्रयुज्यमानेपि मध्यमपुरुषो भवतीत्यर्थः । स्पष्टत्वादुपेक्षितमेकं[4] सूत्रं प्रसङ्गाद्व्याख्यायते । 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ' ॥१।४।१०६॥ परिहासे गम्ये

---

१. Dropped De3. २. °दस्मदोः सद्भावात् Be2. ३. तिङ्वाच्यं Be2. ४. क्षितं सूत्रमेकं Be2.

अस्मद्युत्तमः ॥१।४।१०७॥

अस्मदि तु तथाभूते उत्तमपुरुषः स्यात् ॥ भू सत्तायाम् ।

मन्यतावुपपदे धातोः मध्यमः स्यात् मन्यतेश्चोत्तमः स एकवत् स्यात् । एहि मन्ये ओदनं भोक्ष्यसे । भुक्तः सोतिथिः । प्रहासे किम् । एहि मन्यसे अन्नं भोक्ष्ये इति साधुः ।

अस्मदि तु तथाभूते इति । तिङ्वाच्यकारकवाचिनि प्रयुज्यमानेप्रयुज्यमाने च सति उत्तमपुरुषो भवतीत्यर्थः । यदा युष्मदस्मदी द्वे अप्युपपदे भवतस्तदा कथं स्यात् । उच्यते । यदा कर्तृशक्ती स्वाधारे नियते तदाख्यातमपि पृथगेव प्रयुज्यते । पचसि पचामि चेति । अविरोधाच्चेच्छक्तिद्वयेपि लकारस्तदा विप्रतिषेधे परत्वादुत्तम एव भवति । त्वं चाहं च पचाव इति । स च त्वं चाहं च पचाम इति द्वन्द्वे त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यत इति वाच्यमिति अस्मदः शेषेपि स्थानिन्यपीति मध्यमे प्राप्ते परत्वादुत्तम एव स्यात् । अस्मच्छब्दस्य युष्मदर्थोपि वाच्यः । अन्यथा द्विवचनं न स्यात् । न ह्यस्मदर्थस्यैव द्विर्वचनमुपपद्यते । भू । भू इदं धातुसूत्रम् । भू इत्यविभक्तिको निर्देशः । छान्दसो वा सुलुक् । छन्दोवत् सूत्राणि भवन्तीति । एवं सर्वत्र । भू इत्ययं धातुः सत्तायां वर्तते । सतो भावः सत्ता अस्तित्वम् । भावो धात्वर्थः सामान्यमिति यावत् । तथोक्तं भर्तृहरिणा ।

'संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।
प्राप्तक्रमाविशेषेषु क्रिया सैवाभिधीयते ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ॥' इति ।

---

१. Dropped D_3. २. उत्तमः पुरुषः P, B_1, C, N. ३. ओदनं Bc_2. ४. चास्मदि Dc_3. ५. मध्यमेपि Bc_2. ६. द्विस्त्वमु Bc_2, Dc_3. ७. इदं सूत्रं Bc_2.

कर्तृविवक्षायां भू तिप् इति स्थिते

तिङ्शित् सार्वधातुकम् ॥३।४।११३॥

[1] तिङ् शितश्चैतत्संज्ञाः स्युः ॥

कर्तृविवक्षायां भू तिबिति स्थिते इति । भू इत्यस्य 'भूवादयो धातवः' इति धातुसंज्ञायां धात्वधिकारविहितानेकप्रत्ययप्रसङ्गे वक्तुर्विवक्षापूर्विका शब्दप्रवृत्तिरिति कर्तृविवक्षायां 'लः कर्मणि च—' इति कर्तरि लकारः । तत्रापि 'प्रत्ययः' 'परश्च' इत्यनुवर्तमाने वर्तमानकालविवक्षायां 'वर्तमाने लट्' इति लट् । तस्य 'तिप्तस्-झि—' इति तिबादयः सामान्येन प्राप्नुवन्ति । तत्राप्यस्य धातोः परस्मैपदित्वात् 'शेषात् कर्तरि परस्मैपदम्' इति परस्मैपदम् । तत्रापि युष्मदस्मद्व्यतिरिक्ते उपपदे समानाधिकरणे विवक्षिते 'शेषे प्रथमः' इति प्रथमपुरुषः । तत्राप्येकत्वविवक्षायां 'द्व्येकयोः—' इत्येकवचनं तिप् । 'हलन्त्यम्' इति पकारस्येत्संज्ञायां 'तस्य लोपः' इति लोपः। एवं सति भू ति इति स्थिते वक्ष्यमाणो विधिः कार्य इत्यर्थः ।

तिङ्शित् । सार्वधातुकप्रदेशाः 'सार्वधातुके यक्' इत्येवमादयः ।

---

१. तिङः D_1, N_1: Before it—अत्रादेशः D_3. २. सार्वधातुकसंज्ञाः स्युः D_1, D_3. ३. Before this—सा जातिरित्यर्थः । यद्वैशेषिकं सामान्यं परमपरं परापरं चेति । परं सत्ता महाविषयत्वात् । अपि च धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते । यत्रान्यत् क्रियापदं नास्ति तत्रास्तिभवत्योरध्याहार इत्यलम् ॥ Bc_2, Dc_3. ४. काल dropped Bc_2. ५. After it—एषा च पूर्वनवकस्य । लः परस्मैपदसंज्ञा उत्तरस्य 'तङानावात्मनेपदम्' इत्यात्मनेपदसंज्ञा । एवं सति तत्रापि तस्य धातोः परस्मैपदमिति परस्मैपदं तत्रापि परस्मैपदभिकाणां क्रमेण तिङि त्रीणि प्रथममध्यमोत्तमसंज्ञा त्रिष्वपि त्रीणि वचनानि । सान्येकवचनेति एकवचनद्विवचनबहुवचनसंज्ञानि Dc_3.

कर्तरि शप् ॥३।१।६८॥

कर्त्रर्थे सार्वधातुके परे धातोः शप् प्रत्ययः स्यात् ॥ शपावितौ ।

सार्वधातुकार्धधातुकयोः ॥७।३।८४॥

अनयोः परयोरिगन्तस्याङ्गस्य गुणः स्यात् ॥[1] भवति । भवतः ।

कर्तरि । शपावितावितिं । शकारः सार्वधातुकसंज्ञार्थः । तस्य 'लशक्वतद्धिते' इति इत्संज्ञायां लोपः । पकारोनुदात्तार्थः पित्कार्यार्थश्च । तस्य 'हलन्त्यम्' इतीत्संज्ञायां लोपः । भू अति इति स्थिते ।

सार्व । सनः सकारमारभ्या महिङो ङकारात् प्रत्याहारे सङीत्यस्मिन्नुच्यमानेप्यग्नि काम्यतीत्यत्र स्यादतः सार्वधातुकेत्याद्युक्तम् । इगन्तेति । 'इको गुणवृद्धी' इति परिभाषया । **भवतीति** । 'एचोऽयवायावः' इत्योकारस्यावादेशः । **भवत इति** । द्वित्वविवक्षायां भू तस् इति स्थिते 'कर्तरि शप्' इति शप् । 'सार्वधातुक—' इति गुणः । अवादेशः । 'ससजुषोः—' इति रुत्वम् । 'खरवसानयोः' इति विसर्गः । बहुत्वविवक्षायां 'बहुषु बहुवचनम्' इति परस्मैपदप्रथमपुरुषबहुवचनं झि । भू झि इति स्थिते ।[6]

---

१. After this—गुणवृद्धी परत्वादियङादिकं बाधेते B_1, D_1, D_2. २. नुबन्धार्थः: Bc_2. ३. तस्यापि Bc_2. ४. सार्वधातुकार्धधातुकयोः: Bc_2 ५. अत्र सनः: Dc_3. ६. After it—पूर्ववच्छपि: Bc_2.

झोन्तः ॥७।१।३॥

प्रत्ययादेर्झस्यान्तादेशः स्यात् ॥ अतो गुणे । भवन्ति । भवसि । भवथः । भवथ ।

अतो दीर्घो यञि ॥७।३।१०१॥

अतोऽङ्गस्य दीर्घः स्यात् यञादौ सार्वधातुके परे ॥

झोन्तः । 'चुटू' इति इत्संज्ञापवादोयम् । **प्रत्ययादेरिति** । ननु च प्रत्ययादेरेव यदि स्यात् तदा शेरते[१] इति न सिध्यति । शीङो लेटि कृते 'लेटोडाटौ' इत्यादि च कृते झस्य प्रत्ययादित्वाभावात् अन्तादेशो न स्यात् । तथा चोक्तं[२] **काशिकायाम्** । 'प्रत्ययग्रहणमनुवर्तते । आदिग्रहणं निवृत्तम्' इति । सत्यम् । तथा चाचार्यैर्वैर्निरागमप्रत्ययविवक्षयोक्तम् । सागमप्रत्ययविवक्षायां तु प्रत्ययावयवस्येत्येव । अथवा प्रत्ययादेरिति प्रत्ययावयवस्येत्यर्थः । कुत एतत् उच्यते । प्रत्ययेन आदीयते उपादीयते समवायित्वेनेति प्रत्ययादिः [४]अवयवा हि अवयविना समवायित्वेनोपादीयन्ते । यथा पटेन तन्तवः । 'उपसर्गे घोः किः' । इत्याङ्पूर्वाद्दातेः कर्मणि किः । पश्चात् कर्तृषष्ठीसमासः । प्रत्ययस्यादिः प्रत्ययादिः प्रत्ययावयव इति यावत् । भवसि । भवथः । भवथ इति । समानाधिकरणे युष्मद्युपपदे विवक्षिते 'युष्मद्युपपदे—' इति मध्यमपुरुषः । पूर्ववच्छेबादि ।

अतः । दीर्घग्रहणं किम् । प्रकृतोडागम एव कस्मान्नानुवर्त्येत । विधिसामर्थ्यादतोगुण इति पररूपं नेति चेन्न[६] । अधुक्षावहीत्यत्र 'क्सस्याचि' इति लोपः स्यात् । 'सुपि च' इत्यत्र वानुवृत्तौ अतिजराभ्यामित्यत्र च जरस् स्यात् । एवमपि दीर्घग्रहो व्यर्थः ।

---

१. Dropped D_1, D_3. २. शयाते Bc_3. ३. यथोक्तं Bc_2. ४. समवायित्वेन समवयन्ति यथा पटे तन्तवः । Bc_2. ५. °च्छबादिः Bc_2. ६. न स्यादिति Bc_2. ७. इत्यत्रानुवृत्तौ Bc_2; इत्यत्रानुवृत्तेः Dc_3. ८. Dropped Bc_2, Dc_3. ९. असिद्धत्वादत एवमपि Bc_2.

भवामि । भवावः । भवामः । स भवति । त्वं भवसि । अहं भवामि । इत्यादि ज्ञेयम् ।

भू प्राप्तावात्मनेपदी वा[3] ।

टित आत्मनेपदानां टेरे ॥३।४।७९॥

टितो लस्यात्मनेपदस्य टेरेत्वं स्यात् ॥ भवते ।

अत आदित्येव विधेयम् । मैवम् । अपाक्षीरोदनं देवदत्त । ननु पचामि भोरित्यत्र 'अनन्त्यस्यापि प्रश्नाख्यानयोः—' इति प्लुतः स्यात् । स मा भूद्दीर्घ एव यथा स्यादिति दीर्घग्रहणम् । **भवामीति** । अस्मदि समानाधिकरणे उपपदे विवक्षिते 'अस्मद्युत्तमः' इत्युत्तमः । तत्राप्येकत्वविवक्षायामेकवचनं मिप् । एवं युष्मदादिष्वप्रयुज्यमानेषूदाहृतम्[1] । इदानीं प्रयुज्यमानेषूदाहरति । **स भवति । त्वं भवसि । अहं भवामि । इत्यादि ज्ञेयमिति** । आदिशब्दात् तौ भवतः । ते भवन्ति । युवां भवथः । यूयं भवथ । आवां भवावः । वयं भवामः । इत्यादि ज्ञेयम् ।

भू **प्राप्ताविति** । भू इत्ययं धातुः प्राप्त्यर्थे आत्मनेपदी भवन् वा चुरादिः स्यात् । चुरादौ 'आधृषाद्वा' इत्यधिकारे 'भू प्राप्तावात्मनेपदी' इति पाठादिति भावः । एतच्चात्मनेपदिनोऽस्याचुरादित्वपक्षे प्रक्रियाविशेषकथनायोक्तम् ।

टितः । ननु च पचमानो यजमान इत्यत्रापि टेरेत्वं प्राप्नोति । शानचोऽपि टितो लकारसंबन्धित्वादात्मनेपदत्वाच्च । नैष दोषः । प्रकृतैस्तिबादिभिरात्मनेपदानां विशेषितत्वात् ।

---

१. Before it—युवां भवथः B_3. २. Dropped D_2. ३. °प्राप्त्यर्थम् । Dc_3.

सार्वधातुकमपित् ॥१।२।४॥

अपित् सार्वधातुकं ङिद्वत् स्यात् ॥[१]

आतो ङितः ॥७।२।८१॥

अतः परस्य ङितामाकारस्य इय् स्यात् ॥ 'लोपो व्योर्वलि'। भवेते। भवन्ते।

थासः से ॥३।४।८०॥

टितो लस्य थासः से स्यात् ॥ भवसे । भवेथे । भवध्वे । अतो गुणे[४] । भवे । भवावहे । भवामहे ।

सार्वधातु । ङिद्वदिति । ङिता तुल्यं ङिद्वदिति । तृतीयान्ताद्वतिः । अथवा ङितीव ङिद्वदिति । 'तत्र तस्येव' इति सप्तम्यन्ताद्वतिः । कार्यातिदेशोयम् । सार्वधातुकं किम् । कर्ता । अपित् किम् । करोति ।

आतः । आतः किम् । भवन्ति । ङितः किम् । भवावहे । अत इति तपरकरणं किम्[५] । मिमाते । असति हि तस्मिन् 'श्नाभ्यस्तयोः—' इति लोपात् परत्वादयमेव विधिः स्यात् ।

थासः । स इति वक्तव्ये से[६] इति वचनं ज्ञापनार्थम् । आदेशानामेत्वं न भवतीति । तेन एधितेत्यादि सिद्धम् । भवेथे इति । आथां टेरेत्वम् । ङित्त्वम् । आकारस्येय् यलोपः । भवावहे भवामहे इति वहिमहिङौ । टेरेत्वम् । शबादि । 'अतो दीर्घो यञि' इति दीर्घः ।

---

१. After it—'अतो येयः' इत्यधिकृत्य B_1. २. Dropped N_1. ३. B_1 drops it. ४. अतो गुणे dropped D_3. ५. तपरः किम् । Bc_2. ६. सेवचनं Bc_2.

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥३।३।१६१॥

एष्वर्थेषु धातोर्लिङ् स्यात् ॥

विधि । विधिः प्रेरणम् । आज्ञापनमिति यावत् ।[1] निमन्त्रणं नियोगकरणम् । यत्राकरणे प्रत्यवायः ।[3] आमन्त्रणं कामचारकरणम् ।[4] यत्राकरणेपि प्रत्यवायाभावः । अधीष्टः सत्कारपूर्वको व्यापारः ।[5] संप्रश्नः संप्रधारणम् ।[6] प्रार्थना याच्ञा ।[7] अत्र

'न्यायव्युत्पादनार्थं च प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्' ॥ अन्यथा
'अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया' ॥

इति पदमञ्जरीकारोक्तो विशेषो ज्ञेयः । एष्वर्थेष्विति । विध्यादिविशिष्टेषु कर्त्रादिष्वर्थेष्वित्यर्थः । किमर्थमेवं व्याक्रियते । उच्यते । विध्याद्यर्थः किं प्रकृत्यर्थविशेषणं वा स्यात् प्रत्ययार्थो वा प्रत्ययार्थे[10] विशेषणं वा । तत्र यद्याद्यः कल्पस्तदा यत्र प्रकृतिरेव विध्यादीनाचष्टे तत्र न सिध्येत् । विदध्यात् । निमन्त्रयेतेति । अथ द्वितीयस्तदा

---

१. विधिः कर्तव्यार्थोपदेशः । निमन्त्रणं नियोगकरणम् । आमन्त्रणं कामचारकरणम् । अधीष्टः सत्कारपूर्वको व्यापारः । संप्रश्नः संप्रधारणम् । प्रार्थनं याच्ञा । एष्वर्थेषु &c. B_1, B_2, C, D_1; (B_1 drops from विधिः...to °पदेशः ; it has नियोगतः कर्तव्यं निमन्त्रणम् । सत्कारपूर्वको व्यापार इत्यधीष्टशब्दार्थः । संप्रधारणं संप्रश्नः । याच्ञा प्रार्थना ; D_1 and B_2 have एष्वर्थेषु धातोर्लिङ् स्यात् । लस्य तिबादयः in the beginning and then विधिः कर्तव्या°). २. After it—यद्वा यस्य करणे प्रत्यवायः स विधिः । Dc_3. ३. After it—भ इह भुञ्जीत भवान् Dc_3. ४. After it—इहासीत भवान् Dc_3. ५. अधीष्टं Dc_3. ६. °पूर्वो Bc_2. ७. After it—पुत्रमध्यापयेद्भवान् Dc_3. ८. किं वा वेदमधीयीतोत तर्कं वा । Dc_3. ९. After it—भो भोजनं लभेय Dc_3. १०, प्रत्ययार्थविशेषणं वा Bc_2.

लस्य तिबादयः ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥३।४।१०३॥

लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च[1] ॥ ङित्त्वोक्तेर्ज्ञायते लाश्रयं ङित्त्वं नादेशानामिति ।

लिङः सलोपोऽनन्त्यस्य ॥७।२।७९॥

सार्वधातुकलिङोऽनन्त्यस्य[2] सस्य लोपः[3] स्यात् ॥

इतश्च ॥३।४।१००॥

[4]ङितो लस्य परस्मैपदेष्विकारस्य[5] लोपः स्यात् ॥

भावकर्मकर्तॄणां प्रत्ययार्थानां विध्यादयो बाधकाः स्युः । अतस्तृतीयः पक्ष एव श्रेयान् ।

यासुट् । टकारः स्थानविध्यर्थः । उकार उच्चारणार्थः । **स चेति** । स यासुडित्यर्थः । **ङिच्चेति** । लिङ् ङिच्चेत्यर्थः । तत्रैव ङित्कार्याणां संभवात् । 'सार्वधातुकमपित्' । इति ङित्त्वे सिद्धेपि तदर्थं[6] वचनं ङिच्चेति ज्ञापकार्थमपीत्याह । **ङित्त्वोक्तेरिति** । तेन अचिनवमसुनवमित्यादौ गुणो न भवति । उदात्तवचनमपि तदर्थमागमादावुदात्तत्व[7]ज्ञापनार्थं च ।

लिङः । अनन्त्यस्य किम् । भवेयुः । सार्वधातुके किम् । भूयास्ताम् ।

इतः[8] । अतः 'उस्यपदान्तात्' इति पररूपमयं[9] बाधते । तेन भवेयुरिति सिद्धम् ।

१. ङिच्चत् B_1. २. सार्वधातुकस्यैव लिङो B_2. ३. सलोपः B_1; सस्य dropped B_2. ४. ङित्लकारेकारस्य लोपः स्यात् परस्मैपदे । D_1. ५. °ष्विकार लोपः D_4. ६. अपिदर्थं Bc_2, Dc_3. ७. °मागमानुदात्तत्व° Dc_3. ८. अतः Bc_2. ९. अयं dropped Bc_2.

अतो येयः ॥७।२।८०॥

अतः परस्य या इत्यस्य इय् स्यात् सार्वधातुके[२] । गुणः । येलोपः । भवेत् ।

तस्थस्थमिपां तान्तन्तामः ॥३।४।१०१॥

[४]ङितश्चतुर्णां तामादयः क्रमात् स्युः ॥ भवेताम् ।

झेर्जुस् ॥३।४।१०८॥

लिङो झेर्जुस् स्यात् ॥ ज इत् । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् ।

अतः । अतः किम् । चिनुयात् । तपरत्वं किम् । यायात् । सार्वधातुके किम् । चिकीर्ष्यात् । ननु चात्र अतो लोपः स्यात् । एवं तर्हि भवेदित्यत्रापि 'अतो दीर्घो यञि' इति दीर्घः स्यात् । तदनेनावश्यं विध्यन्तरं बाध्यम् । स दीर्घस्येवाल्लोपस्यापि बाधकः । गुण इति । 'आद्गुणः' इत्यनेन । यलोप इति । 'लोपो व्योर्वलि' इत्यनेन ।

तस्थस्थ । ङितश्चतुर्णामिति । ङिल्लकारसंबन्धिनां तसादीनां चतुर्णामित्यर्थः ।

झेः । झोन्तापवादः । ज इदिति । 'चुटू' इत्यनेन । भवेरिति मध्यमपुरुषैकवचनम् । भवेतमित्यादि । थसथमिपां क्रमेण तं त अम् इत्येते आदेशाः[५] ।[६]

---

१. इय N_1. २. After it—परे D_3. ३. यलोपश्च D_4. ४. ङितां लस्य चतुर्णां B_2. ५. आदेशाः क्रमात् B_2. ६. After it—भवन्ति Bc_2.

नित्यं ङितः ॥३।४।९९॥

ङिल्लकारोत्तमसकारस्य नित्यं लोपः स्यात् ॥ भवेव । भवेम ।

लिङः सीयुट् ॥३।४।१०२॥

लिङ आत्मनेपदस्य सीयुडागमः स्यात् । सेर्लोपः ॥ भवेत । भवेयाताम् ।

झस्य रन् ॥३।४।१०५॥

लिङो झस्य रन् स्यात् ॥ भवेरन् । भवेथाः । भवेयाथाम् । भवेध्वम् ।

इटोत् ॥३।४।१०६॥

लिङादेशस्येटोत् स्यात् ॥ भवेय । भवेवहि । भवेमहि ।

नित्यम् । नित्यग्रहणं 'वैतोन्यत्र' इत्यतोनुवर्तमानस्य विकल्पस्य निवृत्त्यर्थम् ।

लिङः । सामान्येन विहितोयं यासुटा विशेषविहितेन परेण बाध्यत इति यासुट्विषयं परस्मैपदं परिहृत्य आत्मनेपद एव वर्तत इत्यभिप्रेत्याह । **लिङात्मनेपदस्येति** । टो देशविध्यर्थः । उकार उच्चारणार्थः । **सलोप इति** । 'लिङः सलोपः—' इत्यनेन ।

झस्य । झोन्तापवादः ।

इटोत् । त इत् । ननु तकारस्येत्संज्ञानिषेधः प्राप्नोति । 'न विभक्तौ तु स्माः' इत्यनेन । सत्यम् । किं तु नायमादेशावयवस्तकारः । किं तर्हि । मुखसुखार्थमुच्चार्यते । अथवा 'न विभक्तौ—' इत्यस्यानित्यत्वज्ञापनान्न निषेधः । अत्र इट इति आगमस्येटो ग्रहणं न भवति । अर्थवद्ग्रहणे नानर्थकस्येति परिभाषयेत्यभिप्रेत्योक्तं **लिङादेशस्येति** ।

---

१. सलोपः D_1, D_2, D_3, Com. २. B_1, D_1 have after it—**सः स्वरार्थः** ।. ३. अयं dropped Bc_2. ४. प्रतिसेधः Bc_2, Dc_3. ५. आगतस्ये° Bc_2.

लोट् च ॥३।३।१६२॥

विध्यादिष्वर्थेषु धातोर्लोट् स्यात् ॥

आशिषि लिङ्लोटौ ॥३।३।१७३॥

[1]धातोर्लिङ्लोटावाशिषि स्तः ॥

एरुः ॥३।४।८६॥

लोट इकारस्य उः स्यात् ॥

तुह्योस्तातङाशिष्यन्यतरस्याम् ॥७।१।३५॥

आशिषि तुह्योः[2] स्थाने तातङ् स्याद्वा[3]। ङित्त्वं गुणाद्यभावाय [4]नान्त्यादेशाय ।[5] भवताद्वा ॥[6]

लोट् । **विध्यादिष्विति** । विधिनिमन्त्रणाधीष्टसंप्रश्नप्रार्थने-ष्वित्यर्थः ।

आशिषि । आशंसनमाशीः[7] । इष्टस्यार्थस्याप्राप्तस्य प्राप्तिः ।

एरुः । **लोट इति** । लोडादेशानामित्यर्थः ।

तुह्योः । **ङित्त्वमित्यादि** । आदिशब्देन वृद्धिग्रहणम् । वृतादि-त्यादिषु गुणप्रतिषेधः । मृष्टादित्यत्र वृद्धिप्रतिषेधः । यतो ङित्त्वं गुणाद्यभावाय अतो[8] 'ङिच्च' इत्यन्तादेशाय न । यदि हि ङित्करण-स्यान्यप्रयोजनं[9] न स्यात् ततो[10] ह्यादिदेशार्थं स्यादित्यर्थः ।

---

१. Before it—अप्राप्तप्रार्थनमाशीः B_1. २. तुह्निस्थाने N, D_3. ३. वा स्यात् P. ४. नान्तादेशाय P. ५. After this—तातङ्ङित्त्वं संक्रमकृत स्यात् । अन्त्यविधिश्चेत् तच्च तथा न । हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह । तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः । न तद्वत्नङादीनां तेन ते स्वविकारजाः ॥ B_1, B_2 ; C has on the margin—संक्रमो गुणवृद्धिप्रतिषेध इति पूर्वाचार्याणां संज्ञा (B_2 has तातङि ङित्त्वं after संक्रमकृत् स्यात्-संक्रमो नाम गुणवृद्धिप्रतिषेधः). ६. वा dropped B_1, P, C. ७. आशासन° Bc_2. ८. अतो ङित्त्वमन्त्यादेशाय न Bc_2. ९. न्यत प्र° Bc_2. १०. ततोन्त्यादेशार्थं स्यादित्यर्थः Bc_2, Dc_3.

लोटो लङ्वत् ॥३।४।८५॥

लोटो लङ्वत्कार्यं स्यात् । तेन तामादयः सलोपश्च ॥ [१]भवताम् । भवन्तु ।

सेर्ह्यपिच्च ॥३।४।८७॥

लोटः सेर्हिः स्यात् सोपिच्च ॥

तथोक्तं वार्तिककृता ।

तातङि ङित्त्वं संक्रमकृत् स्यादन्त्यविधिश्चेत्तच्च तथा न ।
हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह ॥

तातङो ङित्त्वसामर्थ्यान्नायमन्त्याविधिः स्मृतः ।
न तद्वदनङादीनां तेन ते ह्यविकारकाः ॥ इति ।

ङित्वाच्चास्य स्थानिवद्भावेन पित्त्वं न भवति । ङिच्च पिन्न भवतीति वचनात् । तेन ब्रूतादित्यत्र 'ब्रुव ईट्' इतीट् न भवति ।

लोटः । तामादयः । तान्तन्तामः । ननु च लङ्वदित्युक्तम् । तत्र 'लुङ्लङ्—' इत्यट् । 'आडजादीनाम्' इत्याट् । 'सिजभ्यस्तविदिभ्यश्च' । 'लङः शाकटायनस्यैव' इति । 'झेर्जुस्' । एते किमिति न भवन्ति । अत्र ब्रूमः । 'विदो लटो वा' इति वाग्रहणमनुवर्तते । सा च व्यवस्थितविभाषा [२]भविष्यति । तेन तामादय एव भवन्ति अडादयो न भवन्तीति ।

१. Dropped D_1, D_2, D_3, N_1. २. Before it—'विदो लटो वा' इत्यनुवृत्तेर्व्यवस्थितविभाषया अट् आट् झेर्जुस् न । D_3. ३. °विकारजाः । Dc_3. ४. ङिच्चापि Bc_2. ५. भवति Bc_2.

अतो हेः ॥६।४।१०५॥

अतः परस्य हेर्लुक् स्यात् ॥ भव भवताद्वा। भवतम्। भवत।

मेर्निः ॥३।४।८९॥

लोटो मेर्निः स्यात् ॥

आडुत्तमस्य पिच्च ॥३।४।९२॥

लोडुत्तमस्याडागमः स्यात् स पिच्च ॥ हिन्योरुत्वनिषेधः।
भवानि।

अतः। अतः किम्। युहि। रुहि। तपरकरणं किम्। लुनीहि। असिद्धवदत्राभादितीत्वस्यासिद्धत्वादाकारान्तमेवैतद् भवति। ननु च हेरादेशस्य तातङोपि स्थानिवद्भावेन हित्वाद् भवतादित्यत्रापि लोपेन भाव्यम्। सत्यम्। अत्र 'हुझल्भ्यो हेर्धिः' इत्यतो हेरित्यनुवर्तमानेपि यत् पुनर् 'अतो हेः' इति हिग्रहणं ततोयमर्थः स्यात्। हेरेव हेर्लोपो भवतीति। तेनात्र लोपो न भवति। तातङो हि हित्वं स्थानिवद्भावेन न साक्षात्।

मेर्निः। उत्वेकारलोपयोरपवादः।

आडु। स पिच्चेति। स उत्तमः पिद् भवति। अथाट एव पित्त्वं कस्मान्न स्यात्। निरर्थकत्वात्। पित्त्वं ह्यनुदात्तार्थं वा स्यात् गुणवृद्धिप्रवृत्त्यर्थं वा। तत्राटोनुदात्तत्वमागमत्वादेव सिद्धम्। गुणवृद्ध्योस्तु नैवाटो निमित्तत्वम्। अप्रत्ययत्वात्। तस्मादाटं प्रति पित्त्वानर्थक्यादुत्तमस्यैव भवति। हिन्योरुत्वनिषेध इति। हिश्च निश्च हिनी तयोः हिन्योरुत्वनिषेधः। 'एरुः' इति प्राप्तस्येत्यर्थः।

---

१. °प्रनिषेधः D2, D3. २. तुहि Dc3. ३. तपरः किम् Bc2. ४. अपि dropped Bc2. ५. हेर्ग्रहणं Bc2, Dc3. ६. विषपि Bc2. ७. °मागमादेव Bc2. ८. अप्रत्ययात् Bc2.

ते प्राग्धातोः ॥१।४।८०॥

ते गत्युपसर्गसंज्ञा[1] धातोः पूर्वं[2] प्रयोज्याः ।

आनि लोट् ॥८।४।१६॥

उपसर्गस्थान्निमित्तात् परस्य लोडादेशस्य आनीत्यस्य णः[3] स्यात् ॥ प्रभवाणि ॥ अदन्तरोरुपसर्गवद्वृत्तिर्वाच्या[4] ॥* वृत्तिः[5] समासः । अद्भवानि[6] । अन्तर्भवाणि । दुरः परस्य णत्वं नेति केचित् । दुर्भवानि । भवाव । भवाम । टेरेत्वे कृते ।

आमेतः ॥३।४।९०॥

लोट एकारस्याम् स्यात् ॥ भवताम् । भवेताम् । भवन्ताम् ।

ते प्रा । ननु च क्रियायोगे गत्युपसर्गसंज्ञे विहिते इति धातुग्रहणं विनापि धातोः प्राक् प्रयोगः स्यात् । न हि धातोरन्यस्य क्रियास्ति । तस्माद्धातोरिति व्यर्थम् । न व्यर्थम् । प्रचिकीर्षतीत्यत्रापि[7] धातोः प्राग्यथा स्यात् । तत्र हि प्रशब्दः सन इषिक्रियाया युज्यते इति सनं प्रति गत्युपसर्गसंज्ञे[8] ततः सनः प्राक् स्यात् । धातुग्रहणे हि सति चिकीर्षतेर्धातोः प्राक् प्रयुज्यते न सनः ।

आनि । लोडिति किम् । प्रकृष्टा वपा येषु तानि प्रवपानि मांसानि । अदन्तरोरिति । अच्छब्दस्य 'आतश्चोपसर्गे' इत्यङ्विधौ उपसर्गत्वम् । अद्धा । अन्तःशब्दस्याङ्किविधिणत्वेषु । अन्तर्धा । अन्तर्धिः । दुरः परस्येति । दुरः उपसर्गात् प्राप्तम् । स्वमते तूपसर्गप्रतिरूपकमेतदव्ययं नोपसर्ग इति णत्वं न । तेन दुर्नय इत्यादि सिद्धम् । टेरेत्व इति । 'टित—' इत्यनेन ।

---

१. गत्युपसर्गसंज्ञका P, B_2. २. प्राक् C. ३. नस्य णः D_1, D_2. N, B_2. ४. D_1 drops वाच्या. ५. वृत्तिः समासः । अद्भवानि dropped D_1, N; वृत्तिः समासः dropped D_3. ६. अन्तर्भवाणि । अद्भवाणि । D_4. ७. अत्र Dc_3. ८. °संज्ञा Dc_3.

सवाभ्यां वामौ ॥३।४।९१॥

लोडेतः सवाभ्यां परस्य क्रमात् वे[1] अम् एतौ स्तः ॥ भवस्व । भवेथाम् । भवध्वम् ॥

एत ऐ ॥३।४।९३॥

लोडुत्तमस्य एत ऐ स्यात् ॥ आमोपवादः । आडागमः[2] । वृद्धिः । भवै । आटोऽङित्त्वादियादेशो न[3] । भवावहै । भवामहै ॥

अनद्यतने लङ् ॥३।२।१११॥

[4]नास्त्यद्यतनो यस्मिन् भूते काले तस्मिन् वाच्ये

सवाभ्याम् । **लोडेत** इत्यादि । सवाभ्यां परस्य लोडेकारस्य क्रमात् व अम् एतौ स्त इत्यर्थः ।

एत । पचावेदमित्यत्र[5] आद्गुणे कृते असिद्धं बहिरङ्गमन्तरङ्गे इति तस्यासिद्धत्वादेत्वं न । **आमोपवाद** इति । 'आमेतः' इति प्राप्तस्य । **आडागम** इति । 'आडुत्तमस्य' इत्यनेन । **वृद्धिरिति** । 'आटश्च' इति 'वृद्धिरेचि' इत्यनेन च । **आट** इति । आट इयादेशो न । कुतः । अङित्वात् । ङितां खलु आकारस्येयादेशो विधीयते । अयं च ङिन्न । पित्त्वात् । पिच्च ङिन्न भवतीति ।

अनद्यतने । अनद्यतन इति यद्ययं तत्पुरुषः स्यात्तदाद्यतनादन्यस्मिन् भवतीत्यर्थः स्यात्[6] । एवं चाद्य ह्यो वा भुङ्क्ष्महीत्यत्राद्यतनानद्यतनव्यामिश्रणे प्राप्नोति । भवति ह्यद्यतनानद्यतनसमुदायोऽद्यतनादन्यः । तस्मात् तत्पुरुषे[7] दोषं दृष्ट्वा बहुव्रीहिपक्षमाश्रित्याह । **नास्त्यद्यतनो[8] यस्मिन्निति** । अद्यतनो[9]

---

१. व अम् dropped D_2. २. आडागमः dropped P, D_1, D_3, B_1 B_2. ३. आटो...देशो न after भवामहै D_1; before भवै D_3, N. ४. Before it—अतीताया रात्रेः पश्चिमयामद्वयमागामिन्याः पूर्वयामद्वयं दिवसश्च एषोऽद्यतनः B_2, C (पूर्वं यामं दिवसः सकलः एषो' B_2, पश्चिमं यामं पूर्वं दिवसः सकलः एषोऽद्यतनः D_3). ५. °मिति Dc_3. ६. इत्येतौ Bc_2. ७. नञ्तत्पुरुषः Dc_3. ८. °तनस्य° Dc_3. ९. अस्मि° Bc_2.

धातोर्लेङ् स्यात् ॥[१]

लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥६।४।७१॥

एषु परेष्वङ्गस्याडागमः स्यात् स चोदात्तः । अभवत् । अभवताम् । झोन्ते इलोपे संयोगान्तलोपः । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम । अभवत । अभवेताम् । अभवन्त । अभवथाः । अभवेथाम् । अभवध्वम् । अभवे । अभवावहि । अभवामहि ।

नामातीताया रात्रेर्यामद्वयादर्वाक् यावदागामिन्या रात्रेर्यामद्वयमेतावान् काल इत्येके । अन्ये त्वाचक्षते । दिवसः सकलोऽतीतायाश्च रात्रेः पश्चिमो याम आगामिन्याश्च रात्रेः प्रथमो याम एतावान् । ङकारो 'नित्यं ङितः' इति विशेषणार्थः । अकारो 'लङः शाकटायनस्य' इति विशेषणार्थः । परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषयेऽर्थे लङ् वाच्यः । अरुणद्यवनः साकेतम् ।

लुङ् । स चोदात्त इति । आगमानुदात्तत्वबाधनार्थम् । **अभवदित्यादि** । भू अस्माल्लङि कृते पूर्ववत् प्रक्रिया । **झोन्ते इत्यादि** । भू झि इत्यत्र 'झोन्तः' इत्यनेनान्तादेशे कृते 'इतश्च' इतीकारलोपे कृते संयोगान्तलोपः ।[७]

---

१. After this—अतीतमर्धरात्रमारभ्यागाम्यर्धरात्रपर्यन्तोऽद्यतनः । तद्व्यतिरिक्त इत्यर्थः । D_2, B_1. २. लङ् लुङ्° N. ३. झोन्ते इलोपे च कृते C, D_2 ; झोन्त इतश्च लोपे च कृते B_1, B_2 ; झोन्तः । इतो लोपे कृते D_1 ; झोन्त इलोपे च कृते N_1 ; इलोपे कृते D_3. ४. संयोगान्तस्य लोपः B_2, N_1, D_4. ५. °तीतरात्रिपश्चिमयामः आगामिन्याः प्रथम एतावान् Bc_2. ६. अर्थे dropped Bc_2, Dc_3. ७. After it—अभवन् Dc_3.

लुङ् ॥३।२।११०॥

भूतेर्थे धातोर्लुङ् स्यात् ॥

माङि लुङ् ॥३।३।१७५॥

माङ्योगे लुङ् स्यात् ॥ सर्वलकारापवादः ।

स्मोत्तरे लङ् च ॥३।३।१७६॥

स्मोत्तरे माङि लङ् स्यात् लुङ् च ॥

च्लि लुङि ॥३।१।४३॥

धातोर्लुङि च्लिप्रत्ययः स्यात् ॥ शबाद्यपवादः ।

लुङ् । ङकारो 'नित्यं ङितः' इति विशेषणार्थः । उकारः 'च्लि लुङि' इति विशेषणार्थः । भूतसामान्ये चायं लुङ् वक्तव्यः । भूतविशेषे लङादीनामपवादानां विधानात् । वसतेर्लुङ् रात्रिविशेषे जागरणसंततौ वाच्यः । भवानुषितः । अहमत्रावात्सम् ।

च्लि लुङि । इकार उच्चारणार्थः । चकारोन्तादात्तार्थः । अथ किमर्थं च्लिमुद्दिश्य सिजादय आदिश्यन्ते । तेन सिचमेवोत्सर्गं विधाय तस्य क्सादयोपवादा विधीयेरन् । मैवम् । 'मन्त्रे घस—' इति सूत्रे लेरिति सामान्यग्रहणार्थं च्लिर्विधीयते । अन्यथा तत्र तङोसिच इति वक्तव्यं स्यात् । अथवा 'शल इगुपधात्—' इत्यत्र 'अनिटः' इति च्लेर्विशेषणं यथा स्यात् । न धातोः । यदि धातोर्विशेषणं स्यात् गुहेर्न सिध्येत् । तस्य वेट्कत्वात् । यदा च्लेर्विशेषणं तत्र यदेट् नास्ति तदा च्लिरनिड् भवत्येव ।

---

१. धातोर्लुङ् N₁. २. सर्वलकाराणामपवादः B₁, P, C. ३. लुङि परे P, N₁, D₃, D₄. ४. वाच्यः Bc₂. ५. शेषे for विशेषे Bc₂. ६. सिच्माश्रय Bc₂. ७. चङो Dc₃.

च्लेः सिच् ॥३।१।४४॥

च्लेः सिजादेशः स्यात् ॥ इचावितौ ।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ २।४।७७॥

एभ्यः सिचो लुक् स्यात् परस्मैपदेषु ॥ गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् ।

च्लेः । **इचावितावि**ति । इकारस्येत्त्वममंस्तेत्यादौ 'अनिदिताम्—' इत्यनुनासिकलोपनिषेधार्थम् । ननु 'हनः सिच्' इति कित्-करणात् ज्ञापकात् सिजन्तस्यानुनासिकलोपो न प्राप्नोत्येवं । एवं तर्हि इकार उच्चारणार्थ एव । इता चेन साहचर्यादित्युक्तम् । इत्त्वेपि दोषो नास्तीति कृत्वा । चकारोन्तादात्तार्थः । ननु च स्थानिवद्भावादेव सिचः स्वरो भविष्यति । तत् किमादेशेपि चकारोनुबध्यते । मैवम् । आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वरमपि बाधेतेति स्थानिन्यादेशे च द्विश्चकारोनुबध्यते ।

गाति । **एभ्य** इति । इण् गतौ । अस्यादेशो गा । ष्ठा गतिनिवृत्तौ । घु दारूपा धारूपाश्च धातवः । पा पाने । भू सत्तायामेभ्य इत्यर्थः । **गापोर्ग्रहणे** इति । इणादेशस्य गा इत्यस्य ग्रहणे तावद् गातीति निर्देशो ज्ञापकः । तथा हि । श्तिपा विकरणशून्यो निर्देशो लुग्विकरणस्यैव ग्रहणं यथा स्यात् इति । यदि गामात्रस्य ग्रहणमिष्टं स्यात् तदा गा इत्येवं ब्रूयात् । पाग्रहणे पिबतेर्ग्रहणं लुग्विकरणालुग्विकरणयोरलुग्वि-करणस्यैव ग्रहणमिति परिभाषया ज्ञायते ।

---

१. ग्रहणेन D2. २. एव dropped Dc3. ३. Dropped Bc2. ४. च इता साह° Bc2. ५. विज्ञायते Dc3.

भूसुवोस्तिङि ॥७।३।८८॥

भू सू इत्येतयोः सार्वधातुके तिङि परे गुणो न स्यात् ॥ अभूत् ।

क्ङिति च ॥१।१।५॥

गित्किन्ङिन्निमित्ते गुणवृद्धी न स्तः ॥ अभूताम् ।

भूसु । भू सत्तायाम् । षूङ् प्राणिगर्भविमोचने इति लुग्विकरणस्यैव ग्रहणं सुवतिसूयत्योर्न ग्रहणम् । लुग्विकरणत्वेपि तिङो विकरणेन व्यवहितत्वात् । विकरणस्यैव च ङित्त्वात् गुणाभावसिद्धिश्च । अभूदिति । पूर्ववत् तिबादयः । 'इतश्च' इतीकारलोपः । अडागमः ।

क्ङिति । गकारोप्यत्र चर्त्वभूतो निर्दिश्यते । निमित्तसप्तमी चेत्यभिप्रेत्याह । **गित्किन्ङिन्निमित्त** इति । इक इत्यनुवर्तत एव । तेन कर्मेर्णिङि कामयत इत्यत्र 'अत उपधायाः' इति वृद्धेर्निषेधो न । लैगवायन इत्यत्र नञादित्वात् फकि 'ओर्गुणः' इति गुणनिषेधो न । ननु चात्र प्रतिषेधः स्यादेव । उकारस्येक्त्वात् । न । अत्र त्त्रः क्रियते इत्यर्थे सः । तेनेक इतीमं शब्दमुच्चार्य क्रियमाणयोर्गुणवृद्ध्योर्निषेधो न चैवमोर्गुणः लघूपधगुणस्याप्यत्र प्रतिषेधः ।

१. किति ङिति च निमित्ते D_3, B_1, P; C. २. इकां न स्तः D_3. ३. षूञ् Dc_3. ४. °सूयस्योस्तु नेह Bc_2; °सुवत्योस्तु नेह ग्रहः Dc_3. ५. °सिद्धेश्च Bc_2, Dc_3. ६. तिबादिः Dc_3. ७. फकि कृते Bc_2. ८. निषेधः Bc_2, Dc_3. ९. निषेधः Dc_3.

भुवो वुग्लुङ्लिटोः ॥६।४।८८॥

भुवो वुगागमः स्याल्लुङ्लिटोरचि ॥ अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥

आर्धधातुकं शेषः ॥३।४।११४॥

तिङ्शिद्भ्योन्यो धात्वधिकारविहितः प्रत्यय एतत्संज्ञः स्यात् ॥

आर्धधातुकस्येड्वलादेः ॥७।२।३५॥

वलादेरार्धधातुकस्येडागमः स्यात् ॥

भुवः । ककारो देशविध्यर्थः । अत्र ओरित्यनुवर्तत इति **न्यासकारपदमञ्जरीकारौ** । ततश्च यङ्लुकि बोभाव बोभवीयेत्यत्र परत्वाद्वृद्धौ गुणे च कृते उकारान्तत्वाभावात् वुक् न । अन्यथात्रापि स्यात् । **वार्तिककृतस्त्वेतदनभिमतमतो** न व्याख्यातवान् ग्रन्थकृत् । एतच्च 'इन्धिभवतिभ्यां च' इति सूत्रे व्यक्तीकरिष्यामः ।

आर्ध । **धात्वधिकारविहित** इति । धातुग्रहणेन विहित इत्यर्थः । यदि धातोर्यो विहित इति व्याख्यायते तदा लूभ्यामित्यस्याप्यार्धधातुकसंज्ञा प्राप्नोति । क्विबन्ताद्धातुत्वं न जहतीति भ्यां धातोरेव विहितः तस्माद्धात्वधिकारविहित इति व्याकृतम् । कुत एषोर्थ उपलभ्यते । 'धातोरेकाच—' इत्यतो धातुग्रहणमनुवर्तते । 'धातोः' इत्यतश्च । तयोरेकेनाधातुप्रत्ययो निवर्त्यते । अपरेण धातुप्रत्ययो विशेष्यते । धातोरित्येव यो विहित इति ।

आर्ध । आर्धधातुकस्य किम् । आस्ते । वलादेः किम् । लव्यम् । इडिति वर्तमाने पुनरिड्ग्रहो निषेधनिवृत्त्यर्थः ।

---

१. लिटोः परयोरचि N. २. °रचि परे B_2. ३. धात्वधिकारे विहितः C. ४. Dropped D_2, B_1, P. ५. अत्र च Bc_2, Dc_3. ६. °पदमञ्जर्यौः Bc_2. ७. बोभवियै° Dc_3. ८. °र्थो लभ्यते Bc_2.

गुणावादेशौ । षत्वष्टुत्वे । अभविष्ट । अभविषाताम् ।

आत्मनेपदेष्वनतः ॥७।१।५॥

अनकारात् परस्यात्मनेपदेषु झस्य अदित्यादेशः स्यात् ॥[1] अभविषत । अभविष्ठाः । अभविषाथाम् ।

धि च ॥८।२।२५॥

धादौ प्रत्यये परे सलोपः स्यात् ॥[2]

गुणावादेशाविति । गुणः 'सार्वधातुक—' इत्यनेन । आवादेशः 'एचोयवायावः' इत्यनेन । **षत्वष्टुत्वे** इति । षत्वम् 'आदेशप्रत्यययोः' इति । ष्टुत्वं 'ष्टुना ष्टुः' इत्यनेन । **अभविष्टेति** । भूते इति स्थिते च्लिः । च्लेः सिच् । तस्यार्धधातुकत्वादिट् ।

आत्म । **अनकारादिति** । 'अङ्गस्य' इत्यनुवर्तते । तस्य 'अनकारात्' इत्यनेन[3] तदन्तविधिः । ततश्चानकारन्तादङ्गात् परस्यात्मनेपदेषु वर्तमानस्य झस्येत्यर्थः । आत्मनेपदेषु किम् । चिन्वन्ति । अनः किम् । च्यवन्ते । नित्यत्वादत्र विकरणे शपि कृतेदादेशो न । अन्तादेश एव स्यात् । अनकारान्तेनाङ्गेन[4] झस्य विशेषणं किम्[5] । इह मा भूत् । शयान्ते[6] । अत्राङ्गस्यानन्तरमात्मनेपदम् । आटस्तद्भक्तस्य तद्ग्रहणेन ग्रहणात् । झस्त्वाटा व्यवहितोदादेशो न । अन्तादेशस्त्वङ्गविशेषानुपादानादत्रापि स्यात् ।

धि च । यद्ययं सलोपो न क्रियते[7] तर्हि अभविढ्वमित्यत्र सिचः षत्वे जश्त्वे ष्टुत्वे च सति 'विभाषेटः' इति मूर्धन्याभावपक्षेपि ढकारः श्रूयते[9] । इह च सिचः सकारलोप इष्यते । सिचा च प्रत्यय आक्षिप्यते तस्य च धकारेण विशेषणात् तदादिविधिः स्यादित्यभिप्रेत्याह । **धादौ प्रत्यये इति** । तेनेह न । चकाद्धीति । तथेहापि न । पयो धावतीति ।[8]

---

१. अत् स्यात् C; अदादेशः स्यात् D₂; अत इत्यादेशः स्यात् N.
२. सेलोपः D₁. ३. P drops it. ४. इत्यनेन विशेषितत्वात् Dc₃.
५. अनकारात्मकेनाङ्गेन Bc₂. ६. शाटयन्ते Dc₃. ७. क्रियेत Bc₂.
८. Dropped Bc₂. ९. श्रूयेत Bc₂.

विभाषेटः ॥८।३।७९॥

इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात् ॥ अभविढ्वम् । अभविध्वम् । ध्वे सलोपो वा सस्य द इति केचित् । अभविढ्वम् । अभविषि । अभविष्वहि । अभविष्महि ॥

न माङ्योगे ॥६।४।७४॥

[4]लुङ्लङ्लृङ्क्ष्वुक्तं माङ्योगे न स्यात् ॥ मा भवान् भूत् । [5]मा स्म भवत् । मा स्म भूत् ॥

सग्धिर्बब्ध्वा इत्यत्र तु छान्दसो वर्णलोपो ज्ञेयः । **भाष्यकारस्त्वाह** । चकाधीत्येव भवितव्यमिति । तदा पयो धावतीत्यत्र यत्नान्तरमास्थेयम् ।

विभाषा । अत्रेण इटो विशेषणम् । सोपि षीध्वमादीनाम् । तेपि धकारस्येति दर्शयन्नाह । इणः पर इत्यादि । अप्राप्तविभाषेयं ग्रन्थकृन्मते । प्राप्तविभाषेयमिति तु **पद्मञ्जरीकार**पक्षः । एतच्च 'इणः षीध्वम्—' इत्यत्र कथयिष्यते । इणः किम् । आसिषीध्वम् । **ध्वे सलोप** इति । यदा सलोपो नास्ति तदा 'झलां जश् झशि' इति सस्य दः । तथोक्तं **मुग्धबोधे** । सलोपो वेति ।

न माङ् । **लुङ्लङ्लृङ्क्ष्वुक्त**मिति । माङ्योगे न स्यात् । अडाटावित्यर्थः । **मा भवान् भूत्** इति । 'माङि लुङ्' इति लुङ् । **मा स्म भवत्** । **मा स्म भूत्** इति । 'स्मोत्तरे लङ् च' इति लङ्लुङौ ।

---

१. सीध्वं N. २. मूर्धन्यादेशः स्याद्वा C; मूर्धन्यो वा स्यात् D_1; मूर्धन्यः स्याद्वा । D_3. ३. मूर्धन्यादेशः N. ४. लङ्लुङ्° N. ५. मा स्म भूत् । मा स्म भवत् । B_2, D_3 : मा भवत् । मा भूत् । मा स्म भवत् । मा स्म भूत् D_2 ; मा स्म भवत् भूत् D_4 : भवान् मा स्म भूत् P, C, B_1. ६. पद्मञ्जरी । Bc_2 ; पद्मञ्जरीकारः Dc_3.

७. [प्र. कौ.]

परोक्षे लिट् ॥३।२।११५॥

भूतानद्यतनपरोक्षवृत्तेर्धातोर्लिट्[1] स्यात् ॥ लस्य तिबादयः ।[2]

[3]**लिट् च ॥३।४।११५॥**

लिडादेशस्तिङार्धधातुकसंज्ञः[4] । तेन शबादयो न ।

परोक्षे । ननु च सर्वेऽपि[5] धात्वर्थाः परोक्षे एव । यतो धात्वर्थो नाम पूर्वापरीभूतावयवसाध्या क्रिया । यच्च साध्यमानं तदसत् । यच्चासत् तदिन्द्रियाणां न विषयः । यच्चेन्द्रियविषयो न तत् परोक्षम् । अतो धात्वर्थः सर्वः परोक्षः । ततः परोक्षग्रहणं[6] व्यर्थम् । व्यवच्छेद्याभावात् । सत्यम् । तथापि यत्र प्रत्यक्षाणि साधनानि तत्रानिष्पन्नेऽपि धात्वर्थे प्रत्यक्षाभिमानो लोकस्य स्यात् । ननु साधनान्यपि न प्रत्यक्षाणि । शक्तिरूपत्वात् । शक्तेश्च कार्यानुमेयत्वात् । मैवम् । द्रव्याश्रिता हि शक्तयः । द्रव्यस्य च प्रत्यक्षत्वात् तदाश्रितेषु शक्त्यात्मसु[7] साधनेषु स्वाश्रयधर्मः प्रत्यक्षत्वमुपचर्यते । अथवा साधनशब्देन द्रव्यमेवोच्यते । शक्तिशक्तिमतोरभेदविवक्षया । उत्तमपुरुषे तु पारोक्ष्यं[8] वैचित्त्यात् ।

लिट् च । ननु चात्रैकसंज्ञाधिकाराभावात् सार्वधातुकसंज्ञायाः समावेशः स्यात् । मैवम् । 'लङः शाकटायनस्यैव' इत्यतः एवकारोऽनुवर्तते । स नियमं करिष्यति । आर्धधातुकमेवेति इत्यभिप्रेत्याह । **तेन शबादयो नेति** ।

---

१. °लिट् प्रत्ययः N. २. C drops लस्य तिबादयः ।. ३. B1, D2 have before लिट् च—

> कृतस्यास्मरणे कर्तुरत्यन्तापह्नवेऽपि च ।
> दर्शनादरभावे च त्रिषु विद्यात् परोक्षताम् ॥

C has the same verse in the margin. ४. °संज्ञ : स्यात् B2, D3, D4. ५. सर्वोऽपि धात्वर्थः Dc3. ६. परोक्षेति व्यर्थम् Bc2. ७. शक्त्यात्मसाधनेषु Bc2. ८. परोक्षं Bc2, Dc3.

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥३।४।८२॥

लिटस्तिबादिनवानां णलादयो नवादेशाः स्युः ।

इन्धिभवतिभ्यां च ॥१।२।६॥

आभ्यां परो लिट् कित् स्यात् ॥

इन्धि । इन्धी दीप्तौ । भू सत्तायाम् । इन्धेः संयोगार्थं भवतेः पिदर्थं वचनम् । समीधिरे । अथात्र 'इजादेः—' इत्याम् किं न स्यात् । उच्यते । मन्त्रविषयत्वात् । तत्र च अमन्त्र इत्यधिकारात् । एवं तर्हि 'छन्दस्युभयथा' इति सार्वधातुकत्वात् 'सार्वधातुकमपित्' इति ङित्त्वान्नलोपः स्यात् । ततो व्यर्थं कित्त्वम् । उच्यते । ज्ञापकार्थमनित्य आमिति । नित्यत्वामि तेन व्यवधानात् कित्त्वं व्यर्थं स्यात् । तेन भाषायामपि समीधिरे इत्याद्युपपन्नम् । ननु भवतेः पिदर्थमपि न वाच्यम् । तत्र कृताकृतप्रसङ्गित्वेन नित्यत्वात् । वुकि जाते वृद्धिगुणौ न स्त एव । मैवम् । वुगप्यनित्यः । तत्र हि 'ओः' इति वर्तते । तत्र गुणवृद्ध्योः कृतयोर्नैतदुकारान्तमिति वुक् न स्यात् । वार्तिककारस्य तु एतदनभिप्रेतम् । तथा ह्याह । इन्धेश्छन्दोविषयत्वात् भुवो वुको नित्यत्वात् ताभ्यां लिटः किद्वचनानर्थक्यमिति ।

---

१. क्रमात् स्युः C, B₂. २. Before it—परत्वात् द्वित्वात् पूर्वंवृद्धिप्राप्तौ तद्वा कित्त्वविधायकं सूत्रं पठन्ति । अतो यदमे क्वचित् पूर्वं द्वित्वमुक्त्वा वृद्धिमाह तत् क्रमाविवक्षितत्वात् प्रक्रियामात्रविवक्षितं ज्ञेयम् । Dc3. ३. ञिइन्धि Be₂. ४. सार्वधातुकत्वात् dropped Dc₂. ५. न omitted Dc₁. ६. अत्र Dc₁. ७. Dropped Be₁. Dc₃. ८. एतदभिप्रेतम् Dc₁ ; तदनभिप्रेतम् Dc₃. ९. तथान्वाह Be₂.

लिटि धातोरनभ्यासस्य ॥६।१।८॥

लिटि परेऽनभ्यासस्य धात्ववयवस्यैकाचो द्वे स्तः ॥

एकाचो द्वे प्रथमस्य ॥६।१।१॥

लिडादावुक्तं द्वित्वं धात्ववयवस्य प्रथमस्यैकाचः स्यात् ॥

पूर्वोऽभ्यासः ॥६।१।४॥

अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ॥

लिटि ।

एकाचः । लिडादौ यदुक्तं द्वित्वं तद्धातोरवयवस्यैकाचः प्रथमस्य समुदायस्य स्यादित्यर्थः । यदि प्रथमस्यैकाचः समुदायस्येति नोच्यते तदा णिजिर् शौचपोषणयोरित्येतस्माल्लट् । शप् झि इति स्थिते तस्य 'जुहोत्यादिभ्यः श्लुः' । 'श्लौ' इति द्विर्वचनम् । तत्र यदि निशब्दमात्रं द्विरुच्यते तर्हि दोषः । यतो 'निजां त्रयाणाम्' इति गुणे कृते 'अदभ्यस्तात्' इत्यदादेश इष्यते नेनिजतीति रूपं यथा स्यात् । स च न प्राप्नोति । जकारेण व्यवहितत्वात् न जकारस्याभ्यस्तसंज्ञा । किं तर्हि । निशब्दस्य । तस्य द्विरुक्तत्वात् । अतः समुदाय एव द्विर्वक्तव्यः । अथ कथं पपाचेत्यत्र द्विर्वचनम् । यावता प्रथमस्येत्युच्यते । अत्र एक एव एकाच् । अतो न स्यात् । ददरिद्रौ जजागारेत्यादावेव स्यात् । अन्यच्च । इयायेत्यादौ अपि द्विर्वचनं न स्यात् । यत एकाचस्तदुच्यते । न चात्रैकाच्त्वमस्ति । अज्व्यतिरिक्तस्याभावात् । उच्यते । पपाचेत्यत्र व्यपदेशिवद्भावात् प्रथमत्वम् । इयायेत्यत्र एकाच्त्वं च ।

---

१. P. D_1, D_2, N and C drop एकाचः. २. प्रथमैकाचः D_1, N. ३. अत्र प्रकरणे D_3. ४. इति dropped Bc_2. ५. झि इति स्थिते dropped Dc_3. ६. शब्दमात्रं Bc_2. ७. अपि for इति Bc_2. ८. अत्र च Dc_3.

ह्रस्वः ॥७।४।५९॥

अभ्यासस्य ह्रस्वः स्यात् ॥

अभ्यासे चर्च ॥८।४।५४॥

अभ्यासे झलां चरः स्युर्जशश्च ॥ खयां चरः झशां जश इति विवेकः[1] ।

भवतेरः ॥७।४।७३॥

भवतेरभ्यासस्योकारस्य[2] अः स्याल्लिटि ॥ भवतेरिति कर्तृनिर्देशात् भावकर्मणोर्नात्वम् । वेति केचित् ।

अभ्यासे । खयां चर इत्यादि । अयं च विवेकोन्तरतमपरिभाषया लभ्यते । तथा हि । खयो वर्गाणां द्वितीयाः प्रथमाश्च । ते च विवृतकण्ठाः श्वासानुप्रदाना अघोषाश्च । तेषां सदृशा एव चरस्तुल्यस्थाना जशश्चतुर्थास्तृतीयाश्च ते च संवृतकण्ठा नादानुप्रदाना घोषवन्तस्तेषां तादृशाः[3] एव जशस्तुल्यस्थानाः । तत्र प्रकृतिचरां प्रकृतिचरो जश्त्वबाधार्थम् । जिजनिषते । बुबुधे । एषोर्थः तात्पर्येत उक्तो भवति ।

भवतेः । **अभ्यासोकारस्येति** । एतच्चालोन्त्यपरिभाषया लभ्यते । भवतेरभ्यासस्यान्त्योल् उकार एव । ननु च नानर्थकेलोन्त्यविधिरिति अलोन्त्यविधिर्न । नैवम् । अनभ्यासविकारेष्विति[4] हि सा । अयं चाभ्यासविकारः श्तिपा निर्देशो यङ्लुङ्निवृत्तये[5] बोभावः[6] । कर्तृनिर्देशादिति । कर्त्रर्थयोः श्तिप्श्पोर्निर्देशादित्यर्थः । वेति केचिदिति । तथोक्तं मुग्धबोधे । 'भुवोङ् ढ्यां ढ्यभावे तु वा'[7] इति ।

---

१. झलां जश खयां चर इति विवेक D1. २. °रभ्यासोकारस्य P, B1, B2, ३. तादृशा Dc3. ४. अनभ्यासे वि° Dc1. ५. निवृत्त्यर्थः Bc2. ६. बोभाव Dc3. ७. भुवोङ्भावो गुलुवेति Dc3.

अचो ञ्णिति इति वृद्धिप्राप्तौ क्ङिति चेति निषेधः[1]। [2]वुगागमः। बभूव। बभूवतुः। बभूवुः। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम।

अचो ञ्णितीत्यादि। ननु च 'ङिच्च' इत्यत्र इकोनुवृत्तेरिग्लक्षणैव वृद्धिर्निषिध्यते। न चेयमिग्लक्षणा अच इति निर्दिष्टस्थानित्वात्। इन्धि-भवतीति कित्वविधानसामर्थ्यान्निषेधः स्यादिति चेन्न। थल्युत्तमे णलि च तस्य गुणप्रतिषेधार्थत्वात्। एवं तर्हि इन्धीत्यत्र ङिद्ग्रहणमप्यनुवर्तते। तदनन्यप्रयोजनमनिग्लक्षणाया अपि वृद्धेर्निषेधाय स्यात्। अतः साधूक्तं **क्ङिति चेति निषेध** इति। **बभूवे**ति। भू अस्माल्लिट्। तस्य तिप्। तस्य णलादेशः। स च सर्वस्य तिपः। अनेकाल्त्वात्। ननु च नानुबन्धकृतमनेकाल्त्वं णकारलकारौ चानुबन्धौ तत् कुतोयं सर्वादेशः। नैतत्। न ह्यकृते सर्वादेशे 'चुटू' इतीत्संज्ञा णकारस्य भवति। अप्रत्ययादित्वात्। इत्संज्ञाभावाच्च नानुबन्धो भवतीति सर्वादेशः। अथवा अकारो द्वितीयोत्र प्रश्लिष्टस्तेन सर्वादेशः। असिद्धवदत्राभादिति वुकोसिद्धत्वादुवङि प्राप्ते वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्याद्वुकः सिद्धत्वादुवङ् न। **बभूवतुः**। **बभूवुरि**ति। तस् झि तसः अतुस् झेरुस्। **बभूविथे**ति। सिप् थलादेशः। 'आर्धधातुकस्ये'—' इति इडागमः। **बभूवथुः** इति। थसः अथुस्। **बभूवे**ति। थकारस्याकारा-देशः। 'धातोः' इत्यधिकारात् 'तस्मादित्युत्तरस्य' 'आदेः परस्य' इति थकारस्यादेशो द्वयोरकारयोः अतो गुणे पररूपम्। **बभूवे**ति। मिपो णल् पूर्ववत्। **बभूविव**। **बभूविमे**ति। वस्मसोर्वमौ। 'आर्धधातुकस्ये°—' इतीडागमः।

---

१. प्रतिषेधः B1. २. भुवो वुग् लुङ्लिटोरिति भुवो before it in C. ३. इन्धीति Bc2. ४. Before it—'आदेः परस्य' इत्यत्रांव चुटू इतीत्संज्ञादेशेऽप्यपरितोषात्। समाध्यन्तरमाह। Dc3. ५. वक्तव्यत्वा Dc3. ६ After it—कृते Dc3.

लिटस्तझयोरेशिरेच् ॥३।४।८१॥

लिडादेशयोस्तझयोरेश् इरेच् इत्येतौ स्तः ॥ बभूव । बभूवाते । बभूविरे । बभूविषे । बभूवाथे । बभूविढ्व । बभूविध्वे । बभूवे । बभूविवहे । बभूविमहे ॥

अनद्यतने लुट् ॥३।३।१५॥

भविष्यत्यनद्यतनेर्थे धातोर्लुट् प्रत्ययः स्यात् ॥

स्यतासी ऌलुटोः ॥३।१।३३॥

ऌ इति लृङ्लृटोर्ग्रहणम् । धातोर्ऌलुटोः परयोः क्रमात् स्यतासी एतौ प्रत्ययौ स्तः । शबाद्यपवादः ॥

लिटस्त । शकारः सर्वादेशार्थः । चकारस्त्वन्तोदात्तार्थः । **बभूविषे** इति । थासः से । 'आर्धधातुकस्य—' इतीट् । 'आदेश-प्रत्यययोः' इति षः । **बभूविढ्वे बभूविध्वे** इति । टेरेत्वम् । इट् । 'विभाषेटः' इति वा मूर्धन्यादेशः ।

अनद्यतने । अनद्यतने इति पूर्ववद् बहुव्रीहिनिर्देशः । तेन व्यामिश्रणे न स्यात् । अद्य श्वो गमिष्यतीति । अनद्यतने इति योग-विभागः कार्यः । तेनाद्यतने विहितस्य लटः सत्संज्ञौ स्तः । अत एव ज्ञापकादनद्यतने लट् । श्वोग्नीनाधास्यमानेन श्वः सोमेन यक्ष्यमाणेन । परिदेवने लुडद्यतनेपि वाच्यः । इयं तु न कदा गन्ता यैवं पादौ निदधाति ।

स्यतासी । ननु च लङ्लृट्लुट् इति प्रत्ययानि निमित्तानि त्रीणि निमित्तिनौ स्यतासी द्वौ इति वैषम्याद्यथाक्रमं न स्यातामिति शङ्का-परिहारार्थमाह । **ऌ इतीति** । लृङ्लृटोः सामान्यग्रहणमेवेति यावत् ।

---

१. एतौ B_2, D_2, D_4, N ; एतौ क्रमात् D_3. २. Before it—विभाषेटः D_3. ३. भवति N. ४. धातोः dropped D_1. ५. एतौ स्तः P; इत्येतौ D_1, D_3, C. ६. After it—भविष्यत्सामान्ये परिदेवने लुड् वाच्यः । अयं वृद्धः कदाध्येता य एवं मन्दः । Dc_3. ७. कर्तव्यः Bc_2, Dc_3. ८. °प्रथमाद्या Bc_2. ९. परिहारायाह Bc_2. १०. लृट इतीति Bc_2. ११. °मेकमेवे° Dc_3.

लुटः प्रथमस्य डारौरसः ॥२।४।८५॥

लुडादेश[1]प्रथमपुरुषस्य क्रमात् डारौरस् एत आदेशाः स्युः । पदद्वये[2]पि डित्त्व[3]सामर्थ्याट्टिलोपः । भविता ।

रि च ॥७।४।५१॥

रेफे परे तासेरस्ते[4]श्च[5] सस्य लोपः स्यात् ॥ भवितारौ । भवितारः ।

इकारोनुनासिकलोपप्रतिषेधार्थः मन्तेत्यादिषु । ननु च 'असिद्धवदत्राभात्' इत्यनेन टिलोपस्यासिद्धत्वात् मन्तेत्यादिषु अनुनासिकलोपो न प्राप्नोति । सत्यम् । 'असिद्धवदत्राभात्' इत्यस्यानित्यत्वात् प्राप्नोतीत्येव । अथवे[6]कार उच्चारणार्थः ।

लुटः । ननु च परस्मैपदे तिप् तस् झीति त्रयाणां प्रत्येकं प्रथमपुरुषसंज्ञा । आत्मनेपदेपि त आतां झ ऐ[7]षाम् । एवं षट् स्थानिनस्त्रय आदेशा इति वैषम्यादेकैकस्य पर्यायेण सर्वे प्राप्नुवन्ति । मैवम् । आन्तर्यतो व्यवस्था भविष्यति । तच्चैतदान्तर्यमर्थतः । एकार्थस्यैकार्थः द्व्यर्थस्य द्व्यर्थः बह्वर्थस्य बह्वर्थः । **भवितेति** । तासेरिट् । गुणावादेशौ । तिपो डा । सर्वादेशो णल्वत् ।

रि च । 'तासस्त्योः' इति संबन्धानुवृत्त्या अस्तेरित्य[8]नुवृत्त्य तस्माद्रेफादेः प्रत्ययस्यासंभवादुदाहरणासंभवः । **भविता** इति । भूत इति स्थिते तासिः । इड्गुणावादेशौ । तस्य डादेशः । टिलोपः । ननु च 'टित आत्मनेपदानां टेरे' इत्येत्वेन भवितव्य[9]म् । मैवम् । 'थासः से' इत्यत्र सेवचनं ज्ञापकमित्युक्तम् ।

---

१. लुडादेशस्य B_1, D_3, N. २. भसंज्ञाभावेपि for पदद्वयेपि D_2. ३. ङित्त्वस्य B_1. ४. तासस्त्योश्च C; तासस्त्योः D_4. ५. च dropped D_1, D_2, N. ६. अथवा dropped Bc_2. ७. इत्येषाम् Bc_2. ८. °त्यनुवृत्त Dc_3. ९. भाव्यम् Dc_3.

तासस्त्योर्लोपः ॥७।४।५०॥

[१]तासेरस्तेश्च सस्य लोपः स्यात् सादौ [२]प्रत्यये ॥ भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः । भविता । भवितारौ । भवितारः । भवितासे । भवितासाथे । '[३]धि च' इति सलोपः । भविताध्वे ।

ह एति ॥७।४।५२॥

तासस्त्योः सस्य हः स्यादेति परे ॥ भविताहे । भवितास्वहे । भवितास्महे ।

लिङाशिषि ॥३।४।११६॥

आशिषि लिङस्तिङार्ध[४]धातुकसंज्ञः स्यात् ॥ तेन न शबादि ।

किदाशिषि ॥३।४।१०४॥

आशिषि लिङो यासुट् कित् स्यात् ॥

ह । एशि हकारो न । एधामासे इति । उत्तमैकवचनं सार्वधातुकं च । यत् एत् तस्मिन्नेव परे ह इष्यत इति ।

लिङ् । तेन न शबादीति । यतः सार्वधातुकसंज्ञापवाद आर्धधातुकसंज्ञा समावेशनिवारणार्थश्चेवकारोनुवर्तते । तेन सार्वधातुकत्वाभावाच्छबादिर्नेत्यर्थः ।

किदा । प्रत्ययस्यैवेदं कित्त्वं विधीयते नागमस्य । प्रयोजनाभावात् । यदि प्रत्ययस्य न स्यात् तर्हि गुणवृद्धिप्रतिषेधो न स्यात् । तस्मादेवं वृत्तिर्व्याख्येया । लिङो यासुट् स्यात् स च लिङ् कित् स्यादिति ।

---

१. तासस्त्योश्च C; तासस्त्योः D_1, D_2, D_4, N. २. प्रत्यये परे N, D_3, D_4. ३. धि चेति सलोपः dropped D_1: is after भविताध्वे D_3. ४. °र्धधातुकः B_1. ५. Dropped D_1. ६. ह एति । Bc_2, Dc_3.

६ [प्र. कौ.]

आर्धधातुकत्वात् सलोपो न ॥ 'स्कोः संयोगाद्योः–' इति सलोपः। भूयात्। भूयास्ताम्। भूयासुः। भूयाः। भूयास्तम्। भूयास्त। भूयासम्। भूयास्व। भूयास्म। सी युटि कृते।

सुट्तिथोः ॥३।४।१०७॥

आशिषि लिङस्तकारथकारयोः सुडागमः स्यात्। यलोपः।

ननु च कित्त्वं व्यर्थं ङित्त्वे प्राप्ते कित्त्वस्य विधीयमानत्वात् किति ङिति च गुणवृद्धिप्रतिषेधस्य तुल्यत्वात्। बाढम्। वच्यादिसूत्रेण संप्रसारणे जागर्तिगुणे च विशेषः इज्यात् जागर्यादित्यादिषु।

आर्धधातुकत्वात् सलोपो नेति। 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन। **भूयादिति**। भू अस्मात् 'आशिषि लिङ्लोटौ' इति आशिषि लिङ्। तस्य तिप्। यासुट्। कित्त्वाद्गुणाभावः। 'इतश्च' इतीकारलोपः। **भूयास्तामिति**। 'तस्थस्थमिपाम्–' इति तमस्ताम्। **भूयासुरिति**। 'झेर्जुस्' जुस्। **भूया इति**। सिप्। इकारलोपः। 'स्कोः संयोग–' इति सलोपः। रुत्वविसर्गौ। भूयास्तम्। भूयास्त। भूयासमिति। थस्थमिप्सु यथाक्रमं तं त अम्। भूयास्व। भूयास्म। वस्मसोः यासुट्। 'नित्यं ङितः' इति सलोपः। **सीयुटि कृते इति**। 'लिङः सीयुट्' इत्यनेन।

सुट्। ननु च लिङित्यनुवर्तते। तत्र किं तकारथकारसंबन्धिनो लिङः सुडित्यर्थः स्यात्। अथवा **लिङस्तकारथकारयोरिति**। तत्र यदि पूर्वपक्षस्तदा परत्वाद्विशेषविहितत्वाच्च सुटा सीयुटो बाधो भवेत्। द्वितीये कल्पे तु भिन्नविषयत्वाद्बाधो न भवतीति तमेव पक्षमाश्रित्याह। **लिङस्तकारथकारयोरिति**। **यलोप इति**। 'लोपो व्योर्वलि' इत्यनेन।

---

१. सी युटि कृते dropped C. २. आशिषि dropped C. ३. स्यादार्ध-धातुके D_1. ४. यलोपः dropped D_1. ५. सुट्। अथवा Bc_2. ६. नतो Bc_2. ७. °बाधा Dc_3. ८. °द्बाधा Dc_3.

भविषीष्ट । भविषीयास्ताम् । भविषीरन् । भविषीष्ठाः । भविषीयास्थाम् । भविषीढ्वम् । भविषीध्वम् । भविषीय । भविषीवहि । भविषीमहि ॥

लृट् शेषे च ॥३।३।१३॥

क्रियार्थोपपदादन्यत्र शुद्धे भविष्यत्यर्थे धातोर्लृट् प्रत्ययः[1] स्यात् । चात् तत्रापि । 'स्यतासी—' इति स्यः । भविष्यति । भविष्यतीति[2] व्रजति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ।

भविषीष्टेति । सीयुट् । इट् । गुणः । अवादेशः । 'आदेशप्रत्यययोः' इति सुट्सीयुटोः सस्य मूर्धन्यः । 'ष्टुना ष्टुः' इति तकारस्य ष्टुत्वम् । **भविषीरन्** इति । 'झस्य रन्' इति रन् । यलोपः । **भविषीढ्वम्** । **भविषीध्वमिति** । 'विभाषेटः' इति वा मूर्धन्यः । **भविषीयेति** । 'इटोत्' इत्यत् ।

लृट् । **क्रियार्थोपपदादन्यत्रेति** । क्रिया अर्थः प्रयोजनं यस्याः क्रियायाः सा क्रियार्था सा उपपदं यस्मिन् स तथोक्तः । **चात् तत्रापीति** । क्रियार्थोपपदे इत्यर्थः । शेषग्रहणं त्विन्त्यप्रयोजनम् । भविष्यतीति शुद्धे भविष्यतीत्युदाहरणम् । **भविष्यतीति व्रजतीति** क्रियार्थोपपदे उदाहरणम् । भविष्यन्तीति । 'झोन्तः' इत्यन्तादेशः । अतो गुणे पररूपम् । **भविष्यावः** । **भविष्यामः** इति । स्य इट् गुण अव्[3] षत्वम् । 'यस्मात् प्रत्यय–' इत्यङ्गसंज्ञा । 'अतो दीर्घो यञि' इतिः दीर्घः ।

---

१. प्रत्ययः dropped D_2. २. इति dropped D_3. ३. अव् । Be_2.

भविष्यते । भविष्येते । भविष्यन्ते । भविष्यसे । भविष्येथे । भविष्यध्वे । भविष्ये । भविष्यावहे । भविष्यामहे ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥३।३।१३९॥

हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे धातोर्लृङ् स्यात् कुतश्चित् क्रियाया अनिष्पत्तौ गम्यमानायाम्[1] । स्यप्रत्ययः[2] । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । अभविष्यत । अभविष्येताम् । अभविष्यन्त । अभविष्यथाः । अभविष्येथाम् ।[3] अभविष्यध्वम् । अभविष्ये ।

भविष्यत इति । 'टित आत्मनेपदानां टेरे' इति । **भविष्येते** इति । भू आताम् । 'सार्वधातुकमपित्' इति ङित्त्वम् । 'आतो ङितः' इतीय् । 'आद्गुणः' । 'लोपो व्योर्वलि' । टेरेत्वम् । **भविष्यन्ते** इति । 'झोन्तः' । **भविष्यसे** इति । 'थासः से' । **भविष्ये** इति । इट् । टेरेत्वम् । अतो गुणे पररूपम् ।

लिङ्निमित्ते 'हेतुहेतुमतोर्लिङ्' । 'कामप्रवेदनेकच्चिति' इत्येवमादि लिङ्निमित्तम् । **कुतश्चिदित्यादि** । कुतश्चिद्वैगुण्यात् क्रियाया अनिष्पत्तौ अनभिनिर्वृत्तौ गम्यायां सत्यामित्यर्थः । **स्यः प्रत्यय** इति । 'स्यतासी लृलुटोः' इति । **अभविष्यदिति** । सस्य इट् । गुणः । अव्[4] । मूर्धन्यः । 'इतश्च' इतीकारलोपः । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमः । **अभविष्यतामिति** । 'तस्थस्थमिपाम्—' इति तसस्ताम् । **अभविष्यन्निति** । झोन्ते इलोपे च कृते संयोगान्तलोपः । **अभविष्याव** । **अभविष्यामेति** । 'अतो दीर्घः' इति दीर्घः । 'नित्यं ङितः' इति सलोपः[5] । अभविष्यतेत्यादि पूर्ववत् प्रक्रिया ।

---

१. गम्यायाम् D_3, D_4. २. स्यः प्रत्ययः N. ३. After this B_1 has इत्यादि ज्ञेयम् for अभविष्यध्वम् ....ज्ञेयम्. ४. अवादेशः । Dc_3. ५. लोपः Bc_2.

अभविष्यावहि । अभविष्यामहि । सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यदित्यादि ज्ञेयम् ।

शेषे विभाषाकखादावषान्त उपदेशे ॥८।४।१८॥

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात् परस्य नेर्णत्वं वा स्यात् ॥ प्रणिभवति । प्रनिभवति । एवं चेतत्यादयः । चिती संज्ञाने ।

सुवृष्टिश्चेदित्यादि । भविष्यत्सुभिक्षस्य सुवृष्टिं हेतुभूतां लिङ्गेन ज्ञात्वा तदतिपत्तिं च प्रमाणान्तरादवगम्य वक्ता वाक्यं प्रयुङ्क्ते । सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यदिति । अत्र हेतुहेतुमतोः सुवृष्टिसुभिक्षयोः भविष्यत्कालयोरतिपत्तिरतो वाक्याद्गम्यते ।

शेषे । **उपसर्गस्थान्निमित्तात्परस्येति** । उपसर्गे वर्तमानं यन्निमित्तं रेफषकारलक्षणं तस्मात् परस्येत्यर्थः । **प्रणिभवति** । **प्रनिभवतीति** । 'ते प्राग्धातोः' इति प्रनी उपसर्गौ प्राक् । अकखादौ किम् । प्रनिकरोति । प्रनिखादति । अषान्ते किम् । प्रनिपिनष्टि । उपदेशग्रहणात् प्रनिचकार । प्रणिवेष्टा । **एवं चेतत्यादय** इति । एवमेतेन प्रकारेण चेतत्यादयो दश लकारेषु ज्ञेया इत्यर्थः । अतिदेशोधिकमपेक्षत इति न्यायमभिप्रेत्य परस्मैपद्यात्मनेपद्युभयपदिधातुविवेकाय दौर्गं धातुपाठमाश्रित्य प्रतिधातुविशेषप्रक्रियामाह । **चिती** । संज्ञानं संवित्तिः । ईकारः 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधार्थः । इतः प्रभृति एध वृद्धौ इतीममवधिं कृत्वा परस्मैपदिन एव । तत्र अज गतावित्यन्ताद् द्वाविंशतिः सेट्काः ।

---

१. °नंद' D_3. २. च परे B_2. ३. Before it—उपदेशे किम् । प्रणिचकार D_2. ४. संविज्ञाने D_3. ५. °सुभिक्षयोरुपपत्तिरितो वाक्याद्गम्यते । Bc_2. ६. °रनिष्पत्तिरितो Dc_3. ७. ततः परं° Bc_2. ८. प्रनिवेष्टा । प्रणिवेष्टा Bc_2. ९. एवमनेन Bc_1. १०. °मवधीकृत्य Bc_2.

पुगन्तलघूपधस्य च ॥७।३।८६॥

पुगन्तस्य लघूपधस्य चेको गुणः स्यात् सार्वधातुकार्धधातुकयोः[1] ॥ चेतति । चेतेत् । चेततु । अचेतत् । लुङि सिचि इडागमे कृते ।

पुगन्त । पुक् आगमः । 'अर्तिह्री –' इत्यादिना विहितः पुकि अन्तः पुगन्तः । लघ्वी उपधा लघूपधा । पुगन्तश्च लघूपधा च पुगन्तलघूपधम् । द्वन्द्वैकवद्भावः । अङ्गस्येत्यनुवर्तमाने अङ्गसंबन्धिनः पुगन्तस्य इको लघूपधस्येको गुणः स्यादित्यर्थः । तेन भिनत्तीत्यादावङ्गस्य लघूपधत्वेपि इको गुणो नेत्यर्थः । छेत्ता भेत्तेत्यादौ प्रत्ययादेरङ्गान्त्यस्य च हलोरानन्तर्येण गुरूपधत्वेन लघूपधगुणो न व्यावर्तत इति ज्ञापितम् । 'क्रुसनोः क्रित्करणेन त्रसिगृधिधृषिक्षिपेः क्नुः' । 'हलन्ताच्च' इति । चेततीति । वर्तमाने लट् । तस्य तिप् । शप् । चेततः । चेतन्ति । चेतसि । चेतथः । चेतथ । चेतामि । चेतावः । चेतामः । पूर्ववत्प्रक्रिया । चेतेदिति । 'विधिनिमन्त्रण–' इति लिङ् । तस्य तिप् । यासुट् । सलोपः । 'अतो येयः' इतीय् । 'इतश्च' इतीकारलोपः । 'आद्गुणः' । 'लोपो व्योर्वलि' । चेतेताम् । चेतेयुः । चेतेः । चेतेतम् । चेतेत । चेतेयम् । चेतेव । चेतेम । चेतत्विति । 'लोट् च' इति लोट् । 'एरुः' । चेततात् । चेतताम् । चेतन्तु । चेत । चेततात् । चेततम् । चेतत । चेतानि । चेताव । चेताम । अचेतदिति । 'अनद्यतने लङ्' इति लङ् । अडागमः । इकारलोपः । अचेतताम् । अचेतः । अचेततम् । अचेतत । अचेतम् । अचेताव । अचेताम । **लुङि सिचि इडागमे कृते** इति । चित् अस्मात् 'लुङ्' इति लुङ् । 'च्लि लुङि' इति च्लिः । तस्य 'च्लेः सिच्' इति सिच् । 'आर्धधातुकस्येड् वलादेः' इतीट् । इकारलोपः । अडागमः । एवं सति अ चित् इ स् त् इति स्थिते इत्यर्थः ।

1. After it—परत्वात् N. 2. धत्वेपि लघूपधो De3. 3. इलोपः Beg.

वदव्रजहलन्तस्याचः ॥७।२।३॥

एषामचः स्थाने वृद्धिः स्यात् सिचि परस्मैपदे ॥ इति वृद्धिप्राप्तौ ।

नेटि ॥७।२।४॥

इडादौ सिचि हलन्तस्य वृद्धिर्न स्यात् ॥ गुणः ।

वदव्रज । वद व्यक्तायां वाचि । व्रज गतौ । 'अतो हलादेर्लघोः' इति विकल्पबाधनार्थं वदिव्रज्योर्ग्रहणम् । ननु चात्र योगविभागे सति हलन्तग्रहणं विनापि सिध्यति । कथमिति चेदुच्यते । 'वदिव्रज्योः' इत्येकं सूत्रम् । द्वितीयम् 'अचः' इति । तत्र प्रथमे सूत्रे 'अतः' इति स्थान्यनुवर्तते । वदिव्रज्योरतो वृद्धिर्भवति । द्वितीये सूत्रे अङ्गेनाज्विशेष्यते । अङ्गस्याचः सिचि परतो वृद्धिरिति । सत्यम् । इह हि हल्ग्रहणं हल्समुदायपरिग्रहार्थम् । इहापि यथा स्यात् । रञ्ज रागे । अराङ्क्षीत् । षञ्ज परिष्वङ्गे । असाङ्क्षीदिति । अन्यथा येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् इत्येकेन वर्णेन व्यवधाने स्यात् । अनेकेन हला न स्यात् । उदवोढामित्यत्र वहेः सिचि ढत्वादीनामसिद्धत्वात् पूर्वं हलन्तलक्षणा वृद्धिः । पश्चादोत्वम् । तत्र कृते पुनर्वृद्धिं न कृतवान् । यत्र त्वकृता वृद्धिस्तत्रौकारस्यैव स्यात् । सौढामित्रस्यापत्यं सौढामित्रिरिति ।

नेटि । अनन्तरस्य विधिर्वा प्रतिषेधो वेति परिभाषया नेटीति योगो 'वदव्रज–' इत्यस्यैव बाधक इत्यभिप्रेत्याह । हलन्तस्येति । हलन्तस्य किम् । अलावीत् । ननु चैतदप्यन्तरङ्गत्वात् गुणावादेशयोर्हलन्तम् । न । आरम्भसामर्थ्यात् सिचि वृद्धिरन्तरङ्गमपि गुणं बाधते । **गुण** इति । 'पुगन्त–' इत्यनेन ।

---

१. °पदेषु D3. २. °ग्रहः Be2. ३. द्वितीयसूत्रे Be2. ४. °समुदायस्य Be2. ५. इति मत्वाह Be2.

अस्तिसिचोऽपृक्ते ॥७।३।९६॥

अस्तेः सिचश्च परस्यापृक्तस्य सार्वधातुकस्य ईडागमः स्यात् ॥ लघूपधत्वेन इटो गुणे प्राप्ते ।

दीधीवेवीटाम् ॥१।१।६॥

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः ॥

इट ईटि ॥८।२।२८॥

इटः परस्य सिचो लोपः स्यादीटि ॥ सिज्लोप एकादेशे सिद्धो वाच्यः । सवर्णदीर्घः । अचेतीत् । अचेतिष्टाम् ।

अस्ति । अस्तेरिति । अस भुवीत्यस्मात् ।

दीधी । दीधीङ् दीप्तिदेवनयोः । वेवीङ् वेतिना तुल्ये । अथ दीङ् क्षये । धीङ् अनादरे । वेञ् तन्तुसन्ताने । वी गतिप्रजनकान्त्यशनखादनेषु । एषां ग्रहणं कस्मान्न । उच्यते । यद्येतेऽभिमताः स्युस्तर्ह्यसंदेहार्थं वीवेधीदीटामिति न्यासं कुर्यात् । अतः पूर्वोक्तावेव । इटश्चेति । आर्धधातुकस्येत्यादिना विहितस्य । अथ इण् इट गताविति किं न गृह्येते । युक्तं चैतत् । धातुसाहचर्यात् । मैवम् । इह अल्पाच्तरमिति इटः पूर्वनिपाते कर्तव्ये तद्विपर्ययं कुर्वन्नेतत् सूचितम् । धातुसाहचर्येऽप्यागमस्यैवेटो ग्रहणमिति । **सिज्लोप** इति । 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे क्रियमाणे 'पूर्वत्रासिद्ध–' न्यायेन सिज्लोपस्यासिद्धत्वं प्राप्तं तत् प्रतिषिध्यते । **अचेतिष्टामिति** । चित् तस् 'च्लेः सिच्' । इट् । गुणः षत्वम् । तसस्ताम् । ष्टुत्वम् । अडागमः ।

१. °पृक्तसार्वधातुकस्य C; परस्य dropped D_3. २. सस्य for सिचो B_1, D_1, N_1. ३. °दीटि परं B_2, D_3. ४. सवर्णे दीर्घः B_1, B_2, D_2. ५. न्यायान्तर° Bc_2. ६. °प्यत्रेणमन्येवेटो Bc_2. ७. चित्ल इट् गुणः मूर्धन्यः । Bc_2. ८. अट् । Bc_2.

सिजभ्यस्तविदिभ्यश्च ॥३।४।१०९॥

सिचः परस्याभ्यस्तविदिभ्यां च ङित्संबन्धिनो झेर्जुस् स्यात् ॥ अचैषुः । अचेतीः[१] । चिचेत ।

असंयोगाल्लिट् कित् ॥१।२।५॥

असंयोगात् परोपित् लिट् कित् स्यात् ॥ चिचिततुः । चिचितुः । चिचेतिथ । चेतिता । चित्यात् ।

सिज । अलिङर्थ आरम्भः । विद ज्ञाने अस्यैव ग्रहणमस्मादेव परस्य झेः संभवात् । नान्येषां विदादीनाम् । अभ्यस्तविदि[४]ग्रहणमसिजर्थम् । **अचैतिषुरिति** । च्लेः सिच् । इट् । गुणः । अडागमः । मूर्धन्यः । रुत्वविसर्गौ । **अचेतीरिति** । सिच् । इट् । गुणः । अट् । इलोपः । 'अस्तिसिचोपृक्ते' इतीट् । 'इट ईटि' । इति सिज्लोपः[६] । सवर्णदीर्घः । रुत्वविसर्गौ । अचेतिष्टम् । अचेतिष्ट । अचेतिषम् । अचेतिष्व । अचेतिष्म । **चिचेतेति** । 'परोक्षे लिट्' इति लिट् । तिप् । 'लिट् च' इत्यार्धधातुकत्वम् । 'परस्मैपदानाम्—' इति णल् । 'लिटि धातोः–' इति द्वित्वम् । उपधागुणः ।

असंयोगात् लिट् । लिटाक्षिप्तो धातुरसंयोगेन विशेष्यते । असंयोगान्ताद्धातोरिति । ननु च पर्युदासोयम् । ततश्च नञिवयुक्तन्यायेन संयोगान्तसदृशाद्धलन्तादेव स्यात् चिचिततुरित्यादौ निन्युरित्यादौ न स्यात् । मैवम् । यदयं 'ऋतश्च संयोगादेर्गुणः' इति गुणं शास्ति तज् ज्ञापयति नात्र नञिवयुक्तन्याय इति । ङित्त्वे प्रकृते कित्त्वस्यातिदेशः[७] ईजतुरित्यादौ संप्रसारणार्थः । चिचिततुरिति कित्त्वाद्गुणाभावः । चिचेतिथ । चिचितथुः । चिचित । चिचेत । चिचितिव । चिचितिम । **चेतितेति** । 'अनद्यतने लुट्' इति लुट् । तस्य तिबादयः ।

---

१. After it—अचेतिष्टम् । अचेतिष्ट । अचेतिषम् । अचेतिष्व । अचेतिष्म B_2 ; —अचेतिष्टम् D_4. २. Dropped D_1. ३. Dropped N, D_2, D_3, D_4. ४. विदि dropped Bc_2. ५. च्लिः । Bc_2. ६. सलोपः Bc_2, Dc_3. ७. कित्त्वविधिः Bc_2.

चेतिष्यति । अचेतिष्यत् । च्युतिर् आसेचने ॥ इर इत्संज्ञा वाच्या ॥* च्योतति । च्योतेत् । च्योततु । अच्योतत् ।

इरितो वा ॥३।१।५७॥

इरितो धातोः परस्य च्लेरङादेशो वा स्यात् परस्मैपदेषु ॥

'स्यतासी—' इति तासि इट् । उपधागुणः । 'लुटः प्रथमस्य—' इति डा । टिलोपः । चेतितारौ । चेतितारः । चेतितासि । चेतितास्थः । चेतितास्थ । चेतितास्मि । चेतितास्वः । चेतितास्मः । चित्यादिति । 'आशिषि लिङ्लोटौ' इति आशिषि लिङ् । तस्य तिप् । 'यासुट् परस्मैपदेषु—' इति यासुट् । 'इतश्च' इति इकारलोपः । 'स्कोः संयोगा—' इति सलोपः । चित्यास्ताम् । चित्यासुः । चित्याः । चित्यास्तम् । चित्यास्त । चित्यासम् । चित्यास्व । चित्यास्म । चेतिष्यतीति । 'लृट् शेषे च' इति लृट् । तस्य तिप् । स्य । 'आर्धधातुकस्येड् वलादेः इतीट् । उपधागुणः । 'आदेशप्रत्यययोः' । चेतिष्यतः । चेतिष्यन्ति । चेतिष्यसि । चेतिष्यथः । चेतिष्यथ । चेतिष्यामि । चेतिष्यावः । चेतिष्यामः । अचेतिष्यदिति । 'लिङ्निमित्ते लृङ्—' । तस्य तिप् । स्यः । इट् । गुणः । अट् । इकारलोपः । अचेतिष्यताम् । अचेतिष्यन् । अचेतिष्यः । अचेतिष्यतम् । अचेतिष्यत । अचेतिष्यम् । अचेतिष्याव । अचेतिष्याम । भूवत् प्रक्रिया । च्युतिर् इति । आसेचनमीषत्सेकः । इर इत्संज्ञा वाच्येतीकारस्य 'उपदेशेऽजनुनासिक इत्' इति । रेफस्य 'हलन्त्यम्' इति । अथवा—

'इरितो वा' इत्यत एव ज्ञापकात् समुदायस्येत्संज्ञा । अत उक्तं वाच्येति । च्योततीति । च्युत् अस्मात् 'वर्तमाने लट्' इति लट् । चितीवत् प्रक्रिया । च्योतेदिति । च्युत् अस्मात् 'विधिनिमन्त्रणा—' इति लिङ् । च्योततिवति । 'लोट् च' इति लुट् । अच्योतदिति । 'अनद्यतने लङ्' ।

---

१. चत्वम् । Bc2 (for आदेश). २. इलोपः Bc2.

अच्युतत् । अच्योतीत् ।

हलादिः शेषः ॥७।४।६०॥

अभ्यासस्यादिर्हल् शिष्यतेऽन्यो हल् लुप्यते ॥ चुच्योत ।

अच्युतदिति । 'लुङ्' इति लुङ् । तिप् । 'च्लि लुङि' इति च्लिः । तस्य अङ् । ङित्त्वाद्गुणाभावः । अडागमः । **अच्योतीदिति** । अङभावपक्षे रूपम् ।

हलादिः । हलादिरिति षष्ठीतत्पुरुषः स्यात् कर्मधारयो वा हल् चासावादिश्चेति । अथवा असमासः हल् आदिरिति । तत्र षष्ठीतत्पुरुषे आट आटतुरित्यादौ ऽत्यभ्यासस्यानादिहल्लोपो न स्यात् । अतः कर्मधारयपक्षः श्रेयान् । तत्रापि विशेषणत्वादादेः पूर्वनिपातः स्यादतोऽसमासपक्ष एव श्रेयस्तम इति मनसि कृत्वाह । **अभ्यासस्यादिर्हलिति** । ननु चात्रापि आटेत्यादिषु हलादिशेषो न स्यात् । यदि आदिशेषनिमित्तोऽयमनादेर्लोपो विधीयते । न चात्रादिर्हलस्ति । सत्यम् । अभ्यासजातेराश्रयणात् पपाचेत्यादावपि वर्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति । अन्ये त्वाहुः । शेषशब्दोऽयं निवृत्त्या विशिष्टमवस्थानमाह । तदवस्थानयुक्त्या प्रधानमप्यविधेयत्वादप्रधानं विधेयत्वान्निवृत्तिरेव प्रधानम् । ततोऽयमर्थः । अभ्यासस्यानादेर्हलो निवृत्तिः स्यादिति । सा किमित्यादेरविधेयामनिवृत्तिमपेक्षिष्यत इति । **चुच्योतेति** । परोक्षे लिट् । णल् । द्वित्वम् । च्युत् च्युत् इति । पूर्वहलस्य शेषः । गुणः ।

१. °न्ये हलो लुप्यन्ते C; D_1; अभ्यासस्यादिहलः शिष्यन्ते अन्ये लुप्यन्ते N. २. च्लिः । अङ् Bc_2. ३. Before it—हलामादिरिति Dc_3. ४. मत्वाह Bc_2. ५. यतः Bc_2, Dc_3. ६. तदवस्थानं युक्तयाप्रधानमप्यविधेयत्वान्निवृत्तेरेव प्रधानम् । Bc_2. ७. नादिहलो Bc_2. ८. द्वित्वम् । हलादिशेषः । चुच्युततुः Bc_2.

च्योतिता। च्युत्यात्। च्योतिष्यति। अच्योतिष्यत्।

श्च्युतिर् क्षरणे।

शर्पूर्वाः खयः॥७।४।६१॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्तेन्ये हलो लुप्यन्ते॥

चुच्युततुः। चुच्योतिथ। च्योतितेति। लुट्। च्योतितारौ। च्योतितारः। च्युत्यादिति। आशिषि लिङ्। च्युत्यास्ताम्। च्युत्यासुः। च्योतिष्यतीति। लृट्। अच्योतिष्यदिति। लृङ्।

श्च्युतिर् इति। क्षरणं स्रवणम्। दन्त्यादिरयम्। ततश्च मधुश्च्युतमाचष्टे णिच्। टिलोपः। क्विप्। णिलोपः। संयोगादित्वात् सलोपः। संयोगान्तत्वाद्यलोपः। चस्य कुत्वम्। ततो मधुगिति स्यात्। षट् श्च्योतन्तीत्यत्र श्चुत्वं धुट्त्वेसिद्धं वक्तव्यमिति धुट् न। क्षीरस्वाम्यादयस्त्वेवमाहुः। शस्तालव्योत्र। दन्त्यादित्वे षट् श्च्योतन्तीति श्चुत्वस्यासिद्धत्वात् 'डः सि धुट्' इति। धुडागमः स्यादिति। तन्मते मधुडिति भवेत् इति डाच्युतिर् इत्यप्याहुः। कौशिकस्तु श्चुतिमयकारं मन्यते। श्चोतति। श्चोतेत्। श्चोततु। अश्चोतत्। इति। 'इरितो वा'। इति वाङ्। अश्चुतत्। अश्चोतीत्।

शर्पूर्वाः। 'हलादिः शेषः' इत्यनेन शरां शेषे प्राप्ते खयां शेषोत्र विधीयते। ततः खयः शेषेण आदिशेषो बाध्यते। एकाभ्यासविषयत्वात् संभवेपि सति बाधा स्यादिति न्यायात्। किं चासंभवोप्यत्रास्ति कथं शेषशब्दोयं निवृत्तिमदवस्थानमाह। न चोभयोरवस्थाने निवृत्तिविशिष्टमवस्थानं स्यात्।

१. श्चुतिर् D3. २. Dropped N. ३. श्च्योतन्तीति Dc3. ४. द्रमिडा च्युतिर् Bc2. ५. श्च्युतिमयोपधं चकारं मन्यते Bc2.

चुश्च्योत ।

मन्थ विलोडने । ममन्थ । संयोगात् परस्य लिटो-किंत्त्वादनिदितां हल इति नलोपो न । ममन्थतुः संयोगाल्लिटो वा कित्त्वमिति केचित् । ममथतुः । लोपः । मथ्यात् । [4]

कुथि हिंसासंक्लेशनयोः ।

'चुश्च्योतेति । लिट् । णल् । द्वित्वम् । गुणः । चुश्च्युततुरित्यादि । श्च्योतिता । श्च्युत्यात् । श्च्योतिष्यति । अश्च्योतिष्यत् ।

मन्थ । मन्थति । मन्थेत् । मन्थतु । अमन्थत् । अमन्थीत् । ममन्थेति । परोक्षे लिट् । तिप् । णल् । द्वित्वम् । संयोगादित्यादि । 'असंयोगाल्लिट् कित्' इति 'संयोगात्परस्य लिटोकित्त्वात् 'अनिदिताम्—' इति क्ङिति विधीयमानो नलोपो न भवतीत्यर्थः । केचिदिति । प्रबोधोदयवृत्तिकारादयः । तथा च प्रबोधोदयवृत्तावुक्तम् । संयोगाल्लिट् किद्वा । ररजतुः । ररञ्जतुरिति । मन्थिता । नलोप इति । 'अनिदिताम्' इत्यनेन । मथ्यात् । मन्थिष्यति । अमन्थिष्यत् ।

कुथि हिंसासंक्लेशनयोः । हिंसा प्राण्युपघातः । संक्लेशो बाधा । इकार इदित्कार्यार्थः ।

---

१. चुश्चोत । श्चोतिता । श्चुत्यात् । श्चोतिष्यति । अश्चोतिष्यत् । D_3.
२. Before it—मन्थति । मन्थेत् । मन्थतु । अमन्थत् । अमन्थीत् । मन्थिष्यति । अमन्थिष्यत् । B_2. ३. नो लोपः C, D_1; नलोपः D_2, N: न्लोपः D_3, D_4. ४. After it—मन्थिता B_2; मन्थिष्यति । अमन्थिष्यत् D_3.
५. चुश्चोत Dc_1, Dc_4. ६. चुश्चुततुरित्यादि । श्चोतिता &c. Dc_1, Dc_4.
७. न्लोप Bc_2, Dc_3. ८. हिंसासंक्लेशनयोः dropped Dc_1.

इदितो नुम् धातोः ॥७।१।५८॥

इदितो धातोर्नुमागमः स्यात् ॥ कुन्थति ।

कुहोश्चुः ॥७।४।६२॥

अभ्यासस्य कवर्गहकारयोश्चवर्गादेशः स्यात् ॥ चुकुन्थे[1] । इदित्त्वान्नलोपो न । प्रनिकुन्थ्यात्[2] । कादित्वान्न णः ।

षिधु गत्याम् ।

धात्वादेः षः सः ॥६।१।६४॥

धातोरादेः षस्य सः स्यात् ॥

इदितो **नुम्** । नुमागमोयं धातूपदेशावस्थायामेव भवति । कुण्डेत्यादौ 'गुरोश्च हलः' इति अकारप्रत्ययो यथा स्यात् । **कुन्थतीति** । लट् । तिप् । शप् । कुन्थेत् । कुन्थतु । अकुन्थत् । अकुन्थीत् ।

चुकुन्थेति । णल् । द्वित्वम् । चुत्वम् । कुन्थिता । **इदित्वान्नलोपो नेति** । 'अनिदिताम्— ' इत्यनेन । **प्रनिकुन्थ्यादिति** । आशीर्लिङ् । **कादित्वान्न ण इति** । 'शेषे विभाषा कखादावषान्त उपदेशे ' इत्यनेन । कुन्थिष्यति । अकुन्थिष्यत् ।

षिधु ।

धात्वादेः । धातुग्रहणं किम् । षोडश[3] । षडिकः[4] । आदेः किम् । **कर्षति** । 'आदेशप्रत्यययोः' इति षत्वव्यवस्थार्थं षोपदेशानां लक्षणं करोति ।

---

१. After it—कुन्थिता । कुन्थ्यात् । कुन्थिष्यति । अकुन्थिष्यत् । D_3.
२. प्रतिकुथ्यात् D_2, D_4. ३. षोढा Bc_2. ४. षढोः कः । षण्ढः । Dc_3.

[1]सेकृसृप्सृस्तृसृजस्तॄस्त्योऽन्ये दन्त्याजन्तसादयः ।
षोपदेशाः स्मृताः ष्वष्कस्विद्स्वद्स्वञ्जस्वपस्मिङः ॥
[5]सेधति । अच्छ सेधति । 'सात्पदाद्योः' इति षत्वनिषेधे प्राप्ते ।

सेकृसृपित्यादि । दन्त्याजन्तसादयः षोपदेशाः स्मृताः । दन्त्यश्च अच् च दन्त्याचौ तौ अन्ते परौ यस्य स दन्त्याजन्तः । स चासौ सश्च दन्त्याजन्तसः । स आदिर्येषां धातूनां ते तथोक्ताः । ते च सेकादिभ्योऽन्ये । सेकृ गतौ । सृपृ गतौ । सृ गतौ । स्तृञ् आच्छादने । सृज विसर्गे । स्तॄञ् आच्छादने । स्त्यै शब्दसंघातयोः । एभ्योऽन्ये षोपदेशाः । षः उपदेशे पाठे येषां ते षोपदेशाः । वैयधिकरण्येऽपि गमकत्वाद्बहुव्रीहिः । अथवोपदिश्यते प्रथमत उच्चार्यत इत्युपदेशः । षः उपदेशो येषां ते तथा । ष्वष्कादयश्च षोपदेशाः । ष्वष्क गतौ । ञिष्विदा गात्रप्रक्षरणे । स्वद आस्वादने । ष्वञ्ज परिष्वङ्गे । ञिष्वप शये । ष्मिङ् ईषद्धसने । ष्वष्कादीनां पञ्चानां वकारस्य केवलदन्त्यत्वाभावात् पुनर्ग्रहणम् । दन्त्याजन्तेति किम् । स्कुञ् आप्रवणे । चुस्काव । सेकाद्यन्ये इति किम् । सेकृ । सिसेकेत्यादि ज्ञेयम् ।

सेधतीति । सत्वम् । लट् । तिप् । शप् । 'पुगन्त–' इति गुणः । सेधतु । असेधत् । असेधीत् । सिषेध । सेधिता । सिध्यात् । सेधिष्यति । असेधिष्यत् । अच्छ सेधतीति । 'अच्छ गत्यर्थवदेषु' इति गतिसंज्ञार्थमुदाहरणम् । अच्छ शब्दोऽभिशब्दार्थे दृढार्थे च वर्तते । सात्पदाद्योरिति षत्वनिषेधे प्राप्ते इति । निषेधतीत्यत्र ।

१. B_1 has before this Kārikā दन्त्यश्चाच्च दन्त्याचौ तौ अन्ते यस्य स दन्त्याजन्तः । स चासौ सश्च दन्त्याजन्तसः । स आदिर्येषां ते दन्त्याजन्तसादयः । ष उपदेशे येषां ते षोपदेशाः । उपदेशो धातुपाठः । सेक्यतिभ्यः सत्तभ्योऽन्ये ये दन्त्याजन्तसादयः प्रयुज्यन्ते धातवस्ते षोपदेशा इत्यर्थः तथा ष्वक्कादयश्च ।; C has on the margin from दन्त्य°...to °सादयः. २. °स्त्याभ्योऽन्ये B_2. ३. स्वष्क D_1, N. ४. स्वपि D_2, N, स्वप D_3, D_4. ५. सेधति । सेधेत् । सेधतु । असेधत् । असेधीत् । सिषेध । सेधिता । सिध्यात् । सेधिष्यति । असेधिष्यत् । B_2. ६. असेधत् for अच्छ सेधति in P, B_2. ७. सृप्सृच Bc_2 ; सृप् गतौ Dc_3. ८. Dropped Bc_2. ९. स्तृञ् आच्छादने dropped Bc_2. १०. प्रथम Bc_2. ११. °क्षरणे Dc_3. १२. ष्मिङ् Bc_2, Dc_3. १३. सेकः Bc_2. १४. °भिन्नार्थे Dc_3.

उपसर्गात्[1] सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥८।३।६५॥

[3]उपसर्गस्थान्निमित्तात्परस्यैषां सस्य षः स्यात् ॥

[2]सदिरप्रतेः ॥८।३।६६॥

[5]उपसर्गात् सदेः सस्य षः[4] स्यान्न तु प्रतेः परस्य ।

उपसर्गात् । षुञ् अभिषवे । षू प्रेरणे । षोऽन्तकर्मणि । ष्टुञ् स्तुतौ । [6]ष्टुभु स्तम्भे । एतेषां श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः । अभिसोषवीतीत्यादि । ष्ठा गतिनिवृत्तौ । सेनयेति सुब्धातुः । षिधु गत्याम् । षिधू शास्त्रे माङ्गल्ये च । शपा[7] निर्देशो यङ्लुग्दैवादि[8]निवृत्त्यर्थः । षिच क्षरणे । षञ्ज सङ्गे । ष्वञ्ज परिष्वङ्गे । सिचादीनां यङ्लुक्यपि[9] यथा स्यात् । [10]अभिषेषिचतीत्यादि । उपसर्गादिति तात्स्थ्यात् ताच्छब्द्यमित्यभिप्रेत्याह । उपसर्गस्थादिति । अत्र कवर्गस्यासंभवादिण् संबध्यते । उपसर्गात् किम् । दधि सिञ्चति । निर्गताः[11] सेचका अस्मान्निःसेचकः इत्यत्र न सिचिं प्रत्युपसर्ग इति षो न । अभिषावकमिच्छति अभिषावकीयतीत्यत्र सुनोतिमेव प्रत्युपसर्ग इति षः । सावकमिच्छति सावकीयति ततोऽभिना योगे षो न । अभिसावकीयतीति । 'प्राक् सितात्—' इति व्याख्याय प्रसङ्गात् षत्वप्रकरणमाह ।

सदिः । सदिरिति षष्ठ्यर्थे प्रथमेत्यभिप्रेत्याह । सदेरिति । षद्लृ विशरणगत्यवसादनेषु ।

---

१. उपसर्गात् पर° C. २. सदेरप्रतेः D_1. ३. उपसर्गस्थान्निमित्तात् परस्य D_3. ४. षत्वं C. ५. अप्रतेः for न तु प्रतेः D_2. ६. ष्टुभ स्तम्भने Dc_3. ७. शपा Bc_2. ८. °दैवादिक° Dc_3. ९. Dropped Bc_2, Dc_3. १०. अभिषेषिचीत्यादि Bc_2. ११. निर्गतः सेचकोऽस्माभिः° Bc_2.

स्तम्भेः ॥८।३।६७॥

[१]उपसर्गात् पर[२]स्य स्तम्भेः [३]सस्य [४]षत्वं स्यात् ॥

अवाच्चालम्बनाविदूर्ययोः ॥८।३।६८॥

अवात् परस्य स्तम्भेरेतयोः षत्वं [५]स्यात् ॥

वेश्च स्वनो भोजने ॥८।३।६९॥

[६]व्यवाभ्यां स्वनतेः षत्वं स्याद्भोजने ॥

परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ॥८।३।७०॥

परिनिविभ्यः परेषामेषां [७]षत्वं स्यात् ॥ निषेधति ।

स्तम्भेः । स्तम्भु रोधने । योगविभागादप्रतेरिति नानुवर्तते ।

अवात् । आलम्बनमाश्रयणम् । अविदूरस्य भावः आविदूर्यम् । अत एव निपातनान्नञ्पूर्वात्तत्पुरुषाद्भावप्रत्ययः ।

भोजनं [८]स्वनेन विशिष्टोभ्यवहारोत्राभिमतः । स्वन शब्दे ।

परिनि । षेवृ सेवने । सित [९]निष्ठान्तः । निषितः । [१०]सय इति षिञ् बन्धने एरजन्तः । विषयः । षिवु तन्तुसन्ताने । षह मर्षणे । सुट् आगमः । परिष्करोति । ष्टुञ् स्तुतौ । ष्वञ्ज परिष्वङ्गे । ननु स्तुस्व[११]ञ्जोः पूर्वेणैव सिद्धम् । सत्यम् । तयोर्ग्रहणं 'सिवादीनां वाड्व्यवायेपि' इत्येतदर्थम् ।

---

१. Dropped N_1, D_3, D_4. २. P drops परस्य. ३. उपसर्गस्थानिमित्तात् परस्य B_2. ४. षः D_1. ५. B_1 and P, N, D_4 drop it. ६. व्यवाभ्यां परस्य B_1. ७. सस्य षत्वं B_1, D_1. ८. For स्वनेन-स्वजन° Dc_1. ९. निष्ठान्तम् Dc_1. १०. सयेति Dc_1. ११. स्वञ्ज्योः Bc_2.

प्राक् सितादड्व्यवायेपि ॥८।३।६३॥

सेवसितेत्यत्र सितशब्दात् प्राग्ये सुनोत्यादयस्तेषामड्व्यवधानेपि षत्वं स्यात् । न्यषेधत् ।

स्थादिष्वभ्यासेन चाभ्यासस्य ॥८।३।६४॥

स्थादिषु प्राक् सितादभ्यासेन व्यवायेपि षत्वं स्यादभ्यासस्य च ॥ निषिषेध ।

सेधतेर्गतौ ॥८।३।११३॥

गत्यर्थस्य सेधतेर्न षत्वम् ॥ गङ्गां विसेधति ।

प्राक्सि । **सेवसितेत्यत्र** सितशब्दात् **प्राग्ये सुनोत्यादय** इति । सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जां सदस्तम्भस्वन च एषामित्यर्थः । इण्कोरिति पञ्चमीनिर्देशात् व्यवाये न प्राप्नोतीत्ययमारम्भः । अडित्यागमग्रहणम् । न प्रत्याहारस्य । अपिग्रहणं किम् । अव्यवधानेपि यथा स्यात् । अन्यथा विशेषवचना-द्व्यवाय एव स्यात् । **न्यषेधदिति** । लङ् ।

स्थादि । अषोपदेशार्थमवर्णान्ताभ्यासार्थं वचनम् । अभिषिषे-णयिषति सेनया अभियातुमिच्छति । सह इनेन वर्तते सेना । अभितष्ठौ । षणिप्रतिषिद्धार्थं च । अभिषिषिक्षति । अभ्यासस्येति वचनं नियमार्थं स्थादिष्वेवाभ्याससकारस्य षत्वं नान्यत्र । अभिसिषासति ।

गङ्गां विसेधतीति । गच्छतीत्यर्थः ।

---

१. व्यवायेपि C; D_1, D_3. २. स्वञ्ज Bc_2. ३. सेव for च Bc_2. ४. मवष्टम्भाभ्यासार्थं Bc_2. ५. इति सेना Bc_2. ६. प्रतिषेधार्थम् । सिच् । Bc_2.

षिधू शास्त्रे माङ्गल्ये च ।

स्वरतिसूतिसूयतिधूञूदितो वा ॥७।२।४४॥

स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात् ॥ असेधीत् । 'वदव्रज—' इति वृद्धिः । चर्त्वम् । असैत्सीत् ।

षिधू । शास्त्रं शास्त्रविषया शासनक्रिया । माङ्गल्यं मङ्गलविषया क्रिया लक्ष्यते । अत उक्तम् ।

'क्रियैव वाच्या धातूनां कर्तृव्यापारलक्षणा ।
स्वैकनिष्ठक्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु' ॥ इति ।

ऊकार इत् । 'धात्वादेः षः सः' इति सत्वम् । सेधति । सेधेत् । सेधतु । असेधत् ।

स्वरति । 'इट् सनि वा' इत्यतो वेत्यनुवृत्तावपि वाग्रहो लिङ्-सिचोर्निवृत्त्यर्थः । स्वृ शब्दोपतापयोः । षूञ् प्राणिगर्भविमोचने अदादिकः । षूङ् प्राणिप्रसवे दिवादिकः । धूञ् कम्पने इति स्वादिः क्र्यादिश्चुरादिकश्च । तत्र 'एकाचः' इत्यधिकारात् आद्ययोर्ग्रहणं नेतरस्य । ऊदितः षिधू शास्त्रे माङ्गल्ये चेत्येवमादयः । स्वरतेरनुदात्तत्वात् प्रतिषेधे प्राप्ते इतरेषामुदात्तत्वान्नित्यमिति प्राप्ते विकल्पार्थं वचनम् । किति 'श्र्युकः किति' इति नित्यं प्रतिषेधः पूर्वविप्रतिषेधेन । **असेधीदिति** । लुङ् । तिप् । च्लि लुङि 'च्लेः सिच्' । इट् वा । उपधाया गुणः । 'इतश्च' इतीकारलोपः । 'अस्तिसिच—' इतीट् । 'इट इटि' इति सलोपः । सवर्णदीर्घः । अडागमः । **चर्त्वमिति** । 'खरि च' इति । **असैत्सीदिति** । इडभावपक्षे रूपम् ।

१. परश्च वलादेरिड्वा स्यात् N. २. P, D_2 omit आर्धधातुकस्य ; इड्वार्धधातुकस्य स्यात् B_2 ; आर्धधातुकस्य वलादेः D_4. ३. °विषय° Bc_2. ४. °विषय° Bc_2. ५. यत Bc_2. ६. धात्वर्थेषु क्रियात्मभिः Dc_3. ७. °वृत्त्यर्थम् Dc_3. ८. दैवादिकः Bc_2. ९. °श्चुरादिश्च Bc_2. १०. °न्नित्यमितीट् Bc_2. ११. निषेधः Dc_3. १२. उपधागुणः Bc_2. १३. सवर्णे दीर्घः Bc_2 .

झलो झलि ॥८।२।२६॥

झलः[1] परस्य सिचो लोपः स्याज्झलि ॥

झषस्तथोर्धोऽधः[2] ॥८।२।४०॥

झषः परयोस्तथयोर्धः स्यान्न तु दधातेः । जश्त्वम् । असैद्धाम्[3] । खद स्थैर्ये हिंसायां च[4] ।

अतो हलादेर्लघोः ॥७।२।७॥

हलादेर्लघोरकारस्य इडादौ सिचि परस्मैपदे वा वृद्धिः स्यात्॥

झलः । इतः प्रभृति सिचो लोप इष्यते इत्यभिप्रेत्याह । सिच इति । तेनेह न । दृषत्स्थानम् ।

झषः । अध इति धाधातुनिषेध इत्याह । न तु दधातेरिति । यदि धकारमात्रनिषेधः स्यात् गतिबुद्धीत्यादयो निर्देशा न स्युः । असैद्धामिति । सिच्[5] । तसस्ताम् । 'वदव्रज-' इति वृद्धिः । अडागमः । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । सिषेध । सिषिधतुः । सेधिता । सेद्धा । इड्वा । सिध्यात् । सेधिष्यति । सेत्स्यति । असेधिष्यत् । असेत्स्यत् । खद स्थैर्ये हिंसायां च[7] । खदति । खदेत् । खदतु । अखदत् ।

अतः । 'नेटि' इति प्रतिषेधे प्राप्ते पक्षे विध्यर्थकमेतत्[8] । अतः किम् । अदेवीत् । हलादेः किम् । मा भवानटीत् । लघोः किम् । अतक्षीत् । अथेह कस्मान्न स्यात् । अचकासीदिति । उच्यते । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन हला व्यवधानमाश्रितम्[9] । अत्र त्वज्झल्समुदायेन व्यवधानमिति वृद्धिर्न । एवं तर्ह्येकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेनेति लघोरिति न वाच्यम् । अतक्षीदित्यत्रानेकेन व्यवधानमिति वृद्धिर्न[10] स्यात् ।

---

१. झलां D2. २. °स्तकारथकारयो° N. ३. Dropped D3. ४. C has असैत्सुः after it. ५. सिध् तस् सिच् तसस्ताम् । &c. Dc3. ६. Dropped Bc2. ७. स्थैर्ये हिंसायां च dropped Bc3, Dc3. ८. विधानार्थमेतत् Bc2 : विध्यर्थमे° Dc3. ९. °माश्रितम् Bc2. १०. व्यवधानावृद्धि° Bc2, Dc3.

प्रन्यखादीत् । खादित्वान्न णः । अखदीत् ।

अत उपधायाः ॥७।२।११६॥

उपधाया अतो वृद्धिः स्यात् ञिति णिति[1] ॥ चखाद ।

णलुत्तमो वा ॥७।१।९१॥

उत्तमणल् णिद्वा स्यात् ॥ चखाद । चखद[2] ।

गद् व्यक्तायां वाचि ।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवाति-द्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ ८।४।१७॥

उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं स्याद्गदादौ परे ॥

सत्यम् । विस्पष्टार्थं लघोरित्युक्तम् । खादित्वान्न ण इति । 'शेषे विभाषा कखादौ—' इत्यादिना । अखदीदिति । वृद्ध्यभावपक्षे रूपम् । अखदिष्टम् । अखादिष्टमित्यादि ।

अतः । अत इति किम् । भेदयति । चिचेत । उपधाया इति किम् । चकासयति । चखादेति । परोक्षे लिट् । तिप् । णल् । वृद्धिः । द्वित्वम् । ह्रस्वः । 'कुहोः—' इति छकारः । 'अभ्यासे चर्च' इति र्चः ।

णल् । णिद्वा स्यादिति । णित्कार्यकृद्वा स्यादित्यर्थः । णित्त्वाद् वृद्धिः । चखाद । चखद । खदिता । खद्यात् । खदिष्यति । अखदिष्यत् ।

गद ।

नेर्गद । गद व्यक्तायां वाचि । णद अव्यक्ते[5] शब्दे । पत्ल गतौ । पद[6] गतौ । घुसंज्ञाः[7] । मा इति माङ् माने शब्दे च ।

---

१. After it—च परे B_2. २. उत्तमो णल् C, D_1. ३. After it—खद्यात् । खदिता । खदिष्यति । अखादिष्यत् B_2. ४. चकारः । Bc_2, Dc_3. ५. अव्यक्ते Bc_2. Dc_3. ६. द्गतौ । घुसंज्ञकः । Dc_3. ७. °संज्ञकाः Bc_2.

प्रणिगदति । अगदीत्[1] । अगादीत्[2] ।

रद विलेखने ।[3]

अत एकहल्मध्येनादेशादेर्लिटि ॥६।४।१२०॥

लिट्कृताभ्यासादेशहीनस्य[4] धातोरसंयुक्तहलोर्मध्यस्यात एत्वं स्यात् किति लिटि अभ्यासलोपश्च । रेदतुः । रेदुः ॥

मैङ् प्रतिदाने इति द्वयोर्ग्रहणमिष्यते[5] । षोऽन्तकर्मणि । हन हिंसागत्योः । या प्रापणे । वा गतिगन्धनयोः । द्रा कुत्सायां गतौ । प्सा भक्षणे । टुवप् बीजतन्तुसन्ताने । वह प्रापणे । शमु[6] उपशमे । चिञ् चयने । दिह उपचये । गदति । गदेत् । गदतु । अगदत् । अगादीत् । अगदीत् । 'अतो हलादेः' इति वा वृद्धिः । जगाद । उत्तमे । जगाद । जगद । गदिता । गद्यात् । गदिष्यति । अगदिष्यत् ।

रद विलेखने । विलेखनमुत्पाटनम् । रदति । रदेत् । रदतु । अरदत् । अरादीत् । अरदीत् । रराद ।

अत एक । लिटि कृतेत्यादि । लिटि परतः कृतो यः अभ्यासादेशस्तेन हीनस्येत्यर्थः । इहैत्वे अभ्यासस्य जश्त्वचर्त्वयोरसिद्धत्वं नास्ति । तेन तदादिरप्यादेशादिः स्यात् । बभणतुः । चकणतुः । अत्र ज्ञापकः फलिभजयोरेत्वविधिः । अतः किम् । दिदिवुः । तपरः किम् । ररासे । एकहल्मध्ये किम् । तत्सरुः । रूपाभेदे त्वादेशादित्वं नाश्रीयते । शशिदद्योर्निषेधाज्ज्ञापकात्[7] । तेन देमुः पेचुरित्यादीनां प्रकृतिजश्चरादेशादीनामेत्वं भवति[8] ।

---

१. Dropped N. २. After it—जगाद । जगदतुः । जगदुः । गद्यात् । गदिता । गदिष्यति । अगदिष्यत् B2. ३. After it—रराद B2. ४. °कृतभ्यासा° D3, D4, B, P, C. ५. द्वयोरेव ग्रहण° Bc2, Dc3. ६. शम् Dc3. ७. शशदद्यो° Bc2. ८. अगादीना° Bc2.

थलि च सेटि ॥६।४।१२१॥

इड्वति थलि परे पूर्वविषये एत्वाभ्यासलोपौ स्तः ॥ रेदिथ । अनादेशादेः किम् । चखदतुः । नलोपिनो नेति केचित् । ममथतुः ।

णद् अव्यक्ते शब्दे ।

णो नः ॥६।१।६५॥

धात्वादेर्णस्य नः स्यात् ॥

थलि । पूर्वविषये इति । लिटि कृताभ्यासादेशहीनस्य धातोरसंयुक्तहलोर्मध्यस्थस्यात इत्यर्थः । न्लोपिन इति । यन्मते-संयोगात्परस्य लिटो वा कित्त्वं तन्मते न्लोपिनो नेति साक्षादे-त्वाभ्यासलोपौ निषेधति । स्वमते तु न्लोपादेशस्यासिद्धवदत्रेत्य-सिद्धत्वान्नेति भावः । अथवा स्वमते तु न्लोप एव नास्तीति । केचिदिति । उक्तं मुग्धबोधे । अशशददवाद्यन्यथाखिणु नलोपिनामिति । रदिता । रद्यात् । रदिष्यति । अरदिष्यत् ।

णद् ।

णो नः । सुब्धातोर्न नत्वम् । तेन णकारीयतीति सिद्धम् । णत्वव्यवस्थार्थं णोपदेशान् लक्षयति ।

---

१. नलोपिनो B_2, C, D_2. २. °मध्यस्यात इत्यर्थः Bc_2. ३. न्लोपस्या° Bc_2, Dc_3. ४. Dropped Bc_2, Dc_3. ५. कश्चिदित्युक्तम् Bc_2, Dc_3. ६. तथोक्तं Bc_2, Dc_3. ७. न्लोपि° Bc_2.

णोपदेशास्त्वनृनर्दनाथ्नाध्नन्द्नक्कनॄनृतः ।

उपसर्गादसमासेपि णोपदेशस्य ॥८।४।१४॥

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णत्वं स्यात् [1]समासेसमासेपि ॥ प्रणदति ।[2] 'नेर्गद—' इति णत्वम् । प्रणिनदति । [4]लिट्कृताभ्यासादेशाभावादेत्वाभ्यासलोपौ[5] ।

णोपदेशा इति । नृती गात्रविक्षेपे । नर्द शब्दे । नाथृ नाधृ याञ्चोपतापैश्वर्याशीःषु । टुनदि समृद्धौ । नक्क नाशने । नॄ नये । नट चलने । एतान् वर्जयित्वा येन्ये नादयस्ते णोपदेशा इत्यर्थः । नदति । नदेत् । नदतु । अनदत् । अनादीत् । अनदीत् ।

उपसर्गात् । उपसर्गादिति किम् । प्रगतो नायकोस्मात् प्रनायकः । अत्र प्रस्य गमित्युक्तत्वात्तमेव प्रत्युपसर्गत्वं न नयतिं प्रति । असमासेपि किम् । पूर्वपदाधिकारात् समास एव स्यात् । तदधिकारनिवृत्तिद्योतनाय प्रणमतीत्यादि असमासे प्रमाण इत्यादि समास उदाहरणम् । णोपदेशस्येति किम् । प्रनर्दति । **लिट्कृताभ्यासादेशाभावादिति** । 'अत एक—' इत्यत्र सूत्रे लिटि इत्यनादेशादेशादेरित्यस्य विशेषणमिति कृत्वा लिट्कृताभ्यासादेशहीनस्येति व्याख्यानम् । अतो यद्यपि णादेरादेर्णस्य नादेशो 'णो नः' इति कृतस्तथापि स लिटि परकृते कृतः 'णो नः' इत्यस्यानैमित्तिकत्वात् ।

१. °ननन्दन° D1. २. समासे dropped P. ३. Before it—प्राणर्दीत् प्राणर्दीत् B2. ४. लिट्कृतादेशाभावात् नेदतुः &c. D3, N. ५. एत्वाभ्यासलोपौ dropped P, C, D1, D2, D4. ६. °नदि Bc2, Dc3. ७. गणने Bc2, Dc3. ८. णादय° Bc2, Dc3. ९. °स्मादेशात् Bc2, Dc3. १०. °स्तथापि लिटिपरभूतेन कृतः Bc2. ११. इत्यस्यानिमित्तकत्वात् Bc2.

नेदतुः[1] । नेदिथ ॥ अर्द गतौ याचने च ।[2] लिटि द्वित्वे कृते ।

अत आदेः ॥७।४।७०॥

अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपापवादः ॥

अतो नेदतुः नेदिथेत्यत्रैत्त्वाभ्यासलोपौ भवत इत्यर्थः । ननाद । नदिता । नद्यात् । नदिष्यति । अनदिष्यत् । अर्द । याचने चेत्येके । अर्दतः । खर्दितः । अर्दति । अर्देत् । अर्दतु । आर्दत् । आर्दीत् । लिटि द्वित्वे कृते इति । 'लिटि धातोरनभ्यासस्य' इत्यनेन ।

'अत आदेः' इत्युक्तेस्तदन्तविधिर्न । अत्र च 'लिटि' इत्यनुवर्तते । 'किति' इति निवृत्तम् । तपरकरणं किम् । दीर्घस्य दीर्घो मा भूदिति । ततश्चाछिर्दीर्घविधेरभावात् 'तस्मान्नुड्—' इति नुट् न स्यात् आञ्छेति । यद्यप्यत्रापि ह्रस्वे भूते अदेव तथापि तपरत्वसामर्थ्यात् स्वाभाविकपरिग्रहः । पररूपापवाद इति । 'अतो गुणे' इति प्राप्तस्य पररूपस्यापवाद इत्यर्थः ।

---

१. After it—नेदुः B_1. २. After it—अर्दति । अर्दत् । आडजादीनाम् । आर्दत् । आर्दीत् । B_1, B_2. (P and C have अर्दति only). ३. After it-लिटि B_2, C. ४. रूपत्वा D_4. ५. नेदतुः । नेदुः । नेदिथे° Bc_2. ६. Dropped Bc_2, Dc_3. ७. °आञ्छे° Bc_2, Dc_3. ८. आञ्छाति Bc_2. ९. कृते Bc_2, Dc_3.

९ [प्र. कौ.]

तस्मान्नुड् द्विहलः ॥७।४।७१॥

दीर्घीभूतादकारात् परस्य द्विहलो धातोर्नुडागमः स्यात् । आनर्द ।[२]

इदि परमैश्वर्ये ।[३]

आडजादीनाम् ॥६।४।७२॥

अजादेरङ्गस्याडागमः स्यात् लङ्लुङ्लृङ्क्षु ॥[४]

आटश्चेति वृद्धिः । ऐन्दत् ।

इजादेश्च गुरुमतोऽनृच्छः ॥३।१।३६॥

इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् प्रत्ययः[५] स्याल्लिटि ॥[६]

तस्मात् । द्विहलः किम् । आट । आटतुः । अर्दिता । अर्द्यात् । अर्दिष्यति । आर्दिष्यत ।

इदि । परमैश्वर्यं परमेशानक्रिया । इकार 'इदितो नुम् धातोः' इति नुमर्थः । इन्दति । इन्दत् । इन्दतु ।

आट् । उदात्तश्च स स्यात् । विचारे विशेषस्तु वश कान्तावित्यत्र स्यात् । ऐन्ददिति । लङ् । तिप् । शप् । इल्लोपः । ऐन्दत । ऐन्दिष्टामित्यादि ।

इजादेः । इच् आदिर्यस्य स इजादिः । इच् प्रत्याहारः । गुरुर्विद्यते यस्यासौ गुरुमान् । अथामो मकारस्य 'हलन्त्यम्' इतीत्संज्ञा कस्मान्न स्यादित्यत आह ।

१. भूताभ्यासात् परस्य D_2, B_1 B_2, N. भूतादकारस्य P. २. After it—आनर्दतुः । आनर्दुः । आर्दीत् । आर्दिष्टाम । अर्द्यात । अर्दिता । अर्दिष्यति । आर्दिष्यत B_2. ३. After it—इदितो नुम् धातोः ॥७।१।५८॥ इन्दति D_4, C, (D_4 has इन्दति before 'इदितो नुम् धातोः'). ४. लुङ्लङ्° D_2, N_1. ५. B_1 drops प्रत्ययः. ६. After it—आट्टुः । आनर्द । Bc_2. ७. Dropped Bc_2.

[1]आमोमित्त्वमदन्तत्वादगुणत्वं विदेस्तथा ।
आस्कासोराम्विधानाच्च[2] पररूपं कतन्तवत् ॥

आमोमित्त्वमित्यादि । म इत् यस्य स मित् । न मित् अमित् । तस्य भावः अमित्त्वम् । कुतः । अदन्तत्वात् । मकारान्तत्वे हीत्संज्ञा । न चायं मकारान्तः । किं तर्हि । अकारान्तः । तेनाकार[3] इत्संज्ञामनुभवन् मकारस्येत्संज्ञां प्रतिबध्नाति । यथामो मित्त्वं तथा विदेरपि अदन्तत्वादेवागुणत्वं गुणाभावः विदांचकारेत्यत्र अकारान्तत्वे हि 'अतो लोपः' इत्यकारलोपे कृते तस्य 'अचः परस्मिन् पूर्वविधौ' इति स्थानिवत्त्वादिकार उपधा न भवति तेन लघूपधगुणो न । अदन्तत्वं तु विदेः 'उषविद—' इत्याम्संनियोगे अकारान्तत्वनिपातनात् । अभ्युपत्याप्यामो मान्तत्वममित्त्वं प्रतिपादयितुमाह । **आस्कासोराम्विधानाच्चे**ति । आमो मित्त्वमिति प्रकृतेन संबन्धः । 'दयायासश्च' इति आम आम्विधिः कास उपसंख्यानात् । यद्यामो मित्त्वं स्यात् आस्कासोरामो विधानं व्यर्थं स्यात् । मित्त्वस्य हि 'मिदचोऽन्त्यात् परः' इति प्रयोजनम् । एवं तयोरामि सत्यसति वा न कश्चिद्विशेषः । उभयत्र सवर्णदीर्घे कृते तदेव रूपं स्यात् । अतस्तयोराम्विधानस्यार्थवत्त्वायामो मित्त्वम् । ननु चामोदन्तत्वे 'कास्प्रत्यय–' इत्यत्र 'आमामन्त्रे' इति स्यादत आह । **पररूपं कतन्तवदि**ति । यथा 'सर्वत्र लोहितादिकतन्तेभ्यः' इत्यत्र पररूपं तथेहापि पररूपमित्यर्थः ।

१. Before it—कास्प्रत्ययादाममन्त्रे लिटि । सर्वत्र लोहितादिकतन्तेभ्यः ।—आभ्यां सूत्राभ्यामामोमित्त्वं ज्ञातव्यं पररूपत्वात् B_2. २. °न्तु D_4. ३. तेनाकारस्येत्संज्ञा° Bc_2. ४ कासः कास्प्रत्यय इति यांद आमो &c. Bc_2. ५. एवं च Bc_2. ६. °विधानसामर्थ्यादामोमित्त्वम् Bc_2.

आमः ॥२।४।८१॥

आमः परस्य लेर्लुक् स्यात् ॥[1]

कृञ्चानुप्रयुज्यते लिटि ॥३।१।४०॥

आमन्ताद्धातोः कृञ् अनुप्रयुज्यते लिटि परे। अभूततद्भावे कृभ्वस्तीत्यतः कृञो [2]द्वितीयेति ञकारेण [3]कृञ्प्रत्याहारः।

आमः। अयं[5] च लुक् [4]नाप्राप्तेषु तिबादिषु विधीयमानत्वात्तेषामेयमपवादस्तेनेन्दांचकारेत्यादौ 'तिङ्ङतिङः' इति निघातः सिध्यति। [6]ननु अम गतावित्यस्य णलि वृद्धौ आमिति स्यात्। ततश्च णलोपि स्थानिवद्भावेन लित्त्वाल्लोपः स्यात्। मैवम्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमित्यत्र न स्यात्। लाक्षणिकत्वात्।

कृञ्च। अनु पश्चात् प्रयुज्यते। सावधारणत्वात् सर्वव्याख्यानामाम्प्रत्ययस्यैव पश्चात् प्रयुज्यते। तेन व्यवधाने न भवति। ननु च 'आमः' इति लिटो लुका भवितव्यं तत् कुतस्तस्य परत्वम्। नैष दोषः। न ह्ययमत्रार्थो भवति। लक्षणान्तरेण विहिते लिटि परत इति। अपि तु अनेनैव सूत्रेण लिटि परतः कृञः। अनुप्रयुज्यते। लिटपरः कृञ् अनुप्रयुज्यत इति यावत्। **अभूततद्भाव** इति। प्रत्याहारोत्र गृह्यते इत्यत्र लिङ्गम् 'आम्प्रत्ययवत् कृञोनुप्रयोगस्य' इत्यत्र कृञ्ग्रहणं भ्वस्तिव्यावृत्त्यर्थम्। अन्यथा 'आम्प्रत्ययवदनुप्रयोगस्य' इत्येवावक्ष्यत्। 'अभिविधौ संपदा च' इति संपदोपि

---

१. After it B_1, B_2, D_1, D_2 have—लिटः कृत्संज्ञकत्वात् सुः (स्युः D_2) आमः स्वरादिषु पाठादव्ययत्वम्। ततः सोर्लुक्। (After सोर्लुक्—B_2 has—अव्ययादाप्सुप इत्यनेन सोर्लुक् स्यात्). २. द्वितीयेन D_1. ३. कृञ् dropped D_3. ४. नाप्राप्ते तिबादिषु Bc_2. ५. अयं dropped Bc_2, Dc_3. ६. ननु च अम् अचिन्त्यं स्यात्। णलि &c. Bc_2; ननु च Dc_3. ७. कृञ् अनुप्र Dc_3.

तेन कृभ्वस्तयो ज्ञेयाः । तेषां द्वित्वादि ।

उरत् ॥७।४।६६॥

अभ्यासऋवर्णस्य अत् आदेशः स्यात् ॥[2] रपरत्वम्[3] । हलादिः[4] शेषः । अचो ञ्णिति । इन्दांचकार । परत्वादादौ यणादेशः ।

तत्रान्तर्भावादनुप्रयोगः प्राप्नुयात् । नैवम् । 'सनाद्यन्ताः—' इत्यतो 'धातवः' इत्यनुवृत्तेर्धातूपसर्गसमुदायसंपदो[5] न स्यात् । योत्र धातुस्तस्यापि न । अर्थविप्रतिषेधात् । तेषां द्वित्वादीति । कृभ्वस्तीनां द्वित्वादि । आदिशब्दात् अभ्याससंज्ञा अभ्यासकार्यं कुहोश्चुरित्यादि ।

उरत् । अदादेशे रपरत्वं ततो 'हलादिः शेषः' । नर्नर्तीत्यादौ अभ्यासविकारेष्वपवादा[6] नोत्सर्गान् विधीन् बाधन्ते इति उरत्वे कृते पश्चात् रुगादय आगमाः क्रियन्त इति ज्ञेयम्[7] । इन्दांचकारेति । परोक्षे लिट् । लिटस्तृतीये धात्वधिकारे विहितत्वात् । अतिङ्त्वाच्च कृत्त्वात् । लुप्तेऽपि तस्मिन् प्रत्ययलक्षणेन 'कृत्तद्धित—' इति प्रातिपदिकत्वात् सुः । स्वरादिष्वाम इति पाठात् आमन्तस्याव्ययत्वात् 'अव्ययादाप्सुपः' इति सोर्लुक्[8] । 'तद्धितश्च' इति चकाराद्वाऽव्ययत्वम्[9] । अथवा 'हल्ङ्याप्' इति सुलोपः । परत्वादादौ यणादेश इति[10] । इदां कृ अतुस् इत्यत्र 'असंयोगाल्लिट् कित्' इति कित्त्वाद्गुणाभावे सति 'लिटि धातोः—' इति द्वित्वं प्राप्तम् । 'इको यणचि' इति यणादेशश्च । तत्र 'विप्रतिषेधे परं कार्यम्' इति परत्वादादौ यण् ।

१. अकारादेशः D_1. २. अचो ञ्णिति । रपरत्वम् । इन्दांचकार D_2. ३. रपरत्वम् । हलादिः शेषः dropped D_3. ४. हलादिशेषः N, D_4. ५. °समुदायस्य संपदो Bc_2, Dc_3. ६. विकारेष्वपवादा Bc_3. ७. विज्ञेयम् Bc_2 ८. इति लुक् । Dc_1. ९. चकाराद्वाऽव्ययत्वम् Bc_2. १०. Dropped Bc_2.

द्विर्वचनेचि ॥१।१।५९॥

रूपातिदेशोऽयम्।[1] द्वित्वनिमित्तेचि योजादेशः स स्थानिवत्[2] स्यात् द्वित्वे कर्तव्ये इति [3] [4]साच्कत्वात् द्वित्वम् । इन्दांचक्रतुः ।[5] इदांचक्रुः ।

द्विर्वचने । द्वित्वस्य निमित्तं योऽच् तस्मिन् परतः । रूपातिदेश इति । स च नियतकालः क्रियते । कृते द्वित्वे पुनरादेशरूपमेवावतिष्ठते । ननु च 'द्विर्वचनेचि' इत्युच्यते कथं पुनरर्थद्वयं लभ्यते । द्वित्वनिमित्त इति द्वित्वे कर्तव्ये इति च । उच्यते । द्विर्वचनं च द्विर्वचनं चेत्येकशेषात् । [6]तथा च [7]भाष्ये उक्तम् । एकशेषनिर्देशात् 'एकशेषनिर्देशोऽयम्' इत्यादि । भर्तृहरिणाप्युक्तम् ।

'तथा द्विर्वचनेचीति तन्त्रोपादित[8]लक्षणः[9] ।
एकशेषेण निर्देशो भाष्य एव प्रदर्शितः' ॥ इति ।

स्थानिवद्भावप्रयोजनान्यल्लोपणिलोपयणयवायावत्वोत्वादेशाः । द्विर्वचने कर्तव्ये किम् । जग्ले । भावे लिट् । अत्र श्रवणमाकारस्य न । परेण सह 'वृद्धिरेचि' इति वृद्धिरपि न । द्विर्वचननिमित्त इति किम् । दुद्यूषति । ऊठि यणादेशो न स्थानिवत् । अचि किम् । जेघ्रीयति । देध्मीयते 'ईघ्राध्मोः' इतीत्वत् । यदि द्वित्वे कार्ये न स्थानिवत् स्यात् । इति साच्कत्वाद् द्वित्वमिति । [10]इन्दांचक्रतुरित्यत्र द्वित्वनिमित्ते अतुसि ऋकारस्य यणादेशो जातः स 'लिटि-' इति द्वित्वे कर्तव्ये स्थानिवत् । ततो द्वित्वम् । [11]इन्दांचक्रतुः । 'उरत्' । 'कुहोश्चुः' ।

---

१. After it—नियतकालकृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते । C. B_1 (°रादेशरूप° C). २. द्वित्वे कर्तव्ये स्थानिवत् स्यात् P. ३. Dropped from इति to द्वित्वम् P. ४. साच्कस्य D_4. ५. Dropped D_4. ६. नथा Dc_1. ७. महाभाष्ये Dc_3. ८. पायाविलक्षणः Dc_3. ९. °लक्षणम Bc_2. १०. इन्दां क्र अतुस् इत्यत्र Bc_2. ११. इन्दां क्र कृ उस् Dc_3.

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥७।२।१३॥

क्रादिभ्य एव लिटि इण् न स्यात् । अन्यस्मादनिटोपि स्यात् ।

इन्दांचकर्थ । वा णित्त्वम् । इन्दांचकार । इन्दांचकर । इन्दांचकृव । इन्दांचकृम । इन्दांबभूव । 'अत आदेः' ।[3] इन्दामास । विधानसामर्थ्यादस्तेर्भूभावो न ॥[4]

कृसृ । डुकृञ् करणे । सृ गतौ । डुभृञ् धारणपोषणयोः । भृञ् भरणे । वृञ् वरणे । वृङ् संभक्तौ । टुञ स्तुतौ । द्रु गतौ । स्रु गतौ । श्रु श्रवणे । क्रादीनाम् 'एकाच उपदेशे–' इति प्रकृत्याश्रये इट्प्रतिषेधे सिद्धे वृङ्वृञोस्तु प्रत्ययाश्रये 'श्र्युकः किति' इति निषेधे सिद्धे पुनरारम्भो नियमार्थः । सिद्धे सत्यारम्भो नियमार्थ इति कृत्वा इत्येतन्मनसि कृत्वाह । **क्र्यादिभ्य एवे**त्यादि ।

इन्दांचक**र्थे**ति । गुणो रपरः । स्थानिवत्त्वम् । द्वित्वम् । अत्वम् । चुत्वम् । इन्दांचक्रथुः । इन्दांचक्र । **वा णित्त्वमि**ति । उत्तमे 'णलुत्तमो वा' इत्यनेन । इन्दांचकार । इन्दांचकर । पूर्ववत् प्रक्रिया । **इन्दांचकृव** । **इन्दांचकृमे**ति कित्त्वाद्गुणाभावः । **इन्दांबभूवे**ति । भुवोनुप्रयोगो लिट्परस्य । द्वित्वम् । ह्रस्वः । 'भवतेरः' । 'अभ्यासे चर्च' । 'इन्धिभवतिभ्यां च' इति कित्त्वाद्गुणाभावः । 'भुवो वुक्' इति वुक् । इन्दांबभूवतुरित्यादि । **इन्दामासे**ति । अस्तेर्लिट्परस्यानुप्रयोगः । ननु चासेति प्रयोगो न घटते । अस्तेर्भूभावस्य विहितत्वादित्याशङ्क्याह । **विधान-सामर्थ्या**दिति । इन्दिता । इन्द्यात् । इन्दिष्यति । ऐन्दिष्यत् ।

---

१. लिटि C, D3. २. After it—'तस्मान्नुड् द्विहलः' इति न नुट् द्विहलत्वाभावात् C, D1, D4. ३. नास्ति N. ४. After it—ऐन्दीत् । इन्द्यात् । इन्दिता । इन्दिष्यति । ऐन्दिष्यत् B2. ५. आवरणे Bc2. ६. वृञ् Dc3. ७. गुणः । अण् Bc2. ८. रपरत्वम् । Dc3. ९. °वत्त्वाद् द्वित्वम् । Dc3. १०. श्चासरूप° Bc2; चासेति रूपं Dc3.

णिदि कुत्सायाम् ।[१]

वा निंसनिक्षनिन्दाम् ॥८।४।३३॥

उपसर्गस्थान्निमित्तादेषां णत्वं वा स्यात् ॥ प्रणिन्दति । प्रनिन्दति ।

उख गतौ । ओखति ।[२] औखत् । औखीत् । उपधागुणः । द्वित्वम् । ह्रस्वः ॥

णिदि । 'णो नः' । 'इदितो नुम् धातोः' । निन्दति । निन्देत् । निन्दतु । अनिन्दत् । अनिन्दीत् । निनिन्द । निनिन्दतुः । निन्दिता । निन्द्यात् । निन्दिष्यति । अनिन्दिष्यत् ।

वा निंस । णिसि चुम्बने । णिक्ष रोपणे । णिदि कुत्सायाम् । णोपदेशत्वादेषां नित्ये णत्वे प्राप्ते विकल्पः । **प्रणिन्दति** । **प्रनिन्दतीति** । लिट् । तिप् । शप् ।

उख । **ओखतीति** । शप् । उपधागुणः । ओखेत् । ओखतु । **औखदिति** । लङ् । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । **औखीदिति** लुङ् । 'च्लेः सिच्' । उपधागुणः । इट् । इकार-लोपः । 'अस्ति—' इतीट् । 'इटः—' इति सवर्णदीर्घः । आडागमः । वृद्धिः । **उपधागुण इति** । लिटि णलि 'पुगन्तलघूपधस्य च' इत्यनेनेत्यर्थः । **द्वित्वमिति** । 'लिटि—' इत्यादिना । **ह्रस्व इति** । '**ह्रस्वः**—' इत्यनेन । स च 'एच इग्घ्रस्वादेशः' इत्योकारस्य उकार इति भावः । एवं उ ओख अ इति स्थिते ।

---

१. After it—निन्दति । निन्देत् । निन्दतु । अनिन्दत् । अनिन्दीत् । अनिन्दिष्टाम् । निनिन्द । निन्दिता । निन्द्यात् । निन्दिष्यति । अनिन्दिष्यत । B_2. २. After it—ओखेत् । ओखतु । D_1, D_2, D_3. ३. णिंस Be_2, De_3. ४. नेते Be_2. ५. क्लेः । सिच् । Be_2.

अभ्यासस्यासवर्णे ॥६।४।७८॥

अभ्यासस्य इउवर्णयोरियङुवङौ स्तः असवर्णे अचि ॥

उवोख । ऊखतुः ।[1]

अञ्चु गतिपूजनयोः ।[2] आनञ्च । आनञ्चतुः ।

नाञ्चेः पूजायाम् ॥६।४।३०॥

इति नलोपाभावः । अञ्च्यात । गतौ तु अच्यात ।

मुचु गतौ ।

अभ्यासस्य । ननु चात्रोकारस्य 'अचः परस्मिन्—' इति स्थानिवद्भावत्वादुवङा न भवितव्यम् । न अनादिष्टादचः पूर्वस्य विधौ कार्ये स्थानिवत्त्वमिष्यते । अयं चाभ्यास आदिष्टादचः पूर्वः । **उवोखेति** । ननु चात्र गुणे कृते 'इजादेः—' इत्यामा भाव्यम् । नैवम् । संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति लिट्संनिपातेन जातो गुण आमुद्वारा तद्विघातं न करोतीति न स्यादाम् । **ऊखतुरिति** । द्वित्वं सवर्णदीर्घः । ऊखुः । उवोखिथ । ओखिता । उख्यात । ओखिष्यति । औखिष्यत् ।

अञ्चु । अञ्चति । अञ्चेत् । अञ्चतु । आञ्चत् । आञ्चीत् । **आनञ्चेति** । परोक्षे लिट् । णल् । द्वित्वम् । 'अत आदेः' इति दीर्घः । 'तस्मान्नुड् द्विहलः' इति नुट् । अञ्चिता । अञ्च्यात् । आञ्चिष्यति । आञ्चिष्यत् ।

मुच । म्रोचति । म्रोचेत् । म्रोचतु । अम्रोचत् ।

---

१. After it—ओखिता । उख्यात् D₁ : उख्यात् । ओखिता । ओखिष्यति । औखिष्यत् । B₂. २. Before it—अञ्चति । अञ्चेत् । अञ्चतु । आञ्चत् B₂.

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च ॥ ३।१।५८॥

एभ्यश्च्लेरङ् वा स्यात् परस्मैपदेषु ॥ अम्रुचत् ।[1] अम्रोचीत् । एवं म्लुचुग्रुचुग्लुचुग्लुञ्चु ।[4]

आछि आयामे ।[5] आञ्छतेर्नुड् वेति केचित् । आनाञ्छ ।[6] आञ्छ । हुर्छा कौटिल्ये ।

जॄस्तम्भु । जॄष् वयोहानौ । स्तम्भुः सौत्रो धातुः । म्रुचुम्लुचु गतौ । ग्रुचुग्लुचु स्तेयकरणे । ग्लुञ्चु गतौ । टुओश्वि गतिवृद्ध्योः । अम्रुचदिति । ङित्त्वाद् गुणाभावः । अम्रोचीदिति । अङभावपक्षे रूपम् । सिच् । इट् । इटि सलोपः । गुणः । अट् । एवमित्यादि । एवमनेन प्रकारेण म्लुचादीनां रूपाणि ज्ञेयानीत्यर्थः । अम्लुचत् । अम्लोचीत् । अग्रुचत् । अग्रोचीत् । अग्लुचत् । अग्लोचीत् । अग्लुञ्चत् । अग्लुञ्चीत् । ननु ग्लुचग्लुञ्चोरन्यतरोपादानेपि रूपं त्रयं स्यात् । सत्यम् । अर्थभेदात्तु द्वावप्युपात्तौ । केचिदाहुः । द्वयोरुपादानसामर्थ्यात् ग्लुञ्चेर्नलोपो न स्यात् अग्लुञ्चदिति । जॄस्तम्भोरग्रे कथयिष्यते रूपम् । मुम्रोच । म्रोचिता । म्रुच्यात् । म्रोचिष्यति । अम्रोचिष्यदिति ।

आछि । इदित्वान्नुम् । आञ्छति । आञ्छेत् । आञ्छतु । आञ्छत् । आञ्छीत् । आञ्छतेरिति । तस्माद्ग्रहणान्नुट् न प्राप्नोति । 'अत आदेः' इति अत्र तपरग्रहणात् तेन दीर्घाभावात् स वेति केचिदाहुरित्यर्थः । तथोक्तं मुग्धबोधे । 'स्यान्तादाय्रूदाद्यभोः खेरान् ठ्यां वा त्वाञ्छेः' इति । आञ्छिता । आञ्छ्यात् । आञ्छिष्यति । आञ्छिष्यत् । हुर्छा ।

---

१. °रङ्गादेशः D₁. २. Dropped N₁, D₁, D₃, D₄ ३ म्रुचु D₃. ४. °श्विप्रभृतयः B₂. ५. B₁ has आछत । आञ्छत । केचित् आनाञ्छ । आछ । for आञ्छते .. आञ्छ ; आञ्छतेर्द्विहलो नुडिति B₂. ६. आञ्छ । आनाञ्छ । D₃. ७. च्लिः । सिच् Bc₂. ८. अग्लुचत । अग्लोचीत । अग्लुञ्चत Bc₂. ९. Before it—आनाञ्छ । आञ्छ । Bc₂.

उपधायां च ॥८।२।७८॥

धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् ॥ हूर्छति । अहूर्छीत् । जुहूर्छ ।

वज गतौ ।[५]

न शसददवादिगुणानाम् ॥६।४।१२६॥

शसेर्ददेर्वकारादीनां गुणभूतस्य चाकारस्य एत्वमभ्यासलोपश्च न स्तः ॥

उपधा । धातोः । 'र्वोरुपधाया दीर्घ इकः' 'हलि च' इत्यनुवर्तते । उपधायामिति षष्ठीद्विवचनस्य स्थाने सप्तम्येकवचनम् । तच्च र्वोर्विशेषणम् । प्रकृतं तूपधाग्रहणमिति इको विशेषणम् । तत्तु र्वपेक्षया पूर्वत्वमाह इत्येतत् सर्वं चेतसि कृत्वाह । धातोरित्यादि । हलि किम् । चिरिणोति । चतुर्यितेत्यत्र बहिरङ्गत्वेनासिद्धत्वात् अल्लोपस्य धातोरुपधाभूतो रेफो न । हुर्च्छति । हुर्च्छेत् । हुर्च्छतु । अहुर्च्छत् । अहुर्च्छीत् । जुहुर्च्छ । हुर्च्छिता । हुर्च्छ्यात् । हुर्च्छिष्यति । अहुर्च्छिष्यत् ।

वज । वजति । वजेत् । वजतु । अवजत् । अवाजीत् । अवजीत् । ववाज ।

न शस । शस हिंसायामिति केचित् । केचित्तु शस प्लुतगताविति । दद दाने । **गुणभूतस्य चाकारस्येति** । गुणशब्देन भावितस्येत्यर्थः ।

---

१. °परत: D3. २. Dropped D1. ३. P, N, C and B2 drop अहूर्छीत् । जुहूर्छ, अहूर्छत् । जुहूर्छ । हूर्छिता D1; dropped D2, D3. ४. Dropped D3; after it—हूर्छिता D4. ५. After it—वजति । वजेत् B2. ६. गुणभूतस्याकार° D3. ७. एत्वाभ्यासलोपौ न स्तः D2, D3, D4. ८. स्यात् D1. ९. द्विवचनस्थाने Bc2. १०. Dropped Dc1.

ववजतुः । ववजिथ ।[1]

व्रज गतौ । वदव्रजेति वृद्धिः । अव्राजीत् ।

अज गतौ क्षेपणे च ।

अजेर्व्यघञपोः ॥२।४।५६॥

अजेरार्धधातुके वीत्यादेशः स्यात् न तु घञपोः परतः ॥ वलादावार्धधातुके वेष्यते ।

एकाच उपदेशेनुदात्तात् ॥७।२।१०॥

उपदेशे यो धातुरेकाच् अनुदात्तस्ततः परस्य वलादेरार्धधातुकस्येड् न स्यात् ।

ववजिथेति । 'आर्धधातुकस्येड् वलादेः' । वजिता । वज्यात् । वजिष्यति । अवजिष्यत् ।

व्रज । व्रजति । व्रजेत् । व्रजतु । अव्रजत् । अव्राजीत् । 'वदव्रज--' इति वृद्धिः । वव्राज । व्रजिता । व्रज्यात् । व्रजिष्यति । अव्रजिष्यत् ।

अज । अजति । अजेत् । अजतु । आजत् ।

अजेः । आर्धधातुक इति 'आर्धधातुके' इत्यस्मादधिकारसूत्राल्लभ्यते । आर्धधातुके विवक्षित इत्यर्थः ।

एकाचः । नास्त्युदात्तो यस्मिन् सोनुदात्तः । अथवा अनुदात्तात्मकत्वात् समुदाय एवानुदात्त उच्यते । उपदेशः प्रकृतिपाठः । उपदेश इति मध्ये पठितत्वादुभाभ्यामेकाजनुदात्ताभ्यां मध्यप्रदीपिकान्यायेन संबध्यत इत्यभिप्रेत्याह । उपदेशे यो धातुरित्यादि । के पुनरुपदेशेऽनुदात्ताः । ये तथा पठ्यन्ते । तानेव विस्पष्टार्थं पद्यैर्निबध्नाति । तत्र प्रथममजन्तेष्वनुदात्तानुपदिशति ।

१. वजति । अवजीत् । अवाजीत् । ववाज । ववजतः । ववजिथ । D_1; अवार्जीत् । अवर्जीत् । वजिता । वज्यात् । वजिष्यति । अवजिष्यत B_2.
२. Dropped B_2, D_2, D_3, D_4. ३. मध्ये Dc_3. ४. °दात्तानिर्दिशति B_2.

अदूदृदन्तरुस्नुक्ष्णुशीयुणुंक्षुश्विडीश्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचः स्वरान्ता धातवोऽनिटः ॥ १ ॥
वसतिः शक्लृघसूरभ्यभूलभ्यमौ रमिमन्यती ।
नमिर्हनिगमी देग्धि[4]दुहमिहनह्वहलिहो रुहिः ॥ २ ॥
दहिर्दिशिदृशी दंशिस्पृशिमृशविश[5]रुशिकुशः ।
लिशरि[6]शूसिध्यतिरुधराधसाधयुधः शुध्यतिवुध्यती ॥३॥

अदूदृ इत्यादि । एकाचः स्वरान्ता धातवोऽनिट इत्यनुदात्ता पठ्यन्ते । इत्यनिटो भवन्तीत्यर्थः । अकारान्ता ऊकारान्ता ऋकारान्ताः । रु शब्दे । ष्णु प्रस्रवणे । क्ष्णु तेजने । शीङ् स्वप्ने । यु मिश्रणे । णु स्तुतौ । टुक्षु शब्दे । टुओश्वि गतिवृद्ध्योः । डीङ् विहायसा गतौ । श्रिञ् सेवायाम् । वृङ् संभक्तौ । वृञ् आवरणे । एभिर्विना एतान् वर्जयित्वेत्यर्थः । इदानीं हलन्तेष्वनुदात्तानुपदिशति । वसतिरित्यादि । वस निवासे । शपा निर्देशात् । शक्लृ शक्तौ । घस्लृ अदने इति प्रकृत्यन्तरमस्ति । रभ राभस्ये । यभ मैथुने । डुलभष् प्राप्तौ । यमु उपरमे । रमु क्रीडायाम् । मन ज्ञाने । दैवादिकः । श्यना निर्देशात् । णमु प्रैह्वत्वे शब्दे च । हन हिंसागत्योः । गम्लृ गतौ । दिह उपचये । दुह प्रपूरणे । मिह सेचने । णह बन्धने । वह प्रापणे । लिह आस्वादने । रुह जन्मनि प्रादुर्भावे । दह भस्मीकरणे । दिश अतिसर्जने । दृशिर् प्रेक्षणे । दंश दशने । स्पृश संस्पर्शने । मृश आमर्शने । विश प्रवेशने । रुश हिंसायाम् । क्रुश आह्वाने । लिश अल्पीभावे । रिश हिंसायाम् । षिधु संराद्धौ । दैवादिकः । श्यना निर्देशात् । रुधिर् आवरणे । राध साध संसिद्धौ । साध संवृद्धौ च । युध संप्रहारे । शुध शौचे । बुध अवगमे दिवादिरेव ।

१. नु D1, D2, D3, N1. २. डाङ्श्रिभिः B1, P. C ३. वृञ्वृङ्भ्यां D2. ४. दुह D1, B2. ५. रिश् D2. ६. रिशालिश B2. ७. विश् D2. ८. इत्यनिटोनुशात्ता Bc2. ९. स्नु Bc2. १०. ॰ष्वनिट उप Bc2. ११. मनु Dc3. १२ प्रह्वीभावे Bc2. १३. भावे च Bc2. १४. संस्पर्शे Bc2. Dc3. १५. सिधु शुद्धौ Bc2. १६. राध वृद्धौ च Bc2. Dc3.

क्रुधिक्षुधी व्यधिर्बन्धिः शुष्यतिः पुष्यतिः श्लिषिः ।
[1]दुषिद्विषी विष्पिषौ त्विषतुषौ शिष् कृषिकर्षती ॥ ४ ॥
तप्तिप्याप्विपिस्वप्लिप्लुपस्तृप्यतिदृप्यती ।
सृप्शपौ छुप्क्षिपौ स्कन्दिर्[2]हदिच्छिदिभिदिक्षुदः ॥५॥
अदिः शदिसदी खिद्नुद्तुदः स्विद्यतिपद्यती ।
विनत्तिर्विद्यतिः पच्वच्विचिरिच्प्रच्छिरञ्जयः ॥ ६ ॥

श्यना निर्देशात् । क्रुध कोपे । क्षुध बुभुक्षायाम् । व्यध ताडने । बन्ध बन्धने । शुष शोषणे । पुष पुष्टौ । श्लिष आलिङ्गने । श्लिषु दाहे । दुष वैकृत्ये । द्विष अप्रीतौ । विषु सेचने । विष्लृ व्याप्तौ । पिष्लृ संचूर्णने । त्विष दीप्तौ । तुष तुष्टौ । शिष्लृ विशेषणे । कृष विलेखने । तौदादिको भौवादिकश्च । कृषिकर्षतीति निर्देशात् । तप संतापे । तप ऐश्वर्ये । तिपृ क्षरणे । आप्लृ व्याप्तौ । टुवप बीजतन्तुसन्ताने । ञिष्वप् शये । लिप लेपे । लुप च्छेदे । तृप प्रीणने । दृप हर्षविमोचनयोः । तृप्यतिदृप्यत्योरनुदात्तत्वममागमार्थम् । इर् तु तयो रधादित्वेन विकल्प्यते । तुदादिषु यौ तयोर्ग्रहणं न । श्यनादिनिर्देशात् । सृप्लृ गतौ । शप उपालम्भने । शप आक्रोशे । छुप स्पर्शे । क्षिप प्रेरणे । स्कन्दिर् गतिशोषणयोः । हद पुरीषोत्सर्गे । छिदिर् द्वैधीकरणे । भिदिर् विदारणे । क्षुदिर् संप्रेषणे । अद भक्षणे । शद्लृ शातने । षद्लृ विशरणगत्यवसादनेषु । खिद दैन्ये । खिद परिघाते । नुद प्रेरणे । तुद व्यथने । ञिष्विदा गात्रप्रक्षरणे । दिवादिः । श्यना निर्देशात् । न भ्वादिः । पद गतौ । विद विचारणे । विद सत्तायाम् । श्नम्श्यन्भ्यां निर्देशो वेत्तिविन्दत्योर्निवृत्त्यर्थः । डुपचष् पाके । वच परिभाषणे । 'ब्रुवो वचिः' । विचिर् पृथग्भावे । रिचिर् विरेचने । प्रच्छ ज्ञीप्सायाम् । रञ्ज

१. द्विषौ D_3. २. हृदि D_1, D_4. ३. श्यनोक्तत्वात् Bc_2. ४. लम्भे Bc_2. ५. ह्रदि Bc_3.

निजिः सिचिमुची भञ्जिभजिभृज्जतियजत्यजः ।
युजिः सञ्जिरुजी स्वञ्जिसृजिमस्जिभुजो विजिर् ॥७॥
इमे हलन्तेष्वनिटः इत्यनिट्धातुसंग्रहः ॥[4]

सिचि वृद्धिः परस्मैपदेषु ॥७।२।१॥

सिचि परस्मैपदे परे इगन्तस्याङ्गस्य वृद्धिः स्यात् ॥

रागे । णिजिर् शौचपोषणयोः । षिचिर् क्षरणे । मुचॢ मोक्षणे ।[1] भञ्जो आमर्दने । भज सेवायाम् । भ्रस्जो पाके । यज देवपूजादौ । त्यज हानौ । युजिर् योगे । युज समाधौ । षञ्ज सङ्गे । रुजो भङ्गे । ष्वञ्ज परिष्वङ्गे । सृज विसर्गे । टुमस्जो शुद्धौ । भुज कौटिल्ये । विजिर् विवेके । हलन्तेषु मध्ये इमे अनिटः । अनिट इत्यनुदात्तत्वोपलक्षणम् । ततश्चामादिमन्यत् कार्यं स्यात् । इत्यनिट्धातुसंग्रह इति । अनुदात्तधातुसंग्रहः समाप्त इत्यर्थः ।

सिचि । अत्र सिचि परस्मैपदेष्विति द्वे अपि परसप्तम्यौ । तत्र सिचोऽङ्गापेक्षं परत्वम् । परस्मैपदानां सिजपेक्षम् । तत्रेको गुणवृद्धीत्युपतिष्ठते । ततश्चेकोऽङ्गस्य विशेषणात् तदन्तविधिः स्यादित्यभिप्रेत्याह । सिचीत्यादि । अन्तरङ्गमपि गुणमेषा वचनाद्बाधते । न्यनुवीत् न्यधुवीदित्यत्र कुटादित्वात् ङित्त्वेन निषिद्धायां वृद्धौ उवङादेशः । ननु यथा गुणो बाध्यते एवं निषेधोऽपि बाध्यः । मैवम् । येन नाप्राप्ते यो विधिः स तस्य बाधकः । गुणे च नाप्राप्ते वृद्धिरारभ्यते ।

---

१. साज D_1 ; स्वञ्ज D_2 ; स्वञ्जसञ्जसाञ्ज B_2. २. सञ्जि D_2. ३. मस्ज D_1. ४. After this B_1, B_2, D_2, D_4 have—

रधादिस्वादिरिद्विकल्पेप्यत्रोपात्तस्तु पिर्द्विपिः ।
अनुदात्तत्वमाख्यातुं तथाप्यागमसिद्धये ॥ (तथामागमासिद्धये ॥ D_2, D_4).

५. इगन्ताङ्गस्य C ; इगन्तस्य (अङ्गस्य dropped) D_1. ६. After it—भज सेवायाम् Dc_3. ७. षञ्ज Bc_2, Dc_3. ८. Dropped Bc_2. ९. After it—अनुदात्ता इत्यर्थः Bc_2. १०. °दात्तम्यौ Bc_2, Dc_3. ११. अत्रे° Bc_2.

अवैषीत् । आजीत् । विवाय । एरनेकाचेति यण् । न पदान्तेति सूत्रेण दीर्घयलोपयोर्लोपाजादेश एव न स्थानिवत् ।

निषेधे तु प्राप्ते चाप्राप्ते चेति न तस्य बाधिका । अवैषीदिति । लुङ् । च्लिः । तस्य सिच् । अजेर्वीआदेशः । स च एकाचः । स्वरान्तत्वेनानुदात्त इतीट्प्रतिषेधः । वृद्धिः । अडागमः । 'इतश्च' इतीकारलोपः । 'अस्तिसिचोऽपृक्ते' इति ईट् । षत्वम् । अवैष्टामित्यादि । आजीदिति । व्यभावपक्षे रूपम् । अनुदात्तत्वाभावादिट् । पूर्ववदीट् । 'इट ईटि' इति सलोपः । आजिष्टामित्यादि । विवायेति । लिट् । वी । णल् । 'अचो ञ्णिति' । 'एचोऽयवायावः' । 'एरनेकाचः—' इति यण् । विव्यतुः इति । वि वी अतुस् इत्यत्र । ननु चात्र परत्वात् द्विर्वचनात् पूर्वमियङादेशेन भाव्यम् । नैवम् । पूर्वविप्रतिषेधात् द्वित्वमेवादौ स्यात् । अथवा पदादेशेन यणादेशेन भाव्यमित्युत्सर्गत्वादियङ् द्वित्वात्पूर्वं न प्रवर्तते । अथवा सतीयङि तस्य स्थानिवत्वात् द्वित्वात् द्वित्वम् । तत्र कृते अपवादत्वादियङं बाधित्वा यणेव स्यात् । ननु विव्य् अतुस् इत्यत्र 'उपधायां च' इति दीर्घत्वं प्राप्नोति । अथोच्यते । 'अचः परस्मिन्—' इति यणः स्थानिवत्वात् वकारस्याचपरत्वान्नेति । तन्न । 'न पदान्त—' इति दीर्घविधौ स्थानिवत्वनिषेधात् । इति शङ्कापरिहारार्थमाह । न पदान्तेत्यादि । 'न पदान्त—' इति सूत्रेण दीर्घविधौ यलोपविधौ च क्रियमाणे लोप एव योजादेशः स स्थानिवन्नान्यः ।

---

१. After it- अवैष्टाम् । अवैषुः । B₁. २. Before it-अश्वा ङिणाम । D₄. ३. यणि कृते C. ४. स्थानिवदन्यो भवति । स्थानिवत्त्वेन अचः परस्मि &c. B₂. ५. °र्वीभावः Be₂. ६. °निषेधः Be₂. ७. Dropped De₃ ८. अथवापवादेन यणादेशेन भाव्यम । De₃.

तेन अचः परस्मिन्निति यणः स्थानिवत्त्वाद्वकारस्याच्परत्वं तेन उपधायां चेति न दीर्घः । विव्यतुः । विव्युः ।

अचस्तास्वत् थल्यनिटो नित्यम् ॥७।२।६१॥

अजन्तो यो धातुस्तासौ नित्यमनिट् ततः परस्य थल इट् न स्यात् ॥

तेन कारणेन । 'अचः परस्मिन्—'[1] इति सूत्रेण यणः स्थानिवत्त्वात् वकारस्याच्परत्वम् । तेन 'उपधायां च' इति दीर्घो न । हल्परत्वाभावादित्यर्थः ।

अचः । क्रादिनियमादिटि प्राप्ते अजन्तात् तासौ नित्यमनिटस्थलि प्रतिषेधो विधीयते । अचः किम् । बिभेदिथ । तास्यनिटः किम् । बभूविथ । अयं किति 'श्र्युकः किति' इति नित्यमनिट्[2] । तासाविव तास्वदिति ङ्वेति निर्देशः किमर्थः । उच्यते । योपि तासावसन् असत्त्वाच्च नित्यानिट्[3] तस्य थलि निषेधाभावार्थः[4] । जघसिथ । अदादेशो घसिस्तासौ न । अतः स्थानिवत्त्वात् 'इडत्त्यर्त्ति—' इति इट् । थलीति किम् । विव्यिव । विव्यिम । अनिङ्ग्रहणं नित्यमित्यनेन विशेषणार्थम् । नित्यग्रहणं किम् । धूञ् । दुधविथ । षिधू । सिषेधिथ । तासौ वेट्स्थलि नित्यमिट् । एतच्च यावान् कश्चिदिडभावो निषेधकृतो विकल्पकृतो वा स सर्वः क्रादिसूत्रेण नियम्यत इति पक्षे । यदा तु क्रादीनामेवेट् न स्यादिति नियमान्निषेध एव सर्वो निवर्तते[5] स्वरत्यादिलक्षणस्तु विकल्पः स्यादेवेति पक्षस्तदा थल्येव[6] वेट् ।

---

१. परस्मिन् पूर्वविधाविति D_1. २. नित्यानिट् D_3. ३. तास्यनिडिति किम् Bc_2. ४. °भावार्थम् Bc_2. ५. तयोर्निवर्तते Dc_1, Dc_4. ६. थल्यपि Bc_2, Dc_3.

ऋतो भारद्वाजस्य ॥७।२।६३॥

तासौ नित्यानिट्[1] ऋदन्तस्यैव थलि नेट् भारद्वाजस्य मतेन । तेन पक्षे इटोनुज्ञा । विवेथ । विवयिथ ॥[2]

क्षि क्षये । क्षयति । अक्षैषीत् । चिक्षाय । अचिश्नुधोतिवर्ता यङ् । चिक्षियतुः ।

ऋतः । ऋदन्तानां मध्ये वृङ्वृञावुदात्तौ । तत्रापि वृङ स्थल् न संभवत्यात्मनेपदित्वात् । वृञस्तु ववर्थेति निपातनाद्भाषायामिटा भाव्यम् । तस्मात्तयोरिट्निषेधार्थं तावदेतन्न । अन्ये तु ऋदन्तास्तासौ नित्यानिट इत्यचस्तास्वदित्यनेनैव निषेधः सिद्धः । ननु परत्वाद्गुणे रपरत्वे च कृते अनजन्तत्वान्न सिध्यति । मैवम् । ' अचस्तास्वद् — ' इत्यत्रोपदेश इत्यस्यापकर्षात् सिद्धो निषेध इति सिद्धे सत्यारम्भो नियमार्थ एतन्मनसि कृत्वाह । तासावित्यादि । तपरकरणमृकारान्तनिवृत्यर्थम् । वेता । अजिता । वीयात् । वेष्यति । अजिष्यति । अवेष्यत् । आजिष्यत् ।

क्षि । अनिट् । क्षयति । क्षयेत् । क्षयतु । अक्षयत् । अक्षैषीदिति । लुङ् । च्लिः । ' च्लेः सिच् ' । ' एकाच— ' इतीट्प्रतिषेधः । ' सिचि वृद्धिः— ' इति वृद्धिः । चिक्षायेति । लिट् । णल् । द्वित्वम् । ' हलादिः शेषः ' । ' कुहोश्चुः ' । चिक्षयिथ । चिक्षेथ । क्षेता ।

---

१. नित्यानिट् D3, B1, P. C. २. After this—आजिथ । विव्यिथ । आजिव । वेता । अजिता । वीयात् । B1, D2; B2 has अनुज्ञातपक्षे । आजिथ । वीयात्; D3 has विवयिथ । विवेथ ।; वेता । वीयात् D4. ३. °धातुभ्रुवामितीयङ् C, D1. ४. निपानात Dc3. ५. Dropped Dc3 ६. Dropped Dc3. ७. इत्यपकर्षसिद्धो Bc1. ८. इत्यभिप्रेत्याह । Bc2, Dc3. ९. नपरत्वम् Bc2. Dc3. १० सिच Bc2. ११. परोक्षे लिट् । Dc3.

अकृत्सार्वधातुकयोर्दीर्घः ॥७।४।२५॥

अकृद्यकारे असार्वधातुके[1] च यकारे[2]चो[3] दीर्घः स्यात् ॥ क्षीयात् ।

कटे वर्षावरणयोः ।

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥७।२।५॥

ह्मयान्तस्य[4] क्षणादेर्ण्यन्तस्य श्वयतेश्च एदितश्च वृद्धिर्न[5]

अकृत् । अकृदिति किम् । प्रस्तुत्य । परत्वाद्दीर्घेण तुको बाधः[6] स्यात् । असार्वधातुके किम् । चिनुयात् । क्ङिति किम् । उरुया । उरुणेति प्राप्ते 'सुपां सुलुक्— ' इति यादेशः । क्षेप्यति । अक्षेप्यत् ।

कटे । वृष्टावावरणे चार्थे । इतस्त्रयः सेटः । कटति । कटेत् । कटतु । अकटत् ।

ह्यन्त । ह्मयान्तस्येत्यादि । हकारमकारयकारान्तस्य धातोः । क्षणु हिंसायाम् । श्वस प्राणने । जागृ निद्राक्षये । टुओश्वि गतिवृद्ध्योः । णिप्रत्ययान्तस्य एकारेतश्च धातोरित्यर्थः । ह्म्यन्तक्षणश्वसामेदितां च 'अतो हलादेर्लघोः' इति विकल्पे प्राप्ते प्रतिषेधः । जागृणिश्वीनां तु सिचि वृद्धिः प्राप्ता सा च 'नेटि' इति न प्रतिषिध्यते । अन्तरङ्गत्वाद्धलन्तलक्षणाया एव वृद्धेः प्रतिषेधो 'नेटि' इति न पूर्वस्या ' इति पूर्वमेव व्याख्यातम् । अथ णिश्विग्रहणं किमर्थम् । यतोन्तरङ्गत्वादत्र गुण एव स्यात् । गुणे च कृते यादेशस्ततो यकारान्तत्वादेव निषेधः स्यात् । मैवम् । सिचि वृद्धिरनवकाशाप्रसङ्गात् स्यात् सर्वत्रान्तरङ्गत्वाद्गुणस्यैव प्राप्तत्वात् । अथवेदमेव णिश्विग्रहणं ज्ञापकं सिच्यन्तरङ्गं नास्तीत्यस्य । अथ जागृग्रहणं

१. असार्वधातुकयकारेचो P. २. Dropped D3. ३. यकारे परे D4. ४. ह्मयान्स्यस्य B1. ५. न dropped D3. D4. ६. बाधा Bc2. ७. अनन्तरत्वा° Bc2. ८. इति तु Bc2. ९. व्यथ न for किमर्थम् Dc3.

स्यादिडादौ सिचि ॥ अकटीत् ।[१]

गुपू रक्षणे

गुपूधूपविच्छिपणिपनिभ्य आयः ॥३।१।२८॥

एभ्य आयप्रत्ययः[२] स्यात् स्वार्थे ॥ उपधागुणः[३] ।

सनाद्यन्ता धातवः ॥३।१।३२॥

सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः ॥

किमर्थम् । यतो 'जाग्रोविचिण्णल्ङित्सु' इति जागर्तेर्गुणो वृद्धेरपवादो विधीयते । स यथा ञिति णिति वृद्धिं बाधते तथा सिचि वृद्धिमपि बाधिष्यते । नैवम् । कृते गुणे 'अतो ल्रान्तस्य' इति प्राप्ताया[४] निषेधः । अथ गुणविधानसामर्थ्यादुत्तरभाविन्यपि वृद्धिर्बाध्यते यथा जागरयतीत्यत्रेति चेत् भवतु तर्हि मन्दमतीनां सुखप्रतिपत्त्यर्थं जागृग्रहणम् । **अकटीदिति** । लुङ् । च्ल्यादि । चकाट । कटिता । कट्यात् । कटिष्यति । अकटिष्यत् ।

गुपू । ऊः इत् । **गुपू** धू । गुपू रक्षणे । धूप संतापे । विच्छ गतौ । पण व्यवहारे स्तुतौ च । पन च । **उपधागुण** इति । 'पुगन्त-' इत्यादिना ।

सनाद्यन्ताः । सन् आदिर्येषां ते सनादयः । सनादय अन्ते येषां ते समुदायाः । सनाद्यन्ता इति व्यधिकरणे बहुव्रीहिरित्यभिप्रेत्याह । **सनादय** इत्यादि । प्रत्ययग्रहणपरिभाषैव पदसंज्ञायामन्तवचनेन प्रतिषिद्धा ।

---

१. After it—चकाट । अत उपधाया वृद्धिः । कटिता । D₄. २. आयः प्रत्ययः D₄, P ; आयः C, D₁. ३. उपधाया गुणः C, D₂. ४. प्राप्तायां Bc₂, Dc₂. ५. ऊदित् Bc₂. ६. इति Bc₂. ७. मनेन प्रति॰ Bc₂.

शप्तिबादि । गोपायति ।[1]

आयादय आर्धधातुके वा ॥३।१।३१॥

आर्धधातुकविवक्षायामायादयो वा स्युः ।

अतो लोपः ॥६।४।४८॥

अकारस्य लोपः स्यादार्धधातुके ॥ अगोपायीत् । ऊदित्वादिड्वा । [3]अगोपीत् । अगौप्सीत् । [2]अगौप्साम् ।

पुनः प्रतिप्रसूयते अत्रान्तवचनेन । **शप्तिबादीति** । तिबादयश्च शप् च शप्तिबादि । 'अल्पाच्तरम्' इति शपः पूर्वनिपातः । सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीति एकवद्भावे 'स नपुंसकम्' इति नपुंसकत्वा-[4]द्ध्रस्वत्वम् । **गोपायतीति** । वर्तमाने लट् । तिप् । कर्तरि शप् । अतो गुणो पररूपम् । गोपायेत् । गोपायतु । अगोपायत् ।

आयादयः । आर्धधातुके इतीयं विषयसप्तमी । आर्धधातुक-[5]विषयत्वं तद्विवक्षायां सत्यां बुद्धिस्थे तस्मिन् संभवति नान्यथेत्यभि-प्रेत्याह । **आर्धधातुकविवक्षायामिति** । नित्यप्रत्ययप्रसङ्गे तदुत्पत्तिरार्ध-धातुकविषये विकल्प्यते । तत्र यथायथं पश्चादार्धधातुकप्रत्यया भवन्ति । गुपिः गोपाया इत्यादयः ।

अतः । अत्र आर्धधातुक इतीयं विषयसप्तमी परसप्तमी चेष्यते तच्च यथास्थानं व्याख्यास्यामः । **अगोपायीदिति** । आयप्रत्ययपक्षे रूपम् । **ऊदित्वादिड्वेति** । आयप्रत्ययाभावे 'स्वरतिसूति—' इत्यादिना । **अगोपीदिति** । इट्पक्षे 'नेटि' इति वृद्धिप्रतिषेधः । **अगौप्सीदिति** । इडभावे 'वदव्रज—' इति वृद्धिः । **अगौप्तामिति** । वृद्धिः । तसस्ताम् । 'झलो झलि' इति सिचो लोपः । **अगौप्सुरित्यादि** ।

---

१. धातुत्वात् तिबादि B_2 : शप्तिबादय: B_1, D_1, D_2, P, C. २. B_1, B_2, D_2 have अगोपीत् after अगौप्साम्. ३. Before it—झलो झलि D_4. ४. नपूंसकत्वम् Bc_2, Dc_3 ५. °विषयत्वं तु Bc_3.

कास्प्रत्ययादाममन्त्रे लिटि ॥३।१।३५॥

कास्धातोः प्रत्ययान्तेभ्यश्च आम् स्याल्लिटि न तु मन्त्रे ॥

कृञोनुप्रयोगः । गोपायामास । जुगोप जुगोपिथ । गोपायिता । गोपिता । गोप्ता । गोपाय्यात् । गुप्यात् ।

कास् । अमन्त्रे इति विषयसप्तमी । मन्त्रे निषेधात् भाषायां ब्राह्मणे च भवति । ब्राह्मणं मन्त्रव्याख्याग्रन्थः । ननु नञिवयुक्तन्यायेन ब्राह्मण एव स्यात् । नैवम् । यदि हि भाषायां न स्याद् ब्राह्मण इत्येव ब्रूयात् ।

कृञोनुप्रयोग इति । 'कृञ् चानुप्रयुज्यते लिटि' इति लिट्पराणां कृभ्वस्तीनामनुप्रयोग इत्यर्थः । **गोपायामासे**ति । 'आमः' इति लेर्लुक् । तत्रास प्रयुज्यते । द्वित्वम् । 'अत आदेः' । विधानसामर्थ्यादस्तेर्भूभावो न । **जुगोपे**ति । आयप्रत्ययाभावपक्षे रूपम् । णल् । गुणः । द्वित्वम् । 'कुहोश्चुः' । **जुगोपिथे**ति । इट् । नित्यम् । **गोपायिते**ति । आयः । अनद्यतने लुट् । 'स्यतासी—' इति तासिः । 'आर्धधातुकस्येड् वलादेः' । 'अतो लोपः' । 'लुटः प्रथमस्य—' इति डा । टिलोपः । **गोपितेति** । आयाभावपक्षे रूपम् । 'स्वरति—' इति वेट् । **गोप्तेति** । इडभावे रूपम् । **गोपाय्यात्** । इत्यायपक्षे आशीर्लिङ् । यासुट् । इलोपः । 'स्कोः संयोग—' इति सलोपः । 'अतो लोपः' । **गुप्यादिति** । आयाभावे । गोपायिष्यति । गोपिष्यति । गोप्स्यति । अगोपायिष्यत् । अगोपिष्यत् । अगोप्स्यत् ।

---

१. कास्धातोः C. २. इत्येवं De₁. De₃. ३. लिट्लुक Be₂. ४ तत्राम् De₃ ५. प्रत्युच्यते Be₂. ६. Dropped Be₂. ७. Dropped Be₂. ८. कलोपः Be₂.

एवं धूप संतापे । धूपायतीत्यादि । तप संतापे । एकाजनुदात्तत्वान्नेट् । अताप्सीत् । अताप्ताम् । [1]तेपतुः ।

उपदेशेऽत्वतः ॥७।२।६२॥

धातुपाठेकारवतस्तासौ नि[2]त्यानिटः परस्य थलो नेट् स्यात्[3] ॥ ऋतो भा[4]रद्वाजस्येति पक्षे इट्[5] । तेपिथ । ततप्थ ।[6] चमु अदने ।

एवं धूपेति । गुपूवत् [7]अस्यापि प्रक्रिया ज्ञेयेत्यर्थः । धूपायतीत्यादि । गुपूधूप–' इत्यायः । अलघूपधत्वान्न गुणः । धातुत्वम् । तिप् । पररूपम् । आदिशब्दात् धूपायेत् । धूपायतु । अधूपायत् । 'आयादय आर्धधातुके वा' । अधूपायीत् । अधूपीत् । धूपायामास । दुधूप । धूपायिता । धूपिता । धूपाय्यात् । धूप्यात् । धूपायिष्यति । धूपिष्यति । अधूपायिष्यत् । अधूपिष्यत् । तप । अनिट् । तपति । तपेत् । तपतु । अतपत् । एकाजनुदात्तत्वान्नेडिति । 'एकाच उपदेश—' इत्यादिना । अताप्सीदिति । लुङ् । च्लिः । सिच् । 'वदव्रज—' इति वृद्धिः । 'अस्ति—' इतीट् । अट् । अताप्तामिति । 'झलो झलि' इति सलोपः । तताप । तेपतुरिति । 'अत एकहल्मध्ये—' इति एत्वाभ्यासलोपौ ।

उपदेशे । अनजन्तार्थमारम्भः । उपदेशे किम् । चकर्षिथ । अत्वतः किम् । बिभेदिथ । तपरत्वं किम् । राद्धा । रराधिथ । तास्वदित्येव । जिघृक्षति । जग्रहिथ । नित्यमनिडित्येव । अङ्क्ता । अञ्जिता । आनञ्जिथ । तेपिथेति । 'थलि च सेटि' इत्येत्वाभ्यासलोपौ । तेपिव । तेपिम । तप्ता । तप्यात् । तप्स्यति । अतप्स्यत् । चमु । इतो द्वौ सेटौ ।

---

१. P. B₂. D₃ have तताप before तेपतुः २. नित्यमनिट् D₁ ३ Dropped D₃. ४. भारद्वाजेति D₃. D₄. ५. After it—स्यात् D₄. ६. After this B₁. P. B₂, D₂ have—उपदेशग्रहणं किम् । चकर्षिथ ।. ७. आख्यातप्रक्रियेत्यर्थः Bc₂. ८. तिप् । शप् । Bc₂. ९. तप संतापे । Dc₃. १०. राद्धा dropped Bc₂.

ष्ठिवुक्लमुचमां शिति ॥७।३।७५॥

एषामचो दीर्घः स्यात् शिति । अत्र दैवादिकस्य क्लमो[1] ग्रहणम् । आचामति । आङ् किम् । चमति । विचमति । मान्तत्वान्न वृद्धिः । अचमीत् ।[2]

क्रमु पादविक्षेपे ।

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः[3][4] ॥ ३।१।७०॥

एभ्यः श्यन् वा स्यात् कर्तरि सार्वधातुके ॥ पक्षे शप । क्रम्यति[5] ।

ष्ठिवु । ष्ठिवु निरसने । क्लमु ग्लानौ । चमु अदने । आङ्पूर्वः । **अत्र दैवादिकस्येति** । तस्य हि 'शमामष्टानाम्' इति दीर्घः विहितः शपि न प्राप्नोतीत्ययमारम्भः । **आचामतीति** । शप् । आचामेत । आचामतु । आचामत् । **मान्तत्वान्न वृद्धिरिति** । 'ह्मयन्त—' इत्यादिना । **अचमीदिति** । लुङ् । चचाम । चेमतुः । चमिता । चमिष्यति । अचमिष्यत् ।

क्रमु पादन्यासार्थे ।

वा भ्रास । टुभ्रासृ भ्लासृ दीप्तौ । भ्रमु अनवस्थाने । भ्रमु चलने । द्वयोरपि ग्रहणम् । क्रमु पादविक्षेपे । क्लमु ग्लानौ । त्रसी उद्वेगे । त्रुट छेदने । लष कान्तौ । **क्रम्यतीति** । लट् । तिबादि । क्रम्येत् । क्रम्यतु । अक्रम्यत् ।

---

१. क्लमेर्म D₂. २. After it—चचाम । चम्यात् । चमिता । चमिष्यति । अचमिष्यत् B₂. ३. भ्रासभ्लास N₁. ४. लशः D₃. ५. क्राम्यति D₃, D₄. ६. क्लमु Dc₃. ७. चमु Dc₃. ८. क्रमु Dc₃. ९. पादन्यासं अर्थे Bc₂. Dc₃. १०. टुभ्रास् भास् Dc₃. ११. भ्रम् Dc₃. १२. क्लमु क्रान्तौ Dc₃.

क्रमः परस्मैपदेषु ॥७।३।७६॥

क्रमो दीर्घः स्यात् शेपि परस्मैपदेषु ॥ क्रामति ।

स्नुक्रमोरनात्मनेपदनिमित्ते ॥७।२।३६॥

यत्रात्मनेपदनिमित्तं नास्ति तत्रैव स्नुक्रमोरिट् स्यात् ॥

क्रम: । ननु 'ष्ठिवुक्लम्वाचमां शिति' इत्यतः 'शिति' इत्यनुवर्तते । तत् कथं शपीत्युच्यते शितीति वाच्यम् । सत्यम् । स्वमते शितित्येव । अर्वाचीनमतेन शपीत्युक्तम् । तथोक्तं दुर्गेण । 'ष्ठिवुक्लम्वाचमामनि । क्रमः परस्मै' इति । तन्मतमेवाश्रित्य क्रम्यतीति ह्रस्व उदाहृतः श्यनि । स्वमते तु श्यन्यपि दीर्घः । क्राम्यतीति । परस्मैपदेषु किम् । आक्रमते । ननु चमुक्रामसंक्रामेत्यत्र हेर्लुकि कृता 'न लुमता—' इति प्रत्ययलक्षणनिषेधात् दीर्घो न स्यात् । न लुमता लुप्ते प्रत्यये परतो यदङ्गं तस्य कार्यं स प्रतिषेधः । न च हौ क्रमिरङ्गम् । किं तर्हि । शपि । अतः शपस्ततः परतो विहितस्य विद्यमानत्वाद्दीर्घो भवति । क्रामति । क्रामेत् । क्रामतु । अक्रामत् ।

स्नुक्रमो । ष्णु स्रवणे । क्रमु पादविक्षेपे । यत्रात्मनेपदं नास्तीति । यत्रार्थे आत्मनेपदनिमित्तं स्नुक्रमी न भवत इत्यर्थः । अथवा यत्र प्रयोगविशेषे आत्मनेपदनिमित्तमर्थो नास्तीति । कश्चार्थ आत्मनेपदनिमित्तम् । भावकर्मकर्तृकर्मव्यवहारः । क्रमेर्वृत्त्यादयोपि । यत्रात्मनेपदं तदाश्रयं भवति तदात्मनेपदनिमित्तम् । तेन सत्येवात्मनेपदे इट्प्रतिषेधः ।

---

१. शिति D_4. २. तथा चोक्तं कातन्त्रे Bc_2, Dc_3. ३. क्रामतीति Bc_2. ४. क्रमतीति Dc_3. ५. प्रत्ययलक्षणनिषेधात् dropped Bc_2. ६. किं प्रत्ययलक्षणनिषेधात् । तर्हि शपि Bc_2. ७. °स्ततः परतोपि Bc_2. ८. ष्नु प्रस्रवणे । क्रम् Dc_3. ९. °कर्तरि Bc_2. १०. °व्यातिहारः Bc_2, Dc_3.

[१]अक्रमीत् ।

येम उपरमे ।

इषुगमियमां छः ॥७।३।७७॥

एषां छोन्तादेशः स्यात् शिति ॥ यच्छति ।

यमरमनमातां सक्च ॥७।२।७३॥

यमादेरादन्ताच्च सिच इट् स्यात् परस्मैपदेषु एषां

कुर्वद्रूपमेव हि[२] निमित्तम् । **अक्रमीदिति** । लुङ् । 'ह्ययन्तक्षण—' इति वृद्ध्यभावः । चक्राम । क्रमिता । क्रम्यात् । क्रमिष्यति । अक्रमिष्यत् ।

यमु । उपरमो निवृत्तिः । इतो द्वावनिटौ ।

इषु । इषिरुदित् । इषु इच्छायामित्यस्य ग्रहणम् । इह मा भूत् । इष गतौ । इष आभीक्ष्ण्ये । इष्यति । इष्णाति । **यच्छतीति** । लट् । तिप् । शप् । यच्छेत् । यच्छतु । अयच्छत् ।

यमरम । यमु उपरमे । रमु क्रीडायाम् । णमु प्रह्वत्वे शब्दे च । आदन्ता या प्रापण इत्येवमादयः । सर्वेषामनुदात्तत्वादिट्प्रतिषेधे प्राप्तेस्यारम्भः । अत्र च षष्ठीनिर्देशाद्यमादीनामेव सक् भवति । इट्

---

१. B_1, D_2 have before it—मान्तत्वान्न वृद्धिः : B_2 has—क्रम्यात् । क्रमिता । क्रमिष्यति । अक्रमिष्यत् । मान्तत्वान्न वृद्धिः ।. २. मु B_2, D_3, N_1. ३. Dropped Dc_1. ४. यम Dc_3. ५. यम Dc_3. ६. रम Dc_3. ७. णम Dc_3. ८. इत्यादयः Bc_2. ९. Dropped Bc_2.

सगाममश्च ॥ अयंसीत्[१] । येमिथ । ययन्थ ।

णमु प्रह्वत्वे शब्दे च[२] । प्रणमति । अनंसीत् । नेमिथ । नेनन्थ । हय गतौ । यान्तत्वान्न वृद्धिः । अहयीत् ।[४]

पुनरार्धधातुकाधिकारात्तस्यैव । अयंसीदिति । लुङ् । च्लिः । सिच् । 'अस्ति—' इटीत् । 'इट ईटि' इति सिचो लोपः । अट् । 'नश्चा-पदान्त—' इत्यनुस्वारः । अयंसिष्टामित्यादि । ययाम । येमिथ । ययन्थेति । 'उपदेशे त्वतः' इतीट्प्रतिषेधः । 'ऋतो भारद्वाजस्य' इति पक्षे इट् । इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ । अन्यत्रानुस्वारपरसवर्णौ । यन्ता । यम्यात् । यंस्यति । अयंस्यत् ।

णमु प्रह्वत्वे नम्रत्वम् । प्रणमतीति । लट् । तिप् । शप् । 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वम् । नमेत् । नमतु । अनमत् । अनंसीदिति । लुङ् । सिच् । 'यमरमनमातां सक् च' इतीट्सकौ । सलोपः । अनंसिष्टामित्यादि । ननाम । नेमिथ । ननन्थेति । 'उपदेशेत्वतः' इति इट्प्रतिषेधः । 'ऋतो भारद्वाजस्य' इति पक्षे इट् । 'थलि च सेटि' इत्येत्वाभ्यासलोपौ । नन्ता । नम्यात् । नंस्यति । अनंस्यत् । हय । इतः षट् सेट्काः । हयति । हयेत् । हयतु । अहयत् । यान्तत्वान्न वृद्धिरिति । 'ह्मयन्तक्षण—' इत्यादिना । जहाय । हयिता । हय्यात् । हयिष्यति । अहयिष्यत् ।

---

१. After it—अयंसिष्टाम । अयंसिषुः । अयंसीः । अयंसिष्टम् । अयंसिष्ट । अयंसिषम । अयंसिष्व । येमतुः । येमुः । B₂. २. च dropped P. B₁. D₁. ३. Dropped D₂. ४. After it—जहाय । जहयथ B₁ ; जहाय । जहयतुः । हय्यात् । हायता । हायिष्यात । अहायिष्यत B₂. ५. सिज्लोपः । Be₂. ६. निषेधः Be₂.

दल विशरणे ।

अतो ल्रान्तस्य ॥७।२।२॥

अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्याकारस्य[1] वृद्धिः स्यात् सिचि परस्मैपदेषु । 'नेटि' इत्यस्यापवादः । अदालीत् ।[2]

ञिफला विशरणे ।

दल । विशरणं शैथिल्यम्[3] । दलति । दलेत् । दलतु । अदलत् ।

अतः । अन्तःशब्दोवयववाच्यप्यस्ति यथा वसनान्त इति । समीपार्थोप्यस्ति[4] । तद्यथा उदकान्तं संगत इति[5] । तत्रावयववचनस्यात्र ग्रहणं व्यर्थम् । तस्य ह्युपादाने एतत् प्रयोजनम् । रेफलकारान्तस्य यथा स्यात् । एतच्च येन विधिस्तदन्तस्येति सिद्धम् । तस्मात् । समीपवाचिनोत्र ग्रहणं युक्तमिति मत्वाह । **अतः समीपौ यौ ल्राविति** । **नेटीत्यस्यापवाद** इति । 'नेटि' इति हलन्तलक्षणाया वृद्धेः प्रतिषेधे प्राप्ते तदपवादे 'अतो हलादेर्लघोः' इति विकल्पे प्राप्ते तस्यापवाद इत्यर्थः । अतः किम् । अखोरीत्[6] । ल्रान्तस्य किम् । मा भवानशीत् । अन्तस्येति किम् । बभ्र[7] गतौ । अबभ्रीत्[8] । **अदालीदिति** । लुङ् । सिच् । इडादि[9] । ददाल । देलतुः । दलिता । दल्यात् । दलिष्यति । अदलिष्यत् ।

ञिफला ।

---

१. तदन्ताङ्गाकारस्य B1, D2 ; तदन्ताङ्गस्याकारस्य N, D4. २. After it—अदालिष्टाम् । अदालिषुः B2. ३. Dropped from विश° to °ल्यम् Dc1. ४. सामीप्यार्थेप्यस्ति Dc3. ५. गत इति Bc2, Dc3. ६. अचोरीत Dc3. ७. भ्रम Bc2. ८. अभ्रमीत् Bc2. ९. इट् Bc2.

आदिर्ञिटुडवः ॥१।३।५॥

भ्वादेर्धातोराद्या ञिटुडु एते इतः स्युः[१] ॥ अफालीत् । अभ्यासचर्त्वस्यैत्वं प्रत्यसिद्धत्वादेत्वे प्राप्ते अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वाच्ये इति वचनादादेशादित्वेनैत्वनिषेधे प्राप्ते[२] ।

तॄफलभजत्रपश्च ॥६।४।१२२॥

एषां[३] किति लिटि सेटि थलि च एत्वाभ्यासलोपौ स्तः । फेलतुः[४] । फेलिथ ।[५]

आदिः । अत्र टुशब्दस्य ग्रहणेन 'अणुदित् सवर्णस्य—' इति टवर्गस्य ग्रहणं[६] कस्मान्न भवति । उच्यते । उकारस्यानुनासिकत्वाप्रतिज्ञानात् 'चुटू' इत्यत्र टुग्रहणाच्च[७] । यदि चात्र[८] टवर्गग्रहणं स्यात्तर्ह्यनेनैव सिद्धत्वात् 'चुटू' इति टुग्रहणमनर्थकं स्यात्[९] । ञिडुभ्यां साहचर्याच्च । फलेत् । फलतु । अफलत् । **अफालीदिति** । 'अतो ल्रान्तस्य' इति वृद्धिः । पफाल । **अभ्यासस्ये**त्यादि । फल अतुस् इति स्थिते द्वित्वम् । 'अभ्यासे चर्च' इति पूर्वस्य पकारे कृते आदेशादित्वादेत्वनिषेधप्राप्तावपि पूर्वत्रासिद्धन्यायेनैत्वं प्रति चर्त्वस्यासिद्धत्वात् एत्वे प्राप्ते सति अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वाच्ये इति वचनादेत्वं प्रति चर्त्वस्यासिद्धत्वादादेशादित्वादेत्वप्रतिषेधे प्राप्ते सतीत्यर्थः । फलिता । फल्यात् । फलिष्यति । अफलिष्यत् ।

१. फलति before and पफाल after it B_2. २. प्राप्ते dropped P, D_2, D_4, B. ३. क्ङिति P. ४. Before it—पफाल D_2. ५. After it—णिसि चुम्बने । प्रणिंसति । प्रनिंसति । प्रणेसति B_1. ६. टवर्गग्रहणं Bc_2. ७. च dropped Bc_2. ८. चात्र Dc_3. ९. पुनर्टु इति टुग्रहणं व्यर्थं स्यात् Bc_2. १०. °त्वेनै° Bc_2, Dc_3.

णिक्षु[1] चुम्बने। प्रणिक्षति। प्रनिक्षति[2]।[3]

त्सर छद्मगतौ।[4] अत्सारीत्। तत्सार।

ष्ठिवु निरसने। सुब्धातुष्ठ्यैष्वष्कष्ठिवां[5] सत्वनिषेधः[6]। 'ष्ठिवुक्लमु—' इति दीर्घः। ष्ठीवति। अष्ठेवीत्। ष्ठिवेरभ्यासठकारस्य ठकारो[7] वा। चर्त्वम्[8]। तिष्ठेव। टिष्ठेव।

णिक्षु[9] चुम्बने। चुम्बनं वक्त्रसंयोगविशेषः[10]। प्रणिक्षति। प्रनिक्षति। इति। लट्। तिप्। शप्। 'वा निसनिक्षनिन्दाम्' इति वा णत्वम्। निक्षेत्। निक्षतु। अनिक्षत्। अनिक्षीत्। निनिक्ष। निक्षिता। निक्ष्यात्। निक्षिष्यति। अनिक्षिष्यत्।

त्सर। त्सरति। त्सरेत्। त्सरतु। अत्सरत्। अत्सारीदिति। 'अतो ल्रान्तस्य' इति वृद्धिः। तत्सारेति। लिट्। णल्। वृद्धिः। द्वित्वम्। 'हलादिः शेषः'। त्सरिता। त्सर्यात्। त्सरिष्यति। अत्सरिष्यत्।

ष्ठिवु। सुब्धातुरिति वक्तव्यम्। सुब्धातवः षण्डयतीत्यादयः। ष्ट्यै शब्दसंघातयोः। ष्वष्क गतौ। ष्ठिवुरुक्तार्थः। ष्ठीवतीति। लट्। ष्ठिवुक्लमु[11] इति दीर्घः। ष्ठीवेत्। ष्ठीवतु। अष्ठीवत्। अष्ठेवीदिति। लुङ्। सिच्। इट्। शिवीति विशेषणाद्दीर्घाभावः। 'पुगन्त—' इति गुणः। ष्ठिवेरिति। इयमिष्टिः। टिष्ठेव। तिष्ठेवेति। लिट्। द्वित्वम्।

---

१. णिक्ष D1, B2, N. २. प्रनिक्षति dropped D1, D2. ३. After it—प्राणिक्षीत्। प्राणिक्षत्। नक्ष्यात्। नक्षिता। नक्षिष्यति। अनक्षिष्यत B2. ४. Before it—त्सरति। त्सरिष्यति। अत्सरिष्यत B2. ५. ष्वष्कु B1, B2, P. ६. After it—वक्तव्यः D1. ७. तकारो वा D2. ८. Dropped D1, D2, D4. ९. णिक्षि Dc3. १०. वक्त्रसंयोगः Dc1 Dc3. ११. ष्ठिवु दीर्घः dropped Dc1.

ष्ठेविता । 'हलि च' इति[2] दीर्घः । ष्ठीव्यात् ।

जि जये ।[3]

सन्लिटोर्जेः ॥७।३।५७॥

अभ्यासात् परस्य जेः कुत्वं स्यात् सनि लिटि च । जिगाय । जीयात् ।[4]

तुर्वी हिंसायाम् । 'उपधायां च' इति दीर्घः । तूर्वति ।[6]

रक्ष पालने । प्रनिरक्षति । षान्तत्वान्न णः ।

'शर्पूर्वाः खयः' । ष्ठेवितेति । लुट् । 'स्यतासी—' इति तासिः । 'लुटः प्रथम—' इति डा । 'आर्धधातुक—' इतीट् । गुणः । ष्ठीव्यादिति । आशीर्लिङ् । यासुट् । ष्ठेविष्यति । अष्ठेविष्यत् ।

जि । जयः सर्वोत्कर्षः । अनिट् । जयति । जयेत् । जयतु । अजयत् । अजैषीत् ।

सन् । जिनातेः संप्रसारणे कृते यद्यपि जिर्भवति तथापि लाक्षणिकत्वात् तस्य ग्रहणं न । जिज्यतुः । जिगायेति । लिट् । जेता । जीयादिति । 'अकृत्सार्वधातुकयोः' इति दीर्घः । जेष्यति । अजेष्यत् ।

तुर्वी । इतश्चत्वारः सेट्काः । तूर्वति । तूर्वेत् । अतूर्वत् । अतूर्वीत् । तुतूर्व । तूर्विता । तूर्व्यात् । तूर्विष्यति । अतूर्विष्यत् ।

रक्ष । प्रनिरक्षतीति । लट् । षान्तत्वादिति । 'शेषे विभाषा—' इति । अरक्षीत् । ररक्ष ।

---

१. 'हलि च' । र्वोरुपधाया इको दीर्घः स्याद्धलि । ष्ठीव्यात् D_1. २. इति दीर्घः dropped N, D_4. ३. After it—अजैषीत् B_2. ४. After 'अकृतसार्व-' इति दीर्घः । B_1. ५. तूर्वति dropped D_3. ६. After it—तूर्व्यात् D_2, B_2. ७. Before it—अरक्षीत् । ररक्ष । रक्षिता । रक्ष्यात् । रक्षिष्यति । B_2. ८. After it—क्षिष्यन्ते Bc_2, Dc_3.

अक्षू व्याप्तौ संघाते च ।

अक्षोऽन्यतरस्याम् ॥३।१।७५॥

अक्षो वा श्नुप्रत्ययः स्यात् कर्तरि सार्वधातुके । पक्षे शप् । गुणः । अक्ष्णोति । अक्षति । ङित्वान्न[1] गुणः । अक्ष्णुतः । अचिश्नुधात्विति उवङ् । अक्ष्णुवन्ति । अक्ष्णुयात् ।

उस्यपदान्तात् ॥६।१।९६॥

अपदान्तादवर्णादुसि[2] पररूपमेकादेशः स्यात्[3] ॥ अक्ष्णुयुः । अक्ष्णोतु । अक्ष्णुहि । अक्ष्णोत् । ऊदित्वादिड्वा । आक्षीत् ।

अक्षू ।

अक्षः । अप्राप्तविभाषेयम् । **अक्ष्णोतीति** । लट् । **अक्षतीति** । शप्पक्षे रूपम् । **ङित्वान्न गुण** इति । 'सार्वधातुकमपित्' इति ङित्वात् । 'क्ङिति च' इति न गुण इत्यर्थः । **अक्ष्णुयादिति** । लिङ् । अक्ष्णुयाताम् ।

उसि । आद्गुणापवादः । अपदान्तादिति किम्[4] । का उस्रा । कोस्रा । अवर्णात् किम् । चक्रुः । **अक्ष्णोतु** इति । लोट् । 'एरुः' । अक्ष्णुताद्वा । **आक्ष्णोदिति** । लङ् । 'आडजादीनाम्' । आक्ष्णुताम् । आक्ष्णुवन् । इत्यादि । शप्पक्षे । अक्षति । अक्षेत् । अक्षतु । आक्षत् । इति । **ऊदित्वादिड्वेति** । 'स्वरतिसूति—' इति । **आक्षीदिति** ।

---

१. अक्ष्णुतः । ङित्वान्न गुणः । P ; C ; D_1 drops अक्ष्णुतः ; D_2 has अक्षतः in place of अक्ष्णुतः and drops ङित्वान्न गुणः. २. °वुसि परे D_1 ; °वुसि च पर° D_2; °वुसि परतः D_4. ३. P, B_2, D_4 drop it. ४. अविति किम् । बभ्रुः । Bc_2 ; आदिति किम् । चक्रुः । Dc_3.

ईडभावपक्षे 'स्कोः संयोगाद्योरन्ते च' इति कलोपः।

षढोः कः सि ॥

षस्य ढस्य च कः स्यात् सकारे परे ॥ षत्वम्। कषसंयोगे क्षः। आक्षीत्। आक्षिष्टाम्। आष्टाम्। आक्षिषुः। आक्षुः। आक्षीः। आक्षिष्टम्। आष्टम्। आक्षिष्ट। आष्ट। आक्षिषम्। आक्षम्। आक्षिष्व। आक्ष्व। आक्षिष्म। आक्ष्म। आनक्ष। अक्षिता। अष्टा।

लुङ्। सिच्। इट्। ईट्। अडागमः। षत्वमिति। 'आदेशप्रत्यययोः' इति। आक्षीदिति। 'अस्ति—' इतीट्। **आक्षिष्टामिति**। इट्पक्षे रूपम्। 'तस्थस्थमिपाम्—' इति तसस्ताम्। षत्वम्। ष्टुत्वम्। **आष्टामिति**। इडभावे 'झलो झलि' इति सिज्लोपः। 'स्कोः—' इति कलोपः। ताम्। ष्टुत्वम्। **आक्षिषुः**। **आक्षुरिति**। इडभावाभावयो रूपे। 'सिजभ्यस्त—' इति जुस्। आक्षीः। आक्षिष्टम्। आष्टम्। आक्षिष्ट। आष्ट। **आक्षिषम्**। **आक्षमिति** मिपोम्। **आक्षिष्वेति** सलोपः। आक्षिष्म। आक्ष्म। **आनक्षेति**। लिट्। द्वित्वम्। 'अत आदेः। 'तस्मान्नुट् द्विहलः'। **अक्षिता**। **अष्टेति**। वेट्। अक्ष्यात्। अक्षिष्यति। अक्ष्यति। आक्षिष्यत्। आक्ष्यत्।

---

१. स्कोः संयोगेति N. D3. D4. २. B1. D1. D2 drop षत्वम्: इण्कोरादेश अनेन षत्वम् B2. ३. कषयोगे B1, D1, D3. N. ४. N drops the forms आक्षीः। आक्षिष्टम्। आष्टम्। आक्षिष्ट। आष्ट। आक्ष्व। आक्ष्म। D3, D4 drop from आक्षीः to आष्ट, and आक्षिष्म। आक्ष्म। ५. रूपम् dropped Bc2. ६. षत्वष्टुत्वे Bc2. Dc3.

तक्षूत्वक्षू[1] तनूकरणे ।

तनूकरणे तक्षः ॥३।१।७६॥

तनूकरणार्थात् तक्षः श्नुः[2] स्यात्[3] कर्तरि सार्वधातुके[4] ॥ तक्ष्णोति । तक्षति काष्ठम् । अतक्षीत् । अताक्षीत् । अतक्षिष्टाम् । अताष्टाम् । निर्भत्सने तु संतक्षति । वाग्भिः[5] ।

क्रुष विलेखने । कर्षति[6] ।

तक्षू तनूकरणे । ननु चायं धातुस्तनूकरण एव वर्तते । तत् किमर्थं विशेषणोपादानम्[7] । व्यवच्छेद्याभावात् । मैवम् । अनेकार्थत्वाद् धातूनां विशेषणोपादानम् । **तक्ष्णोतीति** । लट् । तिप्[8] । श्नुः । णत्वम् । सार्वधातुके गुणः । **तक्षतीति** । श्नोरभावे रूपम् । शप् । तक्ष्णुतः । तक्ष्णुवन्ति । तक्ष्णुयात् । तक्षेत् । तक्ष्णुयुः । तक्षेयुः । तक्ष्णोतु । तक्षतु । तक्ष्णुहि । अतक्ष्णोत् । अतक्षत् । **अतक्षीदिति** । लुङ् । सिच् । 'स्वरतिसूति—' इति वेट् । 'अस्ति—' इतीट् । 'नेटि' इति न वृद्धिः । अट् । **अताक्षीदिति** । इडभावे रूपम् । 'स्कोः—' इति कलोपः । 'षढोः कः सि' । षत्वम् । कषयोगे क्षः । 'वदव्रज—' इति वृद्धिः । 'अस्ति—' इतीट् । **अतक्षिष्टामिति** । इट्पक्षे रूपम् । तसस्ताम् । षत्वष्टुत्वे । **अताष्टामिति** । इडभावे । ताम् । 'झलो झलि' इति कलोपः । ततक्ष । तक्षिता । तष्टा । तक्ष्यात् । तक्षिष्यति । तक्ष्यति । अतक्षिष्यत् । अतक्ष्यत् ।

कृष । अनिट् । **कर्षतीति** । लट् । शप् । तिप् । गुणः । रपरः ।

---

१. Dropped N_1, D_1 ; त्वक्षूतक्षू B_2. २. श्नुप्रत्ययः D_3. ३. स्याद्वा D_1 ; D_2 प्रत्ययः स्याद्वा B_2. ४. After it—परे D_3. ५. वाचा D_1, वाक्यैः P, B_1. ६. Dropped B_2. ७. विशेषोपादानम् । Bc_2. ८. तिप dropped Dc_1. ९. सलोपः । कत्वष्टुत्वादि । Dc_3. १०. कृष विलेखने . विलेखनमुत्पाटनम् । Dc_3. ११. Dropped Bc_2, Dc_3.

कृषमृशस्पृशतृपदृपसृपश्लेः सिज्वा ॥ कत्वम् । षत्वम् । अकार्क्षीत् ।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥६।१।५९॥

उपदेशेनुदात्तो य ऋदुपधस्तस्य अमागमो वा स्यात् झलादावकिति परे । यणादेशः । अतो वृद्धिः । अक्राक्षीत् । अक्राष्टाम् । अकार्ष्टाम् । सिजभावपक्षे ।

शल इगुपधादनिटः क्सः ॥३।१।४५॥

इगुपधो यः शलन्तोनिट् तस्माच्च्लेः क्सादेशः स्यात् ।

कृषमृशेति । कृष विलेखने । भ्वादितुदाद्योर्द्वयोरपि ग्रहणम् । मृश आमर्शने । स्पृश संस्पर्शे । तृप प्रीणने । दृप हर्षविमोचनयोः । सृप्लृ गतौ । कृषमृशस्पृशानां क्से प्राप्ते तृपदृपयोः पुषादित्वादङि सृपो लृदित्वादङि प्राप्तेस्यारम्भः । अत्र केचित् सृपिं न पठन्ति । **कत्वमिति** । 'षढोः कः सि' इति । **षत्वमिति** । 'आदेशप्रत्यययोः' इति । **अकार्क्षीदिति** । कृष् । लुङ् । तिप् । 'वदव्रज—' इति वृद्धिः । रपरः । इलोपः । ईट् । अट् ।

अनुदात्तस्य । मित्वादन्त्यादचः परः । **अकार्ष्टामिति** । अमभावे वृद्धिः । **अक्राष्टामिति** । अमागमः । 'वदव्रज—' इति । वृद्धिः ।

शलः । ननु चात्रानिट इति धातुविशेषणत्वेन व्याख्यायते । तन्न व्याख्येयम् । एवं हि व्याख्यायमाने च्लेरुपदेशो व्यर्थः स्यात् । स हि शलित्यत्रस्थमनिड्ग्रहणं च्लिविशेषणं यथा स्यादित्येवमर्थं

---

१. °सृपां C. २. B_1 has before it— एभ्यो धातुभ्यः परस्य च्लेः सिज्वा स्यात्. ३. यणादेशे D_1. ४. आक्राष्टाम् । अक्राष्टाम् C, P, D_1, D_4, N. ५. After it—अकार्क्षीत् । अकार्ष्टाम् । अक्राष्टाम् सिज° D_3. After it—अक्राक्षुः । अकार्क्षुः B_2. ६. आमर्शे Bc_2. ७. सृप्लृ Bc_2. ८. स्पर्शे Bc_2. ९. हि अत्रस्थ° Dc_3. १०. च्लि dropped Dc_2.

के इत् । क्त्वषत्वादि । किच्वान्नाम् । अकृक्षत् । क्रेष्टा । कर्ष्टा ।

रुषरिष हिंसायाम् ।

क्रियत इति च्लिलुङिति । अत्रोक्तं काशिकायां च । 'शलन्तो यो धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्स आदेशो भवति' इति व्याख्यातम् । सत्यम् । आचार्यवर्यैस्तु भाष्यकाराभिमतं व्याख्यानं कृतम् । तथा च च्लेरुपदेशो व्यर्थ इत्यभिप्रेत्य भाष्ये उक्तम् । 'यद्यप्युच्यते क्सविधाने चानिड्विधाने च्लिः संप्रत्ययार्थ इति धातुमेवात्रानिट्त्वेन विशेषयिष्यामो धातोरनिट इति' इत्यादि । यत्तु गुहेर्न सिध्येदित्युक्तं तत्र कैयटेनोत्तरमुक्तम । 'गुहादयो विकल्पितेट् इटो भावाभावाभ्यां भिद्यन्ते तत्र ये सेटस्तेभ्यः [illegible] गो । अनिड्भ्यस्तु क्स इति न च कश्चिद्दोषः' सिज् भविष्या[illegible] इति किम् । अभैत्सीत् । इगुपधादिति इति । शल [illegible] किम् । अधाक्षीत् । अनिट इति किम् । अकोषीत् । क इदिति । 'लशक्वतद्धिते' इत्यनेन । कत्वषत्वादीति । कत्वं 'षढोः—' इति षत्वम् 'आदेश—' इति । आदिशब्दात् कषयोग क्षः । इतश्च 'लुङ्लङ्—' इत्यट् । अकृक्षताम् । । अकृक्षन् । इत्यादि । चकर्ष । क्रष्टा । कर्ष्टेति । लुट् । तासिः । डा । 'अनुदात्तस्य च—' इति वाम् । अमभावे गुणः । कृष्यात् । क्रक्ष्यति । कर्क्ष्यति । अक्रक्ष्यत् । अकर्क्ष्यत् ।

रुष रिष । इतश्चत्वारः सेट्काः । रोषति । रेषति । इत्यादि । अरोषीत् । अरेषीत् । रुरोष । रिरेष ।

---

१. C, D_2 drop क इत. २. चकर्ष । चकृषत् । क्रष्टा । कर्ष्टा । कृष्यात । क्रक्ष्यति । कर्क्ष्यति D_1 ; Before it—अकृक्षताम B_2 ; कर्ष्टा । क्रष्टा । D_3. ३. Dropped Dc_1. ४. भाष्यकारेण Dc_3. ५. कथने-नोत्तर॰ Bc_2, Dc_1, Dc_4. ६. विकल्पेनेट् इटो &c. Dc_3. ७. अकोर्षीत् Bc_2, Dc_3. ८. अम् वा Dc_3.

तीषसहलुभरुषरिषः ॥७।२।४८॥

ईच्छत्यादेः[1] परस्य तादेरार्धधातुकस्येड् वा स्यात् । रोषिता । रोष्टा । एवं रिषः[2] । उष दाहे ।

उषविदजागृभ्योऽन्यतरस्याम् ॥३।१।३८॥

एभ्य आम् वा स्याल्लिटि । ओषांबभूव[3] । उवोष ।[4]

तीष । इषु इच्छायाम् । षह मर्षणे । लुभ गार्ध्ये । लुभ विमोहने । द्वावपि । रुष रिष हिंसायाम् । सर्वे एते उदात्ताः इति । नित्यमिटि प्राप्ते विकल्पार्थमारम्भः । अत्र सूत्रे [5]केचिदुदितमिषं पठन्ति । इष्यते इष्णातेश्च ग्रहणं मा भूदिति । ये पुनरुदितं न पठन्ति ते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यतः प्रकृतस्य वेत्यस्य व्यवस्थितविभाषात्वाद्[6]गौवादिकेन सहिना साहचर्यादिच्छार्थस्यैव ग्रहणं न गत्यर्थाभीक्ष्ण्यार्थयो[7]रिति वर्णयन्तीति चेतसि कृत्वाह । इच्छत्यादेरिति । रोषितेति । लुट् । 'पुगन्त—' इति गुणः । रोष्टेति । गुणः । ष्टुत्वम् । एवं रिषेति । एवमनेन प्रकारेण रिषेरपि रूपाणीत्यर्थः । रेषिता । रेष्टा । रुष्यात् । रिष्यात् । रोषिष्यति । रेषिष्यति । अरोषिष्यत् । अरेषिष्यत् ।

उष । ओषति । ओषीत् । उषविद । उष दाहे । विद ज्ञाने । जागृ निद्राक्षये । परस्मैपदिभ्यामुषजागृभ्यां साहचर्यान्न[8] सत्ता-विचारार्थयोरात्मनेपदिनोर्ग्रहणम् । अदादिकेन जागर्तिना संहचारान्न लाभार्थस्योभयपदिनः ।[10] ओषांबभूवेति । आम् । गुणः । 'आमः' इति लेर्लुक् । 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परस्य भुवोऽनुप्रयोगः । णल् । द्वित्वम् । ह्रस्वः । 'भवतेरः' । 'अभ्यासे चर्च' । 'भुवो वुक्—' इति वुक् । उवोषेति । णल् । गुणः । द्वित्वम् ।[11]

---

१. इषु इत्यादेः B₂. २. रिष् D3, D4; B₂ has रिष for एवं रिषः ३. ओषामास D3, D4. ४. After it—ऊषतुः । उष्यात् । ओषिता । ओषिष्यति । औषिष्यत् B₂. ५. केचिदिषुमुदितं Bc₂. ६. साहचर्याच्चे° Bc₂. ७. गत्यर्थभक्ष्यार्थयो° Bc₂. ८. अपि dropped Bc₂. ९. साह-चर्यान्न Dc3. १०. After it—अतो ज्ञानार्थस्यैव विदेर्ग्रहणम् । Dc3. ११. After द्वित्वम्—ह्रस्वः Bc₂.

शश प्लुतगतौ । 'न शश—' इति एत्वं न । शशशतुः । शशशिथ । मिह सेचने । शल इगुपधादनिटः क्सः । हो ढः । कत्वषत्वे । अमिक्षत् । ढत्वम् । झषस्तथोर्धोऽध इति धत्वम् । ष्टुत्वम् ।

ढो ढे लोपः ॥८।३।१३॥

ढस्य लोपः स्यात् ढे परे ॥

'अभ्यासस्यासवर्णे' इत्युवङ् । ऊषतुः । ऊषुः । उवोषिथ । ओषिता । उष्यात् । ओषिष्यति । औषिष्यत् ।

शश प्लुतिनिर्गमने । शशति । शशाश । 'न शश—' इति । अत्र सूत्रे शसेति केचिद् दन्त्यान्तं पठन्ति । तथा च **न्यासकारेणोक्तम्** । 'शसु हिंसायाम्' इति । अन्ये तु शशेति तालव्यान्तं पठन्ति । यथा च शान्तेषु विचारमणावुक्तम् । वावश्यते च न वशः शशतुर्न शन्तेति । नैतदिति **मुग्धबोधप्रदीपे**ऽप्युक्तम् । शश प्लुतगताविति तदुभयमिष्टम् । **शशशतुः** इति । अतुस् । द्वित्वम् । **शशशिथेति** । 'आर्धधातुक—' इतीट् । शशितेत्यादि । **मिह** । इतो द्वावनिटौ । मेहति । **कत्वषत्वे** इति । कत्वं 'षढोः—' इति षत्वम् 'आदेशप्रत्यययोः' इति । **अमिक्षदिति** । लुङ् । तिप् । च्लिः । इतश्च । अट् । मिमेह ।

ढो ढे । यद्यपि । पदाधिकारस्तथापि तस्यासंभवादपदान्तस्य ढस्य लोपो विज्ञायते । अकार उच्चारणार्थः । ढमात्रं निमित्तम् । ननु च मेढेत्यादावसिद्धं ष्टुत्वं तत् कथमत्र लोपः । उच्यते । अत्र च ढे परे ढलोपो विधीयते । एवं सति यदि ष्टुत्वमसिद्धं स्यात् एतर्हि निर्विषयं स्यात् । ननु च । यत्रोत्पत्तिजो ढः श्वलिड् ढौकन

१. Before it—शशाश B_2. २. °पधादनिटः क्सः C ; D_3, °पधेति D_1. ३. After it—च D_4. ४. Dropped D_3 ५. प्लुतिगतौ Dc_3. ६. केचित् शसेति Dc_3. ७. भाष्यकारेण Bc_2. ८. शशतुर्न शसेति नेत इति Dc_1, Dc_3, Dc_4. ९. मुग्धबोधेऽप्युक्तम् Dc_3. १०. इतः । अट् । Bc_2. ११. ढस्य लोपो Bc_2, Dc_3. १२. °त्पत्तिको Bc_2, Dc_3.

मेढा । मेढारौ । मेक्ष्यति ।

दह भस्मीकरणे । दादेरिति घत्वम् । एकाचो बश इति भष्भावः ।

अधाक्षीत् । अदाग्धाम । अत्र सिचि लुप्ते भष्भावो न ।

इत्यादौ सावकाशं स्यादिति चेन्मैवम् । अत्रान्तरङ्गत्वादसिद्धत्वाच्च पूर्वं जश्त्वे कृते कार्यी नास्तीति ढलोपाभाव एव । न च ढलोपो जश्त्वापवादः स्यादिति वाच्यम् । तस्य हि मेढादिविषयोस्ति । ननु कथं मेढादिरनवकाशः । यतो यथा श्वलिड् ढौकत इत्यत्र जश्त्वे कृते कार्यिणोभावस्तथा मेढादावपि ढत्वस्यासिद्धत्वान्निमित्तस्याभावः । अथ मेढादौ वचनादसिद्धत्वं बाध्यते तर्हीतरत्रापि जश्त्वं बाधनीयमिति चेन्मैवम् । लोपेन तावदवश्यमसिद्धत्वं बाध्यम् । तत्र मेढादौ एकमेव पूर्वत्रासिद्धत्वमतस्तदेव बाध्यते । श्वलिड् ढौकत इत्यत्र तु लोपस्य जश्त्वापेक्षया बहिरङ्गत्वात् परत्वाच्च द्विविधमसिद्धत्वमिति न बाध्यते । अत इष्टसिद्धिः । मेढेति । लुट् । 'स्यतासी—' इति तासिः । 'लुटः प्रथमस्य—' इति डा । टिलोपः । गुणः । मिह्यात् । मेक्ष्यतीति । लट् । स्यः । गुणः । ढत्वम् । कत्वम् । षत्वम् । कषयोगे क्षः । अमक्ष्यत् ।

दह । दहति । अधाक्षीत् । लुङ् । सिच् । 'वदव्रज–' इति वृद्धिः । 'खरि च' इति चर्त्वम् । षत्वम् ।

अदाग्धामिति । लुङ् । तसस्ताम् । सिच् । वृद्धिः । घत्वम् । 'झलो झलि' इति लोपः । 'झषस्तथोर्धोधः' । 'झलां जश् झशि' इति गः । ननु चात्र सिचि लुप्तेपि प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायेन भष्भावः स्यादित्याशङ्क्याह ।

---

१. After it—मेढारः D3. २. घः D1. ३. त्वात् पूर्वं Dc3. ४. कार्ये Dc1; कार्यं Dc3. ५. °रवकाशः Dc3. ६. तयोर्यथा Dc1. ७. जशि Bc2. ८. विविध° Dc1. ९. क्षत्वम् for कषयोगे क्षः Bc2. १०. सिचो लोपः Bc3.

तस्य वर्णाश्रयत्वेन प्रत्ययलक्षणत्वाभावात् । [1]देहिथ । ददग्ध । दग्धा । धक्ष्यति ॥

चह परि[2]कल्कने । [3]अचहीत् । हान्तत्वादि[4]ह न वृद्धिः ।

शुच शोके । भृस्तुशुचूवसृत्यशूभ्यः परस्य तादेरार्धधातुकस्ये[5]ड्वेति केचित् । 'चोः कुः' । शोक्ता । [6]शोचिता । एवं भृस्त्वादीनामपि । ग्लै हर्षक्षये । ग्लायति ।

त[7]स्येत्यादि । तस्य भष्भावस्य सकाराश्रितत्वेन प्रत्ययलक्षणत्वाभावा[8]दित्यर्थः । देहतुरिति । 'अत एकहल्मध्ये—' इति एत्वाभ्यासलोपौ । देहिथेति । थल् । द्वित्वम् । 'उपदेशेऽत्वतः' इति इण्निषेधः । 'ऋतो भारद्वाज—' इति [9]पक्षे इट् । 'थलि च सेटि' इत्येत्वाभ्यासलोपौ । ददग्धेति । इडभावे रूपम् । 'दादेर्धातोर्घः' । 'झषस्तथोर्धोऽधः' । जश्त्वम् । दग्धेति । लुट् । घत्वम् । धत्वम् । जश्त्वम् । धक्ष्यतीति । लृट् । स्यः । घत्वम् । चर्त्वम् । षत्वम् ।

चह । कल्कनं दम्भः कथनं च । इतो [10]ह्रौ सेट्ौ । चहति । हान्तत्वादिति । 'ह्म्यन्तक्षण—' इति । चचाह । चेहतुः । चहिता ।

शुच । शोचति । अशोचीत् । शुशोच । भृस्त्विति । भृञ् भरणे । ष्टुञ् स्तुतौ । शुच शोके । वस आच्छादने । तुड्निर्देशाद्वसतेर्न । अश भोजने । अशूङ् व्याप्तौ । केचिदिति । [11]हेममूर्यादयः । शुच्यात् । शोचिता । शोचिष्यति । ग्लै । हर्षक्षयोऽत्र धात्व[12]पचयः । इत आरभ्य त्रयोविंशतिः स्कन्दान्ता अनिटः । ग्लायतीति । लट् । तिप् । शप् । 'एचोऽयवायावः' ।

---

१. Before it—अधाक्षुः । ददाह B_1, B_2, D_2 ; देहतुः D_1, D_2, D_3, D_4. २. कल्कने D_1. ३. Before it—चहति । चचाह B_2. ४. इह dropped D_1, D_3. ५. °स्येड्वा स्यादिति N. ६. शोचिता । शोचिष्यति । अशोचिष्यत B_2. ७. अत्रेत्यादि Bc_2, Dc_3. ८. प्रत्ययाश्रितत्वाभावादित्यर्थः Bc_2, Dc_3. ९. वेट् for पक्षे इट् Bc_2. १०. Dropped Bc_2. ११. हेमसूरिमुख्याः Bc_2. १२. वृद्ध्यपचयः Bc_2.

आदेच उपदेशेऽशिति ॥६।१।४५॥

उपदेशे एजन्तस्य धातोरेच आत् स्यात् आदिशितोऽन्यस्मिन् प्रत्यये विवक्षिते । यमरमेतीट्सकौ । अग्लासीत् ।[1]

आत औ णलः ॥७।१।३४॥

आदन्ताद्धातोर्णल औरादेशः स्यात् ॥ वृद्धिः । जग्लौ ।

आदेच उपदेशे इति । आद्युच्चारणे । धातुपाठे इत्यर्थः । ननु च उपदेशग्रहणं विनैव लक्षणप्रतिपदोक्तपरिभाषयैव चेतत्यादौ आत्वं न स्यात् । बाढम् । एवं तर्हि उपदेशग्रहणेनास्याः परिभाषाया अनित्यत्वं ज्ञाप्यते । तेन क्रापयतीत्यादिषु लाक्षणिकत्वेप्याकारस्य 'अर्तिह्री–' इति पुक् सिद्धो भवति । अस्नासीदित्यादिषु इट्सकौ भवतः । ननु श इत् यस्य स शित् । न शित् अशिदित्यर्थः । तदा जग्ले इति न स्यादेशोपि शित्त्वात् । मैवम् । श एव इत् शित् इत्यर्थः । तत्र यस्मिन्विधिस्तदादावल्ग्रहणे इति शिदादौ प्रतिषेधः । एश पुनः शकारादिर्न एतच्चेतसि कृत्वाह । **आदिशितोन्यस्मिन्निति** । अशितीति प्रसज्यप्रतिषेधोयम् । तेनैतदात्वमनैमित्तिकं प्रागेव प्रत्ययोत्पत्तेर्भवतीत्यभिप्रेत्याह । **विवक्षित** इति । **अग्लासीदिति** । लुङ् । सिच् । इट्सकौ ।

आत । अत्र ओकारौकारयोर्लाघवे विशेषाभावेपि । ओत्वमपास्य प्रयोगसमवाय्यौकार एव विधीयते । अन्ये तु दददिद्राविल्यत्रालोपेप्यौत्वश्रुत्यर्थमाहुः । वृद्धिरिति । 'वृद्धिरेचि' इत्यनेन । **जग्लौ** इति । अत्रैकादेशात् सवर्णदीर्घात् प्रथममनवकाशत्वादौत्वम् । द्विर्वचनादपि परत्वादेकादेशवृद्धिः । ततः स्थानिवद्भावात् द्वित्वम् । 'हलादिः शेषः' । ह्रस्वः । चुत्वम् । अभ्यासे चर्त्व ।

---

१. आत्वम् C; आ D_1, N. २. अग्लासिष्टाम् after it in B_1, D_2. ३. औ आदेशः P ; औ स्यात् D_1. ४. °न तस्याः Bc_2. ५. °त्यादौ Bc_2. ६. Dropped Bc_2. ७. अग्लासी° Bc_2, Dc_3. ८. Dropped Bc_2. ९. सिचि Bc_2. १०. समुदायौ° Dc_3. ११. स्यादेकादेश° Bc_2.

आतो लोप इटि च ॥६।४।६४॥

अजादावार्धधातुके क्ङिति इटि च परे आतो लोपः स्यात् ॥ ततो द्विर्वचनेचीति स्थानिवत्वाद् द्वित्वम् । जग्लतुः । जग्लुः । जग्लिथ । जग्लाथ । जग्लौ । जग्लिव । जग्लिम । ग्लाता ।

वान्यस्य संयोगादेः ॥६।४।६८॥

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एकारः स्याद्वा आर्धधातुके लिङि क्ङिति ॥ ग्लेयात् । ग्लायात् ।

आतः । अजादावार्धधातुके इति । अजादाविति प्रत्येकमभिसंबध्यते । अजादावार्धधातुके क्ङिति परे । अजादाविटि च परे आकारस्य लोपः स्यादित्यर्थः । अजादाविति किम् । कितोनजादेः प्रत्युदाहरणं ग्लायते इति यक् । इटोनजादेः प्रत्युदाहरणं दासीयेति दात् उत्तमैकवचनम् । इट् । आशीर्लिङ् । सीयुट् । इड्ग्रहणमकिदर्थम् । **जग्लिथ** । **जग्लाथेति** । 'कृसृ—' इत्यादिना । प्राप्तस्य 'अचस्तास्वत्—' इति इटोभावः । 'ऋतो भारद्वाज—' इति पक्षे इट् । **जग्लौ** । इत्युत्तमणल् । **जग्लिवेति** । 'कृसृ—' इति नियमादिट् । **ग्लाता** इति । लुट् । आत्वम् । इडभावः । 'एकाचः—' इति ।

वान्यस्य । घुमास्थादेरित्यादिग्रहणात् पिबतिजहातिस्यतयः । **ग्लेयात्** । **ग्लायादिति** । आशीर्लिङ् । अन्यस्येति किम् । स्थेयात् । संयोगादेरिति किम् । यायात् । क्ङिति किम् । ग्लासीष्ट । अङ्गस्येत्येव निर्यायात् । ग्लास्यति । अग्लास्यत् ।

---

१. क्ङिति लिटि B_2. २. P drops जग्लुः. ३. Dropped B_2, D. ४. ए D_1, D_2, N ; एत्वं D_3, D_4. ५. क्ङिति ङिति Dc_3. ६. लभ्य सीयुट् Dc_3. ७. इड्ग्रहणं किमर्थम् । जग्लिथ । &c. Dc_3. ८. भावे Bc_2. ९. गपिबतिजहातिस्त्रयः । Dc_3.

गै शब्दे । गायति । अगासीत् । जगौ ।

एर्लिङि ॥६।४।६७॥

घुसंज्ञानां मास्थागापिबतिजहातिस्यतीनां च[1] क्ङित्यार्धधातुके लिङि आत एः[2] स्यात् ॥ गेयात् ।[3]

ष्ठ्यै[4] शब्दसंघातयोः । ष्ठ्यायति । दैप् शोधने ।[5]

गै । गायतीति । तिप् । शप् । आय् । गायेत् । अगासीदिति । लुङ् । सिच् । 'आदेच—' इत्यात्वम् । 'यमरम—' इतीट्सकौ । जगाविति लिट् । णल् । आत्वम् । 'आत औ णलः' । द्वित्वम् । ह्रस्वः । 'अभ्यासे चर्च' । जगतुः । जगुः । गाता ।

'एर्लिङि' । घुसंज्ञका[6] दारूपा धारूपाश्च धातवः । मा माने न तु माङ्मेङौ । तयोरात्मनेपदित्वेनाकित्त्वात् ततः परस्य लिङः । ष्ठा गतिनिवृत्तौ । गै शब्दे । न तु गाङ् गताविङादेशो वा । आत्मनेपदित्वात् । नेणादेशो गा । तस्य लिङ्यसंभवात् । पा पाने । ओहाक् त्यागे । षोऽन्तकर्मणि । गास्यति । अगास्यत् ।

ष्ठ्यै । ष्ठ्यायति । सुब्धातु । ष्ठ्यैष्वष्कष्ठिवां सत्वनिषेधः । अष्ठ्यासीत् । तष्ठ्यौ[7] । ष्ठ्याता । ष्ठ्येयात् । ष्ठ्यायात्[8] । ष्ठ्यास्यति । अष्ठ्यास्यत् । दैप्[9] । दायति । दायेत् ।

१. Dropped N. २. एत् P ; एकार C ; एः N; एत्वम् D_3. ३. After it—गेयास्ताम् D_4. ४. After it—तष्ठ्यौ । ष्ठ्यायात् । ष्ठ्येयात् । अष्ठ्यासीत् B_2 ; तष्ठ्यौ D_3 ; अष्ठ्यासीत् । तष्ठ्यौ । ष्ठ्याता । ष्ठ्यास्यति D_4. ५. After it—दायति B_2. ६. घुसंज्ञा Bc_2. ७. तष्ठ्यौ Bc_2. ८. Dropped Dc_1. ९. दैप् शोधने Dc_1.

दाधाघ्वदाप् ॥ १।१।२०॥

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ[2] विना।[1] इति घुसंज्ञत्वाभावाद् 'गातिस्थाघुपा—'[4] इति सिचो न लुक्।[5] अदासीत्। अदासिष्टाम्।[6] 'यमरमनमातां सक् च' इत्यनेन सिद्धमेत्वं च न। दायात्। धेट् पाने। टो ङीबर्थः।

दाधा। उपदेशस्थानां यावतां दाधारूपमनुकरणं संभवति तेषां सर्वेषामिह ग्रहणं दाधा इति। ततश्च दोदेङ्धेङ्अनुकरणानाम् 'आदेच उपदेशेऽशिति' इत्यात्वसद्भावात् तेषां ग्रहणम्। तथा दाण्दाञ्धाञां[7] चेति सर्वेषां सिध्यति। लक्षणप्रतिपदोक्तपरिभाषा निरनुबन्धकपरिभाषा[8] चात्र न प्रवर्तते। सर्वेषां च स्वरूपेणानुक्रियमाणत्वात् प्रनिदारयतीत्यत्र त्वप्रसङ्गः। न हि दृ इत्येतदनुकरणस्यात्वमस्ति। एवं च दीङो-नुकरणस्यात्वाभावात् तृजादिषु 'मीनाति—' इत्यात्वे घुसंज्ञा नेति सर्वं चित्ते कृत्वाह। दारूपा धारूपा इति। 'उदीचां माङो व्यतीहारे' इति मेङः कृतात्वस्य निर्देशात् ज्ञायते नानुबन्धकृतमनेजन्तत्वमिति माङ् मान इत्यस्य हि न व्यतिहारे वृत्तिः।[9] तेन दैपः पकारे श्रूयमाणे एवात्वं भवति। ततोदाविति। दाप् लवने[10] दैप् शोधने इत्युभयोर्निषेध इत्यभिप्रेत्याह। दाप्दैपौ विनेति। ददौ। ददतुः। दाता। दायात्।[11] दास्यति। अदास्यत्। धेट्। टो ङीबर्थ इति। स्तनंधयीत्यत्र धयति।[12]

---

१. घुसंज्ञकाः B_1. २. वर्जयित्वा D_3. ३. घुत्वा° C, D_3; घुसंज्ञकत्वा° B_1, D_2; घुसंज्ञा° D_1; घुत्वाभावान्नेत्वम्। दायात् B_2. ४. 'गातिस्था-' इति D_1, D_3. ५. न सिचो D_3. ६. P and C drop from अदासिष्टाम् to च न: D_1, D_3, N from अदासिष्टम् to सिद्धम्; B_2 from अदासिष्टाम् to दायात्. ७. दाण् दाने दाम् धाम् चेति सर्वेषां &c. Dc_3. ८. निरनुबन्धपरि° Bc_2. ९. वृद्धिः Dc_1, Dc_4. १०. दाने Bc_2. ११. Dropped Bc_2; १२. Dropped Bc_2.

विभाषा धेट्श्व्योः ॥३।१।४९॥

आभ्यां परस्य च्लेश्चङादेशो वा[१] स्यात् कर्तरि लुङि परे[२] ॥

चङि ॥६।१।११॥

चङि परे अनभ्यासस्य धात्ववयवस्यैकाचो द्वे स्तः ॥ चङो ङित्वादातो लोपः । अदधत । अदधताम् । अदधन् । सिच्पक्षे ।

विभाषा घ्राधेट्शाच्छासः ॥२।४।७८॥

एभ्यः परस्य सिचो वा लुक् स्यात् परस्मैपदेषु ॥ अधात् । अधाताम्[४] ।

आतः ॥३।४।११०॥

सिज्लुकि[५] आदन्तादेव[६] झेर्जुस् स्यात् ॥

विभाषा । धेट् पाने । टुओश्वि वृद्धिगत्योः । कर्तरि किम् । अधिषातां गावौ वत्सेन । आतो लोपः इति । 'आतो लोप इटि च' इत्यनेन ।

अदधदिति । आत्वम् । लुङ् । तिप् । ह्रस्वः । 'अभ्यासे चर्च' इति जश्त्वं दकारः । अदधन्निति । 'झोन्तः' इति लोपे च कृते संयोगान्तलोपः[७] ।

विभाषा । घ्रा गन्धोपादाने । धेट् पाने । शो तनूकरणे । छो छेदने । षोन्तकर्मणि ।

---

१. स्याद्वा D₁. २. परे dropped B₁. D₂. ३. Dropped D₁. ४. C drops अधाताम्. ५. सिचि लुकि D₁: सिज्लुकि dropped B₂. ६. एव dropped D₄. ७. संयोगान्तस्य लोपः Bc₂.

उस्यपदान्तात् ॥ अधुः । आदन्तादेवेति किम् । अभूवन् । लुगभावे अधासीत् । धेयात् ।

पा पाने ।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥७।३।७८॥

पादीनां क्रमात् पिबादय आदेशाः स्युः शिति । पिबादेशोदन्तस्तेन नोपधागुणः । पिबति । गातिस्थेति सिचो लुक् । अपात् । पेयात् ।

घ्रा गन्धोपादाने । जिघ्रति । अघ्रात् । अघ्रासीत् ।

अधासीदिति । 'यमरम—' इतीट्सकौ । दधौ । धाता । धेयात् इति । 'एर्लिङि' इत्येत्वम् । धास्यति । अधास्यत् ।

पा । पा पाने न पा रक्षणे लुग्विकरणत्वात् ।

घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः । ष्ठा गतिनिवृत्तौ । म्ना अभ्यासे । दाण् दाने । दृशिर् प्रेक्षणे । ऋ गतिप्रापणयोः । सृ गतौ । एतौ भौवादिकौ । जौहोत्यादिकयोस्तु शितौ संभवान्न ग्रहः । श्नानशः संभवेपि शश्नासानित्वेचेति कर्मधारयात् शितीति शिदोर्दौ विज्ञायते तेन तत्र न । शद्लृ शातने । षद्लृ विशरणे । भौवादिकतौदादिकयोर्ग्रहणम् । अपात् । अपाताम् । अपुः । पपौ । पपिथ । पपाथ । पाता । पेयात् । 'एर्लिङि' इत्येत्वम् । पास्यति । अपास्यत् । घ्रा । जिघ्रतीति । जिघ्रादेशः । अघ्रादिति । 'विभाषा घ्रा—' इति वा सिचो लुक् । अघ्रासीदिति । लुगभावे

१. इति dropped D3. २. लुगभावे D1. ३. धेयात् । धाता । धास्यति । अधास्यत् B2. ४. नोपधाया गुणः B2. ५. Before it पपौ । पाता । 'एर्लिङि' । इत्येकारः । B1, B2 ; पेयात् dropped D4. ६. Dropped Dc1, Dc3. ७. जुहोत्यादिकयो । Bc2, Dc3. ८. ग्रहणम् Bc2. ९. शित्यार्थो Dc3. १०. °शरणगत्यवसादनेषु Bc2, Dc3. ११. Dropped Dc1, Dc3.

जघ्रौ । घ्रेयात् । घ्रायात् ॥ ध्मा शब्दाग्निसंयोगयोः । धमति । अध्मासीत् । ध्मेयात् । ध्मायात् ॥ ष्ठा गतिनिवृत्तौ । तिष्ठति । सिचो लुक् । सत्वे कृते प्रकृतिस्तवर्गः स्यात् ।

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजः शकारश्चेषाट्टवर्गस्तवर्गजः ॥

'यमरम—' इतीट्सकौ । जघ्राविति । 'आत औ णलः' । जघ्रिथ । जघ्राथ । घ्रेयात् । घ्रायादिति । 'वान्यस्य—' इत्येत्वं वा । ध्मा । शब्दो मुखानिलादिना अग्निसंयोगे वा । धमतीति । धमादेशः । अध्मासीदिति । इट्सकौ । दध्मौ । ध्माता । ध्मेयात् । ध्मायादिति एत्वं वा । ष्ठा । तिष्ठतीति । तिष्ठादेशः । सिचो लुगिति । 'गातिस्था—' इत्यनेन । सत्वे कृते इति । 'धात्वादेः षः सः' इति सत्वे कृते निमित्ताभावात् । तवर्गः प्रकृतिः स्यादिति । ठस्य प्रकृतिभूतस्थकार एव श्रूयते इत्यर्थः । ननु नायं तवर्गजष्ठकारः किं तु स्वाभाविक इत्याशङ्क्याह ।

नकारजावित्यादि । धातुषु झलि परतः अनुस्वारपञ्चमौ । अनुस्वारश्च पञ्चमश्च । पञ्चमो नाम ङञणनमाः । एतौ नकाराज्जातौ वेदितव्यौ । झलि शकारः सकारजः षकारात् परष्टवर्गस्तवर्गाज्जातो वेदितव्यः । अथवा सकारजः शकारजश्चेषाट्टवर्गस्तवर्गजः इति वा पाठः । चे चकारे परे शकारः सकारजः । षात् रेफषकाराभ्यां परष्टवर्गस्तवर्गज इत्यर्थः । तत्रानुस्वारस्य नकारजत्वे शंसेः शशंसुरित्यत्र 'असंयोगाल्लिट् कित्' इति कित्त्वनिषेधः । तथा क्विप्प्रत्यये सति प्रथमैकवचने संयोगान्तलोपे कृते शानिति तस्य श्रवणं स्यात् । पञ्चमस्य नकारजत्वे अङ्क्श्चिङि 'अजादेर्द्वितीयस्य' । 'नन्द्राः संयोगादयः'

---

१. Before it-दध्मौ D_2, D_4. २. 'गातिस्था-' इति सिचो लुक् B_1, B_2. P, C. ३. प्रकृतेस्त° C; तवर्गः प्रकृतिः Com. ४. मुखानलादिसंयोगे च Bc_2. ५. °संयोगेन Dc_3. ६. वा एत्वम् Dc_3. ७. ज्ञेय. Bc_2. ८. Dropped B_2. ९. कृते सति तस्य श्रवणं स्यात् Dc_3.

अस्थात् । अड्व्यवायेपि षः[1] । न्यष्ठात् । अभ्यासव्यवायेपि षः । नितष्ठौ ।[2] स्थेयात् ॥ म्ना अभ्यासे । मनति ।[3] दाण् दाने । प्रणियच्छति[4] । प्रण्यदात् । देयात्[5] ॥ ह्वृ कौटिल्ये । ह्वरति । अह्वार्षीत् । जह्वार ॥

इति अनौ परित्यज्य ककारस्य द्वित्वं स्यात् आञ्चिकदिति । अन्यथा-ङस्यैव द्वित्वे आङिङ्क्दिति स्यात् । चे शकारस्य सकारजत्वे व्रश्चेः वृश्णः सुवृडित्यादौ 'स्कोः संयोगाद्योः–' इति लोपः स्यात् । रेफात् टवर्गस्य तवर्गजत्वे ऊर्णोतेरूर्णुनात्रेत्यादौ नकारस्य श्रवणं स्यादित्येवमादीनि कार्याणि नकारजावित्यादेर्ज्ञेयानि ।

अस्थादिति । लुङ् । अड्व्यवायेपि ष इति । 'प्राक् सित–' इत्यनेन । अभ्यासेति । 'स्थादिष्वभ्यासेन' इति । नितष्ठाविति । 'आत औ णलः' । 'शर्पूर्वाः खयः' । स्थाता । स्थेयादिति । 'एर्लिङि' इत्येत्वम् । स्थास्यति । म्ना । अभ्यासः पारम्पर्येणावृत्तिः । मनतीति । मनादेशः । अम्नासीत् । मम्नौ । म्नेयात् । म्नायात् । दाण् । णकारो दाणश्च सा चेदिति विशेषणार्थः । प्रणियच्छतीति । यच्छादेशः । 'नेर्गद—' इति णत्वम् । प्रण्यदादिति । लुङ् । सिच् । 'गातिस्था–' इति सिचो लुक् । ददौ दाता । देयादिति । 'एर्लिङि' इत्येत्वम् । दास्यति । ह्वृ । ह्वरतीति । तिप् । शप् । गुणः । रपरः । अह्वार्षीदिति । लुङ् । सिच् । 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । अट् । 'अस्ति—' इतीट् । जह्वारेति । णल् । वृद्धिः । स्थानिवत्त्वम् । द्वित्वम् 'उरत्' । 'हलादिः शेषः' । अभ्यासस्य जश्त्वम्[6][7] ।

---

१. षत्वम् C, D_1, N. २. After it–नितष्ठतुः । नितष्ठुः । स्थाता । स्थास्यति B_2. ३. After it—अम्नासीत । मम्नौ । म्नाता । म्नायात । म्नेयात । म्नास्यति । अम्नास्यत B_1, B_2 (मम्नतुः B_2). ४. प्रनियच्छति । प्रन्यदात D_1. ५. देयात । दाता । दास्यति B_2. ६. स्थानिवत्त्वात द्वित्वम Bc_2. ७. अभ्यास-जश्त्वम Bc_2.

ऋतश्च संयोगादेर्गुणः ॥७।४।१०॥

संयोगादेर्ऋदन्तस्य गुणः स्यादवृद्धिनिमित्ते लिटि परे ॥ जह्वरतुः । जह्वरुः । ऋतो भारद्वाजस्येति थलि नेट् । जह्वर्थ । क्रादिनियमादिट् । जह्वरिव । जह्वरिम । ह्वर्ता ।

गुणोऽर्तिसंयोगाद्योः ॥७।४।२९॥

अर्तेः संयोगादेर्ऋदन्तस्य गुणः स्याद्यकि असार्वधातुके लिङि च ॥ ह्वर्यात् ।

ऋद्धनोः स्ये ॥७।२।७०॥

ऋतो हन्तेश्च परस्य स्यस्य इट् स्यात् ॥ ह्वरिष्यति ।

ऋतश्च । ननु सर्वत्रात्र साभ्यासमङ्गं न च तत्संयोगादिरभ्यासस्य संयोगविघातकत्वात् । एवं तर्हि प्राक् द्विर्वचनात् संयोगादिरिति विज्ञास्यते । ननु च वृद्धिविषयेऽपि परत्वाद्गुणेन भाव्यम् । मैवम् । पूर्वविप्रतिषेधेन वृद्धिरेव भवतीत्येतदभिप्रेत्याह । **अवृद्धिनिमित्ते लिटि परे** इति । जह्वरतुरिति । 'उरत्' ।

गुणः । ऋ गतिप्रापणयोः । भ्वादिः । ऋ सृ गतौ । ह्वादिः । द्वयोरप्यर्तीति छान्दसो लुका निर्देशः । **असार्वधातुके लिङीति** । या इत्यनुवृत्तेर्यकारादावेव स्यात् । तेन स्तीर्षाष्टेत्यादौ न । **ह्वर्यादिति** । 'उरण् रपरः' । अह्वरिष्यत् ।

१. B_1, B_2 drop जह्वरतुः. २. Dropped D_4. ३ च गुणः N_1, D_3. ४. चावासार्वधातुके B_2. ५. D_1 drops च. ६. स्यप्रत्ययस्य B_2. ७. After it—अह्वरिष्यत् D_3. ८. ऋतश्चेति Bc_2. ९. Dropped Bc_2. १०. Dropped Bc_2. ११. परत्वात् D_3. १२. ऋ गतौ Bc_2.

स्वृ शब्दोपतापयोः ॥ स्वरति । स्वरतिसूतीति वेट् । अस्वारीत् । अस्वार्षीत् । स्वर्ता । स्वरिता ॥ स्वरतेः स्यस्य नित्यमिड् वाच्यः । स्वरिष्यति ॥ सृ गतौ । पाघ्राध्मेति धौरादेशः । धावति । सर्तेः शीघ्रगतावेवायमिष्टः । अन्यत्र तु सरति ।

सर्तिशास्त्यर्तिभ्यश्च ॥३।१।५६॥

एभ्यः परस्य च्लेरङादेशः स्यात् ॥ पृथक्सूत्रकरणादुभयपदेषु

ऋदृशोऽङि गुणः ॥७।४।१६॥

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि ॥ असरत् ॥

स्वृ । स्वरति । अस्वारीदिति । 'इट ईटि' इति सलोपः । 'सिचि वृद्धिः—' इति वृद्धिः । अस्वार्षीदिति । वृद्धिः । रपरः । षत्वम् । स्वरतेरिति । वाच्यो व्याख्येय इत्यर्थः । तत्रेदं व्याख्यानं स्वरतीत्यस्माद् 'ऋद्धनोः स्ये' इति स्याद्विप्रतिषेधेनेति नित्यं स्यस्येडिति । तथा चोक्तं काशिकायाम् । 'स्वरतेरेतस्माद्विकल्पात् 'ऋद्धनोः स्ये' इत्येतद्भवति 'विप्रतिषेधेन' इति । अस्वरिष्यत् । सृ ।

सर्तीति । पृथगिति । यदि 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' 'सर्तिशास्त्यर्तिभ्यः' इत्येकमेव सूत्रं क्रियेत तर्हि सर्तिप्रभृतिभ्योऽपि परस्मैपद एव स्यान्नात्मनेपदे । तस्मादेतेभ्यः समारतेत्यादावात्मनेपदेऽपि यथा स्यादित्येवमर्थं पृथक् सूत्रकरणम् । असरताम् । असरन् ।

---

१. Dropped D_1, D_2, D_3, N_1. २. स्वरतीति वेट D_3. ३. सस्वार । सस्वरतुः । स्वर्ता B_2. ४. Dropped N_1, D_2, D_3, D_4. ५. After it—सिच Dc_3. ६. वाच्ये व्याख्येये Dc_3. ७. °तीत्यस्य Bc_2. ८. क्रियते Bc_2, Dc_3. ९. आरताम् । आरन । Bc_2.

ऋसृभ्यामङ् वेति केचित्[1] । असार्षीत्[2] । सस्रतुः । ससर्थ । क्रादित्वान्नेट् । ससृव ।

रिङ् शयग्लिङ्क्षु ॥७।४।२८॥

शे यकि योदावसार्वधातुके[3] लिङि च परे ऋतो रिङादेशः स्यात् ॥ रीङं बाधित्वा रिङ्विधिसामर्थ्यादकृतसार्वधातुकयोरिति[4] न दीर्घः । स्रियात् । सरिष्यति ।[5]

ऋ गतौ प्रापणे च । ऋच्छति ।[6] आरत् । आर्षीत् । द्वित्वम् । उरत् । वृद्धिः । आर ।

ऋसृभ्यामिति । तथोक्तं कातन्त्रवृत्तिपञ्जिकायाम् । अर्तिसर्त्तीति यद्यपि धातुमात्रनिर्देशे तिपि विशेषाविवक्षायां विकरणे न भवति । तथापि लुग्विकरणयोरेव ग्रहणं शास्तिना साहचर्यादित्याद्युक्त्वा भौवादिकयोः सिजेव आर्षीत् असार्षीदिति एवं व्यवस्थायामुक्तायां विकल्प एव उक्तः स्यादित्युक्तम् । ससार । सस्रतुरिति । 'इको यणचि' इति यण् । 'द्विर्वचनेचि' इति स्थानिवत्त्वात् साकचकस्य द्वित्वम् । उरत् । ससर्थेति । गुणः । १

रिङ् शय इति । 'तुदादिभ्यः श' । 'कृञः श च' । यक् । 'सार्वधातुके यक्' । रीङं बाधित्वेति । 'रीङृतः' इति । सरिष्यतीति । 'ऋद्धनोः स्ये' इतीट् । असरिष्यत् ।

ऋ । ऋच्छतीति । 'पाघ्राध्मा—' इति ऋच्छादेशः । आरदिति 'सर्तिशास्त्यर्तिं' इत्यङ् । 'ऋदृशोऽङि गुणः' । 'आडजादीनाम्' । आर्षीदिति । मतान्तरे । सिच् । वृद्धिः । आर्ष्टाम् । आर्षुः । द्वित्वमिति । 'लिटि धातोरनभ्यासस्य' इत्यनेन । वृद्धिरिति । 'अत्रोञ्णिति' इत्यनेन ।

१. ऋसृभ्या° P, Com. २. ससार । सस्रतुः B₂, D₂. ३. यादावार्धधातुके C. ४. योर्दीर्घो न । D₃. ५. After it—असरिष्यत् D₄. ६. After it—आच्छत् D₁, D₂, B₁; प्राच्छत् B₂. ७. विकरणो Bc₂. ८. Dropped Bc₂. ९. °ति केचिदित्युक्तम् । Bc₂.

ऋच्छत्यॄताम् ॥७।४।११॥

तौदादिकऋच्छेर्ऋधातोॠतां चावृद्धिनिमित्ते लिटि गुणः स्यात् ॥ आरतुः । आरुः ।

इडत्यर्तिव्ययतीनाम् ॥७।२।६६॥

अदऋव्येञ् एभ्यस्थलो नित्यमिट् स्यात् ॥ आरिथ । आरिव । अर्ता । गुणोऽर्तीति गुणः । अर्यात् । अरिष्यति ।

ऋच्छ । अर्तेरप्यत्र प्रश्लेषो बहुवचननिर्देशादवसीयत इत्यभिप्रेत्याह । **तौदादिकऋच्छेर्ऋधातोरिति** । अथार्तिप्रश्लेषः किमर्थः । आरतुरित्यादिरूपसिद्ध्यै । अन्यथा ऋ अतुस् इति स्थिते चिक्यतुरितिवत् यणः पूर्वं द्वित्वम् । उरत्वं साङ्गं बाधित्वा सवर्णत्वादन्तरङ्गत्वात् सवर्णदीर्घः । तत्र येनाभ्यासग्रहणेन ग्रहः स्यात् उरत्वं हलादिः शेषः अत आदेः आतो लोपः आरुरिति स्यात् । अथ धातुग्रहणाद्ग्रहः ततः ऋदन्तत्वाद् गुणे अरतुरिति स्यात् । ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । ऋ गतौ प्रापणे च । ऋकारान्ताः कॄ विक्षेपे इत्यादयः । अत्र वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिरेव भवतीत्यभिप्रेत्याह । **अवृद्धिनिमित्तेति** । वृद्धेर्निमित्तं वृद्धिनिमित्तम् । यस्मिन् लिटि परतो वृद्धिर्न प्राप्नोति तं वर्जयित्वान्यस्मिन् लिटि गुणः स्यादित्यर्थः । अयं भावः । वृद्धिप्राप्तौ वृद्धिरेव पूर्वविप्रतिषेधेनेष्यते । यत्र वृद्धिर्न प्राप्नोति तत्र गुण इति ।

इट् इति । अद भक्षणे । ऋ गतौ प्रापणे च । ऋ सृ गतौ । व्येञ् संवरणे । **आरिथेति** । क्रादिनियमादिट् । **अरिष्यतीति** । 'ऋद्धनोः स्ये' इतीट् ।

१. च वृद्धि D_2, D_3, D_4, P, C, B_1, B_2. २. आरिव । आरिम । D_1, D_3. ३. After it—आरिव्यत D_4. ४. वर्णत्वादन्त° Dc_3. ५. यत्राभ्यास Dc_1. ६. °ग्रहणे ग्रहः Dc_3. ७. °ग्रहाद्ग° Bc_2. ८. इत्याद्याः । Bc_2. ९. एव dropped Bc_2. १०. Dropped Bc_2 : ऋ dropped Dc_3.

श्रु श्रवणे ।

श्रुवः शृ च ॥३।१।७४॥

श्रुवः श्नुप्रत्ययः स्यात् कर्तरि सार्वधातुके परे शृभावश्च । शृणोति । शृणुतः ।

हुश्नुवोः सार्वधातुके ॥६।४।८७॥

हुश्नुवोरनेकाचोऽसंयोगपूर्वोवर्णस्य यण् स्यादचि

श्रु ।

श्रुवः । शपि प्राप्ते श्नुर्विधीयते । श्रुव इति । प्रत्ययविधौ पञ्चमी यदा त्वादेशेन संबध्यते तदार्थात् षष्ठी संपद्यते । चशब्देन प्रत्ययान्तरे शृभावस्यासंभवं दर्शयति । शृणोतीति । तिप् । श्नुः । श इत् । श्नोर्ङित्त्वाद्गुणाभावः । णत्वम् । श्नोस्तिपि गुणः । शृणुत इति । 'सार्वधातुकमपित्' इति ङित्त्वम् । 'क्ङिति च' इति गुणनिषेधः ।

हुश्नुवोः । **अनेकाचो**रिति । अङ्गयोरिति शेषः । ओरित्यनुवर्तते । असंयोगपूर्वस्योकारविशेषणार्थम् । अन्यथा हुश्नुवोरेव विशेषणं स्यात् । ततश्च तक्ष्णुवन्ति इत्यत्रैव निषेधः स्यात् । राध्नुवन्तीत्यत्र न स्यात् । उज्वी जुह्वतीत्यत्र यणादेशो न स्यात् । तस्मादोरित्यनुवर्तनीयम् । तस्य च विशेषणमसंयोगपूर्वस्येति तदेतदभिप्रेत्याह । **असंयोगपूर्वोवर्णस्येति** । असंयोगपूर्वो य उवर्णस्तस्येत्यर्थः । हुश्नुवोरिति किम् । योयुवति । इदमेव श्नुग्रहणं ज्ञापयति भाषायां यङ्लुगस्तीति ।

---

१. Before श्रुवः शृ च B_1 has—श्रुवो वा शृ च । श्रुवो धातोः श्नुप्रत्ययो वा स्यात् । पक्षे कर्तरि शपिति शप् । यत्र शप् तत्र शृ आदेशो वा । शरति । श्रवति । कर्तरि सार्वधातुके परे शृभावश्च । शृणोति. २. परे Dropped C. D_1, D_3. ३. यदात्वादेशेन । Bc_2. ४. श्नु इत्यत्र ङित्त्वा° Bc_2. ५. शक्नुवन्ती° Bc_2.

सार्वधातुके । शृण्वन्ति ।

लोपश्चास्यान्यतरस्यां म्वोः ॥६।४।१०७॥

असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा स्यान्म्वोः परयोः ॥ शृण्वः । शृणुवः । शृण्मः । शृणुमः । परत्वाद्गुणेन लोपो बाध्यते । शृणोमि । शृणुयात् ।[1] पररूपत्वम् । शृणुयुः ॥[2]

उतश्च प्रत्ययादसंयोगपूर्वात् ॥६।४।१०६॥

असंयोगपूर्वात् प्रत्ययस्योकारात् परस्य हेर्लुक् स्यात् ॥ शृणु । गुणावादेशौ । शृणवानि । शृणवाव । शृणवाम । अशृणव ।

छन्दसि हि 'छन्दस्युभयथा' इत्यार्धधातुकत्वादेव यणोप्रसङ्गः । न च यङ्लुगन्तादन्यदुवर्णान्तमनेकाच् असंयोगपूर्वं सार्वधातुकं प्रत्युदाहरणमस्ति । अरुवन्निति तु नानेकाच् । 'असिद्धवदत्र—' इत्यसिद्धत्वात् ।

लोपः । असंयोगपूर्वस्येति किम् । तक्ष्णुवः । तक्ष्णुमः । प्रत्ययस्येति किम् । युवः । युमः । पररूपत्वमिति । 'उस्यपदान्तात्' इति । शृणुयुरिति । 'जुसि च' इति गुणो न । यासुटो ङित्त्वात् ।

उतश्च । असंयोगपूर्वस्येति किम् । तक्ष्णुहि । गुणावादेशाविति । गुणः 'सार्वधातुकार्धधातुकयोः' इति । अवादेशः । 'एचोयवायावः' । शृणवानीति । 'मेर्निः' । 'आडुत्तमस्य' इत्याट् । शृणवाव शृणवामेति । 'लोटो लङ्वत्' इति सलोपः । अशृणोत् । अशृणव ।

---

1. After it—यासुटो ङित्वान्न गुणः B2. 2. After it- शृणोतु B2. 3. प्रत्ययोकारात् B2, D1, D3. 4. इन्यत्र Dc3. 5. सार्वधातुके Dc3.

अशृणुव । अशृणम । अशृणुम । अश्रौषीत्[1] । शुश्राव । शुश्रोथ । शुश्रुव । श्रूयात्[2] ।

पु प्रसवे[3] ।

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥७।२।७२॥

एभ्यः सिच इट् स्यात् परस्मैपदेषु ॥ असावीत् । सुषुविव[4] । रुदुसुनुधातूनां लिटं विना इड् वेति केचित्[5] । सोता । सविता[6] ।

स्रु गतौ[7] ।

अशृणुवेति । लङ् वस् । उलोपो वा । 'नित्यं ङितः' इति सलोपः । अश्रौषीदिति । लुङ् । च्लिः । सिच् । वृद्धिः । इलोपः । इट् । षत्वम् । अट् । शुश्राव । शुश्रुवतुः । शुश्रोथेति । थल् । गुणः । द्वित्वम् । 'हलादिः शेषः' । क्रादिनियमान्नेट् । श्रूयादिति । 'अकृत्सार्वधातुकयोः' इति दीर्घः । श्रोष्यति ।

पु । सवति ।

स्तुसु । ष्टुञ् स्तुतौ । षुञ् अभिषवे । षु प्रसवे । धूञ् कम्पने । असावीदिति । 'सिचि वृद्धिः—' इति वृद्धिः । सुषाव । सुषविथ । सुषोथ । सुषुविवेति । क्रादिनियमादिट् । रुदु इति । रु शब्दे । दु गतौ । षु प्रसवे । षुञ् अभिषवे । णु स्तुतौ । केचिदिति । हेमसूर्यादयः । सूयात् । सविष्यति । सोष्यति ।

स्रु । स्रवति ।

---

१. B₁ has अश्रौष्टाम । शुश्राव after it : D₁ drops शुश्राव: अश्रौषीत् । अश्रौष्टाम । अश्रौषुः । शुश्राव । शुश्रुवतुः । शुश्रुव । श्रूयात । श्रोता । श्रोष्यति । B₂: अश्रौषीत । अश्रौष्टाम । शुश्राव । शुश्रुवतुः । शुश्रोथ । शुश्रुव । शुश्रुम । श्रूयात D₂. २. Dropped N, D₃; After it— शुश्रुवतुः । शुश्रुवुः । D₄. ३ प्राणिप्रसवे B₂, D₄. ४. After it-सुषाव D₄. B₁. P, C. ५. B₁ has before it—सुषुवतुः । सुषुवुः । सुषविथ । सुषोथ । सुषुवथुः । सुषुव । सुषाव । सुषव and after it—सुषुविम. ६. After it—सोष्यति । सविष्यति B₂. ७. निप् । Bc₂. ८. Dropped Bc₂.

णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥३।१।४८॥

ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङादेशः स्यात् कर्त्रर्थे लुङि[1] ॥ द्वित्वम् । उवङादेशः । असुस्रुवत् । 'ऋतो भारद्वाज[2]—' इति प्राप्त इट् क्रादिसूत्रेणापोद्यते[3] । सुस्रोथ । सुस्रुव ।[4] स्रूयात् ॥

दु गतौ ।[5] अदावीत् । अदौषीत् ।[6] दुदविथ । दुदोथ । मतान्तरे नित्यमिट् ।[7] दुदुविव ।[8] दोता । मतान्तरे इड् वा ।[9] दविता ॥

णिश्रि । सिजपवादश्चङ् विधीयते । श्रिञ् सेवायाम् । द्रु गतौ । स्रु गतौ । चङितिङकारो गुणनिषेधार्थः[11] । चकारश्चङीति विशेषणार्थः । द्वित्वमिति । 'चङि' इति । उवङादेश इति । 'अचि श्नुधातु—' इति । असुस्रुवदिति । लुङ् । तिप् । च्लिः । 'हलादिः शेषः' । 'इतश्च' इतीकारलोपः । असुस्रु अत् इति स्थिते तिबाश्रयो लघूपधगुणः प्राप्तः चङाश्रय उवङ् । तत्रान्तरङ्गत्वादुवङ् । कर्तरि किम् । अकारिषातां कटौ देवदत्तेन । कर्तरीति 'अचः कर्मकर्तरि' इत्यचः प्रागनुवर्तते[12] । असुस्रुवताम् । असुस्रुवन् । सुस्राव । सुस्रोथेति । थलि गुणः । स्रोता । स्रूयादिति । 'अकृत्सार्वधातुकयोः' इति दीर्घः । स्रोष्यति ।

दु । दवति । अदावीत् । अदौषीदिति । 'स्तुसुधूञ्भ्यः' इति वेट्[13] । 'सिचि वृद्धिः—' इति वृद्धिः । इट्पक्षे 'इट ईटि' इति सलोपः । अन्यत्र सस्य षः । दुदविथ । दुदोथेति । थल् । गुणः । द्वित्वम् । 'ऋतो भारद्वाज—' इति पक्षे इट् । मतान्तरे[14] दुदविथेति नित्यमिट्[15] । हेमसूर्यादिमते स्तुसुधूञ्धातूनां लिटं विनेत्युक्तत्वादिति भावः । दोता । दविता । दूयात् । दविष्यति । दोष्यति ।

---

१. लुङि परे D_3. २. भारद्वाजस्य D_1. ३. °पोद्यते B_2. ४. After it—सुस्रुम D_3. ५. Before it—दविता B_2. ६. After it—अदाविष्टाम् । अदौषुः । दुदाव । दुदविथ । मतान्तरं नित्यमिट् । दुदुविव । दोता । दूयात् । मतान्तरे इड् वा । दुगतौ &c. D_4. ७. After it—दुदविथ D_3. ८. C has मतान्तरे इड् वा after दविता. ९. After it—दुदुविम । C: दोता । दोष्यति । दविता । D_2. १०. Dropped D_1, D_3, N, B_2; दोता । दविता D_2. ११. °निषेधार्थम् Dc_1, Dc_4; ओर्गुणप्रतिषेधार्थः Dc_3. १२. अचे Bc_2, Dc_3. १३. वेट् Bc_2. १४. मतान्तरे इति Bo_2. १५. दुदविथेत्यत्र नित्यमिट् Dc_1, Dc_4

द्रु गतौ । 'णिश्रि—' इति चङ् । अदुद्रुवत् । दुद्रोथ । दुद्रुव । द्रोता ।

गम्लृ गतौ । 'इपुगमि—' इति छः । गच्छति ॥

पुषादिद्युताद्यॢदितः परस्मैपदेषु ॥३।१।५५॥

श्यन्विकरणपुषादेर्द्युतादेॢदितश्च परस्य च्लेरङ् स्यात्

द्रु । द्रवति । **अदुद्रुवदिति** । 'चङि' इति द्वित्वम् । 'हलादिः शेषः' । 'अचि श्नुधातु—' इत्युवङ् । दुद्राव । दुद्रोथ । दुद्रुवेति । क्रादिनियमान्नेट् । द्रोता । द्रूयते । द्रोष्यति ।

गम्लृ । गच्छतीति । लट् । तिप् । शप् । 'इपुगमि—' इति छः ।

पुषादि । पुषो हि भ्वादौ पठ्यते दिवादौ च । क्र्यादौ च । अत्र भौवादिको यदि गृह्यते तर्हि पुषाद्यनन्तरं द्युतादीनां पाठात् पृथग्ग्रहणं न कुर्यात् । तेनैव सिद्धत्वात् । क्र्याद्यन्तर्गणोऽपि न । तत्र हि चत्वार एव पठ्यन्ते । यदि तेऽभिमतास्तर्हि ॢदित एव तान् कुर्यादिति । अतः पारिशेष्याद्दिवादिक एव । न हि स ॢदित् कर्तुं शक्यते तत्रोदित्कार्याभावे तयोरभावः स्यादित्येतन्मनसि कृत्वाह । **श्यन्विकरणपुषादेरिति** ।

पुषिः शुषिस्तुषिश्चैव दुष्श्लिषी शकि ष्विदा ।
क्रुधिक्षुधी शुधिः षिधूरधनशतृपो द्रुपद्रुही अपि ॥१॥
मुहिः ष्णुहिः ष्णिहिः शम् तम् दम् श्रम् भ्रम् क्षम् क्लमो मदी ।
अस् यसु जस् तस् दसु वसु व्युष् प्लुष् बिस् कुसि बुस् मुसः ॥२॥

१. After it – द्रवति B_2. २. इषुगमियमां छः D_1, B_2. ३. ऋदित: P. ४. विकरणे C: °विकरणस्य B_2. ५. परस्मैपदेषु च्लेरङादेशः स्यात् D_1. ६. द्वि: Bc_2. ७. गम्लृ गतौ । 'पाघ्रा–' इति गच्छादेशः Dc_3. ८. पुषादि Bc_2, Dc_3. ९. तत्रोदित्कार्ये भाव्ये तयोरभावः स्यात् Bc_2, Dc_3 (स्यात् dropped Dc_3).

परस्मैपदेषु । अनङीत्युक्तेरुपधालोपो न । अगमत् । जगाम । 'गमहनजन—' इत्युपधालोपः । तस्य 'द्विर्वचनेचि' इति स्थानिवत्त्वात् साच्कस्य द्वित्वम् । जग्मतुः । जग्मुः । जगमिथ । जगन्थ । जग्मिव । जग्मिम ।

गमेरिट् परस्मैपदेषु ॥७।२।५८॥

गमेः सकारादेरार्धधातुकस्येट् स्यात् परस्मैपदेषु ॥ गमिष्यति । परस्मैपदग्रहणं तङानयोरभावं लक्षयति । तेनाम्स्यपि

नसीलुठौ लुटिं केचित् उन्मृशभ्रंशुवृशकृशः ।
तृपि दृप् रुप् लिप डिपः कुपगुपौ यूप रुपोऽपि लुप ॥३॥
लुभक्षुभौ णभतुभौ क्लिदमदौ ष्विद ऋधुगृधु ।
पञ्चषष्टिरिमे ज्ञेयाः पुषाद्या अङ्विधौ बुधैः ॥४॥
एकोनविंशतिः केचिद्वदन्त्येतान् शमादिकान् ।
शुतश्विताञिमिदृष्विदौ ष्विदुरुचघुट्रुटलुटी अपि ॥५॥
शुभिक्षुभी णभतुभी स्रंसुभ्रंसू तथा परौ ।
ध्वंसुभ्रंशू तथा स्रंसु ध्वस् वृतौ वृध् शृधावपि ॥६॥
स्यन्दू कृपू द्युताद्याः स्युश्चतुर्विंशतिरत्र तु ॥७॥

अनङीत्युक्तेरिति । 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यत्र । **जगामेति** । णल् । 'अत उपधायाः' इति वृद्धिः । द्वित्वम् । चुत्वम् । **जगमिथ** । **जगन्थेति** । थल् । 'उपदेशेऽत्वतः' इतीडभावः । 'ऋतो भारद्वाज—' इति पक्षे इट् । इडभावे 'नश्चापदान्त—' इत्यनुस्वारः । 'अनुस्वारस्य ययि परसवर्णः' ।

गमेः । गमेरित्यादेशानादेशयोर्ग्रहणमविशेषात् । **गमिष्यतीति** । लृट् । स्यः । षत्वम् । **परस्मैपदग्रहणमित्यादि** । तेनाम्स्यपि

१. परस्मैपदेषु dropped P. २. Dropped D_1. ३. 'गमहन—' D_1. ४. Dropped D_1 ५. Dropped D_2. ६. जग्मिम dropped N, D_3. D_1. ७. स्येडागमः B_2. ८. गम्यात् । गन्ता । गमिष्यति B_2. ९. नि भाव्य Dc_1, Dc_3. Dc_4. १०. द्विः Bc_2 ११. वेद Bc_2.

परस्मैपदे इट् स्यात्[१] । आत्मनेपदयोग्याद्[२]इति केचित् ।[३]

सृप्लृ गतौ । सर्पति । लृदित्वादङ् । असृपत् । 'कृपमृश—' इति वा सिच् । 'अनुदात्तस्य च—' इत्यम् वा । असार्प्सीत् । अस्राप्सीत् । ससर्पिथ । ससृपिव ।[६] स्रप्ता । सर्प्ता ॥[७]

स्कन्दिर् गतिशोषणयोः ।

लुग्वेपि परस्मैपदे अथवान्यस्मिन् सकारादौ प्रत्यये कृति परे इट् स्यादित्यर्थः । तथा चोक्तं काशिकायाम् । 'आत्मनेपदसमानस्थस्य गमेरयमिडागमो नेष्यते । अन्यत्र सर्वत्रैवेष्यते । कृत्यपि भवति परस्मैपदलुकि च । संजिगमिषिता व्याकरणस्य जिगमिषत्वमिति । पदशेषकारस्य पुनरिदं दर्शनं गम्युपलक्षणार्थं परस्मैपदग्रहणम् । परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात् सकारादेरार्धधातुकस्येड् भवतीति । तन्मतेन संजिगंसिता व्याकरणस्येति । भवितव्यमिति । आत्मनेपदयोग्यादिति । अर्वाचीनमतमेतत् । अगमिष्यत् ।

सृप्लृ । सर्पतीति । लट् । शप् । गुणः । रपरः । लृदित्वाद-ङिति । 'पुषादि—' इति । असृपदिति । अट् । 'इतश्च' इतीकार लोपः । असार्प्सीदिति । अमभावे रूपम् । 'वदव्रज—' इति वृद्धिः । 'अस्ति—' इतीट् । अस्राप्सीदिति । अमुपक्षे रूपम् । वृद्धिः । ससर्प । ससृपतुः । ससर्पिथ । ससृपिवेति । क्रादिनियमादिट् । सर्प्ता । स्रप्तेति । 'अनुदात्तस्य—' इत्यम् वा । सृप्यात् । सर्प्स्यति । स्रप्स्यति । अस्रप्स्यत् । असर्प्स्यत् ।

स्कन्दिर् ।

---

१. After it—जिगमिषुः B_2. २. °योगाद्° D_4, P, C, B_1, B_2 N. ३. After it—जिगमिषुः D_4. ४. अस्राप्सीत् । असार्प्सीत् C. ५. Before it—असृपत् । ससर्प D_2. ६. After it—ससृपिम D_4. ७. After it—सर्प्स्यति । स्रप्स्यति B_2. ८. Dropped Bc_2. ९. एव dropped Dc_3. १०. °लक्षणं Bc_2 ११. Dropped Bc_2.

वेः स्कन्देरनिष्ठायाम् ॥८।३।७३॥

वेः परस्य स्कन्देः षत्वं वा स्यान्न तु निष्ठायाम्।[1][2] विस्कन्दति। विष्कन्दति। निष्ठायां तु

परेश्च ॥८।३।७४॥

अस्मात् स्कन्देर्वा षत्वम्।[3] परिस्कन्दति। परिष्कन्दति।[4] निष्ठायामपि वा षत्वम्।[5][6] परिष्कण्णः। परिस्कन्नः।[7] इरित्वादङ् वा। अस्कदत्। अस्कान्त्सीत्। अस्कान्ताम्।[8] चस्कन्दिथ। झरो झरि सवर्णे। चस्कन्थ। स्कद्यात्।

वेः। **विष्कन्दतीति**। **विस्कन्दतीति**। लट्। शप्। **विस्कन्न इति**। 'निष्ठा' इति क्तः। 'रदाभ्याम्—' इति तकारदकारयोर्नत्वे 'अनिदिताम्—' इति नलोपः।

परेः। **निष्ठायामपि वा षत्वमिति**। पृथग्योगकरणसामर्थ्यादिति भावः। स्कन्देत्। अस्कान्त्सीत्। चस्कन्द। चस्कन्दतुः। **चस्कन्दिथेति**। 'ऋतो भारद्वाज—' इति वेट्। स्कन्त्ता। **स्कद्यादिति**। 'अनिदिताम्—' इति नलोपः। स्कन्त्स्यति। अस्कन्त्स्यत्।

---

१. अनिष्ठायां षत्वं वा स्यात् D_1. २. विष्कन्दति। विस्कन्दति D_4, N. ३. षत्वं वा स्यात् D_3. ४. परिष्कन्दति। परिस्कन्दति N. ५. वा निष्ठायामपि षत्वम्। D_1. ६. After it—अनिष्ठायामिति योगविभागसामर्थ्यादननुवृत्तेः D_2. ७. परिष्कन्नः B_2. ८. From इरित्वात् to अस्कान्ताम् dropped D_2; N and D_3 have for it only अस्कान्त्सीत्। अस्कदत्।: स्कलाङ् वा D_4. ९. After it—अस्कान्त्सुः C. १०. स्कन्त्ता। स्कन्द्यात्। स्कन्त्स्यति। अस्कन्त्स्यत् D_1, B_2; झरो झरि सवर्णे। स्कन्त्ता। स्कद्यात्। N_1. ११. नलोपः Dc_3. १२. नलोपः Dc_3.

तॄ प्लवनतरणयोः । ऋत इद्धातोरिति प्राप्ते इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेनेति गुणः । तरति । अतारीत् । ऋच्छत्यॄतामिति गुणः । गुणाकारत्वेऽपि तॄफलभजत्रपश्चेत्येत्वम् । तेरतुः । तेरुः । ऋदन्तत्वात् सर्वत्रेट् । तेरिथ । तेरिव ।

वॄतो वा ॥७।२।३८॥

वृङ्वृञ्भ्यामॄदन्ताच्च इटो दीर्घो वा स्यान्न तु लिटि ॥ तरिता । तरीता । लिटि तु । तेरिम ।

तॄ । सेट् । तरीतेत्यत्रान्तरङ्गत्वादित्वं स्यादित्याशङ्क्याह । ऋत इद्धातोरित्यादि । तरत् । अतारीदिति । लुङ् । सिच् 'आर्धधातुकस्येड् वलादेः' । 'सिचि वृद्धिः—' इति वृद्धिः । अतारिष्टाम् । अतारिषुः । ततार । गुणाकारत्वे इति । गुणाकारत्वे सति न 'ऋच्छत्यॄताम्' इत्येत्वाभ्यासलोपनिषेधे प्राप्ते पात्यर्थः ।

वॄतः । वॄत इति किं वॄ वरणे अस्यैव ग्रहणमथवा ऋकारान्तानामथास्य ऋकारान्तानां च अथवा वृङ्वृञोश्चान्येषामॄकारान्तानामथवा वृङ्वृञोश्च ऋकारान्तानाम् । तत्र यदि प्रथमः पक्षः स्यात् तदा व्र इत्येवं निर्देशं कुर्यात् यथा 'ग्रो यङि' इति । अथ द्वितीयः अस्य पृथग् ग्रहणं न कुर्यात् । ऋत इत्यनेनैव सिद्धत्वात् । अथ तृतीयः 'ऋतश्च' इत्यत्र पुनर् ऋशब्देन ह्रस्वग्रहणं न कुर्यात् । इदमेवानुवर्तिष्यते । अथ चतुर्थः वृङ्वृञोः पृथग् ग्रहणं न कुर्यात् । तस्मात् पारिशेष्यात् पञ्चमोऽत्राश्रितः पक्ष इति मत्वाह । वृङ्वृञ्भ्यामॄदन्ताच्चेति । तरिता । तरीतेति । लुट् । तासिः । इट् । गुणः । रपरः । तेरिमेति । 'ऋच्छ—' इति गुणः । रपरः । द्वित्वम् । 'तॄफल—' इत्येत्वाभ्यासलोपौ ।

१. C has भजतः after it : D_3 has भवतः after it. २. Dropped B_2, N. D_4 : before it—स्कन्त्ता D_4. ३. After it—तेरिम D_3. ४. वा दीर्घः B_1, D_2, N_1. ५. B_1, D_2, N_1 have तेरिव before it ; लिटि तु तेरिम dropped D_3. ६. रपरत्वम् । 'तॄफल—' De_3.

सिचि च परस्मैपदेषु ॥७।२।४०॥

वृङ्वृञ्भ्यामॄदन्ताच्च इटो दीर्घो न स्यात् सिचि परस्मैपदेषु। अतारिष्टाम्।

न लिङि ॥७।२।३९॥

वॄत इटो लिङि न दीर्घः। तरिषीष्ट। यासुटः कित्त्वान्न गुणः।

ॠत इद्धातोः ॥७।१।१००॥

ॠदन्तस्य धातोरिकारोऽन्तादेशः स्यात्। रपरत्वम्। हलि चेति दीर्घः। तीर्यात्। तरिष्यति। तरीष्यति।

पञ्च मङ्क्तं।

सिचि। अतारिष्टामिति। 'तस्थस्थमिपाम्—' इति तसस्ताम्। इट्। सिच्। वृद्धिः।

न लिङि। तरिषीष्टेति। आशीर्लिङ्। कर्मण्यात्मनेपदम्। 'लिङः सीयुट्'। इट्। 'सुट्तिथोः'। षत्वम्। ष्टुत्वम्। **यासुटः कित्त्वादिति**। तीर्यात् इति स्थिते 'किदाशिषि' इत्यनेन यासुटः कित्त्वात्। 'क्ङिति च' इति गुणनिषेध इत्यर्थः।

ॠतः। धातोः किम्। मातॄणाम्। ननु चात्र लाक्षणिकत्वादेव न स्यात्। नैवम्। लाक्षणिकस्याप्यत्रेष्यते चिकीर्षतीति। तरिष्यति। तरीष्यति। 'वॄतो वा' इति वा दीर्घः। अतरिष्यत्। अतरीष्यत्।

पञ्च। इत आरभ्य त्रयोऽनिटः।

---

१. न दीर्घः D4. २. वृङ्वृञ्भ्यामॄदन्ताच्च D2. ३. परस्मैपदेषु D c3.

दंशसञ्जस्वञ्जां शपि ॥६।४।२५॥

एषां न्लोपः स्याच्छपि । षत्वम् । निषजति । अटोऽन्तरेऽपि षत्वम् । वृद्धिः । 'चोः कुः' । अनुस्वारपरसवर्णौ । न्यषाङ्क्षीत् । अभ्यासेनान्तरेऽपि अभ्यासस्य च षत्वम् । निषषञ्ज । ससञ्जतुः । ससञ्जुः । ससञ्जिथ । ससङ्क्थ । सङ्क्ता । सज्यात । सङ्क्ष्यति ॥

दंश । दंश दशने । षञ्ज सङ्गे । ष्वञ्ज परिष्वङ्गे । **षत्वमिति** । 'उपसर्गात् सुनोति—' इत्यनेन । **निषजतीति** । 'धात्वादेः षः सः' । **अटोऽन्तरेऽपि षत्वमिति** । 'प्राक्सितादड्व्यवायेऽपि' इति । **वृद्धिरिति** । हलन्तलक्षणा । **न्यषाङ्क्षीदिति** । लुङ् । तिप् । सिच् । अट् । 'इतश्च' । इट् । न्यषाङ्क्ताम । 'झलो झलि' इति सलोपः । न्यषाङ्क्षुः । **अभ्यासेनेति** । 'स्थादिष्वभ्यास—' इत्यनेन । **निषषञ्जेति** । द्वित्वम् । **ससञ्जतुरिति** । संयोगाल्लिटो वा कित्त्वमिति केचित् । **ससञ्जिथ** । **ससङ्क्थेति** । 'ऋतो भारद्वाज—' इति वेट् । **सङ्क्तेति** । लुट् । तासिः । 'चोः कुः ।' अनुस्वारपरसवर्णौ । **सज्यादिति** । 'अनिदिताम्—' इति न्लोपः । **सङ्क्ष्यतीति** । लट् । स्यः । 'चोः कुः' । षत्वम् । अनुस्वारपरसवर्णौ । कषयोगे क्षः । असङ्क्ष्यत् ।

---

१. षञ्ज P; D_4. २. ष्वञ्जां N_1, D_4. ३. नलोपः C, D_2, D_3, D_4. ४. अटान्तरेऽपि B_1, D_3, D_4; अडन्तरेऽपि D_1, D_2. ५. Before it—'चोः कुः' D_3. ६. After it—असाङ्क्ताम् B_1; न्यषाङ्क्ताम् B_2, C. ७. षत्वमभ्यासस्य च D_1; अभ्यासान्तरेऽप्यभ्यासस्य षत्वम् D_3. ८. After it—स्यात् D_2. ९. ससजतुः for it D_3 १०. After it—ससञ्जथुः । ससञ्ज । D_4. ११. After it—असङ्क्ष्यत् D_4. १२. ष्वञ्ज Bc_2, Dc_3. १३. निष्वजतीति Dc_3. १४. अडन्तरेऽपि Bc_2; अटान्तरेऽपि Dc_3. १५. सिचो लोपः Dc_3. १६. संयोगात् परो Dc_3. १७. नस्य लोपः Bc_2; नलोपः Dc_3. १८. °संयोगे Bc_2.

दृशिर् प्रेक्षणे । पश्यति ।

न दृशः ॥३।१।४७॥

दृशश्च्लेः क्सो न स्यात् ॥ इरित्त्वादङ् वा । ऋदृशोऽङि गुणः । अदर्शत् । सिच्पक्षे ।

सृजिदृशोर्झल्यमकिति ॥६।१।५८॥

अनयोरमागमः स्यात् झलादावकिति ॥ वृद्धिः । व्रश्चादीनां षत्वम् । कत्वम् । अद्राक्षीत् । अद्राष्टाम् ।

विभाषा सृजिदृशोः ॥७।२।६५॥

आभ्यां थल इड्वा स्यात् ॥ ददर्शिथ । दद्रष्ठ ।

दृशिर् । **पश्यतीति** । 'पाघ्राध्मा—' इति पश्यादेशः । **इरित्त्वादिति** । 'इरितो वा' इत्यनेन । **अदर्शदिति** । 'ऋदृशः' । अट् । अदर्शताम् ।

सृजि । लघूपधगुणापवादोऽयमम् । **वृद्धिरिति** । अमि कृते हलन्तलक्षणा वृद्धिः । पूर्वं त्वमा बाध्यते । झलि किम् । सर्जनम् । दर्शनम् । अकितीति किम् । सृष्टः । दृष्टः । धातोः स्वरूपग्रहे तत्प्रत्यये कार्यविज्ञानादिह न भवति । देवदृग्भ्याम् । रज्जुसृग्भ्याम् । **अद्राष्टामिति** । तसस्ताम् । अम् । वृद्धिः । 'झलो झलि' इति सलोपः । षत्वम् । ष्टुत्वम् । अद्राक्षुः । ददर्श ।

विभाषा । **ददर्शिथ** । **दद्रष्ठेति** । अम् । षत्वम् । ष्टुत्वम् । द्रष्टा । दृश्यात् । द्रक्ष्यति । अद्रक्ष्यत् ।

---

१. क्सादेशः C, D_1, D_4. २. °र्शति N_1, D_4. ३. After it—पर D_3. ४. कत्वम् dropped P, B_1. ५. आभ्यां परस्य D_3. ६. After it—द्रष्टा । द्रक्ष्यति B_2. ७. रज्जुसृड्भ्याम् Bc_2.

दंश दशने । दशति । अदाङ्क्षीत् ।[1]

कित निवासे[2] रोगापनयने[3] च ।

गुप्तिज्किद्भ्यः सन् ॥३।१।५॥

एभ्यः सन् प्रत्ययः स्यात् ॥[4]

सन्यङोः ॥६।१।९॥

अनभ्यासस्य[5] धात्ववयवस्यैकाचो द्वे स्तः सनि यङि[6] च परे ॥

दश । दशतीति । 'दंशसञ्ज—' इति नलोपः । अदाङ्क्षीदिति । 'सिचि वृद्धिः—' । 'व्रश्च—' इति षत्वम् । कत्वम् । अनुस्वार-परसवर्णौ । इट्[7] । अट् । ददंश । ददंशिथ । ददंष्ठ । दष्टा । दश्यात् । दङ्क्ष्यति । अदङ्क्ष्यत् ।

कित । द्वौ सेट्कौ[8] ।

गुप्ति । गुप गोपने । तिज निशाने[9] क्षमायां च । कित निवासे रोगापनयने च ।

सन्यङोः । ननु च सन्यङोरित्यस्य सनि यङि चेति व्याख्यानमनुपपन्नम् । एवं हि व्याख्यायमाने प्रतीषिषतीति न सिध्येत् । अत्र हि सनो निमित्तत्वात् द्वित्वं[10] न स्यात् । भाव्यं च सनो द्वित्वेन । षष्ठ्यन्तव्याख्याने एवं[11] दोषो न । तत्र हि सन्नन्तस्य यङन्तस्येत्यर्थः । अत एतदपि सिध्यति । अत एव वृत्तिकृतोक्तम्[12] । षष्ठ्यन्तमेतदिति । **न्यासकारेण** चैतदेव विवृतम् । सत्यम् । सप्तमीव्याख्यानेऽपि सन्नन्तस्य यङन्तस्य द्वित्वं स्यात् सन्यङोरकारोच्चारणात्

---

१. B_1 has दस्यात् after it. २. किति D_2, D_3, P, C, B_1, B_2. ३. C has संशये before it ; रोगापनयने निवासे च D_2. ४. B_1, D_1, D_3, D_4 have स्वार्थे after it. ५. अनभ्यासधात्व° D_1. ६. B_1 drops it ; सनि यङि च परे dropped D_3. ७. ईट् Dc_3. ८. इतो द्वौ Dc_3. ९. शातने Bc_2. १०. द्वित्वम् Bc_2, Dc_1, Dc_4. ११ चैव Dc_3. १२. वृत्तिकारेणोक्तम् Dc_3.

धातोरित्यविहितत्वात् सनोत्र नार्धधातुकत्वं तेनेड्गुणौ न स्तः ।
'सनाद्यन्ता—' इति धातुत्वात् शप्तिबादि ॥

पूर्ववत् सनः ॥१।३।६२॥

पूर्वधातुवत् सन्नन्तादपि पदं स्यात् ॥

ज्ञापकात् । अत एवाग्रे वक्ष्यति शपोकारेण सिद्धे सन्यङोरकारोच्चारणमजादेरिति द्वित्वार्थमिति । अथवा सन्यङोरिति सत्सप्तमीयम् । सन्प्रदेशेषु सत्सप्तमीति 'सन्यतः' इत्यादिना ज्ञापितं तथा हि परसप्तमीपक्षे प्रतीषिषतीत्यत्रेत्वमपि न स्यात् समुदायस्य सद्रूपत्वात् सन्परत्वाभावात् । तथा च पदमञ्जर्यां स्तौतिण्योरिति सूत्रेभिहितम् । प्रतीषिषतीत्यत्र सन एव द्विर्वचनमिति षण्परत्वाभावादयं नियमो न प्रवर्तयिष्यते सन्यत इतीत्वमपि तर्हि न प्राप्नोति । समुदायस्य सद्रूपत्वादस्य च सन्परत्वाभावात् । तस्मात् सन्प्रदेशेषु सप्तमी विज्ञेयति ।

पूर्ववत् । पूर्वधातुवदिति सनो यः पूर्वधातुस्तेन तुल्यं पूर्वधातुवत् पदं स्यात् । आत्मनेपदं स्यादित्यर्थः । येन निमित्तेन पूर्वस्मादात्मनेपदं तेनैव सन्नन्तादपीति भावः । आस्ते शेते अनुदात्तेत्वंङित्त्वं चात्मनेपदनिमित्तमत्र तत् सन्नन्तादपि । आसिसिषते । शिशयिषते । 'नेर्विशः' । निविविक्षते । इह न । शिशत्सति । मुमूर्षति । न ह्यत्र शदिम्रियतिमात्रमात्मनेपदनिमित्तम् । किं तर्हि । शिदाद्यपि । यस्य च पूर्वत्रैव निमित्तत्वं निषिध्यते तत् सन्नन्तेपि

---

१. D_1 drops it. २. 'सनाद्यन्ता धातवः' इति धातुसंज्ञा । धातुत्वात् B_2. ३. °तिबादिः D_4. ४. सप्तमीयम् । Bc_2, Dc_3. ५. सन्सप्तमीति विज्ञायत इति । Bc_2. ६. पूर्वमेव Bc_2, Dc_3.

गुपादेः क्रमात् निन्दाक्षमारुग्जयेषु[1] सन्निष्यते । नान्यत्र । चिकित्सति । कितः संदेहे च । विचिकित्सति । अचिकित्सीत् ।[2] चिकित्सामास ।[3]

ऋतेरीयङ् ॥३।१।२९॥

ऋतिः सौत्रो [4]धातुर्घृणार्थः । तस्मादीयङ् प्रत्ययः स्यात् ॥

अनिमित्तम् । अनुचिकीर्षति । पराचिकीर्षति । इह जुगुप्सते मीमांसते इत्यादौ 'अनुदात्तङित—' इत्येव तङ् । अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति । इह त्वस्य सूत्रस्य पाठः सन्प्रसङ्गादिति ज्ञेयम् । **गुपादेरित्यादि** । **रुग्जयेति** प्रायिकमन्यत्रापि दर्शनात् । 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः' । अत्र चिकित्स्यो नाश्यो निग्राह्योपि निन्दाद्यर्थाभावे । चुरादित्वाण्णिच् । गोपायति । तेजयति । संकेतयति । **चिकित्सतीति** । द्वित्वम् । 'कुहोश्चुः' । लट् । तिप् । शप् । चिकित्सेत् । चिकित्सतु । अचिकित्सत् । **अचिकित्सीदिति** । लुङ् । सिच् । 'इट ईटि' । **चिकित्सामासेति** । 'कास्प्रत्यय—' इत्याम् । 'कृञ्चा —' इत्यस्यानुप्रयोगः । चिकित्सिता । चिकित्स्यात् । चिकित्सिष्यति । अचिकित्सिष्यत् ।

ऋते । **घृणार्थ इति** । जुगुप्सार्थे इत्यर्थः । छेङित्यव सिद्धे

---

१. ग्यजेषु D_1. २. After it—अचिकित्सिष्टाम् B_1. ३. After it—चिकित्स्यात् । चिकित्सिता । चिकित्सिष्यति । अचिकित्सिष्यत् B_2. ४. धातुः dropped N, B_2, D_4. ५. Dropped Bc_2. ६. °षणं Bc_2. ७. दृश्यते Dc_3. ८. जुगुप्सा इत्यर्थः Dc_3. ९. ऋतेः छाङि° Bc_2; ऋतेश्च ङित्त्वे न सिद्धे । Dc_3.

ङित्वात् तङ् । ऋतीयते ।[१]

इति परस्मैपदप्रक्रिया ॥

इयङ्वचनं ज्ञापनार्थमित्युक्तम् । ङित्वात्तङिति । 'अनुदात्त—' इत्यनेन । ऋतीयते । ऋतीयेत । ऋतीयताम् । आर्तीयत । ऋतिरयं सौत्रो धातुरित्यस्य इयङ्विषय एव प्रयोगः । तेनार्धधातुके विकल्पो नोदाहृतः । 'वञ्चिलुञ्च्यृतश्च' इति निष्ठायामकित्त्वविधानात् । तत्रेयङ्विकल्पो ज्ञेयः । वृत्तिकारमते त्वार्धधातुके सर्वत्र विकल्पः । तेनार्तिष्टेत्यादि ज्ञेयम् । आर्तीयिष्ट । ऋतीयांचक्रे । ऋतीयिता । ऋतीयिषीष्ट । ऋतीयिष्यते । आर्तीयिष्यत ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगुरथ परस्मैपदिप्रासादयोर्मी ॥

---

१. After it—आर्तीयिष्ट C, D_1 ; (after आर्तीयिष्ट D_1 has ऋतीयिता); ऋतीयेत । ऋतीयताम् । आर्तियत । आर्तियिष्ट । आर्तीत । आनर्त । ऋतीयांचक्रे । अर्तिता । ऋतीयिता । ऋत्यात् । ऋतीयिषीष्ट । D_3 ; आर्तीयिष्ट । आर्तीत् । अर्तिता । ऋतीयिता । D_4. २. ज्ञापकार्थ° Bc_2, Dc_3. ३. विकल्पेनोदाहृताः । Dc_3.

अथात्मनेपदिनः ॥

एध वृद्धौ[1] । एधते । ऐधिष्ट । ऐधिध्वम् ।[2]

आम्प्रत्ययवत् कृञोनुप्रयोगस्य ॥१।३।६३॥

आम् प्रत्ययो यस्मात्[3] कृतः तदनुप्रयुज्यमानस्य[4] कृञ आत्मनेपदं स्यात् अकर्तृगामिन्यपि[5] फले ॥

एध । इत आरभ्य प्यञ्जवर्जिता गाङवधिकाः द्वाविंशतिः सेट्काः[6] । एधते इति । अनुदात्तेत्त्वादात्मनेपदम् । त । शप् । 'टित आत्मनेपदानां टेरे' । एधेते । एधन्ते । एधेत । एधेयाताम् । एधेरन् । एधताम् । एधेताम् । एधन्ताम् । ऐधत । ऐधेताम् । ऐधन्त । ऐधिष्टेति । लुङ् । च्लिः । सिच् । 'आर्धधातुकस्य—' इतीट् । षत्वम् । ष्टुत्वम् । 'आडजादीनाम्' । 'आटश्च' इति वृद्धिः । ऐधिषाताम् । 'आत्मनेपदेष्वनतः' । ऐधिषत । ऐधिध्वम् । 'धि च' इति सलोपः । ध्वे सलोपो वा सस्य दः इति केचिदिति पक्षे ऐधिद्ध्वम् ।

आम्प्रत्ययवत् । 'तत्र तस्येव' इति षष्ठीसमर्थाद्वतिः । आम्प्रत्ययो यस्माद्विहितस्तस्य च अनुप्रयुज्यमानस्य कृञोपि आत्मनेपदं भवतीत्यर्थः[7] । एतच्चाकर्त्रभिप्रायार्थमित्याह । **अकर्तृगेपि** इति । ननु यद्यकर्त्रभिप्रायार्थं तर्हि विध्यर्थं स्यात् । ततश्च उदुम्भां-[8]चकारेत्यत्र कर्त्रभिप्राये तङ् प्राप्नोति । नैष दोषः । उभयमनेन क्रियते विधिर्नियमश्च । कथं पूर्ववदिति वर्तते । स द्वितीयो यत्नः ।

---

१. एध वृद्धौ dropped D_2. २. After it—'इजादेश्च गुरुमत-' इत्याम् B_1, D_2 ; एधेते । एधध्वे for ऐधिष्ट । एधिध्वम् D_3. ३. क्रियते C, D_2, N, drop कृतः; विहितः, P, D_3; dropped D_4. ४. तद्वत्तदनु° B_1; तद्वदनु° D_3, D_4. ५. अकर्तृगामिनि फलेपि च B_1 ; अकर्तृगामिनि फलेपि N, D_1 ; D_4, अकर्तृगामिनि क्रियाफलेपि B_3, D_3. ६. सेटः Bc_2, Dc_3. ७. स्यादित्यर्थः Bc_2. ८. उम्भांचकारे° Dc_3.

एधांचक्रे । ऐधाचकृषे ।

इणः षीध्वं लुङ्लिटां धोऽङ्गात् ॥८।३।७८॥

[1]इणन्तादङ्गात् परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात् ॥ एधांचकृढ्वे । एधांचकृवहे ।[4] कृञः किम् ।

तत्र पूर्वेण 'आम्प्रत्ययवत्—' इत्यादिना वचनेन विधिः क्रियते स मूल एव व्याख्यातः । द्वितीयेन नियमस्तस्यायमर्थः । यदि कृञ् आत्मनेपदं स्यात् तदा पूर्ववदेव स्यादिति । एधांचक्रे इति । लिटि 'इजादेः—' इत्याम् । 'आमः' इति लेर्लुक् । 'कृञ्चा—' इत्यादिना कृञो लिट्परस्यानुप्रयोगः । एधां कृ त इति सति 'लिटस्तझयोरेशिरेच्—' इत्येश् । यणादेशः । 'द्विर्वचनेचि' इति स्थानिवत्त्वात् साच्कस्य द्वित्वम् । 'उरत्' । 'कुहोश्चुः' । एधांचक्राते । एधांचक्रिरे । एधांचकृषे इति । 'थासः से' । क्रादित्वादिडभावः ।

इणः । अत्र इणन्ताद्विहितानामित्यर्थो यदि स्यात् तदा चकृढ्वे इत्यादिष्वेव स्यात् अदिढ्वमित्यादौ दादीनां न स्यात् । नत्सीध्वमित्यादौ नहादीनां प्राप्नुयाच्च । एतद्दोषपरिहाराय इणन्तादङ्गात् परेषामिति व्याकरोति । नन्वेवमप्युच्यमाने ऐधिध्वमित्यादौ प्राप्नुयात् । यद्यपीटः परभक्तत्वाच्छास्त्रकृतमानन्तर्यं नास्ति तथा श्रुतिकृतानन्तर्यस्य सत्त्वात् । उच्यते । 'विभाषेटः' इति इटो विभाषयोक्तत्वात् गोबलीवर्दन्यायेन तद्व्यतिरिक्ते णन्तमङ्गमिह गृह्यते । अथवा श्रुतिकृतमानन्तर्यं नाश्रीयते । ऐधिध्वमित्यादौ न अदिढ्वमित्यादौ स्यात् । पदमञ्जरीकारादिमते ऐधिढ्वमित्यादौ मूर्धन्यो भवत्येव । श्रुतिकृतस्यानन्तर्यस्य

---

१. C drops it. २. इणन्तात परं B1. ३. मूर्धन्यादेशः P, B2, D1, C. ४. After it—एधांचकृमहे D2, N. ५. यत्नेन Dc3. ६. °परस्य कृञोनुप्रयोगः । Bc2. ७. स्थिते Bc2. ८. परत्वाच्छास्त्र Bc2. ९. सत्त्वम् Dc3. १०. ऐधिढ्व° Bc2, Dc3.

एधामास । एधांबभूव । एधिता । एधिषीष्ट । एधिष्यते । ऐधिष्यत ।

दद दाने ।[२] न शशदददेत्युक्तेरत्वं न । ददद‍े ।[३]

ष्वष्क गतौ ।[४] ष्वष्कते ।[५] षष्वष्के ।

संभवात् । तच्च **पदमञ्जर्यां** निपुणतरमुपपादितम् । 'विभाषेटः' इत्यत्र । नेह विस्तरभयाल्लिख्यते । इण्कोरिति वर्तमाने इण्ग्रहणं कवर्गनिवृत्त्यर्थम् । वक्षीध्वमिति । लुङ्लिटां किम् । स्तुध्वे । अङ्गात् किम् । परिवेविषीध्वम् । अर्थवद्ग्रहणादपि सिद्धे विस्पष्टार्थम् । **एधामासेति** । अस्तेः प्रयोगविधानसामर्थ्याद‍स्तेर्भूभावो न । द्वित्वम् । सवर्णदीर्घः । **एधांबभूवेति** । भुवोऽनुप्रयोगः । द्वित्वम् । ह्रस्वः । 'भवतेरः' । अभ्यासजश्च । वकारः । 'भुवो वुक्' इति वुक् । **एधितेति** । लुट् । 'स्यतासी—' इति तासिः । इट् । 'लुटः प्रथमस्य—' इति डा । टिलोपः । एधितासे । एधिताहे । **एधिषीष्टेति** । आशीर्लिङ् । लिङः सीयुट् । इट् । यलोपः । 'सुट्तिथोः' । षत्वमुभयत्र ष्टुत्वम् । एधिषीयास्ताम् । एधिषीय । **एधिष्यत इति** । लृट् । त । एत्वम् । स्यः । इट् । षत्वम् । **ऐधिष्यतेति** । लृङ् । स्यः । इट् । आट् । वृद्धिः । शेषं प्राग्यथर्भूवत् ।

दद । ददते । ददेत । ददताम् । अददत । अददिष्ट । **ददद‍े इति** । एश् । द्वित्वम् । ददिता । ददितासे । ददिषीष्ट । ददिष्यते । अददिष्यत ।

ष्वष्क । **ष्वष्कत इति** । सुभ्धातुष्ठिवुष्वष्कतीनां सत्वनिषेधः । अष्वष्किष्ट । **षष्वष्के इति** । 'हलादिः शेषः' । ष्वष्किता । ष्वष्किषीष्ट । ष्वष्किष्यते । अष्वष्किष्यत ।

---

१. एधिषीध्वम् B1: एधिषीध्वम् after एधिषीष्ट D2. २. After it—ददतं B2. ३. After it—अददिष्ट । अददिषाताम् D4. ४. B1 drops ष्वष्कते. ५. Dropped D3: अष्वष्किष्ट । अष्वष्किषाताम् after it D4. ६. पर्भीष्वमिति Bc2, Dc3. ७. Before it—वेष्टा Bc2. Dc3. ८. जइत्वं Bc2, Dc3.

ऋज गतौ स्थैर्ये च । अर्जते । आर्जिष्ट । अत आदेरिति दीर्घः । ऋकारैकदेशो रेफोपि नुड्विधिं प्रति हल् । तेन तस्मान्नुड् द्विहल इति नुट् । आनृजे । अर्जिषीष्ट ।

तिज निशाने क्षमायां च । तितिक्षते ।[२]

ऋज । अर्जते इति । 'पुगन्त—' इति गुणः । रपरः । टेरेत्वम् । आर्जिष्टेति । सिच् । इट् । गुणः । आट् । वृद्धिः । षत्वम् । ष्टुत्वम् । 'अत आदेः' इति दीर्घः इति । ऋज् एश् इति स्थिते 'उरत्' इत्यत्वे च कृते अ ऋज् ए इत्यत्र । ऋकारैकेत्यादि । ऋकारैकदेशो रेफोपि नुड्विधिं प्रति हल्ग्रहणेन गृह्यत इत्यर्थः । कथं वर्णात्मना हलां ग्रहणेनावर्णात्मको गृह्यत इति चेन्नैष दोषः । द्विहल्सामर्थ्यात् । न च 'तस्मान्नुड्' इत्येवोक्ते अटित्यत्रापि प्रसङ्गः स्यादिति वाच्यम् । 'अश्नोतेश्च' इत्यस्य नियमार्थत्वात् । अद्विहलो यदि भवति अश्नोतेरेव नान्यस्येति । तस्मादन्तरेणापि द्विहल्ग्रहणं सिद्धे यद् द्विहल्ग्रहणं करोति तस्यैतत् प्रयोजनं यस्याप्येको मुख्यो हलवयवो द्वितीयस्तु तच्छायानुकारित्वादुपचारेण हल्व्यपदेशार्हस्तस्यापि स्यादिति । अर्जिता । अर्जिष्यते । आर्जिष्यत ।

तिज । तितिक्षते इति । 'गुप्तिज्किद्भ्यः सन्' इति सन् । 'सन्यङोः' इति द्वित्वम् । धात्वधिकारणविहितत्वात् सनो नार्धधातुकत्वम् । तेनेड्गुणौ न । 'चोः कुः' । षत्वम् । कषसंयोगे क्षः । 'सनाद्यन्ताः' इति धातुत्वात् शबादि । एत्वम् । अतितिक्षिष्ट । तितिक्षांचक्रे । तितिक्षिता । तितिक्षिषीष्ट । तितिक्षिष्यते । अतितिक्षिष्यत ।

---

१. N_1 drops from आर्जिष्ट to दीर्घ. २. After it C has—निशाने गुणाहित्वात् णिच् । तेजयति ।. ३. कत्वं षत्वम् । Dc3. ४. क्षत्वम् Bc_2.

ष्वञ्ज परिष्वङ्गे । निष्वजते ।

सिवादीनां वाड्व्यवायेपि ॥८।३।७१॥

परिनिविभ्यः परेषां सिवसहसुट्स्तुस्वञ्जामड्व्यवायेपि वा[1] षत्वं स्यात् ॥ [2]झलो झलि । [3]न्यस्वङ्क्त । न्यष्वङ्क्त ।

[4]स्वञ्जेः [5]संयोगादपिल्लिटो वा कित्त्वम् ।[6] सस्वञ्जे । सस्वजे ।

ष्वञ्ज । निष्वजते इति । 'दंशसञ्जष्वञ्जाम्' इति न[7]लोपः । 'परिनिविभ्यः सेव' इत्यादिना षत्वम् ।

सिवादीनाम् । प्रत्यासत्तेः 'परिनिविभ्यः—' इति सूत्रे संनिविष्टा एव सिवादयो गृह्यन्त इत्यभिप्रेत्याह । **सिवसहेत्यादि** । उभयत्रविभाषेयम् । स्तुस्वञ्जोः प्राक् सितादिति प्राप्ते इतरेषामप्राप्ते । **न्यस्वङ्क्तेति** । षत्वाभावे रूपमेतत् । लुङ् । सिच् । 'चोः कुः' । अनुस्वप सवर्णौ । अडागमः । षत्वपक्षे रूपं **न्यष्वङ्क्तेति** । अस्वङ्क्ताम् । अस्वङ्क्षत । स्वञ्जेरित्यादि । वक्तव्यमिति शेषः ।

सस्वञ्जे इति । द्वित्वम् । 'हलादिः शेषः' । कित्त्वाभावे एतत् । **सस्वजे इति** । कित्त्वात् 'अनिदिताम्—' इति न[10]लोपः ।

---

१. षत्वं वा B_2. २. Dropped B_2. ३. न्यष्वङ्क्त । न्यस्वङ्क्त D_1, D_3; न्यष्वङ्क्त । व्यष्वङ्क्त । D_4: व्यष्वङ्क्त and व्यस्वङ्क्त in place of न्यष्वङ्क्त and न्यस्वङ्क्त D_2, P, C, B_1, B_2. ४. ष्वञ्जेः N_1. ५. संयोगादेरपि° P; संयोगान्तादपि° C. ६. After it—कित्वान्नलोपः B_2. ७. नलोपः Dc_3. ८. न । सिच् । Dc_3. ९. अट् । Dc_2. १०. न्लोपः । Bc_2.

सदिष्वञ्ज्योः परस्य लिटि ॥८।३।११८॥

अनयोरभ्यासात् परस्य सस्य षत्वं न स्याल्लिटि ॥ परिसस्वञ्जे । स्वङ्क्ता । स्वङ्क्षीष्ट ।

त्रपूष् लज्जायाम् । ऊदित्वाद्वेट् । अत्रपिष्ट । अत्रप्त । तफलेत्येत्वम् । त्रेपे । त्रपिता । त्रप्ता ।

जभ गात्रविनामे ।

रधिजभोरचि ॥७।१।६१॥

अनयोर्नुमागमः स्यादचि ॥ जम्भते । अजम्भिष्ट ।[1]

सदि । **परिषस्वजे** इति । पूर्वस्य षत्वम् । **स्वङ्क्तेति** । लुट् । तासिः । कुत्वम् । अनुस्वारपरसवर्णौ । **स्वङ्क्षीष्टेति** । 'लिङः सीयुट्' । कुत्वानुस्वारपरसवर्णषत्वानि । लृट् । स्वङ्क्ष्यते । अस्वङ्क्ष्यत ।

त्रपूष् । त्रपते । **ऊदित्वादिति** । 'स्वरतिसूति—' इत्यादिना । **अत्रपिष्टेति** । सिच् । वेट् । **अत्रप्तेति** । इडभावे 'झलो झलि' इति सलोपः । **त्रपिता** । **त्रप्तेति** । वेट् । त्रप्सीष्ट । त्रपिषीष्ट । त्रपिष्यते । त्रप्स्यते । अत्रपिष्यत । अत्रप्स्यत ।

जभ ।

रधिजभोः । रध हिंसासंराध्योः । जभ उक्तार्थः । वृद्धिः परापि सती नुमा नित्यत्वाद् बाध्यते । रन्धयति । जम्भयति । अचि किम् । रद्धा । **जम्भत** इति । नुम् । मित्त्वादन्त्यादचः परः । **अजम्भिष्टेति** । लुङ् । त । सिच् । इट् । नुम् । षत्वम् । ष्टुत्वम् । अट् । जजम्भे । जम्भिता । जम्भिषीष्ट । जम्भिष्यते ।

१. Dropped D_1. २. षस्वजे N_1, D_2, D_3, D_4. ३. After it—जजम्भे D_1. ४. लिङ् । सीयुट् । Dc_3.

ष्टुभ स्तम्भे । विष्टोभते । व्यष्टोभिष्ट । तुष्टुभे ।[1]

पण व्यवहारे स्तुतौ च । गुपूधूपेत्यायः।[2] पणे[3] स्तुतावेवायं[4] प्रत्ययः। अनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम् । पणायति । वेति केचित् । पणायते। गोपायति[5] । गोपायते। [6]अपणायीत्। अपाणिष्ट । पणायांचकार। [7]पणायांचक्रे। पेणे।

ष्टुभ । विष्टोभत इति । 'उपसर्गात् सुनोति—' इति षत्वम् । ष्टुत्वम् । अष्टोभिष्टेति । अड्व्यवायेपि षः । तुष्टुभे इति । द्वित्वम् । 'शर्पूर्वाः खयः' । षत्वम् । स्तोभिता । स्तोभिष्यते ।

पण । पणे स्तुतावेवेति । स्तुत्यर्थेन पनिना साहचर्यात् तदर्थः पणिः प्रत्ययमुत्पादयति न व्यवहारार्थ इत्यभिप्रायः । अथ पणायतीत्यत्रात्मनेपदं किं न स्यात् यतः पणिरयमनुदात्तेदित्याशङ्क्याह । अनुबन्धस्येति । अनुदात्तस्येत्यर्थः ।[8] पणायतीति । 'सनाद्यन्ताः—' इति धातुत्वात् तिप् । शप् । वेति केचिदिति । तथोक्तं मुग्धबोधे । 'सनः पमे धोर्वा त्वायात्' इति । अपणायीदिति । लुङ् । च्लिः । सिच् । 'इट ईटि' । अपणिष्टेति । 'आयादय आर्धधातुके वा' इति यदायु नास्ति तदेदम् । सिच् । इट् । केषांचिन्मते अपणायिष्ट । पणायांचकारेति । प्रत्ययान्तत्वादाम् । पेणे

१. After it—स्तोभिषीष्ट । स्तोभिता B_2. २. त्यायादयः B_1. ३. पणे D_4. ४. °वेवाय B_1; °वेवायः प्रत्ययः D_1. ५. गोपायति । गोपायते dropped D_1, D_3. ६. P has-अगोपायीत् । अगोपिष्ट । पणायांचक्रे and C has—अपणायीत् । 'आयादय-' इति वायप्रत्ययः । अपणायिष्ट । अपाणिष्ट । पणायांचकार । पेणे in place of अपणायीत.. पणायांचकार ; B_2, D_3 have after it—अपणायिष्ट : D_2 has अपणायिष्ट before it. ७. पणायांचक्रे । dropped D_2, D_4, B_1, B_2: पेणे dropped D_3. ८. After it Bc_2 has—अवयवे चरितार्थं लिङ्गं समुदायस्य विशेषकं न भवतीति न्यायादिति । ९. यदायो नास्ति तदा सिच् Bc_2.

पणेर्व्यवहारे तु शतस्य पणते। पन च। पनायतीत्यादि॥

कमु कान्तौ।

कमेर्णिङ् ॥३।१।३०॥

कमेर्धातोर्णिङ् प्रत्ययः[2] स्यात् स्वार्थे॥ उपधावृद्धिः[3]।

इति। आयाभावे 'अत एकहल्मध्ये—' इत्येत्वाभ्यासलोपौ। पणायांचक्रे। पणायिता। पणिता। पणाय्यात्। पणिषीष्ट। पणायिषीष्ट। पणायिष्यति। पणिष्यति। पणायिष्यते। अपणायिष्यत्। अपणिष्यत्। अपणायिष्यत। **शतस्य पणत** इति। व्यवहरतीत्यर्थः। 'व्यवहृपणोः—' इति षष्ठी। **पन च**। चकारा स्तुतौ। पनायतीत्यादि। आयप्रत्ययः। आदिशब्दात् पनायेत् इत्यादिरूपाणि पणवत्[4] ज्ञेयानि। **क्षीरस्वामिपक्षे** आयप्रत्ययान्तादपि पनेरात्मनेपदम्। यथाह **क्षीरतरङ्गिण्याम्**। पनायते हरिम्। अत्रावयवे हि कृतं लिङ्गं समुदायस्य विशेषकं भवतीत्यवयव-व्यवधानेऽप्यात्मनेपदमिति।

कमु। कान्तिरभिलाषः।

कमेः। णकारो वृद्ध्यर्थः[5]। ननु च यदि वृद्ध्यर्थो णकारस्तर्हि 'न कम्यमिचमः' इति मित्संज्ञा प्रतिषेधो व्यर्थः। णित्करणसामर्थ्यादेव हि ह्रस्वत्वं न स्यात्। अन्यथा णित्करणं व्यर्थं स्यादिति। नैवम्। नानर्थकं णित्वम्। तस्य 'णेरनिटि' इति सामान्यग्रहणार्थत्वात्। अन्यच्च 'आयादय आर्धधातुके वा' इति यदा णिङ् नास्ति हेतुमण्णिच्कृतस्तदा ह्रस्वो मा भूदित्येवमर्थो मित्संज्ञाप्रतिषेधः। ङकार आत्मनेपदार्थः। उपधावृद्धिरिति। 'अत उपधायाः' इत्यनेन।

---

१. पणे: dropped N. २. प्रत्ययः dropped C. ३. उपधाया वृद्धिः C.
४. पणिवत् Bc3, Dc3. ५. णकारो वृद्ध्यर्थ° Bc2.

शप् । तिबादि । गुणायादेशौ । कामयते । ण्यन्तत्वात् च्लेश्चङ् ॥

णौ चङ्युपधाया ह्रस्वः ॥७।४।१॥

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ॥

शप्तिबादि । 'सनाद्यन्ताः—' इति धातुसंज्ञायां सत्यां तिबादयश्च शप् च स्यादिति भावः । **गुणायादेशाविति** । कामि अ ते स्थिते 'सार्वधातुक—' इति गुणः । 'एचोऽयवायावः' इत्याय् । कामयेत । कामयताम् । अकामयत । ण्यन्तत्वात् 'च्लेश्चङ्' इति 'णिश्रि—' इत्यादिना कामि अ त इति स्थिते द्वित्वे प्राप्ते परत्वादादौ 'णेरनिटि' इति णिलोपः । सौकर्यार्थमन्ते णिलोपसूत्रं पठितं ज्ञेयम् । णिलोपे द्वित्वे प्राप्ते परत्वादादौ ह्रस्व इत्यभिप्रेत्यादौ पठति ।

णौ चङि । चङ्परो यस्मात् स तथोक्तः । चङ्युपधाया ह्रस्व इत्येतावत्युच्यमाने असति णिग्रहणे चङि परतो यदङ्गं तस्योपधाया ह्रस्व इत्यर्थः स्यात् । एवं च चङि णिसहितमङ्गं तथा चानवकाशो ह्रस्वोऽलीलवदित्यादावन्तरङ्गामपि वृद्धिं बाधित्वा वचनसामर्थ्यादकारस्यैव स्यात् । अथापि कथंचिद् वृद्धिर्न बाध्यते एवमपि तस्यां सत्यां अन्तरङ्गमप्यावादेशं बाधित्वा ओकारस्य स्यात् । अन्यथा वचनं व्यर्थं स्यात् । कृतेऽप्यावादेशे ह्रस्वाप्राप्तौ अदीदपत् इत्यत्र च दातेर्णिचि चङि च कृते दा इ अत् इति स्थिते वचनप्रामाण्यादनवकाशो ह्रस्वोऽन्तरङ्गमपि पुकं बाधित्वा प्रवर्तेत । तस्मिन् च सति पुक् विहितनिमित्तत्वाभावान्न स्यात् । अपीपचदित्यत्र चङि परतो यदङ्गं पाचीति तस्योपधायाश्चकारस्य ह्रस्वासंभवात् ह्रस्वो न स्यादेव । तस्माण्णाविति वक्तव्यम् । तदेतत् सर्वं मनसि कृत्वा व्याकरोति । **चङ्परे णौ यदङ्गमिति** ।

---

१. तिबादिः P, D1, D4. २. च्लेः dropped C. ३. स्युरिति Bc2. ४. त इति Dc3. ५. Before it—कामयते Dc3. ६. णि लोपे सूत्रे वचनं ज्ञेयम् Dc3. ७. णिलोपे कृते Dc3. ८. णेः स Dc3. ९. °रयुक्ते Bc2. १०. अपि Dc3. ११. मप्यादेशं Dc3. १२. पुग्विधिर्हि अनिमित्तत्वान्न स्यात् Bc2.

सन्वल्लघुनि चङ्परेऽनग्लोपे ॥७।४।९३॥

लघुनि धात्वक्षरे परे अभ्यासस्य सन्वत् कार्यं स्यात् चङ्परे[1] णौ न त्वग्लोपे ॥

सन्यतः ॥७।४।७९॥

अभ्यासस्यात इकारः[2] स्यात् सनि ॥

सन्व । 'सन्यतः' इत्यादिना सूत्रत्रयेण यदभ्यासस्य सनि कार्यं विहितं तल्लघुनि चङ्परेतिदिश्यते । लघुनि चङ्परे इति च व्यधिकरणे सप्तम्यौ । चङ्परे चङि परतो यत् पूर्वमङ्गं तस्य संबन्धि यल्लघु तस्मिन् परतो योऽभ्यासस्तस्य सन्वद् भवतीति । चङ्पर इति बहुव्रीहिः । चङ् परो यस्मादिति चङ्परः । सामर्थ्यात्[3] । अगिति प्रत्याहारः । तस्य लोपोऽग्लोपः । एवं सूत्रार्थमभिप्रेत्याह । लघुनीत्यादि । लघुनि किम् । अततक्षत् । अजजागरदित्यत्र केचिद् गृशब्दं[4] लघुमाश्रित्य सन्वद्भावमिच्छन्ति । कथमिच्छन्ति । यतो लघुनि पर इत्युच्यते व्यवहितं चात्र लघु । सत्यम् । तथापि अचीकरदित्यादौ ककारादिव्यवधानेऽपि वचनप्रामाण्याद्यथा सन्वद्भावस्तथात्रापि व्यवधानेऽपि भविष्यतीति । तदसत् । एकेन हि वर्णेन सर्वत्र व्यवधानमस्ति वर्णसमूहेन तु न कुत्रचित् तत्राशक्यपरिहारेणैकवर्णेन व्यवधानेऽपि वचनप्रामाण्याद् भवति न तु शक्यपरिहारेण वर्णसमूहेन । एवं चेदंचिक्षणदित्यत्र कथं सन्वद्भावः । उच्यते । यदयं 'अत्स्मृदृ—' इतीत्वबाधनार्थमत्वं विदधाति स ज्ञापयति भवत्येवंजातीयकानामित्वमिति । चङ्ग्रहणं किम् । अहं पपच । परग्रहणं किम् । चङ्येव केवले मा भूत् । अचकमत । अनग्लोपे किम् । अचकथत् । अमीमवदित्यादौ अत्र ग्रहणात् सन्वद्भावेनाभ्यासलोपो न भवति । सन्यतः ।

१. णौ परे D_2, N_1. २. इत C. ३. सामर्थ्याण्णिः Dc_3. ४. °शब्दे Dc_3.
५. Dropped Dc_3. ६. Dropped Dc_1. ७. °च्भण° Dc_3.

दीर्घो लघोः ॥७।४।९४॥

लघुनि धात्वक्षरे परे हलादेर्लघोरभ्यासस्य दीर्घः स्यात् चङ्परे णौ ने त्वग्लोपे ॥

णेरनिटि ॥६।४।५१॥

अनिडादावार्धधातुके परे णेर्लोपः स्यात् । इयङ् । गुणादेरपवादः । अचीकमत । णिङभावपक्षे । कमेश्च्लेङ् वाच्यः ॥ णेरभावान्न दीर्घसन्वद्भावौ । अचकमत ।

अयामन्ताल्वाय्येत्न्विष्णुषु ॥६।४।५५॥

आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात् ॥

तपरग्रहणं किम् । पापच्यते । सन् । पापच्चिषते । अत्र मा भूद्दीर्घः । अत्र यद्यपि हलादेरिति नास्ति तथाप्यर्वाचीनमतेनोक्तम् । तथा च प्रदीपे उक्तम् । हलादेः किम् । और्णुनवदिति ।

णे । णेरिति णिङ्णिचोः सामान्यग्रहणम् । इयङादिभिः सर्वस्य विषयस्याविष्टब्धत्वादनवकाशः सन् णिलोपस्तान् बाधत इत्यभिप्रेत्याह । इयङादेरिति । आदिना यण्वृद्धिदीर्घग्रहणम् । अचीकमतेति । णिलोपः । प्रत्ययलक्षणेनोपधाया ह्रस्वः । द्वित्वम् । चुत्वम् । अचीकमताम् । णिङभावपक्षे इति । 'आयादयः—' इत्यनेन ।

अयामन्त । 'णेरनिटि' इति प्राप्तस्य णिलोपस्यापवादोयमाय् । ननु णिलोपोनुवर्तते तत्र नेत्येव वाच्यं लाघवार्थं न उत्तरार्थमायादेश-

---

१. णौ परे D_2, N_1. २. अनग्लोपे D_1, D_4, N_1. ३. Dropped N_1, D_4. ४. °श्च्लेश्चङ् B_2. ५. °वादोयम् । Bc_2, Dc_3. ६. णिलोपो न प्रवर्तते Dc_3. ७. तत्र णेस्येवं Dc_3.

कामयांचक्रे । चकमे ।[1] इडादित्वान्न णिलोपः । कामयिता । कमिता ।[2]

अय गतौ । अयते ।[3]

उपसर्गस्यायतौ ॥८।२।१९॥

अयतौ परे [4]उपसर्गरेफस्य लत्वं स्यात् ॥ प्लायते । पलायते । पल्ययते ।

वचनम् । **कामयांचक्रे** इति । प्रत्ययान्तत्वादाम् । कृञोऽनुप्रयोगः । 'आम्प्रत्ययवत्—' इत्यात्मनेपदम् । कामयिषीष्ट । कमिषीष्ट । कामयिष्यते । कमिष्यते । अकामयिष्यत । अकमिष्यत ।

अय ।

उपसर्गस्य । इह द्वौ पक्षौ । अयतिग्रहणं रेफविशेषणमित्येकः । उपसर्गविशेषणमिति द्वितीयः । अत्र प्रथमे पक्षे वृत्तिः सुयोज्या । द्वितीये त्वेवं नेया । अयतौ परतो य उपसर्गस्तस्य रेफस्य लत्वं स्यादिति । **प्लायते** । **पलायते** इति । सवर्णदीर्घः । ननु चाद्यपक्षे लत्वं न स्यात् । यावता प्लायते पलायते इत्यत्र तस्मिन् कर्तव्ये 'अचः परस्मिन्—' इत्येकादेशस्य स्थानिवद्भावात् धातूपसर्गविभागे सति अवर्णेन व्यवधानाद्रेफस्यायतिः परो न संभवतीति पल्ययत इत्यत्र च यकारेण व्यवधानादिति चेत् मैवम् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधानेऽपि लत्वं भवति । प्लायते इत्यादिषु ।

---

१. After it-चकमाने P, C, B_1. २. After it—कामयिष्यते । कमिष्यते B_2. ३. Dropped D_4. ४. उपसर्गस्य रेफस्य D_1, N_1. ५. उपसर्गग्रहण° Dc_1. ६. तत्र Bc_2. ७. सवर्णदीर्घः Bc_2, Dc_3. ८. भवतीति Bc_2. ९. पल्यत इत्यत्र Dc_3.

प्रत्यय इति ज्ञापकात् प्रतेर्न । प्रत्ययते । निस्दुस् एतयो रेफस्यासिद्धत्वान्न लत्वम् । निरयते । दुरयते । आयिष्ट । आयिढ्वम् । आयिध्वम् ।

दयायासश्च ॥३।१।३७॥

दय[१] अय आस्[२] एभ्य आम्[३] स्याल्लिटि ॥ अयांचक्रे ।[४]
दय दानगतिहिंसादानेषु । अदयिढ्वम् । अदयिध्वम् । दयांचक्रे ।[५]

प्रत्ययते इत्यत्र तु न भवति । वर्णसमुदायेन व्यवधानात् । द्वितीये तु पक्षे सिद्धमेव सर्वत्र लत्वम् । तत्पक्षे प्रतेरपि प्राप्नोति तन्निवारणायाह । प्रत्यय इति ज्ञापकादिति । एतच्च दुर्मित्रमतेनोक्तम् । प्रत्यय इति सूत्रे प्रत्ययते ज्ञायतेऽर्थोऽस्मादिति प्रत्ययः 'पुंसि संज्ञायां घः प्रायेण' इति घान्तस्य प्रत्ययशब्दस्यान्वर्थस्य निर्देशो ज्ञापक इति भावः । तथा च इन्दुमत्यां वृत्तावुक्तम् । 'प्रतेस्तु व्यञ्जनव्यवहितो य इति न निमित्तम्'[६] इति । प्रत्यय इति ज्ञापकमिति केषांचिन्मते प्रतेरपि भवति लत्वम् । स्पष्टत्वात् त्यक्तं प्रसङ्गाद्व्याख्यायते । 'परेश्च घाङ्कयोः' ॥८।२।२२॥ रस्य लो वा । परिघः । पलिघः । पर्यङ्कः । पल्यङ्कः । योगे च । परियोगः । पलियोगः । आयिष्टेति । लुङ् । सिच् । इट् । 'आडजादीनाम्' । आयिढ्वम् । आयिध्वमिति । 'विभाषेटः' इति वा मूर्धन्यः ।

दयाय । दय दानादिषु । अय गतौ । आस उपवेशने । अयिता । अयिषीष्ट । अयिषीढ्वम् । अयिषीध्वम् । आयिष्यते । आयिष्यत ।

दय । दयते । अदयिष्ट । अदयिढ्वम् । अदयिध्वमिति वा मूर्धन्यः । दयांचक्रे इति । 'दयाय—' इत्याम् । दयिषीध्वम् । दयिषीढ्वम् । दयिष्यते । अदयिष्यत ।

---

१. Dropped D_3, P, C, N. २. दय् अय् C ३. आस P, D_1. ४. After it—अयिता । अयिषीष्ट । आयिष्यते B_2. ५. Before it—दयते P, B_1, B_2. ६. प्रतेस्तु व्यवहितेयतिनिमित्तमिति Bc_2.

स्फायी वृद्धौ। स्फायते। चायस्फायप्यायामिड्वेति केचित्।[1] अस्फायिष्ट। लोपो व्योर्वलि। अस्फास्त। पस्फाये।

आप्याया वृद्धौ।

दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्याम् ॥३।१।६१॥

दीपादिभ्यश्च्लेश्चिणादेशः स्याद्वा एकवचने तशब्दे परे ॥

स्फायी। स्फायते। केचिदिति। हेमसूर्यादयः। अस्फायिढ्वम्। अस्फायिध्वम्। पस्फाये इति। 'शर्पूर्वाः खयः'। पस्फायिढ्वे। पस्फायिध्वे। स्फाता। स्फायिता। स्फासीष्ट। स्फायिषीष्ट। स्फायिषीढ्वम्। स्फायिषीध्वम्। स्फास्यते। स्फायिष्यते।

ओप्यायी। प्यायते।

दीपजन। दीपी दीप्तौ। जनी प्रादुर्भावे। बुध अवगमने। दीप्यादिभिरात्मनेपदिभिः साहचर्यात् जनिबुध्योरात्मनेपदिनोरेव ग्रहणं न्याय्यम्। पूरी आप्यायने। तायृ संतानपालनयोः। ओप्यायी वृद्धौ। एकवचने तशब्दे परे इति। एतच्च सामर्थ्याल्लभ्यते। तथा हि 'चिण् ते पदः' इत्यतस्ते इत्यनुवर्तते। तत्र त इत्यनेन एकवचनमेवोच्यते न बहुवचनं मध्यमस्य पदःपरस्य तथासंभवात्तस्य परस्मैपदत्वात् पदश्चात्मनेपदित्वादिति।

---

१. Dropped D1, D3, D4. २. Before it—स्फायिषीष्ट। स्फायिता। स्फायिष्यते B2. ३. ओप्यायीङ् D4. ४. हेमाद्याः। Bc2. ५. एव dropped Bc2. ६. तथ्यासंभवात् Dc3.

च्चिणो लुक् ॥६।४।१०४॥

चिणः परस्य तप्रत्ययस्य लुक् स्यात् ॥ अप्यायि । अप्यायिष्ट । अप्यास्त ।

लिड्यङोश्च ॥६।१।२९॥

लिटि याङि च प्यायः पीभावः स्यात् ॥ पिप्ये । प्यायिता । प्याता ।

तायृ[1] संतानपालनयोः । '[2]दीपजन—' इति वा चिण् । अतायि । अतायिष्ट ॥[3]

चिणः । अकारितरामित्यत्र 'असिद्धवदत्राभात्' इति तलोपस्यासिद्धत्वात् तरप्तमयोर्लुक् न । ननु त्रान्यस्यान्यत्रासिद्धत्वं विषयभेदाद्भिद्यते । व्यक्तौ पदार्थे प्रतिव्यक्ति लक्षणम् । वचना-देकस्यात्मन्यसिद्धत्वं न स्यात् । सत्यम् । अभेदेन श्रुतमपि लक्षणं भिद्यते इति कृत्वा अतश्चिणः परस्यान्यस्य प्रत्ययस्यासंभवात् तप्रत्ययस्यैव लोप इत्यभिप्रेत्याह । **तप्रत्ययस्येति । अप्यायीति ।** लुङ् । त । च्लिः । अट् । अप्यायिष्ट । **अप्यास्तेति** केषांचिन्मते । न वेट् । इडाभावेति । 'लोपो व्योर्वलि' इति यलोपः । अप्यायिढ्वम् । अप्यायिध्वम् ।

लिड्यङोः । पिप्ये इति परत्वात् कृते पीभावे पुनः प्रसङ्गविज्ञानाद् द्वित्वम् । 'एरनेकाचः—' इति यण् । **प्यायिता ।** प्यातेति । वेट् । यलोपः । प्यायिषीढ्वम् । प्यायिषीध्वम् । प्यास्यते । प्यायिष्यते ।

तायृ । तायते । **अतायीति ।** 'चिणो लुक्' इति तलोपः । **अतायिष्टेति ।** चिणभावे सिच् । 'आर्धधातुकस्येड् वलादेः' इतीट् । तताये । तायिता । तायिषीष्ट । तायिष्यते ।

---

१. ताय B₁, D₂, D₃, D₄, P, C. २. Before it—तायते । तायेत । तायताम् । अतायत । तताये । ततायाते । ततायिरे B₂. ३. After it—तायिषीष्ट । तायिता । तायिष्यते । अतायिष्यत B₂. ४. तरपो लुक् न Bc₂

शल चलने संवरणे च । अशालिढ्वम् । अशालिध्वम् ।

षेवृ सेवने । 'परिनिविभ्यः—' इति षत्वम् । परिषेवते । न्यषेविष्ट । विषिषेवे । एभ्यः किम् । प्रतिसेवते ।

काशृ दीप्तौ । काश आम् वेति केचित् । काशामास । चकाशे ।

कासृ शब्दकुत्सायाम् ।[४] 'कास्प्रत्यय–' इत्याम् । कासांचक्रे । वेति केचित् । चकासे ।

शल । शलते । अशलिष्ट । **अशलिढ्वम्** । **अशलिध्वमिति** । इट् मूर्धन्यः । शेले । शेलिढ्वे । शेलिध्वे । शलिता । शलिषीष्ट । शलिष्यते ।

षेवृ । **परिषेवत** इति । 'धात्वादेःषःसः' । **न्यषेविष्ट** इति । अड्व्यवायेऽपि षत्वम् । **विषिषेवे** इति । 'एच इग्घ्रस्वादेशे' । 'अभ्यासव्यवायेऽपि' अभ्यासस्य च षः । सिषेविढ्वे । सिषेविध्वे । सेविता ।

काशृ । काशते । अकाशिष्ट । **काश** इति । तथोक्तं **बोपदेवपण्डितैः** । 'दरिद्राकासकाशृरुष्जागृवाम् ठ्याम्' इति । **काशामासेति** । असोऽनुप्रयोगः । **चकाशे** इति । ह्रस्वः । चुत्वम् । काशिता । काशिषीष्ट ।

कासृ । शब्दकुत्सा रोगजत्वात् । कासते । अकासिष्ट । कासिता ।

---

१. Before it—शलते B_2. २. After it—न्यषेवत B_1. ३. एभ्य इति किम् D_3. ४. After it—गतौ D_3. ५. °प्रत्ययात्–' C ; before it—कासते B_2 ६. शब्दस्य Bc_2.

ईह चेष्टायाम् । ऐहिढ्वम् । ऐहिध्वम् । ईहांचक्रे । ईहिता । गाङ् गतौ । गाते: शपि कृते प्रकृत्याश्रितत्वादादौ सवर्णदीर्घः । तेन 'आतो ङितः' इति इय् न । गाते । गाते । 'आत्मनेपदेष्वनतः' । गाते । गासे । गाथे । गाध्वे ॥ गै । एति आलाप इत्येके । गे । गावहे । गामहे । गेत । गेयाताम् । गेरन् । गाताम् । गै । गावहै । गामहै । अगात । अगाताम् । अगास्त । जगे । गाता । गासीष्ट ॥

ईह । ईहते । ऐहिढ्वम् । ऐहिध्वमिति । सिच् । इट् । 'विभाषेटः' इति वा मूर्धन्यः । आट् । 'आटश्च' इति वृद्धिः । ईहांचक्रे इति । 'इजादेः—' इत्याम् । ईहिता इति । इट् । अलघूपधत्वान्न गुणः । ऐहिष्यत । गाङ् । अयमनिट् । गाते इति । शप् । सवर्णे दीर्घः । शपि कृते इति । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषयेति भावः । ईतीत्यादि । तथोक्तं मुग्धबोधे । 'उस्येचीम्यण्वराचि लोपः' । इति । गेतेत्यादि । लिङ् । गातामित्यादि । लोट् । त आतां झेषु शपि कृते सवर्णदीर्घः । गास्व । गाथाम् । गाध्वम् । अगातेति । लङ् । बहुवचनेपि 'आत्मनेपदेष्वनतः' इत्यदादेशे कृते । अगात । अगास्तेति । लुङ् । जगे इति । लिट् । 'आतो लोप इटि च' इत्यालोपः । गातेति लुट् । गासीष्ट । गास्यते । अगास्यत ।

---

१. ऐहिध्वम् । ऐहिढ्वम् । B_1, D_4 ; before it—ईहते B_2. २. Dropped D_3. ३. गाते । शपि C. ४. प्रत्यया° C. ५. सवर्णे दीर्घः B_1, B_2, D_2. ६. गाते । गाते dropped D_1, D_3, B_2. ७. एति इत्यालाप इत्येके D_1 ; गाते: एति B_2. ८. From गामहे to गामहै dropped P, B_1, N; after गावहे N has—गेत । गेयाताम् । गेरन् । गाताम् । गै । गावहै । अगात &c. ९. After it—अगासाताम् । जगे । जगाते B_2, D_3. १०. एतीं° Bc_2. ११. तथा चोक्तं Dc_3.

रुङ् गतौ भाषणे च ।[1] अरविष्ट ।[2] अरविढ्वम् । अरविध्वम् । मतान्तरे इड् वा ।[3] लिटि तु[4] नित्यम् । रुरुविषे ।[5]

देङ् पालने । दयते ।

स्थाघ्वोरिच्च ॥१।२।१७॥

अनयोरिदन्तादेशः स्यात् सिच्च कित् स्यादात्मनेपदेषु ॥ कित्त्वान्न गुणः ॥

रुङ् । इट्सहितः । रवते । रवेत । **अरविष्टेति** । लुङ् । सिच् । अट् । अरविषाताम् । अरविषत । **अरविढ्वम्** । **अरविध्वमित्यादि** । '*विभाषेटः*' इति वा मूर्धन्यः । अरोष्ट । अरोषाताम् । अरोषत इत्यादि इडभावे । रुरुवे । रुरुवाते । रुरुविरे । रविता । रोता । रविषीष्ट । रोषीष्ट । रविष्यते । रोष्यते ।

देङ् । अयमनिट् । दयते इति । अयादेशः ।

स्थाघ्वोः । चकारेण कित्त्वं समुच्चीयत इत्यभिप्रेत्याह । **सिच्च किदिति** । प्रयोजनं गुणाभावः । इत्वं तु गुणार्थमेव स्यात् । इत्वेत्यत्र तकारो दीर्घनिवृत्त्यर्थः प्लुतप्रवृत्त्यर्थश्च । तथा **वार्तिककृतोक्तम्** ।

इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेपि सः ।
अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः ॥

इति । 'इच्चेत्यत्र तकारेत्त्वम् । कस्य कार्यस्य सिद्धये । इति प्रश्ने दीर्घो मा भूदित्युत्तरम् । ननु कित्त्वे 'घुमास्था—' इति ईत्वे विधिं विनापि स सिद्ध इतीत्वविधानसामर्थ्यादन्तरतमोपि

---

१. After it-रवते B_2. २. After it-अरोष्ट C, D_1. ३. After it—अरोष्ट D_2, P, B_1, B_2. ४. Dropped D_1. ५. After it—रविष्यते । रोष्यते । रोषीष्ट । रविषीष्ट । रोता । रविता B_2; रविता । रविषीष्ट D_4. ६. Dropped N, D_4. ७. सेट् । Bc_2. ८. वार्तिकम् । Bc_2. ९. ईत्वविधानादपि स सिद्धः Bc_2, Dc_3.

ह्रस्वादङ्गात् ॥८।२।२७॥

ह्रस्वादङ्गात् परस्य सिचो लोपः स्याज्झलि ॥ अदित । अदिषाताम् ।[1] अदिथाः ।[2] अदिढ्वम् ।

दयतेर्दिगि लिटि ॥७।४।९॥

देङो दिगिरादेशः स्याल्लिटि । दिग्यादेशेन द्वित्वबाध इष्यते ।[3] दिग्ये । दिग्याते ।[4] दाता । दासीष्ट ।[5]

ह्रस्वः स्यादित्याशङ्कते । **ऋतेपि स** इति । उत्तरम् । अनन्तरे प्लुतो मा भूदिति । असति तपरत्वे अनन्तरेपि विद्यमानेपि विशेषे घुमेति दीर्घः । अनेन वा दीर्घो नियमार्थः स्यात् दीर्घ एव स्यात् प्लुतो मा भूदिति । मा भूत् प्लुत इति चेत् तत्राह । प्लुतश्चेति । स चासति तपरत्वे न प्राप्नोति सति तु तस्मिन् दीर्घस्याप्रसङ्गात् विधिरेव संपद्यत इति स्वविषये प्लुतो न व्यावर्तत इति वार्तिकार्थः । **अदितेति** । 'आदेच उपदेशेशिति' इत्यात्वम् । **अदिढ्वमिति** । 'इणः षीध्वम्—' इति मूर्धन्यः ।

दयतेः । दयतेरिति देङो ग्रहणम् । न तु दय दाने इत्यस्य । तस्य हि लिट्याम् उक्त इत्यभिप्रेत्याह । देङ इति । **दिग्यादेशेन द्वित्वबाध इति** । ननु द्वित्वे प्राप्ते विधीयमानत्वाद्दिग्यादेशो देङो द्वित्वस्य बाधकः स्यात् । दिग्यादेशद्वित्वं तु केन बाध्यते । उच्यते । इह द्विधा बाधो लक्ष्यस्य लक्षणस्य च । अत्र दिग्यादेशशास्त्रेण द्वित्वशास्त्रं बाधितमिति न द्वित्वम् ।

---

१. After it—अदिषत D_2, P, C, B_1. २. After it—अदिषाथाम् D_2, B_1, B_2. ३. After it—सकृद्गतेर्विप्रतिषेधे यद्बाधितं तद्बाधितमेव D_2. ४. After it-दिग्यिरे । दिग्यिषे । 'आदेच–' इत्यात्वम् B_1; B_2 has 'आदेच–' इत्यात्वम्. ५. After it-दास्यते B_2. ६. अनन्तरे अविद्यमानेपि विशेषे Dc_2.

डिङ् विहायसा गतौ ।[१] अडयिष्ट । डिड्ये । डयिता ।[२]

गुप गोपनकुत्सनयोः[४] । जुगुप्सते ।[६]

मान विचारणे ।

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य

॥३।१।६॥

एभ्यः सन् स्यादभ्यासस्य च दीर्घः ॥

डीङ् । इतः परं स्वरान्ता नव सेटः । डयते । डयेत । **अडयिष्टे**ति । लुङ् । सिच् । इट् । गुणायादेशौ । अडयिढ्वम् । अडयिध्वम् । डिड्ये । डिड्याते । **डयिते**ति । इट् । डयिषीष्ट । डयिष्यते ।

गुप । **जुगुप्स**ते इति । ‘ गुप्तिज्किद्भ्यः सन् ’ । ‘ सन्यङोः ’ इति द्वित्वम् । ‘ कुहोश्चुः ’ । ‘ सनाद्यन्ताः—’ इति धातुत्वम् । लट् । त । शप् । जुगुप्सेत । अजुगुप्सिष्ट । जुगुप्सांचक्रे । जुगुप्सिता । जुगुप्सिषीष्ट ।

मान ।

मानबध । मान पूजायाम् । बध बन्धने । दान अवखण्डने । शान अवतेजने[७] । एभ्यः सन् स्यात् । ननु चाभ्यासदीर्घो[८] विशेषत्वात् सामान्यविहितह्रस्वेत्त्वयोर्बाधकः स्यात् । ततश्चानिष्टरूपं[९] स्यादिति

१. After it—डयते D_3, B_1, B_2: D_3 has उत्पूर्वः । उड्डयते । उदडयिष्ट । डिड्ये । उड्डयिता. २. Dropped P, D_1; D_4 has—डयिता ; डिड्ये । डयिषीष्ट । डयिष्यते. ३. After it—डयिषीष्ट D_3, D_4, B_1. ४. कुत्सनगोपनयोः B_2. ५. Before it—‘गुप्तिज्-’ इति सन् । द्वित्वादि B_1, B_2. ६. After it—अजुगुप्सिष्ट D_3, B_1, C, N. ७. तेजने Dc_3. ८. °दीर्घस्य Bc_2, Dc_3. ९. °चानिष्टं Bc_2, Dc_3.

सन्यत इतीत्वम् । ततो दीर्घः । मीमांसते ।

बध निन्दायाम् । भष्भावः । चर्त्वम् । बीभत्सते ।

द्युत दीप्तौ । द्योतते ।

द्युद्भ्यो लुङि ॥१।३।९१॥

द्युतादिभ्यः परस्मैपदं स्याद्वा लुङि ॥ 'पुषादिद्युता—'

यश्चोदयेत् तं प्रत्याह । सन्यत इतीत्वम् । ततो दीर्घ इति । कथमित्वम् । यावतेत्वं सामान्यविहितं दीर्घत्वं विशेषः एवं मन्यते 'दीर्घोकितः' इत्यत्र ज्ञापितमेतत् । अभ्यासविकारेष्वपवादा नोत्सर्गविधीन् बाधन्त इति । मानादेः क्रमाद्विचारनिन्दार्जवनिशानेषु सन्निष्यते । अत एव मान विचारणे बध निन्दायाम् दान आर्जवे शान निशाने इत्येतदर्थानेव धातून् पठति । मीमांसत इति । ह्रस्वः । इत्वम् । द्वित्वम् । दीर्घः । धातोरित्त्वविधेः । सन आर्धधातुकत्वाभावादिट् न । अनुस्वारः । धातुत्वात्तिप् शबादि । अमीमांसिष्ट । मीमांसांचक्रे । मीमांसिता । मीमांसिषीष्ट ।

बध । भष्भाव इति । 'एकाचो बशः—' इति । चर्त्वमिति । 'खरि च' इति । बीभत्सते इति । 'मान्बध—' इति सन् । 'सन्यङोः' । दीर्घः । धातुत्वम् । त । शप् । अबीभत्सीष्ट । बीभत्सांचक्रे । बीभत्सिता । बीभत्सिषीष्ट ।

द्युत । द्योतत इति । 'पुगन्त—' इति गुणः ।

द्युद्भ्यः । ननु च द्युतेरेकत्वाद् बहुवचननिर्देशो नोपपद्यते इत्यत आह । द्युतादिभ्यः इति । अयमभिसंधिः । यथैकेन छत्रिणा साहचर्यादन्येपि तत्सहचारिणश्छत्रिण इत्युच्यन्ते छत्रिणो गच्छन्तीति तथा द्युतिना साहचर्यात् द्युतादयोपि कृपूपर्यन्ता द्युत इति व्यपदिश्यन्ते ।

---

१. बन्धने B2. २. वा स्यात् D1, D3, D4, N. ३. °ष्वपवादो Bc2. ४. बाधते Bc2. ५. धातोरित्त्वविधे Dc3. ६. तिवादि Bc2. ७. सन्यतः । दीर्घः । Dc3 ८. धातुत्वात्त । Bc2. ९. बहुत्वं Bc2. १०. तत्सहचरा Bc2. ११. द्युतिसाह° Bc2. १२. द्युतय Dc1. १३. वृत्यादयोपि Dc3.

इत्यङ् । अद्युतत् । अद्योतिष्ट ।

द्युतिस्वाप्योः संप्रसारणम् ॥७।४।६७॥

द्युतेः स्वापेश्चाभ्यासस्य संप्रसारणं स्यात् पूर्वरूपत्वम् । दिद्युते ।[1] वृतु वर्तने ।[2] द्युतादित्वात् अवृतत् । अवर्तिष्ट ।[3]

वृद्भ्यः स्यसनोः ॥१।३।९२॥

वृतादिभ्यः पञ्चभ्यो वा[4] परस्मैपदं स्यात् स्ये सनि च[5] ।

न वृद्भ्यश्चतुर्भ्यः[6] ॥७।२।५९॥

वृतु वृधु शृधु स्यन्दूभ्यः सकारादेरार्धधातुकस्येण्न[7] स्यात् ॥

बहुवचननिर्देशसामर्थ्यादिति । अद्योतिष्टेति । लुङ् । च्लिः । सिच् । इट् । 'पुगन्त —' इति गुणः । द्युतादयः कथिताः ।

द्युतिस्वाप्योः । ण्यन्तस्वपिः स्वापिरुच्यते[8] । तस्याभ्यासनिमित्तेन प्रत्ययेनानन्तर्ये सति संप्रसारणमिष्यते । सुष्वापयिषति । इह न स्वापयतेर्ण्वुल् । स्वापकः । ततः । क्यच् । स्वापकीयते । सन् । सिस्वापकीयिषति । पूर्वरूपत्वमिति । 'संप्रसारणाच्च' इति । द्योतिता । द्योतिषीष्ट । द्योतिष्यते । वृतु । वर्तते । द्युतादित्वादवृतदिति । 'द्युद्भ्यो लुङि' इति परस्मैपदम् । 'पुषादिद्युत—' इत्यङित्यर्थः ।

वृद्भ्यः ।[9] वृतादिभ्यः पञ्चभ्य इति । वृतु वर्तने । वृधु वृद्धौ[10] । शृधु शब्दकुत्सायाम् । स्यन्दू स्रवणे[11] । कृपू सामर्थ्ये । इत्येतेभ्यः ।

न वृद्भ्यः । बहुवचननिर्देशात् आद्यर्थो[12] लभ्यते । तत्राद्यानां त्रयाणां नित्यमिटि प्राप्ते स्यन्देस्तूदित्वात् पाक्षिक[13]प्रतिषेधोऽयमुच्यते ।

---

१. After it-विद्युताते B_2. २. B_1, B_2, D_3 have वर्तते before it and C has द्युतादित्वात् परस्मैपदम्; द्युतादित्वादङ् D_1, D_3, D_4, B_2. ३. C has वर्तते after it. ४. परस्मैपदं वा D_3. ५. After it—परे D_3. ६. वृत्वृध्शृधस्यन्दभ्यः C; वृतवृधशृधुस्यन्दूभ्यः P; वृत्वृध्शृधस्यन्दूभ्यः D_1, D_3. ७. परस्य सादेरार्ध° B_1. ८. ण्यन्तः स्वापिः Bc_2. ९. Before it—वृतादिभ्यः Dc_3. १०. वर्धने Bc_2. ११. प्रस्रवणे Bc_2. १२. अयमर्थो Bc_2. १३. पाक्षिक Bc_2, Dc_3.

तङानयोरभावे पदद्वयादन्यत्र वेति केचित् । वत्स्यति । आत्मनेपदेषु वर्तिष्यते ।

स्यन्दू प्रस्रवणे ।

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥८।३।७२॥

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेर्वा षत्वं स्यात् ॥ अनुष्यन्दते । अनुस्यन्दते । एवं विपर्यभिनिभ्यः । अप्राणिषु किम् । निस्यन्दते हस्ती । अस्यदत् । अस्यन्दिष्ट । अस्यन्त ।

अत्र तङा समानपदस्थितेभ्यो वृतादिभ्य इडिष्यते । अन्यत्र निषेधः । कृत्यपि परस्मैपदलुकि च विवृत्सिता विवृत्सत्वमितीत्यभिप्रेत्याह । **तङानयोरभावे** इति । **पदद्वयादि**ति । तथोक्तं **मुग्धबोधे** । 'वृद्भ्यो नेर्मृ पे स्यसनोर्वा त्वमे' इति । अवत्स्यत् । अवर्तिष्यत ।

स्यन्दू ।

अनु । अनुस्यन्दते । तैलमिति शेषः । अप्राणिष्विति प्रसज्यप्रतिषेधः । तेन प्राण्यप्राणिसमुदायेपि प्राण्यस्तीति अनुस्यन्दते मत्स्य उदके इत्यत्र षत्वं नेति **काशिकाकाराभिप्रायः** । अन्ये तु पर्युदासं मन्यमाना भवितव्यमेवात्र षत्वेनेत्याहुः । द्युतादित्वादङ् परस्मैपदे । अस्यदत् । **अस्यन्दिष्टे**ति । ऊदित्वादिड् वा । **अस्यन्ते**ति । इडभावे 'झलो झलि' इति सलोपः । 'झरो झरि सवर्णे' इति दलोपः ।

---

१. आत्मनेपदे P; आत्मनेपदे तु D₁. २. पदे तु D₂, D₃, N₁. ३. एत्व-प्राणि° D₃. ४. स्यन्देर्वा C. ५. षत्वं वा D₃. ६. P drops it. ७. अनुस्यन्दते । अनुष्यन्दते C. ८. After it—उदकम् D₁, D₄. ९. Dropped D₂. १०. After it—लुङि द्युतादित्वात् परस्मैपदं वा । अङ् वा । D₃, P, B₂ (D₃ and P have च for वा; पुषादित्वादङ् B₂). ११. After it—सस्यन्दे । स्यन्दिता । स्यन्दिषीष्ट । स्यन्त्सीष्ट । स्यन्त्ता । स्यन्त्स्यति । स्यन्दिष्यते । अस्यन्त्स्यत् । अस्यन्दिष्यत B₂. १२. तङानसमानपदस्थेभ्यो Dc₃ १३. °पदस्थेभ्यो Bc₂. १४. न्येभ्यो: Dc₃. १५. तिल° Bc₂. १६. सिचो लोपः Dc₃.

स्यन्दिता । स्यन्ता । स्यन्स्यति । स्यन्दिष्यते । स्यन्स्यते ।[1]

कृपू सामर्थ्ये ।

कृपो रो लः ॥८।२।१८॥

कृपो रेफस्य लकारः स्यात् ॥ रो ल इति सामान्योक्तेर्ऋकारैकदेशस्य[2] रेफस्य[3] लकारैकदेशो लः । कृपादौ[4] तु लत्वं नेष्टम् । कॢप्यते । अकॢपत्[5] । अकल्पिष्ट ।

लिङ्सिचावात्मनेपदेषु ॥१।२।११॥

इक्समीपाद्धलः परौ झलादी लिङ्सिचौ कितौ स्तस्तङि परे ॥

सस्यन्दे । स्यन्दिता । स्यन्तेति । इड्वा । स्यन्दिषीष्ट । स्यन्त्सीष्ट । स्यन्त्स्यतीति । 'वृद्भ्यः—' इति परस्मैपदम् । 'न वृद्भ्यः—' इतीडभावः । अस्यन्त्स्यत् । अस्यन्दिष्यत । अस्यन्त्स्यत ।

कृपू ।

कृपो । र इति सामान्यमुपादीयते तेन केवलो यो रेफः यश्च ऋकारस्थस्तयोर्द्वयोर्ग्रहणम् । ल इत्यपि सामान्यमेव तेन केवलस्य[6] रस्य लकारः ऋकारैकदेशस्य लकारैकदेशः । एतदेवाह । रो ल इति । कृपादाविति । आदिशब्दात् कृपण[7] कृपीटकर्पूरादयः । कथमिच्छाभावः सिध्यति । 'उणादयो बहुलम्' इति बहुलग्रहणात् । अकॢपदिति । परस्मैपदम् । अङ् । अकल्पिष्टेति । ऊदित्वादिड् वा ।

लिङ्सिचौ । तङि परे इति । एतत् सिच एव विशेषणम् । न लिङः[8] । लिङ्परस्मैपदग्रहणस्य झल्ग्रहणानुवृत्त्यैव व्यावर्तितत्वात्[9] ।

---

१. After it—ऊदित्वादिट् C; D_2 has this before अस्यन्दिष्ट २. लः P, D_3, B_1. ३. B_1 drops रेफस्य; रस्य N. ४. Before it—कृपा । कृपणः । कृपाणः । B_1 P. ५. Before this—द्युतादित्वात् परस्मैपदमङ् च । N. ६. रेफस्य Dc_3. ७. कृपाण° Dc_3. ८. लिङः परस्मैपदस्य Bc_2. ९. °वृत्तत्वात् Dc_3.

अक्लृप्त । चक्लृपे[२] ।

लुटि च क्लृपः ॥१।३।९३॥

लुटि स्यसनोश्च[४] क्लृपो[३] वा परस्मैपदं स्यात् ॥[५]

तासि च क्लृपः ॥७।२।६०॥

क्लृपः[६] परस्य सादेरार्धधातुकस्य तासेश्चण्न स्यात् तङानयोरभावे ॥ कल्प्ता । कल्प्तासि । तङि तु । कल्पिता । कल्पितासे । कल्प्तासे । कल्पिषीष्ट । क्लृप्सीष्ट । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते ।[८]

अक्लृप्तेति । इडभावे 'झलो झलि' इति सलोपः । 'क्ङिति च' इति गुणनिषेधः ।

लुटि च । वृतादित्वादेव स्यसनोः सिद्धो विकल्पो लुटि विधीयते । चस्तर्हि तदनुकर्षणार्थो न कार्यः । एवं तर्हि इयं प्राप्तिः क्लृपेः पूर्वां प्राप्तिं बाधेत । तस्मात् च कार्यः ।

तासि च । क्लृपेरात्मनेपदसेमानपदस्थादिडागम इष्यते । अन्यत्र निषेधः । क्लृप्यपि परस्मैपदलुकि च निषेधः । कल्प्ता । **कल्प्तासीति** । लत्वम् । गुणः । **कल्पितासे** । **कल्प्तासे** इति । ऊदित्वाद्वेट् । कल्पिषीष्ट । क्लृप्सीष्ट । वेट् । इडभावे 'लिङ्सिचौ—' इति कित्त्वम् । **कल्प्स्यतीति** । 'लुटि च' इति परस्मैपदम् । 'तासि च' इडभावः । **कल्पिष्यते** । **कल्प्स्यते** इति । वेट् । अकल्प्स्यत् । अकल्पिष्यत । अकल्प्स्यत ।

---

१. B_1 has before it—झलादीति किम् । कल्पिषीष्ट । B_2 has it after चक्लृपे. २. Dropped D_1, D_4, B_2. ३. क्लृपः N, D_3. ४ After it—परतः D_1, D_2, P, C. ५. क्लृपेः परस्मैपदं वा स्यात् । C क्लृपेर्धातोर्वा परस्मैपदं स्यात् P, B_1, B_2. ६. क्लृपः N. ७. क्लृपेः N_1; क्लृपः D_3. ८. P has after it—अकल्प्स्यत । अकल्पिष्यत. ९. °सामान्य° Dc_3. १०. इतोऽद् न Bc_2.

व्यथ दुःखसंचलनयोः[1] ।

व्यथो लिटि ॥७।४।६८॥

व्यथोऽभ्यासस्य संप्रसारणं स्याल्लिटि ॥ विधिबलाद्धलादिशेषो न । विव्यथे ।

ञित्वरा संभ्रमे । अत्वरिढ्वम्[2] । अत्वरिध्वम्[3] ।

इत्यात्मनेपदप्रक्रिया ।

व्यथ । व्यथते । अव्यथिष्ट ।

व्यथः । यकारस्य हलादिशेषेण निवृत्तौ प्राप्तायामिदं संप्रसारणं विधीयते इत्यभिप्रेत्याह । विधिबलादिति । वकारस्य तु 'न संप्रसारणे संप्रसारणम्' इति निषिध्यते इति । विव्यथे इति । 'संप्रसारणाच्च' । व्यथिता । व्यथिषीष्ट । व्यथिष्यते । अव्यथिष्यत ।

ञित्वरा । संभ्रमोऽत्राशुकारिता । 'आदिर्ञि—' इति इत् । त्वरते । त्वरेत । त्वरताम् । अत्वरत । अत्वरिष्ट । अत्वरिढ्वम् । अत्वरिध्वमिति । 'विभाषेटः' इति वा मूर्धन्यः । तत्वरे । त्वरिता । त्वरिषीष्ट । त्वरिष्यते । अत्वरिष्यत ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेऽस्मिन् प्रसादे निरगुरथ तङन्ता अमी भ्वादिसंज्ञाः ॥

---

१. दुःखभयसंचलनेषु D_2. २. B_1 has त्वरते before it: अत्वरिध्वम् । अत्वरिढ्वम् N_1, D_4. ३. After it—संभ्रमे Bc_2.

पत्लृ गतौ । लृदित्वादङ् ।

पतः पुम् ॥७।४।१९॥

पतः पुमागमः स्यादङि ॥ प्रण्यपप्तत्[1] । पेततुः । पतिता ।

टुवमु उद्गिरणे । वेम एत्वाभ्यासलोपौ वेति केचित् । वेमतुः । ववमतुः । वेमिथ[4] ।

भ्रमु चलने । वा भ्राशेति श्यन् वा । भ्रम्यति । भ्रमति । अभ्रमीत्[6] ।

पत्लृ । इतस्त्रयः परस्मैपदिनः सेट्कश्च । पतति । लृदित्वादिति । 'पुषादि—' इति ।

पतः । प्रण्यपप्तदिति । 'नेर्गद—' इति णत्वम् । पपात । पेततुरिति । 'अत एकहल्मध्ये—' इत्येत्वाभ्यासलोपौ । पेतिथ । पत्यात् । पतिष्यति । अपतिष्यत् ।

टुवमु । उद्गिरणं भुक्तस्योर्ध्वगतिः । टु इत् । वमति । वमेत् । वमतु । अवमत् । अवमीत् । ववाम । ववमतुः इति । 'न शसदद—' इत्येत्वनिषेधः स्वमते । अर्वाचीनमते त्वेवं वेति भावः । वमिता । वम्यात् । वमिष्यति । अवमिष्यत् ।

भ्रमु । अभ्रमीदिति । 'ह्म्यन्तक्षण—' इति न वृद्धिः ।

---

१. B_1 has पपात before and पेतुः after it; B_2 has पेतुः after it; D_3 has अपप्तत् in its place. २. Dropped D_2. ३. Before it-वमति । अवमीत् । ववाम । D_4. ४. P, N_1, C, B_2, D_1, D_4 have ववमिथ after it. ५. भ्राम्यति B_1, D_3, P; शमामिति दीर्घः । भ्राम्यति B_2, D_2. ६. After this B_1 has—मान्तत्वान्न वृद्धिः B_2 has the same before it and बभ्राम after it. ७. सेटः Bc_2.

वा जॄभ्रमुत्रसाम् ॥

एषां किति लिटि सेटि थलि च[१] एत्वाभ्यासलोपौ वा स्तः ॥ भ्रेमतुः । बभ्रमतुः । भ्रेमिथ । बभ्रमिथ ।[२]

[४]षह मर्षणे ।[५] परिनिर्वीति षत्वम् । विषहते । सिवादित्वात् षो वा । [६]व्यषहत । व्यसहत । [७]असहिष्ट । सेहे । तीषसहेति वेट् । परिषहिता । हो ढः । झषस्तथोरिति धत्वम् । ष्टुत्वम् । ढलोपः ।

सहिवहोरोदवर्णस्य ॥६।३।११२॥

सहिवहोरवर्णस्य ओकारः स्यात् ढलोपे सति ॥

वा जॄ । जॄष् वयोहानौ । भ्रमु चलने । त्रसी उद्वेगे । भ्रमिता । भ्रम्यात् । भ्रमिष्यति ।

षह । मर्षणं क्षमा । सट् आत्मनेपदी च । विषहते इति । 'धात्वादेः षः सः' । सहेत । सहताम् । असहिष्ट । सेहे ।

सहिवहोः । अवर्णस्य किम् । ऊढः । ऊढवान् । वर्णग्रहणं किम् । कृतायामपि वृद्धौ यथा स्यात् । उदवोढाम् । तादपि परस्तपर इति अकारस्य तपरत्वात् अकारस्य ग्रहणं न स्यात् ।

---

१. B_1, D have परं after it. २. After it—बभ्रमतुः । D_4. ३. B_1 has after it—भ्रेमुः । बभ्रमुः । ४. मह N_1. ५. After it—भ्रम्यात् । भ्रमिता । भ्रमिष्यति । एते परस्मैपदिनः । B_2; परिनिविभ्य इति D_3. ६. व्यसहत । व्यषहत । D_4. ७. Dropped N_1, D_2, D_3, D_4. ८. ढो ढे लोपः B_2. ९. Dropped Bc_2.

सोढः ॥८।३।११५॥

सोढरूपस्य सहेः षो[2] न स्यात् ॥ विसोढा ।

पद्लृ विशरण[4]गत्यवसादनेषु । निषीदति । न्यषदत्[5] । सदिस्वञ्ज्योरिति परस्य न षत्वम् । निषसाद[6] । निषत्ता[7] । अप्रतेरित्युक्तेः प्रतिसीदति ।

शद्लृ शातने । शीयादेशः ।

शदेः शितः ॥१।३।६०॥

शित्संबन्धिनः शदेरात्मनेपदं स्यात् ॥ शीयते ।

सोढः । **सोढरूपस्येति** । निष्ठान्तस्य प्रथमान्तनिर्देशः । शङ्कामपाकरोति । **विसोढेति** । लुट् । तासिः । डा । सहिषीष्ट । सहिष्यते । असहिष्यत ।

पद्लृ । विशरणं शटनम् । अवसादोनुत्साहः । इतस्त्रयः परस्मैपदिनः । ह्रावनिटौ । **निषीदतीति** । 'पाघ्राध्मा—' इति सीदादेशः । 'सदेरप्रतेः' इति षत्वम् । व्यषददिति । लुङ् । च्लिः । लृदित्त्वादङ् । 'प्राक्सित—' इति अड्व्यवायेऽपि षः । **निषत्तेति** । चर्त्वम् । सद्यात् । सत्स्यति । असत्स्यत् ।

शद्लृ । शातनं तनूकरणम् । **शीयादेश इति** । 'पाघ्राध्मा—' इति ।

शदेः । **शित्संबधिन** इति । तेन शित इत्यस्य[9] षष्ठ्यन्ततां दर्शयति । कश्च शदि शितः संबन्धीयस्तस्य प्रकृतिः । प्रागपि शितः शदेः तत्प्रकृतित्वमस्त्येवेति शित्प्रकृतेः शदेरात्मनेपदं भवति । शीयते ।

---

१. सोढरूपस्य N_1, D_4, Com. २. षत्वं D_1, D_1 : सस्य षो D_2. ३. Before it—सहिषीष्ट । सहिष्यते B_2. ४. विसरण° D_1, D_4, B_1, P. ५. न्यषदत् D_2, C, P, B_1, B_2, N. ६. C has after it—निषेदतुः । निषेदुः ।. ७. विषत्ता D_4. ८. प्रसहिषीष्ट De_3, ९. इत्येतस्य Be_2.

अशदत् । शेदतुः । शत्ता ।

फण गतौ ।

फणानां च सप्तानाम् ॥६।४।१२५॥

फण राजृ [1]भ्राजृ भ्रासृ भ्लासृ स्यमु स्वन एषां किति[2] लिटि सेटि थलि च एत्वाभ्यासलोपौ वा स्तः ॥ फणतुः । पफणतुः । फेणिथ । पफणिथ ।

राजृ दीप्तौ ।[4] विधिबलादातोऽप्येत्वम् । रेजतुः । रराजतुः । [5]रेजे । रराजे ।

अशददिति । ऌदित्वादङ् । शशाद । **शेदतुरिति** । 'अत एक—' इति एत्वाभ्यासलोपौ । **शत्तेति** । लुट् । शद्यात् । शत्स्यति । अशत्स्यत् ।

फण । सेट् । फणति । अफणीत् । अफाणीत् । पफाण ।

फणानाम । बहुवचननिर्देशादाद्यर्थो गम्यते ।[8] अत एव राजादीनां ग्रहणम् । फण गतौ । राज दीप्तौ । टुभ्राजृ टुभ्रासृ दीप्तौ । स्यमु स्वन शब्दे । फणिता । फण्यात् । फणिष्यति ।[7]

राज । सेट् । उभयपदी च । राजति । राजते । अराजीत् । अराजिष्ट । रराज । ननु च 'फणानाम्—' इत्यत्र सूत्रे नावर्णग्रहोऽस्ति योऽप्यत इति प्रकृतिः सोऽपि मात्राकालः । न च राजादीनां मात्राकालोऽवर्णोऽस्ति तत् कथमाकारस्य स्थाने एत्वं लभ्यत इति प्रश्नोदयेऽत्तं प्रत्याह । **विधिबलादिति** । अयं भावः । अत इत्येतदिहोपस्थितं तपरत्वकृतं कालविशेषमपास्यासंभवादवर्णमात्रं बोधयति । अथवा 'आभ्यस्तयोरातः' इत्यतः आत इत्यनुवर्तते इति । राज्यात् । **राजिषीष्ट** । राजिष्यति । राजिष्यते ।

१. भ्राशृ भ्लाशृ D_1. २. क्ङित N_1, D_4. ३. पफाण । फेणतुः B_2. ४. After it—राजति । राजते D_2, B_1. P. C. ५. रेजे । रेजाते B_2, D_2. ६. After it—टुभ्लासृ Bc_2, Dc_3. ७. After it—अफणिष्यत Dc_3. ८. Dropped Bc_2. ९. °विशेषणम° Dc_3.

भासृ दीप्तौ । 'वा भ्राश—' इति वा श्यन् । भ्रास्यते । भ्रासते । भ्रेसे । बभ्रासे । एवं भ्लासृ दीप्तौ ॥

स्वन शब्दे । विष्वणति । अवष्वणति मांसम् । व्यष्वणत् ॥ विषष्वणतुः । विष्वेणतुः । भोजने किम् । विस्वनति वीणा । व्यवाभ्यां किम् । निस्वनत्यन्नम् ।

भ्रासृ भ्लासृ । सेटावात्मनेपदिनौ द्वौ । अभ्रासिष्ट । **भ्रेसे** इति । एत्वाभ्यासलोपौ वा । भ्रासिता । भ्रासिष्यते । एवं भ्लासृ । अस्यापि भ्रासृवद्रूपाणि ज्ञेयानीत्यर्थः । भ्लास्यते । भ्लासते । अभ्लासिष्ट । भ्लेसे । बभ्लासे । भ्लासिता । भ्लासिष्यते ।

स्वन । सेट् । परस्मैपदी च । **विष्वणति** । अवष्वणतीति । 'वेश्च स्वनो भोजने' इति षत्वम् । 'अट्कुप्वाङ्—' इति णत्वम् । सशब्दं मांसं भुङ्क्ते इत्यर्थः । व्यष्वणदिति । 'प्राक्सित—' इति अड्व्यवायेऽपि षत्वम् । अस्वनीत् । अस्वानीत् । सस्वान । **विषष्वणतुः** । **विष्वेणतुरिति** । 'स्थादिषु—' इति अभ्यासव्यवायेऽप्यभ्यासस्य षत्वम् । 'फणानां च—' इत्येत्वाभ्यासलोपौ वा । विस्वनति वीणेति । नदतीत्यर्थः । **व्यवाभ्यां किमिति** । 'वेश्च स्वनो भोजने' इत्यत्र 'अवाच्चालम्बनाविदूर्ययोः' इत्यवादिति वर्तते । कण्ठोक्तं च वेरिति । द्वयं व्यर्थम् । 'उपसर्गात्' इत्यस्यानुवृत्त्यैव सिद्धत्वादिति प्रश्नाभिप्रायः । उत्तरमाह । **निस्वनत्यन्नमिति** । स्वनिता । स्वन्यात् । स्वनिष्यति । अस्वनिष्यत् ।

---

१. भ्रास N. २. शब्दे भोजने च ॥ 'वेश्च स्वनो भोजने ॥ ८।३।६९॥ वेरवाच्च परस्य स्वनतेः सस्य षः स्याद्भोजने । विष्वणति । मांसं व्यष्वाणीत । 'अतो हलादेः' इति वा वृद्धिः । व्यष्वणीत । विषष्वणतुः । विष्वेणतुः । भोजने किम् &c. B_1 ; स्वनो शब्दे । व्यवाभ्यां स्वनो भोजने ॥८।३।६९॥ व्यवाभ्यां च परस्य स्वनो भोजने षत्वं स्यात B_2 ; स्वन शब्दे । 'वेश्च स्वनो भोजने' । विष्वणति । अवष्वणति मांसम् D_2 ; व्यष्वणत् to विष्वेणतुः dropped D_4. ३. Before it—व्यष्वणीत् । व्यष्वाणीत् । विषष्वाण B_2. ४. वीणाम् D_1, D_2, P, C, B_1, B_2, N. ५. अन्नम् dropped D_3. ६. तत्द्वयं किमर्थम् । Bc_2, Dc_3.

[1]खनु अवदारणे ।[2] 'गमहन—' इत्युपधालोपः । चख्नतुः ।
[4]चख्नुः । चखनिथ ।

ये विभाषा ॥६।४।४३॥

जनसनखनामकारोन्तादेशः स्याद्वा यादौ क्ङिति ॥
खायात् । खन्यात् ।

चायृ पूजानिशामनयोः ।[5] अचायीत् । इडभावे यलोपः ।
अचासीत् ।[6] अचास्ताम् ।[7] अचायिष्ट ।

लष कान्तौ । श्यन् वा । लष्यति । लषति ।[9]

गुहू संवरणे ।

खन् । इत आरभ्य हेऽन्ता उभयपदिनोऽष्टादश गुहूपर्यन्ताः सेट्काः । खनति । खनते । अखानीत् । अखनीत् । अखनिष्ट । चखान । चख्ने । खनितास्मि । खनितासे । खनिषीष्ट । खनिष्यति । खनिष्यते ।

चायृ । चायति । चायते । **इडभावे** इति । चायस्फायप्यायामिड्ढति केचिदिति । **यलोप** इति । 'लोपो व्योर्वलि' इति । अचायिष्ट । अचास्त । चचाय । चचाये । चायिता । चाता । चायितासे । चातासे । चाय्यात् । चायिषीष्ट । चासीष्ट । चायिष्यति । चास्यति । चायिष्यते । चास्यते ।

लष । कान्तिरिच्छा । **श्यन्वेति** । 'वा भ्राशभ्लाश—' इति । लष्यते । लषते । अलाषीत् । अलषीत् । अलषिष्ट । ललाष । लेषतुः । लेषे । लष्यात् । लषिषीष्ट ।

गुहू ।

---

१. खन D_1, N. २. After it—खनति । खनति C, D_4 (also अखनीत D_4). ३. Before it—चखान B_2. ४. Dropped D_2. ५. After it—चायति । चायते D_2, B_1, C, N. ६. अचास्त B_1: अचायिष्ट । अचास्त । अचास्ताम for अचास्ताम । अचायिष्ट N. ७. P and C, D_2, D_3 drop it: B_2, D_4 have चचाये in place of it. ८. लष C. ९. After it—लषते C, B_1: लषते । अलषीत । अलाषीत । अलषिष्ट । ललाष । लेषतुः B_2; लष्यते । लषते । अलाषीत् । अलषीत । अलषिष्ट N. १०. सेटः Bc_2. ११. भ्रासभ्लासेति Bc_2.

ऊदुपधाया गोहः ॥६।४।८९॥

गुह उपधाया ऊकारादेशः स्याद् गोह इति निर्देशाद् गुणहेतावचि परे ॥ गूहति । गूहते । इट्पक्षे । अगूहीत् । अगूहिष्ट । अन्यत्र क्सः । अघुक्षत् ।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥७।३।७३॥

एषां क्सस्य सर्वस्य लोपो वा स्याद् दन्त्ये तङि परे ॥

ऊदुपधाया गोहः इति विकृतग्रहणं विषयनियमार्थम् । यत्रास्यै-तद्रूपं तत्र यथा स्यादित्यभिप्रेत्याह । **गोह इति निर्देशादिति** । इह न । निजुगुहतुः । निजुगुहुः । उपधायाः किम् । अन्त्यस्य मा भूत् । अचीत्यनुवर्तते । गोढा । गुहेत् । गृहेत । पक्ष इति । 'स्वरतिसूति—' इत्यादिना यदेट् तदेत्यर्थः । अगूहिष्टाम् । अगूहिषुः । अगूहिषाताम् । **अन्यत्र क्स** इति । इडभावे 'शलइगुपध—' इति क्स इत्यर्थः । **अघुक्षदिति** । 'हो ढः' इति ढत्वम् । 'एकाचो बशो—' इति भष् । 'षढोः कः सि' इति कः । 'आदेशप्रत्यययोः' इति षः । इट् । 'इतश्च' इतीकारलोपः । अघुक्षताम् ।

लुग्वा । दुह प्रपूरणे । दिह उपचये । लिह आस्वादने । गुहू संवरणे । 'घोर्लोपो लेटि वा' इत्यतो लोप इत्यनुवर्तमानेऽपि पुनर्लुग्-ग्रहणं सर्वलोपार्थं तच्चोत्तमपुरुषद्विवचनार्थमेव । अन्यत्र तस्यैव लोपे कृते 'झलो झलि' इति सलोपो न सिध्यति । स्थानिवद्भावोऽप्यल्लोपस्य नास्ति । पूर्वत्र सिद्धीये न स्थानिवदिति । दन्त्योष्ठ्यो हि वकारो दन्त्य एव गृह्यते इह । अन्यथा तु न· लुग्ग्रहणमेवाकरिष्यत् ।

---

१. गोह C. २. पक्षे इट् C. ३. B_1 drops it. ४. C has before it—एकाचो बशो भष् झषन्तस्य स्ध्वोः ।. ५. B_1 drops सर्वस्य. ६. °दित्यादि Bc_2. ७. इट्पक्षे इति Dc_3. ८. वेट् for यदेट् तदेत्यर्थः । Bc_2. ९. कत्वम् Dc_3. १०. षत्वम् Dc_3. ११. अट् Bc_2. १२. अन्यथा तु ग्रहणमेवा° Dc_3.

ढत्वम् । [1]धत्वम् । ष्टुत्वम् । [2]ढलोपः । दीर्घः । अगूढ । अघुक्षत ।

क्सस्याचि ॥७।३।७२॥

अजादौ [3]तङि परे क्सस्या[4]न्तस्य लोपः स्यात् ॥ अघुक्षाताम् । अघुक्षत । बहुवचने क्सान्तलोपाभाव इति केचित् ।[5] अघुक्षन्त । अगूढाः । अघुक्षथाः । अघुक्षाथाम् । अघूढ्वम् । अघुक्षध्वम् । अघुक्षि । [6]अगुह्वहि । अघुक्षावहि । [7]दन्त्ये किम् । अघुक्षामहि ।[8]

ढत्वमिति । 'हो ढः' इत्यनेन । धत्वमिति । 'झषस्तथोः—' इत्यनेन । ष्टुत्वमिति । 'ष्टुना ष्टुः' इत्यनेन । ढलोप इति । 'ढो ढे लोपः' इत्यनेन । दीर्घ इति । 'ढ्रलोपे—' इति । अगूढेति । लुङ् । त । च्लिः । क्सः । अडागमः । अघुक्षतेति । लुगभावपक्षे ढत्वं भष्भावः कत्वम् । षत्वम् ।

क्सस्य । [10]ककारवतः [11]क्सस्य ग्रहणादिह न । तृणादिभ्यः [12]सः । तृणसौ । तृणसः । अघुक्षातामिति । असति [13]क्सो लोपे 'आतो ङितः' इतीयादेशः स्यात् । अघुक्षन्तेति । 'झोन्तः' इति । अगूढाः इति । [14]क्स· । लोपः । ढत्वम् । धत्वम् । ष्टुत्वम् । [15]ढो लोपः । दीर्घः । अघूढ्वमिति । ढत्वम् । [16]भष् । ष्टुत्वम् । ढलोपः । दीर्घः ।

---

१. झषस्तथोर्धोधः । D_4. २. ढलोपे दीर्घः D_1. ३. C has क्ङिति for तङि परे and P drops तङि परे : ताङि D_1, D_3, D_4, N_1. ४. °न्तलोपः D_1, D_3, D_4. ५. अघुक्षत after this D_2; इत्येके । D_3. ६. अघुक्षामहि । अगुह्वहि । D_3. ७. दन्त्ये किम dropped D_3. ८. After this B_1, B_2 have—लिङ्सिचावात्मनेपदेषु इति किच्वात् लिङि न गुणः । घुक्षीष्ट ।; after this—जुगूह । जुगूहतुः । गूहिता । गोढा । गुह्यात् । घोक्ष्यति । गूहिष्यति D_1, D_4 ; जुगूह । जुगूहे N. ९. अट् ।. Bc_2. १०. क्सस्य ककारसहितस्य ग्रहणादिह न । Dc_3. ११. सस्य Bc_2. १२. Dropped Bc_2. १३. क्सान्तलोपे Bc_2. १४. क्सलोपः Bc_2, Dc_3. १५. ढलोपः Bc_2, Dc_3. १६. भष्भावः Dc_3.

हृञ् हरणे । अहार्षीत् ॥

उश्च ॥१।२।१२॥

ऋवर्णात् परौ झलादी लिङ्सिचौ कितौ स्तस्ताङि ॥[2]

किंत्वान्न गुणः । सिच्[3]लोपः । अहृत । अहृषाताम् ।[4] ह्रियात्[5] । हृषीष्ट ॥[6]

भृञ् भरणे । भरति ।[7] अभार्षीत् । अभृत । बभृव[8] । भर्ता । भरिष्यति ।

जुगूह । जुगूहे । गूहिता । गोढा । गुह्यात् । गूहिषीष्ट । 'लिङ्सिचौ—' इति किंत्वम् । घुक्षीष्ट । गूहिष्यति । घोक्ष्यति । गूहिष्यते । घोक्ष्यते । अगूहिष्यत् । अघोक्ष्यत् । अगूहिष्यत । अघोक्ष्यत ।

हृञ् । ह्रावनिटावित आरभ्य । हरति । हरते ।

उश्च । व्याप्तेर्न्याय्यात् ऋवर्णग्रहणमित्याह । ऋवर्णादिति । लिङ्सिजभ्यामाक्षिप्तस्य धातोः ऋवर्णेन तदन्तविधिर्ज्ञेयः । सिज्लोप इति । 'ह्रस्वादङ्गात्' इत्यनेन । जहार । जहर्थ । जह्रे । हर्ता । ह्रियादिति । 'रिङ्शयग्लिङ्क्षु' इति रिङ् । हृषीष्ट । किंत्वान्न गुणः । हरिष्यति । हरिष्यते । अहरिष्यत् । अहरिष्यत ।

भृञ् । भरते । अभार्षीदिति । 'सिचि वृद्धिः—' इति वृद्धिः । 'अस्ति—' इतीट् । अभृतेति । 'उश्च' इति किंत्वम् । 'ह्रस्वादङ्गात्' इति सिचो लोपः । बभार । बभर्थ । बभूवेति । ऋदित्वान्नेट् । भ्रियात् । भृषीष्ट । भरिष्यति । 'ऋद्धनोः स्ये' इतीट् ।

---

१. Before it—हरति । हरते । C, B_1, B_2, N. २. After it—परे B_2. ३. सिच P, B_1. ४. After it—अहृषत । हर्ता C. ५. Before it—जहार B_2: 'रिङ्शयग्लिक्षु ।' ह्रियात् । हृषीष्ट । 'ऋद्धनोः स्ये' इतीट् । हरिष्यति D_3. ६. After it—हर्ता । हरिष्यति B_2 ; हरिष्यति । अहरिष्यत् C. ७. After it-भरते D_2, C, B_1. B_2. ८. Before it—ऋदित्वान्नेट् । बभर्थ । B_1, C, N; D_2 has बभार before it ; D_4 has ऋादित्वान्नेट् ।. ९. सलोप इति Bc_2.

दान आर्जवे[1] । दीदांसते ।[2]

शान तेजने । शीशांसते ।[3]

भज सेवायाम् । भेजतुः[4] । भेजिथ । बभक्थ ।

श्रिञ् सेवायाम् । 'णिश्रि—'[5] इति चङ् । अशिश्रियत् ।[6] श्रयिता[7] ।

दान । द्वौ सेट्कौ । दीदांसत इति । 'मानबन्ध—' इति सन् । द्वित्वम् । ह्रस्वः । इत्वम् । अभ्यासदीर्घः । दीदांसति । अदीदांसीत् । अदीदांसिष्ट । दीदांसांचकार । दीदांसांचक्रे । दीदांस्यात् । दीदांसिषीष्ट ।

शान । शीशांसत इति । 'मानबन्ध—' इति सन् । शीशांसति । शीशांसांचकार । शीशांसांचक्रे ।

भज । अनिट् । भजति । भजते । अभाक्षीत् । अभाक्ताम् । अभक्त । अभक्षाताम् । बभाज । भेजतुरिति । 'तॄफल—' इत्येत्वाभ्यासलोपौ । भेजिथ । बभक्थेति । 'ऋतो भारद्वाज—' इति पक्षे इट् । भक्ता । भज्यात् । भक्षीष्ट । भक्ष्यति । भक्ष्यते ।

श्रिञ् । सेट्कः । श्रयति । श्रयते । अशिश्रियदिति । 'चङि' इति द्वित्वम् । अ शिश्री अत् इति स्थिते तिबाश्रयो लघूपधगुणः प्राप्तः । इयङ् । तत्रान्तरङ्गत्वात् 'अचि श्नुधातुभ्रुवाम्—' इतीयङेव । अशिश्रियत । शिश्राय । शिश्रिये । श्रयितेति । इट्गुणौ । श्रीयात् । श्रयिषीष्ट ।

---

१. अवखण्डने C, D_1 ; अवखण्डने आर्जवे च B_2 ; आवर्जने N : खण्डने D_3. २. Before it- दीदांसति C, B_1, B_2, N : after it -अदीदांसत । दीदांसांचकार । दीदांसांचक्रे । दीदांस्यात । दीदांसिषीष्ट । दीदांसिता B_2. ३. Before it C has—'मान् बध-' इति दीर्घसनौ : D_1, P, C have शीशांसति before it. ४. Before it-भजति । भजते । अभाक्षीत् । अभक्त D_2, C, B_1, B_2 (instead of अभक्त; B_2 has बभाज). ५. Before it—श्रयति श्रयते C, B_1, B_2. ६. After it—अश्रयिष्ट B_1. ७. Before it - शिश्राय । शिश्रिये । श्रीयात् । श्रयिषीष्ट । श्रयिष्यति । अश्रयिष्यत् B_2 ; शिश्राय । श्रयि ।. D_2. ८. सेटौ Bc_2. ९. वेट् Bc_2. १०. सेट् Bc_2. ११. गुणः Bc_2.

रञ्ज रागे ।

रञ्जेश्च ॥६।४।२६॥

रञ्जेरुपधाया नकारस्य लोपः स्यात् शपि परे॥ रजति । रजते।
अराङ्क्षीत् । अरङ्क्त । अरङ्क्षाताम् । ररञ्जतुः । ररजतुः । रङ्क्ता ।

त्विष दीप्तौ । त्वेषति । त्वेषते । अत्विक्षत् । अत्विक्षत ।
'क्सस्याचि' इति क्सान्तलोपः । अत्विक्षाताम् । 'लिङ्सिचौ—'
इति कित्त्वम् ॥ त्विक्षीष्ट ।

यज देवपूजासंगतिकरणदानेषु । 'व्रश्च—' इति
षत्वम् । अयाक्षीत् । अयष्ट । जश्त्वेन डः । ष्टुत्वम् । अयड्ढ्वम् ।

रञ्ज । इतो नव कसान्ता अनिटः । अराङ्क्षीत् । अरङ्क्त ।
ररञ्ज । ररञ्जतुः । ररञ्जुः इति । संयोगाल्लिटो वा कित्त्वमिति
केचित् । कित्त्वान्न लोपः । ररञ्जे । रेजे । रङ्क्तेति । 'चोः कुः' ।
अनुस्वारपरसवर्णौ । रज्यात् । रङ्क्षीष्ट । रङ्क्ष्यति । रङ्क्ष्यते ।

त्विष । त्वेषति । त्वेषते । अत्विक्षत् । अत्विक्षत । 'शल इगुपध–'
इति क्सः । कत्वम् । 'षढोः ' इति षत्वम् । त्वेष्टा । तित्विषे ।
त्विष्यात् । त्वेक्ष्यति । त्वेक्ष्यते ।

यज । यजति । यजते । अयाक्षीदिति । लुङ् । च्लिः । सिच् ।
'वदव्रज—' इति वृद्धिः । कत्वम् । षत्वम् । 'अस्ति—' इतीट् ।
अयष्टेति । 'झलो झलि' इति सलोपः । 'व्रश्च–' इति षः । ष्टुत्वम् ।
अयड्ढ्वमिति । 'झलो झलि' इति सलोपः । 'व्रश्च—' इति षः ।

---

१. नम्य N. २. रजति । रजते । ररञ्ज । ररञ्जतुः । संयोगाल्लिटः कित्त्वं वा । ररजतुः । 'अनिदिताम्—' इति नलोपः । ररञ्जुः । रङ्क्ता । B_2. ३. This and the next two forms dropped D_2, D_3. ४. Dropped D_1 : D_1 has ररञ्ज for this and the next form. ५. Dropped P, N, D_4. ६. ररजतुः । ररञ्जतुः C. ७. Dropped B_1, D_3. ८. P drops त्वेषते ; N, D_3, D_4 drop त्वेषति । त्वेषते. ९. Dropped B_1. १०. Before it—यजति । यजते D_2, C, B_1, B_2. ११. After it—अयक्षाताम् B_2. १२. 'झलां जश् झशि' इति जश्त्वेन D_1, D_4. १३. ररजतुः Bc_2. १४. तित्विष in its place Bc_2.

लिट्यभ्यासस्योभयेषाम् ॥६।१।१७॥

वच्यादीनां[1] ग्रहादीनां[2] चाभ्यासस्य संप्रसारणं स्याल्लिटि ॥ इयाज ।

वचिस्वपियजादीनां किति ॥६।१।१५॥

वचिस्वप्योर्यजादीनां च संप्रसारणं[3] स्यात् किति ॥

लिट्यभ्यासस्य । अधिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामिति ग्रहणं संप्रसारणं हलादिशेषबाधकं यथा स्यात् वव्रश्चेति । **इयाजेति** । 'अत उपधायाः' इति वृद्धिः । 'संप्रसारणाच्च' इति पूर्वरूपम् ।

वचिस्वपि । आदिशब्दो यजिनैव संबध्यते । न प्रत्येकं वच्यादिभिः[4] । यदि प्रत्येकं संबन्धोभिमतः स्यात्तदा वच परिभाषणे इत्यादीनधीत्य ञिष्वप् शये इत्यधीयीत । तत्र वच्यादीनामिति अनेनैव स्वपादेरपि[5] स्यादिति पृथगुपादानं न स्यात् । ननु नैवं 'रुदश्च पञ्चभ्यः' इत्यत्र स्वपेर्ग्रहणं न स्यात् रुदेरादौ स्वपिमधीत्य 'स्वपश्च पञ्चभ्यः' इति सूत्रं कर्तव्यम् । तच्च न कृतम् । तस्मात् यजिनैव संबध्यते इत्यभिप्रेत्योक्तं 'वचिस्वप्योर्यजादीनां चेति[6]' । वच परिभाषणे । ब्रुवो[7] वचि । उभावपि । ञिष्वप शये । यज देवपूजादिषु[8] ।

यजिर्वपिर्वहिश्चैव वसि[9] वेञ् व्येञ् इत्यपि ।
ह्वेञ्वदीश्वयतिश्चैव यजाद्याः स्युरिमे नव ॥

---

१. यजादीनां D4. २. ग्रहादीनां N, D3. ३. B1 has किति before संप्रसारणम्. ४. वच्यादिभिः प्रत्येकम Bc2. ५. स्वपेरपि Bc2, Dc3. ६. इति Bc2. ७. ब्रूञो Bc2. ८. पूजादौ Bc2. ९. वदि Bc2.

ईजतुः ।[1] ईजुः । इयजिथ । इयष्ठ । इज्यात् ।[2]

टुवप्[3] बीजतन्[4]तुसंताने । प्रण्युवाप[5] । ऊपतुः । ऊप्यात् ।[6]

वह प्रापणे । प्रण्यवाक्षीत्[7] । 'अवर्णस्य' इत्युक्तेः

ईजतुरिति । सवर्णदीर्घः । इयजिथ । इति । 'ऋतो भारद्वाज—' इति पक्षे इट् । इयष्ठेति । इडभावे 'व्रश्च—' इति षः । ष्टुत्वम् । ईजे । यष्टा । इज्यात् । 'किदाशिषि' इति कित्त्वम् । संप्रसारणम् । यक्षीष्ट । यक्ष्यति । यक्ष्यते ।

टु वप । बीजादीनां संतानं क्षेत्रे विस्तारणम् । वपति । वपते । अवाप्सीत् । अवप्त । प्रण्युवापेति । 'नेर्गद—' इति णत्वम् । अभ्यासस्य संप्रसारणम् । ऊपतुरिति । यजादित्वात् संप्रसारणम् । उवपिथ । उवप्थ । ऊपे । वप्ता । उप्यादिति । कित्त्वात् संप्रसारणम् । वप्सीष्ट । वप्स्यति । वप्स्यते ।

वह । वहति । वहते । प्रण्यवाक्षीदिति । सिच् । वृद्धिः[9] हलन्तलक्षणा । 'हो ढः' 'षढोः कः सि' । षत्वम् । ईट् । 'नेर्गद—'[10] इति णत्वम् । अवर्णस्येति । 'सहिवहोरोदवर्णस्य' इत्यत्रैवोपपादितम् ।

१. B_1 drops ईजुः. २. After it—यक्षीष्ट । यष्टा । यक्ष्यति B_2. ३. वपु D_1, D_2, N. ४. तन्तु dropped C, B_2. ५. Before it—उभयपदी । वपति । वपते B_1. ६. After it—वप्ता । वप्स्यति C, B_1, (C drops वप्ता and B_1 वप्स्यति). The following Kârikâ is given after the forms of वप् by P यजो वपो वहश्चैव वेञ् व्येञो ह्वयतिस्तथा । वसिर्वदस्वपिश्चैव यजाद्या नव धातवः ॥ : N, D_3, D_4 give on the margin यजिर्वपिर्वहिश्चैव वजिर्वेञ् व्येञ् इत्यपि । ह्वेञ्वदी श्वयतिश्चैव यजाद्याः स्युरिमे नव ॥ (वसिश्च वेञ् इत्यपि...रमी नव D_3; व्येञ् वेञ्...रमी नव D_4; B_1 has it also on the margin (यजिर्वपिर्वहिश्चापि). ७. Before it—वहति । वहते B_2. ८. वेट् Bc_2. ९. हलन्तलक्षणा वृद्धिः । Bc_2. १०. Before it—अट् । Dc_3.

कृतायामपि वृद्धावोत्वम् । अवोढाम् । अवाक्षुः । [1]अवोढ । उवाह । [2]ऊहे । वोढा । उह्यात् । वक्षीष्ट ।

वेञ् तन्तुसन्ताने ।[3] [4]अवासीत् । अवास्त ।

वेञः ॥६।१।४०॥

वेञो न संप्रसारणं स्याल्लिटि ॥ ववौ । [5]ववतुः । वविथ । ववाथ ।

अवोढामिति । वह् तस् । तसस्ताम् । 'वदव्रज—' इति वृद्धिः । 'झलो झलि' इति सलोपः । 'हो ढः' । 'झषस्तथोः' इति तस्य [6]धत्वम् । ष्टुत्वम् । 'ढो ढे लोपः' । **अवोढेति** ।[7]आत्मनेपदे न । पूर्ववत् प्रक्रिया । **उवाहेति** । 'लिट्यभ्यासस्य' इति संप्रसारणम् । **ऊहे इति** । यजादित्वात् संप्रसारणम् । **वोढेति** । लुट् । तासिः । 'हो ढः' । ढत्वम् । धत्वम् । ष्टुत्वम् । ढलोपः । **उह्यादिति** । संप्रसारणम् । वक्ष्यति । वक्ष्यते ।

वेञ् । वयति । वयते । **अवासीदिति** । 'आदेच उपदेशे—' इत्यात्वम् । 'यमरम—' इतीट्सकौ ।

वेञः । किति यजादित्वात् [8]धातोः संप्रसारणं प्राप्तम् । अकिति तु 'लिट्यभ्यासस्य' इत्यभ्यासस्य । तदुभयं निषिध्यते । **ववौ इति** । 'आत औ णलः' । **वविथ** । **ववाथेति** । भारद्वाजमते इट् ।

---

१. Before it—अवाक्षम् । अवाक्ष्व । अवाक्ष्म । C. २. Before it—ऊहतुः । उवहिथ । उवोढ C. ३. After it—वयति B_2; वयाति । वयते N. ४. Before it—आत्वे इट्सकौ B_1. ५. After it—ववुः D_1, D_2. ६. धः । Bc_2. ७. आत्मनेपदम् । न । Bc_2; आत्मनमदम् । Dc_3. ८. धातोः dropped Bc_2.

वेञो वयिः ॥२।४।४१॥

वेञो वयिरादेशो वा स्याल्लिटि ॥ इकार इत् । उवाय ।

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति-भृज्जतीनां ङिति च ॥६।१।१६॥

एषां किति ङिति च संप्रसारणं स्यात् ॥ यस्य संप्रसारणे प्राप्ते ।

लिटि वयो यः ॥६।१।३८॥

वयो यकारस्य न संप्रसारणं स्यात् लिटि ॥ ऊयतुः । ऊयुः ।

वश्चान्यतरस्यां किति ॥६।१।३९॥

वयो यकारस्या वो वा स्यात् किति लिटि ॥ ऊवतुः । ऊवुः । उवयिथ । वाता । ऊयात् ।

वेञः । इकार इति । इदिव इत् इयथा न श्रूयते तथा अयमप्युच्चारणार्थत्वादिति भावः । उवायेति । 'अत उपधायाः' इति वृद्धिः ।

ग्रहि । ग्रह उपदाने । ज्या वयोहानौ । वेञो वयिः । व्यध ताडने । वश कान्तौ । व्यच व्याजीकरणे । ओव्रश्चू छेदने । प्रच्छ ज्ञीप्सायाम् । भ्रस्जो पाके ।

लिटि वयः । वयेर्लिट्येव विधेर्लिड्ग्रहो व्यर्थः । न । उत्तरार्थः । वेञ इति । ऊये ।

उवयिथेति । नित्यमिट् । वाता इति । आत्वम् । ऊयादिति । संप्रसारणम् । पूर्वरूपम् । 'अकृत्सार्वधातुकयोर्दीर्घः' । वासीष्ट । वास्यति । वास्यते ।

---

१. लिटि वयिरादेशः स्याद्वा N. २. यकारस्य C. ३. संप्रसारणं न P. C. ४. यस्य N1, D3. ५. लिटि किति D1, D3. ६. उवयिथ । ऊवे । ऊये । ववे । वाता । वास्यति । ऊयात् । अवास्यत् B2. ७. इकार इदिति । Bc2, Dc3. ८. यथा इत् Bc2.

व्येञ् संवरणे ।[१]

न व्यो लिटि ॥६।१।४६॥

व्येञ आत्वं न स्याल्लिटि ।[२] वृद्धिः ।[३] विव्याय ।[४] व्येञोन्त्य-भागस्य किति लिटि संप्रसारणं वेति केचित् । विव्यतुः । विव्ययतुः ।[५] विव्ययिथ ।[६] 'इडत्त्यर्त्ति—' इति नित्यमिट् ।[७] व्याता । वीयात् ।

ह्वेञ् स्पर्धायां शब्दे च ।[८]

लिपिसिचिह्वश्च ॥३।१।५३॥

एभ्यश्च्लेरङ् स्यात् ॥ आतो लोपः[९] अह्वत् ।[१०]

व्येञ् । संवरणमाच्छादनम् ।

व्ययति । व्ययते । अव्यासीत् । अव्यास्त । विव्यायेति । अभ्यासस्य संप्रसारणम् । व्येञो वेति यजादित्वात् प्राप्तम् । केचिदिति । महाकवयो मुग्धबोधकारश्च । तथा हि वक्रेः[११] संविव्ययुर्देहान् । संविव्ययुर्वसनचारुचमूसमुत्थम् इत्यादि । महाकवयः ।[१२] 'जि वान्त्यः किति' इति । वीयादिति । संप्रसारणे कृते दीर्घः । व्यासीष्ट । व्यास्यति । व्यास्यते ।

ह्वेञ् । ह्वयति । ह्वयते ।

लिपि । लिप उपदेहे । षिच क्षरणे । ह्वेञ् स्पर्धायाम् । अह्वदिति । आत्वम् । 'आतो लोप इटि च' ।

---

१. After it—व्ययति B_2. २. आत्वं व्येञो न स्यात D_1. ३. वृद्धिः dropped C; वृद्धिः । व्यश्च व्येञो लिटि न संप्रसारणं स्यात । विव्याय B_2. ४. Dropped D_1, D_2, D_4, P, C, B_1, B_2. ५. विव्ययतुः । विव्यतुः C. ६. After it—विव्ययुः P; विव्ययुः । विव्युः B_2. ७. Before it—विव्ये । विव्याते । विव्यये । C, B_1, B_2. ८. After it—ह्वयति B_2. ९. आलोपः N_1, D_3. १०. अङ् वेति केचित । अह्वासीत । B_1, B_2. ११. वक्त्रो Bc_2. १२. महाकविप्रयोगः । Bc_2; महाकविप्रयोगः । मुग्धबोधे Dc_3.

आत्मनेपदेष्वन्यतरस्याम् ॥३।१।५४॥

लिपिसिचिह्वः परस्य च्लेरङ् वा स्यात् तङि ॥ अह्वत । अह्वेताम् । अह्वास्त । अह्वासाताम् ।

अभ्यस्तस्य च ॥६।१।३३॥

अभ्यस्तस्य ह्वयतेः संप्रसारणं स्यात् ॥ जुहाव । जुहुवतुः । जुहविथ । जुहोथ । ह्वाता ।[1]

वस निवासे ।[2]

सः स्यार्धधातुके ॥७।४।४९॥

सस्य तः स्यात् सादावार्धधातुके परे[3] । अवात्सीत् ।[4] अवात्ताम् । अवात्सुः । उवास ।

अभ्यस्त । 'अभ्यस्तस्य' 'ह्वयतेः' इति व्यधिकरणे षष्ठ्यौ[5] । अभ्यस्तसंबन्धी यो ह्वयतिस्तस्येत्यर्थः । कश्चाभ्यस्तसंबन्धी ह्वयतिर्यस्तस्य कारणम्[6] । तेनाभ्यस्तकारणात् ह्वयतेर्द्विर्वचनात् प्रागेव संप्रसारणं स्यात् । अन्यथा हि कृते द्विर्वचनेऽभ्यस्तसंज्ञायां संप्रसारणं स्यात् । एवं च सति 'न संप्रसारणे संप्रसारणम्' इत्यभ्यस्तस्य संप्रसारणं न स्यात् । **जुहावेति** । संप्रसारणे कृते वृद्ध्यावादेशयोश्च स्थानिवद्भावेन हु एतद् द्विरुच्यते । ह्वासीष्ट । हूयात् । ह्वास्यति । हूयते ।

वस । इतस्त्रयः परस्मैपदिनः । वसति ।

अवात्सीदिति । 'वदव्रज–' इति वृद्धिः । ईट् । **अवात्तामिति** । 'झलो झलि' इति सलोपः । तस्यासिद्धत्वात् 'सस्यार्धधातुके' इति सकारस्य तकारः । **उवासेति** । 'लिट्यभ्यासस्य'[7] इति संप्रसारणम् ।

१. After this C has-हूयात् । ह्वासीष्ट । ह्वास्यति । अह्वास्यत. २. B_1 has वसति after it. ३. C, D_3 drop परे. ४. C has after this—सिज्लोपस्यासिद्धत्वात 'सः स्यार्धधातुके' इति सकारस्य तकारः । झलो झलि ।; N_1 has on the margin the same except झलो झलि: before it—पूर्वत्रासिद्धमिति सिज्लोपस्यासिद्धत्वात् सस्य तः । D_3. ५. व्याधिकरणषष्ठ्यौ Bc_2. ६. कारणह्व° Bc_2. ७. इत्यभ्यासस्य Dc_3.

शासिवसिघसीनां च ॥८।३।६०॥

इण्कोः परस्यैषां सस्य षः स्यात् ॥ ऊषतुः । ऊषुः । उवसिथ । उवस्थ । वस्ता । उष्यात् । वत्स्यति ।

वद व्यक्तायां वाचि । अच्छवदति । वदव्रजेति वृद्धिः । अवादीत् । उवाद । ऊदतुः । उवदिथ । वदिता । उद्यात् ।

टुओश्वि गतिवृद्ध्योः । श्वयति । 'जॄस्तम्भु–' वति अङ् वा ।

श्वयतेरः ॥७।४।१८॥

श्वयतेरिकारस्य अः स्यादङि । ततः पररूपम् । अश्वत् ।

शासि । शास अनुशिष्टौ । वस निवासे । षत्वादेशः । अनादेशार्थे वचनम् । वसिर्यद्यप्यादेशस्तथापि सकार आदेशो न । **उवसिथ** । **उवस्थेति** । 'उपदेशेऽत्वतः' इतीट्निषेधे प्राप्ते 'ऋतो भारद्वाज ' इति पक्षे इट् । **वस्तेति** । अनुदात्तत्वादिडभावः । **उष्यादिति** । संप्रसारणम् । षत्वम् । **वत्स्यतीति** । सस्य तः ।

वद । इतो द्वौ सेट्कौ । **अच्छवदतीति** । 'अच्छ गत्यर्थवदेषु' इति गतिसंज्ञा । 'ते प्राग्धातोः' इति प्राक् प्रयोगः । **अवादीदिति** । इट् । सलोपः । **ऊदतुरिति** । यजादित्वात् संप्रसारणम् । **वदितेति** । इट् । वदिष्यति । अवदिष्यत् ।

टुओश्वि । 'आदिर्ञिटुडवः'इतीत्संज्ञायां टुर्लुप्यते । ओः 'उपदेशेऽजनु–' इतीत्संज्ञायाम् । श्वयति ।

श्वयते । **पररूपमिति** । 'अतो गुणे' इति । अश्वयिटाम् ।

---

१. वस्ता । वत्स्यति B₂. २. वदति B₁, D₃. ३. After it वादिष्यति B₂. ४. Dropped D₄. ५. अकारः D₁, D₂. ६. पररूपत्वम D₂. D₃, D₄. ७. °शार्थं Be₂. De₃. ८. वेट् Be₂. ९. सेटौ Be₂. १०. ओः is placed after संज्ञायाम Be₂.

पक्षे सिच् । तस्य इट् । अश्वयीत् । 'विभाषा धेट्श्व्योः' इति चङ् वा । इयङादेशः । अशिश्वियत् ।

विभाषा श्वेः ॥६।१।३०॥

श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च ॥ ततो द्वित्वम् । शुशाव । शुशुवतुः । शुशविथ । शिश्वाय । शिश्वियतुः । शिश्वयिथ । श्वयिता । यजादित्वात् शूयात् ॥

इति मिश्रप्रक्रिया ॥

इति भ्वादयः ॥

अश्वयिषुः । **इयङादेश** इति । 'अचि श्नुधातु—' इति ।

विभाषा । उभयत्रविभाषेयम् । तत्र यङि अप्राप्तं लिटि तु किति यजादित्वान्नित्यं प्राप्तमकित्यप्राप्तं संप्रसारणं सर्वत्र वा स्यात् । यदा धातोर्न तदा 'लिट्यभ्यासस्य' इत्यभ्यासस्यापि न । **शुशुवतुरिति** । संप्रसारणे उवङादेशे च कृते स्थानिवत्त्वात् शु अस्य द्वित्वम् । **शिश्वायेति** । वृद्धिः । हलादिशेषः । श्वयिष्यति । अश्वयिष्यत् ।

इति मिश्रप्रक्रिया ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योयं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलो भ्वादिसंज्ञो गणोयम् ॥

---

१. Before it—'ह्यन्तक्षण–' इति न वृद्धिः. २. Dropped D_1. ३. Before it—द्वित्वम् B_2. ४. After it—शुशुवुः B_2. ५. After it—शिश्वियुः D_1. ६. यजादित्वात् संप्रसारणम् B_2. ७. भुवादयः B_1; dropped D_1.

अथादादयः।

अद भक्षणे।

अदिप्रभृतिभ्यः शपः ॥२।४।७२॥

अदादेः परस्य शपो लुक् स्यात् ॥ चर्त्वम्। अत्ति। अत्तः। अदन्ति। अद्यात्। अत्तु। अत्तात् वा।

हुझल्भ्यो हेर्धिः ॥६।४।१०१॥

होर्झलन्ताच्च[1] हेर्धिः स्यात् ॥ अद्धि।

अद। इत आरभ्य शासन्ताः सप्तविंशतिः परस्मैपदिनः। द्वावनिटौ। अत्तीति। लट्। तिप्। कर्तरि शप्। 'खरि च' इति चर्त्वम्। अत्तः। अदन्तीति। शपो लुक्। 'झोन्तः'। अत्सि। अत्थः। अत्थ। अद्मि। अद्वः। अद्मः। अद्यादिति। विधि लिङ्। यासुट्। शपो लुक्। अद्याताम्। अद्युः। अद्याः। अद्यातम्। अद्यात। अद्याम्। अद्याव। अद्याम। अत्तु इति। लोट्। 'एरुः'। अत्ताद्वेति। 'तुह्योः—' इति तातङ्। अत्ताम्। अदन्तु।

हुझल्भ्यः। अत्र च 'घसिभसोर्हलि च' इत्यतः 'हलि च[2]' इत्यनुवर्तते। तेन रुदिहि इत्यादौ हलादित्वाभावात् धिभावो न। अत्तादित्यत्र परत्वात् तातङादेशः। तत्र कृते सकृद्गते विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति पुनर्धिभावो न भवति। अत्तम्। अत्त। अदानि। अदाव। अदाम।

१. °र्झलन्तेभ्यो C. २. Dropped Bc_2, Dc_3.

अदः सर्वेषाम् ॥७।३।१००॥

अदः परस्यापृक्तसार्वधातुकस्य[1] अडागमः स्यात् सर्वेषां[2] मतेन[3] ॥ आदत् । आत्ताम् । आदन् । आदः ।[4]

लुङ्सनोर्घस्लृ ॥२।४।३७॥

अदेर्घस्लादेशः स्यात् लुङि सनि च ॥ लृदित्वादङ् । अघसत् ।

लिट्यन्यतरस्याम् ॥२।४।४०॥

अदो[5] घस्लृ वा स्याल्लिटि[6] ॥ जघास । 'गमहन—' इत्युपधालोपः ।

अदः । **आददिति** । लङ् । 'आडजादीनाम्' इत्याट् । 'इतश्च' इतीकारलोपः । **आदन्निति** । झोन्ते इलोपे च कृते संयोगान्तलोपः । **आद इति** । सिप् । 'इतश्च' । 'अदः सर्वेषाम्' इति अट् । आत्तम् । आत्त । आदम् । आद्व । आद्म ।

लुङ् । **लृदित्वादङिति** । 'पुषादि—' इत्यनेन । अघसताम् । अघसन् ।

लिट्यन्य । ननु च घस्लृ अदने इत्यस्य जघासेति स्यात् अदेस्तु आदेति । अस्ति हि घसिः प्रकृत्यन्तरम् । 'सृघस्यदः क्मरच्' इति क्मरज्विधानात् । तस्माल्लिटि विकल्पो न कार्यः । क्रियते च घसेः । असर्वविषयत्वज्ञापनार्थम् । तेन तस्य सार्वधातुके आर्धधातुके च यत्र लिङ्गं न वचनं वा तत्र प्रयोगो न स्यात् । **जघासेति** । वृद्धिः । द्वित्वम् । चुत्वम् । ननु घस् अतुस् इत्यत्र उपधालोपे तस्य द्वित्वं

---

१. °स्यापृक्तस्य C, D3, D4. २. सर्वमतेन D1, D4, B1. ३. Dropped B3. ४. After it—आत्तम् D3. ५. अदो घस्ला D2, D3, D4. ६. घस्लादेशः D4. ७. अस्मा° Bc2. ८. नास्ति Bc2, Dc3.

उपधालोपस्य चर्विधिं प्रति स्थानिवत्त्वाभावात् घस्य चर्त्वम् । 'शासिवासि-' इति षत्वम् । जक्षतुः । जक्षुः । घसस्तासावभावात् थलिनित्यमिट् । जघसिथ । पक्षे 'अत आदेः' । आद । आदतुः । आदुः ।[1] आदिथ । अत्ता । अद्यात् । अद्यास्ताम् ।[2] अत्स्यति । प्सा भक्षणे ।[3] प्रणिप्साति । प्सायात् ।[4] प्सायुः । प्सातु । प्साहि । अप्सात् ।

लङः शाकटायनस्यैव ॥

आतः परस्य लङो झेर्जुस् [5]वा स्यात् ॥ अप्सुः । अप्सान् । अप्सासीत् । पप्सौ । प्साता ।

[6]वँश कान्तौ । [7]वँष्टि । [8]ग्रह्यादित्वात् संप्रसारणम् । उष्टः ।

प्रति स्थानिवत्त्वात् द्वित्वे च कृते 'खरि च' इति घस्य चर्त्वे क्रियमाणे 'अचः परस्मिन्—' इति अकारस्य स्थानिवत्त्वाच्चर्त्वं न स्यात् । इत्यत आह । उपधेति । **स्थानिवत्त्वाभावादिति** । 'न पदान्त—' इत्यनेन स्थानिवत्त्वनिषेधादित्यर्थः । **पक्षे** इति । घस्त्रभावपक्षे । आदथुः । आद । आदिव । आदिम । **अत्तेति** । लुट् । तासिः । चर्त्वम् । आत्स्यत् । **प्सा** । **प्रणिप्सातीति** । 'नेर्गद—' इति णत्वम् ।

लङः । **अप्सुरिति** । 'उस्यपदान्तात्' इति पररूपम् । **अप्सानिति** । झोऽन्तः इति कृते सवर्णदीर्घः । **अप्सासीदिति** । 'यमरम—' इतीट्सकौ । **पप्सौ** इति । 'आत औ णलः' । **प्सातेति** । इडभावः । **प्सायादिति** । प्सेयात् । प्सास्यति ।

वश कान्तौ । कान्तिरिच्छा । सेट्कः । **वष्टीति** । शपो लुक् । 'व्रश्च—' इति षः । ष्टुत्वम् । **उष्ट** इति । पूर्वरूपम् । षत्वष्टुत्वे ।

---

१. After it-आदथुः । आद D_1; before it-'इडत्यर्त्ति'-इति नित्यमिट् D_4. २. After it—अद्यासुः D_1. ३. 'नेर्गद-' इति णत्वम् before प्राणिप्साति C;. प्रतिणिप्सति P. ४. प्सायाताम् after it B_2, D_1, D_4, C. ५. स्याद्वा D_2, N_1. ६. वशू D_1. ७. Before it-'व्रश्च-' इति शस्य षः D_4. ८. महिज्यादित्वात् D_1. महादित्वात् D_4. ९. षत्वं ष्टुत्वम् । Dc_3.

उशन्ति । वक्षि । उष्ठः ।[१] उश्यात् । उश्याताम् । वष्टु । उष्टाद्वा । हेर्धित्वम् । षत्वम् । जश्त्वम् । ष्टुत्वम् । उड्ढि । वशानि । वशाव । वशाम ।[२] 'हल्ङ्याब्–' इति तिलोपः ।[३] जश्त्वचर्त्वे[४] । अवट् । अवड् । औष्टाम् । औशन् । अवट् । अवड्[५] । अवशम् । औश्व ।

उशन्तीति । संप्रसारणपररूपे । वक्षीति । षत्वकत्वे । उष्ठः । उष्ठ । वश्मि । उश्वः । उश्मः । उश्यादिति । संप्रसारणम् । हेर्धित्वमिति । 'हुझल्भ्यो हेर्धिः' इति । षत्वमिति । 'व्रश्च—' इति । जश्त्वमिति । 'झलां जश् झशि' इति । ष्टुत्वम् । 'ष्टुना ष्टुः' इति । उड्ढीति । संप्रसारणम् । औष्टामिति । लङि कृते लावस्थायामेवाडागमात् पूर्वमन्तरङ्गत्वात् लादेशः तस् क्रियते । लादेशो हि धातोर्विहितं लकारमात्रमपेक्षते इत्यन्तरङ्गः । अडागमस्तु लविशेषमङ्गं चापरमिति बहिरङ्गः । तत्र कृते विकरणः कृताकृतप्रसङ्गेन नित्यत्वादडागमं बाधते । अडागमस्त्वनित्यः । शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवतीति परिभाषया । तथा हि कृते विकरणे तदन्तस्याङ्गस्य अकृते तु धातुमात्रस्याट् स्यात् । विकरणे कृते संप्रसारणमडागमात् प्राक् नित्यत्वादेव भवति । संप्रसारणे[६] च कृते अजाद्यङ्गं भवति । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । अनेन न्यायेन ऐज्यत औप्यत इत्येवमादि सिद्धं स्यात् । अवट् । अवडिति । सिप् । इलोपः । 'हल्ङ्याब्—' इति सुलोपः । षत्वजश्त्वचर्त्वानि[७] ।

१. After it—उष्ठ D_3. २. हलङ्यादिलोपः N_1. ३. लोपः for तिलोपः C; P; तेलोपः D_3; तलोपः D_4. ४. जश्त्वम् । चर्त्वम् N_1. ५. After it—औष्टम् । औष्ट D_1, D_3. ६. Dropped Dc_3. ७. Dropped Dc_3.

वमोर्वा ॥८।४।२३॥

उपसर्गस्थान्निमित्तात् परस्य हन्तेर्नस्य णो वा स्यात् वमोः परयोः ॥ प्रहण्मि । प्रहन्मि । प्रहण्वः । प्रहन्वः । प्रहण्मः । प्रहन्मः । 'हन्तेरत्पूर्व–' इति णत्वम् । प्रहण्यात् । हन्तु । हतात् वा । हताम् । घ्नन्तु ।

हन्तेर्जः ॥६।४।३६॥

हन्तेर्जादेशः स्यात् हौ परे ।

असिद्धवदत्राभात् ॥६।४।२२॥

अत ऊर्ध्वमापादसमाप्तेः कार्यमाभाच्छास्त्रीयं तस्मिन् कर्तव्ये तत्रत्यं कार्यमसिद्धवत् स्यात् । इति जस्यासिद्धत्वान्न

उपदेशग्रहणं किम् । इह यथा स्यात् । गतिः । गमेः क्तिनि नित्स्वरेणाद्युदात्तत्वेपि भवति । इह न । शान्तः । सनि शिष्टे प्रत्ययस्वरे शेषनिघातेनानुदात्त इति स्यात् । झलीति किम् । घ्नन्ति । क्ङिति किम् । हंसि । हथः । हथ ।

वमो । 'हन्तेरत्पूर्व—' इति नित्यं णत्वे प्राप्ते विकल्पः । हन्यात् । हन्याताम् । हन्युः ।

हन्तेः । हन्तेरिति श्तिपा निर्देशो यङ्लुगन्तस्य मा भूदित्येवमर्थः ।

असिद्धवत् । सिद्धं परिनिष्पन्नम् । न सिद्धमसिद्धम् । तेन तुल्यं वर्तते असिद्धवत् । भसंशब्दनमभिव्याप्य आभात् यच्छास्त्रं तदाभाच्छास्त्रम् । तत्र भवमाभाच्छास्त्रीयम् । तस्मिन् कर्तव्ये तत्रत्यमाभाच्छास्त्रीयं कार्यमसिद्धवत् स्यादित्यर्थः ।

---

१. म्वोर्वा B_1, D_2. २. Dropped N_1. ३. °पूर्वस्येति D_1, D_3. ४. वा णत्वम् P. ५. P has प्रहण्याताम् after it. ६. इत P, D_3, D_4. ७. °पाद-परिसमाप्तेः C, D_3.

हेर्लुक् । जहि । हनानि । हनाव ।[२] अहन् । अहताम् । अघ्नन् । [४]अहन्व ।

लुङि च ॥२।४।४३॥

हनो वध इत्यादेशः स्याल्लुङि ॥ [५]अतो लोपः । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । अवधीत् । 'हो हन्तेः–' इति कुत्वम् । जघान । जघ्नतुः । जघ्नुः ।

अत्रेति समानाश्रयप्रतिपत्त्यर्थः । यत्र तदाभाच्छास्त्रीयं तदाश्रयमेवासिद्धं न व्याश्रयम् । तेन पपुषः चिच्युषः लुलुवुषः इत्यत्र वसौ संप्रसारणमल्लोपे यणि उवङि कार्ये नासिद्धं स्यात् । **अल्लोपादीनि** वसौ वस्वन्तस्य विभक्तौ संप्रसारणमिति व्याश्रयत्वात् । असिद्धं बहिरङ्ग इत्येतदप्यत्र न प्रवर्तते । कुतः । एषा हि परिभाषा आभाच्छास्त्रीया तस्या प्रवर्तमानायां संप्रसारणादीनामाभाच्छास्त्रीयाणामेवासिद्धत्वादन्तरङ्गबहिरङ्गयोर्युगपदुपस्थानं नास्तीति परिभाषा नोपतिष्ठते ।

लुङि । वधेति । अयमकारान्त आदेशः । अत एतत् शैलीयमाचार्यस्येह धात्वादेशप्रकरणे । व्यञ्जनान्त आदेशो यत्रेष्टः तत्रोच्चारणार्थमिकारं करोति । यथा जग्धिरित्यादौ । तस्मादिकारान्ताकरणादकारान्तः । **स्थानिवत्त्वादिति** । 'अचः परस्मिन्–' इति । **न वृद्धिरिति** । 'अतो हलादेः' इति हलन्तलक्षणा वृद्धिर्नेत्यर्थः । **अवधीदिति** । 'इट ईटि' सलोपः । अवधिष्टाम् । **जघानेति** । णल् । 'अत उपधायाः' इति वृद्धिः ।

---

१. Before it—हतम् । हत । B_2. २. C, N_1, D_3, D_4 have हनाम after it. ३. C drops अहताम् । अघ्नन् and has अहनम् in place of them and अहन्म after अहन्व. ४. Before it—अहन् । अहतम् D_1 D_2, B_2;—अहनम् । अहनम N_1. before it अहन् । अहतम् । अहत । अहनम् and after it अहन्म । D_3, D_4 (drops अहन्म D_4.). ५. अतो लोपः dropped N_1. ६. आलोपा° Dc_3. ७. द्व्याश्रयत्वात् Bc_2. ८. अवृद्धि° Bc_2.

अभ्यासाच्च ॥७।३।५५॥

अभ्यासात् परस्य हन्तेर्हस्य कुत्वं स्यात् ॥ जघनिथ । जघन्थ । जघ्निव ।[1] हन्ता ।

हनो वध लिङि ॥२।४।४२॥

हनो वधः[2] स्यादार्धधातुके लिङि ॥ अतो लोपः[3] । वध्यात् । 'ऋद्धनोः—' इतीट् । हनिष्यति ।[4]

द्यु अभिगमने ।

उतो वृद्धिर्लुकि हलि ॥७।३।८९॥

लुग्विषये उकारस्य[5] वृद्धिः[6] स्यात् पिति[7] हलि न त्वभ्यस्तस्य ॥

अभ्यासाच्च । ननु हनुशब्दात् क्यचि कृते तदन्ताच्च सनि जिहननीयिषतीत्यत्र कस्मान्न स्यात् । उच्यते । अभ्यासस्य निमित्तभूते प्रत्यये परतो हन्तेरङ्गस्य योऽभ्यासस्तस्मादेतत् कुत्वम् । अत इह न । न ह्यत्राभ्यासनिमित्ते प्रत्यये सति हन्तिरङ्गम् । किं तर्हि । हननीय-शब्दः । **जघनिथ** । जघन्थेति । 'ऋतो भारद्वाज—' इति पक्षे इट् । **जघ्निवेति** । क्रादिनियमादिट् ।

हन्तेति । 'नश्चापदान्त—' इत्यनुस्वारः । 'अनुस्वारस्य ययि परसवर्णः' । अहनिष्यत् ।

द्यु ।

उतः । 'नाभ्यस्तस्य' इत्यनुवर्तते इत्यभिप्रेत्याह । **न त्वभ्यस्तस्येति** । ततश्च योयोतीत्यादौ न । उतः किम् । एति । लुकि किम् । सुनोति । हलि किम् । द्यवानि । दद्याव । पित्येव । द्युतः । द्युयादित्यत्र ङित्वात् ङिच्च पिन्न भवतीति । पित्त्वनिषेधाद् वृद्धिर्न ।

---

१. P, C and D_3 have जघ्निम after it. २. वधादेशः D_3. ३. अल्लोपः N_1, D_3, D_4. ४. After it—अहनिष्यत् D_3. ५. उकारवृद्धिः C. ६. औकारो वृद्धिः B_1. ७. B_1 has सार्वधातुके before it.

द्यौति । द्युतः । द्युवन्ति । द्युयात् । द्यौतु । द्युतात् वा । द्युहि । द्यवानि । द्यवाव । द्यवाम[1] । अद्यौत् । अद्युताम् । अद्युवन् । अद्यौषीत् । दुद्याव । द्योता । द्यूयात् ॥[2]

यु मिश्रणे ।[3] [4] [5]अयावीत् । यविता ।

द्यौतीति । शपो लुक् । द्युत इति । 'सार्वधातुकमपित्' इति ङित्त्वान्न गुणः । द्युवन्तीति । 'अचि श्नुधातु—' इत्युवङ् । द्युयादिति । यासुटो ङित्त्वान्न गुणः । द्यौतु इति वृद्धिः । द्यवानीति । 'मेर्निः' । 'आडुत्तमस्य पिच्च' । गुणावादेशौ । अद्यौदिति । वृद्धिः । इलोपः । अद्यौषीदिति । लुङ् । सिच् । 'सिचि वृद्धिः—' इति वृद्धिः । अद्यौष्टाम् । अद्यौषुः । दुद्यावेति । वृद्धिः । 'हलादिः शेषः' । द्योतितेति । लुट् । तासिः । गुणः । द्यूयादिति । 'अकृत्सार्वधातुक—' इति दीर्घः । द्योष्यति ।

यु । इतश्चत्वारः सेटः । यौति । युतः । युवन्ति । यौषि । युयात् । यौतु । युहि । अयौत् । अयावीदिति । इट् । वृद्धिः । आव् । युयाव । युयविथ । यूयात् । यविष्यति । अयविष्यत् । अयुतसिद्धानामित्यादिस्मरणात् यु अमिश्रण इत्येके ।

---

१. द्यवाम dropped B_1, D_1, D_2, N. २. After it—द्योष्यति B_2: द्योष्यति । अद्योष्यत D_3. ३. मिश्रीकरणे D_2, N. ४. After it—इतश्चत्वारः सेट्: B_1, P. ५. Before it—यौति । युतः । युवन्ति । युयात । यौतु । युहि । युताद्वा । अयौत् । अयुताम । अयुवन । अयावीत । युयाव । यविता । यूयात । यविष्यति । अयविष्यत D_1, D_3, B_2 (D_1 and B_2 drop युयात । यौतु । युहि; after it युयाव P, D_1 and युयुविव B_1.)

णु स्तुतौ ।[1] अ[2]नौषीत् । [3]नविता । अन्यमते अत्र वेट् । नो[4]ता । लि[5]टि तु । [6]नुनविथ ।

क्ष्णु तेजने । अ[7]क्ष्णावीत् । [7]क्ष्णविता ।

ष्णु प्रस्रवने । सत्वे कृते [8]षयोगाभावात् न णः । स्नौति । 'स्नुक्रमोः—' इतीट् । अस्नावीत् । स्नविता ।

इण् गतौ । एति । [9]इतः ।

णु । 'णो नः' । नौति । नुयात् । नौतु । अनौत् । अनौषीत् । नुनाव । नुनविथेति । नित्यमिट् । गुणावादेशौ । नोता । नूयात् । नविष्यति । नोष्यति । अनविष्यत् । अनोष्यत् ।

क्ष्णु । क्ष्णौति शस्त्रम् । क्ष्णुयात् । क्ष्णौतु । अक्ष्णौत् । अक्ष्णावीत् । चुक्ष्णाव । । क्ष्णविनेति । इट् । क्ष्णुयात् ।

ष्णु । सत्वे इत्यादि । 'धात्वादेः षः सः' इति सत्वे निमित्ताभावे नैमित्तिकस्याप्यभाव इत्यर्थः । स्नौतीति । वृद्धिः । स्नूयात् । स्नविष्यति ।

इण् । णकारः 'इणो यण्' इत्यादिविशेषणार्थः । इतः सप्तानिटो धातवः । एतीति । 'सार्वधातुक-' इति गुणः । इतः इति । ङित्त्वान्न गुणः ।

---

१. After it D_3 has—नौति । नुयात् । नौतु । नुताद्वा । अनौत् । अनौषीत् । अनावीत् । नुनाव । नोता । नविता । अन्यमते तु वेट् । लिटि तु नुनविथ । नूयात् । नोष्यति । नविष्यति ।; नौति B_2 ।; अनावीत् D_2, D_3, B_1, B_2, P, C.
२. Dropped D_1, D_2, D_4, N, C. ३. नोता । नविता । अन्यमते वेट् P.
४. Dropped D_1, D_4, N. ५. लिटि तु नित्यम् N. ६. नुनुविव D_1, B_2.
७. Dropped N, D_3. In place of them क्ष्णौति D_1, क्ष्णौति । क्ष्णविता B_2; D_4 drops अक्ष्णावीत् only. ८. षयोरभावात् P. ९. Dropped D_3
१०. Before it—अनावीत् Dc_3.

इणो यण् ॥६।४।८१॥

इणोऽङ्गस्य यण् स्यादचि ॥ इयङोपवादः । यन्ति । इयात् । इयाताम् । एतु । इताद्वा । इहि । अयानि । अयाव । अयाम । ऐत् । ऐताम् । आयन् ।[1] ऐः । ऐतम् । ऐत । [2]आयम । ऐव ।[3] ऐम ।

इणो गा लुङि ॥२।४।४५॥

इणो लुङि[4] परे गा स्यात्[5] ॥ 'गातिस्था' इति सिचो लुक् । अगात् । द्वित्वम् । वृद्धिः । 'अभ्यासस्य—' इतीयङ् । इयाय ।

इणः । इण इति प्रत्याहारग्रहणं वा धातुग्रहणं वा । तत्र 'एरच्' । 'ओरावश्यके' 'उरत्' इत्येवमादिभ्यो निर्देशेभ्यो नेदं प्रत्याहारग्रहणम् । अतः पारिशेष्याद् धातुग्रहणम् । मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इति गुणवृद्धिभ्यां परत्वाद्बाध्यते । अतः अयानीत्येवमादि सिद्धं भवति । ऐदिति । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । आयन्निति । 'इणो यण्' । इति यणादेशस्य 'असिद्धवदत्र—' इत्यसिद्धत्वादाडागमः । आयमिति । गुणायादेशौ ।

इणः । 'लुङि च' इत्यतः 'लुङ्' इत्यनुवृत्तौ पुनर्लुङ्ग्रहणम् 'आत्मनेपदेष्वन्यतरस्याम्' इत्यस्यानुवृत्तिर्मा भूदित्येवमर्थम् । ततश्च इणो नित्यमविशेषेण गा स्यात् । अगात् । अगाताम् । अगुः । द्वित्वमिति । 'लिटि धातोः—' इति वृद्धिः । 'अचो ञ्णिति' इति प्रक्रियास्मरणार्थमेतत्[6] । क्रमस्तु एवमादौ परत्वाद्वृद्धिः । ततो 'द्विर्वचनेचि' इति स्थानिवद्भावाद् द्वित्वम् । एवं सर्वत्र

---

१. C has alternt—असिद्धवदत्रेति यणादेशासिद्धत्वेन आडागमः २. After it—आयम्—इणो यणिति यणादेशस्यासिद्धत्वादाडागमः । ऐव । ऐम B_2. ३. B_1 drops ऐम. ४. गा स्यात लुङि D_1. ५. गादेशः C; गा इत्यादेशः D_3 ६. स्मरणमात्रमेतत् । Dc_1.

इणो यणि कृते द्वित्वम्।

दीर्घ इणः किति ॥७।४।६९॥

इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि ॥ ईयतुः। ईयुः[1]। इययिथ। इयेथ। ईयिव।[2] ईयिम। ईयात्। ईयास्ताम्।[3]

एतेर्लिङि ॥७।४।२४॥

उपसर्गात् परस्य इणो ह्रस्वः स्यादाशिषि लिङि किति ॥ अन्वियात्। एष्यति।[4]।[5]

इक् स्मरणे ॥ 'इण्वदिकः' इति वक्तव्यमितीण्वत् कार्यम्। रूपं च तद्वत्।[6] इङिकावध्युपसर्गतो न व्यभिचरतः। अध्येति।[7]

इणो यणि कृते द्वित्वमिति। इ अतुस् इति स्थिते परत्वात् 'इणो यण्' इति यणि कृते 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् साच्कस्य द्वित्वमिति भावः।

इययिथ। **इयेथ** इति। 'अचस्तास्वत्—' इतीडभावे 'ऋतो भारद्वाज—' इति पक्षे इट्। 'अभ्यासस्यासवर्णे' इतीयङ्। एता। एतारौ। **ईयादिति**। 'अकृत्सार्वधातुकयोः' इति दीर्घः।

एतेः। 'आशिषि लिङ्' इति विषयं दर्शयति। तत्र हि 'अकृत्सार्व—' इति दीर्घोऽस्ति सार्वधातुके। ननु चातीयादित्यत्र सवर्णदीर्घः संभवति नात्र ह्रस्वः। उपसर्गात् एतेरित्युभयाश्रयणादन्तादिवत्त्वाभावात्। ऐष्यत्।

इक्। ककारः 'अधीगर्थ—' इति विशेषणार्थः। **इण्वदिति**। यथा इणो गादेशादिकार्यं भवति तथा इकोपीत्यर्थः। **इङिकाविति**। यदाहुः। 'कश्चित्तमनुवर्तते' इति। **अध्येतीति**। यणादेशः। अधीतः।

---

१. B_1 drops ईयुः. २. Dropped D_1, D_3. N_1, ३. After it—एता B_2. ४. After it—ऐष्यत् B_2. ५. Dropped D_4. ६. After it—इङ् अध्ययने B_2. ७. अध्येति। अधीतः। अध्यन्ति। (अधियन्ति ?)। अधीयात्। अध्येतु। अधीतात्। अध्यैत्। अध्यैषीत्। अधीयाय। अधीयात्। अधीता। अधीयात्। अध्येष्यति। अध्यैष्यत्। B_2. ८. द्वित्वमेवेति Dc_3.

मा माने ।[1] प्रणिमाति ।[2] लेङि । अमुः । अमान् ।[4] मेयात् ।[5]

ख्या प्रकथने ।[6]

अस्यतिवक्तिख्यातिभ्योऽङ् ॥३।१।५२॥

[7]एभ्यश्च्लेरङ् स्यात् ॥ 'आतो लोप इटि च'। अख्यत । चख्यौ ।[8] ख्येयात् । ख्यायात् ।[9]

अधियन्ति । अधीयात् । अध्येतु । अधीहि । अध्ययानि । अध्ययाव । अध्ययाम । अध्यैत् । अध्यायन् । अध्यायम् । अध्यैव । अध्यगात् । अधीयाय । अधीयतुः । अध्येता । अधीयात् । अधीयास्ताम् । अध्येष्यति ।

मा माने । मानमन्तर्भवनं पात्रे । **प्रणिमातीति** । ननु 'नेर्गद—' इति सूत्रे माङ्मेङोरेव ग्रहणमिष्यते तत् कथं णत्वमुदाहृतम् । सत्यम् । **क्षीरस्वामिमतेनोदाहृतम्** । तथा हि **क्षीरतरङ्गिण्यां** प्रणिमातीत्युक्त्वोक्तम् । सर्वत्र हि माग्रहणमलुग्विकरणस्य णत्ववर्जमिति । तथा **मुग्धबोधेऽपि**[10] । प्रणिमातीत्युदाहृतम् । **अमुः** । **अमानिति** । 'लङः शाकटायनस्यैव' इति वा जुस् । पररूपम् । अमासीत् । ममौ । माता । **मेयादिति** । 'एर्लिङि' इत्येत्वम् । मास्यति ।

ख्या । ख्याति ।

अस्यति । असु क्षेपणे । वच परिभाषणे । ब्रूञादेशो वा । ख्या प्रकथने । चक्षिङादेशो वा । अस्यतेः पुषादित्वात् सिद्धे आत्मनेपदार्थं वचनम् । 'अस्यतेस्थुक्' । पर्यास्थत । पर्यास्थेताम् । **चख्याविति** । 'आत औ णलः' । हलादिः शेषः । ख्याता । ख्येयात् । ख्यायात् । 'वा न्यस्य—' इत्येत्वं वा । ख्यास्यति ।

---

१. शब्दे च after it D_4. २. After it—मातः । मान्ति D_1. ३. Dropped D_3, D_4, N. ४. After it—'लङः शाकटायनस्य' इति जुस् वा P; D_3 has अमात्. ५. For it—ममौ । ममतुः । मेयात् । मेयास्ताम् । माता । मास्यति । B_2. ६. After it—ख्याति B_2. ७. एभ्यः परे C. ८. After it—चख्यतुः B_2. ९. After it—ख्याता । ख्यास्यति । B_2; ख्यायात् dropped D_4. १०. अपि dropped Dc_3.

या प्रापणे । प्रणियाति ।[१] एवं वा गतिगन्धनयोः । द्रा कुत्सायां गतौ ।[२] प्रणिद्राति ।[३]

विद ज्ञाने ।

विदो लटो वा ॥३।४।८३॥

वेत्तेर्लटः परस्मैपदानां णलादयो[४] नवादेशाः क्रमाद्वा स्युः ॥ वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । [५]वित्तः । इत्यादि । विद्यात् । वेत्तु । विद्धि ।[६] वेदानि । वेदाव । वेदाम[७] ।

या । प्रणियातीति । 'नेर्गद—' इति णः । अयुः । अयान् । अयासीत् । ययौ । याता । यायात् । यायास्ताम् । यास्यति । एवं वेति । एवामिति । या प्रापणे इत्यस्यैव रूपाणि ज्ञेयानीत्यर्थः । गन्धनं मर्दनम् । प्रणिवाति । अवुः । अवान् । अवासीत् । ववौ । वायात् । द्रा । कुत्सगतिः पलायनं स्वप्नश्च । प्रणिद्राति । अद्रुः । अद्रान् । अद्रासीत् । दद्रौ । द्राता । द्रेयात् । द्रायात् । द्रास्यति ।

विद । इतस्त्रयः सेट्काः ।

विदः । अत्र ज्ञानार्थस्यैव विदेर्ग्रहणं नान्येषाम् । यतो विद इति पञ्चमी । तेन 'तस्मादित्युत्तरस्य' इत्यनन्तराणामेव तिबादीनामादेशैर्भाव्यम् । न चान्यस्मात् विदेः परस्मैपदान्यनन्तराणि सन्ति विकरणेर्व्यवधानात् । वेदेति । 'पुगन्त—' इति गुणः । विद्धि इति । 'हुझल्भ्यो हेर्धिः' । वेदानीति । 'मेर्निः' । 'आडुत्तमस्य' इत्याड् । 'पुगन्त—' इति गुणः ।

---

१. After it—अयासीत् । ययौ । यायात् । याता । यास्यति B_2; D_4. N drop प्रणियाति. २. D_1, D_3 drop this and the next two forms. ३. After it—दद्रिथ । दद्राथ B_1, B_2. ४. नव क्रमा B_1, D_1; B_2, N_1 वा क्रमात्स्युः C. ५. B_1, D_3 drop वित्तः. ६. वित्तात् वा P: C, B_1, B_2. ७. N_1 drops it; D_4 drops this and also वेदाव. ८. णत्वम् । Dc_3. ९. कुत्सिता गतिः Bc_2, Dc_3. १०. संभवन्ति Dc_3.

विदांकुर्वन्त्वित्यन्यतरस्याम् ॥३।१।४१॥

वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते अविवक्षिते पुरुषवचने ॥

तनादिकृञ्भ्य उः ॥३।१।७९॥

तनादेः कृञश्च उप्रत्ययः स्यात् कर्तरि सार्वधातुके ।[2] शपोऽपवादः । तनादित्वादेव सिद्धे कृञो ग्रहणमन्यत्तनादिकार्यं नास्येति ज्ञापयति । गुणः । लोट्कार्यम् । विदांकरोतु ।

अत उत् सार्वधातुके ॥६।४।११०॥

उप्रत्ययान्तस्य कृञोऽकारस्य उत् स्यात् सार्वधातुके क्ङिति ।

विदां । वेत्तेरित्यादि । लिट्याम् विहितो लोटि न प्राप्नोतीति निपात्यते । आममाश्रित्य गुणः प्राप्नोति तस्याभावश्च । 'आमः' इति लेर्लुग्विधीयमानो लोटो न स्यादिति लोटो लुक् । लिट्परस्य कृञोऽनुप्रयोग उक्तः[1] लोट्परस्य न स्यादिति लोट्परस्यानुप्रयोगो निपात्यते इति सर्वत्र संबन्धनीयम् ।

गुण इति । विदां कृ उम् इति स्थिते उप्रत्यये परे 'सार्वधातुक—' इति गुणः[3] । रपरः । **लोट्कार्यमिति** । तिपि उकारस्य गुणः । 'एरुः' इति उः ।

अत उत् । उत्प्रत्ययान्तस्य कृञः क्ङिति उच्यमानमुत्वं सार्वधातुक एव स्यादिति पुनः सार्वधातुकग्रहणं भूतपूर्वेऽपि[6] सार्वधातुके स्यादिति । विदां कुरु । तपरत्वं गुणनिवृत्तये[4] । विदां कुरुतात्[5] । ङित्त्वान्न गुणः ।

---

१. कृञोऽनुप्रयोग° C. २. C has परे after it. ३. सिद्धेः D4. ४. Dropped D1. ५. उः D4. ६. भूतपूर्वे स्यादिति Dc3.

विदांकुरुतात् वा। [1]विदांकुर्वन्तु। 'उतश्च' इति हेर्लुक्। विदांकुरु। विदांकरवाणि । विदांकरवाव ।[2] अवेत्-द् । अविताम् । 'सिजभ्यस्त—' इति झेर्जुस् । वेत्तेर्लङो झेर्जुस्वेति केचित्। अविदुः। अविदन्।

दश्च ॥ ८।२।७५ ॥

धातोर्दस्य पदान्तस्य सिपि परे रुः स्याद्वा ॥ अवेः। अवेत्-द् । अवेदम्। अवेदीत् । 'उषविद—' इति वाम् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदांबभूव । विवेद । वेदिता ।

[3]अस भुवि। अस्ति।

विदांकुर्वन्त्विति । यणादेशः । विदांकरवाणीति । 'मेर्निः' । 'आडुत्तमस्य' इत्याट् । अवेदिति । लङ् । तप् । इलोपः । 'पुगन्त—' इति गुणः। 'हल्ङ्याब्—' इति तिलोपः। चर्त्वम्। वेत्तेरिति। तथोक्तं मुग्धबोधे । 'द्विषविदातोनुस् वा' इति ।

अवेः। अवेदिति। 'हल्ङ्याब्–' इति सलोपः। अवेदीदिति । लुङ्। सिच्। 'इट ईटि' इति सलोपः। विदांबभूव। भुवोनुप्रयोगो लिट्परस्य। द्वित्वहृस्वत्वात्वजश्त्ववुगागमाः । वेदितेति । तासिः। इट्। विद्यात्। विद्यास्ताम् । वेदिष्यति ।

असः। भवनं भूः सत्ता तस्याम्। अस्तीति। शपो लुक्।

---

१. Before it—विदांकुरुताम् D1, D3, D4, N1. २. P, D1, D3 have विदांकरवाम after it. ३. B1 drops it. ४. असु N1.

श्नसोरल्लोपः ॥ ६।४।१११ ॥

श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति ॥ स्तः । सन्ति । 'तासस्त्योः–' इति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । स्यात् । अस्तु । स्तात् वा ।

घ्वसोरेद्धावभ्यासलोपश्च ॥ ६।४।११९ ॥

घोरस्तेश्चैत्वं स्याद्धौ परे अभ्यासलोपश्च ॥ 'असिद्धवदत्र–' इत्येत्वस्यासिद्धत्वात् 'हुझल्भ्यः–' इति हेर्धिः । एधि । असानि । असाव । असाम ।[1] 'अस्तिसिचः–' इतीट् । आडागमः । आसीत् । श्नसोरल्लोपस्य 'असिद्धवदत्राभात्' इत्यसिद्धत्वादाडागमः[5] । आस्ताम् । आसन् ।

अस्तेर्भूः ॥ २।४।५२ ॥

अस्तेर्भूरादेशः स्यादार्धधातुके ॥ 'स्थानिवदादेशोऽनल्विधौ' इत्यनेन स्थानिवत्त्वाद् 'अस्तिसिचः–' इतीटि प्राप्ते अस्तेर्भुवश्च इट् नेष्यते । अभूत् । बभूव । इत्यादि ।

श्नसोः । श्नसोरिति शकन्ध्वादिषु पररूपं द्रष्टव्यम् ।

घ्वसोः । अभ्यासलोपः शिष्यते तेन सर्वस्याभ्यासस्य भवति । अभ्यासग्रहणसामर्थ्यात् वैयर्थ्यमेव नास्त्यर्थं तस्याभ्यासस्यासंभवात् ।

अस्तेः । आर्धधातुके इति । विवक्षिते इत्यर्थः । अभूदिति । 'गातिस्था—' इति सिचो लुक् । आदिशब्दात् भविता । भूयात् । भविष्यति । अभविष्यत् ।

---

१. श्न इत्येतस्य B_2. २. Dropped D_3. ३. असाम dropped C, B_1, B_2. ४. 'अस्तिसिचः–' इतीट् dropped N_1. ५. आडागमः dropped D_2. ६. श्नसोरित्यल्लोप॰ N_1. ७. स्यात after it in B_1. ८. From स्थानि॰ to स्थानिवत्त्वात् dropped D_1, D_3, D_4, N_1. ९. आहो भुवश्च B_1, P, D_1, D_2. १०. अयमभ्यास॰ Dc_3. ११. स्यर्थमेत्वं Dc_3.

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८।३।८७ ॥

[1]उपसर्गेभ्यः प्रादुषश्च परस्यास्तेः सस्य षः स्यात् यकारे अचि च[2] परे ॥ निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । यच्परः किम् । अभिस्तः ।

मृजूष शुद्धौ ।

मृजेर्वृद्धिः ॥ ७।२।११४ ॥

मृजेरिको वृद्धिः स्यात् सार्वधातुकार्धधातुकयोः ॥ गुणापवादः । 'व्रश्च–' इति षः । मार्ष्टि । 'क्ङिति च' इति न वृद्धिः । मृष्टः । क्ङित्यचि मृजेर्वृद्धिरिष्यते ।

उप । उपसर्गप्रादुर्भ्यां किम् । दधि स्यात् । अस्ति किम् । अनुसूतम् । कथमत्र प्रसङ्गः । यतः सकारस्य प्रकृतत्वात् तमेव प्रत्युपसर्गत्वमाश्रयिष्यते । न चात्र सकारं प्रत्युपसर्गत्वं तन्मात्रस्याक्रियावाचित्वात् । तत्किमस्तिग्रहणेन । इदं तर्हि प्रत्युदाहरणम् । अनुसूते अनुसूः तस्यापत्यमानुसेयः । शुभ्रादित्वात् ढक् । [3]'ढे लोपः–' इत्युलोपे कृते सकारमात्रस्य क्रियावाचित्वात् प्रसज्येत । अतोऽस्तिग्रहणं कृतम् । **निष्यादिति** । लिङ् । यासुट् । 'श्नसोरल्लोपः' । **अभिस्त** इति । तस् । अल्लोपः ।

मृज । [4]

मृजेः । धातुग्रहणमिदं मृजेरिति धातोश्च कार्यमुच्यमानं धातुप्रत्यये भवतीत्यभिप्रेत्याह । **सार्वधातुकार्धधातुकयोरिति** । ततश्च कंसमृड्भ्यामित्यत्र न । **मार्ष्टीति** । 'उरण् रपरः' । ष्टुत्वम् । **मृष्ट** इति । षत्वष्टुत्वे । **क्ङित्यचि मृजेरिति** । इष्यत इत्यनेन भाष्यकारेष्टिं प्रमाणयति ।

---

१. उपसर्गेण C. २. Dropped N_1, D_3. ३. Before it— 'ष्टुना ष्टुः' इति तस्य टः B_2. ४. मृजो वृद्धि N_1, D_3. ५. तस्मात्तस्याक्रिया' Dc_3. ६. लोपः । Dc_3.

मृजन्ति। मार्जन्ति । मार्क्षि। मृज्यात् । मार्ष्टु। मृष्टात्[1] वा। मृजन्तु। मार्जन्तु। मृड्ढि। अमार्ट्–ड्[2]। 'नेटि–' इति सिच्कृतवृद्ध्यभावेपि प्रत्ययकृता स्यादेव[4]। अमार्जीत्। अमार्क्षीत्।[5] क्वचिदस्यानुदात्तेषु[6] पाठात् 'अनुदात्तस्य च—' इत्यम् वा[7]। अम्राक्षीत्। ममार्ज। ममार्जतुः[8]। ममृजतुः। मार्जिता। मार्ष्टा। केप्यमागममिच्छन्ति[9]। म्रष्टा। म्रक्ष्यति तन्मतं[10]।

सा चैवं मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते इति। अत्र यस्मिन् विधिस्तदादावल्ग्रहण इत्येवाजादाविति लब्धेप्यादिग्रहणं मुख्येजादौ निषेधो विकल्पो वा यथा स्यात्। व्यपदेशिवद्भावेनाजादौ मा भूत् तुन्द परिमृज इति यूयं ममृज त्वया ममृज इति। संक्रमो गुणवृद्धि-निषेधविषयः[11]। मार्क्षीति। सिपि वृद्धिः। षत्वम्। कत्वम्। मृष्टम्। मृष्ट। मार्ज्मि। मृज्वः। मार्ष्टु इति। वृद्धिः। मृड्ढि इति। षत्वम्। 'हुझल्भ्यो हेर्धिः'। जश्त्वम्। ष्टुत्वम्। अमार्ट्। अमार्ड् इति। लङ्ति। वृद्धिः। षत्वम्। 'हल्ङ्याब्—' इति [12]लोपः। जश्त्वचर्त्वे। अमार्क्षीदिति। 'स्वरतिसूति—' इतीडभावे। ममार्ज। ममार्जतुः। ममृजतुः। ममार्जिथ। ममृजथुः। ममार्जथुः। ममृज। इत्यादि। मार्जिता। मार्ष्टा। म्रष्टा[13]। मृज्यात्।

१. C drops मृष्टात वा. २. B_1, B_2 have before it—षस्य जश्त्वेन डः. ३. अमार्ड अमार्ट् N_1. ४. वृद्धिः स्यादेव D_1. ५. After it—अम्राक्षीत D_4. ६. अनुदात्तेषु पाठात for क्वचि°...वा in C; अम्राष्टाम्। अमार्ष्टाम। अम्राक्षीत्। अमार्जिष्टाम्। ममार्ज for क्वचिदस्य...तन्मते. ७. Dropped D_2, D_3. D_4. ८. From ममार्जतुः.. to तन्मतं dropped D_4, N. ९. केचिदमा P. १०. तन्मतम D_2, D_3 ११. °प्रतिषेधनियमः Dc_3 १२. सिलोपः Dc_3. १३. Dropped Dc_3.

वच परिभाषणे । वक्ति । कित्त्वाभावात् 'वचिस्वपि—' इति नोत्वम् । वक्तः । न हि वचिरन्तिपरः प्रयुज्यते । वच्यात् । वक्तु । वग्धि ।

अवक्—ग् । 'अस्यतिवक्ति—' इत्यङ् ।

वच उम् ॥ ७।४।२० ॥

वचोऽङ्गस्य उमागमः स्यादङि ॥ 'आद्गुणः' । अवोचत् । उवाच । ऊचतुः । उवचिथ । उवक्थ । ऊचिव । वक्ता । उच्यात् ।

रुदिर् अश्रुविमोचने ।

रुदादिभ्यः सार्वधातुके ॥ ७।२।७६ ॥

रुद् स्वप् श्वस अन् जक्ष एभ्यः परस्य वलादेः सार्वधातुकस्येट् स्यात् ॥ रोदिति । रुदितः ।

वच । अनिट् । वक्ति । 'चोः कुः' । वचन्तीति न प्रयोगार्हम् । यथाह क्षीरस्वामी क्षीरतरङ्गिण्याम् । 'वचन्तीति नेष्यते अनभिधानात्' इति । वग्धि इति । 'हुझल्भ्यो हेर्धिः' ।

उवाचेति । 'लिटि—' इति संप्रसारणम् । ऊचतुरिति । 'वचिस्वपि—' इति संप्रसारणम् । उवचिथ । उवक्थेति । 'ऋतो भारद्वाज—' इति पक्षे इट् । वक्तेति । कुत्वम् । उच्यादिति । संप्रसारणम् । वक्ष्यति । अवक्ष्यत् ।

रुदिर् । सेट् ।

रुदादिभ्यः । रुदिर् अश्रुविमोचने । ञिष्वप शयने । श्वस प्राणने । अन चे । जक्ष भक्षहसनयोः । रोदिति । गुणः । रुदितः ।

१. From न हि to प्रयुज्यते dropped D_2, D_3, D_4, N. २. प्रयोक्तव्यः D_1: B_2 has प्रयोगाभावात after it. ३. ऊचतुः । ऊचुः । D_1. ४. ऊचिव । ऊचिम D_1, D_3, D_4. ५. वक्ता । वक्ष्यति B_2. ६. जक्ष् N. ७. After it—रुदन्ति D_2.

रुद्यात् । रोदितु । रुदिताद्वा । रुदिहि । रोदाव ।

रुदश्च पञ्चभ्यः ॥ ७।३।९८ ॥

रुदादेरपृक्तस्य प्रत्ययस्य ईडागमः स्यात् ॥[१] अरोदीत् ।

अड् गार्ग्यगालवयोः ॥ ७।३।९९ ॥

रुदादेरपृक्तस्य अडागमः स्याद्गार्ग्यगालवयोर्मतेन ॥ अरोदत् । अरुदिताम् । अरुदन् । अरोदीः । अरोदः । अरुदिम । इरित्वादङ् । अरुदत् । अरोदीत् ।

त्रिष्वप् शये । स्वपिति । स्वपितः । स्वप्यात् । स्वपितु । अस्वपीत् । अस्वपत् । अस्वाप्सीत् ।[११]

रुदन्ति । रोदिषि । **रुद्यादिति** । पूर्वविप्रतिषेधेन इडटौ बाधित्वा यासुट् । रुदिहीति । इट् । 'हुझल्भ्यो हेर्धिः' इत्यत्र हलीत्यनुवर्तते । धित्वं न ।

अरोदीदिति । लङ् । **अरुदितामित्यत्र** 'रुदादिभ्यः—' इतीट् । **अरोदीरिति** । सिप् । अरुदितम् । अरुदित । अरोदम् । अरुदिव । **इरित्वादिति** । 'इरितो वा' इति । **अरोदीदिति** । लुङ् । सिच् । 'इट ईटि' इति सलोपः । अट् । रुरोद । रोदिता । रुद्यात् । रोदिष्यति ।

त्रिष्वप् । **स्वपितीति** । 'रुदादिभ्यः—' इतीट् । **अस्वपीदिति** । लङ् । 'इतश्च' । 'रुदश्च पञ्चभ्यः' इतीट् । **अस्वपदिति** । 'अड् गार्ग्यगालवयोः' इत्यट् । **अस्वाप्सीदिति** । लुङ् । सिच् । 'वदव्रज—' इति वृद्धिः । अस्वाप्ताम् ।

१. Dropped P. २. रोदानि । रोदाव । रोदाम । D3. ३. After it—सार्वधातुकस्य D4. ४. After it—सार्वधातुके D3. ५. पृक्तप्रत्ययस्य सार्वधातुकस्य D1, D4. ६. Dropped D3. ७. Dropped D1; before it—अरुदिव D2, N1; in place of it अरुदिव D3. ८. वड् वा D1; D4, D3 वा अड् N. ९. After it—रुरोद । रुरुदतुः । रुद्यात् । रोदिता । रोदिष्यति B2. १०. Dropped D4. ११. After it—अस्वाप्ताम् । अस्वाप्सुः B2. १२. °हुझल्भ्यो हेर्धिरिति धित्वं न । Be2.

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥ ८।३।८८ ॥

एभ्यः सु[1]प्यादेः षः स्यात् । [2]कृतसंप्रसारणे [3]स्वापि सुपिरित्युच्यते । पूर्वत्रासिद्धीय[4]मद्वित्वे इति [5]षत्वे कृते द्वित्वम् । विषुषुपतुः । दुःषुषुपतुः[6] । सुपेरभावान्न षः । विसुष्वाप । कृतसंप्रसारणत्वात् [7]षोत्रेति केचित् । वि[8]षुष्वाप । [9]सुषुप्यात् । सुपीति किम् । [10]निः स्वपा । श्वस प्राणने । श्वसिति । श्[11]श्वसितः ।

सुवि । सूतीति क्तिन्नन्तस्य सूतेर्ग्रहणम् । समेत्यपि स्वरूपग्रहणमेव । न सम वैक्लव्य इति धातुः । इकस्तिपोरन्यतरस्याभावात् । पूर्वत्रासिद्धीयमिति । 'पूर्वत्रासिद्धम्' इति सूत्रोक्तमसिद्धत्वं द्वित्वे कार्ये नेष्यते इति परत्वात् कृते षत्वे षु इत्यस्य द्वित्वमित्यर्थः । तथोक्तं वार्तिककृता ।

'सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्र[11]सारणम् ॥
स्थादीनां नियमो नात्र प्राक् सितादुत्तरः सुपिः ।
अनर्थके विषुषुपुः षुपि भूतो द्विरुच्यते' ॥

केन नेत्यत्र केचनेति क्वचित् पाठः श्रूयते तमाश्रित्याह । कृतसंप्रसारणत्वादित्यादि । सुषुप्यादिति । आशीर्लिङ् । यासुटः 'किदाशिषि' इति कित्त्वात् संप्रसारणम् । सु इत्युपसर्गः । निःस्वपेति । लुट् । कृतसंप्रसारणत्वाभावात् षत्वं न । स्वप्स्यति ।

---

१. स्वप्यादेः सस्य B_1, D_2, D_3. २. कृतसंप्रसारणः सुपिरित्युच्यते C; कृतसंप्रसारणः स्वपिः D_1, D_3. ३. स्वपिः B_2, D_4. ४. °मसिद्धत्वे C. ५. कृते षत्वे C, D_2, D_3, N; द्वित्वे इति वक्तव्यं तेन कृते षत्वे द्वित्वम् D_1. ६. After it—दुःषुषुपुः D_2; in its place दुःषुषुपुः N. ७. C drops विषुष्वाप । सुषुप्यात् । ८. विषुप्यात् N; सुप्यात् D_4. ९. After it—स्वप्स्यति B_2. १०. Dropped C, D_2. ११. संप्रसारणम् Dc_3.

श्वस्यात् । [१]श्वसितु । [२]न्यश्वसीत् । न्यश्वसत् । [३]न्यश्वसिताम् । [४]अश्वसीत् । [५]निशश्वास । [६]श्वसिता ॥

अन च । [७]

अनितेः ॥ ८।४।१९ ॥

उपसर्गस्थान्निमित्तात् परस्यानितेर्णत्वं स्यात् । प्राणिति । विभाषानुवृत्तेति केचित् । प्रानिति । [८]

जक्ष भक्षहसनयोः । जक्षिति । जक्षितः ।

अन च । चकारात् प्राणने जीवने वर्तत इत्यर्थः । इत आरभ्य शीङन्ताश्चतुर्दश सेट्काः ।

अनितेः । प्राणितीति । 'रुदादिभ्यः—' इतीट् । **विभाषेति** । अर्वाचीनमतमेतत् । एतदेवाभिप्रेत्य **प्रदीपे** उक्तम् । 'अनादेर्नस्य वा णत्वं प्राणिति प्रानिति' इति । अनितः । अनन्ति । अन्यात् । अनितु । आनीत् । आनत् । आनीत् । आनिष्टाम् । आन । अनिता । अन्यात् । अनिष्यति ।

जक्ष । **जक्षितीति** । इट् ।

---

१. After it—श्वसिताद्वा । D_2. २. Dropped N. ३. Dropped D_3. ४. Before it—'ह्मयन्तक्षण—' इति वृद्धिनिषेधः B_1 'ह्मयन्तक्षण—' इति न वृद्धिः B_2, D_4. ५. शश्वास D_2, D_3. ६. B_1 has विशश्वास in place of it and C has after it—श्वस्यात् । श्वसिष्यति । अश्वसिष्यत्; B_2 has श्वस्यात् । श्वसिष्यति after it; D_3 drops श्वसिता. ७. प्राणने for च D_2, D_3. ८. °र्नस्य णत्वं D_1, N; नस्य णः स्यात् B_2, D_3, D_4; °नितेर्णः स्यात् D_2. ९. After it—प्राण्यात् । प्राणितु B_2. १०. उक्तं प्रदीपे Dc_3.

अदभ्यस्तात् ॥ ७।१।४ ॥

अभ्यस्तात् परस्य झस्य अत् स्यात् ॥ अन्तापवादः[1]। जक्षति[2]। जक्षितु। 'सिजभ्यस्त–' इति झेर्जुस्[3]। अजक्षुः। जजक्ष।

जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। जागृयात्। जागर्तु। गुणः। 'हल्ङ्याब्–' इति लोपः। विसर्गः। अजागः। अजागृताम्। अभ्यस्तत्वात् झेर्जुस्[4][5]।

जुसि च ॥ ७।३।८३ ॥

जुसि[6] परे इको गुणः स्यात् ॥ अजागरुः[7]। शृणुयुरित्यादौ[8] यासुटो ङित्त्वान्न गुणः।

अद। जक्षतीति। 'जक्षित्यादिभ्यः षट्' इत्यभ्यस्तसंज्ञा। अजक्षीत्। अजक्षत्। अजक्षिताम्। अजक्षीत्। अजक्षिटाम्। जजक्षेति। गम्। जक्षिता।

जागृ। जागर्तीति। गुणः। रपरः। जागृत इति। ङित्त्वाद्गुणाभावः। जाग्रतीति। 'अदभ्यस्तात्' इत्यत्।

जुसि। ननु शृणुयुरित्यादौ गुणः कस्मान्न। उच्यते। 'जुसि च' इति गुणः सार्वधातुकाश्रयङित्त्वनिमित्तप्रतिषेधे प्राप्त एवारभ्यते। सर्वस्मिन्नपि जुसि तस्य प्राप्तत्वात्। अतो येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायात् तस्यैव बाधकः न तु यासुटाश्रयङित्त्वनिमित्तस्य निषेधस्य तस्मिन्नप्राप्ते प्राप्ते चारभ्यमाणत्वात्। अतः शृणुयुरित्यादौ यासुटाश्रयङित्त्वनिमित्तः प्रतिषेधो भवत्येव। एतदभिप्रेत्यानन्तरमेवाह। यासुडित्यादि। अजागरुरित्यादि। ननु चात्र

---

१. झस्य अन्ता° B₁; झोन्ता° B₂. २. After it—जक्ष्यात् B₂. ३. जक्षतु N₁. ४. झेः dropped D₂, D₄, N₁. ५. झेः dropped N₁, D₄. ६. जुसि च परे C, N₁. ७. जागृयु° D₁; शृणुयुर्जागृयु D₃. ८. शृणुयादि° D₀₁.

वृद्धौ प्राप्तायाम् ।

जाग्रोऽविचिण्णल्ङित्सु ॥ ७।३।८५ ॥

जागर्तेर्गुणः स्यात् सर्वत्र न तु विचिण्णल्ङित्सु ॥

'विचिण्णल्ङित्सु' इति गुणप्रतिषेधः स्यात् । ङित्त्वात् । न । अस्य पर्युदासत्वात् । विचिण्णल्ङिद्भ्योऽन्यत्र गुणो विधीयते नात्र प्रतिषिध्यते । अथवा जाग्र इति या प्राप्तिः सा प्रतिषिध्यते तेन 'जुसि च' 'सार्वधातुकार्धधातुकयोः' इति गुणो भवत्येव । तेनोत्तमे णलि जजागरेत्यपि सिद्धं स्यात् । **वृद्धौ प्राप्तायामिति** । 'मिचि वृद्धिः—' इति । ननु च सा 'ह्यन्तक्षण—' इत्यादिना निषिध्यते । तद् व्यर्थं वृद्धौ प्राप्तायामिति । नैवम् । सार्थकमेतत् इति 'ह्यन्तक्षण—' इत्यत्रैव प्रतिपादितम् ।

जाग्रो । वृद्धिविषये प्रतिषेधविषये च जागर्तेरयं गुणो विधीयते । अस्मिन् कृते 'अतः—' इति प्राप्ता वृद्धिः सापि न । यदि स्यात् व्यर्थो गुणः स्यात् चि नलोपप्रतिषेधो व्यर्थः स्यात् ।

---

१. After this P. D1 have—जागर्तेः मिचि वृद्धिरिति वृद्धिप्राप्ता ह्यन्तक्षणेति निषेधः । पुनः सार्वधातुकार्धधातुकयोरिति गुणे कृते अतो-ल्लान्तस्येति वृद्धिप्राप्ता जाग्रोऽरिति बाध्यते ।. २. Dropped D1. ३. चिण्ण-लोपश्च प्रतिषेधो व्यर्थः स्यात् । Bc2; चिण्णलोपश्च प्रतिषेधो व्यर्थः स्यात् Dc3.

अजागरीत्[1] । 'उषविद्–' इत्याम् वा । जागरामास । जजागार[2] । 'जाग्रोऽविचिण्–' इति गुणः । जजागरतुः । जजागरिथ ।[3] जागरिता । जागर्यात्[4] ।

दरिद्रा दुर्गतौ । दरिद्राति ।

इद्दरिद्रस्य ॥ ६।४।११४ ॥

दरिद्रातेरात ईकारः[5] स्यात् सार्वधातुके[6] क्ङिति हलि ॥ दरिद्रितः ।

अजागरीदिति । अत्र सूत्रप्राप्तिक्रमः । जागृ इत् इति स्थिते पूर्वं यण् प्राप्तः । तं सार्वधातुकगुणो बाधते । तं सिचि वृद्धिः । तां जागर्तिगुणः । तत्र कृते हलन्तलक्षणा वृद्धिः । सा 'नेटि' इति प्रतिषिध्यते । 'अतो हलादेः–' इति विकल्पः । तं बाधित्वा 'अतो ल्रान्तस्य' इति नित्यवृद्धिः[7] । तां 'ह्म्यन्तक्षण–' इति निषेधो[8] बाधते । तथोक्तम् ।

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव' ॥ इति ।

जागरामासेति । अस्तेरनुप्रयोगः । जजागारेति । 'णल्–' इति गुणाभावः । 'अचो ञ्णिति' इति वृद्धिः । जागरितेति । इट् । जागर्यादिति । गुणः । जागरिष्यति । अजागरिष्यत् ।

दरिद्रा ।

इद्द । दरिद्रस्येति छान्दसो ह्रस्वः ।

---

१. C has–जागृविः । च्विण् । अजागरि । णल् । जजागार । ङित । जागतः before अजागरीत्. २. जजागर P. ३. C. B_2, D_1, D_2, D_3, D_4 have जजागरिव before it. ४. After it–जागरिष्यति B_2. ५. इत् D_4. ६. क्ङिति सार्वधातुके हलि D_1. ७. नित्या वृद्धिः । Be_2. ८. °निषेधश्च Be_2.

आभ्यस्तयोरातः ॥ ६।४।११२ ॥

अनयोरातो लोपः स्यात् क्ङिति सार्वधातुके ॥ दरिद्रति । दरिद्रियात् । दरिद्रातु । दरिद्रितात् वा । अदरिद्रात् । अदरिद्रुः ।

दरिद्रातेरार्धधातुके आलोपो वाच्यः । लुङि वा । सनि ण्वुलि ल्युटि च न ॥* अदरिद्रीत् । अदरिद्रासीत् ।

अनेकाच आम् वक्तव्यः ॥* दरिद्रामास ।

आभ्य । दरिद्रतीति । 'अदभ्यस्तात्' इत्यत् । दरिद्रासि । दरिद्रिथः । दरिद्रामि । दरिद्रिवः । दरिद्रातु । दरिद्रिहि । दरिद्राणि । दरिद्राव । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुरिति । 'सिजभ्यस्त—' इति जुस् । दरिद्रातेरिति । सिद्धश्च वाच्यः । लुङीत्यादि । तदुक्तं भाष्यकृता ।

'न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।
दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा' ॥ इति ।

अद्यतन्यां वेति वक्तव्यमिति च । अदरिद्रीदिति । आलोपपक्षे रूपम् । सिद्धवचनादसिद्धवदित्यसिद्धत्वेनेट्सकौ न । अदरिद्रासीदिति । 'यमरम—' इतीट्सकौ । दरिद्रातेरिति । केचिदिति । वृत्तिकारादयः । तथा च वृत्तौ 'वस्वेकाच्—' इति सूत्रे उक्तम् । 'दरिद्रातेस्तु कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यम् ।

---

१. °गलोपः N_1. २. Dropped N_1. ३. C drops it; D_1 has in place of it अदरिद्राः; D_4 has before it—अदरिद्रिताम् ।. ४. Before it—'यमरम—' इति सक् इट् च D_1. ५. च Bc_2. ६. चेति Bc_2. ७. स्वलुम्पा° Bc_2.

दरिद्रातेराम्वेति केचित् । ददरिद्र । [1]दरिद्रयात् ।

चकासृ दीप्तौ । चकास्ति । चकास्तः । चकासति । चकास्मि । हेर्धित्वम् । सस्य जश्त्वेन दः । चकाद्धि । भाष्यकारमतेन 'धि च' इति सलोपः । चकाधि ।

तिप्यनस्तेः ॥८।२।७३॥

पदान्तस्य सस्य दः स्यात् तिपि परे न त्वस्तेः ॥ अचकात्–द् ।

सिपि धातोरुर्वा ॥८।२।७४॥

पदान्तस्य धातोः सस्य रुः स्याद्वा [2]सिपि । पक्षे दः ।

दरिद्रां चकृवानिति । अथाम् न क्रियते तथापि ' इत्यादि । तेन तेषां मते वा आमूप्रत्यय इत्यर्थः । ददरिद्रेति । आलोपादौत्वं न । पदमञ्जरी-कारमते अत्राप्यौत्वम् । दरिद्रिता । दरिद्रिष्यति । अदरिद्रिष्यत् ।

चकासृ । **चकासतीति** । अत् । चकास्यात् । चकास्तु । **हेर्धित्वमिति** । ' हुझल्भ्यः—' इति ।

तिप्य । तिपि इति किम् । चकास्तेः क्विप् । चकाः । अनस्तेः किम् । आप एवेदं सलिलं सर्वमाः । आ इत्येतदस्ते रूपम् । लङि तिपि 'बहुलं छन्दसि' इति इट् न भवति । **अचकादिति** । सलोपः । 'वावसाने' ।

सिपि । सिपि परे धातोरन्यस्यासंभवाद्धातुग्रहो व्यर्थः । यथा द इत्यनुवृत्तेस्तस्यैव विकल्पे पक्षे सान्तत्वादेव रुः सिद्ध इति रुग्रहोपि व्यर्थ इति चेत् । नैष दोषः । 'दश्च' आदिषूत्तरसूत्रेषु उभयोः

---

१. P has दरिद्रिता before it; B_2 has दरिद्रिता । दरिद्रिष्यति after it. २. चकास्सि D_3. ३. सिपि परे B_1, B_2, N_1. ४. तिपि Bc_2. ५. आप ये एवं Dc_3.

अचकाः । अचकात्-द् । अचकासीत् । चकासामास ।[१]

[२]शासु अनुशिष्टौ । शास्ति ।

शास इदङ्हलोः ॥ ६।४।३४॥

शास उपधाया इकारः स्यादङि हलादौ च क्ङिति ॥

'शासिवसि-' इति षः । शिष्टः । शासति । शास्सि[३] । शिष्यात्[४] ।

सार्थकत्वात् । **अचकासीदिति** । लुङ् । इट् । ईट् । **चकासामासेति** । अनेकाच आम् वक्तव्यः । चकासिता । चकास्यात् । चकासिष्यति । अचकासिष्यत् ।

शासु । अनुशिष्टिर्नियोगः[५] ।

शासः । अत्र अङा संबन्धात् यस्माच्छासोङ् विहितस्तस्य ग्रहणम् । अङ् च 'सर्तिशास्ति-' इत्यत्र परस्मैपदग्रहणानुवृत्तेः परस्मैपदिनः शासु अनुशिष्टौ इत्यस्माद्विहितस्तेन आङ् शासु इच्छायामित्यस्य न भवति । आशास्ते । **शिष्ट** इति । ष्टुत्वम् । **शासतीति** । 'जक्षित्यादयः—' इत्यभ्यस्तसंज्ञा । 'अदभ्यस्तात्' इत्यत् । शास्मि । शिष्वः । शिष्मः । **शिष्यादिति** । लिङ् । यासुट् । इकार उपधायाः । 'शासिवसि-' इति षः । शिष्यास्ताम् । शिष्युः । शास्तु । शिष्टाद्ध्य । शिष्टाम् । शासतु ।

---

१. After it—चकासिता । चकासिष्यति B_2. २. शास D_1, D_4, B_2. ३. C and P have शास्मि after it: D_4 has शास्मि in place of it. ४. After it—शास्तु । शिष्टाद्ध्य D_2, B_1, P, C. ५. योगात Bc_2.

शा हौ ॥६।४।३५॥

शास्तेर्हौ परे शादेशः स्यात् ॥ शाभावस्यासिद्धत्वाद्धेर्धिः[1] । शाधि । शासानि । शासाव[2] । अशात्-द् । अशिष्टाम् । अशासुः । अशाः । अशात् । अशिषम्[3] । 'सर्तिशास्ति-' इत्यङ् । अशिषत् । अशिषताम् । शशास । शासिता । शिष्यात्[4] ।

इति परस्मैपदप्रक्रिया ।

शा हौ । 'उपधायाः' इति निवृत्तम् । ततः शास इति स्थानेयोगा षष्ठी भवति । क्ङिति इति निवृत्तम् । तेन यदा 'वा छन्दसि' इति पित्त्वं हिशब्दस्य तदाप्यादेशो भवत्येव । शाधीत्याद्युदात्तमपि छन्दसि दृश्यते । **शासानीति** । 'मेर्निः' । 'आडुत्तमस्य' इत्याड् । **अशादिति** । लङ् । तकारलोपः । 'हलङ्याब्—' इति लोपः । 'तिप्यनस्तेः' इति सस्य दः । 'वावसाने' । **अशिष्टामिति** । इत्वम् । षत्वम् । ष्टुत्वम् । **अशासुरिति** । 'सिजभ्यस्त—' इति झेर्जुस् । **अशाः** । **अशादिति** । 'सिपि धातोः' इति वा रुः । पक्षे दः । अशासम् । अशिष्व । **अशिषदिति** । लुङ् । च्लिः । इत्वम् । षत्वम् । **शशासेति** । लिट् । द्वित्वम् । हलादिः[6] शेषः । **शासितेति** । लुट् । शिष्यात् । शिष्यास्ताम् । शिष्यासुः । शासिष्यति[7] ।

---

१. °धित्वम N1. २. After it—शासाम D2, B1, P, C; शासाव dropped D4. ३. After it—अशात् D4. ४. After it—अशिष्ट D2, B1, P, C. ५. शासिष्यति B2; N1, D3, D4 drop शिष्यात्. ६. Dropped P, C, D1, D3, N. ७. तिलोपः । Dc3.

चक्षिङ् व्यक्तायां वाचि। इकार उच्चारणार्थः। 'स्कोः संयोग-'[1] इति कलोपः। चष्टे। चक्षाते[2]। चक्षे[3]। चड्ढ्वे[4]। चक्षीत। चष्टाम्। अचष्ट।

चक्षिङ्। इत आरभ्य वेवीङन्ता एकादश आत्मनेपदिनः। इकार इत्यादि। न नुमर्थ इत्यर्थः। ङित्करणात्। 'इदितो नुम् धातोः' इत्यत्र हि 'गोः पादान्ते' इत्यन्तग्रहणमनुवर्तते। तेनान्ता य इदितः तेषामेव नुम् नान्येषामित्यभिप्रायः। स च इकारोनुदात्तः। 'अनुदात्तेतश्च हलादेः' इति विचक्षण इत्यत्र युच् यथा स्यात्। एवं च ङकारोनुदात्तेत्त्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनार्थः। तेन 'स एवायं नागः सहति कलभेभ्यः परिभवम्'। इत्यादि सिद्धम्। चष्टे इति। ष्टुत्वम्। चक्षते इति। झ। 'आत्मनेपदेष्वनतः' इत्यदादेशः। चक्षे इति। 'थासः से'। 'स्कोः—' इति कलोपः। 'षढोः कः सि'। इति कः। 'आदेशप्रत्यययोः' इति षः। चक्षाथे। चड्ढ्वे इति। कलोपः। 'झलां जश् झशि' इति जश्त्वेन डः। ष्टुत्वम्। चक्षे। चक्ष्वहे। चक्ष्महे। चक्षीयाताम्। चक्षीरन्। चष्टामिति। लोट्। 'आमेतः'। कलोपः। ष्टुत्वम्। चक्षाताम्। चक्षताम्। चक्ष्व। चड्ढ्वम्। चक्षै। चक्षावहै। चक्षामहै। अचष्टेति। लङ्। ष्टुत्वम्। अट्। अचक्षत।

---

१. संयोगाद्योरिति C. २. C, B_2, D_1 have चक्षते after it, D_3 has चक्षते for चक्षे। ३. After it—जश्त्वम् D_4. ४. B_1 चक्षीयाताम् in place of it; D_2, N_1 have चक्षीयाताम after it.

चक्षिङः ख्याञ् ॥२।४।५४॥

चक्षिङ आर्धधातुके ख्याञादेशः स्यात् ॥ ञित्वादुभयपदम् । अख्यत् । अख्यत । क्साञपीष्टः । अक्सासीत् । अक्सास्त । वर्जने निषेधः । समचक्षिष्ट ।[४]

वा लिटि ॥२।४।५५॥

चक्षिङः ख्याञ्क्साञौ वास्तो लिटि ॥ चख्यौ । चख्ये । चक्सौ । चक्से । चचक्षे । ख्याता । क्साता ॥[१०]

चक्षिङः । ख्याञः स्थानिवत्त्वान्नित्यमात्मनेपदं न भवति । ङकारानुबन्धकरणसामर्थ्यादित्यभिप्रेत्याह । ञित्वादिति । अख्यदिति । 'अस्यतिवक्ति—' इत्यङ् । 'आतो लोपः—' अख्यतेत्यात्मनेपदम् । अङ् । अक्सासीदिति । 'यमरम—' इतीट्सकौ । अक्सास्तेत्यात्मनेपदम् । समचक्षिष्टेति । 'आर्धधातुकस्य—' इतीट् । षत्वष्टुत्वे । न्यषेधीदित्यर्थः ।

चख्याविति । 'आत औ णलः' । द्वित्वम् । हलादिशेषः । चर्त्वम् । चुत्वम् । चख्ये । चख्याते । चक्साविति । पूर्ववत् । ख्याता । क्साता । ख्यातासे । क्सातासे । ख्यायात् । ख्येयात् । क्सायात् । क्सेयात् । ख्यासीष्ट । क्सासीष्ट । ख्यास्यति । ख्यास्यते । क्सास्यति । क्सास्यते ।

---

१. After it-परे D₁. २. Dropped N₁; before it—'अस्यतिवक्ति' इत्यङ् । 'आतो लोप इटि च' इत्यालोपः । D₄. ३. °पीष्टि: B₁; क्सापीष्टः । D₃; क्साञपीष्टः । D₄. ४. After it—न्यषेधीदित्यर्थः B₂. ५. The Vritti is dropped D₁. ६. °क्सादेशौ C. ७. स्तो वा D₃. ८. Dropped B₂, N₁, D₃. ९. Dropped B₂, N₁, D₃. १०. After it—ख्येयात् । ख्यायात् । क्सेयात् । क्सायात् । ख्यास्यति । क्सास्यति D₁, D₄.

ईड स्तुतौ । ईट्टे[1] ।

ईडजनोर्ध्वे च ॥७।२।७८॥

आभ्यां परस्य सस्य ध्वस्य[2] च सार्वधातुकस्येडागमः स्यात् ॥ ईडिषे । [3]ईडिध्वे । ईड्डहे ।[4]

ईश ऐश्वर्ये । ईष्टे ।

ईशः से ॥७।२।७७॥

ईशः[5] सस्य सार्वधातुस्येट्[6] स्यात् ॥ ईशिषे । 'ईडजनोर्ध्वे च' इत्यत्र ईशोऽप्यनुकर्षः । ईशिध्वे[7] । ऐशिष्ट[8] ।

ईड । ईट्टे इति । ष्टुत्वम् । 'खरि च' इति चर्त्वम् । ईड स्तुतौ ।

जनी प्रादुर्भावे । जन जनने । उभयोरपि ग्रहणम् । तत्र पूर्वस्य श्यन्विकरणस्य जनेश्छान्दसत्वात् श्यनो लुक् उपधालोपाभावश्च । जनिध्वे । जनिषे । श्लुविकरणस्योत्तरस्य व्यतिजज्ञिषे । व्यतिजज्ञिध्वे इति स्यात् । ध्वे इति कृतटेरेत्वस्य ग्रहणात् लङि न । लोटि तु 'एकदेशविकृतमनन्यवद्भवति' इति स्यादेव । ईडीत । ईड्डाम् । ईडिध्वम् । ऐड्ड । ऐडाताम् । ऐडत । ऐडिष्ट । ईडांचक्रे । ईडिता । ईडिषीष्ट । ईडिष्यते ।

ईश । ईष्टे इति । 'व्रश्च—' इति षः । ष्टुत्वम् ।

ईशः । 'ईडजन—' इति चकारादिति भावः । ततश्च ध्वेऽपि परत इट् स्यात् । ईशीत । ईष्टाम् । ईशिध्वम् । ऐष्ट । ऐशत । ऐष्ठाः । ऐशिष्ट । ईशांचक्रे । ईशिता ।

---

१. ईडे C; after it—ऐडिष्ट । ईडांचक्रे । ईडिषीष्ट । ईडिता । ईडिष्यते B_2; D_2 drops ईट्टे. २. ध्वे-इत्यस्य C. ३. C drops it. ४. After it—ईड्महे । D_4. ५. परस्य B_1, D_1, D_3. ६. °स्येडागमः B_1; सस्य इडागमः D_1. ७. After it—ईशिष्व B_2, D_4, P. ८. Dropped P, C, D_4.

आस उपवेशने । आस्ते[1] । आस्से[2] । आध्वे । आद्ध्वे[3] । दयाया—' इत्याम् । आसांचक्रे ।

वस[4] आच्छादने । वस्ते ।[5] वसिता[6] । वस्ता[7] ।

णिसि चुम्बने ।[8] प्रणिंस्ते । प्रनिंस्ते[9] ।

षूङ् प्राणिगर्भविमोचने । 'भूसुवोस्तिङि' इति[10] न गुणः । सुवै[11] । सुवावहै । सुवामहै । 'स्वरतिसूति—' इति वेट् । असाविष्ट । असोष्ट ॥[12]

आस । आद्ध्वे इति । जश्त्वेन सस्य दः । आध्वे इति । भाष्यकारमते सलोपः । आसीत । आस्ताम् । आस्त । आसिष्ट । **आसांचक्रे** इति । 'आम्प्रत्ययवत्—' इत्यात्मनेपदम् । आसिता ।

वस । वस्से । वद्ध्वे । वध्वे । वसीत । वस्ताम् । अवस्त । अवसिष्ट । 'न शसद—' इत्येत्वाभ्यासलोपौ न । ववसे । **वसिता** इति । इट् । 'भृस्तुशुचवसुतशभ्यः' इति केषांचिन्मतेन वेट् । वस्ता ।

णिसि । **प्रणिंस्ते** । **प्रनिंस्ते** इति । नुम् । 'वा निंस—' इति वा णत्वम् । निंसीत । निंस्ताम् । अनिंस्त । अनिंसिष्ट । निनिंसे । निंसिता ।

षूङ् । सूते । सुवाते । सुवते । सुवीत । सूताम् । **सुवै** इति । 'आडुत्तमस्य पिच्च' इत्याट् । स पित् । पिच्च ङिन्न भवतीति गुणः प्राप्तः । असूत । असविढ्वम् । असविध्वम् । सुषुवे । सविता । सोता ।

---

१. After it—आसाते C. २. Dropped D_4. ३. Before it—भाष्यकारमते सलोपः B_2; आद्ध्वे dropped D_2. ४. वस् N. ५. केषांचिन्मतं वेट् after it—D_2, C. ६. After it—भृस्त्वादित्वादिड् वा । भृस्तुसुस्त्यशूभ्यः परस्य तादेरार्धधातुकस्येड् वेति केचित् । वस्ता B_2. ७. Dropped D_4. ८. After it—इदितो नुम् धातोः C. ९. Dropped D_3. १०. इति dropped C. ११. Before it— 'आडुत्तमस्य-' इत्याट् D_4. १२. After it—साविता । सोता । साविषीष्ट । सोषीष्ट D_1.

शीङ् स्वप्ने ।

शीङः सार्वधातुके गुणः ॥७।४।२१॥

शीङो गुणः स्यात् सार्वधातुके ॥ 'क्ङिति च' इत्यस्यापवादः । शेते । शयाते ।

शीङो रुट् ॥७।१।६॥

शीङो झादेशस्यातो रुडागमः स्यात् ॥ शेरते । अशयिष्ट[1] । इङ् अध्ययने । अधीते । अजादावियङ् । अधीयाते । अधीयते । अधीयीत[2] । अधीयीयाताम्[3] । [4]अध्ययै ।

शीङ् । सानुबन्धग्रहणं यङ्लुङ्निवृत्त्यर्थम् । शेशीशयादेश इति अयादेशः ।

शीङः । अत्रापि ङकारो यङ्लुङ्निवृत्त्यर्थः । व्यतिशेश्यते । अदित्यत्रानुवर्तते तच्च प्रथमान्तमप्यर्थात् षष्ठ्यन्तं जायते । रुडयं परादिः क्रियते । स यदि झस्यैव स्यात् अत् न स्यात् तेन व्यवधानात् इत्यत् एवायमागम इत्यभिप्रेत्याह । झादेशस्यात इति । शयीत । शेताम् । अशेत । **अशयिष्टेति** । लुङ् । सिच् । इट् । अशयिध्वम् । अशयिढ्वम् । शिश्ये । शयिता । शयिषीष्ट । इङ् । अयमनिट् । **अधीते** इति । इङिकावध्युपसर्गतो न व्यभिचरत इत्यधेः प्राक् प्रयोगः । सवर्णदीर्घः । **अजादावियङिति** । 'अचि श्नुधातु—' इति । **अध्ययै** इति ।

---

१. After it—शिष्ये । शयिषीष्ट । शयिता B_2; शिश्ये । शयिता । शयिषीष्ट । शयिष्यते । अशयिष्यत D_1. २. Dropped B_2, D_3, D_4. ३. Dropped D_3, D_4, B_2; अधीताम् D_1. ४, P has गुणः before it.

अध्यैत । परत्वादियङि कृते पश्चादाट् । अध्यैयाताम् । अध्यैयत ।[१]

विभाषा लुङ्लृङोः ॥२।४।५०॥

इङो गाङादेशो वा स्यात् लुङ्लृङोः परयोः ॥

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥१।२।१॥

गाङादेशात् कुटादिभ्यश्च[४] परे ञ्णितः प्रत्यया ङितः स्युः ॥

घुमास्थागापाजहातिसां हलि ॥६।४।६६॥

एषामात ईत् स्याद्धलादौ[५] क्ङिति ॥

लोडुत्तमैकवचनम् । इट् । एत्वम् । 'एत ऐ' इत्यैत्वम् । 'आडुत्तमस्य' इत्याट् । गुणायादेशौ । उपसर्गेकारस्य यण् । अध्यैयेति । लङ् । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । यणादेशः । अध्यैयाताम् । अध्यैयत ।

विभाषा ।

गाङ्कुटादिभ्यः । गाङिति गादेशो गृह्यते न गाङ् गताविति धातुः । गाङो ङकारस्यानन्यार्थत्वादित्यभिप्रेत्याह । **गाङादेशा**दिति । कुटादयस्तु

कुट्पुट्कुच्व्यच्गुजगुडः डिप्छुर्स्फुट्मुट्तुटत्रुटः ।
चुट्छुट्जुड्कड्लुट्कृडः कुड्पुड्घुट्तुड्थुडस्थुडः ॥
खुड्छुड्स्फुर्स्फुल्स्फरस्फुडः चुडवुडक्रुडोपि च ।
भृडगुरी णूधूश्चैव गुध्रुकूश्च कुटादयः ॥

ङितः स्युरिति । ङिद्वत् स्युः । ङित इव कार्यं स्यादित्यतिदेशः ।

घुमा । घुसंज्ञकाः । मेङ् प्रणिदाने । माङ् माने । मा माने इति त्रयाणां मा इति ग्रहणम् । ष्ठा गतिनिवृत्तौ । गा इति गाङ् गतौ गै शब्दे गाङ् स्तुतौ 'इणो गा लुङि' 'इकोपि गा' 'गाङ् लिटि' 'विभाषा लुङ्लृङोः' इति सर्वेषां ग्रहणम् । गामादाग्रहणेष्वविशेष इति ।

---

१. B1, B2, D2, D3 drop पर°...°दाट्; D1, D4 drop from पर° to अध्यैयत. २. B1, B2, D2, D3 drop it. ३. After it—अध्यैयि N1. ४. कुटादेश्च परे N. ५. After it-आर्धधातुके D1.

अध्यगीष्ट । अध्यैष्ट ।

गाङ् लिटि ॥२।४।४९॥

इङो गाङ् स्याल्लिटि परे ॥ अधिजगे । अध्येता । अध्येषीष्ट । अध्येष्यते । अध्यगीष्यत । अध्यैष्यत ।

दीधीङ् दीप्तिदेवनयोः । दीधीते । 'एरनेकाचः—' इति यण् । दीध्याते ।

यीवर्णयोर्दीधीवेव्योः ॥७।४।५३॥

दीधीवेव्योरन्तस्य लोपः स्याद्यकारे इवर्णे च परे ॥

पा इति पिबतेरेव ग्रहणम् । न पातेः । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति परिभाषया । ओहाक् त्यागे । घोन्तकर्माणि । हलि किम् । ददतुः । ददुः । आलोपाद्धि परत्वादीकारः स्यात् ।

अध्यैष्टेति । आट् । 'आटश्च' इति वृद्धिः ।

गाङ् । ङिलकारको निर्देशः लिटि लकारादाविति । तेनादेशेभ्यः प्रागेव लावस्थायां गाङादेशः । ततश्च अधिजगे इत्यत्र 'द्विर्वचनेचि' इति स्थानिवत्त्वेन द्वित्वम् । गाङित्यनुबन्धो गाङ्कुटेत्यत्र विशेषणार्थः । न हि स्थानिवत्त्वेन गाङिति रूपं लभ्यते । अधिजगे इति । एश् । 'आतो लोपः—' । स्थानिवत्त्वाद् द्वित्वम् । चुत्वम् ।

दीधीङ् । देवनं क्रीडा । इतो द्वौ सेटौ । दीध्यते ।

यीवर्ण । यकारे इकार उच्चारणार्थः । यीवर्णयोः किम् ।

---

१. After it—वा P, C. २. °लिटि (परे dropped) D1, P, C. ३. After it—अधिजगाते B2 ; before it– 'आतो लोपः' D4. ४. यकारे परे इवर्णे च C. ५. अधिजगे इति द्विर्वचने स्थानिवत्त्वं न । Bc2, Dc3. ६. चुत्वम् Bc2.

दीधीत।[1] दीधीयाताम्। 'दीधीवेवीटाम्' इति न गुणः दीध्यै। अदीधीत। अदीधीष्ट। दीध्यांचक्रे।

[2]एवं वेविङ् वेतिना तुल्ये।[3]

[4]इत्यात्मनेपदप्रक्रिया।

आदीध्यकः। वर्णग्रहणमादीधयते ण्वुल् आदीध्यकः। अत्र सत्येव गौ ण्वुलुत्पत्तेः प्रागेव प्राप्तोपि लोपो नेत्येवमर्थम्। दीधीतेति। लिङ्। दीधीयाताम्। दीधीतामिति। लोट्। दीध्याताम्। दीध्यताम्। दीध्यै इति। लोडुत्तमैकवचनम्। अदीधीतेति। लङ्। अदीधिष्टेति। लुङ्। सिच्। इट्। अन्तलोपः। दीध्यांचक्रे इति। अनेकाच आम् वक्तव्यमित्याम्। 'आम्प्रत्ययवत्—' इत्यात्मनेपदम्। दीधिता। दीधिषीष्ट। दीधिष्यते।

एवं ववाङ् वेति। वी गतिप्रजनकान्त्यशनखादनेषु। अनेन समानार्थे वर्तते इत्यर्थः। वेवीते। वेव्याते। वेवीत। वेवीयाताम्। वेवीताम्। वेव्याताम्। अवेवीत। अवेविष्ट। वेव्यांचक्रे। वेविता। वेविषीष्ट। वेविष्यते।

---

१. दीधीताम् N_1, दीधीयाताम् dropped D_3. २. C drops एवम्. ३. After this-वीधातुः गतिप्रजनकान्त्यशनखादनेषु C. ४. P and C, D_1, D_3, N_1, drop this. ५. °मादीध्यते ण्वुलि आदीध्यकाः। Do_3.

द्विषँ अप्रीतौ । द्वेष्टि । द्विष्टे । द्विड्ढि । अद्वेट्-ड् ।

द्विषश्च ॥३।४।११२॥

द्विषो लङो झेर्जुस् वा स्यात् ॥ अद्विषुः । अद्विषन् । अद्विष्ट । अद्विक्षत् । अद्विक्षत ।

दुह प्रपूरणे । दोदेर्घः । दोग्धि । धोक्षि । दुग्धि ।

द्विष । इतश्चत्वारोऽनिट उभयपदिनश्च षट् । द्वेष्टि । द्विष्टः । द्विषन्ति । द्विष्टे । द्विष्यात् । द्विषीत । द्वेष्टु । द्विड्ढीति । 'हुझल्भ्यः—' इति हेर्धिः । जश्त्वं डः । ष्टुत्वम् । द्वेषाणि । द्विष्टाम् । अद्वेडिति । लङ् । तिलोपः । जश्त्वम् । 'वावसाने' । अद्विष्टेति । लङ् । आत्मनेपदम् । अद्विक्षादिति । लुङ् । परस्मैपदम् । च्लिः । 'शल इगुपधा—' इति क्सः । कत्वम् । षत्वम् । अद्विक्षतेति । आत्मनेपदम् । क्सः । अद्विक्षाताम् । अद्विक्षन्त । दिद्वेष । दिद्विषे । द्वेष्टासि । द्वेष्टासे । द्विष्यात् । द्विष्यास्ताम् । द्विक्षीष्ट । द्वेक्ष्यति । द्वेक्ष्यते ।

दुह । प्रपूरणं पूरणाभावः क्षरणमिति यावत् । उपसर्गो धात्वर्थं बाधते प्रस्थानवत् । यदाहुः ।

'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्टयन्योऽनर्थकोऽन्यः प्रयुज्यते' ॥ इति ।

दोग्धीति । तिप् । गुणः । 'झषस्तथोः—' इति धः । 'झलां जश् झशि' इति जश्त्वम् । दुग्धः । दुहन्ति । धोक्षीति । सिप् । घत्वम् । 'एकाचो बशो—' इति भष् । चर्त्वम् । षत्वम् । कषयोगे क्षः । दुग्धः । दुग्ध । दोह्मि । दुह्वः । दुह्मः । दुग्धे । दुहाते । दुह्यात् । दुहीत । दोग्धु । दुग्धि इति । लोट् । मध्यमैकवचनम् । हेर्धिः ।

---

१. द्विष N. २. द्वेष्टि । द्विष्टे dropped N, D_3. ३. In its place द्विष्यात् । द्वेष्टु । द्विष्टाद्वा । द्विड्ढि &c. D_1, D_4. ४. स्याद्वा N. ५. Dropped D_3. ६. दादेर्धातोर्घः D_3; दादेर्घः after धोक्षि D_4. ७. Before it—दुग्ध B_2; dropped D_3. ८. After it—दुग्धे C, N. ९. Dropped D_1, D_3, D_4, N. १०. दुह प्रपूरणे Bc_2. ११. उपसर्गोऽत्र Bc_2.

धुक्ष्व । धुग्ध्वम् । दोहे । अधोक्[1] । अधुक्षत्[2] । अधुक्षत[3] । 'लुग्वा दुह–' इति क्सस्य वा लुक् । अदुग्ध ।[3] 'क्सस्याचि' ।[4] अधुक्षाताम् । धुक्षीष्ट ।[5]

एवं दिह उपचये[6] । प्रणिदेग्धि । अधिक्षत् ।[7]

दुग्धाम् । धुक्ष्वेति । मध्यमैकवचनम् । आत्मनेपदम् । षत्वम् । भष्भावः । धुग्ध्वमिति तत्रैव बहुवचनम् । भष् । दोहे इति । उत्तमैकवचनम् । गुणः । अधोक् इति । लङ् । तिप् । गुणः । घत्वं भष् चर्त्वं हल्ङ्यादिलोपः । अडागमः । अदुग्ध । अदुहाताम् । अदुहत । अधुक्षदिति । लुङ् । परस्मैपदम् । तिप् । 'शल–' इति क्सः । घत्वम् । भष्भावः । षत्वम् । अधुक्षत इति । आत्मनेपदम् । अदुग्धेति । घत्वं जश्त्वम् । दुदोह । दुदुहतुः । दुदोहिथ । दुदुहे । दोग्धासि । दोग्धासे । दुह्यात् । धुक्षीष्टेति । आशीर्लिङ् । सीयुट् । घत्वभष्भावचर्त्वषत्वानि । धोक्ष्यति । धोक्ष्यते ।

एवं दिह उपचये । उपचयो लोपः । प्रणिदेग्धीति । 'नेर्गद–' इति णत्वम् । दिग्धे । दिह्यात् । दिहीत । देग्धु । दिग्धाम् । अधेक् । अदिग्ध । अदिहाताम् । अधिक्षत् । इति लुङ् । क्सः । अधिक्षत । अदिग्ध । अधिक्षाताम् । दिदेह । दिदिहे । देग्धा । दिह्यात् । धिक्षीष्ट । धेक्ष्यति । धेक्ष्यते ।

---

१. Before it—प्रथमपुरुषे D_2. २. Dropped D_2. ३. After it—झलन्तस्वात् 'झषस्तथोः–' इति धः D_4. ४. After it—इति क्सान्तलोपः. ५. After it—धोक्ष्यति । धोक्ष्यते D_1. ६. उपलेपे B_1. ७. After it—अदिग्ध । अधिक्षत । धिक्षीष्ट । धेक्ष्यति D_1.

लिह आस्वादने। ढत्वधत्वादि। लेढि।[1] इत्यादि दुहवत्।[2]

ऊर्णुञ् आच्छादने।

ऊर्णोतेर्विभाषा ॥७।३।९०॥

ऊर्णोतेर्वा वृद्धिःस्याद्धलि पिति सार्वधातुके॥ ऊर्णौति। ऊर्णोति। ऊर्णुतः।

गुणोपृक्ते ॥७।३।९१॥

ऊर्णोतेरपृक्ते पिति हलि[3] सार्वधातुके गुणः स्यात्। वृद्धेरपवादः। और्णोत्। और्णोः[4]।

लिह। ढत्वधत्वादीति। ढत्वं 'हो ढः' इति। धत्वं 'झषस्तथोः—' इति। आदिशब्दात् ष्टुत्वम्। ढलोपः। लेढि इति। लट्। तिप्। लीढे। लिह्यात्। लिहीत। लेढु। लीढि। लीढाम्। अलेट्। अलीढ। अलिक्षत्। अलिक्षत। अलीढ। लिलेह। लिलिहे। लेढा। लिह्यात्। लिक्षीष्ट।

ऊर्णुञ्। अयं नकारोपध एव 'रषाभ्याम्—' इति कृतणत्वः पठ्यते सेट्कः।

ऊर्णोतेः। हलीत्यादि। हलादौ पिति सार्वधातुके इत्यर्थः। ऊर्णोतीति।

गुणः। ऊर्णुत इति। ङित्त्वाद्गुणाभावः। ऊर्णुवन्ति। ऊर्णुते। और्णोदिति। 'आटश्च' इति वृद्धिः।

---

१. Before it—लीढे B_1. २. इत्यादि दुहवत् dropped D_4. ३. पिति हलि D_2, D_3. ४. Dropped D_1.

ऊर्णोतेर्विभाषा॥७।२।६॥

इडादौ सिचि परे ऊर्णोतेर्वा वृद्धिः स्यात् परस्मैपदेषु॥ और्णावीत्। और्णवीत्।

विभाषोर्णोः॥१।२।३॥

ऊर्णोतेरिडादिप्रत्ययो वा ङित् स्यात्॥ और्णुवीत। और्णविष्ट। और्णुविष्ट। ऊर्णोतेरामनिषेधो वक्तव्यः।

अजादेर्द्वितीयस्य॥६।१।२॥

अजादेर्धातोर्द्वितीयस्यावयवस्यैकाचो द्वे स्तः॥

ऊर्णोतेः। विभाषा ऊर्णोरिति यदा ङित्त्वं नास्ति तदायं विकल्पः। ङित्त्वपक्षे तूवङ् च। और्णावीदिति। लुङ्। सिच्। 'इट ईटि' इति सलोपः। सवर्णदीर्घः। आट्। और्णविदिति। वृद्ध्यभावे रूपम्। ङित्त्वाभावपक्षे गुणः।

और्णुवीदिति। ङित्त्वपक्षे उवङ्। और्णविष्ट। और्णुविष्टेति। लुङ्। आत्मनेपदम्। ङित्त्वं वा। ङित्त्वाभावे गुणः। ङित्त्वे उवङ्।

'वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्।
आमश्च प्रतिषेधार्थमेकाचश्चेदुपग्रहात्'॥ इति।

अजादेः। 'एकाचो द्वे' इति प्राप्तप्रथमद्विर्वचनापवादोयम्।

---

१. और्णुविष्ट। और्णविष्ट D_3. २. Dropped D_4. ३. वाच्यः D_1.
४. द्वितीयावयवस्यै B_1, B_2, P, D_4;

न न्द्राः संयोगादयः ॥६।१।३॥

द्वितीयस्यैकाचोवयवाः संयोगादयो नदरा द्विर्नोच्यन्ते । ऊर्णुनाव । ऊर्णुनुवतुः । ऊर्णुनविथ । ऊर्णुनुविथ । ऊर्णुनुविव । ऊर्णविता । ऊर्णुविता ।[५]

टुञ् स्तुतौ ।

तुरुस्तुशम्यमः सार्वधातुके ॥७।३।९५॥

एभ्यः पितो हलः सार्वधातुकस्य ईडागमो वा स्यात् ॥

न न्द्राः । द्वितीयस्यैकाचोवयवाना न्द्राणां तदन्तर्भावाद्विर्वचनं प्राप्तं प्रतिषिध्यते । नदरा । इति । नकारदकाररेफा इत्यर्थः । ऊर्णुनावेति । नकारस्य द्वित्वम् । ऊर्णुनविथ । ऊर्णुनुविथेति । 'विभाषोर्णोः' इति वा ङित्त्वम् । ऊर्णुनुवे । ऊर्णविता । ऊर्णुवितेति । वा ङित्त्वाद्गुणो-वङौ । ऊर्णुयात् । ऊर्णविषीष्ट । ऊर्णुविषीष्ट । ऊर्णविष्यति । ऊर्णु-विष्यति । ऊर्णविष्यते । ऊर्णुविष्यते ।

ष्टुञ् । अनिट् ।

तु । तुरिति सौत्रो धातुः । वृत्तिहिंसापूर्तिषु वर्तते । रु शब्दे । ष्टुञ् स्तुतौ । शम उपशमे । अम गतौ । शम्यमोः 'बहुलं छन्दसि' विकरणलुकि हलादिसार्वधातुकमनन्तरं स्यात् । शमीध्वम् । अभ्य-मिति । आपिशलास्तुरुस्तुशम्यमः सार्वधातुकासु छन्दसि इति पठन्ति । तन्मतेनयं विधिः सर्वेषां छन्दस्येव स्यात् । 'नाभ्यस्त-स्याचि पिति सार्वधातुके' इत्यनुवृत्तावपि पुनः सार्वधातुकग्रहो पिदर्थः । स्तुवीतः । स्तुवीध्वम् । यद् वृत्तौ पितो हल इत्युक्तं तदर्वाचीनमतेन ।

---

१. नकारदकाररेफाः संयोगाद्यां D_1. २. ऊर्णुनुविथ । ऊर्णुनविथ D_3. ३. Dropped D_2. ४. ऊर्णुविता । ऊर्णविता । D_3. ५. After it—ऊर्णुविष्यति । ऊर्णविष्यति D_1; ऊर्णुविता । ऊर्णविता N_1. ६. स्यात्ता C, D_4.

स्तवीति । स्तौति[1] । अभिष्टौति[2] । अस्तवीत्[3] । अस्तौत्[4] । न्यस्तावीत् । न्यष्टावीत् । अस्तोष्ट[5] । तुष्टोथ । तुष्टुव । स्तोता ।[6] स्तोषीष्ट ।

टुक्षु शब्दे । क्षविता[8] ।

तथोक्तं **मुग्धबोधे** । 'पिद्धस्रस्येम् ब्रुवो यङ्लुग्मुतुस्तोस्तुवा' इति । **स्तवीति** इति । गुणावादेशौ । **स्तौतीति** । 'उतो वृद्धिः—' इति वृद्धिः । **अभिष्टौतीति** । 'उपसर्गात् सुनोति—' इत्यादिना षत्वम् । स्तुतः । स्तुवन्ति । स्तुते । स्तुयात् । स्तुवीत । स्तौतु । स्तवीतु । स्तुताम् । अस्तवीत् । अस्तौत् । अस्तुत । **न्यस्तावीत्** । **न्यष्टावीदिति** । लुङ् । सिच् । 'स्तुसुधूञ्—' इति सिच् । इट् । सिचि वृद्धिः । 'सिवादीनाम्—' इति अड्व्यवायेपि वा षत्वमिति । **अस्तोष्टेति** । लुङ् । सिच् । आत्मनेपदत्वादिडभावः ।[7] तुष्टाव । तुष्टोथ । **तुष्टुवेति** । क्रादित्वादिडभावः । तुष्टुवे । स्तूयात् । स्तोष्यति । स्तोष्यते ।

टुक्षु । इतस्त्रयः परस्मैपदिनश्चत्वारः सेट्काः । क्षौति । अक्षावीत् । चुक्षाव । क्षूयात् । क्षविष्यति ।

---

१. Before it— 'उतो वृद्धिर्लुकि' D_3, D_4. २. 'उपसर्गात् सुनोति—' इति षः । अभिष्टौति । 'सिवादीनां वाड्व्यवायेपि' । न्यष्टौत् । अस्तौत् । अस्तवीत् । 'स्तुसुधूञ्भ्यः—' इतीट् । न्यस्तावीत् &c. D_4. ३. This and the next form dropped D_1, D_3, N. ४. In its place अस्तुत D_2. ५. अस्तोष्ट । तुष्टाव । स्तोषीष्ट B_2. ६. After this C has on the margin स्तविता । 'भूस्तुशुच्चि' इति वेट् ; स्तोता । स्तविता । स्तोषीष्ट । स्तोष्यति D_1; after स्तोता—'भूस्तुशुच्वस्त्यशूभ्यः परस्य तादेरार्धधातुकस्येडेति केचित् । स्तविता । स्तोषीष्ट N. ७. Dropped D_3. ८. क्षौति । क्षविता D_1.

रु शब्दे ।[१] रौति । रवीति । अरावीत्[२] । रविता । इडेत्येके । रोता[४] ।

णु स्तुतौ । नुरुस्त्विति पाठाश्रयणादीड्वात्रेति केचित् । नौति । नवीति । नविता । एकीयमते वेट् । नोता ।

ब्रूञ् व्यक्तायां वाचि ।

ब्रुव ईट् ॥७।३।९३॥

ब्रुवः परस्य पितो हलः सार्वधातुकस्य ईडागमः स्यात् ॥

रु । रौतीति । वृद्धिः । रवीतीति । 'तुरुस्तु—' इति वेट् । रुयात् । रौतु । रवीतु । अरौत् । अरवीत् । अरावीदिति । इट् । सिचि वृद्धिः । 'रुदुस्तु—' इति वेट् । अरौषीत् । रुराव । इडेत्येके इति । रुदुसुतुधातूनां लिटं विना इडेति केचिदिति । रोता । रूयात् । रविष्यति । रोष्यति ।

णु । पठितोऽप्ययं धातुः पुनः पठ्यते सार्वधातुके हलि केषांचिन्मतेनेड् भवतीति दर्शयितुम् । नौतु । नवीतु । अनौत् । अनवीत् ।

ब्रूञ् ।

ब्रुवः । पित इत्यादि । पितो हलादेरित्यर्थः ।

---

१. 'उतो वृद्धिर्लुकि हलि' before it in C. २. अरौषीत् after it in B_1, B_2, D_4. ३. रोता इत्येके B_1, B_2, D_2. ४. रोता dropped D_1, D_2, D_4, N_1. ५. नुरिस्त्विति° B_1. ६. नोता dropped D_1, D_2, D_4; नोता before एकीयमते वेट् । D_3. ७. प्रदर्शयितुम् । Bc_2.

ब्रवीति[1] । ब्रूते ।

ब्रुवः पञ्चानामादित आहो ब्रुवः ॥३।४।८४॥

ब्रुवो लडादिपञ्चानां[2] णलादि पञ्चादेशा वा स्युः ब्रुव आहादेशश्च[3] ॥

आह । आहतुः । आहुः ।

आहः स्थः ॥८।२।३५॥

आहो हस्य थः स्यात् झलि ॥ चर्त्वम् । ब्रुव ईडिति[4] प्राप्ते आहो ब्रुव[5] ईट् न । आत्थ । आहथुः । पक्षे सुगमम् ।

ब्रुवः । स्थानिषु लडादेशेषु तिबादिषु पञ्चानामादित इति संबन्धादादेशेष्वपि णलादिषु पञ्चत्वमादित्वं च स्यादित्यभिप्रेत्याह । **णलादि पञ्चादेशा** इति । ब्रुव आहादेशश्चेति संनियोगेनेति शेषः । ब्रुव इति पुनर्वचनं स्थान्यर्थमन्यथा हि प्रकृतत्वाण्णलादीनामेवाहादेशः स्यात् ।

आह । 'नहो धः' इति प्रकृतं धत्वं विहाय आदेशान्तरकरणं 'झषस्तथोर्धोऽधः' इत्यस्य निवृत्त्यर्थम् । **चर्त्वमिति** । 'खरि च' इति । **पक्षे सुगममिति** । प्रक्रियाविशेषाभावादित्यभिप्रायः ।

ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः । ब्रूते । ब्रूयात् । ब्रुवीत । ब्रवीतु । ब्रूहि । अब्रवीत् । अब्रूत ।

---

१. After it—ब्रूते B1, P; C; ब्रूते । ब्रुतः D4. २. लडादेशानां पञ्चानां C; B2, D2. ३. आहश्चादेशः D1. ४. ईडितीटि D1. ५. ब्रुवश्च B1, D1, D3.

ब्रुवो वचिः ॥२।४।५३॥

ब्रुवो [1]वच्यादेशः स्यादार्धधातुके ॥ इकार इत् । [3]अवोचत् । अवोचते । उवाच ।[4] ऊचे ।

इत्यदादिप्रक्रिया ।

ब्रुवः । इकार इदिति । इदिव इत् । उच्चारणार्थ इति भावः । **अवोचदिति** । 'अस्यतिवक्ति—' इत्यङ् । 'वच उम्' इत्युमागमः । 'आद्गुणः' । **अवोचतेति** । आत्मनेपदे । **उवाचेति** । 'लिट्यभ्यासस्य' इति संप्रसारणम् । **ऊचे इति** । 'वचिस्वपि—' इति । वक्तासि । वक्तासे । उच्यात् । वक्षीष्ट । वक्ष्यति । वक्ष्यते ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगमदमलोऽदादिसंज्ञो गणोऽयम् ॥

---

१. वाग्विरादेशः D_1. २. Before it—'अस्यतिवक्ति-' इत्यङ् । D_4. ३. After it—अवोचेताम् । अवोचन्त D_1; dropped D_3. ४. After it—उवाच D_3.

हु दानादनयोः ।

जुहोत्यादिभ्यः श्लुः ॥२।४।७५॥

जुहोत्यादेः परस्य शपः श्लुः स्यात् ॥ लुकोपवादः ।

श्लौ ॥६।१।१०॥

श्लौ सत्यनभ्यासस्य धात्ववयवस्यैकाचो द्वे स्तः ॥ जुहोति । जुहुतः । 'अदभ्यस्तात्' । 'हुश्नुवोः—' इति यण् । जुह्वति । जुहाधि । जुहवाव । 'जुसि च' इति गुणः । अजुहवुः । अहौषीत् ।

हु । दानमत्र हविःप्रक्षेपः । अदनं भक्षणम् । इत आरभ्य ऋपर्यन्ताः षट् परस्मैपदिनः । त्रयोनिटः ।

जुहोत्यादिभ्यः । शबनुवर्तते । न यङ् । यङोनुवृत्तौ[3] हि श्लु न । तत्र लुग्पि 'सन्यङोः' इति द्वित्वे सिद्धे 'श्लौ' इति व्यर्थं स्यात् । अतः शबेवानुवर्तत इत्यभिप्रेत्याह । **शपः श्लुः स्यादिति** । श्लुरिति प्रत्ययादर्शनस्य संज्ञा । 'प्रत्ययस्य लुक्श्लुलुपः' इति । **लुकोपवाद** इति । 'अदिप्रभृति—' इति प्राप्तस्य । **जुहोतीति** । गुणः । श्लुत्वम् । **जुहुत** इति । ङित्त्वाद्गुणाभावः । जुहोषि[1] । जुहुथः । जुहुथ । जुहोमि । जुहुवः । जुहुमः । जुहुयात् । जुहोतु । **जुहुधीति** । 'हुझल्भ्यः—' इति हेर्धिः । **जुहवावेति** । लोडुत्तमद्विवचनम् । वस् । सलोपः । आट् । गुणावादेशौ । अजुहोत्[2] । **अजुहवुरिति** । 'सिजभ्यस्त—' इति जुस् । **अहौषीदिति** । 'सिचि वृद्धिः—' इति वृद्धिः ।

---

१. जुहोषि । जुहोतु B₂. २. अजुहोत् । अजुहवुः B₂. ३. °नुवृत्तेः Dc₁, Dc₃, Dc₄.

भीह्रीभृहुवां श्लुवच्च ॥३।१।३९॥

एभ्यो लिट्याम् वा स्यात् आमि श्लाविव कार्यं च[1] ॥
जुहवामास । जुहाव । उवेङ्[2] । जुहुवतुः ।

ञिभी भये । बिभेति[3] ।

भियोन्यतरस्याम् ॥६।४।११५॥

भिय ईकारान्तादेशो[4] वा स्यात् सार्वधातुके क्ङिति हलि ॥
[6]बिभीतः । बिभितः । बिभ्यति । बिभियात् । बिभीयात् ।

भीह्री । ञिभी भये । ह्री लज्जायाम् । डुभृञ् धारणपोषणयोः । हु दानादानयोः । **हुवामिति** । सुपां सुपो भवन्ति । षष्ठी पञ्चम्यर्थे । **श्लुवदिति** । श्लाविव । 'तत्र तस्येव' इति सप्तमीसमर्थाद्वतिः । कार्यातिदेशश्चायम् । अत एवाह । **श्लाविव कार्यं चेति** । किं पुनस्तत् कार्यम् । द्वित्वमित्वं च । **जुहवामासेति** । 'कृञ्च—' इत्यस्त्यनुप्रयोगः । **जुहावेति** । आमभावे वृद्ध्यावादेशौ । द्वित्वम् । चुत्वम् । जुहोथ । जुहविथ । होता । हूयात् । होष्यति । अहोष्यत् ।

ञिभी । **बिभेतीति** । गुणः । द्वित्वम् । ह्रस्वः । 'अभ्यासे चर्च' इति भकारस्य बकारः ।

भियः । क्ङितीति किम् । बिभेति । ननु चात्रेत्वे जातेपि किं न स्यात् उच्यते । इत्वसामर्थ्याद् गुणो न भवेत् । हलीति किम् । बिभ्यति । अत्रापि इत्वविधानसामर्थ्यात् 'एरनेकाचः—' इति यण् न स्यात् । **बिभियात्** । **बिभीयादिति** । इत्वं वा । बिभेतु । बिभितात् । बिभीतात् ।

---

१. Dropped D3. २. उवङ् dropped D1. ३. Dropped N1. ४. इकारान्ता° D4. ५. बिभितः । बिभीतः D3. D4. ६. नश्येत् Dc1, Dc3.

अबिभयुः । बिभयामास । बिभाय ।

ह्री लज्जायाम् । जिह्रेति[३] । जिह्रियति[४] । जिह्रयामास । जिह्राय ।[४]

पॄ पालनपूरणयोः ।

अर्तिपिपर्त्योश्च ॥७।४।७७॥

अनयोरभ्यासस्य इदन्तादेशः स्यात् श्लौ ॥[५] पिपर्ति ।

उदोष्ठ्यपूर्वस्य ॥७।१।१०२॥

ओष्ठ्यपूर्वस्य ऋत उत् स्यात् क्ङिति ॥ रपरत्वम् ।

अबिभेत् । अबिभिताम् । अबिभीताम् । **अबिभयुरिति** । 'सिजभ्यस्त—' इति झेर्जुस् । 'जुसि च' इति गुणः । अभैषीत् । **बिभयामासेति** । 'भीह्री—' इत्याम् । श्लुवत् कार्यं च । भेता । भीयात् । भेष्यति ।

ह्री । जिह्रेति । गुणः । द्वित्वम् । ह्रस्वत्वहलादिशेषचुत्वानि । जिह्रीतः । **जिह्रियतीति** । संयोगादित्वान्न यण् । इयङ् । जिह्रीयात् । जिह्रेतु । अजिह्रेत् । अजिह्रयुः । अह्रैषीत् । जिह्रयामास । आम् । श्लुवच्च । ह्रेता । ह्रीयात् । ह्रेष्यति । ऋ । सेट्कः ।

पॄ पालनपूरणयोः । अच्छन्दोर्थं वचनम् । छन्दसि तु 'बहुलं छन्दसि' इत्युत्तरसूत्रेण सिद्धत्वात् ।

अर्ति । ऋ गतौ ।

उदोष्ठ्य । ओष्ठ्यः पूर्वो यस्मात् ऋतस्तदन्तस्य धातोरङ्गस्योकारः स्यादित्यर्थः । ओष्ठ्योऽत्र धात्ववयव एव गृह्यते । तेन ऋ गतावित्यस्य समीर्णमिति स्यात् । **पिपर्तीति** । श्लुः । गुणः । रपरः । द्वित्वम् । इत्वम् । **रपरत्वमिति** । 'उरण् रपरः' इति ।

---

१. Before it—अबिभेत् B_2. २. C. D_4 have जिह्रीतः after it. ३. After it—जिह्रीयात् D_4. ४. After it—अह्रैषीत् B_2. ५. C has सति after it. ६. Dropped Dc_1. ७. आमि श्लुवच्च । Bc_2

'ह[१]लि च' इति दीर्घः । पिपूर्तः । पिपुरति । पिपूर्यात् । [२]अपिपः । अपिपरुः । [३]अपारीत् । पपार । '[४]ऋच्छत्यृताम्' ।[५] पपरतुः ।[६] [७]गुणत्वान्नैत्वम् ।[८] परिता । परीता । [९]पूर्यात् । ह्रस्वोपि पिपर्तिरस्ति । पिपृतः । पि[१०]प्रति । पिपृयात् । पिप्र[११]तु । पर्ता । प्रि[१२]यात् । 'रिङ्शयग्लिङ्क्षु' ।

दीर्घः । 'हलि च' इति । पिपूर्तः इति । इत्वम् । पिपुरतीति । उत्वे । 'अदभ्यस्तात् ।' पिपर्षि । पिपूर्थः । पिपूर्यादिति । लिङ् । पिपर्तु । पिपूर्तात्त्वा । पिपूर्हि । अपिप इति । गुणः । रपरत्विस्वेत्वाडागमहल्ङ्याब्भ्योलोपाः । अपिपरुरिति । जुस् । 'जुसि च' इति गुणः । अपारीत् । अपारिष्टाम् । पपार । गुणत्वान्नैत्वमिति । 'न शशदद—' इति । परिता । परीतेति । 'वॄतो वा' इति वा दीर्घः । पूर्यात् । परिष्यति । परीष्यति । ह्रस्वोपीति । तथाह क्षीरस्वामी क्षीरतरङ्गिण्याम् । 'ह्रस्वान्तोयम्' इति । [१३]नन्दीति । कविकल्पद्रुमे पृ पालन इत्युक्तम् । पिपर्ति । पिपृत इति । ह्रस्वत्वादुत्वं न । पिप्रतीति । 'इको यणचि' इति । पिपृयादिति । लिङ् । ङित्त्वाद्गुणाभावः । पिपर्तु । पिपृतात्त्वा । अपिपः । अपिपृताम् । अपिपरुः । अपार्षीत् । पपार । पप्रतुरिति । ह्रस्वत्वान्न गुणः । पर्तेति । [१४]अनिट् । प्रियात् । परिष्यति ।

---

१. C drops 'हलि च' इति दीर्घः; 'हलि च' इति dropped N_1, D_3, D_4. २. Before it—पिपर्तु B_2. ३. अपारीत् । पपार dropped D_1, D_2, N_1; अपारीत् dropped D_4. ४. C drops ऋच्छत्यृताम्. ५. °मिति गुणः D_3. ६. After it—पपरुः B_2, D_3, P. ७. गुणि° B_1. ८. After it—'वॄतो वा' इति दीर्घः B_2, C. ९. Dropped D_1, D_3, N. १०. Dropped N. ११. For it B_1 has अपार्षीत् । पप्रतुः; P has पप्रतुः after it; अपार्षीत् । पपार । पप्रतुः । पर्ता । प्रियात् for पिप्रतु to लिङ्क्षु B_2; पपार । पप्रतुः । पर्ता for पिप्रतु to लिङ्क्षु D_3. १२. D_1, D_4, N drop from प्रियात् to लिङ्क्षु ।; D_2 drops from 'रिङ्. to लिङ्क्षु. १३. न निन्वतीति Dc_3. १४. नेट् Bc_2, Dc_3.

ओहाक् त्यागे । जहाति ।

जहातेश्च ॥६।४।११६॥

जहातेरात इद्वा स्यात् सार्वधातुके क्ङिति हलि । जहितः ।

ई हल्यघोः ॥६।४।११३॥

आभ्यस्तयोरात ईत् स्यात् सार्वधातुके क्ङिति हलि न तु घुसंज्ञस्य ॥ जहीतः ॥ 'श्नाभ्यस्तयोः—' इत्यातो लोपः । जहति ।

लोपो यि ॥६।४।११८॥

जहातेराते लोपः स्यात् सार्वधातुके ये परे ॥ जह्यात् ।

ओहाक् । ककारः 'हश्च व्रीहि—' इति सामान्यग्रहणाविघातार्थः । अक्ङित इति । अभ्यासस्य दीर्घनिषेधार्थ इत्येके । इत आरभ्य चत्वारोऽनिटः । जहातीति श्लुः । द्वित्वम् । ह्रस्वः । चुत्वम् ।

जहातेः । इत्वापवाद ईत्वमारभ्यते । जहातेरिति निर्देशाज्जिहीतेर्ई न ।

ई हलि । ननु हल्ग्रहणे असत्यपि 'श्नाभ्यस्तयोरातः' इत्यालोपस्यानवकाशत्वादेवाचि आलोप ईत्वं बाधिष्यत इति व्यर्थो हल्ग्रहः । मैवम् । असति हल्ग्रहणे वचनाद् द्वयं न स्यात् । घुसंज्ञकेष्वेवालोपः स्यात् । तस्माद्धलीति वाच्यम् । जहित इति । इत्वम् । जहीतः । द्वित्वादि । जहतीति । 'अदभ्यस्तात्' । जहासि । जहिथः । जहीथः । जह्यादिति । विधिलिङ् ।

जहातु । जहितात् । जहीताद्वा । जहतु ।

---

१. Dropped D_4. २. इत् स्याद्वा D_3. ३. °संज्ञकस्य D_3, D_4. ४. °स्यालापः D_3, D_4. ५. यकारे D_3. ६. आल्लोप Bc_2, ७. °वाल्लोप Bc_2.

आ च हौ ॥६।४।११७॥

जहातेर्हौ परे आकारान्तादेशो स्याद्वा[1] । पक्षे ईईच[2] ।

जहाहि । जहिहि । जहीहि ।[3] हेयात्[4] ।

ऋ गतौ । 'अर्तिपिपर्त्योः' इतीत्वम् । अभ्यासस्यासवर्णे । इयर्ति । इयृतः[5] । इय्रति[6] । इयृवः[7] । इयृयात् । इयराणि । ऐयः । ऐयृताम् । ऐयरुः । ऐयरम् । आर्षीत्[8] । आरत् । आर[9] ।

आ च हौ । नकार इत्वान्यतरस्यांग्रहणयोरनुकर्षणार्थ इत्यभिप्रेत्याह । जहातेरित्यादि । जहितम् । जहीतम् । अजहात् । अजहिताम् । अजहीताम् । अजहुः । अहासीत् । जहौ । हाता । हेयादिति । 'एर्लिङि' इत्येत्वम् । हास्यति । अहास्यत् ।

ऋ । इयर्तीति । गुणः । रपरः । द्वित्वम् । इयृतः । गुणाभावः । इय्रति । 'अदभ्यस्तात्' । इयर्षि । इयृथः । इयृथ । इयर्मि । इयृवः । इयृमः । इयृयात् । इयृयाताम् । इयर्तु । इयृतात् । इयराणीति । लोडुत्तमैकवचनम् । 'मेर्निः' । आट् । गुणः । रपरः । इयराव । ऐय इति । लङि ऋत् इति स्थिते । गुणः । द्वित्वम् । इय् । आट् । वृद्धिः । हल्ङ्यादिलोपः । विसर्गः । ऐयरुरिति । जुस् । गुणः । ऐयः । ऐयृतम् । ऐयृत । ऐयरम् । ऐयृव । आर्षीदिति । ऋसृभ्यामङ् वेति केचिदिति । अङभावे सिचि वृद्धिः । आरदिति । 'सर्तिशास्ति–' इत्यङ् ।

---

१. वा स्यात् D_1. N, P. C. २. इ; ई च D_2 D_4; पक्षे ई च D_3. ३. After it–अहासीत् P, N. ४. Before it–'एर्लिङि' D_4. ५. Dropped D_3, N_1. ६. Dropped D_1, D_3, N_1. ७. Before it–इयर्षि । इयृथः । and after it इयृमः D_2. ८. Before it C has 'ऋसृभ्यामङ्' इति अङ्; after it–अर्यात् । अर्तात् । अर्ता । अरिष्यति । आरिष्यत B_2; before it–'सर्तिशास्ति—' इत्यङ् । 'ऋदृशोऽङि गुणः' । D_3; before it सृऋभ्यामङ् वेति केचित् । D_4; and has आरत: after it D_4. ९. Dropped D_1, D_3, D_4, N_1.

णिजिर् शौचपोषणयोः ।

णिजां त्रयाणां गुणः श्लौ ॥७।४।७५॥

निजविजविपामभ्यासस्य गुणः स्यात् श्लौ ॥ नेनेक्ति ।

नेनिक्ते[1] । नेनिक्तः । नेनिग्धि ।

नाभ्यस्तस्याचि पिति सार्वधातुके ॥७।३।८७॥

लघूपधस्याभ्यस्तस्य गुणो न स्यादचि पिति सार्वधातुके[2] ॥

नेनिजानि । नेनिजाव । नेनिजाम[3] । अनेनेक् । अनेनिजुः ।

'ऋदृशोऽङि गुणः' । आर । 'ऋच्छत्यॄताम्' इति गुणः । आरुः । 'इडत्त्यर्ति—' इतीट् । आरिथ । अर्ता । 'गुणोऽर्ति—' इति गुणः । अर्यात् । अरिष्यति ।

णिजिर् । इत आरभ्य त्रावुभयपदिनौ । **णिजाम्** । णिजिर् शौचपोषणयोः ।

विजिर् पृथग्भावे । विष्लृ व्याप्तौ । त्रिग्रहणं 'भृञामित्' इत्येवमर्थम् । एषां हि समाप्त्यर्थं वृदिति पठ्यत एव । **नेनेक्तीति** । श्लुः । द्वित्वम् । 'चोः कुः ।' नेनिजति । नेनेक्षि । नेनिक्ते । नेनिजाते । नेनिज्यात् । नेनिजीत । नेनेक्तु । **नेनिग्धीति** । 'हुझल्भ्यो हेर्धिः ।

नाभ्यस्तस्य । अभ्यस्तस्येति किम् । वेदानि । अचीति किम् । नेनेक्ति । अनेनेक् । लङ् । गुणः । द्वित्वम् । अभ्यासगुणः । हल्ङ्यादिलोपः । अट् । 'चोः कुः' । 'वावसाने' । **अनेनिजुरिति** ।

---

१. नेनिक्ताम् N_1, after it नेनिजाति D_3. २. सार्वधातुकेऽचि पिति । D_3, D_4. ३. B_1 and P, D_1, D_4 drop it.

अनेनिजम् । [1]अनिजत् । 'इरितो वा' इति अङ् वा । अनैक्षीत् ।
[2]एवं विजिर् पृथग्भावे । वेवेक्ति । [3]वेविक्तः ।

विष्लृ व्याप्तौ । वेवेष्टि । [4]वेविष्टे । लृदित्वादङ् । वेति केचित् ।
अविषत् । अविक्षत् ।

जन जनने । जजन्ति ।

जनसनखनां सञ्झलोः ॥६।४।४२॥

एषामाकारान्तादेशः स्यात् झलादौ सनि क्ङिति च झलि ॥

'सिजभ्यस्त—' इति जुस् । **अनेनिजमिति** । 'नाभ्यस्तस्य—' इति गुणाभावः । अनेनिक्त । अनेनिजत । अनैक्षीत् । अनिक्त । निनेज । निनिजे । नेक्ता । निज्यात् । निक्षीष्ट । नेक्ष्यति । नेक्ष्यते ।

विष्लृ । **वेवेष्टीति** । श्लुः । गुणः । द्वित्वम् । अभ्यासगुणः । ष्टुत्वम् । वेविष्टे । वेविष्यात् । वेविषीत । वेवेष्टु । वेविड्ढि । वेविषाम् । अवेवेट् । अवेविष्ट । **लृदित्वादङिति** । 'पुषादि—' इत्यनेन । **वेति केचिदिति** । विषिरयमुदित् न लृदित् तेन विषेर्नाङिति केचित् प्रतिपन्ना इत्यर्थः । यथाह **क्षीरतरङ्गिण्यां क्षीरस्वामी** । अविषत् । ऊदिदित्येके । **अविक्षदिति** । क्सः । अविक्षत । विवेष । विविषे । वेष्टा । विष्यात् । विक्षीष्ट । वेक्ष्यति । वेक्ष्यते । अवेक्ष्यत् । अवेक्ष्यत ।

जन । अयं परस्मैपदी सेट्क श्च । **जजन्तीति** । श्लुः । द्वित्वम् ।

जनसन । क्ङितीत्यनुवर्तते । झल्ग्रहणं च सन्विशेषणार्थमनुवर्तत इत्यभिप्रेत्याह । **झलादौ सनि क्ङिति च** । **झलीति** । 'सनीवन्तर्ध—' इति पक्षे इडागमः । तस्मादत्र सनोत्यर्थमेव सन्ग्रहणम् । अन्ययोस्तु

---

१. अनैक्षीत् । अनिजत् P ; B_1 drops from 'इरितो वा' इति to अनैक्षीत् ; D_1, D_4 drop from अनिजत् to अनैक्षीत् ; D_2 has 'इरितो वा' । अनैक्षीत् । अनिजत् । ; N_1 drops 'इरितो वा—' इति अङ् वा । ; D_3 has 'वदव्रज—' इति वृद्धिः । अनैक्षीत् । अनैक्ताम् । अनैक्षुः । . २. From एवं to वेविक्तः dropped D_1, D_3. D_4. ३. वेविक्ते D_2. ४. Dropped B_2, D_1, D_3, D_4.

जजातः। 'गमहन–' इत्युपधालोपः। जज्ञति। 'ईड्जनोर्ध्वे च' इतीट्। जजनिषि। जजन्मि। जजन्वः। 'ये विभाषा'। जजन्यात्। जजायात्।[2]

डुदाञ् दाने। 'नेर्गद—' इति णत्वम्। प्रणिददाति। 'श्नाभ्यस्त–' इत्यातो लोपः। दत्तः। ददति। दद्वः। दत्ते।

झलादौ क्ङित्येव सनोतेर्विप्रतिषेधात्। आत्वेन नलोपो बाध्यते। सिषासति। आभाच्छास्त्रीये असिद्धत्वे विप्रतिषेधः स्यादिति हल्ग्रहणेन ज्ञापितम्। जज्ञनीति। द्वित्वम्। 'अदभ्यस्तात्'। 'स्तोश्चुना श्चुः'। जज्ञोर्ज्ञः। जजाथ। जजन्थ। इति अझलादित्वान्नाकारः। जजन्तु। जजाताद्वा। जज्ञतु। जजाहि। जजनानि। अजजन्। अजजाताम्। अजज्ञुः। अजनीत्। अजानीत्। जजान। जज्ञतुः। जनिता। जन्यात्। जायात्। जनिष्यति। अजनिष्यत्।

डुदाञ्। इत आरभ्य गणान्ता अनिटः। भृञन्ता उभयपदिनः। प्रणिददातीति। श्लुः। द्वित्वम्। ह्रस्वः। 'नेर्गदनद—' इति णत्वम्। दत्त इति। 'खरि च' इति चर्त्वम्। ददतीति। 'अदभ्यस्तात्' इत्यत्। ददासि। दत्थः। दत्थ। ददामि। दद्वः। दद्मः। दत्ते इति। 'श्नाभ्यस्तयोः—' इत्यातो लोपः। दद्यात्। ददीत। ददातु। दत्ताम्।

१. जजन्मः N. २. After this—अजानीत्। अजनीत्। जजान। जन्यात्। जनिता B2. ३. नेर्ग°—णत्वम् dropped D2, D3, D4, N1. ४. लोपः N1, D3. ५. C has दद्मः after it; D4 drops दद्वः.

'घ्वसोः–' इत्येत्वाभ्यासलोपौ। देहि। अददात्। अदात्। 'स्थाघ्वोरिच्च'। अदित। अदिषाताम्। देयात् ॥

डुधाञ् धारणपोषणयोः। प्रणिदधाति। अन्तर्दधाति। श्रद्दधाति।

दधस्तथोश्च ॥८।२।३८॥

द्विरुक्तस्य झषन्तस्य धातोर्बशो भष् स्यात् तथयोः स्ध्वोश्च परतः। वचनसामर्थ्यादालोपस्य न स्थानिवत्ता।

अददादिति। लङ्। अदत्त। अदात्। लुङ्। 'गातिस्था–' इति सिचो लुक्। अदितेति। लुङ्। त। सिच्। ददौ। ददे। दाता। देयादिति। 'एर्लिङि' इत्येत्वम्। दासीष्ट। दास्यति। दास्यते। अदास्यत्। अदास्यत।

डुधाञ्। प्रणिदधातीति। 'नेर्गद–' इति णत्वम्। श्रद्दधातीत्यादि। श्रदन्तरोरुपसर्गवद्वृत्तिर्वाच्येति उपसर्गत्वात् प्राक् प्रयोगः।

दधः। दध इति कृतद्विर्वचनस्य धातोर्निर्देशान्न दध धारणे इत्यस्य। व्याख्यानतो विशेषप्रतिपत्तिः। स्ध्वोरिति। सकारे ध्वशब्दे च परत इत्यर्थः। वचनसामर्थ्यादिति। दधा तम् इति स्थिते 'श्नाभ्यस्तयोः–' इत्यालोपे सति 'दधस्तथोः–' इति भष्भावे क्रियमाणे 'अचः परस्मिन्–' इत्यालोपस्य स्थानिवद्भावः प्राप्नोति। तस्मिंश्च सति वचनमनर्थकं स्यात्। न ह्यालोपं विना झषन्तो धातुरस्ति। अतः 'दधस्तथोश्च' इति वचनसामर्थ्यात् स्थानिवत्त्वं नेत्यभिप्रायः। ननु 'झलो झलि' इत्यतः 'झलि' इति वर्तते। 'झषन्तस्य' इति च। न च धातुस्तथाभ्यामन्यो झलस्ति। तस्मात् 'तयोः' इति न वक्तव्यम्।

---

१. 'घ्वसोरेत्वा°' N1. २. Dropped D1, D3; before it—'गातिस्था—' इति सिचो लुक्। D4. ३. Before it—सिचि D1. ४. Before it—'ह्रस्वादङ्गात्' B2. ५. श्रद्धाति। प्रणिदधाति D4. ६. Dropped P, C, B1, B2. ७. स्थानिवत्त्वम् B2, D4. ८. निर्देशो न दध Bc2.

धत्तः ।[1] धत्थः । धत्से । धद्ध्वे । धेहि । अधित । धेयात् ॥

डुभृञ् धारणपोषणयोः ।

भृञामित् ॥७।४।७६॥

भृञ् माङ् हाङ् एषामभ्यासस्येत् स्यात् श्लौ ॥ बिभर्ति । बिभृतः ।[2] [3]बिभृध्वे । अबिभः । अबिभरुः । अभार्षीत् ।

उच्यते । स्ध्वोरित्यस्यानन्तर्यात् स्ध्वोरेव परतोयमादेशो विज्ञायेतेति तथोरित्युक्तम् । चकारः स्ध्वोरनुकर्षणार्थः । झष इति किमनुवर्तते । दधाति । धत्त इति । तस् । द्वित्वम् । आलोपः । दधति । दधासि । धत्थ इति । थसि पूर्ववत् । धत्से इति । आत्मनेपदम् । आलोपः । भष् । धद्ध्वे इति । भष् । दध्यात् । दधीत । दधातु । धत्ताद्वा । धेहीति । 'घ्वसोरेत्—' इत्येत्वाभ्यासलोपौ । अदधात् । अधत्त । अधात् । **अधितेति** । लुङ् । 'स्थाघ्वोरिच्च' । इतीदन्तादेशः । सिचः कित्त्वम् । 'ह्रस्वादङ्गात्' इति सिचो लोपः । दधौ । दधे । धाता । **धेयादिति** । 'एर्लिङि' इत्येत्वम् । धासीष्ट । धास्यति । धास्यते ।

डुभृञ् ।

भृञा । डुभृञ् धारणपोषणयोः । माङ् माने । ओहाङ् गतौ । एतेषामेव ग्रहः त्रयाणामित्यनुवृत्तेर्लभ्यते । **बिभर्तीति** । लट् । श्लुः । गुणः । रपरः । द्वित्वम् । इत्वम् । 'अभ्यासे चर्च' इति भस्य बः । **बिभृत इति** । ङित्त्वाद्गुणाभावः । **बिभ्रतीति** । 'अदभ्यस्तात्—' इत्यत् । बिभृते । **बिभृध्वे इति** । लडात्मनेपदस्य मध्यमबहुवचनम् । एत्वम् । बिभृयात् । बिभ्रीत । बिभर्तु । बिभृताम् । **अबिभः इति** । लङ् । श्लुः । गुणः । रपरः । द्वित्वम् । अभ्यासेत्वम् । 'हल्ङ्याब्' इति तिलोपः । अट् । **अबिभरुरिति** । 'सिजभ्यस्त—' इति झेर्जुस् । 'जुसि च' इति गुणः । रपरः । अबिभृत । **अभार्षीदिति** । लुङ् ।

---

१. After it—दधाति । दधासि D_3. २. After it—बिभ्रति । बिभृथः P, C, B_1, B_2. ३. Dropped C.

अभृत। बिभरामास। बेभार। बभर्थ। बभृव।[१] भर्ता।[२]

माङ् माने शब्दे च। ईत्वम्।[४] प्रणिमिमीते।[५] अचि[६] आलोपः। मिमाते। मिमते। अमास्त। एवं[७] ओहाङ् गतौ।

इति ह्वादिप्रक्रिया।

सिच्। सिचि वृद्धिः। अभृतेति। आत्मनेपदम्। 'ह्रस्वादङ्गात्' इति सिचो लुक्। बिभरामासेति। 'भीह्रीभृहुवाम्—' इत्याम्। श्लुवच्च। बभारेति। आमाभावे द्वित्वादि। बभर्थ। बभृवेति। क्रादित्वादिड-भावः। भ्रियात्। भृषीष्ट। भरिष्यति। भरिष्यते।

माङ्। इतो द्वावात्मनेपदिनौ। ईत्वमिति। 'ई हल्यघोः' इत्यनेन। प्रणिमिमीते इति। द्वित्वम्। अभ्यासेत्वम्। 'नेर्गद—' इति णत्वम्। अचि आलोपः। 'श्नाभ्यस्तयोः—' इत्यनेन। मिमीत। मिमीताम्। अमिमीत। अमास्तेति। लुङ्। इडभावः। ममे। माता। मासीष्ट। मास्यते। एवं ओहाङ्। जिहीते। जिहाते। जिहते। जिहीत। जिहीताम्। अजिहीत। अहास्त। जहे। हाता। हासीष्ट। हास्यते। अहास्यत।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योयं माणिकाम्बाख्यजनयदतुलं विट्ठलाचार्यमार्यम्॥
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलो ह्वादिसंज्ञो गणोयम्॥

---

१. Dropped D_1, D_3, P, C, B_1, B_2. २. After it— भृम D
३. P has भृषीष्ट after it; D_1 has after it—भ्रियात्। भरिष्यति.
४. 'ई हल्यघोः' इतीत्वम् D_1. ५. मिमीते D_4. ६. अचि लोपः N_1.
७. Dropped N_1. ८. आल्लोपः Bc_2.

[1]दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्[2]तुतिमोदमदस्वप्नकान्ति-गतिषु ।

दिवादिभ्यः श्यन् ॥३।१।६९॥

दिवादिभ्यः श्यन्प्रत्ययः स्यात् कर्तरि सार्वधातुके । शपोपवादः । शनावितौ । 'हलि च' इति दीर्घः । दीव्यति[3] ।

षिवु तन्तुसन्ताने । निषीव्यति । [4]न्यषेवीत् । '[5]सिवादीनाम्—' इति वा षत्वम् । न्यसेवीत् ।

दिवु । व्यवहारः क्रयादिः ।

इत आरभ्य ञिमिदन्ताश्चतुर्विंशतिः परस्मैपदिनः । पञ्च सेट्काः । **दिवादिभ्यः** । **शपोपवाद** इति । तस्य प्राप्तावेवास्यारम्भात् । **शनावितावि**ति । शकारः सार्वधातुकसंज्ञार्थः । 'लशक्वतद्धिते' इतीत् । नकारः 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तार्थः । 'हलन्त्यम्' इतीत् । दीव्यतीति । लट् । तिप् । दीव्येत् । दीव्यतु । अदीव्यत् । अदेवीत् । दिदेव । देविता । दीव्यात् । देविष्यति । अदेविष्यत् ।

षिवु । **निषीव्यतीति** । 'धात्वादेः षः सः' । तिप् । श्यन् । 'हलि च' इति दीर्घः । 'परिनिविभ्यः सेव—' इति षत्वम् । सीव्येत् । सीव्यतु । असीव्यत् । न्यषेवीत् । न्यसेवीदिति । लुङ् । सिच् । इट् । ईट् । **सिवादीनामि**ति । अड्व्यवायेपि वा षः । सिषेव । सेविता । सीव्यात् । सेविष्यति । असेविष्यत् ।

---

१. दिव् D2. २. °स्तुतिकान्तिगतिषु D1, D3, D4, N1. ३. After it—अदेवीत् B2, D1. ४. Before it— 'सिवादीनामड्व्यवायेपि' D4. ५. P and B1, D2, D3, N1 drop 'सिवादीनाम्—' इति वा षत्वम्.

नृती गात्रविक्षेपे । नृत्यति[1] । ङित्वान्न गुणः ।

सेसिचि कृतचृतछृदतृदनृतः ॥७।२।५७॥

एभ्यः परस्य सकारादेरार्धधातुकस्य सिज्वर्जितस्येड्वा[2] स्यात् ॥ नर्तिष्यति । नर्त्स्यति । सिचि[3] तु अनर्तीत् ।[4]

त्रसी उद्वेगे । 'वा भ्रास–'[5] इति श्यन्वा । त्रस्यति । त्रसति । तत्रास । 'वा जॄभ्रमु–' इत्येत्वं वा । तत्रसतुः । त्रेसतुः ।

नृती । गात्रविक्षेपे । गात्रे विक्षेपो नाट्यम् । 'यस्य विभाषा' इति निष्ठायामनिट्त्वे सिद्धे ईदित्वं यङ्लुगन्तार्थम्[6] । नरीनृतः । **नृत्यतीति** । श्यन् । **ङित्वान्न गुण** इति । 'सार्वधातुमपित्' इति । श्यनो ङित्त्वात् 'क्ङिति च' इति लघूपधगुणनिषेधे इत्यर्थः । नृत्येदित्यादि । ननर्त । ननृततुः । नर्तिता । नृत्यात् ।

सेसिचि । सइत्यकार उच्चारणार्थः । 'असिचि' इति निषेधात् । तेन स्येपि[7] स्यात् । कृती छेदने । तुदादिः । कृती वेष्टने । रुधादिः । द्वयोरपि ग्रहणम् । विशेषानुपादानात् । चृती हिंसाग्रन्थयोः[8] । उछृदिर् दीप्तिदेवनयोः । उतृदिर् हिंसानादरयोः । नृती गात्रविक्षेपे । सर्वेषां नित्यमिटि प्राप्ते विकल्पः । **नर्तिष्यतीति** । लृट् । 'स्यतासि' इति स्यः । गुणः । इट् । **नर्त्स्यतीति** । इडभावे रूपम् । गुणः । **अनर्तीदिति** । लुङ् । सिच् । 'आर्धधातुकस्य' इतीट् । ईट् । सिलोपः ।

त्रसी । उद्वेगो भयम् । **त्रसतीति** । शप् । त्रस्येत् । त्रसेदित्यादि । अत्रासीत् । अत्रसीत् । **तत्रासेति** । णल् । वृद्धिः । द्वित्वम् । 'हलादिः शेषः' । त्रेसिथ । तत्रसिथ । त्रसिता । त्रस्यात् । त्रसिष्यति ।

---

१. प्रनृत्यति P, C, N, B1, B2. २. सिज्वर्ज D3, D4. ३. C, D3 drop सिचि तु. ४. After it—ननर्त B2. ५. भ्राशेति D1, D2. ६. यङ्लुगर्थम् Bc2, Dc3. ७. सेपि Dc3 ८. मन्थयोः Bc2; ग्रन्थनयोः Dc3

जॄष् वयोहानौ । 'ऋत इद्धातोः' । जीर्यति । 'जॄस्तम्भु—' इत्यङ् वा । [2]अजरत् । अजारीत् । जजरतुः । जेरतुः । जेरिता । जरीता ।[4]

शो तनूकरणे ।

ओतः श्यनि ॥७।३।७१॥

श्यनि परे ओकारस्य लोपः स्यात् ॥ श्यति । 'विभाषा घ्राधेट्—' इति सिचो वा लुक् । अशात् । [6]अशासीत् । शायात् । एवं छो छेदने । षोऽन्तकर्मणि । [6]अध्यवस्यति । प्रणिष्यति ।

जॄष् । जीर्यतीति । 'हलि च' इति दीर्घः । जीर्येत् । अजरदिति । 'ऋदृशोऽङि गुणः' इति गुणः । अजारीदिति । अङभावे रूपम् । सिचि वृद्धिः । जजार । जजरतुरिति । 'ऋच्छत्यॄताम्' इति गुणः । जेरतुरिति । 'वा जॄभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपौ वा । जरिता । जरीतेति । लुट् । तासिः । इट् । गुणः । रपरः । 'वॄतो वा' इति वा इटो दीर्घः । जीर्यात् । जरिष्यति । जरीष्यति । अजरिष्यत् । अजरीष्यत् ।

शो ।

इत आरभ्य क्षिषन्ता अष्टावनिटः । श्यतीति । लट् । तिप् । श्यन् । श्येत् । श्यतु । अश्यत् । अशासीदिति । 'आदेच उपदेशेऽशिति' इत्यात्वम् । 'यमरम—' इतीट्सकौ । शशौ ।[5] शाता । शायादिति । आशीर्लिङ् । शास्यति । अशास्यत् । एवं छो । 'ओतः श्यनि' इति लोपः । छ्यति । छ्येत् । छ्यतु । अच्छ्यत् । 'विभाषा घ्राधेट्—' इति वा सिचो लुक् । अच्छात् । 'यमरम—' इतीट्सकौ । अच्छासीत् । चच्छौ । छाता । छास्यति । अच्छास्यत् । षो । अन्तकर्म विनाशः । प्रणिष्यतीति । ओलोपः । 'उपसर्गात् सुनोति—' इत्यादिना

---

१. जॄष N1. २. Before it—'ऋदृशोऽङि गुणः' D1. ३. Before it—'वॄतो वा' इति दीर्घो वा D1. ४. After it—जीर्यात् D1. ५. C drops it. ६. Dropped D1, D3, D4. ७. After it—शशिथ । शशाथ Bc2.

न्यषात् । न्यषासीत् । सेयात् ॥ दोवखण्डने । प्रण्यदात् । देयात् ।[१]

राध संसिद्धौ । राध्यति । अरात्सीत् । अराद्धाम् ।[२]

राधो हिंसायाम् ॥६।४।१२३॥

हिंसार्थस्य राधेरेत्वाभ्यासलोपौ स्तः[३] किति लिटि सेटि थलि परे[४] । विकल्पोऽत्रेति केचित् । रेधतुः । रराधतुः । रेधिथ । रराधिथ[५] । हिंसायां किम् । आररराधतुः[६] ।

षः । 'नेर्गद—' इति णत्वम् । न्यषादिति । एत्र आत्वम् । लुङ् । सिच् । 'विभाषा घ्रा—' इति वा सिचो लुक् । 'प्राक् सितादड्व्यवायेऽपि' इति वा षः । न्यषासीदिति । इट्सकौ । ससौ । साता । सेयादिति । 'एर्लिङि' इत्येत्वम् । सास्यति । दो । द्यति । प्रण्यदादिति । 'गातिस्था—' इति सिचो लुक् । 'नेर्गद—' इति णत्वम् । ददौ । दाता । देयादिति । 'एर्लिङि' इत्येत्वम् । दास्यति ।

राध । राध्यतीति । राधोऽकर्मकाद्वृद्धावेवेति धातुसूत्रात् वृद्ध्यर्थे श्यन् । अन्यत्र श्नुरेव । राध्नोत्योदनमित्यादौ । अरात्सीदिति । लुङ् । सिच् । 'खरि च' इति चर्त्वम् । अराद्धामित्यादि । रराध ।

राधः । यद्यप्ययं हिंसायां न पठ्यते तथाप्यनेकार्थत्वाद्धिंसायाम् । अत इत्येतदिहोपस्थितं तपरत्वकृतं कालविशेषमपास्य । संभवादवर्णमात्रं बोधयति । अथवा 'भाभ्यस्तयोरातः' इत्यतः 'आतः' इत्यनुवर्तते । अथवा एकहल्मध्ये यः स स्थानी भविष्यतीति व्याख्येयम् । विकल्प इति । तथोक्तं मुग्धबोधे । 'जॄ वमभ्रमत्रसफणादिर्वधार्थराधां तु वा' इति । रेधिथेति । क्रादिनियमादिट् । राद्धा । राध्यात् । रात्स्यति । अरात्स्यत् ।

---

१. Dropped D_1, D_2, D_4. २. Dropped D_3; before it—'झषस्तथोर्धोऽधः' D_1. ३. वा स्तः C. ४. थलि च परे D_3, D_4, N. ५. Dropped D_1, B_1, N. ६. For it—रराध । रेधतुः B_2. ७. रराधतुः N. ८. बाधार्थं Dc_2.

व्यध ताडने । 'ग्रहिज्या–' इति संप्रसारणम् । विध्यति । विव्याध । विविधतुः ।[१]

पुष पुष्टौ । 'पुषादि–' इत्यङ् । अपुषत् ।

श्लिष आलिङ्गने । पुषाद्यङ् । अश्लिषत् ।

श्लिष आलिङ्गने ॥३।१।४६॥

श्लिषश्च्लेः[२] क्सः[३] स्यादालिङ्गनेर्थे ॥ अश्लिक्षत् कन्यां[४] देवदत्तः । आलिङ्गने किम् । अश्लिषज्जतु[५] काष्ठम्[६] ।

रध हिंसायाम् । रध्यति । पुषादित्वादङ् । 'रधिजभोः–' इति नुम् । अरन्धत् । ररन्ध । ररन्धतुः ।

व्यध । विध्यतीति । तिप् । श्यन् । 'संप्रसारणाच्च' इति पूर्वरूपत्वम् । विध्येत् । विध्यतु । अविध्यत् । अव्यात्सीत् । विव्याधेति । लिट् । द्वित्वम् । 'लिट्यभ्यासस्य' इति संप्रसारणम् । विविधतुरिति । 'ग्रहिज्या—' इति संप्रसारणम् । व्यद्धा । विध्यात् । व्यत्स्यति । अव्यत्स्यत् ।

पुष । पुष्यति । पुष्येत् । पुष्यतु । अपुष्यत् । पुपोष । पोष्टा । पुष्यात् । पोक्ष्यति । अपोक्ष्यत् ।

श्लिष । श्लिष्यति । श्लिष्येत् । श्लिष्यतु । अश्लिष्यत् । अश्लिषदिति । जतु काष्ठेनेति शेषः[७] ।

श्लिषः । आलिङ्गनमुपगूहनम् । प्राण्याश्लेष इति यावत् । अश्लिक्षदिति । कन्यां देवदत्त इति शेषः । शिश्लेष । श्लेष्टा । श्लिष्यात् । श्लेक्ष्यति । अश्लेक्ष्यत् ।

रध । चकारात् संराद्धौ पाके इत्यर्थः । रध्येत् । ररन्धतुरिति । नुमि कृते संयोगान्तत्वात् कित्त्वं नेति नलोपो न ।

---

१. After this B and D_2 have विव्यधिथ । विव्यध; D_1 has in its place व्यद्धा । व्यत्स्यति ।. २. Before it-आलिङ्ग्यते इत्यालिङ्गनं सचेतनानामाश्लेषस्तस्मिन् D_2. ३. C, N_1 drop च्लेः; आलिङ्गनेर्थे च्लेः क्सः स्यात् D_1. ४. कन्यकां B_1 ; D_1, D_3, D_4 drop from कन्याम् to काष्ठम्. ५. °ज्जतु च काष्ठम् N_1. ६. Dropped B_2, N_1. ७. काष्ठं चेति Bc_2 ; जतुना काष्ठं चेति Dc_3.

रधादिभ्यश्च ॥७।२।४५॥

रधनशतृपदृपद्रुहमुहस्नुहस्निह एभ्यो वलादेरार्धधातुकस्य इड्वा स्यात् ॥

नेट्यलिटि रधेः ॥७।१।६२॥

लिड्वर्जे इटि रधेर्नुम् न स्यात् ॥ रधिता । रद्धा । अलिटि किम् । ररन्धिव । रेध्व । अत्र परत्वादिड्वा[2] । केचित्तु[3] क्रादिनियमात् नित्यमाहुः ।

तृप[4] प्रीणने । तृप्यति । अतृप्यत् । अतर्पीत् । अताप्र्सीत् ।

रधादिभ्यः । रधि हिंसासंराध्योः । णश अदर्शने । तृप प्रीतौ । दृप हर्षगमोचनयोः । द्रुह जिघांसायाम् । मुह वैचित्ये । ष्णुह उद्गिरणे । ष्णिह प्रीतौ । तृप्यतिदृप्यत्योरनिट्त्वात् इण्निषेधे[6] शेषाणां नित्यमिटि प्राप्ते विकल्पार्थं वचनम् । रेध्वेति । लिडुत्तमः द्विवचनं च । 'अत एकहल्मध्ये—' इत्येत्वाभ्यासलोपौ । अत्रेत्यादि । तथोक्तं काशिकायां वृत्तौ । 'क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति । अपरे पुनराहुः । पूर्वं विधेरिट्प्रतिषेधविधानसामर्थ्यात् बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिट् भविष्यति । ररन्धिमेत्येव' इति । रध्यात् । रत्स्यति । रन्धिष्यति ।

---

१. °ष्णुहष्णिह D3. २. After it—इति D4. ३. तु dropped D4. ४. तृप् N1. ५. B1 has अतृपत् । अताप्र्सीत् । अत्राप्सीत् । ततर्पिथ for अतृप्यत् · अतृपत्; D1, D3, N, have अतृपत् for अतृप्यत्; 'पुषादि-' इत्यङ् । अतृपत् । अतर्पीत् । अत्राप्सीत् । अताप्र्सीत् । तृपदृपौ D4. ६. रध Bc2, Dc3. ७. प्रीणने Dc3. ८. After it—प्राप्ते Bc2.

अतृपत् । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यम्वा । अत्राप्सीत् । ततर्प । ततृपतुः । तृपदृपोरनिट्सु पाठः 'अनुदात्तस्य चर्दुपधस्य' इत्यम्विकल्पार्थः । त्रप्ता । तर्प्ता । तर्पिता ॥ एवं दृप हर्षणमोहनयोः । मुह वैचित्ये । अमुहत् । 'वा द्रुहमुह—' इति घत्वढत्वे । मोग्धा । मोढा । मोहिता ॥

अत्रप्स्यत् । अतर्प्स्यत् । अतर्पिष्यत् । तृप । प्रीणनं सौहित्यम् । अतृपदिति । पुषादित्वादङ् । अतर्पीदिति । कृशस्पृशतृपश्लेः सिचि वा । 'रधादिभ्यश्च' इति वेट् । 'नेटि' इति वृद्धिप्रतिषेधः । लघूपधगुणः । अत्राप्सीदिति । इडभावपक्षे । 'अनुदात्तस्य—' इत्यम् वा । यण् । 'वदव्रज—' इति वृद्धिः । अतार्प्सीदिति अमभावपक्षे । ततर्थ । त्रप्ता । तर्प्तेति । लुट् । तासिः । 'अनुदात्तस्य—' इत्यम् वा । तर्पितेति । रधादित्वादिट् । तृप्यात् । त्रप्स्यति । तर्प्स्यति । तर्पिष्यति । अत्रप्स्यत् । अतर्प्स्यत् । अतर्पिष्यत् । एवं दृप । मोहनं गर्वः । दृप्यति । दृप्येत् । अदृप्यत् । अदर्पीत् । अद्राप्सीत् । अदार्प्सीत् । ददर्प । द्रप्ता । दर्प्ता । दर्पिता । द्रप्स्यति । दर्प्स्यति । दर्पिष्यति । मुह । वैचित्यमविवेकः । मुह्यति । अमुहदित्यङ् । मुमोह । मोग्धा मोढेति । इडभावपक्षे 'झषस्तथोः—' इति धत्वम् । घत्वपक्षे 'झलां जश् झशि' इति गत्वम् । ढत्वपक्षे ष्टुत्वम् । 'ढो ढे लोपः' । मोहितेति । इट्पक्षे । मोक्ष्यति । मोहिष्यति ।

१. Dropped N; अतार्प्सीत् D3. २. 'अनुदात्तस्य...त्यम् वा dropped N, D1, D2. ३. From अनु... to ततृपतुः dropped D3; ततर्प । ततृपतुः dropped D1, D2 (D2 has ततर्पिथ instead). ४. तृपदृपयोर° B1. ५. Dropped D1. ६. After it—मोक्ष्यति । मोहिष्यति B2. ७. पुषादित्वादङ् Dc3. ८. कृशमृशस्पृशतृपादयः । च्लेः सिच् वा । Dc3.

णश अदर्शने । [१]प्रणश्यति । नशेरत एत्वमङि वा । अनेशत् । [४]अनशत् । नेशतुः ।

नशेः षान्तस्य ॥८।४।३६॥

षान्तस्य नशेर्णत्वं न स्यात् ॥

मस्जिनशोर्झलि ॥७।१।६०॥

अनयोर्नुमागमः स्याज्झलि ॥ प्रनंष्टा । 'नशेर्वा' इति [६]झल्यपि वा कुत्वम् । णत्वं तु नेति केचित् । [७]प्रनङ्ग्धा ।

णश । अदर्शनमनुपलब्धिः । **प्रणश्यतीति** । 'उपसर्गादसमासे' । इति णत्वम् । **अनेशदिति** । पुषाद्यङ् । **अनशदिति** । एत्वाभावे । ननाश । **नेशतुरिति** । 'अत एकहल्मध्ये—' इत्येत्वाभ्यासलोपौ । मस्जि । टुमस्जो शुद्धौ । णश अदर्शने । मित्वादन्त्यादचः परः । 'नशेर्वा' । इति झल्यपि वा कुत्वम् । **णत्वं तु नेति केचिदिति** । **बोपदेवपण्डिताः** । तथा हि **रामव्याकरणे** तैरुक्तम् ।

'नशेः षान्तस्य नो मस्जिनशोः षान्ते । प्रनङ्क्ष्यति । नंष्टा । नङ्ग्धा । नशेर्वा कुः । बुध युध् नाशयेत् फलम्' इति । **कुत्वमिति** धत्वस्याप्युपलक्षणम् । ते हि मुहां वेङ् भौ इति घमेव विहितवन्तः । ततश्च तन्मते ढत्वाभावात्तथोर्धोर्ध इति धत्वं स्यात् । तेन प्रनङ्ग्धेत्यत्र शस्य कुत्वम् । ततः परस्य तस्य धकारः सिद्धो भवति । क्वचित् प्रनङ्क्तेति पाठः । तदा ढत्वं नैव स्यात् । णत्वं तु नेति तथा । तत्रैवोक्तम् । अशान्तत्वात् न ण इति प्रनङ्ग्ध इति । रधादित्वादिड् ।

---

१. णश् N_1. २. Before it—'उपसर्गादसमासेपि णोपदेशस्य' D_4. ३. वा वक्तव्यम् D_1. ४. Dropped N_1. ५. ननाश । नेशतुः B_2, D_3. ६. कल्पयित्वा for झल्यपि B_1, P, C, N. ७. प्रनङ्क्ता N. ८. मस्जो Bc_2, Dc_1, Dc_4. ९. घेङ्भौ Bc_2.

प्रेणशिता । भूतपूर्वषान्तस्यापि णत्वं न । प्रनङ्क्ष्यति । नशिष्यति ॥

शमु उपशमे ।

शमामष्टानां दीर्घः श्यनि ॥७।३।७४॥

शम् दम्[2] श्रम् तम् श्रम् क्षम् क्लम् मद् एषां दीर्घः स्यात् श्यनि ॥ [4]प्रणिशाम्यति । [5]अशमत् । [6]अशमीत् ॥

क्लमु ग्लानौ । क्लाम्यति ।[7] [8]क्लामति । [9]अक्लमत् ।

प्रणशितेति । इट्पक्षे । **भूतपूर्वस्येति** । 'नशेः षान्तस्य' इत्यन्तग्रहणात् । **प्रनङ्क्ष्यतीति** । इडभावे 'व्रश्च—' इति षः । कत्वषत्वे । नुम् ।

शमु । इतः षूडन्ताः सप्त सेटाः ।

शमा । शमुदमु उपशमे । श्रमु तपसि खेदे च । तमु काङ्क्षायाम् । भ्रमु अनवस्थाने । क्षमूष् सहने । क्लमु ग्लानौ । मदी हर्षे । **प्रणिशाम्यतीति** । 'नेर्गद—' इति णत्वम् । शमादयः पुषादय इति केचित् । ते अशमीदित्युदाहरन्ति । अन्ये त्वागणान्ताः पुषादय इत्याहुः । तेन अशमदित्यत्राङ् । शशाम । शमिता । शम्यात् । शमिष्यति । अशमिष्यत् ।

क्लमु । **क्लाम्यतीति** । 'वा भ्राश[10]—' इति श्यन् वा । 'शमाम्—' इति दीर्घः । **क्लामतीति** । श्यन्नभावे शप् । 'ष्ठिवुक्लमु—' इति दीर्घः ।

---

१. Before it—नश्यात् B_2. २. तम्श्रम् P, C, N. ३. क्लम्क्षम् B_2. ४. शाम्यति alone in place of प्रणि...शमीत् D_3. ५. Dropped D_1, D_4, N. ६. शशाम । शम्यात् । शमिता । शमिष्यति B_2; dropped D_1, D_2, D_4, N. ७. After it—'ष्ठिवुक्लम्वाचमाम्' इति दीर्घः । D_1, P, C. ८. D_3 and D_4 drop क्लामति । अक्लमत् ।. ९. Dropped D_1; अक्लमीत् N. १०. भ्राश Bc_2.

भौवादिकस्य तु क्रमति ।[१]

अमु क्षेपणे । अभ्यस्यति । 'अस्यतिवक्ति—' इत्यङ् ।

अस्यतेस्थुक् ॥७।४।१७॥

अस्यतेरङि परे थुगागमः स्यात् ॥ आस्थत् ।[२] आसिथ ।[३]

यसु प्रयत्ने ।[४]

यसोनुपसर्गात् ॥३।१।७१॥

अनुपसर्गाद्यसो वा श्यन् स्यात् कर्तरि सार्वधातुके[६] ॥ यस्यति । यसति । अयसत् ।[७] अनुपसर्गात् किम् । प्रयस्यति ।

भौवादिकस्येति । 'ष्ठिवुक्लमु—' इति अत्र दिवादिकस्यैव क्रमो ग्रहणात् भौवादिकस्य दीर्घो न । **क्रमतीति** । भवतीत्यर्थः । अक्रमत् । मतान्तरे अक्रमीत् । चक्राम । क्रमिता ।

असु । 'अस्यतिवक्ति—' इत्यङ् । येषां शमादयः पुषादयः तेषां मते परस्मैपदार्थमपि । आसीदित्यपि केचिदिच्छन्ति ।[९] तथा च **कविकल्पद्रुमे** ।

अस्यु[१०] ईक्षेपे इति । **कामधेनौ** च प्रकटयन्ति स्म । इट् । आस्यत् ।[११] आसीदिति । आस । असिता ।

यसु ।

यसः । नित्यं श्यनि प्राप्ते विकल्पार्थं वचनम् ।

---

१. After this B_1 has श्यन्यस्यापि क्राम्यति । 'वा भ्राश—' इति श्यन् वा ।; श्यन्यस्यापि क्राम्यति B_2; after it—चक्राम D_2; 'वा भ्राश—' इति श्यन् । पक्षे क्रम्यति N. २. अस्यति D_1, D_4, N; dropped D_3. ३. After it–आस P, C, B_1, B_2. ४. असिता । अस्यात् । असिष्यति B_2; dropped D_1, D_2, D_3, D_4. ५. यस् D_1, D_2. ६. सार्वधातुके परे B_1, N, P, C. ७. यस्येत । अयसत् । ययास । येसतुः । यस्यात । यसिता । यसिष्यति । अनुपसर्गात् किम् । प्रयस्यति B_2. ८. Dropped N_1, D_3, D_4. ९. After it—अयसीत् D_1. १०. यथाहुः स्म बोपदेवपण्डिताः अस् इर क्षेप इति कामधेनौ च प्रकटयति स्म । Dc_3. ११. अस्फु क्षेप इति Bc_2. १२. आस्यत् Bc_2, Dc_3.

संयसश्च ॥३।१।७२॥

संपूर्वाद्यसः श्यन् वा[1] ॥ संयस्यति । संयसति ।

लुभ गार्ध्ये ।[2] लुभ्यति । अलुभत् ।[3] 'तीषसह—' इति वेट् । लोब्धा । लोभिता ।[4]

ञिमिदा स्नेहने ।

मिदेर्गुणः ॥७।३।८२॥

मिदेः शिति परे गुणः स्यात् ॥ मेद्यति । अमिदत् ।[5]

षूङ् प्राणिप्रसवे । सूयते । 'स्वरतिसूति—' इति वेट् । असविष्ट । असोष्ट ।

संयसः । सोपसर्गार्थोऽयमारम्भः । अयसत् । अयासीत् । ययास यसिता ।

लुभ । गार्ध्यमभिकाङ्क्षा ।[6] लुभ्यति । अलुभ्यत् । अलोभीदिति मतभेदेन । लोब्धेति । 'झषस्तथोः—' इति धः । लोभिष्यति ।

ञिमिदा ।

मिदेः । 'इको गुणवृद्धी' इति इकः स्थाने । मिद्येत् । अमिदत् । अमेदीत् । मिमेद । मेदिता । मेदिष्यति । पुषादयः समाप्ताः ।

षूङ् इत्यायुधान्ताः सप्तात्मनेपदिनः । सूयते । सूयताम् । असूयत । असविढ्वम् । असविध्वम् । सुषुवे । सविता । सोता । सविषीष्ट । सोषीष्ट । सविष्यते । सोष्यते ।

---

१. वा स्यात् D_2, N_1. २. After it—गार्ध्यं तृष्णा B_2, D_2. ३. लुभ्यति । अलुभत् dropped D_3, D_4. ४. After it—लुलोभ B_2. ५. After it—मिमेद B_2; after it—परस्मैभाषा D_2; dropped D_3, D_4. ६. °मभिकाङ्क्षायाम् Bc_2.

दीङ् क्षये । दीयते ।

मीनातिमिनोतिदीङां ल्यपि च ॥६।१।५०॥

एषामात्वं स्यात् ल्यपि ॥ चकारादेशित्येज्निमित्ते ॥[2] अदास्त ।

दीङो युडचि क्ङिति ॥६।४।६३॥

दीङः परस्याजादेः क्ङितो युडागमः स्यात् ॥ दिदीये । दाता ।[3]

जनी प्रादुर्भावे ।

दाङ् । अनिट् । दीयते ।

मीनाति । मीञ् हिंसायाम् । डुमिञ् क्षेपणे । दीङ् क्षये । **एज्निमित्ते** गुणवृद्धिनिमित्ते इत्यर्थः ।

दीङः । दीङः इति पञ्चमीनिर्देशात् अजादेर्युडागमो भवतीत्यभिप्रेत्याह । **दीङः परस्याजादेरिति** । **दिदीये** इति । 'वुग्युटावुवङ्यणोः सिद्धौ भवतः' इति वक्तव्यात् । विधानसामर्थ्याद् वा युडागमस्य 'एरनेकाचः—' इति यणं प्रत्यसिद्धत्वं न । दिदीयिढ्वे । दिदीयिध्वे । ननु चात्र युटा व्यवधानाद् ढत्वं न स्यात् । उच्यते । अत्र पक्षद्वयमस्ति । तथा **काशिकायां वामनेनोक्तम्** । 'विभाषेटः' इत्यत्र । 'अथेह कथं भवितव्यम् उपदिदीयिध्वे इति । केचिदाहुः । इणन्तादङ्गादानन्तर्यमिटो युटाव्यवहितमिति न भवितव्यं ढत्वेनेति । अपरेषां दर्शन अङ्गादिति निवृत्तमिण इत्यनुवर्तते । ततश्च यकारादेव इणः परोनन्तर इडिति पक्षे भवितव्यं मूर्धन्येन' इति । दातेति । आत्वम् । दासीष्ट । दास्यते ।

जनी । प्रादुर्भाव उत्पत्तिः । इतस्त्रयः सेट्काः ।

---

१. Dropped D_1, D_2, D_3, D_4. २. ऐज्निमित्तेशिति D_3. ३. After it—दासीष्ट । दास्यते B_2.

ज्ञाजनोर्जा ॥७।३।७९॥

अनयोर्जादेशः स्यात् शिति ॥ जायते । 'दीपजन-' इति वा चिण् ।

जनिवध्योश्च ॥७।३।३५॥

अनयोरुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च[1] ॥ अजनि । अजनिष्ट । जज्ञे ।

दीपी दीप्तौ । अदीपि । अदीपिष्ट । एवं पूरी आप्यायने । पद गतौ । पद्यते ।[2]

ज्ञा । ज्ञा अवबोधने । जनेर्दैवादिकस्य ग्रहणं न जौहोत्यादिकस्य शितोसंभवात् । 'अतो दीर्घो यञि' इति जा इति सिद्धे दीर्घोच्चारणं प्वादीनां ह्रस्व इति मा भूदिति । **जायते** इति । श्यनि कृते जादेशो 'ये विभाषा—' इत्यात्वं च प्राप्तं तत्रानवकाशत्वाज्जादेश एव भवति ।

जनि । जनी प्रादुर्भावे । जन जनने । वध हिंसायामिति प्रकृत्यन्तरमस्ति वधिः । भक्षकश्चेन्न विद्यतेथ वधकोपि न विद्यते इति प्रयोगात् । तस्य ग्रहणम् । न हनादेशस्य वधेः । तस्यादन्तत्वादेव वृद्ध्यभावः सिद्धः । **अजनीति** । 'चिणो लुक्' इति तलोपः । **अजनिष्टेति** । चिणभावे इट् । **जज्ञे** इति । 'गमहन—' इत्युपधालोपः । चुत्वम् । जनिता । जनिषीष्ट । जनिष्यते ।

दीपी । दीप्यते । **अदीपीति** । 'दीपजन—' इति वा चिण् । दिदीपे । दीपिता । दीपिषीष्ट । एवं पूरी । आप्यायनं वृद्धिः । पूर्यते । अपूरि । अपूरिष्ट । पुपूरे । पूरिता । पूरिषीष्ट । पद । गतिर्यानं ज्ञानं च । इतस्त्रयोनिटः ।

---

१. च कृति B1, D1; कृति P. २. C has चिणो लुक् before it. ३ After it—आपद्यते D4.

त्रिण् ते पदः ॥३।१।६०॥

पदश्च्लेश्चिण् स्यादेकवचने[1] तशब्दे परे[2] ॥ [3]प्रेण्यपादि । अपत्साताम् । पेदे[4] ।

बुध अवगमने । अबोधि । 'लिङ्सिचौ—' इति कित्त्वम् । अबुद्ध । अभुत्साताम् । बुबुधे । बोद्धा । भुत्सीष्ट । भोत्स्यते ।[5]

णह बन्धने । 'नहो धः' । अनात्सीत् ।[6] अनद्ध ।[7]

इति दिवादिप्रक्रिया ।

त्रिण् ते । अस्य धातोरात्मनेपदित्वात् परस्मैपदबहुवचनंत-शब्दो न संभवतीत्यात्मनेपदैकवचनस्य ग्रहणमित्याह । **एकवचने तशब्दे** इति । **प्रण्यपादीति** । णित्त्वात् 'अत उपधायाः' इति वृद्धिः । चिणो लुक् । 'नेर्गद—' इति णत्वम् । अपत्सत । अपत्थाः । पेदे । पत्ता । पत्सीष्ट । पत्स्यते ।

बुध । बुध्यते । **अबोधीति** । 'दीपजन—' इति वा चिण् । अबुद्ध । 'झलो झलि' इति सिचो लोपः । **अभुत्सातामिति** । 'एकाचः—' इति भष्भावः । बुबुधे । बोद्धा । भुत्सीष्ट । भोत्स्यते ।

णह । उभयपदी । नह्यति । नह्यते । **अनात्सीदिति** । हलन्त-लक्षणा वृद्धिः । **अनद्धेति** । 'झलो झलि' इति सिचो लोपः । ननाह । नेहे । नद्धा । नह्यात् । नत्सीष्ट । नत्स्यति । नत्स्यते ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला प्रक्रियेयं दिवादेः ॥

---

१. B1, B2 drop स्यात्. २. B1, B2 drop परे; परे कर्तरि D1. ३ Before it—प्रत्यपादि B2. ४. Dropped D1, D3, D4. ५. C, D1, D2, D3, D4 and P drop from बुबुधे to भोत्स्यते; B2 drops this and has उभयपदी instead. ६. After it—अनाद्धाम् । अनात्सुः D1, D4. ७. After it—॥ विभाषिता ॥ D2.

षुञ अभिषवे ।

स्वादिभ्यः श्नुः ॥३।१।७३॥

स्वादेः [२]श्नुः [३]प्रत्ययः स्यात् कर्तरि [४]सार्वधातुके ॥ शपोपवादः । अभिषुणोति । सुनुतः । [५]सुन्वन्ति । [६]सुन्वः । [७]सुनुवहे । सुन्वहे । न्यषावीत् । असोष्ट[८] । सुषुविव ।

---

[९]षुञ् । अभिषवः क्लेदनं संधानाख्यम् ।

इत आरभ्य धूञन्ताः षडुभयपदिनःस्तृञन्ताश्चत्वारोनिटः । **अभिषुणोति** । 'धात्वादेः षः सः' । 'उपसर्गात् सुनोति—' इति षत्वम् । श्नोः 'सार्वधातुकमपित्' इति ङित्त्वात् धातोर्गुणो न । श्नोस्तिपि गुणः । **सुनुत** इति । ङित्त्वान्न गुणः । **सुन्वन्तीति** । 'हुश्नुवोः—' इति यण् । सुनोषि । **सुन्वः** । **सुनुवः इति** । 'लोपश्चान्यतरस्यां म्वोः' इति वा उलोपः । सुनुते । सुन्वाते । **सुन्वहे** । **सुनुवहे** इति । उलोपो वा । सुनुयात् । सुन्वीत । सुनोतु । सुनुतात्त्वा । 'उतश्च' इति हेर्लुक् । सुनु । सुनवानि । सुन्वताम् । असुनोत् । असुनुत । **न्यषावीदिति**[१०] । 'स्तुसुधूञ्भ्यः—' इति सिच इट् । सिचि वृद्धिः । 'प्राक्सितादड्व्यवायेपि' । इति षः । **असोष्टेति** । रुदुसुनुधातूनां लिटं विना इड् वा इति केचित् । असाविष्ट । सुषुवे । सविता । सोता । सूयात् । सविषीष्ट ।

---

१. D_2 gives it before अभिषुणोति. २. श्नुप्रत्ययः D_2. ३. C drops प्रत्ययः. ४. सार्वधातुके परे N_1, D_3. ५. Before it D_2, B_1, B_2 have—हुश्नुवोरिति यण्. ६. Before it C has—लोपश्चान्यतरस्यां म्वोः ।. ७. सुनुवहे । सुन्वहे dropped B_2; सुन्वहे । सुनुवहे N_1. ८. After it—असविष्ट D_2. ९. षुञ् अभिषवे । अभिषवः क्लेदनं &c. Dc_3. १०. न्यषावीदिति Dc_3.

सुनोतेः स्यसनोः ॥८।३।११७॥

स्ये सनि च परे सुञः[1] षो न स्यात् ॥ विसोष्यति । मतभेदे[2] वेट् ।

डुमिञ् प्रक्षेपणे । 'मीनातिमिनोति—' इत्यात्वम् । अमासीत् । अमास्त । ममौ[3] । मिम्यतुः ।

चिञ् चयने ।[4] अचैषीत् । अचेष्ट ।

विभाषा चेः ॥७।३।५८॥

अभ्यासात् परस्य चिञः कुत्वं वा स्यात् सनि लिटि च[5] ॥ प्रणिचिकाय । चिचाय[6] । चिक्ये[7] ।

सुनोतेः । सनि किमुदाहरणम् । सुसूषति । न । 'स्तौतिण्योरेव—' इति नियमान्न स्यात् । इदं तर्हि । अभिसुसूषति । इदमपि न । 'स्थादिष्वभ्यासेन—' इति नियमात् । इदं तर्हि । सुसूषतेः क्विप् । सुसूः । अत्र रुत्वं प्रति षत्वस्यासिद्धत्वात् सन् षभूतो नेत्यभ्यासात् प्राप्तिरस्ति ।

डुमिञ् । मिनोति । मिनुते । **अमासीदिति** । 'यमरम—' इतीट्सकौ । **ममौ** इति । आत्वम् । णल् । **मिम्यतुरिति** । एज्निमित्ताभावादात्वं न । यणादेशः । मिम्ये । माता । मीयात् । मासीष्ट । मास्यति । मास्यते ।

चिञ् । चिनोति । चिनुते । अचैषीत् । अचेष्ट ।

विभाषा । **प्रणिचिकायेति** । 'नेर्गद—' इति णत्वम् । चिक्यतुः ।

---

१. सुञः D2. २. मतभेदे तु वेट् P ; रुदुसुञ्विति मतभेदे वेट् C. ३. Dropped D3, D4. ४. Before it—चिनोति । चिनुते B2; D1, D3, D4 drop अचैषीत् । अचेष्ट ; D2 drops अचैषीत्. ५. Dropped N1. ६. C, N1 drop it. ७. चिच्ये । चिकये । D4.

चिच्ये । चेषीष्ट ।

स्तृञ् आच्छादने ।[२]

ऋतश्च संयोगादेः ॥७।२।४३॥

ऋदन्तात् संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात् तङि ॥ अस्तरिष्ट । अस्तृत । स्तरिषीष्ट । स्तृषीष्ट ।

वृञ् वरणे । अवारीत् ।

लिङ्सिचोरात्मनेपदेषु ॥७।२।४२॥

वृङ्वृञोर्ऋतश्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि ॥ 'वृतो वा' इति वा[४] दीर्घः । अवरिष्ट । अवरीष्ट । अवृत ।

चिच्यतुः । चिच्ये । चिक्ये इति । वा कुत्वम् । चेता । चीयात् । चेषीष्ट । चेष्यति । अचेष्यत् ।

स्तृञ् । स्तृणोति । स्तृणुते । अस्तार्षीत् ।

ऋतः । अस्तृतेति । 'ह्रस्वादङ्गात्' इति सिचो लुक् । तस्तार । 'ऋतश्च संयोगादेः' इति गुणः । तस्तरतुः । तस्तरे । स्तर्ता । 'गुणोर्ति—' इति गुणः । स्तर्यात् । स्तरिषीष्ट । स्तृषीष्टेति । वेट्[५] । इडभावे 'उश्च' इति किन्त्वम् । स्तरिष्यति । स्तरिष्यते ।

वृञ् । इतो ञ्रौ सेट्कौ । वृणोति । वृणुते । अवारीदिति । लुङ् । सिच् । 'इट ईटि' इति सलोपः । 'सिचि वृद्धिः—' । अट् । 'सिचि च परस्मैपदेषु' । इतीटो दीर्घो न । अवारिष्टाम् ।

लिङ् । उदात्तत्वान्नित्यमिटि प्राप्ते विकल्पार्थ आरम्भः । अवरिष्ट । अवरीष्टेति । इट् । गुणः । अवृतेति । इडभावे रूपम् ।

---

१. Dropped D_1, D_3, D_4. २. After it—अस्तार्षीत् । स्तर्ता D_2, B_1, B_2. ३. आवरणे N_1, B_2, D_1, D_4. ४. दीर्घो वा D_1, D_4. ५. 'ऋतश्च' इति वेट् Bc_2.

तासौ सेट्त्वात् थलीट् । ववरिथ ।[1] क्रादित्वान्नेट् । ववृव । 'न लिङि' ।[2] वरिषीष्ट । वृषीष्ट ॥ धूञ् कम्पने ।[3] अधावीत् । अधविष्ट । अधोष्ट ।[4]

'ह्रस्वादङ्गात्' इति सिचो लुक् । ववार । वव्रतुः । **सेट्कत्वादिति** । अयं भावः । क्रादित्वादेव थलीडभावे सिद्धेपि 'बभूथाततन्थजगृम्भववर्थेति निगमे' इति छन्दसि वृञस्थलीडभावो निपात्यत इति नियमार्थं छन्दस्येवेति ववर्थेतीडभावः साधुस्तेन भाषायां सेट्त्वात् थलीडिति । वव्रे । वरिता । वरीता । व्रियात् । '**न लिङि**' इति इटो दीर्घो नेति शेषः । **वरिषीष्टेति** । 'लिङ्सिचोः—' इति वेट् । **वृषीष्टेति** । 'उश्च' इति किल्वान्न गुणः । वरिष्यति । वरीष्यति । वरिष्यते । वरीष्यते । धूञ् । **क्षीरस्वामी**[7] दीर्घमाह । अन्ये[8] ह्रस्वम् । धूनोति । धूनुते । धुनोति । धुनुते । **अधावीदिति** । 'स्तुसुधूञ्भ्यः—' इति सिच इट् । सिचि वृद्धिः । **अधविष्ट** । **अधोष्टेति** । 'स्वरति—' इति वेट् । गुणः । षत्वष्टुत्वे । दुधाव । दुधुवे । धविता । धोता । धूयात् । धविषीष्ट । धोषीष्ट ।

---

१. B_1 has—तासौ सेट्त्वात् थलीट् । क्रादित्वेन थल्यपि इट्प्रतिषेधः प्राप्तः स न भवति तस्य 'ऋतो भारद्वाजस्य' इति तासावनिटे एवोपादानात् इट् । ववर्थेति निगमे निपातनात् भाषायामिट् इति वा । ववरिथ for तासौ...ववरिथ; D_1, D_3, D_4 drop तासौ only. २. After this—ववर्थ इति छन्दसि निगमे निपातनात् B_2; ववर्थेति निगमे निपातनात् भाषायां थलीट् । D_4. ३. After it—इति दीर्घनिषेधः B_1; न दीर्घत्वम् D_4. ४. Before it— धुनोति B_1, B_2. ५. अधोष्ट । अधविष्ट D_4. ६. After it—धुमस्तु अधौषीत् । अधोष्ट D_2, B_1, C, P, N (D_2 has उभयतो भाषा after अधोष्ट). ७. शिवस्वामी Dc_1, Dc_3, Dc_4. ८. अन्येषां Bc_2.

हि गतौ वृद्धौ च ।

हिनुमीना ॥८।४।१५॥

उपसर्गस्थान्निमित्तात् परस्य हिनुमीना एतयोर्नस्य णः स्यात् ॥ प्रहिणोति ।[1]

हेरचङि ॥७।३।५६॥

अभ्यासात्परस्य हिनोतेर्हस्य[2] कुत्वं स्यान्न तु चङि ॥ जिघाय[3] । अचङि[4] किम् । अजीहयत् । जिघ्यतुः ।

कृवि जिघांसायाम् । इदित्वान्नुम् ।

हि । इतश्चत्वारः परस्मैपदिनो दम्भन्ताः । एकोऽनिट् । हि गतौ वृद्धौ च । स्वादिः । मीञ् हिंसायाम् । क्र्यादिः ।

हिनुमीनाग्रहणे विकृतस्यापि भवति । 'अचः परस्मिन्—' इत्यजादेशस्य स्थानिवद्भावात् । अतः प्रहिणोतीति सिद्धम् । अहैषीत् ।

हेरचङि । घोषवत्त्वादिगुणवतो[5] वर्गचतुर्थो हस्य सवर्णः । जिघायेति । वृद्धिः । चुत्वम् । अचङीति किम् । अजीहयत् । ननु च 'अचङि' इति व्यर्थम् । यतोऽङ्गाधिकारेणाभ्यासेन च प्रत्ययस्याक्षेपादभ्यासनिमित्ते प्रत्यये परतो यदङ्गं हिस्तस्येति सूत्रार्थः[6] स्यात् । चङि चानभ्यासनिमित्ते णौ परे हिरङ्गं तस्मान्न प्राप्नोत्येव । सत्यम् । तथापि ज्ञापकार्थमचङीत्युच्यते । इदं हि ज्ञापयति । हिनोतेश्चङोऽन्यत्र व्यधिकस्यापि कुत्वं भवतीति । तेन प्रजिघाययिषतीति सिद्धम् । जिघ्यतुः । हेता । हीयात् । हेष्यति ।

कृवि । इत आगणान्तात् सेटः । अयमग्रिमश्च भौवादिकावप्यर्वाचीनमतेन स्वादौ इत्यत्र पठितौ तन्मतोपसंग्रहाय । इदित्वादिति 'इदितो नुम् धातोः' इति ।

---

१. After it–अहैषीत् B_1, B_2. २. हः for हिनोतेर्हस्य B_1, P; C. ३. प्रजिघाय B_2, D_1, D_3, P, C, N. ४. अचङीति D_2, D_4, N; From अचङि to जिघ्यतुः dropped D_3. ५. गुणात् Dc_1, Dc_4. ६. सूत्रार्थत्वात् Dc_1.

धिन्विकृण्व्योर च ॥३।१।८०॥

आभ्यामुप्रत्ययः स्यादकारोन्तादेशश्च कर्तरि सार्वधातुके ॥ उप्रत्ययस्याशित्त्वादतो लोपः । अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः । कृणोति । अकृण्वीत् । चकृण्व । कृण्विता । कृण्व्यात् ।

धिवि प्रीणने । धिनोति । अधिन्वीत् ।[४]

दम्भु दम्भने । दभ्नोति ॥

श्रन्थिग्रन्थिदम्भिभ्यः परो लिडपित् किद्वक्तव्यः ॥* 'असिद्धवदत्र—' इति नलोपस्यासिद्धत्वादेत्वाप्राप्तौ किति लिटि देम्भ एत्वं वक्तव्यम् ।* देभतुः । देभुः । ददम्भिथ ।

धिन्वि । **उप्रत्ययस्येति** । शित्त्वाभावादार्धधातुकत्वं तेनातो लोप इत्यर्थः । ननु च कृणोतीत्यत्र लघूपधगुणः कस्मान्नेत्यत आह । **अल्लोपस्येति** । 'अचः परस्मिन्—' इत्यल्लोपस्य स्थानिवत्त्वादनुपधात्वादृकारस्य गुणो नेत्यर्थः । **कृणोतीति** । ऋवर्णान्नस्य णत्वं वाच्यम् । कृणुतः । कृण्वन्ति । कृण्विष्यति । अकृण्विष्यत् ।

धिवि । **धिनोतीति** । इदित्त्वान्नुम् । 'धिन्वि–' इत्युप्रत्ययोकारान्तादेशश्च । गुणः । दिधिन्व । धिन्विता । धिन्व्यात् । धिन्विष्यति । अधिन्विष्यत् ।

दम्भु । **दभ्नोतीति** । 'अनिदिताम्—' इति नलोपः । संयोगादित्वान्नोलोपहिलोपौ । दभ्नुवः । दभ्नुहि । अदम्भीत् । ददम्भ ।

श्रन्थीति । श्रन्थ ग्रन्थसंदर्भे । दम्भु दम्भे । न पिदपित् ।

---

१. °रच P, C, N. २. स्यात्कर्तरि सार्वधातुकेकारो° D3. ३. °न्नोपधाया गुणः P. ४. After it—दिधिन्व । दिधिन्वथुः B2. ५. न्लोप° D3, D4. ६. दम्भेरेत्वं D1. ७. वाच्यम् । ददम्भ । देभतुः । देभुः । ददम्भिथ B2, D3, D4. ८. Dropped B1, P, C.

केषांचिन्मते ददम्भतुः । ददम्भुः[1] । श्रन्थग्रन्थदम्भां थलि लोपैत्वे[2] वेति केचित् । देभिथ । दभ्यात् ॥[3]

अशूङ्[4] व्याप्तौ । अश्नुते । संयोगपूर्वत्वादुलोपो[5] न । अश्नुवहे । आशिष्ट । आष्ट[6] । आक्षाताम् । अत आदेः ।

अश्नोतेश्च ॥७।४।७२॥

दीर्घादभ्यासावर्णात् परस्याश्नुतेर्नुडागमः स्यात् लिटि[7] ॥ आनशे ।[8]

इति स्वादिप्रक्रिया ।

केषांचिदिति । तथोदाहृतं **मुग्धबोधे** । दम्भु । ददम्भतुः । देभतुरिति । **श्रन्थेत्यादि** । तथोक्तं तत्रैव । श्रन्थग्रन्थदम्भां थलि न्लोपो वेति । न्लोपपक्षे तन्मते 'तॄफलभजत्रपश्रन्थग्रन्थदम्भ–' इत्यादिनैत्वम् । दम्भिता । **दभ्यादिति** । न्लोपः । दम्भिष्यति ।

अशू । आत्मनेपदी । अश्नुते । **संयोगेति** । 'लोपश्चास्यान्यतरस्याम्' इत्यनेन । अश्नुवीत । अश्नुताम् । आश्नुत । **आशिष्ट** । **आष्टेति** । 'स्वरति–' इत्यूदित्त्वाद्वेट् । आशिषाताम् । **आक्षातामिति** । 'व्रश्च–' इति षः । कत्वम् । षत्वम् । अशिता । अष्टा । अशिषीष्ट । अक्षीष्ट । अशिष्यते । अक्ष्यते । आशिष्यत । आक्ष्यत ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्योयं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानोस्मिन् प्रसादे निरगमदमलः स्वादिसंज्ञो गणोयम् ॥

---

१. Dropped D_1. २. लोपत्वमेत्वं P, D_1; न्लोपैत्वे D_3, D_4. ३. After it–दम्भिता B_2; D_2 has परस्मैभाषा after it. ४. अशू D_3. ५. °दुल्लोपो B_2 P, C, N. ६. ऊदित्वाद्विट् before it in B_1, D_2 ७. लिटि परे N_1. ८. After it— ॥ आत्मनेभाषा ॥ D_2.

तुद व्यथने ।

तुदादिभ्यः शः ॥३।१।७७॥

तुदादेः[1] शः प्रत्ययः स्यात् कर्तरि सार्वधातुके ॥ शपोपवादः । ङित्त्वान्न गुणः । तुदति । तुदते ।[2]

भ्रस्ज पाके । 'ग्रहिज्या—' इति संप्रसारणम् । सस्य जश्त्वेन दः । चुत्वम् । भृज्जति[3] । 'व्रश्च—' इति षत्वम् । संयोगादिलोपः । अभ्राक्षीत् । अभ्रष्ट ।

तुद । इतः षित्रन्ताः पञ्चानिट उभयपदिनश्च । **ङित्त्वान्न गुण** इति । 'सार्वधातुकमपित्' इति ङित्त्वात् 'क्ङिति च' इति लघूपधगुणो नेत्यर्थः । तुदति । तुदेत् । तुदतु । अतुदत् । तोत्ता । तुद्यात् । तोत्स्यति । अतोत्स्यत् । तुदते । तुदेत । तुदताम् । अतुदत । अतुत्त । तुतुदे । तोत्ता । तुत्सीष्ट । तोत्स्यत । अतोत्स्यत ।

भ्रस्ज । **सस्य जश्त्वेनेति** । 'झलां जश् झशि' इति । **चुत्वमिति** । 'स्तोश्चुना श्चुः' इति । असिद्धत्वं तु जश्त्वस्य न । 'न मुने' इत्यत्र 'न' इति योगविभागात् । तथा 'भृज्जतीनां ङिति च' इति निर्देशः । भृज्जेत् । भृज्जतु । अभृज्जत् । भृज्जते । भृज्जेत । भृज्जताम् । अभृज्जत । **संयोगादिलोप** इति । 'स्कोः संयोगाद्योः' इत्यनेन । **अभ्राक्षीदिति** । च्लिः । सिच् । 'वदव्रज–' इति वृद्धिः । षत्वम् । कत्वम् । षत्वम् । ईट् । 'भ्रस्जोरोपधयोः–' इति रमि । अभ्राक्षीत् । अभ्राष्टाम् । अभ्राक्षुः । **अभ्रष्टेति** । लुङ् । आत्मनेपदम् । त । सिच् । 'झलो झलि' इति सिचो लोपः । 'व्रश्च–' इति षः । 'स्कोः–' इति सलोपः । ष्टुत्वम् ।

---

१. तुदादिभ्यः शः स्यात् D_4. २. After it—अतौत्सीत् । अतुत्त D_1. ३. भृज्जाति । भृज्जते B_2.

भ्रस्जो रोपधयोरमन्यतरस्याम् ॥६।४।४७॥

भ्रस्जो रेफस्य उपधायाः सकारस्य च स्थाने रमागमो[1] वा स्यादार्धधातुके ॥ 'मिदचोऽन्त्यात् परः'। रोपधयोः स्थाने विहितत्वात्तयोर्निवृत्तिः ।[2] [3]अभार्क्षीत् । क्ङिति तु संप्रसारणं बाधकम् ।[4] अभ्यासस्य संप्रसारणम् । उरत् । बभर्ज्ज । [5]बभ्रज्ज । संयोगात् परस्य लिटोऽकित्त्वादतुसादौ न संप्रसारणम् ॥ बभर्जतुः । बभ्रज्जतुः ।[6] [7]बभर्जे । बभ्रज्जे ।

भ्रस्ज । ननु रमागमः किं रोपधयोः स्थाने स्यादन्त्यादचः परो वा । नाद्यः । मित्त्वानर्थक्यप्रसङ्गात् । न द्वितीयः । रोपधयोः श्रवणप्राप्तेरित्याशङ्कामपाकर्तुमाह । 'मिदचोऽन्त्यात्परः' इति । रोपधयोरिति । अयमभिप्रायः । मित्त्वादवश्यमन्त्यादचः परोऽयं स्यात् । अन्यथा मित्त्वमनर्थकं स्यात् । यदि च रेफसकारयोः श्रवणं स्यात् 'रोपधयोः' इति स्थानषष्ठीनिर्देशोऽनर्थकः स्यात् । स्थानषष्ठ्या ह्येतदेव प्रयोजनम् । यत् षष्ठ्या निर्दिश्यमानस्य निवृत्तिः स्यादिति । तस्मान्मित्त्वादन्त्यादचः परः षष्ठीनिर्देशात् रोपधयोर्निवृत्तिरिति । क्ङितीति । पूर्वविप्रतिषेधादित्यभिप्रायः । बभर्जेति । णल् । द्वित्वम् । 'लिट्यभ्यासस्य' इति संप्रसारणम् । 'उरत्' । रम् । रोपधयोर्निवृत्तिः । बभ्रज्जेति । [8]रमभावे द्वित्वम् । जश्त्वेन सस्य दः । चुत्वम् । बभर्जतुरिति । द्वित्वम् । [9]अभ्यासस्य संप्रसारणम् । अत्वम् । रम्रेफयोर्निवृत्तिः । बभ्रज्जतुरिति । रमभावे । बभर्जे ।

---

१. रमागमः स्याद्वा D_1, D_4. २. After this B_1 has—रोपधयोरिति षष्ठीनिर्देशात् उपधा रेफश्च निवर्तते ।; N_1 has अभार्क्षीत् । अभर्ष्ट after it. ३. Dropped D_3, D_4. ४. After this—अभार्क्षीत् । अभर्ष्ट । D_8. ५. Dropped D_3. ६. After it—बभर्जिथ । बभ्रज्जिथ । बभ्रष्ठ । बभर्ष्ठ D_3, D_4. ७. Dropped N. ८. रमभावात् Dc_1, Dc_4. ९. अभ्याससं° Dc_1, Dc_4.

भर्ष्टा । भ्रष्टा । भृज्यात् ।

मुच्लृ मोक्षणे ।

शे मुचादीनाम् ॥७।१।५९॥

मुच् लुप् विद् लिप् सिच् कृत् पिश् खिद् एषां नुमागमः स्यात् शे परे ॥ मुञ्चति ।[२] लृदित्त्वादङ् । अमुचत् । अमुक्त ।[३] लिप उपदेहे । लिम्पति । 'लिपिसिचि—' इत्यङ् । अलिपत । 'आत्मनेपदेष्वन्यतरस्याम्' ।[४] अलिपत । अलिपेताम् । अलिप्त । अलिप्साताम् ।[५]

भर्ष्टा । **भ्रष्टेति** । वा रम् । भृज्यात् । भ्रक्ष्यति । भर्क्ष्यति ।

मुच्लृ ।

शे मुच । मुच्लृ मोक्षणे । लुप्लृ छेदने । विद्लृ लाभे । लिप उपदेहे । षिच क्षरणे । कृती छेदने । पिश अवयवे । खिद परितापे । मुञ्चते । **लृदित्त्वादिति** । लृदित्वात् 'पुषादि—' इत्यनेनाङित्यर्थः । **अमुक्तेति** । 'झलो झलि' इति सिचो लोपः । मुमोच । मुमुचे । मोक्ता । मुच्यात् । मुक्षीष्ट । मोक्ष्यति । मोक्ष्यते । **लिप** । उपदेहो वृद्धिः । **लिम्पतीति** । शः । नुम् । लिम्पते । **अलिपेतामिति** । 'आतो ङितः' । इतीय् । यलोपः । **अलिप्तेति** । अङभावे 'झलो झलि' इति सिचो लोपः । लिलेप । लिलिपे । लेप्ता । लिप्यात् । लिप्सीष्ट । लेप्स्यते ।

---

१. भ्रष्टा । भर्ष्टा N; D4 (After it 'ब्रश्चभ्रस्ज—' इति षत्वम् D4). २. After it—मुञ्चते B2. ३. After it—मुक्षीष्ट B1; अमुक्षाताम् । मुच्यात् । मोक्ता । मोक्ष्यति । मोक्ष्यते । मुक्षीष्ट B2. ४. After it—लिपिसिचिह्वाभ्यश्च्लेरङ् वा स्यादात्मनेपदेषु D1. ५. After it—लेप्ता । लेप्स्यति D1, D4.

षिचे[1] क्षरणे । निषिञ्चति । अभिषिञ्चति[2] । न्यषिञ्चत् । न्यषिचत् । न्यषिचत । न्यषिक्त । निषिषेच ॥[4]

कृती छेदने । कृन्तति ।[5] 'सेसिचि कृत—' इति वेट् । कर्तिष्यति । कर्त्स्यति ॥ षू प्रेरणे ।[6] विषुवति । व्यषावीत् ।[7]

षिच । निषिञ्चतीति । नुम् । 'उपसर्गात् सुनोति—' इति षत्वम् । सिञ्चते । न्यषिञ्चदिति । 'लिपिसिचि—' इत्यङ् । 'प्राक्सित—' इत्यड्व्यवायेपि षः । न्यषिचतेति 'आत्मनेपदेष्वन्यतरस्याम्' इति वाङ् । न्यषिक्तेति वा । अङभावे सिचो लोपः । निषिषेचेति । 'स्थादिषु—' इत्यभ्यासव्यवायेपि षः । सिषिचे । सेक्ता । सिच्यात् । सिक्षीष्ट ।

कृती । ईदित्वं यङ्लुगर्थम् । चरीकृतः । इत एकविंशतिः गूपर्यन्ताः परस्मैपदिनः । सप्त तृपन्ताः सेट्काः । कृन्ततीति । 'शे मुच—' इति नुम् । कृन्तेत् । अकर्तीत् । चकर्त । कर्तिता । कृत्यात् । अकर्तिष्यत् । अकर्त्स्यत् । षू । विषुवतीति । 'अचि श्नुधातु—' इत्युवङ् । 'उपसर्गात् सुनोतिसुवति—' इति षत्वम् । व्यषावीत् । 'इट ईटि' इति सिचो लोपः । सिचि वृद्धिः । 'प्राक् सितादड्व्यवायेपि' इति षः । सुषाव । सविता । सूयात् । सविष्यति ।

---

१. षिच्चिर् D_2, D_4, B_1; सिच्चिर् N. २. Dropped D_1, D_2, D_3, D_4. ३. B_1 has निषिञ्चेत् before it; dropped D_1, D_3. ४. After it—उभयतो भाषा D_2. ५. After it—अकर्तीत् B_2. ६. After it—सेट् B_2. ७. After it—दीर्घत्वान्नित्यमिट् B_1, B_2, D_2.

ओव्रश्चू छेदने।[1] 'ग्रहिज्या—'। वृश्चति। अव्रश्चीत्। अव्राक्षीत्।[2] अभ्यासरेफस्य ऋत्वम्। 'उरत्'। अत्त्वस्य स्थानिवत्त्वान्न संप्रसारण इति वस्योत्वं न।[4] वव्रश्च। वव्रश्चतु॥[5]

ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु। 'छे च' इति तुक्। ऋच्छति।[6] अनृछ इत्युक्तेर्नाम्। 'तस्मान्नुँड्–' इति नुट्। आनर्च्छ।

ओव्रश्चू। 'ग्रहिज्या----' इति। संप्रसारणमिति शेषः। वृश्चतीति। पूर्वरूपत्वम्। अव्रश्चीत्। अव्राक्षीत्। ऊदित्त्वादिड् वा। इडभावे 'वदव्रज---' इति वृद्धिः। 'व्रश्च—' इति षः। 'स्कोः--' इति सलोपः। 'षढोः कः सि' इति कत्वम्। षत्वम्। अभ्यासरेफस्येति। व्रश्च णल् इति स्थिते द्वित्वम्। तस्मिन् सति 'लिट्यभ्यासस्य–' इति संप्रसारणेन ऋत्वमित्यर्थः। ननु च वकारस्यापि संप्रसारणं प्राप्नोति। न च वाच्यं 'न संप्रसारणम्' इति निषेध इति। संप्रसारणस्य ऋकारस्य स्थाने अत्त्वस्य जातत्वादित्याशङ्कापाकरणायाह। अत्त्वस्येति। 'अचः परस्मिन्' इत्यत्त्वस्य स्थानिवत्त्वात् 'न संप्रसारणे संप्रसारणम्' इति वस्य संप्रसारणं नेत्यर्थः। वव्रश्चतुरिति। संयोगाल्लिटोऽकित्त्वात् 'ग्रहिज्या—' इति संप्रसारणं न। व्रश्चिता। व्रष्टा। वृश्च्यात्। व्रक्ष्यति। व्रश्चिष्यति।

ऋछ। इन्द्रियप्रलयो मोहः। ऋच्छतीति। तुकि 'स्तोश्चुना–' इति चुत्वम्। आर्च्छतु। आर्च्छीत्। आनर्च्छेति। अत्र वृद्धिप्राप्त्यभावात् 'ऋच्छत्यृताम्' इति गुण इत्यभिप्रेत्याह।

---

१. व्रश्चू D1, D2, P, C. २. 'ग्रहिज्या-' इति B2, 'ग्रहिज्या-' इति संप्रसारणम् D1, N. ३. After it—व्रश्चिता। व्रष्टा। वृश्च्यात्। व्रश्चिष्यति। व्रक्ष्यति। अव्राश्चिष्यत्। अव्रक्ष्यत्। 'स्वरतिसूति—' इति वेट्। अभ्यासरेफस्य &c. B2. ४. Dropped D2. ५. After it B1, B2 have—संयोगात् परस्य लिटः कित्त्वाभावान्न द्वितीयस्य संप्रसारणम्; Before वव्रश्चतुः—संयोगाल्लिटः कित्त्वपक्षेऽपि प्रच्छभ्रज्जव्रश्च एषां लिटि न संप्रसारणम् D1; before वव्रश्च—संयोगाल्लिटः कित्त्वेऽपि प्रच्छभ्रस्जव्रश्चां लिटि न संप्रसारणम् D3. ६. After it—आर्च्छत् B2. ७. °श्नुडागमे नुट् C.

'ऋच्छत्यॄताम्' । आनर्च्छतुः । तुक् संयोगान्नोपधागुणः । ऋच्छिता ।[१]

कॄ विक्षेपे । 'ऋत इद्धातोः' । किरति । अकारीत् ।[२] चकरतुः । करिता । करीता ।[३][४]

किरतौ लवने ॥६।१।१४०॥

उपात् परस्य किरतेः सुडागमः स्याच्छेदेर्थे[५] ॥ उपस्किरति ।

अडभ्यासव्यवायेपि ॥६।१।१३६॥

अड्व्यवायेभ्यासव्यवायेपि[६] सुट् कात्पूर्व एव स्यात् ॥

ऋच्छत्यॄतामिति । गुण इति शेषः । एतत्तु मध्यप्रदीपिकान्यायेन आनर्च्छ आनर्च्छतुरिति उभयत्र संबध्यते । द्वित्वम् । 'उरत्' । 'अत आदेः' इति दीर्घः । ऋच्छयात् । ऋच्छिष्यति ।

कॄ । किरतीति । ऋत इति । रपरः । अकारीत् । चकार । चकरतुरिति । 'ऋच्छत्यॄताम्' इति गुणः । करिता । करीतेति । 'वॄतो वा' इति वेटो दीर्घः ।

किरतौ । छेद इति विषयसप्तमी । छेदविषयो यः किरतेरर्थः तस्मिन्नर्थे इत्यर्थः न तु छेदः किरतेरर्थः । उपस्किरतीति । तथा विक्षिपति यथा विच्छेदो भवतीत्यर्थः । उपस्कारं मद्रका लुनन्ति । विक्षिप्य लुनन्तीत्यर्थः । णमुलत्र वक्तव्यः । इत्येवमादीन्युदाहर्तव्यानि ।

अडभ्यास । किमर्थमिदमुच्यते । यावता पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन । तत्र धातूपसर्गयोः कार्यमन्तरङ्गमिति पूर्वं सुट् पश्चात् अडभ्यासौ स्याताम् । अतोभिमतसिद्धेर्व्यर्थमिदं सूत्रम् ।[७] उच्यते । 'सुट् कात् पूर्वः' इति सूत्रेण कात् पूर्वग्रहणात् सुटो[८]

---

१. After it—ऋच्छयात् B₂. २. Dropped D₁, N₁; चकार D₂, D₃, D₄. ३. B₁ has before it—चकार. ४. After it—कीर्यात् । करिष्यति । करीष्यति B₂; कीर्यात् P, C. ५. लवने D₁; छेदार्थे D₂. ६. °भ्यासस्य D₄. ७. तस्मात् Dc₁. ८. सुटो न वक्तव्यं प्रत्ययादि Dc₁.

उपास्किरत् । उपचस्कार ।

हिंसायां प्रतेश्च ॥६।१।१४१॥

उपात् प्रतेश्च किरतेः सुट् स्यात् हिंसायाम् ॥ उपस्किरति । प्रतिस्किरति ।

गॄ निगरणे ।

अचि विभाषा ॥८।२।२१॥

गॄ इत्यस्य रो लत्वं वास्यादजादौ परे ॥

भक्तत्वं प्रत्यपादि । तथा हि टित्त्वादेव सुट् कात् पूर्वत्वे सिद्धेपि कात्पूर्वग्रहणमभक्तत्वज्ञापनार्थम् । तेन संस्कृषीष्ट । संस्क्रियत इति संयोगादिलक्षणाविट्गुणौ न भवत इति । एवं च सति सुटि जाते पश्चाद्भाविनावडभ्यासौ सकारात् परौ स्याताम् । धातुभक्तत्वात् सुटः । एवं चानिष्टं रूपं स्यात् । अत एतत् सूत्रम् । अस्मिंश्च सत्यस्मादेव वचनात् कृतयोरडभ्यासयोस्तद्व्यवाये सुट् कात्पूर्वं क्रियेत इति सिद्ध-मिष्टम् । सुटटकारः सुट्स्तुस्त्वञ्जामिति विशेषणार्थः । **उपास्किरदिति** । लुङ् । ऋत इत् । **उपचस्कारेति** । वृद्धिः । द्वित्वम् । चुत्वम् ।

हिंसायाम् । हिंसायां विषये इत्यर्थः । **उपस्किरति** । **प्रतिस्किरतीति** । हिंसानुबन्धं विक्षिपतीत्यर्थः । कीर्यात् । करिष्यति । करीष्यति ।

गॄ ।

अचि । धातोः स्वरूपग्रहे तत्प्रत्यये कार्यविज्ञानात् प्रत्ययः संनिधापितस्तस्य च विशेषणात् तदादिविधिरित्यभिप्रेत्याह । **अजादा-विति** । व्यवस्थितविभाषेयम् । तेन गल इति कण्ठे नित्यं गर इति विषे ।[5] निगार्यते । निगाल्यते । इत्यत्र णिलोपस्य स्थानिवत्त्वात् लत्वविकल्पः । पूर्वत्रासिद्धे न स्थानिवदिति सापवादमेव । तस्य दोषः

---

१. सुडागमः N_1, D_3, D_4. २. इजादौ B_1, B_2, D_2; विभाषाचि परे D_1; °वचि C. ३. °यादिः Dc_3. प्रत्ययादि Dc_1. ४. °ग्रहणे Dc_3. ५. After it—अयनं Bc_2; Dc_3 has विषं येन निगार्यते । निगाल्यते &c.

गिरति । गिलति ।[१]

तृम्प तृप्तौ । 'अनिदिताम्—' इति नलोपः । तृपति ।[४] [५]**तृम्पतुम्पतृम्फतृंफगुम्फतुम्भशुम्भां शे वा नुम् वाच्यः ।*** **नुम्विधिसामर्थ्यान्नलोपो न । तृम्पति । अतृम्पीत् ।**

संयोगादिलोपलत्वणत्वेष्विति वचनात् । **गिरति । गिलतीति ।** ऋत इर् । रपरः । अगारीत् । अगालीत् । जगाल । जगार । गलिता । गलीता । गरिता । गरीता ।

तृम्प । तृम्पति । तृम्पादयो ये नुमनुषक्ता धातुपाठे पठ्यन्ते ते गृह्यन्ते । ननु तृम्पतुम्प इति पकारान्तौ न पठ्येते तत् कथमनयोर्ग्रहः । उच्यते । फकारान्तौ यौ पठ्येते तयोः स्थाने केचित् पकारान्तौ पठन्ति तन्मतोपसंग्रहार्थं पकारान्तावपि पठितौ । तथा चाह **क्षीरतरङ्गिणीकारः** । 'तृम्प तुम्पेत्येके । तृम्फ तुम्फेत्येके' इति । **तृम्पतुम्पेति** । तृम्फ तृप्तौ । तुम्फ तृम्फ क्लेशे । गुम्फ ग्रन्थे । तुभ ग्रन्थे । शुम्भ शोभार्थः । तृम्पति । अतृम्पत् । अतृपत् । तृम्पेत् । तृम्पतु । ननु च नुमि कृते 'अनिदिताम्—' इति नलोपः कुतो न स्यादित्यत आह । **नुम्विधि-सामर्थ्यादिति** । अतृम्पीत् । ततृम्प । तृम्पिता । तृम्प्यात् । तृम्पिष्यति ।

---

१. After it—अगारीत् । जगार B₂. २. प्रीतौ B₂. ३. नलोपः C. ४. After it—तृपतु N. ५. तृपतृम्पतुपतुम्पतृफतृम्फतृफतृम्फगुफगुम्फतुभ-तुम्भशुभशुम्भां D₂, B₁, B₂; तृम्पतृम्फतृपतृम्फगुफगुम्फतुभतुम्भशुभशुम्भां शे नुम् वाच्य N. ६. तृम्प D₁, D₄. ७. सामर्थ्यान्नलोपो न B₁. ८. °त् नलोपो न D₁, D₂. ९. अतृम्पत् । अतृम्पीत् । ततृम्प । तृम्पिता । तृम्प्यात् । तृम्पिष्यति B₁, B₂; D₁, D₃, D₄ drop अतृम्पीत्; D₂ has अतृम्पत् for अतृम्पीत् D₂. १०. क्षीरतरङ्गिण्यां क्षीरस्वामी Dc₃. ११. तृपतृम्पेत्येके । तुपतुम्पेत्येके इति । तृप तृप्तौ । तृम्फ तृप्तौ । तृफ तृम्फ उत्क्रोशे । गुफगुम्फ ग्रन्थे । Dc₃.

स्पृश संस्पर्शने । अस्प्राक्षीत् । अस्पार्क्षीत् ।[1] अस्पृक्षत् ।[2]

चृती ग्रन्थे हिंसायां च । 'सेसिचि—' इति वेट् । चर्तिष्यति । चर्त्स्यति ।[3]

प्रछ ज्ञीप्सायाम् । 'ग्रहिज्या—' इति संप्रसारणम् । पृच्छति । अप्राक्षीत् ।[4] पप्रच्छ । पप्रच्छतुः ।[5]

स्पृश । अनिट् । स्पृशति । **अस्प्राक्षीदिति** । कृषमृशस्पृशतृपदृपः च्लेः सिज्वा । 'अनुदात्तस्य—' इत्यम् वा । हलन्तलक्षणा वृद्धिः । 'व्रश्च—' इति षः । कत्वम् । षत्वम् । **अस्पार्क्षीदिति** । अमभावे । **अस्पृक्षदिति** । सिजभावे रूपम् । 'शल इगुपध—' इति क्सः । षत्वकत्वक्षत्वानि । पस्पर्श । स्पर्ष्टा । स्प्रष्टा । स्पृश्यात् । स्प्रक्ष्यति । स्पर्क्ष्यति ।

चृती । सेट्कः । चृतति । चर्तेत् । अचर्तीत् । चचर्त । चर्तिता । चृत्यात् । अचर्तिष्यत् । अचर्त्स्यत ।

प्रच्छ । ज्ञीप्सा जिज्ञासा । इतरत्रयोऽनिटः । **पृच्छतीति** । पूर्वरूपत्वम् । **अप्राक्षीदिति** । 'व्रश्च—' इति षः । 'वदव्रज—' इति वृद्धिः । पप्रच्छ । **पप्रच्छतुरिति** । अभ्यासस्य संप्रसारणम् । तुक् । संयोगात्लिटोऽकित्त्वात् 'ग्रहिज्या—' इति संप्रसारणं न । प्रष्टा । पृच्छ्यात् । प्रक्ष्यति ।

---

१. स्पर्शने D4. २. अस्पार्क्षीत् । अस्प्राक्षीत् D4. ३. Before it—'**शल इगुपधात्—' इति च्लेः क्सः** C; after it—पस्पर्श । पस्पृशतुः । **स्पृश्यात् । स्प्रष्टा** B2. ४. After it—अचर्तिष्यत् । अचर्त्स्यत् । चचर्त । **चर्तिता । चर्त्स्यति** B2. ५. '**ग्रहिज्यावयि—**' D1, D4 ; ग्रह्यादि संप्र' D3. ६. After it—**पृच्छ्यात्** । **प्रष्टा** B2. ७. Dropped D3, D4. ८. After it—B2 has पप्रच्छिथ । पप्रष्ठ । प्रष्टा । पृच्छ्यात् ।; पप्रच्छिथ । पप्रष्ठ for **पप्रच्छतुः** D2.

सृज विसर्गे। 'सृजिदृशोर्झलि—' इत्यम्।[1] अस्राक्षीत्। अस्राष्टाम्। 'विभाषा सृजिदृशोः'। ससर्जिथ। सस्रष्ठ।

टुमस्जो शुद्धौ। मज्जति। 'मस्जिनशोः—' इति नुम्। मस्जेरन्त्यात् पूर्वं नुममिच्छन्ति।[2] संयोगादिलोपः। 'चोः कुः'। अमाङ्क्षीत्। [3]ममज्जिथ। ममङ्क्थ।[4]

विछ गतौ। 'गुपूधूप—' इत्यायः। [5]तुग्योगान्न गुणः। विच्छायति। विच्छेरायो वेति केचित्। विच्छति। अविच्छायीत्। अविच्छीत्।[6]

सृज। सृजति। **अस्राक्षी**दिति। वृद्धिः। 'व्रश्च—' इति षः। कत्वषत्वे। **अस्राष्टा**मिति। 'झलो झलि' इति सिचो लोपः। ससर्ज। स्रष्टा। सृज्यात्। स्रक्ष्यति।

टुमस्जो। शुद्धिः स्नानम्। ब्रुडनं च लक्ष्यते। **मज्जती**ति। सस्य जश्त्वेन दः। चुत्वम्। **मस्जे**रिति। नुमोन्त्यात् पूर्वत्वे प्रयोजनं 'स्कोः—' इति संयोगादेः सस्य लोप इत्यभिप्रेत्याह। **संयोगा**दिलोप इति। तथा मग्न इत्यादावुपधानलोपोपि प्रयोजनम्। **अमाङ्क्षी**दिति। लुङ्। सिच्। हलन्तलक्षणा वृद्धिः। ममज्ज। **ममज्जिथ**। **ममङ्क्थे**ति। 'उपदेशेत्वतः' इति इडभावः। 'ऋतो भारद्वाज—' इति वेट्। इडभावे नुम्। मङ्क्ता। मज्यात्। मङ्क्ष्यति।

विच्छ। सेट्कः। **विच्छे**रिति। यथाह **क्षीरस्वामी क्षीरतरङ्गिण्यां** विच्छेस्तुदादिपाठः सार्वधातुकेप्यायानित्यत्वार्थः। तथा च शपि नित्यमिति **भाष्यम्**। अथ विच्छेर्विकल्प इति। विच्छायांचकार विविच्छ। विच्छायिता। विच्छिता।

---

१. नित्यम् after °त्यम् in B_1. २. After it—एक B_2. ३. C has ममज्ज before it. ४. C, N have ममज्जथुः after it; after it—मङ्क्ता मङ्क्ष्यति। अमङ्क्ष्यत् B_2. ५. तुक्संयोगोपधान्न D_3. ६. After it—विच्छायांचकार। विविच्छ। विच्छायिता। विच्छिता। विच्छाय्यात्। विच्छ्यात्। विच्छायिष्यति। विच्छिष्यति B_2.

मृश आमर्शने । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् ।[१] **इषु इच्छायाम् । 'इषुगमियमां छः' । इच्छति ।**[२] **इयेष । 'तीषसह—' इति वेट् । एषिता । एष्टा ।**

कुट कौटिल्ये ।[३] **'गाङ्कुटादिभ्योऽञ्णित् ङित्' । ङित्वान्न गुणः । अकुटीत् । अञ्णिति किम् । चुकोट । चुकुटिथ । कुटिता ।**

व्यच व्याजीकरणे । ग्रहिज्या । विचति । व्यचेः कुटादित्वमनसि वक्तव्यम् । अविचीत् । विव्याच । विविचतुः ।

मृश । आमर्शनं स्पर्शः । मृशति । **अम्राक्षीत्** । **अमार्क्षीदिति** । 'कृषमृश—' इति वा सिच् । 'अनुदात्तस्य—' इत्यम् वा । 'वदव्रज—' इति वृद्धिः । 'व्रश्च—' इति षः । कत्वम् । षत्वम् । **अमृक्षादिति** । सिजभावे 'शल इगुपधात्—' इति क्सः । ममर्श । मर्ष्टा । मृश्यात् । मक्ष्र्यति । मक्ष्यति ।

इषु । इतः सप्त सेट्काः णूपर्यन्ताः । ऐच्छत् । ऐषीत् । **इयेषेति** । लिट् । णल् । गुणः । द्वित्वम् । 'अभ्यासस्यासवर्णे' इतीयङ् । इष्यात् । एषिता । एषिष्यति । ऐषिष्यत् ।

कुट । कुटति । **अकुटीदिति** । सिच् । इट् । ईट् । सलोपः । **चुकोटेति** । द्वित्वम् । चुत्वम् । **चुकुटिथेति** । 'गाङ्कुट—' इति ङित्वान्न गुणः । कुटिता । कुट्यात् । कुटिष्यति ।

व्यच । **व्यचेरिति** । **पदमञ्जरीकारमते अनसीति पर्युदास इति असदृशे कृत्येव कुटादित्वम् । तेन अव्यचीत् । विव्यचिथेत्यादीनि रूपाणि । कुटादित्वाभावात् । अनसीति प्रसज्यप्रतिषेध इति मत्वाह ग्रन्थकारः । अविचीदिति** । ङित्त्वात् संप्रसारणम् । **विव्याचेति** ।

१. Dropped N_1. २. After it—मृश्यात् । म्रष्टा । मर्ष्टा । म्रक्ष्यति । मर्क्ष्यति B_2. ३. After it—ऐषीत् । अभ्यासस्यासवर्णे P, C; ऐषीत N. ४. After it—कुटति P, C, B_1, B_2. ५. °ज्येति संप्रसारणम् P; ग्रहिज्या dropped N_1. ६. कुटादित्वादित्व° B_2. ७. Dropped D_2.

विचिता ।[1] असुप्रत्यये[2] तु[3] उरुव्यचाः[4] ।

त्रुट[5] छेदने । 'वा भ्राश–' इति श्यन्वा[6] । त्रुट्यति । त्रुटति । अत्रुटीत् ।[7]

स्फुर स्फुरणे ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥८।३।७६॥

निर् नि विभ्यः परयोरनयोः सस्य षो वा स्यात् ॥ निस्फुरति । निष्फुरति । अस्फुरीत् । पुस्फोर । एवं स्फुल संचये च ।[8]

णू स्तवने । नुवति । अनुवीत् । नुनाव ॥[9]

अभ्यासस्य संप्रसारणम् । विचितेति । ङित्वेत्वे । विच्यात् । विचिष्यति । उरुव्यचा इति । असुन् ।

त्रुट । अत्रुटीदिति । ङित्त्वाद्गुणाभावः । तुत्रोट । त्रुटिता । त्रुट्यात् । त्रुटिष्यति ।

स्फुट । अस्फुटीदिति । ङित्त्वाद्गुणाभावः । स्फुटिता । स्फुट्यात् । स्फुटिष्यति । एवं स्फुल । स्फुलति । निस्फुलति । अस्फुलीत् । पुस्फोल । स्फुलिता ।

णू । नुवतीति । 'अचि श्नु—' इत्युवङ् । अनुवीदिति । कुटादित्वात् ङित्वम् । उवङ् । नुविता । नूयात् । नुविष्यति ।

---

१. B_1, D_2 have after it—विच्यात्; B_2—विच्यात् । विचिष्यति। २. असु B_2. ३. B_1 drops तु. ४. उरयचाः D_4. ५. त्रुटी D_3, D_4. ६. भ्राशेति D_1, D_2. ७. After it B_1 has—त्रुटिता । त्रुट्यात् । त्रुटिष्यति । तुत्रोट । त्रुटिता । त्रुटिष्यति B_2. ८. पुल्लने संचये च B_1; च dropped D_1, D_3. ९. After it—नुविता । नूयात् । नुविष्यति B_1; परस्मैभाषा D_2; नुविता । नुविष्याति B_2. १०. स्फुर । अस्फुरीदिति । स्फुरिता &c. Bc_2.

मृङ् प्राणत्यागे ।[1]

म्रियतेर्लुङ्लिङोश्च ॥१।३।६१॥

म्रियतेः शिदन्ताच्च[2] लुङ्लिङोश्चात्मनेपदं स्यान्नान्यत्र । रिङियङादेशौ[3] । म्रियते ।[4]

अमृत ।[5] मृषीष्ट । एषु किम् । मरिष्यति ।

मृङ् । द्वावात्मनेपदिनौ । एकोऽनिट् ।

म्रियतेः । शिद्भावी शिदन्तः । नियमार्थवचनं म्रियतेर्लुङ्लिङोः शिदन्तस्यैवेति । एतदाह । नान्यत्रेति । यद्येवं ङित्करणं किमर्थं यावतान्यत्रात्मनेपदेन भवितव्यमेव । उच्यते । स्वरार्थम् । मा हि मृतेत्यत्र 'तास्यनुदात्त—' इत्यादिना लसार्वधातुकस्यानुदात्तत्वं ङिल्लक्षणेन भाव्यम्[6] । तत्र तु कृते धातोरन्तोदात्तत्वं स्यात् । 'तिङ्ङतिङः' इति निघातो 'हि च' इति प्रतिषिध्यते । अडागमोऽपि 'न माङ्योगे' इति । रिङियङादेशाविति । 'रिङ्शयग्लिङ्क्षु' इति रिङ् । 'अचि श्नुधातु—' इतीयङ् । म्रियते ।

अमृतेति । 'उश्च' इति कित्त्वान्न गुणः । 'ह्रस्वादङ्गात्' इति सिचो लुक् । ममार । मर्तासि । मृषीष्टेति । तङ् । कित्त्वान्न गुणः । मरिष्यतीति । 'ऋद्धनोः स्ये' इतीट् ।

---

१. After it—अत्र ङित्करणं स्वरार्थम् B1. २. च dropped D3, D4. ३. रिङ् शयङ्क्ति रिङ् । इयङादेशः P, C (D2, B3, and N have रिङियङादेशौ for इयङादेशः). ४. After it—'ह्रस्वादङ्गात्' इति सिचो लुक् P, C. ५. After it—अम्रियत D2. ६. ङिल्लक्षणं Bc2; ङिल्लक्षणं वाच्यम् । Dc3.

ओविजी भयचलनयोः । विजते ।

विज इट् ॥१।२।२॥

[1]विजेः परो [2]ञिणद्वर्ज इडादिप्रत्ययो ङिद्वत् स्यात् ॥ [3]अविजिष्ट । विजिता ।[4]

इति तुदादिप्रक्रिया ।

ओविजी । विजते ।

विजः । 'वृद्धिर्यस्याचाम्—' इत्यतः 'यस्यादिः' इत्यनुवर्तते । तेनेड् विशेष्यते । यस्यादिरिति । तेनोत्तमैकवचनमिड् न गृह्यते । आगममात्रं वा न गृह्यते । किं त्विडादिप्रत्यय इत्यभिप्रेत्याह । **इडादिः प्रत्यय इति** । **अविजिष्टेति** । इट् । षत्वम् । ष्टुत्वम् । विविजे । **विजितेति** । ङित्त्वान्न गुणः । विजिषीष्ट । विजिष्यते ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाऽप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला **प्रक्रियेयं तुदादेः** ॥

---

१. विजेरपि परो D_1. २. ञित् D_3, D_4. ३. Before it—विविजे B_2. ४. B_1, B_2 have after it—विजिष्यते; after it—आत्मनेभाषा ॥ D_2.

रुधिर् आवरणे ।

रुधादिभ्यः श्नम् ॥३।१।७८॥

रुधादिभ्यः श्नम् प्रत्ययः स्यात् कर्तरि सार्वधातुके ।[१] नेे शप् । मित्त्वादन्त्यादचः परः ।[२] रुणद्धि ।[३] 'श्नसोरल्लोपः' । धत्वम् । 'झरो झरि सवर्णे' ।[४] परत्वात् कृतस्यापि णत्वस्यासिद्धत्वादनुस्वारः ।[५] तदादेशस्य परसवर्णस्यासिद्धत्वान्न णत्वम् ।[६] अनुस्वारपरसवर्णौ प्रति श्नस्याल्लोपो न स्थानिवत् । रुन्द्धः । रुन्धन्ति । रुन्ध्यात् । अरुणत् । 'दश्च' इति वा

रुधिर् । आवरणं व्याप्तिः । इतस्त्रय उभयपदिनः । एकोऽनिट् । **न शबिति** । श्नमा बाधितत्वात् । कथं पुनर्भिन्नदेशेन श्नमा बाध्यते । न ह्यभिन्नदेशमेव बाधकारणमपि त्वेकप्रयोजनमपि । विकरणा हि सार्वधातुकस्य धातोश्चार्थाभिधाने सहायास्तत्साहाय्यं श्नमैव कृतमिति शपा न भाव्यम् । **रुणद्धीति** । रुनध् ति इति स्थिते **धत्वमिति** । 'झषस्तथोः---' इति धत्वम् । 'झलां जश् झशि' इति दत्वम् । रुनध् तस् इति स्थिते **धत्वमिति** । 'झषस्तथोः—' इति । 'झरो झरि सवर्णे' इति पूर्वधकारस्य लोपः । 'नश्चापदान्त---' इत्यनुस्वारः । 'अनुस्वारस्य ययि परसवर्णः' । 'अट्कुप्वाङ्---' इति नस्य णत्वे प्राप्ते आह । **परसवर्णस्येति** । 'पूर्वत्रासिद्धम्' इत्यसिद्धत्वादिति भावः । ननु चात्रानुस्वारपरसवर्णावेव न स्याताम् । यतः 'अचः परस्मिन्—' इत्यल्लोपस्य स्थानिवत्त्वमित्याशङ्क्याह । **अनुस्वारपरसवर्णावित्यादि** । 'न पदान्त---' इत्यनेनेति ज्ञेयम् । **रुन्धन्तीति** । श्नम् । अल्लोपः । **अनुस्वारपरसवर्णौ** । रुणत्सि । रुणद्धि । रुन्द्धि । **अरुणादिति** । लङ् । **श्नम्** । 'हल्ङ्याब्---' इति लोपः । 'वावसाने' । 'दश्च' इति वा

---

१. After it—परे D3. २. शपापवादः D1. ३. After it—'झषस्तथोर्धोऽधः' । C. ४. After it—रुन्द्धे C; N has रुन्द्धः । रुन्द्धे. ५. From परत्वात् to तदादेशस्य dropped D3. ६. तदादेशस्य dropped D4. ७. From अनुस्वार...to णत्वम् dropped B1.

रुत्वम् । अरुणद् । अरुणः । अरुधत् । अरौत्सीत् । ऐवं भिदिर्[2] छिदिर् रिचिर् विचिर् क्षुधिर् युजिर् ।[1]

उछृदिर् दीप्तिदेवनयोः । छृणत्ति । छृन्ते । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट ।[3] 'सेसिचि—' इति वेट् । छर्दिष्यति । छर्त्स्यति । एवं उतृदिर्[4] हिंसानादरयोः ।[5] शिष्लृ विशेषणे । विशिनष्टि ।[6] हेर्धिः ।[7] षस्य जश्त्वेन डः ।[8] ष्टुत्वम् ।[9] 'झरो झरि—'

त्वमिति । 'सिपि' इति ज्ञेयम् । अरुधदिति । 'इरितो वा' इति वा च्लेरङ् । अरौत्सीदिति । अङभावे सिच् । 'वदव्रज—' इति वृद्धिः । चर्त्वम् । रुरोध । रोद्धा । रुध्यात् । रोत्स्यति । अरोत्स्यत् । रुन्द्धे । रुन्धीत । रुन्द्धाम् । अरुन्द्ध । अरुद्ध । रुरुधे । रोद्धा । रुत्सीष्ट । रोत्स्यते । अनुरुध कामे । अनुपूर्वो रुधिरिच्छार्थो दिवादिः । अनुरुध्यते ।

उछृदिर् । द्वौ सेट्कौ । छृणत्ति । छृन्ते । इरित्वादङ् वा । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट । चच्छर्द । चच्छृदे । छर्दिता । छृद्यात् । छर्दिषीष्ट । छृत्सीष्ट । एवमुतृदिर् । तृणत्ति । तृन्ते । अतृदत् । अतर्दीत् । अतर्दिष्ट । ततर्द । ततृदे । तर्दिता । तृद्यात् । तर्दिषीष्ट । तृत्सीष्ट । तर्दिष्यति । तर्दिष्यते । तर्त्स्यति । शिष्लृ । इतश्चत्वारः परस्मैपदिनः । एकोनिट् । शिनष्टि । शिष्टः । शिंषन्ति । शिनक्षि । शिंष्यात् । शिनष्टु । शिनष् हि इति स्थिते 'श्नसोरल्लोपः । हेर्धिः इति । 'हुझल्भ्यः—' इति । षस्येति । 'झलां जश् झशि' इति । आन्तरतम्यादित्यर्थः । ष्टुत्वमिति । 'ष्टुना ष्टुः' इति । 'नश्चापदान्तस्य' इत्यनुस्वारः ।

---

१. From एवं to युजिर् dropped D1, D3, D4. २. भिदिर् विदारण । छिदिर् द्वैधीकरणे । रिचिर् पृथग्भावे । क्षुदिर् संचूर्णे । युजिर् संयोगे । D2. ३. From छृणत्ति to अच्छर्दिष्ट dropped D1, D3. ४. उतृदिर् N. ५. After it—तृणत्ति । तृन्ते B1, B2; after it—उभयतो भाषा D2. ६. Dropped D1, D3; शिनष्टि D4. ७. 'हुझल्भ्यः—' इति हेर्धिः B1, B2 P, C. ८. षस्य षत्वं जश्त्वं डः D2. ९. जश्त्वम् B1, D3, D4.

इति ढलोपः । अनुस्वारपरसवर्णौ । शिण्ढि । अशिनट् । अशिषत् । शेष्टा । एवं पिष्लृ संचूर्णने । तृह हिंसायाम् ।

तृणह इम् ॥७।३।९२॥

तृहः श्नमि कृते इमागमः स्यात् पिति हलि सार्वधातुके । तृणेढि । तृण्ढः । तृहन्ति । तृणेक्षि । तृणेह्मि । तृंह्वः । तृंह्मः । तृणेढु । अतृणेट् । अतर्हीत् ॥

'अनुस्वारस्य ययि परसवर्णः' । अशिनट् इति । लङ् । 'हल्ङ्याब्—' इति लोपः । जश्त्वचर्त्वे । लृदित्वादङ् । अशिषत् । शिशेष । शेष्टा । शेक्ष्यति । तृह । इतश्चत्वारः सेट्काः ।

तृणहः । तृणह इत्यागतश्नमूकस्य ग्रहणम् । श्नमि कृते इमागमो यथा स्यात् । ततश्च तौदादिकस्य तृहेर्ग्रहणं न । अस्यापि यङ्लुगन्तस्यापि ग्रहणं न भवति । तृणेढीति । श्नम् तृणह इति स्थिते इमागमो मित्त्वादन्त्यादचः परः । 'हो ढः' । 'झषस्तथोः—' इति तकारस्य धकारः । ष्टुत्वम् । 'ढो ढे लोपः' । तृण्ढ इति । 'श्नसोरल्लोपः' । ढत्वम् । ष्टुत्वम् । ढलोपः । अनुस्वारपरसवर्णौ । तृणेक्षीति । श्नम् । ढत्वम् । 'षढोः—' इति कत्वम् । तृण्ढः । तृणेह्मि । तृंह्वः । तृंह्मः । तृंह्यात् । तृणेढु । तृण्ढि । तिपि लोपे कृते हलादाविति सवर्णाश्रयेप्यत्र प्रत्ययलक्षणा परिभाषेष्यत इतीम् । अतृणेट् । अतर्हीदिति । लुङ् । सिच् । इट् । गुणः । ततर्ह । तर्हिता । तृह्यात् । तर्हिष्यति ।

---

१. After it—अशिष्टाम् C. २. From अशिषत् to संचूर्णने dropped D_1, D_4. ३. In place of it C has शिशेष । शिशिषतुः । शिष्यात्; dropped D_3. ४. Before it—भञ्जो आमर्दने । श्नान्नलोपः । श्न इति श्नमयमुच्छिद्यानुबन्धो गृह्यते । तत उत्तरस्य नकारस्य लोपः स्यात् । भनक्ति । अभाङ्क्षीत् । बभञ्ज । भङ्क्ता । भुज पालनाभ्यवहारयोः । भुनक्ति । अभौक्षीत् । भोक्ता । उन्दी क्लेदने । उनत्ति । उन्दांचकार । तञ्चु संकोचने । तनक्ति । वृजी वर्जने । वृणक्ति । अवर्जीत् । ववर्ज । एवं वृचीपृची संपर्के । पृणक्ति । कृती वेष्टिते । कृणत्ति B_2, D_2 (D_2 has भनाक्ति । भङ्क्ता and पृची for वृचीपृची). ५. From तृणेह्मि to अतृणेट् dropped D_1, D_2, D_3, D_4 (D_2 has अतृणेट्); तृणेह्मि । तृंह्व । तृंह्मः dropped N.

[1]हिसि हिंसायाम् । इदित्त्वान्नुम् ।

श्नान्नलोपः ॥६।४।२३॥

श्नमः परस्य नस्य लोपः स्यात् । हिनस्ति ।[2] अहिंसीत् ।

अञ्जू व्यक्ति[3]म्रक्षणकान्तिगतिषु । अनक्ति । अङ्क्तः । अङ्ग्धि ।

हिसि । इदित्त्वान्नुमिति । 'इदितो नुम् धातोः' इति । **श्नात्** । श्नमयमुत्सृष्टमकारानुबन्धो गृह्यते इत्यभिप्रेत्याह ।

श्नमः परस्येति । शकारवतो ग्रहणं किम् । यज्ञानाम् । 'सुपि च' इति दीर्घे कृतेपि स्थानिवत्त्वान्नलोपः स्यादेव । विश्नानां प्रश्नानामित्यत्र लक्षणप्रतिपदोक्तपरिभाषया न भवति । लाक्षणिकत्वादस्य । हिंस्तः । हिंसन्ति । हिंस्यात् । हिनस्तु । 'धि च' इति सलोपः । हिन्धि । 'तिप्यनस्तेः' इति दः । अहिनत् । अहिनद् । 'सिपि धातोः' इति वा रुः । अहिनत् । अहिनः । अहिनद् । जिहिंस । हिंसिता । हिंस्यात् । हिंसिष्यति ।

अञ्जू । व्यक्तिः प्रकटना । म्रक्षणं घृतादिसेकः । कान्तिर्दीप्तिः । **अनक्तीति** । श्नम् । श्नान्नलोपः । अञ्जन्ति । अनक्षि । अञ्ज्यात् । अनक्तु । **अङ्ग्धीति** । 'हुझल्भ्यो हेर्धिः' । 'चोः कुः' । जश्त्वम् । आनक् । आनग् ।

---

१. Before it—वृह वृद्धौ । वृण्ढि । अवर्हीत् B_1, P, C, N (N drops वृण्ढि). २. 'इदितो नुम् धातोः' D_1. ३. After it—अहिनत् । 'तिप्यनस्तेः' । अहिनः । अहिनत् । 'सिपि धातोर्रुर्वा' । अहिंसीत् । B_2, D_2. ४. व्यक्तिम्रक्षण° D_2, B_2.

अञ्जेः सिचि ॥७।२।७१॥

अञ्जेः सिचो नित्यमिट् स्यात् ॥ आञ्जीत् । आनञ्ज । आनञ्जतुः । अङ्क्ता । अञ्जिता ।[1][2]

[3]ञिइन्धी दीप्तौ । इन्द्धे । इन्धाते । इन्धांचक्रे ।[4]

[5]विद् विचारे[6] । विन्ते । एवं खिद दैन्ये ।[7]

इति रुधादिप्रक्रिया ॥

आनञ्जेति । 'अत आदेः' । 'तस्मान्नुड् द्विहलः' इति नुट् ।

अङ्क्ता अञ्जितेति । ऊदित्वादिड्वा । अज्ज्यात् । अञ्जिष्यति । अङ्क्ष्यति ।

ञिन्धी । आत्मनेपदी । इन्धे इति । त । टेरेत्वम् । श्नम् । श्नान्नलोपः । 'झषस्तथोः—' इति धः । 'झरो झरि सवर्णे' इति पूर्वधलोपः । इन्धते । इन्धीत । इन्धाम् । इन्त्स्व । इन्ध्वम् । ऐन्द्ध । ऐन्धिष्ट । इन्धांचक्रे इति । 'इजादेः—' इत्याम् । 'आम्प्रत्ययवत्—' इत्यात्मनेपदं कृञः । इन्धिता । इन्धिषीष्ट । इन्धिष्यते । ऐन्धिष्यत ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमला **प्रक्रियेयं रुधादेः** ॥

---

१. Dropped D1, D2, D3, D4; after it आनञ्जुः N. २. After it—अञ्ज्यात् । अञ्जिष्यति B2; परस्मैभाषा D2. ३. इन्धी P, C, B1, B2. ४. Dropped D4. ५. From विद to दैन्ये dropped P, D1, D3, D4. ६. विचारणे D2, N. ७. After it—खिन्त्ते । चिखेद B2; आत्मनेभाषा । D2; after it-खिन्त्ते N.

तनु विस्तारे ।

तनादिकृञ्भ्य उः ॥३।१।७९॥

तेनादिभ्य उः स्यात् ॥ तनोति । तनुतः । [2]तेन्वन्ति । तन्वः । [3]तनुवः । अतानीत् ।[4] [5]अतनीत् ।

तनादिभ्यस्तथासोः ॥२।४।७९॥

तनादेः सिचो वा लुक् स्यात् तथासोः [6]परयोः ॥ ‘अनुदात्तोपदेश—’ इति अनुनासिकलोपः । अतत । अतनिष्ट अतथाः । अतानिष्ठाः ।[7]

षणु दाने। [8]सनोति। ‘जनसनखनां सन्झलोः’ ।[9] असात ।

तनु । इत आरभ्य आगणान्ताः षडुभयपदिनः । पञ्च सेट्काः । तनोतीति । गुणः । तनुते इति । सार्वधातुकमपिदिति ङित्त्वाद्गुणाभावः तन्वन्ति । तनोषि । तन्वः । तनुव इति । ‘लोपश्चास्यान्यतरस्यां म्वोः ।’ इति वा उलोपः । तन्मः । तनुमः । तनुयात् । तनोतु । ‘उतश्च’ इति हेर्लुक् । तनु । अतनोत् । तनुते । तन्वीत । तनुताम् । अतनुत । अतानीत् । अतनीदिति । ‘अतो हलादेः’ इति वा वृद्धिः ।

तनादिभ्यः । तथासोः साहचर्यादात्मनेपदस्य तशब्दस्य ग्रहणम् । परस्मैपदे न भवति । अतनिष्ट यूयमिति । ततान । तेने । तनिता । तन्यात् । तनिषीष्ट । तनिष्यति । तनिष्यते । अतनिष्यत् । अतनिष्यत ।

षणु । सनोतीति । ‘धात्वादेः षः सः’ । उः । गुणः । सनुते । असानीत् । असनीत् । असातेति । ‘तनादिभ्यः’ इति सिचो वा लुक् ।

---

१. वृत्ति droppod D_1, D_2, D_4, N_1. २. Dropped D_1, D_3. ३. Dropped D_3, D_4 तनुवः dropped N_1. ४. After it–‘अतो हलादेर्लघोः’ C, B_1, B_2. ५. अतनीत् dropped D_3. ६. परतः B_1, D_1, D_4, N_1. ७. After it—ततान । तन्यात् । तनिता B_2. ८. Dropped D_1, D_4. ९. P has befon it—असनीत् । असानीत्.

असनिष्ट । असाथाः । असनिष्ठाः[1] । 'ये विभाषा'। सायात् । सन्यात् ।[2]

क्षणु हिंसायाम् । क्षणोति । 'ह्मयन्तक्षण–' इति न वृद्धिः[3] । अक्षणीत् । अक्षत । अक्षणिष्ट[4] ।

क्षिणु हिंसायाम् । उप्रत्यये तनादेर्नोपधायाः[5] गुणः । उपधा ऋकारस्य तु वा । क्षिणोति । अक्षेणीत्[6] । अक्षित । अक्षेणिष्ट ।

असनिष्ट । सिचो लुगभावे इट् । असाथाः । असनिष्ठाः । इति पूर्ववत् । ससान । सेने । सनिता । सनिषीष्ट । सनिष्यति । सनिष्यते ।

क्षणु । क्षणोति । क्षणुते । अक्षणीदिति । 'ह्मयन्तक्षण—' इति न वृद्धिः । अक्षत । अक्षणिष्टेति । वा सिचो लुक् । पक्षे 'अनुदात्तोपदेश—' इति अनुनासिकलोपः । चक्षाण । चक्षणे । क्षणिता । क्षण्यात् । क्षणिषीष्ट ।

क्षिणु । इमं धातुं दुर्गः पठति पूर्वस्य स्थाने । तन्मतोपसंग्रहार्थः पाठोऽत्रास्य । उप्रत्यये तनादेरिति । एतदपि दुर्गमतम् । तथा च विकरण इति शप्येव गुणं विदधाति । उपधा ऋकारस्य तु वेति । तथोक्तं क्षीरतरङ्गिण्याम् । एते सार्वधातुके संदिग्धगुणाः । ऋणोति । अर्णोति । इत्यादि । क्षिणुते । अक्षेणीत् । अक्षेणिष्ट । अक्षितेति । वा सिचो लुक् । अनुनासिकलोपः । ङित्त्वान्न गुणः । चिक्षेण । चिक्षिणे । क्षेणिता । क्षिण्यात् । क्षेणिषीष्ट ।

---

१. Dropped D3. २. After it–सनिष्यति B2; सन्यात् before ये विभाषा D4. ३. Dropped N1. ४. Dropped D3. ५. नोपधाया गुणः P. ६. Dropped D1, D3, D4; अक्षिणोत् D2

[1]ऋण गतौ । ऋणोति । अर्णोति । ऋणुयात् । [2]अर्णुयात् । [3]ऋणोतु । अर्णोतु । [4]आर्णोत् । आर्णीत् । [5]आर्णिष्टाम् । आर्त । आर्णिष्ट । आनर्ण । [6]आनृणतुः ।

डुकृञ् करणे । करोति । 'अत उत्सार्वधातुके'। कुरुतः । यणादेशः । 'न भकुर्छुराम्' इति न दीर्घः । कुर्वन्ति ।

ऋणु । ऋणोति । अर्णोतीति । 'उपधा ऋकारस्य तु वा' इति वोपधागुणः । ऋणुते । आर्णोत् । आर्त । आर्णिष्टेति । वा सिचो लुक् । लुक्पक्षे अनुनासिकलोपः । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । आनर्णेति । 'अत आदेः' इत्यभ्यासदीर्घः । ऋकारैकदेशो रेफोपि नुड्विधिं प्रति हल् । तेन 'तस्मान्नुड् द्विहलः' इति नुट् । आनृणे । अर्णिता । ऋण्यात् । अर्णिषीष्ट । आर्णिष्यत् । आर्णिष्यत ।

डुकृञ् । अनिट् । करोतीति । 'तनादिकृञ्भ्य उः' । तनादित्वादेव सिद्धे कृञो ग्रहणमन्यत् तनादिकार्यं नास्येति ज्ञापयतीति तनादेर्नोपधागुण इति गुणनिषेधो नेति गुणो रपरः । उकारस्य गुणः । कुरुत इति । उत्वम् । यणादेश इति । कुरु अन्ति इति स्थिते 'इको यणचि' इति यणादेशः । 'न भ च्छुराम्' इति न दीर्घः । 'हलि च' इति प्राप्तः । एतच्च कुर्व इत्येतस्मात् प्राक् स्थितं लेखकदोषादत्र पठितं ज्ञेयम् । यतः कुर्वन्तीत्यत्र 'अचः परस्मिन्—' इति यणः स्थानिवत्त्वादेव दीर्घाप्राप्तेः । 'न पदान्त—' इत्यत्र दीर्घयलोपयोर्लोपाजादेशस्यैव स्थानिवत्त्वनिषेधात् ।

---

१. ऋणु D_3, D_4. २. Dropped C. ३. From ऋणोतु to आर्णिष्टाम् dropped D_1; From ऋणुयात् to आर्णिष्टाम् dropped D_2, D_3, D_4. ४. Dropped N. ५. Dropped C; after it—आर्णिषुः N. ६ Dropped D_1, D_3, D_4; after it-तृणु अदने । तृणोति । तर्णोति । तृणुते एवं घृणु दीप्तौ । वनु याचने । वनुते । मनु अवबोधने । मनुते B_2, D_2.

नित्यं करोतेः ॥७।४।१०८॥

करोतेः प्रत्ययोकारस्य नित्यं लोपः[1] स्यान्म्वोः परयोः ॥ कुर्वः । कुर्मः ।

ये च ॥६।४।१०९॥

कृञः उल्लोपः स्याद्यादौ प्रत्यये[2] ॥ कुर्यात् ।[3] कृञस्तनादित्वेपि सिचो[4] वा लुग् न । अकृत ।

संपर्युपेभ्यः करोतेर्भूषणे ॥६।१।१३७॥

एभ्यः[5] करोतेः सुडागमः स्याद् भूषणेर्थे ॥ संस्करोति ।

नित्यम् । नित्यग्रहणं स्पष्टार्थम् । कुर्व इति वसि उकारलोपस्य दीर्घविधौ स्थानिवत्त्वाभावात् 'हलि च' इति [6]दीर्घे प्राप्ते भवति निषेधः ।

ये च । चकारो लोपानुकर्षणार्थः । कुर्यात् । करोतु । अकरोत् । कुरुते । कुर्वीत । कुरुताम् । अकुरुत । अकार्षीत् । कृञस्तनादि । व्याख्यातप्रायम् । अकृतेति । 'ह्रस्वादङ्गात्' इति सिचो लुक् । चकार । चक्रे । कर्ता । क्रियात् । कृषीष्ट । करिष्यति । करिष्यते ।

संपरि । संस्करोतीति । 'समः सुटि' इति रुः । 'अत्रानुनासिक—' इति पूर्वाकारः सानुनासिकः । संपुंकानां सो वक्तव्यः । संपूर्वस्य क्वचिदभूषणेपीष्यते संस्कृतमन्नमित्यत्र तच्च 'संस्कृतं भक्षाः'[7] इति निर्देशात् । ननु च समस्कृषातामित्यादिषु 'ऋतश्च संयोगादेः' इतीट् कस्मान्न भवति । यतोत्र सुटि कृते करोतिः संयोगादिर्भवतीत्याशङ्कानिराकरणायाह । सुट उपदेशेत्यादि । अयमभिप्रायः ।

---

१. उप्रत्ययस्य लोपः D_3; उलोपः D_4. २. प्रत्यये परे N_1, D_3. ३ After it—अकार्षीत् B_2. ४. वा सिचो N_1. ५. करोतौ भूषणे सुडागमः स्यात् D_1. ६. दीर्घप्राप्तेर्न इति निषेधः Bc_2. ७. भक्ष्याः Bc_2.

अडभ्यासव्यवायेपि सुट्। [1]उपदेशाधिकारत्वात् 'ऋतश्च संयोगादेः—' इति लिङ्सिचोर्नेट्। समस्कृषाताम्। संचस्कार। 'ऋतश्च संयोगादेर्गुणः' इत्यत्र संयोगोपधग्रहणं कर्तव्यम्। कृञर्थमिति गुणः। संचस्करतुः। कृसृभृवृ इति सूत्रे ऋतो भारद्वाजेति सूत्रे च कृञोसुट इति वक्तव्यमिति नियमात् ससुट्कस्येट्। संचस्करिथ। संचस्करिव। सुटो बहिरङ्गत्वात् 'गुणोर्तिसंयोगाद्योः' इति गुणो न। संस्क्रियात्। संस्कृषीष्ट। 'परिनिविभ्यः—' इति षः।

'ऋतश्च संयोगादेः' इत्यत्र 'एकाच उपदेशेनुदात्तात्' इत्यत उपदेशग्रहणमनुवर्तते। तेनोपदेशावस्थायां यः संयोगादिस्तत एव स्यादिति। न च करोतिरुपदेशावस्थायां संयोगादिः। किं तर्हि। उपदेशोत्तरकालम्। अतोत्र न भवतीति। **संचस्कारेति**। अडभ्यासव्यवायेपि सुट्। 'ऋतश्च संयोगादेर्गुणः' इत्यत्र संयोगोपधग्रहणं कर्तव्यम्। **कृञर्थमिति गुण** इति। ननु अनेकाल्त्वात् संयोगस्योपधात्वं न संभवत्येवेति कथं संयोगोपधग्रहणं कर्तव्यमित्युक्तम्। उच्यते। अवयवस्योपधात्वमवयविनि संयोगे उपचर्यते। यथाढ्यमिदं नगरमिति। अथवा संयोगोपधग्रहणेनान्त्यात् पूर्वत्वमुपलक्ष्यते। **सुटो बहिरङ्गत्वादि**त्यादि। अत्र धातूपसर्गयोर्योगे द्वे दर्शने। एकं तावत्। पूर्वं धातुः साधनेन युज्येत पश्चात् सिद्धरूपं उपसर्गेणेति। द्वितीयं तु। पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेति। तत्र पूर्वस्मिन् पक्षे संस्क्रियात् संस्कृषीष्टेत्यत्र 'गुणोर्त्ति—' इत्यन्तरङ्गे गुणे क्रियमाणे उपसर्गयोगेभाविनः सुटो बहिरङ्गत्वादसिद्धत्वात् संयोगादित्वाभावात् गुणो नेत्यभिप्रायः। द्वितीये तु दर्शने सुटो न भक्तत्वात् संयोगादित्वं नास्तीति

---

१. उपदेशाधिकरत्वात् in Mss. other than D_4. २. P drops it. ३. Dropped D_4, N_1; कृसृभृसूत्रे D_3. ४. °द्वाजस्येति D_1. ५. निपातनात् D_3. ६. न गुणः B_1, P, C, N. ७. संस्कृयात् P. ८. तद्ग्रहणं कार्यमित्युक्तम्। Bc_2. ९. संयोग Bc_2. १०. अभक्तत्वात् Bc_2.

परिष्करोति । 'सिवादीनाम्—' इति षत्वं वा । पेर्यष्कार्षीत् । पर्यस्कार्षीत् । उपस्करोति ।[२]

उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु ॥ ६।१।१३९॥

उपात् कृञः सुट् स्यात् पुनर्गुणाधाने विकारेऽध्याहारेऽर्थे ।[४] उपस्कुरुते ॥

इति तनादिप्रक्रिया ।

गुणो न । सुटोभक्तत्वं च कॄ विक्षेपे इत्यत्र धातौ निपुणतरं प्रत्यपादि । समवाये । समवयनं समवायः । 'एरच्' इतीणोच् । समुदाय इत्यर्थः । अत एवाह । सङ्घेऽर्थे इति ।

उपात् । प्रतियत्नस्य व्याख्यानं गुणाधानमिति । सतोऽर्थस्य पूर्वगुणेभ्यो योन्यो गुणस्तस्याधानं गुणाधानं तस्मिन्नर्थे । विकृत इत्यस्य व्याख्या विकार इति । विकृतमेव वैकृतम् । प्रज्ञादित्वादण् इत्यभिप्रायः । वाक्याध्याहारे इत्येकदेशेनानूदितमध्याहारे इति । गम्यमानार्थस्य वाक्यस्य स्वरूपेणोपादानं वाक्याध्याहारः । भूषणार्थेषु क्रमेणोदाहरणानि । उपस्कृता कन्या । अलंकृतेत्यर्थः । उपस्कृता ब्राह्मणाः । समुदिता इत्यर्थः । एधोदकस्योपस्कुरुते । गुणाधानं करोतीत्यर्थः । उपस्कृतं भुङ्क्ते । विकृतमित्यर्थः । उपस्कृतं जल्पति । वाक्याध्याहारेण जल्पतीत्यर्थः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला प्रक्रियेयं तनादेः ॥

---

१. पर्यस्कार्षीत् । पर्यष्कार्षीत । N: पर्यष्कार्षीत् dropped D_4. २. After it—समवाये च ॥६।१।१३८॥ संपर्युपेभ्यः कृञः सुट् स्यात् सङ्घेऽर्थे । उपस्करोति B_3, D_1, D_2 (उपस्कृता ब्राह्मणा समुदिता इत्यर्थः D_1); D_3, D_4, N_1 give the Sûtra and the Vṛitti up to सङ्घेऽर्थे. ४. After it—उपस्करोति B_3.

डुक्रीञ् द्रव्यविनिमये

क्र्यादिभ्यः श्ना ॥३।१।८१॥

क्र्यादिभ्यः श्नाप्रत्ययः स्यात् कर्तरि सार्वधातुके । शपोपवादः । क्रीणाति । ‘ई हल्यघोः’ । क्रीणीतः । [1]‘श्नाभ्यस्तयोरातः’ । क्रीणन्ति । क्रीणीते ।[2]

स्कुञ् आप्रवणे ।

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुं[4]भ्यः श्नुश्च ॥३।१।८२॥

एभ्यः श्नुः स्यात् श्ना च कर्तरि सार्वधातुके ।[3] स्कुनोति । स्कुनाति ॥[5]

स्तम्भुस्तुम्भुस्कम्भु स्कुम्भु रोधने । एते सौत्राः । ‘अनिदिताम्[6]–’

डुक्रीञ् । द्रव्यविनिमयः परिवर्तः । ञावुभयपदिनावनिटौ च । क्रीणन्तीति । ‘श्नोन्तः’ । आलोपः । क्रीणीते इति । टेरेत्वम् । ‘ई हल्यघोः’ । क्रीणाते । क्रीणते । क्रीणीयात् । क्रीणातु । अक्रीणात् । अक्रैषीत् । चिक्राय । क्रेता । क्रीयात् । क्रेष्यति । अक्रेष्यत् । क्रीणीते । क्रीणीताम् । अक्रीणीत । अक्रेष्ट । चिक्रिये । क्रेषीष्ट ।

स्कुञ् । आप्रवणमुद्धरणम् ।

सौत्रोयमिति केचिदाचार्याः । स्तम्भुस्तुम्भुस्कम्भुस्कुम्भु रोधने । एते चत्वारः सौत्राः । उदित्त्वप्रतिज्ञानात् श्नुश्नाव्यतिरिक्तविषयेपि सर्वस्मिन् एतेषां धातुत्वमिति ज्ञायते । स्कुनाति । स्कुनीते । स्कुनोति । स्कुनुते । अस्कौषीत् । अस्कोष्ट ।

---

१. °रातो लोपः B_2. २. After it—अक्रैषीत् । चिक्राय । क्रीयात् । क्रेषीष्ट । क्रेता । क्रेष्यति । क्रेष्यते B_2; अक्रैषीत् for क्रीणीते D_2. ३. आप्रवणमागमनमुद्धरणं वा B_2; आवरणे D_2, D_3, B_1, N, P, C. ४. °स्कुभ्यः N, D_4. ५. After it—अस्कौषीत् D_2. ६. अनिदितां लोपः C.

इति नैलोपः । विष्टभ्नोति । अवष्टभ्नोति । 'जृस्तम्भु—' इत्यङ् वा । व्यष्टभत् । व्यष्टम्भीत् । अवतष्टम्भ । स्तुभ्नोति । स्कभ्नोति ।

वेः स्कभ्नातेर्नित्यम् ॥८।३।७७॥

[४]वेः परस्य स्कभ्नातेः सस्य षः स्यान्नित्यम्[५] ॥ विष्कभ्नाति । स्कभ्नातेरित्युक्तेः स्कभ्नोतेर्न[६] । विस्कभ्नोति । स्कुभ्नोति ।

मीञ् हिंसायाम् । 'हिनुमीना' । प्रमीणाति[९] ।

चुस्काव । चुस्कुवे । स्कोता । स्कूयात् । स्कोषीष्ट । स्तम्भित्यादि । सर्वे परस्मैपदिनः सेट्काश्च । विष्टभ्नोतीति । 'स्तम्भुस्तुम्भु' इत्यादिना श्नुः । 'स्तन्भेः' इति षः । अवष्टभ्नातीति । आ । 'अवाच—' इति षः । व्यष्टभत् । व्यष्टम्भीदिति । 'प्राक् सितादड्व्यवायेपि' इति षः । अङ्पक्षे न्लोपः । अङभावे सिच् । इट् । ईट् । अवतष्टम्भेति । 'अड्भ्यासव्यवायेपि' इति षः । स्तम्भिता । स्तुभ्नोति स्तुभ्नातीति । श्नुः श्ना च । 'अनिदिताम्—' इति न्लोपः । अस्तुम्भीत् । तुस्तुम्भ । स्तुम्भिता । स्तुभ्यात् । स्तुम्भिष्यति ।

मीञ् । उभयपदी अनिट् च । 'हिनुमीना' इत्यनेन ण इत्यर्थः ।

---

१. नलोपः D_2, C, B_1, B_2. २. After it—विष्टभ्नाति D_1; before it—अवष्टभ्नोति N. ३. C, D_2 drop it; स्तुभ्नाति D_1, D_3, D_4, N. ४. नित्यं वेः परस्य B_2. ५. Dropped B_2. ६. नं षत्वम् B_2. ७. विस्कभ्नाति । स्कभ्नाति B_2. ८. स्कुभ्नाति । अस्कुंभीत् D_2; स्कुभ्नोति dropped D_3; after it—स्कुभ्नाति D_4. ९. After it—मीनीते B_2.

'मीनातिमिनोति—' इत्यात्वम् । अमासीत् । अमास्त । ममौ । मिम्यतुः ।[1]

पूञ् पवने ।

प्वादीनां ह्रस्वः ॥७।३।८०॥

प्वादीनां द्वाविंशतेर्ह्रस्वः स्यात् शिति परे ॥ प्वादीनां[2] ह्रस्वो वेति केचित् । पुनाति । पुनीते । अपावीत् । अपविष्ट ।

मीनीते । **अमासीदिति** । 'यमरम—' इतीट्सकौ । **अमास्तेति** । आत्वम् । **ममाविति** । 'आत औ णलः' । **मिम्यतुरिति** । एजुनिमित्ताभावादात्वं न । यणादेशः । मिम्ये । माता । मीयात् । मासीष्ट । मास्यति । मास्यते ।

पूञ् । पवनं शुद्धिः ।

इत आरभ्य सप्त सेट्काः[3] । चत्वार उभयपदिनः । **प्वादीनाम्** । अत्र च मतद्वयमस्ति । केषांचिन्मते ली श्लेषणे वृत्[4] इति प्वादयः । केषांचिन्मते आगणान्ताः । तत्र येषां मते आगणान्तास्तेषां वृत्करणं ल्वादिसमाप्त्यर्थम् । तन्मते जानातीत्यत्रापि ह्रस्वो न[5] ज्ञा इति दीर्घोच्चारणसामर्थ्यात् । तत्र पूर्वमतमाश्रित्याह । **प्वादीनां द्वाविंशतेरिति** । पूञ् पवने । लूञ् छेदने । धूञ् कम्पने । स्तॄञ् आच्छादने । कॄञ् हिंसायाम् । वॄञ् वरणे । शॄ कॄ मॄ हिंसायाम् । वॄ वरणे । भॄ भर्त्सने । पॄ पालनपूरणयोः । दॄ विदारणे । जॄ वयोहानौ । नॄ[7] तपे । ॠ गतौ । गॄ शब्दे । ज्या[6] वयोहानौ । प्ली वरणे । री[8] गतिरेषयोः । क्ली[9] गतौ । ली श्लेषणे[10] । एते प्वादयः । **प्वादीनामिति** । अयं भावः । यन्मतेनागणान्तात्[11] प्वादयस्तन्मतेन ह्रस्वः । अन्येषां तु नेति । **पुनाति** । **पुनीते** । इति । ह्रस्वः । 'ई हल्यघोः' । **अपावीदिति** । लुङ् । सिच् । इट ईट् । अपविष्ट । पुपाव । पुपुवे । पविता । पूयात् । पविषीष्ट ।

---

१. After it— मिम्ये । मयिात B₂. २. Dropped D₁, D₃, D₄. ३. सेटः । Bc₂. ४. वृत् यावत् प्वादयः । केषांचिन्मते आगणान्तात् । येषां मते वृत्करणं Dc₃. ५. न is after °सामर्थ्यात् Dc₃. ६. ज्या Dc₃. ७. नॄ नये । स्तॄ गतौ । Dc₃. ८. जॄ Dc₃. ९. री गतिरेषणयोः । Dc₃. १०. क्ली Bc₃; ल्वी Dc₃. ११. °गणान्ताः Dc₃.

कॄञ् हिंसायाम् । [1]अकारीत् । [2]अकरीष्ट । अकरिष्ट । '[3]लिङ्सिचोः—' इति वेट् । अकीर्ष्ट । करिषीष्ट । कीर्षीष्ट ।

धञ कम्पने । अधावीत् । अधौषीत् इत्यपि केचित् । तासौ नित्यानित्वाभावात् थलि नित्यमिट् ।[4] दुधविथ ।

ग्रह उपादाने । '[5]ग्रहिज्या—' इति संप्रसारणम् । गृह्णाति

कॄञ् । कॄणाति । कॄणीते । अकारीत् । अकरिष्ट । अकरीष्टेति । 'लिङ्सिचोरात्मनेपदेषु' इति वेट् । 'वॄतो वा' इति वा इटो दीर्घः । इडभावे इति । 'लिङ्सिचोः—' इतीडभावपक्षे इत्यर्थः । अकीर्ष्टेति । 'उश्च' इति कित्त्वम् । 'ऋत इद्धातोः' । रपरः । दीर्घः । चकार । 'ऋच्छत्यॄताम्' इति गुणः । चकरतुः । चकरे । करिता । करीता । करिषीष्ट । कीर्षीष्टेति । 'लिङ्सिचोः—' इति वेट् । इट्पक्षे 'न लिङि' इति न दीर्घः । [6]अन्यदित्वम् । करिष्यति । करीष्यति ।

धूञ् । 'प्वादीनां ह्रस्वः' । धुनाति । धुनीते । अधावीदिति । 'स्तुसुधूञ्भ्यः' इतीट् । अधौषीदित्यपीति । तथोदाहृतं मुग्धबोधे । धूञ् । अधावीत् । अधविष्ट । अधोष्ट । दुधाव । दुधविथेति । गुणः । द्वित्वम् । ह्रस्वः । 'अभ्यासे चर्च' । दुधुवे । धविता । धूयात् । धविषीष्ट । धोषीष्ट ।

ग्रह । 'ग्रहिज्या—' इति संप्रसारणमिति विशेषः । गृह्णाति । गृह्णीते ।

---

१ Dropped D_1, D_3, D_4. २. अकरिष्ट । अकरीष्ट N, D_4. ३. इडभावे अकीर्ष्ट P, N, इडभावे 'उश्च' इति लिङ् सिचोः कित्त्वाद्गुणाप्राप्तौ 'ऋत इद्धातोः' । अकीर्ष्ट B_2; D_2 ('हलिच' इतिदीर्घः । अकीर्ष्ट D_2); इडभावे D_1, D_3, D_4. ४. After it—ये तु पाक्षिकानिटस्तेषां थलिकस्यापि मते नास्त्येवेट्प्रतिषेधः । दुधविथ । B_1, P, C, N. ५. C, B_2, D_1, D_4 have ग्रहिज्या for ग्रहि°... संप्रसारणम्; ग्रहज्यादित्वात् D_3. ६. अस्ये दीर्घत्वम् । Dc_3.

हलः श्नः शानज्झौ ॥३।१।८३॥

हलः परस्य श्नः शानजादेशः स्यात् हौ परे ॥ गृहाण ।
[1]अगृह्णात् । अग्रहीत् । हान्तत्वान्न [2]वृद्धिः । जग्राह । [3]जगृहतुः ।
जग्रहिथ ।

ग्रहोलिटि दीर्घः ॥७।२।३७॥

ग्रहेरिटो दीर्घः स्यान्न तु लिटि ॥ ग्रहीता ।[4]

हलः श्नः । 'क्र्यादिभ्यः श्ना' इति श्ने प्रकृतेपि श्न इति ग्रहणमादेशसंप्रत्ययार्थम् । अन्यथा प्रत्ययान्तरं स्यादिति मनसि कृत्वाह । शानजादेश इति । चकारोन्तोदात्तार्थः । स्थानिवद्भावेन शित्त्वे सिद्धेपि पुनः शित्करणं ञिमिदो 'व्यत्ययो बहुलम्' इति श्नाप्रत्ययो यदा भवति तदा तस्य शानजादेशो 'मिदेर्गुणः' इति गुणो मा भूत । इतरथा ह्ययं गुणः प्रतिषेधविषये आरभ्यमाणो यथा मेद्यतीत्यत्र भवति तथेहापि स्यात् । मिदानेति पुनः शित्त्वेपि ङित्त्वमपि पुनर्भवति । तेन गुणो न । गृहाणेति । 'अतो हेः' इति हेर्लुक् । संप्रसारणम् । हान्तत्वान्न वृद्धिरिति । 'ह्यन्तक्षण---' इति निषेधः । अग्रहीष्ट । जग्राहेति । संप्रसारणम् । जगृहे ।

ग्रहः । प्रकृतस्येटो दीर्घत्वमिदं चिण्वदिटो न । ग्राहिता । ग्राहिष्यते । गृह्यात् । ग्रहीषीष्ट । ग्रहीष्यति । ग्रहीष्यते ।

---

१. Dropped N, D1, D3, D4. २. दीर्घः for वृद्धिः B1, D1, P, C.
३. C B2 drop it. ४. After it—उभयतोभाषा । D2.

शॄ हिंसायाम् । शृणाति ।[१]

शॄदॄप्रां ह्रस्वो वा ॥७।४।१२॥

एषां ह्रस्वो वा स्यात् क्ङिति[२] लिटि ॥[३] शशार । ह्रस्वाभावे[४] 'ऋच्छत्यॄताम्' इति गुणः । शशरतुः । शश्रतुः ।[५] शशरिथ । [६]शरिता । शरीता । शीर्यात् । शरिष्यति । शरीष्यति ॥

एवं दॄ विदारणे पॄ पालने ।

ज्या वयोहानौ । 'ग्रहिज्या—'[७] ।

हलः ॥६।४।२॥

अङ्गावयवाद्धलः परं यत् संप्रसारणं तदन्तस्याङ्गस्य दीर्घः स्यात् ॥ इति दीर्घत्वे कृते[८] प्वादीनां ह्रस्वः । जिनाति ।

शॄ । इत आरभ्य दश परस्मैपदिनः । शृणोति । क्षीरस्वामिपक्षेयमुभयपदी । अशारीत् ।

शॄ । शॄ हिंसायाम् । दॄ विदारणे । पॄ पालने । शशार । शशरतुः । शश्रतुरिति । ह्रस्वाभावे 'ऋच्छत्यॄताम्' इति गुणः । ह्रस्वत्वे यणादेशः । शरिता । शरीता । शीर्यात् ।

एवं दॄ । दृणाति । अदारीत् । ददार । ददरतुः । दद्रतुः । दरिता । दरीता । पॄ । पृणाति । अपारीत् । पपार । पपरतुः । पप्रतुः ।

ज्या । ज्ञावनिटौ ।

हलः । हल इति किम् । उतः । अङ्गावयवादिति किम् । निरुतम् । दुरुतम् । तदन्तस्येति किम् । विद्धः । विचितः । अथ तृतीयमित्यत्र कथं दीर्घो न । तृतीयेति निपातनात् । अज्यासीत् ।

---

१. After it—अशारीत् P, C, B_1, B_2. २. क्ङिति D_3. D_4. ३. After it—शशरतुः । शश्रतुः for शशार to शरीष्यति D_1, D_3. D_4; शशरतुः । शश्रतुः । शशरिथ । शशरिव । शश्रिव । शश्रिम । शीर्यात् D_2. ४. From ह्रस्वाभावे to गुणः dropped N, D_4. ५. After it—शशरुः । शश्रुः P, N, B_2. ६. Dropped N. ७. 'ग्रहिज्या—' इति संप्रसारणम् D_3, B_1, C, N. ८. कृते or प्राप्ते D_3, N, B_2 प्राप्ते dropped D_4.

[१]जिज्यौ । जिज्यतुः । [२]जीयात् ।

श्री वरणे । श्रीणाति ।[३] ज्ञा अवबोधने । ज्ञाजनोर्जा ।[४] जानाति ।[५] श्रन्थग्रन्थसंदर्भे । श्रथ्नाति । श्रन्थिग्रन्थ्योः किति लिटि सेटि थलि [६]च एत्वं वक्तव्यम् ॥* वेति केचित् । श्रेथतुः । शश्रन्थतुः । श्रेथिथ । शश्रन्थिथ । एवं [७]ग्रन्थ । कुष निष्कर्षे । कुष्णाति । कुषाण ।

जिज्यावितिं । 'आत औ णलः' । 'लिट्यभ्यासस्य' इति अभ्याससंप्रसारणम् । जिज्यतुरिति । संप्रसारणं 'ग्रहिज्या—' इति । 'हलः' इति दीर्घः । ननु च संप्रसारणे कृते 'सन्लिटोर्जेः' इति कुत्वं कस्मान्नेति चेत् । मैवम् । लाक्षणिकत्वान्नेति पूर्वमेव प्रत्यपादि । ज्याता । जीयात् । ज्यास्यते ।

श्री । श्रीणाति । श्रिणाति । ज्यादीना ह्रस्वो वेति केचित् । अश्रैषीत् । शिश्राय । श्रेता । श्रीयात् । श्रेष्यति । ज्ञा । जानाति । अज्ञासीत् । जज्ञौ । ज्ञाता । ज्ञायात् । ज्ञेयात् । ज्ञास्यति । श्रन्थ । इतो गणान्ताः सेट्काः । श्रथ्नातीति । 'अनिदिताम्—' इति न्लोपः । अश्रन्थीत् । शश्रन्थ । वेति केचिदिति । तथा च पदमञ्जर्यामुक्तम् । अत्र केचिद्वेति पठन्ति । शश्रन्थतुरित्याद्यपि यथा स्यादिति । श्रन्थिता । श्रन्थ्यात् । श्रन्थिष्यति । एवं ग्रन्थ । ग्रथ्नाति । अग्रन्थीत् । जग्रन्थ । जग्रन्थतुः । ग्रेथतुः । ग्रन्थिता । ग्रथ्यात् । कुष । कुष्णातीति । 'रषाभ्यां नो णः समानपदे' । कुषाणेति । 'हलः श्नः शानज्झौ' ।

---

१. Before it—अज्यासीत् B_2. २. D_1, D_3, D_4 drop it; D_2 has जिज्युः for it. ३. D_1, D_2, D_3, N_1 have श्रिणाति after it; after it—अश्रैषीत् । शिश्राय । श्रीयात् । श्रेता । श्रेष्यति B_2. ४. After it—जानीते । अज्ञासीत् । जज्ञौ । जज्ञे । ज्ञेयात् । ज्ञायात् । ज्ञासीष्ट । ज्ञाता । ज्ञास्यति । ज्ञास्यते B_2. ५. Dropped N_1. ६. Dropped N_1. ७. ग्रन्थे D_2.

निरः कुषः ॥७।२।४६॥

निरः परात् कुषो वलादेरार्धधातुकस्येड्वा स्यात् । निरकोषीत् । निरकुक्षत् । निरः किम् । कोषिता ।

अश भोजने । अश्नाति । अशान । आशिता । अशिष्यति ।[१] वृङ् संभक्तौ । अवरिष्ट । अवरीष्ट ।[२] अवृत ।[३] वव्रे ।[४] वरिषीष्ट । वृषीष्ट ।[५]

इति क्र्यादिप्रक्रिया ॥ इति नवगणाः ।

निरः । निस इति वाच्ये निर इति निर्देशेन रेफान्तमुपसर्गान्तरमस्तीति ज्ञाप्यते । तस्य निलयनमिति 'उपसर्गस्यायतौ' इति लत्वं स्यात् । निसो रुत्वस्यासिद्धत्वान्न स्यात् । **निरकुक्षदिति** । 'शल इगुपध—' इति क्सः । कत्वषत्वे । चुकोष । कोषिता । कुष्यात् । कोषिष्यति ।

अश । **अशानेति** । शानच् । आशीत् । आश । **अशितेति** । इट् । अश्यात् । वृङ् । आत्मनेपदी । वृणीते । **अवरिष्ट** । **अवरीष्टेति** । 'लिङ्सिचोः—' इति वेट् । 'वृतो वा' इति वेटो दीर्घः । **अवृतेति** । इडभावे 'उश्च' इति कित्त्वान्न गुणः । 'ह्रस्वादङ्गात्' इति सिचो लोपः । वव्रे । **वव्रृषे** इति । क्रादित्वान्नेट् । वरिता । वरीता । **वरिषीष्ट** । **वृषीष्टेति** । 'लिङ्सिचोः—' इति वेट् । 'न लिङि' इति नेटो दीर्घः । इडभावे कित्त्वम् । वरिष्यते । वरीष्यते । अवरिष्यत । अवरीष्यत ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलः क्र्यादिसंज्ञो गणोयम् ॥

---

१. After it—'शल इगुपधात्' इति क्सः B1, P, C. २. D2 has परस्मैभाषा after it. ३. After it—'ह्रस्वादङ्गात्—' B1, P, C. ४. D2 has अवृषि after it; N, D3, Com. have वव्रृषे after it. ५. D2 has आत्मने भाषा after it.

चुर स्तेये ।

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥३।१।२५॥

एभ्यश्चुरादिभ्यः[1] स्वार्थे णिच्प्रत्ययः स्यात् । णकारो[2] वृद्ध्यर्थः । चकारः 'चितः' इत्यन्तोदात्तार्थः । उपधागुणः[3] । धातुसंज्ञायां शप्तिबादि[4] । गुणायादेशौ । चोरयति ।

एवं नव गणा यथाकथंचिद् व्याख्याताः । अधुना चुरादिरारभ्यते । धातुप्रक्रियाकथने धाष्टर्यमेव कारणं सम्यग्ज्ञानाभावात् । अत एवाह **क्षीरस्वामी** ।

'व्याख्यातेयं नवगणी कुशकाशावलम्बनात् ।
चुरादिरधुनारभ्यो यत्र भग्ना महारथाः ॥
पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः ।[5]
न विद्मः किं वा जह्मिः किं वात्राद्ध्महे वयम् ॥' इति ।

चुर । चुरादयः सर्वे सेट्काः एव । इतः पञ्चोभयपदिनः ।

सत्याप । चुरादिभ्योऽन्येषामिह ग्रहणं प्रपञ्चार्थम् । 'प्रातिपदिकाद्धात्वर्थे' इत्यनेनैव धातुसूत्रेण सिद्धत्वात् । **उपधागुण** इति । 'पुगन्त--' इति । **धातुसंज्ञायामित्यादि** । 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां चोरि इत्यस्मात् 'लः कर्मणि च' इति कर्तरि[6] लकारः । वर्तमाने लट् । लस्य तिबादयः । 'शेषात् कर्तरि परस्मैपदम्'[7] । 'शेषे प्रथमः' इति प्रथमः । तत्राप्येकत्वविवक्षायामेकवचनम् । तिप् । कर्तरि शप् । **गुणायादेशाविति**[8] । 'सार्वधातुक—'

---

१. °श्चुरादिभ्यश्च D_1, D_2, D_3. २. D_1, D_3, D_4 drop from णकारो to °न्तोदात्तार्थः. ३. उपधाया गुणः D_2. ४. °तिबादिः D_1. ५. वागम° Bc_2, Dc_3. ६. मत्र Bc_2. ७. 'कर्तरि' इति परस्मैपदम् Bc_2. ८. After it—इति भावः Bc_2, Dc_3.

णिचश्च ॥१।३।७४॥

णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले ॥ **चोरयते** । **णिश्रीति चङ्** । **द्वित्वम्** । **उपाधाह्रस्वः** । **अभ्यासदीर्घः** । **णिलोपः** । **अचूचुरत्** ।

इति गुणः । 'एचोयवायावः' इति अय् । चोरयति । चोरयेत् । चोरयतु । अचोरयत् ।

णिचः । **चोरयते** इति । ननु च

'स्वरितेत् स्याद्ग्रहिः क्र्यादौ लक्षिश्चैक[1]चुरादिषु' इति लक्षेः स्वरितेत्त्वस्मरणात् कर्त्रभिप्राये क्रियाफले चुरादेः तङ् नास्ति । नैतत् । **भाष्यकारादिभिरनुक्तत्वात्** । हेतुमण्णिच एव 'णिचश्च' इत्यत्र ग्रहणमिति चेत् नैवं वाच्यम् । यत एतदाशङ्क्य परिहृतं **पदमञ्जर्याम्** ।

एष विधिर्न चुरादिणिजन्तात् स्यादिति कश्चन निश्चिनुते स्म ।
आप्तवचोऽत्र न किंचन दृष्टं लक्षयतेः स्वरितेत्त्वमनार्षम् ॥ इति ।

चोरयते । चोरयेत । चोरयताम् । अचोरयत । '**णिश्रि—**' इति **चङिति** । चोरि लुङ् । तस्य तिप् । 'च्लि लुङि' इति च्लिः । तस्य चङित्यर्थः । **द्वित्वमिति** । 'चङि' इति । **उपधाह्रस्व** इति । 'णौ चङ्युपधायाः—' इति । 'एच इग्घ्रस्वादेशे' इति ओकारस्योकारः । अभ्यासस्य ह्रस्वः । **अभ्यासदीर्घ** इति । 'दीर्घो लघोः' इति । **णिलोप** इति । 'णेरनिटि' इति । अडागमः । प्रक्रियास्मरणार्थमेवानेन क्रमेण प्रक्रिया लिखिता । क्रमस्त्वेवं ज्ञेयः । परत्वात् द्वित्वात् पूर्वं णिलोपः । ततः परत्वाद् द्वित्वात् पूर्वमुपधाह्रस्वः । ततो द्वित्वम् । ततः सन्वद्भावादभ्यासदीर्घ इति । अचूचुरत् । अचूचुरताम् । अचूचुरन् । अचूचुरत । अचूचुरेताम् । अचूचुरन्त ।

---

१. अभ्यासस्य D3. २. °श्चेट: Bc2. ३. स्वरितेत्करणम् । क° Bc2. ४. अत for नैतत् Dc3. ५. तस्य चङ् इत्यस्य त्वर्थः । द्वित्वमिति । Bc2. ६. उपधाया Bc2.

चोरयामास । चोरयिता । चोर्यात् । चुरादेर्णिज्वेति केचित् । पक्षे चोरतीत्यादि ।

कृत संशब्दने ।

चोरयामासेति । 'कास्प्रत्यय—' इत्याम् । 'अयामन्त—' इत्ययादेशः । 'कृञ्चा—' इति लिट्परस्य कृञोऽनुप्रयोगः । चोरयांचक्रे । **चोरयितेति** । लुट् । तासिः । इट् । **चोर्यादिति** । णिलोपः । चोरयिषीष्ट । चोरयिष्यति । चोरयिष्यते । अचोरयिष्यत् । अचोरयिष्यत । **चुरादेरिति** । तथा चिति स्मृत्यामित्यादीनामिदित्पाठादनित्यण्यन्ताश्चुरादय इति **भीमसेनो**ऽपि ज्ञापयति । अन्यथा णिलोपस्य स्थानिवत्त्वात् 'अनिदिताम्—' इति नलोपस्याप्रसङ्गाच्चिन्त्यादयो नुमनुषक्ता एव पठ्येरन् । तथा **क्षीरस्वामिना** 'बहुलमेतन्निदर्शनम्' इति सूत्रे उक्तम् । चुरादेर्णिचो बहुलं निदर्शनं वा इत्यपरे । तेन पक्षे चोरति चिन्ततीत्यादि सिद्धमिति । तथा महीपतिवचः श्रुत्वा जुघुषुः पुष्पमाणवा इत्यादि लक्ष्यम्[10] । 'अत एकहल्मध्ये—' इत्यत्र **वृत्तिकृ**दपि जगणतुरित्युदाहरन्[11] ज्ञापयति । तत्र **न्यासकृतोक्तम्** । अनित्यण्यन्ताश्चुरादय इत्यदोषः । अनित्यण्यन्तत्वं संप्रमे ज्ञापयिष्यत इति । **पक्षे चोरतीत्यादि** । शप् । उपधागुणः । आदिशब्दात् । चोरेत् । चोरतु । अचोरत् । अचोरीत् । चुचोर । चोरिता । चूर्यात् । चोरिष्यति । अचोरिष्यत् ।

कूत । संशब्दनमुद्घोषः ।

---

१. After it—चोरयिष्यति । चोरयिष्यते B_2 २. चौरादे° P. ३. °र्णिज्वेति P, C, B_1. ४. चोरीत् इत्यादि D_1. ५. संशब्दे D_1. ६. स्मृत्यादीनामिदित्पाठा° Bc_2; स्मृत्यामित्यादीनामिदित्पाठाद° Dc_3. ७. अपि dropped Dc_3. ८. नलोप° Dc_3. ९. व्याख्याने Bc_2; सूत्रव्याख्याने Dc_3. १०. So Bc_2; others लक्षणम् । ११. °दाहरन् ज्ञाप° Dc_3. १२. समाप्तौ Bc_2.

उपधायाश्च ॥७।१।१०१॥

धातोरुपधाया ऋकारस्य इदादेशः[1] प्रत्यये परे ॥ कीर्तयति । अचिकीर्तत् ।[2]

अथ अदन्ताः । गण संख्याने ॥ अतो लोपः । तस्य स्थानिवत्त्वान्नोपधावृद्धिः । गणयति ।[3]

ई च गणः ॥७।४।९७॥

गणयतेरभ्यासा[4]कारस्य वा[5] ई[6] स्यात् चङ्परे णौ[7] ॥

उपधायाः । **कीर्तयतीति** । उपधाऋकारस्य इत् । रपरः । 'हलि च' इति दीर्घः । धातुसंज्ञायां शप्तिबादि । गुणायादेशौ । कीर्तयेत् । **अचिकीर्तदिति** । कीर्ति तिप् । च्लिः । 'णिश्रि—' इति चङ् । णिलोपः । द्वित्वम् । 'कुहोश्चुः' । अट् । कीर्तयामास । कीर्तयिता । कीर्त्यात् । कीर्तयिष्यति । कर्तृगामिनि क्रियाफले कीर्तयते । णिज्विकल्पात् णिजभावे कीर्ततीत्यादि ।

अथ अदन्ता इति । इत[9] आरभ्यागणान्तादित्संज्ञानिषेधार्थमदन्तत्वं विधीयते अनेन धातुसूत्रेण । ततश्च अतो लोपस्य स्थानिवत्त्वात् वृद्ध्याद्यभावः[10] । **स्थानिवत्त्वादिति** । 'अचः परस्मिन्—' इति । गणयेदित्यादि ।

ई च । अस्याग्लोपित्वादप्राप्तयोः सन्वद्भावदीर्घत्वयोरिदमीत्व-

---

१. इत्स्यात् B_1, P, C ; ईदादेशः D_3. २. After it—पक्षे कीर्तति B_2. ३. गणयते after it B_2. ४. °रभ्यासस्या° D_4. ५ ई वा D_1. ६. ईत् D_2, N_1, ईकारः D_3. ७. णौ परे D_2. ८. 'उपधायां च' इति दीर्घः । Bc_2. ९. इतः प्रभृति Dc_3. १०. After it—गणतः । Bc_2. ११. सन्वद्भावाद्° Dc_3.

अजीगणत् । अग्लोपित्वान्न सन्वद्भावः । अजगणत् ।[२] कथ वाक्यप्रबन्धे । कथयति । कथोभ्यासस्य इत्वं वेति केचित् । अचीकथत् । अचकथत् ।

अङ्क पदे लक्षे[४] च । अङ्कयति[५] । चङि तु ओः पुयण्ज्यपरे इति ज्ञापकात् अद्वित्वनिमित्तेपि[६] णौ[७] कृतमभ्यासस्य स्थानिवद्[८]

मारभ्यते । अजीगणदिति । चङ् । द्वित्वम् । चुत्वम् । अजगणदिति । इत्वाभावे । गणयामास । गणयिता । गण्यात् । गणयते । गणयेत । गणतीत्यादि । कथ । कथयतीति । अतो लोपः । कथ इति । केचिदिति अर्वाचीनाः । अत एवाह क्षीरस्वामी क्षीरतरङ्गिण्याम् । कथमचीकथत् । प्रकृत्यन्तरमन्वेष्यमिति । मुग्धबोधे तूक्तम् ।[९] 'वेङ्गणकथः खेञ्यङि ।' इति । अचकथदिति । अग्लोपित्वान्न सन्वद्भावः । कथयामासेत्यादि ।

अङ्क । अङ्कापयति । चङि त्विति । अङ्कि अस्मात् परस्य च्लेः 'णिश्रि–' इति चङि सति 'चङि' इति द्वित्वे प्राप्ते 'अजादेर्द्वितीयस्य' इति 'नन्द्राः संयोगादयः' इति च ककारस्य साच्कस्य द्वित्वे प्राप्ते किं सणिच्कस्य द्वित्वमुताकारसहितस्येति[१०] संशये आह– ओः पुयण्ज्यपरे इत्यादि । अस्यार्थः । यतः कारणादेवं

---

१. °न्नास्य D1. २. After this D1 has—गणयामास । गणयिता । गण्यात् । णेरनिटीति णिलोपो न । गणयिष्यति । अगणयिष्यत् ।. ३. बन्धे N1. ४. लक्ष्मणि D1 ; लक्षणे D2 ; B2, D3, D4. ५. After it—अङ्कयते B2. ६. D1 drops अपि. ७. अपि णौ B2. ८. स्थानवत् D2. ९. °प्युक्तम् Dc3. १०. °स्येत्याशङ्क्याह । Dc3.

भवतीति ज्ञायते[1] । तेनाल्लोपस्यस्थानिवत्त्वात् अकारवतः ककारस्य द्वित्वम् । अग्लोपित्वान्न सन्वद्भावः । आञ्चकत् । केचिदेवमाहुः । ओः पुयण् इत्युवर्णनिर्देशाण्णौ कृत[2] उवर्णादेशे[3]

ज्ञायते तेन कारणेनाकारवतः अकारसहितस्य ककारस्य द्वित्वमि[4]त्यन्वयः। ननु अल्लोपस्य जातत्वात् कथमकारसहितस्येत्याशङ्क्याह-**अल्लोपस्य स्थानिवत्त्वादिति** । 'द्विर्वचनेऽचि' इति द्वित्वे कर्तव्ये स्थानिवत्त्वात् । ननु च द्वित्वनिमित्तेऽचि योऽजादेशः स स्थानिवत् । न च णिर्द्वित्वनिमित्तं किं तु चङ् । अतो णौ परतो योऽल्लोपस्तस्य कथं स्थानिवत्त्वमित्यत आह—ओः पुयण्ज्यपरे इत्यादि । ओः पुयण्ज्यपरे इति ज्ञापकादद्वित्वनिमित्ते णौ परे[6] यत् कृतं तदभ्यासस्याभ्याससंबन्धि सत् स्थानिवद् भवतीति ज्ञायते यतः कारणात् । तथा हि ओः पुयण् इति अभ्यासोवर्णस्य सनि परे पवर्गयण्जकारेष्ववर्णपरेषु परत इत्वं विधीयते । तच्च पकारयकाराभ्यामन्येषां सर्वेषामेव णिचमन्तरेणावर्णपरता न संभवतीति णिच्येवेत्त्वम् । णिचि च सति जिजावयिषतीत्यादौ वृद्ध्यावादेशयोः कृतयोरभ्यासोवर्ण एव नास्ति। अत एतत् सूत्रं न प्रवर्तते । सर्वरूपसिद्धिश्च । सन्यत इतीत्त्वे सिध्यत्येव एतत् सूत्रं विनापि । अत इदमेव ओः पुयणिति वचनं व्यर्थं सत् ज्ञापयति णौ कृतं स्थानिवद्भवतीति । तेनाकारवतः ककारस्य द्वित्वमित्यर्थः । ज्ञापकाच्च नुनावयिषति इत्यादि सिद्धं स्यात् । एतच्च मतं **काशिकाकारादेः**। **अग्लोपित्वान्न सन्वद्भाव** इति । 'सन्वल्लघुनि' इत्यनेन । **आञ्चकदिति** । णिलोपः । **केचिदेवमाहुरित्यादि** । अन्येषां त्वयं पक्षः । 'ओः पुयण्ज्यपरे' इत्येतस्मिन् सूत्रे ओरित्युवर्णनिर्देशाण्णौ परतः कृतो य उवर्णस्यादेशः

---

१. विज्ञायते D_3. २. परतः कृत° B_2. ३. °देशः D_2. ४. °मित्यर्थः Dc_3. ५. After it—स्यात् Dc_3. ६. परतो Bc_2.

आकार आवादेशश्चाभ्यासस्य स्थानिवत् स्यान्नान्य इति नियमाद्-जादित्वेन सणिच्कस्यैव ककारस्य द्वित्वम् । आञ्चिकत् । न चास्मिन्मते दन्तत्वं व्यर्थम् । यतोग्लोपित्वं स्थानिवत्त्वं चादन्तत्वप्रयोजनम् । यत्र त्वेते न विद्येते तत्राल्लोपविकल्पनम् । अदन्तत्वसार्थकत्वाय वा अल्लोप इत्यर्थः । अङ्कयति । अल्लोपाभावे । अचो ञ्णितीति वृद्धिः ।

आकार आवादेश एवाभ्यासस्येति अभ्याससंबन्धी सन् स्थानिवत् स्यान्नान्य इति नियमात् अजादित्वेनाङ्केः कस्याजादेर्द्वितीयस्य 'नन्द्राः संयोगादयः' इति णिच्सहितस्य ककारस्यैव द्वित्वमित्यर्थः । अस्मिंश्च पक्षे पुस्फोरयिषति चुक्षावयिषति इत्याद्येव सिध्यति । नौजढदित्यादि । अयं च पक्षो बोपदेवपण्डितैः काव्यकामधेनौ महता प्रबन्धेन प्रमाणपदवीमारोहितः ततः सम्यगवगन्तव्यः । ननु चास्मिन् पक्षे अल्लोपस्य नित्यत्वाददन्तत्वं व्यर्थम् । पूर्वस्मिंस्तु पक्षेग्लोपित्वमदन्तत्वप्रयोजनमित्याशङ्कां निराकरोति–न चास्मिन्नित्यादि । कुत इत्यत आह–यत इत्यादि । अल्लोपित्वमदन्तत्वप्रयोजनम् । अचकथदित्यादौ । अत्र हि अतो लोपे कृते अग्लोपित्वान्न सन्वद्भावदीर्घौ । स्थानिवत्त्वं चादन्तत्वप्रयोजनं कथयति गणयतीत्यादौ । अत्रापि अतो लोपे कृते 'अत उपधायाः' इति वृद्धौ प्राप्तायाम् 'अचः परस्मिन्—' इत्यल्लोपस्य स्थानिवत्त्वान्नोपधावृद्धिः । यत्र तु अङ्कयति आञ्चिकदित्यादौ एते अग्लोपित्वस्थानिवत्त्वे न स्तः अङ्कयतीत्यत्र हि स्थानिवद्भावमन्तरेणापि उपधावृद्धिर्न प्राप्नोति उपधायामकाराभावात् । आञ्चिकदित्यत्रापि हि नाग्लोपित्वस्य प्रयोजनम् । एवंविधे स्थले अल्लोपविकल्पनम् । अदन्तत्वसामर्थ्यात् तत्राल्लोपविकल्पनम् । अस्य तात्पर्यार्थमाह–अदन्तत्वेत्यादि ।

१. °न्नान्यत्र D1, B1, P, C. २. च D4, B1, P, C. ३. °भावपक्षे P, D3, D4. ४. °वृद्धिराकारः P. ५. °मिति । Bc2. ६. पुस्फारयिषति Bc2, Dc3.

अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पु[1]ङ् णौ ॥७।३।३६॥

अर्त्यादेरादन्तानां च[2] पुगागमः स्यात् णौ प[3]रे ॥

अङ्कापयति ।[4]

अर्थ उपयाच्ञायाम् । अ[5]र्थयते । अर्थापयते । आ[6]र्तथत । आर्तिथत । इ[7]त्यादि ।

इति चुरादिप्रक्रिया ।

अर्तिह्री । अर्तीति श्तिपा निर्देशः 'ऋदृशोऽङि गुणः' इति—वदृकारान्तग्रहणं मा विज्ञायीति । अर्तीति ऋ गतिप्रापणयोः ऋ गताविति द्वयोरपि ग्रहणम् । ह्री लज्जायाम् । व्ली गत्याम् । री गतिरेषणयोः । रीङ् श्रवणे । उभयोरपि ग्रहणम् । क्नूयी शब्दे । क्ष्मायी विधूनने । पुकः पूर्वान्तकरणमदीदपदित्युपधाया ह्रस्वो यथा स्यादिति सिद्धमाञ्चिकपदित्यादि ज्ञेयम् ।

अर्थ । अयमात्मनेपद्येव । **अर्थयते** इति । अल्लोपः । **अर्थापयते** । अल्लोपाभावे 'अचो ञ्णिति' इति वृद्धिः । 'अर्तिह्री—' इति पुक् । **आर्तथतेति** । अर्थि अस्माल्लुङ् । त । च्लिः । 'णिश्रि—' इति चङ् । अल्लोपस्य स्थानिवत्त्वादकारवतस्थकारस्य द्वित्वम् । 'अभ्यासे चर्च' इति थकारस्य तकारः । णिलोपः । आडागमः । **आर्तिथतेति** । णौ कृताल्लोपस्य स्थानिवत्त्वा-

---

१. पुग्णौ D_1, D_4, N_1. २. Dropped N_1. ३. Dropped D_4. ४. D_1, D_2, B_2 have after it—आञ्चिकपत्. ५. अर्थयति D_1. ६. D_1 has in place of आर्तथत...इत्यादि—आर्थापयत । आर्थपत । अर्थापयामास । अर्थयामास । इत्यादि; आर्तथत dropped D_4. ७. आर्तिथपत् । इत्यादि D_2 ; आर्तिथपत B_2 ; आर्तिथपंत । इत्यादि N_1. ८. सिद्धम् dropped Dc_3.

भाववादिनां मते सणिच्कस्य थिशब्दस्य द्वित्वम् । पूर्ववच्छेषः । अर्थयांचक्रे । इत्यादिशब्दादेव शिष्टानां सर्वेषां पाठस्थितानां धातूनां रूपाणि ज्ञेयानि । तथा च सूत्रलोकागमस्थितानामपि । तथा च धातुसूत्रं 'बहुलमेतन्निदर्शनम्' इति । यदेतद्भ्वत्यादि-धातुपरिगणनं तद् बाहुलकेन निदर्शनत्वेन ज्ञेयम् । तेनापठिता अपि सौत्रलौकिकवैदिकाः ज्ञेयाः । वर्धते हि धातुगणः । एतदेव सूत्रमन्ये एवं व्याचक्षते । भ्वादिनवगणोक्ता अपि स्वार्थणिजन्ताः स्युः । चुरादिपाठस्तु निदर्शनार्थं रामो राज्यमकारयत् । तथोक्तम् ।

'निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिजिष्यते' ।

तथा ।

'धात्वर्थानुप्रवेशोपि बुद्ध्यारोपाण्णिचं विना' ॥ इति ।

अन्ये तु धातूनामर्थनिर्देशोयं निदर्शनार्थ इति व्याचक्षते । यदाहुः ।

'क्रियावाचित्वमाख्यातुमेकैकोर्थो निदर्शितः[1] ।
प्रयोगतोनुगन्तव्या अनेकार्था हि धातवः' ॥ इति ।

सर्वेपि सूत्रव्याख्यानपक्षाः प्रामाणिकत्वादिष्टाः ॥[2]

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमला प्रक्रियेयं चुरादेः ॥

दशापि गणाः समाप्ताः ॥

---

१. प्रदर्शितः Dc3. २. After it—अशिष्टा न ज्ञेयाः । Bc2.

अथ ण्यन्तप्रक्रिया ।

हेतुमति च ॥३।१।२६॥

हेतुः प्रयोजकः तद्व्यापारः प्रेषणादिर्हेतुमान् तस्मिन् वाच्ये धातोर्णिच् स्यात् ॥ कुर्वन्तं प्रेरयति

स्याच्छुद्धा प्रकृतिर्ण्यन्ता सनन्ता णिचि सन्परा ।
यङन्ता यङ्लुगन्ता च नातोन्या निःप्रयोजना ॥ इति

क्रममभिप्रेत्य शुद्धप्रकृतिरूपाण्यभिधाय ण्यन्ताया रूपाण्याख्यातुमारभते।[1]

हेतुमति । 'फलयोग्योपि पदार्थो हेतुरुच्यते'[2] । तस्य चेद् ग्रहणं स्यादिहापि प्रसज्येत । अध्ययनेन वसतीति । तस्मात् तत्प्रयोजको हेतुश्चेति पारिभाषिकस्य हेतोरिदं ग्रहणमिति दर्शयितुमाह—हेतुः प्रयोजक इति । स्वतन्त्रस्य कर्तुः प्रयोजकः । तद्व्यापारस्तस्य प्रयोजकस्य यो व्यापारः क्रिया । कः पुनरसावित्याह—प्रेषणादिरिति । भृत्यादेर्निकृष्टस्य क्वचिदर्थे नियोजनं प्रेषणम् । आदिशब्देन अध्येषणतत्समर्थाचरणग्रहणम् । तत्र हीनेनोत्तमप्रेरणमध्येषणम् । प्रयोज्यस्य यो विषयस्तत्र ये समर्था योग्यास्तेषामाचरणं तत्समर्थाचरणम् ।[3] अत्र[4] येन प्रकारेण पारिभाषिक एव हेतुर्गृह्यते प्रयोज्यादिषु हेतुमत्सु सत्सु च प्रयोजकव्यापार एव हेतुमानित्यादि भाष्यं[5] न्यासादावाक्षिप्य समर्थितम् । नेह विस्तरभयाल्लिख्यते[6] । कुर्वन्तं प्रेरयतीति[7] । इदं कुरु ईदृशं कुर्विति स्वाभिप्रायेवस्थापयतीत्यर्थः ।[8]

---

१. °ख्यातुं प्रारभते । Dc3. २. फलसाधनयोग्योपि Bc1. ३. Dropped Bc2. ४. अत्र च Bc2, Dc3. ५. भाष्य Dc3. ६. °ल्लिखितम् Bc2. ७. कारयती° Bc1. ८. कुर्विति स्वाभिप्राये Dc1.

कारयति ।[1] अचीकरत् । णिजन्ताण्णिच् । चोरयन्तं प्रेरयति [2]चोरयति ।

नाग्लोपिशास्वृदिताम् ॥७।४।२॥

अग्लोपिनः शास ऋदितश्चोपधाह्रस्वो[3] न स्याच्चङ्परे णौ ॥ इति ह्रस्वाप्राप्तौ णेर्णिचि लोपे[4] नाग्लोपित्वमिति[5] ह्रस्वादि[6] ।

एतत् प्रेषणाध्येषणयोर्द्वयोरप्युदाहणं संभवति । तत्समर्थाचरणस्य तु भिक्षा वासयतीति । भिक्षा[7] हि[8] लभ्यमाना वासानुकूलं तृप्तिविशेषं जनयति । **कारयतीति** । डुकृञ् करणे । 'अचो ञ्णिति' इति वृद्धिः । 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां शप् तिबादि । गुणायादेशौ । कारयेत् । कारयतु । अकारयत् । **अचीकरदिति** । लुङ् । च्लिः । 'णिश्रि—' इति चङ् । 'णेरनिटि' इति णिलोपः । णौ चङ्युपधाया ह्रस्वः । द्वित्वम् । 'चङि' इति । चुत्वम् । 'सन्वल्लघुनि—' इति सन्वद्भावः । 'सन्यतः' इतीत्वम् । '[9]दीर्घो लघोः' इति दीर्घः । कारयामास । कारयिता । कार्यात् । **कारयिष्यति** । अकारयिष्यत् । 'कर्तृगामिनि क्रियाफले णिचश्च' इत्यात्मनेपदम् । कारयते इत्यादि । एवं रूपाणि सर्वत्र ण्यन्ते ज्ञेयानि । विशेषस्तत्र तत्र कथयिष्यते । **चोरयतीति** चुर स्तेये अस्मात् स्वार्थे णिजन्ताद्धेतुमाण्णिच् । 'णेरनिटि' इति पूर्वणिलोपः । पूर्ववच्छप्तिबादि ।

नाग्लोपि । अगिति प्रत्याहारस्तस्य लोपोस्ति यस्य तदग्लोपि । शासु अनुशिष्टौ । ऋकार इत्यस्य तत् ऋदित् । इह हि द्विविधमग्लोप्यङ्गम् । क्वचिदगेव लुप्यते । मालामाख्यत् [10]अममालदित्यादौ । क्वचिद्धलचौ । राजानमतिक्रान्तवान् अत्यरराजदित्यादौ । अत्र

---

१. After it—कारयते । कार्यात् B_2. २. After it—चुर स्तेये D_4. ३. °श्चोपधाया D_1, D_2, D_3, B_2, ४. C, D_3, D_4 drop लोपे. ५. केचित् after it in D_2. ६. ह्रस्वादिः D_2. ७. एतद्भिक्षा Dc_1. ८. Dropped Bc_2. ९. 'दीर्घः—' इति Bc_2. १०. अमामलदित्यादौ Dc_3.

अचूचुरत् । णिलोपेऽग्लोपित्वमिति केचित् । अचुचोरत् । अशशासत् । ऋदितः ।[1][2] अडुढौकत् ।

णौ च संश्चङोः ॥६।१।३१॥

सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा[3][4] स्यात् ।

'प्रातिपदिकाद्धात्वर्थे' इति णिच् । 'णाविष्ठवत्' इति टिलोपः । स हलचोः । तत्र यत्राग्लेव केवलो लुप्यते तत्र 'अचः परस्मिन्—' इति स्थानिवत्त्वादकारव्यवधानादेवोपधाह्रस्वो न स्यात् । यत्र तु हलचौ लुप्येते तत्र न सिध्यति । स्थानिवत्त्वाभावात् । अजादेशस्य हि[5] स्थानिवद्भाव उक्तः । न तु हलजादेशस्य । तस्माद्यत्र हलचोरादेशस्तदर्थमग्लोपित्ववचनम् । **अचूचुरदिति** । चोरि अस्मात् च्लेश्चङ् । 'णौ चङ्युपधाया ह्रस्वः' । 'एच इग्घ्रस्वादेशे' । द्वित्वम् । 'दीर्घो लघोः' इत्यभ्यासदीर्घः । **णिलोप इति** । तथोक्तं **मुग्धबोधे** । 'पुनर्नाग्लोपित्वान्न ह्रस्वः' इति । **अचुचोरदिति** । द्वित्वम् । अभ्यासह्रस्वः । अग्लोपित्वादुपधाह्रस्वाभ्यासदीर्घौ न । **अशशासदिति** । शासु अनुशिष्टौ । णिच् । लुङ् । तिप् । च्लिः । चङ् । द्वित्वम् । ह्रस्वः । णेर्लोपः । **अडुढौकदिति** । ढौकृ गतौ । 'अभ्यासे चर्च' इति जश्त्वेन डः ।

णौ च । णौ च संश्चङोरिति भिन्नाधिकरणे सप्तम्यौ इति दर्शयति—**सन्परे चङ्परे च णाविति** । सन् परो यस्मात् स सन्परः । चङ् परो यस्मात् स चङ्परः । एवंविधे णौ परत इत्यर्थः । ननु श्वयतेर्णिचि तदन्ताच्च सनि कृते चङि चान्तरङ्गत्वादादौ वृद्ध्यायादेशौ

---

१. Before it—शासु अनुशिष्टौ D_4. २. D_1 and D_2, D_4 have ढौकृ गतौ before it. ३. Dropped D_3. ४. स्याद्वा D_2. ५. Dropped Bc_2. ६. Dropped Bc_1. ७. च ङः Dc_1.

संप्रसारणं तदाश्रयं च कार्यं बलवदिति वचनादादौ संप्रसारणम्। वृद्ध्यावादेशौ। द्वित्वम्। आवादेशस्याभ्यासे[2] स्थानिवत्त्वादुकारदीर्घः। अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्।

स्तम्भुसिवुसहां चङि ॥८।३।११६॥

एषां षो न स्याच्चङि। उपसर्गादिति वाच्यम् ॥* एषामुपसर्गनिमित्तः षो नेष्यते नाभ्यासकृत इत्यर्थः। अवातस्तम्भत्।

स्यातां ततः संप्रसारणमित्याशङ्क्याह—**संप्रसारणमित्यादि**। **वचनादिति**। वार्तिककृद्वचनादित्यर्थः। तदाश्रयं संप्रसारणाश्रयं च कार्यं 'संप्रसारणाच्च' इति पूर्वरूपत्वादि। **आवादेशस्येति**। आवादेशस्याभ्यासे क्रियमाणे 'ओः पुयण्' इति ज्ञापकादद्वित्वनिमित्तेपि णौ परतः स्थानिवत्त्वादुकारस्तस्य दीर्घ इत्यर्थः। **अशूशवदिति**। टुओश्वि गतिवृद्ध्योरित्यस्माण्णिचि लुङ्। च्लेश्चङ्। णिलोपः। 'णौ चङ्युपधाया ह्रस्वः'। 'चङि' इति द्वित्वम्। शु इत्यस्य 'दीर्घो लघोः'। अट्। **अशिश्वयदिति**। संप्रसारणाभावे रूपम्। वृद्ध्यायादेशौ। उपधाह्रस्वः। 'ओः पुयण्' इति ज्ञापकाद् द्वित्वं श्वि इत्यस्य। हलादिः शेषः। येषां पक्षे उवर्णादेश एव स्थानिवत्तेषां पक्षे 'सन्वल्लघुनि' इति सन्वद्भावः। 'सन्यतः' इतीत्वम्। अलघुत्वात् 'दीर्घो लघोः' इति न दीर्घः।

स्तम्भु। स्तम्भु रोधने। षिवु तन्तुसन्ताने। षह मर्षणे। 'स्तम्भेः' इति 'परिनिविभ्यः' इति प्राप्तस्य प्रतिषेधः। **उपसर्गादित्यादि**। व्याकरोति। **एषामिति**। **अवातस्तम्भदिति**। स्तम्भेर्णिचि लुङि चङि सति णिलोपः। द्वित्वम्। 'शर्पूर्वाः खयः' इति तकारः शेषः।

---

१. उवर्णनिर्देशात् णौकृत आवा° N. २. D₂ has कर्तव्ये after it. ३. °दुकारो दीर्घः D₁, N. ४. Before it D₁, D₂, D₃, D₄, N have सन्वद्भावः.

[1]पर्यसीषिवत् । [2]न्यसीषहत् । सुब्धातोरनेकाचश्च सन्वद्भावो वेति केचित् । अचचकासत् । [3]अचीचकासत् । नन्द्राः संयोगेति[4] नदराणां न द्वित्वम् । उन्दी[5] क्लेदने । औन्दिदत् । अड्डु[6] अभियोगे । आड्डिडत् । आर्चिचत् ।

अडागमः । **पर्यसीषिवदिति** । सिवश्चङ्परे णौ लघूपधागुणे कृते 'णौ चङि' इत्युपधाह्रस्वः । द्वित्वम् । 'दीर्घो लघोः' इति दीर्घः ।[7] **पर्यसीषहदिति** । सहेरपि 'अत उपधायाः' इति वृद्धौ उपधाह्रस्वः । 'सन्वल्लघुनि' इति सन्वद्भावः । 'सन्यतः' इतीत्वम् । दीर्घः । शेषं पूर्ववत् । **सुब्धातोरिति** । सन्वद्भावो दीर्घस्याप्युपलक्षकः । तथोक्तं **मुग्धबोधे** । 'खेः सन्वद् घौ घोर्ह्रसादेर्घश्च ल्यनेकाचोऽस्वकलिहलेर्वा' इति । **अचचकासत्** । **अचीचकासदिति** । चकासृ दीप्तौ । णौ चङि सति ऋदित्वादुपधाह्रस्वो न । अनेकाच्त्वाद्वा सन्वद्भावो दीर्घश्चेति केचित् । **औन्दिददिति** । उन्दी क्लेदने । णिच् । चङ् । 'अजादेर्द्वितीयस्य' इत्युकारस्य न द्वित्वम् । 'नन्द्राः' इति न नकारस्य । अतः सणिच्कस्य दकारस्य द्वित्वम् । अजादित्वाद् 'दीर्घो लघोः' इति दीर्घो नार्वाचीनमते । स्वमते स्यात् । आट् । 'आटश्च' इति वृद्धिः । **आड्डिडदिति** । अड्ड् उद्यमने । दकारस्य न द्वित्वम् । णिच्सहितस्य डकारस्यैव द्वित्वम् । **आर्चिचदिति** । अर्च पूजायाम् । रस्य न द्वित्वम् । सणिच्कस्य चस्यैव द्वित्वम् ।

---

१. C has पर्यसीषहत् for पर्यसीषिवत् । न्यसीषहत्; पर्यसीषहत् Com. २. न्यसीषहत् D_3. ३. Before it—अप्राप्ते नित्यप्राप्तेयमपि विकल्पः अनग्लोपिविषय एव B_2. ४. °संयोगादय इति D_1. ५. D_2, D_3, D_4 drop उन्दी क्लेदने. ६. अड्डु उद्यमने । आड्डिडत् given after औब्जिजत् B_1, P, C; अड्डु अभियोगे dropped D_1, D_3, D_4. ७. After it–षत्वम् । Dc_3. ८. सुब्धातोरनेकाश्चेति । तथोक्तं &c. Bc_2.

बकारस्यापि न द्वित्वम् । उब्ज आर्जवे । औब्जिजत् । अजादेरित्येव । नेह । अदिद्रपत् ।

रभेरशब्लिटोः ॥७।१।६३॥

रभेर्नुमागमः स्यादचि न तु शब्लिटोः ॥ लघुनीत्युक्तेर्न सन्वत् । अररम्भत् ।

औब्जिजदिति । उब्ज आर्जवे । बकारस्य न द्वित्वम् । सणिच्कस्य जस्यैव द्वित्वम् । येषां पक्षे बकारोपधस्तेषामयं प्रतिषेधः । येषां दकारोपधस्तेषां मते तु बत्वं विधातव्यम् । बकारोपदेशस्य प्रयोजनमौब्जिजदित्यादि । दकारोपधस्य समुद्र इत्यादि । अजादेरित्येवेति । 'अजादेः' इत्यनुवर्तत इत्यर्थः । अदिद्रपदिति । द्रा कुत्सायां गतौ । णिच् । 'अर्तिह्री—' इति पुक् । लुङि चङ् । णौ चङ्युपधाया ह्रस्वत्वम् । द्वित्वम् । सन्वद्भाव इत्वम् । ननु च द्वितीयस्येत्यनुवृत्तेरेवात्र न प्राप्नोति किमर्थमजादेरित्यस्यानुवृत्तिः क्रियत इति चेदुच्यते । वृत्तिकारादिमते तु द्वितीयस्येत्यनेनैवात्र निषेधः । ये तु इन्दिद्रीयिषतीत्यादिसिद्ध्यर्थमजादेरिति पञ्चम्यन्तं कर्मधारयमनुवर्तयन्ति तत्पक्षमाश्रित्योक्तमजादेरित्येवेति । एतदर्थमजादेरित्यनुवर्तनीयमेव तदन्यार्थमपि भवति । तत्पक्षे तु द्वितीयस्येति विस्पष्टार्थमेव । इन्द्रमिच्छतीति क्यच् । तदन्तादिन्द्रीयितुमिच्छतीति सन् । पञ्चम्यन्तस्याजादेरित्यस्यानुवृत्तौ 'तस्मादित्युत्तरस्य' इत्यनन्तराणामेव न्द्राणां प्रतिषेधः । अतो नकारस्यैव न द्वित्वम् । दकारस्त्वत्र यद्यपि रेफदकारसंयोगादिभूतस्तथापि नकारेण व्यवहितत्वात् द्विरुच्यते एव ।

रभेः । रभ राभस्ये । अचि किम् । आरब्धा । अशब्लिटोरिति किम् । आरभते । आरेभे । अररम्भदिति । चङ् । पूर्ववत् प्रक्रिया ।

---

१. उब्ज आर्जवे dropped D_1, D_3, D_4. २. अदुद्रवत् । द्रा कुत्सायां गतौ च । अदिद्रपत् D_2, B_1, P, C. ३. नुम् D_1, D_2, D_4. ४. लघुन्युक्ते... सन्वत् after अररम्भत् P. ५. सन्वद्भावः B_2.

लभेश्च ॥७।१।६४॥

लभेर्नुम्[3] स्यादचि न तु शब्लिटोः । अललम्भत् ।
[4]अचङीत्युक्तेर्न कुत्वम् । अजीहयत् ।

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ॥३।१।५१॥

एभ्यश्च्लेश्चङ् न स्याच्छन्दसि ॥[5] औनयीत् । अध्वनयीत् । ऐलयीत् ।[6] आर्दयीत् । लोके तु । औनिनत् । अदध्वनत् ।

लभेः । डुलभष प्राप्तौ । अचि किम् । लब्धा । अशब्लिटोरिति किम् । लभते । लेभे । **अचङीत्युक्तेरिति** । 'हेरचङि' इत्यत्र । **अजीहयदिति** । हि गतौ वृद्धौ च । णिच् । वृद्धिः । चङ् । उपधाह्रस्वः । द्वित्वम् । सन्वद्भावः । इत्वम् । दीर्घः । चुत्वम् ।

नोनयति । ऊन परिहाणे । ध्वन शब्दे । इल प्रेरणे । अर्द गतौ याचने च । एतेभ्यो ण्यन्तेभ्यो धातुभ्यो 'णिश्रि—' इत्यादिना च्लेश्चङादेशः प्राप्तः प्रतिषिध्यते छन्दसि विषये । **औनयीदिति** । सिच् । 'इट ईटि' इति सिचो लोपः । तस्यासिद्धत्वाद् वृद्धौ प्राप्तायां 'ह्यन्तक्षण—' इति निषेधः । गुणायादेशौ । 'आडजादीनाम्' इत्याट् । 'आटश्च' इति वृद्धिः । **अध्वनयीदिति** । ध्वनयतीत्येतस्मादेव निपातनाददन्तत्वम् । अतो लोपः । तस्य स्थानिवत्त्वात् 'अत उपधायाः' इति वृद्धिर्न । **ऐलयीत्** ।
'**पीदिति** । पूर्ववत् प्रक्रिया । **औनिनदिति** । चङ् । 'अजादेर्द्वितीयस्य' इति निशब्दस्य [7]द्विर्वचनम् । **अदध्वनदिति** । अभ्यासस्य जश्त्वम् । अग्लोपित्वान्न सन्वद्भावः ।

---

१. Before it—डुलभष् प्राप्तौ B_2. २. C drops लभे°.. 'लिटोः ३. °र्नुमागमः D_3. ४. Before it—हेरचङीत्यत्र D_1; हेरचङीति B_1; हेरचङीत्यनेन B_2. ५. After it D_1 has—सिच् इट् ईट् गुणः । सिच्लोपः । दीर्घः. ६. एलन प्रेरणे after it in D_2; एलनं प्रेरणम् B_2. ७. द्वित्वम् Bc_2, Dc_3.

ऐलिलत् । आर्दिदत् । द्वयमपि लोक इति केचित् ।

अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ॥७।४।९५॥

एषामभ्यासस्य अकारोन्तादेशः[१] स्याच्चङ्परे णौ ॥ इत्वापवादः । असस्मरत् । अदद्रत्[२] । तपरत्वसामर्थ्यादत्र लघोन दीर्घः । अतत्वरत्[३] । अपप्रथत्[४] । अमम्रदत्[५] । अतस्तरत् । अपस्पशत्[६] ।

विभाषा वेष्टिचेष्ट्योः ॥७।४।९६॥

अनयोरभ्यासस्याद्वा[७] स्यात् चङ्परे णौ ॥ अववेष्टत् ।[८] अविवेष्टत् । एच इग्घ्रस्वादेशे । अचचेष्टत्[९][१०] । अचिचेष्टत् ।

ऐलिलदिति । 'अजादेः—' इति लिशब्दस्य द्वित्वम् । आट् । वृद्धिः । आर्दिददिति । इहापि पूर्ववत् दिशब्दस्य[११] द्विर्वचनं रेफस्य न द्वित्वम् । 'नन्द्राः—'इति निषेधात् । आट् । वृद्धिः ।

अत्स्मृ । स्मृ चिन्तायाम् । दृ भये । ञित्वरा संभ्रमे । प्रथ प्रख्याने । म्रद मर्दने । स्तृञ् आच्छादने । स्पश बाधनस्पर्शनयोः । **असस्मर**दिति । स्मारि । अस्माचङ् । उपधाह्रस्वः । द्वित्वम् । अथाददरदित्यत्र 'दीर्घो लघोः' इति दीर्घत्वं कस्मान्न भवतीत्याह—तपरत्वसामर्थ्यादिति । अत्र यदि 'दीर्घो लघोः' इति दीर्घः स्यात् तपरकरणमनर्थकं स्यात् । अथैवमुच्यते सवर्णग्रहणाभावार्थं तपरत्वमिति । तन्न । भाव्यमानेनाणा सवर्णानामग्रहणात् । अतत्वरदित्यादि । पूर्ववत् ।

विभाषा । वेष्ट वेष्टने । चेष्ट चेष्टायाम् । एतयोरभ्यासो लघुपरो नास्तीत्यप्राप्त एव सन्वद्भावे विभाषयाकारो विधीयते ।

---

१. अकारान्तादेशः D_1, B_2. २. P has before it—दॄ विदारे भये च । ३. P has before it—ञित्वरा संभ्रमे ।. ४. Before it P has-प्रथ क्षिप्तौ. ५. Before it—म्रद क्षोदे P. ६. अपस्पशत् D_1, D_2, D_4, B_2, N_1. ७. °स्यात्त्वं वा D_3, D_4. ८. After it—अचचेष्टत् D_3. ९. C, B_2, N_1 have अविवेष्टत् after एच इग्घ्रस्वादेशे. १०. D_1 and D_2 have अचिचेष्टत् । अचचेष्टत्. ११, °शब्दाद्वि° Bc_2.

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥७।४।३॥

एषामुपधाया[1] ह्रस्वो वा स्यात् चङ्परे णौ ॥ अबिभ्रजत् । अबभ्राजत् । अदीदिपत्[2] । अदिदीपत् । इत्यादि । कणरणवणभणश्रणह्वेञ्लेप[3]लुपलुठहेठां च । अचीकणत् । अचकाणत्[4] ।

भ्राज । भ्राजृ दीप्तौ । भासृ दीप्तौ । भाष व्यक्तायां वाचि । दीपी दीप्तौ । जीव प्राणधारणे । मील [5]निमेषणे । पीड अ[6]वबाधने । एतेषां नित्यं ह्रस्वे प्राप्ते विभाषेयमारभ्यते । भ्राजभासोर्हि ऋदित्करणमपाणिनीयम् । **अबिभ्रजदिति** । अस्माच्चङ् । यदा ह्रस्वस्तदा सन्वद्भावेनेत्वम् । हलादिः शेषः । अभ्यासजश्त्वम् । **अबभ्राजदिति** । ह्रस्वाभावे रूपम् । आदिशब्दात् । अबीभसत् । अबभासत् । अबीभषत् । अबभाषत् । अदीदिपत् । अदिदीपत् । अजीजिवत् । अजिजीवत् । अमीमिलत् । अमिमीलत् । अपीपिडत् । अपिपीडत् । इति । **कणेत्यादि** । उपधाह्रस्वत्वं वा वक्तव्यमिति शेषः । कण आर्तस्वरे । रण शब्दे । वण शब्दे । भण शब्दे । श्रण दाने । ह्वेञ् स्पर्धायां शब्दे च । लप परिभाषणे । लुप लोपने । लुठ लोठने । हेठ[7] बाधे । **अचीकणदिति** । ह्रस्वत्वपक्षे सन्वद्भावादित्वम् । 'दीर्घो लघोः' इति दीर्घः । **अचकाणदिति** ।

---

१. °मुपधाह्रस्वो D_2. २. D_1, D_3 drop अदीदिपत । अदिदीपत्; N_1, D_4 have अदिदीपत । अदीदिपत् ।. ३. लप्लुप्लुट N_1. ४. इत्यादि after it, dropping all forms D_3. ५. निमेलने Bc_2; निमीषणे Dc_3. ६. अवबाधने Bc_2. ७. हठ Dc_3.

अरीरणत् । अरराणत् । अवीवणत् । अववाणत् । अबीभणत् । अबभाणत् । अशिश्रणत् । अशश्राणत् । अजूहवत् । अजुहावत् । अलीलपत् । अललापत् । अलूलुपत् । अलुलोपत् ।[1] अलूलुठत् । अलुलोठत् । अजीहिठत् । अजिहेठत् ।[2]

उर्ऋत् ॥७।४।७॥

उपधाया ऋवर्णस्य स्थाने ऋत् स्याद्वा चङ्परे णौ ॥[3] अचीकृतत् । [4]अवीवृतत् । अमीमृजत् । पक्षे इद्गुणवृद्धयः । अचिकीर्तत् । [6]अववर्तत् । अममार्जत् ॥

ह्रस्वाभावे रूपम् । आदिशब्दात् अरीरणत् । अरराणत् । अवीवणत् । अववाणत् । अबीभणत् । अबभाणत् । अशिश्रणत् । अशश्राणत् । अजूहवत् । अजुहावत् । अलीलपत् । अललापत् । अलूलुपत् । अलुलोपत् । अलूलुठत् । अलुलोठत् । अजीहिठत् । अजिहेठत् ।

उर्ऋत् । ईर् । गुणवृद्धीनामपवादः । **अचीकृतदिति** । कृत संशब्दने । चुरादि णिच् । चङ् । द्वित्वम् । उर्ऋत् । सन्वद्भावेनेत्वम् । चुत्वम् । दीर्घः । **अवीवृतत्** । **अमीमृजादिति** । वृतु वर्तने । मृजूष् शुद्धौ । हेतुमण्णिच् । शेषं पूर्ववत् । **पक्षे इद्गुणवृद्धय इति** । 'उपधायाश्च' इतीत्वम् । रपरः । 'उपधायां च' इति दीर्घः । अयमित् कृतः 'पुगन्त–' इति गुणो वृतः 'मृजेर्वृद्धिः' इति मृजेर्वृद्धिरित्यर्थः । तपरकरणं दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यात् । **अचीकृतदिति** । न चायं भाव्यमानः । आदेशान्तरनिवृत्त्यर्थं स्वरूपमेवैतदभ्यनुज्ञायते ।

---

१. B_2 has इत्यादि after it and drops the remaining forms. २. After it—इत्यादि N_1. ३. After it—इत्वादीनामपवादः B_1, B_2, D_2, D_4. ४. अवीवृधत् C. ५. पक्षे 'ऋत इद्धातोः' इति इत् । 'पुगन्त—' इति गुणः । 'मृजेर्वृद्धिः' इति वृद्धिः । C. D_2, D_3, D_4, B_1, B_2. ६. अववर्धत् C. ७. इति Dc_1 ; इद्गुण° Dc_3. ८. दीर्घः dropped Dc_1.

स्वापेश्चङि ॥६।१।१८॥

ण्यन्तस्य स्वापेश्चङि संप्रसारणं स्यात् ॥ असूषुपत् ॥

शाच्छासाह्वाव्यावेपां युक् ॥७।३।३७॥

एषां युगागमः स्यात् णौ ॥ शाययति[1] । अशीशयत् । छाययति । अचिच्छयत्[2] । साययति । असीसयत् । ह्वाययति ॥

स्वापेः । आप्लृ व्याप्तावित्यस्य सुपूर्वस्यैष निर्देशः संभवत्यतस्तद्ग्रहणशङ्कानिरासार्थमाह—**ण्यन्तस्य स्वापे**रिति । **असूषुप**दिति । 'हेतुमति च' इति णिच् । चङ् । द्विर्वचनात् पूर्वमत्र संप्रसारणं बलीयस्त्वात् । तत्र कृते लघूपधगुणः । तस्य 'णौ चङि'[3] इति ह्रस्वः । ततो द्वित्वम् । 'दीर्घो लघोः' इति दीर्घः । षत्वम् । चङीति किम् । स्वाप्यते ।

शाच्छा । शो तनूकरणे । छो छेदने । षोऽन्तकर्मणि । ह्वेञ् आह्वाने । व्येञ् संवरणे । वेञ् तन्तुसन्ताने । पा पाने । पै शोषणे । इत्युभयोर्ग्रहणम् । पा रक्षणे इत्यस्य तु लुग्विकरणत्वान्न ग्रहणम् । **शाययती**ति । 'आदेच—' इत्यात्वम् । णिच् । शप् । तिबादि । गुणायादेशौ । आदिना छाययति । संव्याययति । वाययति । पाययति । शाछासाह्वाव्यापां कृतात्वानां ग्रहणं पुक्प्राप्तिख्यापनार्थम् । किमेतस्य ख्यापने प्रयोजनम् । एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा नास्तीत्युपदेशः । अतः क्षापयतीत्यादि सिद्धं स्यात् । वे इत्यनात्वेन निर्देशो वातिवाय्यत्योर्निवृत्त्यर्थः । अयं युक् पुकोपवादः । **ह्वाययती**ति । आत्वम् । युक् । शप् । तिबादि । गुणायादेशौ ।

---

१. शाययतीत्यादि for शाययति...ह्वाययति D_1, D_4, B_1, B_2; शाययति । इत्यादि । ह्वाययति N_1, D_3. २. P has छ्यु छेदने । छाययति । साययति for अचिच्छयत्. ३. इत्युपधाया ह्रस्वः । Dc_3.

ह्वः संप्रसारणम् ॥६।१।३२॥

सन्परे चङ्परे णौ[1] ह्वयतेः संप्रसारणं स्यान्नित्यम् ॥ संप्रसारणस्य बलीयस्त्वान्न युक् । अजूहवत्[2] । [3]ञ्यायति । वाययति ।[4] पाययति ।

लोपः पिबतेरीच्चाभ्यासस्य[5] ॥७।४।४॥

पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्च[6] चङ्परे

ह्वः । 'ष्यङः संप्रसारणम्' इत्यनुवर्तमानेपि पुनः संप्रसारणग्रहणं 'विभाषा' इत्यस्य निवृत्त्यर्थमित्यभिप्रेत्याह—नित्यमिति । अजूहवदिति । ह्वा इ अत् इति स्थिते बलीयस्त्वादादौ संप्रसारणम् । वृद्ध्यावादेशौ । उपधाह्रस्वः । द्वित्वम् । [7]उवर्णादेशस्य स्थानिवत्त्वम् । 'दीर्घो लघोः' । 'कुहोश्चुः' इति चुत्वं झकारः । तस्य 'अभ्यासे चर्च' इति जश्त्वं जकारः । णिलोपः । ह्वः संप्रसारणमभ्यस्तस्य चेत्येकयोगे सिद्धे पृथग्योगकरणमभ्यस्तस्य निमित्तं यः प्रत्ययो न भवति तेन व्यवधाने संप्रसारणाभावज्ञापनार्थम् । ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन् । जिह्वायकीयिषतीत्यत्र । पाययतीति । 'शाच्छा—' इति युक् ।

लोपः इति । 'णौ चङ्युपधायाः' इति ह्रस्वे प्राप्ते तदपवादः पिबतेर्लोपो विधीयते ईकारश्चाभ्यासस्य । उपधाधिकारादुपधाया एव पर्यायेण लोपेकारौ मा भूतामित्येवमर्थमभ्यासग्रहणम् । तिपानिर्देशो यङ्लुङ्निवृत्त्यर्थः । अपपेयदिति । न पा रक्षणे पै शोषणे इत्यनयोर्निवृत्त्यर्थः । तयोर्हि एकस्य लुग्विकरणत्वादेव न । अपरस्य

---

१. णौ परे N_1. २. अजूहवत् । अजुहावत् D_3. ३. D_1, D_2, D_3, D_4 and B_2 drop ञ्याययति । वाययति. ४. P, N_1 have अवीवयत् after it. ५. °चाभ्यासस्य D_1, N_1. ६. D_1 drops च. ७. उवर्णादेशः । स्थानिवत्त्वम् Bc_2.

णौ ॥ अपीप्यत् । अर्तिह्रीव्लीति पुक् । पुगन्तेति गुणः । अर्पयति ।[1] ह्रेपयते । व्लेपयति । रेपयति । यलोपः । क्नोपयति । क्ष्मापयति । स्थापयति ।

तिष्ठतेरित् ॥७।४।५॥

तिष्ठतेरुपधाया इदादेशः स्यात् चङ्परे णौ ॥ अतिष्ठिपत् ।

लाक्षणिकत्वात् । **अपीप्यदिति** । पा पाने अस्मात् 'शाच्छा—' इति युक् । णिलोपः । उपधालोपः । ओः पुयण्वचनं ज्ञापकं णौ स्थानिवद्भावस्येति स्थानिवत्त्वाद्द्विर्वचनम् । अभ्यासस्येकारः । अट् । 'अर्तिह्री—' इति पूर्वमेव व्याख्यातम् । **अर्पयतीति** । ऋ गतौ । णिच् । **ह्रेपयतीति** । ह्री लज्जायाम् । **व्लेपयतीति** । व्ली वरणे । **रेपयतीति** । रीङ् क्षरणे[2] । **यलोप** इति । 'लोपो व्योर्वलि' इत्यनेन । **क्नोपयतीति** । क्नूयी दुर्गन्धे आर्द्रत्वे शब्दे च । **क्ष्मापयतीति** । क्ष्मायी विधूनने । अत्रापि यलोपः । **स्थापयतीति** । ष्ठा गतिनिवृत्तौ । आकारान्तत्वात् पुक् ।

तिष्ठतेः । अयमपि ह्रस्वापवादः । 'ई चाभ्यासस्य' इति निवृत्तम् । तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः अतास्थपत् । **अतिष्ठिपदिति** । स्था इ इति स्थिते पुक् चङ् इकारोन्तादेशः । इत्वस्य स्थानिवत्त्वात् स्थाशब्दस्य द्वित्वम् । सन्वद्भावादभ्यासस्येत्वम् । 'शर्पूर्वाः खयः' इति खयः शिष्यन्ते । 'अभ्यासे चर्च' इति थकारस्य तकारः । षत्वम् ।

---

१. After it—आर्पिपत् B_2. २. रक्षणे Dc_3.

जिघ्रतेर्वा ॥७।४।६॥

जिघ्रतेः प्रागुक्तं वा स्यात् ॥ अजिघ्रिपत् । [1]अजिघ्रपत् । पातेर्णौ लुगागमो वक्तव्यः[2] । पालयति ।[3]

वो विधूनने जुक् ॥७।३।३८॥

[4]वातेर्जुक् स्यात् [5]णौ [6]कम्पनेर्थे ॥ वाजयति । [7]कम्पे किम् । केशान् वापयति । धूञ्[8]प्रीञोर्नुग्वेति केचित् । धूनयति । धावयति । प्रीणयति । प्राययति ।

जिघ्रतेः । अयमपि ह्रस्वापवादः । तिपा निर्देशो यङ्-लुङ्निवृत्त्यर्थः । **अजिघ्रपत्** । **अजिघ्रिपदिति** । घ्रा गन्धोपादाने । **पालयतीति** । पा रक्षणे । पाल रक्षणे इत्यनेन पालयतीति सिद्धे पातेः पुग्बाधनार्थं[9] लुग्विधिः ।

वो वि । **वाजयतीति** । कम्पयतीत्यर्थे । वा गतिगन्धनयोः । वज गतावित्यस्य णिचि वाजयतीति सिद्धे वातेः पुङ्निवृत्त्यर्थं जुको विधिः । **धूञ्प्रीञोरिति**[10] । धूञ् कम्पने । प्रीञ् तर्पणे । **वेति केचिदिति** । तथा च **सरस्वतीकण्ठाभरणप्रक्रियायां पदसिन्धुसेता-वित्युक्तं** 'धावयतीत्येके [12]प्राययतीत्येके इति च[11] । **मुग्धबोधे** च '[13]धूञ्प्रीञोर्नन्वा' इति ।

---

१. Dropped N. २. वाच्यः B_2. ३. After it—अपीपलत् B_2. ४. वातेर्णौ जुक् D_3. ५. णौ परे N_1. ६. कम्पेर्थे B_2, P, C. ७. कम्पने D_2, D_3. ८. C drops from धूञ्प्रीञो°......प्राययति. ९. पुग्बाधनार्थं Bc_2. १०. धूञ् इति Bc_2. ११. इति dropped Bc_2. १२. प्रपञ्चयती° Dc_3. १३. 'प्रीधूञोर्नन् वा' मुग्ध.

विभाषा लीयतेः ॥६।१।५१॥

[1]लीलीङोरात्वं वा स्यात् ल्यपि एज्निमित्ते अशिति च ॥ [2]विलापयति विलाययति वा घृतम् ।

लीलोर्नुग्लुकावन्यतरस्यां [3]स्नेहनिपातने ॥७।३।३९॥

लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ स्तो वा णौ स्नेहद्रवे[4] ॥ विलीनयति विलाययति विलालयति [5]विलापयति वा घृतम् । [6]स्नेहद्रवे किम् । लोहं [7]विलापयति ॥ प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम् ॥*

विभाषा । ली श्लेषणे इति क्र्यादिः । लीङ् श्लेषणे इति दिवादिः । उभयोरपि यका निर्देश इति स्मर्यत इत्यभिप्रेत्याह—**लीलीङोरिति** । **विलापयतीति** । पुक् ।

लीलो । लीयतेरिति लीलीङोर्ग्रहणम् । लातेरिति ला आदाने इत्यस्य कृतात्वस्य लीयतेश्च ग्रहणम् । ली ई इति इकारोत्र प्रश्लिष्यते । तत इकारान्तस्यैव नुग्विधिः न तु 'विभाषा लीयतेः' इति कृतात्वस्य । **विलीनयतीति** । नुक् । [10]**विलाययतीति** । [11]नुगभावे वृद्धिः । **विलालयतीति** । लुक् । **विलापयतीति** । [12]लुगभावे पुक् । घृतं द्रवीकरोतीत्यर्थः । **प्रलम्भनेति** । प्रलम्भनं [13]मिथ्याफलाख्यानम् । वञ्चनमित्यर्थः । अभिभवः पराभवः ।

---

१. लिङ्लीङो° P., लीङोप्यात्वं C, D_1, N_1. २. विलापयति घृतम् D_1, D_3, D_4, N_1, B_2 ; विलाययति घृतम् D_2. ३. विपातने D_2, D_3, D_4, N_1. ४. स्नेहद्रावे C. ५. C drops it; D_2 drops it and also विलाययति वा घृतम् ; विलाययति विलापयति वा घृतम् N_1; D_4 (वा घृतम् dropped D_4.) ६. स्नेहद्रावे C. ७. विलाययति । विलापयति P; D_2, D_3, D_4, B_2; विलापयति । विलाययति N_1. ८. इति स्थिते Bc_2. ९. नुग् भवति Dc_1. १०. Dc_1 drops from विलाययतीति to वृद्धिः ११. नुग्भावे Ms. Bc_3, Dc_3. १२. नगभावे Bc_2. १३. °कथाख्यानम् Dc_3.

लियः संमाननशालीनीकरणयोश्च ॥१।३।७०॥

लीङ्लियोरात्मनेपदं स्यादकर्तृगेपि[1] फले पूजाभिभवयोः प्रलम्भने चार्थे ॥ जटाभिर्लापयते[2] । श्येनो वर्तिकामुल्लापयते[3] । बालमुल्लापयते ।[4]

बिभेतेर्हेतुभये ॥६।१।५६॥

बिभेतेरेच आत्वं वा स्यात्[5] प्रयोजकाद् भयं[6] चेद्वाच्यम्[7] ॥

भीस्म्योर्हेतुभये ॥१।३।६८॥

आभ्यामात्मनेपदं स्याद् हेतुभये । पुगागमः । मुण्डो भापयते ।

लियः । जटाभिर्लापयत[8] इति । पूजामधिगच्छतीत्यर्थः । **श्येनो वर्तिकामुल्लापयते** । पराभवतीत्यर्थः । **बालमुल्लापयते** । मिथ्याफलाख्यानेन वञ्चयतीत्यर्थः । 'विभाषा लीयतेः' इति यदात्वं विधीयते तदस्मिन् विषये नित्यमन्यत्र विकल्पेन । व्यवस्थितविभाषा हि सा ।

बिभेतेः । हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकः । 'हेतुभये' इति 'पञ्चमी भयेन' इति समासः । एतद् द्वयं मनसि कृत्वाह—**प्रयोजकाद् भयं चेद्वाच्यमिति**[9] ।

भीस्म्योः । ञिभी भये । स्मिङ् ईषद्धसने । **हेतुभये** इति । प्रयोजकाद्भयं चेद् वाच्यमित्यर्थः । भयग्रहणं धात्वर्थोपलक्षणार्थम् । तेन विस्मयोपि तत एव । **पुगागम** इति । 'अर्तिह्री—' इति । **मुण्डो भापयत** इति । मुण्डगुणोपेतत्वान्मुण्डः ।

---

१. °दकर्तृगामिफले D_1. २. °र्लापयते तापसः । पूजामधिगच्छति B_2. ३. D_2, D_4 have उल्लापनमभिभवनम् before it. ४. After it—अत्र प्रतारणम् B_2, D_4. ५. स्याद्वा D_1. ६. भये वाच्ये D_1. ७. D_2 has स्यात् after it. ८ °र्लापयतीति Bc_2. ९. हेतुभयमिति Bc_2.

भियो हेतुभये षुक् ॥७।३।४०॥

भियः षुक् स्यात् णौ हेतुभये ॥ इयन्तनिर्देशान्नात्वपक्षे षुक् । भीषयते ।

नित्यं स्मयतेः ॥६।१।५७॥

स्मयतेरेचो नित्यमात्वं स्यात् णौ हेतुभये ॥ जटिलो विस्मापयते । हेतुभये किम् । कुञ्चिकयैनं भाययति विस्माययति ।[१]

स्फायो वः ॥७।३।४१॥

अस्य [२]वान्तादेशः स्यात् णौ ॥ स्फावयति । अपिस्फवत् ।[३]

शदेरगतौ तः ॥७।३।४२॥

शदेर्णौ [४]तान्तादेशः स्यान्न तु गतौ ॥ शातयति ।

नित्यम् । हेतुभये इति भयशब्देनात्र[५] धात्वर्थसामान्यात् स्मयतेरर्थोऽभिधीयते । न हि मुख्ये भये स्मयतेर्वृत्तिरस्ति । **कुञ्चिकयैनं भाययतीति** । अत्र [६]करणात् कुञ्चिकातो भयं न हेतोः । अत [७]आत्वमात्मनेपदं पुग् च न । **विस्माययतीति** । रूपेणेति [८]शेषः ।

स्फायो वः । स्फायी वृद्धौ ।

शदेः । शद्लृ शातने । ननु किमर्थमिदमुच्यते यतः शद्लृ शातने इत्यस्मादेव निपातात्तः स्यात् । सत्यम् । ज्ञापनार्थम् । अबाधकान्यपि निपातनानि भवन्तीति । तेन पुराशब्दात् 'सायंचिरम्—' इत्युच्यमानयोष्ट्युट्युलोः 'पुराणप्रोक्तेषु' इति निपातेन बाधो नेति पुरातन इति सिद्धम् । **शातयतीति** । 'अत उपधायाः' इति वृद्धिः ।

---

१. After it—अबीभयत् । असिस्मयत् B_2. २. वान्तादेशः P; D_2, D_3, N. ३. D_1, D_3 drop it; after it—शद्लृ गतौ B_2. ४. तान्तादेशः C, D_2, D_3, N_1. ५. अत्र dropped Bc_2. ६. धारणात् Dc_3. ७. आत्वं dropped Bc_2. ८. Dropped Bc_2.

गतौ तु गाः शादयति गोविन्दः ।

रुहः पोऽन्यतरस्याम् ॥७।३।४३॥

रुहः पः स्याद्वा णौ ॥ रोपयति रोहयति ।[१]

क्रीङ्जीनां णौ ॥६।१।४८॥

[२]क्री इङ् जि [३]एषामेच आत्वं स्याण्णौ ॥[४] क्रापयति । [५]अध्यापयति । [६]जापयति ।

णौ च संश्चङोः ॥२।४।५१॥

[८]सन्परे चङ्परे [७]च णौ इङो गाङ् वा स्यात् ॥

गाः शादयतीति । गमयतीत्यर्थः ।

रुहः । किमर्थमिदमुच्यते । यतो रुप परिमोहने इति दिवादिस्तस्य रोपयतीति स्यात् । रुह जन्मनीत्यस्य रोहयतीति चेत् सत्यम् । जन्मार्थस्य रोपयतीति प्रयोगार्थम् । धातूनामनेकार्थत्वात् स्यादिति चेत् अनेकार्था हि धातवो न सर्वे सर्वार्थाः । **रोपयतीति** । लघूपधगुणः ।

क्रीङ् । डुक्रीञ् द्रव्यविनिमये । इङ् अध्ययने । जि जये । **क्रापयतीति** । णौ परे वृद्धिः । पुक् ।

णौ च । णाविति चेयं परसप्तमी इङपेक्षया संश्चङोरिति सप्तमी ण्यपेक्षयेत्यभिप्रायेणाह—**सन्परे चङ्परे च णाविति** ।

---

१. After it—अरूरुपत् । अरूरुहत् । अरूरुहताम् B₂. २. क्री जि इङ् D₂, D₄. ३. एषामेवात्वं णौ । D₄. ४. After it—परे N. ५. जापयति । अध्यापयति D₂, D₄. ६. C, B₂, N drop it. ७. Dropped B₂. ८. C has इङो गाङ् वा स्यात् in the beginning of the Vṛitti before सन्परे°. ९. स्याद्वा N₁.

अध्यजीगपत् । अध्यापिपत् ।

सिध्यतेरपारलौकिके ॥६।१।४९॥

अस्यैच आत्वं स्याण्णौ न तु पारलौकिकेर्थे ॥ अन्नं साधयति । अदृष्टार्थे तु तपः सेधयति ।

अध्यजीगपदिति । इङ् अध्ययने । अधिपूर्वः । णिचि गाङादेशः । 'अर्तिह्री–' इति पुक् । 'णिश्रि–' इति चङ् । णिलोपः । 'णौ चङि–' इत्युपधाह्रस्वः । द्वित्वम् । 'सन्वत्' इति सन्वद्भावः । 'सन्यतः' इतीत्वम् । 'दीर्घो लघोः' इति दीर्घः । चुत्वम् । **अध्यापिपदिति** । गाङभावेरूपम् । 'क्रीङ्जि—' इत्यात्वम् । पुक् । 'अजादेर्द्वितीयस्य' इति पीत्यस्य द्वित्वम् ।

सिध्यतेः । षिधु संराद्धौ । **अन्नं साधयतीति** । निष्पादयतीत्यर्थः । **तपः सेधयतीति** । तापस इति शेषः । अत्र सिध्यतिः परलोकार्थे ज्ञानविशेषे वर्तते । तापसो ज्ञानविशेषमासादयति । तं तपः प्रयुङ्क्ते । स च ज्ञानविशेष उत्पन्नः परलोकाभ्युदयलक्षणं फलमुपसंहरन् परलोकप्रयोजनो भवति । इह कस्मान्न भवति पर्युदासः । अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति । उच्यते । सिध्यतेरत्रार्थो निष्पत्तिः । तस्याः प्रयोजनमन्नं तस्य यद्दानं तत् पारलौकिकम् । न पुनः सिद्धेरेवेति पर्युदस्यते साक्षात् परलोकप्रयोजने सिद्ध्यर्थे कृतावकाशं वचनं नैवंविधे विषये प्रवर्तत इति । सिध्यतेरिति श्यना निर्देशः षिधु गत्यामित्येतस्य भौवादिकस्य निवृत्त्यर्थः ।

---

१. For it— ज्ञापयति N_1. २. °ण्णौ परे N_1; णौ dropped D_4. ३. D_1 drops it. ४. ईङ् Dc_3. ५. न पर्युदस्यते Bc_2.

चिस्फुरोर्णौ ॥६।१।५४॥

चिञः स्फुरश्चैच आत्वं वा स्याण्णौ[1] ॥ चापयति । चाययति । स्फारयति । स्फोरयति । आत्वस्याभ्यासे स्थानिवत्त्वात् । अपुस्फरत् । अपुस्फुरत् ।[5]

प्रजने वीयतेः ॥६।१।५५॥

अस्यैच आत्वं वा स्यात् णौ प्रजनेर्थे ॥ वापयति वाययति वा[6] गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः । स्तावयति ।

चिस्फुरोः । चिञ् चयने । स्फुर स्फुरणे । **चापयतीति** । आत्वपक्षे पुक् । अन्यत्रायादेशः । **आत्वस्येति** । 'ओः पुयण्-' इत्युवर्णनिर्देशाण्णौ कृत उवर्णादेश आकार आवादेशश्चाभ्यासे स्थानिवदिति स्थानिवत्त्वादित्यर्थः । **अपुस्फरदिति** । स्फुर अस्माण्णिचि चङि च सति गुणः । उपधाया आत्वम् । उपधाया ह्रस्वः ।[7] द्वित्वम् आकारस्य स्थानिवत्त्वात् स्फु इत्येतस्य । **अपुस्फुरदिति** । आत्वाभावे ह्रस्वः । 'एच इग्घ्रस्वादेशे' ।

प्रजने । वी गतिप्रजनकान्त्यशनखादनेषु । प्रजनो जन्मन उपक्रमो गर्भग्रहणमित्यर्थः । अत एवाह—**गर्भं ग्राहयतीत्यर्थः** इति । यदि वा गतिगन्धनयोरयं धातुः प्रजने वर्तते तदा शक्योयं योगोकर्तुम् । वातेर्हि वापयतीति स्यात् वीयतेस्तु वाययतीति । **स्तावयतीति** ।

---

१. चिस्फुरो° D1. २. स्याद्वा for वा स्याण्णौ N. ३. स्याद्वा णौ, D1. ४. D2, D4, B2 drop णौ. ५. C has अपुस्फुरत् । अपस्फुरत् ; अपुस्फुरत् । अपुस्फरत् । D4. ६. Dropped N1, D4. ७. उपधाह्रस्वः । Bc2, Dc3.

आवादेशस्य स्थानिवत्त्वात् अतुष्टवत् । भावयति । सन्वद्भावे ।

ओः पुयण्ज्यपरे ॥७।४।८०॥

अभ्यासोवर्णस्य सनि परे इत्वं स्यात् पवर्गयण्जकारे-ष्ववर्णपरेषु परतः ॥ अबीभवत् । अयीयवत् । अजीजवत् ।[1][2]

ष्टुञ् स्तुतौ । **अतुष्टवदिति** । णिचि चङि वृद्ध्यावादेशौ । उपधाह्रस्वः । द्वित्वम् । अभ्यासावादेशस्य स्थानिवत्त्वम् । शर्पूर्वाः खयः शिष्यन्ते । षत्वष्टुत्वे । **भावयतीति** । भू सत्तायाम् । **सन्वद्भाव** इति । भू अस्माण्णिचि चङि वृद्ध्यावादेशोपधाह्रस्वद्वित्वेषु कृतेषु 'सन्वल्लघुनि' इति सन्वद्भावे सतीत्यर्थः ।

ओः पु । पुयण्जकाराणां समाहारद्वन्द्वे[3] सप्तम्येकवचनं 'पुयण्जि' इति । 'द्वन्द्वाच्चुदषहान्तात्—' इति समासान्तस्त्वनित्य-त्वान्न भवति । अः परो यस्मात् पुयण्जः तदपरमिति सूत्रार्थमभिप्रेत्याह-**अभ्यासोवर्णस्येत्यादि** । **अबीभवदिति** । अत्रावर्णपरपवर्गपरोऽभ्यासः । ननु चाबीभवदित्यादौ कथमुकारान्तताभ्यासस्य यावता णौ वृद्ध्याया-देशयोः कृतयोराकारान्तेनाभ्यासेन भवितव्यमिति चेत् । मैवम् । स्थानिवद्भावादूकारान्त एवाभ्यासो भवतीत्येतत् चुरादिगणे निपुणतरं प्रत्यपादि । 'दीर्घो लघोः' इति दीर्घः । अभ्यासस्य जश्त्वम्[5] । **अयीयवदिति** । यु मिश्रणे । णिचि चङि वृद्ध्यावादेशौ । स्थानिवत्त्वात् द्वित्वमुकारान्तस्य । यकारपरोयमभ्यासः[4] । **अजीज-वदिति** । जु गतौ । जकारपरोयमभ्यासः । अरीरवत् । अलीलवदिति ज्ञेयम् । रेफलकारपरेऽभ्यासे ।

---

१. Dropped B2 ; before it—अपीपवत् D3. २. After it—यु मिश्रणे । अयीयवत् B2 ; अपीपवत् for अयीयवत् N. ३. °द्वन्द्वः Dc3. ४. परोस्ति भकारः । Dc3. ५. अभ्यासजश्त्वम् Dc1.

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥७।४।८१॥

एषामभ्यासस्योकारस्येत्वं वा स्यात् सन्यवर्णपरे[1] धात्वक्षरे परे[2] । असिस्रवत् । असुस्रवत् । इत्यादि ॥

गूहयति । अजूगुहत्[3] ।

दोषो णौ ॥६।४।९०॥

दुष्यतेरुपधाया ऊदादेशः[4] स्यात् णौ ॥ दूषयति ।

स्रवति । पूर्वसूत्रे त्वनन्तर एव यणि भवितव्यमित्यप्राप्तविभाषेयम् । स्रु गतौ । श्रु श्रवणे । द्रु गतौ । च्युङ्प्रुङ्प्लुङ् गतौ । 'पुयण्ज्यपरे' इत्यनुवर्तते । तत्रैषां धातूनामवर्णपरता यण् च संभवति । स च यण् अत्राभ्यासोवर्णात् परः सकारादिभिर्व्यवहित एव नानन्तर इति वचनसामर्थ्यादेकेन वर्णेन व्यवधिराश्रीयत इत्यभिप्रेत्याह—**अवर्णपरे धात्वक्षरे परे** इति । व्यञ्जनसहितोऽक्षरं धातोरक्षरं धात्वक्षरं तत्र । अवर्णः परः अन्तावयवो[5] यस्य तदवर्णपरम् । अवर्णान्ते धात्वक्षरे परे इत्यर्थः । **असिस्रव**दिति । पूर्ववत् प्रक्रिया । आदिशब्दात् । अशिश्रवत् । अशुश्रवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । इति ज्ञेयम् ।

गूहयतीति । गुहू संवरणे । 'ऊदुपधाया गोहः' इति ऊत् ।

दोषः । दुष वैकृत्ये ।

---

१. अवर्णे परे N. २. परे सति N. ३. P and C, D3 drop it. ४. ऊ आ° D3. ५. अन्त्योवयवः Dc3.

वा चित्तविरागे ॥६।४।९१॥

चित्तविरागेर्थे[1] दुष्यतेर्वा[2] ऊत् स्यात् णौ ॥ चित्तं दूषयति दोषयति वा ।

मितां ह्रस्वः ॥६।४।९२॥

घटादयो मित इति कृतसंज्ञानामुपधाया ह्रस्वः स्यात् णौ ॥ घटयति । व्यथयति । एवं पञ्चपञ्चाशतो रूपम् ।

वा चित्त । पूर्वेण नित्ये प्राप्ते विकल्पः । चित्तविरागश्चित्तस्याप्रीतता ।

मिताम् । **घटादय** इत्यादि । 'घटादयो मितः' इति धातुसूत्रेण कृतमित्संज्ञानामित्यर्थः[3] । **घटयति** । व्यथयतीति । घट चेष्टायाम् । व्यथ भयचलनयोः । 'अत उपधायाः' इति वृद्धिः । पश्चाद्ध्रस्वः । **एवमिति** । एवमनेन प्रकारेण प्रथ प्रख्याने इत्यादीनां ज्ञास्वनव्यतिरिक्तानां पञ्चपञ्चाशतो धातूनां रूपं ज्ञातव्यमित्यर्थः । ज्ञस्तु कथयिष्यति । स्वनं तु केचिदेव पठन्ति न सर्वे ।

घटव्यथप्रथाश्चैव पृथुमसम्रदस्खदाः ।
क्षजिदक्षिक्रपकदिक्रदिक्लदित्वादित्वराः ॥
गडिर्हेडी वटिभटी नटिश्चकिष्टकी स्तकिः ।
कखेरगेलगश्चैव हगेल्हगेटगेस्थगः ॥
कगेकागः क्रुटिकर्णी रण्चण्शण्श्रण्श्रथिक्रथः ।
क्नथिक्लथी चनुवनू ज्वलह्वलम्ह्वलस्मृदॄ ॥
नॄश्राज्ञाचल्छदल्डयो मद्ध्वनी स्वन इत्यपि ।
घटादयस्त्वमी ज्ञेया ऊनषष्टिर्हि धातवः ॥

---

१. विरागेर्थे N. २. दूषेर्वा ऊ D_3. ३. कृतमित्संज्ञाना° B_2, D_4.

जनीजृष्क्नसुरञ्जो[1]ऽमन्ताश्च । जन्यादयोऽमन्ताश्च मितो ज्ञेयाः ॥ जनयति । जरयति । क्नसयति । रञ्जेर्णौ[2] मृगरमणे रजयति मृगान् । अन्यत्र तु[3] रञ्जयति वस्त्रम् । दमयति । मारणतोषणनिशानेषु ज्ञा ॥* एष्वर्थेषु ज्ञा मित् स्यात् । [4]ज्ञपयति[5] । अन्यत्र तु[6]

केचिदत्र वेत्यनुवर्तयन्ति । सा च व्यवस्थितविभाषा । तेन संक्रामयतीत्यादि सिध्येत्[7] । मित्संज्ञाविधायकान्यन्यान्यपि धातुसूत्राणि पठति—जनीत्यादि । व्याकरोति च जन्यादय इति । जनी प्रादुर्भावे । जन जनने । उभयोरपि ग्रहणम् । जृष् वयोहानौ दिवादिर्न त्र्यादिरषित्त्वात् । क्नसु ह्वरणदीप्त्योः । रञ्ज रागे । अम् अन्ते येषां ते अमन्ताः । जनयतीत्यादिषु ह्रस्वः । जृणातेस्तु जारयत्यभ्रकम् । दमयतीति । दम दान्तौ । अमन्तोऽयम् । मारणेति । घटादिगणान्तर्गतसूत्रम् । मारणं हिंसनम् । निशानं तीक्ष्णीकरणम् । निशामनमित्येके पेठुः । निशामनमालोकनम् । ज्ञेति । ज्ञा अवबोधने । ज्ञपयतीति । पुक् । मारणे । संज्ञपयति पशुम् । तोषणे । विष्णुं विज्ञपयाम्यहम् । निशाने । प्रज्ञपयति शस्त्रम् । चुरादौ ज्ञा नियोजने । तस्य 'आज्ञापय ज्ञातविशेषपुंसाम्' इत्यादयः प्रयोगाः । आज्ञप्त इत्यादयस्तु ज्ञानाङ्गे तोषणे प्रध्वंसाभावे वा । [10]ज्ञीप्स्यत इत्यादौ

---

१. Dropped B_2. २. मृगरमणर्थे C; मृगरमणे लोपो वक्तव्यः B_2; मृगरमणे न्लोपो वक्तव्यः N, D_3, D_4. ३. Dropped N. ४. Before it—मारणं हिंसनम् B_2. ५. After it—पशुम् । पुगागमः । तोषणे । विष्णुं विज्ञपयाम्यहम् । निशानं तिक्ष्णीकरणम् । प्रज्ञपयाति शस्त्रम् । अन्यत्र तु ज्ञापयाति B_2. ६. Dropped D_3. ७. सिद्धिः Bc_3. ८. निशातनमाज्ञापनम् । Dc_3. ९. निशामने Dc_1. १०. ज्ञीप्सित Bc_2.

ज्ञापयति ॥ ज्वलह्वलह्मलनमोनुपसर्गा वा । ग्लास्नावनु[1]वमश्च ॥ ज्वलादयो ग्लादयश्च मितो वा स्युः [2]अनुपसर्गाः । ज्वलयति । ज्वालयति । ग्लपयति । ग्लापयति । स्नपयति । स्नापयति । अनुपसर्गाः किम् । प्रज्वालयति । प्रग्लापयति ॥[3] नकम्यमिचमः[4] ॥* अमन्ता अप्येते मितो न स्युः ॥ कामयति । आमयति । [5]चामयति । [6]शमोदर्शने ॥* शमोदर्शने मित्[7] स्यात् । शमयति । दर्शने तु निशामयति ॥ यमोपरिवेषणे ॥* यमयति । अन्यत्र तु यामयति ॥ स्खदिरवपरिभ्याम् ॥* अवस्खदयति । परिस्खदयति ।[8] [9]सोपसर्गात् स्खदेः फणश्च मित्वं वेति केचित् । [10]प्रस्खदयति । प्रस्खादयति । [11]फणयति । फाणयति ।

'प्रच्छ ज्ञीप्सायाम्' इति ज्ञापकात् ह्रस्वः । ज्वलेति । ज्वल दीप्तौ । ह्वलह्मल चलने । णमु प्रह्वीभावे । एतेषां नित्यमित्वं प्राप्तमनुपसर्गाणां विकल्प्यते । अत्र क्षीरस्वामी चलिमपि पठति । आचार्यस्तु दुर्गादिभिरत्रापठितत्वान्न पठितः । अतस्तदीयान्येवात्र[12] सूत्राणि पेठुः । ग्लास्नेति । ग्लै हर्षक्षये । ष्णा शौचे । एतयोरप्राप्तम् । वनु संभक्तौ । टु वमु उद्गिरणे । एतयोः प्राप्तम् । न कम्यमीति । कमु कान्तौ । अम गतौ । चमु अदने । शम इति । शमु उपशमे इत्यस्य दर्शनादन्यत्र मित्संज्ञा । यम इति । यमु उपरमे । स्खदिरिति । स्खद खेदने । सोपसर्गेति । तथोक्तं मुग्धबोधे । 'वा शमयमफणागिस्खदाम्' इति ।

---

१. °वन° D_1, B_2. २. अनुपसर्गाश्चेत् B_2, D_3, D_4; अनुपसर्गे N. ३. After it–विग्लापयति ; dropped D_3, D_4, B_2. ४. °चमाम् P. ५. वामयति P. ६. शमो दर्शनेमित् । शमयति । D_3. ७. मित्संज्ञः N_1 ८. Dropped B_2. ९. After this P and D_2, D_4, B_2 have–अन्यस्मात्तु प्रस्खादयति ; N has अन्यस्मात्तु only after it. १०. D_2 has प्रस्कदयति । प्रस्कादयति । फणयति । फाणयति ; C has—अन्यस्मात्तु प्रस्खायति । फण गतौ । फणयति । अन्यमते तु फाणयति ; P has प्रस्खदयति । फण गतौ । फणयति । अन्यमते तु फाणयति. ११. फण गतौ । फणयति । अन्यत्र तु फाणयति । N_1. १२. अत्र dropped Dc_1.

णौ गमिरबोधने ॥२।४।४६॥

इणो गमिः स्यात् णौ । गमयति । बोधने तु प्रत्याययति । इण्वदिक् । अधिगमयति ॥

हनस्तोऽचिण्णलोः ॥७।३।३२॥

हन्तेस्तकारोन्तादेशः स्यात् चिण्णल्वर्जे[१] ञ्णिति ॥ हो हन्तेरिति कुत्वम् । घातयति । ईर्ष्ययति । ईर्ष्यतेस्तृतीयस्य द्वे ॥[२]* तृतीयव्यञ्जनस्यैकाचो वा[३] । ऐर्षिष्यत्[४] । ऐर्ष्ययत्[५] ।

इति ण्यन्तप्रक्रिया ।

णौ गमि । इण गतौ । **प्रत्याययतीति** । णिच् । वृद्धयायादेशौ । बोधयतीत्यर्थः । **इण्वदिति** । इक् स्मरणे ।

हनः । हन हिंसागत्योः । **घातयतीति** । 'अत उपधायाः' इति वृद्धिः । अचिण्णलोरिति किम् । अघानि । जघान । अथेह कस्मान्न । वृत्रं हतवान् । 'ब्रह्मभ्रूण—' इति क्विप् । तदन्तात् 'तस्येदम्' इत्यण् । 'ष पूर्व—' इत्यल्लोपः । वार्त्रघ्न इत्युच्यते । धातोः कार्यमुच्यमानं धातुप्रत्यय एव भवति तेनात्र न भवति । एतच्च भ्रौणहत्येति निपातेन ज्ञापितम् । **ईर्ष्ययतीति** । ईर्ष्य ईर्ष्ये । ईर्ष्यतेरिति वक्तव्यम् । तत्र कस्य तृतीयस्येत्याशङ्कायां केचिदाहुर्व्यञ्जनस्येति । अन्ये तु तृतीयस्यैकाच इति । तदुभयमाह—**तृतीयेति** । व्यञ्जनापेक्षया तृतीयव्यञ्जनस्य यकारस्य । अथवा तृतीयस्यैकाचः षकारस्येत्यर्थः ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेस्मिन् प्रसादे निरगमदमला **प्रक्रिया ण्यन्तसंज्ञा** ॥

---

१. वर्जे N. २. C, N1 and D2 drop it. ३. °स्तृतीयस्य द्वितीयस्य व्यञ्जनस्य एकाचो वा C ; °द्वितीयस्य द्वे । द्वितीयस्य व्यञ्जनस्यैकाचो वा P. ४. After it–द्वे स्तः B2 ; द्वे स्तो वा N. ५. D2 has ईर्ष्ये ईर्ष्यायाम् before it.

अथ सन्नन्ताः ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥३।१।७॥

इषिकर्मणो धातोरिषिणैककर्तृकात् सन्प्रत्ययो वा स्यादिच्छायाम् ॥ लुङ्सनोर्घस्लृ । [1]द्वित्वम् । सन्यतः । धातो-र्विधेरिहार्धधातुकत्वम् । एकाच उपदेश इति नेट् ।[2] धातुत्वाल्लडा-दयः । सस्य तत्त्वम् । अत्तुमिच्छति[3] जिघत्सति । अतो लोपः ।

धातोः कर्मणः । इषिकर्मण इत्यादि । इषेः कर्म इषिकर्म । एकः कर्ता यस्य स एककर्तृकः । य एव कर्ता इषेः स एव कर्ता यस्य तस्मात् सन्प्रत्ययो वा स्यादिच्छायामर्थ इत्यर्थः । कर्मत्वं समानकर्तृत्वं च धातोरर्थद्वारकम् । द्वित्वमिति । 'सन्यङोः' इति । धातुत्वाल्लडादय इति । 'सनाद्यन्ता धातवः' इति धातुत्वादित्यर्थः । सस्य तत्वमिति । 'सः स्यार्धधातुके' इति । जिघत्सतीति । अत्र भक्षणस्यार्थस्येच्छया व्याप्यमानत्वात् कर्मत्वम् । तद्द्वारादिरिषेः कर्म । तथा अदेः समानकर्तृत्वं चेषिणा । य एव कर्ता इषेरर्थस्य स एवाद्यर्थस्येत्यर्थद्वारेण । धातोरिति किम् । उपसर्गादुत्पत्तिर्मा भूत् । प्रकर्तुमैच्छत् प्राचिकीर्षत् । यदि धातोरिति नोच्येत तदा प्रकर्तुमित्यस्य संघातस्येषिकर्मत्वात् सोपसर्गादुत्पत्तिः स्यात् ततश्च प्र इत्यस्य द्वित्वं स्यात् । अट् च प्रशब्दात् पूर्वः स्यात् । कर्मण इति किम् । करणान्मा भूत् । गमनेनेच्छति । समानकर्तृकादिति किम् । देवदत्तस्य भोजनमिच्छति । इच्छायामिति किम् । कर्तुं जानाति । ननु चात्रेच्छा इषिकर्मत्वमिषिसमानकर्तृत्वमपि नास्ति

---

१. सन्यङोरिति द्वित्वम् B_2. २. D_1 has पक्षे वाक्यमपि before धातु°
३. P and C, N_1 have—उक्तार्थानामप्रयोगः before जिघत्सति ।

अजिघत्सीत् । पक्षे वाक्यमपि ।[1]

दीङः सन्यात्वं वेति केचित् । दिदासते ।[2] दिदीषते । द्युतिस्वाप्योः संप्रसारणम् ।

रलो व्युपधाद्धलादेः संश्च ॥१।२।२६॥

उश्च इश्च वी । उइवर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः ॥ दिद्युतिषते । दिद्योतिषते ।[3]

इत्यनेकाङ्गविकलता । नैवम् । सति हीच्छाग्रहणे इषिकर्मत्वमिषिसमानकर्तृकत्वं च लभ्यते । असति तु तस्मिन् यां कांचन क्रियां प्रति धातोः कर्मत्वं समानकर्तृकत्वं चेति युक्तम् । जिघत्सेत् । जिघत्सतु । अजिघत्सत् । अजिघत्सीदिति । लुङ् । सिच् । इट् । ईट् । सलोपः । अडागमः । जिघत्सामास । जिघत्सिता ॥ जिघत्स्यात् । जिघत्सिष्यति । अजिघत्सिष्यत् । इति रूपाणि सन्नन्ते ज्ञेयानि सर्वत्र । **पक्षे वाक्यमपीति** । वावचनादित्यर्थः ।

दीङ इति । दीङ् क्षये । तथोक्तं **मुग्धबोधे** । 'दीङष्ट्यां यन् यब् णौ ङा सनि तु वा' इति । **दिदासत** इति । 'पूर्ववत् सनः' इत्यात्मनेपदम् । **दिदीषते** इति । 'इको झल्' इति कित्त्वान्न गुणः । **द्युतिस्वाप्योः संप्रसारणमिति** । द्युत दीप्तौ । अस्मात् द्योतितुमिच्छतीत्येतस्मिन्नर्थे सन् । द्वित्वम् । पश्चादभ्यासस्य संप्रसारणमित्यर्थः । 'आर्धधातुकस्य' इतीट् ।

रलः । क्त्वाप्रत्ययस्य 'न क्त्वा सेट्—' इति कित्त्वे प्रतिषिद्धे सनोप्यकित्त्वे स्वभावत एव व्यवस्थिते उभयत्रेदं विधिमुखेनैव प्रवर्तते । पक्षे कित्त्वं भवतीति । **दिद्युतिषते** इति । 'क्ङिति च' इति गुणप्रतिषेधः । 'पूर्ववत् सनः' इत्यात्मनेपदम् ।

---

१. D1 drops पक्षे.. मपि. २. After it—अदिदासिष्ट B2. ३. वि: D1.

उच्छेस्तुकि द्वित्वे च कृते खर्पूर्वाः खयः शिष्यन्त इति वक्तव्यम् । इति तलोपः । चर्त्वम् । अभ्यासचर्त्वस्य तुकं प्रति सिद्धत्वात् [१]छे चेति न तुक् । उचिच्छिषति । तलोपो [२]वेत्येके । उतिच्छिषति ।

ण्यन्तात् सन् । णौ च संश्चङोरिति [३]गाङ् वा । [४]अधिजिगापयिषति । अध्यापिपयिषति । [५]णौ संश्चङोरिति वा संप्रसारणम् । [६]शुशावयिषति । शिश्वाययिषति । [७]अण्यन्तस्य तु

उच्छेरिति । उछ बन्धनसमापनवर्जनातिक्रमेषु । अस्मात् सनि कृते 'छे च' इति तुकि च इटि च 'सन्यङोः' इत्यजादित्वाद् द्वितीयस्य तकारसहितस्य छकारस्येट्सहितस्य द्वित्वे कृते इत्यर्थः । चर्त्वमिति 'अभ्यासे चर्च' इति चकारः । पूर्वत्रासिद्धन्यायेन पुनस्तुकि प्राप्ते आह—अभ्यासचर्त्वस्येति । अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वाच्ये इति वचनात् सिद्धत्वादित्यभिप्रायः । तलोप इति । तथोक्तं रामव्याकरणे ।

उचिच्छिषति चर्छोर्द्विरुतिच्छिषति तच्छयोः ।
द्विर्भावं शर्ववर्माह छस्य (?) च्छे पाणिनिस्तुकम् ॥ इति ।

ण्यन्तात् सन्निति । इङ् अध्ययने । अस्माद्धेतुमण्णिजन्तात् सन्नित्यर्थः । अध्यापिपयिषतीति । गाङभावे 'क्रीङ्जि—' इत्यात्वम् । 'अजादेर्द्वितीयस्य' इति एकाचः पीत्येतस्यावयवस्य द्वित्वम् । शुशावयिषतीति । टुओश्वि गतिवृद्ध्योः । हेतुमण्णिच् । सन् । संप्रसारणम् । वृद्ध्यावादेशौ । शु इत्यस्य द्वित्वम् । सन इट् । गुणः । अय् । षत्वम् । शिश्वाययिषतीति । णिच् सन् वृद्ध्यायादेशौ । द्वित्वम् । इत्वम् । सन इट् । गुणः । अय् । षत्वम् ।

---

१. न छे चेति तुक् D_1. २. वेति केचित् P. ३. वा गाङ् D_1. ४. इङ् अध्ययेन before अधिजिगापयिषति in D_1. ५. C drops णौ...°रणम्; णौ च सन्निति वा सं° D_3, D_4. ६. D_1 and D_2, D_3, D_4 have—शिश्वाययिषति । शुशावयिषति. ७. D_2, D_3 drop अण्य°...°यिषति. ८. च कृते Bc_2.

शिश्वयिषति । ह्वः संप्रसारणम् । जुहावयिषति । जुहोतेरप्येवं रूपम् ।

उभौ साभ्यासस्य ॥८।४।२१॥

अनितेः साभ्यासस्य उभौ नकारौ णत्वं प्राप्नुतः निमित्ते सति ॥ प्राणिणिषति । पेराणिणत् । न वृद्भ्यश्चतुर्भ्यः ।

हलन्ताच्च ॥१।२।१०॥

इक्समीपाद्धलः परो झलादिः सन् कित् स्यात् ॥

जुहावयिषतीति । ह्वेञ् स्पर्धायां शब्दे च । णिच् । सन् । संप्रसारणम् । शेषमनन्तरवत् ।

उभौ । अन प्राणने । **निमित्ते सतीति** । उपसर्गस्थे निमित्ते सतीत्यर्थः । **प्राणिणिषतीति** । अनितेः सन् । इट् । 'अजादेः—' इति नीत्यस्य द्वित्वम् । **पराणिणदिति** । णिच् । चङ् । पूर्वत्रासिद्धीयमद्वित्वे इत्येतस्मिन् सति 'अनितेः' इत्यनेनैव कृतणत्वस्य द्वित्वे सिद्धमेतत् सूत्रं विनापि । तथापि पूर्वत्रासिद्धीयमिति वचनस्य नित्यत्वे चिक्लृप्सतीत्यत्र कृतलत्वस्य द्वित्वं प्राप्नोति तन्नाश्रयितव्यमित्येतस्य वचनस्यानित्यत्वज्ञापनार्थमिदं सूत्रमारभ्यते ।

हलन्ताच्च । यदीहान्तशब्दोवयववाची स्यादिको हला सह संबन्धो न स्यात् । न हीको हलवयवः संभवतीति । तस्मान्नायमन्तशब्दोवयववाची अपि तु समीपवाच्येव युक्त इति मत्वाह—

---

१. अभ्यन्तस्य तु जुहूषति for जुहोते…रूपम् B_2, D_4; dropped from जुहो…रूपम् D_3. २. C has प्राणिणिषति for पराणिणत्. ३. °श्चतुर्भ्य इति नेद् B_2.

विवृत्सति। ताङि तु विवर्तिषते। सेसिचीति वेट्। निनृत्सति। निनर्तिषति।

इट् सनि वा ॥७।२।४१॥

वृङ्वृञ्भ्यामृदन्ताच्च परस्य सन इड् वा स्यात् ॥

इको झल् ॥१।२।९॥

इगन्ताज्झलादिः सन् कित् स्यात् ॥ ऋत इद्धातोः।

इक्समीपादिति । **विवृत्सतीति** । वृतु वर्तने । सन्। 'वृद्भ्यः स्यसनोः' इति परस्मैपदम्। ततः 'न वृद्भ्यः' इतीट् न। ततः कित्त्वम्। ततो गुणनिषेधः। इत्वम्। 'उरत्' इत्वम्। ताङि त्विति। यदा तु 'वृद्भ्यः स्यसनोः' इति परस्मैपदं न तदा 'न वृद्भ्यः--' इति निषेधोपि न। आत्मनेपदत्वात्। यदेट् तदा कित्त्वमपि न। अझलादित्वात्। अतो विवर्तिषते इत्यत्र गुणो भवतीति भावः। **निनृत्सतीति**। नृती गात्रविक्षेपे। कित्त्वम्। उरत्। इत्वम्। **निनर्तिषतीति**। इट्पक्षे अकित्त्वाद्गुणः।

इट्। वृङ् संभक्तौ। वृञ् आवरणे।

इकः। सन्ग्रहणं प्रथमान्तमिहानुवर्तते। तस्य च 'झल्' इत्यनेन सामानाधिकरण्यमनुपपन्नम्। अतः सामर्थ्यात् तदादिविधिर्विज्ञायत इत्यभिप्रेत्याह—**झलादिः सन्निति**। इगिति प्रत्याहारः। न इक् स्मरणे इति धातुः। झलिति प्रत्याहारेण साहचर्यात्। अन्यथेको धातोः परो हल् न संभवतीति हलन्ताच्चेत्यघटमानं स्यात्। नंनु किमर्थमिदं कित्त्वम्। गुणनिषेधार्थमिति चेत्तन्न। यतः 'अज्झनगमां सनि' इति दीर्घत्वमनवकाशं सद्गुणस्य बाधकं भविष्यतीति चेन्मैवम्। यदि कित्त्वं नोच्येत कृते दीर्घे गुणः स्यात्। तदपि न।

---

१. ननु च Dc1, Dc3, Dc4. २ दीर्घत्वे Dc3.

यदि कृतेपि दीर्घे गुणः स्यात् दीर्घशास्त्रमनर्थकं स्यात् । ननु चिचीषती-त्येवमादौ ह्रस्वानां कृतस्य दीर्घत्वस्य श्रवणं यथा स्यादित्येवमर्थं ततो नानर्थकं दीर्घत्वम् । दीर्घाणां तु गुणः स्यादेव । न हि तेषां दीर्घत्वमुच्यते । यतो दीर्घवचनसामर्थ्याद् गुणो न स्यात् । ततश्च तितीर्षतीति न सिध्येत् । नैतदस्ति । यथैव हि भुक्तवद्भिरपि भोजनविशेषात् पुनरपि भुज्यते तथा दीर्घाणामपि प्रयोजनत्वविशेषाद् गुणप्रतिषेधाद् दीर्घत्वं स्यात् । यथैव तर्हि दीर्घवचनसामर्थ्याद् गुणो न एवम् 'ॠतः–' इतीत्वमपि चिकीर्षतीत्यादौ न स्यात् । न । ऋदित्वं हि ह्रस्वानां दीर्घसंश्रयमिति न बाध्यते । तथोक्तम् । यं विधिं प्रत्युपदेशोनर्थकः स विधिर्बाध्यते । यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । दीर्घाणामपि नाकृते दीर्घत्वे इत्वं स्यात् । गुणादि-बाधात् । तस्मात् ज्ञीप्सतीत्यत्र णिलोपः प्रयोजनं कित्त्वस्य । यथा हि गुणं बाधते दीर्घत्वं तथा णिलोपमपि बाधेत ज्ञीप्सतीत्यत्र । तस्मात् दीर्घत्वेन णिलोपस्य बाधो मा भूत् । गुणस्यैवेति गुणबाधार्थं कित्त्वम् । अतश्चिचीषतीत्यादिषु सावकाशं दीर्घत्वं परत्वाण्णिलोपेन बाध्यते । तथोक्तं वार्तिककृता ।

'इकः कित्त्वं गुणो मा भूद् दीर्घारम्भात् कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम्' ॥ इति ।

१. ह्रस्वार्थानां Dc3. २. कृतदीर्घ° Bc2. ३. ऋदित्वमपि Dc1, Dc3. ४. °त्यादौ Bc2. ५. वार्तिके Bc2.

तितीर्षति । तितरिषति । तितरीषति ।

अज्झनगमां सनि ॥६।४।१६॥

अजन्तानां हन्तेरिङादेशगमेश्च दीर्घः स्यात् सनि ॥ 'उदोष्ठ्यपूर्वस्य' । बुवूर्षति । विवरिषति । विवरीषति ।

'ऋतश्च संयोगादेः' इत्यत्र सनि इति पदमनुवर्त्य ऋदन्तात् संयोगादेः स्कृङजात् सन इड्वेति केचित् ॥ स्कृवजात्

तितीर्षतीति । तॄ प्लवनतरणयोः । सन् । यदेट् न तदा कित्त्वं गुणाभावः । 'ऋतः—' इतीत्वम् । रपरः । द्वित्वम् । 'हलि च' इति दीर्घः । 'इण्कोः' इति षत्वम् । तितरिषति । तितरीषतीति । इट्पक्षे कित्त्वाभावाद् गुणः । 'सन्यतः' इतीत्वम् । 'वॄतो वा' इतीटो वा दीर्घः ।

अज्झन । इहाज्ग्रहणं न कार्यम् । 'सनि' इत्येतावदेव सूत्रं कार्यम् । 'हनिगम्योः' इति द्वितीयम् । तत्राचश्चेति परिभाषया सनीत्यत्राजन्तस्यैव दीर्घः स्यात् । तदज्ग्रहणं क्रियते प्रवृत्तिभेदेन गमेरपि विशेषणार्थम् । अजन्तस्य दीर्घः इङादेशगमेश्च दीर्घ इत्यभिप्रेत्याह—अजन्तानामित्यादि । बुवूर्षतीत्यादि । वृञ् आवरणे । सन् । 'इट् सनि वा' इतीडभावे रूपम् । दीर्घः । उत्वम् । रपरः । द्वित्वम् । 'हलि च' इति दीर्घः । इट्पक्षे वेटो दीर्घः ।

'ऋतश्च' इत्यादि । एतदेवाभिप्रेत्योक्तं मुग्धबोधे । 'स्याद्वृदृ-

------

१. P, D3, and C drop it. २. °देशस्य D4. ३. सार्वे सनि D3. ४. विवरीषति । विवरिषति N. ५. From 'ऋतश्च'...to अनुवर्त्य dropped C. ६. C So C; others सुङ्वर्जात् । ७. C; So others सुङ्वर्जात्; before it—धृ प्राणने । दिधरिषति । दुधूर्षति B1. ८. नास्ति Dc1, Dc3. ९. इति वेटो दीर्घः Bc2, Dc3. १०. °तीति Bc2. ११. वरणे Bc2.

किम्[1] । संचिस्कीर्षति । दुधूर्षति । दिध्वरिषति ॥

सन्लिटोर्जेः ॥७।३।५७॥

जिगीषति ।[2] 'विभाषा चेः' । चिकीषति । चिचीषति[3] । कुत्वम् । जिघांसति ।

सनि च ॥२।४।४७॥

सनि[4] परे इणो गमिः स्यान्न तु बोधने । जिगमिषति । बोधने तु शपोकारेण सिद्धेपि सन्यङोरकारोच्चारणमजादेरिति

हुरस्कुर्वेम् सन् मढी सेः' । इति । **संचिस्कीर्षतीति** । डुकृञ् करणे । सन् । 'अज्झन--' इति दीर्घः । ननु चात्र दीर्घतायाम् 'इट् सनि वा' इतीट् कस्मान्नेति चेत् तत्रोपदेशाधिकाराल्लाक्षणिकत्वाच्च न । ऋत इत् । रपरः । द्वित्वम् । चुत्वम् । 'संपरि—' इत्यभ्यास-व्यवायेपि सुट् । स्कृ अयामितीट् न । 'हलि च' इति दीर्घः । **दुधूर्षति** । **दिध्वरिषतीति** । ध्वृ कौटिल्ये । सन् । मतान्तरे संयोगादित्वाद्वेट् । यदेट् न तदा कित्त्वम् । दीर्घः । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । रपरः । द्वित्वम् । दीर्घः । यदेट् तदा गुणः । इत्वम् ।

जिगीषतीति । जि जये । एकाच इति नेट् । दीर्घः । **कुत्वम्** । **चिकीषतीति** । चिञ् चयने । **कुत्वमिति** । **अभ्यासाच्चेति** । **जिघांसतीति** । हन हिंसागत्योः । दीर्घः । इत्वम् । चुत्वम् । अनुस्वारः ।

सनि । **जिगमिषतीति** । इण् गतौ । 'गमेरिट् परस्मैपदेषु' इतीट् । **प्रतीषिषतीत्यत्र** सनो द्वित्वप्राप्तिमाह—**शपोकारेणेति** । अयं भावः । सन्यङोरकारोच्चारणं व्यर्थम् । यतः सार्वधातुके शपोकारेण सिध्यति । आर्धधातुके तु अतो लोपेन भवितव्यम् ।

---

१. इति किम् D_2, D_4. २. After it—सन् लिटोरिति किम् । जेजीयते । C, P, N. ३. चिर्चीषति । चिकीषति । D_4. ४. सनि च परे N_1, D_3, D_4.

द्वित्वार्थम् । तेन सनो द्वित्वम् । अभ्यासस्य इत्वम् । प्रतीषिषति । ईण्वदिक्[1] । अधिजिगमिषति ।

इङश्च ॥२।४।४८॥

इङो गमिः स्यात् सनि ॥ अधिजिगांसते । ईर्ष्यतेः[2] सनि यसनोर्वा द्वित्वम् । ईर्ष्यियिषति । ईर्ष्यिषिषति ।

सनि ग्रहगुहोश्च ॥७।२।१२॥

ग्रहेर्गुहेरुगन्ताच्च सन इट् न स्यात् ॥ बुभूषति ।

मैवम् । ' अजादेर्द्वितीयस्य ' इति प्रतीषिषति अटाट्यत इत्यादौ द्वितीयस्य साच्कस्य सकारस्य यकारस्य च द्वित्वार्थमित्यर्थः । तथोक्तं **न्यासे** प्रतीषिषतीत्यत्र प्रतिपूर्वादिणः सनि विहिते यद्यकारोपदेशो न स्यात् ' अजादेर्द्वितीयस्य ' इति द्वितीयस्यैकाचो विधीयमानं सें इत्यस्य न स्यात् । अनच्कत्वात् सनः । अकारोपदेशे तु सति स इत्यस्य[4] द्वितीयस्यैकाच्त्वाद् भवति द्विर्वचनं तदर्थमकारोपदेश इति । **तेन सनो द्वित्वमिति** । ' सन्यङोः ' इति । **अभ्यासस्येति** । ' सन्यतः ' इत्यनेन । **प्रतीषिषतीति** । उपसर्गेकारस्य धातुना सह अकः सवर्णे[6] दीर्घः ।

इङः । **अधिजिगांसत** इति । इङ् अध्ययने । ' अज्झनगम—' इति दीर्घः । ' नश्चापदान्त—' इत्यनुस्वारः । ' पूर्ववत् सनः ' इति तङ् । **ईर्ष्यतेरिति** । ईर्ष्य ईर्ष्ये ।

सनि[3] । ' श्रिस्वृयूर्णु—' इति विकल्पविधानात् श्रयतिर्नानुवर्तते । उगेवानुवर्तत इत्यभिप्रेत्याह—**उगन्ताच्चेति** । **बुभूषतीति** । भू सत्तायाम् । ऊदन्तत्वादिटि प्राप्ते उगन्तत्वान्निषेधः । ' इको झल्—'

---

१. इण्वदिकः D_2. २. C drops ईर्ष्यतेः ·· ईर्ष्यिषिषति. ३. D_1 drops सनि. ४. सन इत्यस्य Dc_1. ५. Dropped Bc_2. ६. सवर्ण Bc_2.

जुहूषति । अत्रादेशादूदन्तत्वेपि नेट् । चिकीर्षति । जुघुक्षति ।

रुद्विद्मुषग्रहिस्वपिप्रच्छः संश्च ॥१।२।८॥

एभ्यः संश्च क्त्वा च कितौ स्तः ॥ ग्रहिज्येया । सनः षत्वस्यासिद्धत्वात् भष्भावः । जिघृक्षति । वचिस्वपीत्युत्वम् । सुषुप्सति ।

इति कित्त्वान्न गुणः । जुहूषतीति । हु दानादानयोः । ननु चात्र 'एकाच उपदेशे—' इत्यनेनैवेटो निषेधात् तस्योदाहरणमिदं नोपपद्यत इत्याशङ्क्यात्र 'अज्झन—' इति कृते दीर्घे ऊदन्तत्वेनोदात्तत्वादिडत्र स्यादिति कस्यचिद् भ्रान्तिः स्यात् तन्निरासार्थमेतदुदाहृतमित्यभिप्रेत्याह—अत्रादेशादिति । चिकीर्षतीति । डुकृञ् करणे । दीर्घः । इत्वम् । जुघुक्षतीति । गुहू संवरणे । ऊदित्त्वाद्विकल्पेनेटि प्राप्ते निषेधः । 'हो ढः' । 'षढोः कः सि' । षत्वम् । 'एकाचः—' इति भष्भावः । कषयोगे क्षः ।

रुद । रुदिर् अश्रुविमोचने । विद ज्ञाने । मुषस्तेये । ग्रह उपादाने । ञिष्वप शये । प्रच्छ ज्ञीप्सायाम् । आद्यानां त्रयाणां 'रल—' इति विकल्पे प्राप्ते नित्यार्थं वचनम् । ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छ्योः सन्नर्थम् । किदेव हि क्त्वा । जिघृक्षतीति । ग्रह । ढत्वादि पूर्ववत् । सुषुप्सतीति । ञिष्वप । 'एकाच—' इतीट्निषेधः ।

---

१. Before it C has—भावकर्मणि यकि । अतो लोपः । वृद्धिदीर्घाभ्यामतो लोपः पूर्वविप्रतिषेधेन । बुभूष्यते ।; N_1 has the same, but has भावे कर्मणि and वृद्धिदीर्घाभ्यां पूर्वविप्रतिषेधेन । बुभूष्यते । अबुभूष्यत । २. 'ज्येति संप्रसारणम् P.

स्मिपूङ्रञ्ज्वशां सनि ॥७।२।७४॥

स्मिङ् पूङ् ऋ अञ्जू[१] अशू[२] एभ्यः सन इट् स्यात् ॥ सिस्मयिषते । पिपविषते । अरिरिषति । अञ्जिजिषति । अशिशिषते ।

किरश्च पञ्चभ्यः ॥७।२।७५॥

कॄ गॄ दॄ धॄ प्रच्छ एभ्यः सन इट् स्यात् ॥ चिकरिषति ।

स्मिपूङ् । स्मिङ् ईषद्धसने । पूङ् पवने । ङकारः पूञो निवृत्त्यर्थः । ऋ गतिप्रापणयोः । ऋ गताविति द्वयोरपि ग्रहणम् । ऋकारान्तां तु ग्रहणं न । किरतीत्यादीनामिटो विधानात् । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु । अशूङ् व्याप्तौ । अश भोजने इत्यस्य ग्रहणं न भवति । उदात्तत्वादेवेटः सिद्धत्वात् । अत्राञ्जेरशेश्चोदित्त्वाद्विकल्पे प्राप्ते स्मिङोऽप्राप्ते शेषयोरुगन्तत्वान्निषेधे प्राप्ते वचनम् । सिस्मयिषते इति । 'पूर्ववत् सनः' इत्यात्मनेपदम् । 'स्तौतिण्योः' इति नियमान्न षत्वम् । पिपविषत इति । 'ओः पुयण्—' इत्यभ्यासस्येत्वम् । अरिरिषतीति । इटि गुणे रपरत्वे च कृते 'अजादेः—' इति रि[४] इत्येतस्य द्वित्वम् । न चात्र 'द्विर्वचनेचि' इति स्थानिवत्त्वं प्राप्नोति यतो द्विर्वचननिमित्तेचीत्युच्यते । न चात्र द्विर्वचनस्य निमित्तमिट् । किं तर्हि । कार्यी । न च कार्यी निमित्तत्वेनाश्रीयते । तथा हि क्ङिन्निमित्तयोर्गुणवृद्ध्योर्निषेधो विधीयमानः शायितेत्यत्र न भवति ।

किरश्च । कॄ विक्षेपे । गॄ निगरणे । दृङ् अनादरे । धृङ् अवस्थाने[५] । प्रच्छ ज्ञीप्सायाम् । आद्ययोः 'इट् सनि वा' इति विकल्पे प्राप्ते मध्ययोरुगन्तत्वादिण्निषेधे प्राप्ते[६] अन्त्यस्य त्वनिट्त्वादप्राप्ते इदं वचनम् ।

---

१. स्मिङ् D1, C, N1. २. अञ्ज D1; अञ्ज् N1, D3. ३. अश D2. ४. रि रिकारस्य Dc3. ५. अनवस्थाने Dc3. ६. Bc2; So; others om.

जिगरिषति । अत्र इटो दीर्घत्वं[1] नेष्टम् । दिदरिषते[2] । दिधरिषते[3] ।
पिपृच्छिषति ।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्
॥७।२।४९॥

इवन्तेभ्यः ऋधादिभ्यश्च सन इड् वा स्यात् ॥

च्छ्वोः शूडनुनासिके च ॥६।४।१९॥

सतुक्कस्य छस्य वस्य च क्रमात् श ऊठ् इत्येतावादेशौ[4] स्तः

पिपृच्छिषतीति । 'रुदविद—' इति कित्त्वम् । 'ग्रहिज्या—' इति संप्रसारणम् । 'छे च' इति तुक् । 'उरत्' इत्यत्त्वम् । 'सन्यतः' इतीत्त्वम् ।

सनीवन्त । इवन्ता दिविसिवीत्यादयः । ऋधु वृद्धौ । भ्रस्जो पाके । दम्भु दम्भे । श्रिञ् सेवायाम् । स्वृ शब्दोपतापयोः । यु मिश्रणे । ऊर्णुञ् आच्छादने । भृञ् भरणे । भौवादिः । शपा निर्देशात् । मारणतोषणनिशामनेषु ज्ञा ण्यन्तश्चौरादिको ज्ञपिश्च । षण भक्तौ । षणु दाने । द्वयोरपि ग्रहणम् । विशेषाग्रहात् । अत्र भ्रस्जोनुदात्तत्वात् स्वृऊर्णुभृञां चोगन्तत्वात् प्रतिषेधे प्राप्ते शेषाणामुदात्तत्वात् सनि नित्यमिटि प्राप्ते विकल्पार्थोयमारम्भः ।

च्छ्वोः शूड् । यदि केवलस्य छस्य ग्रहणं क्रियते तदा प्रच्छ ज्ञीप्सायामित्यस्य क्तप्रत्यये कृतेन्तरङ्गत्वात् पूर्वं 'छे च' इति तुकि छमात्रस्य शकारे पृतृष्ट इत्यनिष्टं रूपं स्यात् । सतुक्कस्य तु शादेशे क्रियमाणे त्वेष दोषो नास्तीत्यालोच्याह—**सतुक्कस्येति** । एतच्च 'ननौ पृष्टप्रतिवचने' इत्यतो निर्देशादवसीयते । तुग्विरहितस्य ग्रहणे-

१. न दीर्घत्वम् C. २. ददरिषति C, D3. ३. दिधरिषति D3. ४. इति dropped N1, D3, D4.

अनुनासिके क्वौ झलादौ [1]क्ङिति च ॥ द्वित्वम् । दुद्यूषति । दिदेविषति । सुस्यूषति । स्तौतिण्योरिति नियमात् न षत्वम् । सिसेविषति । अर्दिधिषति ।

आप्ज्ञप्यृधामीत् ॥७।४।५५॥

एषामच ईत् स्यात् सादौ सनि ॥[2]

अत्र लोपोभ्यासस्य ॥७।४।५८॥

सनि मीमेत्यारभ्य यदुक्तं तत्राभ्यासलोपः स्यात् ।

भिमते पुत्र इति निर्देशमकरिष्यत् । द्वित्वमिति । दिवः सनि 'हलन्ताच्च' इति कित्त्वे ऊठ् यणादेशः । ततः 'सन्यङोः' इति द्वित्वमित्यर्थः । हलादिः शेषः । ह्रस्वः । स्तौतीति । अग्रे कथयिष्यमाणे 'स्तौतिण्योः' इति सूत्रे अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सनि नान्यस्येति नियमात् षत्वं न भवतीत्यर्थः । अर्दिधिषतीति । ऋध । 'पुगन्त–' इति गुणे कृते धीत्यस्य द्वित्वम् । रेफस्य 'नन्द्राः—' इति निषेधात् द्वित्वं न । 'अभ्यासे चर्च' इति जश्त्वं दकारः ।

आप्ज्ञप् । आप्लृ व्याप्तौ । अन्यात्रनन्तर्गोक्तौ । नकारो मुखसुखार्थः ।

अत्र लोपः । अत्रग्रहणं विषयावधारणार्थमित्यभिप्रेत्याह–**सनिमीमेति** । केचित् सर्वस्याभ्यासस्य लोपो यथा स्यादित्येवमर्थमत्रग्रहणं वर्णयन्ति । विषयावधारणपक्षे तु नानर्थकेलोन्त्यविधिरिति सर्वाभ्यासलोपः । अनभ्यासविकारेष्विति तु निषेधो न । लोपस्या-

१. च क्ङिति B2, D3, D4. २. Dropped N1. ३. C, B2, N1, D4 have रपरत्वम् after it. ४. तत्राभ्यासस्य D2, D3, B2. ५. अत्र । Bc2, Dc3. ६ प्रतिषेधो न Dc3.

रपरत्वम् । चर्त्वम् । [1]ईर्त्सति । बिभ्रज्जिषति । बिभर्ज्जिषति । बिभ्रक्षति । बिभर्क्षति । दिदंभिषति ।

दम्भ इच्च ॥७।४।५६॥

दम्भेरच इदादेशः स्यात् ईच्च सकारादौ सनि ॥

विकारत्वात् । ईर्त्सतीति । ईत्त्वे कृते 'अजादेर्द्वितीयस्य' इति द्वित्वम् । **बिभ्रज्जिषतीति** । द्वित्वम् । 'सन्यतः' इतीत्वम् । 'झलां जश् झशि' इति सकारस्य दकारः । 'स्तोश्चुना श्चुः' इति दकारस्य जकारः । **बिभर्क्षतीति** । 'भ्रस्जो रोपध–' इति अकारात् परो रम् रेफस्य सकारस्य च निवृत्तिः । 'व्रश्च–' इति षः । 'षढोः कः सि' इति कः । 'इण्कोः–' इति षत्वम् ।

दम्भः । 'हलन्ताच्च' इति दम्भेः परस्य सनः कित्त्वमित्यन्वयः । ननु च दम्भेः परस्य सनः इक्समीपाद्धलः परत्वं नास्ति भकारेण व्यवधानादिति शङ्कानिराकरणायाह—**हलन्ताच्चेति** । **अत्र हल्ग्रहणस्य जातिवाचकत्वादिति** । अयमभिप्रायः । 'हलन्ताच्च' इत्यत्र हलिति हल्त्वजातिरुच्यते । तेन यदा तावत्स्यक्तभेदा व्यक्तयो जातिरिति दर्शनं तदा तासां हल्त्वेनाश्रितानां नास्ति व्यवधानमतो यैव हल्जातिरिक् समीपगता तत एव च परः सन्निति दम्भेर्विहितस्य सनः कित्त्वं सिद्धमेव । यदाप्यर्थान्तरभूता जातिर्व्यक्तिषु प्रत्येकं परिसमाप्ता निरवयवा नित्या एका च तदापि नास्ति व्यवधानम् । यस्माद् व्यक्तिर्व्यक्त्यन्तरस्य व्यवधायिका न जातेः । तस्या अमूर्तत्वात् । तस्मादिहापि दर्शने यैवं हल्जातिरिकः समीपे तस्या एव परः सन्निति दम्भेः सनः कित्त्वं सिद्धं भवति ।

---

१. C, B_2, N_1, D_4 drop it. २. P has before it—ऋध वृद्धौ. ३. Dropped N_1. ४. सस्य दः । Bc_2. ५. दस्य जः । Bc_2. ६. 'निवृत्त्यर्थमाह । Bc_2. ७. तावत्युक्तभेदा Dc_3. ८. तस्या एव परः Dc_3. ९. एका नित्या तदापि Dc_1, Dc_3. १०. Dropped Bc_2.

अभ्यासलोपः । हलन्ताच्चेत्यत्र दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सनः कित्त्वम् । [1]नूलोपः । धिप्सति । धीप्सति । शिश्रयिषति । शिश्रीषति । सिस्वारिषति । [2]सुस्वूर्षति । यियविषति । युयूषति । [3]ऊर्णुनुविषति । ऊर्णुनविषति । ऊर्णनूषति । बिभरिषति । बुभूर्षति । जिज्ञपयिषति । इको झल् । [4]कित्त्वान्न गुणः ।

तस्यास्तु व्यक्तिव्यतिरिक्ताया जातेर्यदिगपेक्षसमीपवर्तिनीत्वं यच्च तां जातिमपेक्षमाणस्य सनः परत्वं तदुभयं व्यक्तिद्वारकं वेदितव्यम् । नकारव्यक्तिरिकः समीप इति तदाधारा हल्जातिरपि इकः समीप । भकारव्यक्तेः परः सन्निति जातेरपि परः सन्निति । **नूलोप** इति । 'अनिदिताम्—' इति । **धिप्सति** । **धीप्सतीति** । भष्भावः । 'खरि च' इति चर्त्वम् । **शिश्रीषतीति** । 'इको झल्—' इति कित्त्वम् । 'अज्झन—' इति दीर्घः । **सिस्वरिषतीति** । द्वित्वम् । 'उरत्' इत्यत्वम् । 'सन्यतः' इतीत्वम् । **सुस्वूर्षतीति** । पूर्ववद् दीर्घः । 'उदोष्ठ्य—' इत्युत्वम् । रपरः । दीर्घः । **यियविषतीति** । 'ओः पुयण्ज्यपरे' इत्यभ्यासस्येत्वम् । **ऊर्णुनुविषति** । **ऊर्णुनाविषतीति** । अजादित्वाद् द्वितीयस्य नु इत्यस्य द्वित्वम् । रेफस्य तु 'नन्द्राः—' इति निषेधान्न । इट्पक्षे 'विभाषोर्णोः' इति यदा ङित्त्वं तदा उवङ् । अन्यदा गुणः । **बुभूर्षतीति** । पूर्ववद् दीर्घः । उत्वं च । **जिज्ञपयिषतीति** । ज्ञा अस्माण्णिच् । पुकि मित्त्वाद्ध्रस्वे सनि इटि गुणेयादेशे च कृतं रूपम् । **इको झलित्यादि** । 'इको झल्—' इति सूत्रं हि चिर्चीषतीत्यादौ कित्त्वाद्गुणनिषेधार्थम् । अन्यथा हि यथा निरवकाशं सत् दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत ।

१. लोपः D₂, D₃; नलोपः P, B₁, B₂; सनः कित्त्वं लोपः B₂. २. C drops from सुस्वूर्षति॰॰युयूषति । ३. C has विभाषोर्णोः before it. ४. इगन्ते कित्त्वा॰ D₃. ५. समीपेति Dc₃. ६. Dropped Dc₁. ७. चिकीर्षतीं॰ Dc₁. ८. बाधेत Dc₁, Dc₃

परत्वाण्णिलोपेन दीर्घो बाध्यते[1] । ज्ञीप्सति । ज्ञपिरत्र पुगन्तो मित्संज्ञः[2] । पकारान्तश्चौरादिकश्च । अन्यत्र जिज्ञापयिषतीत्येव[3] । सिसनिषति । जनसनेत्यात्वम् । परिसिषासति ॥ तनिपति-दरिद्रातिभ्यः सनो वा इड् वाच्यः[4] । तितनिषति ।

तनोतेर्विभाषा ॥६।४।१७॥

तनोतेरुपधाया[5] दीर्घः स्याद्वा[6] झलादौ सनि ॥ तितांसति । तितंसति । आशङ्कायां सन् वक्तव्यः[7] । श्वा मुमूर्षति ।

तस्माद्दीर्घेण[8] णिलोपबाधो मा भूदिति कित्त्वम् 'इको झल्–' इति विधीयत इत्यर्थः । फलमाह- परत्वादित्यादि । ततश्च ज्ञीप्सतीत्यत्र 'अज्झनगमां सनि' इति प्राप्तो दीर्घो 'णेरनिटि' इति णिलोपेन परत्वात् बाध्यत इत्यर्थः । अयमर्थोऽस्माभिः 'इको झल्' इति सूत्रे विवृतः । एवं स्थिते ज्ञपेरिड्भावे यद्रूपं स्यात् तद् दर्शयति- ज्ञीप्सतीति । 'आप्ज्ञप्–' इतीत्वम् । अभ्यासलोपः । ज्ञपिरत्रेति । अत्र 'सनीवन्त–' इति सूत्रे 'आप्ज्ञप्यृधामीत्' इति सूत्रे च ज्ञपिः पुगन्तो मित्संज्ञको ज्ञा अवबोधने इति त्र्यादिगृह्यते । पकारान्तश्चौरादिको ज्ञप् मारणतोषणनिशामनेषु मिच्चेत्ययमपि गृह्यते । अविशेषादित्यर्थः । सिसनिषतीति । 'स्तौतिण्योः' इति नियमान्न षः । परिसिषासतीति । 'स्तौतिण्योः' इत्यत्र[9] प्रभृते सनि निषेधादत्र षत्वम् । तितनिषतीति । तनु विस्तारे । 'सन्यतः' इतीत्वम् ।

तनोतेः । तितांसतीति । 'नश्चापदान्त–' इत्यनुस्वारः । आशङ्कायामिति । आशङ्का संभावना । श्वा मुमूर्षतीति । मृङ् प्राणत्यागे । कित्त्वम् । दीर्घत्वम् । उत्वम् । रपरः । अत्र

---

१. न बाध्यते D4. २. मित्संज्ञः स्यात् B2. ३. D2, D3, D4, B2 drop अन्यत्र ... त्येव । . ४. वक्तव्यः N1. ५. रुपधादीर्घो वा B2. ६. वा स्यात् D2 ; दीर्घो वा झलादौ D4. ७. वाच्यः C. ८. °दीर्घे Dc1. ९. इत्यत्र Bc2.

कूलं पिपतिषति ।

सनि मीमाघुरभलभशकपतपदामच इस् ॥७।४।५४॥

मि मी मा मोङ् मेङ् दा धा एषां रभादीनां चाचः इस् स्यात् सादौ सनि । अभ्यासलोपः । 'स्कोः संयोगाद्योः' इति संयोगादिलोपः । पित्सति । दिदरिद्रिषति । दिदरिद्रासति ।

चं जीवितस्य प्रियत्वात् शुनो मर्तुमिच्छा न संभवतीति सन् न प्राप्नोति । अतः शङ्के मरिष्यति श्वा इत्यत्रार्थो वेदितव्यः । **कूलं पिपतिषतीति** । पत्लृ पथे च गतौ । अत्र कूलस्याचेतनत्वादिच्छा न संभवतीति सन् न प्राप्नोति । अतः शङ्के पतिष्यति कूलमित्यस्मिन्नर्थे एष प्रयोगः ।

सनि मी । मिमी इति डुमिञ् प्रक्षेपणे मीञ् हिंसायाम् । ननु च मीत्यस्मिन्नुच्चार्यमाणे मिनोतेर्ग्रहणं न लभ्यते । न । तस्यापि हि 'अज्झनगम-' इति सनि दीर्घत्वे कृते मी इति रूपं स्यात् । नन्वेवमपि लक्षणप्रतिपदोक्तपरिभाषयास्य ग्रहणं न स्यात् । तदपि न । अत्र हि घिसंज्ञत्वात् घु इत्येतस्य पूर्वनिपातमकुर्वतैतत् सूचितम् । यथा पूर्वनिपातलक्षणमिह नापेक्ष्यते तथान्यदपि किंचिच्छास्त्रीयं वचनं नापेक्ष्यते । अतो नेयं परिभाषात्र प्रवर्तते इति युक्तं मिनोतेरपि ग्रहणम् । **मा माङ् मेङ्** इति । गामादाग्रहणेष्वविशेष इत्यभिप्रायेण । मा माने । माङ् माने शब्दे च । मेङ् प्रणिदाने । इति च त्रयाणामपि ग्रहणमित्यर्थः । **दा धा** इति । दारूपा धारूपाश्च धातवः । रभ राभस्ये । डुलभष् प्राप्तौ । शकॢ शक्तौ । पत्लृ गतौ । पद गतौ । **पित्सतीति** । पत्लृ अस्मात् सनः 'तनिपति-' इति यदेडभावस्तदा रूपम् । **दिदरिद्रिषतीति** । दरिद्रा दुर्गतौ ।

---

१. मा मेङ् D_1. २. चाचः स्थाने N_1, D_3. ३. °लोपश्च C. ४. स्कोरिति संयोगा° P, D_2, D_3, C; स्कोः संयोगा° N. ५. Before it—दरिद्रातेरार्धधातुके आलोपः C. ६. Dropped Bc_2, Dc_3. ७. इत्यस्य Bc_2, Dc_3.

सः स्यार्धधातुके इति सस्य तः । मित्सति । मित्सते । दित्सति । धित्सति । रिप्सते । लिप्सते । शिक्षति[१] । पित्सते[२] । ईप्सति ।[४]

राधो हिंसायां सनि इस् वाच्यः[५] । प्रतिरित्सति । हिंसायां किम् । आरिरात्सति ।

मुचोकर्मकस्य गुणो वा ॥७।४।५७॥

अकर्मकस्य मुचो गुणो[६] वा स्यात् सादौ सनि ॥ अभ्यासलोपः । पक्षे हलन्ताच्चेति कित्त्वान्न गुणः । मोक्षते मुमुक्षते[७] वा वत्सः स्वयम् । अकर्मकस्य किम् । मुमुक्षति वत्सं कृष्णः ।

पूर्ववदिट् । 'आतो लोप इटि च' इत्यालोपः । **मित्सतीति** । मि मी मा[८] इति त्रयाणां रूपम् । **मित्सते** इति । माङ्मेङोः । 'पूर्ववत् सनः' इत्यात्मनेपदम् । **दित्सति** । **धित्सतीति** । डुदाञ् दाने । डुधाञ् धारणपोषणयोः । **रिप्सते लिप्सत** इति । 'पूर्ववत् सनः' इत्यात्मनेपदम् । 'स्कोः संयोग—' इति सलोपः । 'खरि च' इति चर्त्वम् । **शिक्षतीति** । सलोपः । 'इण्कोः—' इति षः । **ईप्सतीति** । आप्लृ व्याप्तौ । 'आप्ज्ञप्—' इतीत्वम् । अभ्यासलोपः ।

प्रतिरित्सतीति । हिंसितुमिच्छतीत्यर्थः । पूर्ववत् प्रक्रिया । **आरिरात्सतीति** । 'सन्यतः' इतीत्वम् ।[९]

मुचः । **मोक्षत** इति । मुच्लृ मोक्षणे । 'चोः कुः' । 'इण्कोः' इति षत्वम् । कर्मकर्तरि लट् । 'कर्मवत् कर्मणा' इत्यतिदेशादात्मनेपदम् । कृगृभिश्रिभूषार्थेभ्यः सनन्ताच्च यक्चिणौ नेति यक्निषेधः । वत्सं मोक्तुमिच्छति । स मोक्तुमिष्यमाणो मुक्तिक्रियां प्रत्यानुकूल्यं यदा प्राप्नोति तदा सुमोचत्वात् तस्मिन् कर्तृत्वेन

---

१. शिक्षते D_3. २. पित्सति D_4. ३. C drops it. ४. After it—आप्लृ व्याप्तौ N. ५. वक्तव्यः D_1, D_2, P, B_1. ६. वा गुणः N_1. ७. मुमुक्षति C. ८. मा मी Bc_2; मा मीञ् Dc_3. ९. After it—राध एव । Bc_2.

णौ कृतादेशस्य स्थानिवत्त्वम् । पुस्फारयिषति ।[1] [2]चुक्षावयिषति ।
ओः पुयण्ज्यपरे[3] । पिपावयिषति । बिभावयिषति । यियावयिषति ।
रिरावयिषति । लिलावयिषति । जु गतौ । जिजावयिषति ।
ओः पुं[4]यण्जि इति किम् । नुनावयिषति । अपरे किम् ।

विवक्षिते मुचिरकर्मको भवति । ननु गुणग्रहणं किमर्थम् । ओदित्येव किं नोच्यते । नन्वेवं सत्योकारोन्त्यस्य स्यात् । गुणग्रहणे त्विक एव स्यात् । संज्ञया विधानात् । मैवम् । अत्र इति हि वर्तते । तेनान्त्यस्य न स्यात् । एवं तर्ह्येतत् ज्ञापयति अत्र इति निवृत्तमिति । तेन 'अत्र लोपोभ्यासस्य' इत्यत्र एवाभ्यासस्य लोपो न । सति त्वधिकारे मा भूत् तस्यानुवृत्तिर्व्यर्थेत्यत्र एव लोपो भवेत् । **पुस्फारयिषतीति** । स्फुर स्फुरणे । णिच् । गुणः । 'चिस्फुरोर्णौ' इत्यात्वम् । सन् । द्वित्वे क्रियमाणे उवर्णादेशस्याकारस्य स्थानिवत्त्वम् । इड्गुणायादेशाः । **चुक्षावयिषतीति** । टुक्षु शब्दे । णिच् । सन् । वृद्ध्यावादेशौ । उवर्णादेशस्यातः स्थानिवत्त्वम् । **ओः पुयणीति** । 'ओः पुयण्ज्यपरे' इति सूत्रेण सनि पवर्गयण्जकारेष्ववर्णपरेषु परतोभ्यासोकारस्येत्वमित्यर्थः । **पिपावयिषतीति** । पूङ् पवने । अस्माण्ण्यन्ताद् वृद्ध्यावादेशौ । स्थानिवद्भावात् पू इत्यस्य द्वित्वम् । **बिभावयिषतीति** । भवतेर्ण्यन्तात् सन् । **यियावयिषतीति** । यु मिश्रणे । अस्माण्ण्यन्तात् सन् । **रिरावयिषतीति** । **लिलावयिषतीति** । अत्रापि रु शब्दे लूञ् छेदने इति द्वाभ्यामपि ण्यन्ताभ्यामेव सन् । जु गताविति सौत्रो धातुः 'जुचङ्क्रमि—' इत्यादौ सूत्रे पठितत्वात् । **नुनावयिषतीति** । णु स्तुतावस्मात् ण्यन्तात् सन् । पूर्ववत् प्रक्रिया ।

---

१. P has पुस्फोरयिषति after it. २. क्षु शब्दे before it in P. ३. ज्यपरे dropped N_1, D_3. D_4. ४. पुयण् ज्य इति किम N_1; पुयण् किम् D_3. ५. नु dropped Bc_2. ६. °र्व्यर्थेत्यभिप्रेत्याह । अत्र एव &c. Dc_1. ७. Bc_2, Dc_3; So; others स्थानिवत्त्वात्.

बुभूषति । स्रवतीति इत्वं वा । सिस्रावयिषति । सुस्रावयिषति । इत्यादि । अपर इत्येव । शुश्रूषते । रलो व्युपधाद्धलादेः संश्च । रुरोचिषते । रुरुचिषते । लिलेखिषति । लिलिखिषति । रुदविदेति नित्यं कित्त्वम् । रुरुदिषति । विविदिषति । मुमुषिषति ।

स्तौतिण्योरेव षण्यभ्यासात् ॥८।३।६१॥

अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य पः स्यात् पभूते सनि नान्यस्य ॥ तुष्टूषति । ष्टुतिस्वाप्योरित्युत्वम् ।

बुभूषतीति । भवतेः सन् । ' सनि ग्रहगुहोश्च ' इतीडभावः । ' इको झल्— ' इति कित्त्वान्न गुणः । **स्रवतीति इत्वं वेति** । ' स्रवतिशृणोति द्रवतिप्रवतिप्लवतिच्यवतीनां वा ' इति । **सिस्रावयिषति** । **सुस्रावयिषतीति** । स्रवतेर्ण्यन्तात् सन् । आदिशब्दात् । शिश्रावयिषति । शुश्रावयिषति । दिद्रावयिषति । दुद्रावयिषति । पिप्रावयिषति । पुप्रावयिषति । पिप्लावयिषति । पुप्लावयिषति । चिच्यावयिषति । चुच्यावयिषतीति ज्ञेयम् । **शुश्रूषत इति** । श्रु श्रवणे । कित्त्वाद् गुणाभावः । दीर्घः । ' ज्ञाश्रुस्मृ— ' इति तङ् । **रुरोचिषत इति** । रुच दीप्तौ । **लिलेखिषतीति** । लिख लेखने । **रुरुदिषतीत्यादि** । रुदिर् अश्रुविमोचने । विद ज्ञाने । मुष स्तेये ।

स्तौतिण्योः । ष्टुञ् स्तुतौ । षभूते षत्वं प्राप्ते कृतषत्वे इत्यर्थः । सिद्धे सत्यारम्भो नियमार्थः । एवकारकरणमिष्टतोवधारणार्थमित्याह- **स्तौतिण्यन्तयोरेवेति** । षण्येवेति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात् । इह च स्यादेव सिसिक्षतीति । षणिति सानुबन्धग्रहणं किम् । षमात्रे नियमो मा भूत् । सुषुपिष इन्द्रम् । स्वपेर्लिट् । छान्दसत्वाद् व्यत्ययेन थासः से । द्वित्वादि । **तुष्टूषतीति** । ष्टुञ् स्तुतौ । ' अज्झन- '

१. इत्यात्वम् B₂, D₄. २ D₂ drops this. ३. °रिति संप्रसारणम् P. ४. स्तौति । Bc₂. ५ °मिष्टता° Bc₂. ६. ण्योरेवेति Dc₁. ७. Dropped Bc₂, Dc₃.

सुष्वापयिषति । स्तौतिण्योः किम् । सिसिक्षति । उपसर्गात् तु स्थादिष्वभ्यासेनेत्यभ्यासात् षः स्यादेव । परिषिषिक्षति । षणि किम् । सभूतेन्यस्य स्यादेव । तिष्ठासति । सुषुप्सति । अभ्यासात् किम् । धात्विण्निमित्तः षोन्यस्य स्यादेव । इण् । प्रतीषिषति । इक् । अधीषिषति ।

सः स्विदिस्वदिसहीनां च ॥८।३।६२॥

अभ्यासेणः परस्यैषां ण्यन्तानां सस्य स एव स्यान्न षः षणि परे ॥[1] सिस्वेदयिषति ।[2] सिस्वादयिषति । सिसाहयिषति । स्थादिष्वभ्यासेन चाभ्यासस्येत्यत्र स्थादिष्वेवाभ्यासस्य षत्वं न सुनोत्यादिष्विति नियमात् अभिसुसूषति । परिसिषासति ।

इति दीर्घः । 'शर्पूर्वाः खयः' । ष्टुत्वम् । सुष्वापयिषतीति । ञिष्वप शये । ण्यन्तात् सन् । सिसिक्षतीति । षिच क्षरणे । 'हलन्ताच्च' इति कित्त्वाद्गुणाभावः । तिष्ठासतीति । ष्ठा गतिनिवृत्तौ । 'सन्यतः' इतीत्वम् ।

सः स्विदि । ञिष्विदा गात्रप्रक्षरणे । स्वद आस्वादने । षह मर्षणे । सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम् । सिस्वेदयिषतीत्यादि । ण्यन्तेभ्यः सन् । अभिसुसूषतीति । षुञ् अभिषवे । 'सुनोतेः स्यसनोः' इति न षत्वम् । परिसिषासतीति । षोन्तकर्मणि । 'आदेच—' इत्यात्वम् । 'इण्कोः—' इति षत्वम् ।

---

१. D₄. So; others सुष्वा.° २. ष्वभ्यासस्येति षः D₂. ३. न तु षः D₂.
४. Before it P has—स्विदि स्नेहमोक्षणे । ५. Before it—स्वद स्वादे P.

शैषिकान्मतुबर्थीयात् शैषिको मतुबर्थिकः ।
[1]सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सन्निष्यते ॥

स्वार्थसन्नन्तात् सन् स्यादेव । जुगुप्सिषते । मीमांसिषते ।

इति [3]सन्प्रक्रिया ।

शैषिकादित्यादि । अपत्यादिचतुरर्थान्तान्यः शेषः । तत्र भवः प्रत्ययः शैषिकः । अध्यात्मादित्वाट्ठञ् । तस्मात् शैषिकः सरूपप्रत्ययो नेष्टः । शालायां भवः । वृद्धाच्छः । शालीयः । शालीये भव इत्यर्थे पुनश्छो न । विरूपस्तु स्यादेव । अहिछत्रे भवः आहिछत्रः । प्राग्दीव्यतोण् । आहिछत्रे भवः आहिछत्रीयः । अणन्तात् छो भवति । मतुबर्थे भवः मतुबर्थीयः । गहादित्वात् छः । तस्मात् सरूपप्रत्ययो मतुबर्थो नेष्टः । मतुबर्थोऽस्यास्तीति मतुबर्थिकः । 'अत इनिठनौ' इति ठन् । दण्डोऽस्यास्तीति दण्डिकः । पूर्ववत् ठन् । सोऽस्यास्तीति पुनष्ठन् न स्यात् । विरूपस्तु स्यादेव । दण्डोऽस्त्येषां दण्डिनः । ते सन्त्यस्यां शालायां दण्डिमतीति । इन्नन्ताद् मतुब् भवति । सन्नन्तादिति । सरूप इति संबध्यते । तत्र सनो रूपसारूप्यव्यभिचारो नास्तीत्यर्थसारूप्यमाश्रीयते । विशेषणसामर्थ्यात् । जुगुप्सिषते । मीमांसिषते इति । गुप गोपने । मान विचारणे । आभ्यां 'गुप्तिज्किद्भ्यः—' 'मान्बध—' इति च स्वार्थसन्नन्ताभ्यामिच्छासन् । इट् । अतो लोपः ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला प्रक्रियेयं सनन्ता ॥

---

१. सरूपप्रत्ययः D1. २. सनन्त° D3. ३. सरूपो मतुबर्थिकः प्रत्ययः Bc2, Dc3.

अथ यङन्ताः ।

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥३।१।२२॥

हलादिर्यो धातुरेकाच् तस्मात् पौनःपुन्ये भृशार्थे च यङ्प्रत्ययः[1] स्यात् ॥ सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वक्तव्यः । धातोरित्युक्तेः सोपसर्गान्न ।[2] प्राटति भृशम् । रुचिशुभ्योर्यङ् न[3] ।

धातोः । समभिहरणं समभिहारः । विप्रकीर्णानां द्रव्याणां राशीभाव उच्यते । स च मूर्तस्यानेकस्यैककालस्य स्यात् । अतो धातुवाच्यानां क्रियाणां मुख्यः समभिहारो न स्यात् । अमूर्तत्वात् । क्रमभावित्वेनायुगपत्कालत्वाच्चेत्यभिप्रेत्य गौणसमभिहारं दर्शयितुमाह- **पौनःपुन्ये भृशार्थेचेति** । एतदुभयं समभिहारसादृश्यादव्यवधानात् समभिहारव्यपदेशं लभते । तत्र प्रधानक्रियायाः पचनादिकायाः क्रियान्तर-व्यवधानेनावृत्तिः पौनःपुन्यम् । तथैकप्रधाने क्रियाया अधिश्रयणादि-कायाः साकल्येन संपत्तिः फलातिरेको वा भृशार्थः । **सूचिसूत्री**त्यादि । सूच पैशून्ये । सूत्र अवमोचने । मूत्र प्रस्रवणे । अट गतौ । ऋ गतौ । अश भोजने । ऊर्णुञ् आच्छादने । तत्राद्यानां त्रयाणां चुरादिण्यन्ता-नामनेकाजर्थे ग्रहणम् । मध्यानां त्वहलाद्यर्थं । ऊर्णोतेरुभयार्थः । **धातोरित्युक्तेरि**ति । सोपसर्गस्य धातूपसर्गसमुदायत्वेनाधातुत्वादिति भावः । ततश्च प्रादेर्हलादित्वेपि यङ् न । एवं सर्वत्र सोपसर्गाद्यङ् न । किं तु यङि जाते पश्चादर्थविशेषेणोपसर्गसंबन्धः उपपद्यत[4] इत्यादि । **रुचिशुभ्योरि**ति । रुच दीप्तौ । शुभ शोभने ।

---

१. C drops प्रत्ययः. २. After this—धातूपसर्गसमुदायित्वेन प्रपूर्वादटेर्ह-लादित्वेपि यङ् B₂. ३. शुचिभ्यो C; न रुचिशुचिभ्यो यङ् B₂. ४. विशेषेणोपपनापिद्यत इत्यादि Dc3.

नित्यं कौटिल्ये गतौ ॥३।१।२३॥

गत्यर्थात् कौटिल्ये एव यङ् स्यान्न क्रियासमभिहारे ॥[1]

लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ॥३।१।२४॥

एभ्यो धात्वर्थगर्हायामेव यङ् स्यान्न क्रियासमभिहारे ॥ भृशाद्यर्थभावगर्हयोर्मिश्रणेपि लुपादेः स्यादिति केचित् । सन्-यङोरिति द्वित्वम् ।

गुणो यङ्लुकोः ॥७।४।८२॥

अभ्यासस्य गुणः स्यात् यङि यङ्लुकि च परे ॥

नित्यं कौटिल्ये । नित्यग्रहणं विषयनियमार्थमित्याह-**कौटिल्य एव यङ् स्यान्न क्रियासमभिहारे** इति ।

लुपसद । लुप्लृ छेदे । षद्लृ विशरणगत्यवसादनेषु । चर गतौ । जप व्यक्तायां वाचि । जभ गात्रविनामे । दह भस्मीकरणे । दंश दशने । गॄ निगरणे । धात्वर्थगर्हायामित्यनेन भावगर्हायामित्यस्यार्थ-माह । **भृशाद्यर्थे** इति । तथोक्तं **मुग्धबोधे** । 'गत्यर्थात्कुटिले प्रादेर्गर्हायां यङ् न पूर्वोक्ते तद्युते तु स्यात्' इति । **सन्यङोरिति** । सूचि अस्माद्यङ् । ततो द्वित्वमिति ।

गुणः । अभ्यासस्यायं गुणो विधीयते । तेन यद्यपि लुक्शब्दः सामान्यवचनस्तथापि यङ्लुक्येव संप्रत्ययो भवति । न ह्यन्यत्र लुक्य-भ्यासः संभवतीति मत्वाह- **यङ्लुकि चेति** । 'न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधात् यङो लुकि कृते गुणो न प्राप्नोतीति लुक्ग्रहणम् ।

१. After this—नित्यग्रहणं विषयनियमार्थम् N_1. २. धात्वर्थे D_2. ३. लुपादेर्यङ् स्यादि° N_1. ४. लुकि च परे B_2. ५. D_1 drops च.

धातुत्वाद्दश लडादयः। ङित्त्वादात्मनेपदम्।[1] णिलोपः। पुनः पुनरतिशयेन वा सूचयति सोसूच्यते।

यस्य हलः ॥६।४।४९॥

हलः परस्य यकारस्य लोपः स्यादार्धधातुके।[2] असोसूचिष्ट। सोसूचांचक्रे। सोसूत्र्यते। मोमूत्र्यते। द्वितीयस्य द्वित्वम्। हलादिशेषः।

धातुत्वादिति। 'सनाद्यन्ता—' इति धातुत्वादित्यभिप्रायः। **ङित्त्वादिति**। 'अनुदात्तङित—' इति। **णिलोप इति**। 'णेरनिटि' इति।

यस्य। 'आदेः परस्य' इति यकारो लभ्यते इत्यभिप्रेत्याह-**हलः परस्य यकारस्येति**। केचित्तु हलन्तायाः प्रकृतेर्विहितस्य यस्य लोप इति वदन्ति। तन्मते सूच्यादीनां शेतेः कण्ड्वादेश्च न यलोपः। सोसूच्यिनेत्यादि। संघातग्रहणं किम्। ईर्ष्यिता। हल इति किम्। लोलूयिता। **असोसूचिष्टेति**। लुङ्। सिच्। इट्। **सोसूचांचक्रे** इति। प्रत्ययान्तत्वादाम्। यलोपः। 'आम्प्रत्ययवत्' इति कृञ आत्मनेपदम्। सोसूचिता। सोसूचिषीष्ट। सोसूचिष्यते। असोसूचिष्यतेति यङन्ते सर्वत्र रूपाणि ज्ञेयानि। **मोमूत्र्यत इति**। मूत्रि। अस्माद्यङ्। द्वित्वम्। गुणः। धातुत्वाल्लडादयः। आत्मनेपदम्। णिलोपः। **द्वितीयस्य द्वित्वमिति**। अट अश आभ्यां यङि द्वितीयस्य ट्य श्य इत्यस्य द्वित्वमित्यर्थः।

1. इश dropped D_3. 2. D_2. D_1, B_2 have चांभुग्ने before it. 3. धातुके परे D_2. 4. Dropped N. 5. हलादिः शेषः D_2, D_1; हलादिशेषः dropped D_3. 6. यस्येति संघातग्रहणमेतत्। तत्र 'अलोन्त्यस्य' इत्यत्र 'अतो लोपः' इत्यनेनैव सिद्धत्वात्। अथवा हल इति पञ्चमी। तत्र 'आदेः परस्य' &c. Dc_3.

दीर्घोऽकितः ॥७।४।८३॥

अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च ॥ अटाट्यते । अशाश्यते ।

यङि च ॥७।४।३०॥

अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि । यकारपरस्य रेफस्य न द्वित्वनिषेधः । अरार्यते । ऊर्णोनूयते । घुमास्थागापाजहातिसां हलि । ततो द्वित्वम् । गुणः । देदीयते । अतो लोपः । अदेदीयिष्ट । देधीयते । मेमीयते । तेष्ठीयते । जेगीयते ।

दीर्घः । अकितः किम् । जङ्गम्यते । ननु चात्रापवादत्वात् 'नुगतोऽनुनासिकान्तस्य' इति नुकि कृतेन जन्तत्वादेवाभ्यासस्य दीर्घो न स्यात् । अतोऽकित इति व्यर्थम् । एवं तर्हि अकित इत्यनेनैतत् ज्ञाप्यते । अभ्यासविकारेषु बाधको न बाध्यान् विधीन् बाधते इति । किमेतस्य ज्ञापने प्रयोजनम् । डोढौक्यत इत्यत्र 'दीर्घोऽकितः' इत्यनेन संध्यक्षरस्य ह्रस्वो न बाध्यते । अचीकरदित्यत्र 'दीर्घो लघोः' इत्यनेन सन्वदित्वं न बाध्यते । मीमांसत इत्यत्र दीर्घेणेत्वम् । अजीगणदित्यत्रेत्वेन हलादिशेष इति । **अटाट्यत** इति । दीर्घविधानसामर्थ्यात् 'ह्रस्वः' इति ह्रस्वो न ।

ऊर्णोनूयत इति । नुशब्दस्य द्वित्वम् । रेफस्य न द्वित्वम् । 'नन्द्राः—' इति निषेधात् । **देदीयते** इति । डुदाञ् दाने । दाण् दाने । दो अवखण्डने । देङ् पालने । एतेषां रूपम् । नमयोरात्वम् । 'धातोरेकाचः—' इति यङ् । ईत्वम् । द्वित्वम् । 'गुणो यङ्लुकोः' इति गुणः । दाप्दैपोरघुत्वात् दादायते इत्येव रूपम् । **देधीयत** इति । डुधाञ् धारणपोषणयोः । **मेमीयत** इति । मा माने । माङ् शब्दे । मेङ् प्रणिदाने । इत्येतेषां रूपम् । **तेष्ठीयत** इति । ष्ठा गतिनिवृत्तौ । **जेगीयत** इति । गाङ् गतौ । गै गाने ।

पेपीयते। जेहीयते। सेषीयते। विभाषा श्वेः। शोशूयते। शेश्वीयते।
सास्मर्यते। रीङ् ऋतः। चेक्रीयते। सुटो बहिरङ्गत्वान्
संयोगादित्वेन गुणः। संचेस्क्रीयते।

सिचो यङि ॥८।३।११२॥

सिचः सस्य षो न स्याद्यङि॥ उपसर्गाभ्यासनिमित्तषत्वापवादः। निसेसिच्यते। वक्रं व्रजति वाव्रज्यते।

ग्रो यङि ॥८।२।२०॥

गॄ इत्यस्य रेफस्य लः स्याद्यङि॥ गर्हितं गिलति

पेपीयत इति। पा पाने। पातेस्तु पापायते। **जेहीयत** इति। ओहाक् त्यागे। हाङस्तु जाहायते। **सेषीयत** इति। षोऽन्तकर्मणि। सर्वत्र देदीयत इतिवत् प्रक्रिया। **शोशूयत** इति। टुओश्वि गतिवृद्ध्योः। यङ्। संप्रसारणं च। द्वित्वम्। गुणः। 'अकृत्सार्वधातुकयोः' इति दीर्घः। **सास्मर्यत** इति। स्मृ आध्याने। 'यङि च' इति गुणः। 'दीर्घोऽकितः' इति दीर्घः। **चेक्रीयत** इति। डुकृञ् करणे। रीङ्। पश्चात् द्वित्वम्। गुणः। **संचेस्क्रीयत** इति। 'संपरि—' इति सुट्।

सिचः। षिच क्षरणे। **उपसर्गेति**। 'उपसर्गात् सुनोति—' इति 'स्थादिष्वभ्यासेन च' इति प्राप्तषत्वनिषेध इत्यर्थः। **वाव्रज्यत** इति। व्रज गतौ। 'नित्यं कौटिल्ये गतौ' इति यङ्। 'दीर्घोऽकितः' इति दीर्घः।

ग्रो। केचित्तु गॄ निगरणे गॄ शब्दे इति द्वयोस्तुदादिक्र्याद्योः सामान्येन ग्रहणमिच्छन्ति। अपरे गिरतेरेव ग्रहणं गृणातेर्हि यङेव

१. Before it D₂, D₁, B₂ have लिङ्यङोश्चेति न्यायः पीनावः। D₄ has in addition पेपीयते २. After it D₁ has—परिचेस्क्रीयते। उपचेस्क्रीयते। ३. जोहायते Dc₃ ४. 'ऋतश्च-' इति द्वित्वम् Dc₃. ५. After it – चुत्वम् Dc₃

निजेगिल्यते । लोलुप्यते । सासद्यते ।

न कवतेर्यङि ॥७।४।६३॥

कवतेर्भौवादिकस्याभ्यासस्य चुत्वं न स्याद्यङि ॥ कोकूयते । कवतेर्निर्देशात् कौतिकुवत्योश्चुत्वमेव । चोकूयते ।[1]

नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥७।४।८४॥

एषामभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः ॥ अकित इत्युक्तेर्न दीर्घः । न्लोपः । वनीवच्यते । सनीस्रस्यते । इत्यादि ।

नास्ति अनभिधानादित्याहुरन्ये । निजेगिल्यते इति । 'लुपसद—' इति यङ् । 'ॠत इत्—' इतीत्वम् । रपरः । द्वित्वम् । चर्त्वम् । गुणः । लोलुप्यत इति । लुप्लृ छेदने । पूर्ववत् यङ् । गर्हायाम् । सासद्यत इति । षद्लृ विशरणगत्यवसादनेषु । दीर्घोऽभ्यासस्य ।

न कवतेः । कुङ् शब्दे । कवतेरित्यादि । कवतेरिति शप्विकरणनिर्देशाददादितुदाद्योर्ग्रहणं नेत्यभिप्रायः । सर्वे शब्दार्था एव ।

नीग्वञ्चु । वञ्चु गतौ । स्रंसुध्वंसुभ्रंसु अवस्रंसने । कस गतौ । पत्लृ गतौ । पद गतौ । स्कन्दिर् गतिशोषणयोः । न्लोप इति । 'अनिदिताम्—' इति । अथ नीकि कृते ह्रस्वत्वं गुणश्च कस्मान्न स्यात् । दीर्घोच्चारणसामर्थ्यात् । आदिशब्दात् दनीध्वस्यते । बनीभ्रस्यते । चनीकस्यते । पनीपत्यते । पनीपद्यते । चनीस्कद्यते इति ज्ञेयम् ।

---

१. After this D_1 has—कवतिरव्यक्ते शब्दे । कुवतिरार्तस्वरे । कौतिः शब्दमात्रे इति व्यवस्था । २. Dropped D_4. ३. 'ॠतः—' इति इत् Dc_3. ४. वञ्च Dc_3.

नुगतोनुनासिकान्तस्य ॥७।४।८५॥

अनुनासिकान्तस्यादन्ताभ्यासस्य नुगागमः स्याद्यङ्यङ्लुकोः । नुक् पदान्तवद्वाच्यः । अझल्यप्यनुस्वारः । वा पदान्तस्येति वा परसवर्णः । यंयम्यते । यँय्यम्यते । वंवम्यते । वँव्वम्यते । तंतन्यते । तन्तन्यते । अत इति तपरत्वान्नेह । भाम क्रोधे । बाभाम्यते । ये विभाषेत्यात्वम् । जाजायते । जञ्जन्यते । एवं सनखन । कुत्वम् । जङ्घन्यते । हन्तेर्हिंसायां यङि घ्नीभावो वक्तव्यः ॥* जेघ्नीयते ।

नुग । अझल्यप्यनुस्वार इति । नुगित्येतदनुस्वारोपलक्षणार्थम् । स्थानिना ह्यादेशो लक्ष्यते । तेनाझल्यप्यनुस्वारो भवतीत्यर्थः । यंयम्यत इत्यादि । यमु उपरमे । टुवमु उद्गिरणे । तनु विस्तारे । इत्येतेषां रूपाणि क्रमात् । अत इति । तपरत्वं हि भूतपूर्वेपि दीर्घे मा भूदित्येवमर्थम् । अन्यथा सर्वस्याभ्यासस्य ह्रस्वत्वात् तपरत्वं व्यर्थं स्यात् । जाजायत इति । जन जनने । एवं सनखनेति । षणु दाने । खनु अवदारणे । एतयोरपि जनेरिव रूपाणि ज्ञेयानीत्यर्थः । सासायते संसन्यते । चाखायते । चङ्खन्यते इति । कुत्वमिति । 'अभ्यासाच्च' इति । जङ्घन्यत इति । हन हिंसागत्योः ।

---

१. Before it D_1 has—आदेशिना आदेशो लक्ष्यते । अनुस्वारो नुका लक्ष्यते । तेन अझल्यप्यनुस्वारः ।. २. C has—नुक् अनुस्वारोपलक्षणत्वेन before it; B_2, N_1 have तेन before it. ३. यँय्यम्यते । यंयम्यते । वँव्वम्यते । वंवम्यते । संतन्यते । तन्तन्यते N_1, D_4. ४. °स्यात्वं वा N_1; D_3; °स्यात्वं च D_4.

जपजभदहदशभञ्जपशां च ॥७।४।८६॥

एषामभ्यासस्य नुक् स्यात् यङ्यङ्लुकोः ॥ गर्हितं[1] जपति जञ्जप्यते । पशतिस्तालव्यान्तः सौत्रो गत्यर्थः । कुटिलं पशति पंपश्यते[2] । इत्यादि । लवयान्ताभ्यासस्य[3] नुग्वेति केचित् । चंचल्यते । मंमव्यते । चाचल्यते[4] । मामव्यते । दंदय्यते । दादय्यते[5] ।

चरफलोश्च ॥७।४।८७॥

अनयोरभ्यासस्यातो नुक् स्याद्यङ्यङ्लुकोः[6] ॥

जप । जप व्यक्तायां वाचि । जभ गात्रविनामे । दह भस्मीकरणे । दंश दंशने । भञ्ज आमर्दने । पश इति सौत्रो गत्यर्थः । चतुर्षु 'लुपसदचर—' इति यङ् । भञ्जेः 'धातोरेकाचः—' इति । पशेः 'नित्यं कौटिल्ये' इति यङ् । जञ्जप्यत इति । गर्हितं जपतीति विग्रहः । आदिशब्दात् जञ्जभ्यते । दन्दह्यते । दंदश्यते । बम्भज्यते । पम्पश्यते । इति ज्ञेयम् । लवयान्तस्येति । तथोक्तं मुग्धबोधे । 'लवयस्तु वा' इति । चञ्चल्यत इति । चल चलने । मव बन्धने । दय रक्षणे ।

चर । चर गत्यर्थः । ञिफला विशरणे । फल निष्पत्तौ । द्वयोरपि ग्रहणम् । ननु निष्पत्त्यर्थस्याकार उच्चारणार्थ एव । अनुबन्धप्रयोजनाभावात् । ततश्च निरनुबन्धकग्रहणे न सानुबन्धकस्येति तस्यैव ग्रहणं स्यात् । नैष दोषः । चकारोत्र कृतो विशरणार्थस्य समुच्चयार्थः ।

---

१. गर्हितं जपति dropped D3. २. D2, D3 D4, B2 drop from पशति°...... पंपश्यते. ३. लवयान्तस्या° N1, D3. ४. चाचल्यते before मंमव्यते D3, D4. ५. It is given before चाचल्यते in N1. ६. यङ्लुकोः N1.

उत्परस्यातः ॥७।४।८८॥

[1]चरफलोः प्रकृतेरकारस्य उत् स्याद्यङ्लुकोः[2] ॥ चञ्चूर्यते । पम्फुल्यते ।

रीगृदुपधस्य च ॥७।४।९०॥

धातोर्ऋदुपधस्याभ्यासस्य रीगागमः स्याद्यङि यङ्लुकि ।

उत्पर । अभ्यासाधिकारादभ्यासात्परस्याकारस्योत्वम् । न च प्रकृतेरकारादन्योऽभ्यासात्परोऽकारोऽस्तीति चेतसि कृत्वा परस्येति सूत्रावयवं प्रकृतेरकारस्येत्यनेन व्याचष्टे । **चञ्चूर्यते** इति । 'लुपसद—' इति यङ् । उत्वे कृते 'हलि च' इति दीर्घः । **पम्फुल्यत** इति । 'अभ्यासे चर्च' । ननु च 'अतः' इति किमर्थम् । 'अलोऽन्त्यस्य' इति मा भूदिति । 'अतः' इति तर्हि तपरत्वं किमर्थम् । इह मा भूदित्येवमर्थम् । फलन्तं प्रयुङ्क्ते फालयति । तस्मात् क्विप् । ततः क्विब्वा इत्येके इति पुनः क्विप् । तदन्ताद्यङ् । पाफाल्यते । पाफालीतीति । कथमत्र स्यात् । एकदेशविकृतस्यानन्यत्वात् । अथ 'उत्' इति तपरत्वं किम् । यावतान्तरतम्यात् मात्रिकस्य मात्रिक एव स्यात् । उच्यते । चञ्चूर्यत इत्यत्र लघूपधगुणो मा भूदित्येवमर्थम् । न च वाच्यं दीर्घेणैव गुणनिवृत्तिः स्यादिति । गुणं प्रति दीर्घस्यासिद्धत्वात् । यदि लक्षणान्तरेण प्राप्नुवन् गुणो निवर्त्स्यते तपरत्वेन तर्हि गुणवद्दीर्घो न स्यात् । नैवम् । तपरत्वे हि दीर्घत्वमसिद्धम् । अतो नान्यस्य निवृत्तिरस्त्यनेन शक्या कर्तुम् । तथा च 'अत उत् सार्वधातुके' इति तपरत्वेन दीर्घनिवृत्तिर्नेति मन्यमानः 'न भकुर्छुराम्' इति करोतेर्दीर्घनिषेधमारभते ।

रीगृदुपधस्येति । तपरत्वमुकारे परे यणादेशनिवृत्त्यर्थम् । सति तस्मिन् संदेहः स्यात् किं ऋकारोपधस्य रेफोपधस्येति ।

---

१. चर् फल् एतयोः C. २. यङ्लुकोः N1, D2, D3, D4, P; यङ्यङ्लुकोः C, B2.

क्षुभ्नादिषु च ॥८।४।३९॥

क्षुभ्नादावाकृतिगणे णत्वं न स्यात् ॥ नरीनृत्यते । जरीगृह्यते । कृपो रोल इति उभयत्र लत्वम् । चलीक्लृप्यते । रीगृत्वत इति संयोगार्थं वाच्यम् । वरीवृश्च्यते । परीपृच्छ्यते ।

क्षुभ्ना । क्षुभ्नादाविति । 'पूर्वपदात् संज्ञायाम्—' 'छन्दस्यृदवग्रहात्' इति वा प्राप्तस्य णत्वस्य प्रतिषेधः । नन्दि नन्दन नगर इत्येतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति[1] । हरिनन्दी । हरिनन्दनः । गिरिनगरम् । नृतेर्यङि । नरीनृत्यते । तृप्नु । तृप्नोति । नर्तन गहन निवेशन निवासन अग्नि अनूप एतान्युत्तरपदानि । परिनर्तनः । परिगहनः । 'पूर्वपदात्—' इति प्राप्तिः । परिनन्दनमिति । 'उपसर्गादसमासेऽपि' इति । शरानिवेशः । शरानिवासः । शराग्निः । दर्भानूपः । एताः संज्ञाः । आचार्यभोगीनः । आचार्यानी । अविहित-लक्षणो णत्वप्रतिषेधः क्षुभ्नादौ द्रष्टव्यः । अत एवाह—**आकृतिगण इति** । आकृत्या गणः आकृतिगणः । क्षुभ्नाद्याकार इत्यर्थः । केषांचिदेवं पाठः । क्षुभ्ना । तृप्नु । नृनमन । नरनगर । नरनृती । गिरिनदी । गहन । मदन । निवेश । निवास । अग्नि । अनूप । आचार्यभोगीन । चतुर्हायन । इरिकादीनि वनोत्तरसंज्ञायाम् । इरिका । तिमिर । समीर । कुबेर । हरि । कर्मार । **नरीनृत्यत इति** । नृती गात्रविक्षेपे । **जरीगृह्यत इति** । ग्रह उपादाने । 'ग्रहिज्या—' इति संप्रसारणम् । **ऋत्वत इति** । ऋदस्यास्तीति ऋत्वान् । ऋकारवानित्यर्थः । **वरीवृश्च्यते परीपृच्छ्यत इति** । ओव्रश्चू छेदने । प्रच्छ ज्ञीप्सायाम् । पूर्ववत् संप्रसारणम् ।[2]

---

१. प्रयोजकानि Dc3. २. After this—सीषुप्यते इति Dc3.

स्वापिस्यमिव्येञां यङि ॥६।१।१९॥

एषां यङि संप्रसारणं स्यात् ॥ सोषुप्यते । सेसिम्यते । वेवीयते ।

न वशः ॥६।१।२०॥

वष्टेर्यङि संप्रसारणं न स्यात् ॥ वावश्यते ।

चायः की ॥६।१।२१॥

चायतेः की स्याद्यङि ॥ चेकीयते ।

ई घ्राध्मोः ॥७।४।३१॥

एतयोरी[1] अन्तादेशः स्याद्यङि ॥ जेघ्रीयते । देध्मीयते ।

अयङ् यि क्ङिति ॥७।४।२२॥

शीङोयङादेशः स्याद्यादौ क्ङिति[2] । ङित्वादन्त्यस्य[3] । शाशय्यते । अभ्यासस्य ह्रस्वः । ततो गुणः । डोढौक्यते[4] ॥

इति यङन्तप्रक्रिया ।

स्वपि । ञिष्वप् शये । स्यम शब्दे । व्येञ् संवरणे । **सोषुप्यत** इत्यादि । संप्रसारणे कृते पश्चात् द्वित्वगुणादि[5] ।

न वशः । **वावश्यत** इति । वश कान्तौ । 'दीर्घोऽकितः' इति दीर्घः ।

चायः । चायृ पूजानिशामनयोः । दीर्घोच्चारणं यङ्लुगर्थम् । दीर्घोच्चारणसामर्थ्यादेव 'न लुमता—' इति प्रत्ययलक्षणप्रतिषेधो न ।

ई घ्रा । **जेघ्रीयते** । **देध्मीयत** इति । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः ।

अयङ् । **ङित्त्वादन्त्यस्येति** । 'ङिच्च' इत्यनेन । **शाशय्यत** इति । शीङ् स्वप्ने । 'दीर्घोऽकितः' । **डोढौक्यत** इति । ढौकृ गतौ ॥

---

१. रीदन्तादेशः D_2, D_3, B_2; री आदेशः C. २. क्ङिति परे C, N_1, D_3, D_4. ३. °दन्तस्य D_1, D_2, D_4, P, C, B_1, B_2. ४. Dropped Dc_3. ५. द्वित्वम् । गुणादिः । Dc_3.

अथ यङ्लुगन्ताः ।

यङोचि च ॥२।४।७४॥

यङोचि[1] प्रत्यये लुक् स्यात् । चकारादन्यत्रापि बहुलं

यङः । 'अचि' इति प्रत्याहारग्रहणं न भवति । किं तु प्रत्ययग्रहणमित्यभिप्रेत्याह—अचि प्रत्यये इति । यदि प्रत्याहार-ग्रहणमिष्टं स्यात् तर्ह्यणीति वदेत् । न[2] हि यङन्तादन्येचः संभवन्ति । इदमेवाच्ग्रहणं ज्ञापकं सर्वे धातवः पचाद्यन्तःपातिन इति । ननु च 'हुश्नुवोः सार्वधातुके' इत्यत्र वार्तिककारो हुश्नुग्रहण-मनर्थकमन्यत्राभावात् । यङ्लुगर्थमिति चेदार्धधातुकत्वात् सिद्धमिति यङ्लुकं छान्दसमभ्युपगम्य हुश्नुग्रहणं प्रत्याख्यातवान् । स मन्यते 'यङोचि च' इत्यत्र 'छन्दसि' इत्यनुवर्तते । तथा[3] भाष्यकारोपि तत्रैवोक्तवान् । एवं तर्ह्येतत् ज्ञापयति भाषायामपि यङ्लुगस्तीति । बेभिदीति चेच्छिदीति बोभवीतीत्यादि सिद्धं भवतीति । अतस्तन्मते-प्यत्र 'छन्दसि' इत्यनुवर्तते । तथा चिरन्तनाः कवयः प्रायो यङ्लुकं न[4] प्रयुक्तवन्तः । एवं स्थितेत्रापि 'छन्दसि' इत्याचार्यैः किमिति नानु-वर्तितम् । उच्यते । काशिकाकारस्तु 'छन्दसि' इति नानुवर्तत इत्युक्त-वान् । तदभिप्रायेण नानुवर्तितम् । तस्य चाभिप्रायः पदमञ्जर्यामुक्तः । वृत्तिकारस्तु मन्यते यदि ज्ञापकेनापि तावद् भाषायामपि यङ्लुक्-प्रयोगो भवति हन्तैवमत्रैव छन्दोग्रहणं मानुवृतत् । प्रयोगस्तु स्वाभिधानं व्यवस्थास्यत इतीति । अत[5] एतत् निश्चितं प्रयोगानुसारेणैव यङ्लुक् प्रयोज्यः । अत एवाग्रे वक्ष्यति—इत्यादि प्रयोगानुसारात् ज्ञेयमिति । अत एवास्माभिरपि आचार्यैः प्रयुक्ता एव प्रयोगा व्याख्या-यन्ते नान्ये कल्प्यन्त इति ज्ञेयम् । ननु च यङ्लुकि सति 'सन्यङोः'

---

१. °च्प्रत्यये C, P, N. २. For नहि यदि Dc1, Dc4. ३. तथा च Dc3. ४. For न यत् Dc1, Dc4 ५. अत एव तस्मिन्निश्चितं Dc3.

लुक्[1] स्यात् । अनङ्गकार्यत्वान्न लुमतेति द्वित्वानिषेधः । यङ्लुकि सत्यन्तरङ्गत्वात् द्वित्वेभ्यासकार्ये च कृते[3] धातुत्वात् तिबादिः[4] । ततस्तिङाश्रितं कार्यं ज्ञेयम्[5] ।

चर्करीतं च ॥[6]

चर्करीतमिति यङ्लुगन्तं तत् परस्मैपादि[7] अदादिवत् ज्ञेयम् । शपो[8] लुक् ।

यङो वा ॥७।३।९४॥

यङ्लुगन्तात् परस्य हलादेः पितः सार्वधातुकस्य ईडागमो वा स्यात् ॥ भूसुवोरिति गुणाप्राप्तौ बोभूतु तेतिक्त इति

इति द्वित्वं न स्यात् । प्रत्ययलक्षणत्वस्य ' न लुमता— ' इति निषिद्धत्वादित्याशङ्क्याह—**अनङ्गे**ति । द्वित्वं ह्यङ्गस्येत्यधिकृत्य नोक्तम् । अतः ' न लुमता—' इति निषेधो न भवति । अङ्गकार्यस्यैव तत्र निषिद्धत्वादित्यभिप्रायः । **यङ्लुकि सतीत्यादि** । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया ।

' चर्करीतं परस्मैपदम् ' इत्यदादौ धातुसूत्रं तदेकदेशेन पठति—**चर्करीतं चे**ति । तद् व्याकरोति—**चर्करीतमिति यङ्लुगन्त**मित्यनेन । पूर्वाचार्यसंज्ञेयमिति निदर्शितम् । **शपो लुगिति** । अदादित्वात् ।

यङः । यङन्तात् परतः शपो विहितत्वात् हलादेः पितः सार्वधातुकस्यासंभवाद् यङ्लुगन्त एव भवतीत्यभिप्रेत्याह—**यङ्लुगन्ता**दिति । **बोभूतु** इति । ' बोभूतु तेतिक्तेलर्षि—' इत्यादि सूत्रे बोभूतु

---

१. लुक् स्यात् dropped N. २. द्वित्वाद्वेन निषेधः B_2. ३. D_1 drops कृते. ४. तिबादि N, D_4; तिबादयः D_3. ५. अत॰ B_2. ६. Dropped D_3. ७. परस्मैपदमदा॰ C. ८. तेन शपो लुक् D_4.

छन्दसि निपाताद्[1] भाषायां यङ्लुकि गुणः ॥ बोभवीति । बोभोति । बोभूतः । बोभुवति । बोभूयात् । बोभूहि । अबोभोत्[2] । अबोभूताम् । अबोभवुः ।[3] अबोभूत् । अबोभूताम् । अबोभवुः । बोभवांचकार । केश्चिदाम् नेष्यते । धातुनिर्देशे[4]

इति गुणरहितस्य छन्दसि निपाताद् भाषायां गुण इत्यर्थः । बोभवीति । भू सत्तायामस्माद्धातोः 'एकाचः—' इति यङ् । यङो लुक् । 'सन्यङोः' इति द्वित्वम् । ह्रस्वः । 'अभ्यासे चर्च' । 'गुणो यङ्लुकोः' । इति । 'सनाद्यन्ता धातवः' इति धातुसंज्ञा । तिबादि । शप् । शपो लुक् । ईट् । गुणावादेशौ । बोभोतीति । ईडभावे रूपम् । बोभूत इति । 'सार्वधातुकमपित्' । इति ङित्त्वाद्गुणाभावः । बोभुवतीति । 'अदभ्यस्तात्' इत्यदादेशः । 'अचि श्नुधातु—' इत्युवङ् । बोभूयादिति । लिङ् । यासुट् । बोभूहीति । 'सेर्ह्यपिच्च' । इत्यपित्त्वान्न गुणः । अबोभवुरिति । लङ् । 'सिजभ्यस्त—' इति जुस् । 'जुसि च' इति गुणः । अबोभूदिति । लुङ् । 'गातिस्था—' इति सिचो लुक् । 'भूसुवोः—' इति गुणनिषेधः । ननु ज्ञापकाद् गुणः स्यात् । मैवम् । ज्ञापकं तु[5] चतुर्ष्वेव लकारेषु लुग्विकरणवत्सु सजातीयेषु नान्यत्र । अबोभूतामिति । तसस्ताम् । अबोभवुरिति । जुस्गुणौ । बोभवांचकारेति । यङो लुक् । द्वित्वादि । धातुत्वम् । लिट् । प्रत्ययान्तत्वादाम् । गुणः । ननु चात्र 'न धातु—' इति गुणनिषेधेन भाव्यम् । मैवं वोचः । धात्वंशलोपनिमित्ते आर्धधातुके गुणनिषेधः । न चायं यङ्लुक् आर्धधातुकं निमित्तीकृत्य । किं तर्हि । अनिमित्तकः । तस्माद् गुणो भवत्येव । केश्चिदामिति । तथा च न्यासकृता पदमञ्जरीकृता च बोभाव बोभूवतुरित्या-

१. निपातनाद् D_3. २. अबोभवीत् । अबोभोत् in place of it in D_2, D_4, B_2. ३. After this D_2 and B_2 D_4, have—लुङि अबोभूत् । सार्वधातुक एव गुणाभावः छन्दसि निपातितस्तेन (आर्धधातुके तु उभयथापि गुणाभावः वेदे भाषायां च तेनात्र न गुणः B_2) नात्र (अत्र न D_4) गुणः । आर्धधातुकस्य सिचो लुगन्त्वेपि तद्विषयत्वस्य सत्त्वात् ।; P has अबोभवुः । अबोभोत् for अबोभूत्···अबोभवुः. ४. C drops from धातु°·· लुक्. ५. 'नेड्गुणौ Dc_3. ६. Dropped Dc_3.

यङ्लुगन्तस्यापि ग्रहणात् भुवो वुगिति वुक् । बोभूव । बोभूवतुः । धातुग्रहणोक्तं यङ्लुकि वेति केचित् । बोभाव । बोभूवतुः । वनीवञ्चीति । वनीवङ्क्ति । वनीवक्तः ।[३] जङ्गमीति । जङ्गन्ति । जङ्गतः । उपधालोपः ।[४] जङ्गमाति । जङ्गमति ॥[५]

वुदाहृतम् । बोभूवेति । वार्तिककारमते नित्यत्वाद्वुक् गुणवृद्धी बाधते । तन्मतमाश्रित्यैतदुदाहृतम् । न्यासकारादिमते तु बोभाव । बोभूवतुः । बोभूवुः । बोभूविथेति भाव्यम् । धातुग्रहणोक्तमिति । तथोक्तं मुग्धबोधे । 'धुग्रहणोक्तं तु वा स्यात्' इति । बोभावेति । 'अचो ञ्णिति' इति वृद्धिः । ननु चात्र 'इन्धिभवतिभ्यां च' इति कित्त्वं स्यात् । ततश्च वृद्धिर्न स्यात् । नैवम् । श्तिपा निर्देशात् तस्य यङ्लुकि प्राप्तिरेव नास्ति । तथोक्तम् ।

श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ इति ।

वनीवञ्चीतीति । वञ्चु गतौ । 'नित्यं कौटिल्ये' इति यङ् । 'नीग्वञ्चु—' इति नीक् । 'यङो वा' इतीट् । वनीवक्त इति । 'अनिदिताम्—' इति न्लोपः । 'चोः कुः' । वनीवचति । वनीवच्यात् । वनीवञ्चीतु । वनीवक्तु । अवनीवञ्चीत् । अवनीवन् । अवनीवञ्चीत् । अवनीवञ्चिष्टाम् । वनीवञ्चांचकार । वनीवञ्चिता । वनीवञ्च्यात् । वनीवञ्चिष्यति । अवनीवञ्चिष्यत् । एवं सर्वत्र रूपाणि ज्ञेयानि । विशेषो वक्ष्यति । गम्लृ गतौ । पूर्ववद्यङ् । यङो लुक् । 'नुगतोनुनासिकान्तस्य' इति नुक् । ईट् । जङ्गन्त इति । 'अनुदात्तोपदेश—' इत्यनुनासिकलोपः । उपधालोप इति । 'गमहन—' इति । जङ्गमतीति ।

---

१. C drops बोभाव । बोभूवतुः २. बोभुवतुः. D_3 ; बोभुवतुः । बोभुवुः । D_4. ३. After it—अदभ्यस्तादिति । वनीवचति B_2, D_4. ४. उपधाया लोपः D_1 ; उपधालोपश्च C. ५. After it—जङ्गमति D_2, P ; धातुग्रहणोक्तं यङ्लुकि विकल्पतः । जङ्गमाति । जङ्गमति B_2. ६. बाधेत Dc_3. ७. आदि dropped Dc_3. ८. भूधातुग्रहणो° Dc_3.

म्वोश्च ॥८।२।६५॥

मान्तस्य धातोर्नः[1] स्यान्मवयोः परतः ॥ जङ्गन्मि । जङ्गन्वः । जङ्घनीति । जङ्घन्ति । जङ्घतः ।[2] जङ्घ्नति । जङ्घनति । 'नाभ्यस्तस्याचि' इति न गुणः । चञ्चुरीति । 'उत्परस्यातः' इति तपरत्वान्न गुणः । दीर्घत्वं स्यादेव । चञ्चूर्ति । चञ्चूर्तः । धातुग्रहणोक्तं यङ्लुकि वेति केचित्[3] । चङ्खन्ति[4] । चङ्खनीति । चङ्खातः । चङ्खन्तः । चङ्ख्नति । चङ्खनति । जञ्जन्ति । जञ्जनीति । जञ्जातः । जञ्जन्तः । जञ्जनति ।

धातुग्रहणोक्तस्य यङ्लुकि विकल्पात् । जङ्घन्तीति । हन हिंसागत्योः । 'धातोरेकाचः—' इति यङ् । लुक् । नुक् पूर्ववत् । 'अभ्यासाच्च' इति कुत्वम् । अनुस्वारपरसवर्णौ । जङ्घत इति । अनुनासिकलोपः । जङ्घ्नति । जङ्घनतीति । 'अदभ्यस्तात्' । 'गमहन—' इत्युपधालोपः । धातुग्रहणोक्तं वेति केचित् । 'हन्तेर्जः' इत्यत्र श्तिपा निर्देशात् जादेशो न । जङ्घहि । चञ्चुरीति । चर गतिभक्षणयोः । 'चरफलोश्च' इति नुक् । 'उत्परस्यातः' इत्युत् । तपरत्वादिति । एतच्च 'उत्परस्यातः' इत्यस्मिन्नेव सूत्रे विवृतम् । चङ्खातः । चङ्खन्त इति । खनु अवदारणे । नुक् । 'जनसनखनाम्' इत्याकारः । स च वा केषांचिन्मते । चङ्ख्नतीति । 'गमहन—' इत्युपधालोपः । जञ्जात इति । जन जनने । पूर्ववदात्वम् ।

---

१. धातोर्मस्य नः B_2. २. After it—जङ्घतः B_1, B_2, C. ३. धातु°...केचित् dropped D_3. ४. B_2 drops all from चङ्खन्ति to दोग्धोति and has only देग्धोति after केचित्; चङ्खातः । चङ्खन्तः । चङ्खनति । चङ्खानाति । जञ्जातः । जञ्जन्तः । जञ्ज्ञति । जञ्जनीति । यङ्लुकि &c. D_3; चङ्खातः । चङ्खन्तः । चङ्खनान्ति । चङ्खनति । जञ्जातः । जञ्जन्तः । जञ्ज्ञति । जञ्जनाति । यङ्लुकि झलि च्छ्वोः शूठौ वकारे च वेति केचित् । दोग्धोति D_4.

जञ्ज्ञति । यङ्लुकि झलि वे च च्छ्वोः शूठौ वेति केचित् । देद्योति । 'लोपो व्योर्वलि' । देदेति । देदिवीति । देद्यूतः[1] । देदितः । देद्यूथः[2] । देदिथः । मिपोनुनासिकत्वाद् ऊठ् । गुणः । देद्योमि[3] । देद्यूवः । देदिवः । विच्छ । वेविच्छीति । वेवेष्टि । वेविश्वः[4] । वेविछ्वः । 'नाभ्यस्तस्य' इत्यनुवृत्तेरुतो वृद्धिर्न । योयोति । योयवीति[5] । नोनोति । नोनवीति[6] । जाहाति[7] । जाहेति । जहात्यभ्यासस्य

जञ्ज्ञतीति[8] । उपधालोपः । चुत्वम् । जञोर्ज्ञः । यङ्लुकीत्यादि । छकारवकारयोः शकारोठौ वा भवतो यङ्लुकि झलि वकारे च परतो भवत इति केचिन्मन्वते[9] । तथोक्तं मुग्धबोधे । 'च्छ्वोः शूटावग्नौ असृक्नौ यङ्लुक् वोस्तु वा' इति । देद्योतीति । दिवु क्रीडायाम् । 'गुणो यङ्लुकोः' । देदेतीति । वलोपः । गुणः । देद्यूत इति । 'च्छ्वोः शूड—' इत्यूठ् । यण् । देदित इति । 'लोपो व्योर्वलि' इति वलोपः । गुणः । 'सार्वधातुक—' इति । देद्यूवः । देदिवः । केषांचिन्मते वोठ् । विच्छेति । विच्छ गतौ । वेविच्छीतीति । तुक् । वेवेष्टीति । 'व्रश्च—' इति षः । ष्टुत्वम् । गुणः । वेवेश्मीति । पूर्ववत् 'च्छ्वोः शूठ्—' इति शः । वेविश्व इति । वकारे चेति शः । नाभ्यस्तस्येत्यादि । 'उतो वृद्धिः—' इत्यत्रानुवर्तितत्वेनेत्यर्थः । योयोतीति । यु मिश्रणे । नोनोतीति । णु स्तुतौ । जाहेतीति । ओहाक् त्यागे । 'दीर्घोकितः' इति दीर्घः । ईट् । आद्गुणः । जहात्यभ्यासस्येति । ओहागिति कित्त्वादकित इत्युच्यमानो दीर्घो नेति तेषामभिप्रायः ।

---

१. देद्यूतः D_2; before it—देद्याति D_3. २. देद्यूथः D_1, B_2; D_3 and D_4 drop देद्यूथः and देदिथः and देद्योमि and has मिपो° after देदिवः. ३. देद्योमि । देद्यूवः D_2, D_4; देद्योमि । देदिवीमि । देद्यूवः B_2. (also देदिवीमि D_4). ४. Before it—वेवेश्मि D_4. ५. D_1, D_3 drop it ६. नोनवीति dropped D_1, D_3, D_4, B_2. ७. D_3 drops it and P and C have 'घुमास्था—' इति पक्षे जेहेति before it; इट्पक्षे जाहेति । अन्यत्र जाहाति । जहात्यभ्यास° B_2, D_4; D_2 has 'यङो वा' इति ईट्पक्षे जाहेति । अन्यत्र जाहति for जाहाति । जाहेति. ८. जञ्ज्ञतीति Dc_3. ९. न्मन्यन्ते Dc_3.

न दीर्घ इति केचित्। जेहाति। जहेति। जाहीतः। जाहितः।
'जपजभदहदश—' इति [4]नलोपिनो ग्रहणाद् यङ्लुकि [5]नलोपः।
दंदशीति। लोपो वेति केचित्। दंदंशीति[6]। दंदष्टि। दंदंष्टि।
स्वपिस्यमीत्युत्वपक्षे सोषोप्ति।[7] अन्यत्र सास्वप्ति।[8]

न धातुलोप आर्धधातुके ॥१।१।४॥

धात्वंशलोपनिमित्ते आर्धधातुके परे तन्निमित्ते गुणवृद्धी

स्वमते तु ककारो 'हश्च व्रीहिकालयोः' इत्यत्र हाङ्हाकोः सामान्यग्रहणार्थः। जाहीत इति। 'ई हल्यघोः' इति ईः। जाहित इति। 'जहातेश्च' इति इत्। दंदशीतीति। दंश दशने। 'जपजभ—' इति नुक्। न्लोप इति। तथोक्तं मुग्धबोधे। 'दंशो न्लोपो वा' इति। दंदष्टीति। इडभावे 'व्रश्च—' इति षः। स्वपिस्यमीति। उत्वपक्षे इति। धातुग्रहणोक्तं केषांचिन्मते विकल्पेनेति[9] उत्वपक्षे इत्युक्तम्। सोषोप्तीति। ञिष्वप् शये। संप्रसारणम्। द्वित्वगुणौ। सास्वप्तीति। 'दीर्घोकितः' इति दीर्घः।

न धातुलोप इति। सर्वस्य धातोर्लोपे कृते यत्र गुणवृद्धी स्तः तदार्धधातुकं न संभवत्येव। तत्र किं निषेधेन। तस्मान्निषेधसामर्थ्याद् धात्वेकदेशे धातुशब्दो वर्तते इति मत्वाह—धात्वंशेति। धात्वंशस्य लोपो यस्तस्य निमित्तं तदार्धधातुकं तस्मिन् परे तन्निमित्ते आर्धधातुकनिमित्ते गुणवृद्धी

---

१. D_1 has जहेति before it. २. Dropped D_4. ३. Dropped D_4. ४. न्लो° D_3, D_4. ५. न्लोपः B_2, D_3, D_4. ६. दंदंशीति B_2, D_4. ७. After it—सोषोपीति B_2. ८. After it—सास्वपीति B_2. ९. विकल्पोनेति Dc_1.

इको न स्तः ॥ बेभिदिता । मरीमृजिता ॥ आर्धधातुके किम् । बेभेत्ति । मरीमार्ष्टि ।

रुग्रिकौ च लुकि ॥७।४।९१॥

ऋदुपधस्य च धातोरभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युः यङ्लुकि ॥ वर्वृतीति । वरिवृतीति । वरीवृतीति । वर्वर्ति । वरिवर्ति । वरीवर्ति ।

न स्त इत्यर्थः । **बेभिदितेति** । भिदृ विदारणे । यङ् । द्वित्वम् । गुणोऽभ्यासस्य । लुट् । तासिः । तासिं निमित्तीकृत्य 'यस्य हलः' इति यकारस्य लोपः । तमेव निमित्तीकृत्य प्राप्तो गुणो निषिध्यते । **मरीमृजितेति** । मृजूष् शुद्धौ । 'रीगृदुपधस्य' इति रीक् । 'मृजेर्वृद्धिः' इति प्राप्ता वृद्धिर्न । **आर्धधातुके किमित्यादि** । ननु बेभेत्ति मरीमार्ष्टीत्येते इचङ्गविकले प्रत्युदाहरणे । तथा हि यथार्धधातुकनिमित्ते गुणवृद्धी न एवं लोपोऽपि नेति । मैवम् । सत्यार्धधातुकग्रहे अन्यपदार्थत्वेन तस्य ग्रहणात् धातुलोप इति बहुव्रीहिः स्यात् । असति त्वार्धधातुकग्रहणे अविशेषितत्वात् लोपस्य लोपमात्रे प्रतिषेधः स्यात् एव । **काशिकाकारैस्तु न्यासकारमतेनैतत्** प्रत्युदाहृतम् । **पदमञ्जरीकारमते तु** असत्यप्यार्धधातुकग्रहणे धातोर्लोपो यस्मिन्निति बहुव्रीहिः । तन्मते तु तुर्वी मूर्च्छा । तोतोर्ति मोमोर्ति 'राल्लोपः' इति च्छ्वोर्लोपस्य गुणस्य चैकनिमित्तत्वान्निषेधः स्यादिति प्रत्युदाहरणे । धातुग्रहणं किम् । लूञ् । लविता । प्रागेव धातुसंज्ञाया भवन्ननुबन्धलोपो धातुलोपो न । इक इति किम् । अभाजि । रागः ।

रुग्रिकौ । रुगागमे उकार उच्चारणार्थः । **वर्वृतीतीत्यादि** । वृतु वर्तने । 'यङो वा' इतीट् वा । मर्मृज्यते मर्मृज्यमाना स इति चोपसंख्यानम् ।

---

१. D_1 drops it. २. D_1 drops it. ३. Dropped B_2. ४. यस्य Dc_3.

ऋतश्च ॥७।४।९२॥

[1]ऋदन्तस्य धातोरपि तथा ॥ [2]चर्करीति । चरिकरीति । चरीकरीति । चर्कर्ति । [3]चरिकर्ति । चरीकर्ति ॥ ऋतश्चेति तपरत्वादॄदन्तस्य न । [4]कॄ । चाकर्ति । [5]चाकरीति । गुणवद् वृद्धेरपि निषेधो ज्ञेयः । मर्मृजीति । ग्रह । [6]जर्गृहीति । ढत्वधत्व-

---

ऋतः । तथेति । अभ्यासस्य रुक्रिक्रीगागमा यङ्लुकि स्युरित्यर्थः । **चर्करीतीत्यादि** । डुकृञ् करणे । '**ऋतश्च**' इति **तपरत्वादॄदन्तस्य नेति** । 'ऋतश्च' इत्यत्र हि द्वयं प्रकृतम् । अङ्गमभ्यासश्च । ऋत इति विशेषणं चोपात्तम् । तथापि तदङ्गस्यैव विशेषणम् । कुतः । तपरत्वसामर्थ्यात् । अभ्यासस्य हि सर्वत्र ह्रस्वो भवति । अत एव ऋदन्तस्य धातोरिति व्याख्यातवान् । तस्मात् तपरकरणादॄदन्तस्य नेत्यभिप्रायः । तथोक्तं वार्तिककृता ।

'किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः' ॥ इति ।

यङ्लुगन्तं किरतिं पचतीत्यत्र यो नयेत् पचतिना तुल्यरूपाणि यः प्रापयेत् पचतिवत् रुगादिकमकृत्वेत्यर्थः । तमहं प्राप्तिज्ञं रुगादीनां प्राप्तिज्ञं तं मन्ये । तेन साधुशब्दराशेः संग्रहः प्रारब्ध इति वार्तिकार्थः । **कॄ इति** । कॄ विक्षेपे । **चाकर्तीति** । द्वित्वम् । 'उरत्' । 'दीर्घोकितः' । **गुणवद् वृद्धेरिति** । एतच्च यङ्लुकश्छान्दसत्वात् छन्दसि च सर्वे विधयो व्यभिचरन्तीति हेतोर्लभ्यते । **मर्मृजीतीति** । मृजूष् शुद्धौ । **जाग्रहीतीति** । ग्रह उपादाने । द्वित्वम् । 'दीर्घोकितः' । चुत्वम् । **ढत्वेत्यादि** । ग्रह अस्माद्यङ्लुकि द्वित्वादौ कृते इडभावे जग्रह् ति

---

१. ऋवन्तधातो° D_2; ऋवन्ताद्धातो° C. २. This and the next two forms dropped D_4. ३. This and the next form dropped D_3. ४. Dropped D_3. ५. D_1, D_3 drop it; after it D_2, D_4, B_2 have —चाकीर्तः । चाकिरति. ६. जाग्रहीति D_2.

ष्टुत्वढलोपाः । जगृढि । केचिद्यङ्निमित्तं संप्रसारणं नेच्छन्ति । जाग्रहीति । ढत्वधत्वष्टुत्वढलोपदीर्घाः जाग्राढि । बलीयस्त्वादादौ संप्रसारणे कृते रुग्रिगादि । जगृढः । जरिगृढः । जरीगृढः । जगृहति । गृधु । जगृधीति । जगर्धि । अजगृधीत् । गुणः । हल्ङ्यादिलोपः ।

इति स्थिते 'हो ढः' इति ढत्वम् । 'झषस्तथोः—' इति धत्वम् । 'ष्टुना ष्टुः' इति ष्टुत्वम् । 'ढो ढे लोपः' इति ढलोपः । 'ढ्रलोपे—' इति दीर्घ इत्यर्थः । बलीयस्त्वादित्यादि । ग्रह तस् इति स्थिते 'सार्वधातुकमपित्' इति ङित्त्वात् 'ग्रहिज्या—' इति संप्रसारणं प्राप्नोति । 'सन्यङोः' इति द्वित्वं च । तत्र संप्रसारणं तदाश्रयं च कार्यं बलवदित्यादौ संप्रसारणमित्यर्थः । ततो द्वित्वम् । 'उरत्' । चुत्वम् । रुग्रिगादीति । जगृह इति स्थिते ऋदुपधत्वाद्रुग्रिग्रीकः । ततोढत्वधत्वष्टुत्वढलोपाः । जगृहतीति । 'अदभ्यस्तात्' । शेषं पूर्ववत् ढत्वादिवर्जम् । गृधु इति । गृधु अभिकाङ्क्षायाम् । अजगृधीदिति । लङ् । ईट् । गुण इत्यादि । इडभावे अजगृध् त् इति स्थिते 'पुगन्त—' इति गुणः । रपरः । 'हल्ङ्याब्—' इति लोपः ।

---

१. °ढलोपदीर्घाः D_1, P. २. जाग्राढि D, P, जर्गाढि B_2, N_1, D_3, D_4; D_1 drops from केचित्...जाग्राढि. ३. जरिगृहति D_3. after this D_2 has —षढोः कः सि इति कस्यासिद्धत्वात् भष्भावः । जर्घक्षि । ४. Before it—ढत्वधत्वष्टुत्वढलोपदीर्घाः B_2. ५. बलीयस्त्वादादौ संप्रसारणं ततो द्वित्वं रुग् रिगादि P, N_1; संप्रसारणस्य बलीयस्त्वादादौ संप्रसारणे कृते ततो द्वित्वम् । रुक्रिगादयः B_2. ६. जर्गृहीते । षढोः कः सीत्यस्यासिद्धत्वात् भष्भावः । जर्घक्षि । लङ् स्तिप्सिपोः । अजर्घट् । B_2, D_4. ७. गृधु अभिकाङ्क्षायाम् B_2. ८. जर्गृधाति N_1. ९. अजगृधात् N_1; अजर्गर्धीत् । D_3. १०. सलोपः D_{03}.

भष्भावः । जश्त्वचर्त्वे । [1]अजर्घत् । अजर्गृद्धाम् । अजर्गृधुः । दश्चेति वा रुत्वम् । रो रि । [2]ढ्लोपे दीर्घः । अजर्घाः । [3]अजर्घत् । [4]अजर्गृद्धम् । इत्यादि[5]प्रयोगानुसारात् ज्ञेयम् ।

इति य[6]ङ्लुक्प्रक्रिया ॥

'एकाचो बशः—' इति भष्भावः । 'झलां जशोन्ते' इति जश्त्वम् । 'वावसाने' । चर्त्वमित्यर्थः । दश्चेत्यादि । सिपि जर्घत् स् इति स्थिते रुत्वम् । 'रो रि' इति पूर्वरलोपः । दीर्घः । विसर्गः । अजर्घत् इति । रुत्वाभावे ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमला प्रक्रियेयं यङन्ता ॥

इति यङ्लुगन्तप्रक्रिया ॥

---

१. भष् C. २. अजर्घर्त् N_1, D_4. ३. ढ्लोपे पूर्वस्य दीर्घो णः C. ४. अजर्घर्त् B_2, D_4, N_1; dropped D_3. ५. अजर्घृद्धम् N_1 ; dropped D_3. ६. प्रयोगवशात् D_3. ७. यङ्लुकि प्रक्रिया D_3, D_4.

अथ सुब्धातुप्रक्रिया ।

सुप आत्मनः क्यच् ॥३।१।८॥

एषितुरात्मसंबन्धिनः इषिकर्मणः सुबन्तादिच्छायां क्यच्-प्रत्ययो वा स्यात् ॥ सुपो धातुवीति सुपो लुक् ।

क्यचि च ॥७।४।३३॥

क्यचि च परे अवर्णस्य ई आदेशः स्यात् ॥ धातुत्वा-ल्लडादयः । आत्मनः पुत्रमिच्छति पुत्रीयति ॥

अथ सुब्धातुप्रक्रिया । **सुपः** । एषितुरित्यादि । आत्मशब्दः परप्रतियोगिवचनः । एषितुरेवात्मसंबन्धितया इषिकर्मभूतं यत् सुबन्तं तस्मादिच्छायामर्थे क्यच्प्रत्ययो भवतीत्यर्थः । सुप्ग्रहणं किम् । वाक्यान्मा भूत् । महान्तं पुत्रमिच्छति । न धातुप्रातिपदिकव्यावृत्त्यर्थः । धातोर्हि सन् बाधकः । प्रातिपदिकात् सुबन्ताच्च जाते विशेषा-भावाच्च । कथं च सुब्ग्रहणाद्वाक्यनिवृत्तिः । उच्यते । यस्मात् सुब् विहितस्तस्माद्भवति । न च सुब् वाक्याद्विहितः । अपि तु तदवयवात् । आत्मनः किम् । राज्ञः पुत्रमिच्छति । क्यचः ककारः 'नः क्ये' इति सामान्यग्रहणार्थः । चकारस्तदविघातार्थः । अन्यथैकेद्ग्रहणे अनेकेतौ क्यङ्क्यषौ न गृह्येयाताम् ।

क्यचि । 'अकृत्सार्वधातुकयोः' इति दीर्घत्वस्यापवादः । **धातुत्वादिति** । 'सनाद्यन्ताः—' इति । **पुत्रीयतीति** । 'वर्तमाने लट्' । शप् । तिबादि । पुत्रीयेत् । पुत्रीयतु । अपुत्रीयीत् । पुत्रीयामास । पुत्रीयिता । पुत्रीय्यात् । पुत्रीयिष्यति । अपुत्रीयिष्यत् ।

---

१. D_1 drops it. २. धातुप्रातिपदिकयोरिति D_3. ३. ईदादेशः N_1; ई स्यात् D_3. ४. °योगित्व° Dc_3. ५. वा Dc_3. ६. °द्बाधकानिवृत्तिः Dc_3.

वान्तो यि प्रत्यये । गव्याति नाव्याति । त्वद्याति । मद्याति । युष्मद्याति । अस्मद्याति । हलि च । गीर्याति । दीव्याति । अदस्याति । रीङ् ऋतः । कर्त्रीयाति । क्यच्व्योश्च ।[१] गार्गीयाति ।

एवं सर्वत्र सुब्धातुषु रूपाणि ज्ञेयानि । विशेषो वक्ष्यते ।

गव्यतीति । गामात्मन इच्छतीति । **नाव्यतीति** । नावमिच्छति । **त्वद्याति** । **मद्यतीति** । त्वामिच्छति । मामिच्छति । 'प्रत्ययोत्तरपदयोश्च' इतित्वन्मदादेशौ । **युष्मद्याति** । **अस्मद्यतीति** । युवां युष्मान् वेच्छति । आवामस्मान् वेच्छति । **हलि चेति** । गिरमिच्छति दिवमिच्छतीत्यत्रार्थे गिर् य दिव् य इति स्थिते 'हलि च' इति सूत्रेण दीर्घ इत्यर्थः । ननु च तत्र 'धातोः' इत्यनुवर्तते । तत् कथमत्र दीर्घः । उच्यते । गॄ निगरणे । अस्मात् क्विप् । क्विबन्तस्य च धातुत्वापरित्यागाद्गिर्शब्दो धातुरेव । दिवेरुणादिक्विपि कृते दिव्शब्दोपि धातुरेव । एवं चेत् कथं **काशिकायां** वृत्तौ 'हलि च' इत्यत्रोक्तं धातोरित्येव दिवमिच्छतीति । एषोप्यदोषः । उणादीनामव्युत्पत्तिपक्षमाश्रित्योक्तं **वृत्तिकृतेति** कृत्वा । आचार्यवर्यैस्तु व्युत्पत्तिपक्षमाश्रित्योक्तमिति ज्ञेयम् । **अदस्यतीति** । अमुमात्मन इच्छति । सान्तत्वात् 'अदसोसेः' इति मुभावो न । **कर्त्रीयति** । आत्मनः कर्तारमिच्छति । **गार्गीयाति** । **गर्गस्य गोत्रापत्यं गार्ग्यः** । '**गर्गादिभ्यो यञ्**' । ततः आत्मनो **गार्ग्यमिच्छतीत्यर्थे क्यच्** । '**क्यच्व्योश्च**' इत्यपत्ययकारलोपः । '**क्यचि च**' **इतीकारः** ।

---

१. 'हलि च' इति दीर्घः । D₃. २. After it—इति तद्धितलोपः N₁.

नः क्ये ॥१।४।१५॥

क्यचि क्यङि क्यषि परे नान्तमेव पदसंज्ञं स्यात् । नान्यत् । नलोपः । राजीयति । नान्तमेवेति नियमान्नेह । वाच्यति । अकृतसार्वधातुकेति दीर्घः । कवीयति ।

क्यस्य विभाषा ॥६।४।५०॥

हलः परेषां क्यच् क्यङ् क्यषां लोपो वा स्यात् आर्धधातुके ॥ समिधिता । समिध्यिता । मान्ताव्ययेभ्यः क्यच् नेष्टः । किमिच्छति । उच्चैरिच्छति ।

नः क्ये । ननु च सुबन्तादेव क्यजादयो विधीयन्ते ततश्च प्रत्ययलक्षणेन सुबन्तं पदमित्येव सिद्धम् । सत्यम् । किं तु नियमार्थम् । सिद्धे सत्यारम्भो नियमार्थः नान्तमेवेति । ननु नान्तं क्य एवेति विपरीतनियमः किं न स्यात् । उच्यते । 'न ङिसम्बुद्ध्योः' इति निषेधात् । विपरीतनियमे हि ङिसम्बुद्ध्योः पदसंज्ञाया अभावादेव नलोपो न स्यात् तत् किं निषेधेनेत्येतत् सर्वं मनसि कृत्वाह-***नान्तमेव पदसंज्ञं स्यादिति*** । ***नलोप*** इति । 'नलोपः प्रातिपदिकान्तस्य' इति । ***राजीयतीति*** । राजानमिच्छति । 'क्यचि च' इतीकारः । ***वाच्यति*** । वाचमिच्छति । अपदत्वान्न कुत्वम् । ***कवीयतीति*** । कविमिच्छति ।

क्यस्य । ***समिधितेति*** । समिधमात्मन इच्छति । ***मान्ताव्ययेति*** । मान्ताश्चाव्ययानि च तेभ्यः क्यच् नेष्ट इत्यर्थः ।

---

१. च परे D3. २. °धातुके परे । कवीयति D2 ; °कयोर्दीर्घः । D3. ३. यस्य लोपो D3.

अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु ॥ ७।४।३४॥

अशनायादयः क्रमात् बुभुक्षाद्यर्थेषु[1] निपात्यन्ते क्यचि ॥ अशनायति । उदन्यति । धनायति । बुभुक्षादौ किम् । अशनीयति ।

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ७।१।५१॥

एषां क्यचि परेसुगागमः[2] स्यादात्मप्रीतौ ॥ अश्ववृषयोर्मैथुनेच्छायामिष्यते । अश्वस्यति वडवा । वृषस्यति गौः । क्षीरलवणयोर्लालसायाम् । क्षीरस्यति बालः । लवणस्यति उष्ट्रः । सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुग्वागम इत्यपरे[3] । आदेशप्रत्ययेतरत्वान्न षः । दधिस्यति । दध्यस्यति ।[4]

अश । भोक्तुमिच्छा बुभुक्षा । पातुमिच्छा पिपासा । गर्धनं गर्धः । अभिकाङ्क्षेत्यर्थः । **अशनीयतीति** । अत्राशनेच्छामात्रं न बुभुक्षा । 'क्यचि च' इतीत्वम् । उदकीयतीति धनीयतीति ज्ञेयम् ।

अश्व । **आत्मप्रीताविति** । विषयसप्तमीयम् । **अश्वस्यतीति** । अश्वमात्मन इच्छति । क्यच् । असुकि अतो गुणे पररूपम् । **वृषस्यतीति** । वृषमात्मन इच्छति । **लालसायामिति** । अभिलाषातिरेको लालसा । मैथुनेच्छायां किम् । अश्वीयति । वृषीयति । लालसायां किम् । क्षीरीयति । लवणीयतीति । **सर्वेति** । तथोक्तं **मुग्धबोधे** । 'धनोदकाशनवृषाश्वलेर्म्यहपानान्न जाभाथ ञा ङनङ्ङ·। सन् सनसनौ 'क्ये न षः' इति । **दधिस्यतीति** । दध्यात्मन इच्छतीत्यभिलाषातिरेकेण सुक् । **दध्यस्यतीति** असुक् । यणादेशः ।

---

१. बुभुक्षाद्यर्थे D_1. २. सुगागमः असुग्वा N_1; सुगसुगागमो D_1; नासुगसुग्वागमो P. ३. इष्यते for इत्यपरे D_3. ४. After it—दधीयति B_2, D_4; दध्यस्यति dropped D_3.

काम्यच्च ॥३।१।९॥

इषिकर्मणः सुबन्तादात्मेच्छायां काम्यच् प्रत्ययो[1] वा स्यात् । काम्यचोधातुविहितत्वेनार्धधातुकत्वाभावादेव गुणाप्राप्तेः कित्त्वप्रयोजनाभावात् ककारस्य नेत्वम् । पुत्रकाम्यति ।

सोपदादौ । यशस्काम्यति । इणः षः[2] । सर्पिष्काम्यति । किंकाम्यति । अव्ययत्वान्न सः । स्वः काम्यति ।

उपमानादाचारे ॥३।१।१०॥

उपमानात् कर्मणः सुबन्तादाचारेर्थे क्यच्[3] स्याद्वा[4] ॥ आचारक्रियायाः[5] प्रत्ययार्थत्वात् तदपेक्षैवोपमानस्य कर्मता । पुत्रमिवाचराति पुत्रीयाति छात्रम् । विष्णूयाति द्विजम् । **अधिकरणाच्च ॥*** प्रासादीयति कुट्याम् ।

काम्यच्च । अथ काम्यचः ककारस्येत्संज्ञा कस्मान्न स्यादित्याशङ्क्याह- **काम्यच्च** इति । इह शब्दस्योपदेशः कार्यार्थो वा भवति श्रवणार्थो वा । अत्र तु कार्याभावात् श्रवणमेव नेत्संज्ञेत्यभिप्रायः । **पुत्रकाम्यतीति** । आत्मनः पुत्रमिच्छति ।

यशस्काम्यतीति । 'सोपदादौ' इति सः । **किंकाम्यतीति** । मान्ताऽव्ययेभ्योऽपि भवतीति प्रदर्शनार्थम् ।

उपमानात् । उपमीयतेऽनेनेत्युपमानम् । आचरणमाचारः । भावे घञ् । आचारक्रियायाः प्रत्ययार्थत्वात् तदपेक्षयैवोपमानस्य कर्मता । **पुत्रीयतीति** । 'क्यचि च' इतीत्वम् । **विष्णूयतीति** । विष्णुमिवाचरतीति । 'अकृत्सार्वधातुकयोः' इति दीर्घः । **प्रासादीयतीति** । प्रासाद इवाचरति ।

---

१. प्रत्ययः स्याद्वा D_1; स्याद्वा (प्रत्ययः dropped) D_3. २. षः D_3. ३. क्यच्प्रत्ययः D_1. ४. स्यात् स्वार्थे D_2. ५. D_2 drops from आचार ...to कर्मता ।

कर्तुः क्यङ् सलोपश्च ॥३।१।११॥

उपमानात् कर्तुः सुप आचारेर्थे क्यङ् स्यात् सान्ते सलोपश्च । अकृत्सार्वधातुकेति[1] दीर्घः । कृष्ण इवाचरतीति कृष्णायते । राजायते । क्यङ्मानिनोश्चेति पुंवत् । कुमारायते वृद्धा ।

ओजसोप्सरसो नित्यं पयसस्तु विभाषया ।[2] सलोपः । ओजायते[3] । अप्सरायते । पयायते । पयस्यते ।[4] सुपूर्वस्य मनसो नित्यम् । सुमनायते ॥ आचारे गल्भह्रोडक्लीबेभ्यः क्विब्वा ॥*

कर्तुः । ननु चेदेकमेव वाक्यम् । तत्र चेनेत्थं समुच्चीयते क्यङ् सलोपश्चेति । तेनेदमुक्तं स्यात् । क्यङ्सलोपौ स्त इति । तथा च युगपद्विधानात् सलोपाभावे क्यङा न भवितव्यम् कृष्णायत इत्यादौ । पयायत इत्यादावेव भवितव्यम् । युगपद्विधाने हि नान्यतराभावे कार्यं स्यात् । यथा 'स्थाघ्वोरिच्च' इतीति शङ्कानिराकरणार्थमाह- **क्यङ् स्यात् सान्ते सलोपश्चेति** । अयमभिसंधिः । चकारोत्रान्वाचये न समुच्चये । तेन द्वे वाक्ये भवतः । क्यङ् स्यात् सर्वत्रेत्येकम् । सान्ते सलोपश्चेति द्वितीयम् । तेन प्राधान्येन विधीयमानः क्यङ् सलोपाभावेपि स्यात् । **राजायत** इति । 'नः क्ये' । पदत्वान्नलोपः । ततो दीर्घः । ङित्त्वादात्मनेपदम् । **कुमारायत** इति । कुमारीवाचरति । पुंवत्त्वे सति दीर्घः ।

सलोपविधौ वाग्रहणं संबध्यते । व्यवस्थितविभाषा च सेत्यभिप्रेत्याह—**ओजस** इति । सलोपविधौ त्र स्थानषष्ठी संबध्यते । विभक्तिविपरिणामात् । तेन 'अलोन्त्यस्य' इत्यन्त्यस्यैव स्यात् । अत एतत् सिध्यति । अप्सरायत इत्यादि । अप्सरस इवाचरति ।

---

१. °सार्वेति दीर्घः D_1; °सार्वधातुके दीर्घः D_2 °कयोर्दीर्घः D_3. २. P and C, D_3 have after it—मनसस्तु सुपूर्वस्य नित्यं लोपो विधीयते ॥ इति ३. ओजायते दुर्बलः । D_3. ४. तक्रम् after it in P ; नीरम् after it in N_1.

क्विपः सर्वस्य लोपः । गल्भादेः क्वावपि तङानौ ॥ गल्भायते । गल्भते । इत्यादि ॥ सर्वप्रातिपदिकेभ्यः क्विब् वाचार इत्येके ॥* कृष्णति । स्वति । स्वामास । स्वांचकार ।

क्विपः सर्वस्य लोप इति । ककारो 'लशक्वतद्धित' इतीत्संज्ञः । इकारः 'उपदेशे—' इति । पकारो 'हलन्त्यम्' इति । 'तस्य लोपः' । 'वेरपृक्तस्य' इति वलोपः । अथ किमर्थं ककारपकारौ क्विप्यासज्येते यतः ककारस्य गुणनिषेधः कार्यम् । न चेह गुणः प्राप्नोति । अधातुविहितत्वेनार्धधातुकत्वाभावात् । पकारस्यानुदात्तत्वं कार्यम् । तच्च क्विपो न संभवति । अनच्कत्वात् सर्वलोपित्वाच्च । न च वेरिति सामान्यग्रहणार्थः ककारः । तदविघातार्थः पकार इति वाच्यम् । अन्यतरेणैव सामान्यग्रहणस्य सिद्धत्वात् । अन्यथा विड्विचोरपि द्वितीयानुबन्धः कर्तव्यः स्यात् । सत्यम् । क्वि इत्येव पठितव्यमित्येके । पकारानुबन्धकरणसामर्थ्यात् प्रकृतेरेव स्वर इत्यपरे । ननु च क्विप् सर्वप्रातिपदिकेभ्यः इत्येव गल्भादेः सिद्धः किमर्थं पृथगुच्यत इत्याशङ्क्याह- **गल्भादेरिति** । अयं भावः । आत्मनेपदार्थानुदात्तस्यानुषञ्जनार्थं पुनर्वचनम् । तथोक्तं **महाभाष्ये** । 'कर्त्तव्यं च । किं प्रयोजनम् । आत्मनेपदार्थमनुबन्धानासङ्क्ष्यामीति । 'गल्भ क्लीब होढ' इति । **इत्यादीति** । आदिशब्दात् । क्लीबायते । क्लीबते । होढायते । होढते । **सर्वप्रातिपदिकेभ्य** इति । तथोक्तं **महाभाष्ये** । 'अपर आह । सर्वप्रातिपदिकेभ्य आचारे क्विप् वक्तव्यः' इति । **कृष्णतीति** । कृष्ण इवाचरति । क्विपो लोपः । कर्तरि लट् । तिप् । शप् । प्रातिपदिकादेवायं क्विप् विधीयते । तेन पदत्वाभावात् 'अतो गुणे' इति पररूपं स्यात् । एतच्च सर्वेभ्य इति वक्तव्ये सर्वप्रातिपदिकेभ्य इति वचनाल्लभ्यते । **स्वामासेति** । प्रत्ययान्तत्वादाम् ।

---

१. Dropped C, B_2. २. तथा च for तथोक्तं Dc_3.

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥३।१।१२॥

भृशादिभ्यश्च्व्यर्थे भवत्यर्थे[1] क्यङ् स्यात् न तु च्व्यन्तेभ्यः । अन्तहल्लोपश्च[2] ॥ अभृशो भृशो भवति भृशायते । उन्मनायते । शश्वत् । शश्वायते । क्विबप्यत्रेति[3] केचित् । भृशति । पक्षे च्विः । भृशीभवति ।

लोहितादिडाज्भ्यः क्यष् ॥३।१।१३॥

लोहितादेर्डाजन्ताच्चोक्तेऽर्थे क्यष् स्यात् । पक्षे च्विः । क्विब् वेत्येके[4] ।

भृशादि । च्व्यर्थः अभूततद्भावः । अच्वेरिति प्रत्येकमभिसंबध्यत इत्याह न तु च्व्यन्तेभ्य इति बहुवचनेन । किमर्थं पुनरिदमुच्यते । यावता भवतियोगे च्विर्विधीयते तेनोक्तत्वात् च्व्यन्तेभ्यः क्यङ् न स्यात् उक्तार्थानामप्रयोग इति कृत्वा । तत्सदृशप्रतिपत्त्यर्थं तर्हि च्विप्रतिषेधः । सादृश्यं चार्थद्वारकम् । अभूततद्भावार्थेभ्यो भृशादिभ्यः प्रत्ययः स्यादिति । अत एवोक्तं च्व्यर्थ इति । उन्मनायत इति । अनुन्मना उन्मना भवति । सलोपः । 'अकृत्सार्वधातुक—' इति दीर्घः । क्विबप्यत्रेति । तथा च बोपदेवपण्डितैर्मुग्धबोधे उक्तम् । 'भृशादिभ्यश्च्व्यर्थे[5] ङ्यक्की वा स्तः' इति । भृश । शीघ्र । चपल । पण्डित । उत्सुक । उन्मनस् । अभिमनस् । सुमनस् । दुर्मनस् । रहस् । रोहत् । रेहत् । संश्वरत् । प्रमत् । वहत् । शश्वत् । तृषत् । शुचिवर्चस् । ओजस् । अरजस् ।[6]

लोहितादि । उक्तेऽर्थे च्व्यर्थे भवत्यर्थे लोहितादिभ्यः डाजन्ताच्च क्यष् । लोहितीस्यादिति । अभूततद्भावे इति च्विः । 'अस्य च्वौ'

---

१. भवत्यर्थे dropped D3. २. अन्त्य° D4. ३. क्विब् वाप्यत्रेति D2; क्विब् वात्रेति C. ४. चेत्येके C. ५. भृशादेश्च्व्यर्थे मुग्ध. ६. After it—सुरजस् Dc3.

वा क्यषः ॥१।३।९०॥

क्यषन्तात् परस्मैपदं वा[1] स्यात् ॥ [2]लोहितायते । लोहितायति । [3]लोहितति । लोहितीस्यात् । चर्मायति । चर्मायते । चर्मति । चर्मीस्यात् । पटपटायति । पटपटायते । पटपटाति । [4]पटपटास्यात् ।[5]

इतीत्वम् । एतच्च क्यष्विधानं लोहितशब्दात् डाजन्ताच्चेति ज्ञातव्यम् । ननु च लोहितादिगणे नीलमधुपेनरहितमन्दे[6]ति पठ्यन्ते तेभ्योपि क्यषा भाव्यम् । न । तानि भृशादिषु द्रष्टव्यानि । इह तु प्रमादपाठस्तेषाम् । एवं चेदादिशब्दोनर्थकः । मैवम् । अपठितेभ्यश्चर्मादिभ्यः क्यष् भवत्येव । अत एव चर्मायत इत्येवोदाहृतं न नीलादीन्युदाहृतानि । चर्मायत इति । 'नः क्ये' इति पदत्वान्नलोपः । ततः 'अकृत्सार्वधातुक—' इति दीर्घः । आकृतिगणोयम् । तथा च 'नः क्ये'[7] इति सामान्यग्रहणार्थं क्यषि[8] ककारोनुबध्यते । न हि पठितानां मध्ये नकारान्तः शब्दोस्ति । चर्मतीत्येतत्त्वन्यमतेनोक्तम् । स्वमते त्वेतदनभिमतमेव । क्वेराचार एवेष्टत्वात् । क्वौ नलोपस्यानिष्टत्वाच्च । पटपटायति पटपटायत इति । डाजन्तस्य उदाहरणम् । पटत्शब्दात् 'अव्यक्तानुकरणाद्—' इति डाचि विवक्षिते डाचि बहुलं द्वे भवत इति द्वित्वम् । ततो डाचि टिलोपः । तत्र कृते पटत्शब्दे योत्शब्दः तदवयवस्य तकारस्य नित्यमाम्रेडित इति पररूपं पकारः । 'वा क्यषः' इत्यात्मनेपदं वा । ननु च क्यष्प्रयोगे डाच् नास्ति कृभ्वस्तियोगे एव विहितत्वात् । सत्यम् । अस्मादेव ज्ञापकात् क्यष्प्रयोगे भवति । पटपटास्यादिति च्वेरुदाहरणम् । अव्ययस्य ईत्वं दीर्घो नेति केचिदितीत्वाभावः ।

---

१. स्याद्वा D_2, D_3. २. लोहितायति । लोहितायते N_1, D_3. ३. D_2, N_1 drop it. ४. So N_1. ५. पटपटास्यादिति केचित् after this in D_3. ६. मन्दे° Dc_3. ७. न क्यषः Dc_3. ८. क्यषि चकारोनुबध्यते Dc_3. ९. क्यषा Dc_3.

कष्टाय क्रमणे ॥३।१।१४॥

चतुर्थ्यन्तात् कष्टशब्दादनार्जवेऽर्थे[2] क्यङ् स्यात् ॥ कष्टाय कर्मणे क्रामति कष्टायते । छद्मायते इत्येके ।

सत्रकक्षकष्टगहनेभ्यः पापचिकीर्षायाम् ॥* सत्रायते । इत्यादि ।[6]

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः ॥३।१।१५॥

रोमन्थतपोभ्यां कर्मभ्यां क्यङ् स्यात् क्रमेण वर्तिचरोरर्थयोः ॥ रोमन्थं वर्तयति रोमन्थायते गौः ।

कष्टाय । कष्टायेति निर्देशात् चतुर्थीसमर्थात् प्रत्ययो विज्ञायत इत्याह- **चतुर्थ्यन्तादिति** । क्रमशब्दोऽस्ति पादविहरणे । अस्त्यनार्जवे । तत्र कस्येह ग्रहणमिति शङ्कानिरासार्थमनार्जवे इति व्याकरोति । जिह्मं पापमनार्जवमिति पर्यायाः । एतच्च 'धातोः कर्मणः—' इति सूत्राद्वाशब्दानुवृत्तेर्लभ्यते । व्यवस्थितविभाषात्वात् । कष्टाय कर्मण इति तादर्थ्यचतुर्थी । अनार्जवे किम् । अजः कष्टं क्रामति । पादविहरणं करोतीत्यर्थः । **छद्मायत इति** । तथोक्तं **मुग्धबोधे** । छद्मायत इति ।

सत्रेत्यादि । अस्मिन्न्यासान्तरे समर्थविभक्तिर्नास्ति । सुबधिकारात् संबद्धयोग्या विभक्तिरध्याहार्या । सत्रायत इति । सत्रं कर्तुमिच्छति । पापं कर्तुमिच्छतीत्यर्थः ।

कर्मणो । **वर्तिचरोरिति** । वर्तनं वर्तिः । ण्यन्तात् क्तिन् । ननु न भाव्यं क्तिना युचा बाधितत्वात् । एतस्मादेव ज्ञापकात् क्तिन्नपि भवतीत्यदोषः । **रोमन्थायत इति** । अभ्यवहृतं पुनराकृष्य चर्वतीत्यर्थः ।

---

१. Before this—क्रमणं प्रवर्तनं न पादविहरणम् N_1; before this—क्यङनुवर्तते न क्यष् । क्रमणं प्रवर्तनं न पादविहरणम् C. २. °वनार्जवेत्यर्थे D_2. ३. कच्छ D_3. ४. कृच्छ्रगहने D_3, D_4. ५. Before it—एभ्यो धर्मवाञ्छायां क्यप् स्यात् । पापं कर्तुमिच्छति D_2. ६. After it—पापचिकीर्षायां किम् । कष्टाय तपसे क्रामति C, N_1. ७. तादर्थ्ये चतुर्थी Dc_3. ८. So Dc_3.

हनुचलन एव ।* तपसः परस्मैपदं च । तपश्चरति तपस्यति ।

बाष्पोष्मभ्यामुद्वमने ॥३।१।१६॥

आभ्यां क्यङ् स्यादुद्वमने ॥ बाष्पमुद्वमति बाष्पायते । उष्मायते । फेनाच्च ॥* फेनायते । धूमाच्चेति केचित् । धूमायते ।

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥३।१।१७॥

एभ्यः कर्मभ्यः कृञर्थे क्यङ् स्यात् ॥ शब्दं करोति शब्दायते । इत्यादि ॥ सुदिनदुर्दिननीहारेभ्यश्च ॥* सुदिनायते ।

हनुचलन एवेति । अभ्यवहृत्य पुनरुद्गीर्य चर्वणं हनुचलनम् । इह न । कीटो रोमन्थं वर्तयति । उद्गीर्णं बहिर्निरस्तमवगीर्णं वा पृष्ठतो निर्गतं रोमन्थाख्यं द्रव्यं वर्तयति पुटिकां करोतीत्यर्थः ।

बाष्पो । **उष्मायत** इति । ऊष्माणमुद्वर्तयति । 'अकृत्—' इति दीर्घः । **फेनायत** इति । फेनमुद्वमति । **धूमादिति** । तथोक्तं **मुग्धबोधे** । बाष्पोष्मफेनधूमादुद्वान्तौ ' इति ।

शब्दवैर । क्रियां विनात्र शब्दादेः कर्मत्वं नेति क्रियात्र करणं न साधकतममित्यभिप्रेत्याह— **कृञर्थे** इति । आदिशब्दात् । वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते । तत्करोतीति णिचि प्राप्तेस्यारम्भः । 'भृशादिभ्यश्च' इत्यतश्चकारानुवृत्तेर्णिजपि । शब्दयति । अटाट्टाशीकाकोटापोटासोटासृष्टाप्रुंष्टादिभ्योपि करोत्यर्थे क्यङ् । अटायते । अट्टायते । शीकायते । कोटायते । पोटायते । सोटायते । सृष्टायते । प्रुंष्टायते ।

---

१. After हनुचलन एव—अभ्यवहृतं पुनराकृष्य चर्वयतीत्यर्थः । कीटो रोमन्थं वर्तयति । अत्र मा भूत् । तपसः &c. N_1. २. After it—अभ्यवहृतं पुनराकृष्य चर्वयतीत्यर्थः C; कीटो रोमन्थं वर्तयति D_2, D_4; नेह । कीटो रोमन्थं वर्तयति D_3. ३. P and D_2, D_4 drop it; C has आधूमायते इत्येके ।. ४. क्यङ् स्यात् कृञर्थे D_1. ५. करोतीति D_3. ६. °पृष्ठा° Dc_3. ७. पृष्ठायते Dc_3

सुखादिभ्यः कर्तृवेदनायाम् ॥३।१।१८॥

एभ्यः कर्मभ्यः क्यङ् स्यात् वेदयितुरनुभवेऽर्थे[1] ॥ सुखं वेदयति सुखायते । दुःखायते ।[2]

नमोवरिवश्चित्रङः क्यच् ॥३।१।१९॥

एभ्यः[3] क्यच् स्यात् क्रमेण पूजायां परिचर्यायामाश्चर्यलेखनयोः ॥ नमस्यति । वरिवस्यति । ङित्त्वात् तङ् । चित्रीयते ।

सुखादिभ्यः । **वेदयितुरनुभवेऽर्थे** इति । वेदयितुः ज्ञातुः स्वसमवेतानां सुखादीनां प्रत्यक्षोपलब्धावित्यर्थः । वेदयितुरनुभवे किम् । सुखं वेदयते प्रसाधको राज्ञः । अनुमानेन निश्चिनोतीत्यर्थः । सुख । दुःख । तृप्र । अस्र । आस्र । अलीक । करुण[4] । कृपण । सोढ । प्रतीप ।

नमः । पूजायामित्यादि[5] । यद्यपि करणे इति सामान्यमनुवर्तते तथाप्यभिधानशक्तिस्वाभाव्याल्लभ्यते पूजादि विनापि वचनम् । **नमस्यति** । पूजयतीत्यर्थः । अथ नमस्यति गुरूनित्यत्र कथं द्वितीया । यतो 'नमः स्वस्ति—' इति चतुर्थी विहिता नमोयोगे । नैवम् । अप्रधानत्वान्नमःशब्दस्यात्रत्यस्य । प्रधाने हि संप्रत्यय इति प्रधानयोगे चतुर्थी । अथवोपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीया । **वरिवस्यति** । परिचरति । शुश्रूषत इत्यर्थः । **चित्रीयते** । विस्मयत इत्यर्थः । 'क्यचि च' इतीत्वम् ।

---

१. वेदनायात्वनुभवेऽर्थे D_2. २. After it—कर्तृवेदनायां किम् । सुखं वेदयते प्रसाधको राज्ञः । D_3. ३. एभ्यः क्यच् स्यात् dropped N_1. ४. करुण Dc_3. ५. मानपूजायां° Dc_3.

पुच्छभाण्डचीवराण्णिङ् ॥३।१।२०॥

एभ्यो णिङ् स्यात् कृञर्थे । पुच्छादुदसने पर्यसने वा । उत्पुच्छयते ।[1] भाण्डात् समाचयने ॥* संभाण्डयते । चीवरादर्जने परिधाने च ॥* संचीवरयते भिक्षुः ।

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥३।१।२१॥

एभ्यः कृञर्थे णिच् स्यात् ॥ मुण्डयति । व्रताद् भोजनतन्निवृत्त्योः ॥* पयः शूद्रान्नं वा व्रतयति ॥ वस्त्रादाच्छादने[2] ॥*

पुच्छ । उदसनमुत्क्षेपणम् । पर्यसनं परितः क्षेपणम् । यदोदसने प्रत्ययस्तदा तद्द्योतनायोच्छब्दः प्रयुज्यते । यदा पर्यसने तदा परिशब्दः । उत्पुच्छयत इति । णाविष्ठवदिति टिलोपः । भाण्डादिति । समाचयनं राशीकरणम् । अर्जनमलब्धस्य लाभः । णिङो ङकार आत्मनेपदार्थः । णकारो 'णेरनिटि' इति सामान्यग्रहणार्थः ।

मुण्ड । यद्यपि प्रातिपदिकाद्धात्वर्थे इति गणसूत्रेणैव मुण्डादिभ्यो णिच् विहितः तत्करोतीत्यादिना च प्रपञ्चितस्तथापीह मन्दधियामनुग्रहार्थं पुनरुच्यते । मुण्डयतीति । मुण्डं करोतीत्यर्थः । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रतादिति । तन्निवृत्तिर्भोजननिवृत्तिः । पयो व्रतयति । भुङ्क्ते इत्यर्थः । शूद्रान्नं व्रतयति । न भुङ्क्त इत्यर्थः ।

---

१. After it—परिपुच्छयते D_1, D_2, D_3, D_4, N_1. २. After it—परिधाने च D_2, D_4, B_2, N_1.

संवस्त्रयति । णाविष्ठवत् प्रातिपदिकस्य ॥[1] इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशाः स्युस्तद्वत् णावपीत्यर्थः । टिलोपः । हलिं कलिं गृह्णाति । अत्र णिचि[2]परत्वाद्वृद्धौ सत्यां टिलोपः । हलयति । महद्धलं हलिः । कलयति । चङि[3] अग्लोपित्वाभावात् सन्वद्भावे प्राप्ते हलकलेत्यदन्तत्वनिर्देशान्न[4] । अचकलत् ।

संवस्त्रयतीति । समाच्छादयतीत्यर्थः । णाविष्ठवदिति । 'तसिलादिष्वाकृत्वसुचः' इतीष्ठनि पुंवद्भाव उक्तः । 'र ऋतः' इति रभावः । 'टेः' इति टिलोपः । 'विन्मतोर्लुक्' इति विन्मतोर्लोपः । स्थूलदूरेति यणादिपरलोपः । प्रियस्थिरेत्यादिना प्रियादीनां प्रस्थस्फाद्यादेशाः । एतानि कार्याणि यथेष्ठनि परतो भवन्ति तथा णावपि परतः प्रातिपदिकस्य भवन्तीति वक्तव्यमित्यर्थः । ननु च प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चेति गण एव पठ्यते । तत् कस्मात् पुनरिहोच्यते । तस्यैव प्रपञ्चार्थम् । अत्र णिचीति । हलि कलि अनयोर्णिचि कृते 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति इष्ठवद्भावेन टिलोपश्च । तत्र विप्रतिषेधे परं कार्यमिति परत्वादादौ वृद्धिः । तस्यां च सत्यां पश्चात् टिलोप इत्यर्थः । हलयतीति । हलिशब्दं व्याकरोति- महदिति । चङीत्यादि । हलि कलि अनयोर्णिचि चङि च सति परत्वाद्वृद्धौ कृतायामैकारे जाते पश्चाट्टिलोपः । ततश्च नाग्लोप्यङ्गं तस्मादग्लोपित्वाभावात् 'सन्वत्' इति सन्वद्भावे प्राप्ते 'हलकल' इति सूत्रेदन्तत्वनिपातनादग्लोपित्वात् सन्वद्भावो न स्यादित्यर्थः । अचकलदिति ।

---

१. D_1 drops it. २. Dropped N_1. ३. मुण्धातुत्वात् वा सन्वद्भावे for चङि . प्राप्ते D_2, D_4; before it—मुण्धातोरनेकाच्चश्च सन्वद्भावो वेति केचित् । अनेन N_1. ४. After it—न च D_2 ; °दन्तनिर्देशान्न D_3, D_4.

अजेहलत् । कृतयति । अचकृतत् । तूस्तानि वि[2]हन्ति वितूस्तयति ॥ सत्यापपाशेति णिच् । अर्थ[1]वेदसत्यानामापुग्वाच्यः ॥* [3]सत्यमाचष्टे सत्यापयति । अर्थापयति । वेदापयति । [4]पाशाद्विमोचने ॥ * विपाशयति । [5]रूपं पश्यति रूपयति । वीणयोपगायति उपवीणयति । तूलै[6]रनुकृष्णाति अनुतूलयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । अभ्यषेणयत् । अषोपदेशत्वेपि [7]स्थादिष्वभ्यासेति नियमादभ्यासव्यवायेपि षत्वम् । अभिषिषेणयिषति । लोमान्यनुमार्ष्टि अनुलोमयति । त्वचं गृह्णाति त्वचयति । वर्मणा संनह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते अवचूर्णयति । [8]हस्तिनाति[9]क्रामति

‘णिश्रि—’ इति चङ् । ‘चङि’ इति द्वित्वम् । **कृतयतीति** । कृतं गृह्णाति । **अचकृतदिति** । अग्लोपित्वान्न दीर्घसन्वद्भावौ । **वितूस्तयतीति** । जटीभूतकेशादिस्तूस्तशब्दार्थः । **सत्यापयतीति** । आपुग्विधिसामर्थ्यान्न टिलोपः । **अर्थापयतीति** । अर्थमाचष्टे **वेदापयति** । वेदमाचष्टे । **विपाशयतीति** । पाशं विमोचयतीत्यर्थः । **उपवीणयतीति** । वीणया समीपे गायतीत्यर्थः । **त्वचयतीति** । अकारान्तस्त्वचशब्दोयम् । त्वचेति सूत्रेदन्तग्रहणात् । **अवचूर्णयतीति** । अदन्तेषु सत्यापयतीत्यादिषूदाहरणेष्विष्ठवद्भावाट्टिलोपः । ननु च सत्यापयतीत्यस्मिन् सूत्रे आख्यानमोचनादयोर्था अनुक्ताः कथं लभ्यन्ते । उच्यते । शब्दानामर्थाभिधानं स्वाभाविकं न वाचनिकम् । अतः शक्तिस्वाभाव्यादयमर्थः स तस्येति निर्दिष्टः । **हस्तिनातिक्रामति**

१. Dropped N_1. २. विनिहन्ति D_2, D_3, D_4, B_2. ३. सत्य—सत्यापयति after वेदापयति D_3. ४. पाशाद् विमोचने । संयतने च । संपाशयति । विपाशयति । N_1. ५. Before it—रूपादर्शने N_1. ६. रनुतूलयति D_3. ७. स्थादिष्विति D_2, P, N_1. ८. Before it—तेनातिक्रामयतीत्यर्थे णिच् N_1. ९. °क्रामयति N_1. १०. So Dc_3.

अतिहस्तयति । हस्तौ निरस्यति हस्तयति इति केचित् । तत्करोति तदाचष्ट इति चुरादित्वात् सुबन्ताण्णिच् । षष्ठं करोति आचष्टे वा षष्ठयति । सुब्धातुत्वात् षस्य न सः ।

अतिहस्तयतीति 'तेनातिक्रामति' इति णिच् । टेर्लोपः । हस्तौ निरस्यति हस्तयतीति । 'तत्करोति—' इत्यनेन सूत्रावयवेन चुरादिगणोक्तं सूत्रत्रयं लक्ष्यते । 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' । 'तत्करोति तदाचष्टे' 'तेनातिक्रामति' 'धातुरूपं च' कृतकरणार्थे इत्येतेषामर्थः । प्रातिपदिकाद्यथादर्शनं णिच्प्रत्ययः स्यात् क्रियाविशेषे । कूलमुल्लङ्घयति उत्कूलयतीत्यादि । तस्यैव निदर्शनार्थे द्वितीय-तृतीयसूत्रे । तदिति द्वितीयासमर्थात् प्रातिपदिकात् करोतीत्यर्थे च । तथा तेनेति तृतीयासमर्थात् अतिक्रामतीत्यर्थे णिच् भवति । तीक्ष्णं करोति तीक्ष्णयति । वाक्यमाचष्टे वाक्ययति । हस्तिना अति-क्रामति अतिहस्तयतीत्यादि । 'धातुरूपं च' इत्यनेन कात्यायनोक्तमा-ख्यानादित्याशङ्कां स्मारयति । तृतीयस्यार्थः कर्तृकरणयोरर्थे च यथादर्शनं णिच् स्यात् । आलानेन बध्नाति आलानयति हस्तिनः । दात्रेण लुनाति दात्रयति व्रीहीनित्यादि । सुब्धातुत्वादिति । सुब्धातुष्ठिवु-ष्वष्कतीनां सत्वनिषेध इति । अथ देवदत्तस्य दण्डं करोति दण्डयति देवदत्तमित्यादिषु वृत्तौ कथं द्वितीया । वाक्ये हि षष्ठी दृश्यते । उच्यते । वृत्तौ प्रत्ययार्थः प्रधानमप्रधानं प्रकृत्यर्थः । तत्राप्रधानं प्रधानानुयायीति प्रकृत्यर्थे दण्डादौ प्रत्ययार्थमनुयाति सति तत्संबन्धी देवदत्तोपि प्रत्ययार्थमनुगच्छति । तदनुगमाच्च कर्म संपद्यत इति । यत्र च संबन्धिना वृत्तिस्तत्र कर्मणोन्तर्भूतत्वात् तस्याकर्मतैव । यथा

---

१. अङ्गुलिनिरस्यतीत्यर्थे णिच् । २. अतिहस्त D4. ३. Dropped N1. ४. So B2, N1, D3, D4. ५. न सस्य षः D2. ६. हस्तौ निरस्यति तथोक्तं मुग्धबोधे हस्तौ निरस्यति हस्तयति इति । Dc3. ७. After it—आचष्ट इत्यर्थे च । Dc3. ८. हस्तिनम् । Dc3.

कविं पटुं वाचष्टे । वृद्धौ सत्यां टिलोपः । कवयति । [1]पटयति । चङि अनग्लोपित्वात् [2]सन्वद्भावः । अचीकवत् । अपीपटत् । आख्यानात् कृतस्तदा[3]चष्टे इति कृल्लुक् । प्रकृतिप्रत्यापत्तिः । [4]प्रकृतिवच्च कारकम् । कंसवधाख्यानमाचष्टे कंसं घातयति ।

तपः करोतीति तपस्यति । मुण्डयति छात्रमित्यादौ तु सामान्यकर्मान्तर्भूतं [5]विशेषकर्मणा तु सकर्मकत्वम् । एवं चेत् पुत्रीयतेरपि विशेषकर्मणा सकर्मकत्वं स्यात् । पुत्रीयति छात्रमिति । सत्यम् । किं त्वाचारक्यचा बुद्धेरपहृतत्वात् सदपीच्छाक्यचः कर्म न युज्यते । तथा हि पुत्रीयति छात्रमित्यत्र पुत्रमिवाचरतीति प्रतीयते न तु पुत्रमिच्छतीति । तदुक्तं हरिणा—

'सदपीच्छाक्यचः कर्म तदाचारक्यचाहृतम्' । इति ।

वृद्धौ सत्यां टिलोप इति । कविपटुशब्दयोर्णिचि जाते परत्वादादौ 'अचो ञ्णिति' इति वृद्धिः । तत इष्ठवद्भावेन टिलोप इत्यर्थः । **कवयति** । **पटयती**ति । शपि गुणायादेशौ । **चङि** इति । ऐकारौकारयोष्टिलोपेन लोपादनग्लोपित्वमित्यर्थः । **अचीकवदि**ति । 'सन्यतः' इतीत्वम् । 'दीर्घो लघोः' इति दीर्घः । **आख्यानादि**ति । आख्यायत इत्याख्यानं कंसवधादि । तद्वाचकः शब्दोऽप्युपचारादाख्यानम् । तस्मात् कृदन्तात् 'तदाचष्टे' इत्यर्थे णिच् कृतो लुक् । प्रकृतेः प्रत्यापत्तिर्या प्रत्ययमुत्पादितवती तस्याः प्रकृतेः पूर्ववदविकृतेन रूपेणावस्थानम् । **प्रकृतिवच्चे**ति । चकारो भिन्नक्रमः कारकमित्यस्यानन्तरं द्रष्टव्यः । कार्यशब्दश्चाध्याहार्यः । ततोऽयमर्थः । कृतो या प्रकृतिस्तस्या यथा कार्यमडादि तथा ण्यन्ताया अपि स्यात् । किं च प्रकृतिवत् कारकमपि स्यादित्यर्थः । **कंसं घातयती**ति । हन्तेर्भावे 'हनश्च वध' इत्यप्प्रत्ययो वधादेशश्च । ततः कंसस्य वध इति षष्ठीसमासः ।

---

१. Dropped N_1. २. C drops सन्वद्भावः. ३. Dropped in N_1, D_1; D_2, B_2 have णिच् after it. ४. Before it—स्वरूपाद्विप्रच्युतस्य पुनस्तत्प्राप्तिः प्रत्यापत्तिः C; प्रकृतिप्रत्यापत्तिः D_4. ५. °कर्मणां तु सक° Dc_2.

बलिं बन्धयति । ऊढिमाचष्टे ऊढयति । चङि द्वित्वं प्रति ढत्वादीनामसिद्धत्वात् सणिच्कस्य इति[1] इत्यस्य द्वित्वम् । हलादिशेषः[4] । औजिढत् । ढीत्यस्य द्वित्वमिति दुर्गगुप्तादयः । औडिढत् ।

कंसवधाण्णिच् । तत्र कृते अपप्रत्ययस्य कृतो लुक् । प्रकृतेर्हन्[5] अस्याः प्रत्यापत्तिः । हन् इति स्थिते 'अत उपधायाः' इति वृद्धिः । 'हो हन्तेः—' इति कुत्वम् । हकारस्य घकारः । 'हनस्तः' इति तकारोन्तादेशः । शप् । गुणायादेशौ । कारकं च प्रकृतिवत् । प्रकृतेश्च कंसः कर्मासीत् । अत्र द्वितीया कंसमित्यत्र । बलिं बन्धयतीति । बलिबन्धाख्यानमाचष्टे । ऊढयतीति । वह प्रापणे । अस्मात् स्त्रियां क्तिन् । 'हो ढः' इति ढत्वम् । 'झषस्तथोः—' इति धत्वम् । 'ष्टुना ष्टुः' इति ष्टुत्वम् । 'ढो ढे लोपः' इति । 'वचिस्वपि—' इति संप्रसारणम् । 'ढ्रलोपे—' इति दीर्घः । ततो णिच् । टिलोपः । शप् । गुणायादेशौ । चङीत्यादि । ऊढि अस्माण्णिचि लुङि 'णिश्रि—' इति चङि च सति टिलोपे च ऊढि अत् इति स्थिते 'चङि' इति द्वित्वं प्राप्नोति । तत् प्रति पूर्वत्रासिद्धन्यायेन ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् इति अस्य सणिच्कस्य द्वित्वम् । येषां णौ कृत उवर्णादेश आकार आवादेश एव स्थानिवदिति मतं तेषां मतेनेत्यर्थः । अन्येषां हि काशिकाकारादीनां मते णौकृतस्य सर्वस्यापि स्थानिवत्त्वमिति टिलोपस्य स्थानिवत्त्वादिकारसहितस्य चङ्परे णौ द्वित्वम् । औजिढदिति । 'कुहोश्चुः' इति महाप्राणस्य हकारस्य महाप्राणो झकारः । 'अभ्यासे चर्च' इति झकारस्य जकारः । 'णेरनिटि' इति णिलोपः । ढीत्यस्येत्यादि । तेषां हि मते पूर्वत्रा-

१. Before it—बलिमाचष्टे । D3. २. Before it—क्रियान्वाख्यानाच N1. ३. ही इत्यस्य द्वित्वम् D2. ४. हलादिः D1, D3, D4, N1. ५. इह हन् इति Dc3.

ऊढमाचष्टे ऊढयति । औजिढत् । अल्लोपस्य णौ स्थानिवत्त्वमाश्रित्य ढतशब्दस्य द्वित्वादौजढदिति काशिकायाम् । औडढत् इत्यन्ये । प्रकृत्यैकाच् । वृद्धिपुगागमौ । स्वापयति । इष्ठवत्त्वात् पुंवद्भावः । एनीमाचष्टे एतयति । र ऋत इति रत्वम् । प्रथयति । स्थूलदूरेति यणादिलोपः । स्थवयति । प्रियस्थिरेति

सिद्धन्यायः । ऊढमाचष्ट इति । निष्ठान्तम् । पूर्ववत् प्रक्रिया । औजिढदिति । अत्रापि येषां मते णौ कृत उकारादेश आकार आवादेश एव स्थानिवत् तेषां मते लोपस्य स्थानिवत्त्वाभावात् 'अजादेः—' इति सणिच्कस्य ढत्वादीनामसिद्धत्वाच्च ढ्ति इत्यस्य द्वित्वम् । अल्लोपस्येत्यादि । काशिकाकारस्य हि मते णौकृतं सर्वं स्थानिवद् भवतीति अल्लोपस्य स्थानिवत्त्वमाश्रित्य ढ्तशब्दस्य द्वित्वादग्लोपित्वात् सन्वद्भावाद्यप्राप्तेरौजढदिति सिध्येदित्यभिप्रायः । तथा च काशिकायामाह वामनः । औजढदिति ऊढमाख्यदिति णिच् । तदन्ताल्लुङ् । 'चङि' इति द्विर्वचने कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाण्णौ च यष्टिलोपस्तस्य स्थानिवद्भावात् ढ्त इत्यस्य द्विरुच्यत इति । औडढदित्यन्य इति । दुर्गगुप्तादयः । वृद्धीति । 'अचो ञ्णिति' इति वृद्धिः । 'अर्तिह्री—' इति पुक् । स्वापयतीति । स्वमाचष्ट अस्माण्णिचि सतीष्ठवद्भावेन टिलोपे प्राप्ते 'प्रकृत्यैकाच्' इति प्रकृतिभावः । ततो वृद्धिपुकौ । एनीमिति । 'वर्णादनुदात्त—' इति ङीप् तस्य च नः । एतयतीति । 'तसिलादिषु—' इति पुंवद्भावात् ङीप्नयोरभावः । प्रथयतीति । पृथुमाचष्टे । स्थवयतीति । स्थूलमाचष्टे । यणादिलोपः पूर्वस्य च गुणः ।

१. C drops it. २. C. drops it. ३. औडढत् औडिढदित्यन्ये D2 ; C drops औडढत् इत्यन्ये । ४. इष्टवत्त्वात् D3 ; इष्टवद्भावः D4. ५. After it—दवयति D3 : ६. स्वापयम° Dc3.

प्रादयः । प्रियमाचष्टे प्रापयति । [1]स्थापयति । साधयति । संज्ञापूर्वको विधिरनित्य इति नोपधावृद्धिः । कनयति । विन्मतोर्लुक् । स्रग्विन्—[2]स्रजयति । [3]ईश्मन्—ईशयति । त्वचयति । श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च । श्वेतयति । अश्वयति । गालोडयति । आह्वरयति ।

कण्ड्वादिभ्यो यक् ॥३।१।२७॥

कण्डूञ् इत्यादि[4]भ्यो यक्प्रत्ययः स्यात् कृञर्थे । धातवः

ततोत्र् । **प्रापयतीति** । 'प्रकृत्यैकाच्' इति प्रकृतिभावः । वृद्धिपुकौ । **स्थापयतीति** । स्थिरमाचष्टे । **साधयतीति** । बाढमाचष्टे । 'अन्तिक-बाढ—' इति साधादेशः । कनयतीति । युवानमल्पं वाचष्टे । 'युवाल्पयोः' इति कनादेशः । **स्रग्विन्निति** । स्रजो विद्यन्तेस्य । 'अस्माया—' इति विन् । तमाचष्टे । अत्र विनो लुक् । **ईश्मन्निति** । ईडस्यास्ति ईश्मान् । तमाचष्टे । करोति वा । अत्र मतुपो लुक् । **त्वचयतीति** । त्वग्वन्तमाचष्टे । पूर्ववत् । **श्वेतेति** । श्वेताश्वशब्दस्याश्वेत्यस्य लोपः । अश्वतरस्य तरइत्यस्य लोपः । गालोडितेत्यस्य इतरय[5] लोपः । आह्वरकेत्यस्य कलोप इत्यर्थः ।

कण्डू । **धातव** इति । तत्र धात्वधिकारात् धातुभ्य एव प्रत्ययो विधीयते । तथा च गुणप्रतिषेधार्थः ककारोनुबध्यते । तथा चोक्तम् ।

'धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि ।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः' ॥ इति ।

---

१. स्फापयति D_2; साधयाति । स्थापयति । प्रशस्यमाचष्टे श्रापयति । ज्यापयति । संज्ञापूर्वको &c. N_1. २. स्रग्विणमाचष्टे स्रजयति B_2. ३. इश्मनमाचष्टे इशयति B_2. ४. इत्येवमादिभ्यः D_3. ५. इतशब्दस्य Dc_3.

प्रातिपदिकानि चेति कण्ड्वादयो द्विविधाः ।[1] कण्डूं करोति कण्डूयति ।[2] कण्डूयते ।[3] हृणीङ्—हृणीयते ।[4] महीङ्—महीयते । इत्यादि । क्यजन्तात् सन् । नामधातोर्यथेष्टं द्वित्वं वक्तव्यम् । पुपुत्रीयियिषति । पुतित्रीयियिषति । पुत्रीयियियिषति । पुपुतित्रीयियियिषति । अजादेराद्यतरस्य द्वित्वम् । अशिश्वीयिषति । अश्वीयियिषति ।[6] अशिश्वीयियिषति । यत्र संयोगे नदराः सन्ति तत्र आदेरेव न द्वित्वम् । इन्दिद्रीयिषति । चन्दिद्रीयिषति । कण्ड्वादेस्तृतीय-

कण्डूमित्यादि । कण्डूयतीत्यस्यार्थः । ञित्त्वादुभयपदम् । हृणीयते । ङित्त्वादात्मनेपदम् । आदिशब्दात् । मन्तु । वल्गु । असूञ् । वेञ् । वेट् । लोञ् । तिरस् । इरस् । उरस् । उषस् । मागध । मेधा । नडस् । मघस् । दुःख । सुख । वरण । चामर । अधर । भिषक् । भिष्णुक् । इषुध । इषुह । गद्गद । एला । केला । लेट् । लोट् । स्वरूपग्रहणम् । लेट्यति । लोट्यति । चरण । तुरण । भुरण । कण्ड्वादिः । **पुपुत्रीयिषतीति** । पुत्रमिच्छति क्यच् । पुत्रीयितुमिच्छतीति सन् । 'सन्यङोः' इति प्रथमस्य द्वित्वे प्राप्ते नामधातोर्यथेष्टं द्वित्वं स्यात् । प्रथमस्य वा द्वितीयस्य वा तृतीयस्य वा त्रयाणामपि वा । **अशिश्वीयिषतीति** । अश्वमिच्छति क्यच् । अश्वीयितुमिच्छति । सन् । **यत्र संयोग** इत्यादि । ण्यन्ते विवृतम् । **इन्दिद्रीयिषतीति** । इन्द्रमिच्छति । इन्द्रीयितुमिच्छति । क्यजन्तात् सन् । **चन्दिद्रीयिषतीति** । चन्द्रमिच्छति । चन्द्रीयितुमिच्छति । चिकामयिषत इति । कमेर्णिङ् । कामयितुमिच्छति । सन् । द्वित्वम् । पूर्ववत् सनः ।

१. After it—तत्र धात्वधिकारे धातुभ्यः प्रत्यया विधीयन्ते न प्रातिपदिकेभ्यः । तथा च ककारः गुणप्रतिषेधार्थः । कण्डूं &c. B_2; N_1 follows B_2, but has धात्वधिकारात् and तथा गुणप्रतिषेधार्थः ककारः ।. २. Dropped N. ३. हृणीङ् लज्जारोषणयोः B_2. ४. महीङ् वृद्धिपूजनयोः B_2 ५. Dropped D_1. ६. Dropped D_2, D_3, P, C

स्यैव । कण्डूयियिषति । णिङः सन् । चिकामयिषते । आयादित्वाद्वा । चिकमिषते । यङ् सन् ण्यन्तात् सन् । बोभूयिषयिषति । इत्यादि ॥[2]

इति नामधातुप्रक्रिया ॥

चिकमिषत इति । णिङभावे रूपम् । बोभूयिषयिषतीति । भू सत्तायाम् । अस्मात् अतिशयेन भवतीत्यस्मिन्नर्थे 'धातोः—' इति यङ् । द्वित्वम् । 'गुणो यङ्लुकोः' । ततो बोभूयितुमिच्छतीत्यस्मिन्नर्थे सन् । इट् । णिच् । पुनः सन् । पुनरिट् । शबादि । इत्यादि प्रयोगानुसारात् ज्ञेयम् ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा—
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय—
व्याख्यानेस्मिन् प्रसादे निरगमदमला **प्रक्रिया नामधातोः** ॥

---

१. यङः C. २. After it—ज्ञेयम् P, D_3 ; N drops इत्यादि.

अथ पदव्यवस्था ।

अनुपराभ्यां कृञः ॥१।३।७९॥

आभ्यां[1] कृञः परस्मैपदं स्यात् कर्तृगेपि फले[2] । गन्धनादावपि ॥ अनुकरोति । पराकरोति ।

अभिप्रत्यतिभ्यः क्षिपः ॥१।३।८०॥

कर्तृगेपि फले[3] परस्मैपदम् ।[4] अभिक्षिपति । एवं प्रति अति ।[5]

प्राद्वहः ॥१।३।८१॥

प्रवहति ।

अथ पदव्यवस्था । तत्र प्राधान्यादल्पत्वाच्च सूचीकटाहन्यायेन परस्मैपदं तावदाह—

अनु । कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितं तदपवादः परस्मैपदं विधीयते ।

अभि । क्षिप प्रेरणे । स्वरितेत् । अस्मात् कर्तृगे फले आत्मनेपदे प्राप्ते परस्मैपदं विधीयते । **अभिक्षिपतीति** । 'तुदादिभ्यः शः' । अभिप्रत्यतिभ्यः किम् । आक्षिपते । कर्तृग्रहणमनुवर्तते । तेनेह न । अभिक्षिप्यते ।

प्राद्वहः । वह प्रापणे । स्वरितेत् । अस्मात् परस्मैपदं प्रपूर्वात् स्यात् । **प्रवहतीति** । शप् ।

---

१. After it—परस्य C. २. कर्तृगे फलेपि C, D_2, D_3, N_1; कर्तृगामिनि फले D_1; कर्तृगे फले B_2. ३. कर्तृगामिफले D_1; कर्तृगे फलेपि D_3. ४. After it—स्यात् D_2 ; क्षिपः परस्मैपदं स्यात् D_3. ५. प्रतिक्षिपति । एवमति । D_3.

परेर्मृषः ॥१।३।८२॥

परिमृष्यति ॥ वहेरपि । परिवहति ।

व्याङ्परिभ्यो रमः ॥१।३।८३॥

विरमति । आरमति । परिरमति ।

उपाच्च ॥१।३।८४॥

उपपूर्वाद्रमतेरन्तर्भूतण्यर्थात् परस्मैपदं स्यात् ॥ यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः ।

विभाषाकर्मकात् ॥१।३।८५॥

उपाद्रमोऽकर्मकाद्वा परस्मैपदं स्यात् ॥ उपरमति । उपरमते । निवर्तत इत्यर्थः ।

परेः । मृष तितिक्षायाम् । स्वरितेत् । अस्मात् परस्मैपदं स्यात् परिपूर्वात् । **परिमृष्यतीति** । 'दिवादिभ्यः श्यन्' । **वहेरपीति** । परेरिति योगविभागाद्वहेरपि परिपूर्वात् परस्मैपदं स्यादित्यर्थः ।

व्याङ् । रमु क्रीडायाम् । अनुदात्तेत्त्वादात्मनेपदे प्राप्ते व्याङ्परिपूर्वात् परस्मैपदम् ।

उपात् । 'विभाषाकर्मकात्' इत्यनेनोपपूर्वाद्रमेरकर्मकादेव आत्मनेपदं वक्ष्यति । तस्मादत्र सकर्मकादेवात्मनेपदं स्यात् । सकर्मकत्वं चोपपूर्वस्य रमेर्ण्यर्थं विना न घटत इत्याभिप्रेत्याह—**अन्तर्भूतण्यर्थादिति** । बुद्ध्यादावनुप्रविष्टण्यर्थादित्यर्थः । पृथग्योगकरणमुत्तरार्थम् ।

विभाषा । पूर्वेण नित्ये प्राप्ते विकल्पः ।

---

१. Before it—परस्मैपदं स्यात् N_1. २. Before it—परस्मैपदं स्यात् N_1. ३. Before it—यावद्भुक्तम् N_1.

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥१।३।८६॥

एभ्यो णेः पूर्वमचित्तवत्कर्तृकेभ्योऽचलनार्थेभ्योऽपि ण्यन्तेभ्यः परस्मैपदं स्यात् ॥ बोधयति पद्मम् । योधयति काष्ठम् । विनाशयति[1] । जनयति[2] । अध्यापयति[3] । प्रावयति । द्रावयति । स्रावयति ।

निगरणचलनार्थेभ्यश्च ॥१।३।८७॥

अणौ सकर्मकेभ्योऽचित्तवत्कर्तृकेभ्योऽपि अदनकम्पना-[4]र्थेभ्यो ण्यन्तेभ्यः कर्तुः फलेऽपि परस्मैपदं स्यात् ॥ भोजयति ।

बुध । 'णिचश्च' इत्यात्मनेपदे प्राप्ते परस्मैपदं विधीयते । बुध अवगमने । युध संप्रहारे । णश अदर्शने । जनी प्रादुर्भावे । इङ् अध्ययने । प्रुङ् गतौ । द्रु गतौ । स्रु गतौ ।[5] ये चात्राकर्मकाः बुधयुधनश-जनास्तेषाम् 'अणावकर्मकात्—' इत्येव सिद्धे वचनमचित्तवत्कर्तृकार्थ-मित्याह—**अचित्तवत्कर्तृकेभ्य** इति । प्रुङ्द्रुस्रुवः चलनार्था अपि । तेषां 'निगरण—' इत्येव सिद्धे यदा अचलनार्थास्तदर्थं वचनमित्याह—**अचलनार्थेभ्य** इति । **बोधयतीति** । विकासयतीत्यर्थः । विनाशयतीत्यत्र दुःखमिति ज्ञेयम् । **जनयतीत्यत्र** सुखं ज्ञेयम् । जनीजृष इति मित्त्वात् ह्रस्वः । **अध्यापयतीति** । 'क्रीङ्—' इत्यात्वम् । पुक् । **प्रावयतीति** । प्रापयतीत्यर्थः । **द्रावयतीति** । विलापयतीत्यर्थः । **स्रावयतीति** । स्यन्दयतीत्यर्थः । स्यन्दनं चलनमिति न प्रसिद्धं लोके[6] ।

निगरण । अयमपि योगः सकर्मकार्थोऽचित्तवत्कर्तृकार्थश्चे-त्याह—**अणौ सकर्मकेभ्य** इत्यादि । 'णिचश्च' इति कर्तृयोगे फले प्राप्तस्यात्मनेपदस्यापवादोऽयमित्याह—**कर्तुः फलेपीत्यादि** । **भोजयतीति** ।

---

१. नाशयति पापम् । N_1. २ दुःखं जनयति B_2. ३. सुखमध्यापयति B_2. ४. निगरणार्थेभ्यः कम्पार्थेभ्यो C. ५. After it—श्रु श्रवणे Dc_3. ६. चलनं प्रसिद्धं लोके Dc_3.

चेलयति ॥ अत्तेर्निषेधः ॥* आदयते ।

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥१।३।८८॥

णेः पूर्वमकर्मकात् चित्तवत्कर्तृकात् ण्यन्तात् परस्मैपदं स्यात् ॥ शेते कृष्णः । शाययति कृष्णं गोपी । अकर्मकात् किम् । भक्तिं कारयते । प्राणिकर्तृकात् किम् । शोषयते शालिं वायुः । अणौ किम् । रूपयन्तं प्रयोजयति । रूपयते हरिः ।

भुज पालनाभ्यवहारयोः । चलयतीति । चल कम्पने । घटादित्वा-न्मित्त्वम् । ततो ह्रस्वः । आदयत इति । अद भक्षणे ।

अणौ । शाययतीति । शीङ् स्वप्ने । शोषयत इति । शुष शोषणे । रूपयत इति । रूप रूपकरणे । चुरादिः । णावकर्मकः । काशिकाकारमते हेतुमण्णिच्येव योऽकर्मकस्तस्यैव पुनर्हेतुमण्णिचि कृते प्रत्युदाहरणत्वम् । तथा ह्याह जयादित्यः काशिकायाम् । 'चेतयमानं प्रयोजयति चेतयते इति केचित् प्रत्युदाहरन्ति । तदयुक्तम् । हेतुमण्णिचो विधिः । प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यम् । इदं तु प्रत्युदाहरणम् । आरोहयमाणं प्रयोजयति आरोहयते' इति । आरोहयमाणमित्यस्य स्वयमेवारोहत इत्यर्थः । आचार्यवर्यैस्तु भेदस्याविवक्षया णिग्रहणं णिजातेराश्रयणादिति मन्वानैः प्रत्युदाहृतम् । तथा 'णेरणौ—' इत्यस्मिन् सूत्रे अनेनैव प्रत्युदाहृतम् । अणाविति किम् । गणयति गोपालको गणम् । गणयति गणः स्वयमिति । न्यासकारेण च णिजात्याश्रयणादेव समर्थितम् ।

१. चालयति मरुत्पर्णम् ; B_2, D_4; चलयति मरुत्पर्णम् N, (marginal note—घटादित्वान्मित्व ततो ह्रस्वः); चलयति Com. २. C drops it. ३. Before it—कर्तुःफलेपि D_2, D_4, B_2 ; कर्तुः फले N_1.

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥१।३।८९॥

सूत्रद्वयोक्तलक्षणवद्भ्योऽपि पादिभ्यो ण्यन्तेभ्यः कर्तुः फले परस्मैपदं न स्यात् ॥[1] पाययते[2] । दमयते । आयामयते । आयासयते । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते । धेटोऽपि निषेधः ॥[3]* धापयते । अकर्तुः फले परस्मैपदं स्यादेव । सोमं पाययति याज्ञिकः[4] ।[5]

न पा । पा इति लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति पा पाने इत्ययं गृह्यते । न पा रक्षणे । दमु उपशमे । यमु उपरमे । यसु प्रयत्ने । एतावाङ्पूर्वौ । मुह वैचित्ये । परिपूर्वः । रुच दीप्तौ । नृती गात्रविक्षेपे । वद व्यक्तायां वाचि । वस निवासे । भौवादिकः । न वस आच्छादने । अदादिकः । पूर्वोक्ताद्धेतोः । **सूत्रद्वयोक्ते**ति । 'निगरणचलनार्थेभ्यश्च' 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति सूत्रद्वयोक्तलक्षणवद्भ्य इत्यर्थः । तत्र पिबतिर्निगरणार्थः । दमप्रभृतयश्चित्तवत्कर्तृकाः । नृतिश्चलनार्थः । **पाययत** इति । 'शाच्छासा—' इति युक् । **दमयत** इति । अमन्तत्वान्मित्त्वम् । ततो ह्रस्वः । **आयामयत** इति । यमोऽपरिवेषणे इति मित्संज्ञानिषेधः । ङिद्विशिष्टस्याकारस्योपादानमुपसर्गप्रतिपत्त्यर्थम् । **धापयत** इति । धेट् पाने । आत्वम् । 'अर्तिह्री—' इति पुक् । **अकर्तुरि**त्यादि । कर्त्रभिप्रायात्मनेपदापवादः परस्मैपदं तस्यैव निषेधात् ॥

इति परस्मैपदम् ॥

---

१. After this—पिबतिरदनार्थ । दमप्रभृतयः चित्तवत्कर्तृकाः । नृतिश्चलनार्थे B_2, D_4 (चलनार्थोऽपि D_4.) २. पाययते सकृत् पयः । दमयते । दाम्यति । देवदत्तः । तमन्यः । दमु उपशमे । N_1. ३. Before it—यमोऽपरिवेषणेति मित्संज्ञा प्रतिषिध्यते ।. ४. याजकः N, D_2, D_4, B_2. ५. After it—इति परस्मैपदम् N_1, D_4.

कर्तरि कर्मव्यतिहारे ॥१।३।१४॥

धातोः कर्तर्यथात्मनेपदं स्यात् क्रियाया विनिमये ॥
व्यतिभवते । [1] श्नसोरल्लोपः । व्यतिस्ते । व्यतिपाते । [2] व्यतिषते ।
तासस्त्योरिति सलोपः । व्यतिसे । धि च । व्यतिध्वे । ह एति ।
व्यतिहे । व्यतिषीत । [3] व्यत्यसै । व्यत्यास्त । [4] व्यतिराते ।

अथात्मनेपदम् । कर्तरीति । कर्मशब्दः क्रियावाची न पारि-
भाषिककर्मवाचीत्याह—क्रियाविनिमय इति । अन्येन कर्तुमिष्टां
क्रियामन्यः करोति इतरसंबन्धिनीं चेतरः । स व्यतिहारस्तद्विशिष्ट-
क्रियावचनाद्धातोरात्मनेपदं स्यादित्यर्थः । व्यतिस्ते इति । अस
भुवि । अकारे लुप्ते 'सात्पदाद्योः' इति षत्वनिषेधः । व्यतिषत
इति । 'आत्मनेपदेष्वनतः' इत्यत् । 'उपसर्गप्रादुर्भ्याम्' इति षः ।
व्यतिसे इति । अकारसकारयोर्लुप्तयोः स इति प्रत्ययमात्रं पदमिति
षत्वनिषेधः । व्यतिस्वहे । व्यतिस्महे । व्यतिषीतेति । 'लिङः
सीयुट्' । अल्लोपः । षत्वम् । व्यतिषीयाताम् । व्यतिषीरन् ।
इत्यादि । व्यतिस्ताम् । व्यतिषाताम् । व्यतिस्व । व्यतिषाथाम् ।
व्यतिध्वम् । व्यत्यसै इति । लोडुत्तमैकवचनम् । इट् ।
एत्वम् । 'एत ऐ' । 'आडुत्तमस्य' इत्याट् । [5] वृद्धिः ।
पित्त्वादल्लोपाभावः । यण् । व्यत्यसावहै । व्यत्यसामहै ।
व्यत्यास्तेति । लङ् । आट् । व्यत्यासाताम् । इत्यादि । लुङादौ
अस्तेर्भूः । व्यत्यभविष्ट । व्यतिबभूवे । व्यतिभवितासे । व्यति-
भविषीष्ट । व्यतिभविष्यते । व्यत्यभविष्यत । व्यतिरात इति ।

१. कर्तर्यात्मने° P; D₂. B₂. २. क्रियाविनिमये B₂, N, Com. ३. After it—चन्द्रार्कौ । अर्केण चिकीर्षितं चन्द्रः करोतीत्यर्थः । N₁. ४. D₂ drops it. ५. लोपः C. ६. व्यत्यतिस्ताम् C. ७. After it—व्यत्यासाताम् । व्यत्यासत । व्यतिसते । व्यतिससे । व्यतिरासे । व्यतिरै । आलोपपक्षे । व्यतिरे B₂.

व्यतिरासे । व्यतिरै । आलोपपक्षे । व्यतिरे ।

ईडजनोर्ध्वे च ॥७।२।७८॥

ह्रादित्वाज्जनेर्द्वित्वम् ॥ व्यतिजज्ञिषे । व्यतिजज्ञिध्वे ।[1] व्यतिजज्ञिष्व ।

न गतिहिंसार्थेभ्यः ॥१।३।१५॥

एभ्यः क्रियाविनिमयेपि नात्मनेपदं स्यात् ॥ व्यतिसर्पन्ति । व्यतिघ्नन्ति ॥ हसादीनां[4] च ॥* व्यतिहसन्ति । एवं जल्पपठी[7] ।

रा आदाने । अदादित्वाच्छपो लुक् । व्यतिराते प्रथमपुरुषैकवचनम् । व्यति रा आते । सवर्णदीर्घे कृते द्विवचनमपि तथैव । 'आत्मनेपदेष्वनतः' इत्यत् । सवर्णदीर्घे कृते बहुवचनमपि तथा । **जनेरिति** । जन जनने । अस्य व्यतिजज्ञाते । व्यतिजज्ञाते । व्यतिजज्ञाथे । व्यतिजज्ञे । व्यतिजजन्महे । व्यतिजज्ञीत । व्यतिजजाताम् । व्यतिजज्ञाताम् । व्यतिजज्ञताम् ।

व्यतिजज्ञिध्वेति । 'ईडजनोर्ध्वे च' इतीट् । व्यत्यजजात । व्यत्यजज्ञाताम् । व्यत्यजज्ञत । व्यत्यजनिष्ट । व्यतिजज्ञे । व्यतिजनिता । व्यतिजनिषीष्ट । व्यतिजनिष्यते । व्यत्यजनिष्यत । कर्मव्यतिहारे किम् । लुनन्ति । कर्तृग्रहणमुत्तरार्थम् । शेषात् कर्तरि परस्मैपदम् ।

न गति । पूर्वेण प्राप्तमात्मनेपदं निषिध्यते । **व्यतिसर्पन्तीति** । सृप्लृ गतौ । **व्यतिघ्नन्तीति** । हन हिंसागत्योः । 'गमहन—' इत्युपधालोपः । **हसादीनामिति** । हसप्रकाराणां शब्दार्थानामित्यर्थः । अत एवाह—**एवं जल्पपठी** इति । जल्प व्यक्तायां वाचि । पठ पठने ।

---

१. Before it—उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । D_3. २. Before it—व्यतिजज्ञाते । व्यतिजज्ञते । N. ३. After it—व्यतिजजन्वहे । व्यतिजज्ञिष्व । व्यतिजज्ञिध्वम् । व्यतिजजने । व्यतिजज्ञनावहे N; व्यतिजज्ञिष्व । व्यतिजज्ञिध्वम् । D_4, Com. ४. Dropped N_1. ५. अन्योन्यं व्यतिगच्छन्ति C. ६. च न B_2, N_1 ७. पठ C. ८. Before it—व्यतिजजन्वहे Dc_3.

इत्यतेर्न निषेधः । संप्रहरते । वहेर्न निषेध इति केचित् । व्यतिवहते ।

इतरेतरान्योन्योपपदाच्च ॥१।३।१६॥

आभ्यां युक्तात् क्रियाविनिमयेपि नात्मनेपदं स्यात् ॥ इतरेतरस्य अन्योन्यस्य वा व्यतिलुनन्ति । परस्परस्येति: । परस्परस्य व्यतिलुनन्ति ।

नेर्विशः ॥१।३।१७॥

निपूर्वाद्विश आत्मनेपदं स्यात् ॥ निविशते ।

व्यतिजल्पन्ति । व्यतिपठन्ति । संप्रहरन्त इति । हिंसार्थत्वान्निषेधः प्राप्तो नेति भावः ।

इतरेतर । उपोच्चारितपदमुपपदम् । इतरेतरान्योन्ययुक्ताच्छब्दादित्यर्थः । व्यतिलुनन्तीति । लूञ् छेदने । 'श्नाभ्यस्तयोरातः' ।

नेः । निविशन्त इति । विश प्रवेशने । तुदादित्वाच्छः । न्यविशत । अत्राटा व्यवधानं नास्ति । तदागमास्तद्ग्रहणेन गृह्यन्त इति । नेरुपसर्गस्य ग्रहणम् । अर्थवद्ग्रहणे नानर्थकस्येति । तेनेह न । मधुनि विशन्ति भ्रमराः ।

---

१. व्यतिसंप्रहरते C ; संप्रहरन्ते N_1, D_4. २. व्यतिवहन्ते D_4. ३. इतरेतरान्योन्योपपदात् D_1. ४. आत्मनेपदं न स्यात् D_1. ५. After it—यदागमास्तद्ग्रहणेन गृह्यन्ते । तेनाटा नास्ति व्यवधानम् । न्यविशत N_1, C and D_1, C has additional matter after न्यविशत—नेरुपसर्गस्य ग्रहणम् । अर्थवद्ग्रहणेनानर्थकस्य ग्रहणमिति । तस्मादिह न भवति । मधुनि विशन्ति भ्रमराः ।

परिव्यवेभ्यः क्रियः ॥१।३।१८॥

एभ्यः क्रीणातेस्तङानौ स्तः ॥ इहाभयपदिनामात्मनेपदमकर्त्रभिप्रायार्थम् । परिक्रीणीते । एवं वि अव ।[1]

विपराभ्यां जेः ॥१।३।१९॥

विजयते । पराजयते ।[2]

आङो दोऽनास्यविहरणे ॥१।३।२०॥

आङ्पूर्वाद्दात्र आत्मनेपदं स्यात् न तु मुखप्रसारणेऽर्थे ॥ आदत्ते । मुखप्रसारणे तु व्याददाति मुखं कृष्णः ।

परि । डुक्रीञ् द्रव्यविनिमये । **परिक्रीणीत** इति । 'ई हल्यघोः' । पर्यादय उपसर्गा गृह्यन्ते । कथम् । 'क्रियः' इति संबन्धे षष्ठी । तेन क्रियः संबन्धिनो ये पर्यादयः । संबन्धश्चार्थद्वारको विशेषणविशेष्यभावः । स च उपसर्गैरेव क्रियः संभवति । अत उपसर्गा एव । तेनेह न । बहवो वयो यस्मिन् धने तत् बहुवि क्रीणाति धनमिति ।

विपराभ्याम् । 'शेषात्—' इत्यस्यापवादः । **विजयत** इति । जि जये । अत्राप्युपसर्गावेव । तेनेह न । बहुवि जयति धनम् । परा जयति सेना ।

आङः । अकर्त्रभिप्रायार्थमारम्भः । ददातेरेवास्यविहरणे वृत्तिर्नान्येषां दारूपाणाम् । तस्माद्दास्यविहरणप्रतिषेधेन तस्यैव ग्रहणं विज्ञायत इत्याह—दात्र इति । **आदत्ते** इति । 'श्नाभ्यस्तयोः'

---

१. परिव्यवेभ्यः परस्मात् क्रीणातेरात्मनेपदं स्यात् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । N_1. २. Before it—विपराभ्यां जयतेरात्मनेपदं स्यात् N_1. ३. After this—विपराशब्दौ उपसर्गौ गृह्येते साहचर्यात तेनेह न स्यात् । बहु विजयति वनम् । पराजयति सेनेति ।

मुखप्रसारणसंदेशादपि न। विपादिकां व्याददाति। स्वाङ्गकर्मका-द्रेव निषेधः। नेह। व्याददते पिपीलिकाः पतङ्गस्य मुखम्।

क्रीडोनुसंपरिभ्यश्च ॥१।३।२१॥

एभ्यः क्रीडस्तङानौ स्तः॥ अनुक्रीडते। एवं संपरि। चकारादाङोपि। आक्रीडते। अवादपि केचित्। अवक्रीडते॥ समोकूजने॥* संक्रीडते। कूजने तु संक्रीडति चक्रम्। आगमेः क्षमायाम्॥* आगमयते कालम्॥ आशिषि नाथः॥*

इत्याकारलोपः। चर्त्वम्। व्याददाति। प्रसारयतीत्यर्थः। **विपादिका** पादस्फोटः। **स्वाङ्गकर्मकादिति**। नात्राद्रवादिकं स्वाङ्गं विवक्षितम्। किं तर्हि। स्वमङ्गं स्वाङ्गं तत् कर्म यस्य स स्वाङ्गकर्मकः। तेन परसंबन्धिना मुखेन यदा सकर्मको भवति तदात्मनेपदं स्यात्। व्याददते पिपीलिकाः पतङ्गस्य मुखमिति।

क्रीडः। क्रीड व्यवहारे। यद्यन्वादिरुपसर्गत्वं व्यभिचरति संशब्दस्तु न व्यभिचरति। अतस्तत्साहचर्यादन्वादिरप्युपसर्गः। तेन कर्मप्रवचनीयप्रयोगे न स्यात्। माणवकमनु क्रीडतीति। माणवकेन सह क्रीडतीत्यर्थः। 'तृतीयार्थे' इति कर्मप्रवचनीयसंज्ञा। **अवादिति**। तथोक्तं **मुग्धबोधे** 'पर्यन्ववाङः क्रीडः' इति। **आगमेरिति**। गमेराङ्पूर्वाण्ण्यन्तादात्मनेपदं स्यात्। क्षमा उपेक्षा। कालहरणं परीक्षणमित्यर्थः। **आगमयत** इति। परीक्षत इत्यर्थः। अमन्त-त्वान्मित्संज्ञायां ततो ह्रस्वः। लट्। अन्यत्र विद्यामागमयति। सनन्तस्य शकेर्जिज्ञासायामिति च वक्तव्यम्। विद्यासु शिक्षते। विद्या जिज्ञासितुं घटत इत्यर्थः। 'सनिमी—' इति इस्। अभ्यास-लोपः। **आशिषीति**। नाथ याच्ञोपतापैश्वर्याशीःषु इत्यनुदात्तेत्।

---

१. °सद्दृशेपि न D_2, D_4. २. पिपिलिक्यः C. ३. पतङ्गमुखम् C, P. ४. °विति N_1, D_4. ५. D_2, D_4, N_1, B_2 drop it and have after it—क्षमायां किम्। विद्यामागमयति।; P drops it. ६. विद्या Dc_1.

सर्पिषो नाथते ।[1] हरतेर्गत्यनुकारे ॥* पैतृकमनुहरते अश्वः ।[2] किरतेर्हर्षजीविकाकुलायकरणेषु आत्मनेपदम् ॥*

अपाच्चतुष्पाच्छकुनिष्वालेखने ॥६।१।१४२॥

अपात् किरतेः सुट् स्याच्चतुष्पाच्छकुनिकर्तृके[3] आलेखनेऽर्थे । अपस्किरते वृषो हृष्टः[4] । कुक्कुटो भक्षार्थी[5] । श्वा[6] आश्रयार्थी[7] । अन्यत्र मल्लोपकिरति[9] । गजोपकिरत्यम्भः । आङि नुप्रच्छ्योरिष्टिः ॥*

तत्रानुदात्तत्वादेवात्मनेपदे सिद्धे आशिष्येव नाथतेरात्मनेपदम् न याच्ञादिष्विति[8] नियमार्थमेतत् । **सर्पिष** इति । 'आशिषि नाथः' इति षष्ठी । **पैतृकमिति** । पितृवद्गमनस्वभावमित्यर्थः । पितुरागतम् । 'ऋतष्ठञ्' । 'इसुसुक्तान्तात्कः' । गतीति किम् । स्वरूपानुकरणे मा भूत् । पैतृकमनुहरतीति । **पदमञ्जरीकारमते** गतिशब्दः प्रकारवाची । प्रकारस्ताच्छील्यमित्यर्थः । **किरतेरिति** । कॄ विक्षेपे । अस्य विक्षेप एवार्थः । हर्षादयस्तु विषयाः । तत्र हर्षो विक्षेपहेतुः । जीविका कुलायकरणं च फलम् ।

अपात् । हर्षजीविकाकुलायकरणेष्विति वाच्यम् । **अपस्किरत** इति । तुदादित्वाच्छः । 'ऋत इत्' । रपरः । **मल्लोपकिरतीति** । अत्र चतुष्पात्त्वं हर्षादयोऽपि न सन्ति । **गजोपकिरतीति** । अत्र हर्षाद्यभावः । चतुष्पात्त्वमस्त्येव ।

१. After it—आशिषि किम् । नाथति । याचते इत्यर्थः । इह याच्ञायां मा भूत् । N_1, D_2, D_4, B_2. २. After it—गत्यनुकार इति किम् । हरतीति स्वरूपानुकरणं मा भूत् । D_2, D_4, B_2 (अनुहरतीति B_2, D_4): अनु सादृश्येऽपि । तुर्गतिमनुकरोतीत्यर्थः । गत्यनुकार इति किम् । अनुहरतीति । स्वरूपानुकारे मा भूत् N_1. ३. °कर्तृकेऽर्थे (आलेखनेऽर्थे dropped) D_3. ४. Before it—जीविकायाम् C. ५. भक्ष्यार्थी C; भिक्षार्थी D_3. ६. Before it—कुलायकरणे C. ७. आश्रयार्थी वा । D_3, N_1. ८. याच्ञा° Dc_1. ९. मल्लोपः किर° Dc_3.

ओनुते । आपृच्छते । शप उपालम्भे ॥* विप्राय शपते ।[१]

समवप्रविभ्यः स्थः ॥१।३।२२॥

एभ्यस्तिष्ठतेस्तङानौ स्तः ॥ संतिष्ठते । समस्थित । एवं अव प्र वि ।[३] आङः प्रतिज्ञाने ॥*[४] नित्यं शब्दमातिष्ठते ।[५]

प्रकाशनस्थेयाख्ययोश्च ॥१।३।२३॥

स्वाभिप्रायाविष्करणे निर्णेत्राख्यायां च स्थस्तङानौ स्तः ॥ कृष्णाय तिष्ठते गोपी । त्वयि तिष्ठते विवादः ।

आनुत इति । उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः । **शप** इति । वाचा शरीरस्य स्पर्शनमुपालम्भः शपथविशेषः । तथा हि । विप्रस्य शरीरं स्पृशामीति शपथं कुर्वाणो विप्राय शपत इति प्रयुज्यते । 'श्लाघह्नुङ्स्था—' इति संप्रदानसंज्ञायां विप्रायेति चतुर्थी । अन्यत्र शपत्याक्रोशतीत्यर्थः ।

समव । **संतिष्ठत** इति । 'पाघ्रा—' इति तिष्ठादेशः । **समस्थितेति** । लुङ् । 'स्थाघ्वोरिच्च' इतीदन्तादेशः । सिच्च कित् । 'ह्रस्वादङ्गात्' इति सिचो लोपः । **नित्यमिति** । मीमांसको नित्यशब्दं प्रतिजानीत इत्यर्थः ।

प्रकाशन । स्वाभिप्रायकथनं प्रकाशनम् । तिष्ठत्यस्मिन्निति स्थेयः । विवादपदनिर्णेता लोके रूढः । तस्य प्रतिपत्त्यर्थमाख्याग्रहणमिति प्रकाशनस्थेयाख्याशब्दार्थमभिप्रेत्याह—**स्वाभिप्रायेति** । **कृष्णाय तिष्ठत इति** । स्वाभिप्रायाविष्करणं करोतीत्यर्थ । 'श्लाघ—' इति संप्रदानसंज्ञा चतुर्थी । **त्वयीत्यादि** । अस्माद्विवादस्य त्वमेव निर्णेतेत्यर्थः ।

---

१. आनुते शृगालः । शब्दं करोतीत्यर्थः N_1. २. After it—अन्यत्र शपति C; उपालम्भ इति किम् । शपति इत्याक्रोशे मा भूत् D_2, B_2; उपालम्भने इति किम् । शपतीत्याक्रोशे मा भूत् । N_1, D_4. ३. प्र अव वि D_1. ४. आङः स्थः प्रति° D_3. ५. After it—मीमांसकः B_2.

उदोऽनूर्ध्वकर्मणि ॥१।३।२४॥

उदस्तिष्ठतेस्तङानौ स्तः अनूर्ध्वक्रियायाम् ॥ उद ईहायामिष्टिः ॥* मुक्तावुत्तिष्ठते । ईहायां किम् । ग्रामाच्छतमुत्तिष्ठति । अनूर्ध्वक्रियायां[1] किम् । आसनादुत्तिष्ठति ।

उपान्मन्त्रकरणे ॥१।३।२५॥

उपात् स्थस्तङानौ[2] स्तः मन्त्रकरणे ।[3] गायत्र्योपतिष्ठतेऽर्कम् । मन्त्रकरणे[4] किम् । यौवनेनोपतिष्ठति पतिम्[5] ।

उपाद्देवपूजासङ्गमैत्रीकरणपथिष्विति[6] वक्तव्यम् ॥* विष्णुमुपतिष्ठते । यमुना गङ्गामुपतिष्ठते । सन्तमुपतिष्ठते[7] । गङ्गामुपतिष्ठते पन्थाः ॥ लिप्सायां वा ॥* भिक्षुर्धार्मिकमुपतिष्ठते उपतिष्ठति वा ।

उदः इति । उत्पूर्वात्तिष्ठतेरीहायां परिस्पन्दे वर्तमानादात्मनेपदस्येष्टिरित्यर्थः । ईहाग्रहणमनूर्ध्वक्रियाविशेषणम् । ईहात्मिकायामनूर्ध्वक्रियायामिति । मुक्तावुत्तिष्ठत इति । तदर्थं घटते इत्यर्थः । ग्रामादित्यादि । उत्पद्यत इत्यर्थः ।

उपात् । मन्त्रः करणं साधकतमं यस्य धात्वर्थस्य स तथा । मन्त्रकरणे किम् । यौवनेनोपतिष्ठति ।

उपादिति । देवस्य पूजा देवपूजा । सङ्गः उपश्लेषः । मित्रस्य कर्म मैत्रम् । पन्था मार्गः । स कर्ता भाव्यः । विष्णुमित्यादि । पूजयतीत्यर्थः । यमुनेत्यादि । संगता भवतीत्यर्थः । सन्तमिति । मैत्रं करोतीत्यर्थः । गङ्गामिति । प्राप्नोतीत्यर्थः । लिप्सायामिति । लब्धुमिच्छा लिप्सा । तस्यां गम्यमानायां वात्मनेपदमित्यर्थः । भिक्षुरित्यादि । लिप्सायां जातायां धार्मिकमुपसंक्रामतीत्यर्थः ।

---

१. अनूर्ध्वे क्रियायां D_2. २. तिष्ठते° D_1. ३. After it—सति D_3. ४. D_1 drops from मन्त्र°...पतिम्. ५. पतिमुपतिष्ठति यौवनेन C, D_3; यौवनेनोपतिष्ठति कृष्णं गोपी P. ६. सङ्गतिमित्रकरण° N_1. ७. महामात्रानुपतिष्ठते । मैत्रीकरणेन महामात्रानाराधयतीत्यर्थः । N_1.

अकर्मकाच्च ॥१।३।२६॥

उपपूर्वात् तिष्ठतेरकर्मकात्तङानौ स्तः ॥ ज्ञानमुपतिष्ठते ।[२]

उद्विभ्यां तपः ॥१।३।२७॥

आभ्यामकर्मकात्तपः प्राग्वत् ॥ उत्तपते । वितपते ।[४] आत्माङ्गकर्मकाच्चेष्टिः ॥* उत्तपते वितपते पाणिम् । अकर्मकात् स्वाङ्गकर्मकात् किम् । महीं वितपत्यर्कः ।

आङो यमहनः ॥१।३।२८॥

आङः पराभ्यामकर्मकाभ्यामाभ्यां तङानौ स्तः ॥ आयच्छते । आहते । आघ्नते ।[८] आत्माङ्गकर्मकाभ्यां च ॥*

अकर्मकात् । अकर्मकादकर्मकक्रियावचनादित्यर्थः । **ज्ञानमुपतिष्ठत** इति । संनिधीयत इत्यर्थः । अकर्मकात् किम् । देवमुपतिष्ठति ।

उद्विभ्याम् । उद् वि एताभ्यां परादकर्मकक्रियावचनात् तप संताप इत्यस्माद्धातोरात्मनेपदं स्यादित्यर्थः । **उत्तपते** । **वितपते** इति । दीप्यत इत्यर्थः । उद्विभ्यां किम् । निष्टपति । 'निसस्तपतावनासेवने' इति षः ।

आङः । **आयच्छत** इति । यम उपरमे । 'इषुगमि—' इति छः । **आहत** इति । 'अनुदात्तोपदेश—' इत्यनुनासिकलोपः । **आघ्नत** इति । 'आत्मनेपदेषु—' इति झस्यादादेशः ।

---

१. यावद्भुक्तमुपतिष्ठते । अकर्मकादिति किम् राजानमुपतिष्ठति । N_1. २. After it—अकर्मकादिति किम् । राजानमुपतिष्ठति D_2, D_4, B_2. ३. पूर्ववत् D_2. ४. After it—दीप्यत इत्यर्थः C. ५. °कर्मकाच्च D_4. ६. वितपति सूर्यः D_1 ७. आघ्नाते । आघ्नते । D_3, D_4. ८. After it—अकर्मकादिति किम् । आयच्छति कूपाद्रज्जुम् B_2; अकर्मकात् किम् । आयच्छति कूपाद्रज्जुम् । N_1, D_4 (अकर्मकादिति D_1.)

आयच्छते पाणिम् । आहते शिरः ॥

हनः सिच् ॥१।२।१४॥

हन्तेः परः सिच् कित् स्यात् ॥ कित्त्वादनुनासिकलोपः । ह्रस्वादङ्गात् । आहत । आहसाताम् ।

आत्मनेपदेष्वन्यतरस्याम् ॥२।४।४४॥

हन्तेर्वधादेशो[1] वा स्यादात्मनेपदे लुङि ॥ अवधिष्ट[2] ।

यमो गन्धने ॥१।२।१५॥

सूचनार्थाद्यमः सिच् कित् स्यादात्मनेपदेषु ॥ उदायत[3] । अकर्मकाभ्यामात्माङ्गकर्मकाभ्यां[4] किम् । शत्रुमाहन्ति । परशिर आयच्छति ।

'गमहन—' इत्युपधालोपः । 'हो हन्तेः—' इति कुत्वम् ।

आत्मेति । आत्मनः स्वस्याङ्गं तत् कर्म ययोस्ताभ्यामित्यर्थः ।

आहतेति । लुङ् ।

यमः । सूचनं परदोषाविष्करणम् । **उदायत इति** । परावद्यं[5] प्रकटितवानित्यर्थः । **समः** । समो गम्यृच्छिभ्याम् इत्येव सूत्रम् । अन्यद्वार्तिकम् । अत्र समुच्चयेनोक्तिस्तु सूत्रकारवार्तिककारयोः साम्यद्योतनाय । गम्लृ गतौ । ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु । प्रच्छ ज्ञीप्सायाम् । स्वृ शब्दोपतापयोः । ऋ गतिप्रापणयोः । भ्वादिजुहोत्याद्योर्ग्रहणम् । श्रु श्रवणे । विद ज्ञाने । गमादिभिः परस्मैपदिभिः साहचर्यान्न लाभार्थः । **संगच्छत इति** । 'इषुगमि—' इति छः ।

---

१. °देशः स्याद्वा D_1. २. आवधिष्ट N_1. ३. उदायत । गन्धन इति किम् । आयंस्त कूपाद्रज्जुम् । N_1; उदायत D_3. ४. °काभ्यामिति N_1. ५. परावन्द्यं प्रकटितवानित्यर्थः । उपदायतेति आहतेतिवत् प्रक्रिया । समः । समो गम्यृच्छिभ्यामित्येव सूत्रम् । ऋ गति° &c. Dc_3.

समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥ ॥१।३।२९॥

एभ्यः संपूर्वेभ्योकर्मकेभ्यस्तङानौ स्तः ॥ संगच्छते ।

वा गमः ॥१।२।१३॥

गमः परौ लिङ्सिचौ कितौ वा स्त आत्मनेपदेषु ॥ अनुदात्तोपदेशेति मलोपः। समगत। समगंस्त। संगसीष्ट। संगंसीष्ट। समृच्छते । संपृच्छते । संस्वरते । समियृते । सर्तीत्यङ् । समारत । समारेताम् । संशृणुते । संवित्ते ।

वेत्तेर्विभाषा ॥७।१।७॥

वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात् ॥ संविद्रते । संविदते ॥ दृशेर्वाच्यम् ॥* संपश्यते । अकर्मकेभ्यः किम् । गङ्गां संगच्छति ।

निसमुपविभ्यो ह्वः ॥१।३।३०॥

अकर्मकादिति निवृत्तम् । एभ्यो ह्वेञः प्राग्वत् ॥

समगतेति । लुङ् । 'ह्रस्वादङ्गात्' इति सिचो लुक् ।

संगसीष्टेति । आशीर्लिङ् । अनुनासिकलोपः । **संपृच्छत** इति । संप्रसारणम् । **समियृत** इति । 'जुहोत्यादिभ्यः श्लुः' । 'श्लौ' इति द्वित्वम् । 'अर्तिपिपर्त्योः' इतीत्वम् । 'अभ्यासस्यासवर्णे' इतीय् । **समारतेति** । 'ऋदृशोऽङि गुणः' ।

संविद्रत इति । 'आत्मनेपदेषु—' इत्यत् । **संपश्यत** इति । दृशिर् प्रेक्षणे । 'पाघ्रा —' इति पश्यः ।

निसमु । अकर्त्रभिप्रायार्थ आरम्भः । ह्वेञ् स्पर्धायां शब्दे च ।

---

१. गमृ° N. २. N. Drops कितौ. ३. Before it—समृच्छते N. ४. रुडागमः स्याद्वा D_1. ५. Dropped N_1. ६. संयच्छति D_3. ७. D_1 D_3, P drop इति.

निह्वयते। एवं सम् उप वि ॥ उपसर्गादस्यत्यूह्योर्वा वाच्यम् ॥ निरस्यति । निरस्यते । समूहति । समूहते ।

उपसर्गाद्ध्रस्व ऊहतेः ॥७।४।२३॥

उपसर्गात् परस्य ऊहतेरणो ह्रस्वः स्यात् यादौ क्ङिति । ब्रह्म समुह्यात् ।

स्पर्धायामाङः ॥१।३।३१॥

आङो ह्वेञः प्राग्वत्[1] स्पर्धायाम् ॥ कृष्णश्चाणूरमाह्वयते । [2]स्पर्धायामिति किम् । [3]गामाह्वयति ।

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥१।३।३२॥

[4]हिंसात्मकसूचने भर्त्सनादौ च कृञः पूर्ववत् ॥

अस्मादात्मनेपदं स्यादित्यर्थः । एवं संह्वयते उपह्वयते विह्वयते । निरस्यतीति । असु क्षेपणे । दिवादिः । **समूहतीति** । ऊह वितर्के ।

स्पर्धायाम् । पराभिभवेच्छा स्पर्धा । तस्यां गम्यमानायामात्मनेपदं स्यादित्यर्थः । **कृष्ण** इत्यादि । स्पर्धमानस्तस्याह्वानं करोतीत्यर्थः । स्पर्धायां किम् । गामाह्वयति [5]गोपालः ।

गन्धन । **हिंसात्मकसूचने** इति । हिनस्तीति हिंसः । पचाद्यच् । हिंस आत्मा यस्य तत्तथोक्तं पीडाकरणम् । अथवा हिंसाकारकत्वात् सूचनमेव हिंसास्वरूपमित्यर्थः । सूचनं च दोषाविष्करणम् । हिंसात्मकं सूचनं गन्धनशब्दार्थः । भर्त्सनं तिरस्कारः अवक्षेपणशब्दार्थः । आदिना सेवनं परचित्तानुवृत्तिः । साहसिक्यम् । सहसा वर्तते । 'ओजः–

---

१. After it—स्यात् D_3. २ From स्पर्धा°...ह्वयति dropped D_3. ३. गामादाह्वयति P. ४. हिंसार्थे सूचने D_2; हिंसार्थ सूचने D_1, D_4, C, B_1, B_2. ५. गोपालम् Dc_1.

उत्कुरुते । श्येनो वर्तिकामपकुरुते । विष्णुमुपकुरुते । परदारान् प्रकुरुते । एधो दकस्योपस्कुरुते । गीताः[1] प्रकुरुते ।[2] शतं प्रकुरुते । धर्मार्थं विनियुङ्क्त इत्यर्थः ।[3] एषु[4] किम् । कटं[5] करोति ।

अधेः प्रसहने ॥१।३।३३॥

अधेः कृञस्तङानौ स्तः शक्तौ ॥ दैत्यानधिकुरुते विष्णुः ।[6]

वेः शब्दकर्मणः ॥१।३।३४॥

शब्दः कर्मकारकं यस्य तस्माद्विपूर्वात् कृञः प्राग्वत्[7] ॥ स्वरान् विकुरुते ।[8]

सहोम्भ—' इति उक् । तस्य भावः कर्म वा । ब्राह्मणादित्वात् ष्यञ् । अविमृश्यकारित्वमित्यर्थः । सतो गुणान्तराधानं प्रतियत्नः । प्रकथनं प्रकर्षेण कथनम् । उपयोगो धर्मादौ विनियोगः । एष्वर्थेषु वर्तमानात् कृञ आत्मनेपदं स्यादित्यर्थः । उत्कुरुते । सूचयतीत्यर्थः । अपकुरुत इति । भर्त्सयते इत्यर्थः । उपकुरुत इति । सेवत इत्यर्थः । **प्रकुरुत** इति । तेषु सहसा वर्तत इत्यर्थः । **उपस्कुरुते** इति । गुणान्तराधानं करोतीत्यर्थः । 'उपात् प्रतियत्ने' इति च सुट् । 'कृञः प्रतियत्ने' इति षष्ठी । **प्रकुरुते** इति । प्रकर्षेण कथयतीत्यर्थः । एतेषु किम् । कटं करोति ।

अधेः । पृथग्योगकरणमधिविशेषणार्थम् । **दैत्यानधिकुरुते विष्णुरिति** । दैत्यानभिभवति । अथवा तान् पराजेतुं समर्थोपि न पराजयते क्षमया[9] इत्यर्थः ।

---

१. गाथा D_2, B_2; गीतां N_1, D_3. २. N. drops शतं प्रकुरुते C, B_3, N_1, D_3, D_4. ३. एषु किम्...करोति dropped D_3. ४. एष्विति D_1, D_2, N_1. ५. पटं N_1. ६. After it—प्रसहने इति किम् । अर्थमधिकरोति । N_1. ७. तङानौ स्तः P; प्राग्वत् स्यात् D_2. ८. After it—क्रोष्टा C, D_2; after it—स्वर नुदात्तादीन् करोतीत्यर्थः P. ९. क्षमते इत्यर्थः De_3.

अकर्मकाच्च ॥१।३।३५॥

वेः कृञोकर्मकात्तथा[1] ॥ वायुर्विकुरुते । शब्दकर्मणोकर्मकात् किम् । चित्तं विकरोति कामः ।[2]

संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥१।३।३६॥

पूजनोत्क्षेपणादौ णीञस्तङानौ स्तः[3] । शास्त्रे[4] नयते । दण्डमुन्नयते । पुत्रमुपनयते । पदार्थान् नयते । भृत्यमुपनयते । करं विनयते । शतं विनयते[5] ।[6]

अकर्म । **वायुर्विकुरुत** इति । शोभनं वातीत्यर्थः ।

संमानन । **पूजनोत्क्षेपणादाविति** । पूजनमर्चा संमाननशब्दार्थः । उत्क्षेपणमुत्क्षिप्योर्ध्वं नयनमुत्सञ्जनशब्दार्थः । आदिना आचार्यकरणमुपनयनम् । ज्ञानं प्रमेयं निश्चयः । भृतिर्वेतनम् । विगणनमृणादेः शोधनम् । व्ययो धर्मादिषु विनियोगः । संमाननाचार्यकरणभृतिषु नयत्यर्थस्य विशेषणेषु सत्सु उत्सञ्जनज्ञानविगणनव्ययेषु नयत्यर्थेषु सत्सु णीञ् प्रापणे अस्मादात्मनेपदं स्यादित्यर्थः । **शास्त्रे नयते** इति । पदार्थानिति शेषः । युक्त्या स्थिरीकृत्य शिष्यान् प्रापयतीत्यर्थः । ते युक्तिभिः स्थाप्यमाना पूजिता भवन्तीति पूजा तेषाम् । **दण्डमुन्नयत** इति । उत्क्षिप्योर्ध्वं नयतीत्यर्थः । **पुत्रमुपनयते** । आचार्यो भवन्नध्ययनायात्मनः समीपं प्रापयतीत्यर्थः । **पदार्थान् नयते** इति । पदार्थलक्षणं प्रमेये[7] निश्चिनोतीत्यर्थः । **भृत्यमुपनयते** । वेतनेनात्मसमीपं प्रापयतीत्यर्थः । **करं विनयते** । राजगृह्यभागं निर्यातयतीत्यर्थः । **शतं विनयते** । धर्मार्थं विनियुङ्क्ते इत्यर्थः ।

---

१. After it—स्यात् D_2. २. After it—अनाश इति वाच्यम् । विकरोत्यर्थोयमिति नाशार्थस्य मा भूत् । N, D_4. ३. णिञः P; D_2. ४. शास्त्रं C. ५. D_2 drops शतं विनयते. ६. After it—संमाननादिषु किम् । अजां नयति ग्रामम् । N_1. ७. प्रमेयं Dc_3.

कर्तृस्थे चाशरीरे कर्मणि ॥१।३।३७॥

णीञः[1] कर्तृस्थेमूर्ते[2] कर्मणि कारके[3] पूर्ववत् ॥[4] क्रोधं विनयते । कर्तृस्थे किम् । गुरोः क्रोधं विनयति । अमूर्ते किम् । गण्डं[5] विनयति ।

वृत्तिसर्गतायनेषु क्रमः ॥१।३।३८॥

क्रमस्तङानौ स्तः अप्रतिबन्धोत्साहस्फीततासु[6] ॥ ऋचि[7] क्रमते बुद्धिः । धर्माय[8] क्रमते । सतां श्रीः क्रमते ।

उपपराभ्याम्[9] ॥१।३।३९॥

वृत्त्यादिष्वाभ्यामेव[10] क्रमस्तङानौ स्तो नान्योपसर्गात् ॥ उपक्रमते । पराक्रमते । आभ्यां किम् । संक्रामति । वृत्त्यादौ किम् । उपक्रामति ।

कर्तृस्थे । शरीरावयवोत्र शरीरं गृह्यते । स च मूर्त इत्यभिप्रेत्याह—**अमूर्तेति** । प्रत्यासत्तेर्नयतिकर्तृस्थे इति ज्ञेयम् । अपगमे वर्तमानादिति च ज्ञेयम् । अत्र च क्रोधाद्यपगमः फलम् । कर्तृगामिनि[11] 'स्वरितञितः—' इत्येव सिद्धे नियमार्थं वचनम् । कर्तृस्थे कर्मण्यशरीर एव नान्यत्रेति ।

वृत्ति । **ऋचि क्रमते बुद्धिः** । तस्यामप्रतिहता भवतीत्यर्थः । **धर्माय क्रमते** । धर्मार्थमुत्सहत इत्यर्थः । **सतां श्रीः क्रमते** । स्फीता भवतीत्यर्थः । **संक्रामतीति** । 'क्रमः परस्मैपदेषु' इति दीर्घः ।

---

१. णियः C, N_1; नियः D_3. २. कर्तृस्थे स्वेमूर्ते D_1. ३. कर्मकारके P, D_2. ४. After it—स्यात् D_2. ५. गडुं D_1, B_2. ६. अप्रतीबन्धो° C. ७. वेदे C. ८. Before this—अध्ययनाय क्रमते B_2. ९. °पराभ्यां च B_2. १०. वृत्त्यादिष्वर्थेष्वा° D_3. ११. °गामीति Dc_3.

आङ उद्गमने ॥१।३।४०॥

आङः क्रमः[1] प्राग्वदुद्गमनेऽर्थे[2] ॥ आक्रमतेऽर्कः[3] । ज्योतिरुद्गमने इति वाच्यम् । नेह । आक्रामति धूमः । उद्गमने किम् । खमाक्रामत्यर्कः ॥

वेः पादविहरणे ॥१।३।४१॥

वेः क्रमः प्राग्वत्[4] पादविहरणेऽर्थे[5] ॥ साधु विक्रमते वाजी । पादेति किम् । वाजिना विक्रामति ।

प्रोपाभ्यां समर्थाभ्याम् ॥१।३।४२॥

आभ्यां तुल्यार्थाभ्यां क्रमस्तङानौ[6] स्तः । क्रियारम्भ एवानयोस्तुल्यार्थता[7] । भोक्तुं प्रक्रमते उपक्रमते ।[8]

अनुपसर्गाद्वा[9] ॥१।३।४३॥

क्रमते । क्रामति ।[10]

आक्रमतेऽर्कः । उदयत इत्यर्थः । ज्योतिर्ग्रहनक्षत्रादि । खमाक्रामत्यर्क इति । अत्र हि व्याप्तिरेव विवक्षिता ।

वेः । विहरणं विक्षेपः । वाजिनेति । गच्छतीत्यर्थः ।

अनु । अप्राप्तविभाषेयम् । उपसर्गवियुक्तात् क्रमस्तङानौ वा स्तः ।

---

१. C drops क्रमः २. प्राग्वत्स्यादु° D₂. ३. खे आक्रामत्यर्कः C. ४. प्राग्वत् स्यात् D₂. ५. अर्थे dropped N. ६. Dropped D₄. ७. D₂ drops एव; एवैतयो° B₂. ८. After it—आरभते इत्यर्थः N ९. After it—अनुपसर्गात् क्रमतेस्तङानौ वा स्तः B₂, N (N₁ drops स्तः). १०. After it—अनुपसर्गादिति किम् । संक्रामति N₁.

अपह्नवे ज्ञः ॥१।३।४४॥

ज्ञानातेस्तङानौ स्तोपलापेर्थे ॥ शतमपजानीते ।

अकर्मकाच्च ॥१।३।४५॥

अकर्मकाज्ज्ञानातेस्तथा ॥ सर्पिषो जानीते । सर्पिषोपायेन प्रवर्तत इत्यर्थः ।

संप्रतिभ्यामनाध्याने ॥१।३।४६॥

आभ्यां ज्ञः प्राग्वत् अनौत्कण्ठ्ये ॥ संजानीते । प्रतिजानीते । औत्कण्ठ्ये तु पितुः संजानाति ।

अप । **शतमपजानीते** । अपलपतीत्यर्थः । क्र्यादित्वात् श्ना । 'ज्ञाजनोर्जा' इति जा । 'ई हल्यघोः' इतीत्वम् ।

अकर्म । **सर्पिषो जानीते** इति । 'ज्ञोविदर्थस्य' इति षष्ठी ।

संप्रति । अनौत्कण्ठ्यमस्मरणम् । **संजानीते** अवेक्षत इत्यर्थः । **प्रतिजानीते** । अभ्युपगच्छतीत्यर्थः । **पितुः संजानातीति** । स्मरतीत्यर्थः । पितुरित्यत्र 'अधीगर्थ—' इति षष्ठी । 'अकर्मकाच्च' इत्यत्रापि अस्मरण इत्यभिप्रेतमिति तङ् न ।

---

१. ज्ञाते° D_2. २. °पह्नवेर्थे D_3. ३. After it—सोपसर्गश्चायमपह्नवे वर्तते न केवलः । C. ४. स्तङानौ स्तः D_3. ५. After it—अकर्मकात् किम्—स्वरेण पुत्रं जानाति P; D_4, N (N_1, D_4 अकर्मकादिति). ६. After it—स्यात् D_2. ७. Dropped N_1. ८. औत्कामे तु C. ९. After it—संस्मरतीत्यर्थः । N_1.

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥१।३।४७॥

भासनसान्त्वनादिषु वदेस्तङानौ[१] स्तः ॥ शास्त्रे वदते ।[२] भृत्यानुपवदते ।[३] पाणिनिर्वदते ।[४] क्षेत्रे वदते ।[५] विवदन्ते शिष्याः[६] । परदारानुपवदते[७] ।[८]

व्यक्तवाचां समुच्चारणे ॥१।३।४८॥

मनुष्याणां सहोच्चारणे वदेस्तङानौ स्तः ॥[९] संप्रवदन्ते विप्राः । समुच्चारणे[१०] किम् । वदति विप्रः । व्यक्तवाचां किम् । संप्रवदन्ति खगाः ।

भासन । भासनं दीप्तिः । उपसंभाषोपसान्त्वनम् । ज्ञानं सम्यगवबोधः । यत्न उत्साहः । विमतिर्नानामतिः । उपमन्त्रणं रहस्युपच्छन्दनम् । **शास्त्रे वदते** । भासमानः पदार्थान् वक्तीत्यर्थः । **भृत्यानुपवदते** । उपसान्त्वयतीत्यर्थः । **पाणिनिर्वदते** । वदितुं जानाती-त्यर्थः । **क्षेत्रे वदते** । उत्सहते इत्यर्थः । **विवदन्ते शिष्याः** । विमता विविधं भाषन्ते इत्यर्थः । **परदारानुपवदते** । रहस्युपच्छन्दयतीत्यर्थः । एषु किम् । यत् किंचिद्वदति ।

व्यक्त । ननु व्यक्तवाच्येव वदिर्वर्तते किमर्थं व्यक्तवाचामिति विशेषणम् । प्रसिद्ध्युपसंग्रहार्थम् । व्यक्तवाचो मनुष्याः प्रसिद्धा इत्यभिप्रेत्याह—**मनुष्याणामिति** ।

---

१. वदस्त° D_3. २. After it—उपसंभाषा उपसान्त्वनम् C. ३. After it—उपसान्त्वयतीत्यर्थः । ज्ञानं सम्यगवबोधनम् C. ४. After it—जानाति वदितुमित्यर्थः । यत्नः उत्साहः । C. ५. After it—गेहे वदते । तद्विषयमुत्साहमाविष्करोतीत्यर्थः । विमतिर्नाम मतिः C. ६. After it—विमतिविचित्रं भाषन्ते इत्यर्थः C. ७. C drops परदारानुपवदते. ८. °रान् वदते D_1. ९. After it—अकर्मकादवेष्टिः D_2, D_4, P, N_1, B_2; १०. Dropped in D_2, D_3; after खगाः in B_2, N_1.

अनोरकर्मकात् ॥१।३।४९॥

व्यक्तवाग्विषयादनुपूर्वाद्वदतेरकर्मकात्तथा ॥ अनुवदते कठः कलापस्य[1] । अकर्मकादिति[2] किम् । पूर्वमेव यजुरुदितमनुवदति । पुनर्वदतीत्यर्थः[3] । व्यक्तवाचामित्येव[4] । अनुवदति वीणा । विमतौ[5] च । अनुवदन्ते शिष्याः ॥

विभाषा विप्रलापे ॥१।३।५०॥

नृणां विमतिसहोक्तिव्यामिश्रणे वदः प्राग्वत् वा[6] ॥ विप्रवदन्ते विप्रवदन्ति वा वैद्याः ।[7]

अवाद्ग्रः ॥१।३।५१॥

अवाद्गिरतेस्तङानौ स्तः ॥ अवगिरते ।

अनो[8] । अनुवदते कठः कलापस्येति । यथाधीयानः कलापो वदति तथा कठ इत्यर्थः । अकर्मकात् किम् । उक्तमनुवदति । व्यक्तवाचां किम् । अनुवदति वीणा ।

विभाषा । नृणामिति । परस्परप्रतिषेधेन[9] विरुद्धः प्रलापो विमत्युक्तिः । सहोक्तिश्च । तयोर्व्यामिश्रणमेकरूपता[10] । एकरूपे सहोच्चारणे आत्मनेपदं स्यादित्यर्थः ।[11]

अवाद्ग्रः । अवगिरते इति । गॄ निगरणे । तुदादिः । न गॄ शब्दे इति क्र्यादिः । तस्यात्रपूर्वप्रयोगाभावात् । 'ऋत इत्' । रपरः ।

---

१. कालापस्य D_3, D_4, P, C, B_1. २. अकर्मकादिति किम्...to शिष्याः dropped in D_2, D_3; before it—व्यक्तवाचामित्येव । अनुवदति वीणा B_2, D_4. ३. पुनर्वदतीत्यर्थः dropped N_1, D_4. ४. From व्यक्त°... to शिष्याः dropped B_2, D_4. ५. D_1, N_1 drop विमतौ...शिष्याः. ६. After it—स्यात् D_2. ७. After it—विप्रलाप इति किम् । संप्रवदन्ति वैद्याः । व्यक्तवाचामित्येव । विप्रवदन्ति शकुनयः B_2, N_1. ८. अनुः सादृश्ये । यथा कलापाधीयानो वदति. ९. परस्परानिषिद्धेन विरुद्धः Dc_1. १०. रूपे सहोच्चारणे Dc_3. ११. After it—विप्रा वदन्ति । युगपद् वदन्तीत्यर्थः Dc_3.

समः प्रतिज्ञाने ॥१।३।५२॥

संपूर्वाद्गिरतेः पूर्ववत्[1] प्रतिज्ञायाम् ॥ शतं संगिरते[2] ।

उदश्चरः सकर्मकात् ॥१।३।५३॥

उत्पूर्वाच्चरतेः सकर्मकात् तङानौ स्तः ॥ धर्ममुच्चरते । उत्क्रम्य यातीत्यर्थः । सकर्मकात् किम् । धूम उच्चरति ।

समस्तृतीयायुक्तात् ॥१।३।५४॥

संपूर्वाच्चरतेः प्राग्वत्[2] तृतीयायोगे ॥ अश्वेन संचरते ।[3]

दाणश्च सा चेच्चतुर्थ्यर्थे ॥१।३।५५॥

संपूर्वाद्दाणश्चतुर्थ्यर्थे तृतीयायोगे तङानौ स्तः ॥ दास्या संयच्छते[4] कामी । सम इति षष्ठ्यन्तत्वात् प्रेण व्यवधानेपि[5] । दास्या संप्रयच्छते[7] । चतुर्थ्यर्थे[8] किम् । दास्या[9] संप्रयच्छति[10] भिक्षां भिक्षवे ।[11]

समः । शतं संगिरत इति । प्रतिजानीत इत्यर्थः ।

उदः । धूम उच्चरतीति । उत्क्रम्य गच्छतीत्यर्थः ।

समः । तृतीयायुक्तात् किम् । उभौ लोकौ संचरति ।

दाणः । दास्यासंयच्छते कामीति । दाण् दाने । ‘पाघ्रा–’ इति यच्छादेशः । अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीया । **सम** इति षष्ठ्यन्तत्वादिति । अयं भावः । समः इति यदि पञ्चमी स्यात् ‘तस्मादित्युत्तरस्य’ इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थस्यानुवृत्तेः समः परस्मादव्यवहितादेव दाण आत्मनेपदं स्यात् । तस्माद्विशेषणषष्ठी । तेन व्यवधानेपि भवतीति ।

१. After it स्यात्—D_2. २. After it—स्यात् D_2. ३. After it—तृतीयेति किम् । उभौ लोकौ संचरति D_2, D_3, D_4, B_2, N_1. ४. कामुकः D_1. ५. विशेषणे षष्ठी न पञ्चमी तेन समोन्येन व्यवधानेपि D_2, D_4, B_2. ६. Dropped D_4. ७. संप्रयच्छते कामुकः । D_3. ८. चतुर्थ्यर्थे इति N_1. ९. हस्तेन for दास्या C ; before it–पाणिना संयच्छति । D_3. १०. संयच्छति D_3. ११. After it—भार्यायै संयच्छति । समः किम् । दास्या उपयच्छति । D_4.

उपाद्यमः स्वकरणे ॥१।३।५६॥

उपपूर्वाद्यमो विवाहेऽर्थे तङानौ स्तः ॥ भार्यामुपयच्छते ।

विभाषोपयमने ॥१।२।१६॥

विवाहार्थाद्यमः सिज्वा कित् स्यादात्मनेपदेषु ॥ रामः सीतामुपायत । उपायंस्त वा ।

ज्ञाश्रुस्मृदृशां सनः ॥१।३।५७॥

एभ्यः सन्नन्तेभ्यस्तङानौ स्तः ॥ जिज्ञासते । शुश्रूषते ।

उपात् । यदि स्वकरणमभिप्रेतं स्यात् तदा शकटादिस्वकरणेपि स्यादिति शङ्कानिरासायाह—**विवाहेऽर्थे** इति । अयमाशयः । प्रतिनिहिता हि शब्दशक्तयस्तस्मादुपपूर्वो यमिरात्मनेपदे विवाह एव वर्तते । भाष्ये तु स्वीकरणमात्रे स्यादित्युक्तम् । तथा च **भट्टिकाव्ये** प्रयोगोपि । 'उपायंस्त महास्त्राणि' इति । **रामः सीतामुपायतेति** । परिणीतवानित्यर्थः । सिचः कित्त्वे सति 'अनुदात्तोपदेश—' इत्यनुनासिकलोपः । ततो 'ह्रस्वादङ्गात्' इति सिचो लोपः । **उपायंस्त** वेति । कित्त्वाभावादनुनासिकलोपसिज्लोपाभावौ ।

ज्ञाश्रु । तत्र ज्ञः 'अपह्नवे ज्ञः' इति सूत्रत्रयेण तङानौ विहितौ । श्रुदृशोश्च 'समोगमि—' इति । तत्र 'पूर्ववत्सनः' इति सिद्धमन्यत्र विधीयते । **जिज्ञासत** इति । ज्ञा अवबोधने । सन् । 'सन्यङोः' इति द्वित्वम् । ह्रस्वः । 'सन्यतः' इतीत्वम् । **शुश्रूषत** इति । श्रु श्रवणे । 'इको झल्' इति सनः कित्त्वम् । 'श्र्युकः किति' इतीण्निषेधः ।

---

१. सिच कित् स्याद्वा D_1; सिच् किद्वा स्यात् D_3.

सुस्मूर्षते । दिदृक्षते ।

नानोर्ज्ञः ॥१।३।५८॥

अनुपूर्वात् ज्ञः सन्नन्तात् तङाना न स्तः ॥ अनुजिज्ञासति पुत्रम् ।

प्रत्याङ्भ्यां श्रुवः ॥१।३।५९॥

आभ्यां शृणोतेः सन्नन्तात्तङानौ न स्तः ॥ प्रतिशुश्रूषति । आशुश्रूषति ॥ इह सर्वत्रोपसर्गग्रहणात्कर्मप्रवचनीयादौ न । द्विजं प्रति शुश्रूषते ।

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥१।३।६४॥

आभ्यां परादयज्ञपात्रविषयाद्युजेस्तङानौ स्तः ॥ प्रयुङ्क्ते ।

'अज्झन—' इति दीर्घः । **सुस्मूर्षत** इति । स्मृ आध्याने । पूर्ववत् कित्त्वात् 'उदोष्ठ्य—' इत्युत्वम् । 'हलि च' इति दीर्घः । **दिदृक्षत** इति । दृशिर् प्रेक्षणे । 'हलन्ताच्च' इति कित्त्वम् । 'व्रश्च—' इति षः । 'षढोः—' इति कः ।

नानोः । पूर्वेण प्राप्तं प्रतिषिध्यते । तेन सकर्मकस्य प्रतिषेधः । अकर्मकात्तु स्यादेवात्मनेपदम् । औषधस्यानुजिज्ञासते । औषधेन प्रवर्तितुमिच्छतीत्यर्थः । अनोः किम् । धर्मं जिज्ञासते ।

प्रोपा । युज समाधौ । अस्यानुदात्तेत्वादात्मनेपदं सिद्धमतस्तस्य ग्रहणमयुक्तमित्यभिप्रायेणाह—युजेरिति । युजिर्योगे । प्रयुङ्क्त इति ।

१. दिदृक्षते । सुस्मूर्षते C, D_1, D_3, N_1. २. आशुश्रूषति । प्रतिशुश्रूषति । N_1. ३. पराद्युजेरपात्रविषयात्तङानौ स्तः D_1.

[1]उपयुङ्क्ते । स्वराद्यन्तोपसृष्टाद्वाच्यम् ॥* उद्युङ्क्ते । वि[2]युङ्क्ते । यज्ञपात्रेषु । [3]प्रयुनक्ति ।[4]

समः क्ष्णुवः ॥१।३।६५॥

[5]संक्ष्णुते शस्त्रम् ॥

भुजोऽनवने ॥१।३।६६॥

भुजस्तङानौ [6]स्तो न तु पालनेऽर्थे ॥ ओदनं भुङ्क्ते । पालने तु [7]पृथिवीं भुनक्ति ॥

रुधादिभ्यः श्नम् । 'श्नसोरल्लोपः' । 'चोः कुः' इति कुत्वं गः । तस्य 'खरि च' इति कः । 'नश्च—' इत्यनुस्वारः । 'अनुस्वारस्य—' इति ङकारः । **स्वरेति** । स्वरः अच् आदिरन्तो वास्य स्वराद्यन्तस्तत्संबन्धाद्युजेः स्यात् । स्वराद्यन्तोपसृष्टादिति किम् । निर्युनक्ति । **प्रयुनक्तीति** । द्वन्द्वं न्यञ्चि पात्राणीति ज्ञेयम् ।

समः । क्ष्णु तेजने । 'समो गमि—' इत्यत्रैवायं किं नोक्तः । अकर्मकादिति तत्र वर्तते ।

भुजः । अवननिषेधाद्रौधादिकस्य भुज पालनाभ्यवहारयोरस्य ग्रहणं न तौदादिकस्य भुज कौटिल्ये अस्य । अवनसंबन्धाभावात् । तेनेह न । विभुजति पाणिम् ।

---

१. C drops it. २. उपयुङ्क्ते N_1 ; अनुयुङ्क्ते before it D_4. ३. Before it—द्वन्द्वं यज्ञपात्राणि C, N_1. ४. After it—स्वराद्यन्तोपसृष्टादिति किम् । निर्युनक्ति B_2. ५. Before it—संपूर्वात् क्ष्णुवस्तङानौ स्तः । N_1. ६. स्तः B_2, D_4. ७. पृथ्वीं B_2, D_4.

णेरणौ यत् कर्म णौ चेत् स कर्तानाध्याने ॥ ॥१।३।६७॥

ण्यन्तात्तङानौ स्तः अणौ यत् कर्म स एव ण्यन्तस्य कर्ता चेत् न त्वाध्याने ॥ पश्यन्ति भवं भक्ताः । दर्शयते

णेः । 'णिचश्च' इति कर्त्रभिप्राये सिद्धेऽकर्त्रभिप्रायार्थोऽयमारम्भः । कर्त्रभिप्रायेऽपि विभाषोपपदेन प्रतीयमान इति विकल्पबाधनार्थश्च । ण्यन्तात् तङानौ स्त इत्यादिना वाक्यभेदेन सूत्रं व्याचष्टे—ण्यन्तात् तङानौ स्त इति । अनेन 'णेः' इत्येकं वाक्यं दर्शितम् । तस्यार्थः स्पष्टः । ततः 'अणौ यत् कर्म' इत्यनेन अणौ यत् कर्मेति द्वितीयम् । अणौ यत् कर्म णौ चेत् तत् कर्मेत्यर्थः । अनेन कर्मान्तरव्यावृत्तिः क्रियते । 'स एव ण्यन्तस्य कर्ता चेत्' इत्यनेन तृतीयचतुर्थे दर्शिते । तत्र ण्यन्तस्य चेदित्यंशेन 'णौ चेत्' इति तृतीयम् । तत्र 'अणौ यत्' इत्यनुवर्तते । अणौ यत् प्रतिपाद्यं ण्यन्ते चेत्तदेव प्रतिपाद्यमित्यर्थः । एतत् समानक्रियार्थम् । स एव कर्तेत्यंशेन 'स कर्ता' इति चतुर्थम् । अत्राणौ यत् कर्म णौ चेदिति वर्तते । अणौ यत् कर्म ण्यन्तस्य चेत् स एव कर्ता स्यादित्यर्थः । न त्वाध्यान इत्यनेनानाध्यान इति प्रसज्यप्रतिषेधपरं पञ्चमं दर्शितम् । ततश्चैवं संपिण्डितो वृत्त्यर्थः । ण्यन्तात्तङानौ स्तः । अणौ यत् कर्म तदेव ण्यन्ते स्यात् । अणौ यत् प्रतिपाद्यं तदेव[1] ण्यन्तस्य स्यात् । अणौ यत् कर्म णौ चेत् स एव कर्ता स्यात् ।[2] स्मरणे तु न भवति । पश्यन्ति भवमित्यणौ कर्मत्वप्रदर्शनार्थम् । उदाहरणं त्वेतत्—दर्शयते

---

१. तदेव चेत् Dc3. २. After it—स्मरणे तु न भवति । पश्यति भक्तान् इति अणौ कर्मत्वप्रदर्शनार्थः । उदाहरणं त्वेतत् Dc3.

भवो भक्तान् स्वयमेव । इह कर्तृस्था क्रिया । तेन कर्मवत् कर्मणेति

भवो भक्तान् स्वयमेवेति । अयं दृशिर्दर्शनविषयत्वापत्त्युपसर्जनदर्शनविषयत्वापादने वर्तते । दर्शनविषयत्वमापादयतीति । यदानुभवस्य सौकर्यातिशयप्रदर्शनाय भक्तव्यापारो न विवक्ष्यते तदा विषयत्वापत्तौ दृशिर्वर्तते ।तत्र भवस्य कर्तृत्वम् । तदुक्तं हरिणा ।

'निवृत्तप्रेरणं कर्म स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेवतिष्ठते' ॥ इति ।

ततो विषयत्वापत्तिवृत्तेर्दृशेर्भक्तव्यापारे णिजुत्पद्यते । पुनः सौकर्यातिशयविवक्षायामविवक्षिते भक्तव्यापारे विषयत्वापत्तिमात्रे दृशिर्वर्तते । दर्शयते भवः स्वयमेवेति । सुष्ठु विषयो भवतीत्यर्थः । सोयं निवृत्तप्रेरणपक्षः । अध्यारोपितप्रेरणपक्षस्तु । पश्यन्ति भवं भक्तास्तत्सौकर्यातिशयाद्भवः प्रयुङ्क्ते भक्तानिति भक्तव्यापारे णिजुत्पद्यते । दर्शयते भवो भक्तान् स्वयमेवेति सुष्ठु दर्शनविषयत्वं प्रतिपद्यत इत्यर्थः । एष एव तस्य प्रयोजकव्यापारः । नन्वत्रापि सौकर्यातिशयप्रतिपादने तात्पर्यमिति कर्माविवक्षित्वा दर्शयते भवः स्वयमेवेत्येव प्रदर्शनीयम् । भक्तानिति न वक्तव्यम् । मैवम् । भाष्यकारेण पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् राजेति प्रयुक्तत्वादणौ ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे एवात्मनेपदं न । यथा स्थलमारोहयति मनुष्यानिति । इह णौ कर्तॄणां भक्तानां कर्मत्वमिति स्यादेव तङ् । एवं च स्मरयत्येनं वनगुल्मस्य कोकिल इति जयादित्यप्रत्युदाहृतिर्घटते । वामनस्तु अस्मदुक्तमेवार्थं मन्यते । माघे प्रयोगोपि 'करेणुरारोहयते निषादिनम्' इति । पदमञ्जरीकारमते न्यासकारमते तु कर्म न प्रयोज्यमेव । इह कर्तृस्थेति । दर्शनक्रियाया भक्तेषु समवायात् । णेः किम् । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयमाणो हस्ती साध्वारोहति । अत्राणौ कर्म हस्ती स एव कर्ता भवति किं त्वण्यन्तस्यैव रोहतीत्यस्यातो

---

१. कर्तृस्थक्रिया D_2. २. °स्तान् सौकर्यातिशयाद्भवः प्रयुङ्क्ते । Dc_3. ३. सुष्ठु न दर्शने विषयत्वं प्रतिपाद्यत इत्यर्थः । Dc_1. ४. आरोहमाणो हस्ती साध्वारोहयति Dc_3.

कर्मवत्त्वाभावादात्मनेपदमप्राप्तं विधीयते । अणौ यत् कर्म णौ चेत् स कर्तेति किम् । दर्शयति भवं भक्तान् भक्तिः । औत्कण्ठ्ये तु स्मरयति[1] भक्तान् हरिः ।

गृधिवञ्च्योः प्रलम्भने ॥१।३।६९॥

ण्यन्ताभ्यामाभ्यां तङानौ स्तः प्रतारणेऽर्थे ॥ बटुं वञ्चयते[2]

न तङ् । अणौ किम् । गणयति गोपालो गणम् । गणयति गणः स्वयमेव । अत्र गणो णाविव कर्म न त्वणौ । अतो न । पूर्वश्चुरादि णिच् । द्वितीयो हेतुमण्णिच् । **अणौ** **यदित्यादि** । अणौ यत् कर्म तदेव ण्यन्तस्य कर्ता भाव्यः । किमर्थः । करणादेः[3] कर्तृत्वे[4] मा भूत् । **दर्शयति भवं भक्तान भक्तिरिति** । भक्त्या भवं पश्यन्तीति भक्तिरणौ करणम् । सा णौ सति कर्तृत्वे संपद्यते । किं त्वणौ कर्म नेति न तङ् । णौ चेद्ग्रहणं समानक्रियार्थम् । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहमाणो[5] हस्ती भीतान् सेचयति मूत्रेण । अत्राणौ आरोहणस्य कर्म हस्ती स सेचयतीत्यस्य ण्यन्तस्य कर्तापि भवति । किं तु भिन्नक्रियात्वान्न तङ् । यत्सग्रहणमनन्यकर्मार्थम् । आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यम् । अत्र कर्मान्तरमस्ति मनुष्यः । ततो न तङ् । कर्तेति किम् । आरोहन्ति हस्तिनं हस्तिपकाः । तानारोहयति महामात्रः । अत्र यदेवाणौ कर्म हस्ती तदेव णौ कर्तृत्वेन न विवक्षितम् । किं तर्हि[6] । महामात्रः । अतो न तङ् । **स्मरयति भक्तान् हरिरिति** । स्मृ आध्याने । घटादिः । मित्त्वात् ह्रस्वः । भक्ता हरिं स्मरन्तीति ण्यभावे हरिः कर्म स णौ सति कर्ता संपद्यते विवक्षावशाद्यद्यपि तथाप्याधानत्वात्तङ् न ।

गृधि । गृधु अभिकाङ्क्षायाम् । वञ्चु गतौ । प्रतारणं मिथ्या-

१. स्मापयति B2. २. गर्धयते । बटुं वञ्चयते D2, D3 ; P, N1, बटुं गर्धयते । वञ्चयते D4. ३. कारणादेः Dc1. ४. कर्तृत्वं Dc3. ५. आरोहमाणो Dc3. ६. हि Dc1.

गर्धयते । प्रलम्भने किम् । श्वानं गर्धयति । अहिं वञ्चयति ।[१]

मिथ्योपपदात् कृञोऽभ्यासे ॥१।३।७१॥

ण्यन्तात् कृञो मिथ्योपपदात् तङानौ स्तोऽभ्यासे ॥ पदं मिथ्या कारयते । सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । मिथ्या किम् । साधु पदं कारयति । अभ्यासे किम् । सकृत् पदं मिथ्या कारयति ।[२][३]

अपाद्वदः ॥१।३।७३॥

अपपूर्वाद्वदस्तङानौ स्तः [४]कर्तृगे क्रियाफले ॥ अपवदते ।[५]

फलाख्यानम् । श्वानं गर्धयतीति । गर्धनमस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । परिहरतीत्यर्थः ।

मिथ्या । उपोच्चारितं पदमुपपदम् । मिथ्या उपपदं यस्य । मिथ्या कारयते इत्यात्मनेपदेनैवाभ्यासस्य द्योतितत्वात् 'नित्यवीप्सयोः' इति द्वित्वं न । सापचारमिति । सदोषम् । एतेन मिथ्याशब्दार्थमाह । स्वरादिदुष्टमिति । तस्यैवार्थं व्यक्तीकरोति । असकृदिति । अभ्यासशब्दार्थं दर्शयति ।

अपात् । अपवदत इति । धनकामो न्यायमिति शेषः । न्यायापवादेन धर्ममर्जयिष्यामीति मन्यते ।

---

१. After it—वक्रं गमयतीत्यर्थः D_2, D_4, B_2. २. Dropped in D_1. ३. मिथ्योपपदात् किम् D_1, P. ४. C drops कर्तृगे क्रियाफले. ५. After it—अपात् किम् । प्रवदति C, N_1 (N_1 अपादिति किम्).

समुदाङ्भ्यो यमोऽग्रन्थे ॥१।३।७५॥

एभ्यो यमस्तङानौ स्तः न तु ग्रन्थकर्मकात् कर्तृग[1] फले। संयच्छते । उ[2]द्यच्छते । आ[3]यच्छते । आयंस्त रज्जुम् । ग्रन्थे तु वे[4]दमुद्यच्छति ।

अनुपसर्गाज्ज्ञः ॥१।३।७६॥

अनुपसर्गा[5]ज्जानातेः कर्तृगे क्रियाफले तङानौ स्तः ॥ गां जानीते । अनुपसर्गात् किम् । प्रजानाति । कर्तृगे फले किम् । परस्य गां जानाति ।

विभाषोपपदेन प्रतीयमाने ॥१।३।७७॥

[6]कर्तृगे फले यदात्मनेपदं विहितं तदुपपदेन द्योत्ये कर्तृगे

समु । आङ्पूर्वादकर्मकात् 'आङो यमहनः' इत्येव सिद्धं सकर्मकार्थं पुनर्ग्रहणमिति दर्शयितुं द्वितीयं सकर्मकमुदाहरणमाह—**आयंस्त** रज्जुमिति । लुङ् । अगन्धनाद्यर्थत्वात् कित्त्वाभावः । वेदमुद्यच्छतीति । वेदमधिगन्तुमुद्यमं करोतीत्यर्थः ।

अनुपसर्गात् । नास्योपसर्गोऽस्ति तथा । सकर्मकार्थमिदं वचनम् । अन्यथा 'अकर्मकाच्च' इति सिद्धत्वात् ।

विभाषा । 'स्वरितञितः—' इत्यादिभिः पञ्चभिः सूत्रैः कर्तृगे फले प्राप्ते आत्मनेपदं विहितम् । तदुपपदेन द्योतिते कर्तृगे फले न प्राप्नुयात् । उक्तार्थानामप्रयोग इति न्यायात् । अतोऽप्राप्त-

---

१. D_2, N_1 drop it. २. Dropped D_3. ३. After it—अन्यस्मात्तु नियच्छति D_2, D_4, B_2; अन्यस्य तु नियच्छाति N_1. ४. वेदानुद्यच्छाति N. ५. D_1 has the Vritti as follows:—स्वरितञितः कर्त्रभिप्राये क्रियाफले । अपाद्वदः । णिचश्च । समुदाङ्भ्यो यमो ग्रन्थे । अनुपसर्गात् ज्ञः । एतैः पञ्चभिः सूत्रैर्यदात्मनेपदं &c; कर्तृगे क्रियाफले B_2. ६. तत्रोपपदं विहितं तत्रोपपदेन° B_2.

फले वा[1] स्यात् ॥ स्वयं[2] यज्ञं यजति । स्वयं यज्ञं यजते । एवमन्यत्र[3] ।

इति पदव्यवस्थाप्रक्रिया ।

विभाषेयम् । समीपवर्ति शब्दान्तरमुपपदं न पारिभाषिकं तत्रोपपदमिति । एवमन्यत्रेति । एवमुदाहृतप्रकारेण 'अपाद्वदः' इत्यादिषु चतुर्षु सूत्रेषु ज्ञेयमित्यर्थः । स्वं पुत्रमपवदति स्वं पुत्रमपवदते । स्वं यज्ञं कारयते कारयतीति वा । स्वं व्रीहिं संयच्छते संयच्छति वा स्वां गां जानीते जानाति वा इति ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे पदविधिनियमप्रक्रियेयं समाप्ता ॥

---

१. आत्मनेपदं वा स्यात् D_1. २. स्वं यज्ञं यजते । स्वयं यज्ञं यजति । स्वं कण्ठं करोति । स्वं कण्ठं कुरुते । एवमन्यत् D_1. ३. °मन्यत् D_1.

अथ भावकर्मप्रक्रिया ।

[१]भावकर्मविवक्षायां लः कर्मणि चेति लडादयः । [२]तस्य तिबादयः ।

भावकर्मणोः ॥१।३।१३॥

भावकर्मणोर्विहितस्य लस्य स्थाने आत्मनेपदं स्यात् सर्वत्र ॥[३]

सार्वधातुके यक् ॥३।१।६७॥

धातोर्यक् प्रत्ययः स्यात् भावकर्मवाचिनि सार्वधातुके परे ॥ भावो धात्वर्थः । तस्यैकत्वात् तङाद्येकवचनं सर्वत्र[४] ।

[५]अथ भावकर्मप्रक्रिया । **भावकर्मविवक्षायामिति** । भावो धात्वर्थः क्रियात्मकः । कर्म पारिभाषिकम् ।

भाव । अयं प्रत्ययनियमः भावकर्मणोरेवात्मनेपदमिति । नार्थ-नियमः । अर्थनियमे हि को भवता लाभो लब्ध इति कर्मणि घञ् दुर्लभः स्यात् ।

सार्व । **भावकर्मवाचिनीति** । ताच्छील्ये आवश्यके वा णिनिः । **तस्यैकत्वादिति** । तस्य भावस्य । स ह्याख्यातवाच्यः साध्यरूपः प्रतीयते । साध्यरूपत्वाच्च निवृत्तभेदः । तदुक्तम् । निवृत्तभेदा सर्वत्र क्रियाख्यातेभिधीयते । श्रुतेरशक्त्या भेदानां प्रविभागप्रकल्पना ॥ इति । तस्मादाख्यातवाच्यस्य भावस्य संख्याद्ययोगात् तङाद्येकवचनमेव स्यादित्यर्थः । तर्हि तस्यैकत्वादित्ययुक्तम्[६] । मैवम् ।

१. Before it—श्रीगणेशाय नमः । D_3. २. लस्य N_1, D_4; तस्य तिबादयः dropped D_3. ३. Dropped N_1. ४. After it—प्रथमपुरुषस्य P. ५. Dc_3 has भावकर्मप्रक्रिया and लकारार्थप्रक्रिया after पदव्यवस्था. ६. °ति न युक्तम् । Dc_3.

कर्तुस्तिङानभिधानात् कर्तरि तृतीया । मया भूयते ।[१] भूयेत । भूयताम् । अभूयत । अकर्मकोप्युपसर्गवशात् [४]कश्चित् सकर्मकः । ततः कर्मणि लडादयः । तिङोक्तत्वात् कर्मणि न द्वितीया । अनुभूयते आनन्दश्चैत्रेण त्वया मया वा । अनुभूयेते । अनुभूयन्ते ।[६] त्वमनुभूयसे । [७]अहं अनुभूये । इत्यादि ।

द्व्यादिप्रतियोगिकैकत्वाभावेप्यभेदैकत्वादेकवचनमुत्सर्गात्[८] करिष्यते इति भाष्यम् । अत एव मध्यमोत्तमपुरुषावपि न स्तः । शेषे प्रथमाम्नानात् । अत एवोक्तम् 'तङाद्येकवचनम्'[९] इति । मया भूयत इति । भू सत्तायाम् । भावो विवक्षितः । भूयेतेति । 'विधिनिमन्त्रणा—' इति लिङ् । 'लिङः सीयुट्' । सलोपः । यक् । आद्गुणः । यलोपः । भूयतामिति । लोट् । 'आमेतः' । अभूयतेति । लङ् । 'लुङ्लङ्—' इत्यट् । अकर्मकोपीत्यादि । अर्थान्तरे वर्तमान इति भावः । एतच्च तिङन्तप्रारम्भ एव विवृतम् । अनुभूयते आनन्दश्चैत्रेण त्वया मया वेति । अत्रानुपूर्वो भवतिरनुभवे वर्तत इति सकर्मकः । अत्रानन्दे कर्मण्युपपदे समानाधिकरणे विवक्षिते 'शेषे प्रथमः' इति प्रथमः । त्वमनुभूयसे इति । अत्र युष्मदि कर्मण्युपपदे समानाधिकरणे विवक्षिते 'युष्मद्युपपदे' इति मध्यमः । अहमनुभूये इति । अस्मदि कर्मणि समानाधिकरण उपपदे विवक्षिते उत्तमः । आदिना लिङादयः । अनुभूयेत । अनुभूयेयाताम् । अनुभूयेरन् । इत्यादि लिङ् । अनुभूयताम् । अनुभूयेताम् । अनुभूयन्ताम् । इत्यादि लोट् । अन्वभूयत । अन्वभूयेताम् । अन्वभूयन्त । इत्यादि लङ् ।

---

१. °स्तङा D₁. २. After it—युवाभ्यां भूयते D₂ ; युवाभ्यां भूयते । युष्माभिर्भूयते B₂, D₄. ३. D₂ drops it. ४. D₂ and P, B₃ drop it ; C, N₁ have कश्चित्. ५. C drops it. ६. त्वमनु° D₂, D₃, D₄, B₂. ७. P drops अहम्. ८. °मुत्सर्गः Dc₃. ९. °वचनानि Dc₃.

च्चिण् भावकर्मणोः ॥३।१।६६॥

धातोश्च्लेश्चिण् स्यात् भावकर्मवाचिनि तशब्दे परे ॥ णित्त्वाद्वृद्धिः । अभावि । अन्वभावि[१] ।

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥६।४।६२॥

उपदेशेऽजन्तेभ्यो हनादेश्च परेषां[२] भावकर्मणोर्विहितानां स्यादीनामिड्वा स्यात् स च[३] इट् चिण्वच्च ॥ चिण्वद्भावाद् वृद्धिः । अन्वभाविषाताम् । अन्वभविषाताम् । बुभूवे[४] । बभूवे[५] ।

च्चिण् । णित्त्वाद्वृद्धिरिति । 'अचो ञ्णिति' इति । अभावीति । भावे । 'चिणो लुक्' इति तशब्दस्य लुक् । अन्वभावीति । कर्मणि ।

स्यसिच् । हनादेरिति । हन हिंसागत्योः । ग्रह उपादाने । दृशिर् प्रेक्षणे । चिण्वद्भावे प्रयोजनान्यभियुक्ताः पठन्ति ।

'चिण्वद् वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलूनिमित्तो विघाती' ॥ इति ।

अन्वभाविषातामिति । 'अचो ञ्णिति' इति वृद्धिः । युक् 'आतो युक् चिण्कृतोः' इति । अदायिष्यत हन्तेर्घत्वं 'हो हन्तेः—' इति । अघानिष्यत । 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इत्युक्तेर्दीर्घः । शामिष्यते । शमिष्यते । ननु चात्र 'णेरनिटि' इति णिलोपो न स्यात् मेट्त्वादित्यत आह—इट् चासिद्ध इति । अयमिट्

---

१. D_2 drops it. २. परं N_1. ३. मिट् स इट् चिण्वद्वा । D_3. ४. D_2 and P, B_2, N_1 drop it. ५. चिण्भावाद् C. ६. Dropped D_3. ७. After it—इति केचित् D_2, D_4, B_2 केचित् लिटि भाव कर्मणोर्भवतेरित्यस्याभ्यासोकारस्यात्व-मिच्छन्ति । तन्मते । अनुबभूवे । बभूवे N. ८. Before it—इष्यते अयमिट् । असिद्धवदत्राभादित्यसिद्धः । Dc3.

भाविता । भविता ।[1] भाविषीष्ट । भविषीष्ट । भाविष्यते । भविष्यते ।[2] अभाविष्यत । अभविष्यत । अकृत्सार्वधातुकयोर्दीर्घः । स्तूयते विष्णुः । अस्तावि । अस्ताविषाताम् ।[3] अस्तोषाताम् हरिहरौ भक्तेन । तुष्टुवे । स्ताविता । स्तोता । स्ताविषीष्ट । स्तोषीष्ट । स्ताविष्यते । स्तोष्यते[4] । अस्ताविष्यत । अस्तोष्यत । गुणोर्तीति गुणः । स्मर्यते । अर्यते । सुटो बहिरङ्गत्वान्न गुणः ।

'असिद्धवदत्राभात्' इत्यासिद्धः । ननूदात्तेभ्यः परत्वाद्धलादिलक्षणेनेटा भाव्यम् । स च सिद्ध इत्यत आह—नित्य इति । विघात्यनित्यः । इहाङ्गकार्यातिदेशः । तेन हनिणिङादेशा न । घानिष्यते[5] । आयिष्यते । अध्यापिष्यते[6] । अन्वभविषातामिति । 'आर्धधातुकस्येड् वलादेः' । बुभूवे[7] । लिट् । 'लिटस्तझयोः—' इत्येश् । द्वित्वम् । 'भवतेरः' इत्यत्र कर्तृनिर्देशाद् भावकर्मणोर्नात्वम् । बभूव इति केषांचिन्मतेनात्वम् । भावितेति । चिण्वदिट् । भवितेति । इट् । भाविषीष्टेति । आशीर्लिङ् । सर्वाण्येतानि भावे । कर्मणि तु अनुभूयते । अनुबभूवे । अनुभाविता । अनुभविता । अनुभाविषीष्ट । अनुभविषीष्ट । अनुभाविष्यते । अनुभविष्यते । अन्वभाविष्यत । अन्वभविष्यत । इति ज्ञेयम् । उपदेशग्रहणं भाविष्यत इत्यत्र गुणायादेशयोः कृतयोर्न स्यादित्येवमर्थम् । स्तूयते विष्णुरिति । ष्टुञ् स्तुतौ । सकर्मकत्वात् कर्मणि लकारः । स्तूयते । स्तूयेत । स्तूयताम् । अस्तूयत । अस्तावीति । लुङ् । च्लिः । चिण् । वृद्ध्यावादेशौ । चिणो लुक् । अस्ताविषातामिति । चिण्वदिट् । अस्तोषातामिति । चिण्वदिडभावे 'एकाचः—' इति इडभावः । तुष्टुवे इति । 'शर्पूर्वाः खयः' । उवङ् । स्मर्यत इति ।

---

१. भविषीष्ट । भाविषीष्ट, &c. in this order N_1. २. अन्वभाविष्यत । अन्वभविष्यत D_2, D_4, B_2. ३. After it—अस्ताविषत C. ४. D_2 drops स्तोष्यते । अस्ताविष्यत । अस्तोष्यत; P, N_1, D_4 drop the last two forms. ५. निघानि° Dc_3. ६. After it—अयमिट् असिद्धवदत्राभादित्यसिद्धः । Dc_3. ७. बभूवे Dc_1.

रिङादेशः । संस्क्रियते । [1]लोपः । [2]स्रस्यते । इदितस्तु नन्द्यते । संप्रसारणम् । इज्यते । [3]अयङ् यि क्ङिति । शय्यते ।

तनोतेर्यकि ॥६।४।४४॥

तनोते[4]राकारोन्ताde[5]शो वा स्याद्यकि च ॥ तायते । तन्यते । [6]ये विभाषा । जायते । जन्यते ।

स्मृ आध्याने । सकर्मकत्वात् कर्मणि लकारः । स्मर्यते । स्मर्यताम् । अस्मर्यत । अस्मारि । अस्मारिषाताम् । अस्मृषाताम् । सस्मरे । स्मारिता । स्मर्ता । स्मारिषीष्ट । स्मृषीष्ट । स्मारिष्यते । स्मरिष्यते । अर्यते इति । ऋ गतौ । **संस्क्रियते** इति । डुकृञ् करणे । सकर्मकः । 'संपरि—' इति सुट् । 'रिङ् शय—' इति रिङ् । चिण्वदिडादि पूर्ववत् ज्ञातव्यं सिजादिषु । **स्रस्यते** इति । स्रंसु अवस्रंसने । भावे लकारः । 'अनिदिताम्—' इति न्लोपः । **नन्द्यते** इति । टुनदि समृद्धौ । भावे लः । इदित्त्वान्नलोपाभावः । **इज्यते** इति । यज देवपूजादिषु । कर्मणि लकारः । अकर्मकत्वविवक्षायां भावे वा । 'वचिस्वपि—' इति संप्रसारणम् । **शय्यते** इति । शीङ् स्वप्ने । भावे लकारः ।

तायते इति । तनु विस्तारे । कर्मणि लः । **जायते** इति । जन जनने । भावे लः ।

---

१. न्लोपः P; नलोपः D3; अनिदितामित्यादिना न्लोपः । N1, D4. २. भ्रस्यात् P. अनिदितामित्यादिनाल्लोपः । भ्रस्यते D2, B2 (भ्रश्यते B2), D4. ३. अयाङ् क्ङिति D3. ४. °राकारः स्याद्यकि वा D2, B2. ५. °देशः स्याद्यकि वा P, D3; °देशो वा स्याद्यकि D1. ६. D1 has ये विभाषा । जायते । जन्यते before अयङ्यि क्ङिति.

तपोनुतापे च ॥३।१।६५॥

तपतेश्च्लेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च । अन्वतप्त पापिना । घुमास्थेतीत्वम् । दीयते । एशः आदिशित्वाभावादात्वम् । जग्ले ।

आतो युक् चिण्कृतोः ॥७।३।३३॥

आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च ॥ अदायि । अदायिषाताम् । अदिषाताम् । दायिष्यते । दास्यते । हन्यते । हो हन्तेरिति कुत्वम् । अचिण्णलोरित्युक्तेर्हनस्तो न ।

तपः । अनुतापः पश्चात्तापः । अन्वतप्त पापिनेति । तप संतापे । कर्मणि लुङ् । 'झलो झलि' इति सिचो लोपः । यत् पूर्वं पापं कर्म कृतं तेन पश्चात्तप्तः । अभितप्त इत्यर्थः । दीयत इति । डुदाञ् दाने । कर्मणि लः । जग्ले इति । ग्लै हर्षक्षये । भावे लः । 'आदेच उपदेशे' इत्यात्वम् । द्वित्वम् । आलोपः ।

आतः । कृति दायः । चिण्कृतोरिति किम् । ददौ । चौडिः । बाह्वादित्वादिञ् । अदायीति । दाञो लुङि चिणि रूपम् । अदायिषातामिति । 'स्यसिच्सीयुट्—' इति चिण्वदिट् । अदिषातामिति । 'स्थाघ्वोरिच्च' इतीदन्तादेशः सिच्च कित् । दायिष्यते । दास्यते

---

१. °श्चिणादेशः D_1. २. Dropped D_3. ३. अदायिषाताम् । अदिषाताम् B_2. ४. Before it—स्थाघ्वोरिच्च D_2, D_4. B_2. ५. इति dropped D_4. ६. पश्चात्तापः Dc_3.

अघानि । अघानिषाताम् । अहसाताम् । पक्षे वधादेशः । अवधि । अवधिषाताम् ।[1] गृह्यते । अग्राहि । चिण्वदिटो न दीर्घत्वमिष्टम् । अग्राहिषाताम् । अग्रहीषाताम् । दृश्यते । अदर्शि । अदर्शिषाताम् । सिचः कित्त्वादम् न । अदृक्षाताम् । णिलोपः । शम्यते मोहो मुकुन्देन ।

इति । चिण्वदिड् वा । तदभावे नेट् । **हन्यत इति** । हन हिंसागत्योः । कर्मणि लः । **अघानीति** । लुङ् । चिण् । **अघानिषातामिति** । चिण्वदिट् । **अहसातामिति** । चिण्वदिडभावे 'हनः सिच्' इति कित्त्वादनुनासिकलोपः 'अनुदात्तोपदेश—' इति । **पक्षे वधादेश इति** । 'आत्मनेपदेष्वन्यतरस्याम्'[2] इति । एतच्च परमतेनोक्तम् । स्वमते तु वधादेशोत्र न भवत्येव । तथोक्तं महाभाष्ये[4] । 'चिण्वद्भावो भवति विप्रतिषेधेन । अथेदानीं चिण्वद्भावे कृते पुनः प्रसङ्गाद्वधभावः कस्मान्न भवति । सकृद् गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेवेति कृत्वा । हनिणिङादेशप्रतिषेधश्च' इति । **गृह्यते इति** । ग्रह उपादाने । कर्मणि लः । 'ग्रहिज्या—' इति संप्रसारणम् । **अग्रहीषातामिति** । वल इट् । 'ग्रहोऽलिटि' इति दीर्घः । **दृश्यत इति** । दृशिर् प्रेक्षणे । कर्मणि लः । **अदर्शिषातामिति** । चिण्वदिट् । **सिचः कित्त्वादिति** । दृशेश्चिण्वदिडभावे • 'लिङ्सिचौ—' इति सिचः कित्त्वात् 'सृजिदृशोः—' इत्यम् नेत्यर्थः । **शम्यत इति** । शमु उपशमे । हेतुमण्णिच् । अमन्तत्वान्मितां ह्रस्वः । ततो यकि कृते 'णेरनिटि' इति णिलोपः[5] । कर्मणि लकारं दर्शयति मोह इत्यादिना ।

---

१. D₂. P drop it. २. After it—अवधिषत D3. ३. Before it—लिङ्सिचावात्मनेपदेषु । N1. ४. भाष्ये Dc3. ५. णेर्लोपः Dc3.

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥६।४।९३॥

चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात् ॥

[1]**द्वितीये णिचि दीर्घविधौ त्वजादेशो न स्थानिवदिति पाक्षिकदीर्घार्थं दीर्घोक्तिः । ह्रस्वोक्तावाद्यणि[2]च्लोपस्य स्थानिवत्त्वात्**

चिण्णमुलोः । ननु च 'मितां ह्रस्वः' इति ह्रस्वग्रहणमनुवर्त्यानेन विकल्पमात्रं विधेयम् । किं दीर्घग्रहणेन । विकल्पमात्रविधानेपीष्टं सिध्यति । तथा हि । यदानेन ह्रस्वो विधीयते तदाशमीत्यादि सिध्यति । यदा ह्रस्वो न तदात उपधाया दीर्घो विहितस्तस्य स्वेनैव रूपेणावस्थानादशामीत्याद्यपि सिध्यति इत्यतो दीर्घग्रहणं व्यर्थमिति शङ्कानिराकरणायाह—**द्वितीये णिची**त्यादि । शमयन्तं प्रयुङ्क्ते इति शमेर्ण्यन्तात् प्रयोजकव्यापारे द्वितीये णिचि कृते पूर्वणिलोपे च लुङि चिणि[4] चैव कृते अशामीति पाक्षिकदीर्घो भाव्य एतदर्थं दीर्घोक्तिः[5] । ननु च दीर्घोक्तावप्यत्र पाक्षिकं दीर्घत्वं न स्यात् । तथा हि । चिण्णमुल्परे[6] णौ मितामङ्गानां ह्रस्वत्वं (दीर्घत्वं) विधातव्यम् । यश्चात्र णिश्चिण्परः नात्र मिदङ्गम् । 'अचः परस्मिन्—' इति स्थानिवद्भावेन पूर्वणिचा व्यवधानात् । यस्मिंश्च मिदङ्गं नासौ चिण्परः । परेण णिचा व्यवधानादित्याशङ्क्याह—**दीर्घविधौ त्वजादेशो न स्थानिवदिति** । 'न पदान्त—' इति सूत्रेणेत्यभिप्रायः । ननु च ह्रस्वविकल्पविधावपीष्टं सिध्यतीत्याशङ्कामपाकरोति—**ह्रस्वोक्ताविति** । न हि ह्रस्वविधौ स्थानिवद्भावः केनचित् प्रतिषिद्धस्तेन ह्रस्वे[7] विकल्पेन विधीयमाने णिलोपस्य

---

१. द्वितीयेति णिचि D1. २. णिलोपस्य N, D3, D4. ३. तेनं for न Dc3. ४. णिचि च कृते Dc3. ५. पाक्षिकदीर्घभावाय दीर्घोक्तिः । Dc3. ६. चिण्परे णमुल्परे च णौ &c. Dc3. ७. ह्रस्वविकल्पेन Dc3.

पाक्षिक उपधाह्रस्वो[1] न स्यात् । अशमि । अशामि । ण्यन्तत्वे-नाजन्तत्वाच्चिण्वदिट् । तस्य असिद्धवदत्राभादिति णिलोपं प्रति असिद्धत्वाण्णिलोपः । अशामिषाताम् । अशमिषाताम् ।[2] चिण्वदिड-भावे । अशमयिषाताम् । ण्यन्तत्वाभावे शम्यते मुनिना ।

नोदात्तोपदेशस्य मान्तस्यानाचमेः[3] ॥७।३।३४॥

मान्तस्य सेट उपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च न त्वाचमेः[4] । अशमि । अदमि । अनाचमेः किम् । आचामि । आचमिकमिवमीनामिति वक्तव्यम् । अकामि ।

स्थानिवत्त्वाद्विकल्पेन ह्रस्वो न स्यादित्यर्थः । **अशमि** । **अशामीति** । व्याख्यातप्रायम् । **अशमयिषातामिति** । 'आर्धधातुकस्येड्वलादेः' । णेर्गुणायादेशौ । **शम्यते मुनिनेति** । भावे लः ।

नोदात्तो । उपदेशे उदात्तः उदात्तोपदेशः । अस्मादेव साधुः । उदात्तोपदेशस्येति किम् । अनामि । अगामि । कथमुद्यम उपरम इत्येतौ । 'यम उपरमे' । 'अड उद्यमे' इति निपातनात् । यन्मते त्वपाणिनीयो धातुपाठेऽर्थनिर्देशस्तन्मते संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । उपदेशे किम् । शमी तमीत्यादि यथा स्यात् । शमादिभ्यो घिनुण् । असत्युपदेशे प्रत्ययस्वरे कृते धातोरनुदात्तत्वात् शमीत्यादि न स्यात् । उपदेशेत्यनेनाद्यवस्था लक्ष्यते । **अशमि** । **अदमीति** । भावे लः । **आचामीति** । चमु अदने । आङ्पूर्वः । **अकामीति** । कमु

---

१. उपधाया ह्रस्वो D2, P. २. After it—शमयांचक्रे । शामिता । शमिता । इत्यादि D2. ३. चामेः N1. ४. °चामेः N1.

अवामि । [1]अमृचम[2]विश्रमां वेति केचित् । [3]आमि [4]अमि मा । अचामि । अचमि । व्यश्रामि । व्यश्रमि । वध हिंसायाम् । जनिवध्योश्चेति न वृद्धिः । अवधि ।[5] जाग्रो विचिण्णल्ङित्सु इत्युक्तेर्वृद्धिः । अजागारि । ण्यन्तजागर्तेश्चिण्णमुलोर्वा वृद्धिरिति केचित् । [6]अजागरि । अजागारि ।

भञ्जेश्च चिणि ॥६।४।३३॥

भञ्जेर्नलोपो वा स्याच्चिणि ॥ अभाजि अभञ्जि ।

विभाषा चिण्णमुलोः ॥७।१।६९॥

लभेर्नुमागमो वा स्याच्चिण्णमुलोः परतः ॥ अलम्भि । अलाभि । व्यवस्थितविकल्पत्वात् प्रादेर्नित्यं नुम् । प्रालम्भि ।

कान्तौ । **अवामीति** । टुवमु उद्गिरणे । त्रिष्वपि कर्मणि लः । **आमि अमि मेति** । अम रोगे । 'न माङ्योगे' इत्यडभावः । **व्यश्रामि** । **व्यश्रमीति** । श्रमु तपसि खेदे च । **अजागारीति** । जागृ निद्राक्षये । भावे लः । चिण् । ण्यन्तेति । तथोक्तं **मुग्धबोधे** । 'ञेः परयोरिण्णमोस्तु घेश्च जागुश्च स्वोर्घः' इति । अजागरि । हेतुमण्णिच् । ततः कर्मणि लः । ण्यन्तत्वेनाजन्तत्वाच्चिण्वदिट् । तस्य 'असिद्धवदत्राभात्' इति णिलोपं प्रत्यसिद्धत्वाण्णिलोपः ।

भञ्जेः । **अभाजीति** । भञ्जो आमर्दने । नलोपपक्षे 'अत उपधायाः' इति वृद्धिः । **अलम्भीति** । डुलभष् प्राप्तौ । कर्मणि लुङ् । च्लिः । चिण् । **प्रादेरिति** । उपसर्गात् परस्येत्यर्थः ।

---

१. अमु° D_1. २. मु D_1. ३. अमि मा आमि मा B_2; अमि मा आमि वा N_1. ४. मा अमि D_4, C; अमि वा D_3. ५. After it अजनि D_1. ६. अजागारि । अजागरि । D_3.

यदा कर्मैव[1] कर्तृत्वेन विवक्ष्यते तदा सकर्मकाणामप्यकर्मकत्वात् कर्तरि भावे च[2] लकारः ।

कर्मवत् कर्मणा तुल्यक्रियः ॥३।१।८७॥

कर्मस्थया[3] क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यात् ।[4] कर्मवत्त्वाद्यगात्मनेपदचिण्चिण्वदिटः स्युः । उक्तं च

अथ कर्मकर्तरि प्रक्रिया । **यदा कर्मैवेति** । कर्मादीनां कारकाणां शक्तिरूपत्वात् शक्तेश्च धर्मरूपत्वाद्धर्मस्य च धर्मरहितत्वात् कर्मशब्देन कर्मशक्त्याश्रयं तण्डुलादि द्रव्यमुच्यते । तद्यदा बाह्यकर्तृव्यापारनिवृत्तौ स्वव्यापारमात्रेऽवतिष्ठते तदा स्वतन्त्रत्वात् कर्मकर्तृव्यपदेशं लभते । तदुक्तं हरिणा—

'निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते' ॥ इति ।

तत्तु कर्म कर्तृत्वं प्राप्तं कर्मकर्तृ इत्युच्यते यथा लोके ब्राह्मणः सन् श्रमणतां ब्राह्मणश्रमण उच्यते ।

कर्मवत् । कर्मशब्दोऽयं गौणः । तस्मादुपचारेण कर्मस्थायां क्रियायां वर्तते । यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चशब्दः पुरुषेषु । उपचारस्य तु प्रयोजनं कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवद्भावो यथा स्यात् कर्तृस्थभावकानां कर्तृस्थक्रियाणां च मा भूदित्येतत् सर्वं मनसि कृत्वाह—**कर्मस्थयेति** । **कर्ता कर्मवत् स्यादिति** । 'कर्तरि शप्' इत्यनुवृत्तः कर्ता प्रथमया विपरिणम्यमानः कर्मवत् स्यात् । तस्य च कर्मकर्तृव्यपदेशार्हत्वे **दुर्गसिंहोक्तिं** प्रमाणयति—**उक्तं चेति** ।

---

१. कर्तृत्वेन विवक्षितं D_3: कर्तृत्वे विवक्ष्यते N. २. Dropped D_3. ३. कर्मस्थक्रियया D_1. ४. After this—कर्मस्थभावकर्मक्रियाणां च कर्ता कर्मवद् भवति । न कर्तृस्थभावकानां कर्तृस्थक्रियाणां कर्मस्थः पचतेर्भावः कर्मस्थाविर्भेदः क्रिया । मांसासिभावः कर्तृस्थः कर्तृस्थावगमेः क्रिया । कर्मवत्त्वा° C; N_1 (कर्मस्थभावकानां कर्मस्थक्रियाणां च N_1: also न तु कर्तृस्थ° N_1; कर्मस्थावाभिदेः क्रिया N_1).

‘ क्रियमाणं तु यत् कर्म स्वयमेव प्रसिध्यति ।
सुकरैः स्वैर्गुणैर्यस्मात् कर्मकर्तेति तद्विदुः’ ॥

परत्वाच्छपि प्राप्ते कर्मकर्तरि यग्वाच्यः । कर्तरि कर्मेत्यनुवृत्तौ शेषात् कर्तरीति पुनः कर्तृग्रहणात् कर्तैव यः कर्ता तत्रैव परस्मैपदं न कर्मकर्तरि । भिद्यते काष्ठं स्वयमेव । अत्र कर्तुस्तिङोक्तत्वात् प्रथमा । अभेदि । पच्यते ओदनः स्वयमेव । अपाचि । यदा भावे लकारस्तदा काष्ठात् कर्तरि तृतीया ।

क्रियमाणमिति । क्रियमाणं क्रियया ईप्स्यमानं कर्म ओदनादि यद्यदा स्वयमेवात्मनैव न च कर्त्रन्तरेण प्रसिध्यति विक्लेदादिकमुपगच्छति । किंविशिष्टं कर्म । सुकरैरनायाससाध्यैः स्वैरात्मीयैर्गुणैर्धर्मैर्विक्लेदाद्यत्वादिभिर्विशिष्टं यस्मात् अतः कर्तृत्वाद्धेतोस्तदा कर्मकर्तेति विदुः कर्मकर्तृशब्देन व्यपदिशन्तीत्यर्थः । **भिद्यते काष्ठं स्वयमेवेति** । अत्र कर्तरि लकारः । स्वयमित्यव्ययं तृतीयान्तात्मशब्दार्थे वर्तते । स्वयमात्मना करणभूतेनेत्यर्थः । भिद्यते विदीर्यते । विदारमात्रवचनो ह्यत्र भिदिः । धातूनामनेकार्थत्वात् । भेदनं प्रति काष्ठमेव कर्तृ । एवं पच्यते ओदन इत्यादौ विक्लेदादिमात्रवचनाः पच्यादयो ज्ञेयाः । **अभेदीति** । लुङ् । च्लिः । चिण् । तलोपः । **यदा भावे लकार** इति । अतिदेशं विनापि च तत् कार्यं स्यात् तदापि भाव्यमिति कृत्वा तद्ग्रहणमिति भावः । **कर्तरि तृतीयेति** । कर्तुस्तिङानभिधानात् । लोनुवृत्तेरिति । लिङ्याशिष्यङ् इति द्विलकारको निर्देशः । तत्र लोनुवृत्तेरित्यर्थः । कर्मवदित्यत्र कर्मणेति किम् । करणाधिकरणाभ्यां तुल्यक्रियस्य मा भूत् । साध्वसिः छिनत्ति साधु स्थाली पचति । ‘धातोरेकाचः—’ इति धात्वनुवृत्तेरेकसंख्यायाश्च विवक्षया यस्मिन् धातौ कर्मणोपस्थापिते यत् कर्म

---

१. च D_1. २. कर्तरि D_4. ३. तत्र P, D_2, B_2. ४. कर्त्रा Dc_3.

लोनुवृत्तेस्तिङ्वाच्यस्यैव कर्तुःकर्मवत्त्वम् । तेनात्र न द्वितीया । भिद्यते काष्ठेन ।

तपस्तपः कर्मकस्यैव ॥३।१।८८॥

तपः कर्मकस्यैव तपेः कर्ता कर्मवत् स्यात् ॥ तप्यते तपस्तापसः । तपोर्जयतीत्यर्थः । तपोनुतापे चेति कर्मकर्तरि चिण् न । अतप्त । तपःकर्मेति किम् । उत्तपति सुवर्णम । श्रद्धावत्कर्तृकात् सृजो यक्चिणौ कर्तरीति केचित् । सृज्यते स्रजं भक्तः । असर्जि ।[४]

तस्मिन्नेव धातौ स यदि कर्ता स्यात् तदा कर्मवद्भावादिति । इह न । पचत्योदनं देवदत्तः । राध्यत्योदनः स्वमेव । कर्मस्थभावकानां कर्मस्थक्रियाणामेव भवति । कर्तृस्थभावक्रियाणां नेति किम् । गच्छति ग्रामम् । गच्छति ग्रामः स्वयमेव । अत्र गमेः क्रिया कर्तृस्था । माससहचरित आसिः मासासिः । अपरिस्पन्दसाधनसाध्योभावः । सपरिस्पन्दसाधनसाध्या क्रिया ।

तपः । पूर्वं क्रियासादृश्य एव कर्मवद्भावो विहितः । स क्रियावैसादृश्ये न प्राप्नोतीति विध्यर्थमिदम् । तप्यते तपस्तापस इति । अत्रोपवासादिकं तपः तापसं तपतीति तापसस्य कर्मवत् । कर्मावस्थायां तपेः क्लेशार्थता । तापसस्य कर्त्रवस्थायां तपेरर्जनार्थता । तप्यते तपस्तापस इति अर्जयतीत्यनेन दर्शयति । अतप्तेति । 'झलो झलि' इति सिचो लुक् । श्रद्धावदिति । तथा बोपदेवपण्डितैः 'सृजः श्राद्धघात्मनेगि च' इति यक्चिणात्मनेपदानि विहितानि भाष्ये इत्युक्तम् । 'सृजियुज्योः श्यंस्तु । सृजियुज्योः सकर्मकयोः कर्ता बहुलं कर्मवद्भवतीति वक्तव्यम् । श्यंस्तु भवति । सृजेः श्रद्धोपपन्ने कर्तरि कर्मवद्भावो वाच्यश्चिणात्मनेपदार्थः । सृज्यते मालाम् । असर्जि मालामिति । युजेस्तु न्याय्ये कर्मकर्तरि यकोभावाय । युज्यते 'ब्रह्मचारी योगम्' इति ।

१. तपतेः C. २. कर्तरि D_3. ३. कर्मकर्तरीति C. ४. After this—श्रद्धावत्कर्तृकात् किम् । मालां करोति मालिकः । व्यत्यसृष्ट माला मिथुनम् C, N (सृजति मालां मालिकः । व्यत्यसृष्ट माला मिथुनम् N).

कुषिरजोः प्राचां श्यन् परस्मैपदं च ॥१।३।९०॥

अनयोः कर्मकर्तरि श्यन् परस्मैपदे[1] वा स्तः ॥ कुष्यति कुष्यते वा पादः स्वयमेव । रज्यति । रज्यते ।[2] व्यवस्थितविकल्पत्वादार्धधातुके न । अकोषि । अरञ्जि ।

अचः कर्मकर्तरि ॥३।१।६२॥

अजन्ताच्च्लेश्चिण्[3] वा स्यात् [4]कर्मकर्तरि तशब्दे ।[5] अकारि । अकृत ।[6]

दुहश्च ॥३।१।६३॥

अदोहि । अदुग्ध ।[7]

कुषिरजोः । कुष निष्कर्षे । रञ्ज रागे । यगात्मनेपदयोरपवादौ । रज्यतीति । 'अनिदिताम्—' इत्यनुनासिकलोपः । अकोषीति । कर्मवद्भावाच्चिण् ।

अचः । प्राप्तविभाषेयम् । अकारीति । 'अचो ञ्णिति' इति वृद्धिः । अकृतेति । 'ह्रस्वादङ्गात्—' इति सिचो लोपः । तस्यासिद्धत्वात् गुणः प्राप्तः 'उश्च' इति कित्त्वान्न ।

दुहः । दुह प्रपूरणे । अस्माद्धातोश्चिण् वा स्यात् कर्मकर्तरि तशब्दे परे । अदुग्धेति । 'शल इगुपधा—' इति क्सः । तस्य 'लुग्वा दुह—' इति लुक् । 'दादेः—' इति घः । धत्वम् । जश्त्वम् ।

---

१. पदं N_1. २. After it—वा वस्त्रं स्वयमेव B_2; वा D_3. ३. च्लिणादेशः स्याद्वा N; कर्मकर्तरि च्लिण् वा स्यात् D_3. ४. कर्मकर्तृतशब्दे D_2. ५. After it—परे D_3. ६. After it—कटः स्वयमेव B_2, N. ७. After it—अधुक्षत् गौः स्वयमेव पयो मुंचाति B_2, N_1 (मुञ्चतीत्यर्थः N).

न रुधः ॥३।१।६४॥

रुधश्च्लेः[1] कर्मकर्तरि चिण् न ॥ अरुद्ध । पचदुहान्यद्विकर्मकाणां कर्मकर्ता[2] न कर्मवदिति केचित् । चिनोति वृक्षः फलानि स्वयमेव[3] । द्विकर्मकाभ्यां पचदुहाभ्यां कर्मकर्तरि चिण् नेति केचित् । अपक्ताम्रः फलम् । अदुग्ध गौर्दुग्धम् ।

न दुहस्नुनमां यक्चिणौ ॥३।१।८९॥

एषां कर्मकर्तरि यक्चिणौ न स्तः ॥ दुहेरनेन यग्निषिध्यते । चिण् प्रागेव विकल्पितः । दुग्धे । प्रस्नुते[4] ।[5] चिण्वदिटो न निषेध इति काचित् । अस्नाविष्ट । स्नुक्रमोरिति नेट् । अस्नोष्ट[6] । नमते । अनंस्त ।[7] णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणां च

न रुधः । रुधिर् आवरणे । **अरुद्धेति** । 'झलो झलि' इति सिचो लोपः । तस्यासिद्धत्वात् लघूपधगुणः प्राप्तो 'लिङ्सिचौ—' इति कित्त्वान्न । धत्वजश्त्वे ।

न दुह । कर्मकर्तरीति विशेषणम् शुद्धे कर्मणि भावे वा प्राप्तयोः प्रतिषेधार्थम् । **दुग्ध** इति । शप् । अदादित्वात् तस्य लुक् । घत्वम् । 'झषस्तथो—' इति धः । जश्त्वम् । **प्रस्नुत** इति । स्नु प्रस्रवणे । **चिण्वदिट** इति । तथोक्तं **मुग्धबोधे** । 'चिस्नुश्रिमाद्यात्त्वमिग्' इति । **नमत** इति । णमु प्रह्वत्वे शब्दे च । अन्तर्भावितण्यर्थो णमिरत्र । एवं हि कर्मस्थक्रियः स्यात् । यथा नमयति दण्डं देवदत्तः । नमयते दण्डः स्वयमेवेति ण्यन्तावस्थायाम् ।

---

१. च्लेः dropped N. २. कर्ता D_2. ३. स्वयमेव फलानि N. ४. स्नुतं D_3. ५. After it—गौः D_2, D_4, B_2 ; गौः स्वयमेव N. ६. अस्नोष्ट । दण्डः स्वयमेव । N. ७. Before it—नमि अन्तर्भूतण्यर्थः । नमयति दण्डं देवदत्तः । N.

यक्चिणौ न । कारयते ।[१] ण्यन्तात् कर्मकर्तरि चङ् वेति केचित् । अचीकरत । अकारयिष्ट । अकारिष्ट । श्रथ्नीते । अश्रन्थिष्ट ।[३] ग्रथ्नीते । अग्रन्थिष्ट ।[४] ब्रूते । अवोचत । आहते ।[५] आहत ।[६] आघानिष्ट । आवधिष्ट । कॄगॄश्रिञ्[७] भूपार्थेभ्यः[८] सन्नन्ताच्च यक्चिणौ न ॥ श्रिञ्[९]वर्जात् चिण्वद्‌िडपि नेति केचित् । किरते । अकीर्ष्ट । गिरते ।

कारयते इति । ण्यन्तस्योदाहरणम् । अचीकरतेति । कारि अस्माच्चङि 'णौ चङि' इत्युपधाह्रस्वः । द्वित्वम् । चुत्वम् । 'सन्वल्लघुनि—' इति सन्वद्भावः । 'सन्यतः' इतीत्वम् । 'दीर्घो लघोः' । अकारयिष्टेति । चिण्वदिडभावे । अकारिष्टेति । चिण्वदिटि । श्रथ्नीते ग्रथ्नीत इति । श्रन्थग्रन्थ संदर्भे । श्ना । 'ई हल्यघोः' । 'अनिदिताम्—' इति न्लोपः । अवोचतेति । 'ब्रुवो वचिः' इति वचिः । 'अस्यति वक्ति—' इत्यङ् । 'वच उम्' । अत्राप्यन्तर्भावितण्यर्थत्वात् कर्मस्थक्रियत्वम् । आहत इति । 'आङो यमहनः' इत्यात्मनेपदम् । तद्विधानेकर्मकत्वमप्यन्तर्भावितण्यर्थः । आहतेति । चिण्वदिडभावे अनुनासिकलोपः । 'हनः सिच्' इति कित्त्वात् 'ह्रस्वादङ्गात्' इति सिचो लुक् । आघानिष्टेति । चिण्वदिट् । वृद्धिः । घत्वम् । आवधिष्टेति । 'आत्मनेपदेषु—' इति वधादेशः । कॄगॄ इति । कॄ विक्षेपे । गॄ निगरणे । श्रिञ् सेवायाम् । भूषार्था अलंकारार्थाः । किरत इति । तुदादित्वात् शः । 'ऋत इत्' । रपरः । अकीर्ष्टेति ।

१. After it—कटः स्वयमेव । N. २. Dropped B_2. ३. अश्रेथिष्ट C.
४. After it—ग्रन्थः स्वयमेव । N_1. ५. C, P drop it. ६. अघानिष्ट । अवधिष्ट D_3, B_2 ; अघानिष्ट N. ७. क्षृगॄ D_1. ८. भूषणार्थेभ्यः N_1.
९. वर्जं D_3.

अगीष्ट । श्रयते । अश्रयिष्ट । अश्रायिष्ट । तंसते । अतंसिष्ट । चिकीर्षते । अचिकीर्षिष्ट ।[1]

[2]ण्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि ।
प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि ॥ १ ॥

लुङ् । सिच् । इट् । रपरः । अश्रयिष्टेति । चिण्वदिट् । तंसत इति । तसि अलंकारे । चिकीर्षत इति । डुकृञ् । सन् । द्वित्वम् । 'अज्झन—' इति दीर्घः । उरत् । सन्यतः । ऋत इत् । रपरः । दीर्घः ।

ण्यादय इति । ण्यादयो द्विकर्मकसंग्रहकश्लोके पठिताः । नीहृ इत्यादयः निष्कर्माणश्च गत्यर्थाश्च निष्कर्मगत्यर्थाः । ण्यन्ताश्चते निष्कर्मगत्यर्थाश्च ण्यन्तनिष्कर्मगत्यर्थाः । ते ण्यादयश्च मुख्यकर्मणि विहितं प्रत्ययं लकृत्यक्तखलर्थान् प्राप्नुवन्ति । दुह्यादिस्तस्मिन्नेव श्लोके दुह्याच्यर्थ इति पठितो गौणे कर्मणि कर्मप्रत्ययमाप्नोति । अन्ये त्वित्यादि । ण्यादिण्यन्तनिष्कर्मगत्यर्थदुहादिभ्योऽन्ये 'गतिबुद्धि—' इत्यादिसूत्रेषु पठिता यथारुचि रुचिमनतिक्रम्य यथेच्छं मुख्ये गौणे वा कर्मणि कर्मप्रत्ययं यान्तीत्यर्थः । तथोक्तं भाष्ये—

'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः' ॥ इति ।

द्विकर्मणां नीप्रभृतीनाम् ।

---

१. After it—कटः स्वयमेव N1. २. ण्यादयो D1, D3, P.

निन्ये विजनमजागरि रजनिमगामि मदमयाचि संभोगम् ।
गोपी हावमकार्यत भावश्चैनामनन्तेन ॥ २ ॥

इति भावकर्मप्रक्रिया ॥

'नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणम्' इति तस्यैव वचनात् । अस्योदाहरणान्याह—**निन्ये** इति । अनन्तेन गोपी विजनं निन्ये नीता । अत्र गोपी मुख्यं कर्म । तदर्थत्वा-न्नयनस्य । अतो मुख्ये कर्मणि ले जाते गोपीत्यत्र प्रथमा । तिङभि-हितत्वात् । रजनिं रात्रिमजागरि जागरिता गोप्यनन्तेन । इदं ण्यन्त-निष्कर्मण उदाहरणम् । अत्रापि तथैव मुख्यत्वम् । गोप्यनन्तेन मदमगामि प्रापिता । इदं ण्यन्तगत्यर्थस्योदाहरणम् । अत्रापि पूर्ववत् । गोप्यनन्तेन संभोगमयाचि याचिता । इदं दुह्यादेः । याचेस्तु संभोगो मुख्यः । गोपी अमुख्या । तस्याः संभोगार्थत्वात् । अत्र गौणे कर्मणि गोप्यां प्रत्ययस्ततः प्रथमा । अनन्तेन गोपी हावमनुरागोत्सवमकार्यत । अत्र गोपी गौणं तत्र प्रत्ययः । 'हृक्रोः—' इति कर्मत्वात् । एवं गोपीं भावश्चाकार्यत । अत्र भावो मुख्यं कर्म । तत्रापि प्रत्ययः । अन्ये तु यथारुचीति वचनात् । इति श्लोकार्थः । अजागरीति ण्यन्तजागर्तेश्चिणि रूपम् । केषांचिन्मतेन वृद्ध्यभावः । **अगमीति** । मित्त्वाद्ध्रस्वः ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन्प्रसादे निरगमदमलो **भावकर्मप्रसङ्गः** ॥

---

१. हाव° B2, D4.

अथ लकारार्थप्रक्रिया. ।

अभिज्ञावचने लृट् ॥३।२।११२॥

स्मृतिपर्यायधातुयोगे भूतानद्यतने धातोर्लृट् स्यात् ॥ स्मरसि कृष्ण गोकुले वत्स्यामः ।

न यदि ॥३।२।११३॥

यद्युक्ते प्रागुक्तं न ॥ अभिजानासि कृष्ण यद्वनेभुञ्ज्महि ।

विभाषा साकाङ्क्षे ॥३।२।११४॥

यच्छब्देन[1] योगेयोगेपि उक्तार्थे लृड् वा स्यात् लक्ष्यलक्षणसंबन्धे प्रयोक्तुराकाङ्क्षायाम् ॥ स्मरसि कृष्ण वने

अभिज्ञा । वचनग्रहणं पर्यायार्थमित्यभिप्रेत्याह—**स्मृतिपर्यायेति** । पर्यायश्च जानासि स्मरसि बुध्यसे चेतयसे इति । **वत्स्याम** इति । वस निवासे । लृट् । मस् । ‘स्यतासी—’ इति स्यः । ‘सः स्यार्धधातुके’ इति सस्य तः । ‘अतो दीर्घो यञि’ इति दीर्घः ।

न यदि । यदीति सप्तमी । तेन यत्र यच्छब्दोस्ति तत्र नियमतोभिज्ञावचनं यच्छब्दयुक्तं स्यादित्याह—**यद्युक्ते** इति । यद्युक्तेभिज्ञावचने लृणेत्यर्थः । अभुञ्ज्महीति । भुज पालनाभ्यवहारयोः । अस्मादनद्यतने लङ् । ‘भुजोनवने’ इति तङ् । महिङ् । श्नसोरल्लोपः ।

विभाषा । उक्तार्थेभिज्ञावचने । लक्ष्यलक्षणसंबन्ध इति विषयसप्तमी । लक्ष्यलक्षणे यो यः संबन्धस्तस्मिन् विषये प्रयोक्तुराकाङ्क्षा

---

१. यच्छब्दयोगे° D3.

वत्स्यामः। तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यम्। पक्षे लङ्। एवं यच्छब्दे।

परोक्षे लिट् ॥३।२।११५॥

चकार। उत्तमपुरुषे वैचित्त्यात् पारोक्ष्यम्। सुप्तोऽहं किल विललाप॥ अत्यन्तापह्नवेऽपि लिट्। नाहं कलिङ्गं जगाम।

हशश्वतोर्लङ् च ॥३।२।११६॥

आभ्यां योगे लिड्विषये लङ् चाल्लिट्॥ इति हाकरोत् चकार वा। शश्वदकरोत् चकार वा।

स्यादित्यर्थः। **वास** इत्यादि। वासः परिज्ञातत्वाल्लक्षणम्। तेन हि चारणं लक्ष्यते। चारणं लक्ष्यमपरिज्ञातत्वात्। लक्षणं परिज्ञातं ह्यपरस्य लक्षणं स्याद्यथाग्नेर्धूमः। **पक्षे लङि**ति। यथा स्मरसि कृष्ण वनेवसाम तत्र गामचारयामेति। एवं यच्छब्द इति। यथा स्मरसि कृष्ण यद्वने वत्स्यामस्तत्र यद्गां चारयिष्यामः। पक्षे लङ्।

परोक्षे। व्याख्यातत्तरम्। **उत्तम** इति। विक्षिप्तं चित्तं यस्य स विचित्तस्तस्य भावो वैचित्त्यम्। आत्मसाध्यापि क्रिया यदा चित्तविक्षेपान्नोपलक्ष्यते तदासौ परोक्षा भवति। तेनोत्तमविषयेऽपि परोक्षता। अतस्तत्रापि लिट्। **विललापे**ति। लपेर्विपूर्वस्योत्तमे णलि रूपम्। **अत्यन्ते**ति। अपह्नवोऽपलापः। कस्यचिदन्तं स्यात्। यः सर्वापह्नवस्तत्र लिट् स्यात्। नाहं कलिङ्गान् जगामेत्यत्र न केवलं कलिङ्गदेशावस्थापह्नवः अपि तु गमनस्यापीत्यत्यन्तापह्नवः। यदा स्थानमात्रस्यापह्नवः न गमनस्यापि तदा लङेव। नाहं कलिङ्गेष्ववतिष्ठमिति।

---

१. परोक्षम् D_2. २. D_1 drops अपि. ३. After it—च D_1, D_2, D_3, D_4, B_2. ४. लङिति। परोक्षे। Dc_1. ५. कश्चिदन्त्यं न स्यात् Dc_3. ६. °स्थानस्याप° Dc_3.

प्रश्ने चासन्नकाले ॥३।२।११७॥

[1]लङ् चालिट् ।[2] अगच्छत् किम् । जगाम किम् । आसन्नकाले किम् । कंसं जघान किम् ।

लट् स्मे ॥३।२।११८॥

स्मयोगे लिडर्थेपि लट् स्यात् ॥[4] यजति स्म युधिष्ठिरः ।

अपरोक्षे च ॥३।२।११९॥

भूतानद्यतनेपरोक्षेपि स्मयोगे लट् स्यात् ॥ एवं स्म पिता ब्रवीति ।

ननौ पृष्टप्रतिवचने ॥३।२।१२०॥

ननुयोगे भूतेपि लट् पृष्टप्रतिवचने ॥[8] अकार्षीः किम् । ननु करोमि भोः । पृष्टप्रतिवचन इति किम् । नन्वकार्षीत् ।

प्रश्ने इति । पञ्चवर्षाभ्यन्तर आसन्नकालः । **अगच्छदिति** । 'इषुगमि—' इति छः । **ब्रवीतीति** । 'ब्रुव ईट्' ।

ननौ । प्रश्नः पृष्टम् । भावे निष्ठा । प्रश्नपूर्वकं प्रतिवचनम् । शाकपार्थिवादित्वादुत्तरपदलोपी समासः । **अकार्षीः किमिति** । प्रश्नः । **ननु करोमि भोः** । इति वचनम् । पृष्टप्रतिवचने किम् । ननु अकार्षीः ।

---

१. Before it—संनिहितकालसंबंधविषये प्रश्ने च C ; आसन्नकाले पृच्छ्यमाने भूतानद्यतनपरोक्षवृत्तेर्धातोः N_1. २. After it—च D_1, D_3. ३. C drops अपि. ४. Before it—आह स्म हारीतः B_2, D_4. ५. °स्मयोगेपि D_1; लङर्थेपि लट् स्यात् N_1; लिङर्थेपि D_4. ६. पृष्टेपि C. ७. After it—स्यात् C, D_3. ८. स्यात् after it in D_2. ९. P, D_2, D_3, D_4, N_1 drop from पृष्ट ...र्षीत्.

नन्वोर्विभाषा ॥३।२।१२१॥

[1]आभ्यां योगे[2] प्रागर्थे लड् वा स्यात्[3] ॥ अकार्षीः किम् । न करोमि । नाकार्षम् । अहं नु करोमि । अहं न्वकार्षम् ।

पुरि लुङ् चास्मे ॥३।२।१२२॥

[4]पुराशब्दयोगे भूतानद्यतने लुङ्लटौ वा स्तः न तु स्मयोगे । पक्षे यथाप्राप्तम् । वसन्तीह पुरा छात्राः । अवात्सुः । अवसन् । ऊषुर्वा । अस्मे[5] किम् । यजति स्म पुरा ।

नन्वोरिति । **प्रागर्थे** पृष्टप्रतिवचने इत्यर्थः । **नाकार्षमि**ति । मिपोम् ।

पुरीति । पुराशब्देत्यनेन पुराशब्द इहोपपदत्वेनोपात्तो न पूः शब्द इति दर्शयति । एवं तर्हि तस्याकारान्तत्वात् पुरीति सप्तम्यन्तस्य निर्देशो न घटते । मैवम् । 'आतो धातोः' इत्यतः 'आतः' इति योगविभागादाकारलोपाद् घटिष्यते । ननु पूःशब्दोपादानं किं न स्यात् । न । तस्य न घटते वृत्त्यभावात् । इह च 'अनद्यतने' इति मण्डूकप्लुत्यानुवर्तते । अत एवाह—**भूतानद्यतन** इति । चकारेण लटोनुकर्ष[6] इत्याह—**लुङ्लटावि**ति । **पक्षे यथाप्राप्तमि**ति । लङ्लिटौ । **अवात्सुरि**ति । लुङ् । 'सिजभ्यस्त—' इति झेर्जुस् । सिचि वृद्धिः हलन्तलक्षणा । पूर्ववत् सस्य तः । **अवसन्नि**ति । लङ् । **ऊषुरि**ति । लिट् । 'परस्मैपदानाम्—' इति झेरुस् । द्वित्वम् । 'वचिस्वपि—' इति प्रकृतेः संप्रसारणम् । 'लिटि—' इत्यभ्यासस्य । 'शासिवसि—' इति षः ।

---

१. एतयोर्योगे D1 ; ननु आभ्यां योगे C, N1. २. Before it—भूतेकाले D1. ३. Dropped N1. ४. Before it—अनद्यतनग्रहणमिह मण्डूकप्लुत्यानुवर्तते । N1. ५. अस्मेति C. ६. लटानुकर्ष Dc1.

यावत्पुरानिपातयोर्लट् ॥३।३।४॥

आभ्यां निपाताभ्यां योगे भविष्यति काले धातोर्लट् स्यात् ॥ यावद् भुङ्क्ते । पुरा भुङ्क्ते । निपातयोः किम् । यावद् दास्यते तावद् भोक्ष्यते । करणभूतया पुरा यास्यति ।

विभाषा कदाकर्ह्योः ॥३।३।५॥

आभ्यां योगे भविष्यति लट् वा स्यात् ॥ पक्षे यथाप्राप्तम् । कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा ।

किंवृत्ते लिप्सायाम् ॥३।३।६॥

विभक्त्यन्तं डतरडतमान्तं च किमो रूपं किंवृत्तं तद्योगे भविष्यति वा लट् स्यात् लिप्सायाम् ॥ कं कतरं कतमं वा त्वं भोजयसि भोजयिष्यसि भोजयितासि वा ।

यावद् भुङ्क्त इति । 'भुजोऽनवने' इति तङ् । **यावद्दास्यते तावद् भोक्ष्यत** इति । यत् परिमाणमस्य । 'यत्तदेतेभ्यः—' इति वतुप् । 'आ सर्वनाम्नः—' इत्यात्वम् । **पुरा यास्यतीति** । पॄ पालनपूरणयोः । 'भ्राजभास—' इति क्विप् । 'उदोष्ठ्य—' इत्युत्वम् । रपरः । करणे तृतीया ।

किंवृत्ते । **डतरडतमान्तमिति** । 'किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्' । 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति । लब्धुमिच्छा **लिप्सा** । **भोजयसीति** । भुजेर्हेतुमण्ण्यन्तात् लट् । **भोजयिष्यतीति** । लट् । **भोजयितासि** वेति । लुट् । लिप्सायां किम् । को द्वारकां गमिष्यति ।

---

१. वत्स्यति D_2. २. After it—काले D_1. ३. °डतमप्रत्ययान्तं C. ४. C drops कम्; किम् D_4. ५. After it—लिप्सायां किम् । कः पाटलिपुत्रं गमिष्यति । N_1, D_2.

लिप्स्यमानसिद्धौ च ॥३।३।७॥

लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ [1]गम्यमानायां भविष्यति लड् वा स्यात् ॥ योन्नं ददाति दास्यति दाता वा स स्वर्गं [2]लोकं याति यास्यति याता वा ।

लोडर्थलक्षणे च ॥३।३।८॥

लोडर्थस्य [3]प्रैषादेः [4]लक्षणक्रियावचनाद्धातोर्भविष्यति लड् वा स्यात् । आशंसायामपीति केचित् । कृष्णश्चेद् भुङ्क्ते त्वं गाश्चारय । पक्षे लट्लुटौ ।

लिप्स्य । लिप्स्यमानात् सिद्धिर्लिप्स्यमानसिद्धिः । लब्धुमिष्यमाणं लिप्स्यमानमन्नादि । अकिंवृत्तार्थोऽयमारम्भः । **योन्नमित्यादि** । लिप्स्यमानादन्नात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ।

लोडर्थ । प्रैषादेरित्यादिना विध्यादयो गृह्यन्ते । लक्ष्यतेऽनयेति लक्षणा । सा चासौ क्रियेति लक्षणक्रिया । तद्वचनादित्यर्थः । **चारयेति** । 'प्रैषातिसर्ग—' [5]इति प्रैषे लोट् । स च प्रैषश्चारणविषयस्य । [6]कृष्णभोजनं निमित्तत्वाल्लक्षणम् । कृष्णभोजनमाशङ्क्य चारणप्रैष इत्यस्ति कृष्णभोजनस्य प्रैषं प्रति निमित्तत्वम् । **पक्षे लट्लुटाविति** । यथा कृष्णश्चेद् भोक्ष्यते भोक्ता वा त्वं गाश्चारयेति । लिङर्थसूत्रं व्याख्यातप्रायत्वात् त्यक्तं व्याख्यायते । 'लिङ् चोर्ध्वमौहूर्तिके । ३।३।९॥ ऊर्ध्वं मुहूर्ताद्भवः ऊर्ध्वमौहूर्तिकः । निपातनात् समासोत्तरपदवृद्धी । ऊर्ध्वमौहूर्तिके लोडर्थलक्षणे भविष्यति लिङ् लट् च वा स्तः । ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य वा गुरुश्चेदागच्छति आगमिष्यति आगन्ता वा अथ त्वं छन्दोऽधीष्व ।

१. गम्यायां D4. २. D2, D3 drop लोकम्. ३. प्रेषणादेः D3. ४. लक्षणस्य N1. ५. C drops इति. ६. Before it—कृष्णभोजनं चारणं प्रैषलक्षणम् N1.

वर्तमानसामीप्ये वर्तमानवद्वा ॥३।३।१३१॥

समीपमेव सामीप्यम् । स्वार्थेपि ष्यञ् अनेन ज्ञाप्यते । वर्तमानसमीपे भूते भविष्यति वा काले वर्तमानवत् प्रत्यया वा स्युः । कदा आगतोसि । अयमागच्छामि । अयमागमम् । कदा आगमिष्यसि । एष आगच्छामि आगमिष्यामि वा ।

'वर्तमाने लट्' इत्यारभ्य यावत् 'उणादयो बहुलम्' इति वर्तमाने विहितास्ते भूते भविष्यतीति विधीयन्ते—

वर्तमान । ज्ञाप्यते । ज्ञापनप्रयोजनं चातुराश्रम्यादि । अयमागमिष्यामीत्यर्थे एष आगच्छामि । वत्करणं सर्वसादृश्यार्थम् । येन विशेषेण प्रकृत्युपपदोपाधिना वर्तमाने प्रत्यया विहितास्तथवात्र स्युः । पूङ्यजिभ्यां वर्तमाने शानन् उक्तः वर्तमानसामीप्येपि ताभ्यामेव स्यात् । पचमानो यजमान इति । ताच्छील्यादिविशिष्टे कर्तरि इष्णुच् विहितः वर्तमानसामीप्येपि स्यात् । अलंकरिष्णुः । विप्रकर्षे तु वर्षेण गमिष्यतीति लृडेव । परुदगच्छदिति लङेव । यस्तु मन्यते गच्छामीति पदं वर्तमानार्थमेव कालान्तरावगतिस्तु वाक्यात् न च वाक्यगम्यः कालः पदसंस्कारायोपयुज्यते तं प्रतिपत्तारं प्रति प्रकरणमिदमारब्धव्यमेव ।

---

१. Before it—'लिङ् चोर्ध्वमौहूर्तिके ॥' ३।३।९॥ ऊर्ध्वमौहूर्तिके लोडर्थस्य प्रैषादेर्लक्षणक्रियावचनाद्धातोर्भविष्यति काले लिङ् वा लट् च पक्षे लृङ्-लुटौ । ऊर्ध्वमुहूर्तादुपरिमुहूर्तस्य उपाध्यायश्चेदागच्छेत् आगच्छाति आगमिष्याति आगन्ता वाथ त्वं व्याकरणमधीष्व । D_3. २. °सामीप्ये D_1. ३. From अय°.. वा dropped D_3 ; अहमागमम् D_4. ४. गमिष्यसि N_1. ५. गच्छामि । N_1. ६. गमिष्यामि वा D_4, N_1. ७. इति dropped Dc_3.

आशंसायां भूतवच्च ॥३।३।१३२॥

भविष्यति काले भूतवत् चकारात् वर्तमानवच्च प्रत्यया वा स्युः आशंसायाम् । देवश्चेद्वर्षति अवर्षीत् वर्षिस्यति वा एतद् धान्यं वपामः अवाप्स्म वप्स्यामो वा ।

क्षिप्रवचने लृट् ॥३।३।१३३॥

क्षिप्रपर्यायोपपदे भविष्यति लृडेव स्यादाशंसायां न भूतवत् ॥ वृष्टिश्चेत् क्षिप्रमाशु त्वरितं वा आयास्यति शीघ्रं वप्स्यामः । नेति वाच्ये लृड्ग्रुक्तिर्लुड्वाधार्था । श्वः शीघ्रं वप्स्यामः ।

आशंसावचने लिङ् ॥३।३।१३४॥

आशंसापर्यायोपपदे भविष्यति लिङेव स्यान्न भूतवत् गुरुश्चेदुपेयात् आशंसे अधीयीय आशंसे क्षिप्रमधीयीय ।

आशंसायाम् । आशंसनमाशंसा । अप्राप्तस्य प्राप्तीच्छा । **अवाप्स्मेति** । डुवप् बीजतन्तुसंताने । लुङ् । हलन्तलक्षणा वृद्धिः । भूतसामान्यातिदेशोऽयम् । अतो भूतविशेषौ लङ्लिटौ न भवतः ।

क्षिप्र । वचनग्रहणं पर्यायार्थमित्यभिप्रेत्याह—**क्षिप्रपर्यायेति** । भूतवच्चेत्यस्यापवाद इत्याह—**न भूतवदिति** ।

आशंसा । गुरुश्चेदुपेयादिति । इण् । **अधीयीयेति** । इङो लिङ् । सीयुट् । उत्तमैकवचनम् इट् । इटोत् । ङित्त्वाद्गुणाभावः । सलोपः 'धातोः—' इतीयङ् । उपसर्गेण सह सवर्णदीर्घः । **आशंसे क्षिप्रमधीयीयेति** । अत्र क्षिप्रवचनमप्युपपदम् । आशंसावचनमपि । तत्र

---

१ एते for एतद P, C, B2. २. न तु C. ३. न तु C

परत्वाल्लिङेवभवति न लट् । तस्य तु यत्राशंसावचनं नास्ति सोवकाशः । स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयं व्याख्यायते । 'नानद्यतनवत् क्रियाप्रबन्धसामीप्ययोः ॥३।३।१३५॥ क्रियाणां प्रबन्धेन सातत्येनानुष्ठाने प्राकरणिकानां कालानां सामीप्ये भूतभविष्यदनद्यतनवत् लङ्लुटौ न स्तः । यावज्जीवं भृशमन्नमदात् दास्यति वा । सामीप्ये । येयं पौर्णमास्यतिक्रान्ता एतस्यामग्नीनाधित । सोमेनायष्ट । गामदित । पौर्णमास्यन्तरेणाव्यवधानं सामीप्यम् । आगामिन्यामाधास्यते । 'भविष्यति मर्यादावचनेवरस्मिन्' ॥३।३।१३६॥ भविष्यति काले मर्यादावचने सति अवरस्मिन् प्रविभागेनद्यतनवत् प्रत्यया न स्युः । योयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे तत्र सक्तून् पास्यामः । भूते मर्यादाया अनुक्तौ च परस्मिंश्च लुङ्लुटौ स्तः । अक्रियाप्रबन्धसामीप्यार्थं सूत्रम् । 'कालविभागे चानहोरात्राणाम्' ।३।३।१३७॥ कालमर्यादाविभागे सत्यवरस्मिन् प्रविभागे सति भविष्यति न चेदहोरात्रसंबन्धी विभागः । पूर्वेणैव सिद्धेहोरात्रनिषेधार्थं सूत्रम् । योयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणां किम् । त्रिविधोदाहृतिः । योयमागामी मासस्तस्य योवरः पञ्चदशरात्रः योयमागामी त्रिंशद्रात्रस्तस्य योवरोर्धमासः योयमागामी त्रिंशद्रात्रस्तस्य योवरः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे । तत्र सक्तून् पातास्मः । 'परस्मिन् विभाषा' ॥३।३।१३८॥ भविष्यति मर्यादेत्यारभ्य सर्वमनुवर्तते । योयमागाम्यब्दः तस्य यत् परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे अध्येतास्महे ।

भूते च ॥३।३।१४०॥

उताप्योः समर्थयोरित्यादि लिङ्निमित्ते भूतेऽर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ[1][2] ॥ यद्यहमैष्यमुताभोक्ष्ये[3] अप्यभोक्ष्ये[4] न भुक्तवान् ।

वोताप्योः ॥३।३।१४१॥

वा[5] आ उताप्योः । उताप्योरिति यावत् भूते लिङ्निमित्ते लृङ्क्रियातिपत्तौ वेत्यधिक्रियते ।

भूते । अभोक्ष्ये[7] इति । भुजपालनादौ । 'भुजोनवने'* इति तङ् । न भुक्तवानिति । क्रियाया अनिष्पत्तिं दर्शयति । आगमनं नाभूत् भोजनमपि नाभूदित्यर्थः ।

वोताप्योः[6] । वा आ उताप्योरिति । आङः प्रश्लेषं दर्शयति । ननु चाङ्योगे 'पञ्चम्यपाङ्' इति पञ्चम्या भाव्यम् । तदयुक्तम् उताप्योरिति सप्तम्या निर्देशः । नैतत् । पदमेवात्र सप्तम्यन्तमुपादीयते । न च पदादाङ्योगे सप्तमी स्यात् । अप्रातिपदिकत्वात् । अयं चाङ् मर्यादायाम् ।

---

१. Before it—*Vide*, C, N_1 B_2. p. 1810-11. २. After it—गम्यायाम् D_4, B_2. ३. उताभोक्ष्यं D_2 ; °मुताहं D_3. ४. अप्यभोक्ष्यं D_2. ५. न तु D_1. ६. D_2, D_4 drop वा आ उताप्योः. ७. अभोक्ष्यादिति Dc_3.

* नाद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥३।३।१३५॥ सातत्येन क्रियानुष्ठाने कालानां समभक्तनाव्यवधाने लङ्लुटावनद्यतने न स्तः । यावज्जीवं भृशमन्नमदात् । यावज्जीवं भृशमन्नं दास्यसि । येयं पौर्णमास्यतिक्रान्ता एतस्याममीनाधीत । येयमागामिन्यमावास्या एतस्याममीनाधास्यते ।

भविष्यति मर्यादावचनेऽवरस्मिन् ॥३।३।१३६॥ भविष्यति काले देशकृतमर्यादावचने सत्यवरस्मिन् भागे लुङ् न भवति । अक्रिया । अक्रियाप्रबन्धसामीप्यार्थं वचनम् । योयमध्वा गन्तव्य आ पाटलिपुत्रात् यत्र यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे ।

कालविभागे चानहोरात्राणाम् ॥३।३।१३७॥ भविष्यत्यनहोरात्रकालकृतमर्यादा-वचने सत्यवरस्मिन् प्रविभागे लुण् न स्यात् । योयं संवत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणां किम् । योयं मास आगामी तस्य योऽवरः पञ्चदशरात्रः तत्र युक्ता अध्येतास्महे ।

परस्मिन् विभाषा ॥३।३।१३८॥ भविष्यति मर्यादावचने कालविभागे अनहोरात्रे परस्मिन् विभागे लुण् न स्याद्वा । योयं संवत्सर आगामी तस्य यत् परमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे अध्येतास्महे वा । अनहोरात्राणामिति प्रत्युदाहरणं पूर्वोक्तम् ।

गर्हायां लडपिजात्वोः ॥३।३।१४२॥

आभ्यां योगे लट् स्यात् कालत्रयेपि गर्हायाम् । काल-विशेषप्रत्ययापवादः । अपि जायां त्यजसि । जातु गणिकामादत्से । अत्र लिङ्निमित्ताभावात् लृङ् न ।

विभाषा कथमि लिङ् च ॥३।३।१४३॥

कथमा योगे कालत्रयेपि वा लिङ् चात् लट् गर्हायाम् । कथं धर्मं त्यजेः त्यजसि वा । पक्षे कालत्रयलकाराः । अत्र भविष्यति नित्यं लृङ् भूते वा । कथं नाम तत्रभवान् धर्ममत्यक्ष्यत् ।

किंवृत्ते लिङ्लृटौ ॥३।३।१४४॥

किंवृत्तयोगे गर्हायामेतौ स्तः । कालत्रयेपि । सर्वलकारापवादः । कः कतरो वा हरिं निन्देत् निन्दिष्यति । लृङत्र प्राग्वत् ।

गर्हायाम् । गर्हा निन्दा कुत्सेति पर्यायाः । जात्वित्यादि । जायात्यागो गर्हितः । गणिकादानमतिनिन्दितमिति गम्यते ।

विभाषा । विभाषाग्रहणं यथास्वं कालविशेषे विहितानां प्रत्ययानामबाधनार्थमित्याह—**पक्षे कालत्रयलकारा** इति । कथं धर्मं त्यक्ष्यसि कथं धर्मं त्यक्तासि कथं धर्ममत्याक्षीः कथं धर्ममत्यजः कथं धर्मं तत्यजिथेति ज्ञेयाः सर्वलकाराः । गर्हायां किम् । कथं भवान् विष्णुमपूपुजत् ।

किंवृत्ते । विभक्त्यन्तं डतरडतमान्तं च किंवृत्तम् । लिङ्ग्रहणं लटः परिहारार्थम् । **लृङत्रप्राग्वदिति** । भविष्यति नित्यं भूते वेत्यर्थः । **को वा हरिमनिन्दिष्यत्** ।

---

१. न लङ् D₂, D₄, B₂. २. D₂ drops अपि. ३. लट् स्यात् D₂. ४. भवान् P, C. ५. After it—गर्हायामिति निवृत्तम B₂, D₄.

अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि ॥३।३।१४५॥

किंवृत्ते अकिंवृत्तेपि लिङ्लृटौ स्तः असंभावनामर्षयोः । त्रिषु कालेषु सर्वलकारापवादः । न संभावयामि न मर्षये वा भवान् हरिं निन्देत् निन्दिष्यति वा । कः कतरो वा निन्देत् [1]निन्दिष्यति । क्रियातिपत्तौ पक्षे लृङ् ।[2]

किंकिलास्त्यर्थेषु लृट् ॥३।३।१४६॥

किंकिलशब्दे[3] अस्त्यर्थे चोपपदेऽनवक्लृप्त्यमर्षयोर्लृडेव स्यात् त्रिषु कालेषु ॥ न श्रद्दधे न मर्षये[4] वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि । अत्र लिङ्निमित्ताभावाल्लृङ् न ।[5]

जातुयदोर्लिङ् ॥३।३।१४७॥

आभ्यां योगे कालत्रयेपि लिङेव[6] स्यादुक्तेर्थे ॥ यदा[7] यद्योर्योगे च । जातु यत् यदा यदि वा त्वादृशो[8] हरिं निन्देत् नावकल्पयामि न मर्षयामि । लृङ् प्राग्वत् ।

अनव । गर्हायामिति निवृत्तम् । अमर्षोऽक्षमा । बहुव्रचः पूर्वनिपातो लक्षणव्यभिचारे लिङ्गम् । तेन यथासंख्यं न भवति । **लृङिति** । न संभावयामि न मर्षये वा भवान् हरिमनिन्दिष्यत् । को वा हरिमनिन्दिष्यत् ।

किंकिलशब्दो निपातसमुदायः क्रोधद्योतकः । **अस्त्यर्थाः** अस्ति भवतिविद्यतयः । **अस्तीत्यादि** । त्वं शूद्रीं गमिष्यसि । अस्ति नाम तत् न श्रद्दधे न मर्षये वेत्यन्वयः ।

जातु । **उक्तेर्थे** अनवक्लृप्त्यमर्षयोः । **लृङ् प्राग्वदिति** । क्रियातिपत्तौ भविष्यति नित्यं भूते वेत्यर्थः ।

---

१. निन्दिष्यति वा B_2 D_4. २. After it—भविष्यति नित्यम् । N_1. ३. शब्दे चोपपदे N_1. ४. मर्षये D_1. ५. °त् न लृङ् D_2. ६. For लिङेव D_1 has लिङ्. ७. यदायद्योरुपसंख्यानम् D_1, यदायद्योगे च D_4. ८. वेदवान् द्विजः D_1.

यच्चयत्रयोः ॥३।३।१४८॥

आभ्यां योगे पूर्ववत् ॥ यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न मर्षये । प्राग्वत् लृङ् ॥

गर्हायां च ॥३।३।१४९॥

अनवक्लृप्त्यमर्षयोरिति निवृत्तम् । यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात् ॥ यच्च यत्र वा त्वं शूद्रं याजयेः । अन्याय्यम्[1] । लृङ् पूर्ववत्[2] ।

चित्रीकरणे च ॥३।३।१५०॥

यच्च यत्र वा त्वं याजयेः[3] । चित्रमेतत् ।

शेषे लृडयदौ ॥३।३।१५१॥

यच्चयत्राभ्यामन्येन यदिवर्जेन योगे लृडेव स्यात् कालत्रये चित्रीकरणे[4] ॥ आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति । अत्र लृङ् न[5] । अयदौ किम् । आश्चर्यं यदि[6] स भुञ्जीत ।

यच्च । पूर्ववदिति । अनवक्लृप्त्यमर्षयोरर्थयोर्लिङ् स्यात् । लटोपवाद इत्यर्थः । **प्राग्वत् लृङिति** । व्याख्यातचरमेव । **याजयेरिति** । यजेर्ण्यन्तस्य लिङि रूपम् ।

चित्री । चित्रीकरणमाश्चर्यमद्भुतं विस्मयनीयम् । यच्चयत्रयोर्योगे चित्रीकरणे लिङेव स्यात् । **अत्र लृङिति** । लिङ्निमित्ताभावात् । **आश्चर्यं यदि स भुञ्जीतेति** । अनवक्लृप्तिराश्चर्यं च द्वयं गम्यते । तत्राश्चर्यनिमित्ते लृटि प्रतिषेधे यदा यद्योगे चेत्यनवक्लृप्तौ लिङ् ।

---

१. अन्याय्यमेतत् D_2. २. प्राग्वत् D_3. ३. शूद्रं याजयेः B_2, N_1, D_3, D_4. ४. °करणेऽर्थे D_3. ५. Dropped D_3. ६ तु यदि Dc_3.

उताप्योः समर्थयोर्लिङ् ॥३।३।१५२॥

आभ्यां तुल्यार्थाभ्यां योगे लिङ् स्यात् त्रिकालेषु[1] । सर्वलकारापवादः[2] । बाढार्थं[3] तुल्यार्थतानयोः । उत अपि वा हन्यादघं हरिः । इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेपि नित्यो लृङ् ।

कामप्रवेदनेकच्चिति ॥३।३।१५३॥

स्वाभिप्रायाविष्करणार्थे[4] लिङ् स्यात् कालत्रये[5] नतु कच्चिति । कामो[6] मे भुञ्जीत भवान् । अकच्चिति किम् । कच्चित् जीवति[7] ।

संभावनेलामिति चेत् सिद्धाप्रयोगे ॥३।३।१५४॥

अलमर्थेन[8] प्रौढ्या संभावनेर्थे लिङ्[9] सिद्धश्चेदलमोप्रयोगः ।

उताप्योः । उत अपि वेत्यादि । बाढं हनिष्यतीत्यर्थः । समर्थयोः किम् । उत हनिष्यति अपि धास्यति इति प्रश्नापिधानयोर्मा भूत् ।

काम । कामोभिलाषस्तस्य प्रवेदनं प्रकाशनम् । एतदभिप्रेत्याह—**स्वाभिप्रायाविष्करण** इति ।

संभावने । अत्रालंशब्देनालमर्थो गृह्यत इत्याह—**अलमर्थेनेति** । स चालमर्थः पर्याप्तिरेव न भूषणादिरित्यभिप्रेत्याह—**प्रौढ्येति** । प्रौढिः स्वकार्यनिर्वर्तनसामर्थ्यम् । संभावनं शक्तिः श्रद्धानम् । प्रौढ्या संभावनं पर्याप्तमवितथं संभावनं चेदित्यर्थः[10] । सिद्धाप्रयोग इति व्याकरोति—**सिद्धश्चेदलमोप्रयोग** इति । कुत एतत् । अलम एवाप्रयोग इत्युच्यते ।

---

१. त्रिषु कालेषु B_2, D_3. २. सर्वलापवादः P, D_4. ३. बाढे D_2, D_4, B_2. ४. °रणर्थे D_4. ५. कालत्रये dropped B_2. ६. कामं भुञ्जीत भवान् C. ७. After it—जानकी D_4. ८. °मर्थेनाप्रौढ्यसंभावनेर्थे D_1. ९. स्यात् after it in D_2, N. १०. भवति चेदि° De_3.

कालत्रये । अपि गिरिं शिरसा भिन्द्यात् । अलमोप्रयोगे किम् । अलं कृष्णो हस्तिनं हनिष्यति ।

विभाषा धातौ संभावनवचनेयदि ॥३।३।१५५॥

संभावनार्थे[1] धातावुपपदे प्रागुक्तेर्थे लिङ् वा[2] स्यात् न तु यच्छब्दे[3] । संभावयामि भुञ्जीत भवान् भोक्ष्यते वा[4] । अयदि[5] किम् । संभावयामि यद् भुञ्जीथास्त्वम् ।

इतिकरणेनार्थपदार्थत्वात् प्रत्ययस्य शब्दार्थकतायामलमो व्यवस्थापनात् । यद्येवमलमर्थः संभावनविशेषणं न स्यात् । नैष दोषः । आवृत्तिरलंशब्दस्य करिष्यते । क्व च सिद्धोलमोप्रयोगः । यत्र च तस्यार्थो गम्यते स च तत्र प्रयुज्यते तत्र । अपि गिरिमित्यादि । भिदृ विदारणे । रुधादिभ्यः श्नम् । 'श्नसोः—' इत्यल्लोपः । अत्र यत् पर्वतभेदसामर्थ्यं पुंसः संभाव्यते तदस्त्येवेत्यवितथत्वात् पर्याप्तम् । संभावन इति किम् । पर्याप्तं भुङ्क्ते । अलमर्थेन विशेषणं किम् । विदेशस्थानीयो देवदत्तः प्रायेण गमिष्यति ग्रामम् । अत्र क्रियातिपत्तौ भूते भविष्यति च लृङ् स्यात् ।

विभाषा । पूर्वेण नित्यं प्राप्ते विकल्पार्थं सूत्रम् । संभावनमुच्यते येन स संभावनवचन इतीममर्थमाह—**संभावनार्थे** इति । अत्र '**संभावनेलमिति** चेत् सिद्धाप्रयोगे' इति सर्वमनुवर्तत इत्याह—**उक्तेर्थे** इति । अवकल्पयामि श्रद्दध इत्यनयोरपि संभावनार्थयोः प्रयोगे एवमेवोदाहार्यम् ।

---

१. संभावनेर्थे D1, P1 ; C drops the Vritti up to यच्छब्दे. २. स्याद्वा N1. ३. यच्छब्दसंयोगे B2. ४. D1, D3 drop वा. ५. अयदीति C.

हेतुहेतुमतोर्लिङ् ॥३।३।१५६॥

हेत्वर्थे हेतुमदर्थे च लिङ् वा स्यात् ॥ कृष्णं नमेच्चेत् सुखं यायात् । पक्षे लृट् । पुनर्लिङ्ग्रहणं¹ भविष्यदर्थे एव लिङ् । नेह । हन्तीति पलायते ।

इच्छार्थेषु लिङ्लोटौ ॥३।३।१५७॥

इच्छार्थैर्धातुभिर्योगे³ लिङ्लोटौ स्तः त्रिषु⁴ कालेषु । इच्छामि भुञ्जीत भुङ्क्तां वा भवान् । कामप्रवेदने⁵ वाच्ये⁶ । नेह । इच्छन् करोति⁷ ।

हेतुहेतुमतोः । हेतुः कारणम् । हेतुमत् फलम् । हेत्वर्थे हेतुमदर्थे च वर्तमानाद्धातोरिति शेषः । कृष्णमित्यादि । कृष्णनमनं हेतुः । सुखप्राप्तिः हेतुमती । पक्षे लृडिति । कृष्णं नंस्यति चेत् सुखं यास्यतीति । पुनर्लिङ्ग्रहणेरिति । 'उताप्योः समर्थयोर्लिङ्' इत्यतो लिङित्यनुवर्तमाने पुनर्लिङ्ग्रहणस्यैतत् प्रयोजनं भविष्यदर्थे एव यथा स्यादित्यर्थः । पलायत इति । 'उपसर्गस्यायतौ' इति लत्वम् । क्रियातिपत्तौ लृङ् ।

इच्छार्थेष्विति । सर्वलकारापवादः । ननु चात्रेच्छार्थेष्विति सप्तम्यन्तं तत् कथमिच्छार्थयोग इति व्याख्यातम् । मैवं संशयिष्ठाः । अत्रेच्छार्थेषु धातुषूपपदेष्वित्येवार्थः । तथापि केवलं तत्प्रयोगे मा भूत् । किं तु तद्योगे यथा स्यादित्येवमर्थमेवं व्याख्यातम् । उपपदसंज्ञाकार्याभावाच्च ।

---

१. लृङ् D_4. २. After it—वा स्यात् D_3. ३. इच्छार्थे D_2; इच्छार्थधातुभि ° D_1. ४. त्रिकालेषु D_2, P. ५. D_1 drops it. ६. वाच्यं P, N_1, C, B_2, D_3, D_4. ७. करोमि D_1, D_4.

लिङ् च ॥३।३।१५९॥

समानकर्तृकेष्विच्छार्थेषूपपदेषु लिङ् स्यात् । भुञ्जीयेतीच्छति[1] ।

इच्छार्थेभ्यो विभाषा वर्तमाने ॥३।३।१६०॥

इच्छार्थेभ्यो लिङ् वा स्याद्वर्तमाने । पक्षे लट् । इच्छेत्[2] । इच्छति । वष्टि । उश्यात् । विधिनिमन्त्रणेति लिङ् । कालत्रये[3] विधौ । यागं कुर्यात् । नियोगकरणे । इह भुञ्जीत भवान् ।

लिङ् चेति । तृतीयाव्याख्यानघटना पूर्ववत् । भुञ्जीयेति । 'इटोत्' इत्यदादेश उत्तमपुरुषैकवचनस्य । ननु च किमर्थमिदमुच्यते । यावता वासरूपन्यायेनैवात्र लिङ् स्यात् । नैतत् । लिङ्लिटोर्हि परत्वाद्बाधकयोः प्राप्तयोस्तद्बाधनार्थं तुमुन् विधीयते इति तेन बाधितत्वाद्यथा लोट् न तथा लिङपि न । तस्मात् लिङ्विध्यर्थमुच्यते । योगविभाग उत्तरार्थः । वष्टीति । वश कान्तौ । अदादित्वात् शपो लुक् । व्रश्चादिना षत्वम् । उश्यादिति । ग्रहिज्यादिना संप्रसारणम् । विधिनिमन्त्रणेति लिङिति । एतच्च सूत्रं भू सत्तायामित्यस्मिन्नेव धातौ व्याख्यातम् । निमन्त्रणादीनर्थान् व्याकुर्वन् क्रमेणोदाहरति—विधौ । यागं कुर्यादिति । विधिर्भृत्यादेर्निकृष्टस्य प्रवर्तना । आज्ञापनेति यावत् । कुर्यादिति । करोतेरुप्रत्यये गुणे च कृते 'अत उत्सार्वधातुके' इत्युः । 'ये च' इत्युलोपः । नियोगकरणे इति । नियोगतोऽवश्यंभावेन यत्करणमनुष्ठानमवश्यकार्ये भुक्त्यां दौहित्रादेः प्रेरणे इति यावत् । श्राद्धे हि निमन्त्रितो दौहित्रादिरभुञ्जानः प्रत्यवैति । भुञ्जीतेति ।

---

1. C drops इति; इतीच्छामि । N1. 2. इच्छेत् भवान् B2, D4. कस्तत्राविधिः for कालत्रये विधौ D1. 4. °त्रयेपि D3.

कामचारे । इहासीत भवान् । सत्कारपूर्वके व्यापारे । पुत्रमध्यापयेद्भवान् । संप्रधारणे । किं भो वेदमधीयीय उत तर्कम् । प्रार्थने । भो भोजनं लभेय । एवं लोट् ।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥३।३।१६३॥

एषु गम्येषु कृत्याः स्युः लोट् च ॥ कामचारानुज्ञा अतिसर्गः । प्रेषितस्त्वं गङ्गां गच्छ । एवमतिसृष्टस्त्वम् । प्राप्तस्ते

'भुजोनवने' इति तङ् । **कामचार** इति । कामचार इच्छाप्रवृत्तिः । यदकरणेपि न प्रत्यवायः तत्र प्रेरणमिति यावत् । **अध्यापयेदि**ति । इङ् अध्ययने इत्यस्मादधिपूर्वाद्धेतुमण्णिच् । 'क्रीङ्जीनां णौ' इति आकारः । 'अर्तिह्री—' इति पुक् । **अधीयीये**ति । इङ उत्तमपुरुषैकवचनस्य 'इटोत्' इत्यत् । **लभेये**ति । डुलभष् प्राप्तौ । **एवं लोडि**ति । अनेन प्रकारेण लोडुदाहार्यः । तथा हि । विधौ । यागं करोतु । नियोगकरणे । इह भुङ्क्तां भवान् । कामचारे । इहास्तां भवान् । सत्कारपूर्वके व्यापारे । पुत्रमध्यापयतु भवान् । संप्रधारणे । किं भो वेदमध्ययै उत तर्कम् । प्रार्थने । भो भोजनं लभै । इति लोट् ।

प्रैषाति । विधिप्रेरणयोः को विशेषः । केचिदाहुः । आज्ञापनं विधिः प्रेरणं प्रैष इति । केचित्त्वनयोर्विशेषं नेच्छन्त्येव ।

---

१. सत्कारपूर्वकव्यापारे D_2, D_4; सत्कारपूर्वव्यापारे P. २. भो भवन् D_1, D_3. ३. D_1 drops it. ४. Before it—प्रेषणं प्रषः C.

कालो वा । लिङप्यत्रेति केचित् ।

लिङप्यत्रेति केचिदिति । दुर्गसिंहादयः । तथा च दुर्गसिंहवृत्तौ प्रैषप्राप्तकालयोरपि पञ्चमी सप्तम्यपि स्यादेवेति मतमिति । कृत्यग्रहणस्य प्रयोजनमुदाहरणं च कृत्यप्रक्रियायां वक्ष्यति । स्पष्टत्वात् त्यक्तं सूत्रत्रयं व्याख्यायते । 'लिङ्चोर्ध्वमौहूर्तिके' ॥३।३।१६४॥ लोट्कृत्याश्च स्युः प्रैषादौ गम्ये । ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य त्वं कटं कुर्याः कुरु वा । त्वया कटः कार्यो वा । 'स्मे लोट्' ॥३।३।१६५॥ स्मे उपपदे प्रैषादौ ऊर्ध्वमौहूर्तिकेऽर्थे लिङ्कृत्यानामपवादो लोट् स्यात् । ऊर्ध्वं मुहूर्तात् त्वं कटं कुरु स्म । 'अधीष्टे च' ॥३।३।१६६॥ स्मे उपपदे अधीष्टे गम्ये लोट् । अङ्ग स्म बटुमध्यापय । 'लिङ् यदि' ॥३।३।१६८॥ यदि कालसमयवेलासूपपदेषु तुमुनोपवादो लिङ् स्यात् । कालो यद् भुञ्जीत भवान् समयो वेला वा ।

---

१. °चतुष्टयं Dc_3.

लिङ् चोर्ध्वमौहूर्तिके ॥३।३।१६४॥

प्रैषादिषु गम्येषु ऊर्ध्वमौहूर्तिके लिङ् वा । यथाप्राप्तं च । भवान् खलु कटं कुर्यात् करोतु वा ।

स्मे लोट् ॥३।३।१६५॥

स्मशब्देोपपदे पूर्वस्मिन् कालेऽर्थे च लोडेव स्यात् । ऊर्ध्वमुहूर्तात् कटं करोतु भवान् ।

अधीष्टे च ॥३।३।१६६॥

अधीष्टं व्याख्यातम् । स्मे उपपदे व्याख्यातेऽर्थे लोट् स्यात् । अङ्ग स्म माणवकमध्यापय ।

लिङ् यदि ॥३।३।१६८॥

कालसमयवेलासूपपदेषु धातोर्लिङ् स्यात् यच्छब्दयोगे । कालोयं भुञ्जीत भवान् । एवं समयवेलाच ।

अर्हे कृत्यतृचश्च ॥३।३।१६९॥

चाल्लिङ् । त्वं कन्यां वहेः ।[1]

शकि लिङ् च ॥३।३।१७२॥

शक्तौ लिङ् स्यात् चात् कृत्याः ॥ त्वं भारं वहेः । लोडप्यत्रेति केचित् । सिंधुमपि शोषयाणि । माङि[4] लुङ् । मा कार्षीत् । कथं मा भवतु मा भविष्यति इति । नायमाङ् किं तु माशब्दः ।

अर्हे । अर्हतीत्यर्हः । तद्योग्यः । अर्हे कर्तरि गम्यमाने धातोः कृत्यतृचः प्रत्ययाः स्युः । चकाराल्लिङपि स्यादित्यर्थः । त्वं कन्यां वहेरिति । वोढुमर्हसीत्यर्थः ।

शकि । शकीति नोपपदं किं तु प्रकृत्यर्थविशेषणमित्याह— **शक्ताविति** । शक्त्युपाधिकेऽर्थे वर्तमानाद्धातोरित्यर्थः । त्वं भारं वहेः । वोढुं शक्नोषीत्यर्थः । **लोडप्यत्रेति केचिदिति** । **दुर्गसिंहादयः** । तथा च **दुर्गसिंहवृत्तावुक्तम्** । समर्थनाशिषोश्चेति । सिंधुमिति । कश्चिदाह । सिंधुः शोषयितुमशक्यः । अपरस्तु समर्थयते सिंधुमपि शोषयाणि इति । **माङीति** । भूधातौ व्याख्यातम् । **कथमिति** । यदि माङि लुङ् कथं तर्हि मा भवतु मा भविष्यतीति लोट्लट्प्रयोग इत्यर्थः । **माशब्द इति** । अमानोनाः प्रतिषेधे इति निरनुबन्धको मा निषेधार्थः पठ्यते । तस्यायं प्रयोगः । अत एतदुपपन्नमित्यर्थः । केचिदाहुः । असाधुरेवायं प्रयोग इति ।

---

१. Before it—*Vide* Footnote on p. 462, B_2, C, N. २. After it—भवानेतदर्हति B_2, D_4. ३. चकारात् D_1. ४. From माङि to माशब्दः dropped D_4. ५. भवत्वस्य पापमिति D_2.

क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः ॥३।४।२॥

पौनःपुन्यार्थे भृशार्थे वा लोट् स्यात् तस्य च[१] लोटः प[२]दव्यवस्थायां हिस्वौ स्तः सर्वतिङ्विषये तध्वमोर्विषये तु वा कालत्रये । लमात्रापवादः ।

समुच्चयेन्यतरस्याम् ॥३।४।३॥

अनेकक्रियाव्य[५]वहारे प्रागुक्तं वा स्यात् ॥

क्रियेत्यादि । पौनःपुन्यं भृशार्थो वा क्रियासमभिहार इत्याह—**पौनःपुन्ये भृशार्थे** वेति । प्रकृत्यर्थविशेषणं चैतत् । पौनःपुन्यविशिष्टक्रियावचनात् भृशार्थविशिष्टक्रियावचनाद्धातोरित्यर्थः । योगविभागोत्र कार्यः । क्रियासमभिहारे लोट् । ततो लोटो हिस्वौ । लोडित्यनुवर्तते । तेन लोटो हिस्वौ लोडेव । ततश्च 'सेर्ह्यपिच्च' इत्यादिना यौ हिस्वौ विधास्येते तावेवेह लोटः स्थाने स्तः नापूर्वाविति लोड्धर्माणौ स्तः । तेन लोट्-संबन्धिनो हेः परस्मैपदत्वाद्धेः परस्मैपदत्वम् । लोटः स्वशब्दस्यात्मने-पदत्वात्तस्यापि स्वस्यात्मनेपदत्वं व्यवस्थितम् । द्वयोरपि तिङ्त्वं च सिध्यतीति 'तिङ्ङतिङः' इति निघातः स्यात् इति । एतत् सर्वं मनसि कृत्वाह—**तस्य च लोटः पदव्यवस्थायां हिस्वौ स्त** इति । परस्मै-पदं हिर्भवति । आत्मनेपदं स्वो भवतीत्यर्थः । उदाहरिष्यत्यग्रे ।

समुच्चये । अत्रापि समुच्चयः प्रकृत्यर्थविशेषणमेव । **प्रागुक्तमिति** । लोट् स्यात् । पदव्यवस्थया हिस्वौ स्तः सर्वतिङ्विषये तध्वमोर्विषये तु वा कालत्रये । लकारमात्रापवाद इत्यर्थः ।

---

१. धातोर्लोट् P, N1. २. Dropped D3. ३. Dropped D3. ४. पदव्यवस्थया D1, D3, D4. ५. °व्याहारे C.

यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥३।४।४॥

पूर्वस्मिन् लोड्विधाने यस्माद्धातोर्लोड्उक्तः सोनुप्रयोज्यः ॥

समुच्चये सामान्यवचनस्य ॥३।४।५॥

समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः । क्रियासमभिव्याहारत्वाल्लोडन्तद्वित्वम् ॥ याहि याहीति याति ।

यथाविधि । **पूर्वस्मिन्निति** । क्रियासमभिहारे इत्यस्मिन्नित्यर्थः । धातुसंबन्धे प्रत्ययविधेरनुप्रयोगे सिद्धे यथाविध्यर्थं वचनम् । धातुसंबन्धे प्रत्ययाः । अस्यार्थः । अभिधानेभिधेयोपचाराद्धात्वर्थो धातुशब्देनोच्यते । तेन प्रत्ययानां संबन्धो विशेषणविशेष्यभावस्तस्मिन् सति यस्मिन् काले ते विहितास्ततोन्यत्र विशेष्यकालेपि साधवः स्युः । सोमयाज्यस्य पुत्रो भविता । अत्र याजीति भूते णिनिः । भवितेति भविष्यत्यनद्यतने लुट् । तत्र विशेषणं विशेष्यमनुरुध्यते इति याजिना विशेषितो भविता साधुः । भाविकृत्यमासीत् । प्रत्ययाधिकारे पुनः प्रत्ययग्रहणा-द्धात्वधिकारविहितास्तद्धिता अपि धातुसंबन्धे सति कालभेदे सति साधवः स्युः । गोमानासीत् । गोमान् भविता । सर्वत्र तिङ्वाच्यो विशेषः । सुबन्तं विशेषणम् ।

समुच्चय इति । अत्रापि धातुसंबन्धे प्रत्ययविधेरनुप्रयोगे सिद्धे विशेषानुप्रयोगनिवृत्त्यर्थं वचनम् । ननु च लाघवेन सामान्यस्यैव प्रयोगो भविष्यति । नैवम् । लाघवं च लौकिके शब्दव्यवहारे नाद्रियते । **क्रियासमभिव्याहारत्वादिति** । 'क्रियासमभिहारे द्वे भवतः' इति वक्तव्येनेति भावः । **याहि याहीति** यातीति । या

१. After it—याहीत्यस्य यानुप्रयुज्यते न तु गच्छतेरनुप्रयोगः D1 : सोनुप्रयुज्यते D3. २. °डन्तस्य D3. ३. विशेषणं विशेष्यगुणत्वाद् विशेष्य° Dc3. ४. °वाच्योर्थो Dc3.

एवं यातः यान्ति यासि याथः याथ । पक्षे[1] यात यातेति यूयं याथ । याहि याहीत्ययासीत् यास्यति वा । अधीष्व अधीष्वेत्यधीते[2] । एवमन्यत्र । ध्वंविषये प्राग्वत् । पक्षे अधीध्वमधीध्वमिति यूयमधीध्वे । यङन्ते क्रियासमभिहारान्तरे तु लोलूयस्व लोलूयस्वेति लोलूयते । समुच्चये तु सक्तून् पिब धानाः खादेत्यभ्यवहरति । अन्नं भुङ्क्ष्व दाधिकमास्वाद[3]स्वेत्यभ्यवहरति[4][5] । तध्वमोस्तु पिबत खादतेत्यभ्यवहरथ । भुङ्ध्वमास्वादध्वमित्यभ्यवहरध्वे[6] । पक्षे हिस्वौ । लोडभावपक्षे

प्रयाणे । अदादित्वात् शपो लुक् । **अधीष्वाधीष्वेत्यधीत** इति । इङ् अध्ययने इत्यस्य आत्मनेपदित्वात् स्वशब्दो भवति । **एवमन्यत्रेति** । अनेन प्रकारेण द्विवचनबहुवचनयोर्भूते भविष्यति चोदाहार्यम् । तथा हि । अधीष्वाधीष्वेत्यधीयाते । अधीष्वाधीष्वेत्यधीयते । एवं मध्यमोत्तमयोरुदाहार्यम् । भूते अधीष्वाधीष्वेत्यध्यगीष्ट । भविष्यति अधीष्वाधीष्वेत्यध्येष्यते इति । **ध्वंविषये प्राग्वदिति** । अधीष्वाधीष्वेत्यधीध्वे इति । एवं सर्वेषु लकारेषूदाहार्यम् । **यङन्त** इति । यङ् क्रियासमभिहारे धातोरेकाचः इति विधीयते । तथापि क्रियासमभिहारो भृशार्थः पौनःपुन्यमिति द्विविध इति भृशार्थे क्रियासमभिहारे यङि कृते पौनःपुन्यलक्षणे क्रियासमभिहारान्तरे विहिते लोट्द्विवचने भवत इति । **सक्तून् पिबेति** । पा पाने । 'पाघ्रा—' इति पिबादेशः । 'अतो हेः' इति हेर्लुक् । **भुङ्क्ष्वेति** । भुजेः श्नमि अल्लोपे कृते 'चोः कुः' । षत्वम् । **आस्वादस्वेति** । स्वादु प्रीतिलिहोः ।

१. D₁, D₃, P, N₁ drop पक्षे. २. °ष्वेत्यध्यायमधीते D₂, D₄, B₂. ३. °दधिक° D₁. ४. °स्वादयस्वे° C. ५. °हरते D₂, D₃, D₄, N₁, P. B₂. ६. °हरध्वम् C.

लडादि[1] । पुनः पिबति पुनः खादतीत्यभ्यवहरति । इत्यादि ।

इति लकारार्थप्रक्रिया ।[2]

पक्षे हिस्वाविति । पिब खादेत्यभ्यवहरथ । भुङ्क्ष्व आस्वादस्वेत्यभ्यवहरध्वमिति । इत्यादीत्यादिशब्देन पुनः पिबत पुनः खादत इत्यभ्यवहरत इत्याद्यूह्यम् ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमलोयं लकारार्थवर्गः ॥

---

१. लडादिः D_1. २. After this—समस्तवैरिव्रजकुञ्जरेन्द्रव्रातेषु सिंहो नृपभानुजश्च । विशोभते भूपतिभीमसेनो महीपतीशाधिपतिर्महोजाः ॥; समाप्ता द्वितीया वृत्तिः । B_2 ; D_3 has after it—श्री । श्री···श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । श्रीमद्विठ्ठलाय नमः । श्रीगुरुभ्यो नमः । श्रीरामः ॥ २. After it—इत्याख्यातप्रक्रिया समाप्ता । N_1 ; इति लकारप्रक्रिया D_3 ; समाप्ता D_4. ३. After this Dc_3 has इति द्वितीयवृत्तिः संपूर्णा । ३. After this Dc_1 has—श्रीरस्तु । शुभं भवतु । कल्याणमस्तु । संवत् १६०६ वर्षे श्रावणमासे शुक्लपक्षे ५ गुरौ लिखितमिदं पुस्तकम् ॥ ति० प्र० प्रसाद ॥ श्रीः ॥ श्रीः ॥ छ ॥ छ ॥ यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥ श्रीरस्तु । श्रीः॥ श्रीः ॥ छ ॥

अथ कृदन्तप्रक्रिया ।

धातोः ॥३।१।९१॥

आतृतीयाध्यायान्तं धातोरित्यधिक्रियते । पुनर्धातूक्तिः कृत्संज्ञा उपपदसंज्ञा चात्रैवेत्येवमर्था ॥

तत्रोपपदं सप्तमीस्थम् ॥३।१।९२॥

तत्रास्मिन् धात्वधिकारे सप्तमीनिर्दिष्टमुपपदाख्यं स्यात् ।

कृदतिङ् ॥३।१।९३॥

इति कृत्संज्ञा ।

अथ कृदन्तप्रक्रिया । तत्रादौ कृदन्तेष्वेव कृत्याः प्रदर्श्यन्ते । **आतृतीयाध्यायान्तमिति** । तृतीयाध्यायपर्यन्तं मर्यादीकृत्येत्यर्थः । ननु यङ्विधौ 'धातोरेकाचः—' इति धातुग्रहणं प्रकृतं तेनैवाधिकार-सिद्धौ पुनर्धातुग्रहणं किमर्थमित्याशङ्क्याह—**पुनर्धातूक्तिरिति** । चकार आर्धधातुकसंज्ञाया वासरूपबाधकत्वस्य च समुच्चयार्थः । अत्रैव कृत्संज्ञायां सत्यां प्रकरिष्यतीत्यत्र स्यप्रत्ययस्य सिंहावलोकनन्यायेन 'कृदतिङि'ति कृत्संज्ञाभावात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वाभावात् न सुबुत्पत्तिः । वासरूपबाधकत्वेत्रैव स्थिते पूर्वत्र क्सादिभिः सिचो न समावेशः स्यात् । आर्धधातुककार्ये धातुग्रहे सति सामर्थ्याद्धातोरित्येव हि तस्यार्धधातुकसंज्ञा । अन्यथा लूभ्याम् लूभिरित्यत्र क्विबन्ता धातुत्वं न जहतीत्यार्धधातुकसंज्ञा स्यात् । तत इट् प्रसज्येत ।

---

१. Before it—श्रीगणेशाय नमः । N1. २. P drops the Vṛitti. ३. Bc1 has before it—ओं नमः श्रीगणपतये. ४. ननु च Dc3. ५. °धिकारः धातोः इति सिद्धौ Dc3. ६. Dropped Dc3. ७. °रित्येव विहितस्यार्ध° Dc3, PC.

वासरूपोऽस्त्रियाम् ॥३।१।९४॥

अत्रासरूपोपवादप्रत्ययः उत्सर्गस्य वा बाधकः स्यात् स्त्र्यधिकारोक्तं विना ॥

वासरूपः[1] । अपवादविषय उत्सर्गो न भवतीति सर्वत्र स्थितिः । कृतां केषांचित् तत्रापि प्रवृत्तिर्दृश्यते सा कथं नाम स्यादित्यस्य योगस्यारम्भः । **स्त्र्यधिकारोक्तं विनेति** । कथं पुनरस्त्रियामित्यत एषोर्थो लभ्यते । एवं मन्यते । स्त्रीग्रहणं स्वर्यते । स्वरितेनाधिकारो विज्ञायते । तेन स्त्र्यधिकारेण यावुत्सर्गापवादौ तयोरेव प्रतिषेध इति । ननु स्त्रियां वाच्यायामित्यर्थः किमिति नोच्यते ।[3] एवमर्थे सति लव्या लवितव्येति यद्विषये तव्यो न स्यात् । एवं तर्हि स्त्रियामिति स्त्रीसंशब्देन यः प्रत्यय इति किं न । एवमर्थे सति व्यावक्रोशी व्यावकृष्टिरिति णचो विषये क्तिन् स्यादुभयोरपि स्त्रियामित्येव विहितत्वात् । अतः साधूक्तं **स्त्र्यधिकारोक्तं विनेति** । 'तव्यत्तव्यानीयरः' इति उत्सर्गः । 'अचो यत्' इत्यपवादः । तद्विषये तव्यत्तव्यानीयरोपि संभवन्ति वा । चेयम् । चेतव्यम् । चयनीयम् । असरूप इति किम् । 'कर्मण्यण्' इत्युत्सर्गः । 'आतोनुपसर्गे कः' इत्यपवादो नित्यं बाधकः । गोद इति । नानुबन्धकृतमसारूप्यम् । अस्त्रियां किम् । 'स्त्रियां क्तिन्' इत्युत्सर्गः । 'अ प्रत्ययात्' इत्यपवादो बाधते एव नित्यम् । चिकीर्षा ।

---

१. °वाऽऽः प्रत्ययः P, C. २. After it—इति PC, Dc3. ३. After it—स्वरितेनाधिकारः Dc3. ४. एवमर्थे मनः इति Dc1. ५. भवन्ति वा Dc3, PC.

कृत्याः प्राङ्ण्वुलः ॥३।१।९५॥

ण्वुल्तृचावित्यतः प्राक् ये प्रत्यया विहितास्ते कृत्यसंज्ञाः स्युः ।

कर्तरि कृत् ॥३।४।६७॥

कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते

तयोरेव कृत्यक्तखलर्थाः ॥३।४।७०॥

कृत्याः क्तः खलर्थाश्च भावकर्मणोरेव स्युः ॥

तव्यत्तव्यानीयरः ॥३।१।९६॥

धातोरेते प्रत्ययाः स्युरुक्तेऽर्थे ॥ तः स्वरार्थः । प्राग्वदिडादि । स्वाद्युत्पत्तिः । एधितव्यम् । एधनीयं त्वया ।

कृत्याः । 'ण्वुल्तृचौ' इत्यत इति । ननु 'रोगाख्यायां ण्वुल् बहुलम्' इत्यस्यावधित्वं कस्मान्न । ज्ञापकात् । 'अर्हे कृत्यतृचश्च' इति तृज्ग्रहणं करोति तत् ज्ञापयति नास्यावधित्वमिति । अतः साधूक्तं ण्वुल् तृचावित्यतःप्रागिति ।

तव्यत् । **उक्तेऽर्थे** इति । भावकर्मणोरित्यर्थः । **तः स्वरार्थ** इति । उपलक्षणं चैतत् । तरेफौ स्वरार्थावित्यर्थः । तकारः 'तित् स्वरितम्' इति स्वरितत्वार्थः । रेफः 'उपोत्तमं रिति' इति मध्योदात्तार्थः । **प्राग्वदिडादीति** । 'आर्धधातुकस्येड् वलादेः' इतीट् । आदिशब्देन गुणादि । **स्वाद्युत्पत्तिरिति** । 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् 'स्वौजसमौट्—' इति स्वाद्युत्पत्तिरित्यर्थः । **एधितव्यमिति** । एध वृद्धावित्यस्माद् भावे तव्यादयः । **चेतव्य** इति ।

---

१. P drops विहिताः २. °संज्ञकाः C. ३. °वधिकत्वमिति Dc₁.

भावस्यैकत्वादेकवचनं क्लीबता च। चेतव्यश्चयनीयो धर्मस्त्वया॥ वसेस्तव्यत् कर्तरि णिच्च। वास्तव्यः। कर्मकर्तरि केलिमर्वाच्यः[1]। स्वयमेव पच्यन्त इति पचेलिमास्तण्डुलाः।

कृत्यचः ॥८।४।२९॥

उपसर्गस्थान्निमित्तात् परस्याच उत्तरस्य कृत्स्थनकारस्य णत्वं स्यात्॥ प्रयाणीयम्। अचः किम्। प्रमग्नः। निर्विण्णस्योपसंख्यानम्॥ निर्विण्णः।

चिञ् चयने। अस्मात् कर्मणि प्रत्ययः। कृतोक्तत्वात् कर्मणः प्रथमैव भवति धर्म इति। वास्तव्य इति। वसतीति वास्तव्यः। णित्त्वात् 'अत उपधायाः' इति वृद्धिः।

कृत्यचः। अन मुक्सहित—अन अनि अनीयर् इनि निष्ठादेशाः[2] प्रयोजयन्ति। अन। प्रयाणम्। मान। प्रयायमाणम्। अनि। प्रयाणिः। अनीयर्। मूल एवोदाहृतः। इनि प्रयायिणौ। निष्ठादेशः। प्रहीणः। प्रमग्न इति। टुमस्जो शुद्धौ। अस्मात् कर्तरि क्तः। 'स्कोः—' इति सलोपः[3]। 'ओदितश्च' इति तस्य नः। कुत्वम्। निर्विण्ण इति। निपूर्वाद्विदेः क्तप्रत्यये 'रदाभ्यां निष्ठातो नः' इति नत्वे रूपम्।

---

१. केलिमद्वाच्यः B2, N1; केलिमञ् वाच्यः D4. २. निष्ठाप्रदेशाः Dc3. ३. कलोपः Dc3.

णेर्विभाषा ॥८।४।३०॥

ण्यन्तात् परस्योपसर्गस्थान्निमित्तादुत्तरस्य[1] कृत्स्थनस्य णो वा स्यात्[2] ॥ दुर्वर्जादुपसर्गादिति[3] केचित् । प्रयापणीयम् । प्रयापनीयम् ।

हलश्चेजुपधात् ॥८।४।३१॥

हलादेरिजुपधात् कृन्नस्याचः परस्य णो वा स्यात् प्रागुक्तनिमित्ते सति ॥ प्रकोपणीयम्[4] । प्रकोपनीयम्[5] । हलः[6] किम् ।

णेः । ननु चात्र यदि ण्यन्तात् परस्य कृत्स्थनस्य ण इत्युच्यते तर्हि प्रयाप्यमाणं प्रयाप्यमानमित्यत्र यकारव्यवहितत्वात् णत्वं विभाषा न स्यात् । 'तस्मादित्युत्तरस्य' इत्यत्र निर्दिष्टग्रहण-स्यानन्तर्यार्थस्यानुवृत्तेः[7] । अत एव **काशिकायामुक्तम्** । ण्यन्ताद्यो विहितः कृत् तत्स्थस्य नकारस्येति । प्रत्युदाहृतं च[8] तत्रैव 'विहितविशेषणं किम् प्रयाप्यमाणं प्रयाप्यमानमित्यत्र **यकार-व्यवधानेपि यथा स्यात्**' इति । अत्रोच्यते । एवमाचार्याणामभिप्रायः । अत्र यद्यपि यकारव्यवधानमस्ति तथापि व्यवाय इत्यनुवर्तनात् व्यवायेऽपि सेत्स्यति । तथा चोक्तं **भाष्ये** । 'अड्धिकाराद्वा । अथवा अड्व्यवाय इति वर्तते' इति । **दुर्वर्जादिति** । दुर्वर्जनं **किम्** । दुर्योधनः । **प्रयापणीयमिति** । या प्रापणे । णिच् । 'अर्तिह्री—' इति पुक् । 'णेरनिटि' इति णिलोपः । एवमनमानअनि इनि निष्ठा-देशेषूदाहार्यम् ।

हलः । 'कृत्यचः' इति नित्ये प्राप्ते विकल्पार्थं वचनम् । सर्वस्येजुपधस्य हलन्तत्वात् हल्ग्रहणमादेर्विशेषणमित्याह— **हलादेरिति** । **प्रकोपणीयमिति** । कुप क्रोधे । 'पुगन्त—' इति

१. °सर्गस्थनिमित्ता° C. २. स्यात् dropped D_4 ३. उपसर्गात् dropped D_4. ४. Dropped B_2; प्रकोपनीयम् । प्रकोपणीयम् N. ५. Dropped C, D_2. ६. हलादेः B_2, D_4. ७. °ग्रहणस्यानन्तर्यस्याप्यनुवृत्तेः । Dc_3 ८. चात्रैव PC; च dropped Dc_3. ९. इति Dc_3, PC.

प्रोहणीयम् । इजुपधात् किम् । प्रवपणीयम् ॥

इजादेः सनुमः ॥८।४।३२॥

इजादेरेव सनुमो हलन्तात् कृन्नस्य णः स्यात् प्राङ्निमित्ते । प्रेङ्खणीयम् । इजादेरेव किम् । प्रमङ्गनीयम् ॥

न भाभूपूकमिगमिप्यायीवेपाम् ॥८।४।३४॥

एभ्यः कृन्नस्य णो न स्यात् ॥ ण्यन्तादेतोरपि णत्वं नेति केचित् । प्रख्यानीयम् । प्रभानीयम् । प्रभवनीयम् । प्रपवनीयम् । पूञ एव निषेधः । पूङस्तु प्रपवणीयः सोमः । प्रकमनीयम् । प्रगमनीयम् । प्रप्यायनीयम् । प्रवेपनीयम् । ण्यन्तभादिभ्योऽपि न । प्रभापनीयम् ।

गुणः । **प्रोहणीयमिति** । ऊह वितर्के । **प्रवपणीयमिति** । टुवप् बीजतन्तुसंताने । अत्रोभयत्र 'कृत्यचः' इति णत्वम् ।

इजादेः । ननु चात्र 'कृत्यचः' इत्येव सिद्धमित्याशङ्क्य सिद्धे सत्यारम्भो नियमार्थ इत्याह– **इजादेरेवेति** । अत्र च 'हलः' इति वर्तते । तेन च सामर्थ्यात् तदन्तविधिरित्याह– **हलन्तादिति** । हलधिकारो ण्यन्तान्नित्यो विधिरनेन मा भूदित्येवमर्थम् । **प्रेङ्खणीयमिति** । इखि गतौ । **प्रमङ्गनीयमिति** । मगि सर्पणे ।

न भा । भा दीप्तौ । भू सत्तायाम् । पूञ् पवने । कमु कान्तौ । गम्लृ गतौ । ओप्यायी वृद्धौ । टुवेपृ कम्पने ।

---

१. प्रवहणीयम् B_2, D_4, N २. प्राग्नि° D_4. ३. प्रेषणीयम् D_2; Before it—इखि गतौ N. ४. प्रकम्पनीयम् C, B_1, D_2, D_3. ५. After it—निमित्ते साति P. ६ धातोर्णत्वं C. ७. Dropped B. ८. नित्यं णत्वम् Dc_3, PC. ९. इति णित्यच इत्येव DC_1. १०. उत्सर्पणे Dc_3. ११. गम्लृसृप्लृ गतौ PC, Dc_3.

कृत्यल्युटो बहुलम् ॥३।३।११३॥

कृत्या ल्युट् च बहुलमर्थेषु[1] स्युः ॥ स्नात्यनेनेति स्नानीयं चूर्णम् । दीयतेस्मै दानीयो विप्रः ॥

अचो यत् ॥ ३।१।९७॥

अजन्ताद्यत् स्यात्[2] ॥ चेयं[3] पुण्यं त्वया । जेयम् । वासरूपविधेस्तव्यादयोपि । जेतव्यम् । जयनीयम् । अजन्तभूतपूर्वादपि[4] । दित्स्यम् । धित्स्यम् ।

कृत्य । बहुलग्रहणं न कार्यम् । आरम्भसामर्थ्यादेव कृत्यल्युटो यत्र विहितास्ततोन्यत्र स्युः । ततो बहुलग्रहणात् कृन्मात्रस्य स्वार्थव्यभिचारः सिद्धोतो गले चोप्यते इति गलेचोपकः पादाभ्यां ह्रियते पादहारकः । कर्मणि ण्वुल् । **स्नानीयमिति** । ष्णा शौचे । अस्मात् करणेनीयर् । **दानीय** इति । डुदाञ् दाने । अस्मात् संप्रदाने ।

अचः । तकारो 'यतो नावः' इत्याद्युदात्तार्थः । **अजन्तभूतपूर्वादपीति** । अयमाशयः । द्विधा धातवः । अजन्ता हलन्ताश्चेति । तत्र हलन्तात् 'ऋहलोर्ण्यत्' इति ण्यतं वक्ष्यति । अतो यत् पारिशेष्यादजन्तादेव स्यात् किमज्ग्रहणेन इत्याशङ्क्य अजन्तभूतपूर्वादपि यथा स्यादित्येवमर्थमज्ग्रहणं कृतमिति । अजन्तश्चासौ भूतपूर्वश्च । प्रागजन्त इदानीं हलन्त इत्यर्थः । **दित्स्यं धित्स्यमिति** । दाञो धाञश्च सन् । द्वित्वम् । 'सनिमीमा—'

---

१. मर्थे C. २. After it—इत्यर्थे D₄, B₂. ३. Before it—चीयते D₄. ४. °दपि यत् B₂.

ईद्यति ॥६।४।६५॥

यति परे आत ईत् स्यात् ॥ गुणः । देयम् । ग्लेयम् । तकिशसिचतियतिजनिभ्यश्च यत् ॥ तक्यमित्यादि । हनो वा यद् वधश्च ॥ वध्यः । पक्षे ण्यत् । घात्यः ॥

पोरदुपधात् ॥३।१।९८॥

पवर्गान्तादुदुपधाद्यत् स्यात् । ण्यतोपवादः । शप्यम् । सरूपत्वान्न ण्यत् ॥[3]

इति इस् । 'अत्र लोपोऽभ्यासस्य ।' 'मः स्यार्धधातुके' इति तः । 'आर्धधातुकस्य—' इति विवक्षिते 'अतो लोपः' । तस्मिन् सति अनजन्तत्वात् यन्न स्यादतोऽज्ग्रहणं कृतम् । पाक्षिकं चैतत् प्रयोजनं ज्ञेयम् । यदार्धधातुके परे लोपो विधीयते तदा विस्पष्टार्थमज्ग्रहणम् । **गुण** इति । 'सार्वधातुकार्धधातुकयोः' इति । **ग्लेयमिति** । ग्लै हर्षक्षये । 'आदेच उपदेशे —' इत्यात्वम् आर्धधातुके विवक्षिते । **तक्यमित्यादि** । तक हासने । शस हिंसायाम् । चति याचने । यती यत्ने । जनी प्रादुर्भावे ।

पोः । शप्यमिति । शप उपालम्भने । अदुपधात् किम् । कोप्यम् । अत्र 'यतोऽनावः' इत्याद्युदात्तत्वं न । ण्यतो जातत्वादन्तस्वरितत्वमेव स्यात् ।

---

१. तक्यमित्यादि dropped C. २. तव्यादयः । हननीयः N. ३. After it—अदुपधात् किम् । कोप्यम् B2. ४. After it—कृतम् Dc3. ५. प्रयत्ने PC, Dc3.

आङो यि ॥७।१।६५॥

आङ्परस्य लभेर्नुम् स्याद्यादौ प्रत्यये[1] ॥ आलम्भ्या गौः । आङः किम् । लभ्यम् ।

उपात् प्रशंसायाम् ॥७।१।६६॥

उपाल्लभेर्नुम्[2] स्यात् प्रशंसायां यति ॥ उपलम्भ्यः साधुः । स्तुतौ किम् । उपलब्धुं शक्यः उपलभ्यः ।

आङः । आलम्भ्या गौरिति । अत्र यादौ प्रत्यये विवक्षिते प्रत्ययोत्पत्तेः प्राक् नुमि कृते अदुपधत्वं विहतमिति यन्न भवति । 'ऋहलोर्ण्यत्' इति ण्यत्प्रत्ययः । तत्र कृदुत्तरपदप्रकृतिस्वरेणान्तस्वरितत्वं भवति । नुमुत्पत्तेः पूर्वमेव यदि यत् स्यात् तर्ह्युत्तरपदाद्युदात्तत्वं स्यात् । तच्च नेष्टम् । अत्र च 'इदितो नुम् धातोः' इति धातुग्रहणसामर्थ्यादुपदेशावस्थायामेव नुम् । तेन यादौ प्रत्यये विवक्षिते अयमर्थो लभ्यते । तदुक्तं भाष्ये । 'धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम्' इति । लभ्यमिति । 'पोरदुपधात्' इति यत्[3] ।

उपात् । उपलम्भ्यः साधुरिति । साधुः प्रशस्यतेत्र । अत्रापि यादिप्रत्ययविवक्षायां नुम् ततो ण्यत् । तेनान्तस्वरितत्वमेव । तथोक्तमिन्दुमत्यां वृत्तौ । 'उपलम्भ्या विद्या । ण्यदन्तत्वादन्तस्वरितत्वम्' इति । ननु वृत्तौ यतीत्युच्यते तत् कथमेतत् ण्यदन्तम् । सत्यम् । यतीत्यनेन यादिरेव प्रत्ययो विवक्षितः । स च यत्ण्यद्भ्यामन्यो न संभवतीत्युभयोः सामान्येन निर्देशः कृतो यतीति । ननु चैतत् सूत्रद्वयं ण्यत्प्रकरणे पठितव्यम् । किमिति यत्प्रकरणे पठ्यते । उच्यते । यद्यपि नुमि ण्यत्-प्रत्यय एव भवति तथापि नुमः पूर्वं यादिप्रत्ययविवक्षायां यदेवादुपधाद्विवक्ष्यत इति यत्प्रकरणे पठन्ति ।

---

१. परे for प्रत्यये C. २. उपात् परस्य लभे° D1. ३. 'पोरदुपधात्' इति before it PC; Dc3.

शकिसहोश्च ॥३।१।९९॥

आभ्यां यत् स्यात् ॥ शक्यम् । सह्यम् ।

गदमदचरयमश्चानुपसर्गे ॥३।१।१००॥

एभ्योनुपसर्गेभ्यो यत् स्यात् ॥ गद्यम् । मद्यम् । चर्यम् । चरे राङि चागुरौ* ॥ आचर्यो देशः । अगुरौ किम् । आचार्यः । यमेर्नियमार्थम् । यम्यम् । उपसर्गे तु । प्रगाद्यम् । प्रयाम्यम् ।

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥ ॥३।१।१०१॥

एते यदन्ता निपात्यन्ते गर्ह्याद्यर्थे ॥ अवद्यमनिष्टम् । पण्यं विक्रेयम् । अनिरोधोप्रतिबन्धः । शतेन वर्या कन्या । वृत्यान्या । स्त्रीनिर्देशात् पुंसि न । वार्या ऋत्विजः ।

शकिसहोः । शक्लृ शक्तौ । षह मर्षणे ।

गदमद । **अनुपसर्गे** इति । सुब्व्यत्ययेन पञ्चम्यर्थे सप्तमीत्याह-**अनुपसर्गेभ्य** इति । गद व्यक्तायां वाचि । मदी हर्षे । चर **गति**-भक्षणयोः । यम उपरमे । **आचार्य** इति । उपनेता गुरुः । **यमेर्नियमार्थमिति** । 'पोरदुपधात्' इत्येव सिद्धे पुनर्वचनं नियमार्थमित्यर्थः ।

अवद्यपण्येति । **अवद्यमिति** । वदेर्नञः परात् 'वदः सुपि क्यप् च' इति यत्क्यपोः प्राप्तयोर्यदेव निपात्यते । **पण्यमिति** । पणेर्व्यवहारार्थस्य ण्यति प्राप्ते यत् । **वर्येति** । वृञो ण्यति प्राप्ते यत् । **वृत्येति** । 'एतिस्तुशास्—' इति क्यप् । **स्त्रीनिर्देशादिति** । वर्येति सूत्रे [१]स्त्रीनिर्देशस्तन्त्रमित्यर्थः । **वार्या ऋत्विज** इति । ऋत्विजां हि धनवि[२]भागादानिरोधः । [३]स्त्रीलिङ्गता तु नास्ति । गर्ह्यादिषु किम् । **अनुद्यम्** । पाण्यम् । स्तुत्यमित्यर्थः ।

---

१. Dropped N. २. °निर्देशः सूत्रमित्यर्थः । De_1. ३. °संविभागा° PC. ४. °रोधोस्ति स्त्रीलि° PC.

वह्यं करणम् ॥३।१।१०२॥

वह्यं निपात्यते करणं चेत् । वह्यं शकटम् । वाह्यमन्यत् ।

अर्यः स्वामिवैश्ययोः ॥३।१।१०३॥

अर्यः स्वामी वैश्यो वा । आर्योऽन्यः ।

उपसर्या काल्या प्रजने ॥३।१।१०४॥

उपसर्येति निपात्यते । गर्भे प्राप्तकाला चेत् । उपसार्यान्या ।

अजर्यं सङ्गतम् ॥३।१।१०५॥

नञ्पूर्वाज्जीर्यतेः कर्तरि यन्निपात्यते संगतं चेद्वाच्यम् । न जीर्यतीत्यजर्यं सतां संगतम् ।

वह्यं शकटमिति । वहत्यनेनेति वह्यम् । **वाह्यमन्यदिति** । करणादन्यद्वाह्यमित्यर्थः ।

अर्यः । ऋ गतावित्यस्माद्धातोर्ण्यति प्राप्ते स्वामिवैश्ययोर्यन्निपात्यते । **उपसर्या** । उपपूर्वात् सर्तेर्यत्प्रत्ययो निपात्यते । कालः प्राप्तोऽस्याः प्राप्तकाला । 'कालाद्यत्' । प्रजनः प्रजननम् । भावे घञ् । प्रथमं गर्भग्रहणमिति । इममर्थं काल्या प्रजने इत्यस्याह-**गर्भे प्राप्तकाला चेदिति** ।

उपसार्यान्येति । उपसंक्रमणीयेत्यर्थः ।

अजर्यम् । **जीर्यतेरिति** । जॄष् वयोहानौ । **संगतमिति** । भावे क्तः । संगतिश्चेदित्यर्थः । संगतं किम् । अजरिता कम्बलः ।

---

१. प्रथमगर्भे D_2, B_2 ; प्रथमं गर्भे N_1. २. For प्राप्तकाला PC, Dc_3 have काल्या ।

ऋहलोर्ण्यत् ॥३।१।१२४॥

ऋवर्णान्ताद्धलन्ताच्च ण्यत् स्यात् ॥ कार्यम् । हार्यम् । वाद्यम् । कुत्वम् । हनस्तोचिण्णलोः । घात्यम् ।

चजोः कु घिण्ण्यतोः ॥७।३।५२॥

चजोः कुत्वं स्यात् घिति ण्यति च ॥ पाक्यम् । रोग्यम्[1] ।

न क्वादेः ॥७।३।५९॥

कवर्गादेर्धातोः चजोः कुत्वं न स्यात् ॥ गर्ज्यम् ॥

अजिव्रज्योश्च ॥७।३।६०॥

एतयोर्न कुत्वम् ॥ व्राज्यम् । चाद्व्रजेरपि । वाज्यम् । अजेर्वीभावाण्ण्यति नोदाहरणम् ।

वञ्चेर्गतौ ॥७।३।६३॥

गतौ वञ्चेः कुत्वं न स्यात्[2] ॥ वञ्च्यम् । गतौ किम्[3] । वङ्क्यं[4] काष्ठम् ।

ण्य आवश्यके ॥७।३।६५॥

आवश्यकेर्थे ण्ये परे कुत्वं न स्यात् ॥

ऋहलोः । सुप्व्यत्ययेन पञ्चम्यर्थे षष्ठीत्याह—**ऋवर्णान्ता-दिति** । **कुत्वमिति** । ' होहन्तेः—' इति ।

चजोः । यथासंख्यमत्र न भवति 'तेन रक्तं रागात्' इति लिङ्गात् । **पाक्यम्** । **रोग्यमिति** । डुपचष् पाके । रुज रोगे । **गर्ज्यमिति** । गर्ज ध्वनौ । **वङ्क्यं काष्ठमिति** । कुटिलमित्यर्थः ।

---

१. भाग्यम् D_1, रोक्यम् । रोग्यम् । N_1. २. After it—स्यात् D_2. ३. अगतौ तु वङ्क्यं काष्ठम् P. ४. C drops it.

लुम्पेदवश्यमः कृत्ये । अवश्यपाच्यम् । मयूरव्यंसकादित्वात् समासः ।

यजयाचरुचप्रवचर्चश्च ॥७।३।६६॥

एषां ण्ये कुत्वं न स्यात् ॥ याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यम् । ऋच् । अर्च्यम् ।

ऋदुपधादपि ऋचेरत एव ण्यत् ॥ त्यजिपूज्योश्च* ॥ न कुत्वम् । त्याज्यम् । पूज्यम् ।

वचोऽशब्दसंज्ञायाम् ॥७।३।६७॥

वचः कुत्वं न स्यादशब्दाख्यायाम् ॥ वाच्यम् । शब्दाख्यायां तु वाक्यम् ।

लुम्पेदवश्यमः कृत्ये इति । 'लुम्पेदवश्यमः कृत्ये' इत्यादिना श्लोकेनेत्यर्थः ।

यजयाचेति । यज देवपूजादौ । डुयाचृ याच्ञायाम् । रुच दीप्तौ । प्रपूर्वो वच परिभाषणे । ऋच स्तुत्याम् । ननु प्रवचग्रहणं किम् । 'वचोऽशब्दसंज्ञायाम्' इत्येव सिद्धम् । न सिद्धम् । प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति । तत्र शब्दसंज्ञात्वान्न सिध्यति.। अपरे आहुः । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधः नान्योपसर्गपूर्वस्य । तेनाविवाक्यमहः इति सिद्धम् । दशरात्रस्य यद्दशममहस्तदुच्यते अविवाक्यमिति ।

१. ऋचः B₂. २. Dropped N₁. ३. °वशब्दसंज्ञायाम् C. ४. शब्दसंज्ञायां प्रतिषिद्धत्वान्न सिध्यति । PC.

प्रयोज्यनियोज्यौ शक्यार्थे ॥७।३।६८॥

एतौ शक्यार्थे निपात्येते॥ प्रयोक्तुं शक्यः प्रयोज्यः। नियोज्यः। अन्यस्तु प्रयोग्यः। नियोग्यः।

भोज्यं भक्ष्ये ॥७।३।६९॥

भोग्यमन्यत्।

प्रयोज्य। युजिर् योगे। भोज्यमिति। भुज पालनाभ्यवहारयोः। अभ्यवहार्यमात्रमत्र भक्ष्यम्। भोग्यमन्यदिति। पालनीयमित्यर्थः। स्पष्टत्वात् त्यक्तं सूत्रचतुष्टयं प्रसङ्गाद्व्याख्यायते। 'न्यङ्क्वादीनां च' ॥७।३।५३॥ एतेषां कवर्गादेशो निपात्यते। न्यङ्कुः। मद्गुः। भृगुः। उप्रत्ययान्ताः। तक्रम्। वक्रम्। रगन्तौ। मेघः। अर्घः। अवदाघः। निदाघः। घञन्ताः। व्यतिषङ्गः। निसर्गः। अवसर्गः। पचाद्यजन्ताः। फलेपाकः। दूरेपाकः। क्षणेपाकः। फलेपाका दुरेपाका इति टाबन्तौ पठन्ति। केचिदकारान्तौ। पाकः। मांसपाकः। कपोतपाकः। उलूकपाकः। कर्मोपपदेभ्योऽण्। न्यग्रोधः। वीरुत्। 'भुजन्युब्जौ पाण्युपतापयोः' ॥७।३।६१॥ निपात्यौ। भुज्यतेऽनेनेति भुजः। पाणिः। 'हलश्च' इति घञ्। कुत्वाभावो गुणाभावश्च निपातनात्। न्युब्जिताः शेरतेऽत्र न्युब्जः। रोगः। घञ्। कुत्वाभावः। 'प्रयाजानुयाजौ यज्ञाङ्गे' ॥७।३।६२॥ घञन्तौ कुत्वाभावार्थं निपात्यौ। पञ्च प्रयाजाः। यज्ञाङ्गे किम्। प्रयागः। अनुयागः। प्रयाजानुयाजाविति निदर्शनार्थम्। अन्यत्रापि स्यादिति। उपयाजः। उपांशुयाजः। पत्नीसंयाजः। ऋतुयाजः। 'ओक उचः के' ॥७।३।६४॥ उचेर्धातोः के ओक इति निपात्यते।

---

१. Dropped N. २. D1, D2, D4, N drop it. ३. भक्ष्ये D1. ४. केचित्टाबन्तौ Dc3; केचित् टाबन्तौ PC. ५. श्वपाकः PC. ६. घञि कुत्वा° PC, Dc3. ७. After it—पञ्चानुयाजाः PC, Dc3. ८. प्रयोगानुयागः Dc3. ९. प्रदर्शना° PC, Dc3.

ओरावश्यके ॥३।१।१२५॥

उवर्णान्ताण्ण्यत् स्यादावश्यकेर्थे । यतोपवादः । अवश्यलाव्यम् । विप्रेण शुचिना भाव्यम् । लव्यमन्यत् ।

आसुयुवपिरपिलपित्रपिचमश्च ॥३।१।१२६॥

एभ्यो ण्यत् स्यात् यतोपवादः ॥ आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । आचाम्यम् । दभेश्च ॥* दाभ्यम् । न्लोपिनो निर्देशात् न्लोपः । भंज्जप्यजानमां यद्वृति

न्योकः । अन्तोदात्तः फलम् । दिवोकसः । असुनि उणादिबाहुल्यात् कुत्वम् ।

ओः । अवश्यंभाव आवश्यकम् । मनोज्ञादित्वाद्वुञ् । **विप्रेण शुचिना भाव्यमिति** । अत्र हि अशुचित्वे प्रत्यवाय इति अवश्यंभावो गम्यते ।

आसु । **यतोपवाद** इति । षुञ् अभिषवे । यु मिश्रणे । अनयोरजन्तत्वाद्यत् प्राप्तः । टुवप । बीजतन्तुसंताने । रप लप व्यक्तायां वाचि । त्रपूष् लज्जायाम् । चमुछमुजमुझमु अदने । एषामदुपधपवर्गान्तत्वात् । **दभेश्चेति** । **न्लोपिनो निर्देशादिति** । ननु दम्भेरदुपधत्वाभावादेव यतोप्राप्तेः सिद्धौ किमर्थं पृथग् ण्यद्विधिः । अतो दभिरयमदुपधोन्य इति वाच्यम् । तथा सति तस्य नकाराभावात् 'न्लोपिनो निर्देशात् न्लोप' इति नोपपद्यते ।

१. C drops it. २. भजजपयजा N_1. ३. दिवौकसः Dc_3. PC. ४. नलोपि॰ PC. ५. यलोपे प्राप्ते Dc_3. ६. नलोपि॰ PC. ७. नलोप PC.

केचित् । भाग्यम् । भज्यम् । जाप्यम् । जप्यम् । याज्यम् । यज्यम् । आनाम्यम् । आनम्यम् ।

आनाय्योऽनित्ये ॥३।१।१२७॥

गार्हपत्ययोनौ दक्षिणाग्नावनित्ये आनाय्यो निपात्यते । आनेयोऽन्यः ।

दभेः प्रकृत्यन्तरत्वं **न्यासे** उक्तम् । तथाहि । दभिधातुष्व-पठित एव प्रकृत्यन्तरमस्ति चुलुम्पतिवदिति । **पाणिनीयमतदर्पणे** चाप्युक्तम् । दभिरवमेऽर्थे सौत्र इति । **क्षीरतरङ्गिण्यां** च दभ इति चुरादावस्तीत्युक्तम् । दभदितिविपरिपडिपस्तेपक्षेप इति पठित्वा उदाहृतं दाभीयतीति । **नन्दी** तु दम्भयतीत्येवं मन्यते । इत्यप्युक्तम् । भेतस्मात् न्लोपिन इत्यादि कथम् । उच्यते । न्लोपिनो निर्देशात् न्लोप इत्यस्यायमर्थः । दभेश्चेति वार्तिके न्लोपिनो दभेर्निर्देशाल्लोपो दभिरस्तीति । नो लोपः छेदः नकाराभाव इत्यर्थः । स विद्यते यस्य न्लोपी तस्य निर्देशात् । नकाररहितस्य दभेर्निर्देशात् न्लोपः नो लोपो यस्य स न्लोपः नकारलोपसहितो नकाररहितो दभिरस्तीत्यर्थः । एवंविधाद्व्याख्यानात् सर्वं समञ्जसं भवति । अथवा दम्भे दंभने इत्यस्मादेव ण्यद्विधिः दभेश्चेति । ननु चोक्तं दम्भेरदुपधत्वाभावादेव सिद्धो ण्यदिति । सत्यम् । तथापि ण्यत्संनियोगेन नलोपार्थं दभेश्चेति वक्तव्यमिति आचार्याणामभिप्रायः ।

आनाय्यः । अनित्यमात्रे चेदानाय्य इति निपात्यते तर्हि घटादिष्वतिप्रसङ्गः । अत आह—**दक्षिणाग्नाविति** । दक्षिणाग्नावपि यो वैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वानीयते तत्राप्यतिप्रसङ्गस्तत्राह-**गार्हपत्य-योनाविति** । एतच्च रूढेर्बलवत्त्वाल्लभ्यते । अत्र च आङ्पूर्वा-न्नयतेर्ण्यदायादेशौ निपात्येते । **आनेयोऽन्य** इति । 'अचो यत्' इति यत् ।

---

१. भाज्यम् C. २. °तुष पठित C. ३. आपि dropped PC, Dc3.

प्रणाय्योऽसंमतौ ॥३।१।१२८॥

दुर्मतौ निष्कामे वा वाच्ये । प्रणाय्यः साधुश्चौरो वा[1] । प्रणेयोऽन्यः ।

पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवास-सामिधेनीषु ॥३।१।१२९॥

एते मानादौ क्रमान्निपात्यन्ते ॥ पाय्यं मानम् । पेयमन्यत् । सांनाय्यं हविः । संनेयमन्यत् । निकाय्यो निवासः । निचेयोऽन्यः । दधात्यग्निमिति धाय्या सामिधेनी ऋक् । धाय्या ऋत्विजः । धेयमन्यत् ।

क्रतौ कुण्डपाय्यसंचाय्यौ ॥३।१।१३०॥

कुण्डैः पीयतेऽत्र सोम इति कुण्डपाय्यः क्रतुः । संचाय्यः क्रतुः ।

पाय्यसान्नाय्य । पाय्यमिति । माङो ण्यत् पत्वं च निपात्यते । **सांनाय्यमिति** । संपूर्वान्नयतेर्ण्यदायादेशावुपसर्गदीर्घत्वं च । **निकाय्य** इति । निपूर्वात् चिनोतेर्ण्यत् आयादेशः कुत्वं च । **धाय्य** इति । धाञो ण्यत् ।

क्रताविति । **कुण्डपाय्य** इति । कुण्डशब्दे तृतीयान्त उपपदे पिबतेर्धातोरधिकरणे यत्प्रत्ययो युक् च निपात्यते । 'यतो नावः' इत्युत्तरपदाद्युदात्तत्वम् । **संचाय्य** इति । संपूर्वाच्चिनोतेर्ण्यदायादेशौ निपात्यते । संचीयतेऽसौ संचाय्यः । क्रतौ किम् । कुण्डपानम् । संचेयः ।

---

१. चौरो वा साधुः N_1.

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥३।१।१३१॥

अग्नावेते साधवः । अग्नौ किम् । परिचेयः । उपचेयः । संवाह्यः ।

चित्याग्निचित्ये च ॥३।१।१३२॥

एतौ निपात्येते । चित्योऽग्निः । अग्नेश्चयनमग्निचित्या[1] ।

अमावस्यदन्यतरस्याम् ॥३।१।१२२॥

अमोपपदाद्वसेः कालेऽधिकरणे ण्यत् तत्र च[2] वृद्ध्यभावो वा निपात्यते । अमा सह वसतोऽस्यां चन्द्रार्कावित्यमावस्या[3] अमावास्या वा[4] । यजन्त्यनयेति[5] याज्या ऋक् इति केचित् ।

वदः सुपि क्यप् च ॥३।१।१०६॥

वदेरनुपसर्गे सुबन्ते उपपदे क्यप् प्रत्ययः स्यात् चकाराद्यत् । उपपदमिति समासः । ब्रह्मणा उद्यत इति ब्रह्मोद्या कथा । ब्रह्मवद्या[6] ।

अग्नौ । पर्युपपूर्वस्य चिनोतेर्यदायादेशौ निपात्येते । संपूर्वाद्वहतेः संप्रसारणं दीर्घत्वं च ।

चित्या । चीयतेऽसौ चित्योऽग्निः । अग्निचित्येति । भावे यत्प्रत्ययः तुक् च निपात्यते । तेनोदात्तत्वं स्यात् । अग्नावित्येव । आचेयमन्यत् । अमा । अत्रोक्तम् ।

अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् ।

तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति ॥ इति ॥

वदः । ब्रह्मोद्येति । कर्मणि क्यप् । संप्रसारणम् । आद्गुणः । सुपि किम् । वाद्यम् । अनुपसर्गे किम् । प्रवाद्यम् ।

---

१. After it—स्त्रीत्वं लोकात् P. २. C, P drop it. ३. °वास्या अमावस्या वा । N_1; °वास्या अमावस्या D_4. ४. च D_2. ५. यजन्ते अनये° D_1. ६. After it—वा N_1, D_4.

भुवो भावे ॥३।१।१०७॥

अनुपसर्गे सुप्युपपदे भुवः क्यप् स्याद् भावे ॥ ब्रह्मणो[१] भावो ब्रह्मभूयम्[२] । सुपि किम् । भव्यम् । अनुपसर्गे किम् । प्रभव्यम् ।

हनस्त च ॥३।१।१०८॥

अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप् स्यात् तकारोन्तादेशश्च[३] । ब्रह्मणो हननं ब्रह्महत्या । स्त्रीत्वं लोकात् ।

एतिस्तुशास्वृदृजुषः क्यप् ॥३।१।१०९॥

[४]एभ्यः क्यप् स्यात् ॥

ह्रस्वस्य पिति कृति तुक् ॥६।१।७१॥

धातोर्ह्रस्वान्तस्य[५] तुगागमः स्यात् पिति कृति ॥ इत्यः । स्तुत्यः । शास इदङ्हलोः । शिष्यः । वृ इति वृञो ग्रहणं न वृङः । वृत्यः । वृङ्स्तु वार्या ऋत्विजः । आदृत्यः । जुष्यः । पुनः क्यबुक्तिः क्यप्बाधकस्य ण्यतो बाधनार्था । अवश्यस्तुत्यः ॥

भुवः । भावग्रहणमुत्तरार्थम् । पूर्वसूत्रे चानुकृष्टत्वाद्यदत्र नानुवर्तते ।

हनः । सुपि किम् । घातो वर्तते । भावे ण्यत् न भवत्यनभिधानात् । अनुपसर्गे किम् । प्रघातो वर्तते ।

एति । इण् गतौ । ष्टुञ् स्तुतौ । शासु अनुशिष्टौ । वृञ् आवरणे । दृङ् आदरे । जुषी प्रीतिसेवनयोः । **पुनः क्यबिति** । 'वदः सुपि क्यप् च' इत्यतः क्यप्ग्रहणेनुवर्तमाने पुनः क्यबुक्तिरि-

---

१. D_1 drops ब्रह्मणो भावः; before it—चानुकृष्टमुत्तरत्र नानुवर्तत इति यतो नानुवृत्तिः । N_1. २. After it—क्लीबत्वं लोकात् P. ३. तकारान्ता° D_4. ४. Before it—सुप्युपसर्गे भावे इति निवृत्तम् । N_1. ५. °ह्रस्वान्तस्य C.

शंसिदु[1]हिगुहिभ्यो वा । शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् ॥ आङ्पूर्वादजेश्च संज्ञायाम् । अजेः क्यपि वीभावो नेति वाच्यम् ॥* आज्यम् । उपेयमिति इ[2] गतावित्यस्य रूपं नेणः ।

ऋदुपधाच्चाक्लृपिचृतेः ॥३।१।११०॥

ऋदुपधात् क्यप् स्यात् क्लृ[3]पिचृ[4]तौ विना ॥ वृत्-वृत्यम् ।

त्यर्थः । **शंसीति** । शंसु स्तुतौ । दुह प्रपूरणे । गुहू संवरणे । **आङ्पूर्वादिति** । 'अजेर्व्यघञपोः ।' इति प्राप्तवीभावनिवृत्त्यर्थमाह-**अजेरिति** । आङ्पूर्वस्याज गतावित्यस्य रूपम् । ननु चाञ्जू व्यक्ति-म्रक्षणकान्तिगतिषु इत्यस्यैतद्रूपमिति **न्यासकार** आह । **भाष्यकारो**ऽप्याह । अञ्जेश्चोपसंख्यानम् । आज्यम् । यदि क्यप् वृद्धिर्न प्राप्नोति । तस्मात् ण्यदेव । यदि ण्यत् उपधालोपो न प्राप्नोति तस्मात् क्यबेव । ननु चोक्तं वृद्धिर्न प्राप्नोतीति । आङ्पूर्वस्यैष प्रयोग इति । तत् किमज गतावित्यस्येत्युच्यते । समज्येत्यत्र वीभावार्थं च वक्तव्यम्[5] अजेः क्यपि वीभावो नेति वाच्यमिति । तदत्र किमर्थं पठ्यते । तत्रो[6]च्यते । अज गतौ । अस्यापि आज्यमित्येतद्भवतीति प्रदर्शनार्थम् । द्रवरूपे घृतेनुगतार्थत्वात् । म्रक्षणार्थत्वेनाजेरनुगतार्थत्वमिति । उभयोरप्याज्यं भवतीत्यभिप्रायेणैतस्येत्युक्तम् ।

ऋदुपधात् । **कृपिचृती विनेति** । कृपू सामर्थ्ये । चृती हिंसायाम् ।

१. °गुहिदुहिभ्यो वा D_2, D_4. २. ई C; ईङ् D_2. ३. कृपि D_1. ४. चृति N_1. ५. वीभावाप्राप्त्यर्थं च कर्तव्यम् PC; वीभावाभावार्थं Dc_3. ६. अत्रो° PC.

वृध्यम् । कॢपिचृत्योस्तु कल्प्यम् । चर्त्यम् । ऋदुपधेति तपरः किम् । कॄत्-कीर्त्यम् ॥ पाणौ सृजेर्ण्यत् ॥* पाणिसर्ग्या रज्जुः ॥ समवपूर्वाच्च ॥* समवसर्ग्या ॥

ई च खनः ॥३।१।१११॥

खनः क्यप् स्यादीकारान्तादेशश्च ॥ आद्गुणः । खेयम् । दीर्घोक्तिरिकारान्तरप्रश्लेषार्था । तेन येविभाषेत्यात्वं न ।

भृञोऽसंज्ञायाम् ॥३।१।११२॥

भृञः क्यप् स्यान्न तु संज्ञायाम् ॥ भृत्यः । संज्ञायां तु भार्या नाम क्षत्रियाः । भार्या वधूः ॥

एतौ मुक्त्वा । कृपेर्लत्वस्यासिद्धत्वादृदुपधत्वम् । **कल्प्यम्** । **चर्त्यमिति** । 'ऋहलोर्ण्यत्' । **कीर्त्यमिति** । कॄत संशब्दे । 'अचो यत्' इत्यत्र भूतपूर्वग्रहणात् 'णेरनिटि' इति णिलोपेपि कृते यत् स्यात् । अनित्यण्यन्ताश्चुरादय इति पक्षे णेरभावे ण्यत् । तित्त्वात् 'तित् स्वरितम्' इति अन्तस्वरितत्वम् । क्यपि हि सत्याद्युदात्तत्वं स्यात् । **खेयमिति** । खनु विदारणे । ननु च किमर्थं दीर्घ ईकार उच्यते । न । ह्रस्व एवोच्येत । ह्रस्वेपि आद्गुणेनैव खेयमिति सेत्स्यतीति । अत आह—**दीर्घोक्तिरिति** ।

भृञः । **भार्या वधूरिति** । ननु चात्र 'संज्ञायां समज—' इति क्यपा भवितव्यम् । 'भृञोऽसंज्ञायाम्' इत्यस्य तु प्रतिषेधस्य पुंसि संज्ञाविषये भार्या नाम क्षत्रिया इत्यत्र सावकाशत्वात् । तन्न । तत्र भावाधिकारोस्ति । तेन कर्मणि भार्येत्यत्र ण्यतैव भाव्यम् । तथोक्तम् ।

---

१. कृपि D_1. २. कृती छेदने D_1. ३. न भवति D_1. ४. भार्या नाम क्षत्रियः D_2 D_4, B_2. ५. C drops it. ६. संशब्दने PC; Dc_3.

संभृत्रो वा* ॥ संभृत्यः । संभार्यः ।

मृजेर्विभाषा ॥३।१।११३॥

मृजेः क्यब् वा स्यात् पक्षे ण्यत् ॥ मृज्यः । मार्ग्यः ।

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥३।१।११४॥

एते क्यबन्ता निपात्यन्ते ॥ राज्ञा सोतव्यो राजसूयः क्रतुः । सुवति सरति वा सूर्यः । मृषा उद्यते मृषोद्यं नित्यम् । रोचते रुच्यः । स्वर्णरूप्याभ्यामन्यत् कुप्यम् । गोप्यमन्यत् ।

'संज्ञायां पुंसि दृष्टत्वात् न ते भार्या प्रसिध्यति ।
स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिध्यति' ॥

पूर्वेणैव व्याख्यातप्रायमेतत् ।

संभृत्रो वेति । असंज्ञायां नित्यं क्यपि प्राप्ते विकल्प उच्यते ।

मृजेः । ऋदुपधत्वात् प्राप्तविभाषेयम् । **मार्ग्य** इति । 'चजोः—' इति कुः । 'मृजेर्वृद्धिः' ।

राजसूयेति । **राज्ञा सोतव्यो राजसूय** इति । षुञ् अभिषवे । अस्माद्राजनि तृतीयान्ते उपपदे कर्मणि क्यप् । तस्य च तुगभावो दीर्घत्वं च निपात्यते । राजा वा सूयतेऽत्रेति राजसूयः । **सुवतीति सरतीति** । षु प्रेरणे । सृ गतौ । आभ्यां यथाक्रमं यति ण्यति च प्राप्ते क्यप् निपात्यते । सुवतीति कर्मणि लोकान् प्रेरयतीति । **मृषोद्यं नित्यमिति** । 'वदः सुपि क्यप् च' इत्यनेन पक्षे क्यपि पक्षे च यति प्राप्ते क्यबेव निपात्यते[1] । तेन मृषोद्यं नित्यं रूपं भवतीत्यर्थः । **रोचते रुच्य** इति । रोचते इति कर्तृप्रत्ययेन तृजाद्यपवादः कर्तरि क्यप् निपात्यत[2] इति दर्शयति[3] । **कुप्यमिति** । गुप गोपने । गुपू रक्षणे । क्यप् । आदेः कत्वं[4]

---

१. मृषोद्यः । N_1. २. °मन्यत्तुनं D_2. ३. कोट्य° C. ४. °कुत्वं च PC; Dc_3.

कृष्टे स्वयमेव पच्यत इति कृष्टपच्यो व्रीहिः । न व्यथते अव्यथ्यः[1] ।

भिद्योद्ध्यौ नदे ॥३।१।११५॥

कर्तरि क्यबन्तावेतौ नदे वाच्ये ॥ कूलं भिनत्तीति भिद्यो नाम नदः । वारि उज्झतीति उद्ध्यो नदः ॥

पुष्यसिध्यौ नक्षत्रे ॥३।१।११६॥

कार्यं पुष्णाति पुष्यत्यस्मिन् वा पुष्यो नक्षत्रम । कार्यं साधयति सिध्यत्यस्मिन् वा सिध्यः । स एव तिष्योऽपि ।

विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥३।१।११७॥

पूनीजिभ्यः क्यप्[2] निपात्यते ॥ विपूयो मुञ्जः ।

निपात्यते । कृष्टे स्वयमेव पच्यत इति कृष्टपच्य इति । कर्मकर्तरि क्यप् निपात्यते इति दर्शयति । अव्यथ्य इति । व्यथ भयसंचलनयोः । अस्मात् कर्तरि तृजपवादः क्यप् निपात्यते ।

भिद्य । भिदेर्नदेऽभिधेये कर्तरि क्यप् तृजपवादो निपात्यते । उद्ध्येति । उज्झ उत्सर्गे । अस्य धत्वं च कार्यम् ।

पुष्णातीत्यादिना पुष पुष्टौ अस्मात् तथा षिधू संराद्धौ इत्यस्मात् कर्तरि अधिकरणे चार्थे नक्षत्रेऽभिधेये क्यप् निपात्यते इति दर्शयति । स एव तिष्योऽपीति । तुष तुष्टौ इत्यस्य रूपम् ।

विपूय । पूञ् पवने । णीञ् प्रापणे । जि जये । त्रयाणामप्यजन्तत्वात् यति प्राप्ते कर्मणि क्यप् निपात्यते । विपूय इति । विपूयते इति विपूयः मुञ्जः ।

---

१. व्यथ्यते D_1, C. २. Before it—स्तः D_2; निपात्येते B_2, N_1, D_4. ३. Dropped in D_1.

विनीयः कल्कः । जित्यो हलिः । एषु किम । विपत्यम् । विनेयम् । जेयम् ॥

प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥३।१।११८॥

आभ्यां ग्रहेः क्यप् स्याच्छन्दसि ॥ भाषायां वेति केचित् । प्रतिगृह्यम् । प्रतिग्राह्यम् । अपिगृह्यम् । अपिग्राह्यम् ।

पदास्वैरिबाह्यापक्ष्येषु च ॥३।१।११९॥

एष्वर्थेषु ग्रहेः क्यप् स्यात् ॥ प्रगृह्यं पदम् । गृह्यः । अस्वैरी । ग्रामगृह्या सेना । ग्रामबाह्येत्यर्थः । स्त्रीनिर्देशान्नान्यत्र । कृष्णगृह्यः । तत्पक्षाश्रित इत्यर्थः ।

कश्चिदोषधिविशेषः । विनीयः कल्क इति । विनीयते सिद्धिं प्राप्यते इति विनीयः । तैलेन घृतेन वा त्रिफलादिद्रव्यसमवेतेन साध्यः कश्चिदोषधविशेषः कल्कः । जेतव्यो जित्यः । महद्धलं हलिरित्युच्यते ।

प्रत्यपि । 'ग्रहोपिप्रतिभ्यां ति वा' इति **दुर्गोक्तेः** भाषायां वेति तन्मतमाश्रित्याह—**भाषायामिति** । **प्रतिगृह्यमिति** । 'ग्रहिज्या—' इति संप्रसारणम् । 'कुगतिप्रादयः' इति समासः ।

पदा । **एष्विति** । पदे अस्वैरिणि बाह्यायां पक्ष्ये चार्थे । **प्रगृह्यं पदमिति** । प्रगृह्यत इति प्रगृह्यम् । असंनिकर्षोत्र ग्रहेरर्थः । स्वरो हि तत्र न संधीयते । यस्य पूर्वाचार्यैः प्रगृह्यसंज्ञा विहिता तत् प्रगृह्यम् । **अस्वैरीति** । स्वयमीरितुं शीलं यस्य । ताच्छीलिको णिनिः । स्वैरी स्वतन्त्रः । अस्वैरी परतन्त्रः । **ग्रामबाह्येत्यर्थ** इति । बहिर्भवा बाह्या । 'बहिषष्टिलोपो यञ् च' । इति यञ् टिलोपश्च । ग्रामबहिर्भूतेत्यर्थः । **अन्यत्रेति** । पुंसि नपुंसके च ।

---

१. पत्यम् । N1. २. प्रतिगृह्यः । प्रतिग्राह्यः । अपिगृह्यः । N1; ३. C drops अर्थेषु. ४. Before it—पक्षे भवः पक्ष्यः । N1.

विभाषा कृवृषोः ॥३।१।१२०॥

आभ्यां वा क्यप् स्यात् ॥ कृत्यम् । कार्यम् । वृष्यम् । वर्ष्यम् ।

युग्यं च पत्रे ॥३।१।१२१॥

पत्रं वाहनम् । युग्यमश्वादि चेत् । योग्यमन्यत् ।

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥३।३।१६३॥

प्रेषितस्त्वं त्वया गन्तव्यं गमनीयं गम्यम् । अनुज्ञातस्त्वं त्वया अध्येतव्यमध्ययनीयमध्येयम् । प्राप्तस्ते कालस्त्वया ध्यातव्यं ध्यानीयं ध्येयम् । सामान्यतः प्राप्तावप्यत्र लोटा बाधा मा भूदिति पुनः[1] कृत्यविधिः । स्त्रियां क्तिन ऊर्ध्वं[2] वासरूपविधेरभावात् ।

वृष्यमिति । वृषु सेचने । पक्षे ण्यत् ।

पत्रं वाहनमिति । पतत्यनेनेति पत्रम् । 'दाम्नी—' इति ष्ट्रन् । युग्यम् । युजिर् योगे । योजनीयं युग्यम् । युज्यतेऽनेन वा गमनम् ।

प्रेषितस्त्वमित्यादि । गमेस्तव्यत्तव्यानीयरः । 'पोरदुपधात्' इति यच्च । **अध्येयमिति** । इङ् अध्ययने । 'अचो यत्' । **ध्येयमिति** । ध्यै चिन्तायाम् । आत्वम् । यत् । 'ईद्यति' इति ईत्वं गुणः । ननु किमर्थं प्रैषादिषूच्यन्ते[3] । यतः सामान्येन भावकर्मणोर्विहिता एव ते प्रैषादिषु चान्यत्र भविष्यन्तीत्याशङ्क्याह—**सामान्यत** इति । प्रैषादिष्वर्थविशेषेषु विहितेन लोटा सामान्यविहितानां कृत्यानां बाधा मा भूदिति पुनः कृत्यविधिरित्यर्थः । ननु च वासरूपन्यायेन ते अपि भविष्यन्तीत्याशङ्क्याह—**स्त्रियां क्तिन्निति** । **लिङान्तेति** । व्याख्यातप्रायमेतत् ।

---

१. D_1 drops पुनः. २. अत ऊर्ध्वं D_1; इतऊर्ध्वं B_2, D_4; इत्यत्र for ऊर्ध्वं N_1. ३. प्रैषादिषु कृत्या उच्यन्ते PC.

अर्हे कृत्यतृचश्च ॥३।३।१६९॥

[1]स्तोतुमर्हः स्तोतव्यः । स्तवनीयः । स्तुत्यः । लिङात्र बाधो मा भूदिति कृत्यतृचोर्विधिः ।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥३।४।६८॥

एते कृत्यान्ता वा कर्तरि निपात्यन्ते ॥ भवतीति भव्यः । [2]भव्यमनेन वा । गायतीति गेयः । गेयं साम बटुना वा । इत्यादि ।

शकि लिङ् च ॥३।३।१७२॥

चात् कृत्याः ॥ वोढुं शक्यो वोढव्यः । वहनीयः । वाह्यः ।

भव्यगेय । 'तयोरेव' इति भावकर्मणोः प्राप्तौ पक्षे कर्तरीत्युच्यते । भव्यादिषु गेयप्रवचनीयोपस्थानीयानां कर्तरि कर्मणि च शेषाणां चाकर्मकत्वाद् भावे कर्तरि च । **भव्य इति** । 'अचो यत्' । गुणः । 'धातोस्तन्निमित्तस्यैव' इत्यव् । गेय 'ईद्यति' इतीत्वम् । **इत्यादीति** । आदिशब्देन प्रवचनीयो गुरुः स्वाध्यायस्य । प्रवचनीयः स्वाध्यायो गुरुणा । उपस्थानीयः शिष्यो गुरोः । उपस्थानीयो गुरुः शिष्येण । जायतेऽसौ जन्यः । जन्यमनेन वा । आप्लवते आप्लाव्यः । आप्लाव्यमनेन वा । आपततीत्यापात्यः । आपात्यमनेन वा । इति संगृहीतं स्पष्टं कृत्यम् । **वोढव्य इति** । वह प्रापणे । तव्यः । 'हो ढः' । 'झषस्तथोः—' इति धः । ष्टुत्वम् । ढलोपः । 'सहिवहोरोद-

---

१. D_1 drops स्तोतुमर्हः ; स्तोतुमर्हति D_2. २. Before it—भूयते B_2.

लिङा बाधो मा भूदिति कृत्योक्तिः ॥

इति कृत्यप्रक्रिया ॥

वर्णस्य' इत्योकारः । लिङेत्यादि । पूर्ववद् व्याख्यातव्यम् । स्पष्टत्वात् त्यक्तमेकम् । 'कृत्याश्च' ॥३।३।१७१॥ आवश्यकाधमर्ण्ययोः कृत्याः स्युः । आवश्यके । कटः कार्यः । आधमर्ण्ये । शतं दातव्यम् । निष्को देयः । आवश्यकाधमर्ण्ययोर्विशेषविहितेन णिनिना बाधा मा भूदिति विधिः । केचित्तु कर्तरि विहितो णिनिर्भावकर्मविहितानां कृत्यानां न बाधक इत्याशङ्क्य भव्यगेयादयः कर्तृवाचिन इहोदाहरणमित्याहुः ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगमदमला प्रक्रिया कृत्यसंज्ञा ॥

---

१. बाधा N. २. ङमलप्रत्ययाः कृत्यसंज्ञाः De3 : निरनुगुणाः प्रत्ययाः कृत्यसंज्ञाः PC.

ण्वुल्तृचौ ॥३।१।१३३॥

धातोर्ण्वुल्तृचौ स्तः कर्तरि कृदिति कर्त्रर्थे ॥ युवोरनाकौ । करोतीति कारकः । कर्ता । वोढुमर्हो वोढा । प्रत्ययस्थादितीत्वम् । कारिका । ऋन्नेति[1] ङीप् । कर्त्री । गाङ्कुटेति[2] ङित्त्वम् । कुटिता । कोटकः । विज इट् । विजिता । वेजकः । हनस्तोचिण्णलोः । घातकः । आतो युक् चिण्कृतोः । दायकः । नोदात्तोपदेशेति[3] उपधावृद्धिर्न । शमकः । दमकः । अनिटस्तु

ण्वुल् । णकारो वृद्ध्यर्थः । उकारो युवोरिति विशेषणार्थः । लकारः प्रत्ययात्पूर्वस्योदात्तार्थः । चकारस्तृन्तृचोः सामान्यग्रहणार्थः 'तुरिष्ठेमेयस्सु' इत्यादिषु । नान्तोदात्तार्थः । तस्य प्रत्ययस्वरेणैव सिद्धत्वात् । **कारक** इति । डुकृञ् करणे । 'अचो ञ्णिति' इति वृद्धिः । रपरः । कृत्त्वात् प्रातिपदिकत्वम् । स्वादयः । **कर्ते**ति । गुणः । 'ऋदुशनस्—' इत्यनङ् । 'सर्वनामस्थाने च' इत्युपधादीर्घः । नलोपः । **वोढे**ति । वह प्रापणे । 'हो ढः' । 'झषस्तथोः—' इति धः । ष्टुत्वम् । 'ढो ढे लोपः' । 'सहिवहोः—' इत्योकारः । **कारिके**ति । 'अजाद्यतष्टाप्' । 'हल्ङ्याब्—' इति सुलोपः । **कुटिते**ति । कुट कौटिल्ये । 'क्ङिति' इति गुणनिषेधः । **कोटक** इति । अञ्णितीति निषेधान्न ङित्त्वम् । **विजिते**ति । ओविजी भयचलनयोः । **वेजक** इति । अत्रापि णित्त्वात् ङित्त्वाभावः । **घातक** इति । हन हिंसागत्योः । 'अत उपधायाः' इति वृद्धिः । 'हो हन्तेः—' इति कुत्वम् । **दायक** इति । डुदाञ् दाने । **नोदात्तोपदेशे**ति । अनेन सेटो मान्तस्य वृद्धिनिषेध इति भावः । **शमको दमक** इति । शम[4] दम उपशमे । यम[5] उपरमे । 'जनिवध्योः'

१. ऋन्नेभ्यो ङीप् P, C. २. गाङ् कुटादीति D_1. ३. °पदेशस्येत्यादि D_2, D_4; °पदेत्यादि C; °पदेशेत्यादि P. ४. शमु दमु PC. ५. यमु Dc_3, PC.

यामकः । जनिवध्योश्च । जनकः । वधकः । रधिजभोरचि । रन्धकः । जम्भकः । नेट्यलिटि रधः । रधिता । रद्धा ।[२] मङ्क्ता । नंष्टा । नंशिता । रम्भकः[४] । रब्धा । लम्भकः । लब्धा । तीषसहेति वेट् । एषिता । एष्टा । सहिता । सोढा । दरिद्रातेरालोपः । दरिद्रिता । ण्वुलि न । दरिद्रायकः । कृत्यल्युट इत्यत्र बहुलोक्तेः क्वचित् कर्मण्यपि ण्वुल् स्यात्[६] । पादाभ्यां ह्रियते पादहारकः । गले चोप्यते गलेचोपकः । हलदन्तादित्यलुक् । आत्मनेपदार्हात् क्रमेः कृत इण्निषेधः ।

इति वृद्धिनिषेधः । जनकः । जन जनने । वधक इति । वध हिंसायाम् । 'रधिजभोरचि' इति । नुमिति भावः । रन्धक इति । रध हिंसायाम् । जम्भक इति । जभ गात्रविनामे । नेटीति । नुम्निषेधः । मङ्क्ता । नंष्टेति । टुमस्जो शुद्धौ । णश अदर्शने । 'मस्जिनशोः—' इति नुम् । रम्भक इति । रभ राभस्ये । 'रभेरशब्लिटोः' इति नुम् । लम्भक इति । डुलभष् प्राप्तौ । 'लभेश्च' इति नुम् । तीषसहेति वेट् । एषितेति । इषु इच्छायाम् । सोढेति । षह मर्षणे । ढत्वम् । धत्वम् । ष्टुत्वम् । ढलोपः । 'सहिवहोः—' इत्योत् । दरिद्रायक इति । दरिद्रा दुर्गतौ । 'आतो युक् चिण्कृतोः' । गलेचोपक इति । चुप मन्दायां गतौ । आत्मनेपदार्हादिति । सत्यात्मनेपदे निषेध इत्युक्तत्वादिदं वक्तव्यमारभन्ते । 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदयोग्यता ।

---

१. Before it:—रधेर्लिट्वर्ज इति रधेर्नुम् न स्यात् । B₂. २. Before it—रधादिभ्यश्चेति वेट् । मस्जिनशोरिति नुम् D₂; मस्जिनशोर्झलीति । मज्जकः । B₂. ३. D₁, D₄ and C, B₂ drop it; नाशिता । नंष्टा N. ४. रम्भकः । नाशकः । B₂. ५. सह P, D₂; सहेति D₄. ६. C drops it. ७. चुप्यते B₂, D₄. ८. हलदन्तात् सप्तम्याः संज्ञायाम् D₂; हलदन्तेत्यलुक् N. ९. कर्तरि कृत P.

प्रक्रान्ता । कर्तरीत्येव । प्रक्रमितव्यम् । गमेरिट् । तङानाभाव इत्युक्तः संजिगमिषिता । संजिगंसितेत्यपि केचित् । एवं न वृद्भ्यश्चतुर्भ्यः । विवृत्सिता । विवर्तिषितेत्यपि केचित् । चिक्लृप्सिता । न धातुलोप इत्यत्र इक एव गुणवृद्धिनिषेधात् पापाचकः । पापचिता । इत्यादि ज्ञेयम् ।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥३।१।१३४॥

नन्द्यादेर्ल्युः । ग्रहादेर्णिनिः । पचादेरच् । नन्दनः । असि उसि अने च चक्षिङः ख्याञ् नेति वाच्यम् ॥ * विचक्षणः ।

गमेरिडित्यादि । संजिगमिषितेत्यत्र परस्मैपदाभावेऽपि इड् भवत्येव । कुतः । 'गमेरिट् परस्मैपदेषु' इति परस्मैपदग्रहणं तङानयोरभावं लक्षयतीति कृत्वा । **संजिगंसितेत्यपि केचिदिति** । **पदशेषकारस्यायं** पक्षः । **विवृत्सितेति** । वृतु वर्तने । सन् । द्वित्वम् । 'उरत्' इत्यत्वम् । 'सन्यतः' इतीत्वम् । 'हलन्ताच्च' इति कित्त्वम् । **चिक्लृप्सितेति** । कृपू सामर्थ्ये । सन् । 'कृपो रो लः' इति लत्वम् । 'तासि च क्लृपः' इतीण्निषेधः । **पापाचक इति** । डुपचष् पाके । 'धातोरेकाचः—' इति यङ् । 'सन्यङोः' इति द्वित्वम् । 'दीर्घोऽकितः' इति दीर्घत्वम् । ण्वुल् । 'अतो लोपः' । 'अत उपधायाः' इति वृद्धिः । **भाष्यकारमते** तु पापच्यते अस्मात् ण्वुलि 'अतो लोपे' 'यस्य हलः' इति यस्य लोपः । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । पापचक इति ।

नन्दीति । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यत इत्यभिप्रायेणाह—**नन्द्यादेरिति** । **नन्दन इति** । नन्दयतीति नन्दन इति । टुनदि समृद्धौ । **विचक्षण इति** । चक्षिङ् व्यक्तायां

---

१. क्रमितव्यम् । N_1. २. पापाचिता D_2, B_2. ३. स्वयमेव ज्ञेयम् D_4. ४. नन्द्यादे° C. ५. °रच् स्यात् B_2, D_4. ६. पापचक Dc_3, PC.

जनार्दनः । मधुसूदनः । ग्राही । स्थायी । प्रयायिणौ । पचः । देवट् । देवः । देवी । षोडन् शब्दाण्णिच् टिलोपः । पचाद्यच् ।

वाचि । **जनार्दनः** । **मधुसूदन** इति । जनानर्दयतीति जनार्दनः । मधुं सूदयतीति मधुसूदनः । अत्र कर्मण्यणि प्राप्ते ल्युः । नन्दनः । वाशनः । मदनः । दूषणः । साधनः । भूषणः । वर्धनः । शोभनः । एभ्यो ण्यन्तेभ्यः । सहितपिमदीभ्यः संज्ञायाम् । सहनः । तपनः । मदनः । कल्पनः । जल्पनः । रमणः । दर्पणः । संक्रन्दनः । संकर्षणः । संहर्षणः । जनार्दनः । पवनः । मधुसूदनः । विभीषणः । लवणः । निपातनात् णत्वम् । चित्तविनाशनः । कुलदमनः । इति नन्द्यादिः । **ग्राहीति** । ग्रह उपादाने । णित्त्वाद्वृद्धिः । 'सौ च' इति दीर्घः । **स्थायीति** । 'आतो युक्—' । **प्रयायिणाविति** । या प्रापणे । 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति णत्वम् । ग्राही । उत्साही । उद्भासी । उद्भासी । मन्त्री । समर्दी । रक्षश्रुवपशां नौ । निरक्षी । निश्रावी । निवापी । निशायी । याचृव्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची । अव्याहारी । अव्राजी । अवादी । अवासी । अचामचित्तकर्तृकाणाम् । प्रतिषिद्धानामित्येव । अकारी । अहारी । विशयी विषयी देशे । विशयी विषयी देशः । अभिभावी भूते । अभिभावी । अपराधी । परिभवी । इति ग्रहादिः । **पच** इति । डुपचष् पाके । **देवीति** । 'टिड्ढाणञ्—' इति ङीप् । पच । वच । वद । वप । चल । पत । नदट् । प्लवट् । गरट् । तरट् । चरट् । चोरट् । गाहट् । जर । मर । क्षम । सदृट् । देवट् । देव । सव । शेष । कोप । मेध । नर्त । प्राण । दर्श ।

१. °ण्णिच्चि कृते P. २. कर्मप्राप्ते Dc1. ३ Before it—स्थायी PC. ४. After it—असंव्याहारी PC. ५. After it—देवसेवशेषकोपमेधनर्तप्राणदर्शजंपा Dc3, PC. ६. After it—भषट् PC, Dc3. ७. Dropped Dc3, PC. ८. सेव Dc3. ९. After it—जङ्ग PC, Dc3.

षोडः। यङोचि चेति यङो लुक्। न धातुलोपे इति गुणनिषेधः। नेन्यः। लोलुवः। पोपुवः। मरीमृजः। उदन्ताद् यङो लुग्नेति केचित्। रोरूयः॥ चरिचलिपतिवदीनां वा द्वित्वमच्याक्त्वमभ्यासस्य॥ *अभ्यासस्य कार्यमनचीति वक्तव्यमिति हलादिशेषाभावः। चराचरः। चलाचलः। पतापतः। वदावदः। हन्तेर्घत्वं च। घनाघनः। पाटेर्णिलुक् ऊक् चाभ्यासस्य। पाटूपटः। पक्षे। चरः। चलः। पतः। वदः। हनः। पाटः। घञर्थे कविधानमिति कृञः क्लिदः कसश्च कप्रत्ययः। कृञादीनां के द्वे स्तः। चक्रम। चिक्लिदम्। चक्रसः। पक्षे क्लिदक्नसोराजिति केचित्। क्लेदः। क्रसः।

जागभर। पङ्क। श्वपच। पचादिराकृतिगणः। षोड इति। षट् दन्ता यस्यासौ षोडन्। षष उत्वमित्युक्तम्। ष्टुत्वम्। षोडन्तमाचष्टे। 'तत्करोति तदाचष्टे' इति णिच्। 'णाविष्ठवत्' इति टिलोपः। अच्। 'णेरनिटि' इति णिलोपः। नेन्यः। लोलुवः। पोपुव इति। णीञ् प्रापणे। लूञ् छेदने। पूञ् पवने। एभ्यो धातुभ्यो 'धातोरेकाचः—' इति यङ्। 'सन्यङोः' इति द्वित्वम्। 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः। मरीमृजः। मृजूष् शुद्धौ। 'रीगृदुपधस्य च' इति रीक्। रोरूय इति। रु शब्दे। चराचर इत्यादि। चर गतिभक्षणयोः। चल गतौ। पत्लृ पथे च गतौ च। वद व्यक्तायां वाचि। घनाघन इति। हन हिंसागत्योः। पाटूपट इति। पट विस्तारे। चुरादिः। चक्रमिति। डुकृञ् करणे। चिक्लिदमिति। क्लिदू आर्द्रीभावे। क्रस इति। क्रसु हरणे।

---

१. °लोपेति N₁; °लोपे च D₄. २. °मच्याक्त्वमभ्यासस्य D₂, P, N; °मच्याकृचाभ्यासस्य B₂. ३. च्याक् चाभ्या° D₄. ४. अभ्यासकार्य° D₂. ५. हलादिः शे° N₁. ६. पट्रूपटः D₂, D₄, N. ७. After this—क्लीबत्वं लोकात् P; चिक्लिरः N. ८. Dropped PC; Dc₃. ९. पट्रूपट Mss. Dc₃; PC.

रात्रेः कृति विभाषा ॥६।३।७२॥

कृदन्ते परे रात्रेर्मुमागमो[1] वा[2] स्यात् ॥ रात्रिंचरः । रात्रिचरः । रात्रिमटः । रात्र्यटः ।

इगुपधज्ञाप्रीकिरः कः ॥३।१।१३५॥

एभ्यः कः स्यात् ॥ क्षिपः । बुधः । भूरुहः । ज्ञः । इयङ् । प्रियः[3] । कॄ । ॠत इत् । किरः । गिरतेश्चेत्येके । गिरः । गिले परे गिलस्य पूर्वस्य मुमवाच्यः ॥ * तिमिंगिलः । अगिलस्य[4] किम् । गिलगिलः । गिलगिले च ॥ तिमिंगिलगिलः । वासरूपविधिना[5] ण्वुल्तृचावपि । क्षेपकः । क्षेप्ता ।

आतश्चोपसर्गे ॥३।१।१३६॥

उपसर्गे उपपदे आदन्तात् कः स्यात् । 'श्याद्व्यध—' इति णस्यापवादः । सुम्थः[6] । सुग्लः[7] । प्रज्ञः[8] ।

रात्रेः । अप्राप्तविभाषेयम् । **रात्रिंचर** इति । चरतीति चरः । पचाद्यच् । रात्रौ चरः । सप्तमीति योगविभागात् समासः । अथवा रात्रौ चरतीति रात्रिंचरः । 'चरेष्टः' इति टः । उपपदसमासः । **रात्रिमट** इति । अट गतौ । पचाद्यच् । सप्तमीति योगविभागात् समासः ।

इगुपध । क्षिप प्रेरणे । क्ङित्त्वाद्गुणाभावः । बुध अवगमे । **भूरुह** इति । भुवि रुहः । रुह जन्मनि प्रादुर्भावे । सप्तमीसमासः । **ज्ञ** इति । ज्ञा अवबोधने । 'आतो लोप इटि च' इत्यालोपः । **प्रिय** इति । प्रीञ् तर्पणे । **किर** इति । कॄ विक्षेपे । **गिर** इति । गॄ निगरणे । **तिमिंगिल** इति । गॄ निगरणे । मूलविभुजादित्वात् कः । 'ॠत इत्—' । रपरः । 'अचि विभाषा' इति लत्वम् । **सुग्ल** इति । ग्लै हर्षक्षये । कप्रत्यये विवक्षिते 'आदेच उपदेशे—' इत्यात्वे कः ।

---

१. °र्मुगागमो D_1. २. स्याद्वा C. ३. प्रिया N_1. ४. अगिलः किम् N_1.
५. विधानात् P, C. ६. सुज्ञः C; सुम्नः N. ७. Dropped C, N_1, D_1.
८. After it—सुम्नः B_2, D_4.

पाघ्राध्माधेट्दृशः शः ॥३।१।१३७॥

एभ्यः शः स्यात् ॥ शित्वात् पिबादयः । शप् । अतो गुणे । उत्पिबः । उज्जिघ्रः । विधमः । उद्धयः । विपश्यः । उपसर्गानुवृत्तिर्नात्रेत्येके । पश्यः । जिघ्रः । संज्ञायां न । व्याघ्रः ।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥३।१।१३८॥

एभ्योनुपसर्गेभ्यः शः स्यात् । शित्कार्यम् । लिम्पः ।

पाघ्रा । पा पाने । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगयोः । धेट् पाने । एषामादन्तलक्षणे के णे च प्राप्ते शो विधीयते । दृशिर् प्रेक्षणे । अस्मात् इगुपधलक्षणे । उत्पिब इत्यादि । पाघ्राध्मेति पिबादेशः । उपसर्गानुवृत्तेरिति । तथोक्तं काशिकायाम् । ' उपसर्ग इति केचिन्नानुवर्तयन्ति ' इति ।

अनुपसर्गात् । बहुवचनस्थाने सुब्व्यत्ययेनैकवचनम् । लिप उपदेहे । विद्लृ लाभे । सनुम्कयोर्ग्रहणमुपदेशावस्थायामेव नुमिति ज्ञापनार्थम् । धृङ् धारणे । हेतुमण्णिजन्तः । पार तीर कर्मसमाप्तौ । चुरादिण्यन्तः । यद्वा पॄ पालनपूरणयोः । हेतुमण्ण्यन्तः । विद चेतनाख्याननिवासेषु । चुरादिण्यन्तः । यद्वा ज्ञानाद्यर्थानां विदादीनामन्यतमो हेतुमण्ण्यन्तः । एजृ कम्पने । हेतुमण्ण्यन्तः । चिती संज्ञाने । चुरादिण्यन्तः । सातिः सौत्रः । षह मर्षणे । हेतुमण्ण्यन्तः । चुरादिण्यन्तो वा । लिम्पः विन्द इति । तुदादिभ्यः

---

१. उत्पश्यः D1. २. D1, N1 drop अत्र. ३. जिघ्रतः संज्ञायां न B2, D4. ४. विज्ञानार्थम् । Dc3. ५. नाद्यर्थानां विदादीना° Dc1, Dc4.

विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सौत्रः ।[१] सातयः । साहयः । अनुपसर्गात् किम् । प्रलिपः । नौ लिम्पेर्वाच्यः[२] । निलिम्पा देवाः । गवादिषु विन्दः संज्ञायाम् ॥ * गोविन्दः । अरविन्दः[३] ।

ददातिदधात्योर्विभाषा ॥३।१।१३९॥

आभ्यां शो वा स्यात् ॥ शित्वात् श्लुकार्यम्[४] । ददः । दधः । पक्षे णः । अनुपसर्गादेव । प्रदः । प्रधः ।

ज्वलितिकसन्तेभ्यो णः ॥३।१।१४०॥

इतिशब्द आद्यर्थे । ज्वलादिभ्यः कसन्तेभ्यो णः स्याद्वा ।

शः । 'शे मुचादीनाम्' इति नुम् । धारय इत्यादिषु शप् । प्रलिप इति । इगुपधलक्षणः कः ।

ददाति । णस्यापवादः । **श्लुकार्यमिति** । 'जुहोत्यादिभ्यः श्लुः' । 'श्लौ' इति द्वित्वम् । 'श्नाभ्यस्तयोः' इत्यालोपः[५] । **पक्षे ण** इति । दाय धाय इति रूपं तदा । **प्रदः प्रधः** इति । '**आतश्चोपसर्गे**' इति कः । ननु दद दाने दध धारणे आभ्यामपि दद दध इति स्यात् । सत्यम् । णे दायो धाय इति । तत् किमनेन सूत्रेण । न । अचि 'अच्कावशक्तौ' इत्यन्तोदात्तः स्यात् । शे तु नञ्स्वर एव । अददः[६] ।

ज्वलि । ज्वल दीप्ताविति द्विः पठ्यते घटादिषु पुरस्ताच्च । एवं सति संदेहः स्यात् केभ्य इति । तत्राह—**कसन्तेभ्य** इति । तेन घटाद्यन्तर्गणः पर्युदस्तः स्यात् । कसः[७] परस्ताद्ये तन्निवृत्त्यर्थं

---

१. After it—सुखे वर्तते N_1. २. लिपे D_1. ३. अरविन्दम् C, P. ४. शित्कार्यम् C. ५. इत्याकारलोपः PC. ६. After it—अदधः Dc_3, PC. ७. कसेः Dc_3.

पक्षे अच् । ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादेव । प्रज्वलः । तनोतेर्णः ॥ * अवतानः ।

श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिष-श्वसश्च ॥३।१।१४१॥

अनुपसर्गादिति निवृत्तम् । श्यैङ आदन्ताद् व्यधादेश्च णः स्यात् । आदन्तत्वेपि श्यैङुक्तिः कबाधार्था । अवश्यायः ।

क्रसन्तेति न । कसेः परं वृदिति पाठात् । ज्वल दीप्तौ । चल कम्पने । जल घातने । टल ट्वल वैक्लव्ये । ष्ठल स्थाने । हल विलेखने । णल गन्धे । पल गतौ । बल प्राणने धान्यावरोधने च । पुल महत्त्वे । कुल संस्त्याने बन्धुषु च । शल हुल पत्ल गतौ । हुल हिंसासंवरणयोः । क्रथे निष्पाके । पथे गतौ । मथे विलोडने । टुवम उद्गिरणे । भ्रमु चलने । क्षर संचलने । क्षल संचये च । षह मर्षणे । रमु क्रीडायाम् । षद्लृ विशरणगत्यवसादनेषु । शद्लृ शातने । क्रुश आह्वाने रोदने च । बुध अवगमने । रुह बीजजन्मनि । कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । कस गतौ । वृत् ज्वलादिः ।

श्याद्व्यध । श्यैङ् गतौ । आदित्याकारान्ताः । व्यध ताडने । स्रु गतौ । अर्वाचीनाः श्रु श्रवणे इति मन्यन्ते । आङ्पूर्वः पुनः संपूर्वः । इण् गतौ । अतिपूर्वः । षोन्तकर्मणि । अवपूर्वः । हृञ् हरणे । अवपूर्व एव । लिह आस्वादने । श्लिष आलिङ्गने । श्वस प्राणने । अत्र ये सोपसर्गास्तेभ्यः सोपसर्गेभ्य एव । शेषेभ्यस्तु सोपसर्गेभ्योनुपसर्गेभ्यश्च । **अनुपसर्गादिति** । उत्तरसूत्रे पुनरनुपसर्गग्रहणात् तन्निवृत्तौ तत्संबद्धं विभाषाग्रहणमपि निवृत्तम् । **आदन्तत्वेपीति** । 'आतश्चोपसर्गे' इति

---

१. स्थल Dc3. २. °वरोधे च PC, Dc3. ३. बन्धे च PC, Dc3. ४. मथ PC. ५. टुवमु PC.

दायः । धायः । व्याधः । आस्रावः । संस्रावः । आश्रुसंश्रोर्णो वेति केचित् । आश्रवः । संश्रवः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ॥ दुन्योरनुपसर्गे ॥ * दावः । नायः । वेति केचित् । दवः । नयः । अनुपसर्गे किम् । प्रदवः । प्रणयः ।

विभाषा ग्रहः ॥३।१।१४३॥

णो वा व्यवस्थया ॥ जलचरे ग्राहः । ज्योतिषि ग्रहः । भुवश्च वा वाच्यः ॥ * भावः । भवः ।

विशेषविहितत्वात् कः सामान्यविहितस्य णस्य बाधकः स्यात् । अतः श्यैङुक्तिः कबाधार्थेत्यर्थः । एतत् प्रयोजनमवस्यतेरपि ज्ञातव्यम् । अथवा तस्योपसर्गनियमार्थं ग्रहणम् । अवश्याय इति । आतो युक् । **आश्रुसंश्रोः**रिति । तेषामयं भावः । श्याद्यधेति सूत्रे आस्रु इति स्रु गतावित्यस्य ग्रहणं न श्रु श्रवण इत्यस्य । तथा च **न्यासे** अत्र सूत्रे उक्तं स्रु गताविति । तेन श्रु श्रवणे अस्मादजेवेति । **तथामरकोशे** । 'वचने स्थित आश्रवः' इत्युक्तम् । **दुन्योः** । टु दु उपतापे । णीञ् प्रापणे । पञ्चम्यर्थे षष्ठीसप्तम्यौ । अनुपसर्गात् दुनोतेर्नयतेश्च णः स्यादित्यर्थः । **दवः** । **नयः** इति । अच् । **प्रदवः** । **प्रणय** इति । अच् । 'उपसर्गादसमासेपि' इति णत्वम् ।

विभाषा । **णो वा व्यवस्थयेति** । अनेन विभाषाया व्यवस्थितत्वं दर्शयति । तदेव स्पष्टयति—**जलचर** इति ।

---

१. संश्रावः D_1, D_4, B_2. २. °संश्रुं D_1, D_4, P, B_2. ३. संश्रवः D_1, P_2, B_2, D_4. ४. प्रवदः P, N_1. ५. After it—उपसर्गाते णः N_1. ६. अस्मिन् Dc_3. ७. तथा चामर° Dc_3.

गेहे कः ॥३।१।१४४॥

गेहे कर्तरि ग्रहेः कः स्यात् ॥ गृहम् । तात्स्थ्यात् गृहाः दाराः ।

शिल्पिनि ष्वुन् ॥३।१।१४५॥

[1]शिल्पिनि कर्तरि धातोः ष्वुन् स्यात् ॥ नृतिखनिरञ्जिभ्य एव । [2]नर्तकः । खनकः । असि अके अने घिनुणि च रञ्जेर्नलोपो वाच्यः ॥ * रजकः । षित्वान्नर्तकी ।

गस्थकन् ॥३।१।१४६॥

गायतेः [3]स्थकन् स्यात् शिल्पिनि ॥ गाथकः ।

ण्युट् च ॥३।१।१४७॥

गायनः । टित्त्वात् गायनी ।

गेहे । गृहमिति । 'ग्रहिज्या–' इति संप्रसारणम् । तात्स्थ्यादिति । एतेन गौणेपि प्रत्यया भवन्तीति आचष्टे । नृतीत्यादि । नृती गात्रविक्षेपे । खनु अवदारणे । रञ्ज रागे । षित्त्वादिति । षिद्गौरेति ङीष् ।

गः । कै गै रै शब्दे इत्यस्य कृतात्वस्यायं निर्देश इत्याह— गायतेरिति । ननु गामादाग्रहणेष्वविशेष इति गाङ् गतावित्यस्यापि ग्रहणं भाव्यम् । न । गाथक इति गायत्यर्थविषयमेव शिल्पिनः कर्तृत्वं प्रतीयते न गत्यर्थविषयम् । नकार आद्युदात्तार्थः ।

ण्युट् च । गायतेः ण्युडपि स्याच्छिल्पिनि कर्तरि । गायन इति । 'आतो युक्' । टित्त्वादिति । 'टिड्ढाणञ्—' इति ङीप् । योगविभाग उत्तरार्थः ।

---

१. Before it—षो ङीबर्थः B_2. २. D_2 drops नर्तकः । खनकः ३. °स्छकन् D_1, P. ४. स्छकन् D_1, P.

हश्च व्रीहिकालयोः ॥३।१।१४८॥

हाको हाङश्च ण्युट् स्याद् व्रीहौ काले च कर्तरि ॥ अम्बु जहाति जिहीते वा हायनो व्रीहिः । भावान् जहाति जिहीते वा हायनो[1] वर्षम्[2] ।

प्रुसृल्वः समभिहारे वुन् ॥३।१।१४९॥

प्वादेर्वुन् स्यात् साधुकारिणि कर्तरि ॥ प्रवकः । सरकः । लवकः ।

आशिषि च ॥३।१।१५०॥

धातोर्वुन् स्यादाशिषि ॥ जीवतादिति जीवकः । जीवका ।[3] आशिषि के मनेरत एत्वं वाच्यम् ॥ * मेनका ।[4]

हश्च । ओहाक् त्यागे । हाङ् गतौ । अम्बु इति । हायनशब्दस्य व्रीहौ प्रवृत्तिनिमित्तं दर्शयति । भावानिति । संवत्सरे प्रवृत्तिनिमित्तम् ।

प्रुसृ । प्रुङ् गतौ । सृ गतौ । लूञ् छेदने । प्रुसृल्व इति समाहारं कृत्वा निर्देशः । नुमागमस्तु सत्यपि क्लीबत्वे न कृतः । अनित्यत्वादागमशासनस्य । धातूनामनेकार्थत्वात् समभिहार इति साधुकारी उच्यते । अथवा शिल्पिनीत्यनुवर्तत इत्यभिप्रेत्याह-साधुकारिणीति ।

आशिषि । अप्राप्तप्रार्थना आशीः । तस्यामाशिषि गम्यमानायामित्यर्थः ।[5] जीवतादिति जीवकः इति । जीवनं तव भूयादित्यर्थः । जीवक इति । 'आशिषि वुनश्च' इतीत्वाभावः ।

---

१. हायनं D2, D4. २. वर्षः D1. ३. Before it—नन्दतात् । नन्दकः B2, D4. ४. After this—स्त्रीत्वं लोकात् D2, D4. ५. गम्यमानायां तेन चेत्संज्ञा गम्यते इत्यर्थः । Dc3.

क्तिच्क्तौ च संज्ञायाम् ॥३।३।१७४॥

धातोः क्तिच् क्तश्चस्यादाशिषि संज्ञायाम ॥

तितुत्रतथसिसुसरकसेषु च ॥७।२।९॥

एषां दशानां कृत्प्रत्ययानामिण् न स्यात् ॥ भवनात् । भूतिः । देवा एनं देयासुः । देवदत्तः । क्तान्तिः क्तिचा बाधा मा भूदिति ।

अनुनासिकस्य क्विझलोः क्ङिति ॥६।४।१५॥

अनुनासिकान्तस्य धातोरुपधाया दीर्घः स्यात् क्वौ झलादौ क्ङिति च ॥ इति दीर्घे प्राप्ते अनुदात्तोपदेशेति अनुनासिकलोपे प्राप्ते ।

'क्तिच्—' इति चकारो 'न क्तिचि दीर्घश्च' इति विशेषणार्थः। प्रत्ययान्तेन चेत् संज्ञा गम्यत इत्यर्थः ।

तितुत्रेति । तीति क्तिन्क्तिचोर्ग्रहणम् । तु इति सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्नित्यस्य । त्रेति 'दाम्नी-' इति ष्ट्रनः । सर्वधातुभ्यष्ट्रन्नित्यस्य च । तेति हसिमृग्रिण्वमिदमिलमिलूपूधुर्विभ्यस्तन् इत्यस्य । न क्तस्य ग्रहणम् । 'ऊर्णोतेर्विभाषा' इत्यतो 'विभाषा' इत्यनुवृत्तेस्तस्याश्च व्यवस्थितविभाषात्वात् । थेति हनिकुषिनीरमिकाशिभ्यः क्थन् इत्यस्य ग्रहणम् । सीति प्लुषिशुषिकुषिभ्यः क्सिरित्यस्य । सु इति सुक् च इषेः इत्यस्य । सरेति । आस्तेः क्सरच् इत्यस्य । केति इण्भीकापाशल्यतिमर्चिभ्यः कन्नित्यस्य । सेति वृतृवदिहनिकामिकषियुमुचिभ्यः स इत्यस्य । **देवदत्त** इति । दात्रः क्तप्रत्ययः । 'दोदद्घोः' इति ददादेशः । **यन्तिरित्यादि** । यमु उपरमे । रमु क्रीडायाम् । वनु बोधने । तनु विस्तारे ।

---

१. Dropped N_1. २. कृदुक्तिः N_1. ३. दीर्घत्वे N_1. ४. प्रति B_2. ५. बोधे Dc_3, PC.

न क्तिचि दीर्घश्च ॥६।४।३९॥

क्तिचि परे अनिटां वनतितनोत्यादीनां[1] दीर्घानुनासिकलोपौ न स्तः ॥ यन्ति । रन्तिः[2] । वन्तिः । तन्तिः ।

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥
॥६।४।४५॥

सनोतेः क्तिचि परे आकारोऽन्तादेशो नस्य लोपश्च वा स्यात् ॥ सातिः । सतिः । सन्तिः ।

कर्मण्यण् ॥३।२।१॥

कर्मण्युपपदे धातोरण् प्रत्ययः स्यात् ॥ उपपदसमासः[3] ।

सनः । अस्यग्रहणमनन्तरस्य क्तिचो मा भूत् व्यवहितस्यापि सन एव लोपो यथा स्यादित्येवमर्थम् । स च लोपः सनो भवन् अलोऽन्त्यपरिभाषया नकारस्यैव स्यादित्याह-नस्येति । सातिरिति । षण दाने ।

कर्मणि । कर्मणीति न स्वरूपग्रहणम् । 'अशब्दसंज्ञा' इति निषेधात् । नापि क्रियाग्रहणम् । क्रियावाचिन उपपदस्याभावात् । तस्मात् 'कर्तुरीप्सिततमम्' इति पारिभाषिकमेव गृह्यते । तच्च कर्म त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं चेति । तत्राद्यं यदसदेवोत्पद्यते । विकार्यं तु यस्य सत एव विकारः क्रियते । प्राप्यं तु यस्य नोत्पादो नापि विकारः किं तु क्रियासंबन्धमात्रं क्रियते । तस्य त्रिविधस्यापि ग्रहणम्[4] । **उपपदसमास** इति । 'तत्रोपपदम्' इत्युपपदसंज्ञायाम् 'उपपदम्—' इति समास इत्यर्थः ।

---

१. °दीनां च B₂, N₁. २. नन्तिः D₂, D₄. ३. उपपदमिति समासः D₁. ४. °ग्रह PC, Dc₃.

कुम्भं करोतीति कुम्भकारः । अघटं घटं करोतीति घटीकारः । आदित्यं पश्यतीत्यादावनभिधानान्न ।

ह्वावामश्च ॥३।२।२॥

एभ्यः कर्मण्युपपदेऽण् स्यात् । काण्डलावः । आतो युक् । स्वर्गह्वायः । तन्तुवायः । धान्यमायः ।

आतोऽनुपसर्गे कः ॥३।२।३॥

आदन्तादनुपसर्गे कर्मण्युपपदे कः स्यादणः ॥ आतो लोपः । गोदः । पार्ष्णित्रम् । अनुपसर्गे किम् । गोसंदायः ।

कुम्भकार इति । 'अचो ञ्णिति' इति वृद्धिः । **घटीकार** इति । 'अभूततद्भावे' इति च्विः । 'चुटू' इति च इत् । 'उपदेशेऽजनुनासिक—' इति इरित् । 'वेरपृक्तस्य' इति वलोपः । 'अस्य च्वौ' इतीत्वम् । **आदित्यं पश्यतीत्यादावनभिधानान्नेति** । अभिधानसामर्थ्यादित्यर्थः । अत्र चैतद् द्वयं ज्ञातव्यम् । 'शीलिकामि-भक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' । णे सति ङीप् न । मांसं शीलयतीति मांसशीलः । मांसशीला । मांसशब्दोऽन्तोदात्तः वृतुवदिहनिपचिकमिषिभ्यः सः मनेर्दीर्घश्चेति सप्रत्ययान्तत्वात् प्रत्ययस्वरेण । मांसकामा । मांसभिक्षा । कल्याणाचारा । कल्याण-शब्दो मध्योदात्तो लघावन्ते द्वयोश्च बह्वषो गुरुरित्यनेन । 'ईक्षि-क्षमिभ्यां च' । सुखप्रतीक्षा । बहुक्षमा ।

ह्वावाम इति । ह्वेञ् स्पर्धायां शब्दे च । वेञ् तन्तुसन्ताने । माङ् माने । मेङ् प्रतिदाने । **काण्डलाव इति** । '**आतोऽनुपसर्गे कः**' इति प्राप्तस्य । **पार्ष्णित्रमिति** । त्रैङ् पालने । **गोसंदाय** इति । अण् । आतो युक् ।

---

१. After it—शीलिकामिभिक्षाचरिईक्षिक्षमिभ्यो ण इति वाच्यम् । मांस-शीलः । मांसशीला । इत्यादि । N_1. २. D_1 drops it. ३. कल्याणाचारा । कल्याणचरा । PC. ४. प्रणिदाने PC, Dc_3.

सुपि स्थः ॥३।२।४॥

सुप्युपपदे तिष्ठतेः कः स्यात् ॥ समस्थः ।[1]

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥८।३।९७॥

एभ्यः परस्य स्थः सस्य षः स्यात् ॥[2] द्विष्ठः । त्रिष्ठः । सुपीति योगविभागादन्यस्मादादन्तात् कः[4] ॥ द्वाभ्यां पिबतीति द्विपः । पादपः । भावेपि कार्ये तिष्ठतिग्रहणम् । आखूनामुत्थानमाखूत्थं वर्तते । इत ऊर्ध्वं सकर्मकेषु कर्मानुवृत्तिरन्यत्र सुपः ।

अम्बाम्ब । अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्यष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः । स्थास्थिन् स्थूणामिति वक्तव्यम् । सव्येष्ठाः । परमेष्ठी । सव्येष्ठा सारथिः । **सुपीति योगविभागादिति** । अत्र 'सुपि' इत्येको योगः । तत्र च 'आतः' इत्यनुवर्तते । ततश्च सुप्युपपदे आदन्तेभ्यः कः प्रत्ययः स्यादित्यर्थः । द्वितीयः 'स्थः' इति । किमर्थमिदमुच्यते यतः पूर्वेणैव सिद्धमित्याशङ्क्याह-**भावेपीति** । आरम्भसामर्थ्यात् कर्तरि तावन्न । न चार्थान्तरमस्ति । तत्रानिर्दिष्टाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थ एव स्यादिति । **आखूत्थं वर्तत इति** । 'उदस्थाः स्तम्भोः पूर्वस्य' इति पूर्वसवर्णः । ननु आखूत्थमिति

---

१. After it—नाप् D_4. २. After it—वनस्थः N_1, D_2, D_4, C, B_2. ३. Before it—अम्बष्ठः D_4, B_2. ४. कः स्यात C; कः is omitted in D_1. ५. अत C. ६. आखूत्थो K. (नपुंसकपाठस्तु प्रामाणिकः K.)

तुन्दशोकयोः परिमृजापनुदोः ॥३।२।५॥

आभ्यां कः स्यात् तुन्दशोकयोः कर्मणोरुपपदयोः ॥ तुन्दपरिमृजोऽलसः । शोकापनुदः सुखस्याहर्ता ।

मूलविभुजादेश्च ॥ * मूलविभुजः ।[1] कुमुदम् । आकृतिगणः ।

नपुंसकत्वं न घटते । 'ल्युः कर्तरीमनिच् भावे कः' (अमरको० ३।५।१९) इत्यमरकोशे भावे कस्य पुंस्त्वविधानात् । 'भावे नणकचिद्भ्योऽन्ये' (अमरको० ३।५।२९) इति नपुंसकविधाने कस्य पर्युदासाच्च । भाष्यादौ च पुल्लिङ्गस्यैव प्रयोगाच्च । मैवं वोचः । 'ल्युः कर्तरीमनिच् भावे कः' इति पुल्लिङ्गत्वेपि[2] नपुंसकत्वाप्रतिषेधात् । 'भावे नणकचिद्भ्योऽन्ये' इति प्रतिषेधेपि गुणवचनतव्यादय इत्यनुवर्तमाने प्राक् घञ इति घञः प्राक् तव्यादीनां लिङ्गानुशासने त्रिलिङ्गत्वविधानात् सर्वस्य प्रयोगेणेति **चोक्तत्वादमरसिंहेपि** 'ज्ञेयं शिष्टप्रयोगतः' (अमरको० ३।५।४६) इत्युक्तत्वान्नपुंसकत्वमपि घटते । **अत एवेन्दुमत्यां वृत्तौ** नपुंसगप्रयोगो दृश्यते इत्यलम् । [3]अथवात्रापि पुल्लिङ्गपाठ एव ।

तुन्द । **परिमृजापनुदोरिति** सुब्व्यत्ययेन पञ्चम्यर्थे षष्ठीत्यभिप्रेत्याह-**आभ्यामिति** । मृजूष् शुद्धौ । परिपूर्वः । नुद प्रेरणे । अपपूर्वः । अलससुखाहर्त्रोरेवैतौ प्रयोगावित्यभिप्रेत्याह-**तुन्दपरिमृजोऽलस इत्यादि** ।

मूलविभुज इति । भुज कौटिल्ये । **कुमुदमिति** । कौ मोदते ।

---

१. After it–रथः C. २. °पि नपुंसकविधानेपि नपुं° Dc_1. ३. अथवा... एव Dropped Dc_3, PC.

प्रे दाज्ञः ॥३।२।६॥

कर्मणि प्रपूर्वाभ्यामाभ्यां कः स्यात्। सोपसर्गार्थमेतत्। सर्वप्रदः। पथिप्रज्ञः।

समि ख्यः ॥३।२।७॥

गोसंख्यः।

गापोष्टक् ॥३।२।८॥

कर्मण्यनुपसर्गाभ्यामाभ्यां टक् स्यात् न कः॥ सामगः। सामगी। पिबतेः सुराशीध्वोरिति वाच्यम्॥ * सुरापी। सीधुपी। अन्यत्र क्षीरपा। पिबतेः किम्। सुरापा। उपसर्गे तु सामसंगायः।

प्रे। गामादाग्रहणेष्वविशेष इति दारूपा गृह्यन्ते। **सोपसर्गार्थमेत**दिति। अनुपसर्गात्तु 'आतोनुपसर्गे कः' इत्येव सिद्धम्। **पथिप्रज्ञ** इति। पन्थानं जानातीत्यर्थः। प्रे किम्। गोसंदायः।

समि ख्य इति। 'चक्षिङः ख्याञ्' इति ख्याञादेशग्रहणम्। न ख्या प्रकथन इत्यस्य। एतच्च संपूर्वस्य ख्यातेः प्रयोगासंभवाल्लभ्यते।

गापोः। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव पिबतेर्ग्रहणं न पातेः। यद्यपि गामादाग्रहणेष्वविशेषस्तथापि गायतेरेव ग्रहणं न गातेरनभिधानात्। टकः कित्त्वमालोपार्थम्। टित्त्वं ङीबर्थं न तु 'आद्यन्तौ टकितौ' इत्येवमर्थम्। तत्राद्यन्तयोरवयवत्वात्। न च प्रत्ययोवयवो घटते। 'परश्च' इति वचनात्। किं चादित्वे कित्करणमनर्थकं स्यात्। **सामगी**ति। 'टिड्ढाणञ्—' इति ङीप्। **क्षीरपे**ति। 'आतोनुपसर्गे कः' इति कः। टित्त्वाभावाद् 'अजाद्यतष्टाप्' इति टाप्। **सुरापे**ति। पा रक्षणे। **सामगाय** इति। 'कर्मण्यण्'। 'आतो युक्'।

---

१. सुरापः। सुरापी। सीधुपः। सीधुपी। D4. २. सीधुपः D2: सीधुपी। सीधुपः B2. ३. क्षीरपः D4. ४. सुरापः D4. ५. °ग्रहस्य Dc3, PC. ६. ख्याधातोः Dc3. ७. ग्रहो Dc3.

हरतेरनुद्यमनेच् ॥३।२।९॥

कर्मणि हृञोच् स्यात् नोत्क्षेपणे ॥ अंशहरः । उत्क्षेपणे तु । भारहारः । शक्तिलाङ्गूलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहः ॥ *शक्तिग्रहः इत्यादि । सूत्रग्रहोपि ।

वयसि च ॥३।२।१०॥

वयसि द्योत्ये कर्मणि हृञोच् स्यात् ॥ उद्यमनार्थमेतत् । कवचहरः कुमारः ।

आङि ताच्छील्ये ॥३।२।११॥

फलान्याहरति तच्छीलः फलाहरः । ताच्छील्ये किम् । भाराहारः ।

हरते । **नोत्क्षेपण इति** । उत्क्षेपणमधः स्थितस्य वस्तुन ऊर्ध्वं नयनम् । **अंशहर इति** । योंशं स्वीकरोति न तूत्क्षिपति । **शक्तीति** । अत्र प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति घटग्रहणेनैव घटीग्रहणे सिद्धे पुनर्घटीग्रहणं तदस्याः परिभाषाया अनित्यत्वज्ञापनार्थम् । तस्य तु प्रयोजनं 'दित्यदित्यादित्य—' इत्येतत् सूत्रे उक्तम् । **शक्तिग्रह इत्यादि** । आदिशब्देन लाङ्गूलग्रहः । अङ्कुशग्रहः । यष्टिग्रहः । तोमरग्रहः । घटग्रहः । घटीग्रहः । धनुर्ग्रहः । **सूत्रग्रहोपीति** । अयं च धार्यर्थे । यः सूत्रं धारयति स सूत्रग्रहः । यस्तु केवलं गृह्णाति न धारयति असौ सूत्रग्राह एव भवति ।

वयसि । कालकृता शरीरावस्था यौवनादिर्वयः । **उद्यमनार्थमिति** । अनुद्यमने पूर्वेणैव सिद्धत्वात् । **कवचहर इति** । कवचोत्क्षेपसमर्थे वयसि वर्तते इत्यर्थः ।

आङि । **ताच्छील्यं** तत्स्वभावता । फलाहरणे स्वाभाविकी प्रवृत्तिरस्येत्यर्थः ।

अर्हः ॥३।२।१२॥

अस्माद्च् ॥ पूजार्हः । पूजार्हा ।

स्तम्बकर्णयो रमिजपोः ॥३।२।१३॥

'हलदन्त—' इति ङेरलुक् ।[2] स्तम्बेरमो हस्ती ।[3] कर्णेजपः सूचकः ॥[4]

अर्हः । पूजार्हा इति । अजन्तत्वात् टाप् । अणि हि[5] ङीपा भाव्यम् ।

स्तम्ब । रमु क्रीडायाम् । जप जल्प व्यक्तायां वाचि । आभ्यां स्तम्बकर्णयोरुपपदयोरच् स्यादित्यर्थः । रमेरकर्मकत्वात् कर्म न संभवत्येव । जपेश्च शब्दकर्मकत्वात् कर्मणः कर्म न भवतीति । 'सुपि' इत्येतदिह संबध्यते । हस्तिसूचकयोरेवैतौ प्रयोगावित्याह—स्तम्बेरमो हस्तीत्यादि । व्याख्यातप्रायमेवेत्युपेक्षितं सूत्रं व्याख्यायते—'शमि धातोः संज्ञायाम्' ॥३।२।१४॥ शम्युपपदे धातुमात्रात् संज्ञायां विषयेच् स्यात् । शंकरः । शंभवः । शंवदः । धात्वनुवृत्तौ धातुग्रहणं कृञो हेतुताच्छील्यानुलोम्येषु टप्रतिषेधार्थम् । शंकरा नाम काचित् तच्छीला तत्संज्ञा च ।

---

१. D₂, D₄ omit it. २. After it—हस्तिसूचकयोरिति वाच्यम् D₂, D₄. B₂. ३. After सूचक—अन्यत्र स्तम्बेरन्ता । कर्णेजपिता मशकः । D₂, D₄, B₂. ४. After it the Sûtra—शमिधातोः संज्ञायाम् ॥३।२।१३॥ शम्युपपदे धातुमात्रात संज्ञायामच् स्यात् । शंकरः । शंभवः । शंवदः । धातोरित्यनुवृत्तौ शमिधातुग्रहणं कृञो हेत्वादिषु प्रतिषेधार्थम् D₁. D₃, B₁, P, C, N (°त्यनुवृत्तेः P.; शमि [from शमिधातु°] dropped D₁; after प्रतिषेधार्थम् P has शङ्कराः परिव्राजकाः). ५. हि सति Pc. Dc₃. ६. °त्युपेक्षितमाचार्यैरथैमतमस्माभिः व्याख्यायते असूत्रपाठशाल्यर्थम् Pc, Dc₃.

अधिकरणे शेतेः ॥३।२।१५॥

खे[1] शेते खशयः ॥ पार्श्वादौ च ॥ *पार्श्वाभ्यां शेते पार्श्वशयः । उदरशयः । पृष्ठशयः । उत्तानः शेते उत्तानशयः ॥ गिरौ शेतेर्डः ॥ * गिरिशः ।

चरेष्टः ॥३।२।१६॥

अधिकरणे चरेष्टः स्यात् ॥ कुरुचरी[2] ।

भिक्षासेनादायेषु च ॥३।२।१७॥

एष्वपि[3] चरेष्टः[4] । भिक्षां चरति भिक्षाचरः । इत्यादि ।

अधिकरणे । अधिकरणे उपपदे शेतेरच् स्यात् । खशय इति । उपपदसमासः । **पार्श्वादौ चेति** । अनधिकरणार्थम् । **पार्श्वाभ्यामिति** । तृतीयान्तमुपपदमिति दर्शयति । **उत्तानः शेते** इत्य नेनविग्रहेण उत्तानादिषु कर्तृषु[6] उपपदेषु इति दर्शयति । दिग्धसहपूर्वाच्चेत्यपि वक्तव्यम् । दिग्धेन सह शेते इति दिग्धसहशयः । **गिरौ शेते इति** । छन्दसीति ज्ञातव्यम् ।

चरेः । प्रत्ययान्तरकरणं ङीबर्थमिति दर्शयति—**कुरुचरीति** ।

भिक्षा । अनधिकरणार्थोयमारम्भ इति दर्शयति—**भिक्षां चरतीति**[5] । आदिशब्देन सेनाचरः । आदायचरः । आदायेति ल्यबन्तमेतत् । अस्य च कर्मसापेक्षत्वेपि वचनसामर्थ्यात् प्रत्ययः ।

---

१. D_1 drops खे शेते; C has खे शेते इति. २. कुरुचरः । कुरुचरी B_3, D_4. ३. Before it—अनधिकरणार्थोयमारम्भः । N. ४. After it—स्यात् D_2, D_4, B_2. ५. चरतीति D_2. ६. कर्तृषु dropped PC., Dc_3.

पुरोऽग्रतोऽग्रेषु सर्तेः ॥३।२।१८॥

एषु सरतेष्टः स्यात् ॥ पुरःसरः । अग्रतःसरः । अग्रेसरः ।

कृञो हेतुताच्छील्यानुलोम्येषु ॥३।२।२०॥

कर्मणि कृञष्टः स्यात् हेत्वाद्यर्थे ॥

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥८।३।४६॥

कादौ परे अतः परस्य विसर्गस्य सः स्यात् समासे न

पुरः । पुराशब्दात् 'पूर्वाधरावराणामसि—' इत्यसिप्रत्ययान्तो व्युत्पादितः । अग्रतःशब्दोपि 'आद्यादिभ्य उपसंख्यानम्' इति तसिप्रत्ययान्तः । अग्रेशब्दस्यैदन्तत्वं निपात्यते अग्रेसरार्थम् । ननु च सप्तम्या अलुकापि सिध्यति । सत्यम् । यदा सप्तम्यन्तमुपपदं तदा सिध्यति । यदा द्वितीयान्तं तृतीयान्तं वोपपदं तदाग्रेसर इति न सिध्यतीति एदन्तत्वं निपात्यते । स्पष्टत्वात् त्यक्तं सूत्रमेकम्— 'पूर्वे कर्तरि' ॥३।२।१९॥ पूर्वशब्दे कर्तृवाचिन्युपपदे सर्तेष्टः स्यात् । पूर्वः सरतीति पूर्वसरः ।

कृञः । हेतुरैकान्तिकं कारणम् । ताच्छील्यं तत्स्वभावता । आनुलोम्यमनुलोमता ।

अतः । यशस्कारः । यशस्कामः । अयस्कंसः । अयस्कुम्भः । अयस्कुम्भी । अयस्पात्रम् । अयस्कुशा । अयस्कर्णी । अनव्ययस्य किम् । पुनःकारः । समासे एव । यशः करोति । अनुत्तरपदस्थ-

---

१. Before it—पूर्वे कर्तरि ॥ पूर्वशब्दे कर्तृवाचिनि सरतेष्टः । पूर्वः सरतीति पूर्वसरः । कर्तरि किम् । पूर्वं देशं सरति । पूर्वसारः । N. २. 'पूर्वे कर्तरि' एतच्च सूत्रं स्पष्टत्वात् त्यक्तं व्याख्यायते PC. Dc has एतच्च &c. as in PC after the Sûtra. ३. After; it—कर्तरीति किम् । पूर्वदेशं सरति पूर्वसारः PC, Dc3. ४. यशस्करः PC. ५. अयस्कामः Dc1.

त्वव्ययस्य ॥ ×[1] कापवादः । यशस्करी विद्या । श्राद्धकरः[2] । वचनकरः ।[3]

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु ॥३।२।२१॥

एषु कृञष्टः स्यादहेत्वादावपि ॥ दिवाकरः । भास्करः[4] । निपातनात् सः । भास्करः । कारकरः[5] । इत्यादि ॥

स्येत्येव । परमपयःकामः । यशस्करी विद्येति हेतौ उदाहरणम् । श्राद्धकर इति ताच्छील्ये । वचनकर इति आनुलोम्ये ।

दिवा । इत्यादीति । आदिशब्देन विभाकरः । निशाकरः । प्रभाकरः । अन्तकरः । अनन्तकरः । कस्मिंश्चिदुपपदविधौ तदन्तविधिर्नास्तीति अन्तानन्तयोर्ग्रहणम् । न च नान्तकरोनन्तकर इति समासः । अत्रोत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वमिष्टं तद्भङ्गप्रसङ्गात् । नञ्स्वरेणाद्युदात्तत्वापातात् । आदिकरः । बहुकरः । बहुशब्दोयं विपुलवाची । संख्याया वक्ष्यमाणत्वात् । नान्दीकरः । किंकरः । [6]लिपिकरः ।[7] लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकरः । क्षेत्रकरः । संख्याकरः । जङ्घाकरः । बाहुकरः । अहस्करः । नकारस्य रेफस्य विसर्गः । तस्य 'अतः कृकमि—'

---

१. × क × पापवादः P. २. After it—श्रोत्रियः B_2. ३. After it—पूर्वे कर्तरि कर्तृवाचिन्यस्मिन् सरतेष्टः स्यात् । पूर्वः सरति पूर्वसरः । कर्तरि किम् । पूर्वं देशं सरति पूर्वसारः । C; D_1 has it also—(कर्तरि वाच्ये in D_1 for *कर्तृवाचिनि*). ४. *भास्कर इत्यत्र* N_1. ५. निशाकरः । D_1; कारस्कारः B_2. ६. om । Dc_1, ७. om लिबिकरः । Dc_1. ८. om—बलिकरः Dc_1.

किंयत्तद्बहुष्वज्वा ॥* किंकरा स्त्री । इत्यादि ।

कर्मणि भृतौ ॥३।२।२२॥

कर्मशब्दे कृञष्टः स्याद् भृतौ ॥ कर्मकरो भृतकः । कर्मकारोन्यः ।

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥३।२।२३॥

एषु कृञष्टो न हेत्वादौ ॥ शब्दकारः । इत्यादि ।

स्तम्बशकृतोरिन् ॥३।२।२४॥

एतयोः कृञ इन् स्यात् ॥ न इत् । स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः ।

इति सः । यत्करः । तत्करः । धनुष्करः । अरुष्करः । किंकरा स्त्रीति । अजन्तत्वाट्टाप् । आदिना । यत्करा । तत्करा । बहुकरा ।

कर्मणि । कर्मानुवृत्तौ पुनः कर्मग्रहणं स्वरूपग्रहणार्थमित्यभिप्रेत्याह—**कर्मशब्द** इति । भृतिर्वेतनं तस्मिन् गम्यमाने ।

न शब्द । ' कृञो हेतुताच्छील्य—' इति संप्राप्तष्टो निषिध्यते । आदिना । श्लोककारादि ।

स्तम्ब । नकारो ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तार्थ इत्याह—न इदिति । व्रीहिवत्सयोरेव वाच्ययोर्भवतीत्याह—**स्तम्बकरिर्व्रीहिरित्यादि** ।

---

१. °षु कृञोऽश्च C. २. कर्मशब्दोपपदे D1, . B2. ३. नकार N. ४. Before it—व्रीहिवत्सयोरितिवाच्यम् । N.

हरतेर्दृतिनाथयोः पशौ ॥३।२।२५॥

हृञ एतयोरिन् स्यात् पशौ कर्तरि ॥ दृतिहरिः पशुः। नाथहरिः।

फलेग्रहिरात्मम्भरिश्च ॥३।२।२६॥

एतौ निपात्यौ[1] ॥ चात् कुक्षिम्भरिः। उदरम्भरिः॥ देवानाप्नोति[2] देवापिः। वातापिः। रजोग्रहिः। मलग्रहिरिति[3] केचित्।

एजेः खश् ॥३।२।२८॥

कर्मणि ण्यन्तादेजेः खश् स्यात् ॥

अरुर्द्विषदजन्तस्य मुम् ॥६।३।६७॥

अरुषो द्विषतोजन्तस्य च[4] मुमागमः स्यात् खिदन्ते उत्तर-

हरते। 'पशौ' इति प्रत्ययार्थस्य कर्तुर्विशेषणमित्याह—पशौ कर्तरीति।

फले। फलानि गृह्णाति आत्मानं बिभर्तीति विग्रहः। यूथमसेवमानः कुक्षिम्भरिः। उदरम्भरिः। देवानित्यादि। तथोक्तं दुर्गेण। 'फलेमलरजस्सु ग्रहः देववातयोरापेः' इति।

एजेः। एजृ कम्पने। खकारो मुमर्थः। शकारः सार्वधातुकसंज्ञार्थः।

अरु। अन्तग्रहणेन कार्यान्तरस्यान्तेवसाने मुम् कर्तव्य इत्येषोर्थः सूच्यते। अतो ह्रस्वत्वे कृते पश्चान्मुम् स्यात्।

---

१. निपात्यैते D1. २. Before it—देववातयोरापेः N. ३. मूलेग्रहिः C; मलग्रहिः। रजोग्रहिरिति केचित्। N. ४. Dropped in C1, D1.

पदे न त्वव्ययस्य ॥ शित्त्वाच्छेबादि ॥ जनमेजयः । वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः खश्[२] ॥ * वातमजः ।

खित्यनव्ययस्य ॥६।३।६६॥

खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात्[३] । ततो मुम् ॥ शुनिन्धयः । तिलन्तुदः । शर्द्धञ्जहः[४] ।

नासिकास्तनयोर्ध्माधेटोः ॥३।२।२९॥

स्तने धेटः नासिकायां ध्माधेटोः खश् स्यात् ॥ स्तनन्धयः । नासिकन्धमः । नासिकन्धयः[५] । धेटष्टित्त्वात् स्तनन्धयी ।

शित्त्वादिति । खशः शित्त्वात् सार्वधातुकसंज्ञायां शप्गुणायादेशा इत्यर्थः । **जनमेजय** इति ।

वातेति । अज गतौ । धेट् पाने । तुद व्यथायाम् । ओहाक् त्यागे । वातमजतीति वातमजः । शप् । मुम् ।

खिति । उत्तरपदाधिकारेऽपीह तदन्तग्रहणस्यानव्ययस्येत्येष निषेधो ज्ञापक इत्यभिप्रेत्याह—**खिदन्त** इति । मुमा ह्रस्वबाधो न । अन्यथा ह्रस्वविधानमनर्थकं स्यादित्यभिप्रेत्याह—**ततो मुमिति** । शुनीं धयतीति तिलांस्तुदतीति शर्धं जहातीति विग्रहाः ।

नासिका । अल्पाच्तरस्यापूर्वनिपाताल्लक्षणव्यभिचाराद् ज्ञायते यथासंख्यलक्षणस्याप्यत्र व्यभिचार इति चेतसि कृत्वाह—**स्तने धेटः नासिकायां ध्माधेटोरिति** । **नासिकंधम** इति । 'पाघ्रा—' इति धमादेशः । 'खिति—' इति ह्रस्वः । 'अरुर्द्विषत्—' इति मुम् । **धेट** इति । 'टिड्ढाणञ्—' इति ङीबिति भावः ।

---

१. °च्छबादि: D_1, २. After it—वाच्य: C. ३. After it—नत्वव्ययस्य D_1, B_2. ४. गर्धंजह: B_2, D_4 (शर्धंजह: also noticed D_4). ५. C drops it

नाडीमुष्ट्योश्च ॥३।२।३०॥

एतयोर्ध्माधेटोः खश् स्यात् ॥ नाडिन्धमः । [1]नाडिन्धयः । मुष्टिन्धमः । मुष्टिन्धयः । चात् घटिन्धमः । घटिन्धयः । [2]खरिन्धमः । खरिन्धयः । [3]वातन्धमः । वातन्धयः । मुञ्जकूलास्यपुष्येषु धेटः खशिति केचित् । मुञ्जन्धयः । इत्यादि ॥

उदि कूले रुजिवहोः ॥३।२।३१॥

उत्पूर्वाभ्यां रुजिवहाभ्यां कूले कर्मणि खश् स्यात् ॥ कूलमुद्रुजः [4]। कूलमुद्वहः ॥

वहाभ्रे लिहः ॥३।२।३२॥

वहंलिहः । अभ्रंलिहः । बाहुंलिहोऽपीति केचित् । अपित्-सार्वधातुकत्वान्न गुणः ।

नाडी । अत्रापि द्व्यन्तस्यापूर्वनिपातात् संख्यातानुदेशो नेत्यभिप्रेत्योदाहरति—**नाडिंधम** इत्यादि । **मुञ्जे**त्यादि । तथोक्तं **दुर्गेण** 'शुनीस्तनमुञ्जकूलास्यपुष्पे धेट' इति ।

उदि । रुजो भङ्गे । वह प्रापणे । **कूलमुद्रुज** इति । तुदादित्वाद्गुणाभावः ।

वहा । वहाभ्रयोः कर्मणोरुपपदयोर्लिह आस्वादने अस्मात् खश् स्यात् । वहं लेढि अभ्रं लेढि इति विग्रहौ । **अपित्सार्वे**ति । खशः 'सार्वधातुकमपित्' इति ङित्त्वाद्गुणाभावः । 'क्ङिति च' इत्यनेनेत्यर्थः ।

---

१. Dropped N. २. खारिन्धमः । खारिन्धयः D_2, B_2, D_4. ३. Dropped C. ४. After it—पूरः N. ५. ङित्त्वात् क्ङिति च इति गुणनिषेध इत्यर्थः Dc_3, PC.

परिमाणे पचः ॥३।२।३३॥

परिमाणे प्रस्थादौ[1] पचः[2] खश् स्यात्[3] ॥ प्रस्थम्पचा स्थाली ।

मितनखे च ॥३।२।३४॥

एतयोः पचः[4] खश् स्यात्[5] ॥ मितम्पचः । नखम्पचः ।

विध्वरुषोस्तुदः ॥३।२।३५॥

विधुन्तुदः । संयोगान्तलोपः[6] । अरुन्तुदः ।

असूर्यललाटयोर्दृशितपोः ॥३।२।३६॥

एतयोः कर्मणोः[9] क्रमात् दृशितपोः खश् स्यात् ॥ असूर्यमित्यसमर्थसमासः । दृशिना नञः सम्बन्धात् । सूर्यं[7] न पश्यन्त्यसूर्यम्पश्याः राजदाराः[8] । ललाटन्तपः सूर्यः ।

परि । अत्र प्रस्थादिशब्दः प्रस्थादिप्रमितेषु यवादिषु वर्तते । परिमाणविशेषस्य काष्ठादिमयस्य पाकस्य विक्लित्तिलक्षणस्यासंभवात् ।

मित । अपरिमाणार्थ आरम्भः ।

विध्वरुषोः । विधु अरुस् एतयोः कर्मणोरुपपदयोस्तुदः खश् । **संयोगान्तलोप** इति । अरुस् तुद इति स्थिते 'अरुर्द्विषद्—' इति मुमि संयोगान्तस्य सस्य लोप इत्यर्थः । 'मोनुस्वारः' । 'अनुस्वारस्य ययि परसवर्णः' ।

असूर्य । **असूर्यम्पश्या** इति । 'पाघ्राध्मा—' इति पश्यादेशः । एवं गुप्ता दारा यदपरिहार्यं सूर्यमपि न पश्यन्तीत्यर्थः ।

---

१. After it—च C. २. पचेः D₃, P. ३. Dropped B₂. ४. पचेः D₃, D₄. ५. Dropped in D₂. ६. संयोगान्तस्य C, P. ७. न सूर्यं N. ८. दाराः for राजदाराः C, D₁, N. ९. अनयोः Do₃, Pc.

उग्रम्पश्येरम्मदपाणिन्धमाश्च ॥३।२।३७॥

एते निपात्याः । उग्रम्पश्यः । इरया माद्यति[1] इरम्मदः । पाणयो ध्मायन्ते[2] पाणिन्धमोऽध्वा । शुनिन्धमः । करन्धम[4] इत्यपि केचित् ।

प्रियवशे वदः खच् ॥३।२।३८॥

एतयोर्वदेः[5] खच् स्यात् ॥ प्रियंवदः । वशंवदः ॥ गमेः सुपि वाच्यः । भुजङ्गमः । विहायसो विह च ॥* विहङ्गमः । खच्च[6] डिद्वाच्यः । विहङ्गः ।[7] भुजङ्गः ।

द्विषत्परयोस्तापेः ॥३।२।३९॥

एतयोर्ण्यन्तात् तपेः खच् स्यात् ॥ णिलोपः ।

उग्रम् । उग्रम्पश्य इत्यत्र कर्मण्यणि प्राप्ते इरम्मद इत्यत्र तुजादौ पाणिन्धम इत्यत्राधिकरणे ल्युटि खश् निपात्यते । **इरया माद्यतीति** । इरया अम्भसा माद्यतीतीरम्मदो[8] मेघज्योतिः । अविन्धनत्वात् ।

प्रिय । खकारो मुमर्थः[9] । चकारः 'खचि' इति विशेषणार्थः । प्रत्ययान्तरकरणमुत्तरार्थम् । **भुजङ्गम इति** । भुजेन कौटिल्येन गच्छति । **विहङ्गम इति** । विहायसा आकाशेन गच्छति । **खच्च डिद्वाच्य इति** । 'गमेः सुपि' इत्यस्मात् भेदेन पाठो डित्त्वस्यानित्यत्वज्ञापनार्थः । अन्यथा विहङ्गम इति न स्यात् ।

द्विषत् । तप संतापे । भ्वादिः । तप दाहे । चुरादिः । द्वयोरपि ग्रहः । ण्यन्तावस्थायां विशेषाभावात् । **णिलोप इति** । 'णेरनिटि' इति ।

---

१. माद्यतीति D_4. २. ध्मायन्ते इति D_4. ३. Before it—अस्मिन्निति D_2. ४. करन्धमः । काकिन्धमः । इति केचित् D_2; करन्धमः । काकिन्धमः । काटिन्धमः । इति केचित् B_2, D_4. ५. °र्वदः D_1. ६. खज्वा D_1. ७. Before it—डित्त्वात् टिलोपः B_2. ८. माद्यति स्फुरतीति Dc_3. ९. मुं॰ र्थः Dc_1.

खचि ह्रस्वः ॥६।४।९४॥

खच्परे णावुपधाया ह्रस्वः स्यात् ॥ द्विषन्तं परं वा तापयति द्विषन्तपः । परन्तपः । द्विषत्परेति द्वितकारोक्तेः स्त्रियां न । द्विषतीतापः ।

वाचि यमो व्रते ॥३।२।४०॥

वाक्शब्दे यमेः खच् स्यात् व्रते[1] ॥

वाचंयमपुरन्दरौ च ॥६।३।६९॥

मुमर्थमेतौ खचि निपात्यौ ॥ वाचंयमो मौनव्रती ।[2]

पूः सर्वयोर्दारिसहोः ॥३।२।४१॥

पुरि दारेः सर्वशब्दे सहेश्च खच् स्यात् ॥ पुरन्दरः । सर्वसहः ।

भगे च दारेः ॥* भगन्दरः ।

खचि । 'मितां ह्रस्वः' इत्यतो मण्डूकप्लुतिन्यायेनानुवर्तमानेपि ह्रस्वे ह्रस्वग्रहणं विस्पष्टार्थः । द्विषत्परेतीति । 'द्विषत्परयोः' इति सूत्रे द्वौ तकारावुच्येते । तयोरेको द्विषच्छब्दस्यावयवो द्वितीयस्तु विशेषणार्थः । द्विषच्छब्दे तकारान्ते उपपदे इति । तेन स्त्रियां न । अन्यथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति तत्रापि स्यादित्यर्थः । द्विषतीताप इति । कर्मण्यण् ।

वाचि । व्रतमिति शास्त्रीयो नियमः ।

वाचं । न च वाच्यं प्रत्ययो निपातनादेव स्यादिति । पचाद्यचा नियमे सिद्धे निपातस्यासंभवात् । एवं च सति नित्य उपपदसमासो न स्यात् । तस्मात् प्रत्ययश्च निपातनं च कर्तव्यम् । दारीति । दॄ विदारणे । अस्य णिचा निर्देशः । षह मर्षणे । पुरन्दर इति । 'खचि' इति ह्रस्वः । 'वाचंयम—' इति मुमर्थो निपातः ।

---

१. Dropped N_1. २. After it—व्रते किम् । वाग्यामः । N_1.

सर्वकूलाभ्रकरीषेषु कषः ॥३।२।४२॥

एषु कषः[1] खच् स्यात् ॥ सर्वङ्कषः । इत्यादि ।

मेघर्तिभयेषु कृञः ॥३।२।४३॥

एषु कृञः खच् स्यात् ॥ मेघङ्करः । इत्यादि ।

अभयादौ च ॥ *अभयङ्करः ।[2]

क्षेमप्रियमद्रेण् च ॥३।२।४४॥

एषु कृञोण् स्यात् खच् च ॥ क्षेमकारः । क्षेमङ्करः[3] । इत्यादि । अणुक्तेर्हेत्वादौ टो न ।

आशिते भुवः करणभावयोः ॥३।२।४५॥

आशिते सुपि भवतेः खच् स्यात्[4] करणे भावे चार्थे ॥ आशितो भवत्यनेन आशितम्भव ओदनः । आशितम्भवो[5] वर्तते ।

सर्व । कष हिंसार्थः । आदिना कूलङ्कषा नदी । अभ्रङ्कषो वायुः । करीषङ्कषा वात्या ।

मेघ । अपवादत्वादणं बाधते । हेत्वादिविवक्षायां परत्वात् टो भवति । आदिना ऋतिङ्करः । भयङ्करः । अभयादौ चेत्यादिग्रहणं तदन्तविधिं सूचयति ।

क्षेम । ननु वेति खचि विकल्पिते पक्षेण् सिद्धः किमर्थं वाग्रहणं परित्यज्याण्ग्रहणं कृतमित्याशङ्क्याह—**अणुक्तेरि**ति ।

आशिते । अत्र 'सुपि' इत्युपतिष्ठते न 'कर्मणि' इति । भवतेरकर्मकत्वादित्यभिप्रेत्याह—**आशिते सुपी**ति । ल्युट्घञोरपवादोयम् । वासरूपविधानाद् ल्युड् भवत्येव । आशितं भवति आशितम्भवनम् ।

---

१. कषेः D_2. २. After it—इत्यादि N. ३. D_2, B_2 drop क्षेमङ्करः ४. D_2 drops it. ५. °म्भवं P, C, N_1.

संज्ञायां भृतॄवृजिधारिसहितपिदमः ॥३।२।४६॥

एभ्यः सुपि खच् स्यान्नाम्नि ॥ विश्वम्भरः । रथन्तरं साम । पतिंवरा । धनञ्जयः । वसुन्धरा । शत्रुंसहः । शत्रुन्तपः[1] । अरिन्दमः ।[2]

गमश्च[3] ॥३।२।४७॥

गमः[4] खच् स्यान्नाम्नि ॥ सुतङ्गमः ।

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः[5] ॥३।२।४८॥

एषु गमेर्डः स्यात् । डित्त्वकरणसामर्थ्यात् टिलोपः । अन्तगः । इत्यादि । सर्वत्रपन्नयोश्च ॥ * सर्वत्रगः । पन्नगः ॥ उरसो लोपश्च[6] ॥ * उरसा गच्छति[7] उरगः । उरङ्गमोपीति केचित् ॥

संज्ञायाम् । यथायोगं कर्मणि सुपीति संबध्यते । विश्वम्भर इति । विश्वं बिभर्ति । रथेन तरति । पतिं वृणोति । धनं जयति । वसुं धारयति । शत्रुं सहते । शत्रुं तपति । अरिं दाम्यतीति यथायथं विग्रहाः ।

गमः । योगविभागो गमेरेवोत्तरानुवृत्त्यर्थः ।

अन्ता । ननु डित्करणेप्यभत्वात् टिलोपो न स्यादित्याशङ्क्याह–डित्त्वकरणसामर्थ्यादिति । आदिना अत्यन्तगादि । **पन्नग** इति । पद्भ्यां न गच्छति । **उरङ्गमोपीति** । तथा च **कौमारे** वदः खप्रिय–वशयोरित्यनुवर्तमाने 'उरोविहायसोरविहौ वा' इत्युक्तम्[8] ।

---

१. After it—शत्रुञ्जयः D4. २. After it—संज्ञायां किम् । कुटुम्बभारः। ३. गमेश्च D2. ४. गमेः D2. ५. Before it—संज्ञायामिति नानुवर्तते । N. ६. उरसोन्तलोपश्च D1 ; उरसः सलोपश्च D2. ७. गच्छतीति D2. ८. *From* उरङ्गमो'...*to* इत्युक्तम् dropped in PC., Dc3; PC. has आदिना अन्तङ्गेति । विहङ्गस्यात्री । Dc3 has विहगेत्यादि ।

सुदुरोरधिकरणे ॥* सुखेन गम्यते[1]त्र सुगः । दुःखे[2]न गम्यतेत्र दुर्गः ॥ निरो[3] देशे ॥* निर्गो देशः । अन्यत्रापि दृश्यते ॥* [4]ग्रामगः । [5]विहगतुरगभुजगपतगप्लवगादयोप्येवं ज्ञेयाः ॥

आशिषि हनः ॥३।२।४९॥

कर्मणि हन्तेर्डः स्यादाशिषि ॥ शत्रुं वध्यात् शत्रुहः । [6]दारावाहनोणन्त्यस्य च टः संज्ञायाम् ॥* दा[7]रावाङ्पूर्वाद्धन्तेरण्प्रत्ययः स्यादन्त्यस्य च टो नाम्नि ॥ (दार्वाहन्तीति दार्वाघाटः ।)[*] कर्मणि समि च ॥* कर्मण्युपपदे संपूर्वस्य हन्तेरण्प्रत्ययः स्यात् अन्त्यस्य च टो वा । वर्णान् संहन्तीति वर्णसंघाटः । वर्णसंघातः ।

विहगेत्यादि । विहायसा गच्छतीति विहगः । विहायसो विह च । तुरया वेगेन गच्छतीति तुरगः । भुजेन कौटिल्येन गच्छतीति भुजगः । [8]पतेन गच्छतीति पतगः । प्लव उत्पतनं तेन गच्छति प्लवगः । आदिना प्रवगादयः ।

आशिषि । अप्रसिद्धत्वात् तज्जनितशब्दानामुपेक्षितं वक्तव्यत्रयं व्याख्यायते । ‘दारावाहनोणन्त्यस्य च टः संज्ञायाम्’ । चारौ वा टः । दार्वाघाटः । चार्वाघाटः । चार्वाघातः । ‘कर्मणि समि च’ ॥ कर्मणि संपूर्वाद्धन्तेरण् वा च टोन्त्यस्य । वर्णसंघाटः । वर्णसंघातः ।

---

१. अस्मिन् for अत्र D_3, B_2. २. दुःखेन गम्यतेत्र–Dropped B_2, N, D_4. ३. निसो N. ४. Before it—गुरुतल्पगः N. ५. विहगः । तुरगः । भुजगः । पतगः । प्रवगप्लवगा° C; विहगः । तुरगः । भुजगः । पतगः । प्लवगा° D_2, D_4. ६. P, B_2, N_1 drop from दारा° to वर्णसंघातः ७. दाराशब्दे आङ्पूर्वा° D_2. ८. पतन् गच्छति पतङ्गः Do_3; पतन् गच्छति पतगः PC. ९. After it—दाराबुपपदे आङ्पूर्वाद्धन्तेरण् वक्तव्यः अन्त्यस्य च टो वक्तव्यः । दार्वाघाटः । चाराबुपपदे आङ्पूर्वाद्धन्तेरण् अन्त्यस्य च वा टः । चार्वाघाटः &c. PC.

अपे क्लेशतमसोः ॥३।२।५०॥

एनयोरपपूर्वाद्धन्तेर्डः स्यात् ॥ क्लेशापहः । तमोपहः ॥[1]

लक्षणे जायापत्योष्टक् ॥३।२।५२॥

अनयोर्हन्तेष्टक् स्याल्लक्षणे द्योत्ये ॥ जायाघ्नो ना । पतिघ्नी स्त्री ।

अपे । अनाशीरर्थ आरम्भः । स्पष्टत्वात् त्यक्तं सूत्रं[2] प्रसङ्गाद्व्याख्यायते—'कुमारशीर्षयोर्णिनिः' ॥३।२।५१॥ कुमार-शीर्षयोरुपपदयोर्हन्तेर्णिनिः स्यात् । निपातनाच्छिरसः शीर्षभावः[3] । कुमारघाती । शीर्षघाती ।

लक्षणे । जायाघ्न इति । कित्त्वात् 'गमहन—' इत्यादिनोपधा-लोपः । 'हो हन्तेः—' इति कुत्वम् । पतिघ्नीति । टित्त्वात् ङीप् ।

---

१. After this the Sûtra—'कुमारशीर्षयोर्णिनिः' ॥३।२।५१॥—एतयोरुपपदयोर्हन्तेर्णिनिः स्यात् ॥ कुमारघाती । शीर्षघाती । निपातनात् शिरसः शीर्षभावः D_1, D_3, B_1, C_1, N (D_1 drops the Vṛitti, and has कुमारघाती and शीर्षघाती after शीर्षभावः ; After शीर्षभावः N has—दारावाहनोणन्तस्य च टः संज्ञायाम् ॥ दारौ उपपदे सति आङ्पूर्वाद्धन्तेरण् व्यक्तव्यः । अन्तस्य च टो वक्तव्यः । दारौ आहन्ति दार्वाघाटः । चारौ वान्तस्य च टः । आङ्पूर्वाद्धन्तेश्च दशब्दे उपपदे अण् स्यात् अन्तस्य च टो वा । चार्वाघाटः । चार्वाघातः । कर्मणि समि च ॥ कर्मण्युपपदे संपूर्वाद्धन्तेरण् स्यात् वा च टोन्त्यस्य । वर्णान् संहन्ति वर्णसंघातः । वर्णसंघाटः. २. This is given after the Sûtra कुमार° and is as under:—स्पष्टत्वात् पूर्वसूत्रव्याख्यानेनैव व्याख्यातत्वाच्चोपेक्षितं सूत्रं व्याख्यायते Dc_3; PC omits from स्पष्ट° to व्याख्यायते. ३. निपातनाच्छि° Dc_3.

अमनुष्यकर्तृके च ॥३।२।५३॥

कर्मणि हन्तेष्टक् स्यात् अमनुष्यकर्तृकेऽर्थे ॥ पित्तघ्नं घृतम् ।[1] मनुष्ये तु आखुघातः शूद्रः ।[2] बाहुल्याच्चोरघातो हस्ती ।[3]

(शक्तौ हस्तिकपाटयोः ॥३।२।५४॥

एनयोरुपपदयोर्हन्तेष्टक् स्यात् शक्तौ गम्यमानायाम् ।[4] मनुष्यकर्तृकार्थमारम्भः ।[5] हस्तिघ्नः । कपाटघ्नः ।[6])

पाणिघताडघौ शिल्पिनि ॥३।२।५५॥

एतौ निपात्यौ शिल्पिनि ॥ राजघश्च ॥[7] * राजानं हन्ति राजघः ।[8]

अम । बाहुल्यादिति । 'कृत्यल्युटो बहुलम्' इति ।

स्पष्टत्वात् त्यक्तमेकम्—'शक्तौ हस्तिकपाटयोः' ॥३।२।५४॥ हस्तिकपाटयोः कर्मणोरुपपदयोर्हन्तेष्टक् स्यात् शक्तौ गम्यायाम् । मनुष्यकर्तृकार्थ आरम्भः । हस्तिघ्नः । कपाटघ्नः । यस्तु स्वयं शक्तः स उच्यते । यस्तूपायान्तरेण हन्ति हस्तिघात एव सः ।

पाणि । टक् घत्वं टिलोपश्च निपात्यते । शिल्पिनि किम् । पाणिघातः ।

---

१. After it—वातघ्नं तैलम् D_2, B_2, D_4. २. D_2, B_2, D_4 drop बाहु° ...हस्ती. ३. The Sûtra and its Vritti are omitted in P, C, N. ४. D_2 omits एतयो :...गम्यमानायाम्. ५. °र्थमेतत् D_2 D_4, B_2. ६. हस्तिनं हन्तुं समर्थो हस्तिघ्नो ना । कपाटघ्नः । शक्तौ किम् । विषेण हस्तिनं हन्ति हस्तिघातः । बाहुल्याच्चोरघातो हस्ती D_2, D_4, B_2 (After °च्चोरघातो हस्ती B_2 has—ब्रह्मवृत्रशत्रुकृतादिषु च टक् । ब्रह्मघ्नः) ७. Before it—ब्रह्मवृत्रशत्रुकृतादिषु च टक् । N. ८. राज्ञो D_2, B_2. ९. After it—कुमारशीर्षयोर्णिनिः । कुमारघाती B_2, D_1. १०. This is after the Sûtra as follows:—एतदपि स्पष्टत्वादुपेक्षितम् PC., Dc_3.

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥३।२।५६॥

एषु च्व्यर्थेष्वच्व्यन्तेषु कृञः करणेर्थे[1] ख्युन् स्यात् ॥ अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम् । सुभगंकरणम् । स्थूलंकरणम् । प्रियंकरणम्[2] । अच्वौ किम् । आढ्यीकुर्वन्त्यनेन । प्रतिषेधसामर्थ्याल्ल्युडपि न । न ह्यत्र ख्युन्ल्युटो रूपभेदः । च्व्यन्तस्याव्ययत्वेन मुमोभावात् ।[3]

कर्तरि भुवः खिष्णुच्खुकञौ ॥३।२।५७॥

आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु[4] भुवः कर्त्रर्थे खिष्णुच्खुकञ् एतौ स्तः[5] । अनाढ्यः आढ्यो भवति[6] आढ्यंभविष्णुः ।

आढ्यसुभगेति । आढ्यंकरणमिति । 'अरुर्द्विषदजन्त—' इति मुम् । 'टिड्ढाणञ्—' इति ङीप् । प्रत्याहारन्यायेन पलितंकरणम् नग्नंकरणम् अन्धंकरणम् एतान्यप्युदाहरणानि ज्ञातव्यानीत्यभिप्रायेण प्रियंकरणमित्युदाहृतम् । ननु आढ्यीकरणमिति न भाव्यमच्वाविति प्रतिषेधः कृतः । तत्र ख्युनि प्रतिषिद्धेपि ल्युट् भविष्यत्येव किं प्रतिषेधेनेत्याशङ्क्याह—**प्रतिषेधसामर्थ्यादिति** । तदेवोपपादयति—**न हीति** । उत्तरार्थश्च प्रतिषेध इति **भाष्यकारमतम्** । च्व्यर्थेषु किम् । तैलेनाढ्यं कुर्वन्ति । अभ्यञ्जयन्तीत्यर्थः । धातूनामनेकार्थत्वात् ।

कर्तरि । आदिना सुभगंभविष्णुः । सुभगंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः ।

---

१. P drops **अर्थे**. २. Dropped in D_1. ३. After it—**च्व्यर्थेष्विति किम् । आढ्यं तैलेन कुर्वन्ति अभ्यञ्जयन्तीत्यर्थः । धातूनामनेकार्थत्वात्** । N_1. ४. **अच्व्यन्तेषु** is dropped in D_2, D_4. ५. °**खुकञौ स्तः** C; °**खुकञौ एतौ स्तः** D_1. ६. **भवतीति** C. ७. **निषेधः** PC., Dc_3.

आढ्यंभावुकः । इत्यादि । त्यदादिषु दृश इति कञ्किनौ । तादृशः । तादृक् । समानान्ययोश्च ॥ सदृशः । सदृक् । अन्यादृशः । अन्यादृक् । दृशेः क्सश्च । सदृक्षः । तादृक्षः । अन्यादृक्षः ।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप् ॥३।२।६१॥

एभ्यः सुप्युपपदे उपसर्गे सत्यपि क्विप् स्यात् ॥

प्रियंभावुकः । कर्तरि किम् । करणे मा भूत् । च्व्यर्थे किम् । आढ्यो भविता । अच्वौ किम् । आढ्यी भविता ।

'उदात्तत्वाद् भुवः सिद्धमिकारादित्वमिष्णुचः ।
नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ॥'

भवतेरुदात्तत्वात् प्रतिषेधाभावात् वलादिलक्षण इट् स्यात् । किमर्थमिष्णुच इकारेण । अत्रोत्तरम् । नञस्तु इति । नञ उत्तरस्य अनाढ्यंभविष्णुरस्य 'कृत्योकेष्णुच्चार्वादयश्च' इति अन्तोदात्तार्थमिकारादित्वमन्यथा लाक्षणिकत्वादस्य ग्रहणं न स्यादित्यर्थः । 'स्पृशोनुदके क्विन्' 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति सूत्रद्वयं सुबन्त एव व्याख्यातमितीह नोक्तम् । 'त्यदादिषु—' इति व्याख्यातमपि पुनरुच्यते । तत्र सर्वोदाहरणानामनुक्तत्वात् । तादृश इति । स इव दृश्यते । 'आ सर्वनाम्नः—' इत्यात्वम् । सदृक् इति । 'समानस्य सः' इत्यनुवर्तमाने 'दृग्दृशवतुषु' इति सः ।

सत्सू । षद्लृ विशरणगत्यवसादनेषु । सू इति षूङ् प्राणिगर्भविमोचने इत्यस्यादादिकस्य ग्रहणम् । द्विषा साहचर्यात् । न सुवतेस्तौदादिकस्य न वा सूयतेः । द्विष अप्रीतौ । द्रुह जिघांसायाम् ।

---

१. Before it—सुपीति वर्तते । कर्मग्रहणं 'स्पृशोनुदके क्विन्' इत्यतः प्रभृति न व्याप्रियते । N. २. उपसर्गे सत्यसत्यपि C, B_2, N_1, उपसर्गे सत्यसति P.

उपसर्गोक्तेर्ज्ञायते अन्यत्र सुबुक्तौ प्रादिग्रहणं नेति वदः सुपि क्यप् च सुपि च इत्यादौ । वेर्लोपः । शुचिषत् । उपनिषत् । अण्डसूः । प्रसूः । मित्रद्विट् ॥ अग्रग्रामाभ्यां नयतेर्णो वाच्यः । अग्रणीः । ग्रामणीः । देवराट् ।

भजो ण्विः ॥३।२।६२॥

सुपि प्रादौ च भजेर्ण्विः स्यात् ॥ सुखभाक् । प्रभाक् ।

दुह प्रपूरणे । युज समाधौ । युजिर्योगे वा । विद ज्ञाने । विद विचारणे । विद सत्तायां वा । न विद्लृ लाभे । अकारस्य विवक्षितत्वात् । भिदिर् विदारणे । छिदिर् द्वैधीकरणे । जि जये । णीञ् प्रापणे । राजृ दीप्तौ । सुपीति वर्तते । कर्मग्रहणं 'स्पृशोनुदके क्विन्' इत्यतः प्रभृति न व्याप्रियते इत्यभिप्रेत्याह—**सुप्युपपदे** इति । ननु 'सुपि' इति वर्तमाने किमुपसर्गग्रहणेनेत्याशङ्क्याह—**उपसर्गोक्तेरिति** । **वेर्लोप** इति । 'वेरपृक्तस्य' इत्यनेन । पकारस्तुगर्थः । ककारो गुणप्रतिषेधार्थः । इकारो वेरिति सामान्यग्रहणार्थः । **शुचिषदिति** । 'पूर्वपदात्—' इति षत्वम् । **उपनिषदिति** । 'सदिरप्रतेः' इति षत्वम् । 'स एषां ग्रामणीः' इति ज्ञापकान्नयतेः पूर्वपदादसंज्ञायां णत्वं भवतीति वाच्यमित्याह—**अग्रग्रामाभ्यामिति** । मित्रद्विट् । प्रद्विट् । मित्रध्रुक् । गोधुक् । अश्वयुक् । वेदवित् । काष्ठभित् । रज्जुच्छित् । मित्रजित् । विराट् इत्याद्युदाहरणानि ज्ञातव्यानि ।

भजो । **सुखभागिति** । 'वेरपृक्तस्य' इति वेर्लोपः । प्रत्ययलक्षणेन 'अत उपधायाः' इति वृद्धिः । 'चोः कुः' इति कुत्वम् । णो वृद्ध्यर्थः । इरिति सामान्यार्थः ।

---

१. सुपिस्थ B_2, D_4, N. २. शुचिषत् B_2. ३. मित्राजित्; मित्रद्विट् । मित्रध्रुक् । गोधुक् । अश्वयुक् । वेदवित् । काष्ठछित् । काष्ठभित् । मित्रजित् B_2, D_4; अमित्रजित् N. ४. Dropped N, D_4. ५. भजो ण्वि° N. ६. Dropped in C, D_1.

छन्दसि सहः ॥३।२।६३॥

सहेर्ण्विः स्यात् प्राग्वत् छन्दसि ॥ लोकेपीति केचित् । अन्येषामपि दृश्यते इति पूर्वपदस्य दीर्घः । तुराषाट् ।[१]

वहश्च ॥३।२।६४॥

पृष्ठवाट् ॥

परौ व्रजेः षः पदान्ते इति क्विप् तेनैव षः । परिव्राट् । अनसि वहेः क्विप् अनसो डश्च ॥ संप्रसारणम् । अनो वहतीत्यनड्वान् ।

छन्द । लोकेप्येतान् प्रयोगान् केचिदिच्छन्तीति तत्प्रदर्शनार्थमेतानि सूत्राण्यत्र पठ्यन्ते । अन्यथा वैदिकप्रक्रियायामेवापठिष्यत् । तथा च **कुमारसंभवे** प्रयोगः । 'तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः' इति । तुराषाडिति । 'हो ढः' इति ढत्वम् । 'सहेः साडः सः' इति षत्वम् । चर्त्वम् ।

वहः । योगविभाग उत्तरार्थः । 'पृष्ठवाड् युगपार्श्वगः' इत्यमरकोशेभिधानात् लोकेपि प्रयोगः । तथा नैषधेपि ।[२] 'धरातुरासाहि मदर्थयाञ्चा कार्या न कार्यान्तरचुम्बिचित्ते' इति ।

परौ व्रजेरिति । 'परौ व्रजेः षः पदान्ते' इति पञ्चपाद्युणादिसूत्रेषु पठ्यते ।

---

१. After it—जलाषाट् C, B_2, N, D_4; लाषराट् D_2. २. From तथा to इति dropped Dc_3, PC.

जनसनखनक्रमगमो विट् ॥३।२।६७॥

उपसर्गे[1] सुप्येभ्यो[2] विट् स्यात् छन्दसि ॥

विड्वनोरनुनासिकस्यात् ॥६।४।४१॥

अनुनासिकस्यात्[3] विटि वनि च ॥ अब्जाः ।[4]

सनोतेरनः ॥८।३।१०८॥

पूर्वपदस्थान्निमित्तात् परस्य सनोतेः सस्य षः स्यात् न तु नान्तस्य ।[5] गोषाः । कूपखाः । उदधिक्राः । अग्रेगाः ।[6]

जन । जन जनने । जनी प्रादुर्भावे । द्वयोरपि ग्रहणम् । विशेषानुपादानात् । षण[7] दाने । षण संभक्ताविति द्वावपि तथा । खनु अवदारणे । क्रम[8] पादविक्षेपे । गम्लृ गतौ । इकारो 'वेरपृक्तस्य' इति सामान्यग्रहणाविघातार्थः[9] । 'विड्वनोः' इति विशेषणार्थश्च ।

विड्व । 'अनुदात्तोपदेश—' इत्यतोनुनासिकग्रहणेनुवर्तमानेपि पुनर्ग्रहणमनुनासिकमात्रस्य परिग्रहार्थम्[10] । अन्यथा ह्यनुदात्तोपदेशवनतितनोत्यादीनामेव स्यात् । अब्जा इति । अप्सु जायन्त इत्यब्जाः ।

सनो । अनः किम् । गोसनिं वाचमुदीरयन् । पूर्वपदादित्येव सिद्धे नियमार्थं वचनम् । सनोतेरनकारस्यैवेति । तत्र केचित् सवनादिपाठात् गोसनीति नियमस्य फलं नेति सिसानयिषतीति ण्यन्तं प्रत्युदाहरन्ति । न सिसनिषतीति । तत्र 'स्तौतिण्योरेव' इति नियमादेवनेति । सिसनिषतेः क्विप् । सिसनीरित्यपरे प्रत्युदाहरन्ति । **गोषा** इत्यादि । गां सनोतीति कूपं खनतीति उदधिं क्रामतीति अग्रे गच्छतीति विग्रहाः । **अग्रेगा** इति । 'तत्पुरुषे कृति—' इति सप्तम्या

---

१. अनुपसर्गे B_2, D_4. २. सुप्युपपदे जनादिभ्यो D_1. ३. After it—स्यात् D_1, D_2, N. ४. After it—अब्जः B_2. ५. Before it—षण दाने. ६. After it—अग्रेगाः B_2. ७. षणु PC. ८. क्रमु PC. ९. °ग्रहणाभिघा° Dc_3. १०. मात्रग्रहार्थम् PC., Dc_3.

अदोऽनन्ने ॥३।२।६८॥

छन्दसीति निवृत्तम् । अदो विट् स्यात् अनन्ने सुपि ॥[1] आमात् । सस्यात् । अन्ने तु । अन्नादः ।[2]

दुहः कब् घश्च ॥३।२।७०॥

दुहः[4] सुपि कप् स्यात् घश्चान्तादेशः । कामदुघा ।

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥३।२।७१॥

एभ्यो ण्विन् स्यान्मन्त्रे ॥ अलाक्षणिककार्यार्थं समुदाया निपात्यन्ते । ण्विन् विधीयते । श्वेता एनं वहन्ति श्वेतवाः इन्द्रः ।

अलुक् । सर्वत्र 'वेरपृक्तस्य' इति वकारलोपे कृते 'विड्वनोः—' इत्यात्वम् ।

अदः । **सस्यादिति** । सस्यमत्ति । पूर्वेणैव व्याख्यातप्रायत्वादुपेक्षितमेकं सूत्रं व्याख्यायते—'क्रव्ये च' ॥३।२।६९॥ क्रव्यशब्दे उपपदे अत्तेर्विट् स्यात् । क्रव्यमत्ति क्रव्यात् । पूर्वेणैव सिद्धे वचनमसरूपबाधार्थम् । तेनाण् न । तर्हि कथं क्रव्यादः । कृत्तविकृत्तशब्दे उपपदे अदेरण् कृत्तविकृत्तस्य च पृषोदरादित्वात् क्रव्यभावः । ततश्च कृत्तविकृत्तं पक्वं मांसमदन् क्रव्यादः अपक्वं तु क्रव्यादिति विशेषः ।

दुहः । पकारः 'अनुदात्तौ सुप्पितौ' इति स्वरार्थः । **कामदुघेति** । कामान् दुग्धे ।

मन्त्रे । **श्वेतवा** इति । श्वेतः कर्ता उपपदं प्रत्ययस्तु कर्मणि । **उक्थशा** इति । उक्थशब्दे कर्मणि करणे वोपपदे ण्विन् नलोपश्च

---

१. सुब्सुपपदे D_1. २. Dropped in C; आममत्ति आमात् B_2; आममत्ति आमात् D_4. ३. After it—क्रव्ये च । कृत्तविकृतं मांसं तस्य क्रव्यभावो ऽत्र क्रव्यात् । क्रव्यादः । N_1. ४. दुहेः D_4.

उक्थानि उक्थैर्वा शंसति उक्थशाः । पुरो दाशन्ते एनं पुरोडाः ।[१]

अवे यजः ॥३।२।७२॥

अवयाः ।

आतो मनिन्क्वनिब्वनिपश्च ॥३।२।७४॥

सुपि धातो च आदन्तादेते स्युः विच् च छन्दसि ॥ सुष्ठु ददातीति सुदामा । घुमास्थेतीत्वम् । सुपीवा । वनिप् । घृत-पीवा । भूरिदावा । विच् । सोमपाः । अन्यभ्योपि दृश्यन्ते । अनादन्तेभ्योप्येते स्युः । भाषायामपि ।

नेड्वशि कृति ॥७।२।८॥

वशादेः कृत इण्न स्यात् ॥ सुशर्मा । म्वोश्चेति नः । सुजन्मा । क्वनिप् । प्रातरित्वा । वनिप् । विड्वनोरित्यात्वम् ।

निपात्यते । पुरोडाश इति । दाशृ दाने । अस्य पुरस्पूर्वस्य डत्वं कर्मणि च प्रत्ययः । एषु सर्वेषु श्वेतवाहुक्थशास्पुरोडाशवयाजां डस्पदान्त इति वक्तव्येन डस् । 'अत्वसन्तस्य' इति दीर्घः ।

अवे । योगविभागो 'विजुपे छन्दसि' इत्यत्र यजेरनुवृत्त्यर्थ एव । आतः । मनिनो नकार आद्युदात्तार्थः । क्वनिब्वनिपोः पकारावनुदात्तार्थौ । इकार उच्चारणार्थः । ककारः कित्कार्यार्थः । सुपीवेति । सुष्ठु पिबति । घृतपीवेति । घृतं पिबति । भूरिदावेति । भूरि ददाति

नेड् । वशीति प्रत्याहारग्रहणम् । सुशर्मेति । शॄ हिंसायाम् । शोभनं शृणाति । प्रातरित्वेति । इणः प्रातःशब्दे उपपदे क्वनिप् ।

---

१. शंसतीति D1. २. डाशन्ते C, N1. ३. चाद्विच् D2, D4. ४. घृतपावा B2, N1. ५. चकाराद्विच् C; चाद्विच् (च् dropped) B2. ६. Before it शृहिंसायाम् । शृणातीति D1; शृणातीति N1. ७. Before it—आतः । PC.

विजावा ॥ ओणृ । अवावा । वनो रच । अवावरी । विच् । रोट् । रेट् । अपिशब्दान्निरुपपदे[2]भ्योपि । सुत्वा । धीवा । इत्युक्तिः प्रयोगानुसारार्था ।

क्विप् च ॥३।२।७६॥

उपपदे सत्यसति च धातोः क्विप् स्यात् सर्वत्र ॥ उखा-स्रत्[5] । पर्णध्वत् । वाहभ्रट्[6] ।

अन्तः[7] ॥८।४।२०॥

पदान्ते[8] नस्याप्यनितेर्णत्वं स्यान्निमित्ते ॥ हे प्राण् ।

'ह्रस्वस्य—' इति तुक् । विजावेति । जनी प्रादुर्भावे । ओणृ अपसारणे । अवावेति । ओणो णकारस्यात्वम् । अवादेशः । 'वनो-रच' इति ङीब्रौ । रोट् रेट् इति । रुषरिष हिंसायाम् ।

क्विप् स्यात्सर्वत्रेति । सर्वधातुभ्यः छन्दसि भाषायां चेत्यर्थः । एतत् 'अन्येभ्योपि दृश्यन्ते' इत्यतोपिशब्दस्य सर्वविधिव्यभिचारार्थस्या-नुवृत्तेर्लभ्यते ।[10] उखास्रत् । पर्णध्वत् । वाहभ्रट् इति । उखायाः स्रंसते । पर्णात् ध्वंसते । वाहात् भ्रश्यति । स्रंसु ध्वंसु अवस्रंसने । भ्रंशु अधः पतने । 'अनिदिताम्—' इति न्लोपः । 'वसुस्रंसु—' इति दत्वम् । 'वावसाने' इति चर्त्वम् । वाहभ्राडित्यत्र 'व्रश्च—' इति षः ।

अन्तः । 'पदान्तस्य' इति प्रतिषेधापवादोऽयम् । अन्तश्च पदा-पेक्षया गृह्यत इत्यभिप्रेत्याह—पदान्ते नस्यापीति । अक्षद्यूगिति ।

---

१. ओणृ अपनयने D_2, D_4, B_2 ओण् वृद्धौ C. २. पदेपि N_1. ३. D_1 drops it; धीवा । पीवा B_2, N_1. ४. C drops it. ५. After it—स्थालीं D_1. ६. वाहात् भ्रश्यति Before it in D_1; वाहभ्रड् B_2 N_1. ७. अनितेः B_2. ८. पदान्तनस्या° B_2. ९. °स्यात्वे अवादेशः PC. १०. After this-अन्यथा 'विजुपे छन्दसि' इत्यतः 'छन्दसि' इत्यनुवृत्तेः 'आतो मनिन्—' इत्यतः 'आतः' इत्यनुवृत्तेराकारान्तादेव छन्दस्येव च स्यात् PC.

छ्वोः शूडित्यूट् । [1]अक्षद्यूः । शास आशासश्च क्वावुपधाया इत्वं वाच्यम् ॥* मित्राणि [2]शास्ति मित्रशीः । आशीः । गीः ।* अस्यैव प्रपञ्चः । सत्सूद्विषेति ।

[3]असुन् ।

[4]अयं प्रत्ययो धातोः स्यात् ॥ उरुव्यचाः । नृचक्षाः । [5]रजः ।

[6]अर्चिशुचिहुसृपि[7]छादिच्छृदिभ्य [8]इसुन् ॥ [9]अर्चिः । [10]शोचिः । सर्पिः ।

अक्षैर्दीव्यतीति । मित्रशीरिति । शासु अनुशिष्टौ । आशीरिति । आङः शासु इच्छायाम् । गीरिति । गॄ शब्दे । क्विप् । 'ॠत इत् ।' रपरः । 'र्वोरुपधाया—' इति दीर्घः । 'असुन्' इत्यादीनि चत्वारि सूत्राणि औणादिकानि । अत्र तेषां पाठः प्रक्रिया[11]विशेषार्थः । उरुव्यचा इति । व्यच व्याजीकरणे । 'व्यचेः कुटादित्वमन[12]सि वक्तव्यम्' इति ङित्त्वाभावः । नृचक्षा इति । 'असि उसि अने च चक्षिङः ख्याञ् नेति वाच्यम् ।' इति ख्याञभावः । रज इति । रञ्ज रागे । असि अके अने घिनुणि च रञ्जेर्नलोपो वाच्यः' इति नलोपः । अर्चिः । शोचिः । हविः । छदिः । छर्दिः ।

---

१. अक्षैर्दीव्यतीत्यक्षद्यूः D_1. २. शास्तीति C. ३. असून् D_3, D_4. P, C, B_1, B_2. ४. असुन् प्रत्ययो D_2, N. ५. Before it—असि उसीति ख्याञ् न N_1. ६. हविद्युचि D_2, B_2, D_4. ७. छादि D_2, B_2 N_1, D_4. ८. इसिः D_2, इस् P, B_2, D_4, N_1. ९. After it—शोचिः । शोचिः । हविः । छदिः । छर्दिः । सर्पिः । N. १०. P and D_1 and D_2, B_2, D_4 omit this. ११. क्रियाविशेषणार्थः D. C_1. १२. °सीति वक्तव्यात् ङि° PC.

धनर्तिचेक्षिवपितपिजनियजेरुस् ॥ धनुः । चक्षुः ।[1]
सेर्वधातुभ्यष्ट्रन् ॥ तन्त्रम् ।[3]

इस्मन्त्रन्क्विषु च ॥६।४।९७॥

एषु परेषु छादेर्ह्रस्वः स्यात् ॥ छदिः ।[4] छद्म ।[5] छत्रम् । तनुछत् । अनुनासिकस्य क्विझलोः क्ङिति । मो नो धातोः । प्रशान् । प्रतान् ।[7]

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥६।४।२०॥[6]

एषामुपधाया वकारस्य च ऊठ् स्यात् क्वौ झलादौ क्ङिति ॥[8] जूः । जूरौ । तूः । स्रूः । स्रुवौ[9] । ऊः । ऊठ् । वृद्धिश्च । जनानवतीति जनौः । जनावौ । मूः ।[10]

धन । धन शब्दे । अरुः । वपुः । तपुः । जनुः । यजुः । सर्व । तन्त्रमिति । तनु विस्तारे । 'तितुत्र—' इति नेट् । एतान्यौणादिकानि ।

इस् । छद अपवारणे । चुरादिर्णिजन्तः । प्रशानिति । शमु उपशमे । प्रतानिति । तनु तमु ग्लानौ ।

ज्वर । जूरिति । ज्वर रोगे । तूरिति । ञित्वरा संभ्रमे । स्रूरिति । स्रिवु गतिशोषणयोः । ऊरिति । अव रक्षणे । जनौरिति । स एव । 'एत्येधत्यूठ्सु' इति वृद्धिः । मूरिति । मव बन्धने ।

---

१. चक्षिङ् त्रपित्वपि B_2; चक्षिङ् D_4. २. Before it—अरुः N. ३. After it—शास्त्रम् N. ४. Before it—छादिम् संवृतौ D_1: छ (द?) संवरणे N_1. ५. Before it—मनिप् । धातोर्मनिप् स्यात् N_1. ६. स्रिव्य N. ७. अनुनासिके च क्ङिति । D_4. ८. C, B_2 have तुरौ after it स्नूः । स्तावौ । ऊः । ऊटि वृद्धौ D_4. ९. स्नूः । स्रुवौ । ऊः । ऊठि वृद्धौ B_2, N (N drops ऊः) for स्रुवौ...वृद्धिश्च. १०. After it–मुवौ । मुवः । मूर्तिः D_2 ; मुवौ । मुवः । मूर्तिः । ज्वरत्वरे रउपधावकारस्य स्रिव्यवमवामन्तभूतवकारस्य ऊठ् । B_2, D_4 (ज्वरत्वर° D_4.)

राल्लोपः ॥६।४।२१॥

रेफादुत्तरयोश्छ्वोर्लोपः स्यात् क्वौ झलादौ च[1] क्ङिति ॥[2] मूर्च्छा । मूः । धुर्वी[4] । धूः ।[5] विरुहः[6] धोऽन्तादेशो[7] वेदीर्घे इति केचित् । वीरुत् ।

गमः क्वौ ॥६।४।४०॥

गमः क्वौ परेऽनुनासिकस्य लोपः स्यात् ॥ ह्रस्वेति[8] तुक् । अङ्गगत् । यममनतनां[9] च[10] वाच्यः ॥* संयत् । परिमत् । परितत् ।

ऊ च गमादीनाम् ।[11] अग्रेगूः ॥[12] अग्रेभ्रूः ।

रात् । राल्लोपे सतुक्करय छस्याभावात् केवलो गृह्यते । मूरिति । मूर्च्छा मोहसमुच्छ्राययोः । धुर्वीति । तुर्वी धुर्वी हिंसायाम् । विरुहः ध इति । विपूर्वस्य रुह जन्मनि प्रादुर्भावे चेत्यस्य ।

गमः । अज्झलार्थोऽयमारम्भः । ऊ च गमादीनामिति । अलोऽन्त्यपरिभाषयान्त्यस्य । अग्रेगूः अग्रेभ्रूरिति । गमेर्भ्रमेश्चानुनासिकलोपे कृते अकारस्य ऊ आदेशः । स्पष्टत्वादुपेक्षितम् ‘स्थः क च’ ।३।२।७७॥ सुपि उपसर्गे च स्थः कः स्यात् क्विप् च । किमर्थमिदम् । यतः ‘सुपि स्थः’ इति कः सिद्धः । अन्येभ्योऽपि क्विप् । बाधकबाधनार्थं पुनर्वचनम् । शमि धातोः संज्ञायामच् बाधते । शंस्थः । शंस्थाः । ‘आतो लोपः’ इत्यालोपः ।

---

१. रेफात्परयोः D_2, P. २. क्ङिति च P, D_2 ३. मूर्च्छा मोहसमुच्छ्राययोः D_1. ४ धुर्वी हिंसायाम् D_1; धूर्वी D_4, P., D_2. ५. After it—पुर्वी । पूः C. ६ विरुहः क्वौ N. ७. धान्ता° D_1, N_1. ८. ह्रस्वस्येति D_2, P, D_4, B_2. ९. यमुमनु° C, N_1 जनयममनुतनां वाच्यः । प्रजत् । संयत्, &c., B_2, D_4. १०. Dropped N. ११. After it—गमादीनां स्यात् । अनुनासिकलोपश्च अग्रेगूः । अग्रेयूः । N. १२. After it—अग्रेभूः D_1; अग्रेभूः D_2; अग्रेजूः । अग्रेगूः । अग्रेमूः । अग्रेनूः । अग्रेभूः । B_2. १३. After the Sutra—एतत् सूत्रं स्पष्टत्वादुपेक्षितम् PC.

सुप्यजातौ णिनिस्ताच्छील्ये ॥३।२।७८॥

अजात्यर्थे[1] सुपि धातोर्णिनिः स्यात् ताच्छील्ये ॥ उष्ण-भोजी । सुबुक्तिः प्रादिनिवृत्त्यर्था ।

सुपि । **उष्णभोजीति** । उष्णं भोक्तुं शीलमस्य उष्णभोजी । अजाताविति किम् । ब्राह्मणानामन्त्रयिता । ननु 'सुपि स्थः' इत्यतः 'सुपि' इत्यनुवर्तते । किं पुनः सुब्ग्रहणेनेत्याशङ्क्याह—**सुबुक्ति-रिति** । उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानम् । उदासारिणी[2] । उपसर्गार्थम् । साधुकारिणि । अताच्छील्यार्थं जात्यर्थं वासरूपनिवृत्त्यर्थं च । साधु-दायी । ब्रह्मणि वदः । ब्रह्मवादी । अताच्छील्यार्थं जात्यर्थं वासरूप-निवृत्त्यर्थं च । अतो न ब्रह्मवाद इति । त्रीणि सूत्राणि पूर्वसूत्रव्याख्याने-नैव व्याख्यातप्रायत्वादुपेक्षितानि—[3] 'कर्तर्युपमाने' ॥३।२।७९॥ कर्तृ-वाचिन्युपपदे धातोर्णिनिः स्यात् । उपपदकर्ता प्रत्ययार्थकर्तुरुपमानम् । उष्ट्र इव क्रोशति उष्ट्रक्रोशी । अताच्छील्यार्थो जात्यर्थो वारम्भः । कर्तरि किम् । अपूपानिव भक्षयति मनुष्यान् । उपमाने किम् । उष्ट्रः क्रोशति । 'व्रते' ॥३।२।८०॥ सुपि धातोर्णिनिः स्यात् धातूपपदप्रत्यय-समुदायेन चेद्व्रतं गम्यते । सति शयने स्थण्डिल एव शेते स्थण्डिल-शायी । व्रते किम् । स्थण्डिले शेते मैत्रः । जात्यर्थमताच्छील्यार्थं वा । 'बहुलमाभीक्ष्ण्ये' ॥३।२।८१॥ आभीक्ष्ण्यं पौनःपुन्यं ताच्छील्यादन्यत् । सुप्युपपदे आभीक्ष्ण्ये गम्ये धातोर्णिनिः । कषायपायिणो गान्धारा इति । तत्र देशे कषायादिकं पुनः पुनः पिबतां सामर्थ्यं स्यादतस्ते कषायं पिबन्ति न ताच्छील्यात् । बहुलग्रहणात् कुल्माषखाद इत्यत्र न ।

---

१. सुप्यजातौ णिनिः स्यात् ताच्छील्ये । D1 २. After it - प्रत्यासारिणी Pc, Dc4. ३. After it-इत्यादीनि त्रीणि सूत्राणि &c, Pc, Dc4.

मनः ॥३।२।८२॥

सुपि मन्यतेर्णिनिः स्यात् ताच्छील्येऽपि[2] ॥ दृश्यमानी ।

आत्ममाने खश् च ॥३।२।८३॥

मनः सुपि खश् स्यादात्ममाने[3] चाण्णिनिः ॥ शित्वात् श्यन् । आत्मानं[4] पण्डितं मन्यते[5] पण्डितम्मन्यः । पण्डितमानी । खित्यनव्ययस्य ।[6] कालिम्मन्या । अनव्ययस्य किम् । दिवामन्या ।

मनः । मन मनने इत्यस्य दैवादिकस्य ग्रहणं न मनु बोधने इत्यस्य तानादिकस्य । णिनौ रूपान्तराभावेऽपि उत्तरसूत्रे खशि मन्येर्दिवादित्वात् श्यन् स्यात् मनुतेस्तनादित्वादुप्रत्ययः स्यादिति विशेष इति सर्वं चेतसि कृत्वा श्यना निर्दिशति—**मन्यतेरिति** । **दृश्यमानीति** । दृश्यं मन्यते । णित्वात् 'अत उपधायाः' इति वृद्धिः ।

आत्म । यदा प्रत्ययार्थः कर्ता आत्मानमेव पण्डितत्वादिना धर्मेण मन्यते तदायं विधिः । **पण्डितम्मन्य** इति । 'अरुर्द्विषदजन्त—' इति मुम् । खशः खकारो मुमर्थः । शकारः सार्वधातुकार्थः । आत्ममाने किम् । पण्डितमानी देवदत्तस्य । **खित्यनव्ययस्येत्यादि** । कालिंमन्येत्यत्र 'क्यङ्मानिनोश्च' इति प्राप्तात् पुंवद्भावाद्विप्रतिषेधेन 'खित्यनव्ययस्य' इति ह्रस्व एव स्यादित्यर्थः ।

---

१. Before it-'उत्प्रतिभ्यामाङि सर्तेः ॥ उदासारिण्यः । प्रत्यासारिण्यः । ग्साधौ च णिनिः' ॥ साधुकारी । साधुदायी ॥ 'ब्रह्मणि वदो णिनिः*' ॥ ब्रह्मवादी । 'कर्तर्युपमाने ॥' कर्तृवाचिन्युपमाने धातोर्णिनिः । उपपदकर्ता प्रत्ययार्थस्य कर्तुरुपमानम् । उष्ट्र इव क्रोशति । उष्ट्रक्रोशी । अयमारम्भो ताच्छील्यार्थे । जात्यर्थश्च । 'व्रते' ॥ व्रते गम्यमाने धातोर्णिनिः । स्थण्डिलशायी । अश्राद्धभोजी । 'बहुलमाभीक्ष्ण्ये' ॥ आभीक्ष्ण्ये गम्यमाने धातोर्बहुलं णिनिः । क्षीरपायिण उशीनराः । कुल्माषखादा । अत्र न ॥ N. २. अताच्छील्येऽपि B_2, D_4. ३. आत्ममाने dropped C. ४. पण्डितमात्मानं P. ५. After it—असौ D_1; इति C. ६. After it—इति ह्रस्वः C.

इच एकाचोऽम्प्रत्ययवच्च ॥६।३।६८॥

इजन्तादेकाचोऽम् स्यात् स च स्वाद्यम्वत् खिदन्ते परे ॥ औतोम् शसोः । गाम्मन्यः । वाम्शसोः । स्त्रींमन्यः स्त्रियंमन्यः । नृ । नरंमन्यः । भुवंमन्यः ।

भूते ॥३।२।८४॥

एतदधिक्रियते ।

इच । 'अम्' इति हि द्विरावर्तते । तेनाम् स्यात् स च द्वितीयैकवचनवत् स्यादित्याह—**अम् स्यात् स च स्वाद्यम्वदिति** । अतिदेशादात्वपूर्वसवर्णगुणेयङुवङादेशाः स्युः । 'औतोम् शसोः' इत्योकारस्याकारः । 'वाम्शसोः' इतीयङ् । **नरंमन्य** इति । 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः । **भुवम्मन्य** इति । 'अचि श्नुधातु—' इत्युवङ् । श्रियमात्मानं मन्यते श्रिमन्यं ब्राह्मणकुलमित्यत्र किमित्यम्न । अत्रेदं **भाष्यकारवचनम्** । अत्र विषये परित्यक्तस्वलिङ्गः श्रीशब्दो ब्राह्मणकुले वर्तते यथा प्रस्थादयः स्त्रियाम् । तस्मात् 'स्वमोर्नपुंसकात्' इत्यमो लुक्' इति । ननु यथा 'सुपो धातुप्रातिपदिकयोः' इति लुकं बाधते तथामुमपि बाधते । मध्येपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरानिति 'सुपो धातु—' इतीमं लुकमम् प्रत्ययो बाधते न 'स्वमोर्नपुंसकात्' इति ।

भूते । धात्वधिकाराद् धात्वर्थे भूते इति विज्ञायते । एतदधिक्रियते इति । 'वर्तमाने लट्' इति पर्यन्तम् ।

करणे यजः ॥३।२।८५॥

करणे उपपदे यजेर्णिनिः स्याद् भूते ॥ सोमेनेष्टवान् सोमयाजी ।

कर्मणि हनः ॥३।२।८६॥

पितृघाती । निन्दायामेव । चौरं हतवान् ।

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥३।२।८७॥

एषु हन्तेः क्विप् स्याद्भूते ॥ ब्रह्महा । भ्रूणहा । वृत्रहा । नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वात् न [2] ह्रस्वस्येति तुक् । वृत्रहभ्याम् । ब्रह्मादिष्वेव हन्तेरेव क्विबेव भूते एवेति नियमार्थं सूत्रम् ।

करणे । स्वरितत्वात् 'णिनिः' अनुवर्तते न खश् । **सोमेनेष्टवानिति** । **सोमयाजीति** । सोमयागः फलोत्पादनाख्ये व्यापारे करणं भवति । ननु फलोत्पादनलक्षणं व्यापारं प्रति साधनत्वेनेप्सितत्वादनुष्ठीयमानो यागः कर्म भवति । सत्यम् । तथापि शक्तिभेदात् करणत्वं स्यादेव । यथा निपीयमानेन मधुना मत्त इत्यत्र कर्मत्वमनुभवतो मधुनः । तस्मात् सोमयाजीत्यस्यायमर्थः । सोमेन करणेन स्वर्गं भावितवानिति । स्वर्गशब्दो वृत्तावन्तर्भूतत्वान्न प्रयुज्यते ।

कर्मणि । **पितृघातीति** । 'हनस्त च' इति तत्वम् । 'हो हन्तेः—' इति कुत्वम् । 'सौ च' इति दीर्घः । **चौरं हतवानिति** । अत्र निन्दाया अभावान्न णिनिः ।

ब्रह्म । ननु च 'सर्वधातुभ्यः क्विब्वा' इति क्विप् सिद्ध एव किं सूत्रेणेत्याशङ्क्याह—**ब्रह्मादिष्वेवेति** । धातुनियमः कथम् । यत्रैवकारस्ततोन्यत्रावधारणमित्युपपदेभ्यः पर एवकारः प्रयुक्तो हन्तिं नियमयतीति धातुनियमः । तेन पुरुषं हतवान् अत्र न ।

---

१. Before it—नेह B_2. २. ह्रस्वस्येति न तुक् P., D_2, B_2, D_4; ह्रस्वस्येति तुक न N. ३. यागीति Dc_1.

सुकर्मपापमन्त्रपुण्येषु कृञः ॥३।२।८९॥

एषु कृञः क्विप् भूते ॥ सुकृत् । इत्यादि । उपपदान्तरे-ऽपि । शास्त्रकृत् ।

सोमे सुञः ॥३।२।९०॥

[१]सोमसुत् । अत्र चतुर्विधो नियमः ।

हन्तेरेवेत्युपपदनियमः । तेन ब्रह्माधीतवानित्यत्र न । क्विबेवेति कालनियमः । यदि क्विबेवेति नियमः निष्ठापि न स्यात् । ब्राह्मणं हतवानिति । मध्यापवादत्वात् पूर्वानणादीनेव बाधते न निष्ठाम् । एव-मपि वृत्रस्य हन्तुरिति तृच् न स्यात् । प्रायिकत्वान्नियमस्यादोषः । भूत एवेति प्रत्ययनियमः । तेन ब्रह्माणं हन्ति हनिष्यति वेत्यत्र न । एष सर्वोपि नियमः प्रायिकः । तेन मधुहत्यादि सिद्धम् । प्रायिकत्वं 'बहुलं छन्दसि' इति उत्तरत्र बहुलग्रहणात् नियमोपि बहुलग्रहणात् ।

सुक । अत्र त्रिविधो नियमो बहुलग्रहणात् । आदिना कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । अत्र सूत्रे धातुनियमं वर्जयित्वा कालोपपदप्रत्ययविषय एव नियमो बहुलग्रहणानुवृत्तेस्तेनोपपदान्तरेपि कृञः क्विप् स्यादित्याह—**उपपदान्तरेपीति** ।

सोमे । **चतुर्विध** इति । कालधातूपपदप्रत्ययविषयः ।

---

१. Before it—षुञ् मन्थे । सुनोति स्म । D_1. २. कालनियमः Dc_3.

अग्नौ चेः ॥३।२।९१॥

अग्निचित् । [१]नियमः प्राग्वत् ।

दृशेः क्वनिप् ॥३।२।९४॥

कर्मणि दृशेः [३]क्वनिबेव स्याद्भूते ॥ पारदृश्वा ।

राजनि युधिकृञः ॥३।२।९५॥

राजनि कर्मणि युधिकृ[४]ञोः क्वनिप् स्यात् भूते ॥ अत्रान्त-र्भावितण्यर्थो युधिः । राजानं योधितवान् [६]राजयुध्वा । राजकृत्वा ।

अग्नौ चेः । **नियम** इति । कालधातूपपदप्रत्ययविषयः । [७]द्वे स्पष्टत्वात् त्यक्ते—'कर्मण्यग्न्याख्यायाम्' ॥३।२।९२॥ कर्मण्युपपदे चिनोतेः कर्मण्येवार्थे क्विप् स्यात् धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते । श्येन इव चीयते श्येनचित् । कङ्कचित् । अग्न्यर्थ इष्टकानां रचनाविशेषः । 'कर्मणीनि विक्रियः' ॥३।२।९३॥ कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः स्यात् । 'कर्मणि' इति वर्तमाने पुनः कर्मग्रहणं कर्तुः कुत्सानिमित्ते कर्मणि यथा स्यात् । सोमविक्रयी । तिलविक्रयी । घृतविक्रयी । तैलविक्रयी । इह न । धान्यविक्रायः ।

दृशेः । 'अन्येभ्योऽपि दृश्यन्ते' इति सिद्धेऽपि प्रत्ययान्तरनिवृत्त्यर्थं पुनर्वचनमित्यभिप्रेत्याह—**क्वनिबेव स्या**दिति । न प्रत्ययान्तरमित्यर्थः ।

राजनि । ननु युधिरकर्मकस्तत्कथं कर्मवाच्युपपदं घटत इत्याशङ्क्याह—**अन्तर्भावित** इति । तस्मात् सकर्मक इति भावः ।

---

१. अत्र before it N. २. Before this Sûtra—**कर्मण्यग्न्याख्यायाम्** ॥ ३।२।९२॥ कर्मणि चिनोतेः क्विप् स्यात् धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्यायाम् । (चेदग्न्याख्याया गम्यते । N.)। श्येन इव चीयते श्येनचित् ॥ **कर्मणी विक्रियः** ॥ कर्मणि विपूर्वात् क्रीणातेरिनिः स्यात् कुत्साख्यायाम् ॥ सोमविक्रयी । (After it घृतविक्रयी N_1) इह न । धान्यविक्रायः । (विक्रयः N) D_2, D_4, B_2 (कुत्सायाम् D_4, B_2, N.), N. ३. क्वनिप् स्यादेव D_2. ४. कृञः D_2. ५. इति before it N. ६. Dropped N. ७. After it—इति द्वे सूत्रे स्पष्टत्वादुपेक्षिते PC., Dc_3.

सहे च ॥३।२।९६॥

सहयुध्वा । सहकृत्वा ।[1]

सप्तम्यां जनेर्डः ॥३।२।९७॥

अम्बुजम् । तत्पुरुषेति[2] ङेरलुक् । सरसिजम् । बहुलोक्तेः सरोजम् ।

पञ्चम्यामजातौ ॥३।२।९८॥

जातिवर्जे पञ्चम्यन्ते जनेर्डः स्यात् भूते ॥ पङ्कजः[3] । अजातौ किम् । अश्वाज्जातः ।

उपसर्गे च संज्ञायाम् ॥३।२।९९॥

प्रजा ।

अन्येष्वपि दृश्यते ॥३।२।१०१॥

अन्येषूपपदेषु जनेर्डो[4] दृश्यते ॥ अजः । द्विजः ।

सहे । एतच्च कर्मणा न विशेष्यते । तस्यासत्त्ववचनस्य कर्मत्वानुपपत्तेः ।

सप्त । सप्तम्यन्ते उपपदे जनेर्डः स्यात् । डित्त्वाट्टिलोपः ।

पञ्च । पङ्काज्जातः पङ्कजः । पद्यते मा लक्ष्मीरस्मिन्निति क्रियावाची पद्मशब्दो न जातिवाचीत्यभिप्रेत्योदाहृतम् ।

उपस । उपसर्गे चोपपदे जनेर्डः स्यात् । समुदायेन चेत् संज्ञा गम्यत इत्यर्थः । स्पष्टत्वादुपेक्षितम्—' अनौ कर्मणि ' ॥३।२।१००॥ अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात् । पुमांसमनुजातः पुमनुजः । स्त्रियमनुजातः स्त्र्यनुजः ।

---

१. D_2 D_4 drop सहयुध्वा; B_2 has सहकृत्वा । सहयुध्वा । २. तत्पुरुषे कृति बहुलमिति N. ३. After it—संस्कारजः D_1, B_2 ; बुद्धिजः । संस्कारजः । N. ४. जातेर्डो C ; D_1 drops जने; ५. This is after the sutra PC, Dc_3.

सुयजोर्ङ्वनिप् ॥३।२।१०३॥

आभ्यां ङ्वनिप् स्याद् भूते ॥ सुत्वा । यज्वा ।

जीर्यतेरतृन् ॥३।२।१०४॥

जरन् ।

क्तक्तवतू निष्ठा ॥१।१।२६॥

एतौ निष्ठासंज्ञौ स्तः ॥

निष्ठा ॥३।२।१०२॥

धातोर्निष्ठा स्याद्भूते ॥ तयोरेव कृत्येति भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । उकावितौ । स्नातं मया ।

सुय । अग्रिमे अप्येते सूत्रे 'निष्ठा' इत्येतस्मात् तथापि तस्मिन् सूत्रे बहु वक्तव्यमस्ति । अतस्तत् परित्यज्य एते उक्ते । **सुत्वेति** । 'ह्रस्वस्य—' इति तुक् । 'सर्वनामस्थाने च' इति दीर्घः । नलोपः ।

जीर्यतेः । नित्त्वादाद्युदात्तं पदम् । 'उगिदचाम्—' इति नुम् ।

क्त ।

निष्ठा । ननु च निष्ठासंज्ञायां क्तक्तवत्वोः सिद्धिस्तत्सिद्धौ च निष्ठासंज्ञा । असिद्धयोः संज्ञाभावादित्यन्योन्याश्रयत्वम् । मैवम् । भाविनी संज्ञा विज्ञायते । स भूते स्यात् यस्य उत्पन्नस्य निष्ठेत्येषा संज्ञा स्यात् । सामर्थ्यात् क्तक्तवत्वोर्विधिः यथा सूत्रस्य शाटकं वयेति । **उकावितावित्ति** । 'उपदेशेऽजनुनासिकः—' इति उकारः 'लशक्वतद्धिते' इति ककार इत्यर्थः । **स्नातं मयेति** । ष्णा शौचे ।

---

१. क्तवतुः कर्तरि N, D4. २. प्रथमत उक्ते PC., Dc3. ३. क्त क्तवतू निष्ठा । Dc3, PC.

स्तुतस्त्वया विष्णुः । विष्णुर्विश्वं कृतवान् ।

निष्ठायामण्यदर्थे ॥६।४।६०॥

ण्यदर्थो भावकर्मणी । ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात् ॥

क्षियो दीर्घात् ॥८।२।४६॥

दीर्घात् क्षियो निष्ठातकारस्य नः स्यात् ॥ क्षीणवान्[1] । भावकर्मणोस्तु क्षितः कामो मया ।

अस्माद्भावे क्तः । स्तुत इति । ष्टुञ् स्तुतौ । कर्मणि क्तः । कृता क्तेन कर्मणा उक्तत्वात् कर्मणि विष्णौ प्रथमैव जाता । विष्णुर्विश्वं कृतवानिति । कृञः क्तवतुः कर्तरि । ततः कर्तरि प्रथमा कृतोक्तत्वात् । 'न लोकाव्यय—' इति विश्वमित्यत्र न षष्ठी ।

निष्ठायामण्यदर्थे इति । 'ऋहलोर्ण्यत्' इति ण्यत् गृह्यते[2] । ण्यतोऽर्थो ण्यदर्थः । **भावकर्मणी** इति । 'तयोरेव' इति वचनादित्यर्थः ।

क्षियः । ननु क्षेरिति निर्देशे कार्ये क्षिय इति इयङा निर्देशादेव दीर्घः प्रतीयते । किं दीर्घग्रहणेन । मैवम् । क्षियः निष्ठायामण्यदर्थे अत्र ह्रस्वान्तस्यापि धातुकरणस्येयङा निर्देशो दृश्यते । तस्माद् दीर्घग्रहणम् । 'विपराभ्यां जेः' इत्येवमादौ तु धातुत्वमनुकार्यगतं जेरित्यनुकरणे विद्यमानमप्यविवक्षितत्वाद्रूपसामान्यस्यानुकरणम् । तेनेयङा न निर्देशः ।

---

१. Before it—क्षीणः D₁. २. निष्ठायां ण्यदिति ऋहलोर्ण्यत् इति गृह्यते Dc₃, PC.

श्र्युकः किति ॥७।२।११॥

श्रिय एकाच उगन्ताच्च परस्य[1] कितः इण्न स्यात् ॥ श्रितः । श्रितवान् । भूतः[2] । भूतवती[3] । क्षुतः ॥[4] ऊर्णोतेर्णुवद्भावो वाच्यः ॥* तेनैकाच्त्वान्नेट् । ऊर्णुतः । वृतः ।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥८।२।४२॥

रेफदकाराभ्यां परस्य निष्ठातो[5][6] नः स्यात् पूर्वस्य[7] च दः ॥ शॄ । शीर्णः । भिन्नः ।

श्र्युकः । क्ङितीति द्विककारको निर्देशस्तेन गकारप्रश्लेषः । भूष्णुरित्यत्रापि इट्निषेधार्थम् । सौत्रत्वाच्च निर्देशस्य 'श्र्युकः किति' इत्यत्र चर्त्वस्यासिद्धत्वमनाश्रित्य रोरुत्वं न कृतम् । 'क्ङिति च' इत्यत्रापि गकारप्रश्लेषात् भूष्णुरित्यत्र गुणोपि न । अत्र सर्वत्र गकारप्रश्लेषः 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नोर्गित्वस्याश्रयणात् । गित्वं च स्थास्नुरित्यत्रेत्वाभावार्थमाश्रीयते इति केचिद्वर्णयन्ति । अन्ये तु 'ग्लाजिस्थश्च ग्स्नुः' इत्यत्र स्था इत्याकारप्रश्लेषात् स्थास्नोः[8] सिद्धत्वात् न कुत्रापि गकारनिर्देश इति वर्णयन्ति । भूतवतीति । 'उगितश्च' इति ङीप् । ऊर्णु इति । तथा च वार्तिकम्-

"वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥" इति ।

रदा । रेफदकाराभ्यां तकारो विशिष्यते न निष्ठेत्यभिप्राये-णाह—**रेफदकाराभ्यां परस्य निष्ठातस्येति** । अन्यथा चरितं मुदितमित्यत्रापि स्यात् । **शीर्ण** इति । शॄ हिंसायाम् । 'ऋत इत्' । रपरः । रदाभ्या किम् । कृतः । कृतवान् । निष्ठाग्रहणं किम् ।

---

१. D, and C drop परस्य. २. भूतम् N. ३. भूतवान् B_2. ४. After it—क्षुतवान् B_2, D_4, क्षुतः dropped N. ५. निष्ठातस्य परस्य B_2. ६. तस्य D_4. ७. पूर्वदकारस्य च P., D_2, B_2, D_4; पूर्वदस्य च N. ८. स्थः Dc_3.

संयोगादेरातो धातोर्यण्वतः ॥८।२।४३॥

यण्संयोगादेरादन्ताद् धातोर्निष्ठातस्य नः स्यात् ॥ द्राणः। ग्लानः।

ल्वादिभ्यः[2] ॥८।२।४४॥

एकविंशतेर्लूञादिभ्यो निष्ठातो[3] नः स्यात् ॥ लूनः। ज्या। ग्रहिज्या।[4] जीनः। दुग्वोर्दीर्घश्च ॥* दूनः। गूनः। पूञो विनाशे ॥* पूना यवाः। पूतमन्यत्।

सिनोतेर्ग्रासकर्मकर्तृकस्य ॥* सिनो ग्रासः स्वयमेव।

कर्ता। तः किम्। चरितम्। अत्र इटो नत्वं न। पूर्वस्य किम्। परस्य मा भूत्। भिन्नवद्भ्यामिति। कृतस्यापत्यं कार्तिरित्यत्र वृद्धेर्बहिरङ्गत्वादन्तरङ्गे नत्वे क्रियमाणे रेफस्यासिद्धत्वान्नत्वं न।

संयो॰ संयोग आदिर्यस्य स तथा। **द्राण** इति। द्रा कुत्सायां गतौ।[1] संयोगादेः किम्। यातः। आतः किम्। च्युतः। धातोः किम्। निर्यातः। यण्वतः किम्। स्नातः।

ल्वादि। **एकविंशतेरिति**। पृथग्निरिक्ता ल्वादय एव ल्वादयः। एते च[5] एकविंशतिः। ते क्र्यादिगणे 'ल्वादीनां ह्रस्वः' इत्यत्र सूत्रे कथिताः। 'ग्रहिज्या—' इति संप्रसारणम्। **जीन** इति। हल इति दीर्घः। **दुग्वोरिति**। दु गतौ। गु विष्ठोत्सर्गे। चकारान्निष्ठातस्य नः। **पूना** इति। तस्य नः। पूना यवाः। विनष्टा[6] इत्यर्थः। **सिन** इति। षिञ् बन्धने। ग्रासकर्मकर्तृकस्य किम्। सिता पाशेन सूकरी। ग्रासोपि यदा कर्मैव स्यात् न कर्ता तदापि न। सितो ग्रासो देवदत्तेन।

---

१. भ्राणः D4. २. ल्वादिभ्यश्च D2, D4 B2. ३. निष्ठातस्य B2, D4. ४. ज्या-जीनः। D4. ५. ते च PC. ६. नष्टा Dc3, Pc.

ओदितश्च ॥८।२।४५॥

ओदितो धातोर्निष्ठातस्य नः स्यात् ॥ भुजो[2] । भुग्नः । ओंहाक् । प्रहीणः ।[3] स्वादय ओदितः । षूङ् दूङ् दीङ् डीङ्[4] धीङ् मीङ् रीङ् लीङ् व्रीङ् नवैते ओदितः स्युः । सूनः । सूनवान् । दूनः । ओदिन्मध्ये पाठबलान्नेट् । उड्डीनः ।

स्फायः स्फी निष्ठायाम् ॥६।१।२२॥

स्फायः स्फी स्यान्निष्ठायाम् ॥ स्फीतः । वेति केचित् । स्फातः ।

द्रवमूर्तिस्पर्शयोः श्यः ॥६।१।२४॥

द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायाम् ॥

ओदि । प्रहीण इति । 'घुमास्था' इतीत्वम् । स्वादय इति । धातुसूत्रम् । षूङ् प्राणिप्रसवे । दूङ् परितापे । दीङ् क्षये । डीङ् विहायसा गतौ । धीङ् अनादरे । मी हिंसायाम् । रीङ् स्रवणे । लीङ् श्लेषणे । व्रीङ् वरणे । ओदिन्मध्य इति । अयं भावः । यदा डीङ इट् स्यात् तदेटा व्यवहितत्वात्तकारस्य धातोः परत्वं न स्यात् । तदा तस्य नत्वं न स्यात् । तत ओदिन्मध्ये पाठो व्यर्थः स्यादिति । दीनः । धीनः । मीनः । रीणः । लीनः । व्रीणः ।

स्फायः । स्फायी वृद्धौ । वेति केचिदिति । तथोक्तं मुग्धबोधे । 'स्फायः स्फी वा' इति ।

द्रव । द्रवावस्थया उत्तरावस्थाविशेषः काठिन्याख्यो द्रवशब्देनोच्यत इत्याह—द्रवस्य मूर्तौ काठिन्य इति ।

---

१. तां D₁, N. २. भुजो कौटिल्ये D₂, D₄. N₁. ३. After it—कुटयश्च इति पाठम् B₂, D₄. ४. डीङ् शीङ् । D₂. ५. Dropped N. ६ स्यात् dropped B₂. ७. Dropped N₁.

श्योऽस्पर्शे ॥८।२।४७॥

श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे ॥ हल इति दीर्घः । शीनं घृतम् । अस्पर्शे किम् । शीतं जलम् । द्रवमूर्तिस्पर्शयोः किम् । संश्यानो वृश्चिकः । शीतात् संकुचित इत्यर्थः ।

प्रतेश्च ॥६।१।२५॥

प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायां काठिन्ये स्पर्शे ॥[1] प्रतिशीनः ।

विभाषाभ्यवपूर्वस्य ॥६।१।२६॥

अभ्यवपूर्वस्य श्यो निष्ठायां वा संप्रसारणं स्यात् ॥ अभिश्यानमभिशीनं घृतम् । अवश्यानः अवशीनो वृश्चिकः । अभ्यवेत्युक्तेर्नेह । समवश्यानः ।

श्यः । श्यैङ् गतौ । अस्य ।

विभाषा । द्रवमूर्तिविषये प्राप्ते पूर्वेणान्यत्राप्राप्ते च विभाषेयम् । अभ्यवेत्युक्तेरिति । पदैकदेशेन पदं लक्ष्यते । अभ्यवपूर्वस्येत्युक्तेरित्यर्थः । अयं भावः । पूर्वग्रहणाद्यत्र समुदायस्याभ्यवपूर्वता तत्रैव स्यात् । अन्यथा विभाषाभ्यवाभ्यामित्येवोच्येत । समवश्यान इत्यत्र तु श्यैङो यद्यपि अवपूर्वता तथापि समुदायस्य नावपूर्वता । तस्य संपूर्वत्वात् । तस्मादत्र संप्रसारणं न । वृत्तिकारमतेन नेदं पूर्वग्रहणप्रयोजनम् । किंतु अभिसंशीनम् । अभिसंश्यानम् । अवसंशीनम् । अवसंश्यानमिति । एवं चेत् समवश्यान इत्यत्रापि विकल्पः स्यात् । नैवम् । विभाषाग्रहणस्य व्यवस्थितविकल्पत्वान्नेति ।

---

१. निष्ठायाः तस्य D₁. २. After it—च D₁; चाच्ये P.

अञ्चोऽनपादाने ॥८।२।४८॥

अञ्चो[1] निष्ठातस्य नः स्यान्न त्वपादाने ॥ समक्नः । अनपादाने किम् । उदक्तमुदकं कूपात् ।

दिवोऽविजिगीषायाम् ॥८।२।४९॥

दिवो निष्ठातस्य नः स्यादविजिगीषायाम् ॥ सनीवन्तेति विकल्पितेट्त्वात्—

यस्य विभाषा ॥७।२।१५॥

यस्य क्वचिद् [2]विभाषया इड् विहितस्ततो निष्ठायामिण् न स्यात् ॥ द्यूनः । विजिगीषायां तु द्यूतम् । ओव्रश्चू । ग्रहिज्या[3] । स्कोरिति सलोपः । नत्वम् । नस्यासिद्धत्वात् षत्वे कुत्वे च प्राप्ते निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः । इति झलोभावान्न षत्वम् ।[6] वृक्णः ।

अञ्चः । अक्तमित्येतत्तु अञ्जे रूपम् ।

दिवः ।

यस्य । **द्यून** इति । 'च्छ्वोः शूठ्—' इत्यूठ् । **द्यूतमिति** । तत्र हि जिगीषयाक्षपातनादिकं क्रियते । 'ग्रहिज्या—' इति संप्रसारणमिति भावः । **नत्वमिति** । 'ओदितश्च' इति । **नस्यासिद्धत्वादिति** । पूर्वत्रासिद्धन्यायेन । **षत्वे कुत्वे चेति** । षत्वं 'व्रश्च—' आदिना । कुत्वं 'चोः कुः' इति । एते द्वे झलि पदान्ते च विधीयमाने प्राप्ते । तत्र 'निष्ठादेश—' इत्यनेन षत्वं प्रति नत्वस्यासिद्धत्वात् झलोभावात् न भवति । कुत्वं तु भवत्येव । तत्प्रति नत्वस्यासिद्धत्वादेवेत्याह—**निष्ठादेश** इत्यादिना ।

---

१. निष्ठायास्तस्य D_1. २. विभाषा इड् D_4, D_2, C; विभाषायां N. ३. After it—इति संप्रसारणम् B_2. ४. लोपः D_4, D_2, N. ५. नत्वस्या D_1, D_3, C, B_1, B_2, N. ६. After it—कुत्वं प्रत्यसिद्ध एव । N.

निर्वाणोवाते ॥८।२।५०॥

अयं निष्ठायां निपात्यते न तु वाते वाच्ये ॥ निर्वाणोऽग्निः मुनिर्वा । वाते तु निर्वातो वातः ।

शुषः कः ॥८।२।५१॥

शुषो निष्ठातस्य कः स्यात् ॥ शुष्कः ।

पचो वः ॥८।२।५२॥

पचेर्निष्ठातस्य वः स्यात् ॥ पक्वः ।[1]

क्षायो मः ॥८।२।५३॥

[2]क्षायः परस्य निष्ठातस्य मः स्यात् ॥ क्षामः । क्षामवान् ।

प्रस्त्योऽन्यतरस्याम् ॥८।२।५४॥

प्रपूर्वात् स्त्यायतेर्निष्ठातस्य मो वा स्यात् ॥[4]

स्त्यः प्रपूर्वस्य ॥६।१।२३॥

प्रात् स्त्यः संप्रसारणं स्यान्निष्ठायाम् ॥ प्रस्तीमः । मत्वा-

---

निर्वा । निस् पूर्वस्य वा इत्यस्य नत्वं निपात्यते । यतो न तु वाच्य इति व्याख्यातम् ततो निर्वाणो दीपो वातेनेति सिद्धम् ।[6]

शुषः । शुष शोषणे ।

क्षायः । क्षै क्षये ।

स्त्यः । स्त्य इति । स्त्यै ष्ट्यै शब्दसंघातयोरित्यनयोर्द्वयोर्धात्वोः स्त्यारूपापन्नयोर्निर्देशः । मत्वेत्यादि । 'यण्वतः' इत्यनेन 'संयोगादेरातो धातोर्यण्वतः' इति सूत्रं लक्ष्यते । तस्य त्रिपादीपठितत्वा-

---

१. Dropped N. २. After it—क्षै क्षये D1. ३. क्षै इत्यस्मात् परस्य C; क्षैपरस्य P. ४. After it—स्त्यै संहतौ ध्वनौ च D1. ५. Before it—हल इति दीर्घः । D2, B2, D4. ६. After it—भवति PC., Dc3.

भावपक्षे यण्वत इत्यस्य संप्रसारणं प्रत्यसिद्धत्वान्नत्वाभावः। प्रस्तीतः। प्रात् किम्। स्त्यानः।

अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः ॥८।२।५५॥

एते निष्ठान्ता निपात्यन्ते न चेत् प्रादेः परे स्युः॥ त्रिफला। फुल्लः। क्षीबो मत्तः। कृशस्तनुः। परिकृशश्च। उल्लाघो नीरोगः। अनुपसर्गात् किम्।

आदितश्च ॥७।२।१६॥

आकारेतो निष्ठाया इण् न स्यात्॥

ति च ॥७।४।८९॥

तादौ किति परे चरफलोरत उत् स्यात्॥ प्रफुल्लः।

दसिद्धत्वम्। तस्मात् पूर्वं संप्रसारणं तस्मिञ्जाते यण्वत्ता विहतेति नत्वं नेति भावः। पूर्वग्रहणं प्रसंस्तीत इत्यत्र यथा स्यादित्येवमर्थम्। तस्मिन् हि सति ग्रन्थाधिक्यादर्थाधिक्यमिति प्रपूर्वस्य समुदायस्यापि स्यात्।

अनु। **फुल्ल** इति। त्रिफला विशरणे। अस्मात्परस्य निष्ठातस्य लकारो निपात्यते उत्वमिडभावश्च। क्तवत्वन्तस्याप्यतिदिश्यते। फुल्लवान्। **क्षीबकृशोल्लाघा** इति। क्षीवृ मदे। कृश तनूकरणे। आभ्यां लाघृ शक्तौ अस्माच्च उत्पूर्वात्परस्य निष्ठातस्य लोप इडभावश्च निपात्यते। कृते वा इटि इत् इत्यस्य लोपो निपात्यते। **परिकृशश्चेति**। अयं भावः। परिकृश इत्यत्र यः परिशब्दः स क्रियान्तरयोगात् कृशिं प्रकृतिं प्रत्यनुपसर्ग एव। तथा हि। परिगतः कृशः परिकृश इति।

आदि। चकारोऽनुक्तसमुच्चयार्थः। तेन आश्वस्तः। वान्तः। योगविभागः किम्। 'आदितश्च विभाषा भावादिकर्मणोः' इत्येव

---

१. नाभावः B_3, D_4. २. Before it—परेश्च D_3, D_4, B_1; after it—परिकृशः N. ३. °फलयो° D_2. ४. लो Dc_3.

प्रक्षीवितः । प्रकृशितः । प्रलाघितः ॥ [1]उत्फुल्लसंफुल्लयोरुप-संख्यानम् ॥

नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम् ॥८।२।५६॥

एभ्यो निष्ठातस्य नो वा स्यात् ॥ नुन्नः । नुत्तः । विद [2]विचारणे । विन्नः । वित्तः । उन्दी क्लेदने ।

श्वीदितो निष्ठायाम् ॥७।२।१४॥

श्वयतेरीदितश्च निष्ठायामिण् न स्यात् ॥ उन्नः । उत्तः । त्राणः । त्रातः । घ्राणः । घ्रातः । ह्रीणः । ह्रीतः । [3]वेत्तेस्तु विदितः । विद्यतेस्तु विन्नः ।

---

[4]वक्तव्यम् । अन्यत्र भावादिकर्मभ्यां 'यस्य विभाषा' इति निषेधः स्यात् । सत्यं ज्ञापनार्थमेतत् ज्ञाप्यते यदर्थस्य विभाषा तदर्थस्यैव प्रतिषेधः[5] । तेन 'विभाषा गमहनविदविशाम्' इत्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञानार्थस्य निषेधो न । विदितः । विदितवानिति । प्रक्षीवित इत्यादौ 'आर्धधातुकस्य—' इतीट् ।

नुद । ह्रीत्यस्याप्राप्तमितरेषां च नित्यप्राप्तं विकल्प्यते । उन्दी इति ईदित्त्वप्रदर्शनार्थमस्य पाठः ।

श्वीदितः । वेत्तेस्त्विति । विद ज्ञाने अस्य । विद्यतेरिति । विद सत्तायाम् अस्य । तथोक्तम्—

"वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।
विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विन्दतेः ॥" इति ।

१. Before it—लाघ सामर्थ्ये N. २. विचारे N. ३. तु dropped N, D4. ४. हि वक्तव्यम् PC., Do3. ५. After it इति Dc3.

न ध्याख्यापॄमूर्च्छिमदाम् ॥८।२।५७॥

एभ्यो निष्ठातस्य नो न स्यात् ॥ ध्यातः । ख्यातः । पूर्तः । राल्लोपः । मूर्तः । मत्तः ।

वित्तो भोगप्रत्यययोः ॥८।२।५८॥

विन्दतेर्निष्ठान्तस्य निपातोयम् भोग्ये[1] प्रतीते चार्थे । वित्तं धनम् । वित्तः पुरुषः । अनयोः किम् । विन्नः[2] ।

भित्तं शकलम् ॥८।२।५९॥

भिन्नमन्यत् ॥

ऋणमाधमर्ण्ये ॥८।२।६०॥

एतन्निपात्यमाधमर्ण्यव्यवहारे ॥ ऋतमन्यत् ।

न ध्या । 'रदाभ्याम्—' इति 'संयोगादेः—' इति च प्राप्तस्य नत्वस्य निषेधोयम् ।

वित्तः । विद्लृ लाभे । अस्यैव ग्रहणमित्याह—**विन्दतेरिति** । भुज्यत इति भोगः । प्रतीयत इति प्रत्ययः । इत्येवं विग्रहं मत्वाह—**भोग्ये प्रतीते चार्थे** इति । **वित्तं धनमिति** । तद्धि भुज्यत इति भोग्यं भवति ।

ऋण । ऋ इत्येतस्माद्धातोर्निष्ठातकारस्य नकारो निपात्यते । **आधमर्ण्य** इति । अधम ऋणे अधमर्णः । अस्मादेव निपातनात् सप्तम्यन्तोत्तरपदे समासः । तस्य भाव आधमर्ण्यम् । तेन चाधमर्ण्योपलक्षितो व्यवहारो लक्ष्यत इत्याह—**आधमर्ण्य** इति । तेनोत्तमर्ण इत्यपि सिद्धम् । **ऋतमन्यदिति** । सत्यमित्यर्थः ।

---

१. भोगे B_2, D_4. २. विन्नम् D_3, B_2.

इण् निष्ठायाम् ॥७।२।४७॥

निरः कुषो निष्ठाया इट् स्यात् ॥ निःकुषितः[2] ।

[3]वसतिक्षुधोरिट् ॥७।२।५२॥

आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् ॥ उषितः । क्षुधितः ।

अञ्चेः पूजायाम् ॥७।२।५३॥

पूजार्थादञ्चेः[4] क्त्वानिष्ठयोरिट् स्यात् ॥ अञ्चितः । गतौ तु[5] अक्तः ।

लुभोविमोहने ॥७।२।५४॥

लुभः क्त्वानिष्ठयोरिट् स्यान्न तु गार्ध्ये ॥ लुभितः । गार्ध्ये[6] लुब्धः ।

इण् । कुषि निष्कर्षे । 'इट्' इत्यनुवर्तमानेपि इड्ग्रहणं नित्यार्थम् । सूत्रारम्भस्तु 'यस्य विभाषा' इत्यस्य बाधार्थः ।

वसति । वस निवासे । क्षुध बुभुक्षायाम् । अनुदात्तत्वादिट्—प्रतिषेधे प्राप्ते वचनम् । पुनरिड्ग्रहणं नित्यत्वार्थम् । विकरणो निर्देशार्थ एव । वस्तेस्तूदात्तत्वाद् भवितव्यमेवेटा । उषित इति । यजादित्वात् संप्रसारणम् । 'शासिवसि—' इति षः ।

अञ्चेः । 'उदितो वा' इति क्त्वाप्रत्यये विकल्पे प्राप्ते निष्ठायां च 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम् । **अञ्चित** इति । 'नाञ्चेः पूजायाम्' इति न्लोपाभावः ।

लुभः । 'तीषसह—' इति क्त्वायां विकल्पे निष्ठायां निषेधे प्राप्ते वचनम् ।

---

१. निष्ठायां C. २. निष्कुषितः D_2, P, N. ३. D_1 drops it. ४. °दञ्चतेः C. ५. D_2 drops it. ६. गार्ध्ये तु B_2, N, D_4.

क्लिशः क्त्वानिष्ठयोः ॥७।२।५०॥

क्लिशः परयोरेतयोरिड् वा स्यात् ॥ क्लिशितः । क्लिष्टः । वमुजपश्वसो निष्ठाया इड् वेति केचित् ॥ वमितः । अनुनासिकस्य क्वीति दीर्घः । वान्तः । जपितः । जप्तः । विश्वसितः । विश्वस्तः । आश्वसितः । आश्वस्तः ।

पूङश्च ॥७।२।५१॥

पूङः क्त्वानिष्ठयोरिड् वा स्यात् ॥

पूङः क्त्वा च ॥१।२।२२॥

पूङः क्त्वा निष्ठा च सेट् किन्न स्यात् ॥ पवितः । पूतः ।

क्लिशः । क्लिशू विबाधने इत्यस्य क्त्वायां विकल्पः सिद्धः । निष्ठायां 'यस्य विभाषा' इति निषेधः स्यात् तदर्थं निष्ठाग्रहणम् ।[1] क्लिश उपतापे इत्यस्य क्त्वायां निष्ठायां च नित्यमिट् स्यात् तदर्थं क्त्वाग्रहणम् । वमुजपिति । विपूर्व आङ्पूर्वश्च श्वसिः ।

पूङः । 'श्र्युकः किति' इति उगित्त्वान्निषेधे प्राप्ते विकल्पार्थं वचनम् । सानुबन्धोच्चारणं पूञ्निवृत्त्यर्थम् ।

पूङः । द्वयोर्विभाषयोर्मध्ये विधिः स नित्य इति नित्योयं विधिः । क्त्वाग्रहणमुत्तरार्थम् । अस्मात् परस्य क्त्वाप्रत्ययस्य 'न क्त्वा सेट्' इत्येव निषेधः सिद्धः । सानुबन्धग्रहणं पवितः पवितवान् इत्यत्र यङ्लुगन्तात् प्रतिषेधो मा भूदित्येवमर्थं न तु पूञ्निवृत्त्यर्थम् । यतस्तस्मात् परयोः क्त्वानिष्ठयोः सेटोरसंभवः । 'श्र्युकः किति' इत्नीट्प्रतिषेधात् ।

---

१. यत् क्लिश PC.

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ॥१।२।१९॥

एभ्यः सेण्निष्ठा किन्न स्यात् ॥ शयितः ।

आदिकर्मणि निष्ठा वक्तव्या ॥*

आदिकर्मणि क्तः कर्तरि च ॥३।४।७१॥

आदिकर्मणि यः क्तः स कर्तरि स्यात् चाद् भावकर्मणोः॥

विभाषा भावादिकर्मणोः ॥७।२।१७॥

भावे आदिकर्मणि च आदितो निष्ठाया इड् वा स्यात् ॥ प्रस्वेदितश्चैत्रः । स्वेदितं तेन । मेदितम् । क्ष्वेदितम । धर्षितम् । पक्षे । प्रस्विन्नः । स्विन्नं तेनेत्यादि ।

निष्ठा । शीङ् स्वप्ने । ञिष्विदा गात्रप्रक्षरणे । ञिमिदा स्नेहने । ञिक्ष्विदा स्नेहमोचनयोः । ञिधृषा प्रागल्भ्ये । यङ्लुक्ग्रहणं मा भूदिति शीङ् अनुबन्धेन निर्दिष्टः । शयितः । **आदिकर्मणीति** । आदिभूतक्रियाक्षण आदिकर्म । **प्रस्वेदितश्चैत्र** इति । कर्तरि क्तः । अनेन कर्तुरुक्तत्वात् चैत्र इत्यस्य प्रथमा । प्रशब्द आदिकर्म द्योतयति । **स्वेदितं तेनेत्यादि** । भावे क्तः । कित्त्वाभावात् सर्वत्र गुणः । भावक्तत्वादिट् । **पक्षे इति** । इडभावपक्षे इत्यर्थः । **प्रस्विन्न** इति । कर्तरि क्तः । इडभावात् कित्वनिषेधो न । **स्विन्नं तेनेति** । भावे क्तः । आदिना प्रमिन्नः । प्रमिन्नं तेन । प्रक्ष्विण्णः । प्रक्ष्विण्णं तेन । प्रधृष्टः । प्रधृष्टं तेन ।

---

१. After it—प्रस्वेदितः । प्रमेदितः । प्रक्ष्वेदितः । प्रधर्षितः । D_2, B_3, D_4.
२. निष्ठायां B_2. ३. For प्रस्विन्नः । स्विन्नं तेनेत्यादि प्रस्विन्नं तेनेत्यादि D_1, D_3, C, B_1. ४. ञिक्ष्विदा Dc_1.

मृषस्तितिक्षायाम् ॥१।२।२०॥

क्षमार्थान्मृषेः[१] सेण्निष्ठा किन्न स्यात्[२] ॥ मर्षितः । तितिक्षायां किम् । अपमृषितं वाक्यम् ॥

उदुपधाद् भावादिकर्मणोरन्यतरस्याम् ॥ ॥१।२।२१॥

उकारोपधात् परा भावादिकर्मणोः सेण्निष्ठा किन्न स्याद्वा ॥ द्योतितम् । द्युतितं तेन । प्रद्योतितः । प्रद्युतितः[३] । शब्दादीनामिष्टिः । नेह । गुधितम् ।

निष्ठायां सेटि ॥६।४।५२॥

सेटि निष्ठायां परतो णेर्लोपः स्यात् ॥ भावितः ।

मृष । **क्षमार्थादिति** । क्षान्त्यर्थादित्यर्थः । **अपमृषितमिति** । अपमृष्टमित्यर्थः । अनेकार्थत्वाद्धातूनामेतल्लभ्यते । अनेकार्थत्वं धातूनां तितिक्षाग्रहणाल्लभ्यते । अन्यथा तद् व्यर्थं स्यात् । व्यवच्छेद्याभावात् ।

उदु । **द्योतितमिति** । भावे क्तः । **प्रद्योतित इति** । कर्तरि क्तः । गुधितमिति । गुध परिवेष्टने । दैवादिकः ।

निष्ठा । सेटि किम् । संज्ञपितः पशुः । 'सनीवन्तर्ध—' इति ज्ञपेरिटि विकल्पिते[४] 'यस्य विभाषा' इति इण्निषेधः[५] । ननु चात्र 'णेरनिटि' इति णिलोपः स्यात् । नैवम् । सेड्ग्रहणसामर्थ्यात्तेनापि[७] न । ननु 'यस्य विभाषा' इत्यत्रैकाच इत्यनुवृत्तेर्नित्यमत्रेट् स्यात् । ततश्च सेट्ग्रहणं[६] व्यर्थं स्यात् । एवं तर्हि कालावधारणार्थमिडागमे कृते णिलोपो यथा स्यादिति । यदि सेट्ग्रहणं न स्यात्तदा कृताकृत-

---

१. °न्मृषः C., P, N. २. किन्वा स्यात् C., वा किन्न स्यात् P, B_2, N. ३. प्रद्युतितो वा D_4. ४. °रिड् विकल्पात् PC., Dc_3. ५. इट्प्रतिषेधः PC., Dc_3. ६. °ग्रहणं PC., Dc_3. ७. °सामर्थ्यात्तत्रापि न.

भावितवान् । श्वीदित इति नेट् । संप्रसारणम् । शूनः । दीप्तः । गुहू । गूढः । वनु । उदितो वेति विकल्पितेट्त्वात् निष्ठायां नेट् । वतः ।[2] ततः । पेतः सनि वेट्कत्वादिडभावे प्राप्ते श्रितातीतपतितेति निपातनादिट् । पतितः । अनेकाच्त्वादिट् । दरिद्रितः । जाग्रोविचिण्णिति गुणः । जागरितः । आदिकर्मणि निष्ठायां शकिरनिड्विति शौनगाः । शक्तः शकितोऽर्चितुं शिवस्तेन ।

प्रसज्जितत्वेनेटि अकृते एव णिलोपः स्यात् । एवं च सति कारितमित्यत्र 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधः प्रसज्येत । **संप्रसारणमिति** । 'वचिस्वपि—' इति । **शून** इति । टुओश्वि गतिवृद्ध्योः । 'ओदितश्च' इति नः । 'हलः' इति दीर्घः । **दीप्त** इति । दीपी दीप्तौ । **गूढ** इति । गुहू संवरणे । ऊदित्वेन वेट्कत्वात् 'यस्य विभाषा' इतीट्प्रतिषेधः । **वनु** इति । वनु बोधने । उदित्त्वप्रदर्शनार्थं पाठः । **वत** इति । 'अनुदात्तोपदेश—' इति नलोपः । **तत** इति । तनु विस्तारे । पूर्ववत् । **पतेरिति** । 'तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः' इति वेट्कत्वादित्यर्थः । **अनेकाच्त्वादिति** । दरिद्रातेः सनि वेट्कत्वेपि 'यस्य विभाषा' इति निषेधो न । तत्र 'एकाचः' इत्यनुवृत्तेरिति भावः । **जागरित** इति । जागृ निद्राक्षये । **शक्त** इति । शक्लृ शक्तौ । कर्मणि क्तः ।

१. वनु उदितो वेति क्त्वि विकल्पित उदित्वान्निष्ठायां नेट् D_1; वनु उदितो वेति क्त्वि विकल्पितेट्कत्वा° D_4. २. After it—मतः D_2; मतः । सतः B_2; ततः । यतः । N; मतः before पतेः D_4. ३. पतः dropped B_2, D_4 ४. वेट्त्वा° B_2. ५. द्वितीयाश्रिता° B_2, ६. सौनगः C; असौनागः D_1; शौनागाः B_2, N; शौनागः D_4. ७. °तीट्प्रतिषेधः Dc_3, PC.

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥७।२।१८॥

मन्थादिष्वर्थेषु क्षुब्धादयोऽ[१]णौ क्तान्ता निपात्यन्ते ॥ फाण्टमनायासः कषायभेदः[२] । [३]अन्यत्र क्षुभितम् । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम्[४] । फाणितम् । वाहितम् ।

[५]धृषिशसी वैयात्ये ॥७।२।१९॥

[६]एतौ निष्ठायामविनये अनिटौ स्तः ॥ धृष्टः । विशस्तः ।

क्षुब्ध । क्षुभ संचलने । अस्य इडभावो निपात्यते मन्थे वाच्ये । एवमुत्तरेष्वपि निपात्यते इडभावः । क्षुब्धो मन्थः । क्षुब्धा गिरिनदीत्याद्युपमानात् । स्वन शब्दे । स्वान्तं मनः । ध्वन शब्दे । ध्वान्तं तमः । लगिर्गत्यर्थः । लग्नं सक्तम् । निपातनादेव नत्वम् । म्लेच्छ अव्यक्तायां वाचि । इत्वं निपातनादेव । म्लिष्टमविस्पष्टम् । रेभृ शब्दे । इत्वं निपातनात् । विरिब्धः स्वरः । फण गतौ । फाण्टमनायासः कषायभेद इति । त्रिफलादीनां कषायसारमित्यर्थः । यदपक्कमपिष्टमुदकसंपर्काद्विभक्तरसमीषदुष्णं तदिहानायासशब्देनोपलक्ष्यते । अल्पप्रयाससाध्यत्वादित्यर्थः । बाहृ प्रयत्ने । बाढम् भृशम् । **अन्यत्रेति** । अर्थान्यत्व इत्यर्थः ।

धृषि । अविनये धृष्टत्वे इत्यर्थः । **विशस्त** इति । शसु हिंसायाम् । तत्र धृषेः 'आदितश्च' इति शसेरुदितः 'यस्य विभाषा' इति निषेधे सिद्धे नियमार्थं वचनम् । वैयात्ये एव नान्यत्रेति । वैयात्ये किम् । धर्षितः । विशसितः ।

---

१. मन्थादिष्वष्टसु D_1, P. २. काषाय° D_2. ३. Before it—क्षुभ संचलने । स्वन शब्दे । ध्वन शब्दे । लगे संगे । म्लेच्छ अव्यक्ते शब्दे । रिभ शब्दे सौत्रो विपूर्वः । फण गतौ । बाह प्रयत्ने । D_3, B_2, D_4 (रिभ for रि & बाहृ for बाह D_4.) ४. विरिभितम् । फणितम् । D_4. ५. Before it—ञिधृषा प्रागल्भ्ये । B_2, D_4. ६. Before it—शसु हिंसायां विपूर्वः B_2, D_1.

दृढः स्थूलबलयोः ॥७।२।२०॥

स्थूले बलवति चायं निपातः ॥ दृंहितोऽन्यः ।[1]

प्रभौ परिवृढः ॥७।२।२१॥

परिवृंहितोऽन्यः ।[2]

कृच्छ्रगहनयोः कषः ॥७।२।२२॥

कषो निष्ठायामिण् न स्यात् कृच्छ्रगहनयोः ॥ कष्टोऽग्निः । कष्टं वनम् ।[3] कषितमन्यत् ।

दृढः । **बलवतीति** । मतुब्निर्देशेन सूत्रे बलशब्दो मत्वर्थीयाकारान्त इति दर्शयति । दृहि वृद्धौ इत्यस्य धातोः क्तप्रत्यये इडभावः । हकारनकारयोर्लोपः परस्य ढत्वं च निपात्यते । ननु हलोपः किमिति निपात्यते परस्य ढत्वे 'हो ढः' इति च ढत्वे 'ढो ढे लोपः' इति लोपः स्यादेव । नैवम् । ढलोपे हि सति द्रढिमेत्यादौ पूर्वत्रासिद्धन्यायेनासिद्धत्वात् 'र ऋतो हलादेर्लघोः' इति रत्वं न स्यात् । इह च परिद्रढय्य गत इति 'ल्यपि लघु पूर्वात्—' इत्ययादेशो न स्यात् । इह च परिवृढस्यापत्यं पारिवृढी कन्येति गुरूपोत्तमलक्षणः ष्यङ्[4] स्यात् । तस्मात् पूर्वत्रासिद्धनिवृत्त्यर्थं हलोपनिपातनम् ।

प्रभौ । पूर्वेण समानमेतन्निपातनम् । वृहि वृद्धौ । अस्य प्रभौ वाच्ये । संग्रामयतेरेव सोपसर्गादुत्पत्तिरिष्यते नान्यस्मात् । तथा सति परिवृढयतीति 'तिङ्ङतिङः' इति निघातः परिव्रढय्य गत इत्यत्र च परिशब्दस्य क्त्वाप्रत्ययान्तेन सह समासे सति ल्यबादेशश्च सिध्यति ।

कृच्छ्र । कष हिंसार्थः । कृच्छ्रं दुःखं तत्करणं च । **कषितमन्यदिति** । सुवर्णादिकम् ।

---

१. After it—दृहि दीप्तौ D_2 ; दृंहितोऽन्यः । दृहि दीप्तौ D_4, B_2 (वृद्धौ B_2); दृंहितोऽन्यः । N. २. After it—वहि वृद्धौ । परिपूर्णः D_4 D_2, B_2. ३. After it—कष हिंसायाम् D_2, B_2, D_4. ४. ष्यङ् Dc_2, PC.

घुषिरविशब्दने ॥७।२।२३॥

[1]घुषेर्निष्ठायामिण् न स्यात् ॥ घुष्टा रज्जुः ।[2] अविशब्दने किम् । घुषितं वाक्यम् ।

अर्द्देः संनिविभ्यः ॥७।२।२४॥

एतत्पूर्वाद[3]र्द्देर्निष्ठायामिण् न स्यात् ॥ समर्ण्णः । न्यर्ण्णः । व्यर्ण्णः । [4]अर्दितोन्यः ।

अभेश्चाविदूर्ये ॥७।२।२५॥

अभिपूर्वाद[5]र्द्देर्निष्ठायामिण् [6]न स्यात् सामीप्ये ॥ [7]अभ्यर्णम् । अभ्यर्दितमन्यत् ।

घुषि । घुषिर् विशब्दने इति चुरादिः । घुषिर् शब्दार्थे इति भ्वादिः । द्वयोरपि ग्रहणम् । विशब्दनं स्वाभिप्रायस्य शब्देनाविष्करणम् । विशब्दनप्रतिषेधश्च ज्ञापकश्चुरादिणिच् विशब्दनार्थस्यानित्य इति । तेनायमपि प्रयोगः सिद्धः । जुघुषुः पुष्पमागवा इति । अपघुषितं वाक्यमिति । शब्देन प्रकटीकृताभिप्रायमित्यर्थः ।

अर्द्देः । अर्द गतौ याचने च ।

अभेः । विदूरं विप्रकृष्टम् । ततोन्यदविदूरम् । तस्य भाव आविदूर्यम् । ब्राह्मणादित्वात् ष्यञ् । एतस्मादेव निपातनात् 'न नञ्पूर्वात् तत्पुरुषात्' इति ष्यञः प्रतिषेधो नेति चेतसि कृत्वाह—**सामीप्ये** इति ।

---

१. घुषिर्निष्ठायामनिट् स्यात् D₂. २. After it—घुष स्तुतौ D₂, D₄ ३. °र्द्दर्नि° D₂, P. ४. D₂ drops it. ५. °र्द्दर्तेर्नि° C. ६. स्यान्न D₂; स्यात् dropped D₄ ७. अभ्यर्णः । N. ८. शब्दने PC, Dc₃.

णेरध्ययने वृत्तम् ॥७।२।२६॥

ण्यन्ताद्वर्ततेर्वृत्तमिति निपात्यते अध्ययनेऽर्थे ॥ वृत्तं छन्दश्छात्रेण । वर्तितमन्यत् ।

शृतं पाके ॥६।१।२७॥

श्रा इत्यस्य शृभावो निपात्यते निष्ठायां क्षीरहविषोः पाके ॥ शृतं क्षीरम् । श्राणमन्यत् ।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥७।२।२७॥

एते णिचि निष्ठान्ता वा निपात्यन्ते ॥ पक्षे । दमितः । शमितः । पूरितः । दासितः । स्पाशितः । छादितः । ज्ञापितः ।

रुष्यमत्वरसंघुषास्वनाम् ॥७।२।२८॥

एभ्यो निष्ठायामिण् न स्याद्वा ॥ रुष्टः । रुषितः ।

णेः । इडभावो णिलुक् च निपात्यते ।

शृतं । श्रा पाके ।

वा दान्त । इट्प्रतिषेधो णिलुक् च निपात्यते । क्वचिदुपधाह्रस्वत्वं च । दमु शमु उपशमे । पूरी आप्यायने । दसु उपक्षये । स्पश बाधनस्पर्शनयोः । छद अपवारणे । ज्ञप मारणतोषणनिशामनेषु । शमित इति । 'मितां ह्रस्वः' इति ह्रस्वः । 'निष्ठायां सेटि' इति णिलोपः ।

रुष्य । रुष रोषे । अम गत्यादिषु । अम रोगे अस्य चौरादिकस्य ग्रहणं न । 'एकाचः' इत्यधिकारात् । ञित्वरा संभ्रमे । संपूर्वः पूर्वोक्तो

---

१. क्षीरं हविर्वा B_2. २. Dropped in D_1, P. ३. संपूर्वोक्तो घुषिः PC.

आन्तः । अमितः । तूर्णः । त्वरितः । संघुष्टः । संघुषितः । आस्वान्तः । आस्वनितः ।

हृषेर्लोमसु ॥७।२।२९ ॥

हृषेर्निष्ठायामिड्वा स्याल्लोमस्वर्थे ॥ हृष्टं हृषितं लोम ॥ विस्मितप्रतिघातयोश्च ॥* हृष्टो हृषितो मैत्रः । विस्मितः प्रतिहतो वेत्यर्थः ।

अपचितश्च ॥७।२।३०॥

चायतेर्निपातोयं वा । अपचितः । अपचायितः ।

घुषिः । आङ्पूर्वः स्वनिः । आन्त इति । अनुनासिकस्य क्वीति दीर्घः । तूर्ण इति । 'ज्वरत्वर—' इत्यूट् । संपूर्वस्य घुषेरपि अविशब्दनेपि परत्वादयं विकल्पः स्यात् । संघुष्टौ दम्यौ । संघुषितौ दम्यौ । आङ्पूर्वस्य आस्वान्तः । आङ्पूर्वस्य स्वनेरपि परत्वादयं विकल्पः 'क्षुब्धस्वान्त—' इति निपातनं बाधते । आस्वनितं मनः । आस्वान्तं मनः ।

हृषेः । हृषु अलीके इत्युदित्त्वान्निष्ठायामनिट् । हृष तुष्टावयं सेट् । तयोर्द्वयोर्ग्रहणमित्युभयत्र विभाषेयम् । लोमानि मूर्धजानि अङ्गजानि च सामान्येन गृह्यन्ते । यथा लोमनखे स्पृष्ट्वा शौचं कर्तव्यमिति । तद्विषये हर्षे वर्तमानो हृषिर्लोमसु वर्तत इत्युच्यते । हृष्टमिति । 'गत्यर्थाकर्मक—' इति कर्तरि क्तः ।

अप । चायृ पूजानिशामनयोः । अयं योगश्चिनोतेः पूजायां वृत्तिर्यो नेच्छति तं प्रत्यारभ्यते । यस्त्विच्छति तं प्रति न । तथोक्तम् । चिनोतेरपचितः स्यात् चायतेस्त्वपचायित इति ।

---

१. आमितः N. २. °निष्ठाया P. ३. °मिण् न स्याद्वा D1, B2, D4. ४. हृषितो वा D2. ५. तथा चोक्तं PC, Dc3.

प्यायः पी ॥६।१।२८॥

प्यायतेर्निष्ठायां पीभावः स्यात् ॥ पीनं मुखम् । स्वाङ्गादन्यत्र वा ॥ प्यानः पीनः स्वेदः । सोपसर्गस्य न ॥ प्रप्यानः । आङ्पूर्वस्यान्धूधसोः स्यादेव । आपीनोन्धुः । आपीनमूधः ।

ह्लादो निष्ठायाम् ॥६।४।९५॥

ह्लादो ह्रस्वः स्यान्निष्ठायाम् ॥ प्रह्लन्नः ॥[2]

द्यतिस्यतिमास्थामित्ति किति ॥७।४।४०॥

एषामिकारोन्तादेशः स्यात्तादौ किति परे ॥ दितः । सितः । मितः । स्थितः ।

प्यायः । ओप्यायी वृद्धौ । स्वाङ्गादित्यादि व्यवस्थितविभाषाविज्ञानात् लभ्यते ।

ह्लादः । ह्लाद सुखे । प्रह्लन्न इति । 'रदाभ्याम्—' इति नः ।

द्यति । दो अवखण्डने । षोन्तकर्मणि । मा माने । माङ् माने । मेङ् प्रतिदाने ।[3] त्रयाणां ग्रहणम् । गामादाग्रहणेष्वविशेषात् । ष्ठा गतिनिवृत्तौ । आद्यस्य 'दो दद्—' इति दद्भावे शेषाणां 'घुमास्था—' इतीत्वे प्राप्ते इत्त्वविधिः । तपरकरणं मुखसुखार्थम् । न दीर्घनिवृत्त्यर्थम् । भाव्यमानत्वादेव तन्निवृत्तिसिद्धेः । श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः । दादत्तः ।

---

१. ह्लादेर्ह्रस्वः D4. २. After it—योगविभागः कर्तव्यः । प्रह्लत्तिः D2, B2, D4. ३. इति त्रयाणां Dc3, PC. ४. महेष्व° Dc3.

शाच्छोरन्यतरस्याम् ॥७।४।४१॥

शितः । शातः । छितः । छातः । इयतेर्नित्यमित्वं व्रते ॥* संशितं व्रतम् ।

दधातेर्हिः ॥७।४।४२॥

धात्रो हिः स्यात्तादौ किति ॥ हितः ।

दो दद् घोः ॥७।४।४६॥

घुसंज्ञस्य दा इत्यस्य दद् स्यात्तादौ किति ॥ आदेशस्य तान्तत्वे दस्तीति दीर्घत्वं दोषः । दान्तत्वे निष्ठानत्वम् । धान्तत्वे भष्भावः स्यात् । तस्मात् थान्तः । चर्त्वम् । दत्तः । घोः किम् । दातः ।

शाच्छोः । शो तनूकरणे । छो छेदने ।

दधातेः । 'द्युमास्था—' इतीत्वे प्राप्ते हिरादेशः । श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः । दाधीतः ।

दो दद् । दस्तीति दीर्घत्वं दोष इति । विदत्तमित्यादौ उपसर्गस्येत्यर्थः । **निष्ठानत्वम्** । 'रदाभ्याम्—' इति । **भष्भाव** इति । 'झषस्तथोः—' इति धत्वं लक्ष्यते । अथवा तान्तादावपि दोषो नेति भाष्ये प्रतिपादितम् । दात इति । दाप् लवने । अदाप् इति प्रतिषेधात् घुसंज्ञाभावः । दः किम् । धीतम् । धेट् पाने ।

---

१. Before it—उपसर्गात C; D_2 has–इयतेर्व्रतेति नित्यमित्वम् । तेन संशितं व्रतम् ।; B_2 follows D_2 but has इयते व्रते नित्य &c. २. D_1 drops इत्वम्; D_4 drops व्रते. ३. After it भास्वम् । B_2. ४. Dropped Dc_3. PC.

अच उपसर्गात् तः ॥७।४।४७॥

अजन्तादुपसर्गात् परस्य दा इत्यस्य घोस्तः स्यात्तादौ किति ॥ प्रत्तम् । अवत्तः ।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

दस्ति ॥६।३।१२४॥

इगन्तस्योपसर्गस्य दीर्घः स्यात् दादेशे तकारे परे ॥ नीत्तम् । सूत्तम् । घुमास्थेतीत्वम् । धेट् । धीतम् । गीतम् । पीतम् । जनसनेत्यात्वम् । जातम् । सातम् । खातम् ।

अचः । प्रत्तमिति । अलोन्त्यपरिभाषया आकारस्य तत्वे कृते दकारस्य चर्त्वं तकारः । अचः किम् । निर्दत्तम् । उपसर्गात् किम् । दधि दत्तम् । घोः किम् । अवदातम् । दैप् । 'उपसर्गात्' इति पञ्चमीनिर्देशादादेरलः प्राप्नोति । अत्र उत्तरम् । 'अचः' इत्येतद् द्विरावर्तते । तत्रैकं पञ्चम्यन्तमुपसर्गविशेषणार्थम् । द्वितीयं षष्ठ्यन्तं स्थाननिर्देशार्थम् । तेनाकारस्य तकारः । द्वितकारको वा निर्देशस्तेन अनेकाल्त्वात् सर्वस्य स्यात् । अवदत्तमित्यादि । ताभावार्थं निपात्यते । अथवानुपसर्गा एते क्रियान्तरविषयाः । यत्क्रियायुक्तास्तां प्रति गत्युपसर्गसंज्ञे भवत इति । अथवोपसर्गप्रतिरूपकाण्यव्ययानि नोपसर्गाः ।

दस्ति । 'अच उपसर्गात् तः' इत्यन्त्यस्य तकारः क्रियते तथापि चर्त्वभूतस्याश्रयणात् सिद्धं तकारादित्वम् । अथवा द्वितकारकोयमादेशः । धेडिति । धात्रो निवृत्त्यर्थमुक्तम् । तस्य हि हितामित्येव स्यात् । गीतमिति । गै गाने । पीतम् । पा पाने । जातमित्यादि । जन जनने । षण दाने । खनु अवदारणे ।

---

१. Dropped B_2, D_4. २. तादेशे D_3. ३. °तीत्वे B_2. ४. Dropped D_4.

अदो जग्धिर्ल्यप्ति किति ॥२।४।३६॥

अदो जग्धिः स्याल्ल्यपि तादौ किति च ॥ इकार इत् । धत्वम् । झरो झरि सवर्णे । जग्धः । आदिकर्मणि क्तः कर्तरि च । प्रकृतः कटं सः । प्रकृतः कटस्तेन । निष्ठायामण्यदर्थे । प्रक्षीणः सः ।

वाक्रोशदैन्ययोः ॥६।४।६१॥

क्षियो निष्ठायां दीर्घो वा स्यात् आक्रोशे दैन्ये च[2] गम्ये ॥ क्षीणायुर्भवान् क्षितायुर्वा । क्षीणायं तपस्वी क्षितो वा । भावे दीर्घो वेति केचित् । प्रक्षितं प्रक्षीणं तेन ।

निनदीभ्यां स्नातेः कौशले ॥८।३।८९॥

आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये ॥ निष्णातः शास्त्रेषु । नदीष्णः । सुपीति कः ।

अदः । इकार उच्चारणार्थः । तेन नुम् न । धत्वमिति । 'झषस्तथोर्धोऽधः' इति । **प्रकृतः कटं स** इति । कर्तुः क्तेनोक्तत्वात् कर्तरि प्रथमा । कर्मणि द्वितीया अनभिहितत्वात् । **प्रकृतः कटस्तेनेति** । कर्मणि क्तः । **प्रक्षीणः स** इति । 'आदिकर्मणि—' इति क्तः कर्तरि । 'निष्ठायाम्—' इति दीर्घः[6] । 'क्षियो दीर्घात्' इति नत्वम् ।

निनदी । कौशले किम् । निस्नातः । नद्यां स्नातो नदीस्नातः ।

---

१. दीर्घो वा स्यान्निष्ठायां D_1. २. D_2 drops it; P, B_2 has गम्ये च. ३. क्षीणायुर्भव क्षितायुर्वा B_2; क्षीणायुर्भव । क्षितायुर्भव । N_1. ४. D_2 drops it. ५. Before it—'निष्ठायाम्' इत्यनेन दीर्घः । PC, Dc_3. ६. निष्ठा...... दीर्घः dropped Dc_3, PC.

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥३।४।७२॥

एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च ॥ गङ्गां गतः । गङ्गां प्राप्तः । ग्लानः सः । लक्ष्मीमाश्लिष्टो हरिः । शेषमधिशयितो विष्णुः । वैकुण्ठमधिष्ठितः । शिवमुपासितः । हरिदिनमुपोषितः । राममनुजातोऽच्युतः । गरुडमारूढो गोविन्दः । विश्वमनुजीर्णोऽनन्तः । पक्षे प्राप्ता गङ्गा तेन त्यादि । शीङादेरकर्मकत्वेपि उपसृष्टस्य सकर्मकत्वात् पृथगुक्तिः ।

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥३।४।७६॥

निश्चलार्थाद् गत्यर्थाद् भोजनार्थाच्चाधिकरणे क्तः स्याद् यथाप्राप्तं च ।

गत्यर्थ । गत इति । 'अनुदात्तोपदेश—' इति मलोपः । ग्लान इति । 'संयोगादेः—' इति नत्वम् । शेषमित्यादि । 'अधिशीङ्—' इत्याधारस्य कर्मत्वात् कर्मणि द्वितीया । अधिष्ठित इति । 'द्यतिस्यति—' इतीत्वम् । 'उपसर्गात् सुनोति—' इति षः । उपोषित इति । 'वसतिक्षुधोरिट् ।' 'वचिस्वपि—' इति संप्रसारणम् । 'शासिवसि—' इति षः । अनुजात इति । 'जनसन—' इत्यात्वम् । आरूढ इति । 'हो ढः' । धत्वम् । ष्टुत्वम् । 'ढो ढे लोपः' । 'ढ्रलोप—' इति दीर्घः । अनुजीर्ण इति । जॄष ऋत इत् । 'हलि च' इति दीर्घः । 'रदाभ्याम्'— इति नत्वम् । णत्वम् । ननु श्लिषादीनामकर्मकत्वादेव कर्तरि स्यात् किमेषां ग्रहणेनेत्याशङ्क्याह—शीङादेरिति ।

क्तोधि । यथाप्राप्तं चेति । ध्रौव्यार्थेकर्मकत्वात् कर्तरि भावे च गत्यर्थेभ्यः कर्तरि कर्मणि भावे च प्रत्यवसानार्थेभ्यः कर्मणि भावे च क्तः स्यादित्यर्थः ।

---

१. म्लानः D_2, B_2. २. पक्षे च C. ३. ननु च Dc_3, PC.

मुकुन्दस्यासितमिदमिदं यातं रमापतेः ।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः ॥[1]

भुक्तमेषामस्तीति मत्वर्थीयाकारेण भुक्ताः पीता इत्यादि स्यात् ।

ञीतः क्तः ॥३।२।१८७॥

ञीतो धातोर्वर्तमाने क्तः स्यात् ॥ ञिक्ष्विदा । क्ष्विण्णः । ञिइन्धी । इद्धः ।

मतिबुद्धिपूजार्थेभ्यश्च ॥३।२।१८८॥

एतदर्थेभ्यो[2] वर्तमाने क्तः स्यात् ॥ राज्ञां मतः इष्टः[3] बुद्धः विदितः । पूजितः[4] । अर्चितः । चादनुक्तमपि[5] ।

'**मुकुन्दस्य**' इत्यादि । आसितमित्यादौ सर्वत्राधिकरणे क्तः । 'अधिकरणवाचिनश्च' इति मुकुन्दस्येत्यादौ षष्ठी । **मत्वर्थीयाकारेणेति** । 'अर्शआदिभ्योच्' इत्यनेन । भात्रादावुदाहर्तव्यम् ।

ञीतः । **ञिक्ष्विदेति** । मोक्षस्नेहयोर्वर्तते । 'आदितश्च' इति नेट् ।

मति । मतिः संमतिः । **बुद्धिर्ज्ञानम्** । **राज्ञां मत इति** । '**क्तस्य च वर्तमाने**' इति षष्ठी । **इष्ट इति** । **इष इच्छायाम्** ।

---

१. °मेतच्च कृष्णस्येत्यूचु° B_2, D_4. २. Before it—मतिरिच्छा । बुद्धिर्ज्ञानम् । पूजा सत्कारः । N_1. ३. दृष्टः C. ४. Dropped in C, D_1. ५. °दनुक्तानामपि । B_2.

शीलितो रक्षितः क्षान्तः आक्रुष्टो जुष्ट इत्यपि ।[1] सुप्तः । शयितः । तृप्तः । इत्याद्या वर्तमाने ज्ञेयाः ।

नपुंसके भावे क्तः ॥३।३।११४॥

धातोः क्तः स्याद् भावेऽर्थे स च क्लीबे ॥ हसितं जल्पितं शयितं छात्रस्य ।

लिटः कानज्वा ॥३।२।१०६॥

लिटः कानजादेशो वा स्याच्छन्दसि । प्रयोगवशात् लोकेपीति केचित् । तङानावात्मनेपदम् । द्वित्वादि । चक्राणः ।

'तीषसह—' इति वेट्त्वात् 'यस्य विभाषा' इतीण्निषेधः । **शीलित** इत्यादि । शील समाधौ । रक्ष पालने । क्षमूष् सहने । क्रुश आह्वाने रोदने च । जुषी प्रीतिसेवनयोः ।

नपुं । 'तयोरेव—' इत्येव भावे क्तः सिद्धः । नपुंसकविशेषविहितेन ल्युटा बाधा मा भूदिति सूत्रारम्भः । **शयितं छात्रस्येति** । नपुंसके भावे क्तस्य योगे शेषविवक्षायां वेति षष्ठी ।

लिटः । चित्करणमन्तोदात्तार्थं कित्करणं कित्कार्यार्थम् । 'छन्दसि लिट्' अतो लिड्ग्रहणेनुवर्तमानेपि पुनर्लिड्ग्रहणं **सर्वस्य** लिट आदेशो यथा स्यादित्येवमर्थम् । अन्यथा तस्यैव स्यात् । **प्रयोगे**ति । तथा **चामरसिंहे** कानचः प्रयोगः । 'शिश्रिदानोऽकृष्णकर्मा' इति । **क्षीरस्वामिना** च व्याख्यातम् । श्विदि श्वैत्ये । लिट् । कानजिति । **द्वित्वादी**ति । 'लिटि धातोः—' इति द्वित्वम् । आदिना अभ्यासकार्यं च । **चक्राण** इति । कृञः परोक्षे लिट् । तस्य कर्तृगे फले विवक्षिते कानच् । यणादेशः । 'द्विर्वचनेचि' इति द्वित्वे कर्तव्ये **स्थानिवद्भावः** । 'उरत्' इत्यत्वम् । 'कुहोश्चुः' ।

---

१. इत्यादि D_2; जुष्टः सुप्तः शयितः तृप्त इत्यपि इत्याद्या &c. B_2; इत्याद्या वर्तमाने ज्ञेयाः for इत्यपि । D_4 (*i. e.* सुप्तः to तृप्तः dropped D_4.) २. After it—हृष्टश्च हर्षितश्चोभावभिव्याहृत इत्यपि । हृष्टतुष्टौ तथोत्कृष्टस्तथोभौ संयतोद्यतौ ॥ N. ३. इत्यादयो C.

क्वसुश्च ॥३।२।१०७॥

लिटः क्वसुरादेशो वा स्यात् ॥ बेभज्वान्। जाग्रोविचीत्यत्र इकार उच्चारणार्थः। तेन क्वसावपि न गुणः। जजागृवान्। येषां नोच्चारणार्थस्तेषां क्वसौ गुणः। जजागर्वान्।

वस्वेकाजाद्धसाम् ॥७।२।६७॥

कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट् स्यान्नान्येषाम् ॥ आदिवान्। आरिवान्। ददिवान्। दरिद्रातेरशिति

क्वसुः। किन्त्वं संयोगान्तानां नलोपार्थमन्येषां तु 'असंयोगाल्लिट् कित्' इत्येव सिद्धत्वात्। ऋकारान्तानां क्ङिति प्राप्तगुणनिषेधार्थं च। उकारो नुमर्थो ङीबर्थश्च। योगविभागादुत्तरत्र क्वसोरेवानुवृत्तिः। **बभज्वानिति**। भञ्जो आमर्दने। द्विर्त्वादि। **जाग्र** इति। अत्र वृत्तिकारादिभिः पक्षद्वयं दर्शितम्। वीत्यत्र इकार उच्चारणार्थस्तेन वकारादौ क्वसावपि न गुणः। केषांचिन्नोच्चारणार्थस्तेषां क्वसौ गुणः।

वस्वे। **कृतद्विर्वचनानामेकाचामिति**। कृतं द्वित्वं येषां ते तथा। द्वित्वे कृते ये एकाचस्तेषामित्यर्थः। क्रादिनियमात् प्रतिषेधाभावात् य इट् प्रसक्तः स नियम्यते। **आदिवान्**। **आरिवानिति**। अद भक्षणे। धात्वभ्यासयोरेकादेशे कृते कृतद्वित्वोयमेकाच्। ऋ गतौ। 'ऋच्छत्यृताम्' इति गुणत्वे धात्वभ्यासयोरेकादेशे कृते कृतद्वित्वोयमेकाच्। **ददिवानिति**। डुदाञ् दाने। अयं कृतद्वित्वोनेकाजित्यप्राप्त इट आद्ग्रहणेन प्राप्यते। ननु चात्र लोपे कृते एकाजेवायं कृतद्वित्वस्तद् व्यर्थमाद्ग्रहणम्। नैवम्। इटि सति पश्चात् 'आतो लोप इटि च' इत्यातो लोपः। तस्मादनेकाजेव। दरिद्रातेस्त्वनेकाच्त्वादामा

---

१. चकृवान् D_2, D_4; बभज्वानिति मोलः पाठः। चकृवान् B_2. २. क्वसाव-पि B_3. ३. °रिडागमः D_1.

नित्याल्लोपित्वेनादन्तत्वाभावान्नेट् । ददरिद्वान् । जक्षिवान् ।
एषां किम् । बभूवान् । वसोः संप्रसारणम् । वुगागमः ।
बभूवुषः ।[1] बभूवुषी । वसुस्रंस्विति दः । बभूवत् । वकारादौ
क्विति च्छ्वोः शूठौ वेति केचित् । दुद्यूवान् । दिदिवान् ।
दिदिवुषः । विविश्वान् । विविच्छ्वान् ।

विभाषा गमहनविदविशाम् ॥७।२।६८॥

एभ्यो वसोरिड् वा स्यात् ॥ जग्मिवान् । जगन्वान् ।

भाव्यं दरिद्रांचकृवानिति । केषांचिन्मतेन वाम् । तेषां मते यदाम् न तदा कथमित्याशङ्क्याह—दरिद्रातेरिति । जक्षिवानिति । घस्लृ अदने । ननु 'घसिभसोर्हलि च' इति उपधालोपे कृते कृतद्वित्वोऽयमेकाच् । तत् किमस्य ग्रहणेन । मैवम् । परत्वात् द्वित्वात् पूर्वमुपधालोपः स्यात् ततस्त्वनच्कत्वात् द्वित्वमेव न स्यात् । इह हि घसिग्रहणादुपधा-लोपमपि परत्वादिडागमो बाधते । 'गमहन—' इति पश्चादुपधालोपः । स च द्वित्वे कर्तव्ये स्थानिवद् भवति । तेन जक्षिवानिति स्यात् । बभूवुषीति । 'उगितश्च' इति ङीप् । बभूवदिति क्लीबे प्रथमैक-वचनम् । दुद्यूवानिति । प्रथममूठ् पश्चाद् द्वित्वम् ।

विभाषा । 'वस्वेकाच्—' इति नियमाद् गमादीनां न स्यादिति विभाषेयमारभ्यते । जग्मिवानिति । परत्वादिट् ततो 'गमहन—' इत्युपधालोपः । ततो द्वित्वम् । जगन्वा-निति॰ । 'मो नो धातोः ।' 'म्वोश्च' इति नत्वम् ।

---

१. Before it—बभूवुषा D3, D4. २. बभूवद्भ्याम् D3, B2, D4. ३. दिद्यूवान् N1. ४. Dropped PC. ५. °विडभावो Dc3, PC. ६. Before it—दिवु PC, Dc3.

जघ्निवान् । जघन्वान् । तौदादिकौ विदविशी[1] । विविदिवान् । विविद्वान् । विविशिवान् । विविश्वान् । दृशेश्चेति वाच्यम्[2] ॥* ददृश्वान् । ददृशिवान्[3] ।

दाश्वान् साह्वान् मीढ्वांश्च ॥ ६।१।१२॥

एते क्वस्वन्ता निपात्यन्ते ॥

जघ्निवानिति । 'अभ्यासाच्च' इति कुत्वम् । **तौदादिकौ विदविशी** इति । विशस्तौदादिकत्वात् तेन साहचर्यात् विदेरपि लाभार्थस्य तौदादिकस्यैव ग्रहणं न ज्ञानाद्यर्थस्येत्यर्थः । तेन ज्ञानाद्यर्थस्य विविद्वानित्येव स्यात् ।

दाश्वान् । छन्दसि भाषायां चाविशेषेण निपात्यते । **दाश्वानिति** । दाशृ दाने । अस्य क्वसावद्वित्वमनिट्त्वं च निपात्यते । एवं सर्वत्र निपात्यते[4] । **साह्वानिति** । षह मर्षणे । अस्य परस्मैपदमुपधाया दीर्घश्च[5] । **मीढ्वानिति** । मिह सेचने । अस्योपधादीर्घो ढश्च । 'क्वसुश्च' इत्यनेनैव व्याख्यातप्रायत्वादुपेक्षितं व्याख्यायते— 'भाषायां सदवसश्रुवः' ॥३।२।१०८॥ सदादिभ्यः क्वसुः स्याद् भाषायाम् । आदेशविधानाद् भूतमात्रे भाषायामपि लिडनुमीयते । उपसेदिवान् । अनूषिवान् । उपशुश्रुवान् । लुङ्लङ्लिड्विषयेपि पुरस्तादनुवृत्तेः क्वसुः स्यात् । पक्षे उपासदत् । उपासीदत् । उपससाद । अन्ववात्सीत् । अन्ववसत् । अनूवास । उपाश्रौषीत् । उपाशृणोत् । उपशुश्राव ।

---

१. °विशौ B_2. २. वक्तव्यम् D_2. ३. ददृशिवान् । ददृश्वान् । N_1. ४. सर्वत्रैते निपात्यन्ते PC, Dc_3. ५. °मुपधादीर्घश्च PC, Dc_3.

उपेयिवाननाश्वाननूचानश्च ॥३।२।१०९॥

एते निपात्यन्ते । नात्रोपसर्गस्तन्त्रम् ॥[1] समीयिवान् । ईयिवान् । जाग्रः कानचि गुणो वेति केचित्[2] । जजाग्राणः । जजागराणः ।

लटः शतृशानचावप्रथमासमानाधिकरणे ॥ ॥३।२।१२४॥

लटः स्थाने शतृशानचौ स्तः प्रथमया[3] चेदेकार्थता न स्यात् ॥ शबादि । पचन्तं चैत्रं पश्य । पचता चैत्रेण कृतम् । तङानावित्यात्मनेपदसंज्ञा । कर्तृगे[4] फले शानच् ।

उपे । उपपूर्वादिणो लिटः क्वसुर्द्विंत्वमभ्यासस्य दीर्घस्तत्सामर्थ्यात् सवर्णदीर्घाभावः। क्रादिनियमात् प्राप्तस्य 'वस्वेकाजाद् घसाम्' इति निषेधस्येटः प्रतिप्रसवो निपात्यतेऽनेन । अजादौ न । उपेयुषः । उपेयुषा । नात्रेति । उपेत्युपसर्गोऽत्र प्रधानं न । तेनोपसर्गान्तरादप्यनुपसर्गादपि भवति । वानुवृत्तेः पक्षे लुङादयोऽपि । उपागात् । उपैत् । उपेयाय । अश्नातेर्नञ्पूर्वात् क्वसुरिडभावश्च निपात्यते । अनाश्वान् । नाशीत् । नाश्नात् । नाश । अनुपूर्वाद्ब्रुवेः कर्तरि कानच् निपात्यते । अनूचानः । अन्ववोचत् । अन्वब्रवीत् । अनूवाच ।

लटः। शकारः सार्वधातुकत्वार्थः। ऋकार उगित्त्वार्थः। चकारोऽन्तोदात्तार्थः । अप्रथमासमानाधिकरणे इति पर्युदासोऽयम् । प्रथमाया अन्या द्वितीयादिका विभक्तिरप्रथमा । तया चेदेकार्थता तस्येति । पचन्तमिति । डुपचष् पाके । 'उगिदचाम्—' इति नुम् ।

---

१. After it—समुपसर्गपूर्वान्निरुपसर्गाच्च भवत्येव B_2; अन्योपसर्गपूर्वान्निरुपसर्गाच्च भवत्येव । N. २. केचित् dropped D_4. ३. अप्रथमया चेदेकार्थता तस्य P, N. ४. कर्तृफले N_1. ५. निपात्यते । तेनाजादौ Dc_3, PC.

आने मुक् ॥७।२।८२॥

आने परे अदन्ताङ्गस्य मुगागमः स्यात् ॥ पचमानं चैत्रं पश्य । पचमानेन चैत्रेण कृतम् । लडुक्तेः प्रथमासमानाधिकरणेपि क्वचित् । सन् द्विजः ।

माङ्याक्रोशे ॥* मा पचन् । मा पचमानः । मा पचत्वित्यर्थः ।

आने । ननु चादन्ताङ्गस्य चेन्मुगुच्यते पचमान इत्यत्र 'ङिदुपदेशाल्लसार्वधातुकानुदात्तत्वं न प्राप्नोति । मुका व्यवहितत्वात् । अङ्गभक्तोयमङ्गस्यैवावयवत्वान्न व्यवधायकः । अकारस्य तु व्यवधायक एव । तथा च **काशिकायामुक्तम्**—'अङ्गस्यात इति । तथा चाकारमात्रभक्तोयं मुक् अदुपदेशग्रहणेन गृह्यत इत्यदुपदेशादिति लस्य सार्वधातुकमनुदात्तं भवति' इति । अतोङ्गस्यात इति वृत्त्या भाव्यं न त्वदन्ताङ्गस्येति । एवं मन्यते । स्वरविधौ व्यञ्जनमविद्यमानवदितीयं परिभाषास्ति । तेन मुकोविद्यमानत्वेन व्यवधानाभावात् स्यादेवानुदात्तत्वम् । **काशिकाकारस्त्वियं** परिभाषा नास्तीति मन्यमान उक्तवान् । लडुक्तेरिति । 'वर्तमाने लट्' इत्यतो लड्ग्रहणेनुवर्तमानेपि पुनर्लड्ग्रहणमर्थाधिक्यार्थम् । तेन प्रथमासमानाधिकरणेपि स्यादित्यर्थः । **सन् द्विज** इति । अस् भुवि । 'श्नसोः—' इत्यलोपः । **माङीति** । माङि उपपदे आक्रोशे गम्यमानेपि शतृ स्यात् । केचित् 'नन्वोर्विभाषा' इत्यतो विभाषाग्रहणमनुवर्तयन्ति । सा च व्यवस्थितविभाषा । तेन कुर्वद्भक्तिः कुर्वाणभक्तिः कुर्वत्तर इत्यादौ नित्यम् । सन्नस्ति विद्यते विद्यमान इत्यादौ पाक्षिकौ । पचतितरामित्यादौ आमि कृते न स्तः ।

---

१. लडिति वर्तमाने पुनर्लडुक्तेः &c. B_2, N_1. २. P, N_1, and D_1 drop it. ३. श्लोपः Dc_3.

संबोधने च ॥३।२।१२५॥

हे[1] पचन्। हे पचमान।

लक्षणहेत्वोः क्रियायाः ॥३।२।१२६॥

क्रियाया लक्षणे हेतौ चार्थे सतो धातोर्लटः शतृशानचौ स्तः। शयाना भुञ्जते।[2] अर्जयन् वसति।

कृत्यचः ॥८।४।२९॥

प्रपीयमाणः।[3]

संबो०। प्रथमासमानाधिकरणार्थ एवारम्भः।

लक्षण। लक्ष्यते चिह्न्यते येन तल्लक्षणम्। जनको हेतुः। **सतो धातोरिति**। वर्तमानाद्धातोरित्यर्थः। **शयाना इति**। अत्र भुजिक्रियायाः शयनं लक्षणम्। **अर्जयन्निति**। अत्रार्जनं वासक्रियाहेतुः। लक्षणहेत्वोः किम्। पचति पठति च। क्रियाग्रहणात् द्रव्यगुणयोर्न। यः कम्पते सोऽश्वत्थः। यत् प्लवते तल्लघु। ननु वर्षतीति धावति हन्तीति पलायते अत्र शतृशानचौ किमिति न भवतः। इतिना कारणहेतुत्वस्य द्योतितत्वात्। व्यवस्थितविभाषानुवृत्तेर्वा। लक्षणहेत्वोरिति निर्देशः पूर्वनिपातस्य व्यभिचारे लिङ्गम्।

कृत्यचः। इति णत्वम्। **प्रपीयमाण इति**। पा पाने। कर्मणि लट्। यक्। 'घुमास्था—' इतीत्वम्। मुक्।

---

१. Before it—प्रथमा समानाधिकरणार्थोऽयमारम्भः B_2, D_4. २. After it—यवनाः N_1, D_4. ३. After it—सोमः N_1, D_4, D_2, B_2; लक्षणहेत्वोः किम्। पचति च पठति च। क्रियायाः किम्। द्रव्यगुणयोर्मा भूत्। यः कम्पते सोऽस्वस्थः। यत् प्लवते तल्लघु। लक्षणहेतुनिर्देशः पूर्वनिपातव्यभिचारलिङ्गम्। हन्तीति पलायते। वर्षतीति धावतीत्यादौ न। C_1. B_2 (सोऽश्वस्थः, पूर्वमिमीतव्यभिचार° B_2). ४. स्तः PC, Dc_3.

ईदासः ॥७।२।८३॥

आसः परस्य ईत् स्यात् ॥ आदेः परस्येत्यादेरेव । आसीनः ।

विदेः शतुर्वसुः ॥७।१।३६॥

वेत्तेः परस्य शतुर्वसुरादेशः स्याद्वा ॥ विदन् । विद्वान् । विदुषी ।

तौ सत् ॥३।२।१२७॥

तौ शतृशानचौ सत्संज्ञौ स्तः ॥

लृटः सद्वा ॥३।३।१४॥

लृटः सत्संज्ञावादेशौ स्तो वा ॥ व्यवस्थितविकल्पेनाप्रथ-

ईदासः । आस उपवेशने ।

विदेः । विद ज्ञाने । स्थानिवत्त्वादेव उगित्कार्ये सिद्धे वसो-रुकारकरणं 'वसोः संप्रसारणम्' इत्यत्र क्वसोरपि सामान्य-ग्रहणार्थम् । तेनैकानुबन्धग्रहणे न द्व्यनुबन्धकस्येत्येतन्न । तथा सत्युकारकरणमनर्थकं स्यात् । विदुषीति । 'उगितश्च' इति ङीप् । 'वसोः संप्रसारणम्' ।

तौ सत् । तौग्रहणं वर्तमानलक्षणोपाध्यसंसर्गात् शतृशानच्-मात्रस्य संज्ञा यथा स्यादित्येवमर्थम् । तेन ब्राह्मणस्य करिष्यन्नित्यत्र सत्संज्ञासद्भावात् 'पूरणगुण—' इति षष्ठीसमासनिषेधसिद्धिः स्यात् ।

लृटः । 'लृट् शेषे च' इत्यतो लृड्ग्रहणेनुवर्तमानेपि पुनर्लृड्-ग्रहणं स्थानिनिर्देशार्थम् । तेन सत्संज्ञयोः प्रत्ययान्तरत्वं न । **अप्रथ-**

---

१. परस्यानस्य B2, D4. २. °रादेशौ वा स्यात् P, D2, B2, N1. ३. वा स्तः D1. ४. °स्येत्युत्वं न Dc1. ५. °निषेधः सिद्धः स्यात् Dc3, PC.

मैकार्थादिषु नित्यमन्यत्र वा । करिष्यन्तम् । करिष्यमाणम् । हे करिष्यन् । अर्जयिष्यन् वसति । प्रथमैकार्थत्वे । करिष्यति करिष्यन् ।

पूङ्यजोः शानन् ॥३।२।१२८॥

आभ्यां शानन्प्रत्ययः स्यात् ॥ पवमानः । यजमानः ।

ताच्छील्यवयोवचनशक्तिषु चानश् ॥३।२।१२९॥

एषु गम्येषु धातोश्चानश् स्यात् ॥ भोगं भुञ्जानः । कवचं बिभ्राणः । शत्रुं निघ्नानः ।

मैकार्थादिष्विति । आदिशब्देन 'संबोधने च' 'लक्षणहेत्वोः क्रियायाः' इत्यस्मिन् विषये प्रत्ययोत्तरपदयोश्च । करिष्यतोपत्यं कारिष्यतः । कारिष्यमाणिः । करिष्यतो भक्तिः । करिष्यद्भक्तिः । करिष्यमाणभक्तिः ।

पूङ्यजोः । पूङ् पवने । यज देवपूजादौ । शानन् अयं यदि लादेशः स्यात् तदा पवते यजते इति तिङोपि श्रवणार्थं वेत्यानेयम् । प्रत्ययत्वे वासरूपविधिना तिङपि स्यात् । अन्यच्च लादेशत्वे भावकर्मणोरपि स्यात् । कर्तरि चेष्यते । निघातोपि तास्यनुदात्तेदिति स्यात् । आत्मनेपदत्वं च स्यादित्येते दोषाः प्रसज्येरन्निति चेतसि कृत्वाह—**शानन् प्रत्ययः स्यादिति** । शकारः सार्वधातुकत्वार्थः । नकार आद्युदात्तार्थः ।

ताच्छील्य । ताच्छील्यं तत्स्वभावता । वयः शरीरावस्था यौवनादिः । शक्तिः सामर्थ्यम् । **भोगमित्यादि** । ताच्छील्ये । **कवचमिति** । वयसि । **शत्रुमिति** । शक्तौ ।

---

१. विकल्पः D_2, B_3, D_4. २. Before it सति D_4. ३. पूङ्यजोः D_1. ४. एतेषु C.

इङ्धार्योः शत्रकृच्छ्रिणि ॥३।२।१३०॥

आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि ॥ अधीयन् । धारयन् ।

द्विषोऽमित्रे ॥३।२।१३१॥

द्विषन् ।[1]

अर्हः प्रशंसायाम् ॥३।२।१३३॥

अर्हन् ।

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥३।२।१३४॥

इतः परं क्विपमभिव्याप्य ये प्रत्ययास्ते तच्छीलादिषु ज्ञेयाः ।

इङः । अकृच्छ्रः सुखसाध्यो धात्वर्थः । स विद्यते यस्य सोऽकृच्छ्री । तस्मिन् कर्तरीत्यर्थः । अकृच्छ्रिणि किम् । कृच्छ्रेणाधीते धारयति च ।

द्विषः । अमित्रः शत्रुः । अमित्रे किम् । पतिं द्वेष्टि ।[2] स्पष्टत्वादुपेक्षितं व्याख्यायते—'सुञो यज्ञसंयोगे' ।३।२।१३२॥ यज्ञेन संयोगो यज्ञसंयोगः । यज्ञयुक्ते अभिषवे वर्तमानात् सुनोतेः शतृ स्यात् । सुन्वन्तो यजमानाः । संयोगग्रहणं प्रधानप्रतिपत्त्यर्थम् । याजकेषु मा भूत् । यज्ञसंयोगे[3] किम् । सुनोति इक्षुम्[4] ।

अर्हः । प्रशंसा स्तुतिः । प्रशंसायां किम् । अर्हति चोरो[5] वधम् ।

आक्वेः । 'भ्राजभास—' इति क्विपं च वक्ष्यति । तदन्तोऽयमर्थाधिकारः ।

१. After it—अमित्रे इति किम् । भार्या पतिं द्वेष्टि । D2, D4, B2 (द्वेष्टि पतिं भार्या B2, D4.) २. The Sûtra 'सुञो &c.' precedes this Dc3, PC. ३. यज्ञसंयोगे Dc3; यज्ञसंयुक्त PC. ४. योगे Dc1, इक्षून् Dc3, PC. ५. चौरो PC.

तृन् ॥३।२।१३५॥

धातोस्तृन् स्यात्तच्छीलादिषु ॥ कर्ता कटान् ।

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यप-
त्रपवृतुवृधुसहचर इष्णुच् ॥३।२।१३६॥

एभ्य इष्णुच् स्यात् तच्छीलादौ ॥ अलंकरिष्णुः ।

तृन् । नकार आद्युदात्तार्थः । कर्ता कटानिति । ताच्छील्ये । 'न लोक—' इति षष्ठीनिषेधः । तद्धर्मणि वधूमूढां मुण्डयितारः श्राविष्ठायनाः । तत्साधुकारिणि वसित्रीत्र[1] वर्मनमङ्गना । तृन्विधावृत्विक्षु चानुपसर्गस्य । अताच्छील्यार्थं वक्तव्यम् । होता । पोता । अनुपसर्गस्य किम् । उद्गाता । तृजेव । तृच् अन्तोदात्तं तृन् आद्युदात्तं पदमिति[2] विशेषः । नयतेः पुक् च । तृनि कृते गुणो[3] वक्तव्यः । नेष्टा । त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वं च[4] । त्वष्टा । क्षदेश्च नियुक्ते । क्षत्ता । उणादिनिपातनाद्वा होत्रादिसिद्धिः ।

अलम् । अलंपूर्वः करोतिः निराङ्पूर्वश्च । जनी प्रादुर्भावे प्रपूर्वः । पच व्यक्तीकरणे । पत्लृ पथे गतौ च । मदिमन्ये पठन्ति । मद तृप्तिशोभने । एते उत्पूर्वाः । रुच दीप्तौ । त्रपूष् लज्जायामपपूर्वः । वृतु वर्तने । वृधु वृद्धौ । षह मर्षणे । चर गतौ[5] । तृनोऽपवादोऽयम् ।

' निराकरिष्णू वर्तिष्णू वर्धिष्णू परितोषणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥'

प्रजनिष्णुः । उत्पचिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः

---

१. वस्त्र° De₃, PC. २. इति De₃, PC. ३. गुणे De₃, PC. ४. From त्विषे°...to त्वष्टा dropped De₁. ५. च गतौ De₃, PC.

चरिष्णुः इत्यादि । ताच्छीलिकेषु वासरूपन्यायो न । तेन अलंकर्तेति न ।

णेश्छन्दसि ॥३।२।१३७॥

ण्यन्तादिष्णुच् स्याच्छन्दसि । लोकेपीति केचित् ॥ कारयिष्णुः ।

भुवश्च ॥३।२।१३८॥

भविष्णुः । चादनुक्तेपि । भ्राजिष्णुः ।

ग्लाजिस्थश्च ग्स्नुः ॥३।२।१३९॥

एभ्यो ग्स्नुः स्यात्तच्छीलादौ । चाद्भुवश्च ॥ ग्लास्नुः । गित्वान्न गुणः । जिष्णुः । स्थास्नुः । श्रुकः किति त्यत्र गकारप्रश्लेषान्नेट् । भूष्णुः ।

इत्यादिशब्दात् । ताच्छीलिकेष्विति । 'निन्दहिंस—' इत्यादिसूत्रेण वुञ्विधानं ताच्छीलिकेषु वासरूपन्यायाभावज्ञापकमिति भावः ।

णेः । कारयिष्णुरिति । हेतुमण्णिच् । 'अयामन्त—' इत्ययादेशः ।

भुवः । योगविभाग उत्तरत्र भवतेरेवानुकर्षणार्थः ।

ग्लाजि । अयं च गित् इति केषांचित् पक्षः । किदित्यन्येषाम् । तत्र पूर्वः पक्षः आचार्याणामभिप्रेतः । तथोक्तं वार्तिके ।

'ग्स्नोर्गित्वान्न स्थ ईकारः क्ङितोरीत्वशासनात् ।
गुणाभावस्त्रिषु स्मार्यः श्र्युकोनिट्त्वं गकोरितोः ॥'

येषं कित् तैर्गकारप्रश्लेषो न कार्यस्त्रिषु । स्थ इत्यत्र आकारप्रश्लेषः कार्यः 'घुमास्था—' इतीत्वप्रतिषेधार्थम् ।

---

१. निराकरिष्णुः D_2, D_4, B_3. २. ताच्छीलादिषु C. ३. चादनुक्तादपि C; चादनुक्तमपि D_1. ४. ताच्छील्यादौ D_1, N_1; शीलादौ C. ५. Before it—गित्वात्तिष्ठतेरीत्वं न D_2, B_2, D_4. ६. Dropped B_3.

त्रसिगृधिधृषिक्षिपेः क्नुः ॥३।२।१४०॥

एभ्यः क्नुः स्यादुक्तेऽर्थे ॥[1] त्रस्नुः इत्यादि । ग्लाक्षिपचि-परिमृजः स्नुरिति केचित् । ग्लास्नुः । क्षेष्णुः । पक्ष्णुः । परिमार्क्ष्णुः ।

त्रसि । त्रसी उद्वेगे । गृधु अभिकाङ्क्षायाम् । ञिधृषा प्रागल्भ्ये । क्षिप प्रेरणे । **त्रस्नुरिति** । 'नेड्वशि—' इतीण्निषेधः । आदिना गृध्नुः । धृष्णुः । क्षिप्नुः । **ग्लेति** । ग्लै कान्तिसंक्षये । क्षि क्षये । डुपचष् पाके । मृजूष् शुद्धौ । परिपूर्वः । **परिमार्क्ष्णुरिति** । मृजेर्वृद्धिः । स्पष्टत्वादुपेक्षितं सूत्रसप्तकं व्याख्यायते—' शमित्यष्टाभ्यो घिनुण् ' ॥३।२।१४१॥ शमादिभ्योऽष्टाभ्यो घिनुण् प्रत्ययः स्यात् । शमुदमु उपशमे । शमी । दमी । तमु काङ्क्षायाम् । तमी । श्रमु तपसि खेदे च । श्रमी । भ्रमु अनवस्थाने । भ्रमी । क्षमूष् सहने । क्षमी । क्लम ग्लानौ । क्लमी । मदी हर्षे । उन्मादी । प्रमादी । अष्टाभ्यः किम् । असिता ।[2] तृन्नेव स्यात्[3] । घः कुत्वार्थः । उकार उच्चारणार्थः । अनुबन्धत्वे हि उगित्वान्नुमादिप्रसङ्गः । ' संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरि-मुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याह-नश्च ' ॥३।२।१४२॥ एभ्यस्तच्छीलादौ घिनुण् स्यात् । पृची संपर्के । रुधादिः । संपर्की । 'चजोः—' इति कुत्वम् । अदादिकस्य संपर्चितेत्येव[4] । रुधिर् । अनुरोधी । यमु । आयामी । यसु । आयासी । सृ । परिसारी । सृज । संसर्गी । देवृ देवने । भ्वादिः । परिदेवी । संज्वर । संज्वारी[5] । क्षिप प्रेरणे । दिवादिस्तुदादिश्च । परिक्षेपी । रट । परिराटी । वद । परिवादी । दह । परिदाही । मुह ।

---

१. Before it—नेड्वशीति नेट् N_1. २. After it असु क्षेपणे PC, Dc_3. ३. Dropped PC, Dc_3. ४. संपर्कितेⁿ Dc_1. ५. संज्वरी PC, Dc_3.

परिमोही । दुष । दोषी । द्विष । द्वेषी । द्रुह । द्रोही । दुह । दोही । युज समाधौ । युजिर् योगे । योगी । क्रीड । आक्रीडी । विचिर् । विवेकी । त्यज । त्यागी । रञ्ज । रागी । निपातनादनुनासिकलोपः । भज । भागी । चर । अतिचारी । अपचारी । मुष । आमोषी । अभ्याहन । अभ्याघाती । 'वौ कषलसकत्थस्रम्भः' ॥३।२।१४३॥ एभ्यो व्युपपदे घिनुण् । कष हिंसायाम् । विकाषी । लस श्लेषणक्रीडनयोः । विलासी । कत्थ श्लाघायाम् । विकत्थी । स्रंभु विश्वासे । विस्रम्भी । 'अपे च लषः ।' ३।२।१४४॥ लष कान्तौ । अस्मादपे वौ चोपपदे घिनुण् । अपलाषी । विलाषी । 'प्रे लपसृद्रुमथवदवसः ।' ३।२।१४५॥ एभ्यः प्र उपपदे घिनुण् । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । मन्थ विलोडने । निपातनात् न्लोपः । प्रवादी । प्रवासी । वस निवासे । नाच्छादनार्थः । तस्य लुग्विकरणत्वात् । 'निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ।' ३।२।१४६॥ एभ्यो वुञ् स्यात् तच्छीलादौ । णिदि । निन्दकः । हिंसि । हिंसकः । क्लिश उपतापे । क्लिशू विबाधे । क्लेशकः । खाद । खादकः । णश । विपूर्वः हेतुमण्णिजन्तः । विनाशकः । क्षिप । परिक्षेपकः । रट । परिराटकः । वदिर्हेतुमण्ण्यन्तः । परिवादकः । भाष । व्याभाषकः । असूय । कण्ड्वादिषु यगन्तः । कण्ड्वादौ हि असूञ्[1] इति पठ्यते । असूयकः । ण्वुलासिद्धे वुञ्विधिर्ज्ञापको न तच्छीलादिषु वासरूपविधिरिति । 'देविक्रुशोश्चोपसर्गे ।' ३।२।१४७॥ दिवेर्ण्यन्तात् क्रुशेश्चोपसर्गे उपपदे वुञ् स्यात् । परिदेवकः । आक्रोशकः । उपसर्गे किम् । देवयिता । क्रोष्टा ।

१. हन । PC, Dc3. २. असूञ् Dc1.

चलनशब्दार्थादकर्मकाद्युच् ॥३।२।१४८॥

चलनार्थाच्छब्दार्थादकर्मकाद्युच् स्यादुक्तेर्थे ॥ चलनः । कम्पनः । शब्दनः । रवणः । अकर्मकात् किम् । पठिता विद्याम् ।

अनुदात्तेतश्च हलादेः ॥३।२।१४९॥

हलादेरनुदात्तेतो युच् स्यात् ॥ वर्तनः ।

चलन । चलनं देशान्तरप्राप्तिहेतुः क्रियाविशेषः । शब्दः श्रोत्रविषयोर्थः । चलनः । चल कम्पने । कम्पनः । कपि चलने । शब्दनः । शब्द शब्दे आविष्करणे च । रवणः । रु शब्दे । पठितेति । तृन् ।

अनु । वर्तनः । वृतु वर्तने । अनुदात्तेतः किम् । भविता । हलादेः किम् । एधिता । ननु सर्वोनुदात्तेत् हलन्त एवेति हल्ग्रहणस्य व्यावर्त्याभावात् हल्ग्रहणादेव हलादेरित्यर्थसिद्धौ आदिग्रहणं गुपादेः सन्नन्तस्याजन्तस्य 'पूर्ववत् सनः' इति निमित्तातिदेशेनानुदात्तेतो व्यावृत्तिर्मा भूदित्येवमर्थम् । एतच्च 'अतो लोपः' 'आर्धधातुके' परसप्तमीयमिति पक्षस्य ज्ञापकम् । जुगुप्सनः । अकर्मकादेव । वसिता वस्त्रम् । स्पष्टत्वादुपेक्षितं सूत्रचतुष्टयं व्याख्यायते—'जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः' ॥३।२।१५०॥ एभ्यो युच् स्यात् । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । गर्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः । चलनार्थानां पदेश्चोक्तिः सकर्मकार्था । 'क्रुधमण्डार्थेभ्यश्च' ॥३।२।१५१॥ क्रोधार्थेभ्यो भूषणार्थेभ्यश्च युच् तच्छीलादौ । तृनोपवादः । क्रोधनः । मण्डनः । 'न यः' ॥३।२।१५२॥ यकारान्ताद्धातोर्युच् न । क्नूयिता ।

१.° चाकर्मकात् D_2; D_1 drops अकर्मकात्; N_1 has अकर्मकात् in the beginning of the Vritti. २. प्रत्ययः स्यात् C. ३. After it—उक्तेर्थे D_1. ४. शब्दने PC. ५. देर्व्यावृत्तिरिसि Dc_3.

लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ॥३।२।१५४॥

एभ्य उकञ् स्यादुक्तेर्थे ॥ लाषुकः । पातुकः । स्थायुकः । घातुकः । शारुकः । इत्यादि ।

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥३।२।१५५॥

एभ्यः षाकन् स्यादुक्तेर्थे ॥ जल्पाकः । जल्पाकी । वराकः । वराकी । इत्यादि ।

क्ष्मायिता । 'सूददीपदीक्षश्च' ॥३।२।१५३॥ षूद क्षरणे । दीपी दीप्तौ । दीक्ष मौण्ड्ये । इत्येतेभ्यो युच् न । सूदिता । दीपिता । दीक्षिता । दीपेर्युचो रेण विशेषविहितेन बाधितस्यापि निषेधो ज्ञापकस्ताच्छीलिकेष्वपि क्वचिद्वासरूपविधिरस्तीत्यस्य । तथा च युच्रयोः समावेशो दृश्यते । कम्रा युवतिः । कमना युवतिः । कथं मधुसूदनः । अनित्योयं निषेध इति योगविभागात् ज्ञायते । अथवा नन्द्यादिषु मधुसूदनादयो द्रष्टव्यन्ते ।

लष । **स्थायुक** इति । 'आतो युक् चिण्कृतोः ।' **घातुक** इति । 'हो हन्तेः—' इति कुत्वम् । 'हनस्तो चिण्णलोः ।' आदिशब्दात् । पादुकः । भावुकः । वर्षुकः । कामुकः । गामुकः । तच्छीलादौ समावेशः क्वाप्यस्ति इत्यपालाषी पतनः पदनः स्थास्नुः कम्प्र इति घिनुणादयोपि ।

जल्पभिक्षकुट्ट । **जल्पाकी**ति । 'षिद्गौर—' इति ङीष् । कुट्ट छेदने । लुण्ट स्तेये । चौरादिकः । आदिना भिक्षाकः । कुट्टाकः । लुण्टाकः । जल्पेः 'चलनशब्दार्थ—' इति भिक्षेः 'अनुदात्तेतश्च—' इति युचः प्राप्तौ कुट्टलुण्टाभ्यां 'णेश्छन्दसि' इतीष्णुचः वृङः

---

१. Before it—भावुकः । कर्षुकः । D_4. २. Before it—कामुकः । गमुकः । C. ३. षाकम् D_4. ४. षाकम् D_4. ५. D_2 drops it. ६. वर्षुकः PC. ७. समावेशोपि PC, Dc_3. ८. कम्र PC.

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्
॥३।२।१५८॥

एभ्य आलुच् स्यादुक्तेर्थे ॥ स्पृहयालुः । गृह ग्रहणे । गृहयालुः । पतयालुः । एते त्रयश्चुरादावदन्ताः । दयालुः । निपूर्वो द्रातिः । निद्रालुः । तत्पूर्वो द्रा तदो नान्तता निपात्यते । तन्द्रालुः । श्रद्धालुः । शीङो वाच्यः ॥ शयालुः ।

दाधेट्सिशदसदो रुः ॥३।२।१५९॥

एभ्यो रुः स्यादुक्तेर्थे ॥ दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ॥

'आदृगम—' इति किकिनोः प्राप्तौ पाकन् । व्याख्यातप्रायत्वादुपेक्षितं सूत्रद्वयं व्याख्यायते । 'प्रजोरिनिः' ॥३।२।१५६॥ प्रपूर्वाज्जवतेरिनिः स्यात् । प्रजवी । 'जुचङ्क्रम्य—' इति युचि प्राप्ते । 'जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च' ॥३।२।१५७॥ एभ्य इनिः स्यात् । जि । जयी । दृङ् आदरे । दरी । क्षि । क्षयी । श्रिञ् । विश्रयी । इण् । अत्ययी । टुवमु । वमी । व्यथ भयचलनयोः । अव्यथी । अम रोगे । अभ्यमी । भू । परिभवी । षू प्रेरणे । न षूङ् । तस्य सानुबन्धकत्वात् । प्रसवी ।

स्पृहिगृहि । स्पृहि ईप्सायाम् । गृह ग्रहे । पत गतौ । दय दानगतिहिंसादानेषु । द्रा कुत्सायां गतौ । डुधाञ् श्रत्पूर्वः । **एते त्रय** इति । अदन्तत्वे सति अल्लोपस्य स्थानिवत्त्वाद् गुणवृद्धी नेति भावः

दाधेट् । दाञ् दाने । दो अवखण्डने । देङ् रक्षणे । धेट् पाने । षिञ् बन्धने । शद्लृ शातने । षद्लृ विशरणगत्यवसादनेषु । 'न लोक—' इत्युकारान्तप्रत्ययप्रयोगे षष्ठीनिषेधः । तेन धारुर्वत्सो मातरमिति सिध्यति ।[1]

---

१. न तु PC.

सृघस्यदः क्मरच् ॥३।२।१६०॥

एभ्यः क्मरच् स्यादुक्तेऽर्थे ॥ सृमरः । घस्मरः । अद्मरः ।

भञ्जभासमिदो घुरच् ॥३।२।१६१॥

एभ्यो घुरच् स्यात् ॥ भञ्जेः कर्मकर्तरि । घित्त्वात् कुत्वम् । भङ्गुरः । भासुरः । मेदुरः ।

विदिभिदिच्छिदेः कुरच् ॥३।२।१६२॥

एभ्यः कुरच् स्यात् ॥ वेत्तेरत्र ग्रहणम् । विदुरः । भिदिच्छिदोः कर्मकर्तरि । भिदुरः । छिदुरः ।

सृघ । सृ गतौ । घसिः प्रकृत्यन्तरम् । परिसारी । प्रसारी । 'संपृच —' 'प्रे लप —' इति सूत्रसामर्थ्याद् घिनुण् च ।

भञ्ज । भञ्जो आमर्दने । भासृ दीप्तौ । ञिमिदा स्नेहने । भञ्जेरिति । तथोक्तं पाणिनीयमतदर्पणे—

'कर्मकर्तारमेवास्मादभिधत्ते स्वभावतः ।

न कर्ममात्रमित्येष प्रत्ययः कर्मकर्तरि ॥' इति ।

भज्यते स्वयमेव । तथा भट्टिः—

'सृमरो भङ्गुरप्रज्ञो गृहीत्वा भासुरं धनुः ।' इति ।

विदि । वेत्तेरिति । ज्ञानार्थस्येत्यर्थः । एतच्चाभिधानसामर्थ्यात् ।

---

१. भिदुरा । छिदुरा । D₁ ; भिदुरं काष्ठम् । छिदुरम् D₂. २. After it—व्यधेः संप्रसारणं घुरच् । विधुरः । B₂.

इण्नशजिसर्तिभ्यः क्वरप् ॥३।२।१६३॥

एभ्यः क्वरप् स्यादुक्तेऽर्थे ॥ पित्त्वात्तुक् । इत्वरः । नश्वरः । जित्वरः । सृत्वरः । सृत्वरी ।

गत्वरश्च ॥३।२।१६४॥

अयं निपात्यते ॥ गत्वरी ।

जागुरूकः ॥३।२।१६५॥

जागर्तेरूकः स्यात् ॥ जागरूकः ।

यजजपदशां यङः ॥३।२।१६६॥

एभ्यो यङन्तेभ्य ऊकः स्यात् ॥ यस्य हलः । यायजूकः । जञ्जपूकः । दंदशूकः ॥ वदेश्च ॥* वावदूकः ।

नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥३।२।१६७॥

एभ्यो रः स्यात् ॥ नम्रः । कम्प्रः । स्मेरः । जसु मोक्षणे । नञ्पूर्वः । अजस्रम् । सततमित्यर्थः । कम्रः । हिंस्रः । दीप्रः ।

इण्न । पित्त्वात्तुगिति । 'ह्रस्वस्य पिति—' इति । **सृत्वरीति** । 'टिड्ढाणञ्—' इति ङीप् ।

गत्वरः । गमेः । **गत्वरीति** । पूर्ववत् ङीप् ।

जागुः । वासरूपविधेस्तृजपि ।

यज । 'यस्य हलः' इति । यलोपः । **यायजूक इति** । यजेर्यङ् । 'दीर्घोऽकितः' इति दीर्घः । 'अतो लोपः ।' **जञ्जपूक इति** । 'जपजभ—' इत्यभ्यासस्य नुक् ।

नमि । णम प्रह्वत्वे शब्दे च । कपि चलने । स्मिङ् ईषद्धसने । कमु कान्तौ । हिंस हिंसायाम् । दीपी दीप्तौ । कम्पेश्चलनार्थात् कम्पिदीपिभ्यां चानुदात्तेत्त्वाद्युचि प्राप्ते रः ।

---

१. सृत्वरी D1. N. २. जस D2.

सनाशंसभिक्ष उः ॥३।२।१६८॥

सन्नन्तादाशंसिभिक्षिभ्यां च उः स्यात् ॥ रिरंसुः । आशंसेरिच्छार्थस्य ग्रहणम् । आशंसुः । भिक्षुः ।

विन्दुरिच्छुः ॥३।२।१६९॥

एतौ निपात्यौ । वेदनशीलो विन्दुः । एषणशील इच्छुः । भाषायां धाञ्कृसृजनिनमिगमिभ्यः किकिनौ वाच्यौ ॥* तौ च लिड्वत् । द्वित्वादि । दधिः । चक्रिः । सस्रिः । जज्ञिः । नेमिः । जग्मिः । सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वाच्यौ ॥* सासहिः । वावहिः । चाचलिः । पापतिः ।

स्वपितृषोर्नजिङ् ॥३।२।१७२॥

आभ्यां नजिङ् स्यात्कर्थे ॥ स्वप्नक् । तृष्णक् । तृष्णजौ । धृषेरपीति केचित् । धृष्णक् ।

सना । अत्र सन् प्रत्ययो न धातुरित्याह—**सन्नन्तादिति** । **आशंसेरिति** । एतदाङा सह निर्देशात् ज्ञायते । इच्छार्थो हि तेन सह पठ्यते । आशंसेः भिक्षेश्च ‘ अनुदात्तेतश्च—’ इति युचि प्राप्ते ।

विन्दु । विदेर्ज्ञानार्थस्य इषेरिच्छार्थस्य निपातः । **भाषायाम्** । **दधिरिति** । आतो लोपः । **चक्रिः** । यणादेशः । **जज्ञिरिति** । ‘ गमहन—’ इत्युपधालोपः । ‘ स्तोश्चुना श्चुः ’ इति चुत्वम् । जञोर्ज्ञः । **नेमिरिति** । ‘ अत एकहल्मध्येनादेशा—’इत्येत्वाभ्यासलोपौ । **सहीत्यादि** । भाषायामिति वर्तते । **सासहिरिति** । यङ् । आकारयकारलोपौ ।

स्वपि । ङकारस्तृषेर्गुणनिषेधार्थः । इकार उच्चारणार्थः ।

---

१. °रिच्छार्थग्रहणम् C. २. स्तोश्चुना... ज्ञः—Dropped De3, PC.

शॄवन्द्योरारुः ॥३।२।१७३॥

आभ्यामारुः स्यात् ॥ शरारुः । वन्दारुः ।

भियः क्रुक्लुकनौ ॥३।२।१७४॥

भीरुः । भीलुकः । क्रुकन्नपि वाच्यः ॥* भीरुकः ।

स्थेशभासपिसकसो वरच् ॥३।२।१७५॥

एभ्यो वरच् स्यात् ॥ स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः । प्रमद्वरोऽपीति केचित् ।

यश्च यङः ॥३।२।१७६॥

यातेर्यङन्ताद्वरच् स्यात् ॥ अतो लोपः । तस्य न पदान्तेति यलोपं प्रति स्थानिवत्त्वाभावात् लोपो व्योर्वलीति यलोपः । पुनर्यङोकारलोपस्य स्थानिवत्त्वादातो लोपे प्राप्ते न पदान्तेति वरचि यङ्वर्णनिमित्त आतो लोपो न । यायावरः ।

शॄ । शॄ हिंसायाम् । वदि अभिवादनस्तुत्योः ।

भियः । ञिभी भये ।

स्थेश । ष्ठा गतिनिवृत्तौ । ईश ऐश्वर्ये । भासृ दीप्तौ । पिसृ गतौ । कस गतौ । **ईश्वर इति** । 'नेड्वशि—' इतीडभावः ।

यश्च । या प्रापणे । अस्माद्यङ् । द्वित्वम् । यायाय वर इति स्थिते 'अतो लोपः' इति यङकारलोपः । **यलोप इति** । यङः । **पुनरित्यादि** । 'अचः परस्मिन्—' इति यङकारस्य स्थानिवत्त्वात् 'आतो लोप इटि च' इत्यालोपे प्राप्ते 'न पदान्त—' इति सूत्रेण वरे योजादेशस्तस्य स्थानिवद्भावनिषेधात् यङो योकारस्तन्निमित्त आकारलोपो न स्यादित्यर्थः ।

---

१. भास्वरः । पेस्वरः । D_4. २. Before it--लोपो व्योर्वलि । न पदान्तेत्यनेन वरचि अतो लोपस्य स्थानिवत्त्वाभावात् आतो लोपो न । यायावरः । D_4. ३. लोपः P. ४. After it—अतो लोपस्य स्थानिवत्त्वाभावात् N_1. ५. अकार॰ Dc_1.

भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ॥३।२।१७७॥

एभ्यस्तच्छीलादौ क्विप् स्यात् ॥ विभ्राट् । भाः । धूः । विद्युत् । ऊर्क् । पूः । जवतेर्दीर्घश्च । जूः । ग्रावस्तुत् ।

अन्येभ्योपि दृश्यते ॥३।२।१७८॥

[1]अन्येभ्योपि क्विप् दृश्यते तच्छीलादौ ॥ भित् । छित् । क्विब् वचिप्रच्छायतस्तुकटप्रुजुश्रीणां दीर्घोसंप्रसारणं च ॥* [2]वक्त्यनया वाक् । [3]पृच्छति प्राट् । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । जवति जूः । [4]श्रयन्त्येतां श्रीः ।

भ्राज । भ्राजृ भासृ दीप्तौ । धुर्वी हिंसायाम् । द्युत दीप्तौ । ऊर्ज बलप्राणनयोः । पॄ पालनपूरणयोः । जुः सौत्रो गतौ । ष्टुञ् स्तुतौ । विभ्राडिति । 'व्रश्च—' इति षः । जश्त्वचर्त्वे । धूरिति । 'राल्लोपः' इति वलोपः । 'र्वोरुपधायाः —' इति दीर्घः । पूरिति । 'उदोष्ठ्यपूर्वस्य' इत्युत्वम् । पूर्ववद्दीर्घः । ग्रावाणं स्तौतीति ग्रावस्तुत् । 'ह्रस्वस्य—' इति तुक् । उत्तरसूत्रस्यायं प्रपञ्चः ।

अन्ये । दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् । क्वचिद् द्वित्वम् । क्वचिदसंप्रसारणम् । तथा च भाष्यकारोक्तमनुवदति । क्विब् वचीत्यादि । पृच्छति प्राट् इति । प्रच्छेः 'च्छ्वोः शूट्—' इति शः । व्रश्चादिना षः । प्राशौ प्राशः इत्यादि ज्ञेयम् । शेषं सोदाहरणं स्पष्टम् ।

---

१. From अन्ये° to दृश्यते dropped D_4. २. उच्यतेनया C. ३. पृच्छत्यनया प्राट् D_1. ४. श्रयत्येतां B_2.

द्युतिगमिजुहोतीनां द्वे च ॥* द्योतते दिद्युत् । गच्छति जगत् । जुहोतेर्दीर्घश्च ॥* जुहोत्यनया जुहूः । ध्यायतेः संप्रसारणं च ॥* धीः । दृ भये अस्य ह्रस्वद्वित्वे च । दीर्यति दद्रत् ॥ स्रुद्रुपरिव्रजां दीर्घश्चेति केचित् । स्रवति स्रूः । द्रवति द्रूः । परिव्रजति परिव्राट् । दृशिग्रहणात् मित्रं ह्वयति मित्रहूः । वयति ऊः । आप्यायते आपीः । इत्यादि ।

भुवः संज्ञान्तरयोः ॥३।२।१७९॥

भुवः क्विप् स्यात् संज्ञायामन्तरे च ॥ मित्रभूः । धनिकाधमर्णयोरन्तरेऽस्तीति प्रतिभूः ।

विप्रसंभ्यो ड्वसंज्ञायाम् ॥३।२।१८०॥

एभ्यः पराद्भुवो डुः स्यान्न तु संज्ञायाम् ॥ विभुः । प्रभुः । संभुः । मितद्र्वादिभ्य ॥* मितद्रुः । शंभुः । स्वयंभुः ।

भुवः । अन्तरशब्दो न ग्रामाद्यन्तरवचनः । किं तूत्तमर्णाधमर्णयोरन्तरे तिष्ठति यः स एव । शब्दशक्तिस्वाभाव्यादित्याह—**धनिकेति** । ननु संज्ञायामित्येव वक्तव्यम् । किमन्तरग्रहणेन । न । यावद्द्रव्यभाविनी हि संज्ञा प्रतिभूशब्दः पुरुषे कादाचित्क इति ।

विप्र । असंज्ञायां किम् । विभूर्नाम कश्चित् । स्पष्टत्वादुपेक्षितम्—'धः कर्मणि ष्ट्रन्' ॥३।२।१८१॥ धेटो धाञो वा कर्मणि प्रत्ययार्थे ष्ट्रन् स्यात् । धयति तां धात्री उपमाता । दधति तां भेषजार्थमिति धात्री आमलकी ।

---

१. द्युत D_8. २. व्रजतीति N. ३. शंभ्यो B_2. ४. विभुः । शंभुः । विभुनमि कश्चित् B_2. ५. Dropped B_2. ६. यस्तिष्ठति स एव PC, Dc_3. ७. स्पष्टः...क्षितम् given after the Sûtra PC, Dc_3. ८. दधते Dc_3.

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥३।२।१८२॥

दाबादेः ष्ट्रन् स्यात् करणेऽर्थे ॥ दात्यनेन दात्रम् । नेत्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्त्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री ।

अर्तिलूधूसूखनसहचर इत्रः ॥३।२।१८४॥

एभ्यः करणे इत्रः स्यात् ॥ अरित्रम् । लवित्रम् । इत्यादि ।

दाप् । दाप् लवने । णीञ् प्रापणे । शसु हिंसायाम् । यु मिश्रणे । युजिर् योगे । ष्टुञ् स्तुतौ । तुद व्यथने । षिञ् बन्धने । षिच क्षरणे । मिह सेचने । पत्लृ पथे च गतौ । दश दंशने । णह बन्धने । दंष्ट्रेति । अनित्यः षितां ङीष् । 'हलसूकरयोः पुवः' ॥३।२।१८३॥ उपेक्षितम् । पूङः पूञश्च करणे ष्ट्रन् तच्च करणं हलसूकरयोरवयवो यदि स्यात् । पोत्रं हलस्य । सूकरस्य पोत्रम् । मुखमित्यर्थः ।

अर्ति । ऋ गतौ । लूञ् छेदने । धू विधूनने । षू प्रेरणे । खनु अवदारणे । षह । चर । आदिशब्दात् धवित्रम् । धू इत्यस्य कुटादित्वात् ङित्त्वेन गुणो न स्यादेव । धुवित्रम् । अथवा 'भञ्जभासमिदो घुरच्' 'विदिभिदिच्छिदेर्कुरच्' इति वक्तव्ये प्रत्ययान्तरकरणं ज्ञापकमातिदेशिकङित्त्वमनित्यमिति । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ।

---

१. C drops अर्थे. २. करणेर्थे B_2, D_4. ३. D_2 drops it; After it—धवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् (dropping इत्यादि) N.

पुवः संज्ञायाम् ॥३।२।१८५॥

अस्मात् करणे इत्रः स्यान्नाम्नि ॥ पवित्रं दर्भः ।

उणादयो बहुलम् ॥३।३।१॥

उणादयः प्रत्यया वर्तमाने संज्ञायां च बहुलं स्युः ॥

पुवः संज्ञायाम् । पवित्रं दर्भ इति । समुदायेनात्र दर्भादेः संज्ञा गम्यते । स्पष्टत्वादुपेक्षितम्—'कर्तरि चर्षिदेवतयोः' ॥३।२।१८६॥ ऋषौ करणे देवतायां कर्तरि पुव इत्रः स्यात् । पूयतेनेनेति पवित्रोयमृषिः । सोमः पवित्रम् ।

उणादयो बहुलम् ।

'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं वदन्ति ॥' इति वचनात्

बहूनर्थान् लातीति बहुलम् । **पञ्चपाद्यादावुणादीनामुक्तत्वात्** । ननु बहुलग्रहणं किमर्थमित्याशङ्क्य **वार्तिककृतोक्तम्**—

'बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु ॥ १ ॥'

बहुलस्य भावो बाहुलकम् । तदुक्तम् । कुतः । प्रकृतेस्तनुदृष्टेः । प्रकृतीनामल्पदर्शनात् । तथा तेषामुणादीनां प्रायेणाकार्त्स्न्येन समुच्चयनाद्विधानात् । तथा कार्यसशेषविधेरेव । प्रकृताद्याश्रयाणां कार्याणां सशेषाद्विधेश्च । अयं भावः । अल्पाः प्रकृतय उक्ताः । अल्पे च प्रत्ययाः । अल्पानि च कार्याणि । तस्माद्बहुलग्रहणादनुक्ताः प्रकृतयः प्रत्ययाः

---

१. पुङः पूञ्च इत्रः स्यात् करणेर्थे नाम्नि N. २. करणेर्थे C. ३. Given after the Sûtra Dc3, PC. ४. कात्यायनेनोक्तम् PC, Dc3. ५. कुतः PC, Dc3.

ते च केचिद्विहिताः केचित् प्रयोगादुन्नीयन्ते ।

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु ॥
कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥

कार्याणि चोन्नेयानीत्येवमर्थं बहुलग्रहणम् । हि यस्मान्नैगमरूढिभवं बाहुलकात् सुसाधु स्यात् । नैगमा वैदिकाः । रूढिभवा लोकसिद्धाः । सर्वो द्वन्द्वो विभाषयैकवत् । वैदिकानां रूढानां व्युत्पाद्यत्वमन्यैरप्यङ्गीकृतमित्याह—

'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् ।
यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्' ॥

नाम प्रातिपदिकं निरुक्तकारो निरुक्ते धातुजमाह । व्याकरणे शकटस्य तोकमपत्यं शाकटायनोऽप्याह । एवं जातिगुणक्रियावाचित्वाच्छब्दानां त्रय्येव प्रवृत्तिर्न चतुष्टयी । यादृच्छिकानामभावात् । अथवा सर्वे क्रियाशब्दा एव स्युः । सर्वेषां धातुजत्वात् । तत एकैव प्रवृत्तिर्न त्रयी न चतुष्टयी । अथाव्युत्पन्नशब्दानां कथं धातुजत्वावधारणम् । अत आह—यत्रेति । पदमर्थः प्रयोजनमस्य तथा प्रकृत्यादिपदार्थविशेषात्समुत्था प्रादुर्भावो यस्य तत् । यत् प्रतिपदोक्तप्रत्ययविशेषादनिष्पन्नं डित्थादि तत्र थादेः प्रत्ययात् डीत्यादेर्धातोरूह्यम् । स ऊहः कीदृशः । अत आह—

संज्ञास्विति । संज्ञासु रूढशब्देषु धातुरूपाणि कल्प्यानीति शेषः । ततः परे प्रत्ययाश्च कल्प्याः । कार्याद् गुणाभावादेरनुबन्धं ककारादिकं विद्यात् । एतदुणादिषु शास्त्रं शास्त्रनिबन्धत्वात् शास्त्रविषयत्वाद्वा । तत्रोणादीन् दर्शयति—कृवापेति । डुकृञ् करणे । वा गतिगन्धनयोः विशेषणे च । पा पाने । जि जये ।

१. प्रयोगवशात्तु° C. २. त्वनुबन्ध° P., D4. ३. स्विदि N1. ४. °मर्थ Dc3, PC. ५. मस्य स तथा Dc1. ६. समुत्थः PC, Dc3.

कारुः । वायुः । पायुः । जायुः । मायुः । स्वादुः ।
साधु । आशु । गमेर्डोः ॥ गौः ।
ग्लानुदिभ्यां डौः ॥ ग्लौः । नौः ।
सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥[1]
सेतुः । तन्तुः[2] । क्रोष्टा । इत्यादि ।
अवितॄस्तॄतन्त्रिभ्य ईः ॥ अवीः । तरीः । स्तरीः । तन्त्रीः ।

डुमिञ् प्रक्षेपणे । ष्वद स्वादे । साध संसिद्धौ । अशू व्याप्तौ । कारुः । णित्त्वाद् वृद्धिः । 'अचो ञ्णिति' इति[4] । कारुः शिल्पी इन्द्रो वेधाः[5] । वायुः । 'आतो युक्' । पायुरिति । पायुर्वस्तिः । जायुरग्निरोषधं वा । मायुः पित्तम् । स्वादुः रसः । साधु । आश्वित्यव्ययं क्लीबं वा क्रियाविशेषणम् ।

गमेः । गच्छतीति गौः सौरभेयी ।

ग्लानुदि । ग्लायतीति ग्लौश्चन्द्रः । नुदतीति नौस्तरीः । सितनि । सिनोति सेतुः । तनोति तन्यते वा तन्तुः । गच्छतीति गन्तुः । मस्यति मस्तुः । सचते सक्तुः । अवति ओतुः । दधाति धातुः । क्रोशतीति क्रोष्टा । आदिनान्येपीत्थं ज्ञेया इति दर्शयति । तांश्चाग्रे दर्शयिष्यामः ।

अवि । अव रक्षणे । तॄ प्लवनतरणयोः । स्तॄञ् आच्छादने । तत्रि कुटुम्बने । अवीर्भूपालभूभृतौ । तरीर्नौर्वायुः । स्तरीः शयानः शयनं वा । तन्त्रीः शुष्कस्नायुः ।

---

१. क्रुशभ्य° N. २. C drops it. ३. After it—गन्तुः । मस्तुः । सक्तु उतुः । धातुः । क्रोष्टा &c. B₂. ४. 'अचो—' इति Dropped Dc₃, PC. ५. वेधाश्च । वायुर्वातः । पायुर्बस्तिः । Dc₃, PC.

लक्षेर्मुट् च । लक्ष्मीः ।

संस्त्याने स्त्यायतेर्ड्रट्[1] ॥ संस्त्यानं स्त्रीत्वम् । टित्त्वाद्[2] ङीप् । स्त्री ।

जॄविशिभ्यां झच् ॥ झोन्तः । जरन्तः । वेशन्तः । गण्डिमण्डिजनिनन्दिभ्यश्च[3] ॥ गण्डयन्तः । मण्डयन्तः । जनयन्तः । नन्दयन्तः ।

श्रुदक्षिस्पृहिगृहिदृजिभ्य[4] आय्यः ॥ श्रवाय्यः । दक्षाय्यः । स्पृहयाय्यः । गृहयाय्यः । दराय्यः । जयाय्यः ॥

लक्षेः । लक्षेरीप्रत्ययस्तस्य मुडागमश्च । लक्षयन्ति कृतिनो लक्ष्यते वा कृतिभिर्लक्ष्मीः । इत उत्तरं विग्रहानुसारेण कर्त्राद्यर्था धातवश्च ज्ञेयाः । सौत्रा अपि धातवस्ततो ज्ञेयाः । तत एवार्थाश्च तेषां कल्प्याः । उदाहरणार्थास्तु[7] वक्ष्यामोऽप्रसिद्धान् । प्रसिद्धास्तु प्रसिद्धेर्ज्ञेयाः । केचित्तु धात्वर्थानुसारेण नेयाः ।

संस्त्याने । स्त्रीति । स्त्यायत्यस्यां गर्भ इति ।

जॄविशि[5] । जीर्यते जरन्तः वृद्धः । विशति वेशन्तो योगी । विशत्यस्मिन् वा वेशन्तः पल्वलम् । गण्डि । गण्डयतीति गण्डयन्तो मेघः । मण्डयति मण्डयन्तो नटः । जनयतीति जनयन्तः । जनिस्थाने जीति पठन्ति केचित् । जीयते जयन्तः हस्तिजित्वरी[8] । नन्दयन्तीति नन्दयन्तः ।

श्रुदक्षि । शृणोति श्रवाय्यः । दक्ष्यते दक्षाय्यः । स्पृहयतीति स्पृहयाय्यः । गृहयतीति गृहयाय्यः ।[9] दृणातीति दराय्यः । जयतीति जयाय्यः ।

१. ड्रट् C_1 N_1. २. D_2, B_2, N drop टित्त्वात्. ३. गडिमडि D_2. ४. शृ B_1, D_1, D_3, P, C. ५. जृभ्य C. ६. शराय्यः B_1, D_1, D_3, P, C. ७. उदाहरणाम्तु Dc_1. ८. वृभते PC. ९. drop Dc_1.—दृणातीति दराय्यः

स्तनिदृषिपुषिगदिमदिहृदिभ्यो णेरित्नुच् । एभ्यो ण्यन्तेभ्य इत्नुच् स्यात् ॥ अदन्तत्वान्न वृद्ध्यादि । स्तनयित्नुः । दृषयित्नुः । पोषयित्नुः । गदयित्नुः । मदयित्नुः । हृदयित्नुः ।

कृगृस्तृजागृभ्यः क्विन् ॥ कीर्विः । गीर्विः । स्तृविः । अविचिण्णालित्युक्तेर्न गुणः । जागृविः ।

असुनादयः प्रागुक्ताः ।

स्तनि । स्तनयित्नुर्घनः । दूषयित्नुर्दूषकः । दूषिस्थाने हृषिं पठन्ति । हर्षयित्नुर्हर्षक इत्युदाहरन्ति केचित् । पोषयित्नुः पोषकः कोकिलः । गदयित्नुर्वादी । मदयित्नुर्मद्यम् । हृदयित्नुर्हृदयंगमः । केचिदमुं न पठन्ति नोदाहरन्ति च ।

कृगृ । कीर्विः किरणम् । गीर्विः गिरणम् । स्तृणोतीति स्तृविरध्वर्युः । केचित् स्तॄ इति दीर्घं पठन्ति । स्तीर्विरित्युदाहरन्ति । जागर्तीति जागृविर्वह्निप्रबुद्धौ ।

असुनादय इति । 'असुन्—' इत्यादि सूत्रे । ते चास्माभिर्व्याख्याताः । इदानीमादिशब्दसूचितानुणादीन् मूलोक्तेभ्योऽन्यान् दशपाद्यनुसारेण इकारान्तादिक्रमेण कथयामः । तत्रैवं व्यवस्था । 'भूतेऽपि दृश्यन्ते' इति सूत्रेणान्यकालेऽपि ज्ञेयाः । तथा 'भविष्यति गम्यादयः' इति सूत्रेण गम्यादयो भविष्यत्येव स्युः । 'दाशगोघ्नौ संप्रदाने' इति सूत्रेण तौ संप्रदाने 'भीमादयोऽपादाने' इति भीमभीष्मादयोऽपादाने स्युः । 'ताभ्यामन्यत्रोणादयः' इति सूत्रेणान्यत्रोणादयः संप्रदानापादानाभ्यामन्यत्र ज्ञेया इति ।

---

१. मदि dropped B_2, D_4. २. D_2, D_4 drop these forms; B_2 drops मदयित्नुः only; N drops पोषयित्नुः only. ३. क्विप् B_2. ४. Before it—उणादय इति वा पाठः C.

अशावतृभ्योनिः । अशनिर्वज्रः । अवनिर्भूः । तरणिः सूर्यः । अर्तिसृधृधमिभ्यश्च । एभ्योनिः । अरणिः अग्निपात्रम् । सरणिः पन्थाः । धरणिर्भूः । धमनिर्वंशैकदेशे । आङि शुषेः सनश्छन्दसि । आङ्पूर्वाच्छुषेः सनन्तादनिः स्याच्छन्दसि । भाषायामपीति केचित् । आशुशुक्षतीत्याशुशुक्षणिः अग्निः । कृषेरादेश्च चः । कृषेरनिः स्यादादेश्च चकारः । कर्षति कृषतीति वा चर्षणिः वृषः । अदेर्मुट् च । अनिर्मुडागमः । अत्तीति अद्मनिरग्निरश्नो वा । वृत्तेः । वर्ततेनया वर्तिः पन्थाः । क्षिपेः किच्च । [1]क्षिपतेरनिः कित् । क्षिप्यते क्षिपणिरस्त्रं वडिशं दण्डश्च । जसिसहोरुरिन् । जस्यते जासयते वा जसुरिः समाधिरशनिर्वा । सहते सहुरिः पृथिव्यक्रोधनौ । भुवोनिच् । भवतेरनिः स्यात् । भवन्त्यस्यां भूतानि भवनिर्लोकस्थितिः । असिसञ्जिभ्यां क्थिन् । अस्यते अस्थि कीकसम् । सज्जते सक्थि ऊरुः । प्लुषशुषकुषिभ्यः क्सिः । प्लुष्णाति प्लुष्यति वा प्लुक्षिः । अग्निजठरौ । शुष्यति तेन शुक्षिः तेजः । कुष्यति कुक्षिः उदरपार्श्वम् । अशेर्नित् । अशेः क्सिः नित् । अश्नाति अश्नुते वानेन रूपमक्षि नेत्रम् । नियो मिः । नयति नेमिश्चक्रान्तः । अर्तेरूच्च । अर्तेर्मि ऊच्चादेशः । ऋच्छति इयर्ति अर्यते वा ऊर्मिस्तरङ्गः । अशे रश् च । अशेर्निः स्यात् रशादेशश्च । अश्नाति अश्नुते रश्मिः । भुवः कित् । भवन्त्यस्यां भूमिः । दल्मिः । दलेर्निपातः । दलयति दल्यतेनेन वा दल्मिरायुधम् । वीज्याहाज्वरिभ्यो निः । वीयते वेणिः । बाहुलकात् णत्वम् । जिनाति ज्यानिः । हानिः । ज्वरति जूर्णिः । सृवृषिभ्यां कित् । आभ्यां निः स्यात् स च कित् । सरत्यनेन

१. क्षिपेरनिः स च कित् । PC. DC3 २. हसि Pc, Dc3. ३. हसति हस्यते वा हसुरिः PC, DC3. ४. वारि DC3, PC. ५. कुष्णाति PC, DC3. ६. वा नेन Dc1.

सृणिरङ्कुशः । वर्षति वृष्णिर्यादवः । अङ्गेर्नलोपश्च । अङ्ग्यते[1] अङ्गति वा अग्निः । वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् । एभ्यो निः स च नित् । वहति हव्यं वह्निः । श्रयन्त्येतां श्रेणिः सङ्घः । श्रूयते पुम्भिः श्रोणिः कटिः । युवन्त्यस्यां योनिः प्रकृतिर्भगश्च । द्रोणिः । ग्लायन्त्यनया ग्लानिर्दौर्बल्यम् । हीयते हानं वा हानिः । त्वरते त्वरणं वा तूर्णिः । घृणिपृश्निपार्ष्णिचूर्णिभूर्णि । एते निपात्याः । जिघर्तीति घृणिः सूर्यः । स्पृशतीति पृश्निः । स्पृशन्त्यनया पार्ष्णिः । भवति भूर्णिः । बहुलात् घूर्णिः शनिः । क्रुणिः । वृदृभ्यां विन् । वृणाति वर्विः धात्री । दृणात्यनया दर्विः । जृशॄस्तॄजागृभ्यः क्विन् । एभ्यः क्विन् । जीर्यतीति जीर्विः कायः । शृणाति शीर्विर्हिंसा । स्तृणाति स्तीर्विरध्वर्युः प्राणजातिश्च । जागृविः । दिवो द्वे दीर्घश्चाभ्यासस्य[2] । दीव्यति अनेन दीदिविरन्नम् । कृविघृष्विछविस्थविर्दर्विकिकी दिविः । एते निपात्यन्ते । करोति कृविः कारुः । जिघर्ति घृष्विर्वाय्वग्नी । छादयति छविः शोभा । तिष्ठति स्थविः स्थावरः अग्निश्च[3] । ददाति दविर्दाता । कौति कवते वा किकिर्विद्वान् । दीव्यति दिविः द्यूतकितवौ । बाहुलकाद् रविः[4] । पातेर्डतिः । पाति पतिः । अमेरतिः । अमतीत्यमतिर्व्याधिर्गतिः[5] । वहिवस्यर्तिभ्यश्चित् । एभ्योतिः स च चित् । वहतीति वहतिर्वायुरनड्वांश्च । वसत्यस्यां वसतिराश्रयः । ऋच्छतीत्यरतिर्वायुर्मरणं च । अञ्चेः को वा । अतिः स्यात् कादेशश्च वा । अञ्चति अच्यते वा अञ्चतिरङ्कतिर्ब्रह्मवाय्वग्निघृणयः[6] । हन्तेरंह च । हन्तेरंहादेशश्च । हन्ति हन्यते वा अंहतिः पन्थाः कालो रथश्च । रमेर्नित् । स च नित्[7] । रमतेस्यां रमतिः क्रीडा । सुञो रित् दीर्घश्च । सुनोति सूयते वा सूरिः

१. अङ्गते DC3, PC. २. अभ्यासस्य च दीर्घः PC. ३. After it—दिवः क्विन् द्वे चाभ्यासस्य च दीर्घः । DC3. ४. अग्निश्च dropped DC3, PC. ५. रविः DC3, PC. ६. व्याधिगतौ PC. ७. Before it—रमेरतिः PC, DC3.

पण्डितः । अदिशदिभूशुभिभ्यः क्रिन् । अत्ति अद्यते वा अद्रिः । शद्यते शद्रिः वज्रम् । भवति भूरिः बहु । शोभते शुभ्रिर्दर्शनीयः । वङ्क्र्यादयः । निपात्याः । वञ्चते वङ्कते वा वङ्क्रिः [1]शल्यम् । मङ्कते मङ्क्रिः शठः । अङ्क्रि[2]रङ्क्यम् । राशतिभ्यां त्रिप् । राति निद्रां रात्रिः । शतिः सौत्रः । शततीति शत्रिः हस्ती । अदेर्निच्च । अदेस्त्रिः स च नित् । अत्ति अत्रिर्ऋषिः । मृकणिभ्यामीचिः । म्रियते मरीचिः । कणति कण्यते वा कणीचिः चक्षुःप्राणी । वेञो डिच्च । ईचिः स च डित् । वयतीति वीचिः । श्रयतेश्चित् । ईचिः स च चित् । श्रयति 'श्रयीचिश्चन्द्रः । नौ षञ्जेर्घथिन् । निषजति निषज्यते वा निषङ्गथिः रथकूबरः । उद्यर्तेश्चित् । उत्पूर्वादर्तेर्घथिन् स च चित् । उदृच्छति उदर्यते उदगथिः वप्राग्भिकायाः । सर्तेर्णित् । घथिन् स च णित् । धावति सारथिः । अमेर्गुरी रश्च लो वा । अमेर्गुरिः स्यात् तस्य च वा लः । अमति अङ्गुरिः अङ्गुलिः । इञ् सर्वधातुभ्यः । कवते कविः । पविः वज्रम् । परिर्मोक्षमार्गः । हृपिशिरुहिवृतिविदिकीर्तिभ्यश्च । एभ्य इञ् । हरति हरिः विष्णुसिंहाद्याः । पिशति पिश्यते वा पिशिः केशोण्डकमण्डलवः पेशलश्च । रोहति रोहिः जन्म । वर्तते वर्त्यते वा वर्तिः । वेत्ति वेदिः यज्ञाधिष्ठानम् । कीर्तिः सौत्रः । कीर्तनं कीर्तिः । इगुपधात् कित् । इञ् स च कित् । भिनत्ति भिदिः वज्रम् । छिदिः परशुः शस्त्रम् । शोचति जनं क्लिश्यमानं शुचिर्विद्वान् । ऋषिः । कृषिः । भ्रमेः संप्रसारणं च । इञ् स च कित् । भ्रमति भ्राम्यति वा भृमिर्वायुः । क्रमितमिस्तम्भामत इच्च । एभ्य इञ् स च कित् । एषामस्य इत् । क्रामति क्रिमिः प्राणी । ताम्यति तिमिर्मत्स्यः । स्तभ्नाति स्तिभिरम्भोधिः । मनेरुच्चोपधायाः । इञ् उपधाया उच्च । मन्यते मुनिः । वल्लेर्वलि-

१. सर्पः De3. PC. २. रङ्कनम् PC. ३. परमुः dropped De3. PC ४. इः PC.

अहिरण्ये । इञ् वलिरादेशश्च अहिरण्ये । वल्लः सौत्रः । वल्लते वलिः त्वङ्मांससंकोचः । अहिरण्ये किम् । वल्लिर्हिरण्यशलाका । वसिवपिवदिराजिव्रजिध्वजिसदिहनिकमिकषिवाशिवारिभ्य इञ् । पुनरिञ्विधिबलान्नित्यम् । वसति वासिः तक्ष्णो भाण्डी । वपत्यस्यां वापिः पुष्करिणी । वदत्यस्यां वादिः वीणा । राजति राजिर्लेखा । व्रजति व्राजिर्मनः । ध्वजति ध्वाजिरश्वः । सीदति सादिरश्वारोहः । हन्ति हानिः । काम्यते कामिः कामुकः । कषति काषिर्हिंसकः । वाश्यते वाशिर्जलदः । वार्यते वारिः । नहो भश्च । इञ् भोन्तादेशश्च । नह्यते नाभिः । कृषेर्वृद्धिश्छन्दसि । इञ् वृद्धिश्च । कर्षति कार्षिः । छन्दसि किम् । कृषिः । शः शकुनौ । इञ् वृद्धिश्च । शृणाति शारिः । शकुनौ किम् । शरिर्हिंस्रः शूलं च । कृञ उदीचां कारुषु । इञ् वृद्धिश्च । कारिः शिल्पी । उदीचां किम् । करिर्विष्णुः । जनिघसिभ्यामिण् । जायते जनिः प्रादुर्भावः । घासिरग्निः । अज्यतिभ्यां च । अजति आजिर्युद्धम् । अततीत्यातिः पक्षी । पादे च । अज्यतिभ्यामिण् । पादाभ्यामजति पदाजिः पदातिः । 'पादस्य पद्' इति पद्भावः । अशिपणाय्यो रुडायलुकौ च । आभ्यामिण् यथाक्रमं रुट् आयलुक् चागमादेशौ स्तः । अश्नाति अश्नुते वा राशिः लग्नं यवादिसङ्घो वा । पणाय्यतेनेनेति पाणिः । वेञो डित् । वयतीति विः पक्षी तन्तुवायश्च । प्रे हरतेः कूपे । इण् स च डित् । प्रह्रियतेस्मादुदकं प्रहिः कूपः । नौ व्यो यलोपः पूर्वस्य च दीर्घः । निपूर्वाद् व्येञ इण् स च डित् यलोपः पूर्वपददीर्घश्च । निवीयते नीविः । समाने ख्यः स चोदात्तः । समानपूर्वात् ख्याते रिण् स च डित् यलोपः समानस्य सादेशः स चोदात्तः । समानं ख्यायते सखा वयस्यः । आङि श्रिहनिभ्यां ह्रस्वश्च । आङ्पूर्वाभ्यामाभ्यामिण् डिच्च आङो ह्रस्वत्वं चोदात्तत्वं च । आश्रीयते अश्रिः कोणः । आहन्ति प्राणिनमहिः । अच इः ।

१. वलाणिणत्वम् Dc1. २. पणायते PC, Dc2. ३. समानः PC, Dc3.

पुनाति पविः । भवति भविः । खनिकष्यज्यसिवसिध्वनिसनिग्रन्थिचरिभ्यश्च । इः । खन्यते खनिः । कष्यते कषिः । अज्यते अजिस्तेजः । अस्यते असिः । वसत्यस्यां वसिः । ध्वनति ध्वनिः । सनोति सनिः भक्तिर्दानं च । ग्रथ्यते ग्रन्थिः । चर्यतेस्मिन् चरिर्विषयः । उभेर्द्वे च । उभेरिः द्व्यादेशश्च । उभति उभ्यते वा द्वौ । वृत्तेश्छन्दसि । वर्तिर्द्रव्यं दीपाङ्गं च । भुजेः किच्च । इः स च कित् । भुनक्ति भुज्यते वा भुजिः सर्पो भोगश्च । कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च । इः किच्च । किरति कीर्यते वा किरिराखुर्बिलं च । गिरिः । शिरिः शलभः शिला च । पुरिः पूर्भूपश्च । कुटिः शरीरम् । भिदिः प्रहरणम् । छिदिः शस्त्रम् । कुडिकम्प्योर्नलोपश्च । इः किच्च नलोपश्च । कुडिः काय आलयश्च । कपिः कृशानुवानरौ । वसिवितसस्तिः । वसत्यस्यां वस्तिर्गुह्यमङ्गम् । वितस्यतेनया वितस्तिः । पथेर्नित् । तिर्निच्च । पत्तिर्भागः । दृणातेः कित् ह्रस्वश्च । दीर्यते दृतिः प्लवः । पातेरतिः । पाति पातिः । वातेर्नित् । अतिर्निच्च । वातीति वातिर्गन्धमिश्रपवनः । तनोतेर्द्रिः । तनोति तन्द्रिः । 'जीर्यतेः' क्रिन् रश्च वः । क्रिन् रस्य वादेशः । जीर्यते जिव्रिर्देहम् । ग्रहे रनिः । गृह्णाति गृह्यते वा ग्रहणिरुदरान्तरस्थानम् ।

इतीदन्ताः ।

यापोः किद् द्वे च । ईः कित् द्वित्वं चानयोः । यात्यनेन ययीर्मुक्तमार्गः । पिबति पातीति पपीः सूर्यः । वातप्रमीः । निपातः । वातं प्रमिनोति वातप्रमीः ॥

इति ईदन्ताः ।

छन्दसीणः । उण् । एति आयुः जरायुः । दृसनिजनिचरिचटिरहिभ्यो ञुण् । दृणाति दीर्यते दारुः । सनोति सन्यते

१. भूपो PO. २. इः स्यात् DC3. ३. निपात्यः DC3. ४. After it भूगः DC3.

वा सानुः पर्वतैकदेशः । जायते जानुः । चरति चारुः । चटति चाटुः । रहयति राहुः । प्रत्ययान्तरं 'ञ्नित्यादिः—' इत्याद्युदात्तार्थम् । ञिरनुबन्धकरणं 'जानिवध्योश्च' इति ह्रस्वनिषेधार्थम् । किंजरयोः श्रिणः । किंजरापूर्वाभ्यां शृइण्भ्यां ञुण् । किंशृणातीति किंशारुः सस्यशूकम् । जरामेति जरायुर्गर्भवेष्टनम् । त्रो रश्च लः । तॄ ऋ आभ्यां ञुण् रस्य लः । तरन्त्यस्मिन् वर्णास्तालु वदनैकदेशः । ऋच्छतीत्यालुः शाकम् । कृके वचः कश्च । ञुण् । कृकं वक्ति कृकवाकुः कुक्कुटः कृकलासश्च । भृमृशीतॄचरित्सरितनिमिमस्जिभ्य उः । बिभर्ति भरुः धारयिता स्वामी च । म्रियन्तेस्मिन् मरुः अजलतृणो देशः । शेतेत्यर्थं शयुः अजगरः । तरन्त्यस्मिन् तरुः । चरन्ति देवाश्चरुः । त्सरति त्सरुः खड्गादिमुष्टिः । तनोत्याहारं तनुः कायः । मीयते मयुः पशुराकुतं च । मज्जन्त्यस्मिन् मधूनि[1] मद्गुः पक्षी । न्यङ्क्वादित्वात् कुत्वम् । अणश्च । उः । अणतीत्यणुः[2] सूक्ष्मम् । धान्ये नित् । अण उर्नित्च धान्ये । अण्यते प्राणिभिरणुर्धान्यविशेषः । बहुलादन्यत्रापि । कटति कटुः । बटति बटुः । शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च । उः नित्च । शृणाति शरुः क्रोध आयुधं च । स्वरति स्वरुः वज्रम् । स्निह्यति स्नेहुः स्निग्धः । त्रपते त्रपुः । अस्यन्ते अस्यन्ति वासवः प्राणाः । वसति कृतिषु वसुर्देवो धनं वा । हन्ति हन्यते वा हनुर्मुखैकदेशः । क्लेदयति क्लेदुश्चन्द्रः । बध्नाति स्नेहेन बन्धुः । मन्यते मनुः प्रजापतिः । स्यन्देः संप्रसारणं धश्च । उर्नित्च धान्तादेशः संप्रसारणं च । स्यन्दतेत्यर्थं सिन्धुर्नद्यादि । उन्देरिच्चादेः । उर्नित्च आदेरिदादेशश्च । उनत्तीतीन्दुश्चन्द्रः । इषेः किच्च । उः किच्च नित्च । इष्यते इषुः । स्कन्देःसलोपश्च । उर्नित्चादेर्लोपः । स्कन्दत्यस्मिन् कन्दुः पाकस्थानम् । सृजेरसुमच् । उर्नित् असुम् चागमः सलोपश्च । सृज्यते रज्जुः । कृतेराद्यन्तविपर्ययश्च । उर्नित्च आद्यन्तविपरीत्यं च । कृत्यतेनेन तर्कुः सूत्रवेष्टना । नावञ्चेः ।

१. अम्बूनि DC3. २. त्यणुः सूक्ष्मः DC3, PC.

उर्निच्च । नियतमञ्चति न्यङ्कुर्मृगविशेषः। न्यङ्क्वादित्वात् कुत्वम्। फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च । उर्निच्च । फलेर्गुक् आगमः । फल्गु गिरिसारं च । पाटेः पटिः । पाटयतीति पटुः विशारदः । नमेर्नाकः । नम्यतेऽनेन नाकुः ऋषिर्वल्मीकश्च । मन्यतेर्धोऽन्तादेशः । मन्यतेऽत्यर्थं मधु । जनेस्तोऽन्तादेशः । जायते जतु लाक्षा । वलेर्गुक् च । गुगागमश्च । वलतीति वल्गुर्बलवान् मधुरस्वभावश्च । शः कित् सन्वच्च । उर्निच्च किच्च सन्वच्च । मातुः स्तन्यं श्यति शिशुः । यो द्वे च । उः किच्च निच्च यातेर्द्वित्वं च । यान्ति तेन पुण्यं ययुरश्वमेधीयोऽश्वः । कुर्भ्रश्च । भृञः कुः स्याद् द्वित्वं च । बिभर्ति भरति वा तेजो बभ्रुः पिङ्गलः । प्राक्प्रत्ययनिर्देशोऽन्येषां सिद्धये । करोति सत्यं चक्रुः । हन्ति जघ्नुः । पूर्यतेऽसौ पपुश्चन्द्रः । पॄभिदिव्यधिगृधिधृषिहृषिभ्यः । कुः । पृणाति पुरुः धर्मो राजा च । भिनत्ति भिदुः दम्भोलिः । विध्यतीति विधुः नागाग्निकामचन्द्रशस्त्राणि । गृध्यति गृधुः लुब्धः । धृष्णोति धृष्णुः प्रगल्भः । हृष्यति हृषुः हृष्टः । कृग्रोरुच्च । कुः उश्चान्तादेशः । करोति कुरुर्जनपदो राजा च । गृणाति गुरुः । अपदुःसुषु स्थः । अपतिष्ठति अपष्ठुः बालः । दुःखेन तिष्ठति दुष्ठुरशोभनः । सुखेन तिष्ठतीति सुष्ठुः शोभनः । भावेऽपि । अपष्ठु । दुष्ठु । सुष्ठु ।[1] रपेरिच्चोपधायाः । कुः । रपति दुष्टं रिपुः । अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च । कुः । अर्जेर्ऋजिरादेशः । अर्जयति यशः ऋजुः । दृशेः पश् । पश्यति पशुः । कमेस्तुगागमः । काम्यते कन्तुः कामकामुकौ । अमेर्धुक् च । अमतीत्यन्धुः । पशेः सौत्रस्योपधादीर्घः । पश्यते वायुना पांशुः । बाधेर्हः । बाधतेरीन् बाहुः । प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च । कुः । प्रथते पृथुः विशालो राजा च । म्रदते मृदुः । भृज्जति भृगुः । न्यङ्क्वादित्वात् कुः । लङ्घिबंह्योर्न-

[1] After it दुष्ठु PC.

लोपश्च । कुः । लङ्घ्यते लघुः । बंह्यते बहुः । ऊर्णोतेर्नुलोपश्च । कुः । ऊर्णोति ऊरुः । महति ह्रस्वश्च । ऊर्णोति ऊर्णुयते च उरुर्महान् । श्लिषेः कश्च । कश्चान्तादेशः । श्लिष्यति श्लिकुर्भृत्योद्यमौ । आङ्परयोः खनिशृभ्यां डिच्च । कुः डिच्च । आखनत्याखुः । परान् शृणाति परशुः । हरिमितयोर्द्रुवः । कुः डिच्च । हरिभिर्द्रूयते हरिद्रुर्द्रुमः । मितं द्रवति मितद्रुः समुद्रः । बहुलादन्यत्रापि । शतधा द्रवति शतद्रुः नदी नदश्च । खरुशङ्कुपीयुनीलङ्गुलिगु । कुन्ता निपात्यन्ते । खनति खोरति खुरति वा खरुः मूर्खकथनखुराः । शङ्कतेस्मात् शङ्कुः कीलः । पिबति तेजः पीयुः स्वर्णम् । पिबत्यायुः पाति महान्तं पीयुः कालो भूपश्च । नीलं गच्छति नीलङ्गुः क्रिमिः । लगति लिगुर्मूर्खः । मृगय्वादयश्च । कुन्ता निपात्यन्ते । मृगं याति मृगयुः । अस्माद्याति अस्मयुः जिह्मः । भुवं याति भुरण्युर्वह्निः । वरे याति वरेण्यः आदित्यमरुतौ । पः किच्च । तुः किच्च । पिबति पाति पाययति वा पातुः । अर्तेश्च तुः । स किच्च । ऋच्छत्यर्थते वा ऋतुः । कमिमनिजनिगाभापायाहिभ्यश्च । तुः । कामयते कन्तुः । मन्यते मनुते मन्तुः मनः अपराधश्च । जायते जन्यते जन्तुः । गायति गातुः । भाति भातुरर्चिष्मान् । पाति पातुः पालकः । यातीति यातुः पान्थः । हिनोति हेतुः । चायः की । चाय्यते केतुः । आप्नोतेर्ह्रस्वश्च । आप्नोति अप्तुः यज्ञयोनिर्जन्तुश्च । बहुलादन्यत्रापि । अमतीत्यन्तुः । वसेस्तुन् । वसन्त्यस्मिन् वस्तु धनभावौ । अगारे णिच्च । वसन्ति तस्मिन् देवा वास्तु अगारम् । कृञः कतुः । क्रियतेसौ धर्मार्थिभिः क्रतुः । एधिवह्योश्चतुः । एधते एधतुराढ्यः । वहति वहतुरनड्वान् । जीवेरातुः । जीवन्त्यनेन जीवातुः अन्नं जीवनौषधं च । कृहृभ्यामेणुः । करोति करेणुः करिणी । हरति चेतः हरेणुः सुरभिद्रव्यम् । बहुलादन्यत्रापि । गच्छति

१. After it—रक्षकः । PC.

गमेणुः पान्थः । पचति पचेणुः पाचकः । यजति यजेणुः ऋत्विक् । यजिमनिशुन्धिदसिजनिभ्यो युच् । यजति यज्युरध्वर्युः । मनुते मन्यते वा मन्युः कोपादिः । शुध्यति शुन्ध्युः अग्निः । दस्यति दस्युश्चौरः । जनयति जन्युः प्रजापतिः पिता च । भुजिमृङ्भ्यां युक्त्युकौ । भोजनं भुज्युः । मरणं मृत्युः । सर्तेरयुः । सरति सिसर्ति वा सरयुर्वायुः सरिच्च । कण्युच् क्षिपेश्च । क्षिपति क्षिप्यते वा क्षिपण्युर्वायुः । भुवश्च । कण्युच् । भुवण्युरीश्वरः । अनुङ् नदेश्च । नदेः क्षिपेश्चानुङ् । नदति नदनुर्मेघः सिंहो वा । क्षिपति क्षिप्यते वा क्षिपनुर्बाहुः । कृहनिभ्यां क्नुः । करोति कृणोति किरति वा कृणुः कारुः । हन्त्याहारं हनुः । बहुलान्नलोपः । गमेः सन्वच्च । क्त्नुः । आशु गच्छति जिगत्नुः प्राणोमीयो वा । दाभाभ्यां नुः । दीयते दानुः रक्षणाय धनम् । भाति भानुः । बहुलाच्च चित्रस्वर्विश्वेषु । चित्रं भातीति चित्रभानुः । स्वर्भानुः । विश्वभानुः । वचेर्गश्च । नुः गान्तादेशः । वग्नुर्वक्ता । धेट इच्च । नुः इच्चान्तादेशः । गुणा धयन्ति तां धेनुः । सूङः कित् । नुः किच्च । सूयते सूनुः । स्थाणुः । तिष्ठति स्थाणुः शंभुस्तम्भौ । अजिवृरीभ्यो निच्च । णुर्निच्च । अजति वेणुः वीभावः । वृणोति व्रियते वर्णुः देशविशेषः । रीयते रेणुः । विषेः किच्च । णुः किच्च निच्च । वेवेष्टीति विष्णुः । कुडिकुषिभ्यां काकुः । कुडति कुडाकुर्दुर्गतः । कुषाकुराखुः कपिः परोपतापी[1] च । सर्तेर्मुक् च । काकुर्मुगागमश्च । धावत्यत्यर्थं सृमाकुः मृगवारिवाहवः । दुगागममन्ये इच्छन्ति । सृदाकुः । पर्देर्नित्संप्रसारणमल्लोपश्च । पर्दति पृदाकुः सर्पः कुशाब्दकृत् । ह्रियः कुक् रश्च लो वा । कुः रेफस्य लो वा । जिह्रेति ह्रीकुः ह्लीकुर्लज्जितः कुवेषः । इषः क्सुः । इष्यते इक्षुः । आदौ प्रत्ययोच्चारणादशेरपि । अश्नाति

१. करोपतापी PC, परोपकारी Dc3.

अश्नुते वा अक्षुरर्कः । वह्नेरपि । वक्षुर्नटः । अर्तेररुः । ऋच्छति अर्यते वा अररुः अलंकारः । कुटः किच्च । कुटरुः शशप्लवगौ । मापो रुरी च । रुः ई चान्तादेशः । मान्त्यमरा अत्र मीयते वा सूर्येन्दुभ्यां मेरुः । पाति पिबति पीयते वा पेरुः गिरिराजवायुपतङ्गाः । जत्वादयश्च । निपात्याः । जायते जत्रु । शृणाति शत्रुः । शृणाति शिग्रुः शार्खी । अत्तीत्यत्रुः क्षुद्रजन्तुः । हन्ति हन्तुर्हिंस्रः । रुशादिभ्यां क्नुन् । रौति रूयते वा रुरुः । शीयते शत्रुः । जत्वादित्वात् सिद्धे वचनं नित्स्वरार्थम् । तनोतेर्डउः सन्वच्च । तनोति पिष्टद्रव्याणि तितउः चालनी । प्रत्ययसामर्थ्याद्गुणो न । श्मनि श्रयतेर्डुन् । श्मनि श्रयते श्मश्रु । अश्वादयश्च । निपात्याः । अश्नाति अश्नुते चक्षुः अश्रु । न स्रूयते स्रवति वा अस्रु ।

इत्युदन्ताः ।

कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः । कर्षति कर्षते कर्षूः करीषाग्निः[1] । चमति परान् तैश्चम्यते वा चमूः । तनोति तन्यते वा तनूः । धनति धन्यते वा धनूः राशिः । सर्जति सर्जूः वणिक् । खर्जति खर्जूः कण्डूः । बहुलात् यौति यवागूः । मृजेर्गुणश्च । ऊः । मार्ष्टि मर्जूः रजकः । मार्जनं मर्जूः शुद्धिः । वहो धश्च । धोन्तादेशश्च । उह्यते वधूः । कषेः कच्छः । ऊः कच्छादेशः । कषति शरीरं कच्छूः कण्डूः । णिच्च कसिपद्यर्तेः । ऊः णिच्च । कसति कासूः विकलाङ्गविधिशक्तयः[2] । पद्यते पादूः पादुका । ऋच्छत्यर्यते वा आरूः वारिपृथुतरवः । अणो रुश्च । ऊः णिच्च रुरन्तादेशश्च । अणति तेनोदकमारूः भृङ्गारः । नञि लम्बेर्नलोपश्च । ऊः णिच्च नञि । न लम्बत इत्यलाबूः । के श्र एरङ् च । कपूर्वात् शृणातेरूरेरङादेशश्च । कं शृणाति कशेरूः वीरुत् । त्रो दुट्

१. करीषोग्निः PC. २. विकलाङ्गरावि आधिशक्तयः PC, Dc3. ३. रुच्च PC, Dc3.

च। तरतेरुर्डुडागमश्च। तरति तीर्यते वा तर्दूः जलतरणोपकरणे। दरिद्रातेर्यालोपश्च। अस्य इ आ अनयोर्लोपः। दरिद्रात्यनयाऽङ्गं दर्द्रूः कुष्ठविशेषः। नृतिशृध्योः कूः। नृत्यति नृतूः [१]वाल्याक्रिमिनीतयः। शर्धते शृधूः पायुशब्दधिषणे। अन्दूदृम्भू-जम्बूकफेलूकर्कन्धूदिधिषूः। निपात्याः। अमति अम्यते अन्दूः भूषणविशेषः। दृम्भति दृम्भूः [२]कंथुरागौ। जायते जम्बुः। [३]कफं लाति कफेलूः श्लेष्मातकः। कर्कं दधाति कर्कन्धूः बदरी। [४]दिधिं स्यति दिधिषूः पुनर्भूः। भ्रमेश्च डूः। भ्रमति भ्रूः।

ऋदन्ताः।

प्रथमः पादः।

तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ। शंसति शंस्ता। क्षदति क्षत्ता। प्रशास्ति प्रशास्ता। ऋत्विक्संज्ञा एताः। [५]अनित्त्वार्थं तृच्। बहुलमन्यत्रापि। तृन्तृचौ संज्ञायामनिटौ [६]च। प्रस्तोता। प्रतिहर्ता। प्रतिहन्ता। उपद्रष्टा। उद्गाता। होता। उन्नेता। एतेपि ऋत्विजः। नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृमातृभ्रातृजामातृपितृदुहितृ। एते निपात्याः। [७]नं पतति नप्ता। नयति नेष्टा ऋत्विक्सारथी। [८]त्विषति त्वष्टा रविप्रजापती। क्षत्ता सारथिः। जुहोति होता। पुनाति पोता। [९]मान्यते माता। भ्राजते भ्राता। जायां मिनोति जामाता। पाति पिता। दुनोति पितरं दोग्धि वा दुहिता। सावसेर्ऋन्। सुष्ठु अस्यति स्वसा। यतेर्वृद्धिश्च। ऋन्। यतन्ते यातरः भ्रातृभार्याः परस्परम्। नञि च नन्देः। ऋन् वृद्धिश्च। न नन्दन्ति भ्रातृजाया यस्यां ननान्दा पतिभगिनी। दिवेश्च ऋन्। दीव्यति देवा। नयतेर्डिच्च।

---

१. वाल्यानटक्रीमि Dc3. २. कन्थु PC. ३. कफलाति PC, Dc3. ४. दिधिष्टि PC, Dc3 दिधिषुः ५. अनिट्त्वार्थं वचनम्। PC, Dc3. ६. वा Dc1. ७. नमति नप्ता Dc3, PC. ८. त्वेषति Dc3, PC. ९. मन्यते Dc3, PC.

ऋन् डिच्च । नयति ना । सव्ये स्थश्छन्दसि । ऋन् डिच्च । सव्ये तिष्ठति सव्येष्टा भाषायामपि ।

ऋदन्ताः ।

रातेर्डैः । राति श्रेयोर्थं पात्रेभ्यस्तां राति रायते वा राः रायौ धनं भानुश्च ।

द्वितीयः पादः ।

जीवेरातृकन् वृद्धिश्च । जीवति जीवयति वा जैवातृकः आयुष्मांश्चन्द्रो भूतानि च । समि कस उकन् । समन्तात् कसति संकसुकः स्थिरः । पचिनश्योर्णुकन् कनुमौ च । कादेशनुमागमौः । पचति पाकुकः सूपकारोध्वर्युश्च । नश्यत्यल्पेन वायुना नंशुकः पांशुः । भियः क्रुकन् । बिभेति भीरुकः । क्रुन् शिल्पिसंज्ञयोरपूर्वस्यापि । अपूर्वस्य तावत् शिल्पिनि । तक्षतीति तक्षकः । अपिशब्दात् सपूर्वस्यापि । तिलान् पीडयतीति तिलपीडकः । संज्ञायाम् । जनयति जनकः । कलाआङ्पूर्वात् पिबतेः क्रुन् । कलापकः शास्त्रकर्ता । जहातेर्द्वे च । क्रुन् । जहाति जहकः कालः । ध्मो धम च । क्रुन् धमादेशश्च । धमति धमकः लोहकारः । हनो वध च । क्रुन् । हन्ति वधकः बिडालः । बहुलमन्यत्रापि । क्रुन् । कथयति कथकः । रोचते रुचकः । कृषेर्वृद्धिश्चोदीचाम् । क्रुन् च । कृषति कार्षकः कर्षकः कृषको वा । उदकं च । उदेः क्रुन्नन्तो निपातः । उत्स्वाद्यते उदच्यते उदकम् । वृश्चिकृष्योः किकन् । वृश्चति वृश्चिकः । कर्षति कृषिकः । प्राङि पणिकषः । प्रापणायते प्रापणिकः । प्राकर्षति प्राकृषिकः । मुषेर्दीर्घश्च । किकन् । मुष्णाति मूषिकः । स्यमेः संप्रसारणम् । किकन् । स्यमति सिमिकः वृक्षपत्रविभागकृत् कीटकः । क्रिय इकन् ।

१. स्तां राति वा राः Dc3; स्तां रायते वा राः PC.

क्रीणाति क्रयिकः । आङि पणिपनिखनिभ्यः । इकन् । आपणिकः । आपनिकः[1] पथिको वालश्च । आखनिको वराहः । कृदाधारार्चिकलिभ्यः कः । कृणोति करोति करति कर्कः सारङ्गः । ददाति दाकः । दधाति धाकः[2] । राति राकः[3] । अर्च्यते अर्कः । कलति कल्कः क्वाथकितवौ । सृवृभूशुषिमुषिभ्यः कक् । कः किच्च । धावति सिसर्ति सृकः वायुसरकौ । वृणोति वृकः । भवति भूकः कालो भावमात्रं वा । शुष्यति शुष्कः । मुष्णाति मुष्कः चोरः । शुकवल्कोल्काः । निपात्याः । शोभते शृणोति वा शुकः पक्षी ऋषिश्च । वलति वयति वल्कं त्वक् वल्कलम् । उष्यति उल्का ज्वाला । इण्भीकापाशल्यतिमर्चिभ्यः कन् । एति एकः संख्यावाची मुख्यार्थश्च । बिभेति भेकः मण्डूकः । कायति काकः । पाति पिबति वा पाकः विष्णुबालौ । शलयति शल्कः काष्ठत्वक् मुद्गः । अतति अत्को गतिमदात्मानौ । मर्चति मचर्कः । नौ हः । नियतं हीयते नीहाकः निःस्नेहः । नीहाका गोधारः । स्यमेरिट् च । कन् । इडागमः । स्यमति स्यमिकः क्रिमिमेघौ । अजिसृधूञो दीर्घश्च । कन् । अजतीति वीकः वायुरक्षि विमलं च । दीर्घविधिरिड्गुणबाधार्थः । सुनोति सूकः अभिषवः । धूनोति धूको वायुः । ह्रियो रस्य लो वा । कन् । रेफस्य लो वा । जिह्रेति ह्रीकः ह्लीकः लज्जितः । आनकः शीङ्भियः । शेते शयानकः अजगरः । बिभेत्यस्माद्भयानकः । आणको लूधूशिङ्घिधाञ्भ्यः । एभ्य आणकः स्यात् । लूयतेनेन लवाणकः ।[4] शिङ्घ्यते शिङ्घाणकः श्लेष्मा । दधाति धाणकम् वसुपरिमाणम् । बहुलाण्णस्य नत्वमपीत्येके । लवानकादि । वृतेस्तिकन् । वर्तते वर्त्यते वा वर्तिका । कृतिभिदिलतिभ्यः कित् । तिकन् किच्च । कृन्तति कृत्तिका नक्षत्रम् । भिनत्ति भित्तिका कुड्यम् । लतिः

१. वाणिक्र पथिको Dc3. २. After it स्तम्भः PC, Dc3. ३. After it राता PC, Dc3. ४. After it शात्रम् PC.

सौत्रः । अवलत्तिका गोधा गन्धर्वभाण्डम् । इष्यशिभ्यां तकन् । किच्च । इष्यते इष्टका । अभ्रन्त्यस्यां पितरोष्टका । खजेराकः । खजति खजाकः मथा पक्षी । वलाकादयश्च । साधवः । वलति वलाका । मन्यते मनाका करिणी इत्यादि । शलपटिपतिभ्यो रित् । आको रिच्च । शलति शलाका । पटति पटाकः पान्थः । पतति पताका । पिनाकादयश्च । साधवः । पिनह्यतेनेनारीन् पाति वानेन पिनाकः । ताड्यते तडाकम् । भदते भदाकः अकुटिलः । न भाति नभाकः तमः । पिष्यते पिषाकः तिलपिष्टम् । कौति कवाकः पक्षी । श्यायते श्यामाकः जघन्यो व्रीहिः । कषिदूषिभ्यामीकन् । कषत्यनया कषीका खनित्रम् । दूषयति दूषीका दृङ्मलम् । चङ्कणेः किङ्कणश्च । किङ्कणादेशश्च । चङ्कणिर्यङ्लुगन्तः कणिः । पुनः भृशं वा कणति किङ्किणीका क्षुद्रघण्टा । शॄपॄवृञां द्वे रुक् चाभ्यासस्य । ईकन् द्वित्वम् अभ्यासस्य च रुक् । शृणाति शर्शरीकं जालम् । पिपर्ति पर्परीको भूपः सूर्यो जलाशयश्च । वृणुते वर्वरीको युवा । पर्फरीकादयश्च । साधवः । स्फुरति पर्फरीकः चलः । दीर्यते दर्दरीकं वाद्यम् । जीर्यते जर्जरीकं जरद्वपुः । ताड्यते तित्तिडीकमौषधम् । ईषेः किद्ध्रस्वश्च । ईकन् कित् ह्रस्वश्च । ईषति इषीका दर्भशलाका । ऋजेश्च । ईकन् किच्च । अर्जते ऋजीकम् पिष्टपचनम् । अनिदृशिभ्यां च । ईकन् किच्च । अन्यते अनीकं बलम् । पश्यन्ति तां विस्मिता दृशीका पुष्पवती । सर्तेर्नुम् च । धावति सृणीका लाला । अलीकादयश्च । साधवः । अनन्त्यनेनाधोगतिमलीकम् । वहन्ति हृदि व्यलीकम् । मृकणिभ्यामूकोकणौ । मारयति म्रियते मरूको मयूरो मर्त्यो वा । कणति काणुकः काकः । [illegible]लाद्वलेरूकः । वल्यते वलूकः उत्पलं मूलं

१. मन्था: PC, Dc3. २. आको PC. ३. ति तेनारीन् Dc3. ४. पिण्याकः Pc, Dc3. ५. ऋजीकम् । दुष्टम् PC, Dc3.

जलं वा । उलूकादयश्च । साधवः । उत्क्रम्य दृष्टिमालोकयति उलूकः । भल्लते भल्लूकः । शलिमण्डिभ्यामूकण् । शलति शालूकं कन्दम् । मण्डयति प्रावृषं मण्डूकः । कृञादिभ्यः संज्ञायां वुन् । क्रियतेऽत्रोदकं करकः कमण्डलुः । स्रियते सरकः मद्यभाण्डपाने । चरको वैद्याचार्यः । दरको भीरुः । ऋजेः कीकन् । अर्जते ऋजीकं तपो धनं बलं च । अर्भकपृथुकपाका वयसि । साधवः । ऋच्छत्यर्भकः । प्रथते पृथुकः । पिबति पाकः बालः ।

एते कान्ताः ।

इन् खनेर्मुट्टोदात्तः । खनेर्डन् उदात्तः मुट्टागमो धातोः । खन्यते मुखिभिर्मुखम् । मुहेः खन् मूर्च । मुह्यति मोहयति वा मूर्खः । नहेर्हलोपश्च । खन् । नह्यति नखः । महेश्च । खन् हलोपश्च । मह्यते मखः । शीङो निद् ह्रस्वश्च । खन् । शेते शिखा वृक्षावयवः । आ च । शेतेः खन् नित्त आ चान्तादेशः । शेतेऽस्यां पक्षी शाखा । माङ उखा । निपातः । मीयतेऽसौ उखा स्थाली । मीनातेरूखः । मीनाति मयूखः ।

खान्ताः ।

पतेरङ्गच् पक्षिणि । पतति पतङ्गः पक्षी । त्रादिभ्यश्च । अङ्गच् । तरन्ति तेन तरङ्गः । लुनाति लवङ्गः । विडादिभ्यः कित् । विडयति विडङ्गः । कुरङ्गः । मृदङ्गः । गन् गम्यद्योः । गम्यतेऽर्थिभिर्गङ्गा जाह्नवी । अत्ति अद्गः । प्राक् प्रत्ययनिर्देशो वर्गादिनिपातनाय । वृणोति वर्गः । भृञः किन्नुट् च । गन् किच्च नुडागमश्च । बिभर्ति भृङ्गः । शृणातेर्ह्रस्वश्च । गन् कित् नुट् च । शृणाति शृङ्गम् । गण् शकुनौ । नुट् च । शृणाति शार्ङ्गः शकुनिः । मुदिग्रोर्गग्गौ । मोदयति मुद्गः । गिरति गृणाति गर्गः । दहेर्गो लोपो दश्च नः । गन् दस्य च नः । दह्यते वह्निना नगः । छोपूञ्खडिभ्यो गक् । छ्यति छागः । पवते पूगः । खण्डयति खड्गः ।

१. चराको PC; चरको Dc3. २. मद्यते Dc1, Dc4. ३. गम्यातेः PC. ४. अग्निना PC, Dc3.

गान्ताः ।

जनेः कः जङ्घ च । कः स्यात् जङ्घादेशश्च । जायतेऽस्यां रोम जङ्घा । दृणातेर्घक् । दृणाति दीर्घः ।

घान्ताः ।

तृतीयः पादः ।

स्रुवश्चिक् । स्रवत्यत्र हविः स्रुक् । तनोतेरनश्च वः । त्विक् अकारनकारयोर्वादेशश्च । तनोति त्वक् । कुवश्चट् दीर्घश्च । कवते कूचः करी । समिणः । चट् दीर्घश्च । संयन्ति तस्मिन् समीचः । सिवेष्टेरू च । चट् । सीव्यति सूचः पिशुनः । सीव्यत्यनया सूची ।

चान्ताः ।

कचेश्छः । कच्यते तेन कच्छः । पुनातेः पुच्छ इत्यपि ।

छान्ताः ।

पारेराजिः । पारयति पारक् सुवर्णमन्नं वा । पणेरिज्यादेश्च वः । अजिः स्यात् तस्यादेरिदादेशश्च पणेरादेर्वादेशः । पणते वाणिक् । वशेः कित् । अजिः कित् स्यात् तस्यादेरिच्च । वष्टि उश्यते उशिक् वह्निः । भृञ उच्च । अजिस्तस्यादेरिच्च । धातोरुच्च । बिभर्ति भरति मनुष्यान् भुरिक् ।

जान्ताः ।

चतुर्थः पादः ।

लङ्घेरटिर्नलोपश्च । लङ्घते लघट् वायुः । शकादिभ्योटन् । शक्यतेनेन गन्तुं शकटम् । अवत्यवटः । दीव्यति देवटः शिल्पी । मर्कति मर्कटः ।[१] चपति चपटः इषुः । चमति चमटः घस्मरः । भ्रियते भरटो भृत्यः । कृतॄकृपिभ्यः कीटन् । कीर्यते किरीटम् । तीर्यते तिरीटम् । कल्पते कृपीटम् । जनेर्लोपश्च टः । धातोरन्त्यस्य लोपः । जायन्ते जटाः ।

टान्ताः ।

१. After it—ककेति ककटः Dc3.

कमेरठः । कम्यते कमठः भिक्षापात्रं कूर्मश्च । कणेष्ठः । कण्यते कण्ठः । कुणति कुण्ठः ।

ठान्ताः ।

अमन्ताड्डः । आन्तङान्तयोर्नोदाहरणम् । दाम्यतेऽनेनोद्धता दण्डः । मन्यते जनैर्मण्डः अग्रम् । वनुते वण्डः अल्पशेषः दुश्चर्मा च । रण्यते रणत्यनया वा रण्डा । क्रादिभ्यः कित् । कवर्गादि-अमन्तेभ्यो डः किच्च । कुणति कुण्डा उपकरणभाण्डं परजातं च । काणति काण्डम् । गच्छत्युपधानं गण्डः । खन्यते खण्डः अपूर्णः इक्षुविकारः । बहुलादन्यत्रापि । कवते कुडः बालः । गवते गुडः । अण्डन् कृसृभृवृञः । करोति करण्डः । धावति सिसर्ति सरण्डः । भरति भरण्डम् । वृणोति वरण्डः पूगः । प्राक् प्रत्ययनिर्देशः शरण्डाद्यर्थः । शृणाति शरण्डः हिंस्रः । तरति तरण्डो वायुः । एति एरण्डः । सर्तेरडिः । सरति सरड् वातः ।

डान्ताः ।

शमेर्ढः । शान्तमस्येन्द्रियं शण्ढः । बहुलात् षः । षण्ढः ।

ढान्ताः ।

अथ णान्तप्रसङ्गेऽजन्तान् नोपधान् कथयति तेषां नस्य हि रेफ-षकारेषु निमित्तेषु सत्सु प्रायशो णः स्यात् । केवलान् नान्तांश्चाग्रे यथा-स्थाने वक्ष्यति । श्यास्त्याहृञविभ्य इनच् । श्यायते श्येनः । स्त्यायते स्त्येनः । बहुलाद्यलोपोऽपि । स्तेनः । हरत्यध्वानं हरिणः । अवति अविनः बुधनृपौ । वृजेः किच्च । वृज्यते वृजिनं पापचर्मकुटिलानि । अजेरज च । इनच् अजादेशश्च । वीयते अजिनम् । बहुलमन्यत्रापि । इनच् । कठति कठिनम् । द्रुदक्षिभ्यामिनन् । द्रूयतेऽर्थिभिर्द्रविणम् ।

१. जन्यै Dc₁, Dc₄. २. विकारः । अनित्यं गर्भनिलयम् । बहुला Dc₁.

दक्षते दक्षिणः । अर्तेः किदिच्च । इनच् स च कित् इदादेशश्च । ऋच्छत्यर्यते वा इरिणमुखरम् । वेपितुह्योर्[1]ह्रस्वश्च । इनच्च किच्च ह्रस्वश्च । वेपतेस्मिन् विपिनं वनम् । तुह्यते[2]नेन तुहिनम् । महेरिनण् च । चादिनन् । मह्यतेस्मिन् महिनं माहिनं राज्यम् । सुयुरुवृञो युच् । सुनोति सौति सवति सवनः कालः प्रातरादिः । यौति युवति वा यवनः । रौति रवणः वायुषट्पदौ । वृणोति वरणो भिक्षुः । अशो रश च । युच् रश चादेशः । अश्नुते कटी[3] रशना काञ्चिः[4] । उन्देर्नलोपश्च । युच् । उनत्ति ओदनः । बहुलमन्यत्रापि । युच् । स्यन्दते स्यन्दनो रथः । मज्जत्यनेन मज्जनं रोम । रोचते रोचनम्[5] । रजत्यनेन रजनं कुङ्कुमादिरागः । भूसूधूभ्रस्जिभ्यश्छन्दसि । युच् । भवन्ति भूतान्यस्मिन् भुवनम् । सूयते सुवनमादित्योङ्कुरो वा । धुनोति धुनाति धुवनं वायवग्नी । भृज्जत्यत्र भृज्जनमम्बरीषम् । कॄपॄवृजिमन्दि[6]निधाञः क्युः । किरति तमः किरणो रश्मिः । पृणाति पूर्यते वा पुरणोब्धिः । वृणक्ति वृज्यते वृजनं नभः । मन्दनम्[7] । निधनम् । छन्दसीत्येव । परणः । धृषेर्धिष च संज्ञायाम् । क्युः धिषादेशश्च । धृष्णोत्यनया धिषणा धीः । संज्ञाग्रहणं छन्दोधिकारनिवृत्तये । हनो[8] जघ च । क्युः । हन्ति जनान् हन्यते वा जनैर्जघनम् । छन्दस्यसानच् शुजॄभ्याम् । शूयते शवसानः । जीर्यते जरसानः । प्राङ् निर्देशः प्रत्ययस्य शरसानाद्यर्थः । शृणाति शरसानः । चन्द्रसूर्यादिभिः तरति तरसानः अग्निः । वृणोति वरसानो मनोरथः । ऋञ्जिवृधिमन्दिसहिभ्यः कित् । असानच् । ऋजति ऋजसानः मेषः । वर्धते वृधसानः गर्भः । मन्दते मदसानः स्तनः । सहते सहसानः शमी । अर्तेर्गुणः [9]शुट् च ।

१. तुह्योः Dc3. २. तुह्यतेनेन तुहिनम् । Dc3. ३. कटि PC, Dc3. ४. काञ्ची PC, Dc3. ५. रोचनः । देवनः । PC. ६. मादि Dc3, PC. ७. माद्यत्यनेन मदनं Dc3; मदनं PC. ८. हनो PC., Dc3. ९. तैर्जे PC, Dc3.

असानच् । ऋच्छत्यर्शसानः पन्था इषुर्वा । सम्यानच् स्तौतेः । समः पराल्स्तौतेरानच् । संस्तौति संस्तवानो वाग्मी । युधिबुधिदृशेः किच्च । युध्यते युधानः परिवारः । बोधयति बुधान आचार्यः । पश्यति दृशानः लोकपालः । हुर्छेः सनो लुक् छलोपश्च । सन्नन्तात् हुर्छेरानच् सनो लुक् छलोपश्च । जुहूर्छिषति जुहुराणः कठिनहृदयः । इण्-षिञ्दीङुष्यविभ्यो नक् । अर्थिनो यन्ति तमिनः । सिनोति सीयते सिनः कायो बन्धो वा । दीयते दीनः । उष्यतेनेनोष्णम् । अव्यते ऊनः हीनः । फेनमीनौ । साधु । स्फायते फेनः । मिनाति मीनः । कृषेर्वर्णे । नक् । कृषति कृष्णो वर्णः । बन्धेर्ब्रधिबुधी च । नक् एतौ चादेशौ । बध्नाति ब्रध्नः सूर्यः । बुध्नो भवानाशिः मनश्च । धापॄवस्य-ज्यतिभ्यो नः । धीयन्ते प्राणिनो यासां विकारैस्ता धानाः । पृणाति तरुं पर्णम् । वस्तेनेन वस्नं वासः । अजति वेनः वातः । अतति अत्न आत्मा । लक्षेरट् च । नः । लक्ष्यतेनेन लक्षणम् । सिवेष्टेर्यू च । नः । टेर्यूरादेशश्च । सीव्यतेनेन स्योनः राशिः सूरणं च । कॄवॄजॄसिद्रुपन्यति-स्वपिभ्यो नित् । नः । निच्च । कीर्यते कर्णः । वृणोति वर्णः । जीर्यते जीर्णः । सिनोति सेना । द्रवति द्रोणः । पन्नः । अनत्यनेन्नः आत्मा वायुश्च । स्वपित्य-नेन स्वप्नो निद्रा । धेट इच्च । नः । धयन्ति तां धेना सरस्वती माता च । तृषिशुषिरसिभ्यः कित् । नः । तृष्यतेनया तृष्णा । शुष्यति तेन शुष्णम् । रस्यते रस्नः । सुञो दीर्घश्च । कित् । सुनोत्यस्यां सूना वधस्थानम् मांसद्रोणी । रमेस्त च । रमन्तेस्मिन् रत्नम् । रास्नासास्नास्थूणावीणाः । साधवः । राति रसति रस्यते वा रास्ना औषधं । स्वपित्यस्यां सास्ना गोगलकम्बलः । तिष्ठत्यनया धाम इति स्थूणा ।

१. °संसानः Dc_1, Dc_4. २. स्तुवः Dc_1, Dc_4. ३. स्तौति Dc_1, Dc_4. ४. एनमिनः Dc_3. ५. च साधू PC, Dc_3. ६. अन्नमात्मा PC. ७. °त्यन्न-मात्मा PC. ८. शुष्यन्त्यनेन PC; Dc_3. ९. °चर्म PC, Dc_3.

अजति वेति वा वीणा । गादाभ्यामिष्णुच् । गायन्त्यस्मिन् गेष्णुर्मेखः । ददाति देष्णुर्दाता । कृत्यशिभ्यां क्स्नः । कृत्यते तेन कृत्स्नम् । अश्नुते अक्ष्णो वृन्दम् तेजनं च । तिजेर्दीर्घश्च । क्स्नः । तितिक्षति तीक्ष्णम् । श्लिषेरच्चोपधायाः । क्स्नः । श्लिष्यति श्लक्ष्णम् मृदुसूक्ष्मौ । कृवृदृ-दारिभ्य उनन् । किरति मनः करुणा । वृणोति वरुणा । तरति तरुणः । दारयति दारुणम् । पिशेः किच्च । उनन् । पिशति पिशुनः । लपेः शच्च । उनन् । शोन्तादेशः । लपति लशुनम् । फलेर्गुक् च । उनन् गुगागमश्च । फलति फल्गुनः । त्रो रश्च लः । उनन् । रस्य लः । तरति तलुनः । अर्जेर्णिलुक् च । उनन् । अर्जयत्यर्जुनः । तृणाख्यायां चित् । अर्जुनं तृणम् । अर्तेश्च । उनन् चित् । ऋच्छ-त्यरुणः । धारेर्णिलुक् च । उनन् चित् । धारयति धरुणः ग्रहः । अजियमिशीङ्भ्यश्च । उनन् चित् । अजति वयुनश्चन्द्रः । यच्छति यमुना । शेतेत्यर्थं शयुनः अजगरः । तृहेर्नक् हलोपश्च । तृह्यते गवा-दिभिस्तृणम् । अर्तेर्युजुच्च । युच् उच्चास्यादेशः । ऋच्छत्युरणः पशुमेषौ उलूको वा । ऊर्णोतेर्डः । ऊर्णोत्यूर्णा अविलोमानि ।

नोपधा अजन्ताः ।

पञ्चमः पादः ।

मृग्रो रुतिः । म्रियते न कदाचित् मरुत् वायुः । गृणाति गिरति गरुत् मरकतः । गर्मुत् । साधुः । गिरति गर्मुत् सूर्यसुपर्णौ । हृसृरुहियुषिभ्य इतिः । हरति हरित् वायुदिङ्मृगाः । धावति सरित् । रोहति रोहित् सूर्यमाता वारुश्च । युषिः सौत्रः । योषित् । ताडेर्णिलुक् च । इतिः । ताडयति अभ्रं ताड्यते वा तडित् । वर्तमाने पृषद्वृहन्महज्जगच्छतृवत् । एते वर्तमाने साधवः शतृवच्च नुमादिकार्यमेषाम् । वर्षति वृणोति पिपर्ति वा पृषत् चित्रमृग-जातिः आज्यं सीकरश्च । बर्हति वृहत् वृहती । महति महयति महान् । महती । गच्छति जगत् । संस्वद् तृपद्

वेहत् । साधवः । संश्यायति संस्वत् उदकम् । तृप्यति तृपत् चन्द्रः । वहति वेहत् गर्भघातिनी । हसिमृग्रिण्वामिदमितमिलूपूधुर्विभ्यस्तन् । हसत्यनेनारिं हस्तः । म्रियते मर्तः मर्त्यः । गिरति गर्तः श्वभ्रः । एति एतो वायुः । वाति वातः । अम्यतेन्तोवसानम् । दाम्यति दन्तः । ताम्यति तन्तः । लुनाति लोतः । पुनाति पोतः । धूर्वति धूर्तः । तनिमृङ्भ्यां किच्च । तनू । तनोति तन्यते वा ततं विशालम् । मवति मृयते वा मृतः आलानपाशः । अञ्जिघृसिभ्यः क्तः । अज्यते अक्तं अंक्षितम् । जिघर्ति घृतम् । सिनोति सितं शुक्लम् । दुतनिभ्यां दीर्घश्च । क्तः । दुनोति दूतः । तनोति तातः । जेर्मुट् चोदात्तः । क्तस्तस्य मुडागमः स चोदात्तः जेर्दीर्घश्च । जयति नभः जीयतेनलेन वा जीमूतः । हृश्याभ्यामितन् । हरति जिहर्ति हरितः वर्णः । श्यायते श्येतः वर्णः । रुहे रश्च लो वा । इतच् रस्य लो वा । रोहति लोहितः रोहितः । भृदृशीयजिपर्विपच्यमिनमिहर्यिभ्योतच् । बिभर्ति भरतः राजा । द्रियते दरतः आदृतः । शेते शयतः निद्रालुः । यजति यजतः अग्नियजमानौ । पर्वति पर्वतः । पचति पचतः अग्निरवी । अमति अमतः वासरानकौ । नमति नमतः नटः देवो वा । नाम्यति नमतः निर्वेदः । हर्यति हर्यतः वायुः । पृषिरञ्जिभ्यां कित् । अतच् । पृषति पृषतो मृगः । कृपत इत्येके । रजतेत्र रजतः । रजतं रूप्यम् । खलतः । साधुः । स्खलति खलतः खलतिः । रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि । झच् स चषित् । रुह्यात् रोहन्तस्तरुः । नन्द्यात् नन्दयन्तोर्भकः । जीव्याज्जीवन्तो जन्तुः । प्राण्यात् प्राणन्तो योगः । स्त्री चेत् रोहन्तीत्यादि । तृभूवहिवसिभासिसाधिगडिमण्डिजनिनन्दिभ्यश्च । आशिषि झच् षिच्च । तीर्यात् तरन्तः सूर्यः मार्गवर्ती । स्त्री चेत् तरन्ती । भूयात् भवन्तो बालः । उह्यात् वहन्तो वायुः ।

---

१. कुहकः PC, Dc3. २. अविनम् PC, Dc3.

उष्यात् वसन्तः ऋतुः । भासिषीष्ट भासन्तो भानुः । साध्यात् साधन्तो भिक्षुः । गण्डयन्तो मेघः । मण्डयन्तो नटः । जनयन्तो राजा । नन्दयन्तोर्भकः । हन्तेर्मुट् हि च । झच् मुडागमः हन्तेर्हिरादेशश्च । हन्ति पद्मिनीं हेमन्तः । उचिकुत्सिकुषिभ्यः कितन् । उच्यति उचितं न्याय्यम् । कुत्स्यति कुत्सितम् । कुष्यति कुषितं क्लिष्टम् । अदि भुवो डुतच् । अद् भवति अद्भुतम् । सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः । सुपूर्वाद्रमेः क्तो दमेर्थे । सुष्ठु रमते सूरतो दमितः । फलेरितजादेश्च पः । इतजादेः पश्च । फलति पलितम् । जनस्तो र च । तः स्याद्रान्तादेशः । जायते जर्तः वस्त्रं लोम । शकेर्ऋतिन् । शक्नोति शकृत् विष्ठा ।

तान्ताः ।

हनिकुषिनीरमिकाशिभ्यः क्थन् । हन्ति हथो व्याधिः । कुष्यति कुष्ठं गन्धद्रव्यम् । सुष्ठु नयति सुनीथो नीतिमान् । रमन्तेस्मिन् रथः । काशतेनेन काष्ठम् । अवे भृञः । क्थन् । अवभ्रियतेनेना-वभृथो यज्ञान्तस्नानम् । उषिकुषिगार्तिभ्यस्थन् । उष्यते व्यजनैरोष्ठः । कुष्णाति कोष्ठः कुशूल उदरं च । गीयतेसौ गाथा । ऋच्छति तमर्थः । सर्तेर्णित् । थन् । धावति सिसर्ति सार्थः । जॄवृञ्भ्यामूथन् । जीर्यते जरूथं कश्मलम् । वृणोति वरूथं रथगुप्तिः । पातॄतुदिवचिरिचिसिचिभ्यः क्थन् । पिबति तेजः पीथो रविः । तरत्यनेन तीर्थम् । तुदति तुत्थमञ्जनद्रव्यम् । उच्यते उक्थं साम । रिच्यते रिक्थं पित्रादिद्रव्यम् । सिच्यते सिक्थम् । अर्तेर्निरि । थक् । निरन्तरमृच्छति निर्ऋथः समाधिस्थानम् । निशीथगोपीथावगथाः । थकि निपात्याः । नियतं शेरतेस्मिन् निशीथोर्धरात्रः । गावः पिबन्त्यस्मिन् गोपीथः जलद्रोणिः । अवगच्छत्यस्मिन्नवगीयते वा अवगथः प्रातः साम च । उदि गस्थक् । उद्गीयतेसौ उद्गीथः साम । समीगः ।

१. विद्म् PO, Dc3.

थक् । समेति समिथः अग्निः संगमश्च । तिथपृष्ठगूथयूथप्रोथाः । साधवः । तिष्ठति तिम्यति वा तिथः कालः । तप्यत इति केचित् । स्पृशति पृथं पृष्ठम् । गवते गूथो वर्चः । युवन्ति तत्र यूथः संघः । प्रवते प्रोथः सर्पवराहमुखैकदेशः । शीङ्शापिरुगमिवन्दिजीविप्राणिभ्योथः । शेते शयथः निद्रालुः । शपन्ति तेन शपथः सत्यम् । रौति रवथः कालः । गच्छति गम्यते वा गमथः कालः पान्थपन्थानौ । वन्दन्ति वन्दथः । जीवति जीवथः वायुसुभृतौ । प्राणिति प्राणथः बलवान् । आङि वासः । अथः । आवसन्त्यत्र आवसथः वेश्म । भृञश्चित् । बिभर्ति भरथो राजा । रुदिविदिभ्यां ङित् । अथश्चित् ङिच्च । रोदिति रुदथो बालः । वेत्ति विदथो विद्वान् ।

थान्ताः ।

शॄदृभसोदिः । शीर्यतेऽस्यां शरत् । दृणाति दरत् भीरुर्म्लेच्छः । दृशौ बभस्ति भसत् आमाशयस्थानम् । त्यजितनियतिभ्यो डित् । अदिर्डित् । त्यजति त्यत् । तनोति तद् । यतते यद् । एतेस्तुट् च । अदिस्तुट् च । एति एतद् । दृणातेः षुक् ह्रस्वश्च । अदिः षुक्च । दृणात्यत्र दृषत् शिला । कुणिपुल्योः किन्दच् । कुणति कुणिन्दः उपकरणम् । पोलति पुलिन्दः म्लेच्छजातिः । कुपेर्व च । किन्दच् । कुप्यति कुविन्दस्तन्तुवायः । शाशपिभ्यां ददनौ । क्रमात् । नः स्वरार्थः । श्यति शादः कृशः । शपन्ति तेन शब्दः । अब्दादयश्च । निपात्याः । आप्नोति सूर्यमब्दः वर्षम् । मन्यते मनुते मन्दः । बृहति बृह्यते वृन्दम् । कम्पते कन्दः कुन्दम् । युष्यसिभ्यां मदिक् । युष्यते युष्मद् । अस्ति अस्मद् ।

दान्ताः ।

कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः । कनिन् । यौति युवते युवा । वर्षति वृषा । तक्ष्णोति तक्षा । राजते राजा । धन्विः सौत्रः । धन्वति धन्वा मरुदेशः । द्योति द्यूयते वा द्युवा

रत्रिः । प्रतिदीव्यत्यस्मिन् प्रतिदिवा । अन्येभ्योपि । अक्षा । ईक्षा तुवा । नञि जहातेः । न जहात्यत्र कर्म अहः । सप्यशूभ्यां तुट् च । कनिन् । सपन्ति सप्त । अश्नुवतेष्टौ । नीतेर्गुणश्च । कानिन् गुणश्च धातोः । नौतीति नव संख्या । श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति । एतकानि साधवः । श्वयति धाष्ट्यात् श्वा । उक्षति उक्षा वृषः । पुष्णाति पुष्यति वा पूषा सूर्यः । प्लीहते प्लीहा व्याधिः । क्लिद्यति क्लेदा । स्निह्यत्यनया स्नेहा वसा । मुह्यत्यस्मिन् मूर्धा । मज्जत्यस्मिन् मज्जा धातुः । ऋच्छत्यर्यमा देवः । विश्वं प्सायति विश्वप्सा देवः । परिजायते परिज्मा चन्द्रोग्निश्च । मातरि श्वयति मातरिश्वा वातः । मह्यतेसौ मघवा इन्द्रः । वीपतिभ्यां तनन् । वीयते वेतनम् । पतन्त्यस्मिन् पत्तनम् । गमेरिनिः । गमिष्यतीति गमी जिगमिषुः । आङि णित् । इनिर्णित् । आगमिष्यतीत्यागामी प्रवासी । भुवश्च । इनिर्णिच्च । भविष्यति भावी । प्रे स्थः । इनिर्णिच्च । प्रस्थास्यति प्रस्थायी । परमे कित् । स्थः इनिः किच्च । परमे तिष्ठति परमेष्ठी । मन्थेश्च । इनिः किच्च । मथ्नाति मन्थाः । पतः स्थ च । इनिः थान्तादेशः । पतन्त्यनेन पन्थाः । अदेस्त्रिन् । अत्ति तपः स्वाध्यायमत्त्रिः ऋषिः । पतेरत्रिन् । पतत्यर्थे पतत्रिः । हृसृभ्यां क्वनिप् । हरति हृत्वा वायुः । धावति सृत्वा सर्पः । सृजेरम् च । क्वनिप् । अमागमश्च । सृजति स्रग्वा मज्जातन्तुः । स्नामदिपद्यर्तिपॄशकिभ्यो वनिप् । स्नात्यस्यां स्नावा । स्नावरी नदी । माद्यत्यनया मद्वा मद्वरी मदिरा । पद्यते पद्वा रथः । पद्वरी गतिः । ऋच्छत्यर्वा अश्वः । पिपर्ति पर्वा । शक्नोति शक्वा शक्तः । शक्वरी छन्दः । शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् । शेते शीवा अजगरः । क्रोशति क्रुश्वा क्रोष्टा । रोहति रुह्वा तरुः । जयति जित्वा शक्रः । क्षयति क्षित्वा कालः । सरति सृत्वा । ध्रियन्तेस्मिन् भूतानि धृत्वा विष्णुः । ध्याप्योः संप्रसारणं च । ध्यायति

धीवा निषादः । प्यायते पीवा मांसोपचितः । अदेर्धश्च । क्वनिप् धोन्तादेशश्च । अत्ति बलमध्वा । प्रईरसद्योस्तुट् च । प्रेरयति प्रेर्त्वा वायुः । प्रसीदति प्रसत्त्वा मूढः । मनिन् । सर्वेभ्यो मनिन् । क्रियते फलार्थिभिः कर्म । बभस्ति भस्म । शृणाति दुःखं शर्म । जायते जन्म । बृंहेर्नोच्च । मनिन् स्यात् नस्यादादेशः । बृंहति ब्रह्म परमात्म-जीवजातिकमलासनशब्दराशयः । अशिशकिभ्यां छन्दसि । मनिन् । अश्नाति अश्नुते अश्मा । शक्नोति शक्मा समर्थः । हृभृधृस्तृसृभ्य ईमनिन् । छन्दसि । हरति हरीमा वायुः । बिभर्ति भरीमा राजा । ध्रियते धरीमा धर्मी । स्तीर्यते स्तरीमा आच्छादनम् । धावति सरीमा गर्भः । जनिहृभ्यामिमनिन् । जायते जनिमा संसारः । हरति हरिमा मृत्युः । वेञः सर्वत्र । भाषायां छन्दसि इमनिन् । वयति वेमा । नामन्सामन्स्तोमन्होमन्लोमन्व्योमन्विधर्मन्पाप्मन्व्यामन् । साधवः । नमन्ति तेन नाम । सिनोति स्वरान् साम । स्तुनोति स्तोम । हूयते होम । लूयते लोम रोम । वीयते वायुना व्योम । विविधं ध्रियते विधर्मा वायुः । पाति पिबत्यात्मानं वा पाप्मा । व्ययते व्याम संसारः । वसौ शृणातेर्मनिन् । वसवोस्य पापं शीर्यासुर्वसुशर्मा । एवमन्ये भविष्यन्ति । सातिभ्यां मनिन् मनिणौ । यथासंख्यम् । स्यति सामा । अतत्यात्मा । अर्तेर्भुक्षनक् । ऋच्छति ऋभुक्षा । हनो युन् । आद्यन्तयोर्घत्वतत्वे । हन्त्याचारं घातनः । बहुलाद् वृद्धिः ।

नान्ताः ।

षष्ठः पादः ।

आप्नोतेः क्विप् ह्रस्वश्च । आप्नुवन्त्यापः । पानीविषिभ्यः पः । पाति पीयते दुर्जनैः पापम् । नयति नेपः प्रवाहः । वेवेष्टि वेष्पः पर-मात्मा । तुवः कित् । पः । तौति तुपः मन्दः । स्तौतेर्दीर्घश्च । पः कित् । स्तौति स्तूपः बोधिसत्त्ववचनः । कुसुयुभ्यश्च । पः

कित् दीर्घश्च। कुप्यतेस्मिन् कूपः। सुनोति सूपः व्यञ्जनम्। यौति यूपः। सृशॄभ्यामूच्च। पः ऊरादेशश्च। धावति सिसर्ति सूर्पः अहिः। शृणाति शूर्पः। खष्पशिल्पशष्पबाष्परूपतर्पतल्पाः। साधवः पान्ताः। खनति खष्पः खनित्रम्। शीलयन्ति तत् शिल्पम्। शस्यते गवादिभिः शष्पम् बालतृणम्। बाधते नेत्रं बाष्पं नेत्राम्बु। रूप्यते रूपम्। तरन्त्यनेन जनास्तर्पम्। तृप्यन्त्यत्र तल्पम्। बहुलात् चणतेः चम्पा। पान्ति पिबन्ति तां पम्पा। सर्तेरपः षुक् च। अपः षुक् च। धावन्ति तस्माद्रक्षांसि सर्षपः। उषिकुटिदलिकजिखजिभ्यः कपन्। उषति उषपोऽग्निः। कुटति कुटपः परिमाणम्। दल्यतेऽनेन दलपः प्रहरणम्। कच्ञति कच्ञपः शाकुनिको बन्धो वा। खज्यते खजपं दधि। क्वणेः संप्रसारणं च। कपन्। क्वण्यते श्वापदैः कुणपो मृतशरीरम्। कपश्चाक्रवर्मणस्य। क्वणः कपः संप्रसारणं च। कुणपम्। स्वरे भेदः। विटपविष्टपविशिपोलपाः। कपनि साधवः। विटन्त्यत्र पक्षिणो विटपः। विशति तत्र विष्टपं भुवनम्। विशन्ति तत्र विशिपं वेश्म। उष्यतेऽग्निना उलपं तृणम्। उप्लूयते वा।

पान्ताः।

कलेःफगस्योच्च। फक्। अस्य उत्। कल्यते कुल्फः चतुरबन्धसंधिः। गलेश्च। फक्। अस्य उत्। गच्छति गुल्फश्चरणग्रन्थिः।

फान्ताः।

कदिकाडिकाटिभ्योऽम्बच्। कदति कदम्बः तरुः। कडम्बः। कटति कटम्बो वाद्यभेदः। कदेर्णित् पक्षिणि। अम्बच् णित्। कादम्बः कलहंसः। कृञश्च। अम्बच्। करोति करम्बः शाकभेदः। उल्बाबिम्बादयोऽपि।

बान्ताः॥

कॄगॄशॄशलिगर्दिभ्योऽभच्। किरति करभः उष्ट्रादेः। गिरति गृणाति गरभः मृगः। शृणाति शरभः अष्टपात्। शलति शलभः पतङ्गः।

गर्दति गर्दभः । ऋषिवृषिभ्यां कित् । ऋषति ऋषभः । वर्षति वृषभः । रुषेर्निच्च लश च । अभच् निच्च लशादेशः । रुषति लशभः मत्तेभः । रासिवल्लिभ्यां च । अभच् निच्च । रासते रासभः । वल्लति वल्लभः । गडेः कड च । अभच् । गडति कडभः करिशावः । डलयोरभेदात् कलभः । दृदलिभ्यां भः । दृणाति दर्भः । दलयति दल्भः वल्कलम् । अर्तिगृभ्यां भन् । ऋच्छत्यर्भः बालः । गिरति गीर्यते गर्भः । इणः कित् । एति इभः ।

भान्ताः ।

अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् । ऋच्छत्यर्मः नेत्ररोगः । स्तौति स्तूयते स्तोमः । सूयते सोमः । हूयते होमः । सरति सर्मः ध्वनिः । धरति ध्रियते वा धर्मः । क्षयति क्षेमम् । क्षौति क्षौमम् । बहुलाद्वृद्धिः । भाति भामः कोपादित्यनलाः । याति यामः । वाति वामः । पद्यते भृङ्गैः पद्मम् । यक्ष्यति[1] यक्ष्मा । बहुलान्नस्येत्वं न । नीयते नेमः अन्तिको देशः । अवतेष्टिलोपश्च । मन् । अवतेः 'ज्वरत्वर—' इत्यूट् । ततो गुणः । ओम् प्रणवः । ग्रसते रा च । मन् । आ अन्तादेशः । ग्रसन्तेस्मिन् ग्रामः । प्रथेरट् च । मन् अट् च । प्रथन्तेस्मात् प्रथमः । अविसिविशुषिभ्यः कित् । मन् । अवत्युमा । ऊठ् । बहुलात् ह्रस्वः । सीव्यते तेन सूमः । शोषयति दर्पं शुष्म बलम् । इषियुधीन्धिदसिश्याधूसूभ्यो मक् । ईषति ईष्मः बाणवसन्तौ । युध्यते युध्मः शरशरदौ । इध्यतेनेनाग्निरिध्मः इन्धनम् । दस्यति दस्मः हीनः । श्यायते श्यामम् । धुनोति धूयते वा धूमः । सूयते सूते सुवति वा सूमः कालधर्मौ । गलेरुच्चोपधायाः । मक् । गच्छति गुल्मः व्याधिः । युजिरुचितिजां कुश्च । मक् कवर्गान्तादेशः । युनक्ति युज्यते युग्मम् । रोचतेत्यर्थं रुक्मं हेम । तितिक्षते तिग्मं तीक्ष्णम् । हन्तेर्हि च । मक् हिरादेशश्च । हन्ति सत्त्वान् हिमम् । बहुलात् हेमम् । भियः षुग्वा । मक् षुग्वा । बिभेत्यस्माज्जनो भीष्मः भीमः । घर्मः ।

१. यक्षति PC, Dc3.

निपातः । जिघर्ति तेजः घर्मः । ग्रीष्मः । ग्रसते तेजो ग्रीष्मः । पच एलिमच् । पचति पचेलिमम् । भिदेः केलिमन् । भिनत्ति भिदेलिमः । कर्मकर्तरि । कर्दिकडोरमः । कर्दति कर्दमः । ²कड्यते कडमः । डलयोरभेदात् कलमः । सूचेः स्मन् । सूचयति सूक्ष्मम् । गुधेरूमः । गुध्यति गोधूमः । इणो दमुक् । एति इदम् । कायतेर्डिमन् । कायते किम् । क्रमिगमिक्षमिभ्यस्तुम् वृद्धिश्च । क्रामति क्रान्तुम् । गच्छति गान्तुम् । क्षाम्यते क्षान्तुम् । प्रथेरमच् । प्रथतेस्मात् संख्या प्रथमः । 'प्रथेरट्च' इति सिद्धे स्वरार्थं सूत्रम् ³चरेश्च । अमच् । चरति चरमः ।

मान्ताः ।

सप्तमः पादः ।

दिधिषाय्यः । दधातेराय्ये निपातः । धीयते दिधिषाय्यम् मद्यम् । वृञ एण्यः । वृणीते व्रियते वा वरेण्यो वरिष्ठः परब्रह्मधाम वा । स्तुवः क्सेय्यश्छन्दसि । स्तूयते सौ स्तुषेयः स्तोता देवो वा । राजेरन्यः । राजते राजन्यः ज्योतिरग्निः क्षत्रियो वा । ऋतेर्नित् । अन्यः नित् । अर्यते मृगैररण्यम् । पर्जन्यः । साधुः । वर्षत्यर्जति वा पर्जन्यः । शृरम्योश्च । अन्यः निच्च । शृणाति भयं शरण्यः त्राता । रमन्ते स्मिन् रमण्यः शोभनः । वदेरान्यः । वदति वदान्यः वक्ता दाता वा । वालिमलितनिभ्यः कयन् । वलति तत् बलयं भूषणम् । मलति क्षितिं मलयो गिरिः । तनोति कुलं तनयः पुत्रः । वृहोः षुग्दुकौ च । कयन् आगमौ च क्रमात् । वृणोति वृषयः आशयः । ह्रियते तत् हृदयं मनः । माछासासिसूभ्यो यः । मात्यनया माया मिथ्या । छ्यति तेजश्छाया । सस्तीति सस्यं यवादि । सुवत्यनेन सव्यं वामम् । जनेर्यक् । जायतेस्यामपत्यं जाया । अघ्न्या-

१. जगतस्तेजो Dc₃, PC. २. कडते PC. ३. च Dc₃.

दयश्च। निपात्या यकि। हन्ति अघ्न्यो धर्मः। देवता वाघ्न्या। सम्यक् ध्यायन्त्यस्यां विप्राः संध्या। संधीयते वा। काम्यतेसौ कन्या। हतमस्याः कर्मभिर्जीवितं वन्ध्या। ईर्ष्यति ईर्ष्या मात्सर्यम्। शक्यते वक्तुं शक्यमसारम्। रुचिभुजिभ्यां किष्यन्। रुच्यते रुचिष्यं प्रियम्। भुज्यते भुजिष्यः परिचारकः। पूञो यत् णुट् ह्रस्वश्च। यत् णुडागमो ह्रस्वश्च। पुनाति पूयतेनेन पुण्यम्। स्रंसेः शिः कुट् किच्च। यत्। शिरादेशः कुडागमः। स्रंसते शिक्यम् भिक्षुरज्जुः। हर्यतेः कन्यन् हिर् च। कन्यन्। हिरादेशः। हर्यति हिरण्यम्। दधातेर्यत् नुट् च। दधाति सत्त्वान् धान्यम्। कवतेर्यक् डुक् च। कवतेर्यक् डुक् चागमः। कवते कूयते वा कुड्यं भित्तिः।

यान्ताः।

मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच्। मन्दन्तेस्यां वाजिनो मन्दुरा वाजिशाला। वाशयते वाशुरः गर्दभः। मथ्यते जनैर्मथुरा। चतते चतुरः। चङ्क्यते चङ्कुरः। अङ्क्यते अङ्कुरः। व्यथेः संप्रसारणं किच्च। उरच् धोन्तादेशः। व्यथयंतेरमाज्जनो विधुरोभिः राक्षसः। मुकुरदर्दुरौ च। मङ्क्यतेनेन मुकुरः चन्द्रदर्पणौ। दृणाति दर्दुरः मण्डूकः। बहुलात् शृणाति शर्कुरः शिशुः। कौत्यत्यर्थं कुक्कुरः। असेरुरन्। अस्यन्ते देवैरसुराः। शावशेराप्तौ। शुपूर्वादशेरुरन् आप्तौ। श्वश्यन्तेस्मिन् कामाः श्वशुरः। इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिशुषिबन्धिभ्यः किरच्। इष्यते इषिरोग्निः। माद्यतेनया मदिरा। मोदन्तेनेन मुदिरो मेघः। खिद्यतेनेन खिदिरो वक्रश्चन्द्रः देवलो वा। छिनत्ति छिदिरः शस्त्रम्। भिनत्ति भिदिरं वज्रम्। मन्दतोस्मिन् मन्दिरम्। चन्दति चन्दिरो मलयानिलः। तिम्यति

---

१. अघ्न्यः धर्मः PC. २. भिक्षारज्जुः PC.

तिमिरम् । मेहति मिहिरोंशुमान् । मुह्यते मुहिरः स्मरः । मुञ्चति मुचिरो वायुः । रोचते रुचिरं भासुरम् । रुणद्धि रुधिरम् । शुष्यति शुषिरम् । बद्धमस्य श्रोत्रं बधिरः । अजिरशिशिरशिथिलस्थिरस्फिर-स्थविरखदिराः । किरजन्ताः साधवः । अजत्यस्मिन्नजिरम् । शीर्यन्ते तेजांस्यत्र शिशिरः । श्रयते शिथिलम् । रलयोरभेदात् । तिष्ठति स्थिरम् । स्फायते स्फिरम् । स्थितो यौवनात् स्थविरः । खादति खाद्यते वा खदिरः । बहुलात् शेतेस्मिन् सैन्यं शिशिरम् । पच्यतेस्मिन् पिठरम् । मीनातेरूरन् । मीनाति मयूरः । कठिचकिभ्यामोरन् । कठति कठोरः चिरन्तनः अमृदुर्वा । चकति चकोरः । किशोरादयश्च । ओरन् । साधवः । काशते किशोरः । एवमन्येपि । स्फायितञ्चि-वञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदि--खिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवहिवसिवासिशीङ्हसिसिधि—शुभिभ्यो रक् । स्फायते स्फारं बहु । तञ्च्यते तक्रम् । वच्यते वक्रम् कुटिलम् । शक्नोति शक्रः । क्षिप्यते क्षिप्रम् । क्षुद्यते क्षुद्रः । सर्पति सृप्रः वायुसोमौ । तृप्यतेनेन तृप्रमाज्यम् । दृप्यति दृप्रो हर्षमोहौ । वन्द्यते वन्द्रो गुरुः । समुन्दति समुद्रः । श्वेतते श्वित्रम् । वर्तते वृत्रो दानवः । अजति वीरः । नीयते नीरं जलम् । पद्यतेस्मिन् पद्रो जन-पदः । माद्यन्त्यत्र मद्रो देशः । मोदतेनया मुद्रा चिह्नम् । खिद्यतेनेन खिद्रः श्रमः । छिद्यते छिद्रम् । भिनत्ति भिद्रं वज्रम् । मन्दते मन्द्रो मधुरः स्वरः । चन्दति चन्द्रः । दहति दह्रोग्नितरू । दस्यति दस्रः । दभ्नोति दम्भ्रो दाम्भिकः शूरः । वहति उह्रोनड्वान् । वसति तेजोत्र उस्रः किरणः । वास्यते वास्रः शकुनिगर्दभौ । शेते शीरोजगरः । हसति हस्रो हर्षुकः । सिध्नोति सिध्र आसवप्रकारः । शोभते शुभ्रं सितम् । चकिरम्योरुच्चोपधायाः । चक्यतेनेन चुक्रो रसः । रम-न्त्यस्मिन् रुम्रो रमगः । वेः कसेः । रक् । विकसतीति विकस्रः शशी पुष्पितं च । शदेरू च । रक् ऊ चोपधायाः । शीयते शूद्रः ।

स्थश्च । रक् ऊ च । तिष्ठतीति स्थूरः । रलयोरभेदात् स्थूलः ।[1] अमितम्योर्दीर्घश्च । रक् । अमति आम्रश्चूतः । ताम्यति ताम्रो लोहविकारः । दुरीणो लोपश्च । दुर्पूर्वादिणो रक् धातोर्लोपश्च । दुःखेनेयते दूरम् । कृतेश्छक् क्रू च । रक् छगागमः क्रू आदेशः । पक्षे[2] कृन्तति यत्नेन कृच्छ्रं दुःखम् । क्रूरो दारुणः । रोदेर्णिलुक् च । रक् । रोदयति दैत्यस्त्रीं रुद्रः शिवः । बहुलमन्यत्रापि संज्ञाछन्दसोः । अन्यस्माद्धातोरन्यस्मिन् प्रत्यये बहुलं णेर्लुक् संज्ञाछन्दसोः । देवयति द्यौः । क्विप् । पुण्यं कारयति पुण्यकृत् । चक्रं धारयति चक्रधरः । वर्धन्तु त्वा सुष्टुतयो गिरो मे । वर्धयन्त्विति प्राप्ते । संज्ञाछन्दसोरन्यत्रापि ।

'वान्ति पर्णशुषो वातास्ततः पर्णमुचोपरे ।
ततः पर्णरुहो वान्ति ततो देवः प्रवर्षति' ।। इति ।।

जोरी च । रक् । ईरन्तादेशः । जुवते जीरः वाय्वग्नी । सुसूधागृधिभ्यः क्रन् । सुन्वन्ति सुरा देवा मदिरा वा । सूते सुवति सूयते वा सूरः रविः । दधात्यापत्सु चित्तं धीरः । गृध्नाति गृध्रः लुब्धकश्येनौ । शुसिचिमीभ्यो दीर्घश्च । क्रन् । शवति शरणं शूरः । सिनोति सीरो हलः । चिनोति चीरं वल्कलम् । मिनोति मीरं देशसीमा । वाविन्धेः । विविधमिन्धे वीध्रः निर्मलः पूर्णचन्द्रमण्डलं वा ।[3] वृधिवपिभ्यां रन् । वर्धते वर्ध्रं चर्म चन्द्रोपि । उप्यतेस्मिन् वप्रो देशः प्राकारोपि । ऋज्रेन्द्राग्रवज्रविप्रकुप्रचुप्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवप्रेरामालाः[4] । रन्नन्ताः साधवः । अर्जयति अर्जयते वा ऋज्रो नायकः । इन्दति इन्द्यते वा तेजोभिरिन्द्रः । अङ्गति अग्रम् आदिरन्तश्च । व्रजति सर्वत्र वज्रम् । विविधं दातारं पाति विप्रः । कुम्प्यते कुप्रं गृहच्छादनम् । चुम्पते चुप्रं मुखम् । क्षुरति क्षुरः नापितशस्त्रम् । खुरति खुरः शफः । भन्दते भद्रं कल्याणम् । उद्गच्छत्युग्रं तीव्रम् । उग्निरत्युग्रो रुद्रः । बिभेति भेरः । भेलः

१. दुःखं धातुविशेषः । Dc3. २. पक्षे PC, Dc3. ३. वीध्रोग्निर्निर्मलश्च Dc3. ४. शुक्लगौरवप्रेरामालाः Dc1.

शरो मण्डूको वा। शोभते शुक्रः शुक्रः। तिप्यते तीव्रम्। वृणोति वर्ण्यते वा वर्णः। ईयते ईरा पानजातिः। मान्यतेनया मलयति तां माला स्रक्। कृगृशृवृञ्चतिभ्यः ष्वरच्। किरति कर्वरः हिंस्रः। स्त्री चेत् कर्वरी। गिरति गर्वरः अहंकारो गन्धर्वो वा। शृणोत्यस्मिन् शर्वरः। वृणोति वर्वरः कामः। चतन्तेस्मिन् चत्वरः। नौ सदेः। ष्वरच्। नियतं सीदन्त्यस्मिन् निषद्वरो जम्बालः आसनं च। छित्वरछत्वरधीवरपीवरमीवरचीवरनीवरगह्वरकट्वरसंयद्वराः। ष्वरचि साधवः। छिनत्ति छित्वरो धूर्तः। छादयति छत्वरो निकुञ्जश्छादनं वा। ध्वंसते धीवरो निषादजातिः। पिबति पीवरो मांसलः। मीवरः। चिनोति चीयते वा चीवरं मुनिवासः। नीवरो नेता। गृहाति गह्वरं गहनम्। कटति कट्वरं व्यञ्जनम्। संयच्छति संयद्वरो वाग्यतः समवायोपि। उपह्वयन्त्यस्मिन् उपह्वरः संधिरहस्यम्। अशेः सरन्। अश्नुते अश्नात्यक्षरम् वर्णो मोक्षपदं च। वसेश्च। सरन्। वसन्त्यस्मिन् नक्षत्राणि वत्सरोब्दः। संपूर्वाच्चित्। सरन् चित्। समेत्य वसन्त्यत्र संवत्सरः। एवं परिवत्सरादयः। कृधूमादिभ्यः कित्। सरन्। क्रियते कृसरस्तिलान्नम्। धूनोति धूसरः। माद्यत्यनेन मत्सरः। पतेरश्च लो वा। सरन्। पतति पत्सलः पत्सरः पादप्रहारः। तन्यृषिभ्यां क्सरन्। तनोति तसरः। ऋषति ऋक्षरा तोयधारा। अमिनक्षियजिवधिपतिभ्योत्रन्। अमत्यन्नममत्रम्। नक्षति नक्षत्रम्। इज्यन्तेत्र देवा यजत्रमग्निहोत्रम्। हन्यतेनेन वधत्रम्। पतत्यनेन पतत्रं वाहनम्। गडेरादेश्च कः। अत्रन् आदेश्च कः। स्नेहेन गडयति कडत्रम्। डलयोरभेदात् कलत्रम्। वृञश्चित्। अत्रन् चित्। वृणोति व्रियते वा वरत्रा चर्मरज्जुः। सौ विदेः कत्रन्। सुष्ठु वेत्ति विद्यते सुविदत्रं ज्ञानम्। कृतेश्च नुम्। कृन्तति कृन्तत्रं छेदनं वेष्टनम्। ऋच्छेररन्। ऋच्छति ऋच्छरमिन्द्रियं प्रलयः। अर्तिकमिभ्रमि-

---

१. इरः Dc₃. २. मालति Dc₃. ३. चेति Dc₃. ४. तिलान्नं dropped Dc₁, Dc₄. ५. नक्षति dropped Dc₁, Dc₄. ६. यं प्रलयः Dc₃.

चमिदेविवाशिभ्यश्चित् । अरन् चित्र । ऋच्छत्यर्यते वा अररः रणः । काम्यते सौ कमरः कान्तः कोमलः । भ्राम्यति भ्रमरः । चमरः । देवते देवरः भर्तुः कनीयान् भ्राता । वाश्यते वाशरः । बहुलात् वासयतीति वासरः । एवमन्ये । कुवः क्ररन् । कवते कौति वा कुररः पक्षी । अङ्गिमदिमन्दिभ्य आरन् । अङ्ग्यतेसौ अङ्गारः । माद्यति मदारः पाकशौण्डः । मन्दतेनेन मन्दारो देवतरुः । गडेः कड च । आरन् कडादेशः । गडति गड्यते वा कडारः पिङ्गः । शृङ्गारभृङ्गारौ । आरनि साधू । श्रियते जनैः शृङ्गारः श्रयति सौभाग्य शृणोति माधुर्येण श्रोत्रैर्यै शृङ्गारो रसविलासौ । बिभर्त्यम्भो भृङ्गारो जलकलशः । कञ्जिमृजिभ्यां चित् । आरन् स चित् । कञ्जति कञ्जारः कुशूलः । मार्ष्टि भवनं मार्जारः । कमेरुच्चोपधायाः । आरन् स चित् । काम्यते कुमारः महासेनो बालश्च । तुषारादयश्च । आरन्नन्ताः साधवः । तुष्यन्त्यस्मिन्निति तुषारो हिमम् । कसति तस्मात् कासारः । शृणातेः करन् । शृणाति चित्तं शर्करा । पुषः कित् । करन् । पुष्यति पुष्करम् । लभुतेः पुष्कलम् । कॄशॄपू-कटिपटिशौटिभ्य ईरन् । कीर्यते करीरः विटपी । शीर्यते शरीरम् । पुनाति पवीरं पवित्रम् । कट्यते कटीरं जघनम् जनपदो वा । पटति पटीरः शरः । शौटति शौटीरो वीरः कम्बलः । बहुलात् कुटीरम् । कशेर्मुट् च । ईरन् । कशति कश्मीरो देशः । कृञ उच्च ।

---

१. After it पिकः: Dc₃.

२. कलसः: Dc₃.

कर्मणि दृशिविदोः साकल्ये ॥ ३।४।२९ –सकलविशिष्टे कर्मण्युपपदे दृशिविदत्योर्णमुल् स्यात् । कन्यादर्शं वरयति । कन्यां दृष्ट्वा वरयतीत्यर्थः । द्विजवेदं भजयति । तं विचार्य भोजयतीत्यर्थः ॥

चर्मोदरयोः कर्मणोः पूरेर्णमुल् ॥ ३।४।३१—पूरिर्ण्यन्तोत्र । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते । D², D³, B¹, N.

३. कम्बलः dropped Dc¹, Dc⁴.

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥ ३।४।३२ ॥—कर्मणि पूरेर्णमुल् । अस्य ऊलोपो वा स्याद्वर्षप्रमाणं गम्ये ॥ सीतापूरं वृष्टः सीताप्रं वृष्टः । सीता पूरयितेत्यर्थः ॥ D², D³, B¹, N.

ईरन् उदन्तादेशः। क्रियते कुटीरः मैथुनं वेश्म वा। घसेः कित्। ईरन् स कित्। घस्यते क्षीरम्। उपधालोपादि। गभीरगम्भीरौ। ईरन्नन्तौ। गाधते गभीरं गम्भीरम्। बहुलात् कटीरम्। चतेरुरन्। चतते चतुरः। बहुलात् अकारस्येत्संज्ञापि। चत्वारः। ष्ट्रन्। छाद्यते-नेन छत्रम्। वस्तेर्ङ्गः वस्त्रम्। पतति पत्रम्। राजते राष्ट्रम्। भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च। ष्ट्रन्। भृज्जत्यस्मिन् भ्राष्ट्रम्। गच्छति गात्रम्। नमति नात्रं शिरः। हन्ति हात्रं रक्षा। वेवेष्टि वेष्टः विष्णुः। अश्नुते अश्नाति आष्ट्रं नभः। दिवेर्द्यु च। ष्ट्रन् द्युरादेशः। वृद्धिश्च। दीव्यत्यस्मिन् द्यौत्रं स्वर्गः। उषिखनिभ्यां कित्। ओषति वनस्पतीन् उष्ट्रम्। खन्यते खात्रं तडागः। सिविमुच्योष्टेरू च। सीव्यत्यनेन सूत्रम्। मुच्यते तन्मूत्रम्। हुयामाश्रुभसिभ्यस्त्रन्। हूयते होत्रं हविः। यानं यात्रा गतिः। मानं मात्रा अल्पपरिमाणम्। शृण्व-न्त्यनेन श्रोत्रं कर्णः। बभस्त्यनया भस्त्रा दृतिः। गमेरा च। त्रन् आ अन्तादेशश्च। गच्छति गात्रं देहः। अमिचिमिदिशसिभ्यः क्त्रः। अमत्यस्मिन्नन्त्रम्। चीयते चित्रम्। मेद्यति मित्रम्। शासत्य-नेन शास्त्रम्। पुवो ह्रस्वश्च। पूञस्त्रप्रत्ययः। पुनाति पुत्रः सुतः। गुधृवीपचिवचियमिमनितनिसदिक्षदिभ्यस्त्रः। गूयते गोत्रं नामादि। ध्रियते धर्त्रं धर्मेश्वरौ। वीयतेनेन वेत्रं वल्ली। पच्यतेनेन पक्त्रं तेजः। उच्यतेनेन वक्त्रम्। यच्छति यन्त्रम्। मन्यते मनुतेनेन मन्त्रः। तनोति तन्यते तन्त्रम्। सादयति[1] तेन सत्त्रं यज्ञादि। क्षदति क्षत्त्रं राजा। दादिभ्यश्छन्दसि। त्रन्। दात्यनेन दात्रम्। पूयते पोत्रम्। पिबत्य-नेन पात्रम्। लूयते लोत्रम्। भूवादिगृभ्यो णित्रन्। भवति भवित्रं विधानम्। वाद्यते वादित्रम्। गीर्यते गारित्रमनुपानं गुरुश्च। चरेर्वृत्ते ह्रस्वश्च वा। णित्रन्। चरन्तितेन चारित्रम्। चरित्रम्। अशित्रादिभ्य इत्रोत्रौ। अश्नन्ति येन तदशित्रमन्नपात्रम्। तरति तेन तरुत्रम्। एवमन्येपि चरुत्रादयः। अमेर्द्विषति चित्। इत्रः चित्। अमत्यमित्रः

१. सादति Dc₂, PC.

शत्रुः । मसेरूरन् । मस्यते मसूरः सस्यम् । हिंसेरीरन्नीरचौ । हिनस्ति हिंसीरः । स्वरे भेदः । उदि दृणातेरच् पूर्वपदान्त्यलोपश्च । उदीर्यते वायुना उदरम् । जनेरर ठः । अरः ठान्तादेशः । जायतेस्मिन् व्याधिर्जठरम् । वनिमनिभ्यां चिद्वा । अरः ठान्तादेशः वा चित् । वनति वठरः मुर्खः । मन्यते मठरः पण्डितः । कुदरादयश्च । दरे साधवः । कुर्वन्ति तस्मिन् कुदरः कुसूलः । म्रियतेनेन मृदरो व्याधिः । दृणाति दृदरं विषम् । शृणाति शृदरः सूर्यः । अश्नोतेराशुकर्मणि वरट् चोपधायाः । वरट् उपधाया ई च । अश्नुते विश्वमीश्वरः । व्याङि घ्रो जातौ कन् । व्याजिघ्रति व्याघ्रः । करोतेर्ह्रे च । कन् । करोति क्रियते चक्रः । हने रन् घ च । हन्ति हन्यते घरः गृहम् ।

रान्ताः ।

भूसलिकलिमहिनिभडिभण्डिचण्डिशण्डिगण्डिपिण्डिभ्यः किलच् । भविलं भुवनम् । सलति सलिलम् । कलयति कलिलम् । मंहयति[1] महिला । अनित्यनेनानिलः । भडिः सौत्रः । भडिलो निन्दकः । भण्डिलो दूतः । चण्डते चण्डिलः श्वा । शण्ड्यते शण्डिला तटम् । गण्डिलं भटम् । पीड्यते पिण्डते वा पिण्डिलः पिण्डः गणकश्च । तुण्डते तुण्डिलो मुखरः । मुण्डयति मुण्डिलोर्मिः । कोकिलः पिकः । कमेः पश्च । इलच् पश्चान्तादेशः । कम्यते कपिलो वर्णो मुनिर्वा । मिथिलादयश्च । मथतेस्यां मिथिला । इंमिलः । कपिगडिपटिभ्य ओलः । कम्प्यते कपोलः । गण्ड्यते गण्डोलः हर्षणः । पट्यते पटोलः द्रव्यम् । हृषेरुलच् । हृष्यति हर्षुलः क्रीडनमृगौ । कलस्तृपश्च । कलः । तृप्यति तृपला लता । चात् काम्यते कमलम् । मण्ड्यते मण्डलम् । कुण्ड्यते कुण्डलम् । कुश्यते[2] कोशलो देशः । तोसते तोसलः । शपेर्बश्च । कलः । बश्चान्तादेशः । शप्यतेसौ शबलः । वृषादिभ्यश्चित् । कलः चित् । वृषति वृषलः शूद्रः । दीव्यति देवलः ऋषिपूजकौ । केव्यते केवलः । पटति पटलम् ।

१. महति महिला Dc3. २. Before it—कुटिलः PC, Dc3.

मृजेष्टिलोपश्च । कलः । मृज्यतेऽसौ मलः । चुपेरच्चोपधायाः । चोपति मुहुश्चपलः । शकिशम्योर्नित् । शक्यतेऽनेनेतुं शकलम् । शम्यते शमलं शकृत् । द्रमिमस्योरुच्च उपधायाः । कलः । द्रमति द्रुमलम् । मस्यतेऽनेन मुसलम् । कम्बलादयश्च । साधवः । काम्यते कम्बलः । कोमलः । शम्यते पथि दुःखमनेन शम्बलः । छायते यज्ञे छगलम् । पलति पल्यते पललं तिलान्नम् । पटत इति पाटला लता इत्यादि । तमिविडिविलिमृणिकुलिकपिपलिविशिपञ्चिकुणिभ्यः कालन् । ताम्यति तमालः । वेडयत्याखून् विडालः । विलति बिलालः भिदुरः । मृणति मृणालम् । कुल्यते कुलालः । कपयति कपालम् । पलयति पलालम् । विशति तत् विशालम् । पञ्चयति पञ्चालः । कुणति कुणालं नगरम् । पतिचण्डिभ्यामालञ् । पतन्ति तत्र पातालम् । चण्डते चण्डालः । पीयुक्वणिभ्यां कालन् ह्रस्वश्च । कालन् धातोर्ह्रस्वश्च । पीयते पियालं शाकं वीरुच्च । क्वणति क्वणालं नगरम् । पुषः कलन् । पुष्कलम् । मूशक्यबिभ्यः क्लः । मवते मूलम् । शक्नोति हृदयं मार्जयितुं शुक्लम् । अब्यते अब्लं शल्कादिरसः । कुडिकुषिभ्यां क्मलन् । कुड्यते कुड्मलम् । कुष्यते कुष्मलं विकसितम् । वृङ्लुटितनिताडिभ्य उलच् तण्डश्च । व्रियन्ते लुट्यन्ते तन्यन्ते ताड्यन्ते तण्डुलाः । तण्डुलशब्दो निपातितः । सत्यम् । स्वरविशेषार्थं वचनम् । मव्यतेर्यलोपो मश्चायुडालः । आलः यलोपः मान्तादेशः आयुडागमः । मव्यति ममायालः प्रीतिः स्नेहो वा । मङ्गेरलच् । मङ्ग्यते मङ्गलम् ।

लान्ताः ।

प्रथेः षिवन् संप्रसारणम् । प्रथते पृथिवी । गौरादित्वात् ङीषि सिद्धे षित्त्वं गणकृतस्यानित्यत्वज्ञापनार्थम् । अशूप्रुषिलटिकटिकणिखटिविशिभ्यः क्वन् । अश्नुतेऽध्वानमश्वः । प्रोषति प्रुष्वः अग्निबिन्दुः । लटति लट्वश्चपलः । कटति कट्वः । कणति कण्व ऋषिः । खटति

खट्वा । विशति विश्वम् । इण्शीङ्भ्यां वन् । एति एवम् । शेते शेवः सर्पः । सर्वनिघृष्वरिष्वलिष्वशिवपट्वप्रह्वेष्वा अतन्त्रे । अतन्त्रे अकर्तरि निपात्याः । सृतमनेन विश्वं सर्वम् । निघृष्यते निघृष्वः निशान्तः क्षुरो वा । रिष्यन्तेनेन रिष्वं शस्त्रम् । लिष्यते लिष्वः कान्तः । शेते शिवम् श्यति वा । पट्यते पट्वो देशः । प्रह्वयतेसौ प्रह्वः । इष्यतेसौ इष्वः । अतन्त्रे किम् । सरति सर्ता । शेवयह्वजिह्वाग्रीवाप्वामीवाः । वनि निपात्याः । शेतेत्यर्थं शेवः अजगरः । यान्त्यनया तांस्तानर्थान् यह्वा धीर्वृद्धिः । लिह्यत्यनया रसान् जिह्वा । गिरत्यनयान्नपानं ग्रीवा । आप्नोति सर्वमाप्वा वायुः । मीयते मीवा परिमाणजातिः । कृगृशृदृभ्यो वः । कृणाति किरति वा कर्वः समुद्रमूषकौ । गिरति गृणाति गर्वः । शृणात्यसुरान् भक्तानां पापं वा शर्वः ईशः । दृणाति सर्वान् दर्वः । स्रुवः कः । स्रवन्ति तस्माद्धवींषि स्रुवः । शपेर्वन् । शपति शपते वा शप्व आक्रोशः । उल्वादयश्च । वनि साधवः । उह्यते उल्वम् बभ्रुजरायुः तरक्षुः । शलति शल्यते वा शुल्वं स्त्रीपुंयोगः ।

वान्ताः ।

अष्टमः पादः ।

क्लिशेरीच्चोपधायाः शन् लोपश्च लो नाम् च । शन् उपधाया ईत् लस्य लोपे नामागमः । क्लिश्नाति कीनाशः कदर्थः । क्लिशेरन् लोपो लः । क्लिश्यते यैस्ते केशाः ॥

शान्ताः ॥

अविमह्योष्टिषच् । अवति अविषः नृपसमुद्रौ । अविषी गङ्गा । मह्यतेसौ महिषः यमवाहनं राजा च । महिषी मुख्यस्त्री । रुहेर्वृद्धिश्च । टिषच् । रोहत्यत्यर्थं रौहिषं तृणम् । रौहिषी वा दूर्वा । तवेर्णिद्वा ।

१. विशति तस्मिन् PC, Dc3. २. कन्धारः PC. ३. तरक्षः Dc3. Before it—अन् रस्य लोपः Dc3. ५. रौहिषा Dc3.

टिषच् णिच्च वा। वृद्धिः। तवति ताविषः ताविषः स्वर्गः। ताविषी ताविषी गङ्गा। नञि व्यथेः। टिषच्। न व्यथते अव्यथिषः सूर्याग्निभूमयः। सहः षट् लुक् च क्विप्। सहेः षषादेशः प्रत्ययस्य लुक्। सहन्ते षट्। परौ व्रजेः षः पदान्ते क्विप् दीर्घश्च। क्विप् दीर्घः पदान्ते षान्तादेशः। परिव्रजति परिव्राट्। कॄतॄभ्यामीषन्। कीर्यते करीषं गोमयविकारः। तरन्ति तेन तरीषः प्लवबोधौ। शॄपॄभ्यां कित्। शृणाति तं शिरीषः वृक्षः। पूर्यतेनेनोदरं पुरीषं विष्ठा। अजेर्ऋज च। ईषन् कित् ऋजादेशश्च। अर्ज्यते ऋजीषं धनम्। अम्बरीषम्। निपातः। पचन्त्यस्मिन्नम्बरीषं भ्राष्ट्रम्। आप्यते तद्वायुभिरम्बरीषमाकाशम्। ऋनहिभ्यामुषच्। ऋच्छत्यर्यते वा अरुषः प्राणः। नह्यति नहुषो नृपः। पुरः कुषन्। पृणाति पूर्यते पुरुषो नरः। पृकालिभ्यामुषच्। पृणाति परुषो निष्ठुरः। कलते कलुषोप्रसन्नः। पीयेरूषन्। पीयते पीयूषममृतम्। मूङ्य्वोर्लोपश्च। ऊषन् अन्तलोपश्च। मूयते मूषा द्रुतधातुपात्रम्। यौति यूषं व्यञ्जनम्। मस्जेर्नुम् च। ऊषन्। मज्जत्यस्यां मञ्जूषा जलद्रोणी। अङ्कूषः। साधुः। अङ्कत्यङ्कूषो गजबाणवेगाः। बहुलात् खलति खलूषः म्लेच्छः। फलति फलूषा वीरुत्। विषेर्व्याप्तिकर्मणि कन्। वेवेष्टि विश्वं विषम्।

षान्ताः।

वृतॄवदिहनिकमिकषियुमुचिभ्यः सः। वृणाति वर्षम् वत्सरः। तरन्त्यनेन तर्षं प्लवः। वदत्यभीक्ष्णं मातरं वत्सः बालः। हन्त्यध्वानं हंसः पक्षिसूर्यौ। काम्यते कंसः दनुजमानपात्राणि। कष्यते गवादिभिः कक्षं वनम्। यूयते योषा स्त्री। मोचनं मोक्षः अपवर्गः। प्लुषेश्चोपधायाः। प्लुष्यति प्लक्षः। मनेर्दीर्घश्च। सः। मन्यते-

१. पिबन्ति तस्मि°. Dc3. २. प्राणः Dc3. ३. मूङ्र्यो° PC. ४. फलूषः Dc3. ५. वृणोति Dc3. ६. तर्षः Dc3, PC. ७. After it वृक्षः PC.

त्यर्थं मांसं पिशितम् । अशेर्देवने । सः । अश्नुतेत्यर्थमक्षः देवनादिः । स्नुव्रश्चिकृत्यृषिभ्यः कित् । सः । स्नौति स्नुषा पुत्रस्त्री । वृश्चत्युष्णं वृक्षः[1] । कृन्तति कृत्सः पापम् । ऋषति ऋक्षं भम् । ऋषेर्जातौ । सः किच्च । ऋषति ऋक्षः श्वापदम् । मा सः । मीयतेनेन वर्षं मासः । सानुवृत्तौ पुनः सग्रहणं कित्त्वाभावार्थम् । अन्यथा इत्वं स्यात् । अथवा निपातः । उन्दिगुधिकुषिभ्यः कित् । सः । उन्दतीत्युत्सः प्रस्रवणम् । अमत्यनेनांसः स्कन्धः । गुध्यति गुत्सः रोषः । कुष्णाति कुक्षः गर्भः । गृधिपत्योर्दषौ च । सः किच्च क्रमादन्तादेशौ च । गृध्यति गृत्सः अभिलाषः ऋषिः । पतति पक्षः मासार्धम् । बृंहेर्नलोपश्च । इसिः । बृंहते बर्हिः वेद्यास्तरणम् । द्युतेरिसिन्नादेशश्च जः । द्योतते ज्योतिर्ग्रहनक्षत्रादयः । वसौ रुचेः संज्ञायाम् । इसिन् । वसवोस्मिन् रोचन्ते वसुरोचिः क्रतुः । स्तुवः कित् । इसिन् । स्तूयन्तेस्मिन् देवाः स्तविः यज्ञः । सहो धश्च । इसिन् धान्तादेशः । सहते सधिर्भूमिः । पिबतेस्थुक् च । इसिन् । पिबति पाथिः सूर्यः । जनेरुसिः । जायते इति जनुर्जन्म । मनेर्धश्छन्दसि । उसिर्धोन्तादेशः । मन्यते मनुते वा मधुः पवित्रम् । अर्तिपृवपियजितनिधनितपिभ्यो नित् । उस् । ऋच्छत्यर्यते वा अरुः सूर्यप्राणौ । पृणाति पूर्यते वा परुः समुद्रः । उप्यते वपुर्देहः । इज्यते यजुश्छन्दसि । तनुः । धनति धनुः धन्वा । तपति तपुः सूर्याग्निशत्रवः । एतेर्णिच्च । उसिः । एति आयुः जीवनम् । चक्षेः शिच्च । चष्टे रूपं चक्षुर्नेत्रम् । बहुलमन्यत्रापि ।[2] संचष्टे संचक्षुः । परिचष्टे परिचक्षुः । दमेर्डोस् । दमयति दाम्यति दोर्बाहुः । अत्यविचमितमिनमिरभिलभिनमितपिपतिपनिपणिमहिभ्योसच् । अतत्यतसः अश्वत्थी वायुरात्मा च । अवति अवसः समयः । चमत्यनेन चमसः पात्रम् । तम्यतेस्यां

1. After it तरुः । Dc3. 2. After it उस् PC, Dc3.

तमसा नदी । रभते रभसः संभ्रमः । लभते लभसः पावकः । नभति नभसः हिंस्रः । पनायति पनसः हरुतरुविशेषौ । पतति पतसः पतङ्गः इत्यादि । वेञस्तुट् च । वीयते वेतसः वानीरः । वयो णित् । असच् । वयते वायसः ध्वाङ्क्षः । वहियुभ्यां णित् । असच् । वहति वहसः अनड्वान् । यूयते यवसं तृणम् । पातेर्डुम्सुन् । पाति पुमान् नरः । पिबतेरि च । असुन् । पीयते पयो जलम् । अशेर्देवने युट् च । अश्नाति अश्नुते वाशुभं यशः । उब्जेर्बले बलोपश्च । असुन् । उब्जति ओजः बलम् । श्वयतेः संप्रसारणं च । असुन् । श्वयति शवः । श्रयतेः स्वाङ्गे शिरः किच्च । असुन् शिरादेशः । श्रयत्यस्मिन् शिरो मूर्धा । अर्तेरुच्च । असुन् कित् । अर्यते रहसि स्त्रीभिरुरो वक्षः । व्याधौ शुट् च । अर्तेरसुन् । अर्यते पाणिभिरर्शांसि रोगः । उदके नुट् च । अर्तेरसुन् । अर्यते पिपासुभिरर्णो जलम् । इण आगसि । असुन् नुट् च । एति कर्मणा एनः पापम् । रिचेर्धने घिच्च । असुन् घिच्च । रिच्यते रेको धनम् । चायतेरन्ने ह्रस्वश्च । असुन् । चायते चणः अन्नम् । बहुलात् णत्वम् । वृङ्शीङ्भ्यां रूपस्वाङ्गयोः फट् च । असुन् । व्रियते वर्फो रूपम् । शेते शेफः मेढ्रः । स्रुरीभ्यां तुट् च । असुन् । स्रवति स्रोतः स्रवणम् । रीयते रेतः शुक्रम् । पातेर्बले जुट् च । असुन् । पातीति पाजो बलम् । उदके थुट् च । पातेरसुन् । पाति जीवितं पाथो जलम् । अन्ने च । पाथोऽन्नम् । अदेर्नुम्धौ च । असुन् नुमागमः धोन्तादेशः । अद्यतेऽन्धोऽन्नम् । स्कन्देश्च स्वाङ्गे । असुन् धोन्तादेशः । स्कन्दति स्कन्धः देहाङ्गम् । आपः कर्माख्यायाम् ह्रस्वश्च नुट् वा । असुन् ह्रस्वः नुट् वा स्यात् । आप्नुवन्ति तत् अप्नः[1] अपः व्यवसितम् । रूपे जुट् च । आपोसुन् ह्रस्वो जुट् च । आप्यते अब्जो रूपम् । उदके नुम्भौ च । आपः असुन् नुमागमो भान्तादेशो ह्रस्वश्च । आप्नोति सर्वमम्भः । नहेर्दिवि भश्च । असुन् । नह्यते

१. आपः for अप्नः । अपः Dc3.

तन्मेघैर्नभ आकाशम् । इण आग अपराधे । असुन् आगादेशः । एत्यनेन आगः अपराधः । अमेर्हुक् च । असुन् । अमन्त्यंहः पापम् । रमेर्देशे हश्च । असुन् । होन्तादेशः । रमन्तेस्मिन् रहो विविक्तो देशः । अञ्ज्यजियुजिभृजिभ्यः कुश्च । असुन् । कवर्गोन्तादेशः । अज्यते अङ्कः क्षेम । अजति अगः । युनक्ति योगः मनः । भृज्यते भर्गः हरिर्हरश्च । भूरञ्जिभ्यांकित् । असुन् । भुवः अन्तरिक्षम् । रजः अशुभं रेणुश्च । वसेर्णित् । असुन् । वस्ते शरीरं वासः वस्त्रम् । चन्देरादेश्च छः । असुन् । चन्दयति छन्दः वेदः । पचिवचिभ्यां सुट् च । असुन् । पचति तेन पक्षः । उच्यतेनेन वक्षः उरः । वहिहाधाञ्भ्यश्छन्दसि । असुन् सुट् च । उह्यते वक्ष उरो दासो वा । प्रहाण प्रहासः हर्षः । दधाति स धासः शरणम् । इणोसिः । एतीत्यया उरः । मिथुनेसिः । पूर्ववच्च सर्वम् । धातूपसर्गसंबन्धो मिथुनम् । तत्र असिः । पूर्ववच्च सर्वं कार्यम् । सुष्ठु अश्नुते सुयशाः । सुष्ठु श्रवति सुश्रोताः । सुष्ठु वर्त्तते सुवर्चा इत्यादि । नञि हन एह च । नञ्पूर्वात् हन्तेरसिः एहादेशश्च । न[3] आहते अनेहाः कालः । विधाञो वेध च । असिः वेधादेशः । विदधाति वेधाः । नुवो धुट् च । नूयते नोधाः ऋत्विक् । गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च । चन्द्रे मो डित् । चन्द्रे उपपदे मा अस्मादसिर्डिच्च । चन्द्रं मिमीते मीयते वा चन्द्रमाः शशी । वयसि धाञः । असिः । वयो दधातीति वयोधाः प्राणश्चन्द्रश्च । पयसि च । पयो दधातीति पयोधाः समुद्रः । पुरसि च । धाञोसिः । पुरो दधातीति पुरोधा उपाध्यायः । पुरूरवाः । निपातः । पुरूरूयते स्वयशः सर्वत्रेति पुरूरवा राजा । चक्षेर्बहुलं शित् । आचष्टे आचक्षाः वाग्मी । आख्याः । प्रख्याः । बृहस्पतिः । वसेः कित् । वसति तस्यामुषा रात्रिः । दमेरूनसिः । दाम्यति दमूनाः शुक्रः । अङ्गिराः । साधुः । अङ्गारेभ्यः सृतोङ्गिराः मुनिः । अप्सरसः । असौ साधुः । अद्भ्यः सृता

१. भूवि Dc3, PC. २. भूषः Dc3, PC. ३ ने Dc3

अप्सरसः स्वर्गस्त्री । विदिभुजिभ्यां विश्वे । असिः । विश्वं वेत्ति विन्दति विद्यते वा विश्ववेदाः । विश्वं भुनक्ति विश्वभुजः अग्निः । वशेः कनसिः । वष्टि उश्यते उशनाः शुक्रः । अमेरसः । अमत्यमसो-व्याधिः । अपि सर्त्तेरसुन् । अद्भ्यः सृता अप्सरसः । कृञः पासञ् । क्रियते कार्पासः वस्त्रयोनिः । दंसेष्टदटौ नस्य आत्र । दंसेष्टत्अत् एतौ स्तः । नस्य चाकारः । दस्यते दासः । तित्त्वात् स्वरितः । दासा । दासी । दाशतेश्च तटतौ । दाशन्ति तस्मै जना दाशः । दाशा । दाशी ।

सान्ताः ॥

गुहेः कन् । गूहति गुहः सेनानीः । गुहा अद्रिः[1] । सिचेर्नुम् ह्रौ च कन् । सिञ्चति सिंहः । वहेः क्विबनसो डश्च । अनो वहतीत्यनड्वान् ।

हान्ताः ।

नवमः पादः ।

स्थाचतिमृजेरालज्वालजालीयचः । एते क्रमात् स्युः । तिष्ठ-त्यत्रान्नं स्थालः । चत्यते चत्वालः । मार्ष्टि मार्जालीयः । बहुलात् चषालः । सृयुवचिभ्योन्युजागूजलुचः । क्रमात् । धावति सरण्यु-र्मेघो वायुः । यूयते यवागूः पेया । वक्ति वचलुर्वाग्मी । शके-रुनोन्तोन्त्युनयः । एते । शक्नोति नभो गन्तुं शकुनः शकुन्तः शकुन्तिः शकुनिः । इणस्तशस्तशसुनौ । एति एतशाः वाय्वग्न्यर्काः । स्वरे भेदः । उल्मुकदर्विहोमिनः । साधवः । उषयत्युल्मुकम्[2] अर्धदग्धं काष्ठम् । दर्विः साधनं भाण्डम् । जुहोति होमी ऋत्विक् । त्रिसाविहा । क्विपि साधू । विस्यति विसा । विजहाति विहा स्वर्गः । शीङो धुग्लग्वलन्वालनः । शीङ एते स्युः । शेरतेस्मिन् जना सीधु मदिरा । बहुलात् सत्वम् । साधु कर्मणि शेते शीलं धर्मसमाधिः । शेवलं शेवालं जलमलम् । खर्जिविजादि-

---

१. अद्रिः Dc3. २. उषत्यु॰ Dc3, PC.

भ्य ऊरजूलचौ । खर्ज्यादेरूरच् । विजादेरूलच् । खर्जति खर्जूरः । कर्जति कर्जूरः वृक्षजातिः । कल्पते कर्पूरः गन्धद्रव्यम् । विजते विजूलम् । हन्ति वधूलः घातकः । मृडः कीकन्कङ्कणौ । मृड्यते मृडीकम् । मृडङ्कः । ऋतन्याञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निन्यतुजलिजिष्ठुजिष्ठजनिस्यन्निषन्नसनूषानुकः । एभ्यः क्रमादेते स्युः । ऋच्छत्यर्यते वा अरत्निः बाहुमध्यभागः । तनोति तन्यतुर्वायुः सूर्यश्च । अनक्ति अज्यते वानेनाञ्जलिः करद्वयपुटः । वनति वनोति वा वनिष्ठुः अपानोपरिस्थानम् । अनक्ति अञ्जिष्ठः गतिरग्निश्च । अर्पयति अर्पयते वा अर्पणिरार्द्रमांसम् । माद्यत्युदकं प्राप्येति मत्स्यो मीनः । अङ्गत्यनेनेत्यङ्गिषः । कौति कवते कूयते वा कवसः । यौति यूयते वा यवूषः । कृश्यत इति कृशानुरग्निः । स्पृशेः श्वण्शुनौ पृ च । स्पृशति स्पृश्यते वा पार्श्वं पर्शु गतमस्थि । कुसेरुम्भोम्वोमेदेताः कित् । कुसेरेते स्युः । कुस्यति तानि कुसूलः कुसुम्भः कुसुम्वः कुसुमम् कुसीदम् कुसितम् । जनिदाच्युसृवृमदिशमिगमिभृञ्भ्य इत्वनूत्वनूत्नणूक्निनूशक्रस्यखाकटश्च । जायते जन्यते वा जनित्वं लोकः । ददाति दात्वो यज्वा । च्यवते च्यौत्नोण्डजः । धावति सृणिः रविः । वृणोति वृशः । माद्यति मत्स्यः । शाम्यति शङ्खः । गच्छति गमकः । भरति भरटः । अन्येभ्योपि दृश्यन्ते इत्वादयः । पीयते पीत्वा । ध्यायते ध्यात्वं लवनं लूतिः । एवमन्ये । सानसिधर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः । एते साधवः । सनोति सन्यते वा सानसिः स्नेहो हिरण्यम् । ध्रियते धारयति वा धर्णसिः लोकपालः । पृणातीति पर्णसिः आभरणक्रिया । ताड्यते तण्डुलो व्रीहिसारः । अङ्क्यतेऽङ्कुशः प्रतोदः । चषति चषालो यज्ञभाण्डम् । एति इल्वलः । पिबन्ति तस्मिन् पल्वलः । धिषति धिष्ण्यम् ।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्[1]॥३।३।१०॥

क्रियायां क्रियार्थायामुपपदे धातोर्भविष्यति तुमुन्ण्वुलौ स्तः। मान्तत्वादव्ययत्वम्। कृष्णं द्रष्टुं याति। कृष्णं दर्शको

शलति शल्यम्। आः समिण् निकषिभ्याम्। समेति समया। निकषणं निकषा। लोष्टफलितौ। निपातौ। लुनाति[2] लोष्टः। फलयत्यनेन[3] फलितम्। अवद्यावमाधमार्वरेफाः कुत्सिते। साधवः। अवद्यम्। न वदन्ति तत्पुरुषाः। अवमम्। अधमम्। अर्वतेसौ अर्वा। रिफति रेफः। लीङ्रीङो ह्रस्वश्च पुट् तरौ श्लेषकुत्सनयोः। एतयोः क्रमात् तरौ पुट् ह्रस्वश्च। लीयते लिप्तम्। रीयते रिप्रम्। स्थः स्थ चावजवकौ। अवजवकौ स्थ इत्यादेशश्च। तिष्ठति स्थवः। स्थवकः। इत्यादयोऽन्येपि कल्प्याः। यत्र साधिता अप्युक्तास्तेर्थभेदाद्धातुभेदात् स्वरभेदाद्वा यथायोगं ज्ञेयाः[4]।

मिश्राः।

दशमः पादः॥

एवमादिशब्दसूचिता उणादयो दशपाद्यनुसारेण व्याख्याताः॥

तुमुन्। क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था। **मान्तत्वादिति**। 'कृन्मेजन्तः' इत्यनेन। ण्वुल् 'कर्तरि कृत्' इति कर्तरि। तुमुन् भावे। कुत एतत्। 'तुमर्थे सेसेन—' इत्यत्र तुमर्थग्रहणात्। यदि तुमुन् कर्तरि स्यात् तदा सेसेनादयोपि 'कर्तरि कृत्' इति कर्तरि स्युरिति तुमर्थग्रहणं न कुर्यात्। कृतवांश्च। ततो ज्ञायते तुमुन् कर्तरि नेति। तत्रानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति भाव एव तुमुन्[5]। **कृष्णमिति**। कृष्णदर्शनार्था गमनक्रियात्रोपपदम्। क्रियायां किम्। भिक्षिष्य[6] इत्यस्य जटाः। क्रियार्थायां किम्। धावतस्ते पतिष्यति[7]

---

१. क्रियार्थायां क्रियायां D_2, P, D_4. २. D_2 drops it. ३. फलस्य° PC. ४. नेयाः Dc_3. ५. After it—स्यात् PC, Dc_3. ६. भिक्षिष्यत Dc_3. ७. पतति Dc_3, PC.

याति । पुनर्ण्वुलुक्तेर्ज्ञायते नात्र वासरूपन्यायेन तृजादय इति ।

समानकर्तृकेषु तुमुन् ॥३।३।१५८॥

अक्रियार्थोपपदार्थमेतत् । इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् स्यात् ॥ इच्छति भोक्तुं वेष्टि वाञ्छति वा । इच्छन् करोतीत्यादावप्रयोगान्न ।

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥३।४।६५॥

एषूपपदेषु धातोस्तुमुन् स्यात् ॥ शक्नोति भोक्तुम् । एवं धृष्णोत्यादौ । अस्ति भवति विद्यते वा भोक्तुम् ।

दण्डः । 'ण्वुल्तृचौ' इति सामान्येन विहितो ण्वुल् वासरूपेणात्रापि स्यात् । किं पुनर्ण्वुल्ग्रहणेनेत्यत आह—**पुनर्ण्वुलुक्तेरिति** । तेन कर्ता यातीत्यादि न स्यात् । तुमुनो नकार आद्युदात्तार्थः । उकार उच्चारणार्थः । ण्वुलो णकारो वृद्ध्यर्थः । लकारो 'लिति' इति प्रत्ययात् पूर्वस्योदात्तार्थः ।

समान । अक्रियार्थोपपदार्थमेतत् इति अग्रिमसूत्रद्वयस्य प्रयोजनकथनपरसंभवादत्रापि लाघवार्थमुक्तम् । अस्य तु प्रयोजनमिच्छार्थेष्विति लिङ्लोटौ परत्वात् प्राप्नुतस्तद्बाधा ण्वुल्बाधा च समानकर्तृके च विधिरिति । समानकर्तृकेषु किम् । त्वां भुञ्जानमिच्छाम्यहम् । वर्तमाने लडेव । वष्टीति । वश कान्तौ ।

शक । पूर्वसूत्रेण सिद्धावपि अक्रियार्थेष्वपि शक्यादिषूपपदेषु तुमुन्सिद्ध्यर्थं वचनम् । **शक्नोतीति** । नात्रोपपदस्य क्रियार्थता । सामर्थ्यमर्थान्तरं गम्यते । एवं धृष्णोत्यादावुपपदे उदाहार्यमित्यर्थः । धृष्णोति भोक्तुम् । जानाति भोक्तुम् । ग्लायति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । आलभते भोक्तुम् । प्रक्रमते भोक्तुम् । उत्सहते

---

१. Before it—कामयते D_2, B_2, D_4. २. °त्यादयः D_1; °त्यादि C.
३. तुमुन्सिद्ध्य° Dc_3, PC.

कालसमयवेलासु तुमुन् ॥३।३।१६७॥

एषु धातोस्तुमुन् स्यात् ॥ कालः समयो वेला वा भोक्तुम् ।

भाववचनाश्च ॥३।३।११॥

क्रियार्थायां क्रियायां भविष्यति घञादयः स्युः ॥ जयाये याति । पाकाय व्रजति ।

भोक्तुम् । स्पष्टत्वात् त्यक्तम्—'पर्याप्तिवचनेष्वलमर्थेषु' ॥३।४।६६॥ अन्यूनतोच्यते यैस्तेष्वलमर्थेषूपपदेषु धातोरतुमुन् स्यात् । पर्याप्तो भोक्तुम् । पारयति भोक्तुम् । पर्याप्तिवचनेषु किम् । अलं भुक्त्वा । अलमर्थेषु किम् । पर्याप्तं भुङ्क्ते । पूर्वसूत्रे शक्तिग्रहणं नालमर्थम् । शक्यमेव कर्तुमिति ।

काल । इह कस्मान्न । भूतानि कालः पचतीति वार्तेति । प्रैषादिग्रहणमिहानुवर्तते । तेन प्रैषादिष्वेव स्यान्नान्यत्र । इह कस्मान्न । कालो भोजनस्येति । वासरूपेण ल्युडपि स्यात् ।

भाववचना इति । ब्रुवन्तीति वचनाः । भावस्य वचना भाववचना इत्यधिकृत्य घञजादय इत्याह—**घञादय** इति । **जयाय यातीति** । 'एरच्' । **पाकायेति** । घञ् । 'चजोः—' इति कुत्वम् । 'तुमर्थाच्च—' इति चतुर्थी । वचनग्रहणं यथैव स्वैर्येभ्यः प्रकृतिभ्यो येन विशेषणेन प्रोक्ता घञादयस्तथानेनापि स्युरित्येवमर्थम् । 'अण् कर्मणि च' ॥३।३।१२॥ व्याख्यातप्रायत्वादुपेक्षितम् । धातोः कर्मण्युपपदे क्रियार्थायां भविष्यत्यण् स्यात् । वासरूपविधेरभावात् ण्वुला बाधितोण् प्रतिप्रसूयते । तेन ण्वुलं बाधते परत्वाच्च कादीन् । अश्वदायो व्रजति । गोदायो व्रजति ।

---

१. C and D drop it २. °वचनाश्च D4. ३. यागाय D1, D2, D3, D4, C, B1, B2. ४. याति C. ५ Before it—'प्रैषादिसर्ग' इत्यतः Pc. ६. शरलावो Dc3, PC.

पदरुजविशस्पृशो घञ् ॥३।३।१६॥

एभ्यो[1] घञ् स्यात् कालत्रये[2]॥ पचाद्यजादेरपवादः । पद्यतेसौ पादः । रोगः । वेशः । स्पर्शः ।

सृ स्थिरे ॥३।३।१७॥

सर्तेः स्थिरे कर्तरि घञ् स्यात् ॥ सारः । व्याधिमत्स्य-[3]बलेषु च ॥* उपसर्गस्य घञ्यमनुष्ये बहुलम् ।[4] अतीसारः[5] । विसारः । प्रसारः ।

भावे ॥३।३।१८॥

धात्वर्थे वाच्ये धातोर्घञ् स्यात् ॥ पाकः ।

पद इति । अयं ण्वुल्तृचोरपवादः । पदमित्येतत्तु 'अनुदात्तं पदमेकवर्जम्' अस्मान्निपातनात् । **रोगः वेशः** इति । रुजति विशति—आभ्यामिगुपधलक्षणस्य कस्यापवादः । **स्पर्श** इति । स्पृशति । स्पृश उपतापे इति वक्तव्यम् । अत्र च पचाद्यचोपवादः । घञि पदस्याद्युदात्तत्वमचि त्वन्तोदात्तत्वमिति विशेषः ।

सृ । स्थिरं चिरस्थायि । **सार** इति । खदिरादीनाम् । स हि खदिरादौ चिरं तिष्ठन् कालान्तरे सरतीति धात्वर्थस्य कर्ता । **स्थिरे** किम् । सर्ता । सारकः । **व्याधी**ति । अस्थिरार्थम् । **अतीसारो** व्याधिः । **विसारो** मत्स्यः । **प्रसारो** बलम् ।

भावे ।

नित्यानामेव शब्दानां सौकर्यात् प्रतिपत्तये ।
अन्वाख्यानाद्भावशब्देप्यस्ति नान्योन्यसंश्रयम् ॥

इति वचनाद् भावशब्दोपि घञन्तः सिद्धः । भवतेर्धात्वर्थसामान्यवाचित्वाद्भावशब्देन धात्वर्थसामान्यमुच्यते । तेन भवतेरेव भाव इत्याह—**धात्वर्थे वाच्य** इति । यथा पचति पाचक इत्यादौ प्रकृतिः क्रियामाह प्रत्ययस्तु साधनं तथा पाक इत्यादौ प्रकृतिः साध्यमर्थमाह प्रत्ययस्तु तस्यैव सिद्धतां द्रव्यधर्मलिङ्गसंख्याकारकशक्तिसंबन्धयोग्यमाकारमाह । तदुक्तम्—

---

१. C drops it. २. °बयेपि N_1. ३. मत्स्यबन्ध्या/धि° C. ४. After it—स्यात् D_2. ५. अतीसारम् D_2.

इकः काशे ॥६।३।१२३॥

काशे[1] उत्तरपदे इगन्तस्यैव[2] प्रादेर्दीर्घः स्यात् ॥ नीकाशः अनूकाशः । इकः किम् । प्रकाशः ।

अकर्तरि च कारके संज्ञायाम् ॥३।३।१९॥

धातोर्घञ् स्यात् कर्मादौ वाच्ये संज्ञायाम् ॥ प्रास्यति[3] प्रासः । चादसंज्ञायामपि । कस्त्वया दायो दत्तः । दारजारौ कर्तरि णिलुक् च ॥*[4]

'आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥
साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभागस्तु यस्तस्याः स घञादिनिबन्धनः ॥' इति ।

लिङ्गवचने अतन्त्रे । तेन पाकौ पक्तिः पचनमित्यादयोऽपि स्युः ।

इकः । 'उपसर्गस्य घञि—' इत्येव सिद्धे नियमार्थमाह—इगन्तस्यैवेति ।

अक । प्रास्यतीति । असु क्षेपणे । कर्मणि । अकर्तरि किम् । मिषतीति मेषः । बिभर्तीति भर्ता । अत्र । संज्ञायां किम् । कर्तव्यः । चादिति । चकारो भिन्नक्रमः संज्ञायामित्यस्यानन्तरं द्रष्टव्यः । ततः संज्ञायां चासंज्ञायां च स्यात् । दाय इति । कर्मणि घञ् । 'आतो युक्' । दारेति । तृजादिप्राप्तौ । दारयन्ति जरयन्ति । इतः परं 'भावे' 'अकर्तरि च कारके' इत्यनुवर्तते 'कृत्यल्युटो बहुलम्' इति यावत् । [5]स्पष्टत्वादुपेक्षितान्येकत्रिंशत् सूत्राणि घञ्विधायकानि

---

१. कस उत्तर° D_2. २. D_1 drops एव. ३. प्रास्यति तं D_1, D_4, B_2; प्रास्यन्ति तं P D_2, N_1. ४. After it दाराः । जारः B_2. ५. सत्त्व° PC. Dc_3. ६. Before it—इतः परं PC.

व्याख्यास्यामः—'परिमाणाख्यायां सर्वेभ्यः' ॥३।३।२०॥ परिमाणाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यो घञ् कर्मादौ। एकस्तण्डुलनिश्चायः। निष्पावः। धातोरित्येव सिद्धे सर्वग्रहणमपोऽपि बाधनार्थमन्यथा पुरस्तादपवादत्वादच्मेव बाधेत। स्त्रीप्रत्ययास्तु न बाध्यन्ते। एका तिलोच्छित्तिः। परिमाणाख्यायां किम्। निश्चयः। आख्याग्रहो रूढिनिरासाय। तेन संख्यापि न प्रस्थाद्येव। 'उपसर्गे रुवः' ॥३।३।२२॥ रु शब्दे। घञ्। अपोऽपवादः। संरावः। उपरावः। उपसर्गे किम्। रवः। 'समि युद्रुदुवः' ॥३।३।२३॥ घञ्। संयावः। संद्रावः। संदावः। समि किम्। प्रयवः। 'श्रिणीभुवोऽनुपसर्गे' ॥३।३।२४॥ पञ्चम्यर्थे सप्तमी। एभ्यो घञ्। नाजपौ। श्रायः। नायः। भावः। अनुपसर्गे किम्। प्रश्रयः। प्रणयः। प्रभवः। कथं नयः। 'कृत्यल्युटो बहुलम्' इति। प्रभाव इति प्रकृष्टो भाव इति। 'वौ क्षुश्रुवः' ॥३।३।२५॥ घञ्। नाप्। विक्षावः। विश्रावः। वौ किम्। क्षवः। 'अवोदोर्नियः' ॥३।३।२६॥ अचोऽपवादो घञ्। अवनायः अधोनयनम्। उन्नायः ऊर्ध्वनयनम्। बहुलादुन्नयोऽपि। 'प्रे द्रुस्तुस्रुवः' ॥३।३।२७॥ घञ्। नाप्। प्रद्रावः। प्रस्तावः। प्रस्रावः। प्रेति किम्। द्रवः। 'निरभ्योः पूल्वोः' ॥३।३।२८॥ घञ्। नाप्। निष्पावः धान्यविशेषः। अभिलावः। निरभ्योः किम्। पवः। लवः। 'उन्न्योर्ग्रः' ॥३।३।२९॥ घञ्। नाप्। उद्गारः। अतिप्रवृत्तो ध्वनिशब्दः। निगारो भक्षणम्। उन्न्योः किम्। गरः। 'कॄ धान्ये' ॥३।३।३०॥ कॄ विक्षेपे। अस्मादुन्न्योर्घञ् नाप् धान्यविषये। उत्कारो निकारो वा धान्यस्य। धान्ये किम्। भैक्ष्यस्योत्करः। पुष्पनिकरः। 'यज्ञे समि स्तुवः' ॥३।३।३१॥ घञ्। नाप्। संस्तावः समेत्य स्तुवन्ति छन्दोगा यत्र स देशः। यज्ञे किम्। संस्तवः। परिचयः। 'प्रे स्त्रोऽयज्ञे' ॥३।३।३२॥ घञ्। नाप्। शङ्खप्रस्तारः। अयज्ञे किम्। प्रस्तरः। 'छन्दोनाम्नि च' ॥३।३।३४॥ वौ स्तृणातेर्घञ्

१. यवः PC, Dc3. २. निकरः for पुष्पनिकरः Dc3, PC.

वृत्तनामधेये । विष्टारपङ्क्तिश्छन्दः । 'उदि ग्रहः' ॥३।३।३५॥ घञ् । नाप् ।' उद्ग्राहः । 'समि मुष्टौ' ॥३।३।३६॥ ग्रहेर्घञ् नाप् । अङ्गुलिसंनिवेशविषये संग्राहो मुष्टिः । मुष्टौ किम् । संग्रहो धान्यस्य । 'परिन्योर्नीणोर्द्यूताभ्रेषयोः' ॥३।३।३७॥ परिन्योरुपपदयोः क्रमान्नयतेरिणश्च घञ् नाप् क्रमेण द्यूते उचिते च वाच्ये । परिणायः शारीणाम्[1] । न्यायः । अन्यत्र परिणयो विवाहः । न्ययं गतः पापः । नाशमित्यर्थः । 'परावनुपात्यय इणः' ॥३।३।३८॥ अनुक्रमे वाच्ये घञ् नाञ् । पर्यायः । अनुपात्यये किम् । कालस्य पर्ययः अतिपातः । 'व्युपयोः शेतेः पर्याये' ॥३।३।३९॥ तव राजविशाय उपशायो वा । पर्याये किम् । विशयः । अनुपात्ययानुवृत्त्यैव सिद्धौ पर्यायग्रहः परमिनुणं बाधितुम् । 'हस्तादाने चेरस्तेये' ॥३।३।४०॥ घञ् । नाप् । पुष्पप्रचायः । हस्तादानयोगत्वे किम् । तालफलप्रचयः । अस्तेये किम् । पुष्पप्रचयश्चौर्येण । 'संघे चानौत्तराधर्ये' ॥३।३।४२॥ चेर्घञ् । नाञ् । आदेश्चस्य कः प्राणिस्तोमे वाच्ये अनौत्तराधर्ये सति । वैयाकरणनिकायः । अनौत्तराधर्ये किम् । सूकरनिचयः । स्तनपानेन यदौत्तराधर्यभाविनाशेरते तदेदं प्रत्युदाहरणम् । संघे किम् । प्रमाणसमुच्चयः । 'आक्रोशेऽवन्योर्ग्रहः' ॥३।३।४५॥ घञ् । नाप् । अवग्राहो निग्राहो वृषल ते भूयात् । शपने किम् । अवग्रहः पदस्य । 'प्रे लिप्सायाम्' ॥३।३।४६॥ ग्रहो घञ् लिप्सायाम् । पात्रग्राहेण चरति भिक्षुः । लिप्सायां किम् । प्रग्रहः कृष्णस्य । 'परौ यज्ञे' ॥३।३।४७॥ ग्रहेर्घञ् । परिग्राहः । यज्ञे किम् । परिग्रहः । 'नौ वृ धान्ये' ॥३।३।४८॥ नौ वृङ्वृञ्भ्यां घञ् नाप् । नीवारः । धान्ये किम् । निवार्यते निवरा कन्या । 'उदि श्रयतियौतिपूद्रुवः' ॥३।३।४९॥ घञ् । नाजपौ । उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । वक्ष्यमाणविभाषाग्रहणानुवृत्तेः समुच्छ्रय इत्यपि । 'विभाषाङि रुप्लुवोः' ॥३।३।५०॥

---

१. सारीणां Dc3, PC.

एरच् ॥३।३।५६॥

इवर्णान्तादच् स्यात् भावादौ ॥ घञोपवादः । चयः । जयः ।

ऋदोरप् ॥३।३।५७॥

ऋकारान्तादुवर्णान्ताच्चाप् स्याद्भावादौ ॥ करः । गरः । स्तवः । लवः ।

आङि वा घञ् । पक्षे अप् । आरावः । आरवः । आप्लावः । आप्लवः । 'अवे ग्रहो वर्षप्रतिबन्धे' ॥३।३।५१॥ वा घञ् । नाप् । अवग्राहः । अवग्रहः । वर्षप्रतिबन्धे किम् । अवग्रहः पदस्य । 'प्रे वणिजाम्' ॥३।३।५२॥ वणिक्-संबन्धिनि सूत्रे ग्रहेर्घञ् वा नाप् । वणिक् प्रग्राहवान्यद्वत् काले चरति सिद्धये । अन्यत्र प्रग्रहः । 'रश्मौ च' ॥३।३।५३॥ ग्रहेर्घञ् वा । प्रग्रहः । प्रग्राहः । खलीसूत्रम् । 'वृणोतेराच्छादने' ॥३।३।५४॥ प्रे घञ् वा । प्रवारः । प्रवरः । आच्छादने किम् । प्रवरा[1] गौः । 'परौ भुवोवज्ञाने' ॥३।३।५५॥ वा घञ् । परिभवः । परिभावः । अवज्ञाया किम् । सर्वतो भवनं परिभवः[2] ।

'एरच् ।' चकारः 'थाथघञ्क्ताजबित्रकाणाम्' इत्यत्र 'अच्' इति विशेषणार्थः । अन्यथात्र 'अप्रत्ययात्' इत्यस्यापि ग्रहणं स्यात् । चयः जयः इति । चिञ् चयने । जि जये । भयादीनामुपसंख्यानम् । भयम् । वर्षम् । नपुंसके भावे क्तादिनिवृत्त्यर्थम् । भाष्यप्रयोगात् काम-वर्षणादस्मात् वर्षणमित्यपि स्यात् । कल्पादिभ्यो नेति वाच्यम् । कल्पः । अर्थः । मन्त्रः ।[3]

ऋदो । पकारः 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वार्थः । ऋदोरिति न तकारः । किं तु दकारो मुखसुखार्थः । तेन तादपि तपर इति तत्कालग्रहणं नेत्यभिप्रेत्या ह-उवर्णान्ताच्चेति । कर इत्यादि । कॄ विक्षेपे । गॄ निगरणे । ष्टुञ् स्तुतौ । लूञ् छेदने ।

---

१. प्रवरो गौः PC, Dc3. २. भवः PC, Dc3. ३. After it घञ् PC, Dc3.

इङश्च ॥३।३।२१॥

अस्माद् घञ् स्याद् भावादौ नाच् ॥ अध्यायः । उपे-[1]त्यास्मादधीते उपाध्यायः ।

प्रथने वावशब्दे ॥३।३।३३॥

विपूर्वात् स्तृञो घञ् स्यात् विस्तीर्णार्थे[2] न तु शब्दे ॥ पटस्य विस्तारः । शब्दे तु वाचो विस्तरः ।

घञपोश्च ॥२।४।३८॥

अदेर्घस्लृ स्याद् घञि अपि च ॥

उपसर्गेऽदः ॥३।३।५९॥

अदेः[3] प्रादावप् स्याद्भावादौ ॥ प्रघसः । प्रादौ किम् । घासः ।

इङ । ननु घञ्प्रकरणे एव किमिति न पठितान्येतानि सूत्राणि । अजपोरपवादत्वात् तौ विधाय पठितानीत्यदोषः । इङ् अध्ययने । उपाध्याय इति । अपादाने स्त्रियां च वक्तव्यं तदन्ताच्च वा ङीष् । उपाध्याया । उपाध्यायी । श्रो वायुवर्णनिवृत्तेषु । शॄ हिंसायाम् । शारो वायुर्वर्णश्च । निवृत्तं सीतादिदुःखवारणार्थमावरणम् ।

गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः । अकृतावरण इत्यर्थः ।

प्रथ । स्तृञ् आच्छादने ।

घञ ।

उपसर्गे । घञोपवादः । अन्यत्रापि हलन्तादप् ।

---

१. उपेत्यस्मादधीयते D_2. B_2. २. विस्तीर्णतार्थे D_2, P; N_1. ३. अदः D_1.

समुदोरजः पशुषु ॥३।३।६९॥

समुत्पूर्वादजतेरप् स्याद् भावादौ पशुविषये ॥ अघञपो-रित्युक्तेर्वीभावो न । समजः [1]पशुसङ्घः । उदजः पशुप्रेरणम् । अन्यत्र समाजः । उदाजः । नोदात्तोपदेशेति[2] न वृद्धिः । शमः । [3]आचमादेस्तु । आचामः । [4]कामः । वामः । अमा-देस्तु । आमः । अमः । चामः । चमः । विश्रामो । विश्रमः । विश्रामो[5]पशब्द इति काशिकायाम् । हनस्तोचिण्णलोः । आघातः[6] ।

हनश्च वधः ॥३।३।७६॥

हन्तेरनुपसर्गाद्भावे अप् स्यात् हन्तेर्वधादेशश्च ॥ वधः । घञोपीड्ः[7] । घातः । निमिर्मीलियां खलचोरात्त्वनिषेधः ।

समु । अज गतिक्षेपणयोः । **अन्यत्रेति** । सधर्मिसंघे । **शम** इति । घञ् । **आचाम** इति । चमु अदने । आङ्पूर्वः । कमु कान्तौ । टुवमु उद्गिरणे । **अमादेरिति** । केषांचिन्मतेन वा वृद्धिः । **विश्रामोपशब्द** इति । तथा च **काशिकायां वामनेनो**क्तम् । विश्राम-भूमिरित्येवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते । **आघात** इति । घञ् । 'हो हन्तेः—' इति कुत्वम् ।

हनः । अत्र सूत्रे वधशब्दस्यान्तोदात्तस्योच्चारणादपि कृते 'अतो लोपः' इत्यकारलोपे 'अनुदात्तस्य च यत्रोदात्तलोपः' इत्यु-दात्तनिवृत्तिस्वरेणाप उदात्तत्वम् । **निमिर्मीति** । 'मीनातिमिनोति-दीङां ल्यपि च' 'विभाषा लीयतेः' इति प्राप्तस्यात्वस्य निषेधः ।

---

१. पशुसंघातः D₁. २. °पदेशस्येति D₂. ३. Before it—अनुदात्तो-पदेशेति किम्। रामः। N₁. ४. D₃ drops it. ५. विश्रमोपशब्दः काशिका- D₁. ६. घातम् D₂. ७. घञपीड्ः C. ८. कुः। D₃₃, PC.

निमयः । मयः । विलयः । लयः ।

निमय इति 'एरच्' ।' इतःपरं स्पष्टत्वादुपेक्षितानि अविधायकानि सूत्राणि सप्तविंशतिं व्याख्यामः । 'ग्रहवृदृनिश्चिगमश्च' ॥३।३।५८॥ एभ्योप् । घञचोरपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः । निश्चिग्रहो मध्योदात्तार्थः । वशिरण्योश्च । वशः । रणः । स्थास्नापाव्यधिहनियुधां कः । स च घञर्थैकविधानमिति । प्रतिष्ठन्तेस्मिन् प्रस्थः सानुः । प्रस्नात्यस्मिन् प्रस्नः कटाहः । प्रपिबन्ति तस्यां प्रपा पानीयशाला । आविध्यन्त्यनेनाविधमायुधम् । विहन्त्यस्मिन्निति विघ्नः । आयुध्यतेनेनायुधम् । 'नौ ण च' ॥३।३।६०॥ नौ अदेर्णः अप् च । न्यादः । निघसः । 'व्यधजपोरनुपसर्गे' ॥३।३।६१॥ अप् । व्यधः । जपः । अनुपसर्गे किम् । आव्याधः । उपजापः । 'स्वनहसोर्वा' ॥३।३।६२॥ अनुपसर्गे वाप् । स्वनः । स्वानः । हसः । हासः । उपसर्गे प्रस्वानः प्रहासः । 'यमः समुपनिविषु च' ॥३।३।६३॥ एषु अनुपसर्गाच्च यमो वाप् । संयमः । उपयमः । नियमः । वियमः । यमः । पक्षे घञ् । 'नौ गदनदपठस्वनः' ॥३।३।६४॥ एभ्यो नौ अब्वा निगदः । निनदः । निपठः । निस्वनः । पक्षे घञ् । 'क्वणो वीणाया च' ॥३।३।६५॥ वीणाविषयाच्च निपूर्वाच्चानुपसर्गाच्च क्वणोब् वा । कल्याणप्रक्वणा वीणा । निक्वणः । क्वणः । पक्षे घञ् । एषु किम् । अतिक्वाणो वर्तते । 'नित्यं पणः परिमाणे' ॥३।३।६६॥ अप् । शाकपणः । संव्यवहाराद् द्वित्रादिपरिमिता शाकमुष्टिः । परिमाणे किम् । पाणः । 'मदोनुपसर्गे' ॥३।३।६७॥ विद्यामदः । उपसर्गे उन्मादः । 'प्रमदसंमदौ हर्षे' ॥३।३।६८॥ निपात्यौ । 'अक्षेषु ग्लहः' ॥३।३।७०॥ अक्षसंबन्धे देवने ग्रहेर्ग्लहो नित्यं निपात्यः । अक्षेषु किम् । ग्रहः । यद्वा ग्लहिः प्रकृत्यन्तरम् । ग्लाहः । 'प्रजने सर्तेः' ॥३।३।७१॥ अप् गर्भग्रहणे । गवामुपसरः । 'ह्वः संप्रसारणं च न्यभ्युपविषु' ॥३।३।७२॥ एषु ह्वयतेरप् संप्रसारणं च । निहवः ।

अभिहवः । उपहवः । विहवः । एषु किम् । प्रह्वायः । 'आङि युद्धे' ॥३।३।७३॥ ह्वः संप्रसारणं च । आहवः । युद्धे किम् । आह्वायः । 'निपानमाहावः' ॥३।३।७४॥ जलाधारः आहावः । अन्यथा आह्वायः । 'भावेनुपसर्गस्य' ॥३।३।७५॥ ह्वोप् संप्रसारणं च । हवः । अनुपसर्गस्य किम् । आह्वायः । भावोक्तेः कर्मादौ न । 'मूर्तौ घनः' ॥३।३।७७॥ हन्तेरप् घनादेशश्च काठिन्ये । दधिघनः । काठिन्ये किम् । घातः । कथं घनं दधि । उपचारात् । 'अन्तर्घनो देशे' ॥३।३।७८॥ निपात्यः । णान्त इति केचित् । देशे किम् । अन्तर्घातः । 'अगारैकदेशे प्रघणः प्रघाणश्च' ॥३।३।७९॥ द्वारबाह्यप्रकोष्ठके प्रघणः प्रघाणश्च निपात्यौ । अन्यः प्रघातः । 'उद्घनोत्याधानम्' ॥३।३।८०॥ निपात्यः । निधाय तक्ष्यते यत्र काष्ठैः काष्ठं स उद्घनः । अन्यत्र उद्घातः । 'अपघनोङ्गम्' ॥३।३।८१॥ निपात्यः । अङ्गं किम् । अपघातः । 'करणेयोविद्रुषु' ॥३।३।८२॥ एषु हनोप् करणेर्थे घनादेशश्च । अयो हन्यतेनेन अयोघनः । विघनः । द्रुघनः । द्रुघण इति केचित् । 'पूर्वपदात्—' इति णत्वम् । 'स्तम्बे क च' ॥३।३।८३॥ हनः करणे कः अप् घनादेशश्च । स्तम्बघ्नः । स्तम्बघनः । करणे किम् । स्तम्बघातः । 'परौ घः' ॥३।३।८४॥ हन्तेः करणेप् स्यात् घोन्तादेशः । परिहन्यतेनेनेति परिघः । पलिघोपि । 'उपघ्न आश्रये' ॥३।३।८५॥ निपात्यते । आश्रयेण सामीप्यं लक्ष्यं स्यात् । उपघ्नोन्तिकाश्रये । 'संघोद्घौ गणप्रशंसयोः' ॥३।३।८६॥ निपात्यौ । सङ्घो गणः । उद्घः प्रशस्तः । अन्यत्र संघातः । उद्घातः । 'निघो निमितम्' ॥३।३।८७॥ निपात्यः । समन्तान्मितं निमितम् समोन्नतिविस्तारम् । निघा वृक्षाः । निघातोन्यः ।

१. संह्वायः Dc3, PC. २. देशश्च PC.

कर्मव्यतिहारे णच् स्त्रियाम् ॥३।३।४३॥

क्रियाव्यतिहारे गम्ये धातोर्णच् स्यात् भावादौ स च स्त्रियाम् ॥

णचः स्त्रियामञ् ॥५।४।१४॥

स्त्रियां [1]विहितणजन्तात् स्वार्थेञ् स्यात् ॥ तद्धितत्वा-न्नग्वाभ्यामित्यैचि प्राप्ते

न कर्मव्यतिहारे ॥७।३।६॥

कर्मव्यतिहारेर्थे [2]प्रत्यये परे नैच् स्यात् ॥ आदिवृद्धिः । टिड्ढाणञिति ङीप्[3] । [4]व्यावहासी ।

कर्म । क्रियाव्यतिहारः परस्परकरणम् । चकारो विशेषणार्थः 'णचः स्त्रियामञ्' इति । बाधकविषयेपि क्वचिदिष्यते । व्यावचोरी । व्यावचर्चीति । अत्र चुरादिणिजन्तत्वात् परत्वात् युच् प्राप्नोति । व्यात्युक्षीति । अत्र अकारो बाधकः । क्वचिन्न । व्यतीक्षा । व्यतीहा । 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादिदं वैचित्र्यम् ।

णचः । विहितणजन्तादिति । विहितश्चासौ णच् च विहितणच् । सोन्तो यस्य विहितणजन्तः । तस्मात् । कर्मव्यतिहारे णच् स्त्रियाम् इति विहितणजन्तात् स्वार्थेञ् स्त्रियां स्यादित्यर्थः । स्त्रियामेव हि णच् विहितः । किं पुनः स्त्रियामित्यनेन । एवं तर्ह्येतत् ज्ञाप्यते स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते इति । तेन देव एव देवता त्रय एव लोकास्त्रैलोक्यमित्येवमादि सिध्यति । अञ् च सगति-कारकपूर्वात् स्यात् ।

न कर्म । आदिवृद्धिरिति । 'तद्धितेष्वचामादेः' इति ।

---

१. विहिताण्णञ॰ P., C. २. ञिति णिति तद्धिते परे नैच् स्यात् D_1. ३. ङीष् D_4. ४. Before it—व्यावक्रोशी C.

अभिविधौ भाव इनुण् ॥३।३।४४॥

अभिव्याप्तौ गम्यायां भावे इनुण् स्यात् ॥

अणिनुणः ॥५।४।१५॥

इनुणन्तात् स्वार्थेण् स्यात् ॥ आदिवृद्धिः । इनण्यनपत्ये । सांराविणं वर्तते ।

उपसर्गात् खल्घञोः ॥७।१।६७॥

उपसर्गाल्लभेर्नुम् स्यात् खलि घञि च ॥ प्रलम्भः ।

न सुदुर्भ्यां केवलाभ्याम् ॥७।१।६८॥

सुदुर्भ्यां परस्य लभेर्नुम् न स्यात् ॥ सुलाभः । दुर्लभः । केवलाभ्यां किम् । सुप्रलम्भः । अतिदुर्लम्भः ।

स्फुरतिस्फुलत्योर्घञि ॥६।१।४७॥

अनयोरेच आत्वं स्याद् घञि ॥ स्फारः । स्फालः ।

अभि । क्रियागुणाभ्यां कार्त्स्न्येन संबन्धोभिव्याप्तिः । भाव इति स्थिते पुनर्भावग्रहणं वासरूपनिरासार्थम् । तेन घञा क्तेन च समावेशो न । ल्युटा त्वस्ति । बहुलग्रहणात् । 'इनण्यनपत्ये' इति प्रकृतिभावात् 'नस्तद्धिते' इति टिलोपो न ।

उप । 'लभेश्च' इत्येव सिद्धे वचनं नियमार्थम् । उपसर्गादेव लभेर्नुम् खल्घञोरिति ।

स्फुर । स्फुर स्फुल चलने ।

---

१. Before it—केवलाभ्याम् N.

निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥३।३।४१॥

एष्वर्थेषु चिनोतेर्घञ् स्यान्नाच् आदेश्च कः ॥ निवासो निकायः । चितौ । आकायोऽग्निः । कायः शरीरम् । राशीकरणे । गोमयनिकायः ॥

घञि च भावकरणयोः ॥६।४।२७॥

भावेऽर्थे[2] करणार्थे च घञि रञ्जेर्नस्य लोपः स्यात् ॥ रागः । अनयोः किम् । रजत्यस्मिन्निति[3] रङ्गः[4] ॥

स्यदो जीवे ॥६।४।२८॥

निपातो[5] वेगे । स्यदः । अन्यत्र स्यन्दः ।

अवोदैधौद्मप्रश्रथहिमश्रथाः ॥६।४।२९॥

एते निपात्यन्ते ॥ अवोदः अवक्लेदनम् । एधः इन्धनम् ।

निवास । निवासादीनर्थान् व्याकुर्वन्नुदाहरति— **निवासो निकाय** इत्यादि ।

घञि च । रञ्ज रागे । **राग** इत्यादि । रञ्जनं रागः रज्यतेनेन वा । घञ् । 'चजोः—' इति कुः ।

स्यदः । स्यन्दतेर्नलोपो वृद्ध्यभावो निपात्यते । अनिग्लक्षणाया वृद्धेः 'न धातुलोप आर्धधातुके' इति निषेधो नास्ति यतः ।

अवोदै । **अवोद** इति । उन्देरवपूर्वस्य घञि नलोपो निपात्यते । अवक्लेदनमिति । किंचिदार्द्रत्वमित्यर्थः । अत्र सर्वत्र

---

१. D_2 drops स्यान्नाच्. २. भावार्थे N. ३. इति dropped P, N. ४. After it—पात्रम् B_2, D_4. ५. निपातोयं जवे D_1 ; निपातोयं वेगे P, B_2, N.

ओद्मः उन्दनम् । प्रश्रथः । हिमश्रथः ।

ड्वितः क्त्रिः ॥३।३।८८॥

डु इत् यस्य ततो धातोर्भावादौ क्त्रिः स्यात् ॥

क्त्रेर्मम्नित्यम् ॥४।४।२०॥

क्त्रिप्रत्ययान्तात् नित्यं मप् स्यान्निर्वृत्तेऽर्थे ॥ करणेन निर्वृत्तं कृत्रिमम् । पक्त्रिमम् ।

ट्वितोऽथुच् ॥३।३।८९॥

टु इत् यस्य ततो धातोर् अथुच् स्याद् भावादौ ॥ वेपथुः । श्वयथुः ।

घञि नलोपो निपात्यते । एध इति । इन्धेर्गुणश्च । अन्यथा न धातुलोप इति निषेधः स्यात् । **ओद्म** इति । उन्दतेर्गुणश्च । **प्रश्रथः** । **हिमश्रथः** । श्रन्थेर्वृद्ध्यभावश्च ।

ड्वितः । स्वभावतो भाव एव क्त्रिः । कौ गुणनिषेधार्थः ।

क्त्रेर्मम् । त्रिशब्देनात्र संख्या न गृह्यते अनभिधानात् । किंतु 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययो गृह्यत इत्याह— **क्त्रिप्रत्यया-न्तादिति** । अयं च तद्धितः । भावप्रत्ययान्तान्निर्वृत्तेऽर्थे इमनिच् वाच्यः । पाकिमम् । रागिमम् । **कृत्रिममिति** । डुकृञ् करणे । **पक्त्रिममिति** । डुपचष् पाके ।

ट्वितः । भावादावित्यस्यानुवृत्तिसिद्ध्यर्थमुक्तम् । अथुच् भाव एव स्वभावतो भवति । घञजपामपवादश्च । वासरूपन्यायेनापि घञ् न । अनभिधानात् । **वेपथुः** । टुवेपृ कम्पने । **श्वयथुः** । टुओश्वि गतिवृद्ध्योः । चकारोऽन्तोदात्तार्थः ।

यजयाचयतविच्छप्रच्छरक्षो नङ् ॥३।३।९०॥

एभ्यो नङ् स्याद्भावादौ ॥ चुत्वम् । यज्ञः । याच्ञा । यत्नः । च्छ्वोः शूठ् । विश्नः । प्रश्ने[1] चासन्नेति ज्ञापकान्न संप्रसारणम् । प्रश्नः । रक्ष्णः ।

स्वपो नन् ॥३।३।९१॥

स्वपो भावादौ नन् स्यात् ॥ स्वप्नः ।

उपसर्गे घोः किः ॥३।३।९२॥

प्रादावुपपदे घुसंज्ञकात् किः[2] स्याद्भावादौ ॥ आतो लोपः[3] । अन्तर्धिः । आदिः । आधिः ।

कर्मण्यधिकरणे च ॥३।३।९३॥

कर्मण्युपपदे अधिकरणेर्थे घोः किः स्यात् ॥ उदकं धीयतेस्मिन्[4]नित्युदधिः । पयोनिधिः ।

यज । वासरूपविधिश्च यथाभिधानं स्यात् । ङकारो विच्छेस्तुगभावपक्षे गुणनिषेधार्थः । तथा हि । **पाणिनीयमतदर्पण-कारः** । ' तुगागमे सत्यलघूपधत्वाद्गुणो न दृष्टः स्वत एव विछः । विज्ञायते ङित्करणेन[5] तस्मादनित्यता त्वागमशासनस्य ' इति ।

स्वपः । नकारः ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तार्थः ।

उप । घञोपवादः । कित्करणमालोपार्थम् ।

कर्मणि । अधिकरणग्रहणमर्थान्तरनिरासार्थम् चकारः प्रत्यया-नुकर्षणार्थः । **उदधिरिति** । ' पेषं वासवाहनधिषु च ' इत्युदक-स्योदादेशः ।

---

१. प्रश्न D_3. २. भावादौ किः स्यात् D_1; किः B_2. ३. आतो लोप इति च C. ४. निधीयते D_2. ५. °त्करणे Dc_1. ६. अपि Dc_3.

स्त्रियां क्तिन् ॥३।३।९४॥

धातोर्भावादौ क्तिन् स्यात्[1] तदन्तश्च[2] स्त्रीलिङ्गः ॥ कृतिः । बुद्धिः । स्मृतिः[3] । ह्लाद इति योगविभागात् क्तिनि ह्रस्वः । प्रह्लत्तिः । ति च । चूर्तिः । फुल्लिः । चायतेः क्तिनि नित्यं चिभावः । अपचितिः । कण्डूयतेः क्तिन् । अतो लोपः । तस्य[4] च लोपे

स्त्रियाम् । घञजपामपवादः । ह्लाद इतीति । 'ह्लादो निष्ठायाम्' इत्यत्र ह्लाद इति योगविभागः । **ति चेति** । चरफलोरत उत्वादौ । **चायतेरिति** । चायृ पूजानिशामनयोरिति । **कण्डूयतेरिति** । 'कण्ड्वादिभ्यो यक् ।' तस्मात् क्तिन् स्यादिति वाच्यम् । एतच्च 'क्तिन्नाबादिभ्यश्च' इति वार्तिकात् सिद्धम् । अन्यथा 'अ प्रत्ययात्' इत्यः स्यात् । अथवा प्रत्ययान्तादपि क्तिन् स्यादिति 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति वर्तीति ण्यन्तात् क्तिनमुत्पाद्य निर्देशः कृतः सूत्रकारेण । ततो ज्ञायते । तथा च **काशिकायां** 'न पदान्त—' इति सूत्रे उक्तम् । 'कण्डूयतेः क्तिनि कृते' इति । **न्यासकारेण** च तत्रैवोक्तम् । 'कण्डूतिरिति । कण्ड्वादिभ्यो यक् । तदन्तात् स्त्रियां क्तिन्' इति । **पदमञ्जरीकारेण** चैवमुक्तम् क्तिनि कृते इति । क्तिन्नाबादिभ्यो वक्तव्य इत्यनेनेति भावः । क्तिचिति तु युक्तः पाठ इति । **भाष्यकारस्य** त्वयमभिप्रायः । कण्डूतिरिति क्तिजयं न क्तिन् । तथा च 'न पदान्त—' सूत्रे उक्तवान् । इदं तर्हि कण्डूतिरिति । नैतदस्ति प्रयोजनम् । कण्डूया[5] वल्गुया इति भवितव्यम्[6] । इदं तर्हि । कण्डूयतेः क्तिच् । ब्राह्मणकण्डूतिरिति । **अतो लोप** इत्यादि ।

---

१. Dropped in D2. २. Dropped in C. ३. स्थितिः D1. ४. यस्य N, D1. ५. कण्डूति वल्गूतिरिति Dc3. ६. भविष्यति Dc3.

कर्तव्ये स्थानिवत्त्वाभावात् यलोपः ।[1] कण्डूतिः । शान्तिः । दान्तिः । तितुत्रेति नेट् । दीप्तिः । तितुत्रतीण्णिषेधोग्रहादीनामिति वाच्यम्[2] ॥* नेह[3] । निगृहीतिः[4] । निकुचितिः । निपठितिः । उपस्निहितिः[5] ।

ग्लाज्याहात्वरिभ्यो निः[6] ॥ ग्लानिः[7] । ज्यानिः । हानि । 'ज्वरत्वर–'[8] इति । तूर्णिः । ॠल्वादिभ्यः क्तिन् निष्ठावत् ज्ञेयः ॥

कण्डूय् ति इति स्थिते अलोपस्य 'लोपो व्योर्वलि' इति यलोपं प्रति 'अचः परस्मिन् पूर्वविधौ' इति स्थानिवत्त्वे प्राप्ते 'न पदान्त—' इति सूत्रेण यलोपविधिं प्रति स्थानिवत्त्वनिषेधात् यलोपः स्यादित्यर्थः । शान्तिः । दान्तिरिति । 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घः । दीप्तिरिति । ननु चात्र 'गुरोश्च हलः' इत्यप्रत्ययो बाधकः । न । तत्र 'निष्ठायां सेटः' इत्युक्तेः । निगृहीतिरिति । 'ग्रहिज्या ।' 'ग्रहो लिटिदीर्घः ।' ज्वरत्वरेति । अनेनोपधावकारयोरूट्[9] । अत्रानुनासिके इत्यनुवर्तते । यदि क्वौ झलादौ च क्ङिति इत्येवानुवर्तते नानुनासिक इति तर्ह्ययं निप्रत्ययः क्तिन्नर्थे औणादिक एव वार्तिकेनानूदित इति 'उणादयो बहुलम्' इति बहुलादूडिति ज्ञेयम् । ॠल्वेति । ॠकारान्तेभ्यो ल्वादिभ्यश्च ।

---

१. After it—स्यात् D2. २. वक्तव्यम् N. ३. तेन नेह । D4. ४. विगृहीतिः N. ५. C drops it. ६. म्लाग्ला° D2; ग्लाम्लाहाज्या-त्वरिभ्यो B2, D4. ७. Before it—म्लानिः D2. D4, B2. ८. त्वर for 'ज्वरत्वर–' इति N. ९. इत्यूट् D2, D4, B2.

कीर्णिः । शीर्णिः । लूनिः । धूनिः ॥ संपदादेः क्विब् वा । संपत् । विपत् । पक्षे संपत्तिः । आकृतिगणोऽयम् ॥

ऊतियूतिजूतिसातिहेतिकीर्तयश्च ॥३।३।९७॥

एते निपात्याः । अव । ऊतिः । यु । यूतिः । जु । जूतिः । षो षिञ् वा । सातिः । हि हन् वा । हेतिः । कॄत् । कीर्तिः ।

कीर्णिरिति । कॄ विक्षेपे । 'ऋत इत्' । रपरः । 'उपधायां च' इति दीर्घः । निष्ठावत्त्वात् 'रदाभ्याम्—' इति तस्य नः । णत्वम् । स्पष्टत्वात् त्यक्तम्—'स्थागापापचो भावे' ॥३।३।९५॥ स्थादिभ्यः 'आतश्चोपसर्गे' इति पचेः 'षिद्भिदादिभ्योऽङ्' इति प्राप्तस्याङोऽपवादः क्तिन् विधीयते स्त्रियाम् । स्थितिः । गीतिः । पीतिः । पक्तिः । 'व्यवस्थायामसंज्ञायाम्' इति ज्ञापकात् संस्थेत्यादि स्थितम् ।

ऊतीति । उदात्त इत्यनुवृत्तेरन्तोदात्ता एते । अवतेः स्वरार्थं निपातनम् । ज्वरत्वरेत्यूठश्च क्तिनि सिद्धत्वात् । युजुवोर्दीर्घत्वोदात्तार्थम् । षो षिञ् वेति । षोऽन्तकर्मणि इति 'द्यतिस्यति—' इतीत्वे प्राप्ते तन्निषेधार्थं षिञ् बन्धने इत्यस्य वात्वान्तोदात्तार्थम् । वृत्तिकारादिमते तु षणु दाने इत्यस्य 'जनसनखनाम्' इत्यात्वसिद्धौ अन्तोदात्तार्थं न षिञः । तथामरसिंहेऽपि 'सातिर्दानावसानयोः' इति । हि हन्वेति । हि गतावित्यस्य गुणार्थं हन एत्वार्थं वा । कॄत संशब्दने । 'उपधायां च' इतीत्वम् । 'ण्यासश्रन्थ—' इति युचि प्राप्ते तद्बाधार्थम् । कालापकास्तु युचमपीच्छन्ति कीर्तनेति ।

---

१. Dropped D_1. २. संपद्वादौ D_2, B_2. ३. वा dropped N. ४. After it—प्रतिपत् P, N. ५. After it—इत्यादि N. ६. जूतियूति° C. ७. षण् D_4. ८. स्थितेः Dc_3. ९. क्तिनः Dc_1.

व्रजयजोर्भावे क्यप् ॥३।३।९८॥

आभ्यां भावे क्यप् स्यात् स्त्रियाम् ॥ व्रज्या । इज्या । क्त्यधिकारत्वान्न वासरूपविधिना पक्षे क्तिन् । भावे किम् । कर्मादौ न ।

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥३।३।९९॥

एभ्यः क्यप् स्यात् संज्ञायां स्त्रियाम् ॥ अजेः क्यपि वीभावो नेति वाच्यम् । समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । अयङ् यि क्ङिति । शय्या । भृत्या । इत्या ।

व्रज । उदात्त इत्येव । पित्करणमुत्तरार्थम्[3] । **इज्येति** । 'वचिस्वपि—' इति संप्रसारणम् ।

संज्ञायाम् । अनन्तरभावग्रहणं न स्वर्यते तेन भावादावर्थ उदात्त इत्येव । **समज्या** सभा । **निषद्येति** । निषीदन्ति तस्यां निषद्या आपणः । निपतन्ति तस्यां **निपत्या** पिच्छिला[4] भूमिः । मन्यतेनया **मन्या** गलपार्श्वशिरा । विवदन्त्यनया तत्त्वमिति **विद्या** । सूयतेस्यां सोम इति **सुत्या** । शय्यते तस्यां **शय्या** । शिविका । खट्वा । भरणं **भृत्या** । अयनमित्या एति तयेति वा । संज्ञायां किम् । संवीतिः । निषत्तिः । निपत्तिरित्यादि । अथ कथं भृतिः मतिः आसुतिः । कर्मणि भृतौ इति मतिबुद्धीति आसुति परिषदः इति निपातनात् । 'अकर्तरि—' इत्यतः संज्ञायामित्यनुवर्तमाने पुनः संज्ञाग्रहणं संज्ञायामेवेत्येवमर्थम् । तत्र तु कारक एव संज्ञायां प्रत्ययः ।

---

१. C drops it. २. Before it—समजन्ति तस्याम् D_1, P, N; समजन्त्यस्यां B_2. ३. °मुत्तरत्र तुगर्थम् PC., Dc_3. ४. पिच्छला PC., Dc_3.

कृञः श च ॥३।३।१००॥

कृञो भावादौ शः स्यात् क्यप् च स्त्रियाम् । शित्त्वाद्भावे यक् । रिङादेशः । क्रिया । कृत्या । योगविभागात् क्तिन्नपि । कृतिः ।

इच्छा ॥३।३।१०१॥

इषेः शे निपातोयम् ॥ परिचर्या । परिसर्या । मृगया । अटाट्यादयश्च । जागर्तेरकारो वा । जागर्या । जागरा । आस्या । चर्या । इति केचित् ।

कृञः । योगविभागादिति । कृञः क्यप् स्यात् । ततः शाच । चकाराद् यथाप्राप्तमिति । क्तिन्नपीत्यर्थः ।

इच्छा । यगभावो निपात्यते । परिचर्येत्यादि । चर गतौ । सृ गतौ । मृग अन्वेषणे । अट गतौ । एभ्यो भावे शः । यक् । सर्तेर्गुणः । मृगयतेर्णेरियादेशः । अटतेर्द्वित्वमात्वं चाकारस्य । जागर्येति । 'जाग्रः—' इति गुणः । आस्येति । आस उपवेशने । तथा चामरसिंहे 'स्यादास्या चासना स्थितिः' । तथा 'चर्या त्वीर्यापथे-स्थितिः' इति । तथाह काशिकाकारः । कथमास्येति । 'ऋहलोर्ण्यत्' इति ण्यन्ताद् भविष्यति । वासरूपनिषेधश्च स्त्रीप्रकरणविषयस्यापवादा-य' इति ।

---

१. शः स्याद्भावादौ C. २. D₂ drops it. ३. इत्यादि N. ४. °प्राप्तं चेति P, Dc3. ५. °वादस्य PC, Dc3.

अः प्रत्ययात् ॥३।३।१०२॥

प्रत्ययान्ताद्धातोर्भावादौ स्त्रियामः स्यान्न क्तिन् ॥ चिकीर्षा । अटाटा ।[1] लोलूया । कण्डूया । कण्डूतिरपि ।

गुरोश्च हलः ॥३।३।१०३॥

हलन्ताद्गुरुमतः[2] अः स्याद्भावादौ स्त्रियां न क्तिन् ॥ ईहा । ऊहा । गुरोः किम् । भक्तिः । हलः किम् । नीतिः ॥ निष्ठायां सेट इति वाच्यम् ॥* तेनेह न । आप्तिः । राद्धिः । प्रशस्तिः । प्रशंसेत्यपि ।

षिद्भिदादिभ्योऽङ् ॥३।३।१०४॥

षितो भिदादेश्चाङ् स्यात् स्त्रियां भावादौ ॥ जॄष् । ऋदृशोऽङि गुणः । जरा । त्रपा । क्षमूष् । क्षमा । क्षम इत्यस्य

अप्र । चिकीर्षेति । सन्नन्तात् प्रत्ययः । अटाटेति । यङ् । द्वित्वम् । 'यस्य हलः' इति यलोपः । कण्डूयेति । 'कण्ड्वादिभ्यो यक् ।' कण्डूतिरपीति । आबादित्वादित्यर्थः ।

गुरोः । ईहा । ऊहेति । ईह चेष्टायाम् । ऊह वितर्के । प्रशंसेत्यपीति । 'प्रशंसायां रूपप्' इति निपातनात् ।

षिद्भि । भूषेत्यादिशब्देन क्षिपा । कुटा । वपा । वसा

---

१. After it—यस्य हल इति यलोपः D₂, D₄. २. After it— धातोः D

३. After it—धातोः C.

क्षान्तिः । भिदा । छिदा । क्षिपा[1] । गुहा । मेधा ।[2] गोधा । कारा । हारा ।[3] तारा[4] । धारा । लेखा[5] । कृपा । पीडा । भूषा ।[6] इत्यादि ।

चिन्तिपूजिकथिकुम्बिचर्चश्च ॥३।३।१०५॥

एभ्योऽङ् स्याद्भावादौ स्त्रियाम् ॥ वक्ष्यमाणयुचोपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा ।

आतश्चोपसर्गे ॥३।३।१०६॥

प्रादावुपपदे आदन्तेभ्योऽङ् स्यात् स्त्रियां भावादौ न क्तिन्[7] ॥ उपदा । श्रद्धा । अन्तर्धा ।

ण्यासश्रन्थो युच् ॥३।३।१०७॥

ण्यन्तादास्‌श्रन्थिभ्यां च[8] युच् स्यात् स्त्रियां भावादौ ॥ कारणा । आसना । श्रन्थना ॥ घट्टिवन्दिविदिभ्यश्च ॥*

मृत्सा । आरा । भिदा । छिदा । विदारणे । अन्या भित्तिः । छित्तिः । आरा शस्त्र्याम् । आर्तिरन्या । धारा प्रपाते । धृतिरन्या । गुहा गिर्योषध्योः । अन्या गूढिः ।

चिन्ति । चिति स्मृत्याम् । पूज पूजायाम् । कथ वाक्यप्रबन्धे । कुबि च्छादने । चर्च अध्ययने । चुरादयः ।

आतः । **श्रद्धा** । **अन्तर्धेति** । अदन्तरोरुपसर्गवद्वृत्तिर्वाच्या ।

ण्यास । 'अप्रत्ययात्' इत्यस्यापवादोयम् । **कारणेति** । हेतुमण्णिच् । **श्रन्थनेति** । श्रन्थ मोचनप्रतिहर्षयोरिति क्र्यादिः ।

---

१. विदा । क्षिपा B₂. २. गोधा dropped B1, D1, D2, D3, D4. ३. Dropped P, N. ४. Dropped D2, N; आरा D4. ५. After it—रेखा P, D1. ६. After it—रेखा । आरा । इत्यादि B2; भिदादिराकृतिगणः । इत्यादि N. ७. C and D2, B2 drop it. ८. Dropped N, D4.

घट्टना । वन्दना । वेदना ॥ इषेरनिच्छार्थात् ॥* अन्वेषणा । परेर्वा ॥* पर्येषणा । परीष्टिः । एषणा ग्रन्थनेत्यपि केचित् ॥

रोगाख्यायां ण्वुल् बहुलम् ॥३।३।१०८॥

धातोर्ण्वुल् स्यात् स्त्रियां भावादौ रोगाख्यायाम् ॥ प्रच्छर्दिका । विचर्चिका । बहुलोक्तेः शिरोर्तिः । धात्वर्थनिर्देशे ण्वुल् वाच्यः । आसिका । शायिका ॥ इक्श्तिपौ धातुनिर्देशे ॥* पचिः । नन्दिः । आदिः । भवतिः । अत्तिः ।[4] जुहोतिः । दीव्यतिः ॥ वर्णनिर्देशे वर्णात्कारः ॥* अकारः । ककारः ॥ रादिफः ॥* रेफः । मत्वर्थाच्छो भत्वं च ॥* मत्वर्थीयः । इञजादिभ्यः ॥* आजिः । आतिः ।[8] इक् कृष्यादिभ्यः ॥* कृषिः । गिरिः । किरिः ।

घट्टीति । घट्ट चलने इति भ्वादिः । चुरादेर्ण्यन्तत्वादेव सिद्धेः । **इषेरनिच्छार्थादिति** । गत्याभीक्ष्ण्यार्थकात् ।

रोगा । क्तिन् युजादीनामपवादः । **इक्श्तिपौ** । धातुनिर्देशो धातुत्वकरणम् । बहुलात् क्वचिन्न 'गुप्तिज्किद्भ्यः सन्' इति । शकारः सार्वधातुकार्थः । शित्करणसामर्थ्यादकर्त्रर्थत्वेपि शबादिः । **वर्णेति** । कथमेवकारः । वर्णसमुदायो ह्ययम् करणं कारः । एवस्य कारः एवकार इति । बहुलात् 'अस्य च्वौ' इत्यादौ कारो न । **रादिफः** । कारस्यापवाद इफः । कथं रकारादीनि नामानि । वासरूपविधेः कारोपि स्यात् । कृदधिकारविधिसामर्थ्यादेव धातुविहितानामपि कृत्त्वात् प्रातिपदिकत्वम् । इण्वपादेरिति वक्तव्यम् ।

---

१. ईषणा C; इषणा D3. २. D1 drops it. ३. अर्त्तिः P. ४. Dropped N1. ५. Before it—भसंज्ञा D2. B2 : भत्वं भसंज्ञा D ६. °दिभ्यश्च B2. ७. आदिः N. ८. After it—आत्तिः B2. D4. ९. °कत्वार्थ PC.

विभाषाख्यानपरिप्रश्नयोरिञ् च ॥३।३।११०॥

परिप्रश्ने आख्याने च गम्ये धातोरिञ् स्यात् स्त्रियां भावादौ चात् ण्वुल् ॥ वोक्तेर्[1]यथास्वमन्येपि । कां त्वं कारिं कारिकां क्रियां कृत्यां कृतिं वा अकार्षीः । सर्वां कारिं कारिकां क्रियां कृत्यां कृतिमकार्षम् । एवं गणिं गणिकां गणनामित्यादि ।

आक्रोशे नञ्यनिः ॥३।३।११२॥

नञि उपपदे धातोरनिः स्यादाक्रोशे स्त्रियां भावादौ न क्तिन्नादि[2] । अजीवनिस्ते शठ भूयात् ।[3] अप्रयाणिः ।

वापिः । वासिः । 'संज्ञायाम्' ॥३।३।१०९॥ इति स्पष्टत्वादुपेक्षितम्[4] । धातोर्ण्वुल् संज्ञायाम् । उद्दालकपुष्पभञ्जिका ।[5]

विभाषा । सूत्रे आख्यानस्याल्पाच्तरत्वात् पूर्वनिपातः । **कारिमिति** । इञ् । **कारिकामिति** । ण्वुल् । 'प्रत्ययस्थात्—' इतीत्वम् । **क्रियामिति** । शः । **कृत्यामिति** । क्यप् । **कृतिमिति** । क्तिन् । **गणिमिति** । गण संख्याने ।[6] पर्यायार्हर्णोत्पत्तिषु ण्वुच् ॥३।३।१११॥ एतदप्युपेक्षितम् । क्रमे अर्हे ऋणे उत्पत्तौ च धातोर्ण्वुच् । क्तिन्नादीनामपवादः । क्रमे । भवत आसिका । अर्हे । अर्हति भवानिक्षुभक्षिकाम् । ऋणे । इक्षुभक्षिकां मे धारयसि । उत्पत्तौ । इक्षुभक्षिकोत्पन्ना । वेल्येव । चिकीर्षोत्पद्यते । ण्वुलि सति प्रत्ययात् पूर्व उदात्तः स्यादित्यन्तोदात्तार्थं ण्वुच् ।

आक्रोशे । आक्रोशे किम् । अकृतिः कटस्य । नञीति किम् । मृतिस्ते वृषल भूयात् ।

---

१. वोक्तेर्ज्ञायते यथास्वं D_1. २. 'न्नादिः D_4. ३. अप्राणनिः C; after it—अहरणिस्ते भूयात् B_2, D_4. ४. स्पष्टत्वादुपेक्षितं 'संज्ञायाम्' इति Dc_3. ५. After it शालभञ्जिका PC, Dc_3. ६. स्पष्टत्वात् न्त्यक्तम् 'प°' Dc_3.

ल्युट् च ॥३।३।११५॥

धातोर्ल्युट् स्याद्भावे तदन्तश्च [1]नपुंसकः ॥ [2]ज्ञानम् । मानम् । प्रमाणम् । [3]प्रयापणम् । [4]प्रयापनम् । [5]प्रकोपणम् । प्रकोपनम् । प्रेपणम् । [6]प्रणिंसनम् । प्रनिंसनम् । [7]प्रपवनम् ।

ल्युट् च । 'युवोरनाकौ' । **प्रमाणमिति** । 'कृत्यचः' इति णत्वम् । **[8]प्रयापणमिति** । 'णेर्विभाषा' इति वा णत्वम् । **प्रकोपणमिति** । 'हलश्चेजुपधात्' इति वा णः । **प्रणिंसनमिति** । 'वा निंसनिक्षनिन्दाम्' इति णः । **प्रपवनमिति** । 'न भाभूपूकमि—' इति णत्वनिषेधः । स्पष्टत्वात् त्यक्तम् 'कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् ।' ॥३।३।११६॥ येन कर्मणा स्पृष्टस्य कर्तुः शरीरसुखं स्यात् तदुपपदाद्धातोर्ल्युट् स्यान्नपुंसके भावे । नित्यसमासाय सूत्रम् । पयःपानं सुखम् । कर्मणि किम् । तूलिकाया उत्थानं सुखम् । संस्पर्शात् किम् । अग्निकुण्डस्योपासनं सुखम् । कर्तुः किम् । गुरोः स्नापनं सुखम् । शरीरस्य किम् । पुत्रस्य परिष्वञ्जनं सुखम् । मानसं सुखमत्र । ननु सुखं शरीरव्यतिरिक्तस्यात्मनो धर्मः । सत्यम् । यस्मिन् सुखे उत्पन्ने शरीरेऽपि स्वास्थ्यं स्यात् तच्छरीरसुखम् । पुत्रपरिष्वङ्गे तु गाढे शरीरतोद एव स्यात् न स्वास्थ्यमतो मनःस्वास्थ्यमेव । अत्र प्रत्युदाहरणं सर्वत्रासमासस्य ।

१. नपुंसके D_2, P, N, D_4. २. प्रज्ञानम् N. ३. प्रयापनम् । प्रयापणम्; Before it—प्रगापनम् D_4, N. ४. Dropped D_4. ५. प्रकोपनम् । प्रकोपणम् । D_4. ६. D_1 drops it—प्रेषणम् N. ७. प्रतपनम् D_1; Dropped D_4. ८. प्रयापनमिति Pc. Dc 3.

करणाधिकरणयोश्च ॥३।३।११७॥

करणेधिकरणे च[1] धातोर्ल्युट् स्यात् ॥ इध्मव्रश्चनः । रजनः । गोदोहनी स्थाली । शयनी ।

वा यौ ॥२।४।५७॥

ल्युटि परे अजेर्वीभावो वा स्यात् ॥ प्रवयणम् । प्राजनम् । दरिद्राणम् ॥ मिहपतदशेति न्लोपिनो निर्देशात् अकित्यपि न्लोपः । दशनः । ष्ठिवुषिवोर्ल्युट्युपधादीर्घो वा ॥[2] ष्ठीवनम् । सीवनम् । पक्षे । ष्ठेवनम् । सेवनम् । कुटादित्वान्न गुणः । स्फुरणम् । स्फुलनम् ॥ कृत्यल्युटो बहुलम् ॥ राजभोजनाः शालयः । राजाच्छादनं वासः ।

करण । **इध्मव्रश्चन** इति । इध्मानां व्रश्चन इति षष्ठीसमासः । **रजन** इति । असि अके अने घिनुणि च रञ्जेर्नलोपो वाच्य इति लोपः । **गोदोहनीति** । गौर्दुह्यतेस्याम् । 'टिड्ढाणञ्—' इति ङीप् ।

वा यौ । **प्रवयणम्** । 'कृत्यचः' इति णत्वम् । **दरिद्राणमिति** । दरिद्रा दुर्गतौ । दरिद्रातेरालोपो वाच्यः । सनिण्वुलि ल्युटि च नेति निषेधादालोपाभावः । **मिहपतदशेति** । 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' इति सूत्रे न्लोपिनो निर्देशात् दंशेरकित्यपि न्लोप इत्यर्थः । **ष्ठिवुषिवोरिति** । ष्ठिवु निरसने । षिवु तन्तुसन्ताने । **स्फुरणम्** । **स्फुलनमिति** । स्फुरस्फुल चलने । **कृत्येति** । पूर्वमेव व्याख्यातम् । **राजभोजनाः** । भुज्यन्त इति भोजनाः । राज्ञो भोजनाः ।

---

१. D_1 drops च ; चार्थे P, N_1. २. ल्युटि उपधाया वा दीर्घः C ; ल्युट्युपधाया दीर्घो वा D_2.

पुंसि संज्ञायां घः प्रायेण ॥३।३।११८॥

पुंलिङ्गे करणेऽधिकरणे चार्थे धातोर्घः केचित्[1] संज्ञायाम् ॥ णिलोपः ।

छादेर्घेऽद्व्युपसर्गस्य ॥६।४।९६॥

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद् घे परे ॥ उरश्छदः । प्रच्छदः । अद्वीति किम् । [2]समुपच्छादः ।[3] आकुर्वन्त्यस्मिन्नित्याकरः ।[4]

गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥३।३।११९॥

एते निपात्याः[5] । गावश्चरन्त्यत्र गोचरः ।[6] संचरन्ति तेन संचरः । इत्यादि ।

पुंसि किम् । प्रसाधनम् । संज्ञायां किम् । प्रहरणो दण्डः । घकारश्छादेर्घ इति विशेषणार्थः ।

छादेः । 'उपधायाः' इति वर्तते । उरश्छद इति । उरश्छाद्यतेऽनेन सः ।

गोचर । पूर्वेण सिद्धे 'हलश्च' इति वक्ष्यमाणस्य घञोऽपवादार्थम् । आदिशब्दात् वहन्त्यनेन वहः । व्रजन्त्यनेन व्रजः । व्यजन्त्यनेन व्यजः । एत्य एतस्मिन् पणायन्तीत्यापणः । निगच्छन्ति तस्मिन्निति निगमः । चकारात् कषः निकषः ।

---

१. क्वचित् स्यात् D_2. २. Before it—समुपच्छायः । N. ३. After it—समुपातिच्छादः । पुंसीतिकिम् । प्रसाधनम् । संज्ञायां किम् । प्रवपणो दण्डः । D_2; समुच्छादः । पुंसि किम् । प्रसाधनम् । संज्ञायां किम् । प्रवपणं तोरनम् B_2; P. has समुपातिच्छादः only. ४. After it—कुर्वन्त्यनेन करः । लीयन्तेऽस्मिन्निति लयः । शृणन्त्यनेनेति शरः । B_2, D_4. ५. निपात्यन्ते D_1. ६. संचरन्त्यनेन संचरः B_2, N_1.

अवे तॄस्त्रोर्घञ् ॥३।३।१२०॥

अवतारः । अवस्तारः ।

खनो घ च ॥३।३।१२५॥

अस्मात् घः स्याच्चात् घञ् । करणाधिकरणयोः पुंसि ॥ आखनः । आखानः ।[1] आखनो डइकडरइकवका वाच्या उक्तेऽर्थे ॥ आखः । आखनिकः । आखरः । आखनिकवकः ।

अवे । ञो वृद्ध्याद्युदात्तार्थः । घ उत्तरत्र कुत्वार्थः । स्पष्टत्वादुपेक्षितं सूत्रचतुष्टयम्— 'हलश्च' ॥३।३।१२१॥ पुंसि संज्ञायां करणाधिकरणयोर्हलन्ताद् घञ् स्यात् । लेखः । वेदः । वेषः । मार्गः । 'अध्यायन्यायोद्यावसंहाराधारावायाश्च' ॥३।३।१२२॥ घे प्राप्ते घञन्ता निपात्यन्ते । अधीयतेऽस्मिन्नध्यायः । नीयते तेन न्यायः । उद्युवन्ति अस्मिन्नित्युद्यावः । संह्रियते तेन संहारः । आध्रियतेऽस्मिन्नाधारः । आवयति तस्मिन् आवायः । 'उदङ्कोऽनुदके' ॥३।३।१२३॥ उदञ्चतेः 'हलश्च' इति सिद्धौ उदकप्रतिषेधार्थम् । तैलोदङ्कः । अनुदके किम् । उदकोदञ्चः । 'जालमानायः' ॥३।३।१२४॥ आनायो मत्स्यानाम् ।

खनो । आखन इति । डश्च इकश्च डरश्च इकवकश्च डइकडरइकवकाः । संहिताभावोऽसंदेहार्थः । आख इति डित्वसामर्थ्याट्टिलोपे । आखनिकः । इकः । आखरः । डरः । टिलोपः । आखनिकवकः । इकवकः ।

---

१. After it—आख्यानः । आख्नः C. २. डरङ् D₁.

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥३।३।१२६॥

एष्वेसुखसुखार्थेषूपपदेषु धातोः खल् स्यात् । तयोरेवेति भावे कर्मणि चार्थे ॥ कृच्छ्रे । दुष्करः कटो भवता । अकृच्छ्रे । ईषत्करः सुकरो वा । निमिमीलियामात्वाभावात् । ईषन्निमयः । दुःप्रमयः । सुविलयः ।

उपसर्गात् खल्घञोः ॥७।१।६७॥

ईषत्प्रलम्भः । दुःप्रलम्भः । सुप्रलम्भः ।

कर्तृकर्मणोश्च भूकृञोः ॥३।३।१२७॥

ईषदादिषूपपदेषु कर्तृपूर्वाद्भुवः कर्मपूर्वात् कृञश्च खल् स्यात् । कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम् ॥* खित्त्वान्मुम् । कृच्छ्रे । अदुराढ्येन दुराढ्येन भूयते दुराढ्यंभवम् । अकृच्छ्रे । ईषदाढ्यंभवम् । स्वाढ्यंभवम् । ईषदाढ्यंकरः । दुराढ्यंकरः । स्वाढ्यंकरश्चैत्रो भवता ॥

ईषत् । कृच्छ्रं दुरो विशेषणम् । अकृच्छ्रं सु ईषत् अनयोर्विशेषणम् । संभवादित्यभिप्रायेणाह— **कृच्छ्रे दुष्करः कटो भवता । अकृच्छ्रे ईषत्करः सुकरो वा** । ईषदादिषु किम् । कृच्छ्रेण कार्यः । कृच्छ्राकृच्छ्रार्थेषु किम् । ईषत्कार्यः । लः प्रत्ययात्पूर्वस्योदात्तार्थः । खित्करणमुत्तरत्र मुमर्थम् । **निमिमीलीति** । 'निमिमीलियां खलचोरात्वनिषेधः' इति ।

उपसर्गादिति । लभेर्नुमित्यर्थः ।

कर्तृकर्म । च्व्यर्थयोरिति । अभूततद्भावे इत्यर्थः । च्व्यर्थयोः किम् । स्वाढ्येन भूयते ।

१. Before it—करणाधिकरणयोरिति निवृत्तम् D_2, D_4. २. एषु दुःखसुखार्थेषु D_2. ३. दुःकर: D_1, N_1. ४. सुखकरो वा P. ५. D_2 drops it. ६. C drops it. ७. Dropped N. ८. After it—भवता D_2, D_4, D_1, B_2, N_1. ९. After it—भवता D_1. १०. ईषदाढ्यः क्रियते ईषदाढ्यंकरः D_2; अनीषदाढ्यः ईषदाढ्यः क्रियते ईषदाढ्यंकरः B_2, D_4. ११. स्वाढ्यंकरो दुराढ्यंकर° N.

आतो युच् ॥३।३।१२८॥

ईषदादिष्वादन्ताद्युच् स्यान्न खल् ॥ ईषत्पानः सोमो भवता । दुष्पानः । सुपानः । दरिद्रातेर्नेति केचित् । शासियुधिदृशिधृषिमृषिभ्यो युच् वाच्यः ॥* वेत्येके । दुःशासनः । दुःशासः । सुशासनः । सुशासः । युधेर्ण्यन्तात् । दुर्योधनः । सुयोधनः । दुर्योधः । सुयोधः । सुदर्शनः । सुदर्शः । सुधर्षणः । सुधर्षः । ईषन्मर्षणः । ईषन्मर्षः ।

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥३।४।१८॥

प्रतिषेधार्थयोरलंखल्वोरुपपदयोर्धातोः क्त्वा वा स्यात् ॥ दोदद् घोः । अलं दत्त्वा। अलं दानेन । घुमास्था । पीत्वा खलु । पानेन खलु ।

आतः । कर्तृकर्मणोरिति न स्वर्यते । दुष्पान इति । 'पात्पदान्तात्' इति णत्वनिषेधः । स्पष्टत्वात्त्यक्तमेकं सूत्रं व्याख्यायते- 'आवश्यकाधमर्ण्ययोर्णिनिः' ॥३।३।१७०॥ अवश्यंभावविशिष्टे आधमर्ण्यविशिष्टे चार्थे वाच्ये धातोर्णिनिः स्यात् । अवश्यंकारी । शतंदायी ।

अलम् । तुमर्थ इत्यनुवर्तते । अलंखल्वोः किम् । न हातव्यं भवता । प्रतिषेधयोः किम् । अलंकारः । घुमास्थेति । ईत्वम् । स्पष्टत्वादुपेक्षितं सूत्रद्वयम्— 'उदीचां माङो व्यतीहारे ॥३।४।१९॥

---

१. Before it—कर्तृकर्मणोरिति निवृत्तम् D_2, B_2, D_4. २. सुपानः । दुःपानः । D_2 ; दुःपानः D_1, D_4 ; P drops सुपानः ३. After it—ईषद्दरिद्रं भवता D_2, B_2, D_4. ४. P drops the optional forms दुःशासः । सुशासः । &c., D_4 has दुःशासनः । सुशासनः । दुःशासः । सुशासः । D_4. ५. Dropped N. ६. Dropped N. ७. Dropped N. ८. D_2 drops दुर्योधः । सुयोधः । ९. Dropped N. १०. घुमास्थेतीत्वम् C.

समानकर्तृकयोः पूर्वकाले ॥३।४।२१॥

एककर्तृकयोर्धात्वोः पूर्वकाले स्थिताद्धातोः क्त्वा स्यात् ॥ अनुदात्तोपदेशेति मलोपः। विष्णुं नत्वा स्तौति। द्वित्वमतन्त्रम्। नत्वा स्तुत्वा व्रजति। स्वरत्यादेः श्र्युकः कितीति नित्यमिड्भावः पूर्वविप्रतिषेधेन। स्वृत्वा। सूत्वा। धूत्वा।

क्त्वि स्कन्दस्यन्दोः ॥६।४।३१॥

एतयोर्लोपो न स्यात् क्त्वे परे ॥ स्कन्त्वा। स्यन्त्वा। ऊदित्वात्। स्यन्दित्वा।

व्यतीहारे वर्तमानात् माङो धातोः क्त्वा वा स्यात्। 'मयतेरिदन्यतरस्याम्' इतीत्वं वा। अपमाय याचते। अपमित्य याचते। एतच्चाग्रे उदाहरिष्यति। अपूर्वकालत्वाद्विधिः। पक्षे याचित्वापमयते। मेङः कृतात्वस्योक्तिर्ज्ञापिका नानुबन्धकृतमनेजन्तत्वमिति तेन। दैपः संज्ञा न। 'परावरयोगे च' ॥३।४।२०॥ परावराभ्यां योगे गम्ये धातोः क्त्वा। परे योगे तावत्। अप्राप्य नदीं पर्वतः। अत्र परनदीयोगविशिष्टोद्रिः प्रतीयते। अवरयोगे। अतिक्रम्याद्रिं नदी। अवराद्रियोगविशिष्टात्र नदी।

समान। समानकर्तृकयोः किम्। भुक्तवति ब्राह्मणे व्रजति देवदत्तः। पूर्वकाले किम्। वदति जल्पति च। द्वित्वमिति। बहुष्वपि धातुषु स्यात् क्त्वा। **स्वरत्यादेरिति**। **स्वृत्वेत्यादि**। 'स्वरति सूति सूयति—' इति वेट् प्राप्नोति। **श्र्युकः कितीति** इण्निषेधश्च प्राप्नोति। तत्र पूर्वविप्रतिषेधेन निषेध एव स्यादित्यर्थः।

क्त्वि स्कन्द। स्कन्दिर् गतिशोषणयोः। स्यन्दू स्रवणे। **ऊदित्वादिति**। 'स्वरतिसूति—' इति वेडित्यर्थः।

---

१. अनुदात्तोपदेशेति D_2; अनुदात्तोपदेशवनतितनोत्यादीनामिति D_1. २. °मिड्भावः N_1. ३. C drops it. ४. न क्त्वि &c., B_2. ५. °र्न्लोपो D_4. ६. प्रस्रवणे Dc_3.

न क्त्वा सेट् ॥१।२।१८॥

सेट् क्त्वा किन्न स्यात् ॥ शयित्वा । सेट् किम् । कृत्वा ।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥१।२।७॥

एभ्यः सेट् क्त्वा कित् स्यात् ॥ मृडित्वा । इत्यादि । क्लिशः क्त्वेति वेट् । क्लिशित्वा । क्लिष्ट्वा । उदित्वा । उषित्वा । रुदविदेति कित्त्वम् । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ।

न क्त्वा । शयित्वेति । कित्त्वाभावाद् गुणः । क्त्वाग्रहणं किम् । निगृहीतिः ।

'न सेडिति कृतेऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥
इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं किदतीदेशान्निगृहीतिः प्रयोजनम् ॥'

मृड । मृड सुखने । मृद क्षोदे । गुध रोषे । कुष निष्कर्षे । क्लिशू विबाधने । वद व्यक्तायां वाचि । वस निवासे । 'न क्त्वा सेट्' इत्यस्यापवादः । नन्वेतदेव नियमार्थं स्यात् । मृडादिभ्य एव क्त्वा कित् नान्येभ्य इति । तत् किं 'न क्त्वा सेट्' इत्यनेन । सत्यम् । विस्पष्टार्थं तत् । अन्यथा विपरीतोऽपि नियमः संभाव्यते । मृडादिभ्यः क्त्वा एव कित् नान्य इति । उषित्वेति । 'वसतिक्षुधोरिट्' । गृहीत्वेति । 'ग्रहोऽलिटि दीर्घः ।'

---

१. Before it—देवित्वा B_2, D_4. २. Before it—मृडी सुखने D_2, D_4. B_2. ३. Before it—मृदित्वा D_1.

नोपधात्थफान्ताद्वा ॥१।२।२३॥

नकारोपधात् थफान्तात् परः सेट् क्त्वा कित् स्याद्वा ॥ श्रथित्वा । श्रन्थित्वा[1] । गुफित्वा । गुम्फित्वा । नोपधात् किम् । कोथित्वा । रेफित्वा ।

वञ्चिलुञ्च्यृतश्च ॥१।२।२४॥

एभ्यः सेट् क्त्वा किद्वा स्यात् ॥ वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा ।[3] [4]ऋतित्वा । अर्तित्वा ।

नोपधा । श्रथित्वेति । श्रन्थ ग्रन्थसंदर्भे । गुम्फित्वेति । गुफ गुम्फ ग्रन्थे । कोथित्वेति । कुथ क्लेशे । रेफित्वेति । रिफ कत्थनयुद्धनिन्दाहिंसानादरेषु । ननु नोपधग्रहणेऽत्र क्रियमाणेऽपि 'रलो व्युपधात्' इति कोथित्वेत्यादौ विकल्पः स्यादेवेति नोपधग्रहणं व्यर्थम् । ननु ऋकारोपधस्तस्य व्यावर्त्यः स्यात् । ऋफरिफ हिंसायाम् । मैवम् । नोपधग्रहणभावेऽपि ऋफित्वा ऋम्फित्वेति रूपे स्तः । ऋफेः अर्फित्वेति रूपं स्यादिति त्रैरूप्यसिद्धिः । तस्मान्नोपधग्रहणसामर्थ्यात् 'रलो व्युपधात्—' इति विकल्पोऽत्र न स्यादिति ज्ञायते ।

वञ्चि । वञ्चु प्रलम्भने । लुञ्च अपनयने । ऋत इति सौत्रो घृणार्थः । ऋतेरीयङार्धधातुके विकल्पितः । स यत्र पक्षे नास्ति तत्रेदमुदाहरणम् ।

---

१. After it—प्रथित्वा । ग्रन्थित्वा । D_4. २. क्रित् स्याद्वा C. ३. After it—लुञ्च अपनयने D_2. ४. After it—ऋत गत्यैश्वर्यस्पर्धाघृणासु B_2, D_4. ५. विकल्पोऽप्यत्र PC, Dc_3.

तृषिमृषिकृशेः काश्यपस्य ॥१।२।२५॥

एभ्यः सेट् क्त्वा किद्वा स्यात् ॥ तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृशित्वा[1] । कर्शित्वा । रलो व्युपधादिति कित्वं वा[2] । द्युतित्वा । द्योतित्वा[3] । लिखित्वा । लेखित्वा । व्युपधात् किम् । वर्तित्वा । रलः किम् । सेवित्वा । हलादेः किम् । एषित्वा । सेट् किम् । भुक्त्वा । वसतिक्षुधोरिट् । क्षुधित्वा । क्षोधित्वा । अञ्चेः पूजायामितीट्[4] । अञ्चित्वा । गतौ तु अक्त्वा । लुभित्वा । लोभित्वा । विमोहने[5] तु लुब्ध्वा ।

जॄव्रश्च्योः क्त्वि ॥७।२।५५॥

आभ्यां परस्य क्त्व इण्[6] नित्यं स्यात् ॥ जरीत्वा[7] । जरित्वा[8] । व्रश्चित्वा ।

तृषि । ञितृष पिपासायाम् । मृष तितिक्षायाम् । कृश तनूकरणे । काश्यपग्रहणं पूजार्थम् । वेत्येतत्त्वनुवर्तत एव । **द्योतित्वेति** । द्युत दीप्तौ । **वर्तित्वेति** । वृतौ हिंसायाम् । **एषित्वेति** । इषु इच्छायाम् । **भुक्त्वेति** । भुज पालनाभ्यवहारयोः । **अञ्चित्वेति** । 'नाञ्चेः पूजायाम्' इति नलोपाभावः[9] । **लुभित्वेति** । 'लुभो विमोहने' इतीट् ।

जॄ । जॄष् वयोहानौ । ओव्रश्चू छेदने । **जरीत्वेति** । 'वॄतो वा' इतीटो दीर्घः ।

---

१. कृषित्वा । कर्षित्वा D4, N1 २. वा कित्त्वम् D2, D4, N1, ३. द्योतित्वा । द्युतित्वा । लेखित्वा । लिखित्वा । D4. ४. C drops अञ्चेः पूजायामितीट् ; D4 drops इतीट् । ५. Before it—लुभो विमोहने । D2; लुभो विमोहने । इट् स्यान्मोहने तु लुब्ध्वा B2, D4. ६. नित्यमिट् स्यात् N. ७. जरित्वा । जरीत्वा N. ८. Dropped B2 ९. न्लोपा° PC.

उदितो वा ॥७।२।५६॥

उदितो धातोः क्त्व इड् वा स्यात् । शमित्वा । अनुनासिकस्य क्विझलोः क्ङिति दीर्घः । शान्त्वा । द्यूत्वा । देवित्वा ।

क्रमश्च क्त्वि ॥६।४।१८॥

क्रम उपधाया दीर्घो वा स्यात् झलादौ क्त्विपरे ॥ क्रान्त्वा । क्रन्त्वा । झलि किम् । क्रमित्वा । पूङश्चेति वेट् । पवित्वा । पूत्वा ।

जान्तनशां विभाषा ॥६।४।३२॥

जकारान्तानां नशेश्च न्लोपो वा स्यात् क्त्वि परे ॥ भक्त्वा । भङ्क्त्वा । रक्त्वा रङ्क्त्वा । नष्ट्वा । नंष्ट्वा । झलादौ वाच्यम् । नह । अञ्जित्वा । जनसनखनां सञ्झलोरित्यात्वम् । खात्वा । खनित्वा । द्यतिस्यतीत्वम् । दित्वा । मित्वा । स्थित्वा । दधातेर्हिः । हित्वा ।

उदि । शमित्वेति । शमु उपशमे । द्यूत्वेति । दिवु क्रीडादौ । 'च्छ्वोः शूठ्—' ।

क्रमः । क्रमु पादविक्षेपे ।

जान्त । भक्त्वेति । भञ्जो आमर्दने । रक्त्वा । रञ्ज रागे । खात्वेति । खनु अवदारणे । दित्वेत्यादि । दो अवखण्डने । षोऽन्तकर्मणि । मा माने । ष्ठा गतिनिवृत्तौ । हित्वेति । डुधाञ् धारणपोषणयोः ।

---

१. धातोः परस्य D₁. २. Dropped N. ३. The Sûtra and the Vritti dropped N. ४. क्रमेस्त्व D₁. ५. वा दीर्घः P., D₂. ६. नंष्ट्वा । नष्ट्वा । D₄. ७. कृत्त्वाद्विट् । भक्त्वा D₂, B₂, D₄, (भक्त्वा । भङ्क्त्वा D₄). ८. After it—मित्वा C. N₁, D₄, B₂.

जहातेश्च क्त्वि ॥७।४।४३॥

अस्य हिः स्यात् क्त्वि[1]॥ हित्वा । हाङ्स्तु हात्वा ॥ अदो जग्धिः । जग्ध्वा ।

समासेनञ्पूर्वे क्त्वो ल्यप् ॥७।१।३७॥

अनञ्पूर्वे समासे सति क्त्वो ल्यबादेशः स्यात् ॥ तुक् । प्रकर्षेण कृत्वा प्रकृत्य । अनञिति[2] किम् । अकृत्वा ।

जहातेः । ओहाक् त्यागे । जग्ध्वेति । अद भक्षणे ।

समासे । समासे किम् । कृत्वा । हृत्वा । ननु च परमकृत्वा उत्तमकृत्वा अत्रापि ल्यप् प्राप्नोति । अत्रापि हि 'सन्महत्—' इत्यादिना समासोऽस्ति । उच्यते । अनञिति नायं प्रसज्यप्रतिषेधः । किं तु पर्युदासः । तेन नञोऽन्यदनञिति । तत्र नञिवयुक्तमन्यसदृशार्थे । तथा ह्यर्थगतिः नञ्युक्तमिव युक्तं चान्यस्मिन् सदृशेऽर्थे प्रतीतिमुत्पादयति । तथा हि । अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशः क्षत्रियादिरानीयते न लोष्टादिः । तथा नञोऽन्यन्नञ्सदृशं यदव्ययं तत्पूर्वे समासे ल्यप् स्यात् । ततश्च परमोत्तमशब्दयोरनव्ययत्वात् ल्यबभावः । स्नात्वाकालकादिषु मयूरव्यंसकादौ निपातनात् ल्यबभावः । पूर्वग्रहणं किम् । अनञीति ह्युच्यमानेयं बहुव्रीहिः स्यात् न विद्यते नञ् यत्र सोऽनञ् । ततश्चेहापि न स्यात् । स्त्रैणीकृत्येति । स्त्रिया इदं स्त्रैणम् । 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञ् । तदन्तादभूततद्भावे इति च्विः । 'अस्य च्वौ' । 'कु गति—' इति समासः । पूर्वग्रहणे तु सति यत्र समासस्यादिभूतो नञवयवस्तत्रैव न स्यात् । तेनस्त्रैणीकृत्येत्यत्र स्यादेव । न ह्यत्र समासस्यादिभूतो नञ् । किं तर्हि । मध्यभूतः । लित्वं प्रतिचिकीर्ष्येत्यादौ प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यादित्येवमर्थम् । **तुगिति** । 'ह्रस्वस्य पिति—' इति ।

---

१. क्त्वि परे D_2. २. अनञ् किम् D_1.

षत्वतुकोरसिद्धः ॥६।१।८६॥

षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धः स्यात् ॥ कोसिञ्चत् । कोसि । अत्र एङः पदान्तादिति एकादेशस्यासिद्धत्वान्न षत्वम् । अधीत्य । प्रेत्य । अत्र एकादेशस्यासिद्धत्वात् ह्रस्वस्येति तुक् ।

वा ल्यपि ॥६।४।३८॥

अनुदात्तोपदेशसूत्रोक्तानां ल्यपि परे वानुनासिकलोपः स्यात्[1] ॥ व्यवस्थितविकल्पत्वात्[2] मान्तानिटां वा नान्तानिटां वनतनादीनां च नित्यम्[3] । आगत्य । आगम्य । प्रणत्य[4] । प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य[5] । वितत्य । अजेर्ल्यपि वीभावो नेति[6] केचित् । उदज्य । अदो जग्धिर्ल्यप्तिकिति । प्रजग्ध्य । अन्तरङ्गत्वात् प्रागेव जग्धौ सिद्धेऽपि ल्यबुक्तेर्ज्ञायते हित्वदत्वआत्व-इत्वदीर्घत्वशँऊठ्इट्[7]विधयो ल्यपि न स्युरिति ।

षत्व । संप्रसारणङीट्सु प्रतिषेधो वाच्यः । संप्रसारणे व्रह्महूषु परिवीषु । ह्वेञ्वेञोः क्विपि संप्रसारणे पूर्वरूपत्वे च षत्वं प्रत्यसिद्धत्वात् पूर्वस्य षत्वं न प्राप्नोति । तदर्थोऽयं निषेधः । ङौ । वृक्षे छत्रम् । वृक्षेच्छत्रम् । इटि । अपचे छत्रम् । अपचेच्छत्रम् । आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणस्तुक् नित्यं प्राप्नोति । 'दीर्घात् पदान्ताद्वा' इतीष्यते विकल्पेन ।

वा ल्यपि । **आगत्येति** । गम्लृ गतौ । 'ह्रस्वस्य—' इति तुक् । **प्रणत्येति** । णमु प्रह्वत्वे शब्दे च । **प्रहत्य** । हन हिंसागत्योः । **प्रमत्येति** । मनु बोधे । **प्रवत्येति** । वनु याचने । **वितत्येति** । तनु विस्तारे । **अन्तरङ्गत्वादिति** । प्रजग्ध्येति अदेः क्त्वाप्रत्यये कृते ति कितीत्येतावतैव ल्यपः समासापेक्षत्वाद् बहिरङ्ग-

---

१. Dropped B_2, D_4. २. °विकल्पात् । D_4. ३. वनादीनां नित्यम् D_2. ४. प्रणत्म्य । प्रणत्य । D_4. ५. C drops it. ६. अजेर्वीभावो ल्यपि नेति D_1. ७. शूट् for शऊठ् । D_4.

न ल्यपि ॥६।४।६९॥

ल्यपि परे घुमास्थादेरीत्वं न स्यात् ॥ विधाय । प्रदाय ।[1] प्रखन्य । प्रस्थाय । प्रक्रम्य ।[3] आपृच्छ्य । प्रदीव्य । प्रपठ्य ।[4] एषु हित्वाद्यभावः । प्रमाय । प्रगाय । प्रपाय । प्रहाय । प्रसाय ।[5] दो ।[6] प्रदाय । प्रशाय । प्रच्छाय । मीनातिमिनोतीत्यात्वम् । प्रमाय । निर्माय ।[7] उपदाय । विभाषा लीयतेः । विलाय । विलीय । णिलोपः । उत्तार्य । विचार्य ।

ल्यपि लघुपूर्वात् ॥६।४।५६॥

लघुपूर्वात् परस्य णेरयादेशः स्यात् ल्यपि । विगणय्य । प्रणमय्य ।[9] लघुपूर्वात् किम् । संप्रधार्य ।

त्वात् तस्मात् पूर्वमेवाल्पापेक्षत्वादन्तरङ्गत्वाज्जग्धे सिद्धेपि पुनर्यत् ल्यप्ग्रहणं करोति तज् ज्ञापयति बहिरङ्गोपि ल्यप् अन्तरङ्गान् विधीन् बाधते तेन हित्वादयो नेत्यर्थः । **विधायेति** । 'दधातेर्हिः' इति हित्वं न । **प्रदायेति** । दाञो 'दो दद् घोः' इति दत्वं न । **प्रखन्येति** । 'जनसन—' इत्यात्वं न । **प्रस्थायेति** । 'द्यतिस्यति—' इतीत्वं न । **प्रक्रम्येति** । 'क्रमश्च क्त्वि' इति दीर्घत्वं न । **आपृच्छ्य प्रदीव्येति** । 'च्छ्वोः शूट्—' इति शूठौ न । **प्रपठ्येति** पठतेः 'आर्धधातुकस्येड्वलादेः' इतीट् न । **प्रमायेत्यादौ** । 'घुमास्थागापाजहातिसां हलि' इतीत्वं प्राप्नोति तस्याभावः । **प्रशाय प्रच्छायेति** । 'शाछोरन्यतरस्याम्' इति प्राप्तस्येत्त्वस्याभावः । **विभाषा लीयतेरिति** वा आत्वम् । **णिलोप इति** । 'णेरनिटि' इति ।

ल्यपि । ह्रस्वाल्लोपानामसिद्धत्वं नास्ति । समानाश्रयत्वाभावात् । ह्रस्वादयो हि णौ । ल्यपि णेरयादेशः ।

---

१. Before it—प्रस्थाय N. २. After it—प्रहाय । प्रसाय । दो । प्रदाय D_1. ३. After it—आक्रम्य N_1. ४. प्रपद्य । प्रपच्य D_4. ५. D_1 drops from प्रपाय to प्रस्थाय. ६. D_2 drops दो । प्रदाय. ७. प्रतिदाय C. ८. Dropped B_2. ९. After it—प्रबेभिदय्य D_2, P, B_2, N_1, D_4.

विभाषापः ॥६।४।५७॥

आप्नोतेर्णेरयादेशो वा स्याल्ल्यपि ॥ प्रापय्य । प्राप्य ।

क्षियः ॥६।४।५९॥

क्षियो ल्यपि दीर्घः स्यात् ॥ वेत्येके । प्रक्षीय । प्रक्षित्य ।

मयतेरिदन्यतरस्याम् ॥६।४।७०॥

मेङ ईकारोन्तादेशः स्याद्वा ल्यपि ॥ अपमित्य । अपमाय ।

ल्यपि च ॥६।१।४१॥

वेञो ल्यपि संप्रसारणं न स्यात् ॥ प्रवाय ।

ज्यश्च ॥६।१।४२॥

ज्या इत्यस्य तथा । प्रज्याय ।

व्यश्च ॥६।१।४३॥

व्येञो ल्यपि प्राग्वत् ॥ उपव्याय ।

विभाषा परेः ॥६।१।४४॥

परेः व्येञो वा संप्रसारणं स्याल्ल्यपि ॥ तुकं बाधित्वा परत्वाद्धल इति दीर्घः । परिवीय । परिव्याय ॥ समो वेत्येके ॥ संवीय । संव्याय । तत्कालेपि क्त्वा क्वचित् । आस्यं व्यादाय स्वपिति । नेत्रे संमील्य हसति ॥

विभाषा । इयङादेशस्य लाक्षणिकत्वात् न । अध्याप्य गतः ।

मयतेरिति । मेङ् प्रतीदाने । 'ह्रस्वस्य—' इति तुक् ।

ज्यश्च । ज्या वयोहानौ । तथेति । ल्यपि संप्रसारणं न स्यादित्यर्थः ।

व्यश्च । व्येञ् संवरणे ।

परेः । तुकं बाधित्वेति । यदा संप्रसारणं तदा तुक् प्राप्नोति । तुकं बाधित्वा परत्वात् 'हल—' इति दीर्घः ।

---

१. स्याद्वा ल्यपि D_1. २. प्राप्य । प्रापय्य N. ३. इकारान्ता° D_4. ४. लाक्षणिकत्वम् । Dc_3.

आभीक्ष्ण्ये णमुल् च ॥३।४।२२॥

धातोः पूर्वकाले णमुल् स्यात् पौनःपुन्ये क्त्वा च ॥ नित्यवीप्सयोः । स्मारं स्मारं नमति शिवम् । स्मृत्वा स्मृत्वा वा । पायं पायम् । भोजं भोजम् । चिण्णमुलोर्दीर्घ इति णिचि वा दीर्घः । गामं गामम् । गमं गमम् । विभाषा चिण्णमुलोरिति नुम् वा । लम्भं लम्भम् । लाभं लाभम् । प्रादौ तु प्रलम्भं प्रलम्भम् । [1]ण्यन्तजा[2]गुस्तु[3] जा[4]गरं जागरम् । जागारं जागारम् ।[5] इत्यादि ज्ञेयम् ॥[6]

आभीक्ष्ण्ये । पौनःपुन्यविशिष्टेऽर्थे वर्तमानाद्धातोरित्यर्थः । स्मारं स्मारमिति । स्मृ आध्याने । 'अचो ञ्णिति' इति वृद्धिः । 'कृन्मेजन्तः—' इत्यव्ययत्वम् । पायं पायमिति । 'आतो युक् ।' गामं गाममिति । गमेर्हेतुमण्णिच् । णेर्लोपः । प्रादौ त्विति । व्यवस्थितविभाषाविज्ञानात् नित्यं नुमित्यर्थः । ण्यन्तजागुरिति । ण्यन्तजागर्तेश्चिण्णमुलोर्वा वृद्धिरिति केषांचिन्मते वा वृद्धिः । इत्यादीति आदिशब्देन सूचितं स्पष्टत्वात् त्यक्तं सूत्रद्वयं व्याख्यायते— 'न यद्यनाकाङ्क्षे' ॥३।४।२३॥ अनाकाङ्क्षे वाक्ये यद्युपपदे न क्त्वाणमुलौ । यदयं भुङ्क्ते तदधीते । साकाङ्क्षे तु यदयं भुक्त्वा याति ततोऽधीते । 'विभाषाऽग्रेप्रथमपूर्वेषु' ॥३।४।२४॥ अप्राप्तविभाषा । आभीक्ष्ण्यं नानुवर्तते । अग्रे प्रथम पूर्व इत्येतेषूपपदेषु समानकर्तृकयोः पूर्वकाले वा क्त्वाणमुलौ स्तः । अग्रे भोजं व्रजति । अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । प्रथमं भुक्त्वा व्रजति ।

---

१. Before it—जागरं जागरम् D_2, D_4, B_2. २. जाग्रस्तु N. ३. स्तु वा गुणः D_2, B_2. ४. D_2 drops जागरं जागरम्. ५. इत्यादि after it D_2. ६. After this the Sûtra—'विभाषाऽग्रेप्रथमपूर्वेषु' ॥३।४।२४॥—एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ स्तः ॥ अग्रे भोजं व्रजति । इत्यादि । D_2 D_3, B_1. ७. °विभाषात्वान्नित्यं Dc_3.

कर्मण्याक्रोशे कृञः खमुञ् ॥३।४।२५॥

कर्मण्युपपदे कृञः खमुञ् स्यात् आक्रोशे गम्ये । चौरं[1]कारमाक्रोशति । चौरोसीत्याक्रोशतीत्यर्थः[2] ॥[3]

स्वादुमि णमुल् ॥३।४।२६॥

स्वाद्वर्थेषु कृञो णमुल् स्यात् एककर्तृकयोः पूर्वकाले ॥ स्वादुंकारं भुङ्क्ते । मान्तत्वमविकारार्थम्[4] ।[5] अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते । संपन्नंकारम् ।[6] लवणंकारम्[7] । वासरूपेण क्त्वापि । स्वादुं कृत्वा भुङ्क्ते ।

पूर्वं भोजं पूर्वं भुक्त्वा याति । विभाषाग्रहात् अग्रे भुङ्क्ते ततो यातीति लडादयोपि । ननु वासरूपेण विकल्पः स्यात् । न । क्त्वाणमुलौ सह यत्र विधीयेते तत्र वासरूपविधिर्नास्तीत्यनेन ज्ञाप्यते । तेनाभीक्ष्ण्ये लडादयो न ।

कर्मणि । चौरंकारमाक्रोशतीति । 'अरुर्द्विषद्—' इति मुम् । करोतिरत्रोच्चारक्रियः ।

स्वादुमीति । **मान्तत्वमित्यादि** । तेन च्व्यन्तत्वे मकारान्तत्वदीर्घत्वे न स्तः । तुमर्थाधिकारात् सर्वेमी प्रत्यया भावे स्युः । ननु च यदि भावे तर्हि स्वादुंकारं भुङ्क्ते चैत्र इति णमुला कर्तुरनभिहितत्वात् कर्तरि तृतीया कस्मान्न भवति । उच्यते । भुजिप्रत्ययेन लटाभिहितत्वात् । समानकर्तृकप्रकरणे शक्तीनां शक्तिमतो भेदो न विवक्ष्यते । तेन शक्तिमानेकः कर्ता सोभिहित इति न तृतीया ।

---

१. चौरंकार° D_1. २. चौरो॰ D_1. ३. °क्रोशयतीत्यर्थः॰ D_2. ४. मान्तत्वादव्ययत्वम् । N_1. ५. After it—च्व्यन्तस्य च मकारार्थम् B_2, D_4. ६. After it—भुङ्क्ते D_1. ७. After it—भुङ्क्ते. ८. स्यात् Dc_3.

अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ ॥३।४।२७॥

एषूपपदेषु कृञो णमुल् स्यात् सिद्धोऽप्रयोगो यस्य तथा स चेत् । कृञो व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः ॥ अन्यथाकारं एवंकारं कथंकारं इत्थंकारं भुङ्क्ते । इत्थं भुङ्क्ते इत्यर्थः । सिद्धेति किम् । अन्यथा शिरः कृत्वा भुङ्क्ते । क्त्वापि । एवं कृत्वापि ।

अन्यथा । व्यर्थत्वादिति । ननु व्यर्थस्य कथं प्रयोगः । द्वौ ब्राह्मणावित्यत्र द्विशब्दस्य लोके व्यर्थस्यापि प्रयोगोऽस्ति । अन्यथा कृत्वेति अत्रान्यथाशब्देन शिरःप्रकारः कथ्यते । स च करोतिना न गम्यते । ते नायं न सिद्धाप्रयोगः । स्पष्टत्वादुपेक्षितं सूत्रद्वयम् व्याख्यायते– ‘ यथातथयोरसूयाप्रतिवचने ’ ॥३।४।२८॥ यथातथयोरुपपदयोः करोतेर्णमुल् । यदि कश्चिदसूयन् पृच्छति तस्य प्रतिवचनम् । यथाकारं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन । असूयाप्रतिवचने किम् । यथा कृत्वा भोक्ष्ये तथा कृत्वा द्रक्ष्यसि । सिद्धाप्रयोगे इत्येव । यथा कृत्वा शिरो भोक्ष्ये तथा कृत्वा शिरो भोक्ष्ये किं तव । ‘ कर्मणि दृशिविदोः

---

१. Before this the Sûtras—

यथातथयोरसूयाप्रतिवचने ॥ ३।४।२८ ॥

अनयोरुपपदयोः कृञो णमुल् स्यात् ॥ यदि कश्चिदसूयया पृच्छति तस्य प्रतिवचने । यथाकारं तथाकारं भोक्ष्ये किं तवानेन । D_2, D_3, B_1, N.

२. सिद्धश्चाप्रयोगश्चेत् । सिद्धस्य कृञ् (ञ ?) अप्रयोगो निरर्थकत्वं चेत् । D_1. ३. स चेत् तथा C. ४. भुङ्क्ते after अन्यथाकारं, एवंकारं, &c. D_1. ५. Dropped N. ६. कृत्वा शिरः D_1, D_4, B_2, N_1. ७. P drops अपि ८. शिरसः Dc_3

यावति विन्दजीवोः ॥३।४।३०॥

यावत्युपपदे आभ्यां णमुल् स्यात् ॥ विद् लाभे । यावद्वेदं भुङ्क्ते । यावज्जीवमधीते ।

निमूलसमूलयोः कषः ॥३।४।३४॥

एतयोः कर्मणोः कषो णमुल् स्यात् ॥

साकल्ये ।' ३।४।२९॥ कर्मणीत्यधिकार आप्रकरणात् । विदेरत्र सत्तार्थस्य ग्रहो न । अकर्मकत्वात् । साकल्यविशिष्टे कर्मण्युपपदे दृशिविदोर्णमुल् स्यात् । कन्यादर्शं वरयति । सर्वाः कन्या वरयतीत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं जानाति लभते विचारयति वा तं सर्वं भोजयति । साकल्ये किम् । द्विजं दृष्ट्वा भोजयति ।

यावति । स्पष्टत्वात् समुपेक्षितं सूत्रत्रयं व्याख्यायते— 'चर्मोदरयोः पूरेः' ॥ ३।४।३१॥ चर्मोदरयोः कर्मणोः पूरेर्णमुल् । अण्यन्तस्याकर्मकत्वात् पूरि[२]र्ण्यन्तोत्र गृह्यते । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते । 'वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' ॥ ३।४।३२॥ कर्मणि पूरेर्णमुल् । अस्य ऊलोपश्च स्याद् वर्षप्रमाणे गम्ये । सीतापूरं वृष्टः । सीताप्रं वृष्टः । वर्षप्रमाणे किम् । सीतां पूरयित्वा वृष्टः । अस्य किम् । उपपदे लोपो मा भूत् । मूषिकाबिलपूरं प्रवृष्टः । 'चेले क्नोपेः' ॥३।४।३३॥ वस्त्रे कर्मणि क्नोपेर्णमुल् वर्षप्रमाणे । वस्त्रक्नोपं वृष्टः ।

निमूल । कष हिंसार्थः ।

---

१. Dropped D4. २. वा स्यात् Dc3, PC. ३. उपपदलोपो Dc3.

कषादिषु यथाविध्यनुप्रयोगः ॥३।४।४६॥

कषादिषु मध्ये यस्माण्णमुलुक्तः स एव अनुप्रयोज्यः ॥ धातुसंबन्धे सिद्धेपि नियमार्थमुक्तिः । निर्मूलकाषं कषति । समूलकाषं कषति । समूलं कषतीत्यर्थः ।

शुष्कचूर्णरूक्षेषु पिषः ॥३।४।३५॥

एषु कर्मसु पिषो णमुल् स्यात् ॥ शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । इत्यादि ।

परिक्लिश्यमाने च ॥३।४।५५॥

स्वाङ्गे द्वितीयान्ते । शिरःपेषं युध्यते ।

विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥३।४।५६॥

द्वितीयान्ते । गेहानुप्रवेशमास्ते इत्यादि ।

समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥३।४।३६॥

एषु कर्मसु क्रमेण हन्त्यादेर्णमुल् स्यात् ॥ समूलघातं हन्ति । अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवं गृह्णातीत्यर्थः ।

कषा । धातुसंबन्धेति । धातुसंबन्धे प्रत्यया इत्यनेन धातुसंबन्धे सिद्धेपीत्यर्थः ।

शुष्क । शुष्कपेषं पिनष्टि । इत्यादिशब्देन चूर्णपेषं पिनष्टि । रूक्षपेषं पिनष्टि ।

समूला । जीवं गृह्णातीत्यर्थः इत्येतदुपलक्षणम् समूलघातं हन्तीत्यादेरर्थस्य । स चायं समूलं हन्ति अकृतं करोतीति ।

---

१. पिषेर्णमुल् D_2. २. D_1, C, and P, B_2, N_1, D_4 drop this and the next Sûtra with their Vrittis. ३. हनाहे D_2, D_4. ४. °लक्षणार्थम् Dc_3. PC.

करणे हनः ॥३।४।३७॥

करणे उपपदे हन्तेर्णमुल् स्यात् ॥ पादघातं हन्ति । पादेन हन्तीत्यर्थः ।

स्नेहने पिषः ॥ ३।४।३८॥

स्निह्यते[1] येन तस्मिन् करणे पिषेर्णमुल् स्यात् ॥ तैलपेषं पिनष्टि । तैलेन पिनष्टीत्यर्थः ।

हस्ते वर्तिग्रहोः ॥३।४।३९॥

हस्तार्थे करणे आभ्यां णमुल् स्यात् ॥ हस्तवर्तं वर्तयति । करवर्तम् । हस्तग्राहं गृह्णाति । करग्राहम् । करेण गृह्णातीत्यर्थः ॥[2]

करे । 'हिंसार्थानां च समानकर्मकाणाम्' इति णमुलं वक्ष्यति । अहिंसार्थोऽयमारम्भः नित्यसमासार्थो यथाविध्यनुप्रयोगार्थश्च ।

स्नेहने ।

हस्ते । वर्तिर्ण्यन्तः ।

---

१. स्निह्यति B_2.

२. After it the Sûtras—

अधिकरणे बन्धः ॥ ३।४।४१ ॥—चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥ ३।४।४३ ॥—जीवनाशं नष्टः । जीवो नष्टः । पुरुषवाहं वहति । पुरुषो भूत्वा वहतीत्यर्थः ॥

हिंसार्थानां च समानकर्मकाणाम् ॥ ३।४।४८ ॥—दण्डोपघातं दण्डेनोपघातं वा गाः पाति । समानकर्मकाणां किम् । दण्डेन संताड्य चोरं गाः पाति । D_2, D_3, B_1.

सप्तम्यां चोपपीडरुधकर्षः ॥ ३।४।४९ ॥—

उपपूर्वेभ्य एभ्यः सप्तमीतृतीयान्ते चोपपदे णमुल् स्यात् ॥ पार्श्वोपपीडं पार्श्वयोरुपपीडं पार्श्वाभ्यामुपपीड्य शेते । व्रजोपरोधं गाः पाति ॥ D_2, D_3, B_1.

स्वे पुषः ॥३।४।४०॥

स्ववाचिनि[1] करणे पुषेर्णमुल् स्यात् ॥ स्वपोषं पुष्णाति । स्वेन पुष्णातीत्यर्थः । पर्यायाणां विशेषाणां चात्र ग्रहणमिष्यते[2] । धनपोषम् । गोपोषम् ।

वृक्षादौ तद्विशेषाणां स्वे पर्यायविशेषयोः ।
पर्यायस्यैव राजादौ मत्स्यादौ तद्विशेषयोः ॥

स्वे ।

वृक्षादाविति । 'वृक्षमृगतृण—' इत्यादिसूत्रे विशेषाणामेव[3] ग्रहणं न स्वरूपपर्याययोः । 'स्वे पुषः' इत्यत्र पर्यायस्य विशेषस्य ग्रहणम् । स्वरूपस्यापि ग्रहणमिष्यते । तथोदाहृतत्वात् । 'सभाराजामनुष्यपूर्वा' इत्यत्र पर्यायस्यैव ग्रहः । न स्वरूपविशेषयोः । पक्षिमत्स्यमृगान् हन्तीत्यत्र स्वरूपस्य विशेषस्य च ग्रहणम् । स्पष्टत्वात् समुपेक्षितं सूत्रचतुष्टयं व्याख्यायते—'अधिकरणे बन्धः' ॥३।४।४१॥ णमुल् । चक्रबन्धं बध्नाति । चक्रे बध्नातीत्यर्थः । 'संज्ञायाम्' ॥३।४।४२॥ बध्नातेर्णमुल् । क्रौञ्चबन्धं बद्धः । अञ्जलिकाबन्धं[4] बद्धः । 'कर्त्रोर्जीवपुरुषयोर्नशिवहोः' ॥३।४।४३॥ क्रमेणोपपदयोर्णमुल् । जीवनाशं नष्टः । जीवो नष्ट इत्यर्थः । पुरुषवाहं वहति । पुरुषो भूत्वा वहतीत्यर्थः । 'ऊर्ध्वे शुषिपूरोः' ॥३।४।४४॥ ऊर्ध्वे कर्तर्यनयोर्णमुल् । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वं शुष्यतीत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वं पूर्यत इत्यर्थः ।

---

१. स्वं वाचिनि B_2. २. D_2 B_2, N drop इष्यते. ३. विशेषणार्थमेव Dc_3. ४. चण्डालिका° PC., Dc_3.

उपमाने कर्मणि च ॥३।४।४५॥

येन कर्म कर्ता वोपमीयते तत्रोपपदे णमुल् स्यात् ॥ रत्ननिधायं निधत्ते । रत्नमिव निधत्ते इत्यर्थः । अजनाशं नष्टः । अज इव नष्ट इत्यर्थः ।

उपदंशस्तृतीयायाम् ॥३।४।४७॥

तृतीयान्तोपपदादुपदंशेर्णमुल् स्यात् ॥ मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । तृतीयाप्रभृतीनि वा समासः ।

उप । रत्ननिधायमिति । 'आतो युक् ।'

उप । वास्तवरूपेण क्त्वापि । मूलकेनोपदश्य भुङ्क्ते । स्पष्टत्वात् समुपेक्षितं सूत्रचतुष्टयं व्याख्यायते— 'हिंसार्थानां च समानकर्मकाणाम्' ॥३।४।४८॥ हिंसार्थादनुप्रयोगसमानकर्मणः करणोपपदे णमुल् । दण्डोपघातं दण्डेनोपघातं वा गाः कालयति । समानकर्मणां किम् । दण्डेन संताड्य चोरं गाः पाति । 'सप्तम्यां चोपपीडरुधकर्षः' ॥३।४।४९॥ उपपूर्वेभ्य एभ्यः सप्तम्यां तृतीयायां चोपपदे णमुल् । पार्श्वोपपीडम् पार्श्वयोरुपपीडम् पार्श्वाभ्यामुपपीडं शेते । व्रजोपरोधं गाः कालयति । व्रजे उपरोधं व्रजेनोपरोधं वा । पाण्युपकर्षं गृह्णाति । पाणावुपकर्षं पाणिनोपकर्षं वा । सगुणस्य निर्देशात् कर्षतेर्ग्रहो न कृषेः । 'समासत्तौ' ॥३।४।५०॥ सन्निकर्षे गम्ये तृतीयासप्तम्युपपदाण्णमुल् । केशग्राहं युध्यन्ते केशेषु ग्राहं केशैर्वा ग्राहम् । 'प्रमाणे च' ॥३।४।५१॥ आयामे गम्ये पूर्ववण्णमुल् । द्व्यङ्गुलोत्कर्षं खण्डिकाश्छिनत्ति द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलेनोत्कर्षं वा ।

---

१ चोपमीयते B_2. २. Dropped N_1, D_4. ३. प्रभृत्यन्यतरस्यामिति C. ४. °पदंशमिति Dc_3. ५. °पदे णमुल् Dc_3.

अपादाने परीप्सायाम् ॥३।४।५२॥

त्वरायामपादानोपपदाद्धातोर्णमुल् स्यात्[1] ॥ कषादित्वाभावात् यथाविध्यनुप्रयोगो न । शय्योत्थायं धावति ।[2] शय्याया उत्थाय धावतीत्यर्थः ।

द्वितीयायां च ॥३।४।५३॥

द्वितीयान्ते उपपदे धातोर्णमुल् स्यात् त्वरायाम् ॥ यष्टिग्राहं युध्यन्ते । यष्टीर्गृहीत्वा युध्यन्ते इत्यर्थः ॥[3]

अपा । त्वरायां किम् । पीठादुत्थाय याति ।

द्वितीया । यष्टिग्राहं युध्यन्ते । एवं नाम त्वरन्ते यदायुधमपि नाद्रियन्ते । स्पष्टत्वादुपेक्षितं सूत्रपञ्चकं व्याख्यायते— 'स्वाङ्गेऽध्रुवे' ॥३।४।५४॥ यत्राङ्गे छिन्ने न मृतिस्तस्मिन् कर्मणि णमुल् । भ्रूविक्षेपं ब्रूते । अध्रुवे किम् । उत्क्षिप्य शिरो ब्रूते । 'परिक्लिश्यमाने च' ॥३।४।५५॥ स्वाङ्गे द्वितीयान्ते परिक्लिश्यमाने उपपदे णमुल् । शिरःपेषं युध्यते । ध्रुवार्थोक्तिः । 'विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः' ॥३।४।५६॥ एभ्यो द्वितीयायां णमुल् व्याप्यमाने आसेव्यमाने चार्थे गम्ये । सुप्सु व्याप्तिः । तिङ्क्ष्वासेवा । समासेन व्याप्त्यासेवयोरुक्तेर्न द्वित्वम् । असमासे स्यादेव । व्याप्तौ । गेहानुप्रवेशमास्ते । गेहमनुप्रवेशं[4] वा ।

---

१. त्वरायां गम्यमानायामपा° C_1 P, N_1. २. After it—शय्याया उत्थायं धावति । C, P.

३. After it—अस्यतितृषोः क्रियान्तरे कालेषु ॥ ३।४।५७ ॥

क्रियामन्तरयाति क्रियान्तरः । तत्र धात्वर्थे वर्तमानेषु कालवाचिषु द्वितीयान्तेषु णमुल् स्यात् ॥ द्व्यहात्यासं गाः पाययति । त्र्यहतर्षम् । अद्य पाययित्वा द्व्यहं त्र्यहं वातिक्रम्येत्यर्थः । तयोः क्रिप् । द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तरे किम् । अहरत्यस्य गतः । अत्र गतेः प्रागेवात्यासः । न तन्मध्ये काले क्रिक्रोशमत्यस्य गाः पाययति ॥ D_2, D_3 B_1.

४. गेहं गहे° Dc_3.

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ॥३।४।५९॥

अव्यये उपपदे कृञः एतौ स्तः । अप्रियस्योच्चैः[1] प्रियस्य नीचैः कथने उच्चैः कृत्य उच्चैः कृत्वा उच्चैःकारं वा अप्रियं ब्रूते ।

आसेवायाम् । गेहमनुप्रवेशमनुप्रवेशमास्ते । एवं गेहानुप्रपातम् । गेहानुप्रपादम् । गेहावस्कन्दम् । व्याप्यासेवयोरिति किम् । गेहमनुप्रविश्य भुङ्क्ते । आभीक्ष्ण्यमेवासेवा । पुनरुक्तिरूपपदार्थः । 'अस्यतितृषोः क्रियान्तरे कालेषु' ॥३।४।५७॥ क्रियामन्तरयतीति क्रियान्तरः । तत्र धात्वर्थे वर्तमानयोः कालवाचिषु द्वितीयान्तेषु णमुल् । द्व्यहात्यासं गाः पाययति । द्व्यहमत्यासं गाः पाययति । अद्य पाययित्वा द्व्यहं त्र्यहं चातिक्रम्येत्यर्थः । द्व्यहतर्षम् । द्व्यहंतर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अस्यतितृषोः किम् । द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तरे किम् । अहरत्यस्य गतः । अत्र गतेः प्रागेवात्यसनम् । मध्येकाले किम् । क्रोशमत्यस्य गाः पाययति । 'नाम्न्यादिशिग्रहोः' ॥३।४।५८॥ द्वितीयान्ते नामपद उपपदे आदिशिग्रहोर्णमुल् । नामादेशमाचष्टे । नामग्राहम् ।

अव्यये । वासरूपेण सिद्धे समासार्थोक्तिः । द्वयोस्तुल्यत्वेनानुवृत्तौ णमुलुक्तिः । अयथाभिप्रेताख्याने किम् । उच्चैः कृत्वाचष्टे पुत्रस्ते जात इति । स्पष्टत्वादुपेक्षितं सूत्रपञ्चकं[2] व्याख्यायते । 'तिर्यच्यपवर्गे' ॥३।४।६०॥ समाप्तौ गम्यमानायां कृञः क्त्वाणमुलौ । तिर्यक् कृत्वा । तिर्यक्कारम् । अपवर्गे किम् । तिर्यक् कृत्वा काष्ठं गतः । 'स्वाङ्गे तस्प्रत्यये कृभ्वोः' ॥३।४।६१॥ तस्प्रत्यये स्वाङ्गे कृभ्वोः क्त्वाणमुलौ । मुखतः कृत्य मुखतः कृत्वा मुखतःकारं गतः । मुखतो भूय मुखतो भूत्वा मुखतो भावं गतः । स्वाङ्गे किम् । सर्वतः कृत्वा । तसि किम् । मुखं कृत्वा ।

---

१. After it—कथने D_2, D_4. २. षट्कं Dc_3

नीचैः कृत्यं प्रियं ब्रूते ॥ इत्यादयः कृतो ज्ञेयाः ।

प्रत्यये किम् । मुखे तस्यतीति मुखतः कृत्वा । 'नाधार्थप्रत्यये च्व्यर्थे ।' ३।४।६२॥ । नाधार्थप्रत्ययान्ते च्व्यर्थे उपपदे कृभ्वोः क्त्वाणमुलौ । 'विनञ्भ्यां नानाञौ—' । विनाकृत्य विनाकृत्वा विनाकारं गतः । नानाभूय नानाभूत्वा नानाभावं गतः । एवं द्विधाकृत्य द्विधाकृत्वा द्विधाकारं द्विधाभूत्वा द्विधाभूय द्विधाभावं गतः । प्रत्यये किम् । पृथक् कृत्वा । च्व्यर्थे किम् । नाना कृत्वा काष्ठानि गतः । 'तूष्णीमि भुवः' ॥३।४।६३॥ तूष्णींभूय तूष्णींभूत्वा तूष्णींभावमास्ते । 'अन्वच्यानुलोम्ये' ॥३।४।६४॥ अन्वच्युपपदे आनुकूल्ये गम्ये भुवः क्त्वाणमुलौ । अन्वग्भूय अन्वग्भूत्वा अन्वग्भावमास्ते । आनुकूल्ये किम् । अन्वग्भूत्वास्ते । इत्यादयः कृतो ज्ञेयाः । आदिशब्देन स्पष्टत्वादुपेक्षिता ज्ञेयाः । ते चास्माभिर्न-

---

१. After it—नीचैः कृत्वा नीचैः कारं वा D_1, B_2. २. इत्यादयः- dropped D_2 : इत्यादयः and the Sutras ३।४।५८॥, ३।४।६०॥, ३।४।६१॥, ३।४।६४॥, ३।४।६३ as under—D_2, D_3, B_1.

नाम्न्यादिशिग्रहोः ॥ ३।४।५८ ॥

नामादेशमाचष्टे नामग्राहं वा ॥

तिर्यच्यपवर्गे ॥ ३।४।६० ॥

समाप्तौ गम्यायां कृञः क्त्वाणमुलौ स्तः । तिर्यक्कारम् । अपवर्गे किम् । तिर्यक् कृत्वा काष्ठं गतः ॥

स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥ ३।४।६१ ॥

तस्प्रत्ययान्ते स्वाङ्गे क्त्वाणमुलौ स्तः ॥ मुखतः कारं गतः ॥

अन्वच्यानुलोम्ये ॥ ३।४।६४ ॥

अन्वच्युपपदे भुव एतौ स्तः ॥ अन्वग्भावमास्ते ।

तूष्णीमि भुवः ॥ ३।४।६३ ॥

तूष्णींभावमास्ते । इत्यादयः कृदन्ता ज्ञेयाः । दिङ्मात्रमेतदुक्तम् ॥

इति कृदन्तप्रक्रिया ॥

दिङ्मात्रमेतदुक्तम् ॥

इति कृदन्तप्रक्रिया ॥

थामिति कतिचिद् दर्शिताः । दिङ्मात्रमेतदुक्तमिति । एतदिति सुबन्ततिङन्तयोर्यदुक्तं तत् परामृश्यते । अत्रास्माभिर्दिङ्मात्रं दर्शितम् । अनया दिशान्येपि प्रयोगा ज्ञातव्या इत्यभिप्रायः । ते चास्माभिरुपेक्षितसूत्रव्याख्यानेनोभयत्र कियन्तो दर्शिताः । अन्ये प्रयोगवशात् ज्ञेयाः ।

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् प्रसादे निरगुरथ सदागाधबोधाः कृदन्ताः ॥

---

१ इदम् D1. २ अन्येपि प्रयोगात् Do3, PC.

॥ अथ वैदिकी प्रक्रिया ॥

वैदिकशब्देष्वप्येषैव[1] प्रक्रिया । य एव लौकिकास्त[3] एव वैदिका[2] इति न्यायात् । क्वचित् प्रयोगवशादन्यथात्वम् ।

प्रकृत्यान्तःपादमव्यपरे ॥६।१।११५॥

ऋक्पादमध्यस्थ[4] एङ् प्रकृत्या स्यात्[5] अति परे न तु वकारयकारपरे अति ॥ उप[6] प्रयन्तो अध्वरम् । सुजाते[7] अश्वसूनृते । अन्तःपादमिति[8] किम् । य एतेऽवयन्ति । अव्यपरे[9] किम् । तेऽवदन् । तेऽयस्मयम् ।

अथ वैदिकी प्रक्रिया ॥ वैदिकशब्देष्विति । पूर्वं सुबन्ते तिङन्ते च योक्ता प्रक्रिया सैव वैदिकेष्वपि शब्देषु ज्ञेया । तत्र हेतुमाह—य एवेति । कर्ममीमांसायां य एव लौकिकास्त एव वैदिकाः त एव च तेषामर्था इत्यादि मीमांसाभाष्यकारादिभि-र्निर्णीतान्न्यायादित्यर्थः[10] । ननु वैदिकानां शब्दानामन्यथात्वं बहुषु स्थलेषु दृश्यते इत्याह[11]—क्वचिदिति[12] ।

प्रकृत्या । एङ् इति यत् पञ्चम्यन्तं वर्तते तदिहार्थात् प्रथमान्तं संपद्यते । पादशब्देन च ऋक्पादस्यैव ग्रहणमित्येतच्चेतसि कृत्वाह—**ऋक्पादमध्यस्थ** इति । **प्रकृत्या स्यादिति** । स्वभावेन कारणात्मना वा स्यात् न विकारमापद्यत इत्यर्थः ।

---

१. शब्देष्येवं प्रक्रिया D1. २. वैदिकाः D2. ३. लौकिकाः D2. ४. C ends with ऋक्पादमध्यस्थ एङ्प्र. ५. स्यात् dropped P, D1, D2, D3. ६. उपप्रयन्तो अध्वरम् P; उपप्रयन्ताध्वरम् B2. ७. सुजाते अश्वसूनृते P. ८. इति dropped N1; पादेति किम् D4. ९. अव्ययपरे N1. १०. °रतिनि र्दिष्टान्न्या° Dc3. ११. इत्याशङ्क्याह Dc3. १२. क्वचिदिति । अपगुरो णमुलि । गुरी उद्यमने । अस्यापपूर्वस्यौतः स्थानेत् स्यात् । अपगारान्त अपगारम् । D. c. 1.

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च
॥६।१।११६॥

एषु सप्तसु व्यपरेष्याति एङ् प्रकृत्या[1] ॥ वसुभिर्नो अव्यात् । मित्र[2]महो अवद्यात् । मा शिवासो [3]अवक्रमुः । ते नो [4]अव्रत । शतधारो अयं मणिः । ते नो अवन्तु ।[5] कुशिकासो अवस्यवः ।

यजुष्युरः ॥६।१।११७॥

उरःशब्द एङन्तोतिपरे प्रकृत्या[6] यजुषि ॥ उरो अन्तरिक्षम् ।

आङोनुनासिकश्छन्दसि ॥६।१।१२६॥

[7]आङोनुनासिकादेशोचि प्रकृत्या[8] ॥ अभ्र आँ अपः ।

अव्याद् । नो अव्यात् । अस्मदो द्वितीयाबहुवचनान्तस्य नसादेशः । अव रक्षणे । आशीर्लिङ् । **अवद्यादिति** । पञ्चम्येकवचनान्तम् । **अवक्रमुः** । क्रमेर्लिङ्युसि रूपम् । **अव्रतेति** । वृङो वृञो वा 'मन्त्रे घस—' इति च्लेर्लुकि झस्यादादेशे यण् । प्रथमबहुवचनान्तम् । **अवस्यव इति** । अवेर[9]सुन् । ततः क्यच् । ततः 'क्याच्छन्दसि' इत्युः ।

आङः । ङित्विशिष्टस्य ग्रहः । ईषदाद्यर्थस्य ग्रहो यथा स्यात् । तस्य च सन्धिः प्राप्नोत्यत उक्तं **प्रकृत्येति** ।

---

१. After it—स्यात् D_2. २. मित्रमहो B_2. ३. अवचक्रमुः D_4. ४. अव्रताः D_2. ५. After it—रथघ्नः D_2. ६. D_2 has स्यात् after it. ७. Before it—छन्दसि B_2, D_4. ८. After it—स्यात् D_1; प्रकृत्या च B_2, D_4. ९. रसुच् K.

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥८।३।५३॥

षष्ठीविसर्गस्य सः स्याद्बहुलं छन्दसि पत्यादौ परे ॥ वाचस्पतिः । दिवस्पुत्रः । इत्यादि ।

स्यश्छन्दसि बहुलम् ॥६।१।१३३॥

स्य इत्यस्य सोर्लोपः स्याद्धलि बहुलम् ॥ एष स्य वाजी । बहुलं किम् । यत्र स्यो निपतेत् ।

अयस्मयादीनि छन्दसि ॥१।४।२०॥

अयस्मयादीनि छन्दसि भपदसंज्ञानि स्युः ॥ अयस्मयम् । भाषायां तु पदसंज्ञा । अयोमयम् ।

तन्वादीनां विकल्पेनेयङुवङौ ॥ तन्वं पुषेम । तनुवम् । विषुं विषुवं पश्य । स्वर्गो लोकः । सुवर्गो वा । त्र्यम्बकम् । त्रियम्बकम् । वेरण्यम् । वेरणियम् ।

षष्ठ्याः । आदिना दिवस्पृष्ठे तमसस्पारम् इडस्पदे दिवस्पयः रायस्पोषम् ।

स्यः । एष स्य वाजीति । एतदस्त्यदस्त्यदाद्यत्वम् । सुलोपः । भाषायामिति । छन्दसि तु भसंज्ञा क्वचिदुभयमिति भावः । अयोमयमिति । अत्र पदत्वात् रुत्वम् ।

तन्वादीनामिति । वक्तव्यम् ।

---

१. बहुल सः स्याच्छन्दसि D_1 N, D_4, B_1; सः स्याच्छन्दसि बहुलम D_2. २. D_3 drops it. ३. P_1 drops it: N_1 has पर for it. ४. D_2 drops बहुलं किम्. ५. निपतेत D_1, B_2, D_4. ६. N_1. D_1 B_2 drop from अय...to अयस्मयम् : P has शब्दरूपाणि after it. W P gives छन्दसि विषये after भपदसंज्ञानि स्युः ७. भसंज्ञानि D_2, D_4. ८. भवन्ति । वेदविषयेयादीनि छन्दसि । D_4. ९. After it—वक्तव्या D_1. १०. तनुं जुषेम D_4. ११. वा पश्य D_2. १२. स स्वर्गो D_4 १३. वा लोकः D_2. १४. After it वा D_4.

छन्दस्युभयथा ॥६।४।८६॥

भूसुधियोर्यण् स्यादियङुवङौ च ॥ वनेषु चित्रं विभ्वम् । विभुवं वा । [2]सुध्यो नव्यमग्ने । सुधियो वा ।

आज्जसेरसुक् ॥७।१।५०॥

अकाराज्जसेरसुगागमः स्याच्छन्दसि ॥ ब्राह्मणासः ।

बहुलं छन्दसि ॥७।१।१०॥

अतो भिस ऐस् बहुलं स्याच्छन्दसि ॥ ऐत्वम् । देवेभिः । [4]कर्णेभिः ।

मन्त्रेष्वाङ्यादेरात्मनः ॥६।४।१४१॥

आङिति टा । तस्मिन् परे आत्मन्शब्दस्यादेर्लोपः [5]स्यात् मन्त्रेषु ॥ त्मना देवेभ्यः । अन्यत्रापि लोपः । त्मन्या[6]समञ्जन ।

आज्जसे । जसेरिति पूर्वाचार्यसूत्रनिर्देशः । ये पूर्वासो य उपरास ईयुरित्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानाच्छी प्राप्नोति । सत्यम् । सकृद्गतौ विप्रतिषेधे यद् बाधितं तद्बाधितमेवेति न स्यात् ।

मन्त्रेषु । अन्यत्रापीति । एतच्च मन्त्रेष्विति बहुवचननिर्देशाल्लभ्यते । बहुवचनेन हि बहुविषयोऽयं विधिः सूचितः । त्मन्यासमञ्जन्निति सप्तम्येकवचने लोपः ।

---

१. रियङुवङ्यणः D_4. २. सुधियां नव्यमग्ने सुध्यां वा D_2 : सुधियां नव्यमग्नेः सुध्यां वा B_2, D_4, N_1 (°मग्ने N_1.) ३. D_2 drops it. ४. D_1, P_1 B_2. D_4 drop it. ५. Dropped B_2. ६. समंजात (समञ्जन् इति वा पाठः) B_2; समञ्जन् D_4.

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥७।१।३९॥

सुपामेते आदेशाः स्युः[1] । ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते जसः सुः । आर्द्रे चर्मन् । चर्मणीति प्राप्ते लुक्[2] । न ङिसम्बुद्ध्योरिति नलोपो न । मती । मत्या इति प्राप्ते पूर्वसवर्णः । सखाया । सखायौ इति प्राप्ते औकारस्य आ । न ताद्ब्राह्मणम् । तमिति[3] प्राप्ते अम आत् । अस्मे इन्द्राबृहस्पती । न युष्मे वाजबन्धवः । वयं यूयमिति प्राप्ते जसः शे । यूयवयादेशाभावश्च छान्दसत्वात् । उरुया । उरुणेति प्राप्ते या । नाभा पृथिव्याः । नाभाविति प्राप्ते डा । अनुष्ट्या यजामसि । अनुष्टुभा इति प्राप्ते ड्या । साधुया । साध्विति प्राप्ते याच् । वसन्ता यजेत । वसन्ते इति प्राप्ते आल् । सुपां सुपो भवन्ति[4] । धुरि दक्षिणायाः । दक्षिणायामिति[5] प्राप्ते । तिङां तिङो[6] भवन्ति । ये यूपाय तक्षति । तक्षन्तीति प्राप्ते । इयाच् डियाच् ईकारश्च । ऊर्विया[7] । दार्विया[8] । ऊरुणा दारुणेति[9] प्राप्ते इयाच् ।

सुपाम् । **चर्मन्** इति सप्तम्येकवचनस्य लुक् । **मतीति** तृतीयैकवचनस्य पूर्वसवर्ण ईकारः । सवर्णदीर्घः । **सखाया** इति । ' सख्युरसम्बुद्धौ ' इति णित्त्वं वृद्धिः । **अस्मे युष्मे** । जसः शे । शकारः सर्वादेशार्थः । **ड्येति** । डकारष्टिलोपार्थः । **साध्विति प्राप्ते** इति । सोर्लुकि प्राप्ते इति शेषः । **धुरि दक्षिणाया** इति । सप्तम्याः स्थाने षष्ठी । **तक्षन्तीति** । लोटः स्थाने लट्^च^ । **इयाजिति** । वक्तव्यम् ।

---

१. सुपामादेशा एते स्युः D_1. २. D_2 drops लुक् ; ङेर्लुक् P. ३. न तमिति B_2. ४. D_1 drops it. ५. After it—इति वक्तव्यम् D_1. ६. तिङः D_1. ७. उर्विया B_2. ८. दर्विया । उरुणा B_1, ९. Before it—दा in D_2.

सुक्षेत्रिया । सुक्षेत्रिणेति प्राप्ते डियाच् । सरसी शयानम् । सरसि इति प्राप्ते ईकारः । आड्याचयारश्च । प्रेबाह्वा । प्रबाहुनेति प्राप्ते औङ् । स्वप्नया । स्वप्नेनेति प्राप्ते । नावया । नावा इति प्राप्ते ।

प्रसमुपोदः पादपूरणे ॥८।१।६॥

एषां द्वे स्तः पादपूरणे ॥ प्रप्रायमग्निः । संसमिद्युवसे[४] । उपोप मे परामृश । किं नोदुदु हर्षसे ।[६]

अमो मश् ॥७।१।४०॥

मिपादेशस्यामो मश् स्यात् ॥ वधीं वृत्रम् । अवधिषमिति प्राप्ते ।

ध्वमो ध्वात् ॥७।१।४२॥

ध्वंस्थाने ध्वात् स्यात् ॥ धारयध्वात् । धारयध्वमिति प्राप्ते ।

सुपामेते स्युरित्यर्थः । आङ्याच् । आङादयश्चेति वक्तव्यम् । सुपामेते स्युः । चकारः स्वरार्थः ।

प्रस । पादपूरणे किम् । प्रदेवं देव्या धिया । छन्दस्येतद्विधानम् । भाषायामनर्थकस्य प्रयोगाभावात् ।

अमः । **वधीमिति** । हन्तेर्लुङ् । च्लेः सिच् । मिपोम् । 'लुङि च' इति वधादेशः । 'बहुलं छन्दस्यमाङ्योगेपि' इत्यडभावः ।

---

१. आङ् अयान् आ° B_2; अवाङ् for आङ D_4. २. प्रवाहा D_1. P and D_2, D_4 drop it. ४. सामिद्युवसे B_2; समध्युवसे D_4. ५. °त्तुर्षसे D_4 ६. After it—पादपूरणे किम् । प्र देव देव्या धिया B_2. ७. Dropped B_2. ८. वधी वृत्रम् । D_1. ९. वारयध्वात् । वारयध्वमिति प्राप्ते D_2.

यजध्यैनमिति च ॥७।१।४३॥

एनमि ध्वमोन्तलोपः वकारस्य च यकारः ॥ यजध्यैनं प्रियमेधाः ।

तस्य तात् ॥७।१।४४॥

लोण्मध्यमबहुवचनस्य तस्य तात् ॥ गमयतात् । गमयतेति प्राप्ते ।

तप्तनप्तनथनाश्च ॥७।१।४५॥

एते च तस्यादेशाः स्युः ॥ तप्–शृणोत ग्रावाणः तनप्–दधातन । तन–जुहुतन । थन–ये दिवि जुहुथन । शृणुत धत्त जुहुत इति प्राप्ते ।

इदन्तो मसि ॥७।१।४६॥

मस्शब्दे अन्त इकारः स्यात ॥ पुरस्ताद्दीपयामासि । दीपयामः इति प्राप्ते ।

यज । यजध्वमेनमिति प्राप्ते ।

तस्य । **लोडिति** । अथ प्रथमपुरुषैकवचनग्रहः कस्मान्न । छन्दसि दृष्टानुविधानात् ।

तप्त । चकारस्तस्यानुकर्षणार्थः ।

इद । **मसीति** । उत्तमपुरुषबहुवचनस्य इकार आगमः स्यात् । आगमत्वमन्तग्रहणात् ।

---

१. नो D1. २. After लोपः—वस्य यत्वं च स्यात् D2. ३. वकार ...कारः dropped D4. ४. यः B2. ५. यजध्वैनं B2. ६. After it—स्यात् D2, B2; तात् स्यात् for तस्य तात् D4. ७. The Ms. P. ends here, at एते च तस्यादेशाः स्युः. ८. यविष्ठन D2, D4. ९. After it इच्छत D2, D4; यार्इच्छत B2.

स्नात्व्यादयश्च ॥७।१।४९॥

एते निपात्याः ॥ स्नात्वी मलादिव । स्नात्वेति प्राप्ते । पीत्वी ।[1]

छन्दसि शायजपि ॥ ३।१।८४॥

हलः श्नः शायजपि स्यात् हौ छन्दसि ॥ हृग्रहोर्भश्छन्दसि ॥*

एतयोर्हस्य भः स्यात् छन्दसि ॥ गृभाय । गृहाणेति प्राप्ते । जभार । जहारेत्यर्थः ।

व्यत्ययो बहुलम् ॥ ३।१।८५॥

शबादिविकरणानां छन्दसि बहुलं व्यत्ययः स्यात् ॥

भेदति । भिनत्तीति प्राप्ते । मरते । म्रियत इत्यर्थः । बहुलोक्तिः सर्वविधिव्यभिचारार्था ।

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।

व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिध्यति बाहुलकेन॥

उपग्रहः परस्मैपदात्मनेपदे । नरः प्रथमपुरुषादिः ।

स्नात्व्या । आदिशब्दः प्रकारार्थः ।

छन्दसि ।

व्यत्य । भेदतीति । श्नमि प्राप्ते शप् । मरत इति । शे प्राप्ते शप् । बहुलोक्तिरिति । अत्र वार्तिकमुदाहरति—सुप्तिङिति । शास्त्रकृत् पाणिनिः । एषां सुबादीनां व्यत्ययमिच्छति । सोपि च बाहुलकेन सिध्यति । चशब्दो हेतौ । यस्मात् प्रकृतानामप्रकृतानां च

---

१. After it—पीत्वेति प्राप्ते B₂. D₄. २. D₂ drops it. ३. बहुलं छन्दसि D₁.

लिङ्याशिष्यङ् ॥३।१।८६॥

आशीर्लिङि धातोरङ् स्याच्छन्दसि ॥ यासुटि कृते अतो येयः । स्थेयम् । गेयम् । गमेम । वच उम् । वोचेम । विदेयम् । शकेयम् । रुहेयम् । दृशेयम् ।

व्यत्ययः सिध्यति तस्माद्बाहुलकं बहुलग्रहणमित्यर्थः । सुपां व्यत्ययः । युक्तामासीद् धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते । तिङां च । चषालं ते अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । आत्मनेपदपरस्मैपदयोः । युध्यति । युध्यते इति प्राप्ते । लिङ्गस्य । मधोस्तृप्ताः । मधुन इति प्राप्ते । पुरुषाणाम् । विपूयाः । विपूयादिति प्राप्ते । कालस्य । श्वोग्नीनाधास्यमानेन । लुङ्विषये लृट् । हलाम् । शुधितमुग्रवीरम् । भकारस्य धकारः । अचाम् । उपगायन्तु मा मातरो गर्भिणयः । गार्भिण्य इति प्राप्ते दीर्घे ह्रस्वः । स्वराणाम् । अश्वावतीः । अन्तोदात्तत्वे आद्युदात्तत्वम् । कर्तृग्रहणं कारकोपलक्षणम् । मादयाद्भिः । संप्रदानस्य करणत्वम् । यङामिति 'सार्वधातुके यक्' इत्यारभ्य 'लिङ्याशिष्यङ्' इत्यङ्पर्यन्तानां प्रत्याहारः । उदाहरणं तु भेदतीत्याद्युक्तं मूल एव ।

लिङि । **स्थेयमिति** । आशिषि लिङ् । मिप् । तस्याम् । यासुट् । सलोपः । गुणः । **गेयमित्यादि** । गै शब्दे । गम्लृ गतौ । वच परिभाषणे । विद ज्ञाने । शकॢ शक्तौ । रुह जन्मनि प्रादुर्भावे । **दृशेयमिति** । अत्राग्वाच्यः । अन्यथा 'ऋदृशोङि—' इति गुणः स्यात् ।

---

१. रङ्प्रत्ययः D_2, B_2.

छन्दस्युभयथा ॥ ३।४।११७॥

धात्वधिकारोक्तः सर्वोपि प्रत्ययः सार्वधातुकार्धधातुकसंज्ञः स्याच्छन्दसि ॥ वेर्धन्तु[1] । वर्धयन्त्वित्यर्थः[2] । आर्धधातुकत्वाण्णिलोपः । विशृण्विरे । सुन्विरे ।

लिङर्थे लेट् ॥३।४।७॥

लिङर्थे विध्यादौ धातोर्लेट्प्रत्ययः स्याच्छन्दसि ॥

सिब् बहुलं लेटि ॥३।१।३४॥

धातोः [3]सिप्प्रत्ययो बहुलं स्याल्लेटि ॥

इतश्च लोपः परस्मैपदेषु ॥३।४।९७॥

लेटस्तिङामितो लोपः [4]स्याद्वा परस्मैपदेषु ॥

लेटोडाटौ ॥३।४।९४॥

लेटः अट् आद्[5] इत्येतावागमौ स्तः तौ च पितौ ॥ जोषिषत् ।[6]

छन्दसि । णिलोप इति । 'णेरनिटि' इति । विशृण्विरे इति । सार्वधातुकत्वात् 'श्रुवः शृ च' इति श्रुवः शृभावश्च । सुन्विरे । 'स्वादिभ्यः श्नुः ।'

लिङ् । 'विधिनिमन्त्रण—' सूत्रोक्तो 'हेतुहेतुमतोर्लिङ्' इत्येवमादिश्च लिङर्थः । जोषिषदिति । जुषी प्रीतिसेवनयोः । लेट् । तिप् । सिप्प्रत्ययः । सिपि इकार उच्चारणार्थः । तिप इकारलोपः । अट् । 'आर्धधातुकस्य' इति सिप इट् । लघूपधगुणः ।

---

१. वर्धतु । वर्धयत्वित्यर्थे । D_2. २. °त्यर्थे B_2. ३. सिच्प्रत्ययो D_1. ४. वा स्यात् D_2. ५. D_1 drops इति. ६. After it D_2, B_2, D_4 have—सिब्बहुलं (सिब्बहुलं B_2, D_4) छन्दसि णिद्वक्तव्यः । इति णित्वाद्वृद्धिः ।

तारिषत् । मं[1]न्दिषत् । प[2]क्षे पे[3]ताति विद्युत् । उ[4]दधि व्यावयाति ।

स उत्तमस्य ॥३।४।९८॥

लेट उ[5]त्तमस्य सकारस्य वा लोपः स्[6]यात् ॥ करवाव । पक्षे करवावः । टेरेत्वम् ।

आत ऐ ॥३।४।९५॥

लेट आकारस्य ऐ[7] स्यात् ॥ मन्त्रयैते । मन्त्रयैथे । विधिसामर्थ्यादाट ऐ[8]त्वं न । मन्त्रयाते ।

'आदेशप्रत्यययोः' इति षत्वम् । **तारिषदिति** । तॄ प्लवनपूरणयोः । 'सार्वधातुकार्धधातुकयोः' इति गुणः । 'व्यत्ययो बहुलम्' इति वर्णव्यत्ययेन धात्वकारस्याकारः । शेषं पूर्ववत् । **मन्दिषदिति** । मदि स्तुतिमोदस्वप्नकान्तिगतिषु । 'इदितो नुम् ।' **पक्षे** इति । सिप इकारलोपस्य चाभावे । पतातीति पाठे पत्लृ गतौ । पदातीति पद गतौ । व्यत्ययेन शप् तिप् च । अटा सह सवर्णदीर्घः । **व्यावयातीति** । व्युङ् गतौ । हेतुमण्णिच् । सिपः पित्वम् बोभूयिषातामित्यत्राद्युदात्ते प्राप्तेनुदात्तार्थम् ।

स उत्तमस्य । **करवावेति** । आट् ।

आत ऐ । **मन्त्रयैते** इति । मन्त्रि गुप्तभाषणे । चुरादिणिच् । ञपि गुणायादेशौ । **विधिसामर्थ्यादिति** । आतश्चेदेत्वं स्यात् तद्विधिरनर्थकः स्यात् । ऐडागममेव विदध्यात् । एवं प्रक्रिया लघुः स्यादिति भावः । प्रासङ्गिकसूत्रं व्याख्यायते । 'घोर्लोपो लेटि वा' ॥७।३।७०॥ घुसंज्ञानां लेटि परतो वा लोपः । सोमो ददत् गन्धर्वाय । दधद्रत्नानि दाशुषे । यदग्निरग्नये ददात् ।

---

१. नंदिषत् D_2 मेदिषत् P. २. पक्षे dropped P. ३. पक्षे पताति विद्युताति विद्युत् B_2; पक्षे पताति विद्युत् । उदार्धे च्यावयाति । D_4. ४. उदधिं D_2, B_2. ५. उत्तमसकारस्य B_2, D_4. ६. Dropped B_2. ७. ऐः D_4, B_2 ८. एत्वं B_2.

वैतोन्यत्र ॥३।४।९६॥

आत ऐ[1] विषयं विना लेट एकारस्य ऐ[2] स्याद्वा ॥ पशू-नामीशै[3] । गृह्यान्तै । पक्षे दधसे । एतोन्यत्र किम् । मन्त्रयैते ।

उपसंवादाशङ्कयोश्च ॥३।४।८॥

उपसंवादे[4] शङ्कायां च लेट् स्यात्[5] ॥ अहमेव पशूनामीशै । नेज्जिह्मायन्तो नरकं पताम[6] ।

कृमृदृरुहिभ्यश्छन्दसि ॥३।१।५९॥

एभ्यश्च्लेरङ् वा[7] स्याच्छन्दसि ॥ अकरत् । अमरत् । अदरत् । अरुहत् ।

वैतः । पशूनामीशै इति । ईश ऐश्वर्ये । उत्तमपुरुषैकवचन-मिट् । टेरेत्वम् । गृह्यान्तै इति । ग्रह उपादाने । कर्मणि 'सार्व-धातुके यक् ।' 'ग्रहिज्या—' इति संप्रसारणम् । अट् । झोन्तः ।

उप । पणबन्धो नाम यदि मे भवानिदं कुर्यात् अहमपि भवते इदं दास्यामीति कारणतः कार्यानुसरणम् । अहमेवेत्यादि । पणबन्धे त्वमेव पशुं जहीति देवैरुक्तो रुद्र आह—अहमेव पशूनामीशै । नेज्जिह्मायन्त इत्याशङ्कायाम् ।

कृमृ । डुकृञ् करणे । मृङ् प्राणत्यागे । दृ विदारणे । रुह बीजजन्मनि प्रादुर्भावे ।

---

१. ए B_2. २. ऐः B_2, D_4. ३. °मीशैगृह्यान्तै D_1, D_4 °मीशैर्गृह्यातै B_2. ४. पणबन्धे D_2, D_4, B_2. ५. After it छन्दसि D_2, D_4, B_2. ६. पताम: D_2 ७. स्याद्वा D_1.

श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥६।४।१०२॥

एभ्यो हेर्धिः स्याच्छन्दसि ॥ श्रुधी हवम् । श्रुणुधी गिरः । अन्येषामपि दृश्यत इति दीर्घः । पृधि[1] । पूर्धि । उरुणस्कृधि । अपावृधि ।

वा छन्दसि ॥३।४।८८॥

हिरपिद्वा स्यात् छन्दसि ॥

आङितश्च ॥६।४।१०३॥

पित्त्वेनाङितो हेर्धिः स्यात् ॥ रारन्धि । प्रयन्धि[2] । युयोधि ।[3] पित्वाभावे ।[4] प्रीणीहि ।

आदृगमहनजनः किकिनौ लिट् च ॥३।२।१७१॥

आदन्तादृवर्णान्ताद् गमादेश्च किकिनौ स्तः छन्दसि । तौ च लिड्वत् ॥ द्वित्वादि[5] । पपिः । कित्त्वम् ऋच्छत्यृताम्

श्रुशृ । श्रु श्रुतौ । पॄ पूर्तौ । डुकृञ् करणे । वृङ् वृञ् वा । दीर्घो धीत्यत्र । शृणुधीत्यत्रधिभावविधानसामर्थ्यात् 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुक् न । पृधीत्यादौ 'व्यत्ययो बहुलम्' इति शप् । तस्य 'बहुलं छन्दसि' इति लुक् वा ।

आङि । रारन्धीति । रमेः 'व्यत्ययो बहुलम्' इति परस्मैपदम् । शपः श्लुः । द्वित्वमभ्यासदीर्घः छान्दसः । मलोपाभावोऽङित्त्वादेव । **प्रयन्धीति** । यमेः शपो लुक् । **युयोधीति** । योधतेः शपः श्लुः । **प्रीणीहि** । प्रीञ् तर्पणे ।

आदृ । द्वित्वादीति द्वित्वमभ्यासकार्यम् । 'लिटि धातोः—'

---

१. पृधि D_1; पूर्धि P. २. प्रयन्धि B_2. ३. After it—युयुहि B_2, D_4. युयुहि D_2. ४. पृणीहि. for प्रीणीहि B_2, D_4. ५. द्वित्वादिः D_1.

इति गुणबाधार्थम् । बहुलं छन्दसीत्युत्वम् । जगुरिः । जग्मिः । जघ्निः । जज्ञिः ।

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥३।४।९॥

धातोरेते प्रत्ययाः स्युः छन्दसि तुमुनोऽर्थे ॥ से-वक्षे रायः । सेन्-ता[1] वामेषे । असे-असेन्-जीवसे । क्से-प्रेषे । कसेन्-[2]श्रियसे । अध्यै-अध्यैन्-[3]आचरध्यै । कध्यै-कध्यैन्—आहुवध्यै । शध्यै-पिबध्यै । शध्यैन्—मादयध्यै । तवै-पातवै । तवेङ्-सूतवे । तवेन्-कर्तवे । कर्तुमित्यर्थः ।

इति द्वित्वम् । अभ्यासह्रस्वः । जगुरिः । गॄ निगरणे । जग्मिः । जघ्निः । गम्लृ गतौ । हन हिंसागत्योः । 'गमहन—' इत्युपधालोपः । 'हो हन्तेः—' इति हन्तेः कुत्वं च ।

तुमर्थे । तुमाद्यर्थो भावः । कुतः । कर्ता तावन्न । यदि कर्ता तुमर्थः स्यात् तुमर्थवचनमनर्थकं स्यात् । कृत्वादेव कर्तरि स्युः । कर्मादिश्च तुमुनो नादिश्यते । तस्मादनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति स्वार्थे स्यात् । स्वार्थश्च धातूनां भावः । **वक्षे** इति । वचेः से । कुत्वम् । षत्वम् । **एषे** इति । इणः सेन् । गुणः षत्वम् । स्वरे भेदः । **जीवसे** । जीव प्राणधारणे । असेअसेनोरिदमेवोदाहरणम् । स्वरे भेदः । **प्रेषे** इति । इणः क्से । **श्रियसे** । श्रिञ् सेवायाम् । कसेन् । **आचरध्यै** । चर गत्यर्थः । अध्यैअध्यैनोरुदाहरणम् । स्वरे भेदः । **आहुवध्यै** । जुहोतिराङ्पूर्वः । कध्यैकध्यैनोश्च । उवङ् । **पिबध्यै** । पा पाने । शध्यै । पिबादेशः शित्त्वात् । **मादयध्यै** इति । मदी हर्षे । णिच् । शध्यैन् । गुणायादेशौ । **पातवै** । पिबतेः । **सूतवे** । षूङ् प्राणिगर्भविमोचने । **कर्तवे** । डुकृञः ।

---

१. गवामेषे रथनां D_4. २. त्रियसे D_4. ३. आचरध्यै D_4 (in place of आचरध्यैन्.)

प्रयै रोहिष्यै अव्यथिष्यै ॥३।४।१०॥

एते निपात्याः । प्रयातुम् । रोढुम् । अव्यथितुमित्यर्थः ।

दृशे विख्ये च ॥३।४।११॥

एतौ निपात्यौ । द्रष्टुं विख्यातुमित्यर्थः ।[1][2]

ईश्वरे तोसुन्कसुनौ ॥३।४।१३॥

ईश्वरे[3] उपपदे धातोरेतौ स्तस्तुमर्थे । ईश्वरो विचरितोः । ईश्वरो विलिखः ।

कृत्यार्थे तवैकेन्केन्यत्वनः ॥३।४।१४॥

धातोरेते स्युः कृत्यानामर्थे भावकर्मणोः ॥ तवै । अन्वेतवै । केन् । अवगाहे[4] । केन्यः । दिदृक्षेण्यः । त्वन् । कर्त्वम् ।

प्रयै । प्रपूर्वस्य यातेः कै निपात्यते । रुहेरिष्यै । नञ्पूर्वस्य व्यथेरिष्यै ।

दृशे । दृशे विश्वाय सूर्यम् । विख्ये त्वा हरामि ।

ईश्वरे । विचरितोः । चर गतौ । विलिखः । लिख लेखने ।

कृत्यार्थे । 'तयोरेव कृत्यक्तखलर्थाः' इति कृत्यानां भावकर्मणोरेव विधानात् । अन्वेतवै । अनुपूर्वादिणः । अवगाहे । गाहू अवलोडने । दिदृक्षेण्यः । दृशेः सन्नन्तात् । कर्त्वम् । कृञः ।

---

१. D₂, D₄ drop it. २. द्रष्टुमित्यर्थः D₂. ३. ईश्वरेऽर्थे D₂. ४. अवगाहे मह्रे B₂.

सृपितृदोः कसुन् ॥३।४।१७॥

आभ्यां कसुन् स्यात् भावलक्षणे तुमर्थे ॥ पुरा क्रूरस्य विसृपो विरप्शिन्[1] । पुरा जर्तृभ्य[2] आतृदः । कृञः सन्नन्तात् ण्वुल् । अतो लोपः । तस्य स्वरं प्रति स्थानिवत्त्वाभावात्

लिति ॥६।१।१९३॥

लिति परे पूर्वमुदात्तं स्यात् ॥ इति ईकारस्योदात्तता । चिकीर्षकः । अदेः क्तिनि कृते बहुलं छन्दसीति घस्लृ । घसिभसोर्हलि चेति उपधालोपः । झलो झलीति सलोपः । धत्वम् । उपधालोपस्य स्थानिवत्त्वाभावात्[3] घस्य जश्त्वम् । समाना[4] ग्धिः । सग्धिः । इत्यादिप्रयोगमनुसृत्यान्वाख्यातव्यम्[5] ॥

इति वैदिकी प्रक्रिया समाप्ता ॥

सृपि । सृप्लृ गतौ । उतृदिर् हिंसानादरयोः । कृञ इति । चिकीर्ष अस्मात् । ण्वुल्तृचाविति । अकः । तस्येति । ‘न पदान्त–’ इति सूत्रेण स्वरविधिं प्रति अल्लोपस्य स्थानिवत्त्वाभावात् ‘लिति’ इत्यनेन चिकीर्षक इत्यत्र ईकारस्योदात्तत्वम् । स्वरविधिं प्रति व्यञ्जनस्याविद्यमानत्वात् रषयोरव्यवधायकत्वम् । अदेरिति । ‘स्त्रियां क्तिन्’ इति क्तिन् । उपधालोपस्य स्थानिवत्त्वाभावात् । ‘न पदान्त—’ इति सूत्रेण जश्विधिं प्रति स्थानिवत्त्वाभावादित्यर्थः । इत्यादि प्रयोगमनुसृत्यान्वाख्यातव्यमिति । आदिशब्देनान्येप्यष्टाध्याय्यां साधिता वैदिकाः प्रयोगा उच्यन्ते । स्वरप्रक्रिया

---

१. विरप्शिन् D_4. २. जर्तृभ्य D_4. ३. उपधालोपस्यास्थानिवत्त्वात् D_3, D_4. ४. समानाग्धिः । साग्धिः D_1. ५. व्याख्यातव्यम् D_1.

स्वरप्रक्रियासूत्रव्याख्या च 'लिति' इत्यस्य सूत्रस्य व्याख्यानेनोपलक्षिता। तत्र तावदष्टाध्यायीस्थितान्येव शिष्टानि छान्दसानि सूत्राणि व्याख्यायन्ते। पश्चात् स्वरसूत्राणि व्याख्यास्यामः। 'शे'॥ (१।१।१३)॥ सुबादेशः शेशब्दः प्रगृह्यसंज्ञः स्यात्। अस्मे इन्द्राबृहस्पती। इति वैदिकमुदाहरणम्। युष्मे इति अस्मे इति त्वे इति मे इति। इत्यादिषु पदकारैः क्रियमाणेषु प्रगृह्यसंज्ञा भवति। 'ईदूतौ च सप्तम्यर्थे' ॥१।१।१९॥ ईदूदन्तं सप्तम्यर्थे वर्तमानं प्रगृह्यसंज्ञं भवति। मामकी इति। तनू इति। मामक्यां तन्वामिति प्राप्ते 'सुपां सुलुक्—' इति लुक्। सप्तमीति किम्। मती इति। मत्या इति प्राप्ते। अर्थे किम्। वाप्यामश्वो वाप्यश्वः। अर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य प्रगृह्यसंज्ञाधिकारे। तच्च भाष्यादवगन्तव्यं सम्यक्। 'छन्दसि पुनर्वस्वोरेकवचनम्' ॥१।२।६१॥ पुनर्वस्वोर्द्वित्वे एकवचनं वा स्यात्। पुनर्वसुर्नक्षत्रं पुनर्वसू वा। 'विशाखयोश्च' ॥१।२।६२॥ विशाखा नक्षत्रं विशाखे वा। 'षष्ठीयुक्तश्छन्दसि वा' ॥१।४।९॥ पतिर्घिसंज्ञो वा। कुलुञ्चानां पतये पत्ये वा। पुनश्चनसौ गतिसंज्ञौ स्याताम्। पुनरुत्स्यूतम्। 'गतिर्गतौ' इति निघातः स्यात्। चनोहितः। 'गतिरनन्तरः' इति स्वरः। 'छन्दसि परेऽपि' ॥१।४।८१॥ गत्युपसर्गसंज्ञाः। याति नि। 'व्यवहिताश्च' ॥१।४।८२॥ आ मन्द्रैरिन्द्र हरिभिर्याहि। 'तृतीया च होश्छन्दसि' ॥२।३।३॥ कर्मणि वा तृतीयापि। यवाग्वा जुहोति। यवागूं जुहोति। 'द्वितीया ब्राह्मणे' ॥२।३।६०॥ ब्राह्मणविषये प्रयोगे दिवो द्यूतार्थस्य कर्मणि द्वितीया स्यात्। ग्रामस्य तदहः सभायां दीव्येयुः। 'प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने' ॥२।३।६१॥ प्रेष्यब्रुवोर्हविषः कर्मणः[1] षष्ठी। अग्नये हविषः प्रेष्य अनुब्रूहि वा। देवतासंप्रदाने किम्। बटवे पुरोडाशान् प्रेष्य। अस्य प्रयोगस्य यज्ञविषयत्वात् वैदिकेषु लिखितमेतत् सूत्रम्।

१. कर्मणि PC.

'चतुर्थ्यर्थे बहुलं छन्दसि' ॥२।३।६२॥ षष्ठी। पुरुषमृगश्चन्द्रमसे चन्द्रमसो वा। षष्ठ्यर्थे चतुर्थी। याभ्यङ्क्ते तस्यै दुश्चर्मा। 'यजेश्च करणे' ॥२।३।६३॥ षष्ठी वा। घृतस्य यजते। घृतेन यजते। 'हेमन्तशिशिरावहोरात्रे च च्छन्दसि' ॥२।४।२८॥ पूर्ववल्लिङ्गौ। हेमन्तशिशिरौ। अहोरात्रे। 'बहुलं छन्दसि'। २।४।७६॥ शपः श्लुः। श्लोरभावोत्र। दाति प्रियाणि। विवष्टि। 'मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः' ॥२।४।८०॥ एभ्यो लेर्लुक्। लिलेः सामान्यग्रहणम्। घस। अक्षन्। ह्वर। माह्वः। नश। प्रणट्। वृ। आवः। दह। आधक्। आत्। आप्राः। वृच। परावर्क्। कृ। अक्रन्। गमि। अग्मन्। जनि। अज्ञत। 'अदो जग्धिः—' इत्यादय आदेशाः संज्ञाच्छन्दसोर्बहुलं वक्तव्याः। अन्नाद्यर्थम्। अन्नम्। वधकः। गात्रम्। विवक्षणः। अजिरम्। बहुलं छन्दसि। अदेर्घस्लृ। घस्ताम्। अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि ॥३।१।४२॥ एते निपात्याः। अक इति चतुर्णा प्रत्येकमनुप्रयोगः। अभ्युत्सादयामकः। अभ्युदसीषददिति लोके। प्रजनयामकः। प्राजीजनदिति लोके। चिकयामकः। अचैषी-दिति लोके। रमयामकः। अरीरमदिति लोके। पावयांक्रियात्। पाव्यादिति लोके। विदामक्रन्। अवेदिषुरिति लोके। 'गुपेश्छन्दसि' ॥३।१।५०॥ च्लेश्चङ् वा। अजूगुपतम्। अगौप्तम्। अगोपिष्टम्। अगोपा-यिष्टम्। 'प्रत्यपिभ्यां ग्रहेश्छन्दसि' ॥३।१।११८॥ क्यप्। प्रतिगृह्यम्। अपिगृह्यम्। 'छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्या-ध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्य-पृडानि' ॥ ३।१।१२३॥ एते निपात्याः। कृती ण्यत्। निष्टर्क्यः। क्यप्। देवहूयः। णीञ् क्यप्। प्रणियः। उन्नियः। शिष्लृ क्यप्। उच्छिष्यः। मृङ् स्तृञ् ध्वृ खन् यत्। मर्यः। स्तर्या। ध्वर्यः। खन्यः। खनेर्ण्यदपि। खान्यः। यजेर्यत्। देवयज्या।

प्रच्छेः क्यप् । आपृच्छ्यः । सिवः क्यप् । प्रतिषीव्यः । वदेर्ण्यत् । ब्रह्मवाद्यः । भू भाव्यः । स्तु स्ताव्यः । चिञ् उपचाय्यः । पृडे चोत्तरपदे । पिबतेश्छन्दसि बहुलं टक् । या ब्राह्मणी सुरापी भवति सुरापा वा । गिरौ शेते । छन्दसि डः । गिरौ शेते गिरिशः । छन्दसि क्षदेस्तच्छीलादौ तृच् । क्षत्तृभ्यः । चित्त्वादन्तोदात्तः । दंशेश्छन्दसि क्स्नोरुपसंख्यानम् । दङ्क्ष्णवः पशवः । 'छन्दसि वनसनरक्षिमथाम्' ॥३।२।२७॥ इन् प्रत्ययः । ब्रह्मवनिः । गोसनिः । पापारक्षिः । हविर्मथिः । 'कव्यपुरीषपुरीष्येषु ञ्युट्' ॥३।२।६५॥ एषु वहेः ञ्युट् छन्दसि । कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः । 'हव्येनन्तःपादम्' ॥३।२।६६॥ हव्ये वहेर्ञ्युट् छन्दसि अनन्तःपादं चेद्वहिः । अग्निश्च हव्यवाहनः । अनन्तःपादं किम् । हव्यवाडग्निरजरः पिता नः । 'विजुपे छन्दसि' ॥३।२।७३॥ उपपूर्वाद्यजो विच् स्यात् । उपयट् । 'बहुलं छन्दसि' ॥३।२।८८॥ धातोः क्विप् । मातृहा । 'छन्दसि लिट्' ॥३।२।१०५॥ भूते । अहं सूर्यमुभयतो ददर्श । 'णेश्छन्दसि' ॥३।२।१३७॥ ण्यन्तादिष्णुच् । दृषदं धारयिष्णुः । 'क्याच्छन्दसि' ॥३।२।१७०॥ क्यच्क्यङ्क्यषन्तात् उः स्यात् । मित्रयुः । 'एरजधिकारे जवसवौ छन्दसि वाच्यौ' । ऊर्वोरस्तु मे जवः । पञ्चौदनसवः । 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' ॥३।३।९६॥ मन्त्रविषये क्तिन् स चोदात्तः । वृष्टिः । इष्टिः । पक्तिः । मतिः । वित्तिः । भूतिः । वीतिः । रातिः । उदात्तार्थं सूत्रम् । इषे विध्यर्थम् । इषेति निपातात् मन्त्रादन्यत्रादिरुदात्तः । 'छन्दसि गत्यर्थेभ्यः' ॥३।३।१२९॥ खल्विषये युच् । सूपसदनोग्निः । 'अन्येभ्योपि दृश्यते' ॥३।३।१३०॥ युच् । सुदोहनः । 'छन्दसि लुङ्लङ्लिटः' ॥३।४।६॥ धातुसंबन्धे कालमात्रे । लुङ् । शकलाङ्गुष्ठकोकरत् । लङ् । होतारमवृणीत । लिट् । अद्या ममार । 'शकि

१. हव्य° Dc1.

णमुल्कमुलौ ॥' ३।४।१२॥ शक्नोतौ उपपदे तुमर्थे णमुल्कमुलौ स्तः । विभाजं नाशक्नुवन् । अपलुपं नाशक्नुवन् । विभक्तुमपलोप्तुमित्यर्थः । 'अवचक्षे च' ॥३।४।१५॥ कृत्यार्थे निपातः । 'भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' ॥३।४।१६॥ भावलक्षणे वर्तमानेभ्य एभ्यस्तोसुन् स्यात् । आ संस्थातोर्वेद्यां सीदन्ति । उदेतोः । अपाकर्तोः । प्रवदितोः । प्रचरितोः । आहोतोः । आतमितोः । आजनितोः । उन्निपूर्वादपि ग्रहेश्छन्दसि । स्रगुद्यमनिपातयोर्घञ् । उद्ग्राभं च निग्राभं च । 'नित्यं संज्ञा छन्दसोः' ॥४।१।२९॥ अन्नन्तादुपधालोपिनो बहुव्रीहेर्ङीप् संज्ञायाम् । सुराज्ञी । यां पञ्चनाम्नी । दासात् परस्य पत्युर्नान्तादेशः स्याच्छन्दसि । दासपत्नी । 'केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च' ॥४।१।३०॥ केवलादिभ्यो ङीप् संज्ञाछन्दसोः । केवली । मामकी । भागधेयी । पापी । अपरी । समानी । आर्यी । कृती । सुमङ्गली । भेषजी । भाषायां तु केवला । संज्ञाछन्दसोः केवलीत्यादि । 'रात्रेश्चाजसौ' ॥४।१।३१॥ अजस्विषये ङीप् संज्ञाछन्दसोः । रात्री व्यख्यत् । जसौ ता रात्रयः । अजसादिष्विति वाच्यम् । रात्रिं सहोषित्वा । रात्र्य इत्यप्यस्ति । तत्र 'कृदिकारादक्तिनः' इति ङीप् । अन्तर्वत्पतिवतोश्छन्दसि वा नुक् । अन्तर्वत्नी देवानुपैत् । अन्तर्वती । पतिवत्नी तरुणवत्सा । पतिवती । 'नित्यं छन्दसि' ॥४।१।४६॥ बह्वादिभ्यश्छन्दसि नित्यं ङीष् । बह्वी नापिती । 'भुवश्च' ॥४।१।४७॥ सम्भ्राड्विभ्वी । प्रभ्वी । उत इत्येव । स्वयंभूः । मुद्गलाच्छन्दसि लिच्च । आनुक् स्यात् स्त्रियाम् । स च लित् । ङीष् च । रथीरभून्मुद्गलानीति । 'दीर्घजिह्वी च छन्दसि' ॥४।१।५९॥ ङीषन्तस्य निपातः । दीर्घजिह्वी । 'कद्रुकमण्डल्वो-

१. नि॰ Dc1.

छन्दसि' ॥४।१।७१॥ ऊङ् । कद्रूः । कमण्डलूः । गुग्गुलुमधुजतुपतयालूनां स इष्यते । गुग्गुलूः । आविःशब्दाच्छन्दसि त्यक्प्रत्ययो वाच्यः शैषिकः । आविष्ट्यः । तिलान्निष्फलात् पिञ्ज-छन्दसि ङिच्च । निष्फलस्तिलस्तिल्पिञ्जः । 'छन्दसि ठञ्' ॥४।३।१९॥ वर्षाशब्दात् ठञ् छन्दसि शैषिकः । ठकोपवादः । स्वरे भेदः । नभश्च-नभस्यश्च वार्षिकावृतू । बहिषष्टिलोप ईकञ् च वाच्यः । बाहीकः । ञित्त्वादाद्युदात्तः । ण्यतो वाङ्मतिपितृमतां छन्दस्युपसंख्यानम् । वाच्यम् । मात्यम् । पैतृमत्यम् । 'वसन्ताच्च' ॥४।३।२०॥ ऋत्वणोपवादः । छन्दसि । मधुश्च माधवश्च वासन्तिकावृतू । 'हेमन्ताच्च' ॥४।३।२१॥ ठञ् । सहश्च सहस्यश्च हैमन्तिकावृतू । 'द्व्यचश्छन्दसि' ॥४।३।१५०॥ मयट् विकारे । पर्णमयी जुहूः । 'नोत्त्वद्वर्ध्रबिल्वात्' ॥४।३।१५१॥ उकारवतो वर्ध्रबिल्वाभ्यां छन्दसि मयट् न स्यात् । मौञ्जं शिक्यम् । वार्ध्री । बैल्वः । 'ढश्छन्दसि' ॥४।४।१०६॥ सभाशब्दाच्छन्दसि तत्र साधुरित्यर्थे ढः । सभेयो युवा । 'भवे छन्दसि' ॥४।४।११०॥ सप्तम्यन्ताद् भवे यत् । मेध्याय नमो विद्युत्याय । 'पाथोनदीभ्यां ड्यण्' ॥४।४।१११॥ तत्र भवे । पाथसि भवः पाथ्यो वृषा । पाथोन्तरिक्षम् । नाद्यो गिरो मे । 'वेशन्तहिमवद्भ्यामण्' ॥४।४।११२॥ भवे । वैशन्तीभ्यः स्वाहा । हैमवतीभ्यः स्वाहा । 'स्रोतसो विभाषा ड्यड्ड्यौ' ॥४।४।११३॥ पक्षे यत् । स्रोत्यः । स्वरितत्वान्तोदात्तत्वे । ड्यड्ड्यतोः स्रोतस्यः । 'सगर्भसयूथसनुताद्यत्' ॥४।४।११४॥ सगर्भ्यः । सयूथ्यः । सनुत्यः । समानो गर्भः । समानं यूथम् । समानं नुतम् । इति कर्मधारयः । बहुव्रीहिर्वा । सर्वत्र 'समानस्य छन्दसि' इति सः । 'तुग्राद् घन्' ॥४।४।११५॥ तुग्रियः । अभ्राकाशयज्ञवरिष्ठेषु तुग्रः । 'अग्राद्यत्' ॥४।४।११६॥ अग्र्यम् । 'घच्छौ च' ॥४।४।११७॥ तत्र भवः । अग्रियः । अग्रीयः ।

१. ण्यतौ PC.

वा तुर्मीयम् । छे सत्यन्तोदात्तत्वम् । घनि त्वाद्युदात्तत्वम् । ‘ समुद्राभ्राद् घः ’ ॥४।४।११८॥ समुद्रिया नदी । अभ्रियस्येव घोषः । ‘ बर्हिषि दत्तम् ’ ॥४।४।११९॥ यत् । बर्हिष्ये निधेहि । ‘ दूतस्य भागकर्मणी ’ ॥४।४।१२०॥ यत् । ‘ रक्षोयातूनां हननी ’ ॥४।४।१२१॥ यत् । रक्षस्या तनूः । यातव्या । ‘ रेवतीजगतीहविष्याभ्यः प्रशस्ये ’ ॥ ४।४।१२२॥ यत् । यद्वो रेवती रेवत्यम् । जगत्यम् । हविष्यम् । ‘ असुरस्य स्वम् ’ ॥४।४।१२३॥ यत् । असुर्यम् । ‘ मायायामण् ’ ॥४।४।१२४॥ आसुरी माया । ‘ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ’ ॥४।४।१२५॥ मतुबन्तात् प्रथमान्तात् उपधानमन्त्रवाचिनः षष्ठ्यर्थे इष्टकासु वाच्यासु यत् । मतुपो लुक् च । वर्चस्वानुपधानमन्त्रः आसामिष्टकानां वर्चस्याः । ऋतव्याः । ‘ अश्विमानण् ’ ॥४।४।१२६॥ अश्विमानुपधानो मन्त्र आसामिष्टकानामाश्विनीरुपदधाति । ‘ वयस्यासु मूर्ध्नो मतुप् ’ ॥४।४।१२७॥ वयस्वानुपधानो मन्त्रो यासां तासु इष्टकासु वाच्यासु । यत्र मूर्धवयःशब्दौ स्तः स वयस्वान् मूर्धन्वांश्च । स उपधानो यासां ता उपदधाति । ‘ मत्वर्थे मासतन्वोः ’ ॥४।४।१२८॥ यत् । नभांसि सन्त्यस्मिन् नभस्यो मासः । तन्व्याम् । ओजोऽस्त्यस्या ओजस्या । रक्षस्या । अनन्तरार्थेऽपीष्टः । मध्वस्मिन्ननन्तरं मधव्या । लुगकारेकाररेफाश्चेष्यन्ते । लुक् । तपश्च तपस्यश्च । अकारः । इषः । ऊर्जः । इकारः । शुचिः । रेफः । शुक्रः । ‘ मधोर्ञ च ’ ॥४।४।१२९॥ मत्वर्थे मासतन्वोर्मध्ययोर्ञः चात् यच्च । उपसंख्यानाल्लुक् च । माधवो मधव्यो मधुर्मासः । माधवा मधव्या[2] मधुस्तनुः । ‘ ओजसोऽहनि यत्खौ ’ ॥४।४।१३०॥ दिने वाच्ये । ओजस्यमहः । ओजसीनम् । ‘ वेशोयशआदेर्भगाद्यल् ’ ॥४।४।१३१॥ वेशोभगयशोभगशब्दाभ्यां मत्वर्थे यल् । वेशोभगोऽस्यास्तीति वेशोभग्यः । वेशो बलम् । यशोभग्यः । श्रीकाममाहात्म्यप्रयत्नवीर्ययशांसि भगः । ‘ ख च ’ ॥४।४।१३२॥

१. बर्हिषि त्वं निधेहि PC. २. मधव्यः PC.

वेशोभगीनः । 'पूर्वैः कृतमिनयौ च' ॥४।४।१३३॥ पूर्वशब्दात् तृतीयान्तात् इनयौ ख च । पथिभिः पूर्विणैः पूर्व्यैः पूर्वीणैः । पूर्वैः कृताः पन्थान इति तेषां प्रशंसा । 'अद्भिः संस्कृतम्' ॥४।४।१३४॥ अप्-शब्दात् संस्कृतमित्यर्थे यत् । अप्यं हविः । 'सहस्रेण संमितौ घः' ॥४।४।१३५॥ सहस्रशब्दात् तृतीयान्तात् सदृशे वाच्ये घः । सहस्रियः। 'मतौ च' ॥४।४।१३६॥ मत्वर्थे च सहस्राद् घः । सहस्रियः । 'सोममर्हति यः' ॥४।४।१३७॥ सोममर्हन्ति सौम्या ब्राह्मणाः । 'मये च' ॥४।४।१३८॥ सोमशब्दान्मत्वर्थे आगतविकारावयवप्रकृतिषु यः । सोम्यं मधु । सोममयमित्यर्थः । 'मधोः' ॥४।४।१३९॥ यो निवृत्तः । मधोर्यत् । मधव्याः श्लोकाः । मधुमया इत्यर्थः । 'वसोः समूहे च' ॥४।४।१४०॥ समूहे मयडर्थे च यत् । वसव्यः । समूहो मयडर्थो वा । अकारोक्षरात् समूहे वाच्यः । आश्रावयेति चतु-रक्षरम् । अक्षरस्तोमवृत्तेः छन्दःशब्दात् स्वार्थे यत् । सप्तदशा-क्षरं छन्दस्यः । वसुशब्दादपि स्वार्थे यदिष्टः । वसुभिर्वसव्यैः । वसुभिरित्यर्थः । 'नक्षत्राद् घः' ॥४।४।१४१॥ स्वार्थे । नक्षत्रियेभ्यः स्वाहा । 'सर्वदेवात्तातिल्' ॥४।४।१४२॥ स्वार्थे । सर्वतातिः । देवतातिः । 'शिवशमरिष्टस्य करे' ॥४।४।१४३॥ शिवादिभ्यः षष्ठ्यन्तेभ्यः कर इत्यर्थे तातिल् । शिवस्य करः शिवतातिः । शंतातिः । अरिष्टतातिः । 'भावे च' ॥४।४।१४४॥ शिवस्य भावः शिवतातिः । शंतातिः । अरिष्टतातिः । 'शनूशतोर्डिनिश्छन्दसि' । तदस्य परिमाणमित्यर्थे वाच्यः । पञ्चदशिनोर्धमासाः । त्रिंशिनो मासाः । 'विंशतेश्चेति वाच्यम्' । विंशिनोङ्गिरसः । 'छन्दसि सादृश्ये युष्मदस्मदोर्वतुप् वाच्यः' । त्वावतः पुरूवसो । यज्ञं विप्रस्य मावतः । 'सप्तनोञ् छन्दसि' ॥५।१।६१॥ सप्तन्शब्दात् वर्गेभिधेयेञ् स्यात् छन्दसि । साप्त साप्तान्यसृजत् । 'छन्दसि च' ॥५।१।६७॥

१. After it तृतीयान्तात् Dc3, PC.

प्रातिपदिकमात्रात् तदर्हतीति यः। ओदन्या व्रीहयः। यूप्याः पलाशाः। 'वत्सरान्ताच्छश्छन्दसि' ॥५।१।९१॥ वत्सरशब्दान्तात् छप्रत्ययश्छन्दसि निवृत्तादिषु । इद्वत्सरीयः। 'छन्दसि घस्' ॥५।१।१०६॥ ऋतुशब्दात् तदस्य प्राप्तमित्यर्थे घस्। सकारः पदत्वार्थः। ऋत्वियः। 'उपसर्गाच्छन्दसि धात्वर्थे' ॥५।१।११८॥ उपसर्गाद्धात्वर्थे वतिः स्यात्। य उद्वतो निवतो यासि । उद्वतो निगतश्चेत्यर्थः। 'थट् च च्छन्दसि' ॥५।२।५०॥ नान्तादसंख्यादेः परस्य डटः थट् मट् चागमः। पञ्चथानि। पञ्चमम्। 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' ॥५।२।८९॥ पर्यवस्थातरि प्रतिपक्षे निपातावेतौ। मा त्वा परिपन्थिनो विदन्। मा त्वा परिपरिणो विदन्। 'बहुलं छन्दसि' ॥५।२।१२२॥ विनिः प्रत्ययो मत्वर्थे बहुलं स्याच्छन्दसि। अग्ने तेजस्विन्। सूर्यो वर्चस्वान्। अष्ट्रावी। मेखलावी। द्वयावी। उभयावी। रुजावी। हृदयावी। मर्मावी। इत्यादि। 'छन्दसीवनिपौ वाच्यौ'। वंश्च मतुप् च। ई। रथीरभूत्। सुमङ्गलीरियं वधूः। वनिप्। मघवानमीमहे। वन् उद्वा च। मतुप्। उद्वती च। 'तयोर्दार्हिलौ च छन्दसि' ॥५।३।२०॥ इदंतदोर्यथासंख्यं दार्हिलौ स्तः। इदा। तर्हि। यथाप्राप्तं च। 'था हेतौ च च्छन्दसि' ॥५।३।२६॥ किमस्था स्यात् हेतौ प्रकारे च। कथा ग्रामं न पृच्छसि। कथा देवा आसन्। पुरा केन हेतुनेत्यर्थः। 'पश्च पश्चा च च्छन्दसि' ॥५।३।३३॥ अवरस्यास्तातेरर्थे निपातौ पश्चाच्च। पश्चसिंहः। पश्चासिंहः। पश्चाद्धसति। 'तुश्छन्दसि' ॥५।३।५९॥ तृजन्तात् तृन्नन्ताच्च इष्ठन्नीयसुनौ स्तः। आसुतिं करिष्ठः। दोहीयसी धेनुः। 'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि'। ॥५।३।१११॥ एभ्य इवार्थे थाल्। प्रत्नथा। पूर्वथा। विश्वथा। इमथा। 'अमु च च्छन्दसि' ॥५।४।१२॥ किमेत्तिङव्ययघादमु आमु च स्यात्। प्रतरं न ग्रामः। 'वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि' ॥५।४।४१॥ स्वार्थे। वृकतिः। ज्येष्ठतातिः। 'अन-

१. उद्व° PC. २. उद्वावी Dc3, PC.

सन्तान्नपुंसकाच्छन्दसि ' ॥५।४।१०३॥ अन्नन्तादसन्ताच्च क्लीबात् तत्पुरुषे टच् समासान्तः स्यात् । ऋषभचर्मेभिषिच्यते । देवच्छन्दसानि । वेति वाच्यम् । ब्रह्मचर्म । देवच्छन्दः । ' बहुप्रजाश्छन्दसि ' ॥५।४।१२३॥ बहुप्रजा इति निपात्यते । बहुप्रजा निर्ऋतिमाविवेश । ' छन्दसि च ' ॥५।४।१४२॥ दन्तशब्दस्य बहुव्रीहौ समासान्तो दतृ आदेशः स्यात् । उभयतोदतः प्रतिगृह्णाति । ' ऋतश्छन्दसि ' ॥५।४।१५८॥ ऋकारान्ताद्बहुव्रीहेः कप्प्रत्ययो न । हता मातास्य हतमाता । छन्दस्वस्अपस्ओकस्कविक्षेमवर्चस्निष्केवलउक्थजनपूर्वनवसूरमर्त्यायधिष्णेभ्यः स्वार्थे यत् । छन्दस्यः । वस्यः । अपस्यो वसाना । ओकस्यः । कव्योसि । क्षेम्यमध्यवस्यसि । वायुर्वर्चस्यः । निष्केवल्यं शंसति । उक्थ्यं शंसति । जन्यस्ताभिः । पूर्व्या[१] दिशः स्तोमं जनय । कुलालवरूढनिषादचण्डालमित्रामित्रेभ्यः छन्दसि स्वार्थे ण वाच्यः । कुलाल एव कौलालः । वारूढः । नैषादः । चाण्डालः । मैत्रः । आमित्रः । नेत्रन्ताद्बहुव्रीहेश्छन्दस्यब् वाच्यः । बृहस्पतिर्नेता येषां ते बृहस्पतिनेत्रा देवाः । सोमनेत्राः । ' लिटि धातोः—' इति द्वित्वम् । छन्दसि वेति वाच्यम् । यो जागार । दाति प्रियाणि । ' तुजादीनां दीर्घोऽभ्यासस्य ' ॥६।१।७॥ येषामभ्यासस्याविहितलक्षणं दीर्घत्वं दृश्यते तेषां तुजादीनामभ्यासदीर्घत्वं साधु स्याच्छन्दसि । तूतुजानः । मामहानः । स्वभां मीमाय । अनड्वान् दाधार । स तूताव । भाषायां न । तुतोज शबलान् हरीनिति । ' बहुलं छन्दसि ' ।६।१।३४॥ ह्वः संप्रसारणं स्यात् । इन्द्राग्नी हुवे । ह्वयामि । ऋक्शब्दे परे त्रः संप्रसारणमुत्तरपदादिलोपश्च । तिस्र ऋचोत्र तृचं सूक्तम् । ' रयेर्मतौ बहुलम् ।' संप्रसारणम् । रेवान् । रयिमान् । ' अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताश्रितमाशीराशीर्ताः ॥६।१।३६॥ एते छन्दसि निपात्यन्ते ।

१. पूर्वा Do3. PC.

इन्द्रश्च विष्णो यदपस्पृधेथाम् । स्पर्धेर्लङ्याथाम् । अपपूर्वस्येत्यन्ये । य उग्रा अर्कमानृचुः । वसून्यानृहुः । अर्चेरर्हेर्लिट्युसि । चिच्युषे । च्युङो लिटि थासि । तित्याज । त्यजेर्णलि । आतास्त इन्द्र सोमाः । श्रिता नो ग्रहाः । श्रीञ् पाके निष्ठायाम् । नाशीरं रुद्रे । आशीर्त ऊर्जम् । श्रीञ एव क्विपि निष्ठायां च । 'खिदेश्छन्दसि' ॥६।१।५२॥ खिद दैन्ये इत्यस्य धातोरेचः स्थाने वा आकारादेशः स्यात् । चित्तं चिखाद चिखेद । शीर्षंश्छन्दसि ॥६।१।६०॥ शिरःशब्देन समानार्थः शीर्षन् शब्दो निपात्यते । यत्ते शीर्ष्णो दौर्भाग्यम् । 'वा छन्दसि' ॥६।१।१०६॥ 'अमि पूर्वः' ॥६।१।१०७॥ अमि पूर्ववत्त्वं वा । शमीं च शम्यं च । 'संप्रसारणाच्च' ॥६।१।१०८॥ पूर्वरूपं वा । इज्यमानः । यजमानः । 'शेश्छन्दसि बहुलम्' ॥६।१।७०॥ लोपः स्यात् । या क्षेत्रा । या वना । यानि । एमन्नादिषु परेषु पूर्वपरयोः पररूपमेकादेशश्छन्दसि । अपां त्वेमन् । गोर्यूतौ छन्दसि । वान्तादेशो वाच्यः । गव्यूतिमाशास्ते । 'अङ्ग इत्यादौ च' ॥६।१।११९॥ अङ्गशब्दे य एङ् सोऽति परे प्रकृत्या अङ्गशब्दादौ योकारस्तस्मिन् परे च एङ् प्रकृत्या यजुषि । अङ्गे अङ्गे वृषा वृषा । प्राणो अङ्गे दिवो भवतु । 'अनुदात्ते च कुधपरे' ॥६।१।१२०॥ अनुदात्ते चाति कवर्गपरे धकारपरे च एङ् प्रकृत्या यजुषि । अयं सो अग्निः । अयं सो अध्वरः । 'अवपथासि च' ॥६।१।१२१॥ अवपथाःशब्दे अनुदात्ते अकारादौ परे एङ् प्रकृत्या यजुषि । त्री रुद्रेभ्यो अवपथाः । वपतेस्थासि लङि 'तिङ्ङतिङः' इति निघातः । 'भय्यप्रवय्ये च च्छन्दसि' ॥६।१।८३॥ बिभेतेः प्रपूर्वस्य वीत्यस्य च यति परतोयादेशो निपात्यते । भय्यः किलासीत् । वत्सतरी प्रवय्या । अयं स्त्रियामेव । हृदय्या आप इति च वाच्यम् । हृदय्या आपः । 'भवे छन्दसि' इति यत् । 'वा

छन्दसि' ॥६।१।१०६॥ दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो वा न स्यात् । मारुतीश्चतस्रः । मारुत्यश्चतस्रः । वाराही । वाराह्यौ । छन्दसि 'इकोसवर्णे—' इति प्राप्तस्य शाकल्यस्य सिति प्रत्यये परे निषेधो वाच्यः । 'छन्दसि घस्' इति ऋतुशब्दाद् घस् । ईषाअक्षादिषु छन्दसि प्रकृतिभावमात्रम् । ईषा अक्षा । का ईषिरे । विलाप आं अगमत् । विश्वजनादीनां छन्दसि छे वा तुगागमः । विश्वजनछत्रम् । विश्वजनच्छत्रम् । 'आपोजुषाणोवृष्णोवर्षिष्ठेम्बेम्बालेम्बिकेपूर्वे' ॥६।१।११८॥ यजुषि आपो इत्यादीनां चतुर्णामम्बेम्बाले एतयोश्चाम्बिकेपूर्वयोरेङ् अतिपरे प्रकृत्या । आपो अस्मान् । जुषाणो अप्सु राज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधिनाके । अम्बे अम्बाले अम्बिके । यजुषीदृगेव पठ्यते । 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' ॥६।१।१५१॥ ह्रस्वात् परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यात् मन्त्रे । सुश्चन्द्रो युष्मान् । पुरुश्चन्द्रः । 'पितरामातरा च छन्दसि' ॥६।३।३३॥ द्वन्द्वे निपातः । आ मा गन्तां पितरामातरा च । मातापितरावित्यर्थः । 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' ॥६।३।६३॥ ङ्यन्तस्याबन्तस्य च बहुलं ह्रस्वः संज्ञायाम् । रेवतिपुत्रः । न च । नान्दीघोषः । छन्दसि । कुमारिदारा । न च । फाल्गुनीपौर्णमासी । 'त्वे च' ॥६।३।६४॥ त्वप्रत्यये च बहुलं ह्रस्वः । अजत्वम् । रोहिणित्वम् । 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' ॥६।३।८४॥ समानस्य सः स्यात् मूर्धादिभिन्नस्मिन् उत्तरपदे परे । सगर्भ्यः । सयूथ्यः । 'सध मादस्थयोश्छन्दसि' ॥६।३।९६॥ मादस्थयोः परपदयोः सहस्य सधादेशः स्यात् । सधमादो द्युम्नीति । सधस्थः । 'पथि च छन्दसि' ॥६।३।१०८॥ पथिशब्दे परपदे कोः कवादेशः स्यात् का च वा । कवपथः । कापथः । कुपथः । 'साढ्यै साढ्वा साढेति निगमे' ॥६।३।११३॥ एते निपात्यन्ते । साढ्यै समन्तात् । साढ्वा शत्रून् । क्त्वान्तस्य निपातौ । साढेति तृजन्तस्य । 'छन्दसि च' ॥६।३।१२६॥ अष्टनः परपदे दीर्घः ।

१. इषिरे PC., Dc_3. २. आगमत् Dc_1.

अष्टाकपालः । अष्टापदी । भक्षस्य कारे मुम् छन्दसि । भक्षस्य कारः भक्षंकारः । 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' इति छन्दसि बहुलं वाच्यम् । विश्वाची च घृताची च कद्रीची । स्वरो रोहतौ छन्दस्युत्वं वा वाच्यम् । जाय एहि स्वो रोहाव । अन्येपि पृषोदरादिवत् ज्ञेयाः । 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' ॥६।३।१३१॥ एषां मतुपि परे दीर्घो मन्त्रे । सोमावती । अश्वावती । इन्द्रियावती । विश्वदेव्यावती । 'ओषधेश्च विभक्तावप्रथमायाम्' ॥६।३।१३२॥ दीर्घः स्यान्मन्त्रे । ओषधीभिः । ओषधीभ्यः । विभक्तौ किम् । ओषधिपते । अप्रथमायां किम् । ओषधिः । 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' ॥६।३।१३३॥ ऋग्विषये त्वादीनां दीर्घः । आ तू न इन्द्र । नू मर्तः । उत वा घा स्यालात् । मक्षू गोमन्तम् । तङ् प्रत्याहारः । भरता जातवेदसम् । तङो ङित्वो ग्रहस्तेनेह न । शृणोत ग्रावाणः । कूमनाः । अत्रा ते । उरुष्याणः । 'इकः सुञि' ॥६।३।१३४॥ सुञि परे ऋग्विषये दीर्घः । अभीषुणः सखीनाम् । 'सुञः' इति षः । 'नश्च धातुस्थोरुषुभ्यः' इति णः । 'द्व्यचोतस्तिङः' ॥६।३।१३५॥ द्व्यचस्तिङन्तस्यातो मन्त्रे दीर्घः स्यात् । विद्मा हि त्वा सत्पतिं शूर गोनाम् । द्व्यचः किम् । अश्वा भवत वाजिनः । अतः किम् । आ देवान् वक्षि यक्षि च । 'निपातस्य च' ॥६।३।१३६॥ मन्त्रे दीर्घः । एवा ते । 'छन्दस्युभयथा' ॥६।४।५॥ तिसृचतसृशब्दयोरङ्गस्य दीर्घो वा नामि । तिसृणाम् । तिसृणाम् । चतसृणाम् चतसृणाम् । 'वा षपूर्वस्य निगमे' ॥६।४।९॥ असंबुद्धौ सर्वनामस्थाने परे षपूर्वस्योपधाया वा दीर्घः । तक्षाणं तिष्ठन्तम् । तक्षणं तिष्ठन्तम् । 'जनिता मन्त्रे' ॥६।४।५३॥ इडादौ तृचि णिलोपो निपात्यते मन्त्रे । यो नः पिता जनिता । 'शमिता यज्ञे' ॥६।४।५४॥ यज्ञविषये शमयितेर्णिलोपो निपात्यते । शृतं हविः शमिता । 'युप्लुवोर्दीर्घश्छन्दसि' ॥६।४।५८॥ युप्लुवोर्ल्यपि दीर्घः स्यात् । वियूय विप्लूय । 'छन्दस्यपि दृश्यते' ॥६।४।७३॥ अनजादीनामप्याट्

लुङादिषु । आवः । आयुनक् । वृयुजोर्लुङि 'मन्त्रे घस—' इति च्लेर्लुकि रूपे । 'बहुलं छन्दस्यमाङ्योगेऽपि' ॥६।४।७५॥ अडाटौ छन्दस्यमाङ्योगेऽपि न स्तः । माङ्योगेऽपि स्तो बहुलम् । जनिष्ठाः । मा वः क्षेत्रे परबीजान्यवाप्सुः । 'इरयो रे' ॥६।४।७६॥ इरादेशस्य इरे इत्यस्य रे आदेशो बहुलं छन्दसि । गर्भं प्रथमं दध्र आपः । धाञो रेभावस्यासिद्धत्वादातो लोपः । न च स्यात् । अग्निकर्माणि चक्रिरे । 'तनिपत्योश्छन्दसि' ॥६।४।९९॥ एतयोरुपधालोपोऽजादौ क्ङिति । वितत्निरे कवयः । शकुना इव पप्तिम । 'घसिभसोर्हलि च' ॥६।४।१००॥ एतयोरुपधालोपो हलि । सग्धिश्च मे । बब्धां ते हरी धानाः । लोट् तसस्ताम् । 'विभाषर्जोश्छन्दसि' ॥६।४।१६२॥ ऋजु इत्यस्य ऋतः स्थाने रः स्यादिष्ठेमेयस्सु परतः । ऋजिष्ठमेति पन्थानम् । रजिष्ठं वा । 'ऋव्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि' ॥६।४।१७५॥ एतानि निपात्यन्ते । ऋतौ भवमृव्यम् । वास्तौ भवं वास्त्व्यम् । वस्तुनि भवो वास्त्वः । माध्वीर्नः सन्त्वोषधीः । हिरण्यस्य विकारो हिरण्ययः । छन्दस्यमिपचोरलिट्येत्वं वाच्यम् । व्येमानम् । अमो विपूर्वस्य चानशि मुक् न । लिङि । पेचिरन् । पेचिम । छान्दसो ह्रस्वः । यजिवप्योश्च । आयेजे । यजेर्वपेश्चानजादेरप्याडागमश्छान्दसत्वात् । 'बहुलं छन्दसि' ॥७।१।८॥ धातुमात्रात् परस्य रुट् स्यात् । देवा अदुह्र । 'नेतराच्छन्दसि' ॥७।१।२६॥ इतरात् स्वमोरद्डादेशो न । इतरमण्डमजायत । 'क्त्वापि छन्दसि' ॥७।१।३८॥ अनञ्पूर्वसमासे क्त्वो ल्यप् क्त्वापि स्याच्छन्दसि । यजमानं परिधापयित्वा । उद्धृत्य जुहोति । 'श्रीग्रामण्योश्छन्दसि' ॥७।१।५६॥ श्रीणामुदारो धरुणो रयीणाम् । सूत ग्रामणीनाम् । 'गोः पादान्ते' ॥७।१।५७॥ गोशब्दात् परस्यामो नुट् स्यात् ऋक्पादान्ते । विद्माहि त्वा सत्पतिं शूरगोनाम् । पादान्ते किम् । गवां गोत्रम् । सर्वे विधयश्छन्दसि विकल्प्यन्ते इति पादान्तेऽपि क्वचिन्न । गोपतिं गवाम् । 'लोपस्त आत्मनेपदेषु'

॥७।१।४१॥ तकारस्य लोपः स्यात् तङि । देवा अदुह्र । अदुह्रतेति प्राप्ते । 'क्त्वो यक्' ॥७।१।४७॥ क्त्वो यगागमः स्यात् । दत्त्वाय सविता धियः । दत्त्वेति प्राप्ते । 'इष्ट्वीनमिति च' ॥७।१।४८॥ यजेः क्त्वान्ते निपातोयम् । इष्ट्वीनं देवान् । 'छन्दस्यपि दृश्यते' ॥७।१।७६॥ अस्थिदधिसक्थ्यक्ष्णामनजादावपि तृतीयादिविभक्तेरन्यत्रापि च दृश्यते छन्दसि । इन्द्रो दधीचो अस्थभिः । अस्थान्युत्कृत्य । अक्षण्वता । 'ई च द्विवचने' ॥७।१।७७॥ अस्थ्यादीनां द्विवचने परत ई च स्यात् । अक्षीभ्यां ते । 'दृक्स्ववस्स्वतवसां छन्दसि' ॥७।१।८३॥ एषां सौ परे नुम्स्यात् । ईदृङ् । स्ववान् । स्वतवान् । 'बहुलं छन्दसि' ॥७।१।१०३॥ ऋकारान्तस्य धातोर्बहुलमुकारः स्यात् । अनोष्ठ्यपूर्वस्यापि स्यात् । मित्रावरुणौ ततुरिः । ओष्ठ्यपूर्वस्यापि न । पप्रितमम् । स्यादपि पपुरिः । त्रिशब्दस्यामि छन्दसि त्रयादेशो वा । त्रीणामपि यथा स्यात् । त्रीणामपि समुद्राणाम् । 'हु ह्वरेश्छन्दसि' ॥७।२।३१॥ ह्वरेः निष्ठायां हु आदेशः स्यात् । अहुतमसि । 'अपरिह्वृताश्च' ।७।२।३२॥ हु इत्यस्याभावो ह्वरतेर्निपात्यते । अपरिह्वृताः सनुयाम वाजम् । 'सोमे ह्वरितः' ।५।२।३३॥ निपाताद् गुणः । सोमो ह्वरितो विह्वरितस्त्वम् ॥ 'ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृ-वरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च' ॥७।२।३४॥ अष्टादश निपाताः । ग्रसितं वा एतत्सोमस्य । विष्कभिते अजरे । येन स्वस्तभितम् । सत्येनोत्तभिता भूमिः । चत्ता वर्षेण विद्युत् । विकस्तमुत्तानाया हृदयम् । एते षट् क्तान्ताः । त्वष्टुरश्वस्य विशस्ता । शंस्ता विप्रा । शास्ता राजा । तरुतारं रथानाम् । तरूतारम् । वरुतारम् । वरूतारम् । वरूत्रीष्ट्वा देवीर्विश्वदेव्यावती । वरूत्रयः । एते अष्ट तृजन्ताः । ज्वलानां चतुर्णां शप इकारो निपात्यते । एते लडन्ताः । अग्निरुज्ज्वलिति । स्तोकं क्षरिति । वमिति सोमम् । अभ्यमिति वरुणम् । भाषायां तु

१. दिवः PC.

प्रस्तस्कन्ध(स्तब्धो)त्तब्धचतितविकसितविशसिताशंसिताशासितातरीता-तरितावरीतावरिताउज्ज्वलति क्षरति वमति अमति । 'बभूथाततन्थ-जगृम्भववर्थेति निगमे' ॥७।२।६४॥ निपाताः। त्वं हि होता प्रथमो बभूथ। येनान्तरिक्षमुर्वाततन्थ । जगृम्भा ते दक्षिणमिन्द्र हस्तम । ववर्थ त्वं हि ज्योतिषा । क्रमेण बभूविथ आतेनिथ जगृहिम ववरिथेति प्राप्ते । 'सनिंससनिवांसम्' ॥७।२।६९॥ सनिपूर्वस्य सनोतेः सनतेर्वा पदानुपूर्व्या छन्दस्येव निपात्यते । अग्निस्वामे सनिंससनिवांसम् । पावकादीनां छन्दसि 'प्रत्ययस्थात् कात्पूर्वस्य' इति अत्वं वेति वक्तव्यम् । हिरण्यवर्णाः शुचयः पावकाः । अलोमकाः । 'बहुलं छन्दसि' ॥७।३।९७॥ अस्तेः सिचश्चापृक्तस्य ईडागमो बहुलं स्याच्छन्दसि । आप एवेदं सलिलं सर्वमाः । अहरेवासीत् । सिचः । गोभिरक्षाः । अभैषीर्मा पुत्रक । 'जसि च' इत्येतत् प्रकरणे जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधाया ह्रस्व इत्येतस्मात् । अम्बाद्यर्थम् । अम्बे । अम्ब । दर्वे । दर्वि । शतक्रत्वः । शतक्रतवः । पश्वे नृभ्यः । पशवे नृभ्यः । किकिदीव्या । किकिदीविना । तन्वो ह्रस्वत्वं ङि सम्बुद्धौ वेति वाच्यम् । देवते देवतायां हे देवत हे देवते । 'नाभ्यस्तस्याचि' इति निषेधो बहुलं छन्दसि इति वाच्यम् । जुजुषत् । जुजोषत् । 'नित्यं छन्दसि' ॥७।४।८॥ णौ चङ्युपधाया ऋवर्णस्य स्थाने नित्यमृकारादेशः स्यात् । इरारामपवादः । अवीवृधत् पुरोडाशेन । अवीवृधताम् । अवीवृधन् । 'न छन्दस्यपुत्रस्य' ॥७।४।३५॥ पुत्रवर्जितादन्तस्य क्यचि ईत्वदीर्घौ न स्तः । मित्रयुः । 'क्याच्छन्दसि' इत्युः । अपुत्रस्य किम् । पुत्रीयन्तः सुदानवः । अपुत्रादीनां वाच्यम् । जनीयन्तो न्वग्रवः । 'दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति' ॥७।४।३६॥ एते क्यचि निपात्यन्ते । दुरस्युः । दुष्टीयतीति प्राप्ते । द्रविणस्युः । द्रविणीयतीति प्राप्ते । वृषण्यति । वृषीयतीति प्राप्ते । रिषण्यति । रिष्टीयतीति

१. पुत्रवर्जितस्यादन्तस्य PC.

प्राप्ते । 'अश्वाघस्यात्' ॥७।४।३७॥ अश्व अघ एतयोः क्यचि आत् स्यात् छन्दसि । अश्वायन्तो मघवन् । मा त्वा वृका अघायवो विदन् । 'देवसुम्नयोर्यजुषि काठके' ॥७।४।३८॥ देव सुम्न इत्येतयोः क्यचि आत्स्याद्यजुषि काठके । देवायन्तो यजमानाय शर्म । सुम्नायन्तो हवामहे । 'कव्यध्वरपृतनस्यर्चि लोपः' ॥७।४।३९॥ इत्येतेषामन्तस्य क्यचि लोपः स्यादृचि । कवि । कव्यन्तः । अध्वर । अध्वर्यन्तः । पृतना । पृतन्यन्तः । 'विभाषा छन्दसि' ॥७।४।४४॥ जहातेश्छन्दसि वा हिरादेशः स्यात् क्त्वि परे । हित्वा शरीरं यातव्यम् । हात्वा शरीरं यातव्यम् । 'सुधितवसुधितनेमधितधिष्वधिषीय च' ॥७।४।४५॥ दधातेर्निपाताश्छन्दसि । गर्भं माता सुधितम् । सुहितमिति प्राप्ते । वसुधितमग्नौ जुहोति । वसुहितमिति प्राप्ते । नेमधिताः । नेमहिता इति प्राप्ते । लोण्मध्यमे धिष्व सोमम् । धत्स्वेति प्राप्ते । आशीर्लिङात्मनेपदोत्तमपुरुषैकवचने धिषीय । धासीयेति प्राप्ते । 'कृषेश्छन्दसि' ॥७।४।६४॥ कृषेर्धातोश्छन्दसि यङि परेऽभ्यासस्य चुत्वं न । करीकृष्यते । 'दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च' ॥७।४।६५॥ एतेऽष्टादश निपात्यन्ते । दाधर्ति दर्धर्ति दर्धर्षि धारेः श्लौ यङ्लुकि वा निपाताः । बोभूतु भोः यङ्लुगन्तस्य लोट् गुणाभावः । 'भूसुवोस्तिङि' इति गुणाभावे सिद्धेऽन्यत्र यङ्लुगन्तस्य गुणप्रतिपत्त्यर्थम् । तेतिक्ते इति तिजेर्यङ्लुगन्तस्य तङ् । अलर्षि इयर्तेर्लटि लत्वम् । अलर्ति इत्यपि स्यात् । आपनीफणत् । फणतेर्यङ्लुकि नीगागमः । संसनिष्यदत् स्यन्देतेर्निगागमः षत्वं च । करिक्रत् । करोतेः । कनिक्रदत् । क्रन्देः । भरिभ्रत् । बिभर्तेर्यङ्लुकि शतृ । दविध्वतः । ध्वरतेः । दविद्युतत् । द्युतेः । तरित्रतः । तरतेः । सरीसृपतम् । सृपेः श्लौ अम् । वरीवृजत् । वृजेः श्लौ । सर्वेभ्यः शतृ । मर्मृज्येति मृजेर्लिटि णल्

अभ्यासस्य हक् । आगनीगन्ति । गमेर्लिटि श्लौ । इतिकरणं प्रकारप्रदर्शनार्थम् । 'बहुलं छन्दसि' ॥७।४।७८॥ अभ्यासस्य श्लौ बहुलमिकार आदेशः स्यात् छन्दसि । पूर्णां विवष्टि । वशेरेतद्रूपम् । तथा वचेः जनिमा विवक्ति । न च स्यात् । ददातीत्येवं ब्रूयात् । स्ववस्स्वतवसोर्मास उषसश्च तकारादेश इष्यते छन्दसि । स्ववद्भिः । स्वतवद्भिः । माद्भिष्ट इन्द्रो वृत्रहा समुषद्भिरजायथाः । 'छन्दसीरः' ॥८।२।१५॥ इवर्णान्ताद्रेफान्तात् परस्य मतोर्मस्य वः स्यात् । त्रिवती याज्यानुवाक्या भवति । अधिपतिवती जुहोति । मरुत्वदग्निवानिव । सरस्वतीवान् । दधिवान् । छन्दसि विधि-विकल्पान्नेह । सप्तर्षिमन्तं पश्य । ऋषिमान् । सूर्यं ते द्यावापृथिवीमन्तम् । रेफान्तात् । गीर्वान् । धूर्वान् । 'अनो नुट्' ॥८।२।१६॥ अन्नन्तान्मतोर्नुट् स्याच्छन्दसि । अक्षण्वतः । 'नाद् घस्य' ॥८।२।१७॥ नान्तात् परस्य घस्य नुट् स्याच्छन्दसि । सुपथिन्तरः । दस्युहन्तमः । भूरिदाव्नस्तुड् वाच्यः । भूरिदावत्तरः । ईद्रथिनः । रथीतरः । 'नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि' ॥८।२।६१॥ नसत्तनिषत्तौ निपूर्वस्य सदेः । नसत्तमञ्जसा । नसन्नं निषण्णमिति प्राप्ते । अनुत्तमिति उन्देर्नञ्पूर्वस्य । प्रतूर्तमिति त्वरतेः तुर्वि इत्यस्य वा । सूर्तमिति सृ इत्यस्य । गूर्तमिति गुरी इत्यस्य । प्रतूर्णं सृतं गूर्णमिति प्राप्ते । 'अम्नरूधरवरित्युभयथा छन्दसि' ॥८।२।७०॥ एषां छन्दस्युभयथा स्यात् । रुर्वा रेफो वा । अम्न एव । अम्नरेव । ऊध एव । ऊधरेव । अव एव । अवरेव । 'भुवश्च महाव्याहृतेः' ॥८।२।७१॥ भुवस् इत्यस्य महाव्याहृते-श्छन्दसि रुर्वा रेफो वा । भुव इत्यन्तरिक्षम् । भुवरित्य-न्तरिक्षम् । छन्दसि प्लुतविकाराविदुतौ वाच्यौ । अग्नाऊ इ पत्नीवः । 'मतुवसो रु संबुद्धौ छन्दसि' ॥८।३।१॥ मत्वन्तस्य वस्वन्तस्य संबुद्धौ पदस्य नकारस्य रुः स्यात् छन्दसि । इन्द्र

मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । 'दाश्वान्साह्वा-न्मीढ्वांश्च' ॥६।१।१२॥ एते निपात्यन्ते । दाश्वांसो दाशुषः सुतम् । साह्वान् वलाहकः । मीढ्वस्तोकाय तनयाय । मरुत्वान् हरिवान् मीढ्वानिति प्रकृतिः । वन उपसंख्यानम् । यस्त्वायन्तं वसुना प्रातरित्वः । 'उभयथर्क्षु' ॥८।३।८॥ अम्परे छवि नकारस्य रुत्वं नत्वं च ऋक्षु । तस्मिंस्त्वा दधाति । तस्मिन् त्वा दधाति । तांस्त्वं खाद । तान् त्वं खाद । 'दीर्घादटि समानपादे' ॥८।३।९॥ दीर्घान्नकारस्य रुः स्यात् अटि परे स चेदट् नकारश्च ऋक्-समानपादे स्यात् । ऋक्ष्विति प्रकृतत्वात् ऋक्पाद एव गृह्यते । देवां अच्छादीध्यत् । महां इन्द्रो य ओजसा । उभयथेत्येव । आदित्यान् याचिषामहे । 'आतोऽटि नित्यम्' ॥८।३।३॥ अटि परे रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः । महाँ इन्द्रः य ओजसा । केचिदनुस्वारमधीयते । तत्र छान्दसो व्यत्ययः । 'स्वतवान् पायौ' ॥८।३।११॥ स्वतवानित्यस्य रुः पायौ । स्वतवाः पायुः । स्वतवाँः पायुः । 'छन्दसि वाप्राम्रेडितयोः' ॥८।३।४९॥ विसर्जनीयस्य सकारो वा स्यात् कुप्वोः प्रशब्दमाम्रेडितं च वर्जयित्वा । अरुणः कारः । अरुणस्कारः । अयस्पात्रम् । अयःपात्रम् । अप्राम्रेडितयोः किम् । अग्निः प्रविद्वान् । परुषः परुषः । 'कःकरत्करतिकृधि-कृतेष्वनदितेः' ॥८।३।५०॥ एषु परेषु अनदितेर्विसर्जनीयस्य सः स्याच्छन्दसि । कः । विश्वतस्कः । अपस्करत् । अपस्करति । उरुणस्कृधि । सदस्कृतम् । अनदितेः किम् । यथा नो अदितिः करत् । 'पञ्चम्याः परावध्यर्थे' ॥८।३।५१॥ पञ्चमीविसर्गस्य सः स्यात् परौ परे उपरिभावे छन्दसि । दिवस्परि प्रथमं जज्ञे । अग्निर्हिमवत-स्परि । पञ्चम्याः किम् । अहिरिव भोगैः पर्येति बाहुम् । अध्यर्थे किम् । दिवः पृथिव्याः पर्योज उद्भृतम् । 'पातौ च बहुलम्' ॥८।३।५२॥ पातौ च परे पञ्चमीविसर्गस्य सः स्याद्बहुलं

छन्दसि। दिवस्पातु। राज्ञस्पातु। न च स्यात्। परिषदः पातु। 'इडाया वा' ॥८।३।५४॥ इडाया विसर्गस्य वा सकारः स्यात् पष्ठयाः पतिपुत्रपृष्ठपारपदपयस्पोषेषु। इडायास्पतिः। इडायाः पतिः। इत्यादि। 'यजुष्येकेषाम्' ॥८।३।१०४॥ युष्मत्तत्तक्षुषु परत एकेषामाचार्याणां मतेन सस्य मूर्धन्यादेशः स्याद् यजुषि। अर्चिभिष्ट्वम्। अर्चिभिस्त्वम्। अग्निष्टे अग्रम्। अग्निस्ते अग्रम्। अर्चिभिष्टतक्षुः। अर्चिभिस्ततक्षुः। 'स्तुतस्तोमयोश्छन्दसि' ॥८।३।१०५॥ एतयोः परतः सस्य मूर्धन्यो वा। त्रिभिष्टुतस्य। त्रिभिः स्तुतस्य। गोष्टोमम्। गोस्तोमम्। 'पूर्वपदात्' ॥८।३।१०६॥ पूर्वपदस्थान्निमित्तात् परस्य सस्य मूर्धन्य एकेषाम्। द्विषन्धिः। द्विसन्धिः। 'सुञः' ॥८।३।१०७॥ सुञो निपातस्य पूर्वपदस्था- न्निमित्तात् परस्य सस्य मूर्धन्यः। अभीषु णः सखीनाम्। ऊर्ध्व ऊ षु णः। 'छन्दस्यृदवग्रहात्' ॥८।४।२६॥ अवग्रह उच्चारभेदः। ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य णः स्यात्। नृमणाः। पितृयाणम्। इति ऋकारोऽवगृह्यते। 'नश्च धातुस्थोरुषुभ्यः' ॥८।४।२७॥ अस्मदादेशस्य नसो णत्वम्। धातुस्थात् तावत्। अग्ने रक्षा णः। शिक्षा णो अस्मिन्। उरु णस्कृधि। अभीषु णः सखीनाम्। ऊर्ध्व ऊ षु णः। उदः परस्य स्कन्देश्छन्दसि पूर्वसवर्णो वाच्यः। अग्नेः दूरमुत्कन्दनम्। 'सनोतेरनः' ॥८।३।१०८॥ सनोतेर्मूर्धन्यः। गोषाः। अनकारान्तात् किम्। गोसनि वाचमुदीरयन्। 'सहेः पृतनर्ताभ्यां च' ॥८।३।१०९॥ आभ्यां सहेः मूर्धन्यः। पृतनाषाहम्। ऋताषाहमित्यपि। 'न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्' ॥८।३।११०॥ एषां मूर्धन्यो न स्यात्। रपर। विस्रंसिकायाः। सृपि। पुरा क्रूरस्य विसृपः। सृजि। वाचो विसर्जनात्। स्पृशि। दिवस्पृशः। स्पृहि। निस्पृहः। सवनादीनाम्। सवने सवने। सुते सुते। सोमे

सोमे । सवनमुखे सवनमुखे । किंसं किंसम् । अनुसवनम् । अनुसवनम् । गोसनिः । अश्वसनिः । अश्वसनिग्रहणमनिणोपि षत्वमस्तीति ज्ञापनार्थम् । तुराषाहं जलाषाहमित्येतत् सिद्धं भवति । क्वचिदेवं गणपाठः । सवने सवने । सवनमुखे सवनमुखे । अनुसवनमनुसवनम् । बृहस्पतिसवनः संज्ञायाम् । शकुनिसवनम् । सोमे सोमे । सुते सुते । संवत्सरे संवत्सरे । विसं विसम् । किंसं किंसम् । मुसलं मुसलम् । गोसनिः । अश्वसनिः । 'निव्यभिभ्योऽड्व्यवाये वा छन्दसि' ॥८।३।११९॥ एभ्योऽड्व्यवाये सस्य मूर्धन्यो वा । न्यसीदत् पिता नः । व्यसीदत् । अभ्यसीदत् । न्यस्तौत् । व्यस्तौत् । पक्षे मूर्धन्यः । न्यषीदत् । व्यषीदत् । अभ्यष्टौत । एवं छान्दसानि शिष्टानि सूत्राणि व्याख्याय वैदिकाः कियन्तः प्रयोगा दर्शिताः । एवमन्येऽप्यूह्याः ।

श्री रामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्योऽयं माणिकाम्बाप्यजनयदतुलं विट्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेऽस्मिन् प्रसादे निरगमदमला वैदिकी प्रक्रियेयम्* ।

---

* Here follows in Dc_1 :—

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
छ । छ । श्रीः । श्रीः । छ । छ ।

संवत् १६०५ वर्षे ज्येष्ठ वदि ५ शुक्रे अद्येह श्रीसूर्यपुरवास्तव्य आभ्यन्तरनागरज्ञातीयस्मार्तवासुदेवकेन लिखितमिदं पुस्तकम् । छ । छ । श्रीरस्तु । शुभं भवतु । कल्याणमस्तु ।

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
परहस्तगताद्रक्षेदेवं वदति पुस्तिका ॥ १ ॥ छ । छ । Dc_1.

अथ 'लिति' इत्यस्य सूत्रस्य व्याख्यानेनोपलक्षितव्याख्यानानि स्वरसूत्राणि व्याकुर्वद्भिरस्माभिः स्वरप्रक्रियोच्यते । उदात्तोनुदात्तः स्वरितश्चेति त्रयः स्वराः । तल्लक्षणानि पूर्वत्रैवोक्तानि । चतुर्थोपि प्रचयाख्यः स्वर इति पाठका यं लक्षणकारा एकश्रुतिरिति वदन्ति । तांश्च स्वरान् साधारणप्रकृतिप्रत्ययसमासतिङन्तस्वरप्रकरणेषु प्रदर्शयिष्यामः । ततो वैदिकवाक्येषु स्वरप्रदर्शनप्रकरणं षष्ठे भवति । तत्र सुबन्ततिङन्तयोः प्रसङ्गेनोक्ताः स्वरास्ततो ज्ञेयाः । इह त्वनुक्ता एवोच्यन्ते । तत्र तावत् साधारणस्वरप्रक्रियाप्रकरणम् । 'अनुदात्तं पदमेकवर्जम्' ॥६।१।१९८॥ परिभाषेयं स्वरविधिविषया । यत्र पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं पदमनुदात्ताच्कं स्यात् । गोपायतीत्यत्रायप्रत्ययान्तस्य 'धातोः' इत्यन्तोदात्तत्वे कृते यकारात्परमकारमुदात्तं वर्जयित्वा शेषं पदमनुदात्ताच्कम् ।

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च ।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः ॥

आगमस्य । 'चतुरनडुहोरामुदात्तः' । चत्वारः । 'चतेरुरन्' इत्युरन्प्रत्ययान्तत्वात् चतुर् आद्युदात्तः । असत्येतस्मिन् चतुरः प्रकृतेरागमस्य च पृथक् स्वरः स्यात् । सति त्वेतस्मिन्नेकवर्जस्वरे सति शिष्टत्वादागमस्वरः प्रकृतिस्वरं बाधते । विकारस्य । अस्थनि । दधनि । 'अस्थिदधि—' इत्यनङ् । विकार उदात्तः । दधिशब्दः किन्प्रत्ययान्तत्वादन्तोदात्तः । अत्राप्यसत्येकवर्जस्वरे दधिशब्दस्यानङश्च पृथगेवोदात्तत्वं स्यात् । अस्मिंस्तु सत्यनङेव सति शिष्टत्वात् । प्रकृतेः । गोपायति । गुपिः 'धातोः' इत्यन्तोदात्तः । आयप्रत्ययस्तु 'आद्युदात्तश्च' इत्याद्युदात्तः ।

---

१. Before it PC. has—ओं नमो गणेशाय । २. तु पूर्व° Dc3. ३. स्वरविस्वरप्रदर्शन° Dc3.

गोपायतीति तु 'सनाद्यन्ता धातवः' इति धातुत्वादन्तोदात्तः। एवं पृथक् स्वरे प्राप्ते यकारस्यैव धातुस्वरः स्यात् सति शिष्टत्वात्। प्रत्ययस्य। कर्तव्यम्। धातोरन्तोदात्तत्वे प्रत्ययस्याद्युदात्तत्वे प्राप्ते प्रत्ययाद्युदात्तत्वमेव। सति शिष्टत्वादेव। परनित्यान्तरङ्गापवादैः स्वरैर्व्यवस्था सति शिष्टेन च। सति शिष्टस्वरो बलीयानिति वक्तव्यमन्यत्र विकरणेभ्य इति वचनात्। यो हि यस्मिन् सति शिष्यते स तद्बाधकः स्यात्। तथानन्तरमेव प्रदर्शितम्। तथा च कृष्णोत्तरासङ्गपुत्र इत्यत्र समासस्वरापवादो बहुव्रीहिस्वरः सति शिष्टेन समासस्वरेणैव बाध्यते। विकरणस्वरस्तु सति शिष्टोपि सार्वधातुकस्वरं न बाधते। लुनीत इत्यत्र तस एव स्वरः स्याद्युदात्तत्वम्। 'तत्पुरुषे तुल्यार्थ—' इति प्रकृतिभावेन निपातस्य नञो यदाद्युदात्तत्वं तेन उत्तरपदस्वरो बाध्यते। विभक्तिनिमित्ताच्च स्वरान्नञ्स्वरो बलीयानिति वाच्यम्। अचत्वारः। यस्य विभक्तिर्निमित्तमामस्तस्य यदुदात्तत्वं तत् सति शिष्टमपि नञ्स्वरेण बाध्यते। यच्चोपपदं कृति नञ् तस्य स्वरो बलीयानिति वक्तव्यम्। अकरणिर्ह ते वृषल भूयात्। सहनिर्दिष्टस्य स्वरो बलीयानिति वाच्यम्। अध्यगीषि भाष्यम्। पदग्रहं वाक्ये पृथक्पदस्वरार्थम्। देवदत्त गामभ्याज शुक्लां दण्डेनेति। परिमाणार्थं चैतत्पदग्रहणम्। तेन यस्य पदसंज्ञा भविष्यति तत् पदमित्युच्यते न सुप्तिङन्तम्। तेनैव तत्पदाधिकारस्य निवृत्तिं करोतीति ततः प्रागेव पदव्यपदेशात् स्वरविधिसमकालमेव शिष्टस्यानुदात्तत्वं स्यात्। तथा च कुवल्या विकारः कौवलमित्यत्रानुदात्तलक्षणोञ् सिद्धः स्यात्। 'अनुदात्तस्य च यत्रोदात्तलोपः' ॥६।१।१६१॥ यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात्। कुमार ई कुमारी। कुमारशब्दोन्तोदात्तः। तस्य ङीप्यनुदात्ते उदात्तो लुप्यते। अनुदात्तग्रहणमादेरनुदात्तस्योदात्तार्थम्। अन्त इति हि

प्रकृतत्वादन्तस्य स्यात् । मा हि धुक्षाताम् । यत्रेति किम् । भार्गवः । भार्गवौ । भृगवः । प्राक् सुबुत्पत्तेर्गोत्रप्रत्ययस्य लुक् । उदात्तलोप इति किम् । वैदी । अत्र ह्यनुदात्तलोपः । 'चौ' ॥६।१।२२२॥ चावित्यञ्चतिर्लुप्तनकारः । तत्र परे पूर्वस्यान्त उदात्तः । दधीचः पश्य । मधूचः पश्य । उदात्तनिवृत्तिस्वरापवादः । अतद्धिते इति वाच्यम् । दाधीचः । प्रत्ययस्वरोऽत्र । 'आमन्त्रितस्य च' ॥६।१।१९८॥ आमन्त्रितविभक्त्यन्तस्यादिरुदात्तः स्यात् । विप्र । विप्रौ । विप्राः । लुमता लुप्ते प्रत्ययलक्षणमत्रेष्यते । सर्पिरागच्छ । सप्तागच्छेति । 'आमन्त्रितस्य च' ॥८।१।१९॥ इदं त्वष्टमाध्यायस्थम् । षाष्ठिकस्यानन्तरोक्तस्यापवादः । अत्र च पदस्य पदात् अनुदात्तं सर्वमपादादावित्यनुवर्तते । आमन्त्रितान्तस्य पदात्परस्यापादादौ वर्तमानस्य सर्वस्यानुदात्तः स्यात् । पचसि देवदत्त । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः । नेह । यज्ञदत्त पचसि । देवदत्त आगच्छ । अयं दण्डो हरानेन ओदनं पच तव भविष्यति । 'आम एकान्तरमामन्त्रितमनन्तिके' ॥८।१।५५॥ आम उत्तरमेकपदान्तरमामन्त्रितान्तमनन्तिके विषयेनुदात्तं न स्यात् । आम् पचसि देवदत्ता३ । आम् भो देवदत्ता३ । भो इत्यामन्त्रितान्तरेपि प्रतिषेध इष्यते । प्लुतोदात्तः पुनरसिद्धत्वान्न प्रतिषिध्यते । अन्ये त्वाहुः । अनन्तिक इत्यनेन यन्न दूरं न संनिकृष्टं तत् परिगृह्यते तेनात्रैकश्रुतिरप्राप्तिरेव । प्लुतोपि नोदाहार्य इति । 'आमन्त्रितं पूर्वमविद्यमानवत्' ॥८।१।७२॥ आमन्त्रितान्तं पूर्वमामन्त्रितकार्यस्य प्रयोजकं न स्यात् । देवदत्त यज्ञदत्त । आमन्त्रितस्य पदात् परस्येति निघातोत्र न भवति । हे देवदत्त पचसि इति 'तिङ्ङतिङः' इति निघातो न । देवदत्त तव ग्रामः स्वम् । अत्र युष्मदादेशो न । इत्युदाहार्यम् । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' ॥८।१।७३॥ पर्यायेषु मा भूदिति । अग्ने देवि सरस्वति । 'विभाषितं

विशेषवचने बहुवचनम्' ॥८।१।७४॥ आमन्त्रितान्ते विशेषवचने परे पूर्वामन्त्रितान्तमविद्यमानवद्वा। देवाः शरण्याः। ब्राह्मणा वैयाकरणाः। बहुवचनं किम्। माणवक जटिलकाऽ२। नित्यं विद्यमानवदेव। 'सुबामन्त्रिते पराङ्गवत् स्वरे' ॥२।१।२॥ सुबन्तमामन्त्रिते परे परस्याङ्गवत् स्यात् स्वरे कार्ये। तादात्म्यातिदेशोयम्। सुबन्तमामन्त्रितमनुप्रविशति। कुण्डेनाटन्। मद्राणां राजन्। इत्याद्युदाहर्तव्यम्। सुप् किम्। पङ्च्ये पीड्यमान। आमन्त्रिते किम्। गेहे गार्ग्यः। परेति किम्। पूर्वस्य मा भूत्। देवदत्त कुण्डेनाटन्। अङ्गग्रहणं किम्। उभयोराद्युदात्तत्वं मा भूत्। पिण्डीभूतस्य स्यादिति। वत्करणं स्वाश्रयमपि यथा स्यात्। आं कुण्डेनाटन्। एकान्तरता भवति। समानाधिकरणस्योपसंख्यानमनन्तरत्वात्। तीक्ष्णया सूच्या सीव्यन्। अव्ययानां निषेधः। उच्चैरधीयान। 'उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य' ॥८।२।४॥ उदात्तस्थाने यो यणादेशस्तथा स्वरितस्य स्थाने यो यणादेशस्तस्मात्परस्यानुदात्तस्य स्वरित आदेशः स्यात्। उदात्तयणः। कुमार्यै। उदात्तनिवृत्तिस्वरेणायमीकार उदात्तस्तस्य यो यण् तस्मात्परस्यानुदात्तस्य विभक्त्यैकारस्य स्वरितो जातः। स्वरितयणः। सकूल्व्याशा। कृत्स्वरेणान्तोदात्तः। तस्य यो यणादेशः स उदात्तयण्। ततः परस्य सप्तम्येकवचनस्य स्वरितस्य यो यण् तस्मात् स्वरितयणः परस्याशाशब्दाकारस्यानुदात्तस्य स्वरितो जातः। ननु चात्र यणादेशे कार्ये यदुदात्तयणः परस्य सप्तम्येकवचनस्य स्वरितत्वं तत् 'पूर्वत्रासिद्धम्' इत्यसिद्धम्। तत् कथमयं स्वरितयण् स्यात्। अथोच्येत आश्रयात्सिद्धं स्यादिति तर्हि 'उदात्तादनुदात्तस्य स्वरितः' इत्यस्याप्याश्रयात्सिद्धत्वं स्यात्। ततश्च दध्याशेत्यत्र दधिशब्द आद्युदात्तः शेषनिघातः 'उदात्तादनुदात्तस्य स्वरितः' इति तस्य स्वरितत्वं तस्याप्याश्रयात् सिद्धत्वात् तत्स्थानिकादपि यणः परस्यानुदात्तस्य स्वरितः प्रसज्येत। अत्रोच्यते। अस्ति ह्यत्र वार्तिकम्। यण्स्वरो यणादेशे सिद्धो वक्तव्यः स्वरितयणः स्वरितार्थ इति।

तेनास्यैव स्वरितस्याश्रयात् सिद्धत्वं स्यात् नान्यस्य । ननु चात्र स्वरितयण्ग्रहणं न कार्यम् । यतः खलप्व्याशेत्येवमादावुदात्तयण इत्येव स्वरितः सिद्धः । न च वाच्यं न सिद्धः । स्वरितयणा व्यवधानादिति । स्वरविधौ व्यञ्जनमविद्यमानवदिति तस्याविद्यमानत्वेन व्यवधायकत्वाभावादिति चेदुच्यते । पूर्वस्मादपि हि विधौ 'अचः परस्मिन्—' इति स्थानिवत्त्वमाश्रितमिति व्यवधानमस्त्येव । न च वाच्यं स्वरविधौ स्थानिवत्त्वे 'न पदान्त' इति निषेध इति । यतः स्वरदीर्घयलोपेषु लोपाजादेशस्यैवास्थानिवत्त्वात् । उदात्तस्वरितयोः किम् । शार्ङ्गरव्याशा । अनुदात्तयणादेशोयम् । अनुदात्तस्येति किम् । कुमार्यत्र । अत्रेत्याद्युदात्तो लित्स्वरेण । 'एकादेश उदात्तेनोदात्तः' ॥८।२।५॥ उदात्तेन सहानुदात्तस्य एकादेशे स उदात्तः स्यात् । अग्नी । वायू । अग्निवायू प्रातिपदिकस्वरेणान्तोदात्तौ । विभक्तिरनुदात्ता । उदात्तेनेति किम् । पचन्ति । अन्तीत्यस्य लसार्वधातुकत्वानुदात्तत्वे कृते शवकारस्य च यदुदात्तादनुदात्तस्य स्वरित इति तस्यासिद्धत्वाद्द्वयोरनुदात्तयोरेकादेशः । 'स्वरितो वानुदात्ते पदादौ' ॥८।२।६॥ अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितः स्यादुदात्तो वा । सु उत्थितः । सूत्थितः । सुशब्दस्य 'सुः पूजायाम्' इति कर्मप्रवचनीयस्यापि स्वती पूजायामिति प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वम् । शेषमनुदात्तम् । तेनानुदात्ते पदादावेकादेशो भवति । वि ईक्षते । वीक्षते । तिङन्तनिघाते कृते एकादेशः । स्वरितग्रहणं विस्पष्टार्थम् । उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यतः स्वरित एव स्यात् । अनुदात्ते किम् । देवदत्तोत्र । पदादौ किम् । वृक्षौ । वृक्षाः । एकादेशस्वरोन्तरङ्गः सिद्धो वाच्यः । किमर्थम् । अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् । अय् । वृक्ष इदमित्यत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः । स 'एकादेश—' इत्युदात्तः । तस्य सिद्धत्वं वाच्यम् ।

आन्तर्यतोऽयादेश उदात्तो यथा स्यादिति । आय् । कुमार्या इदम् । यदि 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वे कृते विभक्तेराटश्चैकादेशस्तदा स्यादिदं प्रयोजनम् । अथ कृते एकादेशे 'उदात्तयणो हल्पूर्वात्' इति स्वरस्तदा नैतदस्य प्रयोजनं भवति । आत् । वृक्षाविदम् । एकादेशस्वरः । गाङ्गेऽनूप इति । गाङ्गेशब्दे य एकारः 'एकादेश उदात्तेनोदात्तः' इत्युदात्तः तस्य सिद्धत्वात् यः पुनः 'एङःपदान्तादति' इत्येकादेशः स उदात्तेन सह भवति । ततश्च 'स्वरितो वानुदात्ते पदादौ' इति पक्षे स्वरितः स्यात् पक्षे उदात्तो भवति । शतृस्वरः । तुदती । अलुपदेशाल्लसार्वधातुकानुदात्तत्वे कृते एकादेश उदात्तस्तस्य सिद्धत्वात् 'शतुरनुमो नद्यजादी' इत्येष स्वरो भवति । एकाननुदात्तः । तुदन्ति । एकादेशस्वरस्य सिद्धत्वात् 'अनुदात्तं पदमेकवर्जम्' इति वर्ज्यमानता स्यात् । सर्वानुदात्तः । ब्राह्मणास्तुदन्ति । एकादेशस्वरस्य सिद्धत्वात् कृते तस्मिन् 'तिङ्ङतिङः' इति निघातः स्यात् । अन्तरङ्ग इति वचनाद्बहिरङ्गस्यासिद्धत्वमेव । पचतीति । इतिशब्दो निपातत्वादाद्युदात्तः । अत्र बाह्यपदापेक्षत्वादेकादेशस्य बहिरङ्गत्वान्न तत्स्वरो बहिरङ्गस्यासिद्धत्वाद्वर्ज्यमानता न । 'उदात्तादनुदात्तस्य स्वरितः' ॥८।४।६६॥ उदात्तात् परस्यानुदात्तस्य स्वरित आदेशः स्यात् । गार्ग्यः । अस्य स्वरितस्यासिद्धत्वात् 'अनुदात्तं पदमेकवर्जम्' इत्येतन्न प्रवर्तते । तेनोदात्तः स्वरितश्चेति द्वावपि श्रूयेते । 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्' ॥८।४।६७॥ उदात्तपरोऽनुदात्तः स्वरितो न भवति । गार्ग्यस्तत्र । तत्रेत्याद्युदात्ते परे गार्ग्यन्तो न स्वरितः । गार्ग्यादीनां तु मते स्वरित एव । 'तस्यादित उदात्तमर्धह्रस्वम्' ॥१।२।३२॥ उदात्तानुदात्तसमाहारः स्वरित इत्युक्तम् । तस्यादावर्धह्रस्वमुदात्तं स्यात् शेषमनुदात्तम् । अर्धह्रस्वमित्यर्धमात्रा लक्ष्यते । शिक्यमित्यत्रादितोऽर्धमात्रा उदात्ता

१. दीर्घस्वा or एकादेशस्वा.

अर्धमात्रा अनुदात्ता । कन्या इत्यत्रार्धमात्रादित उदात्ता अध्यर्ध-मात्रा अनुदात्ता । माणवका३ इत्यत्रादितोर्धमात्रोदात्ता अर्धतृतीय-मात्रानुदात्ता । इत आरभ्य नवसूत्राण्यसिद्धकाण्डे उदात्तस्ये-त्यस्मात्पराणि पठितव्यानि । एतद्विभागाख्यानमाष्टमिकस्यापि यथा स्यात् । उत्तरत्रापि प्रयोजनं तत्र तत्र वक्ष्यामः । 'एकश्रुति दूरात् संबुद्धौ' ॥१।२।३३॥ त्रैस्वर्ये पदानां प्राप्ते आरम्भः । एका श्रुतिर्यस्य तदिदमेकश्रुति । संबोधयति येन तदिदं संबोधनं संबुद्धि रेकवचनम् । दूरात्संबोधने एकश्रुति वाक्यं स्यात् । स्वराणामुदात्ता-दीनां भेदतिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्ता ३। दूरात् किम् । आगच्छ भो माणवक देवदत्त । 'यज्ञकर्मण्यजप-न्यूङ्खसामसु' ॥१।२।३४॥ यज्ञकर्मणि मन्त्राणां नैकश्रुत्यं स्यात् जपन्यूङ्खसामानि वर्जयित्वा । अपां रेतांसि जिन्वतो३म् । यज्ञकर्मणीति किम् । स्वाध्यायकाले मा भूत् । अजपादिष्विति किम् । ममाग्ने वर्चो विहवेष्वस्तु । न्यूङ्खाः षोडश ओंकाराः । तेषु प्रथमसप्तमत्रयोदशास्त्रय उदात्तास्त्रिमात्राः । इतरे त्रयोदश अनुदात्ता अर्धाकाराः । एतच्च आश्वलायनेनोक्तमुदाहृतं च । सामानि वाक्यविशेषस्तथा गीतयः । ए३विश्वं समत्रिणं दहा३ । 'उच्चैस्तरां वा वषट्कारः' ॥१।२।३५॥ यज्ञकर्मणि वषट्कार उच्चैस्तरां वा स्यात् एकश्रुतिर्वा । वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते । वौषड्ग्रहणं तु वैचित्र्यार्थं न कृतम् । सोमस्याग्ने वीही३वौ३षट् । 'विभाषा छन्दसि' ॥१।२।३६॥ छन्दसि विषये विभाषा एकश्रुतिः स्यात् । पक्षे त्रैस्वर्य-मेव । वेति प्रकृते विभाषाग्रहणं यज्ञकर्मणीत्यस्य निवृत्त्यर्थम् । अग्निमीळे पुरोहितम् । अग्निमीळे पुरोहितम् । केचित्त्वियं व्यवस्थित-विभाषेत्याहुः । ततश्च ऋग्वेदब्राह्मणादिविषया एकश्रुतिः । त्रैस्वर्य-विज्ञानं तु ऋग्वेदसंहिताविषयमिति । 'न सुब्रह्मण्यायां स्वरितस्य तूदात्तः' ॥१।२।३७॥ अत्र 'यज्ञकर्मणि' 'विभाषा छन्दसि'

इति च प्राप्तैकश्रुतिर्निषिध्यते । सुब्रह्मण्यो३मिन्द्र आगच्छ हरिव आगच्छ । मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जार कौशिकब्राह्मण गौतमब्रुवाण श्वः सुत्यामागच्छ मघवन् । अत्र सुब्रह्मण्योमित्योकारः स्वरितः । उदात्तस्वरितयोरेकादेशत्वात् । तस्योदात्तोनेन विधीयते । इन्द्र इति 'आमन्त्रितस्य च' इत्याद्युदात्तम् । आष्टमिकस्तु निघातोऽसमानवाक्यत्वान्न तस्य । द्वितीयो वर्णः 'उदात्तादनुदात्तस्य—' इति स्वरितः प्रसक्तः तस्यानेनोदात्तः । आगच्छेत्याकार उदात्तः । ततः परोनुदात्तः स्वरितः । तस्यानेनोदात्तः । छेत्यनुदात्तः । हरिव आगच्छेत्यनयैव प्रक्रियया चत्वार उदात्ताः । द्वावनुदात्तौ । मेधातिथेरिति षष्ठ्यन्तं परमामन्त्रितमनुप्रविशति । पराङ्गवद्भावात् । ततः सकलस्यामन्त्रितस्याद्युदात्तत्वे कृते द्वितीयाक्षरमनुदात्तं स्वरितस्योदात्तः शेषमनुदात्तम् । वृषणश्वस्य मेने इति गौरावस्कन्दिन्निति अहल्यायै जार इति पूर्वेण समानानि । कौशिकब्राह्मणेति गौतमब्रुवाणेति चेन्द्रेत्यनेन समानम् । श्वः सुत्यामागच्छ मघवन्निति आमन्त्रितं निहन्यते । 'देवब्रह्मणोरनुदात्तः' ॥ १।२।३८॥ सुब्रह्मण्यायामेव देवब्रह्मण इति पठ्यते । तत्र पूर्वेण स्वरितस्योदात्तः प्राप्तोऽनेनानुदात्तो विधीयते । देवा ब्रह्माण आगच्छत । द्वयोरपि पदयोरामन्त्रितत्वादाद्युदात्तत्वे शेषनिघाते उदात्तादनुदात्तस्य स्वरितत्वे कृते तस्यानुदात्तः स्यात् । 'स्वरितात् संहितायामनुदात्तानाम्' ॥ १।२।३९॥ संहितायां विषये स्वरितात् परेषामनुदात्तानामेकश्रुतिः स्यात् । इमं मे गङ्गे यमुने सरस्वति । इममित्यन्तोदात्तं म इत्यनुदात्तम् । विधानकाल एव निघातविधेः । तत्पुनर् 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितं संपद्यते । ततः परेषां गङ्गेप्रभृतीनामनुदात्तानामेकश्रुतिर्भवति । सर्व एते आमन्त्रितनिघातेनानुदात्ताः । संहितायां किम् । अवग्रहे मा भूत् । इमं मे गङ्गे यमुने सरस्वति । 'उदात्तस्वरितपरस्य

सन्नतरः ' ॥१।२।४०॥ उदात्तात् पूर्वस्य स्वरितात् पूर्वस्यानुदात्तस्यानुदात्ततरः आदेशः स्यात् । पृश्निमातरोपः । मातर इत्यनुदात्तः । अपइत्यन्तोदात्तः । तत्रानुदात्तस्वरितयोर्य एकादेश ओकारः सोनुदात्तः । तस्योदात्ते परेनुदात्ततर आदेशः स्यात् । अध्यापक क्व गन्ता । अध्यापकेत्याद्युदात्तः । क्वेति स्वरितः । तस्मिन् परे क्वेत्यनुदात्तस्य सन्नतर आदेशः । ' अनुदात्तं च ' ॥ ८।१।३॥ द्विरुक्तस्य परं रूपमनुदात्तं स्यात् । भुङ्क्ते भुङ्क्ते ॥

इति साधारणप्रक्रिया ॥

अथ प्रकृतिस्वरप्रकरणमुच्यते । प्रकृतिस्तु द्विधा धातुः प्रातिपदिकं च । तत्र तावद्धातुस्वर उच्यते । ' धातोः ' ६।१।१६२॥ धातोरन्त उदात्तः स्यात् । क्विबन्ता धातवः सर्वे उदाहरणम् । गोपायतं नः । अभिजित् विश्वजिदित्यादौ गतिकारकोपपदात् कृदिति कृदुत्तरपदप्रकृतिस्वरत्वे धातुस्वर एव । यत्र प्रत्ययः तथा धातुस्वरं न बाधते तदप्युदाहरणम् । पचति । पठति । तत्र शप्तिपौ पित्त्वादनुदात्तौ । तेन धातुस्वर एवावतिष्ठते । ' स्वपादिहिंसामच्यनिटि ' ॥ ६।१।१८८॥ स्वपादीनां हिंसेश्चानिट्यजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् । स्वपन्ति । श्वसन्ति । हिंसन्ति । पक्षे प्रत्ययस्वरेण मध्योदात्तता । स्वपन्ति । श्वसन्ति । हिंसन्ति । स्वपादिरदाद्यन्तर्गणो वृत्करणावधिः । अचि किम् । स्वप्यात् । अनिटि किम् । स्वपिताः । ङित्यजादावयं विधिरिष्यते । इह न । स्वपानि । ' अभ्यस्तानामादिः ' ॥६।१।१८९॥ अनिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः स्यात् । ददति । दधति । जक्षति । आदिरिति वर्तमाने पुनरादिग्रहणं नित्यार्थः । अचीत्येव । दद्यात् । अनिटीत्येव । जक्षिव । ' अनुदात्ते च ' ॥६।१।१९०॥ अविद्यमानोदात्ते लसार्वधातुके परेभ्यस्तानामादिरुदात्तः । ददाति । दधाति । अनुदात्त इति बहुव्रीहिनिर्देशो लोपयणादेशार्थः ।

ततश्च मा हि स्म दधादित्यत्रैकारस्यानुदात्तस्य लोपेप्याद्युदात्तता स्यात् । दधात्यत्रेत्यत्रैकारस्य यणादेशे कृतेपि स्यात् । 'भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात् पूर्वं पिति' ॥६।१।१९२॥ भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात् पूर्वमुदात्तं स्यात् । बिभेति । जिह्रेति । बिभर्ति । जुहोति । ममत्तु नः । जजनदिन्द्रम् । दधनत् । दरिद्राति । जागर्ति । पिति किम् । दरिद्रति । 'आदिर्णमुल्यन्यतरस्याम्' ॥६।१।१९४॥ णमुलि परेभ्यस्तानामादिर्वोदात्तः स्यात् । लोलूयं लोलूयम् । आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयशब्दः पक्षे आद्युदात्तः । अपरोत्र लित्स्वरेण मध्योदात्तः । 'अचः कर्तृयकि' ॥६।१।१९५॥ उपदेशेजन्तानां धातूनां कर्तृयकि परे आदिरुदात्तो वा । लूयते केदारः स्वयमेव । २ । यदा नुदात्तत्वं न तदा सार्वधातुकनिघाते यक एव स्वरः स्यात् । जनादीनामुपदेश एवात्वं द्रष्टव्यम् । तत्राप्यस्य स्वरस्येष्टिः । जायते स्वयमेव । सायते । खायते । अचि किम् । भिद्यते स्वयमेव । कर्तृयकि किम् । लूयते केदारो देवदत्तेन । 'चङ्यन्यतरस्याम्' ॥६।१।२१८॥ चङन्ते धातावुपोत्तममुदात्तं वा । मा हि चीकरताम् । 'न माङ्योगे' इत्यटि निषिद्धे 'हि च' इति निघाते 'अदुपदेशात्' इति लसार्वधातुकत्वानुदात्तत्वे च कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तः स्यात् ।

इति धातुस्वरः ।

अथ प्रातिपदिकस्वरः । स चाष्टाध्याय्यां केषांचित् प्रातिपदिकानां साक्षात् सूत्रैरुक्तः । अनुक्तस्य तु कृदन्तस्य तद्धितान्तस्य च प्रातिपदिकस्य कृत्तद्धितप्रत्यययोर्ज्ञेयः । शेषस्य तु प्रातिपदिकस्य उणादिव्युत्पत्तिपक्षे उणादिप्रत्यये ज्ञेयः । अव्युत्पत्तिपक्षे फिट्सूत्रे ज्ञेयः । एतच्च पक्षद्वयं **महाभाष्य** एवोक्तम् । उणादयो व्युत्पन्नानि प्रातिपदिकानि उणादयोऽव्युत्पन्नानि प्रातिपदिकानीत्युक्तेः । **यास्केनाप्युक्तं** मतद्वयम् । नामान्याख्यातजानीति **शाकटायनो** नैरुक्तसमयश्च न सर्वाणीति

गार्ग्यो वैयाकरणानां चैके इति । फिट्सूत्राण्यग्रे व्याख्यास्यामः । यथावसरं चाष्टाध्याय्युक्तान्येव समाससूत्राणि व्याख्यास्यामः । 'कर्षात्वतो घञोन्त उदात्तः' ॥६।१।१५९॥ कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात् । कर्षः । पाकः । दायः । 'ञ्नित्यादिर्नित्यम्' इत्यस्यापवादः । 'उञ्छादीनां च' ॥६।१।१६०॥ अन्त उदात्तः । यथायोगं प्राप्तस्य स्वरस्यापवादः । उञ्छः । म्लेच्छः । जल्पः । एते घञन्ताः । जप व्यध इत्यबन्तौ । केचित् वध इत्याहुः । युग इति घञन्तः । निपातनादगुणत्वं कालविशेषे रथाद्यवयवे च प्रयोगः । अन्यत्र योग इत्येव । गरशब्दोबन्तो दृष्य एवान्तोदात्तः । गरो विषम् । वेगवेदचेष्टबन्धाः करणे घञन्ताः । भावे त्वाद्युदात्ता एव । स्तुयुद्रुवश्छन्दसि । परिष्टुत् । सुयुत् । परिद्रुत् । वर्तनिशब्दः सामस्थोन्तोदात्तः । श्वभ्रे दरः । श्वभ्रे दरशब्दोन्तोदात्तः । साम्बतापौ गर्हायाम् । उत्तमशश्वत्तमौ सर्वत्र । केचिद्भावगर्हायामित्यनुवर्तयन्ति । भक्षमन्थभोगदेहा घञन्ताः । 'चतुरः शसि' ॥६।१।१६७॥ चतुरोन्त उदात्तः शसि परे । चतुरः पश्य । इह न स्यात् । चतस्रः पश्य । 'झल्युपोत्तमम्' ॥६।१।१८०॥ षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यात् । त्र्यादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमम् । पञ्चभिः । तिसृभिः । चतुर्भिः । मध्योदात्ताः संपन्नाः । झलि किम् । पञ्चानाम् । उपोत्तमं किम् । षड्भिः । 'विभाषा भाषायाम्' ॥६।१।१८१॥ अनन्तरे विधौ विकल्पोयम् । पञ्चभिः । २ । तिसृभिः । २ । चतसृभिः । २ । 'सर्वस्य सुपि' ॥६।१।१९१॥ सुपि परे सर्वशब्दस्यादिरुदात्तः । सर्वः । सर्वौ । सुपि किम् । सर्वतरः । प्रत्ययलक्षणेनाप्ययमिष्यते । सर्वस्वरोनकच्कस्य वाच्यः । सर्वकः । अन्तोदात्तः । 'ञ्नित्यादिर्नित्यम्' ॥६।१।१९७॥ ञिति निति च परे नित्यमादिरुदात्तः स्यात् । 'गर्गादिभ्यो यञ्' । गार्ग्यः । 'वासुदेवार्जुनाभ्यां वुन्' । वासुदेवकः । आद्युदात्तानि स्वपदानि संपन्नानि ।

प्रत्ययलक्षणमत्र नेष्यते। गर्गाः चञ्चा इत्यत्र यञि कनि च लुप्ते न। प्रत्ययस्वरापवादः। 'पथिमथोः सर्वनामस्थाने' ॥६।१।१९९॥ आदिरुदात्तः। पन्थाः। पन्थानौ। मन्थाः। मन्थानौ। सर्वनामस्थाने किम्। पथः पश्य। मथः पश्य। उणादिकेनप्रत्ययान्तत्वादन्तोदात्तौ। उदात्तनिवृत्तिस्वरेणान्तोदात्ते संपन्ने। प्रत्ययलक्षणमत्रापि नेष्यते। ततः पथिप्रिय इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्तः पथिशब्दः। 'अन्तश्च तवै युगपत्' ॥६।१।२००॥ तवैप्रत्ययान्तस्यादिश्चान्तश्च युगपदुदात्तौ स्तः। युगपद्ग्रहणं पर्यायेण मा भूदिति। अन्यथैकवर्जमिति वचनाद्यौगपद्यं न स्यात्। 'क्षयो निवासे' ॥६।१।२०१॥ आद्युदात्तः। क्षये जागृहि। निवासादन्यत्र एरजन्तोदात्तः। क्षयो वृषलानाम्। 'जयः करणम्' ॥६।१।२०२॥ करणवाची जय आद्युदात्तः। जयत्यनेनेति जयोऽश्वः। करणं किम्। जयो ब्राह्मणानाम्। भावे एरजन्तोदात्तः। 'वृषादीनां च' ॥६।१।२०३॥ आदिरुदात्तः। वृषः। जनः। ज्वरः। ग्रहः। हयः। गयः। नयः। तयः। आमः। वेदः। वन्द्यः। अजन्ताः। गय इति गायतेर्निपातत्वादेत्वम्। सूदः। इगुपधलक्षणः कः। गुहा। भिदाद्यङ्। शमरणौ संज्ञायां संमतौ भावकर्मणोः। शमो भावे रणः कर्मणि निपातनादजन्तौ। मन्त्रः अजन्तः। शान्तिः क्तिजन्तः। कामः। यामः। घञन्तौ। आराधाराकारा अङन्ताः। वहः घान्तः। कल्पः अजन्तः। पादो घञन्तः। तत्र क्वचित् 'कर्षात्वतः—' अनेनान्तोदात्ते प्राप्ते आद्युदात्तः। वृषादिराकृतिगणः। अविहितमाद्युदात्तत्वं वृषादिषु। 'संज्ञायामुपमानम्' ॥६।१।२०४॥ आद्युदात्तः। चञ्चेव चञ्चा। कनोऽत्र लुप्। किमर्थमुच्यते प्रत्ययलक्षणत्वादाद्युदात्तत्वं सिद्धम्। एवं तर्ह्येतत् ज्ञापयति स्वरविधौ क्वचित् प्रत्ययलक्षणं नेति। तथैवोदाहारि। संज्ञायां किम्। अग्निर्माणवकः। उपमानं किम्। देवदत्तः। 'निष्ठा च द्व्यजनात्' ॥६।१।२०५॥ निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तः

स चेदादिराकारो न । दत्तः । गुप्तः । प्रत्ययस्वरापवादः । निष्ठा किम् । देवः । द्व्यच् किम् । रक्षितः । अनात् किम् । त्रातः । 'शुष्कधृष्टौ' ॥६।१।२०६॥ एतावाद्युदात्तौ । शुष्कः । धृष्टः । असंज्ञार्थम् । 'आशितः कर्ता' ॥६।१।२०७॥ कर्तृवाच्याशितः आद्युदात्तः । आशितो देवदत्तः । 'रिक्ते विभाषा' ॥६।१।२०८॥ आदिरुदात्तो वा । रिक्तम् । २ । 'जुष्टार्पिते च छन्दसि' ॥६।१।२०९॥ छन्दस्येतावाद्युदात्तौ । जुष्टः । २ । अर्पितः । २ । भाषायां प्रत्ययस्वरेणान्तोदात्तौ । 'नित्यं मन्त्रे' ॥६।१।२१०॥ पूर्वोक्तं मन्त्रे नित्यम् । जुष्टो देवानाम् । अर्पितः पितॄणाम् । केचिदत्रार्पितशब्दं नानुवर्तयन्ति । अन्तोदात्तो हि मन्त्रे पठ्यते । त्रिंशता न शङ्कवोऽर्पिता इति । 'युष्मदस्मदोर्ङसि' ॥६।१।२११॥ एतौ मदिक्प्रत्ययान्तावन्तोदात्तौ ङसि आद्युदात्तौ स्तः । तव स्वम् । मम स्वम् । 'ङयि च' ॥६।१।२१२॥ ङयि च परे पूर्वोक्तम् । तुभ्यम् । मह्यम् । 'यतो नावः' ॥६।१।२१३॥ द्व्यजिति वर्तते । यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तः । न च नौशब्दात् परो यत् । चेयम् । जेयम् । कण्ठ्यम् । अनावः किम् । यदि नाव्यं तरेत् । द्व्यच इत्येव । चिकीर्ष्यम् । 'ईडवन्दवृशंसदुहां ण्यतः' ॥६।१।२१४॥ एषां ण्यदन्तानामादिरुदात्तः । ईड्यम् । वन्द्यम् । वार्यम् । शंस्यम् । दोह्यम् । 'विभाषा वेण्विन्धानयोः' ॥६।१।२१५॥ अनयोरादिरुदात्तो वा । वेणुः । २ । इन्धानः । २ । वेणुरित्युपमानं यदा तदा 'संज्ञायामुपमानम्' इति नित्यमाद्युदात्तत्वमिष्यते । 'त्यागरागहासकुहश्वठक्रथानाम्' ॥६।१।२१६॥ आदिरुदात्तो वा । त्यागः । २ । रागः । २ । हासः । २ । एते घञन्ताः । पक्षे कर्षात्वत इत्यन्तोदात्ताः । कुहः । २ । श्वठः । २ । क्रथः । २ । एते जन्ताः । 'मतोः पूर्वमात् संज्ञायां स्त्रियाम्' ॥६।१।२१७॥ मतोः पूर्व आकार उदात्तः स्यात् स्त्रीनाम्नि । उदुम्बरावती । शरावती । 'शरादीनां च' इति दीर्घः । आदिति किम् । इक्षुमती । संज्ञायां किम् । खट्वावती । स्त्रियां किम् । शरावान् । मतोः किम् । गवादिनी । 'अन्तोवत्याः' ॥६।१।२२०॥ अवती-

शब्दस्यान्त उदात्तः संज्ञायाम् । अजिरवती । खदिरवती । वेत्रवती । हंसवती । ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् । 'ईवत्याः' ॥६।१।२२१॥ ईवत्यन्तस्यान्त उदात्तः संज्ञायाम् । अहीवती कपीवती ॥

फिट्सूत्राणि ।

अथ फिट्सूत्राणि व्याख्यास्यामः । 'फिषः' ॥ फिषः प्रातिपदिकस्येत्यधिक्रियते । 'अन्त उदात्तः' ॥ प्रातिपदिकस्य । उच्चैः । नीचैः । दधत् । 'गेहार्थानामस्त्रियाम्' ॥ अन्त उदात्तः । गेहम् । गृहम् । स्त्रियां तु शाला । 'गुदस्य च' ॥ अन्त उदात्तः । 'नब्विषयस्य—' इत्यस्यापवादः । 'ध्यपूर्वस्य स्त्रीविषयस्य' ॥ अन्तापेक्षया धपूर्वस्य यपूर्वस्य चान्त उदात्तः । अन्तर्धा । जाया । माया । 'खान्तस्याश्मादेः' ॥ खशब्दान्तस्यान्त उदात्तः । सुखम् । दुःखम् । शकारमकारादेस्तु न । शाखा । मखः । 'बंहिष्ठवत्सरतिशत्थान्तानाम्' ॥ अन्त उदात्तः । बंहिष्ठः । संवत्सरः । विंशतिः । त्रिंशत् । निशीथः । 'दक्षिणस्य साधौ' ॥ अन्त उदात्तः । दक्षिणः साधुः । अन्यत्र दक्षिणो देशः । 'स्वाङ्गाख्यायामादिर्वा' ॥ दक्षिणस्येननुप्रत्ययान्तत्वान्नित्यमाद्युदात्तत्वे प्राप्ते स्वाङ्गाख्यायां पाक्षिकोदात्तत्वार्थे विधिः । दक्षिणो बाहुः । 'छन्दसि च' ॥ आदिरन्तोदात्तो वा । अस्वाङ्गार्थमसाध्वर्थं च । दक्षिणः । 'कृष्णस्यामृगाख्या चेत्' ॥ 'वर्णानां—' इत्याद्युदात्तत्वे प्राप्ते अन्त उदात्तः । कृष्णः । मृगाख्यायां तु कृष्णः राज्यै । 'वा नामधेयस्य' ॥ कृष्णस्य । अयं वां कृष्णः । कृष्णः ऋषिः । 'शुक्लगौरयोरादिः' ॥ नित्यमुदात्तः । शुक्लस्य फिषोऽन्तोदात्तत्वे गौरस्य च प्रज्ञाद्यणन्तस्यान्तोदात्तत्वे प्राप्ते । शुक्लः । गौरः । 'अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः' ॥ उदात्तः । अङ्गुष्ठः । उदकम् । बकः । वशा । 'पृष्ठस्य च' ॥ छन्दस्यन्त उदात्तः । पृष्ठमुपदधाति । 'वा

भाषायाम्' ॥ पृष्ठं पृष्ठम् । 'अर्जुनस्य तृणाख्या चेत्' ॥ अन्त उदात्तः । अर्जुनानि तृणानि । 'अर्यस्य स्वाम्याख्या चेत्' ॥ अर्यः स्वामी । 'आशाया अदिगाख्या चेत्' ॥ अन्त उदात्तः । आशा । 'नक्षत्राणामाब्विषयाणाम्' । अन्त उदात्तः । आर्द्रा । आश्लेषा । 'न कुपूर्वः कृत्तिकाख्या चेत्' ॥ अन्त उदात्तः । कृत्तिका नक्षत्रम् । 'घृतादीनाम्' ॥ अन्त उदात्तः । आदिशब्दः प्रकारे । घृतम् । 'ज्येष्ठकनिष्ठयोर्वयसि' ॥ ज्येष्ठो वर्षिष्ठः । कनिष्ठो यविष्ठः । अन्यत्र ज्येष्ठः श्रेष्ठः । कनिष्ठोऽल्पिष्ठः । 'बिल्वतिष्ययोः स्वरितो वा' ॥ अन्त उदात्तो वा । बिल्वः । तिष्यः ।

'अथादिः प्राक् शकटेः' ॥ 'शकटिशकट्योः' इत्यतः प्राक् आदिरुदात्त इत्यधिकारः । 'ह्रस्वान्तस्य स्त्रीविषयस्य' ॥ आदिरुदात्तः । बलिः । नाभिः । तनुः । 'नब्विषयस्यानिसन्तस्य' ॥ क्लीबविषयस्येसन्तवर्जितस्यादिरुदात्तः । कुण्डम् । धनम् । इसन्तस्य तु सर्पिः । 'तृणधान्यानां च द्व्यषाम्' ॥ आदिरुदात्तः । कुशाः व्रीहयः । बहूनां तु गोधूमः । 'त्रः संख्यायाः' ॥ आदिरुदात्तः । पञ्च चत्वारः । द्व्यच एव । एकादश । 'स्वाङ्गशिटामदन्तानाम्' ॥ शिट् सर्वनाम । अदन्तानामेषामादिरुदात्तः । कर्णः । तुष्टः । सर्वः । विश्वः । 'प्राणिनां कुपूर्वः' ॥ कवर्गात्पूर्व आदिरुदात्तः । काकः । शुकः । 'खय्युवर्णं कृत्रिमाख्या चेत्' ॥ खयि परे पूर्वमुवर्णमुदात्तम् । कन्दुकः । कृत्रिमाख्या चेत् किम् । बन्धूकः । 'उनर्वन्नन्तानाम्' ॥ आदिरुदात्तः । उन । वरुणः । ऋ । स्वसा । वन् । सेवा । 'वर्णानां तणतिनितान्तानाम्' ॥ आदिरुदात्तः । एतः । हरिणः । शितिः । पृश्निः । हरित् । 'ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये' ॥ ऋद्वर्जं ह्रस्वान्तमाद्युदात्तम् । मुनिः । 'अक्षस्यादेवनस्य' ॥ आदिरुदात्तः । अक्षः । देवने तु अक्षैर्दीव्यति । 'अर्धस्यासमद्योतने' ॥ अर्धो ग्रामस्य । समेंशके

तु अर्धं पिप्पल्याः। 'पीतद्र्वर्थानाम्' ॥ आदिरुदात्तः। पीतद्रुः सरलः। 'ग्रामादीनां च'। आदिरुदात्तः। ग्रामः। सोमः। यामः। 'लुबन्तस्योपमेयनामधेयस्य' ॥ आदिरुदात्तः। चञ्चेव चञ्चा वर्धिका। 'न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्' ॥ उपमेयनाम्नां नादिरुदात्तः। ताल इव तालः। मेरुरिव मेरुः। व्याघ्रः। सिंहः। महिषः। 'राजविशेषस्य यमन्वाख्या चेत्' ॥ आदिरुदात्तः। पञ्चालाः विषयः। एवं वङ्गाः। 'लघावन्ते द्वयोश्च बह्वषो गुरुः' ॥ अन्ते लघौ द्वयोश्चान्ते लघ्वोः परतो बह्वषो गुरुरादिरुदात्तः। कल्याणः। कोलाहलः। 'स्त्रीविषयवर्णाक्षुपूर्वाणाम्' ॥ स्त्रीविषयवर्णानामक्षुपूर्वाणामादिरुदात्तः। श्येनी। हरिणी। 'शकुनीनां च लघु पूर्वम्' ॥ पूर्वं लघूदात्तम्। कुक्कुटः। तित्तिरिः। 'नर्तुप्राण्याख्यायाम्' ॥ यथालक्षणं प्राप्तमुदात्तत्वं न। वसन्तः। कृकलासः। 'धान्यानां च वृद्धक्षान्तानाम्' ॥ आदिरुदात्तः। कान्ताः श्यामाकाः। षान्ता माषाः। 'जनपदशब्दानामषान्तानाम्' ॥ केकयः। 'हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा' ॥ हलादीनामसंयुक्तलशब्दान्तानामन्त उदात्तः स्यात् पूर्वं वा। पललम्। शललम्। अन्यत्र मल्लः। 'इगन्तानां च द्व्यषाम्' ॥ आदिरुदात्तः। कृषिः। रषिः।

'अथ द्वितीयं प्रागीषात्' ॥ 'ईषान्तस्य हयादेः' इत्यतः प्राक् द्वितीयाधिकारः। 'त्र्यचां प्राङ्मकरात्' ॥ 'मकरवरूढ' इत्यतः प्राक् त्र्यचां द्वितीयमुदात्तं ज्ञेयम्। 'स्वाङ्गानामकुर्वादीनाम्' ॥ कवर्गरेफवकारादीन् वर्जयित्वा स्वाङ्गानां द्वितीयमुदात्तम्। ललाटम्। कुर्वादीनां तु कपोलः। रसना। वदनम्। 'मादीनाम्' ॥ त्र्यचां द्वितीयमुदात्तम्। मलयः। मकरः। 'शादीनां शाकानाम्' ॥ अत्रां द्वितीयमुदात्तम्। शीतन्या। शतपुष्पा। 'पान्तानां गुर्वादीनाम्' ॥ पादपः। आतपः।

लघ्वादीनां तु अनूपम् । द्व्यचां तु नीपम् । 'युतान्यण्यन्तानाम्' ॥ युते अयुतम् । अनि धमनिः । अणि विपणिः । 'मकरवरूढ-पारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा' ॥ आदि-र्द्वितीयो वोदात्तः । मकरः २ । वरूढः २ । इत्यादि । 'छन्दसि च' ॥ अमकराद्यर्थ आरम्भः । लक्ष्यानुसारात् आदिर्द्वितीयं वोदात्तं ज्ञेयम् । 'कर्दमादीनां च' ॥ आदिर्द्वितीयं वोदात्तम् । कर्दमः २ । आदिशब्दः प्रकारार्थः । 'सुगन्धितेजनस्य ते वा' ॥ आदिर्द्वितीयं च ते च उदात्ते वा स्तः । सुगन्धितेजनः । 'नपः फलान्तानाम्' ॥ क्लीबानां फलान्तानामादि द्वितीयं वोदात्तम् । राजादनफलम् । 'यान्तस्यान्त्यात् पूर्वम्' ॥ उदात्तम् । शाल्यः । 'थान्तस्य च नालघुनी' ॥ थान्तस्य शब्दस्य नाशब्दो लघुश्चोदात्तौ स्तः । सनाथा सभा । 'शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च' ॥ अन्त्यात् पूर्वमुदात्तं द्वितीयं वा । शिशुमार इत्यादि । 'साङ्काश्यका-म्पिल्यनासिक्यदार्वाघाटानाम्' ॥ द्वितीयमुदात्तं वा । साङ्काश्यमित्यादि । 'ईषान्तस्य हलादेरादिर्वा' । हलीषा । लाङ्गलीषा । 'उशीरदाशेर-कपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवरा-णाम्' ॥ आदिरुदात्तः । उशीर इत्यादि । 'महिष्यषाढयोर्जायेष्टका-ख्या चेत्' ॥ आदिरुदात्तः । महिषी जाया चेत् । अषाढा इष्टका चेत् ।

'शकटिशकट्योरक्षरमक्षरं पर्यायेण' ॥ उदात्तम् । शकटिः ३ । शकटी ३ । 'गोष्ठजस्य ब्राह्मणनामधेयस्य' ॥ अक्षरमक्षरं क्रमेणो-दात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृति-स्वरेणान्तोदात्तः । 'पारावतस्योपोत्तमवर्जम्' ॥ शेषमक्षरं क्रमेणो-दात्तम् । पारावतः । 'धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधू-जलस्थानाम्' ॥ एषां धूजलस्थानि वर्जयित्वा शेषाक्षराणि क्रमेणो-दात्तानि । धूम्रजानुरित्यादि । 'कपिकेशहरिकेशयोश्छन्दसि' ॥ प्रत्य-

क्षरं क्रमेणोदात्तम् । कपिकेशः । हरिकेशः । 'न्यङ्स्वरौ स्वरितौ' ॥ इतो न्यक् अधान्यश्च । 'न्यर्बुदव्यल्कशयोरादिः' ॥ स्वरितः । न्यर्बुदाय स्वाहा । पाकदूर्वाव्यल्कशाः । 'तिल्यशिक्य-काश्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः' ॥ स्वरितः । तिल्य-मित्यादि । 'बिल्वभक्ष्यवीर्याणि छन्दसि' ॥ अन्तस्वरितानि । बिल्व इत्यादि । 'त्वत्त्वसमसिमेत्यनुच्चानि' ॥ एतान्यनुदात्तानि स्युः । स्तरीरुत्वत् इत्यादि । 'सिमस्याथर्वणेन्त उदात्तः' । सिमः । 'निपाता आद्युदात्ताः' ॥ स्वाहा अह इत्यादि । 'उपसर्गा-श्चाभिवर्जम्' ॥ प्रादय आद्युदात्ता अभिं वर्जयित्वा । अभिः प्रातिपदिकत्वादन्तोदात्तः । 'एवादीनामन्तः' ॥ उदात्तः । एव । एवम् । इत्यादयः । नह । 'वावादीनामुभावुदात्तौ' ॥ वाव इत्यादि । उभौ ग्रहणम् 'अनुदात्तं पदमेकवर्जम्' इत्यस्य बाधाय । 'चादयोनुदात्ताः' ॥ च वा ह इत्यादि । 'यथेति पादान्ते' ॥ अनुदात्तम् । तन्नेमिमृभवो यथा । पादान्ते किम् । यथा नो अदितिः करत् । 'प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः' ॥ पटुपटुः । 'शेषं सर्व-मनुदात्तम्' ॥ शेषं द्विरुक्तं सर्वमनुदात्तम् । ग्रामे ग्रामे रमणीये । प्रप्रायमग्निः ।

इति प्रकृतिस्वरप्रकरणं समाप्तम् ॥

अथ प्रत्ययस्वर उच्यते । 'आद्युदात्तश्च' ॥३।१।३॥ प्रत्यय आद्युदात्तः स्यात् । अनियतस्वरप्रसङ्गे अनेकाक्षु च देशस्यानियमे प्राप्ते वचनम् । कर्तव्यम् । तैत्तिरीयम् । 'अनुदात्तौ सुप्पितौ' ॥३।१।४॥ पूर्वस्यापवादः । सुपः पितश्च प्रत्यया अनुदात्ताः स्युः । दृषदौ । 'चितः' ॥६।१।१६३॥ चितोन्तोदात्तं स्यात् । घुरच् । भङ्गुरम् । 'आगस्त्य—' इति कुण्डिनच् । कुण्डिनः । चिति प्रत्यये सप्रकृतिकस्य समुदायस्यान्तोदात्त इष्यते । बहुकजर्थम् । बहुपटवः । उच्चकैः । एतत् सूत्रं बाहुल्येन प्रत्ययस्वरप्रतिपादक-

मित्यत्र प्रकरणे पठितम् । कुण्डिना इत्याद्यर्थं पूर्वप्रकरणे ज्ञेयम् । तथा ' ञ्नित्या—' इति सूत्रं प्रत्ययानुबन्धेनापि प्रकृतिस्वरप्रतिपादकमिति पूर्वत्र व्याख्यातम् । ' लिति ' इति तु वैदिकप्रक्रियान्ते मूल एव व्याख्यातम् । ' तद्धितस्य ' ॥६।१।१६४॥ परमपि ञित्स्वरं बाधित्वान्तोदात्तत्वमेव यथा स्यादित्येवमर्थं चितस्तद्धितस्यान्तोदात्तो विधीयते । ' गोत्रे कुञ्जादिभ्यश्च्फञ् ' । कौञ्जायनः । ' कितः ' ॥६।१।१६५॥ कितस्तद्धितस्यान्त उदात्तः स्यात् । ' नडादिभ्यः फक् ' । नाडायनः । ' तिसृभ्यो जसः ' ॥६।१।१६६॥ अन्त उदात्तः । ' उदात्तस्वरितयोः—' इत्यस्यापवादः । तिस्रस्तिष्ठन्ति । ' सावेकाचस्तृतीयादिर्विभक्तिः ' ॥६।१।१६८॥ साविति सप्तमीबहुवचनग्रहः । तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता । वाचा । वाग्भ्याम् । सौ किम् । राज्ञा । एकाचः किम् । राजसु । तृतीयादिः किम् । वाचौ । विभक्तिः किम् । वाक्तरा । ' अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ' ॥६।१।१६९॥ नित्यसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच् ततः परा तृतीयादिविभक्तिरन्तोदात्ता वा स्यात् । परमवाचा । पक्षे समासान्तोदात्ततैव । अन्तोदात्तात् किम् । अवाचा । मयूरव्यंसकादित्वात् समासे ' तत्पुरुषे तुल्यार्थ—' इत्यव्ययपूर्वपदप्रकृतिस्वर इत्याद्युदात्तमेतत् । उत्तरपदग्रहणमेकाच्त्वेनोत्तरपदं विशेषयितुमन्यथा समासविशेषणं स्यात् । ततः शुन ऊर्के श्वोर्ज्जेत्यत्रायं विधिः स्यात् । अनित्यसमास इति नित्याधिकारविहितः समासः पर्युदस्यते अग्निचिता । ' उपपदम्—' इति नित्याधिकारसमासः । तत्र ' गतिकारकोपपदात्—' इति प्रकृतिस्वरेण चित् शब्द उदात्तः । यस्तु विग्रहाभावे नित्यसमासः तत्र स्यादेव विकल्पः । अवाचा सुवाचा ब्राह्मणेन इति ' नञ्सुभ्याम्—' इति उत्तरपदान्तोदात्तत्वम् । ' अञ्चेश्छन्दस्यसर्वनामस्थानम् ' ॥६।१।१७०॥ अञ्चेः पराऽसुट्विभक्तिरुदात्ता स्यात् । प्रतीचो बाहून् । ' चौ ' इति पूर्व-

पदान्तोदात्तत्वं प्राप्तम् । तृतीयादिरिति वर्तमाने असर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । 'ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः' ॥६।१।१७१॥ एभ्यो-सुट्विभक्तिरुदात्ता स्यात् । ऊट् । प्रष्ठौहः । ऊठ्युपधाग्रहणं कर्तव्य-मिह मा भूत् । अक्षद्यूः । अक्षद्युवे । इदम् । आभ्याम् । अन्वादेशे न । अथो आभ्यां निपुणमधीतम् । पदादयः 'पद्दन्नोमास्हृन्निश्-' इति षडेव । निपदश्चतुरो जहि । या दतो धावति । अपः पश्य । 'अष्टनो दीर्घात्' ॥६।१।१७२॥ शसादिविभक्तिरुदात्ता भवति । अष्टाभिः । नेह । अष्टसु । 'शतुरनुमो नद्यजादी' ॥६।१।१७३॥ अनुम् शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्ति-रुदात्ता स्यात् । तुदती । तुदता । अजादिः किम् । तुदद्भ्याम् । अन्तोदात्तादित्येव । जक्षती । 'अभ्यस्तानामादिः' इत्युदात्तः । बृहन्महतोरुपसंख्यानम् । बृहती । बृहता । महती । महता । 'उदात्तयणो हल्पूर्वात्' ॥६।१।१७४॥ उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शसादिविभक्तयश्चोदात्ताः स्युः । कर्त्री । कर्त्रा । तृजन्तोदात्तः । उदात्तयणः किम् । कर्त्रा । तृन्नन्तोऽय-माद्युदात्तः । हल्पूर्वात् किम् । वहति नावा ब्राह्मण्या । नकारग्रहणं च कार्यम् । वाक्पत्नीयं कन्या । 'नोङ्धात्वोः' ॥६।१।१७५॥ अनयोर्यणः परे शसादय उदात्ता न स्युः । ऊङ् । ब्रह्मबन्ध्वा । खलप्वा । 'ह्रस्वनुड्भ्यां मतुप्' ॥६।१।१७६॥ ह्रस्वान्तादन्तो-दात्तान्नुटश्च परो मतुबुदात्तः स्यात् । अग्निमान् । वायुमान् । अक्षण्वान् । अन्तोदात्तादित्येव । वसुमान् । स्वरविधौ व्यञ्जन-मविद्यमानवदितीह नाश्रीयते । तेन मरुत्वानित्यत्र न स्यात् । रेशब्दाच्च । आरेवान् । त्रेः परस्य निषेधः । त्रिवती । 'नाम-न्यतरस्याम्' ॥६।१।१७७॥ मतुपि यो ह्रस्वस्तदन्तात् परो नामुदात्तो वा । अग्नीनाम् । सनुट्कस्य ग्रहणं किम् । धेन्वाम् । 'उदात्तयणः—' इत्यन्तोदात्तः । ह्रस्वादित्येव । कुमारीणाम् । अन्तोदात्तादित्येव ।

त्रपूणाम् । 'ङ्याश्छन्दसि बहुलम्' ॥६।१।१७८॥ ङीपरो नामुदात्तः । देवसेनानामभिभञ्जतीनाम् । न च स्यात् । जयन्तीनां मरुतो यन्तु । 'षट्त्रिचतुर्भ्यो हलादिः' ॥६।१।१७९॥ एभ्यो हलादिर्विभक्तिरुदात्ता । षड्भिः । षण्णाम् । पञ्चानाम् । त्रयाणाम् । चतुर्णाम् । 'न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥' ६।१।१८२ ॥ एभ्यो यदुक्तं तन्न । 'साविकाचः—' इति 'अन्तोदात्तादुत्तर—' इति च प्राप्तः स्वरो निषिध्यते । गो—गवा । श्वन्—शुना । सौ प्रथमैकवचने अवर्णान्तात् । केभ्यः । राट्—राजा । अङ्—क्विन्नन्तः सनकारः । प्राञ्चा । प्राङ्भ्याम् । नलोपविषये तु स्यादेव विभक्तेरुदात्तत्वम् । प्राचा । क्रुङ् क्विन्नन्तः । क्रुञ्चा । परमक्रुञ्चा । कृत्—करोतिः कृतिर्वा । कृता । परमकृता । 'दिवो झल् ॥' ६।१।१८३॥ दिवः परा झलादिर्विभक्तिर्नोदात्ता । द्युभ्याम् । 'साविकाचः—' इति 'ऊडिदम्—' इति वा प्राप्तस्वरनिषेधः । झलि किम् । दिवा । 'नृ चान्यतरस्याम्' ॥६।१।१८४ ॥ नुः परा झलादिर्नोदात्ता वा । नृभ्याम् । झलीत्येव । त्रा । 'तित् स्वरितम् ॥' ६।१।१८५॥ 'अचो यत् ।' चिकीर्ष्यः । ण्यत्—कार्यम् । प्रत्ययाद्युदात्तस्य बाधा । 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः' ॥६।१।१८६॥ अस्माच्चतुष्टयात् परं लसार्वधातुकमनुदात्तम् । तासेः—कर्ता । कर्तारौ । प्रत्ययस्वरापवादः । अनुदात्तेतः—आस्ते । ङितः—शेते । अदुपदेशात्—तुदतः । पचतः । अनुबन्धस्यानेकान्तत्वादकारान्तोपदेश एव शप् । पचमानादौ चित्स्वरोऽप्यनेन बाध्यते । तास्यादिभ्यः किम् । चिनुतः । ङिदयं श्नुः पूर्वस्य कार्यं प्रति न परस्य । उपदेशग्रहः किम् । इह च यथा स्यात् । पचावः । इह च मा भूत् । हतः । हथः । सार्वधातुकं किम् । शिश्ये । अन्ह्विङोः किम् ।

१. Dropped Dc3. २. आम्रेडितः । शेते । Dc3. ३. परत्वाद्बाध्यते Dc3.

ह्नुते । यदधीते । 'आदिः सिचोऽन्यतरस्याम्' ॥६।१।१८७॥ सिजन्तस्यादिरुदात्तो वा । मा हि लाविष्टम् ॥ २ ॥ एक आद्युदात्तः अपरो मध्योदात्तः । सिचश्चित्करणादागमानुदात्तत्वं हि बाध्यते । मा हि कार्ष्टाम् २ । एक आद्युदात्तः अपरोऽन्तोदात्तः । सिच आद्युदात्त्वेनिटः पितः पक्षे उदात्तत्वं वक्तव्यम् । मा हि कार्षम् । २ । अनिटः किम् । मा हि लाविषम् २ । 'थलि च सेटीडन्तो वा' ॥६।१।१९६॥ सेटि थलन्ते पदे इडुदात्तः अन्तो वादिर्वा । लुलविथ । यदा नैते स्वरास्तदा लिति प्रत्ययात् पूर्वमुदात्तं स्यात् । तेनैते चत्वारो धातोः क्रमेण स्युः । सेटि किम् । ययाथ । 'लिति प्रत्ययात् पूर्वमित्येव स्वरः । 'उपोत्तमं रिति' ॥६।१।२१७॥ रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात् । करणीयम् । पटुजातीयः । प्रत्ययस्वरापवादः ।

इति प्रत्ययस्वराः ।

अथ समासस्वर उच्यते । 'समासस्य' ॥६।१।२२३॥ अन्त उदात्तः । नानापदस्वरापवादः । राजपुरुषः । ब्राह्मणकम्बलः । स्वरविधौ व्यञ्जनमविद्यमानवदिति हलन्तेऽप्यन्तोदात्तत्वं स्यात् । ब्राह्मणसमित् । 'पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः' ॥८।१।६७॥ पूजनेभ्यः काष्ठादिभ्यः उत्तरपदं पूजितमनुदात्तं स्यात् । समासे चैतदनुदात्तत्वं समासान्तोदात्तत्वापवाद इष्यते । काष्ठाध्यापकः । दारुणाध्यापकः । मयूरव्यंसकादित्वात् समासः । काष्ठा । दारुण । अमातापुत्र । वेश । अनाज्ञात । अयुत । अद्भुत । भृश । घोर । परम । सु । अति । 'चौ' ॥६।१।२२२॥ चाविस्यञ्चतिर्लुप्तनकारो गृह्यते । तस्मिन् परे पूर्वस्यान्त उदात्तः स्यात् । दधीचः पश्य । दधीचे । उदात्तनिवृत्तिस्वरापवादः । अतद्धिते इति वाच्यम् । दाधीचः । प्रत्ययस्वर एव स्यात् । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' ॥६।२।१॥

बहुव्रीहौ समासे पूर्वपदस्य यः स्वरः उदात्तः स्वरितो वा स प्रकृत्या स्यात् । न विकारमनुदात्तत्वमापद्यते । समासस्वरापवादो योगः । कार्ष्णोत्तरासङ्गः । कृष्णो मृगस्तस्य विकारः । 'प्राणिरजतादिभ्योऽञ्' । कार्ष्णः । अञन्तत्वादाद्युदात्तः । अध्यापकपुत्रः । अध्यापकशब्दो ण्वुलन्तो 'लिति' इति मध्योदात्तः । मनुष्यनाथः । मनुष्यशब्दो 'मनोर्जातौ' इति यदन्तत्वात् स्वरितान्तः । उदात्तग्रहणं स्वरितग्रहणं चेहानुवर्तते । तेन सर्वानुदात्ते पदे नायं विधिः । किं तु समासान्तोदात्तत्वमेव । समभाग इति । समशब्दो हि सर्वानुदात्तः । 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' ॥ सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या । तुल्यार्थे । तुल्यश्वेतः । सदृक्छ्वेतः । 'कृत्यतुल्याख्या—' इति तत्पुरुषः । तुल्यशब्दो 'नौवयोधर्म—' इति यदन्तो 'यतोनावः' इत्याद्युदात्तः । तृतीया शङ्कुलया खण्डः शङ्कुलाखण्डः । सप्तमी । अक्षशौण्डः । अशेर्देवन इति सप्रत्ययान्तोऽक्षशब्दोऽन्तोदात्तः । उपमानम् । शस्त्रीश्यामा । शस्त्री ङीप्प्रत्ययान्तोऽन्तोदात्तः । अव्ययम् । अब्राह्मणः । नञाद्युदात्तः । अव्यये नञ्कुनिपातानामिति वाच्यम् । नेह स्नात्वाकालकः । द्वितीया । मुहूर्तसुखम् । मुहूर्तशब्दः पृषोदरादित्वादन्तोदात्तः । कृत्य । भोज्योष्णम् । भोज्येति ण्यदन्तोऽन्तस्वरितः । 'वर्णो वर्णेष्वनेते' ॥६।२।३॥ एतवर्जिते वर्णवाचिन्युत्तरपदे वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । 'कृषेर्वर्णे' इति कृष्णशब्दो नक्प्रत्ययान्तोऽन्तोदात्तः । वर्णः किम् । परमकृष्णः । वर्णेषु किम् । कृष्णतिलाः । अनेते किम् । कृष्णैतः । 'गाधलवणयोः प्रमाणे' ॥६।२।४॥ इयत्तावाचिनि तत्पुरुषे अनयोः परयोः पूर्वपदं प्रकृत्या । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । यावद् गवे दीयते तावदित्यर्थः । षष्ठीसमासः । अरित्रशब्दः 'अर्तिलूधू—' इतीत्रप्रत्ययान्तो मध्योदात्तः । गोशब्दो डोप्रत्ययान्तोऽन्तोदात्तः । स्वरव्यङ्ग्यं प्रमाणविषयत्वमेषाम् । प्रमाणे किम् ।

परमगाधम् । परमलवणम् । 'दायाद्यं दायादे' ॥६।२।५॥ दायाद्यवाचि पूर्वं दायादे परे प्रकृत्या । विद्यादायादाः । विद्येति 'संज्ञायां समजनिषद—' इत्युदात्तः क्यप् । 'प्रतिबन्धि चिरकृच्छ्रयोः' ॥६।२।६॥ कार्यसिद्धिं प्रतिबध्नाति विहन्तीति प्रतिबन्धि । ताच्छील्ये आवश्यके वा णिनिः । प्रतिबन्धिवाचि पूर्वं चिरकृच्छ्रयोस्तत्पुरुषे प्रकृत्या स्यात् । गमनचिरम् । गमनकृच्छ्रम् । गमनं ल्युडन्तं लित्स्वरेणाद्युदात्तम् । गमनं च तच्चिरं चेति विशेषणसमासो मयूरव्यंसकादिर्वा । कारणवैकल्याच्चिरभावि कृच्छ्रयोगि वा यद् गमनं तत् कार्यसिद्धेः प्रतिबन्धि जायते । प्रतिबन्धि किम् । मूत्रकृच्छ्रः । 'पदेऽपदेशे' ॥६।२।७॥ व्याजवाचिनि पदशब्दे पूर्वं तत्पुरुषे प्रकृत्या । मूत्रपदेन-प्रस्थितः । मूत्रशब्दो मुचेः ष्ट्रन्प्रत्ययान्तो मूत्रयतेर्वा घञन्त आद्युदात्तः । विशेषणसमासो मयूरव्यंसकादिर्वा । अपदेशे किम् । विष्णुपदम् । 'निवाते वातत्राणे' ॥६।२।८॥ निवाते परे पूर्वं प्रकृत्या तत्पुरुषे । कुटीनिवातम् । वातस्याभावो निवातं निरुद्धो वातोऽत्र वा निवातम् । कुटीशब्दो गौरादिङीषन्तोऽन्तोदात्तः । वातत्राणे किम् । राज-निवाते वसति । निवातशब्दोऽयं पार्श्ववाची । षष्ठीसमासः । 'शारदे-ऽनार्तवे' ॥६।२।९॥ प्रत्यग्रवाचिनि शारदे परे पूर्वं प्रकृत्या । रज्जुशारदमुदकम् । सद्यो रज्जूद्धृतम् । प्रत्यग्रमित्यर्थः । अत्र च नित्यसमासोऽस्वपदविग्रह इष्यते । तृतीयातत्पुरुषः । रज्जुशब्दः 'सृजे-रसुम् च' इत्युप्रत्ययान्तो 'धान्येनित्' इत्यनुवृत्तेराद्युदात्तः । अनार्तवे किम् । परमशारदम् । शरदि ऋतौ भवं यत्तदिह शारदम् । 'अध्वर्युकषाययोर्जातौ' ॥६।२।१०॥ अनयोः पूर्वं प्रकृत्या जाति-वाचिनि तत्पुरुषे । प्राच्याध्वर्युः । अयं जातिवाची कर्मधारयः । तत्र प्राच्यशब्दो यत्प्रत्ययान्त आद्युदात्तः । जातौ किम् । परमाध्वर्युः । 'सदृशप्रतिरूपयोः सादृश्ये' ॥६।२।११॥ अनयोः पूर्वं प्रकृत्या सादृश्यं चेत् तत्पुरुषार्थः । पितृसदृशः । पितृशब्दोऽन्तोदात्तो निपा-

तितः । सादृश्ये किम् । परमसदृशः । समासार्थोत्र पूज्यमानता न सादृश्यम् । 'द्विगौ प्रमाणे' ॥६।२।१२॥ द्विगावुत्तरपदे सर्वं प्रकृत्या प्रमाणवाचिनि तत्पुरुषे । गान्धारिसप्तसमः । सप्त समाः प्रमाणमस्येति मात्रच् । 'प्रमाणे लो द्विगोर्नित्यम्' इति लुक् । गान्धारिशब्दः कर्दमादित्वादाद्युदात्तो मध्योदात्तो वा । द्विगौ किम् । व्रीहिप्रस्थः । प्रमाणे किम् । परमसप्तसमः । 'गन्तव्यपण्यं वाणिजे' ॥६।२।१३॥ गन्तव्यं वा पण्यवाचि प्रकृत्या वाणिजे परे तत्पुरुषे । मद्रवाणिजः । मद्रशब्दो रक्प्रत्ययान्तत्वादन्तोदात्तः । गन्तव्यपण्यं किम् । परमवाणिजाः । 'मात्रोपज्ञोपक्रमच्छाये नपुंसके' ॥६।२।१४॥ एषु क्लीबतत्पुरुषान्तेषु पूर्वं प्रकृत्या । समुद्रमात्रं पाणिनीयम् । अत्र समुद्रस्य तुल्यप्रमाणमित्यस्वपदविग्रहः षष्ठीसमासः । समुद्रशब्दः 'पाटलापालङ्काम्बासागरार्थानाम्' इत्यन्तोदात्तः । व्याड्युपज्ञं दुष्करणम् । व्याडिरितीञन्तत्वादाद्युदात्तः । आढ्योपक्रमम् । एत्यैनं ध्यायतीत्याढ्यः । घञर्थे कः । पृषोदरादित्वात् ह्रस्वम् । थाथादिस्वरेणान्तोदात्तः । इषुच्छायम् । इषुशब्दः 'इषेः किच्च' इत्युप्रत्ययान्तो 'आन्ये नित्' इत्यनुवृत्तेराद्युदात्तः । नपुंसके किम् । कुड्यच्छाया । 'सुखप्रिययोर्हिते' ॥६।२।१५॥ अनयोः परयोः पूर्वं प्रकृत्या हितवाचिनि तत्पुरुषे । वचनसुखम् । व्याहरणप्रियम् । समानाधिकरणसमासौ । वचनव्याहरणे लित्स्वरः । हितं किम् । परमसुखम् । 'प्रीतौ च' ॥६।२।१६॥ प्रीत्यर्थे गम्ये तथा । ब्राह्मणसुखं पायसम् । कन्याप्रियो मृदङ्गः । ब्राह्मणः प्रत्ययस्वरेणान्तोदात्तः । कन्याशब्दः स्वरितान्तः । प्रीतौ किम् । राजसुखम् । 'स्वं स्वामिनि' ॥६।२।१७॥ स्वामिनि परे स्ववाचि प्रकृत्या । गोस्वामी । स्वं किम् । परमस्वामी । 'पत्यावैश्वर्ये' ॥६।२।१८॥ पत्यौ परे ऐश्वर्यर्थे तत्पुरुषे पूर्वं प्रकृत्या । गृहपतिः । गृहशब्दोयं 'गेहे कः' इति कप्रत्ययान्तोन्तोदात्तः । ऐश्वर्ये किम् । ब्राह्मणो वृषलीपतिः ।

वृषल्या भर्तेत्यर्थः । 'न भूवाक्चिद्दिधिषु' ॥६।२।१९॥ पत्यौ परे ऐश्वर्यार्थे तत्पुरुषे भ्वादीनि प्रकृत्या न स्युः । भूपतिः । दिधिषूपतिः इत्यादि । समासान्तोदात्तत्वमेव । 'वा भुवनम्' ॥६।२।२०॥ पत्यौ परे प्रकृत्या वा । भुवनपतिः । 'भूसूधूभ्रस्जिभ्यश्छन्दसि' इति क्युन्नन्तोऽन्तोदात्तः । 'आशङ्काबाधनेदीयस्सु संभावने' ॥६।२।२१॥ एषु परेषु पूर्वं प्रकृत्या संभावनार्थे तत्पुरुषे । अस्तित्वाध्यवसायः संभावना । गमनाशङ्कम् । गमनमाशङ्क्यत इति संभाव्यते । गमनाबाधम् । गमनमाबाध्यत इति संभाव्यते । गमननेदीयः । गमनमन्तिकमिति संभाव्यते । षष्ठीसमासा एते । क्लीबता क्रियाविशेषणत्वात् 'अव्ययीभावश्च' इति चकाराद्वा लिङ्गस्य लोकाश्रयत्वाद्वा । 'पूर्वे भूतपूर्वे' ॥६।२।२२॥ पूर्वशब्दे परे पूर्वं प्रकृत्या भूतपूर्वार्थे तत्पुरुषे । आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषयो भूतपूर्वे वर्तते । तत्र विशेषणसमासो मयूरव्यंसकादिर्वा । भूतपूर्वे किम् । परमपूर्वः । 'सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये' ॥६।२।२३॥ एषु परेषु पूर्वपदं प्रकृत्या सामीप्यार्थे तत्पुरुषे । मद्रसविधम् । मद्रसनीडम् । मद्रसमर्यादम् । मद्रसवेशम् । मद्रसदेशम् । 'विस्पष्टादीनि गुणवचनेषु' ॥६।२।२४॥ एतानि प्रकृत्या गुणवाचिषु परेषु । विस्पष्टकटुकम् । विस्पष्टं कटुकमिति विगृह्य 'सुप् सुपा' इति समासः । एवं सर्वत्र । विस्पष्टादयोऽत्र प्रवृत्तिनिमित्तस्य विशेषणानि । कटुकादयस्तु गुणवद् द्रव्यं वदन्ति । अतो वैयधिकरण्यान्न कर्मधारयः । विस्पष्टो 'गतिरनन्तरः' इत्याद्युदात्तः । विचित्रलवणम् । अव्ययस्वरेणाद्युदात्तो विचित्रशब्दः । व्यक्तलवणम् । व्यक्तशब्द 'उदात्तस्वरितयोर्यणः—' इत्यादिना स्वरितः । ये चात्रापरे पठ्यन्ते तत्र संपन्ननिपुणौ 'थाथ—' इत्यन्तोदात्तौ । पटुपण्डितौ उप्रत्ययकृप्रत्ययान्तावन्तोदात्तौ । कुशलः कृत्स्वरेणान्तो-

१. न वैयधिकरण्यात् कर्म॰ PC. २. विस्पष्टशब्दो Dc3.

दात्तः । चपलशब्दः 'चुपेरच्चोपधायाः' इत्यन्तोदात्तः । चिदिति हि तत्र वर्तते । तत्पुरुष इति निवृत्तम् । 'अज्यावमकन्यापवत्सु भावे *कर्मधारये*' ॥६।२।२५॥ एषूत्तरपदेषु पूर्वं प्रकृत्या भावार्थे कर्म-*धारये । गमनश्रेष्ठम् । गमनश्रेयः* । वचनज्येष्ठम् । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । गमनपापीयः । भावे किम् । गम्यतेनेनेति गमनम् । तच्छ्रेयो गमनश्रेयः । कर्मधारये किम् । गमनस्य श्रेयो गमनश्रेयः । 'कुमारश्च' ॥६।२।२६॥ पूर्वपदं कर्मधारये प्रकृत्या । कुमारश्रमणा । कुमारोन्तोदात्तः । 'आदिः प्रत्येनसि' ॥६।२।२७॥ कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये । कुमारप्रत्येनाः । प्रतिगतमेनोस्य प्रत्येनाः । 'पूगेष्वन्यतरस्याम्' ॥६।२।२८॥ गण-वाचिन्युत्तरपदे कुमारस्यादिर्वोदात्तः । कुमारचातकाः । कुमारबालकाः । चातकादौ 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' इति ञ्यः । तस्य 'तद्राज-स्य बहुषु' इति लुक् । 'इगन्तकालकपालभगालशरावेषु द्विगौ' ॥६।२।२९॥ एषु परेषु पूर्वं प्रकृत्या द्विगौ । पञ्चारत्नयः प्रमाणं यस्य सः । मात्रचो द्विगौ लुक् । पञ्चमास्यः । पञ्चमासान् भृतो भूतो भावी वा । द्विगोर्यप् । पञ्चवर्षः । 'वर्षाल्लुक् च' इति ठञो लुक् । पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । अत्र त्रिषु 'संस्कृतं भक्षाः' इति कृताणो 'द्विगोर्लुगनपत्ये' इति लुक् । 'त्रः संख्यायाः' इति पञ्चशब्द आद्युदात्तः । 'बह्वन्यतरस्याम्' ॥६।२।३०॥ इगन्ता-दिषूत्तरपदेषु बहुशब्दः प्रकृत्या । बह्वरत्निः । बहुरन्तोदात्तः । तस्य प्रकृतिस्वरे कृते यत्र यणादेशस्तत्र 'उदात्तस्वरितयोः—' इत्येष स्वरः । बहुमास्यः । बहुकपालः । बहुभगालः । बहुशरावः । 'दिष्टिवितस्त्योश्च' ॥६।२।३१॥ अनयोरिगन्तत्वेपि पूर्वं प्रकृत्या वा । पञ्चदिष्टिः । दशवितस्तिः । 'सप्तमी सिद्धशुष्कपक्वबन्धे-ष्वकालात्' ॥६।२।३२॥ सप्तमीस्वरः कृत्स्वरेण बाधितः पुनः प्रसूयते ।

१. प्रतिगुण° PC. २. प्रतिप्रसूयते Dc3.

एषु परेषु सप्तम्यन्तं प्रकृत्या सा चेत् सप्तमी कालान्न । साङ्काश्य-सिद्धः । निधनशुष्कः । कुम्भीपक्वः । चक्रबन्धः । 'साङ्काश्य-काम्पिल्य—' इत्यन्तोदात्तो मध्योदात्तश्च । निधनेति क्युप्रत्ययान्तो मध्योदात्तः । कुम्भीति ङीषन्तोऽन्तोदात्तः । चक्रेत्यन्तोदात्तः । 'परि-प्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' ॥६।२।३३॥ पर्यादयः प्रकृत्या वर्ज्यमानादिषूत्तरपदेषु । अव्ययीभावार्थोयमारम्भः । बहुव्रीहि-तत्पुरुषयोः सिद्धत्वात् । वर्ज्यमाने परित्रिगर्तं वृष्टो देवः । परि-पूर्वाह्णम् । परिपूर्वरात्रम् । एवं प्रतिपूर्वाह्णादि । 'उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तानि पूर्वपदानि । 'राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु' ॥६।२।३४॥ अभिषिक्तवंश्यक्षत्रियवाचिनोऽत्र राजन्यास्तेषां बहुवचना-न्तानां यो द्वन्द्वोऽन्धकवृष्णिषु वर्तते तत्र पूर्वपदं प्रकृत्या । शिनिवासुदेवाः । शिनिराद्युदात्तः । तदपत्येष्वभेदेन वर्तते । राजन्येति किम् । द्वैप्य-वैमायनाः । द्वीपे भवा द्वैप्याः । विमेरपत्यानि युवानः वैमायनाः । अन्धकवृष्णय एते नाभिषिक्ता न च क्षत्रियाः । बहुवचने किम् । संकर्षणवासुदेवौ । द्वन्द्वे किम् । वृष्णीनां कुमारा वृष्णि-कुमाराः । अन्धकवृष्णिषु किम् । कुरुपञ्चालाः ॥ 'संख्या' ॥६।२।३५॥ संख्यावाचि पूर्वपदं प्रकृत्या । एकादश । 'इगन्तकाल—' इति कन्नन्तत्वादाद्युदात्तः । 'आचार्योपसर्जनश्चान्तेवासी' ॥६।२।३६॥ आचार्योपसर्जनच्छात्रद्वन्द्वे पूर्वं प्रकृत्या । आपिशलपाणिनीयाः । अपि-शलस्यापत्यमापिशलिस्तेन प्रोक्तमापिशलम् । 'इञश्च' इत्यण् । तदधीयतेये तेप्यापिशलाः । प्रोक्ताल्लुक् । आपिशलेर्वा छात्रा आपिशलाः । आचार्योपसर्जनः किम् । छान्दसवैयाकरणाः । अन्तेवासीति किम् । आपिशलपाणिनीये शास्त्रे । 'कार्तकौजपादयश्च' ॥६।२।३७॥ एषां द्वन्द्वे पूर्वपदं प्रकृत्या । कार्तकौजपौ । कृतस्यायं कार्तः । कुजपस्यायं कौजपः । अणन्तौ । सावर्णिमाण्डूकेयौ । सावर्णिरिञन्तः । आवन्त्य-श्मकाः । अवन्तेरपत्यानि बहूनि तन्निवासो जनपदः । तथा

अश्मकाः । पैलश्यापर्णेयाः । पीलाया अपत्यं पैलस्तस्यापत्यं युवा । 'अणो—' इति कृतस्य फिञः 'पैलादिभ्यश्च' इति लुक् । श्यापर्णो बिदादिः । तस्यापत्यं स्त्री श्यापर्णी । तस्यापत्यं युवा श्यापर्णेयः । कपिश्यापर्णेयः । कपिरन्तोदात्तः । तस्यापत्यं बहुत्वे कपिबोधादाङ्गिरस इत्युत्पन्नस्य यञो लुक् । शैतिकाक्षपाञ्चालेयाः । शितिकक्षस्यापत्यम् । ऋष्यण् । तदपत्ये यूनि य इण् तस्य 'ण्यक्षत्रियार्ष—' इति लुक् । पाञ्चालस्यापत्यं स्त्री पाञ्चाली । तदपत्यं युवा पाञ्चालेयः । शैतिकाक्षपाञ्चालेयौ । कटुकवाधूलयाः । कटेरिणादिकोकप्रत्यये संज्ञा । कटुकस्यापत्यम् । इञ् । तस्य 'बह्वच इञः—' इति लुक् । वधूलयस्यापत्यं वाधूलयः । शाकलशुनकाः । शाकलसणका इति केचित् । शकलस्यापत्यं शाकल्यस्तस्य छात्राः । कण्वादित्वादण् । शुनकस्यापत्यम् । बिदादिभ्योञ् तस्य बहुषु लुक् । सणकशब्दादुत्पन्नस्येञः 'बह्वच इञः—' इति लुक् । शणकबाभ्रवाः । आर्चाभिमौद्गलाः । ऋचाभिन प्रोक्तमधीयते आर्चाभिनः । 'वैशम्पायनान्ते—' इति णिनिः । मुद्गलः कण्वादिस्तदपत्यस्य छात्राः । कुन्तिसुराष्ट्राः । चिन्तिसुराष्ट्राः । कुन्तेः सुराष्ट्रस्य चापत्येषु बहुषु तन्निवासे वा जनपदे द्वन्द्वः । तण्डवतण्डाः । पचाद्यजन्तौ । गर्गादित्वाद्यञ् । तत्रापत्यबहुत्वे यञो लुक् । अविमत्तकामविद्धाः । अविमत्तो नञ्स्वरेणाद्युदात्तः । द्वयोरप्यपत्यबहुत्वे 'बह्वचः—' इति यञो लुक् । कठकालापाः । कठकौथुमाः । कौथुमलौकाक्षाः । कठेन प्रोक्तमधीयते । 'वैशम्पायनान्तेवासि—' इति णिनिः । कठचरकाल्लुक् । कलापिना प्रोक्तमधीयते कालापाः । 'कलापिनोण्' । 'सब्रह्मचारी—' इति टिलोपः । कुथुमिना प्रोक्तमधीयते । प्राग्दीव्यतोण् । पूर्ववट्टिलोपः । लोकाक्षेण प्रोक्तमधीयते लौकाक्षाः । लोकाक्षस्य वापत्यं लौकाक्षिः । स्त्रीकुमारम् । स्त्री अन्तोदात्तः । मौदपैप्पलादाः । मौदपैप्पलादाः । मुदस्यापत्यं मौदिस्तच्छात्राः । तथा पैप्पलादाः ।

द्विपाठप्रयोजनं पक्षे समासान्तः । वत्सजरत् । वत्सोऽन्तोदात्तः । सौश्रुतपार्थिवाः । सुश्रुतस्य पृथोश्छात्राः । जरामृत्यु । याज्यानुवाक्ये । यजेर्ण्यत् । 'यजयाच—' इति कुत्वाभावः । वचेर्ण्यत् । तस्य कुत्वम् । 'तित् स्वरितम्' इत्यन्तस्वरितः । इहाचार्योपसर्जनान्तेवासिनां पाठः प्रपञ्चार्थः । 'महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु' ॥६।२।३८॥ द्वन्द्व इति निवृत्तम् । व्रीह्यादिषु दशसु उत्तरपदेषु महानिति पूर्वपदं प्रकृत्या । महाव्रीहिः । महापराह्णः इत्यादि । महानन्तोदात्तः । तस्य यः प्रतिपदोक्तः 'सन्महत्—' इति समासः तत्रैव स्वरः । अन्यत्र षष्ठीसमासे समासान्तोदात्तत्वमेव । 'क्षुल्लकश्च वैश्वदेवे' ॥६।२।३९॥ क्षुल्लको महांश्च वैश्वदेवे उत्तरपदे प्रकृत्या । क्षुल्लकवैश्वदेवम् । क्षुधं लातीति क्षुल्लः । ततोऽज्ञातादिषु 'प्रागिवात् कः' इत्ययमन्तोदात्तः । 'उष्ट्रः सादिवाम्योः' ॥६।२।४०॥ एतयोरुत्तरपदयोरुष्ट्रः पूर्वपदं प्रकृत्या । उष्ट्रसादि । उष्ट्रवामि । उष्ट्रः ष्ट्रन्प्रत्ययान्त आद्युदात्तः । कर्मधारयः । षष्ठीसमासो वा । 'गौः सादसादिसारथिषु' ॥६।२।४१॥ एषु परेषु गोशब्दः पूर्वपदं प्रकृत्या । गोसादः । गोः सादः । गां सादयतीति वा । गोः सादिः गोसादिः । गोसारथिः । 'कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलो दासीभाराणां च' ॥६।२।४२॥ एषामष्टानां समासानां पूर्वं प्रकृत्या दासीभारादेश्चाकृतिगणस्य पूर्वपदम् । कुरुगार्हपतम् । 'कृग्रोरुच्च' इति कुरुः कुप्रत्ययान्तोऽन्तोदात्तः । 'कुरुवृज्योर्गार्हपत इति वाच्यम् ।' वृजिगार्हपतम् । वृजिशब्द आद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः । 'रिक्ते विभाषा' इति रिक्त आद्युदात्तोऽन्तोदात्तो वा । असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । लावण्यहीनेत्यर्थः । असूताश्लीलौ नञ्समासत्वादाद्युदात्तौ । पारे वडवेव पारेवडवा । निपातनादेवायमिवार्थे समासो विभक्त्यलोपश्च ।

पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूस्तैतिलकद्रूः । तितिलिनोपत्यं छात्रो वा तैतिलोऽणन्तः । पण्यकम्बलः । पण्यो यदन्तत्वादाद्युदात्तः । पण्यकम्बलः । संज्ञायामिति वाच्यम् । अन्यत्र समासान्तोदात्तत्वमेव । दासीभारः । देवहूतिः । देवभूतिः । देवनीतिः । पूर्वपदान्तोदात्तानि । वसुनीतिः । पूर्वमाद्युदात्तम् । ओषधिः ओषो धीयतेस्यां किप्रत्ययान्तः । ओषो घञन्त आद्युदात्तः । चन्द्रमाः । 'चन्द्रे मोसिः' इत्यसिप्रत्ययान्तः । चन्द्रो रक्प्रत्ययान्तोन्तोदात्तः।यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न च विहितं स सर्वो दासीभारादिषु द्रष्टव्यः । 'चतुर्थी तदर्थे' ॥६।२।४३॥ चतुर्थ्यन्ताभिधेयार्थे उत्तरपदे चतुर्थ्यन्तं प्रकृत्या । यूपदारु । यूप आद्युदात्तः । 'कुयुभ्यां च' इति पप्रत्ययान्तः । तत्र निदित्यनुवर्तते । तदर्थे किम् । कुबेरबलिः । प्रकृतिविकारभावे इष्यते । इह न । अश्वघासः । 'अर्थे' ॥६।२।४४॥ अर्थे परे चतुर्थ्यन्तं प्रकृत्या । मात्रर्थम् । पित्रर्थम् । मातृपितृशब्दावन्तोदात्तौ । 'क्ते च' ॥६।२।४५॥ क्तान्ते परे पूर्वं प्रकृत्या । गोहितम् । गोरक्षितम् । 'कर्मधारयेऽनिष्ठा' ॥६।२।४६॥ कर्मधारये क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिराद्युदात्तः । कर्मधारये किम् । श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठा किम् । कृताकृतम् । 'अहीने द्वितीया' ॥६।२।४७॥ क्तान्ते परे द्वितीयान्तं प्रकृत्या अहीनवाचिनि समासे । कष्टश्रितः । कष्टशब्दोन्तोदात्तः । अहीने किम् । कान्तारातीतः । हीनं त्यक्तं विभक्तमिति यावत । द्वितीयानुपसर्गे इति वाच्यम् । इह न । सुखप्राप्तः । दुःखापन्नः । 'तृतीया कर्मणि' ॥६।२।४८॥ कर्मार्थकक्तान्ते परे तृतीयान्तं प्रकृत्या । अहिहतः । रुद्रहतः । 'आङि श्रिहनिभ्याम्—' इत्यन्तोदात्तोऽहिर्युत्पादितः । केचिदाद्युदात्तमिच्छन्ति । रुद्रो रेक्प्रत्ययान्तोन्तोदात्तः । कर्मणि किम् । रथेन यातो रथयातः ।

१. त्यस्यन्तोयम् PC. २. श्रेणिशब्द आ PC. ३. रुक्° PC.

गत्यर्थत्वात् कर्तरि क्तः । 'गतिरनन्तरः' ॥६।२।४९॥ कर्मार्थक्तान्ते परे गतिसंज्ञः प्रकृत्या । प्रकृतः । संहृतः । अनन्तरे किम् । अभ्युद्धृतः । व्यवहितगतेर्न । अनन्तरस्य स्यादेव । कर्मणीत्येव । प्रकृतः कटं देवदत्तः । कारकपूर्वस्य तु सतिशिष्टत्वात् थाथादिस्वर एव । दूरादागत इति । 'तादौ च निति कृत्यतौ' ॥६।२।५०॥ तकारादौ निति तुशब्दवर्जिते कृति परे गतिरनन्तरः प्रकृत्या । कृत्स्वरापवादः । प्रकर्ता । तृन् । प्रकर्तुम् । प्रकृतिः । तादौ किम् । प्रजल्पाकः । निति किम् । प्रकर्ता । कृद्ग्रहं उपदेशे तादर्थः । इहापि स्यात् । प्रलपिता । अतौ किम् । आगन्तुः । 'तवै चान्तश्च युगपत्' ॥६।२।५१॥ तवैप्रत्ययस्यान्त उदात्तः गतिश्च प्रकृत्या युगपदुभयं स्यात् । अन्वेतवै । कृत्स्वरापवादः । 'अनिगन्तोऽञ्चतौ वप्रत्यये' ॥६।२।५२॥ अनिगन्तो गतिर्वप्रत्ययेऽञ्चतौ परे प्रकृत्या । प्राङ् । प्राञ्चौ । प्राञ्चः । एकादेश उदात्तः स्वरितो वा । अनिगन्त इति किम् । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । कृदुत्तरपदप्रकृतिस्वर इह स्यात् । वप्रत्यये किम् । उदञ्चनः । चौः 'अनिगन्तोऽञ्चतौ वप्रत्यये' इत्येष स्वरः परत्वान् स्यात् । पराचः । 'न्यधी च' ॥६।२।५३॥ वप्रत्ययान्तेऽञ्चतौ परे इगन्तावपि न्यधी प्रकृत्या । न्यङ् । न्यञ्चौ । न्यञ्चः । अध्यङ् । अध्यञ्चौ । अध्यञ्चः । 'उदात्तस्वरितयोः—' इत्यञ्चतेरकारः स्वरितः । 'ईषदन्यतरस्याम्' ॥६।२।५४॥ उत्तरपदे प्रकृत्या । ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव । 'हिरण्यपरिमाणं धने' ॥६।२।५५॥ हिरण्यपरिमाणवाचि पूर्वपदं धने परे प्रकृत्या वा । द्विसुवर्णधनम् । द्वौ सुवर्णौ परिमाणमस्येति द्विसुवर्णं तदेव धनमिति कर्मधारयः । बहुव्रीहावपि परत्वाद्विकल्प एव । द्विसुवर्णधनः । हिरण्यग्रहः किम् । प्रस्थधनम् । परिमाणं किम् । काञ्चनधनम् । धने किम् । निष्कमाला । 'प्रथमोऽचिरोपसंपत्तौ' ॥

१. °हितस्याभंर्न PC. २. पश्चैतदुभयं PC. ३. एवेह PC.

॥६।२।५६॥ अभिनवार्थे प्रथमशब्दः पूर्वपदं प्रकृत्या । प्रथमवैयाकरणः । संप्रत्यध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दोन्तोदात्तः । अचिरोपसंपत्तौ किम् । प्रथमवैयाकरणः । आद्यो वैयाकरणानामित्यर्थः । 'कतरकतमौ कर्मधारये' ॥६।२।५७॥ प्रकृत्या वा । कतरकलापः । कतमकठः 'आर्यो ब्राह्मणकुमारयोः' ॥६।२।५८॥ आर्यः प्रकृत्या वा । आर्यब्राह्मणः । आर्यकुमारः । ण्यदन्तत्वात् स्वरितः । कर्मधारय इत्येव । आर्यस्य ब्राह्मण आर्यब्राह्मणः[1] । 'राजा च' ६।२।५९ ॥ ब्राह्मणकुमारयोः प्रकृत्या वा । राजब्राह्मणः । कर्मधारय इत्येव । राज्ञो ब्राह्मणो राजब्राह्मणः । 'षष्ठी प्रत्येनसि' ॥६।२।६०॥ राजशब्दः प्रत्येनसि परे प्रकृत्या वा । राज्ञः प्रत्येनाः राजप्रत्येनाः । षष्ठी किम् । राजा चासौ प्रत्येनाश्च राजप्रत्येनाः । 'क्ते नित्यार्थे' ॥६।२।६१॥ क्तान्त उत्तरपदे नित्यार्थे समासे पूर्वपदं प्रकृत्या वा । नित्यप्रहसितः । सततप्रहसितः । 'कालाः' इति द्वितीयासमासः । नित्यशब्दस्त्यबन्तत्वादाद्युदात्तः । सततशब्दो भावक्तान्तो थाथादि स्वरेणान्तोदात्तः[2] । कर्मक्तान्तस्तु गतिस्वरेणाद्युदात्तः । नित्यार्थे किम् । मुहूर्तप्रहसितः । 'ग्रामः शिल्पिनि' ॥६।२।६२॥ ग्रामः प्रकृत्या शिल्पवाचिनि परे । ग्रामनापितः । ग्राम आद्युदात्तः । शिल्पिनि किम् । ग्रामरथ्या । 'राजा च प्रशंसायाम्' ॥६।२।६३॥ राजा प्रकृत्या वा शिल्पवाचिनि परे प्रशंसा चेत् समासार्थः । राजनापितः । शिल्पिनीत्येव । राजहस्ती । 'आदिरुदात्तः' ॥६।२।६४॥ इत उत्तरं पूर्वपदस्यादिरुदात्त इत्येतदधिकृतम्[3] । 'सप्तमीहारिणौ धर्म्येहरणे' ॥६।२।६५॥ सप्तम्यन्तं हारिवाचि च पूर्वपदमाद्युदात्तं हरणादन्यस्मिन् धर्म्यवाचिनि उत्तरपदे । हारीति देयं यः स्वीकरोति सः । धर्म्यमित्याचारनियतं देयम् । स्तूपेशाणः । मुकुटेकार्षापणम् । हलेद्विपदिका । 'संज्ञायाम्' इति समासः । 'कारनाम्नि च' इति

1. PC. has after it प्रत्ययान्तोदात्तं पदम् । 2. भावक्तप्रत्ययान्तोदात्तः PC. 3. क्रियते PC. 4. °ण्वः । PC.

विभक्तेरलुक् । हारी याज्ञिकाश्वः । वैयाकरणहस्ती । क्वचिदयमाचारः स्तूपादिषु शाणादि देयं याज्ञिकादीनामश्वादीति । धर्म्ये किम् । स्तम्बेरमः । अहरणे किम् । वाडवहरणम् । वाडवस्य बीजनिषेकात् पश्चात् पुष्ट्यर्थं यद्दीयते तद्धरणमुच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते इति हरणनिषेधो ज्ञापयति । तेन वाडवहार्यमिति हारिस्वरः सिध्येत् । 'युक्ते च' ॥६।२।६६॥ तत्परार्थे समासे पूर्वस्यादिरुदात्तः । गोबल्लवः । अश्वबल्लवः । 'विभाषाऽध्यक्षे' ॥६।२।६७॥ अध्यक्षे उत्तरपदे पूर्वपदमाद्युदात्तं वा । गवाध्यक्षः । 'पापं च शिल्पिनि' ॥६।२।६८॥ शिल्पिवाचिन्युत्तरपदे पापमाद्युदात्तम् । पापनापितः । पापाणके कुत्सितैः' इति प्रतिपदोक्ते समासे स्यात् । इह न । पापस्य नापितः पापनापितः । 'गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे' ॥६।२।६९॥ भार्यासौश्रुतः । कुमारीदाक्षाः । भिक्षामाणवः । श्राद्धब्राह्मणः । ओदनवात्स्यः । कुमार्यादिलाभकामा ये दाक्षादिभिः प्रोक्तानि शास्त्राण्यधीयते तच्छिष्यतां वा प्रतिपद्यन्ते ते एवं क्षिप्यन्ते । 'अङ्गानि मैरेये' ॥६।२।७०॥ मैरेये परे तदङ्गवाचीनि पूर्वपदान्याद्युदात्तानि । गुडमैरेयः । 'भक्ताख्यास्तदर्थेषु' ॥६।२।७१॥ अन्नवाचिनस्तदर्थे परे आद्युदात्ताः । भाजीकंसः । भिक्षाकंसः । तदर्थेषु किम् । भिक्षाप्रियः । 'गोबिडालसिंहसैन्धवेषूपमाने' ॥६।२।७२॥ एषूपमानवाचिषूत्तरपदेषु पूर्वस्यादिरुदात्तः । धान्यं गोरिव धान्यगवः । गवाकृत्या संनिवेशितमुच्यते । एवं गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । उपमाने किम् । परमसिंहः । 'अके जीविकार्थे' ॥६।२।७३॥ अकप्रत्ययान्ते परे पूर्वमाद्युदात्तं जीविका चेत् समासार्थः ।

---

१. वडवाश्वाय PC. २. °दात्त वा PC. ३. एषु परेषु पूर्वस्यादिरुदात्तः क्षेपश्चेत् समासार्थः । गोत्रे-ओदनवात्स्यः । अन्तेवासिनि-ओदनपाणिनीयाः । माणवे-भिक्षामाणवः । ब्राह्मणे-श्राद्धब्राह्मणः । ओदनलाभार्थं ये वात्स्यगोत्रत्व-पाणिनीयशिष्यत्व-माणवब्राह्मणत्वानि प्रतिपद्यन्ते त एवं क्षिप्यन्ते । PC. ४. अकान्ते PC.

दन्तलेखकः । 'प्राचां क्रीडायाम्' ॥६।२।७४॥ प्राच्यक्रीडायां समासार्थे अके परे[1] पूर्वस्यादिरुदात्तः । उद्दालकपुष्पभञ्जिका । प्राचां किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । 'अणि नियुक्ते' ॥६।२।७५॥ अणन्ते परे पूर्वमाद्युदात्तं नियुक्ते । छत्रधारः । नियुक्ते किम् । काण्डलावः । 'शिल्पिनि चाकृञः' ॥६।२।७६॥ शिल्पिन्यणन्ते परे पूर्वमाद्युदात्तम् । तन्तुवायः । अकृञः किम् । कुम्भकारः । 'संज्ञायां च' ॥६।२।७७॥ पूर्ववत् । तन्तुवायो नाम कीटः । अकृञ इत्येव । रथकारो नाम ब्राह्मणः[2] । 'गोतन्तियवं पाले' ॥६।२।७८॥ पाले परे एतान्याद्युदात्तानि । गोपालः । तन्तिपालः । यवपालः । 'णिनि' ॥६।२।७९॥ णिनन्ते परे पूर्वमाद्युदात्तम्[3] । पुष्पहारी । 'उपमानं शब्दार्थप्रकृतावेव' ॥६।२।८०॥ उपमानवाचि पूर्वं शब्दार्थप्रकृतावेव णिनन्ते परे[4] । पुष्पहारी । उपमानं नियम्यते । उष्ट्रकोशी । शब्दार्थप्रकृतौ किम् । वृकप्रेक्षी । उपसर्गवति मा भूत् । खरोच्चारी । एवेति अनुपमानेपि यथा स्यात् । पुष्कलजल्पी । 'युक्तारोह्यादयश्च' ॥६।२।८१॥ एते समासा आद्युदात्ताः । युक्तारोही । आगतरोही । आगतयोधी । आगतनर्दी[5] । आगतप्रहारी । एते णिन्नन्ताः । णिनीत्यस्यै-वोदाहरणार्थः पाठः पूर्वोत्तरपदनियमार्थो वा । इह न[6] । वृक्षारोही । ग्राम-युक्ताध्यायीति । आगतमत्स्या । क्षीरहोता । भगिनीभर्ता । ग्राम-गोधुक् । अश्वत्रिरात्रः । गर्गत्रिरात्रः । व्युष्टत्रिरात्रः । शणपादः । एते षष्ठीसमासाः । एकशितिपात् । एकः शितिः पादोस्येति त्रिपदो बहुव्रीहिः । तत्रैकशितिः 'तद्धितार्थोत्तरपद—' इति तत्पुरुषस्तस्य निमित्ति-स्वरबलीयस्त्वादन्तोदात्तता प्राप्तेत्यत्र पाठः । तेन द्विशितिपादित्यत्र शितिरुदात्तः । निमित्तस्वरबलीयस्त्वस्याप्येकशितिपात्स्वरवचनमेव

१. अण्यन्ते Dc3. २. ब्राह्मणः omitted PC. ३. पूर्वं तथा PC. ४. परे तथा । उष्ट्रकोशी । PC. ५. °नन्दी । PC. ६. तेनेह न । PC. ७. इति निमित्तस्वरबलीयस्त्वा.

ज्ञापकम् । पात्रेसमितादयश्च युक्तारोह्यादयस्ततस्तेऽप्याद्युदात्ताः । 'दीर्घकाशतुषभ्राष्ट्रवटं जे' ॥६।२।८२॥ दीर्घान्ताः काश तुष भ्राष्ट्र वट एते जपरे आद्युदात्ताः। कुटीजः। काशजः। तुषजः। भ्राष्ट्रजः। वटजः। 'अन्त्यात् पूर्वं बह्वचः' ॥६।२।८३॥ जे परे बह्वचोऽन्त्यात् पूर्वमुदात्तम्। उपसरजः। मन्दुरजः। वडवाजः। बह्वचः किम्। दग्धजानि तृणानि। 'ग्रामे निवसन्तः'. ॥६।२।८४॥ अनिवसद्वाचि पूर्वमाद्युदात्तं ग्रामे परे। मल्लग्रामः। वणिग्ग्रामः। समूह इत्यर्थः। अनिवसन्तः किम्। दाक्षिग्रामः। 'घोषादिषु च' ॥६।२।८५॥ एषु पूर्वं तथा। दाक्षिघोषः। घोष। पल्लव। बदरी। पिङ्गल। पिशङ्ग। माला। रक्षा। कटा.। शाल्मली। अश्वत्थ। तृण। दाक्षिशाल्मली। शाल्मलिमुनिः। दाक्षिकूटः। 'छात्र्यादयः शालायाम्' ॥६।२।८६॥ शालायामुत्तरपदे तथा। छात्रिशाला। छात्रि। ऐलि। भाण्डि। व्याडि। आखण्डि। आघडि। गोमि। यदा शालान्तः समासः क्लीबस्तदापि 'तत्पुरुषे शालायाम्—' इत्येतस्माद्विप्रतिषेधेनायमेव स्यात्। छात्रिशालम्। 'प्रस्थेवृद्धमकर्क्यादीनाम्' ॥६।२।८७॥ प्रस्थे परे कर्क्यादिवर्जितमवृद्धमाद्युदात्तम्। इन्द्रप्रस्थः। अवृद्धं किम्। दाक्षिप्रस्थः। अकर्क्यादीनां किम्। कर्कीप्रस्थः। कर्की। मघी। मकरी। कर्कन्धू। शमी। करीर। करट। कवल। खदिर। 'मालादीनां च' ॥६।२।८८॥ प्रस्थे परे एषामादिरुदात्तः। मालाप्रस्थः। माला। शाला। द्राक्षा। क्षामा। काञ्ची। एक। शोण। काम। एकशोणयोः 'एङ् प्राचां देशे' इति वृद्धत्वम्। 'अमहन्नवं नगरेनुदीचाम्' ॥६।२।८९॥ नगरे परे महन्नववर्जितं पूर्वमाद्युदात्तं तच्चेदुदीचां न। सुह्मनगरम्। अमहन्नवं किम्। महानगरम्। नवनगरम्। अनुदीचां किम्। कान्तीनगरम्। 'अर्मे चावर्णं द्व्यच् त्र्यच्' ॥६।२।९०॥ अर्मे परे द्व्यच् त्र्यच् अवर्णान्तं पूर्वमाद्युदात्तम्। गुप्तार्मम्। कुक्कुटार्मम्। अवर्णं किम्।

१. कटुक PC.

बृहदर्मम् । द्व्यच् त्र्यच् किम् । कपिञ्जलार्मम् । अमहन्नवमित्येव । महार्मम् । नवार्मम् । 'न भूताधिकसंजीवमद्राश्मकज्जलम्' ॥६।२।९१॥ अर्मे परे एतान्याद्युदात्तानि न स्युः । भूतार्मम् । अधिकार्ममित्यादि । दिवोदासादयश्छन्दस्याद्युदात्ताः । दिवोदासाय गायत । वध्र्यश्वाय दाशुषे । 'अन्तः' ॥६।२।९२॥ अधिकारोयं प्रागुत्तरपदादिरित्यस्मात् । 'सर्वं गुणकार्त्स्न्ये' ॥६।२।९३॥ पूर्वपदसर्वस्यान्त उदात्तो गुणकार्त्स्न्यं चेदर्थः । सर्वश्वेतः । सर्वं किम् । परमश्वेतः । आश्रयव्याप्त्या परमन्त्वं श्वेतस्येति गुणकार्त्स्न्ये वर्तते । गुणे किम् । सर्वसौवर्णः । कार्त्स्न्ये किम् । सर्वेषां श्वेततरः सर्वश्वेतः । 'संज्ञायां गिरिनिकाययोः' ॥६।२।९४॥ गिरौ निकाये च पूर्वमन्तोदात्तं संज्ञायाम् । अञ्जनागिरिः । शाण्डिलिनिकायः । संज्ञायां किम् । ब्राह्मणनिकायः । 'कुमार्यां वयसि' ॥६।२।९५॥ कुमार्यां परे पदे पूर्वमन्तोदात्तं वयसि गम्ये । वृद्धकुमारी । वयसि किम् । परमकुमारी । 'उदकेऽकेवले' ॥६।२।९६॥ मिश्रार्थे समासे सति उदके परे पूर्वं तथा । गुडोदकम् । 'स्वरितो वा—' इति पक्षे स्वरितः । अकेवले किम् । शीतोदकम् । 'द्विगौ क्रतौ' ॥६।२।९७॥ द्विगौ परे क्रतौ वाच्ये पूर्वं तथा । गर्गत्रिरात्रः । द्विगौ किम् । अतिरात्रः । 'सभायां नपुंसके' ॥६।२।९८॥ सभाशब्दे उत्तरपदे क्लीबे पूर्वमन्तोदात्तम् । गोपालसभम् । सभायां किम् । विप्रसेनम् । नपुंसके किम् । राजसभा । 'पुरे प्राचाम्' ॥६।२।९९॥ पूर्वमन्तोदात्तम् । शिवदत्तपुरम् । प्राचां किम् । शिवपुरम् । 'अरिष्टगौडपूर्वे च' ॥६।२।१००॥ एतत्पूर्वसमासे पुरे परे तथा । अरिष्टपुरम् । गौडपुरम् । पूर्वग्रहणादिहापि । अरिष्टश्रितपुरम् । गौडभृत्यपुरम् । 'न हास्तिनफलकमार्देयाः' ॥६।२।१०१॥ पुरे परे एतानि नान्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् ।

१. प्राच्ये पुरे PC. २. एते पुरे परे नान्तोदात्ताः । PC.

'कुसूलकूपकुम्भशालं बिले' ॥६।२।१०२॥ बिले परे एतान्यन्तोदात्तानि । कुसूलबिलम् । 'दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु' ॥६।२।१०३॥ एषु परेषु दिक्शब्दा अन्तोदात्ताः । पूर्वेषुकामशमी । जनपद–पूर्वपञ्चालाः । आख्यान–पूर्वयायातम् । अधिराममधिकृत्य कृतो ग्रन्थ आधिरामम् । चानराट—पूर्वचानराटम् । 'आचार्योपसर्जनश्चान्तेवासिनि' ॥६।२।१०४॥ आचार्योपसर्जनान्तेवासिन्यन्त्युत्तरपदे दिक्शब्दा अन्तोदात्ताः । पूर्वपाणिनीयाः । 'उत्तरपदवृद्धौ सर्वं च' ॥६।२।१०५॥ उत्तरपदस्येत्यधिकृत्य या वृद्धिरुक्ता तद्वति परे सर्वशब्दः दिक्शब्दश्चान्तोदात्तः । सर्वपाञ्चालकः । अपरपाञ्चालकः । अधिकारलक्षणादिह न । सर्वकारकः । 'बहुव्रीहौ विश्वं संज्ञायाम्' ॥६।२।१०६॥ अत्र विश्वं पूर्वपदमन्तोदात्तम् ॥ विश्वदेवः । विश्वमहान् । पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं प्राप्तम् । बहुव्रीहौ किम् । विश्वे च ते देवा विश्वेदेवाः । संज्ञायां किम् । विश्वे देवा अस्य विश्वदेवः । विश्वामित्रो विश्वाजिन इत्यत्र 'संज्ञायां मित्राजिनयोः' इति परत्वात्स्यात् । प्रागव्ययीभावाद् बहुव्रीह्यधिकारः 'उदराश्वेषुषु' ॥६।२।१०७॥ पूर्वमन्तोदात्तं बहुव्रीहौ संज्ञायाम् । वृकोदरः । कुवलयाश्वः । महेषुः । 'क्षेपे' ॥६।२।१०८॥ क्षेपे गम्ये उदरादिषु परेषु बहुव्रीहौ संज्ञायां पूर्वं तथा । कुण्डोदरः । कटुकाश्वः । चलाचलेषुः । 'नदी बन्धुनि' ॥६।२।१०९॥ बन्धुनि परे नद्यन्तमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः । नदी किम् । ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । 'निष्ठोपसर्गपूर्वमन्यतरस्याम्' ॥६।२।११०॥ उपसर्गपूर्वं निष्ठान्तं पूर्वपदमन्तोदात्तं वा । प्रक्षालितपादः । निष्ठा किम् । प्रसेचकमुखः । उपसर्गपूर्वं किम् । शुष्कमुखः । 'उत्तरपदादिः' ॥६।२।१११॥ अधिकारः । आपादान्तम् । 'कर्णो वर्णलक्षणात्' ॥६।२।

१. एत अन्तोदात्ताः PC. २. अपरयायातम PC. ३. यायातमधिकृत्य कृतो ग्रन्थ यायातम् PC. ४. उत्तरपदाधिकारः आपादान्तः । आद्यधिकारः प्रकृत्या भगालमित्यवधिकः । Pc.

११२॥ आभ्यां परः कर्णशब्दः आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । दात्राकर्णः । 'कर्णे लक्षणस्य' इति दीर्घः । लक्षणमिति पशूनां विभागज्ञापनार्थं कर्णादिषु दात्रादिप्रतिरूपकं यत् क्रियते तदिह गृह्यते । तेनेह न । स्थूलकर्णः । 'संज्ञौपम्ययोश्च' ॥६।२।११३॥ अत्र यो बहुव्रीहिस्तत्र कर्ण उत्तरपदमाद्युदात्तं संज्ञायाम् । कुम्भकर्णः । औपम्ये-गोकर्णः । 'कण्ठपृष्ठग्रीवाजङ्घं च' ॥६।२।११४॥ संज्ञौपम्ययोरेते आद्युदात्ताः संज्ञायाम् । शितिकण्ठः । काण्डपृष्ठः । दशग्रीवः । गोजङ्घः । औपम्ये । उष्ट्रकण्ठः । गोपृष्ठः । उष्ट्रग्रीवः । नाडीजङ्घः । 'शृङ्गमवस्थायां च' ॥६।२।११५॥ अवस्थायां संज्ञौपम्ययोश्च शृङ्गमुत्तरपदमाद्युदात्तम् । उद्गतशृङ्गः । ऋष्यशृङ्गः । मेषशृङ्गः । 'नञो जरमरमित्रमृताः' ॥६।२।११६॥ नञः परे एते आद्युदात्ता बहुव्रीहौ । अजरमित्यादि । 'सोर्मनसी अलोमोषसी' ॥६।२।११७॥ सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाद्युदात्तम् । सुकर्मा । सुयशाः । सोः किम् । कृतकर्मा । अलोमोषसी किम् । सुलोमा सुषा । 'क्रत्वादयश्च' ॥६।२।११८॥ आद्युदात्ता बहुव्रीहौ । सुक्रतुः । क्रतु । दृशीक । प्रतीक । प्रपूर्ति । हव्य । भव्य । भग । 'आद्युदात्तं द्व्यच्छन्दसि' ॥६।२।११९॥ यदाद्युदात्तं द्व्यच् तत् सोरुत्तरं बहुव्रीहावाद्युदात्तम् । स्वश्वाः । सुरथाः । नित्स्वरेणाश्वरथावाद्युदात्तौ । आद्युदात्तं किम् । सुबाहुः । अन्तोदात्तोयम् । द्व्यच् किम् । सुगुरसत् । 'वीरवीर्यौ च' ॥६।२।१२०॥ सोरुत्तरावेव तौ छन्दस्याद्युदात्तौ बहुव्रीहौ । सुवीरेण । सुवीर्यस्य । बहुव्रीह्यधिकारो निवृत्तः । 'कूलतीरतूलमूलशालाक्षसममव्ययीभावे' ॥६।२।१२१॥ एतान्युत्तरपदान्यव्ययीभावे आद्युदात्तानि । उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । परिशालम् । पर्यक्षम् । सुषमम् । कूलादिग्रहः किम् । उपकुम्भम् । अव्ययीभावे किम् । परमकूलम् । 'कंसमन्थशूर्पपाय्यकाण्डं द्विगौ' ॥६।२।१२२॥

---

१ °कर्णम् PC. २. अवस्थावगमे PC. ३. सोरुत्तरं &c. PC.

उत्तरपदान्येतानि द्विगौ आद्युदात्तानि । द्विकंसमित्यादि । 'तत्पुरुषे शालायां नपुंसके' ॥६।२।१२३॥ क्लीबे तत्पुरुषे शालान्ते तथा । ब्राह्मणशालम् । 'कन्था च' ॥६।२।१२४॥ पूर्ववत् । सौशमिकन्थम् । नपुंसक इत्येव । दाक्षिकन्था । 'आदिश्चिहणादीनाम्' ॥६।२।१२५॥ कन्थान्ते तत्पुरुषे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । चिहण । मदुर । वैतुल । पटत्क । वैडालिकर्णि । कुक्कुट । चित्कण । चिक्कण । आद्यधिकारे आदिग्रहः पूर्वपदाद्युदात्तार्थः । 'चेलखेटकटुककाण्डं गर्हायाम्' ॥६।२।१२६॥ गर्हार्थे चेलादीत्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । पुत्रः चेलमिव । 'उपमितं व्याघ्रा—' इति समासः । उपानत्खेटम् । दधिकटुकम् । भूतकाण्डम् । 'चीरमुपमानम्' ॥६।२।१२७॥ उपमानार्थे तत्पुरुषे चीरमुत्तरमाद्युदात्तम् । वस्त्रचीरम् । कम्बलचीरम् । 'पललसूपशाकं मिश्रे' ॥६।२।१२८॥ मिश्रार्थे तत्पुरुषे एतान्याद्युदात्तानि । गुडपललम् । घृतसूपः । घृतशाकम् । 'कूलसूदस्थलकर्षाः संज्ञायाम्' ॥६।२।१२९॥ एते तथा । दाक्षिकूलम् । देवसूदम् । भाण्डस्थली । स्थलेग्रहे लिङ्गविशिष्टस्यापि ग्रहात् । दाक्षिकर्षः । ग्रामनामधेयान्येतानि । 'अकर्मधारये राज्यम्' ॥६।२।१३०॥ कर्मधारयान्यतत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । अकर्मधारये किम् । परमराज्यम् । चेलराज्यादिस्वरादव्ययस्वरः स्यात् पूर्वविप्रतिषेधेन । कुचेलम् । कुराज्यम् । 'वर्ग्यादयश्च' ॥६।२।१३१॥ एते पूर्ववत् । वासुदेववर्ग्यः । वासुदेवपक्ष्यः । वर्ग्यादयो गणेषु न पठ्यन्ते । वर्ग पूग इत्येवमादयो ये पठितास्त एव यत्प्रत्ययान्ता इह गृह्यन्ते । 'पुत्रः पुम्भ्यः' ॥६।२।१३२॥ पुंशब्देभ्यः परः पुत्र आद्युदात्तः । कौनाटिपुत्रः । पुम्भ्यः किम् । गार्गीपुत्रः । 'नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः' ॥६।२।१३३॥ आचार्यादिभ्यः परः पुत्रो नाद्युदात्तः । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः ।

राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः ।[1] याजकपुत्रः । होतृपुत्रः । संयुक्तपुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । 'ऋतो विद्यायोनिसंबन्धेभ्यः' इति षष्ठ्या अलुक् । समासान्तोदात्तत्वमेव । 'चूर्णादीन्यप्राणिषष्ठ्याः' ॥६।२।१३४॥ एतान्यप्राणिषष्ठ्यन्तात् पराण्याद्युदात्तानि । मुद्गचूर्णम् । अप्राणिषष्ठ्याः किम् । मत्स्यचूर्णम् । चूर्ण । करिष । कपिल । शाकिन । शाकट । द्राक्षा । तूस्त । कुन्दम । दलप । चमसी । चक्कन । चौल । 'षट् च काण्डादीनि' ॥६।२।१३५॥ काण्ड चीर पलल सूप शाक कूल इत्येतानि षट् अप्राणिषष्ठ्या गर्होपमानमिश्रसंज्ञासु आद्युदात्तानि । दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । षट् किम् । राजसूदः । 'कुण्डं वनम्' ॥६।२।१३६॥ तत्पुरुषार्थे उत्तरपदं कुण्डमाद्युदात्तम् । शरकुण्डम् । वनं किम् । मृत्कुण्डम् । आद्यधिकारो निवृत्तः । 'प्रकृत्या भगालम्' ॥६।२।१३७॥ भगालवाच्युत्तरपदं प्रकृत्या । कुम्भीभगालम् । कुम्भीकपालम् । भगालादयो मध्योदात्ताः । 'प्रकृत्या' इत्येतदधिक्रियते अन्त इति यावत् । 'शितेर्नित्याबह्वज् बहुव्रीहावभसत्' ॥६।२।१३८॥ शितेः[3] परं नित्याबह्वच्कं बहुव्रीहौ प्रकृत्या । शितिपादः । शित्यंसः । शित्योष्ठः । पादशब्दो वृषादित्वादाद्युदात्तः । अंसौष्ठौ प्रत्ययस्य नित्त्वात् । शितेः किम् । दर्शनीयपादः । अबह्वच् किम् । शितिललाटः । नित्याबह्वच् किम् । शितिककुत् । ककुदस्यावस्थायां टिलोपः । अन्यत्र शितिककुदः । अभसत् किम् । शितिभसत् । 'गतिकारकोपपदात् कृत्' ॥६।२।१३९॥ एभ्यः परं कृदन्तं प्रकृतिस्वरं तत्पुरुषे । प्रकारकः । कारकात् । इध्मव्रश्चनः । उपपदात् । ईषत्करः । एभ्यः किम् । षष्ठीतत्पुरुषे मा भूत् । देवदत्तकारकः । 'उभे वनस्पत्यादिषु

१. °षष्ठ्याः PC. २. शरकाण्डम् । PC. ३. शितेरुत्तरं नित्यं यदबह्वच् तच्छब्दवर्जितं तत् प्रकृतिस्वरं स्यात् बहुव्रीहौ । PC. ४. प्रकृत्या PC.

युगपत्' ॥६।२।१४०॥ एषु पूर्वोत्तरपदे युगपत् प्रकृत्या । वनस्पतिः । वनपतिशब्दावाद्युदात्तौ । बृहस्पतिः । बृहदन्तोदात्तः । केचिदाद्युदात्तत्वमत्र निपातयन्ति । शचीपतिः । 'कृदिकारादक्तिनः' इत्यन्तोदात्तः । केचिच्छार्ङ्गरवादिपाठेनाद्युदात्त इत्याहुः । तनूनपात् । तनूरन्तोदात्तः[४] । 'देवताद्वन्द्वे च' ॥६।२।१४१॥ उभे युगपत् प्रकृत्या । इन्द्रावरुणौ । इन्द्राबृहस्पती । इन्द्र आद्युदात्तो निपातितः । वरुण उनन्नन्त आद्युदात्तः । देवता किम् । प्लक्षन्यग्रोधौ । द्वन्द्वे किम् । अग्निष्टोमः । 'नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु' ॥६।२।१४२॥ पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे देवताद्वन्द्वे उभे प्रकृत्या न । इन्द्राग्नी । अग्निरन्तोदात्तः । अपृथिव्यादौ किम् । द्यावापृथिव्यौ । सोमारुद्रौ । इन्द्रापूषणौ । शुक्रामन्थिनौ । द्यावाशब्द आद्युदात्तो निपातितः । पृथिवी ङीषन्तत्वादन्तोदात्तः । सोमो मन्नन्त आद्युदात्तः । रुद्रो रगन्तत्वादन्तोदात्तः । 'श्वन्नुक्षन्—' इति पूषान्तोदात्तो निपातितः । मथिन् इन्नन्तत्वादन्तोदात्तः । 'अन्तः' ॥६।२।१४३॥ समासस्योत्तरपदस्यान्त उदात्त इत्यापादसमाप्तेरधिकारः । 'थाथघञ्क्ताजबित्रकाणाम्' ॥६।२।१४४॥ एतत्प्रत्ययान्तानां गतिकारकोपपदात् परेषामन्त उदात्तः । थ सुनीथः । अवभृथः । 'अवे भृञः' इति क्थन् । अथ आवसथः । 'उपसर्गे वसेः' इत्यथः । घञ् प्रभेदः । काष्ठभेदः । क्त दूरादागतः विशुष्कः । अज्–प्रक्षयः । अप्–प्रलवः । इत्र–प्रलवित्रम् । क–गोवृषः ।

१. पंचसु PC. २. वनपती आद्यु° PC. ३. इति ङीषन्तोऽन्तोदात्त PC. ४. नपादिति 'नभ्राण्नपात्—' इत्याद्युदात्तो निपातितः । नराशंसः । नरेत्यबन्त आद्युदात्तः । शंसो घञन्तः । दीर्घो निपातनात् । शुनःशेपः । उभावाद्युदात्तौ । शण्डामर्कौ । घञन्तौ । 'अन्येषामपि–' इति दीर्घः । तृष्णावरूत्री । तृष्ण आद्युदात्तः । वरूत्रीत्यन्तोदात्तो निपातितः । पूर्ववद्दीर्घः । बम्बाविश्ववयसौ । बम्बोऽन्तोदात्तः । विश्ववयो बहुव्रीहौ विश्वमित्यन्तोदात्तं दीर्घः पूर्ववत् । मर्मृत्युः । मृङोपि च । मृत्युरन्तोदात्तः । ५. द्यावेति 'दिवो द्यावा' इति दिवो द्यावेत्यन्तोदात्तो निपातितः । PC.

मूलविभुजादित्वात् कः । गतिकारकोपपदादित्येव । सुस्तुतं भवता । कर्मप्रवचनीयेऽव्ययस्वर एव । 'सूपमानात् क्तः' ॥६।२।१४५॥ सोरुपमानाच्च परं क्तान्तमन्तोदात्तम् । सुकृतम् । शशप्लुतम् । 'गतिरनन्तरः' इति प्राप्ते उपमानादपि 'तृतीया कर्मणि' इत्ययमारम्भः । गतिकारकोपपदादित्येव । सुस्तुतं भवता । 'संज्ञायामनाचितादीनाम्' ॥६।२।१४६॥ संज्ञायां गतिकारकोपपदात् परं क्तान्तमन्तोदात्तमाचितादीन् विना । संभूतो गार्ग्यायणः । उपहूतः शाकल्यः । 'गतिरनन्तरः' इत्येतस्यापवादः । धनुष्खाता नदी । 'तृतीया कर्मणि' इत्यस्यात्र बाधः । अनाचितादीनां किम् । आचितम् । पर्याचितम् । आस्थापितम् । परिगृहीतम् । निरुक्तम् । प्रतिपन्नम् । अश्लिष्टम् । उपहतम् । उपस्थितम् । संहिता गवि । संहिताशब्दो यदि गोरन्यस्य संज्ञा तदान्तोदात्तो न । यदा गोः संज्ञा तदान्तोदात्त एव । 'प्रवृद्धादीनां च' ॥६।२।१४७॥ एषां क्तान्तमुत्तरपदमन्तोदात्तम् । प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुक्ताः सक्तवः । आकर्षवहितः । अवहितो भोगेषु । खट्वारूढः । कविशस्तः । पुनरुत्स्यूतं वासोदेयं पुनर्निष्कृतो रथः । आकृतिगणोयम् । यानादीनामत्र गणे पाठः प्रयोगप्रवृत्तिप्रदर्शनाय न विषयनियमार्थः । तेन यानादिभ्योन्यत्राप्यन्तोदात्तता स्यात् । विषयनियमार्थ एवेत्येके । 'कारकाद्दत्तश्रुतयोरेवाशिषि' ॥६।२।१४८॥ संज्ञायामाशिषि विषये कारकात्परयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तः । देवा एनं देयासुर्देवदत्तः । विष्णुरेनं श्रूयात् विष्णुश्रुतः । कारकात् किम् । अकारकान्नियमो मा भूत् । संभूतो गार्ग्यायणः । दत्तश्रुतयोः किम् । देवपालितः । आशिषीति किम् । अनाशिषि नियमो मा भूत् । देवैः खाता देवखाता । कारकाद्दत्तश्रुतयोराशिष्येवेत्ययमपि नियमोत्रेष्यते । तेनानाहतो नदति देवदत्तः इत्यत्र न । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वर एव ।

---

१. कर्मप्रवचनीये नाचिः चाव्यय° PC. २. अवशिष्टम् । उपहूतम् । PC. ३. संहित PC. ४. भोगेषु PC. ५. वृत्ति° PC.

अत्रत्यो देवदत्तशदः कस्यचित् शङ्खस्य नाम । 'इत्थंभूतेन कृतमिति च' ॥६।२।१४९॥ विकारोपात्तेन कृतमित्येतस्मिन्नर्थे समासस्योत्तरपदमन्तोदात्तम् । उन्मत्तप्रलपितम् । उन्मत्तत्वप्रकारमापन्नेन कृतमित्यर्थः । 'तृतीया कर्मणि' इत्यस्यापवादः । 'अनो भावकर्मवचनः' ॥६।२।१५०॥ कारकात् परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम् । ओदनभोजनं सुखम् । राजभोजनाः शालयः । भावकर्मेति किम् । दन्तधावनं काष्ठम् । करणे ल्युट् । कृत्स्वरः । प्रकृतिस्वरः प्रत्युदाहरणेषु सर्वत्र । 'मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः' ॥६।२।१५१॥ एतान्युत्तरपदान्यन्तोदात्तानि । मन्–रथवर्त्म । क्तिन्–पाणिनिकृतिः । व्याख्यान–ऋगयनव्याख्यानम् । शयन–राजशयनम् । आसन–राजासनम् । स्थान–गोस्थानम् । याजकादि–ब्राह्मणयाजकः । 'याजकादिभिश्च' इत्यत्रैते गणिताः । क्रीत–गोक्रीतः । कारकादित्येव । प्रकृतिः । कृत्स्वरापवादो योगः । 'सप्तम्याः पुण्यम्' ॥६।२।१५२॥ सप्तम्यन्तात् परं पुण्यमन्तोदात्तम् । वेदे पुण्यं वेदपुण्यम् । कृत्स्वरेणाद्युदात्तत्वं मा भूत् इति विधिः । 'ऊनार्थकलहं तृतीयायाः' ॥६।२।१५३॥ तृतीयान्तात्पराण्यन्तोदात्तानि । कार्षापणविकलम् । असिकलहः । 'मिश्रं चानुपसर्गमसन्धौ' ॥६।२।१५४॥ तृतीयान्तात् परं मिश्रमन्तोदात्तम् । गुडमिश्राः । अनुपसर्ग किम् । गुडसंमिश्राः । असंधौ किम् । ब्राह्मणमिश्रो राजा । ब्राह्मणैः सहैक्यं गत इत्यर्थः । इह पणबन्धेनैकार्थ्यं संधिः । पणबन्धो यदि मे भवानिदं कुर्यादहमपि तर्हि इदं ते करिष्यामि इति परिभाषणम् । केचित् पुनर्गृह्यमाणे विशेषाप्रत्यासत्तिः संधिरित्याहुः । 'नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः' ॥६।२।१५५॥ संपाद्यर्हहितालंवाचिनो ये तद्धितास्तदन्तान्युत्तरपदानि नञः पराणि गुणप्रतिषेधवाचीन्यन्तोदात्तानि । कर्णवेष्टकाभ्यां संपादि मुखं कार्णवेष्टकिकम् । न कार्णवेष्टकि-

१. विकारापन्ने कृत PC. २. एते उत्तरपदेऽन्तोदात्ताः । PC.

कमकार्णवेष्टकिकम् । छेदमर्हति छैदिकः । न छैदिकः अच्छैदिकः । वत्सेभ्यो हितो वत्सीयः । न वत्सीयः अवत्सीयः । संतापाय प्रभवति सांतापिकः । न सांतापिकोऽसांतापिकः । गुणप्रतिषेधे किम् । अगार्दभरथिकः । अन्यार्थोयं नञ् । संपदाद्यर्थाः किम् । अपाणिनीयः । 'ययतोश्चातदर्थे' ॥६।२।१५६॥ ययतौ यावतदर्थे तदन्तस्योत्तरपदस्य नञः परस्यान्त उदात्तः । पाशानां समूहः पाश्या । न पाश्या अपाश्या । 'पाशादिभ्यो यः' । अन्यार्थेयं नञ् । दन्त्यम् । 'शरीरावयवाद्यत्' । न दन्त्यमदन्त्यम् । अतदर्थे किम् । पादार्थमुदकं पाद्यम् । गुणप्रतिषेधे एव । दन्त्यादन्यददन्त्यम् । 'अच्कावशक्तौ' ॥६।२।१५७॥ नञः परमजन्तं कान्तं वाशक्तौ गम्यायामन्तोदात्तौ । अपचः पक्तुमशक्तः । अविक्षिपः । 'आक्रोशे च' ॥६।२।१५८॥ आक्रोशार्थे अजकान्तं नञः परं तथा । अपचोयं जाल्मः । अविलिखः । 'संज्ञायाम्' ॥६।२।१५९॥ आक्रोशे नञः परमेव संज्ञायां वर्तमानमन्तोदात्तम् । अदेवदत्तः । 'कृत्योकेष्णुच्चार्वादयश्च' ॥६।२।१६०॥ नञः परे एते तथा । कृत्य–अकर्तव्यम् । उक–अगामुकम् । इष्णुच्–अनलंकरिष्णुः । चार्वादि–अचारुः । असाधुः । अयौधिकः । अवदान्यः । चारु । साधु । यौधिक । अनङ्गमेजय । अत्र द्वितीये नञ्समासेन्तोदात्तत्वम् । अनङ्गमेजयः । वदान्यः । अकस्मात् । अत्रापि द्वितीये नञ्समासेन्तोदात्तत्वम् । वर्तमानवर्धमानत्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः संज्ञायामेते ज्ञेयाः । विकारसदृशे व्यस्तसमस्ते । अविकारः । असदृशः । गृहपतिः । राजाह्नोश्छन्दसि । भाषायां नञ्स्वर एव । 'विभाषा तृन्नन्नतीक्ष्णशुचिषु' ॥६।२।१६१॥ एतेषु नञ उत्तरेषु अन्त उदात्तो वा ।

१. अन्या...नञ् dropped PC. २. शापार्थे PC. ३. नञ्यन्तोदात्तः । PC. ४. अत्रापि नञ्यन्तरम् । अनकस्मात् । PC.

तृन् अकर्ता । अन्न–अनन्नम् । तीक्ष्ण–अतीक्ष्णम् । शुचि–अशुचिः ।
पक्षे अव्ययस्वर एव । 'बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः
क्रियागणने' ॥६।२।१६२॥ एभ्यः परयोरेनयोरन्त उदात्तः । इदं
प्रथममस्य इदंप्रथमः । इदंद्वितीयः । एतद्द्वितीयः । तद्द्वितीयः । अत्र
सर्वत्र गमनादिक्रियागणनमेव । बहुव्रीहौ किम् । अनेन प्रथमः
इदंप्रथमः । 'तृतीया' इति योगविभागात्समासः । क्रियागणने
किम् । अयं प्रथम एषां ते इदंप्रथमाः । द्रव्यगणनमेतत् । 'बहुव्रीहौ'
इत्येतत् 'वनं समासे' इत्येतस्मात् प्रागनुवर्तते । 'संख्यायाः
स्तनः' ॥६।२।१६३॥ अन्तोदात्तः । द्विस्तना । संख्यायां किम् ।
दर्शनीयस्तना । 'विभाषाच्छन्दसि' ॥६।२।१६४॥ संख्यायाः
स्तनोन्तोदात्तो वा छन्दसि । द्विस्तनां कुर्याद्वामदेवः । 'संज्ञायां
मित्राजिनयोः' ॥६।२।१६५॥ मित्राजिनोत्तरपदे बहुव्रीहावन्तोदात्ते ।
देवमित्रः । वृकाजिनः । संज्ञायां किम् । प्रियमित्रः । ऋषिप्रतिषेधो
मित्रे । विश्वामित्र ऋषिः । 'व्यवायिनोन्तरम्' ॥६।२।१६६॥
व्यवधायकवाचिनः परमन्तरमन्तोदात्तम् । कुड्यान्तरम् । 'मुखं
स्वाङ्गम्' ॥६।२।१६७॥ स्वाङ्गवाच्युत्तरपदं मुखं बहुव्रीहावन्तो-
दात्तम् । गौरमुखः । स्वाङ्गं किम् । दीर्घमुखा शाला ।
'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः' ॥६।२।१६८॥ एभ्यः
परं मुखं नान्तोदात्तम् । अव्यय—उच्चैर्मुखः । दिक्शब्द-प्राङ्मुखः ।
गो–गोमुखः । महत्–महामुखः । स्थूल–स्थूलमुखः । मुष्टि–मुष्टिमुखः ।
पृथु–पृथुमुखः । वत्स–वत्समुखः । 'निष्ठोपमानादन्यतरस्याम्'
॥६।२।१६९॥ आभ्यां परं मुखमन्तोदात्तं वा । प्रक्षालितमुखः । यदै-
तदुत्तरपदान्तोदात्तत्वं नास्ति तदा 'निष्ठोपसर्गपूर्व—' इति पक्षे पूर्व-
पदान्तोदात्तत्वं तस्याप्यभावे पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरः । उप-
मानात्–सिंहमुखः । 'जातिकालसुखादिभ्योनाच्छादनात् क्तोकृतमित-

१. अनयोः dropped PC. २. मुखं वा तथा । PC.

प्रतिपन्नाः' ॥६।२।१७०॥ आच्छादनवर्जितात् जात्यादित्रयात् परं कृत-मितप्रतिपन्नान् वर्जयित्वा क्तान्तमन्तोदात्तम् । जातिवाचिनः—सारङ्गो जग्धो येन सारङ्गजग्धः । काल—मासो जातो यस्य मासजातः । सुखादि-सुखजातः । दुःखजातः । तृप्रजातः । अनाच्छादनात् किम् । वस्त्र-च्छन्नः । अकृतादयः किम् । कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । 'वा जाते' ॥६।२।१७१॥ जात्यादिपूर्वो जातान्तो बहुव्रीहिस्तथा वा । दन्तजातः । २ । मासजातः । २ । सुखजातः । २ । 'नञ्सुभ्याम्' ॥६।२।१७२॥ आभ्यां परं बहुव्रीहौ अन्तोदात्तम् । अयवो देशः । अव्रीहिः । सुयवः । सुव्रीहिः । 'कपि पूर्वम्' ॥६।२।१७३॥ नञ्-सुभ्यां परं पदं कपः पूर्वभूतमन्तोदात्तं कपि परे । अकुमारीको देशः । सुकुमारिकः । 'ह्रस्वान्तेन्त्यात् पूर्वम्' ॥६।२।१७४॥ नञ्सुभ्यां परं यत् पदं ह्रस्वान्तं तत्रान्त्यात् पूर्वमुदात्तं स्यात् कपि परे । अयवकः । सुयवकः । पूर्वमित्यनुवर्तमाने पुनः पूर्वसंग्रहणं प्रवृत्तिभेदेन नियम-प्रतिपत्त्यर्थं ह्रस्वान्तेन्त्यादेव पूर्वमुदात्तं न कपि पूर्वम् । तेन अज्ञकः सुज्ञकः इत्यत्र कबन्तस्यैवान्तोदात्तत्वम् । 'बहोर्नञ्वदुत्तरपदभूम्नि' ॥६।२।१७५॥ उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य नञः परस्येव स्वरः । 'नञ्सुभ्याम्' 'कपि पूर्वम्' 'ह्रस्वान्तेन्त्यात्पूर्वम्' 'नञो जरमरमित्रमृताः' इति सूत्रैरुक्तः स्वरः स्यात् । बहुमाषो देशः । बहुव्रीहिकः । बहुकुमारिकः । उत्तरपदभूम्नि किम् । बहुमनाः । 'न गुणादयोवयवाः' ॥६।२।१७६॥ बहोः परे एते नान्तोदात्ताः । बहुगुणा रज्जुः । बह्वक्षरं पदम् । एवं बहुच्छन्दः । बहुसूक्तः । बह्वध्यायः । गुणादिराकृतिगणः । अवयवाः किम् । बहुगुणो ब्राह्मणः । 'उपसर्गात् स्वाङ्गं ध्रुवमपर्शु' ॥६।२।१७७॥ उपसर्गात् परं पर्शुव्यतिरिक्तं ध्रुवं स्वाङ्गमन्तोदात्तम् । प्रपृष्ठः । प्रललाटः । ध्रुवमेकरूपम् । उपसर्गात् किम् । दर्शनीयपृष्ठः । स्वाङ्गं किम् ।

१. °पन्नवर्जितं PC. २. अमाषो देशः । PC. ३. आकृतिगणोयम् । PC.

प्रशाखो वृक्षः । ध्रुवं किम् । उद्बाहुः । अपर्शु किम् । उत्पर्शुः । विपर्शुः । बहुव्रीह्यधिकारो निवृत्तः । 'वनं समासे' ॥६।२।१७८॥ समासमात्रे वनमुपसर्गात् परमन्तोदात्तम् । प्रवणे यष्टव्यम् । निर्वणे प्रणिधीयते । 'अन्तः' ॥६।२।१७९॥ अन्तःशब्दात् परं वनमन्तोदात्तम् । अन्तर्वणो देशः । 'अन्तश्च' ॥६।२।१८०॥ उपसर्गात् परोऽन्तःशब्दोऽन्तोदात्तः । प्रान्तः । पर्यन्तः । 'ननिविभ्याम्' ॥६।२।१८१॥ आभ्यां परोऽन्तः शब्दो नान्तोदात्तः । न्यन्तः । व्यन्तः । अनेनान्तोदात्ते निषिद्धे पूर्वपदप्रकृतिस्वरे कृते यणादेशः । तत्र 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितः । 'परेरभितोभावि मण्डलम्' ॥६।२।१८२॥ परेः परमभितोभाविवचनं मण्डलं चान्तोदात्तम् । परिकूलम् । अभितो भावो भवनमस्यास्तीत्यभितोभावि । परिमण्डलम् । 'प्रादस्वाङ्गं संज्ञायाम्' ॥६।२।१८३॥ अन्तोदात्तम् । प्रगृहम् । प्रकोष्ठम् । अस्वाङ्गं किम् । प्रपदम् । 'निरुदकादीनि च' ॥६।२।१८४॥ अन्तोदात्तानि । निरुदकम् । निरुपलम् । निर्मक्षिकम् । निर्मशकम् । निष्कालकम् । निष्कालिकम् । निष्ठालिका । निष्पेषः । निस्तरीपः । निस्तरीकः । दुस्तरीपः । तरीर्नौः । तां पातीति तरीपः । निरजिनम् । प्राजिनम् । परिपादः । परिकेशः । परिकर्षः । आकृतिगणोऽयम् । 'अभेर्मुखम्' ॥६।२।१८५॥ अन्तोदात्तम् । अभिमुखम् । 'अपाच्च' ॥६।२।१८६॥ अपमुखः । 'स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च' ॥६।२।१८७॥ अपात् पराणि स्फिगादीनि षट् सीरनामानि नाम चान्तोदात्तानि स्युः । अपस्फिगम् । अपपूतम् । अपवीणम् । अपाञ्जः । अपाध्वा । अपकुक्षि । अपसीरम् । अपहलम् । अपनाम । बहुव्रीहिरव्ययीभावो वा । 'अधेरुपरिस्थम्' ॥६।२।१८८॥ अधेः परमुपरिस्थवाच्यन्तोदात्तम् । अधिदन्तः । दन्तस्योपरि स्थितो दन्त उच्यते । उपरिस्थं किम् ।

१. स्वरत्वे यणा° PC. २. °वाचि PC.

अधिकरणम् । 'अनोरप्रधानकनीयसी' ॥६।२।१८९॥ अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम् । अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदप्रधानः समासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानोयम् । 'पुरुषश्चान्वादिष्टः' ॥६।२।१९०॥ अनोः परः पुरुषोन्तोदात्तः । अन्वादिष्टः पुरुषः अनुपुरुषः । अन्वादिष्टः किम् । अनुगतः पुरुषोनुपुरुषः । 'अतेरकृत्पदे' ॥६।२।१९१॥ अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः । अत्यङ्कुशो नागः । अतिकशोश्वः । अतिपदा शक्करी । अकृत्पदे किम् । अतिकारकः । अतेर्धातुलोप इति वाच्यम् । इह मा भूत् । शोभनो गार्ग्योतिगार्ग्यः । इह च यथा स्यात् । अतिक्रान्तः कारकादतिकारकः । 'नेरनिधाने' ॥६।२।१९२॥ नेः परमुत्तरपदमन्तोदात्तं प्रकाशनेर्थे । निमूलम् । बहुव्रीहिस्तत्पुरुषो वा । अव्ययीभावे समासान्तोदात्तत्वेनैव सिद्धम् । अनिधाने किम् । निवाक् । निहितवागित्यर्थः । 'प्रतेरंश्वादयस्तत्पुरुषे' ॥६।२।१९३॥ प्रतेः परे एतेन्तोदात्ताः । प्रतिगतोंशुः प्रत्यंशुः । अंशु । जन । राजन् । उष्ट्र । खेटक । अजिर । आर्द्रा । श्रवण । कृत्तिका । तत्पुरुषे किम् । प्रतिगता अंशवोस्य प्रत्यंशुरयमुष्ट्रः । 'उपाद्द्व्यजजिनमगौरादयः' ॥६।२।१९४॥ उपात् परं द्व्यच्कमजिनं चान्तोदात्तम् । उपदेवः । उपाजिनम् । अगौरादयः किम् । उपगौरः । गौर । नैष । तैल । लेट । लोट । जिह्वा । कृष्णा । कन्या । गुड । कल्प । पाद । तत्पुरुष इत्येव । उपगतः सोमः यस्य स उपसोमः । 'सोरवक्षेपणे' ॥६।२।१९५॥ निन्दायां सोरुत्तरमन्तोदात्तं तत्पुरुषे । इह खल्विदानीं सुस्थण्डिले सुस्फिताभ्यां सुप्रत्यवसितः । सुरत्र पूजायामेव । वाक्यार्थस्त्ववक्षेपणमसूयया तथाभिधानात् । सोः किम् । कुब्राह्मणः । अवक्षेपणे किम् । सुतृणेषु । 'विभाषोत्पुच्छे' ॥६।२।१९६॥

१. After it अनुगतश्चेत् PC. २. उत्तरपदं पदशब्दश्च PC. ३. गायत्री PC. ४. कारकमति PC. ५. उपाजिनः PC. ६. उपगौरम् PC.

उत्पुच्छशब्दोऽन्तोदात्तः । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयति उत्पुच्छयतेरच् उत्पुच्छस्तदा थाथादिना नित्यमन्तोदात्तत्वे प्राप्ते विकल्पः । सेयमुभयत्र विभाषा । तत्पुरुष इत्येव । उदस्तं पुच्छमस्य उत्पुच्छः । 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' ॥६।२।१९७॥ आभ्यां परेष्वेष्वन्त उदात्तो वा बहुव्रीहौ । द्विपात् । त्रिपात् । द्विदन् । त्रिदन् । द्विमूर्धा । त्रिमूर्धा । पादशब्दः कृताल्लोपः स्यात् । कृतददादेशो दन्तो दत् । मूर्धनित्यकृतसमासान्त एव । तस्य प्रयोजनमसत्यपि समासान्ते स्यादिति । एतज् ज्ञापकं वानित्यः समासान्तः स्यादिति । बहुव्रीहौ किम् । द्वयोर्मूर्धा द्विमूर्धा । 'सक्थं चाक्रान्तात्' ॥६।२।१९८॥ क्रान्तादन्यस्मात्परं सक्थमन्तोदात्तम् । गौरसक्थः । अक्रान्तात् किम् । चक्रसक्थः । 'परादिश्छन्दसि बहुलम्' ॥६।२।१९९॥ छन्दसि परस्यादिरुदात्तो बहुलम् । अञ्जिसक्थमालभेत । वाक्पतिः । चित्पतिः । अत्यल्पमिदमुच्यते ।

परादिश्च[1] परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः ॥

इति समासस्वरप्रकरणम् । अथ तिङन्तस्वरप्रकरणम् ।

'तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः' ॥८।१।२७॥ तिङः पराणि गोत्रादीन्यनुदात्तानि कुत्सनाभीक्ष्ण्ययोः । कुत्सने । पचति गोत्रम् । आभीक्ष्ण्ये । पचति पचति गोत्रम् । गोत्र । ब्रुव । प्रवचन प्रसहन । प्रकथन । न्याय । प्राय । प्रचक्षण । स्वाध्याय । भूयिष्ठ । नाम वा । अनुदात्तमाद्युदात्तं वा । पचतिनाम । 'तिङ्ङतिङः'[2] ॥८।१।२८॥ अतिङन्तात् पदात् परं तिङन्तं पदं सर्वमनुदात्तम् । देवदत्तः पचति । 'न लुट्' ॥८।१।२९॥ लुडन्तं नानुदात्तम् ।

---

१. परादिश्च परान्तश्च PC. २. This Sûtra is dropped PC.

श्वः कर्ता । 'निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्' ॥८।१।३०॥ निपातैरेतैर्युक्तं तिङन्तमनुदात्तं न स्यात् । यत्करोति । यदि पठति । हन्त पचति । कुवित् करोति । नेज्जिह्मायन्तो नरकं पताम । स चेदधीते । अयं च करिष्यते । अत्र चेदर्थ एव चो गृह्यते । कच्चिद् भुङ्क्ते । यत्राधीते । 'नह प्रत्यारम्भे' ॥८।१।३१॥ अवधारणे गम्ये नहयुक्तं तिङन्तं नानुदात्तम् । नह भोक्ष्यसे । 'सत्यं प्रश्ने' ॥८।१।३२॥ सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने गम्ये । सत्यं भोक्ष्यते । 'अङ्गाप्रातिलोम्ये' ॥८।१।३३॥ अङ्गयुक्तं तिङन्तं नानुदात्तमानुकूल्ये गम्ये । अङ्ग कुरु । अप्रातिलोम्ये किम् । अङ्ग कूज वृषल इदानीं ज्ञास्यसि । 'हि च' ॥८।१।३४॥ हियुक्तं तिङन्तं नानुदात्तम् । स हि कुरु । अप्रातिलोम्ये इत्येव । स हि कूज वृषल इदानीं ज्ञास्यसि । 'छन्दस्यनेकमपि साकाङ्क्षम्' ॥८।१।३५॥ छन्दसि हियुक्तं तिङन्तं क्वचिदेकं क्वचिदनेकमपि साकाङ्क्षं नानुदात्तम् । अनृतं हि मत्तो वदति । पाप्मा एनं विपुनाति । अत्रानेकमप्यनुदात्तं न स्यादित्यर्थः । अजा ह्यग्नेरजनिष्ट गर्भम् । सा वापश्यज्जनितारमग्रे । इहाजनिष्टेत्याद्युदात्तम् । अपश्यदित्येकमनुदात्तम् । 'यावद्यथाभ्याम्' ॥८।१।३६॥ आभ्यां योगे तिङन्तं नानुदात्तम् । यावद् भुङ्क्ते । यथाधीते । परेणापि योगे स्यात् । देवदत्तः पचति यावत् । भुङ्क्ते यथा । 'पूजायां नानन्तरम्' ॥८।१।३७॥ यावद्यथाभ्यामनन्तरं तिङन्तमननुदात्तं न स्यात् पूजायामर्थे । यावत् पचति शोभनम् । यथाधीते चारु । इदं तिङन्तमनुदात्तमेव । 'उपसर्गव्यपेतं च' ॥८।१।३८॥ यावद्यथाभ्यां युक्तं प्रादिव्यवहितं तिङ् पूजार्थेनुदात्तमेव । यावत् प्रपचामि शोभनम् । यथा प्रकरोति चारु । 'तुपश्यपश्यताहैः पूजायाम्' ॥८।१।३९॥ एभिर्युक्तं तिङ् न निहन्यते । माणवकस्तु भुङ्क्ते । पश्य माणवको भुङ्क्ते । पश्यत माणवको भुङ्क्ते । अह माणवको

---

१. तिङन्तं Dc३. २. तिङन्तं Dc४.

भुङ्क्ते । पूजायामिति वर्तमाने पुनः पूजावचनं निघातनिषेधार्थम् । तद्धि निघातनिषेधस्य निषेधेन संबद्धम् । 'अहो च' ॥८।१।४०॥ अहोयुक्तं तिङ्[1] नानुदात्तम् । अहो भुङ्क्ते । 'शेषे विभाषा' ॥८।१।४१॥ अपूजायामहोयोगे तिङ् वानुदात्तम् । कटमहो करिष्यति । असूयावचनमेतत् । 'पुरा च परीप्सायाम्' ॥८।१।४२॥ पुरायोगे तिङ्[2] नानुदात्तं त्वरा चेदर्थः । अधीष्व माणवक । पुरा स्तनयति स्तनयित्नुः । पुराशब्दोयं भविष्यदासत्तिद्योतकः । 'नन्वित्यनुज्ञैषणायाम' ॥८।१।४३॥ अनुज्ञेच्छावाची यो ननुस्तद्योगे तिङ् नानुदात्तम् । ननु करोमि भोः । अनुजानीष्व मां गमनं प्रतीत्यर्थः । अनुज्ञैषणायां किम् । अकार्षीः कटं देवदत्त । ननु करोमि भोः । पृष्टप्रतिवचनमेतत् । 'किं क्रियाप्रश्नेनुपसर्गमप्रतिषिद्धम्' ॥८।१।४४॥ क्रियाप्रश्नार्थे किंयोगे तिङन्तं नानुदात्तम् । किं देवदत्तः पचति आहोस्विद् भुङ्क्ते । आख्यातद्वयस्यापि संशयविषयत्वेन किंयोगान्निघातनिषेध इत्येके । अन्ये तु पूर्वस्यैवेत्याहुः । क्रियाप्रश्ने किम् । साधनप्रश्ने मा भूत् । किं शाकं पचति आहोस्वित् अपूपान् । अनुपसर्गे किम् । किं प्रपचति आहोस्वित् प्रकरोति । अप्रतिषिद्धं किम् । किं न पचसि । 'लोपे विभाषा' ॥८।१।४५॥ यत्र किंशब्दो न प्रयुज्यते गम्यते च तदर्थस्तत्र तिङन्तं नानुदात्तम् । देवदत्तः पचति आहोस्वित् पठति । 'एहि मन्ये प्रहासे लृट्' ॥८।१।४६॥ एहिमन्येयुक्तं लृडन्तं नानुदात्तमुपहासे गम्ये । एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोतिथिना । प्रहासे किम् । एहि मन्ये ओदनं भोक्ष्यसे सुष्ठु मन्यसे । 'जात्वपूर्वम्' ॥८।१।४७॥ पूर्वपदशून्येन जातुना युक्तं लृडन्तं नानुदात्तम् । जातु भोक्ष्यसे । अपूर्वं किम् । कटं जातु करिष्यति । 'किंवृत्तं च चिदुत्तरम्' ॥८।१।४८॥ चित्परं यत् किंवृत्तं तद्युक्तं तिङन्तं नानुदात्तम् । कश्चिद् भुङ्क्ते । कश्चिद् भोजयति । कतर-

१. तिङन्तं Dc3. २. तिङन्तं Dc3.

श्चिद् भोजयति । कतमश्चिद्वा । त्रिदुत्तरं किम् । को भुङ्क्ते । अपूर्वमित्येव । छात्रं कश्चिद् भोजयति । 'आहो उताहो चानन्तरम्' ॥८।१।४९॥ आभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङ् नानुदात्तम् । आहो भुङ्क्ते उताहो पचति । 'शेषे विभाषा' ॥८।१।५०॥ आहोउताहोभ्यां सान्तराभ्यां योगे नानुदात्तं वा । आहो मैत्रः पचति । २ । उताहो मैत्रः पचति । 'गत्यर्थलोटा लृण् न चेत् कारकं सर्वान्यत्' ॥८।१।५१॥ गत्यर्थधातौ परेण लोटा युक्तं लृट् नानुदात्तं यत्रैव कारके लोट् तत्रैव चेत् लृट् स्यात् । गच्छ मैत्र ओदनं भोक्ष्यसे । उह्यन्तां देवदत्तेन शालयस्तेनैव भोक्ष्यन्ते । न चेत् कारकमन्यत् किम् । गच्छ चैत्र मैत्रो भोक्ष्यते । उह्यन्तां शालयो माषा भोक्ष्यन्ते । सर्वग्रहणं किम् । आगच्छ चैत्र ग्रामं त्वं चाहं च द्रक्ष्यावः । इह तु लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते । 'लोट् च' ॥८।१।५२॥ गत्यर्थलोटा युक्तं लोडन्तं नानुदात्तं न चेत् कारकं सर्वान्यत् । गच्छ चैत्र ग्रामं पश्य । गम्यतां देवदत्तेन ग्रामो दृश्यताम् । 'विभाषितं सोपसर्गमनुत्तमम्' ॥८।१।५३॥ सोपसर्गं लोडन्तं पूर्ववद्वा । आगच्छ मैत्र ग्रामं प्रविश ॥२॥ अनुत्तमं किम् । आगच्छानि देवदत्त ग्रामं प्रविशानि । 'हन्त च' ॥८।१।५४॥ हन्तयुक्तं लोडन्तं सोपसर्गं वा नानुदात्तम् । हन्त प्रविश । २ । अनुत्तममित्येव । हन्त प्रभुनजावहै । 'यद्धितुपरं छन्दसि' ॥८।१।५६॥ तिङन्तं नानुदात्तम् । यत्परम्—गवां गोत्रमुदसृजो यदङ्गिरः । हिपरम्—इन्दवो वामुशन्ति हि । तुपरम्—व्याख्यास्यामि तु ते । 'निपातैः—' इत्यादिभिः सिद्धे नियमार्थं वचनं एभिरेव परभूतैर्योगे निषेधो नान्यैरिति । जाये स्वारोहावैहि । एहीत्यनेन गत्यर्थलोटा युक्तस्य रोहावेति लोडन्तस्य निघातनिषेधो न । 'चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः' ॥८।१।५७॥ एषु षट्सु परेष्वगतेरुत्तरं तिङन्तं नानुदात्तम् । पचति चन । पचतिचित् । पचतीव । गोत्रादि—पचति गोत्रम् । एवं ब्रुवादि । तद्धितः—पचतिकल्पम् । अनुदात्तं तद्धि-

तान्तमुदाहार्यम् । अन्यत्र तद्धितस्वरेण तिङ्स्वरो बाध्यते । अगतेः किम् । प्रपचति चन । उपसर्गगतिरिहेष्यते । इह मा भूत् । शुक्लीकरोति चन । 'चादिषु च' ॥८।१।५८॥ अगतेः परं तिङन्तं नानुदात्तं चवाहहैवेषु परेषु । पचति च । पचति वा । पचति ह । पचत्यह । पचत्येव । अगतिरित्येव । प्रपचति च । 'चवायोगे प्रथमा' ॥८।१।५९॥ चवायोगे प्रथमा तिङ्विभक्तिर्नानुदात्ता । गर्दभांश्च कालयति । वीणां च वादयति । वीणां वा वादयति । गदर्भं वा कालयति । 'हेति क्षियायाम्' ॥८।१।६०॥ क्षिया धर्मव्यतिक्रमस्तत्र प्रथमा तिङ् हयोगे नानुदात्ता । स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति । 'क्षियाशीः—' इति प्लुतः । 'अहेति विनियोगे च' ॥८।१।६१॥ अहयुक्ता प्रथमा तिङ् विभक्तिर्नानुदात्ता । नानाप्रयोजने नियोगे धर्मव्यतिक्रमे च । त्वमह ग्रामं गच्छ । त्वमहारण्यं गच्छ । स्वयमह रथेन याति ३ उपाध्यायं पदातिं गमयति । 'चाहलोप एवेत्यवधारणम्' ॥८।१।६२॥ चाहशब्दो न प्रयुज्यते तदर्थश्च गम्यते तत्र प्रथमा तिङ् विभक्तिर्नानुदात्ता एवेत्येतच्चेदवधारणे प्रयुज्यते । चलोपे—देवदत्त एव ग्रामं गच्छतु देवदत्त एवारण्यं गच्छतु । ग्रामं चारण्यं चेत्यर्थः । अहलोपे—मैत्र एव ग्रामं गच्छतु मैत्र एवारण्यं गच्छतु । केवलं ग्रामं केवलमरण्यमित्यर्थः । 'चादिलोपे विभाषा' ॥८।१।६३॥ चवाहहैवलोपे प्रथमा तिङ् विभक्तिर्नानुदात्ता । चलोपे—शुक्ला व्रीहयो भवन्ति २ श्वेता गा आज्याय दुहन्ति । भवन्तीति विकल्पेन निहन्यते । एवं वालोपादिषूदाहार्यम् । 'वैवावेति च च्छन्दसि' ॥८।१।६४॥ आभ्यां युक्ता प्रथमा तिङ् विभक्तिर्वा नानुदात्ता । अहर्वै देवानामासीत् २ रात्रिरसुराणाम् । अयं वाव हस्त आसीत् २ । नेतर आसीत् । 'एकान्याभ्यां समर्थाभ्याम्' ॥८।१।६५॥ आभ्यां योगे प्रथमा तिङ् विभक्तिर्वा नानुदात्ता छन्दसि । प्रजामेका जिन्वति । तयोरन्यः पिप्पलं स्वाद्वत्ति । अनश्नन्नन्यो अभिचाकशीति । जिन्वति अत्ति इति वा निहन्यते । 'यद्वृत्तान्नित्यम्' ॥८।१।६६॥

इह विभक्त्यन्तं यद्वृत्तम् । प्रथमा च्छन्दसीति निवृत्ते । यद्वृत्तात् परं व्यवहितमव्यवहितं च तिङन्तं नानुदात्तम् । यो भुङ्क्ते । यं भोजयति २ । यत्कामास्ते जुहुमः । 'सगतिरपि तिङ्' ॥८।१।६८॥ 'पूजनात् पूजितमनुदात्तम्—' इति वर्तते । सगतिरगतिरपि तिङ् पूजनेभ्यः परः पूजितोऽनुदात्तः । 'निपातैर्यद्यदि—' इति निषेधे प्राप्ते पुनर्विधिः । यत् काष्ठं पचति । यत्काष्ठं प्रपचति । 'पदात्' इति निवृत्तम् । 'कुत्सने च सुप्यगोत्रादौ' ॥८।१।६९॥ निन्दार्थे च गोत्रादिवर्जिते सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः । पचति पूति । प्रपचति पूति । अगोत्रादौ किम् । पचति गोत्रम् । क्रियाकुत्सने इति वाच्यम् । कर्तृकर्मकुत्सने मा भूत् । पचति पूतिः । पचतिपूतिरनुदात्तः । विभाषितं बह्वर्थमनुदात्तं वक्तव्यम् । पचन्ति पूति । 'गतिर्गतौ' ॥८।१।७०॥ गतौ परे गतिरनुदात्तः । अभ्युद्धरति । समुदानयति । अभिसंपर्याहरति । 'तिङि चोदात्तवति' ॥८।१।७१॥ उदात्तवति तिङि परे गतिरनुदात्तः । यत् प्रकरोति । उदात्तवति किम् । प्रकरोति ।

इति तिङन्तस्वरप्रकरणम् ।

अथ वैदिकवाक्येषु स्वरविस्तरकथनप्रकारप्रदर्शनप्रकरणम् । स च स्वरविस्तरः पूर्वप्रकरणेषु ज्ञातेषु प्राज्ञैः सुवचोऽपि दिङ्मात्रप्रदर्शनार्थं कथ्यते । तथोक्तम् ।

'तदेवं साधुविज्ञाने प्रकृतिप्रत्ययाश्रये ।
समासोत्थस्वरे प्राज्ञैः सुवचः स्वरविस्तरः' ॥ इति ।

तत्र ऋग्वेदस्थः प्रथमो वर्गः अग्निमीळे इत्यादिक उदाह्रियते । तत्राद्या ऋक् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातममिति । तत्राग्निमिति गत्यर्थादगिधातोः 'अङ्गेर्नलोपश्च' इत्युणादिसूत्रेण निप्रत्ययः । इदित्वानुमागमेन प्राप्तस्य नस्य लोपः । अङ्गति स्वर्गं गच्छति हविर्नेतुमित्यग्निः । तत्र 'धातोः' इत्यकार उदात्तः । स्वरविधौ व्यञ्जनमविद्यमानवदिति गकारस्याविद्यमानत्वात् । एवं

सर्वत्र । 'आद्युदात्तश्च' इति प्रत्ययेकारोप्युदात्तः । तत्र 'अनुदात्तं पदमेकवर्जम्' इति द्वयोरन्यतरमुदात्तमवशिष्यते । इतरस्यानुदात्तत्वं प्राप्तम् । तत्र धातुस्वरे प्रथममवस्थिते पश्चाच्छिष्यमाणः प्रत्ययस्वरोवशिष्यते । सतिशिष्टस्वरो बलीयानिति न्यायात् । ततोग्निप्रातिपदिकमाद्यनुदात्तमन्तोदात्तम् । ततोम् द्वितीयैकवचनम् 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तम् । तस्य 'अमि पूर्वः' इति यत् पूर्वरूपं तदुदात्तम् 'एकादेश उदात्तेनोदात्तः' इति । ईळ इति ईड स्तुतावित्यस्य लड्युत्तमपुरुषैकवचनम् । डकारस्य च ळकारो बह्वृचाध्येतृसंप्रदायप्राप्तः । 'तिङ्ङतिङः' इत्यतिङन्तादग्निशब्दात् परस्य तिङन्तस्य निघातविधानात् ईळे इति पदं सर्वानुदात्तम् । पदद्वयसंहिताकाले तु धातुगतस्य ईकारस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम् । तत ऊर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य 'स्वरितात् संहितायामनुदात्तानाम्' इत्यैकश्रुत्यं प्रचयाख्यं स्यात् । पुरः शब्दः 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' इति पूर्वशब्दादसूप्रत्यये पूर्वस्य च पुरादेशे प्रत्ययस्वरेणान्तोदात्तः । हितशब्देपि धाञो निष्ठायां 'दधातेर्हिः' इत्यादेशे सति प्रत्ययस्वरेणान्तोदात्तः । तयोः समासे सति समासान्तोदात्तत्वे प्राप्ते तदपवादत्वेन 'तत्पुरुषे तुल्यार्थ—' इत्यादिनाव्ययपूर्वपदप्रकृतिस्वरत्वम् । यद्वा 'पुरोव्ययम्' इति गतिसंज्ञायां 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् । ओकार उदात्तः । अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववत् । आद्यक्षरस्य संहितायां प्रचये प्राप्ते 'उदात्तस्वरितपरस्य सन्नतरः' इति नीचोनुदात्तः । यज्ञशब्दो 'यजयाच—' इति नङ्प्रत्ययान्तोन्तोदात्तः । सुप्स्वरेणानुदात्तत्वे स्वरितत्वम् । आद्यक्षरः सन्नतरः । देवशब्दः पचाद्यजन्तः । स च फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः । पूर्वाक्षरं सन्नतरम् । ऋत्विक्शब्दः 'ऋत्विग्दधृक्—' इति निपातितः कृदुत्तरस्वरेणान्तोदात्तः । विभक्तिस्वरः पूर्ववत् । होतृशब्दस्तृन्-

प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । स्वरितप्रचयौ पूर्ववत् । रत्नशब्दो 'नब्विषयस्यानिसन्तस्य' इत्याद्युदात्तः । रत्नानि दधातीति विग्रहः । समासत्वादन्तोदात्तो रत्नधाशब्दः । यद्वा कृदुत्तरपदप्रकृतिस्वरेण । तमप्प्रत्ययस्य पित्स्वरेणानुदात्तत्वे सति स्वरितप्रचयौ । संहितायां रेत्याद्यक्षरस्य प्रचयः । द्वितीयाक्षरस्य त्नेत्यस्य सन्नतरत्वम् । द्वितीया ऋक् । अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत स देवाँ एह वक्षति इति । पुर्व पर्व पूरण इत्यस्मादौणादिके अनि पूर्वशब्द आद्युदात्तः । 'बहुलं छन्दसि' इति भिस ऐसादेशाभावः । ऋषिशब्दोऽप्युणादिः किनन्तत्वादाद्युदात्तः । ईड्यशब्दो ण्यदन्तत्वात् 'तित् स्वरितम्' इति स्वरिते शेषानुदात्तत्वे च तदपवादत्वेन 'ईडवन्द—' इत्याद्युदात्तत्वम् । नवशब्दस्य नू आदेशस्तनन्प्रत्ययश्च वक्तव्यौ । तेन नूतनशब्द आद्युदात्तः । अवशिष्टाः स्वरा अभ्यादिषु नूतनान्तेषु पूर्ववत् ज्ञेयाः । उतशब्दस्यान्तोदात्तत्वस्यैव स्वरादिषु पाठो द्रष्टव्यः । अथवा 'एवादीनाम्—' इत्यन्तोदात्तत्वम् । स इत्यत्र 'फिषः—' इत्यन्तोदात्तः । दिव उक्तस्वरः । देवानित्यस्य 'दीर्घादटि—' इति रुः । 'आतोऽटि नित्यम्' इत्याकारोऽनुनासिकः । यत्वलोपौ । आङो निपातत्वादाद्युदात्तत्वम् । इदमो हप्रत्यये इहशब्दः प्रत्ययस्वरेणान्तोदात्तः । वक्षतीति वहो लोडर्थे छान्दसो लट् । स्यप्रत्ययस्य छान्दसो लोपः । यद्वा लेटि 'सिब्बहुलम्' इति सिप् । 'लेटोऽडाटौ' इत्यट् । तस्य 'तिङ्ङतिङः' इति निघातः । संहितास्वराः पूर्ववत् ज्ञेयाः । तृतीया ऋक् । अग्निना रयिमश्नवत् पोषमेव दिवे दिवे यशसं वीरवत्तममिति । रयिशब्दः फिट्स्वरेणान्तोदात्तः । अश्नवदित्यश्नोतेर्लेटीकारलोपे अडागमे च रूपम् । तस्य निघातः । पोषशब्दो घञन्तत्वादाद्युदात्तः । एवशब्दस्य निपातत्वेऽप्येवमादित्वादन्तोदात्तत्वम् । वकारान्ताद्दिव्शब्दात् परस्या विभक्तेः 'सुपाम्—' इत्यादिना शेभावे 'सावेकाचः—' इति

'ऊडिदम्—' इति वा तस्योदात्तत्वम् । 'नित्यवीप्सयोः' इति द्वित्वे 'अनुदात्तं च' इति परभागस्यानुदात्तत्वम् । यशसमित्यर्शआदित्वादच् । व्यत्ययेन नित्स्वरं बाधित्वा मध्योदात्तः । वीरशब्दात् फिट्स्वरेणान्तोदात्तात्परयोर्मतुप्तमपोः पित्त्वादनुदात्तत्वम् । संहितास्वराः पूर्ववत् । चतुर्थी ऋक् । अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि स इद्देवेषु गच्छति इति । अग्न इत्यग्निशब्दस्य षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । विश्वत इत्यत्र तसिलः प्रत्ययस्वरं बाधित्वा 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते तदपवादः कृदुत्तरपदप्रकृतिस्वर उक्तः । संहितास्वराः पूर्ववत् । पञ्चमी ऋक् । अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः देवो देवेभिरागमत् इति । अग्निरन्तोदात्तः । होता आद्युदात्तः । कविक्रतुरिति 'बहुव्रीहिः' इति पूर्वपदप्रकृतिस्वरत्वम् । सत्यशब्दोऽन्तोदात्तः । चित्रश्रवस्तमशब्देपि 'बहुव्रीहिः' इति पूर्वपदप्रकृतिस्वरत्वम् । देवशब्दोऽन्तोदात्तः । आङाद्युदात्तः । गमदिति गच्छत्वित्यस्य छन्दोभावे उकारलोपे च छान्दसं रूपं सर्वानुदात्तम् । शेषाः स्वराः पूर्वोक्ताः । दिङ्मात्रमुक्तम् । एतदनुसारेण सर्ववेदवाक्यस्थाः स्वरा ज्ञेयाः । विस्तरभयादशक्यत्वाच्च न लिखिताः ।

इति वैदिकवाक्यस्वरप्रदर्शनप्रकरणम् ।

भाष्यवृत्तिहरिग्रन्थतद्व्याख्यामर्मवेदिनः ।
कौतुकाक्रान्तमनसः प्रमोदयतु मत्कृतिः ॥ १ ॥

पदे वाक्ये प्रमाणे च तत्त्वज्ञं ज्ञातृसंमतम् ।
रामचन्द्राचार्यसूरेरन्यं नोपलभामहे ॥ २ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तोनुमता च वैष्णवमहासिद्धान्तसद्दीपिका ।

आनन्त्यात् सर्वशब्दा हि न शक्यन्तेनुशासितुम् ।
बालव्युत्पत्तयेस्माभिः सोक्षप्योक्ता यथामति ॥१॥
प्रक्रियाकौमुदी सेयं रामचन्द्रप्रकाशिता ।
असद्वचस्तमो वध्यात् सच्चकोरप्रिया चिरम् ॥२॥

कालज्ञानविधौ व्यधायि विबुधानन्दि प्रबन्धत्रयं
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥ ३ ॥
रामचन्द्राचार्यवर्यैः प्रक्रियाकौमुदीमिषात् ।
अष्टाध्यायी व्याहृतार्था विवृता सा यथामति ॥ ४ ॥
श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीय-
व्याख्यानेस्मिन् स्वराणां सुविशदममला प्रक्रिया-
सातिमागात् ॥ ५ ॥

एवं 'लिति' इति सूत्रव्याख्यानेनोपलक्षितव्याख्यानानि सूत्राणि व्याख्याय प्रकृतमनुसरामः । शब्दानामनन्तत्वात् प्रतिपदपाठेनाभिधानमशक्यमिति लक्षणेनैवाभिधातुं शक्यन्त इति भाष्यकाराभिप्रायं चित्ते कृत्वा पाणिनीयलक्षणानुसारेण शब्दानां लक्षणमेव यतो ग्रन्थेनास्माभिर्बालव्युत्पादनार्थं कृतमित्याह—**आनन्त्यादित्यादि** । यतः **सर्वे शब्दा** अनुशासितुं प्रकृतिप्रत्ययादिविभागेन व्युत्पादयितुं **न शक्यन्ते** । अतोस्माभिः पाणिनीयलक्षणानुसारेण यथामति स्वमत्यनुसारेण बालव्युत्पत्तये संक्षिप्योक्ता इत्यर्थः । इदानीं स्वग्रन्थस्याभिजनं नामान्वर्थं वदन् सुशब्दलक्षणविषयप्रतिपादनद्वारापशब्दनिराकरणपरतां रूपकेण शास्ति । **प्रक्रियाकौमुदीति** । प्रक्रियन्ते व्युत्पाद्यन्ते शब्दा अपशब्दभिन्नाः प्रक्रियास्तासु कौमुदीव कौमुदी ।

१. सर्वशः शब्दा न &c. B2. २. प्रियाश्चिरम् D2. ३. प्रसादे Dc3.

जयति सुभगमूर्तिर्मुग्धहासावलोक-
प्रशमितजनतापो विट्ठलः स्वात्मदीपः ।
सचकितमिव लक्ष्मीः सेवते यत्पदाब्जं
ललिततरकराभ्यां साधु संवाहयन्ती ॥३॥

अथवा प्रक्रिया कौमुदीव प्रक्रियाकौमुदी । सेयं प्रत्यभिज्ञायमाना रामचन्द्रेण रामचन्द्राचार्येण प्रकाशिता सती अपशब्दवत्तमोपशब्दान्धकारचित्रं वध्यात् नाशयतु । कीदृशी । सच्चकोरप्रिया । सन्तश्चकोरा इव सच्चकोरास्तेषां प्रिया । यथा चन्द्रप्रकाशिता कौमुदी चकोरप्रिया सती तमो नाशयति तथेयमपि सत्प्रिया सत्यपशब्दान् नाशयत्विति भावः ।

इदानीं मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते इत्यभिप्रेत्य शास्त्रान्ते मङ्गलाचरणमभिमतेष्टदेवतोत्कर्षलक्षणं करोति–जयतीत्यादि । श्रीविट्ठलो जयत्युत्कर्षेण वर्तते । श्रीविट्ठलस्य भक्तानुग्रहकारित्वं केवलं दर्शनमात्रेण सकलपुरुषार्थदत्वमनिष्टनिवारकत्वं स्वयंप्रकाशत्वं सुसेव्यत्वं च सुभगमूर्तिरित्यादिभिर्विशेषणैराह । सुभगमूर्तिस्वरूपस्य पृथग्जना अपि यस्य श्रीविट्ठलस्य दर्शनमाकाङ्क्षन्ते किं पुनः सूरयः । मुग्धहासावलोकप्रशमितजनतापः मुग्धौ शोभनौ च तौ हासावलोकौ ताभ्यां प्रशमितो निराकृतो जनतापो येन । अनेन दर्शनमात्रेण सकलपुरुषार्थदत्वमुक्तम् । **स्वात्मदीप** इति स्वयंप्रभवत्वमुक्तम् । यत्पदाब्जं यच्चरणकमलं साधु शोभनं सचकितं सभयं च यथा तथा संवाहयन्ती लक्ष्मीः सेवते । अनेन भुक्तिदत्वं प्रकटीक्रियते सर्वसेवितत्वं चेति ।

श्रीमद्विट्ठलपादपङ्कजयुगं वन्दे सुरैर्वन्दितं
भक्तेभ्यो ह्यभयप्रदं सुखकरं विज्ञानदं सर्वदा ।
क्षोदीयः किल यद्रजो जनितवत् पृथ्वीं स्थिरान्ताध्वरां
या विश्वस्य विधारणेजनि तथा पुष्टौ समर्थाश्रया ॥ १ ॥

१. °प्रापां (पापां?) D_2.

¹इति श्रीरामचन्द्राचार्यविरचितायां प्रक्रियाकौमुद्यां कृदन्तः समाप्तः।

वन्दे पाणिनिमीश्वरं वररुचिं शेषं तथान्यान् बुधान्
ग्रन्थान् ये व्यदधुः परोपकृतये सूत्रादिभाष्यादिकान् ।
पोतैस्तैस्तु नरास्तरन्ति गहनं तं शब्दरत्नाकरं
चित्रं यत्परपारमाप न परो देवो मरुत्वानपि ॥ १ ॥

यस्मिन् वैदिकधर्मजातमनिशं जागर्ति यद्वैष्णवा-
चारानुष्ठितितुष्टविट्ठलविभुः सर्वार्थदः सर्वदा ।
ऋग्वेदादिसमस्तशास्त्रनिचयश्रीपाञ्चरात्रागम-
व्याख्यानक्षमपूरुषो विजयते वंशोऽन्ध्रदेशोद्भवः ॥ २ ॥

तद्वंशे नररत्ननायकमणिर्जातोऽविमुक्ताङ्गजोऽ-
नन्ताचार्य इति त्रिलोकविदितः सर्वज्ञ एवापरः ।
रामस्वामियतीन्द्रवर्यविहिताचार्याभिषेकस्तुतौ
लब्धां²वैदिकपञ्चरत्नमकरोद्यो वल्लभानां त्रयम् ॥ ४ ॥

तत्सूनुर्निगमागमादिकुशलः सन्यायवैशेषिक-
व्याकृत्यद्वयजैमिनीयभणिति³ष्वव्याहतप्रातिभः ।
यः सौदर्शनभाष्यमाख्यदमलं विद्वत्सभासंनिधा-
वाचार्यो ⁴नृहरिः सदाचरणतः साक्षात्कृतश्रीहरिः ॥ ५ ॥

गोपालाचार्यमुख्याः प्रथितगुणगणास्तस्य पुत्रा अभूवन्
कृष्णाचार्यः कनीयानपि जगति गुणैर्ज्येष्ठ आसीद् वरिष्ठैः ।
⁵यं वेदाद्याः सुविद्याः स्वयमधिवसति चक्रुरुत्कर्षहेतो-
स्तस्माच्छ्रीकृष्ण एवेत्यनुजगदुरमुं सूरयः सौरिभक्ताः ॥ ६ ॥

१. D_2 has—इति श्रीरामचन्द्राचार्यविरचिता प्रक्रिया समाप्ता ॥ D_2, D_4 इति श्रीरामचन्द्राचार्यविरचिता प्रक्रियाकौमुदी समाप्ता B_2. २. PC. क्ष्मीं Dc_3 लक्ष्मीं seems correct. ३. गणिति Dc_3 ४. बृहस्पतिः Dc_3. नृहरिः seems correct for नृसिंह. ५. सद्वेदाद्याः Dc_3.

समाप्ता चेयं प्रक्रियाकौमुदी ॥[1]

तस्मादाचार्यवर्यौ हरिहरभजनप्राप्तसंविल्प्रकाशा-
वास्तां ज्येष्ठो नृसिंहो निखिलगुणनिधी रामचन्द्रः कनिष्ठः ।
येनानेकप्रबन्धाः क्षितिपतिसमितिख्यातविद्वत्प्रबोधो-
द्बोधार्थं चक्रिरे यैर्भवति हृदि कृतैः कोविदः प्राकृतोऽपि ॥ ७ ॥
तत्सूनुं सकलेषु शास्त्रनिवहेष्वाचार्यकृष्णाद्गुरो-
र्लब्धज्ञानविशेषमात्मजनकं श्रीमन्नृसिंहं भजे ।
तत्पूर्वैश्च कलिप्रलुप्तमखिलं विद्यासमूहं तथा
धर्मं स्फारयितुं क्षितौ समभवद्येनावतारो हरेः ॥ ८ ॥
श्रीमद्राघवसंज्ञकं यतिवरं वन्दे गुरुं संततं
यः सर्वज्ञसमान् व्यधाद् भुवि नरानात्मीयसेवापरान् ।
वादीन्द्रान् बहुवादिदर्पशमनान् जित्वा तथास्थापय-
द्योऽद्वैतं श्रुतिमूर्धनिर्णयचणो भाष्यादिसंस्कारकः ॥ ९ ॥

---

१. After this D_1 has—श्री विश्वेश्वरः प्रीयताम् । श्रीरस्तु । कल्याणमस्तु ।; B_2 D_4 have-मीमांसायुगलाक्षपादकणभुक्प्रोक्तागसद्वाक्यदा दुर्ज्ञेयस्वनशास्त्रतप्तमनसां शब्दाधिकेच्छावताम् । शब्दाधारविसार्यसाधुवचनध्वान्तातारनाशक्षमा तन्याच्छं पुरु रामचन्द्रजनिता सा प्रक्रियाकौमुदी ॥ संवत् १७४२ वर्षे आसु शुदि ११ भोमे लिखितम् B_2

After the verse मीमांसा युगलाक्षपाद° as in B_2, D_4 has—

यस्याः प्रसादमासाद्य कुमुदन्ति कवीश्वराः ।
प्रक्रियाकौमुदी सेयं पत्रेऽत्र प्राप पूर्णताम् ॥ १ ॥

संवत् १६७७ वर्षे आसु वदि ८ दिने श्री जेशलमेरमध्ये लिखितम् । ऋिष श्री ५ लालावाचनार्थं । लिखतं सं । पुंजा जीवाणी । शुभं भवतु । लेखवाचकयोः । श्रीरस्तु । श्रीः । श्री । श्रीः ।

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि सु(शु)द्धमसु(शु)द्धं वा मम दोषो न दियते ॥

॥ छ ॥ ॥ छ ॥

यः शास्त्रलोकव्यवहारविद्या
जगत् समग्रं स्ववशं व्यतानीत् ।
तमर्भकं कृष्णगुरोर्नमामि
रामेश्वराचार्यगुरुं गुणाब्धिम् ॥ १० ॥

श्रीविठ्ठलाचार्यगुरोस्तनूजं सौजन्यभाजं जितवादिराजम् ।
अनन्तसंज्ञं पदवाक्यविज्ञं प्रमाणविज्ञं तमहं नमामि ॥ ११ ॥

श्रीनागनाथं जितवादिनाथं विद्याधिनाथं वशराजनाथम् ।
श्रीकृष्णसूनुं विबुधं नमामि बह्वन्वयोगाहि तगीष्पतीति ॥ १२ ॥

यस्य निधानादभवन्नरो मा विद्याधिराजो जितवादिराजः ।
आचार्यवर्यं बुधरामचन्द्रं भजामि गोपालगुरोस्तनूजम् ॥ १३ ॥

जगन्नाथाश्रमं वन्दे यतिवेदान्तकोविदम् ।
पदवाक्यप्रमाणज्ञं स्वधर्मनिरतं सदा ॥ १४ ॥

श्रीरामाचार्यसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहा-
चार्यो यं माणिकाम्बाप्यजनयदतुलं विठ्ठलाचार्यमार्यम् ।
सोऽहं श्रीपाणिनीयाद्यनुगुणसगुणप्रक्रियाकौमुदीय-
व्याख्यारूपं प्रसादं विशदमकरवं विठ्ठलस्तेन तुष्यात् ॥ १५ ॥

---

१. This verse is omitted PC. २. This verse is omitted. PC.
३. This verse is omitted Dc3. ४. तस्य for साहं Dc3.

इति श्रीप्रक्रियाप्रसादवृत्तिः समाप्ता ।

PC. has at the end:—संवत् सोल ६४ वर्षे भाद्रवा वदि २ गुरौ संपूर्णं लिखितम् । पठनपाठनपरोपकाराणां कल्याणमस्तु । यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।

यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ श्रीरस्तु । कल्याणमस्तु ।

...तेनेयं पुस्तिके वाद्रिवसुरसशशिव्यक्तवर्षे प्रदत्ता मुनये धर्मसिंहाय तस्मै सम्यग्भावेन भक्त्या सुवितरणवता पाणिना स्वस्य लक्ष्मीः ॥ PC.

Dc3 concludes as under :—

संवत् १७१७ वर्षे आसू सुदि १४ । दिने बुधवासरे श्रीबृहत्खरतरगच्छेशश्रीयुग-प्रधान श्री १०८ श्रीमज्जिनचन्द्रसूरिशिष्यपं० भुवनमेरुगणितत्शिष्यवाचना-चार्यवर्यधुर्य श्रीपुण्यरत्नगणिशिष्यपं० दयाकुशलगणिलिखितेयं प्रसादप्रति-रियम् । शिष्यपं० धर्ममन्दिरमुनिपठनार्थम् । श्रीप्रह्लादनपुरे । वाच्यमानानां सुखं भूयात् । श्रीभट्टारकश्रीमज्जिनसागरसूरिआचार्यश्रीजिनधर्मसूरिविजयराज्ये ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयताम् ॥ १ ॥
भग्नपृष्ठकटिग्रीवा वक्रदृष्टिरधोमुखम् ।
दुःखेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥ २ ॥
तिलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
परहस्तगतां रक्षेदेवं वदति पुस्तिका ॥ ३ ॥

ग्रन्थाग्रं १८०००-वाच्यमाना चिरं नन्दतु लेखकपाठकयोः । शुभं भवतु । श्रीः ।

INDEX I

Proper Names Occurring in the Sutras of Pânini.

आचार्याः pp.
आपिशलिः pp.
उदीचः pp.
काश्यपः pp.
गार्ग्यः pp.
गालवः pp.
प्राचः pp.
भारद्वाजः pp.
शाकटायनः pp.
शाकल्यः pp.
सेनकः pp.
स्फोटायनः pp.

INDEX II

Proper Names Occurring in the Prakriyâ Kaumudî.

जिनेन्द्रबुद्धि
न्यासकृत्
भोज

INDEX III

Proper Names Occurring in the Prakriyâ Prasâda.

अभिधान
अमर
इन्दुमती
कविकल्पद्रुम
कातन्त्रवृत्तिपञ्चिका
कारकपरीक्षा
कालिदास
काशिका
काशिकाकार
काशिकाविवरणपञ्जिका
काशिकाविवरणपञ्जिकाकार
कुमारसंभव
कृष्णाचार्य
कैयट
कौमार
कौशिक
क्षीरतरङ्गिणी
क्षीरस्वामिन्
गोनर्दीय
जिनेन्द्रबुद्धि
दाक्षीपुत्र
दुमित्र
दुर्ग or दुर्गसिंह
दौर्गसिंही वृत्ति

धर्मकीर्ति
नरेन्द्रनाथ
न्यास
न्यासकार or न्यासकृत्
पदमञ्जरी
पदमञ्जरीकार
पदशेषकार
पदसिन्धुसेनि
पाणिनि
पाणिनिमतदर्पण
प्रदीप
प्रपञ्चप्रदीप
प्रबोधोदय
भट्टिकाव्य
भर्तृ
भर्तृहरि
भागवत
भागुरि
भाष्य
भाष्यकार
भीमसेन
भोज
मनु
माघ
मुग्धबोधप्रदीप
याज्ञवल्क्य
रघुवंश
रामकौतुक
रामव्याकरण
रूपावतार
वररुचि
वाक्यपदीय
वामन
वार्तिककार
विचारचिन्तामणि
वृत्ति
वृत्तिकार—कृत्
वोपदेव
व्यास
शर्ववर्मन्
शाकटायन
शेष
सरस्वतीकण्ठाभरणप्रक्रिया
सूत्रकार
हेमसूरि